एवं न्यासं पुरा कृत्वा करयोर्विहरेत्ततः। मूलमन्त्रादिसर्वस्य न्यस्तमन्त्रगणस्य च।। १।।
यस्य मन्त्रस्य ये न्यासाः कर्तव्याः सिद्धिमिच्छिता। ततो मन्त्रपुटैर्वर्णैर्मातृकायाः सबिन्दुभिः।।२।।
विन्यसेन्मन्त्रवित् सम्यक् शास्त्रदृष्टेन वर्त्मना। अथ वाङ्करन्यासांस्ततो मुद्राः प्रदर्शयेत्।। ३।।

इति। श्रीकुलार्णवे—

आगमोक्तेन मार्गेण न्यासान्नित्यं करोति यः। देवताभावमाप्नोति मन्त्रसिद्धिः प्रजायते।। १।।
यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये। दृष्ट्वा विघ्नाः पलायन्ते सिंहं दृष्ट्वा यथा गजाः।।२।।
अकृत्वा न्यासजातं यो मूढात्मा कुरुते जपम्। विघ्नैः स बाध्यते नूनं व्याघ्रैर्मृगशिशुर्यथा।। ३।।

इति। कालिकापुराणे—

न्यासानां प्रचुरत्वे हि फलानामपि भूरिता। उक्तन्यासो नहि त्याज्यस्त्वधिकं तु समाचरेत्।। १।।

इति उत्तरतन्त्रे—

वाग्भवस्य द्वितीयेन कामराजेन भैरव। मुद्रया बन्धनं कार्यं मूलमन्त्रेण दर्शितम्।। १।।
परित्यागस्तु मुद्रायास्ताराबीजेन वाचरेत्। प्रान्तादिचन्द्रबिन्दुभ्यां षष्ठस्वरसमन्वितम्।। २।।
ताराबीजमिति प्रोक्तम्।

इति। प्रान्तादिर्हकारः। अन्यत्सुगमम्। तथा—

ध्यानं कुर्यात्ततो मन्त्री तत्तत्कल्पोक्तवर्त्मना। ध्यानमात्मेष्टदेवस्य वेदनं मनसा मतम्।। १।।
तदेव द्विविधं प्रोक्तं सगुणं निर्गुणं तथा। आत्मनो हृदयाम्भोजं कर्णिकाकेसरोज्ज्वलम्।। २।।
प्रफुल्लं सोमसूर्याग्निमण्डलेन विराजितम्। स्वीयेष्टदेवतां तत्र ध्यायेदागमबोधिताम्।। ३।।
एवं यद्वेदनं[1] तद्धि सगुणं ध्यानमुच्यते। यज्जीवब्रह्मणोरैक्यं सोऽहं स्यादिति वेदनम्।। ४।।
तदेव निर्गुणं ध्यानमिति ब्रह्मविदो विदुः।

इति। ध्यानं तु तत्तत्कल्पेषु वक्ष्यते। योगिनीतन्त्रे—

अथान्तर्यजनं वक्ष्ये यथावदवधारय। वामनाडीं समाकृष्य किञ्चिदाकुञ्चयेद्धृदम्।।
अन्तर्यागमिदं देवि कथितं गुरुभाषितम्।

इति। फत्कारिणीतन्त्रे— "आराध्य मनसा भक्त्या बाह्यपूजामथाचरेत्" इति। गौतमीये— "पूजां च मानसीं कुर्यात्ततोऽर्घ्यस्थापनं चरेत्" इति। उत्तरतन्त्रे—

ध्यात्वा ह्यन्तर्यजेत् पीठं न्यासमार्गेण मन्त्रवित्। तस्मिन् पीठे स्थितामिष्टदेवतामुक्तविग्रहाम्।।१।।
ध्यात्वा यजेच्चन्दनाद्यैर्मानसैर्भोजनान्तिगैः । भोजनावसरे चान्तर्वैश्वदेवं समाचरेत्।। २।।

---

[1] 'वेधनं' क. पाठः।

मूलाधारे स्मरेत् कुण्डं कुण्डल्यग्निसमुद्भवम्। आत्मान्तरात्मपरमज्ञानात्मचतुरस्रकम्।। ३।।
धर्माधर्मान्विते तत्र मूलमन्त्रपुरःसरम्। अमुं जुहोमि स्वाहेति प्रत्येकं जुहुयात्ततः।। ४।।
अहन्तासत्यपैशुन्यकामक्रोधादिकं हविः। मन एव स्रुवः प्रोक्तः सुषुम्णा स्रुगुदीरिता।। ५।।
तदन्ते तन्मयो भूत्वा यथाशक्ति जपेन्मनुम्। तज्जपं सर्वसम्पत्त्यै देवतायै समर्पयेत्।। ६।।

इति। जपनिवेदनमन्त्रस्तु ''गुह्याती''ति प्रागेवोक्तः। लक्षसागरे—

इत्थं जपं यथाशक्ति कृत्वा देवि समर्पयेत्। गुरुं प्रणम्य विधिवत्पूजाचक्रं समुद्धरेत्।। १।।

इति। सिद्धीश्वरतन्त्रे—

प्रणम्य श्रीगुरुं भक्त्या साधकः कुङ्कुमादिभिः। स्वर्णादिरचिते पीठे पूजाचक्रं समुद्धरेत्।। १।।
संस्थाप्य पुरतो देवि शुभे पीठे सुरेश्वरि। दद्यात् पुष्पाञ्जलिं तत्र मूलमन्त्रेण साधकः।। २।।

इति। अत्र पूजाचक्रविधिस्तु प्रागेव प्रदर्शितः।।

अथ कादिमतरीत्या पूजायन्त्रप्रतिष्ठाविधिः। तत्र श्रीतन्त्रराजे—

चक्रे देव्यां तथा शिष्ये प्रतिष्ठा त्रिविधोच्यते। सा च तत्त्वविदा कार्या सम्प्रदायानुरोधिना।।

इति। चक्रे पूजाचक्रे। देव्यां देवीमूर्तौ। देवीत्युपलक्षणं तेन स्वेष्टदेवतामूर्तौ। तत्त्वविदा चन्द्रसूर्यनाडीपथपृथिव्यादि-पञ्चतत्त्वोदयकालतत्फलविदा, अथवा आत्मज्ञानविदा[1]। सम्प्रदायानुरोधिना गुरुपारम्पर्यक्रमवेत्तृत्वगुरुमण्डलपूजकत्व-नित्यनिमित्तकोपास्तिनिरतत्वविशिष्टेनेत्यर्थः। तथा—

स्थिरे शुभग्रहोपेतेऽनुकूले गुणशालिनि। मुहूर्ते कारयेद्विद्वान् पूर्णायां वा शुभे दिने।।

इति। स्थिरे स्थिरलग्ने। दुष्टग्रहाक्रान्तस्य निषेधत्वादाह—शुभग्रहोपेते इति। तथाप्ये[2]तादृशगुणविशिष्टस्याष्टमचतुर्थद्वादश-स्थप्रतिकूलातादोषदुष्टत्वादाह—अनुकूले इति। तथापि निर्दिष्टमुहूर्तप्राप्त्यर्थवादादाह—गुणशालिनीति। तथा च स्वल्प-दोषेऽधिकगुणे इत्यर्थः। मुहूर्ते कारयेदिति। तथा—

क्षौद्राज्यदुग्धैः प्रथमं नारिकेलाम्भसा ततः। अभिषिच्याथ तोयेन क्वथितेनाक्षरौषधैः।। १।।
आवाह्याभ्यर्च्य तल्लग्ने चक्रे संस्थाप्य पूजयेत्। नित्यातत्त्वाप्तिकालोत्थविद्ययाभ्यर्च्य ताः क्रमात्।।२।।
स्पृशञ्जपेत् कराग्रेण श्रीचक्रं पूजयेदपि। एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत्।। ३।।
गन्धैः पुष्पैर्नवैर्धूपैर्दीपैर्नैवेद्यतर्पणैः। त्रिरात्रं पूजयेद्देवीं योगिनीयोगिभिः समम्।। ४।।
एवं देवीप्रतिष्ठायां क्रमः सान्निध्यकारकः। इति।

लक्षसागरे—

आदौ वेदोदितैर्मन्त्रैरग्न्युत्तारणमाचरेत्। धातुनिर्मितचक्राणां मूर्तीनां च विशेषतः।। १।।

इति। अग्न्युत्तारणप्रकारस्तु प्रयोगे वक्ष्यते।। अथ पात्रासादनं, तत्प्रकारस्तु प्रागेव प्रपञ्चितः। शारदातिलके—

आत्मानं यागवस्तूनि मण्डलं प्रोक्षयेद्गुरुः। प्रोक्षणीपात्रतोयेन मनुनान्यानपि क्रमात्।। १।।

इति। श्रीकुलार्णवे—

पूजाद्रव्याणि सम्प्रोक्ष्य मूलास्त्राभ्यां विधानवित्। दर्शयेद्धेनुमुद्रां च द्रव्यशुद्धिः प्रकीर्तिता।। १।।

इति। रुद्रयामले—''अप्रोक्षितं नैव दद्यान्नाप्रोक्षितः समर्चयेत्।'' इति। शारदातिलके—

---

१. 'वता' क. पाठः। २. 'एकादश' ग. पाठः।

न्यासक्रमेण देहे स्वे धर्मादीन् पूजयेत् ततः। पुष्पाद्यैः पीठमन्वन्तं तस्मिन् पद्मे च देवताम्॥ १॥
पञ्चकृत्वः पुनः कुर्यात् पुष्पाञ्जलिमनन्यधीः। उत्तमाङ्गे हृदाधारे पादे सर्वाङ्गके क्रमात्॥ २॥
विना निवेद्यं गन्धाद्यैरुपचारैः समर्चयेत्। गुरूपदिष्टविधिना शेषमन्यत् समापयेत्॥ ३॥
सर्वमेतत् प्रयुञ्जीत प्रोक्षण्यद्भिः समाहितः। इति।

धर्मादीनित्युपलक्षणम्। तेन मण्डूकादिपीठमन्वन्ता योगपीठदेवता योगपीठन्यासस्थानेषु पूज्या इत्यर्थः। शेषं जपादिकम्। उत्तरतन्त्रे—

मूलाधारगते कुण्डे पूर्वोक्ते चतुरस्रके। पूर्ववज्जुहुयान्मन्त्री धर्माधर्मादिकं हविः॥ १॥

इति। प्रकाशोदये—

अथवाभ्यन्तरे कार्यमग्निकार्यं ब्रवीमि तत्। चिदग्निमण्डले दण्डमूले कुण्डलिरूपिणि॥ १॥
त्र्यस्रकुण्डे हुनेदुद्यत्सूर्यमण्डलवर्चषि।

अत्र त्र्यस्रचतुरस्रयोः कुण्डयोर्विकल्पः।

.... वासनेन्धनसन्दीप्ते पञ्चभिश्च समीरणैः ॥ २॥
सन्धुक्षिते प्रजुहुयादक्षवृत्तीरनन्तरम्। मूलविद्यां समुच्चार्य हुनेत् सप्ताहुतीस्ततः ॥ ३॥
मन्त्ररूपं पठेच्छ्लोकं परं गुरुतरं परात्। धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा॥ ४॥
सुषम्णावर्त्मणा नित्यमक्षवृत्तीर्जुहोम्यहम्। स्वाहान्तेनाहुतिं दत्त्वा[१] हुनेत् पूर्णाहुतिं गुरुः॥ ५॥
मूलविद्यां समुच्चार्य श्लोकमन्यं पठेदमुम्[२]। प्रकाशामर्शहस्ताभ्यामवलम्ब्योन्मनीस्रुचम्॥ ६॥
धर्माधर्मकलास्नेहपूर्णवह्नौ जुहोम्यहम्। स्वाहान्तेनाहुतिं हुत्वा प्राणायामनिरोधतः ॥ ७॥
निरस्तनिखिलोपाधिमात्मानं चिन्मयं स्मरेत्।

इति ज्ञानार्णवे—

पुण्यपापे हविर्देवि कृत्याकृत्ये हविः प्रिये। सङ्कल्पश्च विकल्पश्च धर्माधर्मौ हविः प्रिये॥ १॥

इति। हवनप्रकारस्तु प्रयोगे वक्ष्यते। मन्त्रतन्त्रप्रकाशे—“अष्टोत्तरसहस्रं तु कृत्वान्तर्यागमादरात्। जपेत् प्रतिदिनं मन्त्री” इति। अन्तर्देहे, यागः पूजा। उत्तरतन्त्रे—

आत्मपूजां विधायेत्थं यथाशक्ति जपं चरेत्। स्वेष्टदैवतमात्मानं भावयन् यतमानसः॥ १॥

एतेनाष्टोत्तरसहस्रं तु शक्तपरम्। तथा—

अर्घ्योदकेन सम्प्रोक्ष्य मूलमन्त्रेण मन्त्रवित्। पूजाचक्रं ततस्तत्र पीठपूजां समाचरेत्॥ १॥
देवस्योत्तरतः पूजा गुरुपङ्क्तेस्ततः परम्। महागणपतिः पूज्यो दक्षिणे चन्दनादिभिः॥ २॥

उत्तरतः उत्तरदिशि। तेन देवस्य दक्षिणभुजसमीप इति। आवाहनमुत्तरत्र तथा वक्ष्यते। रुद्रयामले—

सर्वाधो मण्डुकाधारे रुद्रः कालानलो विभुः। रक्षां करोतु या नित्यं मे मूलप्रकृतिस्तथा॥ १॥
ततश्चाधारशक्तिर्या मम रक्षां करोतु सा। कूर्मस्तु सततं पायादनन्तो रक्षयेत् सदा॥ २॥
तस्य मूर्ध्नि स्थितश्चक्री वराहः परिरक्षतु। दन्ते तस्य स्थिता पृथ्वी पातु नित्यं वसुन्धरा॥ ३॥

---

१. ‘हुत्वा’ ग. पाठः। २. ‘पठन्’ क. पाठः।

समुद्रः सर्वदा पातु सुरत्नैरमृतैर्जलैः। रत्नद्वीपस्तु मे रक्षां करोतु स्वर्णपर्वतः।। ४।।
पातु मां नन्दनोद्यानं रक्षन्तु कल्पपादपाः। अधस्तेषां सदा पातु विचित्रा रत्नभूमिका।। ५।।
श्रीरत्नमन्दिरं पातु सततं पातु वेदिका।

इति। भैरवयामले—

रक्तवर्णं महाकायं मण्डूकं प्रथमं यजेत्। तत्र कालाग्निरुद्रं च दशबाहुसमन्वितम्।। १।।
पञ्चवक्त्रं रक्तकृष्णवर्णदक्षापराङ्गकम्। तदूर्ध्वं मूलप्रकृतिं बन्धूकाभां वराभयाम्।। २।।

इति। उत्तरतन्त्रे—

अधः पीठस्य रक्ताभां पाशाङ्कुशवराभयान्। हस्ताब्जैर्दधतीं सम्यग्यजेदाधारशक्तिकाम्।। १।।
तस्या उपरि सम्पूज्य कूर्मः स्वर्णरुचिर्दृढः। सहस्रशिरसं तत्र शुक्लवर्णमलङ्कृतम्।। २।।
नीलवस्त्रं महाकायमनन्तं सम्यगर्चयेत्। पीताम्बरधरं तत्र नीलवर्णं सुभूषणम् ।। ३।।
शङ्खचक्रगदापद्मधारिणं पोत्रिणं यजेत्। ब्रीह्यग्रशुकहस्ताब्जां वराभयधरां शुभाम् ।। ४।।
तद्दंष्ट्रोपरि नीलाभां धरां धीरः समर्चयेत्।

इति। रत्नद्वीपो नवरत्नमयद्वीपः। उक्तं श्रीतन्त्रराजे—''नवरत्नमयं द्वीपं नवखण्डविराजितम्। पुष्पं नीलं च वैडूर्यम्'' इति विलोमेन नव रत्नमयानि खण्डानि मध्यान्तानि ध्येयानीत्यर्थः। तत्रैव कुरुकुल्लापटले—''पश्चिमं पुष्परागं तु सम्प्राप्यावतरेत् ततः'' इति उक्तत्वात्। रत्नमन्दिरं नवरत्नमयं माणिक्यमयं वा[१] ''स्वर्णप्राकारवेष्टितं विचित्रमण्डप''-मिति उत्तरतन्त्रवचनात्। ''अमृताब्धौ मणिद्वीपे कल्पवृक्षवनोज्ज्वले। स्वर्णप्राकारसंवीते स्मरेन्माणिक्यमण्डपम्''।। इति देवीयामलवचनाच्च। वेदिका स्वर्णमयी। ''विचित्रमण्डपं तत्र पूजयेत् स्वर्णवेदिकम्''। इत्युत्तरतन्त्रात्। उत्तरतन्त्रे—''रत्नसिंहासनं तत्र पूजयेन्मण्डलान्वितम्'' इति।

मण्डलान्वितं तत्तत्पूजाचक्ररूपमण्डलसमन्वितमित्यर्थः।

तत्पादेषु यजेत् सम्यगाग्नेयादिशिवान्तकम्। धर्मं वृषतनुं रक्तवर्णमादौ समर्चयेत्।। १।।
सिंहाकारं ततो ज्ञानं श्यामवर्णं समाहितः। भूताकारं च वैराग्यं पीतवर्णं यजेत्ततः।। २।।
कृष्णवर्णं गजाकारमैश्वर्यं साधु पूजयेत्। अग्रदेशं समारभ्य चतुर्दिक्षु समर्चयेत्।। ३।।
अधर्मादींश्च पीठस्य चित्रगात्रधिया पुनः।।

इति। वामकेश्वरतन्त्रे— ''मध्ये मायां तथा विद्यां पूजयेत् साधकोत्तमः''। उत्तरतन्त्रे—

तल्पाकारं ततोऽनन्तं पीठमध्ये समर्चयेत्। तस्य मूर्ध्नि यजेत् पद्मं सर्वलक्षणसंयुतम्।। १।।
आनन्दकन्दमभ्यर्च्य संविन्नालमनन्तरम्। प्रकृत्यात्मकपत्राणि विकारात्मककेसरान् ।। २।।
तत्त्वरूपां कर्णिकां च मातृकावर्णविग्रहाम्।

इति। लिङ्गपुराणे—

तस्य पूर्वदलं साक्षादणिमामयमक्षरम्। लघिमा दक्षिणं चैव महिमा पश्चिमं तथा।। १।।
प्राप्तिश्चैवोत्तरं पत्रं प्राकाम्यं पावकस्य तु। ईशित्वं नैर्ऋतं पत्रं वशित्वं वायुगोचरम्।। २।।

---

[१] 'च' ग. पाठः।

सर्वज्ञत्वं तथैशानं कर्णिका सोम उच्यते। सोमस्याधस्तथा सूर्यस्तस्याधः पावकः स्वयम्।। ३।।

इति। उत्तरतन्त्रे—

पत्रकोशेषु पद्मस्य सत्त्वादीन् क्रमतो यजेत्। सत्त्वपूर्वान् गुणान् सूर्येन्द्वग्नीनां मण्डलानि च।। १।।
ब्रह्मविष्णुमहेशाख्यानाद्यादींस्त्रीन् यथाक्रमम्।

इति। सम्मोहनतन्त्रे—

विधिरूपः सत्त्वगुणो रजः प्रकृतिरूपकम्। तमोगुणो मोहरूपः प्रोक्तास्त्वेवं गुणास्त्रयः।। १।।

इति। वामकेश्वरतन्त्रे—

......................ज्ञानतत्त्वात्मकं यजेत्। कालतत्त्वात्मकं चैव विद्यातत्त्वात्मकं तथा।। १।।
परतत्त्वात्मकं चैव क्रमेण परिपूजयेत्। चतुर्दिक्षु च मध्ये च।

इति। प्रपञ्चसारे—

मध्येऽनन्तं पद्ममस्मिंश्च सूर्यं सोमं वह्निं तारवर्णैर्विभक्तैः।
सत्त्वादींश्च त्रीन् गुणानात्मयुक्तान् शक्तीः किञ्जल्केषु मध्ये यजेच्च।। १।।

इति। उत्तरतन्त्रे—

केसरेषु ततो मध्ये पूर्वादिषु यथाक्रमम्। तत्तन्मन्त्रोक्तपीठस्य नव शक्तीः प्रपूजयेत्।। १।।
पीठमन्त्रेण गन्धाद्यैः पीठमध्ये ततो यजेत्।

इति। सनत्कुमारसंहितायाम्—

प्रागाद्यष्टसु पत्रेषु कर्णिकायां यजेन्मुने। चतुर्थ्या नमसा युक्तैः स्वैः स्वैरेव च नामभिः।। १।।
मध्ये पुष्पाञ्जलिं दद्यात् पीठमन्त्रेण मन्त्रवित्।

इति। यजेत् प्रादक्षिण्येन। ''एताः प्रदक्षिणं पूज्याः'' इति मन्त्रतन्त्रप्रकाशवचनात्। पूर्वादिष्वित्यत्र पश्चिमस्यैव पूर्वत्वम्। ''स्वराः षोडश देवेशि युग्मयुग्मप्रभेदतः। दलाष्टकेषु संलेख्याः पश्चिमादिप्रदक्षिणम्'' इति ज्ञानार्णवे यन्त्रे वर्णविन्यासदर्शनात्। आवरणार्चनायां देवाग्रे प्राच्यभिधानाच्च अत्रापि तथा कल्पनात्। ''दक्षिणे च तथा गुरुम्'' इति सङ्कर्षणवचनाच्च।। नारदपञ्चरात्रे, गुर्वर्चायां—''मण्डले देवदेवस्य दक्षिणे मण्डलोपरि। गुरून्समर्चये''दिति। अत एव देवदेवस्योत्तरत इति पूर्वोक्तस्यापि पूजामण्डलस्योपरि पूजा ज्ञेया। धर्मादिपूजायामप्येवमेव देवाग्रे कल्पितप्राच्यनुसारेणैवाग्नेयादि कल्पयेत्। अत्र भाविनि भूतवदुपचारः। ''आवाह्य मन्त्रेण मुने'' इत्यनन्तरमावाहनोक्तेः भूताकारमिति—भूता देवयोनिः ''भूतोऽमी देवयोनयः'' इति कोशात्। तत्स्वरूपं तु— ''रक्तवस्त्रधराः कृष्णा नखदंष्ट्रा- सुदंष्ट्रिका(?)। कर्त्रीखट्वाङ्गहस्ताश्च राक्षसा घोररूपिणः।। भूतास्तथैव दीनास्याः''। इति भूतडामरोक्तस्वरूपा पीठशक्तयः पीठमन्त्रास्तत्तत्कल्पे वक्ष्यन्ते। उत्तरतन्त्रे—

पीठशक्तीर्नवाभ्यर्च्य केसरेषु च मध्यतः। वरदाभयधारिण्यः पीठं पीठाणुना यजेत्।। १।।
मूलमन्त्रं समुच्चार्य षष्ठ्यन्तं देवनाम च। मूर्तिं च कल्पयामीति मूर्तिं मध्ये विनिक्षिपेत्।। २।।
पुनर्मूलं समुच्चार्य देवनाम च पूर्ववत्। मूर्तिं च पूजयामीति तां पुष्पेण समर्चयेत्।। ३।।
पूजामूर्तेः शिरः कुर्यात् कुसुमोपहितं सदा। पूजाकालं विना तस्या नोपरि भ्रामयेत् करम्।। ४।।

अथेष्टदेवताप्रीत्यै यजेदायतनान्यपि।

इति। आयतनानि प्रागेवोक्तानि। प्रागेव शिवलिङ्गप्रमाणविधिरपि प्रदर्शितः।।

अथेष्टदेवतायाः पूजाङ्गत्वेन पार्थिवविधानम्। नारद उवाच

धर्मार्थकाममोक्षाणां साधनं परमं हितम्। तत्सर्वं कथयस्व त्वमनुग्राह्योऽस्मि ते विभो।। १।।
सर्वपापक्षयकरं सर्वारिष्टनिवारणम्। सर्ववश्यकरं चैव कलौ सर्वत्र सिद्धिदम्।। २।।

ईश्वर उवाच

शृणु नारद वक्ष्यामि शिवपूजाविधानकम्। यस्यानुष्ठानमात्रेण कृतकृत्यो भवेन्नरः ।। ३।।
अकृत्वा पार्थिवं लिङ्गं योऽन्यदेवं प्रपूजयेत्। वृथा भवति सा पूजा स्नानदानादिकं वृथा।। ४।।
शुद्धां मृदं समानीय पुनः शोध्य विशेषतः। लिङ्गाकारं ततः कुर्याद्यथोक्तविधिना पुमान्।। ५।।
पूजयेत् सविधानेन पार्थिवं लिङ्गमुत्तमम्। अखण्डं कारयेद्यत्नाद्वक्ष्यमाणैश्च नामभिः।। ६।।
मृदाहरणसङ्घट्टप्रतिष्ठाह्वानमेव च । स्नपनं पूजनं चैव क्षमस्वेति विसर्जनम्।। ७।।
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् । पशुपतिः शिवश्चैव महादेव इति क्रमात्।। ८।।
द्विखण्डं यः करोत्येवं तस्य पूजापि निष्फला। पक्वजम्बूफलाकारं सर्वकामप्रदं शिवम्।। ९।।
विवरं य करोत्येवं हानिपीठाकरं भवेत्। कुर्यात् साक्षात् स्वबीजेन मूलमन्त्रेण पूजनम्।। १०।।
चतुर्दशस्वरोपेतो हकारो बिन्दुसंयुतः। शिवप्रसादजनकः[1] शिवप्रणवसंज्ञकः।। ११।।
शर्वो भवश्च रुद्रोग्रौ भीम ईशानसंज्ञकः। महादेवः पशुपतिमूर्तिभिश्चैव पूजयेत्।। १२।।
क्षितिरापोऽनलो वायुराकाशः सोमसूर्यकौ। यजमान इति ह्यष्टौ मूर्तयः परिकीर्तिताः।। १३।।

नारद उवाच

देव केन विधानेन कर्तव्यं सर्वकामदम्। यस्यानुष्ठानमात्रेण कृतकृत्यो भवेन्नरः।। १४।।

ईश्वर उवाच

मुने सर्वप्रयत्नेन पार्थिवं लिङ्गमुत्तमम्। कर्तव्यं हि नृभिर्नित्यं काममुद्दिश्य यत्नतः।। १५।।
अखण्डं पार्थिवं लिङ्गं द्विखण्डं स्थावरं मतम्। पूर्वोक्तेन विधानेन पूज्यं लिङ्गं तु पार्थिवम्।।१६।।
संख्या पार्थिवलिङ्गानां यथाकामं निगद्यते। विद्यार्थी लिङ्गसाहस्रं धनार्थी शतपञ्चकम्।। १७।।
पुत्रार्थी सार्धसाहस्रं कान्तार्थी शतपञ्चकम्। मोक्षार्थी कोटिगुणितं भूकामस्तु[2] सहस्रकम्।। १८।।
रूपार्थी त्रिसहस्रं च तीर्थार्थी द्विसहस्रकम्। सुहृत्कामी त्रिसाहस्रं वस्त्रार्थी च शताष्टकम्[3] ।।१९।।
मारणार्थी सप्तशतं मोहनार्थी शताष्टकम्। उच्चाटनपरश्चैव सहस्रं च यथोक्तितः।। २०।।
स्तम्भनं तु सहस्रेण मारणं शतपञ्चकम्। निगडान्मुक्तिकामस्तु सहस्रं सार्धमीरितम्।। २१।।
महाराजभये पञ्चशतं चोरादिसङ्कटे। शतद्वयं तु डाकिन्या भये पञ्चशतं तु वा।। २२।।
दारिद्र्ये पञ्चसाहस्रमयुतं सर्वकामदम्। एकं पापहरं प्रोक्तं द्विलिङ्गं चार्थसिद्धिदम्।। २३।।

---

१. 'प्रसाद' क. पाठः। २. 'मस्य' ग. पाठः। ३. ' र्थी शतमष्टकं ' ग. पाठः।

त्रिलिङ्गं सर्वकामानां कारणं परमीरितम्। उत्तरोत्तरमेव स्यात् पूर्वोक्तगणनावधि।। २४।।

इति। ग्रन्थान्तरे—

लिङ्गानामयुतं कृत्वा महाराजभयं हरेत्। सहस्राणि तथा पञ्च निगडान्मुक्तये ध्रुवम्।। १।।
कारागृहादिमुक्त्यर्थमयुतं कारयेद् बुधः। डाकिन्यादिभये सप्तसहस्रं कारयेत्ततः।। २।।
सहस्रं पञ्चपञ्चाशदपुत्रो हि प्रकारयेत्। लिङ्गानामयुतेनैव कन्यकां सततं लभेत्।। ३।।
एवं लिङ्गार्चनेनैवमतुलां श्रियमाप्नुयात्। लक्षमेकं तु लिङ्गानां यः करोति नरो भुवि।। ४।।
शिव एव भवेत् सोऽपि नात्र कार्या विचारणा। अर्चा पार्थिवलिङ्गानां कोटियज्ञफलप्रदा।। ५।।
भुक्तिदा मुक्तिदा नित्यं तत्तत्कामार्थदा नृणाम्। ब्रह्मस्वपरिहारार्थे सौवर्णं लिङ्गमर्चयेत्।। ६।
लवणेन च सौभाग्यं पार्थिवं सार्वकामिकम्। अनेकगुणसम्भूतं रेतोत्थं परिकीर्तितम्।। ७।।
ग्रामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम्। अन्नोत्थमन्नदं प्रोक्तं गुडोत्थं प्रीतिवर्धनम्।। ८।।
गन्धोत्थं भोगदं चैव शर्करोत्थं सुखप्रदम्। यवपिष्टोद्भवं लिङ्गं वंशकामोऽर्चयेत् पुमान्।। ९।।
तण्डुलानां च पिष्टेन पुत्रबाहुल्यमाप्नुयात्। सर्वरोगविनाशाय गोमयोत्थं प्रपूजयेत्।। १०।।
केशास्थिसम्भवं लिङ्गं सर्वशत्रुविनाशनम्। आसुरं लवणोत्थं च सर्वलोकवशङ्करम्।। ११।।
स्तम्भने रजनीपिष्टसम्भवं लिङ्गमुत्तमम्। तण्डुलोद्भवपिष्टानां लिङ्गं विद्याप्रदं स्मृतम्।। १२।।
दधिदुग्धोद्भवं लिङ्गं कीर्तिलक्ष्मीसुखप्रदम्। धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत्।। १३।।
पुण्यार्थं सर्वसौभाग्यमुक्ताधात्रीफलोद्भवम्। नवनीतोद्भवं लिङ्गं कीर्तिसाम्राज्यदायकम्।। १४।।
दूर्वागुडूचीसम्भूतमपमृत्युनिवारणम्। इक्षुदण्डोद्भवं लिङ्गं स्फुटमुच्चाटयेत् परम् ।। १५।।
इन्द्रनीलमयं लिङ्गं बहुपोषणकामकृत्। स्फाटिकं बहुस्वामित्वफलदं मुनिभिः स्मृतम्।। १६।।
पितॄणां मुक्तये पूज्यं लिङ्गं रजतसम्भवम्। हेमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान्।। १७।।
पूजयेत् ताम्रजं लिङ्गं पुष्टिकामो हि मानवः। कृषिकामस्तु सततं लिङ्गं पित्तलसम्भवम्।। १८।।
कीर्तिकामोऽर्चयेल्लिङ्गं सदा कांस्यसमुद्भवम्। शत्रुमारणकामस्तु लिङ्गं लोहमयं सदा।। १९।।
ज्वरशान्त्यै चन्दनजमर्चयेद्विधिवत् सदा। कर्पूरसम्भवं लिङ्गं शान्तिकामोऽर्चयेत् सदा।। २०।।
कस्तूरीसम्भवं लिङ्गं गन्धकामो हि पूजयेत्। लिङ्गं गोरोचनोत्थं च रूपकामस्तु पूजयेत्।। २१।।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमकेसरम्। श्वेतागरुसमुद्भूतं महाबुद्धिविवर्धनम्।। २२।।
धारणाशक्तिदं लिङ्गं कृष्णागरुसमुद्भवम्। यक्षकर्दमसम्भूतं लिङ्गं प्रीतिविवर्धनम्।। २३।।
गोधूमपिष्टजं लिङ्गं गोकामो हि प्रपूजयेत्। मुंद्गपिष्टमयं लिङ्गं पूजयन्मुक्तिमाप्नुयात्[2]।। २४।।
माषपिष्टमयं लिङ्गं नित्यमिष्टार्थसिद्धिदम्। चणकोद्भवपिष्टेन लिङ्गं बुद्धिविवर्धनम्[3]।। २५।।
लिङ्गं व्रीहिमयं पूज्यं धान्यकामेन नित्यशः। यवधान्यमयं लिङ्गं सर्वारिष्टनिवारणम्।। २६।।
यः करोति तिलैः श्वेतैस्तद्द्वीपे च महीयते। यःकृष्णैश्च तिलैः सम्यग्लिङ्गं कृत्वार्चयेत् नरः।।२७।।

---

१. 'संयुतं' ग. पाठः। २. 'जनात्' क. ग. पाठः। ३. 'प्रीति' ग. पाठः।

कामेशश्च प्रियो नित्यं भवेत् स्त्रीणां हि मानव:। ग्रीष्मे च मल्लिकापुष्पसम्भवं लिङ्गमुत्तमम्।।२८।।
पूजयित्वा नरो भक्त्या प्राप्नोति महतीं कृषिम्। वर्षासु पूजयेद्भक्त्या लिङ्गं कनकपुष्पजम्।।२९।।
इह चामुष्मिके लोके सुखी भवति चात्मन:। नीलोत्पलमयं लिङ्गं कृत्वा शरदि मानव:।। ३०।।
पूजयेत् परमां सिद्धिं भक्त्या प्राप्नोति नित्यश:। हैमन्तीयैश्च कुसुमैर्लिङ्गं कृत्वा मनोरमम्।।३१।।
भक्त्या चाभ्यर्च्य मतिमान् शिवेन सह मोदते। शिशिरे सर्वपुष्पोत्थं लिङ्गमभ्यर्च्य मानव:।।३२।।
सर्वपापं विहायाशु ब्रह्मणा सह मोदते। येन केन प्रकारेण यस्य कस्यापि वस्तुन:।। ३३।।
कृत्वा लिङ्गं समभ्यर्च्य प्राजापत्यमवाप्नुयात्। विना लिङ्गार्चनं यस्य कालो गच्छति नित्यश:।।३४।।
महाहानिर्भवेत्तस्य सर्वत्रास्य दुरात्मन:। कृत्वा सर्वाणि दानानि व्रतानि विविधानि च।। ३५।।
तीर्थानि नियमा यज्ञा लिङ्गार्चात: कृता: स्मृता:। कलौ लिङ्गार्चनं श्रेष्ठं यथा लोके प्रदृश्यते।।३६।।
ततोऽन्यन्नास्ति नास्तीति शास्त्राणामेष निश्चय:[1]। भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारणम्।। ३७।।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात्। लिङ्गानामपि सर्वेषां पार्थिवं लिङ्गमुत्तमम्।। ३८।।
कृत्वा सम्पूज्य विधिवत् सर्वान् कामानवाप्नुयात्। पाषाणसम्भवं लिङ्गं सम्पूज्य परया मुदा।।३९।।
इह कामानवाप्नोति सदा चानुत्तमं सुखम्। पाषाणात् स्फाटिकं श्रेष्ठं स्फाटिकात् पद्मरागजम्।।४०।।
पद्मरागाच्च काश्मीरं काश्मीरात्पुष्परागजम्। पुष्परागादिन्द्रनीलमिन्द्रनीलाच्च गोमदम्।। ४१।।
ततो गारुत्मतं श्रेष्ठं तस्मान्माणिक्यसम्भवम्। माणिक्याद्विद्रुमं श्रेष्ठं विद्रुमान्मौक्तिकं परम्।।४२।।
मौक्तिकाद्राजतं श्रेष्ठं सौवर्णं राजतात्परम्। सौवर्णाद्धीरकं श्रेष्ठं हीरकात् पारदं स्मृतम्।। ४३।।
पारदाद् बाणजं श्रेष्ठं तत:[2] श्रेष्ठं न विद्यते। नर्मदाजलमध्यस्थं बाणलिङ्गमिति स्मृतम्।। ४४।।
सर्वतीर्थानि यज्ञाश्च साङ्गदानव्रतानि च। त्रिसन्ध्यं योगसिद्धादि बाणलिङ्गे च संस्थितम्।। ४५।।
बाणासुरार्चितं लिङ्गं बाणलिङ्गं तदुच्यते। अभ्यर्च्य विधिवद्भक्त्या शिवलोके महीयते।। ४६।।
बाणलिङ्गेन चण्डेश[3] न च निर्माल्यकल्पना। सर्वं बाणार्पितं[4] ग्राह्यं शक्त्या भक्त्या न चान्यथा।।४७।।
बाणलिङ्गे स्वयम्भूते चन्द्रकान्ते हृदि स्थिते। चान्द्रायणशतं ज्ञेयं शम्भुनैवेद्यभक्षणम्।। ४८।।
ग्राह्याग्राह्यविभागोऽयं बाणलिङ्गे विधीयते। तदर्पितं तिलं चिह्नं ग्राह्यं प्रसादसंज्ञया।। ४९।।
बाणे च रजते रत्ने स्फाटिके हेमनिर्मिते। काश्मीरे चन्द्रकान्ते च लिङ्गे स्वायम्भुवे तथा।। ५०।।
सदा सन्निहितो देव: सत्यं सत्यं न संशय:। शिवनाभिमयं लिङ्गं नित्यं पूज्यं महात्मभि:।।५१।।
एतच्च सर्वलिङ्गेभ्य शस्तं पूजाविधानकै:। उत्तमं मध्यमं नीचं त्रिविधं लिङ्गमीरितम्।। ५२।।
चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया शिवम्। उत्तमं लिङ्गमाख्यातं मुनिभिस्तन्त्रकोविदै:।। ५३।।
तदर्धं मध्यमं प्रोक्तं तस्यार्धं वाधमं स्मृतम्। एवं लिङ्गं समासाद्य श्रद्धाभक्तिसमन्वित:।। ५४।।
पूजयित्वा लभेत् कामान् मनसा चाभिलाषितान्। शास्त्राण्यालोड्य सर्वाणि तदर्थान् परिभाव्य च।।५५।।

---

[1] 'मेव निश्चितम्' क. पाठ:। [2] 'तस्मात्' क. पाठ:। [3] 'श' क. पाठ:। [4] 'र्चितं' ग. पाठ:।

पुरुषार्थप्रदं तत्त्वं निश्चितं लिङ्गपूजनम्। सर्वमूर्तीः परित्यज्य कर्मजालं विशेषतः।। ५६।।
भक्त्या परमया विद्वाँल्लिङ्गमेवं प्रपूजयेत्। लिङ्गार्चनेऽर्चितं सर्वं जगत् स्थावरजङ्गमम्।। ५७।।
संसारार्णवमग्नानां नान्यत्तारणसाधनम्। अज्ञानतिमिरान्धानां विषयासक्तचेतसाम् ।। ५८।।
प्लवो नान्योऽस्ति जगतो लिङ्गराधनमन्तरा। ब्रह्मादयः सुराः सर्वे मुनयो यक्षराक्षसाः।। ५९।।
गन्धर्वाश्चारणाः सिद्धा दैतेया दानवास्तथा। पूजयित्वा महाभक्त्या लिङ्गं सर्वार्थसिद्धिदम्।। ६०।।
अचिराल्लेभिरे नूनं सर्वान् कामान् समीहितान्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यनुलोमजः।।६१।।
पूजयेत् सततं लिङ्गं तत्तन्मत्रेण साधकः। द्विजानां वैदिकेनापि मार्गेणाराधनं परम्।। ६२।।
अन्येषामपि जन्तूनां वैदिकेनापि मन्त्रतः। तन्त्रोक्तदीक्षितानां च तन्त्रेणापि विधानतः।। ६३।।
स्मृतमाराधनं शम्भोर्नैव वैदिकवर्त्मना। वैदिकानां च सर्वेषां पूजा वैदिकमार्गतः।। ६४।।
कर्तव्या नान्यमार्गेण चेत्याह भगवाञ्छिवः। दधीचिगौतमादीनां शतसम्बद्धचेतसाम्।। ६५।।
न जायतेऽन्यवर्त्मापि शर्मावैदिकवर्त्मना। यो वैदिकमनादृत्य कर्म स्मार्तमथापि वा।। ६६।।
अन्यत् समाचरेन्मर्त्यो न स कर्मफलं लभेत्। तत्रापि पार्थिवं लिङ्गं क्षिप्रसिद्धिप्रदं भवेत्।। ६७।।
पार्थिवेन तु लिङ्गेन बहुसिद्धिमवाप्नुयात्। कृते रत्नमयं लिङ्गं त्रेतायां हेमसम्भवम्।। ६८।।
द्वापरे पारदं श्रेष्ठं[1] पार्थिवं तु कलौ युगे। अष्टमूर्तिषु सर्वासु मूर्तिर्वै पार्थिवी परा।। ६९।।
एवं पार्थिवलिङ्गे तु नित्यं सन्निहितः शिवः। यथा सर्वेषु देवेषु ज्येष्ठः श्रेष्ठो महेश्वरः।। ७०।।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते। यथा सर्वेषु वेदेषु प्रणवश्च महान् स्मृतः।। ७१।।
तथैव पार्थिवं श्रेष्ठं प्राराध्यं[2] पूज्यमेव हि। पार्थिवाराधनं पुण्यमायुर्धनविवर्धनम्।। ७२।।
प्रसन्नं तुष्टिदं श्रीदं कार्यसाधनसिद्धिदम्। यथासर्वोपचारैश्च भक्तिश्रद्धासमन्वितः।। ७३।।
पूजयेत् पार्थिवं लिङ्गं शास्त्रोक्तविधिना नरः। पञ्चसूत्रविभागं च पार्थिवं न विचारयेत्।। ७४।।
आकारमात्रं रचयेत् सर्वसिद्धिप्रदायकम्। द्विखण्डमत्र कुर्वाणो नैव पूजाफलं लभेत्।। ७५।।
रत्नजं हेमजं लिङ्गं पादरं स्फाटिकं तथा। पार्थिवं पिष्टजं पौष्पं माषजं तु प्रकारयेत्।। ७६।।
अखण्डं तु चरं लिङ्गं द्विखण्डमचरं स्मृतम्। खण्डाखण्डविभागोऽयं चराचरतया स्मृतः।। ७७।।
वेदिका तु महाविष्णुर्लिङ्गं देवो महेश्वरः। अतोऽपि स्थावरं लिङ्गं स्मृतं शेषे द्विखण्डता।। ७८।।
वेदिका तु महादेवी गिरिजा शिववल्लभा। पिण्डिका तु महेशानो द्वयोर्योगो द्विखण्डता।। ७९।।
द्विखण्डं स्थावरं लिङ्गं कर्तव्यं हि विधानतः। अखण्डं जङ्गमं प्रोक्तं शैवसिद्धान्तवेदिभिः।। ८०।।
द्विखण्डं तु चरं लिङ्गं कुर्वन्नज्ञानमोहितः। नैव सिद्धान्तवेत्तारो मुनयः शास्त्रपारगाः(?)।। ८१।।
अखण्डं स्थावरं लिङ्गं द्विखण्डं चरमेव च। ये कुर्वन्ति नरा मूढा न पूजाफलमाप्नुयुः।। ८२।।
तस्माच्छास्त्रोक्तविधिना द्विखण्डं चरसंज्ञितम्। विखण्डं स्थावरं लिङ्गं कर्तव्यं परया मुदा।। ८३।।

---

[1] 'लिङ्गं' ग. पाठः। [2] 'प्रासाध्यं' ग. पाठः।

अखण्डे तु चरे पूजा सम्पूर्णफलदा स्मृता। द्विखण्डे स्थावरे पूजा सम्पूर्णफलदायिनी।। ८४।।
द्विखण्डे तु चरे पूजा महाहानिः प्रजायते। अखण्डे स्थावरे पूजा न पूजाफलदायिनी।। ८५।।
अथ वैदिकभावानां पार्थिवार्चा निगद्यते। वेदोक्तविधिना सम्यक् सम्पूर्णफलसिद्धये।। ८६।।
सूत्रोक्तविधिना स्नात्वा सन्ध्यां कृत्वा यथाविधि। ब्रह्मयज्ञं विधायादौ ततस्तर्पणमेव च।। ८७।।
नैमित्तं सकलं कर्म विधायानन्तरं पुमान्। पूजयेत् परया भक्त्या पार्थिवं लिङ्गमुत्तमम्।। ८८।।
नदीतीरे तडागादौ पर्वते काननेऽपि वा। शिवालये शुचौ देशे पार्थिवार्चा विधीयते।। ८९।।
शुद्धप्रदेशसम्भूतां मृदमाहृत्य यत्नतः। विप्रे गौरा स्मृता शोणा बाहुजे वैश्यजातिके।। ९०।।
पीता शूद्रे तु कृष्णा स्यादथवा यत्र या भवेत्। सङ्ग्राह्या मृत्तिका लिङ्गनिर्माणार्थं प्रयत्नतः।। ९१।।
आनीय शुद्धदेशे तु संस्थाप्य मृदमुत्तमाम्। संशोध्य च जलैः शुद्धैः पिण्डीकृत्य शनैः शनै।।९२।।
पश्चाल्लिङ्गं विधायाशु क्रमेणानेन भक्तिमान्। प्रणवादिचतुर्थ्यन्तैः पूर्वोक्तैर्नामभिः क्रमात्।। ९३।।
कर्तव्या मत्प्रिया पूजा भक्त्या परमया मुदा। प्राणायामत्रयं कुर्यात् मूलमन्त्रेण देशिकः।। ९४।।
भूतशुद्धिं विधायादौ विन्यसेन्मातृकामयम्। पञ्चब्रह्ममयं न्यासमष्टात्रिंशत्कलात्मकम्।। ९५।।

इति। अत्र दशविधमातृकान्यासकरणाशक्तौ अन्तर्मातृकाबहिमातृकाश्रीकण्ठादिमातृकाष्टात्रिंशत्कलान्यासा इति न्यासचतुष्टयमावश्यकम्। तथा—

अर्घ्यादिपात्राण्यासाद्य शैवे पीठे शिवं यजेत्। उपचारैः प्रयत्नेन शैवमुद्राः प्रदर्शयेत्।। ९६।।
पुष्पाञ्जलित्रयं दत्त्वा प्राणायामत्रयं चरेत्। प्रणवं पूर्वमुद्धृत्य महाप्रासादमुद्धरेत् ।। ९७।।
चिन्तारत्नं समुद्धृत्य भुवनेशीमनन्तरम्। पञ्चाक्षरो महेशस्य मूलमन्त्रो नवाक्षरः।। ९८।।

''उें ह्रौं र्क्ष्म्यूं ह्रीं नमः शिवाय'' इति नवाक्षरः।

वामदेव ऋषिश्छन्दो गायत्रं निचृदन्वितम्। पार्थिवेश्वरनामादिचिन्तामणिरितीरिता।। ९९।।
देवता कथिता बीजं महाप्रासादसंज्ञितम्। शक्तिस्तु भुवनेशानी नतिः कीलकमुच्यते।। १००।।
विनियोगः समाख्यातः पुरुषार्थचतुष्टये। चत्वारि बीजान्युच्चार्य सर्वज्ञाय हृदीरितम्।। १०१।।
तथैव नित्यतृप्ताय शिरसे बह्निवल्लभा। वदेदनादिबोधाय शिखायै वषडित्यथ।। १०२।।
स्वतन्त्रशक्तये प्रोक्त्वा कवचाय हुमीरितम्। अलुप्तशक्तये नेत्रत्रयाय वौषडुच्चरेत्।। १०३।।
अनन्तशक्तये प्रोक्त्वा अस्त्राय फडिति क्रमात्। एवं षडङ्गं विन्यस्य ध्यायेद्देवमतन्द्रितः।।१०४।।

कर्पूरगौरं करुणावतारं[1] संसारसारं भुजगेन्द्रहारम्।
सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि।। १०५।।
वन्दे महेशं सुरसिद्धसेवितं भक्तैः सदा पूजितपादपद्मम्।
ब्रह्मेन्द्रविष्णुप्रमुखैश्च वन्दितं ध्यायेत् सदा कामदुघं प्रसन्नम्।। १०६।।

---

१. 'लवालं' क. पाठः।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।। १०७।।

एवं ध्यात्वा महामन्त्रं जपेन्नियतमानसः। यथाशक्ति ततः कुर्यात् प्राणायामषडङ्गकम्।। १०८।।
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव त्वत्प्रदासात् सुरेश्वर[1]।। १०९।।
इत्युच्चार्य जपं हस्ते दक्षे देवस्य चार्पयेत्। प्रदक्षिणनमस्कारैः परितोष्य मुहुर्मुहुः।। ११०।।
प्रार्थयेत् परया भक्त्या देवदेवं जगद्गुरुम्। जय देव जगन्नाथ जय शाश्वत शङ्कर।। १११।।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित। जय सर्वगुणातीत जय सर्ववरप्रद।। ११२।।
जय नित्यनिराधार जय विश्वम्भराव्यय। जय विश्वैकवन्द्येश जय नागेन्द्रभूषण।। ११३।।
जय गौरीपते शम्भो जय चन्द्रार्धशेखर। जय कोट्यर्कसङ्काश जयानन्तगुणालय।। ११४।।
जय रुद्र विरूपाक्ष जयाचिन्त्य निरञ्जन। जय नाथ कृपासिन्धो जय [2]दुःखार्तिभञ्जन।। ११५।।
जय दुस्तरसंसारसागरोत्तारण प्रभो। प्रसीद मम देवेश संसारार्तस्य बिभ्यतः[3]।। ११६।।
सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर। महादारिद्र्यमग्नस्य महापापहतौजसः।। ११७।।
महाशोकनिमग्नस्य[4] महारोगातुरस्य च। ऋणभारपरीतस्य दह्यमानस्य कर्मभिः।। ११८।।
ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर। दीर्घमायुः सदारोग्यं [6]यशोवृद्धिर्बलोन्नतिः।। ११९।।
ममास्तु नित्यमानन्दः प्रसादात्तव शङ्कर। शत्रवः संक्षयं यान्तु प्रसीदन्तु नवग्रहाः।। १२०।।
नश्यन्तु दस्यवो राष्ट्रे[7] जनाः सन्तु निरापदः[8]। दुर्भिक्षमारीसन्तापाः शमं यान्तु महीतले।१२१।।
वसुसस्यसमृद्धिं च ममानन्दं सदा दिश। प्रदोषे वापि पूजान्ते प्रार्थयेद्भक्तितत्परः।। १२२।।
प्रसन्नोऽभीप्सितं देवो ददाति गिरिजापतिः। एवं सम्प्रार्थ्य तत्तेजो वहन्नासापुटाध्वना।। १२३।।
समानीय स्वहृदये महासंहारमुद्रया। शिवलिङ्गं तु नद्यादौ संस्थाप्य विहरेत् सुखी।। १२४।।

इति। अत्र प्रागुक्तपार्थिवेश्वरचिन्तामणिमन्त्रो वा जप्तव्यः, कामदुघामन्त्रो वा, कामदुघामन्त्रस्तु—

षडक्षरं समुच्चार्य [9]प्रपन्नेति पदं तथा। पारिजाताय चोच्चार्य वह्निजायां समुद्धरेत्।। १२५।।
षोडशार्णो महेशस्य मन्त्रः कामदुघाह्वयः।

''ॐ नमः शिवाय [10]प्रपन्नपारिजाताय स्वाहा''। एतस्य न्यासध्यानादिकं प्राग्वत्।।

अथ वैदिकमार्गेण पूजां वक्ष्ये शिवस्य वै। सद्योजातेति मन्त्रेण मृत्तिकाग्रहणं भवेत्।। १२६।।
वामदेवेति मन्त्रेण जलैः संशोध्य यत्नतः। अघोरेण च मन्त्रेण लिङ्गीकरणमुत्तमम्।। १२७।।
ततस्तत्पुरुषायेति बाणं कुर्याद्विचक्षणः। ईशान इति मन्त्रेण वेदीबाणं समाचरेत्।। १२८।।
पञ्चाक्षरेण मन्त्रेण उपचारैः समर्चयेत्। भवाय भवनाशाय महादेवाय धीमहि।। १२९।।

---

१. 'त्वयि स्थिता' क. पाठः। २. 'भक्ता' ग. पाठः। ३. 'खिद्यतः' ग. पाठः। ४. 'निविष्टस्य' ग. पाठः। ५. 'मोहा' क.पाठः।
६. 'कोश' ग. पाठः। ७. 'ष्ट्रात्' ग. पाठः। ८. 'मयाः' क. पाठः। ९. 'प्रसन्न' क. पाठः। १०. 'प्रसन्न' क. पाठः।

उग्राय चोग्रनाशाय शर्वाय शशिमौलिने। एभिर्मन्त्रैश्च वा पूजा कर्तव्या शुभमिच्छता।। १३०।।
यः कृत्वा पार्थिवं लिङ्गं पूजयेच्छुभवेदिकाम्। इहैव पुत्रवाञ्छीमांस्ततो रुद्रत्वमाप्नुयात्।।१३२।।
त्रिसन्ध्यं [1]योऽर्चयेल्लिङ्गं कृत्वाभिज्ञस्तु पार्थिवम्। दशैकादशकं यावत्तस्य पुण्यफलं शृणु।।१३२।।
अनेनैव स्वदेहेन रुद्रतुल्यो भवेन्नरः। अथ पारदलिङ्गस्य विधानं वच्मि नारद।। १३३।।
नित्यसम्पादनाशक्तौ प्रकारान्तरमुच्यते। निष्कत्रयं हेमपत्रं[2] रसेन्द्रं नवनिष्कलम्।। १३३।।
अम्लेन मर्दयेद्यामं तेन लिङ्गं तु कारयेत्। दोलायन्त्रे[3] सारनाले जम्बीरस्थं दिनं पचेत्।।१३५।।
तल्लिङ्गं पूजयेन्नित्यं सुशुभैरुपचारकैः। लिङ्गकोटिसहस्रस्य यत्फलं सम्यगर्चनात्।। १३६।।
तत्फलात् कोटिगुणितं रसलिङ्गार्चनाद्भवेत्। ब्रह्महत्यासहस्राणि गोहत्यानियुतानि च।। १३७।।
तत्क्षणाद्विलयं यान्ति रसलिङ्गस्य दर्शनात्। स्पर्शनात् प्राप्यते मुक्तिरिति सत्यं शिवोदितम्।।१३८।।
वाङ्मायाश्री अघोरेण मन्त्रराजेन चार्चयेत्। अष्टादशभुजं शुभ्रं पञ्चवक्त्रं त्रिलोचनम्।। १३९।।
प्रेतारुढं नीलकण्ठं रसलिङ्गं विचिन्तयेत्। तस्योत्सङ्गे महादेवीमेकवक्त्रां चतुर्भुजाम्।। १४०।।
अक्षमालाङ्कुशौ दक्षे वामे पाशाभये शुभे। दधतीं तप्तहेमाभां पीतवस्त्रां विभावयेत्।। १४१।।
वाङ्मायाश्रीकामराजशक्तिबीजरसाङ्कुशा। यै नमो द्वादशार्णैषा जयाविद्या रसाङ्कुशी।। १४२।।
अनया पूजयेद्देवीं गन्धपुष्पाक्षतादिभिः। नन्दिभृङ्गिमहाकालान् कुमारान् सर्वदिक्क्रमात्।। १४३।।
पूजयेन्नाममन्त्रैस्तु प्रणवादिनमोन्तकैः। सर्वान् कामानवाप्नोति पुत्रवान् धनवान् भवेत्।। १४४।।
पराप्रासाददीक्षा च पारदेश्वरपूजनम्। महिम्नः स्तुतिपाठश्च नाल्पस्य तपसः फलम्।। १४५।।
पराप्रासादमन्त्रेण रसलिङ्गं समर्चयेत्। पण्मासाभ्यन्तरेणैव सर्वसिद्धीश्वरो भवेत्।। १४६।।

इति। हयशीर्षपञ्चरात्रे—

आदिमूर्तिर्वासुदेवः सङ्कर्षणमथासृजत्। प्रद्युम्नं चानिरुद्धं च स्वयमेवासृजत्प्रभुः।। १।।

इति। तथा—

चतुर्मूर्तिः परः प्रोक्त एकैको भिद्यते त्रिधा। केशवादिप्रभेदेन मूर्तिद्वादशकं स्मृतम्।। १।।
पङ्कजं दक्षिणे दद्यात् पाञ्चजन्यं तथोपरि। वामोपरि गदा यस्य चक्रं चाधो व्यवस्थितम्।। २।।
आदिमूर्तेस्तु भेदोऽयं केशवेति प्रकीर्त्यते। अधरोत्तरभावेन कृतमेतत्तु यत्र वै।। ३।।
नारायणाख्या सा मूर्तिः स्थापिता भुक्तिमुक्तिदा। सव्याधः पङ्कजं यस्य पाञ्चजन्यं तथोपरि।। ४।।
दक्षिणोर्ध्वे गदा यस्य चक्रं चाधो व्यवस्थितम्। आदिमूर्तेस्तु भेदोऽयं माधवेति प्रकीर्तितः।। ५।।
दक्षिणाधः स्थितं चक्रं गदा यस्योपरि स्थिता वामोर्ध्वे संस्थितं पद्मं शङ्खं चाधो व्यवस्थितम्[4]।।६।।
सङ्कर्षणस्य भेदोऽयं गोविन्देति प्रकीर्तितः। दक्षिणोपरि पद्मं तु गदा चाधो व्यवस्थिता।। ७।।
वामोर्ध्वे पाञ्चजन्यं च चक्रं चाधो व्यवस्थितम्। सङ्कर्षणस्य भेदोऽयं विष्णुरित्यभिधीयते।। ८।।

---

१. 'पूजयेत्' ग. पाठः। २. 'होम' क. पाठः। ३. 'शेला' ग. पाठः। ४. 'चाचरेत्' ग. पाठः।

दक्षिणोपरि शङ्खं च चक्रं चाधः प्रदर्श्यते। वामोर्ध्वे पङ्कजं यस्य गदा चाधो व्यवस्थिता॥ ९॥
मधुसूदननामायं भेदः सङ्कर्षणस्य तु। दक्षिणोर्ध्वे गदा यस्य पङ्कजं चाप्यधः स्थितम्॥ १०॥
वामोर्ध्वे संस्थितं चक्रमधः शङ्खः प्रदर्श्यते। ब्रह्माण्डगं वामपादं दक्षिणं शेषपृष्ठगम्॥ ११॥
बलिबन्धनसंसक्तं वामनं चाप्यधः स्थितम्। वामोर्ध्वे कौमुदी यस्य पुण्डरीकमधः स्थितम्॥ १२॥
दक्षिणोर्ध्वे सहस्रारं पाञ्चजन्यमधः स्थितम्। सप्ततालप्रमाणेन वामनं कारयेत्सदा॥ १३॥
ऊर्ध्वं दक्षिणतश्चक्रमधः पद्मं व्यवस्थितम्। वामोर्ध्वे कौमुदी यस्य पाञ्चजन्यमधः स्थितम्॥ १४॥
पद्मा पद्मकरा वामपार्श्वे यस्य व्यवस्थिता। स्थितो वाप्युपविष्टो वा सानुरागो विलसवान्॥ १५॥
प्रद्युम्नस्य तु भेदोऽयं श्रीधरेति प्रकीर्त्यते। दक्षिणोर्ध्वे महाचक्रं कौमुदी तदधः स्थिता॥ १६॥
वामोर्ध्वे नलिनं यस्य त्वधः शङ्खो विराजते। हृषीकेश इति ज्ञेयः स्थापितः सर्वकामदः॥ १७॥
दक्षिणोर्ध्वे पुण्डीरकं पाञ्चजन्यमधस्तथा। वामोर्ध्वे संस्थितं चक्रं कौमोदी तदधः स्थिता॥ १८॥
पद्मनाभेति सा मूर्तिः स्थापिता मोक्षदायिनी। दक्षिणोर्ध्वे पाञ्चजन्यमधस्तात् तु कुशेशयम्॥ १९॥
सव्योर्ध्वे कौमुदी यस्य हेतिराजमधः स्थितम्। अनिरुद्धस्य भेदोऽयं दामोदर इति स्थितः॥ २०॥
एतेषां तु स्त्रियः कार्याः पद्मवीणाधराः शुभाः। इति।

सिद्धार्थसंहितायां तु चतुर्विंशतिमूर्तयः उक्ताः—

वासुदेवो गदाशङ्खचक्रपद्मधरो मतः। पद्मं शङ्खं तथा चक्रं गदां वहति केशवः॥ १॥
शङ्खं चक्रं गदापद्मं धत्ते नारायणः सदा। गदां चक्रं तथा शङ्खं पद्मं वहति माधवः॥ २॥
चक्रं पद्मं तथा शङ्खं गदा च पुरुषोत्तमः। पद्मं कोमोदकीं शङ्खं चक्रं धत्ते ह्यधोक्षजः[1]॥ ३॥
सङ्कर्षणो गदाशङ्खपद्मचक्रधरः स्मृतः। चक्रं गदां पद्मशङ्खौ गोविन्दो धरते भुजैः॥ ४॥
गदा पद्मं तथा शङ्खं चक्रं विष्णुर्बिभति यः। चक्रं शङ्खं तथा पद्मं गदां मधुसूदनः॥ ५॥
गदां सरोजं चक्रं च शङ्खं धत्तेऽच्युतः सदा। शङ्खं कौमोदकीं चक्रमुपेन्द्रः पद्ममुद्वहेत्॥ ६॥
चक्रशङ्खगदापद्मधरः प्रद्युम्न उच्यते। पद्मं कौमोदकीं चक्रं शङ्खं धत्ते त्रिविक्रमः॥ ७॥
शङ्खं चक्रं गदां पद्मं वामनो वहते सदा। पद्मं चक्रं गदां शङ्खं श्रीधरो वहते भुजैः॥ ८॥
चक्रं पद्मं गदां शङ्खं नरसिंहो बिभर्ति यः। पद्मं सुदर्शनं शङ्खं गदां धत्ते जनार्दनः॥ ९॥
अनिरुद्धश्चक्रगदाशङ्खपद्मलसद्भुजः। हृषीकेशो गदां चक्रं पद्मं शङ्खं च धारयन्॥ १०॥
पद्मनाभो वहेच्छङ्खं पद्मं चक्रं गदां तथा। पद्मं चक्रं गदां शङ्खं धत्ते दामोदरः सदा॥ ११॥
शङ्खं चक्रं सरोजं च गदां वहति यो हरिः। शङ्खं कौमोदकीं पद्मं चक्रं कृष्णो बिभर्ति यः॥ १२॥
एताश्च मूर्तयो ज्ञेया दक्षिणाधःकरक्रमात्। इति।

एवमेता विष्णुमूर्तयः शिवलिङ्गं वा शूद्रैः पूजिता ब्राह्मणादिभिर्न पूज्या न नमस्याश्च इत्याहुः। बृहन्नारदीये धर्मभगीरथसंवादे धर्मवाक्यानि—

---

[1] १. 'प्य' क. पाठः।

प्रायश्चित्तविहीनानि पापानि शृणु भूपते। सर्वपापानि यान्यत्र तानि त्वं सर्वभूपते।। १।।
समस्तपापतुल्यानि महानरकदानि च। यः शूद्रेणार्चितं लिङ्गं विष्णुं वा प्रणमेद्द्विजः।। २।।
न तस्य निष्कृतिर्हन्त प्रायश्चित्तशतैरपि। नमेद्यः शूद्रसंस्पृष्टलिङ्गं वा हरिमेव वा।। ३।।
स सर्वयातनाभोगी यावदाचन्द्रतारकम्। पाखण्डपूजितं लिङ्गं नत्वा पाखण्डतां व्रजेत्।। ४।।
सर्ववेदविदो वापि सर्वशास्त्रविदोऽपि वा। आभीरपूजितं लिङ्गं नत्वा नरकमश्नुते।। ५।।
योषिद्भिः पूजितं लिङ्गं विष्णुं वापि नमेत्तु यः। स कोटिकुलसंयुक्त आकल्पं रौरवं व्रजेत्।। ६।।
यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथाविधि। तदा प्रभृति शूद्रश्च योषितो वा न संस्पृशेत्।। ७।।
स्त्रीणामनुपनीतानां शूद्राणां च नरेश्वर। स्थापने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च।। ८।।
अर्चितं राजशार्दूल स्वप्ने वापि न पूजयेत्। यः शूद्रसंस्कृतं लिङ्गं विष्णुं वापि नमेद् द्विजः।। ९।।
इहैवात्यन्तदुःखानि पश्यत्यामुष्मिके किमु। शूद्रो वानुपनीतो वा स्त्रियो वा पतितोऽपि वा।।१०।।
केशवं शङ्करं वापि स्पृष्ट्वा नरकमश्नुते। बौद्धालयं विशेद्यस्तु महापद्यपि च द्विजः।। ११।।
न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि। बौद्धाः पाखण्डिनः प्रोक्ता यतो वेदविनिन्दकाः।। १२।।
तस्माद्द्विजस्तान्नेक्षेत यदि देवेषु भक्तिमान्। यस्तु सन्तप्तशङ्खारिलिङ्गाङ्किततनुं नरः।। १३।।
सम्भाष्य रौरवं याति यावदिन्द्राश्चतुर्दश। चक्राङ्किततनुर्यत्र न तत्र दिवसं वसेत्।। १४।।
यदि तिष्ठेन्महापापो सहस्रब्रह्महा भवेत्। गङ्गास्नानरतो वापि अश्वमेधरतोऽपि वा।। १५।।
चक्राङ्किततनुं दृष्ट्वा पश्येत्सूर्यं जपन्नरः। जपेत्स पौरुषं सूक्तमन्यथा रौरवं व्रजेत्।। १६।।
लिङ्गाङ्किततनुं दृष्ट्वा पश्येत्सूर्यं नरेश्वरः। जपेच्च शतरुद्रियमन्यथा रौरवं व्रजेत्।। १७।।
ब्राह्मणस्य तनुर्ज्ञेया सर्वदेवसमाश्रया। सा चेत् सन्तापिता राजन् किं वक्ष्यामि तदेनसः।। १८।।
चक्राङ्किततनुर्वापि राजंल्लिङ्गाङ्कितोऽपि वा। नाधिकारी परिज्ञेयः श्रौतस्मार्तेषु कर्मसु।। १९।।

इति। अथ शालग्रामलक्षणानि स्कान्दे—

स्निग्धा कृष्णा पाण्डुरा च पीता नीला तथैव च। रक्ता रूक्षा च वंक्रा च महास्थूलाप्यलाञ्छिता[1] ।।१।।
कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका। बृहन्मुखी बृहच्चक्रा लग्नचक्राथवा पुनः।। २।।
मग्नचक्राथवा[2] काचिद्भग्नचक्राप्यधोमुखी।

इति। अथैतासां वर्णादिभेदेन गुणदोषौ तत्रैव—

स्निग्धा सिद्धिकरी मन्त्रे कृष्णा कीर्तिं ददाति च। पाण्डुरा पापदमनी पीता पुत्रफलप्रदा।। १।।
नीला सन्दिशते लक्ष्मीं रक्ता राज्यप्रदायिनी। रूक्षा चोद्वेगदा नित्यं वक्रा दारिद्र्यदायिनी।। २।।
स्थूला निहन्ति चैवायुर्निष्फला तु[3] अलाञ्छिता। कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका।। ३।।
बृहन्मुखी बृहच्चक्रा लग्नचक्राथवा पुनः। मग्नचक्राथवा च स्याद्भग्नचक्राप्यधोमुखी।। ४।।
पूजयेद्वा प्रमादेन दुःखमेव लभेत सः।

---

१. 'च' ग. पाठः। २. 'बद्ध' ग. पाठः। ३.'चैव' ग. पाठः।

इति। अग्निपुराणे—

तथा व्यालमुखी भग्ना विषमा बद्धचक्रिका। विकारावर्तनाभिश्च नारसिंही तथैव च॥ १॥
कपिला च भ्रमावर्ता रेखावर्ता च या शिला। दुःखदा सा तु विज्ञेया सुखदा न कदाचन॥ २॥
स्निग्धा श्यामा तथा शुक्ला पीता वा समचक्रिका। घोणीमूर्तिरनन्ताख्या गम्भीरा सम्पुटा तथा॥३॥
सूक्ष्मा मूर्तिश्च सुमुखी पूजिता सिद्धिदायिका। धात्रीफलप्रमाणा या करेणोभयसम्पुटा॥ ४॥
पूजनीया प्रयत्नेन भक्त्या तां तु प्रपूजयेत्। पूजिते फलमाप्नोति इह लोके परत्र वै॥ ५॥

इति। दोषाश्चैते सकामार्चनविषयाः। अत उक्तं श्रीभगवता स्कान्दे—

खण्डितं स्फुटितं भग्नं सालग्रामे न दोषभाक्। इष्टा तु यस्य या मूर्तिः स तां यत्नेन पूजयेत्॥१॥
चक्रं वा केवलं तत्र पद्मेन सह संयुतम्। केवला वनमाला वा हरिर्लक्ष्म्या सह स्थिता॥ २॥
मुख्याः स्निग्धादयस्त्वत्र मुख्या रक्तादयो मताः। मुख्याभावे त्वमुख्या हि पूज्या इत्युच्यते परैः॥३॥

इति। अथैतासामेव लक्षणविशेषेण संज्ञाविशेषो ब्राह्मे श्रीभगवद्ब्रह्मसंवादे—

निवसामि सदा ब्रह्मन् सालग्रामाख्यवेश्मनि। तत्र च मुख्यचक्राङ्कभेदे नामानि मे शृणु॥ १॥
द्वारदेशे समे चक्रे दृश्येते नान्तरायके। वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः॥ २॥
प्रद्युम्नः सूक्ष्मचक्रस्तु पीतदीप्तिस्तथैव च। सुषिरं छिद्रबहुलं दीर्घाकारं तु तद्भवेत्॥ ३॥
अनिरुद्धस्तु नीलाभो वर्तुलश्चातिशोभनः। रेखाद्वयं तु तद्द्वारि पृष्ठं पद्मेन लाञ्छितम्॥ ४॥
सौभाग्यं केशवो दद्यात् चतुष्कोणो भवेत्तु यः। श्यामं नारायणं विद्यान्नाभिचक्रं तथोपरि[1]॥ ५॥
दीर्घरेखासमोपेतं दक्षिणे सुषिरं पृथु। ऊर्ध्वे मुखं विजानीयाद्द्वारे च हरिरूपिणम्॥ ६॥
कामदं मोक्षदं चैव ह्यर्थदं च विशेषतः। परमेष्ठी च शुक्लाभः पद्मचक्रसमन्वितः॥ ७॥
बिल्वाकृतिस्तथा पृष्ठे सुषिरं वापि पुष्कलम्। कृष्णवर्णस्तथा विष्णुः स्थूले चक्रे सुशोभने॥८॥
द्वारोपरि तथा रेखा दृश्यते मध्यदेशतः। कपिलो नारसिंहस्तु पृथुचक्रः सुशोभनः॥ ९॥
ब्रह्मचार्यधिकारी स्यात् पूजनं नान्यथा भवेत्। ब्रह्मचर्य्येण पूज्योऽसावन्यथा विघ्नदो भवेत्॥१०॥

इति। क्वचिच्च—

कपिलोऽधस्त्रिबिन्दुः स्यात् कपिलः पञ्चबिन्दुकः। ब्रह्मचर्य्येण पूज्यः स्यादन्यथा सर्वविघ्नदः॥१॥
स्थूलं चक्रद्वयं मध्ये गुडलाक्षासवर्णकम्। द्वारोपरि तथा रेखा पूजा कार्या सुशोभना॥ २॥
स्फुटितं विषमं चक्रं नारसिंहं तु कापिलम्। सम्पूज्य मुक्तिमाप्नोति सङ्ग्रामे विजयी भवेत्॥ ३॥

इति। पद्मपुराणे, कार्तिकमाहात्म्ये—

यस्य दीर्घं मुखं पूर्वैं कथितैर्लक्षणैर्युतम्। केसराकारिका रेखा नारसिंहो मतः स तु॥ १॥

इति। ब्राह्मे—

वराहं शक्तिलिङ्गं च चक्रे च विषमे स्मृते। इन्द्रनीलनिभं स्थूलं विरेखालाञ्छितस्थलम्॥ १॥

---

[1] 'थोन्नतम्' क. पाठः।

इति। पाद्मे च—

वराहाकृतिराभुग्नश्चक्ररेखास्वलङ्कृतः। वाराह इति सम्प्रोक्तः,

इति। ब्राह्मे—

दीर्घा काञ्चनवर्णाभा बिन्दुत्रयविभूषिता। मत्स्याख्या सा शिला ज्ञेया भुक्तिमुक्तिफलप्रदा।। १।।
कूर्मस्तथोन्नतः पृष्ठे बर्तुलः परिपूरितः। हरितं वर्णमाधत्ते कौस्तुभेन च चिह्नितः।। २।।
कूर्माकारा च चक्राङ्का शिला कूर्मः प्रकीर्तितः।

इति। ब्राह्मे—

हयग्रीवोऽङ्कुशाकारो रेखाः पञ्च भवन्ति हि। बहुबिन्दुसमाकीर्णो दृश्यते नीलरूपकः।। १।।

इति। पाद्मे—

हयग्रीवा यथा लम्बरेखा वा या शिला भवेत्। तथा सौम्यो हयग्रीवः पूजितो ज्ञानदो भवेत्।।१।।
अश्वाकृति मुखं यस्य साक्षमालशिरस्तथा। पद्माकृतिर्भवेद्वापि हयशीर्षस्त्वसौ मतः।। २।।
वैकुण्ठं नीलवर्णाभं चक्रमेकं तथा ध्वजा। द्वारोपरि तथा रेखा पूजा कार्या सुशोभना।। ३।।
श्रीधरस्तु तथा देवश्चिह्नितो वनमालया। कदम्बकुसुमाकारो रेखापञ्चकभूषितः।। ४।।
वर्तुलश्चातिचिह्नश्च[1] वामनः परिकीर्तितः। अतसीकुसुमप्रख्यो बिन्दुना परिशोभितः।। ५।। इति।

अन्यत्र च—

वामनाख्यो भवेद्देवो ह्रस्वो यः स्यान्महाद्युतिः। वामपार्श्वे गदाचक्रे रेखे चैव तु दक्षिणे।। १।।

इति। पाद्ये—

चक्राकारेण पक्तिः सा यत्र रेखामयी भवेत्। स सुदर्शन इत्येवं ख्यातः पूजाफलप्रदः।। १।।
दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितम्। दूर्वाभं द्वारि सङ्कीर्णं पीता रेखा तथैव च।। २।।
उपर्यधश्च चक्रे द्वे नातिदीर्घं मुखे विलम्। मध्ये च रेखा लम्बैका सा च दामोदरः स्मृतः।। ३।।

इति। अन्यत्र च—

स्थूलो दामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु यः। चक्रे च मध्यदेशस्थे पूजितः सुमुखः सदा।। १।।
नानावर्णो ह्यनन्ताख्यो नागभोगेन चिह्नितः। अनेकचक्रसम्भिन्न सर्वकामफलप्रदः।। २।।
अनेकचक्रो बहुभिश्चिह्नैरप्युपलक्षितः। अनन्तः स तु विज्ञेयः सर्वपूजाफलप्रदः।। ३।।
विदिक्षु दिक्षु सर्वासु यस्योर्ध्वे दृश्यते मुखम्। पुरुषोत्तमः स विज्ञेयो भुक्तिमुक्तिफलप्रदः।। ४।।
दृश्यते शिखरे लिङ्गं शालग्रामसमुद्भवम्। तस्य योगीश्वरो नाम ब्रह्महत्यां व्यपोहति।। ५।।
आ (रख्यं?राध्यं) पद्मनाभाख्यं पङ्कजच्छत्रसंयुतम्। तुलस्या पूजयेन्नित्यं दरिद्रस्त्वीश्वरो भवेत्।।६।।
चन्द्राकृति हिरण्याख्यं रश्मिजालं विनिर्दिशेत्। सुवर्णरेखाबहुलं स्फटिकद्युतिशोभितम्।। ७।।

इति। पाद्मे—

---

[1] १. 'द्रवश्च' क. पाठः।

वज्रकीटोद्भवा रेखाः पङ्क्ति[1]भूताश्च यत्र वै। सालग्रामशिला या सा विष्णुपञ्जरसंज्ञिता।। १ ।।
नागवत् कुण्डलीभूतरेखापङ्क्तिः स शेषकः। पद्माकारे तु पङ्क्ती द्वे मध्ये लम्बा च रेखिका।।२ ।।
गरुडः स तु विज्ञेयश्चतुश्चक्रो जनार्दनः। चतुश्चक्रः सूक्ष्मद्वारि वनमालाङ्कितोदरः।। ३ ।।
लक्ष्मीनारायणः श्रीमान् भुक्तिमुक्तिफलप्रदः। अर्धचन्द्राकृतिर्देवो[2] हृषीकेश उदाहृतः।। ४ ।।
तमभ्यर्च्य लभेत् स्वर्गं विषयांश्च समीहितान्। वामपार्श्वे समे चक्रे कृष्णवर्णः सबिन्दुकः।। ५ ।।
लक्ष्मीनृसिंहो विख्यातो भुक्तिमुक्तिफलप्रदः। त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्युतिः।। ६ ।।
वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे। प्रदक्षिणावर्तकृतवनमालाविभूषितः ।। ७ ।।
या शिला कृष्णसंज्ञा सा धनधान्यसमृद्धिदा। चतस्रो यस्य दृश्यन्ते रेखाः पार्श्वे समीपगाः।।८ ।।
द्वे चक्रे मध्यदेशे तु सा शिला तु चतुर्मुखा।

इति। तथा—

एतल्लक्षणयुक्तास्तु सालग्रामशिलाः शुभाः। याश्च तास्वपि सूक्ष्माः स्युस्ताः प्रशस्ततराः स्मृताः।।९ ।।

इति। तथा च श्रीभगवद्ब्रह्मसंवादे तत्रैव—

यथा यथा शिला सूक्ष्मा महत्पुण्यं तथा तथा। तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये।। १ ।।
तत्राप्यामलकीतुल्या सूक्ष्मा चातीव या भवेत्। तस्यामेव सदा ब्रह्मन् श्रिया सह वसाम्यहम्।।२ ।।

इति। अथ सालग्रामशिलायां हरिपूजामाहात्म्यं पाद्मे माघमाहात्म्ये—

यः पूजयेद्धरिं चक्रे शालग्रामशिलोद्भवे । राजसूयसहस्रेण तेनेष्टं प्रतिवासरम्।। १ ।।
यदामनन्ति वेदान्ता ब्रह्म निर्गुणमच्युतम्। तत्प्रसादो भवेन्नृणां शालग्रामशिलार्चनात्।। २ ।।
महाकाष्ठस्थितो वह्निर्मथ्यमानः प्रकाशते। अपि पापसमाचाराः कर्मण्यनधिकारिणः।। ३ ।।
शालग्रामार्चका वैश्या नैव यान्ति यमालयम्। न तथा रमते[3] लक्ष्म्या न तथा स्वपुरे हरिः।।४ ।।
शालग्रामशिलाचक्रे यथा स रमते सदा। अग्निहोत्रं हुतं तेन दत्ता पृथ्वी ससागरा।। ५ ।।
येनार्चितो हरिश्चक्रे शालग्रामशिलोद्भवे। कामक्रोधमदलोभैर्व्याप्तो योऽत्र नराधमः।। ६ ।।
सोऽपि याति हरेर्लोकं सालग्रामशिलार्चनात्। यः पूजयति गोविन्दं शालग्रामे सदा नरः।। ७ ।।
आभूतसम्प्लवं यावन्न स प्रच्यवते दिवः। विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मखैः।। ८ ।।
मुक्तिं यान्ति नरा वैश्य शालग्रामशिलार्चनात्। नरकं गर्भवासं च न तिर्यक्कृमियोनिकम्।। ९ ।।
न याति वैश्यः पापोऽपि शालग्रामेऽच्युतार्चकः। दीक्षाविधानमन्त्रज्ञश्चक्रे यो बलिमाहरेत्।। १० ।।
स याति वैष्णवं धाम सत्यं सत्यं मयोदितम्। नैवेद्यैर्विविधैः पुष्पैर्धूपदीपविलेपनैः।। ११ ।।
गीतवादित्रस्तोत्राद्यैः शालग्रामशिलार्चनम्। कुरुते मानवो यस्तु कलौ भक्तिपरायणः।। १२ ।।
कल्पकोटिसहस्राणि रमते सन्निधौ हरः। लिङ्गैस्तु कोटिभिर्दृष्टैर्यत्फलं पूजितैश्च तैः।। १३ ।।
सालग्रामशिलायास्तु एकेनापीह तत्फलम्। सालग्रामशिलारूपी यत्र तिष्ठति केशवः।। १४ ।।

---

१. 'पद्म' ग. पाठः। २. 'ज्ञेयो' क. पाठः। ३. 'राजते' ग. पाठः।

तत्र देवासुरा यक्षा भुवनानि चतुर्दश। सालग्रामशिलायां तु यः श्राद्धं कुरुते नरः।। १५।।
पितरस्तत्र तिष्ठन्ति तृप्ताः कल्पशतं दिवि। सालग्रामसमीपे तु क्रोशमात्रं समन्ततः।। १६।।
कीटकोऽपि मृतो याति वैकुण्ठं किमु मानुषः[1]। सालग्रामशिलाचक्रं यो दद्याद् दानमुत्तमम्।। १७।।
भूचक्रं तेन दत्तं स्यात् सशैलवनकाननम्।

इति। स्कान्दे-शिवस्कन्दसंवादे,

सालग्रामशिलायां तु त्रैलोक्यं सचराचरम्। मया सह महासेन लीनं तिष्ठति सर्वदा।। १।।
दृष्टा प्रणामिता येन स्नापिता पूजिता तथा। पुण्यकोटिसमं पुण्यं गवां कोटिफलं लभेत्।। २।।
कामासक्तोऽपि यो नित्यं भक्तिभावविवर्जितः। सालग्रामशिलां पुत्र सम्पूज्यैवाच्युतो भवेत्।। ३।।
सालग्रामशिलावि (म्बे ?म्बं) हत्याकोटिविनाशनम्। स्मृतं सङ्कीर्तितं ध्यातं पूजितं च नमस्कृतम्।।४।।
सालग्रामशिलां दृष्ट्वा यान्ति पापान्यनेकशः। सिंहं दृष्ट्वा यथा यान्ति वने मृगगणा भयात्।।५।।
मनः करोति मनुजः शालग्रामशिलार्चने। पापानि विलयं यान्ति तमः सूर्योदये यथा।। ६।।
कामासक्तोऽथवा क्रुद्धः सालग्रामशिलार्चनम्। भक्त्या वा यदि वाभक्त्या कृत्वा मुक्तिमवाप्नुयात्।।७।।
वैवस्वतभयं नास्ति तथा मरणजन्मनोः। यः कथां कुरुते विष्णोः सालग्रामशिलाग्रतः।। ८।।
गीतैर्वाद्यैस्तथा स्तोत्रैः सालग्रामशिलार्चनम्। कुरुते मानवो यस्तु कलौ भक्तिपरायणः।। ९।।
कल्पकोटिसहस्राणि रमते विष्णुसद्मनि[2]। सालग्रामे नमस्कारो भावेनापि नरैः कृतः।। १०।।
भयं नैव करिष्यन्ति मद्भक्ता ये नरा भुवि। मद्भक्तिबलदर्पिष्ठा मत्प्रभुं न नमन्ति ये।। ११।।
वासुदेवं न ते ज्ञेया मद्भक्ताः पापिनो हि ते। सालग्रामशिलायां तु सदा पुत्र वसाम्यहम्।। १२।।
दत्तं देवेन तुष्टेन स्वस्थानं नाम भक्तितः। पद्मकोटिसहस्रैस्तु पूजिते मयि यत्फलम्।। १३।।
तत्फलं कोटिगुणितं सालग्रामशिलार्चने। पूजितोऽहं न तैर्मन्त्रैर्नमितोऽहं न तैर्नरैः।। १४।।
न कृतं मर्त्यलोके यैः सालग्रामशिलाचर्नम्। सालग्रामशिलाग्रे तु यः करोति ममार्चनम्।। १५।।
तेनार्चितोऽहं सततं युगानामेकसप्ततिः। किमर्चितैर्लिङ्गशतैर्विष्णुभक्तिविवर्जितैः ।। १६।।
सालग्रामशिलाबिम्बं नार्चितं यदि पुत्रक। अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम्।। १७।।
सालग्रामशिलालग्नं सर्वं याति पवित्रताम्। यो हि माहेश्वरो भूत्वा वैष्णवं लिङ्गमुत्तमम्।। १८।।
द्वेष्टि वै याति नरकं यावदिन्द्राश्चतुर्दश। सकृदभ्यर्चिते विष्णौ सालग्रामसमुद्भवे।। १९।।
मुक्तिं प्रयान्ति मनुजा नूनं सांख्येन वर्जिताः। मल्लिङ्गैः कोटिभिर्दृष्टैर्यत्फलं पूजितैस्तु तैः।। २०।।
सालग्रामशिलायां तु एकेनापीह तद्भवेत्। तस्माद्भक्त्या च मद्भक्तैः प्रीत्यर्थं मम पुत्रक।। २१।।
कर्तव्यं सततं भक्त्या सालग्रामशिलार्चनम्। सालग्रामशिलारूपी यत्र तिष्ठति केशवः।। २२।।
तत्र देवासुरा यक्षा भुवनानि चतुर्दश। सालग्रामशिलाग्रे तु सकृत्पिण्डेन तर्पिताः।। २३।।
वसन्ति पितरस्तस्य न संख्या तत्र विद्यते। प्रमाणमस्ति सर्वस्य सुकृतस्य हि पुत्रक।। २४।।

---

१. 'भवनं नरः' ग. पाठः। २. 'धामनि' ग. पाठः।

फलं प्रमाणहीनं तु सालग्रामशिलार्चने। यो ददति शिलां विष्णोः सालग्रामसमुद्भवाम्।। २५।।
विप्राय विष्णुभक्ताय तेनेष्टं बहुभिर्मखैः। मानुष्ये दुर्लभे लोके सालग्रामशिला नरैः।। २६।।
प्राप्यते न विना पुण्यैः कलिकाले विशेषतः। स धन्यः पुरुषो लोके सफलं तस्य जीवितम्।।२७।।
सालग्रामशिला शुद्धा गृहे यस्य च पूजिता। सन्नियम्येन्द्रियग्रामं सालग्रामशिलार्चनम्।। २८।।
यः कुर्यान्मानवो भक्त्या स याति परमं पदम्। भक्त्या वा यदि वाभक्त्या यः करोति स पुण्यभाक्।।२९।।
द्वेषेणापि च लोभेन दम्भेन कपटेन वा। सालग्रामोद्भवं देवं दृष्ट्वा पापात् प्रमुच्यते।। ३०।।
अशुचिर्वा दुराचारः सत्यशौचविवर्जितः। सालग्रामशिलां स्पृष्ट्वा सद्य एव शुचिर्भवेत्।। ३१।।
तिलप्रस्थशतं भक्त्या यो ददाति दिने दिने। तत्फलं स[1] समाप्नोति सालग्रामशिलार्चने[2]।।३२।।
पत्रं पुष्पं फलं मूलं तोयं दूर्वाक्षताः सुत। जायते मेरुणा तुल्यं सालग्रामशिलार्पितम्।। ३३।।
विधिहीनोऽपि यः कुर्यात् क्रियामन्त्रविवर्जितः। चक्रपूजामवाप्नोति सम्यक् शास्त्रोदितं फलम्।।३४।।

इति। तत्रैवान्यत्र—

स्कन्धे कृत्वा तु योऽध्वानं वहते शैलनायकम्। तेनोढं तु भवेत् सर्वं त्रैलोक्यं सचराचरम्।। १।।
ब्रह्महत्यादिकं पापं यत्किञ्चित् कुरुते नरः। तत्सर्वं निर्दहत्याशु सालग्रामशिलार्चनम्।। २।।
न पूजनं न मन्त्राश्च न जपो न च भावना। न स्तुतिर्नोपस्कराश्च सालग्रामशिलार्चने ।। ३।।
सालग्रामशिला यत्र तत्तीर्थं योजनत्रयम्। तत्र दानं च होमश्च सर्वं कोटिगुणं भवेत्।। ४।।
सालग्रामशिलायां तु यः श्राद्धं कुरुते नरः। पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पशतं दिवि।। ५।।
सालग्रामसमीपे तु क्रोशमात्रं समन्ततः। कीटकोऽपि मृतो याति वैकुण्ठभवनं नरः।। ६।।
सालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम्। भूचक्रं तेन दत्तं स्यात् सशैलवनकाननम्।। ७।।

इति। गरुडपुराणे—

तिष्ठन्ति नित्यं पितरो मनुष्यास्तीर्थाग्निगङ्गागयपुष्कराणि।
यज्ञाश्वमेधाद्यपि पुण्यशैलाश्चक्राङ्किता यस्य वसन्ति गेहे।। १।।

इति। पाद्मे—

सालग्रामशिलायां तु यैर्नरैः पूजितो हरिः। संशोध्य तेषां पापानि मुक्तये बुद्धिदा भवेत्।। १।।
कार्तिके मथुरायां तु सारूप्यं दृश्यते हरिः। सालग्रामशिलायां वै पितॄनुद्दिश्य पूजितः।। २।।
कृष्णः समुद्धरेत्तस्य पितॄनेतान् सलोकताम्।

इति। बृहन्नारदीये—

सालग्रामशिलारूपी यत्र तिष्ठति केशवः। न बाधन्तेऽसुरास्तत्र भूतवेतालकादयः।। १।।
सालग्रामशिला यत्र तत्तीर्थं तत्तपोवनम्। शतं वा पूजितं भक्त्या तदा स्यादधिकं फलम्।। २।।

इति। अथ तासां बाहुल्ये फलविशेषः पाद्मे—

---

[1] 'सर्वं' क. पाठः। [2] 'नात्' क. पाठः।

सालग्रामा युगाः पूज्या युगेषु द्वितयं नहि। अयुग्मा नैव पूज्यन्ते अयुग्मेष्वेक एव हि।। ३।।
शिला द्वादश भो वैश्य सालग्रामसमुद्भवाः। विधिवत् पूजिता येन तस्य पुण्यं वदामि ते।।४।।
कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः। यत् स्यात् द्वादशकल्पैस्तु दिनेनैकेन तद्भवेत्।। ५।।
यः पुनः पूजयेद्भक्त्या सालग्रामशिलाशतम्। तत्फलं नैव शक्तोऽहं वक्तुं कल्पशतैरपि।। ६।।

इत्याद्यास्तां विस्तरः। अत्र केचित् सालग्रामे विष्णोर्नावाहनं कार्यमिति वदन्ति, तत्र प्रमाणं चिन्त्यं वस्तुतस्तु स्कन्दपुराणादिदर्शनादावाहनमवश्यं कार्यमिति प्रतीयते। यथा स्कन्दपुराणे–

विप्रः पूर्वं निजे देहे स्मृत्युक्तेन न्यसेद्बुधः। ततस्तु प्रतिमायां च सालग्रामे विशेषतः।। १।।
क्रमेण च ततः पश्चात् कुर्यादावाहनादिकम्। आवाहयेच्च पुरतो ध्यानसेव्यं[१] द्विजोत्तमः।। २।।

इति। अत्र एवावाहनाद्युद्वासनान्तमभिधायोक्तं बौधायनेन– ''सालग्रामे प्रतिमास्वग्नावप्यावाहनादिविसर्जन''मिति त्रैलोक्यसम्मोहनतन्त्रे–'सालग्राम' इत्युपक्रम्य विसर्जनान्ता पूजोक्ता। अत्र–''सालग्रामशिलायां तु प्रतिष्ठां नैव कारयेत्'' इति प्रतिष्ठामात्रनिषेधादावाहनमावश्यकं विष्णोरन्यदेवतानां चाविरुद्धमिति। ''आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत्''।। इति भागवतेऽपि भगवता स्वयमभिधानात्। आदिपदेन मन्त्रादयो गृह्यन्ते। तथा मेरुतन्त्रेऽपि सालग्रामशिलालक्षणे–

विष्णोर्भेदा इमे प्रोक्ता अत्रैवावाहयेद्धरिम्। विसर्जयेत् तु पूजान्ते प्रतिष्ठां नात्र कारयेत्।। १।।

इति। आवाहनस्वरूपमुक्तं सिद्धान्तशेखरे–

स्वत एव प्रपूर्णस्य तत्त्वस्येवार्चनादिषु। सादरं सम्मुखीभावस्तदावाहनमिष्यते।। १।।

इति। तत्पर्यायमाह शारदातिलके–

मूलमन्त्रं समुच्चार्य सुषुम्नावर्त्मना सुधीः। आनीय तेजः स्वस्थानान्नासिकारन्ध्रनिर्गतम्।। १।।
करस्थमातृकाम्भोजे चैतन्यं पुष्पसञ्चये। संयोज्य ब्रह्मरन्ध्रेण मूर्तावावाहयेत् सुधीः।। २।।

इति। सुषुम्नावर्त्मना ब्रह्मरन्ध्रेण दक्षिणनासारन्ध्रनिर्गतमिति। गरुडपुराणे–''आगच्छेति प्रयोगेण मूलमन्त्रेण शङ्कर''। आवाहनं प्रकर्तव्यमिति। नृसिंहपुराणे– ''आगच्छ नरसिंहे''ति। तन्त्रान्तरे–

आवाहनं स्थापनं च सन्निधापनमेव च। सन्निरोधनमित्युक्तं सम्मुखीकरणं ततः।। १।।
अथावगुण्ठनं प्रोक्तं सकलीकरणं ततः। अमृतीकरणं चैव परमीकरणं तथा।। २।।
विधाय स्वस्वमुद्राभिः प्राणस्थापनमाचरेत्।

इति। सकलीकरणस्वरूपं च सिद्धान्तशेखरे–

अविभिन्नस्वभावानां यदभिन्नप्रयोजनम्। अङ्गानामङ्गिना सार्धं सकलीकरणं त्विदम्।। १।।

इति। श्रीकुलार्णवे–

पीठे देवं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित्। मूलमन्त्रेण दीपिन्या मालिन्याघ्यर्योदकेन च।। १।।
त्रिवारं प्रोक्षयेद्विद्वान् देवशुद्धिरियं प्रिये। पञ्चशुद्धिं विधायेत्थं पश्चाद्यजनमारभेत् ।। २।।
सा पूजा सफला देवि चान्यथा निष्फला भवेत्।

---

[१] 'व्या' क. पाठः।

इति। तथा—

वाग्भवं वदयुग्मान्ते वाग्वादिति च वाग्भवम्। कामराजं ततः क्लिन्ने क्लेदिनि क्लेदयेति च।।१।।
महाक्षोभं कुरुयुगं कामराजमतः परम्। तार्तीयं मोक्षशब्दान्ते कुरुयुग्मं वदेत्ततः।। २।।
स्यात् प्रासादपराम्बान्ते सप्तत्रिंशद्भिरक्षरैः। दीपिनीमनुरित्युक्तः सर्वसिद्धिकरः प्रिये।। ३।।

इति। चकारात् कुरुयुग्मान्ते तार्तीयं तदनु पराप्रासादबीजमित्यर्थः। सप्तत्रिंशदक्षर इत्युक्तेः। वाग्भवकामराजतार्तीया बालाविद्याया एव, सा त्वग्रे वक्ष्यते। पराप्रासादबीजं तु पुरस्तात्प्रयोगे अस्यैव मन्त्रस्यान्ते द्रष्टव्यम्, तथा—

सकलीकृत्य तत्प्राणांस्तदीयानीन्द्रियाणि च। प्रतिष्ठाप्यार्चयेद् देवमन्यथा निष्फलं भवेत्।। १।।

इति। अत्र केचित्—''अस्मिन्प्राणप्रतिष्ठां तु प्रतिमापूजनादृते। न क्वचित्तु बुधः कुर्यात्कृत्वा मृत्युमवाप्नुयात्''।। इत्युत्तरतन्त्रवचनात्प्राणप्रतिष्ठा न कार्येत्याहुः। तन्न तस्य वचनस्यावाहनादिरहितस्य स्थण्डिलादेः पूजनविषयत्वात्। अत एवोक्तं तत्रैव—''प्रतिमापूजनादृते'' इति। प्रतिमा मूर्तिस्तस्यां मन्त्रमय्यामपि तथात्वात्, अन्यथा कथं सकलीकरणमिति। उत्तरतन्त्रे—''मुद्रां प्रदर्श्य विधिवदुपचारान्प्रकल्पयेत्''।। मुद्रास्तत्तत्कल्पोक्तास्तास्त्वग्रे वक्ष्यन्ते। कुलमूलावतारे—

मुदं स्वरूपलाभाख्यां देहद्वारेण वात्मनः। या ह्यर्पयन्त्ययत्नेन मुद्रास्ताः परिकीर्तिताः।। १।।
मोचयन्ति ग्रहादिभ्यो पापौघं द्रावयन्ति च। मोचनं द्रावणं यस्मान्मुद्रा शास्त्रेषु वर्णिता।। २।।

इति मुद्राशब्दनिरुक्तिः। प्रपञ्चसारे—

आसने स्वागते चार्घ्ये पाद्ये साचमनीयके। मधुपर्काचमस्नानवसनाभरणान्यपि।। १।।
सुगन्धसुमनोधूपदीपनैवेद्यचन्दनम् । प्रयोजयेदर्चनायामुपचारांस्तु षोडश ।। २।।
अर्घ्यपाद्ये साचमने मधुपर्काचमान्यपि। गन्धादयो निवेद्यान्ता उपचारा दश क्रमात्।। ३।।
गन्धादयो निवेद्यान्ता पूजा पञ्चोपचारिका। सपर्यास्त्रिविधाः प्रोक्तास्तासामेकतमां श्रयेत्।। ४।।

इति। अत्र पञ्चोपचारपूजापक्षे अर्घ्यादिस्थापनं नास्ति प्रयोजनाभावात्। भैरवीतन्त्रे—''एकैकस्यां ततो मन्त्री प्रणम्य तु निवेदयेत्।'' तन्निवेदनप्रकारमाह नारदपञ्चरात्रे—

प्रणवान्ते त्रिधा कृत्वा प्राणं व्योमविभूषितम्। इदमिदमिदं पश्चात्पदं दद्यात्षडक्षरम्।। १।।
गृहाण च ततः स्वाहा मन्त्रः पञ्चदशाक्षरः। योज्यः सर्वोपचारेषु पाद्यादिषु सदैव हि।। २।।

इति। प्राणं हकारः। व्योम बिन्दुः। अत्र तृतीयंहकारोपस्थितबिन्दोरिकारेण सह सन्धिः कार्यस्तदा तु भवति। उत्तरतन्त्रे—

मूलेनैवासनं दद्यात् तेन स्वागतमीरयेत्। ततोऽर्घ्यं मूर्ध्नि दद्याच्च स्वाहामन्त्रेण मन्त्रवित्।। १।।
पादाब्जे देवतायास्तु हृदा पाद्यं प्रकल्पयेत्। दद्यादाचमनं वक्त्रे देवतायाः सुधाणुना।। २।।
सुधामन्त्रेण दद्याच्च मधुपर्कं मुखाम्बुजे।

इति। अत्रार्घ्याचमनीयमधुपर्कमुख्येष्वपि शूद्रैर्नमःपदमेव स्वाहादिस्थाने प्रयोक्तव्यं प्रागुक्तयुक्तेः। अथात्र— ''वैदिको मिश्रितो वापि विप्रादीनां विधीयते। तान्त्रिको विप्रभक्तस्य शूद्रस्यापि प्रकीर्तितः।।'' इति पद्मपुराणवचनाद्ब्राह्मण-क्षत्रियवैश्यैर्गणेशादिपञ्चदेवतानां तत्तद्वैदिकमन्त्रेण प्रथमं पूजां कृत्वा ततस्तत्तत्तान्त्रिकमन्त्रेण पूजा कार्या। केवलतान्त्रिक-

यजनस्य शूद्रविषयत्वादुक्तवचनात्।

कदाचिदपि न त्याज्यो वेदमार्गो द्विजैः सदा। वेदच्युतानां विप्रत्वं देवत्वं चापि दुर्लभम्।। १ ।।
वेदः कर्तुं तु नो शक्यस्तन्त्राणि तु युगे युगे। कल्मषं सम्भवैर्विप्रैर्यन्नाम्ना कीर्तिताः सदा।। २ ।।
कलिना प्रेरिता विप्रास्तत्तन्त्रपथगामिनः। कामलोभादिभिर्ग्रस्ता ब्राह्मण्येन विदारिताः।। ४ ।।

इति। तत्र वैदिकमन्त्रास्तु–‘‘गणानां त्वा’’ इति गणपतेः। ‘‘गौरीर्मिमाय’’ इति भुवनेश्वर्यादिगौरीभेदानाम्। ‘‘यद्वाक्’’ इति भारत्याः। श्रीसूक्तं लक्ष्म्याः। ‘‘जातवेदसे सुनवाम’’ इति दुर्गायाः। विष्णोः पुरुषसूक्तम्। रवेः ‘‘आकृष्णेन’’ इति। शिवस्य ‘‘नमः शम्भवाय’’ इति ‘‘त्र्यम्बकं यजामहे’’ इति वा। गणानां त्वेति गृत्समदो गणपतिर्जगती। गौरीर्मिमायेति जगती दीर्घतमाः। आकृष्णेनेति हिरण्यस्तूपः सविता त्रिष्टुप्।। अथोपचाराः, तत्रादावासनानि–

देवस्य वामभागे तु दद्यान्मूलेन चासनम्। पौष्पं दारुमयं वास्त्रं चार्मकौशेयतैजसम्।। १ ।।
षड्विधमासनं प्रोक्तम्।

इति। उत्तरतन्त्रे–

पौष्पं पुष्पादिरचितं कुशसूत्रादिसंयुतम्। अतिप्रीतिकरं देव्या ममाप्यन्यस्य भैरव।। १ ।।
यज्ञदारुसमुद्भूतमासनं चाव्रणं शुभम्। अन्यदारुभवं चापि दद्यादासनमुत्तमम्।। २ ।।
सकीटकक्षीरयुतं दारुसारविवर्जितम्। चैत्यश्मशानसम्भूतं वर्जयित्वा विभीतकम्।। ३ ।।

इति। चैत्यो ग्रामप्रसिद्धिहेतुभूतो महान् वृक्षः। दारुमयासने विशेषमाह रुद्रयामले–

शण्डिल्यभद्रसारस्य चासनं हस्तमात्रकम्। सप्ताङ्गुलोच्छ्रितं दद्याद्विष्टरं वा विचक्षणः।। १ ।।

शाण्डिल्यो बिल्वः। ‘‘बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि’’ इत्यमरः।। भद्रसारश्चन्दनः। ‘‘भद्रसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रिया’’मित्यमरः।। विष्टरो दर्भमुष्टिः। सप्तविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषितम्। विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितम्।। इति। यद्वा विष्टरशब्दस्त्वासनमात्रवाची ‘‘विष्टरे विटपे दर्भमुष्टौ पीठाद्यमासन’’मिति हि कोशः। उत्तरतन्त्रे–

कोशजं वाल्कलं शाणवस्त्रमेतद्द्वयं स्मृतम्। रोमजं कम्बलं चैव वादरं च चतुष्टयम्।। १ ।।
वास्त्रेषु कम्बलं श्रेष्ठमासनं देवतुष्टये।

वास्त्रमासनचतुष्टयमित्यर्थः। वादरं कार्पासम्। ‘कार्पासं वादरं च त’’दिति विश्वप्रकाशकोशात् च।। तथा–

सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य च। गजानां च तुरङ्गाणां कृष्णसारस्य चर्मणः।। १ ।।
राङ्कवं रोमजं श्रेष्ठं दारवं चन्दनोद्भवम्।

राङ्कवं रङ्कुनामा मृगः काश्मीरदेशे प्रसिद्धः तद्रोमजं ‘‘पामरी’’ इति लोके प्रसिद्धा कम्बलविशेषः। तथा–

यच्चासनं कुशमयं तदासनमनुत्तमम्। योगपीठस्य सदृशमासनं कौशमुच्यते।। १ ।।

इति। तथा–

सर्वेषां तैजसानां चाप्यासनं श्रेष्ठमुच्यते। वर्जयित्वा लोहमयं कांस्यं सीसकमेव च।। १ ।।

इति। अतः परमर्घ्यदानं, तच्च देवस्य शिरोर्हणायैव शिरसि देयम्। न चैवं पित्रर्घ्येणाव्याप्तिर्विप्रकरे दानादिति वाच्यं, तस्य पितॄणां शिरोर्हणायैव तत्र दानादिति सोमशम्भुः—

आगताय तथार्चायां स्नातुमासनगाय च। पूजितागन्तुकामाय दद्यादर्घ्यं विचक्षणः।। १।।
आगते स्नानकाले च नैवेद्योपक्रमे तथा। पाद्यस्यापि समुद्दिष्टः समयस्त्रिविधो बुधैः।। २।।
पाद्ये च मधुपर्के च स्नाने वस्त्रोपवीतयोः। भोजने चाचमं दद्यात्।

इति। तृर्णायागे—

सुगन्धतैलैरभ्यर्च्य सुगन्धामलकादिभिः। उद्वर्तनं विधायाथ तर्पयित्वाथ[१] वारिणा।। १।।
गन्धोदकैश्च मूलेन यथाशक्त्याभिषेचयेत्। महाभिषेकं सर्वत्र शङ्खेनैव प्रकल्पयेत्।। २।।
सर्वमन्त्रे प्रशस्तोऽब्जः शिवसूर्याचमं विना।

इति। अब्जः शङ्खः। अगस्त्यः—

स्नानं पुरुषसूक्तेन शुद्धशङ्खोदकेन च। क्षीरदध्याज्यमधुभिः खण्डेन च पृथक् पृथक्।। १।।
नारिकेलोदकेनापि तथा तालफलाम्बुना। गन्धद्रव्यैश्च मधुभिस्तथा गन्धोदकेन च।। २।।
ऐक्षवेणोदकेनापि सकर्पूरादिगन्धिना । कदलीपनसाम्रोत्थजलेनापि सुगन्धिना ।। ३।।
शतं सहस्रमयुतं शक्त्या वाप्यभिषेचयेत्। शङ्खं सम्पूज्य तेनैव सपुष्पेण रघूत्तम।। ४।।
सकृष्णागुरुधूपेन धूपयेदन्तरान्तरम्। ततः शुद्धजलेनैव स्नापयेत् तमनन्यधीः ।। ५।।

इति। अत्र शिवस्य शङ्खेन स्नपनं निषिद्धं, पुराणे तु शङ्खेन स्नपनं प्रशस्तं श्रूयते। स्कान्दे—

सुप्रतिष्ठितशङ्खस्थतीर्थैः[२] पञ्चामृतैरपि। अभिषिच्य महादेवं रुद्रसूक्तैः समाहितः।। १।।

इति। यामले—

पीतं कौशेयवसनं विष्णुप्रीत्यै प्रकीर्तितम्। रक्तं शक्त्यर्कविघ्नानां शिवस्य च सितं प्रिये।। १।।
मलहीनं तथाछिद्रं क्षौमं कार्पासमेव च।

इति। मन्त्रतन्त्रप्रकाशे—

तैलादिदूषिताद्रोगः सच्छिद्राद् वाच्यता भवेत्। जीर्णाद् दरिद्रता कर्तुर्मलिनात् कान्तिहीनता।। १।।

इति कालिकापुराणे—

निर्दशं मलिनं जीर्णं छिन्नं गात्रावलम्बितम्। परकीयं चाखुदष्टं सूचीविद्धं तथासितम्।। १।।
उपकेशमधौतं च श्लेष्ममूत्रादिदूषितम्। प्रदाने देवताभ्यश्च दैवे पित्र्ये च कर्मणि ।। २।।
वर्जयेत् स्वोपयोग्यं च यज्ञादावुपयोजने।

इति। उत्तरतन्त्रे—

यज्ञोपवीतं दत्त्वाथ भूषणानि समर्पयेत्। तानि नानाविधानि स्युर्मुकुटादिप्रभेदतः।। १।।
स्त्रीपुंस्प्रभेदतश्चापि विज्ञेयानि विचक्षणैः।

इति। योगिनीतन्त्रे—

---

१. 'त्वोष्णा' क. पाठः। २. 'स्य' क. ग. पाठः।

गन्धः पुष्पं तथा धूपो दीपो नैवेद्यमेव च। यस्य यद्दीयते वस्त्रमलङ्कारादिकाञ्चनम्।। १।।
तेषां दैवतमुच्चार्य कृत्वा प्रोक्षणपूजने। उत्सृज्य मूलमन्त्रेण प्रतिनाम्ना निवेदयेत्।। २।।
वरुणस्य तु बीजेन तेषां प्रोक्षणमाचरेत्। अन्नस्य देवता लक्ष्मीरथवापि प्रजापतिः।। ३।।
सुवर्णं चाग्निदैवत्यं रजतं चन्द्रदैवतम्। हेरकं वारुणं ज्ञेयं रसानां पृथिवी तथा।। ४।।
जलस्य वरुणो देवः पेयानां वरुणस्तथा। कृसरस्य रमा देवी परमान्नस्य चैव हि।। ५।।
घृतप्रदीपके विष्णुस्तैलयोगे वनस्पतिः। गान्धर्वश्च तथा धूपो ह्याज्यं चैवाग्निदैवतम्।। ६।।
मधु वै वारुणं ज्ञेयं दधि क्षीरं च वैष्णवम्। वानस्पत्यं तथा पुष्पं वैष्णवो गन्ध ईरितः।। ७।।
मालायाश्च तथा दुर्गा सर्वं वा विष्णुदैवतम्।

इति। अत्र पूजन एव देवतोच्चारः ''तेषां दैवतमुच्चार्य पूजयेच्च विचक्षणः'' इति स्वयमभिधानात्। उत्सर्गस्तु मूलमन्त्रेण ''तथोत्सर्गनिवेदने'' इति स्वयमभिधानात्। कालिकापुराणे—

चूर्णीकृतो वा घृष्टो वा दाहाकर्षित एव च। रसः सम्मर्दजो वापि प्राण्यङ्गोद्भव एव च।। १।।
गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिकारकः। गन्धचूर्णं गन्धपत्रचूर्णं सुमनसस्तथा।। २।।
प्रशस्तगन्धयुक्तानां पत्रचूर्णानि यानि च। तानि गन्धाह्वयानि स्युश्चूर्णजः प्रथमः स्मृतः।। ३।।
घृष्टो मलयजो गन्धः सकलश्च नमेरुणा। अगरुप्रभृतिश्चैव यस्य पङ्कः प्रणीयते।। ४।।
घृष्टेन घृष्टो गन्धोऽयं द्वितीयः परिकीर्तितः।

इति। शारदातिलके—

गन्धश्चन्दनकर्पूरकालागुरुभिरीरितः । देवदार्वगरुब्रह्मसारसारात् तु चन्दनात् ।। १।।
प्रियादीनां च यो दग्ध्वा गृह्यते दारुजो रसः[१]। स दाहाकर्षितो गन्धस्तृतीयः परिकीतितः।। २।।
सुगन्धकरवीराद्यं सुगन्धललिता तथा। सुगन्धात्परमो योऽसौ निष्पीड्य परिगृह्यते।। ३।।
स सम्मर्दोद्भवो गन्धः सम्मर्दज इतीष्यते। मृगनाभिमुद्भूतस्तत्कोशोद्भव एव च ।। ४।।
गन्धः प्राण्यङ्गजो ज्ञेयो मोददः स्वर्गवासिनाम्।

इति। मन्त्रतन्त्रप्रकाशे—

पुष्पं पञ्चविधं प्रोक्तं मुनिभिर्नारदादिभिः। परापरोत्तमं[२] चैव मध्यमं च तथाधमम्।। १।।
सौवर्णं परमित्युक्तमपरं चित्रवस्त्रजम् । वृक्षगुल्मलतापुष्पमुत्तमं परिकीर्तितम् ।। २।।
अधमं पत्रतोयादि मध्यमं तु फलात्मकम्। उत्सृष्टं न क्रियायोग्यं सदा योग्यं परापरे।। ३।।

इति। एषु यदुत्स्रष्टं देवेभ्यो दत्तं तत्पुनः क्रियायोग्यं न भवतीत्यर्थः। परापरे इति—परं सौवर्णम्, अपरं वास्त्रं, ते चानुत्सृष्टे चेत्सदा योग्ये भवेतां, देवतोपरि सदा धार्ये इत्यर्थः। तयोरेकतरमप्युत्सृष्टं यदि भवति तदा तत्पुनः क्रियायोग्यं देवपूजायोग्यं न भवतीत्यर्थः। ज्ञानार्णवे—

पुष्पैः पर्युषितैर्देवि नार्चयेत् स्वर्णजैरपि। निर्माल्यभूतैः कुसुमैरुत्सृष्टैः परमेश्वरि।। १।।

इति। निर्माल्यभूतैरुत्सृष्टैर्दत्तैरिति यावत्। अथवोत्सृष्टैः पूजावशिष्टैः। उत्तमपुष्पाण्युत्तरतन्त्रे—

---

[१] 'रजः' ग. पाठः। [२] 'सरं' ग. पाठः।

शुक्ला कृष्णा च तुलसी शुक्लं रक्तं च पङ्कजम्। केतकीयुगलं जातीद्वयं द्वन्द्वहयारिजम्।। १।।
पुष्पाणां दशकं ह्येतत् प्रशस्तं परिकीर्तितम्। रक्तनीलोत्पले शस्ते मल्लिकाकुमुदं तथा।। २।।
कुन्दं कह्लारकं चैव मन्दारं तगरं पुनः। अर्जुनं किंशुकं रक्तं मन्दारं नागचम्पकम्।। ३।।
अशोकं बिल्वपुष्पाणि पाटला नवमल्लिका। चम्पकं कर्णिकारं च पारिजाततरूद्भवम्।। ४।।
शतवर्गोद्भवं पुष्पं कोरण्टकुसुमानि च। इत्यादीनि सुपुष्पाणि गन्धवन्ति लसन्ति च।। ५।।
तत्तन्मन्त्रविधानेषु विहितानि समर्पयेत्। म्लानानि चाम्बुगान्येव शीर्णानि क्ष्मागतानि च।। ६।।
यानि पर्युषितानि स्युः क्रिमिभिर्भक्षितानि च। कोरकाणि च दुष्टानि समाघ्रातानि नार्पयेत्।। ७।।

इति। मन्त्रतन्त्रप्रकाशे—

पत्रेषु तुलसी श्रेष्ठा बिल्वं दामनकं शुभम्। मरुवो देवकह्लारि विष्णुक्रान्ता तथैव च।। १।।
अपामार्गोऽथ गान्धारी पत्री सुरभिसंज्ञिता। नागवल्लीदलं दूर्वा कुशपुष्पं तथा मतम्।। २।।
पत्रं चागस्त्यवृक्षस्य पुण्यं धात्रीफलं तथा।

इति। ज्ञानमालायाम्—

नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम्। न दूर्वया यजेद् दुर्गां बिल्वपत्रैर्दिवाकरम्।। १।।
देवीनामर्कमन्दारावादित्ये तगरं तथा। गणेशाय च सूर्याय रक्तपुष्पमतिप्रियम्।। २।।
शिवे कुन्दं मदन्तीं[1] च यूथिं बन्धूककेतके। जपां रक्तां त्रिसन्ध्ये द्वे सिन्दूरं कुटकानि च।। ३।।
मालतीं घुसृणं रक्तहयारिं [2]बर्बरीं त्यजेत्। उग्रगन्धमगन्धं च केशक्रिम्यादिदूषितम्।। ४।।
अशुद्धपात्रपाण्यङ्गवासोभिः कुत्सितात्मभिः। आनीतं नार्पयेच्छम्भोः प्रमादादपि दोषकृत्।। ५।।
कलिकाभिस्तथा नेज्यं विना पङ्कजचम्पकैः। शुष्कैर्न पूजयेच्छम्भुं पत्रैः पुष्पैः फलैरपि।। ६।।
स्नात्वानीतैः पर्युषितैर्याचितैः कृष्णवर्णकैः। स्वयं विकाशितैः पुष्पैः स्वयं च पतितैर्भुवि।। ७।।
वर्जयेद् बृहतीपुष्पं काञ्चनारं कुरण्टकम्। सर्वपुष्पैः सदा पूजा विहिताविहितैरपि ।। ८।।
कर्तव्या सर्वदेवानां भक्तिरेवात्र कारणम्।

इति। अत्र स्नात्वानीतैर्मध्याह्नस्नानोत्तरमादृ[3]त्यानीतैरित्यर्थः प्रातरुत्थानादिप्रातः कालीनपूजान्तं प्रथमप्रहरकृत्यमुक्त्वा ''ततः पुष्पफलादीनामुत्थायार्चनमाचरे''दिति द्वितीयप्रहरकृत्यत्वेन नारदपञ्चरात्रे पुष्पाहरणस्योक्तत्वात्। तथा—

पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम्। दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणम्।। १।।
चित्रपूजासु सर्वासु न विरुद्धस्य दूषणम्। अधोमुखार्पणं नेष्टं पुष्पाञ्जलिविधौ न तत्।। २।।
लक्षपूजासु सर्वासु पुष्पमेकैकमर्पयेत्। समुदायेन चेत्पूजा लक्षपूजार्पणं न तत्।। ३।।
न पर्युषितदोषोऽस्ति जलजोत्पलचम्पके। तुलस्यगस्त्यवकुले बिल्वे गङ्गाजले तथा।। ४।।

इति। अत्र केचिदुत्पलपददर्शनात् जलजपदेन कमलमात्रं ग्राह्यमिति वदन्ति। तत्र ''तुलस्यां बिल्वपत्रे च जलजेषु च सर्वशः। न पर्युषितदोषोऽस्ति मालाकारगृहेषु च''।। इति भविष्यपुराणवचनात्।। उत्तरतन्त्रे—

---

१. 'कुन्दम' क. पाठः। २. 'रिब' क. पाठः। ३. 'माहृत्या' ग. पाठः।

परारोपितवृक्षेभ्यः पुष्पाण्यानीय चार्चयेत्। अविज्ञाय च तैर्यस्तु निष्फलं तस्य पूजनम्।। १।।

इति। ज्ञानमालायाम्—

फलेष्वामलकं श्रेष्ठं वादरं तिन्तिणीफलम्। दाडिमं मातुलिङ्गं च जम्बीरं पनसोद्भवम्।। १।।
कदलीचूतसम्भूतं श्रेष्ठं जम्बूफलं तथा। यजेदेतैः सदा विष्णुं पत्रैः पुष्पैः फलैरपि।। २।।

इति। विष्णुमित्युपलक्षणम्

दिवसे दिवसोत्फुल्लैः पुष्पैः पूजा तथा निशि। पुष्पाभावे प्रवालैर्वा कारयेच्चूतकोरकैः।। १।।

इति। अतः परमावरणपूजा। तत्र पुष्पोपचारान्ते उत्तरतन्त्रे—

मन्त्रसम्पुटितैर्वर्णैर्मातृकायाः सबिन्दुकैः। क्रमेण गन्धपुष्पाद्यैर्देवस्याङ्गे समर्चयेत्।। १।।
लयाङ्गमर्चयेद् देहे देवस्य मनुवित्तमः।

इति। ज्ञानार्णवेऽपि— ''लयाङ्गमर्चयेद् देहे न्यासस्थानेषु मन्त्रवित्'' इति। शारदातिलके—

अङ्गादिलोकपालान्तं यजेदावरणान्यपि। केसरेष्वग्निकोणादि हृदयादीनि पूंजयेत्।। १।।
नेत्रमग्रे दिशास्वस्त्रं ध्यातव्याश्चाङ्गदेवताः। तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः।। २।।
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः।

अङ्गादीति विशेषानभिधाने लोकपालशब्देन तदस्त्राणामप्यादानम् तत्राग्निकोणादीत्यादिपदस्य क्रमगाहित्वादग्निराक्षसवायव्येशानकोणेष्वङ्गचतुष्टयं यजेदिति वदन्ति। तत्र ''अग्नीशासुरवायव्यमध्ये दिक्ष्वङ्गपूजन''मिति ज्ञानार्णवदक्षिणामूर्तिसंहितावचनात्। ''हृदयं चाग्निदिग्भागे ऐशान्यां च शिरो यजेत्। शिखां निर्ऋतिदिग्भागे वायव्ये कवचं तथा।। अस्त्रमन्त्रं तथा दिक्षु नेत्रमग्रे प्रपूजयेत्''। इति दक्षिणामूर्तिकल्पवचनात्।

वह्नौ हृदयमैशान्यां शिरो रात्रिचरे शिखाम्। वायौ वर्म पुरो नेत्रमस्त्रं दिक्षु चतुर्ष्वपि।। १।।

इति। कपिलपञ्चरात्रवचनात्। चतुर्ष्वपीति दिव्यत्वाच्चतसृष्वित्यर्थः। ''इष्ट्वा हृदयमाग्नेय्यामैशान्यां च शिरो यजेत्। शिखा च नैर्ऋत्यां पूज्या वायव्यां कवचं यजेत्।। अभ्यर्च्य पुरतो नेत्रमस्त्रं दिक्षु समर्चयेत्।'' इति सोमशम्भुवचनात्।

पूर्वयाम्यान्तरे विष्णोर्हृदयं विनिवेशयेत्। शिरः पूर्वोत्तरे दद्याच्छिखां पश्चिमदक्षिणे।। १।।
पश्चिमोत्तरदिङ्मध्ये कवचं विन्यसेद्धरेः। अग्रतः केसरोद्देशे नेत्रं दिक्ष्वस्त्रराट् तथा।। २।।

इति नारदपञ्चरात्रवचनाच्चेति[2] अत्र ''अथावरणपूजा स्यात्पुरः प्राचीं प्रकल्पयेत्। तदादि परिवाराणां प्रादक्षिण्येन पूजनम्।।'' इति नृसिंहकल्पवचनात्।

''यष्टुरभिमुखा देवा देवाभिमुखतो दश। प्राच्यादिहरितो ज्ञेयाः पूजाहोमादिकर्मसु''।। इत्युत्तरतन्त्रवचनात्।। ''यत्रैव भास्वानुदयं प्रयाति प्राचीमिमां वेदविदो वदन्ति। मध्ये तु सा पूजकपूज्ययोश्च सदागमज्ञैः सततं विचिन्त्या''।। इति भैरवीतन्त्रवचनात्। देवाग्रं प्राचीं परिकल्प्य तदनुसारेणाग्नेय्यादिकं कल्पयित्वाङ्गानि पूजयेत्। आवरणदेवताश्चैवमेव प्रपूजयेदिति।। महाकपिलपञ्चरात्रे—

शिरःप्रभृतिमन्त्रेषु पूजायां च नमोन्तता। शिरोभिन्नेषु मन्त्रेषु होमे स्वाहान्तता भवेत्।। १।।

इति। आवरणदेवतास्तत्तत्कल्पेषु द्रष्टव्याः। मालिनीतन्त्रे—''स्वे स्वे स्थाने चाभिमुखान् पूजयेत्प्रोक्षणादिभिः।'' अभिमुखान् देवस्य। श्रीविद्यावरणपूजायां दक्षिणामूर्तिसंहितायां— ''श्रीविद्यासम्मुखीः स्मरे''दित्युक्तेः।

---

१. 'डी' ग. पाठः। २. 'नस्येति' क. ख. पाठः।

तथा सिद्धेश्वरीतन्त्रे—

अधृष्यश्च समर्थश्च मार्तण्डः स्वमरीचिभिः। तद्वदङ्गैर्निजैर्देव्यो ध्यातव्याः स्वमरीचिभिः।। १ ।।

इति। तूर्णायागे—

देवीं ध्यात्वा तच्छरीरान्मयूखनिकरं बहिः। विनिःसृत्य स्थिरीभूतं परिवारं विचिन्तयेत्।। १ ।।
अभ्यर्च्यावरणं त्वाद्यं मूलमुच्चार्य मन्त्रवित्। सम्पूज्य देवीं सम्बोध्य वदेन्मन्त्रमिमं ततः।। २ ।।
अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये[1] तुभ्यं प्रथमावरणार्चनम्।। ३ ।।
इति पुष्पाञ्जलिं दत्त्वा प्रणमेदतिभक्तितः। प्रत्यावरणमेवं तु तत्तन्नाम्ना समर्पयेत् ।। ४।।
इत्थमावरणं सम्यगभ्यर्च्य मनुवित्तमः। अन्ते यजेल्लोकपालांस्तत्तदस्त्राणि[2] च क्रमात्।। ५ ।।
इन्द्रं सुराधिपं पीतं वज्रहस्तं सवाहनम्। अग्निं तेजोऽधिपं रक्तं शक्तिहस्तं सुभूषणम्।। ६ ।।
यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत्। रक्षोऽधिपं निर्ऋतिं च खड्गहस्तं सुधूम्रकम्।। ७।।
पाशहस्तं सुशुभ्राङ्गं वरुणं यादसांपतिम्। वायुं प्राणाधिपं धूम्रमङ्कुशाढ्यकरं यजेत्।। ८ ।।
यक्षाधिपं कुवेरं च गदाहस्तं सितं यजेत्। विद्याधिपं शूलहस्तं स्फटिकाभं शिवं यजेत्।। ९ ।।
नागाधिपमनन्तं च गौरं चक्रायुधं यजेत्। लोकाधिपं विधातारं रक्तं पद्मकरं यजेत्।। १० ।।
ऐरावतं तथा मेषं महिषं मृगपूरुषम्। मकरं मृगमर्त्यौ च वृषं च विपहंसकौ।। ११ ।।
इन्द्रादिलोकपालानां वाहनानि विदुर्बुधाः। वज्रं पीतं सितां शक्तिं दण्डं कृष्णं समर्चयेत्।। १२ ।।
खड्गमाकाशसङ्काशं पाशं विद्युन्निभं यजेत्। अङ्कुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत्।।१३ ।।
त्रिशूलं नीलवर्णं च यजेन्मन्त्री ततः परम्। रथाङ्गं कुरुविन्दाभं पद्मं रक्तं समर्चयेत्।। १४।।
लोकपालायुधान्येवं क्रमेण परिपूजयेत्।

इति। अत्र केचित्— ''अन्ते यजेल्लोकपालान् भूत (मूल) पारिषदान्वितान्। हेतिजात्यधिपोपेतान् दिक्षु पूर्वादितः क्रमात्''। इति शारदातिलकवचनाद्यथास्थितपूर्वादिदिक्षु इन्द्रादिपूजनमिति वदन्ति, तन्न चतुरायतनदेवतास्थापन-प्रकारेणोक्तयुक्तेः सर्वेषामावरणानां देवाग्रत आरम्भाल्लोकपालावरणस्याप्यावरणत्वाच्च कल्पितप्राच्यनुसारेणैव पूजनं युक्तमिति विचारतः प्रतिभातीति।।

[3]पुनर्मूलं समुच्चार्य साङ्गायै सपरीति च। वारायै नाम देव्याश्च चतुर्थ्यन्तमुदीर्य च।। १ ।।
नम इत्यर्चयेद्गन्धपुष्पाद्यैः साधकस्त्रिधा। ततो यजेद् धूपदीपनैवेद्यैः सुमनोहरैः।। २ ।।

इति। प्रपञ्चसारे—

सगुग्गुल्वगरूशीरसिताज्यमधुचन्दनैः। साराङ्गारविनिक्षिप्तैर्मन्त्री नीचैः प्रधूपयेत्।। १ ।।

इति। कुलमूलावतारे—

प्रालेयं मलयोद्भवं जतुनखं सर्जं च कुष्टं समं
सिंल्हाख्यागुरुयुग् जटा[4] द्विगुणिता प्रत्येकसञ्चूर्णिता।

---

[1] 'र्च्चये' ग. पाठः। [2] 'तेषाम' ग. पाठः। [3] 'पर्व' ग. पाठः। [4] 'प' क. पाठः।

षड्भागा वरमाक्षिकस्य सुसिता चार्धाष्टभागान्विता
धूपोऽयं भुवि शङ्करेण कथितः श्रीसुन्दरीवल्लभः।। १।।

इति। शैवागमे—

धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदाणुना। अस्त्रेण पूजितां घण्टां वादयन् गुग्गुलुं दहेत्।। १।।

इति। नारदपञ्चरात्रे—

आवाहनेऽर्घ्ये धूपे च स्नाने नैवेद्ययोजने। नित्यमेवं प्रयुञ्जीत तन्मन्त्रामन्त्रितामपि।। १।।

चकाराद्दीपेऽपि। तथा—

पूजाकालं विनान्यत्र हितं नास्याः प्रचालनम्। नानया च विना पूजां कारयेत् सिद्धिलालसः।।१।।
दद्यात् तारावसाने च गजध्वनिपदं[1] ततः। मन्त्रमातः पदं चैव स्वाहाक्षरसमन्वितम्।। २।।
एकाशाक्षरो मन्त्रो घण्टायाः सर्वसिद्धिदः।

इति। उद्धारः सुगमः। कालिकापुराणे—

वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे। न धूपं वितरेद्भूमौ नासने न घटे तथा।। १।।
यथा तथाधारगतं कृत्वा तं विनिवेदयेत्। मेदोमज्जासमायुक्तान्न धूपान् विनिवेदयेत्।। २।।
न यक्षधूपं वितरेत् साधकस्तु कदाचन।

इति। यक्षधूपस्तु रालेति लोके प्रसिद्धः। विष्णुः— धूपार्थे न जीवतानमिति। प्रपञ्चसारे—

गोसर्पिषा वा तैलेन वर्त्या च लघुगर्भया। दीपितं सुरभिं शुभ्रं दीपमुच्चैः प्रदर्शयेत्।। १।।

इति। वाशब्देनोभयोरमिश्रणमुक्तम्। "न मिश्रीकृत्य दद्याच्च दीपस्नेहान् घृतादिकान्! कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं नयेत्[2]।।" इति कालिकापुराणवचनात्। तूर्णायागे—

पारावतभ्रमाकारं दीपं नेत्रादि दर्शयेत्। दक्षिणे सर्पिषा दीपं तिलतैलेन वामतः।। १।।
सिता वर्तिर्दक्षिणतो रक्ता वर्तिस्तु वामतः।

इति। कालिकापुराणे—

वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन। कुर्वंस्तु पृथिवीतापं यो दीपमुत्सृजेन्नरः।। १।।
स ताम्रतापं नरकं प्राप्नोत्येव शतं[3] समाः।

इति। रुद्रयामले—

नैव निर्वापयेद् दीपं साधकस्तु कदाचन। यस्तु निर्वापयेद् दीपं तस्य लक्ष्मीर्विनश्यति।। १।।
कूष्माण्डच्छेदिका नारी दीपनिर्वापकः पुमान्। विधवा च दरिद्रश्च भवेत् सप्तसु जन्मसु।। २।।

इति। मन्त्रतन्त्रप्रकाशे—"पाद्यमाचमनीयं च दत्त्वा नैवेद्यमर्पयेत्"। इति। सनत्कुमारकल्पे—

इत्थं कृष्णं समभ्यर्च्य पञ्चावरणसंयुतम्। कदलीफलसंयुक्तं पायसं विनिवेदयेत्।। १।।

इति। ज्ञानार्णवे—

शुद्धस्फटिकसङ्काशं चन्द्ररश्मिसमप्रभम्। लसत्सुवर्णजे पात्रे चारु मृद्वोदनं प्रिये।। १।।

---

[1] 'जय' ग. पाठः। [2] 'व्रजेत्' ग. पाठः। [3] 'न संशयः' इति पाठान्तरम्।

हिङ्गुजीरमरीचाद्यैरार्द्रकै रचितः शुभः। वटकः कुङ्कमाकारः पायसं हिमसन्निधम् ।। २।।
दुग्धमावर्तितं सम्यक् शर्करासारपूरितम्। कपिलाघृतसंयुक्तं भूर्जवच्छोभिमण्डकाः[1]।। ३।
शर्करा फाणिताश्चैव सूपं मुद्गोद्भवं तथा। नानाविधानि पेयानि व्यञ्जनानि वहूनि च।। ४।।

इति। उत्तरतन्त्रे–

निधाय स्वर्णजे पात्रे साधारं तच्च मण्डले। संस्थाप्य चतुरस्रे च संस्कुर्याच्छास्त्रमार्गतः।। १।।
अस्त्रमन्त्रेण सम्प्रोक्ष्य चक्रमुद्राभिरक्षितम्। वायुवीजेन संशोष्य[2] वह्निवीजेन सन्दहेत्।। २।।
स्पृशन् दक्षकराग्रेण सुधावीजेन मन्त्रवित्। अमृतीकृत्य तत्सर्वं मूलमन्त्रेण तत्पुनः।। ३।।
स्पृशन् कराभ्यां विधिवदष्टधा चाभिमन्त्रयेत्। धेनुमुद्रां प्रदर्श्याथ गन्धपुष्पैः समर्चयेत्।। ४।।
देवमभ्यर्च्य कुर्याच्च पुष्पाञ्जलिमनन्यधीः। हेमपात्रस्थितं द्रव्यं परमान्नं सुसंस्कृतम्।। ५।।
पञ्चधा षड्रसोपेतं गृहाण मम सिद्धये। मूलमन्त्रं समुच्चार्य स्वाहान्तं जलमर्पयेत्।। ६।।
कराभ्यां तत्समुद्धृत्य पूजितं च सुधात्मकम्। निवेदयामि भवते सानुगाय जुषाण तत्।। ७।।
सर्वपूजासु तन्नाम्ना नैवेद्यस्य मनुस्त्वयम्। प्राणसंज्ञस्तथापानो व्यानोदानमनू ततः।। ८।।
समानो ङेयुताः सर्वे प्रणवाद्या द्विठान्तकाः। पञ्चमन्त्रा भवन्तीह क्रमेण परिकीर्तिताः।। ९।।

इति। प्राणादीनां मुद्रास्त्वग्रे वक्ष्यन्ते। नैवेद्यसंस्कारस्तन्निवेदनप्रकारश्च प्रयोगे वक्ष्यते। स्मृतिसमुच्चये–

त्रिषु वर्णेषु दातव्यं विष्णवे पाकभोजनम्। खण्डाज्यादिकृतं पाकं न दुष्येच्छूद्रजन्मनः।। १।।

इति। श्राद्धकल्पे–शूद्रैस्त्वामान्नेनैव दशाहादिकं पिण्डं देयमित्युक्तं, तेन देवतानैवेद्यमप्यामान्नेनैव देयं तुल्यन्यायादिति। ज्ञानार्णवे–''सङ्कल्प्य परमेशान्यै नित्यहोमविधिं चरेत्''। इति सङ्कल्प्य नैवेद्यम्। उत्तरतन्त्रे–

इत्थं संस्कृते वह्नौ देवमावाह्य मन्त्रवित्। सम्पूज्य मूलमनुना पञ्चविंशतिमाहुतीः ।। १।।
हुनेदाज्येन हविषा तिलैर्वा पायसैः शुभैः। तण्डुलैस्तिलमिश्रैर्वा केवलैर्वाथ पुष्पकैः।। २।।
अङ्गावरणदेवानामेकैकामाहुतिं हुनेत्। उद्वास्य वह्निदेवं तु[3] पूजास्थानं व्रजेत्ततः।। ३।।
उपविश्यासने मन्त्री दद्याद्भूतबलिं ततः। ईशाने मण्डलं कृत्वा साधारं तत्र निक्षिपेत्।। ४।।
अन्नव्यञ्जनतोयाद्यं पात्रे पुष्पादिपूजिते। ध्यात्वा भूतानि सम्पूज्य ततस्तेभ्यो बलिं हरेत्।। ५।।

इति। भूतानां ध्यानं पीठपूजाप्रकरणे प्रोक्तम्। बलिमन्त्रो बल्युत्सर्गप्रकारश्च प्रागेवोक्तः। उद्वास्य पूजाचक्रे देवं स्वात्मनि वह्नौ चेति अग्निसंस्कारः प्रागेवाभिहितः। सङ्क्षेपप्रकारेऽपि वसिष्ठः– ''अग्न्याधानादिकं कर्म नित्यहोमे न विद्यते''। इति।। नारदीये–''पुनराचमनं दद्यात्करोद्वर्तनमेव च''। पुनराचमनीयमुत्तरापोशानं चकाराद् गण्डूषदन्तधावनादीन्युक्तानि। प्रपञ्चसारे–''पुनर्नैवेद्यमुद्धृत्य पुरोवत्परिपूज्य च। मुखवासादिकं दत्त्वा'' इति।। नारायणीये–

सकर्पूरं च ताम्बूलं दद्यान्नीराजनं तथा[4]। समर्प्य मुकुटादीनि भूषणानि विचक्षणः।। १।।
आदर्शयेत् तथादर्शं कल्पयेच्छत्रचामरे।

इति। अगस्त्यः–

---

[1] 'ला:' क. पाठः। [2] 'ध्य' क. ग. पाठः। [3] 'च' क. पाठः। [4] 'ततः' ग. पाठः।

कर्पूरशकलोन्मिश्रं नागवल्लीदलैर्युतम्। सुधाबिन्दुसमायुक्तं पूगीफलमनोहरम्।। १।।
ताम्बूलं रघुनाथाय दत्त्वा कामानवाप्नुयात्।

इति। सुधाबिन्दुश्चूर्णम्। नीराजनमाह सोमशम्भुः—''शिरस्यारोप्य देवस्य दूर्वाक्षतपवित्रकम्''। इति नीराजनशब्दे—नारात्रिकमुच्यते। तत्र ज्ञानार्णवे—

आरात्रिकं ततः कुर्यात्सर्वकामार्थसिद्धिये। सौवर्णे राजते कांस्ये लोकनेत्रमनोहरम्[1]।। १।।
कुङ्कुमेन लिखेत्पद्मं वसुपत्रं वरानने। दीपमेकं कर्णिकायां वसुपत्रेऽष्टदीपकान्।। २।।
यवगोधूमरचितान् शर्करादुग्धसंयुतान्। वलयाङ्कितशोभाभिः शोभितान् घृतपूरितान्।। ३।।
अभिमन्त्र्य ततो मन्त्री रत्नेश्वर्या ततः परम्। मूलमन्त्रेण चाभ्यर्च्य ततश्चारात्रिकं चरेत्।। ४।।
तत्पात्रं तु समुद्धृत्य मस्तकान्तं पुनः पुनः। नववारं महादेव्यास्ततो नीराजनं चरेत्।। ५।।
आरात्रिकं महादेव्याश्चक्रमुद्रां प्रदर्शयेत्।

इति। रत्नेश्वरीमन्त्रः प्रागेवोदधृतः। कात्यायनीतन्त्रे—

इत्थमारात्रिकं कृत्वा प्रणम्य परदेवताम्। प्राणायामत्रयं कृत्वा मूलमन्त्रेण साधकः।। १।।
न्यासं कृत्वा यथापूर्वं देवीं ध्यात्वा हृदम्बुजे। मूलमन्त्रं यथाशक्ति जपेत्तद्गतमानसः।। २।।

इति। कुलार्णवे—

ग्रथित्वा मातृकावर्णैर्मूलमन्त्राक्षराणि च। क्रमोत्क्रमात् त्रिरावृत्त्या मन्त्रशुद्धिरितीरिता।। १।।

इति। शारदातिलके—

सहस्रकृत्वः सञ्जप्य मूलमन्त्रमनन्यधीः। तं जपं सर्वसम्पत्त्यै देवतायै समर्पयेत्।। १।।

इति। नित्यहोमे कालान्तरमाह—दक्षिणामूर्तिः ''यथाशक्ति जपं कृत्वा नित्यहोमं समाचरेत्'' इति। शैवागमे—

अष्टोत्तरसहस्रं तु तदर्धं त्रिशतं तु वा। अष्टोत्तरशतं वापि जपेन्नित्यमतन्द्रितः।। १।।

जपो जपसमर्पणप्रकारश्च प्रयोगे वक्ष्यते।

इत्थं जपं समर्प्याथ घण्टावादनपूर्वकम्। स्तुवीत स्तुतिभिः सम्यक् साधको भक्तिसंयुतः।। १।।

इति। उत्तरतन्त्रे—

पौराणिकैर्वैदिकैश्च मूलमन्त्रेण चैव हि। प्रदक्षिणं प्रणामं च कुर्याद्धर्मार्थसाधनम्।। १।।
ततः क्षमापयेन्मन्त्रैर्वक्ष्यमाणैर्महेश्वरि।

इति। क्षमापणमन्त्राः प्रयोगे वक्ष्यन्ते अत्र पौराणिकैर्वैदिकैरिति त्रैवर्णिकपरम्। मूलमन्त्रेणेति शूद्रपरं ज्ञेयम्, शूद्राणां पौराणिकस्तवपाठेऽपि निषेधात्। यदुक्तं कालिकापुराणे—

मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतिम्। पठन्नरकमाप्नोति पितृभिः सह पापकृत्।। १।।

इति। पञ्चरात्राणां तु श्रवणेऽपि नाधिकारः। यदुक्तं नारदपञ्चरात्रे—

ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते। शूद्रादीनां न तच्छोत्रपदवीमधिरोहति।। १।।

इति। तदुक्तं मेरुतन्त्रे—

---

१. 'रमम्' ग. पाठः। २. 'ञ्चित' ग. पाठः।

ब्राह्मणो वेदमन्त्राद्यैः क्षत्रियः संहितादिभिः। पौराणिकाद्यैर्वैश्यस्तु शूद्रस्तु प्राकृतादिभिः।। १।।
मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतिम्। पठन्नरकमाप्नोति पितृभिः सह पापकृत्।। २।।
यः शूद्रो बुद्धिपूर्वं तु शृणुयाच्छ्रावयेद् द्विजः। वदन्तौ द्वौ दुःखितौ स्तोऽस्मिन् भवेऽन्ते च नारकौ।।३।।
अधिकारमदाद्यस्तु धनस्य मदतोऽपि वा। शूद्रश्च शृणुयाद्वेदं स निर्वंशश्च निर्धनः ।। ४।।
अज्ञानाच्चेच्छ्रुतो वेदः श्रावितो वा द्विजन्मना। प्राजापत्यत्रयं कृत्वा तौ द्वौ शुद्धौ भविष्यतः।। ५।।

इति। शैवागमे—

अर्घ्यपात्रं समुद्धृत्य मूलमुच्चार्य मन्त्रवित्। साधु वासाधु वा कर्म यद्यदाचरितं मया।। १।।
तत्सर्वं भगवञ्छम्भो गृहाणाराधनं परम्। इत्यर्घ्योदकमुत्सृज्य किञ्चिद्देवस्य दक्षिणे।। २।।
करे समर्पयेद्विद्वान् कृतमाराधनं शिवे।

इति। कुलार्णवे—

कृतार्चनादिकं सर्वं समन्त्रोदपुरःसरम्। इतः पूर्वादिमनुना देवतायै समर्पयेत्।। १।।

इति। इतः पूर्वमिति मन्त्रः प्रागेव प्रदर्शितः। सनत्कुमारः—''उद्वासयेत्ततो देवं परिवारगणैः सह''।। इति। प्रपञ्चसारे—''स्तुत्वेन्दुखण्डपरिमण्डितमौलिमेवमुद्वासयेत्पुनरमुं हृदयाम्बुजे स्वे'' इति। शिवरहस्ये—

रश्मिरूपा महेशस्य पूजिता याश्च देवताः। श्रीशिवाङ्गे विलीनास्ताः सन्तु सर्वाः शुभावहाः।। १।।
इति पुष्पाञ्जलिं दत्त्वा प्रणम्य परिभावयेत्। देवस्याङ्गे विलीनं तद्रश्मिवृन्दमशेषतः।। २।।
तेजोरूपं शिवं ध्यात्वा क्षमस्वेति पुनः पुनः। क्षमाप्यारोपयेत् स्वीयहृदम्भोजे महेश्वरम्।। ३।।
गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ।। ४।।
विसृज्यानेन मन्त्रेण ततः पूरकवायुना। ध्यायंस्तु मन्त्रेणानेन नत्वा तं स्थापयेद्धृदि।। ५।।
तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वर। यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि।। ६।।

विसृजेत्संहारमुद्रया।

संहारमुद्रां बद्ध्वा च तेजोरूपां महेश्वरीम्। विभाव्य पुष्पेणोद्धृत्य वहन्नासाध्वना शिवे।। १।।
प्रवेश्य द्वादशान्तस्थसहस्रारसरोरुहे। विश्राम्य मध्यनाड्या तामानीय हृदयाम्बुजे।। २।।
संस्थाप्य सम्यक् सम्पूज्य स्वात्मानं तन्मयं स्मरेत्।

इति हंसपारमेश्वरवचनात्। कुलमूलावतारे—

ऐशान्यां मण्डलं कुर्याद्द्वारपद्मविवर्जितम्। विसर्जनार्थं निर्माल्यधारिण्याः पूजनाय वै।। १।।
निक्षिप्य तस्मिन्निर्माल्यं मन्त्रेण तु समर्चयेत्। चण्डेश्वरि महादेवि निर्माल्यैश्चन्दनादिभिः।। २।।
लेह्यचोष्यान्नपानादिनिर्माल्यस्रग्विलेपनम्। निर्माल्यभोजिन्यै तुभ्यं ददामि श्रीशिवाज्ञया।। ३।।
इति नैवेद्यशेषं तु दत्त्वा नत्वा विसर्जयेत्।

इति। गणेश्वरपरामर्शिन्याम्— ''लम्बोदराय निर्माल्यमैशान्यां मण्डले न्यसेत्'' इति। सम्मोहनपञ्चरात्रे—''विश्वक्सेनाय निर्माल्य नैवेद्यं च निवेदयेत्''। शैवागमे—

पूर्वोत्तरदिशि प्रान्ते चण्डेशं मण्डलेऽर्चयेत्। देवदेवस्य निर्माल्यैर्ध्यायन्तं चन्द्रशेखरम्।। १।।

इति। वामदेवतन्त्रे—

तेजश्चण्डोऽस्य निर्माल्यभोक्ता देवेशि यत्नतः। तस्मै समर्पयेन्नित्यं नाजिघ्रेन्नाक्रमेच्च तत्।। १।।

इति। उत्तरतन्त्रे—

ततो भास्करवीजेन सहितेनामुना ततः। मन्त्रेण भास्करायार्घ्यमच्छिद्रार्थं निवेदयेत्।। १।।
ओंनमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये सवित्रे कर्मदायिने।। २।।
ततः कृत्वाञ्जलिर्भूत्वा पवित्वा मन्त्रमीरितम्। एकाग्रमनसा वाग्नेरच्छिद्रमवधारयेत्।। ३।।
ओंयज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम। अच्छिद्रमस्तु तत्सर्वं भास्करस्य प्रसादतः।। ४।।

भास्करबीजं त्र्यक्षरमन्त्रः स मन्त्रतत्प्रकरणे बोद्धव्यः। विजयमालिनीतन्त्रे—

अर्घ्यतोयेन देवेशि गन्धं पूजावशेषितम्। आलोड्य किञ्चिन्मूलेन मन्त्रयेदष्टधा शिवे।। १।।
प्रोक्षयेत्तेन तोयेन स्वात्मानं मूलमन्त्रतः। निर्माल्यं मस्तके धार्यं मूलमन्त्रेण मन्त्रिणा।। २।।
प्राश्य पादोदकं देवि नैवेद्यं विभजेत्प्रिये। तद्भक्तेभ्यः स्वयं भुक्त्वा तन्मयो विहरेत्सुखम्।। ३।।

न तु शिवादिप्रसादस्वीकारनिन्दावचनविरोधः तस्याशुचिपरत्वात्। स्कन्दपुराणे तन्निर्माल्यस्वीकारस्योक्तत्वात्। यथा—

ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत्। तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते।। १।।
स्नपयित्वा विधानेन यो लिङ्गस्नपनोदकम्। त्रिः पिबेत् त्रिविधं पापं तस्येहापि प्रणश्यति।। २।।
लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्धाभिषेचनम्। गङ्गास्नानफलं तस्य जायतेऽत्र विपाप्मनः।। ३।।

इति। तथा—

निर्माल्यं हि तु यो भक्त्या शिरसा धारयिष्यति। अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः।। १।।
नरके पतते घोरे तिर्यग्योनौ प्रजायते।

इति। कालिकापुराणे—

फलं पुष्पं च ताम्बूलमन्नपानादिकं च यत्। अदत्त्वा तन्महादेव्यै न भोक्तव्यं कदाचन।। १।।
पथि वा पर्वताग्रे वा सभायामपि साधकः। तथा तस्यै निवेद्यैव स्वमर्थमुपकल्पयेत्।। २।।

इति। वराहपुराणे—

विष्णुरुद्रान्तरं ब्रूयाच्छीगौर्योरन्तरं तथा। नास्तिकानां तु मूर्खाणां वाक्यं शास्त्रविगर्हितम्।। १।।

इति। भविष्यपुराणे—

यथा शिवस्तथा विष्णुर्यथा विष्णुस्तथा ह्युमा। उमा यथा तथा गङ्गा चतूरूपं न विद्यते।। १।।

इति। तत्रैव—

विष्णुरुद्रान्तरं यस्तु श्रीगौर्योरन्तरं तथा। गङ्गागौर्योरन्तरं च यो ब्रूते मूढधीस्तु सः।। १।।
रौरवादिषु घोरेषु नरकेषु पतत्यधः।

इति। भविष्योत्तरे—

यो ब्रह्मा स हरिः प्रोक्तो यो हरिः स महेश्वरः। महेश्वरः स्मृतः सूर्यः सूर्यः पावक उच्यते।। १।।

पावकः कार्तिकेयोऽसौ कार्तिकेयो विनायकः। गौरी लक्ष्मीश्च सावित्री शक्तिभेदाः प्रकीर्तिता।।२।।
देवं देवीं समुद्दिश्य यः करोति व्रतं नरः। न भेदस्तत्र मन्तव्यः शिवशक्तिमयं जगत्।। ३।।

इति। पद्मपुराणे–

सौराश्च शैवगाणेशा वैष्णवाः शक्तियाजकाः। मामेव ते प्रपद्यन्ते वर्षापः सागरं यथा।। १।।
एकोऽहं पञ्चधा जातः क्रीडता नामभिः किल। देवदत्तो यथा कश्चित् पुत्राद्याह्वाननामभिः।। २।।

इति। विष्णुवचनं गीतासु–''अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।'' इति। प्रभुः फलदाता। विष्णुपुराणे–

यजन् यज्ञान् यजत्येनं जपत्येनं जपन् नृप। घ्नंस्तथान्यं हिनस्त्येनं सर्वभूतो यतो हरिः।। १।।

इति। इत्थं सर्वत्र सर्वरूपेण श्रीविष्णोरेव क्रीडितत्वात् स्वेष्टदेवतास्वोपहारस्वीकारो न दोषावह इति प्रतिभाति विचारकाणामिति। अत्रादत्त्वा तदित्यनेन निवेद्यैवेत्यनेन च किञ्चिद्देयं किञ्चिद्भोक्तव्यमिति वा, यद्देयं तदथ भोक्तव्यमिति वा विधीयते। अत्र केचिद्विनियुक्तविनियोगदोषाद्दत्तापहारप्रसङ्गाच्च पूर्वः पक्षः श्लाघीयान् इति वदन्ति। वस्तुतस्तु किञ्चिदग्रशेषादिवादाभावात् कर्मान्तराश्रुतेर्निवेदनभोजनयोरेककर्मकत्वाच्छ्रुतिसंवादात् तन्त्रदेशितत्वाच्चोत्तरपक्ष एव श्रेयानिति। श्रुतिः–'' तस्माद्विद्वांसो विष्णुर्यद्वृतं भक्षयेयुः'' इति। नारदपञ्चरात्रे–

यत्किञ्चित् स्वीयमश्नीयात् पुरो विप्र निवेदितम्। विष्णोर्वाङ्कायमनसा मूलं साष्टशतं जपेत्।। १।।

इति प्रायश्चित्तमप्युक्तम्। विप्रेति नारदसम्बोधनम्। नित्यपूजायां सङ्क्षेपप्रकारः प्रयोगे वक्ष्यते।। अथ नित्यपूजायामपि यावत्यावश्यको क्रिया तामाह, प्रपञ्चसारे

अथ पुनराचम्य गुरुः प्राग्वदनो विष्टरोपविष्टः सन्। प्राणायामं सलिपिन्यासं कृत्वा न्यसेत्तदृष्यादीन्।।१।

इति। अत एव प्राणायाम-मातृकान्यास-ऋष्यादिकराङ्गन्यासानभिधायोक्तं तत्रैव–''जपारम्भे मनूनां तु सामान्येयं प्रकल्पना'' इतीयं प्राणायामादिक्रिया प्रकर्षेण कल्प्यते समर्प्यते अधिकार्यते इति प्रकल्पना, अधिकारसम्पादना सामान्या सवर्णाश्रमसाधारणा, तेन तैरेव सर्वेषां पूजाधिकारः। अत एव तेषामकरणे निन्दा श्रूयते। यथागस्त्यसंहितायाम्–

प्राणायामैर्विना यद्यत्कृतं कर्म निरर्थकम्। अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिः।। १।।

इति। दक्षिणामूर्तिकल्पे–

जपार्थं सर्वमन्त्राणां विन्यासेन लिपेर्विना। कृते तन्निष्फलं विन्द्यात्तस्मादादौ लिपिं न्यसेत्।। २।।

इति। कपिलपञ्चरात्रे–

ऋषिच्छन्दोदेवतानां विन्यासेन विना यदा। जप्यते साधितोऽप्येष तत्र तुच्छफलं भवेत्।। १।।

इति। गौतमीये–

ध्यानं जपार्चना होमः सिद्धमन्त्रकृता अपि। अङ्गविन्यासविधुरा न दास्यन्ति फलं त्वमी।। १।।

अत एव विहितानुष्ठाने दोषमाह याज्ञवल्क्यः–

विधिदृष्टं तु यत्कर्म करोत्यविधिना नरः। फलं न किञ्चिदाप्नोति क्लेशमात्रं हि तस्य तत्।। १।।

इति। उत्तरतन्त्रे–

प्रवासे पथि दुर्गे वा स्थानाप्राप्तौ जलेऽपि वा। कारागारनिबद्धो वा प्रायोवेशगतोऽपि वा।। १।।

---

१. 'प्रसाद' ग. पाठः।

मनोभये समुत्पन्ने सिंहव्याघ्रसमाकुले[१]। परचक्रागमे चैव कुर्यान्मानसपूजनम् ।। २।।
मनसा हृदयस्यान्तर्ध्यात्वा योगाख्यपीठकम्। तत्रैव पृथिवीमध्ये पूजां तत्र समाचरेत्।। ३।।
मैत्रप्रसादनं स्नानं दन्तधावनकर्म वै। अन्यच्च सर्वं मनसा ध्यात्वा कुर्याच्च पूजनम्।। ४।।
यथा पुष्पादिभिः पूजा बहिर्देशे विधीयते। तथा हृद्यपि कर्तव्याः सर्वाश्च प्रतिपत्तयः।। ५।।

इति। जले प्रवहणादौ। प्रायोवेशगतो गृहीतानशनव्रतः। अन्यच्च सर्वमिति। मैत्रप्रसादनं दन्तधावनव्यतिरिक्तमित्यर्थः। मैत्रादीनां मानसासम्भवात्। मैत्रम्—''यः शौचनिरतो विप्रः स वै मैत्र उदाहृतः'' इति भागुरिकृतसमुच्चयलिखित—ब्रह्माण्डपुराणवचनात्। नारदपञ्चरात्रे—

ब्राह्म्यान्मुहूर्तादारभ्य प्रागंशं विप्र वासरात्। जपध्यानार्चनास्तोत्रैः कायवाङ्मनसा युतैः।। १।।
अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतम्। ततः पुष्पफलादीनामुत्थायार्चनमाचरेत्।। २।।
भगवद्यागनिष्पत्तिकरणं प्रहरं परम् । ततोऽप्यङ्गेन यागेन पूजयेत्परमेश्वरम् ।। ३।।
साधकः प्रहरं विप्र इज्याकालो हि स स्मृतः। श्रवणं चिन्तनं व्याख्या ततः पाठसमन्विताः।।४।।
स्वाध्यायकालं तद्विद्धि कालं तं मुनिसत्तम। दिनावसाने सम्प्राप्ते पूजां कृत्वा समभ्यसेत्।।५।।
योगो निशावसानेऽथ विश्रामैरन्तरैः कृतम्।

इति। विप्रेति नारदसम्बोधनम्। आदिपदेन समिदाद्याहरणम्। ''समित्पुष्पकुशादीनां स कालः समुदाहृतः'' इति वचनात्। अङ्गेन यागेनेति स्वयमेव विवृणोति। ''मध्वाज्येन च दध्ना च पूजा च पशुना च या। त्रितयं तच्च यागाङ्गं तुर्यं मन्ये च पूजनम्।।'' मध्वाज्येनेत्यनेन मधुपर्क उक्तः, पशुस्तदङ्गम्, विष्णुधर्मोत्तरे—

मधुपार्किकपश्वर्थे ततो मात्रां निवेदयेत्। सहिरण्यं बीजपात्रं द्रविणेन सदैव तु।। १।।
पशुः कलौ न कर्तव्य इत्याह भगवान् भृगुः।

इति। द्रविणं दक्षिणा, एतन्मध्याह्नपूजानन्तरं सति सम्भवे कार्यम्। यथा तत्त्वसारसंहितायाम्—

आतुरी सौतिकी चैव त्रासी दौर्बोधकी तथा। साधना भाविनी चेति पञ्चधा भिद्यते पुनः।। १।।
यदि लङ्घनपर्यन्तो व्याधिरात्मनि दृश्यते। तदा पूजा न कर्तव्या स्थण्डिले प्रतिमासु च।। २।।
न स्नानं दन्तकाष्ठं वा कुर्याद्धोमममथापि वा। रविमण्डलमालोक्य प्रतिमामथ वा पुनः।। ३।।
मूलमन्त्रं सकृज्जप्त्वा पुष्पं साक्षतमुत्क्षिपेत्। अन्ते व्याधिभिरत्युग्रैः क्लान्तश्चैवोपवासकैः।। ४।।
न दोषोऽस्त्विति सम्प्रार्थ्य पुनः पूर्ववदाचरेत्।

इति सम्प्रार्थ्य जपहोमादिकं कार्यम्।

यस्तु रोगवशान्मोहवशाद्दोष उपागतः। जपेन क्षालनीयः स्याद् दानेन हवनेन च।। १।।
ध्यानेनापि मुनिश्रेष्ठ ज्ञात्वा कर्म बलाबलम्।

इति नारदपञ्चरात्रवचनात्। तथा—

अथ सूतकिनः पूजां वदाम्यागमबोधिताम्। स्नात्वा नित्यं च निर्वर्त्य मानस्या क्रियया तु वै।।१।।
बाह्यपूजाक्रमेणैव स्थानयोगेन पूजयेत्। यदि कामी न चेत्कामी नित्यं पूर्ववदाचरेत्।। २।।

---

[१] 'भया' ग. पाठः।

त्रासिनो वक्ष्यते पूजा यथैवागमबोधिता। लब्धं वा यदि वालब्धमर्घ्यपात्रादि साधनम्।। ३।।
पूजोदकेन कर्तव्या तच्चेत्तोयं न विद्यते। तदा सम्पूजयेद् देवं भावनाकुसुमादिभिः।। ४।।
दौर्बोधकीं प्रवक्ष्यामि पूजामागमबोधिताम्। मूर्खस्त्रीबालवृद्धाश्च दुर्बोधा इति भाविताः।। ५।।
रत्नमण्डपधर्मादिचतुष्कमुरगाम्बुजम्। मूलमूर्तिः षडङ्गानि तेषां पूजा विधीयते।। ६।।
अन्येषामपि सर्वेषां प्रोक्ता सङ्क्षेपकर्मणि। सर्वेषामेव वस्तूनां अलाभे भावनैव हि।। ७।।
निर्मलेनोदकेनाथ पूर्णतेत्याह नारदः। तथा पुनस्त्रिधा पूजा उत्तमाधममध्यमा।। ८।।
....। पत्रपुष्पाम्बुनिष्पाद्या पूजा चाधमसंज्ञिका।। ९।।
विदिताखिलवेदार्थैर्ब्रह्मविद्भिरकल्मषैः। क्रियमाणा तु या पूजा सात्त्विकी सा विमुक्तिदा।। १०।।
राजर्षिभिस्तपोनिष्ठैर्भगवत्तत्त्ववेदिभिः। या पूजा क्रियते सम्यक् राजसी सा सुखप्रदा।। ११।।
स्त्रीबालावृद्धमूर्खाद्यैर्भक्तैरक्षुद्रमानसैः। या पूजा क्रियते नित्यं तामसी सा प्रकीर्तिता।। १२।।

इति। उत्तरतन्त्रे—

आराधनासमर्थश्चेद् दद्यादर्चनसाधनम्। यो दातुं नैव शक्नोति कुर्यादर्चनदर्शनम् ।। १।।
नैकं तु यस्य विद्येत सोऽधो यात्येव नान्यथा। यस्तु भक्त्या प्रयत्नेन स्वयं सम्पाद्य चाखिलम्।।२।।
साधनं चार्जयेद्विद्वान् स समग्रफलं लभेत्।

इति। कुम्भसम्भवः—

स्वस्थः समर्थः कुर्वीत चोत्तमैरेव साधनैः। मध्यमो मध्यमेनैव न्यूनैर्न्यूनस्तपोधनैः।। १।।
आपन्नश्चेत्समर्थोऽपि न्यूनैरेव समाचरेत्। पूजाकर्म विशेषेण देशकालानुसारतः।। २।।

इति। तथा मेरुतन्त्रे—

अथ सूतकिनो नित्यं वैदिकं तु स्मृतीरितम्। कृत्वा तान्त्रिकपूजादि मनसैव समाचरेत्।। १।।

इति। भविष्यपुराणे—

विभवे सति यो मोहान्न कुर्याद्विधिविस्तरम्। न तत्फलमवाप्नोति प्रलोभाक्रान्तमानसः।। १।।

इति। शिवयामले—

शिवपितृवनमेकलिङ्गवृक्षोद्भवजलसङ्गमचत्वरे सुदेशे।
अपि शिवगदितं विमुच्य शस्तं निजगृह एव तु पूजनं मुमुक्षोः।। १।।
अरण्ये स्वल्पकामानां विद्ध्यर्थे पूजनं हितम्। निष्कामानां मुमुक्षुणां गृहे शस्तं सदार्चनम्।। २।।

।। इति श्रीमहामहोपाध्यायवर्यभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे एकोनविंशः श्वासः।। १९।।

* * *

अथ

विंश: श्वास:

* * *

अथ नित्यपूजाप्रयोग:। तत्र श्रीमान्साधकेन्द्रो रजनीतुर्ययामे शयनाद्दक्षिणाङ्गेन समुत्थाय, स्वेष्टदेवतां स्मृत्वा वामपादं भुवि विन्यस्योत्थाय गृहाद्बहिर्निर्गत्यावश्यकं कृत्वा हस्तौ पादौ च प्रक्षाल्य, रात्रिवास: परित्यज्य धौते वाससी परिधायाचम्य देवतायागमन्दिरं सम्मार्ज्य गोमयेनोपलिप्य वितानादिभिरलङ्कृत्य, तत्र स्वासने उपविश्य पूजामूर्तेर्निर्माल्यमपकृत्य प्रक्षाल्य संस्थाप्य प्राणायामादित्रयर्ष्यादिन्यासपूर्वकं पूर्वदिनपूजावशिष्टपत्रादिना मूर्तिं त्रिरभ्यर्च्य पाद्याचमनीये दत्त्वा, देवाय कर्पूरशकलैर्दन्तधावनं कारयित्वा सुगन्धिजलैर्गण्डूषमुखप्रक्षालनादि दत्त्वा पुनराचमनीयं निवेद्य करास्यप्रोञ्छनाय सूक्ष्मनिर्मलवस्त्रं दत्त्वा, शिरसि श्वेतसहस्रदलकमलकर्णिकायां श्रीगुरुं श्वेतवस्त्राभरणभूषितं वराभयज्ञानमुद्रापुस्तककरं चन्द्रकान्तनिभं सुप्रसन्नं श्वेतगन्धानुलेपनं श्वेतमाल्यविभूषितं वामाङ्कगतया रक्तवर्णया रक्तवस्त्राभरणगन्धमाल्यविभूषितया वामकरधृतलीलाकमलया देव्या दक्षिणभुजेनालिङ्गितं त्रिनेत्रं शान्तमन्तर्मुखं शिवरूपिणं[1] ध्यात्वा, तच्चरणारविन्दयुगलनि:सृतपीयूषधारया स्वदेहमभिषिक्तं सञ्चिन्त्य ''श्रीअमुकानन्दनाथश्रीपादुकां पूजयामि'' इति तद्गुरुणा तत्सङ्केतकृतनाम्ना, तदज्ञाने ''श्रीगुरुभ्यो नम:। श्रीगुरुपादुकाभ्यो नम:'' इति मन्त्रेण वा गन्धादिभिरुपचारैर्मनसा वा सम्पूज्य।

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम्।
योगीन्द्रमीड्यं भवदु:ख[2]वैद्यं श्रीमद्गुरुं नित्यमहं नमामि।।

इति प्रणम्य स्वहृदि लयं भावयेत्। ततो मूलाधारादिब्रह्मरन्ध्रान्तमुद्यत्सूर्यसहस्रप्रभं सुषुम्नान्तस्तेजोदण्डनिभं मूलमन्त्रं ध्यात्वा तत्तेजसा व्याप्तं स्वशरीरं सञ्चिन्त्य वक्ष्यमाणविधिना मूलमन्त्रेण प्राणायामत्रयं कृत्वा वक्ष्यमाणर्ष्यादिकरषडङ्गन्यासान् विन्यस्य हृदयकमले वक्ष्यमाणरूपं देवं ध्यात्वा मानसैरुपचारै: सम्पूज्य मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य स्तुत्वा प्रणम्य,

त्रैलोक्यचैतन्यमयादिदेव श्रीशङ्कर त्वच्चरणाज्ञयैव ।
प्रात: समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये।।
संसारयात्रामनुवर्तमानं त्वदाज्ञया शङ्कर देवदेव।
स्पर्धातिरस्कारकलिप्रमादभयानि मां माभिभवन्तु नाथ।।
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्ति:।
त्वयेन्द्रियाणामधिदैवतेन[3] यथा नियुक्तोऽस्मि तथा करोमि।।

एते प्रार्थनाश्लोका गणेशाद्युपासकैर्यथायोग्यमूह्या:, इति प्रार्थ्य

समुद्रमेखले देवि पर्वतस्तनमण्डले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे।।

---

१. 'शान्त' ख. पाठ:। २. 'भवरोग' क. पाठ:। ३. 'त्वया हृषीकेश हृदि स्थितेन'' इति। ''केनापि देवेन मयि स्थितेन'' इति वा पाठान्तरम्।

इति भूमिं प्रार्थ्य, श्वासानुसारेण तस्यां पादं निधायेष्टदेवतानामोदीर्योत्थाय पदे पदेऽस्त्रमन्त्रं स्मरन् ग्रामाद्बहिर्याम्यां नैर्ऋत्यां वा दिशि शरप्रक्षेपदूरमतीत्य दूरं गत्वा प्रमाणोक्तप्रकारेण स्थानादृष्यादीनुद्वास्य यथाविधि मलमूत्रोत्सर्गं प्रमाणोक्तविधिना शौचाचमनादिकं च विधायानिषिद्धदिनेषु विहितं दन्तकाष्ठमादाय ''क्लीं कामदेवाय सर्वजनप्रियाय नम:'' इति मन्त्रेण दन्तधावनं विधाय, दन्तकाष्ठं प्रक्षाल्य पुरत: शुद्धदेशे परित्यज्य, मूलमन्त्रेण मुखं प्रक्षाल्य कुशतिलगन्धाक्षतकुसुमधौतवस्त्राण्यादायास्त्रादिमन्त्रिशङ्कुनोद्धृतां शुचिस्थानान्मृत्तिकां च गृहीत्वा जलाशयं गत्वास्त्रमन्त्रादिमन्त्रितजलेन तीरं प्रक्षाल्य, तत्राभिमन्त्रितं कुशादिकं निधायोद्धृतजलेन तीर्थाद्बहि: कटिशौचं कृत्वा स्वशाखोक्तविधिना वैदिकस्नानं विधाय तदङ्गतर्पणं कृत्वा तीरं गत्वास्त्रमन्त्रेण मृत्तिकया मूर्धादिपादान्तं विलिप्य

''आधार: सर्वभूतस्य विष्णोरतुलतेजस:। तद्रूपाश्च ततो जातास्ता अप: प्रणमाम्यहम्।। ''

इति तीर्थजलं प्रणम्य सन्मुखीकरणमुद्रां बद्ध्वा प्राणवायुं निरुन्धन् जलान्त: प्रविश्य, तूष्णीं निमज्ज्योन्मज्ज्य नाभिमात्रे जले स्थित्वा ''अद्येहेत्यादि अमुकोऽहमिष्टदेवताप्रीत्यर्थं तान्त्रिकस्नानं करिष्ये'' इति सङ्कल्प्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा मूलमन्त्रस्य ऋष्यादिकरषडङ्गन्यासांश्च कृत्वा, स्वपुरतो जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य

''ब्रह्माण्डोदरतीर्थानि करै: स्पृष्टानि ते रवे। तेन सत्येन देवेश तीर्थं देहि दिवाकर।।''

इति सूर्यात्तीर्थं प्रार्थ्य क्रोमित्यङ्कुशमुद्रया सूर्यमण्डलं भित्त्वा

''गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु।।''

इति सूर्यमण्डलात् तीर्थमावाह्य पुर: कल्पिततीर्थमण्डले संयोज्य वक्ष्यमाणतीर्थशक्तिमन्त्रेण तीर्थशक्तिमावाह्य तत्र तां ध्यायेत्।। यथा–

सर्वानन्दमयीमशेषदुरितध्वंसां मृगाङ्कप्रभां
त्र्यक्षीं चोर्ध्वकरद्वयेन दधतीं पाशं सृणिं च क्रमात्।
दोर्भ्यां चामृतपूर्णहेमकलशं मुक्ताक्षमालां वरं
गङ्गासिन्धुसरिद्द्वयादिसहितां श्रीतीर्थशक्तिं भजे।।

इति ध्यात्वा, ''ओंह्रांह्रींह्रूंह्रैंह्रौंह्र: सर्वानन्दमये तीर्थशक्ति एह्येहि स्वाहा तीर्थशक्त्यै नम:'' इति तीर्थशक्तिं सम्पूज्य, ''ओंनमो भगवति अम्बे अम्बालिके अम्बिके महामालिन्यै एह्येहि भगवति अशेषतीर्थालवाले ह्रीं श्रीं शिवजटाधिरुढे गङ्गे गङ्गाम्बिके स्वाहा'' इति मन्त्रेणाष्टवारमभिमन्त्र्य तज्जलं ह्रींकारेणावलोड्य वमिति धेनुमुद्रयामृतीकृत्य, कवचमन्त्रेणावगुण्ठनमुद्रयावगुण्ठ्यास्त्रमन्त्रेण छोटिकाभि: संरक्ष्य, तत्र सचक्रं सावरणं देवं ध्यात्वा जलमयै: पञ्चोपचारै: सम्पूज्य मूलमन्त्रेणाष्टवारमभिमन्त्र्य, तत्र मूलमन्त्रं जपन् हृदि देवं स्मरन् त्रिर्निमज्ज्योन्मज्ज्य कुम्भमुद्रां बद्ध्वा मूलमन्त्रेण स्वशिरसि त्रिरभिषिच्य

''ओं सिसृक्षोर्निखिलं विश्वं मुहु: शुक्रं प्रजायते। मातर: सर्वदेवानामापो देव्य: पुनन्तु माम्।।''

इति मन्त्रेण चात्मानमभ्युक्ष्य

''यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि। ललाटे कर्णयोरक्ष्णोरापस्तु घ्नन्तु वो नम:।।''

इति प्रणम्य स्वाहान्तेन मूलमन्त्रेण त्रिराचम्य मूलेन च त्रि: सन्तर्प्य देवं विसृज्य तीरमागत्य, धौते वाससी परिधायोरुकरौ मृदाद्भिश्च प्रक्षाल्याचम्य, प्रमाणोक्तस्ववर्णविहितं तिलकमादौ विधाय शिवभक्ताङ्गभूतं भस्मत्रिपुण्ड्रधारणं

कुर्यात्। तत्र ब्राह्मणस्योर्ध्वपुण्ड्रं क्षत्रियस्य त्रिपुण्ड्रं वैश्यस्यार्धचन्द्राकारं शूद्रस्य वृत्ताकारम्।।

अथ भस्मधारणविधिः— तत्राग्निहोत्रोद्भवं वैवाह्याग्न्युद्भवं पूर्वोक्तविधिना वक्ष्यमाणविधिना वा संस्कृतशिवाग्नौ प्रमाणोक्तविधिनान्तरिक्षे गृहीतगोमयपिण्डं शुष्कं मूलमन्त्रेण दग्धं देवोद्वासनात् पूर्वमेव गृहीतमपक्वातिपक्वरहितं वस्त्रेण शोधितं कर्पूरादिसुवासितं भस्म सङ्गृह्य संस्थाप्य तेन वा त्रिपुण्ड्रधारणं कुर्यात्। तत्र प्रकारस्तु—मूलमन्त्रेण प्राणायामत्रयं कृत्वा शिरसि पिप्पलादऋषये नमः, मुखे गायत्रीछन्दसे नमः, हृदि श्रीरुद्राय देवतायै नमः, गुह्ये अग्निबीजाय नमः, पादयोः भस्मशक्तये नमः, मम मोक्षार्थे भस्मधारणे विनियोगः। इति ऋष्यादिन्यासं विधाय, अङ्गुष्ठयोः कालाय नमो हृदयाय नमः, तर्जन्योः कलविकरणाय नमः शिरसे स्वाहा, मध्यमयोः बलविकरणाय नमः शिखायै वषट्, अनामिकयोः बलप्रमथनाय नमः कवचाय हुं, कनिष्ठिकयोः सर्वभूतदमनाय नमः नेत्रत्रयाय वौषट्, करतलकरपृष्ठयोः मनोन्मनाय नमः अस्त्राय फट्, इति विन्यस्य, हृदयशिरःशिखाकवचनेत्रेषु प्रागुक्तपञ्चमन्त्रान् विन्यस्य अस्त्रमन्त्रेण तालत्रयं दशदिग्बन्धनं च कृत्वा

“विभूते भूतिमानासीद्वामदेवः सदाशिवः। रक्षाबन्धस्तया देवि रक्ष मामनघे सदा।।”

इति विभूतिं प्रणम्य, “सद्योजात”मित्यादिपञ्चानुवाकानां सांहितिकी देवतौपनिषदाः ऋषयः प्रथमद्वितीयचतुर्थानुवाकानां अनुष्टुप् “अघोरेभ्य” इत्यस्य स्वराडनुष्टुप् अन्त्या गायत्री, सर्वेषां रुद्रो देवता इति ऋष्यादिकं स्मृत्वा विन्यस्य, “ओं सद्योजातं प्रपद्यामि सद्योजाताय वै नमः। भवे भवे नातिभवे भजस्व मां भवोद्भवाय नमः।। १।। वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः।। २।। “अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। [१]सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्र रूपेभ्यः।। ३।।” तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्।।४।।, ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदाशिवोम्।। ५।। इति मन्त्रान् पठित्वा विभूतिमादाय वामकरे निधाय, भस्माभिमन्त्रणमन्त्रस्य ऋष्यादिन्यासं कुर्यात्। शिरसि अथर्वशिरसे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीरुद्रदेवतायै नमः। इति विन्यस्य “अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मानि”। इत्यभिमन्त्र्य, “आपो वा इत्यस्य प्रजापतिः ऋषिः यजुरापो देवता इति ऋष्यादिकं स्मृत्वा विन्यस्य “आपो वा इदं सर्वं विश्वा भूतान्यापः प्राण वा आपः पशव आपोऽन्नमापः सम्राडापो विराडापः स्वराडापः छन्दांस्यापो ज्योतींष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवःस्वरापः ओं”मिति मन्त्रेणाद्भिः संसिच्य। “मा नस्तोके” इत्यस्य भगवानृषिः जगती छन्दो हिरण्यगर्भो देवता इति ऋष्यादिकं स्मृत्वा विन्यस्य, “ओं मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते।।” इति मन्त्रेण सम्मर्द्य, “तस्माद् ब्रह्ममृदेतत्पाशुपतं पशुपाशविमोक्षाय” इति मन्त्रेणैकादशवारमभिमन्त्र्य द्विधा कृत्वैकेन भागेन “ईशानः सर्वविद्यानां” इति प्रागुक्तमन्त्रेण शिरसि। “तत्पुरुषाय” इति मुखे। “अघोरेभ्य” इति बाह्वोः। “वामदेवाय” इति कण्ठादिनाभ्यन्तम्। “सद्योजात” मिति ऊरुमूलादिपादद्वयपर्यन्तम्। इति सर्वाङ्गे भस्मोद्धूलनं कृत्वा हस्तौ प्रक्षाल्य द्वितीयभागमादाय, शिरसि ओंह्रींहरहर ओं नमः शिवाय। ललाटे ब्रह्मणे नमः। हृदये हव्यवाहनाय नमः। नाभौ स्कन्दाय नमः। कण्ठे पूष्णे नमः।

---

[१] “सर्वतः शर्वं सर्वेभ्यो” ख. पाठः।

दक्षवाहुमूले रुद्राय नम:। दक्षबाहुमध्ये आदित्याय नम:। दक्षमणिबन्धे चन्द्राय नम:। वामबाहुमूले वामदेवाय नम:। वामबाहुमध्ये प्रभञ्जनाय नम:। वाममणिबन्धे वसुभ्यो नम:। ककुदि शम्भवे नम:। पृष्ठे हराय नम:। ब्रह्मरन्धे परमात्मने नम:। इति त्रिपुण्ड्रधारणं कृत्वा वैदिकसन्ध्यां कृत्वा तान्त्रिकसन्ध्यां कुर्यात्।। अथ भस्मधारणविधिस्त्रैवर्णिकानामेव। अन्यैस्तु पञ्चाक्षरेण मूलमन्त्रेण वा त्रिपुण्ड्रधारणं कार्यमिति। शाक्तैस्तु कुङ्कुमयुक्तचन्दनादिनैव मूलमन्त्रेण त्रिपुण्ड्रधारणं कार्यमिति।।

अथ तान्त्रिकसन्ध्या–तत्र मूलमन्त्रेणाचम्य शिखां बद्ध्वा मूलेनैव प्राणायामत्रयं कृत्वा मूलमन्त्रस्यर्ष्यादिकरषडङ्गन्यासान् विन्यस्य, स्वपुरतो वमिति धेनुमुद्रया जलममृतीकृत्य मूलमन्त्रेण अष्टवारमभिमन्त्र्य, तज्जलबिन्दुभि: कुशैरकारादिक्षकारान्तैरेकपञ्चाशदक्षरै: सबिन्दुभि: प्रत्यक्षरं शिर: प्रोक्ष्य, मूलेन च त्रि: प्रोक्ष्य, सूर्यमण्डले यथोक्तरूपं ध्यात्वा देवम्, दक्षिणकरेण जलमादाय वामकराग्रेण त्रि: प्रोक्ष्यावशिष्टं वामकरस्थं जलं वामनासासमीपं नीत्वा तेजोमयं वामनासारन्ध्रेण स्वदेहान्त:प्रविष्टं ध्यात्वा, तेन जलेन स्वदेहान्त:स्थं सकलकलुषं प्रक्षाल्य कृष्णवर्णं तज्जलं दक्षिणनासारन्ध्रेण विनिर्गतं ध्यात्वा दक्षिणकरेणादाय स्ववामभागे वज्रशिलां ध्यात्वा ''ॐश्लींपशुहुंफट्'' इति पाशुपतास्त्रेण तस्यामास्फाल्य, हस्तौ प्रक्षाल्य मूलमन्त्रेण त्रिराचम्याञ्जलिं जलमादायोत्थाय स्वेष्टदेवतागायत्रीमुच्चार्य ''श्रीमहादेव एष तेऽर्घ्य: स्वाहा''। महादेवेत्युपलक्षणम्। इति त्रिरर्घ्याञ्जलिं सूर्याभिमुखमुत्क्षिप्य मूलमुच्चार्य ''श्रीमहादेवं तर्पयामि नम:'' इति त्रि: सन्तर्प्य, प्राग्वत् प्राणायामादिकं[१] कृत्वा सूर्यमण्डले देवं ध्यायन् ''ॐतन्महेशाय विद्महे वाग्विशुद्धाय धीमहि तन्न: शिव: प्रचोदयात्''।। इति शिवगायत्रीं तत्तद्देवतागायत्रीं यथाशक्ति जपित्वा मूलमन्त्रं वाष्टोत्तरशतं जपित्वा जपं समर्प्य स्तुत्वा प्रणम्य सूर्यमण्डलाद् देवं हृदि विसृज्य श्रीगुरुं प्रणमेदिति त्रिषु कालेषु तान्त्रिकसन्ध्याविधि:।। गणेशाद्युपासकैरप्युक्तयुक्त्या तत्तत्सन्ध्या कार्या, तत्तद्गायत्र्यार्घ्यदानजपतत्तन्मूलमन्त्रजपश्च विशेष:। तत्तद्गायत्री तत्तत्कल्पे द्रष्टव्या। अत्र–

> ''सन्ध्यालोपो न कर्तव्य: शम्भोराज्ञैवमेव हि। दीक्षित: सन्ध्यया हीनो न दीक्षाफलमश्नुते।।''

इति शिवरहस्यवचनात् सन्ध्यात्रयमावश्यकमिति। स्वसमये न कृता चेत् सन्ध्या तदाष्टोत्तरशतजपं प्रायश्चित्तार्थं कृत्वा पूर्वसन्ध्यां कृत्वा तत्तत्कालसन्ध्यां कुर्यात्।।

तत्र प्रकृते प्रात: सन्ध्यावन्दनानन्तरं वैदिकतर्पणं निर्वर्त्य मूलेन प्राणायामत्रयर्ष्यादिन्यासपूर्वकं स्वपुरतो वमिति धेनुमुद्रया जलममृतीकृत्य, तत्र देवं सचक्रं साङ्गावरणं ध्यात्वा मूलमन्त्रमुच्चार्य ''श्री अमुकदेवतां तर्पयामि नम:'' इत्यष्टोत्तरशतवारं तदर्धमष्टाविंशतिवारं वा देवस्य मुखकमले परमामृतबुद्ध्या तत्तीर्थजलै: सन्तर्प्यावरणदेवताश्च ''अमुकं तर्पयामि नम:'' इति प्रत्येकमेकैकाञ्जलिना सन्तर्प्य देवं स्वहृदि विसृज्य तीर्थं च सूर्ये विसृज्य गुरुदिक्पतिग्रहान् प्रणम्य, शुद्धोदकपूर्णपात्रमादाय हृदि स्वेष्टदेवतां स्मरन् मौनी स्वपदमात्रदृष्टि: स्तोत्रादिकं पठन् स्वगृहं गच्छेत्। ततो द्वारि स्थित: स्वपापं मनसा सञ्चिन्त्य,

> ''देवं त्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम। तन्नि:सारय चित्तान्मे पापं फट्फट्फट् ते नम:।।
> सूर्य: सोमो यम: कालो महाभूतानि पञ्च च। एते शुभाशुभस्येह कर्मणो नव साक्षिण:।।''

इति पठित्वा 'हुंफट्' इति क्रोधदृष्ट्या पार्श्वद्वयमूर्ध्वमधश्चावलोक्य सुमना भूत्वा गृहान्त: प्रविश्याङ्गणे स्थित्वा पादौ प्रक्षाल्याचम्याङ्गणभूमौ गोमयोपलिप्तायां सिन्दूरादिना रचितवृत्तमण्डलमध्ये स्वासनमास्तीर्य ''ह्रीं आधारशक्ति–

---

१. 'मत्रयं' क. पाठ:।

कमलासनाय नमः'' इत्यासनं सम्पूज्य, तत्र प्राङ्मुख उपविश्य वक्ष्यमाणसूर्यमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि अजाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीसूर्यदेवतायै नमः। इति विन्यस्य सूर्यार्घ्यदाने विनियोगः इति कृताञ्जलिर्वदेत्। ततः अङ्गुष्ठयोः ह्रां हृदयाय नमः। तर्जन्योः ह्रीं शिरसे स्वाहा। मध्यमयोः ह्रूं शिखायै वषट्। अनामिकयोः ह्रैं कवचाय हुं। कनिष्ठिकयोः ह्रौं नेत्रत्रयाय वौषट्। करतलकरपृष्ठयोः ह्रः अस्त्राय फट्। इति करयोर्विन्यस्येतानेव पञ्चमन्त्रान् हृदयशिरःशिखाकवचनेत्रेषु विन्यस्यास्त्रमन्त्रेण तालत्रयदशदिग्बन्धनं च कृत्वा,

> रक्ताम्बुजासनमशेषगुणैकसिन्धुं भानुं समस्तजगतामधिपं नमामि।
> पद्मद्वयाभयवरान् दधतं कराब्जैर्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्।।

इति सूर्यं ध्यात्वा स्वपुरतः पुरस्तात्प्रयोगप्रकरणे वक्ष्यमाणप्रयोजनतिलकाख्यत्र्यक्षरमन्त्रोक्तविधिना साङ्गं सावरणं सम्पूज्य, तदशक्तौ तन्मण्डले साङ्गावरणं ध्यात्वा सम्पूज्य, स्वपुरतश्चतुरस्त्रवृत्तत्रिकोणात्मकं मण्डलं कृत्वा "श्रीसूर्याधारमण्डलाय मनः'' इति मण्डलं सम्पूज्य, तत्र साधारं प्रस्थजलग्राहि ताम्रपात्रं निधाय सूर्यमन्त्रेण शुद्धोदकेनापूर्य तिलयवसर्षपश्यामाककुशाग्रगन्धाक्षतरक्तपुष्पाणि रक्तचन्दनं च निक्षिप्य कुशैराच्छाद्य तत्पात्रं कराभ्यामाच्छाद्य सूर्यमन्त्रमष्टोत्तरशतं जपित्वा जानुभ्यामवनीं गतस्तत्पात्रं कराभ्यामामस्तकमुधृत्य पूर्वोक्तरूपं सूर्यं निजेष्टदेवताभेदेन ध्यायन् "ओंह्रांह्रींसःसग्रहराशिनक्षत्रयोगकरणपरिवृत श्रीसूर्य एष तेऽर्घ्यः स्वाहा'' इति सूर्यायार्घ्यं दत्त्वा, तदर्घ्याम्बुपूतं सूर्यं ध्यायन् तन्मन्त्रं यथाशक्ति जपित्वा सूर्यं स्तुत्वा प्रणम्य स्वपुरः पूजापक्षे तं विसृज्य, पूजामण्डपद्वारं गत्वा तत्र वक्ष्यमाणविधिना सामान्यार्घ्यं संस्थाप्य, तदशक्तौ ताम्रादिपात्रस्थं जलं धेनुमुद्रया अमृतीकृत्य तेन जलेन वा पूजामण्डपस्य द्वारं प्रोक्ष्य द्वारस्योर्ध्वशाखाया मध्ये विघ्नाय नमः। तद्दक्षिणे महालक्ष्म्यै नमः। वामे सरस्वत्यै नमः। पुनर्मध्ये द्वारश्रियै नमः। द्वारस्य वामदक्षिणशाखयोः गं गणतपये नमः। क्षं क्षेत्रपालाय नमः। शंशङ्खनिधिवसुधाराभ्यां नमः। पंपद्मनिधिवसुमतीभ्यां नमः। मं मायाशक्त्यै नमः। चिं चिच्छक्त्यै नमः। गं गङ्गायै नमः। यं यमुनायै नमः। धं धात्र्यै नमः। विं विधात्र्यै नमः। इति द्वन्द्वक्रमेणाधोऽधः सम्पूज्य, अधो देहल्यै नमः। वामदक्षिणयोः नन्दिने नमः। महाकालाय नमः। इति द्वारपालौ सम्पूज्य, उत्तरद्वारं गत्वा तदर्घ्याम्बुना प्रोक्ष्य प्राग्वद्विघ्नादिदेहल्यन्तं प्रोक्तक्रमेण सम्पूज्य, द्वारपार्श्वयोः गणेशाय नमः। वृषभाय नमः। इति द्वारपालौ सम्पूज्य, दक्षिणद्वारं गत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यन्तमभ्यर्च्य, द्वारपार्श्वयोः उमायै नमः। चण्डेश्वराय नमः। इति द्वारपालौ सम्पूजयेत्।। वैष्णवे तु नन्द-सुनन्द-चण्ड-प्रचण्ड-बल-प्रबल-भद्र-सुभद्राः प्रतिद्वारं द्विद्विक्रमेण पूजयेत्। गाणेशे वक्रतुण्डैकदंष्ट्रमहोदरगजाननलम्बोदर-विकटविघ्नराजधूम्रवर्णास्तथैव पूज्याः।। शाक्तसारस्तु............(१) ब्राह्म्याद्यष्टमातरस्तु प्राग्वत्पूज्याः। पुनः पश्चिमद्वारं गत्वास्त्रमन्त्रेण सप्तधाभिमन्त्र्य,

> "अपक्रामन्तु भूतानि पिशाचाः प्रेतगुह्यकाः। ये चात्र निवसन्त्यन्ये देवता भुवि संस्थिताः।।
> अपसर्पन्तु ये[1] भूताये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।।''

इत्यन्तेऽस्त्रमन्त्रं जपन् नाराचमुद्रया मण्डपान्तः प्रक्षिप्य, तस्मान्निर्गच्छतां विघ्नानां स्ववामाङ्गसङ्कोचेन मार्गं दत्त्वास्त्रमन्त्रं पठन् वामपार्ष्णिघातत्रयेण भौमान्, ऊर्ध्वोर्ध्वतालत्रयेणान्तरिक्षगान्, तिग्मदृष्ट्यावलोकनेन दिव्यान् विघ्नानुत्सार्य, दक्षिणपादपुरःसरं शाक्ते वामपादपुरःसरं देहलीमुल्लङ्घ्यान्तः प्रविश्य वाससा द्वारमाच्छाद्य पञ्चगव्यार्घ्यतोयाभ्यां घण्टावादनपूर्वकं मण्डपाभ्यन्तरं प्रोक्ष्य, मण्डपस्य नैर्ऋतकोणे वास्तुपुरुषाय नमः। तत्रैव वास्त्वधीशाय ब्रह्मणे नमः।

---

[1] 'ते' क. पाठः।

इति सम्पूज्य, मण्डपस्येशानकोणे रक्तद्वादशशक्तिसहिताय श्रीदीपनाथाय नम:। इति दीपनाथं सम्पूज्य,

"अतितीक्ष्ण महाकाय कल्पान्तदहनोपम। भैरवाय नमस्तुभ्यं[1] ममाज्ञां दातुमर्हसि।।"

इति भैरवाज्ञां प्रार्थ्य[2] "अ: फट्" इति मण्डपमध्यस्थां पूजावेदीं गत्वा, शिरसि मेरुपृष्ठाय ऋषये नम:। मुखे सुतलाय छन्दसे नम:। हृदि पृथिव्यै देवतायै नम:। इति विन्यस्य पृथिवीप्रार्थने विनियोग: इति कृताञ्जलिरुक्त्वा,

ओं पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां नित्यं[3] पवित्रं कुरु चासनम्।।

इति पृथिवीं प्रार्थ्य, स्वासनस्थानं मूलमन्त्रेण वीक्ष्यास्त्रमन्त्रेण प्रोक्ष्य तेनैव मन्त्रेण कुशै: सन्ताड्य कवचमन्त्रेणाभ्युक्ष्य, तत्र मण्डूकादिवेदिकान्ता: पीठदेवता: सम्पूज्य तत्र चेलाजिनकुशोत्तरं हस्तद्वयमात्रं चतुरस्रं चतुरङ्गुलोच्छ्रितं स्वासनमास्तीर्य मूलमन्त्रेण द्वादशाभिमन्त्रितेन जलेनाभ्युक्ष्य "ह्रीं आधारशक्तिकमलासनाय नम:" इति सम्पूज्य, तत्र प्राङ्मुख उदङ्मुखो वा स्वस्तिकवीरसिद्धान्यतमेनोपविश्य, आसनस्य स्वदक्षिणाग्रकोणादिचतुष्कोणेषु प्रादक्षिण्येन गं गणपतये नम:। दुं दुर्गायै नम:। सं सरस्वत्यै नम:। क्षं क्षेत्रपालाय नम:। इति सम्पूज्य गन्धपुष्पाक्षतादीनि पूजाद्रव्याणि स्वदक्षिणभागे निधाय "ह्रांह्रूंफट्" इति मन्त्रं स्मरन् दिव्यदृष्ट्या विलोक्य कर्पूरादिवासितशुद्धोदकपूर्णं वामभागस्थं कुम्भं श्रीमिति वामपाणिना संस्पृशन् दक्षिणकराङ्गुल्यग्रेण क्ष्लौं इति कुम्भस्थं जलं संस्पृश्य, रमिति दीपशिखां स्पृष्ट्वा करं प्रक्षाल्य कृताञ्जलिर्वामे गुरुभ्यो नम:। दक्षिणे गणपतये नम:। अग्रे महादेवाय नम:। इति प्रणम्य, चन्दनसुगन्धपुष्पाणि ह्स्रैं इति मन्त्रेणादायास्त्रमन्त्रेण मर्दयित्वा करौ सुरभीकृत्य तत्पुष्पं वामकरेण स्वमूर्धानं परितो रोमिति भ्रामयित्वाघ्राय, ओं हों

"ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसका:। मृत्युरोगभयक्लेशा: पतन्तु रिपुमस्तके।।"

इति पठित्वास्त्रमन्त्रेण नाराचमुद्रया ईशान्यां दिशि दूरे प्रक्षिप्य, अस्त्रमन्त्रेण पुन: करावन्योन्यमार्जनेन संशोध्यास्त्रमन्त्रेणोर्ध्वोर्ध्वतालत्रयमङ्गुष्ठतर्जन्युत्थशब्देन दशदिग्बन्धनं कृत्वा त्रिशूलमुद्रामुद्रितौ व्यस्तौ मणिबन्धेनान्योन्यसम्पृक्तौ करौ स्वमूर्धानं परितोऽस्त्रमन्त्रं स्मरन् प्रादक्षिण्येन त्रिर्भ्रामयन् अग्निप्राकारत्रयं विधाय तन्मध्यगतमात्मानं सञ्चिन्त्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात्।।

अत्र प्रागुक्तपरिपाट्या भूतशुद्ध्यादिकं तु, प्रथमतो भूतशुद्धि:, तत: प्राणप्रतिष्ठा, ततोऽन्तर्मातृकान्यास:। अत्रान्तर्मातृकान्यासो मनसैव कार्य:। "पुष्पैरनामया वापि मनसा वा न्यसेदणून्" इति दक्षिणामूर्तिसंहितावचनात्। "एवमन्त: प्रविन्यस्य मनसा नो बहिर्न्यसेत्" इति कुम्भसम्भववचनाच्च। अत्र वाशब्द: समुच्चये। अणून् मन्त्रान्। अत्रैवं व्यवस्था—पुष्पैर्देवतामूर्तौ, अनामया स्वदेहे, मनसा मूलाधारादिचक्रेषु, तत्र करस्पर्शासम्भवात्। अनामया साङ्गुष्ठया। "अङ्गुष्ठानामिकाभ्यां तु न्यास: सर्वत्र सम्मत:" इति पञ्चवाहिनीवचनात्। ऋष्यादिकरषडङ्गन्यासव्यतिरिक्तेष्वियं व्यवस्था ज्ञेया। तत्रानङ्गुष्ठानां सर्वाङ्गुलीनां विहितत्वात् तथैव सम्प्रदायात्। षडङ्गमन्त्राणामपि पृथक् पृथक् प्रतिपादनाच्चेति।

ततो बहिर्मातृकान्यास:। अत्र बहिर्मातृकान्यासे केवले बिन्दुयुक्तत्वमक्षराणां वीर्ययोजनार्थमिति सम्प्रदाय:। ततो बिन्दुमातृकान्यास:। ततो विसर्गमातृकान्यास:। ततो बिन्दुविसर्गयुक्तमातृकान्यास:। अत्र यतिवानप्रस्थैरादौ

---

१. 'भ्यमनुज्ञां' क. पाठ:। २. 'प्राप्य' क. पाठ:। ३. 'देवि' क. पाठ:।

सृष्टिस्ततः स्थितिस्ततः संहार इति कार्यः। गृहस्थैस्तु प्रथमं संहारस्ततः सृष्टिस्ततः स्थितिः कार्या। ब्रह्मचारिभिः आदौ स्थितिस्ततः संहारस्ततः सृष्टिः कार्या। अत्र केचित् ''गृहस्थैः सृष्टिस्थितिसंहारानन्तरं पुनः सृष्टिस्थिती च कार्ये, तेन स्थित्यन्तता सृष्ट्यन्तता स्यात्। एवं ब्रह्मचारिभिः सृष्टिस्थितिसंहारानन्तरं पुनः सृष्टिन्यासः कार्यः। एवं कृते स्थित्यन्तता संहारान्तता च भवति' इत्याहुः। अत्र यथागुरूपदेशं कार्यमिति।।

ततस्तारोत्थैकपञ्चाशत्कलामातृकान्यासः। ततः केशवादिमातृकान्यासः। ततः श्रीकण्ठादिमातृकान्यासः। ततो भुवनेश्वरीमातृकान्यासः। ततः श्रीबीजादिमातृकान्यासः। ततः कामबीजादिमातृकान्यासः। ततः श्रीशक्तिकामवीजादिमातृकान्यासः। ततः प्रपञ्चयागमातृकान्यासः। ततस्तत्तद्देवतोपासकस्तत्तद्देवतामातृकान्यासं कृत्वा मूलमन्त्रेण प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात्।।

तत्र प्राणायामप्रयोगः– तत्र बद्धपद्मासन ऋजुकायः समुपविश्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं निरुध्य वामनासापुटेन वायुमाकृष्य स्वोदरे पूरयित्वा कनिष्ठानामिकाभ्यां वामनासापुटं च निरुध्य हृदि देवं ध्यायन् मूलमन्त्रं जपन् यावच्छक्यं वायुं कुम्भकेन धृत्वा पुनर्दक्षिणनासापुटेन शनैःशनैर्वायुं त्यजेदित्येकः प्राणायामः। पुनर्दक्षिणनासापुटेन वायुमाकृष्य तथैव कुम्भयित्वा पुनर्वामनासारन्ध्रेण तं वायुं त्यजेदित्यन्यः। पुनर्वामनासारन्ध्रेण प्राग्वद्वायुमापूर्य तथैव कुम्भयित्वा तथैव दक्षिणनासारन्ध्रेण तं वायुं त्यजेदित्यपरः। इत्थं प्राणायामत्रयं कृत्वा, मूलाधारे 'मण्डूकाय नमः'' इत्यादिपरतत्त्वान्तं प्रागुक्तक्रमेण विन्यस्य ''ओं नमो भगवते सकलगुणात्मने शक्तियुक्तायानन्ताय योगपीठात्मने नमः'' इति मूर्धादिपादान्तं व्यापकत्वेन न्यसेदिति योगपीठन्यासः। अत्र योगपीठस्थाने–गाणेशैः सुधार्णवस्थाने इक्षुरससमुद्रो विष्णुसूर्योपासकैः क्षीरसमुद्रस्तत्र तत्तत्पीठमन्त्रश्च न्यस्तव्य इति विशेषः।।

अथ मूलमन्त्रन्यासः, स च तत्तत्कल्पेषु बोद्धव्यः। ततस्तत्तत्कल्पोक्तमुद्रा विरच्य स्वेष्टदेवताकल्पोक्तरूपं स्वाभेदेन ध्यात्वा स्वशिरसि मूलमन्त्रेण पुष्पाञ्जलिं दत्त्वा पुनर्हृदयकमले ध्यात्वा, योगपीठपुरःसरं मानसैरुपचारैर्देवं साङ्गं सावरणं सम्पूज्य मानसमेव नैवेद्यं दत्त्वा देवं भुञ्जानं ध्यायन्, मूलाधारे आत्मान्तरात्मपरमात्मज्ञानात्मेत्यात्मचतुष्काकारचतुरस्रे कुण्डमध्ये चिच्छक्तिं कुण्डलिनीं वह्निरूपां ध्यात्वा मूलमन्त्रमुच्चार्य ''अहन्तां जुहोमि स्वाहा''। पुनर्मूलं ''असत्यं जुहोमि स्वाहा'' इत्थमहन्तासत्यपैशुन्यकामक्रोधलोभमदमोहमात्सर्याणि क्रमेण सुषुम्नास्रुग्युक्तमनःस्रुवेण हुत्वा प्राणायामर्घ्यादिकरषडङ्गन्यासपूर्वकं मूलमन्त्रमष्टोत्तरशतवारं जपित्वा गुह्येत्यादिना समर्प्य श्रीगुरुं प्रणम्य, पुरतश्चन्दनादिलिप्ते श्रीपर्ण्यादिपीठे सौधादिनिर्मिते स्थण्डिले वा कुङ्कुमादिना तत्तत्कल्पोक्तं पूजाचक्रं निर्माय, तत्र मूलमन्त्रेण पुष्पाञ्जलिं दद्यात्। यद्वा सुवर्णादिभिः शिल्पिवरैर्निर्मितं पूजाचक्रं चन्दनादिमण्डितं प्राग्वत् पीठे संस्थाप्य पुष्पाञ्जलिं दद्यात्। तत्र स्वर्णरूप्यादिधातुनिर्मितस्य पूजाचक्रस्याम्लरसादिना संशुद्धस्यादौ वैदिकमार्गेणाग्न्युत्तारणं कारयित्वा मधुघृतगोदुग्धनारिकेलजलैः पृथक्पृथगभिषिच्य पञ्चाशद्वर्णौषधिक्वाथजलैस्तत्तन्मन्त्रौषधिक्वाथजलैर्वाभिषिञ्चेत्।।

अत्र मन्त्रवर्णौषधिग्रहणे मन्त्रवर्णेषु पुनरुक्तवर्णनामोषध्यो यस्य वर्णस्य यावत्य आवृत्तयो मन्त्रे दृश्यन्ते तस्यौषधेस्तावन्तो भागा ग्राह्याः। तास्तु प्रागेव प्रदर्शिताः। ततः शुद्धजलैः प्रक्षाल्य चन्दनागरुकर्पूरकस्तूरीकुङ्कुमादिपङ्कैरालिप्य पुरतः शुभे पीठे संस्थाप्य तच्चक्रं स्पृष्ट्वा मूलमन्त्रमष्टोत्तरसहस्रं जपित्वा संशुद्धस्य तस्य चक्रस्य प्रागुक्तप्राणप्रतिष्ठामन्त्रे ''अमुकदेवतापूजाचक्रस्य'' इत्यादितत्तद्देवतानामपूर्वकं देवमावाह्य साङ्गं सावरणं सम्पूज्य महानैवेद्यं बलिदानादिपूर्वकं महोत्सवं प्रत्यहं दिनत्रयपर्यन्तं कुर्यात्। दिनत्रयमपि, प्रथमदिने आवाहितं देवं न

विसर्जयेत्। चतुर्थदिने नित्यपूजान्ते देवं विसर्जयेत्। इति प्रतिष्ठिते चक्रे नित्यनैमित्तिकादिपूजनं च कुर्यात्। अग्न्युत्तारणं तु ऋग्वेदोक्ताग्निसूक्तेनैव वा कार्यम्। सूक्तं तु— (ऋ० १० मं० ८० सू०)

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं, श्रुत्यं कर्मनिष्ठाम्।
अग्नी रोदसी वि चरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरन्धिम्।। १।।
अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश।
अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते परूणि।। २।।
अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम्।
अग्निरत्रिं घर्म उरुष्यदन्तरग्निर्नृमेधं प्रजयासृजत्सम्।। ३।।
अग्निर्दा द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति।
अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा।। ४।।
अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः।
अग्नि वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम्।। ५।।
अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः
अग्निर्गान्धर्वीं पथ्यातृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता।। ६।।
अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिम्।
अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व।। ७।।

अथैतस्य प्रयोगः— तत्र एभिर्मन्त्रैः प्रथमं प्रतिष्ठितस्य चक्रादिकमग्निशब्दरहितैः शतावृत्त्या शुद्धजलैरभिषिच्यानन्तरमग्निशब्दसहितैः शताद्यावृत्त्याभिषिञ्चेदित्यग्न्युत्तारणविधिः।। ततः प्रत्यहमम्लादिभिः शुद्धजलेन प्रक्षालनं धातुमयचक्रस्य, स्फटिकस्य जलेनैव क्षालनं कार्यमिति।। अथ कालीमते चक्रप्रतिष्ठाविधिस्तु वामकेश्वरतन्त्रे—भैरव्युवाच।

चक्रभेदं महादेव त्वत्प्रसादान्मया श्रुतम्। इदानीं श्रोतुमिच्छामि प्रतिष्ठाक्रमनिर्णयम्।। १।।

शङ्कर उवाच

शृणु देवि महाभागे जगत्कारिणि कौलिनि। तस्योद्यापनकर्माङ्गं सर्वकार्यविनिर्णयम्।। २।।
स्नात्वा सङ्कल्पयेन्मन्त्री गुरोरर्चनमारभेत्। पञ्चगव्यं ततः कृत्वा शिवमन्त्रेण मन्त्रितम्।। ३।।
तत्र चक्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम्। समुद्धृत्य ततश्चक्रं स्थापयेत्पूर्णपात्रके ।। ४।।
पञ्चामृतेन दुग्धेन शीतलेन जलेन च। चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमेन च।। ५।।

पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात्। तोयधूपान्तरैः कुर्यात्पञ्चामृतविधिं बुधः।। ६।।
हाटकैः कलशैर्देवीमष्टभिर्वारिपूरितैः। कषायजलसम्पन्नैः कारयेत् स्नानमुत्तमम्।। ७।।
स्नानं समाप्य तां देवीं स्थापयेत् स्वर्णपात्रके। यन्त्रराजाय विद्महे महायन्त्राय धीमहि।
तन्नो यन्त्रं प्रचोदयात्।। ८।।
स्पृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत्। अष्टोत्तरशतं देवि देवताभावसिद्धये।। ९।।
आत्मशुद्धिं ततः कृत्वा षडङ्गैर्देवतां यजेत्। तत्रावाह्य महादेवीं जीवन्यासं च कारयेत्।। १०।।
उपचारैः षोडशभिर्महामुद्रादिभिः सदा। फलताम्बूलनैवेद्यैर्देवीं तत्र समर्चयेत्।। ११।।
पट्टसूत्रादिकं दद्याद्वस्त्रालङ्कारमेव च। मुकुरं चामरं घण्टां यथायोग्यं महेश्वरि।। १२।।
सर्वमेतत्प्रयत्नेन दद्यादात्महिते रतः। ततो जपेत्सहस्रं च सकलेप्सितसिद्धये।। १३।।
बलिदानं ततः कृत्वा प्रणमेच्चक्रराजकम्। अष्टोत्तरशतं हुत्वा सम्पाताज्यं विनिक्षिपेत्।। १४।।
होमकर्णण्यशक्तश्चेद् द्विगुणं जपमाचरेत्। धेनुमेकां समानीय स्वर्णशृङ्गाद्यलङ्कृताम्।। १५।।
गुरवे दक्षिणां दद्यात्ततो देव्या विसर्जनम्।

अथ प्रयोगः— तत्र साधकः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं सङ्कल्पं कुर्यात्। अद्येहेत्यादि अमुकगोत्रोऽमुकशर्मामुकदेवतायाः पूजार्थममुकयन्त्रसंस्कारमहं करिष्ये इति सङ्कल्प्य, पञ्चगव्यमानीय हौमित्यष्टोत्तरशतमभिमन्त्र्य ओमिति यन्त्रं तत्र निक्षिपेत्। तस्मादुत्तोल्य पात्रान्तरे स्थापयेत्। ततः शीतलजलचन्दनकस्तूरीकुङ्कुमैः स्नापयित्वा पञ्चामृतं प्राग्वत् हौमिति शोधयित्वा स्थापयेत्।।

तत्र क्रमस्तु—क्षीरेण स्नाप्य पुनः शुद्धजलैः स्नाप्य धूपयेत्। एवं दधिघृतमधुशर्कराभिः। ततोऽष्टभिः कलशैः कुङ्कुमगोरोचनाचन्दनमिश्रिततोयैः स्नापयेत् मूलमन्त्रेण सर्वत्र। ततो यन्त्रमुत्तोल्य कुशाग्रेण स्पृशन् "यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात्" इत्यष्टोत्तरशतवारमभिमन्त्र्य प्राणप्रतिष्ठां कुर्यात्।। ततस्तत्रेष्टदेवतामावाह्य षोडशोपचारैः सम्पूज्य षडङ्गेन पूजयेत्। तत्र पट्टसूत्रादिकं दत्त्वाष्टोत्तरसहस्रं जपेत्। शक्तश्चेद्बलिं दद्यात्। ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुति सम्पातं कुर्यात्। होमासामर्थ्ये द्विगुणजपः कार्यः। ततो गुरवे सुवर्णालङ्कृतां गां दक्षिणां च दत्त्वाच्छिद्रावधारणं कुर्यादिति।

इत्थं प्रतिष्ठितं प्रक्षालितं चन्दनादिमण्डितं पुरतः प्रोक्तपीठे संस्थाप्य, तत्र मूलमन्त्रेण पुष्पाञ्जलिं दत्त्वा प्राग्वदर्घ्यादिपात्राण्यासाद्यार्घ्यजलं किञ्चित् पात्रान्तरेणोद्धृत्य तेन जलेन स्वात्मानं पूजाचक्रं पूजाद्रव्याणि च मूलमन्त्रेण प्रोक्ष्य तेषु धेनुमुद्रां प्रदर्श्य, स्वदेहं गन्धादिभिरलङ्कृत्य स्वेष्टदेवतारूपं सञ्चिन्त्य स्वशिरसि श्रीगुरुं, मूलाधारे गणपतिं च सम्पूज्य, प्रागुक्तयोगपीठदेवतास्तत्तन्न्यासस्थानेषु सम्पूज्य हृदयकमलकेसरेषु तत्तत्पीठशक्तीश्च सम्पूज्य, तत्तत्पीठमन्त्रेण सर्वाङ्गेषु पुष्पाञ्जलिं दत्त्वा स्वेष्टदेवतां स्वात्मानं ध्यायन् मूलमन्त्रेण मूर्ध्नि हृदये गुह्ये पादयोः सर्वाङ्गे च पञ्चस्थानेषु पञ्च पुष्पाञ्जलीन् दत्त्वा धूपदीपनैवेद्यैस्त्र प्राग्वन्मूलाधारे चतुरस्रं सञ्चिन्त्य तत्र कुण्डल्यात्मकपरमात्मवह्निं सञ्चिन्त्य मूलमन्त्रमुच्चार्य,

"धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्।।"

पुण्यं जुहोमि स्वाहा। पुनर्मूलं प्रागुक्तश्लोकमन्त्रं च, पापं जुहोमि स्वाहा। इत्थं पुण्यपापे कृत्याकृत्ये सङ्कल्पविकल्पौ

धर्मं च[१] पृथक् हुत्वा पुनर्मूलं,

"प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम्। धर्माधर्मकलास्नेहपूर्णां बह्नौ जुहोम्यहं स्वाहा॥"

इति धर्माधर्मात्मकं सकलप्रपञ्चकं पूर्णाहुतित्वेन हुत्वा निरस्तनिखिलोपाधितया निरतिशयसुखानन्दचिद्विलासात्मकं स्वात्मानं ध्यायन्, प्राणायाममर्घ्यादिकरषडङ्गन्यासपूर्वकं मूलमन्त्रमष्टोत्तरशतवारं जपित्वा जपं समर्प्यार्घ्यजलेन पूजाचक्रमभ्युक्ष्य, चक्रस्योत्तरभागे ऐं गुरुभ्यो नमः। दक्षिणे गं गणपतये नमः। इति सम्पूज्य पूजाचक्रस्याधस्तादतलादिसप्तपातालभावनया ओं मण्डूकाय नमः। एवं कालाग्निरुद्राय नमः। मूलप्रकृत्यै नमः। आधारशक्त्यै नमः। कूर्माय नमः। अनन्ताय नमः। वराहाय नमः। इति सम्पूज्य, वराहस्य दंष्ट्रोपरि पृथिव्यै नमः। तस्यां सुधार्णवाय नमः। तस्मिन् नवरत्नमयद्वीपाय नमः। तन्मध्ये स्वर्णपर्वताय नमः। तदुपरि नन्दनोद्यानाय नमः। तदुपरि कल्पवृक्षेभ्यो नमः। तेषां मध्ये विचित्ररत्नभूम्यै नमः। तन्मध्ये स्वर्णप्राकाराय नमः॥ तन्मध्ये रत्नमण्डपाय नमः। तस्यान्तः स्वर्णवेदिकायै नमः। तदुपरि रत्नसिंहासनाय नमः। इति तत्तद्भावनया सम्पूज्य पूजाचक्राधारपीठं सिंहासनत्वेन परिकल्प्य, तस्य चाग्नेयादिकोणचतुष्टयस्य पादचतुष्टये धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय नमः। इति प्रादक्षिण्येन सम्पूज्य, स्वाग्रादिपीठस्य गात्रचतुष्टये अधर्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय नमः। इति प्रादक्षिण्येन पूजयेत्॥

ततः सिंहासनस्य मध्ये, मायायै नमः। विद्यायै नमः। इति मायाविद्ये पट्टसूत्रमयपट्टिकारूपेण लौकिकमञ्चवदोतप्रोतरूपेण ग्रथिते स्थिते ध्यात्वा सम्पूज्य, तदुपरि अनन्ताय नमः। इति तल्पाकारमनन्तं सम्पूज्य, तस्य मूर्ध्नि पद्माय नमः। आनन्दकन्दाय नमः। संविन्नालाय नमः। तद्दलेषु प्रकृतिमयपत्रेभ्यो नमः। तत्केसरेषु विकृतिमयकेसरेभ्यो नमः। तत्कर्णिकायां पञ्चाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै नमः। केसरेषु अं अर्कमण्डलाय नमः। कर्णिकायां उं सोममण्डलाय नमः। पत्रेषु मं वह्निमण्डलाय नमः। तथैव, ब्रह्मणे नमः। विष्णवे नमः। रुद्राय नमः। तत्रैव सं प्रबोधात्मने सत्त्वाय नमः। रं प्रकृत्यात्मने रजसे नमः। तं मोहात्मने तमसे नमः। आं आत्मने नमः। अं अन्तरात्मने नमः। पं परमात्मने नमः। ह्रीं ज्ञानात्मने नमः। सिंहासनस्य स्वाग्रादिचतुर्दिक्षु मध्ये च—ज्ञानतत्त्वात्मने नमः। मायातत्त्वात्मने नमः। कलातत्त्वात्मने नमः। विद्यातत्त्वात्मने नमः। परतत्त्वात्मने नमः। इति सम्पूज्य, तत्केसरेषु स्वाग्रादिप्रादक्षिण्येन गणेशादितत्तत्पीठस्य नवशक्तीः पीठमन्त्रेण समस्तं पीठं च सम्पूज्य तत्तन्मूलमन्त्रमुच्चार्य "श्रीशिवादिमूर्तिं परिकल्पयामि" इति पीठमध्ये शिवलिङ्गादि तदभावे पुष्पादिकं वा निक्षिप्य ध्यानोक्तां मूर्तिं विभावयेत्। "नमः" इति कल्पितां मूर्तिं पूजयेत्॥

अथ पञ्चायतनी चेत् मध्ये शिवपूजायां देवस्याग्नेयादिकोणचतुष्टये सूर्यगणेशदुर्गाविष्णून् संस्थाप्य गणेशादिक्रमेण तत्तत्कल्पोक्तविधिना तत्तद्यन्त्रे तत्तत्पीठपूजापुरःसरं पृथक् पृथक् साङ्गावरणान् सर्वोपचारैः सम्पूज्य तत्तन्मन्त्रजपस्तोत्रपाठप्रणामक्षमापनादिभिः परितोषयेत्। एवं विष्ण्वादिपूजायां प्रमाणोक्तप्रकारणे कोणेषु देवताः संस्थाप्य प्रमाणोक्तप्रकारेणायतनदेवताः पूजयेत्। अत्र पञ्चायतनपूजायामपि पूज्यपूजकयोर्मध्ये प्राचीदिशं परिकल्प्य तदनुसारेणाग्नेय्यादिकं कल्पयेदिति। ततः पुनर्मूलमन्त्रेण प्राणायामत्रयं मूलमन्त्रस्यर्ष्यादिकांश्च कृत्वा कराभ्यां पुष्पाञ्जलिमादाय पद्ममुद्रां बद्ध्वा पूर्वोक्तमातृकाम्भोजत्वेन ध्यात्वा पद्मासनेनोपविष्ट ऋजुकायोऽन्तर्मुखो गुदमेढ्रयोरन्तराले सुषुम्नान्त-

श्चतुरस्रमध्यस्थचर्तुदलपङ्कजदलेषु विद्योतत् वशषसार्णचतुष्टयं सकेसरं पीतवर्णं मूलाधारं सञ्चिन्त्य, तन्मध्ये, सोमसूर्याग्निमयाकथादित्रिरेखं त्रिकोणं विभाव्य तन्मध्ये सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलं जपाकुसुमप्रभं ज्योतिर्लिङ्गं ध्यात्वा, तदुपरि चिद्रूपां तडित्कोटिप्रभादीप्तां विसतन्तुतनीयसीं प्रसुप्तभुजगीमिव सार्धत्रिवलयेन सर्वान्तर्यामितया स्थितां परब्रह्माविनाभूतां कुण्डलिनीं शक्तिं चिरं विभाव्य, गुरूपदिष्टविधिना गुदाकुञ्चनपूर्वकं [1]हूङ्कारेण तां कुण्डलिनी-मुत्थाप्य सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्रभेदेन ब्रह्मरन्ध्रं नीत्वा, तत्र स्थपरमामृता-म्बुधौ परमात्मनि संयोज्य शिवशक्त्यात्मकं तत्तेजो वहन्नासाध्वना निःसार्य करस्थपुष्पाञ्जलौ संयोज्य मूलमन्त्रमुच्चार्य "श्रीशिव इहागच्छ इहागच्छ" इति चक्रमध्यस्थितमूर्तेः शिरसि पुष्पाञ्जलिप्रक्षेपेण तत्तेज आवाहनीमुद्रया समावाह्य तद् ब्रह्मरन्ध्रेण प्रविष्टं सञ्चिन्त्य, श्रीशिवादिरूपेण परिणतं ध्यानोक्तरूपं तं ध्यायन् मूलमन्त्रमुच्चार्य "श्रीशिव इह तिष्ठ इह तिष्ठ" इति स्थापनीमुद्रां प्रदर्श्य,

"देवेश भक्तसुलभ सर्वाभरणसंयुत। यावत्त्वां पूजयिष्यामि तावदत्र स्थिरो भव।।"

इति प्रार्थ्य, पुनर्मूलमन्त्रमुच्चार्य "श्रीशिव इह सन्निधेहि इह सन्निधेहि" इति सन्निधापनमुद्रया सन्निधाप्य, मूलमुच्चार्य "श्रीशिव इह सन्निरुद्धो भव इह सन्निरुद्धो भव" पुनर्मूलं "श्रीशिव इह सम्मुखो भव इह सम्भुखो भव" इति तत्तन्मुद्रया विधाय, पुनर्मूलं "श्रीशिव इहावगुण्ठितो भव इहावगुण्ठितो भव" इत्यवगुण्ठ्य देवस्य हृदयादिषडङ्गन्यासस्थानेषु षडङ्गमन्त्रान् विन्यस्य, मूलमुच्चार्य "श्रीशिव सकलीकृतो भव सकलीकृतो भव" इति सकलीकृत्य, धेनुमुद्रां बद्ध्वा देवस्य मूर्ध्नि अमृतवृष्टिं धारयन् मूलमुच्चार्य "श्रीशिवामृतीकृतो भवामृतीकृतो भव" इत्यमृतीकृत्य महामुद्रां बद्ध्वा मूलमुच्चार्य "श्रीशिव परमीकृतो भव परमीकृतो भव" इति देवस्य मूर्ध्नि परमामृतवृष्टिः ध्यात्वा, मूलमन्त्रं ततः "ऐं वद वद वाग्वादिनि ऐं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु सौः ह्सौः" इति दीपनीमकारादिक्षकारान्तां मातृकां चोच्चार्यार्घ्योदकेन देवं त्रिःप्रोक्ष्य देवस्य हृदयं स्पृशन् पूर्वोक्तप्राणप्रतिष्ठामन्त्रैर्ममपदस्थाने श्रीशिवस्येति पदं प्रक्षिप्य प्राणप्रतिष्ठामन्त्रं जपेत्। देवस्य प्राणप्रतिष्ठां विधाय, मूलमन्त्रमुच्चार्य "श्रीशिवाय नमः" इति त्रिः पुष्पाञ्जलिं दत्त्वा लिङ्गयोनित्रिशूलाक्षमालावराभयमृगखट्वाङ्गकपालडमरुकाख्या दश मुद्राः प्रत्येकं कामबीजेन विरच्य मूलमन्त्रेण प्रदर्श्य ह्वमिति मुञ्चेदिति दश मुद्रा प्रदर्श्य, मूलमुच्चार्य "श्रीशिव एतत्ते आसनं नमः" इति वार्क्षं चार्मं वास्त्रं पौष्पं तैजसं वा यथासम्भवमासनं देवस्य वामभागे विन्यस्य, "हंहंहं इदमिदमिदं गृहाण स्वाहा" इति निवेद्य मूलेन पद्ममुद्रां, प्रदर्श्य, पुनर्मूलमुच्चार्य "श्रीशिवाय नमः" इति पुष्पाञ्जलिं दत्त्वा, पुनमूर्लमुच्चार्य "श्रीशिव कुशलं स्वागतम्" इति कुशलस्वागतप्रश्नं कृत्वा कुशलस्वागतप्रश्नमुद्रे प्रदर्श्य, पुनर्मूलमुच्चार्य "श्रीशिव एष तेऽर्घ्यः स्वाहा" इति पूर्वस्थापितार्घ्यपात्राद्गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वान्वितं जलं पात्रान्तरेणोद्धृत्य देवस्य शिरसि दत्त्वा "ओं हंहंहं इदमिदमिदं गृहाण स्वाहा" इति निवेद्यार्घ्यमुद्रां प्रदर्श्य, मूलमुच्चार्य "श्रीशिवाय नमः" इति पुष्पाञ्जलिं दत्त्वा, पुनर्मूलमुच्चार्य "श्रीशिव एतत्ते पाद्यं नमः" इति पाद्यपात्राच्छ्यामाकदूर्वाब्जविष्णुक्रान्तान्वितं जलं पात्रान्तरेणोद्धृत्य देवस्य पादयोर्दत्त्वा ओं हंहंहमिति मन्त्रेण प्राग्वन्निवेद्य, मुद्रां प्रदर्श्य मूलं प्राग्वत्पुष्पाञ्जलिं दद्यात्। अत्र सर्वोपचारेषु प्रोक्तमन्त्रेण निवेदनं मूलमन्त्रेण पुष्पाञ्जलिं च प्रत्युपचारं कुर्यात्।

तत आचमनीयपात्राज्जातीफललवङ्गकक्कोलचूर्णयुतंजलं पात्रान्तरेणोद्धृत्य, मूलमुच्चार्य "श्रीशिव एतत्ते आचमनीयं सुधा" इति देवस्य मुखकमले दत्त्वा प्राग्वन्निवेद्याचमनीयमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा मधुपर्कपात्र-मुद्धृत्य, मूलमुच्चार्य "श्रीशिव एष ते मधुपर्कः सुधा" इति देवस्य मुखकमले दत्त्वा प्राग्वन्निवेद्य मधुपर्कमुद्रां प्रदर्श्य

---

[1] 'हुंकारेण' क. ख. पाठः।

पुष्पाञ्जलिं दत्त्वा पुनराचमनीयपात्रात्पात्रान्तरेण जलमुद्धृत्य, मूलमुच्चार्य ''श्रीशिव एतत्ते पुनराचमनीयं सुधा'' इति पुनराचमनीयं दत्त्वा प्राग्वन्निवेद्याचमनीयमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा, रत्नपादुके उपनीय ''पादुकायुगमारुह्य भगवन् रत्ननिर्मितम्। स्नानमण्डपमायाहि स्नानार्थं शक्रदिग्गतम्।।'' इति प्रार्थ्य, पूर्वस्यां दिशि विरचितं स्नानमण्डपं नीत्वा प्राग्वदासनं दत्त्वार्घ्यपाद्याचमनीयानि प्राग्वन्निवेद्य, सुगन्धतैलादिकमुपनीय ''श्रीशिव एतत्ते सुगन्धतैलाभ्यङ्गसुगन्धामलकाद्युद्वर्तनादिकं नम:'' इति सुगन्धामलकाद्युद्वर्तनादिकं च निधाय महाराजोपचारवन्नानाविधैर्जलैरभिषिच्य गङ्गादितीर्थादाहृतजलपूर्णकनककलशहस्ताभिर्देवकन्याभिरभिषिक्तं मत्वा, प्राग्वन्निवेद्य स्नानमुद्रां प्रदर्श्य मूलेन पुष्पाञ्जलिं दत्त्वा प्राग्वदाचमनीयं दत्त्वा, जलापकर्षणार्थं वस्त्रं दत्त्वाङ्गप्रोञ्छनं परिकल्प्य श्वेतदुकूलयुगलमानीय वमिति वरुणबीजेनाभिमत्र्य, जलेनास्त्रमन्त्रेण प्रोक्ष्य ''बृहस्पतिदैवताभ्यां वासोभ्यां नम:'' इति सम्पूज्य, मूलमुच्चार्य ''श्रीशिव एते ते वाससी नम:'' इति वाससी परिधाप्य पूर्ववन्निवेद्य वस्त्रमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा, पूर्ववदाचमनीयं दत्त्वा स्वर्णादिनिर्मितं यज्ञोपवीतमानीय, मूलमुच्चार्य ''श्रीशिव एतत्ते यज्ञोपवीतं नम:'' इति यज्ञोपवीतं दत्त्वा प्राग्वन्निवेद्य पुष्पाञ्जलिं दत्त्वा यज्ञोपवीतमुद्रां प्रदर्श्य प्राग्वदाचमनीयं निवेद्य; रत्नपादुके उपनीय

''ओं पादुकायुगमारुह्य भगवन् रत्ननिर्मितम्। आगच्छ निर्मित्तं याम्यमलङ्कारस्य मण्डपम्।।''

इति दक्षिणदिशि तमलङ्कारमण्डपं नीत्वा तत्र सिंहासने उपवेश्य नानाविधालङ्करणानि समुपनीय, प्राग्वत्प्रोक्ष्य ''नानादैवतेभ्यो मुकुटाभरणेभ्यो नम:'' इति सम्पूज्य, मूलमुच्चार्य ''श्रीशिव एतत्ते मुकुटं नम:, एतत्ते कुण्डलं नम:'' इति नानाभरणानि तत्तन्नाम्ना समर्प्य निवेद्याभरणमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा, पादुके उपानीय

''पादुके परिधायेमे पञ्चवाद्यपुर:सरम्। यागमण्डपमायाहि परिवारगणै: सह''।।

इति प्रार्थ्य प्रधानमण्डपं नीत्वा तत्र प्राक्कल्पितयोगपीठे देवं समुपवेश्य छत्रचामरादिनानाविधोपकरणहस्तं परिवारदेवतागणं सूर्यात् किरणसमूहमिव देवशरीराद्विनिर्गत्य स्वे स्वे स्थाने समुपविष्टं विशेषानुक्तौ प्रधानदेवतासदृशाकाराभरणायुधादिशोभितं स्थितीभूतं परितश्चक्रमध्ये ध्यात्वा, चन्दनागुरुकर्पूरादिनानागन्धमानीय प्राग्वत्प्रोक्ष्य ''गन्धर्वदैवत्याय गन्धाय नम:'' इति सम्पूज्य, मूलमुच्चार्य ''श्रीशिव एष ते गन्धो नम:'' इति देवाय गन्धं समर्प्य

''शरीरं ते न जानामि चेष्टां नैव च नैव च। मया निवेदितान् गन्धान् प्रतिगृह्य विलिप्यताम्।।''

इति प्रपूज्य, मूलमुच्चार्य ''श्रीशिवेमानि ते पुष्पाणि वौषट्'' इति नानाविधानि सुगन्धशुभ्रपुष्पाणि समर्प्य प्राग्वन्निवेद्य पुष्पमुद्रां प्रदर्श्य देवं सम्पूज्य देवहृदयादिषु षडङ्गन्यासस्थानेषु षडङ्गानि लयाङ्गत्वेन सम्पूज्य ''श्रीशिव परिवारदेवतापूजनार्थमनुज्ञां देहि'' इति देवं प्रार्थ्य तत्तत्कल्पोक्तावरणदेवता: पूजयेदिति।।

इत्थमङ्गावरणदेवता: सम्पूज्य तद्बाह्ये देवाग्राद्यष्टसु दिक्षु क्रमेण—लं इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नम:। रं अग्नये तेजोऽधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नम:। टं यमाय प्रेताधिपतये कृष्णवर्णाय दण्डहस्ताय महिषवाहनाय नम:। क्षं निर्ऋतये रक्षोऽधिपतये धूम्रवर्णाय खड्गहस्ताय प्रेतवाहनाय नम:। वं वरुणाय जलाधिपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नम:। यं वायवे प्राणाधिपतये कृष्णवर्णायाङ्कुशहस्ताय मृगवाहनाय नम:। सं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय नरवाहनाय नम:। हं ईशानाय विद्याधिपतये स्फटिकवर्णाय शूलहस्ताय वृषभवाहनाय नम:। इति सम्पूज्य इन्द्रेशानयोर्मध्ये आं ब्रह्मणे लोकाधिपतये रक्तवर्णाय पद्महस्ताय हंसवाहनाय नम:। निर्ऋतिवरुणयोर्मध्ये ह्रीं अनन्ताय नागाधिपतये गौरवर्णाय चक्रहस्ताय

गरुडवाहनाय नमः, इति पूजयेत्।। एवं विस्ताराशक्तौ लं इन्द्राय नमः। रं अग्नये नमः। टं यमाय नमः। क्षं निर्ऋतये नमः। वं वरुणाय नमः। यं वायवे नमः। सं कुबेराय नमः। हं ईशानाय नमः। आं ब्रह्मणे नमः। ह्रीं अनन्ताय नमः, इति प्राग्वत्सम्पूज्य इन्द्रादीनां समीपे वं वज्राय नमः। एवं, शं शक्त्यै नमः। दं दण्डाय नमः। खं खड्गाय नमः। पां पाशाय नमः। क्रों अङ्कुशाय नमः। गं गदायै नमः। शं त्रिशूलाय नमः। पं पद्माय नमः। चं चक्राय नमः, इति लोकपालानायुधानि च पूजयेत्। अत्र सर्वत्रावरणपूजायां प्रथमावरणपूजान्ते मूलमन्त्रेण देवं सम्पूज्य सम्बोध्य मूलमन्त्रमुच्चार्य

"अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।।"

इति देवस्य चरणयोरर्घ्योदकं पुष्पादिकं दद्यात्। एवं द्वितीयावरणादिष्वप्यूहनीयम्।

ततो मूलमुच्चार्य "साङ्गाय सावरणाय शिवाय नमः" इति त्रिःपुष्पाञ्जलिना सम्पूज्यास्त्रमन्त्रेण धूपभाजनं सम्प्रोक्ष्य हृदयमन्त्रेण धूपभाजनं गन्धादिभिरभ्यर्च्य, तत्र साराङ्गारान्निधाय वमिति धेनुमुद्रयामृतीकृत्य "क्लीं सुरभितेजसे स्वाहा" इति मन्त्रेण गुगुलादिधूपं निक्षिप्य "गन्धर्वदैवताय धूपाय नमः" इति धूपं सम्पूज्य, मूलमुच्चार्य

"वनस्पतिरसोत्पन्नो गन्धाढ्यो धूप उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्"।।

इति धूपमुत्सृज्य, स्ववामभागे घण्टां निधायास्त्रमन्त्रेण प्रोक्ष्य तेनैव मन्त्रेण "घण्टायै नमः" इति त्रिभिरभ्युर्च्य "ओं गजध्वनि मन्त्रमातः स्वाहा" इति घण्टामन्त्रेण तां त्रिभिरभिमन्त्र्य वामकरेण तां घण्टां वादयन् "ओंहंहंहं इदमिदमिदं गृहाण स्वाहा" इति मन्त्रेण नीचैर्धूपं निवेद्य, धूपभाजनं देवस्य वामभागे निवेश्य धूपमुद्रां प्रदर्श्य देवं सम्पूज्य, दीपग्राहिण्यां गोघृतं तिलस्नेहं वा निक्षिप्य तत्र कर्पूरगर्भिणीं वर्तिं निधाय ह्रीमिति प्रज्वाल्य "विष्णुदैवत्याय घृतप्रदीपाय नमः, "वनस्पतिदैवत्याय तिलदीपाय नमः" इति तैलदीपश्चेत्सम्पूज्य वमिति धेनुमुद्रयामृतीकृत्य, मूलमुच्चार्य

"सुप्रकाशो महादीपः सर्वत्र तिमिरापहः। सवाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्।।"

इत्युच्चार्य "श्रीशिव एष ते दीपो नमः" इति दीपमुत्सृज्य प्राग्वत् घण्टां वादयन् देवस्य पादादिमूर्धान्तं दीपमुच्चैः प्रदर्श्य, घार्तश्चेद्दक्षभागे तैलदीपश्चेद्देवस्य वामभागे दीपं निवेश्य दीपमुद्रां प्रदर्श्य, देवं सम्पूज्य प्राग्वद्देवस्य पाद्याचमनीये दत्त्वा स्वर्णादिपात्रे भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं पञ्चविधमन्नं कट्वम्ललवणतिक्तकषायमधुरात्मकषड्रासोपेतनानाविध-व्यञ्जनसमेतं नैवेद्यमानीय "विष्णुदैवत्याय नैवेद्याय नमः" इति सम्पूज्य देवस्य पुरतः चतुरस्रमण्डले साधारं तत्पात्रं निधाय, मूलेन वीक्ष्यास्त्रेण प्रोक्षणीजलेन प्रोक्ष्य तेनैव मन्त्रेण कुशैस्त्रिः सन्ताड्य कवचमन्त्रेणाभ्युक्ष्याधोमुखदक्षिणहस्तोपरि तादृशं वामहस्तं निधाय यमिति वायुबीजेनाष्टवारमभिमन्त्र्य नैवेद्यगतस्पर्शादिदोषान् शोषयित्वा, पुनर्वामहस्तोपरि दक्षिणकरं प्राग्वन्निधायाधोमुखवामहस्तेनाच्छादयन् रमिति वह्निबीजमष्टवारं जपन् तद्गतदोषान् दग्ध्वा, धेनुमुद्रां प्रदर्शयन् वमित्यमृतबीजमष्टधा जपन्नैवेद्यममृतीकृत्यास्त्रमन्त्रेण नैवेद्यस्योपरि चक्रमुद्रां दर्शयन् तत्संरक्ष्य मूलमन्त्रेणाष्टवारमभिमन्त्र्य दक्षिणहस्तेन जलं गृहीत्वा

"हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम्। पञ्चधा षड्रसोपेतं गृहाण परमेश्वर।।"

इति नैवेद्यस्योपरि चुलुकोदकं निक्षिप्य मूलमुच्चार्य "श्रीशिव एतत्ते नैवेद्यं नमः" इत्युत्सृज्य, कराभ्यां तत्पात्रं स्पृशन् पूर्वोक्तमन्त्रेण निवेद्य पात्रान्तरे धेनुमुद्रयामृतीकृत्य देवस्य दक्षिणहस्ते तज्जलं किञ्चिद्दत्त्वा "अमृतोपस्तरणमसि

स्वाहा'' इति देवमाचामयित्वा वामकरेण विकचोत्पलसन्निभां ग्रासमुद्रां दर्शयन् दक्षिणकरस्थकनिष्ठानामिकाङ्गुष्ठयोगेन ''ओं प्राणाय स्वाहा'' एवं पुनस्तर्जनीमध्यमानामिकाङ्गुष्ठयोगेन ''ओं उदानाय स्वाहा।'' एवं प्रागुक्तपञ्चमुद्राभिः पञ्च ग्रासान् ग्राहयित्वा स्वर्णादिपात्रे जलं धेनुमुद्रया अमृतीकृत्य

> ''नमस्ते देवदेवेश सर्वतृप्तिकरं परम्। अन्यानिवेदितं शुद्धं प्रकृतिस्थं सुशीतलम्।।
> परमानन्दसम्पूर्णं गृहाण जलमुत्तमम्।''

इति देवस्य वामभागे जलपात्रं निवेश्य निवेद्य, पुष्पाञ्जलिं दत्त्वास्त्रमन्त्रेण दिग्बन्धनं कुर्वन् देवं परितो जवनिकां विभाव्य ''अवात्मकं नैवेद्यं नमः'' इत्यङ्गुष्ठानामिकायोगरूपां करद्वयेन नैवेद्यमुद्रां प्रदर्श्य देवं भुञ्जानं ध्यायेत्। यथा—

> ब्रह्मेन्द्राद्यैः सरसमभितः सूपविष्टैः समेतो
> देव्या शिञ्जद्वलयकरया सादरं वीज्यमानः।
> नर्मक्रीडाप्रहसनपरो हासयन् पङ्क्तिभोज्यान्
> भुङ्क्ते पात्रे कनकघटिते षड्रसान् देवदेवः।।

इति ध्यायन् मूलमन्त्रं दशधा जपित्वा जपं समर्प्य नित्यहोमं कुर्यात्। अत्र नित्यहोमविधानं तु प्रागेव दर्शितम्।। अत्रैवं विस्ताराशक्तौ ''अग्न्याधानादिकं कर्म नित्यहोमे न विद्यते'' इति वशिष्ठसंहितावचनात् लौकिकाग्नावेव देवदेवं ध्यात्वा सम्पूज्य मूलमन्त्रेण पञ्चविंशत्याहुतीः षडङ्गमन्त्रैश्च षडाहुतीरावरणदेवतानामेकैकामाहुतिं च जुहुयात्। आवरणहोमाशक्तौ मूलमन्त्रेण षडङ्गमन्त्रैश्चोक्तसंख्यया जुहुयादिति नित्यहोमं विधाय, पूजास्थानं गत्वा स्वासन उपविश्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा ऋष्यादिकरषडङ्गन्यासपूर्वकं मूलमन्त्रेण पुष्पाञ्जलित्रयं दत्त्वा पूजाचक्रस्येशानकोणे चतुरस्रवृत्तत्रिकोणमण्डलं कृत्वा साधारं सव्यञ्जनान्नोदकपूरितं ताम्रपात्रं निधाय ''सर्वभूतानीहागच्छत इह तिष्ठत'' इत्यावाह्य ''सर्वभूतेभ्यो नमः'' इति पुष्पादिभिः सम्पूज्य,

> ''ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः। योगिन्योऽप्युग्ररूपाश्च गणानामधिपाश्च ये।
> भूचराः खेचराश्चैव तथा वै चान्तरिक्षगाः। सर्वे ते प्रीतमनसो भूता गृह्णन्त्विमं बलिम्।।''

इति वामकराङ्गुलिभिरर्घ्यपात्रात्पात्रान्तरेणोद्धृत्य जलधारां बलिपात्रे निक्षिपन् बलिमुत्सृज्य पुष्पाञ्जलिमादाय

> ''भूतानि यानीह वसन्ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम्।
> सन्तोषमासाद्य व्रजन्तु सर्वे क्षमन्तु तान्यत्र नमोऽस्तु तेभ्यः।।''

इति पुष्पाञ्जलिं दत्त्वा प्रणम्य ''यथासुखं विहरन्तु भूतानि'' इति नाराचमुद्रया विसृज्यास्त्रमन्त्रेण शुद्धजलैः स्वात्मानं प्रोक्ष्य देवं तृप्तं ध्यात्वा, पात्रान्तरे वमिति धेनुमुद्रया जलममृतीकृत्य ''अमृतापिधानमसि स्वाहा'' इति देवायोत्तरापोशानं दत्त्वा नैवेद्यं गतसारमुद्धृत्य नैर्ऋत्यां नैवेद्यपात्रं निधाय गोमयाद्भिरस्त्रमन्त्रेण तत्स्थानं शोधयित्वा तस्मात् किञ्चिच्छेषमादाय ''निर्माल्यभोजिने नमः'' इत्यैशान्यां निक्षिप्य हस्तं प्रक्षाल्य, देवाय करशोधनार्थं सुगन्धिचूर्णादिकं करक्षालनाय च दत्त्वा करं क्षालयित्वा, हस्तशोधनार्थं कर्पूरशलाकादि दत्त्वा पुनर्गण्डूषजलं दत्त्चा पादौ प्रक्षाल्य प्राग्वदाचमनीयं दत्त्वा सूक्ष्मवस्त्रेण हस्तौ पादौ प्रोञ्छ्य सुगन्धिचूर्णादिभिः करौ सुरभितौ कृत्वा ताम्बूलमादाय, मूलमुच्चार्य

''तमालदलकर्पूरपूगभागतरङ्गितम्। [1]संशोभितं सुगन्धं च ताम्बूलं प्रतिगृह्यताम्।'' ''श्रीशिव एतत्ते ताम्बूलं नमः'' इति ताम्बूलं समर्प्य प्रागुक्तनिवेदनमन्त्रेण निवेद्य, मूलमन्त्रमुच्चार्य ''सुप्रसन्नाय श्रीशिवाय नमः'' इति त्रिः पुष्पाञ्जलिना सम्पूज्य, पुनर्मूलमुच्चार्य ''सुप्रसन्नाय श्रीशिवाय एष गन्धो नमः'' एवं गन्धपुष्पधूपदीपैराराधयेत्, इति प्रसन्नपूजां कृत्वा मुकुटं परिधाप्यादर्शं दर्शयित्वा छत्रचामरव्यजनादिनानाविधराजोपचारान् परिकल्प्य, दूर्वाक्षतजलान्यादाय मूलमुच्चार्य ''श्रीशिव एतत्ते नीराजनं नमः'' इति देवस्य मुकुटोपरि दूर्वादिकं निक्षपेत्। ततः कांस्यादिबृहत्स्थाल्यां चन्दनादिनाष्टदलकमलं कृत्वा तत्र मध्येऽष्टसु दलेषु च पिष्टमयान् नव दीपान् घृतपूर्णान् कर्पूरगर्भवर्तिसहितान् निःक्षिप्य ह्रीमिति प्रज्वाल्य, क्वच्चिच्चतुरस्रमण्डले निधाय वमिति धेनुमुद्रयामृती–कृत्यास्त्रमन्त्रेण चक्रमुद्रया संरक्ष्य ''श्रींह्रींग्लूंस्लूंप्लूंम्लूंन्लूंह्रींश्रीं'' इति रत्नेश्वरीविद्यया मूलमन्त्रेण च पृथक्पृथगभ्यर्च्य तत्पात्रं कराभ्यामादाय मूलमुच्चरन् देवस्य चरणान्मूर्धान्तं मूर्धादिचरणान्तं पुनःपुनर्भ्रामयन् नवकृत्वो नीराजयेत्।। इति नीराजनविधिः।।

ततः प्रणम्य मूलमन्त्रस्य प्राणायामत्रयं कृत्वा ऋष्यादिकरषडङ्गन्यासपूर्वकं प्राक्प्रोक्तविधिना प्रतिष्ठताक्षमालां प्रागुक्तविधिना सम्पूज्य, देवं भावयन् मूलमन्त्रं प्रणवोच्चारपूर्वकमष्टोत्तरसहस्रं तदर्धं त्रिशतमष्टोत्तरशतं वा जपित्वा, ओमिति जपं समाप्य पुनः प्राणायामर्ष्यादिन्यासपूर्वकं जपमालां प्राक्प्रोक्तविधिना स्वशिरसि निधायार्घ्योदकमादाय

''ओं गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव त्वत्प्रसादात् त्वयि स्थिता।।''

इति देवस्य दक्षिणहस्ते गृहीतोदकदानेन जपं समर्प्य, प्राक्प्रोक्तविधानेन जपमालां सम्पूज्य रहसि निधापयेत्। अत्र जपमालाभावेऽङ्गुलिभिर्वा जपगणना कार्या। इत्थं जपं विधाय घण्टावादनपूर्वकं शिवसहस्रनाम–शतनामस्तोत्रादिभिर्देवं स्तुत्वा प्रदक्षिणनमस्कारैः परितोप्य

''यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम्। निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया।।
आवाहनं न जानानि न जानामि विसर्जनम्। पूजां चैव न जानामि त्वं गतिः परमेश्वर।।
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम। अन्तश्चारेण भूतानां द्रष्टा त्वं परमेश्वर।।
नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्। तेषु तेष्वचला भक्तिरव्ययास्तु सदा त्वयि।।
देवो दाता च भोक्ता च देवः सर्वमिदं जगत्। देवो जयति सर्वत्र यो देवः सोऽहमेव हि।।''

इति कृताञ्जलिः प्रार्थ्य पुनःपुनः प्रणम्य स्वेष्टार्थप्रार्थनां कृत्वार्घ्यपात्रमुद्धृत्य

''साधु वासाधु वा कर्म यद्यदाचरितं मया। तत्सर्वं भगवञ्छ[2]म्भो गृहाणाराधनं परम्।।''

इति कृतमाराधनमर्घ्योदकदानेन समर्प्य पुनः प्राग्वदर्घ्यं दत्त्वा तत्पात्रं स्वस्थाने निवेश्य पुष्पाञ्जलिमादाय ''इतः पूर्व''मिति मन्त्रेण देवस्य पादयोर्दत्त्वा प्रणम्य पुष्पाञ्जलिमादाय मूलमुच्चार्य

''रश्मिरूपा महेशस्य पूजिता याश्च देवताः। श्रीशिवाङ्गे विलीनास्ताः सन्तु सर्वसुखावहाः।।''

इति पुष्पाञ्जलिं निक्षिप्य, द्वारदेवताश्चतुरायतनदेवताश्च देवस्याङ्गे विलीना इति विभाव्य ''श्रीशिव क्षमस्व'' इति तालत्रयं दत्त्वा संहारमुद्रां बद्ध्वा

''गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवा न विदुः परमं पदम्।।''

इति पठित्वा निर्माल्यपुष्पेण सह तत्तेजः समुद्धृत्याघ्राय नासाध्वना तत्तेजो ब्रह्मरन्ध्रं नीत्वा सुषुम्नामार्गेण हृदयकमलमानीय

---

१. 'संसाधितं' क. पाठः। २. 'विष्णो' क. पाठः।

“ओं तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वर। यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि।।”

इति स्वहृदि संस्थाप्य, तत्र यथोक्तरूपं देवं ध्यात्वा मानसैरुपचारैः सम्पूज्य स्वाभेदेन ध्यायन् प्राणयामत्रयर्ष्यादिकरषडङ्गन्यासान् विधायेशानकोणे चतुरस्रवेष्टितं त्रिकोणमण्डलं कृत्वा, पञ्चायतनी चेदीशानादिकोणचतुष्के प्रादक्षिण्येन–लम्बोदराय नमः। चण्डेश्वर्यै नमः। विष्वक्सेनाय नमः। तेजश्चण्डाय नमः, इति गणेशादिनिर्माल्येन सम्पूज्य, मध्ये चण्डेश्वराय नमः, इति देवस्य निर्माल्यपुष्पादिकं निक्षिप्य, नैवेद्यशेषं किञ्चिदानीय

“लेह्यचोष्यान्नपानादिताम्बूलं स्रग्विलेपनम्। निर्माल्यभोजिने तुभ्यं ददामि श्रीशिवाज्ञया।।”

इति तत्रैव निक्षिप्य स्वकरं प्रक्षालयेत्। अन्यदैवतोपासकैरपि स्वेष्टदेवताङ्गत्वेन पूर्वोक्तस्थापनक्रमेण गणेशादीनां निर्माल्यदेवताः पूज्याः।। ततस्ताम्रादिपात्रे गन्धपुष्पान्वितं जलमापूर्य सूर्याभिमुखः स्थित्वा

“ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये सवित्रे कर्मदायिने।।”

इति पठित्वा “ह्रांह्रींसः श्रीसूर्य एष तेऽर्घ्यः स्वाहा” इति सूर्यायार्घ्यं दत्त्वा, कृताञ्जलिः

“ यज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम। अच्छिद्रमस्तु तत्सर्वं भास्करस्य प्रसादतः।।”

इत्यच्छिद्रमवधार्य पूजास्थानं गत्वा पूजावशिष्टं गन्धं किञ्चित् स्ववामकरे निधाय तत्रार्घ्यपात्रोदकं किञ्चित् निक्षिप्यालोड्य मूलमन्त्रेणाष्टवारमभिमन्त्र्य तेन जलेन स्वात्मानं प्रोक्ष्य मूलमन्त्रेण निर्माल्यपुष्पं शिरसि निधाय, मूलेनैव चरणोदकं प्राश्य नैवेद्यं शिवभक्तेभ्यो विभज्य दत्त्वा, स्वयमपि भुक्त्वा श्रीशिवरूपः सुखं विहरेत्।। इति नित्यपूजाविधिः।।

अत्र स्कन्दपुराणे शिवनिर्माल्यधारणं तन्निवेदितभक्षणं च तद्भक्तैः कर्तव्यमित्युक्तत्वादवश्यं कार्यमिति। यत्तु शिवनिर्माल्यधारणनैवेद्यभक्षणादौ निषेधवचनं तदशुचिपरम्। अत्राशुचिरनधिकारी अदीक्षित इति यावत्।

अथैवं विस्तरतो नित्यपूजां कर्तुमशक्तश्चेत् प्रातरुत्थाय श्रीगुरुं स्मृत्वा प्रणम्य शौचादिकं विधायोक्तविधिना स्नात्वा, स्नानेऽपि विस्ताराशक्तौ निर्मलादिस्नानानन्तरं कुम्भमुद्रया स्वशिरसि त्रिरभिषिञ्चेत्। उक्तविधिना त्रिपुण्ड्रं विधाय, तत्रापि विस्ताराशक्तौ मूलमन्त्रेणैवाभिमन्त्रितभस्मना विधायोक्तविधिना सन्ध्यातर्पणसूर्यार्घ्यदानानि कृत्वा, तर्पणेऽपि विस्ताराशक्तौ मूलमन्त्रेणाष्टाविंशतिवारं देवं सन्तर्प्य, सूर्यार्घ्यदाने विस्ताराशक्तौ केवलसूर्यमन्त्रेणैवार्घ्यं दत्त्वा गृहं गत्वा प्राग्वद्भूतोत्सादनं कृत्वा प्रागुक्तविधिना पश्चिमद्वारमेव सम्पूज्य, प्राग्वत् प्रविश्यासनं कल्पयित्वा आसनेऽपि विस्ताराशक्तौ “ह्रीं आधारशक्तिकमलासनाय नमः” इत्यासनं सम्पूज्योपविश्य, प्राग्वद्द्रव्याण्यासाद्य भूतशुद्धिं विधाय, तत्रापि विस्ताराशक्तौ प्राग्वद्धृदये जीवात्मानं ध्यात्वा तथैव ब्रह्मरन्ध्रे संयोज्य प्राग्वत् पापपुरुषं ध्यात्वा तथैव यंबीजेन संशोध्य रंबीजेन सन्दह्य वंबीजेनाप्लाव्य पुनर्ब्रह्मरन्ध्राज्जीवात्मानं हृदयमानीय प्राग्वत् प्राणप्रतिष्ठां मातृकान्यासांश्च कृत्वा, समस्तमातृकान्यासकरणाशक्तौ केवलमातृकान्यासं श्रीकण्ठादिन्यासं च, तत्राप्यशक्तश्चेत् केवलमातृकान्यासमेव कृत्वा प्राणायामयोगपीठन्यासं मूलमन्त्रन्यासांश्च कृत्वा ध्यानार्घ्यस्थापनादि सर्वं प्राग्वत् समापयेत्।।

पाद्यादिपात्रस्थापनाशक्तौ अर्घ्यपात्रं प्रोक्षणीपात्रं च संस्थाप्य प्रोक्षणीजलेनैव पाद्यादीनि कल्पयेत्। इतोऽपि सङ्क्षेपप्रकारः शास्त्राद्गुरुमुखादवगन्तव्यः। इयं सङ्क्षेपपूजा विस्तरतः कर्तुमशक्तानामेव, शक्तौ चेदालस्यादिना विस्तारं त्यक्त्वा सङ्क्षेपेण क्रियते तदा दोषाय भवतीति। उत्तरतन्त्रे—

स्वरूपं मन्त्रयन्त्राणां देवतानां विशेषतः। अज्ञात्वा भजते मूढो न सिद्धिं प्राप्नुयात् क्वचित्।। १ ।।

मन्त्रविद्यार्णनिचयं स्वरव्यञ्जनभेदतः। पृथक्पृथग्विभज्यैवं पार्थिवाद्याश्च षड्विधाः।। २।।
रश्मयोऽपि समालेख्यास्तेषु पार्थिवसञ्चयम्। तथैवाप्यं तैजसं च वायव्यं नाभसं क्रमात्।। ३।।
मानसं रश्मिवृन्दं च षोढा संयोज्य संलिखेत्। षड्विधेषु च भूयस्त्वं यस्य तत् तत्स्वरूपकम्।।४।।

इति। अस्यार्थः— मन्त्रे यावन्तो वर्णास्तान् स्वरव्यञ्जनरूपेण पृथक्पृथग्विलिख्य प्राक् मन्त्रवीर्यप्रकरणप्रोक्तेषु चतुर्विधेषु रश्मिष्वन्यतमं रश्मिक्रमं गृहीत्वा प्रत्यक्षरस्य षड्विधरश्मीन् पृथक्पृथग्विलिख्य, ततः इयन्तः पार्थिवाः, इयन्तः आप्याः इयन्तस्तैजसाः, इयन्तो वायव्याः, इयन्तो नाभसाः, इयन्तो मानसाः। एवं षट् वृन्दानि कृत्वा तेषु यस्याधिक्यं दृश्यते तत्स्वरूपं मन्त्रयन्त्रदेवतानां ज्ञातव्यम्। इति कालीमते प्रकाशितं रश्मिवृन्दमेतस्यापि विवेको विविच्याग्रे वक्ष्यते।। कादिमते तु मातृकार्णवे—

ऊर्ध्वाम्नाया इति ख्याता ऊर्ध्ववक्त्राद्विनिर्गताः। पूर्वाम्नायास्तु सम्प्रोक्ता मन्त्राः पूर्वमुखोद्भवाः।।१ ।।
दक्षिणास्यात् समुद्भूता दक्षिणाम्नायसंज्ञकाः। पश्चिमाननसम्भूताः पश्चिमाम्नायसंज्ञकाः ।। २।।
उत्तरास्यात्तु सञ्जाता ह्युत्तराम्नायसंज्ञकाः। ऊर्ध्ववक्त्राच्च सम्भूता ह्यूर्ध्वाम्नायाभिधाः स्मृताः।। ३।।
पृथिवीजलतेजांसि वायुराकाशमेव च। क्रमेणात्र तु विज्ञेयं धराद्यं भूतपञ्चकम्।। ४।।
मानसा रश्मयो ज्ञेया भूतग्रामे तु सर्वतः। ऊर्ध्वाम्नायक्रमे वच्मि रश्मिवृन्दं तु षड्विधम्।। ५।।
आकाशार्णेषु दशसु पार्थिवाद्याश्च रश्मयः। एकादिदशपर्यन्तं क्रमात्पार्थिवरश्मयः।। ६।।
एकसप्ततितोऽशीतिपर्यन्तं जलरश्मयः। एकादशोत्तरशताद्विंशोत्तरशतावधि।। ७।।
तैजसाश्चैकपञ्चाशदुत्तराच्छततः क्रमात्। षष्ट्युत्तरशतं यावद्वायव्याः परिकीर्तिताः।। ८।।
नाभसा रश्मयः सैकचत्वारिंशच्छतद्वयात्। पञ्चाशदुत्तरशतद्वयं यावत् प्रकीर्तितम्।। ९।।
प्रत्यक्षरं तु द्वात्रिंशद्द्वात्रिंशन्मानसांशवः। दशानां वायुवर्णानां वक्ष्ये रश्मिक्रमं शृणु।। १०।।
रुद्राद्विंशतिपर्यन्तं पार्थिवा रश्मयः स्मृताः। एकषष्टिमितात्सप्तत्यन्तमाप्याः प्रकीर्तिताः।। ११।।
एकोत्तरशताच्चैव दशोत्तरशतावधि। तैजसाः सैकनवतिशताद्यावच्छतद्वयम्।। १२।।
वायव्या रश्मयो ज्ञेयाः सैकत्रिंशच्छतद्वयात्। चत्वारिंशोत्तरशतद्वयं नाभसरश्मयः।। १३।।
मानसा रश्मयः प्रागवद् द्वात्रिंशत्सम्मिताश्च ये। तैजसेषु दशार्णेषु पार्थिवाद्याश्च रश्मयः।। १४।।
एकविंशात् क्रमात् त्रिंशद्यावत्पार्थिवरश्मयः। एकपञ्चाशतः षष्टिर्यावदाप्याश्च रश्मयः।। १५।।
सैकचत्वारिंशशताद्यावत्सार्धशतं तथा। तैजसा रश्मयः सैकाशीत्युत्तरशतात् क्रमात्।। १६।।
सनवत्युत्तरशतं वायव्याः सम्प्रकीर्तिताः। शतद्वयात् सैकविंशात् सत्रिंशद्द्विशतं क्रमात्।। १७।।
नाभसा रश्मयो ज्ञेयाः प्राग्वन्मानसरश्मयः। आप्येषु दशवर्णेषु क्रमाद्रश्मिक्रमं विदुः।। १८।।
सैकत्रिंशात् ततश्चत्वारिंशद्यावच्चा पार्थिवाः। तथैकनवतेर्यावच्छतमाप्याः प्रकीर्तिताः।। १९।।
सैकत्रिंशच्छताद्यावच्चत्वारिंशच्छतान्ततः। तैजसा रश्मयश्चैकसप्तत्यूर्ध्वशतात् क्रमात्।। २०।।
साशीतिशतकं यावद्वायव्याः परिकीर्तिताः। एकादशोत्तरशतद्वयाद्विंशच्छतद्वयम्।। २१।।
नाभसा रश्मयो ज्ञेयाः प्राग्वन्मानसरश्मयः। पार्थिवार्णेषु दशसु क्रमाद्रश्मिक्रमं ब्रुवे।। २२।।

एकचत्वारिंशदङ्काद्यावत् पञ्चाशतं भवेत्। पार्थिवा रश्मयो ज्ञेयास्तथैकाशीतितः परम्।। २३।।
यावन्नवति चाप्यास्ते सैकत्रिंशच्छतात् परे। सत्रिंशच्छतकं यावत्तैजसाः सम्प्रकीर्तिताः।। २४।।
सैकषष्ट्युत्तरशतात् सप्तत्यूर्ध्वशतं तथा। वायव्या रश्मयो ज्ञेया एकोत्तरशतद्वयात्।। २५।।
दशोत्तरं द्विशतकं नाभसाः पूर्ववत् परे।

इति। परे मानसाः। पूर्ववद् द्वात्रिंशत्प्रत्यर्णं ज्ञेया इत्यर्थः। जयद्रथयामले—

ऊर्ध्वाम्नाये नभोवायुतेजोजलधरांशवः। पूर्वाम्नाये पृथिव्यम्बुतेजोऽनिलनभःक्रमः।। १।।
दक्षिणेऽनिलतेजोऽम्बुपृथिवीनभसां क्रमः। पश्चिमेऽम्बुपृथिव्यभ्रपवनानलरश्मयः ।। २।।
उत्तरेऽनलवाःपृथ्वीनभोवायुक्रमः स्मृतः।

इति। मातृकार्णवे—

षट्पञ्चाशल्लकारस्य चाधारे पार्थिवांशवः। स्वाधिष्ठाने तु द्वाषष्टिस्तेजसोपान्तरश्मयः।। १।।
मणिपूरे द्विपञ्चाशल्लान्तस्यामृतसंख्यकाः। अनाहते यकारस्य चतुःपञ्चाशदानिलाः।। २।।
द्वासप्ततिर्विशुद्धे तु हकारस्य च नाभसाः। आज्ञायां तु चतुष्षष्टिष्ठान्ते मानसरश्मयः।। ३।।
विसर्गस्थे विसर्गस्य कलाशतकमानसाः।

इति। अस्यार्थः— ऊर्ध्वाम्नाये आकाशात्मकेशानमुखोद्भूते देवतामन्त्रयन्त्राणां स्वरूपज्ञानार्थं षड्विधरश्मयः प्रदर्श्यन्ते। तत्रादावाकाशवर्णानां लृलॄअंङञणनमशहानां दशानां क्रमेण १। २। ३। ४। ५। ६। ७। ८। ९। १० एवं क्रमेण पार्थिवरश्मयो ज्ञेयाः। अथाप्यरश्मयः— ७१। ७२। ७३। ७४। ७५। ७६। ७७। ७८। ७९। ८०। अथ तैजसरश्मयः— १११। ११२। ११३। ११४। ११५। ११६। ११७। ११८। ११९। १२०। अथ वायव्यरश्मयः— १५१। १५२। १५३। १५४। १५५। १५६। १५७। १५८। १५९। १६०। अथाकाशरश्यमः— २४१। २४२। २४३। २४४। २४५। २४६। २४७। २४८। २४९। २५०। अथ मानसरश्मयः— ३२। ३२। ३२। ३२। ३२। ३२। ३२। ३२। ३२। ३२।

अथ वायुवर्णानाम् अआएकचटपयषाणां दशानां क्रमेण पार्थिवरश्मयः— ११। १२। १३। १४। १५। १६। १७। १८। १९। २०। अथाप्यरश्मयः— ६१। ६२। ६३। ६४। ६५। ६६। ६७। ६८। ६९। ७०। अथ तैजसरश्मयः— १०१। १०२। १०३। १०४। १०५। १०६। १०७। १०८। १०९। ११०। अथ वायव्यरश्मयः— १९१। १९२। १९३। १९४। १९५। १९६। १९७। १९८। १९९। २००। अथाकाशरश्यमः— २३१। २३२। २३३। २३४। २३५। २३६ २३७। २३८। २३९। २४०। मानसरश्मयः प्राग्वत्प्रत्यक्षरं द्वात्रिंशद्द्वात्रिंशत्क्रमेण ज्ञेयाः।।

अथ तैजसवर्णानां दशानाम् इईऐखछठथफरक्षाणां पार्थिवादिरश्मयः। तत्रादौ पार्थिवाः— २१। २२। २३। २४। २५। २६। २७। २८। २९। ३०। अथाप्यरश्मयः— ५१। ५२। ५३। ५४। ५५। ५६। ५७। ५८। ५९। ६०। अथ तैजसरश्मयः— १४१। १४२। १४३। १४४। १४५। १४६। १४७। १४८। १४९। १५०। अथ वायव्यरश्मयः— १८१। १८२। १८३। १८४। १८५। १८६। १८७। १८८। १८९। १९०। अथाकाशरश्मयः— २२१। २२२। २२३। २२४। २२५। २२६। २२७। २२८। २२९। २३०। मानसाः प्राग्वत्।।

अथाप्यवर्णानां दशानाम् ऋॠऔघझढधभवसानां दशानां क्रमेण पार्थिवादिरश्मयः। तत्रादौ पार्थिवाः— ३१।

३२। ३३। ३४। ३५। ३६ ३७। ३८। ३९। ४०। अथाप्या: — ९१। ।९२। ९३। ९४। ९५। ९६। ९७। ९८। ९९। १००। अथ तैजसा:— १३१। १३२। १३३। १३४। १३५। १३६ १३७। १३८। १३९। १४०। अथ वायव्या:— १७१। १७२। १७३। १७४। १७५। १७६। १७७। १७८। १७९। १८०। अथ नाभसा:— २११। २१२ ।२१३। २१४। २१५। २१६। २१७। २१८। २१९। २२०। मानसा: प्राग्वत्।।

अथ पार्थिववर्णानां दशानाम् उऊओगजडदबलळानां क्रमेण पार्थिवादिरश्मय:। तत्रादौ पार्थिवा:— ४१। ४२। ४३। ४४। ४५। ४६। ४७। ४८। ४९। ५०। अथाप्या:— ९१। ।९२। ९३। ९४। ९५। ९६। ९७। ९८। ९९। १००। अथ तैजसा:— १२१। १२२। १२३। १२४। १२५। १२६। १२७। १२८। १२९। १३०। अथ वायव्या:— १६१। १६२। १६३। १६४। १६५। १६६। १६७। १६८। १६९। १७०। अथ नाभसा:— २०१। २०२। २०३। २०४। २०५।। २०६। २०७। २०८। २०९। २१०। मानसा: प्राग्वज्ज्ञेया:।। इत्यूर्ध्वाम्नायक्रमे रश्मिक्रम:।।

अथ पूर्वाम्नाये रश्मिक्रम:। तत्रादौ पार्थिवानां दशार्णानां क्रमेण पार्थिवादिरश्मिक्रम:। तत्रादौ पार्थिवा:— २४१। २४२। २४३। २४४। २४५। २४६। २४७। २४८। २४९। २५०। अथाप्या:— १५१। १५२। १५३। १५४। १५५। १५६। १५७। १५८। १५९। १६०। अथ तैजसा:— १११। ११२। ११३। ११४। ११५। ११६। ११७। ११८। ११९। १२०। अथ वायव्या:— ७१। ७२। ७३। ७४। ७५। ७६। ७७। ७८। ७९। ८०। अथ नाभसा:— १। २। ३। ४। ५। ६। ७। ८। ९। १०।।

अथाप्यानां दर्शार्णानां पार्थिवादिरश्मय:। तत्रादौ पार्थिवा:— २३१। २३२। २३३। २३४। २३५। २३६ २३७। २३८। २३९। २४०। अथाप्या:— १९१। १९२। १९३। १९४। १९५। १९६। १९७। १९८। १९९। २००। अथ तैजसा:— १०१। १०२। १०३। १०४। १०५। १०६। १०७। १०८। १०९। ११०। अथ वायव्या:— ६१। ६२। ६३। ६४। ६५। ६६। ६७। ६८। ६९। ७०। अथ नाभसा:— ११। १२। १३। १४। १५। १६। १७। १८। १९। २०। मानसा: प्राग्वत्।।

अथ तैजसानां दशार्णानां क्रमेण पार्थिवादिरश्मय: तत्र पार्थिवा:— २२१। २२२। २२३। २२४। २२५। २२६। २२७। २२८। २२९। २३०। अथाप्या: — १८१। १८२। १८३। १८४। १८५। १८६। १८७। १८८। १८९। १९०। अथ तैजसा:— १४१। १४२। १४३। १४४। १४५। १४६। १४७। १४८। १४९। १५०। अथ वायव्या: — ५१। ५२। ५३। ५४। ५५। ५६। ५७। ५८। ५९। ६०। अथ नाभसा:— २१। २२। २३। २४। २५। २६। २७। २८। २९। ३०। अत्र मानसा: प्राग्वत्।

अथ वायव्यानां दशार्णानां पार्थिवादिरश्मय:। तत्रादौ पार्थिवा:— २२१। २२२। २२३। २२४। २२५। २२६। २२७। २२८। २२९। २३०। अथाप्या: — १७१। १७२। १७३। १७४। १७५। १७६। १७७। १७८। १७९। १८०। अथ तैजसा:— १३१। १३२। १३३। १३४। १३५। १३६ १३७। १३८। १३९। १४०। अथ वायव्या:— ९१। ।९२। ९३। ९४। ९५। ९६। ९७। ९८। ९९। १००। अथ नाभसा:— ३१। ३२। ३३। ३४। ३५। ३६ ३७। ३८। ३९। ४०। मानसा: प्राग्वत्।।

अथ नाभसानां दशार्णानां पार्थिवादिरश्मय:। तत्रादौ पार्थिवा: — २०१। २०२। २०३। २०४। २०५। २०६। २०७। २०८। २०९। २१०। अथाप्या:— १६१। १६२। १६३। १६४। १६५। १६६। १६७। १६८। १६९। १७०।

अथ तैजसाः— १२१।१२२।१२३।१२४।१२५।१२६।१२७।१२८।१२९।१३०। अथ वायव्याः — ८१।८२। ८३।८४।८५।८६।८७।८८।८९।९०।अथ नाभसाः — ४१।४२।४३।४४।४५।४६।४७।४८।४९।५०। अत्रापि मानसाः प्राग्वत्।। इति पूर्वाम्नाये रश्मिक्रमः।।

अथ दक्षिणाम्नाये रश्मिक्रमः। ''दक्षिणेऽनिलतेजोऽम्बुपृथिवीनभसां क्रमः।'' अत्रायमर्थः— पूर्वाम्नाये ये पार्थिवादिरश्मयः पार्थिवदशार्णानामभिहितास्ते दक्षिणाम्नाये वायव्यदशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। अथ च पूर्वाम्नाये ये आप्यदशार्णानां पार्थिवादिरश्मयः प्रोक्तास्ते दक्षिणाम्नाये तैजसानां दशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। अथ च पूर्वाम्नाये तैजसानां दशार्णानां ये पार्थिवादिरश्मयः प्रोक्तास्तेऽत्र दक्षिणाम्नाये आप्यानां दशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। अथ च पूर्वाम्नाये वायव्यदशार्णानां ये पार्थिवादिरश्मयः प्रोक्तास्तेऽत्र दक्षिणाम्नाये पार्थिवदशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। नाभसा उभयत्र समाना इत्यर्थः। एवं क्रमेण

''पश्चिमेऽम्बुपृथिव्यभ्रपवनानलरश्मयः। उत्तरेऽनलवाःपृथ्वीनभोवायुक्रमः स्मृतः।।''

एतद्रीत्या पश्चिमाम्नायोत्तराम्नाययोः रश्मिक्रम ऊह्यः। अत्र पञ्चाम्नायेषु क्रमप्राप्तरश्मिभ्योऽप्यधिकरश्मयो लरवयहठानां वर्णानां षण्णां पृथिव्यप्तेजोवाय्वाकाशमानसाः मातृकार्णवोक्तरीत्या ज्ञेयाः। यथा—मूलाधारे चतुर्दलकमलकर्णिका-मध्यस्थलकारस्य षट्पञ्चाशत्पार्थिवरश्मयो ज्ञेयाः। स्वाधिष्ठाने षट्दलकमलकर्णिकामध्यस्थवकारस्य द्विपञ्चाशदाप्यरश्मयो ज्ञेयाः। मणिपूरे दशदलकमलकणिकामध्यस्थरेफस्य द्वाषष्टिस्तैजसरश्मयो ज्ञेयाः। अनाहते द्वादशदलकमलकर्णिका-मध्यस्थयकारस्य चतुष्पञ्चाशद्वायव्यरश्मयो ज्ञेयाः। विशुद्धे षोडशदलकमलकर्णिकामध्यस्थहकारस्य द्वासप्ततिर्नाभसरश्मयो ज्ञेयाः। आज्ञायां द्विदलकमलकर्णिकामध्यस्थठकारस्य चतुःषष्टिर्मानसरश्मयो ज्ञेयाः। ततो ब्रह्मरन्ध्रे सहस्त्र-दलकमलकर्णिकोपरिष्टाद्विसर्गस्थानस्थितअःकारस्य षोडशशतमानसरश्मयो ज्ञेयाः।। श्रीतन्त्रराजे—

अथ षोडशनित्यानां ध्यानानि विविधानि ते। कथयामि शृणु प्राज्ञे वाञ्छितार्थसुरद्रुमान्।। १।।
एकैकमङ्गाङ्गित्वेन तासां तच्छक्तिभिस्तथा। प्रयोगेषु समस्तेषु बाह्याभ्यन्तरतः क्रमात्।। २।।
श्रियै कीर्त्यै जयावाप्त्यै वश्याकर्षणसिद्धये। ध्यायेद्देवीः समस्ताश्च लोहिताकारमण्डनाः।। ३।।
विद्याप्त्यै शान्तिके मुक्ताबिन्दुकर्पूरसन्निभाः। विद्वेषोच्चाटनिधननिग्रहेष्वसिताः स्मरेत्।। ४।।
क्षित्यादिभूतैः सत्त्वादिगुणैरेकैकसंहतैः। [1]एतद्व्याप्तिसमारब्धैर्वर्णाकारैस्तु शक्तयः ।। ५।।

इति। अत्र क्षितिवर्णानां दशानां सत्त्वादियोजनाप्रकारस्तु—सात्त्विकवर्णाः। राजसवर्णाः। तामसवर्णाः। सात्त्विकसात्त्विकाः राजसराजसाः। तामसतामसाः। सात्त्विकराजसाः। राजससात्त्विकाः। सात्त्विकतामसाः। तामससात्त्विकाः। राजसतामसाः। तामसराजसाः। एवं द्वादशधा क्षितिवर्णाः १२०। एवमाप्यवर्णाः १२०। तैजसा १२०। वायव्याः १२०। नाभसाः १२०। एवं मानसा अपि ज्ञेयाः।। तथा—

धूम्राभाश्चिन्तयेत् सर्वाः प्रोक्तद्वेषादिसिद्धये। सर्वत्र स्वसमाकारवर्णशक्तिभिरावृताः ।। १।।
असंख्याताः भवन्त्यासां कार्त्स्न्याद्ध्यानं तु को वदेत्। को वा शृणोति साकल्यात् ततः किञ्चिद्वदामि ते।।२।।
भौमाकाराः पीतवर्णाः सर्वाः स्तम्भनकारिकाः। आप्याः सत्त्वगुणाः सर्वाः सिताकाराः समीरिताः।।३।।

---

१. 'एकद्व्यादिसमा' क. पाठः।

ताः सर्वा ज्ञानकान्तिश्रीकीर्तिसौभाग्यमुक्तिदाः। आग्नेय्यो राजसाः सर्वा लोहिताकारसंयुताः।।४।।
वश्याकर्षणशान्तिश्रीसौभाग्यविजयप्रदाः। वायुरूपा धूम्रवर्णाः सर्वा द्वेषादिकारिकाः ।। ५।।
नाभसा नीलवर्णास्ता मारणोच्चाटयोः[1] स्मृताः। आसां मुखभुजादेहविधानं शृणु पार्वति।। ६।।
एकवक्त्राश्चतुर्वक्त्रा नववक्त्रास्तथापराः। षोडशास्याः पञ्चविंशदशास्या[2] अपि काञ्चन।। ७।।
षट्त्रिंशद्वदनाः क्वापि चत्वारिंशन्नवाननाः। चतुःषष्टिमुखास्तद्वदेकाशीतिशताननाः ।। ८।।
बहुना किं मुखभुजसंख्या साधकवाञ्छया। तथापि दर्शितं किञ्चिद्वक्त्रे वक्त्रे भुजद्वयम्।। ९।।
नामरूपातिगा येन तेन सानन्तविग्रहा। न सन्ति नानारूपाश्च भवेयुर्भक्तवाञ्छया ।। १०।।
अम्बायां[3] ललितायाः स्युरन्याः पञ्चदशाङ्गगाः। ललिताङ्गित्वरूपेण सर्वासामात्मविग्रहाः।। ११।।
तेन तासां तु सर्वासां स्वतोऽन्याः परिचारिकाः। तत्तद्वर्णायुधाकारवाहनैश्च सुसंयुताः ।। १२।।
तथाविधैः स्वस्वशक्तिवृन्दैश्चावेष्टिता अपि। इति तासां ध्यानभेदाः प्रोक्ताः स्थूला महेश्वरि।। १३।।
सूक्ष्मरूपाणि च तथा कथयामि तवानघे। येन ते साधकाः सर्वे वाञ्छितं प्राप्नुयुः क्षणात्।। १४।।
प्रोक्तेष्वाधारपद्मेषु लोहितात्मैक्यविग्रहाम्। विभाव्य तेजोनिचये तत्र सिद्धिं च चिन्तयेत्।। १५।।
तेन सर्वमभीष्टं तु समवाप्नोत्ययत्नतः। पूजातर्पणहोमादिरहितं भावनेन वै।। १६।।
परं तु ध्यानमुदितमखण्डात्मविमर्शतः। निर्वातदीपसङ्काशमात्मनात्मसमीरणात्[4] ।।। १७।।
स्थूलेन साधयेत्तत्तदिष्टं सर्वं शुभाशुभम्। प्रोक्तक्रमेण देवेशि सततं साध्यसाधकैः।। १८।।
सिद्धस्तु सूक्ष्मरूपेण ध्यानेन सकलेप्सितम्। साधयेत् पररूपं तु साध्यं साधनसिद्धये।। १९।।
ब्रूहि देव महेशान स्थूलसूक्ष्मस्वरूपयोः। ध्यानयोः कर्मणा सिद्धिं विविधां फलयोगतः।। २०।।
तासां तत्तत्करेषूक्तेष्वायुधान्यप्यशेषतः। शृणु वक्ष्ये महेशानि क्रमेण तव साम्प्रतम्।। २१।।
वामदक्षिणयोः स्यातां द्विभुजे च वराभये। पाशाङ्कुशौ चतुर्बाहौ षट्भुजे चापसायकौ।। २२।।
चर्मखड्गौ चाष्टभुजे गदाशूले दशोदिते। मुखपाण्यायुधानां तु रूपसंख्यादिवाञ्छया।। २३।।
यस्मिन् कर्मणि ता देवि यथा स्मरति साधकः। तथा तस्याग्रतो भूत्वा पालयन्ति तमादरात्।।२४।।
सर्वत्र स्मेरवदननयनाः शुभकर्मसु । दंष्ट्रोग्रा भीमनयनवदनाः क्रूरकर्मसु ।। २५।।
शुभेषु कर्मस्वासीनाः स्थिताः वाहनगा अपि। शुभेतरेषु ताः सर्वाः प्रयोगेषु तु सर्वदा।। २६।।
हारग्रैवेयमुक्तादिमुद्रिकानूपुरान्विताः । नवरत्नमयैः सर्वाः स्तवकैश्चोपशोभिताः ।। २७।।
वलयैरङ्गदै रत्नमयैरप्यङ्गुलीयकैः। विराजमानास्ताः सर्वा दिव्यांशुकधरा अपि ।। २८।।
एवं सामान्यमुदितं ध्यानं तासां महेश्वरि। विशेषं शृणु वक्ष्यामि तत्तत्कर्मसु सिद्धिदम्।। २९।।
गजवाजिरथारूढा विमानस्थाश्च सिंहगाः। व्याघ्रताक्ष्यर्समारूढा ध्येया रक्षासु सर्वदा।। ३०।।
समरेषु जयावाप्त्यै नृपराष्ट्रादिरक्षणे। पिशाचचोरव्यालादिदुर्गमेऽरण्यवर्त्मनि ।। ३१।।

---

[1] 'णोत्सादयोः' ख. पाठः। [2] 'द्वदना' ख. पाठः। [3] 'आद्याया' ख. पाठः। [4] 'समीक्षणात्' क. पाठः।

ध्यायेत्ता देवताः सर्वाः शर्वशक्तिभिरावृताः। एकैकशः समस्ता वा सुखीभवति निश्चितम्।। ३२।।
ऋक्षवानरभल्लूकखरसैरिभवाहनाः। उच्चाटनेषु सर्वास्ता भीमा ध्येयाः सुदारुणाः ।। ३३।।
कङ्कश्येनवकक्रौञ्चकाककौशिकवाहनाः। विद्वेषणेषु सर्वास्ताः घोरप्रहरणाकुलाः ।। ३४।।
[1]खड्गगोमायुगवयशललीहरिणाश्वगाः। चिन्तयेत् सकलाः सर्वक्षुद्रकर्मसु साधकः ।। ३५।।
पिशाचवेतालगता ध्येयाः सर्वत्र मारणे। इति वाहनभेदेन फलभेदाः समीरिताः ।। ३६।।
सर्वास्ताक्ष्यर्गता वह्निवायुबाहुद्वयान्विताः। द्विनेत्रास्त्वेकवदना दष्टौष्ठा[2] भीमविग्रहाः।। ३७।।
वहन्त्यो [3]वह्निनिवहं ध्येयाः स्वाकारशक्तिभिः। भीमारवाभिरभितो वेष्टिता रणमूर्धनि।। ३८।।
विजयो भवति क्षिप्रं वैरिसेनाविनाशनः। पलायनात् सङ्ग्रहणात् पादयोः पतनेन वा।। ३९।।
चतुर्मुखा अष्टभुजा गृह्णत्यो महतीं चमूम्। विभाव्य विजयं युद्धे प्राप्नोत्युक्तक्रमेण वै।। ४०।।
नवाननास्तद्द्विगुणभुजा वा भीमविग्रहाः। वामैः कोदण्डनिवहमन्यैर्बाणांश्च बिभ्रतीः।। ४१।।
ध्यात्वारिसेनां सकलां शरभिन्नकलेवराम्। वमद्रुधिरधारां च विजयं प्रोक्तमाप्नुयात्।। ४२।।
अथवा नवभिः खेटमन्यैः खड्गं च बिभ्रतीः। चतुरङ्गा रिपोः सेनाश्छिन्दतीस्तरवारिभिः।। ४३।।
चिन्तयित्वा रिपुं युद्धे भीमाकारे सुदुर्जये। [4]पत्त्यश्वेभरथाटोपवाद्यनिःस्वानसङ्कुले।। ४४।।
प्राप्नोत्ययत्नतः क्षिप्रं प्रागुक्तक्रमयोगतः। अथवा नवभिर्हस्तैर्गदा वामैस्तथेतरैः।। ४५।।
नखरान् पाणिभिर्भीमान् दधतीः समरे स्मरन्। तद्भिन्नचतुरङ्गां च सेनां विजयमाप्नुयात्।। ४६।।
तथा स्थूलकुठारोघैः पातयन्तीर्द्विषां बलम्। विजयी भवति प्रोक्तक्रमाद्वीरो रणाङ्गणे।। ४७।।
तथैव चर्मक्षुरिकानिवहैर्निघ्नतीर्बलम्। ध्यात्वा वा विजयी भूयात् समरे रोमहर्षणे।। ४८।।
निद्रातिमिरहस्ता वा मोहयन्तीर्द्विषां बलम्। ध्यात्वा विजयमाप्नोति नियतं[6] समरे नृपः।। ४९।।
पिशाचसर्पहस्ता वा तैः सेनां मृद्गतीः स्मरन्। विजयं समरे शश्वदश्नुते शङ्करोपमः।। ५०।।
पाशकर्तरिकाभिर्वा निघ्नतीः पृतनां रणे। स्मृत्वा विजयमाप्नोति नृपः प्रोक्तक्रमाद् ध्रुवम्।। ५१।।
अङ्कुशक्रकचाभ्यां वा दारयन्तीश्चमूः क्षणात्। चिन्तयन् समरे भीमे विजयी स्यात् सुनिश्चितम्।।५२।।
हलैश्च मुसलैर्नित्यं प्रहरन्तीर्द्विषां बलम्। स्मरन् प्रविजयं युद्धे प्राप्नोति ध्यानवैभवात्।। ५३।।
तथा षोडशवक्त्रास्ता द्वात्रिंशद्बाहुभिर्युताः। प्राग्वत् प्रमथितारातिपृतनाश्चिन्तयञ्जपेत्।। ५४।।
पञ्चविंशतिवक्त्रा वा पञ्चाशद्भुजसंयुताः। तथैकादशभिर्भेदैरायुधैर्निघ्नतीर्बलम्।। ५५।।
विचिन्त्य जयमाप्नोति समरे सर्वदा नृपः। तथा स्मरणसंयुक्तः पूजयेत्तास्तदा गृहे।। ५६।।
षड्त्रिंशद्वदना देवीर्द्विसप्ततिकराः स्मरेत्। तथैकादशरूपैस्तैः घोरैः प्रहरणैर्युताः।। ५७।।
एकोनपञ्चाशद्वक्त्रा हस्तैस्तद्द्विगुणैर्वृताः[7]। प्रहरन्तीस्तथारातीन् स्मृत्वा वा जयमाप्नुयात्।। ५८।।

---

१. 'बहु' क. पाठः। २. 'दंष्ट्रोग्रा' ख. पाठः। ३. 'दहन्त्यो वैरि' ख. पाठः। ४. 'सत्य' क. पाठः। ५. 'तस्या शूल' क. पाठः।
६. 'तः' क. पाठः। ७. 'र्युताः' क. पाठः।

चतु:षष्टिमुखा देवी: करैस्तद्द्विगुणैर्युता:। प्रहरन्ती: स्मरन् युद्धे जयी भवति निश्चितम्।। ५९।।
एकाशीतिमुखा देवीस्तद्द्वैगुण्यभुजैर्युता:। तथाविधै: प्रहरणै: स्मरन् युद्धे जयी भवेत्।। ६०।।
शतवक्त्रास्तद्द्विगुणकरास्तद्धेतिभिर्युता:। स्मृत्वा विजयमाप्नोति समरे ताश्च षोडश।। ६१।।
एवं वक्त्रकरैर्युक्तास्त्वेनेकैरिष्टरूपत:। तथा तैर्हेतिनिवहैर्व्याकुलक्रमहस्तकै: ।। ६२।।
असंख्याता भवेयुस्ता: साधकाभीष्टसिद्धिदा:। एवमुद्दामसमरसङ्कटादिषु चिन्तयन्।। ६३।।
देवीस्तास्तरति क्षिप्रमापदो मनुजोऽथवा। देवो वा राक्षसो यक्ष: किन्नरो वा भुजङ्गम:।। ६४।।
पिशाचो वा गुह्यको वा सिद्धो वा दानवोऽथवा। न कदाचित् स्मरन्नित्यं भङ्गमाप्नोति निश्चितम्।।६५।।
चोरादिसङ्कटेऽरण्ये गिरिदुर्गमवर्त्मनि। द्विविधैर्वैरिभिर्जातै: कृच्छ्रे राजभये तथा।। ६६।।
क्षुद्रपीडासु भूतापस्माररराक्षसङ्कटे। पिशाचडाकिनीवृन्दब्रह्मराक्षसपीडने ।। ६७।।
अन्येष्वपि च कृच्छ्रेषु विस्तरेषु महत्स्वपि। स्मरन्नित्थं जयेत्सर्वा विपदो ध्यानवैभवात्।। ६८।।
एकवक्त्रा द्विनयना द्विभुजाभीष्टधारिका:। सपादुका: समागत्य सर्वाभरणभूषिता:।। ६९।।
स्वसमानाभिरभित: शक्तिभि: परिवारिता:। गायन्तीभिश्च नृत्येषु वनमालाभिरन्विता:।। ७०।।
ध्यायन्नभिमतं सर्वमाप्नुयात् षोडशापि ता:। नासाध्यमस्ति भुवने ध्यानादासां महेश्वरि।। ७१।।
अलङ्कृतहयारूढा: शक्तिभिश्च तथावृता:[1]। स्मेराननाश्च गायन्ती: स्मृत्वा विश्वं वशं नयेत्।।७२।।
तथाविधा गजारुढास्तथा शक्तिभिरावृता:। सङ्गीतासक्तमहिलावृन्दसङ्कुलमध्यगा: ।। ७३।।
स्मृत्वा लक्ष्मीमवाप्नोति राजमान्यामतिस्थिराम्। नानाभोगसमोपेतां प्रख्यातां निजवैभवात्।। ७४।।
तथाविधरथारूढास्तथा शक्तिभिरावृता: । तथा सङ्गीतसंसक्तशक्तिवृन्दसमन्विता: ।। ७५।।
स्मरन् भूमिमवाप्नोति राजा चेद्वैरिमण्डलम्[2]। एवं तत् त्रिविधध्यानात् सौभाग्यं चातुलं यश:।।७६।।
कदलीकानने रम्ये निर्जने तास्तथा स्मरन्। पादुकासक्तचरणा आगच्छन्तीश्च शक्तिभि:।। ७७।।
मण्डलं मासमर्धं वा जपन् विद्यां ततो वसेत्। निधिं सम्प्राप्य भवने भोगी स्याद्यावदायुषम्।।७८।।
पूगारामे तथा स्मृत्वा निधिमाप्नोत्यत्नत:। एवं चम्पकपुन्नागनमेरुवकुलेष्वपि ।। ७९।।
तथा पर्वतकुञ्जेषु स्मरंस्ता वित्तमाप्नुयात्। राजतो धनितोऽन्यस्माद्येनासौ स्यात् सुखी चिरम्।।८०।।
समुद्रतीरे पुण्येषु तथा नित्यं स्मरन् धिया। प्राप्नोत्यनर्घ्यरत्नानि बहूनि ध्यानवैभवात्।। ८१।।
समुद्रगासरिन्मध्यतरुवाटीषु तास्तथा। स्मरन् कनकमाप्नोति वर्णोत्कृष्टमसंख्यकम्।। ८२।।
निर्जने विपिने स्मृत्वा प्राप्नोति महिला: शुभा:। रूपयौवनशीलाढ्या: प्रेमनिघ्नास्त्वनन्यगा[3]:।।८३।।
उक्तेषु तेषु स्थानेषु हयारूढा: स्मरन् नर:। नृपतिं कुरुते वश्यं मनोवाक्कायकर्मभि:।। ८४।।
तेषूक्तेषु गजारूढा: स्मृत्वा नारीर्नरान्नृपान्। वशीकरोति भुवने प्राणिनश्चाविशेषत:।। ८५।।
तथा तेषु रथारूढा: स्मृत्वा देवीस्तथोदिता:। वाञ्छितं समवाप्नोति मुक्त: स्यान्निगडादित:।। ८६।।

---

१. 'श्चोभवावृत:' क. पाठ:। २. 'लात्' क. पाठ:। ३. 'निम्ना' ख. पाठ:।

शतवक्त्रास्तद्द्विगुणभुजास्तेष्वायुधान्यपि। वाञ्छितानि लिखित्वा ताः पटेषु नवसु स्फुटम्।।८७।।
पटांस्तान् मध्यपर्यन्तद्वये संस्थापयेत् तथा। रथदन्तिहयानां तु तिरस्करणिकायुतान्।। ८८।।
प्रतिसैन्याभिमुख्ये तु तांस्तु सम्यक् प्रदर्शयेत्। वज्रालिखितनिःसानभेरीपणवमर्दलान्।। ८९।।
आहत्य वादयन् शृङ्गशङ्खकाहलकादिकम्। [1]व्रजेदभिमुखं वैरी धावत्याशु पराजितः।। ९०।।
तत्सेना सम्मुखी पश्चान्न जातु भवति ध्रुवम्। इति ध्यानान्यशेषाणि कथितानि तवानघे।। ९१।।
सूक्ष्मध्यानेन सिद्धानां साधकानां फलोदयः। अतस्तच्छृणु वक्ष्यामि सर्वाभीष्टाप्तिकारकम्।।९२।।
दाडिमीकेसरप्रख्यतेजोरूपाः स्मरन् धिया। तन्मध्ये साध्यरूपं च निजवाञ्छानुरूपकम्।। ९३।।
समस्ताभीष्टमाप्नोति शुभानप्यशुभानपि। तथा सुषुम्नान्तस्तद्वच्चिन्तयेद्वा गमागमम्।। ९४।।
तेनाखिलं निजेष्टं तु प्राप्नोति ध्यानवैभवात्। साधकश्च तथा सिद्धस्तयोरेवाशुसिद्धिकृत्।। ९५।।

इति। अत्र मूलमन्त्रवर्णाः स्वरव्यञ्जनरूपेण पृथक्कृताः तत्तद्रश्मिवृन्दसहितास्तत्तद्रूपेण ध्यातव्याः। मातृकावर्णाश्च तथैव ध्यातव्या इत्यर्थः। षोडशनित्यासु ललिताया अङ्गत्वेन पञ्चदशनित्याः, पञ्चदशनित्यासु परस्परमङ्गाङ्गित्वेन तत्तन्मन्त्रवर्णान् स्वरव्यञ्जनरूपेण पृथक्पृथग्विभज्य क्षित्यादिभूतवर्णान् विभज्य तत्तद्रश्मिपुञ्जसहितान् भावयेत्। तत्तत्फलं भवेत्।।
इति कादिमते रश्मिक्रमः।।

अथ कालीमते रश्मिक्रममाह। उत्तरतन्त्रे—

मनूनां प्रस्तृतेर्योग्या रश्मयो वर्णसंहतेः। देवतामन्त्रयन्त्राणां ज्ञायते यैः स्वरूपकम्।। १।।
रश्मिक्रमस्य विज्ञानाच्छिवोऽभून्नात्र संशयः। अकारस्य तु विज्ञेयाः पार्थिवाश्च चतुर्दश।। २।।
आप्याः पञ्च मयूखाः स्युस्तैजसा दश चैव हि। वायव्यास्तस्य सम्प्रोक्ताः षष्ट्युत्तरशतांशवः।।३।।
चत्वारो नाभसा उस्रास्तथा आकारके स्मृताः। चतुर्दश ततः पञ्च ततः षट्षष्टिकं शतम्।। ४।।
चत्वारश्चैव चत्वारः इईवर्णद्वये पृथक्। शतं सप्तत्युत्तरं च ततः ततो दश।। ५।।
चत्वारश्चैव चत्वारः उऊवर्णद्वये पृथक्। चतुर्दश ततो भौमाः नवषष्ट्युत्तरं शतम्।। ६।।
ततो दश च चत्वारो ऋॠद्वये पृथक्। चतुर्दशः ततः पञ्च ततो दश ततो युगाः।। ७।।
षष्ट्युत्तरशतं चैव लृॡवर्णद्वये पृथक्। अवर्णस्येव सम्प्रोक्ता एकारस्य च रश्मयः।। ८।।
इवर्णस्य यथा प्रोक्ता ऐकारस्य तथा स्मृताः। उवर्णस्येव ओकारे ऋकारस्येव औलिपे।। ९।।
लृवर्णस्येव विज्ञेया अंस्वरस्य च रश्मयः। (लृवर्णस्येव विज्ञेया अःस्वरस्य च रश्मयः।।१०।।)
पार्थिवा रश्मयोः ज्ञेयाः कवर्णस्य चतुर्दश। आप्याः पञ्चदश प्रोक्तास्तैजसाश्च ततः परम्।। ११।।
वायव्या रश्मयः प्रोक्ताः पञ्चत्रिंशच्छतद्वयम्। नाभसाश्चैव चत्वारः खकारस्य चतुर्दश।। १२।।
पार्थिवा जलजाः पञ्च ततश्चैव शतद्वयम्। सैकचत्वारिंशदनु तैजसा युगसंख्यकाः।। १३।।
वायव्या नाभसाश्चोक्ताश्चत्वारो वेदसंख्यकाः। गवर्णे पार्थिवाः पञ्चचत्वारिंशच्छतद्वयम्।। १४।।
पञ्चाप्या दश चाग्नेया वायव्या वेदसंख्यकाः। नाभसाश्चैव घवर्णे मनुपार्थिवाः।। १५।।

---

१. 'वज्राद' ख. पाठः।

आप्या: शतद्वयं चैव प्रोक्ता: षट्त्रिंशदुत्तरम्। तैजसा दश वायव्याश्चत्वारो नाभसा: स्मृता:।।१६।।
पञ्चत्रिंशच्छतद्वे च कार्णस्येव चवर्णके। खवर्णस्येव छार्णस्य गवर्णस्येव जार्णके।। १७।।
घवर्णस्येव झार्णस्य ङवर्णस्येव ञार्णके। चवर्णस्येव टार्णस्य छवर्णस्येव ठार्णके।। १८।।
शतद्वयं पञ्चनवत्युत्तरं डस्य पार्थिवा:। घस्येव ढस्य सम्प्रोक्ता ञार्णस्येव च णार्णके।। १९।।
टस्येव तस्य सम्प्रोक्ता मनवस्थस्य पार्थिवा:। पञ्चाप्या एकनवतिद्विशतं चानु वायुजा:।। २०।।
चत्वारो नाभसाश्चैव डस्येव च दवर्णके। ढस्येव धस्य सम्प्रोक्ता णार्णस्येव च नार्णके।। २१।।
पार्णस्य पार्थिवा: प्रोक्ताश्चतुर्दश जलीयका:। पञ्चैव तैजसा: प्रोक्ता दशैकनवतिस्तथा।। २२।।
शतद्वयं तु वायव्याश्चत्वारो नाभसा: स्मृता:। थस्येव फस्य सम्प्रोक्ता रश्मंय: क्रमशो बुधै:।।२३।।
पार्णस्य पार्थिवा: पञ्चचत्वारिंशच्छतांशव:। आप्या: पञ्चदशाग्नेया वायव्या नाभसा: स्मृता:।।२४।।
चत्वारश्च तथा प्रोक्ता भार्णस्य मनुसंख्यका:। पार्थिवाश्च सषट्त्रिंशतपञ्चसंख्याशतानि च।। २५।।
तैजसा दश वायव्याश्चत्वारो नाभसास्तथा। चतुर्दश मकारे तु रश्मय: पार्थिवा: स्मृता:।। २६।।
आप्या: पञ्च दशाग्नेया वायव्या देवसंख्यका:। पञ्चत्रिंशतपञ्चशतं नाभसा: सम्प्रकीर्तिता:।।२७।।
यार्णे चतुर्दश प्रोक्ता: पार्थिवा: पञ्च नीरजा:। तैजसा रश्मय: प्रोक्ता: वायव्याश्च तत: परम्।।२८।।
पञ्चत्रिंशतपञ्चशतं चत्वारो नाभसा: स्मृता:। रेफस्य मनुसंख्याका: पार्थिवा: पञ्चनीरजा:।। २९।।
सैकचत्वारिंशदनु शतपञ्चकतैजसा:। वायव्याश्चैकचत्वारश्चत्वारो नाभसा: स्मृता:।। ३०।।
बार्णस्येव लवर्णस्य (रश्मय: सम्प्रकीर्तिता:। बार्णस्य रश्मय: प्रोक्ता:) पार्थिवाङ्के चतुर्दश।।३१।।
सषट्त्रिंशदष्टशतमाप्या वै दश तैजसा:। वायव्याश्चैव चत्वारश्चत्वारो नाभसा: स्मृता:।। ३२।।
मनुसंख्या: शकारस्य पार्थिवा: पञ्च नीरजा:। तैजसा दश वायव्याश्चत्वारो नाभसा: स्मृता:।।३३।।
पञ्चत्रिंशच्चाष्टशतं पकारे मनुसंख्यका:। पार्थिवा: पञ्च चाप्या वै तैजसा: दश कीर्तिता:।।३४।।
पञ्चत्रिंशच्चाष्टशतं वायव्या वेद नाभसा:। वार्णस्येव सकारस्य हकारस्य चतुर्दश।। ३५।।
पार्थिवा: पञ्च चाप्या तै तैजसा दश कीर्तिता:। वायव्याश्चैव चत्वार: सपञ्चत्रिंशदुत्तरम्।। ३६।।
ससप्ततिसहस्त्रं च नाभसा: परिकीर्तिता:। लकारस्येव ळस्यैव क्षकारस्य चतुर्दश।। ३७।।
पार्थिवा: पायसा: पञ्च रश्मय: परिकीर्तिता:। सैकचत्वारिंशदनु[1] ससप्ततिसहस्त्रकम्।। ३८।।
तैजसा वेद वायव्या नाभसाश्च तथा स्मृता:।

---

१. 'तस्तु' क. पाठ:।

।। कालीमते रश्मिक्रमः।।

संख्या	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
वर्णाः	अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ऌ	ॡ	ए	ऐ	ओ	औ	अं	अः
भौमाः	१४	१४	१४	१४	१७०	१७०	१४	१४	१४	१४	१४	१४	१७०	१४	१४	१४
आप्याः	५	५	५	५	५	५	१६९	१६९	५	५	५	५	५	१६९	५	५
तैजसाः	१०	१०	१६६	१६६	१०	१०	१०	१०	१०	१०	१०	१६६	१०	१०	१०	१०
वायव्याः	१६०	१६०	४	४	४	४	४	४	२	२	१६०	४	४	४	२	२
नाभसाः	४	४	४	४	४	४	४	४	१६०	१६०	४	४	४	४	१६०	१६०

संख्या	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०	३१
वर्णाः	क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट	ठ	ड	ढ	ण
भौमाः	१४	१४	२४५	१४	१४	१४	१४	२४५	१४	१४	१४	१४	२९५	१४	१४
आप्याः	१५	५	५	२३६	५	१५	५	५	२३६	५	१५	५	५	२३६	५
तैजसाः	१५	२४१	१०	१०	१०	१५	२४१	१०	१०	१०	१५	२४१	२४१	१०	१०
वायव्याः	२३५	२	४	४	४	२३५	२	४	४	४	२३५	२	२	४	४
नाभसाः	४	४	४	४	२३५	४	४	४	४	२३५	४	४	४	४	४

संख्या	३२	३३	३४	३५	३६	३७	३८	३९	४०	४१	४२	४३	४४	४५
वर्णाः	त	थ	द	ध	न	प	फ	ब	भ	म	य	र	ल	व
भौमाः	१४	१४	२९५	१४	१४	१४	१४	१४५	१४	१४	१४	१४	१४५	१४
आप्याः	१५	५	५	२३६	५	५	५	५	५३६	५	५	५	५	८३६
तैजसाः	१५	२११	२४१	१०	१०	१०	२११	१०	१०	१०	१०	५४१	१०	१०
वायव्याः	२३५	४	२	४	४	२११	४	४	४	४	५३५	४१	४	४
नाभसाः	४	४	४	४	४	४	४	४	४	५३६	४	४	४	४

संख्या	४६	४७	४८	४९	५०	५१
वर्णा:	श	ष	स	ह	ळ	क्ष
भौमा:	१४	१४	१४	१४	१४५	१४
आप्या:	५	५	८३६	५	५	५
तैजसा:	१०	१०	१०	१०	१०	७००४१
वायव्या:	४	८३५	४	४	४	४
नाभसा:	८३५	४	४	७००३५	४	४

मूलाधारस्थपद्मस्य कर्णिकायां शिवात्मक:।। ३९।।
षट्पञ्चाशद्भिरुस्रैश्च प्रसरद्भिर्दलाब्धिके[1]। आवृत: पृथिवीवर्ण: स्वाधिष्ठानाह्वयाम्बुजे।। ४०।।
कर्णिकायां द्विषष्टिश्च मयूखै: परिवारित:। तेजोभिर्व्याप्तपत्रैश्चानलवर्ण: शिवात्मक:।। ४१।।
मणिपूराख्यचक्रस्थकर्णिकायां समावृत:। द्वासप्ततिमयूखैश्चामृताख्यैरमृतार्णक:।। ४२।।
अनाहताख्यचक्रस्थकर्णिकायां शिवात्मक:। चतु:पञ्चाशदुस्रैश्चावृतो मारुतवर्णक:।। ४३।।
विशुद्धाख्ये महाचक्रे कर्णिकायां समावृत:। द्वासप्ततिमयूखैश्च नाभसै: शिव एव हि।। ४४।।
आज्ञाया: कर्णिकामध्ये मनोवर्ण: शिवात्मक:। चतु:षष्टिमयूखैश्चावृतोऽमृतमय: सदा।। ४५।।
सहस्रारे महापद्मे कर्णिकायां समावृत:। षट्शताधिकसाहस्रमयूखैर्मानसै: सदा।। ४६।।
दलै: सहस्रसंख्याकै: सहस्रकिरणात्मकै:। षट्शतै: स्वाङ्गभूतैश्च विसर्गात्मा शिवात्मक:।। ४७।।
विसर्गस्था मयूखाश्च षट्चक्रस्थाश्च रश्मय:। सोमसूर्याग्निमयाष्टात्रिंशत्संख्याकलात्मभि:।। ४८।।
पञ्चब्रह्मात्ममन्त्राणामष्टात्रिंशत्कलात्मभि:। तेजोभिर्मिश्रिता: सन्त: प्रसर्पन्त: परस्परम्।। ४९।।
वाच्यवाचकरूपेण जगत्स्थावरजङ्गमम्। व्याप्य तिष्ठन्ति वै सर्वं सृष्टिस्थित्यन्तकारिण:।। ५०।।
षोडशार्णा महाविद्या चन्द्रमण्डलरूपिणी। षट्त्रिंशत्तत्त्वसम्पूर्णा सुधावृष्टिमयी सदा।। ५१।।
पूर्णमण्डलरूपा च सर्वतेजोमयी परा।

इति। अत्र पाञ्चभौतिकरश्मीनां सहस्रारस्थितमानसरश्मीनां परस्परप्रतिफलनेन पञ्चाशद्भूतवर्णानां यावन्तो रश्मय: सम्भूयन्ते, तावन्त: प्रतिवर्णरश्मयो द्वात्रिंशद्द्वात्रिंशन्मानसरश्मिसञ्चये अथ च द्वात्रिंशद्द्वात्रिंशन्मानसरश्मय: प्रतिवर्णं प्रतिफलन्तीत्यर्थ:।

ईशानवक्त्रसम्भूतकलानां पञ्चकस्य तु। एकैकस्या: कलायास्तु त्रिशतं विंशदुत्तरम्।। १।।
मानसात्मकरश्मीनां क्रमो ज्ञेयो मनीषिभि:। मन्त्रस्य वाथ विद्याया अष्टषष्टिमितार्णका:।। २।।

---

[1] १. 'लोद्यके' क. ख. पाठ:।

द्वात्रिंशद्भिर्मानसैश्च गुणिताः पूर्णमानसैः। हृताश्चेत् तत्र यल्लब्धं तच्छन्दस्तन्मनोः स्फुटम्॥ ३॥
शेषाङ्कपूर्णरूपेण महाविद्या भवत्यसौ। न्यूने न्यूना क्रमस्त्वेवं ज्ञातव्यः सिद्धिमिच्छता॥ ४॥

इति। यत्र यस्या विद्याया मन्त्रस्य वा स्वरव्यंञ्जनरूपेण पृथक्कृता वर्णा यावन्तो जायन्ते, तावन्तो द्वात्रिंशदङ्केन गुणनीयाः। प्रत्यर्णं द्वात्रिंशद्द्वात्रिंशन्मानसरश्मिक्रमत्वात्। अथ च पूर्णमानसैः षट्शतोत्तरसहस्रसंख्याकैर्भागहरणेन यल्लब्धं तत्तन्मन्त्रस्य च्छन्दो ज्ञेयम्। तत्रापि षड्विंशतोऽधिकं लब्धं चेत्प्राप्यते तदपि षड्विंशता भागहरणेन यदुर्वरितं तच्छन्द इति ज्ञेयम्। तथा पूर्णमानसैर्भागहरणाद्यदुर्वरितं, तत् षट्सप्तत्युत्तरपञ्चशतसंख्याङ्कश्चेत् सा विद्या महाविद्येति ज्ञेयम्। ततोऽधिकं चेत्तदपि ज्ञेयं, न्यूनं चेन्न्यूनं ज्ञेयमित्यर्थः॥

अत्र विद्यार्णरूपस्य द्वात्रिंशद्गणनेन च। हृतेन मानसैश्चापि क्वचिन्नोर्वरितं यदि॥ १॥
लब्धं षड्विंशता चैव हरेल्लब्धं भवेच्च तत्। तच्छन्दः.........................॥ २॥

अस्यार्थः— मन्त्रस्य विद्याया वा वर्णाः स्वरव्यञ्जनरूपेण पृथक् कृताः द्वात्रिंशता गुणिताः पूर्णमानसैर्हृताश्चेच्छेषाङ्को नोर्वरितस्तदा लब्धमेव षड्विंशता हरेच्छन्दः प्राप्यते, एवं क्रमः ज्ञेयः॥

मन्त्रविद्यार्णरूपं तु द्वात्रिंशद्गुणितं यदि। पूर्णतां न लभेद्यत्र दशघ्नीकृत्य चाहरेत्॥ १॥

अस्यार्थः— मन्त्रविद्याक्षराणि स्वरव्यञ्जनरूपेण पृथक्कृतानि द्वात्रिंशता गुणयेत् तदा पूर्णता षोडशशतानि न जायन्ते चेद् दशगुणितं कृत्वा षोडशशतैर्भागमाहरेत्। अन्यत्सर्वं प्राग्वत्॥

श्रीविद्यायाश्च षोडश्याः सहस्राणि च विंशतिः। षष्ट्युत्तरं च त्रिशतं भवेयुर्नाभसांशवः॥ १॥
पञ्चोत्तरं च नवतिर्द्विसहस्रं शताष्टकम्। पार्थिवा रश्मयश्चाथ षट्सहस्राणि चैव हि॥ २॥
अष्टौ शतान्येकषष्टिस्तैजसा रश्मयो ह्यथ। पञ्चसप्तत्युत्तरशतं सहस्रं वायुरश्मयः॥ ३॥
अष्टादशोत्तरं पञ्चशतं वेदसहस्रकम्। मयूखा ह्यमृतात्मानो वक्ष्ये सङ्कीर्णरश्मिकम्॥ ४॥
त्रिशतं च चतुःषष्टिर्वियद्वर्णेषु पार्थिवाः। षष्ट्युत्तरं शतं चाप्यास्तावन्तस्तैजसाः स्मृताः॥ ५॥
शतं च चत्वारिंशच्च वायव्याः सम्प्रकीर्तिताः। चतुस्त्रिंशद्वेदशतं पार्थिवा ह्यनलेषु च॥ ६॥
शतं च पञ्चपञ्चाशदाप्याश्च शतमेव च। चतुर्विंशतिसंख्याका वायव्याः सम्प्रकीर्तिताः॥ ७॥
तावन्तो नाभसाः प्रोक्तास्ततो भूवर्णसञ्चये। त्रिंशदाप्याश्च चाग्नेया अशीतिश्चतुरुत्तरा॥ ८॥
वायव्याश्च चतुर्विंशत्तावन्तो नाभसाः स्मृताः। सप्तत्युस्राः समुद्दिष्टाः वायुवर्णेषु पार्थिवाः॥ ९॥
पञ्चविंशतिश्चाप्यास्तु पञ्चाशत्तैजसाः स्मृताः। नाभसा विंशतिः प्रोक्ताश्चाप्यवर्णेषु पार्थिवाः॥ १०॥
अष्टाविंशत्युत्तरं च शतसप्तकमेव च। तैजसाः सप्ततिर्ज्ञेया अष्टाविंशतिर्वायुजाः॥ ११॥
तावन्तो नाभसा ज्ञेयाः सङ्कीर्णा रश्मयस्त्विमे। अत्र (न्ये) तद्भूतवर्णस्य तत्तद्भूतांशवो निजाः॥१२॥

इति। अन्ये भूतांशवः सङ्कीर्णाः मानसा अपि तथैव ज्ञेयाः। ऊर्ध्वाम्नायक्रमे—मानसाः सहजा, अन्ये सङ्कीर्णा इति केचित्। अत्र यथागुरूपदेशं बोद्धव्यम्॥

पराप्रासादमन्त्रस्य पञ्चोत्तरसहस्रकम्। आप्यास्तथा पञ्चनवत्युत्तरं च शताष्टकम्॥ १॥
सहस्रं नाभसाः प्रोक्ताः सङ्कीर्णाः पार्थिवाः स्मृताः। षट्पञ्चाशत्समाख्याताश्चत्वारिंशच्च तैजसाः॥२॥
वायव्याः षोडश प्रोक्ता नाभसाः षोडशैव हि। आप्या दश समाख्याता मानसाः प्राग्वदेव हि॥३॥

इति। प्रत्यर्णं द्वात्रिंशत्क्रमेणाष्टाविंशत्युत्तरशतं रश्मय इत्यर्थः।।

परापासादवर्णौघं गुण्यात्तन्मानसांशुभिः। षड्विंशता हरेच्छेशं लब्धाङ्केन पुनर्हरेत्।। १ ।।
तल्लब्धं तस्य मन्त्रस्य च्छन्दो ज्ञेयं मनीषिभिः।

इति। पराप्रासादमन्त्रस्य वर्णाः स्वरव्यञ्जनरूपेण पृथक् कृता द्वात्रिंशद्भिर्गुणिताः षड्विंशता हृताः शेषं लब्धाङ्केन हृतं तच्छेषं तल्लब्धाङ्केन हरेत्तल्लब्धं तच्छन्दः इत्यर्थः।। यथा—

कालिकाया महाविद्यावर्णा द्वात्रिंशता हताः। हृताश्च मानसैः पूर्णैः शेषं षड्विंशता हरेत्।। १ ।।
शेषं लब्धं तु संयोज्य पुनः षड्विंशता हरेत्। शेषं छन्दस्तु विज्ञेयं सम्यक् तत्त्वविशारदैः।।२ ।।

इति। अस्यार्थः— विद्याया वर्णाः स्वरव्यञ्जनरूपेण पृथक् कृताः द्वात्रिंशद्भिर्गुणिताः पूर्णमानसांशुभिर्हृताः शेषं षड्विंशता हरेत्, तच्छेषे तत्फलं संयोज्य पुनः षड्विंशता हरेत् तच्छेषं छन्दो ज्ञेयमिति।।

रससंख्याः क्षितेर्भागा द्वौ भागावमृतस्य च। द्वाविंशत्यग्निभागाश्च वायुभागाश्चतुर्दश।। १ ।।
पञ्चविंशतिभागाश्च व्योम्नश्च परिकीर्तिताः। अष्टोत्तरं च द्विशतं सहस्रद्वयमेव च।। २ ।।
मानसा रश्मयो ज्ञेया भूतभागोद्भवांशवः[1]। प्रागुक्तक्रमतो ज्ञेया रश्मिक्रम उदाहृतः।। ३ ।। इति।

अथ कादिमते कामेश्वर्यादिनित्यानां प्रयोगविधिर्लिख्यते।। ''ह्रींक्लींऐंब्लूंस्त्रीं'' इति पञ्चकामा भवन्ति। तन्त्रराजे— (प० ७ श्लो० ३९)

एषां यन्त्राणि सर्वाणि त्रैलोक्यक्षोभणानि च। तानि क्रमेण कथयाम्याकर्णय समाहिता।। १ ।।
तेषु पञ्चसु बीजेषु पुनरुक्तविवर्जितैः। योजयेदष्टभिस्तैस्तैः स्वरान् षोडश मायया।। २ ।।
अष्टाविंशतिसंयुक्तं शतं तेन भवन्ति वै। तैर्यन्त्राणि विधेयानि पञ्चानां क्रमतः शिवे।। ३ ।।

इति। अस्यार्थः— प्रोक्तपञ्चसु बीजेषु द्वितीयबीजस्य जठरे प्रथमबीजं। १। तृतीयबीजजठरे द्वितीय बीजं। २। चतुर्थबीजजठरे तृतीयं बीजं। ३। पञ्चमबीजजठरे चतुर्थं बीजं। ४। चतुर्थबीजजठरे पञ्चमं बीजं। ५। तृतीयबीजजठरे चतुर्थं बीजं। ६। द्वितीयबीजजठरे तृतीयं बीजं। ७। प्रथमबीजजठरे द्वितीयं बीजं। ८। एवमष्टौ बीजानि पुनरुक्तवर्जितानि भवन्ति। एतानि प्रत्येकं षोडशस्वरयुक्तानि कर्तव्यानि, तदा संख्यया १२८ बीजानि भवन्ति। एतैर्यन्त्राणि विधेयानीत्यर्थः।।

यन्त्ररचनाप्रकारमाह—

वृत्तत्रयस्थं षट्कोणं कृत्वा मध्ये स्वमक्षरम्। लिखेत् साध्याख्ययोपेतं षट्कोणेषु च तत्पुनः।। १ ।।
विभज्य बिन्दुमायाभ्यामध ऊर्ध्वं लिखेत् क्रमात्। वृतान्तरालयोर्बाह्ये चतुःषष्ट्या द्विरालिखेत्।।२ ।।
एवं यन्त्राणि पञ्च स्युः पञ्चानां क्रमतः शिवे।

इति। अस्यार्थः— प्रथमतः षट्कोणं कृत्वा तद्बहिर्वृत्तत्रयं विधाय मध्ये साध्यनामसहितं प्रकृतिस्थपञ्चकामेषु प्रथमं बीजं विलिख्य षट्सु कोणेषु तदेव बीजं विलिख्य प्रोक्ताष्टाविंशत्युत्तरशतं बीजानि चतुष्टया चतुःषष्ट्या द्विधा विभज्य वृत्तत्रयान्तरालद्वयेऽभ्यन्तरान्तराले बिन्दुयुक्तानि प्रथमचतुःषष्टिबीजानि पङ्क्त्याकारेण विलिख्य, तद्बाह्यान्तराले द्वितीयचतुः षष्टिबीजानि विसर्गयुक्तानि लिखेत्, इदं प्रथमं यन्त्रम्।। द्वितीयबीजं मध्ये साध्यसहितं विलिख्य षट्कोणेषु द्वितीयमेव बीजं विलिख्य बहिरन्तरालद्वये प्राग्वद्विलिखेदिति द्वितीययन्त्रम्।। एवं तृतीयबीजेन तृतीयं यन्त्रम्।। चतुर्थबीजेन चतुर्थं यन्त्रम्।। पञ्चबीजेन पञ्चमं यन्त्रम्।।

---

[1] 'भावो' क. पाठः।

इति पञ्च यन्त्राणि भवन्तीत्यर्थः।। अथ पञ्चबीजैरेकमेव यन्त्रं लेखनीयमित्याह—

पञ्चभिस्त्वेकमस्त्यन्यद्यन्त्रं सुमहदद्भुतम्। द्वितीयजठरे त्वाद्यं सनामाभिलिखेत् तयोः।। १।।
बहिस्तृतीयरूपेण षट्कोणेन प्रवेष्टयेत्। चतुर्थं विलिखेत् कोणेष्वेषु षट्स्वपि पार्वति।। २।।
वेष्टयेत्पञ्चमेनैव तद्यन्त्रं सर्वमोहनम्।

इति। अस्यार्थः— द्वितीयबीजस्य क्लींकारस्य जठरे प्रथमबीजं ह्रीमिति बीजं साध्यनामगर्भं विलिख्य, तद्बहिस्तृतीय बीजेन ऐंकारेण अधरोत्तरयोगेन षट्कोणं कुर्यात्। अत्र ऐंकारस्य त्रिकोणरूपत्वाद्बीजद्वयरूपत्रिकोणद्वयेन षट्कोणेनावेष्ट्य षट्कोणेषु चतुर्थबीजं ब्लूंकारं विलिख्य पञ्चमबीजेन स्त्रींकारेण षट्कोणाद्बहिर्वेष्टयेत्, यथा स्त्रींकारगर्भे सर्वं भाति तथा कुर्यादित्यर्थः। एवं षट्चक्राणि जातानि।।

अथ समययन्त्रयोरुद्धारक्रममाह—

तस्यापि परतो बाह्ये तैरावेष्ट्य पुरोदितैः। यन्त्रांन्तरं तु जनयेद् बहिर्मातृकयापि च।। १।।

इति। प्रोक्तषष्ठयन्त्रस्य बहिर्वृत्तत्रयं विधाय प्राग्वत् १२८ बीजैश्चतुःषष्ट्या द्विरालिखेत् सप्तमं यन्त्रं भवति। एतस्यैव षष्ठयन्त्रस्य बहिर्वृत्तत्रयान्तरालद्वये प्राग्वद्बिन्दुयुक्तां विसर्गयुक्तां च लिखेत्, इदमष्टमं यन्त्रं भवतीति।।

यन्त्राण्यष्टौ भवन्त्येव[1] पञ्चकामात्मकानि वै। तैरसाध्यं जगत्स्वेषु किञ्चित्तु[2] न कदाचन।। १।।
मनुजं मनुजेशं वा महिलां वा मदाबिलाम्। अष्टसूक्तेषु मध्यस्थं भावयेत् स्वेन तेजसा।। २।।
एकीभूतं जपेदेतान्यक्षराण्यपि पञ्च वै[3]। तेन ते वशगाः क्षिप्रं यावज्जीवं न[4] संशयः।। ३।।
[5]तेष्वेष्टमस्य मध्यस्थमात्मसाध्यं जपारुणम्। तन्मन्त्रार्णप्रकाशैश्च तथारुणतरैर्वृतम् ।। ४।।
भावयन्नात्मना ग्रस्तं जपेत्ताराक्षराण्यपि[6]। तेन ते वशगाः क्षिप्रं दद्युः प्राणान् धनानि च।। ५।।
तस्य षष्ठस्य मध्यस्य बीजं[7] मन्त्रेण वेष्टयेत्। प्राग्वन्नि (व ?ज) सुषुम्नान्तर्भावयेद्योनिमुद्रया।।६।।
एतदष्टकमध्यस्थं कुम्भं कृत्वा यथाविधि। तेनाभिषिञ्चेद् दौर्भाग्यरोगदारिद्र्यमुक्तये।। ७।।
कुचन्दनैर्वा सिन्दूरैर्गैरिकैर्दरदैस्तु वा। कृत्वा चक्राष्टकं भूमौ फलकायां शिलासु च।। ८।।
मध्ये विद्यावृत्तं कृत्वा तत्रावाह्याभिपूज्य ताम्। कामेश्वरीं तदग्रस्थो जपेल्लक्षं पयोव्रतः।। ९।।
तेनास्य पूर्वजन्मान्तर्दुष्कृतान्यपयान्ति वै। अस्मिञ्जन्मनि सल्लक्ष्मीमवाप्य सुखमेधते।। १०।।
नरं नारीं नृतं वान्यं[8] नगरं वाथ पत्तनम्। देशं जनपदं विश्वं तन्मध्ये प्रविलिख्य तत्।। ११।।
पूजयेदरुणैः पुष्पैर्गन्धैः काश्मीरसम्भवैः। नैवेद्यैः कदलीदुग्धशर्करापायसादिभिः।। १२।।
मण्डलं वा तदर्धं वा सप्तवासरमेव वा। कन्दर्पसमसौभाग्यो जायते नियतं नरः।। १३।।
सुवर्णादिषु संलिख्य धारणाद्धरणीतले। लक्ष्मीकान्तिधनारोग्यैरायुः पूर्णमवाप्नुयात्।। १४।।
अनावृत्तैस्तु[9] विद्यार्णैः षोडशस्वरयोजनात्। द्वानवत्या शतं वर्णा जायन्ते मन्त्रसम्भवाः।। १५।।

---

१. 'वं' क. पाठः। २. 'तन्न' क. पाठः। ३. 'तैः' क. पाठः। ४. 'सुनिश्चिलम्' क. पाठः। ५. 'तेषु मध्यस्थमाध्यस्थगात्मसाध्ये' क. पाठः। ६. 'त्तान्य' क. पाठः। ७. 'जे क. पाठः। ८. 'चा' क. पाठः। ९.. 'ते' ग. पाठः।

इति। अस्यार्थः— कामेश्वर्या मन्त्रस्यैकादशाक्षरस्यानावृत्ता[1]क्षराणि ''असकलहरनतयमदव'' इति द्वादशाक्षराणि भवन्ति। ते षोडशस्वरयोगेनाङ्कतः १९२ वर्णा भवन्तीति।।

स्वराणां सर्वमन्त्रेषु[2] योजनं केन हेतुना। क्रियते परमेशान तन्मे कथय साम्प्रतम्।। १।।
स्वराः षोडश देवेशि व्यञ्जनानि तथा पुनः। पञ्चत्रिंशत् समाख्यातं तयोरन्योन्यसङ्गतैः।। २।।
भारत्या देहभूतैस्तैर्व्यञ्जनैः स्वरयोजनम्। तत्प्राणयोजनं विद्धि रहस्यं परमेश्वरि।। ३।।
भारत्या वर्णरूपाया हसौ नेत्रे समीरिते। प्राणाः स्वराः समाख्याता बिन्दुसर्गौ तु चेतना।। ४।।
अन्यान्यवयवानि स्युरन्यानि परमेश्वरि। तेन तद्युक्तितो वर्णाः प्रसीदन्ति न चान्यथा।। ५।।
बिन्दुसर्गो हसौ तुर्यस्वरश्चेति च पञ्चमम्। भारत्या मातृकादेहे विद्धि चैतन्यजृम्भणम्।। ६।।
तेन तैर्हीनरूपास्तु मन्त्रविद्यास्तथापरे। निष्प्राणदेहवत् कार्यकरणेष्वक्षमाः स्मृताः।। ७।।
तेन सर्वत्र तु मया स्वरयोग[3] उदीर्यते। ये ये मन्त्राः प्रोक्तवर्णविहीनास्तैश्च योजयेत्।। ८।।
तेन ते बलवन्तः स्युः कार्येषु च फलान्विताः। तस्मात् सर्वत्र संयोगात् स्वरैः सर्वार्थसिद्धिदाः।।९।।
एवं तैरेव जायन्ते यन्त्राणि सबलानि वै। द्वात्रिंशद्विनियोगांश्च वक्ष्ये तेषामनुक्रमात्।। १०।।
वृत्तद्वयान्तः षट्कोणं कृत्वा मध्ये निजेप्सितम्। मायागर्भं समालिख्य वेष्टयेन्मातृकाक्षरैः।। ११।।

इति। अस्यार्थः— प्रथमतः षट्कोणं विलिख्य तद्बहिर्वृत्तद्वयं विधाय मध्ये साध्यनामगर्भं ह्रींकारं विलिख्य, षट्सु कोणेषु द्वानवत्युत्तरशतवर्णेषु प्रथमतः षडक्षराणि विलिख्य बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयेदिति प्रथमं यन्त्रं भवति।। द्वितीययन्त्रस्य षट्सु कोणेषु प्रोक्तवर्णसमुदायस्य प्रथमतः षड्वर्णान् विहाय सप्तमाक्षरतः षड्वर्णान् विलिखेदिति द्वितीयं यन्त्रं भवति। एवं तृतीययन्त्रादिषु च क्रमेण पुनरुक्तवर्जिताः षट्षड्वर्णा लेखनीयाः। अन्यत्समानम्। एवं यन्त्राणि ३२ जायन्ते।। तेषां फलान्याह—

प्रथमे कनकावाप्तिर्द्वितीये भूषणोदयः। तृतीये कन्यकासिद्धिश्चतुर्थे[4] भूप्रतिग्रहः[5]।। १।।
पञ्चमे वाहनावाप्तिः षष्ठे स्त्रीवश्यमीरितम्। सप्तमे भवनावाप्तिरष्टमे धेनुसङ्गमः।। २।।
नवमे वशयेद्भूपं दशमे वारणं हयम्। एकादशेन विजयी नरः समरसीमनि।। ३।।
वादेषु व्यवहारेषु द्यूतेषु [6]द्विविधेष्वपि। द्वादशे चेप्सितावाप्तिः परेणारिविनाशनम्।। ४।।
गजवाजिखरोष्ट्राणां नरगोमृगपक्षिणाम्।। भुजङ्गमेषमहि[7]षवाजिनां त्वाशु नाशनम्।। ५।।
तत्तत्त्वचि च तद्रक्तलिखितं तत्र तत्र च। स्थापितं मण्डलान्मासात्सप्ररात्रादथापि वा।। ६।।
चतुर्दशेन वृष्टिः[8] स्यात्परेण [9]स्तम्भनं रिपोः। क्रोधवैरिसमुद्योगगमनादेरपि ध्रुवम्।। ७।।
षोडशेन धृतेनासौ[11] भूताद्यैर्नैव बाध्यते। ततः परेण यन्त्रेण खातेन धरणीतले।। ८।।
रक्षा भवति सर्वत्र प्राणिनां जगति ध्रुवम्। [12]अनन्तरानन्तराभ्यां खननात्फलकद्वये।। ९।।

---

[1] 'ता' ग. पाठः। [2] 'तन्त्रे' ग. पाठः। [3] 'रैर्यो' क. पाठः। [4] 'नका' क. पाठः। [5] 'परिग्रह' क. पाठः।
[6] 'वि' क. पाठः। [7] 'षैरजानामाशु' ग. पाठः। 'पैरा' क. पाठः। [8] 'दृष्टिः' ग. पाठः। [9] 'जम्भणं' क. पाठः।
[10] 'वैर' क. पाठः। [11] 'नाग्नौ' क. पाठः। [12] अनन्तराभ्यां खननात् कलहोद्वेगयोर्द्वयोः' क. पाठः।

शस्यानां बहुभिः क्लैशैर्नाशः स्याद्भूरुहामपि। देशानामपि [1]वान्योन्यकलहात्पीडनं भवेत्।।१०।।
अनन्तरेण यन्त्रेण विरोधो भूभुजां भवेत्। [2]राज्यसन्धितले तस्य खननेनाल्पकालतः।। ११।।
एकविंशेन यन्त्रेण रोगार्ता वैरिणो ध्रुवम्। द्वाविंशेन गवां रोगस्त्रयोविंशेन दन्तिनाम्।। १२।।
चतुर्विंशेन वाहानां पञ्चविंशेन भूभुजाम्। षड्विंशेन प्रधानानां रोगावाप्तिर्दृढं भवेत्।। १३।।
सप्तविंशेन तेषां तु प्रोक्तानां क्लेशनाशनम्। अष्टाविंशेन यन्त्रेण कृत्या प्रतिनिवर्तते।। १४।।
धारणाद्भूषु खननाद्वृक्षाग्रादिषु बन्धनात्। तडागकूपवाप्यादिष्वर्पणात्पाति ता ध्रुवम्।। १५।।
ततः परेण यन्त्रेण वाग्मी मूकोऽपि[3] जायते। अत ऊर्ध्वेन यन्त्रेण वैरिवाक्स्तम्भनं भवेत्।। १६।।
एकत्रिंशेन यन्त्रेण वाहानां दन्तिनामपि। रक्षा भवति तद्भूषु खननाद्धारणादपि ।। १७।।
द्वात्रिंशेनाम्बुधौ पोता न क्लिश्यन्ति कदाचन। पारं प्रयान्ति चाक्लेशाद्विचित्रा यन्त्रशक्तयः।।१८।।
षोडशानां तु नित्यानां प्रत्येकं तिथिषु क्रमात्। तत्तत्तिथौ तद्भजनं जपहोमादिना चरेत्।। १९।।
घृतं च शर्करा दुग्धमपूपं कदलीफलम्। क्षौद्रं गुडं नालिकेरं फलं लाजा तिलं दधि।। २०।।
पृथुकं चणकं मुद्गं पायसं च निवेदयेत्। प्रतिपत्तिथिमारभ्य क्रमात् पञ्चदशस्वपि।। २१।।
कामेश्वर्यादिशक्तीनां सर्वासामपि चोदितम्। आद्याया ललितायास्तु सर्वाण्येतानि सर्वदा।। २२।।
निवेदयेच्च जुहुयाद्वह्नौ दद्यान्नृणामपि। विद्याभक्तिमतां नित्यमभीष्टावाप्तयेऽनिशम्।। २३।।
तत्तद्विद्याक्षरप्रोक्तमौषधं तत्प्रमाणतः। सम्पिष्य [4]गुलिकीकृत्य ताभिः सर्वं च साधयेत्।। २४।।
[5]अर्घ्यान्ततर्पणं नित्यं स्नानपानानुयोजनम्[6]। पाटीरसंयुतं भाले धारणं सर्वसिद्धिकृत्।। २५।।
राज्ञां विशेषतो रक्षां कुर्यादेतैस्तु नित्यशः। स्नाने पाने धारणे च गुलिकायोजनेन वै।। २६।।
रोगापमृत्युकृत्यादिदोषा ग्रहसमुद्भवाः। न बाधन्ते ततो नित्यमर्चयेत् स्वगृहे क्वचित्।। २७।।

इति कामेश्वर्याः प्रयोगविधिः।।

अथ भगमालिनीनित्याप्रयोगविधिः। श्रीतन्त्रराजे– (प० ८ श्लो० २४)

काम्यहोममथो वक्ष्ये नानाभीष्टाप्तिदायकम्। त्रिमध्वक्तैः पुण्डरीकैर्होमाद्विप्रान् वशं नयेत्।। १।।
आरग्वधैस्तु राजानं करवीरैस्तु वैश्यकम्। उत्पलैर्वशयेच्छूद्रं वनिता[7] जपया हुतैः।। २।।
बिल्वैर्लक्ष्मीर्भवेद्धोमे[8] भूम्याढ्यः कमलैर्हुतात्। कैरवैर्वाहनावाप्तिर्दरपुष्पैर्महद्यशः।। ३।।
सौभाग्यं चम्पकैः सिद्ध्यै रक्तसौगन्धिकैर्हुनेत्। तगरैर्वस्त्रसंसिद्ध्यै पुन्नागैर्भूषणाप्तये।। ४।।
मधूकैः कन्यकासिद्ध्यै पलाशैः स्वर्णसिद्धये। किंशुकैरंशुकावाप्त्यै पाटलैः पशुसिद्धये।। ५।।
रक्तोत्पलैः सर्वसिद्ध्यै होमयेत् परमेश्वरि। अथ यन्त्राणि वक्ष्यामि वाञ्छतार्थप्रदानि तु।। ६।।
चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमैर्लिखेत्। सर्वाणि सर्वतो यन्त्राण्यभीष्टावाप्तिकामुकः।। ७।।
सुवर्णे रजते ताम्रे त्वंशुके भूर्जपत्रके। धारणं मूर्ध्नि बाहौ वा कण्ठे कट्यां प्रकोष्ठके।। ८।।

---

[1] 'चा' क. पाठः। [2] 'राष्ट्र' क. पाठः। [3] 'भि' ग. पाठः। [4] 'गुटिकी' क. पाठः। [5] 'अर्घ्यवत्' क. पाठः।
[6] 'पानं तु भोज्नं' क. पाठः। [7] 'तां' क. पाठः। [8] 'मैः' क. पाठः।

निधाय क्वापि पूजां वा कुर्याद्यन्त्राण्यशेषतः। षट्कोणं वृत्तयोर्मध्ये कृत्वा तन्मध्यतस्तथा।। ९।।
योनिं विलिख्य तन्मध्ये मायां साध्यसमन्विताम्। विलिख्य कोणत्रितये बहिः षट्केऽपि संलिखेत्।।१०।।
एकैकं[१] वृत्तयोर्मध्ये शेषार्णानि समालिखेत्। बहिर्मातृकयावेष्ट्य वृत्तान्तर्बिन्दुयुक्तया।। ११।।
एवं यन्त्राणि मन्त्रार्णै[२]र्दशभिर्दशभिर्भवेत्। चरमेऽमृतष[३]ष्ट्यैव शेषं सम्पूरयेच्छिवे ।।१२।।

इति। अस्यार्थः— प्रथमतस्त्रिकोणं विलिख्य तद्बहिः षट्कोणं कृत्वा तद्बहिर्वृत्तचतुष्टयं विलिख्य मध्ये साध्यनामगर्भं ह्रींकारं विलिख्य त्रिषु कोणेषु प्रथमाक्षरमारभ्य मूलमन्त्रस्याक्षरत्रयं विलिख्य, ततः षट्सु कोणेषु षडक्षराणि विलिख्या तद्बहिर्वृत्तचतुष्टयान्तरालत्रयेऽभ्यन्तरान्तराले मूलमन्त्रस्य दशमबीजं विलिख्य, तत एकादशाक्षरमारभ्य तदन्तरालं यथा पूर्णं भवति तथा पञ्चविंशत्युत्तरशतमूलमन्त्रार्णैः संवेष्ट्य, तद्बहिरन्तराले बिन्दुयुक्तमातृकाक्षरैः संवेष्ट्य तद्बहिरन्तराले विसर्गयुक्तमातृकाक्षरैः संवेष्टयेत्। एवं दशभिर्दशभिर्मूलमन्त्रार्णैः कृत्वा त्रयोदश यन्त्राणि विलिख्यावशिष्टमूलमन्त्राक्षरैः पञ्चभिः सहामृतपञ्चकं संयोज्य, दशभिरक्षरैः प्राग्वद्यन्त्रं विलिख्यामृतपञ्चकं षण्ठहीनद्वादशस्वरसंयोगेन षष्टिबीजानि कृत्वा तानि बिन्दुयुक्तानि विसर्गयुक्तानि च विंशत्युत्तरशतवर्णैः प्रथमान्तराले संवेष्ट्य तद्बहिरन्तरालद्वये· बिन्दुविसर्ग-मातृकाभ्यां वेष्टयेदिति चतुर्दश यन्त्राणि विलिखेत्।। अमृतपञ्चकस्योद्धारमाह तत्रैव—

ज्या कं दावोऽम्बु हृत् स्वेन माययामृतपञ्चकम्। तत्पञ्चकं स्वरैर्भेदादशीतिर्मायया तथा।। १।।
तथा अशीतिः।
तैः षण्ठहीनैः षष्टिः स्यान्मायया च तथा भवेत्। षष्ट्या शतं समुद्दिष्टं वर्णेष्वमृतविग्रहम्।। १।।
तेषां सर्वत्र तन्त्रेऽस्मिन् विनियोगो विधीयते।

ज्या जकारः, कं झकारः दावष्ठकारः, अम्बु वकारः, हृत्सकारः, जझठवस इति। स्वेन बिन्दुना पञ्च। मायया विसर्गेण च योगे पञ्चेत्यर्थः। षण्ठहीनस्वरयुक्तेन षष्टिः। बिन्दुविसर्गाभ्यां १२०। अमृतपञ्चकषोडशस्वरसंयोगेन ८०। बिन्दुना विसर्गेण च १६० अक्षराणीत्यर्थः।। तथा—

चतुर्दशानां यन्त्राणां विनियोगं शृणु प्रिये। वश्यमाकर्षणं स्तम्भमारोग्यं विजयं श्रियम्।। १।।
रक्षां गजाश्वगोमेषमहिषाणामनुक्रमात्। नरनारीनृपाणां च प्रोक्तयोगेन साधयेत्।। २।।

इति।। तथा—

अमृतार्णैः [४]समूलार्णैर्लिखिता (?ललिता) रहितैस्तु तैः। नित्याचतुर्दशार्णैश्चाप्येकषष्ट्या शतेन च।।१।।
षट्पञ्चाशत्समोपेतं चतुःशतमुदीरितम्। तैर्यन्त्ररचनायोगं फलानि च शृणु प्रिये ।। २।।

इति। अमृतार्णाः षष्ट्युत्तरशतवर्णाः १६० मूलार्णैः पञ्चत्रिंशच्छतवर्णैः १३५ ललितारहितचतुर्दशनित्यानां मन्त्राणां एकषष्ट्युत्तरशतवर्णाः १६१ सर्वे षट्पञ्चाशदुत्तरचतुःशतवर्णाः ४५६ भवन्ति।। तथा—

त्रिकोणमष्टपत्राब्जं बहिर्वृत्तद्वयं तथा। विधाय मध्ये मायास्थं कृत्वा नाम त्रिकोणजम्।। १।।
अन्तरालत्रयस्थं च बहिःपत्राष्टगामि च। चतुर्दशर्णमालिख्य वृत्तमध्ये तु मातृकाम्।। २।।
विलिख्यार्चाहुतजपसेकसिद्धानि योजयेत्। त्रयस्त्रिंशत्तमं यन्त्रं सशक्त्यमृतपञ्चकैः।। ३।।

---

१. 'कवृ' क. पाठः। २. 'न्त्राणि' ग. पाठः। ३. 'वृष्ट्यै च' ग. पाठः। ३. 'स्व' क. पाठः।

इति। अस्यार्थः— प्रथमतस्त्रिकोणं विलिख्य तदुपरि वृत्तं कृत्वा, तल्लग्नान्यष्टदलानि विरच्य तद्बहिर्वृत्तद्वयं कुर्यादिति यन्त्रं निर्माय मध्ये साध्यनामगर्भं ह्रीकारं विलिख्य त्रिषु कोणेषु तदन्तरालेषु षड्बीजानि विलिख्याष्टदलेष्वष्टबीजानि विलिखेदिति प्रागुक्तवर्णसमुदायात् प्रथमतश्चतुर्दशाक्षराणि विलिख्य बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयित्वा त्रयस्त्रिंशत्तमयन्त्रस्यावशिष्टमूलवर्णाष्टके मायाबीजयुक्तामृतपञ्चकं संयोज्य चतुर्दशाक्षराणि पिधाय प्राग्वत्पूरयेत्॥

फलानि ३३ यन्त्राणां क्रमेणाह—

ज्वरे घोरे शीतिकायां तथा चातुर्थिके गदे। स्फोटे मसूरिकायां च नेत्रार्त्यां कुक्षिसम्भवे॥ १॥
यक्षराक्षसगन्धर्वपिशाचोरगपीडने। बालाग्रहार्तौ दौर्भाग्ये बन्ध्यात्वे वैरिपीडने॥ २॥
वादे चोन्मादके राजक्रोधे चौरभये तथा। डाकिन्यादिगणैः षड्भिराक्रान्त्यां ब्रह्मराक्षसैः॥ ३॥
प्रमेहकामलाछर्दिदोषजेषु त्रिषु क्रमात्। योजयेदुक्तविधिना त्रयस्त्रिंश[1]दितीश्वरि॥ ४॥
कामेश्वर्यादिनित्यानां साधारणसमर्चनम्। शृणु देवि प्रवक्ष्यामि सर्वाङ्गाङ्गित्वयोगतः॥ ५॥
तासां पञ्चदशानां तु मन्त्रवर्णाः समीरिताः। शतद्वयं षण्णवतिः(२९६) तैश्चक्रं तत्र पूजनम्॥ ६॥
प्राक्प्रत्यग्दक्षिणोदक् च रेखाविंशतिमालिखेत्। तेन कोष्ठानि जायन्ते चतुरस्राणि पार्वति॥ ७॥
शतत्रयं त्वेकषष्ट्या तेष्वीशादिप्रदक्षिणम्। [2]प्रवेशगत्या विलिखेद्यावत्संख्यं यथान्तरम्[3]॥ ८॥
पञ्चषष्टिस्तेषु दिक्षु प्रागादिक्षु चतुष्टयम्। अवशिष्टं भवेत्तेषु[4] दिक्स्थेष्वेकीकृतेषु च॥ ९॥
मायां चतुष्टयान्तस्थमालिखेद्वाञ्छितं क्रमात्। एकोनपञ्चाशत्कोष्ठेष्वेकीभूतेषु तत्र वै॥ १०॥
पद्मं चतुर्दशदलं बहिर्वृत्तद्वयं तथा। लिखित्वा कर्णिकामध्ये योनिं मायोदरां लिखेत्॥ ११॥
दलेष्वपि तथा शक्तिं चतुर्दशसु संलिखेत्। भगमालां मध्यशक्त्यामावाह्याभ्यर्चयेद्बहिः॥ १२॥
पश्चिमादि तु वाय्वन्तमन्या आवाह्य पूजयेत्। यथाक्रममिदं चक्रमालां साधारणं भवेत्॥ १३॥
मध्ये मध्ये तु[5] या पूज्या शेषास्त[6]त्तद्दलाश्रिताः। यथाक्रमेण चित्रान्ताः पूजयेद्रक्तविग्रहाः॥ १४॥
चतुरस्रद्वयं बाह्ये कृत्वा द्वाराणि दिक्षु च। द्वाराणां पार्श्वयोः कोणेष्वर्चयेद् द्वादश क्रमात्॥ १५॥
ब्राह्मी माहेश्वरी द्वारे पश्चिमे सव्यदक्षिणे। कौमारी वैष्णवी सौम्ये वाराह्यैन्द्री च पूर्वके[7]॥ १६॥
चामुण्डा समहालक्ष्मीर्याम्ये वाय्वादिकोणगाः। देशकालौ तथाकारशब्दौ प्रोक्तक्रमेण वै॥ १७॥

अथैतद्यन्त्ररचनाप्रकारः— तत्र प्राक्प्रत्यगायता विंशतिरेखा दक्षिणोत्तरायता विंशति कोष्ठानि कृत्वा तेषु कोष्ठेष्वीशानगतकोष्ठमारभ्य प्रवेशगत्या प्रादक्षिण्येन पञ्चदशनित्यामन्त्राक्षराणि प्रोक्तानि षण्णवत्युत्तरशतद्वयसंख्यकानि (२९६) विलिख्यावशिष्टपञ्चषष्टिकोष्ठेषु प्रागादिदिक्षु कोष्ठचतुष्टयक्रमेण षोडशकोष्ठानि मार्जयित्वा तेषु साध्यनामगर्भं ह्रींकारं प्रतिदिशं विलिख्य मध्येऽवशिष्टान्येकोनपञ्चाशत्कोष्ठान्येकीकृत्य सकर्णिकं चतुर्दशदलकमलं कृत्वा, तद्बहिर्वृत्तद्वयं विधाय कर्णिकामध्ये त्रिकोणे विलिख्य तन्मध्ये ह्रीमिति बीजं विलिख्य, दलेष्वपि मायाबीजं विलिख्य बहिश्चतुरस्रद्वयं चतुर्द्वारयुक्तं कुर्यादिति यन्त्रं विलिख्य, मध्ये भगमालामावाह्य चतुर्दशदलेषु पश्चिमादिवाय्वन्तं नित्यक्लिन्नादिविचित्रान्ताश्चतुर्दश नित्या आवाह्य पूजयेत्।

---

[1] 'शानितीश्वरि' क. पाठः। [2] 'प्रदेश' क. पाठः। [3] 'न्तरा' ग. पाठः। [4] 'देषु' ग. पाठः। [5] 'तथा' क. पाठः।
[6] 'स्तत्र' क. पाठः। [7] 'पूर्वगे' क. पाठः।

अत्र मध्ये या नित्या पूज्यते तत्परतो नित्यामारभ्य चतुर्दश नित्याः पूजयेत्। तद्बहिश्चतुर्द्वारपार्श्वेषु ब्राह्म्यादिशक्तीः सम्पूज्याग्नेयादिकोणेषु देशकालाकारशक्तीः सम्पूजयेत्।। तथा—

पूजयेत्प्रोक्तरूपैस्तु प्रोक्तरूपाश्च ता यजेत्[1]। उपचारैश्चासवैश्च मत्स्यैः मांसैः सुसंस्कृतैः।। १ ।।
अपूपैः पायसैर्दुग्धैः सुश्रीतैः सितसंयुतैः। कदलीपनसाद्यैश्च फलैर्मधुभिरेव च ।। २।।
नैवेद्यैः प्रीणयेद् देवीं नृत्यगीतादिभिस्तथा। एकरात्रं त्रिरात्रं च पञ्चरात्रं तु सप्त वा।। ३ ।।
नवरात्रं तथा पक्षं मासं पूर्णादिकं तु वा। वर्षं वा फाल्गुनान्तं वा स्यात् समस्तार्तिनाशनम्।। ४।।
ग्रहाणां प्रातिकूल्येषु दीर्घरोगेषु वैकृते। देवतानामथोत्पाते त्रिविधे त्वभिचारके ।। ५।।
दारिद्र्ये विजयप्राप्त्यां दुर्भिक्षे शत्रुपीडने। कृच्छ्रेष्वन्येषु घोरेषु पूजैषा सर्वकामदा।। ६ ।।
पीठे वा सुसमे कृत्वा वेदिकामण्डपे तु वा। कृत्वैतत् प्रोक्तरूपं च प्रोक्तद्रव्यैस्तथार्चयेत्।। ७।।
नमेरुचम्पकाशोकपुंनागबकुलाम्बुजैः। मल्लिकामालतीजातीशतपत्रोत्पलादिभिः ।। ८ ।।
सुगन्धिभिस्तथान्यैश्च पूजयेत् पूर्णमानसः। एतद्विद्याभक्त्युपास्तियुतानन्यांश्च पूजयेत्।। ९ ।।
[2]अथान्यदपि देवेशि चक्रमद्भुतदर्शनम्। योन्यर्णवाख्यं वनितागर्वपर्वतवज्रकम्।। १० ।।
षड्विंशाङ्गुलमानेन कृत्वा योनिं समे तले। तत्र द्व्यङ्गुलमानेषु सूत्राण्येकादशार्पयेत्।। ११ ।।
तेनात्र योन्यो जायन्ते त्रिकोणानि शतात्परम्। चत्वारिंशच्च चत्वारि तेषु मन्त्राक्षराणि तु।। १२ ।।
प्रादक्षिण्यप्रवेशेन[3] विलिखेत्तु निरन्तरम्। मध्येऽवशिष्टनवके नववर्गसमन्विते ।। १३ ।।
नाथान् नव लिखेत् पश्चात् साध्याख्यां कर्मसंयुताम्। सर्वत्र विलिखेद्भूमौ भूय आवर्तनेन तु।।१४।।
अर्धरात्रे तु तां साध्यां स्मरन्मदनवह्निना। दह्यमानां हृतस्वान्तां मस्तकस्थापिताञ्जलिम्।। १५ ।।
विकीर्णकेशीमालोललोचनामरुणारुणाम्। वायुप्रेङ्खत्पताकास्थपटोपमकलेवराम् ।। १६ ।।
विवेकविधुरां मत्तां मानलज्जाभयातिगाम्। चिन्तयन्नर्चयेच्चक्रं मध्ये देवीं दिगम्बराम्।। १७।।
जपादाडिमबन्धूककिंशुकाद्यैः समर्चयेत्। अन्यैः सुगन्धिशेफालिकुसुमाद्यैः सुगन्धिभिः।। १८ ।।
त्रिसप्तरात्रादायाति प्रोक्तरूपा मदाकुला। यावच्छरीरपातं सा[4] छायेवानपगामिनी[5] ।। १९ ।।

प्रयोगः स्पष्टः।। इति भगमालिनीप्रयोगः।।

अथ नित्यक्लिन्नाप्रयोगविधिः। तत्र श्रीतन्त्रराजे— (प० ९ श्लो० २३)

विद्यायाः साधनं सम्यक्समीहितफलप्रदम्। शृणु देवि प्रवक्ष्यामि प्रयोगार्हो यतो भवेत्।। १ ।।
जितेन्द्रियो हविष्याशी त्रिसन्ध्यार्चारतो भवेत्। प्राग्वल्लक्षं तद्दशांशं कुर्याद्धोमं च तर्पणम्।। २ ।।
मधूकपुष्पैर्मध्वक्तैर्वकुलोत्थैरथापि वा। चन्द्रचन्दनकस्तूरीवासितैस्तर्पयेज्जलैः।। ३ ।।
ततो विद्याप्रयोगार्हो नित्यार्चानिरतस्तथा। सहस्रजापी तद्भक्तः कुर्यादुक्तं न चान्यथा।। ४।।
पद्मै रक्तैस्त्रिमध्वक्तैर्होमाल्लक्ष्मीमवाप्नुयात्। तथैव कैरवै रक्तैरङ्गनास्तु[6] वशं नयेत्।। ५।।

---

[1] 'क्रमात्' क. पाठः। [2] 'अथान्यं शृणु' क. पाठः। [3] 'शे तु' क. पाठः। [4] 'तु' क. पाठः।
[5] 'गास्य सा' क. पाठः। [6] 'स्व' ग. पाठः।

समानरूपवत्सायाः शुक्लायाः गोः[1] पय:प्लुतैः। मल्लिकामालतीजातीशतपत्रैर्हुतैर्भवेत्।। ६।।
कीर्तिविद्याधनारोग्यसौभाग्यविजयादिकम् । आरग्वधप्रसूनैस्तु क्षौद्राक्तैर्हवनाद्भवेत् ।। ७।।
स्वर्णाप्तिः स्तम्भनं शत्रोः नृपादीनां क्रुधोऽपि च। आज्याक्तैः करवीरोत्थैः प्रसूनैररुणैर्हुतैः।।८।।
रक्ताम्बराणि वनिताभूपा[2]मात्यवशं तथा। भूषावाहनवाणिज्यसिद्धयश्चास्य वाञ्छिताः।। ९।।
लवणैः सर्षपैर्गौरैरितरैर्वाथ होमतः। तत्तैलाक्तैर्निशामध्ये त्वानयेद्वाञ्छितां वधूम्।। १०।।
तैलाक्तैर्जुहुयात् कृष्णादरपुष्पैर्निशान्तरा। मासादरातिस्तीव्रार्तिर्ज्वरेण भवति ध्रुवम्।। ११।।
आरुष्करघृताभ्यक्तैस्तद्बीजैर्निशि होमतः। शत्रोर्देहे व्रणानि स्युर्दुःसाध्यानि चिकित्सकैः।। १२।।

आरुष्करघृतं भल्लातकतैलम्। तद्बीजैर्भल्लातकबीजैः।।

तैरेव [3]दलिताङ्गस्तु रिपुर्याति यमालयम्। तथा तत्तैलसंसिक्तैर्बीजैरङ्कोलकैरपि ।। १३।।
मरिचैः सर्षपाज्याक्तैर्निशि होमात्तु मासतः। वाञ्छितां वनितां कामज्वरार्तामानयेद् ध्रुवम्।। १४।।
मरिचैः सर्षपोपेतैः सप्तरात्रं[4] हुतैर्निशि। धैर्यमानकुलैर्नित्यं दुष्प्रापामानेयद्वधूम्[5]।। १५।।
अन्नाज्यैर्जुहुयान्नित्यं शतमष्टोत्तरं तु वा। तेनान्नपूर्णो भवने भोक्ता च भवति प्रिये।। १६।।
शालीभिराज्ययुक्ताभिर्होमाच्छालीमवाप्नुयात्। मुद्गैर्मुद्गं घृतैराज्यमिष्टैरिष्टं हुतैर्भवेत्।। १७।।
साध्यर्क्षवृक्षसम्भूत[6]पिष्टपादरजःकृताम्। राजीमरिचलोणोत्थां पुत्तलीं जुहुयान्निशि।। १८।।
प्रपदाभ्यां च जङ्घाभ्यां जानुभ्यामूरुयुग्मतः। नाभेरधस्ताद्धृदयाद्भिन्नेनाकण्ठतस्तथा।। १९।।
शिरसा च सुतीक्ष्णेन छित्त्वा शस्त्रेण वै क्रमात्। एवं द्वादशधा होमान्नरनारीनराधिपाः।। २०।।
वश्या भवन्ति सप्ताहाज्ज्वरार्ताश्चास्य वाञ्छया। प्रयान्ति निधनं चास्य वाञ्छयानन्ययोगतः।।२१।।

अथ साध्यनक्षत्रसम्भूतपिष्ट-साध्यपादरजो धूली—राजीमरिचलवणैरेभिः पञ्चद्रव्यैरेकैकपुत्तलिका पाक्प्रयोगोक्तप्रकारेण कृतप्राणप्रतिष्ठा। प्रपदाभ्यां १ जङ्घाभ्यां २ जानुभ्यां ३ ऊरुयुग्मतः ४ नाभेरधस्तात् ५ हृदयान्नाभिपर्यन्तं ६ कण्ठतो हृत्पर्यन्तं ७ शिरः ८, एवमाहुत्यष्टकम्।। तथा—

पिष्टेन गुडयुक्तेन मरिचैर्जीरकैर्युतम्। कृत्वा पुत्तलिकां साध्यनामयुक्तामथो हृदि ।। २२।।
सनामहोमसम्पातघृते सम्पाच्य तां पुनः। स्पृशन् निजकराग्रेण सहस्रं प्रजपेन्मनुम्।। २३।।
अभ्यर्च्य तद्घृताभ्यक्तं भक्षयेत्तद्धिया जपन्। नरनारीनृपास्तस्य वश्याः स्युर्मरणावधि।। २४।।

अस्यार्थः— प्राग्वद्गुडयुक्ततण्डुलपिष्टमरिचजीरकैः पुत्तलिकां कृत्वा तस्या हृदि साध्यनाम विलिख्य, क्वचिदग्निं संस्थाप्य साध्यनामविदर्भितमूलमन्त्रेण घृतेनैव सहस्रं हुत्वोद्देशत्यागं कृत्वां क्वचिद्भाण्डे कृत्वा तत्सम्पाताज्ये मूलमन्त्रं जपन् तां पुत्तलिकां पक्वान्नवत् सम्पाच्य, पुर्निजकराग्रेण तां स्पृशन् मूलं साध्यविदर्भितं सहस्रं जपित्वा तस्यां देवतामावाह्याभ्यर्च्य ''अमुकं मे वशमानय, अमुकदेवतापादुकां पूजयामि'' इति प्रत्यावरणशक्तिं सम्पूज्य, धूपदीपादिकं सर्वं प्राग्वत्समाप्य प्राक्प्रोक्तसंम्पाताज्यसहितां तां मूलं जपन् तद्धिया भक्षयेदुक्तफलं भवति।। तथा—

---

[1] 'श्च' ग. पाठः। [2] 'नृपमर्त्य' क. पाठः। [3] 'ज्वलिता' क. पाठः। [4] 'सप्तवारा' क. पाठः।
[5] 'प्यां' क. पाठः। [6] 'तां' क. ख. ग. पाठः।

तैरेव पिष्टैर्वृत्तं तु कृत्वा तन्मध्यतस्तथा। साध्यनाम स्फुटं कृत्वा प्रागवत्सम्पाच्य भक्षणात्।।२५।।
वश्यास्ते वत्सरं भूयुस्तन्नामार्णान्वितस्तथा। कृत्वा विपाच्य खादंस्तु[1] वशयेत् तांस्तदर्धकम्।।२६।।

अयमर्थः— प्रागुक्तपिष्टैर्वर्तुलाकारां मुद्रां कृत्वा प्रागवद्भक्षयेद्वत्सरमात्रं वश्या भवेयुः। अथ साध्यनामविदर्भितं मूलं जपन् प्रोक्तविधिं विनापि षण्मासमध्ये तथा वश्या भवेयुः। तदुत्तरं पुनः कुर्यादित्यर्थः।।

तथा—

नारिकेलफलाम्भोभिस्तर्पणाद्वनिता वशाः। कर्पूरवासितैस्तोयैर्मनुष्याः स्युर्वशे स्थिताः।। २७।।
तर्पणाल्लवणाम्भोधिजलैः सर्वेऽस्य किङ्कराः। तथा लवणयुक्तेन तोयेन वनिता वशाः।। २८।।
शुद्धेन वारिणा मासं तदर्धं सप्तरात्रकम्। तर्पयेद्यस्य नाम्नैव स तस्य स्याद्वशेऽनिशम्।। २९।।
केतकैर्वासितैरिन्दुयुक्तैः केलफलोदकैः। तर्पणाद्वनिता वश्या दद्युः प्राणान्निजं धनम्।। ३०।।
नमेरुवासितैस्तोयैस्तर्पणाद्भूमिपा वशम्। चम्पकैर्वासितजलैस्तर्पणं सर्वरञ्जनम्।। ३१।।
पाटलीशतपत्राभ्यां वासितैस्तर्पणं जलैः। सर्वलोकचमत्कारकारी भवति नित्यशः।। ३२।।
कस्तूरीवासिताम्भोभिस्तर्पणं सर्वसिद्धिकृत्। इन्दुचन्दनसौरभ्यवासिताम्भःप्रतर्पणम्।। ३३।।
वाञ्छितार्थसुसंसिद्धिं मण्डलात् कुरुते ध्रुवम्। सक्तुमिश्रजलैराढ्यो धनधान्यादिभिश्चिरम्।। ३४।।
गुडमिश्रजलै रात्रौ तर्पणं विघ्ननाशनम्। चिञ्चाफलरसोपेतैर्जलैर्द्वेषाय तर्पयेत्।। ३५।।
उष्णोदकैः समरिचैस्तर्पयेद्वैरिमृत्यवे। केवलोष्णोदकैस्तस्य[2] तीव्रज्वरसमुद्भवः।। ३६।।
निम्बपत्ररसोपेतैरम्बुभिस्तर्पणं द्विषाम्। जायतेऽन्योन्यवैरस्यं येन ते नाशमाप्नुयुः।। ३७।।
तथैव सर्षपतिलैस्तर्पणाद्वैरिणो भृशम्। अतीसारादिभिर्दोषैरौदरैः क्लेशमाप्नुयुः[4]।। ३८।।

स्पष्टार्थः।।

अथ यन्त्राणि देवेशि शृणु वाञ्छाप्रदानि वै। यैः कृतैः सिद्धयो हस्ते भवन्ति भजनादपि[5]।। ३९।।
षट्कोणवृत्तयोर्मध्ये कृत्वा वृत्तं सनामकम्। विद्याद्यवर्णं विलिखेद् द्वितीयादीनि षट् क्रमात्।।४०।।
षट्सु कोणेषु विलिखेच्छिष्टमर्णचतुष्टयम्। वृत्तयोरन्तरा दिक्षु लिखेत् कोणान्तरालतः।। ४१।।
भूताक्षराणि क्रमशो दश द्वित्रिक्रमेण तु। एवमेकादशविधं मध्येऽन्येषां निवेशनात्।। ४२।।
भूताक्षराणि प्रत्येकयोगात् पञ्चशतान्वितम्। पञ्चकं परमेशानि शृणु तानि यथाक्रमम्।। ४३।।
एषु सर्वत्र तद्बाह्ये वृत्तं कृत्वा च[6] मातृकाम्। विलिखेदभितः पश्चाद्विनियोगमथोच्यते।। ४४।।
वश्ये त्रयमथाकर्षे द्वयं शान्त्यां द्वयं तथा। मध्ये नामाक्षरन्यासभेदास्तद्भेदकल्पनम्[7]।। ४५।।
एवं तत्फलभेदस्तु सप्तविंशतिधा भवेत्। शेषाणि शृणु देवेशि क्रमेण विनियोगतः।। ४६।।
स्तम्भनं मोहनं पश्चाद्विद्वेषोच्चाटनं तथा। मारणं व्याधिभिः क्लेशं कुलोत्सादकरं तथा।। ४७।।
गजाश्वोष्ट्रखराणां च रक्षा महिषमेषयोः। गवां नाराणां नारीणां विजयः समरे द्विषाम्।। ४८।।

---

१. 'भिषाच्य भक्षात्तु' क. पाठः। २. 'तस्मात्' क. पाठः। ३. 'तथैवोष्णोष्णसलिलैः' क. पाठः। ४. 'रोदनैः क्लेशमावहेत्' क. पाठः। ५. 'भवनात्' क. पाठः। ६. 'कृत्वात्र' क. पाठः। ७. 'कच्युतम्' क. पाठः।

द्वन्द्वयुद्धे तथा वारे व्यवहारेषु सर्वतः। द्यूते च रक्षा नगरग्राममण्डलके[१] तथा।। ४९।।

इति। अस्यार्थः— प्रथमतो वृत्तं विधाय तद्बहिः षट्कोणं विलिख्य तद्बहिर्वृत्तत्रयं विधाय, मध्ये नित्यक्लिन्नाविद्याक्षरेष्वेकादशसु प्रथमबीजं साध्यनामयुक्तं विलिख्य, षट्सु कोणेषु द्वितीयबीजादिषड्बीजानि विलिख्यावशिष्टार्णचतुष्टयं षट्कोणाद्बहिर्वृत्तद्वयान्तराले चतुर्दिक्षु विलिख्य, तद्बहिरन्तराले तत्तत्कार्यानुगुणभूतार्णदशकं द्वित्रिक्रमेण चतुर्दिक्षु विलिख्य, तद्बहिः पुनर्वृत्तं कृत्वा तदन्तराले मातृकावर्णैर्वेष्टयेदिति प्रथमयन्त्रम्। द्वितीययन्त्रे मध्ये मूलमन्त्रस्य द्वितीयाक्षरं विलिख्य शेषं प्राग्वल्लिखेदिति द्वितीयं यन्त्रं भवति। एवं तृतीयादिबीजानां तृतीयादीनि यन्त्राणि भवन्ति। एवमेकादश यन्त्राणि जायन्ते। एवमेकादशयन्त्राणां सप्तविंशतिप्रयोगा भवन्ति। यथा—त्रिविधवश्ये प्रथमयन्त्रम्। द्विविधविद्वेषे द्वितीयं यन्त्रम्। द्विविधशान्त्यां तृतीयं यन्त्रम्। अन्येषामष्टयन्त्राणां प्रतियन्त्रं स्तम्भनादिप्रयोगत्रयं प्रयोगत्रयं ज्ञेयं, मध्ये साध्याक्षरलेखनभेदेन प्रयोगभेदस्तत्तत्कार्यानुसारिभूतार्णदशकलेखनभेदश्च ज्ञातव्य इत्यर्थः।।

अथ यन्त्रान्तरोद्धारमाह—

विद्यायां पुनरुक्तानि हित्वा वर्णानि तान्यपि। एकादश स्युस्तैः प्राग्वत् स्वरयोगान्महेश्वरि।। ५०।।
षट्सप्तत्या शतं प्रोक्तं वर्णानां मन्त्रगामिनाम्। प्रोक्तयन्त्रेषु विलिखेदेकादशविभागतः।। ५१।।
मातृकाविद्ययावेष्ट्य कुर्यात् तन्नामयोजनम्। षोडशानां च यन्त्राणां विनियोगमथोच्यते।। ५२।।

अस्यार्थः— मूलविद्यायाः पुनरुक्तवर्जितानि अनावृत्तान्यक्षराणि एकादश भवन्ति "हरनतयकलमदवस" इति। एते षोडशस्वरयोगेन षट्सप्तत्युत्तरशतं (१७६) वर्णा भवन्ति। प्राग्वदेषु वर्णेषु एकादशैकादशवर्णानामेकमेकं यन्त्रं विलिखेदेवं षोडश यन्त्राणि जायन्ते।। तेषां फलान्याह—

प्रथमेन तु यन्त्रेण कन्यकाः स्ववशं नयेत्। तेनैव तासामार्तिं च शमयेत् सेकधारणैः।। ५३।।
स्वस्थावेशं च तेनैव कुर्यान्मन्त्रं[२] जपन् धिया। तन्मयीं भावयेत्कन्यां धूपं[३] सर्जरसैर्दहेत्।। ५४।।
आविष्टे तां[४] समभ्यर्च्य प्रोक्तैस्तैरुपचारकैः। पृच्छेत् 'तान्वाञ्छितानर्थानाचष्टे स्वात्मनस्तदा[६]।।५५।।
ततोऽभ्यर्च्यात्मना योज्य[७] तां तदात्मा भवेत्स्वयम्। तासामावेशमन्यैश्च[८] शमयेत्तस्य[९] धारणात्।।५६।।
द्वितीयेन तु यन्त्रेण कर्पटे गैरिकद्रवैः। लिखितेन[१०] जयेद्वादे प्रतिवादिनमन्तरा।। ५७।।
स्थापनात्तस्य नियतमतिप्रौढोऽपि तत्क्षणात्। स्तब्धजिह्वो निरुद्योगः शुष्कास्यो लोललोचनः।।५८।।
विलोकयन् दश दिशस्त्यक्तलज्जः पलायते। पतेद्वा पादयोः क्षिप्रं जितोऽस्मीति त्वया वदन्।।५९।।
तृतीयेन निशापिष्टतोयेन लिखितेन तु। कर्पटे खर्परे वापि स्थापितेनोष्णभूतले।। ६०।।
चुल्ल्यधो वा दिनैर्द्वित्रैः स्तम्भयेत् सुदृढं रिपोः। रोषं गतिं मतिं जिह्वां समरं सर्वमेव च।। ६१।।
आयान्तमग्रतो रात्रौ मार्गमध्ये खनेदिदम्[११]। बलिं दद्यात्तु तद्योन्यां तन्नक्षत्रोक्तया पुनः।। ६२।।
तेन तत्पृतना भ्रष्टा रुग्णा गतसमुद्यमा। भीता न[१२] तन्मुखा जातु घटते यन्त्रवैभवात्।। ६३।।
चतुर्थेनारिनक्षत्रवृक्षोत्थफलकातले। लिखितेन पुरोक्तेन स्थापितेन रिपोः पुरे।। ६४।।
नाशमेति रिपुः कृच्छ्रैर्वैरिरोगादिसम्भवैः। तेषु तेषु प्रयोगेषु कुर्याद्रक्षामथात्मनः।। ६५।।

---

१. 'गा' क. पाठः। २. 'मन्त्रजपं' क. पाठः। ३. 'धूपः' क. पाठः। ४. 'तं' क. पाठः। ५. 'स्वान्' क. पाठः।
६. 'सात्मन सदा' क. पाठः। ७. 'ज्यं' क. पाठः। ८. 'अवस्थां' क. पाठः। ९. 'अस्य' क. पाठः।
१०. 'लिखेत् तेन' क. पाठः। ११. 'नन्निदम्' क. पाठः। १२. 'तत्त' क. पाठः।

पञ्चमेनाथ षष्ठेन सप्तमेनाष्टमेन च। नवमेन च कुर्वीत रक्षां राष्ट्रपुरालये ।। ६६।।
प्रागादिषु चतुर्दिक्षु वह्न्यादिष्वस्रदिक्ष्वपि। मध्ये च स्थापयेद्यन्त्रं ताम्रपट्टेषु कल्पितम्।। ६७।।
क्रमेण नवमं मध्ये स्थापयेदुक्तयोगतः[1]। स्वराष्ट्रे नगरे राजगृहे प्रोक्तक्रमात् खनेत्।। ६८।।
तेन वैरिकृताः कृत्याप्रयोगाः क्रूरविग्रहाः। प्रवेष्टुमत्राशक्तास्ते[2] नाशयन्ति प्रयोजकम्।। ६९।।
दशमं राजते पट्टे विलिख्य कवचं[3] दधत्। रणं वीरः प्रविश्याशु नाशयेद् द्रावयेच्च तत्।।७०।।
एकादशं निशातोय[4]घृष्टगैरिकलेखनात्। कर्पटे स्थापितं शीघ्रं शमयेद्भूभृतां रणम्।। ७१।।
द्वादशेनेन्दुकाश्मीरलिखितेन घृतेन तु। भूर्जपत्रपुटे[5] सम्यक् सर्वरक्षा भवेन्नृणाम्।। ७२।।
त्रयोदशेन यन्त्रेण तालपत्रकृतेन तु।ताललिप्तेन कुड्यान्तः[6]स्थापितेनार्चितेन[7] च।। ७३।।
गृहरक्षा भवेद्व्याधिचोरग्रहभुजङ्गमात्। राजतो वैरितो बाधादन्यक्षुद्रादितस्तथा।। ७४।।
चतुर्दशेन यन्त्रेण भूर्जपत्रस्थितेन वै। धृतेन कामिनीनां तु सौभाग्यमतुलं भवेत्।। ७५।।
तथा पञ्चदशेनापि स्वर्णपट्टधृतेन तु। बन्ध्यापि लभते पुत्रं गुणाढ्यं दीर्घजीवितम्।। ७६।।
षोडशेनोक्तरूपेण साभिषेकं धृतेन वै। सपत्नीष्वधिकां तेन भर्तुः सात्यन्तवल्लभा।। ७७।।
भूर्जस्थेन धृतेनैव सर्वेषामपि सर्वदा। रक्षा भवति मर्त्यानां राजचौरग्रहादितः।। ७८।।

इति नित्यक्लिन्नाप्रयोगः।।

अथ भेरुण्डानित्याप्रयोगविधिः। तत्र श्रीतन्त्रराजे—(प० १० श्लो० २१)

स्नातो मौनी पयोभक्षः प्रजपेन्नवलक्षकम्। तद्दशांशं हुनेदग्नौ त्रिमध्वक्तैः कुशेशयैः।। १।।
तावच्च तर्पयेत्तोयैरिन्दुचन्दनवासितैः। अर्चयेन्नित्यशो देवीं सहस्रं प्रजपेदपि।। २।।
ततः स्वगुरुणोद्दिष्टप्रयोगान् विधिना चरेत्। अन्यथा निष्फलं भूयात् प्रत्युतैनं निहन्ति च।। ३।।
द्वितीयाद्यैस्त्रिभिर्बीजैः षष्ठेन च समीरितम्। निग्रहाख्यमथान्यैस्तु[8] त्रिभिरन्त्यद्वयेन च ।। ४।।
षट्कोणं वृत्तयुग्मं च कृत्वा तन्मध्यतो लिखेत्। द्वितीयार्णं साध्ययुतं कोणेष्वन्यत् त्रयं लिखेत्।।५।।
अधरेषु समायानि तानि लेख्यानि सर्वदा। वृत्तयोरन्तरा साध्यसमेतैः पवनार्णकैः।। ६।।
संवेष्ट्य तानि सञ्जप्य रिपोरष्टमराशिगे। श्मशाने स्थापयेत्तत्र लग्ने विद्वेषणं भवेत्।। ७।।

अस्यार्थः— षट्कोणं विलिख्य तद्बहिर्वृत्तद्वयं विधाय भेरुण्डाया मूलनवार्णस्य द्वितीयाक्षरं साध्यनामगर्भं "अमुकामुकयोर्विद्वेषणं कुरु कुरु" इति संयोज्य मध्ये विलिख्य, तृतीयं चतुर्थं षष्ठं बीजत्रयं बिन्दुयुक्तं षटकोणस्योपरितनकोणत्रये विलिख्य, तान्येव त्रीणि बीजानि षट्कोणस्याधस्तनकोणत्रये विसर्गयुक्तानि विलिख्य तद्बहिर्वृत्तयोरन्तराले वायुवर्णदशकेन साध्यनामगर्भेणावेष्टयेदुक्तफलदं भवति।। तथा—

निम्बपत्ररसैः पिष्टश्मशानाङ्गारलेखनात्। पृषदाखुत्वचि च तत्सहस्रद्वयजापतः।। ८।।

पृषन्मार्जारः। आखुर्मूषकः।

---

१. 'तत्प्रयोगतः' क. पाठः। २. 'वेष्टुं मन्त्रा अशक्तास्ते' ग. पाठः। ३. 'चे' क. पाठः। ४. 'तोयपिष्ट' ग. पाठः।
५. 'पत्रे पटे'। ६. 'ड्येन' क. पाठः। ७. 'नार्पितेन' क. पाठः। ८. 'र्थं' क. पाठः।

द्वीपिवक्त्रत्वचि लिखेत् तद्यन्त्रं गोमुखत्वचि। समालिख्यं च संज्ञान्त[1] पूर्वस्मिन्नुत्तरे रिपो:।। ९।।
उत्तराधरमाधाय शिलाध: सन्ध्ययोर्जपेत्। जपित्वा प्रोक्तसंख्यं च जयेत्तं प्रतिवादिनम्।। १०।।

रिपोरुत्तरदिशि पूर्वदिशि वा उत्तराधरं उपरिष्टादधस्ताच्छिलाद्वयमित्यर्थ:। सन्ध्ययो: प्रात: सायम्। प्रोक्तसंख्यं सहस्रम्।

एतन्मुखावलोकेन प्रतिवादी हतोद्यम:। निरुत्तर: पलायेत जितोऽस्मीति वदेत्तु वा।। ११।।
हरितालेन पिष्टेन[2] निशारसयुतेन तु। विलिखेद्वादविजये यन्त्रमुक्तक्रमेण वै।। १२।।
रुरुचर्मणि तद्रक्तलिखितं[3] तद्रिपोर्गृहे। प्रोक्तकाले खनेदुक्तक्रमपूजाजपान्वितम्।। १३।।
उच्चाटयेद्रिपून् मासान्नियतं यन्त्रवैभवात्। नृचर्मणि च तद्रक्तलिखितं तत् श्मशानके।। १४।।
पूजाजपक्रमोपेतं निखनेदुक्तकालत:। मासेन याति वैरी तु दाहज्वरयुतो यमम्।। १५।।
तृतीयं मध्यत: कृत्वा त्वितरान् परितो लिखेत्।

तृतीयं प्रोक्तबीजचतुष्टयमध्ये तृतीयं बीजमित्यर्थ:।।

साध्यर्क्षयोनेस्त्वचि तन्मधूच्छिष्टेन पीडितम्[4]।। १६।।
श्मशानभस्ममिलितं[5] निक्षिप्तं नष्टकूपके। प्रोक्तकालसमोपेतं नाशयेत् सलिले रिपुम्।। १७।।
तदेव वह्निमूलेन पिष्टेन मनुजासृजा[6]। लिखितं गोत्वचि क्षिप्तं चुल्ल्यामुपरि वह्निना।। १८।।
ज्वलितेनानिशं सामादग्निनाग्नौ पतेद्रिपु:। तृतीयेन तु मध्येन वेष्टितैरितरैरपि।। १९।।

तृतीये तृतीयबीजेन।

उलूककाकपक्षाभ्यां प्रथमोक्तेन संलिखेत्। गर्दभत्वचि तत् खात्वा कुण्डमध्ये तदूर्ध्वत:।। २०।।
साध्यवृक्षेन्धने वह्नौ बीजैरुन्मत्तसम्भवै:। कद्रुतैलप्लुतैर्होमान्मत्तोऽरिर्म्रियते ध्रुवम्।। २१।।
साध्यर्क्षवृक्षकीलं तु प्रोक्तयन्त्रसमन्वितम्। खरस्नायुभिराबद्धं खातं वैरिपुरे निशि।। २२।।
राशौ तदष्टमे मासात्तत्पुरं पितृकाननम्। काकोलूकबकश्येनकङ्कतित्तिरिपादयो:।। २३।।
विलिख्य यन्त्राण्युक्तानि प्रेतचीरे निबध्य तत्। खनेन्मङ्गलवारे तु प्रोक्तकाले चतुष्पथे।। २४।।
त्रिसप्ताहाद् व्रजेद्वैरी स्यादुन्मत्तो दिशो दश। तान्येव तत्तच्चर्मस्थं तदालयभुवि स्थितम्।। २५।।
[7]शमयेद्गजमर्त्याश्वगोखरोष्ट्राजसैरिभान्। सप्ताहात् तद्द्वयान्मासान्नियतं यन्त्रवैभवात्।। २६।।
तच्छान्तिं शृणु देवेशि यन्त्रध्यानाभिषेकत:। तन्मन्त्रवर्णैर्यन्त्रस्थैश्चित्रा[8] मन्त्रार्थवैभवा:[9]।। २७।।
पद्ममष्टदलं कृत्वा मध्ये त्वाद्यं सनामकम्। लिखित्वाष्टसु पत्रेषु चतुष्कं तद्द्विरालिखेत्।। २८।।
बहिर्वृत्तान्तरा कुर्यान्मातृकाक्षरवेष्टनम्। प्रागुक्तैरेव तैर्द्रव्यै: सम्पूज्य विनियोगत: ।। २९।।
तत्तत्क्लेशविनाश: स्यात्तथा मन्त्रानुभावत:।

---

[1] 'स्वसंज्ञां तु' क. पाठ:। [2] 'घृष्टेन' क. पाठ:। [3] 'मिलितं' क. पाठ:। [4] 'पिण्डितम्' क. पाठ:। [5] 'लिखितं' क. पाठ:। [6] 'नायुजा' ग. पाठ:। [7] 'नाशयेत्' क. पाठ:। [8] 'न्ता' क. पाठ:। [9] 'वात्' क. पाठ:।

अत्र निग्रहयन्त्रोक्ताक्षरचतुष्टयं विहायोर्वरिताक्षरपञ्चकमध्ये प्रथमं साध्यनामगर्भं कर्णिकायामर्णचतुष्टयं द्विरावृत्त्याष्टदलेषु लिखेदित्यर्थः।।

विजयं समरे राज्ञां शृणु वैरिविनाशनम् ।। ३०।।
मन्त्राक्षराणि प्रत्येकं योजयेत् षोडशस्वरैः। तेन मन्त्राक्षराणि स्युः संख्यया च शतं पुनः।। ३१।।
चत्वारिंशच्च चत्वारि तैर्यन्त्ररचनं शृणु।

अत्र मूलमन्त्रस्यानावृत्ताक्षराणि करभझछजसवह इति नवाक्षराणि षोडशस्वरयुक्तानि चतुश्चत्वारिंशदुत्तरशतं १४४ भवन्ति।। तथा—

तेन सर्वत्र समरे विजयो भवति ध्रुवम्।। ३२।।
प्राक्प्रत्यक्दक्षिणोदक् च कुर्याद्रेखास्त्रयोदश। तेन तावन्ति कोष्ठानि सम्भवन्ति समन्ततः।।३३।।
कृत्वाष्टास्रं ततो बाह्ये वृत्तयुग्मं ततो लिखेत्। अक्षराणि शिवाद्यं तु निर्ऋत्यन्तमनुक्रमात्।। ३४।।
तत्त[1]न्मन्त्रार्णकोष्ठेषु नवस्वाख्यां समालिखेत्। बहिरष्टसु कोणेषु द्वितीयार्णादि संलिखेत्।। ३५।।

यस्मिन् यस्मिन् कोष्ठेऽनावृत्ताक्षरं पतितं तस्मिंस्तस्मिन् कोष्ठे साध्यनाम लिखेदित्यर्थः। द्वितीयार्णेति मूलमन्त्रबीजानीत्यर्थः।।

अन्तरालेषु विलिखेदाद्यं वृत्तद्वयान्तरा[2]। तान्येव मातृकाख्याभिर्विदर्भितमथो लिखेत्।। ३६।।

बहिरष्टकोणान्तरालेषु आद्यक्षरं प्रणवमेव लिखेत्। तदन्तर्बहिर्वृत्तद्वयान्तराले मूलमन्त्राक्षरविदर्भितमातृकाक्षरैर्वेष्टयेदित्यर्थः।।

एतत्पटे समालिख्य ध्वजीकृत्य रणोद्यमे। दर्शयेत् तेन रिपवः पलायन्ते दिशो दश।। ३७।।
प्रणमेयुर्निजां लक्ष्मीं प्राभृतीकृत्य तत्क्षणात्। तदेव वैरिशिविरे निखनेदुदये शनेः[3]।। ३८।।
सद्यस्त्वन्योन्यकलहान्नाशमेति सुनिश्चितम्। तदेव स्वपुरे मध्ये स्थापयेद् धिषणोदये।। ३९।।
पराभिचारकृत्यादिदुरितानि न तत्र वै। संस्पृशन्ति पुरान्तःस्थाद्यन्त्रशक्त्यनुभावतः।। ४०।।
तद्यन्त्रं ताम्रपट्टे तु विलिख्याभ्यर्च्य तत्पुनः। स्थापयेत् साध्यभूभर्तुरिकादशसमुद्यमे।। ४१।।
गजवाजिगृहे स्वस्य भाण्डागारे स्वमन्दिरे[4]। अन्तःपुरे नगर्यास्तु दिक्षु मध्ये च तत् खनेत्।। ४२।।
यत्र संस्थापितं यन्त्रं तत्रार्चां नित्यशो नृपः। कारयेत् तेन तत्सर्वं शाश्वतं वृद्धये भवेत्।। ४३।।
बीजानि तानि प्रत्येकमष्टपत्रसरोरुहे। मध्ये दलेषु परितो लिखेदेकैकशः क्रमात्।। ४४।।
बहिर्मातृकयावेष्ट्य सञ्जप्याभ्यर्च्य नित्यशः। स्वजन्मर्क्षादिनवके कुर्याच्छान्तिमनुक्रमात्।। ४५।।
यन्नक्षत्रे भवेदस्य ग्रहतो राजतोऽपि वा। रोगतो वैरितो वापि तस्मिंस्तत्तेन शामयेत्।। ४६।।

अत्र यन्त्रान्तरमाह। बीजानीति—अष्टदलकमलं विलिख्य मध्ये प्रथमबीजं साध्यनामगर्भे विलिख्याष्टसु दलेषु द्वितीयाद्यष्टबीजानि विलिख्य बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयेत्। एवं द्वितीयाक्षरं मध्ये चेद् द्वितीयं यन्त्रं

---

[1]. 'तत्र' क. पाठः। [2]. 'रान्' क. पाठः। [3]. 'शनिस्थितराश्युदयकाले इत्यर्थः क. पाठः। [4]. 'मण्डपे' क. पाठः।

भवति। एवं नव यन्त्राणि भवन्तीत्यर्थः।। तथा—

मन्त्राणौंषधमध्यस्थं[१] यन्त्रं कृत्वा तु तेन तु। रक्षां कुर्वीत सर्वेषां सर्वापत्तारणाय वै।। ४७।।
तत्तद्यन्त्रं[२] तद्दिनेषु स्नानपानाशनादिना। ग्रहजं वैरिजं दुःखं शाम्यत्येव न संशयः।। ४८।।
क्रमेण नवयन्त्राणि नवग्रहमयानि च। तस्मात् तत्तद्ग्रहक्लेशं तत्तद्यन्त्रेण शामयेत्।। ४९।।
सेकाशनविभूत्यादिप्रयोगैरुदितैः क्रमात्। विविधानि विषाण्येभिर्यन्त्रैर्जलनिवेशनैः।। ५०।।
नाशयेत् पानसेकाभ्यां धारणेनार्चनेन च। एभिस्तु नवभिर्यन्त्रैर्यन्न साध्यं न कुत्रचित्।। ५१।।
देशे वा नगरे ग्रामे मण्डले खर्वटादिके। प्रथमं मध्यतः खात्वा प्रागादिषु ततोऽष्टसु।। ५२।।
द्वितीयादीनि तु खनेत् तत्र लक्ष्मीरतिस्थिरा। धर्मार्थौ चातिसंवृद्धौ भवेतामुक्तयोगतः।। ५३।।
द्वितीयं मध्यतः खात्वा त्वितराण्यभितः खनेत्। धार्मिकास्तेन तत्रस्थाः प्रसीदन्ति च देवताः।।५४।।
सप्तस्वन्येषु च तथा कान्त्यारोग्ययशोबलैः। पुत्रज्ञानधनैश्चाढ्याः प्रभवन्ति च नित्यशः।। ५५।।
दष्टेषु घोरैः फणिभिर्नवभिर्नवरन्ध्रगैः। [३]ध्यातैर्मृतोऽपि माहात्म्यान्मन्त्रस्योत्तिष्ठते ध्रुवम्।। ५६।।
अश्विन्यादिषु ऋक्षेषु नवानि नवसु क्रमात्। विलिख्य देवीं तत्रस्थां नवाकारां नवस्वपि।। ५७।।
पूजयेदुपचारैस्तां नित्यशो भक्तिसंयुतः। प्रागुक्तपरिवारादिरहितां पूजयन्नपि ।। ५८।।
सिद्धिमेति नरो भक्त्या परया चेत् समन्वितः। स्त्रीबालवृद्धाशक्तानां गतिरेषा च सिद्धये।। ५९।।
भेरुण्डां कर्णयोर्जप्याद्विषार्तस्य तदैव सः। निर्विषो जायतेऽचिन्त्या[४] मन्त्राणां शक्तयः शिवे।।६०।।
त्रैलोक्यमोहिनी विद्या सर्वतो भवता स्तुता। न कदाचित् तु सा प्रोक्ता तां मे ब्रूहि महेश्वर।।६१।।
सर्वेषामेव मन्त्राणां विद्यानां च यशस्विनि। व्याप्तरूपं प्रवक्ष्यामि शृणु त्वमिदमद्भुतम्।। ६२।।
येन नारीनरनृपदेवताः सर्वजन्तवः। भजन्त्येनं यथा मां त्वं तत्प्रयोगबलाद् ध्रुवम्।। ६३।।
अकारादिक्षकारान्तैर्मातृकार्णैः सबिन्दुभिः। प्रत्येकं पुटितान् कृत्वा मन्त्रं विद्यामथापि वा।। ६४।।
विद्यया मातृकावर्णान् पुटयेन्मन्त्रतोऽपि वा। प्रोक्ते तद्यन्त्रनवके कुम्भं संस्थाप्य वै तथा।। ६५।।
जपतर्पणहोमार्चासिद्ध्या सेक ईरितः। कुचन्दनैर्गैरिकैर्वा दरदैश्चन्दनैस्तथा ।। ६६।।
सिन्दूरैस्तण्डुलैर्मुद्गैस्तिलैः कृष्णैः सितैरपि। नवानां नवभिः कुर्यादेभिर्यन्त्रप्रकल्पनम्।। ६७।।
चैत्रादिविषुवद्द्वन्द्वे तथैवायनयोर्द्वयोः। [५]दक्षोत्तराख्य[६]योर्जन्मत्रितये पर्वणि क्रमात्।। ६८।।
राजा वा राजमहिषी सेनापत्यधिपोऽथवा। अन्यो वा भक्तिशीलाढ्यः कारयेदभिषेचनम्।। ६९।।
दक्षिणामभिषेके च दद्याद्भूरि स्वशक्तितः। वित्तशाढ्यं न कुर्वीत यदि कुर्वीत लोभतः।। ७०।।
सन्दहेत्तं यावकवत् पुत्रलक्ष्मीकलत्रकैः। तस्मात् सर्वत्र तन्त्रेऽस्मिन् वित्तशाठ्यं न चिन्तयेत्।।७१।।
अभिषेकफलं देवि शृणु वक्ष्ये यथाविधि। सोमसूर्याग्निरूपेण जलेनेप्सितमन्त्रतः।। ७२।।

---

[१] 'मन्त्राणोंऽप्यथ भस्मस्थं' क. पाठः। [२] 'न्त्रे' क. पाठः। [३] 'ध्यानैः' क. पाठः। [४] 'चित्रा' क. पाठः।
[५] 'रक्षां' क. पाठः। [६] 'क्षयो' क. ग. पाठः।

जपपूजादिना सिद्धवैभवेनाभिषेकतः। दुर्लक्षणसमुत्थानि तथा दुष्कर्मजानि च।। ७३।।
तद्वद्दुर्नीतिजनितान्यन्यानि दुरितानि च। नाशयेत् तत्क्षणादेव सलिलैरिव पावकः।। ७४।।
अपुत्रो वित्तविद्यायुरारोग्यादिसमन्वितः। लभते च बहून् पुत्रान् सुखी च चिरमेधते।। ७५।।
केमद्रुमादियोगेषु जन्मना प्राक्तनाद्यतः। यो भृशं नित्यदारिद्र्यात् क्लिष्टः सोऽपि श्रियैधते।।७६।।
प्राग्जन्मसञ्चितैः पापैरपथ्यादिनिषेवणैः। अनीत्या वैरिविहितैरभिचारादिभिस्तु वा ।। ७७।।
ये रोगाः पीडयन्त्येनं ते विनश्यन्त्यशेषतः। कान्तिलक्ष्मीधनारोग्यविद्याविजयकीर्तिभिः।। ७८।।
सुचिरं जीवति ख्यातः पुत्रपौत्रादिभिर्युतः। नवाभिषेकं नवसु प्रोक्तेषु विधिना चरन्।। ७९।।
अपमृत्युं विजित्यास्मद्भक्तः शुद्धान्तमानसः। जीवन्मुक्तश्चिरं योगी भुवि जीवति मन्मथः[1]।। ८०।।

इति भीरुण्डानित्याप्रयोगविधिः।।

अथ वह्निवासिनीनित्याप्रयोगः। तत्र श्रीतन्त्रराजे– (प० ११ श्लो० ३६)

विद्यायाः साधनं तद्वत्तन्त्रेऽस्मिन् परमेश्वरि। अन्यत[2]न्त्रानपेक्षित्वादुच्यतेऽत्रैव साधनम्।। १।।
द्रव्यानुक्तौ होमविधौ घृतमन्नाज्यमेव च। संख्यानुक्तौ सहस्रं स्याच्छतं वा तन्त्रचोदितम्।। २।।
विदध्यादुक्तरूपेण पूर्णत्वं त्वमुनाक्षतम्। काम्यहोमविधिं वक्ष्ये शृणु वाञ्छितदायकम्।। ३।।
शालितण्डुलमादाय प्रस्थं भाण्डे विनिक्षिपेत्[3]। समानवर्णवत्साया रक्ताया गोः पयस्तथा।। ४।।
द्विगुणस्तत्र निक्षिप्य श्रपयेन् संस्कृतेऽनले। घृतेन सिक्तं सिक्थं तु कृत्वा तत्ससितं करे।। ५।।
निधाय विद्यामष्टोर्ध्वं शतं जप्त्वा हुनेत्ततः। एवं होमो महालक्ष्मीमावहेत् प्रतिपत्कृतः[4]।। ६।।

सिक्थं पिण्डं, ससितं सितया युतम्।। तथा–

शुक्रवारेष्वपि तथा वर्षान्नृपसमो भवेत्। पञ्चम्यां तु विशेषेण प्राग्वद्धोमं समाचरेत्।। ७।।
तस्यां तिथौ त्रिमध्यक्तैर्मल्लिकाद्यैः सितैर्हुनेत्। अन्नाज्याभ्यां तु नियतं हुत्वान्नाढ्यो भवेन्नरः।।८।।
यद्यद्धि वाञ्छितं वस्तु तानि सर्वाणि सर्वदा। घृतहोमादवाप्नोति तथैव तिलतण्डुलैः।। ९।।
पञ्चमीषु विशेषेण पूजां कुर्याद् व्रती भवेत्। प्रतिपत्तिथिमारभ्य पञ्चदश्यन्तमम्बिके।। १०।।
कामेश्वर्यादिचित्रान्ता देव्यस्त्वेकैकविग्रहाः। यतस्तेन स्वस्वतिथौ तास्ताः पूज्या हुतादिभिः।।११।।
प्रीणयेद् व्रतसङ्कल्पसमेतो भक्तिसंयुतः। तेनायुःश्रीधनारोग्यविद्याकीर्तिसमन्वितः ।। १२।।
जीवेद्वर्षशतं भूमौ स्वकुल्याग्र्यश्च तत्त्ववित्[5]। यत्तिथौ याः समाख्याताः स ताः सममवाप्नुयात्।।१३।।
विद्या विधिवदेवैताः प्रोक्ताः पञ्चदशापि च। सम्प्राप्य जपहोमार्चायोगतर्पणसेकतः ।। १४।।
विद्यया देवतात्मानं सम्प्राप्याखिलमाचरेत्। विद्याप्राप्तिविधिं देव ब्रूहि सम्यङ् ममाधुना।। १५।।
आसां पञ्चदशानां च येनैताः साधकोन्मुखाः। शृणु वक्ष्यामि ते देवि विद्याप्राप्तिविधिं शुभाम्।।१६।।
येन विद्यादेवताभ्यामैक्यं योगेन सिध्यति। तद्भावमा[6]वयोरैक्यरूपमानन्दविग्रहम्।। १७।।

---

[1] 'मन्मयः' क. पाठः। [2] 'म' क. पाठः। [3] 'नवे' क. पाठः। [4] 'पक्षतः' ग. पाठः।
[5] 'तद्बली' क. पाठः। [6] 'तद्भावभावयोः' ग. पाठः।

यदवाप्तुं यजन्तेऽद्याप्यनेके मुनयोऽम्बिके। कुचन्दनैः कुङ्कुमैर्वा सिन्दूरैर्गैरिकैः शुभैः।। १८।।
विदध्याद्विपुलं चक्रं व्यक्तरेखं सुशोभनम्। यस्या यच्चक्रमाख्यातं नित्यपूजाविधिक्रमे।। १९।।
तत्र कुम्भं निधायान्तर्जले सम्पूज्य देवताः। प्रोक्तक्रमसमोपेतं पूर्वेद्युर्गीतनृत्यकैः ।। २०।।
कृत्वोत्सवमथान्येद्युः प्राग्वदभ्यर्च्य तां तथा। तत्तिथौ प्राङ्मुखं शिष्यमुक्तलक्षणसंयुतम्।।२१।।
तथाविधो गुरुः कुम्भजलैस्तमभिषेचयेत्। तज्जलं प्रागुदङ्मध्यदिक्षुगं सर्वसिद्धिदम्।। २२।।
अन्यासु क्रमतोऽनिष्टान्यवाप्नोति सुनिश्चितम्। बह्निदाहं मृतिं रोगं दारिद्र्यं देशमोचनम्।। २३।।
क्रमाद्वह्न्यादिवाय्वन्तं फलानि स्युरिमानि वै। ततोऽसौ परिधायाशु शुभ्रे शुद्धे च वाससी।।२४।।
समाचम्य निजैर्वृत्तैः[1] समस्तैर्वा पुरोदितैः। अभ्यर्च्य पादयोर्नाथं पञ्चश्लोकैः स्तुवंस्त्रिशः।। २५।।
प्रणम्योत्थाय पुरतो बद्धाञ्जलिकरो भवेत्। ततो गुरुस्तमाहूय चक्रमध्ये निवेश्य च।। २६।।
मनसा भावयन्नैक्यमात्मानं देवतात्मना। प्रोक्तक्रमेण तां देवीं विद्यारूपां महाद्युतिम्।। २७।।
समावाह्यास्य मूर्धादित्रिषु स्थानेष्वनुक्रमात्। संस्थाप्य प्रोक्तरूपां तां ध्यात्वाभ्यर्च्य वदेन्मनुम्।।२८।।
जीवकर्णे त्रिशः पूर्णदेवतात्मा समाहितः। ततस्तत्रैव तां विद्यां शतं जप्यात् तदात्मवान्।। २९।।
पुनस्तदाज्ञयोत्थाय पुष्पैरभ्यर्च्य तं स्तुवन्। प्रणम्य त्रिरुपासीत मूर्ध्नि बद्धाञ्जलिः स्तुवन्।। ३०।।
आहूय क्रममाचारान् प्रोक्त्वा सम्यग्भजेति तम्। आदिशेद् देशिकस्तस्माद् दिनादारभ्य सोऽपि [2]तम्।३१।
नित्यशो जपपूजाद्यैरुपासीत शिव[3] गुरुम्। एवं पञ्चदशानां च नित्यानां क्रम ईरितः।। ३२।।
विद्याप्राप्तिविधौ देवि सर्वं सम्यक् समीरितम्। तासां नैमित्तिकं काम्यं ललितोक्तविधानतः।।३३।।
कुर्यात्प्रतिष्ठाद्यं चैवं यत एतास्तु[4] तन्मयः। आसामन्योन्यमङ्गाङ्गिपूजासु परमेश्वरि।। ३४।।
एकाङ्गित्वे स्थितान्यास्तत्परिवारास्तथाविधाः। अन्यदा प्रोक्तरूपास्तास्तत्र तत्रार्चने मताः।। ३५।।
तासां काम्यफलावाप्तिध्यानं तत्पटलोदितम्। एवं सर्वं समाख्यातं साधारणविधानकम्।। ३६।।
विद्या मन्त्रा इति प्रोक्ता यत्तद्भेदं वद प्रभो। शृणु देवि विशेषं तु सन्दर्भत्वे[5] समेऽपि च।। ३७।।
वर्णानां देवताभेदान् द्विधा स्युस्ते त्वशेषतः। त्वद्दैवत्याः स्मृता विद्या मद्दैवत्यास्तु मन्त्रकाः।।३८।।
पुनरस्यास्तु यन्त्राणि तत्फलानि शृणु प्रिये। विद्याक्षरेष्वनावृत्तान्यक्षराण्यष्ट तैस्तथा।। ३९।।
स्वराणां सङ्गमादष्टाविंशत्या शतमीरितम्। विधाय वृत्तयोर्मध्ये त्वष्टकोणं ततो द्वयम्।। ४०।।

अत्र अनावृत्ताक्षराणि "हरवनसयम" इति। आदावकारः, मिलित्वाष्टावक्षराणि षोडशस्वरयुक्तानि चेदष्टाविंशत्युत्तरशतं १२८ वर्णा भवन्तीत्यर्थः।

कृत्वा तेषु न्यसेद्वर्णानिष्टस्वष्टौ तु मध्यतः। मायां नामाङ्किता[6] कृत्वा तां तारेण प्रवेष्टयेत्।। ४१।।
अन्तर्वृत्तान्तराले ताँल्लिखेद्वर्णान् दश क्रमात्। कर्मानुरूपान् पञ्चाशल्लिखेदुक्तक्रमेण वै।। ४२।।

---

[1] 'वित्तैः' चित्तैः' व्यस्तैः' ग. पाठः। [2] 'ताम्' क. पाठः। [3] 'शिवां' क. पाठः। [4] 'एवां' क. पाठः।
[5] 'भंवै' क. पाठः। [6] 'न्वितां' क. पाठः।

बहिर्वृत्तान्तरा प्राग्वदादिक्षान्ताक्षराणि च। एवं षोडश यन्त्राणि जायन्ते तैर्यथाक्रमम्।। ४३।।

इति।। अथैतद्यन्त्ररचनाप्रकारः— प्रथमतो मध्ये साध्यनामगर्भं ह्रीकारं विलिख्य तत्प्रणवेन बहिरावेष्ट्य तद्बहिर्वृत्तद्वयं कृत्वा तद्बहिरष्टकोणं चतुरस्रद्वयेन विरच्य, तद्बहिर्वृत्तद्वयं विधायाभ्यन्तरवृत्तद्वयान्तराले कर्मानुसारीणि भूताक्षराणि दश द्वित्रिद्वित्रिक्रमेण विलिख्याष्टकोणेषु अष्टाविंशत्युत्तरशत १२८ वर्णेषु प्रथमाष्टबीजानि विलिख्य तद्बहिर्वृत्तद्वयान्तराले मातृकाक्षरैः संवेष्टयेत्। द्वितीययन्त्रस्याष्टकोणेषु प्रागुक्तवर्णेषु प्रथमाष्टकं विहाय द्वितीयाष्टकं लिखेत्। अन्यत्समानम्। एवं षोडश यन्त्राणि भवन्तीत्यर्थः।। तथा—

तैर्यन्त्रैः साधयेन्नित्यं मनीषितमशेषतः। प्रथमं खपरि रक्तवह्निमूलेन संयुतम्।। ४४।।
सिन्दूरं तद्रसे पिष्ट्वा धत्तूररससंयुते। लिखित्वा खदिराङ्गारे तापयेन्निशि जापवान्।। ४५।।
नारी नरो नृपोऽन्यो वा समायाति च तद्बलात्। तदेव तेन ताम्रे वा कांस्ये वा प्राग्वदालिखेत्।।४६।।
तत्तापनादपि भवेत् पूर्वोक्तं फलमीश्वरि। द्वितीयं खपरि तेन विलिख्य निशि तापयेत्।। ४७।।
नारी वश्यं समायाति जन्माचारविलङ्घिनी। तृतीयं तेन तत्रैव लिखित्वा निशि तापयेत्।। ४८।।
श्मशानाग्नौ मुक्तकेशः क्षणाद्वैरी ज्वरातुरः। तदेव दम्पतीदग्धवह्न्यङ्गारे तु निर्जने ।। ४९।।
रसे पिष्ट्वा लिखित्वाग्नौ सन्ताप्य निखनेत् ततः। श्मशाने वैरिणा प्रोक्तकाले क्रुद्धाशयो जपन्।।५०।।
मनुं तदैव सम्भ्रान्तः पिशाचार्तो रिपुर्भवेत्। चतुर्थं विलिखेत् कृष्णपटचीरेऽसिताम्बरे।। ५१।।
पूर्ववत् तत्र निखनेद्रात्रावुक्तक्रमेण तु। दाहज्वरेण सप्ताहाद्रिपुर्याति यमालयम्।। ५२।।
पञ्चमेऽप्यथवा षष्ठे द्वयोर्नाम लिखेद् द्वयोः। काकोलूकजपक्षोत्थलेखिन्या खर्परद्वये।। ५३।।
श्मशाने निखनेत् प्राग्वन्नदीतीरद्वये द्वयम्। नद्यां तु वारिपूर्णायां विद्वेषः स्यात् तयोर्मिथः।। ५४।।
सप्तमे नाम संलिख्य सीसपट्टे यथाविधि। शिरः कपाले निक्षिप्य श्मशाने निखनेन्निशि।। ५५।।
रिपोः पुरोक्तकाले च पिशाचैर्गृह्यते रिपुः। अष्टमं खपरि कृत्वा रिपुद्वारे खनेन्निशि।। ५६।।
सप्ताहात् तद्गृहाद्वैरी प्रयात्युच्चाटितोऽन्यतः। नवमं हेम्नि कृत्वा तदूर्मिकायां रवेर्दिने।। ५७।।
सिद्धयोगे शुभे लग्ने धिषणोदय एव वा। कृत्यापमृत्युरोगादिदुःखेभ्यो मुच्यते नरः।। ५८।।
दशमं राजते पट्टे कृत्वा वेश्मनि कुत्रचित्। निधाय पूजयेद्देशमन्यश्मपातादिशान्तये।। ५९।।
तथा भूतग्रहातांश्च रक्षेदेतस्य धारणात्। एकादशं लिखेद्भूर्जे पाटीरेन्दुद्रवैस्तु तत्।। ६०।।
उत्क्रमसमोपेतं गुलिकीकृत्य तं पुनः। सितसिक्थमये लिङ्गे संस्थाप्याभ्यर्चयेत् पुनः।। ६१।।

अत्र सिक्थं मधूच्छिष्टम्।

स्थापयेत् क्षौद्रमध्ये तु पूजयेन्नित्यशश्च तत्। सन्ध्यासु सुसितैः पुष्पैः सौरभाढ्यैर्विधानतः।। ६२।।
मासात् तदर्धात् सप्ताहाद्वशे स्युः शत्रवो ध्रुवम्। भवेयुर्व्याधितास्तेनोद्धृतेनारोग्यमाप्नुयुः।। ६३।।
ज्वारार्तास्तु विशेषेण सुखिताः स्युरयत्नतः। आम्लसौवीरमध्यस्थं विद्वेषयति वैरिणौ।। ६४।।
तत्रैव क्वथनाद्रोगं द्वयोरुत्सादयेदपि। शुण्ठीमरिचपिप्पल्यः सुसूक्ष्मं परिचूर्णिताः ।। ६५।।
लकुचस्य रसोपेतास्तन्मध्ये तद्विनिक्षिपेत्। तापयेत् त्रिषु सन्ध्यासु यन्त्रारातिस्तु तन्मुखम्।। ६६।।

प्रोक्तकाले ज्वरैरार्तस्तापतृष्णासमन्वितः। द्वादशं कर्पटे रात्रिरसेनालिख्य तत्पुनः।। ६७।।
इष्टकायुगमध्यस्थं कृत्वा तच्छ्लेषयेद् दृढम्। स्थापयेच्चण्डिकागेहे शास्तुरायतनेऽपि वा।।६८।।
स्वगेहभित्तिमध्ये वा शयनस्थानतोऽपि वा। स्तम्भयेद्वैरिणो रोषमुद्योगं बन्धचिन्तनम्।। ६९।।
व्यवहारं रणं चान्यदस्याभिमतमात्मनः। त्रयोदशेन भूर्जस्थेनाशु धारणतोऽङ्गना।। ७०।।
वन्ध्यापि लभते पुत्रं विचित्रा यन्त्रशक्तयः। चतुर्दशगतं नाम कृत्वा भूर्जे च तत्तथा।। ७१।।
सिक्थमध्यगतं कृत्वा तं निशीथेऽभितापयेत्। सप्ताहाद्वशमायान्ति स्त्रियो वा पुरुषा नृपाः।।७२।।
गजा हया मृगास्त्वन्ये ये जीवा भूतलाश्रयाः। परेण नाम्ना युक्तेन फलकालिखितेन वै।। ७३।।
सुखप्रसूतिः स्यात् स्त्रीणां तत्पूजा प्रेक्षणादिना। षोडशे नाम संलिख्य धारयेत् प्राणिनां तथा।।७४।।
रक्षा भवति सर्वत्र ग्रहरोगभयादिषु। तदेव स्वर्णपट्टस्थं विधाय विधिना [1]युतम्।। ७५।।
ऊर्मिकाङ्गदभूषादौ मूर्ध्नि वा बिभृयात् ततः। आधिव्याधिविनिर्मुक्तो निःसपत्नो जितेन्द्रियः।।७६।।
भोक्ता कर्ता च पुण्यानां जीवेद्वर्षशतं भुवि।

इति वह्निवासिनीनित्याप्रयोगविधिः।। (११ प०)

अथ महावज्रेश्वरीनित्याप्रयोगविधिः। श्रीतन्त्रराजे—(१२ प० २२ श्लो०)

वसन्तकाले ग्रीष्मे वा पूर्णामारभ्य साधयेत्। हविष्याशी पयोभक्षः फलमूलाशनोऽथवा।। १।।
स्नातः सुगन्धिसलिलैररुणांशुकवाञ्छुचिः। चन्द्रचन्दनकाश्मीरचर्चालोहितविग्रहः ।। २।।
अञ्जनाक्ताक्षियुगलस्ताम्बूलारुणवक्त्रवान्। मुखार्पितेन्दुशकलो हृष्टचेता जितेन्द्रियः।। ३।।
मौनी त्रिकालपूजासु कृतसङ्कल्पसाधनः। नक्ताशी हुतशिष्टेन जपेद्विद्यां [2]समीरिताम्।। ४।।
नित्यशो भोजयेद्विप्रान् भक्तान् भजनकौतुकान्। अघादिहीनान् मधुरं पायसं भोज्यभक्तिमान्।।५।।
प्रणम्याभ्यर्च्य विसृजेन्नित्यं सप्तदिनेषु तु। गुरुं जीवनमासाद्य प्रणम्यासकृदात्मवान्।। ६।।
धनधान्याम्बराद्यैस्तं सन्तोष्य तदनुज्ञया। कृतारम्भो नित्यशश्च पूजयेत्तं च भक्तितः।। ७।।
अन्ते च वित्तैः स्तोत्रैश्च तं सन्तोष्य कृती भवेत्। वित्तशाठ्यं च दम्भं च मोहं चासत्यमेव च।।८।।
न कदाचित् प्रकुर्वीत विशेषाद्गुरुसन्निधौ। एवं लक्षत्रयं जप्त्वा तद्दशांशं हुनेद् घृतैः।। ९।।
आरग्वधप्रसूनैर्वा प्रसूनैर्बकुलोद्भवैः। मधूकजैश्चम्पकैर्वा त्रिमध्वक्तैश्च नित्यशः ।। १०।।
चन्द्रचन्दनकस्तूरीकाश्मीरसुरभीकृतैः। तर्पयेत् सलिलैस्तावद् दिनशो भक्तिमान् दृढः।। ११।।
एवं संसिद्धमन्त्रस्तु कुर्यात् काम्यानि साधकः। गुरुभक्तो नित्यकृत्यकृतसङ्कल्पसंयुतः।। १२।।
सहस्रजापी स्थिरधीर्मन्त्रवीर्यविदात्मवान्। यः सोऽपि काम्यान् कुर्वीत प्रयोगान् नान्यथा शिवे।।१३।।
यद्यज्ञानेन मोहेन चापलेनापि वा चरेत्। अनर्थक्लेशराजादिपीडाः प्राप्नोति निश्चितम्।। १४।।
अरुणैः पङ्कजैर्होमं कुर्यात् त्रिमधुराप्लुतैः। मण्डलाल्लभते लक्ष्मीं महतीं श्लाघ्यविग्रहाम्।। १५।।
कह्लारैः क्षौद्रसंसिक्तैः[3] पौर्णाद्यं तद्दिनावधि। जुहुयान्नित्यशो भक्त्या सहस्रं विकचैः शुभैः।।१६।।

---

[1] 'शुभम्' क. ग. पाठः। [2] 'समाहितः' क. पाठः। [3] 'युक्तैः' क. पाठः।

तद्दिनेषु तु पूर्वोक्तात् भोजयेदुक्तरूपतः। तावच्च जप्याद्धोमान्ते यावत्संख्यं हुतं कृतम्।। १७।।
चम्पकैः क्षौद्रसंसिक्तैः सहस्रहवनाद् ध्रुवम्। लभते स्वर्णनिष्काणां शतं मासेन पूर्ववत्।। १८।।
पाटलैर्घृतसंसिक्तैस्त्रिसहस्रं हुतैस्तथा। दर्शादिमासाल्लभते चित्राणि वसनानि च।। १९।।
कर्पूरचन्दनादीनि सुगन्धीनि च मासतः। वस्तूनि लभते हृद्यैरन्यैर्भोगोपयोगिभिः।। २०।।
शालीभिः क्षीरसिक्ताभिः सप्तमीषु शतं हुनेत्। तेन शालिसमृद्धिः स्यान्मासैः षड्भिरसंशयम्।।२१।।
तिलैर्हुतैस्तद्दिवसे वर्षादारोग्यमाप्नुयात्। स्वजन्मसु त्रिषु तथा दूर्वाभिर्जुहुयात् तथा।। २२।।
निरातङ्को महाभोगः शतं वर्षाणि जीवति। गुडूचीतिलदूर्वाभिस्त्रिषु जन्मसु वा हुनेत्।। २३।।
तेनायुःश्रीयशोभाग्यपुण्यनिध्यादिवान् भवेत्। घृतपायसदुग्धैस्तु हुतैस्तेषु त्रिषु क्रमात्।। २४।।
आयुरारोग्यविभवैर्नृपमान्यो भवेत् तथा। सप्तम्यां कदलीहोमात् सौभाग्यं लभतेऽब्दतः।। २५।।
दूर्वात्रिकैस्तु प्रादेशमात्रैस्त्रिस्वादुसंयुतैः। जुहुयाद्दिनशो घोरे सन्निपाते ज्वरे गदे।। २६।।
महारोगेषु दूर्वाभिस्तिलैश्छिन्नोद्भवैस्तथा। त्रिभिर्वा नित्यशो होमं कुर्यात् त्रिस्वादुसंयुतैः।। २७।।
षण्मासादब्दतो वापि रोगान्मुक्तः सुखी भवेत्। तद्दिनेषु जपेद्विद्यां नित्यशः सलिलं स्पृशन्।।२८।।
सहस्रवारं तत्तोयैः स्नानपानं समाचरेत्। पाकाद्यमपि तैरेव कुर्याद्रोगविमुक्तये ।। २९।।
साध्यर्णवृक्षं सञ्चूर्ण्य [1]त्र्यूषणं सर्षपं तिलम्। पिष्टं च साध्यपादोत्थरजसा च समन्वितम्।। ३०।।
कृत्वा पुत्तलिकां तैस्तु हृदये नामसंयुताम्। प्राग्वच्छित्त्वायसैस्तीक्ष्णैर्निशि पुत्तलिकां हुनेत्।।३१।।
एवं दिनैः सप्तभिर्वा त्रिभिर्वैकदिनेन वा। साध्यो वश्यो भवेच्छीघ्रमपि दूरस्थितो दृढः।। ३२।।
तथाविधां पुत्तलिकां कुण्डमध्ये खनेद्भुवि। उपर्यग्निं निधायात्र विद्यया दिनशो हुनेत्।। ३३।।
त्रिसहस्रं त्रियामायां सर्षपैस्तद्रसाप्लुतैः। शतयोजनदूरादप्यानयेद्वनितां बलात्।। ३४।।

त्रियामायां निशीथे। तद्रसाप्लुतैः सर्षपतैलाक्तैः।।

तां तु पुत्तलिकां[2] मध्ये मधूच्छिष्टसमन्विताम्। कृतप्राणप्रतिष्ठां च श्मशाने निखनेन्निशि।। ३५।।
साध्ययोनिं च तत्रैव च्छित्वा दत्त्वा बलिं ततः। कृताभिषेकस्तां विद्यां प्रजपेच्च शतत्रयम्।।३६।।
अरातेरष्टमे राशौ मासान्नानाविधैरपि। रोगैर्भूतादिसङ्क्लेशैर्नाशमेति सुनिश्चितम् ।। ३७।।
यद्यन्तरा समुद्धृत्य सलिले तां खनेन्निशि। क्लेशैस्तैः स विनिर्मुक्तः सुखी जीवति भूतले।।३८।।
साध्यवृक्षेण कृत्वा तां सर्षपाज्ये निवेशिताम्। तोयमध्ये निधायैतत् क्वाथयेदुक्तवासरैः।। ३९।।
वैरी तीव्रज्वरेणार्तः कृती प्राग्वत् सुखी भवेत्। तामेव चण्डिकागेहे तथा बलियुतां खनेत्।।४०।।
साध्यो नरश्च नारी चेच्छास्तुरायतने खनेत्। तद्विधानेन सहितं शत्रुरुन्मादवान् भवेत्।। ४१।।
महावज्रं च वज्रं च यन्त्राण्येतान्यनुक्रमात्। प्रयोगानपि वक्ष्यामि समाहितधिया शृणु।। ४२।।
प्राक्प्रत्यग्दक्षिणोदक्च त्रिशत् सूत्राणि पातयेत्। तेन कोष्ठानि जायन्ते त्वेकषष्ट्या शतत्रयम्।।४३।।

---

[1] 'लवङ्गं' क. पाठः। [2] 'कामर्ध' क. पाठः।

तेषु कोणचतुष्केऽपि मार्जयेत् पञ्चकेन च। चत्वारिंशत्तत्र शेषं वज्राकारं यथा भवेत्।। ४४।।
दिक्षु चत्वारि चत्वारि मार्जयित्वा त्रिकोणगम्। कुर्याच्छेषाणि कोष्ठानि पञ्चषष्ट्या शतं भवेत्।।४५।।
तेषु पूर्वादि परितो लिखेद्विद्याक्षराणि तु। प्राग्वत् स्वरविभिन्नानि प्रागुक्तविधिना तथा।। ४६।।
चत्वारि चत्वारिंशच्च शतं तेषां तु मध्यत:। एकविंशति कोष्ठानि शिष्टानि पुनरम्बिके।। ४७।।
तेषु पर्यायनित्याणुवर्णषट्कसमन्वितम्। घटिकायुगवर्णौ च लिखेत् प्रागुक्तयोगत:।। ४८।।
शिष्टेषु विद्यावर्णांश्च लिखेद् द्वादश शेषयो:। साध्याख्यामालिखेदुक्तक्रमेण पुटयोर्द्वयो:।। ४९।।
चतुर्दिक्षु लिखेत् कोणेष्वभितो भौतिकार्णकान्। द्वित्रिक्रमेण प्राक्प्रत्यक्कोणयोस्तु त्रयं त्रयम्।।५०।।
एतत् प्रोक्तेषु संलिख्य सम्पूज्य विधिना युतम्। स्पृशञ्जपेन्मनुं पश्चात् त्रिसहस्रं ततस्तु तत्।।५१।।
विनियुञ्ज्यादथोक्तेषु कार्येषु क्रमत: शिवे। भूताक्षराणि च पुनर्लिखेत् कार्यानुरूपत:।। ५२।।
महावज्रमिति ख्यातं सर्वत्रैवापराजितम्। विजयस्तम्भविद्वेषवश्योच्चाटनकर्मसु।। ५३।।
रक्षां[1] पुष्टिं च शान्तिं च तथैव रिपुनिग्रहे। देशराष्ट्रपुरग्रामनिवेशोदर्विशेषत:[2]।। ५४।।
घोरेषूत्पातजातेषु भूमौ संलिख्य गैरिकै:। मध्ये देवीं समावाह्य पूजयेन्नित्यश: शिवाम्।। ५५।।
सन्ध्यासु तिसृषु प्रोक्तक्रमान्नीराजनं तथा। कुर्यात् त्रिरात्रं द्विगुणं त्रिगुणं काम्यरूपत:।। ५६।।
राज्ञां वैरिनिरोधेन[3] पुरीमात्रावशेषिते। विभवे मण्डपे तस्य प्रोक्तवज्रं लिखेन्महत्।। ५७।।
दरदेनार्चयेत् तस्य मध्ये देवीं शुचिस्मिताम्। नृत्यगीतादिभि: सार्धं सन्ध्यासु च विशेषत:।। ५८।।
एवं प्राग्वद्दिनैरुक्तैर्विजयी नृपतिर्भवेत्। वैरिनाशेन वा तस्य भङ्गाद्व्यसनतोऽपि वा।। ५९।।
ततस्तन्मार्जयित्वा तु भाले कृत्वा पुरीं बलै:। परीयाद्देशिकं त्वग्रे गजे[4] जीवेच्चिरं सुखी।।६०।।
नि:सपत्नो निरातङ्क: षडङ्गख्यातवैभव:[5]। एवमेतस्य वज्रस्य वैभवं को नु वर्णयेत्।। ६१।।

अथैतद्यन्त्ररचनाप्रकार:—तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्च विंशतिं विंशतिं रेखा: कृत्वा समान्तरालानि एकषष्ट्युत्तरत्रिशतकोष्ठानि विलिख्य, कोणचतुष्टये प्रतिकोणं पञ्चचत्वारिंशत्पञ्चचत्वारिंशदिति अशीत्युत्तरशतं कोष्ठानि गुरूक्तयुक्त्या मार्जयित्वा, तेषु स्थलेषु चत्वारि कोणानि विधाय सिद्धेषु पञ्चषष्ट्युत्तरशतकोष्ठेषु १६५ मूलविद्याक्षराण्यनावृत्तानि षोडशस्वरयुक्तानि चतुश्चत्वारिंशदुत्तरशताक्षराणि १४४ पूर्वादिप्रादक्षिण्येन प्रवेशगत्या विलिख्यावशिष्टैकविंशतिकोष्ठेषु तद्दिननित्याया वर्णत्रयं पर्यायनित्याया वर्णत्रयं षट्कोणेषु विलिख्य, घटिकाक्षरसहितं युगाक्षरमेकस्मिन् कोष्ठे विलिख्यावशिष्टचतुर्दशकोष्ठेषु प्रतिकोष्ठमेकमेकमिति मूलमन्त्राक्षराणि विलिख्यावशिष्टकोष्ठद्वये साध्याख्यां कर्म च विलिख्य दिक्चतुष्टयस्थकोणचतुष्टये तत्तत्कर्मानुसारिभूतवर्णान् द्वित्रिद्वित्रिक्रमेण विलिखेदेतद्यन्त्रमुक्तफलदं भवति।। तथा—

अथान्यवज्रनिर्माणविधानं च शृणु प्रिये। येन हस्तगतेन स्यु: सिद्धयोऽपि स्वहस्तगा:।। ६२।।
प्राक्प्रत्यग्दक्षिणोदक्च दशसूत्रनिपातनात्। तेनैकाशीतिकोष्ठानि जायन्ते तच्च पूर्ववत्।। ६३।।

---

[1] 'रक्षयत् पुष्टिशान्त्यै' क. पाठ:। [2] 'दिवि' क. पाठ:। [3] 'विरोधेन' क. पाठ:।
[4] 'नजे' क. पाठ:। [5] 'न्यास' क. पाठ:।

मार्जयेद्दशकोणेषु शिष्टेषु विलिखेत्तथा। त्रिकोणानि चतुर्दिक्षु तेषु तान्येव पूर्ववत्।। ३४।।
विलिखेदवशिष्टेषु मन्त्रार्णांस्तद्द्विशस्तथा। एकस्मिन्मध्यमे शक्तिजठरे साध्यमालिखेत्।। ६५।।
एतच्च पूर्वप्रोक्तेषु विनियुज्यान्निजेच्छया। न भेदस्त्वनयोरस्ति प्रयोगेषु तु सर्वतः।। ६६।।
एतद्वज्रस्य मध्यस्थं नाम कृत्वा महीभुजः। दंशके हृदये शीर्षे संस्थाप्य समरे कृते।। ६७।।
निहत्य वाहिनीं शत्रोश्चतुरङ्गां महीभुजः। अक्षताशेषसर्वाङ्गो यशोलक्ष्मीधरान्वितः[1]।। ६८।।
निर्वत्य सुचिरं जीवेद् भूमौ भोगी निजेच्छया। एतत्ताम्रतले[2] कृत्वा स्थापयेदभिवृद्धये।। ६९।।

अथैतद्रचनाप्रकारः— तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्च दश दश रेखाः कृत्वा समान्तरालानि एकाशीतिकोष्ठानि विधाय, चतुर्दिक्षु दश दश कोष्ठानि मार्जयित्वा एकचत्वारिंशत्कोष्ठात्मकं वज्राकारं निष्पाद्य, दिक्षु चत्वारि चत्वारि कोष्ठानि मार्जयित्वा त्रिकोणानि विधाय, तेषु कर्मानुसारिप्राग्वद्भूतार्णान् विलिख्यमध्यकोष्ठे मायाबीजं साध्यनामगर्भं विलिख्यावशिष्टकोणेषु मूलमन्त्रस्य द्वादशाक्षराणि द्विशो विलिखेत्। एतद्यन्त्रमुन्त्रमुक्तफलदं भवति।। तथा—

विधाय वृत्तयोर्मध्ये षट्कोणं तस्य मध्यतः। बाह्ये च कृत्वा विद्याया बीजमाद्यमथान्तिमकम्।।७०।।
षट्सु कोणेषु तु पुनरग्रपश्चिमयोर्लिखेत्। एकैकं पार्श्वकोणेषु द्वे द्वे वृत्तान्तरा पुनः।। ७१।।
मातृकां विलिखेदादिक्षान्तां बिन्दुसमन्विताम्। मध्यबीजस्य मध्यस्थं लिखेत् तन्निजवाञ्छितम्।।७२।।
भर्तुर्दर्शनभीतानां[3] कुमारीणामिदं भुजे। कण्ठे वा धारयेत् सद्यो वल्लभा तस्य जायते।। ७३।।

अथैतद्यन्त्ररचनाप्रकारः— प्रथमतः षट्कोणं विधाय तद्बहिर्वृत्तद्वयं कृत्वा मध्ये साध्यनामगर्भं ह्रींकारं विलिख्य षट्सु कोणेषु कोणाग्रेषु कोणान्तरालेषु च मायाबीजान्येव विलिख्य वृत्तद्वयान्तराले मायाबीजद्वय-सहितामकारादिक्षकारान्तां मातृकां विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

स्वरप्रसारितैर्मन्त्रवर्णैः पद्मानि कारयेत्। वृत्ताष्टपत्रयुक्तानि षोडशानि मनोहरम् ।। ७४।।
कर्णिकासु च पत्रेषु लिखेदेकैकमक्षरम्। कर्णिकार्णस्य मध्यस्थं कुर्यान्नाम निजेप्सितम्।। ७५।।
घटिकाक्षरसंयुक्तं विनियुञ्ज्यात्तु नित्यशः। अहोरात्रं षोडशधा कृत्वा तां तेषु योजयेत्।। ७६।।
समस्तं वाञ्छितं तत्र तन्मध्यं विलिखेत् तदा। धारयेदभिषिञ्चेच्च[4] जपेदिष्टार्थसिद्धये।। ७७।।

अथैतद्यन्त्ररचनाप्रकारः— प्रथमतो वृत्तं कृत्वा तल्लग्नान्यष्टदलानि विधाय प्राक्प्रोक्तषोडशस्वरसंयुक्त-मूलविद्यानावृत्ताक्षरेषु चतुश्चत्वारिंशदुत्तरशतवर्णेषु १४४ प्रथमाक्षरं साध्यनामगर्भं कर्णिकायां विलिख्य तत्रैव घटिकाक्षरं संयोज्याष्टदलेषु द्वितीयाद्यष्टौ वर्णान् विलिखेत्। एवं नवनववर्णानामेकमेकं यन्त्रं भवति। एवं षोडश यन्त्राणि भवन्तीत्यर्थः।। तथा—

प्राक्प्रत्यग्दक्षिणोदक्च पञ्च सूत्राणि पातयेत्। कोष्ठानि षोडशात्र स्युस्तेषु पद्मानि कारयेत्।।७८।।
प्रागुक्तेषु विधायैवमर्चयेद्यामतः क्रमात्। देवीं तु स्थापयेद्भूमौ सर्वसम्पदवाप्तये ।। ७९।।

स्पष्टोऽयमर्थः।। इति महावज्रेश्वरीनित्याप्रयोगविधिः।।

अथ शिवदूतीनित्याप्रयोगविधिः, श्रीतन्त्रराजे— (१३ प० २० श्लो०)

---

[1] 'धना' क. पाठः। [2] 'दले' क. पाठः। [3] 'दमन' क. पाठः। [4] 'ञ्चेयुः' क. पाठः।

साधनं प्रोक्तमार्गेण कुर्याल्लक्षमतन्द्रित:। काम्यहोमविधिं देवि शृणु सङ्कल्पसिद्धिदम्।। १।।
येनासौ वाञ्छितं क्षिप्रमवाप्नोति सुनिश्चितम्। वशयेद्वनिता होमाद् गुग्गुलैर्मधुमिश्रितै:।। २।।
नारिकेलफलोपेतैर्गुडैर्लक्ष्मीमवाप्नुयात्। तथाज्यसिक्तै: कह्लारै: क्षीराक्तैररुणोत्पलै:।। ३।।
त्रिमध्वक्तैश्चम्पकैश्च प्रसूनैर्वकुलोद्भवै:। मधूकजै: प्रसूनैश्च हुतै: कन्यामवाप्नुयात्।। ४।।
पुंनागजैर्हुतैर्वस्त्राण्याज्यैरिष्टमवाप्नुयात्। माहिष्यैर्महिषीराज्यैरजान् गव्यैश्च गास्तथा ।। ५।।
अवाप्नोति [1]हुतैराज्यैरन्नेनान्नं च साधक:। शालिपिष्टमयीं कृत्वा पुत्तलीं सितसंयुताम्।। ६।।
हृद्देशन्यस्तनामार्णां पचेत् तैलाज्ययोर्निशि। तामनश्नन् दिवा रात्रौ विद्याजप्तां तु भक्षयेत्।।७।।
सप्तरात्रप्रयोगेण नरो नारी नृपोऽथवा। दासवद्वशमायाति वित्तप्राणादिमर्पयेत्।। ८।।
हयारिपुष्पैररुणै: सितैर्वा जुहूयात् तथा। त्रिसप्तरात्रान्महतीमवाप्नोति श्रियं नर:।। ९।।
छागमांसैस्त्रिमध्वक्तैर्होमात् स्वर्णमवाप्नुयात्। क्षीराक्तै: शस्यसम्पूर्णां भुवमाप्नोति मण्डलात्।।१०।।
पद्माक्षैर्हवनाल्लक्ष्मीमवाप्नोति त्रिभिर्दिनै:। अथ यन्त्राणि वक्ष्यामि नानाभीष्टप्रदानि ते।। ११।।
शृणु तेषु विधानानि समाहितमना: शिवे। दूतीनित्याक्षरेषु स्युरनावृत्तानि वै दश।। १२।।

अत्रानावृत्ताक्षराणि ''हरअशवदतयनम'' इति।।

तै: षोडशस्वरयुतै: षष्ट्या शतमुदीरितम्। चतुरस्रद्वयं कृत्वा तदन्तर्वृत्तयुग्मकम्।। १३।।
तदन्तरष्टकोणं च तदन्तर्वृत्तयुग्मकम्। कृत्वा तत्र लिखेन्मध्ये विद्याद्यं नामसंयुतम्।। १४।।

विद्याद्यं ह्रींकारम्।

वृत्तयोरन्तरा शेषं बहि: कोणेषु चाष्टसु। लिखेद् द्वेद्वेऽक्षरे तेषु बाह्यवृत्तद्वयान्तरा।। १५।।
कर्मानुरूपान् भूतार्णान् दश भूपुरमध्यत:। मातृकां विलिखेद् दिक्षु द्वादश द्वादश क्रमात्।।१६।।
अन्त्यं च त्रिषु कोणेषु शेषाणां च विलेखने। स्वरैर्बिन्दुं समायोज्य योजयेद् व्यञ्जने परम्।।१७।।
एवं यन्त्राणि जायन्ते दश सिद्ध्यास्पदानि वै।..।।

अत्र प्रथमतो वृत्तद्वयं कृत्वा तद्बहिरष्टकोणं तद्बहिर्वृत्तद्वयं तद्बहिश्चतुरस्रद्वयं कृत्वा मध्ये साध्यनामगर्भं मायाबीजं विलिख्य, तद्बहिर्वृत्तद्वयान्तराले प्रथमबीजरहितैर्मूलविद्याक्षरैर्वेष्टयित्वा तद्बहिरष्टकोणेषु षोडशस्वरसंयुक्तानावृत्ताक्षेरषु षष्ट्युत्तरशतसंख्याकेषु १६० प्रथमत: षोडशाक्षराणि प्रतिकोणं द्विद्विक्रमेण विलिख्य, तद्बहिर्वृत्तद्वयान्तरे कर्मानुसारिभूताक्षरदशकं प्राग्वद्विलिख्य, तद्बहिश्चतुरस्रद्वयान्तराले दिक्षु द्वादश द्वादश क्रमेण अकारादिसकारान्तमातृकावर्णान् विलिख्याग्नेयादिकोणेषु त्रिषु हलक्षान् विलिख्येशानकोणे हंलंक्षं इति विलिखेत्। एवं दश यन्त्राणि भवन्तीत्यर्थ:।। तथा—

....। प्रथमं गैरिकै: कृत्वा तत्रावाह्य शिवां यजेत्।। १८।।
सप्तम्यां त्रिषु सन्ध्यासु सितापूपसमन्वितम्[2]। कृत्वा निवेद्य[3] पयसा प्रातर्मध्यन्दिने तथा।। १९।।

---

१. 'साज्यैरन्नैरन्नं' क. पाठ:। २. 'धूप' ग. पाठ:। ३. 'द्यं' क. पाठ:।

दधिभक्तं तु सायं तु क्षीरं मोचाफलं तथा। एवं मण्डलमर्धं वा कुर्यात् पूजां समाहित:।। २०।।
वाञ्छितं प्राप्नुयाद् देव्या: प्रसादेनाल्पयत्नत:। द्वितीयं दरदै: कृत्वा तत्रावाह्याथ तद्दिने।। २१।।
सुपक्वछागमांसेन क्षौद्रमन्नं निवेदयेत्। तावद्[1]भजेन्महीपालं वशे कर्तुमयत्नत:।। २२।।
तथैव वनितां हृद्यां वशयेद्यावदायुषम्। तृतीयमपि सिन्दूरैर्विधायावाह्य तत्र ताम्।। २३।।
तावद्दिनैस्तथावाह्य वशयेद्विविधान् रिपून्। चतुर्थं कुङ्कुमै: कृत्वा तत्र मध्येऽर्चयेत् तथा।। २४।।
सप्ताहादापद: सर्वा: प्रयान्त्यस्या: प्रसादत:। पञ्चमं चन्दनै: कृत्वा तन्मध्ये पूजयेच्छिवाम्।।२५।।
केवलं पायसं मोचां सितां घृतसमन्विताम्। निवेदयंस्त्रिसन्ध्यासु मासाद्रोगानशेषत:।। २६।।
जित्वा सुखं चिरं जीवेच्छेषमायुर्निरामय:। अभिषिञ्चेच्च यन्त्रे वै कुम्भं संस्थाप्य तैर्जलै:।। २७।।
कृत्वा तस्मै दक्षिणां च दद्याद्भूरि स्वशक्तित:। प्राणप्रदात्रे तस्मै तु दद्यात् सर्वस्वमेव वा।। २८।।
येनासौ तोषमायाति तावद्वित्तं समर्पयेत्। षष्ठं कर्पूरसंयुक्तं पाटीरैरालिखेत् तत:।। २९।।
मसृणे वा शिलापट्टे पीठे वा सौधभूतले। अन्नाज्यपायसापूपव्यञ्जनानि निवेदयेत्।। ३०।।
पूजयेच्च त्रिसन्ध्यासु जपन् विद्यां तदा वशी। त्रिसप्तरात्रमात्रेण ज्वराद्धीमाभिचारजात्।। ३१।।
मुच्यन्ते प्राणिनोऽचिन्त्या: शक्तयो मन्त्रयन्त्रयो:। सप्तमं ताम्रपट्टे तु कृत्वावाह्याभिपूज्य च।।३२।।
स्थापयेन्मन्दिरे तस्मिंल्लक्ष्मीरास्तेऽतिसुस्थिरा। अष्टमं राजते कृत्वा बिभृयात् सर्वसम्पदे।। ३३।।
नवमं हेमगं कृत्वा भूषादौ धारयेच्छिवे। दशमे सर्वकार्याणि साधयन्नर्चयेच्छिवाम्।। ३४।।
यद्यद्धि वाञ्छितं कार्यं तत्तन्मध्यगतं तथा। कृत्वा तां पूजयेत् तत्र तत्कार्यं हृदये स्मरन्।। ३५।।
तद्दिनैस्तदवाप्नोति नात्र कार्या विचारणा। दशैव तानि यन्त्राणि भूर्जे कृत्वाभिपूज्य च।। ३६।।
सिक्थनिर्मितपात्रं तु क्षौद्रमध्ये निवेशयेत्। त्रिसन्ध्यमर्चयेद्रक्तगन्धपुष्पै: समाहित:।। ३७।।
साध्यस्याभिमुखो विद्यां जपेन्नित्यमनुस्मरन्। पाशेन कण्ठमाबध्य पातितं निजपादयो:।। ३८।।
न्यस्ताञ्जलिकरं शीर्षे दासोऽहमिति वादिनम्। त्रिसप्तरात्राद्वश्या: स्युर्नरनारीनृपादय:।। ३९।।
तदेव कोष्णं कृत्वा च सन्ध्यासु त्रिषु नित्यश:। कामार्ता वनिता: कामज्वरग्रस्ताशया: शनै:।।४०।।
कुलं लज्जां विवेकं च परित्यज्यास्य किङ्करा:। भवेयुरिति यन्त्राणां प्रयोगास्ते समीरिता:।। ४१।।
प्राणप्रतिष्ठाविद्यां ते वक्ष्येऽहं शृणु पार्वति। वातो नभो धरायुक्तं स्पर्शो व्याप्तेन संयुत:।। ४२।।
जवी दाहमरुद्युक्तो व्योमापि मरुता युतम्। अग्निर्हंसश्च पूर्वार्णौ पश्चादादित्रयं तथा।। ४३।।
ज्यावह्नियुक्तान्तोऽम्बु स्यात् षष्ठसप्तमकौ पुन:। हृच्छिख्यग्निरथो माया वातादित्रितयं[2] पुन:।।४४।।
हृद्दाहाम्बुचरै: स्वेन गोत्रादाहाग्निभि: परम्। व्याप्तं मरुत्समोपेतं व्योमाग्निगमनन्तरम्।। ४५।।
पुनराद्यत्रयं चाम्बु मरुद्द्यु नभसा युतम्। शून्यं मायान्वितं पश्चाच्चतुर्थं पञ्चमं तत:।। ४६।।
अग्निर्हंसो मरुद्युक्तो व्याप्तं च मरुता युतम्। स्वं स्याद्द्रयधरायुक्तं हृदम्बु मरुदन्वितम्।। ४७।।

---

[1] 'गजे' क. पाठ:। [2] 'रयगादित्रयं' क. पाठ:।

हंसश्च मरुता युक्तश्चत्वारिंशल्लिपिर्मनुः।...।।

अमुष्य प्राणा इह प्राणा अमुष्य जीव इह स्थित अमुप्य सर्वेन्द्रियाणि अमुप्य वाङ्मनःप्राणा इहायान्तु स्वाहा'' इति।

....। यादिसप्ताक्षरैः कुर्यात् षडङ्गानि द्वियोगतः।। ४८।।
त्वगादिषु च तान्येव न्यस्येच्छक्तिपुटस्थितम्। ध्यायेद् देवीं प्राणशक्तिमरुणामरुणाम्बराम्।।४९।।
अरुणाकल्पमुकुटामरुणाधरपल्लवाम् । अरुणायतनेत्राब्जयुगां चारुस्मिताननाम् ।। ५०।।
प्रसूनपिण्डं पाशं च दधानां पाणियुग्मतः। स्वसमानाभिरभितो वेष्टितां दशशक्तिभिः।। ५१।।
अनन्तशक्तियुक्ताभिः पूजयेत् पद्ममध्यतः। प्राणापानसमानाश्च व्यानोदाना च शक्तयः।। ५२।।
नागा कूर्मा सकृकरा देवदत्ता धनञ्जया। चतुरस्रद्वयं कृत्वा तदन्तर्वृत्तयुग्मकम्।। ५३।।
तदन्तर्दशपत्राब्जं तदन्तस्तद्द्वयं तथा। कृत्वा मध्ये समावाह्य कृत्वार्घ्यं पूजयेत् ततः।। ५४।।
लक्षं जपेत् पयोभक्षस्तद्दशांशं हुनेत् तथा। तिलैः शुद्धैः सर्षपैश्च सितैर्मधुरसंयुतैः ।। ५५।।
तर्पयेत् सौरभाद्येन जलेनेत्थं सुसाधयेत्। तन्त्रेऽस्मिन् यास्तु पुत्तल्यो यन्त्राण्युक्तानि सर्वतः।।५६।।
अनया विद्यया तत्र साध्यप्राणान्नियोजयेत्। यन्त्रमस्याः शृणु प्राज्ञे सद्यःप्रत्ययकारकम्।। ५७।।
येन पुत्तलिका जीवस्पन्दयुक्ता मनोर्बलात्। प्राक्प्रत्यग्दक्षिणोदक् च सूत्राण्यष्टौ निपातयेत्।।५८।।
कोष्ठान्येकोनपञ्चाशज्जायन्ते तेषु विन्यसेत्। प्रागुत्तरं समालिख्य[1] परितोऽपि प्रवेशतः।। ५९।।
मध्येषु शिष्टनवसु लिखेदङ्गोदितात् क्रमात्। ततः शिष्टद्वये साध्यनामालिख्याथ साधकः।।६०।।
सञ्जप्य विद्यां हस्तेन सजीवेन स्पृशन् शतम्। तेन पुत्तलिकाः कुर्यात् सिद्धये नान्यथा भवेत्।।६१।।
साध्यजीवाद्यानयनं शृणु वक्ष्यामि तेऽद्भुतम्। मन्त्रवीर्यस्मृतिं कुर्वन् तथा तद्देहगर्भतः।। ६२।।
ज्ञानकर्मेन्द्रियाण्यर्थान्मनो जीवं तनुं तथा। तस्मान् साध्यशरीरान्तात् पुत्तल्या नामभिस्तथा।।६३।।
रक्तरज्ज्वा शक्तिमय्या तानानीयार्पयेद्धिया। विद्यायास्त्र्यक्षरान्तेषु साध्यनाम नियोजयेत्।। ६४।।
एवं नियोजितां विद्यां सहस्रं प्रजपेत् स्पृशन्। जीवहस्तेन तच्चितो निशामध्येषु साधकः।। ६५।।
एवं संस्थापितप्राणा पुत्तली स्पन्दते तदा[2]। साध्यस्य जन्मनक्षत्राण्याकर्णय वदामि ते।। ६६।।
तज्जन्मलग्नसञ्जातनवांशर्क्षप्रमाणकम्। अन्यानि च नवर्क्षाणि नवग्रहसमन्वयात् ।। ६७।।
तेषु तेषु प्रयोगांस्तु वक्ष्याम्यपरहोमके। रिपोर्नखं च केशं च चरणोत्थं रजस्तथा।। ६८।।
अन्यानि चाङ्गरोमाणि पुत्तल्यां योजयेन्मृतौ। वश्यादिषु च सर्वत्र पुत्तल्यां प्रोक्तया तया।। ६९।।
एवं सर्वं समाख्यातं प्राणाकर्षणकर्मणि। अनया विद्यया कृत्वा प्राणाकर्षणमुक्तया।। ७०।।
ततो निर्दिष्टपुत्तल्यां तत्र तन्त्रोक्तमाचरेत्। सर्वत्र मारणे प्रोक्ते साध्यर्क्षग्रहसंस्थितिम्।। ७१।।
उक्तानां तत्र ऋक्षाणां तथैवाष्टकवर्गकम्। दशास्थितिं च संवीक्ष्य कुर्यान्मारणमात्मवान्।। ७२।।

---

१. 'रभ्य' क. पाठः। २. 'ऽब्दतः' ग. पाठः।

अनवेक्ष्य कृतं कर्म स्वात्मानं हन्ति तत्क्षणात्। ब्राह्मणं धार्मिकं भूपं वनितामास्तिकं नरम्।।७३।।
वदान्यं सदयं नित्यमभिचारे न योजयेत्। योजयेद्यदि वैरेण प्रत्यगेनं निहन्ति तत्।। ७४।।
अभिचारस्य विषयानाकर्णय वदामि ते। पापिष्ठान् नास्तिकान् घोरान् देवब्राह्मणनिन्दकान्।।७५।।
प्रजानां घातकान् सर्वक्लेशकर्मसु संस्थितान्। क्षेत्रवृत्तिधनस्त्रीणामाहर्तारं कुलान्तकम्।। ७६।।
निन्दकं समयानां च पिशुनं राजघातकम्। विषाग्निक्षुरशस्त्राद्यैर्हिंसकं प्राणिनां सदा।। ७७।।
नियोजयेन्मारणेषु कर्मस्वेतैर्न पातकी। कृत्वा तु मारणं कर्म तदन्ते स्वधनार्धतः।। ७८।।
पादतो वा गुरुं बिप्रानाराध्य स्वेन नित्यया। अभिषिच्य ततो विद्यां जपेल्लक्षं हविष्यभुक्।।७९।।
जन्मत्रयेऽप्यब्दमात्रमभिषेकं समाचरेत्। सदूर्वाहोममब्दात्तु तत्पापैरेष मुच्यते।। ८०।।
एतत्ते कथितं सर्वं दूतीनित्याविधानकम्।

इति शिवदूतीनित्याप्रयोगविधिः।।

।। इति श्रीमहामहोपाध्यायवर्य्यभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे विंशः श्वासः।। २०।।

* * *

अथ

एकविंशः श्वासः

* * *

अथ त्वरितानित्यायाः प्रयोगविधिः। श्रीतन्त्रराजे– (१४। २३)

ततः साधितविद्यस्तु प्रयोगानाचरेन्नरः। वैल्वैर्दशांशं जुहुयात् पत्राद्यैः साधने जपे।। १।।
एवं संसिद्धमन्त्रस्तु मन्त्रितैश्चुलुकोदकैः। फणिदष्टमृतानां तु मुखे सन्ताड्य जीवयेत्।। २।।
तत्कर्णयोर्जपेद्विद्यां यष्ट्या वा जपसिद्धये। सन्ताड्य शीर्षे सहसा मृतमुत्थापयेदिति।। ३।।
काम्यहोमविधिं देवि शृणु वक्ष्ये यथाविधि। कृत्वा योनिं कुण्डमध्ये तत्राग्नौ विधिवद्धुनेत्।। ४।।
तिलसर्षपगोधूमशालिधान्ययवैर्हुनेत्। त्रिमध्वक्तैरेकशो वा समेतैर्वा समृद्धये।। ५।।
बकुलैश्चम्पकैरब्जैः कह्लारैररुणोत्पलैः। कैरवैर्मल्लिकाकुन्दमधूकैरिन्दिराप्तये।। ६।।
अशोकैः पाटलैर्बिल्वैर्जातीविचकिलैः सितैः। नवैर्नीलोत्पलैश्चरिपुजैः कर्णिकारजैः ।। ७।।
होमाल्लक्ष्मीं च सौभाग्यमायुर्वित्तं यशो निधिम्। यद्यद्धि वाञ्छितं सर्वमवाप्नोति सुनिश्चितम्।।८।।
दूर्वागुडूचीमश्वत्थं वटमारग्वधं तथा। सितार्कप्लक्षकं हुत्वा रोगान्मुक्तो नरोऽचिरात्।। ९।।
इक्षुजम्बूनालिकेरमोचागुडसितैर्हुतैः । अचलां लभते लक्ष्मीं भोक्ता च भवति ध्रुवम्।। १०।।
एतैरुदीरितैराज्यमधुक्षीरपरिप्लुतैः। एकैकैर्वनिता वश्या यावज्जीवं धनादिभिः।। ११।।
तैस्तैराज्यप्लुतैर्भूपा वश्या स्युर्हवनात्प्रिये। क्षीराक्तैस्तैर्हुतैर्मर्त्या वशे तिष्ठन्त्यशेषतः।। १२।।
सर्षपाज्यैर्हुनेन्मृत्युकाष्ठाग्नौ वैरिमृत्यवे। तदक्तैर्वैरियोन्युत्थमांसैरपि च तत्कृते[1]।। १३।।
अक्षेन्धनाग्नौ योन्युत्थक्षतजोत्पादितं[2] चरुम्। आरुष्करघृतोपेतं फणिशीर्षस्रुचा हुनेत्।। १४।।
कृष्णांशुकशिरोवेष्टः खड्गपाणिश्च रोषवान्। निशामध्ये हुनेत् सद्यो निहन्तुं वैरिणं हठात्।। १५।।
मृत्युकाष्ठानले तस्य फलैः पत्रैश्च होमतः। सप्तरात्रादरातेस्तु गजाश्वा रोगमाप्नुयुः ।। १६।।
चतुरङ्गुलजैर्होमाच्चतुरङ्गबलं रिपोः। सप्ताहाद्रोगदुःखार्तं भवत्येव न संशयः।। १७।।
एवमस्यास्तु विद्याया वैभवं को नु वर्णयेत्। तथापि तद्दिशा किञ्चिदुच्यते तच्छृणु प्रिये।। १८।।
अथ यन्त्राणि वक्ष्यामि समस्ताभीष्टसिद्धये। तानि सर्वाणि देवेशि कुरु चित्ते क्रमेण वै।। १९।।
प्राक्प्रत्यग्दक्षिणोदक्च सूत्राणि द्वादशार्पयेत्। तदग्राण्यभितः कुर्यात् त्रिशिखान्यस्य मध्यगे[3] ।।२०।।
कोष्ठे तारस्य[4] मध्यस्थं नाम कृत्वा शिवादिषु। प्रादक्षिण्यप्रवेशेन द्वादशावृत्ति मायया।। २१।।

---

१. 'तै' क. पाठः। २. 'चितं' क. पाठः। ३. 'नि महेश्वरि' ग. पाठः। ४. 'अस्य यन्त्रस्य' ग. पाठः।

विद्यामालिख्य सञ्जप्य बिभृयात् सर्वसिद्धये। श्रियै कीर्त्यै च वश्याय सौभाग्यायाखिलाप्तये।।२२।।
विषग्रहगदोन्मादशान्त्यै युद्धे जयाप्तये। नरनारीनृपादीनां वश्याय बिभृयाच्च तत्।। २३।।

अस्यार्थः— प्राग्प्रत्यगायता दक्षिणोत्तरायताश्च द्वादश रेखा विलिख्यैकविंशत्युत्तरशतकोष्ठानि (१२१) कृत्वा, रेखाग्रेषु सर्वेषु त्रिशूलानि विलिख्य सन्मध्यकोष्ठे ससाध्यं प्रणवं विलिख्येशानकोष्ठमारभ्य प्रादक्षिण्येन प्रवेशगत्या त्वरिताविद्यां प्रणवद्वितीयहृल्लेखाविधुरां द्वादशावृत्ति विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।।

तथा—

प्राक्प्रत्यग्दक्षिणोदक्च नव सूत्राणि पातयेत्। जायन्ते च चतुःषष्टिकोष्ठानि परमेश्वरि।। २४।।
तेषु शर्वनिर्ऋत्यादि लिखेल्लक्ष्मीमनुं क्रमात्। बहिस्तूर्णाक्षरैरन्ते वषड्युक्तैस्तु वेष्टयेत्।। २५।।
अनुग्रहं महाचक्रं विद्यां शृणु महेश्वरि । सर्वतोभद्रविन्यासानुष्टभं सर्वसिद्धिदम्।। २६।।
दाहवह्नियुतं चाद्यं वियद्धून्मरुता ततः। नभश्च मरुतोपेतं व्याप्तं तेन समन्वितम्।। २७।।
एतान्येव विलोमानि प्रथमं चरणं भवेत्। द्वितीयादि द्वितीयं स्याद्धुवा शून्यं द्वितीयकम्।। २८।।
तृतीयं च चतुर्थं स्याज्ज्या तु साभ्रचरा ततः। प्रतिलोमं तथैतेषां द्वितीयं चरणं भवेत्।। २९।।
तृतीयतुर्यौ परत इला वह्न्या ततस्त्विला। मरुद्युता प्राग्वदेतत्प्रतिलोमं तृतीयकम्।। ३०।।
चतुर्थं द्वादशं विंशं तदाद्यं[1] ते विलोमगाः। एतच्चतुर्थं चरणं श्रीविद्यायां महेश्वरि।। ३१।।
सर्वतोभद्ररूपैषा विद्या सर्वार्थसाधिका। यत्र स्थितासौ चक्रस्था न तत्राशुभसङ्कथा।। ३२।।

"श्रीसामायायामासाश्री सानोयाज्ञेयानोसा। मायालीलालालीयामा याज्ञेलालीलीलाज्ञेया"।। इति। अथैतद्यन्त्ररचनाप्रकारः— तत्र प्राग्प्रत्यगायता दक्षिणोत्तरायताश्च नव रेखाः कृत्वा चतुःषष्टिकोष्ठयुतं चतुरस्रं श्रीचक्रंपरिकल्प्य, तत्र सर्वोपरिगतपङ्क्तेः प्रथमकोष्ठमारभ्य स्ववामादिदक्षिणान्तक्रमेण पङ्क्तिचतुष्टयगतेषु द्वात्रिंशत्कोष्ठेषु प्रोक्तसर्वतोभद्राख्यलक्ष्मीमन्त्रस्य द्वात्रिंशदक्षराणि विलिख्य, पुनरधोगतपङ्क्तिचतुष्टयेऽपि सर्वाधःपङ्क्तेः प्रथमकोष्ठं स्वदक्षिणस्थमारभ्य वामान्तमुपर्युपरि पङ्क्तिचतुष्टये तस्यैव मन्त्रस्य द्वात्रिंशदक्षराणि विलिख्य तद्बहिः प्रागादिषु चतसृषु दिक्षु ईशादीशान्तं चतुरावृत्ति तद्बाह्यरेखास्पृष्टां त्वरिताविद्यामन्तर्गतवषट्कारामालिख्य तद्बहिर्वमित्यमृतबीजेन वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति।।

तथा—

दशसूत्रनिपातेन कृत्वैकाशीतिकं पदम्। तन्मध्यकोष्ठे दावस्थं कृत्वा नामास्य वीथिषु।। ३३।।
लिखेद्वर्णचतुष्कं तु शृणु भद्रे यथाविधि। ज्याधरास्वैर्मायया हृत्ततोऽम्बु स्पर्शगा इला।। ३४।।
ततः श्रियो लिखेद्विद्यां शिवरक्षोदिगादिकाम्। प्राग्वत्तूर्णामृतार्णैस्तैर्वेष्टयेत् फड्वियोजितैः।। ३५।।
ततोऽम्बु स्वयुतं तेन मालाकलितरूपिणा। वृत्तद्वयेन निष्पाद्य कुम्भं पद्माधरोत्तरम्।। ३६।।
कृत्वा स्वर्णादिषूक्तेषु सम्पूज्याभ्यर्च्य तत्पुनः। स्थापयेज्जपसंसिद्धं तेषु पूर्वोदितेषु वै।। ३७।।
तत्र लक्ष्मीरतिस्फीता नीरोगाश्च प्रजास्तथा। गजाश्वपशवस्त्वन्ये प्राणिनः सुखिनोऽनिशम्।। ३८।।
भूतप्रेतपिशाचादिपीडासु बिभृयादिदम्। अलक्ष्मीशान्तये वश्यसिद्धये सर्वसम्पदे।। ३९।।

अथैतद्यन्त्ररचनाप्रकारः— तत्र प्राक्प्रत्यग्दक्षिणोदक्च समान्तरालानि दश दश सूंत्राण्यास्फाल्यैकाशीतिपदानि

---

१. 'तत्पूर्वं' ख. पाठः।

विधाय, तत्र मध्यकोष्ठे सबिन्दुकठकारोदरे साध्यनामालिख्य तत्कोष्ठपार्श्वस्थपूर्वापरायतपङ्क्तिद्वयेन दक्षिणोत्तरायतपङ्क्तिद्वयेन च सम्भूय चतसृषु पङ्क्तिषु चतुश्चतुष्कोष्ठात्मिकासु स्वाग्रादिप्रादक्षिण्यक्रमेण "जूंसः वषट्" इति च प्रतिकोष्ठमेकैकमभ्यन्तरान्निर्गमगत्या विलिख्य, तत ईशानादिनिर्ऋत्यादिकं च प्रागुक्तश्रीविद्यानुष्टभं मध्यवीथीचतुष्टयवर्जमालिख्य, सर्वबाह्येऽभितः ईशादीशान्तं तूर्णामृताक्षराणि चतुरावृत्त्या प्राग्वत्समालिख्य सर्वमध्यकोष्ठमध्यकोष्ठमवष्टभ्य चतुष्कोणस्य तूर्णाक्षरमानेन भ्रमेण वृत्तं निष्पाद्य, तद्बाह्येऽङ्गुलमानेन तथा वृत्तान्तरं कृत्वाध उपरिभागे च मध्यतश्चतुरङ्गुलान्तरालं वृत्तद्वयं मार्जयित्वा तदग्रचतुष्टयमानमवक्रं समान्तरालमुपरि चतुरङ्गुलकुम्भमुखाकारं यथा भवति तथा समुन्नमय्य कुम्भमुखे तिर्यग्रेखाद्वयं प्रसार्य, तत्कुम्भवीथीमध्यमन्योन्यस्पृष्टवकारमालया शृङ्खलारूपयान्तर्मुखया समापूर्य सर्वत्रोपरि बिन्दुं समालिख्य, कुम्भाधस्तात्पद्मं तत्कर्णिकास्थकुम्भं यथा भवति तथा समालिख्य प्रोक्तक्रमेण मनीषितेषु विनियोगात् प्रोक्तफलानि भवन्ति। इत्यनुग्रहयन्त्राणि।। अथ निग्रहयन्त्राणि (तत्रैव)—

निग्रहं शृणु देवेशि शत्रवो यस्य शङ्किताः। स्वल्पेनैव तु कालेन भवन्त्येव परासवः।। ४० ।।
प्राग्वदेकाशीतिपदं कृत्वा तन्मध्यकोष्ठके। दाहगर्भे नाम कृत्वा तथा दिग्वीथिषु क्रमात्।। ४१ ।।
लिखेद्बीजचतुष्कं तु वह्निमारुतविग्रहम्। यैः सद्यो वैरिणः स्वैरं[1] विमुञ्चन्ति कलेवरम्।। ४३ ।।
ईशरक्षोदिगारम्भात् पङ्क्तिशो विलिखेत्ततः। काल्या यमस्य क्रमतो विद्यामन्त्रं[2] च सङ्क्रमम्।।४४।।
सर्वतोभद्ररूपं तु काल्यनुष्टुभमीश्वरि। शृणु वक्ष्यामि परतो यमानुष्टभमीदृशम्।। ४५ ।।
प्राणो मरुत्समोपेत इला वह्न्या समन्विता। नभो मरुद्युतं दाहश्चतुर्णां प्रतिलोमतः।। ४६ ।।
प्रथमं चरणं तस्य द्वितीयं शून्यमेव च। नभो भुवा ग्रास एतत्प्रतिलोमाद् द्वितीयकम्।। ४७।।
तृतीयमेकादशमं ततो गोत्रा चरान्विता। रयस्तेषां विलोमं च तृतीयं चरणं [3]मतम्।। ४८।।
चतुर्थं द्वादशं विंशं रयोऽम्ब्वाधो विलोमकम्। चतुर्थं चरणं प्रोक्तं विद्यैषा सर्वनाशिनी।। ४९।।
व्याप्तं कालीतृतीयं च मरुताम्बुसमन्वितम्। नाद एषां विलोमं च प्रथमं चरणं यमे।। ५०।।
एतद्द्वितीयतुर्यौ च नभसा भूश्च नादकम्। एतेषां प्रतिलोमं च द्वितीयं चरणं मनोः।। ५१ ।।
अम्बुयुक्तो मरुच्चास्मिन्नेकादशकमेव च। रसः क्षमया वह्निदाहौ प्रतिलोमं तृतीयकम्।। ५२।।
नादो नादो दाहवह्नी रयोऽम्ब्वा तदनन्तरम्। प्रतिलोमं तु तेषां स्याच्चतुर्थं चरणं शिवे।। ५३।।
एवं मनुद्वयं कोष्ठेष्वालिख्य बहिरप्यथ। वेष्टयेद् व्याप्तदाहाभ्यामुक्तक्रमसमन्वितम्।। ५४।।
मर्कटीदण्डिगरलैरालिप्तं स्थापितेरकम्। जपन् विनिक्षिपेदक्षविवरे चत्वरेऽथवा।। ५५।।
वल्मीके मातृभवने शास्तुरायतनेऽथवा। श्मशाने प्रोक्तसमये प्रोक्तक्रमसमन्वितम्।। ५६।।

"कालीमाररमालीका लीनमोक्षक्षमोनली। मामोदेततदेमोमा रक्षतत्वत्वतक्षर।।" इति काल्युनुष्टुभम्।। "यमावाटटवामाय माटमोटटमोटमा। वामोभूरीरीभूमोवा टटरीत्वत्वरीटट" इति यमानुष्टुभम्।। "भ्रूंक्ष्रूंछ्रूंह्रूं" इति निग्रहबीजचतुष्टयम्।। अथैतन्निग्रहयन्त्ररचनाप्रकारः— तत्र प्राग्वदेकाशीतिपदोपेतं चक्रं विरच्य तन्मध्यकोष्ठे सबिन्दुकरेफोदरे साध्यनामालिख्य

---

१. 'स्वीय' क. पाठः। २. 'न्नमसं' क पाठः। ३. 'मनोः' ग. पाठः।

प्राग्वत् तत्पार्श्वपङ्क्तिषु चतुष्कोष्ठेषु प्रागुक्तक्रमेण "भ्रूंक्ष्रूंछ्रूंहूं" इत्यक्षरचतुष्टयमभ्यन्तरान्निर्गमनगत्याभितः समालिख्य, आभिचार्यः पुरुषश्चेदन्तःकाल्यनुष्टभं बहिर्यममन्त्रं, वनिता चेदन्तर्यममन्त्रं बहिः कालीविद्यां च समालिखेत्। लेखने तु—ईशानादिकं निर्ऋत्यादिकं च कालीविद्याम्, अन्यदा तथा यममन्त्रं विलिख्य अन्यतरं बहिरीशानादिनिर्ऋत्यन्तं निर्ऋत्यादीशान्तं च निरन्तरं द्विरालिख्य, तद्बहिर्निरन्तरं बिन्दुयुक्तं यकारं रेफं चेशादीशान्तं यथाक्रममन्तर्बहिर्विभागेन समालिख्य मनीषितेषु विनियुञ्ज्यात्। एतन्निक्षिपेदाभिचार्यः पुरुषश्चेत् काल्यादिशक्तेरायतने, स्त्री चेत् शास्तुरायतन एवाग्रभागेऽधस्तान्निखनेदिति सम्प्रदायः। प्रपञ्चसारे?—

सीसकृते नवपट्टे शावभवे कर्पटके वा। प्रस्तरके वा विषमस्या संलिख काकसुपत्रैश्च।। १।।
चत्वरके वा कलिवृक्षे स्थापितमेतदरीणां हि। मृत्युकरं व्याधिकरं स्यात् पुत्रस्त्रीविपत्करं च।।२।।

इति। तन्त्रराजे—

यत्र देशादिके यन्त्रं तत्रालक्ष्मीर्गदैः समम्। मारी सुदुस्तरासाध्या सर्वैर्देवासुरैरपि।। ५७।।
प्राग्वच्च नवभिः सूत्रैरष्टाष्टकपदं शिवे। कृत्वा तेष्वीशरक्षोदिगारम्भात् कालिकामनुम्।। ५८।।
विलिख्य यममन्त्रेण प्रोक्तबीजद्वयेन च। वेष्टयित्वा बहिश्चक्रं स्थापयेत्तदधोमुखम्।। ५९।।
एतच्च पूर्वचक्रोक्तफलकृत् परमेश्वरि। अनुक्तेष्वपि नामानि योजयेत् कोष्ठमध्यतः।। ६०।।
लवणोषणमेहाम्बुगृहधूमाग्निसंयुतम्। श्मशानाङ्गारनिम्बोत्थनिर्यासो विषमीरितम् ।। ६१।।

ऊषणमूषर इति मनोरमाकारैर्व्याख्यातम्। मेहाम्बु प्रस्रवः। अग्निश्चित्रकम्।। यन्त्ररचनाक्रमो यथा—तत्र प्राग्वत् नवभिर्नवभिः सूत्रैश्चतुःषष्टिकोष्ठकानि कृत्वा तेष्वीशानादिकं निर्ऋत्यादिकं चाभिचार्यः पुरुषश्चेदन्तः कालीविद्यां बहिर्यममन्त्रं च, स्त्री चेदन्तर्यममन्त्रं बहिः कालीविद्यां च प्राग्वत् समालिख्य प्राग्वत् सबिन्दुयकाररेफाभ्यां संवेष्ट्य प्रोक्तक्रमेण प्रोक्तस्थानेषु स्थापनात् प्रोक्तफलसिद्धिर्भवतीति।। तथा—

विद्याद्यवर्णजठरे साध्यमालिख्य तद्बहिः। अष्टच्छदेषु फङ्वर्ज्यमालिखेदष्टवर्णकम्।। ६२।।
कर्णिकास्थं ततोऽब्जं च वेष्टयेन्मायया ततः। बहिः कुम्भं विदध्याच्च प्रोक्ताक्षरविधानतः।। ६३।।
एवमन्यैश्च नवभिर्विद्यावर्णैर्यथाक्रमम्। विदध्यान्नव यन्त्राणि. दशानां च फलं शृणु।। ६४।।

यन्त्ररचनाक्रमो यथा—तत्राष्टदलकमलं सकर्णिकं विलिख्य तद्बहिर्वृत्तद्वयं विधाय कर्णिकायां विद्याद्यवर्णं साध्यनामगर्भं विलिख्य, तद्बहिर्मायाबीजेन संवेष्ट्याष्टदलेषु फङ्वर्ज्यं द्वितीयाद्यष्टौ बीजानि विलिख्य तद्बहिर्मायया वेष्टयेत्। एवं द्वितीयबीजं कर्णिकायां विलिख्य द्वितीयं यन्त्रं भवति। एवं तृतीयबीजादिकं ज्ञेयम्। एवं दश यन्त्राणि भवन्ति।। फलान्याह—

सर्वरक्षां जयं वश्यं नरनारीनृपादिनाम्। स्तम्भं लक्ष्मीयशोहेमवासांसि च समाप्नुयात्।। ६५।।
अनावृत्तान्यक्षराणि मन्त्रेष्वेकादशाथ तैः। स्वरभिन्नैर्भवेत् संख्या षट्सप्तत्या शतं स्मृतम्।। ६६।।

'अहरखचछक्षसतफट्' इति।

तैर्यन्त्रकरणं तेषां फलानि च यथाक्रमम्। शृणु वक्ष्यामि देवेशि साधकाभीष्टसिद्धये।। ६७।।
वृत्तयोर्मध्यगं कृत्वा पद्मं षोडशपत्रकम्। तन्मध्ये कर्णिकामध्ये शक्तिं साध्यसमन्विताम्।। ६८।।
परेषु षोडशार्णानि वेष्टयेत्तच्च मायया। वृत्तयोरन्तरा बाह्ये कुम्भं प्रोक्तं समालिखेत्।। ६९।।

एवमेकादशोक्तानि यन्त्राणि प्रथितानि वै।..।।

अत्र सकर्णिकं षोडशदलपद्मं विलिख्य बहिर्वृत्तद्वयं विधाय, कर्णिकायां साध्यनामगर्भं ह्रींकारं विलिख्य तन्मायया संवेष्ट्य षोडशदलेषु षोडशबीजानि विलिख्य, वृत्तद्वयान्तराले मायाबीजै:, संवेष्ट्य प्राक्प्रोक्तप्रकारेण तद्बहि: कुम्भं विलिखेत्। एवमेकादश यन्त्राणि भवन्ति। तथा–

....। विनियोगानथैतेषां क्रमेण शृणु पार्वति।। ७०।।
प्रथमं गज[1]रक्षाकृद् द्वितीयं हेमरक्षकम्। तृतीयं नृपरक्षायां चतुर्थं द्वन्द्वरक्षकम्।। ७१।।
पञ्चमं कुरुते राजवेश्मरक्षां तु सर्वत:। षष्ठं सचिवरक्षाकृत् सप्तमं पुररक्षकम्।। ७२।।
अष्टमे गृहरक्षा स्यात् सर्वेषामपि सर्वदा। फणिचोरग्रहादिभ्यो भयेभ्य: शत्रुतस्तथा।। ७३।।
नवमं सर्वरोगार्तौ सर्वेषामपि सर्वदा। उत्तारकं स्याद् देवेशि प्राक्प्रोक्तविधिना युतम्।। ७४।।
दशमं भूर्जगं कृत्वा प्राग्वत् सिक्थोत्थलिङ्गकम्[2]। स्थापयेच्छीतले तोये घटादौ सविधेऽथ तम्।।७५।।
पूजयेत् तानि च यजेत् स्पृशञ्जीवकरेण तम्। घोराभिचारकृत्यादिजातो दाहज्वर: क्षणात्।।७६।।
विमुच्यं तं प्रयोक्तारं नाशयेत् तत्क्षणात् प्रिये। एवमेतानि यन्त्राणि नामत: सर्वकार्यकृत्।। ७७।।
सर्वासामपि नित्यानां प्रातरेव समृद्धये। पूजादौ च बलिं दद्यात् षोडशार्णेन पार्वति।। ७८।।

इति त्वरितानित्याप्रयोगविधि:।।

अथ कुलसुन्दरीनित्याप्रयोगविधि:। श्रीतन्त्रराजे–(१५। २५)

एवं नित्यार्चनं कुर्यान्नित्यहोमं घृतेन वै। प्रात: सलिलपानं च कुर्याद्विद्यात्मसिद्धये[3]।। १।।
चन्दनोशीरकर्पूरकस्तूरीरोचनान्वितै:। काश्मीरकालागुरुभिर्मृगस्वेदमयैरपि।। २।।
आलिप्तगात्रो हृष्टान्त:करणो मौनमन्वित:[4]। चित्रभूषाम्बरस्रग्वी जपेद्विद्यां निशामुखे।। ३।।
पूजयेच्च शिवामेतैर्गन्धै: सर्वार्थसिद्धये। सर्वाभिरपि नित्याभि: प्रातर्मातृकया समम्।। ४।।
त्रिजप्ताभि: पिवेत्तोयं तथा वाक्सिद्धये शिवे। अन्यैरपि च मन्त्रैस्तैर्विद्याभिस्तत् प्रसिद्ध्यति।।५।।
प्राग्वल्लक्षत्रयं जप्त्वा तद्दशांशं च तर्पयेत्। सुगन्धिसलिलैर्होमं तावत् त्रिमधुराप्लुतै:।। ६।।
पलाशपुष्पैर्विकचैरदुष्टैरविखिण्डितै:। सिद्धविद्य: पुन: कुर्यात् काम्यकर्माणि साधक:।। ७।।
देव्या वर्णविभेदेन फलभेदा: समीरिता:। विद्यास्वरूपभेदांस्तु शृणु वक्ष्ये यथाविधि।। ८।।
त्रयीमयत्वं विद्यायास्तथा व्यञ्जनसङ्गमात्। वाच्यवाचकरूपस्य प्रपञ्चस्यामितात्मन:।। ९।।
कारणत्वं परात्मत्वममेयत्वं च वै क्रमात्। कथयामि शृणु प्राज्ञे विचित्रास्तव वैभवा:।। १०।।
अकारादि: सामवेदो ऋग्वेदस्तु तदादिक:। यजुर्वेद इकारादिस्तेषां संयोगत: शुचि:।। ११।।
तन्निष्पत्तिं शृणु प्राज्ञे प्रोक्तं पूर्वापरक्रमात्। विलिखेद्योजेयत् पूर्वं शब्दशास्त्रानुसारत:।। १२।।
गुणसन्ध्या ऋग्यजुषा ततस्तेनापरं तथा। वृद्धिसन्ध्या समायुञ्ज्यादित्युत्पन्नं शुचेर्वपु:।। १३।।
तेन त्रयीमयी विद्या कार्यकारणयोगत:। आद्यक्षरप्रसूतानि सर्वाण्यन्यानि येन वै।। १४।।

---

[1] हय' क. पाठ:। [2] 'के' क. पाठ:। [3] 'शुद्धये' क. पाठ:। [4] 'मास्थित:' क. पाठ:।

मध्यमार्णगतप्राणा व्यञ्जनादेस्तु मातृका। प्राग्वत् कारणकार्यत्वयोगाद्वाचकरूपता ।। १५।।
तदर्णकरसायोगाद्भूतादित्वेन वाच्यता। इति वाचकवाच्यत्वरूपा विश्वात्मतोदिता।। १६।।
परारूपं तृतीयेन त्रिंशिकोक्तं त्रिकात्मकम्। एवमेषा विश्वमयी विद्यारूपमिदं शृणु[1]।। १७।।
शुचिराद्या वाक्स्वरूपा द्वितीया वह्निरीरिता। बिन्दुसर्गात्मनोरैक्यरूपा सा त्वावयोर्वपु:।। १८।।
तेन बीजेन विश्वात्मरूपा सा सम्यगीरिता। वनं तृतीयामाख्यातं मायया स्वेन वा युतम्[2]।।१९।।
एषा त्रैपुरकन्दा स्यात् सङ्केतेन निगद्यते। ज्ञातृज्ञानज्ञेयदोषगुणतेजस्त्रयात्मिका।। २०।।

'ऐईऔ' इति सङ्केतविद्या। त्रैपुरकन्दं त्रिपुरामन्त्राणां मूलमित्यर्थ:। वनं तृतीयं औकार:। मायया विसर्गेण, स्वेन बिन्दुना वेति विकल्प:।। तथा—

अस्यास्तु मध्यमे बीजे रसाप्राणनियोजनात्। वाच्यवाचकरूपात्मा प्रपञ्चस्य हि कारणम्।। २१।।
तृतीये हृत्समायोगात् त्रिकविश्वात्मतोदिता। हंसहृद्योगतस्तेषु जङ्गमस्थावरात्मता।। २२।।

'ऐंक्लींऔ:, ऐंक्लींसौ:, ह्सैंह्सक्लींह्सौ:। एतासु विद्यासु कादिपञ्चत्रिंशद्व्यञ्जनानाम्। तथा—

एकद्व्यादिसमायोगाद् व्यञ्जनानां तथा त्रिषु। ज्ञातुं न शक्यते संख्या विद्यानां परमेश्वरि।। २३।।

त्रिषु त्रिबीजेषु।

एवं सानन्तविभवा तां नि:शेषं वदेत् कथम्। तथापि भक्तसन्त्राणहेतो: काञ्चन वच्मि ते।। २४।।
आयुर्लक्ष्मीकीर्तिभोगसौन्दर्यारोग्यदायिका:। ऐहिकामुष्मिकज्ञानमय्य: सङ्कल्प[3]सिद्धिदा:।। २५।।
विद्याया: कुलसुन्दर्या हंसयोगात् त्रिषु क्रमात्। विजयारव्या महाविद्या विश्वसन्त्राणतत्परा।।२६।।

अत्र हैंह्क्लींह्सौ: इति विजया।

हृत्समायोगतस्तेषु बीजाख्या[4] विश्वचिन्मयी। द्वयोर्नियोजनात्तेषु जायते सावयोर्वपु:।। २७।।

केवलसकारयोगाद्बीजाख्या। द्वयोर्हकारसकारयोर्योगाद्विश्वचिन्मयी।

हृदादिस्त्वन्मयी विद्या हंसादिर्मन्मयो मनु:। तेषु दाहसमायोगाद्विश्वाख्या विश्वविग्रहा।। २८।।

अत्र मन्त्र इति विद्येति भेदद्वयम्। दाहो रेफ:।

प्रत्येकं शक्तिपुटिता विद्या विश्वविमोहिनी।..।।

मायाबीजपुटिता प्रत्येकम्।

....। [5]'स्वंचराम्बुरसोपेतमायाभ्यां पुटिता तु सा।। २९।।
त्रिपुरामृतसंज्ञा सा सर्वाप्यायनविग्रहा। ह्लाब्लेंह्लीं इति।
....। मायाद्या मोहिनी प्रोक्ता तन्मध्या क्षोभिणी मता[6]।।३०।।
तदन्ता क्लेदिनी ख्याता वातादि: स्यान्महोदया। त्रयोदशीति कथिता त्रिपुरानिधय:[7] स्मृता:।।३१।।
आसां क्रमविपर्यासजाता विद्याष्टसप्तति:। तासां विधानं ते प्रोक्तमशेषं लक्षसागरे।। ३२।।
सम्पत्करीति काप्यस्ति विद्या याचिन्त्यवैभवा। तां वक्ष्ये शृणु देवेशि साधकाभीष्टसिद्धये।।३३।।

---

१. 'भिदा: शुभा:' क. पाठ:। २.'ता' क. पाठ:। ३. 'सकल' क. पाठ:। ४. 'जीवाख्या' क. पाठ:। ५. 'खे' क. पाठ:। ६. 'महा' क. पाठ:। ७. 'विधव:' क. पाठ:। ८. 'सा' क. पाठ:।

प्राणो रसा मरुद्वह्निस्वयोगादाद्यमीरितम्। वातेन च चरस्वाभ्यां द्वितीयमपि पार्वति।। ३४।।
हंसहृद्धनमायाभिस्तृतीयं परमेश्वरि। एवं त्रिवर्णा सा विद्या विधानं चाथ कथ्यते।। ३५।।

'कळआई, अऐं, ह्सौ:'।

तृतीयबीजेनाङ्गानि दीर्घस्वरयुजा क्रमात्। कुर्यात् कराङ्गयो: प्राग्वदित्थं ध्यायेच्च तां पराम्।।३६।।
दाडिमीकेसरप्रख्यदेहवासोविभूषणाम्। चतुर्भुजां त्रिनयनां प्रसन्नस्मेरवक्त्रकाम्।। ३७।।
रत्नाभिषेकसम्भिन्ना[1]मष्टपत्राब्जमध्यगे। त्रिकोणे स्वस्तिकासीनां करुणानन्दमन्दिराम्।। ३८।।
प्रवालाक्षस्रजं रत्नचषकं रत्नपूरितम्। पुस्तकं च वरं हस्तैर्दधानां सर्वमङ्गलाम्।। ३९।।
अकारादिसकारान्तषोडशत्रयकल्पिते। कुलासने हळक्षार्णमध्ये तद्विद्ययान्विते।। ४०।।
समावाह्यार्घ्यसङ्कल्पपूर्वं तामर्चयेत् क्रमात्। मध्ये त्रिकोणकोणेषु रतिं प्रीतिं मनोभवाम्।। ४१।।
अग्रादिसव्यगास्तद्वदष्टपत्रेषु मातर:। चतुरस्रे लोकपालान् प्राग्वच्छक्ती: समर्चयेत्।। ४२।।
विधानमष्टसप्तत्या इति सम्यक्समीरितम्। बलिद्वयं च होमं च प्राग्वदन्यत् समुन्नयेत्।। ४३।।
चतुर्गुणचतुर्थांशस्वसमाननियोजितै:। ब्राह्मीरसवचादुग्धै: श्रृतं सर्पिस्त्रिभिर्दिनै: ।। ४४।।
सयन्त्रं मातृकाविद्याजप्तं त्वयुतमादरात्। दिनशो विलिखेत् प्रातरब्दान्मूको भवेत् कवि:।। ४५।।
शिवोऽम्बिका कुमारश्च विधिर्विष्णुस्तथा रमा। कुबेरो रविचन्द्रारज्ञगुरु: सितसौरय:।। ४६।।
वारेशास्तेषु वारेषु तांस्तद्दिनजविद्यया। नामसप्ताक्षरीयुक्त्या पूजयेत् तर्पयेद्धुनेत्।। ४७।।
वर्णौषधिसमुत्थेन भस्मना मन्त्रितेन तु। मातृकान्याससहितं स्पृशेद्रक्षाकृतेन तु।। ४८।।
विशेषतो महीपानामार्तानां च विधिं चरेत्। तेन ते सुखिनो भूयु: सान्वया यावदायुषम्।। ४९।।
क्रूरेषु व्याधिषु प्राप्तेष्वभ्यर्च्यैवं तु मण्डले। नवकोष्ठे नव प्रोक्तान् राहुकेतुसमन्वितान्।। ५०।।
मध्येन्द्रयमपाशीन्दुवह्निरक्षोऽनिले शिवे[2]। कोष्ठे तांस्तैर्जपेत्[3] सद्यो मुक्तरोग: सुखी भवेत्।। ५१।।
ग्रहार्तिषु रिपुक्लेशे दुर्भिक्षे त्रिविधे तथा। उत्पन्ने[4] समरोद्योगे कुर्यादुक्तार्चनादिकम्।। ५२।।
सम्पूज्य तद्विदां[5] सम्यग्दद्याद्गां स्वर्णमम्बरम्। तेन सर्वापदुन्मुक्त: सुखी जीवति भूतले।। ५३।।
ब्रूहि मे मातृकान्यासं तद्यन्त्रं परमेश्वर। कथयामि द्वयं तेऽद्य वक्ष्ये तत्पटलेऽखिलम्।। ५४।।
ह्रस्वदीर्घस्वरद्वन्द्वपुटितै: षण्ठवर्जितै:। कुर्यादङ्गानि षड्वर्गै: पञ्च पञ्चदशाक्षरै:।। ५५।।
स्वरेषु मध्यत: प्रोक्ताश्चत्वार: षण्ठवर्जिता:। कराङ्गयोर्विधायेत्थमादिक्षान्ताक्षराणि वै।। ५६।।
भाले वक्त्रावृतौ नेत्रश्रोत्रनासाकपोलत:। ओष्ठदन्तशिरोजिह्वास्वेकशो विन्यसेत् स्वरान्।। ५७।।
करयो: पादयोर्मूलमध्यसन्धिष्वथाग्रत:। विन्यसेच्च चतुर्वर्गं पञ्चमं पार्श्वपृष्ठत:।। ५८।।
नाभौ हृदि च विन्यस्य व्यापकान् दशधातुषु। त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रान्तगामिषु।। ५९।।
प्राणशक्त्यात्मसु तथा न्यसेदेवं समाहित:। हृदयस्पर्शिनां तेषां स्मरन् धातुषु विन्यसेत्।। ६०।।

---

[1] 'सम्पन्ना' क. पाठ:। [2] 'परे' ग. पाठ:। [3] 'यजेत्' क. पाठ:। [4] 'उत्पाते' क. पाठ:। [5] 'तद्विद्यां' क. पाठ:।

अथ बाहुद्वये[1] स्कन्धयुगे च त्रिककक्षयोः। हृदयाधस्तथा पादजठरे वदने न्यसेत्।। ६१।।
वृत्तद्वयावृतं चाष्टपत्रमब्जं महीपुरम्। विधाय विलिखेन्मध्ये हंसहृद्धनशक्तिकम् ।। ६२।।
कूटं स्वरान् केसरेषु वर्गान् पत्रेषु चालिखेत्। पञ्चपञ्चाक्षरोपेतान् दावाम्बु दिग्विदिक्षु च।। ६३।।
स्वरेष्वपुनरुक्तानि पञ्चान्यानि तु पञ्च वै। सव्यञ्जनाव्यञ्जनत्वभेदतोऽभूद् द्विरन्वयः।। ६४।।
सवाताग्निधरास्वेन शक्तिस्तत्पञ्चकं भवेत्। अन्यान्येकादश शिवे सन्धिमात्रादिसम्भवाः।। ६५।।
एतद्यन्त्रस्य मध्यस्थं नाम कृत्वा प्रयोजयेत्। प्रातर्मूर्ध्नि स्मरेदिन्दुबिम्बस्थं सर्वसम्पदे।। ६६।।
अभिषेकाद् धारणाच्च पूजनाल्लोहकल्पिते। स्थापनाद् गृहदेशादौ यन्त्रं सर्वार्थसिद्धिदम्।। ६७।।
एतद्यन्त्रस्य मध्यस्था देवताः सकला अपि। सन्निधिं फलदानं च साधकानां वितन्वते।। ६८।।
विद्यां तां तु नरो मूर्खो जडो मूकोऽतिपातकी। नित्यशो जपपूजाद्यैः काले मत्समतां व्रजेत्।।६९।।
जिह्वायामक्षराण्येतान्यसकृद्भावयन् धिया। प्रविष्टो विद्वद्गोष्ठीषु पूज्यते वाग्मिभिर्जनैः।। ७०।।
मूर्ध्नीन्दुबिम्बमध्यस्थं सुधावर्षविधायिनम्। विभावयन्निति मनुं जपेदेकाग्रमानसः ।। ७१।।
मण्डलात् कवितासिद्धिः सर्वभाषामयी भवेत्। वादादिषु तु सर्वत्र देवतात्मा जयी भवेत्।।७२।।
यन्त्राणि नित्याविद्यायाः समान्येकात्मयोगतः। तेनात्मनोक्तानि शिवे सर्वसिद्धिकराणि वै।। ७३।।
षोडशस्वपि विद्यासु यन्त्रादन्यत् समीरितम्। प्रयोगजातमन्योन्यं विदध्यादैक्ययोगतः।। ७४।।
वृत्तयुग्मं षडस्रं च कृत्वा मध्याद्यमध्यतः। नामालिख्य बहिः षट्सु तत्त्रयं स्वेन मायया।।७५।।
विलिख्य मातृकां वृत्ते कृत्वा तद्धारणान्मुखे। जिह्वायां भावनात् सर्वगोष्ठीष्वग्रं विगाहते।। ७६।।

इति कुलसुन्दरीनित्याप्रयोगविधिः।।

अथ नित्यानित्याप्रयोगविधिः। श्रीतन्त्ररात्रे— (१६ प०। २१ श्लो०)

विद्ध्यात् साधनं प्राग्वद्वर्णलक्षं पयोव्रतः। त्रिस्वादुसिक्तैररुणैरम्बुजैर्हवनं तथा।। १।।
जपतर्पणहोमार्चासेकसिद्धमनुर्नरः। कुर्यादुक्तान् प्रयोगांश्च न चेत् तद्धातुदेवताः।। २।।
प्राणांस्तस्य ग्रसन्त्येव कुपितास्तत्क्षणं शिवे। अनया विद्यया लोके यन्न साध्यं न तत्क्वचित्।।३।।
विद्याक्षराणि सप्त स्युस्तैः प्राग्वत् स्वरसंयुतैः। शतं द्वादशसंयुक्तं तैर्यन्त्राणि वदामि ते।। ४।।
वृत्तद्वयान्तः षट्कोणं तदन्तर्वृत्तयुग्मकम्। विधाय मध्ये मायास्थमेकमक्षरमाख्यया ।। ५।।
बहिः षडालिखेत् षट्सु वृत्तयोर्भूतमातृकाम्। कृत्वान्तर्बहिरेवं स्युः क्रमाद्यन्त्राणि षोडश ।। ६।।

इति।। अस्यार्थः— अस्या अनावृत्ताक्षराणि सप्त ''हसकलरडअ'' इति। ते षोडशस्वरयुक्ता द्वादशोत्तरशतं वर्णा ११२ भवन्ति।। प्रथमतो वृत्तद्वयं कृत्वा तद्बहिः षट्कोणं तद्बहिर्वृत्तद्वयं विधाय मध्ये साध्यनामगर्भमायाबीजे एकमक्षरं विलिख्य, तद्बहिर्वृत्तद्वयान्तराले कर्मानुसारीणि तत्तद्भूताक्षराणि प्राग्वद्विलिख्य, तद्बहिः षट्सु कोणेषु षडक्षराणि विलिख्य तद्बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयेत्। एवं षोडश यन्त्राणि भवन्ति।। फलान्याह—

---

[1] 'अथवा हृदये' क. पाठः।

प्रथमेन धृतेन स्यादौदरव्याधिसंह्वति:। द्वितीयेन शिरोरोगा नश्यन्ति परमेश्वरि।। ७।।
तृतीयेनाक्षिरुक्शान्ति: श्रोत्रजानां परेण तु। पञ्चमेन भुजारोगा: प्रयान्त्यूर्ध्वेन पादजा:।। ८।।
सप्तमेनान्तराधिस्था धृतेन निध[1]नाश्रया:। धृत्तेनाष्टमयन्त्रेण ज्ञानेन्द्रियगता गदा:।। ९।।
परेण कर्मेन्द्रियगा दशमेनानिलोद्भवा। एकादशेन पित्तोत्था द्वादशेन कफोद्भवा:।। १०।।
त्रयोदशेन दोषाणां सन्निपातसमुद्भवा:। प्रयान्ति विलयं सद्यो यन्त्राणां शक्तिवैभवात्।। ११।।
चतुर्दशेन यन्त्रेण भूतप्रेतपिशाचका:। प्रयान्ति भीता: क्षणत: सर्वेऽन्येऽपि ग्रहा: शिवे।। १२।।
तत्परेण महारोगा: धृतेनाष्टौ न बाधका:। षोडशेन धृतेन स्यादायुरारोग्यमीश्वरि।। १३।।
यन्त्राणि षोडशैतानि धारयेच्चाधिशान्तये। सर्वेषां प्राणिनां सम्यगनुक्तेषु गदेष्वपि।। १४।।
सर्वत्र यन्त्रधरणं[2] साभिषेकं सदक्षिणम्। सवन्दनं सविश्वासं फलत्येवान्यथान्यथा।। १५।।
कुर्विहीना तु सा विद्या पञ्चकूटाभिधा शिवे। वाक्सिद्धिमन्यत् सकलं कुरुते त्वभिदान्ययो:[3]।।१६।।
तद्विद्याकूटभेदा: स्युर्विंशत्या शतसप्तकम्। तैर्वज्रयन्त्रनिर्माणं फलानि च शृणु प्रिये।। १७।।
प्राक्प्रत्यग्दक्षिणोदक्च सूत्राण्यष्टादश क्षिपेत्। तैस्तु कोष्ठानि जायन्ते नवाशीतिशतद्वयम्।।१८।।
प्राग्वत् तत्कोणकोष्ठानि षट्त्रिंशन्मार्जयेत् क्रमात्। मध्ये वज्रं यथा भूयात् तथा कुर्यात् समन्तत:।।१९।।
सपञ्चचत्वारिंशच्च शतकोष्ठैस्तु वज्रकम्। त्र्यस्राणि चत्वार्यग्राणि चतुष्कोष्ठैस्तु पूर्ववत्।। २०।।
विधाय तस्य मध्याध: कोष्ठमारभ्य संलिखेत्। प्रादक्षिण्यप्रवेशेन कूटांस्तस्याद्यखण्डजान्।।२१।।
मध्येऽवशिष्टनवके वामदक्षत्रयद्वये। प्रतिलोमानुलोमात्मविद्याद्वयमथालिखेत् ।। २२।।
शिष्टेषु त्रिषु कोणेषु साधकाख्यां तदूर्ध्वगे। कर्म मध्येऽधरे साध्यमालिखेदपि सर्वत:।। २३।।
चतुस्त्रिकोणमध्यस्थं द्विरेखाभिर्नवीकृतम्। मध्यवद्विलिखेत् तेषु वज्रयन्त्रमितीरितम्।। २४।।
एवमन्यै: पञ्चभिश्च खण्डै: पञ्च प्रकल्पयेत्। इति षड्वज्रयन्त्राणि प्रोक्तानि क्रमत: शिवे।। २५।।

अथैतद्यन्त्ररचनाप्रकार:— तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्चाष्टादशाष्टादश रेखा विलिख्य, समान्तरालानि नवाशीत्युत्तरशतद्वय(१८९)कोष्ठानि कृत्वा, चतुर्दिक्षु षट्त्रिंशत् षट्त्रिंशत्कोष्ठानि गुरूक्तयुक्त्या मार्जयित्वा पञ्चचत्वारिंशदुत्तरशत(१४५)कोष्ठात्मकं वज्राकारं निष्पाद्य, चतुर्दिक्षु कोष्ठचतुष्टयं कोष्ठचतुष्टयं मार्जयित्वा त्रिकोणानि विधायावशिष्टेष्वेकोनत्रिंशदुत्तरशत(१२९)कोष्ठेषु मध्याध: कोष्ठमारभ्याद्यकूटखण्डान् विंशत्युत्तरशत (१२०) भेदान् विलिख्य, मध्येऽवशिष्टनवकोष्ठेषु वामपार्श्वस्थत्रिषु कोष्ठेषु प्रतिलोमविद्यां त्रिधा विलिख्य दक्षपार्श्वस्थकोष्ठत्रये तथैवानुलोमविद्यां विलिख्य, मध्यस्थकोष्ठत्रये ऊर्ध्वकोष्ठे साधकनाम तदध: कोष्ठे कर्म तदध: कोष्ठे साध्यनाम विलिख्य, चतुर्दिक्षु चतुस्त्रिकोणेषु द्विद्विरेखायोगेन नव नव त्रिकोणानि विलिख्य तेषु तेषु मध्यनवकोष्ठ- वद्विलिखेत्। एवं षट्कूटखण्डजै: षड्वज्रयन्त्राणि भवन्तीत्यर्थ:।। तथा—

लोहत्रयकृते पट्टे शिलायां वा चतुर्षु वा। पट्टे वा फलकायां वा षट्कं षट्सु प्रकल्पयेत्।। २६।।

चतुर्षु वेति लोहत्रयं शिला च।

---

१. 'विधिना' ग. पाठ:। २. 'धारणं' क. पाठ:। ३. 'न भिदा तयो:' ख. पाठ:।

फलकापट्टयोः पूजां कुर्यान्नित्यश एव तु। इतराणि तु संस्थाप्य जपेत् तत्रैव तां शिवाम्।। २७।।
तत्स्थापनप्रदेशे तु विदध्यान्मण्डपं शुभम्। नवहस्तायामततं पताकातोरणान्वितम्।। २८।।
फलपुष्पवितानाद्यैरुपेतं परिकल्पयेत्। उत्सेधायामविस्तारहस्तां वेदीं च मध्यतः।। २९।।
एकं चेत् षट्कमथ चेत् कुर्याद्विद्यादिकं तथा। ईशप्राग्वह्निरक्षोम्बुवाय्वादीनां यथाक्रमम्।। ३०।।
प्रथमं राक्षसे त्वन्यान्यन्ये[1]षूक्तक्रमेण वै। निवेश्य गन्धपुष्पाद्यैर्नृत्यगीतादिभिस्तथा।। ३१।।
समाराध्यैवमेवं तु त्रिदिनं प्रोक्तशक्तिभिः। हुत्वा जपित्वा जीवोच्चे भानूच्चे वा स्थिरोदये।। ३२।।
स्ववामगे भूम्युदये संस्थाप्य परमेश्वरि। देव्यात्मा तच्छिलाभिस्तु दृढमाबध्य तत्र वै।। ३३।।
देवीं षड्भिर्वृतां ताभिर्डाकिन्यादिभिरम्बिके। मूर्तिसप्तकमुत्पाद्य प्रतिष्ठाप्य समर्चयेत्।। ३४।।
नित्यशस्त[2]त्पुरो विद्याभजनं वापि कारयेत्। यत्र तत्र गदालक्ष्मीरिपुग्रहपिशाचकाः[3] ।। ३५।।
दुर्भिक्षक्षुद्रकर्मोत्थपीडाः कृत्याः परेरिताः। न कदाचित् सम्भवन्ति विद्यायन्त्रानुभावतः।। ३६।।
मङ्गलान्येव जायन्ते सर्वेषां सर्वतः सदा। धार्मिकाश्चैव राजानः पूर्णसप्ताङ्गसंयुताः।। ३७।।
फलकापट्टयोः क्लृप्तपूजातो निजमन्दिरे। वाञ्छितं समवाप्नोति मण्डलान्मासतोऽपि वा।। ३८।।
आसां देहस्थितिं[4] वक्ष्ये शृणु सर्वार्थदायिनीम्। सुषुम्नामध्यसंस्थेषु षडाधाराम्बुजेषु ताः।। ३९।।
तिष्ठन्ति प्राणिनां देव्यः सिद्ध्यन्ति ज्ञानपूजिताः। बहिश्च मण्डले पूजां निग्रहानुग्रहात्मिकाम्[5]।।४०।।
विशुद्धाख्ये कण्ठदेशे षोडशस्वरपत्रके। धूम्रवर्णाम्बुजे देवीं डाकिनीं तत्समाकृतिम्।। ४१।।
शक्तिभिः स्वररूपाभिरावृतां तत्र पूजयेत्। तथा सर्वज्ञतासिद्धिर्भवत्येव न संशयः।। ४२।।
अनाहताख्ये हृद्देशे सिन्दूरारुणपङ्कजे। राकिणीं द्वादशदले कादिठान्ताक्षरात्मभिः।। ४३।।
शक्तिभिः पूजयेन्नित्यं कीर्त्यायुःश्रीधनाप्तये। मणिपूरकसंज्ञे च नाभिस्थे दशपत्रके।। ४४।।
इन्द्रनीलनिभे डादिदशवर्णात्मशक्तिके। लाकिनीं पूजयेद्देवीं[6] विजयश्रीसमृद्धये।। ४५।।
ध्वजमूले समस्तापत्तारणायेष्टसिद्धये। वादिषड्वर्णशक्तीभिरावृतां काकिनीं यजेत्।। ४६।।
स्वाधिष्ठानाह्वये पद्मे बालार्कत्विषि षड्दले। आधाराख्ये चतुष्पत्रे सुवर्णाभे सरोरुहे।। ४७।।
वादिसान्तार्णशक्तीभिरावृतां [7]शाकिनीं यजेत्। पायुध्वजान्तरा त्र्यस्रमध्ये तेजःसमन्विताम्।।४८।।
आज्ञाख्येऽब्जे भ्रुवोर्मध्ये द्विदले शुद्धविग्रहे[8]। सेवितां हक्षशक्तिभ्यां हाकिनीं पूजयेत्तथा।। ४९।।
त्रिकालज्ञानतः[9] सर्वचित्ताकर्षणकारिणी । विश्वसृष्टिस्थितिध्वंसशक्तिदामप्ययत्नतः ।। ५०।।
उत्क्रमविपर्यासो[10] निग्रहोऽन्तर्बहिस्तथा। पूजनं सर्वदुःखार्तिशमनं सम्पदास्पदम्।। ५१।।
भूमौ विधाय षट्कोणसप्तकं प्रोक्तदिक्क्रमात्। मध्ये च तत्र तां नित्यानित्यां गन्धादिभिर्यजेत्।।५२।।

---

१. 'न्यासेषु' ग. पाठः। २. 'तत्परः' ग. पाठः। ३. 'चिकाः' ग. पाठः। ४. 'देहे' ग. पाठः।
५. 'पूजात्मिका' क. पाठः। ६. 'वैरि' क. पाठः। ७. 'सा' क. पाठः। ८. 'शुभ्र' क. पाठः।
९. 'ज्ञो नरः सर्वचिन्तालोकनकारिणीम्' क. पाठः। १०. 'सात्' क. पाठः।

अभितस्तु षडस्रेषु तत् षट्कं तत्क्रमाद्यजेत्। बाह्येष्वपि च ताः प्राग्वत् प्रोक्तवर्णाः समर्चयेत्॥५३॥
तासां षण्णामपि तथा षट्सु कोणेषु शक्तयः। षट्त्रिंशत् ताः समा देव्याः सर्वा रूपायुधादिभिः॥५४॥
प्राग्वत् स्वरेण पञ्च स्युरपूर्वाः कादिमान्तिकाः[१]। परेषु [२]यवलक्षार्णरहितैस्तैस्तथार्चयेत्॥ ५५॥
तेषामपि[३] च चक्राणां शक्तीनां च विलोमतः। पूजा निग्रहसंज्ञा स्यात्सा शत्रूणां विपत्तये॥ ५६॥
षट्चक्रेषु च षट् कुम्भान्निधायारिमहीरुहम्। क्वाथतोयाभिसम्पूर्णान् कृष्णाम्बरसमन्वितात्॥ ५७॥
अर्धरात्रे यजेत्तास्तु तद्योनिबलिदानतः। क्षिप्रं त्वगादिभिस्ते स्युः पूर्णाः शत्रोः कलेवराः[४]॥ ५८॥
निवेद्यं योनिरक्तेन सम्पन्नं चरुणा रिपोः। होमं च कुर्यात्तेनैव फणिशीर्षस्रुचा रुषा॥ ५९॥
ध्यायेद् देवीश्च कुपिता दष्टौष्ठा बाहुभिर्निजैः। प्रहरन्तीः पिशाचेभ्यो विकिरन्तीश्च तत्तनुम्॥ ६०॥
जपागुलुच्छविकसत्कण्ठा[५] भीमार्तनिःस्वनाः। ध्यात्वैवं निग्रहं कुर्याद्रिपूणां मारणाय वै॥ ६१॥
चक्रं च निग्रहे प्रोक्तं वज्ररूपं भयङ्करम्। कांस्ये सीसेऽपि वा कृत्वा स्थापयेद्वैरिभूमिषु[६]॥ ६२॥
प्राक्प्रत्यग्दक्षिणोदक् च दशसूत्रनिपातनात्। एकाशीतिपदानि स्युस्तेषु कोणचतुष्टये॥ ६३॥
प्रत्येकं दशकोष्ठानि मार्जयेच्छिष्टवज्रकैः। चतुर्दिक्षु त्रिकोणानि चतुष्कोष्ठैः प्रकल्पयेत्॥ ६४॥
तेषु मध्यस्थकोष्ठे च साध्यं कर्म समालिखेत्। शिष्टेषु मध्याधःकोष्ठमारभ्य प्रतिलोमजान्॥६५॥
विद्याकूटांस्तु षट्त्रिंशदालिखेदप्रदक्षिणम्। साध्ययोन्यसृजा पिष्टं तद्वृक्षक्षोदलेपितम्॥ ६६॥
स्थापयेत् प्रोक्तसमये रिपुक्षेत्रगृहादिके। श्मशाने चण्डिकागेहे कुलोत्सादकरं भवेत्॥ ६७॥
इति निग्रहमाख्यातं समस्तरिपुमर्दनम्। अनुग्रहं शृणु प्राज्ञे पूजाचक्रविधानतः॥ ६८॥
देवीस्ताः प्रोक्तरूपास्तु ध्यात्वा चक्रेषु पूजयेत्। नैवेद्यमासां सम्प्रोक्तं[७] यदासां प्रीतिदायकम्॥६९॥
पायसान्नं गुडान्नं च मुद्गभिन्नान्नकं तथा। हरिद्रान्नं तिलान्नं च शुद्धान्नं षट्कमेव च॥ ७०॥
चक्रेषु सप्तसु तथा तद्वर्णाश्चारुविग्रहाः। [८]युवतीसप्तकं स्थाप्य प्राग्वदभ्यर्च्य ताः क्रमात्॥ ७१॥
भूषणाम्बरगन्धासृग्भोजनाद्यैस्तु तोषयेत्। तुष्टासु तासु तुष्टाः स्युः शक्तयस्ताः समास्तदा॥७२॥
प्रागुक्तवज्रे साध्याख्यां तथालिख्यानुलोमजान्। कूटानुक्तसमारम्भान् प्रादक्षिण्येन संलिखेत्॥७३॥
प्रोक्तेषु प्रोक्तरूपेण स्थापयेत् प्रोक्तभूमिषु। प्रोक्तान्येव फलानि स्युर्योगोऽयं लघुविग्रहः॥ ७४॥
आदिक्षान्ताक्षरैः प्राग्वद्रूपिणीशक्तिसंयुतैः। बीजद्वयाद्यैः सप्ताक्षर्यन्तैः पञ्चदशाक्षरैः॥ ७५॥
पञ्चाशच्छक्तयः पूज्याः पञ्चाशत्क्षेत्रपालकैः। सप्ताक्षर्या च संयुक्ता मन्त्राः पञ्चदशाक्षराः॥ ७६॥
चतुःषष्टिपदे मध्यचतुष्के दिनविद्यया। दिनेषु घटिकायोगात् पञ्चाशन्मिथुनान्यपि॥ ७७॥
तेषां बीजद्वयं वर्णरूपक्षेत्रेशसंयुताः। मनीषितं समालेख्य तेषु तन्मिथुनानि वै॥ ७८॥
घटिकाक्रमयोगेन हृन्मायामध्यगेऽर्चयेत्। एवं मण्डलमासार्धात् प्राप्नोत्येवाभिवाञ्छितम्॥ ७९॥

---

१. ‘न्तकाः’ क. पाठः। २. ‘चवल’ ग. पाठः। ३. ‘एषां’ क. पाठः। ४. ‘वरात्’ क. पाठः। ५. ‘विलसत्कर्णाः’ क. पाठः।
६. ‘द्वेवि’ ग. पाठः। ७. ‘युक्तं’ ग. पाठः। ८. ‘युवतीः सप्त संस्थाप्य’ क. पाठः।

नित्यशस्तां समावाह्य तस्मिंश्चक्रे समर्चनात्। समस्तवाञ्छितप्राप्तिः सदा भवति सर्वतः।। ८०।।

इति नित्यानित्याप्रयोगविधिः।।

अथ नीलपताकानित्याप्रयोगविधिः। श्रीतन्त्रराजे—(१७।१८)

सर्वत्र नित्यहोमं तु कुर्यादन्नाज्यतोऽपि वा। तिलतण्डुलकैर्वापि प्रोक्तं द्रव्यानुदीरणे[1]।। १।।
विद्याक्षराणां सर्वेषां स्वरव्यञ्जनबिन्दुकान्। पृथक् कृत्वाथ गणितैस्त्रिपञ्चाशद्भवन्ति हि।। २।।
तेन तल्लक्षसंख्यं तु जपेद्विद्यां प्रयत्नतः। तद्दशांशं हुनेदग्नौ सर्वत्राक्षरलक्षके।। ३।।
प्राङ्मुखो नित्यपूजासु साधनेषु च साधकः। नित्यानामपि सर्वासां वासनायामुदीरितम्।। ४।।
ततः सिद्धमनुर्मन्त्री कुर्यात् सिद्धिषु कौतुकम्। तद्विधानं शृणु प्राज्ञे वक्ष्ये विद्याविभेदतः।। ५।।
दशानामपि सिद्धीनां विद्यास्तासां भिदागताम्। संख्यां च ताश्च सम्प्रोक्ताः क्रमेणासां फलानि च।।६।।
विद्यादिकूटे त्वाद्ये तु योजयेद् दशसु क्रमात्। ताभ्यामेव विलोमाभ्यां पुटयेदुपरीरितान्।। ७।।
मन्त्रवर्णान् दशानां च तत्तत्संख्याश्च ताः शृणु। परस्तात्तत्प्रभेदानां मन्त्रान् वक्ष्ये यथाविधि।।८।।
चतुर्विधः स्याद्विजयो द्वन्द्वे सचतुरङ्गके। कूटयुद्धे दुर्गजे च तेषां मन्त्राश्चतुर्विधाः।। ९।।
कामरूपत्वमुदितं स्वेच्छयाभीष्टविग्रहम्। विधातुमात्मनः शक्तिं स एको मन्त्र ईरितः।। १०।।
पादुकायुगलं विद्यावैभवाप्तं तु पादयोः। कृत्वा स्मरेद्वाञ्छितं तु देशं तत्र तदा स्थितिः।। ११।।
तन्मन्त्रः स्यादेकविधस्तथैवाञ्जनमीरितम्। येनाक्ताक्षो निधिं पश्येद् देवाद्यांश्चान्तरिक्षगान्।। १२।।
खड्गश्च तादृशः प्रोक्तः करस्थेनाहिताः क्षणात्। पलायिता वा पदयोः प्रणमेयुर्वशंगताः।। १३।।
वेतालाः स्युरसंख्याताः सिद्ध्यन्ते चैकविद्यया[2]। निधाय साधकं स्कन्धे चरेयुर्वाञ्छयास्य ते।।१४।।
विकृताङ्गमुखाः केचित् केचित्तिर्यङ्मुखाङ्गकाः। केचिद्भीषणनादाङ्गा[3] वेताला बहुविग्रहाः।।१५।।
सर्वेऽपि वशगा वाक्यादस्य शत्रून् ग्रसन्ति च। किङ्करा प्रोक्तकरणाद्भवेयुर्यावदायुषम्।। १६।।
पिशचास्तादृशाः प्रोक्ताः कार्श्यवैरूप्यविग्रहाः। क्रुद्धाः क्षुद्राशयाः प्रोक्तकारिणः स्युरसंख्यकाः।।१७।।
तेषामेका भवेद्विद्या तथा ते किङ्कराः सदा। तैरेव प्रहरेच्छत्रुमज्ञातमनिशं रणे।। १८।।
षट्त्रिंशद्रूपसंयुक्ता यक्षिण्यो वाञ्छितप्रदाः। सुरूपा द्विभुजाश्चित्रवसनाभरणान्विताः।। १९।।
ससहाया यौवनाढ्याः स्रगालेपनसौरभैः। समेत्य सर्वाभीष्टानि दद्युस्ताः साधकाय वै।। २०।।
तासां विद्यास्तु षट्त्रिंशद्वक्ष्ये ताश्च शृणु प्रिये। याभिः सिद्धाभिरनिशं साधकाः सर्वसम्मताः।।२१।।
चेटकाश्च चतुःषष्टिस्तेषां मन्त्राश्च तत्समाः। तेऽपि नानाविधाकाराः सिद्धास्ते दद्युरीप्सितम्।। २२।।
मायासंख्याश्चित्ररूपाश्चित्राण्यस्येच्छयानिशम्। वसून्युपहरेयुस्ता विद्यैका तत्प्रसाधने।। २३।।
विद्याया नवमार्णादिवर्णैः षड्भिरुदीरितैः। दश विद्याः प्रजायन्ते शृणु वक्ष्ये च ताः क्रमात्।।२४।।
नित्येति विजयं देहीत्युक्त्वा सम्पुटयेत् ततः। विद्या सा विजयप्राप्त्यां [4]चतुर्थैकादशाक्षराः।।२५।।

---

[1] 'नुदीरितम्' ग. पाठः। [2] 'चेक' ग. 'चैव' क. पाठः। [3] 'पादाङ्गा' क. पाठः। [4] 'चतुर्थे' क. पाठः।

अथ ''नित्यविजयं देहि मदद्रवे'' इत्येकादशाक्षरो मूलभूतश्चतुर्धा। तथा–''नित्यद्वन्द्वयुद्धे विजयं देहि मदद्रवे'(१)। ''नित्यचतुरङ्गयुद्धे विजयं देहि मदद्रवे'' (२)। ''नित्यकूटयुद्धे विजयं देहि मदद्रवे'' (३)। नित्यदुर्गयुद्धे विजयं देहि मदद्रवे''(४) इति। तथा–

मदेति कामरूपं मे देहीति पुटयेत्तथा। त्रयोदशाक्षरी विद्या कामरूपप्रदेरिता।। २६।।

''मदकामरूपं मे देहि द्रवे नित्य''। इति

नित्यदे पादुकां देहीत्युक्त्वा कुर्याच्च सम्पुटम्। द्वादशार्णा भवेद्विद्या सिद्धा दद्याच्च पादुके।।२७।।

''नित्यदे पादुकां देहि मदद्रवे''। इति।

तथा नित्यमदेत्युक्त्वा देह्यञ्जनमितीरयेत्। पुटयेत् तद् द्वयेनाथ[1] द्वादशार्णा समीरिता।। २८।।

''द्रवे नित्यमद देह्यञ्जनं द्रवे'' इति।

द्रवनित्ये देहि खड्गमित्युक्त्वा पुटयेत् तथा। द्वादशार्णा भवेत् सिद्धा खड्गं दद्यात् सुशोभनम्।।२९।।

''द्रवनित्ये देहि खड्गं द्रवनित्ये'' इति।

नित्यद्रवेति वेतालान् देहीति पुटयेत् तथा। त्रयोदशाक्षरी विद्या सिद्धा तान् दर्शयेत्तथा।। ३०।।

''नित्यद्रवे वेतालान् देहि नित्यद्रवे'' इति।

पिशाचान्मे प्रयच्छेति पूर्वं नित्यमदद्रवे। पुटयेत् पूर्ववद् द्वाभ्यां विद्या सप्तदशाक्षरी।। ३१।।

''नित्यमदद्रवे पिशाचान्मे प्रयच्छ नित्यद्रवे'' इति।

षट्त्रिंशदुक्ता यक्षिण्य: सर्वा वाञ्छितसिद्धिदा:। तासां नामानि विद्याश्च शृणु वक्ष्ये यथाविधि।।३२।।
विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिका। विशाला मदना तुष्टा[2] कालकण्ठी महाभया।।३३।।
माहेन्द्री शङ्खिनी[3] चान्द्री मङ्गला वटवासिनी। मेखला सकला लक्ष्मीर्मालिनी विश्वनायिका।।३४।।
सुलोचना सुशोभा च कामदा सविलासिनी। कामेश्वरी नन्दिनी च स्वर्णरेखा[4] मनोहरा।। ३५।।
प्रमोदा रागिणी सिद्धा पद्मिनी सरतिप्रिया। कल्याणदा कलादक्षा ततश्च सुरसुन्दरी।। ३६।।
इति षट्त्रिंशदाख्याता यक्षिण्योऽभीष्टदायिका:। तासां विद्या: क्रमेण [5]स्युस्तद्बीजद्वयसम्पुटै:।।३७।।
नित्यद्रवमदेत्येतै:[6] षड्वर्णैश्चोक्तनामभि:। विद्या षट्त्रिंशदाख्यातास्ता: सिद्धादद्युरीप्सितम्।। ३८।।
तासां विद्यार्णसंख्यास्तु शृणु वक्ष्ये यथाक्रमम्। पञ्चमी पञ्चदशमी विंशतिश्च तथान्तिमा।। ३९।।
चतस्र: पञ्चदशकास्तृतीया साष्टमी तथा। त्रयोदशी साष्टदशा[7] द्वाविंशा द्वादशाक्षरा।। ४०।।
सैकत्रिंशच्च तद्वत् स्युश्चतुर्दशसमन्विता:। नवमी दशमी चैकविंशा[8] तद्वदनन्तरम्।। ४१।।
चतुर्विंशा पञ्चविंशा सप्तविंशा तदूर्ध्वगा। त्रयस्त्रिंशादिकास्तिस्रस्त्रयोदशयुता: परा:।। ४२।।
चेटकानां चतु:षष्टिं तन्मन्त्रांश्च वदामि ते। शृणु सिद्धास्तु ते नित्यं साधयेयु: समीहितम्।। ४३।।
विभ्रमो वाहको वीरो विकर्ष: कोरक:[9] कवि:। सिंहनादो महानाद: सुग्रीवो मर्कट: शठ:[10]।।४४।।

---

१. 'पूजयेत् तद्द्वयेनात्र' क. पाठ:। २. 'रुद्धा' क. पाठ:। ३. 'शशिनी' क. पाठ:। ४. 'स्वर्णवेशा' क. पाठ:।
५. 'नैव' क. पाठ:। ६. 'त्यन्तै: षड्वर्णै: स्वो' क. पाठ:। ७. 'चाष्टदशी' क. पाठ:। ८. 'सैकत्रिंशा' क. पाठ:।
९. 'सोरक:' क. पाठ:। १०. 'सदा' क. पाठ:।

बिडालाक्षो बिडालास्य: कुमार: खेचरो भव:। मयूरो मङ्गलो भीमो द्वीपिवक्र: खरानन:[1]।।४५।।
मातङ्गश्च निशाचारी विषग्राही वृकोदर:[2]। सैरिभास्यो गजमुख: पशुवक्त्रो मृगानन:[3]।। ४६।।
क्षोभको मणिभद्रश्च क्रीडक: सिंहवक्त्रक:। श्येनास्य: कङ्कवदन: काकास्यो हयवक्त्रक:।। ४७।।
महोदर: स्थूलशिरा विकृतास्यो वरानन:। चपल: कुक्कुटास्यश्च मायावी मदनालस:।। ४८।।
मनोहरो दीर्घजङ्घ: स्थूलदन्तो[4] दशानन:। सुमुख: पिण्डित:[5] क्रुद्धो वराहास्य: सटामुख:।।४९।।
कपट: कौतुकी काल: किङ्कर: कितव: खल:। भक्षको भयद: सिद्ध: सर्वगश्चेति कीर्तिता:।।५०।।
बीजद्वयपुटान्तस्थैर्मदनित्यद्रवे–युतै:। नामभिस्तैर्द्वितीयान्तैर्देहीति पदसंयुतै:।। ५१।।
एवं मन्त्राश्चतु:षष्टि: क्रमादुक्ता महेश्वरि। तेषां संख्यामपि तथा शृणु वक्ष्ये तथाविधि।। ५२।।
चतुर्दशाक्षरास्तेषु नव मन्त्रा: समीरिता:। तथा पञ्चदशार्णास्तु षड्विंशतिरितीरिता:[6]।। ५३।।
षोडशार्णास्तु मनव: पञ्चविंशतिरीरिता:। तथा सप्तदशार्णाश्च चत्वारो व्याकुला:[7] क्रमात्।। ४४

इति।। (१)“ह्लींश्रीं नित्यद्रवे मदविचित्रे श्रींह्लीं” १३।। (२)“ह्लींश्रीं नित्यद्रवे मदविभ्रमे श्रींह्लीं” १३।। (३)“ह्लींश्रीं नित्यद्रवे मदहंसि श्रींह्लीं” १२।। (४)“ह्लींश्रीं नित्यद्रवे मदभीषणि श्रींह्लीं” १३।। (५)“ह्लींश्रीं नित्यद्रवे मदजनरञ्जिके श्रींह्लीं” १३।। (६)“ह्लींश्रीं नित्यद्रवे मदविशाले श्रींह्लीं” १३।। (७)“ह्लींश्रीं नित्यद्रवे मदमदने श्रींह्लीं” १३।। (८)“ह्लींश्रीं नित्यद्रवे मदतुष्टे श्रींह्लीं” १२।। (९)“ह्लींश्रीं नित्यद्रवे मदकालकण्ठि श्रींह्लीं” १४।। (१०)“ह्लींश्रीं नित्यद्रवे मदमहाभये श्रींह्लीं १४ (११) “ह्लींश्रीं नित्यद्रवे मदमाहेन्द्री श्रींह्लीं” १३।। (१२) “ह्लींश्रीं नित्यद्रवे मदशङ्खिनि श्रींह्लीं” १३।। (१३) “ह्लींश्रीं नित्यद्रवे मदचान्द्रि श्रींह्लीं” १२।। (१४) “ह्लींश्रीं नित्यद्रवे मदमङ्गले श्रींह्लीं” १३।। (१५)“ह्लींश्रीं नित्यद्रवे मदवटवासिनि श्रींह्लीं” १५।। (१६)“ह्लींश्रीं नित्यद्रवे मदमेखले श्रींह्लीं” १३।। (१७)“ह्लींश्रीं नित्यद्रवे मदसकले श्रींह्लीं” १३।। (१८)“ह्लींश्रीं नित्यद्रवे मदलक्ष्मि श्रींह्लीं” १२।। (१९)“ह्लींश्रीं नित्यद्रवे मदमालिनि श्रींह्लीं” १३।। (२०)“ह्लींश्रीं नित्यद्रवे मदविश्वनायिके श्रींह्लीं” १५।। (२१)“ह्लींश्रीं नित्यद्रवे मदसुलोचने श्रींह्लीं” १३।। (२२)“ह्लींश्रीं नित्यद्रवे मद(सु)शोभे श्रींह्लीं” १३।। (२३)“ह्लींश्रीं नित्यद्रवे मदकामदे श्रींह्लीं” १३।। (२४)“ह्लींश्रीं नित्यद्रवे मद(स)विलासिनि श्रींह्लीं” १५।। (२५)“ह्लींश्रीं नित्यद्रवे मदकामेश्वरि श्रींह्लीं” १४।। (२६)“ह्लींश्रीं नित्यद्रवे मदनन्दिनी श्रींह्लीं” १३।। (२७)“ह्लींश्रीं नित्यद्रवे मदस्वर्णरेखे श्रींह्लीं” १४।। (२८)“ह्लींश्रीं नित्यद्रवे मदमनोहरे श्रींह्लीं” १४।। (२९)“ह्लींश्रीं नित्यद्रवे मदप्रमोदे श्रींह्लीं” १२।। (३०)“ह्लींश्रीं नित्यद्रवे मदरागिणि श्रींह्लीं” १३।। (३१)“ह्लींश्रीं नित्यद्रवे मदसिद्धे श्रींह्लीं” १२।। (३२)“ह्लींश्रीं नित्यद्रवे मदपद्मिनि श्रींह्लीं” १३।। (३३)“ह्लींश्रीं नित्यद्रवे मद(स)रतिप्रिये श्रींह्लीं” १३।। (३४)“ह्लींश्रीं नित्यद्रवे मदकल्याणे श्रींह्लीं” १५।। (३५)“ह्लींश्रीं नित्यद्रवे मदकलादक्षे श्रींह्लीं” १३।। (३६)“ह्लींश्रीं नित्यद्रवे मदसुरसुन्दरि श्रींह्लीं” १५।। इति षट्त्रिंशद्यक्षिणीमन्त्रा:।।

अथ चतुष्षष्टिश्चेटका यथा– (१)“ह्लींश्रीं मदनित्यद्रवे विभ्रमं देहि श्रींह्लीं” १५।। (२)“ह्लींश्रीं मदनित्यद्रवे वाहकं देहि श्रींह्लीं” १५।। (३)“ह्लींश्रीं मदनित्यद्रवे वीरं देहि श्रींह्लीं” १४।। (४)“ह्लींश्रीं मदनित्यद्रवे विकर्षं देहि श्रींह्लीं” १५।। (५)“ह्लींश्रीं मदनित्यद्रवे कोरकं देहि श्रींह्लीं” १५।। एवं–कविं सिंहनादं महानादं सुग्रीवं मर्कटं शठं बिडालाक्षं

---

१. ‘षडानन:’ क. पाठ:। २. ‘विषानन:’ क. पाठ:। ३. ‘गजानन:’ क. पाठ:। ४. ‘तृणदन्त’ क. पाठ:।
५. ‘पीडित:’ ग. पाठ:। ६. ‘रुदाहृता:’ क. पाठ:। ७. ‘लक’ ख. पाठ:।

बिडालास्यं कुमारं खेचरं भवं मयूरं मङ्गलं भीमं द्वीपिवक्त्रं खराननं मातङ्गं निशाचारिणं विषग्राहिणं वृकोदरं सैरिभास्यं गजमुखं पशुवक्त्रं मृगाननं क्षोभकं मणिभद्रं क्रीडकं सिंहवक्त्रकं श्येनास्यं कङ्कवदनं काकास्यं हयवक्त्रकं महोदरं स्थूलशिरसं विकृतास्यं वराननं चपलं कुक्कुटास्यं मायाविनं मदनालसं मनोहरं दीर्घजङ्घं स्थूलदन्तं दशाननं सुमुखं पिण्डितं क्रुद्धं वराहास्यं सटामुखं कपटं कौतुकिनं कालं किङ्करं कितवं खलं भक्षकं भयदं सर्वगं (६४) इति चतुःषष्टिश्चेटकाः।। तथा–

विद्याक्षरेष्व[१]नावृत्तान्यक्षराणि चतुर्दश। सस्वरैस्तैर्भवेत् संख्या चतुर्विंशच्छतद्वयम्।। ५५।।

अत्र ''हरफसकअलवनतयमदव'' इति।

तैर्यन्त्राणि च सप्त स्युस्तेषु प्रोक्तक्रमाद्यजेत्। देवताः सप्तवारेषु भास्करादिषु भक्तितः।। ५६।।
वाराख्यां सप्तमीयुक्तामिष्टं देहीति चालिखेत्। यन्त्रस्य मध्ये मायास्थं तत्र सिद्धीश्च पूजयेत्।।५७।।
वृत्तयोर्नवयोनिं च कृत्वा बाह्येऽष्टकोणकम्। बहिः कलाब्जभूसद्मयुगं[२] कुर्याद्यथाविधि।। ५८।।
विलिख्य तेषु क्रमतो वर्णान् द्वात्रिंशदालिखेत्। दलेषु कोणेषु तथा वृत्तमध्ये द्वये[३] पुनः।। ५९।।
मातृकामकथाद्यां वै विलिखेदान्तरक्रमात्। तस्य कोणान्तरालेषु हळक्षार्णान् समालिखेत्[४]।। ६०।।
अग्रात् प्रदक्षिणं त्वेवं सप्त यन्त्राणि तैर्भवेत्। सिद्धीनां चेटकानां च यक्षिणीनां तथैकशः।।६१।।
चेटकानां विशेषोऽयं मध्येऽष्टच्छदमम्बुजम्। तेषामुक्तक्रमेणैव साधनानि फलानि वै[५]।। ६२।।
प्रयोगाञ्छृणु देवेशि यैः सिद्धो मत्समो भुवि। पूज्यते सर्वलोकैश्च सर्वतः सर्वदापि वा।। ६३।।
सिन्धुतीरवने चैता यक्षिणीः साधयेत् त्रिशः। एकैकस्मिन् वर्णलक्षं जपेदुक्तविधानतः।। ६४।।
अरण्यवटमूले च पर्वताग्रे गुहासु च। उद्यानमध्ये कान्तारे मातृपादपमूलतः ।। ६५।।
तद्दशाशं तर्पणं च होमं कुर्यात् प्रसूनकैः। कदम्बबन्धूकजपाहयमारैश्च लोहितैः।। ६६।।
ततः प्रीताः समागत्य प्रत्यक्षा वाञ्छितप्रदाः। सुवर्णानि च वासांसि भूषणानि फलानि च।। ६७।।
आस्वाद्यानि च लेह्यानि[६] भोज्यानि विविधानि च। आलेपनानि माल्यानि दद्युराजीवितावधि।।६८।।
आयाताः सर्वदा मह्यं[७] प्रत्यक्षा देहि वाञ्छितम्। इत्युक्त्वा नित्यशस्तास्तु[८] पूजयेच्च जपेत्तथा।।६९।।
अष्टोत्तरसहस्रं तु तां तां विद्यामनन्यधीः। एवं ताः सर्वयक्षिण्यः फलं दद्युर्यथेप्सितम्।। ७०।।
चेटकानां तु सर्वेषां तेषु तेषु क्रमेण वै। एकस्मिन् पञ्च पञ्च स्युः सिद्धाः सिन्धुतटे नव।। ७१।।
तेषां च वर्णलक्षं तु जपमुक्तविधानतः। मौनं दिनेषु सततं कुर्यात् सिद्ध्यै न चालयेत्।। ७२।।
मध्यरात्रे सदा होमं तर्पणं च समीरितम्। जपेद् दिवानिशं प्रोक्तं सर्वेषामपि साधने।। ७३।।
चेटकास्ते समागस्य मध्यरात्रेऽतिभीषणाः। क्षोभयेयुरमुं क्षोभं न चेदेत्याथ तत्पुरः।। ७४।।
प्रत्यक्षाः किं तवेष्टं तत् करोमीति वदेन्निशि। प्रत्येकं[९][१०]ते तथेत्युक्त्वा न मां मुञ्चत इत्यपि।।७५।।
नित्यशस्तान् जपार्चाभिरुपासीताचरेत् ततः[११]। स्मृते तमेत्य सन्दिष्टं साधयेयुः समीहितम्।।७६।।

---

१. रैर’ क. पाठः। २. ‘भूपद्म’ क. पाठः। ३. ‘लिखेद्वृत्तत्रये’ क. पाठः। ४. ‘क्रमात्’ ख. पाठः। ५. ‘फलावलिः’ क. पाठः।
६. ‘पेयानि’ क. पाठः। ७. ‘आयाते सर्वदा’ ‘ग्राह्यं’ क. पाठः। ८. ‘स्तैः’ क. पाठः। ९. ‘तेषूक्तेषु’ क. पाठः।
१०. ‘तत्प्रत्येकं’ क. पाठः। ११. ‘पुनः’ क. पाठः।

शत्रूणां समरे भङ्गं प्रहारमहिते जने। कुर्वन्ति प्रार्थितार्थानां प्रदानं ते दिवानिशम्।। ७७।।
आनयेयुश्च वनिता वाञ्छितास्तत्क्षणाद् ध्रुवम्। निश्चलीकुर्वते मत्तं दन्तिनं वा हयं नरम्।। ७८।।
नित्याषोडशके सिद्धे देवर्षिपितृराक्षसैः। पिशाचैरुरगैः सिद्धैः किन्नरैरप्सरोगणैः।। ७९।।
मरुद्भिर्वसुभिः सप्तऋषिभिर्यक्षदानवैः। रुद्रैरेकादशविधैः साध्यैश्च नवभिर्ग्रहैः ।। ८०।।
द्वादशार्कैर्लोकपालैस्तथान्यैरपि दैवतैः। राजभिर्वनिताभिश्च नरैरन्यैर्मृगैस्तथा ।। ८१।।
पूज्यते सर्वदा सिद्धः समीहितसुखास्पदः। हृष्टाशयो वदान्यश्च दयावान् सुमुखः क्षमी।। ८२।।
पूर्णाशयः सदानन्दो निरपेक्षः[१] कलान्वितः। धनी भोक्तापरद्वेषी प्रेमभूरावयोर्भवेत्।। ८३।।

इति नीलपताकानित्याप्रयोगविधिः।।

अथ विजयानित्याप्रयोगविधिः। श्रीतन्त्रराजे—(१८। २६)

पूर्वोक्तक्रमतो विद्यां वर्णलक्षं जपेत् सुधीः[२]। होमं रक्ताम्बुजैः कृत्वा सिद्धमन्त्रो दयान्वितः।। १।।
प्रयोगानाचरेन्मन्त्री होमयन्त्रविधानतः। जपेन तर्पणेनापि पूजनेन यथाविधि ।। २।।
कमलैः कैरवै रक्तै सितैः सौगन्धिकोत्पलैः। सुगन्धिशेफालिकया त्रिमध्वक्तैर्यथाविधि ।। ३।।
होमात् सप्तसु वारेषु कुर्यात् प्रोक्तैस्तु सप्तभिः। प्रोक्तवारेशयोश्चापि[३] तन्मण्डलत एव वै।। ४।।
विजयं समवाप्नोति समरे द्वन्द्वयुद्धके। मल्लयुद्धे[४] शस्त्रयुद्धे वादे द्यूतद्वयेऽपि च।। ५।।
व्यवहारेषु सर्वत्र जयमाप्नोति निश्चितम्। चतुरङ्गुलजैः पुष्पैर्होमात् संस्तम्भयेद्रिपून्।। ६।।
तथैव कर्णिकारोत्थैः पुन्नागोत्थैर्नमेरुजैः। चम्पकैः केतकै राजवृक्षजैर्माधिवोद्भवैः[५] ।। ७।।
प्राग्वद्वारेषु जुहुयात् क्रमात् पुष्पैस्तु सप्तभिः। प्रोक्तेषु स्तम्भनं शत्रोर्भङ्गो वा भवति ध्रुवम्।। ८।।
शत्रोर्नक्षत्रवृक्षाग्नौ तत्समिद्भिस्तु होमतः। सर्षपाज्याप्लुताभिस्तैः प्रणमन्त्येव पादयोः।। ९।।
मृत्युकाष्ठानले मृत्युपत्रपुष्पफलैरपि। समिद्भिर्जुहुयात् सम्यग् वारेशार्चनपूर्वकम्।। १०।।
[६]अरातेश्चतुरङ्गं तु बलं रोगार्दितं भवेत्। तेनास्य विजयो भूयान्निधनेनापि वा पुनः।। ११।।
अर्कवारेऽर्कजैरिध्मैः समिद्धेऽग्नौ तदुद्भवैः। पत्रैः पुष्पैः फलैः काण्डैर्मूलैश्चापि हुनेत् क्रमात्।। १२।।
सवर्णारुणवत्साया घृतसिक्तैस्तु मण्डलात्। अरातिदिङ्मुखो भूत्वा कुण्डे त्र्यस्रे विधानतः।।१३।।
पलायते वा रोगार्तः प्रणमेद्वा भयान्वितः। वैरी बलसमग्रोऽपि शौर्यमानान्वितोऽपि च।। १४।।
पलाशेध्मानले तस्य पञ्चाङ्गैस्तद्[७]घृताप्लुतैः। होमेन सोमवारेषु[८] भवेत् प्राग्वन्न संशयः।। १५।।
खादिरेध्मानले तस्य पञ्चाङ्गैस्तद्घृताप्लुतैः। वारे भौमस्य हवनात् तदाप्नोति सुनिश्चितम्।। १६।।
अपामार्गेध्मजे वह्नौ तत्समिद्भिर्हुनेत् तथा। बुधवारेषु शुभ्रायाः सवत्साया घृतान्वितम्।। १७।।
पूर्वोक्तफलसंसिद्धिर्भवत्येव च तद्दिनैः। तत्तद्वारेषु भजनात् पूर्वमेव हुतक्रिया ।। १८।।
सर्वत्र प्रोक्तमेवा[९]र्चाजपयन्त्रादिकर्मसु। तत्तन्नित्यार्चनं तत्तद्वारेशद्वयपूजनम्।। १९।।

---

१. 'क्षफला' क. पाठः। २. 'वशी' क. पाठः। ३. 'योगार्चा' 'योरचां' ग. पाठः। ४. 'महा' क. पाठः। ५. 'मगधो' क. पाठः।
६. 'आगतं' क. पाठः। ७. 'सघृ' क. पाठः। ८.'च' क. पाठः। ९. 'प्रोक्तहोमा' क. पाठः।

विधाय पश्चात्कर्माणि तानि कुर्यात् समाहितः। शीघ्रं तत्फलसंसिद्ध्यै भवत्येवान्यथान्यथा।।२०।।
पिप्पलाग्नौ गुरोवरि तदुत्थैस्तद्घृतप्लुतैः। हुनेत्तथा तत्फलाप्तिस्तद्दिनैः स्यादसंशयम्।। २१।।
उदुम्बराग्नौ भृगुजे वारे होमं तदुद्भवैः। तत्सिक्थैर्विदधीतेत्थं तद्दिनैस्तत्र सिध्यति।। २२।।
शमीवह्नौ तदुत्थैस्तु जुहूयात् कृष्णगोघृतैः। तद्दिनात् तत्फलानि स्युरिति वारेषु सप्तसु।। २३।।
विजयो [1]विहितः सम्यग् हवनात् तिथिऋक्षयोः। विजयं शृणु देवेशि कथयामि क्रमेण ते।। २४।।
प्रतिपत्तिथिमारभ्य पञ्चम्यन्तक्रमेण वै। शालीचणकमुद्गैश्च यवमाषैश्च होमतः ।। २५।।
महिषाज्यप्लुतैस्ताभिस्तिथिभिः समवाप्नुयात्। षष्ठ्यादि च दशम्यन्तमजाभवघृतैस्तदा।। २६।।
प्रागुक्तैर्निस्तुषैर्होमात् प्रागुक्तं फलमाप्नुयात्। तदूर्ध्वं पञ्चदश्यन्ते समस्तैश्च तिलद्वयैः[2]।। २७।।
सिताक्तैः[3] पायसैः सिक्तैराविकैस्तु घृतैस्तथा। हवनात् फलमाप्नोति यदादौ फलमीरितम्।। २८।।
एवं नक्षत्रवृक्षोत्थवह्नौ तैस्तैर्मधुप्लुतैः। हवनादपि तत्प्राप्तिर्भवत्येव न संशयः।। २९।।
विद्यायां प्राग्वदर्णानि पञ्च युञ्ज्यात् स्वरैस्तथा। अशीत्यर्णवती विद्या तैर्यन्त्राणि शृणु प्रिये।।३०।।
प्राक्प्रत्यग्दक्षिणोदक् च दश सूत्राणि पातयेत्[4]। एकाशीतिपदानि स्युस्तेषु तानि लिखेत् क्रमात्।।३१।।
मध्यकोष्ठेऽभिधां कृत्वा प्रागुक्तविधिना युतम्। शूलीकृत्य च रेखाग्राण्यत्रावाह्याभिपूज्य ताम्।।३२।।
उपासीत पुरो विद्यां जपं[5] नित्यं समर्चयेत्। विद्याक्रमं तत्र यन्त्रे यजेत् तत्फलमाप्नुयात्।। ३३।।

अत्र यन्त्रलेखनक्रमः सुगमः। तथा–

प्राक्प्रत्यग्दक्षिणोदक् च चतुःसूत्रनिपातनात्। नवानि सम्भवन्त्यत्र कोष्ठानि परमेश्वरि।। ३४।।
तेषु प्रत्येकमब्जानि साष्टपत्राणि संलिखेत्। तेषु मध्यस्थपद्मस्य कर्णिकायां समालिखेत्।। ३५।।
नामगर्भां तुं मां विद्यां तद्बहिश्चाष्टपत्रके। तेष्वादितोऽष्टौ संलिख्य बिन्दुना तद्बहिस्तथा।। ३६।।
कर्णिकायां तु नामैकं बहिरष्टौ तथाष्टसु। एवमष्टसु संलिख्य वेष्टयेन्मातृकाक्षरैः ।। ३७।।
विलोमैरनुलोमैश्च मायाबिन्दुसमन्वितैः। चतुरस्रत्रये बाह्ये ळक्षावग्रे[6] समालिखेत्।। ३८।।
एवं कृत्वा हस्तयुग्ममाने कुम्भं विधाय[7] तम्। विद्याक्षरौषधिक्वाथजलैरापूर्य पूर्ववत्।। ३९।।
अभ्यर्च्य विद्यामयुतं जपित्वा तैर्विधानतः। अभिषिञ्चेत् ततः क्लेशैर्विमुक्तौ जायते सुखी।।४०।।
विजयं सर्वतो भूयात् प्रोक्तेष्वपि च सप्तसु। नवग्रहार्तौ रिपुभिः सर्वतः क्लेशसम्भवे।। ४१।।
समरस्योद्यमे कीर्तिसमृद्ध्योरप्यवाप्तये। पुत्राप्त्यै वाञ्छितप्राप्त्यै त्रिषु जन्मसु कारयेत्।। ४२।।
एतद्यन्त्रं गैरिकेण पीठे संलिख्य तत्र ताम्। देवीमावाह्य सम्पूज्य जपेद्विद्यां तथायुतम्।। ४३।।
एवं त्रिःसप्तभिः[8] सप्तरात्राद्विश्वं वशं नयेत्। राजानं वनितां मर्त्यानन्यांश्च प्राणिनोऽखिलान्।।४४।।
हरिद्राढ्यपटे[9] कृत्वा कलशे वा शरावयोः। निधाय भित्तिमध्ये वा शयनस्थानके निजे।। ४५।।

---

१. 'भिहितः' क. पाठः। २. 'बलि' क. पाठः। ३. 'सितान्नैः' क. पाठः। ४. 'सूत्रनिपाततात्' क. पाठः।
५. 'पात्' ग. पाठः। ६. :यन्त्रस्या' क. पाठः। ७. 'नि' क. पाठः। ८. 'त्रिः' क. पाठः। ९. 'याः' क. पाठः।

अभ्यर्च्य विद्यया जापं कुर्यात् सन्ध्यासु नित्यशः। सहस्रं प्रोक्तकलनात्[1] स्तम्भयेदखिलं दृढम्॥४६॥
शत्रोरुद्योगरोषाभ्यामनिष्टकरणं तथा। व्यवहारे रणोद्योगे वादे वाचं रुषं मतिम्॥ ४७॥
एतत्प्रागुक्तसुरभिद्रव्यैरालिख्य तत्र ताम्। सन्ध्यासु पूजयेन्नित्यं सहस्रं प्रजपेत्तथा॥ ४८॥
प्रोक्तकालप्रयोगेण श्रियं प्राप्नोति पुष्कलाम्।..॥

इति। अथैतद्यन्त्ररचनाप्रकारः– तत्र प्राक्प्रत्यग्दक्षिणोदक् च चतुश्चतुःसूत्रनिपातनात् समान्तरालानि नव कोष्ठानि कृत्वा, तेषु नवसु कोष्ठेषु अष्टदलपद्मानि सकर्णिकानि नव कृत्वा, मध्याष्टदलकर्णिकायां साध्यनामयुक्तां विजयाविद्यां विलिख्य, बहिरष्टसु दलेषु प्रागुक्ताशीत्यक्षरेषु प्रथमतोऽष्टाक्षराणि विलख्य, पूर्वदिग्गताष्टदले कर्णिकायां नवमाक्षरं साध्यनामगर्भं विलिख्याष्टदलेष्वष्टाक्षराणि विलिख्य, तथैवाग्नेयदिक्स्थाष्टदलपद्मेषु विलिख्य बहिश्चतुरस्रत्रयं कृत्वाभ्यन्तराले विसर्गयुक्तां विलोममातृकां विलिख्य तद्बहिर्ळक्षाभ्यां वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति॥ तथा–

....। अथान्यद्वज्ररूपं तु यन्त्रं वक्ष्येऽतिवैभवम्[2]॥ ४९॥
प्राग्वद् द्विसप्तरूपाणां[3] पातेनोत्पादयेत् तथा। कोष्ठानि नवषट्या च युतं शतमतिस्फुटम्॥ ५०॥
तच्चतुष्कोणकोष्ठानि मार्जयेत् सैकविंशतिम्। मध्ये वज्रं भवेत् पञ्चाशीतिकोष्ठैर्यथाविधि॥५१॥
तच्चतुर्दिक्षु विलिखेत् त्रिकोणान्येककोणतः[4]। सर्वमध्यस्थकोष्ठे च चतुर्दिक्षु न्यसेत् तथा॥५२॥
विद्यां नामोदरां कृत्वा प्राग्वद्वर्णांस्तु संलिखेत्। एतदग्रचतुष्कस्य स्पर्शात् त्रिचतुरस्रकम्॥ ५३॥
विधाय तत्र विलिखेत् मातृकां प्राग्विधानतः। एतेन[5] वज्रयन्त्रेण विजया विजयप्रदा॥ ५४॥
एतत्प्रोक्तेषु संलिख्य स्थापयेत् प्रोक्तरूपतः। विजयं समवाप्नोति प्रोक्तेष्वपि च सप्तसु॥ ५५॥
विलिख्याश्वत्थफलकातले यन्त्रं कुचन्दनैः। जपाराधनसंसिद्धं स्थापयेच्छून्यवेशमसु॥ ५६॥
देशे वा तत्र दिनशो वर्धते श्रीरचञ्चला। पिशाचा राक्षसाः कृत्या वेतालाः स्युर्न तत्र वै॥ ५७॥
पलाशफलकायां तु विलिख्यैतद्यथाविधि। स्थापयेद्यत्र कुत्रापि तत् क्षेत्रं ब्राह्मणास्पदम्॥ ५८॥
पूर्वोक्तस्थापनाद् राजधानी भवति सुस्थिता। वटे विलिख्य खननात् पत्तनं भवति ध्रुवम्॥ ५९॥
उदुम्बरे विधायेत्थं स्थापनादचिरेण वै। अहितानाश्रयं स्थानं भवत्येव न संशयः॥ ६०॥
वज्रस्य दिक्त्रिकोणान्तरालात् कुर्यात् त्रिशूलकम्। दाहव्याप्ते स्वसंयुक्ते लिखेत् तच्छृङ्गमध्ययोः॥६१॥
तत्र संस्थाप्य गदितं विद्याज[6]प्तविभूतिना। भालस्थेनाभिजप्तेन तमाविश्य गदो वदेत्॥ ६२॥
स्वावेशकारणं कर्म स्वापयानक्रमं तथा। ग्रहभूतपिशाचाद्या अस्याविश्यापयान्ति वै॥ ६३॥
(तदेव दासवत् तस्य वशे भवति तद्बलात्।) यन्त्रमेतद्विलिख्याश्मन्यभ्यर्च्य स्थापयेत् क्वचित्॥६४॥
राज्ञो गेहे तस्य राज्ञः क्षमा मुञ्चति नान्वयम्। स्थाने गजानां वाहानां नव कृत्वा नवस्वपि॥६५॥
स्थानेषु स्थापितान्येतान्यर्चयेद् दिनशस्तथा। दिक्षु मध्ये च तत्रैव रोगाः कृत्याः परेरिताः॥६६॥

---

[1] 'सहस्रं प्रोक्तकालेन' क. पाठः। [2] 'अतिदुर्लभम्' ग. पाठः। [3] 'सूत्राणां' क. पाठः। [4] 'कोष्टतः' क. पाठः। [5] 'एकेन' क. पाठः। [6] 'जप' ग. पाठः।

वीक्षितुं भुवनं नैव शक्ताः स्युस्तत्प्रभावतः। चन्द्रचन्दनकाश्मीरैरालिख्याभिनवे पटे।। ६७।।
अभ्यर्च्य विद्याजप्तं तं पटमास्तीर्य शाययेत्। दाहज्वरार्तमचिरान्मुच्यते तज्ज्वरेण सः।। ६८।।
अन्येष्वपि गदेष्वेवं कारयेत् तद्विमुक्तये। समरेषु महीपानां यन्त्रमेतदुदीरितम्।। ६९।।
निःसाने पटहेऽन्येषु वाद्येषु च समालिखेत्। दरदेनाथ तन्मध्ये तामावाह्य समर्चयेत्।। ७०।।
विजयां विजयावाप्त्यै युगपत् ताडयन् व्रजेत्। प्रत्यर्थिसेना तच्छब्दाकर्णनेन पलायते।। ७१।।
दिशो दश भयोद्विग्ना नाभियाति कदाचन। सजीवद्यूतकालेषु यन्त्रमेतद्विनिर्मितम्।। ७२।।
गुलिकीकृत्य तत्कण्ठे[१] बद्ध्वा पश्चात् तु योजयेत्। एतद्दर्शनमात्रेण पलायन्ते दिशो दश।७३।।
निर्जीवेषु च तद्यन्त्रं जयमाप्नोति सर्वतः। नासाध्यं विद्यते तेन वज्रयन्त्रेण पार्वति।। ७४।।
ध्यायेद्वक्त्रं रिपोर्यन्त्रं विद्यां वा लोहितांकृतिम्। तदैव दासवत् तस्य वशो भवति तद्वलात्।७५।।
इति ते विजयानित्यावैभवास्तु समीरिताः।

एतद्वज्र (स्य?स्तु) सुगमत्वान्न विस्तारितः। इति विजयानित्याप्रयोगविधिः।।

अथ सर्वमङ्गलाप्रयोगविधिः। तत्र श्रीतन्त्रराजे– (१९।१७)

जपं तु नित्यशः कुर्यादग्रे तस्याः सहस्रकम्। प्राग्वत् तां साधयेद्विद्यां द्वात्रिंशल्लक्षमानतः।। १।।
होमं दशांशतः कुर्यादन्नाज्याभ्यां घृतेन वा। एवं संसिद्धविद्यस्तु कुर्यात् प्रोक्तानशेषतः।। २।।
प्रयोगानन्यथा तस्य नैष्फल्यमयशो मृतिम्। विदध्यात् तेन तां प्रोक्तक्रमेणाराध्य भक्तितः।। ३।।
संसाध्य पश्चात् कुर्वीत मङ्गलान्मङ्गलोदितान्। प्रयोगार्थां वर्णशक्तीर्वक्ष्ये देवि शृणु प्रिये।। ४।।
सोमसूर्याग्निरूपाश्च ताश्चाष्टत्रिंशदेव ताः। अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः।। ५।।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः।।६।।
एताः षोडश चन्द्रस्य कलाः कल्पद्रुमोपमाः। तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः।। ७।।
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा। एतास्तु[२] शक्तयः प्रोक्ता क्रमाद् द्वादश भानुजाः।।८।।
भकारादिडकारान्तवर्णोच्चारो विलोमतः। धातार्यमा च मित्रश्च वरुणो सौभगस्तथा।। ९।।
विवस्वानिन्द्रपूषार्काः पर्यन्यः समनन्तरः। त्वष्टा विष्णुरिति प्रोक्ता द्वादशार्काः क्रमेण वै।। १०।।
कादिठान्तार्णतनवः सर्वगाः सर्वसिद्धिदाः। धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी।११।।
सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि। यादिक्षान्ताक्षरमयाः शक्तयो दश कीर्तिताः।। १२।।
तेषां दशानां नामानि वासनोक्तानि ते शिवे। कादिक्षान्ताक्षराणां तु द्वात्रिंशन्मिथुनानि वै।। १३।।
प्रोक्तक्रमेण सम्पूज्य विनियुञ्ज्यात् तु सर्वतः। स्वराणां तु स्वतन्त्रत्वात् स्वतन्त्राः शक्तयस्तथा।१४।।
तासां नाथास्तत्सदृशनामरूपाः समीरिताः। मिथुनान्येवमुक्तानि त्रिंशदष्टक्रमेण वै ।।१५।।
तानि सम्पूज्य तत्तेजस्त्रयात्मनि जले शिवे!। प्रोक्तानि देवतारूपाण्यावाह्याभ्यर्च्य तैर्जलैः।१६।।

---

[१] 'स्कन्धं' क. पाठः। [२] 'स्युः' क. पाठः।

अभिषेकात्तु तत्तेजस्त्रयं देव्यात्मता भवेत्।..॥

अत्र स्वरान्विता द्वाविंशतिमिथुनानि सूर्यस्याग्नेश्च कलाद्वाविंशतित्वात् स्वरैर्मिलित्वा अष्टात्रिंशन्मिथुनानीत्यर्थः। तथा –

....................................। वाताद्यैर्ग्रसमायान्तैः षट्सप्ततियुतैः शतैः॥ १७॥
पञ्चभिर्योजयेन्नित्यां विद्यां तां सर्वमङ्गलाम्। ततस्तस्या वनस्थाने स्वरान् षोडश योजयेत्॥ १८॥
ततः सहस्रैर्नवभिर्द्विशतेन च षोडश। रूपाणि नित्याविद्याया जायन्ते परमेश्वरि॥ १९॥
तैर्यन्त्राणि प्रयोगांश्च फलानि च वदामि ते।

अस्यार्थः– वाताद्यैरकाराद्यैर्ग्रसमायानतैर्ग्रासो क्षकारः माया विसर्गस्तत्सहितक्षकारान्तैः षट्सप्तत्युत्तरपञ्चशत(५७६)वर्णैः पूर्णमण्डलरूपैरित्यर्थः। ततः सर्वमङ्गलाविद्याया वनस्थाने औकारस्थाने षोडशस्वरान् योजयेत्। तद्बीजमेव षोडशस्वरयुक्तं कुर्यादित्यर्थः। एवं षोडशस्वरयुक्तसर्वमङ्गलाबीजेन प्रागुक्तपूर्णमण्डलवर्णान् योजयेत्। यथा– स्वंअं स्वंआंस्वंइं स्वंईं इत्यादि स्वंक्षः इत्यन्तं (५७६)। एवं स्वांअं स्वांआं स्वांइं स्वांईं इत्यादि स्वांक्षः इत्यन्तं (५७६)। स्विंअंस्विआंस्विइंस्विंईं इत्यादि स्विंक्षः इत्यन्तं (५७६)। एवं नव सहस्राणि षोडशोत्तरद्विशतवर्णाः (९२१६) जायन्ते इत्यर्थः॥ तथा–

....................................। वृत्तद्वयं विधायास्य बहिः षट्कोणमालिखेत्॥ २०॥
तद्बहिश्चाष्टपत्राब्जं तद्बहिस्तत्त्रयं तथा। कृत्वा तेषु न्यसेद्विद्याकूटान्युक्तक्रमेण वै॥ २१॥
तेष्वाद्यं मध्यतः साध्यसमेतं विलिखेद् बहिः। षट्सु कोणेषु चत्वारि प्रत्येकं विलिखेत् ततः॥२२॥
अष्टच्छदेषु प्रत्येकं पञ्च पञ्च समालिखेत्। बहिर्वृत्तान्तरयुगे मातृकां माययान्विताम्॥ २३॥
विलोमामनुलोमां च स्वेन सम्यक् समालिखेत्। अन्तः षडन्तरालेषु पर्यायदिनसम्भवे॥ २४॥
नित्ये लिखेदग्रतस्तु प्रादक्षिण्येन सर्वतः। एवं यन्त्राणि जायन्ते तैः कूटैरुक्तभेदतः॥ २५॥
शतं च चत्वारिंशच्च चत्वारि च ततः क्रमात्। एवमन्यानि कूटानि प्रोक्तानि विलिखेत् क्रमात्॥२६॥
मध्ये नामसमेतानि तदन्यान्यभितो लिखेत्। त्रयोदशमितैर्लक्षैः सप्तविंशतिसंख्यकैः॥ २७॥
सहस्रैश्च शतेनापि चतुर्भिस्तानि संख्यया। यन्त्राणि तेन[1] जायन्ते तैश्चासौ सर्वमङ्गला॥ २८॥
एवमासां तु नित्यानां यन्त्राणि स्युः पृथक् पृथक्। तस्मादाभिरसाध्यानि न कदाचिच्च कुत्रचित्॥२९॥
विद्यन्ते तेषु यत् किञ्चिद्वक्ष्ये कोऽशेषतो वदेत्। नाथात्मकानि येन स्युस्तेन तानि नवक्रमैः॥३०॥
भित्त्वा षोडशधा देवि विदध्याद्विनियोगकम्। विशालमध्यविन्यासं विधाय नवकोष्ठकम्॥ ३१॥
प्रागादिमध्यपर्यन्तं प्रादक्षिण्यक्रमाल्लिखेत्। नवानि नवसु प्राज्ञे तेषु ऋक्षाणि चालिखेत्॥ ३२॥
सप्तम्या साध्यसयुक्तं नाथान् देवीश्च तत्क्रमात्। यद्यद्धि वाञ्छितं कर्म तत्तत् तेषु विलिख्य वै[2]॥३३॥
पीठे वा भूतले वापि पूजयेत् प्रोक्तवासरे। ततः प्राप्ते वाञ्छितार्थे स्वात्मन्युद्वास्य देवताः॥३४॥
चक्रं प्रक्षाल्य तत् तोयं[3] केदारादिषु निक्षिपेत्। एवमन्यानि यन्त्राणि प्रोक्तानि क्रमतः शिवे॥३५॥

---

१. 'देवि' क. पाठः। २. 'तत्तेषु विनियोजयेत्' ख. पाठः। ३. 'तिर्यक्' क. पाठः।

विनियुञ्ज्यादभीष्टेषु कार्येषु क्रमत: शिवे। परसंख्यासमेतानि तेषु तेष्वप्ययं विधि:।। ३६।।
सर्वत: सौम्यकर्माणि सिध्यन्त्येवानया ध्रुवम्। वश्येषु ज्ञानसम्प्राप्तौ सर्वप्रत्यूहशान्तये[1]।। ३७।।
लक्ष्मीप्राप्तौ तथारोग्यसिद्धौ रोगार्तिशान्तिषु। विजयाय समस्तापत्तारणायाभिवृद्धये।। ३८।।
पुत्राप्त्यै सर्वरक्षायै पूजयेत् तेषु तत्क्रमात्। गजाश्वगोखरोष्ट्राजमहिषीणां विवृद्धये।। ३९।।
तेषां रोगादिपीडासु तच्छान्त्यै च यथाक्रमात्। निर्माय नवयन्त्राणि तत्र तत्रार्चयेच्छिवाम्।। ४०।।
तेषु तेषूक्तकार्येषु तत्तत्सम्प्राप्तिहेतवे । नव प्राकारयुक्तानि षोडश प्रथमादिषु ।। ४१।।
तिथिषु प्रोक्तरूपाणि तत्र तां सर्वमङ्गलाम्। पूजयेद्वाञ्छितावाप्त्यै प्रथमे सर्वदा यजेत्।। ४२।।
एवमेषा महासिद्धिकरी पूजाजपादिना। लघुमन्त्रक्रियामासां पूजां सर्वार्थसिद्धिदाम्।। ४३।।
पूर्णामनतिविस्तारां मङ्गलां ब्रूहि मे शिव। देवर्षिसिद्धगन्धर्वयक्षदेवाङ्गनाश्रयाम् ।। ४४।।
पूजां वक्ष्यामि देवेशि गुह्यां शृणु मनोहराम्। विद्यया कुलसुन्दर्या कराङ्गन्यासपूर्वकम्।। ४५।।
अर्घ्यं तया विधायाथ पीठे चक्रं विधाय तत्। चन्दनागुरुकर्पूररोचनादरदादिषु।। ४६।।
एकेन तत्र ता: सम्यगुक्तरूपमथार्चयेत्। रत्नादिषूक्तेष्वालिख्य प्रतिष्ठाप्यात्र पूजयेत्।। ४७।।
वृत्तस्यायामविस्तारद्वये त्वेकतुरीयत:। वृत्ते विधाय चिह्नानि तेषु सूत्राणि पातयेत्।। ४८।।
त्रयमन्तरतो मुक्त्वा तेन द्वादशकोणकम्। तेंषां मर्मसु मध्ये च विदध्याद् वृत्तयुग्मकम्।। ४९।।
मध्यवृत्तस्य मध्ये तु योनिं कुर्यात् समास्त्रकम्। प्राग्वत् तिस्रोऽर्चयेन्नित्यास्तत्कोणेषु प्रदक्षिणम्।।५०।।
अन्या अन्येषु कोणेषु पूजयेद् द्वादश क्रमात्। अग्रात् प्रदक्षिणं पश्चाद्बलिं दध्याद्यथाविधि।।५१।।
सप्ताक्षर्या केवलया केवलां ललितां जपेत्। नित्यानां ललिताद्यानां षोडशानां च नामभि:।।५२।।
नित्यासप्ताक्षरीभि: स्युर्विद्या: पूजासु सर्वदा। ताभि: षोडशविद्याभिर्नित्यास्ता: षोडशार्चयेत्।।५३।।
तद्विद्याक्षरसंख्यास्तु[2] शृणु वक्ष्ये यथाक्रमम्। प्रथमायाश्च सप्तम्या विद्या स्यात् षोडशाक्षरी।।५४।।
द्वितीयायाश्चतुर्थ्यास्तु चतुर्दशभिरक्षरै:। तृतीयायाश्च षष्ठ्याश्च दशम्या दशपञ्चकम्।। ५५।।
द्वादश्या: सचर्तुदश्या: पञ्चदश्या: क्रमेण वै। पञ्चम्याश्च नवम्याश्च त्रयोदश्यास्त्रयोदश।। ५६।।
एकादश्यास्तु साष्टम्या: षोडश्या द्वादशोदिता:। अस्मिन्नेवार्चयेच्चक्रे चतुर्विंशतिभिस्तथा।।५७।।
सविंशतिशता विद्या जपेत्तास्ताश्च सिद्धये। अन्या विंशत्सप्तशतं तैर्यन्त्रेष्वेव पूजनम्।। ५८।।
आसां पूजाजपाद्येषु यन्त्रेषु च समीरितम्। एतल्लघुप्रकारं तु यन्त्रं सर्वार्थदायकम्।। ५९।।
तेन तत्रोक्तमखिलं साधयेद्वज्ररूपिणा।...।।

इति। अत्र ''वृत्तद्वयं विधाय'' इत्यादिश्लोकषट्कस्यायमर्थ:—प्रथमतो वृत्तद्वयं विधाय तद्बहि: षट्कोणं कृत्वा तद्बहिरष्टदलपद्मं विरच्य तद्बहिर्वृत्तद्वयं कृत्वा मध्ये साध्यगर्भमाद्यकूटं विलिख्य, षट्कोणे प्रतिकोणं चत्वारि चत्वारि कूटानि विलिख्याष्टपत्रेषु प्रतिपत्रं पञ्च पञ्च कूटानि विलिख्य, बहिर्वृत्तान्तरालद्वयस्याभ्यन्तरान्तराले विसर्गसहितां प्रतिलोममातृकां विलिख्य, बाह्यान्तराले बिन्दुयुक्तामनुलोममातृकां विलिख्यान्त: षट्कोणान्तरालेषु पर्यायनित्यातद्दिननित्ययो:

---

[1] 'न्तिषु' क. पाठ:। [2] 'ख्यां' क. पाठ:।

षडक्षराणि स्वाग्रात् प्रादक्षिण्येन विलिखेदिति। एवं मध्यकूटं तथैव स्थापयित्वा द्वितीययन्त्रेऽग्रिमकूटानि विलिखेदेवं तृतीये तदग्रिमकूटानि विलिखेत्। एवमेकस्यैकस्य कूटस्य चतुश्चत्वारिंशदुत्तरशतं (१४४) यन्त्राणि जायन्ते। एवं क्रमेण सर्वाणि यन्त्राणि त्रयोदशलक्षाणि सप्तविंशतिसहस्राणि चतुरुत्तरशतसंख्यानि (१३२७१०४) भवन्ति। एवमन्यासां नित्यानां यन्त्राणि भवन्तीत्यर्थः। यन्त्राणां विनियोगानाह— 'नाथात्मकानि' इति। अस्यायमर्थः— विशालायामं नवकोष्ठात्मकं चक्रं विलिख्यैकैकस्मिन् कोष्ठे सूत्रत्रयनिपातनात् षोडश कोष्ठानि विलिख्यैकैकस्मिन् कोष्ठे एकमेकं यन्त्रं विलिखेत्। एवं चतुश्चत्वारिंशदुत्तरशतं (१४४) यन्त्राणि भवन्ति। नवकोष्ठेषु त्रिरावृत्त्या सप्तविंशतिनक्षत्राणि विलिख्य नवसु नवनाथान् विलिख्य, सप्तम्यन्तं साध्यनाम "वाञ्छितं कर्म देहि" इति विलिख्य प्रोक्तक्रमेण पूजादिकं कुर्यात्, प्रोक्तफलानि भवन्तीत्यर्थः। एवमन्येषां यन्त्राणामपि प्रोक्त एव क्रमो ज्ञेयः। "लघुमन्त्रक्रिया"मित्यादिश्लोकैर्लघुपूजोक्ता। तत्र चतुर्दशारं विलिख्य, मध्ये त्र्यस्रं विधाय तन्मध्ये ललितात्र्यस्रे तिस्रः चतुर्दशस्वरेषु चतुर्दशनित्याः पूज्या इत्यर्थः। तत्तद्विद्याया उच्चारणाशक्तौ नाममन्त्रैः पूजा कार्येत्याह— 'प्रथमायाश्च' इत्यादिश्लोकैः। तेन मन्त्रास्तु तत्तत्संख्यां ज्ञात्वोह्याः। 'अस्मिन्नेवार्चयेच्चक्रे' इत्यादिश्लोकेन चतुश्चत्वारिंशदुत्तरशतकूटानि प्रागुक्तान्यप्यस्मिन्नेव चक्रे जपेदित्यर्थः। अन्यानि नित्याप्रकरणे प्रोक्तानि विंशत्युत्तरसप्तशत (७२०) कूटानि तत्रोक्तयन्त्रेष्वेव पूजयेदित्यर्थः।। तथा—

……………………………………। तद्वज्रं द्विविधं प्रोक्तं कोष्ठकोणात्मभेदतः।। ६०।।
कोणात्मवज्रनिर्माणप्रयोगाः परतः शिवे। तयोस्तु कोष्ठरूपं तु वज्रं वक्ष्ये यथाविधि।। ६१।।
यत्साधकेप्सितावाप्त्यै सुराङ्घ्रिपसमो भवेत्। प्राक्प्रत्यग्दक्षिणोदक्च चतुर्विंशतिसूत्रतः।। ६२।।
नवविंशतिभिः पञ्चशतं कोष्ठानि तेषु वै। कोणेषु मार्जयेत् षड्भिः षष्टिकोष्ठानि पूर्ववत्।। ६३।।
शिष्टेषु[1] वज्रकोष्ठानि पञ्चषष्ट्या शतद्वयम्। तेषु प्राग्वत् त्रिकोणानि चतुर्दिक्षु चतुष्टयैः।। ६४।।
कोष्ठैर्विधायाधो मध्ये बाह्यारम्भात् प्रदक्षिणम्। प्रवेशगत्या विलिखेच्चित्रादिललितान्तकम्।। ६५।।
मध्येऽवशिष्टेष्वन्यार्णचतुर्विंशतिमालिखेत्। ललितार्णचतुर्भेदजनितां नामशक्तियुक् ।। ६६।।
ललितां साध्यगर्भां तु विलिखेन्मध्यकोणतः। एवं यन्त्रं समालिख्य शिलालोहत्रयादिषु।। ६७।।
संस्थाप्य कुत्रचिद् स्थाने पूजयेद्वाञ्छिताप्तये। यस्मिन् देशे वज्रयन्त्रं स्थापितं योजनावधि।। ६८।।
मङ्गलान्येव जायन्ते नामङ्गलकथा [2]क्वचित्। पूजाचक्रे च तासां तु नामानि प्रतिकोणकम्।।६९।।
विलिख्य मध्ये ललितां साध्यगर्भां समालिखेत्। बहिर्वृत्ते मातृकां च तच्चक्रं स्थापयेद् भुवि।।७०।।
तेनापि पूर्ववत् प्रोक्तं देशे न स्यादभव्यकम्। तस्मिन् सर्वत्र संलिख्य तां विद्यां सर्वमङ्गलाम्।।७१।।
मध्ये साध्याक्षरोपेतां स्थापयेत् तत्फलाप्तये। प्रागुक्ते वज्रयन्त्रे वा द्वादशारेऽपि वा शिवे।। ७२।।
संस्थाप्य कुम्भं तद्वर्णभूरुहक्वाथपूरितम्। विद्यया विधिवज्जप्तैरभिषिञ्चेज्जलैः शुभैः।। ७३।।
जन्मर्क्षेषु विशेषेण समस्तामयशान्तये। [3]पूर्णसम्पत्समृद्ध्यै च ग्रहरोगादिशान्तये ।। ७४।।
तथान्यमपि देवेशि प्रयोगं सर्वपावनम्। दारिद्र्यवनदावाग्निं पापाब्धिवडवानलम्।। ७५।।

---

१. 'तु' क.ग. पाठः। २. 'भवेत्' ग. पाठः। ३. 'पूर्वं' क. पाठः।

सङ्कोचध्वान्तमार्तण्डं सन्तोषाब्धिविधूदयम्। प्रागुक्ताक्षरसम्भिन्नां विद्यां नित्यां समाहितः।। ७६।।
मौनी जपेत् प्रसूनैश्च पूजयेत् सौरभान्वितैः। तर्पयेत् सलिलैः सिन्धुगामिनीसम्भवैः शिवे।। ७७।।
सौरभाढ्यैस्तिलैः शुभ्रैस्तण्डुलैर्विधिवद्धुनेत्। संस्थाप्य कुम्भं प्रोक्ताम्बुपूर्णं सम्पूज्य भक्तितः।।७८।।

प्रोक्ताम्बु अक्षरौषधिक्वाथम्।

समस्तं तत् क्रमादेकवारं तैरभिषेकतः। घोराभिचारकृत्यादिदुःखेभ्यो मुच्यते क्षणात्।। ७९।।
भूतप्रेतपिशाचापस्माराराक्षसयक्षकाः। कुमारा गुह्यका वीरा डाकिन्यश्चातिदारुणाः ।। ८०।।
विमुच्य तत्क्षणाद्भीताः प्रयान्त्येवान्यतः क्षणात्। समुद्रगासरित्तोये ताः समावर्तयेत् स्थितः।।८१।।
कण्ठमात्रे मण्डलात्तु[1] प्राग्जन्माद्यैर्विमुच्यते। तथैव घृतहोमेन तर्पणाच्चाब्धिवारिभिः।। ८२।।
एवं सकल[2]कल्याणा सम्प्रोक्ता सर्वमङ्गला। नामानुरूपं भजतां कृपया फलदानतः।। ८३।।
क्षिप्रप्रसादतो नित्यं हर्षोत्पादनतोऽपि च।

इति सर्वमङ्गलानित्याप्रयोगविधिः।।

अथ ज्वालामालिनीनित्यायाः प्रयोगविधिः। तन्त्रराजे– (२०।१४)

अष्टलक्षं हविष्याशी जपेद्विद्यां जितेन्द्रियः। तद्दशांशं तर्पणं च होमं कुर्याच्च गोघृतैः।। १।।
एवं संसिद्धमन्त्रस्तु कुर्याद्यन्त्राण्यनुक्रमात्। पूजाचक्रे बहिर्भूतचतुरस्रे त्वखण्डिते।। २।।
विधाय तत्र विलिखेदक्षराणि यथाविधि। सर्वमध्ये तारगर्भे शक्तिमाख्यासमन्विताम्।। ३।।
त्रयं च त्रिषु कोणेषु षट्सु षट्कमथाष्टसु। अष्टकं बहिरप्येवं बाह्ये दिक्षु नव क्रमात्।। ४।।
एवं मूलाक्षरैः कृत्वा यन्त्रं तेनैव साधयेत्। समस्तं वाञ्छितं पूजाधारणस्थापनैः शिवे।। ५।।

अथैतद्यन्त्ररचनाप्रकारः– तत्र मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बहिरष्टास्रं तद्बहिरष्टदलकमलं तद्बहिर्द्वाररहितं चतुरस्रमिति चक्रं निर्माय, मध्ये साध्याख्यागर्भं मायाबीजं प्रणवोदरे विलिख्य त्रिषु कोणेषु त्रीण्यक्षराणि षट्सु कोणेषु षडक्षराणि चाष्टकोणेष्वष्टाक्षराणि अष्टदलेष्वष्टाक्षराणि चतुरस्रे प्रागादिदिक्ष्वष्टावक्षराणि मूलमन्त्रस्य लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा–

अकारादिक्षकारान्तवर्णेषु स्वरयोगिषु। चतुष्टयं प्रोक्तयन्त्र[3] वर्णैस्तत्स्थानतो लिखेत्।। ६।।
शिष्टमेकं लिखेत्मध्ये साध्याक्षरसमन्वितम्। एवं यन्त्राणि जायन्ते दश तेषामनुक्रमात्।। ७।।
विनियोगात् फलावाप्तिं प्रवक्ष्यामि शृणु प्रिये। यैरिष्टमखिलं प्राप्नोत्ययत्नात् साधको ध्रुवम्।।८।।
द्वितीयादीनि यन्त्राणि मातृकार्णयुतानि वै। क्रमान्नवग्रहाणां स्युस्तत्तद्द्वारेषु तद्दिशि ।। ९।।
तेषु देव्यर्चनात् प्रीतास्त्वनिष्टं ते न कुर्वते। राहुकेतू स्थितौ यत्र तद्राश्यधिपवारके।। १०।।
षडस्राष्टान्तरालेषु ग्रहनाम द्वितीयया। विभक्त्या भाजने सम्यक् प्रीणयामीति संलिखेत्।। ११।।
आद्ये तु यन्त्रे संलिख्य प्रोक्तक्रममथार्चयेत्। सर्वेष्वपि च वारेषु सर्वेषां प्रीतिसिद्धये।। १२।।
अनिष्टशान्त्यै नियतमर्चयेत् तान् ग्रहान् प्रिये। एवं यन्त्रेषु दशसु पूजिता नित्यया सह।। १३।।

---

१. 'मज्जनात्' ख. पाठः। २. 'सङ्कल्प्य' ग. पाठः। ३. 'न्त्रे' ख. पाठः।

प्रीताः क्रूरा अपि तथा क्रूरस्था अपि सर्वदा। सौम्याः सौम्यगतानां तु फलान्येव वितन्वते।।१४।।
दशस्वपि च यन्त्रेषु दरदैर्गैरिकैस्तु वा। लिखितेष्वर्चितेष्वेवं कुमारं कन्यकां तु वा।। १५।।
सुशुभावयवां मुग्धां स्नातां धौताम्बरां शुभाम्। तथाविधं कुमारं वा संस्थाप्याभ्यर्च्य विद्यया।।१६।।
[1]स्पृष्टशीर्षो जपेद्विद्यां शतवारं तथार्चयेत्। प्रसूनैररुणैः शुभ्रैः सौरभाढ्यैरथापि वा।। १७।।
दद्याद् गुग्गुलधूपं च यावत्कार्यावसानकम्। ततो देव्या समाविष्टे तस्मिन् सम्पूज्य भक्तितः[2]।।१८।।
ततस्तामुपचारैस्तैः प्रागुक्तैर्विद्यया वशी। प्रजपेत् तां ततः पृच्छेदभीष्टं कथयेच्च सा।। १९।।
भूतं भवद्भविष्यं च यदन्यन्मनसि स्थितम्। जन्मान्तराण्यतीतानि सर्वं सम्पूजिता वदेत्।। २०।।
ततस्तां प्राग्वदभ्यर्च्य स्वात्मन्युद्वास्य तां जपेत्। सहस्रवारं स्थिरधीः पूर्णात्मा विचरेत् सुखी।।२१।।
तथा षट्कोणकोणेषु मध्ये चालिख्य दाहकम्। तत्र संस्थाप्य गदिनमभ्यर्च्योदीरितक्रमात्।। २२।।
आवेश्य रोगिणं रोगं पृच्छेत् तत्कारणं शमम्। प्रोक्त्वा तत्सकलं तस्य निर्देशादपयाति च।।२३।।
प्रथमं स्त्रीकपालस्य मध्यस्थं तापयेन्निशि। जपन् विद्यां स्मरन् साध्यां सद्य आकृष्यतेऽथ सा।।२४।।
भीतिलज्जाभिमानादिरहिता वेपिताङ्गका। निरस्तेतरसद्भावा मन्मथार्ताभियाति सा।। २५।।
तद्यन्त्रं पुंस्कपालस्थं स्थापयेत् प्रजपेत् तथा। राजानो राजपुत्रा वा तथान्ये वापि केचन।। २६।।
विवेकविधुरा मूढास्त्यक्ताजातिकुलक्रमाः। वशगा दासवद्भूमौ तिष्ठन्त्यामरणाद् ध्रुवम्।। २७।।
सर्वासामपि नित्यानामुपदेशेषु तं गुरुः। तत्र चक्रस्य मध्यस्थं चेष्टविद्याजपान्वितम्।। २८।।
वह्निज्वालापरीताङ्गं भावयन्निन्द्रियाण्यपि। मनःषष्ठानि [3]वाकर्षेन्मनसा प्राग्वदात्मनि।। २९।।
एवं कृते क्षणादेवं विसंज्ञो निपतेद् भुवि। ततस्तमुत्थाप्य मुखे प्रक्षिप्ताम्बु[4] वदेत्ततः।। ३०।।
एष वेधस्त्रिधा प्रोक्तः सद्यः प्रत्ययकारकः। शाक्तशाम्भववेधाभ्यां द्वयोरा[5]त्मैक्ययामलात्।।३१।।
शिष्यस्य मूलाधारादिस्थानेषु ब्रह्मरन्ध्रके। स्मर दाहार्णकान् सप्तेत्युक्त्वा प्राग्वदुदीक्षणात्।। ३२।।
विदध्याच्छाक्तवेधं तुं देशिकः सिद्धविद्यया। शाम्भवं तु शृणु प्राज्ञे वेधमद्भुतविग्रहम्।। ३३।।
तूष्णीं संस्थापितं शिष्यं तत्तच्चक्रे तदात्मना। स्वयं प्रविश्य तद्देहमेकीभूत्वा पुनः स्वके।। ३४।।
समागत्यात्मरूपेण तदात्मानं विभाव्य वै। कृतन्यासजपार्चस्तु तत्तनुं वह्निना दहेत्।। ३५।।
स्यादेष शाम्भवो वेधः प्रोक्तः प्रागेव यामलः। इति वेधत्रयं प्रोक्तं [6]भावनासिद्धिसूचकम्।। ३६।।
यामले तु विशेषोऽयं विद्धः[7] पश्चद्गुरोः श्रुतम्। ज्ञानमन्यच्च सकलं सङ्क्रमेत् तेन तत्समः।।३७।।
रक्तचन्दनपङ्केन लिखित्वा प्रथमं शिवे। लोहैर्विरचिते पट्टे फलकायां शिलातले ।। ३८।।
भूमौ वा सुसमे शुद्धे लोष्ठाङ्गारविवर्जिते। देवीमावाह्य तत्रैव पूजयेच्छक्तिभिर्वृताम्।। ३९।।
दिनं दिनत्रयं सप्तवासरं पक्षमेव वा। मासं मण्डलमित्येवं क्रमादिष्टमवाप्नुयात्।। ४०।।

---

१. 'स्पृष्ट्वा शीर्षे' ख. पाठः। २.'यत्नतः' ख. पाठः। ३. 'चा' ख. पाठः। ४. 'क्षिप्त्वार्घ्याम्बु' ख. पाठः।
५. 'रैक्यात्मकयामलात्' ख. पाठः। ६. 'त्वद्भाव' ख. पाठः। ७. 'सिद्धः' ख. पाठः।

वश्यमाकर्षणं स्तम्भं निग्रहं लाभमीप्सितम्। अन्यच्च सकलं त्विष्टमवाप्नोत्यर्चनाद् द्रुतम्।।४१।।
तदा प्रोक्तगदान् सर्वान् जयेदन्यांस्तथाखिलान्। साधयेत् प्रथमेनैव यन्त्रेणायत्नतः शिवे।। ४२।।
द्वितीयं दरदैः[1] कृत्वा प्रोक्तेषूच्चगते रवौ। पूजयेत् प्रोक्तकालेन फलान्युक्तान्यवाप्नुयात्।। ४३।।
विलिख्य राजते पट्टे जपित्वा दिनशः स्पृशन्। सहस्रवारं तां नित्यां विद्यां तद्वासिताम्बुभिः।।४४।।
स्नानं पानं पाकजातं कुर्यादुक्तदिनं ततः। प्रमेहैस्त्रिविधैर्घोरैर्मूत्रकृच्छ्रैः सुदारुणैः ।। ४५।।
अश्मरीमूत्रघातादिरोगैर्मुक्तः सुखी भवेत्। जीवेच्च सुचिरं भूमौ नीरोगः स्वस्थमानसः।। ४६।।
तृतीयं गैरिकैः कृत्वा वैरिनक्षत्रवृक्षजे। तले भूमौ ततः खात्वा तत्राग्निं ज्वालयेत्सदा।। ४७।।
प्रोक्तैस्तैर्वासरैर्वैरी दाहज्वरगदादिभिः। तच्च नोद्धृत्य सलिले प्रक्षिपेच्चेद्विनश्यति।। ४८।।
चतुर्थं रोचनापङ्कैरालिख्योक्तप्रपूजनात्। प्राप्नोति विजयं प्रोक्तेष्वखिलेषु सुनिश्चितम् ।। ४९।।
वादे च द्विविधे द्यूते ग्रहेष्वन्येषु सर्वतः। सर्वदा जयिनः सर्वे भवन्त्येतस्य वैभवात्।। ५०।।
पञ्चमं कुङ्कुमैः कृत्वा तत्र तत्पूजनाद्दिनैः। वशे भवन्ति मनुजा दन्तिनो वाजिनः स्त्रियः।।५१।।
षष्ठं हरिद्रामालिख्य कर्पटे नामसंयुतम्। मन्दोच्चे स्थापयेत् क्वापि सुबद्धं त्विष्टकापुटे।। ५२।।
शत्रोर्जिह्वां गतिं दोषं[2] दिव्यं राज्ञां समुद्यमम्। वादेच्छां सकलं चान्यदनिष्टं स्तम्भयेद् ध्रुवम्।।५३।।
सप्तमं चन्दनैरिन्दुमिलितैरालिखेत्तथा[3]। तत्रार्चयेत् नित्यशस्तां सन्ध्यासु भुवने निजे।। ५४।।
तद्दिनैरिन्दिरा तस्य सर्वलोकातिशायिनी। भवत्येव महेशानि विचित्रा यन्त्रशक्तयः।। ५५।।
अष्टमं त्वगुरुक्षोदैरालिखेत् फलकापुटे। पीठे वा तत्र तां देवीं गुरावुच्चगते दिने।। ५६।।
तदुच्चकाले सुरभिप्रसूनैस्त्वेवमर्चयेत्[4]। वासांसि च विचित्राणि भूषणान्यप्यवाप्नुयात्।। ५७।।
मृगस्वेदैस्तु नवममालिख्याभ्यर्च्य तत्र ताम्। तदालिप्तो व्रजेद्यत्र कुत्रापि जनसंसदि।। ५८।।
सर्वे तं गुरुवद् बुद्धा वशे स्युर्वनिता यदि। तदिष्टसाधिका यावज्जीवमस्यानुभावतः।। ५९।।
विलिखेद् दशमं प्रोक्तद्रव्यैः सर्वैस्तथैकशः। [5]सद्यस्तैरीरितं सर्वं कार्यमेतत् सुसाधयेत्।। ६०।।
प्रोक्तेषु दशसु प्रोक्तद्रव्यैरालिख्य तेषु च। संस्थाप्य कुम्भं विधिना जापत्वोग्रग्रहे[6] तदा।। ६१।।
अभिषिञ्चेत् तद्ग्रहस्य दोषस्थानगतं फलम्। न भवेच्छुभमेव स्यादेवं यन्त्रेष्वशेषतः।। ६२।।
तथा तदुच्चे तत्पूजां होममन्नाज्यपायसैः। निवेद्य च प्रणम्यार्घ्ययुतं दद्याच्छिवात्मवान्।। ६३।।
तत्तद्ग्रहार्तिषु क्षिप्रं ते ग्रहास्तत्प्रभावतः। एकादशस्थफलदा नित्यशो यजनादपि।। ६४।।
सुवर्णे रजते वा तद्यन्त्रेष्वन्यतमं शिवे। विलिख्याभ्यर्च्य तद्विद्याविदे दद्यात् सुपूजितम्।। ६५।।
षोडशद्वादशनवषट्त्रिनिष्कप्रकल्पितम्। नित्यार्चकस्य नित्यानामेकां पूजयितुं तु वा।। ६६।।
दद्याद् गन्धादिनार्च्यैतं प्रणम्य ग्रहविग्रहम्। पश्चिमामुखमासीनं तस्मै प्रोक्तविधानतः।। ६७।।
विद्याजप्ताम्बुपानेन वर्धते कुक्षिगोऽनलः। भुक्ते च जठरस्पर्शजपादपि सुनिश्चितम्।। ६८।।

---

१. ‘दे’ ख. पाठः। २. ‘शेषं’ ग. पाठः। ३. ‘ततः’ ग. पाठः। ४. ‘रर्चयेत्तथा’ ग. पाठः। ५. ‘यद्यत्तैः’ ख. पाठः।
६. ‘उग्रे’ ख. पाठः।

मेषादिराशिगे भानौ मासेषु द्वादशस्वपि। प्रोक्तेषु दशयन्त्रेषु प्रत्येकं त्रित्रिवासरम्।। ६९।।
पूजयेदेवमब्देन धनधान्यगृहादिभिः। समृद्धो जीवति चिरमरोगः सुमना भुवि।। ७०।।
यद्राशौ यो ग्रहस्तिष्ठत्येको द्वौ बहवोऽथवा। तद्दिनेषु तदुच्चेषु कालेषु च तदर्चनात्।। ७१।।
तत्तद्ग्रहाः सुसम्प्रीताः पालयन्त्यनिशं च तम्। तथा तर्पणहोमाभ्यां जपदानादिनापि वा।। ७२।।
नवस्वपि च यन्त्रेषु नवग्रहमयत्नतः। तत्तत्क्षोभं विलिख्यान्तः पूजयेद्वैरिमर्दने।। ७३।।
रिपुनामयुतान्युक्तान्यालिख्य रविचन्द्रयोः। उपरागे समे भूमौ दिनशो जयमाप्नुयुः।। ७४।।
विद्याक्षरौषधानां तु प्रत्येकं कर्षमर्पितम्। भाण्डे नवे पञ्चगव्ये खारिमाने पचेच्च तत्।। ७५।।
विद्यया संस्कृते वह्नौ ततस्तदुदरोत्थिते। घृतेन विद्यया हुत्वा तद्भस्मादाय तत्र वै।। ७६।।
यन्त्राणि दश निष्पाद्य तत्र देवीं यजेत्तथा। ततस्तद्भस्म सङ्गृह्य निदध्याद् दिनशोऽर्चयेत्।। ७७।।
तद्भस्म सर्वरक्षाकृत्सर्वाभिरपि साधयेत्। गदचोरग्रहारिष्टक्लेशा न स्युश्च तद्गृहे ।। ७८।।
नित्यशो धारणे देहे श्रीकण्ठाद्यैर्विलेपितम्। भक्षणं सर्वकृत्यादिदुरितार्तिविभञ्जकम्।। ७९।।
वह्न्यक्षरेषु दशसु व्यञ्जनैः सप्तभिः पृथक्। स्वरत्रयं क्रमाद्युञ्ज्यात् तेन तान्येकविंशतिः।। ८०।।
त्रिकोणद्वयमालिख्य बाह्याभ्यन्तरयोगतः। तदन्तर्वृत्तमध्यस्थं षडस्रं च विधाय तु।। ८१।।
नामाद्यं विलिखेन्मध्ये षट्कोणेषु च षट् क्रमात्। विलिखेदग्रमारभ्य प्रादक्षिण्येन पार्वति।। ८२।।
त्रिकोणान्तरतो लिख्य चतुर्दश तथा क्रमात्। शिष्टे साध्याक्षरं त्वग्रे लिखेत् पञ्चदशस्वपि।।८३।।
क्रमेण मध्ये त्वन्येषां निवेशादेकविंशतिः। भवन्ति यन्त्राणि तथा तैः कुक्ष्यग्निः प्रवर्धते।। ८४।।
त्रिकोणाकारके पट्टे ताम्रे तानि विलिख्य वै। स्पृशन् विद्यां जपेल्लक्षं तद्वर्णकृतसम्पुटाम्।।८५।।
तत्तोयभाण्डे दिनशो निक्षिपेज्जपपूजितम्। तत्तोयैः[1] पाकपानाभिषेकतो भवति ध्रुवम्।। ८६।।
प्रदीप्तिर्जठराग्नेस्तु प्राग्जन्माघक्षयेण वै। जायते परमेशानि नित्यानां वैभवादिति।। ८७।।

अथैतद्यन्त्ररचनाप्रकारः—प्रथमतः षट्कोणं विरच्य तद्बहिर्वृत्तं तद्बहिरन्तर्बहिर्विभागेन त्रिकोणद्वयं विधाय वह्नेर्दशाक्षरेषु सप्तव्यञ्जनानि स्वरत्रययोगेनैकविंशतिर्भवन्ति। तेष्वाद्यं साध्यनामगर्भं मध्ये विलिख्य द्वितीयादिषडक्षराणि षट्सु कोणेषु विलिख्यावशिष्टचतुर्दशाक्षराणि त्रिकोणद्वयान्तरालेऽग्रात् प्रादक्षिण्यक्रमेणावेष्ट्य शिष्टे वह्न्यक्षरे साध्यनामगर्भं कृत्वाग्रेषु विलिखेत्। एवं मध्याक्षरभेदेनैकविंशतिर्भवन्ति, प्रोक्तफलेषु योज्यानि प्रोक्तफलानि भवन्ति।। इति ज्वालामालिनीनित्याप्रयोगः।।

अथ विचित्रानित्याप्रयोगविधिः। तत्र श्रीतन्त्रराजे—(२१। १३)

काम्यहोमविधिं वक्ष्ये शृणु सर्वार्थदायकम्। येनातिमन्दभाग्योऽपि श्रीमान् भोक्ता सुखी भवेत्।।१।।
मधुरत्रयसंसिक्तैररुणैरम्बुजैः श्रियम्। प्राप्नोति मण्डलाद्धोमात् सितैस्तैश्च महद्यशः।। २।।
क्षौद्राक्तैरुत्पलैः रक्तैर्हवनात् प्रोक्तकालतः। सुवर्णं समवाप्नोति निधिं वा वसुधां तु वा।। ३।।
क्षीराक्तैः कैरवैर्होमात् प्रोक्तकालमवाप्नुयात्। धान्यानि विविधान्याशु सुभगस्तु भवेन्नरः।। ४।।
आज्याक्तैरुत्पलैर्होमाद्वाञ्छितं समवाप्नुयात्। तदक्तैरपि कह्लारैर्हवनाद्राजवल्लभः।। ५।।

---

[1] 'तत्तोयेनान्नपाकाभि' ख. पाठः।

पलाशपुष्पैस्त्रिस्वादुयुक्तैस्तत्कालहोमत:। चतुर्विधं तु पाण्डित्यं भवत्येव न संशय:।। ६।।
लाजैस्त्रिमधुरोपेतैस्तत्कालहवनेन वा। कन्यकां लभतेऽयत्नात् समस्तगुणसंयुताम्।। ७।।
नारिकेलफलक्षोदं ससितं सगुडं तु वा। क्षौद्राक्तं जुहुयात् तद्वदयत्नाद् धनदोपम:।। ८।।
तथैवान्नाज्यहोमेन सतण्डुलतिलैरपि। प्रसूनैररुणैस्तद्वत् तथा बन्धूकसम्भवै:।। ९।।
सितै: प्रसूनैर्वाक्सिद्धिं हवनात् समवाप्नुयात्। सितरक्तैस्तु मिलितैरायुरारोग्यमाप्नुयात्।। १०।।
दूर्वात्रिकैस्त्रिमध्यक्तैर्हवनात्तु जयेद्गदान्। तथा गुडुच्या होमेन पायसेन तिलेन च[1] ।। ११।।
श्रीखण्डपङ्ककर्पूरमिलितै: शतपत्रकै:। हवनाच्छ्रियमाप्नोति या तदन्वयगामिनी ।। १२।।
कुङ्कुमं हिमतोयेन पिष्ट्वा कर्पूरसंयुतम्। तत्पङ्कमर्दितैर्होमात् कह्लारैर्विकचै: शुभै:।। १३।।
राजकल्प: श्रिया भूयाज्जीवेद्वर्षशतं भुवि। नि:सपत्नो निरातङ्को निर्द्वन्द्वो निर्मलाशय:।। १४।।
इक्षुकाण्डस्य शकलैर्हवनाद्वस्त्रमाप्नुयात्। तथैव करवीरोत्थै: प्रसूनैररुणै: सितै: ।। १५।।
क्षौद्राक्तै: पाटलीपुष्पैर्हवनाद् वशयेद् वधू:। तथैव चम्पकैर्होमाद्रूपाजीवां वशं नयेत्।। १६।।
सरूपवत्सासितगोक्षीराक्तसितहोमत: । लभतेऽनुपमां लक्ष्मीमपि पापिष्टचेतन: ।। १७।।
सौवीराक्तैस्तु कार्पासबीजैस्तत्कालहोमत:। अर्धेन्दुकुण्डे नियतं विद्विष्टा रिपवोऽम्बिके।। १८।।
अरिष्टपत्रैस्तद्वीजैस्तत्तैलाक्तैस्तथा हुतै:। मृत्युबीजैर्निम्बतैलसिक्तैर्होमात्तु दन्तिन: ।। १९।।
रोगार्तास्तुरगास्तद्वत् तत्पञ्चाङ्गैर्हुतैर्ध्रुवम्। अक्षबीजैस्तु तैलाक्तैर्होम: सर्वविनाशन:।। २०।।
करञ्जबीजैस्तत्सिक्तैर्होमाद्वैरी पिशापवान्[2]। तथैवाक्षतरुद्भूतपञ्चाङ्गहवनादपि।। २१।।
निम्बतैलाप्लुतैरक्षद्रुमबीजैस्तु होमत:। तद्दिनै: स्यादपस्मारी वैरी भवति निश्चितम्।। २२।।
अरातेर्जन्मनक्षत्रवृक्षेन्धनगतेऽनले। तद्योनिपिशितैस्तैश्च हवनं मृत्युकृद्रिपो: ।। २३।।
यक्षाक्षबीजै: सर्षपतैलाक्तैर्हवनात् तथा। जायन्ते वैरिण: कुष्ठरोगा देहविलोपका:।। २४।।
मरिचै: सर्षपैर्होमात् तैलाक्तैर्मध्यरात्रके। दाहज्वरेण ग्रस्त: स्यादरातिस्तद्दिनैर्ध्रुवम्।। २५।।
एवं निग्रहहोमेषु स्वरक्षायै तथान्वहम्। स्निग्धै: सम्प्राप्तमन्त्रैस्तु[3] जपहोमादि कारयेत्।। २६।।
मृत्युञ्जयेन वा तद्वत् प्रयोगस्ताभिरेव च। विद्याभिरन्यथासिद्धमन्त्रमाशु विनाशयेत्[4]।। २७।।
प्रागुक्तानां तु कुर्वीत निग्रहं स्वस्य रोषत:। वित्ताशया वा न कदाप्याचरेद्भूतिकामुक:।। २८।।
नित्यक्लिन्नाविधौ प्रोक्तैस्तर्पणैस्तानि साधयेत्। अनया विद्यया कर्माण्यशेषाणि महेश्वरि।। २९।।
अथ यन्त्राणि वक्ष्यामि नानाभीष्टप्रदानि वै। यै: सर्वे सर्वदा सर्वसमीहितमवाप्नुयु:।। ३०।।
स्वरयुक्तलिपिव्रातगर्भां विद्यां समालिखेत्। सर्वत्रोक्तेषु विधिवत् स्थानेषु परमेश्वरि।। ३१।।
त्रिकोणं वृत्तयुग्मं च षट्कोणं तद्द्वयं तथा। तद्बहि: षड्दलं पद्मं तत्त्रयं च समालिखेत्।। ३२।।
आद्यकूटं लिखेत् साध्यगर्भं मध्ये विधानत:। त्रिकोणेषु च षट्कोणे षट्पत्रेषु समालिखेत्।। ३३।।

---

१. 'वा' ख. पाठ:। २. 'वैरिविनाशन:' ख. पाठ:। ३. 'सद्विद्य:' ख. पाठ:। ४. 'मायाशु नाश' ख. पाठ:।

कूटान्यन्यानि चोक्तानि तत्र पञ्चदशान्यपि। अन्तर्वृत्तान्तरद्वन्द्वे भूतार्णांश्च क्रियोचितान्।। ३४।।
ससाध्यकर्मवर्णैश्च बहिर्वृत्तान्तरद्वये। मातृकां विलिखेन्मायाबिन्दुयुक्तां क्रमोत्क्रमात् ।। ३५।।
एवं षड्विंशतिविधं यन्त्रं कुर्याद्विचक्षणः। परस्तात्तु शतेनापि षष्ट्या कूटैर्लिखेत् पविम्[1] ।। ३६।।

इति। अथैतद्यन्त्ररचनाप्रकारः—मध्ये त्रिकोणे तद्बहिर्वृत्तद्वयं तद्बहिः षट्कोणं तद्बहिः पुनर्वृत्तद्वयं तद्बहिः षड्दलं पद्मं तद्बहिर्वृत्तत्रयमिति यन्त्रं विलिख्य, तन्मध्ये षोडशस्वरयुक्तमूलविद्यायाः प्रथमं कूटं साध्यगर्भं विलिख्य त्रिकोणेषु कूटत्रयं षट्कोणेषु षट्कूटानि षड्दलेषु षट्कूटानीति षोडश कूटानि विलिख्याभ्यन्तरवृत्तान्तराले साध्यनामयुक्तं तत्तत्कर्मानुसारितत्तद्भूताक्षराणि द्वित्रिद्वित्रिक्रमेण षट्कोणाद्बहिर्वृत्तान्तराले तान्येव भूताक्षराणि तथैव कर्मयुक्तानि विलिख्य, बहिर्वृत्तान्तरालद्वयेऽभ्यन्तरान्तराले विसर्गयुक्तमातृकामनुलोमां विलिख्य तद्बहिरन्तराले बिन्दुयुक्तां विलोममातृकां विलिखेत्। एवं द्वितीययन्त्रे मध्ये साध्यगर्भं द्वितीयं कूटं विलिख्य प्रागुक्तक्रमेणान्यानि पञ्चदशकूटानि विलिखेत्। एवं तृतीयकूटादीनि तृतीयादिषु यन्त्रेषु विलिखेदिति षोडशयन्त्राणि निष्पाद्य, प्रागुक्तामृतबीजपञ्चकं षोडशस्वरसंयुक्तं कृत्वा तान्यशीतिबीजानि विन्दुयुक्तानि विसर्गयुक्तानि च षष्ट्युत्तरशतबीजानि कुर्यात्। ततस्तेषु प्रथमं मूलविद्यया सहितं मध्ये विलिख्य पञ्चदशबीजानि त्रिकोणादिषु विलिखेत्। एवं षोडशषोडशबीजैर्दशयन्त्राणि विलिखेत्। एवं प्रागुक्तैः षोडशयन्त्रैः सह षड्विंशतिर्यन्त्राणि भवन्तीत्यर्थः।।

अथ सप्तविंशतितमं वज्ररूपं यन्त्रमाह—

प्राक्प्रत्यक्दक्षिणोदक् च सूत्राण्यष्टादश क्षिपेत्। तैस्तु कोष्ठानि जायन्ते नवाशीतिशतद्वयम्।।३७।।
तत्र कोणेषु कोष्ठानि द्वात्रिंशन्मार्जयेत् तदा[2]। ततो वज्रं भवेन्मध्ये त्वेकषष्ट्या शतात्मकम्।।३८।।
अस्य[3] दिक्षु त्रिकोणानि विदध्यादेककोष्ठतः। मध्ये कोष्ठे लिखेद्विद्यां साध्याख्याकर्मसंयुताम्।।३९।।
त्रिकोणेषु तु तत्कूटान्यालिखेत् साध्यवन्ति च। प्राग्वदारभ्य विलिखेत् प्रादक्षिण्यप्रवेशतः।।४०।।
एतद्वज्रं महायन्त्रं समस्तापन्निवारणम्।

अथैतद्यन्त्ररचनाप्रकारः—प्राक्प्रत्यग्दक्षिणोदक् चाष्टादशाष्टादशसूत्रपातनेन नवाशीत्युत्तरशतकोष्ठानि विरच्य, चतुर्दिक्षु द्वात्रिंशद् द्वात्रिंशत् कोष्ठानि मार्जयित्वा एकषष्ठ्युत्तरशत(१६१)कोष्ठात्मकं वज्ररूपं विधाय चतुर्दिक्षु एकैकं कोणं[4] मार्जयित्वा त्रिकोणानि विधाय, मध्ये साध्यनामगर्भां मूलविद्यां विलिख्य चतुर्दिक्षु चतुस्त्रिकोणेषु प्रागुक्तामृतबीजानामादितश्चतुर्बीजानि साध्यनामयुक्तानि विलिख्य, पञ्चमबीजमारभ्य बाह्यतः प्रवेशगत्या प्रादक्षिण्येन सर्वाणि कोष्ठानि पूरयेदिति।। तथा—

समस्ताभीष्टदं सर्वविजयश्रीप्रदं शुभम्। सप्तविंशतिरुक्तानि यन्त्राण्येवं महेश्वरि।। ४१ ।।
सप्तविंशतिनक्षत्रम[5]यान्येतानि येन वै। तेन तान्येव सप्तम्या विभक्त्या साध्यमालिखेत्।। ४२ ।।
तानि तत्तद्दिनेष्वेवं विखिलेत् स्थापयेदपि। फलानि तेषां क्रमशो वदाम्युक्तक्रमेण वै।। ४३ ।।
विनियोगक्रमं चैव सुस्फुटं परमेश्वरि। प्रथमेनार्चितेन [6]स्याद्रोगा नश्यन्त्यशेषतः।। ४४।।
स्ववेश्मनि विधायैतत् पीठे भूमितलेऽपि वा। प्रोक्तद्रव्याणि सम्पिष्य तत्पङ्केनाथ सुस्फुटम्।।४५।।
त्रिरात्रं सप्तरात्रं वा सप्तविंशतिरात्रकम्। सम्पूज्य तत्र कुम्भं तु विद्यौषधिजलान्वितम्।। ४६।।

---

१. 'सुधीः' ख. पाठः। २. 'तथा' ख. पाठः। ३. 'तस्य' ख. पाठः। ४. 'कोष्ठं' ग. पाठः। ५. 'समान्येतानि चेदपि' ख. पाठः। ६. 'स्यादिति अव्ययमिदमाख्यातप्रतिरूपकम् अवधारणार्थम्।

निधायाभ्यर्च्य गदिनमभिषिञ्चेत् ततः सुखी। एवमन्यानि यन्त्राणि प्रोक्तेषु विनियोजयेत्।। ४७।।
तेषां विलेखनद्रव्याण्याकर्णय वदामि ते। कुचन्दनं चन्दनं च सिन्दूरं सेन्दुरोचनम्।। ४८।।
काश्मीरमगुरुं कुष्ठमेलाकक्कोलजातिभिः। स्वर्क्षवृक्षैर्द्वादशभिर्हिमाम्बुपरिपेषितैः ।। ४९।।
जलैर्नक्षत्रवृक्षोत्थै रसैर्वा सूक्ष्मपेषितैः। द्वितीयं विजयप्राप्त्यै विदध्यात् प्रोक्तरूपतः।। ५०।।
वादे विवादे समरे द्यूतेषु च जयी भवेत्। तृतीयाद्येषु नवसु ग्रहान् नव समर्चयेत्।। ५१।।
देव्यात्मरूपान् तेनास्य तैर्बाधा न भवेद् ध्रुवम्। स्तम्भयेद् द्वादशेनाशु प्रोक्तक्रमविधानतः।। ५२।।
सङ्ग्रामगमनं वर्षामुद्योगं वाचमाग्रहम् । त्रयोदशाद्यैर्वज्रान्तैर्यन्त्रैस्तिथिमयैरपि ।। ५३।।
तत्तत्तिथिषु तैः प्राग्वद्वाञ्छितान् प्राप्नुयाद् ध्रुवम्। तेषु तेषु तु यन्त्रेषु तत्तत्तिथिदिनाधिपान्।। ५४।।
वारेशानपि सम्पूज्य तत्तत्फलमवाप्नुयात्। कार्योद्योगेषु रोगेषु[1] वाञ्छितेष्वितरेष्वपि ।। ५५।।
वारर्क्षतिथिसम्प्रोक्तयन्त्रे तां तैश्च देवतैः। आवृतामर्चयेदग्निरक्षोवाय्वीशदिग्गतैः ।। ५६।।
रोगशान्तिसमुद्योगफलाभीष्टान्यवाप्नुयात् । वाराणामधिपाः प्रोक्तास्तिथिनक्षत्रदेवताः ।। ५७।।
ऋक्षवृक्षांस्तथा योनीर्वदामि[2] परमेश्वरि। वह्निदस्त्रावुमा विघ्नो भुजङ्गः षण्मुखो रविः।। ५८।।
मातरश्च तथा दुर्गा दिशो धनदकेशवौ। यमो हरः शशी चेति तिथीशाः परिकीर्तिताः।। ५९।।
नक्षत्रदेवताश्चापि शृणु वक्ष्ये यथाविधि। अश्विनौ च यमो वह्निर्धाता चन्द्रः शिवोऽदितिः।। ६०।।
गुरुः सर्पाश्च पितरस्त्वर्यमा भग एव च। दिनकृच्च तथा त्वष्टा मरुदिन्द्राग्निमित्रकाः।। ६१।।
इन्द्रो निर्ऋतितोयाख्यौ विश्वेदेवा हरिस्तथा। वसवो वरुणः पश्चादज एकपदस्तथा।। ६२।।
अहिर्बुध्न्यस्तथा पूषा प्रोक्ता नक्षत्रदेवताः। कारस्करश्चामलकोदुम्बरो जम्बुकस्तथा।। ६३।।
खदिरः कृष्णवंशौ च पिप्पलो नागरोहिणौ। पलाशप्लक्षकाम्बष्ठबिल्वार्जुनविकङ्कताः।। ६४।।
बकुलः सरलः सर्जो वञ्जुलः पनसस्तथा। अर्कः शमी कदम्बश्च चूतो निम्बस्तथान्तिमः।।६५।।
मधूकश्चेति सम्प्रोक्ता वृक्षा भानां क्रमादमी। अश्वगजमजं सर्पसर्पिणीश्वबिडालिकाः।। ६६।।
अजामार्जारमूषाश्च मूषिका वृषमाहिषौ। व्याघ्रश्च महिषो व्याघ्री मृगी मृगशुनी कपिः।। ६७।।
[3]गोखड्गो वानरी सिंही तुरगी सिंहगोगजाः। यदा रोगादिदुःखार्तिर्भवेत् [4]तत्पूर्वगैर्दिनैः।। ६८।।
मुहूर्तैः संख्ययाऽहोभिः शान्तिः स्याद् द्विगुणेन वा। आधारे पञ्च यन्त्राणि स्वाधिष्ठाने चतुष्टयम्।।६९।।
प्रोक्तेषु भावयेत्तानि तावन्ति मणिपूरके। अनाहते ततः पञ्चयन्त्राणि परिभावयेत्।। ७०।।
विशुद्धाख्ये च चत्वारि पञ्चाज्ञायामिति क्रमात्। तत्तत्तिथिदिनेष्वेवं भावयेत् षोडशीं शिवाम्।।७१।।
तत्तच्चक्रगताः सर्वा भावयेत् सर्वसम्पदे। आधारादिषु चक्राणि भावयेदुक्तयोगतः ।। ७२।।
न तु सर्वत्र सर्वाणि भावयेन्न कदाचन। भावनायामशक्तानां तत्तद्यन्त्राद्बहिस्तथा ।। ७३।।
प्रोक्तान्याधारपद्मानि कृत्वा तत्रार्चयेच्छिवाम्। एवं दिनेषु वारेषु नक्षत्रेषु त्रिषु क्रमात्।। ७४।।

---

१. 'जातेषु' ख. पाठः। २. 'निगदे' ख..पाठः। ३. 'गोकर्णो' ख. पाठः। ४. 'तदर्धकैः' ख. पाठः।

सम्पूज्य देवीमिष्टानि प्राप्नुयात् प्रोक्तवासरैः। बलिं च दद्यात् तेष्वेव वासरेषु यथाविधि।। ७५।।
पञ्चाशन्मिथुनानां च प्रोक्तचक्रेऽर्धरात्रके। मध्याह्ने सन्ध्ययोश्चापि चक्रस्थानामपीश्वरि।। ७६।।
मिथुनोक्तक्रमे शक्तिमन्त्रवच्चक्रगामिनाम्। कूटानां मन्त्ररूपाणि प्रोक्तानि स्फुटमीश्वरि।। ७७।।
तैस्तेषां तेषु कालेषु बलिं दद्यात् तथेरितैः। देव्यास्त्वनुग्रहप्रोक्तनिवेद्यैः सिक्थकं महत्।। ७८।।
विधाय तस्य मध्ये तु कृत्वा दीपं घृतप्लुतम्। विधाय तत्तन्मन्त्रैस्तु विदध्यात् तान्यनुक्रमात्।।७९।।
प्रत्येकं देवतानां वा मिथुनानां तथापि[1] वा। इत्थं कार्यस्य गुरुतालाघवापेक्षया दिनैः।। ८०।।
साधयेत् सप्तभिः पक्षान्मासान्मण्डलतोऽपि वा। दद्यादपूपपनसमोचागुडघृतान्वितम् ।। ८१।।
कुल्माषाः पायसान्नं च व्यञ्जनं छागमांसयुक्। मिथुनानां बलिं दद्यात् प्रतिमासं गृहेऽर्चयेत्।। ८२।।
प्रत्यब्दं वा गृहे मन्त्री जीवेदाढ्यो महोदयः। एवं कालात्ममिथुनबलिदानेन पूजनात्।। ८३।।
स्मरणात् कीर्तनात् सर्ववाञ्छितानाप्नुयुर्नराः। मिथुनानां बलिद्रव्याण्याकर्णय महेश्वरि।। ८४।।
यैस्तुष्टिं प्रापितान्याशु प्रयच्छन्त्यभिवाञ्छितम्। दशानां पायसं दद्याद् दशानां तु गुडौदनम्।।८५।।
पञ्चानां मुद्गभिन्नान्नं पञ्चानां दधिभक्तकम्। दद्यादपूपं पञ्चानां पञ्चानां क्षीरशर्करे ।। ८६।।
पञ्चानां नारिकेलस्य फलक्षोदं गुडान्वितम्। पञ्चानां सितभक्ताभ्यां मोचाफलमुदीरितम्।। ८७।।
मिथुनार्चारतो नित्यं योऽसौ स्यान्मान्त्रिकाग्रणीः।

इति विचित्रानित्याप्रयोगविधिः।।

अथ कुरुकुल्लानित्याप्रयोगविधिः। तत्र श्रीतन्त्रराजे– (२२। ३२)

प्राग्वद्व्रतयुतो विद्यां पञ्चविंशतिलक्षकम्। जपित्वा पूजयेत् सन्ध्यास्वथ तर्पणहोमतः।। १।।
कुर्यान्नित्योदितेष्वन्यतमेन हवनक्रियाम्। एवं संसिद्धविद्यस्तु नित्यार्चानिरतस्तथा ।। २।।
प्रयोगानाचरेद्भक्त्या काम्यान् प्रोक्तक्रमेण वै। होमेन पूजया यन्त्रभावनेन च तान् शृणु।। ३।।
घृताक्तैः सर्षपैर्होमाद् वशयेद् वनिताजनम्। सर्षपस्नेहसंसिक्तैर्मरिचैरानयेच्च ताः ।। ४।।
तैलाक्तैस्तु तिलैर्होमान्मध्यरात्रे यथाविधि। नारीनरनृपानन्यान् वशयेद्यावदायुषम् ।। ५।।
अजाघृताक्तैर्बन्धूककुसुमैर्मध्यरात्रके । हवनाद्वनिताः सर्वा मोहयेत् प्रेमकौतुकैः ।। ६।।
क्षीराक्तैर्मल्लिकापुष्पैर्हवनाद् ब्राह्मणान् नृपान्। वशयेच्छतपत्रैस्तु तथा विचकिलैः शुभैः।। ७।।
सवत्ससितगोदुग्धसमेतैर्नारिकेलजैः। फलक्षोदैः सितयुतैर्हवनात् स्वर्णमाप्नुयात् ।। ८।।
नारिकेलफलक्षोदैर्गुडक्षौद्रघृतप्लुतैः । प्रागुक्तकालतो वित्तनिचयं समवाप्नुयात्।। ९।।
कदलीफलहोमेन स्यादाढ्योऽम्बुजहोमतः। कह्लारहोमतोऽभीष्टं लभते कुमुदद्वयैः।। १०।।
उत्पलैः पूजयेद् देवीं समस्तापद्विमुक्तये। पद्मैः सितैर्लोहितैश्च पूजयेदिन्दिराप्तये।। ११।।
कुमुदाभ्यां यजेद्वित्तलाभाय यशसे तथा। जपाबन्धूककुसुमैस्तथा दाडिमजैरपि।। १२।।

---

[1] 'नामथा' ख. पाठः।

सौगन्धिकैर्विचकिलै: कुटजै: शतपत्रकै:। पुन्नागजै: पाटलैश्च चम्पकोत्थैर्यजेच्छिवे।। १३।।
सप्तभि: सप्तवारेषु भास्करादिषु पूजयेत्। प्रोक्तकालेषु वित्ताढ्यो धराधान्यांशुकादिमान्।। १४।।
चन्दनैरर्चयेन्नित्यं समस्तमपि वाञ्छितम्। लभते प्रोक्तकालेन तथा कालागुरुद्रवै:।। १५।।
[1]कुसुमैर्नित्यश: पूजां कुर्यात् सौभाग्यसिद्धये। कर्पूरैरायुष: सिद्ध्यै वश्य[2]श्रीधनसिद्धये।। १६।।
मृगस्वेदमदाभ्यां च पूजयेन्मासमात्रकम्। कन्दर्पसमसौभाग्यो वनितासु नरो भवेत्।। १७।।
एलालवङ्गकक्कोलजातीभिर्नित्यशो यजेत्। अब्दमात्रं ततो लोके विश्रुत: स्यात्स वैभवै:।। १८।।
कर्पूरशकलै: पूजा सर्वाभीष्टप्रदा भवेत्। पूजितैस्तैस्तु जग्धै: स्यान्नरो यात्यखिलप्रिय:।। १९।।
वृत्तत्रयं तथाष्टारमब्जं तन्मध्यतस्तथा। नवयोनिं विधायात्र मध्ये मायां ससाध्यकाम्।। २०।।
आलिख्याष्टसु कोणेषु मन्त्रार्णाष्टकमालिखेत्। बहिर्दलेष्वपि तथा लिखेद् द्विद्विक्रमेण वै।।२१।।
बहिर्मातृकया मायास्वगया प्रतिलोमया। क्रमेण चाभिसंवेष्ट्य तेन यन्त्रेण साधयेत्।। २२।।
समस्तं वाञ्छितं पूजाधारणस्थापनादिना। यन्त्रं रोचनयालिख्य भूर्जे वा क्षौमखण्डके।। २३।।
गुलिकीकृत्य सिक्थस्य मध्यगं तद्विधाय तु। तापयेद्रात्रिषु दिनै: प्रागुक्तै: स्त्रियमानयेत्।। २४।।
दरदेन विलिख्यैतत् पटे वा फलकोदरे। तत्र देवीं समावाह्य पूजयेत् तैर्दिनैर्भवेत्।। २५।।
वशे त्रिभुवनं सर्वं नरनारीनृपादिकम्। गजवाजितरक्ष्वादितिर्यग्जातीरपि ध्रुवम् ।। २६।।
तद्यन्त्रं सिन्धुतीरे वा नदीतीरेऽथवा लिखेत्। गैरिकेण समावाह्य देवीं तत्रैव पूजयेत्।। २७।।
समस्तरोगदु:खार्तिशान्ति: स्यादुदितैर्दिनै:। लभेच्च[3] पूजनात्तत्र पशुदासीधनादिकम्।। २८।।
तद्यन्त्रं चन्दनै: कृत्वा पीठे तद्दिनपूजनात्। पुत्रपौत्रकलत्राज्ञाधनधान्यार्द्धिमान् भवेत्।। २९।।
तद्यन्त्रं हेम्नि रूप्ये वा भूर्जे वालिख्य धारणात्। समस्तरोगदु:खार्तिरहितो वर्धते सुखी।। ३०।।

अथैतद्यन्त्ररचनाप्रकार:—प्रथमतो नवयोनिचक्रं विलिख्य तद्बहिरष्टदलकमलं तद्बहिरष्टारं तद्बहिर्वृत्तत्रयं च विलिख्य, मध्ये ससाध्यं ह्री: इति बीजं विलिख्य तद्बहिरष्टसु कोणेषु मूलपञ्चविंशाक्षरमन्त्रस्याष्टौ वर्णान् विलिख्य, तद्बहिरष्टदलेष्वष्टाक्षराणि तद्बहिरष्टारेष्वपि शिष्टान्यष्टाक्षराणि विलिख्य तद्बहिरन्तराले विसर्गयुक्तयानुलोममातृकया तद्बहिरन्तराले बिन्दुयुक्तया विलोममातृकया च वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

प्राक्प्रत्यग्दक्षिणोदक्च सूत्रषट्कनिपातनात्। कोष्ठेषु पञ्चविंशत्सु त्रीणि कोणेषु मार्जयेत्।। ३१।।
कोष्ठैर्वज्रं तत: शेषैस्त्रयोदशभिरीरितम्। तन्मध्ये शक्तिमायास्थामालिख्याख्यां ततोऽभित:।। ३२।।
लिखेद्विद्यां ततस्तस्मिन् पूजयेदर्धरात्रके। वाञ्छितां वनितां मानकुललज्जातिलङ्घिनीम्।। ३३।।
तृणराजदले कृत्वा यन्त्रं सर्षपहिङ्गुभि:।..।।

तृणराजदले तालपत्रे।

....। पटुशुण्ठीमागधिकामरिचार्कपयोयुतम्।। ३४।।

---

[1] 'कुङ्कुमै:' ख. पाठ:। [2] 'स्त्री' ख. पाठ:। [3] 'लाभाश्च' ख. ग. पाठ:।,

निशासु सिक्थगं दीपवह्नौ सन्तापयेज्जपन्। विद्यां त्रयोदशार्णां तु तद्दिक्वक्त्रो दिनैः स्त्रियम्।।३५।।
आकर्षयेन्नवागच्छेत् तत्र कामज्वराच्छतैः। अवस्थाभिश्च दशभिर्मृतिमेति सुनिश्चितम् ।। ३६।।
भूर्जे वा तालपत्रे तदालिख्य स्पष्टविग्रहम्। मधूच्छिष्टप्रतिकृतैर्ऋजु तं तापयेत्तथा।। ३६।।
नरं नारी नृपं चान्यं प्राणिनं स्नेहविह्वलम्। करोति यावद्देहान्तं ते प्रतीपा लपन्ति च।। ३८।।
कज्जलैर्यन्त्रमालिख्य भूर्जे क्षौमे सितेऽथवा। जपित्वा धारयेत् सर्वरोगदुःखार्तिनाशनम्।। ३९।।
गैरिकैश्चन्दनोपेतैरालिख्य विमलाम्बरे। तदास्तीर्य[1] शयानस्य वैरिणो[2] दाससन्निभाः।। ४०।।
वृत्तद्वयान्तरा कृत्वा षट्कोणं तस्य मध्यतः। भूःस्वगर्भगतं नाम विलिख्याश्रिषु षट्स्वपि।। ४१।।
षडक्षराणि विलिखेत् सप्ताक्षर्या क्रमेण वै। यन्त्रमेतत्तालपत्रे भूर्जे क्षौमेऽर्कपत्रके।। ४२।।
प्रजप्य विद्यामयुतं वल्मीके निक्षिपेच्च तत्। तत्र स्थिता ये भुजगा पलायन्तेऽथ तद्दिने।। ४३।।
तदूर्मिकादौ संलिख्य सञ्जप्याभ्यर्च्य कुत्रचित्। निधाय नित्यशः पूजासमेते रक्षतो गृहे।। ४४।।
भूतप्रेतपिशाचापस्मारवेतालराक्षसाः। यक्षगन्धर्वभुजगवृश्चिकाद्या न तत्र वै।। ४५।।
तत्क्षिप्त्वा कुम्भसलिले जपित्वा विद्ययानया। सहस्रवारं सलिलैरासेकः क्ष्वेडनाशनः।। ४६।।
तत्पीतं जठरे प्राप्तमशेषं नाशयेद्विषम्। देहगं परमेशानि त्रिविधं भीषणात्मकम्।। ४७।।
तद्विलिख्य नखाग्रेण नारिकेलदले स्मरन्। तद्रूपं फणिनं विद्याजपपूर्वं नखादिना।। ४८।।
पीडनात् पाटनाद्रोगी पीडितः पाटितो भवेत्। एवं सर्वं त्रिप्रकारं गरलं नाशयेदिदम्।। ४९।।
बालुकासु सुसंलिख्य यन्त्रमभ्यर्च्य देवताम्। तत्र तैर्वेष्टयेत् सुप्तं भोगिनं न व्रजेद्वहि।। ५०।।

अथ त्रयोदशाक्षरमन्त्रस्य यन्त्ररचनाप्रकारः—तत्र प्राक्प्रत्यग्दक्षिणोदक्च षट्सूत्रनिपातनात् पञ्चविंशतिकोष्ठात्मकं यन्त्रं विरच्य चतुष्कोणेषु त्राणि त्रीणि कोष्ठानि मार्जयित्वा त्रयोदशकोष्ठात्मकं वज्ररूपं निष्पाद्य मध्यकोष्ठे ह्रीः इति मायाबीजं साध्यगर्भं विलिख्यावशिष्टानि विद्याया अक्षराणि प्रवेशगत्या विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।।

अथ सप्ताक्षर्याः यन्त्ररचनप्रकारः—तत्र वृत्तद्वयमध्यस्थं षट्कोणं विलिख्य मध्ये प्रणवगर्भं साध्यनामालिख्य षट्सु कोणेषु षडक्षराणि विलिखेत्। एतद्यन्त्रमुक्तफलं भवति।। तथा—

अनावृत्तानि विद्यायामक्षराणि त्रयोदश। तैः षोडशस्वरोपेतैः संख्याष्टौ च शतद्वयम्।। ५१।।
तानि पूर्वाद्ययन्त्रे तु विलिखेन्मध्यतो द्वयम्। बहिः प्राग्वत् ततस्तैः स्याद्यन्त्राण्यष्टौ महेश्वरि।।५२।।
तेष्वाद्यं सर्ववारेषु विनियुञ्ज्यादुदीरिते। द्वितीयादीनि यन्त्राणि सप्त भान्वादिवारके।। ५३।।
विनियुञ्ज्यात् प्रोक्तकर्मस्वाख्यालेखनपूर्वकम्। वाराख्यां सप्तमीयुक्तामालिखेत् साधयेति तत्।।५४।।
वश्याकर्षणशान्त्याप्त्यै विदध्यादाद्ययन्त्रतः। प्रोक्तक्रमेण विधिना शान्तिमर्चनतस्तथा।। ५५।।
सप्तमं पूजितं क्वापि स्थापितं पोतगर्भके। न नाशयति तत्पोतमम्बुधौ सर्वदा शिवे।। ५६।।
तथा वारेषु तेषूक्तान्यालिख्याभ्यर्येच्छिवाम्। वाञ्छितेषु समस्तेषु तैर्दिनैस्तान्यवाप्नुयात्।। ५७।।

---

१. 'स्त्रियः' ख. पाठः। २. 'वैरिण्यः' ख. पाठः।

रोगशान्तिं जयं लाभं नानाभीष्टार्थविग्रहम्। शत्रुभङ्गं वशं नारीनृपमर्त्यादिजन्मिनाम्।। ५८।।
प्राक्प्रत्यगुदक्षिणोदक् च सूत्राण्यास्फालयेत् क्रमात्। द्वाविंशतिं ततः सैकचत्वारिंशिच्चतुःशतम्।।५९।।
तेषु कोणेषु परितो मार्जयेत् पूर्ववत् क्रमात्। पञ्चपञ्चाशदन्यानि कोष्ठवज्रे महेश्वरि।। ६०।।
शतद्वयं सैकविंशत् तेषु दिक्षु त्रिकोणकम्। कुर्यात् प्राग्वच्चतुःकोष्ठैस्तथा प्राङ्मध्यतः शिवे।।६१।।
प्रादक्षिण्येन विलिखेत् प्रवेशक्रमयोगतः। मध्येऽवशिष्टनवकमध्ये नामोदरां लिखेत्।। ६२।।
मायां तदभितो मन्त्रवर्णांस्त्रित्रिक्रमेण वै। त्रिकोणेषु च साध्यानि लिखेद्वज्रमितीरितम्।। ६३।।
तद्वज्रयन्त्रं तु पटे क्षौमे वा सुसिते शुभे। विलिख्याभ्यर्च्य तद्यन्त्रं पोतं रक्षति वारिधौ।। ६४।।
प्रागुक्तानि समस्तानि साधयेद्वज्ररूपिणा। यन्त्रेणानेन कालेन प्रोक्तेन नियतं शिवे।। ६५।।
तां देवीं पाशसम्बद्धं साध्यमङ्कुशताडनात्[1]। आकर्षन्ती स्वपादान्ते साञ्जलिं प्रणतं मुहुः।।६६।।
रक्ष रक्षेति भाषन्तं स्मरन् विद्यां जपन्निशि। साध्यो नरोऽथ नारी वा वशमेति सुनिश्चितम्।। ६७।।
अथवा साञ्जलिं साध्यं प्राग्वद्वादिनमङ्कुशे। प्रोतकेशसमाकृष्टं जपेत् प्राग्वद् वशे भवेत्।।६८।।
मन्त्राक्षराणां तेजोभिः परीतं वा तथाविधाम्। स्वयमेवानयेत् तां तु स्मरन् जापैर्वशं नयेत्।। ६९।।
एवं सा कुरुकुल्ला ते प्रोक्ता सर्वार्थसाधिका। ललिताविग्रहा येन वशिन्यादियुता ततः।। ७०।।

इति कुरुकुल्लानित्याप्रयोगविधिः।।

अथ वाराहीनित्याप्रयोगविधिः। तत्र श्रीतन्त्रराजे—(२३। १०)

जितेन्द्रियो हविष्याशी मौनी सन्ध्यासु पूजयेत्[2]। विद्यां जपेल्लक्षसंख्यां तद्दशांशेन तर्पणम्।।१।।
अर्चनं हवनं कृत्वा सिद्धमन्त्रो दयान्वितः। गुरुभक्तः सुसन्तुष्टः शान्तचित्तः क्षमान्वितः।। २।।
प्रयोगानाचरेद्भक्त्या यैरिष्टमखिलं क्षणात्। सिध्यत्ययत्नतो देव्या प्रसादाद्वैभवादपि।। ३।।
ध्यायेच्च देवीं कोलास्यां तप्तकाञ्चनसन्निभाम्। आकण्ठवनितारूपां ज्वलत्पिङ्गशिरोरुहाम्।। ४।।
त्रिनेत्रामष्टहस्तां च चक्रं शङ्खमथाङ्कुशम्[3]। पाशं च मुसलं सीरमभयं वरदं तथा।। ५।।
दधानां गरुडस्कन्धे सुखासीनां विचिन्तयेत्। नित्यपूजासु तच्छक्तीस्तत्समानाः स्मरेच्छिवे।। ६।।
प्रयोगेषु स्मरेद् देवीं सिंहस्थां व्याघ्रगामपि। गजारूढां हयारूढां तार्क्ष्यारूढां च शक्तिभिः।। ७।।
श्यामामप्यरुणां पीतामसितां धूम्रविग्रहाम्। तत्तत्प्रयोगेषु तथा ध्यायेत् तत्तदवाप्तये ।। ८।।
अरुणामरुणाकल्पामरुणाभिस्तु शक्तिभिः। आवृत्तां पञ्चमीं ध्यायन् जपेद्वश्याप्तयेऽनिशम्।। ९।।
पीतां पीताम्बरां पीतभूषणस्रग्विलेपनाम्। पीतशक्त्यावृतां ध्यायेत् स्तम्भनेषु तु सर्वदा।। १०।।
श्यामां च दुर्गमे मार्गे सिंहस्थां भीमविग्रहाम्। शक्तिभिः स्वसमानाभिरनन्ताभिः समावृताम्।।११।।
चिन्तयन् प्रजपन् विद्यां [4]प्रजपेच्छक्तिमध्यंगम्। स्वात्मानं भावयन्मन्त्री प्रयात्य[5]क्लिष्टवैभवः।।१२।।

---

१. 'धारणात्' क.ग.पाठः। २.'यन्' ख. पाठः। २.'थाम्बुजम्' ख. पाठः। ४. 'यजेत्तच्छक्तिमध्यतः' ख. पाठः। ५. 'व्रजेद' ख. पाठः।

सिंहर्क्षद्वीपिशरभख[1]ड्गिसैरिभसूकरैः। गवयैर्भुजगैर्भीमैर्दन्तिभिर्मदमन्थरैः॥ १३॥
चौरैः कुन्तप्रहरणैः क्रूरैरन्यैर्भयावहैः। भूतप्रेतपिशाचाद्यैराकुले रण[2]सङ्कटे॥ १४॥
अलब्धमार्गे विपिने गिरिशृङ्गे तथाविधे। स्मरन् देवीमुक्तरूपां निरातङ्को व्रजेत् सुखी॥ १५॥
समरेष्वपि भीमेषु पत्त्यश्वरथदन्तिभिः। सङ्कटेषु दुरन्तेषु स्मृत्वेत्थं विजयी भवेत्॥ १६॥
नखरं [3]क्षुरिकां खड्गं बाणं शूलं गदां सृणिम्। चक्रं च दक्षिणैर्बिभ्रद् बाहुभिर्भीमविग्रहाम्॥ १७॥
तर्जनीं खेटकं चर्म चापं डमरुकं हलम्। पाशं शङ्खं च दधतीमन्यैर्नीलां स्वशक्तिभिः॥ १८॥
गजाधिरूढां द्विरदैः शक्त्यारूढैः समावृताम्। वैरिसेनां समस्तां च निपात्य परिघैर्भुवि ॥ १९॥
तदुपर्यभितः प्रेङ्खत्कदलीकेतुसङ्कुलम्। चरन्तीं शक्तिवृन्दैश्च भीमारावैर्मदोद्धतैः ॥ २०॥
भानुमण्डलमध्यस्थां शूलप्रोतारिविग्रहाम्। तद्देहनिर्यद्रक्ताक्तशूलां देवीं विचिन्तयेत्॥ २१॥
कण्ठमात्रे जले स्थित्वा जपेद्विद्यामनन्यधीः। सप्तरात्रप्रयोगेण वैरिणं मारयेज्ज्वरात्॥ २२॥
देव्याः सपरिवाराया हेतिभिः शकलीकृतम्। रिपुदेहं स्मरन् फेरुकङ्कक्रव्यादकुक्कुरैः॥ २३॥
भक्ष्यमाणं जपेद्विद्यां त्रिदिनं सलिले स्थितः। यावत्तावद्दिनैर्वारिहितं श्रुत्वा समुत्तरेत्॥ २४॥
द्विभुजां धूम्रवर्णां च[4] साध्यजिह्वाहृदम्बुजे। उत्पाटयन्तीं सञ्चिन्त्य जपञ्छत्रुं यमं नयेत्॥ २५॥
तथाविधां पीतवर्णां स्मृत्वा सञ्जप्य वैरिणः। क्रोधं संशमयेद्वादे विवादे समरेऽपि च॥ २६॥
तार्क्ष्यारूढां च तां तार्क्ष्यगणस्थाभिश्च शक्तिभिः। वृतां तार्क्ष्यगणोद्दामपक्षमारुतमूर्छितताम्॥ २७॥
स्मृत्वा [5]जपेद्रिपोः सेनां दूरतो द्रावयेत् क्षणात्। तथैवाष्टभुजैः खड्गान् दधानां शक्तिभिर्वृताम्॥२८॥
तथैवारातिपृतनां समरे नाशयेत् क्षणात्। विकीर्य केशानरुणवारबाणधरो हयैः॥ २९॥
तरक्षुकेसरिकपिकोलर्क्षगरुडस्थितैः । शक्तिवृन्दैस्त्रिशूलाग्रप्रोतपत्त्यश्ववारणैः ॥ ३०॥
क्रीडाविनोदां माणिक्यमण्डपे सिंहविष्टरे। ध्यायन्नरातेः पृतनां नाशयेत् स्वैर्बलैर्नृपः॥ ३१॥
पीतप्रसूतैः पीताभामर्चयेत् स्तम्भनाय वै। प्रागुक्तैर्मण्डलाद्यैस्तु वासरैः परमेश्वरि ॥ ३२॥
अरातीनां गतिं सेनां मतिं जिह्वां समुद्यमम्। इष्टमन्यच्च सकलं स्तम्भयेत् साधकः क्षणात्॥३३॥
अरुणामरुणैः पुष्पैरर्चयेन्मध्यरात्रतः। निहन्तुकाममप्याशु रिपुं कुर्याद्विधेयताम्[6] ॥ ३४॥
विषनाड्यां दग्धयोगे मृतियोगे सनाशके। यमकण्ठककाले वा कृष्णैः पुष्पैस्तथाविधाम्॥ ३५॥
पूजयेत्त[7]द्दिनैः शत्रून् जीवितेशपुरं नयेत्। श्यामां च सौरभाद्यैस्तैः पुष्पैरभ्यर्च्य वासरैः॥ ३६॥
[8]तद्दिनैरिन्दिराढ्यः स्यादरोगः सुमना वशी। सुखी जीवति भूमौ स शतं वर्षाणि विश्रुतः॥ ३७॥
होमं कुर्यात् तथा रात्रौ चतुरस्रेऽथ कुण्डके। हरिद्रामिलितैरन्नैस्तिलैर्माषैः सतण्डुलैः॥ ३८॥
पीतैः पुष्पैस्तथा पीतैः फलैस्तालदलैरपि। सकलीकृत्य लिखितसाध्यवर्णसमन्वितैः॥ ३९॥

---

[1] 'शृङ्गिकुक्कुर' ख. पाठः। [2] 'अरण्य' ख. पाठः। [3] 'छ' ख. पाठः। [4] 'र्णाभां' ख. पाठः। [5] 'जयेत्' ख. पाठः।
[6] 'वशे ध्रुवम्' क. पाठः। [7] 'यन्' ख. पाठः। [8] 'उदितैः' ख. पाठः।

निशाघृतसमोपेतैः स्तम्भयेत् प्रागुदीरितान्। निशाचूर्णैर्घृताक्तैस्तु होमात् संस्तम्भयेत्तथा[१]।। ४०।।
अर्धरात्रेऽरिवृक्षेद्धवह्नौ[२] तद्योनिदेहजैः। मांसैस्तद्देहसम्भूतस्नेहाक्तैर्हवनाद् दिनैः।। ४१।।
मारयेद्वैरिणं रोगशस्त्रशृङ्गफणीजलैः। दहनैर्वारुणैरन्यैः प्रमादैः कण्ठकादिभिः।। ४२।।
निर्घाततरुकुड्यादिपतनाद् विषभक्षणात्। शत्रुभिर्वा प्रयोगामी [+] न भवन्त्येव भङ्गुराः।। ४३।।
धूम्रां कङ्कसमारूढां नखराद्यायुधैर्युताम्। ध्यायन् रिपोरष्टमे तु राशौ छागघृताप्लुतैः।। ४४।।
मरीचैः सर्षपैर्होमात् तद्दिनैर्मारयेद्रिपून्। तीव्रदाहज्वरैर्ग्रस्तं विसंज्ञं विकृताङ्गकम्।। ४५।।
बालार्काभां स्मरन्नाद्यहेतिभिः संयुतां शिवाम्। सरूपवत्सारुणगोघृताक्तैररुणैः शुभैः।। ४६।।
प्रसूनैः किंशुकोद्भूतैस्तथा बन्धूकसम्भवैः। जपाप्रसूनैः पालाशैः करवीरसमुद्भवैः।। ४७।।
कह्लारैरुत्पलै रक्तैः कमलैः पाटलोद्भवैः। अशोकजैः कुसुम्भोत्थैरन्यैः पुष्पैश्च लोहितैः।। ४८।।
हवनात् नृपतुल्यः स्यादैश्वर्येणाज्ञया धनैः। अन्यैरपि च तत्साम्यकरैरङ्गैः[३] सुनिश्चितम्।। ४९।।
अरुणां नखराद्यैश्च युतां ध्यायन् समाहितः। मध्यरात्रे हुनेत् साध्यदिङ्मुखो मरिचैस्तथा।। ५०।।
प्रोक्तैर्दिनैर्नृपो नारी नरलोकोऽपि वा वशे। भवेत् कीर्तीन्दिरायुक्तश्चिरं जीवति भूतले।। ५१।।
विलिख्य भूपुरं मध्ये निजसाध्यं समालिखेत्। भौमाक्षराणि तद्बाह्ये दशाग्रादभितो लिखेत्।। ५२।।
बहिरष्टच्छदं पद्मं कृत्वा तत्र लिखेत् क्रमात्। मन्त्राक्षराणि ऋतुशस्तद्बहिर्वृत्तयुग्मकम् ।। ५३।।
तत्रापि पार्थिवान् वर्णान् बहिः षट्कोणमालिखेत्। तत्कोणेष्वन्तरालेषु मन्त्रार्णान् भूदशान्वितान्।।५४।।
विलिखेत् प्राग्वदभितो बहिर्वृत्तद्वयं लिखेत्। विलोमां मातृकां तत्र न्यस्य भूमिपुरं बहिः।। ५५।।
कृत्वानुलोमामालिख्य मातृकां मूलविद्यया। पूजयन्नखिलं लोकं स्तम्भयेदरिवाहिनीम्।। ५६।।

अथैतद्यन्त्ररचनाप्रकारः—तत्र मध्ये भूपुरं विलिख्य तन्मध्ये साध्यनाम लिखित्वा तद्बहिः पार्थिववर्णैर्दशभिरावेष्ट्य, तद्बहिरष्टदलपद्मं निर्माय दलेषु मूलमन्त्राक्षराणि प्रतिदलं षट्षट् क्रमेण विलिख्य, तद्बहिर्वृत्तद्वयं विधाय तदन्तराले पार्थिववर्णैर्दशभिरावेष्ट्य, तद्बहिः षट्कोणं विलिख्य तत्कोणेषु मन्त्रवर्णान् पार्थिवार्णसहितान् षट्षट् क्रमेण विलिख्य, तद्बहिर्वृत्तद्वयं विधाय तदन्तराले विलोममातृकाक्षरैर्वेष्टयेत्। तद्यन्त्रमुक्तफलदं भवति।। तथा—

नवास्रं वृत्तयुग्मं च वस्वस्रं तद्द्वयं बहिः। चतुरस्रं च संलिख्य मन्त्रार्णान् षट्षडालिखेत्।।५७।।
अष्टान्तरालेष्वेकैकं बाह्यवृत्ते तु मातृकाम्। चतुरस्रे च विलिखेत् प्रतिलोमानुलोमकाम्[४]।। ५८।।
साध्याख्यां सर्वतो लिख्याद् ध्या[५]येदष्टभुजां शिवाम्। स्तम्भः स्यात् पूर्वममुक्तानां विधानात् परमेश्वरि।।५९।।

अथैतद्यन्त्ररचनाप्रकारः— तत्र प्रथमतो नवास्रं विलिख्य तद्बहिर्वृत्तद्वयं तद्बहिर्वसुकोणं तद्बहिर्वृत्तद्वयं तद्बहिश्चतुरस्रं विलिख्य, मध्ये साध्यनाम कर्मसहितं विलिख्य नवकोणेषु प्रतिकोणं षट्षट् क्रमेण मूलमन्त्राक्षराणि विलिख्याष्टकोणेष्वपि तथैवाष्टकोणान्तरालेष्वेकमेकं मूलमन्त्राक्षरं विलिख्य, मध्यवृत्तान्तरालद्वयेऽपि पार्थिववर्णान् प्रागुक्तविधिना साध्यसहितान् विलिख्य, बाह्यवृत्तान्तरालेषु मातृकाक्षरैः संवेष्ट्य तद्बहिश्चतुरस्रे प्राग्वत् प्रतिलोमानुलोममातृकां विलिखेत्।

---

१. 'मःस्तम्भयते' ख. पाठः। २. 'ज्ञेद्ध' ख. पाठः। ३. 'सक्तपरैः' ख. पाठः। ४. 'कम्' ख. पाठः। ५. 'ख्ययजेत्' ख. पाठः।
+ प्रयोगा अमी इति दिव्यत्वात् पदच्छेदः।

तद्यन्त्रमुक्तफलदं भवति।। तथा—

वृत्त त्र्यस्रं पुनर्वृत्तं षडस्रं वृत्तयुग्मकम्। अष्टास्रं तद्बहिर्वृत्तमिति कृत्वा निवेदयेत्[१]।। ६०।।
एकं मध्ये बहिः कोणेष्वन्तरालेषु च क्रमात्। त्रयं त्रयं समालिख्य बहिः शिष्टं तु पार्थिवैः।। ६१।।
विलिख्य साध्य[२]नामापि जपित्वाभ्यर्च्य साधकः। स्थापयेत् क्वापि तत्रैव नित्यशश्च बलिं क्षिपेत्।।६२।।
कृत्वा षडष्टकोणानि षट्कोणानि पृथक् पृथक्। क्रमात् त्रिकोणवृत्तान्तरालान् षट्कोणसंयुतान्।।६३।।
बाह्यात् क्रमेण मध्यान्तं नक्षत्रतिथिवारयुक्। विलिखेल्लिपिशः सर्वां मातृकां शक्तिसंयुताम्।।६४।।
साध्यं सप्तसु मध्येषु विलिखेच्च प्रदक्षिणम्। मायामध्यगतं देवि धारयेत् सर्वसिद्धये।। ६५।।
भूतप्रेतपिशाचादिशान्त्यै सर्वार्तिशान्तये। गजवाजिखरोष्ट्रादिरोगशान्त्यै च धारयेत्।। ६६।।

एतेषां पृथक्पृथक्करणे सुगमत्वान्न विस्तारतिम्।। तथा—

प्राक्प्रत्यग्दक्षिणोदक् च रेखा द्वादश संलिखेत्। रेखाग्रा[३]त्सर्वतः शूलांस्तन्मध्याग्रे च पार्श्वयोः।।६७।।
स्तम्भयेति समालिख्य मध्यकोष्ठेऽरिनाम च। परितो विलिखेन्मन्त्रवर्णान् भौमसमन्वितान्।।६८।।
गैरिकेणाथ निशया[४] तालेन विलिखेच्छुभम्। स्थापेद्भित्तिमध्ये च भूमौ च क्रमतः शिवे।। ६९।।
भूर्जे वा कर्पटे लोहे शिलायां वा समालिखेत्। गृहपत्तनयोर्लोहदृषदोरिष्टसिद्धिदम्।। ७०।।
नित्यशः पूजयेत् पुष्पैः सुगन्धैः प्रजपेत्तथा। यावत्फलाप्ति कुर्वीत नियतं सन्ध्ययोर्द्वयोः।। ७१।।

इदमपि यन्त्रं सुगमम्।

प्राक्प्रत्यग्दक्षिणोदक् च कुर्यात् सूत्राणि षोडश। तैस्तु कोष्ठानि जायन्ते पञ्चविंशच्छतद्वयम्।।७२।।
तेषु कोष्ठेषु[५] परितो मार्जयेत् प्राग्वदीश्वरि। अष्टाविंशतिकोष्ठानि ततः शिष्टेषु दिक्ष्वपि।।७३।।
प्राग्वदेकैकतः कुर्यात् त्रिकोणानि यथाविधि। मध्ये त्रिषु तु कोष्ठेषु साध्यसाधककर्म च।।७४।।
उपर्यधो मध्यतश्च शेषेषु प्राग्वदालिखेत्। मन्त्रार्णानग्रमारभ्य विलिखेदभितः शिवे।। ७५।।
एतद्वज्रं महायन्त्रं समस्ताभीष्टदायकम्[६]। यत्रैतत् स्थापितं लोहशिलादिलिखितं शिवे।। ७६।।
तत्र चोरग्रहव्याधिरिपुसर्पसमुद्भवाः। भूतप्रेतपिशाचादिकोपजाश्चाप्युपप्लवाः।। ७७।।
न भवन्ति कदाप्यत्र सम्भवन्ति च सम्पदः। वास्तुमर्मादिदुःखादि शमयेद्देहगं च यत्[७]।। ७८।।
यस्मिन् गृहे स्थापितं तद्यन्त्रं तद्गृहवर्तिनाम्। कृत्याभिचारक्षुद्रादिपीडा न भवति ध्रुवम्।। ७९।।
वाय्वग्निनैर्ऋतेशं च कुर्याद् द्वादशसूत्रकम्। तैर्वज्ररूपकोष्ठानि सैकविशं शतं भवेत्।। ८०।।
तेषु मध्ये समालिख्य साध्यनाम ततो बहिः। अग्राद्यभित[८] एवान्यान्यक्षराणि समालिखेत्।।८१।।
निर्गमेन महीवर्णपूर्वाणि क्रमतः शिवे। यत्रैतत् स्थापितं लोहशिलादिलिखितं शिवे।। ८२।।
रोगभूतग्रहोन्मादपिशाचापस्मृतिद्विषः। अन्यानि क्लेशकारीणि यानि तानि[९] विनाशयेत्।। ८३।।

---

१. 'त्ते इति कृत्वात्र विन्यसेत्' ख. पाठः। २. 'मध्ये' ख. पाठः। ३. 'ग्रे' ख. पाठः। ४. 'शिलायां' ख. पाठः।
५. 'कोणेषु' ख. ग. पाठः। ६. 'साधकम्' ख. पाठः। ७. 'तत्' ख. पाठः। ८. 'द' ख. पाठः। ९. 'कानि' ख. पाठः।

प्रोक्तेष्वार्तिष्वपि तथा तद्वज्रं गैरिकैर्भुवि। विलिख्य मध्ये कुम्भं तु क्षीरद्रुक्वाथपूरितम्।। ८४।।
निधाय देवीं सलिले समावाह्याभिपूज्य च। स्पृशञ्जलं जपेद्विद्यां सहस्रत्रयमात्मवान्।। ८५।।
तैर्जलैरभिषिञ्चेत् तं गदिनं प्राङ्मुखं तत:। तै: क्लेशैर्मुक्तदेहस्तु सुखी जीवति भूतले।। ८६।।
विद्याप्राप्त्यभिषेकं तु वज्रेऽस्मिन् कोष्ठवज्रके। सैकविंशशते वापि कुम्भं संस्थाप्य सेचयेत्।।८७।।
वेदाङ्गुलपरिभ्रान्त्या वृत्तं कृत्वा ततो बहि:। व्यङ्गुले व्यङ्गुले कुर्यादेकादश तत: क्रमात्।।८८।।
तेषु व्यङ्गुलमानेषु तिर्यक्सूत्राणि पातयेत्। एकादश ततस्तेषु प्राङ्मध्यात्तु प्रदक्षिणम्।। ८९।।
भूदशार्णैस्तु तां विद्यामालिखेन्निर्गमक्रमात्। रेखाग्राणि च शूलानि कृत्वा साध्यं च मध्यत:।।९०।।
तद्यन्त्रं प्राग्वदखिलविनियोगेषु योजितम्। नासाध्यमस्ति भुवने विद्यया सिद्धयानया।। ९१।।

इति वारहीनित्याप्रयोगविधि:।।

अथ कौतुकप्रकरणम्। श्रीतन्त्रराजे—(३४। १)

अथ षोडशनित्यानां विद्याकौतुकिनामिह। चमत्कारकरीं विद्यां वदामि शृणु सुन्दरि।। १।।
सिद्धसारस्वतं मृत्युञ्जयं त्रिपुटगारुडे। अश्वारूढामन्नपूर्णां नवात्मानं नवात्मिकाम्।। २।।
ततश्च देवीहृदयं गौरीविद्यां च लक्षदाम्। निष्कत्रयप्रदामिष्टवादिनीं[1] च मतङ्गिनीम्।। ३।।
राजलक्ष्मीं महालक्ष्मीं सिद्धलक्ष्मीमनन्तरम्। गोपालभेदानौषध्यान् वदाम्युक्तक्रमेण वै।। ४।।
शुचि: स्वेन ततो माया वियद् दाहस्ववह्नियुक्। हंसहृत्तेजसां योगाद् द्युतिदाहचरस्वकै:।। ५।।
पुनश्च हंसहृद्धंसद्वयदाहवनैरपि। समायैरुदिता विद्या पञ्चार्णामृतविग्रहा।। ६।।

''ऐं ह्रीं श्रीं हसखफ्रें हसहहौ:''।

पटलेऽस्मिननुक्तानामङ्गानि निजविद्यया। मायया वा विदध्याच्च ध्यानं चाद्यानुदीरिते।। ७।।
पयोव्रत: पञ्चलक्षं जपित्वा कुलसुन्दरीम्। ध्यात्वा सिद्धमनु: पश्चाद्विदध्याद्विनियोगकम्।। ८।।
अनया मन्त्रितैरद्भि: शोधयित्वा तु कन्यकाम्। पाययित्वा च तां ब्रूयाच्छ्लोकयेति समाहित:।।९।।
गङ्गाप्रवाहवत् तस्या भारती नि:सरेन्मुखात्। आचष्टे च त्रिकालस्थानर्थान् पृष्टा महाद्भुतम्।। १०।।
भू:स्वेन ज्या धरास्वेता[+] हृच्च मायासमन्वितम्। पालयेति द्विरुक्त्वा तत्प्रतिलोममुदीरयेत्।।११।।
विद्या मृत्युञ्जयाख्यासौ दीर्घस्वरयुजा हृदा। विधया[3]ङ्गानि नियतं स्वात्मानं चिन्तयेदिति।। १२।।

''ॐजुंस: पालय पालय स:जुंॐ''। सांसीं इत्यादिना षडङ्गन्यास:।।

आद्यमध्यतृतीयार्णनालपद्मसुकर्णिके। समासीनं सुधार्द्राङ्गं मौलाविन्दुकलायुतम् ।। १३।।
सुसितं हरिणाक्षस्रक्चिन्तापाशकरं[++] हरम्। स्वैक्येन भावयन्नित्यं जपन्[4] दीर्घायुरेधते।। १४।।
तृतीयममृताख्याया द्वितीयं तदनन्तरम्। रसावह्निस्वसहितप्राणस्तैस्त्रिपुटोदिता ।। १५।।

---

१. 'दायिनीं' ख. पाठ:। २. 'धा' ख. पाठ:। ३. 'विद्यया' ख. पाठ:। ४. 'जय' ख. पाठ:।
+ इता सहितेत्यर्थ:। ++ चिन्तेति व्याख्यानमुद्रा, इति मनोरमाकार:।

श्रींह्रींक्लीं''।

त्रिभिर्द्विरुक्तैरङ्गानि कृत्वा नित्यां तु नित्यशः। जपेदह्नो मुखे स्वैक्यं भावयंस्त्रिसहस्रकम्।। १६।।
तेन विद्यां श्रियं कान्तिं कवितां गानकौशलम्। नरनारीनृपाणां च वाल्लभ्यं लभते नरः।। १७।।
अरुणामरुणाब्जस्थां प्रसन्नवदनाम्बुजाम्। पुष्पेष्वङ्कुशपद्मानि पद्मपाशेक्षुचापकान् ।। १८।।
दधानां बाहुभिः षड्भिर्माणिक्यमुकुटोज्ज्वलाम्। शृङ्गारभूषापिटकचामरादर्शपादुकाः ।। १९।।
दधानाः परितस्तस्या गायन्त्यश्चापि शक्तयः। परिवार्य स्थितास्ताभिर्वृतां तां स्वैक्यतः स्मरेत्।।२०।।
भूःस्वेन हंसदाहाभ्यां मरुद्वह्निक्ष्मया युताः। वैरिमोहीत्यक्षराणां चतुष्कं गरुडेति च।। २१।।
जवी सवह्निर्ग्रासश्च हंसहिंसद्वयं तथा। स्वाहान्तो गदितो मन्त्रस्तार्क्ष्यस्याखिलरक्षितुः।। २२।।
त्रयोविंशार्णको मन्त्र उपरागे सुसाधितः।..।।

''ओह्रांह्रींह्रूं वैरिमोहिगरुडपक्षी हंसहंससहिंसहिंस स्वाहा''।

....। फणिदष्टान् पिशाचाद्यैः क्लिष्टानन्यांश्च रोगिणः।। २३।।
विषार्तांस्त्रिविधैरुग्रैर्मूर्छितांश्च गतासुकान्। पालयेच्छतजप्तेन तोयेनाभ्युक्षणात् क्षणात्।। २४।।
कुर्वतस्ताण्डवं शम्भोरग्रे मेरुसमं विभुम्। अहितानि च खादन्तं स्मरंस्तार्क्ष्यमनुं जपेत्।। २५।।
पद्माक्षबीजतैलेनाप्याशु नस्येन नाशयेत्। गरलं भुजगानां च समस्तानामयत्नतः।। २६।।
प्रणवं चरहंसाग्निर्जवी दाहो नभश्चरौ। शून्याम्ब्वग्नियुतो दाहो[1] ह्रदम्बु मरुदन्वितम्।। २७।।
हंसश्च मरुता युक्तः प्रोक्ता विद्या दशाक्षरी। षडङ्गं मायया कृत्वा जपेदक्षरलक्षकम्।। २८।।

ओं एहि परमेश्वरि स्वाहा''।

ततो यमुद्दिश्य जपं निशि कुर्यादयत्नतः। समानयेत् स्वगेहे तमानाशात् प्रोक्तकारिणम्।। २९।।
वश्यमाकर्षणं लक्ष्मीं सुवर्णं वाञ्छितानि च। प्राप्नोत्ययत्नादनया विद्यया सिद्धयानिशम्।। ३०।।
लोहितां लोहिताश्वस्थां लोहिताम्बरभूषणाम्। चतुर्भुजां त्रिनयनां प्रसन्नवदनाम्बुजाम् ।। ३१।।
भल्लं दक्षेण वामेन चर्मयष्टिं समुज्ज्वलाम्। अन्याभ्यां हेमपाशेन कण्ठे बद्ध्वा स्वसाध्यकम्।।३२।।
हेमवेत्राहतं बद्ध[2]करयुग्मकृताञ्जलिम्। दासोऽहमिति भाषन्तं पतितं निजपादयोः ।। ३।।
स्मरन् विद्यां जपेन्मर्त्यो वशीकुर्यादयत्नतः। समस्तं जीवभुवनमश्वारूढाख्यविद्यया।। ३४।।
प्रणवं नमसा युक्तं तथा भगवतीति च। माहेश्वरीति प्रोक्त्वान्नपूर्णे स्वाहेति तन्मनुः।। ३५।।
विधाय माययाङ्गानि जपेद्विद्यामहर्मुखे। सहस्रवारं नियतं तस्य स्याददरिद्रता।। ३६।।

''ओंनमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा''।

भुजगत्रासकरणनृत्ता[3]सक्तावलोकिनीम्। स्मितवक्त्रां हेमपात्रात् पयसं दधतीं स्मरेत्[4]।। ३७।।
भवानीं सर्वदा विद्याजपवान्न कदाचन। बुभुक्षितो भवेदेव न कदाचिन्न कुत्रचित्।। ३८।।

---

१. 'वियदम्बु सदाहोऽग्निः' ख. पाठः। २. 'बद्ध्वा' ख. पाठः। ३. 'त्या' ख. पाठः। ४. 'करे' ख. पाठः।

तथा नृत्यस्थितं मां त्वां तंदालोकनकौतुकाम्। आभ्यां भजन्नित्यशो यो मन्त्राभ्यां याचते वरम्।।३९।।
तस्यावयोः प्रसादेन सिध्यत्येवाशु चिन्तितम्। तिष्ठेच्चोपरि सर्वेषां सर्वथा सर्वतः सदा।। ४०।।
हंसहृद्ग्रासनभसां रसाम्बुव्याप्तदाहकैः। क्ष्मास्वयोगान्नामतश्च नवात्मा नवभिश्च तैः।। ४१।।

हसक्षमलवयरूं''

तस्यैव क्ष्माक्षरं हित्वा वह्निं तत्र प्रयोजयेत्। नवात्मिका तु ते विद्या द्वावेतौ सर्वसिद्धये।। ४२।।

''हसक्षमलवयरीं''

प्रणवं त्रिपुटान्त्यार्णं नमसा चतुरक्षरी। देवीहृदयसंज्ञासौ विद्या सर्वार्थसिद्धिदा ।। ४३।।

''ओंक्लीनमः''

ध्यानमुक्तममुष्यास्तु सततं सर्वमङ्गलम्। सितकुष्टं स्वर्णपुष्पीमूलं तत्पत्रवारिणा ।। ४४।।
पिष्ट्वा शुद्धः पायसाशी विद्याजापी जितेन्द्रियः। भूमौ शयीत तां रात्रिं विजने सुशुभे गृहे।४५।।
तल्लिप्ताज्ञाकण्ठहृत्कस्तत्रालिखितमायकः। स्वपन्निशीथिनीविद्यां जपन्नाज्ञास्थितं तथा।। ४६।।
अतिलोहितरूपां तां विद्यां तां देवतामपि। स्वप्ने सा तं समासाद्य वदेदस्याभिवाञ्छितम्।। ४७।।
देवीहृदयविद्येयं स्त्रीणां सद्यः फलप्रदा। सौभाग्यलक्ष्मीकीर्त्यायुरारोग्यविजयावहा ।। ४८।।
प्रणवं रुद्रदयिते तथा योगेश्वरीति च। स्वाहान्तिका तु विद्येयं कथिता द्वादशाक्षरी।। ४९।।

''ओंरुद्रदयिते योगेश्वरि स्वाहा''।

गौरीविद्येत्यसौ प्रोक्ता लक्षजप्तानु[1]सारतः। ध्यानात् प्राग्वद्धयारूढा देवी साधयतीप्सितम्।। ५०।।
निशामध्ये तु निशया निजवामोरुदेशतः। साध्यनामसमोपेतामालिख्यैतां तु तन्मनाः ।। ५१।।
ध्यायंस्तथा जपेद्विद्यां तदैवाकर्षयेत् प्रियाम्। नानया सदृशी विद्या विद्यते वनितावशे ।। ५२।।
राजवश्ये तथा लोकवश्ये स्त्रीवश्यकर्मणि। न विद्याः सन्ति विषये[2] हयगौरीमनुद्वयात्।। ५३।।
अग्निर्नादश्च तद्युक्तस्तावेवाथ नभोधरे। एतद् द्वितीयं तौ स्यातां काकण्ठेति ततः परम्।। ५४।।
मुण्डिस्वाहेति विद्येयमुक्ता पञ्चदशाक्षरी।..।।

''इटिइटिमुटिमुटिकाकण्ठमुण्डि स्वाहा''।

....। कृताङ्गो मायया ध्यात्वा तां देवीं सर्वमङ्गलाम्।। ५५।।
जपेद्विद्यां मौनयुतः कदलीपूगमध्यतः। त्रिसन्ध्यार्चासमोपेतं सा प्रीता लक्षदा दिनैः।। ५६।।
प्रणवं नवकेशी च कनकं वतिसंयुतम्। स्वाहान्ता द्वादशार्णेयं विद्या निष्कत्रयप्रदा।। ५७।।

''ओं नवकेशी कनकवति स्वाहा''।

नित्यशो गिरिशृङ्गस्थवटमूले त्रिलक्षकम्। जपित्वाक्षरशो विद्यां फलमुक्तमवाप्नुयात्।। ५८।।
चरः प्राणो मरुद्युक्तो व्याप्तं प्राणो धरान्वितः। व्योमद्वयं मरुद्युक्तं रयश्च धरया युतः।। ५९।।
चरः प्राण इति प्रोक्ता विद्याभीष्टं वदेन्मिथः।..।।

---

[1] 'सुसाधिता' ख. पाठः। [2] 'भुवने' क. पाठः।

''एकायकुण्णातुएक''।

....। जातीपुष्पैर्निशामध्ये पूजिता मङ्गलाकृतिः॥ ६०॥
सिद्धसारस्वतस्यादौ त्र्यक्षराणि ततः परम्। मातङ्गिन्यै तथा स्वाहा पुनस्त्रीणीनि तन्मनुः॥ ६१॥

''ऐंह्रींश्रीं मातङ्गिन्यै स्वाहा ऐंह्रींश्रीं''।

द्वादशार्णेयमचिरात् सौभाग्यं कवितां श्रियम्। गानाभियोगं विश्वेषां मान्यतां च प्रयच्छति॥ ६२॥
यामाकृताङ्गो नित्यशस्तां जपेदुदये रवेः। सहस्रवारं तेनासौ सिद्धा सर्वं प्रयच्छति॥ ६३॥
इन्द्रनीलनिभां रक्तवसनाभरणोज्ज्वलाम्। प्रलम्बवेणीसन्नद्धसौगन्धिकसमुज्ज्वलाम् ॥ ६४॥
तत्क्लृप्तमुण्डमालां च मुक्तास्तबकशोभिताम्। ऊर्मिकावीरकटकनूपुरैर्मण्डिताङ्घ्रिकाम्॥ ६५॥
वादयन्तीं सदा वीणां स्वसमानाङ्गनाजनैः। स्तूयमानां च परितो ध्यायेद् देवीं शुचिस्मिताम्॥६६॥
मातङ्गिन्या द्वितीयं च तृतीयं तदनन्तरम्। रसाचरस्वैरम्बु स्याद्वातागनी तदनन्तरम् ॥ ६७॥
राज्यदे राज्यलक्ष्मीति हृन्माया व्युत्क्रमात् त्रयम्। विद्यासौ राज्यलक्ष्म्यास्तु षोडशार्णा समीरिता॥६८॥

''ह्रींश्रींब्लेंअइराज्यदे राज्यलक्ष्मि सः ब्लेंश्रींह्रीं''।

ध्यात्वा तां विजयाविद्यां जपेन्नित्यं च पूजयेत्। राज्यं प्रयच्छति प्रीता साधकायाविलम्बितम्॥६९॥
प्रणवं श्रीपुटां मायां कमले तदनन्तरम्। कमलातो लये पश्चात्प्रसीद द्वितयं पुनः॥ ७०॥
आद्यत्रयं महालक्ष्म्यै नमः प्रोक्ता महेश्वरि। विद्या ते सप्तविंशार्णा समस्ताभीष्टदानिशम्॥ ७१॥

''ओंश्रींह्रींश्रीं कमले कमलालये प्रसीदप्रसीद श्रींह्रींश्रीं महालक्ष्म्यै नमः''।

बीजत्रयैः षडङ्गानि द्विरुक्तैर्विहितानि वै। ध्यानं च विजयारूपं प्रजपेद् दिनशस्तथा॥ ७२॥
कीर्तिलक्ष्मीध[1]रारोग्यविजयाद्यखिलेष्टदा। तुलास्थे भास्करे पूजा पूर्णायां सकलेष्टदा॥ ७३॥
ज्यासकंदाहवह्निस्वान्नभो हंसो मरुद्युतः। चण्डतेजश्च सङ्कर्षवर्णाः स्युस्तदनन्तरम् ॥ ७४॥
व्योमाग्न्या कालिमन्थाने वर्णा हंसश्च मायया। सिद्धलक्ष्म्याश्च विद्येयं प्रोक्ता सप्तदशाक्षरा॥ ७५॥

''जझरीं महाचण्डतेजः सङ्कर्षणि कालिमन्थाने हः''।

आद्येन कृत्वा चाङ्गानि जपेद्विद्यां तु नित्यशः। प्रातः सहस्रवारं तु तर्पयेद् तद्दशांशकम्॥ ७६॥
प्रसन्ना वर्षतो नित्यपूजायां साधकस्य सा। प्रयच्छति जयं युद्धे श्रियं सर्वातिशायिनीम्॥ ७७॥
भूतप्रेतपिशाचापस्मारकृत्यादिवारणम् । करोति मार्गे कान्तारगिरिकृच्छ्रेऽभिरक्षति ॥ ७८॥
ध्यानं तु तस्या देवेशि मङ्गले मङ्गलासमा। युद्धमार्गादिरक्षासु शृणु वक्ष्ये यथाविधि॥ ७९॥
शतशीर्षां त्रिनयनां प्रतिवक्त्रं भयानकाम्। हस्तद्विशतसंयुक्तां स्वसमाकारशक्तिभिः॥ ८०॥
वृतामनन्तहस्तेषु साधकाभीष्टहेतिकाम्। ध्यात्वैवमर्चयन्निष्टमवाप्नोत्यखिलं ध्रुवम् ॥ ८१॥
प्राक्प्रत्यग्दक्षिणोदक् च कृत्वा सूत्राष्टकं ततः। मार्जयेद् बाह्यवीथीषु पञ्च पञ्च तथैकधा॥८२॥
तदन्तरपि कोणेषु त्रयमेकीकृते ततः। मध्यादि विलिखेन्मन्त्रवर्णान् षोडशनाम च॥ ८३॥

---

१. 'धना' ख. पाठः। २. 'अनन्तैः' ख. पाठः। दिव्यपाठत्वात् अनन्ताभिरिति यावत्।

[1]प्रदक्षिणत्रयान्मध्ये पूजयेत्तत्र तां सदा। समस्ताभीष्टसंसिद्ध्यै सिद्धलक्ष्मीं तु नित्यशः ।। ८४।।
कदाचिदाद्या ललिता पुंरूषा कृष्णविग्रहा। सर्वनारीसमारम्भादकरोद्विवशं जगत् ।। ८५।।
ततः सः गोपीसंज्ञाभिरावृतोऽभूत् स्वशक्तिभिः। [2]ततस्तेन विनोदाय स्वं षोढाकल्पयद्वपुः।। ८६।।
तेषां षण्णां च षण्मन्त्राः समस्ताभीष्टदायकाः। तैर्यन्त्रपूजाहवनजपतर्पणसेचनैः ।। ८७।।
भवन्ति लक्ष्मीकान्तिश्रीविजयारोग्यसम्पदः। शृणु तान् षट्क्रमान्मन्त्रान् ध्यानार्चाविनियोगकैः।।८८।।
स्थिरारसाव्याप्तवनस्वैरुक्तोभून्महामनुः । प्रणवद्वयमध्यस्थः सिद्धगोपालकाभिधः ।। ८९।।

''ओंग्ल्यौंओं''। (१)

प्रोक्तैस्तैः पञ्चभिः काममन्त्रैरेकैकतः क्रमात्। पुटनान्नामतस्तस्माद्बाणैस्तैः पुटनाद्भवेत्।। ९०।।
सम्मोहनाख्यस्त्वेवं च सप्तधाभून्महामनुः।...।।

''ह्रींग्ल्यौंह्रीं (२)। क्लींग्ल्यौंक्लीं (३)। ऐंग्ल्यौंऐं (४)। ब्लूंग्ल्यौंब्लूं (५)। स्त्रींग्ल्यौंस्त्रीं (६)। द्रांद्रींक्लींब्लूंसः ग्ल्यौं सब्लूंक्लींद्रींद्रां (७)।

....। आद्य पञ्चाङ्गको मन्त्रस्त्वितरे स्युः षडङ्गकाः।। ९१।।
तत्तद्बीजादिकेन स्यात् षडङ्गानि यथाविधि। अष्टपत्राब्जमध्यस्थं पूजयेत् सप्त तान् क्रमात्।।९२।।
यन्त्राणि तानि तन्मन्त्रयुतमध्यान्यनुक्रमात्। वारेषु भास्कराद्येषु तेषां पूजा क्रमेण वै।। ९३।।
सकलेष्टप्रदा नित्यं दुग्धक्षौद्रघृतान्नकैः। पायसैर्नारिकेलैश्च ससितैः कदलीफलैः।। ९४।।
क्रमाद्वारेषु नैवेद्यं दद्यादिष्टार्थसिद्धये। इतीरितैः सप्तभिस्तैः सर्वमिष्टवापुयात्।। ९५।।
अरुणं षड्भुजं वंशवादिनं पाशमङ्कुशम्। पुण्ड्रेक्षुचापपुष्पेषून् दधानं शक्तिभिः स्मरेत्।। ९६।।
सुवर्णपुष्पीमूलेन पिष्टेन निजवारिणा । हृत्कण्ठाज्ञालेपनतो देवतादर्शनं भवेत् ।। ९७।।
उग्रगन्धां च नीलां च धातकीं फलसंयुताम्। आरग्वधं मुण्डिनीं च शाखोटं जम्बुमूलकम्।।९८।।
कर्णिकारं हंसपदीं वाराहीं [3]भृङ्गराजकम्। कोरण्टं कर्पटं सूत्रं[4] त्रिफलां चूर्णयेत् समम्।। ९९।।
सितेनाज्येन मधुना [5]जग्ध्वा तल्लिप्ततत्त्रयः। भावयंस्तन्मयो भूयाद् दिवसैः कैश्चिदात्मवान्।।१००।।

इति।। अथ वासना तत्र श्रीतन्त्रराजे– (३५। १)

अथ षोडशनित्यानां स्वात्मत्वे वासनां शृणु। यया तन्मयतासिद्धिः प्रत्यक्षा भवति ध्रुवम्।। १।।
गुरुराद्या भवेच्छक्तिः सा विमर्शमयी मता। नवत्वं तस्य देहस्य रन्ध्रत्वेनावभासते।। २।।
बलिदेव्यः स्वमायाः स्युः पञ्चमी जनकात्मिका। कुरुकुल्ला भवेन्माता पुरुषार्थास्तु सागराः।।३।।
रत्नद्वीपो भवेद्देहो नवत्वं धातुरोमभिः। सङ्कल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः।। ४।।
ग्रहर्क्षराशिचक्रेण कालात्मा पश्चिमामुखः। तेन पूर्वाभिमुख्यं स्यादन्यत्ते कथितं मिथः।। ५।।
ज्ञाता स्वात्मा भवेज्ज्ञानमर्घ्यं ज्ञेयं बहिःस्थितम्। श्रीचक्रपूजनं तेषामेकीकरणमीरितम्।। ६।।
श्रीचक्रे सिद्धयः प्रोक्ता रसा नियतिसंयुताः। ऊर्मयः पुण्यपापे च ब्राह्मयाद्या मातरः स्मृताः।। ७।।

१.'प्रादक्षिण्यक्रमात्' ख. पाठः। २.'तदा' ख. पाठः। ३.'मृगराजकम्' ख. पाठः। ४.'पिप्पलंमूलं' ख. पाठः। ५.'द' ख. पाठः।

भूतेन्द्रियमनांस्येवं क्रमान्नित्याकलाः पुनः। कर्मेन्द्रियार्था दोषाश्च ज्ञेयाः स्युः शक्तयोऽष्ट वै।। ८।।
नाड्यश्चतुर्दश प्रोक्ताः क्षोभिण्याद्यास्तु शुक्तयः। वायवो दश सम्प्रोक्ताः सर्वसिद्ध्यादिशक्तयः।।९।।
वह्नयो दश सम्प्रोक्ताः सर्वज्ञाद्यास्तु शुक्तयः। शीतोष्णसुखदुःखेच्छा गुणाः प्रोक्ताः क्रमेण वै।।१०।।
वशिन्याद्याः शक्तयः स्युस्तन्मात्राः पुष्पसायकाः। मनो भवेदिक्षुधनुः पाशो राग इतीरितः[1]।।११।।
द्वेषः स्यादङ्कुशः प्रोक्तः क्रमेण वरवर्णिनि। अव्यक्ताहङ्कृतिमहदाकाराः प्रतिलोमतः।। १२।।
कामेश्वर्यादिदेव्यः स्युः संवित्कामेश्वरः स्मृतः। स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा।। १३।।
लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावना। सिद्धिस्त्वनन्यचित्तत्वं मुद्रा वैभवभावना।। १४।।
उपाचाराश्चलत्वेऽपि तन्मयत्वाप्रमत्तता। प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम्।। १५।।
यन्त्राणि मन्त्राः सर्वत्र स्वात्मत्वे धै[2]र्यसाधनम्। सन्ध्यासु भजनं देव्या आदिमध्यान्तमञ्जनम्।।१६।।
अन्यास्तु शक्तयश्चक्रगामिन्यो याः समन्ततः। तास्तु विश्वविकल्पानां हेतवः समुदीरिताः।। १७।।
न्यासस्तु देवतात्वेन स्वात्मनो देहकल्पनम्। जपस्तन्मयतारूपभावनं सम्यगीरितम्।। १८।।
होमो विश्वविकल्पानामात्मन्यस्तमयो मतः। तेषामन्योन्यसम्भेदभावनं तर्पणं स्मृतम्।। १९।।
मोहाज्ञानादिदुःखनामात्मन्यस्तमयो दृढम्। अभिषेकस्तु विद्या स्यादात्मा सर्वाश्रयो महान्।।२०।।
उपाधीनां तु राहित्यमुपदेश इतीरितः। दक्षिणा भेदशून्यत्वं शूश्रूषा स्थैर्यमुच्यते ।। २१।।
तिथिरूपेण कालेन[3] परिणामावलोकनम्। नित्याः पञ्चदशैताः स्युरिति प्रोक्तास्तु वासनाः।। २२।।
पृथिव्यादीनि भूतानि कनिष्ठाद्याः क्रमान्मताः। तेषामन्योन्यसम्भेदप्रकारैस्तत्प्रपञ्चता।। २३।।
ललितायास्त्रिभिर्वर्णैः सकलार्थोऽभिधीयते। शेषेण देवीरूपं तु तेन स्यादिदमीरितम्।। २४।।
अशेषतो जगत् कृत्स्नं हृल्लेखात्मकमीरितम्। तस्याश्चार्थस्तु कथितः सर्वतन्त्रेषु गोपितः।।२५।।
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना। तयोर्विमर्श ईकारो बिन्दुना तन्निफालनम्[+]।। २६।।

इति।। अथ प्रणवस्वरूपनिरूपणम्। तत्रोपनिषद्वाक्यम्—

ओंब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम्। यत्रोत्पत्तिं लयं चैव ब्रह्मविण्णुमहेश्वरात्।। १।।
प्रसादान्तःसमुत्थस्य विष्णोरद्भुतकर्मणः। रहस्यं ब्रह्मविद्यायां ध्रुवाग्निः सम्प्रचक्षते ।। २।।
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः। शरीरं तस्य वक्ष्यामि स्थानं कालं लयं तथा।। ३।।
तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः। तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य च।। ४।।
ऋग्वेदो गार्हपत्यश्च पृथिवी ब्रह्म एव च। अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः।। ५।।
यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च। विष्णुश्च भगवान् देव उकारः परिकीर्तितः।। ६।।
सामवेदस्तथाद्यौश्चाहवनीयस्तथैव च। ईश्वरः परमो देवो मकारः परिकीर्तितः।। ७।।

---

१. 'उदीरितः' ख. पाठः। २. 'स्थैर्य' ख. पाठः। ३. 'कालस्य' ख. पाठः।

[+] निफालनं तादात्म्यविमर्शनिणीतिरित्यर्थः।

सूर्यमण्डलमिवाभात्यकार: शङ्खमध्यग:। उकारश्चन्द्रसङ्काशस्तस्य मध्ये व्यवस्थित:।। ८।।
मकारश्चाग्निसङ्काशा विधूमो विद्युतोपम:। तिस्रो . मात्रास्तथा ज्ञेया: सोमसूर्याग्नितेजस:।। ९।।
शिखाभा दीपसङ्काशा यस्मिन्नुपरि वर्तते। अर्धमात्रा तु सा ज्ञेया प्रणवस्योपरि स्थिता।। १०।।
पद्मसूत्रनिभा सूक्ष्मा शिखाभा दृश्यते परा। सा नाडी सूर्यसङ्काशा सूर्यं भित्त्वा तथापरम्।। ११।।
द्वासप्ततिसहस्राणि सूर्यं भित्त्वा तु मूर्धनि। वरद: सर्वभूतानां सर्वं व्याप्यैव तिष्ठति।। १२।।
कांस्यघण्टानिनादस्तु यथा लीयति शान्तये। ओंकारस्तु तथा योज्य: शान्तये सर्वमिच्छता।।१३।।
यस्मिन् संलीयते शब्दस्तत्परं ब्रह्म गीयते। ध्रुवं हि चिन्तयेद्ब्रह्म सोऽमृतत्वाय कल्पते
सोऽमृतत्वाय कल्पते।। १४।।

इति। अस्यार्थ:—ब्रह्मविद्यां प्रवक्ष्यामीति श्लोक: क्वचिदेवादौ पठ्यते। ब्रह्म प्रणवस्तस्य विद्यां ज्ञानं, तां किंभूतां, सर्वेषां ज्ञानं ज्ञानोपायभूतां, प्रणवेन ब्रह्मणि ज्ञाते सर्वस्य विज्ञानात्। तथा यत्र विद्यायां देवत्रयादुत्पत्तिं लयं चकारात् पालनं च वक्ष्यामीति पूर्वेणान्वय: श्रुते: प्रतिज्ञेयम्।। प्रसादेति विष्णो: ब्रह्मविद्यायां रहस्यं ध्रुवाग्नि: प्रणवतेज इति सम्प्रचक्षते बुधा इत्यन्वय:, विष्णुनेयं विद्या प्रवर्तितेत्यर्थ:। कीदृशस्य प्रसादेन भक्तकृपया अन्त: अन्तरात् स्तम्भमध्यात् समुत्थस्य नृसिंहरूपेण प्रकटीभूतस्य, यद्वा ''प्रासादो देवभूभुजा''मिति कोषात् क्षीरोदार्णववैकुण्ठबलिगृहद्वारादे: प्रासादस्यान्तराज्जगद्रक्षणार्थं प्रकटीभूतस्य, यद्वा प्रसाद: लिङ्गाद्यपेक्षया प्रसन्नरूपो जीवस्तस्यान्तरमावरणमविद्यादि, तत: समुत्थस्य निष्क्रान्तस्याविद्यावरणरहितस्येत्यर्थ:। यथोक्तं छान्दोग्ये—''अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुप[1]सम्पद्य स्वेन रूपेणाभिसम्पद्यते[2] स उत्तमपुरुष:'' इति। अद्भूतकर्मणो मत्स्यादिरूपेण ओंकारो ध्रुवोऽक्षरनिघण्टावुक्त:। तथा हि—

''ओंकारो वर्तुलस्तारो बिन्दु: शक्तिस्त्रिदैवत:। प्रणवो मन्त्रगर्भश्च पञ्चदेवो ध्रुव: शिव:।।
मन्त्राद्य: परमं बीजं मूलमाद्यश्च तारक:। शिवादि व्यापको व्यक्त: परं ज्योतिश्च संविद:''।।

इति।। स्थानं कालं लयं तथेति कालशब्दो मेचकवाचको वर्णं लक्षयति, तेन वर्णं वक्ष्यामीत्यर्थ:। वर्णमित्येव वक्तव्ये कालग्रहणं मात्रारूपकालस्यापि सङ्ग्रहार्थमिति द्रष्टव्यम्। अवयवश: शरीरं तावदाह तत्र देवा इति, त्र्यक्षरस्य शिवस्य चेति। शिवोऽर्धमात्रार्थ:। तिस्रो मात्रा त्र्यक्षरस्य, अर्धमात्रा शिवस्येत्यर्थ: प्रणवस्य देवादयस्त्रय उक्ता:। त्रयस्त्रयोऽनुपदमेव वक्ष्यन्ते। तिस्रो मात्रा अर्धमात्रा चेति वक्तव्ये छान्दस: सन्धि:। तदुक्तं हठप्रदीपिकायाम्—

''अकारश्च उकारश्च मकारो बिन्दुसंज्ञक:। त्रिधा मात्रा स्थिता यत्र तत्परं ज्योतिरोमिति''।।

त्रय इत्युक्तं तदेव विभजते ऋग्वेद इत्यादिना। ब्रह्म एव चेत्यत्र छान्दसो ह्रस्व: प्रकृतिभावश्च, ब्रह्मा देव इत्यर्थ:। खण्डान्तेन ग्रन्थेन शरीरमित्युक्तं सम्प्रति स्थानं वर्णसहितमाह सूर्येति, सूर्यमण्डलमिवाभाति अकार:।। शङ्खो ललाटास्थि तन्मध्यं नेत्रस्थानं तत्र वर्तमान: ''योऽयं दक्षिणेऽक्षन्पुरुष:'' इति श्रुते:। ''शङ्खो निध्यन्तरे कम्बुललाटास्थिनखेषु चेति'' विश्व:। तस्य मध्ये शङ्खस्यैव मध्येऽर्थाद्वामनेत्रे स्थित:। मकार इत्यत्रापि तस्य मध्ये इत्यपेक्षते। शङ्खस्य मध्ये अर्थात् तृतीयनेत्रे व्यवस्थित:। अत एव याज्ञवल्क्येनोक्तम्—

---

१. 'तीरूपं सं' ख. पाठ:। २. 'निष्प' क. पाठ:।

इडायां पिङ्गलायां च चरतश्चन्द्रभास्करौ। इडायां चन्द्रमा ज्ञेयः पिङ्गलायां रविः स्मृतः''।।

इति।। खेचर्यां च–

''जिह्वामूले स्थितो देवि सर्वतेजोमयोऽनलः। तदग्रे भास्करश्चन्द्रस्तालुमध्ये प्रतिष्ठितः।।
एवं यो वेत्ति तत्त्वेन तस्य सिद्धिः प्रजायते''।।

इति। तिस्रो मात्रा अकारादयः। अनेन काल उक्तः। सोमसूर्याग्नितेजस इत्यनेन वर्णा उक्ताः। यस्मिन् शङ्खे उपरि तृतीयनेत्रादुपरि, अनेनार्धमात्रास्थानमुक्तम्। पद्मसूत्रनिभेति तस्या वर्ण उक्तः। शिखाभा ज्वालाभा ऊर्ध्वतावैशद्याभ्याम्। तथा मूले स्थूला उपर्युपरि तन्वी च।

''शिखा शिफायां ज्वालायां चूडायामग्रमात्रके। लाङ्गल्यां चापि शाखायां चूडायां च शिखण्डिनः।।''

इति विश्वः। सा नाडी सुषुम्ना तस्या एव वा पूर्वाणि विशेषणानि। सूर्यं चक्षुरधिष्ठानं अथवा सूर्यालब्धरश्मित्वान्मनोऽधिष्ठानश्चन्द्रः सूर्यस्तं भित्त्वा तथा अपरमधःकन्दे द्वासप्ततिसहस्रनाडीर्भित्त्वा ऊर्ध्वं गता।। तदुक्तं (गोरक्षेण)–

''ऊर्ध्वं मेढ्रादधो नाभेः कन्दयोनिः खगाण्डवत्। तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः''।।

इति। पुनरधिदैवतं सूर्यं भित्त्वा मूर्धनि ब्रह्मलोके द्वादशान्ते च दृश्यते इत्यनुषङ्गः।। तदुक्तं याज्ञवल्क्येन–

तासां मुख्यतमा तिस्रस्तिसृष्वेकोत्तमोत्तमा। मुक्तिमार्गेति सा प्रोक्ता सुषुम्ना विश्वधारिणी।। १ ।।
कन्दस्था मध्यमे[1] मार्गे सुषुम्ना सुप्रतिष्ठता। पृष्ठमध्यस्थिता नाडी सा हि मूर्ध्नि व्यवस्थिता।।२ ।।
मुक्तिमार्गे सुषुम्ना सा ब्रह्मरन्ध्रे प्रतिष्ठिता। अव्यक्ता सैव विज्ञेया सूक्ष्मा सा वैष्णवी स्मृता।।३ ।।

इति। प्रणवो नादरूपेण सर्वं व्याप्यैव तिष्ठतीत्याह वरद इति। अनेन ओंकारोऽनाहतशब्दो विष्णुश्चैक इत्युक्तं भवति। इदानीं लयमाह कांस्यघण्टेति। यथा लीयति लीनो उपरतव्यापारो भवति ओंकारस्तथा शान्तये योज्यः, प्लुततरो जप्तव्य इत्यर्थः। सर्वं सर्वात्मभावं ब्रह्मभावमिच्छता। यस्मिन् संलीयते इति, यद्वस्त्वनुभूय शब्दो विषयो नोपलभ्यते विलीयते तत्परं ब्रह्म।। तदुक्तं प्रदीपिकायाम्–

काष्ठे प्रवर्तितो वह्निः काष्ठेन सह शाम्यति। नादे प्रवर्तितं चित्तं नादेन सह लीयते।। १ ।।
विसृज्य सकलं बाह्यं नादे दुग्धाम्बुवन्मनः। एकीभूयास्य मनसा ब्रह्माकाशे विलीयते।। २ ।।

इति। लयलक्षणं तु–

लयो लय इति प्राहुः कीदृशं लयलक्षणम्। अपुनर्वासनोत्थानाल्लयो विषयविस्मृतिः।। १ ।।

यद्वा यतो वाचो निवर्तन्ते, इत्यर्थः। उपसंहरति ध्रुवमिति। ध्रुवमोङ्कारं हि ब्रह्म चिन्तयेत्, ध्रुवमेकरूपं वा एकाग्रतया वा ब्रह्म चिन्तयेत्। द्विरुक्तिः समाप्त्यर्थः।।

अथ प्रसङ्गतो योगलक्षणमाह क्षुरिकायाम्–

क्षुरिकां सम्प्रवक्ष्यामि धारणां योगसिद्धये। यां प्राप्य न पुनर्जन्म योगयुक्तः स[2] जायते।। १ ।।
वेदतत्त्वार्थविहितं यथोक्तं हि स्वयम्भुवा। निःशब्दं देशमास्थाय तत्रासनमवस्थितः।। २ ।।
कूर्मोऽङ्गानीव संहृत्य मनो हृदि निरुध्य च। मात्राद्वादशयोगेन प्रणवेन शनैः शनैः।। ३ ।।

---

[1] 'मा गार्गि' ख. पाठः। [2] 'क्तस्य' क. पाठः।

पूरयेत् सर्वमात्मानं सर्वद्वारान् निरुध्य च। उरोमुखकटिग्रीवं किञ्चिद् हृदयमुन्नतम्॥ ४॥
प्राणान् सञ्चारयेद्योगी[1] नासाभ्यन्तर[2]चारिण:। भूत्वा तत्र गत: प्राणान् शनैरथ समुत्सृजेत्[3]॥५॥
स्थिरमात्रादृढं कृत्वा अङ्गुष्ठे तु समाहित:। द्वे तु गुल्फे च कुर्वीत जङ्घे चैव त्रयस्त्रय:॥ ६॥
द्वे जानुनि तथोरुभ्यां गुदे शिश्ने त्रयस्त्रय:। वायोरायतनं चात्र[4] नाभिदेशे समाश्रयेत्॥ ७॥
तत्र नाडी सुषुम्ना तु नाडीभिर्बहुभिर्वृता। अणुरक्ताश्च पीताश्च कृष्णास्ताम्रविलोहिता:॥ ८॥
अतिसूक्ष्मां च तन्वीं च शुक्लां नाडीं समाश्रयेत्। तत: सञ्चारयेत् प्राणानूर्णनाभीव तन्तुना॥९॥
तत्र[5] रक्तोत्पलाभासं पुरुषायतनं महत्। दहरं पुण्डरेकेति[6] वेदान्तेषु निगद्यते॥ १०॥
तद्भित्त्वा कण्ठमायाति तां नाडीं पूरयन्यत:[7]। मनसस्तु क्षुरं गृह्य सुतीक्ष्णं बुद्धिनिर्मलम्॥ ११॥
पादस्योपरि मर्मृज्य तद्रूपं नाम कृन्तयेत्। मनोद्वारेण तीक्ष्णेन योगमाश्रित्य नित्यश:॥ १२॥
इद्रवज्र इव प्रोक्तं मर्मजङ्घानुकीर्तनम्। तद्ध्यानबलयोगेन धारणाभिर्निकृन्तयेत्॥ १३॥
ऊरोर्मध्ये तु संस्थाप्य मर्मप्राणविमोचनम्। चतुरभ्यासयोगेन छिन्देदनभिशङ्कित: ॥ १४॥
तत: कण्ठान्तरे योगी समूहन्नाडिसञ्चयम्। एकोत्तरं नाडिशतं तासां मध्ये वरा: स्मृता:॥ १५॥
इडा रक्षतु वामेन पिङ्गला दक्षिणेन तु। तयोर्मध्ये वरं स्थानं यस्तं वेद स वेदवित्॥ १६॥
सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी। द्वासप्ततिसहस्राणि प्रति नाडीस्तु[8] तैतिलम्॥ १७॥
छिद्यते ध्यानयोगेन सुषुम्नैका न छिद्यते। योगनिर्मलधारेण क्षुरेणान[9]लवर्चसा ॥ १८॥
छिन्देन्नाडीशतं धीर: प्रभावादिह जन्मनि। जातीपुष्पसमायोगैर्यथा वास्यन्ति तैतिलम्॥ १९॥
एवं शुभाशुभैर्भावै: सा नाडी तां विभावयेत्। तद्भाविता: प्रपद्यन्ते पुनर्जन्मविवर्जिता:॥ २०॥
ततो विदितचित्तस्तु नि:शब्दं देशमाश्रित:[10]। नि:सङ्गस्तत्त्वयोगज्ञो निरपेक्ष: शनै: शनै;॥ २१॥
पाशं छित्वा यथा हंसो निर्विशङ्क: खमुत्क्रमेत्। छिन्नपाशस्तथा जीव: संसारं तरते तदा॥ २२॥
यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत्[11]। तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत्॥ २३॥
प्राणायामसुतीक्ष्णेन मात्राधारेण योगवित्। वैराग्योपलघृष्टेन छित्त्वा तन्तुं न बध्यते। छित्त्वा तन्तुं
न बध्यते॥ २४॥

इति। अस्यार्थ:—

"क्षुरिका शस्त्रिका प्रोक्ता तत्तुल्या धारणा यत:। तद्वाचकस्त्रिखण्डोऽयं क्षुरिकाग्रन्थ उच्यते"॥

गुरुत: प्राप्तविद्यस्य तत एव लब्धज्ञानप्रणवमन्त्रस्य षडङ्गयोगेऽधिकार इति तदर्थमुत्तरो ग्रन्थ: क्षुरिकामित्यादि। क्षुरिकामिव संसारोच्छित्तये शस्त्रिकामिव रूपकं धारणामात्मनि चित्तावस्थानलक्षणम्। उक्तं च योगियाज्ञल्क्येन—

---

[1] 'तस्मिन्' ग. पाठ:। [2] 'धा' क. पाठ:। [3] 'समुन्नयेत्' क. पाठ:। [4] ' चाथ' क. पाठ:। [5] 'तत:' क. पाठ:।
[6] 'तु' क. पाठ:। [7] 'येच्छनै:' येद्यत:' क. पाठ:। [8] 'नाडी तु' क. पाठ:। [9] 'मल' क. पाठ:।
[10] 'स्थित:' क. पाठ:। [11] 'नयेत्' क. पाठ:।

''शमादिगुणयुक्तस्य मनसः स्थितिरात्मनि। धारणेत्युच्यते सद्भिः शास्त्रतात्पर्यवेदिभिः।।

इति। न पुनर्जन्म भवतीति शेषः। स धारणावान् कुतश्चिदपराधाद्यदि योगभ्रष्टो भवति तर्हि जन्मान्तरे योगयुक्त एव जायते इत्यर्थः। ''योगश्चित्तवृत्तिनिरोधः''। ''तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिक''मिति स्मृतेः।। वेदेति। इदं योगस्वरूपं वेदेन तत्त्वार्थेन परमार्थेन[१] विहितं विधिविषयीकृतं स्वयंभुवा ब्रह्मणा यथोक्तं यथा वर्तते तथोक्तं न विसंवादीत्यर्थः। तदुक्तं योगियाज्ञवल्क्येन– ''वक्ष्यामि योगसर्वस्वं ब्रह्मणा कीर्तितं पुरा'' इति। 'यथोक्तं परमेष्ठिना' इति च।। योगस्वरूपं साधयितुं षडङ्गान्याह निःशब्दमिति। यदुक्तं 'कान्तारे विजने देशे फलमूलोदकान्विते। तपश्चरन् वसेन्नित्यं' इति।। षडङ्गलक्षणानि प्रागुक्तानि। यमादीनां पूर्वकाण्डादेव सिद्धत्वादिहानभिधानं, न तु कापालिकवदनङ्गीकारात्।

यमा दश यथा–

''अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्। क्षमा धृतिर्मिताहारः शौचं चेति यमा दश''।।

इति। नियमा दश यथा–

''तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम्। सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम्''।।

इति।। अवस्थित आस्थित आरुढः। तदुक्तं गीतासु–

''शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्''।।

इति। तथा तन्त्रेणासनं पद्माद्यास्थितमित्यपि बोद्धव्यम्। तदुक्तं हठयोगप्रदीपिकायाम्–

''हठस्य प्रथमाङ्गत्वादासनं पूर्वमुच्यते। तत् कुर्यादासनस्थैर्यमारोग्यं चाङ्गपाटवम्''।।

इति।। कूर्मोऽङ्गानीवेति प्रत्याहार उक्तः। अत्र इन्द्रियाणीति शेषः। तदुक्तम्–

''इन्द्रियाणां विचरतां विषयेषु स्वभावतः। बलादाहरणं तेषां प्रत्याहारः स उच्यते''।।

इति। आन्तरप्रत्याहारसिद्धये मन इति। हृदि हृत्पुण्डरीके। मनोऽनिरोद्धे दोषस्मरणात्। तदुक्तम्–

''कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते''।।

इति। मात्रेति द्वादश मात्रा नादबिन्दावुक्ताः 'घोषिणी प्रथमा मात्रा' इत्यादिना तत्रैव द्रष्टव्याः। प्रणवेन शनैः शनैरुच्चारितेन वायुं पूरयेत्। कीदृशेन मात्राः अकारोकारमकारार्धमात्राख्याश्चतस्रस्तासां प्रत्येकं तिस्रस्तिस्रो मात्रा घोषिण्यादयो भूमिपत्यादिफला द्वादश, तासां योगश्चिन्तनं यस्मिंस्तेन प्रणवेन पूरयेत्। यदा द्वादशभिः प्रणवैः पूरणं तदाष्टचत्वारिंशद्भिः कुम्भनं, चतुर्विंशतिभी रेचनम्। यदा तु षोडशभिः पूरणं तदा चतुष्षष्टिभिः कुम्भनं द्वात्रिंशद्भी रेचनम्। यदा त्वष्टभिः पूरणं तदा द्वात्रिंशद्भिः कुम्भनं षोडशभी रेचनमिति विवेकः। सर्वमात्मानं न तु कतिपया[२]ङ्गनिरोधेनोपविशेत्। तथा सति वायुवैषम्यं स्यात्। सर्वद्वारान् सर्वद्वाराणीत्यर्थः। अधोद्वारे आकुञ्चनमूलबन्धाभ्यामूर्ध्वद्वाराणि जालन्धरबन्धेन। उरोमुखकटिग्रीवमुन्नतं धारयेदिति शेषः। तदुक्तं गीतासु– ''समं कायशिरोग्रीवं धारयन्नचलं स्थिरम्''। इति। हृदयं किञ्चिदुन्नतं धारयेत्, अनेन जालन्धरबन्धः सूचितः। स यथा–

''कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढम्। बन्धो जालन्धराख्योऽयममृताक्षयकारकः''।।

इति।। सञ्चारयेत् पूरकमात्राभिस्तस्मिन् हृदये। नासेति तेन मुखेन पूरकरेचकौ निषिद्धौ, मुखेनैव पूरणे शिरानैर्मल्यासिद्धेः।

---

१. 'र्थत्वेन' क. पाठः। २. 'यान्यङ्गानि' क. ख. पाठः।

भूत्वेति प्राणस्तत्र सर्वशरीरे गतः प्रविष्टो भूत्वा तिष्ठतीति शेषः, एतेन कुम्भक उक्तः। स च पूरकमात्रापेक्षया चतुर्गुणाभिर्मात्राभिः कार्यः। अथ रेचकमाह शनैरिति। समुत्सर्जनं च पूरणापेक्षया द्विगुणाभिर्मात्राभिः। शीघ्रोत्सर्जने विमार्गे वायुर्गच्छेत्। स्थिरेति स्थिराभिरेकरूपाभिर्मात्राभिर्दृढं स्थिरं प्राणं कृत्वा केवलकुम्भके सिद्धे इत्यर्थः। ततो धारणाभिः प्रत्याहारमभ्यसेदित्याह अङ्गुष्ठे इत्यादिना। अङ्गुष्ठे इत्यादौ जातावेकवचनम्। अङ्गुष्ठयोर्गुल्फयोर्जङ्घयोरित्यादि बोद्धव्यम्। अङ्गुष्ठयोर्धारणे कुर्वीतेत्यन्वयः, द्वे तु, धारणे कुर्यादित्यर्थः। त्रयस्त्रय इति (जङ्घे प्राप्य) आद्यन्तमध्येषु निरोधाः कर्तव्या इति शेषः। जानुनि आद्यन्तयोरूरुभ्यां साधनाभ्यां ऊर्वोरपि तथा द्वे इत्यर्थः। गुदेति मूलाधारे स्वाधिष्ठाने चाद्यन्तमध्येषु निरोधः। वायोरिति, अत्र नाभिदेशे वायोरायतनं मुख्यं स्थानमस्ति। तच्च धारणया समाश्रयेदित्यर्थः। तत्रेति, तत्र नाभौ सुषुम्ना मध्यनाडी बहुभिर्द्वासप्ततिसहस्रैर्वृता। मूलं तु तस्याः कन्दमध्ये कन्दस्तु— 'गुदध्वजान्तरे कन्दमुत्सेधाद्द्व्यङ्गुलं विदु'रित्युक्तः। 'गुदमेढ्रान्तरे यद्वै— बेणुकन्दं तदुच्यते' इति च। बेणुः सुषुम्ना सा च षट्चक्रवती मूलाधारदण्डान्तर्विवरगता मूर्धानं भित्त्वा ब्रह्मलोकान्तं निर्गता। यच्छान्दोग्ये— 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका' इति। नाभेरूर्ध्वं तु चक्रानुक्रमेण धारणा मूर्धान्तं द्रष्टव्या। उक्तं च योगियाज्ञवल्क्येन—

मर्मस्थानानि सिद्ध्यर्थं शरीरे योगक्षेमयोः। तानि सर्वाणि वक्ष्यामि यथावच्छृणु सुव्रते॥ १॥

मर्मस्थानसंख्या तु—

"पादाङ्गुष्ठौ तु गुल्फौ च जङ्घामध्यौ तथैव च। [1]तयोर्मूलं च जान्वोश्च मध्ये चोरूभयस्य च॥२॥
पायुमूलं ततः पश्चान्मध्यदेहश्च मेढ्रकम्। नाभिश्च हृदयं गार्गि[2] कण्ठकूपस्तथैव च॥ ३॥
तालुमूलं च नासाया मूलं चाक्ष्णोश्च मण्डले। भ्रुवोर्मध्यं ललाटं च [3]प्रोक्तानि मुनिसत्तमैः[4]॥४॥

मर्मस्थानानि चैतानि"। इति एतेषु च तत्रैव धारणोक्ता—

स्थानेष्वेतेषु मनसा वायुमारोप्य धारयेत्। स्थानात्[5] स्थानं [6]समाकृष्य प्रत्याहारं प्रकुर्वतः॥ १॥
सर्वे रोगाश्च नश्यन्ति योगाः सिध्यन्ति तस्य च।..॥

इति। प्रपञ्चसारेऽपि— (१९। ५१)

अङ्गुष्ठगुल्फजानुद्वितय[7] च गुदं च सीवनी मेढ्रम्। नाभिर्हृदयं ग्रीवा सलम्बिकाग्रं तथैव नासा च।१॥
भ्रूमध्यललाटाग्रं सुषुम्नाग्रं द्वादशान्तमित्येवम्। उत्क्रान्तौ परकायप्रवेशने चागतौ च पुनः स्वतनौ॥२॥
स्थानानि धारणायाः प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः।..॥

इति। अङ्गुष्ठादूर्ध्वमारोहे फलमिदमुक्तम्। मूर्ध्नोऽङ्गुष्ठपर्यन्तावरोहेऽपि च धारणानां फलमुक्तम्—

"स्थानात् स्थानं समाकृष्य यस्त्वेवं धारयेत् सुधीः। सर्वपापविशुद्धात्मा जीवेदाचन्द्रतारकम्"॥

इति। अणुरक्ताश्चेत्यादीनां नाडीनां विशेषणम्। तदुक्तं छान्दोग्ये—"यथा या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्य" इति॥ अणवश्च ता रक्ताश्चेति समासः। एवं केवलकुम्भके सिद्धे प्राणमनसोः

---

[1] 'चित्योः' ग. पाठः। [2] 'याज्ञानि' ग. पाठः। [3] 'मूर्धा च' क. पाठः। [4] 'मे' क. पाठः। [5] 'मर्मस्थानं' क. पाठः।
[6] 'समुत्कृष्य' क. पाठः। [7] 'द्वययोनिगुदं' क. पाठः।

स्थानविशेषेषु प्रत्याहारमभ्यस्य[1] धारणासिद्धये सुषुम्नायां प्राणमनसोः प्रवेशः कर्तव्यः। तत्रोपायः—मूलोड्याणजालन्धरबन्धैः शक्तिचालनेन त्वपानमूर्ध्वमाकुञ्च्य तेन देहमध्ये अग्निं प्रज्वाल्य तज्ज्वालया कुण्डलिनीं प्रताप्योद्बोध्य ब्रह्म[2]नाडीद्वारमध्यस्थतन्मुखप्रसारणेन तत्र वायुमनोवह्नीन् प्रवेशयेदित्याशयेन आह—अतिसूक्ष्मामिति। तत्र जालन्धरबन्ध उक्तः। उड्याणं यथा—

"उदरे पश्चिमं तानं नाभेरूर्ध्वं तु कारयेत्। अडियाणो ह्ययं बन्धो मृत्युमातङ्गकेसरी"।।

इति।। मूलबन्धो यथा—

"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद् गुदम्। अपानमूर्ध्वमाकृष्य मूलबन्धो निगद्यते"।।

इति। शक्तिचालनं यथा—

सव्यासनस्थस्य फणावती सा प्रातश्च सायं प्रहरार्धमात्रम्।
प्रपूर्य सूर्यात् परिधानयुक्ता प्रदह्य नित्यं परिचालनीया।।

इति। अतिसूक्ष्मां तन्वीं बालाग्रशत(सहस्रान्त)भागोपमां नाडीं सुषुम्नां समाश्रयेत्, अन्या नाडीरुत्सृज्य तत्रैव मनो रुन्ध्यादित्यर्थः। ततस्तयेत्यर्थः। तृतीयार्थे तसिः। तन्तुना इति प्रतियोगिनि तृतीयाश्रवणात्। सुषुम्नाया प्राणान् सञ्चारयेदूर्ध्वं नयेत्। ऊर्णनाभी कीटविशेषो लूताख्यः स तन्तुना यथोर्ध्वं सञ्चरति तथा सञ्चारयेदित्यर्थः। तत इति। ततः सञ्चारानन्तरं तद्भित्त्वा इत्यग्रतनेनान्वयः। तत् पुण्डरीकं कीदृशं रक्तोत्पलवदाभासं रक्तवर्णं नानावर्णनाडीयोगात् रक्तता। 'पुण्डरीकं सिताम्बुजे' इति कोषात् सितत्वेऽपि औपाधिकी रक्तता ज्ञेया। पुरुषायतनं जीवनीडः महत् सर्वावभासकत्वात्। दहरं दभ्रं सूक्ष्मरूपत्वेन पुण्डरीके हृत्पद्मे दहराख्यमाकाशं वेदान्तेषु छान्दोग्यादिषु निगद्यते पठ्यते। तद्यथा— "अथ यदिदस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा व विजिज्ञासितव्यम्" इति। तद्भित्त्वेति, तत्पुण्डरीकमनाहताख्यं कुण्डलिनीं मनःप्राणाग्निभिर्भित्त्वा कण्ठं विशुद्धिचक्रस्थानं अर्गलां भेत्तुमायाति जीवः। तां सुषुम्नां पूरयन् व्याप्नुवन् यतः प्रयतः सावधानः 'पूरयन् दिवि' इति पाठे दिवि इति निमित्तसप्तमी, फलमपि च निमित्तं भवति, दिवः प्राप्त्यर्थं ऊर्ध्वमारोहेदित्यर्थः। मनसस्त्वेति मनःप्रकृतिकं क्षुरं शास्त्रनिष्णातं मन एवेत्यर्थः। सुतीक्ष्णं तर्केण घर्षणोपलेन निर्घृष्टं शाणस्थानीया बुद्ध्या निर्मलम्। पादस्येति, ब्रह्मणः पादस्य श्रुत्यन्तरोक्तस्य पुंस्पादस्थानीयस्योपरि तदुपासनया मर्मृज्य निर्मलीकृत्य, मृजेर्यङन्तात् ल्यप् छान्दसः। ब्रह्मणः पादा यथा— 'तदेतच्चतुष्पाद् ब्रह्म वाक् पादः प्राणः पादः चक्षुः पादः श्रोत्रं पादः, इत्यध्यात्मम्। अथाधिदैवतं 'अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः इत्युभयमेवादिष्टं भवति अध्यात्मं चाधिदेवं चेति। अथवा प्रणवस्य चत्वार्यक्षराण्येव जाग्रदादिरूपाणि पादाः। 'ओमित्येतदक्षरस्य पादाश्चत्वारः' इत्यथर्वणशिखोक्तेः। तत् प्रसिद्धं रूपं भूतादिस्वरूपं नाम तद्वाचकः शब्दः तद्द्वयं ब्रह्मणो लोमस्थानीयं स्वरूपाद् बाह्यं कृन्तयेन्निवर्तयेत्, तद्विषयां वृत्तिं भूतशुद्धिमार्गेण त्यजेदित्यर्थः। इदमेव तस्य निकृन्तनं यदविषयीकरणं मनोमयत्वात् संसारस्य मनसानुपरक्तस्य स्वरूपाभावात्। हठपक्षे उत्तरमार्गरोधकं सग्रन्थि नाडीचक्रं छिन्द्यात्। तदुक्तम्—

---

१. 'ध्यस्य' क. पाठः। २. 'मध्य' क. पाठः।

नासादक्षिणमार्गवाहिपवन: प्राणातिदीर्घीकृतश्चन्द्राम्भ:परिपूरितामृततनु: प्रग्घण्टिकायां तदा।
छिन्द्यात् कालविशालवह्निवशतो[1] भ्रूरन्ध्रनाडीगणान् तत्कार्यं कुरुते पुनर्नवतरं छिन्नद्रुमस्कन्धवत्।।

इति। कि कृत्वा निकृन्तयेदत आह मन इति। मनसा उपायेन नित्यशोऽभीक्ष्णं योगं जीवात्मपरमात्मनोरैक्यं पक्षान्तरे योगमुद्योगमाश्रित्य। इन्द्रेति। कीदृशं योगं इन्द्रवज्र इवेति। तथा प्रोक्तं यथा इन्द्रो वज्रेण भेद्यं भिनत्ति, एवमयं योगश्छेद्यं वासनाजालम्। इन्द्रवज्रो विद्युत् तत्तुल्यया कुण्डलिन्या नाडीजालं च छिनत्ति। पुन: कीदृशं, मर्मणो जङ्घाया अनुकीर्तनं यस्मिन् स तं जङ्घारूपं मर्म ध्यानस्थानं यत्र कथितम्। जङ्घाग्रहणमङ्गुष्ठादेरप्युपलक्षणं तुल्यन्यायत्वात्। अङ्गुष्ठादि-मूर्धान्तानां मर्मणामनुकीर्तनात्। 'मर्मजङ्घानुकर्तनं' इति पाठे यथा नापितेन क्षुरस्य तैक्ष्यज्ञानाय जङ्घा अनुकृत्यते मुण्ड्यते, तथाङ्गुष्ठादिमर्मस्थानानि नाडीमलापनुत्तये[2] निर्मलीक्रियन्ते इत्यर्थ:। तद्ध्यानेति, तच्छब्देन योग्यतावशाद् मर्म जङ्घादि गुणीभूतमपि परामृश्यते। तत् [3]सनामकं मर्मादि धारणाभि: छिन्द्यात्। अथवा व्यवहितमपि रूपं नाम तच्छब्देन परामृश्यते, स एवार्थ:। इममिन्द्रवज्रयोगं जिह्वायास्तालुमूले प्रवेशार्थं जिह्वामूलसूत्रकृन्तनरूपं हठयोगिनो वर्णयन्ति। तदुक्तं खेचर्याम्—

तालुमूलं समुद्धृत्य सप्तवासरमात्मवित्। स्वगुरूक्तप्रकारेण मलं सर्वं विशोषयेत्[4]।। १।।
स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम्। समाधाय यतस्तेन रोममात्रं समुच्छिदेत्।। २।।
छित्त्वा सैन्धवपथ्याभ्यां चूर्णं तेन प्रघर्षयेत्। पुन: सप्तदिने प्राप्ते रोममात्रं समुच्छिदेत्।। ३।।
एवं क्रमेण षण्मासं नित्ययुक्त: समाचरेत्। षण्मासाद्रसनामूले शिराबन्ध: प्रणश्यति।। ४।।

इति। ततो दोहनमुक्तम्।

अथ वागीश्वरीं नाम शिरोवस्त्रेण वेष्टयेत्। शनैरुत्कर्षयेद्योगी कालवेलाविधानवित्।। ५।।

इति। प्रवेशोऽप्युक्त:—

यदात्व[5]बाह्यमार्गेण जिह्वा ब्रह्मविलं विशेत्[6]। तदा ब्रह्मार्गलं देवि दुर्भेद्यं त्रिदशैरपि।। ६।।
अङ्गुल्यग्रेण सङ्घृष्य जिह्वां तत्र प्रवेशयेत्।....................................।।

इति। ततो जिह्वया मथनाभ्यासात् फलमप्युक्तम्—

एवं द्वादशवर्षान्ते संसिद्धि: परमेश्वरि। शरीरे सकलं विश्वं पश्यत्यात्माविभेदत:।।

इति। त हठतर: पन्था:। ऊरोरिति। ऊरुग्रहणमुत्तरोत्तरस्थानोपलक्षणम्, ऊरोर्मध्ये समनस्कं प्राणं संस्थाप्य मर्मण: प्राणस्य च विमोचनं कर्तव्यम्। 'अस्मिन् मर्मण्यहं स्थित:' इत्यभिमानं त्यक्त्वा निरालम्बस्तिष्ठेदित्यर्थ:। एवं स्थानान्तरेष्वप्यूह्यम्। अथवा सर्वत्रावच्छेदेन व्यवधायकं नाड्यादि विदार्य स्थानात् स्थानान्तरे गमनं च।। चतुरिति, ऊरोरुत्तरेषु चतुर्षु गुदशिश्ननाभिहृदयस्थानेषु अभ्यासयोगेन नामरूपमर्मप्राणान् छिन्देत्। अथवा चतुर्वारं चतुरावृत्त्या प्रातर्मध्याह्ने सायं निशीथे च सर्वेषु स्थानेषु अभ्यासयोगेन। नन्वेवं छेदने देहाभिमानत्यागेन देहपात: स्यादत आह—

---

१. 'शगान्' क. पाठ:। २. 'मलानुकृन्तनेन' क. पाठ:। ३. 'सनाडीक' क. ग. पाठ:। ४. 'ध' क. पाठ:।
५. 'ल्प' ग. पाठ:। ६. 'व्रजेत्' क. पाठ:।

अनभिशङ्कित इति। अयं भावः— न ह्यभिमानत्यागेन देहपातो भवति, सुषुप्त्यादिषु तथादर्शनात्। ध्यानिनां चिरकालं देहावस्थानस्मृतेश्च। न वा चक्रादिभेदेनेत्यपि सा शङ्केति।। तत इति, तदनन्तरं योगी कण्ठान्तरे कण्ठमध्ये नाडीसञ्चयं समूहन् सङ्घीकुर्वन् छिन्देदित्यनुषङ्गः। कियन्त्यो नाड्यः सन्तीत्यपेक्षायां मध्यमसंख्यामाह— एकेति। वरा उत्तमाः।। इडा रक्षत्वेति,। इडा वामेन पिङ्गला दक्षिणेन इत्येवं[1] वक्तव्ये रक्षतुशब्दप्रयोगः शिष्याणामाशिषे विद्यासम्प्रदायोच्छेदो मा भूदिति। वरं स्थानं सुषुम्नाख्यं, तं तदधिष्ठातारं पुंलिङ्गनिर्देशात्। किं तत् स्थानं कश्च तदधिष्ठाता इत्यपेक्षायामाह— सुषुम्ना त्विति। परे परपुरुषे ब्रह्मणि लीना विरजा निर्मला ब्रह्मरूपिणी ब्रह्मस्थानत्वात् सुषुम्नैव वरं स्थानं पर एव तदधिष्ठाता इत्यर्थः। कथंभूता सुषुम्ना, नाडीषु मध्ये द्वासप्ततिसहस्राणि नाडीः प्रति तैतिलमुच्छीर्षं गण्डुकम्। यथा गण्डुकाधारे उत्तमाङ्गं तिष्ठति एवं सुषुम्नाधारे सर्वा नाड्यः स्थिता इत्यर्थः। ''तैतिलो गण्डूके प्रोष्ठस्तैतिलं करणान्तरे'' इति विश्वः।। छिद्यते इति। ध्यानयोगेन ताश्छिद्यन्ते, तासां छिन्नत्वादुच्चावचदेशेषु उत्क्रान्तौ जीवस्य गमनं भवतीत्यर्थः।। यदुक्तम्— 'तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्न्या उत्क्रमणे भवन्ति' इति।। एका सुषुम्ना न छिद्यते, तस्याः परमसूक्ष्मत्वेन मनोविषयत्वायोग्यत्वात् मनोविषयस्यैव योगेन च्छेद्यत्वात् ऋजुतयाऽप्रतिद्वन्द्वित्वाच्च।। योगनिर्मलेति, योग एव निर्मला धारा यस्य तेन क्षुरेण मनसा अन[2]लवर्चसा पादस्योपरि मृ(घृ)ष्टत्वान्निर्मले तेजसा नाडीशतं छिन्देत्। तासां छेदे तत्प्रभूतस्य द्वासप्ततिसहस्रस्यापि छेद सिद्धः। धीरो धीमान्, प्रभावाद्योगसामर्थ्यात्, इह जन्मनि मनुष्यशरीरे। तैतिलेन सुषुम्नायाः सादृश्यान्तरमाह—जातीपुष्पेति। जाती [3]मालती तस्याः पुष्पाणां समायोगैः संयोगैः कृत्वा यथा प्रसाधकास्तैतिकं गण्डुकं वास्यन्ति वासेन परिमलेन युक्तं कुर्वन्ति एवं सा नाडी शुभाशुभैर्भावैर्वास्यते इति विपरिणामः। पुष्पाधिवासाश्रयो यथा गण्डुकं भवति तथेयं नाडी वासनाश्रय इत्यर्थः। तर्हि किं कार्यमत आह—तामिति। चिन्तनफलमाह—तदिति प्रपद्यन्ते सम्पद्यन्ते।। तत इति, विदितं चित्तं येन स विदितचित्तः। मात्राधारेण मात्रा द्वादशादिसंख्या प्रणवमात्रास्ता एव धारा यस्य मनः क्षुरस्य स तथा, तन्तुं वासनारूपं नाडीरूपं च। द्विरुक्तिर्निश्चयार्थः। समाप्त्यर्थ इति शब्दः। अयमारोहप्रकार उत्क्रान्तिसमये खेचरीपटले उक्तः, यथा—

यदा तु योगिनो बुद्धिस्त्यक्तुं देहमिमं भवेत्। तदा स्थिरासनो भूत्वा मूलाच्छक्तिं समुज्ज्वलाम्।।१।।
सूर्यकोटिप्रतीकाशां भावयेच्चिरमात्मनः। आपादतलपर्यन्तं प्रसृतं जीवमात्मनः ।। २।।
संहृत्य क्रमयोगेन मूलाधारपदं नयेत्। तत्र कुण्डलिनीं शक्तिं संवर्तानलसन्निभाम् ।। ३।।
जीवं निजं चेन्द्रियाणि ग्रसन्तीं चिन्तयेद्धिया। सम्प्राप्य कुम्भकावस्थां तडिज्ज्वलनभास्वराम्।।४।।
मूलाधाराद् यतिर्देवि स्वाधिष्ठानपदं नयेत्। तत्रस्थं जीवमखिलं ग्रसन्तीं चिन्तयेद् व्रती।। ५।।
तडित्कोटिप्रतीकाशां तस्मादुन्नीय सत्वरम्। मणिपूरपदं प्राप्य तत्र पूर्ववदाचरेत् ।। ६।।
तत्र स्थित्वा क्षणं देवि पूर्ववद्योगमार्गवित्। अनाहतं नयेद्योगी तत्र पूर्ववदाचरेत्।। ७।।
ततो विशुद्धावानीय कुण्डली पूर्ववच्चरेत्। उन्नीय तस्माद् भ्रूमध्ये नीरक्षीरं ग्रसेत् पुनः।। ८।।
ग्रस्तं क्षीरं महाशक्त्या कोटिसूर्यसमप्रभम्[4]। मनसा सह वागीश्या भित्त्वा ब्रह्मार्गलं क्षणात्।।९।।

---

१. 'व च' क. पाठः। २. 'मल' ग. पाठः। ३. 'वासन्ती' क. पाठः। ४. 'भाम्' क. पाठः।

परामृतमहाम्भोधौ विश्रान्तिं तत्र कारयेत्। तत्रस्थं परमं देवं शिवं परमकारणम्।। १०।।
शक्त्या सह समायोज्य तयोरैक्यं विभावयेत्।..।।

इति। ज्ञातमुत्क्रान्तिकालं वञ्चयित्वा यदि जीवितुमिच्छेत् तदावरोहं कुर्यात्, इत्यपि तत्रोक्तम्। तद्यथा—

यदि वञ्चितुमुद्युक्तः कालं कालविभागवित्। कालस्तु यावद्व्रजति तावत्तत्र सुखं वसेत्।। १।।
ब्रह्मद्वारार्गलस्याधो देहं कालप्रयोजनम्। तस्मादूर्ध्वं पदं देयं नहि कालप्रयोजनम्।। २।।
यदा देव्यात्मनः कालमतिक्रान्तं प्रपश्यति। तदा ब्रह्मार्गलं भित्त्वा शक्तिं मूलपदं नयेत्।। ३।।
शक्तिदेहप्रसूतं तु स्वजीवं चेन्द्रियैः सह। तत्तत्कर्मणि संयोज्य स्वस्थदेहः सुखं व्रजेत्।। ४।।
अनेन देवि योगेन वञ्चयेत् कालमागतम्।।..।।

इति। अत्रारोहावरोहाभ्यास एव योगशास्त्रेषु मुख्यो योग इति द्रष्टव्यम्। स चात्र प्रकाशितः। अत्र पञ्चाशद्दलगामिनि चित्ते पञ्चाशद्बुद्धयो जायन्ते। तदुक्तमध्यात्मविवेके—

गुदलिङ्गान्तरे चक्रमाधारं तु चतुर्दलम्। परमः सहजस्तद्वदानन्दो वीरपूर्वकः ।। १।।
योगानन्दश्च तस्य स्यादीशानादिदले फलम्। स्वाधिष्ठानं लिङ्गमूलं षट्पत्रं चक्रमस्य तु।। २।।
पूर्वादिषु दलेष्वाहुः फलान्येतान्यनुक्रमात्। प्रश्रयः क्रूरता गर्वनाशो मूर्छा ततः परम्।। ३।।
अवज्ञानमविश्वासो जीवस्य चरतो ध्रुवम्। नाभौ दशदलं पद्मं मणिपूरकसंज्ञकम् ।। ४।।
सुषुप्तिरत्र तृष्णा स्यादीर्ष्या पिशुनता पुनः। लज्जा भयं घृणां मोहः क्रुधिताथ विषादिता।। ५।।
हृदयेऽनाहतं चक्रं दलैर्द्वादशभिर्युतम्। लौल्यप्रणाशः कपटः वितर्कोऽप्यनुतापिता।। ६।।
आशा प्रकाशश्चिन्ता च समीहा समता ततः। क्रमेण दम्भो वैकल्यविवेको हुङ्कृतिस्तथा।। ७।।
फलान्येतानि पूर्वादिदलस्थस्यात्मनो विदुः। कण्ठेऽस्ति भारतीस्थानं विशुद्धिः षोडशच्छदम्।।८।।
तत्र प्रणव उद्गीथो हुंफट्वौषट्वषट्सुधा। स्वाहा नमोऽमृतं सप्त स्वराः षड्जादयो मताः।। ९।।
इति पूर्वादिपत्रस्थे फलान्यात्मनि षोडश।..।।

इति। षोडशच्छदे त्वन्यत्र विशेष उक्तः—

कृपा क्षमार्जवं धैर्यं वैराग्यं च धृतिस्तथा। हास्यं रोमाञ्चनिश्चयौ ध्यानं सुस्थिरता तथा।। १०।।
गाम्भीर्यमुद्यमं सत्त्वं चौदार्यैकाग्रता तथा। एते पूर्वादिपत्रेषु गुणाः........................।। ११।।

इति। ''तत्त्वंपदार्थावभासो द्रष्टव्यो द्विदले पुनः'' इति वायोरुत्थापनं तु आधारस्वाधिष्ठानयोरन्तरेऽग्निकुण्डं तन्मूले मनो दध्यात्। यत्र यत्र मनस्तत्र तत्र प्राण आयाति। प्राणवायुयोगेनाग्निर्दीप्यते स चोर्ध्वज्वलनस्वभावः। तस्मिंश्च ज्वालिते वायुरूर्ध्वं गच्छति ततः षट्चक्रभेदो भवति। स्वाधिष्ठानं लिङ्गचक्रं त्रिःप्रदक्षिणीकृत्य त्रिरावृत्त्या, तत्र कुण्डलिनीमिति अत एव वचनादनुमीयते। तदुक्तं दीक्षापटले—

तत्र वेधमयीं दीक्षां वक्ष्ये संसारमोचनीम्। ध्यायेच्छिष्यतनोर्मध्ये मूलाधारे चतुर्दले।। १।।
त्रिकोणमध्ये विमले तेजस्त्रयविजृम्भिते। वलयत्रयसंयुक्तां तडित्कोटिसमप्रभाम् ।। २।।
शिवशक्तिमयीं देवीं चेतनामात्रविग्रहाम्। सूक्ष्मात् सूक्ष्मतरां शक्तिं भित्त्वा षट्चक्रमञ्जसा।। ३।।
गच्छन्तीं मध्यमार्गेण दिव्यां परशिवावधि। वादिसान्तदलस्थार्णान् संहरेत् कमलासन।। ४।।

इत्यादिकुण्डल्यनुसारेण वायोरपि चोर्ध्वं गच्छतस्त्रिः परिवृत्तिंः। मणिपूरकं नाभिचक्रं गत्वा प्राप्य, अनाहतं हृच्चक्रं तदप्यतिक्रम्य, विशुद्धौ कण्ठप्रदेशे प्राणान् वायून्निरुध्याज्ञामाज्ञाचक्रं भ्रूमध्यवर्त्यनुध्यायन् अथो नादं ध्यायन्। कीदृशम् आधारमारभ्य ब्रह्मरन्ध्रपर्यन्तं प्रतीयमानं तथोज्ज्वलं, स वै नादः ब्रह्म प्राणात्मा परमात्मैवेति। ते प्राणाः षट्शताधिकैकविंशतिसहस्रसंख्याकाः प्राक्प्रोक्ताः। ग्रन्थान्तरेषु तु षडुत्तरषट्शताधिकैकविंशतिसहस्रसंख्याकाः (२१६०६)'' इत्यङ्कतः। अन्यत्र ग्रन्थेषु ''अशीतिः षट्शतं चैव सहस्राणि त्रयोदश। लक्षं चैकं च निश्वासा अहोरात्रप्रमाणतः'' इति संख्याभेद उक्तः। अङ्कतः (११३६८०) भवन्ति। तन्त्रान्तरे तु—

उच्छ्वासे चैव निःश्वासे हंस इत्यक्षरद्वयम्। तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः।।१ ।।
नाभेरुच्छ्वासनिःश्वासा हृदयाग्रे व्यवस्थिताः।

इति।➪ गुदं पायुमवष्टभ्य रुद्ध्वा आधारान्मूलाधारचक्राद्वायुं प्राणाख्यमुत्थाप्योर्ध्वमवष्टभ्य, अवष्टम्भनोपायो योगियाज्ञवल्क्येनोक्तः—

दक्षिणोतरगुल्फेन सीवनीं पीडयेत् दृढम्। अधस्तादण्डयोः सूक्ष्मां सव्योपरि च दक्षिणः।। १ ।।
जङ्घोर्वोरन्तरं योगी निश्छिद्रं बन्धयेद् दृढम्। समग्रीवशिरःस्कन्धः समपृष्ठः समोदरः ।। २।।

इत्यादि।। अत्र कादिमतोक्तश्वासक्रमोऽग्रे वक्ष्यते।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे एकविंशतितमः श्वासः।। २१।।

◆

➪अयं टीकाभागो मूलश्लोकाप्राप्तेः सन्दिग्धः।

अथ
द्वाविंशः श्वासः

अथ लक्ष्म्यादिमन्त्राणामुद्धारप्रयोगविधिः। कूर्मपुराणे–

श्रियं ददाति विपुलां पुष्टिं मेधां यशो बलम्। अर्चिता भगवत्पत्नी तस्माल्लक्ष्मीं समर्चयेत्।। १ ।।

इति। सारसङ्ग्रहे–

अथोच्यते रमामन्त्रा लक्ष्मीसौभाग्यदा भृशम्। दुर्गत्युद्धारणे शक्तास्त्रिवर्गफलदायकाः।। १ ।।
संवर्ताद्वामतः षष्ठं व्योमसप्तमसंयुतम्। तुरीयस्वरचन्द्रार्धकलानादाद्य[१]धिष्ठितम्।। २ ।।
एकाक्षरो रमामन्त्रो मनोरथसुरद्रुमः।...।।

इति। संवर्तात् क्षकाराद्वामतो विलोमेन षष्ठं शकारः, व्योमसप्तमोऽपि तथैव, तेन रेफस्तद्युक्तं, तुरीयस्वरः ई, चन्द्रार्धकला अर्धचन्द्रः, नादो बिन्दुः, तेन श्रींबीजमुक्तम्। तथा–

भृगुरस्य मुनिः प्रोक्तश्छन्दश्चास्य निचृन्मतम्। देवता गदिता लक्ष्मीर्भोगमोक्षफलप्रदा।। ३ ।।
द्विसव्यनेत्रकर्णेन मन्वन्तस्वरसंयुता। मन्त्रेणैव षडङ्गानि जातियुक्तानि कल्पयेत्।। ४ ।।

सव्यनेत्र ईकारः, कर्ण ऊ, कर्णस्यापि सव्यत्वं समासात्। इनो द्वादशस्वरः, मनुश्चतुर्दशस्वरः, अन्त्यो विसर्गः एतेन श्रांश्रींश्रूंश्रैंश्रौंश्रः इति षडङ्गमन्त्रा उक्ताः। ध्यानम्–

पद्मारूढा नवकनकरुक् पद्मयुग्माभयेष्टप्रोद्यद्धस्ता हिमगिरिनिभैर्वेदसंख्यैरिभेन्द्रैः।
हस्तोत्क्षिप्तामृतभृतघटैः[२] सिच्यमानाङ्गयष्टिर्भूयाद्भूत्यै रुचिरमुकुटा क्षौमवस्त्राब्जनेत्रा।।

दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम्।

''चतुर्भुजां सुवर्णाभां सपद्मोर्ध्वकरद्वयाम्। दक्षिणाभयहस्तां तां वामहस्तवरप्रदाम्''।।

इति नारायणीयवचनात्। 'हिमगिरिनिभैरिति श्वैत्यमुक्तः 'शुभ्राभ्राभेभ' इति दक्षिणामूर्तिवचनात्* दक्षिणा–

---

१. 'नादविभूषितम्' ख. पाठः। २. 'घठजवैः' ख. पाठः।

*तद्यथा– भूयाद्भूयो द्विपद्माभयवरदकरा तप्तकार्तस्वराभा, शुभ्राभ्राभेभयुग्मद्वयकरधृतकुम्भाद्भिरासिच्यमाना।
रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालेपनाढ्या, पद्माक्षी पद्मनाभोरसि कृतवसतिः पद्मगा श्रीः श्रिये वः।।

मूर्तिसंहितायाम्—

अष्टपत्रं लिखेत् पद्मं बहिर्भूबिम्बमालिखेत्। मध्ये बीजं विनिक्षिप्य नव शक्तीः समर्चयेत्।। १।।

इति। सारसङ्ग्रहे—

अष्टपत्राम्बुजद्वन्द्वं कर्णिकाकेसरोज्ज्वलम्। चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम्।। १।।

इति पूजाचक्रमुद्धृतम्।। तत्रैव—

धर्मादिकल्पिते पीठे नवशक्तिसमन्विते। रमामावाह्य गन्धाद्यैर्यजेत् साधकसत्तमः।। २।।

इति। दक्षिणामूर्तिसंहितायाम्—

विभूतिरुन्नतिः कान्तिर्हृष्टिः[1] कीर्तिश्च सन्नतिः। व्यु[2]ष्टिरुत्कृष्टिर्ऋद्धिश्च वसुदिक्षु प्रपूजयेत्।। १।।
मध्ये सिंहासनं पूज्यं सर्वशक्तिमयं प्रिये।..।।

इति। शारदातिलके— ''बीजाद्यमासनं दद्यात् मूर्तिं मूलेन कल्पयेत्''। सर्वशक्तिपदं प्रोक्त्वा ङेन्तं च कमलासनम्। नम इत्यासनं पूज्यं तत्तद्बीजादिकं शिवम्।। १।।

इति। तेन बीजानन्तरं 'सर्वशक्तिकमलासनाय नमः' इति पीठमन्त्रो ज्ञेयः। तदुक्तम्—

सर्वशक्तिपदं प्रोक्त्वा ङेऽन्तं च कमलासनम्। नम इत्यासनं पूज्यं तत्तद्बीजादिकं शिवे।।

इति। पद्मपादाचार्यास्तु—'श्रींश्रीदेव्यासनाय नमः श्रींश्रीदेवीमूर्तये नमः' इत्याहुः। सनत्कुमारः— ''सङ्कल्प्याम्भोरुहं शुभ्रं [3]कर्णिकायां यजेच्छ्रियम्।'' इति। सारसङ्ग्रहे—

तस्मिन् पीठे समावाह्य देवीं गन्धादिभिर्यजेत्। पुराङ्गानि समभ्यर्च्य वासुदेवादिमूर्तिभिः।। १।।
इभैर्निधियुगेनान्या बलाकाद्याभिरीरिता। लोकेशैरपरावृत्तिस्तदस्त्रैश्च परा स्मृता ।। २।।
बलाका[4] विमला चैव कमला वनमालिका। विभीषिका मालिका च शाङ्करी वसुमालिका।।३।।
पङ्कजद्वयहस्तास्ता मुक्ताहारसमप्रभाः। अनेन विधिना मन्त्री मन्त्रमेतं भजेत् तु यः।। ४।।
वस्वन्नसङ्कुलां लक्ष्मीं स प्राप्नोत्यचिराद् ध्रुवम्।

अत्र वासुदेवादिपद्मनिध्यन्तं द्वितीयावरणम्, ''मूर्तीभचतुष्कनिधियुगैरपरा'' (प्रपञ्चसारे १२।१०) इत्याचार्योक्तेः। यत्तु ''आग्नेयादिषु पत्रेषु गुग्गुलुश्च कुरण्टकः। दमकः सलिलश्च'' इति नारायणीयवचनं तत्प्रकृतदिक्परम्।।

अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि, भृगुऋषये नमः। मुखे निचृच्छन्दसे नमः। हृदि श्रियै देवतायै नमः। गुह्ये शं बीजाय नमः। पादयोः ईं शक्तये नमः। नाभौ रं कीलकाय नमः। इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा श्रां हृदयाय नमः, श्रीं शिरसे स्वाहा, श्रूं शिखायै वषट्, श्रैं कवचाय हुं, श्रौं नेत्रत्रयाय वौषट्, श्रः अस्त्राय फट्, इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्हृदयादिषडङ्गेष्वपि विन्यस्य, ध्यानमानसपूजान्ते चतुर्द्वारयुक्तचतुरस्रत्रयावृतमष्टदलद्वयमर्चापीठं निर्माय, प्राग्वत् पुरतो निधायार्घ्यस्थापनादिपरतत्त्वार्चान्ते, ओं विभूत्यै नमः, रत्यै नमः, कान्त्यै नमः, हृष्ट्यै नमः, कीर्त्यै नमः, सन्नत्यै नमः, व्युष्ट्यै नमः, उत्कृष्ट्यै नमः। मध्ये ऋद्ध्यै नमः, इति स्वाग्रादिप्रादक्षिण्येन पीठशक्तीः सम्पूज्य, श्रींसर्वशक्तिकमलासनाय नमः, इति समस्तपीठं सम्पूज्या-

---

[1] 'सृष्टिः' ख. पाठः। [2] 'पुष्टिः' क. पाठः। [3] 'श्रुक्लक' क. पाठः। [4] 'की' ख. पाठः।

वाहनाद्यङ्गपूजान्तेऽन्तरालाष्टदले देव्यग्रादिचतुर्दलेषु—ॐ वासुदेवाय नमः, सङ्कर्षणाय नमः, प्रद्युम्नाय नमः, अनिरुद्धाय नमः, इति सम्पूज्याग्नेयादिविदिक्षु दमकाय नमः, सलिलाय नमः, गुग्गुलवे नमः, कुरुण्टकाय नमः, इति सम्पूज्य, देवीदक्षिणदलाग्रे ॐ शङ्खनिधये नमः, वामदलाग्रे ॐ पद्मनिधये नमः, इति सम्पूज्य, द्वितीयाष्टदले—ॐ बलाकायै नमः, ॐ विमलायै नमः, ॐ कमलायै नमः, ॐ वनमालायै नमः, ॐ विभीषिकायै नमः, ॐ मालिकायै नमः, ॐ शाङ्कर्यै नमः, ॐ वसुमालिकायै नमः, इति सम्पूज्य लोकपालार्चादि सर्वं समापयेद् इति।। तथा—

जपेद्भास्करलक्षं च तत्सहस्त्रं हुनेत् ततः। पद्मैस्त्रिस्वादुसंयुक्तैस्तिलैर्वा श्रीफलैरथ।। ५।।
त्रिभिर्वा मधुराक्तैश्च जुहुयाद्विजितेन्द्रियः। तर्पणादि ततः कुर्याद् द्विजार्चान्तं प्रसन्नधीः।। ६।।

इति। भास्करलक्षं द्वादशलक्षम्। तत्सहस्त्रमित्युक्तेर्दशांशो होमः। बैल्वैः समिद्वरैरित्याचार्यचरणाः।। त्रिभिरिति एकैकेन सहस्त्रचतुष्टयं न तु मिलितैस्तेषां तु द्रव्यान्तरत्वेन त्रिभिर्होमासम्भवादिति। तदुक्तं भट्टचरणैः — नैवं व्रीहिभिरिष्टं स्याद्यवैर्न च यथाश्रुतैः।। मिश्रैरिज्येत चेदिति "मिश्राणां विध्यदर्शना"दिति च, तर्हि त्रिमधुराक्तं विरुद्धमिति चेत् न "सर्वं त्रिमधुरोपेतं होमद्रव्यमुदाहृतम्।" इति वचनात् तद्योगस्य पशुपुरोडाशावदानानामुपस्तरणाभिघाराज्ययोगवदविरुद्धत्वादिति।।

ततः सिद्धमनुर्मन्त्री साधयेन्निजवाञ्छितम्। वक्षोजदघ्ने पयसि तिष्ठन्नर्कगतां श्रियम्।। ७।।
संस्मृत्य मनुमेनं च जपेल्लक्षत्रयावधि। सोऽचिरेणैव कालेन दारिद्र्यान्मुच्यते नरः।। ८।।
मधुसूदनगेहस्थबिल्वाध उपविश्य च। त्रिलक्षं प्रजपेन्मन्त्री वत्सराद्वाञ्छितप्रदः[2]।। ९।।
अधिकं वसुसङ्घातं लभते नान्यथाचिरात्। अशोकेध्मचिते वह्नौ सघृतैस्तण्डुलैर्हुनेत्।। १०।।
मन्त्री त्रिभुवनं सर्वं वशयत्येव नान्यथा। खादिरैः शकलैः सम्यगेधितेऽग्नौ यथाविधि।। ११।।
तण्डुलैस्त्रिस्वादुयुक्तैर्जुहुयान्मन्त्रवित्तमः। तेन राजकुलं वश्यं धनदादर्थवान् भवेत् ।।१२।।
अर्कवह्नौ हुनेन्मन्त्री सुशुद्धैः शालितण्डुलैः। नियुतं राज्यलक्ष्मीं च राजपुत्रो लभेद् ध्रुवम्।। १३।।
त्रिस्वादुयुक्तैर्नलिनैर्लक्षमेकं हुनेत् सुधीः। अलक्ष्मीसहितो मर्त्यो लक्ष्मीं प्राप्नोति निश्चितम्।। १४।।
धनधान्यादिसम्पत्त्या तोषयेत् तां च साधकः। करुणार्द्रं सनाथा सा कुलं तस्य न मुञ्चति।। १५।।
ब्राह्मणः स्वंगृहे बिल्वं समारोप्य च वर्धयेत्। श्रीसूक्तं च जपन्नेष[3] तत्पत्रैर्जुहुयात् ततः।। १६।।
त्रिस्वादुयुक्तैः कुसुमैः फलैश्चापि समिद्वरैः। स्कन्धभेदैस्तस्य नरस्तन्मूलैश्चापि संहुनेत्।। १७।।
बिल्वमिश्रहविष्याशी मण्डलात् प्राक् स्वयं रमा। प्रत्यक्षा च भवेत्तस्य कथमश्रीः कुले भवेत्।।१८।।

इति। श्रीयन्त्रसारे—

कर्णिकायां साध्यनामगर्भं तारं विलिख्य च। एवा पित्र्ये ऋचः पादचतुष्कं चापि तद्दले।। १।।
अष्टपत्रे यूयमिति दिक्ष्वेवेन्द्रादि चाश्रिषु। पादा लेख्यास्ततो बाह्यदलषोडशके क्रमात्।। २।।
आलिखेत् षोडशदले त्वं सोमाद्यस्य चाप्यृचः(प्रचिकीत्यृचः)। त्रीण्यक्षराणि प्रथमे द्वितीये सप्त सप्त च।३।
तृतीये च चतुर्वर्णांस्तुरीये पञ्च पञ्चमे। षष्ठे षट् चतुरो वर्णान् सप्तमेऽष्ट दलेऽष्टमे।। ४।।

---

१. 'न्नवैः' क. पाठः। २. 'तार्थदः' ख. पाठः। ३. 'पठन्' ख. पाठः।

प्रजापते ऋचो वर्णांश्चतुरो नवमे दले। दशमे च दले वर्णान् पञ्च चैकादशेऽपि षट्।। ५।।
द्वादशे चतुरो वर्णान् दले चापि त्रयोदशे। (चतुर्दशे चतुर्वर्णान् सप्त पञ्चदशे दले)।। ६।।
षोडशे चापि षड्वर्णान् विलिख्य च दले बहिः। आवेष्ट्य लिप्या श्रीबीजं विलिखेद्भूपुरास्त्रिषु।।७।।
यन्त्रं ऋक्पञ्चकस्यैतद्धनधान्यंधरासुतैः। गोगजाश्वाविमहिषसस्यभूषादिसङ्कुलाम्।। ८।।
लक्ष्मीं समावहेद्रम्यां पुत्रपौत्रादिगामिनीम्।..................................।।

इति। अस्यार्थः—तत्र चतुर्दलकमलकर्णिकामध्ये ससाध्यं प्रणवं विलिख्य, तद्दलेषु ''एवापित्रे'' इति ऋचः पादचतुष्टयं स्वाग्रादिप्रादक्षिण्येन प्रतिदलमेकं पादं विलिख्य, तद्बहिरष्टदलं कमलं कृत्वा तस्य दिग्दलेषु ''यूयं'' इत्याद्यृचः पादचतुष्टयं, कोणदलेषु ''एवेन्द्राग्नी'' इत्याद्यृचः पादचतुष्टयं विलिख्य, तद्बहिः षोडशदलं कमलं कृत्वा तद्दलेषु ''त्वं सोम'' इत्यादि ऋग्द्वयस्य प्रथमदले त्रीण्यक्षराणि, द्वितीये सप्त, तृतीये सप्त, चतुर्थे चत्वारि, पञ्चमे पञ्च, षष्ठे षट्, सप्तमे चत्वारि, अष्टमेऽष्ट, ''प्रजापते न त्वदे'' इति ऋचो नवमे चत्वारि, दशमे पञ्च, एकादशे षट्, द्वादशे चत्वारि, त्रयोदशेऽपि चत्वारि, चतुर्दशे चत्वारि, पञ्चदशे सप्त, षोडशे षडक्षराणि चेति विभज्य विलिख्य, तद्बहिर्वृत्तद्वयं विधाय तयोरन्तरालवीथ्याम् अकारादिक्षकारान्तान् मातृकार्णान् सबिन्दुकान् वेष्टनरूपेण विलिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु श्रीबीजं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। ऋक्पञ्चकं तु ऋग्वेदे—वामदेवस्य बृहस्पतिः त्रिष्टुप्।

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः। बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम्।। १।। यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः। जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम्''।।२।। एवेन्द्राग्नी इत्यस्य कुत्सः इन्द्राग्नी त्रिष्टुप्। ''एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि। तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः''।। ३।। गौतमस्य त्रिष्टुप्। ''त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम्। तव प्रणीती पितरो न इन्दो देवेषु रत्नभजन्त धीराः''।। ४।। प्रजापते इति हिरण्यगर्भ ऋषिः को देवता त्रिष्टुप्छन्दः। 'प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।। ५।।

इति। श्रीयन्त्रसारे—

मध्ये तारं साध्ययुक्तं श्रियं कोणेषु षट्स्वपि। अष्टपत्रे केसरोद्यत्स्वरद्वन्द्वे क्रमेण च।। १।।
या लक्ष्मीरित्यृचो वर्णांश्चतुरश्चतुरो बहिः। अश्वदाया ऋचा हल्भिश्च संवेष्ट्य कुगृहास्त्रिषु।। २।।
श्रियं समालिखेद्यन्त्रं स्थापितं यत्र मन्दिरे। धनैर्धान्यैश्च विभवैरन्यैश्चाश्वगवादिभिः ।। ३।।
आपूरयन्ती सततं तत्रैव रमते रमा। ....।।

इति। अस्यार्थः—अष्टदलपद्मोदरे षट्कोणं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, षट्कोणेषु श्रीबीजं विलिख्याष्टदलकेसरेषु द्वन्द्वशः स्वरानालिख्याष्टदलेषु ''या लक्ष्मीः'' इत्यृचो वर्णांश्चतुरश्चतुरो विलिख्य, बहिर्वृत्तत्रयान्तरालद्वयेऽन्तर्गतान्तराले श्रीसूक्ते अग्रे वक्ष्यमाण— ''अश्वदायै गोदायै*'' इति ऋचा संवेष्ट्य तद्बहिर्गतान्तराले कादिक्षान्तवर्णैरावेष्ट्य

---

*'अश्वदायै गोदायै धनदायै महाधने। धनं मे जुपतां देवि सर्वकामांश्च देहि मे।।'

तद्बहिश्चतुरस्त्रं कृत्वा तत्कोणेषु श्रीबीजं लिखेत्। एतद्यन्त्रमुक्तफलदम्। ''या लक्ष्मीः सिन्धुसम्भवा भूतिर्धेनु पुरूवसुः। पद्मा विश्वा वसुर्देवी सदा नो जुषतां गृहे।।'' इति ऋक्। तथा–

....। सद्याद्यं बिन्दुसहितं द्वितीयं भुवनेश्वरी।। ४।।
तृतीयं च रमाबीजं चतुर्थं कामराजकम्। समुद्रवर्णो धर्मार्थकाममोक्षफलो मतः।। ५।।

सद्याद्य ऐ, बिन्दुयुतं तेन ऐं, अन्यत् प्रसिद्धम्। तथा–

ऋषिर्भृगुर्निचृत्पूर्वमनुष्टुप् छन्द ईरितम्। देवता कमला प्रोक्ता सर्वसम्पत्करी शुभा।। ६।।
पूर्वमन्त्रवदेवास्य षडङ्गानि प्रकल्पयेत्। ....।।

अथ ध्यानम्–

माणिक्याभा हरिगिरिनिभैः कुञ्जरेन्द्रैश्चतुर्भिर्नासाग्रोद्यन्मणिमयघटाम्भोभिरासिच्यमाना।
अम्भोजस्था वरसरसिजद्वन्द्वकाभीतिहस्ता लक्ष्मीः पायादमरनिकरैः सेविताङ्घ्य्रम्बुजा सा।। ६।।

आयुधध्यानं प्रोग्वत्।

पूर्वोदिते रमापीठे यजेद्देवीं च पूर्ववत्। अर्कलक्षं जपेन्मन्त्री नियताशी च संहुनेत्।। ७।।
तत्सहस्त्रं सरोजैश्च रक्तैस्त्रिस्वादुसंयुतैः। पूर्वानुक्तप्रयोगांश्च कुर्यान्मन्त्री यथाविधि।। ८।।
साधको मनुवर्यस्य निधिभिः सेव्यते स्वयम्।..।।

प्रयोगः सुगमः। तथा–

कामिकापञ्चमं कालो अन्त्यस्वरविभूषितः। वर्गादिः क्ष्वेडमचला वरुणो दीर्घयुक्भृगुः।। ९।।
अक्षियुक् धान्तपवनसद्याद्याश्च द्विठावधिः। दशाक्षरो निगदितो मन्त्रः प्रोक्तफलप्रदः।। १०।।

इति। कामिकापञ्चमं न, कालो म, अन्त्यस्वरो विसर्गस्तेन मः, वर्गादिः क, क्ष्वेडं म, अचला ल, वरुणो व, दीर्घयुक् वा, भृगुः स अक्षियुक् सि, धान्तं न, पवनो य, सद्याद्य ऐ तेन न्यै, द्विठः स्वाहा,।। तथा–

ऋष्याद्या दक्षसविराट्कमलाः समुदीरिताः। देवी च पद्मिनी विष्णुपत्नी च वरदा मता।। ११।।
रूपान्ता कमला चाभिर्ङे नमोन्ताभिरुक्तवत्। पञ्चाङ्गानि मनोरस्य जातियुक्तानि कल्पयेत्।। १२।।

इति। शारदायाम्– ''नमोन्ता प्रणवादिकाः'' इत्यङ्गमन्त्रा उदिताः। ध्यानं तु–

तडित्पुञ्जाभासा कमलयुगदानाभयकरा
शरीरोद्यद्भासा भुवनविवरं भासयति या।
सरोजस्था काञ्चीमणिमुकुटमञ्जीररुचिरा
श्रिये भूयाल्लक्ष्मीः कुचकलशभारानततनुः।। १३।।

आयुधध्यानं प्राग्वत्।

रमापीठे पुरा प्रोक्ते यजेल्लक्ष्मीं यथाविधि। आदावङ्गानि तद्बाह्ये बलाक्याद्यष्टशक्तयः।। ४।।

तद्बाह्ये लोकपालाश्च तदस्त्राणि ततो बहि:। एवमभ्यर्चयेल्लक्ष्मीं भवेत् साक्षाद्धनाधिप:।। ५।।

अथ प्रयोग:— प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि दक्षाय ऋषये नम:। मुखे विराट्छन्दसे नम:। हृदि श्रीकमलायै देवतायै नम:। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा मूलमन्त्रं करयोर्व्यापय्य[1], उों देव्यै नम: हृदयाय नम:, उों पद्मिन्यै० शिरसे० उों विष्णुपत्न्यै० शिखायै०, उों वरदायै० कवचाय०, उों कमलरूपायै० अस्त्राय०, इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य, नेत्रवर्जं हृदयादिपञ्चाङ्गेष्वपि विन्यस्य, ध्यानाद्यङ्गपूजान्ते प्राग्वदष्टदले वलाक्याद्यष्टशक्ती: सम्पूज्य इन्द्राद्यर्चादि सर्वं प्राग्वत् समापयेदिति।। तथा—

पङ्क्तिलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रिय:। तद्दशांशं सरसिजैस्त्रिस्वाद्वक्तैर्हुनेत् सुधी:।। १६।।
नद्यां समुद्रगामिन्यां कण्ठदघ्ने जले स्थित:। लक्षत्रयं जपेन्मन्त्री भवेदर्थान्वितो नर:।। १७।।
नन्द्यावर्तप्रसूनैश्च जुहुयादुत्तराह्वभे[2]। रमां सम्पूज्य साहस्रं तावद्बैल्वैर्मधुप्लुतै: ।। १८।।
फलैर्हुनेत् पौर्णमास्यां पञ्चम्यां वा सिताम्बुजै:। शुक्रवारे श्वेतपुष्पैर्मासं यो जुहुयात् सुधी:।। १९।।
संवत्सराद्धनं पूर्णं लभते नात्र संशय:। किं बहूक्तेन भजते मनुमेनं जितेन्द्रिय:।। २०।।
स वाञ्छितार्थाँल्लभते वसुधान्यसमृद्धियुक्।......................................।।

इति। तथा—

वाक्शक्तिश्रीकामखं च साग्निसद्यान्तसर्गयुक्। चतृतीयं च वर्गादितृतीयं केवलश्च त:।। २१।।
लोहितोऽग्नियुतो वामश्रुतियुग् भृगुरीरित:। तुर्यवर्गादिपवनसद्याद्यहृदयावधि ।। २२।।
द्वादशार्णो महालक्ष्मीमन्त्र: प्रोक्तस्तु सूरिभि:। प्रणवाद्योऽयमेव स्यात् सर्वसिद्धिकरो मनु:।। २३।।

इति। वाक् वाग्बीजं, शक्ति: भुवनेश्वरीबीजं, कामस्तद्बीजं, खं ह, स स्वरूपं, अग्नी रेफ:, सद्यान्त औ, सर्गो विसर्ग: एभि: पिण्डितं ह्स्रौ:, च तृतीयं ज, वर्गादितृतीयं ग, केवलश्च त: तकार: स्वररहित:, लोहित: प, अग्नियुक् सरेफ: तेन प्र, वामश्रुतियुक् ऊकारयुक्त: भृगु: स तेन सू, तुर्यवर्गादि त, पवन य, सद्याद्य ऐ तेन त्यै, हृदयं नम:, प्रणवाद्यस्त्रयोदशाक्षर:।। तथा—

ऋष्याद्या ब्रह्मगायत्रीमहालक्ष्म्य: समीरिता:। संशोध्य मनुना पाणी प्रणवाद्यं हृदन्तकम्।। २४।।
अङ्गुलीषु क्रमान्मन्त्री विन्यसेद्बीजपञ्चकम्। मन्त्रशेषं न्यसेन्मन्त्री (तलयोरुभयोरपि ।। २५।।)
मूर्धादि चरणं यावन्मन्त्रेण व्यापकं न्यसेत्। मूर्धाक्षिवक्षोगुह्याङ्घ्रौ पञ्च बीजानि विन्यसेत्।। २६।।
शेषं सप्तार्णकं मन्त्री) विन्यसेद् हृदि धातुषु। पञ्चबीजै: पञ्चमन्त्रान् शिष्टै: षष्ठं तु कल्पयेत्।।२७।।
चतुर्थ्यन्तैर्ज्ञानमुखैर्युक्तं वापि षडङ्गकम्। ज्ञानैश्वर्ये शक्तिबले वीर्यं तेजश्च षट् क्रमात्।। २८।।
एवं न्यस्ततनुर्मन्त्री चिन्तयेदिष्टदेवताम्। आदौ स्मरेत् समुद्यानं सर्वर्तुप्रतिशोभितम्।। २९।।
वञ्जुलैर्नागरङ्गैश्च रसालै: श्रीद्रुमैरपि। तालैस्तमालैर्हिन्तालै: शालैश्च बकुलैरपि।। ३०।।
कर्कन्धुबन्धुजीवैश्च चम्पकैरुपशोभितम्। मन्दान्दोलितकर्पूरकदलीदलमण्डितम् ।। ३१।।
अशोकपाटलानागकोविदारमनोरमम्। मल्लिकायूथिकाकुन्दमदयन्तीसुगन्धिकम् ।। ३२।।

---

१. 'प्य' क. पाठ:। २. 'ह्वयै:' क. पाठ:।

द्राक्षावल्लीनागवल्लीमाधवीदेवदारुभिः। नमेरुभिर्लवङ्गैश्च बकुलैस्तिलकैस्तथा।। ३३।।
शोभितं कर्णिकारैश्च चन्दनैः रक्तचन्दनैः। वञ्जुलैर्मातुलुङ्गैश्च दाडिमीलकुचैः शुभैः।। ३४।।
नारिकेलैश्च खर्जूरैः पूगैः कुरवकैर्वृतम्। मालतीकेतकीजातीपारन्तीतुलसीवृतम्।। ३५।।
नन्द्यावर्तैर्दमनकैः सर्वर्तुकुसुमोज्ज्वलम्। अमन्दैः पिचुमन्दैश्च मन्दारैरुपशोभितम्।। ६६।।
विशिष्टैः पनसैरुच्चैः शाखोटैः कुटजैर्गणैः। अवेगपवनस्पृष्टसुमनोगन्धमञ्जुलम्।। ३७।।
महासरस्तस्य मध्ये स्मरेन्मन्त्री मनोरमम्। वरटाहंससङ्घाद्यचक्रकारण्डकोज्ज्वलम्।। ३८।।
भ्रमद्भ्रमरमालाभिरलङ्कृतचतुर्दिशम्। केकिकेकारवाकीर्णं लक्ष्मणासारसैर्वृतम्।। ३९।।
फुल्लैः सरसिजैः रम्यैः कह्लारैः कैरवैरपि। नीलेन्दीसरसङ्घैश्च सुगन्धिकुसुमैर्वृतम्।। ४०।।
सर्वर्तुशोभिकल्पद्रुवनमण्डितमुज्ज्वलम्। पुलिनं तत्र तन्मध्ये मण्डपं रत्नकुट्टिमम्।। ४१।।
समुद्यदर्कसन्दोहकिरणद्युतिभास्वरम्। हिमरश्मिकरव्रातसिक्तामृतसुशीतलम्।। ४२।।
प्रोल्लसद्गालितस्वर्णप्राकारसुमनोहरम्। नानारत्नौघरचितचतुर्द्वारसमन्वितम् ।। ४३।।
नवरत्नम[1]यप्रोद्यदरराष्टकशोभितम्। नूतनोद्यन्महारत्नै रचितोत्तुङ्गगोपुरम् ।। ४४।।
तप्तगालितहेमोद्यद्दण्डध्वजसमूहकम्। वैडूर्यादिमहारत्नरचितस्तम्भराजितम्।। ४५।।
सन्तप्तस्वर्णरचितगवाक्षशतसङ्कुलम्। हेमदण्डस्फुरद्दीपसहस्रसुमनोहरम्।। ४६।।
नानाविधक्षौमवस्त्ररचिताभिश्च काञ्चनैः (?)। सक्षुद्रघण्टिकायुक्तपताकाभिरथावृतम्।। ४७।।
शरद्राकासुधारश्मिदुकूलरचितैः शुभैः। विचित्रवसनोद्भूतैर्वृतं चन्द्रातपैरपि ।। ४८।।
काञ्चनोर्वीमणिव्रातकुट्टिमालङ्कृतं शुभम्। घनसारागुरुस्वम्बुकस्तूरीकुङ्कुमैरपि ।। ४९।।
तमालैर्द्रव्य(व)जातैश्च सुगन्धिभिरथेतरैः। आमोदितचतुर्द्वारं मण्डपं [2]प्रविचिन्तयेत्।। ५०।।
(तदन्तः पारिजातस्य मूले सिंहासनं नवम्। नानारत्नगणाकीर्णं तत्र देवीं विचिन्तयेत्।।)
बालभास्करसत्कान्तिं शशिशेखरमण्डिताम्। मुक्ताहारोज्ज्वलां रम्यां रत्नाकल्पविभूषिताम्।। ५१।।
हस्ताम्भोजैश्च बिभ्राणां नूतनां शालिमञ्जरीम्। पद्मद्वयं कौस्तुभं च सस्मितास्यसरोरुहाम्।। ५२।।
विकचोत्पलसं[3]शोभिलोचनत्रयसंयुताम्। क्वणन्नूपुरसम्फुल्लरक्तोत्पलपदद्वयाम् ।। ५३।।
नितम्बबिम्बविलसद्रशनादाममञ्जुलाम्। बलित्रयलसद्वेदिमध्यदेशसुशोभिताम् ।। ५४।।
गम्भीरावर्तह्र(भृ)न्नाभिह्रदमण्डलमण्डिताम्। यक्षकर्दमसंलिप्तपीनोन्नतघनस्तनीम् ।। ५५।।
कुम्भिकुम्भोद्भवप्रोद्यन्मुक्तादामविराजिताम्। क्षौमोत्तरासङ्गवर्ती[4] पुष्पदामसुभूषिताम्।। ५६।।
गालितस्वर्णखचितवैडूर्याढ्याङ्गदोज्ज्वलाम्। काञ्चनोद्यत्पद्मरागमणिसम्बद्धकङ्कणाम्।। ५७।।
नानाविधलसद्रत्नमुद्रिकालङ्कृताङ्गुलीम्। कम्बुकण्ठकलारावां स्वर्णग्रैवेयराजिताम्।। ५८।।
विचित्रनानालङ्कारालङ्कृताङ्गीं शुचिस्मिताम्। उद्यदर्कप्रभाभास्वद्रत्नताटङ्कशोभिताम्।। ५९।।

---

१. 'रत्नातप' ख. पाठः। २. 'परि' ग. पाठः। ३. 'सरोचि' क. ग. पाठः। ४. 'वीतां' क. पाठः।

कर्णपूरीकृतस्वर्णबद्धरत्नाङ्कुशां शुभाम्। प्रवालविलसत्कान्तिरुचिराधरपल्लवाम् ।। ६० ।।
शेखरप्रो(शङ्खरत्नो)ल्लसद्रम्यदशनावलिशोभिताम्। निर्लाञ्छनशरद्राकाताराधिपशुभाननाम्।। ६१ ।।
पञ्चसायकोदण्डविलासाधिकभ्रूयुगाम्[1]। बिभ्राणां नासिकां प्रोद्यत्तिलपुष्प[2]जयोद्यताम् ।। ६२ ।।
शीतांशुशकलाकाररुचिरालिकराजिताम्। घनसौगन्ध्यसम्पन्नमृगनाभिविशेषकाम्।। ६३ ।।
मनाक्कुञ्चितसुस्निग्धनीलमञ्जुलमूर्धजाम्। पारिजातद्रुकुसुमगन्धवाहिसुमूर्धजाम्।। ६४ ।।
(अनर्घ्यरत्नघटितमुकुटाङ्कितमस्तकाम्) । तप्तहाटकसम्बद्धनानारत्नौघशेखराम्।। ६५ ।।
सौन्दर्यभूमेरवधिं तेजसां जन्मभूमिकाम्। विलासलक्ष्मीभवनं महालक्ष्मीं विचिन्तयेत्।। ६६ ।।

वामाधःकरमारम्य दक्षाधःकरपर्यन्तमायुधध्यानम्।

पुरा प्रोक्ते रमापीठे देवीं सम्यक् प्रपूजयेत्। दद्याद्बीजेनासनं च स्वाणुना मूर्तिकल्पना।। ६७ ।।
दक्षभागे यजेद्देव्या गणपं चान्यतस्तथा। सुमनोञ्जलिहस्तं च पुष्पधन्वानमर्चयेत् ।। ६८ ।।
अङ्गानि पूजयेदादौ यथास्थानेषु मन्त्रवित्। अष्टपत्रेष्विमाः पूज्या उमा श्रीश्च सरस्वती।। ६९ ।।
दुर्गा धरणिगायत्र्यौ देव्युषा चेति शक्तयः। नानालङ्करणाढ्याः स्युरम्भोजद्वयपाणयः।। ७० ।।
अङ्घ्रिप्रक्षालनार्थं च प्रोद्यते जह्नुसूर्यजे। पूजनीये प्रयत्नेन कराभ्यां धृतचामरौ।। ७१ ।।
निधी पूज्यौ च वरुणं पश्चिमे छत्रधारिणम्। परितश्च यजेत् राशीन् ग्रहान्नव ततोऽर्चयेत्।। ७२ ।।
चतुर्दन्तान् दिग्गजांश्च यजेदाशासु मन्त्रवित्। लोकपालांस्तदस्त्राणि तत्तद्वाह्ये यजेत् सुधीः।।७३ ।।
ऐरावतः पुण्डरीको वामनः कुसुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च ते क्रमात्।। ७४ ।।

इति। अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीमहालक्ष्मीदेवतायै नमः। इति विन्यस्य, प्राग्वद्विनियोगमुत्कीर्त्य (मूलमन्त्रेण करयोर्व्यापकं कृत्वा, अङ्गुष्ठयोः ऐं नमः, तर्जन्यो ह्रीं०, मध्यमयोः श्रीं०, अनामिकायोः क्लीं०, कनिष्ठिकयोः ह्स्रौः०, करतलयोः जगत्प्रसूत्यै नमः।। मूर्ध्नि ऐं नमः, चक्षुषोः ह्रीं०, वक्षसि श्रीं०, गुह्ये क्लीं, पादयोः ह्स्रौः०, हृदि सप्तधातुषु— त्वचि जं नमः, रक्ते गं०, मांसे अं०, मेदसि सूं०, अस्थ्नि त्यैं०, मज्जायां नं०, शुक्रे मं नमः, इति विन्यस्य,) ऐंज्ञानाय नमः हृदयाय नमः। ह्रींऐश्वर्याय नमः शिरसे स्वाहा। श्रींशक्तये नमः शिखायै वषट्। क्लींबलाय नमः कवचाय हुं। ह्स्रौः वीर्याय नमः नेत्राभ्यां वौषट्। जगत्प्रसूत्यै तेजसे नमः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं मूलमन्त्राभिमृष्टयोः करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। ततः सकेसरमष्टदलकमलं तद्बहिर्द्वादशदलकमलं तद्बहिर्नवदलं कमलं तद्बहिश्चतुर्द्वारयुतचतुरस्रत्रयमिति पूजाचक्रं निर्माय, प्राग्वत् पुरतः संस्थाप्य ध्यानादिपुष्पोपचारान्ते कर्णिकायां देव्या दक्षिणे गणपतये नमः वामे कामदेवाय इति सम्पूज्य, प्राग्वत् षडङ्गानि सम्पूज्याष्टदले उमायै नमः, श्रियै०, सरस्वत्यै०, दुर्गायै०, धरिण्यै०, गायत्र्यै०, देव्यै०, उषायै०, इति स्वाग्रादिप्रादक्षिण्येन सम्पूज्य, देव्या दक्षिणचरणसमीपे गङ्गायै नमः, वामसमीपे यमुनायै नमः। देवीदक्षिणे शङ्खनिधये नमः। वामे पद्मनिधये नमः, इति सम्पूज्य, द्वादशदले मेषाय नमः, वृषाय० मिथुनाय० कर्काय० सिंहाय० कन्यायै० तुलायै० वृश्चिकाय० धनुषे० मकराय० कुम्भाय०

---

[1] 'चिल्लिकाम्' ख. पाठः। [2] 'प्पोज्ज्वलोद्यतां' क. ख. पाठः।

मीनाय नमः। तद्बहिर्नवदले रवये नमः, सोमाय० मङ्गलाय० बुधाय० बृहस्पतये० शुक्राय० शनैश्चराय० राहवे० केतुभ्यो नमः। तद्बहिश्चतुरस्रकमलयोरन्तराले देव्यग्राद्यष्टदिक्षु ऐरावताय नमः, पुण्डरीकाय० वामनाय० कुमुदाय० अञ्जनाय० पुष्पदन्ताय० सार्वभौमाय० सुप्रतीकाय नमः। इति प्रादक्षिण्येन सम्पूज्य, प्राग्वद्वीथीद्वये दिगीशान् तदस्त्राणि च समभ्यर्च्य धूपदीपादिशेषं प्राग्वत् समापयेदिति। तथा—

जपेद्भास्करलक्षं च नियताशीर्यतव्रतः। तद्दशांशं प्रजुहुयाद् घृतैस्त्रिस्वादुसंयुतैः।। ७५।।
पद्मै रमाद्रुमफलैः प्रत्येकमयुतं हुनेत्। वासितैः शुचिभिस्तोयैस्तर्पयेदयुतद्वयम्।। ७६।।

इति। अत्र घृतैर्दशांशहोमं विधाय तद्दशांशतर्पणादि निर्वर्त्य पश्चादयुतद्वयहोममयुतद्वयतर्पणं च विदध्यात्, इत्यन्यमन्त्रेभ्यो विशेषः।। तथा—

एवं सिद्धमनुर्मन्त्री गुरुभक्तो दृढव्रतः। कुर्यात् काम्यानि कर्माणि स्वाभीष्टानि च मन्त्रवित्।।७७।।
आज्याप्लुताभिर्दूर्वाभिरायुष्कामो हुनेन्नरः। सहस्रं दशरात्रं च समिद्धे हव्यवाहने।। ७८।।
शताह्वाभिर्गुडूचीभिरष्टोत्तरसहस्रकम्। सप्ताहं जुहुयाज्जीवेद् वत्सराणां शतं सुधीः।। ७९।।

शताह्वाभिर्दूर्वाभिः।

दीर्घायुश्च घृताभ्यक्तैस्तिलैः प्रजुहुयाद्बुधः। आरोग्यकामो जुहुयादारभ्यार्कदिनं सुधीः।। ८०।।
दशांशं प्रत्यहं चापि सर्पिरक्तान् समिद्वरान्। कण्ठदघ्ने जले स्थित्वा महालक्ष्मीमनुस्मरन्।।८१।।

समिद्वरानर्कजान्।

अष्टाधिकसहस्रं च प्रोर्ध्वबाहुर्जपेन्मनुम्। स वाञ्छितार्थं लभते आरोग्यमपि साधकः।। ८२।।
अन्वहं जुहुयादष्टसहस्रं शालिभिर्ध्रुवम्। सोऽचिराल्लभते लक्ष्मीं महतीं साधकोत्तमः।। ८३।।

अष्टसहस्रमष्टाधिकसहस्रमित्यर्थः।

रमालताप्रसूनैर्वा नन्द्यावर्तसमुद्भवैः। श्वेतसर्षपकैराज्यप्लुतैर्वा जुहुयाद् बुधः ।। ८४।।
प्रथीयसीं रमामाप्नोत्यचिरात् साधको ध्रुवम्। मान्यते च तथा सर्वैर्जन्तुभिर्नान्यथात्र च।। ८५।।
नालिकेररजोयुक्तैर्मरिचैर्जीरकान्वितैः। गुडयुक्तैर्घृतपक्वैरपूपैर्जुहुयात् सुधीः ।। ८६।।
संयतः प्रत्यहं चाष्टशतं पायसभुग् द्विजः। मण्डलाच्च ध्रुवं साक्षाद् भवेद्वैश्रवणस्तथा।। ८७।।
गुडमिश्रहविष्यस्य होमादन्नसमृद्धिमान्। अष्टोत्तरसहस्रं च जपासूनानि संहुनेत् ।। ८८।।
सङ्गृह्य तद्भस्म मन्त्री नागवल्लीरसेन च। सहितं तिलकं कुर्यात् सर्ववश्यं भवेद् ध्रुवम्।। ८९।।
पलाशोत्थसमिद्भिश्च कुसुमैर्जुहुयात् तथा। वश्या भवेयुर्मुखजा वशिनस्तस्य मन्त्रिणः।। ९०।।
जातिकाकुसुमैर्मन्त्री राजानं वशमानयेत्। जुहुयादरुणाम्भोजैर्वैश्याः स्युस्तेन वश्यगाः।। ९१।।
नीलोत्पलानां होमेन वश्याश्चरणसम्भवाः। वशयेत् प्रमदा विद्वान् मधूककुसुमैर्घृतैः।। ९२।।
नवकोष्ठात्मकं सम्यङ्मण्डलं रचयेत् सुधीः। मध्ये यन्त्रं च रुचिरं कल्पयेच्च यथाविधि।। ९३।।

यन्त्रं वक्ष्यमाणम्।

तेषु कोष्ठेषु नवसु विन्यसेत् कलशान् नव। शुभांश्चन्दनकाश्मीरलिप्तसर्वाङ्गकान् नवान्।। ९४।।
कूर्चतण्डुलसंयुक्तान् सर्वदृष्टिमनोहरान्। पूजयेच्च यथावत् तान् वासितैस्तीर्थपुष्करैः।। ९५।।

कर्षस्वर्णेन रचितं नवरत्नसमन्वितम्। कर्णिकामध्यविलसद्यन्त्रं पद्मं तु कारयेत्।। ९६।।
मध्यस्थकलशे रम्यं यथावत् तद्विनिक्षिपेत्। पञ्चरत्नानि सर्वेषु कलशेषु विनिक्षिपेत्।। ९७।।

पञ्चरत्नानि तु—

वज्रं मुक्ताफलं नीलं पद्मरागं तथैव च। मरकतेन समायुक्तं पञ्चरत्नमिदं विदुः।। १।।

इति पुराणोक्तानि। तथा—

पटीरोशीरकाश्मीरचन्द्रागुरुतमालकम्। जातीकक्कोलसंयुक्तं सम्पिष्येत् तानि भागशः।। ९८।।
कलशेषु च सर्वेषु यथाविधि विलोडयेत्। सदाभद्रा च दूर्वा च देवी श्रीश्च मधुव्रता।। ९९।।
अपामार्गस्य पत्राणि मुशली वज्रिवल्लरी। चक्रप्रियङ्गुव्रीहींश्च मुद्गगोधूमतण्डुलान्।। १००।।
शालिमाषांश्च सतिलान् यवान् प्रक्षिप्य निक्षिपेत्। कदलीनारिकेलश्रीधात्रीलकुचभूरुहाम्।। १०१।।
फलानि पद्मबकुलजातिसौगन्धिकानि च। मल्लिकाचम्पकाशोकपुन्नागोत्थानि निक्षिपेत्।। १०२।।
पुष्पाणि केतकीं तद्वत् तुलसीपल्लवानि च। न्यग्रोधोदुम्बरप्लक्षचैत्यानां ब्रह्मकूर्चकम्।। १०३।।
प्रक्षिप्य घटवक्त्राणि च्छादयेत् भूपकैः शुभैः। साक्षतैः सफलैस्तांश्च वेष्टयेत् क्षौमवाससा।। १०४।।
तेषु मध्यस्थकलशे समावाह्य महेश्वरीम्। महालक्ष्मीं चन्दनाद्यैरुपचारैश्च संयजेत्।। १०५।।
शिष्टेष्वष्टसु कुम्भेषु ह्युमाद्या क्रमतो यजेत्। सुगन्धैश्चन्दनैः पुष्पैर्मनोज्ञैर्धूपदीपकैः।। १०६।।
भक्ष्यभोज्यनिवेद्यैश्च यथाविधि यजेत् सुधीः। संस्पृश्य तान् घटान् मन्त्री त्रिसहस्रं मनुं जपेत्।। १०७।।
ततः साध्यं समानीय संयतं स्थण्डिले शुभे। सुपीठे तं निवेश्याथ[1] तस्मिन् साध्ये तु योजयेत्।। १०८।।
मनोहरैरलङ्कारैर्विविधैर्वसनैरपि। आदरात् तमलङ्कृत्य सुरक्तं सुमनोवृतम्।। १०९।।
सुवासिनीभिर्योषाभिरर्चितानां द्विजन्मनाम्। सहस्रैर्वचनैः सर्ववाद्यानां निनदैः सह।। ११०।।
वेदघोषेण च सह लग्ने चैव सुशोभने। तेषु मध्यस्थितं कुम्भं समुद्धृत्य गुरुः स्वयम्।। १११।।
मूलमन्त्रं जपन् सिञ्चेत् साध्यशीर्षे ततोऽपरैः। कलशैः पूर्ववत् सिक्त्वा हस्तेनास्य शिशोः शिरः[2]।। ११२।।
संस्पृशन् वेदगदितामाशिषं च प्रयच्छति। कल्याणमस्तु च सदा सम्पदश्च निराकुलाः।। ११३।।
प्रसीदतु महालक्ष्मीः सकला देवता अपि। रक्षन्तु त्वां सर्वदैव विजयोऽस्तु सुखी भव।। ११४।।
इत्थं दत्त्वाशिषः पश्चाद्वाससी परिधाप्य च। आचन्तः प्रणमेत् सम्यग्यथाविधि गुरुं शिशुः।। ११५।।
नानाविधैश्च वसनैर्नानालङ्करणैरपि। धनैर्धान्यै रत्नगोभिर्महिषीभिश्च दासकैः ।। ११६।।
दासीभिर्देवताबुद्ध्या गुरुं सन्तोषयेत् सुधीः। नानाविधैर्भक्ष्यभोज्यैर्लेह्यचोष्यैस्तथेतरैः।। ११७।।
दीनान्धकृपणैः सार्धं भोजयेच्च द्विजन्मनः। ततः स्वमन्दिरे कुर्यादुत्सवं बन्धुभिः सह।। ११८।।
षट्त्रिद्व्येकाहरम्यं च ततः स नृवरः स्वयम्। कृतार्थं मन्यते सम्यगात्मानं नान्यथात्र हि।। ११९।।
राजा शत्रून् विजयतेऽभिषिक्तश्च यथाविधि। राजपुत्रश्च राज्येप्सुरचिरादाप्नुयात् पदम्।। १२०।।

---

[1] 'शुभे पीठे तं निवेश्य' ख. पाठः। [2] 'न्यस्तशिरोशिरः' क. ख. पाठः।

बन्ध्याभिषिक्ता रमणी ह्यचिराद्वाञ्छितं सुतम्। महामतिं च लभते नात्र कार्या विचारणा।। १२१।।
महाभयेषु भूतादिनिमित्तोत्थभयेषु च। कृत्याद्रोहादिदोषे च प्रकुर्यादभिषेचनम् ।। १२२।।
अभिषेकेणामुना च नृणां भवति निश्चितम्। सर्वसम्पच्च सौभाग्यं सर्वामयशमस्तथा।। १२३।।
सर्वापद्वारणं चैव सर्वसौख्यानि निश्चितम्।।..।।

पाटीरश्चन्दन:। उशीरो बालकं। काश्मीरं कुङ्कुमं केसरमिति प्रसिद्धम्। चन्द्र: कर्पूर:। तमालकं पत्रजं। जाती जातीफलं, कक्कोलं कोल इति प्रसिद्धम्। भागश: समभागेन। सदाभद्रा मुस्ता। देवी सहदेवी। श्रीरपराजिता। मधुव्रता भृङ्गराज:। मुशली तालमूली। वज्रिवल्लरी इन्द्रवारुणी। प्रियङ्गु: काङ्गुनी। श्री: बिल्व:। धात्री आमलकी, लकुचो बडहर इति प्रसिद्ध:। बकुल: बैलसरीति प्रसिद्ध:। प्लक्ष: पाकडिति प्रसिद्ध:। चैत्यो ग्रामप्रसिद्धिहेतुभूतो महावृक्ष:। ब्रह्मकूर्चं पञ्चगव्यं। भूपकैराच्छादनपात्रै:।। तथा–

श्रीमायाकामयुक्तं प्रणवगतमथो साध्यमालिख्य मध्ये
किञ्जल्केषूक्तबीजत्रितयमपि लिखेद् युग्मशश्चार्कपत्रे।
मन्त्रार्णान् षोडशारं स्वरलसितदलं कादियुक्पत्रमूलं
हक्षोद्यत्कोणभूमीगृहयुगलवषट्प्रान्ततूर्णावृतं स्यात्।। १२४।।

यन्त्रमेतन्महालक्ष्म्या: प्रोक्तं सम्पत्करं परम्। सर्वसौभाग्यदं चापि सर्वदु:खविमोचनम्।। १२५।।
आपन्निवारणं प्रोक्तं किं बहूक्तेन सर्वदम्।..।।

इति। अस्यार्थ:– द्वादशदलं पद्मं विरच्य तत्कर्णिकायां प्रणवं विलिख्य तस्योदरे श्रीमायाकामबीजानि (साध्यनाम च विलिख्य तत्केसरेषु प्रोक्तश्रीमायाकामबीजानि) प्रतिकेसरमेकैकमिति बीजत्रयस्याष्टावृत्त्या चतुर्विंशतिकेसरेष्वपि विलिख्य, द्वादशपत्रेषु मूलमन्त्रस्य वर्णानेकैकशो विलिख्य, तद्बहि: षोडशदलं पद्मं कृत्वा तत्केसरेषु ककारादिसकारान्तान् वर्णान् द्वात्रिंशतं द्वन्द्वशो विलिख्य दलेषु षोडश स्वरान् विलिख्य, तद्बहिश्चतुरस्रद्वयेनाष्टकोणं कृत्वा, तत्कोणेषु प्रतिकोणं हक्षौ विलिख्य वषडन्तया त्वरिताविद्यया वेष्टयेत्। अत्र त्वरिताविद्यावेष्टने तु अष्टकोणाद्बहिर्वृत्तद्वयं कृत्वा तयोरन्तरालवीथ्यां यथोक्तया त्वरिताविद्यया वेष्टयेदिति सम्प्रदाय:। एतद्यन्त्रमुक्तफलदम्।। तथा–

तारश्रीशक्तिलक्ष्मीकसूर्या: शिवयुता धरा। चतुराननसूर्यौ च दीर्घयुक्त: पुरन्दर:।। १२६।।
उपान्त्य: शिवयुग्वायुर्लोहितोऽग्नियुतो भृगु:। चतुर्थस्वरयुक् थान्त: पुनरेतत् त्रयं वदेत्।। १२७।।
बीजत्रयं महालक्ष्मि हृदन्तो गदितो मनु:। सर्वदो वै महालक्ष्म्या मन्त्रराज: प्रकीर्तित:।। १२८।।

इति। तार: प्रणव:, श्री: श्रीबीजं, शक्तिर्भुवनेशी, लक्ष्मी: श्रीबीजं, क स्वरूपं, सूर्यो मकार:, शिव ए धरा ल तेन ले, चतुरानन: क, सूर्यो म, दीर्घयुक्त: पुरन्दर: ला, उपान्त्यो ल, शिव ए, वायु य, तेन ये। लोहित: प, अग्नि: रेफस्तेन प्र, भृगु: स, चतुर्थस्वर ई तेन सी, थान्तो द, पुनरेतत्त्रयं प्रसीदेति। बीजत्रयं श्रीशक्तिलक्ष्मीबीजानि। महालक्ष्मि स्वरूपं, हृदन्तो नमोन्त:।। अत्र केचित् लक्ष्मीशब्दं चतुर्थ्यन्तत्वेनेच्छन्ति, 'महालक्ष्म्यै' इत्येवोद्धरन्ति। तथा च प्रपञ्चसारे ''समहालक्ष्म्यै हृदिन्दिरामन्त्र:'' इति।। (१२। २७)। सारसङ्ग्रहे–

त्रिबीजपुटितैर्मन्त्रवर्णै: पञ्चाङ्गमीरितम्। त्रीष्वग्निवह्निवेदैश्च ततो देवीं विचिन्तयेत्।। १।।

इषु: ५ अग्नि: ३ वेद: ४। ध्यानम्—

सिन्दूरारक्तकान्ति: सरसिजवसतिश्चारुलावण्यभूमि-
र्हस्ताब्जै रत्नपात्रं सरसिजयुगलं दर्पणं संवहन्ती।
दासीभिश्चाभिवीता मणिमयमुकुटा हारसत्कुण्डलाढ्या
काञ्चीप्रोद्यन्नितम्बाङ्गदलसितभुजा श्रेयसे वोऽस्तु लक्ष्मी:।। २।।

वामाध:करमारभ्य दक्षिणाध:करपर्यन्तमायुधध्यानं दक्षाधस्तादारभ्य वा।

पूर्वोदिते यजेत् पीठे वक्ष्यमाणेन वर्त्मना। पुराङ्गानि यजेत् पश्चात् श्रीधरादींस्तत: सुधी:।। ३।।
श्रीधरश्च हृषीकेशो बैकुण्ठो विश्वरूपक:। वासुदेवादयश्चेमे चत्वार: समुदीरिता: ।। ४।।
भारत्यादिभिरन्या स्यात् भारती पार्वती तथा। चान्द्री शची च सम्प्रोक्ता दमकाद्यान् यजेद्गजान्।।५।।
यजेद्बाणान् महालक्ष्म्या अनुरागादिकान् बहि:। अनुरागो विसंवादो विजयो वल्लभो मद:।। ६।।
हर्षो बलश्च तेजश्च यजेल्लोकेश्वरान् बहि:। तदायुधानि तद्बाह्ये पूजयेच्चन्दनादिभि:।। ७।।
एवं सम्पूजयेल्लक्ष्मीं यो मर्त्यो विधिनामुना। तत्र नित्यं महालक्ष्मीर्वर्धते न जहाति तम्।। ८।।

इति। अथ प्रयोग:—प्रात:कृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि दक्षप्रजापतये ऋषये नम:। मुखे गायत्रीच्छन्दसे नम:। हृदये श्रीमहालक्ष्मीदेवतायै नम:। इति विन्यस्य प्राग्वद्विनियोगमुत्कीर्त्य, श्रींह्रींश्रीं कमले श्रींह्रींश्रीं हृदयाय नम:। श्रींह्रींश्रीं कमलालये श्रींह्रींश्रीं शिरसे स्वाहा।। श्रींह्रींश्रीं प्रसीद श्रींह्रींश्रीं शिखायै वषट्। श्रींह्रींश्रीं प्रसीद श्रींह्रींश्रीं कवचाय हुं। श्रींह्रींश्रीं महालक्ष्म्यै श्रींह्रींश्रीं अस्त्राय फट्। इति पञ्चाङ्गमन्त्रान् मूलाभिमृष्टयो: करयोरङ्गुष्ठादिकनिष्ठिकान्तास्वङ्गुलीषु विन्यस्य, नेत्रवर्जं हृदयादिषु च न्यसेत्। ततो ध्यानमानसपूजान्तेऽष्टदलकमलत्रयं चतुर्द्वारयुतचतुरस्रत्रयावृतं पूजाचक्रमुद्धृत्य, अर्घ्यस्थापनाद्यङ्गपूजान्तेऽन्तरष्टदलेषु ॐश्रीधराय नम:। हृषीकेशाय नम:। वैकुण्ठाय०। विश्वरूपाय०। वासुदेवाय०। सङ्कर्षणाय० प्रद्युम्नाय० अनिरुद्धाय०, इति देव्यग्रादि प्रादक्षिण्येन सम्पूज्य, द्वितीयेऽष्टदले दिक्पत्रेषु भारत्यै नम:। पार्वत्यै०। चान्द्र्यै०। शच्यै०। आग्नेयादिषु पत्रेषु दमकाय नम:, सलिलाय०, गुग्गुलवे०, कुरण्टकाय०, इति सम्पूज्य, तृतीयेऽष्टदले अनुरागाय नम:। विसंवादाय०, विजयाय०, वल्लभाय०, मदाय०, हर्षाय०, बलाय०, तेजसे०, इति सम्पूज्य प्राग्वद् दिगीशादि शेषं समापयेद् इति।। दक्षिणामूर्तिसंहितायां तु— अङ्गै: प्रथमावरणं, भारत्यादिचतसृभि: श्रीधरादिभिश्चतुर्भिश्च द्वितीयम्, अनुरागादिभिस्तृतीयं, ततो लोकेशास्तद्धेतयश्च इति पञ्चावरणमुक्तम्। दक्षिणामूर्ति:—

लक्षं जपेत् फलैर्बैल्वैर्जुहुयान्मधुरोक्षितै:। दशांशं संस्कृते वह्नौ प्राक्प्रोक्तेनैव वर्त्मना।। १।।

इति। एष जप: कृतयुगपर:।

एवं सिद्धमनुर्मन्त्री साधयेदिष्टमात्मन:। चन्दनाक्तै: सरसिजैर्लक्षं प्रजुहुयात् सुधी:।। २।।
लभते नृपतिर्वैरिसाम्राज्यं समरं विना। महालक्ष्मीमनुं चैव जपन् राजसभां व्रजेत्।। ३।।
तत्र सम्मान्यते नित्यं नात्र कार्या विचारणा। सहदेवी रमा दूर्वा क्रान्ता भद्रा मधुव्रता।। ४।।
शक्रवल्ली चाञ्जलिनी मुशली हरिचन्दनम्। घनसारं चन्दनं च कक्कोलं रोचनं च रुक्।। ५।।

[redacted]

मायूरकेसरौ सर्वं पिष्ट्वा सम्यग् हरिद्रया। सञ्जप्तं मनुना सम्यगष्टोत्तरसहस्रकैः।।
अनेन तिलकं कृत्वा[1] सर्ववश्यं भवेद्ध्रुवम्।..................................

रमा श्रीलता। क्रान्ता अपराजिता। हरिचन्दनं रक्तचन्दनम्। ''हरिर्ना कपिले त्रिषु'' इति कोशात्। घनसारः कर्पूरः। रुक् कुष्ठम्।। सारसङ्ग्रहे—

प्रणवं शुद्धवासान्ते से हृदन्ते महापदम्। ङेन्तश्रीहृन्मनुः प्रोक्तश्चतुर्दशभिरक्षरैः।। १ ।।

शुद्धवास स्वरूपं। से स्वरूपं। हृन्नमः। महा स्वरूपं। ङेन्ता श्रीः श्रियै। हृन्नमः।

मनोः पदैश्च पञ्चाङ्गं पूर्ववद् ध्यानपूजनम्। जपस्त्रिलक्षमेतस्य पद्मैर्होमो दशांशतः।। २ ।।

पूर्ववत् महालक्ष्मीमन्त्रवत्। जपः कलियुगपरः। तेनर्ष्यादिकमपि तत्रोक्तं ज्ञेयम्।। तथा—

यौतौमौतभये प्रोक्त्वा श्रियै श्रीर्नम इत्यथ। एकादशार्णो मन्त्रोऽयं जमदग्निर्मुनिर्मतः।। ३ ।।

यौतौमौतभये स्वरूपं, श्रियै श्रीर्नम इत्यपि स्वरूपम्।

त्रिष्टुप्छन्दो रमादेवी देवता परिकीर्तिता। आद्यषण्मन्त्रवर्णैश्च हृदन्तैर्हृद्द्विठान्तकैः।। ४ ।।
शिरः, शिखा वषट् भूयो हृत्(हुं)प्रान्तैः कवचं मतम्। श्रियै नेत्रं श्रीर्नमोऽस्त्रं विदध्याद् ध्यानमुक्तवत्।

ध्यानमित्युपलक्षणम्। पूजादिकमपि तथा ज्ञेयम्। अथ प्रयोगः—प्राग्वद्योगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि जमदग्नये ऋषये नमः, मुखे त्रिष्टुप्छन्दसे नमः, हृदि श्रीमहालक्ष्म्यै देवतायै नमः, इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, यौतौमौतभये नमः हृदयाय नमः, यौतौमौतभये स्वाहा शिरसे स्वाहा, यौतौमौतभये वषट् शिखायै वषट्, यौतौमौतभये हुं कवचाय हुं। श्रियै नेत्रत्रयाय वौषट्। श्रीर्नमः अस्त्राय फट्। इति षडङ्गमन्त्रान् प्राग्वत् करयोर्हृदयादिषु च विन्यस्य शेषं महालक्ष्मीवत् सर्वं कुर्यात्।। तथा—

नित्यं द्वादशसाहस्रं सप्तरात्रं मनुं जपेत्। तेन सिद्धो भवेन्मन्त्रः साधकस्य न संशयः।। ६ ।।

अत्र होमो नोक्तः। तथापि पूर्वोक्तमन्त्रहोमद्रव्यैर्जपदशांशतो होमः कार्यः, इति साम्प्रदायिकाः। तथा—

लक्ष्मीं सुवर्णाब्जकरां ध्यात्वा मन्त्रमिमं जपेत्। अष्टोत्तरसहस्रं च स लभेद्वाञ्छितां श्रियम्।। ७ ।।
जपन्नष्टशतं विश्वं तिलकाद्वशयेद् ध्रुवम्। मासत्रयं तथा जप्त्वा ग्रामं मन्त्री समाप्नुयात्।। ८ ।।

इति। तथा—

पद्मप्रभेपदं पद्मसुन्दरीति पदं वदेत्। पद्मर्षेऽग्निवधूर्मन्त्रश्चतुर्दशभिरक्षरैः ।। ९ ।।

मन्त्रोद्धारस्तु सुगमः।

पदैश्चतुर्भिः सर्वेण पञ्चाङ्गं गदितं मनोः। जपपूजादिकं सर्वमस्य पूर्ववदाचरेत्।। १० ।।

पूर्ववदेकादशाक्षरोक्तवत्। ''इयं सिद्धा महाविद्या भक्तानां कल्पवल्लिका।'' एतेन पुरश्चरणमपि तत्रोक्तमेव।।

अथ शक्तिलक्ष्मीमन्त्रः स तु वक्ष्यमाणत्रिपुटामन्त्र एव (२२श्वा०)। यजनविधिरपि तत्रोक्त एव ज्ञेयः।।

दक्षिणामूर्तिसंहितायाम्—

अथ वक्ष्ये महादेवि सर्वसाम्राज्यदेवताम्। यस्या आराधनाद् विष्णुरभूल्लक्ष्मीपतिः स्वयम्।। १ ।।

---

[1] 'कुर्यात्' क. पाठः।

चन्द्रः समदनं क्ष्मेशो वह्निदीर्घाक्षिमण्डितः। बिन्द्वक्रूरेश्वरीयुक्तो विद्येयं वैष्णवी प्रिये।। २।।
श्रीबीजं सम्पुटं कुर्यात् सर्वसाम्राज्यदायिनी।.......................................।।

इति। चन्द्रः स, मदनं ककारः, क्ष्मा लकारः, ईशो हकारः, वह्नी रेफः, दीर्घाक्षी ईकारः, बिन्दुशब्देन नादो गृह्यते जनकजन्ययोस्तयोरभेदात्। नादबिन्द्वोर्जनकजन्यत्वम्। तत्र शारदातिलके—''आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः'' (१। ७) इति। अक्रूरेश्वरी बिन्दुः एतेन मायोद्धृता। तथा—

....। ऋषिर्हरिस्तथा छन्दो गायत्री चास्य सम्मता।। ३।।
देवता मोहिनी लक्ष्मीः सर्वसाम्राज्यदायिनी। बीजं कूटं समाख्यातं शक्तिः श्रीबीजमुच्यते।। ४।।
षड्भिः कूटं स्वरैर्भित्त्वा षडङ्गानि प्रविन्यसेत्। अतसीपुष्पसङ्काशां रत्नभूषणभूषिताम्।। ५।।
शङ्खचक्रगदापद्मशार्ङ्गबाणधरां करैः। षड्भिः कराभ्यां देवेशि वरदाभयशोभिताम्।। ६।।

ध्यायेदिति शेषः। वामाद्यूर्ध्वयोराद्ये, तदाद्यधःस्थयोरपरे, तदाद्यधःस्थयोरितरे इत्यायुधध्यानम्। तथा—

........................यन्त्रोद्धारं शृणु प्रिये। त्रिकोणं चाष्टपत्रं च भूबिम्बं च ततो लिखेत्।। ७।।
चतुर्द्वारोपशोभाढ्यं यन्त्रमेतत् समालिखेत्। अस्मिन् समावाह्य देवीं पूजयेदुपचारकैः।। ८।।
पूर्ववत् परमेशानि षडङ्गावरणं यजेत्। गायत्री चैव सावित्री सरस्वत्यग्रकोणतः[१]।। ९।।
क्रमेण पूजयेन्मन्त्री ब्राह्म्याद्याश्च स्वरैः पृथक्। अष्टपत्रेषु भूबिम्बे चैकोच्चारेण पूजयेत्।। १०।।
अष्टादशमहाकोटियोगिनीभ्यो नमो लिखेत्। अनेन मनुना पश्चादिन्द्रादीन् पूजयेत् ततः।। ११।।
पुनर्देवीं समभ्यर्च्य गन्धपुष्पाक्षतादिभिः। वटुकक्षेत्रपालेभ्यो योगिनीभ्यो बलिं हरेत्।। १२।।

अत्र वटुकक्षेत्रपालेभ्य इति बहुवचनं गणेशस्यापि ग्रहणार्थम्। तेन वटुकक्षेत्रपालगणेशेभ्य इत्यर्थः।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि हरये ऋषये नमः, मुखे गायत्रीछन्दसे नमः, हृदये श्रीसर्वसाम्राज्यलक्ष्म्यै देवतायै नमः, गुह्ये सकलह्रींबीजाय नमः, पादयोः श्रींशक्तये नमः, इति विन्यस्य ममेत्यादि प्राग्वद्विनियोगमुक्त्वा, सकलां हृदयाय नमः, सकलीं शिरसे स्वाहा, सकलूं शिखायै वषट्, सकलैं कवचाय हुं, सकलौं नेत्रत्रयाय वौषट्, सकलः अस्त्राय फट्, इति षडङ्गमन्त्रैः प्राग्वत् करषडङ्गन्यासं कृत्वा, ध्यानाद्यात्मपूजान्ते प्रागुक्तं लक्ष्मीपीठमभ्यर्च्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, त्रिकोणाग्रादिप्रादक्षिण्येन ॐ गायत्र्यै नमः, सावित्र्यै नमः, सरस्वत्यै नमः, इति सम्पूज्याष्टदलेषु प्राग्वत् ब्राह्म्याद्याः सम्पूज्य, चतुरस्रे ''अष्टादशमहाकोटियोगिनीभ्यो नमः'' इति देवीं परितः सम्पूज्य लोकेशार्चादि प्राग्वत् समापयेदिति।। तथा—

''एवमष्टभुजां ध्यात्वा त्रिलक्षं प्रजपेत् सुधीः। तद्दशांशेन पद्मैस्तु हुनेत् साम्राज्यसिद्धये।। १३।।
जितेन्द्रियः सन् विधिवत्'' इति। अत्र विधिवदित्यनेन तर्पणादिब्राह्मणभोजनान्तं कर्तव्यमित्युक्तम्।। तथा सारसङ्ग्रहे—

हृदयं पद्मतनया सम्बुद्ध्यन्तो रमामनुः। सप्तार्णो गदितश्चास्य षडङ्गान्यमुनैव हि।। १।।

नमो हृ०, पद्मतनये शि०, नमः शिखा०, पद्मतनये कवचा०, नमो नेत्रा० पद्मतनये अस्त्रा०। ''ध्यानपूजाहुतार्चादि पूर्ववच्चास्य कीर्तितम्''। इति। पूर्ववदेकाक्षरोक्तवत् तथा—

---

[१] 'भागतः' ख. पाठः।

रमामन्त्रेषु यो भक्तः श्रीसूक्तं स जपेत् सुधीः। विधानं वक्ष्यते सम्यक् पञ्चदशर्चकस्य हि।। १।।
हिरण्यवर्णामित्यस्या ऋचो लक्ष्मीर्मुनिर्मतः। छन्दोऽनुष्टुप् समाख्यातमन्यासां मुनयः क्रमात्।। २।।
आनन्दकर्मदचिक्लीतश्रीपुत्रा अमी मताः। ताम आवहजाताश्वपूर्वामित्यनयोर्मतः ।। ३।।
छन्दोऽनुष्टुप्च कांसोस्मितामस्या बृहती मतम्। चन्द्रां प्रभादित्यवर्णामनयोस्त्रिष्टुबीरितम्।। ४।।
उपैतु मां क्षुत्पिपासा गन्धद्वारां दुरेति च। मनसः कर्दमेनापः सृजन्त्यार्द्रां च सप्तमी।। ५।।
आर्द्रां पुष्करिणीमासामष्टर्चां च प्रकीर्तितम्। छन्दोऽनुष्टुप् तथा ताम आवहास्या प्रकीर्तितम्।। ६।।
प्रस्तारपङ्क्तिः सर्वासां देवते श्रीर्विभावसुः। मूर्धाक्षिकर्णनासास्यगलदोर्हृत्सनाभिषु ।। ७।।
गुह्यपायूरुयुग्जानुजङ्घापत्सु न्यसेदृचः। हिरण्मयी च चन्द्रा च तृतीया रजतस्रजा।। ८।।
हिरण्याद्या स्रजा त्वन्या हिरण्या च तथापरा। हिरण्यवर्णा चैताभिः कुर्यादङ्गानि षट् क्रमात्।। ९।।

एताभिश्चतुर्थीनमोन्ताभिः। ''एताभिर्ङेनमोन्ताभिरङ्गकल्पनमीरितम्।'' इति मन्त्रतन्त्रप्रकाशवचनात्।।

ध्यानम्—

संरक्तोद्यत्सरसिजरजःपुञ्जवर्णा कराब्जैरिष्टाभीती कमलयुगलं धारयन्ती मनोज्ञा।
सम्यक्शोणप्रवरनलिने संस्थिता चारुभूषा भूयाद्भूत्यै भुवनजननी श्रीरियं रत्नमौलिः।। १०।।

एकाक्षरोक्तवदायुधध्यानम्।

यजेद् देवीं पुराप्रोक्ते पीठे आवाह्य मन्त्रवित्। यजेदङ्गानि पद्माद्या लोकपालाः सहेतयः।। ११।।
आवाहनं चासनं स्यादर्घ्यपाद्याचमानि च। मधुपर्काभिषेकौ च वस्त्रालङ्कारचन्दनम्।। १२।।
पुष्पं धूपं दीपभोज्ये प्रोद्वासनमथापि च। एतानि मन्त्रवित् कुर्यादृक्पञ्चदशकेन हि।। १३।।
पद्माद्या पद्मवर्णान्या पद्मस्थार्द्रा तुरीयका। तर्पयन्ती सतृप्तान्या ज्वलन्ती सप्तमी मता।। १४।।
स्वर्णप्राकारसंज्ञेयमष्टमी समुदाहृता।..।।

इति। अथ प्रयोगः— प्राग्वद्योगपीठन्यासान्ते प्रणवेन श्रीबीजेन वा प्राणायामत्रयं कृत्वा, शिरसि आनन्दकर्दमचिक्लीतश्रीपुत्रेभ्य ऋषिभ्यो नमः। मुखे अनुष्टुब्बृहतीत्रिष्टुप्अनुष्टुप्प्रस्तारपङ्क्तिभ्यश्छन्दोभ्यो नमः। हृदि श्रीविभावसुभ्यां देवताभ्यां नमः, इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, हिरण्मय्यै नमः हृदयाय नमः, चन्द्रायै नमः शिरसे स्वाहा, रजतस्रजायै नमः शिखायै वषट्, हिरण्यस्रजायै नमः कवचाय हुं, हिरण्यायै नमः नेत्रत्रयाय वौषट्, हिरण्यवर्णायै नमः अस्त्राय फट्, इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्हृदादिषडङ्गेष्वपि विन्यस्य, शिरसि ॐहिरण्यवर्णामित्यादि० नमः। नेत्रयोः ओं ताम्म आवह० नमः। कर्णयोः ओं अश्वपूर्वां० नमः। नासायां ओंकासोस्मितां० नमः। मुखे ओंचन्द्रां० नमः। गले ओंआदित्यवर्णे० नमः। बाह्वोः ॐउपैतु मां नमः। हृदि ओंक्षुत्पिपासा० नमः। नाभौ ओंगन्धद्वारां० नमः। गुह्ये ओंमनसः० नमः। गुदे ओं कर्दमेन० नमः। ऊर्वोः ओंआपः सृजन्ति० नमः। जान्वोः ओंआर्द्रां० नमः। जङ्घयोः ओंआर्द्रां० नमः। पादयोः ओंताम्म० नमः।। एवमेता ऋचः प्रणवादिनमोन्ता विन्यस्य ध्यानमानसपूजान्ते चतुर्द्वारयुतं चतुरस्रत्रयावृतमष्टदलकमलं पूजाचक्रं निर्माय, प्राग्वत् पुरतो निधायार्घ्यस्थापनादिपीठार्चनान्ते,

''ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह''।। १।।

इत्यृचा प्राग्वदावाहनीयमुद्रयावाह्य आवाहनादिपरमीकरणान्तं तत्तन्मुद्रया विधाय, ॐ ताम्म आवह–

जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।। २।। श्रीरेतत्त आसनं नमः।। उं अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम्।। ३।। इति श्रीरेतत्त अर्घ्यं स्वाहा।। उं कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्ती तृप्तां तर्पयन्तीम्।। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्।। ४।। श्रीरेतत्ते पाद्यं नमः।। उं चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोकं देवजुष्टामुदाराम्। तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि।। ५।। श्रीरेतत्ते आचमनीयं सुधा।। उं आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तराश्च बाह्या अलक्ष्मीः।। ६।। श्रीरेष ते मधुपर्कः सुधा।। ततः पूर्ववदाचमनीयम्। उं उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे।। ७।। श्रीरेतत्ते स्नानं नमः।। उं क्षुत्पिपासामला ज्येष्ठा अलक्ष्मीर्नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वा निर्णुद मे गृहात्।।८।। श्रीरेते ते वाससी नमः।। ततः पूर्ववदाचमनीयम्।। उं गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।९।। श्रीरेतानि ते भूषणानि नमः।। उं मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः।१०।। श्रीरेष ते गन्धो नमः।। उं कर्दमेन प्रजा भूता मयि सम्भ्रम कर्दम। श्रियं वासय मे गृहे मातरं पद्ममालिनीम्।। ११।। श्रीरेतत्ते पुष्पं वौषट्। इति पुष्पान्तानुपचारानुपचर्य्य पूर्ववदङ्गानि सम्पूज्याष्टदले स्वाग्रादिप्रादक्षिण्येन, उं पद्मायै नमः, उं पद्मवर्णायै नमः, उं पद्मस्थायै नमः, आर्द्रायै नमः, तर्पयन्त्यै नमः, तृप्तायै नमः, ज्वलन्त्यै नमः, स्वर्णप्राकारायै नमः, इति सम्पूज्य प्राग्वल्लोकपालांस्तदायुधानि च सम्पूज्य, उं आपः सृजन्ति स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले।। १२।। श्रीरेष ते धूपो नमः।। उं आर्दां पुष्पारिणी यष्टिं सुवर्णां हेममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह।। १३।। श्रीरेष ते दीपो नमः।। उं आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह।। १४।। श्रीरेतत्ते नैवेद्यं नमः।। ततः पुनराचमनादिकं दत्त्वा ताम्बूलादि सर्वं प्राक्पूजाप्रकरणोक्तप्रकारेण कृत्वा, उं ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्।१५।। श्रीः यमस्व, इति विसृज्य शेषं प्राग्वत्कृत्वा समापयेदिति।। अत्र सर्वेषूपचारेषु प्राग्वत् पूजाप्रकरणोक्तप्रकारेण यत्र यद्यत् कर्तव्यं तत्र तत्तत् सर्वं कुर्यात्।। तथा–

....। प्रारम्भ शुक्लप्रतिपद्यावदेकादशी भवेद्।। १५।।
तावद् द्वादशसाहस्रं जपन् निश्चलमानसः। ब्रह्मचर्यरतः शुद्धवस्त्रदन्तादिकः सुधीः।। १६।।
पद्मैस्त्रिमधुरोपैतैर्घृताक्तेन पयोन्धसा। श्रीसमिद्भिः सर्पिषा च प्रत्येकं त्रिशतं हुनेत्।। १७।।

श्रीसमिद्भिर्बिल्वसमिद्भिः।

द्वादश्यां द्वादशैवाथ विप्रांश्चैव तु भोजयेत्। तेन सिद्धो भवेन्मन्त्रो नात्र कार्या विचारणा।। १८।।

अत्र द्वादशसाहस्रमृचां न तु सूक्तस्य, इति सम्प्रदायः। एकादशभिर्दिनैः सूक्तस्य द्वादशसाहस्रावृत्तेरसम्भवादशक्यत्वाच्च।

तदा त्वेकादशभिर्दिनैरष्टशतावृत्तिः सूक्तस्य कार्या। तत्राष्टदिनपर्यन्तं प्रत्यहं त्रिसप्तत्यावृत्तिः सूक्तस्य कार्या, अनन्तरदिनत्रये द्वासप्तत्यावृत्तिः प्रत्यहं कार्या, तेन द्वादशसाहस्रमृचामावृत्तिर्भवतीति।। तथा—

कुन्दमन्दारकुमुदमालतीपद्मकेतकाः[1]। नन्द्यावर्तद्वयं जाती कह्लारं चम्पकं तथा ।।१९।।
रक्तोत्पलादिपुष्पाणि लक्ष्म्याश्चातिप्रियाणि हि। स्नानकाले च तैः सूक्तैरभिषिञ्चेत् त्रिशः सुधीः।।२०।।
यावज्जपेद्रविमुखस्तर्पयेत् तावदेव तु। पूर्वोक्तविधिना सम्यक् पूयजेत् परमेश्वरीम्।। २१।।
त्रिवारं प्रत्यहं मन्त्री जुहुयाच्च यथाविधि। षण्मासं यः करोत्येवं साक्षाल्लक्ष्मीपतिः स्वयम्।।२२।।
विकचन्मात्र एवाब्जे नवनीतं प्रविन्यसेत्। मध्ये सकेसरे पद्मे सम्यक्पत्रान्तरालके।। २३।।
सुसमिद्धेऽनले तच्च समुद्धृत्य हुनेत् सुधीः। अन्त्यर्चाष्टोत्तरशतं जपंश्च भृगुवासरैः।। २४।।
चत्वारिंशद्भिरस्य स्यान्महालक्ष्मीरचञ्चला। तुरीयर्चा च जुहुयाद्घृतेनैकादशाहुतीः।। २५।।
एवं कुर्वत एवास्य षण्मासात् स्यान्महेन्दिरा। प्रधानतर्पणान्ते च सन्तर्प्याः शक्तयस्त्विमाः।।२६।।
प्रणवाद्या हृदन्ताश्च श्रीर्लक्ष्मीर्वरदायिका। विष्णुपत्नी च वसुदा रूपा[2]प्यन्या हिरण्यतः।। २७।।
स्वर्णमालिन्यपि परा ततः स्याद् रजतस्रजा। सुवर्णादिगृहा स्वर्णप्राकारा पद्मवासिनी।। २८।।
पद्महस्तप्रिया* मुक्तालङ्कारा सूर्यकापरा। चन्द्रा विश्व (बिल्व) प्रियेश्वर्यौ भुक्तिश्चापि प्रमुक्तियुक्।।२९।।
विभुर्वृद्धिः(भूत्यृद्धी)समृद्धिश्च तुष्टिः पुष्टिर्धनाद्यदा[3]। भुवनेशी च शुद्धा [4]स्याद्योगिनी भोगदा मता।।३०।।
धात्री विधात्री द्वात्रिंच्छक्तयः समुदीरिताः। द्वात्रिंशद्भिश्च पूजान्ते मन्त्री मन्त्रैर्बलिं हरेत्।। ३१।।

मन्त्रैर्नाममन्त्रैः, श्रीरेष ते बलिर्नमः इत्यादिभिः।

श्रीमन्त्रजापिनां केचिदुच्यन्ते नियमा इह। तैलाभ्यक्तश्च नाश्नीयान्नग्नस्तोये न संविशेत्।।३२।।
अशुचिर्न स्वपेत् क्वापि त्वभ्यङ्गादशुचिर्भवेत्। लवणं तिलसम्भूतं नाश्नीयात् केवलं सुधीः।।३३।।
लिम्पेद्धरिद्रां वक्ते नो नानृतं प्रवदेत् क्वचित्। कदाचिन्मलिनो न स्याद्ध्रुवं नैवालिखेद्वृथा।।३४।।
श्रीफलाम्बुजसद्रोणान् न मूर्धनि च धारयेत्। तथा च निर्मलाचारः शुक्लः शुद्धमना भवेत्।।३५।।
शुद्धमाल्यानुलेपश्च शुद्धाभरणभूषितः। श्वेतवस्त्रपरीधानः शुद्धदेहः स्वलङ्कृतः ।। ३६।।
उत्कृष्टगन्धानुलेपः शुद्धदन्तश्च सन्नखः। विष्णुभक्तश्च विमलरम्यशय्यो भवेत् सुधीः।। ३७।।
निन्दितान्वयसम्भूतां दुष्टां च कलहप्रियाम्। दुष्टयोनिमनिष्टां च रोगग्रहनिषेविताम्।। ३८।।
अन्यासक्तामशक्तां च कृष्णाङ्गीं[5] सुबृहत्तनुम्। अतिह्रस्वां सुदीर्घां च विरस्यां भोगलोलुपाम्।।३९।।
अन्यपुरुषलोलां च काकाक्षीं राजयोषितम्। रजस्वलामेकचारां योषितं न स्पृशेदपि।। ४०।।
शान्तः शुचिस्मितो वाग्मी मधुरालापवान् भवेत्। दयार्द्रचित्त आचार्यदेवातिथ्यर्चनारतः।। ४१।।
गुर्वग्निपूजानिरतः पुण्यशीलो दृढव्रतः। नित्यस्नायी पश्चिमाशामुखाशी शीलवान् भवेत्।।४२।।

---

१. 'रे' क. पाठः। 'ने' ख. पाठः। २ 'पास्यास्य' क. ख. पाठः। ३. 'ढ्यदा' ग. पाठः। ४. 'सम्भोगिनी' ख. पाठः।
५. 'कृशा' खः पाठः। *पद्महस्ता पद्मप्रियेति द्वे नामनी।

वर्णाश्रमरत: स्वीयदारतुष्टोऽ[1]ल्पभाषण:। एतादृशैश्च नियमैर्युक्तो लक्ष्मीं लभेत स:।। ४३।।

इति।। नारायणीये—

नाजिघ्रेन्नाक्रमेच्चाब्जं तद्बीजं न च भक्षयेत्। न स्यान्मलिष्टो न च्छिन्द्याद्बिल्वं भूमौ शयीत स:।।१।।
लवणामलके वर्ज्ये नागादित्यतिथौ क्रमात्। पञ्चम्यामुत्तरे च स्त्री वर्ज्या[2] प्रत्यङ्मुखोऽशने।।२।।

नागादित्यतिथी पञ्चमीसप्तम्यौ।

बिल्वैर्न मार्जयेद् दन्तान् त्रिसन्ध्यं प्रणमेच्च तान्। प्रातर्भक्ष्यास्तिलान्ते च धार्या लक्ष्मीं *च भक्षयेत्।।३।।
धारयेन्मूर्ध्नि तत्पुष्पमुत्तरे मधुरान्नभुक्। पायसं बिल्वबीजं च भक्षयेच्छुक्लपर्वणि।। ४।।

शुक्लपर्वणि पूर्णिमायाम्।। शारदातिलके— (८।१६३)

शयीत शुद्धशय्यायां तरुण्या सह नान्यथा। (नग्नो नावतरेदम्भस्तैलाभ्यक्तो न भक्षयेत्।। १।।
हरिद्रां न मुखे लिम्पेन्न स्वपेदशुचि: क्वचित्। न वृथा विलिखेद्भूमिं न बिल्वं द्रोणमम्बुजम्।।२।।
धारयेन्मूर्ध्नि नैवाद्याल्लोणं तैलं च केवलम्।) मलिनो न भवेज्जातु कुत्सितान्नं न भक्षयेत्।। ३।।
द्रोणपङ्कजबिल्वानि पद्भ्यां जातु न लङ्घयेत्। सहदेवीमिन्द्रवल्लीं श्रीदेवीं विष्णुवल्लभाम्।। ४।।
कन्याम्बुजप्रवालं च धारयेन्मूर्ध्नि सर्वदा।..।।

श्रीदेवी श्रीलता। विष्णुवल्लभा अपराजिता। कन्या कुमारी। प्रयोगसारे—

धान्यगोगुरुहुताशनराणां तु स्वपेदुपरि नाप्यनुवंशम्।
नोत्तरापरशिरा न च नग्नो नार्द्रपाणिचरण: श्रियमिच्छन्।। १।।

इति। यन्त्रसारे—

श्रीबीजं साध्यसंयुक्तं कर्णिकायां विलिख्य च। वस्वादित्यद्व्यष्टसंख्यपत्रेष्वपि यथाक्रमम्।। १।।
श्रीसूक्तस्याप्यर्धमर्धमृचामालिख्य तद्बहि:। य: शुचि: प्रयतो भूत्वेत्यृचा मातृकयापि च।। २।।
सवेष्ट्य च धराबिम्बकोणेषु श्रियमालिखेत्। श्रीसूक्तयन्त्रमेतत्तु धारयेद्यो यथाविधि।। ३।।
पुत्रारोग्यधराधान्यधनगोसस्यशालिनीम्। लब्ध्वातिबहुलां लक्ष्मीं जीवेच्च शरदां शतम्।। ४।।
इदमेव ताम्रपट्टे विलिख्य जप्त्वा च सिक्तसम्पातम्। संस्थाप्याङ्गनभूमौ लक्ष्मीमावाह्य साधु सम्पूज्य।।५।।
भूय: परिवारयुतां बलिं हरेद्भूतलं समीकृत्य। यस्मिन्नेव क्रियते वर्धन्ते तत्र सम्पदो नित्यम्।।६।।
पुत्रैर्दारैर्विभवैर्भृत्यैरिष्टैर्धनैव धान्यैश्च। नागै रथैस्तुरङ्गैर्वृषभैर्गोभिश्च संख्यया हीनै: ।। ७।।
रमयन्ती गेहेऽस्मिन् विहरत्याभूतसम्प्लवं लक्ष्मी:।..।।

इति। अस्यार्थ:—अष्टदलकमलं कृत्वा तत्कर्णिकायां श्रीबीजं साध्यसहितं विलिख्याष्टदलेषु 'हिरण्यवर्णा'मित्यारभ्य 'तामिहोपह्वये श्रिय'मित्यन्तमृचामर्धमर्धमालिख्य, तद्बहिर्द्वादशकमलं कृत्वा तद्दलेषु स्वाग्रादिप्रादक्षिण्येन 'चन्द्रां प्रभासा'मित्यारभ्य 'मयि श्रीश्रियतां यश' इत्यन्तमृचामर्धमर्धमालिख्य तद्बहि: षोडशदलकमलं कृत्वा तद्दलेषु पूर्ववत् श्रीसूक्तस्य ऋचामर्धमर्धमालिख्य अन्त्यदलद्वये 'य: शुचि:' इत्यर्धद्वयं विलिख्य तद्बहिर्वृत्तत्रयं कृत्वाभ्यन्तरवीथ्यां "य: शुचि: प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। श्रिय: पञ्चदशर्चं च श्रीकाम: सततं जपेत्" इत्यृचा संवेष्ट्य बहिर्वीथ्यां

---

१. 'भ्यभा' क. ख. पाठ:। २. 'वर्या' ख. पाठ:। *श्रीलतां इत्यर्थ:।

मातृकया संवेष्ट्य तद्बहिश्चतुरस्त्रं विलिख्य तत्कोणेषु श्रीबीजमालिखेत्। एतद्यन्त्रमुक्तफलदं भवति।।

अथाश्विननवरात्रे वेदोक्तप्रकारेण महालक्ष्मीपूजनं वक्ष्यते। तत्र ब्राह्मे मुहूर्त उत्थाय श्रीगुरुस्मरणकुण्डलिनी-ध्यानाजपासङ्कल्पशौचदन्तधावनस्नानमन्त्रस्नानतिलकधारणवैदिकसन्ध्यानन्तरतान्त्रिकसन्ध्यासूर्यार्घ्यदेवर्षिपितृतर्पणानि विधाय, स्वासने समुपविश्य भूशुद्धिदीपनाथवन्दनविघ्नोत्सारणकरशुद्धिदिग्बन्धनाग्निप्राकारत्रयशान्तिपाठभूतशुद्धिप्राण-प्रतिष्ठामातृकान्यासादियोगपीठन्यासान्तं विधाय, मूलेन प्राणायामत्रयं कृत्वा गणपतिकुलदेवताब्राह्मणादीन् नमस्कृत्य,

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो[1] विनायकः।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि[2]। सर्वविघ्नच्छिदे तस्मै श्रीगणाधिपतये नमः।।
यत्र योगीश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।।
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।
स्मृते सकलकल्याणभाजनं यत्र जायते। पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्।।
सर्वेष्वारम्भकार्येषु नास्ति तेषाममङ्गलम्। येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः।।

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।।

इति मङ्गलं कृत्वा, अद्याश्विने मासि चैत्रे वा अमुकगोत्रोत्पन्नोऽहममुकदेवशर्म्मा श्रीमहाकाली-महालक्ष्मीमहासरस्वती-प्रीतिपूर्वकदुरितनिवारणक्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्धिकामः प्रतिपदमारभ्य नवमीपर्यन्तमिष्टदेवतास्वरूपिण्याः श्रीमहालक्ष्म्याः षोडशोपचारपूजां तदङ्गभूतश्रीसूक्तचण्डीपाठतद्दशांशहोमांश्च निर्विघ्नार्थं गणपतिपूजनं च करिष्ये, इति सङ्कल्प्य ततो रक्ताक्षतादिभिरष्टदलकमलं पीठे विरच्य, तत्र—ओंभूर्भुवः—स्वर्महागणपते सिद्धिबुद्धिसहित-सवाहन-सायुध-सपरिवार इहागच्छ,

हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिप्रदे त्र्यक्ष लक्षलाभयितः पितः।।
नागास्य नागहार त्वं गणराज चतुर्भुज। भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः।।
आवाहये त्वां पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां कर्तुश्च रक्ष मे।।

आवाह्यैवं गणेशानं पूजाद्रव्यैः प्रपूजयेत्। ‘‘ओं ग॒णानां त्वा ग॒णपति ँ हवामहे प्रियाणां त्वांप्रियपतिँ हवामहे निधीनां त्वां निधिपति ँ हवामहे वसो मम। आहमजानि गर्भधमात्वमाजासि गर्भधम्।। ओं गणानां त्वा गणपति ँ हवामहे कविं कवीनामुपम श्रवस्तमम्। ज्येष्ठराजं ब्रह्मणः ब्रह्मणस्पय आ नः शृण्वन्नूतिभिः सीद सादनम्’’।।

---

[1] ‘राजो’ ख. पाठः। [2] ‘सुरासुरैः’ क. ख. पाठः।

इति मन्त्रेणावाहनं स्वागतं पाद्यमर्घ्यमाचमनीयं मधुपर्कं पुनराचमनीयं स्नानं वसनमाभरणानि गन्धपुष्पधूपदीपनैवेद्यताम्बूलप्रदक्षिणनमस्कारान् समर्प्य, हस्तद्वये नारिकेलादिकमर्घ्यपात्रस्थं सपुष्पं गृहीत्वोत्थाय प्रार्थयेत्—

रक्ष रक्ष गणाध्यक्ष त्र्यक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो। वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥
अनेन फलदानेन फलदोऽस्तु सदा मम।..॥

इति फलं दत्त्वा प्रार्थयेत्।

विघ्नेश्वराय वरदाय सुमप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतिपक्षविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥
भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय[1] नमो नमस्ते॥
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः। विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे॥
भक्तिप्रियाय देवाय नमस्तुभ्यं विनायक।..॥

इति नमस्कृत्य।

त्वं विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति फलदेति सुखप्रदेति।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव॥

इति सम्यक् प्रार्थ्य, ऋत्विग्वरणं कृत्वा यवान् वापयित्वा तन्मध्ये कलशस्थापनं कुर्यात्। तद्यथा—

ओं मही द्यौः पृथिवी चन इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥ इति भूमिं स्पृष्ट्वा। ओं स्योना पृथिवि भवानृक्षरा निवेशिनी। यच्छा नः शर्म सप्रथा॥ इति भूमिं प्रार्थ्य। मृत्तिके हर मे पापं० इति मृत्तिकां क्षिप्त्वा। ओं ओषधयः संवदन्ते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्त[2] राजन् पारयामसि॥ इति यवान् क्षिप्त्वा। ओं आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः॥ इति तत्र कलशं निधाय। ओं वरुणस्योत्तम्भनमसि। वरुणस्य स्कम्भसर्ज्जनीस्थो वरुणस्य ऋतसदन्यसि। वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥ इति जलेन पूरयित्वा। ओं या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा मनै नु बभ्रूणामहँ शतं धामानि सप्त च॥ इति सर्वौषधीः स्थापयित्वा। ओं स्योना पृथिवि नो भवा नृक्षरा निवेशिनी। यच्छा नः शर्म सप्रथा॥ इति पञ्चमृत्तिका निक्षिप्य। ओं ओषधयः संवदन्ते० इति यवान् निक्षिप्य। ओं काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि। एवा नो

---

१. 'वदनाय' क. पाठः। २. 'स्त्वं' क. पाठः।

दूर्वे प्रतनु सहस्रेण शतेन च।। इति दूर्वा निःक्षिप्य। उों अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम्।। इति पञ्चपल्लवान्निःक्षिप्य। उों याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। वृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः।। इति फलं क्षिप्त्वा। उों परि वाजपतिः कविरग्निहव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे।। इति पञ्चरत्नानि निःक्षिप्य। उों हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषा विधेम।। इति हिरण्यं दत्त्वा। उों युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः। तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः।। इति रक्तवस्त्रेण सूत्रेण वावेष्ट्य। उों गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।। इति गन्धं दत्त्वा। उों पूर्णादर्वि परायत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्ज शतक्रतो।। इत्युपरि धान्यपूर्णपात्रं विन्यस्य तदुपरि नारिकेलफलं संस्थाप्य। " उों तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरु शँसमान आयुः प्रमोषीः।। इति मन्त्रेण वरुणावाहनं कृत्वा तेनैव मन्त्रेण षोडशोपचारैः पूजयेत्।। ततः—

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे। तेन सत्येन देवेश तीर्थं[1] देहि दिवाकर।।

इति क्रों इत्यङ्कुशमुद्रया च रविमण्डलात् तीर्थान्याकृष्य

गङ्गे च यमुने चैव गोदावरि सरस्वती। नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु।।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु लक्ष्मीपूजार्थं दुरितक्षयकारकाः।।

इत्यावाह्य, चन्दनाक्षतपुष्पमाल्यादिभिः कलशमलङ्कृत्य,

उों कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तु संस्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः[2]।।
कुक्षौ तु सागराः सर्वे[3] सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।
अङ्गैश्च सहिता सर्वे कलशं तु समाश्रिताः।...।।

इति कलशमभिमन्त्र्य,

देवदानसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव।।
सान्निध्ये कुरु मे देव[4] प्रसन्नो भव सर्वदा।...।।

इति प्रार्थयेत्। इत्थं कलशस्थापनं विधाय मूलमन्त्रेण प्राणायामत्रयं कृत्वा, उों अस्य श्रीसूक्तस्य, शिरसि आनन्दकर्दमचिक्लीतश्रीपुत्रेभ्य ऋषिभ्यो नमः। हृदि श्रीविभावसुभ्यां देवताभ्यां नमः। मुखे अनुष्टुब्बृहतीत्रिष्टुप्प्रस्तार-पङ्क्तिभ्यश्छन्दोभ्यो नमः। इति विन्यस्य मम सकुटुम्बस्य क्षेमस्थैर्यायुरारोग्याभिवृद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा,

---

१. 'मे देव तीर्थं' क. पाठः। २. 'स्मृताः' क. पाठः। ३. 'प्त' क. पाठः। ४. 'देवेश' क. पाठः।

उों हिरण्यायै नमौ हृदयाय नमः। उों चन्द्रायै नमः शिरसे स्वाहा। उों रजतस्रजायै नमः शिखायै वषट्। उों हिरण्यस्रजायै नमः कवचाय हुं। उों हिरण्यायै नमः नेत्रत्रयाय वौषट्। उों हिरण्यवर्णायै नमः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्हृदयादिषडङ्गेष्वपि न्यसेत्।। शिरसि हिरण्यवर्णां०। नेत्रयोः ताम्म आवह०। कर्णयोः अश्वपूर्वां०। नासिकायां कांसोस्मितां०। मुखे चन्द्रां प्रभा०। गले आदित्यवर्णे०। बाह्वोः उपैतु मां०। हृदि क्षुत्पिपासा०। नाभौ गन्धद्वारां०। गुह्ये मनसः काम०। गुदे कर्दमेन०। ऊर्वोः आपः सृजन्ति०। जान्वोः आर्द्रां०। जङ्घयोः आर्द्रां०। पादयोः ताम्म आवह०। इति विन्यस्य, श्रांश्रींश्रूंश्रैंश्रौंश्रः इत्यपि षडङ्गानि विन्यस्य प्रागुक्तरीत्या स्वहृत्कमले देवीं ध्यायेत्।

अरुणकमलसंस्था तद्रजःपुञ्जवर्णा करकमलधृतेष्टाभीतियुग्माम्बुजा च।
मणिमुकुटविचित्राङ्कृता कल्पजातैः[१] भवतु भुवनमाता सन्ततं श्रीः श्रिये वः।।

इति ध्यात्वा मानसोपचारैराराध्यार्घ्यादिस्थापनान्ते "औंह्रींहंसः सोऽहं स्वाहा" इति मन्त्रेणात्मपूजां विधाय पीठपूजामारभेत्। उों मण्डूकाय नमः। उों कालाग्निरुद्राय नमः। एवं उों मूलप्रकृत्यै०। आधारशक्त्यै०, कूर्माय०, अनन्ताय०, वराहाय०, पृथिव्यै०सुधासमुद्राय०, श्वेतद्वीपाय०, स्वर्णपर्वताय०, नन्दनोद्यानाय०, कल्पवृक्षवनाय०, स्वर्णप्राकाराय०, करुणातोयपरिखायै०, स्वर्णमण्डपाय नमः। पूर्वद्वारे—द्वारश्रियै नमः, इन्द्राय० ब्रह्मणे०, सत्त्वाय०, ऋग्वेदाय०, आत्मने०, कालतत्त्वाय०, अम्बिकायै०, इन्द्राण्यै०, वेदमात्रे०, शैलपुत्र्यै०, ब्रह्मचारिण्यै०, चण्डघण्टायै०, स्कन्दमात्रे०, कात्यायन्यै०, कालरात्र्यै०, गौर्य्यै नमः। ततो दक्षिणद्वारे—द्वारश्रियै नमः। यमाय०, शान्तायै०[२], सिद्धायै०, क्षमायै०, विष्णवे० यजुर्वेदाय०, रजसे०, विद्यातत्त्वाय०, जगन्मात्रे०, मायायै०, शिखायै०, शान्त्यै०, प्रभायै०, ह्रींकारायै०, क्लींकारायै०, मायाशक्त्यै० वीरायै०, प्रवीरायै०, अन्तरात्मने० दण्डधराय नमः। ततः पश्चिमद्वारे—द्वारश्रियै नमः, वरुणाय०, रुद्राय०, सामवेदाय०, तमसे०, आदित्याय०, वारुण्यै०, शङ्खायुधायै०, हंसवाहिन्यै०, जगज्जीवायै०, जगद्वीजायै०, षोडशकलायै०, पूर्णकलशायै०, चित्रिण्यै०, चित्रमालायै०, चित्रायै०, चामुण्डायै नमः। तत उत्तरद्वारे—द्वारश्रियै नमः, कपालधारिण्यै०। भक्तवत्सलायै०, हूँकारायै०, क्षांकारायै०, विमलरूपायै०, ईशानाय०, पार्वत्यै०, ब्रह्मणे०, अथर्वणवेदाय०, धात्रे०, ज्योत्स्नायै०, कल्याण्यै०, शर्वाण्यै०, चन्द्रकलायै०, चन्द्रवदनायै०, विभूत्यै०, परमविभूत्यै०, भस्मधारिण्यै०, पावनायै०, गङ्गायै०, भागीरथ्यै०, गोदावर्य्यै०, प्रवरायै०, प्रणतायै०, क्रांकारायै०, क्रींकारायै०, क्रौंकारायै०, सर्ववीजात्मने० बीजप्रवाहिन्यै नमः। ततो मध्ये—रत्नवेदिकायै नमः, रत्नसिंहासनाय०, धर्माय०, ज्ञानाय०, वैराग्याय०, ऐश्वर्याय० अधमार्य०, अज्ञानाय०, अवैराग्याय०, अनैश्वर्याय०, श्वेतच्छत्राय०, चिच्छक्त्यै०, मायाशक्त्यै०, आनन्दकन्दाय०, संविन्नालाय०, प्रकृतिमयपत्रेभ्यो०, विकारमयकेसरेभ्यो० पञ्चाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै० अं अर्कमण्डलाय०, मं वह्निमण्डलाय०, सं सोममण्डलाय०, सं सत्त्वाय०, रं रजसे०, तं तमसे० आं आत्मने० अं अन्तरात्मने०, पं परमात्मने०, ह्रीं ज्ञानात्मने०, आत्मतत्त्वाय०, मायातत्त्वाय०, विद्यातत्त्वाय०, कलातत्त्वाय०, परतत्त्वाय नमः। इति सम्पूज्य, केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च— उों विभूत्यै नमः, उन्नत्यै०, कान्त्यै०, हृष्ट्यै०, कीर्त्यै०, सन्नत्यै०, व्युष्ट्यै०, उत्कृष्ट्यै०, मत्यै०, ऋद्ध्यै०, इति सम्पूज्य, 'ओं श्रीं सर्वशक्ति कमलासनाय नमः' इति समस्तपीठं सम्पूज्य मूलमन्त्रमुच्चार्य "श्रीलक्ष्मीमूर्तिं परिकल्पयामि नमः" इति

---

१. 'पद्मजालैः' ग. पाठः। २. 'शान्त्यै' क. पाठः।

कलशोपरि मूर्तिं परिकल्प्य —

घटामसृक्करां (?) लक्ष्मीं दुर्गां देवीं व्यवस्थिताम्। स्थापयामि महादेवीं सर्वसौभाग्यदायिनीम्।।

इति संस्थाप्य स्वहृत्कमले प्राग्वद् देवीं ध्यात्वा देव्यास्तेजो दीपाद्दीपान्तरमिव वहन्नासापुटाध्वना पुष्पाञ्जलावानीय

एह्येहि देवदेवशि परिवारसमन्विते। यावत्त्वां पूजयिष्यामि तावत्त्वं च इहावह।।
महापद्मवनान्त:स्थे कारणानन्दविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि।।

इत्यावाह्य, आवाहनादिदशमुद्रा: प्रदर्श्य ध्यायेत्।

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं दासीभूतसमस्तदेवनिकरां लोकैकदीपाङ्कुराम्।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां तां त्रैलोक्यकुटुम्बिनीं सरसिजां (गां) वन्दे मुकुन्दप्रियाम्।।

इति ध्यात्वा मूलमन्त्रेण दीपिन्या मालिन्यार्घ्योदकेन च त्रिवारं प्रोक्षयित्वा प्राणप्रतिष्ठां विधाय पुष्पाञ्जलिं गृहीत्वा

उों दुर्गे कात्यायनि देवि शाम्भवि शङ्करप्रिये। मया भक्त्या कृतां पूजां गृहाण त्वं महेश्वरि।।

हिरण्यवर्णां०, जातवेदसे०, नमो देव्यै०, श्रीमहालक्ष्म्यै नम: आवाहनं समर्पयामि इति दद्यात्।।

उों तप्तकाञ्चनवर्णाभं मुक्तामणिविराजितम्। अमलं कमलं दिव्यमासनं प्रतिगृह्यताम्।।

ताम्म आवह०, जातवेदसे०, नमो देव्यै०, श्रीमहासरस्वत्यै नम: श्रीरेतत्ते आसनं नम:।

स्वागतं कुशलं पृच्छे महादेव्यै महेश्वरि। सुस्वागतं त्वया भद्रे कृपया भक्तवत्सले।।

ताम्म आवह०, जातवेदसे०, नमो देव्यै०, महासरस्वत्यै नम: श्रीरेतत्ते स्वागतं नम:।

उों गङ्गादितीर्थसम्भूतं गन्धपुष्पाक्षतैर्युतम्। पाद्यं ददाम्यहं तुभ्यं नमस्ते कमलालये।।

अश्वपूर्वां०, जातवेदसे०, नमो देव्यै०, श्रीरेतत्ते पाद्यं नम:।

अष्टगन्धसमायुक्तं स्वर्णपात्रे प्रपूरितम्। अर्घ्यं ददाम्यहं तुभ्यं प्रसीद त्वं सुरेश्वरि।।

कांसोस्मितां०, जातवेदसे०, नमो देव्यै०, लोकमात्रे नम: श्रीरेष तेऽर्घ्य: स्वाहा।

उों सर्वलोकस्य या माता या माता लोकपाविनी। ददाम्याचमनं तस्यै महालक्ष्म्यै प्रयत्नत:।।

चन्द्रां प्रभासां०, जातवेदसे०, नमो देव्यै०, वरदायै नम: श्रीरेतत्त आचमनीयं सुधा।

कपिलादधि कुन्देन्दुधवलं मधुसंयुतम्। स्वर्णपात्रस्थितं देवि मधुपर्क्कं गृहाण मे।।

आदित्यवर्णे०, जातवेदसे०, नमो देव्यै० भक्तप्रियायै नम:, श्रीरेष ते मधुपर्क्क: सुधा।

उों कर्पूरवासितं वारि निर्मलं शुद्धिहेतुकम्। गृहाण परमेशानि पुनराचमनीयकम्।।

आदित्यवर्णे०, जातवेदसे०, नमो देव्यै० भक्तप्रियायै नम: श्रीरेतत्त आचमीनीयं नम:।

उों एहिं पादुकया देवि स्नानार्थं स्नानमण्डपम्। स्नानशाटीं गृहीत्वा तु स्नानासनसमागता।।
सुगन्धितैलगव्यादिपञ्चामृतजलादिकम्। सुगन्धिश्लक्ष्णचूर्णं च तथोद्वर्तनकादिकम्।।
नानातीर्थोद्भवं तोयं स्नानीयं च गृहाण मे।..।।

आदित्यवर्णे०, जातवेदसे०, नमो देव्यै०, भक्तप्रियायै नम:, श्रीरेतत्ते स्नानीयं नम:। आपो हि ष्ठेति मलापकर्षणम्।

ॐ पयो दधि घृतं चैव शर्करामधुसंयुतम्। पञ्चामृतं मयानीतं गृहाण परमेश्वरि।।

आदित्यवर्णे०, जातवेदसे० नमो देव्यै० भद्रायै नमः श्रीरेतत्ते पञ्चामृतस्नानं नमः। पुरुषसूक्तेन शुद्धोदकेन स्नानम्। जातवेदसे० इति पुनराचमनीयम्।

ॐ दिव्याम्बरं नवं श्वेतं क्षौमं चातिमनोहरम्। त्रैलोक्यजननि देवि दीयमानं गृहाण मे।।

उपैतु मां० जातवेदसे०, नमो देव्यै० श्रीलक्ष्म्यै नमः एतत्ते वस्त्रयुग्मं नमः।

एहि देवि विभूषार्थं नेपथ्यागारमुत्तमम्। विभूषासनमास्थाय तथादर्शं विलोक्य च।।
केशप्रसाधनं कृत्वा भूषणान्यङ्गसात् कुरु। रत्नकङ्कणवैडूर्यमुक्ताहारादिकानि च।।
सुप्रसन्ने महालक्ष्मि भूषणानि गृहाण मे।..।।

क्षुत्पिपासा०, जातवेदसे० नमो देव्यै०, हिरण्यायै नमः श्रीरेतानि ते भूषणानि नमः।

एहि देवि निजं स्थानं सिंहासनमनुत्तमम्। पूजाचक्रं समास्थाय गन्धं देव्यङ्गसात् कुरु।।
चन्दनागुरुकर्पूरकुङ्कुमाद्यैः समन्वितम्। कस्तूरीरोचनायुतं गन्धं देवि गृहाण मे।।

गन्धद्वारां०, जातवेदसे०, नमो देव्यै०, श्रीरेष ते गन्धो नमः।

शुद्धमुक्ताफलाभैस्तैरक्षतैः शशिसन्निभैः[१]। सर्वाधिपे महालक्ष्मीर्द्योतयामि सुभक्तितः।।

जातवेदसे० नमो देव्यै० देव्यै नमः श्रीरेते ते अक्षताः नमः।

हरिद्रां च मयानीतां देवि कल्याणदायिनि। सौभाग्यवर्धनां नित्यं गृहाण हरिवल्लभे।।

जातवेदसे०, नमो देव्यै० हरिप्रियायै नमः श्रीरेतत्ते हारिद्रं नमः।

कुङ्कुमं शोभनं दिव्यं सर्वदा मङ्गलप्रदम्। मयानीतं महादेवि तुभ्यं दास्यामि सुन्दरि।।

जातवेदसे०, नमो देव्यै० मङ्गलायै नमः श्रीरेतत्ते कुङ्कुमं नमः।

सिन्दूरं शुभदं नित्यं महाशक्तिप्रियं सदा। प्रयच्छामि महादेवि सर्वसौभाग्यदायिनि।।

जातवेदसे० नमो देव्यै० महादेव्यै नमः श्रीरेतत्ते सिन्दूरं नमः।

मालतीमल्लिकादीनि नवानि कुसुमानि च। एकनाथे प्रयच्छामि पुष्पाणि प्रतिगृह्यताम्।।

मनसः काममाकूतिं०, जातवेदसे०, नमो देव्यै०, एकनाथायै नमः। श्रीरेतानि पुष्पाणि वौषट्।

रक्तैः श्वेताम्बुजैः पुष्पैर्मल्लिकादिविचित्रितैः। पुष्पमालां प्रयच्छामि प्रसीद त्वं सुरेश्वरि।।

जातवेदसे० नमो देव्यै० श्रीरेषा ते पुष्पमाला नमः।

सुगन्धं शीतलं शुभ्रं नानागन्धसमन्वितम्। प्रीत्यर्थं तव देवेशि सच्चूर्णं प्रतिगृह्यताम्।।

जातवेदसे०, नमो दैव्यै० सुभगायै नमः श्रीरेतत्ते परिमलद्रव्यं नमः।

ओं चञ्चलायै नमः पादौ पूजयामि। ॐ चपलायै नमः गुल्फौ०। कान्त्यै नमः जानुनी०। मङ्गलायै नमः जङ्घे०। भद्रकाल्यै नमः ऊरू०। कमलिन्यै नमः कटिं०। शिवायै नमः नाभिं०। क्षमायै नमः उदरं०। गौर्यै नमः हृदयं०। सिंहवाहिन्यै नमः स्तनद्वयं०। स्कन्दमात्रे नमः भुजद्वयं०। कम्बुकण्ठायै नमः कण्ठं०। सरस्वत्यै नमः मुखं०। सुवासिन्यै नमः नासिकां०। स्वर्णकुण्डलायै नमः कर्णद्वयं०। चण्डिकायै नमः नेत्रद्वयं०। शिवायै नमः ललाटं०। कुमार्यै नमः शिरः०। सर्वरूपायै नमः सर्वाङ्गं पूजयामि, इति सम्पूज्याष्टोत्तरशतनामभिः पूजयेत्।।

---

१. 'शालिसम्भवैः' क. पाठः।

उों अस्य श्रीमहालक्ष्म्या अष्टोत्तरशतनाममन्त्रस्य ब्रह्मा ऋषि:, अनुष्टुप् छन्द:, श्रीमहालक्ष्मीर्देवता श्रीमहालक्ष्मीप्रीत्यर्थे श्रीमहालक्ष्मीमष्टोत्तरशतनामभि: पूजयिष्ये। तत: श्रीबीजषट्केन षडङ्गन्यासं कृत्वा ''लक्ष्मीं क्षीरसमुद्रे'' ति ध्यात्वा पुष्पैरक्षतैर्वा पूजयेत्। तद्यथा—उों महालक्ष्म्यै नम: एवं महाकाल्यै० महासरस्वत्यै० महाकन्यायै० महागौर्य्यै० महादेव्यै० भक्तानुग्रहकारिण्यै० स्वप्रकाशात्मरूपिण्यै० महामायायै० महेश्वर्यै० (१०) वागीश्वर्यै० जगद्धात्र्यै० कालरात्र्यै० त्रिलोचनायै० भद्रकाल्यै० कपालिन्यै० महाशौर्यायै० त्रिलोकात्मिकायै० सिद्धलक्ष्म्यै० क्रियालक्ष्म्यै० (२०) लोकमार्गप्रदायिन्यै० अरूपायै० सुरूपायै० विश्वरूपिण्यै० पञ्चभूतात्मिकायै० देवमात्रे० सुरेश्वर्यै० दारिद्र्यध्वंसिन्यै० वीणापुस्तकधारिण्यै० सर्वशक्त्यै० (३०) ब्रह्मात्मिकायै० अष्टाङ्गरूपिण्यै० नवदुर्गात्मिकायै० अष्टभैरव्यै० गङ्गायै० शारदायै० वेण्यै० सर्वशास्त्रधारिण्यै० समुद्रवसनायै० ब्रह्माण्डमणिमेखलायै० (४०) अवस्थात्रयनिर्मुक्तायै० गुणत्रयविवर्जितायै० योगध्यानैकसंन्यासिन्यै० योगध्यानैकपरायणायै० देवत्रयविशोकायै० वेदान्तज्ञानरूपिण्यै० पद्मावत्यै० विशालाक्ष्यै० नागयज्ञोपवीतिन्यै० सूर्यचन्द्रार्धमासायै० (५०) ग्रहनक्षत्ररूपिण्यै० वेदिकायै० वेदरूपिण्यै० गिरिसम्भवायै० कैवल्यदायै० विशृङ्खलायै० सूर्यमण्डलसंस्थितायै० सोममण्डलमध्यस्थायै० वायुमण्डलसंस्थितायै० वह्निमण्डलसंस्थितायै० (६०) शक्तिमण्डलसंस्थितायै० चक्रिकायै० चक्रमध्यस्थितायै० चक्रमार्गप्रदायिन्यै० सर्वसिद्धान्तमार्गयायिन्यै० षड्वर्गवर्जितायै० प्रत्यक्षादिप्रमावृतायै० विद्यामूर्तायै० त्रैलोक्यमोहिन्यै० विद्यायै० (७०) चर्मदायै० रक्षायै० ब्रह्मस्थापितरूपायै० कैवल्यज्ञानगोचरायै० करुणायै० वरुणायै० मधुकैटभमर्दिन्यै० अचिन्त्यलक्षणायै० गोप्त्र्यै० सदाभक्ताघनाशिन्यै० (८०) महारमायै० परमेश्वयै० सुसिद्धलक्ष्म्यै० महाकालिन्द्यै० सद्योजातायै० वामदेव्यै० अघोरायै० तत्पुरुषायै० ईशानरूपिण्यै० एकाक्षरदेव्यै० (९०) योगिन्यै० योगध्यानपराक्रमायै० श्रीसिद्धलक्ष्म्यै० श्रियै० कमलायै० कमलालयायै० पद्मायै० नलिनयुग्मकराम्बुजायै० शैलपुत्र्यै० ब्रह्मचारिण्यै० (१००) चण्डघण्टायै० कूष्माण्ड्यै० स्कन्दमात्रे० कात्यायन्यै० कालरात्र्यै० महागौर्यै० सिद्धिदायै० सर्वात्मिकायै० नम: (१०८) इति सम्पूज्य, कर्णिकायां—श्रां हृदयाय नम:। श्रीं शिरसे स्वाहा नम:। श्रूं शिखायै वषट् नम:। श्रैं कवचाय हुं नम:। श्रौं नेत्रत्रयाय वौषट् नम:। श्र: अस्त्राय फट् नम:। ततोऽष्टदलेषु—पूर्वादि, ओं पद्मासनायै नम:, आ पद्मवर्णायै०, ओं पद्मस्थायै०, ओं आर्द्रायै०, ओं तर्पयन्त्यै०, ओं तृप्तायै०, ओं ज्वल[1]न्त्यै०, ओं स्वर्णप्राकारायै नम:। ततो दलाग्रेषु—ब्राह्म्यै नम:, माहेश्वर्यै०, कौमार्यै०, वैष्णव्यै०, वाराह्यै०, इन्द्राण्यै०, चामुण्डायै०, महालक्ष्म्यै नम:।। ततो भूपुरे—लं इन्द्राय सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय नम:। एवं रं अग्नये०, टं यमाय०, क्षं निर्ऋतये०, वं वरुणाय०, यं वायवे०, सं कुबेराय०, हौं ईशानाय०, आं ब्रह्मणे०, ह्रीं अनन्ताय नम:। तद्बहि: वं वज्राय नम:, शं शक्तये०, दं दण्डाय०, खं खड्गाय०, आं पाशाय०, क्रों अङ्कुशाय०, गं गदायै०, शं शूलाय०, पं पद्माय०, चं चक्राय नम:, इति सम्पूज्य देव्यै पुष्पाञ्जलिं दत्त्वा,

उों दशाङ्गं गुग्गुलं धूपं चन्दनागुरुसंयुतम्। भक्त्या दत्तं मया देवि प्रसीद त्वं महेश्वरि।।

कर्दमेन०, जातवेदसे०, नमो देव्यै०, श्रीमहालक्ष्म्यै नम: श्रीरेष ते धूपो नम:।

उों कर्पूरवर्तिसंयुक्तं गोघृतेन समन्वितम्। दीपं गृहाण देवेशि महालक्ष्मि नमोऽस्तु ते।।

---

[1] 'ज्वलिन्यै' ग. पाठ:।

आप: सृजन्ति०, जातवेदसे०, नमो देव्यै०, श्रीमहालक्ष्म्यै नम: श्रीरेष ते दीपो नम:।

उों नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम्। षड्रसै रचितं दिव्यं घृतेन परिपूरितम्।।

आर्द्रां०, जातवेदसे०, नमो देव्यै०, पूर्णमालिन्यै नम: श्रीरेतत्ते नैवेद्यं सुधा। मध्ये पानीयम्। उत्तरापोशनम्। पुनराचमनीयम्।

उों कर्पूरचन्दनोन्मिश्रं दिव्यगन्धसमन्वितम्। करोद्वर्तनकं नित्यं गृहाण परमेश्वरि।।

जातवेदसे०, नमो देव्यै० माहेश्वर्यै नम: श्रीरेतत्ते करोद्वर्तनं नम:।

उों पूगीफलै: सकर्पूरैर्नागवल्लीदलैर्युतम्। कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।।

आर्द्रां०, जातवेदसे०, नमो देव्यै० पिङ्गलायै नम: श्रीरेतत्ते ताम्बूलं नम:।

....। ....।।

जातवेदसे०, नमो देव्यै०, देव्यै नम: श्रीरेतत्ते सुवर्णपुष्पं नम:।

उों इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सकलावाप्तिर्भवेज्जन्मनि जन्मनि।।

जातवेदसे०, नमो देव्यै०, सिद्धिदायै नम: श्रीरेतत्ते फलम्।

उों त्वं सूर्चचन्द्ररत्नानि विद्युदग्निस्त्वमेव हि। नीराजनं मया दत्तं गृहाण परमेश्वरि।।

ताम्म आवह०, जातवेदसे०, नमो देव्यै०, यमुनाद्रिवासिन्यै नम:। श्रीरेतत्ते नीराजनम्। गौरीर्मिमाय०, जातवेदसे०, प्रणो देवी०, समस्तश्रीसूक्तं पठित्वा श्रीरेतत्ते नैवेद्यं नम:। उों महाकाल्यै नम:, महालक्ष्म्यै नम:, महासरस्वत्यै नम: श्रीरेतत्ते मन्त्रपुष्पं नम:। उों सर्वस्वरूपे०, जातवेदसे०, नमो देव्यै०, महाकाल्यै नम: श्रीरेतानि प्रदक्षिणानि। उों सर्वत: पाणिपादं ते०, य: शुचि: प्रयतो०,

नमस्तेऽस्तु महादेवि नमस्तेऽस्तु हरिप्रिये। नमस्तेऽस्तु जगद्धात्रि नमस्ते शिववल्लभे।।

जातवेदसे०, नमो देव्यै०, महामायायै नम:, श्रीरेतानि ते वन्दनानि। पद्मप्रिये०, या साम्प्रतं०, पद्मासनस्था०, या माया मधुकैटभ०, जातवेदसे०, नमो देव्यै० श्रीरेषा ते प्रार्थना। तत: श्रीसूक्तं चण्डीपाठलक्ष्मीहृदयादिकं पाठयित्वा ''गुह्ये'' त्यादिना जपं समपर्ययेत्, इति लक्ष्मीपूजा।।

अथ लक्ष्मीहृदयम्।

अस्य श्रीलक्ष्मीहृदयस्य शिरसि भार्गवाय ऋषये नम:। मुखे त्रिष्टुबादिच्छन्देभ्यो नम:। हृदये महालक्ष्म्यै देवतायै नम:। इति विन्यस्य ममालक्ष्मीपरिहारपूर्वकदीर्घायुर्नैरुज्यमहैश्वर्यफलावाप्त्यर्थं लक्ष्मीहृदयपाठे विनियोग:, इति कृत्वाञ्जलिर्वदेत्। तत: श्रांश्रीमिति मन्त्रै: षडङ्गन्यासं विधाय ध्यायेत्।

हस्तद्वयेन कमले धारयन्तीं तु लीलया। हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तये।। १।।
वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलाङ्गीम्।
बीजापूरं कनककलशं हेमपद्मे दधानामाद्यां शक्तिं सकलजननीं विष्णुवामाङ्गसंस्थाम्।। २।।
श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम्। सर्वकामफलावाप्तिसाधनैकसुखावहाम्।। ३।।
नामामि नित्यं देवेशि त्वया प्रेरितमानस:। त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम्।। ४।।
समस्तसम्पत्सुखदां महाश्रियं समस्तसौभाग्यकरीं महाश्रियम्।
समस्तकल्याणकरीं महाश्रियं भजाम्यहं ज्ञानकरीं महाश्रियम्।। ५।।

विज्ञानसम्पत्सुखदां सनातनीं विचित्रवाग्भूतिकरीं महेश्वरीम्[1]।
मनोहरानन्तसुभोगदायिनीं[2] नमाम्यहं भूतिकरीं हरिप्रियाम् ।। ६ ।।
समस्तभूतान्तरसंस्थिता त्वं समस्तभूतेश्वरि विश्वरूपे ।
तन्नास्ति यत् त्वद्व्यतिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहं श्रीः ।। ७ ।।
दारिद्र्यदुःखौघतमोपहन्त्री त्वत्पादपद्मं मयि सन्निधत्स्व ।
दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः ।। ८ ।।
अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व।
आलोकनप्रणयिहृद्गतशोकहन्त्री त्वत्पादपद्मयुगलं प्रणमाम्यहं श्रीः ।। ९ ।।
शान्त्यै नमोऽस्तु शरणागतरक्षणायै कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै।
क्षान्त्यै नमोऽस्तु दूरितक्षयकारणायै धात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै।। १० ।।
शक्त्यै नमोऽस्तु शशिशेखरसंस्तुतायै रत्यै नमोऽस्तु रजनीकरसोदरायै।
भक्त्यै नमोऽस्तु भवसागरतारकायै मत्यै नमोऽस्तु मधुसूदनवल्लभायै।। ११ ।।
लक्ष्म्यै नमोऽस्तु शुभलक्षणलक्षितायै सिद्ध्यै नमोऽस्तु शिवसङ्घ[3]सुपूजितायै।
धृत्यै नमोऽस्त्वमितदुर्गतिभञ्जनायै गत्यै नमोऽस्तु वरसद्ग[4]तिदायिकायै।। १२ ।।
देव्यै नमोऽस्तु दिवि देवगणार्चितायै भूत्यै नमोऽस्तु भुवनार्तिविनाशिकायै।
दान्त्यै नमोऽस्तु धरणीधरवल्लभायै पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै।। १३ ।।
सुतीव्रदारिद्र्यविदुःखहर्त्र्यै नमोऽस्तु ते सर्वभयापहन्त्र्यै।
श्रीविष्णुवक्षःस्थलसंस्थितायै नमो नमः सर्वविभूतिदायै ।। १४ ।।
जयतु जयतु लक्ष्मीर्लक्षणालङ्कृताङ्गी[5] जयतु जयतु पद्मा पद्मसद्माभिवन्द्या।
जयतु जयतु विद्या विष्णुवामाङ्कसंस्था जयतु जयतु सम्यक्सर्वसम्पत्करी श्रीः।। १५ ।।
जयतु जयतु देवी देवसङ्घाभिपूज्या जयतु जयतु भद्रा भार्गवी भाग्यरूपा।
जयतु जयतु नित्या निर्मलज्ञानवेद्या जयतु जयतु सत्या सर्वभूतान्तरस्था।। १६ ।।
जयतु जयतु रम्या रत्नगर्भान्तरस्था जयतु जयतु शुद्धा शुद्धजाम्बूनदाभा।
जयतु जयतु कान्ता कान्तिमद्भासिताङ्गी जयतु जयतु शान्ता शीघ्रमायाहि सौम्ये।।१७।।
यस्याः कलायाः कमलोद्भवाद्या रुद्राश्च शक्रप्रमुखाश्च लेखाः।
जीवन्ति सर्वेऽपि सशक्तयस्ते प्रभुत्वमापुः परमायुषस्ते।। १८।।

---

[1] 'मनोहराम्' पाठः। [2] 'अनन्तसामोदसुखप्रदायिनीं' पाठः। [3] 'सिद्धि' पाठः। [4] 'सङ्गति' पाठः।
[5] 'णालालिता' ख. पाठः।

लिलेख निटिले विधिर्मम लिपिं विसृज्या[1]न्तरं
त्वया विलिखितव्यमेतदिति तत्फलावाप्तये।
तदन्तर इह स्फुटं कमलवासिनि श्रीरिमां
समर्पय स्वमुद्रिकां सकलभाग्यसंसूचिकाम्।। १९।।
तदिदं तिमिरं भाले स्फुटं कमलवासिनि। श्रियं समुद्रजां देहि सर्वभाग्यस्य सूचिकाम्।। २०।।
कलया ते यथा देवि जीवन्ति सचराचराः। तथा सम्पत्करी लक्ष्मि सर्वदा सम्प्रसीद मे।। २१।।
यथा विष्णौ ध्रुवे नित्यं स्वकलां संन्यवेशयः। तथैव स्वकलां लक्ष्मिर्मयि सम्यक् समर्पय।।२२।।
सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे। अचलां कुरु यत्नेन कलां मयि निवेशिताम्।। २३।।
सदास्तां मद्भाले परमपदलक्ष्मीः स्फुटकला
सदा वैकुण्ठश्रीर्निवसतु कला मे नयनयोः।
वसेन्मर्त्ये[2] लोके मम वचसि लक्ष्मीर्वरकला
श्रियः श्वेतद्वीपे निवसतु कला मे स्वकरयोः।। २४।।
तावन्नित्यं ममाङ्गेषु क्षीराब्धौ श्रीकला वसेत्। सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मीपतिः श्रिया।। २५।।
सर्वमङ्गलसम्पूर्णा सर्वैश्वर्यसमन्विता। आद्यादिश्रीर्महालक्ष्मीः त्वत्कला मयि तिष्ठतु।। २६।।
अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रकाशिका। सर्वैश्वर्यप्रदा मेऽस्तु त्वत्कला मयि सुस्थिरा।। २७।।
अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा यथा। वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता।। २८।।
ऐश्वर्यमङ्गलोत्पत्तिस्त्वत्कला[3] या निधीयते। मयि तस्मात् कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव।।२९।।
भवदावेशभाग्यार्हो भाग्यवानस्मि भार्गवि। त्वत्प्रसादात् पवित्रोऽहं लोकमातर्नमोऽस्तु ते।। ३०।।
पुनासि मां त्वं[4] कलयैव यस्मादतः समागच्छ ममाग्रतस्त्वम्।
परं पदं श्रीर्भव सुप्रसन्ना मय्यच्युतेन प्रविशादिलक्ष्मि।। ३१।।
श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः। नारायणेन सह मां कृपादृष्ट्यावलोकय।। ३२।।
सत्यलोकस्थिते लक्ष्मि त्वं ममागच्छ सन्निधिम्। वासुदेवेन सहिता प्रसीद वरदा भव।। ३३।।
श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते। विष्णुना सहिते देवि जगन्मातः प्रसीद मे।। ३४।।
क्षीराम्बुधिस्थिते लक्ष्मि समागच्छ समाधवे। त्वत्कृपादृष्टिसुधया सततं मां विलोकय।। ३५।।
रत्नगर्भस्थिते लक्ष्मि परिपूर्णे[5] हिरण्मयि। समागच्छ समागच्छ तिष्ठस्व पुरतो मम।। ३६।।
स्थिरा भव महालक्ष्मि निश्चला भव निर्मले। प्रसन्ने कमले देवि प्रसन्नहृदया भव।। ३७।।
श्रीधरे श्रीमहाभूते त्वदन्तःस्थं महानिधिम्। शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ।। ३८।।

---

१. 'विमृज्या' ख. पाठः। २. 'सत्ये' ख. पाठः। ३. 'कलायां निधीयते अहं तस्मात्' क. ग. पाठः।
४. 'त्वत' ख. पाठः। ५. 'र्णहि' ख. पाठः।

वसुन्धरे श्रीवसुधे वसुदोग्ध्रि कृपा मयि। त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे सम्प्रदर्शय।। ३९।।
विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे। त्वद्गर्भगतहेमादीन् प्रदर्शय प्रदर्शय ।। ४०।।
रसातलगते लक्ष्मि शीघ्रमागच्छ मत्पुरः। न जाने परमं रूपं मातर्मे सम्प्रदर्शय।। ४१।।
आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुरः। मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम्।। ४२।।
देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते। मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात्।। ४३।।
उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि। अक्षयान् हेमकलशान् सुवर्णेन सुपूरितान्।। ४४।।
निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः। समुन्नतोन्नता[1] भूत्वा समृद्ध्यैहि[2] धरान्तरात्।। ४५।।
मत्सन्निधिं समागच्छ मदाहितकृपारसात्। प्रसीद श्रेयसां दोग्ध्रि लक्ष्मि मे नयनाग्रतः।। ४६।।
अत्रोपविश्य लक्ष्मि त्वं स्थिरा भव हिरण्मयि। सुस्थिरा भव सम्प्रीत्या प्रसन्ना वरदा भव।। ४७।।
आनीतांस्तांस्त्वया देवि निधीन् मे सम्प्रदर्शय। अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा।। ४८।।
मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि। अभये कुरु मे देवि महालक्ष्मि नमोऽस्तु ते।। ४९।।
समागच्छ महालक्ष्मि शुद्धजाम्बूनदप्रभे[3]। प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय।। ५०।।
लक्ष्मि भुवि[4] गता भासि यत्र यत्र हिरण्मयी। तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय।। ५१।।
क्रीडसि त्वं च बहुधा परिपूर्ण[5]कृपामयि। मम मूर्धनि ते हस्तमविलम्बितमर्पय।। ५२।।
फलद्भाग्योदये लक्ष्मि समस्तपुरवासिनि। प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे।। ५३।।
अयोध्यादिषु सर्वेषु नगरेषु समास्थिते। वैभवैर्विविधैर्युक्ता समागच्छ बलान्विता।। ५४।।
समागच्छ समागच्छ ममाङ्गे भव सुस्थिरा। करुणारसनिःष्यन्दनेत्रद्वयविलासिनि।। ५५।।
सन्निधत्स्व महालक्ष्मि त्वत्पाणिं मम मस्तके। करुणासुधया मां त्वमभिषिञ्च स्थिरं कुरु।। ५६।।
दीनस्य मस्तके हस्तं मम त्वं कृपयार्पय। आद्यादिश्रीर्महालक्ष्मि विष्णुवामाङ्कसंस्थिते।। ५७।।
भवभीतिपरित्रस्तभक्तत्राणपरायणे। प्रत्यक्षीकुरु रूपं मे रक्ष मां शरणागतम् ।। ५८।।
सर्वराजगृहाल्लक्ष्मि समागच्छ गुणान्विता। स्थित्वा तु पुरतो मेऽद्य प्रसादेनाभयं कुरु।। ५६।।
प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे। अचला भव सुप्रीत्या सुस्थिता भव मद्गृहे।। ६०।।
यावत्तिष्ठन्ति देवाश्च यावत्त्व[6]न्नाम तिष्ठति। यावद्विष्णुश्च यावत्त्वं तावत् कुरु कृपां मयि।। ६१।।
चान्द्री कला यथा शुक्ले वर्धते सा दिने दिने। तथा दया ते मय्येव वर्धतामभिवर्धताम्।। ६२।।
यथा वैकुण्ठनगरे यथा वै क्षीरसागरे। तथा मद्भवने तिष्ठ स्थिरं श्रीर्विष्णुना सह।। ६३।।
योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना। तथा मद्भवने तिष्ठ स्थिरं श्रीर्विष्णुना सह।। ६४।।
नारायणस्य हृदये भवती यथास्ते नारायणोऽपि तव हृत्कमले यथास्ते।

---

१. 'तानना' ख. पाठः। २. 'समाधेहि' ख. पाठः। ३. 'स्थिते' ख. पाठः। ४. 'वं' ख. पाठः।
५. 'र्णंहिरण्मयि' ख. पाठः। ६. 'त्व मम तिष्ठसि' ख. पाठः।

नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि दयावति श्रीः।। ६५।।
विंज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यसिद्धिं कुरु मे गृहे श्रीः।
दयासुपुष्टिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे करे[2] श्रीः।। ६६।।
न मां त्यजेथाः श्रितकल्पवल्लि सद्भक्तिचिन्तामणिकामधेनो।
विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे।। ६७।।
आद्यादिमाये त्वमजाण्डबीजं त्वमेव साकारनिराकृतिस्त्वम्।
त्वया धृताश्चाब्जभवाण्डसङ्घाश्चित्रं चरित्रं तव देवि विष्णोः।। ६८।।
ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः। महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम्।। ६९।।
अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च। तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम्।। ७०।।
भवतीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः। इति सञ्चिन्त्य मनसा त्वामहं शरणं व्रजे।। ७१।।
अनन्तानन्त[3]सुखिनस्त्वद्भक्तास्त्वत्परायणाः। इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे।। ७२।।
तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित्। इति सञ्चिन्त्य सञ्चिन्त्य प्राणान् सन्धारयाम्यहम्।।७३।।
त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि विद्यते। यावत् सम्पूर्णकामः स्यां तावद् देहि कृपानिधे।।७४।।
क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना। न जीवन्तीह जलजा जलं त्यक्त्वा जलग्रहाः।।७५।।
हिता[4] हि पुत्रवात्सल्याज्जननी प्रस्नुतस्तनी। वत्सं त्वरितमागत्य सम्प्रीणयति वत्सला।। ७६।।
यदि स्यां तव पुत्रोऽहं मातस्त्वं यदि मामकी। दयापयोधरस्तन्यसुधाभिरभिषिञ्च माम्।। ७७।।
मृग्यो न गुणलेशोऽपि मयि दोषैकमन्दिरे। पांसूनां वृष्टिबिन्दूनां दोषाणां च न मे मितिः।। ७८।।
पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः। दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये।। ७९।।
विधिनाहं न सृष्टश्चेन्न स्यात् तव दयालुता। आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः।। ८०।।
कृपा मदग्रजा किं ते ह्यहं वा किं तदग्रजः। विचार्य देहि मे वित्तं तव देवि दयानिधे।। ८१।।
माता पिता त्वं गुरु सद्गतिः श्रीस्त्वमेव सञ्जीवनहेतुभूता।
अन्यं न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्यम्।। ८२।।
आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञानसुखैकदोग्ध्रि।
अज्ञानहन्त्रि त्रिगुणातिरिक्ता प्रज्ञाननेत्रे भव सुप्रसन्ना ।। ८३।।
अशेषवाग्जाड्यमलापहारिणि नवं नवं स्पष्टसुवाक्प्रदायिनि।
ममैहि जिह्वाग्रसुरङ्गनर्तकी भव प्रसन्ना वदने च मे श्रीः।। ८४।।
समस्तसम्पत्सुविराजमाना समस्ततेजःसु विराजमाना।

---

१. 'वृद्धि' ख. पाठः। २. 'गृहे' ख. पाठः। ३. 'नित्य' ख. पाठः। ४. 'यथा' ख. पाठः। ५.' जश्चयराजमाना' ख. पाठः।

विष्णुप्रिये त्वं भव दीप्यमाना वाग्देवता मे भवने[1] प्रसन्ना।। ८५।।
भक्त्या नतानां सकलार्थदे त्वं प्रभासुलावण्यदयासुदोग्ध्रि।
सुवर्णदे त्वं सुमुखी भव श्रीर्हिरण्मये मे भव सुप्रसन्ना।। ८६।।
सर्वार्थदा सर्वजगत्प्रसूति: सर्वेश्वरी सर्वभयापहन्त्री।
सर्वोन्नता त्वं सुमुखी भव श्रीर्हिरण्मये मे वदने[2] प्रसन्ना।। ८७।।
समस्तविघ्नौघविनाशकारिणी समस्तविघ्नो[3]द्धरणे विचक्षणा।
अनन्तसौभाग्यसुखप्रदायिनी हिरण्मये मे वदने प्रसन्ना।। ८८।।
देवि प्रसीद दयनीयतमाय मह्यं देवादिनाथभवदेवगणाभिवन्द्ये।
मातस्तथैव भव सन्निहिता दृशोर्मे पत्या समं मम मुखे भव सुप्रसन्ना।। ८९।।
मा वत्स भैरभयदानकरोऽर्पितस्ते मौलौ ममेति मयि दीनदयानुकम्पे।
मात: समर्पय मुदा करुणाकटाक्ष माङ्गल्यबीजमहिमानुसृतं ममान्त:[4]।। ९०।।
कटाक्ष इह कामधुक् तव ममास्तु चिन्तामणि:
कर: सुरतरु: सदा नवनिधिस्त्वमेवेन्दिरे।
भवेत्[5] तव दयारसो रसर[6]रसायनं त्वन्वहं
मुखं तव कलानिधिर्विविधवाञ्छितार्थप्रदम्।। ९१।।
यथा रसस्पर्शनतोऽयसोऽपि सुवर्णता स्यात् कमले तथा ते[7]।
कटाक्षसंस्पर्शनतो जनानाममङ्गलानामपि मङ्गलत्वम्।। ९२।।
देहीति नास्तीति वच: प्रवेशाद्भीतो रमे त्वां शरणं प्रपन्न:।
अत: सदास्मिन्नभयप्रदा त्वं सहैव पत्या मम सन्निधेहि।। ९३।।
कल्पद्रुमेण मणिना सहिता सुरम्या श्रीस्ते कला मयि रसेन रसायनेन।
आस्तां यतो मम च दृक्शिरपाणिपादस्पृष्टा: सुवर्णवपुष: स्थिरजङ्गमा: स्यु:।। ९४।।
आद्यादिविष्णो: स्थिरधर्मपत्नी त्वमम्ब पत्या मम सन्निधेहि।
आद्यादिलक्ष्मीस्त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात्।। ९५।।
आद्यादिलक्ष्मीहृदयं पठेद्य: स राज्यलक्ष्मीमचलां तनोति।
महादरिद्रोऽपि भवेत् धनाढ्यस्तदन्वये श्री: स्थिरतां प्रयाति।। ९६।।
यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा। तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत्।। ९७।।
इदं हरस्यं हृदयं सर्वकामफलप्रदम् । जप: पञ्चसहस्रं तु पुरश्चरणमुच्यते ।। ९८।।

---

१. 'नयने' ख. पाठ:। २. 'नयने' ख. पाठ:। ३. 'भक्तोद्धरणे' ख. पाठ:। ४. 'मिह न: सृज जन्ममात:' ख. पाठ:।
५. 'भवे' ख. पाठ:। ६. 'मम' ख. पाठ:। ७. 'थैव' ख. पाठ:। ८. 'सुवृष्टि' ख. पाठ:।

त्रिकालमेककालं वा नरो भक्तिसमन्वित:। य: पठेच्छृणुयाद्वापि स याति परमां श्रियम्।। ९९।।
महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे। इदं श्रीहृदयं जप्त्वा पञ्चवारं धनी भवेत्।। १००।।
अनेन हृदयेनान्नं गर्भिण्या अभिमन्त्रितम्। ददाति तत्कुले पुत्रो जायते श्रीपति: स्वयम्।। १०१।।
नरेणाप्यथवा नार्या लक्ष्मीहृदयमन्त्रिते। जले च पीते तद्वंशे मन्दभाग्यो न जायते।। १०२।।

य आश्विने मासि च शुक्लपक्षे रमोत्सवे सन्निहितैकभक्त्या।
पठेत् तथैकोत्तरवारवृद्ध्या लभेत सौवर्णमयीं च वृद्धिम्[1]।। १०३।।
य एकभक्तोऽन्वहमेकवर्षं विशुद्धधी: सप्ततिवारजापी।
स मन्दभाग्योऽपि रमाकाटाक्षाद्भवेत् सहस्राक्षशताधिकश्री:।। १०४।।
श्रीशाङ्ग्रिभक्तिं हरिदासदास्यं प्रसन्नमन्त्रार्थदृढैकनिष्ठाम्।
गुरो: स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मे देहि परं पदं श्री:।। १०५।।
पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविध[2]र्द्धिसिद्धिम्।
सम्पूर्णसिद्धिं[3] बहुवर्षभोग्यां प्रदेहि मे देहि पुन: पुनस्त्वम्।। १०६।।
वाग[4]र्थसिद्धिं बहुलोकवश्यं वय:स्थिरत्वं ललनासुभोगम्।
पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि*।। १०७।।

ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम्।
वीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रे भर्त्रा युक्तां मुहुरभयदां शश्वदप्यच्युतश्री:।। १०८।।

इत्यथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रं सम्पूर्णम्।। सारसङ्ग्रहे—

अथोच्यन्ते महामन्त्रा दुर्गाया: वाञ्छितार्थदा:। त्रिवर्गफलमोक्षाप्तिदायका विजयप्रदा:।। १।।
सद्य: सदण्डी हृल्लेखा सधृतिह्लादिनीन्दुयुक्। अत्रीन्धिके विसर्ग: स्मृतिप्रतिष्ठे श्रिया सह।। २।।
धूम्रार्चि: स्यात् टपङ्क्त्यार्णास्तन्द्रानन्तेऽष्टवर्णक:। दुर्गामनु: समाख्यातो भजतां सर्वकामद:।।३।।

सद्य ओ, दण्डी अनुस्वारस्तद्युक्तस्तेन प्रणव:, हृल्लेखा भुवनेश्वरीबीजं, धृतिरुकारो, ह्लादिनी दकार:, इन्दु: अनुस्वारस्तेन दुं, अत्रिर्दकार: इन्धिका उकार: विसर्गयुक्तस्तेन दु:, स्मृतिर्गकार: प्रतिष्ठा आ तेन गा, श्री: ऐकार: धूम्रार्चिर्यकार: तेन यै, टपङ्क्त्यर्णो नकार:, तन्द्रा म, अनन्तो विसर्ग:, तस्यात्र ''ससजुषो रु''रिति रेफ:, तेन दुर्गा इत्यस्य सन्धिस्तेन दुर्गायै इति मन्त्रे बोद्धव्यम्।।

मुनि: प्रोक्तो नारदाख्यो गायत्रं छन्द ईरितम्। दुर्गा च देवता प्रोक्ता दृष्टादृष्टफलप्रदा।। ४।।
षड्दीर्घयुक्तैराद्यन्तैर्मनुपूर्वषडर्णकै: । जातियुक्तै: षडङ्गानि मनोरस्य प्रकल्पयेत्।। ५।।

---

* सुवर्णवृद्धिं कुरु मे गृहे श्री: कल्याणवृद्धिं कुरु मे गृहे श्री:।
विभूतिवृद्धिं कुरु मे गृहे श्री: सौभाग्यवृद्धिं कुरु मे गृहे श्री:।। इति पुस्तकान्तरेऽधिक: श्लोक:।

१. 'सवृष्टि' ख. पाठ:। २. 'धार्य' ख. पाठ:। ४. 'कीर्ति' ख. पाठ:। ४. 'वादा' ख. पाठ:।

तेन ओं ह्रींदुंदुर्गायै ह्रां ह्रदयाय नम:, इत्यादिषडङ्गमन्त्रा उन्नेया:। तदुक्तमाचार्यचरणै:—''तारो माया च दुर्गायै ह्रामाद्यन्ताङ्गकल्पना'' इति। चकार: दुं समुचिनोतीति पद्मपादाचार्य:।। ध्यानम्—

सिंहासनां मरकतद्युतिमिन्दुचूडां शङ्खं ह्यरि करतलैदर्धतीं शरासम्।
बाणं त्रिनेत्रलसितां भवदु:खहन्त्रीं दुर्गां नमामि मणिभूषणभूषिताङ्गीम्।। ६।।

वामाद्यूर्ध्वयोराद्ये तदाद्यध:स्थयोरन्ये, इत्यायुधध्यानम्। तथा—

अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयावृतम् । चतुर्द्वारसमायुक्तं कुङ्कुमादिभिरुद्धरेत् ।। ७।।
कुर्याच्च पीठपूजायां नवशक्तिसमर्चनम्। ताश्च प्रभा समाया सजया सूक्ष्मा विशुद्धा स्यात्।। ८।।
नन्दिन्या सुप्रभया विजया सर्वादिसिद्धिर्नवमी। एकवह्निशरक्लीवहीनैरज्भि: प्रपूजयेत्।। ९।।

एकेति अइउऋॠऌॡ इति सप्तस्वररहितैरज्भि: आईऊएऐओऔअंअ: इति नवभि: स्वरै: सहिता नवशक्तय: पूज्या इत्यर्थ:।

तारो वज्रनखदंष्ट्रायुधाय च महापदम्। सिंहाय वर्मास्त्रनतिप्रान्त: सिंहाणुरीरित:।। १०।।
आसनं मनुनानेन दद्यान्मूलेन कल्पयेत्।...।।

वर्म हुं, अस्त्रं फट्, नतिर्नम:।

मूर्तिमावाह्य तस्यां तां पूजयेच्चन्दनादिभि:। प्रथमावृतिरङ्गै: स्याज्जयादिभि: परा परा।। ११।।
शङ्खादिकैरायुधै: स्याच्चतुर्थीन्द्रादिभि: परा। तदायुधैश्च दुर्गाया: पूजनं समुदीरितम्।। १२।।
सजया विजया कीर्ति: प्रीति: प्रभा समीरिता श्रद्धा। मेधा श्रुति: स्वनामाद्यक्षरपूर्वा: समभ्यर्च्या:।।१३।।
आरिदरगदासिपाशाङ्कुशशरधनूंष्यायुधानि गदितानि।
इत्थं दुर्गामन्त्रं यो भजते स नर इन्दिरां लभते।। १४।।

अथ प्रयोग:— तत्र प्रातरुत्थाय योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ओं नारदाय ऋषये नम:, मुखे गायत्रीछन्दसे नम:, ह्रदये श्रीदुर्गायै देवतायै नम:, इति विन्यस्य कृताञ्जलिर्मम सर्वाभीष्टसिद्धये विनियोग: इत्युक्त्वा, ओं ह्रींदुंदुर्गायै ह्रां ह्रदयाय नम:, ओं ह्रींहुंदुर्गायै ह्रीं शिरसे० इत्यादिषडङ्गमन्त्रानङ्गुष्ठादितलान्तं ह्रदयादिषडङ्गेष्वपि विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे चन्दनादिभिरन्तर्बहिर्विभागेनाष्टदलकमलं कृत्वा तद्बहिश्चतुर्द्वारयुक्तचतुरश्रत्रयं कुर्यादिति पूजाचक्रं निर्माय, प्राग्वत् स्वपुरत: संस्थाप्यार्घ्यस्थापनादिपरतत्त्वार्चान्तं विधाय, अष्टदलकेसरेषु स्वाग्रादिप्रादक्षिण्येन आं प्रभायै नम:, ईं मायायै०, ऊं जयायै०, एं सूक्ष्मायै०, ऐं विशुद्धायै०, ओं नन्दिन्यै०, औं सुप्रभायै०, अं विजयायै०, मध्ये अ: सर्वसिद्ध्यै नम:, इति सम्पूज्य, ''ओं वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नम:'' इति पीठस्य मध्ये समभ्यर्च्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्यान्तरष्टदलेषु स्वाग्रादिप्रादक्षिण्येन ओं जं जयायै नम:, ओं विं विजयायै०, ओं किं कीर्त्यै०, ओं प्रिं प्रीत्यै०, ओं प्रं प्रभायै०, ओं श्रं श्रद्धायै०, ओं में मेधायै०, ओं श्रुं श्रुत्यै नम:, इति सम्पूज्य, बाह्याष्टदलेषु ओं शङ्खाय नम:, चक्राय० गदायै० खड्गाय०, पाशाय०, अङ्कुशाय०, शरेभ्य:०, धनुषे नम:, इति प्रादक्षिण्येन सम्पूज्य, प्राग्वद् वीथीद्वये लोकपालतदस्त्रार्चादि सर्वं समापयेत्।। तथा—

जितेन्द्रियो हविष्याशी वसुलक्षं जपेन्मनुम्। तत्सहस्रं तिलै: स्वादुलोलितैर्वा पयोन्धसा।। १५।।

जुहुयादेधिते वह्नौ तर्पणादि ततश्चरेत्।...।।

वसुलक्षमष्टलक्षं, स्वादु त्रिमधु।

....। एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत् सुधीः।। १६।।
यथोक्तेन विधानेन नव कुम्भान् मनोरमान्। पञ्चरत्नसमायुक्तान् नवस्थानेषु विन्यसेत्।। १७।।
मन्त्री दुर्गां यजेन्मध्ये त्वन्यत्र च जयादिकाः। चन्दनाद्यैः समभ्यर्च्य धूपदीपैश्च मन्त्रवित्।। १८।।
अभिषिञ्चेत् प्रियं साध्यं राजानं वा शिशुं बुधः। विजयश्रीसमायुक्तो राजा भवति नान्यथा।।१९।।
भूतापस्मारवेतालपिशाचाद्यैर्वियुज्यते। वन्ध्या च ललना पुत्रं विनीतं प्राप्नुयाच्छुभम्।। २०।।
आमयान्मुच्यते मर्त्यो दीर्घायुश्च न संशयः। अनेनैव विधानेन जनानामनुरञ्जनम्।। २१।।
एवं दुर्गामनुं मर्त्यो यो भजेद्विधिनामुना। स दीर्घायुश्च दुरितं जयेत् सुविजितामयः।। २२।।
पद्मे तारगतां शक्तिं ससाध्यां तद्दलेष्वथ। मन्त्रवर्णांल्लिखेदष्टौ त्रिष्टुब्मन्त्रेण वेष्टयेत्।। २३।।
मातृकार्णैर्बहिर्वीतं चतुरश्रेण वेष्टयेत्। दौर्गं यन्त्रमिदं प्रोक्तं सर्वसिद्धिकरं परम्।। २४।।
अपस्मारमहाभूतक्षुद्रज्वरनिवारणम्। नृणां विजयदं स्त्रीणां पुत्रदं नात्र संशयः।। २५।।

इति। अस्यार्थः— अष्टदलपद्मं कृत्वा तन्मध्ये तारं तस्योदरे शक्तिबीजं तदुदरे साध्यनाम च विलिख्य, तद्दलेषु मन्त्रवर्णानेकैकशो विलिख्य, बहिर्वृत्तत्रयं कृत्वाऽन्तर्वीथ्यां ''जातवेदसे सुनवामे'' ति त्रिष्टुब्मन्त्रेण संवेष्ट्य, तद्बहिश्चतुरश्रं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति। पूर्वोक्तनवकुम्भस्थापनमस्मिन्नेव यन्त्रे ज्ञेयम्।। नारायणीये—

विषं हि मज्जा कालोऽग्निरत्रिनिष्ठो निठद्वयम्। मन्त्रो महिषमर्दन्याः प्रोक्तो वस्वक्षरात्मकः।। १।।

विषं म, हि स्वरूपं, मज्जा ष, कालो म, अग्निः र, अत्रिनिष्टो दकारस्थस्तेन र्द, नि स्वरूपं, ठद्वयं स्वाहा।

मार्कण्डेयो मुनिश्छन्दो गायत्रं देवता मनोः। सुरासुरनता देवी प्रोक्ता महिषमर्दनी।। २।।

शारदातिलके— (११। २२)

महिषमर्दिनि हुंफट् हृदयं परिकीर्तितम्। महिषशत्रूत्सादि हुंफट् शिरोऽङ्गं समुदीरितम्।। १।।
महिषं भीष[2]यद्वन्द्वं हुंफडन्तः शिखामनुः। महिषं हनयुग्मान्ते देवि हुंफट् तनुच्छदम्।। २।।
महिषान्ते सूदनि हुंफडन्तं चास्त्रमीरितम्। मन्त्रैरेतैर्जातियुक्तैः पञ्चाङ्गानि प्रकल्पयेत्।। ३।।
गारुडोपलसन्निभां मणिमौलिकुण्डलमण्डिताम्। नौमि भालविलोचनां महिषोत्तमाङ्गनिषेदुषीम्।।४।।
शङ्खचक्रकृपाणखेटकबाणकार्मुकशूलकान्। तर्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम्।।५।।

दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम्।। ईशानशिवे तु—

ध्यायेत् श्यामां महादुर्गां सर्वाभरणभूषिताम्। जटामुकुटशोभाढ्यां स्फुरच्चन्द्रकलान्विताम्।। १।।
पीताम्बरधरां देवीं पीनोन्नतकुचद्वयाम्। शङ्खचक्रलसद्धस्तां तदधः खड्गखेटकौ।। २।।
बाणचापौ च तदधः सशूलां तर्जनीमधः।...।।

---

१. 'हिंसिके' ख. पाठः। २. 'हेषय' क. ग. पाठः।

तर्जनीति तर्जनीमुद्रा। तल्लक्षणं यथा– ''तर्जन्येकाकिनी ऊर्ध्वं शेषा: सन्नमितास्त्वध:। मुद्रेयं तर्जनी प्रोक्ता वक्त्रश्रोत्रोस्तु भीतिदा।।'' इति सारसङ्ग्रहोक्ता।

....। तत: पूर्वोदिते पीठे यजेन्महिषमर्दिनीम्।। ३।।
प्रथमावृतिरङ्गै: स्याद् दुर्गाद्याभि: परा परा। ध्यानोक्तैरायुधैर्याद्यैर्लोकपालै: परीरिता।। ४।।
तदायुधै: पञ्चमी स्यादेवं पूजा समीरिता। दुर्गाद्या वरवर्णिन्या ह्यार्या च कनकप्रभा।। ५।।
कृत्तिका ह्यभयाद्या च प्रदा कन्या स्वरूपिका। दीर्घस्वराद्या: क्रमत: पूजयेन्मन्त्रवित्तम:।। ६।।

इति दीर्घाद्या: क्लीवान्त्यरहितदीर्घस्वराद्या:। नारायणीये पूर्वे पटलेऽनन्तत्र्यब्धियोन्यादीत्युक्त्वोत्तरपटले आद्यै: स्वरै: क्रमादित्युक्तम्। आद्यै:– आईऊएऐओऔअं इति परस्परैरिति टीका। याद्यैर्यादिभिर्हान्तैरिति।। अथ प्रयोग:–तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि मार्कण्डेयाय ऋषये नम:, मुखे गायत्रीछन्दसे नम:, हृदये श्रीमहिषमर्दिन्यै देवतायै नम:, इति विन्यस्य विनियोगमुत्कीर्त्य, महिषमर्दिनीहुंफट् हृदयाय नम:। महिषशत्रूत्सादिहुंफट् शिरसे स्वाहा। महिषं हेषय २ हुंफट् शिखायै वषट्। महिषं हनहन देवि हुंफट् कवचाय हुं। महिषसूदनि हुंफट् अस्त्राय फट्। इति पञ्चाङ्गमन्त्रान् मूलमन्त्राभिमृष्टयो: पाण्योरङ्गुष्ठादिकनिष्ठिकान्तास्वङ्गुलिषु विन्यस्य, नेत्ररहितेषु हृदयादिपञ्चाङ्गेषु विन्यस्य, ध्यानमानसपूजान्ते पूर्वमन्त्रोक्तं पूजाचक्रं निर्मायार्घ्यस्थापनाद्यङ्गपूजान्ते तदष्टदलेषु स्वाग्रादिप्रादक्षिण्येन आं दुर्गायै नम:, ईं वरवर्णिन्यै नम:, ऊं आर्यायै०, एं कनकप्रभायै०, ऐं कृत्तिकायै०, ओं अभयप्रदायै०, औं कन्यायै०, अं स्वरूपायै नम:, इति सम्पूज्य, द्वितीयेऽष्टदले स्वाग्रादिप्रादक्षिण्येन यं शङ्खाय नम:, रं चक्राय०, लं खड्गाय०, वं खेटकाय०, शं बाणाय०, षं बाणासनाय०, सं शूलाय०, हं तर्जन्यै नम:, इति सम्पूज्य दिगीशार्चादि शेषं प्राग्वत् समापयेदिति।। तथा–

प्रजपेद्वसुलक्षं च तत्सहस्रं तिलैर्हुनेत्। एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत् तत: ।। ७।।
तिलहोमाद्वशीकारो नृणां स्त्रीणां भवेद् ध्रुवम्। आमयान्मुच्यते मर्त्य: सद्य: सर्षपहोमत:।। ८।।
पद्महोमात्तथा राज्ञ: सङ्ग्रामे विजयो भवेत्। दूर्वाहोमेन मर्त्यानां रोगशान्तिर्भवेद् ध्रुवम्।। ९।।
ब्रह्मवृक्षोत्थकुसुमैर्लभते पुष्टिमुत्तमाम्। धान्यहोमेन धान्याप्ति: काकपक्षहुतेन च ।। १०।।
विद्वेषो जायते लोके ह्यत्यन्तं सुहृदोरपि। शत्रुर्गच्छति पञ्चत्वं सत्यं मरिचहोमत:।। ११।।
एवं यो भजते देवीं दुर्गां महिषमर्दिनीम्। स नाशयेत् क्षुद्रभृतचौरादीन् दर्शनादपि।। १२।।

इति। सारसङ्ग्रहे–

वेदादिर्दुर्गासम्बुद्धिद्वितयं वह्निरत्यग:। टपञ्चम: सनयन: कृशानुगृहिणी तत:।। १।।
पङ्क्त्यक्षरो मनु: प्रोक्तो भजतां सर्वसिद्धिद:।......................................।।

वेदादि: प्रणव:। दुर्गासम्बुद्धिद्वितयं दुर्गे दुर्गे इति। वह्नी रेफ:। अन्त्यग: क्षकार: टपञ्चमो णकार: सनयन इकारसहितस्तेन णि। कृशानुगृहिणी स्वाहा।। शारदातिलके–''तारो दुर्गेयुगं रक्तमन्त्यं ढान्तं सलोचनम्'' इत्युद्धृतं, तत्र सलोचनमिति पदमन्त्यस्य ढान्तस्य च विशेषणमिति द्वयोरपीकारयोग उक्तस्तट्टीकाकृता अपेक्षितार्थद्योतनिकाकारेण। तेन क्षिणि इति केचिद्वदन्ति, तन्न रम्यम्। 'तारो दुर्गेद्वयं वह्निरन्त्यं ढान्तं सदृक् शिर:'' इति नारायणीयवचनात्।

वह्निभार्या स्वरः षष्ठो ढान्तः प्रान्त्योऽग्निरेव च। दुर्गे द्विरिति सोङ्कारो दुर्गामन्त्रः स्मृतो बुधैः।।

इति कालिकापुराणाच्च।। अत्र षष्ठः स्वरः इकारः सप्तस्वराङ्गीकारात्। ह्रस्वदीर्घयोरेकत्वाद् व्युत्क्रमेण इकारस्य षष्ठत्वात् सन्निधिस्थेन ढान्तेनैव अस्यान्वये जाते केवलप्रान्तप्रतीतेरुक्तशारदातिलकस्यापि लाघवादेकस्यैव सलोचनमिति पदं विशेषणमित्यर्थः।। अत्र व्युत्क्रमेण मन्त्रोद्धारो बोद्धाव्यः।। तथा नारायणीये—

नारदो मुनिराख्यातो विराट्छन्द उदाहृतम्। जयदुर्गा देवता स्याद्भुक्तिमुक्तिफलप्रदा।। १।।
ताराद्यैः पञ्चभिर्मन्त्रपदैः सर्वेण सम्मता। जातियुक्तैरङ्गक्लृप्तिः।।

इति। शारदातिलके—

दुर्गे च हृदयं प्रोक्तं[1] दुर्गे शिर इतीरितम्। दुर्गायै स्याच्छिखा वर्म भूतरक्षणि कीर्तितम्।। १।।
तारादि दुर्गे—द्वितयं रक्षण्यस्त्रं प्रकीर्तितम्।..।।

इति षडङ्गमन्त्रा उक्ताः। अत्र केचित् तारादीति वर्मान्तमन्त्रमस्त्रान्तर्वदन्ति। वस्तुतस्तु तयोरुक्तमध्ये तदन्तर्भाव इति तत्त्वम्। ध्यानम्—

जलदद्युतिमिन्दुकिरीटां चक्रदरासिरुजः करपद्मैः। दधतीं नयनत्रययुक्तां सिंहगतां प्रणमेज्जयदुर्गाम्।।१।।

रुक् त्रिशूलम्। वामोर्ध्वादिवामाधः करान्तमायुधध्यानम्। दक्षोर्ध्वादतदधोऽन्तं वा। तथा—

दौर्गे पीठे यजेद्देवीमुक्तमार्गेण मन्त्रवित्। प्रजपेत् पञ्चलक्षं च तद्दशांशं हुनेद् घृतैः।। १।।

उक्तमार्गेण प्रथमाष्टाक्षरोक्तमार्गेण।

तर्पणादि ततः कुर्यात् ततः सिद्धो भवेन्मनुः। ततः सिद्धमनुर्मन्त्रीं प्रयोगानाचरेत् सुधीः।। २।।
इमं मन्त्रं जपन् भूयः प्रविशेच्छत्रुसङ्गरम्। अशेषेण रिपुं हन्यान्नात्र कार्या विचारणा।। ३।।
विवादे व्यवहारादौ जप्तौ विजयदो भवेत्। अनयास्त्राणि विद्धानि शस्त्राणि सुबहून्यपि।। ४।।
सुजप्तानि च सङ्ग्रामे सम्यग्विजयदानि च।..।।

इति। सारसङ्ग्रहे—

तारो हृन्मन्त्रतो दुर्गेद्वयं रक्षणि च द्विठः। द्वादशार्णो मनुः प्रोक्तो मुन्याद्यं पूर्ववच्चरेत्।। १।।
व्यस्तेन च समस्तेन मन्त्रेणाङ्गानि षट् क्रमात्। ध्यानपूजादिकं सर्वमस्य पूर्ववदाचरेत्।। २।।

द्विठः स्वहाकारः। पूर्ववद् दुर्गाष्टाक्षरवत्।। तथा—

प्रणवो हृद्भगवती ज्वालामालिनि गृध्रगः। णलोहितो रिवृते च द्विठान्तः परिकीर्तितः।। ३।।
द्वाविंशत्यर्णको मन्त्रः सर्वकामफलप्रदः।..।।

हृन्नमः। लोहितः ष। द्विठः स्वाहा। अन्यानि पदानि स्वरूपाणि।।

....। त्रिचतुष्प[2]ञ्चवस्वर्णैर्मिश्रैर्मन्त्रार्णकैः क्रमात् ।। ४।।
पञ्चाङ्गानि मनोरस्य जातियुक्तानि कल्पयेत्। अन्यच्छूलिनिदुर्गावत् सर्वमस्य प्रकल्पयेत्।। ५।।

इति।। अथ शूलिनिदुर्गाविधिर्लिख्यते। सारसङ्ग्रहे—

अथ शूलिनिदुर्गाया मनुं वक्ष्ये यथाविधि। चतृतीयं सुधायुक्तं धरा ह्येतद्द्वयं ततः[3]।। ६।।

---

१. 'तारादिदुर्गे हृदयं' ख. पाठः। २. 'पञ्चवर्णैर्मिलितैर्मन्त्रा' क. ग. पाठः। ३. 'पुनः' ख. पाठः।

मरुत्पञ्चम च वामश्रुतीनां भूमिरक्षियुक्। दीर्घा तृतीयस्वरयुक् त—तृतीयश्च कर्णयुक्।। ७।।
ष्टग्रव्योम च वर्मास्त्रवह्नियोषावसानक:। अयं शूलिनि दुर्गायास्तिथिवर्णो मनुर्मत:।। ८।।

चतृतीयं ज, सुधा व, तद्युक्तं तेन ज्व, धरा ल, एतद्द्वयं ज्वलज्वल इति। मरुत्पञ्चम श, वामश्रुति: ऊ तेन शु। भूमिर्ल, अक्षि इ तेन लि। दीर्घा न, तृतीयस्वर इ तेन नि। ततृतीयो द, कर्ण उ तेन दु। ष्टग्र स्वरूपं। व्योम ह, वर्म हुं, अस्त्रं फट्, वह्नियोषा स्वाहा।।

मुनिर्दीर्घतमाच्छन्द: ककुबुक्तं च देवता। शूलिन्याह्वा महादुर्गा क्षुद्रदुष्टविनाशिनी।। ९।।
दुर्गे स्याद् हृदयं शीर्षं वरदे विन्ध्यवासिनी। शिखा वर्मासुरान्ते च मर्दन्यन्ते ततो वदेत्।। १०।।
युद्धप्रिये पदं पश्चात् त्रासय—द्वयमीरितम्। पञ्चाङ्गमन्त्रा उद्दिष्टा एवं न्यस्तस्य मन्त्रिण:।। ११।।
रक्षाकृद्ग्रहदोषघ्नमङ्गकर्म भवेद् ध्रुवम्। एवं न्यस्तशरीरोऽसौ ध्यायेद् दुर्गां सुरैर्नुताम्।। १२।।

पञ्चाङ्गमन्त्रानाह— 'दुर्गे स्याद्धृदय'मित्यादि। तेन शूलिनि इत्यादावन्ते देवसिद्धेत्यादि। तदुक्तं नारायणीये—

एवमादौ शूलिनीति पदं तारादिकं वदेत्। अवसाने तु सर्वेषां देवसिद्धसुपूजिते।। १।।
नन्दिनीरक्षयुग्मं च महायोगेश्वरीमपि। वर्मास्त्रबीजे चामूनि ग्रहरक्षाकराणि हि।। २।।
पञ्चाशदावृतिन्यासाज्ज्वरस्तीव्रोऽपि नश्यति।.................................।।

तारादित्वं च ज्वरप्रयोगे। तथा—

नीलाम्भोधरकान्तिमिन्दुमुकुटां सिंहाधिरूढां करै:
शूलं बाणमसिं ह्यरिं दरगदाचापान् सपाशाञ्शुभै:।
बिभ्राणामसिखेटयुक्चतसृभि: कन्याभिराराद्वृतां
नानाभूषणभूषितां त्रिनयनां दुर्गां भजे शूलिनीम्।।

दक्षिणाध:करमारभ्य वामाध: करपर्यन्तमायुधध्यानम्।

.................................। दुर्गापीठं पुरा प्रोक्ते ध्यात्वा देवीं प्रपूजयेत्।। ३।।
वक्ष्यमाणेन विधिना पुराङ्गानि प्रपूजयेत्। दुर्गादिभिर्द्वितीया स्यादायुधैश्चापरा स्मृता।। ४।।
दिशाधिनाथैर्वज्राद्यैरेवमर्चा समीरिता। दुर्गा च वरदा विन्ध्यवासिन्यसुरमर्दिनी।। ५।।
प्रोक्ता युद्धप्रिया देवसिद्धसुपूजितापि च। नन्दिन्या समहायोगेश्वरीति गदिताश्च ता:।। ६।।

आयुधानि तु— ''चक्रदरासिगदाशरशरासनत्रिशिखपाशकानि विदु:''।। अथ प्रयोग:— तत्र प्राग्वद्योगीपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि दीर्घतमसे ऋषये नम:। मुखे ककुप्छन्दसे नम:। हृदि शूलिनीदुर्गायै देवतायै नम:। इति विन्यस्य विनियोगमुक्त्वा, शूलिनि दुर्गे देवसिद्धसुपूजिते, हृदयाय नम:। शूलिनि वरदे देवसिद्धसुपूजिते, शिरसे स्वाहा। शूलिनि विन्ध्यवासिनि देवसिद्धसुपूजिते, शिखायै वषट्। शूलिन्यसुरमर्दिनि देवसिद्धसुपूजिते, कवचाय हुं। शूलिनि युद्धप्रिये त्रासय त्रासय देवसिद्धसुपूजिते, अस्त्राय फट्। इति पञ्चाङ्गमन्त्रान् मूलमन्त्राभिमृष्टयो: पाण्योरङ्गुष्ठादिकनिष्ठास्वङ्गुलीषु विन्यस्य हृदयादिषु नेत्ररहितेषु पञ्चाङ्गेषु च विन्यस्य, ध्यानादिपञ्चाङ्गपूजान्तेऽष्टदलेषु स्वाग्रादिप्रादक्षिण्येन् ओं दुं दुर्गायै नम:, एवं वरदायै०, विन्ध्यवासिन्यै०, असुरमर्दिन्यै०, युद्धप्रियायै०, देवसिद्धसुपूजितायै०,

नन्दिन्यै०, महायोगेश्वर्यै नमः, इति सम्पूज्य, द्वितीयाष्टदले स्वाग्रादिप्रादक्षिण्येन ओं चक्राय नमः, शङ्खाय०, खड्गाय०, गदायै०, बाणाय०, चापाय०, शूलाय०, पाशाय०, इति सम्पूज्य दिगीशार्चादि शेषं प्राग्वत् समापयेत्।। तथा—

वर्णलक्षं जपेन्मन्त्रं जुहुयात् तद्दशांशतः। आज्येन प्राज्यहविषा तर्पणादि ततश्चरेत्।। ७।।
आराध्य विप्रान् विधिवद्भक्त्याभ्यर्च्य गुरुं ततः। एवं सिद्धमनुर्मन्त्री प्रयोगान् मनसीप्सितान्।।८।।
विदधीत विधानेन गुरोराज्ञापुरःसरम्। शूलाद्यायुधसंयुक्तामुग्रां स्वं शूलिनीं तथा ।। ९।।
विचिन्त्य प्रजपेन्मन्त्रं ग्रस्तं स्पृष्ट्वा विधानतः। तमाविश्य क्षणं सर्वं वदेत् पश्चाद्विनश्यति।।१०।।
मन्त्रावृत्त्या तदानीं च भूतसङ्घः पलायते। स्मृत्वात्मरोगिणोर्मध्ये शूलिनीमायुधैर्वृताम्।। ११।।
जपतो विद्रवत्याशु ग्रहा अवश[1]विग्रहाः। दुःसर्पवृश्चिकाद्युत्थं बहुपात्कुक्कुरोद्भवम्।। १२।।
लूतिका[2]दिककीटोत्थं विषं नाशयति क्षणात्। निशिते सायके देवीमाधायैव च शूलिनीम्।।१३।।
क्षेमङ्करीं पूजयित्वा मनुमेनं जपेत् सुधीः। परायुधानि गृह्णाति सेना निश्चेष्टका भवेत्।। १४।।
तिलयुक्तैः सर्षपैश्च वैरिणो नामसंयुतैः। लक्षं प्रजुहुयाच्छत्रुरामयाविष्टविग्रहः।। १५।।
यमातिथित्वमायाति नात्र कार्या विचारणा। त्रिस्वाद्वक्तैस्तिलैरष्टसहस्रं प्रत्यहं हुनेत्।। १६।।

अष्टसहस्रमष्टोत्तरसहस्रमित्यर्थः।

शक्तिरस्याप्रतिहता वत्सरात् प्राग्भवेद[3]लम्। घृतेनाष्टशतं मन्त्री जुहुयाद्वाञ्छितं लभेत्।। १७।।
वत्सरात् प्राग् दूर्वया च मधुरत्रययुक्तया। सम्यगष्टोत्तरशतं जुहुयादीप्सितं लभेत्।।१८।।
छुरिकाखड्गनाराचाः सञ्जप्ता मनुनामुना। सम्पातघृतसिक्तश्च सङ्ग्रामेऽहतशक्तयः ।।१९।।
अष्टोत्तरशतं मन्त्री गुलिका गोमयस्य च। जुहुयात् सप्तदिवसैरिष्टौ द्विष्टौ स्त आदरात्।। २०।।
अस्पृष्टभूम्यन्तरिक्षे गृहीत्वा गोमयं शुभम्। त्रिसहस्रमितं जप्त्वा ययासोर्द्वारि सङ्खनेत्।। २१।।
तस्य संस्तम्भनं मङ्क्षु भवेन्नैवात्र संशयः। सेनामुखे निखातं च सेनास्तम्भं करोत्यलम्।। २२।।
ग्रामं वा नगरं गच्छन् संस्मरेदम्बिकां सुधीः। पानीयान्नकरीं चैव प्रसन्नां प्रजपेन्मनुम्।। २३।।
तर्पयित्वा प्रविष्टस्तं प्राप्नुयादिष्टभोजनम्। सह च भृत्यवर्गेण साधको नात्र संशयः।। २४।।
अर्कवृक्षसमिद्भिश्च त्रिमध्यक्ताभिरुक्तवत्। जुहुयाद्रविसाहस्रं यानुद्दिश्य तु साधकः।। २५।।
भवन्त्येव हि ते वश्यास्तथाश्वत्थसमिद्वरैः। प्रसन्नचेताश्च तिलैः पूर्वकर्मणि वा हुनेत्।। २६।।
दुर्गाकल्पोदितान् सर्वान् प्रयोगान् साधयेत् सुधीः।...।।

यन्त्रव्यतिरिक्तानिति।। तथा सारसङ्ग्रहे—

अथातो वनदुर्गायाः प्रोच्यते मन्त्र उत्तमः। धृतिश्च कामिकाद्वन्द्वं तुष्टियुग् वृषठान्तकः।। १।।
रमेषुस्वरयुक्ता च परा विष्णुयुताक्षियुक्। प्रज्ञा जया तुष्टिबिन्दुयुक्ता हंसश्च बालयुक्।। २।।

---

१. 'अशुभ' ग. पाठः। २. 'कुलिकादि' ग. पाठः। ३. 'जपेत्' क. पाठः। ४. 'प्रच्छन्नां' ग. पाठः।

लोहितो नेत्रसहितो मन्त्रषष्ठाक्षरं वदेत्। क्लिन्ना सदण्डी वसुधा विषं पङ्क्तिस्वरार्णयुक्।। ३।।
प्रभा महाकालश्रोत्रशूरः स्थ्यर्धेन्दुयुग्घरिः। मरुन्मुक्त्यक्षिणी सन्ध्या क्यम सन्ध्याक्य बिन्दुमत्।।४।।
सूक्ष्मा कान्तियुता शुद्धिर्दीर्घकाले स्वरान्विता। विश्वमूर्तिः प्रभा बालः कामिकेयुग् वृषघ्नकः।।५।।
वैकुण्ठो वसुधा चाग्निकान्ता मनुरयं मतः। प्रवरो वनदुर्गायाः ससप्तत्रिंशदर्णकः ।। ६।।

धृतिरुकारः। कामिकाद्वन्द्वं त्त। तुष्टियुग् इकारयुक्तं तेन त्ति। वृषः ष स एव ठान्तस्तेन ष्ठ। रमा प इषुस्वर उ तद्युक्तस्तेन पु। परा रेफः विष्णुयुत उकारयुतस्तेन रु। अक्षियुक् प्रज्ञा षि। जया क तुष्टिरिकारः बिन्दुरनुस्वारस्तेन किं। हंसः स बालयुग् वकारयुक्तस्तेन स्व। लोहितः प नेत्रसहित इकारयुक्तस्तेन पि। मन्त्रषष्ठाक्षरं पि। क्लिन्ना भ। सदण्डीवसुधा यं। विषं म पङ्क्तिस्वरार्णयुक् तेन मे। प्रभा स। महाकालो म श्रोत्र उ तेन मु। शूरः प। स्थि स्वरूपं। अर्धेन्दुयुग्घरिः तं। मरुत् य। मुक्त्यक्षिणी दि। सन्ध्या श। क्यम स्वरूपं। सन्ध्या श। क्य बिन्दुमत् क्यं। सूक्ष्मा व कान्तियुतस्तेन वा। शुद्धिः त। दीर्घकालेस्वरान्विता मकारएकारयुक्तो नकारस्तेन न्मे। विश्वमूर्तिः भ। प्रभा ग। बालो व। कामिकेयुक् तकार—इकारयुक् तेन ति। वृषघ्नः श। वैकुण्ठो म। वसुधा य। अग्निकान्ता स्वाहा। अत्र वा तन्मे इत्यक्षराणि कीलकानि।। ईशानसंहितायाम्—''गुणबीजं समुद्धृत्य उत्तिष्ठेति पदं ततः'' इत्यादि। ''एवमेषा महाविद्या निष्कीला सर्वसिद्धिदा। गुणान्ते भुवनेशानी दुर्गाबीजं नियोजयेत्।। मनोरन्ते त्रयं[1] बीजं मुक्त्वा चान्ते विलोमतः। पूर्वोक्तबीजत्रितयं योजयेत् क्रौंश्चदारण।।'' बीजत्रयं प्रणवमायादुर्गाबीजानि विलोमतः दुर्गामायाप्रणवक्रमेण। एतावता आदौ बीजपञ्चकमनन्तरं मन्त्रस्तदनु विलोमेन त्रिबीजमिति मन्त्रः सिद्धः।। तथा—

अरण्यको मुनिः प्रोक्तोऽत्यनुष्टुप्छन्द ईरितम्। वनदुर्गा देवतास्य सर्वशत्रुविघातिनी।। ७।।
ऋत्वब्ध्यष्टाष्टर्तु—बाणमितैर्मन्त्रार्णकैः क्रमात्[2]। जातियुक्तैः षडङ्गानि मनोरस्य प्रकल्पयेत्।। ८।।
पादाष्टसन्धिके गुदे लिङ्गाधारोदरेषु च। पार्श्वयुग्मे हृदि कूचद्वन्द्वे कण्ठेऽष्टसन्धिषु ।। ९।।
करयोर्वदने नासागण्डदृक्कर्णयुग्मके। भ्रूमध्ये मूर्धनि मनोर्वर्णान् न्यसेद्यथाविधि ।। १०।।

ध्यानम्—

विद्युद्दामप्रभाभां कनकसरसिजे संस्थितां सत्रिनेत्रां
हस्ताम्भोजैर्वहन्तीमरिदरवरदाभीतिसंज्ञाः क्रमेण।
स्वर्णोद्यत्कान्तिवस्त्रां शशिकलितलसद्रत्नचूडां प्रसन्नां
पार्श्वोद्यत्सन्मृगेन्द्रां हृदि वनवसतिं दावदुर्गां स्मरेऽहम्।। ११।।

दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम्।

इति ध्यात्वा महादेवीं पूजयेद्भक्तितत्परः। पूर्वोदिते शुभे दौर्गे पीठे दुर्गां प्रपूजयेत्।। १२।।
पूर्वमङ्गानि पूज्यानि तत्र आर्यादिकान् यजेत्। चक्राद्यस्त्राणि मातृंश्च लोकेशानायुधानि च।। १३।।
आर्या दुर्गा भद्रा सभद्रकाल्यम्बिका क्षेम्या। वेदाद्या गर्भाख्या क्षेमर्ङ्क्यष्टमी प्रोक्ता।। १४।।
चक्रशङ्खासिखेटेषुधनुरुजनृकरोटिकाः। तदायुधानीरितानि दुर्गापूजनमीरितम्।। १५।।

---

१. 'वर्मणोन्ते म्बक' ख. पाठः। २. 'पृथक्' ख. पाठः।

रुक् त्रिशूलम्। नृकरोटिर्नृकपालम्।। अथ प्रयोगः— तत्र प्राग्वद्योगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि आरण्यकाय ऋषये नमः। मुखे अत्यनुष्टुप्छन्दसे नमः। हृदि श्रीवनदुर्गादेवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुत्कीर्य, उत्तिष्ठ पुरुषि हृदयाय नमः। किं स्वपिषि शिरसे स्वाहा। भयं मे समुपस्थितं शिखायै वषट्। यदि शक्यमशक्यं वा कवचाय हुं। तन्मे भगवति नेत्रत्रयाय वौषट्। शमय स्वाहा अस्त्राय फट्, इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्हृदयादिषडङ्गेषु च विन्यस्य, दक्षपादाङ्गुलीमूले उं नमः। गुल्फे त्तिं नमः। जानुनि ष्टं नमः। ऊरुमूले पुं नमः। वामपादाङ्गुलीमूले रुं नमः। गुल्फे षिं नमः। जानुनि किं नमः। ऊरुमूले स्वं नमः। गुदे पिं नमः। लिङ्गे षिं नमः। मूलाधारे भं नमः। उदरे यं नमः। दक्षपार्श्वे में नमः। वामपार्श्वे सं नमः। हृदि मुं नमः। दक्षस्तने पं नमः। वामस्तने स्थि नमः। कण्ठे तं नमः। दक्षकराङ्गुलिमूले यं नमः। दक्षमणिबन्धे दिं नमः। कुर्परे शं नमः। बाहुमूले क्यं नमः। वामकराङ्गुलिमूले मं नमः। मणिबन्धे शं नमः। कुर्परे क्यं नमः। बाहुमूले वां नमः। मुखे तं नमः। दक्षनासापुटे न्में नमः। वामे भं नमः। दक्षगण्डे गं नमः। वामे वं नमः। दक्षनेत्रे तिं नमः। वामे शं नमः। दक्षकर्णे मं नमः। वामे यं नमः। भ्रूमध्ये स्वां नमः। शिरसि हां नमः, इति विन्यस्य प्राग्वद् ध्यानमानसपूजान्तेऽष्टदलकमलत्रयात्मकं प्राग्वत् पूजाचक्रं निर्मायार्घ्यस्थापनाद्यङ्गपूजान्ते प्रथमेऽष्टदले—आर्यायै नमः। दुर्गायै नमः। भद्रायै नमः। भद्रकाल्यै नमः। अम्बिकायै नमः। क्षेम्यायै नमः। वेदगर्भायै नमः। क्षेमङ्कर्यै नमः। द्वितीयेऽष्टदले चक्राय नमः। शङ्खाय नमः। खड्गाय नमः। खेटकाय नमः। बाणाय नमः। चापाय नमः। शूलाय नमः। कपालाय नमः। तृतीयेऽष्टदले— प्राग्वद् ब्राह्म्याद्याः सम्पूज्य दिगीशार्चादि सर्वं पूर्ववत् समापयेत्। इति। नारायणीये—

वेदलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत् तिलैः। ब्राह्म्याद्यास्तिलदुग्धान्नैर्दुर्गां सञ्चिन्त्य चानले।। १।।
तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा। धनधान्यादिभिः सम्यक् तोषयित्वा निजं गुरुम्।। २।।
एवं सिद्धमनुर्मन्त्री वाञ्छितार्थान् प्रसाधयेत्। दुर्गाप्रयोगभेदेन चिन्तयेद्वनवासिनीम्।। ३।।
श्रिये च दुर्गां महिषोत्तमाङ्गस्थितां च दूर्वादलरुग् (भां) वहन्तीम्।
सचक्रशङ्खासिसखेटबाणचापान् भुजैस्तर्जनिकां वहन्तीम् (त्रिशूलम्)।। ४।।
शङ्खचक्रकृपाणखेटकबाणधनूंषि शूलवत्। पुंस्कपालसऋष्टिकान् मुसलकुन्तनन्दकान्।। ५।।
सत्करैर्वलयसद्गदाभिण्डिपालकशक्तिकान्। बिभ्रतीं जलदद्युतिं महिषोत्तमाङ्गनिषेदुषीम् ।। ६।।
पावकोल्लसितद्युतिं हृदि भीमसिंह(समा)गताम्। श्यामलां कमलस्थितां नयनत्रयोल्लसितां शुभाम्।।७।।
व्याघ्रचर्मसदंशुकामहिबद्धकुन्तलशोभिताम्। चन्द्रशोभितशेखरां सुरदानवाभयभीतिदाम्।। ८।।
प्रजपेत् प्रत्यहं मन्त्री स्वरक्षायै शतं ह्यथ। सहस्रं वा तदन्ते च प्रयोगान् कर्तुमर्हति।। ९।।
यद्यदुद्दिश्य च मनुं सहस्रं वायुतं जपेत्। अचिराल्लभते तत्तदसाध्यमपि साधकः।। १०।।
प्रातःस्नायी न्यासपूर्वं स्मरन् देवीमनन्यधीः। नित्यं सहस्रं प्रजपेन्मन्त्रं साधकसत्तमः।। ११।।
ज्वरसर्पग्रहोत्थांश्च दोषान् प्रशमयेत् सुधीः। हुनेदारण्यकतिलै राजिकाभिश्च वा हुनेत्।। १२।।
अपामार्गसमिद्भिश्च नाशयेत् सकलामयान्। अपस्मारादिकान् मन्त्री नात्र कार्या विचारणा।। १३।।

---

१. 'कुम्भकदम्बकान्' ख. ग. पाठः।

न्यग्रोधोत्थसमिद्भिर्वा सशुङ्गाभिर्हुनेत् सुधीः। अयुतं सर्वसम्पत्त्यै सर्वापन्मुक्तयेऽपि च।। १४।।
ग्रहादिशान्त्यै च तथा ह्यभिचारादिशान्तये। अर्कवृक्षसमुद्भूतैर्जुहुयाच्च समिद्वरैः ।। १५।।
आरभ्य रविवारं च तद्द्वयं प्रत्यहं सुधीः। दशाहतो वाञ्छितार्थसिद्धिर्भवति नान्यथा।। १६।।
त्र्यहं वा सप्तरात्रं वा चेध्मैः सारसमुद्भवैः। एकैकं शकलं मन्त्री हुनेद्वाञ्छितसिद्धये।। १७।।
त्रिंशच्छरान् शिताग्रांश्च निधाय जुहुयाद्बुधः। कटुतैलैः सहस्रं वा ह्ययुतं तदनन्तरम्।। १८।।
सम्पाततैलेन शरान् समभ्युक्ष्य यथाविधि। पूर्ववत् प्रजपेन्मन्त्रं तान्शरान् अथ भूपतिः।। १९।।
शुद्धाचारश्च धीरश्च धन्वी संयतमानसः। गृहीत्वा परसेनाया मध्ये गच्छेदभीः क्षिपेत्।। २०।।
सा धावति दिशः सर्वाः सम्भ्रान्ता विह्वला तदा। स आगत्य पुनर्भूयो गुरुं धान्यैर्धनैरपि।। २१।।
वस्त्रालङ्करणैश्चैव तोषयेज्जयदायिनम् । अष्टाधिकशतेनाथ सञ्जप्तं शवभस्म च ।। २२।।
निक्षिपेद्यस्य शिरसि स विद्विष्टो भवेज्जनैः। देशाद् देशान्तरं चैव काकवद् भ्रमते सदा।। २३।।
कारस्करद्रुमोत्थैश्च पत्रैर्वायुनिपातितैः। सहस्रं जुहुयात् पादरजोभिः सह वैरिणः।। २४।।
उच्चाटोऽस्य भवेत् सद्यो, विषवृक्षसमुद्भवैः। पुष्पैर्हुनेत् सहस्रं च सेनां संस्तम्भयेत् बुधः[1] ।। २५।।
ताविद्भिस्तस्य पत्रैश्च मन्त्री सेनां निवर्तयेत्। विषवृक्षसमुद्भूतां शत्रोः प्रतिकृतिं शुभाम्।। २६।।
कृत्वा प्रतिष्ठितप्राणां खण्डं खण्डं कृतैर्निशि। कृष्णपक्षचतुर्दश्यां काकोलूकवसाप्लुतैः।। २७।।
तद्गात्रैर्विपिने होमः कर्तव्योऽष्टसहस्रकम्। चतुर्दशीत्रयादेवं नाशमेति रिपुर्ध्रुवम् ।। २८।।
उलूकवायसपक्षैः सवसारक्तसंयुतैः । होमाद्रिपुर्नाशमेति ह्युन्मत्तसमिधं तथा ।। २९।।
होमान्मत्तो रिपुर्नूनं भवत्येव सहस्रतः। वैरिणः प्रतिमां कृत्वा सम्यक् संस्थापितानिलाम्।। ३०।।
विषत्रिकटुकालिप्तां सम्यगुष्णे जले क्षिपेत्। प्रजपेच्च मनुं सद्यो ज्वराक्रान्तो भवेद्रिपुः।। ३१।।
दुग्धाभिषेकतः शान्तिर्भवत्यस्य न संशयः। प्रतिमां विषवृक्षोत्थां निःक्षपेदुष्णवारिणि।। ३२।।
उन्मादश्च रिपोः सद्यः पूर्ववच्छान्तिरीरिता। सूर्यबिम्बेऽन्तरारक्तां शूलतर्जनिकाकराम् ।। ३३।।
ध्यात्वायुतं प्रजप्याथ मारयेद्रिपुसञ्चयम्। असिखेटकरार्कस्था क्रुद्धा सा वनवासिनी।। ३४।।
संस्मृता मन्त्रजापे तु शमयेच्छत्रुसञ्चयम्। शरधनुष्करां सिंहस्थितां पावकसन्निभाम् ।। ३५।।
संस्मृत्य मन्त्रं प्रजपन् क्षिप्रमुच्चाटयेदरीन्। कारस्करद्रुसमिधामयुतं जुहुयात् सुधीः ।। ३६।।
रोगिणः करिणः सर्वे जायन्ते ह्यचिरात् सदा। विषवृक्षोत्थितैः पत्रैरमी नाशं प्रयान्ति च।। ३७।।
सद्वृक्षसुमनोभिः स्यादुच्चाटः करिणां ध्रुवम्। राजवृक्षसमिद्भिर्वा रोगा नश्यन्ति दन्तिनाम्।। ३८।।
विषयवृक्षप्रसूनैश्च त्रिमध्वक्तैस्तु मानवः(वारणः)। वशीभवेत् तथा शीघ्रं पत्रैरानित्यशोभितैः*कोद्भवैः)
त्रिस्वाधुयुक्तैः करिणो ह्यतिमत्ता भवन्ति च। अभ्यङ्गः पञ्चगव्येन लोके रक्षाकरः परः।। ४०।।
करिणां मनुजप्तोऽयं प्रोक्तो मन्त्रविदुत्तमैः। सर्पिस्तिलानित्यकैस्तु राजिकापञ्चगव्यकैः।। ४१।।

---

[1] 'सदा' क. ग. पाठः।

* 'अनित्यको राजवृक्षः' इत्यर्थः।

दुग्धतण्डुलकैश्चैव प्रत्येकं च सहस्रतः। जुहुयादिभसङ्घानां वृद्धिर्भवति नान्यथा।। ४२।।
महान्तं विष(द्विज)वृक्षं च छित्वा निर्भिद्य पञ्चधा। दिक्क्रमेणैव पञ्चैवमायुधानि प्रकल्पयेत्।।४३।।
सम्यक् शिल्पविदा शङ्खो नन्दकश्चक्रशार्ङ्गकौ। कौमोदकीति क्रमेण प्रोक्तमायुधपञ्चकम्।। ४४।।
निक्षिप्य पञ्चगव्ये तु जपेन्मन्त्रसहस्रकम्। तावच्चाज्येन जुहुयात् सम्पातं तत्र पातयेत्।। ४५।।
भूयश्च पूर्वसंख्याकं जपं कुर्याद्विचक्षणः। विदध्यादायुधान् पञ्च पञ्चगव्यप्रपूरितान्।। ४६।।
मध्यायुधे स्वा(मध्यावटेष्वा)युधानि निक्षिपेत्(तत्र तत्र च)। बलिं हरेत् समीकृत्य तन्मन्त्रैर्मन्त्रिणा तथा।
कार्या रक्षा राष्ट्रपुरग्रामाणामेवमेव च। यत्रेयं विहिता रक्षा लक्ष्मीः) तत्र च वर्धते।। ४८।।
धनधान्यसमृद्धिः स्याद्रिपुचौरभयं न च। पद्मैर्नृपं वशीकुर्यात् तत्पत्नीरुत्पलैरपि।। ४९।।
ब्राह्मणान् कुमुदैर्हुत्वा कह्लारैर्विश एव च। शूद्राँल्लवणहोमेन ग्रामं जातिप्रसूनकैः।। ५०।।
चक्रशङ्खगदाम्भोजहस्तं सञ्चिन्तयेच्छुभम्। रविबिम्बे मुकुन्दं च मनुं व्यत्यस्तलिङ्गकम्।। ५१।।
प्रजपेच्चाथ पुरुषभगवत्पदयोरथ। सर्वसिद्धिकरः प्रोक्तः प्रकारोऽयं सुमन्त्रिभिः ।। ५२।।
साध्यनामाक्षरैः सम्यग्विदर्भितमनुं लिखेत्। यन्त्रे(पत्रे) ततः कुलालस्य करलग्नं प्रगृह्य मृत्[१] ।।५३।।
तया कृता या प्रतिमा तस्याश्च हृदि संन्यसेत्। संस्थाप्य स्वाभिमुख्ये तां सप्ताहं प्रजपेन्मनुम्।।५४।।
सन्ध्यात्रये शतं चाष्टाधिकं वश्यो भवेत्तु सः। व्रीहीन् हुनेदष्टशतं प्रत्यहं वत्सराद्भवेत्।। ५५।।
व्रीहिमान् गोपयोभिश्च पशुमान् भवति ध्रुवम्। घृतहोमान्मन्त्रिणः स्यात् काञ्चनाप्तिर्महीयसी।।५६।।
दध्ना सर्वसमृद्धिः स्यादन्नैरन्नसमृद्धियुक्। मधुहोमेन रत्नानां निधिर्भवति नान्यथा।। ५७।।
दूर्वाहोमेन दीर्घायुर्मन्त्री भवति निश्चितम्। श्वेतगुञ्जाः समानीय कुडवप्रमिताः शुभाः।। ५८।।
एतन्मन्त्रसुजप्ताश्च विकिरेच्छत्रुसैन्यके। स्वयं मन्त्री सुगुप्तः सन् तेनासौ वैरिणश्चमूः।। ५९।।
ज्वरादिकैर्महारोगैः षीडिता स्यान्मृताचिरात्। सेनाधिपतिमुख्यानां परस्परविरोधतः।। ६०।।
एतदुपद्रवैर्नानाविधनाशं प्रयाति च।...।।

तारे शक्तिं समाध्यां लिखतु रविदले मध्यतः पत्रमूले
मर्दिन्या वर्णयुग्मं दलमनु विलिखेद्वह्निशो मूलवर्णान्।
अन्त्ये प्र(चा)न्त्येकबीजं बहिरथ लिपिभिर्भूपुरद्वन्द्वसंस्थं
दुर्गाया यन्त्रमेतद्युवतितनयदं सर्वरक्षाकरं स्यात्।। ५९।।

सर्वसम्पत्करं नृणां सर्वसौभाग्यपुष्टिदम्। राज्यलक्ष्मीविहीनानां भूपतीनां च राज्यदम्।। ६०।।
आमयग्रस्तनृणां च रोगशान्तिकरं परम्। जपहोमाज्यसम्पातसाधितं यन्त्रमुत्तमम् ।। ६१।।
प्रोक्तं च वनदुर्गायाः सर्वदं नात्र संशयः।...।।

इति। अस्यार्थः— द्वादशदलपद्मं विरच्य तन्मध्ये तारं तस्योदरे शक्तिं तदन्तः साध्यनाम च विलिख्य, तत्केसरेषु

---

[१] 'प्रगृह्य करलग्नमृत्' इति ख. पाठः।

महिषमर्दिन्यष्टाक्षरमन्त्रस्य त्रिरावृत्त्या प्रतिकेसरं वर्णद्वयं वर्णद्वयमालिख्य, मूलमन्त्रस्य वर्णान् प्रतिदलं त्रिश आलिख्यान्तिमाक्षरमन्तिमदले विलिख्य पद्माद्बहिर्वृत्तद्वयं विरच्य तयोरन्तरालवीथ्यां प्रत्यक्षरं सबिन्दुकां मातृकां विलिख्य तद्बहिश्चतुरस्रद्वयसम्पुटरूपेणाष्टकोणेन वेष्टयेत्, एतद्यन्त्रमुक्तफलदं भवेत्।। नारायणीये—“अत्रिरत्र समाख्यातस्तद्बीजं शिवसर्गवान्’। अत्रिः दकारः शिव उ सर्गो विसर्गः तेन दुः। तद्बीजं तस्या दुर्गाया बीजम्। (अस्य) कश्यप ऋषिः, गायत्री छन्दः, श्रीदुर्गा देवता, षड् दीर्घयुक्तबीजेन षडङ्गानि बीजेन सविसर्गेण। सर्वत्र अष्टकमलदले दूर्वाश्यामां त्रिनेत्रां शूलबाणचक्रशङ्खखड्गखेटधनुःकपालानि दक्षिणाधःकरक्रमेण धारयन्तीं ध्यायेत्। लक्षजपे दशांशहोमः पूजादिकं वनदुर्गावज्ज्ञेयम्। अयं लक्षजपः कृतयुगपरः।। अथ स्तोत्रम्—

यत्कर्मधर्मनिलयं प्रवदन्ति तज्ज्ञाः यज्ञादिपुण्यमखिलं सकलं त्वयैव।
त्वं चेतना यत इति प्रविचार्य चित्ते नित्यं त्वदीयचरणौ शरणं प्रपद्ये।। १।।
पाथोऽधिनाथतनयापतिरेष शेषपर्यङ्कलालितवपुः पुरुषः पुराणः।
त्वन्मोहपाशविवशो जगदम्ब सोऽपि व्याघूर्णमाननयनः शयनं चकार।। २।।
तत् कौतुकं जननि यस्य जनार्दनस्य कर्णप्रसूतमलजौ मधुकैटभाख्यौ।
तस्यापि यौ न भवतः सुलभौ निहन्तुं त्वन्मायया कवलितौ विलयं गतौ तौ।। ३।।
यन्माहिषं वपुरपूर्वबलोपपन्नं यन्नाकनायकपराक्रमजित्वरं च ।
यल्लोकशोकजननव्रतद्धहार्दं तल्लीलयैव दलितं गिरिजे भवत्या।। ४।।
यो धूम्रलोचन इति प्रथितः पृथिव्यां भस्मीबभूव स रणे तव हुंकृतेन।
सर्वासुरक्षयकरे गिरिराजकन्ये मन्ये स्वमन्युदहने कृत एष होमः।। ५।।
केषामपि त्रिदशनायकपूर्वकाणां हन्तुं न जातु सुलभाविति चण्डमुण्डौ।
तौ दुर्मदौ सपदि चाम्बरतुल्यमूर्तेर्मातस्तवासिकुलिशात् पतितौ विशीर्णौ।। ६।।
दौत्येन ते शिव इति प्रथितप्रभावो देवोऽपि दानवपतेः सदनं जगाम।
भूयोऽपि तस्य चरितं प्रथयाञ्चकार सा त्वं प्रसीद शिवदूति विजृम्भितेन।। ७।।
चित्रं तदेतदमरैरपि ये न जेयाः शस्त्राभिघातपतिताद्रुधिरादपर्णे।
भूमौ बभूवुरमिताः प्रतिरक्तबीजास्तेऽपि त्वयैव गगने गिलिताः समस्ताः।। ८।।
आश्चर्यमेतदतुलं यदभूत् सुरारी त्रैलोक्यवैभवविलुण्ठनहृष्टपाणी।
शस्त्रैर्निहत्य भुवि शुम्भनिशुम्भसंज्ञौ नीतौ त्वया जननि तावपि नाकलोकम्।। ९।।
त्वत्तेजसि प्रलयकालहुताशनेऽस्मिंस्तस्मिन् प्रयान्ति विलयं भुवनानि सद्यः।
तस्मिन्निपत्य शलभा इव दानवेन्द्रा भस्मीभवन्ति हि भवानि किमत्र चित्रम्।। १०।।
तत्किं गृणामि भवतीं भवतीव्रतापनिर्वापणप्रणयिनीं प्रणमज्जनेषु ।
तत्किं गृणामि भवतीं भवतीव्रतापसंवर्द्धनप्रणयिनीं विपदि स्थितेषु।। ११।।

वामे करे तदितरे च तथोपरिष्टात् पात्रं सुधारसयुतं वरमातुलुङ्गम्।
खेटं गदां च दधतीं भवतीं भवानि ध्यायन्ति येऽरुणनिभां कृतिनस्त एव।। १२।।
यद्वारुणात् परमिदं यदि मानवस्ते बीजं स्मरेदनुदिनं दहनाधिरूढम्।
मायाङ्कितं तिलकितं तरुणेन्दुबिन्दुनादैरमन्दमिह राज्यमसौ भुनक्ति ।। १३।।
आवाहनं यजनवर्णनमग्निहोत्रं कर्मार्पणं तव विसर्जनमत्र देवि ।
मोहान्मया कृतमिदं सकलापराधं मातः क्षमस्व वरदे बहिरन्तरस्थे।। १४।।
अन्तः स्थिताप्यखिलजन्तुषु जन्तुरूपा विद्योतसे बहिरिवाखिलविश्वरूपा।
का भूरिशब्दरचना वचनाधिका सा दीनं जनं जननि मामव निष्प्रपञ्चम्।। १५।।
एतत् पठेदनुदिनं दनुजान्तकारि चण्डीचरित्रमतुलं भुवि यस्त्रिकालम्।
श्रीमान् सुखी स विजयी सुभगः कृती स्यात् त्यागी चिरन्तनवपुः कविचक्रवर्ती।।१६।।
श्रीसिद्धनाथापरनामधेयः श्रीशम्भुनाथो भुवनैकनाथः ।
तस्य प्रसादात् सकलागमश्रीः पृथ्वीधरस्तोत्रमिदं चकार।। १७।।

अथ नवार्णविधानोक्तमहालक्ष्मीपूजा लिख्यते। तत्र प्रातःकृत्यादिमातृकान्यासान्तं विधाय मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मविष्णुरुद्रेभ्यो नमः। मुखे गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः। हृदि श्रीमहालक्ष्मीमहाकालीमहासरस्वती देवताभ्यो नमः। गुह्ये परमशिवलिङ्गाय बीजाय नमः। पादयोः कालीशिवदूतीप्रजापतिभ्यः शक्तिभ्यो नमः। नाभौ ह्रीं कीलकाय नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये जपे विनियोगः। इति कृताञ्जलिरुक्त्वा ॐ ऐं ह्रीं क्लीं हृदयाय नमः, एवं षडङ्गन्यासं विदध्यात्। अत्रैकादशन्यासेषु मातृकान्यासः प्रथमः। षडङ्गन्यासो द्वितीयः। ततः– ओं ह्रीं ब्रह्माणी मे पूर्वे पातु। रँ महालक्ष्मीर्मे ईशान्यां पातु। रँ व्योमेश्वरी मे ऊर्ध्वं पातु। रँ सप्तद्वीपेश्वरी मे मध्यं पातु। रँ नागेश्वरी मेऽधः पातु। इति तृतीयो न्यासः।। ततः– ॐह्रीं मम पूर्वाङ्गं नन्दजा पातु नमः। एवं रँ दक्षिणाङ्गं रक्तदन्तिका०, रँ पश्चिमाङ्गं शाकम्भरी०, रँ वामाङ्गं दुर्गा०, रँ मूर्धादिपादान्तं भीमा०, रँ पादादिमूर्धान्तं भ्रामरी पातु नमः। इति चतुर्थो न्यासः।। पादादिनाभिपर्यन्तं रँ ब्रह्मा पातु नमः। नाभेः कण्ठपर्यन्तं रँ विष्णुः पातु नमः। कण्ठाद् ब्रह्मरन्ध्रान्तं रँ रुद्रः पातु नमः। पादद्वये रँ हंसः पातु नमः। नेत्रयोः रँ वृषभः पातु नमः। सर्वाङ्गे रँ गजाननः पातु नमः। ब्रह्मरन्ध्रे रँ हरिः पातु नमः। मध्यदेहे रँ महालक्ष्म्यै नमः। मस्तके रँ सरस्वत्यै नमः। पादयोः रँ महालक्ष्म्यै नमः। करयोः रँ सिंहाय नमः। नेत्रयोः रँ परमहंसाय नमः। पादयोः रँ महिषसहितप्रेताय नमः। सर्वाङ्गे रँ महेशाय नमः। पुनः सर्वाङ्गे रँ चण्डिकायै नमः। इति षष्ठो न्यासः। ततो ब्रह्मरन्ध्रे ॐऐं नमः। दक्षिणकर्णे ॐह्रीं नमः। वामकर्णे ॐक्लीं नमः। दक्षणनेत्रे ॐचां नमः। वामनेत्रे ॐमुं नमः। दक्षनासायां ॐण्डां नमः। वामनासायां ॐयैं नमः। मुखे ॐविं नमः। लिङ्गे ॐच्चें नमः। इति सप्तमो न्यासः।। ततो गुदे ॐऐं नमः। लिङ्गे ॐह्रीं नमः। मुखे ॐक्लीं नमः। वामनासायां ॐचां नमः। दक्षनासायां ॐमुं नमः। वामनेत्रे ॐण्डां नमः। दक्षनेत्रे ॐयैं नमः। वामकर्णे ॐविं नमः। दक्षकर्णे ॐच्चे नमः। इत्यष्टमो न्यासः।। स्वपूर्वाङ्गे मूर्धादिपादान्तं मूलमन्त्रमुच्चार्य नमः। एवं दक्षिणपार्श्वे, पृष्टभागे, वामभागे, पुनर्वामे, पृष्ठे,

दक्षभागे, पूर्वाङ्गे[1] व्यापकत्वेन न्यसेत्, इति नवमो न्यासः।। ततो मूलमन्त्रमुच्चार्य हृदयाय नमः। इत्येवं षडङ्गन्यासं कुर्यात्। इति दशमो न्यासः।। 'खड्गिनी शूलिनी घोरा' इत्येकं श्लोकं कृष्णवर्णं ध्यात्वा सर्वाङ्गे व्यापकम्। 'शूलेन पाहि नो देवि' इत्यादि 'रक्ष सर्वतः' इत्यन्तं श्लोकचतुष्टयं बालार्कवर्णं ध्यायन् व्यापकम्। 'सर्वस्वरूपे सर्वेशि' इत्यादि 'चण्डिके त्वां नता वयम्, इत्यन्तं श्लोकपञ्चकं शुद्धस्फटिकसङ्काशं ध्यायन् सर्वाङ्गे व्यापकं न्यसेत्। इति एकादशो न्यासः।। अथ स्वहृदये वक्ष्यमाणं पूजापीठं विभाव्य तन्मध्ये मूलमन्त्रस्य बीजत्रयं ध्यात्वा मध्यबीजे श्रीमहालक्ष्मीं सर्वदेवशरीरतैजसोद्भूतां ध्यायेत्—

सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा। विचित्रजघना चित्रमाल्याम्बरविभूषणा ।। १ ।।
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी। अष्टादशभुजा पूज्या सा सहस्रभुजा सती।। २ ।।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात्। अक्षमाला च कमलं बाणासी मुसलं गदा।। ३ ।।
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः। शक्तिर्दण्डश्चर्म चापः पानपात्रं कमण्डलुः।। ४ ।।
अलङ्कृतभुजामेभिरायुधैः कमलासनाम्। सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप।। ५ ।।
पूजयन् सर्वदेवानां लोकानां च प्रभुर्भवेत्।..।।

इति महालक्ष्मीं ध्यात्वा प्रथमबीजे महाकालीं ध्यायेत्।।

दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा। विशालया राजमाना त्रिंशल्लोचनमालया ।। १ ।।
स्फुरद्दशनदंष्ट्रा सा भीमरूपा त्वभून्नृप। रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम्।। २ ।।
खड्गबाणगदाशूलचक्रपाशभुशुण्डिभृत्। परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ।। ३ ।।
एषा सा वैष्णवी माया कालरात्रिर्दुरत्यया। आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम्।। ४ ।।

इति महाकालीं ध्यात्वा महालक्ष्म्या वामभागे सरस्वतीं तृतीयबीजे ध्यायेत्—

गौरीदेहात् समुद्भूता यासत्त्वैकगुणान्विता। साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिवर्हिणी।। १ ।।
दधानाष्टभुजा बाणान् मुसलं चक्रशूलभृत्। शङ्खं च लाङ्गलं घण्टां कार्मुकं वसुधाधिप।। २ ।।
एषां सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति।..।।

इति महासरस्वतीं च ध्यात्वा वक्ष्यमाणपीठपूजापुरःसरं महालक्ष्मीं साङ्गां सावरणां मानसोपचारैः स्वमूलाधारे आत्मादिचतुष्टयरूपं चतुरश्रं कुण्डल्यग्निसमुज्ज्वलं ध्यात्वा, मूलमन्त्रमुच्चार्य ''अहन्तां जुहोमि स्वाहा'' पुनर्मूलमुच्चार्य ''असत्यं जुहोमि स्वाहा'' इत्येवं अहन्तापैशुन्यकामक्रोधलोभमोहमदमात्सर्याणि सुषुम्णास्रक्युक्तमनःस्रुवेण पृथक् पृथग् हुत्वा, निर्दग्धनिखिलवैरिगणः स्थिरचित्तो मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य बाह्यपूजां समारभेत्।। तत्र स्वर्णादिपीठे कुङ्कुमादिना षट्कोणं तद्बहिर्वृत्तं तल्लग्नं सकेसरमष्टदलं तद्बहिर्वृत्तं तद्बहिश्चतुर्द्वारयुतं चतुरश्रत्रयं रचयेत्, इति पूजाचक्रं निर्माय, षट्कोणमध्ये वाग्भवमायाकामराजबीजत्रयं पङ्क्त्याकारेण विलिख्य स्वाग्रादिषट्कोणेषु प्रादक्षिण्येन च अकारादिबीजषट्कं विलिखेत्। ततोऽर्घ्यादिपात्राण्यासाद्य पूजोपकरणानि सम्प्रोक्ष्य ''ॐह्रींहंसः सोहं स्वाहा'' इति मन्त्रेण स्वशरीरं गन्धादिभिरलङ्कृत्य, स्वात्मानं देवीरूपं विभाव्य प्राग्वत् मूलाधारे चतुरस्रं कुण्डलिरूपमग्निं

---

[1] 'पूर्वभागे' ग. पाठः।

सञ्चिन्त्य, मूलं०

धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा।।

एवं पापं जुहोमि स्वाहा, इत्थं पुण्यपापकृत्याकृत्यसङ्कल्पविकल्पधर्मान् हुत्वा, पुनर्मूलं०

प्रकाशामर्शहस्ताभ्यामवलम्ब्योन्मनीस्रुचम्। धर्माधर्मकलास्नेहपूर्णां बह्नौ जुहोम्यहम्।।

अधर्मं जुहोमि स्वाहा, इति पूर्णाहुतिं हुत्वा देवीरूपमात्मानं ध्यात्वा मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य, पूजापीठमर्घ्योदकेनाभ्युक्ष्य, षट्कोणे ओंकारपीठाय नमः। अष्टदले ओं पूर्णगिरिपीठाय नमः। चतुरश्रे—ओं कामपीठाय नमः।। इति सम्पूज्य, पीठाद्बहिश्चतुर्दिक्षु ओं गं गणेशाय नमः, ओं क्षं क्षेत्रपालाय नमः, ओं दुंदुर्गायै नमः, ओं वं वटुकाय नमः, इति सम्पूज्याग्नेयादिकोणेषु ओं जंजयायै नमः, ओं विंविजयायै०, ओं जंजयन्त्यै०, ओं अंअपराजितायै नमः। पद्मनालमूले आं आधारशक्त्यै नमः, कूं कूर्माय नमः, ओं शेषाय०, पृं पृथिव्यै०, नां नालाय०, पं पद्माय०, इति सम्पूज्याष्टदलकर्णिकायां षट्कोणाद्बहिः ओं विं विष्णुमायायै नमः, एवं चें चेतनायै०, बुं बुद्ध्यै०, निं निद्रायै०, क्षुं क्षुधायै०, इति पञ्चशक्तीः सम्पूज्य, दक्षिणदिशि ओं छां छायायै नमः, शं शक्त्यै, तृं तृष्णायै०, क्षां क्षान्त्यै०, जां जात्यै०, लं लज्जायै०, इति शक्तिषट्कं सम्पूज्य, पश्चिमदिशि ओं शां शान्त्यै नमः, श्रं श्रद्धायै०, कां कान्त्यै०, लं लक्ष्म्यै०, धृं धृत्यै०, वृं वृत्यै०, इति शक्तिषट्कं सम्पूज्य, उत्तरदिशि ओं स्मृं स्मृत्यै नमः, दं दयायै०, तु तुष्ट्यै०, पुं पुष्ट्यै०, मां मात्रे०, भ्रां भ्रान्त्यै०, इति शक्तिषट्कं सम्पूजयेदिति प्रादक्षिण्येन त्रयोविंशतिदेवताः सम्पूज्य, मध्यबीजे मूलं० "श्रीमहालक्ष्म्या मूर्तये नमः" इति मूर्तिं सम्पूज्य, कराभ्यां पुष्पाञ्जलिमादाय हृदयकमले यथोक्तरूपां साङ्गां सावरणां महालक्ष्मीं ध्यात्वा, तत्तेजोरूपतामादाय सुषुम्णवर्त्मना ब्रह्मरन्ध्रं नीत्वा प्रवहन्नासारन्ध्रेण पुष्पाञ्जलौ संयोज्य मूलेन तत्तेजः समानीय,

ध्यायामि मनसा दुर्गां नाभिमध्ये व्यवस्थिताम्। आवाहयेत् ततो दुर्गां संसारभयतारिणीम्।। १।।
कल्याणजननीं सत्यां कामदां करुणाकराम्। अनन्तशक्तिसम्पन्नां दुर्गामावाहयाम्यहम्।। २।।
महापद्मवनान्तःस्थे कारणानन्दविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि।। ३।।

इति पुष्पाञ्जलिप्रक्षेपेणावाह्य, आवाहनादिनवमुद्राः प्रदर्श्य,

देवेशि भक्तिसुलभे सर्वावरणसंयुते। यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव।। ४।।

इति प्रार्थ्य,

ओं दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदे शिवे। आसनं मम भूत्यर्थं गृहाण त्वं सुरेश्वरि।। ५।।

इत्यासनम्।

ओं स्वागतं कुशलं पृच्छे महादेवि महेश्वरि। सुस्वागतं त्वया भद्रे कृपया भक्तवत्सले।। ६।।

इति। स्वागतम्।

जगत्पूज्ये त्रिलोकेशि दैत्यदानवभञ्जनि। अष्टाङ्गार्घ्यं गृहाण त्वं देवि विश्वार्तिहारिणि।। ७।।

इत्यर्घ्यम्।

कात्यायनि महादुर्गे चामुण्डे शङ्करप्रिये। पाद्यं गृहाण देवेशि भद्रकालि नमोऽस्तु ते।। ८।।

इति पाद्यम्।

सर्वलोकस्य या माता या माता लोकपावनी। ददाम्याचमनं तस्यै महालक्ष्म्यै प्रयत्नतः।। ९।।

इत्याचमनीयम्।

कपिलादधि कुन्देन्दुधवलं मधुसंयुतम्। स्वर्णपात्रस्थितं देवि मधुपर्कं गृहाण मे।। १०।।

इति मधुपर्कम्।

कर्पूरवासितं वारि निर्मलं शुद्धिहेतुकम्। गृहाण परमेशानि पुनराचमनीयकम्।। ११।।

इति पुनराचमनीयम्।

ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि। स्नानं गृहाण देवेशि तीर्थोदकविभूषितम्।। १२।।

इति स्नानम्।

वस्त्रं स्वच्छं महार्हं वै पट्टसूत्रविनिर्मितम्। गृहाण सुभगे देवि मे दुकूलं सुरार्चिते।। १३।।

इति वस्त्रम्।

सुरासुरशिरोरत्ननिर्घृष्टचरणाम्बुजे। अलङ्कारान् गृहाण त्वं नानारत्नविभूषितान्।। १४।।

इति अलङ्कार:।

श्रीखण्डागुरुकर्पूररोचनानाभिसंयुतम्। गृहाण गन्धं मे देवि सर्वकामफलप्रदे।। १५।।

इति चन्दनम्।

नानापुष्पविचित्राढ्यां पुष्पमालां सुशोभिताम्। प्रयच्छामि महादेवि गृहाण त्वं सुरेश्वरि।। १६।।

इति पुष्पाणि। इति पुष्पान्तानुपचारानुपचर्य, श्रीभगवति परिवारपूजार्थमनुज्ञां देहि इति प्रार्थ्य, मध्ये प्रथमबीजे ऊँ महासरस्वत्यै नम:। तृतीयबीजे ऊँ महाकाल्यै नम:। महालक्ष्म्या: पृष्ठे ब्रह्मसरस्वतीभ्यां नम:। महासरस्वतीपृष्ठे रुद्रगौरीभ्यां नम:। महाकाल्या: पृष्ठे हृषीकेशलक्ष्मीभ्यां नम:। महालक्ष्म्या वामाग्रे मं महिषासुराय नम:। दक्षाग्रे सिं सिंहाय नम:, इति सम्पूज्य षट्कोणेषु पूर्वादि ऊँ नन्दजायै नम:, ऊँ रक्तदन्तिकायै० ऊँ शाकम्भर्य्यै०, ऊँ दुर्गायै०, ऊँ भीमायै०, ऊँ भ्रामर्य्यै नम: इति सम्पूज्य, षट्कोणाद्बहि: कर्णिकायामेवं षडङ्गानि सम्पूज्य, अष्टदलेषु ब्राह्म्याद्यष्टमातृका: सम्पूज्य, चतुरस्रे प्रथमवीथ्यामिन्द्रादीन्, द्वितीयवीथ्यां वज्रादीन् सम्पूज्य, मूलं० साङ्गायै सपरिवारायै श्रीमहालक्ष्म्यै नम: इति पुष्पाञ्जलीन् दद्यात्।

गुग्गुलं घृतसंयुक्तमगुर्वादिसमाहितम्। दशाङ्गं गृहाण धूपं भद्रकालि नमोऽस्तु ते।। १७।।

इति धूपम्।

रक्तसूत्रलसद्वर्ति गोघृतेन च पूरितम्। दीपं गृहाण देवेशि नमस्त्रैलोक्यसुन्दरि।। १८।।

इति दीपम्।

दिव्यान्नं रससम्पुष्टं नानाभक्ष्यैस्तु संस्कृतम्। चोष्यपेयसमायुक्तमन्नं देवि गृहाण मे।। १९।।

इति नैवेद्यम्। इति नैवेद्यं समर्प्य देवीं भुञ्जानां भावयत् मूलं दशवारे जपित्वा शुद्धोदकं देव्यै निवेद्य, स्मार्ताग्नौ मूलेन पञ्चविंशत्याहुतीर्हुत्वा षडङ्गमन्त्रै: षडाहुती: आवरणदेवतानामेकैकामाहुतिं हुत्वा पूजास्थानमागत्य, स्ववामाग्रे त्रिकोणमण्डलेऽन्नव्यञ्जनयुतं साधारबलिपात्रं निधाय "ऊँह्रीं सर्वविघ्नकृद्भ्य: सर्वभूतेभ्यो हुं फट्" सर्वभूतेभ्य एष बलिर्नम:। इति मन्त्रेण बलिमुत्सृज्य देव्यै उत्तरापोशानादिकं दत्त्वा, तत:

गृहाण देवि ताम्बूलं कर्पूरेण सुवासितम्। पूगीफलसमायुक्तं सचूर्णं मुखमण्डनम्।। २०।।

इति ताम्बूलम्।

मङ्गले कालिके दुर्गे मंहिषासुरसूदनि। नीराजनं मया दत्तं गृहाण सुरसुन्दरि।। २१।।

इति नीराजनम्।

दुर्गे देवि नमस्तुभ्यं सकलासुरनाशिनि। पुष्पाञ्जलिं गृहाण त्वं मया दत्तं सुरार्चिते।। २२।।

इति पुष्पाञ्जलिः।

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके दुर्गे कात्यायनि नमोऽस्तु ते।।२३।।

इति नमस्कारः।

मया जन्मसहस्रेषु अर्जितं पापसञ्चयम्। तत्सर्वं नाशय क्षिप्रं प्रदक्षिणपदे पदे।। २४।।

इति प्रदक्षिणम्।

पूजायाः सद्गुणार्थं तु दक्षिणा दीयते मया। तां गृहाण महेशानि पूजा मे सफलां कुरु।। २५।।

इति हिरण्यम्।

महिषघ्नि महामाये चामुण्डे पापहारिणि। यशो देहि धनं देहि तव भक्तिं च देहि मे।। २६।।

इति प्रार्थना। ततो मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य सप्तशतीपाठं कुर्यात्।। तत्र अद्येत्यादिसङ्कल्पं कृत्वा, प्रथमचरित्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, महाकाली देवता, रक्तदन्तिका बीजं, नन्दा शक्तिः, अग्निस्तत्त्वं प्रथमचरित्रजपे विनियोगः। मध्यमचरित्रस्य विष्णुर्ऋषिः, पङ्क्तिश्छन्दः, महालक्ष्मीर्देवता, दुर्गा बीजं, शाकम्भरी शक्तिः वायुस्तत्त्वं मध्यमचरित्रजपे विनियोगः। उत्तमचरित्रस्य रुद्र ऋषिः, अनुष्टुप् छन्दः, महासरस्वती देवता, भ्रामरी बीजं, भीमा शक्तिः, सूर्यस्तत्त्वं उत्तमचरित्रजपे विनियोगः, इति विन्यस्य पठेत्।। पूजायन्त्रस्य चतुरस्राद्बहिः प्राच्यां रँ उड्याणपीठाय नमः, मुण्डेश्वरनाथाय नमः, मुण्डाम्बापादुकां पूजयामि नमः। एवं आग्नेये रँ मातृकापीठाय०, मातृकाचक्रेश्वरनाथाय०, मातृकाम्बापा०। दक्षिणे रँ जालन्धरपीठाय०, जालामुखनाथाय०, जालाम्बापा०। नैर्ऋत्ये रँ कोलापुरपीठाय०, कोलापुरेश्वरनाथाय०, कोलाम्बापा०। पश्चिमे रँ पूर्णगिरिपीठाय नमः, पूर्णेश्वरनाथाय०, पूर्णाम्बापा०। वायव्ये रँ चौहारपीठाय०, चौहारनाथाय०, चौहाराम्बापा०, उत्तरे रँ कोलगिरिपीठाय०, कोलनाथाय०, कोलाम्बापा०। ऐशान्यां रँ कामरूपपीठाय०, कामरूपनाथाय०, कामाम्बापा०। मध्ये रँ योगिनीपीठाय नमः। तत आग्नेयादिकोणेषु वेतालान्, पूजयेत्, अग्निमुखाय नमः, प्रेतवाहनाय० ज्वालामुखाय नमः, धूम्राक्षाय नमः। ततो मध्ये षट्कोणेषु गुरुभ्यो नमः, परमगुरुभ्यो०, परमेष्ठिगुरुभ्यो०, गणेशाय०, हरये०, हराय नमः। ततो मध्ये देवीपृष्ठभागे महालक्ष्मीहृषीकेशाभ्यां नमः, सरस्वतीविरिञ्चिभ्यां०, उमामहेश्वराभ्यां०। दक्षिणे कालाय०, रुद्राय०, महासिंहाय०। वामे मृत्यवे०, मध्ये विजयाय०, गणपाय०, महिषाय०, चण्डिकायै०। उत्तरे कालाय०, दक्षिणे यमाय नमः। इति सम्पूज्य योनिमुद्रां प्रदर्शयेत्।।

अथ जातवेदसादिमन्त्राः—ब्राह्मे मुहूर्ते उत्थाय पूर्वोक्तवद्गुरुध्यानाजपास्नानसन्ध्याभूतशुद्ध्यादिमातृकान्यासान्तं विधाय, मूलमन्त्रेण प्राणायामत्रयं कृत्वा मन्त्रन्यासान् कुर्यात्।। अस्य श्रीजातवेदसे—महामन्त्रस्य मरीचिकश्यप ऋषिः, त्रिष्टुप् छन्दः, जातवेदसेऽग्निस्वरूपिणी दुर्गा देवता ममाभीष्टसिद्ध्यर्थे विनियोगः। मरीचिकश्यपऋषये नमः शिरसि,

त्रिष्टुप्छन्दसे नमो मुखे, जातवेदसेऽग्निस्वरूपिणीदुर्गादेवतायै नमो हृदि, ममाभीष्टसिद्ध्यर्थे विनियोगाय नमः सर्वाङ्गेषु। जातवेदसे हृदयाय नमः, सुनवाम सोममरातीयतो शिरसे स्वाहा, निदहाति वेदः शिखायै वषट्, स नः पर्षदति कवचाय हुं, दुर्गाणि विश्वा नावेव नेत्रत्रयाय वौषट्, सिन्धुं दुरितात्यग्निः अस्त्राय फट्। एवमङ्गुलीन्यासः।।

ओं जां नमो दक्षपादाङ्गुष्ठे। ओं तं नमो वामे। ओं वं नमो दक्षगुल्फे। ओं दं नमो वामे। ओं सें नमो दक्षजङ्घायाम्। ओं सुं नमो वामायाम्। ओं नं नमो दक्षजानुनि। ओं वां नमो वामे। ओं मं नमो दक्षोरौ। ओं सों नमो वामे। ओं मं नमो दक्षकट्यां। ओं अरां नमो वामायाम्। ओं तीं नम अन्धुनि। ओं यं नमो नाभौ। ओं तों नमो हृदि। ओं निं नमो दक्षस्तने। ओं दं नमो वामस्तने। ओं हां नमो दक्षपार्श्वे। ओं तिं नमो वामपार्श्वे। ओं वें नमो पृष्ठे। ओं दः नमो दक्षस्कन्धे। ओं सं नमो वामे। ओं नः नमो मध्ये। ओं पं दक्षबाहुमूले। ओं रं नमो वामे। ओं पं नमो दक्षोपबाहौ। ओं दं नमो वामे। ओं तिं नमो दक्षकूपरि। ओं दुं नमो वामे। ओं र्गां नमो दक्षप्रकोष्ठे। ओं णिं नमो वामे। ओं विं नमो दक्षमणिबन्धादितलान्ते। ओं श्वां नमो वामे। ओं नां नमो मुखे। ओं वें नमो दक्षनासिकायाम्। ओं वं नमो वामायाम्। ओं सिं नमो दक्षनेत्रे। ओं न्धुं नमो वामे। ओं दूं नमो दक्षकर्णे। ओं रिं नमो वामे। ओं तां नमो ललाटे। ओं त्यं नमो मस्तिष्के। ओं ग्निं: मूर्ध्नि। इत्यक्षरन्यासः।।

जात शिखायाम्। वेदसे ललाटे। सुनवाम कर्णयोः। सोमं नासिकायाम्। अराती चक्षुषोः। यत ओष्ठयोः। नि दन्तेषु। दहाति तालुनि। वेदः जिह्वायां। स ग्रीवायां। नः बाह्वोः। पर्षत् स्तनयोः। अति हृदये। दुः कुक्षौ। गाणि नाभौ। विश्वा पृष्ठे। नावा पायौ। इव वृषणयोः। सिन्धुं शिश्ने। दुः कट्योः। इता ऊर्वोः। अति जङ्घयोः। अग्निः पादयोः। अग्नी रक्षतु। इति पदन्यासे सृष्टिः।। ततः समग्रमन्त्रेण व्यापकं विन्यस्य,

जातवेदसे पादयोः। सुनवाम अङ्गुलीषु। सोमं जानुनोः। अरातीयतो ऊर्वोः। नि गुह्ये। दहाति कट्योः। वेदः नाभौ। स हृदये। नः पृष्ठे। पर्षत् वाह्वोः। अति कण्ठे। दुर्गाणि वक्त्रे। विश्वा चक्षुषोः। नावेव नासिकायोः। सिन्धुं कर्णयोः। दुरिता ललाटे। अति मुकुटे। अग्निः मूर्ध्नि।।

पादयोः विष्णवे नमः। हृदि ब्रह्मणे नमः। मूर्ध्नि परमात्मने नमः। शिखायां सप्तऋषिभ्यो नमः। नासिकायां सप्तवायुभ्यो नमः। चक्षुषोः शशिभास्कराभ्यां नमः। श्रोत्रयोः अश्विनीयदेवाभ्यां नमः। जिह्वायां सरस्वत्यै नमः। वाचि अग्नये नमः। दन्तेषु मरुद्भ्यो नमः। कण्ठे देवेभ्यो नमः। हृदि वरुणाय नमः। उदरे हव्यवाहनाय नमः। कुक्षौ पृथिव्यै नमः। कट्यां नवग्रहेभ्यो नमः। नाभौ मेरवे नमः। अस्त्रे जातवेदसे नमः। शिखायां आज्यस्थाल्यै नमः। शिरसि आज्याय नमः। नेत्रयोः ज्योतिषे नमः। कवचे बर्हिषे नमः।। उद्यन्तः शक्तिः ज्वलन्तः प्रहरणं बद्धगोधाङ्गुलित्राणं,

यस्याः सिंहो रथे युक्तो व्याघ्रा यस्यानुगामिनः। तामिमां रुद्रसंयुक्तां दुर्गामावाहयाम्यहम्।।

आयातु दुर्गा दुर्गरूपा अभयं मे ददातु तां दुर्गां कुमारीमृषिभिश्च पूजितां शरणमहं प्रपद्ये। ओं दुर्गायै नमः, ओं याम्यै०, ओं रौद्र्यै०, ओं आदित्यायै०, ओं कात्यायन्यै०, ओं गौर्य्यै०, ओं धात्र्यै०, ओं शक्त्यै०, ओं चामुण्डायै०, ओं सरस्वत्यै०, इति नवशक्तियुक्तां,

शङ्खं खेटं तथा बाणान् वामे चाभयदायिनीम्। धनुश्चक्रं तथा पात्रं दक्षिणे सुवरप्रदम्।।
चक्रखड्गशराञ्छूलं लोहमुष्टिं च तोमरम्। बलयं भिण्डिपालं च दधानां चोत्तरे भुजे।।
परिघं चाङ्कुशं चैव धारयन्तीं त्रिलोचनाम्। सिध्यन्ति सर्वकार्याणि निश्चितं हि द्विजोत्तम।।

ऋग्वेदसंस्तुता देवी कश्यपेन प्रकीर्तिता। जातवेद:प्रभां देवीं भुक्तिमुक्तिविधायिनीम्।।

मेरुपर्वतकुभां व्याघ्रानुसारिणीं सिंहचतुर्मुखवाहिनीमष्टादशभुजां शुक्लवस्त्रां शुक्तवासिनीं सर्वाभरणभूषितां जातवेदसेदेवीं ध्यात्वा मानसैरुपचारैः सम्पूज्य, तदेव देवीस्वरूपं स्वात्मनमित्यभेदभावनां कृत्वा रक्षाषडङ्गं कुर्यात्। ओं हरहरिणि मालिनि शूलिनि दुष्टग्रहनिवारिणिभ्यां स्वाहा हृदयाय नम:। अग्नितेजोज्वालामालिनि शिरसे स्वाहा। चन्द्रतेजोज्वालामालिनि शिखायै वषट्। ब्रह्मतेजोज्वालामालिंनि कवचाय हुं। आदित्यतेजोज्वालामालिनि नेत्रत्रयाय वौषट्। विष्णुतेजोज्वालामालिनि सर्वतेजोज्वालामालिनि ज्वलज्वालामालिनि शूलिनि दुष्टग्रहनिवारिणि देवि दह जातवेदससम्भूते स्वाहा अस्त्राय फट्। इति षडङ्गं कृत्वा,

"ओं जातवेदसे सुनवाम सोमं सुरासुरैर्द्विजगणैः पिशाचोरगराक्षसैः रात्रौ भये समुत्पन्ने अरातीयतो निदहाति वेदः राजद्वारे भये घोरे सङ्ग्रामे शत्रुसङ्कटे सर्वं रक्षति दुरितं सनः पर्षदति दुर्गाणि विश्वा महद्भये समुत्पन्ने स्मरन्ति च पठन्ति सर्वं तरति दुर्गा नावेव सिन्धुं दुरितात्यग्निः" इति पठन् स्वात्मानं स्वप्रकाशचिदानन्दमग्नं देवतामयं ध्यात्वा मूलषडङ्गं कुर्यात्। ओं जातवेदसे सुनवाम हलाहलिनि ज्वलज्वालामालिनि बद्धगोधाङ्गुलित्राणिनि हृदयाय नम:। सोममरातीयतो हलाहलिनि ज्वलज्वालामालिनि बद्धगोधाङ्गुलित्राणिनि शिरसे स्वाहा। निदहाति वेदः हलाहलिनि ज्वलज्वालामालिनि बद्धगोधाङ्गुलित्राणिनि शिखायै वषट्। स नः पर्षदति हलाहलिनि ज्वलज्वालामालिनि बद्धगोधाङ्गुलित्राणिनि कवचाय हुं। दुर्गाणि विश्वा नावेव हलाहलिनि ज्वलज्वालामालिनि बद्धगोधाङ्गुलित्राणिनि नेत्रत्रयाय वौषट्। सिन्धुं दुरितात्यग्निः हलाहलिनि ज्वलज्वालामालिनि बद्धगोधाङ्गुलित्राणिनि अस्त्राय फट्। इति षडङ्गं कृत्वा मन्त्रेण सर्वाङ्गं व्याप्य, स्ववामभागे कलशस्थापनं कृत्वा, स्वदक्षिणभागे शङ्खं संस्थाप्य मध्येऽर्घ्यादिपञ्चपात्राणि संस्थाप्य, देवीसूक्तेन देवीमभिषिच्य पीठपूजां कुर्यात्। ओं कालाग्निरुद्राय नम:। मण्डूकाय०, आधारशक्त्यै०, कूर्माय०, अनन्ताय०, वराहाय०, पृथिव्यै०। एवमुपर्युपरि सम्पूज्य, क्षीरसमुद्राय नमः, श्वेतद्वीपाय०, कल्पवृक्षाय नमः, रत्नवेदिकायै नमः,। रत्नसिंहासनाय नम:। आग्नेयादि धर्माय०, ज्ञानाय०, वैराग्याय०, ऐश्वर्याय०, एते पादरूपिणः।। अधर्माय०, अज्ञानाय०, अवैराग्याय०, अनैश्वर्याय०, एते सिंहासनगात्ररूपिणः, इति सम्पूज्य, तदुपरि ह्रीं मायायै० ह्रीं चिच्छक्त्यै०। तदुपरि आनन्दकन्दाय०, संविन्नालाय०, प्रकृतिमयपत्रेभ्यो०, विकारमयकेसरभ्यो०, पञ्चाशद्वर्ण वीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै०। तदधः अं अर्कमण्डलाय०, सं सोममण्डलाय०, रं वह्निमण्डलाय०, सं सत्त्वाय०, रं रजसे०, तं तमसे०, अं अन्तरात्मने०, आं आत्मने०, पं परमात्मने०, ह्रीं ज्ञानात्मने०, आत्मतत्त्वाय०, मायातत्त्वाय०, विद्यातत्त्वाय०, कलातत्त्वाय०, मध्ये परमतत्त्वाय०, इति सम्पूज्य केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च पीठशक्तीः प्रपूजयेत्। ह्रीं जं जयायैः, ह्रीं विं विजयायै०, ह्रीं भं भद्रायै०, ह्रीं भं भद्रकाल्यै०, ह्रीं सुं सुमुख्यै०, ह्रीं दुं दुर्मुख्यै०, ह्रीं व्यां व्याघ्रमुख्यै०, ह्रीं सिं सिंहमुख्यै०, मध्ये—ह्रीं दुं दुर्गायै०, इति सम्पूज्य 'ओं वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः, इति पीठं सम्पूज्य, तदुपरि मूलमन्त्रमुच्चरन् देवीयन्त्रं संस्थाप्यावाहनं कुर्यात्।

यस्याः सिंहो रथे युक्तो व्याघ्रा यस्यानुगामिनः। तामिमां रुद्रसंयुक्तां दुर्गामावाहयाम्यहम्।।

इत्यावाह्य आवाहिता भव, आस्थापिता भव, सन्निरोधिता भव, सम्मुखी कृता भव, अवगुण्ठिता भव, सकलीकृता भव, परमीकृता भव, अमृतीकृता भव, इत्युच्चरन् तत्तन्मुद्राः प्रदर्शयेत्।। ध्यानम्—

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्रगदासिखेटविशिखं चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत्।।

इति ध्यात्वा, मूलमन्त्रेणार्घ्यपाद्याचमनीयमधुपर्कादिषोडशोपचारपूजां कृत्वा आवरणपूजामारभेत्। यथा आग्नेयकोणे जावतेदसे सुनवाम हृदयाय नमः। ईशानकोणे सोममरातीयतः शिरसे स्वाहा। नैर्ऋत्ये निदहाति वेदः शिखायै वषट्। वायव्ये स नः पर्षदति कवचाय हुं। मध्ये दुर्गाणि विश्वानावेव नेत्रत्रयाय वौषट्। पूर्वादिचतुर्दिक्षु सिन्धुं दुरितात्यग्निः अस्त्राय फट्। इति षडङ्गपूजाप्रथमावरणम्।।

ततोऽष्टदलेषु पूर्वादिप्रादक्षिण्येन जातवेदसे नमः, सप्तजिह्वाय नमः, हव्यवाहनाय०, अश्वोदरजाय[१]० वैश्वानराय०, कौमारतेजसे० विश्वमुखाय०, देवमुखाय नमः। इति द्वितीयावरणम्।।

ततः पत्राग्रेषु पूर्वादिचतुर्दिक्षु ॐ पृथिव्यात्मने०, सलिलात्मने०, अग्न्यात्मने०, वाय्वात्मने०। आग्नेयादिकोणेषु निवृत्त्यै०, प्रतिष्ठायै०, विद्यायै०, शान्त्यै नमः। इति तृतीयावरणम्।।

ततः पूर्वादिकोणेषु (दिग्विदिक्षु) प्रादक्षिण्येन वच[२]नात्मिकाभिमुखीभ्योऽधोमुखीभ्यः स्त्रीदेवताभ्यो नमः, ॐ जां जागरायै०, ॐ तं तपनायै०, ॐ वें वेदगर्भायै०, ॐ दं दहनरूपिण्यै०, ॐ सें सेन्दुखण्डायै०। शब्दस्पर्शरूपरसगन्धात्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः स्त्रीदेवताभ्यो नमः, ॐ सुं सुम्भहन्त्र्यै०, ॐ नं नभश्चारिण्यै०, ॐ वां वागीश्वर्यै०, ॐ मं मन्दवाहायै०, ॐ सों सोमरूपायै०। षाट्कोशिकमयात्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः क्लीवदेवताभ्यो नमः। ॐ मं मनोजवायै०, ॐ मं मरुद्वेगायै०, ॐ रां रात्र्यै०, ॐ तीं तीव्रकोपायै०, ॐ यं यशोवत्यै०, ॐ तों तोयात्मिकायै०। षडूर्म्यात्मिकाभिमुखीभ्यः ऊर्ध्वमुखीभ्यः क्लीवदेवताभ्यो नमः। ॐ निं नित्यायै०, ॐ दं दयावत्यै०, ॐ हां हारिण्यै०, ॐ तिं तिरस्क्रियायै०, ॐ वें वेदमात्रे०, ॐ दंः दमनप्रियायै०। सप्तधात्वात्मिकाभिमुखीभ्य उभयमुखीभ्यः क्लीवदेवताभ्यो नमः। ॐ सं समाराध्यायै०, ॐ नंः नन्दिन्यै०, ॐ पं पराक्यै०, ॐ रं रिपुमर्दिन्यै०, ॐ षं षष्ठ्यै०, ॐ दं दण्डिन्यै०, ॐ तिं तिग्मायै०। पञ्चभूतात्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः क्लीवदेवताभ्यो नमः। ओं दुंः दुर्गायै०, ओं गां गायत्र्यै०, ओं णिं निरवद्यायै०, ओं विं विशालाक्ष्यै०, ओं श्वां श्वासोद्वाहायै०। कर्मेन्द्रियात्मिकाभिमुखीभ्य ऊर्ध्वमुखीभ्यः स्त्रीदेवताभ्यो नमः। ओं नां नादिन्यै०, ओं वें वेदनायै०, ओं वं वह्निगर्भायै०, ओं सिं सिहवाहाह्वयायै०, ओं धुं धुर्यायै०। ज्ञानेन्द्रियात्मिकाभिमुखीभ्य ऊर्ध्वमुखीभ्यः स्त्रीदेवताभ्यो नमः। ओं दुं दुर्विषयायै०, ओं रिं रिरंसायै०, ओं तां तापहारिण्यै०, ओं त्यं त्यक्तदोषायै०, ओं ग्निंः निःसपत्नायै०। एताः प्रज्वलत्केशवदनाः भीमदंष्ट्रा भयापहा ध्येयाः। इति चतुर्थावरणम्।।

ततस्तद्बहिः पूर्वादिदले लं इन्द्राय०, रं अग्नये०, मं (टं) यमाय०, क्षं निर्ऋतये०, वं वरुणाय०, यं वायवे०, सं कुबेराय०, हौं ईशानाय०। इति पञ्चमावरणम्।।

ततस्तद्बहिः वं वज्रायुधाय०, शं शक्त्यायुधाय०, दं दण्डायुधाय०, खं खड्गायुधाय०, पां पाशायुधाय०,

---

१. 'राय' ख. पाठः। २. 'दवना' क. पाठः।

क्रों अङ्कुशायुधाय०, गं गदायुधाय०, शूं शूलायुधाय०, इति षष्ठावरणम्।। एवं सम्पूज्य नैवेद्यादिकं निवेद्य आरात्रिकापुष्पाञ्जल्यन्तं समर्प्य, मूलमन्त्रेण प्राणायामत्रयं कृत्वा यथाशक्ति जपित्वा "गुह्यातिo" इति मन्त्रेण जपफलं समर्प्य पूर्वोक्तमन्त्रैर्दिक्पालेभ्यो बलिं हरेत्। एवं गायत्रीजपद्विगुणसहितचतुश्चत्वारिंशत्सहस्राणि जपित्वा तिलसर्षपचित्र-मूलसमिद्भिरुडम्बरप्लक्षाश्वत्थसमिद्भिराज्याक्तहविष्यान्नेन दशांशतो होतव्यं, कृतपुरश्चरणो भवति। तत आग्नेयास्त्राधिकारी भवति।। तदुक्तं शारदाम्— (२१। ३५)

आग्नेयमभिधास्यामि मन्त्रं सर्वार्थसाधनम्। मारीचः कश्यपः प्रोक्तो मुनिरस्य महामनोः।। १।।
त्रिष्टुप्छन्दो देवतात्र जातवेदोऽग्निरीरितः। नवभिः सप्तभिः षड्भिः सप्तभिः पुनरष्टभिः।। २।।
सप्तभिः मूलमन्त्रार्णैः षडङ्गविधिरीरितः। अङ्गुष्ठगुल्फजङ्घासु जानुनोरूरुयुग्मके।। ३।।
कट्यन्धुनाभिषु हृदि स्तनयोः पार्श्वयोः द्वयोः। पृष्ठतः स्कन्धयोर्मध्ये बाहुमूलोपबाहुषु।। ४।।
प्रकूर्परप्रकोष्ठेषु मणिबन्धतलेष्वपि । मुखनासाक्षिकर्णेषु मस्तमस्तिष्कमूर्धसु।। ४।।
क्रमेण विन्यसेद्वर्णान् मन्त्री मन्त्रसमुद्भवान्। शिखाललाटनयनकर्णौष्ठरदनास्वथ।। ६।।
सकण्ठबाहुहृत्कुक्षिकटिगुह्योरुजानुषु। जङ्घयोः पादयोर्न्यसेत् पदान्यस्य मनो सुधीः।। ७।।

"विद्युद्दामसमप्रभां" इत्यादिध्यानम्।

मन्त्रवर्णसहस्राणि जपेन्मन्त्रं विशालधीः। तदन्ते तिलसिद्धार्थचित्रमूलैः समिद्वरैः।। ८।।
क्षीरद्रुमाणामाज्येन हविष्यान्नैर्घृतप्लुतैः। चतुश्चत्वारिंशदाढ्यं चतुःशतसमन्वितम्।। ९।।
चतुःसहस्रं जुहुयादर्चिते हव्यवाहने। मण्डले सर्वतोभद्रे षट्कोणाङ्कितकर्णिके।। १०।।
विधिना वक्ष्यमाणेन पीठं देव्याः प्रपूजयेत्। जयाख्यां विजयां भद्रां भद्रकालीमनन्तरम्।। ११।।
सुमुखीं दुर्मुखीसंज्ञां पश्चाद्व्याघ्रमुखीं पुनः। अथ सिंहमुखीं दुर्गां नव शक्तीः प्रपूजयेत्।। १२।।
आसनं सिंहमन्त्रेण दद्यादुक्तेन देशिकः। प्रणवानन्तरं वज्रनखदंष्ट्रायुधाय च ।। १३।।
महासिंहाय वर्मास्त्रनतिः सिंहमनुः स्मृतः। मूर्तिं सङ्कल्प्य मूलेन तस्यामावाह्य पूजयेत्।। १४।।
षडङ्गानि यथापूर्वं केसरेष्वर्चयेत् सुधीः। ग्न्यादिपादाष्टकोत्पन्ना मूर्तयोऽर्च्या बहिः पुनः।। १५।।
जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः। अश्वोदरजसंज्ञोऽन्यः पुनर्वैश्वानराह्वयः ।। १६।।
कौमारतेजाः स्याद्विश्वमुखो देवमुखस्ततः। ततो भूसलिलाग्नीरानात्मनेन्तान् नमोन्वितान्।। १७।।
चतुर्दिक्षु समभ्यर्चेत् कोणेषु तत्कलाः पुनः। पूर्वादिदिक्षु सम्पूज्या जार्णाद्याः सार्णशक्तयः।। १८।।
जागरा तपना वेदगर्भा दहनरूपिणी। सेन्दुखण्डा सुम्भहन्त्री नभश्चारिण्यनन्तरम्।। १९।।
वागीश्वरी मन्दवाहा[1] सोमरूपा मनोजवा। मरुद्वेगा रात्रिसंज्ञा तीव्रकोपा यशोवती ।। २०।।
तोयात्मिका पुनर्नित्या दयावत्यपि हारिणी। तिरस्क्रिया देवमाता तत्परा दमन[2]प्रिया।। २१।।
समाराध्या नन्दिनी च पराकी रिपुमर्दिनी। षष्ठी च दण्डिनी तिग्मा दुर्गा गायत्र्यनन्तरम्।। २२।।

---

१. 'मदवहा' ख. पाठः। २. 'मदन' ख. पाठः।

निरवद्या विशालाक्षी श्वासोद्वाहा च नादिनी। वेदना वह्निगर्भाख्या सिंहवाहाह्वया तथा।। २३।।
धुर्या दुर्विषया[1] पश्चात् रिरंसा तापहारिणी। त्यक्तदोषा निःसपत्ना चत्वारिंशच्चतुर्युताः।। २४।।
लोकपालांस्ततोऽभ्यर्चेद्वज्राद्यायुधसंयुतान्। इत्थं जपादिभिः सिद्धे मन्त्रेऽस्मिन् साधकोत्तमः।। २५।।
आग्नेयास्त्राधिकारी स्यात् तद्विधानमिहोच्यते।..।।

अस्य श्री आग्नेयास्त्रमन्त्रस्य मरीचिपुत्रकश्यप ऋषिः त्रिष्टुप् छन्दः उग्रकृत्या देवता शत्रुक्षयार्थे जपे विनियोगः। प्रतिलोममन्त्रेण करशुद्धिं कृत्वा ''ग्निस्त्यतारिदु धुंसि'' अस्त्राय फट्। 'ववेना श्वाविणि र्गादु' नेत्रत्रयाय वौषट्। 'तिदषरप नः स' कवचाय हुं। दःवे तिहादनि' शिखायै वषट्। 'तोयतीराममसो' शिरसे स्वाहा। 'मवानसु सेदवेतजा'. हृदयाय नमः। इति षडङ्गं कृत्वा, अक्षरन्यासपदन्यासान् प्रतिलोमेन कृत्वा गुरूपदिष्टमार्गेण ध्यात्वा, ब्रह्मास्त्रद्विगुणजपसहितं प्रतिलोममन्त्रं चतुश्चत्वारिंशत्सहस्रसंख्याकं जप्त्वा पञ्चगव्येन पक्त्वा चरुणा दशांशेन होमः कार्यः। अस्त्रसिद्धिर्भवति।। तथा—

....। आग्नेयास्त्रमिति प्रोक्तं विलोमोच्चरितो[2] मनुः।। २६।।
पूर्वोक्ता एव मुन्याद्या मन्त्रस्यास्य प्रकीर्तिताः। प्रतिलोमक्रमादस्य षडङ्गानि प्रकल्पयेत्।। २७।।
वर्णन्यासपदन्यासान् विदध्यात् प्रतिलोमतः। ध्यानभेदान् विजानीयात् गुर्वादेशान्न चान्यथा।।२८।।
पूर्ववज्जपक्लृप्तिः स्याज्जुहुयात् पूर्वसंख्यया। पञ्चगव्यसुपक्वेन चरुणा तस्य सिद्धये।। २९।।
अर्चनं पूर्ववत् कुर्याच्छक्तेस्तु प्रतिलोमतः। सर्वत्र देशिकः कुर्याद् गायत्र्या द्विगुणं जपम्।। ३०।।
क्रूरकर्माणि कुर्वीत प्रतिलोमविधानतः। शान्तिकं पौष्टिकं कर्म कर्तव्यमनुलोमतः।। ३१।।
प्रयोगकाले प्रजपेदष्ट पादान् विलोमतः। साधितो जायते पश्चान्मन्त्रोऽयं विधिनामुना।। ३२।।
ग्न्यादिपञ्चाक्षरः पादो ज्ञेयो ज्ञानेन्द्रियात्मकः। धुमाद्योऽन्यः पञ्चवर्णः स्मृतः कर्मेन्द्रियात्मकः।।३३।।
श्वाद्यस्तृतीयः पञ्चार्णः पञ्चभूतमयः स्मृतः। त्याद्यः सप्ताक्षरः पादश्चतुर्थो धातुरूपकः।। ३४।।
दःपूर्वः पञ्चमः पाद ऊर्मिरूपः शडक्षरः। तोवर्णादिः षडर्णोऽन्यः षाट्कोशिकमयो मतः।। ३५।।
सोपूर्वः[3] पञ्चवर्णोऽन्यः शब्दादिमय ईरितः। सेवर्णाद्यष्टमो ज्ञेयः पञ्चार्णो वचनादिकः।। ३६।।
एवं तत्त्वसमायोगात् पादक्लृप्तिरुदीरिता। तत्तत्पादाक्षरोत्पन्नास्तावत्यो वर्णदेवताः।। ३७।।
प्रधानमूर्तिप्रतिमाः स्वस्ववर्णोदितप्रभाः। प्रज्वलत्केशवदना भीमदंष्ट्रा भयापहाः।। ३८।।
देवता इन्द्रियोत्पन्ना ऊर्ध्वदृष्टय ईरिताः। देवता भूतपादोत्थास्तिर्यग्वक्त्राः प्रकीर्तिताः।। ३९।।
धातुरूपाक्षरोद्भूता उभयाननशोभिताः। ऊर्मिजा ऊर्ध्ववदनाः कोशोत्थास्तिर्यगाननाः।। ४०।।
एताः सर्वाः स्मृताः क्लीवा इन्द्रियार्थोद्भवाः स्त्रियः। अधस्तिर्यङ्मुखोपेता ईरिता वर्णदेवताः।।४१।।
अभिमुख्यः स्मृताः सौम्ये पराङ्मुख्योऽन्यकर्मणि। आभ्योऽसंख्याः समुत्पन्ना देवता ज्वलिताननाः।४२।
याभिर्मन्त्री दहेच्छत्रो राज्यं सगिरिकाननम्। अस्त्रं मनुष्यनक्षत्रेष्वारभेत विचक्षणः।। ४३।।

---

१. 'पहा' ख. पाठः। २. 'पठितो' ख. पाठः। ३. 'सोवर्णात्' ख. पाठः।

आसुरीषु प्रयुञ्जीत देवतारासु संहरेत्। पूर्वोत्तरत्रयं पश्चाद्भरण्यार्द्राथ रोहिणी ।। ४४।।
इमानि मानुष्याण्याहुर्नक्षत्राणि मनीषिणः। ज्येष्ठाशतभिषामूलधनिष्ठाश्लेषकृत्तिकाः।। ४५।।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः। अश्विनी रेवती पुष्यस्वाती हस्तः पुनर्वसुः।। ४६।।
अनुराधा मृगशिरः श्रवणं देवतारकाः। उपक्रमेत नन्दासु रिक्तास्वस्त्रं विसर्जयेत्।। ४७।।
भद्रास्वाहरणं कुर्याज्जयास्वत्यन्तमुत्तमम्। उपक्रमो भौमवारे शनिवारे विसर्जनम्।। ४८।।
प्रतिसंहरणं वारे गुरो शुक्रस्य वा भवेत्। भानुना मोक्षसंहारौ कुर्यात् पक्षद्वये सुधीः।। ४९।।
स्थिरेषु राशिष्वारम्भश्चरेषु स्याद्विसर्जनम्। अस्त्रसंहरणं कुर्यार्दुभयेषु विचक्षणः ।। ५०।।
कृष्णपक्षेऽनलेनास्त्रं विसृजेच्छशिना पुनः। शुक्लपक्षे क्रमादस्त्रं पुनरात्मनि संहरेत्।। ५१।।
पश्चिमाभिमुखो भूत्वा कर्म सर्वत्र कारयेत्[1]। नक्षत्रवृक्षशकलान् साध्याख्याकर्मसंयुतान्।। ५२।।
तत्तन्मन्त्राक्षरोपेतान् मन्त्री मन्त्रार्णसंख्यया। जुहुयादेधिते वह्नौ मारयेद्रिपुमात्मनः।। ५३।।
कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशीम्। धतूरविषवृक्षाक्षभूरुहोत्थान् समिद्वरान्।। ५४।।
राजीतैलेन संयुक्तान्[2] पृथक्सप्तसहस्रकम्। जुहुयात्संयतो भूत्वा[3] रिपुर्यमपुरं व्रजेत्।। ५५।।
सप्तरात्रं प्रजुहुयात् सिद्धार्थस्नेहलोलितैः। आर्द्रवस्त्रो विष्टिकाले मरिचैर्मनुनामुना।। ५६।।
निगृह्यते ज्वरेणारिः प्रलयाग्निसमेन सः। तालपत्रे समालिख्य शत्रुनाम यथाविधि। ५७।।
आग्नेयास्त्रेण संवेष्ट्य कुण्डमध्ये निखातयेत्[4]। जुहुयान्मरिचैः क्रूद्धो ज्वराक्रान्तः स जायते।।५८।।
तदादाय क्षिपेत् तोये शीतले स वशो भवेत्। पिष्ट्वापामार्गबीजानि मरीचमधुसंयुतम्।। ५९।।
अत्युष्णे लवणे तोये निःक्षिप्य क्वाथयेत् ततः। ऋक्षवृक्षप्रतिकृतेर्हृदये वदने नसि।। ६०।।
किञ्चित्किञ्चित् क्षिपेत् तोयं दर्व्या कारस्करोत्थया। आग्नेयमुच्चरन् मन्त्री सोऽचिराज्ज्वरितो भवेत्।६१।
क्वथितेऽम्भसि तां क्षिप्त्वा हन्याच्छत्रुमयत्नतः। तीक्ष्णस्नेहेन संलिप्तां शत्रोः प्रतिकृतिं निशि।६२।
तापयेदेधिते वह्नौ प्रतिलोममनुं जपन्। ज्वरेण बाध्यते सद्यो मासादस्य मृतिर्भवेत्।। ६३।।
सामुद्रे सलिले हिङ्गुविषजीरकलोलिते। क्वथिते पुत्तलीं साध्यनक्षत्रतरुनिर्मिताम्।। ६४।।
अधोवक्त्रां विनिक्षिप्य यष्ट्या विषतरूत्थया। तच्छिरस्ताडनं कुर्वञ्जपेदस्त्रं विलोमतः।। ६५।।
सप्ताहान्मरणं याति शत्रुर्ज्वरविमोहितः। आदित्यरथनागेन्द्रग्रस्ताङ्घ्रिं तद्विषाहतम् ।। ६६।।
नग्नं तैलेन लिप्ताङ्गं दग्धं भानुमरीचिभिः। अधोमुखं निजरिपुं ध्यात्वा क्वथितवारिणा।। ६७।।
तापयेद्भानुमालोक्य शत्रुर्मृत्युप्रियो भवेत्। बिभ्रतीं मुसलं शूलं ध्यायन् कालघनप्रभाम्।। ६८।।
कार्पासबीजैर्निम्बस्य पत्रैर्मेषीघृतप्लुतैः। हुत्वा विद्वेषयेच्छत्रूनस्त्रेणानेन देशिकः ।। ६९।।
बिभ्राणां तर्जनीं शूलं ध्यात्वा दुर्गां भयङ्करीम्। महिषीघृतसम्प्लुतै[5]र्पल्लवैर्विषवृक्षजैः।। ७०।।

---

[1] 'साधयेत्' ख. पाठः। [2] 'लिप्तान्' ख. पाठः। [3] 'मन्त्री' ख. पाठः। [4] 'खन्यते' ख. पाठः। [5] 'संसिक्तैः' ख. पाठः।

हुत्वा रिपोः क्षणात् सेनामुच्चाटयति मन्त्रवित्। ध्यात्वा देवीं पुरा प्रोक्तां चतुर्भिर्मरिचान्वितैः।।७१।।
अजारुधिरसंयुक्तै[1]र्जुहुयाद् दिवसत्रयम्। रिपोरुच्चाटनं कुर्यात् सेनाया नात्र संशयः।। ७२।।
[2]असिशूलकरां दुर्गां ज्वलन्तीं प्रलयाग्निवत्। ध्यात्वा सर्षपतैलाक्तैर्बीजैर्धत्तूरसम्भवैः।। ७३।।
हुत्वा विमोहयेच्छत्रून् मरिचैर्वा ससर्षपैः। कालाञ्जननिभां दुर्गां शूलखड्गधरां स्मरेत्।। ७४।।
नक्षत्रवृक्षसम्भूतैर्व्रणकृत्स्नेहलोलितैः । समिद्वरैः प्रजुहुयाद्धन्यान् मासेन वैरिणम् ।। ७५।।
सिंहारूढां प्रधावन्तीं धावमानं रिपुं प्रति। शरान् कार्मुकनिर्मुक्तान् वह्निज्वालासमा[3]कुलान्।।७६।।
मुञ्चन्तीं संस्मरन् दुर्गां तर्पयेदुष्णवारिणा। भानुबिम्बं समालोक्य रिपोरुच्चाटनं भवेत्।। ७७।।
अतिदुर्गामयोयष्टिगदाहस्तां विचिन्त्येत्। विद्युद्दामसमानाभां महिषीघृतसम्प्लुतैः ।। ७८।।
पुलाकैर्जुहुयान्निम्बवैभीतिकसमिद्वरैः। कोद्रवैरथवा शत्रोः सेनायाः स्तम्भनं भवेत्।। ७९।।
आत्तपाशाङ्कुशां रक्तां गाणिदुर्गामनु स्मरेत्। लोणैः समधुरैः साध्यवृक्षकाष्ठेधितेऽनले।। ८०।।
जुहुयान्निशि सप्ताहान्मन्त्रविद्वशयेन्नृपान्। पाशाङ्कुशधरां रक्तां विश्वदुर्गां विचिन्तयेत्।। ८१।।
फलिनीकुसुमैः फुल्लैश्चन्दनाम्भःसमुक्षितैः। जुहुयान्निशि यो मन्त्री तस्य विश्वं वशं भवेत्।।८२।।
शरच्चन्द्रनिभां देवीं विगलत्परमामृताम्। पाशाङ्कुशधरां ध्यात्वा सिन्धुदुर्गां समिद्वरैः।। ८३।।
वैतसैर्मधुरासिक्तैर्जुहुयाद् वृष्टिसिद्धये। कपालं त्रिशिखं पाशमङ्कुशं बिभ्रतीं करैः।। ८४।।
जपाकुसुमसङ्काशामग्निदुर्गां विचिन्तयेत्। हुत्वा लवणपुत्तल्या मधुरत्रययुक्तया ।। ८५।।
[4]आकर्षेद्वाञ्छितान् साध्यान् मन्त्रविन्नात्र[5] संशयः। अतिदुर्गेयमित्याद्या फडन्ता त्रिष्टुबीरिता।।८६।।
दुर्वर्णान्ता च गाण्याद्या गाणिदुर्गा समीरिता। विश्वाद्या ण्यक्षरान्ता सा विश्वदुर्गा समीरिता।।८७।।
सिन्ध्वाद्या सा वकारान्ता सिन्धुदुर्गा निगद्यते। त्यन्तामग्न्यादिकामेनाग्निदुर्गां विदुर्बुधाः।। ८८।।
अङ्गणे स्थण्डिलं कृत्वा सुगन्धिकुसुमादिभिः। देवीमभ्यर्चयेन्नित्यं प्रागुक्तेनैव वर्त्मना।। ८९।।
आहरेद्रात्रिषु बलिं चरुणा तस्य सिद्धये। कृत्यारोगग्रहद्रोहभूतादीन् नाशयेदयम् ।। ९०।।
यथावदग्निमाराध्य गन्धपुष्पैर्मनोहरैः। स्थित्वा तस्याग्रतो मन्त्री जपेन्मन्त्रमनन्यधीः।। ९१।।
जपोऽयं सर्वसिद्ध्यै स्यान्नात्र कार्या विचारणा। लवणैर्मधुरासिक्तैः जुहुयात् पश्चिमामुखः।। ९२।।
मन्त्रार्णसंख्यया मन्त्री रिपुमात्मवशं नयेत्। शालीन् प्रक्षाल्य संशोध्य शुद्धान् कुर्वीत तण्डुलान्।।
पाचित्वा[6] पञ्चगव्येषु संस्कृते हव्यवाहने। चरुं पचेज्जपन् मन्त्रमवतार्य पुनः सुधीः।। ९४।।
अर्चयित्वा विशदधीर्देवीमग्नौ यथा पुरा। जुहुयाच्चरुणा तेन साज्येनाष्टसहस्रकम् ।। ९५।।
पात्रे सम्पातनं कुर्यात् साध्यं तत्प्राशयेत् पुनः। शिष्टं तं निखनेद् द्वारि सम्पातं प्राङ्गणान्तरे।।९६।।
कृत्यारोगा विनश्यन्ति सहभूतग्रहामयैः[7]। परैरुत्पादिता कृत्या पुनस्तानेव भक्षयेत्।। ९७।।

---

१. 'संसिक्तैः' ख. पाठः। २. 'अग्नि' ख. पाठः। ३. 'मुखा' ख. पाठः। ४. 'आकर्षयेद्वाञ्छितार्यान्' ग. पाठः।
५. 'साध्यान् मन्त्री न' क. पाठः। ६. 'जपित्वा' ख. पाठः। ७. 'हासुरैः' ग. पाठः।

व्रीहिभिर्हविषा क्षीरैः पयोवृक्षसमिद्वरैः । आज्यैर्मधुत्रयोपेतैरेतैर्दशशतं पृथक्।। ९८।।
जुहूयात् सम्पदां भूमिः साधको भवति ध्रुवम्। भास्करे मेषराशिस्थे मन्त्रज्ञोऽनुगुणे दिने।। ९९।।
नद्यां समुद्रगामिन्यां स्नात्वा मन्त्री यथाविधि। उद्धृत्यादाय सिकताः संशोध्य परिशोधयेत्।।१००।।
न्यस्य ताः पञ्चगव्येषु संस्कृते हव्यवाहने। भर्जयेन्मनुना सिद्ध्यै दर्व्या ब्राह्मतरूत्थया।। १०१।।
सिंहमेषधनुःस्थेऽर्के कृष्णपक्षेऽष्टमीतिथौ । विशाखाकृत्तिकामूलहस्तोत्तरमघास्वथ।। १०२।।
रोहिण्यां श्रवणे वारौ मन्दवाक्पतिदेवतौ। विहायान्येषु कुर्वीत सिकतास्थापनं सुधीः।। २०३।।
गृहग्रामादिराष्ट्राणां रक्षार्थं सिकताः शुभाः। प्रस्थाढकघटोन्माना मध्यादिष्ववटेष्विमाः ।। १०४।।
नवसु प्रक्षिपेज्जप्तास्तेषु सम्पूजयेत् क्रमात्। मध्यादिदेवीमस्त्राणि कपालान्तानि देशिकः।।१०५।।
चक्रं शङ्खमसिं खेटं बाणं चापं त्रिशूलकम्। कपालं स्वस्वमन्त्रेण सम्पूज्यान्ते बलिं हरेत्।।१०६।।
नक्षत्रग्रहराशीनां लोकेशानां बलिं हरेत्। विहिता यत्र रक्षेयं वर्धन्ते तत्र सम्पदः।। १०७।।
क्षुद्रग्रहमहारोगचोरभूतसरीसृपाः ।अमुना विलयं यान्ति विधिना नात्र संशयः ।।१०८।।
सिकतानां विशुद्धानां विकारकुडजं सुधीः। पञ्चगव्ययुतं पात्रे ब्रह्मवृक्षेण निर्मिते ।।१०९।।
निक्षिप्य विधिना यत्र स्थापयेत्तत्र सम्पदः। दिने दिने प्रवर्धन्ते कालविष्ट्यादिभिः सह।। ११०।।
महोत्पाता विनश्यन्ति कृत्याद्रोहमहाग्रहाः। चरुं गव्यात्मना कुर्यात् स्थापनं विधिनामुना।।१११।।
गोमूत्रं प्रस्थमानं स्याद्गोमयाम्भस्तदर्धकम्। आज्यात् सप्तगुणं क्षीरं गोमूत्रात् त्रिगुणं दधि।।११२।।
गोमूत्रेण समं सर्पिः सर्वं वा सममुच्यते। गावः स्युः कपिलाः श्वेतश्यामधूम्रारुणप्रभाः।। ११३।।
अभावे गदिताः सर्वाः सर्वं वा कपिलोद्भवम्। एकोनपञ्चाशत्कोष्ठे फलके ब्रह्मशाखिनः।।११४।।
विहाय कोणकोष्ठानि शक्त्याद्यं जातवेदसम्। लिखित्वा मध्यकोष्ठादि पूजयेत् तत्र देवताम्।।११५।।
कृत्वा होमं ससम्पातं निखनेत् तद्यथा पुरा। दद्याद्बलिं यथापूर्वमस्य पूर्वोदितं फलम्।। ११६।।
मध्ये मायामष्टकोष्ठेषु पादानष्टौ कृत्वा मातृकार्णैः प्रवीतम्।
भूबिम्बस्थं सर्वभूतामयघ्नं रक्षायुःश्रीकीर्तिदं यन्त्रमेतत्।। ११७।।
आग्नेयास्त्रस्य जानाति विसर्गादानकर्मणी। यः पुमान् गुरुणा शिष्टस्तस्याधीनं जगत्त्रयम्।।११८।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे द्वाविंशतितमः श्वासः।। २२।।

* * *

अथ

त्रयोविंशः श्वासः

तथा– (२२। १)

अथो दिनास्त्रं कृत्यास्त्रं वक्ष्ये शत्रुविमर्दनम्। अतिदुर्गामनुं प्राहुर्दिनास्त्रं मन्त्रवित्तमाः ।। १।।
प्रतिलोममिमं मन्त्रं कृत्यास्त्रं च प्रचक्षते। दिनास्त्रस्य षडङ्गादीन् प्रतिलोमोदितान् विदुः।। २।।

(इममतिदुर्गामन्त्रं, स तु–अतिदुर्गाणि इत्यारभ्य पर्षदित्यन्तम्। प्रतिलोममिति तर्षप इत्यादि र्गादुतिअ इत्यन्तम्। दिनास्त्रस्य कृत्यास्त्रस्येति शेषः, प्रतिलोमोदितानि षडङ्गानि त्वाग्नेयास्त्रवदेव। आदिपदेन वर्णन्यासपदन्यासवर्णशक्तिपूजासु प्रातिलोम्यं सूच्यते। तच्चात्र पञ्चाद्यक्षरादिमन्त्राक्षरपर्यन्तं क्रमेण, न तु क्रमेण त्रिष्टुप्मन्त्रस्य प्रातिलोम्यम्।)

भानुबिम्बगतं शत्रुमधोवक्त्रं विषाहतम्। मूलादुत्थितया[1] ग्रस्तं कुण्डल्या भावयन् सुधीः।। ३।।
मूलाधारे क्षिपेत् सद्यः प्रस्फुरत्कालपावके। दिनत्रयाज्ज्वराक्रान्तो रिपुर्यमपुरं व्रजेत्[2]।। ४।।
दिनास्त्र[3]प्रतिविद्धाङ्गं स्वाधिष्ठानगतं रिपुम्। पञ्चवायुसमिद्धेन वह्निना दग्धविग्रहम्।। ५।।
ध्यायेन्मनुं जपेत् सद्यः स भवेद्यमवल्लभः। मणिपूरगतं शत्रुमग्निना दीप्तविग्रहम्।। ६।।
ध्यायन् दिनास्त्रं प्रजपेत् स मृत्युग्रासतां[4] व्रजेत्। अनाहताहितः शत्रुर्निर्दग्धो मन्त्रवह्निना।। ७।।
पाशेन बद्ध्वा शीघ्रेण नीयते यमकिङ्करैः। विशुद्धस्थानगो वैरी दिनबाणेन पीडितः।। ८।।
अधोमुखः स्मृतस्तूर्णं परासुः स्याद् दिनत्रयात्। आज्ञायां निहितं शत्रुं दहेद् दिनाग्निना धिया।।९।।
पुत्रमित्रकलत्रादीन् हित्वा मृत्युमुपाश्रयेत्। नाभिमात्रोदके स्थित्वा ध्यायन् बिम्बे दिनेशितुः।।१०।।
वैरिणं दग्धसर्वाङ्गं मन्त्रमष्टोत्तरं शतम्। जपेत् सप्तदिनादर्वाग् यमलोकं स गच्छति।। ११।।
आरवारं समारभ्य सप्ताहं प्रजपेन्मनुम्। सूर्योदयं समारभ्य यावदस्तमयो भवेत् ।। १२।।
सन्निपातज्वराविष्टो यमग्रस्तो भवेदरिः। स्थित्वा दुर्गालये मन्त्री त्रिरात्रं वर्जिताशनः।। १३।।
दिनबाणेन विद्धाङ्गं वैरिणं प्रविचिन्तयन्। जपेन्मनुमिमं शत्रुर्ज्वरितो मरणं व्रजेत्।। १४।।
स्पृष्ट्वा दुर्गां जपेन्मन्त्रमनशनंस्त्रिदिनं स्मरन्। शूलप्रोतं निजरिपुं दिनास्त्रेण प्रपीडितम्।। १५।।
ज्वरेण महताविष्टो जायतेऽसौ यमातिथिः। रविमण्डलगं शत्रुं दष्टं तद्रथपन्नगैः।। १६।।
विषाग्निदग्धसर्वाङ्गं ध्यायनुष्णेन वारिणा। तर्पयेद् दिनबाणेन स्यादसौ यमवल्लभः।। १७।।

---

१. 'उद्धृत' ग. क. पाठः। २. 'रिपुः प्राणान् विमुञ्चति' ख..पाठः। ३. 'स्त्रेण प्रवि' ख. पाठः। ४. 'वशतां' ख. पाठः।

रविबिम्बादागतया ज्वालया ग्रस्तविग्रहम्। रिपुं ध्यात्वा जपेन्मन्त्रं स क्रीडति यमान्तिके।। १८।।
ग्रहग्रस्तार्क[1]बिम्बस्थं विद्धं मन्त्रमयैः शरैः। प्रतिपद्य निजं शत्रुं जपेदयुतमस्त्रवित्।। १९।।
रिपुं नयति शीघ्रेण यमदूतो यमालयम्। प्रलयानलसङ्काशकालरात्रिमिवापराम् ।। २०।।
शूलपाशधरां घोरां सिंहस्कन्धनिषेदुषीम्। सवितुर्मण्डलान्तःस्थां रक्तनेत्रत्रयोद्धतैः।। २१।।
विस्फुलिङ्गैर्निर्दहन्तीं रिपुमाकुलविग्रहम्। स्पष्टदंष्ट्राधरां नृत्यद्भ्रूकूटीभीषणाननाम्।। २२।।
तर्जयन्तीं निजं शत्रुं तर्जन्या भीमरूपया। दंष्ट्रामयूखजालेन द्योतयन्तीं दिगन्तरम्।। २३।।
शूलेन वैरिणो वक्षो दारयन्तीं भयङ्करीम्। जपेद् दिनत्रयं मन्त्री मारयेद्रिपुमात्मनः।। २४।।
अस्त्रमन्त्रकृतन्यासः प्रलयाग्निसमप्रभः। रक्तवस्त्रधरां क्रुद्धां रक्तनेत्रत्रयान्विताम्।। २५।।
सिंहाधिरूढां धावन्तीं धावमानं रिपुं प्रति। खड्गेन तच्छिरश्छित्वा क्षणाद् व्योमस्थलं गताम्।।२६।।
ध्यात्वा दुर्गां जपेन्मन्त्रं त्रिदिनं वर्जिताशनः। अनेनैव विधानेन रिपुर्मुत्युप्रियो भवेत्।। २७।।
कर्माण्येतानि कुर्वीत दिवसे न तु रात्रिषु।..।।

इति। अथ रात्रिकृत्यम्—

....। पश्चिमामुखलिङ्गस्य सजीवं महिषं पुरः।। २८।।
निखाय तस्य शिरसि कुण्डं कृत्वा त्रिकोणकम्। तस्मिन् समेधिते वह्नौ यथावद् देशिकोत्तमः।।२९।।
सत्रिकोणान् ससाध्यक्ष[2]साध्यनामसमन्वितान्। अजारक्तेन संसिक्तान् कारस्करसमिद्वरान्।। ३०।।
सहस्रं जुहुयाद् देवीं ध्यात्वा सवितृमण्डले। प्रलयाग्निसमां घोरां द्वात्रिंशद्भुजशोभिताम्।। ३१।।
उद्यदायुधसन्दीप्तां नृत्यन्तीं सिंहमस्तके। महादंष्ट्रां महाभीमां[3] ज्वलत्केशीं नदन्मुखीम्।। ३२।।
रक्तार्द्रमांसवदनां घूर्णितोग्र[4]त्रिलोचनाम्। अनेन विधिना शत्रुर्महाज्वरनिपीडितः ।। ३३।।
विमुञ्चति निजं देहं पुत्रमित्रादिभिः सह। ऊर्ध्वमुष्णाम्भसो मन्त्री लम्बयित्वा भुजङ्गमम्।। ३४।।
बानुबिम्बगतां दुर्गां सहस्रादित्यसन्निभाम्। सहस्रपाणिचरणां सहस्राक्षिशिरोमुखीम् ।। ३५।।
सहस्रनागबद्धाङ्गीं त्रासयन्तीं जगत्रयम्। ध्यायन्ननेन सर्पास्ये तर्पयेदुष्णवारिणा ।। ३६।।
संयतः कालपाशेन वैरी मुञ्चेत् स्वजीवितम्। मध्याह्नार्कायुतप्रख्यां नदन्तीं नरसिंहवत्।। ३७।।
घोरसिंहसमासीनां महाभीषणदर्शनाम्। शूलप्रोताहितां ध्यायञ्जपेन्मन्त्रमनन्यधीः ।। ३८।।
तर्पणदुष्णतोयेन सर्पवक्त्रे दिनत्रयम्। यमस्य भुवनं गच्छेदरातिर्नात्र संशयः।। ३९।।
ॠक्षवृक्षप्रतिकृतिं प्रतिष्ठितसमीरणाम्। उष्णोदके विनिक्षिप्य विषाढ्ये विधिना ततः।। ४०।।
अर्केन्द्वनलसङ्काशां खड्गखेटकधारिणीम्। नयनत्रयनिर्गच्छद्विस्फुलिङ्गशताकुलाम् ।। ४१।।
सिंहस्थां सर्पभूषाढ्यां त्रैलोक्यभयकारिणीम्। खड्गकृत्ताहितां ध्यायन् प्रजपेदयुतं मनुम्।। ४२।।

---

१. 'युक्ता' ख. पाठः। २. 'समन्त्रार्णान्' ख. पाठः। ३. 'माया' ग. पाठः। ४. 'धूर्णदिहां' ग. पाठः। ५. 'दायिनीम्' ख. पाठः।

विधानेनामुना शत्रुर्ग्रस्तो भवति मृत्युना। प्रकल्प्य दुर्गायतने त्रिकोणं कुण्डमुत्तमम्॥ ४३॥
तत्र सज्ज्वालिते वह्नौ महिषीशकृता कृताम्। पुत्तलीमजरक्ताक्तां प्रतिष्ठितसमीरणाम्॥ ४४॥
छित्वा च्छित्वा प्रजुहुयादजरक्तान्वितां निशि। ध्यत्वा दुर्गां प्रनृत्यन्तीं महिषोरःस्थलान्तरे॥ ४५॥
शूलेन महिषस्याङ्गं भिन्दतीं घोरदर्शनाम्। अट्टहासैरजस्त्रोत्थैर्भीषणां सुरसेविताम्॥ ४६॥
प्रलयानलसङ्काशां भ्रमन्नेत्रत्रयान्विताम्। सन्दष्टाधरसम्भिन्नां दंष्ट्राभीममुखाम्बुजाम्॥ ४७॥
सङ्गखेटकयुक्ताभिः कन्यकाभिः समावृताम्। अनेन विधिना शत्रुः प्रयाति यममन्दिरम्[2]॥४८॥
दिनास्त्रमेवं विहितं[3] शत्रुनिग्रहकारणम्। कृत्यास्त्रचोदितान्[4] कुर्यात् प्रयोगान् मन्त्रवित्तमः॥ ४९॥
आधारादुद्गतां देवीं कुण्डलीं सर्परूपिणीम्। सुषुम्नारन्ध्रमार्गेण यातां व्योमस्थलं ततः॥ ५०॥
मुखेन शत्रुमादाय निवृत्तां स्वगृहं प्रति। ज्वलत्कालानलोद्दीप्तां विचिन्त्य प्रजपेन्मनुम्॥ ५१॥
सप्तभिर्वासरैः शत्रुर्मृत्युमा[5]प्नोति मोहितः। अङ्गारवारे चित्यग्नौ सर्षपस्नेहलोलितम्॥ ५२॥
सिद्धार्थकुडवं जप्त्वा जुहुयात् पक्षमात्रतः। कृत्यास्त्रज्वालया दग्धो रिपुर्यमपुरं व्रजेत्॥ ५३॥
चतुर्दश्यामर्धरात्रे चितास्थीन्यत्र[6] साधकः। व्रणतैलविलिप्तानि चिताग्नौ जुंहुयात् ततः॥ ५४॥
अनेन विधिना शत्रुर्मृत्युमेष्यति कातरः। तुषास्थिनिर्मितां शत्रोर्व्रणतैलपरिप्लुताम्॥ ५५॥
प्रतिमां स्थापितप्राणां जुहुयान्निशि साधकः। छित्वा च्छित्वाजरक्तेन सप्ताहान्म्रियते रिपुः॥ ५६॥
श्मशानवालुकाः स्पृष्ट्वा साक्षता नियुतं जपेत्। विकिरेत्तास्तडागादौ कृत्यास्त्रकथितं जलम्॥५७॥
तदीयं पीतमचिरान्निहन्ति सकलाञ्जनान्। कृष्णाङ्गारचतुर्दश्यां प्रजप्तैः प्रेतभस्मभिः॥ ५८॥
महिष्याज्येन लुलितैस्तन्मन्त्राक्षरसंख्यया। निर्माय गुलिकामेना[7] सम्यग्जप्तसमीरणाम्[8]॥५९॥
चितिकाष्ठैधिते वह्नौ जुहुयाद् दृढमानसः। चतुर्दशीत्रयादर्वाक् शत्रुर्मृत्युप्रियो[9] भवेत्॥ ६०॥
श्मशानभस्म सिद्धार्थान् पञ्चगव्ये विनिक्षिपेत्। महिषस्थां स्मरन् देवीं कालग्निसदृशप्रभाम्॥६१॥
भर्जयेत् प्रजपन्मन्त्रं विषकाष्ठैश्चितानले[10]। दुर्गागारे प्रजुहुयादनेनायुतमस्त्रवित्॥ ६२॥
पुनरादाय तद्भस्म सेनायां वैरिणः क्षिपेत्। सा सेना बहुधा भिन्ना ज्वररोगविमोहिता॥ ६३॥
आयुधानि परित्यज्य युद्धकाले पलायते। गेहग्रामादिषु क्षिप्तं कुर्यादुच्चाटनं क्षणात्॥ ६४॥
सप्तारवारे गुलिका[11] दुर्गाविश्मसु शर्कराः। सप्त माहेन्द्रदिग्वर्जं गृहीत्वा प्रजपेन्मनुम्॥ ६५॥
महिषीपञ्चगव्येषु[12] भर्जयेत्तां यथापुरा। भूयो जपित्वा विकिरेद्गेहग्रामपुरेष्विमाः॥ ६६॥
स देशो नश्यति क्षिप्रं दग्धो मन्त्रभवाग्निना। ब्रह्मदण्डीं मर्कटिकां करक्रोशनिकात्रयम्॥ ६७॥
भौमवारस्य गुलिके गृहीत्वा प्रजपेन्मनुम्। चतुर्दश्यां रिपोर्गेहे निखनेत् प्रजपेन्मनुम्॥ ६८॥

---

१ 'षितां' ख. पाठः। २. 'सन्निधिम्' ख. पाठः। ३. 'कथितं' ख. पाठः। ४.. 'दर्शितान्' ख. पाठः। ५. 'त्युं प्रा' ख. पाठः।
६. 'न्यष्ट' ग. पाठः। ७. 'का पताः' ख. पाठः। ८. 'रणाः' ग. पाठः। ९. 'वशो' ख. पाठः। १०' 'धिता' ख. पाठः।
११. 'सप्तवारेषु कुलिके' ख. पाठः। १२. 'व्येन' ग. पाठः।

सार्धं पुत्रकलत्राद्यैरुच्चाटो[1] जायते रिपोः। एकैकं वा [2]जपेन्मन्त्री मण्डलात् तत्फलं लभेत्।।६९।।
षड्बिन्दुखण्ड[3] पुत्तल्यां निखनेदोदनाप्लुतम्। स्पृष्ट्वा तां प्रजपेदस्त्रं कृष्णाष्टम्यां निशार्धतः।।७०।।
शत्रुनामसमायुक्तं श्मशाने निखनेदिमाम्। प्रणश्यति रिपुः शीघ्रं सकुटुम्बः सबान्धवः।। ७१।।
कपालशकलान् मन्त्री कृत्यास्त्राक्षरसंख्यकान्। संस्पृशन् प्रजपेन्मन्त्रं प्राणस्थापनपूर्वकम्।। ७२।।
कृष्णाङ्गारचतुर्दश्यां श्मशाने विषवृक्षजे। जुहुयादजरक्ताक्तान् कृत्यास्त्रज्वालया हतः।। ७३।।
रिपुर्यमपुरं गच्छेन्महाज्वरविमोहितः। अजारक्तेन सम्पूर्णे कलशे निक्षिपेदहिम्।। ७४।।
कपालेन पिधायैनं छादयेद्रक्तवाससा। पूजयेद्रक्तपुष्पाद्यैः स्पृष्ट्वा तमयुतं जपेत्।। ७५।।
भौमवारे निशामध्ये कारस्करसमेधिते। श्मशानवह्नौ जुहुयाद्गच्छेद्यमपुरं रिपुः।। ७६।।
साध्यनक्षत्रवृक्षेण कृत्वा कुम्भं प्रपूरयेत्। माहिषैः पञ्चगव्यैस्तं विडालं तत्र निक्षिपेत्।। ७७।।
जपपूजादिकं सर्वं यथापूर्वं समाचरेत्। कारस्करैधिते वह्नौ कृत्यास्त्रेण समेधिते[5]।। ७८।।
अयुतं व्रणतैलेन हुत्वा चान्ते घटं पुनः। आमस्तकं समुद्धृत्य जपेन्मन्त्रमनन्यधीः।। ७९।।
जुहुयाद्विधिनानेन त्रिदिनैर्म्रियते रिपुः। सुन्दरं महिषीवत्समेकरात्रमुपोषितम्।। ८०।।
पाययेन्महिषीसर्पिः प्रस्थं मन्त्रेण मन्त्रितम्। कुशैः स बद्धसर्वाङ्गं स्थापितप्राणमञ्जसा।। ८१।।
कारस्करैधिते वह्नौ व्रणतैलेन मन्त्रवित्। होमं कृत्वायुतं वत्सं जुहुयाद्यतमानसः।। ८२।।
एकेन दिवसेनारिर्गच्छेद्यमपुरं सुखी। त्रिकोणकुण्डे निहिते वह्नौ मन्त्रेण दीपिते।। ८३।।
अर्चिते गन्धपुष्पाद्यैरयुतं जुहुयात् क्रमात्। राजीभल्लातकतिलतैलैः सप्तदिनं ततः।। ८४।।
प्रसूतिसमयं प्राप्तां महिषीं स्थापितानिलाम्। पूजितां गन्धपुष्पाद्यैः स्पृशन् कूर्चेन तां जपेत्।।८५।।
मस्तकाद्योनिपर्यन्तं धिया वत्समनुस्मरन्। आकृष्य हस्ते पतितं जुहुयादेधितेऽनले।। ८६।।
एवं कृते समुत्पन्ना कृत्या दीप्ता हुताशनात्। भक्षयेदचिराच्छत्रुमीश्वरेणापि रक्षितम्।। ८७।।
पुनरग्नौ विशत्येषा कर्तारमनुकाङ्क्षिणी। एवंविधानि कर्माणि यः कुर्यान्मन्त्रवित्तमः।। ८८।।
स जपेदात्मरक्षार्थं मन्त्रान् मृत्युञ्जयादिकान्।..।।

अथ लवणदुर्गामन्त्राः। एषां श्रीलवणदुर्गामन्त्राणां अङ्गिरसऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमो मुखे। अग्निरात्रिदुर्गाभद्रकालीदेवताभ्यो नमो हृदये। ह्रींबीजाय नमो गुह्ये। क्रोंशक्तये नमो जान्वोः। आंकीलकाय नमः पादयोः। मम सकलजग[6]द्वशार्थं जो विनियोगः सर्वाङ्गेषु। ओं चिटि चिटि हृदयाय नमः, चण्डालि शिरसे स्वाहा, महाचण्डालि शिखायै वषट्, अमुकं मे कवचाय हुं, वशमानय नेत्रत्रयाय वौषट्, स्वाहा अस्त्राय फट्। एवमङ्गुलीन्यासः।।

अथाक्षरन्यासः— ओं ओं नमो मूर्ध्नि, ओं चिं नमो भाले, ओं टिं नमो दक्षनेत्रे, ओं चिं नमो वामनेत्रे, ओं टिं नमो दक्षकर्णे, ओं चं नमो वामकर्णे, ओं ण्डां नमो दक्षनासिकायां, ओं लिं नमो वामनासिकायां, ओं मं नमो मुखे, ओं हां नमश्चिबुके, ओं चं नमः कण्ठे, ओं ण्डां नमो हृदि, ओं लिं नमो दक्षस्तने, ओं अं नमो वामस्तने, ओं मुं नमः,

---

१. 'उत्सादो' ग. पाठः। २. 'खनेत्' ख. पाठः। ३. 'कीटविशेषः' ख. पाठः। ४. 'स्पृष्ट्वा तान्प्रजपेदस्त्रं' ख. पाठः।
५. 'प्रपूजिते' ग. पाठः। ६. 'जनवश्या' ग. पाठः।

कुक्षौ, उों कं नमो नाभौ, उों में नमो दक्षकट्यां, उों वं नमो वामकट्यां, उों शं नमो मेढ्रे, उों मां नम: पार्श्वयो:, उों नं नम: ऊरुद्वये, उों यं नमो जानुयुगे, उों स्वां नमो जङ्घायुगे, उों हां नम: पादद्वये, इत्यक्षरन्यास:।। ध्यानम्—

नवकुङ्कुमसन्निभं त्रिनेत्रं रुचिराकल्पशतं नमामि वह्निम्।
स्रुवशक्तिवराभयानि दोर्भिर्दधतं रक्तसरोरुहे निषण्णम्।। १।।
कालाम्बुवाहद्युतिमिन्दुवक्त्रां हारावलीशोभिपयोधराढ्याम्।
कपालपाशाङ्कुशशूलहस्तां नीलांशुकां यामवतीं नमामि।। २ ।।
नीलाञ्जनाभामरिशङ्खशूलखट्वाङ्गहस्तां तरुणेन्दुचूडाम्।
भीमां त्रिनेत्रां जितशत्रुवर्गां दुर्गां भजे दुर्गतिभङ्गदक्षाम्।। ३।।
टङ्कं कपालं डमुरुं त्रिशूलं सम्बिभ्रती चन्द्रकलावतंसा।
पिङ्गोर्ध्वकेशी सितभीमदंष्ट्रा भूयाद्विभूत्यै मम भद्रकाली।। ४।।

इति ध्यात्वा।

ऋक्पञ्चकं जपेत् सम्यगयुतं तद्दशांशत:। हविषा घृतसिक्तेन जुहुयादर्चितेऽनले।। ५।।
एवं कृतपुरश्चर्य: प्रयोगे कुशलो भवेत्। अग्निर्यामवती ध्येयौ वश्याकर्षणकर्मणो:।। ६।।
स्मरेद् दुर्गां भद्रकालीं मन्त्री मारणकर्मणि।..।।

इति। अथ प्रयोग:—ब्राह्मे मुहुर्ते चोत्थाय गुरुनमस्कारस्नानसन्ध्यामातृकान्यासपात्रासादनान्तं कर्म समाप्य, पीठे मण्डूकादिकमलान्तं सम्पूज्य केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च पीठशक्ती: पूजयेत्।

भीषणी बहुरूपा च तीक्ष्णदंष्ट्रा मदोत्कटा। स्मरणी मोहिनी कान्ता कमण्डलुधरा परा।। ७।।

इति क्रमेण भीं भीषण्यै नम: इत्यादि सम्पूज्य तत्कर्णिकायां 'उों ह्रीं आधारशक्तिकमलासनाय नम:' इति पीठमनुं विन्यस्य तदुपरि षट्कोणाष्टदलकमलभूगृहयन्त्रं विभाव्य मध्ये इष्टदेवतामावाह्य षोडशोपचारै: पूजां कृत्वा षट्कोणेषु पूर्वादि, उों चिटि चिटि हृदयाय नम:। इति रीत्या षडङ्गानि सम्पूज्य, अष्टदले पूर्वादि

शूलहस्ता विकेशी च दारुणा लवणप्रिया। परा कराला अत्युग्रा तामसी चाष्ट सिद्धय:।। ८।।

उों शूं शूलहस्तायै नम:, इति रीत्या सम्पूज्य, केसरेषु पूर्वादि,

उत्कटो विकटाक्षश्च शूलहस्तो महाबल:। अग्निजिह्व: खड्गधर: कपाली तारणप्रिय:।। ९।।

उों उं उत्कटाय नम:, इति रीत्या सम्पूज्य, पत्राग्रेषु पूर्वादि उों अं आं असिताङ्गभैरवसहितब्राह्म्यै नम:, उों इं ईं रुरुभैरवसहितमाहेश्वर्यै नम:, उों उं ऊं चण्डभैरवसहितकौमार्यै नम:, ओं ऋं ॠं क्रोधभैरवसहितवैष्णव्यै नम:, उों लृं ॡं उन्मत्तभैरवसहितवाराह्यै नम:, उों एं ऐं कपालिभैरवसहितेन्द्राण्यै नम:, उों ओं औं भीषणभैरवसहितचामुण्डायै नम:, उों अं अ: संहारभैरवसहितमहालक्ष्म्यै नम:, इति सम्पूज्य, भूगृहे लोकपालान् सम्पूज्य वहिर्वज्राद्यायुधानि सम्पूज्य, षडावरणसहितामिष्टदेवतां सम्पूज्याष्टोत्तरसहस्रं जपित्वा ''गुह्यातिगुह्य'' इमि मन्त्रेण तेजोरूपं फलं देव्या हस्ते समर्पयेत्।। दशसहस्रजप: पुरश्चरणम्। साज्येन हविषा दशांशहोम:।

अथो लवणमन्त्रस्य विधानमभिधीयते। ऋगाद्या कथिता पूर्वं लवणाम्भसि—पूर्विका।। १।।
लवणादि द्वितीया स्याद् दहाद्या परिकीर्तिता। तं दग्ध्वाद्या चतुर्थी स्याद्या ते—पूर्वादि पञ्चमी।।२।।
अङ्गिरा मुनिराख्यातश्छन्दोऽनुष्टुबुदाहृतः। अग्नी रात्रिः पुनर्दुर्गा भद्रकाली च देवताः।। ३।।
चिटिमन्त्राक्षरैः कुर्यात् षडङ्गानि समाहितः। पञ्चभिर्हृदयं प्रोक्तं त्रिभिर्वर्णैः शिरः स्मृतम्।। ४।।
पञ्चवर्णैः शिखा प्रोक्ता कवचं करणाक्षरैः। पञ्चभिर्नेत्रमुदितं युगलेनास्त्रमीरितम् ।। ५।।
तारश्चिटिद्वयं पश्चाच्चाण्डालि तदनन्तरम्। मंहत्पदाद्यां तां ब्रूयादमुकं मे ततः परम्।। ६।।
वशमानय ठद्वन्द्वं चिटिमन्त्र उदाहृतः। चतुर्विंशत्यक्षरात्मा सर्वकामफलप्रदः।। ७।।

नवकुङ्कुमसन्निभं त्रिनेत्रं रुचिराकल्पशतं नमामि[१] वह्निम्।
स्रुवशक्तिवराभयानि दोर्भिर्दधतं रक्तसरोरुहे निषण्णम्।। ८।।
कालाम्बुवाहद्युतिमिन्दुवक्त्रां हारावलीशोभिपयोधराढ्याम्।
कपालपाशाङ्कुशशूलहस्तां नीलांशुकां यामवतीं नमामि।। ९।।
नीलाञ्जनाभामरिशङ्खशूलखट्वाङ्गहस्तां तरुणेन्दुचूडाम्।
भीमां त्रिनेत्रां जितशत्रुवर्गां दुर्गां भजे दुर्गतिभङ्गदक्षाम्।। १०।।
टङ्कं कपालं डमुरुं त्रिशूलं सम्बिभ्रती चन्द्रकलावतंसा।
पिङ्गोर्ध्वकेशी सितभीमदंष्ट्रा भूयाद्विभूत्यै मम भद्रकाली।। ११।।

ऋक्पञ्चकं जपेत् सम्यगयुतं तद्दशांशतः। हविषा घृतसिक्तेन जुहुयादर्चितेऽनले।। १२।।
एवं कृतपुरश्चर्यः प्रयोगे कुशलो भवेत्। अग्निर्यामवती ध्येयौ वश्याकर्षणकर्मणोः।। १३।।
स्मरेद् दुर्गां भद्रकालीं मन्त्री मारणकर्मणि। जानुप्रमाणे सलिले स्थित्वा निशि जपेन्मनुम्।।१४।।
अनेन वाञ्छितः साध्यः किङ्करो जायतेऽचिरात्[४]। नाभिमात्रोदके स्थित्वा जपेन्मन्त्रमिमं सुधी[५]ः।।१५।।
अष्टोत्तरसहस्रं यस्तस्य साध्यो वशे भवेत्। ऋक्पञ्चकं जपेन्मन्त्री कण्ठमात्रोदके स्थितः।। १६।।
सप्तभिर्दिवसैर्भूपान् वशयेद्विधिनामुना। विलिख्य तालपत्रे तं साध्यनाम्ना विदर्भितम्।। १७।।
निःक्षिप्य क्षारसम्मिश्रे जले तंत् क्वाथयेन्निशि। वश्यो भवति साध्योऽस्य नात्र कार्या विचारणा।।१८।।
तालपत्रे लिखित्वैनं भद्रकालीगृहे खनेत्। वश्याय सर्वजन्तूनां प्रयोगोऽयमुदाहृतः।। १९।।
ताम्रपत्रे समालिख्य मन्त्रं साध्य[६]विदर्भितम्। तापयेत् खादिरे वह्नौ मासाद्वश्यो भवेन्नरः।। २०।।
त्रिकोणकुण्डमापाद्य सम्यक् शास्त्रोक्तलक्षणम्। तस्मिन् होमं प्रकुर्वीत संस्कृते हव्यवाहने।।२१।।
प्रक्षाल्य गव्यदुग्धेन संशोध्य लवणं[७] सुधीः। सुचूर्णितं तज्जुहुयात् सप्ताहाद्वशयेज्जनान्[८]।।२२।।

---

१. 'भजामि' ग. पाठः। २. 'म्बरां' ग. पाठः। ३. 'कालाम्बुदाभा' ग. पाठः। ४. 'क्षणात्' ग. पाठः।
५. 'मनन्यधीः' ग. पाठः। ६ः 'तालपत्रे लिख्य यन्त्रं साध्यनाम' ख. पाठः। ६.'प्य लवणात्' ग. पाठः। ८. 'जगत्' ग. पाठः।

दधिमध्वाज्यसंसिक्तैः सैन्धवैर्जुहुयात् तथा। वशयेत् सकलान् देशा[1]नचिरात् किमु पार्थिवान्।।२३।।
विशुद्धलवणं प्रस्थं विभक्तं पञ्चधा पृथक्। एकैकया प्रजुहु[2]यादृचा पञ्चाहमादरात्।। २४।।
यस्य नाम्ना स वश्यः स्यादनेनैव न संशयः[3]। शुद्धं लवणमादाय जुहुयान्मधुरान्वितम्।। २५।।
ऊनपञ्चाशदाहुत्या वशं नयति वाञ्छितम्। नित्यं शुद्धेन लोणेन हुत्वा शत्रून् वशं नयेत्।। २६।।
मधुरत्रयसंयुक्तैर्लवणैः साधुचूर्णितैः। जुहुयाद् वशयेन्नारीर्नरान् नरपतीनपि ।। २७।।
मन्त्रं कृष्णतृतीयादि प्रजपेद्यावदष्टमी। पुत्तलीः पञ्च कुर्वीत साङ्गोपाङ्गाः समाः शुभाः।। २८।।
एका साध्यद्रुमेण स्यादन्या पिष्टमयी मता। चक्रिहस्तमृदान्या स्यादन्या सिक्थमयी स्मृता।।२९।।
लवणं पोतसम्भूतं चूर्णितं परिशोधितम्। कुडवं प्रोक्षयेत् क्षीरदध्याज्यमधुभिः क्रमात्।। ३०।।
गुडाज्यमधुभिः सम्यङ्मिश्रितेनामुना ततः। कुर्वीत पुत्तलीं सौम्यां सर्वावयवशोभिताम्।। ३१।।
प्राणमन्त्रकृतं यन्त्रमासां हृदि विनिःक्षिपेत्। आसु प्राणान् प्रतिष्ठाप्य पूजयेत् कुसुमादिभिः।।३२।।
पश्चात् कृष्णाष्टमीरात्रौ याममात्रे गते सति। विधाय मातृकान्यासं मन्त्रन्यासमनन्तरम्।। ३३।।
चिटिमन्त्रसमुद्भूतान् चतुर्विंशतिसंख्यकान्। ताराद्यान् विन्यसेद्वर्णान् स्थानेष्वेषु समाहितः।। ३४।।
मूर्ध्नि भाले दृशोः श्रुत्योर्नासास्यचिबुकेष्वथ। कण्ठहृत्स्तनयुग्मेषु कुक्षौ नाभौ कटिद्वये।। ३५।।
मेढ्रे पायौ प्रविन्यस्य शिष्टवर्णचतुष्टयम्। ऊरुद्वये जानुयुगे जङ्घायुग्मे पदद्वये ।। ३६।।
एवं विन्यस्तसर्वाङ्गो रक्तमाल्यानुलेपनः। रक्तवस्त्रधरः शुद्धः पुत्तलीं दारुणा कृताम्।। ३७।।
अधोमुखीं खनेत् कुण्डे पिष्टजामासनादधः। मृन्मयीं प्रतिमां पाददेशे न्यस्येत् तथात्मनः।। ३८।।
मधूच्छिष्टमयीं व्योम्नि कुण्डस्योर्ध्वं प्रलम्बयेत्। लवणेन कृतां पश्चात् पुत्तलीं संस्पृशञ्जपेत्।।३९।।
ऋक्पञ्चकं यथान्यायमष्टोत्तरसहस्रकम्। संहृत्या चिटिमन्त्रार्णान् पुनस्तस्यास्तनौ न्यसेत्।। ४०।।
अङ्गुष्ठसन्धिप्रपदजङ्घाजानूरुपायुषु । लिङ्गदेशे पुनर्नाभौ जठरे हृदयाम्बुजे ।। ४१।।
स्तनद्वये कन्धरायां चिबुके वदने पुनः। घ्राणयोः कर्णयोरक्ष्णोर्ललाटे मूर्धनि न्यसेत्।। ४२।।

तत्प्रतिमाप्रमाणं तु—

आयामः पादयोस्तस्या आकट्याच्चतुरङ्गुलम्। पादोनद्व्यङ्गुलात् कुक्षिस्तावदेनाङ्गुलोदरम्।।१।।
अङ्गुलद्वयमावक्त्रात् कण्ठदेशस्य मानकम्। शिरसो वक्ष्यमाणं स्यात् सार्धद्वयमिहाङ्गुलम्।।२।।

इति द्वादशाङ्गुलप्रमाणप्रतिमेत्यर्थः।।

अग्निमादाय सन्दीप्य साध्यनक्षत्रदारुभिः। तस्मिन्नभ्यर्च्य मन्त्रोक्तां देवतां रूप्यपात्रके।। ४३।।
कुशीतराजिपुष्पाद्भिर्दत्त्वार्घ्यं प्रणमेत् सुधीः। मन्त्रैरेतैः प्रयोगादावन्ते संयतमानसः।। ४४।।
ओं त्वमनेनाप्य[4]मित्रघ्न निशायां हव्यवाहन। हविषा मन्त्रजप्तेन[5] तृप्तो भव तया सह।। ४५।।

---

[1] ‘देवान्’ ख. पाठः। [2] ‘कमंशां जु’ ग. पाठः। [3] ‘न विधिनाचिरात्’ ग. पाठः। [4] ‘त्वमाननम्’ क. पाठः।
[5] ‘दत्तेन’ क. पाठः।

अथो लवणमन्त्रस्य विधानमभिधीयते। ऋगाद्या कथिता पूर्वं लवणाम्भसि—पूर्विका।। १।।
लवणादि द्वितीया स्याद् दहाद्या परिकीर्तिता। तं दग्ध्वाद्या चतुर्थी स्याद्या ते—पूर्वादि पञ्चमी।।२।।
अङ्गिरा मुनिराख्यातश्छन्दोऽनुष्टुबुदाहृत:। अग्नी रात्रिः पुनर्दुर्गा भद्रकाली च देवता:।। ३।।
चिटिमन्त्राक्षरै: कुर्यात् षडङ्गानि समाहित:। पञ्चभिर्हृदयं प्रोक्तं त्रिभिर्वर्णै: शिर: स्मृतम्।। ४।।
पञ्चवर्णै: शिखा प्रोक्ता कवचं करणाक्षरै:। पञ्चभिर्नेत्रमुदितं युगलेनास्त्रमीरितम् ।। ५।।
तारश्चिटिद्वयं पश्चाच्चाण्डालि तदनन्तरम्। मंहतपदाद्यां तां ब्रूयादमुकं मे तत: परम्।। ६।।
वशमानय ठद्वन्द्वं चिटिमन्त्र उदाहृत:। चतुर्विंशत्यक्षरात्मा सर्वकामफलप्रद:।। ७।।

नवकुङ्कुमसन्निभं त्रिनेत्रं रुचिराकल्पशतं नमामि वह्निम्।
स्रुवशक्तिवराभयानि दोर्भिर्दधतं रक्तसरोरुहे निषण्णम्।। ८।।
कालाम्बुवाहद्युतिमिन्दुवक्त्रां हारावलीशोभिपयोधराढ्याम्।
कपालपाशाङ्कुशशूलहस्तां नीलांशुकां यामवतीं नमामि।। ९।।
नीलाञ्जनाभामरिशङ्खशूलखट्वाङ्गहस्तां तरुणेन्दुचूडाम्।
भीमां त्रिनेत्रां जितशत्रुवर्गां दुर्गां भजे दुर्गतिभङ्गदक्षाम्।। १०।।
टङ्कं कपालं डमुरुं त्रिशूलं सम्बिभ्रती चन्द्रकलावतंसा।
पिङ्गोर्ध्वकेशी सितभीमदंष्ट्रा भूयाद्विभूत्यै मम भद्रकाली।। ११।।

ऋक्पञ्चकं जपेत् सम्यगयुतं तद्दशांशत:। हविषा घृतसिक्तेन जुहुयादर्चितेऽनले।। १२।।
एवं कृतपुरश्चर्य: प्रयोगे कुशलो भवेत्। अग्निर्यामवती ध्येयौ वश्याकर्षणकर्मणो:।। १३।।
स्मरेद् दुर्गां भद्रकालीं मन्त्री मारणकर्मणि। जानुप्रमाणे सलिले स्थित्वा निशि जपेन्मनुम्।।१४।।
अनेन वाञ्छित: साध्य: किङ्करो जायतेऽचिरात्[४]। नाभिमात्रोदके स्थित्वा जपेन्मन्त्रमिमं सुधी[५]:।।१५।।
अष्टोत्तरसहस्रं यस्तस्य साध्यो वशे भवेत्। ऋक्पञ्चकं जपेन्मन्त्री कण्ठमात्रोदके स्थित:।। १६।।
सप्तभिर्दिवसैर्भूपान् वशयेद्विधिनामुना। विलिख्य तालपत्रे तं साध्यनाम्ना विदर्भितम्।। १७।।
नि:क्षिप्य क्षारसम्मिश्रे जले तत् क्वाथयेन्निशि। वश्यो भवति साध्योऽस्य नात्र कार्या विचारणा।।१८।।
तालपत्रे लिखित्वैनं भद्रकालीगृहे खनेत्। वश्याय सर्वजन्तूनां प्रयोगोऽयमुदाहृत:।। १९।।
ताम्रपत्रे समालिख्य मन्त्रं साध्य[६]विदर्भितम्। तापयेत् खादिरे वह्नौ मासाद्वश्यो भवेन्नर:।। २०।।
त्रिकोणकुण्डमापाद्य सम्यक् शास्त्रोक्तलक्षणम्। तस्मिन् होमं प्रकुर्वीत संस्कृते हव्यवाहने।।२१।।
प्रक्षाल्य गव्यदुग्धेन संशोध्य लवणं[७] सुधी:। सुचूर्णितं तज्जुहुयात् सप्ताहाद्वशयेज्जनान्[८]।।२२।।

---

१. 'भजामि' ग. पाठ:। २. 'म्बरां' ग. पाठ:। ३. 'कालाम्बुदाभा' ग. पाठ:। ४. 'क्षणात्' ग. पाठ:।
५. 'मनन्यधी:' ग. पाठ:। ६: 'तालपत्रे लिख्य यन्त्रं साध्यनाम' ख. पाठ:। ६.'प्य लवणात्' ग. पाठ:। ८. 'जगत्' ग. पाठ:।

दधिमध्वाज्यसंसिक्तैः सैन्धवैर्जुहुयात् तथा। वशयेत् सकलान् देशा[1]नचिरात् किमु पार्थिवान्।।२३।।
विशुद्धलवणं प्रस्थं विभक्तं पञ्चधा पृथक्। एकैकया प्रजुहु[2]यादृचा पञ्चाहमादरात्।। २४।।
यस्य नाम्ना स वश्यः स्यादनेनैव न संशयः[3]। शुद्धं लवणमादाय जुहुयान्मधुरान्वितम्।। २५।।
ऊनपञ्चाशदाहुत्या वशं नयति वाञ्छितम्। नित्यं शुद्धेन लोणेन हुत्वा शत्रून् वशं नयेत्।। २६।।
मधुरत्रयसंयुक्तैर्लवणैः साधुचूर्णितैः। जुहुयाद् वशयेन्नारीर्नरान् नरपतीनपि ।। २७।।
मन्त्रं कृष्णतृतीयादि प्रजपेद्यावदष्टमी। पुत्तलीः पञ्च कुर्वीत साङ्गोपाङ्गाः समाः शुभाः।। २८।।
एका साध्यद्रुमेण स्यादन्या पिष्टमयी मता। चक्रिहस्तमृदान्या स्यादन्या सिक्थमयी स्मृता।।२९।।
लवणं पोतसम्भूतं चूर्णितं परिशोधितम्। कुडवं प्रोक्षयेत् क्षीरदध्याज्यमधुभिः क्रमात्।। ३०।।
गुडाज्यमधुभिः सम्यङ्मिश्रितेनामुना ततः। कुर्वीत पुत्तलीं सौम्यां सर्वावयवशोभिताम्।। ३१।।
प्राणमन्त्रकृतं यन्त्रमासां हृदि विनिःक्षिपेत्। आसु प्राणान् प्रतिष्ठाप्य पूजयेत् कुसुमादिभिः।।३२।।
पश्चात् कृष्णाष्टमीरात्रौ याममात्रे गते सति। विधाय मातृकान्यासं मन्त्रन्यासमनन्तरम्।। ३३।।
चिटिमन्त्रसमुद्भूतान् चतुर्विंशतिसंख्यकान्। ताराद्यान् विन्यसेद्वर्णान् स्थानेष्वेषु समाहितः।। ३४।।
मूर्ध्नि भाले दृशोः श्रुत्योर्नासास्यचिबुकेष्वथ। कण्ठहृत्स्तनयुग्मेषु कुक्षौ नाभौ कटिद्वये।। ३५।।
मेढ्रे पायौ प्रविन्यस्य शिष्टवर्णचतुष्टयम्। ऊरुद्वये जानुयुगे जङ्घायुग्मे पदद्वये ।। ३६।।
एवं विन्यस्तसर्वाङ्गो रक्तमाल्यानुलेपनः। रक्तवस्त्रधरः शुद्धः पुत्तलीं दारुणा कृताम्।। ३७।।
अधोमुखीं खनेत् कुण्डे पिष्टजामासनादधः। मृन्मयीं प्रतिमां पाददेशे न्यस्येत् तथात्मनः।। ३८।।
मधूच्छिष्टमयीं व्योम्नि कुण्डस्योर्ध्वं प्रलम्बयेत्। लवणेन कृतां पश्चात् पुत्तलीं संस्पृशञ्जपेत्।।३९।।
ऋक्पञ्चकं यथान्यायमष्टोत्तरसहस्रकम्। संहृत्या चिटिमन्त्रार्णान् पुनस्तस्यास्तनौ न्यसेत्।। ४०।।
अङ्गुष्ठसन्धिप्रपदजङ्घाजानूरुपायुषु । लिङ्गदेशे पुनर्नाभौ जठरे हृदयाम्बुजे ।। ४१।।
स्तनद्वये कन्धरायां चिबुके वदने पुनः। घ्राणयोः कर्णयोरक्ष्णोर्ललाटे मूर्धनि न्यसेत्।। ४२।।

तत्प्रतिमाप्रमाणं तु—

आयामः पादयोस्तस्या आकट्याच्चतुरङ्गुलम्। पादोनद्व्यङ्गुलात् कुक्षिस्तावदेनाङ्गुलोदरम्।।१।।
अङ्गुलद्वयमावक्त्रात् कण्ठदेशस्य मानकम्। शिरसो वक्ष्यमाणं स्यात् सार्धद्वयमिहाङ्गुलम्।।२।।

इति द्वादशाङ्गुलप्रमाणप्रतिमेत्यर्थः।।

अग्निमादाय सन्दीप्य साध्यनक्षत्रदारुभिः। तस्मिन्नभ्यर्च्य मन्त्रोक्तां देवतां रूप्यपात्रके।। ४३।।
कुशीतराजिपुष्पाद्भिर्दत्त्वार्घ्यं प्रणमेत् सुधीः। मन्त्रैरेतैः प्रयोगादावन्ते संयतमानसः।। ४४।।
ॐ त्वमनेनाप्य[4]मित्रघ्न निशायां हव्यवाहन। हविषा मन्त्रजप्तेन[5] तृप्तो भव तया सह।। ४५।।

---

१. 'देवान्' ख. पाठः। २. 'कमंशां जु' ग. पाठः। ३. 'न विधिनाचिरात्' ग. पाठः। ४. 'त्वमाननम्' क. पाठः।
५. 'दत्तेन' क. पाठः।

जातवेदो महादेव तप्तजाम्बूनदप्रभ। स्वाहापते विश्वभक्ष लवणं दह शत्रुहन्।। ४६।।
ईशे शर्वरि शर्वाणि ग्रस्तं मुक्तं त्वया जगत्। महादेवि नमस्तुभ्यं वरदे कामदा भव।। ४७।।
तमोमयि महादेवि महादेवस्य सुव्रते। त्रियामे[1] पुरुषं हत्वा वशमानय देवि[2] मे।। ४८।।
दुर्गे दुर्गा[3]दिरहिते दुर्गसंरोधनाकुले[4]। चक्रशङ्खधरे देवि दुष्टशत्रुभयङ्करि ।। ४९।।
नमस्ते दह शत्रुं मे वशमानय चण्डिके। शाकम्भरि महादेवि शरणं मे भवानघे।। ५०।।
भद्रकालि भवाभीष्टे भद्रसिद्धिप्रदायिनि। सपत्नान् हन[5] हन दह शोषय तापय।। ५१।।
शूलासिशक्तिवज्राद्यैरुत्कृत्योत्कृत्य मारय। महादेवि महाकालि रक्षास्मानक्षरात्मिके।। ५२।।
साध्यं संस्मृत्य[6] निर्भिद्य पुत्तलीं सप्तधा ततः। ऋक्पञ्चकं समुच्चार्य जुहुयादेधितेऽनले।। ५३।।
प्रथमो दक्षिणः पादस्तत्करस्तदनन्तरम्। शिरस्तृतीयमाख्यातं वामहस्तस्ततः परम्।। ५४।।
मध्यादूर्ध्वं पञ्चमः स्यादधोऽङ्गः षष्ठ ईरितः। सप्तमो वामपादः स्यादेवं भागक्रमः स्मृतः।। ५५।।
सप्तसप्तविभागो वा प्रोक्तेष्वेषु यथाविधि। हुत्वैवमर्चयित्वाग्निं प्रणमेद् दण्डवत्ततः।। ५६।।
यजमानो धनैर्धान्यैः प्रीणयेद्गुरुमात्मनः। अनेन विधिना मन्त्री वशयेत् ससुरासुरान्।। ५७।।
किं पुनर्मनुजान् भूपानमात्यान् वार[7]योषितः। मारणे पूर्वसम्प्रोक्तं पुत्तलीनां चतुष्टयम्।। ५८।।
निवेशयेद्यथापूर्वं साधकेन्द्रो विधानवित्। अपरां वक्ष्यमाणेन विधानेन प्रकल्पयेत्।। ५९।।
वराहपारावतविट्तिलत्र्यूषणरामठैः। व्रणकृन्निम्बसिद्धार्थसाध्यवामाङ्घ्रिरेणुभिः।। ६०।।
माहिषीमूत्रसम्पिष्टैः पूर्वोक्तलवणान्वितैः। विधाय पुत्तलीं सम्यक् प्राणस्थापनमाचरेत्।। ६१।।
जपपूजादिकं सर्वं कुर्यात् प्रागुक्तवर्त्मना। ततः पूर्वोदिते कुण्डे रात्रौ प्रज्वलितेऽनले।। ६२।।
दुर्गां वा भद्रकालीं वा समाराध्य यथाविधि। धारयेन्निशितं शस्त्रं सव्यहस्तेन[8] साधकः।। ६३।।
वामपादं समारभ्य दक्षिणाङ्घ्र्यवसानकम्। छित्वा छित्वा प्रजुहुयान्निराहारो जितेन्द्रियः।। ६४।।
कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशीम्। अनेनैव विधानेन होमं कुर्याद्विचक्षणः।। ६५।।
त्रिसप्ताहप्रयोगेण मारयेद्रिपुमात्मनः।..।।

अथ लवणमन्त्राः—

लवणाम्भसि तीक्ष्णोऽस्युग्रोऽसि हृदयं तव। लवणस्य पृथिवी माता लवणस्य वरुणः पिता।। १।।
लवणे हूयमाने तु कुतो निद्रा कुतो रतिः। लवणं पचति पाच लवणं छिन्दसि भिन्दति।। २।।
अमुष्य दह गात्राणि दह मांसं दह त्वचम्। दह त्वगस्थिमज्जानि अस्थिभ्यो मज्जिकां दह।।३।।
यदि वसति योजनशते नदीनां वा शतान्तरे। नगरे लोहप्राकारे कृष्णसर्पशतार्गले।। ४।।
तं दग्ध्वानय मे शीघ्रमग्रे लोणस्य तेजसा। वशमायातु लवणमन्त्रशक्तिपुरस्कृतः।। ५।।

---

[1] 'एषा मे' ग. पाठः। [2] 'देहि' क. पाठः। [3] 'सर्गा' क. पाठः। [4] 'र्गले' क. पाठः। [5] 'हन दह' शोषय तापय तापय' ख. पाठः। [6] 'संस्कृत्य' ख. ग. पाठः। [7] 'नृप' ख. पाठः। [8] 'सम्यगुक्तेन' ग. पाठः।

या ते रात्रि: शल्यविद्धस्य शूलाग्रारोपितस्य च। या ते रात्रिर्महारात्रि: सा ते रात्रिर्महानिशा।।६।।

इति। एतेषु ऋगादिषु प्रणवान् संयोज्य प्रणवपाशादि त्र्यक्षरादि चिटिमन्त्रसमेतं ऋक्पञ्चकं जपेत्। अथवा सर्वेषु ऋगादिषु चिटिमन्त्रादौ च आवरणदेवतादिषु च प्रणवपाशादित्र्यक्षरं योजयेत्।।

पिप्पलादमते अथ लवणमन्त्रा:—

लवणाम्भसि तीक्ष्णोऽसि उग्रोऽसि हृदयं तव। लवणस्य पृथिवी माता लवणस्य जलं पिता।। १।।
लवणं दहति पचति लवणं छिन्धि भिन्दति। लवणे हूयमाने तु कुतो निद्रा कुतो रति:। २।।
अमुष्य दह गात्राणि दह मांसं दहानलम्। दह त्वगस्थिमज्जानि अस्थिभ्यो मज्जिकां दह।।३।।
यदि वसति योजनशते नदीनां वा शतान्तरे। सं दग्ध्वा च स मे शीघ्रमग्नेर्लवणतेजसा।। ४।।
या ते रात्रिर्महारात्रिर्यातिरात्रिर्महानिशा। या रात्रि: शल्यविद्धस्य शूलाग्रारोपितस्य च।। ५।।

ह्रीं चिटि चिटि चण्डालि महाचण्डालि अमुकं मे वशमानय स्वाहा, इति लवणमन्त्रा:।। अस्याङ्गिरा ऋषि:, अनुष्टुप् छन्द: अग्निरात्रिदुर्गाभद्रकाल्यो देवता:, मन्त्रस्य हलो बीजानि, स्वरा: शक्तय:—लवणाम्भसि—लवणे हूयमाने—दह त्वगस्थिं—सन्दग्ध्वा—या ते रात्रिरित्येतै: पञ्चमन्त्रै: पञ्चाङ्गानि। अथवा चिटिमन्त्राक्षरै: पञ्चत्रिपञ्चचतुष्पञ्चद्विसंख्याकै: क्रमात् षडङ्गानि।। ध्यानम्—

अरुणोऽरुणपङ्कजसन्निषण्ण: स्रुवशक्तिवराभययुक्तकर: ।
अमितार्चिरजातगतिर्विलसन्नयनत्रितयोऽवतु वो दहन:।। १।।
नीलतरांशुककेशकलापा नीलतनुर्निबिडस्तनभारा ।
साङ्कुशपाशशूलकपाला यामवती भवतोऽवतु नित्यम्।। २।।
करकमलविराजच्चक्रशङ्खासिशूला परिलसितकिरीटा पातितानेकदैत्या।
त्रिनयनलसिताङ्गी तिग्मरश्मिप्रकाशा पवनसखनिभाङ्गी पातु कात्यायनी व:।। ३।।
सुरौद्रसितदंष्ट्रिका त्रिनयनोर्ध्वकेशोल्वणा कपालपरशूल्लसड्डमरुका त्रिशूलोज्ज्वला।
घनाघननिभा रणद्रुचिरकिङ्किणीमालिका भवद्विभवसिद्धये भवतु भद्रकाली चिरम्।। ४।।

इति ध्यानम्। अयुतजप: पुरश्चरणम्। अत्यन्तानियतस्य त्रिसहस्रजप: पुरश्चरणम्। आज्यचरुणा दशांशहोम:। अष्टमीमारभ्य चतुर्दशीपर्यन्तं रात्रिषु प्रतिदिनं कुडवपरिमितलवणचूर्णैर्मधुरत्रयोपेतैरष्टोत्तरं द्विशतं जुहुयात्। एवं सप्तरात्रहोमेन साध्यो दासवद्वश्यो भवति। प्रयोगकाले मन्त्रस्यामुकपदस्थाने साध्यनाम निक्षिप्य जुहुयात् प्रजपेच्च।। साध्यनक्षत्रवृक्षास्तु—

कारस्करोऽथ धात्री स्यादुडुम्बरतरु: पुन:। जम्बू: खदिरकृष्णाख्यौ वंशपिप्पलसंज्ञकौ।। १।।
नागरोहिणनामानौ पलाशप्लक्षसंज्ञकौ । अम्बष्टबिल्वार्जुनाख्यविशङ्कतमहीरुहा: ।। २।।
वकुल: शम्बर:[1] सर्जो वञ्जुल: पानसार्ककौ। शमीकदम्बाम्रनिम्बमधूका ऋक्षशाखिन:।। ३।।

---

[1] 'सरल:' क. ख. पाठ:।

इति।। अथान्नपूर्णेश्वरीमन्त्राः ज्ञानार्णवे– (९ प० १५ श्लो०)

तारं च भुवनेशानी श्रीबीजं कामराजकम्। हृदन्ते भगवत्यर्णान् माहेश्वरिपदं वदेत्।।
अन्नपूर्णेऽग्निजाया च विद्येयं विंशदक्षरी।.......................................।।

तारं प्रणवः, भुवनेशानी मायाबीजं, श्रीबीजं श्रीमिति, कामराजकं क्लीं, हृन्नमः, भगवति स्वरूपं, माहेश्वरि अन्नपूर्णे स्वरूपं, अग्निजाया स्वाहाकारः। अत्र माहेश्वर्यन्नपूर्णे इति पदयोर्न सन्धिर्विंशदक्षरीत्युक्तेः।। तथा–(९-१९)

ऋषिर्ब्रह्मास्य मन्त्रस्यानुष्टप् छन्दोऽभिधीयते[1]। अन्नपूर्णेश्वरी देवी देवता परिकीर्तिता।। १।।
बीजं तु भुवनेशानी श्रीबीजं शक्तिरुच्यते। कीलकं कामराज[2] स्यात् षडङ्गानि ततः परम्।। २।।

इति। दक्षिणामूर्तिः– (१६ प० ७ श्लो०)

षड्दीर्घस्वरसम्भिन्नां हृल्लेखां कुरु पार्वति। एभिरङ्गानि विन्यस्य वर्णन्यासमथाचरेत्।। १।।
ब्रह्मरन्ध्रे च सीमन्ते भालभ्रूमध्ययोर्नसि। वक्त्रे कण्ठे च हृदये कुक्षिनाभिषु लिङ्गके।। २।।
आधारे स्फिग्द्वये चोरुद्वये जानुद्वये तथा। पादयोर्देवदेवेशि (पदन्यासं ततश्चरेत् ।। ३।।
नवद्वारेषु देवेशि पदन्यासः उदाहृतः।.......................................।।

ज्ञानार्णवे तु– (९–२३)

पदानि नव देवेशि) नवद्वारेषु विन्यसेत्। मूर्धादिगुदपर्यन्तं पुनस्तेषु वरानने।। ४।।
गुदादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत्।.......................................।।

गुदः पर्यन्तो दशमो येषां ब्रह्मरन्ध्रादीनामित्यर्थः। तेन ब्रह्मरन्ध्रादिलिङ्गपर्यन्तं नव पदानि विन्यस्य पुनर्गुदादिदक्षनेत्रान्तानि तान्येव पदानि न्यसनीयानीति।

ब्रह्मरन्ध्रास्यहृदयमूलाधारेष्वनुक्रमात्। चतुर्बीजानि विन्यस्य स्वरेष्वन्यान् प्रविन्यसेत्।।
गोलकं च ततो देवि विन्यसेद्विधिवत् प्रिये।.......................................।।

गोलकं व्यापकम्।। ''मूलेन व्यापकं न्यासं कुर्याद् देहस्य सिद्धये'' इति दक्षिणामूर्त्येकवाक्यात्। स्वरेषु स्वरन्यासस्थानेषु। ध्यानम्–

तप्तकाञ्चनसङ्काशां[3] बालेन्दुकृतशेखराम्। नवरत्नप्रभादीप्तमुकुटां कुङ्कुमारुणाम् ।। १।।
चित्रवस्त्रपरीधानां शफराक्षीं[4] त्रिलोचनाम्। सुवर्णकलशाकारपीनोन्नतघटस्तनीम् ।। २।।
नृत्यन्तमीशमनिशं दृष्ट्वानन्दमयीं पराम्। सानन्दमुखलोलाक्षीं मेखलाढ्यां नितम्बिनीम्।। ३।।
अन्नदानरतां नित्यं भूमिश्रीभ्यां नमस्कृताम्[5]।.......................................।।

अन्नदानरतामित्यनेन वामहस्तेऽन्नपात्रं दक्षिणहस्ते दर्वीं धृतवतीति ज्ञेयम्।

''अथवा दक्षिणे हस्ते दर्वीं ध्यायेत् सुवर्णजाम्। दुग्धान्नभरितं पात्रं दिव्यरत्नविभूषितम्।।
वामहस्ते महेशानि'' इति संहितोक्तेः।

---

[1] 'कृतिश्छन्दाभिधीयते' ख. पाठः। [2] 'बीजं' क. पाठः। [3] 'वर्णाभां' क. पाठः। [4] 'शावकाक्षीं' क. पाठः। [5] 'अलङ्कृतां' क. पाठः।

ज्ञानार्णवे– (९–२५)

त्रिकोणं च चतुष्पत्रं वसुपत्रं तत: परम्। कलापत्रं च भूबिम्बं सचतुर्द्वारमालिखेत्।। १।।

भूबिम्बं चतुरस्रत्रयात्मकं, चतुरस्रत्रयं च कुर्यात्। चतुर्द्वारोपशोभितमिति सम्मोहनपञ्चरात्रात्। एतत्सर्वदैवतपरं ज्ञेयम्। "सर्वेष्वेव विधातव्यं पूजाचक्रेषु भृगृह"मिति स्वयमभिधानात्।

सिंहासनस्य परित: पीठदेवी: समर्चयेत्। सिंहासने दक्षिणे तु कथिता: पीठनायिका:।। २।।
ता एव पूजिता: पीठे वामाद्या: परमेश्वरि।...।।

वामाद्या: शैवपीठशक्तय:। अथवा–

समभ्यर्च्य जयाद्यास्तु पीठशक्तीर्नव क्रमात्। पीठं च पीठमन्त्रेण हृल्लेखाद्या: प्रपूजयेत्।। १।।

इति सम्मोहनतन्त्रवचनात्। "जयादिनवशक्तीश्च पूजयेत्तदनन्तरम्" इति सारसङ्ग्रहवचनात्। पूर्वोक्तभुवनेश्वरीपीठस्य जयादिनवशक्तय:, तत्पीठमन्त्रश्च वा ग्राह्य:। तथा– (९–३४)

एवं ध्यात्वा यजेद्देवीं षडङ्गावरणं यजेत्। तारं प्रासादबीजं च हृच्छिवाय तत: परम्।। १।।
सप्ताक्षरी महाविद्या अनया देवि पूजयेत्। गोक्षीरधाम[1]धवलं पञ्चवक्त्रं त्रिलोचनम्।। २।।
प्रसन्नवदनं शान्तं नीलकण्ठविराजितम्। कपर्दिनं स्फुरत्सर्पभूषणं कम्बुसन्निभम्।। ३।।
नृत्यन्तमीश्वरं देवं त्रिकोणाग्रे सुरेश्वरि। ॐ नम: पदमाभाष्य ततो भगवतेपदम्।। ४।।
ततो वराहरूपाय भूर्भूव:स्व:पतिस्तथा। ङेन्तं भूमिपतित्वं च मे देहि च ददापय।। ५।।
वह्निजायान्वितो मन्त्रो वराहस्य वरानने। अनया विद्यया देवि वामकोणे प्रपूजयेत्।। ६।।
ॐ नम:पदमाभाष्य ङेन्तं नारायणं लिखेत्। नारायणं दक्षकोणे क्रमेण परिपूजयेत्।। ७।।
वामदक्षिणयो: पूज्ये भूश्रियौ परमेश्वरि। एकेन मनुना देवि कथयामि तवानघे।। ८।।
अन्नमहिं पदं चान्नं मे देह्यन्नाधिपान्तिके। तये ममान्नमाभाष्य प्रदापय तत: परम्।। ९।।
वह्निजायान्वितो मन्त्र: सम्पुटीकृत्य पूजयेत्। ग्लौमात्मकेन रमया वामदक्षिणयो: क्रमात्।। १०।।
ततश्चतुर्दले पूज्या: पश्चिमादिक्रमेण तु। तारेण परविद्यां च भुवनेशीं तदात्मना।। ११।।
कमलां रमया भद्रे कामेन सुभगां यजेत्। वसुपत्रे महेशानि ब्राह्म्याद्या: पश्चिमादित:।। १२।।
षोडशारे महेशानि चन्द्रमण्डलरूपिणी:। कला: षोडश सम्पूज्या: पश्चिमादिक्रमेण हि।। १३।।
अमृता मानदा [2]पुष्टिस्तुष्टि: प्रीती रतिस्तथा। ह्रीश्च श्रीश्च सुधा रात्रिर्ज्योत्स्ना हैमवती तथा।। १४।।
छाया च पूर्णिमा नित्या अमावास्या तु षोडशी। शैपैर्वर्णै: प्रपूज्याश्च अन्नंपूर्णान्तशब्दका:।।१५।।
चतुरस्रे लोकपालान् क्रमेण परिपूजयेत्।...।।

इति। अथ प्रथमप्रयोग:– तत्र प्रात: कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे अनुष्टुप्छन्दसे नम:। हृदये श्रीअन्नपूर्णायै देवतायै नम:। गुह्ये ह्रीं बीजाय नम:। पादयो: श्रीं शक्तये नम:। नाभौ

---

[1] 'कुन्द' ग. पाठ:। [2] 'पूषा' ग. पाठ:।

क्लीं कीलकाय नमः। इति विन्यस्य ममान्नसमृद्धये जपे विनियोगः। इति कृताञ्जलिरुक्त्वा, ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यस्य, शिरसि ओं नमः। सीमन्ते ह्रीं नमः। भाले श्रीं नमः। भ्रूमध्ये क्लीं नमः। नासायां नं नमः। मुखे मों नमः। कण्ठे भं नमः। हृदि गं नमः। उदरे वं नमः। नाभौ तिं नमः। लिङ्गे मां नमः। आधारे हें नमः। दक्षस्फिजि श्वं नमः। वामे रिं नमः। दक्षोरौ अं नमः। वामोरौ न्नं नमः। दक्षजानुनि पूं नमः। वामे र्णें नमः। दक्षपादे स्वां नमः। वामे हां नमः। इति वर्णन्यासः।।

ततो ब्रह्मरन्ध्रे ओं नमः।। दक्षनेत्रे ह्रीं०। वामे श्रीं०। दक्षश्रोत्रे क्लीं०। वामे नमो०। दक्षनासारन्ध्रे भगवति०। वामे माहेश्वरि०। मुखे अन्नपूर्णे०। लिङ्गे स्वाहा०। इति विन्यस्यैतान्येव पदानि गुदलिङ्गमुखवामदक्षनासारन्ध्रवामदक्षिणश्रोत्र-वामदक्षनेत्रेषु। इति पदन्यासः।। ततो ब्रह्मरन्ध्रे ओं नमः। मुखे ह्रीं नमः। हृदये श्रीं नमः। मूलाधारे क्लीं नमः। इति विन्यस्य शिष्टं षोडशस्वरन्यासस्थानेषु न्यसेत्। ततो मूलेन व्यापकं कृत्वा ध्यानाद्यात्मपूजान्ते प्रागुक्तभुवनेश्वरीपीठं समभ्यर्च्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, त्रिकोणाग्रे ''ओं हौं नमः शिवाय शिवाय नमः'' इति मन्त्रेण नृत्यन्तं शिवं सम्पूज्य, वामकोणे ''ओं नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि ददापय स्वाहा वराहाय नमः''। इति वराहं सम्पूज्य, दक्षकोणे ''ओं नमो नारायणाय नारायणाय नमः'' इति सम्पूज्य, त्रिकोणाभ्यन्तरे देव्या वामभागे ''ग्लौं अन्नमह्यन्नं मे देहि अन्नाधिपतये ममान्नं प्रदापय स्वाहा ग्लौं भूम्यै नमः'' इति सम्पूज्य, दक्षभागे ''श्रीं अन्नमह्यन्नं मे देहि अन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं श्रियै नमः'' इति सम्पूज्य, चतुर्दलेषु देव्यग्रादितः— ओं परविद्यायै नमः। ह्रीं भुवनेश्वर्यै नमः। श्रीं कमलायै नमः। क्लीं सुभगायै नमः।। ततोऽष्टदलेषु ब्राह्म्याद्याः सम्पूज्य, षोडशदलेषु देव्यग्रादि प्रादक्षिण्येन नं अमृतायै अन्नपूर्णायै० मों मानदायै अन्नपूर्णायै० भं पुष्ट्यै अन्नपूर्णायै० गं तुष्ट्यै अन्नपूर्णायै० वं प्रीत्यै अन्नपूर्णायै० तिं रत्यै अन्नपूर्णायै० मां ह्रियै अन्नपूर्णायै० हें श्रियै अन्नपूर्णायै० श्वं स्वधायै अन्नपूर्णायै० रिं रात्र्यै अन्नपूर्णायै० अं ज्योत्स्नायै अन्नपूर्णायै० न्नं हैमवत्यै अन्नपूर्णायै० पूं छायायै अन्नपूर्णायै० र्णें पूर्णिमायै अन्नपूर्णायै० स्वां नित्यायै अन्नपूर्णायै० हां अमावास्यायै अन्नपूर्णायै नमः। तद्बहिश्चतुरस्रे प्राग्वदिन्द्रादीन् सम्पूज्य शेषं समापयेदिति।। दक्षिणामूर्तिः— (१६। १७)

लक्षं जपेत् सनियमो दशांशेन तु होमयेत्। रम्यपायससर्पिर्भ्यां सिद्धिदा भवति ध्रुवम्।। १।।

इति। सारसङ्ग्रहे—

तर्पणादि ततः कुर्यात् पूर्वोक्तविधिना सुधीः। अन्नपूर्णेश्वरी देवी पूजितान्नसुवर्णदा।। १।।
अनया विद्यया जातः कुबेरो धननायकः। अन्नपूर्णेश्वरी नाम सर्वसम्पत्समृद्धिदा।। २।।

इति। तथा—

बीजहीनेयमेव स्यात् षोडशार्णा तथा परे[1]। मायाद्या साथ ताराद्या मता सप्तदशाक्षरा।। १।।

---

[1] 'परा' ग. पाठः।

मायातारादिका चान्या गदिताष्टादशार्णका। मुन्याद्याः पूर्वमुदिता माययाङ्गक्रिया मता।। २।।
अर्चनाङ्गेन्द्रवज्राद्यैः साधयेत् पूर्ववच्च ताः।..।।

भगवति भवरोगात् पीडितं दुष्कृतोत्थात्[१] सुतदुहितृकलत्रोपद्रवेणानुयातम्।
विलसदमृतदृष्ट्या वीक्ष्य विभ्रान्तचित्तं सकलभुवनमातस्त्राहि मामोंनमस्ते।। ३।।
माहेश्वरीमाश्रितकल्पवल्लीमहं भवोच्छेदकरीं भवानीम्।
क्षुधार्तजायातनयाद्युपेतस्त्वामन्नपूर्णे शरणं प्रपद्ये।। ४।।
दारिद्र्यदावानलदह्यमानं पाह्यन्नपूर्णे गिरिराजकन्ये।
कृपाम्बुधौ मज्जय मां त्वदीये त्वत्पादपद्मार्पितचित्तवृत्तिम्।। ५।।
इत्यन्नपूर्णास्तुतिरत्न[२]मेतच्छ्लोकत्रयं यः पठतीह भक्त्या।
तस्मै ददात्यन्नसमृद्धिमम्बा श्रियं च विद्यां च यशश्च भुक्तिम्।। ६।।

अन्नप्रदाख्यमन्त्रस्य पूर्वोक्तस्योच्यते विधिः। ऋषिर्ब्रह्मा समाख्यातश्छन्दश्चातिकृतिर्मतम्।। ७।।
देवते भूश्रियौ प्रोक्ते धनधान्यप्रदे शुभे। वेदेषुषण्मुनिद्वन्द्वमितैर्मन्त्रार्णकैः पृथक् ।। ८।।
पञ्चाङ्गानि मनोः कुर्याज्जातियुक्तानि मन्त्रवित्।..।।

क्षीराब्धौ रजतोच्चवप्रकनकद्वीपे सुराद्ये (?) शुभे
कल्पद्रुव्रजशोभिते मणिमये सद्वित्तपस्याग्रतः।
आसीने वसुधाश्रियौ धनसमूहान् संसृजन्त्यौ मुहु-
र्भक्ताय प्रविचिन्तयेद् दिनमुखे धान्यान्नसम्पत्तये।। ९।।

आवाह्य वैष्णवे पीठे देवीं गन्धादिभिर्यजेत्। पुराङ्गानि यजेद्बाह्ये दिक्षु भूतानि संयजेत्।। १०।।
आद्यानि चत्वारि पुनर्विदिक्षु पूजयेदिमाः। निवृत्याद्याश्चतस्रस्तु बलाक्याद्यास्ततः परम्।। ११।।
इन्द्रादयस्तदस्त्राणि चैवं पूजा समीरिता।..।।

इति।। अथ द्वितीयप्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे अतिकृतिच्छन्दसे नमः। हृदये भूश्रीभ्यां देवताभ्यां नम इति विन्यस्य मम धनधान्यसमृद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, मूलमन्त्रेणाभिसृष्टयोः पाण्योः अन्नमहि अङ्गुष्ठाभ्यां नमः। अन्नं मे देहि तर्जनीभ्यां नमः। अन्नाधिपतये मध्यमाभ्यां नमः। ममान्नं प्रदापय अनामिकाभ्यां नमः। स्वाहा कनिष्ठिकाभ्यां नमः। इति विन्यस्य हृदयादिष्वपि नेत्रहीनेषु पञ्चाङ्गेषु न्यसेत्। अन्नमहि हृदयाय नमः। अन्नं मे देहि शिरसे स्वाहा। अन्नाधिपतये शिखायै वषट्। ममान्नं प्रदापय कवचाय हुं। स्वाहा अस्त्राय फट्, ततो ध्यानादिमानसपूजान्ते चतुर्द्वारयुक्चतुरस्त्रत्रयवेष्टितमष्टदल-कमलद्वयं पूजाचक्रं कृत्वा, प्राग्वत् संस्थाप्य सम्पूज्य तत्र वक्ष्यमाणवैष्णवपीठं सम्पूज्य, तत्र भूश्रियौ समावाह्यासनादि-पुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, प्रथमाष्टदलस्य दिग्दलेषु ओं आकाशाय नमः। ओं वायवे नमः। ओं अग्नये नमः। ओं जलाय नमः, इति सम्पूज्य, विदिग्दलेषु ओं निवृत्त्यै नमः। प्रतिष्ठायै नमः। विद्यायै नमः। शान्त्यैः नमः। इति सम्पूज्य,

---

१. 'दुःखयोगात्' ख. पाठः। २. 'बद्धमे' ख. पाठः।

द्वितीयाष्टदलेष्वेकाक्षरलक्ष्मीप्रकरणोक्तवलाक्याद्यष्टशक्तीः सम्पूज्य प्रागवदिन्द्रादिपूजामारभ्य शेषं समापयेदिति। तथा—

नियुतं प्रजपेन्मन्त्रं तद्दशांशं च मन्त्रवित्। जुहुयादाज्यसम्पृ[१]क्तेनान्नेन च यथाक्रमम्।। १।।
तर्पणादि ततः कृत्वा विप्रान् सम्भोज्य यत्नतः। गुरुं सन्तोष्य यत्नेन मन्त्रसिद्धिमवाप्नुयात्।। २।।
दिनादौ प्रजपेन्मन्त्रमष्टोत्तरशतं सुधीः। क्षेत्रधान्यान्नरत्नौघसमृद्धो भवति ध्रुवम् ।। ३।।

इति।। अथाश्वारूढामन्त्राः। सारसङ्ग्रहे—

योनिर्वियत् सनेत्रं च परमेपदमुच्चरेत्। अस्थिगं मेदयुक्ता च रक्तस्थं दृक् द्विठावपि।। १।।
प्रणवाद्यो दशार्णोऽयमश्वारूढामनुर्मतः।..।।

योनिरेकारः, वियद्धकारः सनेत्रं इकारयुक्तं तेन हि, परमे स्वरूपं, अस्थि शकारः मेदो वकारः तेन श्व, रक्तं रेफः दृक् इकारः तेन रि, द्विठः स्वाहाकारः। तथा—

....। ऋषिर्ब्रह्मा विराट् छन्दो देवता परिकीर्तिता।। २।।
अश्वारूढा त्रिभिः पादैः प्रणवाद्यैर्द्विरीरितैः। षडङ्गानि मनोरस्य जातियुक्तानि कल्पयेत्।। ३।।

अश्वारूढां नवशशियुतां भालनेत्रां च दोष्णा
पाशाबद्धं मदनविवशं साध्यमाश्वासयन्तीम्।
दक्षेणोद्यत्कनकरचितां वेत्रयष्टीं दधानां
बन्धूकाभां मनसि कलये पीनवक्षोजनम्राम्।। ४।। इति।

तन्त्रराजे तु— (३४। ३१)

लोहितां लोहिताश्वस्थां लोहिताम्बरभूषणाम्। चतुर्भुजां त्रिनयनां प्रसन्नवदनाम्बुजाम् ।। १।।
भल्लां दक्षेण वामेन चर्मयष्टिं समुज्ज्वलाम्। अन्याभ्यां हेमपाशेन कण्ठे बद्ध्वा स्वसाध्यकम्।।२।।
हेमवेत्राहतं बद्धकरयुग्मकृताञ्जलिम् । दासोऽहमिति भाषन्तं पातितं निजपादयोः।। ३।।

स्मरन्"। इति चतुर्भुजध्यानमुक्तम्।

शाक्ते पीठे यजेद्देवीं पुराङ्गानि प्रपूजयेत्। मातॄरिन्द्रादिकान् बाह्ये तदस्त्राणि ततो बहिः।। १।।
पूजेयमश्वारूढायाः प्रोक्ता सर्वसमृद्धिदा।..।।

इति। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे विराजे छन्दसे नमः। हृदये अश्वारूढायै देवतायै नमः, इति विन्यस्य वश्यार्थे विनियोगः। इति कृताञ्जलिरुक्त्वा, एहि हृदयाय नमः। परमेश्वरि शिरसे स्वाहा। स्वाहा शिखायै वषट्। एहि कवचाय हुं। परमेश्वरि नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्, इति करषडङ्गन्यासं कृत्वा ध्यानादिपुष्पोपचारान्ते प्रागवदङ्गानि सम्पूज्य, (अष्टदलेषु प्रागवद् ब्राह्म्याद्याः सम्पूज्य) चतुरस्रे लोकपालान् सम्पूज्य धूपादिशेषं प्रागवत् समापयेत्। तथा—

जपेदयुतसंख्याकं तद्दशांशं हुनेद्घृतैः। तर्पणादि ततः कुर्यात् पूर्वोक्तविधिना सुधीः।। १।।

---

[१] 'संसिक्ते' ख. पाठः।

इत्थं ध्यात्वैव सकलं विश्वं वशयतेऽचिरात्। आज्यान्नं जुहुयान्मन्त्री लभते वाञ्छितं फलम्।।२।।
त्रिमध्वक्तैस्तथा लोणैर्हुतैर्वश्या नृपाः किल। प्रोक्तेनैव विधानेन वश्याः स्युर्वनिता अपि।। ३।।
अनया विद्यया सर्पिर्होमः काञ्चनदो मतः। त्रिस्वादुभिः सहस्रं च हुनेत् स्त्रीवश्यसिद्धये।। ४।।
पूर्वोक्तेनैव होमेन नारीमाकर्षयेद् ध्रुवम्। प्रणवाद्यथ मायादिरयमेकादशार्णकः।। ५।।
षड्दीर्घमाययैवास्य षडङ्गविधिरीरितः।................................।।

इति। तथा—

प्रणवं पाशहल्लेखे ह्यङ्कुशाद्योऽयमीरितः। त्रयोदशार्णको द्वाभ्यामेकेनैकेन युग्मतः।। ६।।
पञ्चभिश्च तथा द्वाभ्यां षडङ्गविधिरीरितः।................................।।

पाशः आं, हल्लेखा ह्रीं, अङ्कुशः क्रों, अयं दशार्णः।

पुरश्चरणमस्याणोः पञ्चलक्षं प्रकीर्तितम्। पूजादिकं स्यादनयोः पूर्वमन्त्रानुसारतः।। ७।।
कोष्ठानां द्वादशकं कृत्वा मध्यस्थवेदमिते कोष्ठे। प्रणवं साध्यसमेतं शिष्टेषु द्वादशाथ मन्त्रार्णान्।।८।।
अशेषनारीनरपनरवश्यप्रदं मतम्। अश्वारूढायन्त्रमेतत् पूजितं सर्वकामदम्।। ९।।

इति। केरलीये यन्त्रसारे—

मध्ये शक्तिं ससाध्यां ज्वलनपुरयुगास्त्रिष्वथो पाशशक्तिं
क्रोमैंक्लींसौःक्रमेण प्रविलिखतु बहिर्मन्त्रवर्णान् दलेषु।
एकैकं भानुसंख्येष्वपि मदनशरैर्नित्यया मातृकार्णै-
श्चावीतं यन्त्रमेतद्धरणिपुरगतं श्रीकरं वशयकारि ।।

अस्यार्थः— षट्कोणमध्ये ससाध्यं शक्तिबीजं विलिख्य (तत्कोणेषु आंह्रींक्रोंऐंक्लींसौः इत्येकमेकं बीजं विलिख्य बहिर्द्वादशदलेषु शक्तिरहितद्वादशाक्षराणि एकैकं क्रमेण विलिख्य) बहिर्वृत्तचतुष्टयं कृत्वा प्रथमवीथ्यां पूर्वोक्तैर्बाणबीजैर्द्वितीयवीथ्यां वक्ष्यमाणनित्यक्लिन्नानित्याविद्यया तृतीयवीथ्यां मातृकार्णैश्च निरन्तरं संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यादितदुक्तफलदं भवति। तथा—

प्रणवो भुवनाधीशा नमो भगपदं वति। माहेश्वर्येहि परमेश्वरि स्वाहान्तिको मनुः।।
एकविंशार्णकः प्रोक्तः पूजाद्यं चास्य पूर्ववत्।................................।।

भुवनाधीशा ह्रीं, अन्यत्सुगमम्। अत्र माहेश्वर्येहिपदयोर्न सन्धिरेकविंशाक्षर इत्युक्तेः।।

अथ गौरीमन्त्राः। सारसङ्ग्रहे—

मयां वदेद्गौरि रुद्रदयिते योपदं वदेत्। गेश्वर्यन्ते च वर्मास्त्रद्विठान्तः षोडशाक्षरः।। १।।

माया ह्रीं, वर्म हुं, अस्त्रं फट्, द्विठः स्वाहा।

अजोऽस्य ऋषिराख्यातोऽनुष्टुप् छन्दश्च देवता। गौरी सौभाग्यसद्वश्यसर्वसम्पत्प्रदायिका।। २।।
षड्दीर्घमायया कुर्यात् षडङ्गानि मनोरथ। हेमाभां बिभ्रतीं दोर्भिर्दर्पणाञ्जनसाधने।। ३।।
पाशाङ्कुशौ सर्वभूषां तां गौरीं सर्वदा स्मरेत्।................................।।

वामाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम्।

....। शाक्ते पीठे यजेद्गौरीं चन्दनाद्यैर्मनोहरैः।। ४।।
अङ्गानि पूर्वमभ्यर्च्य सुभगाद्यास्ततो यजेत्। सुभगा ललिता चान्या कामिनी काममालिनी।।५।।
पाशाङ्कुशौ दर्पणोऽञ्जनशलाकाष्टमी मता। शक्रादयस्तदस्त्राणि गौरीपूजा समीरिता ।। ६।।

इति। प्रपञ्चसारे तु—

[१]धर्मादिकल्पिते पीठे पीठशक्तीरिमा यजेत्। प्रभा ज्ञाना च वाग्वागीश्वरी स्याज्ज्वालिनी परा।।१ ।।
वामा ज्येष्ठा च रौद्री च गुह्यशक्तिश्च ता नव। ह्रस्वत्रयक्लीववर्ज्यस्वराढ्यभृगुणान्विता।। २।।

ह्रस्वत्रयं अइउ, क्लीवाः, ऋॠऌॡ, भृगुः सकारः।

गौंगौरीमूर्तये हृच्च पीठमन्त्रश्च कल्पिते। एवं पीठे यजेद् देवीं चन्दनाद्यैर्मनोहरैः।। ३।।
सुभगायै च विद्मान्ते हेअन्ते काममालि च। न्यै स्याद्धीमहि तन्नो च गौरी स्यात्तु प्रचोदयात्।।४।।
गायत्र्या त्वनया सर्वानुपचारान् प्रकल्पयेत्। अङ्गानि पूर्वमभ्यर्च्य सुभगाद्यास्ततो यजेत्।। ५।।
भृगुः साम्बुः सद्वितुर्यषष्ठार्केन्दुस्वरादिकाः। सुभगा ललिता चान्या कामिनी काममालिनी।।६।।
दिक्ष्वन्यत्र स्वायुधानि लोकपालैस्तदायुधैः।..।।

भृगुः सकारः अम्बु वकारः द्वि आ, तुर्य ई, षष्ठ ऊ, अर्क ऐ, तेन स्वांस्वींस्वूंस्वैं। आयुधानि दर्पणाञ्जनसाधनपाशाङ्कुशाः।

अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अजऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीगौर्यै देवतायै नमः। इति विन्यस्य ममाभीष्टार्थसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा ह्रींह्रीमित्यादिना करषडङ्गन्यासं विधाय, ध्यानाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठमभ्यर्च्याष्टदलकेसरेषु स्वाग्रादिप्रादक्षिण्येन सां प्रभायै नमः, सीं ज्ञानायै० सूं वाचे० सें वागीश्वर्यै० सैं ज्वालिन्यै० सों वामायै० सौं ज्येष्ठायै० सं रौद्र्यै० सः गुह्यशक्त्यै नमः। इति सम्पूज्य, गौं गौरीमूर्तये नमः इति समस्तं पीठं सम्पूज्यावाहनादिमुद्रादर्शनान्ते "सुभगायै विद्महे काममालिन्यै धीमहि तन्नो गौरी प्रचोदयात्" इति गायत्र्या आसनादिसर्वानुपचारान् दद्यात्। ततः पुष्पोपचारान्ते पूर्ववदङ्गानि सम्पूज्याष्टदलेषु दिग्दलेषु उों स्वां सुभगायै० उों स्वीं ललितायै० उों स्वूं कामिन्यै० उों स्वैं काममालिन्यै०। विदिक्षु पाशाय० अङ्कुशाय० दर्पणाय० अञ्जनशलाकायै० इति तदग्रादिप्रादक्षिण्येन सम्पूज्य तद्बहिश्चतुरस्रे लोकपालांस्तदस्त्राणि च सम्पूज्य धूपादि शेषं प्राग्वत् समापयेदिति। तथा—

एकलक्षं जपेन्मन्त्रं तद्दशांशं हुनेद्घृतैः। तर्पणादि ततः कुर्याद् गुरुं सन्तोष्य यत्नतः।। १।।
सिद्धे मन्त्रे प्रकुर्वीत मन्त्री काम्यानि नान्यथा। वामाक्षीणां च निशया वामोरौ विलिखेन्निशि।। २।।
आच्छादयन् वामदोष्णा तन्मनाः प्रजपेन्मनुम्। शतं सहस्रं लोलाक्षीमानयेत् काममोहिताम्।। ३।।
एतन्मन्त्रेण सञ्जप्तं गन्धपुष्पफलादिकम् । दत्तं संसेवितं सर्वजनतावश्यकारकम् ।। ४।।

इति। तथा—

अथान्यं सम्प्रवक्ष्यामि समस्तस्त्रीवशङ्करम्। काङ्क्षितस्त्रीवशंशब्दं करिसुदु पृथग् द्वयम्।।

---

[१] 'पद्मा' ग. पाठः।

घेद्वयं वाद्वयं स्त्रींस्वाहेति मन्त्रोऽयमीरितः। एकोनविंशत्यर्णाढ्यो मन्त्रः स्त्रीवश्यदः परः।।
अस्य पूजादिकं सर्वं मन्त्री पूर्ववदाचरेत्। अस्याद्यवर्णतस्त्वर्वाक् साध्यनाम प्रयोजयेत्।।
जपेन्मन्त्रं शतं वापि स वश्यो भवति ध्रुवम्।...।।

इति।। अथ पद्मावतीमन्त्राः। सारसङ्ग्रहे–

माया सलोहिता द्मावति स्वाहा सप्तवर्णकः। पद्मावत्या मनुः प्रोक्तः सर्ववश्यप्रदायकः।। १ ।।

माया भुवनेश्वरीबीजं, लोहितः पद्मावति स्वरूपम्, स्वाहा स्वरूपम्। तथा–

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छन्द उच्यते। पद्मावती देवतास्य ह्रींबीजं शक्तिरस्य तु।। २।।
स्वाहा स्यान्मायायाङ्गानि षड्दीर्घस्वरभिन्नया। कृत्वा देवीं ततो ध्यायेत् साधकः स्थिरमानसः।।३।।
रक्तोत्पलकरद्वन्द्वामब्जस्थां कमलाननाम्। बन्धूकाभां त्रिनयनां नानाकल्पोज्ज्वलां स्मरेत्।। ४।।
शक्तिपीठे यजेद् देवीं पुराङ्गानि च मातरः। लोकपालांस्तदस्त्राणि पद्मावत्यर्चमा मता।। ५।।

प्रयोगः सुगमः। तथा–

पुरश्चरणमस्यैकं लक्षं प्रोक्तं च मन्त्रिभिः। तद्दशांशेन च घृतैर्जुहुयान्मन्त्रवित्तमः ।। ६।।
एनं मनुं यो भजते सुभगः सर्वयोषिताम्। षट्कोणान्त[1]र्लिखेच्छक्तिं[2] षट्कोणेषु च संलिखेत्।।७।।
मन्त्राणांश्च ततो बाह्ये लिपिवीतमिदं मतम्। रम्यं पद्मावतीयन्त्रं वश्यदं नात्र संशयः।। ८।।

लिपिवीतं मातृकया। अन्यत् सुगमम्। तथा–

वाग्भवं प्रथमं बीजं द्वितीयं भुवनेश्वरी। तृतीयं च रमाबीजं आद्यलक्ष्मीपदं ततः।। ९।।
स्वयंभुवे पदान्ते च प्रवदेद्भुवनेश्वरी। ज्येष्ठायै हृदयं चैव मन्त्रः सप्तदशाक्षरः।। १०।।

वाग्भवं ऐं, हृदयं नमः। अन्यत्सुगमम्। तथा–

ऋषिरस्य स्मृतो ब्रह्मा छन्दोऽष्टिः समुदाहृतम्। देवता ज्येष्ठलक्ष्मीश्च श्रीमाये शक्तिबीजके।। ११।।
प्रमृज्य त्रिः करौ विद्वानङ्गन्यासमथाचरेत्। त्रिवेदाब्धीन्द्वग्नियुग्मवर्णैरङ्गानि षट् क्रमात्।। १२।।
शिरोभ्रूमध्यवक्त्रेषु बीजानां त्रितयं न्यसेत्। हृन्नाभ्याधारजान्वङ्घ्रौ पदानां पञ्चकं न्यसेत्।। १३।।
पद्मासनस्थामरुणामरुणाम्बरधारिणीम्। कुङ्कुमक्षोदलिप्ताङ्गीं प्रोत्फुल्लकमलेक्षणाम् ।। १४।।
मन्दस्मितमुखीं ज्येष्ठां कलशं वसुपात्रकम्। दधानामूर्ध्वबाहुभ्यां पाशमप्यङ्कुशं तथा।। १५।।
चिन्तयेत् परया भक्त्या देवीमित्थं प्रपूजयेत्।...।।

वामाद्यूर्ध्वयोराद्ये। तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम्। कलशं सुधाढ्यम्।

सम्यग्धर्मादिभिः पीठे मन्त्रवित् परिकल्पयेत्। लोहिताक्षी विरूपाक्षी कमला नीललोहिता।।१६।।
समदा वारुणी पुष्टिरमोघा विश्वमोहिनी। पूर्वादिदलमूलेषु मध्ये चार्च्याः क्रमादिमाः।। १७।।
वदेच्च रक्तज्येष्ठायै विद्महे नीलशब्दतः। ज्येष्ठायै धीमहि प्रोक्त्वा तन्नो लक्ष्मीः प्रचोदयात्।।१८।।
अनयावाह्य तां ज्येष्ठां पूजयेच्चन्दनादिभिः। अङ्गानि मातृर्लोकेशांस्तदस्त्राणि प्रपूजयेत्।। १९।।

---

[1] 'षट्कोणं विलिं' ग. पाठः। [2] 'चक्रं' क. पाठः।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे अष्टिच्छन्दसे नमः। हृदये ज्येष्ठालक्ष्म्यै देवतायै नमः। गुह्ये श्रींबीजाय नमः। पादयोः ह्रींशक्तये नमः, इति विन्यस्य, मूलविद्यया करौ प्रमृज्य, उों ऐंह्रींश्रीं हृदयाय नमः। आद्यलक्ष्मी शिरसे स्वाहा। स्वयंभुवे शिखायै वषट्। ह्रीं कवचाय हुं। ज्येष्ठायै नेत्राभ्यां वौषट्। नमः अस्त्राय फट्, इत्यङ्गमन्त्रैः करषडङ्गन्यासं विधाय, ध्यानाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठं सम्पूज्याष्टदलकेसरेषु स्वाग्रादिमध्यान्ते लोहिताक्ष्यै नमः। विरूपाक्ष्यै नमः। कमलायै०, नीललोहितायै०, मदायै०, वारुण्यै०, पुष्ट्यै०, अमोघायै०, विश्वमोहिन्यै०, इति प्रादक्षिण्येन सम्पूज्य 'ऐंह्रींश्रीं सर्वशक्तिकमलासनाय नमः' इति समस्तं पीठं सम्पूज्य ''रक्तज्येष्ठायै विद्महे नीलज्येष्ठायै धीमहि तन्नो लक्ष्मीः प्रचोदयात्'' इत्यनया गायत्र्यावाह्य मूलविद्ययासनादिपुष्पोपचारान्तं कृत्वा प्राग्वदङ्गानि सम्पूज्याष्टदले ब्राह्म्याद्याश्चतुरस्रे लोकपालांस्तदस्त्राणि च सम्पूज्य धूपदीपादि शेषं प्राग्वत् समापयेद् इति।। तथा—

लक्षं तु प्रजपेन्मन्त्रं जुहुयात् तद्दशांशतः। पायसेन सुशुद्धेन सर्पिःसिक्तेन साधकः।। २०।।
तर्पणं मार्जनं कृत्वा कुर्याद् ब्राह्मणभोजनम्।...।।
ज्येष्ठामनुं यो भजते मनुष्यः सन्यासपूजाजपतर्पणैश्च।
भोगानिह प्राप्य बहून् स मर्त्यः परत्र विष्णोः पदमेति नित्यम्।। २१।।

इति। सारसङ्ग्रहे—

अथ वक्ष्ये मन्त्रवरं त्रिपुटासंज्ञकं शुभम्। लोकरञ्जनकर्तारं चतुर्वर्गफलप्रदम्।। १।।
यशस्करं पुत्रपौत्रफलदं कविताकरम्। कमला भुवनेशानी तृतीयश्च मनोभवः।।
वर्णत्रयात्मा त्रिपुटानामको मन्त्र ईरितः।..।।

कमला श्रीं, भुवनेशानी ह्रीं, मनोभवः क्लीं। दक्षिणामूर्तिसंहितायाम्— ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रं छन्द ईरितम्। शारदातिलके— ''ऋषिः सम्मोहन'' इत्युक्तम्। आचार्यचरणैः किमपि नोक्तम्। सारसङ्ग्रहे—

....। भृगु सम्मोहनोऽस्यर्षिः छन्दो गायत्रमुच्यते।। ३।।
देवता त्रिपुटाख्या स्याद्द्विरुक्तेनाणुनाङ्गकम्। अथवा भुवनेशान्या षडङ्गानि प्रविन्यसेत्।। ४।।
हेमाभां पारिजातद्रुमरुचिरवने मण्डपे स्वर्णभूमौ
रत्नोद्यत्कुट्टिमेऽधो लसदमरतरोश्चारुसिंहासनोर्ध्वे।
षट्कोणस्थां स्मरेऽहं कमलयुगगुणानङ्कुशं चापबाणौ
बिभ्राणां हस्तपद्मैर्मणिमयमुकुटां चारुभूषां त्रिनेत्राम्।। ५।।
दूतीभिश्चामरादर्शसमुद्गककरण्डकान्। ताम्बूलं च वहन्तीभिरावृतां परितः शुभाम्।।६।।

दूतीभिर्घृणिन्यादिभिः। नारायणीये—सौम्यादि घृणिनीं सूर्यामादित्यां च प्रभावती'मिति। तथा— पीयूषदृष्ट्या पश्यन्तीं साधकं च मनोहरम्' इति। दक्षिणामूर्तिः—

षट्कोणं पूर्वमालिख्य मध्ये विद्यां लिखेत् सुधीः। वीप्सया तां तु षट्कोणकोणेषु क्रमतो लिखेत्।।१।।

बाह्ये वसुदलं कुर्याद् दीर्घस्वरविभूषितम्। चतुरस्रं चतुर्द्वारभूषितं मण्डलं लिखेत्।। २।।

चतुरस्रं चतुरस्रत्रयं, गृहं सम्मार्ष्टीतिवदेकवचनमुद्दिश्य गतसंख्यापरम्। मध्ये षट्कोणान्त: स्थचतुष्पत्रमध्ये। ''यजेदेनां चतुष्पत्रे षट्कोणस्थाम्बुजे बुध:'' इति नारायणीयवचनात्। सारसङ्ग्रहे—

शाक्ते पीठे यजेद् देवीं नवशक्तिसमन्विते। अङ्गानि पूजयेदादौ लक्ष्म्याद्या: कोणषट्कगा:।। १।।
षट्कोणपार्श्वे च निधी यजेन्मातृृश्च तद्बहि:। लोकपालांश्च रमणीरूपानाराधयेत्[1] क्रमात्।। २।।
काञ्चनाभां कृशां लक्ष्मीं सवराब्जकरद्वयाम्। स्वर्णाभमरिशङ्खाह्वगदाब्जसुकरं हरिम्।। ३।।
गुणसृण्यभयाह्वेष्टधारिणीमरुणां शिवाम्। शिवं स्वर्णाभमेणाह्वटङ्काभीतीष्टधारिणम् ।। ४।।
स्वर्णाभां नीलकमलकरां सौम्यां रतिं स्मरम्। पाशाङ्कुशौ चापबाणौ धारयन्तं रुचारुणम्।। ५।।
त्रिपुटाह्वमहाविद्यापूजा प्रोक्ता समासत: । ....।।

इति। अथ प्रयोग:—तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि सम्मोहनाय ऋषये नम:। मुखे गायत्रीछन्दसे नम:। हृदये श्रीत्रिपुटादेवतायै नम:। इति विन्यस्य, श्रीं हृदयाय नम:। ह्रीं शिरसे स्वाहा। क्लीं शिखायै वषट्। श्रीं कवचाय हुं। ह्रीं नेत्रत्रयाय वौषट्। क्लीं अस्त्राय फट्, इति मन्त्रै: करषडङ्गन्यासं विधाय ध्यानादिपुष्पोपचारान्तं पूर्वोक्तभुवनेश्वरीपीठे कृत्वा प्राग्वदङ्गानि सम्पूज्य, चतुर्दले देव्या वामदलमारभ्य प्रादक्षिण्येन घृणिन्यै०। सूर्यायै०। आदित्यायै०। प्रभावत्यै०। षट्कोणेषु देव्यग्रकोणमारभ्य लक्ष्म्यै०। हरये०। गिरिजायै०। शिवाय०। रत्यै०। अनङ्गजाय० इति सम्पूज्य, षट्कोणपार्श्वयोर्देवीदक्षिणे शङ्खनिधये नम:। वामे पद्मनिधये नम:, इति सम्पूज्याष्टदलेषु ब्राह्म्याद्या: सम्पूज्य दिगीशार्चादि सर्वं प्राग्वत् समापयेदिति। तथा—

इति ध्यात्वा मन्त्रमिमं जपेदादित्यलक्षकम्। तत्सहस्रं प्रजुहुयान्मधुराक्तै: समिद्वरै:।। १।।
श्रीराजवृक्षसम्भूतै: सजपाकुसुमै: शुभै:। तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा।। २।।

श्रीवृक्षो बिल्व:। तथा—

लक्ष्मीगौरीसुकन्दर्पबीजानि क्रमत: सुधी:। कृत्वा कलायां तां चेन्दौ तं चाकाशे स्मरेच्च तत्।।
सिन्दूरवर्णमखिलं त्रैलोक्यं तन्मयत्वत:। स्मृत्वा तदाखिलान् देवान् वशयेत् किं पुनर्नरान्।।
एवं मनुं यो भजते स लभेत् कवितां पराम्। दिव्यां लक्ष्मीं च सौभाग्यमतुलं लभतेऽचिरात्।।
बहुकालं च विहरेत् सुस्थिरं भुवि मानव:। ....।।

इति। प्रपञ्चसारे—पाशश्रीशक्तिस्मरमन्मथशक्तीन्दिराङ्कुशाश्च। पाश आं, स्मर:, मन्मथश्च क्लीं क्लीं, इन्दिरा श्रीबीजं, अङ्कुश: क्रों। तथा—

ऋष्याद्या अजगायत्रीशक्तय: समुदीरिता:। स्त्रीवश्याकर्षणादौ तु विनियोग उदाहृत:।। ६।।
षड्दीर्घमाययाङ्गानि सर्वैरष्टाङ्गमिष्यते । हृच्छिरश्च शिखावर्मनेत्रास्त्रोदरपृष्ठके ।। ७।।
अष्टाङ्गं विन्यसेन्मन्त्री मूलेन व्यापकं न्यसेत्। आनन्दरूपिणीं देवीं पाशाङ्कुशधनु:शरान्।।
बिभ्रतीं दोर्भिररुणां कुचार्तां हृदि भावयेत्। ....।।

---

[1] 'नभ्यर्चयेत्' ख. पाठ:।

वामाद्यूर्ध्वयोराद्ये, तदाद्यध:स्थयोरन्ये, इत्यायुधध्यानम्।

शक्ते पीठे यजेद्देवीं हृल्लेखाद्याभिरङ्गकै:। मातृभिर्लोकपालैश्च वज्राद्यै: पञ्चमावृत्ति:।। ९।।

इति। अथ प्रयोग:— प्रात:कृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि अजऋषये नम:। मुखे गायत्रीछन्दसे नम:। हृदये शक्तये देवतायै नम:, इति विन्यस्य स्त्रीवश्याकर्षणे विनियोग:, इति कृताञ्जलिरुक्त्वा ह्रांह्रीं इत्यादिना करषडङ्गन्यासं कृत्वा, हृदये आं नम:। शिरसि श्रीं नम:। शिखायां ह्रीं नम:। कवचस्थाने क्लीं नम:। नेत्रस्थाने क्लीं नम:। अस्त्रे ह्रीं नम:। उदरे श्रीं नम:। पृष्ठे क्रों नम:, इति विन्यस्य ध्यानादिपुष्पोपचारान्ते, मध्ये हृल्लेखायै नम:। अग्रे गगनायै०, दक्षिणे रक्तायै०, उत्तरे करालिकायै०, पश्चिमे महोच्छुष्मायै०, इति सम्पूज्य प्रागवदङ्गानि सम्पूज्याष्टदलेषु ब्राह्म्याद्या: सम्पूज्य चतुरस्रे लोकेशार्चादि प्राग्वत् समापयेदिति। तथा—

अष्टलक्षं जपेत् साज्यैर्दशांशं जुहुयात् तिलै:। तर्पणादि तत: कुर्यादेवं सिद्धो भवेन्मनु:।।

इति।। अथ नित्यक्लिन्नाप्रयोग:। सारसङ्ग्रहे—

भुजङ्गेशसमारूढा लक्ष्मीर्लोलाक्षिसंयुता। श्रीमुखीविलसच्छीर्षा मेषो नयनसंयुत: ।। १।।
पूतना सुमुखीयुक्ता महाकाली समाधवी। सूक्ष्मेण सहिता मेषद्वयं झिण्ठीशसंयुतम्।। २।।
जया च योगिनी चैव रेवतीयुक् च वारुणी। सोर्ध्वकेशी च सहजा खड्गीशं विरंजान्वितम्।।३।।
सानन्तो नकुलीशश्च नित्यक्लिन्नामनुर्मत:। एकादशाक्षर: सर्वसौभाग्यैश्वर्यदायक: ।। ४।।

इति। भुजङ्गेशो रेफ:, लक्ष्मी: हकार:, लोलाक्षी ईकार:, श्रीमुखी बिन्दु:, एतै: ह्रीं। मेषो नकार:, नयनं इकार:, तेन नि। पूतना त, सुमुखी य तेन त्य। महाकाली क, माधवी ल, सूक्ष्म इ तेन क्लि। मेषद्वयं नकारद्वयं, झिण्ठीश: ए तेन न्ने। जया म, योगिनी द, रेवती रेफ: चकारात्पुनर्दकार: तेन द्र। वारुणी व, ऊर्ध्वकेशी ए तेन वे। सहजा स, खड्गीशो व, विरजा आ तेन स्वा। नकुलीशो ह, अनन्त: आ तेन हा।। तथा—

ऋषिर्ब्रह्मा त्रिष्टुबुक्तं छन्दो मन्त्रस्य देवता। नित्यक्लिन्ना च गदिता चतुर्वर्गफलप्रदा।। ५।।

दक्षिणामूर्तिसंहितायाम्— ''बीजमाद्यं वह्निजाया शक्तिर्न्ने कीलक''मिति ''विराट्छन्द'' इति च।

आद्येन मन्त्रवर्णेन हृदयं समुदीरितम्। ततो द्वाभ्यां पुनर्द्वाभ्यां द्वाभ्यां द्वयेन च।। ६।।
कुर्याच्छिष्टानि चाङ्गानि करयोश्च न्यसेत् क्रमात्। हृदि दृक्श्रोत्रयोर्द्वन्द्वे त्वचि लिङ्गे च गुह्यके।।७।।
पादयोश्चैव मन्त्रार्णान् विन्यसेन्मन्त्रवित्तम:। अरुणामरुणाकल्पामरुणांशुकधारिणीम् ।। ८।।
अरुणस्रग्विलेपां तां चारुस्मेरमुखाम्बुजाम्। नेत्रत्रयोल्लसद्वक्त्रां भाले घर्माम्बुमौक्तिकै:।। ९।।
विराजमानां मुकुटलसदर्धेन्दुशेखराम्। चतुर्भिर्बाहुभि: पाशमङ्कुशं पानपात्रकम् ।। १०।।
अभयं बिभ्रतीं पद्ममध्यासीनां मदालसाम्। ध्यात्वैवं पूजयेन्नित्यां प्राक्प्रोक्तशक्तिपीठके।। ११।।
पद्ममष्टदलं मध्ये वह्निगेहसमन्वितम्। चतुरस्रद्वयं बाह्ये प्राक्प्रत्यग्द्वारसंयुतम्।। १२।।
तत्र मध्ये यजेद् देवीं चन्दनादिभिरुत्तमे। कर्णिकायोनिमध्यस्थदेशे वाय्वीशवह्निषु।। १३।।
नैर्ऋत्यां पुरतो दिक्षु यजेदङ्गानि षट् क्रमात्। क्षोभिणी मोहिनी लोला त्रिषु कोणेषु पूजयेत्।।१४।।
नित्या निरञ्जना क्लिन्ना क्लेदिनी मदनातुरा। मदद्रवा द्राविणी च द्रविणा चाष्ट पत्रगा:।। १५।।

मदाबिला मङ्गला च मन्मथार्ता मनस्विनी। मोहामोदा मानमयी माया मन्दा मितावती।। १६।।
द्वारपार्श्वेषु कोणेषु दिक्षु ता दश पूजयेत्। लोकेशानपि तद्बाह्ये तदस्त्राणि ततो बहि:।। १७।।

इति।। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे त्रिष्टुप्छन्दसे नम:। हृदये श्रीनित्यक्लिन्नायै देवतायै नम:, इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोग:, इति कृताञ्जलिरुक्त्वा, ह्रीं हृदयाय नम:। नित्य शिरसे स्वाहा। क्लिन्ने शिखायै वषट्। मद कवचाय हुं। द्रवे नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्, इति करषडङ्गन्यासं विधाय, हृदि ह्रीं नम:। दक्षनेत्रे निं नम:। वामे त्यं नम:। दक्षश्रोत्रे क्लिं नम:। वामे न्नें नम:। दक्षनासायां मं नम:। वामे दं नम:। सर्वाङ्गे द्रं नम:। लिङ्गे वें नम:। गुदे स्वां नम:। पादयो: हां नम:, इति विन्यस्य मूलविद्यया व्यापकं कृत्वा ध्यानादिषडङ्गपूजान्ते, त्रिकोणे उों क्षोभिण्यै नम:, मोहिन्यै०, लोलायै०, इति देव्यग्रादिकोणत्रये सम्पूज्याष्टदलेषु देव्यग्रदलमारभ्य प्रादक्षिण्येन नित्यायै नम:। निरञ्जनायै०, क्लिन्नायै०, क्लेदिन्यै०, मदनातुरायै०, मदद्रवायै०, द्राविण्यै०, द्रविणायै०, इति सम्पूज्य, चतुरस्रे देव्यग्रद्वारस्य वामपार्श्वमारभ्य मदाविलायै०, मङ्गलायै०, मन्मथार्तायै०, मनस्विन्यै०, मोहायै०, आमोदायै०, मानमय्यै०, मायायै०, मन्दायै०, मितावत्यै०, इति द्वारपार्श्वद्वयाग्नेयदक्षिणनिर्ऋति–पश्चिमद्वारपार्श्वद्वयवायव्योत्तरेशानेषु दशदिक्षु सम्पूज्य, मध्यरेखायामिन्द्रादीन् सर्वबाह्यरेखायां वज्रादींश्च सम्पूज्य धूपदीपादि सर्वं प्राग्वत् समापयेदिति।। तथा—

ध्यात्वैवं प्रजपेल्लक्षं मनुमेनं दशांशत:। मधूकपुष्पै: स्वाद्वक्तैर्जुहुयात् हविषाथवा ।। १८।।
तद्दशांशं तर्पयित्वा जलै: कर्पूरवासितै:। आत्मानमभिषिच्याथ ब्राह्मणान् भोजयेत् तत:।। १९।।
वित्तभूषाम्बराद्यैश्च सन्तोष्य गुरुमात्मन:। सिद्धमन्त्र: प्रकुर्वीत प्रयोगान् मन्त्रवित्तम:।। २०।।
ततो विद्याप्रयोगार्हो नित्यार्चानिरतस्तथा। सहस्रजापी तद्भक्त: कुर्याद्युक्तं न चान्यथा।। २१।।
पद्मै रक्तैस्त्रिमध्वक्तैर्होमाल्लक्ष्मीमवाप्नुयात्। तथैव कैरवै रक्तै: राज्ञश्च स्ववशं नयेत्।। २२।।
समानरूपवत्साया: शुक्लाया गो: पय:प्लुतै:। मल्लिकामालतीजातीशतपत्रैर्हुतैर्भवेत्।। २३।।
स्वर्णाप्ति: स्तम्भनं शत्रोर्नृपादीनां क्रुधोऽपि वा। आज्याक्तै: करवीरोत्थै: प्रसूनैररुणैर्हुतै:।। २४।।
रक्ताम्बराणि वनिता भूपमर्त्यं[1] वशं नयेत्। भूषावाहनवाणिज्यसिद्धय: स्यु: स्ववाञ्छिता:।। २५।।
लवणै: सर्षपैगौरतिलैर्वापि च होमत:। तत्तैलाक्तैर्निशामध्ये त्वानयेद्वाञ्छितां वधूम्।। २६।।
तैलाक्तैर्जुहुयात् कृष्णदरपुष्पैर्निशान्तरे । मासादरातिस्तीव्रार्तिज्वरेण परिपीड्यते ।। २७।।
आरुष्करघृताभ्यक्तैस्तद्बीजैर्निशि होमत:। व्रणा: शरीरे शत्रो: स्युर्दु:साध्याश्च चिकित्सकै:।। २८।।
तैरेव दलिताङ्गस्तु रिपुर्याति यमालयम् । तथा तत्तैलसंसिक्तैर्बीजैरङ्कोलजैरपि ।। २९।।
मरिचै: सर्षपाज्याक्तैर्निशि होमात्तु मासत:। वाञ्छितां च रमां कामज्वरार्तामानयेद् ध्रुवम्।। ३०।।
मरिचै: सर्षपोपेतै: सप्तरात्रं हुतैर्निशि। दान[2]मानकुलैर्नित्यं दु:प्रापामानयेद् वधूम्।। ३१।।
अन्नाज्यैर्जुहुयान्नित्यं शतमष्टोत्तरं तु वा। तेनान्नपूर्णो भवने भोक्ता च भवति ध्रुवम्।। ३२।।

---

[1] 'वाणिज्यभूतमर्थं' क. ग. पाठ:। [2] 'धैर्य' ख. पाठ:।

शालीभिराज्ययुक्ताभिर्होमाच्छालीनवाप्नुयात्। साध्यर्क्षवृक्षसम्भूतामिष्ट[1]पादरज:कृताम् ।। ३३।।
राजीमरिचलोणोत्थां पुत्तलीं जुहुयान्निशि। प्रपदाभ्यां च जङ्घाभ्यां जानुभ्यामूरुयुग्मत:।। ३४।।
नाभेरधस्ताद् हृदयाद्गलेनाकण्ठतस्तथा। शिरसश्च सुतीक्ष्णेन च्छित्त्वा शास्त्रेण वै क्रमात्।। ३५।।
एवं द्वादशधा होमान्नरनारीनराधिपा:। वश्या भवन्ति सप्ताहादरातिरस्य[2] वाञ्छया।। ३६।।
प्रयाति निधनं चास्य वाञ्छयानन्ययोगत:। पिष्टेन गुडयुक्तेन मरीचैजीरकैर्युताम्।। ३७।।
कृत्वा पुत्तलिकां साध्यनामयुक्तामथो हृदि। सनामहोमसम्पातघृते सम्पाच्य तां पुन:।। ३८।।
स्पृशन् निजकराग्रेण सहस्रं प्रजपेन्मनुम्। अभ्यर्च्य तद्घृताभ्यक्तां भक्षयेत्तद्धिया जपन्।। ३९।।
नरनारीनृपास्तस्य वश्या: स्युर्मरणावधि। तैरेव पिष्टैर्वृत्तं तु कृत्वा तन्मध्यतस्तथा।। ४०।।
साध्यनाम स्फुटं कृत्वा प्राग्वत्सम्पाच्य भक्षणात्। वश्यास्ते वत्सरं भूयुस्तन्नामार्णान्वितैस्तथा।।४१।।
कृत्वा विपाच्य खादंस्तु वशयेत् तांस्तदर्धकम्। नारिकेलफलाम्भोभिस्तर्पणाद्वनिता वशा:।।४२।।
कर्पूरवासितैस्तोयैर्मनुष्याश्च वशे स्थिता:। तर्पणाल्लवणाम्भोभि: सर्वे स्युस्तस्य किङ्करा:।। ४३।।
तथा लवणयुक्तेन तोयेन वनिता वशा:। शुद्धेन वारिणा मासं तदर्धं सप्तवारकम्[3]।। ४४।।
तर्पयेद्यस्य नाम्नैव स तस्य स्याद् वशेऽनिशम्। केतकीवासितैश्चेन्दुयुक्तै: केरफलोदकै:।। ४५।।
तर्पणाद्वनिता वश्यां दद्यु: प्राणान्निजं धनम्। नमेरुवासितैस्तोयैस्तर्पणाद्भूमिपा वशा:।। ४६।।
चम्पकैर्वासितजलैस्तर्पणं सर्वरञ्जनम्। पाटलीशतपत्राभ्यां वासितैस्तपणैर्जलै: ।। ४७।।
सर्वलोकचमत्कारकारी भवति नित्यश:। कस्तूरीवासिताम्भोभिस्तर्पणं सर्वसिद्धिकृत्।। ४८।।
इन्दुचन्दनसौरभ्यवासिताम्भ:प्रतर्पणम्। वाञ्छितार्थस्य संसिद्धिं मण्डलात् कुरुते ध्रुवम्।। ४९।।
(सिक्तुमिश्रजलैराढ्यो धनधान्यादिभिश्चिरम्। गुडमिश्रजलै रात्रौ तर्पणं विघ्ननाशनम्।। ५०।।
चिञ्चाफलरसोपेतैर्जलैर्द्वेषाय तर्पयेत्।) उष्णोदकै: समरिचैस्तर्पयेद् वैरिमृत्यवे।। ५१।।
केवलोष्णोदकेन स्यात् तीव्रज्वरसमुद्भव:। निम्बपत्ररसोपेतैरम्बुभिस्तर्पणाद् द्विषाम्।। ५२।।
जातयेऽन्योन्यवैरस्यं येन ते नाशमाप्नुयु:। तथैवात्युष्णसलिलैस्तर्पणाद् वैरिणो भृशम्।। ५३।।
अतिसारादिभिर्दोषैरौदरै: क्लेशमाप्नुयु:। वनितानवनीतस्य द्रावकोऽग्निर्जपादिना।। ५४।।
जायते साधको नित्यं कन्दर्पाधिकसुन्दर:।..।।

इति।। तथा—

प्रणवं चाथ हृल्लेखा वाग्वीजं नित्यशब्दत:। क्लिन्ने मदद्रवे वाचं मायामग्निवधूं वदेत्।। १।।
नित्यक्लिन्नाभिधो मन्त्र: प्रोक्त: पञ्चदशाक्षर:।..।।

हृल्लेखा ह्रीं, वाचम् ऐं, अग्निवधू: स्वाहाकार:। तथा—

ऋषि: सम्मोहन: प्रोक्तो विराडुक्तं च देवता। नित्यक्लिन्नाभिधा देवी चतुर्वर्गफलप्रदा:।। २।।

---

१. 'पिष्ट' ख. पाठ:। २. 'ज्वरार्ताश्चास्य' ख. पाठ:। ३. 'रात्रकम्' ख. पाठ:।

विना वाग्भवबीजं तु द्विद्वियुग्मेषुयुग्मकैः। समस्तेनाङ्गषट्कं स्यान्निक्लिन्नां स्मरेत्ततः।। ३।।

सुराब्धिमध्ये पृथुलं सुचारु द्वीपं स्मरेत् कल्पतरूपशोभि।
पिकालिभृङ्गावलिमञ्जुनादं मन्देन संसेवितमीरणेन ।। ४।।
मनोज्ञवीरुत्कुसुमावकीर्णमुद्यच्छशाङ्कप्रतिमस्वरश्मिम्।
माणिक्यसङ्घामलमण्डपं च सिंहासनं रत्नमयं च तत्र।। ५।।
त्रिकोणमध्यं ललिताष्टपत्रं सञ्चिन्त्य पद्मं स्मर तत्र देवीम्।
शीतांशुचूडामरुणोत्पलाभां करैः सपाशाङ्कुशकल्पवल्लीः।। ६।।
कपालमन्येन च धारयन्तीं द्वाभ्यां कराभ्यां कलनादवीणाम्।
त्रैलोक्यसम्मोहनकारिणीं तां नित्यां भजे चारुरुचिं त्रिनेत्राम्।। ७।।

इति। वामाद्यूर्ध्वयोराद्ये, तदादिमध्ययोरन्ये, तदधस्तनाभ्यां वीणा, इत्यायुधध्यानम्।।

इति ध्यात्वा यजेत्पीठं चतुःशक्तियुतं सुधीः। सयोनिकर्णिकं पद्ममष्टपत्रविराजितम्।। ८।।
बहिः पञ्चदलं पद्मं तद्बहिर्दशपत्रकम्। चतुरस्रत्रयं बाह्ये चतुर्द्वारविराजितम् ।। ९।।

(इति सम्मोहनपञ्चरात्रोक्तमिति।

चतुर्दले द्राविण्यादीरीशाद्यस्रिषु पूजयेत्। प्रादक्षिण्येन मन्त्रज्ञ उच्यन्ते ता यथाक्रमम्)।। १०।।
पूर्वा स्याद् द्राविणी वामा ज्येष्ठा साह्लादकारिणी। अपरा क्षोभिणी रौद्री गुह्यशक्तिश्चतुर्थिका।।११।।
मायाद्यमासनं देयं मूर्तिं मन्त्रेण कल्पयेत्।...।।

द्राविण्याद्यास्तिस्रो वामाद्यानां तिसृणां विशेषणभूताः। ''कोणेष्वैशादिमध्ये च तत्र शक्तीर्न्यसेदिमाः'' इति नारायणीयवचनस्य कोणेषु मध्ये चेत्यर्थः।

''नित्यक्लिन्नां तत्र यजेत् वक्ष्यमाणेन वर्त्मना। केसरेष्वङ्गपूजा स्यात् पत्रेष्वेताः प्रपूजयेत्।।
सषण्ठाद्यन्तयुक्स्वरवर्जमष्टस्वरादिकाः''।...।।

सषण्ठाद्यन्तयुक्स्वरवर्जमित्यर्थः। ऋॠऌॡसहितानुस्वारविसर्ग—अआइत्यष्टस्वररहिताः स्वरादिका इत्यर्थः।

नित्यादिमा सुभद्रा समङ्गला वनचारिणी। सुभगा दुर्भगा स्यान्मनोन्मनी रुद्ररूपिणी ।। १२।।
वल्लकीवादनपरा दूत्यो रक्ता मनोहराः। मदमन्थरगामिन्यः सुवेशाश्चारुभूषणाः ।। १३।।
अरुणांश्चार्वलङ्कारान् पञ्च कामान् प्रपूजयेत्। व्योमसर्गाढ्यकन्दर्पबीजाद्यांस्ते त्वनङ्गकः।। १४।।
स्मरमन्मथकामाश्च मारः पञ्चम ईरितः। पञ्चपुष्पेषुपाशाङ्कसाङ्कुशेक्षुधनुर्भृतः ।। १५।।
पृष्ठभागे तूणयुक्ताः शक्तीस्तत्पार्श्वसंस्थिताः। भूषायुक्ताः स्मेरवक्त्रकमलाः साधु पूजयेत्।। १६।।
सबिन्दुक्लीवौष्ठ्यवर्ज्यस्वरवर्गादिमादिकाः[१]। ता रतिर्विरतिः प्रीतिर्विप्रीतिर्मतिदुर्मती ।। १७।।

---

[२] 'मात्रिकाः' ख. ग. पाठः।

धृतिः स्याद्विधृतिस्तुष्टिर्वितुष्टिर्दश संस्मृताः। अरुणारुणभूषाढ्या वीणाहस्ताः स्मितानना:।। १८।।
लोकपालांस्ततो बाह्ये तद्धेतीश्च ततो बहिः।..।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि सम्मोहनाय ऋषये नमः। मुखे विराट्छन्दसे नमः। हृदये श्रीनित्यक्लिन्नायै देवतायै नमः। इति विन्यस्य ओं ह्रीं हृदयाय नमः। नित्य शिरसे स्वाहा। क्लिन्ने शिखायै०। मदद्रवे ह्रीं कवचाय०। स्वाहा नेत्रत्रयाय०। ओं ह्रीं नित्यक्लिन्ने मदद्रवे ह्रीं स्वाहा अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य ध्यानादिपरतत्त्वान्तं पञ्चदलकेसरेष्वीशानकोणादि आं द्राविण्यै वामायै०। ईं ह्लादिन्यै ज्येष्ठायै०। ऊं[2] क्षोभिण्यै रौद्र्यै०। ऐं गुह्यशक्त्यै० इति पीठशक्तीः सम्पूज्य, ह्रीं सर्वशक्तिकमलासनाय नमः। इति समस्तं पीठं सम्पूज्य मूलविद्यया मूर्तिं प्रकल्प्यावाहनादिषडङ्गपूजान्ते अष्टदलेषु इं नित्यायै०। ईं सुभद्रायै०। उं मङ्गलायै०। ऊं वनचारिण्यै०। एं सुभगायै०। ऐं दुर्भगायै० ओं मनोन्मन्यै०। औं रुद्ररूपिण्यै०, इति सम्पूज्य, (तद्बहिः पञ्चदलेषु देव्यग्रादि ह्रीः अनङ्गाय०। ह्रीः स्मराय०। ह्रीं: मन्मथाय०। ह्रीः कामाय०। ह्रीं: माराय०। इति सम्पूज्य) तद्बहिर्दशदलेषु देव्यग्रादिप्रादक्षिण्येन कं रत्यै०। कां विरत्यै०। किं प्रीत्यै०। कीं विप्रीत्यै०। कुं मत्यै०। कूं दुर्मत्यै०। कों धृत्यै०। कौं विधृत्यै०। कं तुष्ट्यै०। कः वितुष्ट्यै०, इति सम्पूज्य लोकेशार्चादि सर्वं समापयेदिति।। तथा—

वह्निलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत् ततः। घृतेन तर्पणाद्यं च कृत्वा सन्तोष्य देशिकम्।। १९।।
धनधान्यादिभिः सम्यक् प्रयोगानाचरेत् ततः। एवं मन्त्रोदितान् सम्यक् पूर्वोक्तविधिना सुधीः।।२०।।
एवं यः पूजयेद्भक्त्या नित्यक्लिन्नां नरोऽन्वहम्। प्राप्नोति महतीं लक्ष्मीं प्रार्थ्यते प्रमदाजनैः।।२१।।

इति।। तथा—

बालान्त्यहीना नित्यान्ते ह्रस्वं बिन्दुविवर्जितम्। कामबीजं नद्वयं च शिवयुक् च मदौ वदेत्।।१।।
द्रान्तेऽम्बु शिवयुग् हादिजलानन्ताः सकान्ति खम्। अयं वाग्वादिनीक्लिन्नामन्त्रो द्वादशवर्णकः।।२।।

बालाविद्या पूर्वोद्धृता सा अन्त्यहीना तृतीयबीजरहिता तेन ऐं क्लीं इति बीजद्वयमुद्धृतम्। नित्य स्वरूपं, कामबीजं ह्रस्वं ह्रस्वेकारयुक्तं बिन्दुविवर्जितं तेन क्लि इति। नद्वयं शिवयुगेकारयुक्तं तेन न्ने इति। मदौ मकारदकारौ, द्र स्वरूपं, अम्बु वकारः, शिव एकारः तद्युक्तं तेन वे इति। हादि सकारः, जलं वकारः, अनन्त आकारस्तैः स्वा इति। सकान्ति खम् आकारयुक्तो हकारः तेन हा इति।।

सम्मोहननिचृन्नित्यक्लिन्ना मुन्यादिका मताः। वाग्भवेन षडङ्गानि कृत्वा नित्यां विचिन्तयेत्।। ३।।
रक्तां सुरक्तवसनामरुणाङ्गरागां हस्ताम्बुजैः कमलपाशसृणीन् कपालम्।
संबिभ्रतीं त्रिनयनां शशिशेखरां तां नित्यां स्मरेद्धृदि मदाकुलिताङ्गयष्टिम्।। ४।।

दक्षाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्।

शाक्ते पीठे यजेद् देवीं प्रोक्तेऽङ्गानि पुरा यजेत्। पूर्वोक्ताश्च ततो ह्यष्टशक्तीर्नित्यादिका यजेत्।।५।।
अरुणा नीलकमलकपालाढ्यकराम्बुजाः। शतक्रत्वादिकान् बाह्ये वज्रादीनि ततो बहिः।। ६।।

---

१. 'ओं आह्लादिन्यै' ख. पाठः। २. 'उं' ख. पाठः।

अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि सम्मोहनाय ऋषये नमः। मुखे निचृच्छन्दसे नमः। हृदये नित्यक्लिन्नानित्यायै देवतायै नमः, इति विन्यस्य इष्टसिद्धये विनियोगः इत्युक्त्वा, ऐं हृदयाय० इत्यादिकरषडङ्गन्यासं कृत्वा ध्यानाङ्गपूजान्ते अष्टदलेषु पूर्वोक्तैकादशाक्षरोक्तनित्याद्यष्टशक्तीः सम्पूज्य लोकेशार्चादि सर्वं समापयेदिति।। तथा—

सम्बुद्ध्यन्ता मता नित्यक्लिन्ना तद्वन्मदद्रवा। कामिकापञ्चमः कालः सविसर्गो दशाक्षरः।। १ ।।
नित्यक्लिन्नामनुः प्रोक्तो भजतां सर्वसिद्धिदः।..।।

सम्बुद्ध्यन्ता नित्यक्लिन्ने, तद्वत् मदद्रवे, कामिकापञ्चमो नकारः कालो म सविसर्गो मः इति।

....। ऋषिरत्रिस्त्रिष्टुबुक्तं छन्दो नित्या च देवता।। २।।
नित्यायै हृदयं स्वाहा नित्यायै शिर ईरितम्। क्लिन्नेस्वाहा शिखा नित्यक्लिन्नेन कवचं मतम्।।३ ।।
नित्यक्लिन्ने नमश्चास्त्रं ध्यानं पूर्ववदाचरेत्। पूजादिकं चास्य मन्त्री पूर्ववत् परिकल्पयेत्।। ४।।

इति।। अथ प्रयोगः—मूलेन प्राणायामत्रयं कृत्वा शिरसि अत्रये ऋषये नमः, मुखे त्रिष्टुप् छन्दसे नमः, हृदये श्रीनित्यक्लिन्नायै देवतायै नमः, इति विन्यस्य सर्वाभीष्टार्थसिद्धये विनियोगः, इति प्राग्वदुक्त्वा मूलेन करयोर्व्यापकं कृत्वा, नित्यायै हृदयाय नमः। नित्यायै शिरसे स्वाहा। क्लिन्नेस्वाहा शिखायै०। नित्यक्लिन्ने कवचाय हुं। नित्यक्लिन्ने नमः अस्त्राय फट्, इत्यङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य हृदयादिष्वपि नेत्रहीनेषु पञ्चाङ्गेषु न्यसेत्। ततो ध्यानपूजादिकं सर्वं पूर्वमन्त्रवत् कुर्यात्।। तथा—

एकलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत् तिलैः। तर्पणादि ततः कुर्यात् पूर्वोक्तविधिना सुधीः।। ५।।
नित्यामन्त्रं जपेद्यः सहुतविधिजपैः सार्चनातर्पणैश्च
स स्याद् दारिद्र्यदुःखामयगणवियुतो वत्सराणां शतं च।
जीवेद्विश्वं समग्रं[१] वशयति मनुविन्मोहयत्याशु लोकं
देहान्ते मुक्तिमिष्टां परमतिविमलां प्राप्नुयान्नान्यथात्र।। ६।।

इति।। सारसङ्ग्रहे—

प्रणवं भुवनेशानी जलं वह्न्यम्ब्वनन्तयुक्। ङेन्तं सिनीपदं हृच्च नववर्णा समीरिता।। १ ।।
विद्येयं वह्निवासिन्याः सर्वसौख्यफलप्रदा। यस्याः स्मरणतो वश्यं जायते भुवनत्रयम्।। २।।

इति। (जलं व, वह्निः स्वरूपं, अम्बु व, अनन्त आ, तद्युक्तस्तेन वा, ङेन्तं सिनी सिन्यै, हृन्नमः।)
दक्षिणामूर्तिसंहितायाम्— (२२ प०)

ऋषिर्वसिष्ठश्छन्दः स्याद्गायत्री देवता त्वियम्। आद्यन्ते बीजशक्ती तु कीलकं मध्यमेव च।। १ ।।

इति। देवता त्वियं वह्निवासिनी।। सारसङ्ग्रहे—

विद्याद्वितीयबीजेन दीर्घस्वरयुजा सुधीः। मायान्तेन षडङ्गानि कुर्यान्मन्त्री कराङ्गयोः।। ३ ।।
नवाक्षराणि विद्याया नवरन्ध्रेषु विन्यसेत्। व्यापकं च समस्तेन कुर्याद् देव्यात्मसिद्धये।। ४।।
तप्तकाञ्चनसङ्काशां नवयौवनसुन्दरीम्। चारुस्मेरमुखाम्भोजविलसन्नयनत्रयाम् ।। ५।।

---

१. 'वर्षं समग्रं' ग. पाठः।

अष्टभिर्बाहुभिर्युक्तां माणिक्याभरणोज्ज्वलाम्। रक्ताब्जकम्बुपुण्ड्रेक्षुचापपूर्णेन्दुमण्डलान्।। ६।।
दधानां बाहुभिर्वामैः कह्लारं हेमशृङ्गकम्। पुष्पेषु मातुलुङ्गं च दधानां दक्षिणैः करैः।। ७।।
स्वसमानाभिरभितः शक्तिभिः परिवारिताम्। नवयोनिकर्णिकायां कृत्वा तद्बहिरम्बुजम्।। ८।।
द्वादशच्छदसंयुक्तं विदध्यात् च मनोहरम्। तद्बहिश्चतुरस्रे द्वे द्वारद्वयसमन्विते।। ९।।
पूर्वपश्चिमयोस्तस्मिंश्चक्रे देवीं समर्चयेत्। मध्ये समावाह्य वह्निवासिनीं विश्वविग्रहाम्।। १०।।
गन्धपुष्पैर्निवेद्यान्तैरुपचारैर्यजेत् क्रमात्। अङ्गानि पूर्वमभ्यर्च्य वक्ष्यमाणाश्च शक्तयः।। ११।।
अष्टकोणेषु सम्पूज्यास्तदग्रात्तु प्रदक्षिणम्। ज्वालिनीविस्फुलिङ्गिन्यौ मङ्गला समनोहरा।। १२।।
कनका कितवा विश्वा विविधा चेति शक्तयः। दलेषु द्वादशस्वेता राशिशक्तीः समर्चयेत्।। १३।।
मेषां वृषाह्वयां शक्तिं मिथुनां कर्कटामपि। सिंहां कन्यां तुलां कीटां चापां च मकरामपि।। १४।।
कुम्भां मीनां यजेत् प्राग्वदग्रादारभ्य मन्त्रवित्। चतुरस्रद्वारयुग्मपार्श्वयोः कोणदिक्षु च।। १५।।
मन्त्रविद् वक्ष्यमाणाश्च दश शक्तीः समर्चयेत्। घस्मरा सर्वभक्षा[3] च विश्वा च विविधोद्भवा।। १६।।
चित्ररूपा निःसपत्ना निरातङ्का च पावनी। अचिन्त्यवैभवा रक्ता दशमी परिकीर्तिता।। १७।।
लोकपालांस्ततो बाह्ये तदस्त्राणि ततो बहिः। पूजेयं वह्निवासिन्याः प्रोक्ता सर्वसमृद्धिदा।। १८।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि वशिष्ठाय ऋषये नमः, मुखे गायत्रीछन्दसे नमः, हृदये श्रीवह्निवासिनीनित्यायै देवतायै नमः, गुह्ये ॐ बीजाय नमः, पादयोः नमः शक्तये नमः, नाभौ वह्निवासिन्यै कीलकायै नमः, इति विन्यस्य (ह्रींह्रीमिति करषडङ्गन्यासं विधाय, दक्षनेत्रे ॐ नमः, वामे ह्रीं, दक्षकर्णे वं, वामे ह्निं, दक्षनसि वां, वामे सिं, मुखे न्यैं, लिङ्गे नं, गुदे मः नमः इति विन्यस्य) मूलविद्यया मूर्धादिपादान्तं व्यापकं कृत्वा ध्यानादिमानसपूजान्ते प्रमाणोक्तचक्रमुद्धृत्यार्घ्यस्थापनादिस्वात्मपूजनान्ते भुवनेश्वरीपीठं सम्पूज्यावाहनादिपुष्पोपचारान्तेऽङ्गानि सम्पूज्य, अष्टयोनिषु[2] देव्यग्रमारभ्य प्रादक्षिण्येन—ज्वालिन्यै नमः। विस्फुलिङ्गिन्यै०। मङ्गलायै०। मनोहरायै०। कनकायै०। कितवायै०। विश्वायै०। विविधायै नमः। इति अष्टशक्तीः सम्पूज्य, ततस्तद्बहिर्द्वादशदलेषु प्रादक्षिण्येन मेषायै नमः, वृषायै०, मिथुनायै०, कर्कटायै०, सिंहायै०, कन्यायै०, तुलायै०, कीटायै०, चापायै०, मकरायै०, कुम्भायै०, मीनायै०, इति राशिशक्तीः सम्पूज्य, चतुरस्रे देव्यग्रद्वारस्य दक्षिणभागमारभ्य प्रादक्षिण्येन घस्मरायै०, सर्वभक्षायै०, विश्वायै०, विविधोद्भवायै०, चित्ररूपायै०, निःसपत्नायै०, निरातङ्कायै०, पावन्यै०, अचिन्त्यवैभवायै०, रक्तायै०, इति देव्यग्रद्वारपार्श्वद्वयाग्नेयदक्षिणनिर्ऋतिवायव्यकोणेषु देव्याः पृष्ठभागद्वारपार्श्वादित ईशानकोणावधि सम्पूज्य तद्बाह्ये लोकपालांस्तदस्त्राणि सम्पूजयेत्। एतदुक्तफलदं भवति।। तथा—

एकलक्षं जपेन्मन्त्रं तद्दशांशं हुनेद् घृतैः। तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा।। १९।।
सिद्धमन्त्रः प्रकुर्वीत प्रयोगान्निजवाञ्छितान्। काम्यहोमविधिं वक्ष्ये सम्यग्वाञ्छितदायकम्।। २०।।
शालितण्डुलमाधाय प्रस्थं भाण्डे नवे क्षिपेत्। समानवर्णवत्साया रक्ताया गोः पयस्तथा।। २१।।

---

१. 'दया' ग. पाठः। २. 'कोणेषु' क. पाठः। ३. 'क्ष्या' क. ग. पाठः।

द्विगुणं तत्र निक्षिप्य श्रपयेत् संस्कृतेऽनले। घृतेन सिक्तं सम्यक् तु[१] कृत्वा च [२]ससितं करे।।२२।।
निधाय विद्यामष्टोर्ध्वशतं जप्त्वा हुनेत्तत:। एवं होमो महालक्ष्मीमावहेत् प्रतिपत्कृत:।। २३।।
शुक्रवारेष्वपि तथा वर्षान्नृपसमो भवेत्। पञ्चम्यां च विशेषेण प्राग्वद्धोमं समाचरेत्।। २४।।
तस्यां तिथौ त्रिमध्वक्तैर्मल्लिकाद्यै: सितैर्हुनेत्। अन्नाज्याभ्यां च नियतं हुत्वा त्वाढ्यो भवेन्नर:।।२५।।
यद्यद्धि वाञ्छितं वस्तु तानि सर्वाणि सर्वदा। घृतहोमादवाप्नोति तथैव तिलतण्डुलै:।। २६।।
पञ्चमीषु विशेषेण पूजां कुर्याद् व्रती भवेत्। ....।।

इति।। अथ वज्रप्रस्तारिणीप्रयोग: सारसङ्ग्रहे—

वज्रप्रस्तारिणीविद्यामिन्दिरामन्दिरं शुभम्। वच्मि लोकहितार्थाय यथावच्च समासत:।। १।।
सर्वनारीनरपतिनरसम्मोहकारिणीम् । कान्तारसागरक्रूरदु:खसङ्घाततारिणीम् ।। २।।
अरुणांक्रोधिनी शान्तियुक्ता सृष्टिक्रियाक्षियुक्। तपञ्चमद्वयं रुद्रयुक्तं ज्ञानामृतेन्दुयुक्।। ३।।
जयेन्द्वग्न्याप्यायनीयुक् दीर्घा विद्येव कामिका। क्षुधावती विषं थान्तं पुनस्तद्वह्निसंयुतम्।। ४।।
उत्कारी शिवयुक् प्रोक्त्वा बीजमाद्यं पुनर्वदेत्। द्वादशार्णा महाविद्या मोक्ता सर्वसमृद्धिदा।। ५।।

अरुणा हकार:, अं स्वरूपं, क्रोधिनी रेफ:, शान्तिरीकार:, एभिर्मायाबीजमुद्धृतम्। सृष्टि: ककार:, क्रिया लकार:, अक्षि इकार:, एभि: क्लि इति। तपश्चमद्वयं नकारद्वयं, रुद्र एकारस्तद्युक्तं तेन न्ने। ज्ञानामृता ऐकार: इन्दुरनुस्वारस्तेन ऐं इति। जया ककार:, इन्दुरनुस्वार:, अग्नी रेफ:, आप्यायनी ओकारस्तेन क्रों, दीर्घा न विद्या इ तेन नि, कामिका त, क्षुधावती य, तेन त्य। विषं म, थान्तं द, पुनस्तदेव दकार:, वह्नी रेफस्तद्युतं द्र। उत्कारी वकार:, शिव एकार:, तेन वे। आद्यबीजं मायाबीजम्।। दक्षिणामूर्ति:— (२२ प०)

द्वादशार्णा पराविद्या ऋषिर्ब्रह्मा च गीयते। गायत्री छन्द आख्यातं देवता परमेश्वरी।। १।।

परमेश्वरी वज्रेश्वरी। सारसङ्ग्रहे—

आद्यन्ते बीजशक्ती तु वाग्भवं कीलकं भवेत्। क्लिन्ने हृदयमैं प्रोक्तं शिरश्चैवाङ्कुश: शिखा।।६।।
नित्य वर्म मद नेत्रं द्रवेऽस्त्रं समुदीरितम्। मायया पुटितानेतानङ्गषट्के प्रकल्पयेत्।। ७।।
प्रत्येकं शक्तिपुटितान् मन्त्रार्णान् दश विन्यसेत्। श्रोत्रनासाकपोलाक्षिनाभिगुह्येष्वनुक्रमात्।। ८।।
तत: सञ्चिन्तयेद् देवीं सर्वसौख्यप्रदायिनीम्। रक्तां रक्ताम्बरां रक्तगन्धमाल्यविभूषणाम्।। ९।।
चतुर्भुजां त्रिनयनां माणिक्यमुकुटोज्ज्वलाम्। पाशाङ्कुशाविक्षुचापं दाडिमीसायकं तथा।। १०।।
दधानां बाहुभिर्नेत्रैर्दयामद[३]सुशीतलै:। पश्यन्तीं साधकं त्र्यस्रषट्कोणाब्जमहीपुरे ।। ११।।
चक्रमध्ये सुखासीनां स्मेरवक्त्रसरोरुहाम्। शक्तिभि: स्वस्वरूपाभिरावृतां पोतमध्यगाम्।। १२।।
सिंहासनेऽभित: प्रेङ्खत्पोतस्थाभिश्च[४] शक्तिभि:। वृतां ताभिर्विनोदांश्च यातायातादिभि: सदा।। १३।।
कुर्वाणामरुणाम्भोधौ चिन्तयेन्मन्त्रनायिकाम्। ध्यानोदिते मण्डले च शक्तिपीठसुशक्तिके।। १४।।

---

१. 'सिक्थं' ख. पाठ:। २. 'सुकृतं' क. ग. पाठ:। ३. 'दम' ख. पाठ:। ४. 'तत्तत्स्थाभि:' ख. पाठ:।

शोणाब्धिं हेमपोतं च सिंहासनमनन्तरम्। तत्र चक्रं ततो देवीं सम्यगावाह्य पूजयेत्॥ १५॥
अरुणैर्गन्धकुसुमैर्धूपदीपनिवेद्यकै:। अङ्गानि पूजयेदादौ त्रिकोणस्थास्तु पूजयेत् ॥ १६॥
इच्छाज्ञानक्रियासंज्ञा: षट्कोणेष्वर्चयेत् तत:। डाकिनीं राकिणीं चैव लाकिनीं काकिनीं तत:।१७॥
शाकिनीं हाकिनीं चैव पद्मद्वादशपत्रगा:। हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा॥ १८॥
निरञ्जना रागवती तथैव मदनावती। मेखला द्राविणी वेगवती द्वादश शक्तय:॥ १९॥
तत: षोडशपत्रेषु वक्ष्यमाणा: प्रपूजयेत्। कमला कामिनी कल्पा कला कलितकौतुके॥ २०॥
किराता कालकदने कौशिकी कम्बुवाहिनी। कातरा कपटा कीर्ति: कुमारी कुङ्कुमापि च॥२१॥
चतुरस्रगताश्चापि शक्तीर्वक्ष्ये यथाक्रमात्। भगिनी वेगिनी नागा चपला पेशला सती॥ २२॥
रति: श्रद्धा भोगलोला मदोन्मत्ते मनस्विनी। दिक्षु द्वाराग्रपार्श्वेषु कोणादिक्षु च संस्थिता:॥ २३॥
द्वादशैता महादेव्यश्चतुरस्रेऽभितो यजेत्। यजेदाशाधिपान् बाह्ये तदस्त्राणि ततो बहि:॥ २४॥
एतत्सम्पूजनान्मर्त्यो दारिद्र्यान्मुच्यतेऽचिरात्। रोगापमृत्युदौर्भाग्यजरादोषैर्विवर्जित:॥ २५॥
देहान्ते भवभीतेश्च मुच्यते नात्र संशय:।..॥

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे गायत्री छन्दसे नम:। हृदये श्रीवज्रेश्वरीनित्यायै देवतायै नम:। पादयो: ह्रीं शक्तये नम:। नाभौ ऐं कीलकाय नम:, इति विन्यस्य ममेष्टार्थसिद्धये विनियोग:, इति कृताञ्जलिरुक्त्वा, ह्रींक्लिन्नेह्रीं हृदयाय नम:। ह्रींऐंह्रीं शिरसे स्वाहा। ह्रींक्रोंह्रीं शिखायै वषट्। ह्रींनित्यह्रीं कवचाय हुं। ह्रींमदह्रीं नेत्रत्रयाय वौषट्। ह्रींद्रवेह्रीं अस्त्राय फट्, इति करषडङ्गन्यासं कृत्वा, दक्षश्रोत्रे ह्रींक्लिंह्रीं नम:। वामे ह्रींन्नेंह्रीं नम:। दक्षनसि ह्रींऐंह्रीं नम:। वामे ह्रींक्रोंह्रीं नम:। दक्षकपोले ह्रींनिंह्रीं नम:। वामे ह्रींत्यंह्रीं नम:। दक्षनेत्रे ह्रींमंह्रीं नम:। वामे ह्रींदंह्रीं नम:। नाभौ ह्रींद्रंह्रीं नम:। गुह्ये ह्रींवेंह्रीं नम:, इति विन्यस्य मूलविद्यया व्यापकं कृत्वा ध्यानादिमानसपूजान्ते द्वादशदलकमलं कृत्वा, तत्कर्णिकायां षट्कोणं, तन्मध्ये त्रिकोणं, द्वादशदलाद्बहि: षोडशदलं, तद्बहिश्चतुरस्रत्रयं चतुर्द्वारयुक्तं कुर्यादिति पूजाचक्रं निर्माय, पुरत: प्राग्वत् संस्थाप्याभ्यर्च्यार्घ्यस्थापनादिकमात्मपूजान्तं कृत्वा पीठपूजायां मण्डूकादिपृथिव्यर्चान्ते शोणाब्धौ हेमपोतं तन्मध्ये रत्नसिंहासनं च सम्पूज्य, धर्मादिषडङ्गपूजान्ते त्रिकोणस्याग्रकोणमारभ्य ओं इच्छाशक्त्यै नम:। ज्ञानशक्त्यै०। क्रियाशक्त्यै०, इति सम्पूज्य, षटकोणेषु देव्या वामकोणे डाकिन्यै नम:, दक्षिणे राकिण्यै०। पृष्ठकोणे लाकिन्यै०। पृष्ठवामकोणे काकिन्यै०। पृष्ठदक्षिणकोणे शाकिन्यै०। देव्यग्रकोणे हाकिन्यै नम:, इति सम्पूज्य, द्वादशदलेषु देव्यग्रमारभ्य प्रादक्षिण्येन हृल्लेखायै नम:, क्लेदिन्यै०, क्लिन्नायै०, क्षोभिण्यै०, मदनातुरायै०, निरञ्जनायै०, रागवत्यै०, मदनावत्यै०, मेखलायै०, द्राविण्यै०, वेगवत्यै०, इति सम्पूज्य षोडशदलेषु कमलायै नम:, कामिन्यै०, कल्पायै०, कलायै०, कलितायै०, कौतुकायै०, किरातायै०, कालायै०, कदनायै०, कौशिक्यै०, कम्बुवाहिन्यै०, कातरायै०, कपटायै०, कीर्त्यै०, कुमार्यै०, कुङ्कुमायै०, इति सम्पूज्य चतुरस्रे देव्यग्रद्वारस्य दक्षिणपार्श्वमारभ्य द्वारपार्श्वेषु कोणेषु च प्रादक्षिण्यक्रमेण भगिन्यै०, वेगिन्यै०,

---

१. लविद्यया' क. पाठ:।

नागायै०, चपलायै०, पेशलायै०, सत्यै०, रत्यै०, श्रद्धायै०, भोगलोलायै०, मदायै०, उन्मत्तायै०, मनस्विन्यै०, इति सम्पूज्य लोकेशार्चादिसर्वं प्राग्वत् समापयेदिति।। तथा—

मन्त्री लक्षत्रयं जप्त्वा तद्दशांशं हुनेद् घृतैः। आरग्वधप्रसूनैर्वा प्रसूनैर्वकुलोद्भवैः।। २६।।
मधूकजैश्च पद्मैर्वा[1] त्रिमध्वक्तैश्च मन्त्रवित् । चन्द्रचन्दनकस्तूरीकाश्मीरसुरभीकृतैः।। २७।।
तर्पयेद् दिनशस्तद्वत् सलिलैर्भक्तिमान् सुधीः। आत्मानमभिषिच्याथ तर्पयेद् ब्राह्मणानपि।। २८।।
एवं संसिद्धमन्त्रस्तु नित्यार्चानिरतस्तथा। गुरुभक्तः प्रकुर्वीत प्रयोगान् निजवाञ्छितान्।। २९।।
सहस्रजापी स्थिरधीर्मन्त्रवीर्यविदात्मवान्। यः सोऽपि काम्यान् कुर्वीत प्रयोगान्नान्यथा क्वचित्।।३०।।
यदाज्ञानेन मोहेन चापलेनाथ वाचरेत्। अनर्थक्लेशराजादिपीडाः प्राप्नोति निश्चितम्।। ३१।।
अरुणैः पङ्कजैर्होमं कुर्यात् त्रिमधुराप्लुतैः। मण्डलाल्लभते लक्ष्मीं महतीं श्लाघ्यविग्रहाम्।। ३२।।
कह्लारैः क्षौद्रसंयुक्तैः पूर्णाद्यं तद्दिनावधि। जुहुयान्नित्यशो भक्त्या सहस्रं विकचैः शुभैः।। ३३।।
तत्तद्दिनेषु पूर्वोक्तान् भोजयेदुक्तरूपतः। तावच्च जप्याद्धो[2]मोऽथ यावत्संख्यं हुतं कृतम्।। ३४।।
चम्पकैः क्षौद्रसंसिक्तैः सहस्रहवनाद् ध्रुवम्। लभते स्वर्णनिष्काणां शतं मासेन पूर्ववत्।। ३५।।
पाटलैर्घृतसंसिक्तैस्त्रिसहस्रहुतैस्तथा। दर्शादिमासाल्लभते चित्राणि वसनानि च।। ३६।।
कर्पूरचन्दनाद्यानि सुगन्धीनि च मासतः। वस्तूनि लभते हृद्यैरन्यैर्भोगोपयोगिभिः ।। ३७।।
शालीभिः क्षीरसिक्ताभिर्मन्त्रविच्च शतं हुनेत्। तेन शालीसंमृद्धिः स्यान्मासैः षड्भिरसंशयम्।।३८।।
तिलैर्हुनेन्नवशतं वर्षादारोग्यमाप्नुयात्। स्वजन्मसु त्रिषु तथा दूर्वाभिर्जुहुयात् सुधीः।। ३९।।
निरातङ्को महाभोगः शतं वर्षाणि जीवति। गुडूचीतिलदूर्वाभिः त्रिषु जन्मसु संहुनेत्।। ४०।।
चिरायुःश्रीयशोधान्यभोगपुण्यादिभाग् भवेत्। घृतपायसदुग्धैश्च हुतैस्तेषु त्रिषु क्रमात्।। ४१।।
आयुरारोग्यविभवैः नृपमान्यो भवेत् तथा। सप्तम्यां कदलीहोमात् सौभाग्यं लभते ध्रुवम्।। ४२।।
दूर्वात्रिकैस्तु प्रादेशमात्रैः त्रिस्वादुसंयुतैः। षण्मासादब्दतो वापि रोगान्मुक्तः सुखी भवेत्।। ४३।।
तद्दिनेषु जपेद्विद्यां नित्यशः सलिलं स्पृशन्। सहस्रवारं तत्तोयैः स्नानं पानं समाचरेत्।। ४४।।
पाकाद्यमपि तैरेव कुर्याद्रोगविमुक्तये । साध्यर्क्षवृक्षसञ्चूर्णत्र्यूषणं सर्षपास्तिलाः ।। ४५।।
पिष्टं च साध्यपादोत्थरजसा च समन्वितम्। कृत्वा पुत्तलिकां तैस्तु हृदये नामसंयुताम्।। ४६।।
प्राग्वच्छित्त्वायसैस्तीक्ष्णैः शस्त्रैः पुत्तलिकां हुनेत्। एवं दिनैः सप्तकैर्वा त्रिभिर्वैकदिनेन वा।।४७।।
साध्यो वश्यो भवेच्छीघ्रमतिदूरस्थितोऽपि च। तथाविधां पुत्तलिकां कुण्डमध्ये खनेद्भुवि।। ४८।।
उपर्यग्निं निधायात्र विद्यया दिनशो हुनेत्। त्रिसहस्रं त्रियामायां सर्षपैस्तद्रसाप्लुतैः ।। ४९।।
शतयोजनदूरादप्यानयेद्वनितां बलात्। तां तु पुत्तलिकार्मधमधूच्छिष्टसमन्विताम् ।। ५०।।
कृतप्राणप्रतिष्ठां च श्मशाने निखनेन्निशि। साध्ययोनिं च तत्रैव च्छित्वा दत्त्वा बलिं ततः।। ५१।।

---

१. 'चम्पकैः' ख. पाठः। २. 'मान्ते' ख. पाठः।

कृत्वाभिषेकं तां विद्यां प्रजपेच्च शतत्रयम्। अरातेरष्टमे राशौ मासान्नानाविधैरपि।। ५२।।
रोगैर्भूतादिसंक्लेशैर्नाशमेति सुनिश्चितम्। यद्यन्तरात्[1] समुद्धृत्य सलिले तां खनेन्निशि।। ५३।।
क्लेशैस्तैः स विनिर्मुक्तः सुखी जीवति भूतले। साध्यवृक्षेण कृत्वा तां सर्षपाज्यनिवेशिताम्।।५४।।
तोयमध्ये निधायैतत् क्वाथयेदुक्तवासरैः। वैरी घोरज्वरेणार्तः कृते प्रागवत् सुखी भवेत्।। ५५।।
तामेव चण्डिकागेहे तथा बलियुतां[2] खनेत्। साध्यो नरश्चेत् नारी चेत् शास्तुरायतने खनेत्।।५६।।
तद्विधानेन सततं शत्रुरुन्मादवान् भवेत्।..।।

इति।। तथा—

अथ वाग्वादिनीक्लिन्नाद्वितीयार्णे तु योजयेत्। माया मेषा द्वादशार्णा वज्रप्रस्तारिणी मता।। १।।

वाग्वादिनी क्लिन्ना पूर्वोक्ता तस्या द्वितीयार्णे द्वितीयार्णस्थाने मायां भुवनेश्वरीबीजं योजयेत्, तत्र स्थितं कामबीजमपास्येत्यर्थः। तथा—

मुनिः स्यादङ्गिरास्त्रिष्टुप् छन्दः प्रोक्तोऽस्य देवता। वज्रप्रस्तारिणी प्रोक्ता सर्वराजवशङ्करी।। २।।
बीजेनाद्येन चाङ्गानि कल्पयेत् षट् क्रमात् सुधीः। ध्यानपूजादिकं सर्वमस्याः पूर्ववदाचरेत्।। ३।।

पूर्ववद्वज्रप्रस्तारिणीवत्। ह्रींह्रींमित्यादिना षडङ्गन्यासः। अन्यत्सुगमम्।। अथ शिवदूती, सारसङ्ग्रहे—

भुवनेशी चतुर्थ्यन्तशिवदूतीपदं सहृत्। सप्तार्णोऽयं मनुः प्रोक्तः शिवदूत्यास्त्रिवर्गदः।। १।।

भुवनेशी ह्रीं, चतुर्थ्यन्तशिवदूती शिवदूत्यै, हृन्नमः।। दक्षिणामूर्तिः— (२२ प०)

ऋषीरुद्रोऽस्या गायत्री छन्दः स्याद्देवता शिवा। आद्यन्ते बीजशक्ती च मध्यं कीलकमुच्यते।।१ ।।

शिवा शिवदूती। तथा—

षड्दीर्घस्वरयुक्तेन बीजेनाद्येन कल्पयेत्। षडङ्गानि मनोरस्य जातियुक्तानि मन्त्रवित्।। २।।
तैनेव पुटितैरन्यैर्मन्त्रार्णैर्विन्यसेत् तनौ। श्रोत्रनासाकपोलाक्षिनाभिषु क्रमतः सुधीः।। ३।।
षष्ठं मनसि विन्यस्य व्यापकं विद्यया न्यसेत्। निदाघकालमध्याह्नदिवाकरसमप्रभाम्।। ४।।
नवरत्नकिरीटां च त्रीक्षणामरुणाम्बराम्। नानाभरणसम्भिन्नदेहकान्तिविराजिताम् ।। ५।।
शुचिस्मितामष्टभुजां स्तूयमानां महर्षिभिः। पाशं खेटं गदां रत्नचषकं वामबाहुभिः।। ६।।
दक्षिणैरङ्कुशं खड्गं कुठारं कमलं तथा। दधानां साधकाभीष्टदानोद्यमसमन्विताम्।। ७।।
ध्यात्वैवं पूजयेद् देवीं दूतीं दुरित[3]नाशिनीम्। वृत्तद्वयं बहिस्त्र्यस्त्रं तद्द्वयं षड्दलाम्बुजम्।। ८।।
तथा षडस्रमष्टास्रं तद्वदष्टदलाम्बुजम्। भूपुरं वह्निवासिन्याः कृत्वा तन्मध्यगां शिवाम्।। ९।।
आवाह्याभ्यर्चयेद् देवीं दूतीं दुर्नीतिवारिणीम्। शाक्ते पीठे गन्धपुष्पैरुपचारैः समाहितः।। १०।।
वृत्तमध्ये द्वितीये च वृत्ते चाङ्गानि पूजयेत्। इच्छाज्ञानक्रियाशक्तीः त्रिषु कोणेषु पूजयेत्।। ११।।
शिवां वार्णीं दूरसिद्धां त्यैविग्रहवतीमपि। नादां मनोन्मनीं षट्सु पत्रेषु परिपूजयेत्।। १२।।
डाकिन्याद्याः षडस्रेषु सर्वास्त्वग्रात् प्रदक्षिणम्। मूलदेवीसमाकारवर्णायुधसमन्विताः।। १३।।

---

१. 'रा' ख. पाठः। २. 'विधियुतां' क. ग. पाठः। ३. 'दुर्नीति' ख. पाठः।

सुमुखी सुन्दरी सारा सुमना च सरस्वती। समया सर्वगा सिद्धेत्युक्ता अष्टास्रशक्तयः।। १४।।
वागीशी वरदा विश्वा विनदा विघ्नकारिणी। वीरा विघ्नहरा विद्या पूज्याः पत्राष्टके त्विमाः।। १५।।
विह्वला कर्षिणी लोला नित्या मदनमालिनी। प्रमोदा कौतुका पुण्या पुराणा चतुरस्रगाः।। १६।।
पूज्या बाह्ये लोकपालास्तदस्त्राणि च तद्बहिः। एवं पूजा मया प्रोक्ता शिवदूत्या यथाविधिः।।१७।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि रुद्राय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीशिवदूतीनित्यायै देवतायै नमः, गुह्ये ह्रींबीजाय नमः। पादयोः नमः शक्तये नमः। नाभौ शिवदूत्यै कीलकाय नमः, इति विन्यस्य सर्वाभीष्टसिद्धिये विनियोगः, इति प्राग्वदुक्त्वा ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे चन्दनादिना वृत्तद्वयं कृत्वा (तद्बहिः स्वाभिमुखाग्रं त्र्यस्रं तद्बहिः पुनर्वृत्तद्वयं तद्बहिः षड्दलपद्मं) तद्बहिः षट्कोणं तद्बहिरष्टकोणं तद्बहिरष्टदलं कमलं तद्बहिः पूर्वपश्चिमयोर्द्वारद्वययुक्तं चतुरस्रत्रयमिति पूजाचक्रं निर्माय, संस्थाप्य अर्घ्यस्थापनादिपुष्पोपचारान्ते वृत्तान्तराले षडङ्गानि प्राग्वत् सम्पूज्य, त्रिकोणस्याग्रकोणादिप्रादक्षिण्येन ओंइच्छाशक्त्यै नमः। ज्ञानशक्त्यै०। क्रियाशक्त्यै०, इति सम्पूज्य, षड्दलेषु शिवायै नमः। वाण्यै० दूरसिद्धायै० त्यैविग्रहवत्यै० नादायै० मनोन्मन्यै० इति सम्पूज्य, षट्कोणेषु देव्यग्रकोणादिप्रादक्षिण्येन हाकिन्यै नमः। राकिण्यै शाकिन्यै० लाकिन्यै० काकिन्यै० डाकिन्यै० इति सम्पूज्य, अष्टकोणेषु सुमुख्यै नमः, सुन्दर्यै० सरायै० सुमनायै० सरस्वत्यै० समयायै० सर्वगायै० सिद्धायै० इति सम्पूज्य, अष्टदलेषु वागीश्यै नमः, वरदायै० विश्वायै० विनदायै० विघ्नकारिण्यै० विरायै० विघ्नहरायै० विद्यायै० इति सम्पूज्य, चतुरस्रे देव्यग्रद्वारस्य दक्षिणभागमारभ्य प्रादक्षिण्येन विह्वलायै नमः, आकर्षिण्यै० लोलायै० नित्यायै० मदनायै० मालिन्यै० प्रमोदायै० कौतुकायै० पुण्यायै० पुराणायै० इति सम्पूज्य, लोकपालार्चादि प्राग्वत् समापयेदिति।। तथा—

एकलक्षं जपेन्मन्त्रं जुहुयात् साधकोत्तमः। तद्दशांशं पयोन्नेन सर्पिरक्तेन मन्त्रवित्।। १८।।
तर्पयेत् तद्दशांशेन सुगन्धिसलिलैः शुभैः। आत्मानमभिषिच्याथ ब्राह्मणांस्तोषयेद्गुरुम्।। १९।।
एवं संसिद्धमन्त्रस्तु प्रयोगान् कर्तुमर्हति। काम्यहोमविधिं वक्ष्ये सम्यक् सङ्कल्पसिद्धिदम्।। २०।।
येनासौ वाञ्छितं क्षिप्रमवाप्नोति सुनिश्चितम्। वशयेद्वनिता होमाद् गुग्गुलैस्तिल[1]मिश्रितैः।। २१।।
नारिकेलस[2]मोपेतैर्गुडैर्लक्ष्मीमवाप्नुयात्। तथाज्यसिक्तैः कह्लारैः क्षीराक्तैररुणोत्पलैः।। २२।।
त्रिमध्वक्तैश्चम्पकैश्च प्रसूनैर्बकुलोद्भवैः। मधूकजप्रसूनैश्च हुतैः कन्यामवाप्नुयात्।। २३।।
पुन्नागजैर्हुतैर्वस्त्राण्याज्यैरिष्टमवाप्नुयात्। माहिषैर्महिषीराजैरजा गव्यैश्च गास्तथा ।। २४।।
अवाप्नोति हुतैः साज्यै रत्नै रत्नानि[3] साधकः। शालिपिष्टमयीं कृत्वा पुत्तलीं सितसंयुताम्।।२५।।
हृद्देशे न्यस्तसाध्याख्यां पचेत्तैलाज्ययोर्निशि। तां मन्त्री च दिवा रात्रौ विद्याजप्तां तु भक्षयेत्।२६।।
सप्तरात्रप्रयोगेण नरो नारी नृपोऽथवा। दासवच्च समायाति वित्तं प्राणादि चार्पयेत्।। २७।।
हयारिपुष्पैररुणैः सितैर्वा जुहुयात् तथा। त्रिसप्तरात्रान्महतीमवाप्नोति श्रियं नरः ।। २८।।

---

[1] 'मधु' क. पाठः। [2] 'फलो' ख. पाठः। [3] 'हुतैराज्यैरन्नैरन्नानि' ग. पाठः।

छागमांसैस्त्रिमध्वक्तैर्होमात् स्वर्णमवाप्नुयात्। क्षीराक्तैः शस्यसम्पन्नां भुवं प्राप्नोति मण्डलात्।।२९।।
पद्माक्षैर्हवनाल्लक्ष्मीमवाप्नोति त्रिभिर्दिनैः। समस्तापत्तारिणीयं मोहिनी विश्वरञ्जिनी ।। ३०।।
श्रीकरी शिवदूत्याह्वा प्रोक्ता सर्वसमृद्धिदा।..।।

इति।। अथ (त्वरित्वा,) सारसङ्ग्रहे—

त्वरितामन्त्रमथ ते वक्ष्यामि सर्वसिद्धिदम्। सर्वापत्तारकं सर्वसम्पत्सन्तानसिद्धिदम् ।। १।।
मूर्धयुग्दन्तपङ्क्तिश्च हृल्लेखा कवचान्त्यिका। दक्षदोःकूर्परोष्ठौ स्तो वामदोर्मूलकं ततः।। २।।
तद्दन्त्योष्ठावन्तिमं च भृगुणान्तिमरेफयुक्। सशान्तिः खं वामकर्णबिन्दुयुक् सेस्वरोऽन्तिमः।।३।।
शक्तिरस्त्रान्तको मन्त्रो द्वादशार्णः समीरितः।..।।

दन्तपङ्क्तिः ओकारः, मूर्धयुक् बिन्दुयुक्तः, तेन ओं। हृल्लेखा भुवनेश्वरीबीजं ह्रीं। कवचं हुं। दक्षदोःकूर्परः खकारः ओष्ठः ए तेन खे। वामदोर्मूलं चकारः, दन्त्योष्ठौ छकारेकारौ ताभ्यां च्छे। अन्तिमः क्षकारः। भृगुः सकारः, णान्तेन तकारेण रेफेण च युक्तः। सशान्तिः ईकारयुतस्तैः स्त्री। खं हकारः, वामकर्णः ऊकारः, बिन्दुरनुस्वारः एतैः हूं। अन्तिमः क्षकारः, स एकारयुक्तस्ताभ्यां क्षे। शक्तिः ह्रीं, अस्त्रं फट्कारः। तथा—

....। ऋष्याद्या अर्जुनविराट्त्वरिताह्वाः समीरिताः ।। ४।।
कूर्माद्यैः सप्तभिः पूर्वपूर्वहीनैः षडङ्गकः। द्वाभ्यां द्वाभ्यां विना मायां कृत्वा मन्वर्णकान् न्यसेत्।।५।।

कूर्मश्चकारः। द्वाभ्यामित्यनेन 'चच्छे हृत्' च्छेक्षः शिरः, इत्यादि प्रयोगे वक्ष्यते। नारायणीये तु—

नवमादितृतीयान्तं यदस्या वर्णसप्तकम्। तेनाङ्गानि द्विवर्णानि कर्तव्यान्युपदेशतः।। १।।

उपदेश इत्यनेन पूर्वपूर्वत्यागः सूचितः। तेन 'खेच हृत्, चच्छे शिरः, इत्यादि यथागुरूपदेशं कार्यम्।

कभालकण्ठहृन्नाभिगुह्योरुषु सजानुषु। जङ्घयोः पादयोर्मन्त्री सर्वेण व्यापकं न्यसेत्।। ६।।
लसच्छ्यामतनुं रक्तपङ्कजोद्यत्पदाम्बुजाम्। ताटङ्काङ्गदविद्योतिरशनानूपुरात्मकैः ।। ७।।
विप्रक्षत्रियविट्शूद्रजातिभिर्भीमविग्रहैः। द्विद्विक्रमादष्टनागैः कल्पितोद्यत्सुभूषणाम्।। ८।।
शेषश्च वासुकिर्विप्रौ तक्षककर्कोटकौ नृपौ। वैश्यौ पद्ममहापद्मौ तुर्यौ कुलिकशङ्खपौ।। ९।।

शङ्खपः शङ्खपालः।

पल्लवांशुकसंवीतां शिखिपिच्छकृतैः शुभैः। वलयैर्भूषितभुजां माणिक्यमुकुटोज्ज्वलाम्।। १०।।
वर्हिबर्हकृतापीडां तच्छत्रां तत्पताकिनीम्। गुञ्जाफललसद्धारविलसत्कुचमण्डलाम् ।। ११।।
त्रिनेत्रां चारुवदनां मन्दस्मितमुखाम्बुजाम्। वराभयकरां गण्डद्वयीमुकुरशोभिताम् ।। १२।।
तनुमध्यलताभुग्न[१]पृथुलस्तनयुग्मकाम् । अरुणायतसन्नेत्रां सुशोणाधरपल्लवाम् ।। १३।।*

---

* दक्षवामयोर्वराभये विप्रनागावनन्तकुलिकौ बर्हिवर्णौ, प्रत्येकं सहस्रफणालङ्कृतौ, नृपौ वासुकिशङ्खपालौ पीतवर्णौ प्रत्येकमष्टशतफणालङ्कृतौ, वैश्यौ तक्षकमहापद्मौ नीलवर्णौ प्रत्येकं फणापञ्चशतालङ्कृतौ, वृषलौ पद्मकार्कोटकौ सितवर्णौ प्रत्येकं त्रिशतफणालङ्कृतौ तत्तदाभरणभूतौ ध्येयौ, इत्यधिकः पाठः शिवार्चनचन्द्रिकायाम्।

[१] 'लतामुच्च' ख. पाठः।

विलासमन्दिरं देवीं तरुणीं संस्मरेत् सुधी:। आसने हेमरचिते त्वष्टसिंहवृतेऽभित:।। १४।।
सरोजमष्टपद्मं स्याद्वृत्तयुग्मं ततो भवेत्। ताद्बहिर्भूपुरद्वन्द्वं पश्चिमद्वारसंयुतम् ।। १५।।
मायापीठोदिता अत्र नवशक्ती: प्रपूजयेत्। त्वरितां वक्ष्यमाणेन विधानेनात्र संयजेत्।। १६।।
अन्त्यं सदण्डी वर्माथ खं सदण्डी सुधा ज्रदे। वियद्भान्त्य: सकर्णाग्निरप्येतद्द्वन्द्वकं पुन:।। १७।।
अन्त्यं सनेत्रार्धचन्द्रो गुलगर्जद्वयं वदेत्। उपान्त्यस्वरयुग्व्योम वर्मान्त्यो दीर्घबिन्दुयुग्।। १८।।
ङेन्तं पञ्चाननं हृच्च पीठमन्त्र उदाहृत:।...।।

अन्त्यं क्षकार:, सदण्डी सानुस्वार: तेन क्षं। वर्म हुं। खं हकार: सदण्डी सानुस्वार: तेन हं। सुधा वकार:। ज्रदे स्वरूपं। वियत् हकार:। भान्त्य: मकार: कर्ण उ तेन मु। अग्नी रेफ: अपिशब्दादुकार: तेन रु। पुनरेतद्द्वयं मुरु इति। अन्त्यं क्षकर:, सनेत्र: इकारसहित: अर्धचन्द्रो बिन्दु: तेन क्षिं इति। गुलद्वयं गर्जद्वयं चेत्यर्थ:। उपान्त्यस्वरो बिन्दु:, तद्युग्व्योम हकार: तेन हं। वर्म हुं। अन्त्य: क्षकार:, दीर्घ: अकार: बिन्दुरनुस्वार: तेन क्षां। ङेन्तं पञ्चाननं पञ्चाननाय। हृत् नम:।।

अनेन मनुना दद्यादासनं मूर्तिकल्पना। मूलमन्त्रेण कर्तव्या त्वरितां पूजयेत् तत:।। १९।।
यथावत् केसरेष्वङ्गपूजा कार्या विपश्चिता। प्रणीतां चैव गायत्रीं यजेत्तत्रैव मन्त्रवित्।। २०।।

तत्रैव सप्तमाष्टमकेसरेषु। षडङ्गानि सम्पूज्यावशिष्टकेसरयोर्विपश्चितेत्येनेन षडङ्गपूजायां विशेष उक्त:। यथा अत्र देव्यग्रकेसरमारभ्य प्रादक्षिण्येन षट्सु केसरेषु षडङ्गानि सम्पूज्यावशिष्टकेसरद्वये शक्तिद्वयं पूजयेदिति।। उक्तं च मृडानीतन्त्रे—''अष्टसिंहासने पूज्या दले पूर्वादिकं क्रमात्''। इति ''अङ्गं प्रणीतां गायत्रीं'' इति तोतलामतेऽपि। ''यजेत् तत्राष्टपत्रेषु (पूर्वाशाद्यङ्गदेवता:। सौम्ये प्रणीतामैशे च गायत्रीमभिपूजयेत्।।'' इति। पद्मपादाचार्यश्च पूर्वादिषट्सु केसरेषु) षडङ्गानि सम्पूज्य उत्तरैशानयोरुभयं पूजयेदिति।। प्रपञ्चसारे—(१३। ३३) ''हूंकार्याख्या खेचरिचण्डे सच्छेदनी तथा क्षेपणी। भूयस्त्रियाह्वयाहुंकारीक्षेमङ्कर्यश्च सम्पूज्या:।। १।। सश्रीबीजा लोकेशायुधभूषणान्विता दलाग्रेषु।'' इति लोकेशवाहनमपि ज्ञेयम्। ''इन्द्रादिलोकपालानां वर्णा वाहायुधै: समा:'' इति तोतलामतात्।। तथा— फट्कारी चाप्यग्रे सचाप[1]शरधारिणी च तद्बाह्ये।। २।। सस्वर्णवेत्रयष्ट्यौ द्वा:स्थे पूज्ये पुनर्जयाविजये। कृष्णो बर्बरकेशो लकुडधर: किङ्करश्च तत्पुरत:।। ३।। बर्बर:[2] उद्भूषित:, धूसर इति यावत्। लकुड: गदा। 'कृष्णवर्णो गदापाणि'रिति। सारसङ्ग्रहचनात्।। सारसङ्ग्रहे—

किङ्कराय रक्षयुगं त्वरिताज्ञास्थिरो भव। कवचान्ते फट्च वदेदनेन मनुना तत:।। १।।
आरक्तैर्वनसम्भूतैर्मनोज्ञैश्च सुगन्धिभि:। धूपदीपादिभिर्नृत्यगीतै: सम्पूज्येच्छिवाम्।। २।।
एवं पूजां विधायाग्रे जपेद्विद्यां सहस्रकम्। शतं वा कृतहोमस्तु प्राग्वत् पूजां समापयेत्।। ३।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलविद्यया प्राणायामत्रयं कृत्वा, शिरसि अर्जुनाय ऋषये नम:। मुखे विराजे छन्दसे नम:। हृदये श्रीत्वरितानित्यायै देवतायै नम:। गुह्ये ॐ बीजाय नम:। पादयो: ह्रीं शक्तये नम:, इति विन्यस्य मम सकलपुरुषार्थसिद्धये विनियोग:, इति कृताञ्जलिरुक्त्वा, चक्षे हृदयाय नम:। क्षेच्छ: शिरसे

---

१. 'शरास' ख. पाठ:। २. 'वर्वर:' कुटिल इति तन्त्रराजटीकाकार:।

स्वाहा। क्ष:स्त्री शिखायै वषट्। स्त्रींहुं कवचाय हुं। हुंक्षे नेत्रत्रयाय वौषट्। क्षेफट् अस्त्राय फट्, इति करषडङ्गन्यासं विधाय ध्यानाद्यात्मपूजान्ते भुवनेश्वरीपीठमभ्यर्च्यावाहनादिपुष्पोपचारान्तेऽष्टदलकेसरेषु देव्यग्रादिषट्केसरेषु षडङ्गानि सम्पूज्य, अन्तिमकेसरयो:—उों प्रणीतायै० उों गायत्र्यै० इति सम्पूज्य, अष्टदलेषु—उों हूंकार्यै०, खेचर्यै०, चण्डायै०, च्छेदिन्यै०, क्षेपण्यै०, स्त्रियै०, हुंकार्यै०, क्षेमङ्कर्यै०, इति सम्पूज्य देव्यग्रे उों फट्कार्यै नम:, देव्यग्रद्वारदक्षवामपार्श्वयो: उों जयायै०, विजयायै०, इति सम्पूज्य, द्वाराग्रे एव 'किङ्कराय रक्ष रक्ष त्वरिताज्ञास्थिरो भव हुंफट्' किङ्कराय नम:, इति सम्पूज्य लोकेशार्चादि प्राग्वत् समापयेदिति।। अत्र हुंकार्यादिशक्तीनां लोकेशात्मकत्वाल्लोकपालार्चा नास्तीति केचित्।। मृडानीतन्त्रे—

त्वरितादेवि शब्दान्ते विद्महे तूर्णिमुद्धरेत्। विद्यायै धीमहि प्रोक्ता तन्नो देवी प्रचोदयात्।। १।।
गायत्री त्वरितायास्तु जपात् सान्निध्यकारिणी।..।।

इति गायत्र्युक्ता।। प्रपञ्चसारे— (१३। ३१)

दीक्षां प्राप्य गुरोरथ लक्षं जप्याद् दशांशकं जुहूयात्।
बिल्वसमिद्भिस्त्रिमधुरसिक्ताभि: साधक: सुसंयतधी:।। १।।

इति। सारसङ्ग्रहे—

एवं संस्मृत्य लक्षैकं प्रजपेन्मनुवित्तम:। मध्वक्तबिल्वसमिधो जुहुयात् तद्दशांशत:।। १।।
सुगन्धिसलिलैश्चैव तर्पयेत् त्वरितां पराम्। आत्मानमभिषिच्याथ कुर्याद् ब्राह्मणभोजनम्।। २।।
एवं सिद्धे मनौ तस्मै नरनारीनराधिपा:। नमस्क्रियां प्रकुर्वन्ति नात्र कार्या विचारणा।। ३।।
देवदानवगन्धर्वयक्षचारणयोषित: । सिद्धविद्याधराणां च योषा ह्यप्सरसस्तथा ।। ४।।
विस्पृष्टजघनोरस्का: स्पष्टदोर्मूलमञ्जुला:। प्रस्खलत्पदविन्यासा: प्रस्पन्दिदशनांशुका:।। ५।।
रम्यमीषदुन्मिलितनयनेन्दीवराश्च ता:। श्लथमानाङ्गवसना: श्लथकुञ्चितमूर्धजा: ।। ६।।
मन्दस्खलितभाषिण्य: प्रसादाकाङ्क्षया मुहु:। सम्यक् शिरोविरचितनत्यञ्जलय उत्कटम्।। ७।।
पश्य वाचं प्रयच्छाशु ह्याश्लेषसुखमेधि न:। एहि रम्यं सुरोद्यानं रंस्यामोऽत्र निजेच्छया।। ८।।
निरातङ्कं सदेत्यादिवादिनीभिरहर्निशम्। प्रलोभ्यमानो मन्त्रज्ञो यदा विक्रियते न स:।। ९।।
तदैत्य वाञ्छितं तस्मै ददाति त्वरिताखिलम्। सञ्जप्य कर्णयोर्विद्यां यष्ट्या च जपसिद्धया।।१०।।
सन्ताड्य शीर्षे सहसा मृतमुत्थापयेदसौ।...।।

मृतं सर्पादिदष्टमिति शेष:। तथा—

काम्यहोमविधिं वक्ष्ये यथाविधि विधानवित्। कृत्वा योनिं कुण्डमध्ये समाधायाग्निमत्र ताम्।।१।।

योनि स्वाभिमुखाग्रत्रिकोणम्।

सम्पूज्य पूर्वविधिना देवतां पूर्ववत् सुधी:। तिलसर्षपगोधूमशालिधान्ययवैर्हुनेत्।। २।।
त्रिमध्वक्तैरेकशो वा समेतैर्वा समृद्धये। बकुलैश्चम्पकै रक्तकह्लारैररुणोत्पलै:।। ३।।
कैरवैर्मल्लिकाकुन्दमधूकैरिन्दिराप्तये। अशोकै: पाटलैर्बिल्वैर्जातीविचकिलै: सितै:।। ४।।

नवैर्नीलोत्पलैस्श्वरिपुजैः कर्णिकारजैः। होमाल्लक्ष्मीं च सौभाग्यमायुर्नित्यं यशो निधिम्।। ५।।
यद्यद्धि वाञ्छितं सर्वं तत्तदाप्नोति निश्चितम्। दूर्वां गुडूचीमश्वत्थं वटमारग्वधं तथा।। ६।।
सिताब्ज[1]लक्षकं हुत्वा रोगान्मुक्तो नरोऽचिरात्। इक्षुजम्बूनारिकेलमोचागुडसिता हुनेत् ।। ७।।
अचलां लभते लक्ष्मीं भोक्ता च भवति ध्रुवम्। एतैरुदीरितैराज्यमधुक्षीरप्लुतैर्हुनेत् ।। ८।।
एकैकैर्वनिता वश्या यावज्जीवं धनादिभिः। तैस्तैराज्यप्लुतैर्भूपा वश्याः स्युर्हवनात्ततः।। ९।।
क्षीराक्तैस्तैर्हुतैर्मर्त्या वशे तिष्ठन्त्यशेषतः। सर्षपाज्यैर्हुनेन् मृत्युकाष्ठाग्नौ वैरिमृत्यवे।। १०।।
तदक्तैर्वैरियोन्युत्थमांसैरपि च तत्कृते। [2]प्लक्षेन्धनाग्नौ योन्युत्थक्षतजोत्पाचितं चरुम्।। ११।।
आरुष्करघृतोपेतं फणिशीर्षस्रुचा हुनेत्। कृष्णांशुकशिरोवेष्टः खड्गपाणिश्च रोपवान्।। १२।।
निशामध्ये हुनेत् सद्यो निहन्तुं वैरिणं हठात्। मृत्युकाष्ठानले तस्य फलैः पत्रैश्च होमतः।। १३।।

मृत्युः कारस्करः।

सप्तरात्रादरातेस्तु गजाश्वा रोगमाप्नुयुः । चतुरङ्गुलजैर्होमाच्चतुरङ्गबले रिपोः ।। १४।।
सप्ताहाद्रोगदुःखार्तिर्भवत्येव न संशयः। मन्त्रजप्तोदकैः सेकात् क्ष्वेडशान्तिर्भविष्यति।। १५।।
तज्जप्तयष्टिघाताच्च तज्जप्तचुलुकोदकात्। होमसंख्या यावती स्याज्जपसंख्या च तावती।।१६।।
तत्कर्णरन्ध्रजापाच्च सद्यो न स्युर्विषग्रहाः। तद्यन्त्रस्थापनं चैव विषभूतादिनाशनम् ।। १७।।
एवमस्यास्तु विद्याया वैभवं को नु वर्णयेत्। तथाप्यनुग्रहात्तस्याः किञ्चिदुक्तं मया त्विदम्।। १८।।

वैरियोन्युत्थमांसैर्वैरिनक्षत्रयोनिमांसैरित्यर्थः। नक्षत्रयोनयस्तु तोतुलामते—

अश्वहस्त्यजसर्पाश्च सर्पिणी विडालिका। मेषो भिडालकश्चाखुर्मूषको गौर्वृषस्तथा।। १।।
महिषो व्याघ्रमहिषीव्याघ्रैणीहरिणाः शुनी। वानरो नकुलश्चैव नकुली वानरी तथा।। २।।
सिंहो हयवधूः सिंही छागी हस्तिन्यपि क्रमात्। भानां तु योनयो देवि कथितास्तव सुव्रते।। ३।।

अत्र द्वितीयनकुलशब्दोऽभिप्रायेणोक्तः, अत एवाष्टाविंशतिरिति। सारसङ्ग्रहे—

अथानुग्रहयन्त्राणि वक्ष्यन्तेऽत्र समासतः। ....।।

कोष्ठचतुःषष्टिं च लिखित्वा तेषु च शर्वाद्यं कुणपादि।
श्रीमनुमालिख्य शिखाशेषं तूर्णमनुं बाह्येऽमृतवीतम्।। १।।
काञ्चनपट्टेऽच्छे वसने वा संलिखितं च स्थापितमेतत्।
सस्यसमृद्धिदायिन्यः समये स्युस्तत्र वृष्टयः फलदाश्च।। २।।
यन्त्रमिदं चानुग्रहसंज्ञं यत्र निखातममङ्गला वार्ता।
तत्र भवेत् सत्यं न काचिन्छ्रीमनुमेनं सम्प्रति वक्ष्ये ते।। ३।।

विबिन्दुका रमाथ सा विषं च दीर्घसंयुतम्। मरुच्च दीर्घसंयुतो विलोमगानिमान् वदेत्।। ४।।

---

[1] 'कं प्लक्षजं' ख. पाठः। [2] 'अक्षे' ख.. पाठः।

भृगुश्च कान्तिसंयुतस्तपञ्चमश्च सद्ययुक्। ह्यनन्तयुक् मरुद्भवेत् ज्ञमेयुतं पुनर्वदेत्।। ५।।
इमान्विलोमगांस्ततश्च मा मरुच्च दीर्घयुक्। धरा च वामनेत्रयुक् वसुन्धरा ह्यनन्तयुक्।। ६।।
इमान्विलोमगान् पठेत् ततश्च याज्ञमेयुतम्। वदेच्च लापदंचली सुवैपरीत्यगानिमान्।। ७।।
वदेद्रमामनुर्मत: स सर्वकार्यसाधक:।..।।

इति। विविन्दुका रमा श्री इति, सा स्वरूपम्, विषं मकार:, दीर्घ: आकार: तेन मा। मरुत् यकार:, दीर्घ: आकारस्तेन या। विलोमगान् यामासाश्री। भृगु: सकार:, कान्ति: आ तेन सा इति। तपञ्चम: नकार:, सद्य: ओकारस्तेन नो। अनन्त आ, तद्युक्तो मरुत् यकार: तेन या। ज्ञ स्वरूपं, तत् एयुतं तेन ज्ञे। इमान् विलोमगान् ज्ञेयानोसा। मा स्वरूपं, मरुत् यकार: दीर्घ: आ तेन या इति, धरा लकार:, वामनेत्रं ईकार: तेन ली वसुन्धरा लकार:, अनन्त: आ तेन ला। विलोमगान् लालीयामा। या स्वरूपं ज्ञ एयुतं एकारयुक्तं तेन ज्ञे। ला स्वरूपं, ली स्वरूपं, वैपरीत्यगान् लीलाज्ञेया इति।। अथैतद्यन्त्ररचनाप्रकार: —

तत प्राक्प्रत्यगायता नव रेखा दक्षिणोत्तरायता नव रेखाश्च कृत्वा चतुष्पष्टिकोष्ठयुतं चतुरस्रं चक्रं परिकल्प्य, तत्र सर्वोपरिगतपङ्क्ते: प्रथमकोष्ठमारभ्य स्ववामादिदक्षिणान्तक्रमेण पङ्क्तिचतुष्टयगतेषु द्वात्रिंशत्कोष्ठेषु प्रोक्तसर्वतोभद्राख्यलक्ष्मीमन्त्रस्य द्वात्रिंशदक्षराणि विलिख्य, पुनरधोगतपङ्क्तिचतुष्टयेऽपि सर्वाध:पङ्क्ते प्रथमकोष्ठं स्वदक्षिणस्थमारभ्य वामान्तमुपर्युपरि षङ्क्तिचतुष्टये तस्यैव मन्त्रस्य द्वात्रिंशदक्षराणि विलिख्य, तद्बहि: प्रागादिषु चतसृषु दिक्षु ईशानादीशान्तं चतुरावृत्त्या तद्बाह्यरेखास्पृष्टां त्वरिताविद्यामन्तर्गतवषट्कारामालिख्य तद्बहि: वमित्यमृतबीजेन वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति।।

इत: परं प्रवक्ष्ये ते मनोज्ञं यन्त्रमुत्तमम्। प्राक्प्रत्यगायतै: सूत्रैस्तथा दक्षोत्तरायतै:।। १।।
दशभिर्दशभि: कुर्यादिकाशीतिपदानि वै। समान्तरालकान्यत्र मध्यकोष्ठे समालिखेत्।। २।।
ससाध्यं टपरं मन्त्री बिन्दुयुक्तं च तद्बहि:। चतसृष्वपि वीथीषु चतुष्कोष्ठात्मिकासु च।। ३।।
दिग्गतासु क्रमाद्वर्णान् वक्ष्यमाणान् समालिखेत्। चतृतीयं वामकर्णयुक्तं बिन्दुविभूषितम्।। ४।।
विसर्गाढ्यो भृगुस्तोयं श्वेतेश: खेचरी तत:। केवलां च तत: प्राग्वल्लक्ष्मीविद्यां समालिखेत्।।५।।
उक्तवर्णविहीनेषु कोष्ठेषु मनुवित्तम:। ततस्तूर्णामृतार्णैस्तैर्वेष्टयेद्बहिरुक्तवत् ।। ६।।
मूलविद्याक्षराण्येव वषड्युक्तानि मन्त्रिभि:। फट्काररहितानीह तानि प्रोक्तानि चागमे।। ७।।
बहि: कुम्भं विदध्याच्च पद्मं तदधरोत्तरम्।..।।

इति। अथैतद्यन्त्ररचनाप्रकार:—तत्र प्राक्प्रत्यग्दक्षिणोदक् समान्तरालानि दश दश सूत्राण्यास्फाल्य एकाशीतिपदानि विधाय, तत्र मध्यकोष्ठे सबिन्दुकठकारोदरे साध्यनामालिख्य, तत्कोष्ठपार्श्वस्थपूर्वापरायतपङ्क्तिद्वये च सम्भूय चतसृषु षङ्क्तिषु चतुश्चतु:कोष्ठात्मिकासु स्वाग्रादिप्रादक्षिण्यक्रमेण "जूंस: वषट्" इति च प्रतिकोष्ठं प्रतिकोष्ठमेकैकमभ्यन्तरान्त्रिर्गमगत्या विलिख्य, तत: ईशानादिनैर्ऋत्यादिकं च प्रागुक्तश्रीविद्यानुष्टुबं मध्यवीथिचतुष्टयवर्जमालिख्य सर्वबाह्येऽभित: ईशानादीशान्तं तूर्णामृताक्षराणि चतुरावृत्त्या प्राग्वत्समालिख्य, सर्वमध्यकोष्ठमवष्टभ्य चतु:कोणस्य तूर्णामृताक्षरमानभ्रमेण वृत्तं निष्पाद्य तद्बाह्येऽङ्गुलमानेन तथा वृत्तान्तरं कृत्वा, अध: उपरि भागे च मध्यत: चतुरङ्गुलान्तरालं वृत्तद्वयं

मार्जयित्वा, तदग्रचतुष्टयमानमवक्रं, समान्तरालमुपरि चतुरङ्गुलं कुम्भमुखाकारं यथा भवति तथा समुन्नमय्य तत्कुम्भमुखे तिर्यग्रेखाद्वयं प्रसार्य, तत्कुम्भवीथीमध्यम् अन्योन्यस्पृष्टवकारमालया शृङ्खलारूपया अन्तर्मुखया समापूर्य सर्वोपरि बिन्दुं समालिख्य, कुम्भाधस्तात् पद्मं तत्कर्णिकास्थं कुम्भं यथा भवति तथा समालिख्य प्रोक्तक्रमेण मनीषितेषु विनियोगात् प्रोक्तफलानि भवन्ति।। तथा—

कुङ्कुमैर्लाक्षया वापि लिखितं स्वर्णपट्टके। धवले वसने वापि लेखिन्या स्वर्णजातया।। ८।।
सम्पूज्य जपसंसिद्धं स्थापयेद्यत्र तत्र वै। भवेल्लक्ष्मीरतिस्फीता नीरोगाश्च प्रजास्तथा।। ९।।
गजाश्वपशवस्त्वन्ये प्राणिन: सुखिनो भृशम्। भूतप्रेतपिशाचादिपीडासु बिभृयादिदम् ।। १०।।
अलक्ष्मीशान्तये वश्यसिद्धये सर्वसम्पदे। कृत्यामृत्युग्रहक्ष्वेडदुरितेभ्यो विमुक्तये ।। ११।।
पुत्रपौत्रैश्वर्यदीर्घायुष्यसंसिद्धयेऽपि च ।..।।

इति। तथा —

पद्मे दशदलयुक्ते मायां साध्याह्वयसहितां च।
ताराद्यर्णांल्लिखेद् दशपत्रे षट्कोणस्थं चितिपुरसंस्थं च।। १२।।
कृत्याद्रोहग्रहविनाशमनन्तचोरव्यालादिकभयहरम् ।
जप्तं दोष्णा विधृतमशेषं राज्ञां युद्धे विजयदमुक्तम्।। १३।।

इति। अथैतद्यन्त्ररचनाप्रकार:— तत्र दशदलपद्मं कृत्वा तत्कर्णिकायां मायाबीजस्योदरे साध्यनामालिख्य, तद्दलेषु मूलविद्याया: प्रणवादिदशवर्णान् मायाबीजरहितान् विलिख्य, तद्बहि: षट्कोणं कृत्वा तद्बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवति।। तथा—

विद्याद्यवर्णजठरे साध्यमालिख्य तद्बहि:। अष्टच्छदेषु फड्वर्जमालिखेदष्टवर्णकम् ।।१४।।
कर्णिकास्थं ततोऽब्जं च मायया वेष्टितं तत:। बहि: कुम्भं विदध्याच्च प्रोक्तलक्षणसंयुतम्[१] ।।१५।।
एवमन्यैश्च नवभिर्विद्यावर्णैर्यथाक्रमम्। विदध्यान्नव यन्त्राणि दशानां च फलं त्विदम्।। १६।।
सर्वरक्षां जयं वश्यं क्ष्वेडहृद्ग्रहनाशनम्। स्तम्भं लक्ष्मीयशोधान्यवासांसि स समाप्नुयात्।। १७।।

अथैतद्यन्त्ररचनाप्रकार:— तत्राष्टदलं पद्मं विधाय तत्कर्णिकामध्ये विद्याप्रथमहृल्लेखां तदुदरे विद्याद्यभूतप्रणवं तन्मध्ये साध्यनाम चालिख्य शेषाण्यष्टौ मन्त्राक्षराणि हृल्लेखाद्वयफट्कारविधुराणि क्रमेणाग्रादिप्रादक्षिण्येन अष्टसु दलेषु समालिख्य, तत्पद्मं द्वितीयहृल्लेखया उक्तमन्त्रेणावेष्ट्य तद्बहि: प्राग्वत् सबिन्दुकशृङ्खलितवकाराक्षरमालोपेतं उपर्यधश्च पद्मद्वयोपेतं च कुम्भं कुर्यात्, एतत्प्रथमयन्त्रम्। एवमस्यैव यन्त्रस्य कर्णिकामध्ये हृल्लेखोदरे विद्यायास्तृतीयाक्षरादीनि शेषाक्षराणि क्रमेणैकमेकं नामगर्भं विन्यस्य तदनन्तरादितत्पूर्वान्तं प्राग्वदेभिरक्षरैर्दलस्थै: पूर्वोक्तेन सार्धं नव यन्त्राणि, हृल्लेखामध्ये सनामकं फट्कारं समालिख्य प्रणवविधुरैस्तृतीयादिभि: शेषाक्षरै: प्राग्वद्दलस्थैर्दशमं चेति, एवं दश यन्त्राणि कुर्यादिति।। तथा—

---

१. 'प्रोक्ताक्षरविधानत:' ख. पाठ:।

साध्ययुतं तारकमिह मध्ये कोष्ठशते चैकविंशतिसहितेऽत्र।
द्वादशधा शूलमिह शिवाद्यं[1] संलिख्य विंशद्युगवसुशूलम्।। १८।।
मूलजप्तं यन्त्रवर्यं सम्पाताज्यसुसंयुतम्। क्ष्वेडग्रहादि हरति जयलक्ष्मीयशःप्रदम्।। १९।।

अस्यार्थः— प्राक्प्रत्यगायता दक्षिणोत्तरायताश्च द्वादश द्वादश रेखा विलिख्यैकविंशत्युत्तरशतकोष्ठानि कृत्वा, रेखाग्रेषु सर्वेषु त्रिशूलानि विरच्य, तन्मध्यकोष्ठे ससाध्यं प्रणवं विलिख्येशानकोष्ठमारभ्य प्रादक्षिण्येन प्रवेशगत्या त्वरिताविद्यां प्रणवद्वितीयहृल्लेखाविधुरां द्वादशावृत्तिं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

एकाशीतिपदं चक्रं कृत्वा तन्मध्यकोष्ठके। रेफोदरे समालिख्य साध्यनाम यथाविधि।। २०।।
लिखेद्बीजचतुष्कं तद्वीथीषु च यथा पुरा। वक्ष्यमाणां ततः प्राग्वत्कालीविद्यां समालिखेत्।। २१।।
चतुःषष्टिपदेष्वीशादिषु च कुणपादिषु। यममन्त्रावृतं बाह्ये वह्निवायुसमावृतम्।। २२।।
निग्रहाख्यमिदं यन्त्रं सर्वशत्रुनिवर्हणम्। वह्निस्थं पतुरीयं स्याद्वामकर्णेन्दुभूषितम्।। २३।।
प्रथमं बीजमुदितं संवर्तोऽग्न्यासनेन्दुयुक्। सवामकर्णो ह्यपरं कूर्मान्तार्घीन्दुवह्नियुक्।। २४।।
तृतीयं व्योमवह्न्यर्घिबिन्दुभिः परमीरितम्। एतद्बीजचतुष्कं तु शत्रुसंहारकारकम्।। २५।।

पतुरीयं भकारः, वह्निस्थं रेफोपरि स्थितं, वामकर्णमूकारः, इन्दुरनुस्वारः एतैः भ्रूं। संवर्तः क्षकारः अग्न्यासनेति रेफस्थं, इन्दुरनुस्वारः, वामकर्णः ऊकारः तेन क्ष्रूं। कूर्मान्तः छ, अर्घी ऊकारः इन्दुरनुस्वारः, वह्नियुक् सरेफः एतैः छ्रूं। व्योम हकारः, वह्नी रेफः, अर्घी ऊकारः, बिन्दुरनुस्वारः एतैः ह्रूं। इति।। तथा—

क्रोधीशः कान्तिमान् शक्रो वामनेत्रं ततः परम्। कालोऽनन्तयुतो वह्निर्विपरीतानिमान् वदेत्।।२६।।
शक्रो युतश्च लोलाक्ष्या मेषो भान्तश्च सद्ययुक्। संवर्तः पुनरेवैतान् विपरीतान् समुद्धरेत्।। २७।।
कालोऽनन्तयुतः सोऽथ सद्ययुक् ततृतीयकः। झिण्टीयुता पूतना च विपरीतानिमान् वदेत्।।२८।।
वह्निरन्त्यः पूतना च सा जलस्था वदेदिमान्। विपरीतानियं प्रोक्ता कालीविद्यारिघातिनी।। २९।।

इति। क्रोधीशः ककारः कान्तिराकारस्तेन का, शक्रो ल, वामनेत्रं ईकारस्तेन ली। कालो मकारः, अनन्त आकारस्तेन मा। वह्नी र। विपरीतान् रमालीका इति। शक्रो ल, लोलाक्षी ईकारः तेन ली। मेषो नकारः, भान्तो मकारः, सद्य ओकारस्तेन मो। संवर्तः क्ष। विपरीतान् क्षमोनली इति, कालो मकारः, अनन्त आ तेन मा । स एव सद्ययुक् तेन मो। ततृतीयो द, झिण्ठी ए तद्युतो दे, पूतना त। विपरीतान् तदेमोमा इति। वह्नी रेफः, अन्त्यः क्षकारः, पूतना त, सैव जले स्थिता वकारोपरि स्थिता तेन त्व। विपरीतान् त्वक्षर इति।। तथा—

वायुः कालोऽनन्तयुतो जलं कान्तिसमन्वितम्। सोमश्च खेचरी तोयं कान्तियुक् सा जयान्विता।।३०।।
वायुः कालः कान्तियुतः खेचरी सद्ययुग् विषम्। सोमेशः खेचरी कालः सद्ययुक् खेचरी विषम्।।३१।।
कान्तिमज्जलकान्ती च कालः सद्ययुतः पुनः। पतुरीयो वामकर्णयुतोऽग्निर्नेत्रवान् पुनः।। ३२।।

---

[1] 'विद्याद्यं' क. पाठः।

स एव तादृशो भूय: पतुरीयश्च पूर्ववत्। काल: सद्ययुतस्तोयं कान्तियुक् खेचरीद्वयम्।। ३३।।
वह्नि: सवामनेत्रश्च ततस्तोयं च पूतना। तथाविधा पुन: सैव वह्निर्वामाक्षिसंयुत:।। ३४।।
सोमेश: खेचरी चेति यममन्त्र उदाहृत:। सर्वशत्रुक्षयकरो यन्त्रविन्यासत: सदा।। ३५।।

इति। वायुर्यकार:, कालो मकार: अनन्त आकारस्तद्युतो तेन मा। जलं वकार:, कान्तिराकारस्तेन वा। सोम ट, खेचरी ट, तोयं व, कान्ति आ तेन वा। सैव कान्तिर्जयान्विता तेन मा। वायु: यकार:, कालो म, कान्तिराकारस्तेन मा। खेचरी ट, सद्ययुक् ओकारयुतं विषं मकारस्तेन मो। सोमेश: ट, खेचरी ट कालो म सद्ययुक् ओकारयुतस्तेन मो। खेचरी ट, विषं मकार:, कान्तिमदाकारयुक्तस्तेन मा। जलं वा कान्ति: आ तेन वा। कालो म, सद्य ओ तेन मो। पतुरीयो भ, वामकर्ण: ऊ तेन भू। अग्नि: र, नेत्रं इ तेन रि। सोऽग्निस्तादृशो नेत्रयुत इकारयुक्तस्तेन रि। पतुरीयो भ, पूर्ववत् ऊकारयुक्तस्तेन भू। कालो म, सद्य ओ तेन मो, तोयं व, कान्ति: आ तेन वा। खेचरीद्वयं टट इति, वह्नि: र, वामनेत्रं ई तेन री। तोय व, पूतना त तेन त्व। सैव पूतना तथाविद्या तकार एव वकारयुत इत्यर्थ:, तेन त्वं इति। वह्नि: र, वामाक्षि ई तेन री। सोमेश: ट खेचरी ट इति।।

अथैतन्निग्रहयन्त्ररचनाप्रकार:—तत्र प्राग्वद्वेदिकायामेकाशीतिपदोपेतं चक्रं विरच्य, तन्मध्यकोष्ठे सबिन्दुकरेफोदरे साध्यनामालिख्य, प्राग्वत् पार्श्वपङ्क्तिषु चतसृषु चतुष्कोष्ठेषु प्रागुक्तक्रमेण भ्रूंक्षूंछूंहूं इति वर्णचतुष्टयमाभ्यन्तरान्निर्गमनगत्या अभित: समालिख्य, अभिचार्य: पुरुषश्चेदन्त:काल्यनष्टुभं बहिर्यममन्त्रं, वनिता चेदन्तर्यममन्त्रं बहि:कालीविद्यां च समालिखेत्। लेखने तु ईशानादिकं निर्ऋत्यादिकं च कालीविद्या, अन्यदा तथा यममन्त्रं (विलिख्य अन्यतरं बहिरीशादिनिर्ऋत्यन्तं निर्ऋत्यादीशान्तं च निरन्तरं द्विर्द्विरालिख्य तद्—) बहिस्तद्वन्निरन्तरं बिन्दुयुक्तं यकारं रेफं च ईशादीशान्तं यथाक्रममन्तर्बहिर्विभागेन समालिख्य मनीषितेषु विनियुञ्ज्यात्। एतन्निक्षेपे चाभिचार्य: पुरुषश्चेत् काल्यादिशक्तेरायतनेऽग्रे स्त्री चेच्छास्तुरायतने एवाग्रभागे अधस्तान्निखनेदिति सम्प्रदाय:।। तथा—

सीसकृते नवपट्टे शावभवे कर्पटके वा। प्रस्तरके वा विषमस्या संलिख्य काकसुपत्रैश्च।। ३६।।
चत्वरके वा कलिवृक्षे स्थापितमेतदरीणां हि। मृत्युकरं व्याधिकरं स्यात् पुत्रस्त्रीवियुतत्वकरं च।।३७।।

इति।। तथा—

प्राक्प्रत्यगुदक्षिणोदक् च नव सूत्राणि पातयेत्। जायन्ते च चतुष्षष्टि: कोष्ठानि सुसमानि च।।३८।।
मन्त्री तेष्वीशनैर्ऋत्यदिगाद्यं कालिकामनुम्। विलिख्य यममन्त्रेण प्रोक्तबीजद्वयेन च।। ३९।।
वेष्टयित्वा बहिश्चक्रं विषेणैव च लेपयेत्। ब्रह्मदण्ड्या च मर्कट्या लिप्तं जप्तमधोमुखम्।।४०।।
क्षिप्तं देशादिके यत्र तत्रालक्ष्मीर्गदै: समम्। मारी तु सुस्थिरासाध्या भवेद् देवासुरैरणि।। ४१।।

यन्त्ररचनाक्रमो तथा—तत्र प्राग्वन्नवभिर्नवभि: सूत्रैश्चतु:षष्टिकोष्ठकानि कृत्वा तेष्वीशादिकं निर्ऋत्यादिकं चाभिचार्य: पुरुषश्चेदन्त:कालीविद्यां बहिर्यममन्त्रं च, स्त्री चेदन्तर्यममन्त्रं बहि: कालीविद्या च प्राग्वत् समालिख्य प्राग्वत् सबिन्दुयकाररेफाभ्यां संवेष्ट्य प्रोक्तक्रमेण प्रोक्तेषु स्थानेषु स्थापनात् प्रोक्तफलसिद्धिर्भवति।। तथा—

अनुक्तेष्वपि नामानि योजयेत् कोष्ठमध्यत:। लवणोषणमेहाम्बुगृहधूमाग्निसंयुतम्।। ४२।।

श्मशानाङ्गारनिम्बोत्थनिर्यासो विषमीरितम्।.......................................।

ऊषणमूषर इति मनोरमाकारैर्व्याख्यातम्। मेहाम्बु प्रस्रवः, अग्निश्चित्रकम्। सारसङ्ग्रहे—

खों खेऽन्त्योऽन्त्यकलायुक्तस्त्रिवर्णेयं त्रिकण्टकी। ऋष्यादिकं पुरा प्रोक्तं द्विरुक्तार्णैः षडङ्गकम्।।४३।।

खं हकारः उं स्वरूपं तेन हुं। खे स्वरूपं। अन्त्यः क्षकारः अन्त्यकला विसर्गः, तेन क्षः इति।

नाभेर्नीलनिभामधोऽरुणरुचिं कण्ठात् सिताभाननां
तुन्दालम्बिभिराननैर्युगमितैर्दंष्ट्रोत्कटैर्भीषणाम्।
दीप[१]द्वन्द्वदरारिहस्तकमलां चन्द्रोल्लसच्छेखरा—
मुद्यद्बालविलोचनां भयहरां देवीं सदा भावयेत्।। ४४।।

युगमितैश्चतुर्भिः। दरः शङ्खः। अरिश्चक्रं। वामाद्यूर्ध्वयोः शङ्खचक्रे, अन्ययोरन्यतरे। इत्यायुधध्यानम्।

ततः पूर्वोदितेनाथ वर्त्मनामुं भजेत् सुधीः। वर्णलक्षं जपेदन्ते दशांशेन घृतं हुनेत्।। ४५।।
आत्मानं देवतारूपं ध्यात्वा रूपं (बद्धा) करद्वये। शूलमुद्रां ग्रहग्रस्तं स्पृष्ट्वैवं प्रजपेन्मनुम्।।४६।।
आशु ग्रहात् प्रमुच्येत नरो मन्त्रप्रभावतः।.......................................।।

इति। तथा—

ईशयुक् पूर्वमन्त्रान्त्यौ मध्ये योषिद्भवेदियम्। वश्या त्रिकण्टकीविद्या त्र्यर्णा मन्त्रिभिरीरिता।।४७।।

पूर्वमन्त्रान्त्यौ खेक्षः इति वर्णौ ईशयुतावेकारयुक्तौ, एतद्द्वयोर्मध्ये योषित् स्त्री इत्यक्षरं यदि भवेदित्यर्थः।

पूर्वोक्तवत्सर्वमस्य कुर्यान्मन्त्री यथाविधि।.......................................।।

पूर्ववत् त्वरितावत्। एतन्मन्त्रद्वयस्यापि ज्ञेयम्।। अथ महामाया वैष्णवी उत्तरतन्त्रे—

हान्तान्तपूर्वो मान्तश्च नान्तो णान्तस्तथैव च। कैकादश आदिषष्ठः खान्तो विष्णुपुरःसरः।। १।।
एभिरष्टाक्षरैर्मन्त्रः शोणपद्मसमप्रभः। ओङ्कारं पूर्वतः कृत्वा जप्यः सर्वैस्तु साधकैः।। २।।

हान्तान्तपूर्वः शकारः, मान्तो यकारः, नान्तः पकारः, णान्तस्तकारः, कैकादश टकारः, आदिषष्ठश्चकारः, खान्तः ककारः, विष्णुरकारः पुरःसर इत्यनेनाकारादिशकारान्तो मन्त्रः उक्तः।

नारदोऽस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुप् च वैष्णवी। देवता मुनिभिः प्रोक्ता सर्वसिद्धिप्रदा तथा।। ३।।
मूलमन्त्राक्षरैः कुर्यात् त्रिभिस्त्रिभिरनुक्रमात्। एकैकं वर्जयेत् पश्चादङ्गानि षडनुक्रमात्।। ४।।

अकच हृत्, कचट शिरः, इत्यादिप्रणवपूर्वं कुर्यात्। "अकचैते सप्रणवाः" इति हयशीर्षवचनात्।

ततस्तु मूलमन्त्रस्य वक्त्रे पृष्ठे तथोदरे। बाह्वोर्गुह्ये पादयोश्च जङ्घयोर्जघने क्रमात्।। ५।।
विन्यसेदक्षराण्यष्टौ ओङ्कारं च तथा स्मरेत्। शोणपद्मप्रतीकाशां मुक्तमूर्धजलम्बिनीम्।। ६।।

---

१. 'पक्षि' ख. पाठः।

चलत्काञ्चनसम्भूतकुण्डलोज्ज्वलशालिनीम्। स्वर्णरत्नसमुन्नद्धकिरीटसूत्रधारिणीम्॥ ७॥
शुक्लकृष्णारुणैर्नेत्रैस्त्रिभिश्चारुविभूषिताम्। बन्धूकदन्तवसनां शिरीषप्रभनासिकाम्॥ ८॥
कम्बुग्रीवां विशालाक्षीं सूर्यकोटिसमप्रभाम्। चतुर्भुजां विवसनां पीनोन्नतपयोधराम्॥ ९॥
दक्षिणोर्ध्वेन निस्त्रिंशं परेण सिद्धसूत्रकम्[1]। बिभ्रतीं वामहस्ताभ्यामभीतिवरदायिनीम्। ।१०॥
आनम्रनागनासोरुं वृत्तगुल्फां सुपार्ष्णिकाम्। गात्रेण रत्नस्तम्भं च सम्यगालम्ब्य संस्थिताम्॥ ११॥
किमिच्छसीति वचनं व्याहरन्तीं मुहुर्मुहुः। पञ्चाननं पुरःसंस्थं निरीक्षन्तीं स्ववाहनम्॥ १२॥
ईदृशीमम्बिकां ध्यात्वा ॐनमः फडिति मस्तके। स्वकीये सुमनो दद्यात् साहमेवं विचिन्त्य च।१३॥
पञ्चाननं मण्डलस्य मध्येऽवश्यं प्रपूजयेत्। आवाहनं ततः कुर्याद् गायत्र्या शिरसा सह॥ १४॥
महामायायै विद्महे चण्डिकायै च धीमहि। एवमुक्त्वा ततः पश्चात्तन्नो देवी प्रचोदयात्॥ १५॥
ततस्तु मूलमन्त्रेण गन्धं पुष्पं सधूपकम्। दीपादिकं च दद्यात्तु मोदकं पायसं तथा॥ १६॥
पुष्पाञ्जलित्रयं दद्यान्मूलमन्त्रेण शोभनम्। एवं सम्पूज्य मध्ये तु मन्त्रेणाङ्गानि पूजयेत्॥ १७॥
सिद्धसूत्रं च खड्गं च खड्गमन्त्रेण पूजयेत्। शैलपुत्रीं चण्डघण्टां स्कन्दमातरमेव च॥ १८॥
कालरात्रीं च दिक्पत्रेष्वर्चयेच्चन्दनादिभिः। चण्डिकामथ कूष्माण्डीं तथा कात्यायनीं शुभाम्।१९॥
महागौरीं चाग्निकोणे नैर्ऋत्यादिषु पूजयेत्। ततः सम्पूज्य लोकेशांस्तदस्त्राणि च मन्त्रवित्।।२०॥
महामायां नमामीति मूलमन्त्रेण चाष्टधा। पूजयेत् पद्ममध्ये तु सुमनोञ्जलिभिस्तथा॥ २१॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥ २२॥
सप्तधावर्तनं कृत्वा स्तुतिमेनां तु साधकः। पञ्च प्रणामान् कुर्वीत ऐंह्रींश्रीमिति मन्त्रकैः॥ २३॥
योनिमुद्रां ततः पश्चाद् दर्शयित्वा विसर्जयेत्।...॥

अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारदाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीवैष्णव्यै महामायायै देवतायै नमः, इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, अकच हृदयाय नमः। कचट शिरसे स्वाहा। चटत शिखायै वषट्। टतप कवचाय हुं। तपय नेत्रत्रयाय वौषट्। पयश अस्त्राय फट्, इति मन्त्रैः करषडङ्गन्यासं कृत्वा ध्यानानन्तरं 'ॐ नमः फट्' इति स्वशिरसि पुष्पं दत्त्वा मानसपूजादिपरतत्त्वपूजान्ते 'ॐ पञ्चाननाय (नमः' इति पीठमध्ये सम्पूज्य, महामायायै विद्महे चण्डिकायै धीमहि तन्नो देवी प्रचोदयात् स्वाहा।) इत्यन्तं "श्रीवैष्णवीहागच्छागच्छ" इत्यावाह्य मूलेन स्थापनादिपरमीकरणान्तं कृत्वा प्राणस्थापनादिपुष्पोपचारान्ते मूलमन्त्रेण पुष्पाञ्जलित्रयं दत्त्वा प्राग्वदङ्गानि सम्पूज्य, दुं सिद्धसूत्राय नमः ह्रांह्रींह्रींसः खड्गाय नमः इति देव्या दक्षिणधऊर्ध्वकरयोः सम्पूज्याष्टदलेषु देव्यग्रादिचतुर्दलेषु ॐ शैलपुत्र्यै नमः। चण्डघण्टायै० स्कन्दमात्रे० कालरात्र्यै०, आग्नेयादिदलेषु ॐ चण्डिकायै० कूष्माण्ड्यै० कात्यायंन्यै० महागौर्यै० इति प्रादक्षिण्येन सम्पूज्य, इन्द्रादिपूजानन्तरं मूलान्ते "महामायां नमामि" इति पुष्पाञ्जल्यष्टकं देव्यै समर्प्य धूपादिसर्वं

---

१. 'सिद्धसूत्रं जपमालामित्यर्थः।

प्रागवत्समर्पयेत्।। तथा–

लक्षद्वयं भवेदस्य पुरश्चरणकर्म वै। दशांशहोमश्चाज्येन कर्तव्यस्तर्पणादिकम्।। २४।।

इति।। तथा–

ओंनमोऽन्ते महामायायै मनुर्वसुवर्णकः। ओंनमोऽन्ते च वैष्णव्यै मन्त्रः प्रोक्तः षडक्षरः।।
एतन्मन्त्रद्वयस्यापि सर्वं पूर्वोक्तमाचरेत्।..।।

इति। कालिकापुराणे–

अशुचिर्न महामायां पूजयेत्तु कदाचन। अवश्यं तु स्मरेन्मन्त्रं योऽतिभक्तियुतो नरः।। १।।
दन्तरक्ते समुत्पन्ने स्मरणं च न विद्यते। सर्वेषामेव मन्त्राणां स्मरणान्नरकं व्रजेत् ।। २।।
जानूर्ध्वक्षतजे जाते नित्यकर्माणि सन्त्यजेत्। नैमित्तिकं तु तदधः स्रवद्रक्तो न चाचरेत्।। ३।।
लोतके तु समुत्पन्ने क्षुरकर्माणि मैथुने। धूमोद्गारे तथा वान्ते नित्यकर्माणि सन्त्यजेत्।। ४।।
द्रव्यभुक्तेऽप्यजीर्णे च नैव भुक्त्वा च किञ्चन। कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा।। ५।।
जलस्यापि नरश्रेष्ठ भोजनाद्भेषजादृते। नित्यक्रिया निवर्तेत सह नैमित्तिकैः सदा।। ६।।
जलौकां गूढपादं च कृमिगण्डूपदादिकम्। कामाद्धस्तेन संस्पृश्य नित्यकर्माणि सन्त्यजेत्।। ७।।
विशेषतः शिवापूजां प्रमीतपितृको नरः। यावद्वत्सरपर्यन्तं मनसापि न चाचरेत् ।। ८।।
महागुरुनिपाते च काम्यं किञ्चिन्न चाचरेत्। आर्त्विज्यं ब्रह्मयज्ञं च श्राद्धं देवक्रियां तथा।। ९।।
गुरुमाक्षिप्य विप्रं च प्रहृत्यैव च पाणिना। न कुर्यान्नित्यकर्माणि रेतःपाते च भैरवि।। १०।।

स्मरेद् ध्यायेन्मनसा जपेदित्यर्थः। अतिभक्तियुतः सततेष्टदेवतागतचित्तो नित्यमपि नाचरेदित्यर्थः। स्रवदिति वर्तमानमविवक्षितम्।

नाभेरूर्ध्वमधो वापि यस्य क्षरति शोणितम्। अशुचिस्तदहः कर्म कुर्वन्नरकमाप्नुयात्।। १।।

इति भविष्यपुराणवचनात् मेढ्रादधो जान्वधः नित्यं कुर्यादेवेत्यर्थः लोतकेऽश्रुजले। लोतमस्रुणि चोदितमिति विश्वप्रकाशकोपात्। द्रव्येऽन्नादौ। गूढपादः सर्पः। गण्डूपदः किञ्चुलिकः। आर्त्विज्यम् ऋत्विजमाक्षिप्य तिरस्कृत्य पाणिनेत्यपलक्षणम्।। योगार्णवे–

वान्तोद्गारे च क्षतजे लोतके च समुद्भवे। गूढपादस्पर्शने च उपस्थस्पर्शने तथा।। १।।
रेतःपाते तथा क्षौरे प्रमीतपितृके तथा। नित्यं नैमित्तिकं काम्यं मनसापि न चाचरेत्।। २।।

उद्गारे धूमोद्गारे। लोतके क्रन्दनादौ वा।

क्रन्दनादश्रुपाते तु नित्यनैमित्तिकं त्यजेत्। तदेव हर्षात् सञ्जातं कर्म कुर्वन् न दुष्यति।। १।।

इति मत्स्यपुराणवचनात्। उपस्थस्पर्शोऽकामतः। शौचे 'गृहीतशिश्नश्चोत्थाय' इति तत्स्पर्शोक्तेः। प्रमीतपितृक इत्युपलक्षणम्, तेन मातर्यपि प्रमीतायाम्,

प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। नापि दैवं न वा पैत्र्यं यावत् पूर्णोऽथ वत्सरः।। २।।

इति देवीपुराणवचनात्। एतत्सर्वं महामायोपासकपरम्। अथवा सकामपरम्।। "अथ सूतकिनां पूजां वदाम्यागमबोधिता"–मित्यादिप्राक्पूजाप्रकरणोक्ततत्त्वसारसंहितावचनात्। इति अन्यथा पुरश्चरणप्रकरणे लिखितवचनानां वैयर्थ्यापत्तेः।।

अथ ब्रह्मास्त्रविद्या, तत्र श्रीभैरवयामले— श्रीदेव्युवाच

प्रभो त्वं भैरवश्रेष्ठ सर्वतन्त्रानुजीवक। नानारहस्यसारं च त्वत्प्रसादाच्छृणोम्यहम्।। १।।
दिव्यतन्त्रं महातन्त्रं पूर्वपश्चिमसंज्ञकम्। दक्षिणोत्तरमूर्ध्वं च ह्युपायाः कथिताः प्रभो।। २।।
वश्याकर्षणदिव्यानि मारणोच्चाटनादिकम्। विद्वेषं मोहनं चान्यद् द्विविधं कामनादिकम्।। ३।।
विस्तारपूर्वं कथितं ज्ञानं न्यासेन तन्मया[1]। इदानीं स्तम्भनं देव कथयस्व प्रसादतः।। ४।।
कथयस्व सुरश्रेष्ठ यद्यहं तव वल्लभा।..।।

श्रीभैरव उवाच—

साधु साधु महाभागे सर्वतन्त्रार्थसाधिके। न कस्यचिन्मयाख्यातं पृष्टं वापि न केनचित्।। ५।।
गुह्याद् गुह्यतरं देवि त्वत्स्नेहात्तु प्रकाश्यते[2]। अथातः सम्प्रवक्ष्यामि शृणु चैकाग्रमानसा।। ६।।
विद्या या परमा गुप्ता महास्तम्भनकारिणी। तारं प्रथममुच्चार्य स्थिरमायामथोच्चरेत्।। ७।।
सम्बोधनपदं देवि वदेच्च बगलामुखीम्। तदग्रे सर्वदुष्टानां ततो वाचं मुखं पदम्।। ८।।
स्तम्भयेति पदं जिह्वां कीलयेति ततः परम्। बुद्धिं विनाशयेत्यस्मात् स्थिरमायां पुनर्लिखेत्।।९।।
लिखेच्च पुनरोङ्कारं स्वाहेति पदमन्ततः। षट्त्रिंशदक्षरा विद्या महास्तम्भनकारिणी।। १०।।

इति। जयद्रथयामले—

पूर्वोक्तमायाबीजे तु व्योमरेफान्तरालके। भूबीजं योजयेदेषा स्थिरमाया प्रकीर्तिता।। ११।।

मायाबीजे भुवनेश्वरीबीजे भूबीजं लकारं, सुगममन्यत् (तन्त्रान्तरे 'वह्निहीनेन्द्रयुग्माया स्थिरमाया प्रकीर्तिता' इति मतान्तरम्।) भुवनेश्वरीबीजस्य सर्वेषु स्थलेषु उद्धृतत्वात् पूर्वोक्तेत्युक्तिः।

गजानां च रथानां च दुर्जनान् शीघ्रकारिणः। स्तम्भयेच्च महावाचं बृहस्पतिमुखोद्गताम्।। १२।।
महापर्वतवृक्षाणां सरितां सागरव्रजाम्। चतुष्पदां पक्षिणां च सर्पाग्निवायुविद्युताम्।। १३।।
स्तम्भयेत् पञ्च दिव्यानि मानुष्येषु च का कथा। त्रैलोक्यस्तम्भिनी विद्या देवी श्रीबगलामुखी।।१४।।

तारं प्रणवं, स्थिरमाया ह्लींबीजं, सम्बोधनपदं बगलामुखि, सर्वदुष्टानां स्वरूपं, वाचं स्वरूपं, मुखं स्वरूपं, पदं स्वरूपं, स्तम्भय स्वरूपं, जिह्वां कीलय स्वरूपं, बुद्धिं विनाशय स्वरूपं, स्थिरमायां प्राग्वद्बीजं, प्रणवमोङ्कारं, स्वाहा स्वरूपम्।। तथा—

नारायण ऋषिस्त्रिष्टुप् छन्दश्च बगलामुखी। देवता गदिता देवि त्रैलोक्यस्तम्भकारिणी।। १५।।
स्थिरमाया भवेद्बीजं शक्तिः स्वाहा समीरिता। विनियोगस्तु विख्यातः पुरुषार्थचतुष्टये।। १६।।
स्थिरमाया च हृदयं शिरश्च बगलामुखी। सर्वदुष्ट शिखां न्यस्य कवचं स्तम्भयान्तिकम्।। १७।।
जिह्वां कीलय नेत्रे च बुद्धिं विनाशयास्त्रकम्।..।।

सर्वदुष्ट इति समग्रपदस्य ग्रहणं तेन सर्वदुष्टानां शिखायै इति। स्तम्भयान्तिकमित्यनेन वाचं मुखं पदं

---

[1] 'व्यासेन कथितं मया' ख. पाठः। [2] 'हात्प्रकटीकृतम्' ख. पाठः।

स्तम्भय इति पदचतुष्टयं कवचे प्रोक्तम्। सुगममन्यत्।

मूर्ध्नि भाले भ्रुवोर्मध्ये नेत्रयोः श्रोत्रयोर्नसोः। गण्डयोरोष्ठयोर्वक्त्रे चिबुके च गले प्रिये।। १८।।
दोःपत्सन्धिषु साग्रेषु मन्त्रवर्णान् न्यसेत् क्रमात्। एवं न्यासविधिः प्रोक्तस्ततो ध्यानं शृणु प्रिये।।१९।।
यस्याः स्मरणमात्रेण त्रैलोक्यं स्तम्भयेत् क्षणात्। गम्भीरां च मदोन्मत्तां तप्तकाञ्चनसुप्रभाम्[1] ।।२०।।
चतुर्भुजा त्रिनयनां कमलासनसंस्थिताम्। मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकम्।। २१।।
पीताम्बरधरां सान्द्रवृत्तपीनपयोधराम् । हेमकुण्डलभूषां च पीतचन्द्रार्धशेखराम्[2] ।। २२।।
पीतभूषणभूषां च स्वर्णसिंहासनस्थिताम्। एवं ध्यात्वा च देवेशि शत्रुस्तम्भनकारिणीम्।। २३।।
महाविद्या महामायां साधकेष्टफलप्रदाम्।...।।

दक्षिणाध उत्तरयोर्मुद्गरपाशौ, वामाध उत्तरयोर्जिह्वावज्रे, जिह्वां साधकविपक्षजनस्येति, ''धृतमुद्गरवैरिजिह्वा''-मिति वचनात्।।

श्रीदेव्युवाच—

ध्यानं तु कथितं देव महाश्चर्यप्रदायकम्। इदानीं कथयस्वेश पूजनं विधिपूर्वकम्।। २४।।

श्रीभैरव उवाच—

पूजनं शृणु देवेशि साधके सिद्धिदायकम्। नित्यं नैमित्तिकं काम्यं पूजनं त्रिविधं प्रिये।। २५।।
भूप्रदेशे मनोरम्ये पुष्पामोदैः सुधूपिते। गोमयेनाथ संलिप्ते पुष्पप्रकरशोभिते ।। २६।।
मण्डपे विधिवत्तत्र आसनं तु समर्चयेत्। सौवर्णे वाथ रौप्ये वा पैत्तले वाथ भूर्जके।। २७।।
कर्पूरागरुकस्तूरीश्रीखण्डकुङ्कुमैरपि। लिखेद् यन्त्रं प्रयत्नेन लेखिन्या हेमतारया।। २८।।
मध्ये योनिं समालिख्य तद्बाह्ये तु षडस्रकम्। तद्बाह्येऽष्टदं पद्मं तद्बाह्ये षोडशच्छदम्।। २९।।
चतुरस्रत्रयं बाह्ये चतुर्द्वारोपशोभितम्।...।।

इति। अत्र तु—

यत्र नोक्तं महादेवि पीठं वा पीठशक्तयः। तत्र मायोदितं पीठं ज्ञेयं ता एव शक्तयः।। ३०।।
तद्बीजेनैव[3] पीठं च यजेन्मायाणुनाथ वा। ....।।

इति श्रीशिवयामलवचनाद्भुवनेश्वरीपीठमभ्यर्च्य तत्र श्रीबगलामुखीमन्यां वा देवीमनुक्तपीठं यजेत्। मायाणुना भुवनेशीबीजेन। तथा—

तत्रावाह्य यजेद् देवीं सुपीतैरुपचारकैः। अङ्गानि पूर्वमभ्यर्च्य यथास्थानं महेश्वरि।। ३१।।
पूर्वद्वारे गणेशं च दक्षिणे वटुकं यजेत्। पश्चिमे योगिनीः पूज्याः क्षेत्रपालं तथोत्तरे।। ३२।।
ईशानादिनिर्ऋत्यन्तं गुरुपङ्क्तिं समर्चयेत्।...।।

ईशानादीति तन्त्रेषु षडङ्गपूजाक्रमे अग्नीशासुरवायव्येत्युक्तक्रमस्य कल्पितप्राच्यनुसारादीशानस्यादिभूतमाग्नेयं तदारभ्य निर्ऋतिदिक्पर्यन्तं गुरुपङ्क्तिं पूजयेदित्यर्थः। तदा तु यथास्थितवायव्यादीशानान्तं गुरुपङ्क्तिपूजा

---

१. 'सन्निभाम्' क. पाठः। २. 'किरीटसर्पशेखराम्' ख. पाठः। ३. 'तत्तद्बीजेन' ख. पाठः।

कार्येत्यायातम्।। तथा—

....। बगला पूर्वपत्रे तु स्तम्भिनी च ततः परम्।। ३३।।
जम्भिनी मोहिनी वश्या अचला च चला तथा। दुर्द्धरा कल्मषा धीरा कल्पना कालकर्षिणी।।३४।।
भ्रामिका मन्दगमना भोगाख्या चैव योगका। एताः षोडशपत्रेषु गन्धपुष्पाक्षतैर्यजेत्।। ३५।।
षोडशस्वरसंयुक्ताः सम्प्रदायात् कुलागमे। यजेच्च पत्रमध्येषु कल्पिते चाष्टपत्रके।। ३६।।
ब्रह्माण्याद्याष्ट पूर्वादौ वाहनाकल्पसंयुताः। स्थिरमायाबीजपूर्वाः परिपूज्याः कुलागमे।। ३७।।
डादिहान्ताः षडस्त्रेषु पूज्याः षड्धातुमातृकाः। लोकेशांश्च तदस्त्राणि पूजयेद्बाह्यतः प्रिये।। ३८।।
योनिमध्ये मूलदेवीं त्रिरञ्जलिभिरर्चयेत्। धूपदीपसुनैवेद्यैर्गन्धताम्बूलदीपकैः ।। ३९।।
नीराज्य विधिवत् पश्चाज्जपसंख्यां निवेदयेत्। पवित्रारोपणं देवि दमनेन च पूजयेत्।। ४०।।
बलित्रयं ततो दद्यात् पीतान्नादीनि साधकः।..।।

बलित्रयमित्युपलक्षणं बलिपञ्चकं दद्यादित्यर्थः। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि नारायणऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये बगलामुख्यै देवतायै नमः। नाभौ ह्लींबीजाय नमः। गुह्ये स्वाहा शक्तये नमः। पादयो पुरुषार्थचतुष्टये विनियोगाय नमः, इति कृताञ्जलिरुक्त्वा, ह्लीं हृदयाय नमः। बगलामुखि शिरसे स्वाहा। सर्वदुष्टानां शिखायै वषट्। वाचं मुखं पदं स्तम्भय कवचाय हुं। जिह्वां कीलय नेत्राभ्यां वौषट्। बुद्धिं विनाशय अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, शिरसि ॐ नमः। ललाटे ह्लीं नमः। भ्रूमध्ये वं नमः। दक्षनेत्रे गं नमः। वामे लां नमः। दक्षश्रोत्रे मुं नमः। वामे खिं नमः। दक्षनसि सं नमः। वामे र्वं नमः। दक्षगण्डे दुं नमः। वामे ष्टां नमः। ऊर्ध्वोष्ठे नां नमः। अधरोष्ठे वां नमः। मुखे चं नमः। चिबुके मुं नमः। गले खं नमः। दक्षबाहुमूले पं नमः। मध्ये दं नमः। मणिबन्धे स्तं नमः। अङ्गुलिमूले म्भं नमः। अग्रे यं नमः। वामबाहुमूले जिं नमः। मध्ये ह्वां नमः। मणिबन्धे कीं नमः। अङ्गुलिमूले लं नमः। अग्रे यं नमः। दक्षोरुमूले वुं नमः। जानुनि द्धिं नमः। गुल्फे विं नमः। अङ्गुलिमूले नां नमः। अग्रे शं नमः। वामोरुमूले यं नमः। जानुनि ह्लीं नमः। अङ्गुलिमूले स्वां नमः। अग्रे हां नमः, इति विन्यस्य, ध्यानाद्यात्मपूजान्ते पूर्वोक्तभुवनेश्वरीपीठं सम्पूज्य तत्र नवशक्तिपूजान्ते 'ह्लीं सर्वशक्तिकमलासनाय नमः' इति समस्तं पीठं सम्पूज्यावाहनादिषडङ्गपूजान्ते देव्यग्रद्वारमारभ्य प्रादक्षिण्येन चतुर्द्वारेषु, गणेशाय नमः। वटुकाय नमः। योगिनीभ्यो नमः। क्षेत्रपालाय नमः। इति सम्पूज्य, स्ववामभागे कल्पितप्राच्यनुसारेणाग्नेयादिनिर्ऋत्यन्तं[1] गुरुभ्यो नमः। परमगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो नमः। परापरगुरुभ्यो नमः। अस्मद्गुरुभ्यो नमः। इति गुरुपङ्क्तिं सम्पूज्य, षोडशदलेषु देव्यग्रादिप्रादक्षिण्येन अं बगलायै नमः, आं स्तम्भिन्यै०, इं जम्भिन्यै०, ईं मोहिन्यै०, उं वश्यायै०, ऊं अचलायै०, ऋं चलायै०, ॠं दुर्द्धरायै०, ऌं कल्मषायै०, ॡं धीरायै०, एं कल्पनायै०, ऐं कालकर्षिण्यै०, ओं भ्रामिकायै०, औं मन्दगमनायै०, अं भोगायै०, अः योगायै नमः, इति सम्पूज्य। अष्टदलेषु प्रादक्षिण्येन—ह्लीं

---

१. 'ईशानादिनिर्ऋत्यन्तं' ख. पाठः।

ब्रह्माण्यै नमः, माहेश्वर्यै नमः इत्यादि स्थिरमायाबीजाद्या अष्ट मातॄः सम्पूज्य, अन्तःषट्कोणेषु देव्यग्रादिप्रादक्षिण्येन डां डाकिन्यै नमः। रां राकिण्यै नमः। लां लाकिन्यै नमः। कां काकिन्यै नमः। शां शाकिन्यै नमः। हां हाकिन्यै नमः, इति सम्पूज्य, मध्ये देवीं पुनस्त्रिमूलविद्यया सम्पूज्य लोकेशपूजादि सर्वं नित्यहोमान्तं कृत्वा बालाप्रकरणोक्तवद्बलित्रयं दत्त्वा शेषं प्राग्वत् समापयेदिति।। तथा—

साधनं सम्प्रवक्ष्यामि साधकानां हिताय वै। सर्वपीतोपचारेण पीताम्बरधरो नरः।। ४१ ।।
जपमाला च देवेशि हरिद्राग्रन्थिसम्भवा। पीतमासनमारूढः पीतध्यानपरायणः।। ४२ ।।
पीतपुष्पार्चनं नित्यमयुतं जपमाचरेत्। दशांशेन कृतो होमः पीतद्रव्यैः सुशोभितैः।। ४३ ।।
तर्पणादि ततः कुर्यान्मन्त्रः सिध्यति मन्त्रिणः। साध्यसंज्ञां सतुच्चार्य स्तम्भयेति ततः परम्।।४४।।
गतिस्तम्भकरी विद्या अरिस्तम्भनकारिणी। मेधां प्रज्ञां च शस्त्रादीन् देवमानवपन्नगान्।। ४५ ।।
स्तम्भयेच्च महाविद्या सत्यं सत्यं वरानने।...।।

श्रीदेव्युवाच—

अधुना साधनं देव शीघ्रप्रत्ययकारकम्। मन्त्रयन्त्रौषधजपहुताद्यैः कथयस्व मे।। ४६ ।।

साधनं कामितार्थस्य, मन्त्रसाधनस्य प्रागेवोक्तत्वात्।

श्रीभैरव उवाच—

शृणु प्राज्ञे महागुप्तं प्रकटीक्रियतेऽधुना। एकान्ते निर्जने रम्ये शुचौ देशे गृहेऽपि वा।। ४७ ।।
कुण्डं सलक्षणं कृत्वा मेखलात्रयशोभितम्। योनिर्वितस्तिमात्रा तु षट्कर्माण्यत्र साधयेत्।। ४८ ।।
नानाविधासने देवि क्रमोद्दिष्टं समाचरेत्। मधुरत्रितिलाज्येन वश्यलाभानि साधयेत्।। ४९ ।।
तथाकर्षणकामस्तु लोणं त्रिमधुरान्वितम्। निम्बपत्रैस्तैलयुक्तं विद्वेषणकरं परम् ।। ५० ।।
हरितालं हरिद्रां च लवणेनैव संयुतम्। स्तम्भने होमयेद् देवि प्रज्ञां चैव गतिं मतिम्।। ५१ ।।

स्तम्भयेदिति शेषः।

राजिकाष्ठस्य सारेण माहिष्या रुधिरेण च। रिपूणां मारणे देवि श्मशानाग्नौ हुनेन्निशि।। ५२ ।।

राजिकाष्ठसारः आसुरीस्नेहः।

गृध्राणामपि काकानां गृहधूमयुतेन वै। पक्षेण जुहुयाद् देवि (शत्रोरुच्चाटनाय वै।। ५३ ।।
दूर्वाङ्कुरामृतावल्लीखण्डाश्च चतुरङ्गुलाः। लाजांस्त्रिमधुयुक्तांश्च सर्वरोगोपशान्तये।। ५४ ।।
लक्षमेकं जपेद् देवि) ब्रह्मचारि दृढव्रतः। पर्वताग्रे महारण्ये सिद्धशैलमये गृहे।। ५५ ।।
सङ्गमे च महानद्योर्निशायामपि साधयेत्। श्वेतब्रह्मतरोर्मूलपादुकां चैव कारयेत्।। ५६ ।।
अलक्तेन तु रागेण रञ्जिता च हरिद्रया। षट्त्रिंशदक्षरीविद्या लक्षैकेन तु मन्त्रिता।। ५७ ।।
शतयोजनमात्रं तु मनश्चिन्तितमात्रतः।...।।

---

१. 'शोभनैः' ख. पाठः।

गच्छेदिति शेषः।

रसं मनःशिलां तालं माक्षिकेण समन्वितम्। पिष्ट्वाभिमन्त्र्य लक्षैकं सर्वाङ्गे लेपनं कृतम्।।५८।।
अदृश्यकारकं देवि लोके च महदद्भुतम्। सुरभेरेकवर्णाया धारोष्णं क्षीरमाहरेत्।। ५९।।
शर्करामधुसंयुक्तं त्रिवारं तेन मन्त्रितम्। पाययित्वा तु हरते विषं स्थावरजङ्गमम्।। ६०।।
दारिद्र्यमोचनं देवि लक्षमेकं जपेन्नरः। दशांशेन कृतो होमः [1]एभिर्द्रव्यैः पृथक् पृथक्।। ६१।।
लक्ष्मीयुक्तो भवेद् देवि दारिद्र्यं नाशयेद् ध्रुवम्[2]। अथान्यत् सम्प्रवक्ष्यामि कामनां यन्त्रतः पराम्।।६२।।
पटे वाप्यथ पाषाणे साध्यसंज्ञां तु कारयेत्। आद्यन्ते स्थिरमायां च हरिद्रातालकैर्लिखेत्।। ६३।।
उन्मत्तरससंयुक्तैर्गाढं त्रिवलयं लिखेत्। गर्भस्तम्भं गतिस्तम्भं चमत्कारकरी परा।। ६४।।

करोतीति शेषः।

भूर्जपत्रे समालिख्य तालोन्मत्तनिशारसैः। षट्कोणं तस्य मध्ये तु विद्यां वलयतो लिखेत्।।६५।।

साध्यसंज्ञां विद्यया वेष्टयेदित्यर्थः।

साध्यसंज्ञां ततो देवि पीतसूत्रेण वेष्टयेत्। चक्रं भ्राम्यत्कुलालस्य विपरीतं तु मृत्तिकाम्[3]।।६६।।
वृषभं कारयेत् तस्या विलिप्तं तालकेन च। तन्मध्ये निक्षिपेद् यन्त्रमारूढं वृषभोपरि।। ६७।।
नासायां निक्षिपेद्रज्जुं पीतवस्त्रेण वेष्टयेत्। बाह्योपचारपूजाभिः स्वगृहे तु प्रपूजयेत्।। ६८।।
अर्चयेत्तं चतुष्कालं साध्यनामात्र साधकः। दुष्टानां स्तम्भयेद्वक्त्रं साक्षाद्वाचस्पतेरपि।। ६९।।
अधोमुखं श्मशानस्थं दृढं खर्परमानयेत्। गृहीत्वा वामहस्तेन श्मशानाङ्गारकैर्लिखेत्।। ७०।।
दक्षहस्तेन देवेशि लिखेन्नाम प्रयत्नतः। सप्तधा तु ठकारेण पूरकेणाभिमन्त्रयेत्।। ७१।।
तन्मध्ये विलिखेद्बीजं त्रिवलीकारतः प्रिये। षष्ठ्यन्तसाध्यनामान्ते मुखं स्तम्भय चालिखेत्।।७२।।
बाह्ये न्यस्तं महाबीजं चतुःसंख्यं समालिखेत्। साध्यनामाक्षरं देवि चाभिमन्त्र्याथ[4] विद्यया।।७३।।
षष्ठ्यन्तं साधकं चोक्त्वा साध्ये सम्बोधनं वदेत्। मा भुङ्क्ष्वेति पदं पश्चाद्वदेदाम्रेडितान्वितम्।।७४।।
पीतोपचारैः सम्पूज्य मुखस्तम्भनमुत्तमम्। एतद्यन्त्रं वरारोहे श्मशानवसने[5] लिखेत्।। ७५।।
भेकस्य वदने क्षिप्त्वा पीतसूत्रेण वेष्टयेत्। भूमिष्ठं मण्डलं कृत्वा पीतपुष्पैः समर्चयेत्।। ७६।।
उत्सा[6]रोत्सर्गमन्त्रे च पदमुच्चारयेत् स्फुटम्। वामपादेन सम्पूज्य[7] कुलालोद्भवमृत्तिकाम्।। ७७।।
पूरकस्य प्रयोगेण प्रयोगः प्रत्ययावहः। आलिखेच्चतुरः पादान् कुब्जत्वात्[8] कुब्जतां गतान्।।७८।।
अन्योन्यं मिलितत्वेन कृतोऽर्धो(त्वोर्ध्वा)धः समन्ततः। वामदक्षिणसम्बन्धात् द्वौ द्वौ पादौ प्रकल्पयेत्।।७९।।
नाम साध्यस्य षष्ठ्यन्तं गतिं च स्तम्भयेति च। पूर्ववन्मायया नामालिंख्य[9] भूबीजमालिखेत्[10]।।८०।।

---

[1] एभिर्धारोष्णक्षीरशर्करामधुभिर्मिलितैरित्यर्थः। 'पीत' क. पाठः। [2] 'द्रुतम्' ख. पाठः। [3] 'तन्मृदा' ख. पाठः।
[4] 'न्त्र्य स्ववि' ख. पाठः। [5] 'वासरे' ग. पाठः। [6] 'उच्चा' ख. पाठः। [7] 'पूर्य' ग. पाठः। [8] 'भग्नत्वात्' ख. पाठः।
[9] 'न्मध्यमालिख्य' ख. पाठः। [10] 'जं तस्यचा' ग. पाठः।

पादशाखास्तदग्रेषु तन्मध्ये बीजमालिखेत्। पूर्वोक्तैर्वस्तुभिर्लिख्य पाषाणे वाथ पट्टके।। ८१।।
पूर्वोक्तैः सम्पुटीकृत्य वेष्टयेत् पीततन्तुभिः। शय्यायाः स्थलसंस्थं च खनेत् खातं प्रयत्नतः।।८२।।
वामहस्ते न्यसेद्यन्त्रं पीतपुष्पैस्तु पूजयेत्। महदाश्चर्यदं भद्रे रेतःस्तम्भनमुत्तमम् ।। ८३।।
श्मशानखर्परं ग्राह्यं श्मशानाङ्गारमाहरेत्[1]। मायाबीजं त्रिधालिख्य साध्यसंज्ञां च मध्यतः।। ८४।।
अपसव्येन वलना रेखात्रिबलयानया। वामहस्तेन निखनेत् खर्परं तदधोमुखम् ।। ८५।।
छादयेद्वामपादेन मलोत्सर्गं तथोपरि। स्तम्भनं चैव देवेशि रिपूणां मुखबन्धनम्।। ८६।।
ताटङ्कपत्रमादाय लिखेत् साध्यं तु नामतः। आद्यन्ते विलिखेद्बीजं त्रिविधोत्तरकं लिखेत्।। ८७।।
वामहस्तपुटं कृत्वा करपिण्डीयकण्टकात्। सप्तसंख्याकण्टकानि भित्त्वा चैव पुटीकृतम्।। ८८।।
पृथग्विद्यां च चोच्चार्य नाम साध्यस्य साधकः। भाण्डमध्ये क्षिपेत्तं च सौवीरेण च पूरयेत्।।८९।।
स्वगृहे बाह्यदेशे तु वायव्ये चैव कोणके। वामहस्ते खनेत् खातं वामपादेन पूरयेत्।। ९०।।
गतिमतिस्तम्भकारः प्रयोगः प्रत्ययावहः। दिव्यस्तम्भकरं देवि नान्यग्रन्थेष्वपीरितम्।। ९१।।
त्वत्प्रीत्या कथयाम्यद्य शृणु त्वं प्रियमुत्तमम्। अत्र स्थाने भवेद् दिव्यं देवालयगृहेऽपि वा।।९२।।
तत्र स्थाने लिखेद्विद्यां साधकात् साध्यनामतः। आटरूपस्य पत्राणि परिमृज्य तथोपरि।। ९३।।
स्तम्भयेत् सप्त दिव्यानि कृतदोषोऽपि शुध्यति। उत्तरावारुणीमूलं सप्तविद्याभिमन्त्रितम्।। ९४।।
जलमध्ये तु तत् क्षिप्त्वा तेनैव स्नानमाचरेत्। महाकृतस्य दोषस्य कृतदिव्यो विशुध्यति।।९५।।
अथवा दीपमार्गेण रात्रौ कृत्वा तु मण्डलम्। भूर्जपत्रे समालिख्य पूर्वोक्तद्रव्यकेण च।। ९६।।
दीपं प्रज्वालयेद्यत्नात् कपिलाज्येन पूरितम्। तावत्तु दीपयेद् दीपं यावद् दिव्यं प्रशाम्यति।।९७।।
एवं ते कथिता भद्रे कामना प्रत्ययावहा। इयं तु परमा विद्या किमन्यत् परिपृच्छसि।। ९८।।

इति। जयद्रथयामले—

पीताम्बरधरो भूत्वा पूर्वाशाभिमुखस्ततः। लक्षमेकं जपेन्मन्त्रं हरिद्राग्रन्थिमालया ।। १।।
ब्रह्मचर्यरतो नित्यं जपतो ध्यानतत्परः। प्रियङ्गुपायसैर्वापि पीतपुष्पैश्च होमयेत्।। २।।
कृते होमे दशांशेन सिद्ध्यति बगलामुखी। कुरुते वाग्गतिस्तम्भं दुष्टानां बुद्धिनाशनम्।। ३।।
जपहोमप्रयोगेषु मन्त्रं चाप्ययुतं जपेत्। ....।।

एतेन पूर्वं पुरश्चरणत्वेनोक्तयुतजपस्तु प्रयोगसिद्ध्यर्थं प्रयोगारम्भकाले कर्तव्यत्वेनोक्त इति प्रतीयते, न तु पुरश्चरणत्वेन। अत एवात्रोभयप्रकारे युक्त इति, तेनैव लक्षजप एव पुरश्चरणम्। अयं लक्षजपः कृतयुगपरः।

हरिद्राहरितालाभ्यां जुहुयाल्लवणं निशि। स्तम्भयेत् पञ्च दिव्यानि नात्र कार्या विचारणा।। ४।।
स्तम्भनेषु च सर्वेषु प्रयोगः प्रत्ययावहः। अथवा पीतपुष्पैर्वा त्रिमध्यक्तैश्च होमयेत्।। ५।।
ॐकारयोः सम्मुखयोरूर्ध्वाधःशिरसोर्लिखेत्। मध्यगं नाम साध्यस्य तद्बाह्ये चाक्षरद्वयम्।। ६।।

---

[1] 'नाङ्गारतो लिखेत्' ख. पाठः।

बीजं द्वितीयवर्गस्य तृतीयं बिन्दुभूषितम्। चतुर्दशस्वरोपेतं संलिखेत् पृथिवीगतम्।। ७।।
ठकारेण समावेष्ट्य चतुष्कोणपुटं बहिः। तत्कोणोरेखासंसक्तं शूलवज्राष्टकं लिखेत्।। ८।।
त्रिशूलमध्यरेखासु पृथ्वीबीजानि पार्श्वयोः। अष्टस्वपि च कोणेषु तदैकैकं समालिखेत्।। ९।।
पृथिव्यान्तरपार्श्वे च मातृकोपरि मण्डलम्। आवेष्ट्य च ततः पश्चात्तद्बाह्ये स्थिरमायया।। १०।।
निरोध्याङ्कुशबीजेन नादसम्मिलिताङ्घ्रिणा। लिखेत् पूर्वोक्तमावेष्ट्य ठकारं बगलामुखीम्।। ११।।

बगलामुंखीं तद्विद्याम्।

पाषाणपट्टे वाथ पटे हरिद्रोन्मत्ततालके। गर्भस्तम्भं गतिस्तम्भं लिखित्वा गाढमाक्रमेत्।। १२।।

विवादव्यतिरिक्तेषु स्तम्भनकृत्येषु प्रोक्तं यन्त्रं पटे वा पाषाणे विलिख्य अध ऊर्ध्वं च पाषाणेन निरुध्य स्थापयित्वा तत्र देवीं पूजयेत्। विवादे तु वक्ष्यमाणविधिं कुर्यात्।

विवादे यन्त्रमालिख्य भूर्जे तैरेव वस्तुभिः। कुम्भकारस्य चक्रस्थां भ्रमन्तीं विपरीतगाम्।। १३।।
मृत्तिकां समुपादाय वृषभं कारयेत् ततः। यन्त्रं तदुदरे न्यस्य तालकेन विलिख्य च।। १४।।
तन्नासायां विनिक्षिप्य पीतरज्जुं निजे गृहे। अर्चयित्वा चतुष्कोणे नित्यं पीतोपचारकैः।। १५।।
दुष्टस्य स्तम्भयत्येव मुखं वाचस्पतेरपि।..।।

इति। अथैतद्यन्त्ररचनाप्रकारः— तत्र ऊर्ध्वाधोमस्तकमोङ्कारद्वयमालिख्य तत्पार्श्वगतमन्योन्यसम्मुखमोङ्कारद्वयमित्येवमोङ्कारचतुष्टयं विलिख्य, तन्मध्ये साध्यनामालिख्य ओङ्कारयोरन्योन्यसम्मुखयोः पार्श्वद्वये ग्लौं इति धराबीजं विलिख्यैतत्सर्वं वृत्तेन संवेष्ट्य, तद्बहिः पुनवृत्तं कृत्वा वृत्तयोरन्तराले मूलं विलिख्य, तद्बहिरष्टकोणं कृत्वा तेष्वाग्नेयादिविदिक्स्थकोणचतुष्टयगतरेखाष्टके प्रतिरेखमेकमेकं वज्रमिति वज्राष्टकं विधाय, दिग्गतकोणचतुष्टयस्थरेखाष्टके त्रिशूलाष्टकं कृत्वा, त्रिकोणोदरेषु त्रिशूलमध्यरेखासु त्रिशूलपार्श्वेषु च प्रागुक्तं धराबीजं विलिख्य, वज्रयुक्तचतुरस्रस्य कोणपार्श्वेषु च तदेव बीजं विलिख्याष्टकोणाद्बहिर्वृत्तचतुष्टयं कृत्वा, तदन्तरालवीथीत्रये सर्वाभ्यन्तरवीथ्यां मातृकया संवेष्ट्य तद्बाह्यवीथ्यां स्थिरमायाबीजेन ह्लींकारेण तद्बाह्यवीथ्यां क्रोमित्यङ्कुशबीजेन संवेष्टयेदिति प्रोक्तविधिना प्रोक्तद्रव्यैर्विलिख्य विनियोगात् प्रोक्तफलसिद्धिर्भवति।। तथा—

दृढं खर्परमादाय श्मशानस्थमधोमुखम्। वामहस्ते समावेश्य[१] तदङ्गारं तु दक्षिणे।। १६।।

अङ्गारं 'कोइला' इति न त्वग्निः।

अभिमन्त्र्य ठकारेण सप्तधा कृतपूरकः। तस्योदरगतं बीजं वलयाकारमालिखेत्।। १७।।
साध्यं मध्ये च षष्ठ्यन्तं तन्मुखं स्तम्भयेति च। पृथ्वीबीजानि चत्वारि व्यस्तशीर्षाणि संलिखेत्।।१८।।
ततः परं प्रकुर्वीत यन्त्रं देवेशि पूर्ववत्। साध्यसम्बोधनं कृत्वा षष्ठ्यन्तं साधकं लिखेत्।।१९।।
मा भुङ्क्ष्वेति पदं पश्चात्तद्वदाम्रेडितान्वितम्। पूजयेत् पीतपुष्पाद्यैर्मुखस्तम्भोऽयमुत्तमः।। २०।।
पूर्वद्रव्यैः श्मशानोत्थवसने व्यक्तमालिखेत्। भेकस्य वदने क्षिप्त्वा कीलयेत् पीततन्तुभिः।।२१।।
क्षिप्त्वा क्षोण्यां यजेत् पुष्पैः पीतवर्णैस्तु मण्डले। अनुच्चाराद्धि मन्त्रस्य स्फुटमुच्चारमाचरेत्।।२२।।

---

१. 'मात्रेशात्' ख. पाठः।

पूरकस्य प्रयोगेण प्रयोगः प्रत्ययावहः। चत्वरः पादानालिख्य भग्नत्वात् कुब्जतां गतान्।। २३।।

भग्नत्वात् त्रुटितत्वाच्चतुर्धा विभक्तत्वादित्यर्थः।

अन्योन्यमिलितत्वेन तं चोर्ध्वाधः[1] समन्ततः। वामदक्षिणसम्बन्धं द्वौ पादौ तस्य कल्पयेत्।।२४।।
आलिखेन्नाम षष्ठ्यन्तं गतिं च स्तम्भयेति च। मध्ये लिखित्वा संलिख्य पृथ्वीबीजानि चाग्रतः[2] ।।२५।।

पादाग्रेष्वित्यर्थः। अग्रेषु शाखा इति च। 'अग्रतः पादशाखान्ते परं मध्ये तु संलिखेत्'। पादाभ्यां चतुरस्रं प्राप्यते इति साम्प्रदायिकाः।

पटे पाषाणपट्टे वा प्रोक्तैश्चैव त्रिभिस्त्रिभिः। प्राग्वत् सम्पुटयोगेन बद्ध्वा पीतगुणैर्दृढैः।। २६।।
गतिस्तम्भो भवत्येवं यन्त्रस्यास्य प्रभावतः। शिलातालहरिद्राभिर्मेषमूत्रसमन्वितैः ।। २७।।
कोकिलाक्षस्य लेखिन्या निजरक्तपटे लिखेत्। साध्यस्य नाम षष्ठ्यन्तं कुम्भकेन च वायुना।।२८।।
स्तम्भनं नात्र सन्देहः सप्ताहाज्जायते ध्रुवम्। शिलातले हरिद्राभिः करपत्रयुगे लिखेत्।। २९।।
कोकिलस्य च लेखिन्या स्तम्भने रिपुनाम वा। त्रिकोणैः[4] सुसमावेष्ट्य तद्बाह्ये पार्थिवं पुरम्।।३०।।
वज्राष्टकैः समोपेतं रेफषोडशसंयुतम्। मायाबीजेन संवेष्ट्य चाङ्कुशेन[5] निरोधितम्।। ३१।।
तद्योगं योजयित्वा तु कटकैर्वल[6]येत् ततः। क्षिप्त्वा वल्मीकमध्ये तु पाषाणैस्तत्र पूरयेत्।। ३२।।
पश्चात् समारभेद्युद्धं विवादं वापि कारयेत्। गतिस्तम्भो मनःस्तम्भो वाचां स्तम्भस्तथैव च।।३३।।
जिह्वास्तम्भो विवादे च परास्तो जायते ध्रुवम्। कृष्णकर्पटके यन्त्रं विषरक्तेन संलिखेत्।। ३४।।
विद्याविदर्भितं नाम जलमध्ये विनिक्षिपेत्। सिक्थकेन भृशं वेष्ट्य दिव्यस्तम्भनमुत्तमम्।। ३५।।
स्तम्भयेत् पञ्च दिव्यानि नात्र कार्या विचारणा। अभिन्नं तु तमेवं तु अनेन विधिना भवेत्।।३६।।
त्रिषु स्थानेषु कर्तव्यं त्रिकोणमायसे लिखेत्। शिखिपिच्छेन तन्मध्ये नाम विद्याविदर्भितम्।।३७।।
तद्बाह्ये चाग्निबीजेन भावशुद्धोऽपि यो नरः। विषरक्तेन संलिख्य कर्पटे तु श्मशानके।। ३८।।
विदर्भितं यस्य नाम श्मशाने भस्ममृत्तिकाम्। गृहीत्वा चाकृतिं कृत्वा यन्त्रं तद्धृदि सङ्क्षिपेत्[7]।।३९।।
कण्टकैर्वेधयेत् प्राज्ञः स्मृत्वा विद्यां पुनः पुनः। वेधिते प्रभवत्यस्य दुःखं स्यादतिवेदना।। ४०।।
सर्वाङ्गैर्म्रियते सिद्धः शूलैश्चैव सुदारुणैः। ब्रह्मास्त्रं त्रिषु लोकेषु दुर्लभं त्रिदशैरपि।। ४१।।
गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित्। गुरुभक्ताय दातव्यं वत्सरार्धोषिताय च।। ४२।।

इति। दृढमित्यादिभिरुत्तम इत्यन्तैः पञ्चभिः श्लोकैर्यन्त्रान्तरमाह– तत्र श्मशानस्थमधोमुखं खर्परमादाय तद्वामहस्ते निधाय दक्षिणहस्तेन श्मशानाङ्गारं गृहीत्वा तद्द्वयं ठकारेण सप्तधाभिमन्त्र्य, तस्मिन्, खर्परे तेनाङ्गारेण वृत्तं कृत्वा तन्मध्ये स्थिरमायाबीजं विलिख्य, तन्मध्ये अमुकस्य मुखं स्तम्भायेति विलिख्य बीजपरितः पूर्वोक्तं बीजं चतुर्दिक्षु मध्यबीज।* तद्बहिरष्टकोणादि सर्वं पूर्वोक्तं यन्त्रं कृत्वा क्वचित् संस्थाप्य मूलविद्यायां सर्वदुष्टपदस्थाने अमुकं

---

१. 'कृत्वोर्ध्वा' ख. पाठः। २. 'लिप्य...............श्रिषु' ग. पाठः। ३. 'श्रिषु' ग. पाठः। ४. 'ठकारैः' ख. पाठः।
५. 'त्रिधाङ्कुश' ख. पाठः। ६. 'वेष्ट' क. पाठः। ७. 'लिखेत्' क. पाठः। *अत्र त्रुटिरस्तीति अनुमीयते।

अमुकस्य मा भुङ्क्ष्व मा भुङ्क्ष्वेति पदं दत्त्वा, पीतोपचारैस्तस्मिन् यन्त्रे देवीमावाह्य पूजयेत्, मुखस्तम्भो भवति। इदंमेव यन्त्रं पूर्वोक्तहरिद्रादिद्रव्यैः श्मशानवस्त्रे विलिख्य गुलिकीकृत्य, मण्डूकस्य सजीवस्य मुखे विन्यस्य पीतसूत्रेण तन्मुखं दृढं बद्ध्वा, तं मण्डूकं भूमौ खात्वा तदुपरि पीतवर्णं पूजामण्डपं[१] कृत्वा, तत्र देवीं पीतपुष्पादिभिः पूजयेदुक्तफलसिद्धिर्भवति॥

चत्वर इत्यादिभिः प्रभावत इत्यन्तैर्यन्त्रान्तरमाह—तत्र चत्वर इति दिव्यत्वात्, अयं यन्त्ररचनाप्रकारः तत्र चतुर्द्वारयुक्तं चतुरस्रं कृत्वा तन्मध्ये अमुकस्य गतिं मतिं मुखं स्तम्भय स्तम्भयेति विलिख्य, मूलविद्यां चतुर्धा विभज्य प्रथमपादमूर्ध्वगत्या पूर्वद्वारान्तं, द्वितीयपादमधोगत्या, पश्चिमद्वारान्तं, तृतीयपादं तिर्यग्गत्या उत्तरद्वारान्तं, चतुर्थं पादं तिर्यग्गत्या दक्षिणद्वारान्तमिति मध्यलिखिताक्षरसमुदायस्य चतुर्दिक्षु विलिख्य, चतुष्पादाग्रेषु चतुरस्रस्य चतुष्कोणेषु पूर्वोक्तं भूबीजं विलिखेदिति पूर्वोक्तद्रव्यैर्यन्त्रं पाषाणे वा पट्टे वा विलिख्य, पीतरज्जुभिर्वेष्टयित्वोपर्यधः पाषाणेन निरुध्य स्थापनात् पूजनाच्चोक्तफलसिद्धिर्भवति॥

शिलेत्यादिश्लोकाभ्यां पूर्वोक्तस्यैव यन्त्रस्य लेखनद्रव्यविशेषं लेखनी च लेखनसमये कर्तव्यत्वेनोक्तम्। पुनः शिलेत्यादिभिर्ध्रुवमित्यन्तैः पञ्चभिः श्लोकैः पूर्वोक्तयन्त्रे लेखनविशेषण प्रयोगविशेषमाह— अयमर्थः, तत्र पूर्वोक्तैरेव द्रव्यैः पूर्वोक्तमेव मन्त्रं करपत्रद्वये विलिख्य तच्च स्वरविदर्भितं मध्ये नाम विलिख्य तद्यन्त्रं वृत्तत्रयेणावेष्ट्य तद्बहिश्चतुरस्रं कृत्वा, तद्रेखाचतुष्कोष्ठके वज्राष्टकं कृत्वा, प्रतिवज्रपार्श्वयोः रेफद्वयमिति सम्भूय रेफषोडशकं सबिन्दुकं विलिख्य, तद्बहिर्वृत्तपञ्चकं कृत्वा तदन्तरालचतुष्टयेऽभ्यन्तराले स्थिरमायाबीजेन संवेष्ट्य, बहिरन्तरालत्रयेऽपि अङ्कुशबीजैर्वेष्टयित्वा, तन्मध्ये मूलविद्यया विदर्भितं साध्यनाम विलिख्य वेष्टयित्वा, वल्मीकमध्ये निःक्षिप्य पाषाणैः पूरयित्वा प्रत्यहं पूजां कारयेत्। राजा स्वकटकैः शत्रुसैन्यं संवेष्ट्य युद्धमारभेत्। विवादकर्ता च विवादं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति॥

कृष्णेत्यादिश्लोकाभ्यामेतदुक्तं भवति, तत्रैतदेव यन्त्रं कृष्णवस्त्रे विषरक्तमिलितैः पूर्वोक्तद्रव्यैर्विलिख्य (तन्मध्ये मूलविद्यया विदर्भितं साध्यनाम विलिख्य) मधूच्छिष्टेन दृढं संवेष्ट्य जलमध्ये निःक्षिप्य तत्र दिव्यं कारयेत्, कृतदोषोऽपि विशुद्धो भवति॥

विषरक्तेनेत्यादिभिः श्लोकैः पूर्वोक्तस्यैव यन्त्रस्य प्रयोग (विशेषमाह—तत्र श्मशानवस्त्रे पूर्वोक्तं यन्त्रं मूलविद्याविदर्भितसाध्यनामगर्भितं विषयुक्तरक्तेन विलिख्य श्मशान) भस्ममृद्भ्यां पुत्तलीं निर्माय तस्या हृदि यन्त्रं निक्षिप्य[२] विद्यां स्मरन् कण्टकैस्तां सर्वाङ्गेषु वेधयेदुक्तफलावाप्तिर्भवति। ततः शत्रुः शीघ्रं म्रियते इति॥

अथ बगलामुखीस्तोत्रम्। अस्य श्रीबगलामुखीस्तोत्रमन्त्रस्य भगवान्नारद ऋषिः बार्हच्छन्दांसि बगलामुखी देवता स्थिरमाया बीजं, स्वाहा शक्तिः, कीलय कीलकं, मम सन्निहितानां दूरस्थानां दुष्टानां विरोधिनां पदजिह्वा-मुखबुद्धिस्तम्भनार्थे श्रीपरमेश्वरीप्रीत्यर्थे च जपमहं करिष्ये,

मध्ये सुधाब्धिमणिमण्डपरत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं देवीं भजामि धृतमुद्गरवैरिजिह्वाम्॥ १॥

---

१. 'लं' क. पाठः। २. 'विलिप्य' क. पाठः।

जिह्वाग्रमादाय करेण देवीं वामेन शत्रुन् परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि।। २।।
त्रिशूलधारिणीमम्बां सर्वसौभाग्यदायिनीम्। सर्वाभरणशोभाढ्यां देवीं ध्यात्वा प्रपूजयेत्।। ३।।
पीताम्बरां त्रिनेत्रां च द्विभुजां हाटकोज्ज्वलाम्। शिलापर्वतहस्ताङ्घ्रीं रिपुस्तम्भां महोत्कटाम्।। ४।।
वैरिनिर्दलनार्थाय स्मरेत्तां बगलामुखीम्। गम्भीरां च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम्।। ५।।
चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम्। हेमकुण्डलभूषां च पीतचन्द्रार्धशेखराम् ।। ६।।
पीतभूषणभूषां च स्वर्णसिंहासने स्थिताम्। सानन्दमपि देवेशि अरिस्तम्भनकारिणीम् ।। ७।।
मदनस्य रतेश्चैव प्रीतिस्तम्भकरीं पराम्। महाविद्यां महामायां साधकस्य बलप्रदाम् ।। ८।।
यस्याः स्मरणमात्रेण त्रैलोक्यं स्तम्भयेत् क्षणात्। वामे पाणावङ्कुशं च तस्याधस्ताद्वरं शुभम्।।९।।
तस्यैवाधःकरे चाक्षसूत्रं च पद्ममुत्तमम्।..।।

एवं दक्षिणपाणिक्रमतः पाशाभयाक्षसूत्रपद्मानि ।
केयूराङ्गदकुण्डलभूषां बालां हिमद्युतिसंस्कृतमुकुटाम्।। १०।।
तरुणादित्यप्रतिमां कौशेयांशुकलग्ननितम्बाम्।
तन्वीं कल्पद्रुमाधो हेमशिलायां प्रमुदितचित्तोल्लसत्कान्तिम्।। ११।।
पञ्चप्रेतसमारूढां भक्तजनविविधकामलीलाम्।
एवंविधां तां बगलां ध्यायेन्मनसि शुद्धेन्दीवरनीलाम्।। १२।।
चलत्कनककुण्डलोच्छ्वा[1]सितचारुगण्डस्थलां
लसत्कनकचम्पकद्युतिविराजितचन्द्राननाम्।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां
स्मरामि बगलामुखीं विमुखिनां[2] मुखस्तम्भिनीम्।। १।।
पीयूषोदधिमध्यचारुविलसद्रत्नोज्ज्वले मण्डपे
यः[3] सिंहासनमौलि (गां वि) पाटितरिपु[4] प्रेतासनाध्यासिनीम्।
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदाविभ्रमां
नित्यं[5] ध्यायति यान्ति तस्य विलयं सद्योऽम्ब सर्वापदः।। २।।
मन्त्रस्तावदलं[6] विपक्षदलने स्तोत्रं पवित्रं च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रं च चित्रं च ते।
मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे

---

१. 'ल्ल' ख. पाठः। २. 'खिवाङ्' ख. पाठः। ३. 'सत्' ख. पाठः। ४. 'पुप्रे' ख. पाठः।
५. 'इत्थं' ख. पाठः। ६. 'अयं' ग. पाठः।

त्वन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ।। ३।।
देवि त्वच्चरणाम्बुजार्चनविधौ[1] यः पीतपुष्पाञ्जलिं[2]
भक्त्या वामकरे निधाय च पुन[3]र्मन्त्री मनोज्ञाक्षरम्।
पीतध्यानपरोऽथ कुम्भकवशाद्बीजं स्मरेत् पार्थिवं
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत् तत्क्षणात्[4]।। ४।।
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति।
गर्वी खर्वति सर्वविच्च जडति त्वन्मन्त्रिणा मन्त्रितः
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः।। ५।।
दुष्टस्तम्भनमुग्रविघ्नशमनं[5] दारिद्र्यविद्रावणं
गर्वस्तम्भकरं परं मृगदृशां चेतःसमाकर्षणम् ।
सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णामृतं
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ।। ६।।
मातर्भञ्जय मद्विपक्षवदनं जिह्वां बला[6]त्कीलय
ब्राह्मीं मुद्रय मुद्रयांशु[7] धिषणामुग्रां गतिं स्तम्भय।
शत्रूंश्चूर्णय चूर्णयाशु[8] गदया गौराङ्गि पीताम्बरे
विघ्नौघं बगले हर प्रतिदिनं[9] कारुण्यपूर्णेक्षणे ।। ७।।
सङ्कष्टे चौरसृष्टे[10] प्रहरणसमये बन्धने वारिमध्ये
विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम्।
वश्यत्वे स्तम्भने वा रिपुवधसमये दीर्घसूत्रे[11] रणे वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः।। ८।।
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये
श्रीविद्ये[12] बगले महेशि समये कामेशि वामे रमे।
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम्।। ९।।

---

[1] 'कृते' ख. पाठः। [2] 'लीन् शुद्धं' ख. पाठः। [3] 'मनुं' ख. पाठः। [4] 'वाग्घृदयधीस्तम्भो भवेद्वादिनाम्' क. ग. पाठः।
[5] 'वीर्यगमनं' क.ग. पाठः। [6] 'च संकी' क. पाठः। [7] 'नाशया' ख. पाठः। [8] 'देवि तीक्ष्ण' ख. पाठः।
[9] 'प्रणमतां' ख. पाठः। [10] 'संरम्भे चौरसंघे' ख. पाठः। [11] 'निर्जने वा' ख. पाठः। [12] 'नित्ये' ख. पाठः।

त्वं विद्या परमा त्रिलोकजननी विघ्नौघसञ्छेदिनी।
योषाकर्षणकारिणी च सुमहद्विघ्नौघसञ्छेदिनी।
दुष्टोच्चाटनकारिणी जनमनःसम्मोहसन्दायिनी
जिह्वाकीलनवैभवा विजये ब्रह्मास्त्रविद्या परा ।।१०।।
नित्यं यस्तु मनोहरं स्तवमिमं देव्याः पठेत् सादरं
धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा गले।
राजानो [1]वययोषितोऽथ करिणः सर्पा मृगेन्द्राः खगा—
स्ते वै यान्ति विमोहितां रिपुगणा लक्ष्मीः स्थिरा सिद्धयः।। १।।
अनुदिनमभिरामं साधको यस्त्रिकालं पठति भुवनमातुः पूज्यते देववर्गैः।
भवति परमकृत्यं तस्य दृष्ट्यैव लोके भवति परमसिद्धा लोकमाता परा च।। १२।।
विद्या लक्ष्मीः सर्वसौभाग्यमायुः[2]
पुत्राः सम्पद्राज्यमिष्टार्थसिद्धिः ।
मातः श्रेयः सर्ववश्यत्वसिद्धिः
प्राप्ता प्राप्ता भूतलेऽस्मिन् नरेण ।।१३।।
यत् कृतं जपसन्नाहं गदितं[3] परमेश्वरि। शत्रूणां स्तम्भनार्थाय तद्गृहाण नमोऽस्तु ते।। १४।।
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु दुर्लभम्। गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित्।।१५।।
।। इति श्रीरुद्रयामले बगलामुखीस्तोत्रं सम्पूर्णम्।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे त्रयोविंशतितमः श्वासः।। २३।।

* * *

---

[1] 'प्यरयो मदान्धकरिण.' ख. पाठः। [2] 'दाच' क. पाठः। [3] 'दृश्यते यस्य संख्यातं चिन्तनं' क. ग. पाठः।

अथ

चतुर्विंशः श्वासः

अथ कालीप्रकरणं, तत्र भैरवतन्त्रे–

अथ वक्ष्ये महाविद्याः कालिकायाः सुदुर्लभाः। यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः।। १ ।।
नात्र [1]चित्तादिशुद्धिः स्यान्नारिमित्रादिलक्षणम्[2]। न वा प्रयासबाहुल्यं समयासमयादिकम्।। २ ।।
न वित्तव्ययबाहुल्यं कायक्लेशकरं न च। य एनां चिन्तयेन्मन्त्री सर्वकार्यसमृद्धिदाम्।। ३ ।।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः। गद्यपद्यमयी वाणी सभायां तस्य जायते।। ४।।
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः। राजानोऽपि च दासत्वं भजन्ते किं परे जनाः।। ५ ।।
दिवारात्रिव्यत्ययं च वशीकर्तुं क्षमो भवेत्। अन्ते च भजते देव्या गणत्वं दुर्लभं नरः।। ६ ।।

इति। अथ श्यामामन्त्रः। तत्र कालीमन्त्रे–

कामत्रयं वह्निसंस्थं रतिबिन्दुसमन्वितम्। कूर्चयुग्मं तथा लज्जायुगलं तदनन्तरम्।। १ ।।
दक्षिणे कालिके चेति पूर्वबीजानि चोच्चरेत्। अन्ते वह्निवधूं दद्याद् विद्याराज्ञी प्रकीर्तिता।। २ ।।

मन्वर्थमाह, रुद्रयामले–

ककाराज्जलरूपत्वात् केवलं मोक्षदायिनी। ज्वलनार्थसमायोगात् सर्वतेजोमयी शुभा ।। १ ।।
मायाबीजत्रयेणैव सृष्टिस्थित्यन्तकारिणी। बिन्दूनां निष्कलत्वाच्च कैवल्यफलदायिनी।। २ ।।
बीजत्रयाणां युक्त्या सा केवलं ज्ञान[3]चित्फला। शब्दबीजद्वयेनैव (शब्दराशिप्रबोधिनी ।। ३ ।।
लज्जाबीजद्वयेनैव) सृष्टिस्थित्यन्तकारिणी। सम्बोधनपदेनैव सदा सन्निधिकारिणी ।। ४ ।।
स्वाहया जगतां माता सर्वपापप्रदाहिनी।..।।

इति। एवं वीरतन्त्रे–

अथातः सम्प्रवक्ष्यामि दक्षिणां कालिकां शुभाम्। कामाक्षरं वह्निसंस्थं वामनेत्रविभूषितम्।। १ ।।
बिन्दुनादसमायुक्तं बीजमेतत्त्रयं लिखेत्। कूर्चयुग्मं ततो देवि लज्जायुग्ममनन्तरम् ।। २ ।।
दक्षिणे कालिके चेति सम्बोधनपदान्वितम्। सप्तबीजं पुनः प्रोच्य स्वाहान्तं मनुमुद्धरेत्।। ३ ।।

अथास्य पूजाप्रयोगः। तत्राचमनं भैरवतन्त्रे–

कालिकाभिस्त्रिभिः पीत्वा काल्यादिभिरुपस्पृशेत्। द्वाभ्यामोष्ठौ द्विरुन्मृज्य चैकेन क्षालयेत् करौ।।१ ।।

---

१. 'चिन्ताविशुद्धिः' ख. पाठः। २. 'नाम' ख. पाठः। ३. 'दूषणम्' क. पाठः।

मुखघोणेक्षणश्रोत्रनाभ्युरःकं भुजौ क्रमात्। आचम्यैवं भवेत् काली वत्सराणां (त्तां) प्रपश्यति।।२।।

आद्यबीजत्रयेण द्विराचमेत्। ॐ काल्यै नमः, ॐ कपालिन्यै नमः, इति औष्ठौ द्विरुन्मृजेत्। ॐ कुल्लायै नमः, इति करं क्षालयेत्। ॐ कुरुकुल्लायै नमः, इति मुखे। ॐ विरोधिन्यै नमः, इति दक्षिणनासायां। ॐ विप्रचित्तायै नमः, इति वामनासायां। ॐ उग्रायै नमः, ॐ उग्रप्रभायै नमः, इति नेत्रयोः। ॐ दीप्तायै नमः, ॐ नीलायै नमः, इति श्रोत्रयोः। ॐ घणायै नमः नाभौ। ॐ बलाकायै नमः, इति वक्षसि। मात्रायै नमः शिरसि। मुद्रायै नमः, मितायै नमः इत्यंसयोः, इति मन्त्राचमनम्। ततः प्रातःकृत्यादियोगपीठन्यासान्ते भूतशुद्ध्यन्तं कर्म विधाय, मायाबीजेन यथाविधि प्राणायामत्रयं कृत्वा ऋष्यादिन्यासं कुर्यात्। तद्यथा– अस्य मन्त्रस्य भैरव ऋषिः, उष्णिक् छन्दः, दक्षिणकालिका देवता, ह्रींबीजं, हूं शक्तिः, क्रीं कीलकं पुरुषार्थसिद्ध्यर्थे जपे विनियोगः। शिरसि भैरवऋषये नमः। मुखे उष्णिक्छन्दसे नमः। हृदि दक्षिणकालिकादेवतायै नमः। गुह्ये ह्रीं बीजाय नमः। पादयोः हूं शक्तये नमः। सर्वाङ्गे क्रीं कीलकाय नमः।। तथा च कालीतन्त्रे–

भैरवोऽस्य ऋषिः प्रोक्त उष्णिक् छन्द उदाहृतम्। देवता कालिका प्रोक्ता लज्जाबीजं तु बीजकम्।।१।।
शक्तिस्तु कूर्चबीजं स्यादनिरुद्धसरस्वती। कवित्वार्थे विनियोगः स्यादेवं ऋषिकल्पना।। २।।

इति। कालीक्रमे–''कीलकं चाद्यवर्णं स्याच्चतुर्वर्गार्थसिद्धये।'' कवित्वार्थ इत्युपलक्षणं, तन्त्रान्तरे फलान्तरश्रवणाच्च। कुलचूडामणौ–

भैरवोऽस्य ऋषिः प्रोक्त उष्णिक् छन्द उदाहृतम्। दक्षिणा कालिका देवी चतुर्वर्गफलप्रदा।। १।।

इति। अथ कराङ्गन्यासौ, यथा कालीतन्त्रे–

अङ्गन्यासकरन्यासौ यथावदभिधीयते। षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्।। १।।

इति। वीरतन्त्रेऽपि– ''दीर्घषट्कयुताद्येन प्रणवाद्येन कल्पयेत्।'' तद्यथा– ॐ ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां स्वाहा, इत्यादि। एवं ओं ह्रां हृदयाय नमः, इत्यादि। ॐ क्रां अङ्गुष्ठाभ्यां नमः, इत्यादिना वा। ततो वर्णन्यासः– अंआंइंईंउंऊंऋंॠंऌंॡं नमः, इति हृदये। एंऐंओंऔंअंअःकंखंगंघं नमः, इति दक्षबाहौ। ङंचंछंजंझंञंटंठंडंढं नमः, इति वामबाहौ। णंतंथंदंधंनंपंफंबंभं नमः, इति दक्षपादे। मंयंरंलंवंशंषंसंहंळंक्षं नमः, इति वामपादे। विरूपाक्षमते तु सबिन्दुरेष न्यासः, तन्त्रे पुनर्निर्बिन्दुः। यथा वीरतन्त्रे–''अंआंइंईंउंऊंऋंॠंऌंॡं वै हृदये न्यसेत्''। इत्यादि।। कालीतन्त्रेऽपि– ''अआइईउऊऋॠऌॡ वै हृदये न्यसेत्।'' इत्यादि। अथ षोढान्यासः तदुक्तं वीरतन्त्रे–

केवलां मातृकां कृत्वा मातृकां तारसम्पुटाम्। मातृकापुटितं तारं न्यसेत् साधकसत्तमः।। १।।
श्रीबीजपुटितां तां तु मातृकापुटितं तु तत्। कामेन पुटितां देवीं (तत्पुटं काममेव च।। २।।
शक्त्या च पुटितां देवीं) शक्तिं च तत्पुटां न्यसेत्। ह्रींद्वन्द्वं च पुनर्न्यस्य ऋॠऌॡ च पूर्ववत्।।३।।
मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च। अनुलोमविलोमेन न्यस्य मन्त्रं यथाविधि।। ४।।
मूलेनाष्टशतं कुर्याद् व्यापकं तदनन्तरम्।..।।

यथा–ॐअंॐ, अंॐअं, श्रींअंश्रीं, अंश्रींअं, एवं तथैव मातृकापुटितम्। एवं कामपुटितां तां तत्पुटितं कामम्। एवं

शक्तिपुटितां तां तत्पुटितां शक्तिं न्यसेत्। तथा ह्रींद्वन्द्वपुटितां तां तु मातृकापुटितं द्वयम्। तथा ॠंॠंॡंॡं च पूर्ववत्। एवं मन्त्रपुटितां मातृकां मातृकापुटितं मनुं, पुनरनुलोमविलोमेन मन्त्रं मातृकास्थाने न्यस्य मूलेनाष्टोत्तरशतेन व्यापकं कुर्यात्। एतन्यासस्ताराया अपि बोद्धव्यः। ''इति गुप्तेन दुर्गाया अङ्गषोढा प्रकीर्तिता। तारायाः कालिकायाश्च तन्मुख्याश्च तथापरा।। कृतेऽस्मिन् न्यासवर्ये च सर्वपापं प्रणश्यति''। ततस्तत्त्वन्यासः—मनुं त्रिखण्डं विधाय प्रथमखण्डान्ते ॐ आत्मतत्त्वाय स्वाहा, पादादिनाभिपर्यन्तम्। द्वितीयान्ते ॐ विद्यातत्त्वाय स्वाहा, नाभ्यादिहृदयान्तम्। तृतीयखण्डान्ते ॐ शिवतत्त्वाय स्वाहा, हृदयादिशिरःपर्यन्तम्।। तदुक्तं स्वतन्त्रे—

मूलविद्यात्रिखण्डान्ते प्रणवाद्यैर्यथाविधि। आत्मविद्याशिवैस्तत्त्वैर्न्यासं तत्र समाचरेत्।। १ ।।

इति। अथ बीजन्यासः। तदुक्तं कुमारीकल्पे—

ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके। गुह्ये वक्त्रे च सर्वाङ्गे सप्तबीजं क्रमान्न्यसेत्।।

तद्यथा—आद्यबीजं ब्रह्मरन्ध्रे। द्वितीयं बीजं भ्रुमध्ये। तृतीयं बीजं ललाटे। चतुर्थं बीजं नाभौ। पञ्चमं बीजं गुह्ये। षष्ठबीजं वक्त्रे। सप्तमबीजं सर्वाङ्गे। एतत् त्रयं काम्यम्। मूलेन सप्तधा व्यापकं कृत्वा यथाविधि मुद्रां प्रदर्शयेत्।। तदुक्तं भैरवीतन्त्रे—''पञ्चधा नवधा वापि मूलेन सप्तधा तथा।'' स्वतन्त्रेऽपि—''मूलेन व्यापकं न्यासं नवधा कारयेद्बुधः।'' ततो देवीं ध्यायेत्। तद्यथा कालीतन्त्रे—

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्। कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्।। १ ।।
सद्यश्छिन्नशिरःखड्गवामाधोर्ध्वकराम्बुजाम्। अभयं वरदं चैव दक्षिणाधोर्ध्वपाणिकाम् ।। २ ।।
महामेघप्रभां श्यामां तथा चैव दिगम्बराम्। कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्।। ३ ।।
कर्णावतंसतानीतशवयुग्मभयानकाम्[2]। घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ।। ४ ।।
शवानां करसङ्घातैः कृतकाञ्चीं हसन्मुखीम्। सृक्वद्वयगलद्रक्तधाराविस्फुरिताननाम्।। ५ ।।
घोररावां[3] महारौद्रीं श्मशानालयवासिनीम्। (बालार्कमण्डलाकारलोचनत्रितयान्विताम्)।। ६ ।।
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम्। शवरूपमहादेवहृदयोपरि संस्थिताम्।। ७ ।।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम्। महाकालेन च समं विपरीतरतातुराम्।। ८ ।।
सुखप्रसन्नवदनां स्मेराननसरोरुहाम्। एवं सञ्चिन्तयेत् कालीं श्मशानालयवासिनीम्।। ९ ।।

शिवयुग्मेति, घोरकर्णा[4]वतंसेति, प्रेतकर्णपूरेति च, ''शकुन्तपक्षसंयुक्तबाणकर्णविभूषणाम्'' इति। ''विगतासुकिशोराभ्यां कृतकर्णवतंसिनीमिति'' पठनादुभयमेव पाठः।। ध्यानान्तरं स्वतन्त्रे—

अञ्जनाद्रिप्रभां देवीं करालवदनां शिवाम्। मुण्डमालावलीकीर्णां मुक्तकेशीं स्मिताननाम्।। १ ।।
महाकालहृदम्भोजस्थितां पीनपयोधराम्। विपरीतरतासक्तां घोरदंष्ट्रां शवैः सह।। २ ।।
नागयज्ञोपवीताढ्या चन्द्रार्धकृतशेखराम्। सर्वालङ्कारसंयुक्तां मुण्डमालाविभूषिताम्।। ३ ।।
मृतहस्तसहस्रैस्तु बद्धकाञ्चीं दिगंशुकाम्। शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजिताम्।। ४ ।।

---

१. 'गुह्ये' ख. पाठः। २. 'विराजिताम्' ख. पाठः। ३. 'रूपां' ख. पाठः। ४. 'बाण' ख. पाठः।

रक्तपूर्णमुखाम्भोजां मद्यपानप्रसक्तिकाम्। वह्न्यर्कशशिनेत्रां तु रक्तविस्फुरिताननाम्।। ५।।
विगतासुकिशोराभ्यां कृतकर्णावतंसिनीम्। कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्।। ६।।
श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दिताम्। सद्यश्छिन्नशिरःखड्गवराभीतिकराम्बुजाम्।। ७।।

इति ध्यात्वा, मानसोपचारैः सम्पूज्य अर्घ्यस्थापनं कुर्यात्। यथा—स्ववामे भूमौ 'हुमिति' अर्घ्यस्थापनीयगर्भं त्रिकोणं विलिख्य, तत्रार्घ्यपात्रं संस्थाप्य मूलेन शुद्धजलादिना शङ्खादिपात्रमापूर्य 'ॐ ह्रां हृदयाय नमः' इत्यादिषडङ्गमन्त्रैरग्नीशासुरवायुषु, अग्रे औं ह्रौं नेत्रत्रयाय वौषट्। चतुर्दिक्षु ह्रः अस्त्राय फट्, इत्यभ्यर्च्य, तदुपरि मत्स्यमुद्रयाच्छाद्य, तदुपरि मूलमन्त्रं दशधा जप्त्वा धेनुमुद्रया अमृतीकृत्य, अस्त्रेण संरक्ष्य भूतिनीयोनिमुद्रे प्रदर्श्य, तज्जलं प्रोक्षणीपात्रे किञ्चिन्निक्षिप्य, तेनोदकेनात्मानं स्वपूजोपकरणं चाभ्युक्ष्य पीठपूजामारभेत्। अस्याः पूजायन्त्रम्— आदौ बिन्दुं स्वबीजं भुवनेश्वरीं च विलिख्य, ततस्त्रिकोणं तद्बाह्ये त्रिकोणचतुष्टयं वृत्तमष्टदलं पद्मं पुनर्वृत्तं चतुर्द्वारात्मकं भूगृहं यन्त्रमारभेत्।

ततः पीठपूजा, कुमारीकल्पे—

पीठपूजां ततः पश्चादाधारशक्तिपूर्वकम्। प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च।। १।।
सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा। श्मशानं पारिजातं च तन्मूले रत्नवेदिकाम्।। २।।
तस्योपरि मणेः पीठं न्यसेत् साधकसत्तमः। चतुर्दिक्षु मुनीन् देवान् शिवांश्च शवमुण्डकान्।। ३।।

'धर्माधर्मादींश्चे'त्यादि।। ततः पीठन्यासोक्तधारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यन्तं सम्पूज्य केसरेषु पूर्वादितः "इच्छाज्ञानक्रियाश्चैव कामिनी कामदायिनी। रती रतिप्रियानन्दा मध्ये चैव मनोन्मनी''।। सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत्। तदुपरि "ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः'' पीठस्योत्तरे गुरुपूजा। पुनर्ध्यात्वा पुष्पाञ्जलावानीय मूलमन्त्रकल्पितमूर्तौ आवाहयेत्। "देवेशि भक्तिसुलभे परिवारसमन्विते। यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव''।। ततो मूलमुच्चार्य "अमुके देवि इहावह २ इह तिष्ठ २ इह सन्निधेहि २ इह संनिरुध्यस्व २''। ततो हुमित्यवगुण्ठ्य अङ्गमन्त्रैः सकलीकृत्य, धेनुमुद्रया अमृतीकृत्य, परमीकरणमुद्रया परमीकृत्य, भूतिनीयोनिमुद्रे प्रदर्श्य प्राणप्रतिष्ठां विधाय मूलेन पाद्यादिभिः पूजयेत्। मूलमुच्चार्य अमुकदेवतायै एतत्पाद्यं नमः। इदमर्घ्यं स्वाहा। इदमाचमीयं स्वधा। स्नानीयं निवेदयामि। पुनराचमनीयं स्वधा। एष गन्धो नमः। एतानि पुष्पाणि वौषट्। ततो मूलेन पुष्पाञ्जलिं दत्त्वा मूलमुच्चार्य एष दीपो नमः। ततो घण्टां सम्पूजयेत्— 'ॐ जगद्ध्वनि मन्त्रमातः स्वाहा' इति घण्टां सम्पूज्य वादयन् धूपं दत्त्वा दीपं दृष्टिपर्यन्तं दद्यात्। ततो मूलेन पुष्पाञ्जलित्रयं दत्त्वा यथोपपन्नं नैवेद्यं दद्यात्।।

ततः आवरणपूजामारभेत्। ततः "अमुके देवि आवरणं ते पूजयामि'' इत्याज्ञां गृहीत्वा, केसरेषु अग्निकोणे ॐ ह्रां हृदयाय नमः। ईशाने ॐ ह्रीं शिरसे स्वाहा। नैर्ऋत्ये ॐ ह्रूं शिखायै वषट्। वायौ ॐ ह्रैं कवचाय हुं। आग्नेये ॐ ह्रौं नेत्रत्रयाय वौषट्। चतुर्दिक्षु ॐ ह्रः अस्त्राय फट्। ततो बंहिः षट्कोणे ॐ काल्यै नमः, एवं कपालिन्यै० कुल्लायै०, कुरुकुल्लायै०, विरोधिन्यै०, विप्रचित्तायै नमः उग्रायै०, उग्रप्रभायै०, दीप्तायै०, (इत्यन्तत्र्यस्रे। नीलायै०, घनायै०, बलाकायै०, इति द्वितीयत्र्यस्रे। मात्रायै०, मुद्रायै०) मितायै नमः इति तृतीयत्र्यस्रे। "सर्वाः श्यामा असिकरा मुण्डमालाविभूषणाः। तर्जनीं वामहस्तेन धारयन्त्यः शुचिस्मिताः।। दिगम्बरा हसन्मुख्यः

स्वस्वभर्तृसमन्विता:[1]।'' इति ध्यात्वार्चयेत्।। ततोऽष्टपत्रेषु पूर्वादिक्रमेण ओं ब्राह्म्यै नम:, एवं नारायण्यै०, माहेश्वर्यै०, चामुण्डायै०, कौमार्यै०, अपराजितायै०, वाराह्यै०, नारसिंह्यै०। एता गन्धादिभि: सम्पूज्य, पत्राग्रे असिताङ्गादिभैरवान् पूजयेत्। ततो मूलेन पुष्पाञ्जलित्रयं दद्यात्। तत: पाद्यादिना देव्या दक्षिणे भागे महाकालं पूजयेत्।। कुमारीकल्पे—'देव्याश्च दक्षिणे भागे महाकालं प्रपूजयेत्''। ''हूंक्षौं यांरांलांवांहांक्रों महाकालभैरव सर्वविघ्नान् नाशय २ ह्रींश्रींफट्स्वाहा''। अनेन पाद्यादिभिराराध्य त्रिस्तर्पयित्वा मूलेन देवीं पञ्चोपचारै: पूजयेत्। तथा च कालीतन्त्रे— ''महाकालं यजेद्यत्नात् पश्चाद् देवीं प्रपूजयेत्''। ततो देवीं ध्यायेत्। ततो यथाशक्ति जपित्वा गुह्येत्यादिना जपं देव्या वामहस्ते समर्पयेत्। तत: स्तुत्वा प्रदक्षिणीकृत्याष्टाङ्गं प्रणामं कुर्यात्। श्रीजगन्मङ्गलं नाम कवचं पठेत्। ततस्तत्तेज: पुष्पेण सार्धं हृदि आरोपयेत्। (ततो नैवेद्यं निवेदयित्वा) तन्नैवेद्यं किञ्चित् ''उच्छिष्टचण्डालिन्यै नम:'' इत्यैशान्यां दिशि दत्त्वा शेषं शिष्टेभ्यो दद्यात्। किञ्चित् स्वीकृत्य पादोदकं किञ्चित् पीत्वा, निर्माल्यं धृत्वा यथेच्छं विहरेदिति। ततो मूलेनाष्टोत्तरशताभिमन्त्रितं ''पुष्पं च चन्दनं धृत्वा त्रैलोक्यं वशमानयेत्। सर्वसिद्धियुतो भूत्वा भैरवो वत्सराद्भवेत्''।। इति। अस्य पुरश्चरणं लक्षद्वयजप:। तत्क्रमस्तु कालीतन्त्रे—

लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचि:। रात्रौ ताम्बूलपूरास्य: शय्यायां लक्षमानत:।। १।।

इति। व्यवस्थामाह स्वतन्त्रतन्त्रे—

दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नर:। ततस्तस्य दशांशेन हविषाग्नौ समर्पयेत्।। १।।

इति। अत्राङ्गस्य कालान्तरमाह, नीलसारस्वततन्त्रे—''लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचि:। अशुचिश्च तथा रात्रौ लक्षमेकं तथैव च।। दशांशं होमयेन्मन्त्री दशांशमभिषेचयेत्।'' इति साम्प्रदायिका:। वस्तुतस्तु कुमारीकल्पे—

लक्षमेकं जपेन्मन्त्री हविष्याशी दिवा शुचि:। रात्रौ ताम्बूलपूरास्य: शय्यायां लक्षमानत:।। १।।
एवं लक्षद्वयं जप्त्वा तद्दशांशेन मन्त्रवित्। अयुतं होमयेत् देवि दिवारात्रिप्रभेदत:।। २।।

इति दर्शनाद् दिवा लक्षं जप्त्वा तद्दशांशहोमं कुर्यात्। रात्रौ लक्षं जपित्वा रात्रावेव तद्दशांशहोमं कुर्यात्, इति रहस्यार्थ:।। अत्र मन्त्रभेदा:—

वर्गाद्यं वह्निसंयुक्तं रतिबिन्दुसमन्वितम्। एकाक्षरो महामन्त्र: सर्वकामफलप्रद:।।
त्रिगुणस्तु विशेषेण सर्वशास्त्रप्रबोधक:।..............................।।

पूजादिकं तु—प्रात:कृत्यादिप्राणायामान्तं कर्म विधाय पूर्वोक्ता ऋषिच्छन्दोदेवता विन्यस्य वर्णन्यासं कृत्वा कराङ्गन्यासं कुर्यात्। तद्यथा—ओं क्रां अङ्गुष्ठाभ्यामित्यादि। एवं क्रां हृदयायेत्यादि कल्पयेत्। एवं—''षडङ्गानि मनोरस्य जातियुक्तानि देशिक:''। अन्यत्सर्वं पूर्ववत्। अनयो: पुरश्चरणं लक्षजप:। तथा च सिद्धेश्वरीतन्त्रे—

एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं विधानत:। तद्दशांशं विधानेन होमयेत् साधकोत्तम:।। १।।
मायाद्वयं कूर्चयुग्मं ऐन्द्रान्तं मादनत्रयम्। मायाबिन्द्वीश्वरयुतं दक्षिणे कालिके पदम्।। २।।
संहारक्रमयोगेन बीजसप्तकमुद्धरेत्। एकविंशाक्षरो मन्त्रस्ताराद्य: कालिकामनु: ।। ३।।

---

[1] १. 'स्वस्ववाहनभूषिता:' ख. पाठ:।

इन्द्रस्य समीपे ऐन्द्रं रेफमित्यर्थः। तेन प्रणवं मायाद्वयं कूर्चयुग्मं निजबीजद्वयं दक्षिणेकालिके निजबीजत्रयं कूर्चद्वयं मायाद्वयमित्येकविंशत्यक्षरः। अस्य पूजादिकं दक्षिणावत्। पुरश्चरणं तु लक्षजपः। होमस्तु तद्दशांशतः।

स्वाहान्तश्च त्रयोविंशाक्षरोऽयं मनुराजकः। स्वाहां विनैकविंशत्यक्षरः कामप्रदो मनुः।। ४।।
विंशत्यर्णा महाविद्या स्वाहाप्रणववर्जिता। ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरेत्।। ५।।

इति। स्वतन्त्रे—

प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत्। रतिबीजं समुद्धृत्य पपञ्चमं भगान्वितम्।। १।।
ठद्वयेन समायुक्ता विद्याराज्ञी प्रकीर्तिता।..।।

रतिबीजं निजबीजम्। तथा च चामुण्डातन्त्रे—'रत्याद्या कालिका पातु द्वाविंशाक्षररूपिणी, इति कवचे प्रतिपादितम्। तेन प्रणवो माया निजबीजं पपञ्चममेकारयुक्तं वह्निवल्लभा।

अस्य पूजा—प्रातःकृत्यादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्यात्। अस्य मन्त्रस्य भैरव ऋषिः, विराट् छन्दः, सिद्धिकाली ब्रह्मरूपा त्रिभुवनेश्वरी देवता, निजबीजं बीजं, लज्जा शक्तिः। वर्णन्यासकराङ्गन्यासौ च दक्षिणावत्। ध्यानं तु—

खड्गोद्भिन्नेन्दुबिम्ब[१]स्रवदमृतरसाप्लाविताङ्गी त्रिनेत्रा
सव्ये पाणौ कपालाद्गलदसृजमथो मुक्तकेशी पिबन्ती।
दिग्वस्त्रा बद्धकाञ्ची मणिमयमुकुटाद्यैर्युता दीप्तजिह्वा
पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डलालीढपादा।।

एवं ध्यात्वा पूजादिकं दक्षिणावत् कुर्यात्। पुरश्चरणं त्वेकविंशतिसहस्रजपः। तदुक्तं कालीतन्त्रे—

जपेद्विंशतिसाहस्रं सहस्रैकेन संयुतम्। होमयेत् तद्दशांशेन मृदुपुष्पेण मन्त्रवित्।। १।।

इति। प्रकारान्तरं विश्वसारे—

मूलबीजं ततो माया लज्जाबीजं ततः परम्। महाविद्या महाकाल्या महाकालेन भाषिता।। १।।
वर्गाद्यं वह्निसंयुक्तं रतिबिन्दुसमन्वितम् । एतत्त्रयं क्रमेणैव तदन्ते वह्निवल्लभा।। २।।

निजबीजत्रयं फट् वह्निवल्लभा (३) निजबीजत्रयं कूर्चबीजं लज्जा पुनस्तान्येव वह्निवल्लभा (४)। वाग्भवं नमः मूलबीजं पुनस्तदेव कालिकायै वह्निवल्लभा (५)।

अस्य पूजाप्रयोगः—प्रातःकृत्यादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्यात्, अस्यैकादशाक्षरस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिः छन्दः, कालिका देवता, शिरोमुखहृदयेषु ऋषिच्छन्दोदेवता विन्यस्य ध्यायेत्। तथा—

चतुर्भुजा कृष्णवर्णा मुण्डमालाविभूषिता। खड्गं च दक्षिणे पाणौ बिभ्रतीन्दीवरद्वयम्।। १।।
कर्त्रीं च खर्परं चैव क्रमाद्वामे सुबिभ्रती। द्यां लिखन्तीं जटामेकां बिभ्रती शिरसा द्वयीम्।। २।।
मुण्डमालाधरा शीर्षे ग्रीवायामपि चापराम्। वक्षसा नागहारं च बिभ्रती रक्तलोचना।। ३।।

---

[१] 'खण्ड' ख. पाठः।

कृष्णवस्त्रधरा कट्यां व्याघ्राजिनसमन्विता। वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्।। ४।।
विलाप्य सिंहपृष्ठे तु लेलिहाना शवद्वयम्। साट्टहासा महाघोररावयुक्ता सुभीषणा।। ५।।

इति। एवं ध्यानम्। अन्यत्सर्वं दक्षिणावत्। पूर्वोक्तानां मन्त्राणां च सर्वं दक्षिणावद्बोद्धव्यम्। अस्य पुरश्चरणं लक्षद्वयजप:। अन्यासां मन्त्रवर्णसंख्यलक्षजप:। तदुक्तं तत्रैव—

लक्षद्वयं जपेद्विद्यां पुरश्चरणकर्मणि। अन्यासां वर्णलक्षं तु कथितं पद्मयोनिना।। १।।

इति। भेदास्तु— (१) निजबीजं कूर्चबीजं माया दक्षिणेकालिके वह्निवल्लभा। (२) निजबीजं कूर्चं लज्जा दक्षिणेकालिके फट्। (३) मूलबीजद्वयं कूर्चद्वयं लज्जाद्वयं दक्षिणेकालिके पूर्वषड्बीजानि वह्निवल्लभा। (४) निजबीजं वह्निवल्लभा। (५) निजबीजद्वयं कूर्चद्वयं लज्जाद्वयं वह्निवल्लभा। (६) मूलबीजं कूर्चं लज्जा वह्निसुन्दरी। (७) मूलबीजं दक्षिणेकालिके वह्निवल्लभा। (८) निजबीजं कूर्चं माया पुनस्तान्येव वह्निवल्लभा। (९) मूलद्वयं कूर्चद्वयं मायाद्वयं पुनस्तान्येव वह्निवल्लभा। (१०) मूलत्रयं कूर्चद्वयं लज्जाद्वयं पुनस्तान्येव वह्निवल्लभा। (११) हृदयं वाग्भवं मूलद्वयं कालिकायै ठद्वयं। (१२) हृदयं पाशद्वयं[1] अङ्कुशद्वयमस्त्रं वह्निजाया कालि कालिके दीर्घतनुच्छदं भुवनेशी कूर्चमस्त्रम्। (१३) लज्जाबीजं क्रोधमस्त्रं। एतासां पूजादिकं सर्वं दक्षिणावत्।। एषां पूजा— प्रात:कृत्यादिप्राणायामान्तं कर्म विधाय ऋष्यादिन्यासं कुर्यात्। एषां दक्षिणामूर्तिर्ऋषि: पङ्क्तिश्छन्द: दक्षिणाकाली देवता, अन्यत् सर्वं दक्षिणावद्बोद्धव्यम्। अस्यास्तु पुरश्चरणं लक्षजप:। एतासां पूजायन्त्रं कालीतन्त्रे—

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत्। ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम्।। १।।
ततो वृत्तं समालिख्य लिखेदष्टदलं तत:। वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम्।। २।।

इति। कुमारीकल्पे—''मध्ये तु बैन्दवं चक्रं बीजमायाविभूषितम्'' इति। यन्त्रनिर्माणपात्रं मुण्डमालातन्त्रे—

ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्मिते। शनिभौमदिने वापि शरीरे मृतसम्भवे।।
स्वर्णरूप्येऽथवा लोहे चक्रं कार्यं विधानत:।......................................।।

इति। एतासां प्रमाणं विश्वसारतन्त्रे—

अथ पञ्चाक्षरीं विद्यां शृणुष्व कमलानने। प्रजापतिं समुद्धृत्य वह्न्यारूढं प्रजापतिम्।। १।।
चतुर्थस्वरसंयुक्तं नादबिन्दुविभूषितम्। द्विगुणं च तत: कृत्वा ङेन्तं च कालिकापदम्।। २।।
स्वाहान्ता कथिता विद्या प्रिय एकादशाक्षरी। ऋषि: स्याद् दक्षिणामूर्ति: पङ्क्तिश्छन्द उदाहृतम्।।३।।
परात्परता शक्ति: कालिका देवता स्मृता। एकादशाक्षरी विद्या कालिकाया: सुदुर्लभा।। ४।।
लक्षद्वयं जपेद्विद्यां पुरश्चरणकर्मणि। अन्यासां वर्णलक्षं स्यात् कथितं पद्मयोनिना।। ५।।

इति। अन्यासां पञ्चाक्षरीप्रभृतीनाम्। अस्या ध्यानम्— ''चतुर्भुजा कृष्णवर्णा'' इत्यादि।

मूलबीजं ततो मायां लज्जाबीजं तत: परम्। दक्षिणे कालिके चेति अस्त्रान्ता समुदीरिता।। ६।।
अथापरां प्रवक्ष्यामि विद्यां विंशतिवर्णकाम्। यस्या: प्रसादमात्रेण भवेद्भूमिपुरन्दर:।। ७।।

---

[1] 'प्रणव' क. पाठ:।

मूलबीजद्वयं दद्यात्[१] ततः कूर्चद्वयं वदेत्। लज्जायुग्मं समुद्धृत्य सम्बुद्ध्यन्तं पदद्वयम्।। ८।।
पूर्ववत् षट् तथा बीजान्यन्ते च वह्निसुन्दरी। ऋषिः स्याद् दक्षिणामूर्तिः पङ्क्तिश्छन्द उदाहृतम्।।९।।
देवता कथिता सद्भिः काली दक्षिणपूर्विका। अथापरां प्रवक्ष्यामि विद्यां त्रिभुवनेश्वरीम्।। १०।।
निजबीजं समुद्धृत्य तदन्ते वह्निसुन्दरीम्। भैरवोऽस्य ऋषिः प्रोक्तो नानातन्त्रसमन्वितः।। ११।।
अष्टाक्षरी तु या प्रोक्ता सर्वतन्त्रेषु गोपिता। निजबीजद्वयं कूर्चद्वयं लज्जाद्वयं ततः।। १२।।
स्वाहान्ता कथिता विद्या (सर्वकामफलप्रदा। निजं कूर्चं तथा लज्जा तदन्ते वह्निसुन्दरी।। १३।।
पञ्चाक्षरी महाविद्या पञ्चवक्त्र ऋषिः स्मृतः। नवाक्षरीं महाविद्यां शृणुष्व कमलानने।। १४।।
निजबीजत्रयं कूर्चयुग्मं लज्जायुगं ततः। स्वाहान्ता कथिता विद्या) सर्वसम्पत्करी मता।। १५।।
अथापरां प्रवक्ष्यामि विद्यां तां च नवाक्षरीम्। मूलबीजं समुद्धृत्य सम्बुद्ध्यन्तं पदद्वयम्।। १६।।
स्वाहान्ता कथिता विद्या सर्वशत्रुक्षयङ्करी। अथवाष्टाक्षरीं विद्यां शृणुष्व कमलानने।। १७।।
निजबीजं ततः कूर्चं ततो मायां समुद्धरेत्। पुनस्तान्येव उच्चार्य स्वाहान्ता मोक्षदायिनी।। १८।।
अथापरां प्रवक्ष्यामि दशतत्त्वसमन्विताम्। मूलद्वयं कूर्चयुगं तथा लज्जाद्वयं तथा।। १९।।
पुनस्तान्येव बीजानि तदन्ते वह्निसुन्दरी। चतुर्दशाक्षरी विद्या चतुर्वर्गफलप्रदा।। २०।।
ब्रह्मत्रयं समुद्धृत्य रतिवह्निसमन्वितम्। नादबिन्दुसमायुक्तं लज्जाकूर्चद्वयं ततः।। २१।।
पुनः क्रमेण चोद्धृत्य वह्निजायावधिर्मनुः। षोडशीयं समाख्याता विद्या कल्पद्रुमोपमा।। २२।।

इति। मायातन्त्रे—

हृदयं वाग्भवं देवि निजबीजयुगं ततः। कालिकायै पदं चोक्त्वा तदन्ते वह्निसुन्दरी।। १।।

तन्त्रान्तरे—

नमः पाशाङ्कुशौ द्वेधा फट्स्वाहाकालिकालिके। दीर्घतनुच्छदं कालीमनुः पञ्चदशाक्षरः।। १।।

अस्य पुरश्चरणं लक्षजपः। तथा च—

लक्षसंख्यं जपं कुर्यात् पुरश्चरणसिद्धये। एतासां पूजनं चैव दक्षिणावत् सुरेश्वरि।। २।।

मत्स्यसूक्ते— ''लज्जाबीजं ततः क्रोधं फडन्ता त्र्यक्षरी भवेत्''। इति कालीमन्त्राः। अथ गुह्यकाली विश्वसारे—

अथ वक्ष्ये महेशानि विद्यां सर्वफलप्रदाम्। चतुर्वर्गप्रदां साक्षान्महापातकनाशिनीम्।। १।।
सर्वसिद्धिप्रदां विद्यां भुक्तिमुक्तिप्रदायिनीम्। गुह्यकालीमहाविद्यां त्रैलोक्ये चातिदुर्लभाम्।। २।।
इन्द्रादिरूढं वर्गाद्यं रतिबिन्दुसमन्वितम्। त्रिगुणं च तथा कृत्वा ईशानं च समुद्धरेत्।। ३।।
षष्ठस्वरसमायुक्तं बिन्दुनादकलान्वितम्। द्विगुणं च ततः कृत्वा ईशानद्वयमुद्धरेत्।। ४।।
वामाक्षिवह्निसंयुक्तं नादबिन्दुविभूषितम्। तद् गुह्ये कालिके प्रोक्त्वा अथवा दक्षिणे वदेत्।। ५।।
सप्तबीजं पुनः पूर्वक्रमेण योजयेत् ततः। बह्निजायाविधिः प्रोक्त्वा विद्या त्रैलोक्यमोहिनी।। ६।।

---

[१] 'ब्रूयात्' ग. पाठः।

अथवेति गुह्येकालिके दक्षिणेकालिके वा मन्त्रः।

कामबीजं तथा कूर्चं तदन्ते भुवनेश्वरी। गुह्ये च कालिके वापि तथा बीजद्वयं भवेत्।। ७।।
स्वाहान्ता कथिता विद्या सर्वतन्त्रेषु गोपिता। एषा तु षोडशी विद्या चतुर्वर्गफलप्रदा।। ८।।

अस्यार्थः— आदौ निजबीजं कूर्चं माया ततः सम्बोधनपदद्वयं ततो निजबीजद्वयं कूर्चद्वयं मायाद्वयं वह्निवल्लभा। "कामबीजद्वयं हित्वा भवेद्विद्या चतुर्दशी"। अस्य मन्त्रस्येति शेषः।

सप्तबीजं पुरा प्रोक्तं गुह्ये च कालिके पुनः। स्वाहान्ता कथिता विद्या सर्वतन्त्रेषु गोपिता।। ९।।

एषापि चतुर्दशाक्षरी। तथा—

दक्षिणे पदमाभाष्य भवेत् पञ्चदशाक्षरी। कामबीजं समुद्धृत्य सम्बुद्ध्यन्तं पदद्वयम्।। १०।।
पुनः कामं तदन्ते च दद्याद्वह्नेश्च सुन्दरीम्। एषा नवाक्षरी विद्या गुह्यकाल्याः समीरिता।। ११।।
दक्षिणे पदमाभाष्य भवेद्विद्या दशाक्षरी। कामबीजं परित्यज्य अथवा षोडशाक्षरी।। १२।।

तेन षोडशाक्षरविद्यायाः कामबीजाभावे पञ्चदशी भवति। एतासां पूजनं तु—

पूर्ववन्न्यासवर्गैस्तु पूर्ववत् पूजयेच्छिवाम्। पूर्ववच्च जपेद्विद्यां सर्वं पूर्ववदेव हि।। १३।।
बलिदानं तथा यन्त्रं पूर्ववत् परिकल्पयेत्।.................................।।

बलिमन्त्रस्तु—उँह्रींएह्येहि परमेशानि जगन्मातर्जगतां जननि गृह्ण २ मम बलिं सिद्धिं देहि देहि शत्रुक्षयं कुरु कुरु उँहूँ[1]ह्रीं फट् ओंकालिकायै नमः फट् स्वाहा।। यद्वा गुह्यकाल्या अयं बलिमन्त्रः, हूंनमो एहि २ गुह्यकालिके गृह्ण २ मम शत्रून् नाशय २ खादय २ तुरु[2] २ छिन्दि २ सिद्धिं देहि २ हुं[3]२ स्वाहा।। तथायमासनमन्त्रः— उँहूं सदाशिवमहाप्रेताय गुह्यकाल्यासनाय नमः, गुह्यकाल्यै हूं नमः।

भद्रकाल्यादयो विद्याः कथ्यन्ते सुरसुन्दरि। कामबीजादिकं बीजं सप्त पूर्वापरे यजेत्।। १४।।
भद्रकालीं तथा ङेन्तां बीजमध्ये नियोजयेत्। स्वाहान्ता कथिता विद्या विंशद्वर्णात्मिका परा।।१५।।
चतुर्वर्गप्रदा विद्या भद्रकाली शुभावहा। सप्तबीजं समुद्धृत्य श्मशानकालिके तथा।। १६।।
पुनर्बीजं क्रमेणैव स्वाहान्ता सर्वसिद्धिदा। विंशत्येकाक्षरी विद्या श्मशानकालिका मता।। १७।।
बीजानि चोच्चरेत् पूर्वं महाकालिपदं ततः। तदन्ते सप्तबीजानि स्वाहान्ता सर्वसिद्धिदा।। १८।।
विंशत्यर्णा महाविद्या महाकाल्याः प्रकीर्तिता।...।।

एतासां जपपूजनं दक्षिणावत्। विशेषस्तु—भूपुरे इन्द्रादिवज्रादीन् पूजयेत्। गृहस्य पूर्वादिद्वारेषु विष्णुं शिवं सूर्यं गणेशं पूजयेत्। तत्रैव—

भूपुरे लोकपालांश्च तदस्त्राणि ततो बहिः। भूपुरेषु चतुष्कोणे पूजयेत् क्रमतः सुधीः।। १९।।
विष्णुं शिवं तथा सूर्यं गणेशं पूजयेत् ततः।...।।

अथास्याः पूजायन्त्रम्—

त्रिकोणं चैव षट्कोणं नवकोणं मनोहरम्। त्रिवृत्तं चाष्टपत्रं च सुकिञ्जल्कसमन्वितम्।। २०।।

---

१. 'हूं' क. पाठः। २. 'स्फुरस्फुर' ख. पाठः। ३. 'हूंफट्' ख. पाठः।

भूपुरत्रितयारूढं योनिमण्डलमण्डितम्। त्रिपञ्चारमिदं चक्रं सर्वतन्त्रेषु कीर्तितम्।। २१।।

त्रिकोणं त्रिकोणाकारमित्यर्थः। ध्यानं तु—

महामेघप्रभां देवीं कृष्णवस्त्रपिधायिनीम्। ललज्जिह्वां घोरदंष्ट्रां घोररावां[1] हसन्मुखीम्।। २१।।
नागहारलतोपेतां चन्द्रार्धकृतशेखराम्। द्यां लिखन्तीं जटामेकां (लेलिहानासवं स्वयम्।। २२।।
नागयज्ञोपवीताङ्गीं) नागशय्यानिषेदुषीम्। पञ्चाशन्मुण्डसंयुक्तनरमालां महोदरीम् ।। २३।।
सहस्रफणसंयुक्तमनन्तं शिरसोपरि। चतुर्दिक्षु नागफणावेष्टितां गुह्यकालिकाम् ।। २४।।
तक्षकसर्पराजेन वामकङ्कणभूषिताम्। अनन्तनागराजेन कृतदक्षिणकङ्कणाम्।। २५।।
नागेन्द्ररशनाहारकल्पितां रत्ननूपुराम्। द्विभुजां चिन्तयेद् देवीं नागयज्ञोपवीतिनीम्।। २६।।
नरदेहसमारब्धकुण्डलश्रुतिमण्डिताम्। प्रसन्नवदनां सौम्यां नवरत्नविभूषिताम्।। २७।।
नारदाद्यैर्मुनिगणैः सेवितां शिवगे(मो)हिनीम्। अट्टहासां महाभीमां साधकाभीष्टदायिनीम्।। २८।।

जटामेकां धारयन्तीमिति शेषः। अनन्तं शिरसोपरि दधतीमिति शेषः। गुह्येत्युपलक्षणम्। पूजादिकं तु दक्षिणावत् कार्यम्, इति कालीमन्त्राः।।

अथ ताराप्रकरणम्—

अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्वसिद्धिदान्। येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः[2]।।१।।
कवितां लभते शुद्धामनर्गलविजृम्भिणीम्। पाण्डित्यं सर्वशास्त्रेषु धनधान्यपतिर्भवेत्।। २।।
राजद्वारे सभायां च विवादे व्यवहारके। सर्वत्र जयमाप्नोति बृहस्पतिरिवापरः ।। ३।।

इति। तथा च मत्स्यसूक्ते—

मायाबीजं समुद्धृत्य तारकं[3] वह्निसंयुतम्। मायाबिन्दु[4]स्वरयुतं द्वितीयं बीजमुद्धृतम्।। १।।
कूर्चबीजं तृतीयं च फट्कारं तदनन्तरम्। सम्पूर्णं सिद्धमन्त्रं तु रश्मिपञ्चकसंयुतम्।। २।।

रश्मिपञ्चकं वर्णपञ्चकमित्यर्थः (एकजटापक्षे रश्मिपञ्चकं वर्णपञ्चकं, नीलसरस्वतीपक्षे प्रणवमित्यर्थः)

लीलया वाक्प्रदा चेति तेन नीलसरस्वती। तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी।। ३।।
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता।...।।

इति। तारार्णवे—

वसिष्ठाराधिता विद्या न तु शीघ्रफला यतः। अतस्तेनापि मुनिना शापो दत्तः सुदारुणः।। १।।
ततः प्रभृति विद्येयं फलदात्री न कस्यचित्।...।।

शापोद्धारमाह—

चन्द्र[5]बीजं त्रपान्तत्रं बीजोपरि नियोजितम्। ततः प्रभृति विद्येयं वधूरिव यशस्विनी।। १।।
फलिनी सर्वविद्यानां जयिनी जयकाङ्क्षिणाम्। विषक्षयकरी विद्या अमृतत्वप्रदायिनी।। २।।

---

[1] 'कोटराक्षी' ख. पाठः। [2] 'क्तोभवेद्ध्रुवम्' ख. पाठः। [3] 'तकारं' क. पाठः। [4] 'बिन्द्वीश्वर' क. पाठः। [5] 'शक्ति' ख. पाठः।

मन्त्रस्य ज्ञानमात्रेण विजयी भुवि जायते।..।।

एकवीराकल्पेऽपि—

लज्जाबीजं वधूबीजं कूर्चबीजं तथा च फट्। एषा पञ्चाक्षरी विद्या पञ्चभूतप्रकाशिनी।। १।।

तथा च तत्रैव—

षोडशव्यञ्जनं वह्निवामाक्षिबिन्दुसंयुतम्। चन्द्रबीजसमारूढं वधूबीजमिदं स्मृतम् ।। १।।

वधूबीजं स्त्रींकारम्। तथा च विश्वसारे—'स्वबीजं च महेशानि वधूबीजं प्रकीर्तितम्' इति।

नीलतन्त्रे—

ताराया: पञ्चवर्णेयं श्रीमन्नीलसरस्वती। सर्वभाषामयी शुद्धा सर्वाम्नायैर्नमस्कृता।। १।।

इति। तारार्णवेऽपि

अनुत्तरं समुद्धृत्य मायोत्तरमत: परम्। पपञ्चम[1]समायुक्तं पञ्चरश्मि प्रकीर्तितम्।। १।।
जीवनी मध्यमा पश्चादेकाक्षी तदनन्तरम्। उग्रदर्पं ततो दद्यादस्त्रं देवि प्रकाशितम्।। २।।

एकाक्षी स्त्रीं, एतेन सर्वत्र शापोद्धारः। पञ्चाक्षरीमधिकृत्य तन्त्रे—

श्रीबीजाद्या यदा विद्या तदा श्रीः सर्वतोमुखी। एषैव हि महाविद्या मायाद्या सकलेष्टदा।। १।।
वाग्भवाद्या यदा विद्या वागीशत्वप्रदायिनी। वितारैकजटा वैषा महामुक्तिकरी मता।। २।।
तारास्त्ररहिता त्र्यर्णा महानीलसरस्वती। कुल्लुकेयं समाख्याता सर्वतन्त्रेषु गोपिता।। ३।।
एषा क्रमगता प्राप्ता मतभेदादनेकधा।..।।

एषा पञ्चाक्षरी। तदेवाह— "पञ्चाक्षरी एकजटा ताराभावे महेश्वरि। ताराद्या तु भवेद्देवि श्रीमन्नीलसरस्वती।। अग्रतारा त्र्यक्षरी च महानीलसरस्वती" कुल्लुका च। अन्यासां विद्यानामेकजटैव देवता प्रकृतित्वात्। एतासां साधनस्थानं नीलतन्त्रे—

एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे। (शवस्योपरि मुण्डे वा जले वाकण्ठपूरिते।। १।।
सङ्ग्रामभूमौ योनौ वा स्थले वा विजने वने।) तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम्।। २।।

इति। तत्रैव—

पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्षते। तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा।। १।।

इति। अन्यत्रापि—

उज्जटे पर्वते वापि निर्जने चा चतुष्पथे। देवागारे च शून्ये च निर्जनैकान्तवेश्मनि।। १।।

इति। वीरतन्त्रेऽपि—

शून्यागारे श्मशाने यदि जपति जड[2]स्त्वेकलिङ्गे तडागे
गङ्गागर्भे गिरौ वा शुचिविम[3]लमतिः सर्वदा भक्तियुक्तः।
विद्यां श्रीनीलवाण्या भुवनजनपतिः सर्वशास्त्रार्थवेत्ता
देहान्ते योगिमुख्यः परमसुखपदं ब्रह्म निर्वाणमेति।। १।।

---

१. 'पञ्चपञ्च' ख. पाठः। २. 'ततः' क. पाठः। ३. 'रमल' ख. पाठः।

इति। ताराचमनं भैरवतन्त्रे—

ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत् करम्। स्त्रीं हूं ओष्ठौ द्विरुन्मृज्य फट्कारैः क्षालयेत् करम्।।१।।
आस्यनासेक्षणश्रोत्रनाभिवक्षःशिरोभुजान्। वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते ।। २।।
आचम्य भैरवो भूत्वा वत्सरात्तां प्रपश्यति।..।।

ताराभेदैरिति—उग्रतारा एकजटा नीलसरस्वती च। वैरोचनादयस्तु—वैरोचनशङ्खपाण्डुरपद्मनाभ (असिताख्य) मामकनामकतारकपाण्डुरपद्मान्तकयमान्तकविघ्नान्तकनरका[1]न्तकाः सचतुर्थीप्रणवादिनमोन्तकाः। इति।

अथ पूजा—प्रातःकृत्यादिस्नानान्तं कर्म विधाय यागस्थानं गत्वा ''ॐवज्रोदके हुंफट् स्वाहा'' इति मन्त्रेण जलमधिष्ठाय एतज्जलं पूजार्थं विधाय तत्र किञ्चिदन्यजले निक्षिप्य तेनैव वारिणा 'ॐ ह्रींविशुद्ध सर्वपापानि शमयाशेषविकल्पमपनय हुंफट् स्वाहा'' इति हस्तपादौ प्रक्षाल्य कुलकुशान् सुवर्णरजतरूपान् यथासंख्येन हस्ते दत्त्वा ''ॐह्रींस्वाहा'' इत्याचम्य पीठं विचिन्तयेत्। कुलकुशास्तु—

सुवर्णं रजतं चैव जपपूजादिकर्मसु। कुशकार्यकरं प्रोक्तं न तु वन्याः कुशाः कुशाः।। ३।।

इति। ततः—

जलशङ्खं करे कृत्वा तिष्ठेद् द्वारि महेश्वरि। क्षालयेद्धस्तपादौ च वक्ष्यमाणेन वर्त्मना।। १।।

इति। मत्स्यसूक्ते—''तारं वज्रोदके हुंफट् स्वाहा जलमधिष्ठितम्।'' तथा च—

(तारं) लज्जा विशुद्धान्ते सर्वपापानि चैव हि। शमयान्ते त्वशेषान्ते विकल्पपदमुच्चरेत्।। १।।
अपनयान्ते वर्म फट् स्वाहा पादविशुद्धये। ॐ माया वह्निजाया च तथा चाचमने मनुः।। २।।

इति। तथा—

श्मशानं तत्र सञ्चिन्त्य तत्र कल्पद्रुमं स्मरेत्। तन्मूले मणिपीठं च नानामणिविभूषितम्।। १।।
नानालङ्कारभूषाढ्यं मुनिदेवैश्च शोभितम्। शिवाभिर्बहुमांसास्थिमोदमानाभि[3]रन्वितम्।। २।।
चतुर्दिक्षु शिवामुण्डचिताङ्गारास्थिभूषितम्। तन्मध्ये भावयेद् देवीं यथोक्तध्यानयोगतः।। ३।।

इति ध्यात्वा 'ॐमणिधरि वज्रिणि महाप्रतिसरे हुंफट् स्वाहा' इति शिखाबन्धनं कुर्यात्। सामान्यार्घ्यं विधाय, फट् इति त्रिवारं सम्प्रोक्ष्य गां गणेशाय नमः। एवं वां वटुकाय०, क्षां क्षेत्रपालाय०, यां योगिनीभ्यो नमः। इति द्वारं सम्पूज्य वास्तुपुरुषं पूजयेत्। शिखाबन्धनानन्तरं मत्स्यसूक्ते सामान्यार्घ्यमाह—

फडित्युक्त्वा हृदापूर्य तारेण दश मन्त्रयेत्। फटा द्वारं प्रोक्षयेच्च बीजेनाभ्यर्चयेत् सुरान्।। १।।
गांवांक्षांयां च बीजानि तान्युक्तानि महेश्वरि। गणेशं वटुकं क्षेत्रपालं च योगिनीर्यजेत्।। २।।
ङेन्तानेतांश्च सर्वान्ते हृन्मन्त्रं विलिखेत्ततः। पूजयित्वा ततो गेहं प्रविशेद् गृह[4]मध्यतः।। ३।।
ब्रह्माणं वास्तुदेवं च तारादिहृदयान्तकम्।...।।

इति। ॐरक्षरक्षहूंफट् स्वाहा इति जलसेका[5]द्भूमिं शोधयेत्। ''ॐसर्वविघ्नानुत्सारय हूंफट् स्वाहा'' इति नाराचमुद्रया

---

१. 'रान्तकाः' ख. पाठः। २. 'इति त्रिरा' ख. पाठः। ३. 'रावृ' ख. पाठः। ४. 'बाह्य' ख. पाठः। ५. 'लाभिषेकात्' ख. पाठः।

अक्षतप्रक्षेपेण वामपार्ष्णिघातत्रयेण (भौमानूर्ध्वतालत्रयेणान्तरिक्षगान् दिव्यदृष्ट्या दिव्यानिति) त्रिविधविघ्नान् दिव्यान्तरिक्षभौमानुत्सारयेत्। ''ओंपवित्रवज्रभूमे हुंफट् स्वाहा'' इति भूमिमभिमन्त्र्य तत्र कोमलकम्बलविष्टराद्यासनानि यथाप्राप्तान्यास्तीर्य ''ओंआःसुरेखे वज्ररेखे हुंफट् स्वाहा'' इति रक्तचन्दनगन्धपुष्पादिना समभ्यर्च्य स्वस्तिकादिक्रमेण तत्रोपविशेत्। तदुक्तं मत्स्यसूक्ते—

मृदुकोमलमासीनो ह्यन्येषु कम्बलेषु च। विष्टरेषु समासीनः साधयेत् सिद्धिमुत्तमाम्।। १।।
(सङ्ग्रामे पतितं बालं सम्पादितमचूडकम्। षण्मासनिःसृतं प्राप्य चितायां वा तदन्तिके।। २।।)

इति। तन्त्रचूडामणौ—

(तत्र मृद्वासनं देवीपीठमन्त्रेण पूजयेत्। तारं प्रेंकामपीठाय हृदयान्तोऽयमीरितः।। १।।)
तत्र बद्धासनं वीरः स्वात्मानं शोधयेत्ततः।.......................................।।

इति। कोमलादिलक्षणमाह श्रीक्रमे—

(वीरासनाद्यभावे तु मृतासनं शृणु प्रिये)। पञ्चवर्षोत्तरं यावन्मृतं बालमचूडकम्।। १।।
षण्मासाभ्यन्तरं चैव दशमासाच्च पूर्वकम्। गर्भच्युतमृतं बालं गर्भाष्टमात् पुरःसरम्।। २।।
एतत्कोमलमित्याहुर्विष्टरेषु कुशेषु वा।..।।

इति। तथा च तन्त्रे—

अवृत्तचूडको बालो हीनोपनयनः पुमान्। यो मृतः पञ्चमे वर्षे तमेव कोमलं विदुः।। ३।।

पञ्चमे वर्षे पञ्चमवर्षे पूर्णे[1]। आसनपरिमाणमाह —

एकहस्तं द्विहस्तं वा चतुरस्रे समन्ततः। विशुद्धे आसने कुर्यात् संस्कारं पूजनं बुधः।। ४।।

कृष्णसारव्याघ्रचर्माद्यपि आसनम्। ''कृष्णसारद्वीपिचर्म अचूडं कम्बलं तथा। पीतं च श्वेतवर्णं वा आसनाय प्रकल्पयेत्।। प्रोतं च विस्तरेणाथ ह्यथवा कुण्डलीकृतम्।'' इत्यादि। विष्टरेष्वित्यादि कुशपत्रशतकेन वटुकं निर्माय तत्र शवप्राणप्रतिष्ठां कुर्यात्। तत्रैव—

ओंकारं आःसुरेखे च वज्ररेखे ततः परम्। हुंफट्स्वाहा च कुर्यात्तु मण्डलं च शवासने।। ५।।
वीरासनेनोपविश्य सम्पूज्यासनमेव च। चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्।। ६।।

इति। ''ओंमणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष मां हुं फट् स्वाहा'' इति वस्त्राञ्चले रक्षाग्रन्थिं बन्धयेत्। ''ओंआःहुंफट् स्वाहा'' इति व्यापकतया कायवाक्चित्तं शोधयेत्। ''ओं पुष्पकेतुराजार्हते शताय सम्यक्सम्बन्धाय ''ओंपुष्पे पुष्पे महापुष्पे पुष्पभूषिते पुष्पचयावकीर्णे हुं फट् स्वाहा'' इति च पुष्पादि मन्त्रमयं कृत्वा स्वर्णादिपीठे गोरोचनकुङ्कुमादिलिप्ते 'ओंआः सुरेखे वज्ररेखे हुं फट् स्वाहा' इति मन्त्रेणाधोमुखत्रिकोणगर्भाष्टदलपद्मं वृत्तं चतुरस्रं यन्त्रमुद्धरेत्। पद्मस्य पूर्वादिदलेषु मन्त्राक्षराणि लिखेत्। तथा च कुलचूडामणौ—

ततः कुलर[2]सेनैव पीठं निर्माय यत्नतः। आः सुरेखे वज्ररेखे हुंफट् स्वाहा समन्वितम्।। १।।
मन्त्रेणानेन संलिख्य वसुपत्रं मनोहरम्। चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ।। २।।

कुलरसेन स्वयंभूरसेन। वर्णलिखनप्रकारमाह फेत्कारीये—

---

१. 'र्षाभ्यन्तरे' ख. पाठः। २. 'कुशैनै' क. पाठः।

सयोनिं चन्दनेनाष्टपत्रं वृत्तं[1] लिखेत्ततः। मृद्वासनं समासाद्य[2] मायां पूर्वदले लिखेत्।। १।।
मध्यबीजं द्वितीये फमुत्तरे पश्चिमे तु टम्[3]। मध्ये बीजं लिखेत्तार[4] भूतशुद्धिमथाचरेत्।। २।।

इति। तदुक्तं गन्धर्वे–

षट्कोणान्तर्गतं पद्मं भूबिम्बद्वितयं पुनः। चतुरस्रं चतुर्द्वारमेवं वा यन्त्रमालिखेत्।। ३।।
(तन्मध्ये विलिखेन्मन्त्री ताराप्रणवमेव च।)....................................।।

बीजलेखनं तु पूर्ववत्। नीलतन्त्रेऽपि सारस्वतार्थिनां तु विशेषेण यन्त्रान्तरमुक्तम्।

व्योमेन्द्वौरसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्केसरं वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम्।
ताराधीश्वरवारिवर्णविलसद्दिक्कोण[5]संशोभितं यन्त्रं नीलतनोः परं निगदितं सर्वार्थसिद्धिप्रदम्।।
(बिन्दुस्त्रिकोणं च षडस्रयुक्तं वृत्तं तथाष्टरमलं त्रिवृत्तम्।
सभूपुरं चैकजटाविलासगेहं मया यन्त्रमिदं प्रदिष्टम्।।)

इति। (एवमेतेषामन्यतमं विरच्य पुरतो निधायार्चयेत्) पीठस्य पूर्वद्वारे ओंह्रींगां गणतपये नमः। पीठस्य दक्षिणे ओंह्रींवां वटुकाय नमः। पीठस्य पश्चिमोत्तरयोः ओंह्रींक्षां क्षेत्रपालाय नमः। ओंह्रींयां योगिनीभ्यो नमः। ततो मध्ये श्मशानाय नमः। कल्पवृक्षाय नमः। तन्मूले मणिपीठाय नमः। नानालङ्कारेभ्यो नमः, मुनिभ्यः०, देवेभ्य०, बहुमांसास्थिमोदमानाभ्यः शिवाभ्यो नमः। चतुर्दिक्षु शवमुण्डचिताङ्गास्थिभ्यो नमः। इति सर्वत्र नमोन्तेन पूजयेत्। अष्टदलेषु अग्न्यादि ओंलक्ष्म्यै नमः। ओंसरस्वत्यै०। ओंरत्यै०। ओंप्रीत्यै०। ओंकीर्त्यै०। ओंका[6]न्त्यै०। ओंतुष्ट्यै०। पुष्ट्यै नमः। एवमुत्तरोत्तरमभ्यर्च्य तस्य मध्ये ह्सौः सदाशिवमहाप्रेतासनाय नमः।। तदुक्तं सिद्धसारस्वते–

लक्ष्मीः सरस्वती चैव रतिः प्रीतिस्तथैव च। कीर्तिः [7]कान्तिश्च तुष्टिश्च पुष्टिश्चेत्यष्ट शक्तयः।। १।।
देव्या नीलसरस्वत्याः पीठशक्तय ईरिता।....................................।।

इति। वीरतन्त्रे–''तन्मध्ये पूजयेद् देव्या वाहने शवमेव च''। इति, ततो भूतशुद्धिं कुर्यात्। यथा–स्वाङ्के उत्तानौ करौ कृत्वा हंस इति मन्त्रेण कुण्डलिनीं जीवात्मानं वैलोम्येन चतुर्विंशतितत्त्वानि सुषुम्णवर्त्मना परमतेजसि संयोज्य, कुम्भकेन ह्रींकारं रक्तवर्णं नाभौ ध्यात्वा तदुद्भूताग्निना लिङ्गशरीरं सन्दह्य, स्त्रींकारं पीतवर्णं हृदि विचिन्त्य (तदुद्भूतवायुना तद्भस्म प्रोत्सारयेत्। ततो रेचकेन हूंकारं श्वेतवर्णं शिरसि विचिन्त्य) तदुद्भूतेनामृताम्बुना तदस्थि प्लावितं कृत्वा समस्तमपगतव्यथं विश्वमयं शरीरमाप्लावयेत्। तथा च श्रुतिः– षट्त्रिंशत्तत्त्वानि शरीरमिति। तत आत्मानमपगतव्यथं निर्मलं देवताधिया ध्यायेत्। तस्मिन् विश्वव्यापकं अमृतवारिणि आःकारे रक्तपङ्कजं ध्यात्वा तदुपरि टाङ्कारात् श्वेतपङ्कजं विचिन्त्य, तदुपरि नीलसन्निभं हूंकारं ध्यात्वा तदुपरि हुंबीजभूषितां कर्त्रिकां ध्यायेत्। तदुपरि देवतां ''आंह्रींक्रोंस्वाहा'' इति एकादशवारं जपन् प्राणान् प्रतिष्ठाप्य ध्यायेदिति। तदुक्तं फेत्कारीये–

मायां नाभौ रक्तवर्णां ध्यात्वा तज्जातवह्निना। शुष्कं कर्मार्थकं[8] देहं दग्धं सञ्चिन्तयेत् ततः।।१।।

---

[1] 'पद्मं; ख. पाठः। [2] 'द्रुमासनमास्थाय' ख. पाठः। [3] 'फट्' ख. पाठः। [4] 'तारं हूंकारं हूंकारस्य तारा प्रणवत्वेन प्रसिद्धत्वात्। [5] 'वृत्तेन' ख. पाठः। [6] 'शान्त्यै' ख. पाठः। [7] 'शा' ख. पाठः। [8] 'ष्कं पापात्मकं' ख. पाठः।

स्त्रींकारं हृदि पीताभं तदुद्भूतेन वायुना। भस्म प्रोत्सारितं कृत्वा ललाटे चिन्तयेत् तत:।। २।।
कूर्चं तुषारवर्णाभं तदुद्भूतामृतेन च[1]। तदस्थि प्लावितं कृत्वा तारात्मानं विचिन्तयेत्।। ३।।
सर्वव्यथाविनिर्मुक्तं निर्मलं देवतामयम्। भूतशुद्धिं विधायेत्थं शून्यं विश्वं विचिन्तयेत्[2]।। ४।।
निर्लेपं[3] निर्गुणं शुद्धमात्मानं देवता[4]मयम्। अन्तरिक्षे ततो ध्यायेदा:काराद्र[5]क्तपङ्कजम्।। ५।।
(भूतस्तस्योपरि ध्यायेत् टाङ्कारात् श्वेतपङ्कजम्। तस्योपरि पुनर्ध्यायेद् हूङ्कारं नीलसन्निभम्।। ६।।
ततो हूङ्कारबीजात्तु कर्त्रिकां बीजभूषिताम्।) भूतस्तस्यो[6]परि ध्यायेदात्मानं तारिणीमयम्।। ७।।

इति। ततो ध्यानम्—

प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम्। खर्वां लम्बोदरीं भीमां व्याघ्रचर्मावृतां कटौ।। ८।।
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम्। चतुर्भुजां ललज्जिह्वां महाभीमां[7] वरप्रदाम् ।। ९।।
खड्गकर्त्रिसमायुक्तसव्येतरभुजद्वयाम्। कृपालोत्पलसंयुक्तसव्यपाणियुगान्विताम्।। १०।।
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम्। बालार्कमण्डलाकारलोचनत्रयभूषिताम्।। ११।।

इति। पञ्चमुद्राविभूषितामिति, ललाटे श्वेतास्थिपट्टिकाचतुष्टयान्वितकपालपञ्चकान्वितामित्यर्थ:। श्रीशङ्कराचार्येणाप्युक्तम्— ''विचित्रास्थिमालां ललाटे. करालां कपालं च पञ्चान्वितं धारयन्ती''मिति। तत: प्राणायाम:, वामनासापुटेन मूलं चतुर्वारं जप्त्वा वायुं पूरयेत्। तदनु नासापुटौ धृत्वा षोडशवारजपेन वायुं कुम्भयेत्। तदनु दक्षिणनासापुटेनं वाराष्टकावर्तनेन रेचयेत्। दुनर्दक्षिणेनापूर्य वामेन रेचयेत्। पुनर्वामेनापूर्य दक्षिणेन रेचयेत्, इति प्राणायामत्रयं भवति। तत्र ऋष्यादिन्यास:। तद्यथा—शिरसि अक्षोभ्यऋषये नम:। मुखे बृहतीछन्दसे नम:। हृदि श्रीमदेकजटादिदेवताभ्यो नम:। मूलाधारे हूंबीजाय नम:। पादयो: फट् शक्तये नम:। शेषाण्यक्षराण्युच्चार्य सर्वाङ्गे स्त्रींकीलकाय नम:। तदुक्तं वीरतन्त्रे—

अक्षोभ्य ऋषिरेतस्या बृहती छन्द ईरितम्। नीलासरस्वती देवी त्रिषु लोकेषु गोपिता।। १।।
हूंबीजमस्त्रं शक्ति: स्याच्चतुवर्गफलप्रदा।...।।

इति। तत: कालीतन्त्रोक्तमातृकान्यास:। तथा चोक्तम्— ''यथा काली तथा नीला तत्क्रमान्मातृका न्यसेत्''। तद्यथा— अंआंइंईंउंऊंऋंॠंऌंॡं नमो हृदि। एंऐंओंऔंअंअ:कंखंगंघं नमो दक्षभुजे। ङंचंछंजंझंञंटंठंडंढं नमो वामभुजे। णंतंथंदंधंनंपंफंबंभं नमो दक्षिणजङ्घायां। मंयंरंलंवंशंषंसंहंक्षं नमो वामजङ्घायाम्। तत: कराङ्गन्यासौ— ह्रां अखिलवाग्रूपिण्यै अङ्गुष्ठाभ्यां नम:। ह्रीं अखण्डवाग्रूपिण्यै तर्जनीभ्यां नम:। ह्रूं ब्रह्मवाग्रुपिण्यै मध्यमाभ्यां नम:। ह्रैं विष्णुवाग्रूपिण्यै अनामिकाभ्यां नम:। ह्रौं रुद्रवाग्रूपिण्यै कनिष्ठिकाभ्यां नम:। ह्र: सर्ववाग्रूपिण्यै करतलकरपृष्ठाभ्यां नम:।। ह्रां अखिलवाग्रूपिण्यै हृदयाय नम:। ह्रीं अखण्डवाग्रूपिण्यै शिरसे स्वाहा। ह्रूं ब्रह्मवाग्रूपिण्यै शिखायै वषट्। ह्रैं विष्णुवाग्रुपिण्यै कवचाय हुं। ह्रौं रुद्रवाग्रूपिण्यै नेत्रत्रयाय वौषट्। ह्र: सर्ववाग्रूपिण्यै अस्त्राय फट्।। अङ्गुलिनिर्णय उक्त:। अयं तु नीलसरस्वतीपक्षे। तथा च तारामधिकृत्य सिद्धसारस्वते—

---

१. 'तेन वायुना' ख. पाठ:। २. 'भाव' ख. पाठ:। ३. 'र्मलं' ख. पाठ:। ४. 'तारिणी' ख. पाठ:। ५. 'दाकाशा' ख. पाठ:। ६. 'कर्त्र्युपरिगतं' ख. पाठ:। ७. 'भीमरूपां' ख. पाठ:।

अखिलवाग्रूपिणीं प्रोच्य हृदयाय नमो वदेत्। अखण्डवाग्रूपिणीति शिरसे वह्निवल्लभा॥ १॥
ब्रह्मवाग्रूपिणीत्युक्त्वा शिखायै वषडित्यथ। विष्णुवाग्रूपिणीं प्रोच्य कवचाय हुमादिशेत्॥ २॥
रुद्रवाग्रूपिणीत्युक्त्वा नेत्राभ्यां वौषडित्यपि। सर्ववाग्रूपिणीमुक्त्वा अस्त्राय फडिति स्मरेत्॥ ३॥
षड्दीर्घमायया चैव बीजान्ते तानि[1] योजयेत्।..॥

इति। ह्रां एकजटायै अङ्गुष्ठाभ्यां नमः। ह्रीं तारिण्यै तर्जनीभ्यां स्वाहा। ह्रूं वज्रोदके मध्यमाभ्यां वषट्। ह्रैं उग्रजटे अनामिकाभ्यां नमः हुं। ह्रौं महाप्रतिसरे कनिष्ठिकाभ्यां वौषट्। ह्रः पिङ्गोग्रैकजटे करपृष्ठाभ्यां फट्। एवं हृदयादिषु न्यसेत्॥ तथा च एकजटामधिकृत्य नीलतन्त्रे—

बीजान्ते एकजटायै हृदयं परिकीर्तितम्। तारिण्यै शिरसे तद्वद् वज्रोदके शिखा ततः॥ १॥
उग्रजटे च कवचं महाप्रतिसरे तथा। पिङ्गोग्रैकजटे तद्वन्नेत्रास्त्रे परिकीर्तयेत्॥ २॥
षड्दीर्घया मायया च बीजान्ते नाम वाचयेत्।..॥

अत्र वर्णन्यासपीठन्यासौ न लिखितौ, अनुक्तत्वात्। तथा च फेत्कारीये— "अत्रोक्तमाचरेत् सम्यग् नान्यो[2]क्तमाचरेद् बुधः।" कालीषोढा वा कर्तव्या। ततो मूलमुच्चार्य शिर आदिपादपर्यन्तं पादादिशिरोन्तं हृदयादिसुखपर्यन्तमिति व्यापकत्रयं न्यसेत्। ततोऽर्घ्यस्थापनं तद्यथा— स्ववामे त्रिकोणवृत्तचतुरस्रमण्डलं कृत्वा, तत्र साधारं पात्रं निधाय मूलविद्यया जलादिनापूर्य रक्तचन्दनबिल्वपत्राणि अक्षतादीन्निक्षिप्य, अर्घ्यस्याग्नीशासुरवायुमध्ये दिक्षु च—ह्रां अखिलवाग्रूपिण्यै हृदयाय नमः, इत्यादि। ह्रां एकजटायै हृदयाय नमः, इत्यादि वा षडङ्गानि विन्यस्य, अर्घ्यपात्रं मत्स्यमुद्रयाच्छाद्य मूलमन्त्रं दशधा जपेत्। तथा च— 'दशकृत्वो जपेद्विद्यां देवताभावसिद्धये' इति। ततोऽस्त्रेण संरक्ष्य धेनुयोनिमुद्रे प्रदर्श्य तेजोमयं तज्जलं विभाव्य किञ्चित् प्रोक्षणीयपात्रे निक्षिप्य, तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य पूजामारभेत्। भूतशुद्ध्यनन्तरं वा। तथा च फेत्कारीये—

भूतशुद्धिं विधायेत्थमर्घ्यादिस्थापनं चरेत्। प्राणायामं ततः कृत्वा ऋष्यादिन्यासमाचरेत्॥ १॥

इति। ततः पुष्पाञ्जलिं विरच्य आत्माभेदेन देवीं ध्यायेत्। तद्यथा—

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासा परा खड्गेन्दीवरकर्त्रिखर्परधरा[3] हूङ्कारबीजोद्भवा॥
खर्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा स्वयम्॥

एवं विभाव्य, करकलितदूर्वाक्षतरक्तचन्दन(वज्रपुष्पादि)मिलितदिनकरकिरणारुणकुसुमाञ्जलौ मातृकायन्त्रं ध्यात्वा हृदयान्मूलमन्त्रतेजोमयीं शुद्धज्ञानचैतन्यमयीं षट्चक्रभेदेन शिरःस्थितसहस्रदलकमलकर्णिकान्तर्गतपरमशिवं प्रापय्य क्रियासमभिव्याहारेण तदमृताम्बुधौ विश्राम्य तदमृतलोलीभूतां चैतन्यानन्दमयीं तां प्रवहन्नासापुटादानीय मूलेन कल्पितमूर्तावावाहयेत्॥ तन्त्रान्तरे—

देवीं सुषुम्णामार्गेण चानीय ब्रह्मरन्ध्रकम्। वहन्नासापुटे ध्यायेन्निर्यान्तीं स्वाञ्जलिस्थिते॥ १॥
पुष्पे आरोप्य तत्पुष्पं प्रतिमादौ निधापयेत्। देवेशि भक्तिसुलभे परिवारसमन्विते॥ २॥
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव।..॥

---

[1] 'नाम' ख. पाठः। [2] 'नु' ख. पाठः। [3] 'भुजा' ख. पाठः।

ततः पूर्वोक्तक्रमेणावाहनादिकं कृत्वा योन्यादिपञ्चमुद्राः प्रदर्शयेत् पञ्चमुद्रास्तु—'सुमुखं चतुरस्रं च वृत्तं गोमुखमेव च। योनिमुद्रेति विख्याता: मुद्रा: पञ्च नमस्कृतौ'।। ''आवाहनादिमुद्राभि: पञ्चमुद्रा: प्रदर्शये''दिति भैरवीयात्। तास्तु मुद्राप्रकरणेऽनुसन्धेया:। 'आंह्रींक्रों स्वाहा' इति प्राणप्रतिष्ठां कुर्यात्। ततः ''ओं श्रीमदेकजटे वज्रपुष्पं प्रतीच्छ हूफट् स्वाहा'' इत्यनेन षोडशोपचारेण पञ्चोपचारेण वा पूजयेत्। ''ताराद्यमग्निजायान्तमुदीर्य यजनं चरेत्''। तार: कूर्चस्तदादि हूंफडित्यर्थ:। स च वह्निजायान्त इति। (ओं भगवत्येकजटे ह्रींविशुद्धधर्मगात्रि सर्वपापानि शमय सर्वविकल्पानपनय हूंफट् स्वाहा पाद्यं नम:। तारिणि ह्रामिदमाचनीयं स्वधा। ह्रीं मणिधरि वज्रिणि) महाप्रतिसरे इदमर्घ्यं स्वाहा। ह्रींकपालिनि मधुपर्कं स्वधा। श्रीमदेकटजे इदमाचमनीयं सुगन्धिजलं नम:। गन्धपुष्पयोर्विशेषस्त्वयम्—''परमानन्दसौरभ्यपरिपूर्णदिगन्तरम्। गृहाण परमं गन्धं कृपया परमेश्वरि।।'' श्रीमदेकजटे एष गन्धो नम:। ''तुरीयवनसम्भूतं नानागुणमनोहरम्। आनन्दसौरभं पुष्पं गृह्यतां परमेश्वरि।।'' इयं वचोरचना विद्याधराचार्यसम्मता। महातन्त्रे तारिणीनिर्णये—''प्रणवं भगवत्येकजटे माया तत: परम्। (विशुद्धधर्मगात्रित: सर्वपापानि तत्परम्।। शमय सर्वविकल्पानपनय हूंफट् शिर:। अयं पाद्यमनुर्देवि आचमनीयमनुं शृणु। तारं वज्रिणि मायेति तारो माया तत: परम्।) मणिधरि वज्रिणीति महाप्रतिसरे मनु:।। माया कपालिनि मन्त्रो मधुपर्कं सुरेश्वरि।'' ततो योनिमुद्रां प्रदर्श्य, देवि आज्ञापय भगवत्या: परिवारान् पूजयामि, इति प्रार्थ्य आवरणान् पूजयेत्। तथा केसरेषु आग्नीशासुरवायुमध्ये दिक्षु च षडङ्गानि पूजयेत्। आग्नेय्यां ह्रां एकजटे हृदयाय नम:। ऐशान्यां ह्रीं तारिणि शिरसि स्वाहा। नैर्ऋत्यां ह्रं वज्रोदके शिखायै वषट्। वायव्यां ह्रैं कपालिनि कवचाय हुं। मध्ये ह्रौं महाप्रतिसरे नेत्रत्रयाय वौषट्। चतुर्दिक्षु ह्र: पिङ्गोग्रैकजटे अस्त्राय फट्।। नीलसरस्वतीपक्षे तु— ह्रां अखिलवाग्रूपिण्यै हृदयाय नम:, इत्यादिना षडङ्गानि पूजयेत्। ततो देव्या मौलौ ''अक्षोभ्यवज्रपुष्पं प्रतीच्छ हूं फट् स्वाहा'' इति सम्पूजयेत्। तदुक्तं भैरवीये—

वज्रपुष्पं प्रतीच्छेति हूंफट् स्वाहेति मन्त्रत:। एतन्मन्त्रे नाममात्रं भिन्नं चैव न संशय:।।
अनेन मनुना सर्वान् परिवारान् समर्चयेत्।..।।

सर्वत्र प्रणव:। तदुक्तं तत्रैव—''प्रणवं वह्निजायान्तं वज्रपुष्पं विनिक्षिपेत्।'' तत: पीठस्योत्तरे वायव्यादीशानपर्यन्तं गुरुपक्तिं पूजयेत्। तथा च ताराचूडामणौ—

अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान्। ऊर्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वज:।। १।।
दिव्यौघा: सिद्धिदा देवि सिद्धौघाञ्छृणु तत्त्वत:। वशिष्ठ: कूर्मनाथश्च मीननाथो महेश्वर:।। २।।
हरिनाथो मानवौघानथ वक्ष्यामि तद्गुरून्। तारावती भानुमती जया विद्या महोदरी[1]।। ३।।
सुखानन्द: परानन्द: पारिजात: कुलेश्वर:। विरूपाक्ष: फेरवी[2] च कथितं तारिणीकुलम्।। ४।।

अशक्तश्चेदक्षोभ्यमात्रं पूजयेत्। तत: पूर्वादिदलमूले—

महाकाल्यथ रुद्राणी भया[3] भीमा तथैव च। घोरा च भ्रामरी चैव महारात्री च सप्तमी।। ५।।
अष्टमी भैरवी प्रोक्ता योगिनीस्ता: प्रपूजयेत्।..।।

तत: पूर्वादिचतुर्दलेषु वामावर्तेन, ह्रां वैरोचनशङ्खपाण्डुरपद्मनाभासिताङ्गान् पूजयेत्। तत: वह्न्यादिचतुर्दलेषु दक्षिणावर्तेन

---

[1] 'हेश्वरी' ख. पाठ:। [2] 'भैर' ख. पाठ:। [3] 'उमा' ख. पाठ:।

मामकना[1]मकपाण्डुरतारकान् पूजयेत्। ततः पूर्वादिद्वारेषु पद्मान्तकयमान्तकविघ्नान्तकनरकान्तकान् पूजयेत्। तथा च सिद्धसारस्वते–

तथा वैरोचनं शङ्खपाण्डुरं पद्मनाभकम्। असिताङ्गं यजेन्मन्त्री दिक्ष्विन्द्रादिचतुर्दले ।। १ ।।
नामकं[2] मामकं चैव पाण्डुरं तारकं तथा। वह्न्यादिकचतुष्कोणे मन्त्रैः स्वैः स्वैः क्रमाद्यजेत्।।२।।
द्वारपूर्वादितस्तद्वत् पद्मान्तकयमान्तकौ। विघ्नान्तकं समभ्यर्च्य पूजयेन्नरकान्तकम् ।। ३ ।।

इति। नीलतन्त्रे–''वामावर्तक्रमेणैव पूजयेदङ्गदेवताः''। इति। ततो बलिं दद्यात्। ''पूजान्ते भोजनादौ च बलिं मन्त्रेण दापयेत्''। तत्र क्रमः– स्ववामे त्रिकोणवृत्तचतुरस्रमण्डलं कृत्वा पुष्पैस्तमभ्यर्च्य, तत्र विहितबलिद्र[3]व्यभरितं साधारं पात्रं निधाय तद्वामाङ्गुष्ठानामाभ्यां स्पृष्ट्वा ''ओंह्रींएकजटे महायक्षाधिपतये मयोपनीतबलिं गृह्ण२ गृह्णापय२ मम सर्वशान्तिं कुरु २ परविद्यामाकृष्य २ त्रुट २ छिन्धि २ सर्वजगद्वशमानय ह्रींस्वाहा'' इति त्रिः पठित्वा बलिं दद्यात्। तथा च सिद्धसारस्वते– बलिमन्त्रः।

प्रणवं पूर्वमुच्चार्य ह्ल्लेखां च ततः परम्। एकजटे पदान्ते च महाशब्दमुदीरयेत्।। १ ।।
यक्षाधिपदमाभाष्य पतये पदतो मया। उपनीतपदं चोक्त्वा बलिं गृह्णेति च द्विधा।। २ ।।
गृह्णापय द्विधा प्रोक्त्वा मम सर्वपदं तथा। शान्तिं कुरु द्विधा[4] चैव परविद्यामनन्तरम्।। ३ ।।
द्विधाकर्ष्येति च ब्रूयात् त्रुट छिन्धीति च द्विधा। सर्वजगत्पद चोक्त्वा वशमानय इत्यनु।। ४ ।।
माया स्वाहेति मन्त्रोऽयं वल्यादौ विहितः स्मृतः।..।।

इति। ततो रहस्यमालया निगदेनोपांशुना मानसेन वाष्टोत्तरसहस्रं शत वां जपेत्। तथा च–

अष्टोत्तरशतं जाप्यं याव(द्विंश)ज्जीवतिसंख्यया। सहस्रं वा जपेद्देवि नित्यपूजाविधौ पुनः।।१ ।।

अशक्तश्चेद्विंशत्यन्तं नूनं जपेत्। तथा च नीलतन्त्रे– ''सहस्रं शतं विंशतिं वा जपेद्रहस्यमालया।'' तत्र जपरहस्यं यथा–मूलाधारस्वाधिष्ठानमणिपूरकेषु यथासंख्यं बीजत्रयव्याप्तिं तडित्कोटिभास्वरां परस्परानुस्यूतां विभाव्य सर्वतेजोमयं फट्कारं विश्रान्तिरूपं ध्यात्वा उच्चारयेत्। तथा च नीलतन्त्रे–

मन्त्रध्यानं प्रवक्ष्यामि जपात् सार्वज्ञदायकम्। मन्त्रध्यानान्महेशानि शुद्ध्यते ब्रह्महा यतः।। १ ।।
मूलरन्ध्रे तु ह्ल्लेखां सूर्यकोटिसमप्रभाम्। स्वाधिष्ठाने पीतवर्णं द्वितीयं तु विभावयेत्।। २।
नाभौ जीमूतसङ्काशं कूर्चबीजं महाप्रभम्। अस्त्रबीजं हृदि ध्यायेत् कालाग्निसदृशप्रभम्।। ३ ।।
मूलादिब्रह्मरन्ध्रान्तं सर्वां विद्यां विभावयेत्। सूर्यकोटिप्रतीकाशां योगिभिर्दृष्टपूर्विकाम्।। ४ ।।

इत्येवं यथाशक्ति जपित्वा समर्प्य नित्यहोमादिकं चरेत्। तदुक्तं सोमसिद्धान्ते–

नाजप्तः सिध्यते मन्त्रो नाहुतश्च फलप्रदः। नानिष्टो यच्छते कामान् तस्मात् त्रितयमाचरेत्।। १ ।।
पूजया लभते पूजां जपात् सिद्धिर्न संशयः। विभूतिं चाग्निकार्येण सर्वसिद्धिं च विन्दति।। २ ।।

इति। नीलतन्त्रेऽपि–

विद्याहोमं प्रवक्ष्यामि सर्वां सिद्धिं च विन्दति। सपर्यासर्वमापाद्य बलिपूर्वं चरेद्विधिम् ।। १ ।।
ततो जपं तर्पणं च चरेत् साधकसत्तमः। बलिवश्यादिकं चैव ब्राह्मणः समुपाचरेत्।। २ ।।

---

[1] 'लाम' ख. पाठः। [2] 'लाम' ख. पाठः। [3] 'बहिर्बलि' ख. पाठः। [4] 'पदं' ख. पाठः।

विधिवदग्निमानीय क्रव्यादेभ्यो नमस्तदा। मूलमन्त्रं समुच्चार्य कुण्डे वा स्थण्डिलेऽपि वा।। ३।।
भूमौ वा संस्तरेदग्निं व्याहृतित्रितयेन तु। स्वाहान्तेन त्रिधा कृत्वा षडङ्गत्रितयं तत:।। ४।।
ततो देवीं समावाह्य मूलेन षोडशाहुती:। हुत्वा स्तुत्वा नमस्कृत्वा विसृजेद्विन्दुमण्डले।। ५।।

ततो विसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं लक्षजप:। तद्दशांशो होम:। तथा च–

एवं कृत्वा हविष्याशी जपेल्लक्षमनन्यधी:। रहस्यमालामादाय लक्षमेकं सदा जपेत्।। ६।।

रहस्यमाला यथा–

अकस्मान्निहिता सिद्धिर्महाशङ्खाक्षमालया। पञ्चाशन्मणिभिर्माला निर्मिता सर्वसिद्धिदा।। ७।।

महाशङ्खाभावेऽपि स्फाटिकी माला कर्तव्या। तथा च–''महाशङ्खेऽप्यशक्तश्चेत् स्फाटिकीमालया जपेत्।'' तारामन्त्रे तु कुल्लुकाया ज्ञानमावश्यकम्। तथा च मत्स्यसूक्ते–

कुल्लुकां च न जानाति महामन्त्रं जपेन्नर:। पञ्चत्वं जायते तस्य अथवा वातुलो भवेत्।। ८।।

इति। मायातन्त्रे–

कुल्लुकां धारयेच्छीर्षे लिखित्वा भूर्जपत्रके। राजद्वारे सभायां च विजयी भवति ध्रुवम्।। १।।
एवमुक्तेन जप्त्वा तु तद्दशांशस्य होमत:। तद्दशांशं तर्पणं तद्दशांशं ब्राह्मभोजनम्।। २।।
तर्पयेच्च परां देवीं तत्प्रकार इहोच्यते।..।।

ततो गुरुदक्षिणामाचरेत्। तथा च सिद्धसारस्वते–

एवं जपं पुरा कृत्वा दशांशमसितोत्पलै:। आज्याक्तैर्जुहुयान्मन्त्री तद्दशांशेन तर्पणम्।। १।।
कालागरुद्रवोपेतैर्विमलैर्गन्धवारिभि: । तर्पयेच्च परां देवीं तत्प्रकार इहोच्यते ।। २।।
जले चावाह्य विधिवत् पाद्याद्यैरुपचारकै:। सन्तर्प्य विधिवद् देवीं परिवारान् सकृत्सकृत्।। ३।।

इति। अभिषेको यथा–

देवीबुद्ध्यात्मनात्मानं सम्पूज्य साधकोत्तम:। तारिणीं सिञ्चयामीति जलं मूर्ध्नि[1] विनिक्षिपेत्।।४।।

इति। अथ रहस्यपुरश्चरणम्। यथा–

अथवान्यप्रकारेण पुरश्चरणमिष्यते। कुजे वा शनिवारे वा नरमुण्डं समाहृतम्।। १।।
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषत:। निक्षिप्य भूमौ हस्तार्धमानत: कानने वने।। २।।
तत्र तद्दिवसे रात्रौ सहस्रं परिमाणत:। एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादप:।। ३।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते। अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि।। ४।।
सूर्योदयं समारभ्य यावत् सूर्योदयान्तरम्। तावज्जप्त्वा निरातङ्क: सर्वसिद्धीश्वरो भवेत्।। ५।।

इति। मुण्डमालातन्त्रे–

अथवान्यप्रकारेण पुरश्चरणमिष्यते। शरत्काले चतुर्थ्यादिनवम्यन्तं विशेषत: ।। १।।
भक्तित: पूजयित्वा तु रात्रौ तावत्सहस्रकम्। जपेदेकाकी विजने केवलं तिमिरालये।। २।।
अष्टम्यादिनवम्यन्तमुपवासपरो भवेत्। कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत्।। ३।।

---

१. 'जपन्' ख. पाठ:।

सहस्रसंख्ये जप्ते तु पुरश्चरणमिष्यते। कृष्णां चतुर्दशीं प्राप्य नवम्यन्तं महोत्सवे।। ४।।
अष्टमीं नवमीं रात्रौ पूजां कुर्याद्विशेषतः। दशम्यां पारणां कुर्यान्मत्स्यमांसादिभिर्युतम्।। ५।।
षट्सहस्रं जपेन्मन्त्रं नित्यं भक्तिपरायणः। चतुर्दशीं समारभ्य यावदन्या चतुर्दशी।। ६।।
तावज्जप्त्वा महेशानि पुरश्चरणमिष्यते। केवलं जपमात्रेण मन्त्राः सिद्धा भवन्ति हि।। ७।।

इत्यादिकं वीरसाधनाद्याचारादि प्रागुक्तं बोद्धव्यम्।। अथ श्यामातारयोर्मन्त्राणां लघूद्धारक्रमस्तु तन्त्रान्तरे—

ताराभेदा अथोच्यन्ते शीघ्रसिद्धिप्रदायिनः। वह्निवामाक्षिबिन्द्वाढ्या कामिका भुवनेश्वरी।। १।।
भुवनेशी वर्मरुद्धा फडन्ता प्रणवादिका। सप्ताक्षरी महाविद्या विरिञ्चिसमुपासिता।। २।।

"ओंत्रींह्रींहुंह्रींहु फट्।" इति स्वरूपम्। तथा—

वाक्शक्तिः कमला कामो हंसोऽनुग्रहसर्गवान्। वर्मोग्रतारे वर्मास्त्रं विष्णवर्च्या द्वादशाक्षरी।। ३।।

"ऐंह्रींश्रींक्लींसौ:हुं उग्रतारे हुं फट्।" इति स्वरूपम्। तथा—

तारं वर्म शिवा कामो मनुसर्गयुतो भृगुः। वर्मास्त्रमेषा सप्तार्णा सिद्धिदा विष्णुसेविता।। ४।।

"ओंहुंह्रींक्लींसौः हुं फट्। इति स्वरूपम्।

एतयोः पञ्चमे बीजे सकारो हादिरन्तिमः। सदा विद्याद्वयं प्रोक्तं चतुर्मुखसमर्चितम्।। ५।।

"ऐंह्रींश्रींक्लींह्सौः हुं उग्रतारे हुं फट्। ओंहुंह्रींक्लींह्सौः हुं फट्।" इति स्वरूपद्वयम्। "तारो माया वर्ममाया वर्मास्त्रं च रसाक्षरी।" "ओंह्रींहुंह्रींहु फट्" इति स्वरूपम्। तथा—

हरिरग्नित्रिमूर्तीन्दुयुग्वर्मपुटिताद्रिजा। अस्त्रान्ता पञ्चवर्णेयं प्रोक्ता एकजटाह्वया ।। ६।।

"त्रीहुंह्रींहु फट्" इति स्वरूपम्। तथा—

रेफशान्तीन्दुयुग् णान्तो वर्मास्त्रं कामवाग्भवे। नारायणोपासितेयं पञ्चार्णा सर्वसिद्धिदा।। ७।।

त्रींहुंफट्क्लींऐं" इति स्वरूपम्।

अमूपामष्टविद्यानामृषिः शक्तिर्वशिष्ठजः। गायत्रीतारके छन्दोदेवते परिकीर्तिते।। ८।।
न्यासं तु पूर्ववत्[1] कृत्वा ध्यायेत् तारां हृदम्बुजे।...............................।।
श्वेताम्बरां शारदचन्द्रकान्तिं स[2]द्भूषणां चन्द्रकलावतंसाम्।
कर्त्रीकपालाञ्चितपाणिपद्मां तारां त्रिनेत्रां प्रभजेऽखिलर्द्ध्यैः।। ९।।
जपपूजादिकं सर्वमासां पूर्ववदाचरेत्। मधुयुक्परमान्नेन होमाद् विद्यानिधिर्भवेत् ।। १०।।
रक्तां वशे स्वर्णवर्णां स्तम्भने मारणेऽसिताम्। उच्चाटने धूम्रवर्णां शान्तौ श्वेतां स्मरेदिमाम्।। ११।।
भूरिणा किमिहोक्तेन विद्या एताः प्रसाधिताः। पूरयन्त्यखिलं नृणां मनोरथमिह ध्रुवम्।। १२।।

इति। तथा—

मायाहृद्भगवत्येकजटे मम जलं स्थिरा। वह्न्यासनगता पुष्पं प्रतीच्छानलवल्लभा।। १३।।
द्वाविंशत्यक्षरो मन्त्रस्तारादि पूर्वसिद्धिदः।..।।

ओंह्रींनमो भगवत्येकजटे मम वज्रपुष्पं प्रतीच्छ स्वाहा" इति स्वरूपम्।

---

१. 'पूर्ववत् षड्दीर्घमायया' ख. पाठः। २. 'शुभ्रांसु' ख. पाठः।

ऋषिः पतञ्जलिश्छन्दो गायत्र्येकजटा पुनः। देवता दीर्घषट्काद्यमायया स्यात् षडङ्गकम्।। २१।।
ध्यानार्चनप्रयोगांस्तु कुर्यात् पूर्वोक्तमन्त्रवत्।..।।

इति। तथा—

रमा माया हसौ व्यापिन्यारूढौ सर्गसंयुतौ। वर्मास्त्रं नीलभृगुरस्वत्यै ठद्वयमीरितः।। २२।।
प्रणवाद्यो मनुः सर्वसिद्धिदो मनुवर्णकः।...।।

''ओंश्रींह्रींह्सौः हुंफट् नीलसरस्वत्यै स्वाहा।'' इति स्वरूपम्।

ऋष्याद्या ब्रह्म गायत्री तथा नीलसरस्वती। नेत्रचन्द्रेन्दुनेत्राङ्गनेत्रार्णैरङ्गकल्पना।। २३।।
मन्त्रोत्थितैरथो ध्यायेद् देवीं सर्वेष्टसिद्धिदाम्।.....................................।।
घण्टां शिरः शूलमसिं कराग्रैः सम्बिभ्रतीं चन्द्रकलावतंसाम्।
प्रमर्षन्तीं पादतले पशुं तां भजे मुदा नीलसरस्वतीं ताम्।। २४।।
जपपूजादिकं सर्वमस्याः पूर्ववदीरितम्। विशेषाज्जयदा वादे विद्येयं साधिता नृणाम्।। २५।।

इति। तथा—

माया सैवानन्तयुक्ता वर्महृत्ङेयुता पुनः। तारा महापदाद्या सा भृगुब्रह्मानलान्तिमाः।। २६।।
दुस्तरं तारयद्वन्द्वं तरयुग्मं च ठद्वयम्। द्वात्रिंशदर्णा ताराद्या मुनिभिः पूर्ववन्मता।। २७।।

इति। ''ओंह्रींह्रांहुं नमस्तारायै महातारायै सकलदुस्तरं तारय २ तर २ स्वाहा'' इति स्वरूपम्। तथा—

विद्याराज्ञीमथो वक्ष्ये सुरेन्द्रस्यापि दुर्लभाम्। लब्ध्वा यां मानवाः स्वेष्टान् साधयन्त्यर्चने रताः।।१ ।।
वाङ्माया श्रीर्मनोजन्मा हंसोऽनुग्रहबिन्दुयुक्। कामः शक्तिश्च वाग्बीजं फान्तो लार्घीशबिन्दुयुक्।।२।।
स्त्रीबीजं नीलतारे स्यात् सम्बुध्यन्ता सरस्वती। अत्री सरेफौ क्रमतः शेषवामाक्षिसंयुतौ।। ३।।
सानुस्वारौ कामबीजं फान्तो मांसाग्निबिन्दुकः। सर्गी भृगुर्वाग् हृल्लेखा रमा कामश्च सौद्वयम्।।४।।
सर्गान्तं भुवनेशानी स्वाहा द्वात्रिंशदक्षरा। महाविद्या समाख्याता सेविता भोगमोक्षदा।। ५।।

''ऐंह्रींश्रींक्लींसौंक्लींह्रींऐंब्लूंस्त्रीं नीलतारे सरस्वति द्रांद्रींक्लींबलूंसःऐंह्रींश्रींक्लींसौः सौः ह्रीं स्वाहा'' इति स्वरूपम्। तथा—

ब्रह्मानुष्टुप्सरस्वत्योर्मुन्याद्या अङ्गकल्पना। पञ्चपञ्चाष्टपञ्चेषुयुगार्णैर्मन्त्रसम्भवैः ।। ६।।
नौकासनां सर्पविभूषणाढ्यां कर्त्रीं कपालं चषकं त्रिशूलम्।
करैर्दधानां नरमुण्डमालां त्र्यक्षीं भजे नीलसरस्वतीं ताम्।। ७।।
चतुर्लक्षं जपेद्विद्यां किंशुकैर्मधुरान्वितैः। दशांशं जुहुयाद्वह्नौ श्रद्धापूर्वमतन्द्रितः।। ८।।
पूर्वोक्ते पूजयेत् पीठे वक्ष्यमाणेन वर्त्मना। आदौ त्रिकोणं षट्कोणमष्टषोडशपत्रके।। ९।।
द्वात्रिंशत्पत्रमब्जं स्याच्चतुःषष्टिदलं ततः। त्रिरेखाढ्यधरागेहं चतुरस्त्रमतः परम्।। १०।।
एवं यन्त्रं समालिख्य बाह्यतः पूजनं चरेत्। चतुरस्त्राग्निकोणेषु विघ्नेशं परिपूजयेत्।। ११।।
वायुकोणे क्षेत्रपालमीशाने भैरवं तथा। नैर्ऋते योगिनीस्त्वर्च्या वामभागे गुरुं यजेत्।। १२।।

भूगृहस्याद्यरेखायामणिमा लघिमा तथा। महिमा चेशिता पूज्या वशिता कामपूरणी।। १३।।
गरिमा प्राप्तिरित्येताः पूज्याः पूर्वादिदिक्क्रमात्। धरागृहस्य रेखायां द्वितीयायां तु भैरवान्।। १४।।
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तकपालिनः। भीषणश्चाथ संहार एतेऽष्टौ भैरवाः स्मृताः।। १५।।
भूमिगेहतृतीयायां रेखायां मातरः पुनः। ब्राह्मी माहेश्वरी चाथ कौमारी वैष्णवी तथा।। १६।।
वाराहीन्द्राणिका चैव चामुण्डा सप्तमी स्मृता। महालक्ष्मीर्दलेष्वर्च्याः पूर्वादिषु यथाक्रमम्।।१७।।
इत्थमाद्यावृतिं चेष्ट्वा योनिमुद्रां प्रदर्शयेत्। चतुःषष्टिदले पद्मे शक्तीरर्चेच्च तावतीः।। १८।।
कुलेशी कुलनन्दा च वागीशी भैरवी तथा। उमा श्रीः शान्तपा चण्डा धूम्रा काली कपालिनी।।१९।।
महालक्ष्मीश्च कङ्काली रुद्रकाली सरस्वती। वाग्वादिनी च नकुली भद्रकाली शशिप्रभा।। २०।।
प्रत्यङ्गिरा सिद्धलक्ष्मीरमृतेशी च चण्डिका। खेचरी भूचरी सिद्धा कामाख्या हिङ्गुला धरा।।२१।।
जया च विजया चाथ जिता नित्यापराजिता। विलासिनी तथा घोरा चित्रा मुग्धा धनेश्वरी।।२२।।
सोमेश्वरी महाचन्द्रा विद्या हंसी विनायका। वेदगर्भा तथा भीमा उग्रा वैद्या च सद्गतिः।। २३।।
उग्रेश्वरी चन्द्रगर्भा ज्योत्स्ना सत्या यशोवती। कुलिका कामिनी कामा ज्ञानवत्यथ डाकिनी।।२४।।
राकिणी लाकिनी चाथ काकिनी शाकिनीत्यपि। हाकिनीति चतुःषष्टिशक्तयः सिद्धिदायिकाः।।२५।।
दर्शयेत् खेचरीमुद्रां द्वितीयावरणेऽर्चिते। द्वात्रिंशत्पत्रमध्ये तु पूज्या एतास्तु शक्तयः।। २६।।
किराता योगिनी वीरा वेताला यक्षिणी हरा। ऊर्ध्वकेशी च मातङ्गी मोहिनी वंशवर्द्धिनी।। २७।।
मालिनी ललिता दूती मनोज्ञा पद्मिनी धरा। बर्बरी छत्रहस्ता च रक्तनेत्री विचर्चिका।। २८।।
मातृका दूरदर्शा च क्षेत्रेशी रङ्गिनी नदी। शान्तिर्दीप्ता वज्रहस्ता धूम्रा श्वेता सुमङ्गला।। २९।।
इच्छा तृतीयावरणं बीजमुद्रां प्रदर्शयेत्। ततः षोडशपत्रेषु पूज्याः षोडशशक्तयः।। ३०।।
मुग्धा श्रीः कुरुकुल्ला च त्रिपुरा तोतला क्रिया। रतिः प्रीतिस्तथा बाला सुमुखी श्यामलाविला।३१।
पिशाची च विदारी च शीतला वज्रयोगिनी। सर्वेश्वरीति सम्पूज्य सृणिमुद्रां प्रदर्शयेत्।। ३२।।
अष्टपत्रे स्वस्वमन्त्रैर्यजेदष्ट सरस्वतीः।...।।

इति। ता यथा—

तारो हृल्लोहितः सत्यो वैकुण्ठानन्तसंयुतः। भृगुर्नेशब्दरूपे वाग् माया कामो वद द्वयम्।। १।।
वाग्वादिन्यग्निकान्तान्तो मन्त्रो वेदाक्षिवर्णवान्। अनेन मनुना पूर्वपत्रे वागीश्वरीं यजेत्।। २।।

"ॐनमः पद्मासने शब्दरूपे ऐंह्रींक्लीं वद वद वाग्वादिनि स्वाहा।" इति वागीश्वरीमन्त्रः।। १।।

वराहहंसचक्रेन्द्रसंयुता भुवनेश्वरीं यजेत्। वदयुग्मं च चित्रेश्वरि वाग्बीजानलप्रिया।।
द्वादशार्णेन मनुना वह्नौ चित्रेश्वरीं यजेत्।...।।

"हसकलह्रीं वदवद चित्रेश्वरि ऐं स्वाहा।" इति चित्रेश्वरीमन्त्रः।। २।। तथा—

वाग्बीजं कुलजे वाक्च सरस्वत्यनलाङ्गना। एकादशार्णमनुना कुलजां दक्षिणे यजेत्।। ४।।

''ऐं कुलजे ऐं सरस्वति स्वाहा।'' इति कुलजामन्त्रः।। ३।।

वाङ्माया श्रीवर्दद्वन्द्वं कीर्तीश्वरि वसुप्रिया। त्रयोदशार्णेन यजेन्नैर्ऋत्ये कीर्तिनायिकाम्।। ५।।

ऐंह्रींश्रीं वद वद कीर्तीश्वरि स्वाहा।'' इति कीर्तीश्वरीमन्त्रः।। ४।।

वाङ्माया चान्तरिक्षान्ते सरस्वति च ठद्वयम्। रव्यर्णेन यजेत् प्रत्यगन्तरिक्षसरस्वतीम्।। ६।।

''ऐंह्रीं अन्तरिक्षसरस्वति स्वाहा।'' इति अन्तरिक्षसरस्वतीमन्त्रः।। ५।।

वराहहंसचण्डीशजनार्दनकृशानुयुक्। सेन्दुर्योनिश्च नकुलिभृगुरर्धेन्दुयुग्मनुः ।। ७।।
अरुणाभृगुशिख्यग्निसंयुता शान्तिरिन्दुयुक्। वाङ्मायाश्रीषुबीजानि घ्नीं घटान्ते सरस्वति।। ८।।
घटे वदतरद्वन्द्वं रुद्राज्ञया युता मम। अभिलाषं कुरुद्वन्द्वं प्रेयसी कृष्णवर्त्मनः ।। ९।।
गुणवेदार्णेन यजेद्वायौ घटसरस्वतीम्।..................................।।

''हसखफ्रें हसौं हसफ्रीं ऐंह्रींश्रीं द्रांद्रींक्लींब्लूंसःघ्नीं घटसरस्वति घटे वदतर वदतर रुद्राज्ञया ममाभिलाषं कुरु कुरु स्वाहा।'' इति घटसरस्वतीमन्त्रः।। ६।।

भूधरेन्द्रयुतोऽर्घीशो बिन्द्वाढ्यो वे वदद्वयम्। त्रींहुंफट् नववर्णेन नीलामर्चेदुदग्दिशि।। १०।।

''ब्लूंवें वद वद त्रींहुफट्।'' इति नीलामन्त्रः।। ७।।

वाग्बीजमधराक्रान्तो नकुली बिन्दुमान् पुनः। शान्तिचन्द्राढ्यमाकाशं किणिद्वन्द्वं सदृग्जलम्।।११।।
कूर्मद्वन्द्वं भगाक्रान्तं नवार्णेनामुना यजेत्। मन्त्रेणेशानदिग्भागे किणिसंज्ञां सरस्वतीम्।। १२।।

ऐंहौंहीं किणि किणि विच्चे।'' इति किणिसरस्वतीमन्त्रः।। ८।।

पञ्चमावृतिमाराध्य क्षोभमुद्रां प्रदर्शयेत्। डाकिन्याद्याः पूर्वमुक्ताः षट्कोणे षट् प्रपूजयेत्।। १३।।
दर्शयेद् द्राविणीमुद्रां षष्ठावरणपूजने। परा बाला भैरवीति पूजनीयास्त्रिकोणके।। १४।।
सप्तमावृतिपूजायां मुद्रां कुर्याच्च कर्षिणीम्। इत्थं सम्पूज्य तारेशीं मनोऽभीष्टमवाप्नुयात्।। १५।।
गणेशाय क्षेत्रपालयोगिन्यै भैरवाय च। तारायै चापि वितरेद्बलिं नित्यं चतुष्पथे।। १६।।
मांसमाषान्नशाकाज्यपायसापूपकादिकम्। बलिद्रव्यं समाख्यातं तेनेष्टं सा प्रयच्छति।। १७।।
तस्या ध्यानं त्रिधा वच्मि सत्त्वादिगुणभेदतः। श्वेताम्बराढ्यां हंसस्थां मुक्ताभरणभूषिताम्।। १८।।
चतुर्वक्त्रामष्टभुजैर्दधानां कुण्डिकाम्बुजे। वराभये पाशशक्ती अक्षस्रक्पुष्पमालिके।। १९।।
शब्दपाथोनिधौ ध्यायेत् सृष्टिध्यानं समीरितम्। रक्ताम्बरां रक्तसिंहासनस्थां हेमभूषिताम्।। २०।।
एकवक्त्रां वेदसंख्यैर्भुजैः सम्बिभ्रतीं क्रमात्। अक्षमालां पानपात्रमभयं वरमुत्तमम्।। २१।।
श्वेतद्वीपस्थितां ध्यायेत् स्थितिध्यानं समीरितम्। कृष्णाम्बराढ्यां नौसंस्थामस्थ्याभरणसंयुताम्।।२२।।
नववक्त्रां भुजैरष्टादशभिर्दधतीं वरम्। अभयं परशुं दर्वीं खड्गं पाशुपतं हलम्।। २३।।
भिण्डिं शूलं च मुशलं कर्त्रीं शक्तिं त्रिशीर्षकम्। संहारास्त्रं वज्रपाशौ खट्वागं गदया सह।। २४।।
रक्ताम्भोधौ स्थितां ध्यायेत् संहारध्यानमीदृशम्। कर्मसु क्रूरसौम्येषु ध्यायेन्मन्त्री यथातथा।। २५।।
एवं सिद्धे मनौ मन्त्री गिरा वाचस्पतिर्भवेत्। दूर्वोत्थया तु लेखिन्या रोचनारसयुक्तया।। २६।।

बालस्याच्छिन्ननालस्य ज़िह्वायां विलिखेन्मनुम्। सम्प्राप्ते चाष्टमे वर्षे सर्वशास्त्रज्ञतामियात्।।२७।।
अयुतमन्त्रसञ्जप्तां वचां बालककण्ठतः। बध्नीयात् पूर्वसम्प्रोक्तं बलिं दद्याद्विधानतः।। २८।।
द्वादशे वत्सरे प्राप्ते भक्षिता सा कवित्वकृत्। ज्योतिष्मतीभवं तैलं कर्षमात्रं तु मन्त्रितम्।। २९।।
उपरागे जलस्थो यो जग्ध्वा वाचस्पतिर्भवेत्। चतुष्पथे श्मशाने वा हित्वा लज्जां भयं तथा।।३०।।
जपेच्छवं समारुह्य विद्यां तत्परमानसः। शृणोत्यसावमुं शब्दं निशीथे जपतत्परः।। ३१।।
पारगो भव विद्यानां सर्वसिद्धिमवाप्नुहि। विद्वत्कुलसमुद्भूतमष्टवर्षं शिशुद्वयम्।। ३२।।
उपवेश्य तयोर्मूर्ध्नि करौ दद्याज्जपेन्मनुम्। वेदान्तन्यायसंयुक्त्या विवदेते उभावपि।। ३३।।
यः कौतुकी स आश्चर्यं विद्यायाः पश्यतु ध्रुवम्। विधाय वेदिकां रम्यां विजने कदलीवने।। ३४।।
तत्रासीनो जपेद्विद्यामेकलक्षं विधानतः। दासीचालितदोलायामारूढां सुस्मिताननाम्।। ३५।।
पुंनागचम्पकाशोकधरां विपिनसंस्थिताम्। एवं ध्यायन् भगवतीं बलिं दद्याज्जपान्ततः।। ३६।।
एवं कुर्वन्नरः सर्वमभीष्टं लभतेऽचिरात्। निर्वासाः विशिखः प्रेतभूमिस्थो यो जपेन्मनुम्।। ३७।।
अयुतं कृष्णभूताहे स वाक्सिद्धिमवाप्नुयात्। विद्यां सौख्यं धनं पुष्टिमायुःकीर्तिबलं स्त्रियः।।३८।।
रूपं कामयमानेन तारा सेव्या निरन्तरम्।...।।

इति। एकवीराकल्पे—

लिखेत् खं कूर्चसंयुक्तं रौद्रं त्रैगुण्यमेव च। विधिविष्णुमहेशानां स्वशक्त्या क्रमयोगतः।। १।।
एषा मता महाविद्या सर्वसिद्धिप्रदा सदा। ....।।

अस्यार्थः, खं स्वरूपं, रौद्रं, प्रासादं, त्रैगुण्यं प्रणवं, विधिशक्तिर्वाग्भवं, विष्णुशक्तिः रमाबीजं, महेशशक्तिर्भुवनेश्वरीबीजम्। “खंहूंह्सौःॐऐंश्रींह्रीं” ध्यानार्चनप्रयोगश्च पूर्ववद्भवेत्।। प्रणवं भुवनेश्वरीं हां कूर्चबीजं नमस्तारायै सकलदुस्तरं तारय तारय प्रणवयुग्मं वह्निजाया। तथा च नीलतन्त्रे—

प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत्। गगनं शेषसंयुक्तं बिन्दुनादविभूषितम्।। १।।
कूर्चबीजं च हृदयं तारायै च समुद्धरेत्। सकलदुस्तरं तारय तारयेति तथा पुनः।। २।।
तारयुग्मं वह्निजाया मन्त्रोऽयं सुरपादपः। ध्यानपूजादिकं सर्वं पूर्ववत् समुपाचरेत्।। ३।।

“ॐह्रींहांहूं नमस्तारायै सकलदुस्तरं तारय तारय ॐॐ स्वाहा।” अस्याः पुरश्चरणं चतुर्लक्षजपः। तदुक्तं तत्रैव— “चतुर्लक्षजपेनास्याः सिद्धयोऽष्टौ भवन्ति च।” मायातन्त्रे—

तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती। कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृताः।। १।।
उष्णवर्णगतो जीवो निगमस्वरसंयुतः। नादबिन्दुसमाक्रान्तस्तत्त्वरश्मिसमन्वितः ।। २।।
कपिलं वामकर्णस्थं नादाढ्यबिन्दुशेखरम्। पार्श्वान्त्यं च तथा ञान्त्यं शवान्तं परिकीर्तितम्।।३।।
मध्यादिमायाकूर्चान्तं द्वितीयं मन्त्रमुद्धृतम्। विपरीतं त्रिधा ज्ञेयं कूर्चाद्यं च तुरीयकम्।। ४।।
मायादिकं च कूर्चान्तं पञ्चमं परिकीर्तितम्। मायामध्यगतं षष्ठं द्वितीयान्तं च सप्तमम्।। ५।।
अष्टमं कूर्चमध्यं स्यादेवं भेदाष्टकं भवेत्।...।।

उष्णवर्णो रेफ:। जीवो हकार:। निगमस्वर: ईकार:। तत्त्वरश्मिर्वधूबीजं। कपिलो हकार:। शवान्तं फडन्तं। तेन पञ्चाक्षर उद्धृत:। फडन्तश्चैका विद्या। तेन पञ्चाक्षरश्च प्रकृति:। मध्यादीति, तेन वधूर्माया कूर्चं फट्। विपरीतमिति, तेन कूर्चवधूमायाफट्। कूर्चेति कूर्चमायावधूफट्,। मायावधूकूर्चं फट्। वधूमायाकूर्चं फट्। मायाकूर्चवधूफट्। अष्टममिति वधूकूर्चमायाफट्। स्पष्टं यथा– ह्रींस्त्रींहूँ फट्।।१।। स्त्रींह्रींहूं फट्।। २।। हूँस्त्रींह्रीं फट्।। ३।। हूंह्रींस्त्रीं फट्।। ४।। ह्रींस्त्रींहूं फट्।। ५।। स्त्रींह्रींहूं फट्।। ६।। ह्रींहूंस्त्रीं फट्।। ७ स्त्रींहूंह्रीं फट्।। इति,

ऋषि: स्यादष्टकश्छन्दोऽनुष्टप् च देवता तथा। शम्भुपत्नी महेशानि चतुर्वर्गेषु योजयेत्।। ६।।
त्र्यक्षरस्यैव भेदोऽयं फटौ यत्र न तत्र वै। जाप्ये तु त्र्यक्षरं ज्ञेयं न्यासे सर्वं प्रतिष्ठितम्।। ७।।
काललक्षं जपेन्मन्त्रमेवमुक्तेन वर्त्मना। ध्यानपूजादिकं सर्वं पूर्ववत् समुपाचरेत्।। ८।।

इति। ''प्रणवं तारे तुतारे तत्ता स्वाहा।'' तदुक्तं गन्धर्वतन्त्रे–

प्रणवं पूर्वमुद्धृत्य तारे तुतारे च तथा। तत्ता स्वाहेति मन्त्रोऽयं दशाक्षर उदाहृत:।। १।।

इति। अस्या ध्यानं स्वतन्त्रतन्त्रे–

श्यामवर्णां त्रिनयनां द्विभुजां रक्तपङ्कजे। बिभ्राणां बहुरूपाभिर्बहुवर्णाभिरावृताम्।। १।।
शक्तिभि: स्मेरवदनां स्मेरमौक्तिकभूषणाम्। रत्नपादुकयोर्न्यस्तपादाम्बुजयुगां स्मरेत्।। २।।

अस्या: पूजादिकं सर्वं पूर्ववत्। पुरश्चरणं तु दशलक्षजप:। तदुक्तं तत्रैव–

वर्णलक्षं जपेद्धीमान् नियमेन यथाविधि। दशांशं जुहुयान्मन्त्री घृताक्तै रक्तपुष्पकै:।। १।।

''वाग्भवं भुवनेश्वरी प्रणवं वाग्भवं भुवनेश्वरी फट् स्वाहा।'' तदुक्तं मातृकार्णवे–

वाग्भवं कुलदेवीं च तारकं वाग्भवं तथा। हृल्लेखा चास्त्रमन्त्रान्ते वह्निजायावधिर्मुनु:।। १।।
अष्टाक्षरो मनु: प्रोक्तो वेदमातुरनुत्तम:। पञ्चाङ्गान्यस्य मन्त्रस्य पञ्चबीजै: प्रकल्पयेत्।। २।।
अस्त्रं शेषाक्षरैर्न्यस्य कृतकृत्यो भवेन्नर:। ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत्।। ३।।

इति। मत्स्यसूक्ते–

प्रणवं पूर्वमुद्धृत्य पद्मे युग्मं तथैव च। महापद्मे पदं ब्रूयात् पद्मावति पदं तत:।। १।।
माये स्वाहेति मन्त्रोऽयं प्रोक्त: सप्तदशाक्षर:। पूजा पूर्ववदुद्दिष्टा अर्धरात्रे चतुष्पथे।। २।।
जपमस्याचरेद्यस्तु स स्याद् द्रुतकविस्तथा। हंसश्च प्रणवं माया वधू: कूर्चश्च हंसक:।। ३।।
अष्टाक्षरी महाविद्या हंसाद्यन्ता सुदुर्लभा।..।।

हंस: प्रणवं माया वधूबीजं कूर्चं हंस:। तदुक्तं स्वच्छन्दसङ्ग्रहे–

शिवबीजं महेशानि शक्तिबीजं तत: परम्। बिन्दुसर्गसमायुक्तं वेदाद्यं तदध: क्रमात्।।
मायास्त्रीवर्मबीजान्तं हंसबीजमुदाहृतम्। एषा त्वष्टाक्षरी विद्या कथिता भुवि दुर्लभा।।
पञ्चाक्षरी च सा विद्या हंसाद्यन्ता महोदया। केवलं त्वत्प्रयत्नेन तव स्नेहात् प्रकीर्तिता।।
अनयोर्जपपूजादीन् पञ्चाक्षरीवदाचरेत्।..।।

अथ श्यामातारयोर्लघुपूजानुक्रमणिकाप्रसिद्धमन्त्राणामुद्धारक्रम: प्रदर्श्यते। तत्रादौ श्यामाया उत्तरतन्त्रे–

वर्गाद्याद्यं वह्नियुतं रतिबिन्दुसमन्वितम्। त्रिगुणं च ततः कूर्चयुग्मं लज्जायुगं ततः।। १।।
दक्षिणे कालिके चेति पूर्ववच्च ततः पुनः। ठद्वयेन समायुक्तं मन्त्रमेनं विदुर्बुधाः।। २।।

इति। ''क्रींक्रींक्रींहूंहूंह्रींह्रीं दक्षिणेकालिके क्रींक्रींक्रींहूंहूंह्रींह्रीं स्वाहा।'' अयं मन्त्रराजः। कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नो घोरा प्रचोदयात्। इति कालीगायत्री। ''क्रींहूंस्त्रींह्रींफट्।'' इति कालिकायाः कुल्लिका। 'ऐंह्रींश्रींऐं परायै अपरायै परापरायै विरूपायै ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः।' इति कालिकायाः पीठमन्त्रः। 'सिंहव्याघ्रमुखी मृगमेषमुखी गजवाजिमुखी बिडालमुखी क्रोष्टुमुखी ह्रस्वदीर्घमुखी लम्बोदरमुखी ह्रस्वजङ्घा काकजङ्घा लम्बोष्ठी प्रलम्बोष्ठी।' एताः कालिकाया द्वारपालिकाः। ''ओंहूं महाकाल प्रसीद २ ह्रीं २ स्वाहा।'' इति महाकालमन्त्रः। ''ओंवज्रोदके हुं फट् स्वाहा'' इति जलग्रहणमन्त्रः। 'ओंह्रींस्वाहा' ''ओंह्रींसुविशुद्धधर्मगात्रि सर्वपापनिशामयाशेषविकल्पानपनय हूं स्वाहा' इति मन्त्रद्वयं पादप्रक्षालने। ''ओंमणिधरि वज्रिणि शिखरिणि सर्ववशंकरिणि महाप्रतिसरे हूं फट् स्वाहा'' इति शिखाबन्धनमन्त्रः। ''ओंरक्ष रक्ष हूं फट् स्वाहा'' इति भूमिसेचनमन्त्रः। ''ओं सर्वविघ्नानुत्सारय हुं फट् स्वाहा'' इति विघ्नोत्सारणमन्त्रः। ''ओंपवित्रवज्रभूमे हूं फट् स्वाहा'' इति भूम्यभिमन्त्रणमन्त्रः। ''आः सुरेखे वज्ररेखे हूं फट् स्वाहा'' इति आसनपूजामन्त्रः। ''ओंह्रीं आधारशक्तिकमलासनाय नमः'' इत्यासनमन्त्रः। ''ओंशताभिषेके शताभिषेके हूं फट् स्वाहा'' इति पुष्पाधिष्ठानमन्त्रः। ''ओंपुष्पकेतुराजार्हते शताय सम्यक् समृद्धाय, पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे पुष्पचयावकीर्णे हुं फट् स्वाहा'' इति पुष्पाभिमन्त्रणमन्त्रः। ''ओंआंहूं फट् स्वाहा'' कायवाक्चित्तशोधनमन्त्राः। ''रक्ष रक्ष हूँ फट् स्वाहा' इत्यात्मरक्षामन्त्रः। ''प्रह्लादानन्दनाथाख्यः सनकानन्द एव च। कुमारानन्दनाथश्च वशिष्ठानन्द एव च।। क्रोधानन्दः शुकानन्दो ध्यानानन्दस्त्वतः परम्। बोधानन्दस्ततश्चैव कुलाख्या गुरवः स्मृताः।।'' इति कुलगुरवः। 'श्रीगुरुः परमगुरुः परापरगुरुः परमेष्ठिगुरुः' एते सामान्यगुरवः। ''महादेवी महादेवस्तथा त्रिपुरभैरवः।'' इति दिव्यौघाः। 'ब्रह्मानन्दः पूर्णदेवश्चलचित्तश्चलाचलः। कुमारः बोधनश्चैव वरदः स्मरदीपनः। माया मायावती चैव सिद्धौघाः सम्प्रकीर्तिताः।।' एते सिद्धौघाः। 'विमलः कुशलश्चैव भीमसेनः सुकाकरः। मीनो गोरक्षकश्चैव भौमदेवः प्रजापतिः।। मूलदेवो रन्तिदेवो विघ्नेश्वरहुताशनौ। सन्तोषः समयानन्दो मानवौघाः प्रकीर्तिताः।।' एते सम्प्रदायगुरवः। 'इच्छा ज्ञाना क्रिया चैव कामिनी कामदायिनी। रती रतिप्रियानन्दा मध्ये चैव मनोन्मनी।।' इति कालिकायाः पीठशक्तयः।। अथ मन्त्रभेदाः:– 'क्रीं' इत्येकाक्षरः। 'क्रींक्रींक्रीं' इति त्र्यक्षरमन्त्रः। 'क्रींहूंह्रीं' इत्यपि त्र्यक्षरः। 'क्रींक्रींहूंहूंह्रींह्रीं' इति षडक्षरः। 'ऐंहूंह्रींहूंहूं फट् स्वाहा' इत्यष्टाक्षरः। 'क्रीं दक्षिणे कालिके क्रीं स्वाहा' इति दशाक्षरः। हूंह्रींक्रीं दक्षिणे हूंह्रीं स्वाहा' इत्यन्यो दशाक्षरः। 'ओंह्रींक्रीं स्वाहा' इति कालीहृदयम्। क्रींहूंह्रीं दक्षिणेकालिके क्रींहूंह्रीं स्वाहा' इति चतुर्दशाक्षरी। 'ओंह्रींह्रींहूंहूंक्रींक्रीं दक्षिणे कालिके क्रींक्रींहूंहूंह्रींह्रीं स्वाहा' इति एकविंशाक्षरी। 'ओंह्रींह्रींहूंहूंक्रींक्रींक्रीं दक्षिणे कालिके क्रींक्रींक्रीहूंहूंह्रींह्रीं स्वाहा' इति त्रयोविंशाक्षरी। 'ह्रींह्रींहूंहूंक्रींक्रींक्रीं दक्षिणे कालिके क्रींक्रींहूंहूंह्रींह्रीं इति विंशत्यक्षरी। 'ओंह्रींक्रीं मे स्वाहा' इति षडक्षरी। 'क्रींह्रींह्रीं' इति त्र्यक्षरी। 'क्रींक्रींक्रीं' स्वाहा' इति पञ्चाक्षरी। क्रींहूंह्रींक्रींहूंह्रीं स्वाहा' इति अष्टाक्षरी। 'ऐं नमः क्रींक्रींकालिकायै स्वाहा' इति एकादशाक्षरी। 'क्रींहूंह्रीं दक्षिणे कालिके स्वाहा' इत्यप्येकादशाक्षरी। 'क्रींहूंह्रीं दक्षिणे कालिके फट्' इति दशाक्षरी। 'क्रींक्रींहूंहूंह्रींह्रीं दक्षिणे कालिके क्रींक्रींहूंहूंह्रींह्रीं स्वाहा' इति विंशाक्षरी। 'क्रीं स्वाहा' इति त्र्यक्षरी। 'क्रींक्रीं कालिकायै स्वाहा' इत्यष्टाक्षरी। 'क्रींहूंह्रीं स्वाहा' इति पञ्चाक्षरी। 'क्रीं दक्षिणे कालिके

स्वाहा' इति नवाक्षरी। 'क्रींक्रींक्रींहूंहूंह्रींह्रींक्रींक्रींहूंहूंह्रींह्रीं स्वाहा' इति षोडशाक्षरी। 'नमः ऐंक्रींक्रीं कालिकायै स्वाहा' इत्येकादशाक्षरी। 'नमः ओंओंक्रोंक्रोंफट् स्वाहा' इति नवाक्षरी। 'कालिकालिके हूंह्रींहूंफट्' इत्यपि नवाक्षरी। क्रींक्रींक्रींफट् स्वाहा' इति षडक्षरी। 'क्रींक्रींक्रींक्रींक्रींक्रीं स्वाहा' इत्यष्टाक्षरी। 'क्रींक्रींहूंहूंह्रींह्रींक्रींक्रींहूंहूंह्रींह्रीं' स्वाहा' चतुर्दशाक्षरी। क्रींहूंह्रीं दक्षिणेकालिके फट्' दशाक्षरी। क्रींहूंह्रींक्रींहूंह्रीं स्वाहा' अष्टाक्षरी। 'क्रींक्रींहंहंह्रींह्रींक्रींक्रींहूंहूंह्रींह्रींक्रींहंहंह्रींह्रीं' स्वाहा' विंशाक्षरी। नमः आंक्रोंआंक्रों फट् स्वाहा कालिकालिके हूं' पञ्चदशाक्षरी। 'ह्रींहूं फट्' त्र्यक्षरी। अथ वश्ये प्रागुक्तद्वाविंशद्वर्णान्ते- 'हूंह्रींह्रींक्रींक्रीं' इति पञ्चबीजानि संयोजयेत्।२७। अथाकर्षे 'हूंह्रींक्रीं मूलं हूंह्रींक्रीं'।। २८।। 'हूंह्रींक्रीं दक्षिणेकालिके स्वाहा हूंह्रींक्रीं' इत्यप्याकर्षे केचिद्वदन्ति।। १४।। 'क्रींक्रींहूंहूंह्रींह्रीं गुह्येकालिके 'क्रींक्रींक्रींहूंहूंह्रींह्रीं स्वाहा'।। २१।। 'क्रींहूंह्रीं गुह्येकालिके 'क्रींक्रींहूंहूंह्रींह्रीं स्वाहा' षोडशाक्षरी। 'क्रींहूंह्रीं गुह्येकालिके हूंहूंह्रींह्रीं स्वाहा' चतुर्दशाक्षरी। 'क्रींक्रींक्रींहूंहूंह्रींह्रींदक्षिणेकालिके स्वाहा' पञ्चदशाक्षरी। 'क्रींगुह्येकालिकेक्रीं स्वाहा' नवाक्षरी। 'क्रीं दक्षिणेकालिके क्रीं स्वाहा' दशाक्षरी। 'हूंहूंह्रींह्रीं दक्षिणे कालिके हूंहूंह्रींह्रीं स्वाहा' षोडशाक्षरी। इति गुह्यकाली।। बलिमन्त्रस्तु— ऐंह्रींएह्येहि परेशानि जगन्मातर्जगतां जननि गृह्ण २ मम बलिं सिद्धिं देहि २ शत्रुक्षयं कुरु २ ओंहूंह्रींफट् ओंकालिकायै नमः फट् स्वाहा' अयं दक्षिणकालिकायाः बलिमन्त्रः।। 'हूंनमः एह्येहि गुह्यकाल्यै गृह्ण २ मम शत्रून् नाशय २ खादय २ तुरु २ छिन्धि २ सिद्धिं देहि २ हुं २ स्वाहा' अयं गुह्यकाल्याः बलिमन्त्रः। 'ओंहूं सदाशिवमहाप्रेताय गुह्यकाल्यासनाय नमः गुह्यकाल्यै हूं नमः' इति गुह्यकाल्यासनमन्त्रः। 'हौं कालि महाकालि किणि २ फट् स्वाहा।१४। इयं भद्रकाली। 'क्रींक्रींक्रींहूंहूंह्रींह्रीं भद्रकाल्यै 'क्रींक्रींक्रींहूंहूंह्रींह्रीं स्वाहा'। २०। इयमपि भद्रकाली। 'क्रींक्रींक्रींहूंहूंह्रींह्रीं श्मशानकालिके क्रींक्रींक्रींहूंहूंह्रींह्रीं स्वाहा'। २२। इयं श्मशानकालिका। 'क्रींक्रींक्रींहूंहूंह्रींह्रीं महाकालि क्रींक्रींक्रींहूंहूंह्रींह्रीं स्वाहा। इति महाकालीमन्त्रः। 'ओंक्षेंक्षेंक्रेंक्रें पशुं गृहाणहुं फट् स्वाहा' महाकालीमन्त्रः। 'गृध्रकर्णि २ विरूपाक्षि २ लम्बस्तनि २ महोदरि २ उत्पादय २ हुंफट् स्वाहा' अयमपि महाकालीमन्त्रः। 'ऐंह्रींश्रींक्लीं कालिके क्लींश्रींह्रींऐं' इति श्मशानकालीमन्त्रः।। अथ तारामन्त्राः— ओंह्रींस्त्रींहंफट्' ५। पीठमन्त्रः प्राग्वत्। द्वारपालाः प्राग्वत्। पीठशक्तयस्तु—

लक्ष्मीः सरस्वती चैव रतिः प्रीतिस्तथैव च। कीर्तिः शान्तिश्च पुष्टिश्च तुष्टिरित्यष्ट शक्तयः।।

सारसङ्ग्रहे—

रतिः प्रीतिः प्रिया कान्तिः कामिनी काममालिनी। कन्दर्पदलिनी दुर्गा भाविनी नव शक्तयः।।

इति। अन्यत्र—

मेधा प्रज्ञा प्रभा विद्या धीर्धृतिस्मृतिबुद्धयः। विश्वेश्वरीति सम्प्रोक्ताः पीठस्य नव शक्तयः।।

इति। तन्त्रान्तरे—

महाकाली च रुद्राणी उग्रा भीमा तथैव च। घोरा च भ्रामरी चैव महारात्रिस्तथैव च।।
भैरवी च तथा प्रोक्ता पीठस्य वसुशक्तयः।..।।

इति। प्रागुक्ता एव दशमन्त्राः कुलगुरवश्च। सम्प्रादायगुरवस्तु—

ऊर्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः। आनन्दनाथशब्दान्ता दिव्यौघाः कथिताः प्रिये।।
वशिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः। हरिनाथश्च सिद्धौघाः कथिता वीरवन्दिते।।
तारावती भानुमती जया विद्या महोदरी। सुखः परः पारिजातस्ततश्चैव कुलेश्वरः।।
विरूपाक्षः फेरवी च मानवौघाः प्रकीर्तिताः।...................................।।

इति। अथ मन्त्रभेदाः— 'ओंत्रोंह्रींहुंह्रींहुं फट्'। ७। 'ऐंह्रींश्रींक्लींसौःहुं उग्रतारे हुंफट्'। १२। 'ओंहुंह्रींक्लींसौः हुंफट्। ७। 'ओंहुंह्रींक्लींह्सौः हुंफट्' । ७। 'ओंह्रींहुंह्रींहुं फट्'। ६। 'त्रींहुंह्रींहुं फट्' । ५। 'त्रींहूंफट्क्लींऐं'। ५। 'ऐंह्रींश्रींक्लींसौः— क्लींह्रींऐंब्लूंस्त्रीं नीलतारे सरस्वति द्रांद्रींक्लींब्लूंसःऐंह्रींश्रींक्लींसौःसौःह्रीं स्वाहा'।। ३२।। 'ओंनमः पद्मासने शब्दरूपे ऐंह्रींश्रीं वदवद वाग्वादिनि स्वाहा' इति वागीश्वरीमन्त्रः। 'हसकलह्रीं वद चित्रेश्वरि ऐं स्वाहा' इति चित्रेश्वरी। 'ऐं कुलजे ऐं सरस्वति स्वाहा' इति कुलजा। 'ऐंह्रींश्रीं वदवद कीर्तीश्वरि स्वाहा' इति कीर्तीश्वरी। 'ऐंह्रीं अन्तरिक्षसरस्वत्यै स्वाहा' इत्यन्तरिक्षसरस्वती। 'सहखफ्रीं ह्सौ हसफ्रीं ऐंह्रींश्रींद्रांद्रींक्लींब्लूंसःघ्नीं घटसरस्वति घटे वदतर वदतर रुद्राज्ञया ममाभिलाषं कुरु २ स्वाहा' इति घटसरस्वती। 'ब्लूँवें वदवद त्रींहुं फट्' इति नीलामन्त्रः। 'ऐंह्रोहीं किणि किणि विच्चे' इतिं किणिसरस्वती। 'खेंहौंओंऐंश्रींह्रीं' इति महाविद्या। 'ऐंह्रींह्रांहूं नमस्तारायै सकलदुस्तरं तारय तारय ओंओंस्वाहा'२५।।

तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती। कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृताः।।

तारा प्रागुक्तादौ। 'स्त्रीह्रीहूंफट्' इत्युग्रा। हूंस्त्रींह्रीं फट्' इति महोग्रा। 'हूंह्रींस्त्रीं फट्' इति वज्रा। 'ह्रींस्त्रीं फट् हुं' इति नीला। 'स्त्रींह्रीं फट् हूं' इति सरस्वती। 'ह्रींहूं फट् स्त्रीं' इति कामेश्वरी। 'ह्रींहूंस्त्रीं फट्' इति भद्रकालीतारा। 'ओंतारे तुतारे तत्ता स्वाहा' १०। 'ऐंह्रींओंऐंह्रीं फट् स्वाहा' । ८। 'ओंपद्मे पद्मे महापद्मे पद्मावति ह्रींह्रीं स्वाहा' १७। 'हंसः ओंह्रींस्त्रींहूं हंसः' ८। 'स्त्रीह्रींहूं नीलसरस्वति' ९ 'हंसः ओंह्रींस्त्रींहूं फट् हंसः' ९। 'ओंह्रीं एकजटे महायक्षाधिपतये ममोपनीतं बलिं गृह्ण २ स्वाहा। इति बलिमन्त्रः। 'खें[1]हौंओंऐंश्रींह्रीं' ६।

अथ महाविद्या षोडशी। तत्रादौ पञ्चदशी— कएईलह्रीं हसकहलह्रीं सकलह्रीं' इति कामराजविद्या। 'हसकलहह्रीं हसकहलह्रीं सकलह्रीं' इति लोपामुद्रोपासिता। 'कहएईलह्रीं हकएईलह्रीं सकएईलह्रीं' इयं मनूपासिता। 'सहकएईलह्रीं' सहकहईलह्रीं हसकएईलह्रीं' इति चन्द्रोपासिता। 'हसकएईलह्रीं हसकएईलह्रीं सहकएईलह्रीं' इयं कुबेरोपासिता। 'कएईलह्री हसकईलह्रीं सहसकलह्रीं' इयमगस्त्योपासिता। 'सएईलह्रीं सहकलह्रीं सकलह्रीं' इयं नन्द्युपासिता। 'हसकलह्रीं सहकलह्रीं सकहलह्री' इयं सूर्योपासिता। 'हसकलह्रीं हसकलह्रीं सकलह्रीं हसकलहसकलसकलह्रीं' इयं शिवोपासिता। 'कएईलह्रीं हसकहलह्रीं सहसकलह्रीं सएईलह्रीं सहकहलह्रीं सक्रलह्रीं' इयं विष्णूपासिता। 'हसकलह्रीं सकहसकलह्रीं सहकलह्रीं' इयं स्कन्दोपासिता। 'कएईलह्रीं हसकलह्रीं सकलह्रीं' इयमिन्द्रोपासिता। 'कएईलहरीहरी हसकहलहरीहरी सकलहरीहरी' इयं दुर्वास उपासिता। 'कएईलह्रीं हकहलह्रीं हसकलह्रीं' इयमुन्मनी। 'कएईलह्रीं हकहलह्रीं सहकलह्रीं' इयं वरुणोपासिता। 'कएईलह्रीं हकहह्रीं सहकलह्रीं' इयं धर्मराजोपासिता। 'कसकलह्रीं हसलकलह्रीं सकलरलह्रीं' इयं वह्न्युपासिता। 'हसकलह्रीं हसककहलह्रीं सकलरलह्रीं इयं नागराजोपासिता। 'कहरलरह्रीं हकलरहलह्रीं सरकलरह्रीं' इयं वायूपासिता। 'कएईरलह्रीं हकहलरह्रीं सहकरह्रीं' इयं बुधोपासिता। 'कहलह्रीं

---

१. 'खंहूं' ख. पाठः।

हकहलरह्रीं सकलह्रीं' इयमीशानोपासिता। 'कएईलह्रीं हसकहलह्रीं सकलह्रीं' इयं रत्युपासिता। ' कएईलह्रीं हसकहलह्रीं सकलह्रीं सकलह्रीं हसकहलह्रीं कएईलह्रीं नारायणोपासितेयम्। 'कएईलह्रीं हकहसरह्रीं सहकलह्रीं' ब्रह्मोपासितेयम्। 'हसकलह्रीं हकहसरह्रीं हसकलह्रीं' जीवोपासितेयम्। एते शुद्धाः २५। अशुद्धाः २५। शुद्धाशुद्धाः २५। शबलाः २५। एवं शतं भेदाः।।

अथ पञ्चमीभेदाः— (१) 'कएईलह्रीं हसकलह्रीं हकहलह्रीं कहयलह्रीं हसकलह्रीं'[1]। (२) 'कएईलह्रीं हसकलह्रीं हकहलह्रीं कहयलह्रीं सहकलह्रीं।' (३) 'सकहलह्रीं 'कएईलह्रीं हसकहलह्रीं सकलह्रीं हकलसह्रीं।' (४)'सकहलह्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं ईएकलह्रीं'। (५) ' कएकलह्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं सहकलह्रीं।' (६) ईएकलह्रीं 'कएईलह्रीं हसकहलह्रीं सकलह्रीं हकलसह्रीं।' (७) 'एईकलह्रीं 'कएईलह्रीं हसकहलह्रीं सकलह्रीं सहकलह्रीं'। (८) एईकलह्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं हकलसह्रीं।' (९) 'कएईलह्रीं हसकलह्रीं हसकहलह्रीं हकहलह्रीं सकलह्रीं'। (१०) 'कएईलह्रीं हसकलह्रीं हसकहलह्रीं सकलसह्रीं सकलह्रीं'।। (११) कएईलह्रीं हसकलह्रीं सहकलहह्रीं सहकलह्रीं सकलह्रीं'। (१२) कएईलह्रीं हसकलह्रीं[3] [2]'सहकहलह्रीं सकलह्रीं सहकलह्रीं'।। कहलह्रीं कएईलह्रीं हसकलह्रीं हसकहलह्रीं हकलसह्रीं'। एषा प्राग्वदष्टधा। अन्या चतुर्धा १२।। 'कहसलह्रीं कएईलह्रीं हसकहलह्रीं हसकलह्रीं सकलह्रीं'[4] एषा पूर्ववदष्टधा। अन्या चतुर्धा। एवं षट्त्रिंशद् ३६ भेदाः पञ्चम्याः। एतासां पञ्चमीविद्यानां श्रींह्रींहं इति बीजत्रयं सम्पुटत्वेनाद्यन्तयोः संयोज्य, मध्यस्थकामराजकूटत्रयादौ कामराजबीजं संयोज्य जपो विधेयः।।

अथ सुन्दरीभेदाः— 'ईएकलह्रीं हसकहलह्रीं सकलह्रीं' इति प्रथमसुन्दरी १। एईकलह्रीं हसकहलह्रीं सकलह्रीं' २। कईएलह्रीं हसकहलह्रीं सकलह्रीं' इत्यनन्तसुन्दरी ३। 'सहकलह्रीं हसकहलह्रीं सकलह्रीं इति पश्चिमाम्नायसुन्दरी ४। हससकलह्रीं हसकहलह्रीं सकलह्रीं इत्युत्तराम्नायसुन्दरी ५। 'हसह्रीं कहह्रीं सहह्रीं' इयं रुद्रयोगिनी पूर्वाम्नायसुन्दरी ६। 'कलह्रीं कहलह्रीं सकलह्रीं' इति दक्षिणाम्नायसुन्दरी ७। 'कहक्षमलह्रीं हसकहलह्रीं सकलह्रीं' इत्यूर्ध्वाम्नाये शिवसुन्दरी ८। 'सहक्षमलह्रीं सहकहलह्रीं सकलह्रीं' इत्यूर्ध्वाम्नाये शक्तिसुन्दरी ९। 'हक्षमलह्रीं हसकहलह्रीं सकलह्रीं' इति सर्वसुन्दरी १०। सहकलह्रीं हकहलह्रीं कहकलह्रीं' इति सौभाग्या ११। 'हकलसह्रीं कहलसह्रीं कलसहह्रीं' इयं भाषा १२। 'हसकलह्रीं हलकहसह्रीं सकलह्रीं' इयं सृष्टिः १३। 'हलकसह्रीं कसहलसह्रीं कहसलह्रीं' इति स्थितिः १४। 'हलकसह्रीं हसकलह्रीं हहसलह्रीं' इति संहृतिः १५। 'लकसह्रीं सहकलह्रीं हससहकह्रीं' निराख्या १६। 'कहकलसह्रीं हससहकह्रीं सहकहह्रीं' निराख्या १६। 'हकलसह्रीं हकहलह्रीं हसकलह्रीं' स्वप्नावती १७। 'कहलसह्रीं कहयलह्रीं कससलह्रीं' इयं मधुमती १८। 'कएईलह्रीं हसकहलह्रीं सकलह्रीं 'सहकलह्रीं हकहलह्रीं कहकलह्रीं' ततः पञ्चम्याः पञ्चकूटं। इयमेकादशकूटा। एवं षट्त्रिंशत्पञ्चमीनां पञ्चपञ्चकूटयोजनेनैकादशकूटा। एवं शुद्धाशुद्धादिभेदैः सह त्रिचतुष्पञ्चषट्सप्ताष्टनवकूटयोजनेन सुन्दरीभेदा बहवः सन्ति। जपे तु सर्वासां सुन्दरीविद्यानामाद्यन्तेषु प्रागुक्तबीजत्रयसम्पुटीकरणमावश्यकम्।।

अथ दशविद्यान्तर्गतत्वेन सङ्क्षेपतः श्रीविद्यायाः पद्धतिः। तद्यथा— तत्र प्रातःकृत्यादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्यात्। अस्य श्रीत्रिपुरसुन्दरीमन्त्रस्य दक्षिणामूर्तिर्ऋषिः, पङ्क्तिश्छन्दः, त्रिपुरसुन्दरी देवता, वाग्भवं बीजं, कामराजं कीलकं, तार्तीयं शक्तिः, पुरुषार्थचतुष्टयसिद्धये विनियोगः। शिरसि दक्षिणामूर्तये ऋषये नमः। मुखे

---

१. 'हसकलह्रीं' ख. पाठः। २. ''सहकलह्रीं' ख. पाठः। ३. ''हसकहलह्रीं' ख. पाठः। ४. ''हकलह्रीं' ख. पाठः।

पङ्क्तिच्छन्दसे नमः। हृदि त्रिपुरसुन्दरीदेवतायै नमः। गुह्ये वाग्भवबीजाय नमः। पादयोः तार्तीयशक्तये नमः। सर्वाङ्गे कामराजकीलकाय नमः। इति।

तथा च समयार्के—

त्रिपुरसुन्दरीमन्त्रस्य दक्षिणामूर्तये तथा। ऋषये नमः शिरसि पङ्क्तये छन्दसे नमः।। १।।
मुखे त्रिपुरसुन्दर्यै देवतायै नमो हृदि।..।।

तथा च वाग्भवादिस्वरूपं दक्षिणामूर्तौ—

निः[1]सरन्ति महामन्त्रा महाग्नेश्च स्फुलिङ्गवत्। तथैव मातृका वर्णा निःसृता वाग्भवात् प्रिये।। १।।
अत एव तदेव स्याद्वाग्भवं बीजमुच्यते। योषित्पुरुषरूपेण स्फुरन्ती विश्वमातृका।। २।।
महामोहेन देवेशि कीलयन्ती जगत्त्रयम्। अतस्तत्कीलकं देवि तेन सौभाग्यगर्विता।। ३।।
पालयन्ती जगत् सर्वं तेनेयं शक्तिरुच्यते।..।।

इति। ज्ञानार्णवे—

बीजं तु वाग्भवं शक्तिस्तार्तीयं कीलकं ततः। कामराजं महेशानि बीजन्यासस्ततः परम्।।

इति। अथ वशिन्यादिन्यासः— यथा, अं १६ँ ब्ल्रूँ वशिनीवाग्देवतायै नमः ब्रह्मरन्ध्रे। कं ५ँ कलह्रीं कामेश्वरीवाग्देवतायै नमः ललाटे। चं ५ँ नवलीं मोदिनीवाग्देवतायै नमः भ्रूमध्ये। टं ५ँ य्लूं विमलावाग्देवतायै नमः कर्णयोः। तं ५ँ जमरीं अरुणावाग्देवतायै नमः हृदये। पं ५ँ हसलवयूं जयिनीवाग्देवतायै नमः नाभौ। यं ४ँ झमरयूं सर्वेश्वरीवाग्देवतायै नमः आधारे। शं ५ँ क्ष्म्रीं कौलिनीवाग्देवतायै नमः सर्वाङ्गे। तथा च ज्ञानार्णवे—

अवर्गान्ते लिखेद्बीजं रेफा[2]न्ते बक्षमान्वितम्। वामकर्णविशोभाढ्यं बिन्दुनादाङ्कितं प्रिये।। १।।
वशिनीं पूजयेद्वाचां देवतां देवि सुव्रते। कवर्गान्ते महेशानि कलह्रीं बीजमुत्तमम्।। २।।
कामेश्वरीं समुच्चार्य वाग्देवीं पूजयेत्ततः। चवर्गान्ते धान्तलान्तक्षमातुर्यस्वरान्वितम्।। ३।।
मोदिनीं पूजयेद्वाचं नादबिन्दुविभूषितम्। टवर्गान्ते वायुबीजं भूमिपूर्वं[3] महेश्वरि।। ४।।
वामकर्णेन्दुबिन्द्वाढ्यं विमलां वागधीश्वरीम्। तवर्गान्ते जमयान्तं वामनेत्रविभूषितम्।। ५।।
बिन्दुनादाङ्कितं बीजं वाग्देवीमरुणां यजेत्। पवर्गान्ते व्योमचन्द्रक्ष्मातोयानिलसंयुतम्।। ६।।
ऊकारस्वरसंयुक्तं बिन्दुनादकलान्वितम्। जयिनीं पूजयेद्वाचां देवतां वीरवन्दिते।। ७।।
यवर्गान्ते जान्तकालरेफवायुसमन्वितम्। वामकर्णेन्दुशोभाढ्यं सर्वेशीं परिपूजयेत्।। ८।।
क्षमवह्निगतं तुर्यस्वरेण परिवेष्टितम्। बिन्दुनादकलाक्रान्तं कौलिनीं वाचमर्चयेत्।। ९।।
शवर्गान्ते महेशानि न्यसेत् सर्वार्थसिद्धये। शिरोललाटभ्रूमध्यकर्णहृन्नाभिगोचरे।। १०।।
आधारे व्यूहके यावत् न्यसेद् देवि परां प्रिये[4]।..।।

इति। अथ करन्यासः— अं मध्यमाभ्यां नमः। आं अनामिकाभ्यां नमः। सौः कनिष्ठिकाभ्यां नमः। अं अङ्गुष्ठाभ्यां

---

[1] 'निःस्फुरन्ति' ख. पाठः। [2] 'वहिफान्त' ख. पाठः। [3] 'संस्थं' ख. पाठः। [4] 'न्यासान् वर्गैरष्टभिराचरेत्' ख. पाठः।

नम:। आं तर्जनीभ्यां नम:। सौ: करतलकरपृष्ठाभ्यां नम:। अथाङ्गन्यास:— ऐं हृदयाय नम:। क्लीं शिरसे स्वाहा। सौ: शिखायै वषट्। ऐं कवचाय हुं। क्लीं नेत्रत्रयाय वौषट्। सौ: अस्त्राय फट्। ततो मूलेन व्यापकं कृत्वा ध्यायेत्। तथा—

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्। पाशाङ्कुशशरांश्चापं धारयन्तीं शिवां भजे[१] ।।

इति ध्यात्वा, मानसोपचारै: सम्पूज्य आनन्दोऽहमिति विभाव्य शङ्खस्थापनं कुर्यात्। यथा— श्रीचक्रपुरत: स्ववामे षट्कोणमध्ये त्रिकोणं विलिख्य, तत्र त्रिपादिकां संस्थाप्य मूलेन षट्कोणं पूजयेत्। फट् इति शङ्खं प्रक्षाल्य तत्र गन्धपुष्पादिकं निक्षिप्य, मूलेन जलेनापूर्य मण्डलादिकं पूजयेत्। मं वह्निमण्डलाय दशकलात्मने नम: इति त्रिपादिकायाम्। अं सूर्यमण्डलाय द्वादशकलात्मने नम: इति शङ्खे उं सोममण्डलाय षोडशकलात्मने नम: इति जले। तत: ''गङ्गे च यमुने चैव'' इत्यादिना तीर्थमावाह्य, हुं इत्यवगुण्ठ्य षडङ्गेन सम्पूज्य, धेनुमुद्रां प्रदर्श्य, मूलमष्टधा जप्त्वा तज्जलं किञ्चित् प्रोक्षणीतोये निक्षिप्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्षयेत्। तद्दक्षिणे पाद्यादिपात्रं संस्थाप्यासनपूजामारभेत्। यथा[२] उपर्युपरि यन्त्रस्य— ॐ आधारशक्तये नम:। एवं प्रकृतये०, कूर्माय०, अनन्ताय०, पृथिव्यै०, रसाम्बुधये०, रत्नद्वीपाय०, नन्दनोद्यानाय०, रत्नमण्डपाय०, कल्पवृक्षाय०, रत्नवेदिकायै०, रत्नसिंहासनाय नम:। पीठोपरि बैन्दवचक्रे— ह्सौ: सदाशिवमहाप्रेतपद्मासनाय नम:। बैन्दवे— हसरैं हसकलरीं हसरौ: इति मन्त्रेण मूर्तिं सङ्कल्प्य त्रिखण्डां मुद्रां बद्ध्वा पूर्ववद् ध्यात्वा, प्रवहन्नासापुटेन तेजोमयं पुष्पाञ्जलावानीय ''ॐ महापद्मवनान्त:स्थे कारणानन्दविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि।।'' इति मूर्तौ संस्थाप्यावाहनादि यथाशक्त्युपचारेण पूजां विधाय षडङ्गानि पूजयेत्। अग्नीशासुरवायुमध्ये दिक्षु च, वाग्भवकूटमुच्चार्य हृदयाय नम:। कामराजमुच्चार्य शिरसे स्वाहा। शक्तिकूटमुच्चार्य शिखायै वषट्। पुनर्वाग्भवकूटमुच्चार्य कवाचय हुं। कामराजमुच्चार्य नेत्रत्रयाय वौषट्। शक्तिकूटमुच्चार्य अस्त्राय फट्। ततो मध्यप्राक्त्र्यस्त्रमध्येषु गुरुपङ्क्तिं पूजयेत्। ऐंह्रींश्रीगुरुपङ्क्तिभ्यो नम:। ३ँ गुरुपादुकाभ्यो नम:। एवं परमगुरुं तत्पादुकां, परापरगुरुं तत्पादुकां, आचार्यं तत्पादुकां च पूजयेत्।

अथावरणपूजा— तत्र चतुरस्रस्य प्रथमरेखायां— ३ँ अणिमाद्यष्टदेवीश्रीपादुकां पूजयामि नम:। एवं मध्यरेखायां— ३ँ ब्राह्म्याद्यष्टदेवीश्रीपादुकां पूजयामि नम:। अन्तरेखायां—३ँ सर्वसंक्षोभिण्यादिमुद्राश्रीपादुकां पूजयामि नम:। सर्वत्रावरणपूजायां श्रीपादुकापदप्रयोग:। तथा च तन्त्रान्तरे—

श्रीपदं पूर्वमुच्चार्य पादुकापदमुद्धरेत्। पूजयामि नम: पश्चात् पूजयेदङ्गदेवता:।। १ ।।

इति। चक्राग्रे ३ँ त्रिपुराचक्रनायिकाश्रीपादुकां पूजयामि नम:। अत्र त्रैलोक्यमोहनचतुरस्रचक्रे त्रिपुराचक्रनायिकाधिष्ठिते एता अणिमाद्या: प्रकटयोगिन्य: समुद्रा: सायुधा: सपरिवारा: सवाहना: पूजितास्तर्पिता: सन्तु, इत्यर्घ्यजलेन मूलदेव्यै समर्पयेत्। त्रिपुरापदव्युत्पत्तिस्तु वाराहीये—

ब्रह्मविष्णुमहेशाद्यैस्त्रिदशैरर्चिता पुरा। त्रिपुरेति तदा नाम कथितं देवतैस्तव ।। १ ।।

इति। तर्पणं तु वामहस्तेन। तथा च स्वतन्त्रतन्त्रे—

अङ्गुष्ठानामिकायोगाद्वामहस्तेन पार्वति। तर्पयेत् सुन्दरीं दिव्यां समुद्रां च सवाहनाम्।। १ ।।

तत: षोडशदले— अं १६ ऐंह्रींश्रींकामाकर्षिण्यादिषोडशनित्याकलाश्रीपादुकां पूजयामि नम:। चक्राग्रे— ३ँ त्रिपुरेशचक्रनायिकाश्रीपादुकां पूजयामि नम:। अत्र सर्वाशापरिपूरके षोडशदलचक्रे त्रिपुरेशीचक्रनायिकाधिष्ठिते एता:

---

१. 'श्रये' ख. पाठ:। २. 'तत:' क. पाठ:।

कामाकर्षिण्याद्या गुप्तयोगिन्यः समुद्राः इत्यादि मूलदेव्यै समर्पयेत्।।

ततोऽष्टदले–३ँ अनङ्गकुसुमादिदेवीश्रीपादुकां पूजयामि नमः। चक्राग्रे– ३ँ त्रिपुरसुन्दरीचक्रनायिकाश्रीपादुकां पूजयामि नमः। अत्र सर्वसङ्क्षोभकरे अष्टदलचक्रे त्रिपुरसुन्दरीचक्रनायिकाधिष्ठिते एता अनङ्गकुसुमाद्या गुप्ततरयोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्।।

ततश्चतुर्दशारचक्रे– ३ँ सर्वसङ्क्षोभिण्यादिचतुर्दशदेवीश्रीपादुकां पूजयामि नमः। चक्राग्रे– ३ँ त्रिपुरवासिनी-चक्रनायिकाश्रीपादुकां पूजयामि नमः। अत्र सर्वसौभाग्यदायके चतुर्दशारचक्रे त्रिपुरवासिनीचक्रनायिकाधिष्ठिते एताः सर्वसङ्क्षोभिण्यादयः सम्प्रदाययोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्।।

ततो बहिर्दशारचक्रे– ३ँ सर्वसिद्धिप्रदादेवीश्रीपादुकां पूजयामि नमः। चक्राग्रे– ३ँ त्रिपुराश्रीचक्रनायिका-श्रीपादुकां पूजयामि नमः। अत्र सर्वार्थसाधके बहिर्दशारचक्रे त्रिपुराश्रीचक्रनायिकाधिष्ठिते एताः सर्वसिद्धिप्रदाद्या दशदेव्यः कुलकौलिन्यादियोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्।।

ततोऽन्तर्दशारचक्रे– ३ँ सर्वज्ञादिदशदेवीश्रीपादुकां पूजयामि नमः। चक्राग्रे– ३ँ त्रिपुरमालिनीचक्रनायिका-श्रीपादुकां पूजयामि नमः। अत्र सर्वरक्षाकरे अन्तर्दशारचक्रे त्रिपुरमालिनीचक्रनायिकाधिष्ठिते एताः सर्वज्ञादिदशदेव्यो निगर्भयोगिन्यः समुद्राः इत्यादि मूलदेव्यै समर्पयेत्।।

ततोऽष्टारचक्रे– ३ँ वशिन्याद्यष्टदेवीश्रीपादुकां पूजयामि नमः। चक्राग्रे– त्रिपुरसिद्धाचक्रनायिकाश्रीपादुकां पूजयामि नमः। अत्र सर्वरोगहराष्टारचक्रे त्रिपुरसिद्धाचक्रनायिकाधिष्ठिते एता वशिन्याद्या रहस्ययोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्।।

अत्रान्तरालत्र्यस्रे मूलविद्यया षडङ्गानि पूजयेत्।। ततोऽग्रकोणे ३ँ कामेश्वरीनित्याश्रीपादुकां पूजयामि नमः। दक्षिणकोणे ३ँ वज्रेश्वरीनित्याश्रीपादुकां पूजयामि नमः। वामकोणे ३ँ भगमालिनीनित्याश्रीपादुकां पूजयामि नमः। चक्राग्रे ३ँ त्रिपुराम्बिकाचक्रनायिकाश्रीपादुकां पूजयामि नमः। अत्र सर्वसिद्धिप्रदे त्र्यस्रचक्रे बाण[1]पाशाङ्कुश-विभूषितान्तराले त्रिपुराम्बिकाचक्रनायिकाधिष्ठिते एता कामेश्वर्याद्या रहस्यातिरहस्ययोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्।।

ततो बिन्दुमध्ये– ३ँ श्रीमहात्रिपुरसुन्दरीनित्याश्रीपादुकां पूजयामि नमः। इत्यादि वारत्रयं पूजयेत्। वामे ३ँ योनिमुद्राश्रीपादुकां पूजयामि नमः। चक्राग्रे– ३ँ त्रिपुरभैरवीश्रीपादुकां पूजयामि नमः। अत्र सर्वानन्दमये परब्रह्मस्वरूपिणि बैन्दवचक्रे त्रिपुरभैरवीचक्रनायिकाधिष्ठिते एताः सर्वचक्रेश्वरीयोगिन्यः समुद्राः सवाहनाः सपरिवाराः सायुधाः पूजितास्तर्पिताः सन्तु, इति मूलदेव्यै समर्पयेत्। ततो धूपादिविसर्जनान्तं कर्म समापयेत्। अस्याः पुरश्चरणं लक्षजपः।। तथा च वामकेश्वरतन्त्रे–

> तत्र स्थित्वा जपेल्लक्षं साक्षाद् देवीस्वरूपदृक्। किंशुकैर्हवनं कुर्याद् दशांशं च वरानने।। १।।
> कुसुम्भकुसुमैर्वापि मधुरत्रयमिश्रितैः। इति।

अथ श्रीविद्याविशेषपद्धतिः यथा–

ब्राह्मे मुहूर्ते उत्थाय रात्रिवासः परित्यज्य, गुरुं यथोक्तरूपं ध्यात्वा ''ऐंह्रींहसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं ह्सौः स्हौः अमुकानन्दनाथश्रीपादुकां पूजयामि नमः'' अमुकशक्त्यम्बाश्रीपादुकां पूजयामि नमः, इति स्मृत्वा

---

१. 'चाप' ख. पाठः।

मानसैर्गन्धादिभिः पूजयेत्।[1]यथा— ऐंह्रींश्रींलंपृथिव्यात्मकं गन्धं समर्पयामि नमः, कनिष्ठाभ्यां। ऐंह्रींश्रींहं आकाशात्मकं पुष्पं समर्पयामि नमः, अङ्गुष्ठाभ्यां। ३ँ यं वाय्वात्मकं धूपं समर्पयामि नमः, तर्जनीभ्यां। ३ँ रं वह्न्यात्मकं दीपं समर्पयामि नमः, मध्यमाभ्यां। ३ँ वं अमृतात्मकं नैवेद्यं समर्पयामि नमः, अनामिकाभ्यां। ३ँ ऐं ताम्बूलं समर्पयामि नमः, अञ्जलिना।। यथा विशुद्धेश्वरे—

एवं ध्यात्वा पुनश्चैव पञ्चभूतात्मकैर्यजेत्। गन्धतत्त्वं पार्थिवं तु कनिष्ठाङ्गुलियोगतः।। १।।
[1]पुष्पमाकाशात्मकं च अङ्गुष्ठाभ्यां समर्पयेत्। वाय्वात्मकं महाधूपं तर्जनीभ्यां समर्पयेत्।। २।।
तेजोमयं महादीपं मध्यमाद्वययोगतः। अमृतात्मकनैवेद्यमनामिकायुगेन च ।। ३।।
नमस्कारेणाञ्जलिना ताम्बूलं च समर्पयेत्। स्मृतं तु स्वस्वबीजान्ते सर्वान्ते तु नमस्क्रिया।। ४।।

इति। ततो योन्यञ्जलिमुद्रे प्रदर्श्य नमस्कृत्य स्तुतिं कुर्यात्। ''अखण्डमण्डलाकार''मित्यादि। शेषं सामान्यपद्धत्युक्तक्रमेण कुर्यात्।

अथ श्रीविद्याया विशेषस्नानम्। वैदिकस्नानं विधायाचमनं कृत्वा षडङ्गानि विधाय, क्रों इत्युङ्कुशमुद्रया सवितुर्मण्डलात् तीर्थमावाह्य, मूलविद्यायाः शक्तिमुच्चार्य योनिमुद्रां तज्जले निक्षिप्य, धेनुयोनिमुद्रे प्रदर्श्य मूलवाग्भवबीजेन दशवारमभिमन्त्र्य, आनन्दामृतवारिमध्यस्थां देवीं विचिन्त्य मूलविद्यया सप्तवारमभिमन्त्र्य तन्मुखारविन्दविनिर्गतामृत-धाराबुद्ध्या मूलेन सप्तवारमात्मानमभिषिच्य, पुनरेकविंशतिवारं मूलविद्यामुच्चरन् तज्जले देवीपादारविन्दाधोगलदमृतधारया त्रिवारं निमज्ज्योत्थाय, पुनर्योनिमुद्रया सप्तवारं त्रिवारं वा शिरस्यभिषेकं विधाय तत्रैवाचामेत्। यामले तु—

बालाबीजत्रयैः पीत्वा द्वाभ्यामोष्ठौ प्रमार्जयेत्। दुर्गाभ्यां च त्रिकं मृज्य मायया क्षालयेत् करम्।।१ ।।
श्रीमायावाक्पराकामत्रिपुटायोनिवर्तुलैः?। कामकलाङ्कुशाभ्यां च मुखनासाक्षिकर्णकान्।। २।।
नाभ्युरस्कं भुजौ स्पृष्ट्वाप्यधिकारी जपार्चने। आचम्यैवं यजेद् दुर्गां जीवन्मुक्तो भवेन्नरः।। ३।।

दशावृतः। यथा— ऐंक्लींसौः इति पिबेत्। ह्रींश्रीं इति ओष्ठौ द्विः प्रमार्जयेत्। दुर्गे दुर्गे रक्षिणि स्वाहा इति मार्जयित्वा। ह्रीं इति करक्षालनम्। श्रीं मुखे, ह्रीं ऐं नसोः, सौःक्लीं चक्षुषोः, ह्रींश्रींक्लीं कर्णयोः। ऐं नाभौ, ह्रीं वक्षसि, ईं दक्षांसे, क्रों वामांसे, इति स्पृष्ट्वा, तीरमागत्यानुपहते वाससी परिधाय मूलमन्त्राभिमन्त्रितशुद्धयज्ञभस्मना त्रिपुण्ड्रं त्रिरेखात्मकमर्धचन्द्राकृतिं विधायाघमर्षणान्तं कृत्वा तर्पणं कुर्यात्। तथा च —

षडङ्गान्यपि विन्यस्य तीर्थमङ्कुशमुद्रया। क्रोंमन्त्रेण समाकृष्य ततः सवितृमण्डलात्।। १।।
शक्तिबीजं समुच्चार्य निक्षिपेद्योनिमुद्रया। धेनुमुद्रायोनिमुद्रे ततस्तत्र प्रदर्शयेत्।। २।।
मूलवाग्भवबीजेन मन्त्रयित्वाथ देवताम्। आनन्दामृतवारीणां मध्यस्थां परिचिन्तयेत्।। ३।।
देवीमुखारविन्दाच्च निर्गतामृतधारया। सप्तकृत्वो जपेद्विद्यामभिषिञ्चेत् स्वकां तनुम्।। ४।।
एकविंशतिवाराणि जपेद्विद्यामनन्तरम्। देवीपादारविन्दाधोगलदमृतधारया।। ५।।

---

[1] शब्दमयं महापुष्पं प्रथमाङ्गुलियोगतः ख. पाठः।

वारत्रयं ततः पश्चात् निमज्ज्योत्तीर्य साधकः। योनिना च तथा देवि मूर्ध्नि सेकं समाचरेत्।। ६।।
त्रिसप्त वा तथा वारान् सेचयेत् साधकाग्रणीः। ततस्तीरं समासाद्य कर्म कुर्याद्यथेप्सितम्।। ७।।
उचिते वाससी पश्चात् परिदध्यादनन्तरम्। आचम्य प्राङ्मुखो भूत्वा मूलमन्त्राभिमन्त्रितम्।। ८।।
धृत्वा भालतले भस्म पूर्ववच्छ्रीगुरुं स्मरेत्। सूर्यमण्डलवासिन्यै देवतायै ततः परम्।। ९।।
अर्घ्यमञ्जलिनादाय गायत्र्या च त्रिरुत्क्षिपेत्। यथाशक्ति जपेद् देवीं गायत्रीं परमाक्षरीम्।। १०।।
तर्पणार्थं समाचम्य प्राणानायम्य साधकः। वसून् रुद्रांस्तथादित्यांस्तथैवाङ्गिरसं ततः।। ११।।
देवान् गाश्च ततो ब्रह्मविष्णुरुद्रान् ग्रहानपि। लोपामुद्रामहल्यां चानुसूयामृषितीर्थके।। १२।।
नक्षत्रराशियोगांश्च करणानि यथाक्रमम्। चतुर्थीवह्निजायान्तं देवतीर्थेन तर्पयेत् ।। १३।।
मरीचिमत्रिं पुलहं पुलस्त्यं क्रतुमेव च। वसिष्ठं च भरद्वाजं गौतमागस्त्यनामकौ।। १४।।
अग्निष्वात्तान् बर्हिषदः पितॄंश्च स्वपितृक्रमम्। त्रिधा ङेन्तं हृदन्तं च पितृतीर्थेन तर्पयेत्।। १५।।
भैरवान् क्षेत्रपालांश्च कुमारीर्योगिनीस्तथा। भूतानि सर्वसत्त्वानि तृप्यन्त्वन्तानि तर्पयेत्।। १६।।

ततो देवीं तर्पयेत्। दक्षिणामूर्तिसंहितायाम्—''तर्पणं च ततः कुर्याद् देवर्षिपितृपूर्वकम्''। ततस्तस्मिञ्जले त्रिकोणवृत्तचतुरस्रं विभाव्य, गणेशवटुकौ चक्रवामदक्षिणतः सन्तर्प्य, त्रिकोणवृत्तचतुरस्रान्तराले ईशानादिवायव्यान्तां वक्ष्यमाणगुरुपङ्क्तिं सन्तर्प्य, त्रिकोणमध्ये साध्यसिद्धासनमन्त्रैर्वक्ष्यमाणैः सन्तर्प्य, जले भगवतीमावाह्य परमामृतधारया त्रिवारं पूर्वोक्तक्रमेण सन्तर्प्य, त्रिकोणेषु कामेश्वर्यादिदेवीत्रयं वक्ष्यमाणसमयविद्यया सन्तर्प्य, चतुरस्रकोणेष्वङ्गदेवतास्तर्पयेत्। तत आवरणदेवतानां तर्पणम्। ततः सूर्यायार्घ्यं दत्त्वा ''हंसः सोह''मित्युपस्थाय सवितृमण्डले तीर्थं निधाय यतवचनो यागस्थानमागच्छेत्। यागस्थानं तु कालीकुलसद्भावे—

अरण्यं स्वल्पकामानां सिद्ध्यर्थं पूजने हितम्। निष्कामानां मुमुक्षूणां गृहे शस्तं सदार्चनम्।। १।।
ऋषीणां मुनिमुख्यानां दीक्षितानां द्विजन्मनाम्। गृहेऽपि यजनं शस्तं रसैर्वा चेक्षुसम्भवैः।। २।।

इति। कुलार्णवेऽपि—

एकान्ते निर्जने रम्ये देशे बाधाविवर्जिते। सुखासने समासीनः प्राङ्मुखो वाप्युदङ्मुखः।। १।।

इति। तत्रादौ सूर्यपूजा। तदुक्तं रुद्रयामले—

आदित्यं पूजयेदादौ प्रत्यक्षं लोकसाक्षिणम्। अन्यथा नैव सिद्धिः स्यात् कल्पकोटिशतैरपि।। १।।

इति। बृहत्स्तवराजेऽपि—

मूलेन (स्नानं तु) विधिवत् सन्ध्यां तर्पणं सूर्यपूजनम्। पूजालये तथागत्य पञ्चमीपूजनं चरेत्।।१।।

इति। ततः पूजामण्डपमागत्य, ॐआत्मतत्त्वाय स्वाहा, ॐविद्यातत्त्वाय स्वाहा, ॐशिवतत्त्वाय स्वाहा, इत्यनेनाचम्य सामान्यार्घ्यं विधाय द्वारपूजां कुर्यात्। तद्यथा— बालया द्वारमभ्युक्ष्य दक्षिणवामपार्श्वयोरुपर्यधः ऐंह्रींश्रींगं गणपतये नमः। ३ँ दुं दुर्गायै नमः ३ँ वां वटुकाय नमः। ३ँ क्षां क्षेत्रपालाय नमः। ३ँ द्वारश्रियै नमः। ३ँ देहल्यै नमः। ततो वामपादपुरस्सरं गृहं प्रविश्य, अग्न्यादिकोणेषु ३ँ गणपतये नमः। ३ँ दुं दुर्गायै नमः। ३ँ वां वटुकाय नमः। ३ँ क्षां क्षेत्रपालाय नमः।

---

१. 'शुचिः' ख. पाठः।

मध्ये ॐ रत्नमण्डपाय नमः। दिक्षु ॐ कामदेवाय रत्यै नमः। ॐ वसन्ताय प्रीत्यै नमः। ॐ गां गणतपये नमः। ॐ सां सरस्वत्यै नमः। ॐ श्रीं श्रियै नमः। इति। सोमभुजगावल्याम्– ''सरस्वतीं श्रियं मायां दुर्गां च तदनन्तरम्। भद्रकालीं ततः स्वस्तिं स्वाहां चैव शुभङ्करीम्।। गौरीं च लोकधात्रीं च तथा वागीश्वरीमपि।'' इति। एताः पूजयेत्। ततः ऐंह्रींश्रीं रक्तवर्णद्वादशशक्तिसहिताय दीपनाथाय नमः, इति पुष्पाञ्जलित्रयं मुञ्चेत्। विश्वसारे–

समुद्रमेखले देवि पर्वतस्तनमण्डले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे।। १।।

इति प्रसाद्य।। 'पृथ्वि त्वया धृता लोकाः' इति निवेद्य, ततोऽस्त्रेण वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य, अस्त्रेण जलेनान्तरिक्षगान्, श्रीबालान्यस्ततिग्मदृष्ट्यवलोकनेन दिव्यविघ्नानुत्सार्य, सिद्धार्थाक्षतकुसुमान्यादाय '' ॐ अपसर्पन्तु मे भूताः'' इत्यादिना क्षिप्त्वा विघ्नानुत्सार्य, सिद्धार्थाक्षतकुसुमान्यादाय रक्षेत्। ततो नैर्ऋत्यां ॐ ब्रह्मणे नमः, ॐ वास्त्वधिपतये नमः, ॐ आधारशक्तिकमलासनाय नमः, इत्यासनं सम्पूज्य तत्रोपविश्य, भूतशुद्धिमातृकान्यासादि-प्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्यात्।। कल्पसूत्रे यद्यपि वाय्वग्निसलिलात्मकप्राणायामैः शोषणदाहनप्लावनरूपां भूतशुद्धिं विधाय त्रिःप्राणानायम्य मातृकान्यासं कुर्यात्, इति नियमः, तथापि मातृकान्यासानन्तरं प्राणायामो बोद्धव्यः। तथा च तन्त्रान्तरे–

भूतशुद्धिं विधायेत्थं मातृकान्यासमाचरेत्। प्राणायामत्रयं कृत्वा न्यासानन्यान् समाचरेत्।। १।।

इति। यथा– शिरसि दक्षिणामूर्तये ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि श्रीत्रिपुरसुन्दयै देवतायै नमः। गुह्ये वाग्भवबीजाय नमः। पादयोः शक्तिकूटशक्तये नमः। सर्वाङ्गे कामराजकीलकाय नमः।। तथा च तन्त्रान्तरे–

ऋषिं न्यस्येन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे। देवतां हृदये चैव बीजं तु गुह्यदेशके।। १।।
शक्तिं च पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत्।..।।

ततः करन्यासः। यथा– अं मध्यमाभ्यां नमः। आं अनामिकाभ्यां नमः। सौः कनिष्ठिकाभ्यां नमः अं अङ्गुष्ठाभ्यां नमः। आं तर्जनीभ्यां नमः। सौः करतलपृष्ठाभ्यां नमः।। तथा च नवरत्नेश्वरे–

एतद्बीजद्विरावृत्त्या[1] मध्यमाद्यङ्गुलीषु च। शुद्धिं करस्य कुर्वीत तलयोः पृष्ठयोरपि।। १।।
चतुर्थीनतिसंयुक्तनाममन्त्रैः पृथक् पृथक्। बालाबीजत्रयं पूर्वं तथा[2] त्रिपुरसुन्दरि ।। २।।
आत्मानं रक्ष रक्षेति कुर्याद्रक्षां हृदि स्पृशन्। तथैवास्त्रेण मुद्रया कुर्याद् दिग्बन्धनं ततः।। ३।।

ततो बालान्ते अमृतार्णवासनाय नमः, पादयोः। बालान्ते त्रिपुरसुन्दरीपोताम्बुजासनाय नमः, जानुद्वये। ह्रींक्लींसौः त्रिपुरसुन्दरीदेव्यात्मासनाय नमः, ऊरुद्वये।। यामलतन्त्रे–

अमृतार्णवशब्दान्ते आसनाय ततो नमः। पादयोर्विन्यसेत् पश्चाद्बालान्ते त्रिपुरेश्वरी ।। १।।
पोताम्बुजासनायान्ते नमो जानुनि विन्यसेत्। ह्रींक्लींसौः त्रिपुरेत्युक्त्वा सुन्दरीति पदं ततः।।२।।
ङेन्तं देव्यासनं चान्ते नम ऊरुद्वये न्यसेत्।...।।

हैंहक्लींह्सौः त्रिपुरवासिनीचक्रासनाय नमः, स्फिक्द्वये। हसौः हसक्लीं हसौः त्रिपुराश्रीसर्वमन्त्रासनाय नमो गुह्ये। ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनाय नमो नाभिदेशे। हसरैं हसकलरीं हसरौः त्रिपुराम्बापर्यङ्कशक्तिपीठासनाय

---

[1] 'एतद्विद्यां द्विरुच्चार्य' ख. पाठः। [2] 'महा' ख. पाठः।

नमो, वक्षसि। ततो मूलविद्यान्ते श्रीमहात्रिपुरभैरवीसदाशिवमहाप्रेतपद्मासनाय नमो ब्रह्मरन्ध्रे। तथा च यामले—

हैंह्क्लींह्सौरन्ते च त्रिपुरावासिनीति च। चक्रासनायेत्यमुना स्फिग्द्वये परिविन्यसेत्।। १।।
हसैंहसक्लींह्सौश्चेति त्रिपुराश्रीपदं ततः। सर्वमन्त्रासनायान्ते नमो गुह्ये प्रविन्यसेत्।। २।।
ह्रींक्लींब्लेत्रिपुरमालिन्यन्ते साध्यसिद्धपदं वदेत्। आसनाय नम इति नाभिदेशे प्रविन्यसेत्।। ३।।
हस्त्रैं हसकलरीं ह्स्त्रौरन्ते त्रिपुराम्बापदं ततः। पर्यङ्कपीठासनं ङेन्तं नमो वक्षसि विन्यसेत्।। ४।।
त्रिकूटविद्याबीजान्ते महात्रिपुरभैरवी। सदाशिवमहाप्रेतपदात् पद्मासनाय च।। ५।।
नम इत्यमुना ब्रह्मरन्ध्रस्थाने प्रविन्यसेत्।..।।

अथ षडङ्गन्यासः— ऐं सर्वज्ञताशक्तिश्रीमहात्रिपुरसुन्दरी हृदयाय नमः। क्लीं नित्यतृप्तिशक्तिश्रीमहात्रिपुरसुन्दरी शिरसे स्वाहा। सौः अनादिबोधशक्तिश्रीमहात्रिपुरसुन्दरी शिखायै वषट्। ऐं स्वतन्त्रशक्तिश्रीमहात्रिपुरसुन्दरी कवचाय हुं। क्लीं नित्यमलुप्तशक्तिश्रीमहात्रिपुरसुन्दरी नेत्रत्रयाय वौषट्। सौः अनन्तशक्तिश्रीमहात्रिपुरसुन्दरी अस्त्राय फट्।। तथा च नवरत्नेश्वरे—

सर्वज्ञता नित्यसुतृप्तता च अनादिबोधश्च स्वतन्त्रता च।
अलुप्तशक्तित्वमनन्तता च षडाहुरङ्गानि बुधाः शिवायाः।। १।।

इति। तथा च— "बीजान्ते नाम संयोज्य जातियुक्तं षडङ्गकम्"। ततो वशिन्यादिन्यासः। स च सङ्क्षेपप्रयोगे उक्तः। ततो नवयोन्यात्मकन्यासः। तथा च— "बालाया त्रिपुरेशान्या नवयोन्यात्मकं न्यसेत्"। प्रयोगस्तु भैरवीप्रकरणे उक्तः।. पुनर्बालां समुच्चार्य गोलकत्वेन चिन्तयेत्। पुनर्बालां समुच्चार्य चतुरस्रं विचिन्तयेत्।। अथ पीठन्यासः। यथा मूलवाग्भवमुच्चार्य अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके रुद्रात्मशक्तिश्रीकामेश्वरीदेवीश्रीपादुकायै नमः आधारे। द्वितीयकूटमुच्चार्य सूर्यचक्रे पूर्णगिरिपीठे षष्ठेशनाथात्मके विष्णवाशक्तिश्रीवज्रेश्वरीदेवीश्रीपादुकायै नमो हृदि। तृतीयकूटमुच्चार्य सोमचक्रे [२]जालन्धरपीठे उड्डीशनाथात्मके ब्रह्मात्मशक्तिश्रीभगमालिनीदेवीश्रीपादुकायै नमः ललाटे। त्रिकूटमुच्चार्य परब्रह्मचक्रे उड्डियानपीठे श्रीचर्यानाथात्मके ब्रह्मात्मशक्तिश्रीमहात्रिपुरसुन्दरीदेवीश्रीपादुकायै नमो ब्रह्मरन्ध्रे।। अथ तत्त्वन्यासः— वाग्भवमुच्चार्य, आत्मतत्त्वव्यापिकायै श्रीमन्महात्रिपुरसुन्दर्यै नमो आधारे। कामराजमुच्चार्य, विद्यातत्त्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै नमो हृदये। तृतीयकूटमुच्चार्य, शिवतत्त्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै नमो ललाटे। त्रिकूटमुच्चार्य, सर्वतत्त्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै नमः ब्रह्मरन्ध्रे।। ततः पञ्चदशीन्यासः— यथा मूले हृदि चक्षुषोः कर्णयोः नसोमुखे भुजयुगपृष्ठजानुयुगलनाभिषु प्रत्येकं नमोऽन्तं मूलवर्णं न्यसेत्।। अथ षोडशीन्यासः—

ब्रह्मरन्ध्रे च सम्पूर्णां विद्यां रक्तां विचिन्तयेत्। सौभाग्यदण्डिनीं मुद्रां वामांसे भावयेत् सुधीः।। १।।
रिपुजिह्वाग्रहां मुद्रां वामपादतले न्यसेत्। व्यापकान्ते योनिमुद्रां मुखे क्षिप्त्वाभिवन्द्य च।। २।।

पुनर्ब्रह्मरन्ध्रे मणिबन्धे ललाटे मालिकायां षोडशार्णान् न्यसेत्। ततः—

पादयोर्जङ्घयोर्जान्वोः कट्यामन्धुनि पृष्ठके। नाभौ पार्श्वद्वये चापि स्तनयोरंसयोस्तथा।। ३।।

---

१. 'जालन्धर' ख. पाठः। २. 'पूर्णगिरि' ख. पाठः।

करयोर्ब्रह्मरन्ध्रे च वदने भ्रुवि पार्वति। कर्णप्रदेशे च तथा करवेष्टनयोः क्रमात्।। ४।।

इति संहारन्यासः।। अथ स्थितिक्रमः—करयोरङ्गुलीषु पञ्च। ब्रह्मरन्ध्रे मुखे हृदि त्रयं। नाभ्यादिपादपर्यन्तमेकम्। कण्ठान्नाभिपर्यन्तमपरम्। ब्रह्मरन्ध्रात् कण्ठपर्यन्तमेकं। पादयोः पञ्चाङ्गुलीषु पञ्च।। अथ सृष्टिन्यासः— ब्रह्मरन्ध्रे ललाटे नेत्रे श्रवणे घ्राणे ओष्ठे दन्ताधऊर्ध्वे जिह्वायां चिबुके पृष्ठे सर्वाङ्गे हृदि स्तनयोः कुक्षौ लिङ्गे च षोडशार्णान् विन्यसेत्। अथ षोढान्यासः— ऐंह्रींश्रीं अं विघ्नेश्वरश्रीभ्यां नम शिरसि। ३ँ आं विघ्नराजह्रीभ्यां नमो मुखवृत्ते। ३ँ इं विनायकपुष्टिभ्यां नमो दक्षचक्षुषि। ३ँ शिवोत्तमशान्तिभ्यां नमो वामचक्षुषि। ३ँ उं विघ्नहृत्तुष्टिभ्यां नमो दक्षकर्णे। ३ँ ऊं विघ्नकर्तृसरस्वतीभ्यां नमो वामकर्णे। ३ँ ऋं विघ्नराजरतिभ्यां मनो दक्षनसि। ३ँ ॠं गणनायकमेधाभ्यां नमो वामनसि। ३ँ ऌं एकदन्तकान्तिभ्यां नमो दक्षगण्डे। ३ँ ॡं द्विदन्तकामिनीभ्यां नमो वामगण्डे। ३ँ एं जगवक्त्रमोहिनीभ्यां नमः ओष्ठे। ३ँ ऐं निरञ्जनजटाभ्यां नमः अधरे। ३ँ ओं कपर्दितीव्राभ्यां० ऊर्ध्वदन्ते। ३ँ औं दीर्घमुखज्वालामु[1]खीभ्यां अधोदन्ते। ३ँ अं शङ्कुकर्णनन्दाभ्यां०। ब्रह्मरन्ध्रे। ३ँ अः वृषध्वजस्वरसाभ्यां० मुखे। ३ँ कं गणनाथकामरूपिणीभ्यां दक्षस्कन्धे। ३ँ खं गजेन्द्रशुभ्राभ्यां० दक्षकपूरि। ३ँ गं शूर्पकर्णजयिनीभ्यां नमो मणिबन्धे। ३ँ घं त्रिनेत्रस[2]तीभ्यां अङ्गुलिमूले। ३ँ ङं लम्बोदरविघ्नेशाभ्यां० अङ्गुल्यग्रे। ३ँ चं महामो(ना)द- स्वरूपिणीभ्यां० वामस्कन्धे। ३ँ छं चतुर्मुख[3]कामदाभ्यां नमः कपूरि। ३ँ जं सदाशिवमदविह्वलाभ्यां नमः वाममणिबन्धे। ३ँ झं आमोदविकटाभ्यां० वामाङ्गुलिमूले। ३ँ ञं दुर्मुखधूम्राभ्यां वामाङ्गुल्यग्रे। ३ँ टं सुमुखभूतिभ्यां० दक्षिणकट्यधः। ३ँ ठं प्रमोदभूतिभ्यां[4]० जानुनि। ३ँ डं एकपादसतीभ्यां गुल्फे। ३ँ ढँ द्विजिह्वरमाभ्यां० अङ्गुल्याधः। ३ँ णं शूरमानुषीभ्यां अङ्गुल्यग्रे। ३ँ तं वीरमकरध्वजाभ्यां० वामकट्यधः। ३ँ थं षण्मुखविकर्णाभ्यां मणिबन्धे। ३ँ दं वरदभ्रुकुटीभ्यां गुल्फे। ३ँ धं वामदेवलज्जाभ्यां अङ्गुल्यधः।. ३ँ नं वक्रतुण्डदीर्घघोणाभ्यां अङ्गुल्यग्रे। ३ँ पं द्विरदधनुर्धराभ्यां० दक्षपार्श्वे। ३ँ फं सेनानीयामिनीभ्यां नमः वामपार्श्वे। ३ँ बं ग्रामिणीरात्रिभ्यां० पृष्ठे। ३ँ भं मतचण्डि[5]काभ्यां० नाभौ। ३ँ मं विमलशशिप्रभाभ्यां नमः उदरे। ३ँ यं मत्तवाहनलोलाक्षीभ्यां हृदि। ३ँ रं जटिलचपलाक्षीभ्यां० दक्षस्कन्धे। ३ँ लं मुण्डिऋद्धिभ्यां नमः ककुदि। ३ँ वं खड्गिदुर्भगाभ्यां वामस्कन्धे। ३ँ शं वरेण्यसुभगाभ्यां हृदयादिदक्षहस्ते। ३ँ षं वृषकेतुशिवाभ्यां० हृदयादिवामहस्ते। ३ँ सं भक्ष्यप्रियदुर्गाभ्यां० हृदयादिदक्षपादे। ३ँ हं गणेशगुहप्रियाभ्यां० हृदयादिवामपादे। ३ँ ळं मेघनादकामिनीभ्यां० हृदयाद्युदरे। ३ँ क्षं गणेश्वरकालजिह्वाभ्यां० मुखे। एतान् नमोन्तान् विन्यसेत्।।

अथ ग्रहन्यासः— ३ँ अं १६ आं आदित्यरुचिभ्यां नमो हृदये। ३ँ यं ४ सों सोममेघाभ्यां नमो भ्रूमध्ये। ३ँ कं ५ अं अङ्गारकरक्ताभ्यां नमो नेत्रत्रये। ३ँ चं ५ बुधज्ञानरूपाभ्यां० हृदयोपरि। ३ँ टं ५ बृं बृहस्पतियशस्विनीभ्यां नमः कण्ठे। ३ँ तं ५ शुं शुक्राह्लादिनीभ्यां० हृदये। ३ँ पं शं शनैश्चरशक्तिभ्यां० नाभौ। ३ँ शं ४ रां राहुकृष्णाभ्यां नमो वक्षसिं। ३ँ ळक्षं कें केतुवायवीभ्यां नमो गुह्ये।। तथा च ज्ञानार्णवे— "सुरैरर्कं हृदि न्यसेत् यवर्गेण शशी ततः। भ्रूयुगे" इत्यादि।।

---

१. 'ज्वालिनीभ्यां' ख. पाठः। २. 'सत्या' ख. पाठः। ३. 'चतुमूर्ति' ख. पाठः। ४. 'भूमि' ख. पाठः।
५. 'चन्द्रिका' ख. पाठः।

अथ नक्षत्रन्यासः— ३ँ अंआं अश्विन्यै नमो ललाटे। ३ँ इं भरण्यै० दक्षनेत्रे। ३ँ ईंउंऊं कृत्तिकायै नमो वामनेत्रे। ३ँ ऋंॠंलृंलॄं रोहिण्यै० दक्षकर्णे। ३ँ एं मृगशीर्षायै० वामकर्णे। ३ँ ऐं आर्द्रायै० दक्षनासिकायां। ३ँ ओंऔं पुनर्वसवे नमो वामनासिकायां। ३ँ कं पुष्यायै नमो दक्षकरे। ३ँ खंगं अश्लेषायै नमो दक्षस्कन्धे। ३ँ घंङं मघायै नमो वामस्कन्धे। ३ँ चं पूर्वाफाल्गुन्यै नमो दक्षकूर्परे। ३ँ छं जं उत्तराफाल्गुन्यै० वामकूर्परे। ३ँ झंञं हस्तायै नमो दक्षमणिबन्धे। ३ँ टंठं चित्रायै नमो वाममणिबन्धे। ३ँ डं स्वात्यै नमो दक्षहस्ततले। ३ँ ढंणं विशाखायै नमो वामहस्ततले। ३ँ तंथंदं अनुराधायै नमो नाभौ। ३ँ धं ज्येष्ठायै० दक्षकटौ। ३ँ नंपंफं मूलायै नमो वामकटौ। ३ँ बं पूर्वाषाढायै नमो दक्षोरौ। ३ँ भं उत्तराषाढायै नमो वामोरौ। ३ँ मं श्रवणाय नमो दक्षजानुनि। ३ँ यंरं धनिष्ठायै नमो वामजानुनि। ३ँ लं शतभिषायै नमो दक्षगुल्फे। ३ँ वंशं पूर्वाभाद्रपदायै नमो वामगुल्फे। ३ँ षंसंहं उत्तराभाद्रपदायै नमो दक्षपादतले। ३ँ ळंक्षं रेवत्यै नमो वामपादतले।।

अथ योगिनीन्यासः— ३ँ अं १६ डमलवरयूं डाकिन्यै मां रक्ष २ त्वगात्मने नमः कण्ठे। ३ँ कं ५ चं ५ टंठं रांरींरूंरमलवरयूं राकिण्यै मां रक्ष २ असृगात्मने नमो हृदये। ३ँ डंढंणंतं ५ पंफं लांलीलूंलमलवरयूं लाकिन्यै मां रक्ष २ मांसात्मने नमः नाभौ। ३ँ बंभंमंयंरंलं कांकीकूंकमलवरयूं काकिन्यै मां रक्ष २ मेदात्मने नमः स्वाधिष्ठाने। ३ँ वंशंषंसं सांसासूंसमलवरयूं साकिन्यै मां रक्ष २ मज्जात्मने नमो मूलाधारे। ३ँ हंळंक्षं हांहींहूंहमलवरयूं हाकिन्यै मां रक्ष २ अस्थ्यात्मने भ्रूमध्ये।। एवमसृक्मांसमेदमज्जास्थीनि राकिण्यादिषु योज्यानि।।

अथ राशिन्यासः— ३ँ अंआंइंईं मेषराशये नमो दक्षपादे। ३ँ उंऊं वृषराशये नमो दक्षवृषणे। ३ँ ऋंॠंलृंलॄं मिथुनराशये नमो दक्षकुक्षौ। ३ँ एंऐं कर्कटराशये नमो दक्षोरसि। ३ँ ओंऔं सिंहराशये नमो दक्षबाहुमूले। ३ँ अंअः शं ६ कन्याराशये नमो दक्षमस्तके। ३ँ कं ५ तुलाराशये नमो वाममस्तके। ३ँ चं ५ वृश्चिकराशये नमो वामबाहुमूले। ३ँ टं ५ धनूराशये नमो वामहृदये। ३ँ तं ५ मकरराशये नमो वामकुक्षौ। ३ँ पं ५ँ कुम्भराशये नमो वामवृषणे। ३ँ यं ४ मीनराशये नमो वामपादे।।

अथ पीठन्यासः— ३ँ अं वाराणसीपीठाय नमः। ३ँ आं कामरूपपीठाय०। ३ँ इं नेपालपीठाय०। ३ँ ईं पौण्ड्रवर्धनपीठाय०। ३ँ उं पुरस्थिरपीठाय०। ३ँ ऊं कान्यकुब्जपीठाय०। ३ँ ऋं पूर्णशैलपीठाय०। ३ँ ऋं अर्बुधपीठाय०। ३ँ लृं आम्रातकेश्वरपीठाय०। ३ँ लॄं एकाम्रपीठाय०। ३ँ एं तिस्रोतः पीठाय नमः। ३ँ ऐं कामकोपीठाय०। ३ँ ओं भृगुनगरपीठाय०। ३ँ औं केदारपीठाय०। ३ँ अं चन्द्रपुरपीठाय० ३ँ अः श्रीपुरपीठाय०। ३ँ कं ओंकारपीठाय०। ३ँ खं जालन्धरपीठाय०। ३ँ गं मालवपीठाय०। ३ँ घं भद्रपीठाय०। ३ँ ङं देवीकोटपीठाय०। ३ँ चं गोकर्णपीठाय०। ३ँ छं मारुतेश्वरपीठाय०। ३ँ जं मङ्गलकोटपीठाय०। ३ँ झं अट्टहासपीठाय०। ३ँ ञं सवीरज[1]पीठाय०। ३ँ टं राजगृहपीठाय०। ३ँ ठं महापथपीठाय०। ३ँ डं कोलागिरिपीठाय०। ३ँ ढं ऐलापुरपीठाय०। ३ँ णं वा[2]णीश्वरपीठाय०। ३ँ तं जयन्तीपीठाय०। ३ँ थं उज्जयिनीपीठाय०। ३ँ दं चरित्रापीठाय०। ३ँ धं क्षीरिकापीठाय०। ३ँ नं हस्तिनापुरपीठाय०। ३ँ पं उड्डीशपीठाय०।

---

१. 'विजयः' ख. पाठः। २. 'कामेश्वर' 'कौलेश्वर' ख. पाठः।

३ँ फं प्रयागपीठाय०। ३ँ बं षष्ठीपुरपीठाय०। ३ँ भं मायापुरपीठाय०। ३ँ मं जलेश्वरपीठाय०। ३ँ यं मलयगिरिपीठाय०। ३ँ रं श्रीशैलपीठाय०। ३ँ लं महामेरुपीठाय०। ३ँ वं गिरिपीठाय०। ३ँ शं महेन्द्रपीठाय०। ३ँ षं वामनपीठाय०। ३ँ सं हिरण्यपीठाय०। ३ँ हं महालक्ष्मीपुरपीठाय०। ३ँ ळं उड्डीयानपुरपीठाय०। ३ँ क्षं छायाच्छत्रपीठाय नमः। एतानि नमोन्तानि मातृकास्थानेषु कर्तव्यानीति षोढान्यासः। अयं षोढान्यासो मातृकान्यासानन्तरं कर्तव्य इति।।

अथ त्रिपुरान्यासः– तथा च तन्त्रान्तरे "त्रिपुरान्यासं ततः कुर्यात् सर्वकामार्थसिद्धये। आसां तु न्यासमात्रेण सदाशिवो भवेन्नरः"।। ३ँ अं कामिनीत्रिपुरायै नमः। ३ँ आं मालिनीत्रिपुरायै०। ३ँ इं मदनात्रिपुरायै०। ३ँ ईं उन्मादिनीत्रिपुरायै०। ३ँ उं द्राविणीत्रिपुरायै०। ३ँ ऊं खेचरीत्रिपुरायै०। ३ँ ॠं घण्टिकात्रिपुरायै०। ३ँ ॠं कलावतीत्रिपुरायै०। ३ँ ॡं क्लेदिनीत्रिपुरायै०। ३ँ ॡं शिवदूतीत्रिपुरायै०। ३ँ एं सुभगात्रिपुरायै०। ३ँ ऐं भगावहात्रिपुरायै०। ३ँ ओं विद्येश्वरीत्रिपुरायै०। ३ँ औं सिद्धीश्वरीत्रिपुरायै०। ३ँ अं उग्रात्रिपुरायै०। ३ँ अः महोग्रात्रिपुरायै०। ३ँ कं कपालिनीत्रिपुरायै०। ३ँ खं व्यापिनीत्रिपुरायै०। ३ँ गं सुभगात्रिपुरायै०। ३ँ घं वागीश्वरीत्रिपुरायै०। ३ँ ङं कालिकात्रिपुरायै०। ३ँ चं पिङ्गलात्रिपुरायै०। ३ँ छं भगसर्पिणीत्रिपुरायै०। ३ँ जं सुन्दरीत्रिपुरायै०। ३ँ झं नीलपताकात्रिपुरायै०। ३ँ ञं महासिद्धेश्वरीत्रिपुरायै०। ३ँ टं अमोघात्रिपुरायै०। ३ँ ठं रत्नमालात्रिपुरायै०। ३ँ डं मङ्गलात्रिपुरायै०। ३ँ ढं विजयात्रिपुरायै०। ३ँ णं भगमालिनीत्रिपुरायै०। ३ँ तं रौद्रीत्रिपुरायै०। ३ँ थं योगेश्वरीत्रिपुरायै०। ३ँ दं अम्बिकात्रिपुरायै०। ३ँ धं अट्टहासात्रिपुरायै०। ३ँ नं व्योमव्यापिनीत्रिपुरायै०। ३ँ पं वज्रेश्वरीत्रिपुरायै०। ३ँ फं क्षोभिणीत्रिपुरायै०। ३ँ बं शाम्भ[1]वीत्रिपुरायै०। ३ँ भं अनङ्गा[2]त्रिपुरायै०। ३ँ मं लोकेश्वरीत्रिपुरायै०। ३ँ यं रक्तात्रिपुरायै०। ३ँ रं सुस्थात्रिपुरायै०। ३ँ लं शुक्लात्रिपुरायै०। ३ँ वं अपराजितात्रिपुरायै०। ३ँ शं संवर्तात्रिपुरायै०। ३ँ षं विमलात्रिपुरायै०। ३ँ सं अघोरात्रिपुरायै०। ३ँ हं भैरवीत्रिपुरायै०। ३ँ ळं अमोघात्रिपुरायै०। ३ँ क्षं सर्वाकर्षिणीत्रिपुरायै नमः। एता नमोऽन्तेन मातृकास्थानेषु विन्यसेत्।।

अथ कामरतिन्यासः। यथा– ऐंह्रींश्रींक्लीं अं कामरतिभ्यां नमः। ४ँ आं कामदप्रीतिभ्यां०। ४ँ इं कान्तकामिनीभ्यां०। ४ँ ईं भ्रान्तिमोहिनीभ्यां०। ४ँ उं काम[3]मधुकरकलाभ्यां०। ४ँ ऊं कामाचारविलासिनीभ्यां०। ४ँ ॠं कामिकल्पलताभ्यां०। ४ँ ॠं कोमलश्यामलाभ्यां०। ४ँ ॡं कामवर्द्धकशुचिस्तिमाभ्यां०। ४ँ ॡं कामविजयाभ्यां०। ४ँ एं रमणविशालाक्षीभ्यां०। ४ँ ऐं भ्रमणलेलिहानाभ्यां०। ४ँ ओं रतिनाथदिगम्बराभ्यां०। ४ँ औं रतिप्रियारमाभ्यां०। ४ँ अं रात्रिनाथकुब्जिकाभ्यां०। ४ँ अः स्मरसेनकान्ताभ्यां०। ४ँ कं रमणनित्याभ्यां०। ४ँ खं निशाचरकल्याणीभ्यां०। ४ँ गं नन्दकमोहिनीभ्यां०। ४ँ घं नन्दनकामदाभ्यां०। ४ँ ङं म[4]दनसुलोचनाभ्यां०। ४ँ चं चन्दयितृसुलापिनीभ्यां०। ४ँ छं निशाचरमर्दिनीभ्यां०। ४ँ जं

---

[1] 'शाकम्भरी' ख. पाठः। [2] 'अनन्तगा' ख. पाठः। [3] 'कामधुक् कमलाभ्यां' ख. पाठः। [4] 'नन्दि' ख. पाठः।

रतिसखकलहप्रियाभ्यां०। ४ँ झं पुष्पधन्ववराक्षीभ्यां०। ४ँ ञं महाधनुःसुमुखीभ्यां०। ४ँ टं भ्रामणीनलिनीभ्यां०। ४ँ ठं भ्रमणजटिनीभ्यां०। ४ँ डं भ्रममाणपा[1]लिनीभ्यां०। ४ँ ढं भ्रमशिखिनीभ्यां०। ४ँ णं भ्रान्तमुग्धाभ्यां०। ४ँ तं भ्रामकरमाभ्यां०। ४ँ थं भृङ्गभ्रमाभ्यां०। ४ँ दं भ्रान्तचारलोलाभ्यां०। ४ँ धं भ्रमावहसुचञ्चलाभ्यां०। ४ँ नं मोहनदीर्घजिह्वाभ्यां०। ४ँ पं मेचकमद्रिभ्यां[2]०। ४ँ फं मुग्धलोलाक्षीभ्यां०। ४ँ बं मोहवर्धनभृङ्गिनीभ्यां०। ४ँ भं मोहकपाटलाभ्यां०। ४ँ मं मन्मथमदनाभ्यां०। ४ँ यं मतङ्गमालिनीभ्यां०। ४ँ रं भृङ्गनायकहंसिनीभ्यां०। ४ँ लं गायकविश्वतोमुखीभ्यां०। ४ँ वं गीतजगदानन्दिनीभ्यां०। ४ँ शं नर्तकरञ्जिनीभ्यां०। ४ँ षं लोलकान्तिभ्यां०। ४ँ सं उन्मत्तकलकण्ठीभ्यां०। ४ँ हं मत्तकवृकोदरीभ्यां०। ४ँ ळं विलासिमेघश्यामाभ्यां०। ४ँ क्षं कामवर्धनसोन्मत्ताभ्यां०। ४ँ एता नमोऽन्ता मातृकास्थानेषु विन्यसेत्।।

अथ षोडशनित्यान्यासः। षोडशनित्या यथा ज्ञानार्णवे—

प्रथमा सुन्दरी नित्या महात्रिपुरसुन्दरी। कामेश्वरी समाख्याता तथैव भगमालिनी।। १।।
नित्यक्लिन्ना च भेरुण्डा तथैव वह्निवासिनी। वज्रेश्वरी च दूती च त्वरिता कुलसुन्दरी।। २।।
नित्या नीलपताका च विजया सर्वमङ्गला। ज्वालामालिनीचित्रान्ताः पञ्चदश प्रकीर्तिताः।। ३।।

इति। एतासां मन्त्रास्तु ज्ञानार्णवे—

शृणु देवि प्रवक्ष्यामि नित्यामण्डलमुत्तमम्। (१)बालां तारं च हृत्प्रान्ते कामेश्वरिपदं वदेत्।। १।।
इच्छाकामफलस्यान्ते प्रदे सर्वपदं ततः। ततः सत्त्ववशं भूयः करि सर्वजगत्पदम्।। २।।
क्षोभणान्ते करि ब्रूयात् हुङ्कारत्रयमालिखेत्। पञ्चबाणान् समालिख्य संहारेण कुमारिकाम्।। ३।।
एषा कामेश्वरी नित्या प्रसङ्गात् कथिता शिवे,। (२) वाग्भवं भगशब्दान्ते भुजे[3] भगिनि चालिखेत्।।४।।
भगोदरि भगाङ्गे च भगमाले भगावहे। भगगुह्ये भगप्रान्ते तथायोनि भगान्तिके।। ५।।
निपातिनि च सर्वान्ते ततो भगवशङ्करि। भगरूपे ततो लेख्यं नीरजायतलोचने।। ६।।
नित्यक्लिन्ने भगप्रान्ते स्वरूपे सर्व चालिखेत्। भगानि भे ह्यानयान्ते वरदेऽथ समालिखेत्।। ७।।
रेते सुरेते च भगक्लिन्ने क्लिन्नद्रवे ततः। क्लेदय द्रावय चाथ सर्वसत्त्वान् भगेश्वरि।। ८।।
अमोघे भगविच्चे च क्षुभ क्षोभय सर्व च। सत्त्वान् भगेश्वरि ब्रूयाद्वाग्भवं ब्लूंजमादिकम्।। ९।।
भेंब्लूंमोंब्लूं च हेंब्लूंहें च क्लिन्ने ततः परम्। सर्वाणि च भगान्यन्ते मे वशमानयेति च।। १०।।
स्त्रीबीजं च हरप्रान्ते बलेमात्मकमक्षरम्। भुवनेशीं समालिख्य विद्येयं भगमालिनी।। ११।।
(३)पराबीजं समुच्चार्य नित्यक्लिन्ने मदद्रवे। अग्निजायान्वितो मन्त्रो नित्यक्लिन्नेयमीरिता।।१२।।
(४)प्रणवं पूर्वमुच्चार्य तथाङ्कुशयुगं वदेत्। तन्मध्ये विलिखेद् देवि हरोमात्मकमक्षरम्।। १३।।
चवर्गमन्त्यहीनं च विलिखेद्वह्निसंस्थितम्। चतुर्दशस्वरोपेतं बिन्दुनादाङ्कितं पृथक्।। १४।।
वह्निजायान्विता विद्या भेरुण्डा देवता भवेत्,। (५)परां विलिख्य वह्न्यनुवासिन्यै नम इत्यपि।।१५।।
अष्टार्णेयं महेशानि देवता वह्निवासिनी,। (६)नित्यक्लिन्नां समालिख्य मुखे तारं समालिखेत्।।१६।।

---

१. 'ज्वालिनी' ख. पाठः। २. 'मेषकमहामतिभ्यां' ख. पाठः। ३. 'भुगे' ख. पाठः।

ह्रल्लेखान्ते फरेमान्ते चन्द्रबीजं विसर्गवत्। चतुर्दशाक्षरी विद्या देवी वज्रेश्वरी* भेवत्,।। १७।।
(७)पराबीजं समुच्चार्य शिवदूती च ङेयुता। हृदन्तोऽयं मनुर्देवि दूती (त्याः) सर्वसमृद्धिदः।।१८।।
(८)ॐकारबीजमुच्चार्य परां कवचमालिखेत्। खे च छे क्षः समालिख्य स्त्रीबीजं च समालिखेत्।१९।
हुंकारं क्षे परां चास्त्रं विद्येयं त्वरिता भवेत्,। (९)सर्वसिंहासनमयी बालैव कुलसुन्दरी,।। २०।।
(१०)बालया पुटितं कुर्यात् तथा वै नित्यभैरवीम्। पञ्चबाणांश्च देवेशि नित्या शक्राक्षरी भवेत्।२१।
पञ्चाक्षरी बाणबीजैर्नित्येयमपरा भवेत्,। (११) प्रणवं भुवनेशानीं फरेमात्मकमक्षरम्।। २२।।
ब्लूमात्मकं द्वितीयं च भुवनेश्यङ्कुशं ततः। नित्यशब्दं समुद्धृत्य सम्बोध्या च मदद्रवा।।२३।।
कवचं चाङ्कुशं माया नित्या नीलपताकिनी,। (१२) वान्तं कालसमायुक्तं रेफं शक्रस्वरान्वितम्।२४।।
बिन्दुनादाङ्कितं देवी विद्येयं विजया भवेत्।..।।

यद्वा—

वान्तं कालाग्निवायुश्च शक्रस्वरविभूषितः। नादबिन्दुकलायुक्तो विद्येयं विजया भवेत्।। २५।।
(१३) चन्द्रं वारुणसंयुक्तं तारबीजं समालिखेत्। चतुर्थ्यन्तां ततो देवि विलिखेत् सर्वमङ्गलाम्।।२६।।
हृदन्तोऽयं मनुर्देवि विद्येयं सर्वमङ्गला। (१४)तारं हृद्भगवत्यन्ते ज्वालामालिनि देवि च।। २७।।
द्विरुच्चार्य च सर्वान्ते भूतसंहारकारिके। जातवेदसि संलिख्य ज्वलन्तिपदयुग्मकम्।। २८।।
ज्वलेति प्रज्वलद्वन्द्वं हुङ्कारत्रयमालिखेत्। वह्निबीजत्रयं हुं च अस्त्रस्वाहान्वितो मनुः।। २९।।
इयं नित्या महादेवि ज्वालामालिनिका परा,। (१५)कवर्गान्तं स्वरान्तं च शक्रस्वरविभूषितम्।३०।।
बिन्दुनादकलाक्रान्तं विचित्रा परमेश्वरि। अकारादिषु सर्वेषु स्वरेषु क्रमतो यजेत्,।। ३१।।
(१६)अःस्वरे परमेशानि श्रीविद्यां विश्वविग्रहाम्[१]। स्वरवद्विन्यसेद् विद्यां नीरजायतलोचने।। ३२।।
एतेन ताः षोडशसु स्वरस्थानेषु विन्यसेत्।..।।

यथा—(१) ओंऐंह्रींश्रींअंऐंक्लींसौः ओंनमः कामेश्वरि इच्छाकामफलप्रदे सर्वसत्त्ववशङ्करि सर्वजगत्क्षोभणकरि हुंहुंहुंद्रांद्रींक्लींब्लूंसःसौःक्लींऐं (४६) कामेश्वरीनित्याकलायै नमः।। (२) ॐ आं ऐं भगभुजे[२] भगिनि भगोदरि भगाङ्गे भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वभगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय सर्वसत्त्वान् भगेश्वरि अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐंब्लूंजंब्लूंभेंब्लूंमोंब्लूंहेंब्लूंहें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रींहरब्लेंह्रीं (१४५) भगमालिनीनित्याकलायै नमः।। (३) ॐ इं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा (११) नित्यक्लिन्नाकलायै नमः।। (४) ॐ ईँ ओंँ क्रोँ हौंँ क्रोँ च्रौँ छ्रौँ ज्रौँ झौँ स्वाहा (१०) भेरुण्डानित्याकलायै नमः।। (५) ॐ उं ह्रीं वह्निवासिन्यै नमः (८) वह्निवासिनीनित्याकलायै नमः।। (६) ॐ ऊं ओंह्रींफ्रेंसः नित्यक्लिन्ने मदद्रवे स्वाहा (१४) वज्रेश्वरीनित्याकलायै नमः।। (७) ॐ ऋं ह्रीं शिवदूत्यै नमः (७) शिवदूतीनित्याकलायै नमः।। (८) ॐ ॠं ओंह्रींहुंखेचछेक्षःस्त्रीहुंक्षेह्रीं फट् (१२) त्वरितानित्याकलायै नमः।। (९) ॐ लृं ऐंक्लींसौः कुलसुन्दरीनित्याकलायै नमः।। (१०) ॐ ॡं ऐंक्लींसौः हसकलरडैं

---

* अस्या एव नामान्तरं महाविद्येश्वरीति तत्सम्प्रदायेनैवायमत्र मन्त्रोद्धारो ज्ञेयः। वज्रेश्वरामन्त्रस्तु यथा 'ह्रीं क्लिन्ने ऐंक्रों नित्यमदद्रवे ह्रीं' इति सौभाग्यरत्नाकरे।

१. 'मातृकां' ख. पाठः। २. 'भुगे' ख. पाठः।

हसकलरडीं हसकलरडौः द्रांद्रींक्लींब्लूंसः सौःक्लींऐं नित्यानित्याकलायै नमः। अथवा ऐंह्रींश्रींलृं द्रांद्रींक्लींब्लूंसः नित्येत्यादि।। (११) ४ँ एं डोंह्रींफ्रेंब्लूंह्रींक्रों नित्यमदद्रवे हुंक्रोह्रीं नीलपताकानित्याकलायै नमः।। (१२) ४ँ ऐं भमरौं विजयानित्याकलायै नमः। अथवा ४ँ ऐं भमरयौं विजयेत्यादि।। (१३) ४ँ ओं स्वों सर्वमङ्गलायै नमः सर्वमङ्गलानित्याकलायै नमः। (१४) ४ँ औं ङों नमो भगवति ज्वालामालिनि देवि २ सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति २ ज्वल २ प्रज्वल २ हुंहुंहुं रंरंरं हुंफट् स्वाहा ज्वालामालिनीनित्याकलायै नमः।। (१५) ४ँ अं चकौँ विचित्रानित्याकलायै नमः।। (१६) ४ँ अः मूलविद्यामुच्चार्य महात्रिपुरसुन्दरीनित्याकलायै नमः।। यद्वा— ४ँ अः कामेश्वरीनित्याकलायै नमः।। इति षोडशविद्यान्यासः। अस्मिन् काले वा सृष्टिस्थितिन्यासः कार्यः।।

अथ प्रकटयोगिनीन्यासः— मूलाधारे, ऐंह्रींश्रीं प्रकटयोगिनीभ्यो नमः। स्वाधिष्ठाने, ३ँ गुप्तयोगिनीभ्यो नमः। नाभौ, ३ँ गुप्ततरयोगिनीभ्यो नमः। हृदि, ३ँ सम्प्रदायरहस्ययोगिनीभ्यो नमः। कण्ठे, ३ँ कुलकौलिनीयोगिनीभ्यो नमः। भ्रूमध्ये, ३ँ निगर्भयोगिनीभ्यो नमः। नादे, ३ँ रहस्ययोगिनीभ्यो नमः। नादान्ते, ३ँ अतिरहस्ययोगिनीभ्यो नमः। ब्रह्मरन्ध्रे, ३ँ परमातिरहस्ययोगिनीभ्यो नमः।।

अथायुधन्यासः— द्रांद्रींक्लींब्लूंसः यांरांलांवांशांधं सम्मोहनाय कामेश्वरधनुषे नमः। यां ५ द्रां ५ थं सम्मोहनाय कामेश्वरीधनुषे नमः। एतद्द्वयं वामाधोहस्ते। द्रां ५ यां ५ जं जृम्भणेभ्यः कामेश्वरबाणेभ्यो नमः। यां ५ द्रा ५ जं जृम्भणेभ्यः कामेश्वरीबाणेभ्यो नमः दक्षिणाधःकरे। द्रां ५ यां ५ आं वशीकरणाय कामेश्वरपाशाय नमः। यां ५ द्रां ५ ह्रीं वशीकरणाय कामेश्वरीपाशाय नमः वामोर्ध्वे। द्रां ५ यां ५ क्रों सर्वस्तम्भनाय कामेश्वराङ्कुशाय नमः यां ५ द्रां ५ क्रों सर्वस्तम्भनाय कामेश्वर्यङ्कुशाय नमो दक्षिणोर्ध्वे।। ततो वक्ष्यमाणक्रमेण कामकलां ध्यात्वा न्यसेत्।

एवं कामकलारूपं देवतामयमात्मनः। वपुर्विचिन्त्य शिवयोरायुधध्यानमाचरेत् ।। १।।
द्रांद्रींक्लींब्लूंसः इत्येते कामबाणाः प्रकीर्तिताः। यांरांलांवांशामिदं कामेशीबाणपञ्चकम्।। २।।
द्रादीनि पश्चाद्यादीनि धंसंमोहनशब्दतः। ङेन्तं कामेश्वरधनुर्ङेनमोऽन्तं समुद्धरेत् ।। ३।।
अनेन च स्ववामाधोहस्ते संधारयेद् धनुः। यादिद्रादीनि थं ङेन्तं सम्मोहनपदोपरि।। ४।।
कामेश्वरीधनुर्ङेन्तं नमोन्तमित्यधःकरे। वामे देव्यास्तथा मन्त्री धारयेदैक्षवं धनुः।। ५।।
द्रादियादीनि जं जृम्भणेभ्यः कामेश्वरं पदम्। बाणेभ्यो नम इत्येवं दक्षिणधःकरे निजे।। ६।।
शैवान् प्रविन्यसेद्बाणान् पौष्पान् साधकसत्तमः। यादिद्रादीनि जं जृम्भणेभ्यः कामेश्वरीपदम्।। ७।।
बाणेभ्यो नम इत्येवं दक्षिणाधःकरे निजे। देव्याः प्रविन्यसेद् बाणान् पौष्पानपि च साधकः।। ८।।
द्रादियादीनि भूयोऽपि मुखवृत्तं सबिन्दुकम्। स्याद्वशीकरणायेति कामेश्वरपदं ततः।। ९।।
पाशाय नम इत्यन्तं वामोर्ध्वे विन्यसेत् करे। यादिद्रादीनि गगनं वह्निवामाक्षिबिन्दुमत्।। १०।।
स्याद्वशीकरणायेति ततः कामेश्वरीपदम्। पाशाय नम इत्येवं वामोर्ध्वे विन्यसेत् करे।। ११।।

द्रादियादीनि क्रों सर्वस्तम्भनाय पदं ततः। कामेश्वरपदात् पश्चादङ्कुशाय नमो लिखेत्।। १२।।
दक्षिणोर्ध्वकरे चैवं विन्यसेदङ्कुशं ततः। यादिद्रादीनि क्रों सर्वस्तम्भनाय ततः परम्।। १३।।
कामेश्वरीपदादूर्ध्वमङ्कुशाय नमो लिखेत्। दक्षिणोर्ध्वकरे देव्या विन्यसेदङ्कुशं ततः।। १४।।

इति। ततो मूलेन व्यापकं कृत्वा नवमुद्राः प्रदर्शयेत्। यथा— द्रां सर्वसङ्क्षोभिणी, द्रीं सर्वविद्राविर्णी, क्लीं आकर्षिणीं, ब्लूं सर्वविशिनीं, सः सर्वोन्मादिनीं, क्रों महाङ्कुशां, ह्सखफ्रें खेचरीं, ह्सौः बीजमुद्रां ऐं योनिमुद्राम्।।

न्यासकालस्तु योगिनीहृदये—

प्रातःकालेऽथवा पूजासमये होमकर्मणि। जपकाले वापि तासां विनियोगः पृथक् पृथक्।। १।।
पूजाकाले समस्तं वा कुर्यात् साधकसत्तमः।..।।

इति। ततो ध्यानं यथा—

ततः पद्मनिभां देवीं बालार्ककिरणोज्ज्वलाम्। जपाकुसुमसङ्काशां दाडिमीकुसुमोपमाम्।। १।।
पद्मरागप्रतीकाशां कुङ्कुमारुणसन्निभाम्। स्फुरन्मुकुटमाणिक्यकिङ्किणीजालमण्डिताम्।। २।।
कालालिकुलसङ्काशकुटिलालकपल्लवाम्। प्रत्यग्रारुणसङ्काशवदनाम्भोजमण्डलाम् ।। ३।।
किञ्चिदर्धेन्दुकुटिलललाटमृदुपट्टिकाम् । पिनाकिधनुराकारभ्रूलतां परमेश्वरीम् ।। ४।।
आनन्दमुदितोल्लासलीलान्दोलितलोचनाम्। स्फुरन्मयूखिसङ्काशविलसद्धेमकुण्डलाम् ।। ५।।
सुगण्डमण्डलाभोगजितेन्द्वमृतमण्डलाम्। विश्वकर्मविनिर्माणसूत्रसुस्पष्टनासिकाम्।। ६।।
ताम्रविद्रुमबिम्बाभरक्तौष्ठीममृतोपमाम्। स्मितमाधुर्यविजितमाधुर्यरससागराम् ।। ७।।
अनौपम्यगुणोपेतचिबुकोद्देशशोभिताम्। कम्बुग्रीवां महादेवीं मृणाललतितैर्भुजैः।। ८।।
रक्तोत्पलदलाकारसुकुमारकराम्बुजाम्। कराम्बुजनखज्योतिर्वितानितनभःस्थलाम्।। ९।।
मुक्ताहारलतोपेतसमुन्नतपयोधराम्। त्रिवलीवलया[१]युक्तमध्यदेशसुशोभिताम् ।। १०।।
लावण्यसरिदावर्ताकारनाभिविभूषिताम्। अनर्घ्यरत्नघटितकाञ्चीयुतनितम्बिनीम्।। ११।।
नितम्बबिम्बद्विरदरोमराजिवराङ्कुशाम्। कदलीललितस्तम्भसुकुमारोरुमीश्वरीम्।। १२।।
लावण्यकुसुमाकारजानुमण्डलबन्धुराम्। लावण्यकदलीतुल्यजङ्घायुगलमण्डिताम्।। १३।।
गूढगुल्फपदद्वन्द्वप्रपदाजितकच्छपाम् । तनुदीर्घाङ्गुलीस्वच्छनखराजिविराजिताम्।। १४।।
ब्रह्मविष्णुशिरोरत्ननिर्घृष्टचरणाम्बुजाम्। शीतांशुशतसङ्काशकान्तिसन्तानहासिनीम्।। १५।।
लौहित्यजितसिन्दूरजपादाडिमरागिणीम्। रक्तवस्त्रपरीधानां पाशाङ्कुशकरोद्यताम्।। १६।।
रक्तपद्मनिविष्टां तु रक्ताभरणभूषिताम्। चतुर्भुजां त्रिनेत्रां तु पञ्चबाणधनुर्धराम्।। १७।।
कर्पूरशकलोन्मिश्रताम्बूलपूरिताननाम्। महामृगमदोद्दामकुङ्कुमारुणविग्रहाम्।। १८।।
सर्वशृङ्गारवेषाढ्यां सर्वाभरणभूषिताम्। जगदाह्लादजननीं जगद्रञ्जनकारिणीम्।। १९।।
जगदाकर्षणकरीं जगत्कारणरूपिणीम्। सर्वमन्त्रमयीं देवीं सर्वसौभाग्यसुन्दरीम् ।। २०।।
सर्वलक्ष्मीमयीं नित्यां सर्वशक्तिमयीं शिवाम्। एवं ध्यायेत् परेशानीं महात्रिपुरसुन्दरीम्।। २१।।

---

[१] 'वलना' ख. पाठः।

इति। एवं रूपमात्मानं ध्यात्वा मानसैः पूजयेत्। तद्यथा— हृत्पद्ममध्ये देवीं विभाव्य कुण्डलिनीपात्रस्थेन सहस्रारामृतेन पाद्यं देव्याश्चरणयोर्दद्यात्। ततो मनश्चार्घ्यं दत्त्वा सहस्रदलपद्मभृङ्गारगलितपरमामृतजलेनाचमनीयं मुखे। चतुर्विंशतितत्त्वेन, गन्धं च अहिंसां विज्ञानं क्षमां दयां चालोभममोहममात्सर्यममायामनहङ्कारमरागमद्वेषमिन्द्रियाणि दशैतानि पुष्पाणि च प्रदापयेत्। वायुरूपं धूपं, तेजोरूपं च दीपम्, अम्बरं चामरं, सूर्यं दर्पणं, चन्द्रं छत्रं, पद्मं च मेखलां, आनन्दहारसूत्रमुज्ज्वलं, अनाहतध्वनिः मयीं घण्टां निवेदयेत्। ततः सुधारसाम्बुधिं मांसपर्वतं ब्रह्माण्डपूरितं पायसं च दत्त्वा, ''मनोनर्तकसन्तालैः शृङ्गारादिरसोद्भवैः। नृत्यैर्गीतैश्च वाद्यैश्च तोषयेत् परमेश्वरीम्''।। एवं सम्पूज्याभेदेन जपः कार्यः। ततो बहिः पूजामारभेत्। तत्रार्घ्यस्थापनम्। प्रथमं सामान्यार्घ्यम्। तत्र क्रमः—आदौ स्ववामे जलेन चतुरस्रं विधाय तदन्तर्वृत्तमालिखेत्। ॐमण्डलाय नमः, इति पुष्पैरभ्यर्च्य, तत्र साधारं पात्रं स्थापयित्वा बालया तमभ्यर्च्य शुद्धजलेन तमापूर्य 'ऐं सर्वज्ञाशक्तिश्रीमहात्रिपुरसुन्दरीहृदयाय नमः, इत्यादिक्रमेण षडङ्गानि सम्पूज्य तदुपरि मूलमष्टधा जपेत्।। ततो विशेषार्घ्यस्थापनम्। तत्पात्रं तु तन्त्रान्तरे—

पात्रं काञ्चनकाचरूप्यजनितं मुक्ताकपा[१]लोद्भवं
विश्वामित्रमयं च कामदमिदं हैमं[२] श्रिये स्फाटिकम्।
ताम्रं प्रीतिदमिष्टसिद्धिजनकं श्रीनारिकेलोद्भवं
कापालं स्फुटमत्र सिद्धिजनकं मुक्तिप्रदं मौक्तिकम्।। १।।

इति। नवरत्नेश्वरे—

नरपात्रं महेशानि विज्ञेयं चोत्तमोत्तमम्। नारिकेलोद्भवं पात्रं ज्ञेयं चोत्तमकल्पकम्।। १।।
रत्नपात्रं च सुश्रोणि ज्ञेयं चोत्तममध्यमम्। मध्यमोत्तमगं बैल्वं ब्रह्मवृक्षजमेव च।। २।।
कल्पं च मध्यमं प्रोक्तं मृण्मयं कल्पमध्यमम्। वश्याकर्षणकर्माणि हेमपात्रेषु शोभने।। ३।।
शान्तिके पौष्टिके वापि राजतं कारयेत् प्रिये। लोहपात्रं विजानीयान्मारणोच्चाटने तथा।। ४।।
स्तम्भकार्येषु पाषाणं विद्वेषे लोहमृण्मयम्। सर्वकार्येषु कर्तव्यं विश्वामित्रं च सुव्रते।। ५।।
कुलोत्सादनकार्येषु काचपात्रं विशिष्यते। काष्ठपात्रं विजानीयान्मन्त्राराधनकर्मणि।। ६।।
नरपात्रं तु गृह्णीयाद्भुक्तिमुक्तिप्रदायकम्। दृष्ट्वार्घ्यपात्रं देवेशि ब्रह्माद्या देवताः सदा।। ७।।
नृत्यन्ति सर्वयोगिन्यः प्रीताः सिद्धिं ददत्यपि।..।।

इति। सामान्यविशेषार्घ्ययोरावश्यकत्वमाह। तत्रैव—

एकपात्रं न कुर्वीत यदि साक्षान्महेश्वरः। मन्त्राः पराङ्मुखा यान्ति आपदश्च पदे पदे।। १।।
इह लोके दरिद्रः स्यान्मृते च पशुतां व्रजेत्। ....।।

इत्यादि पात्रलक्षणं ज्ञेयम्। तत आत्मश्रीचक्रयोर्मध्ये सामान्यार्घ्यजलेन त्रिकोणवृत्तषट्कोणचतुरस्रमण्डलं कृत्वा त्रिकोणमध्ये मूलविद्यया मध्यं सम्पूज्य, त्रिकोणे प्रत्येकं कूटं पूजयेत्। अग्न्यादिकोणक्रमेण षट्कोणे मूलविद्यया द्विरावृत्त्या षडङ्गानि पूजयेत्। तत्र त्रिपादिकां संस्थाप्य, ऐंह्रींश्रीं मं अग्निमण्डलाय दशकलात्मनेऽर्घ्यपात्राधाराय नमः, इत्याधारं

---

१. 'कला' ख. पाठः। २. 'बैल्वं' ख. पाठः।

सम्पूज्य तत्र वृत्ताकारेण वह्नेर्दश कलाः पूजयेत्। यथा– ऐंह्रींश्रीं यं धूम्रायै नमः। ३ँ रं नीलवर्णायै नमः। ३ँ लं कपिलायै नमः। ३ँ वं विस्फुलिङ्गिन्यै नमः। ३ँ शं ज्वालिन्य नमः। ३ँ षं हेम(तेजो)वत्यै नमः। ३ँ सं हव्यवाहनायै नमः। ३ँ हं कव्यवाहनायै नमः। ३ँ ळं रौद्र्यै नमः। ३ँ क्षं सङ्कर्षिण्यै नमः। इति सम्पूज्य, तदुपरि पात्रं संस्थाप्य, पूर्ववत् तत्र मन्त्रमालिख्य सम्पूज्य च, ऐंह्रींश्रीं क्लीं अं सूर्यमण्डलाय द्वादशकलात्मनेऽर्घ्यपात्राय नमः, इति सम्पूज्य वृत्ताकारेण सूर्यस्य द्वादशकलाः पूजयेत्। यथा– ऐंह्रींश्रीं कंभं तपिन्यै नमः। ३ँ खंबं तापिन्यै नमः। ३ँ गंफं धूम्रायै नमः। ३ँ घंपं विबुधायै नमः। ३ँ ङंनं बोधिन्यै नमः। ३ँ चंधं कालिन्यै नमः। ३ँ छंदं शोषिण्यै[1] नमः। ३ँ जंथं वरेण्यायै नमः। ३ँ झंतं आकर्षिण्यै नमः। ३ँ ञंणं मायायै नमः। ३ँ टंढं विवस्वत्यै नमः। ३ँ ठंडं हेमप्रभायै नमः इति सम्पूज्य, ऐंह्रींश्रीं सौः सोममण्डलाय षोडशकलात्मने नमः, इत्यनेन मूलेन च जलादिनापूर्य, पूर्ववन्मन्त्रमालिख्य त्रिकोणे अकथादित्रिरेखां हक्षौ च मध्ये चिन्तयेत्। ततः पूर्ववत् सम्पूज्य, ४ँ उं सोममण्डलाय षोडशकलाव्याप्त्यात्मनेऽर्घ्यामृताय नमः, इति सम्पूज्य वृत्ताकारेण सोमकलाः पूजयेत्। यथा–ऐंह्रींश्रीं अं अमृतायै नमः। एवं ३ँ आं मानदायै०। ३ँ इं तुष्ट्यै०। ३ँ ईं पुष्ट्यै०। ३ँ उं प्रीत्यै०। ३ँ ऊं रत्यै०। ३ँ ऋं श्रियै०। ॠं क्रियायै०। ३ँ ऌं स्वधायै०। ३ँ ॡं रात्र्यै०। ३ँ एं ज्योत्स्नायै०। ३ँ ऐं हैमवत्यै०। ३ँ ओं छायायै०। ३ँ औं पूर्णायै०। ३ँ अं विद्यायै०। ३ँ अः अमावास्यायै नमः। इति सम्पूज्य, मध्ये–हंसः आत्मने नमः। ततो हसक्षमलवरयूं आनन्दभैरवाय वषट्, हसक्षमलवरयीं सुधादेव्यै वषट्, इति सम्पूज्य, मत्स्यमुद्रया तज्जलमाच्छाद्य मूलविद्यामष्टधा जपेत्। धूपदीपादीन् निवेद्य नव मुद्राः प्रदर्श्य, ब्रह्ममयं तज्जलं किञ्चित् पात्रान्तरे निःक्षिप्य, मूलेन तज्जलेनात्मानं पूजोपकरणं चाभ्युक्ष्य सर्वं ब्रह्ममयं कुर्यात्। ''पूजासमाप्तिर्यावत् स्यात् तावदर्घ्यं न चालयेत्'' इति समयाङ्के। सुन्दरीविद्यया अङ्गदेवतापूजा तु अर्घ्यस्थापनानन्तरम्। तथा च–

आत्मानं यागवस्तूनि प्रोक्षयित्वा यथाक्रमम्। चिन्मयं तत् सदा भक्त्या चिन्तयेन्मन्त्रवित्तमः।।

तस्माच्चक्रचतुर्दिशि क्रमवशान्निमार्य चक्रं शुभं
सूर्यं हस्तिमुखं परं स्मरहरं गोपालमेवं तथा।
ध्यात्वावाह्य च तांस्ततो बहुविधैः पुष्पैश्च पाद्यादिभि–
र्नानाद्रव्यसुगन्धिमोदकफलैरुद्वासयेत् स्वे हृदि।।

इति। ततो महाचक्रे–ओं अमृताम्भोनिधये नमः। एवं रत्नद्वीपाय०, नानावृक्षमहोद्यानाय०, कल्पवृक्षवाटिकायै०, सन्तानवाटिकायै०, हरिचन्दनवाटिकायै०, मन्दारवाटिकायै०, पारिजातवाटिकायै०, कदम्बतरुवाटिकायै०, हेमप्राकाराय०, पुष्परागरत्नप्राकाराय०, पद्मरागरत्नप्राकाराय०, गोमेदरत्नप्राकाराय०, इन्द्रनीलरत्नप्राकाराय०, वज्ररत्नप्राकाराय०, वैडूर्यरत्नप्राकाराय०, मुक्तारत्नप्राकाराय०, विद्रुमरत्नप्राकाराय०, माणिक्यरत्नप्राकाराय०, माणिक्यमण्डपाय०, सहस्रस्तम्भमण्डपाय०, अमृतवापिकायै०, आनन्दवापिकायै०, विमर्शवापिकायै०, बालातपोद्गाराय०, चन्द्रिकोद्गाराय०, महाशृङ्गारपरिखायै०, महापद्माटव्यै०, चिन्तामणिगृहराजाय०, पूर्वाम्नायपूर्वद्वाराय०, दक्षिणाम्नायदक्षिणद्वाराय०,

---

[1] 'शिखिन्यै' ख. पाठः।

पश्चिमाम्नायपश्चिमद्वाराय०, उत्तराम्नायोत्तरद्वाराय०, रत्नद्वीपवलयाय०, महासिंहासनाय०, ब्रह्ममयैकमञ्चपादाय०, विष्णुमयैकमञ्चपादाय०, रुद्रमयैकमञ्चपादाय०, ईश्वरमयैकमञ्चपादाय०, सदाशिवमयमञ्चफलकाय०, हंसतूलमहोपधानाय०, कौसुम्भास्तरणाय०, महावितानिकायै०, महाजवनिकायै नमः। तदुपरि हसौः सदाशिवमहाप्रेतपद्मासनाय नमः। ततः पुनर्ध्यात्वा, त्रिखण्डामुद्रां बद्ध्वा तदुपरि शिखरे मातृकायन्त्रे समानीय 'ऐंह्रींश्रीं सौः त्रिपुरसुन्दरीमूर्तिं कल्पयामि' इति बिन्दौ कल्पितमूर्तावावाहयेत् 'हसरैं हसकलरीं हसरौं' इत्युच्चार्य,

महापद्मवनान्तःस्थे कारणानन्दविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि''।।

इति। बैन्दवचक्रे परचितिमावाह्य, आवाहनादिप्राणप्रतिष्ठान्तं कर्म समाप्य बाणकोदण्डपाशाङ्कुशादिमुद्राः प्रदर्शयेत्। ततो यथोपचारैः सम्पूज्य त्रिधा सन्तर्पयेत्। तत्रायं क्रमः— सव्यहस्ताङ्गुष्ठानामानखाग्रेण धृतश्रीपात्रार्घ्यबिन्दुना अन्यहस्तक्षिप्तपुष्पाक्षतैः ''श्रीमहात्रिपुरसुन्दरीं तर्पयामि'' इति त्रिस्तर्पयेत्।। तदुक्तं स्वतन्त्रतन्त्रे—

अङ्गुष्ठानामिकायो (ग्या?गा) द्वामहस्तस्य पार्वति। तर्पयेत् सुन्दरीं देवीं समुद्रां च सवाहनाम्।।
तर्पणानि ततो देव्यास्त्रिवारं मूलविद्यया। अङ्गुष्ठानामिकाभ्यां तु नखैर्निर्दिष्टमुद्धृतम् ।।
श्रीपात्रस्थोदकं बिन्दुं तर्पयेत् कुलनायिकाम्। अङ्गुष्ठो भैरवो देवि अनामा चण्डिका प्रिये।।
सव्येन हस्तयोगेन तर्पयेद्वा कुलेश्वरीम्।...।।

इति। विशेषस्तु—

अङ्गुष्ठानामिकाभ्यां तु वश्यकर्मणि तर्पयेत्। अङ्गुष्ठमध्यमाभ्यां तु शान्तिकर्मणि तर्पयेत्।।
तर्जन्यङ्गुष्ठयोगेन तर्पयेदभिचारके। कनिष्ठाङ्गुष्ठयोगेन स्तम्भने तर्पयेत् प्रिये।।

ततो देव्या अङ्गे षडङ्गानि पूजयेत्। यथा— ऐं सर्वज्ञाशक्तिश्रीमहात्रिपुरसुन्दरी हृदयाय नमः। क्लीं नित्यतृप्तिशक्तिश्रीमहात्रिपुरसुन्दरी शिरसे स्वाहा। सौः अनादिबोधशक्तिश्रीमहात्रिपुरसुन्दरी शिखायै वषट्। ऐं स्वतन्त्रशक्तिश्रीमहात्रिपुरसुन्दरी कवचाय हुं। क्लीं नित्यमलुप्तशक्तिश्रीमहात्रिपुरसुन्दरी नेत्रत्रयाय वौषट्। सौः अनन्तशक्तिश्रीमहात्रिपुरसुन्दरी अस्त्राय फट्। ततः स्वशरीरे कामकलां भावयेत्। तथा च—

बिन्दुं सङ्कल्प्यवक्त्रं तु तदधश्च कुचद्वयम्। तदधः सपरार्धं तु चिन्तयेत् तदधोमुखम्।।

इति। ततस्तिथिनित्या अर्चेत्। महात्र्यस्रे वामावर्तेन अकारादिपञ्च, ऊकारादिपञ्च, एकारादिपञ्च, विभाव्य मध्ये विसर्गं, तेषु वामावर्तेन शुक्लपक्षे कामेश्वर्यादिविचित्रान्तं, कृष्णपक्षे विचित्रादिकामेश्वर्यन्तं पूजयेत्। तद्यथा— प्रतिपदि अकारे ऐंह्रींश्रीं तत्तमन्त्रं चोच्चार्य कामेश्वरीनित्याकलाश्रीपादुकां पूजयामि नमः। एवं आकारे द्वितीयायां भगमालिनीं, इकारे तृतीयायां नित्यक्लिन्नां, ईकारे चतुर्थ्यां भेरुण्डां, उकारे पञ्चम्यां वह्निवासिनीं, ऊकारे षष्ठ्यां महावज्रेश्वरीं, ऋकारे सप्तम्यां शिवदूतीं, ऋकारे अष्टम्यां त्वरितां, लृकारे नवम्यां कुलसुन्दरीं, लृकारे दशम्यां नित्यां, एकारे एकादश्यां नीलपताकां, ऐकारे द्वादश्यां विजयां, ओकारे त्रयोदश्यां सर्वमङ्गलां, औकारे चतुर्दश्यां ज्वालामालिनीं, अंकारे पौर्णमास्यां विचित्रां, विसर्गे त्रिपुरसुन्दरीं पूजयेत्। कृष्णपक्षे एवं विचित्रादिकामेश्वर्यन्तं पूजयेत्। पूजामन्त्रस्तु तन्त्रान्तरे—

श्रीपदं पूर्वमुच्चार्य पादुकापदमुद्धरेत्। पूजयामि नमः पश्चात् पूजयेदङ्गदेवताः।।

इति। ततो मध्ये प्राक्त्र्यस्रमध्येषु गुरुपङ्क्तिं पूजयेत्। तथा–

आनन्दनाथशब्दान्तां विज्ञेया: परमेश्वरि। अम्बान्ता गुरव: प्रोक्ता स्त्रीलिङ्गा वीरवन्दिते।।

इति। तद्यथा– ऐंह्रींश्रीं परप्रकाशानन्दनाथश्रीपादुकां पूजयामि नम:। एवं परशिवं०, परशक्त्यम्बां०। एवं कौलेश्वरीं०, शुक्लदेवीं०, कुलेश्वरं०, कामेश्वर्यम्बिकां, एते दिव्यौघा:। भोगं०, क्लिन्नं०, समयं०, वेदं, सहजं०, एते सिद्धौघा:। गगनं०, विश्वं०, विमलं०, मदनं०, भुवनं, नीलं, एते मानवौघा:। ततो गुरुं परमगुरुं परापरगुरुं परमेष्ठिगुरुं केवलं गुरुं वा। एते* कामराजविद्यायास्तद्घटितायाश्च गुरव:। लोपायास्तद्घटितायाश्च परमशिवं, कामेश्वर्यम्बिकां, दिव्यौघं, महौघं, सर्वानन्दं, प्रज्ञादेवीं, प्रकाशं (७) एते दिव्यौघा:। दिव्यं, चित्रं, कैवल्यं दिव्याम्बां, महोदयं (५) एते सिद्धौघा:। चिद्बिश्वशक्ति: रमानन्द:, कमल:, परानन्दो, मनोहर:, स्वात्मनन्द:, प्रतिभा। एते मानवौघा:** तत: पूर्ववद् गुरुत्रयमेकं वा पूजयेत्।

अथ सामान्यगुरुपङ्क्तिं पूजयेत्। ऐंह्रींश्रीं गुरुभ्यो नम:। एवं ३ँ गुरुपादुकाभ्यो नम:। ३ँ परमगुरुभ्यो नम:। ३ँ परमगुरुपादुकाभ्यो नम:। ३ँ परापरगुरुभ्यो नम:। ३ँ परापरगुरुपादुकाभ्यो नम:। ३ँ परमेष्ठिगुरुभ्यो नम:। ३ँ परमेष्ठिगुरुपादुकाभ्यो नम:। ३ँ आचार्येभ्यो नम:। आचार्यपादुकाभ्यो नम:।। सर्वत्रादौ त्रितारी द्वितारी वा योज्या। तथा च ज्ञानार्णवे–

मायालक्ष्मीमयं बीजयुग्मं पूर्वक्रमेण हि। कथितं योजयेद् देवि तत्त्रयं वा परमेश्वरि।।

इति। कल्पसूत्रे सर्वेषां मन्त्राणामादौ त्रितारी–'वाङ्माया कमला चेति'। ततस्त्रैलोक्यमोहनादिसृष्टिचक्रे, ४ँ हसरीं सह्रीं श्रीं कलह्रीं पूर्वम्नायोन्मनीदेवीश्रीपादुकां पू०।। स्थितिचक्रे, ऐंक्लिन्ने क्लीं मदद्रवे कुले हसौ: दक्षिणाम्नायभोगिनीदेवी–श्रीपादुकां०।। तत: सर्वसौभाग्यादिसंहारात्मकत्रिचक्रे, ४ँ हसखफ्रें हसौ: ओं नमो, भवगति हस(ख)फ्रें कुब्जिके ह्स्रां ह्स्रूं अघोरे घोरे (अ)घोरमुखि छ्रांछ्रीं किणि किणि विच्चे, विलोमत: पूर्वोक्तानि बीजानि च पश्चिमाम्नायकुब्जिका–देवीश्रीपादुकां पू०।। सर्वचक्रे, ४ँ हसखफ्रें महाचण्डयोगेश्वरि उत्तराम्नायकालिकादेवीश्रीपादुकां पू०।। ततो बैन्दवे, शैवदर्शनाय नम:। तत्परित: शाक्तदर्शनाय नम:। भूबिम्बे ब्रह्मदर्शनाय नम:। शिवस्य वामतो वैष्णवदर्शनाय नम:। सृष्टिचक्रे सूर्यदर्शनाय नम:। स्थितिचक्रे बौद्धदर्शनाय नम:। ततोऽग्नीशासुरवायव्यमध्ये (दिक्षु च) मूलेन षडङ्गानि पूजयेत्। तथा च ज्ञानार्णवे–

अथाङ्गावरणं कुर्यात् श्रीविद्यामनुसम्भवम्। अग्नीशासुरवायव्यमध्ये दिक्ष्वङ्गपूजनम्।।

ततो बाह्यचतुरस्रे पश्चिमादिद्वारचतुष्टयेषु अणिमादिसिद्धी: पूयजेत्। पश्चिमादिनियमस्तु गुप्तार्णवे–

यदाशाभिमुखो मन्त्री त्रिपुरां परिपूजयेत्। देवीपश्चात् तत: प्राची प्रतीची त्रिपुराग्रत:।।

३ँ अणिमासिद्धिश्रीपा०। ३ँ लघिमासिद्धिश्रीपा०। ३ँ महिमासिद्धिश्रीपा०। ३ँ ईशित्वसिद्धिश्रीपा०। वायव्यादिकोणचतुष्टयेशु, ३ँ वशित्वसिद्धिश्रीपा०। ३ँ प्राकाम्यसिद्धिश्रीपा०। ३ँ भक्तिसिद्धिश्रीपा०। ३ँ इच्छासिद्धिश्रीपादुकां०। अध ३ँ प्राप्तिसिद्धिश्रीपा०। ऊर्ध्वे ३ँ सर्वज्ञासिद्धिश्रीपा०।। मध्यचतुरस्रस्य पश्चिमादिद्वारचतुष्टयेषु, ३ँ आं ब्रह्माणीश्रीपा०। ३ँ ईं माहेश्वरीश्रीपा०। ३ँ ऊं कौमारीश्रीपा०। ३ँ ॠं वैष्णवीश्रीपा०। वाय्वादिचतुष्कोणेषु, ३ँ ॡं वाराहीश्रीपा०। ३ँ ऐं

---

*कामराजविद्याया: कालीमते एते दीक्षागुरव:। दक्षिणामूर्तिसम्प्रदायेन इति सौभाग्यरत्नाकर:।

** एते दीक्षागुरवो लोपामुद्रागस्त्य- सम्प्रदायिभि: पूज्या:। एते कालीमतानुसारेण ज्ञेया:।

इन्द्राणीश्रीपा०। ३ँ औं चामुण्डाश्रीपा०। ३ँ अः महालक्ष्मीश्रीपा०।। आभ्यन्तरचतुरस्रस्य पश्चिमादिद्वारचतुष्टयेषु, ३ँ द्रां सर्वसंक्षोभिणीमुद्राश्रीपा०। ३ँ द्रीं सर्वविद्राविणीमुद्राश्रीपा०। ३ँ क्लीं सर्वाकर्षिणीमुद्राश्रीपा०। ३ँ ब्लूं सर्ववशङ्करीमुद्राश्रीपा०। ३ँ वाय्वादिकोणचतुष्टयेषु, ३ँ सः सर्वोन्मादिनीमुद्राश्रीपा०। ३ँ क्रों महाङ्कुशामुद्राश्रीपा०। ३ँ हसखफ्रें खेचरीमुद्राश्रीपा०। ३ँ हसौः सर्वबीजमुद्राश्रीपा०। अधः ३ँ ऐं योनिमुद्राश्रीपा०। ऊर्ध्वे ३ँ ऐंक्लींसौः त्रिखण्डामुद्राश्रीपा०। चक्राग्रे सम्पूर्णचक्रे ३ँ त्रैलोक्यमोहनचतुरस्रचक्राय नमः। अंआंसौः त्रिपुराश्रीपादुकां पूज०। एतस्या दक्षिणे ३ द्रां सर्वसङ्क्षोभिणीमुद्राश्रीपा०। वामे ३ँ अं अणिमासिद्धिश्रीपा०। ३ँ चार्वाकदर्शनाय नमः। अत्र त्रैलोक्यमोहनचतुरस्रचक्रे त्रिपुराचक्रनायिकाधिष्ठिते एता अणिमाद्याः प्रकटयोगिन्यः समुद्राः सवाहनाः ससिद्धयः सायुधाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः सन्तु, इत्यर्घ्यजलेन मूलदेव्यै समर्पयेत्।। द्रां इति सर्वसङ्क्षोभिणीं मुद्रां प्रदर्शयेत्। ऐं आत्मतत्त्वाय स्वाहा, क्लीं विद्यातत्त्वाय स्वाहा, सौः शिवतत्त्वाय स्वाहा, इति त्रिवारमर्घ्योदकेन तर्पयेत्।।

ततः षोडशदलेषु पश्चिमदलादारभ्य वामावर्तेन, ३ँ अं कामाकर्षिणिनित्याकलाश्रीपा०। ३ँ एवं सर्वत्र कलापदप्रयोगः। तथा च नवरत्नेश्वरे—"विलोमेन यजेदेताः क्रमान्नित्याकलाः पुनः"। ३ँ आं बुद्ध्याकर्षिणीनित्याकलाश्रीपा०। ३ँ इं अहङ्काराकर्षिणीनित्याकलाश्रीपा०। ३ँ ईं शब्दाकर्षिणीनित्याकलाश्रीपा०। ३ँ उं स्पर्शाकर्षिणीनित्याकलाश्रीपा०। ३ँ ऊं रूपाकर्षिणीनित्याकलाश्रीपा०। ३ँ ऋं रसाकर्षिणीनित्याकलाश्रीपा०। ३ँ ॠं गन्धाकर्षिणीनित्याकलाश्रीपा०। ३ँ ऌं चित्ताकर्षिणीनित्याकलाश्रीपा०। ३ँ ॡं धैर्याकर्षिणीनित्याकलाश्रीपा०। ३ँ एं स्मृत्याकर्षिणीनित्याकलाश्रीपा०। ३ँ ऐं नामाकर्षिणीनित्याकलाश्रीपा०। ३ँ ओं बीजाकर्षिणीनित्याकलाश्रीपा०। ३ँ औं आत्माकर्षिणीनित्याकलाश्रीपा०। ३ँ अं अमृताकर्षिणीनित्याकलाश्रीपा०। ३ँ अः शरीराकर्षिणीनित्याकलाश्रीपा०। चक्राग्रे सर्वाशापरिपूरकषोडशकलाचक्राय नमः। ३ँ ऐंक्लींसौः त्रिपुरेशीचक्रनायिकाश्रीपा०। एतस्या दक्षिणे द्रीं सर्वविद्राविणीमुद्राश्रीपा०। वामे लघिमासिद्धिश्रीपा०। ३ँ बौद्धदर्शनाय नमः। अत्र सर्वाशापरिपूरकषोडशदलचक्रे त्रिपुरेशीचक्रनायिकाधिष्ठिते एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। द्रीं इति सर्वविद्राविणीमुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा इति पूर्ववत्।।

अष्टदलचक्रे पूर्वादिचतुर्दलेषु, वामावर्तेन ३ँ कं ५ अनङ्गकुसुमादेवीश्रीपा०। ३ँ चं ५ अनङ्गमेखलादेवीश्रीपा०। ३ँ टं ५ अनङ्गमदनादेवीश्रीपा०। ३ँ तं अनङ्गमदनातुरादेवीश्रीपा०। आग्नेयादिचतुर्दलेषु, ३ँ पं ५ अनङ्गरेखादेवीश्रीपा०। ३ँ यं ४ अनङ्गवेगिनीदेवीश्रीपा०। ३ँ शं अनङ्गाङ्कुशादेवीश्रीपा०। ३ँ ळं क्षं अनङ्गमालिनीदेवीश्रीपा०। चक्राग्रे ३ँ सर्वसङ्क्षोभणाष्टदलचक्राय नमः। ३ँ ऐंक्लींसौः त्रिपुरसुन्दरीचक्रनायिकाश्रीपा०। एतस्या दक्षिणे ३ँ क्लीं सर्वाकर्षिणीमुद्राश्रीपा०। वामे ३ँ महिमासिद्धिश्रीपा०। जिनेन्द्रदर्शनाय नमः। अत्र सर्वसङ्क्षोभणाष्टदलचक्रे त्रिपुरसुन्दरीचक्रनायिकाधिष्ठिते एता अनङ्गकुसुमाद्या गुप्ततरयोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। क्लीं इति सर्वाकर्षिणीमुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा इति समानम्।।

चतुर्दशारचक्राग्राच्च समारभ्य वामावर्तेन पश्चिमादि दक्षिणं यावत्, ॐ सर्वसङ्क्षोभिणीशक्तिश्रीपा०। एवं ॐ सर्वविद्राविणीश्रीपा०। ॐ सर्वाकर्षिणीश्रीपा०। ॐ सर्वाह्लादिनीश्रीपा०। ॐ सर्वसम्मोहिनीश्रीपा०। ॐ सर्वस्तम्भिनीश्रीपा०। ॐ सर्वजृम्भिणीश्रीपा०। ॐ सर्वसत्त्ववशङ्करीश्रीपा०। ॐ सर्वरञ्जनीश्रीपा०। ॐ सर्वोन्मादिनीश्रीपा०। ॐ सर्वार्थसाधिनीश्रीपा०। ॐ सर्वसम्पत्तिपूरणीश्रीपा०। ॐ सर्वमन्त्रमयीश्रीपा०। ॐ सर्वद्वन्द्वक्षयङ्करीशक्तिश्रीपा०। इति सर्वत्र। चक्राग्रे सर्वसौभाग्यदायकचतुर्दशारचक्राय नम:। ॐ हैं हक्लीं हसौ: त्रिपुरवासिनीचक्रनायिकाश्रीपा०। एतस्या दक्षिणे ब्लूं सर्ववशङ्करीमुद्राश्रीपा०। वामे ॐ ईशित्वसिद्धिश्रीपा०। ॐ सांख्यमीमांसान्यायदर्शनेभ्यो नम:। अत्र सौभाग्यदायकचतुर्दशारचक्रे त्रिपुरवासिनीचक्रनायिकाधिष्ठिते एता: सर्वसङ्क्षोभिण्याद्या: शक्तय: सम्प्रदाययोगिन्य: समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। ब्लूं सर्ववशङ्करीमुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा, इति समानम्।।

बहिर्दशारचक्राग्रं समारभ्य वामावर्तेन पश्चिमाद्दक्षिणान्तम्, ॐ सर्वसिद्धिप्रदाश्रीपा०, ॐ सवसम्पत्प्रदा०, ॐ सर्वप्रियङ्करी, ॐ सर्वमङ्गलकारिणी०, ॐ सर्वकामप्रदा०, ॐ सर्वदु:खविमोचिनी०, ३ सर्वमृत्युप्रशमनी०, ॐ सर्वविघ्ननिवारिणी०, ॐ सर्वाङ्गसुन्दरी०, ॐ सर्वसौभाग्यदायिनीदेवीश्रीपा०। इति सर्वत्र। चक्राग्रे सर्वार्थसाधकबहिर्दशारचक्राय नम:। ॐ हसैं हसक्लीं हसौ: त्रिपुराश्रीचक्रनायिकाश्रीपा०। ॐ एतस्या दक्षिणे ॐ स: सर्वोन्मादिनीमुद्राश्रीपा०। ॐ वामे वशित्वसिद्धिश्रीपा०। ॐ ब्राह्मवैदिकदर्शनाय नम:। अत्र सर्वार्थसाधके बहिर्दशारचक्रे त्रिपुराश्रीचक्रनायिकाधिष्ठिते एता: सर्वसिद्धिप्रदाद्या: देव्य: कुलकौलिनीयोगिन्य: समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। स: सर्वोन्मादिनीमुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा। इति समानम्।।

अन्तर्दशारचक्राच्च समारभ्य पश्चिमाद् दक्षिणान्तं, ॐ सर्वज्ञादेवीश्रीपा०, ॐ सर्वशक्तिमयी०, ॐ सर्वैश्वर्यदायिनी० ॐ सर्वज्ञानमयी०, ॐ सर्वव्याधिविनाशिनी०, ॐ सर्वाधारस्वरूपिणी०, ॐ सर्वपापहरा०, ॐ सर्वानन्दमयी०, ॐ सर्वरक्षास्वरूपिणी०, ॐ सर्वेप्सितफलप्रदादेवीश्रीपा०। एवं सर्वत्र। चक्राग्रे– ॐ सर्वरक्षाकरान्तर्दशारचक्राय नम:। ह्रींक्लींब्लें त्रिपुरमालिनीचक्रनायिकाश्रीपा०। एतस्या दक्षिणे क्रों महाङ्कुशमुद्राश्रीपा०। वामे ३ प्राकाम्यसिद्धिश्रीपा०। ॐ सौरदर्शनाय नम:। अत्र सर्वरक्षाकरान्तर्दशारचक्रे त्रिपुरमालिनीचक्रनायिकाधिष्ठिते एता: सर्वज्ञाद्या देव्यो निगर्भयोगिन्य: समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। क्रों महाङ्कुशां मुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा इति समानम्।।

ततोऽष्टारचक्राच्च समारभ्य पश्चिमादि दक्षिणान्तं यावत्, ॐ अं १६ रबलूं वशिनीवाग्देवताश्रीपा०। ॐ कं ५ कलह्रीं कामेश्वरीश्रीपा०। ॐ चं ५ मोदिनीवाग्देवताश्रीपा०। ॐ टं ५ यलूं विमलावाग्देवताश्रीपा०। ॐ तं ५ जमरीं अरुणावाग्देवताश्रीपा०। ॐ पं ५ हसलवयूँ जयिनीवाग्देवताश्रीपा०। ॐ यं ४ झमरयूं सर्वेश्वरीवाग्देवताश्रीपा०। ॐ शं ४ क्षमरीं कौलिनीवाग्देवताश्रीपा०। ॐ चक्राग्रे ॐ सर्वरोगहराष्टारचक्राय नम:। ह्रींश्रींसौ: त्रिपुरासिद्धानित्याश्रीपा०। एतस्या दक्षिणे हसखफ्रें खेचरीमुद्राश्रीपा०। वामे ॐ भुक्तिसिद्धिश्रीपा०। ॐ वैष्णवदर्शनाय नम:। अत्र सर्वरोगहराष्टारचक्रे त्रिपुरासिद्धाचक्रनायिकाधिष्ठिते एता वशिन्याद्या योगिन्य: समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। हसखफ्रें खेचरीमुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा इति समानम्।।

त्रिकोणबाह्येऽग्रतो वामावर्तेन पश्चिमादि दक्षिणान्तं यावत्, ३ँ द्रांद्रींक्लींब्लूंसः यांरांलंवांशां कामेश्वरकामेश्वरीजृम्भणबाणेभ्यो नमः। ३ँ द्रां ५ या ५ धं थं सर्वसम्मोहनाय कामेश्वरकामेश्वरीधनुषे नमः। ३ँ द्रां ५ यां ५ आंह्रींवशीकरणाय कामेश्वरकामेश्वरीपाशाय नमः। ३ँ द्रां ५ यां ५ क्रों सर्वस्तम्भनाय कामेशवरकामेश्वर्यङ्कुशाय नमः॥

ततस्त्रिकोणाग्रदक्षिणोत्तरकोणेषु, मूलवाग्भवमुच्चार्य अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके रुद्रात्मशक्तिकामेश्वरीश्रीपा०। कामराजमुच्चार्य सूर्यचक्रे पूर्णगिरिपीठे[2] षष्ठीशनाथात्मके विष्ण्वात्मशक्तिवज्रेश्वरीदेवीश्रीपा०। शक्तिकूटमुच्चार्य सोमचक्रे जा[1]लन्धरपीठे उड्डीशनाथात्मके ब्रह्मात्मशक्तिभगमालिनीदेवीश्रीपा०। चक्राग्रे सर्वसिद्धिप्रदाद्यचक्राय नमः। हसरैं हसकलरीं हसकलरौं त्रिपुराम्बाशक्तिनित्याकलाश्रीपा०। एतस्या दक्षिणे ह्सौः बीजमुद्राश्रीपा०। वामे इच्छाशक्तिश्रीपा०। ३ँ शाक्तदर्शनाय नमः। अत्र सर्वसिद्धिप्रदाद्यचक्रे बाणचापपाशाङ्कुशभूषितान्तराले त्रिपुराम्बाचक्रनायिकाधिष्ठिते एताः कामेश्वर्याद्या अतिरहस्ययोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्। हसौः बीजमुद्रां प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा इति समानम्॥

ततो बैन्दवचक्रे, मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीनित्याश्री० इति त्रिः सम्पूज्य, चक्राग्रे ३ँ सर्वानन्दमयबैन्दवचक्राय नमः। मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीचक्रनायिकाश्रीपा०। एतस्या दक्षिणे ऐं योनिमुद्राश्रीपा०। वामे ३ँ प्राप्तिसिद्धिश्रीपा०। ३ँ मोक्षसिद्धिश्रीपा०। ३ँ शैवदर्शनाय नमः। कुलोड्डीशे यथा

"ततो मूलं समुच्चार्य महात्रिपुरसुन्दरी। पूजयेद् देवतारूपां बिन्दौ चक्रेश्वरीं पुनः॥"

यथा नवरत्नेश्वरे–

"बौद्धं ब्राह्मं तथा सौरं शैवं वैष्णवमेव च। शाक्तं षष्ठं तु विज्ञेयं चक्रं षड्दर्शनात्मकम्"॥

रुद्रयामलेऽपि–

"चतुरस्रं बौद्धभेदं ब्राह्मं वै षोडशच्छदम्। वैष्णवं शैवभेदं च मन्वस्रं सौरमुच्यते॥
अष्टास्रं द्विदशारस्तु मध्यं शाक्तं समीरितम्"।....................................॥

इत्युक्तस्थाने तत्तद्दर्शनपूजा। अत्र सर्वानन्दमये बैन्दवे चक्रे परब्रह्मस्वरूपिणीपरापरशक्तिमहात्रिपुरसुन्दरीसमस्तचक्रनायिकासंवित्तिरूपाचक्रनायिकाधिष्ठिते त्रैलोक्यमोहन–सर्वाशापरिपूरक–सर्वसङ्क्षोभकारक–सर्वसौभाग्यदायक–सर्वार्थसाधक–सर्वरक्षाकर–सर्वरोगहर–सर्वसिद्धिप्रद–सर्वानन्दमयश्रीचक्रसमुन्मीलितसमस्तप्रकटगुप्तगुप्ततरसम्प्रदाय–कुलकौलिनी–निगर्भरहस्यातिरहस्य–परापररहस्य–समस्तयोगिनीपरिवृतश्रीत्रिपुरा–त्रिपुरेशी–त्रिपुरसुन्दरी–त्रिपुरवासिनी–त्रिपुराश्री–त्रिपुरमालिनी–त्रिपुरसिद्धा–त्रिपुराम्बा–तत्तच्चक्रनायिकावन्दितचरणकमला श्रीमहात्रिपुरसुन्दरी नित्यादेवी सर्वचक्रेश्वरी–सर्वमन्त्रेश्वरी–सर्वविद्येश्वरी–सर्वपीठेश्वरी–सर्वकामेश्वरी–सर्ववीरेश्वरी–त्रैलोक्यमोहिनी– जगदुत्पत्तिमातृका–सर्वचक्रमयी–तत्तच्चक्रनायिकासहिता समुद्रा ससिद्धिः सायुधा सवाहना सपरिवारा सर्वोपचारैः श्रीमहात्रिपुरसुन्दरी परापरया सपर्यया पूजिता तर्पिताऽस्तु, इति विशेषार्घ्योदकाक्षतकुसुमैः प्रधानदेव्या वामहस्ते समर्पयेत्॥

---

१. 'जलन्धर' ख. पाठः। २. 'पूर्णगिरि' ख. पाठः।

ततो नवमुद्राः प्रदर्श्य, ऐं आत्मतत्त्वाय स्वाहा, क्लीं विद्यातत्त्वाय स्वाहा, सौः शिवतत्त्वाय स्वाहा, इति त्रिरर्घ्योदकेन तर्पयेत्। ततो गन्धपुष्पदूर्वाक्षतमाल्यादीनि दत्त्वा, ऐं इत्युक्त्वा घण्टां वादयन् मूलमुच्चार्य,

"ॐ वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।"

इति धूपं दद्यात्। ततो मूच्चामुच्चार्य,

"स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः। सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्।।"

इति दीपं दद्यात्। ततो मूलमुच्चार्य श्रीमहात्रिपुरसुन्दर्यै नैवेद्यं कल्पयामि नमः। इति दद्यात्।। ततो नित्यहोमं कुर्यात्। तद्यथा– परिषिच्य भूमौ मूलमुच्चार्य प्राणाय स्वाहा, अपानाय स्वाहा, समानाय स्वाहा, उदानाय स्वाहा, व्यानाय स्वाहा, षडङ्गेनाहुतिषट्कं। ततः स्ववामे त्रिकोणं वृत्तं चतुरस्रं कृत्वा, ऐंह्रींश्रीं व्यापकमण्डलाय नमः इति सम्पूज्य

"अर्धान्नं पूर्णसलिलं स्थापयेत् तत्र भाजनम्। त्रिधा पठन् कलावर्णमनुं दद्याद्बलिं ततः"।।

ॐह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा, इति सामान्यार्घ्योदकेन दत्त्वा मुद्रां प्रदर्शयेत्। ततो वटुकादिभ्यो बलिं दद्यात्। ईशानवायुनिर्ऋतिवह्निकोणेषु त्रिकोणवृत्तमण्डलानि कृत्वा, तेषु वां वटुकाय नमः। यां योगिनीभ्यो नमः। गां गणपतये नमः। क्षां क्षेत्रपालाय नमः। इति पाद्यादिभिः सम्पूज्य तेषु द्रव्यभरितपात्राणि निक्षिप्य बलिं दद्यात्। "एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा" इत्यनेन मन्त्रेण वटुकाय बलिं दत्त्वा वामाङ्गुष्ठानामिकायोगेन मुद्रां प्रदर्शयेत्।।

ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले[1] वा
पाताले वातले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा।
क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिमांसैः[2]
प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः।।

" यां योगिनीभ्यः स्वाहा सर्वयोगिनीभ्यः हुं फट् स्वाहा" इत्यनेन बलिं दद्यात्। वामहस्ताङ्गुष्ठतर्जनीमध्यमानामाभिर्योन्याकारेण मुद्रां प्रदर्शयेत्। "क्षांक्षींक्षूंक्षैंक्षौंक्षः स्थानक्षेत्रपाल धूपादिसहितं बलिं गृह्ण २ स्वाहा" इत्यनेन क्षेत्रपालबलिं हरेत्। वाममुष्टेस्तर्जनीं सरलां कृत्वा मुद्रां दर्शयेत्। "गांगींगूं गणपतये वरवरद सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा" इत्यनेन गणपतये बलिं हरेत्। वामामुष्टेर्मध्यमाङ्गुलिं दण्डवत् कृत्वा मुद्रां प्रदर्शयेत्। भैरवीविद्यया चैतद्बलिचतुष्टयं कर्तव्यम्। सर्वान्ते भूतबलिर्वा। तन्त्रे बलिमधिकृत्य–

अदत्त्वा वटुकादीनां यः पूजयति चण्डिकाम्। पूजा च विफला तस्य देवीशापश्च जायते।।

ततो मूलदेव्यै आचमनीयादिकं दत्त्वा सुवासितं ताम्बूलं दद्यात्। तत आरात्रिकं दद्यात्। तद्यथा– सुवर्णकांस्यादिभाजने कुङ्कुमादिना बालायाश्चक्रं विलिख्य, तत्र कर्पूरगर्भिण्यां वर्त्या घृतपूरितानष्टयोनिष्वष्ट प्रदीपान् निधाय, मध्ये पिष्टकादिरचितमस्तकोपरि महादीपं संस्थापयेत्। "श्रींह्रींग्लूँस्लूँम्लूँप्लूँन्लूँह्रींश्रीं" इति मन्त्रेण मूलमन्त्रेण चाभ्यर्च्य

---

१. 'विष्कले' ख. पाठः। २. 'दिकेन' ख. पाठः।

तत्पात्रं मस्तकान्तं समुद्धृत्य नववारं नीराजयेत्। तथा च ज्ञानार्णवे—

आरात्रिकमतः कुर्यात् सर्वकामार्थसिद्धये। सौवर्णे राजते कांस्ये स्थालके परमेश्वरि।।
कुङ्कुमेन लिखेद्यन्त्रं नवकोणं मनोहरम्। चन्द्ररूपं चरुं कृत्वा तन्मध्ये मस्तके शिवे।।
दीपमेकं विनिक्षिप्य वसुकोणेऽष्ट दीपकान्। यवगोधूममुद्गादिरचितान् शर्करायुतान्।।
चणका[1]हितशोभाभिः शोभितान् घृतपूरितान्। अभिमन्त्र्य महेशानि रत्नेश्वर्या ततः परम्।।

इति। ततो मूलमुच्चार्य

समस्तचक्रचक्रेशीयुते देवि नवात्मिके। आरात्रिकमिदं भद्रे गृहाण मम सिद्धये।।

इति। ततश्चक्रमुद्रां प्रदर्शयेत्। ततो विसर्जनान्तं कर्म समापयेत्।। इति सङ्क्षेपश्रीविद्यापद्धतिः।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे चतुर्विंशः श्वासः।। २४।।

* * *

---

[1] 'चषका' ख. पाठः।

अथ

पञ्चविंशः श्वासः

अथ भुवनेश्वरीमन्त्राः। तत्र दक्षिणामूर्तिसंहितायाम्– (१८ प०)

शृणु देवि प्रवक्ष्यामि भुवनानन्दमन्दिरम्। यस्य विज्ञानमात्रेण पलायन्ते महापदः।। १।।
शिवं वह्निसमारूढं वामाक्षिपरिभूषितम्। बिन्दुनादकलाक्रान्तं विद्येयं भुवनेश्वरी।। २।।

शिवं ह, वह्निः र, वामाक्षि ईकारः, बिन्दुरनुस्वारः, नादकला अर्धचन्द्रः। अस्य बीजस्य माहात्म्यं भुवनेश्वरीपारिजाते–

मत्समः पुरुषो नास्ति त्वत्समा नास्ति चाङ्गना। मायाबीजसमो मन्त्रो न भूतो न भविष्यति।।१।।

इति। शारदायाम्– (९ प० १ श्लो०)

अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीम्। ब्रह्मादयोऽपि यां ज्ञात्वा लेभिरे श्रियमूर्जिताम्।। १।।
नकुलीशोऽग्निमारूढो वामनेत्रार्धचन्द्रवान्। बीजं तस्याः समाख्यातं सेवितं सिद्धिकाङ्क्षिभिः।।२।।

नकुलीशो हकारः, अग्नी रेफः, वामनेत्रः ईकारः, अर्धचन्द्रोऽनुसारः।। भुवनेश्वरीपदव्युत्पत्तिमाह दक्षिणामूर्तिसंहितायाम्– (१९ प० ४४ श्लो०)

व्योमबीजे महेशानि कैलासादि प्रतिष्ठितम्। वह्निबीजात् सुवर्णादि निष्पन्नं बहुधा प्रिये।। १।।
तेनायं वर्तते लोको भूमिमण्डलसंस्थितः। तुर्यस्वरेण पाताले शेषरूपेण धार्यते।। २।।
महाभूमण्डलं तस्मात् पातालस्यापि नायिका। अत एव महेशानि भुवनाधीश्वरी प्रिये।। ३।।
हकारे व्योम तुर्येण स्वरेणानिलसम्भवः। वि(ह)कारे सति रेफेण साक्षाद्वह्निस्वरूपिणी।। ४।।
वह्निबीजं वसुधेयं तस्माद्रेफे वसुन्धरा। अत एव महेशानि सवायोः समता भवेत्।। ५।।
बिन्दुचक्रा[1]मृताद्देवि प्लावयन्ती जगत्त्रयम्। द्रवरूपी भवेत् तस्मात् प्लवन्ती चार्धमात्रया।। ६।।
अत एव महेशानि भुवनेशीति कथ्यते।.................................।।

इति। तथा– (१८। ३)

ऋषिः शक्तिर्वशिष्ठस्य सुतश्छन्दोऽस्य[2] कथ्यते। गायत्रं देवता बोधवाचा[3] संवित्कला परा।।१।।
शिवतुर्ये बीजशक्ती कीलकं रेफ उच्यते। ददाति भुवनेशानी पुरुषार्थचतुष्टयम्।। २।।

इति। सारसङ्ग्रहे–

युग्माब्धिषट्सूर्यमनुविकृतिस्वरवह्निभिः। बिन्दुनादयुजा व्योम्ना षडङ्गानि सजातिभिः।। १।।

---

[1] 'चन्द्रा' ख. पाठः। [2] 'ऽत्र' ख. पाठः। [3] 'चि' ख. पाठः।

संहारमातृकां सृष्टिमातृकां विन्यसेत् ततः। देव्येकतापादनाय मनुन्यासं समाचरेत्।। २।।
त्रयोदशैकादशेषुवह्निसोमस्वरादिकाः। हृल्लेखाद्या भूतनिभा न्यस्तव्या मन्त्रिणा तनौ।। ३।।

त्रयोदश ओ, एकादश ए, इषु उ, वह्निः इ, सोमः अ, इति पञ्चस्वराद्या हृल्लेखाद्याः शक्तयो न्यस्तव्या इत्युक्तम्। केचित्तु—

सद्योऽष्ठश्रुतिनेत्राद्यैर्विद्यां सम्भेद्य मन्त्रवित्। हृल्लेखाद्याः प्रविन्यसेद्यथास्थानं विचक्षणः।। १।।

इति दशपटलीवचनात्। ह्रौंह्रैंह्रींह्रांह्रः इति पञ्चबीजादिकास्ताः शक्तय इत्याहुः। तत्र यथोपदेशं कार्यमिति।

मूर्ध्नि वक्त्रे हृदि गुह्ये पादयोश्च यथाक्रमम्। ऊर्ध्वेन्द्रसौम्ययाम्याशाप्रत्यग्वक्त्रेषु च न्यसेत्।। ४।।
हृल्लेखा गगना रक्ता चतुर्थी च करालिका[1]। पञ्चमी च महोच्छुष्मा पुनरङ्गानि विन्यसेत्।। ५।।
कण्ठे न्यसेच्च गायत्रीं सावित्रीं वामगे कुचे। सरस्वतीं दक्षकुचे ब्रह्माणं वामगेंऽसके।। ६।।
हृदि विष्णुं महेशं च दक्षिणेंऽसे प्रविन्यसेत्। वामे धनपतिं युक्तं श्रिया श्रोत्राग्रके न्यसेत्।। ७।।
स्मरं रत्या युतं वक्त्रे गणं पुष्ट्या युतं न्यसेत्। दक्षश्रोत्राग्रके मन्त्री निधी शक्तियुतौ न्यसेत्।। ८।।
ब्रह्माणं विन्यसेद्भाले गायत्र्या सहितं सुधीः। विष्णुं कपोले सावित्र्या युतं दक्षे प्रविन्यसेत्।।९।।
महेशं वामगण्डे च वागीश्वर्या युतं न्यसेत्। अधः कपोलान्तरयोर्मूलं वक्त्रे न्यसेत् ततः।। १०।।
गलमूले कुचयुगे वामांसे हृदि दक्षिणे। अंसे पार्श्वयुगे चैतान् न्यसेन्मन्त्री समाहितः।। ११।।
अष्ट मातृर्न्यसेद्भाले ह्यंसे पार्श्वे तथोदरे। पार्श्वे चांसे च मन्त्रज्ञस्तथा परगले हृदि।। १२।।
व्यापय्य मूलमनुना तनुं देवीं ततः स्मरेत्। उद्यदादित्यरुचिरां शीतांशुकृतशेखराम्।। १३।।
पद्मासनां त्रिनेत्रां च पाशाङ्कुशवराभयैः। अलङ्कृतचतुर्बाहुं मन्दस्मितलसन्मुखीम्।। १४।।
कुचभारविनम्राङ्गलतां देवीं हृदि स्मरेत्।..।।

वामोर्ध्वकरादिवामाधःकरपर्यन्तमायुधध्यानम्। दशपटल्यां तु—''दक्षेऽङ्कुशाभये प्रोक्ते वामे पाशमथेष्टदम्'' इत्युक्तम्। अथ यथोपदेशं यथेष्टं वा ध्यानम्।। तथा—

आदौ कृत्वा तु षट्कोणं तद्बाह्येऽष्टदलाम्बुजम्। तद्बाह्ये षोडशदलं चतुरस्त्रत्रयं बहिः।। १५।।
चतुर्द्वारसमोपेतं मण्डलं प्रोक्तमुत्तमम्। तत्र पीठं यजेत् पूर्वं नवशक्तिसमन्वितम्।। १६।।
जया च विजया चैवाजिताख्या चापराजिता। नित्या विलासिनी दोग्ध्री ह्यघोरा मङ्गला ततः।।१७।।
एतास्तु शक्तयः पूज्याः केसरेषु च मध्यके। दद्यान्मूलेनासनं तु मूर्तिं तेनैव कल्पयेत्।। १८।।
देवीमावाहयेत् तस्यामङ्गावरणसंयुताम्। पाशाङ्कुशवराभीतिकरा भूतनिभाश्च ताः ।। १९।।
हृल्लेखाद्याः समभ्यर्च्य विविधाभरणोज्ज्वलाः। मध्येऽग्रयाम्योदक्प्रत्यक्स्थानेषु क्रमतस्ततः।।२०।।
अग्नीशासुरवायव्यकोणेष्वग्रे हृदादिकान्। यजेदस्त्रं तथाशासु कोणाग्रे मिथुनानि च।। २१।।
गायत्रीमरुणाभासामरुणाकल्पभूषिताम्। चतुर्मुखीं करैर्दण्डं कुण्डिकामक्षमालिकाम्।। २२।।
अभीतिं बिभ्रतीं तद्वद् ब्रह्माणं पुरतो यजेत्। सावित्रीं हस्तकमलैररिशङ्खौ गदाम्बुजे।। २३।।

---

[1] 'चक्रनायिका' ख. पाठः।

बिभ्राणां पीतवसनां केयूराङ्गदभूषणाम् । किरीटहाररशनानूपुरैरुपशोभिताम् ।। २४।।
तादृग्रूपं महाविष्णुं रक्षःकोणाग्रके यजेत्। शुभ्रां त्रिनेत्रामत्यन्तशुभ्रवस्त्रविराजिताम्।। २५।।
टङ्काक्षसूत्राभयदवरयुक्तचतुर्भुजाम्। सरस्वतीं यजेद्वायौ कोणे चेशं च तादृशम्।। २६।।
लक्ष्मीं प्रियाङ्कसंस्थां च दक्षेणालिङ्ग्य बाहुना। पतिं वामेन कमलं धनदं च पृथूदरम्।। २७।।
पीतं रत्नघटं रत्नकरण्डं बिभ्रतीं यजेत्। आग्नेये रमणाङ्कस्थां रतिं सव्येन पाणिना।। २८।।
आलिङ्ग्य रमणं पद्ममन्येन दधतीं स्मरेत्। बन्धूकाभं बाणगुणसृणिचापधरं जले।। २९।।

जले पश्चिमे।

ऐशाने पूजयेत् सम्यक् विघ्नराजं प्रियान्वितम्। सृणिपाशधरं कान्तावराङ्गस्पृक्‌कराङ्गुलिम्।।३०।।
माध्वीपूर्णकपालाढ्यं विघ्नराजं दिगम्बरम्। पुष्करे वि[1]लसद्रत्नस्फुरच्चषकधारिणम्।। ३१।।
सिन्दूरसदृशाकारामुद्दाममदविभ्रमाम् । धृतरक्तोत्पलामन्यपाणिना तद्ध्वजस्पृशम् ।। ३२।।
आश्लिष्टकान्तामरुणां पुष्टिमर्चेद् दिगम्बराम्। कर्णिकायां निधी पूज्यौ षट्कोणस्याथ पार्श्वयोः।।३३।।
आद्या त्वनङ्गकुसुमा त्वनङ्गकुसुमातुरा। पश्चादनङ्गमदना त्वनङ्गमदनातुरा।। ३४।।
भुवनाद्या पालिनी स्यात् तथा च गगनादिका। वेगा स्याच्छशिरेखान्या रेखा गगनपूर्विका।। ३५।।
इत्यष्ट शक्तयः पूज्याः पत्रेषु परितः स्थिताः। पाशाङ्कुशवराभीतिकरा रक्ताः सुभूषिताः।। ३६।।
ततः षोडशपत्रेषु कराली विकराल्युमा। सरस्वती श्रीर्दुर्गोषा लक्ष्मीः श्रुतिः स्मृतिर्धृतिः।। ३७।।
श्रद्धा मेधा मतिः कान्तिरर्या[2] षोडश शक्तयः। खड्गखेटकधारिण्यः श्यामाः पूज्याः प्रदक्षिणम्।।३८।।
ब्राह्म्याद्यास्तद्बहिः पूज्याः पत्रसन्धिषु दिक्क्रमात्। पद्माद्बहिः समभ्यर्च्याः शक्तयः परिचारिकाः।।३९।।
प्रथमानङ्गरूपा स्यादनङ्गमदना ततः । मदनातुरा भुवनवेगा भुवनपालिका ।। ४०।।
स्यात् सर्वशिशिरानङ्गम[3]दनानङ्गमेखला। चषकं तालवृन्तं च ताम्बूलं छत्रमुज्ज्वलम्।। ४१।।
चामरे चांशुकं पुष्पं बिभ्राणाः करपङ्कजैः।..।।

एता द्विभुजा वामेन रक्तोत्पलं दक्षिणेनैकैकशश्चषकादिकं च दधाना ध्येयाः।। प्रयोगसारे—

रक्ता रक्तोत्पलाकारा रक्ताम्बरविलेपनाः। रक्तोत्पलकरा ध्येयाः सुन्दर्याः परिचारिकाः।।

इति। तथा—

सर्वाभरणसन्दीप्तांल्लोकपालान् बहिर्यजेत्। वज्रादीन्यपि तद्बाह्ये देवीमित्थं प्रपूजयेत्।।
पूज्यते सकलैर्देवैः किं पुनर्मनुजोत्तमैः।। इति। अथ प्रयोगः— पीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शक्तिऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीभुवनेश्वरीदेवतायै नमः। गुह्ये हं बीजाय नमः। पादयोः ईं शक्तये नमः। नाभौ रं कीलकाय नमः, इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, ह्रांह्रीं इत्यादिना करन्यासं विधाय हृदयादिषडङ्गेष्वपि न्यसेत्। मूर्ध्नि ओं हृल्लेखायै नमः। एवं वक्त्रे एं गगनायै नमः, हृदि ईं रक्तायै नमः, गुह्ये आं करालिकायै नमः, पादयोः अं महोच्छुष्मायै नमः, कण्ठे गायत्र्यै नमः। वामकुचे सावित्र्यै

---

१. 'विगलद्' ख. पाठः। २. 'रार्या' ख. पाठः। ३. 'वेदना' ख. पाठः।

नमः। दक्षे सरस्वत्यै नमः। वामांसे ब्रह्मणे नमः। हृदि विष्णवे नमः। दक्षांसे महेशाय नमः। बामश्रोत्रे श्रियै धनपतये नमः। मुखे रत्यै कामाय नमः। दक्षकर्णे पुष्ट्यै गणपतये नमः। दक्षकर्णकपोलयोर्मध्ये वसुधारायै शङ्खनिधये नमः। वामे वसुमत्यै पद्मनिधये नमः। ललाटे गायत्र्यै ब्रह्मणे नमः। दक्षकपोले सावित्र्यै विष्णवे नमः। वामे वागीश्वर्यै महेशाय नमः। मुखे ह्रीं नमः। इति विन्यस्य, गलमूले वामदक्षकुचयोर्वामांसहृदयदक्षिणांसेषु दक्षवामपार्श्वयोश्च प्रोक्तमिथुनाष्टकं विन्यस्य, ललाटे आं ब्राह्म्यै नमः। वामांसे ईं माहेश्वर्यै नमः। इत्यादिक्रमेण वामपार्श्वोदरदक्षपार्श्वदक्षांसककुत्सु कौमार्यादिमहालक्ष्म्यन्तं विन्यसेत्। ततो मूलमन्त्रेण व्यापकं कृत्वा ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिनाष्टदलकमलं कृत्वा तत्कर्णिकायां षट्कोणं विधाय, तद्बाह्येऽष्टदलपद्मं विधाय, पद्माद्बहिः षोडशदलं पद्मं विरच्य, तद्बहिश्चतुर्द्वारयुक्तं, चतुरस्रत्रयं कुर्यादिति पूजाचक्रं निर्माय पुरतः संस्थाप्यार्घ्याद्यात्मपूजान्ते मण्डूकादिज्ञानात्मान्तं पीठमभ्यर्च्य, केसरेषु स्वाग्रादिप्रादक्षिण्येन, जयायै नमः। एवं विजयायै०, अजितायै०, अपराजितायै०, नित्यायै०, विलासिन्यै०, दोग्ध्र्यै०, अघोरायै०, मङ्गलायै नमः, इति मध्यमान्तं सम्पूज्य, कर्णिकायां ह्रीं सर्वशक्तिकमलासनाय नमः इति समस्तं पीठं सम्पूज्य, मूर्तिकल्पनादिपुष्पोपचारान्ते लयाङ्गमभ्यर्च्य, षट्कोणाभ्यन्तरे मध्ये देव्यग्रे देव्या दक्षिणोत्तरपृष्ठेषु च हृल्लेखाद्याः पञ्चशक्तीः सम्पूज्य, प्रागवत् षडङ्गान्यभ्यर्च्य, षट्कोणस्य देव्यग्रकोणपत्रे गायत्रीयुताय ब्रह्मणे नमः। निर्ऋतिकोणे सावित्रीयुताय विष्णवे नमः। वायव्ये सरस्वतीयुताय रुद्राय नमः। वह्निकोणे लक्ष्मीयुताय धनदाय नमः। पश्चिमे रतियुताय कन्दर्पाय नमः। ईशाने पुष्टियुताय गणपतये नमः। इति मिथुनषट्कं सम्पूज्य, षट्कोणस्य दक्षवामपार्श्वयोः शं शङ्खनिधिवसुधाराभ्यां नमः। पं पद्मनिधिवसुमतीभ्यां नमः। इति सम्पूज्य, अष्टदलेषु देव्यग्रदलमारभ्य प्रादक्षिण्येन अनङ्गकुसुमायै नमः। अनङ्गकुसुमातुरायै नमः। अनङ्गमदनायै नमः। अनङ्गमदनातुरायै नमः। भुवनपालिन्यै नमः। गगनवेगायै नमः। शशिरेखायै नमः। गगनरेखायै नमः। इति सम्पूज्य, षोडशदलेषु कराल्यै नमः। एवं विकराल्यै०, उमायै०, सरस्वत्यै०, श्रियै०, दुर्गायै०, उषायै०, लक्ष्म्यै०, श्रुत्यै०, स्मृत्यै०, धृत्यै०, श्रद्धायै०, मेधायै०, मत्यै०, कान्त्यै०, आर्यायै नमः। इति प्रादक्षिण्येनाभ्यर्च्य, तद्बहिर्दलसन्धिषु अष्टदिक्षु ब्राह्म्याद्यष्टकं सम्पूज्य, षोडशदलचतुरस्रान्तरालेऽष्टदिक्षु देव्यग्रमारभ्य अनङ्गरूपायै नमः, अनङ्गमदनायै, अनङ्गमदनातुरायै, भुवनवेगायै, भुवनपालिकायै, सर्वशिशिरायै अनङ्गवेदनायै[1], अनङ्गमेखलायै नमः। इति सम्पूज्य प्रागवल्लोकपालार्चादिसर्वं समापयेदिति।।
अत्रैव विस्तारपूजाशक्तौ सङ्क्षेपमाह महासम्मोहनतन्त्रे—

> चतुर्भिर्वा त्रिभिर्वापि द्वयेनैकेन वा पुनः। सर्वैर्वावरणैरेव भोगार्थी विस्तरं त्यजेत्।। १।।

चतुर्भिः हृल्लेखादिषडङ्गलोकपालतदायुधैः। त्रिभिः, अङ्गलोकेशतदस्त्रैः। द्वयेन अङ्गलोकपालाभ्यां। एकेन अङ्गाह्वयेनैव। इति सङ्क्षेपप्रकाराश्चत्वारः। तथा—

> द्वात्रिंशल्लक्षमानेन जपेन्मन्त्रं समाहितः। तद्दशांशं हुनेदष्टद्रव्यैस्त्रिस्वादुसंयुतैः।। १।।
> तर्पणादि ततः कुर्यान्मन्त्री शास्त्रोक्तवर्त्मना। अश्वत्थोदुम्बरप्लक्षन्यग्रोधसमिधस्तथा।। २।।
> तिलसर्षपदुग्धाज्यं द्रव्याण्यष्टौ मतानि च।..............................।।

प्रतिद्रव्येण पृथगयुतचतुष्टयं होतव्यम्।

---

[1] 'मदना' ख. पाठः।

अथवान्यप्रकारेण पुरश्चरणमुच्यते । एकलिङ्गे शिवागारे दक्षिणामूर्तिमाश्रित:।। १ ।।
बद्धपद्मासनो भस्मस्नायी च कुलविष्टर:। कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशी।। २ ।।
नित्यं विष्णुं शिवं शक्तिं जपेन्मन्त्रं सहस्रकम्। दधिक्षौद्रघृताभ्यक्ता व्याघातसमिधो हुनेत्।। ३ ।।
तत: साग्रं सहस्रं च ध्यायेत् सर्वेश्वरीमुमाम्। तत: सिद्धो भवेन्मन्त्रो नात्र कार्या विचारणा।। ४।।

व्याघात आरग्वध:।

एवं सिद्धमनुर्मन्त्री सर्वान् कामान् प्रसाधयेत्। नित्यं सौभाग्यदं पञ्चविंशज्जप्त्वाभिषेचनम्।। ५ ।।
मेधावी च भवेद्वाग्मी तावज्जप्ताम्बुपानत:। जिह्वाग्रे न्यस्य सञ्जप्तं वाक्सिद्धिकविताकरम्।।६ ।।
तज्जप्तमञ्जनं वश्यं कर्पूरागरुमिश्रितम् । सासृग्भस्मारुणालेपैर्वश्याय तिलकक्रिया ।। ७।।
जानुमात्रे जले स्थित्वा निश्चलोन्मीलितेक्षण:। जपेत् सहस्रं तद्गात्राविष्टामाकर्षयेत् स्त्रियम्।। ८।।
लाजै: कन्यामवाप्नोति तिलैरारोग्यमश्नुते। पुष्टिमान् दधिहोमेन तण्डुलैश्च तथा भवेत्।। ९ ।।
ब्राह्मीरसयुताँल्लाजान् वचया च समन्वितान्। त्रिसहस्रेणाभिमन्त्र्य मासमेकं च भक्षयेत्।। १० ।।
बृहस्पतिसमो मन्त्री सर्वविद्याधिपो भवेत्। अश्वत्थसमिध: स्वाद्वभ्यक्ता हुत्वा द्विजानसौ।। ११ ।।
वशयेत् पद्महोमेन राज्ञस्तन्मन्त्रिणस्तथा। कुमुदै राजपत्नीश्च ब्रह्मवृक्षप्रसूनकै: ।। १२ ।।
तण्डुलानां पिष्टकृतां प्रतिमां स्वादुसम्प्लुताम्। कृतप्राणप्रतिष्ठां तां सञ्जप्तां मनुनामुना ।। १३ ।।
भक्षयेत् तामर्कवारे तत: कुर्याद्वशं नरम्[1]। राजानं प्रमदां वापि यं च वाञ्छत्यनुत्तमम्।। १४।।
फलके भूतिना शक्तिं ससाध्यां विलिखेत् सुधी:। गर्भिण्यै[2] दर्शयेदाशु सा सुखप्रसवा भवेत्।।१५ ।।
अभिषेकविधानं तु वक्ष्यते वाञ्छितार्थदम्। मण्डपे मण्डलं कुर्याद् देवीपीठान्वितं शुभम्।। १६ ।।
यथावत् पीठमभ्यर्च्य कलशान् विन्यसेत् सुधी:। कर्णिकायां दलाग्रेषु स्वर्णरौप्यसुताम्रजान्।।१७।।
मार्तिकान्वा न्यसेत् कुम्भान् पञ्चैकं वापि मन्त्रवित्। महता वाद्यघोषेण मधुना पूरयेद् घटम्।।१८ ।।
कला आवाह्य परितो वस्त्राभ्यां वेष्टयेत् तत:। सर्पिषा पूर्वदिक्संस्थं दध्ना दक्षिणदिग्गतम्।।१९ ।।
क्षीरेण पश्चिमाशास्थं तैलेनेवोत्तरस्थितम्। पुष्पक्षीरमहीरुट्त्वग्दशमूलोद्भवै: शुभै:।। २० ।।

दशमूलानि वैद्यकशास्त्रोक्तानि ज्ञेयानि।

क्वाथैर्विदिक्स्थितान् कुम्भान् पूरयेन्मन्त्रवित्तम:। यदि पञ्चात्र कलशास्तदा तान् पूरयेत् क्रमात्।।२१ ।।
गोमूत्रेणैव पूर्वस्थं गोमयेनापि याम्यगम्। दुग्धेन वारुणं कुम्भं दध्ना चोत्तरदिक्स्थितम्।। २२ ।।

गोमयेन गोमयोदकेन। "गोमूत्रगोमयोदकपयोदधिघृतांशका:" इति आचार्यचरणोक्ते:।

आज्येन कलशं मध्यं पूरयेत् क्रमश: सुधी:। ऋग्भिश्च प्रणवोत्थाभि: पञ्चगव्यानि योजयेत्।।२३ ।।

प्रणवस्य पञ्च ऋच: प्रागेव दीक्षाप्रकरणोक्ता बोद्धव्या:।

आत्माष्टाक्षरमन्त्रैर्वा पञ्चभिस्तानि योजयेत्। एकार्धसप्तत्रितयभूमितानि समानि वा।। २४ ।।

एकार्धेत्यादिपञ्चभागकथनं तूत्तरे चैककलशपक्षे पञ्चगव्यपूरेण ज्ञेयम्।

---

१. 'नर:' ख. पाठ:। २. 'गर्विण्यै' ख. पाठ:।

पञ्चाशदोषधिक्वाथैर्यद्येकः कलशस्तदा। अथवा पञ्चगव्यैश्च मन्त्रवित् तं प्रपूरयेत्।। २५।।
अत्रोत्तरस्यामाशायां स्थापयेत् पङ्कजे घटम्। सम्पूरणीयो ब्रह्मद्रुक्वाथाम्भोभिरनुत्तमः।। २६।।

अत्रोत्तरस्यामिति श्लोकेन यो घट उक्तः स तु मण्डलाद्बहिरष्टदलकमले स्थाप्यः।

सुवर्णवस्त्रादियुतः शुद्धः स कलशो मतः। द्वारेषु मण्डपस्यास्य कुम्भौ द्वौ जलपूर्णकौ।। २७।।
संस्थाप्योत्तमवस्त्राद्यैर्वेष्टयित्वाभिपूजयेत्। पूर्ववद् देवतां तत्र समावाह्य प्रपूजयेत्।। २८।।
पूर्वोक्तैरुपचारैस्तु निजेष्टाप्त्यै च मन्त्रवित्।..।।

पूर्ववद्देवतामित्यनेन मण्डलमध्यस्थापितकुम्भे देवतावाहनादिकमुक्तमिति ज्ञेयम्।

घटेष्वन्येषु सम्पूज्या मातरो दिक्क्रमाद् बुधैः। यदि स्युः पञ्च कलशा मध्यादिषु यजेत् क्रमात्।।२९।।
हृल्लेखाद्याः पञ्च सुधीरभिषिञ्चेत् ततोऽन्तरम्[1]। प्रथमं घृतकुम्भेन कषायेण ततः परम्।। ३०।।
दध्ना पश्चाच्च पयसा कषायेण ततः परम्।..।।

दध्ना चेति चकारात् कषायेणाभिषिच्य पश्चात् पयसा।

तैलेन च कषायेण मधुना च ततः परम्। द्विजवृक्षत्वचः क्वाथैरभिषिच्य ततः सुधीः।। ३१।।
द्वारकुम्भजलैः पश्चादन्तरासेकमाचरेत्। वक्त्रहस्तपदक्षालाचमान्यपि च मन्त्रवित्।। ३२।।

वक्त्रहस्तेत्यादिना अभिषेकसमये एकैककलशाभिषेकानन्तरं द्वारकुम्भजलैर्मुखकरचरणक्षालनमाचमनं च कार्यमित्युक्तम्।

कारयेत् तेन नीरेण त्वेवं सिक्तो नरोत्तमः। ब्राह्मणान् भोजयेन्नानाविधैर्भक्ष्यैश्च तोषयेत्।। ३३।।
आप्नोति महतीं लक्ष्मीं सर्वदा विजयी भवेत्। वैप्रब्रह्मद्रुबिल्वानां पलं ग्राह्यं पलार्धकम्।। ३४।।

वैप्रद्रुरश्वत्थः। ब्रह्मद्रुः पलाशः।

अग्निमन्थप्लक्षसेव्यकानां कर्षं विदुस्तथा। प्रसारिणीकाश्मरिकारोहिणीनां तदर्धकम्।। ३५।।
उदुम्बरी पाटली टुण्टुकभागाः समीरिताः।..।।

अग्निमन्थः अगथ इति मध्यदेशभाषया प्रसिद्धः। प्रसारिणी गन्धप्रसारिणीति प्रसिद्धः। रोहिणी वृक्षविशेषो विन्ध्यपार्श्वेषु प्रसिद्धः। काश्मरी खंभारीति प्रसिद्धा। टुण्टुको वृक्षविशेषः।

एतत्क्वाथोदकेनासौ(मुं)पूरयेत् कलशं ततः। अमुना प्रतिवर्षं च सेकाद् दीर्घायुरुत्तमः।। ३६।।
इन्दिरावानामयैश्च रहितस्तेजसा रविः। कमला किङ्करी तस्य तं दृष्ट्वा विविधामयाः।। ३७।।
नश्यन्ति वर्धते तत्र धनधान्यादिकं महत्[2]। सर्वे देवा नमस्तस्मै कुर्वन्ति फणिनश्च तम्।। ३८।।
न दंशन्ति च तत्पुत्राः सम्पन्नाः पौत्रसंयुताः। देहान्ते परमां मुक्तिं मन्त्री याति न संशयः।।३९।।

(शारदायाम्— ९ प० ५२ श्लो०)

शक्त्यन्तःस्थितसाध्यकर्मभवने वह्नेर्वृतं शक्तिभि-
र्बाह्ये कोणगतेयुतं हरिहरैर्वर्णैः कपोलार्पितैः।

---

१. 'नरः' ख. पाठः। २. 'कुल स्थलम्' ख. पाठः।

पश्चात् तैः पुनरींयुतैर्लिपिभिरप्यावीतमिष्टार्थदं
यन्त्रं भूपुरमध्यगं त्रिगुणितं सौभाग्यसम्पत्प्रदम्।। ४०।।
दीर्घायुष्यप्रदं वश्यकरं सर्वार्थसिद्धिदम्।..........................।।

कोणगतेयुतमिति कोणगतेन इकारेण युतमित्यर्थः। सबिन्दुना इति सम्प्रदायः।। अस्यार्थः— इन्द्ररक्षोवायुदिग्गतकोणत्रयं त्र्यस्रमग्निमण्डलं विधय तन्मध्ये भुवनेश्वरीबीजं विलिख्य, तस्य रेफस्थाने साध्यनाम इकारस्थाने साधकनाम तयोर्मध्ये कर्म च विलिख्य, तद्भुवनेश्वरीबीजैरावेष्ट्य त्रिकोणस्य कोणत्रयाभ्यन्तरे सबिन्दुकमीकारं विलिख्य त्रिकोणाग्रेषु भुवनेश्वरीबीजं प्रतिकोणं विलिख्य, तेषां त्रयाणामेकैकस्य बीजस्य रेफेण तत्तद्बीजं प्रदक्षिणीकृत्यान्योन्यस्येकाराग्रे परस्परं बध्नीयात्। ततः कोणत्रयपार्श्वयोर्हरिहर इति वर्णचतुष्टयं विलिख्य बहिर्वृत्तत्रयं कृत्वा तन्मध्यगतबीथीद्वये प्रथमवीथ्यां स्वाग्रादि प्रादक्षिण्येन हरिहरवर्णैः पुनःपुनर्लिखितैरावेष्ट्य, द्वितीयवीथ्यामकारादिक्षकारान्तैः सबिन्दुकैर्मातृकाक्षरैः स्वाग्रादि प्रादक्षिण्येन वेष्टयित्वा, सर्वबाह्ये चतुरस्रं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

अत्रापि सम्पदे देवीं पूजयेत् साधको यदि। तद्बाह्यस्योपरि प्राज्ञो विदध्यादष्टपत्रकम्।। ४१।।
तस्योपरि च राश्यादिविकृतं चापि मण्डलम्। तत्रावाह्य यजेद् देवीं यथाविधि समाहितः।। ४२।।
हृल्लेखाद्याः समभ्यर्च्य पूर्ववत् साधकः स्वयम्। अङ्गानि पूजयेत् पश्चाद् गायत्र्याद्याः प्रपूजयेत्।।४३।।
प्रागग्रबीजे गायत्रीं सावित्रीं दक्षिणास्रगे[1]। सरस्वतीं मारुतस्थे ब्रह्माणं वह्निगे तथा।। ४४।।
वारुणे विष्णुमीशं च यजेदीशे ततो बहिः। ब्रह्माण्याद्या लोकपालास्तद्बाह्ये कुलिशादयः।।४५।।
एवं त्रिगुणिते देवीं पूजयेत् साधकोत्तमः।

इति। शारदातिलके— (९ प० ५३ श्लो०)

बीजान्तःस्थितसाध्यनाम शरशो मायारमामन्मथै—
र्वीतं वह्निपुरद्वये रसपुटेष्वालिख्य बीजत्रयम्।
सात्मानात्मकर्मींशिखं हरिहरैराबद्धगण्डं बहिः
षड्बीजैरनु[2]बद्धसन्धिलिपिभिर्वीतं गृहाभ्यां भुवः।। ४६।।
चिन्तामणिनृसिंहाभ्यां लसत्कोणमिदं लिखेत्। बहिः षोडशशूलाङ्कमतीव च मनोहरम्।। ४७।।
एतत् षड्गुणितं यन्त्रं सर्वसिद्धिकरं परम्। ....।।

अस्यार्थः— तत्र स्वेष्टमानभ्रमेण वृत्तं कृत्वा तत्र प्राक्प्रत्यक् ब्रह्मसूत्रमास्फाल्य तदग्रयोः सन्धिमवष्टभ्य, वृत्तार्धपरिमाणेन सूत्रेण वृत्तसन्दष्टं मत्स्यद्वयं दक्षिणोत्तरयोः कुर्यात्। एवं कृते मत्स्यचतुष्टयं सम्पन्नं भवति। ततः पूर्वमत्स्यद्वये पश्चिममत्स्यद्वये च दक्षिणोत्तरं तिर्यक्सूत्रद्वयमास्फाल्य ब्रह्मसूत्रस्य प्रागग्रे निधाय, पश्चिम-मत्स्यद्वयोदरयोस्तिर्यक्सूत्रद्वयमास्फालनेन ब्रह्मसूत्रपश्चिमाग्रे निधाय, पूर्वदिङ्मत्स्योदरयोः सूत्रद्वयमास्फालयेत्। एवं कृते वह्निमण्डलद्वयं जायते। ततो वृत्तं प्राचीसूत्रं च मार्जयेत्, इत्येवं षट्कोणं कृत्वा तन्मध्ये शक्तिबीजं विलिख्य, तस्य रेफभागे साध्यनामालिख्य, तस्येकारस्वरभागे साधकनामालिख्य रेफेकारयोरन्तराले साधकांशे कर्म लिखेदित्येवं स्वाभिमतं विलिख्य, मध्यस्थबीजपरितो वेष्टनप्रकारेण पञ्चधा शक्तिबीजं विलिख्य, तद्बहिः पञ्चधा श्रीबीजं पुनस्तद्बहिः

---

१. 'श्रिते' ख. पाठः। २. 'रवरुद्ध' ख. पाठः।

पञ्चधा कामबीजं विलिख्य, षट्कोणस्य ऊर्ध्वगतत्रिकोणत्रये तान्येव बीजानि विसर्गयुक्तानि ससाध्यनामानि दक्षिणमध्योत्तरक्रमेण विलिख्य, षट्स्वपि त्रिकोणोदरेषु (सबिन्दुचतुर्थस्वरमालिख्य, षट्कोणस्य प्रतिकोणपार्श्वयोर्हरिहर इति द्वादशधा विलिख्य षट्सु त्रिकोणाग्रेषु) प्रतित्रिकोणाग्रमेकमेकं शक्तिबीजं विलिख्य पूर्ववदेकैकान्तरितं बध्नीयात्। उक्तं चाचार्यचरणैः— 'एकैकान्तरितांस्तास्तु सम्बुध्युरितरेतरम्'। इति (१० प. ५२ श्लोक) ततो बहिर्वृत्तत्रयं कृत्वा वीथीद्वयं निष्पाद्य, तत्राभ्यन्तरवीथ्यां स्वाग्रादि प्रादक्षिण्येन (सबिन्दूनकारादिक्षकारान्तान् मातृकावर्णानालिख्य, बहिर्वीथ्यां तानेव क्षकाराद्यकारान्तक्रमेण प्रादक्षिण्येन) लिखेत्। उक्तं चाचार्यचरणैः— "बाह्यरेखामन्तरा स्युर्वर्णाः क्रमगताः शुभाः। तद्बहिः प्रतिलोमाश्च ते स्युर्लेखकपाटवात्" (१० प० ५९ श्लो०) इति।। ततो बहिरष्टकोणं विधाय तस्य दिग्गतकोणस्थरेखाष्टकं प्रान्तषोडशके षोडश त्रिशूलानि कुर्यात्। उक्तं चाचार्यचरणैः— "बहिः षोडशशूलाङ्कं शोभनं व्यक्तवर्णवत्"। एतत् षड्गुणितं यन्त्रमुक्तफलदं भवति। तथा—

अत्र देवं यजेन्मन्त्री पद्मस्योपरि शोभनम्। पद्मं द्वादशपत्रं च षट्त्रिंशत्केसरान्वितम्।। १।।
बहिश्च राश्यादिकेन युक्तं कुर्यान्मनोहरम्। नवशक्तियुतं पीठं सम्पूज्यावाह्य देवताम्।। २।।
सम्पूजयेच्चन्दनाद्यैरुपचारैश्च पूर्ववत्। प्रोक्तवच्च षडङ्गानि मिथुनानि च संयजेत्।। ३।।
बहिर्द्वादशशक्तीश्च रक्ताद्यास्तु यजेत् क्रमात्। रक्ता चानङ्गकुसुमा नित्या च कुसुमातुरा।। ४।।
अनङ्गमदना तद्वद्भवेच्च मदनातुरा। गौरी च गगना तद्वद्रेखान्तं गगनं पदम् ।। ५।।
पद्मा भवप्रमथिनी द्वादशी शशिशेखरा। बाह्ये मातॄश्च लोकेशान् कुलिशादीनि तद्बहिः।। ६।।

तद्वद्भवेच्च मदनातुरेति, अनङ्गमदनातुरेत्यर्थः। रेखान्तं गगनं पदमिति गगनरेखेत्यर्थः।

अनेन विधिना मन्त्री योऽर्चयेद्भुवनेश्वरीम्। स लक्ष्मीनिलयो भूत्वा त्रिदशैश्चाभिवन्दितः।। ७।।
देहान्ते शिवसायुज्यं सम्प्राप्नोति सुनिश्चितम्।..............................।।

इति। शारदायाम्— (९—५५)

बीजं व्याहृतिभिर्वृतं गृहयुगद्वन्द्वं वसोः कोणगं
दौर्गं बीजमनन्तरं लिपियुगैराबद्धगण्डं लिखेत्।
गायत्र्या रविशक्तिबद्धविवरं त्रिष्टुब्वृत्तं तत्ततो
वीतं मातृकया धरापुरयुगे सत्सिंहचिन्तामणिम्।। १।।
यन्त्रं दिनेशगुणितं प्रोक्तं रक्षासमृद्धिदम्। सर्वसौभाग्यजननं सर्वशत्रुनिवारकम्।। २।।

इति। अस्यार्थः— तत्र प्राग्वत् षट्कोणमालिख्य तस्य सन्धिषट्के त्रिकोणषट्कं यथा व्यक्तं भवति तथा गुरूक्तयुक्त्या षट्कोणान्तरं विलिख्य, तन्मध्ये प्राग्वत् साध्यसाधककर्मयुक्तं शक्तिबीजमालिख्य तत्प्रतिलोमेन व्याहृतिभिर्वेष्टयेत्। तदुक्तमाचार्यैः— "शक्तिं प्रवेष्टयेच्च प्रतिलोमव्याहृतिभिरन्तःस्थाम्" इति। ततो द्वादशत्रिकोणोदरेषु दुमिति दुर्गाबीजं विलिख्य तदुपरि च सानुस्वारं चतुर्थस्वरं लिखेत्। उक्तं चाचार्यचरणैः— (११। ८ "गायत्रीं प्रतिलोमतः प्रविलिखेदग्नेः कपोलम्" इति। ततः पूर्वं[1]द्वादशत्रिकोणाग्रेषु शक्तिबीजानि विलिख्य तानि परस्परं पूर्ववदेकान्तरं बध्नीयात्।

---

१. 'पूर्ववत्' ख. पाठः।

तद्बहिर्वृत्तद्वयं विधाय तयोरन्तरालगतवीथ्यां ''जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद:। स न: पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्नि:''।। इति त्रैष्टुभमन्त्रस्य सबिन्दुभिर्वर्णै: प्रलिोमेन वेष्टयेत्। तदुक्तमाचार्यचरणै:— ''बहिश्च रचयेद्भूयस्तथा त्रैष्टुभम्'' इति (११। ८) तत्र श्रीपद्मपादाचार्यव्याख्या—तथा त्रिष्टुभमिति प्रतिलोमेनेत्यर्थ:। तत: प्राग्वदनुलोममातृकया विलोममातृकया च संवेष्ट्य, तद्बहिरष्टकोणं कृत्वा प्राग्वत् तत्कोणेषु नृसिंहबीजं चिन्तामणिबीजं च विलिख्य, तथैव षोडशशूलयुक्तं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

> भुवनेशीमत्र यजेद्यन्त्रे[1] साधकसत्तम:। तदास्य विलिखेद्बाह्ये पद्मं षोडशपत्रकम्।। १ ।।
> बहिश्च राशिवीथ्यादियुतं नेत्रमनोहरम्। तत्र मध्ये यजेद् देवीमङ्गानि तदनन्तरम्।। २।।
> हृल्लेखाद्याश्चतस्रोऽपि ब्राह्म्याद्याश्च ततो यजेत्। करालाद्या: षोडश च पूजयेच्च ततो बहि:।।३ ।।
> द्वात्रिंशच्चैव विद्याया चतु:षष्टिस्ततो बहि:। पिङ्गलाक्ष्यादिका बाह्ये लोकपालास्तथायुधै:।। ४।।
> एवं य: पूजयेद्भक्त्या पूर्वोक्तं द्विगुणं फलम्। लभते साधक: शीघ्रं देवानामपि दुर्लभम्।। ५।।
> विद्याह्रीपुष्टय: प्रज्ञा सिनीवाली कुहूस्तथा। रुद्रवीर्या प्रभानन्दा पोषिणी सिद्धिदा शुभा।। ६।।
> कालरात्रिर्भद्रकाली महारात्रि: कपालिनी। विकृतिर्दण्डिमुण्डिन्यौ सेन्दुखण्डा शिखण्डिनी।। ७।।
> निशुम्भशुम्भमथनी महिषासुरमर्दिनी । इन्द्राणी चैव रुद्राणी शङ्करार्धशरीरिणी ।। ८।।
> नारी नारायणी चैव त्रिशूलिन्यपि पालिनी। अम्बिकाह्लादिनी चैव द्वात्रिंशच्छक्तयो मता:।। ९।।
> पिङ्गलाक्षी विशालाक्षी समृद्धि[2]र्बुद्धिरेव वा। श्रद्धा स्वाहा स्वधाख्या च मायाभिख्या वसुन्धरा।।१०।।
> त्रिलोकधात्री गायत्री सावित्री त्रिदशेश्वरी। सुरूपा बहुरूपा च स्कन्दमाताऽच्युताप्रिया।। ११।।
> विमला सामला चैव अरुणा आरुणी तथा। प्रकृतिर्विकृति: सृष्टि: स्थिति: संहृतिरेव च।। १२।।
> सन्ध्या माता सती हंसी मर्दिका वज्रिका परा। देवमाता भगवती देवकी कमलासना।। १३।।
> त्रिमुखीसप्तमुख्यौ च सुरासुरविमर्दिनी। सलम्बोष्ठ्यूर्ध्वकेश्यौ च बहुशिम्ना वृकोदरी।। १४।।
> रथरेखाह्वया चैव शशिरेखा तथापरा। पुनर्गगनवेगाख्या वेगा च पवनादिका।। १५।।
> भूयो भुवनपालाख्या तथैव मदनातुरा। अनङ्गानङ्गमदना भूयश्चानङ्गमेखला।। १६।।
> अनङ्गकुसुमा विश्वरूपाऽसुरभयङ्करी। अक्षोभ्यासत्यवादिन्यौ वज्ररूपा शुचिव्रता।। १७।।
> वरदा चैव वागीशी चतुष्षष्टि: प्रकीर्तिता:।..................................।।

इति। तथा—शारदातिलके (९ प० ५७ श्लो०)

> लिखेत् सरोजं रसपत्रयुक्तं मध्ये दलेष्वप्यभिलिख्य मायाम्।
> स्वरावृतं यन्त्रमिदं वधूनां पुत्रप्रदं भूमिगृहान्तरस्थम्।। १ ।।

अस्यार्थ:— भूर्जादौ षड्दलकमलं विधाय तन्मध्ये ससाध्यं शक्तिबीजमालिख्य, षट्सु दलेष्वपि शक्तिबीजमेवालिख्य, तद्बहिर्वृत्तद्वयं विधाय, तयोरन्तराले सबिन्दुभि: षोडशस्वरैरावेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्।

---

१. 'यदि' ख. पाठ:। २. 'वृद्धि:' ख. पाठ:।

एतद्यन्त्रमुक्तफलदं भवति। (तथा– षट्कोणमध्ये प्रविलिख्य शक्तिं कोणेषु तामेव विलिख्य भूयः। ससाध्यगर्भं वसुधापुरस्थं यन्त्रं भवेद्वश्यकरं नराणाम्।। अस्यार्थः– प्राग्वत् षट्कोणं विधाय तन्मध्ये तत्कोणेष्वेव ससाध्यं शक्तिबीजमालिख्य तद्बहिश्चतुरस्रं कुर्यादेतद्यन्त्रमुक्तफलदं भवति।।) तथा च सारसङ्ग्रहे–

ज्ञानामृता दण्डियुक्ता याष्टमो वह्निपुष्टियुक्! सबिन्दुर्मृत्युरूष्मायुक् शान्तिबिन्दुविभूषिता।। १।।
त्र्यक्षरात्मा मनुः प्रोक्तश्चतुर्वर्गफलप्रदः। ....।।

ज्ञानामृता ऐ, दण्डी अनुस्वारः तद्युक्तस्तेन ऐं। याष्टमो ह बह्निपुष्टियुक् रेफतुर्यस्वर (युक्तः तेन ह्रीं। मृत्युः श ऊष्मायुक् रेफयुतः शान्तिरीकारः) एभिः श्रीं इति। तथा–

पूर्वोदिताश्च मुन्याद्या मन्त्रिभिः सम्प्रकीर्तिताः। आद्याद्येन च मध्येन दीर्घभाजाङ्गकल्पनम्।। २।।

तेन ऐं ह्रां हृदयाय नमः, ऐं ह्रीं शिरसे० इत्यादिषडङ्गमन्त्रा उक्ताः। तथा– ''पुरोक्तमन्त्रवन्न्यासानत्रापि परिकल्पयेत्।'' इति। ध्यानम्–

बन्धूकाभां त्रिनयनयुतां बद्धचन्द्रार्धमौलिं
दोर्भ्यां पूर्णं विविधमणिभी रत्नपात्रं वहन्तीम्।
पद्मं सौम्यामुरुकुचयुगां स्मेरवक्त्रेन्दुबिम्बां
ध्यायेद् देवीं धृंतमणिघटप्रोल्लसत्सव्यपादाम्।। १।।

वामे रत्नपात्रं, दक्षिणे पद्ममित्यायुधध्यानम्। (''पीठे पुरोदिते देवीं यजेत् पूर्वोक्तवर्त्मना''। अथ प्रयोगः– तत्र प्राग्वत् योगपीठन्यासान्ते एकाक्षरोक्तऋष्यादिन्यासान्विधाय ऐं ह्रां हृदयाय० ऐं ह्रीं शिरसे० इत्यादिकरषडङ्गन्यासान्विधाय एकाक्षरोक्तानन्यांश्च न्यासान् कृत्वा, अत्र प्रमाणोक्तध्यानादिमानसपूजान्ते एकाक्षरोक्तवत्सर्वं कुर्यात्।।) तथा–

जपेद् द्वादशलक्षं च जुहुयात् तद्दशांशतः। त्रिस्वादुयुक्तहविषा तर्पणादि ततश्चरेत्।। ३।।
ततः प्रयोगान् कुर्वीत मन्त्री स्वेष्टफलाप्तये। ब्रह्मवृक्षप्रसूनैश्च होमो लक्ष्मीप्रदो मतः।। ४।।
संवत्सराज्जप्तब्राह्मीसर्पिःपानात् कवित्वभाक्। गौरसर्षपयुग्लोणहोमात् तु वशयेत् स्त्रियम्।।५।।
नरान् नरपतिं वान्यान् वशयेन्नात्र संशयः। आरग्वधोत्थैः कुसुमैः संसिक्तैश्चन्दनाम्भसा।। ६।।
त्रैलोक्यं च वशीकर्तुं होमोऽयं मन्त्रिणो मतः। त्रिस्वादुयुक्तै रक्ताब्जै राज्यलक्ष्मीं च विन्दति।।७।।
तैलैस्तण्डुलसम्मिश्रैर्होमात् पूर्वोदितं फलम्। पुरोदितान् प्रयोगांश्च कुर्यादत्रापि साधकः।। ८।।

इति।। तथा–

पूर्वाण्वादिकमाद्यन्ते मध्यस्थं मध्यमीरितम्। त्र्यक्षरोऽयं मनुः प्रोक्तः सर्वसिद्धिप्रदायकः।। १।।

पूर्वाण्वादिकं वाग्भवं तदाद्यन्तयोः मध्यस्थं भुवनेश्वरीबीजं, मध्ये, तेन ऐंह्रींऐं इति।। यथा–

ऋष्याद्यास्त्वस्य मन्त्रस्य पूर्वोक्ता एव सम्मताः। आद्यन्तपुटितेनैव दीर्घयुग्मध्यमेन च।। २।।
जातिभाजा षडङ्गानि विदध्यान्मन्त्रवित्तमः। एकाक्षरोदितान् न्यासान् कुर्यान्मन्त्री समाहितः।। ३।।

---

१. 'हृदि' ख. पाठः।

अम्भोदोद्द्योतिमूर्तिं त्रिनयनलसितां पीनवक्षोजनम्रां
हस्ताम्भोजैर्वहन्तीं वरदसरसिजे रत्नपात्राभये च ।
नित्यं रक्ताम्बुजस्थां शशिशकललसच्छेखरां हारभूषां
विश्वाधीशार्चिताङ्घ्रिं निजहृदि कलये भास्वरामम्बिकां ताम्।। ४।।

दक्षाध:करमारभ्य वामाध:करपर्यन्तमायुधध्यानम्। तथा—

एकाक्षरोदिते पीठे पूजयेद्भुवनेश्वरीम्। पूर्वोक्ता: पूर्ववत् पूज्या हृल्लेखाद्याश्च मन्त्रिणा।। ५।।
सम्पूजयेत् कोणषट्के पूर्ववन्मिथुनानि च। किञ्जल्केषु षडङ्गानि पूजयेच्च दलेषु ता:।। ६।।
ब्राह्म्याद्या निजनाथाङ्कास्थिता: स्मेराननालसा:। असिताङ्गो रुरुश्चण्ड: क्रोधोन्मत्तौ कपाल्यथ।।७।।
भीषणश्चैव संहार: प्रोक्तास्तत्पतयस्त्विमे। शूलं कपालं प्रेतं च क्षुद्रदुन्दुभिरेव च।। ८।।
बिभ्राणा: पाणिभिर्हस्तित्वग्वस्त्रा भीमविग्रहा:। (स्मर्तव्या वक्रकेशाश्च पूजाकाले च मन्त्रिणा।।९।।
दीर्घाद्या मातर: प्रोक्ता[1] ह्रस्वाद्या भैरवा: स्मृता:[2]। पूज्या: षोडशपत्रेषु करालाद्या: पुरोदिता:।।१०।।
तद्बाह्येऽनङ्गरूपाद्या: लोकेशास्त्राणि तद्बहि:।) ....।।

अथ प्रयोग:— तत्र प्राग्वत् प्रात:कृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा एकाक्षरोक्तान् ऋष्यादीन् विन्यस्य ऐंह्रांऐं हृत्, ऐंह्रींऐं शिर:, ऐंह्रूंऐं शिखा, इत्यादिकरषडङ्गन्यासान् विधाय, एकाक्षरोक्तन्यासान् विधाय, एकाक्षरोक्तानन्यांश्च न्यासान् कृत्वा, अत्रोक्तरूपां भवगतीं ध्यात्वा, मानसपूजादिपुष्पोपचारान्ते एकाक्षरोक्तवत् हृल्लेखाद्या मिथुनानि सम्पूज्याष्टदलकेसरेषु षडङ्गानि सम्पूज्य, अष्टदलेषु— आं ब्राह्म्यै नम: अं असिताङ्गभैरवाय नम:, ईं माहेश्वर्यै० इं रुरुभैरवाय०, ऊं कौमार्यै० उं चण्डभैरवाय० ॠं वैष्णव्यै० ॠं क्रोधराजभैरवाय० ॡं वाराह्यै० ऌं उन्मत्तभैरवाय०, ऐं इन्द्राण्यै० एं कपालिभैरवाय०, औं चामुण्डायै० ओं भीषणभैरवाय०, अ: महालक्ष्म्यै० अं संहारभैरवाय०, इति भैरवाङ्कस्था ब्राहम्याद्या: प्रादक्षिण्येन सम्पूज्य, तद्बहि: षोडशपत्रेषु प्रागुक्ता: करालाद्या: सम्पूज्य, तद्बहि: प्राग्वदनङ्गरूपाद्यास्तद्बहिरिन्द्रादीन् वज्रादींश्च सम्पूज्य शेषं प्राग्वत् समापयेद् इति।। तथा—

मनुं जपेत् तत्त्वलक्षं ब्रह्मवृक्षप्रसूनकै:। त्रिमध्वक्तै राजवृक्षपुष्पैर्वा तद्दशांशत:।। ११।।
जुहुयात् तर्पणादीनि कुर्यान्मन्त्रस्य सिद्धये। एवमुक्तविधानेन यो भजेद्भुवनेश्वरीम्।। १२।।
मदविह्वलयोषाश्च राज्ञश्च वशयेत् सुधी:। एकाक्षरोदितान् सर्वान् प्रयोगानत्र चाचरेत्।। १३।।
तेन सिद्ध्यन्ति कर्माणि तन्त्रोक्तान्यखिलान्यपि।..................................।।

इति।। तथा सारसङ्ग्रहे—

सदण्डि मुखवृत्तं स्याद् द्वितीयं भुवनेश्वरी। दक्षदोर्मूलकं साग्नि सद्यार्धेन्दुयुतं मनु:।। १।।
त्र्यर्ण: प्रोक्तश्च पाशादिस्त्रैलोक्यवशदायक:। एकाक्षरोक्तमृष्यादि माययाङ्गानि कल्पयेत्।। २।।

सदण्डि मुखवृत्तं आं, भुवनेश्वरी ह्रीं, दक्षदोर्मूलकं क, साग्नि सरेफ:, सद्य ओ, अर्धेन्दुरनुस्वार:, तेन क्रों।
अङ्कुशं वरगुणाभयं करैर्बिभ्रतीं कमलसंस्थितां पराम्। प्रोद्यदर्कगणकान्तिसत्तनुं संस्मरेच्च भुवनेश्वरीं हृदि।।१।।

---

१. 'पूज्या:' ख. पाठ:। २. 'तथा' ख. पाठ:।

दक्षोर्ध्वाधःकरयोराद्ये, तथा वामकरयोरन्ये, इत्यायुधध्यानम्।

इति ध्यात्वा यजेत् पीठे पूर्वोक्ते भुवनेश्वरीम्। वक्ष्यमाणेन मार्गेण हृल्लेखाद्या यथा पुरा।। ४।।
किञ्जल्केषु षडङ्गानि ब्राह्म्याद्या दलमध्यतः। ततः शक्रादयो बाह्ये हेतिः पूज्या च तद्बहिः।।५।।
एवं यः पूजयेद्भक्त्या स भवेच्च कुबेरवत्। अनुरक्ताः सर्वलोका भवेयुस्तस्य मन्त्रिणः।। ६।।

अथ प्रयोगः— ततः प्रातरुत्थानादियोगपीठन्यासान्ते एकाक्षरोक्तमृष्यादिकं विन्यस्य, षड्दीर्घयुक्तमायाबीजेन षडङ्गानि विन्यस्य, ध्यानादिपुष्पोपचारान्तेऽष्टदलकर्णिकायां प्राग्वद् हृल्लेखाद्यास्तत्केसरेषु षडङ्गानि, तद्दलेषु ब्राह्म्यादीः, तद्बहिश्चतुरस्रे'' लोकपालांस्तदायुधानि च सम्पूज्य शेषं प्राग्वत् समापयेदिति। तथा—

मनुं जपेत् तत्त्वलक्षं जुहुयात् तत्सहस्रकम्। त्रिस्वादुयुग्दुग्धवृक्षसमिद्भिः प्रोक्तसंख्यया।। ७।।
शुद्धैस्तिलैः पयोयुक्तैस्तर्पणादि ततश्चरेत्।.......................................।।

तत्त्वलक्षं चतुर्विंशतिलक्षम्। तत्सहस्रं चतुर्विंशतिसहस्रं। दुग्धवृक्षा अश्वत्थोदुम्बरप्लक्षवटाः। एकैकेन षट्सहस्रं। प्रोक्तसंख्ययेत्यस्य तिलैरिति सम्बन्धः। तेन तावत्तिलैरपि जुहुयादित्यर्थः। ''तिलैश्च तावज्जुहुयात् पयोक्तैः'' (११ प० ४३ श्लो०) इति प्रपञ्चसारवचनात्।

महसा सूर्यसदृशस्तेनाधिष्ठितमन्दिरम्। रजन्यां निष्प्रदीपं च प्रदीपशतसङ्कुलम्।। ८।।
विलोक्यते सर्वजनैरेतन्मन्त्रप्रसादतः। लवणोन्मिश्रसिद्धार्थैः रजन्यां घृतसुप्लुतैः ।। ९।।
जुहुयाच्चैव राजानं राजपत्नीं वशं नयेत्। अन्नहोमेन मन्त्रज्ञः समृद्धान्नगृहो भवेत्।। १०।।
विकसत्पद्महोमेन लक्ष्मीरेनं न सन्त्यजेत्। चतुरङ्गुलपुष्पैश्च होमः स्यात् कविताप्रदः।। ११।।
तिलहोमेनामयानां नाशो मन्त्रिण एव हि। आयुष्कामो घृतेनैव जुहुयान्मन्त्रवित्तमः।। १२।।
पूर्वोदितान् प्रयोगांश्च कुर्यादत्रापि मन्त्रवित्।.......................................।।

इति। प्रपञ्चसारे — (प० ११ श्लो० २८)

अष्टाशात्तार्गलाविर्हलयवरयुतापूर्वपाश्चात्यषट्कं
कोणोद्यत्स्वाङ्गसाष्टाक्षरयुगयुगलाष्टाक्षराख्यं बहिश्च।
मायोपेतात्मयुग्मस्वरमिलितलसत्केसरं साष्टपत्रं
पद्मं तन्मध्यपङ्क्तित्रितयपरिलसत्पाशशक्त्यङ्कुशार्णम्।। १।।
पाशाङ्कुशावृतमनुप्रतिलोमगैश्च[1] वर्णैः सरोजपुटितेन घटेन चापि।
आवीतमिष्टफलभद्रफटं[2] तदेतद्यन्त्रोत्तमं त्विति घटार्गलनामधेयम्।। २।।
प्राक्प्रत्यगर्गले हलमथ पुनराग्नेयमारुते च हयम्।
दक्षोत्तरे हरार्णं नैर्ऋतशैवे हरं द्विपङ्क्तिंशो विलिखेत्।। ३।।

---

१. 'कैश्च' ख. पाठः। २. 'घटं' ख. पाठः।

विलिखेच्च कर्णिकायां पाशाङ्कुशसाध्यसंयुतां शक्तिम्।
अभ्यन्तराष्टकोष्ठेष्वङ्गान्यवशेषितेषु चाष्टार्णौ ॥ ४॥
कोष्ठेषु षोडशस्वथ षोडशवर्णं मनुं तथा मन्त्री।
पद्मस्य केसरेषु च युगस्वरात्मान्वितां तथा मायाम्॥ ५॥
एकैकेषु दलेषु त्रिंशस्त्रिंशः कर्णिकागतान् मन्त्रान्।
पाशाङ्कुशबीजाभ्यां प्रवेष्टयेद्बाह्यतश्च नलिनस्य॥ ६॥
अनुलोमविलोमगतैः प्रवेष्टयेदक्षरैश्च तद्बाह्ये।
तदनु घटेन सरोजस्थितेन तद्वक्त्रकेऽम्बुजं च विलिखेत्॥ ७॥

इति॥ सारसङ्ग्रहे—'घटार्गलाभिधं यन्त्रं सर्वसम्पत्करं परम्' इति। अथैतद्यन्त्ररचनाप्रकारः—तत्र समचतुरस्रद्वयसम्पुटितमष्टकोणं विधाय, तस्य कोणाष्टगतरेखाग्रकाणि ऋज्वाकाराणि स्वाभिमतमानेन प्रसार्य, तद्रेखाग्रषोडशकस्पृष्टं वृत्तं कृत्वा पद्माद्बहिरप्येकाङ्गुलान्तराले तद्बहिस्त्र्यङ्गुलान्तराले च वृत्तद्वयं कृत्वाभ्यन्तरवीथ्यां समान्तरालाभिः षोडशरेखाभिः केसराणि परिकल्प्य, बहिर्वीथ्यामपि समान्यष्टदलानि कृत्वा, पद्माद्बहिर्वृत्तत्रयं कृत्वा, तद्बाह्ये घटमालिख्य घटस्य पृष्ठे ऊर्ध्वमुखं घटस्य मुखेऽधोमुखं चेति पद्मद्वयं विरच्य, चतुरस्रद्वयगतरेखाष्टकसन्धिस्थानभेदितं बाह्याभ्यन्तररूपेण वृत्तद्वयं कुर्याद् इति यन्त्रशरीरं निष्पाद्य, ततस्तन्मध्ये पाशादित्र्यक्षरमन्त्रमालिख्य, तन्मध्यगतशक्तिबीजमध्ये प्राग्वत् साध्यसाधककर्माण्यालिख्य, अष्टकोणस्य प्रथमसन्धिभेदिवृत्तस्याभ्यन्तरगतकोष्ठाष्टके अग्नीशासुरवायव्यस्वाग्रगत–(कोष्ठपञ्चके हृदयादिनेत्रान्तान् पञ्च मन्त्रानालिख्य प्रागादिचतुर्दिग्गत) कोष्ठचतुष्केऽस्त्रमन्त्रं प्रतिकोष्ठमालिखेदिति षडङ्गमन्त्रानालिख्य, प्रथमवृत्तबाह्यगतचतुरस्रद्वयस्याष्टसु कोणेषु स्वाग्रादिप्रादक्षिण्येन 'आंश्रींह्रींक्लींक्लींह्रींश्रींक्रों' इत्यष्टाक्षराणि प्रतिकोणमेकमेकं (विलिख्य कोणाष्टकान्तर्गतवर्तुलगतकोष्ठाष्टके च स्वाग्रादिप्रादक्षिण्येन ''कामिनि रञ्जिनि स्वाहा'' इति वर्णाष्टकं प्रतिकोष्ठमेकैकं) विलिख्य, तद्बहिर्गतषोडशकोष्ठेषु ''ह्रींगौरि रुद्रदयिते योगेश्वरि हुं फट् स्वाहा'' इति षोडशाक्षरमन्त्रस्यैकैकमक्षरं विलिख्य, अर्गलासु प्रस्तारितरेखाद्वयपार्श्वयोः पूर्वार्गलायां बहिर्वृत्तमारभ्योत्तररेखापार्श्वे 'ह्लंह्लांह्लिं' इति विलिख्यान्यरेखापाश्र्वेऽभ्यन्तरवृत्तमारभ्य ह्लीह्लुं ह्लूं इति विलिख्य, पश्चिमार्गलायां तथैव बहिर्वृत्तमारभ्य रेखापार्श्वयोः 'ह्लेंह्लैंह्लों' इति एकपार्श्वे, द्वितीये 'ह्लौंह्लंह्लः' इति बहिर्वृत्तपर्यन्तं प्रवेशनिर्गमनरीत्या विलिख्य, आग्नेयार्गलायां तथैव 'ह्यंह्यांह्यिंह्यींह्युंह्यूं' इति प्रादक्षिण्येन प्रवेशनिर्गमरीत्या विलिख्य, मारुतार्गलायां 'ह्येंह्यैंह्योंह्यौंह्यंह्यः— इति षट्कं विलिख्य, ततः दक्षिणोत्तरार्गलयोः प्रागुक्तयुक्त्या 'ह्वंह्वांह्विंह्वींह्वुंह्वूंह्वेंह्वैंह्वोंह्वौंह्वंह्वः' इति विलिख्य 'ईशाननैर्ऋत्यार्गलयोः 'ह्रंह्रांह्रिंह्रींह्रुंह्रूंह्रेंह्रैंह्रोंह्रौंह्रंह्रः' इति पूर्वोक्तयुक्त्या विलिख्य, तद्बहिरष्टदलमूलस्थकेसरेषु प्रथमे अंहंईंसःआं, द्वितीये इंहंईंसःईं, तृतीये उंहंईंसःऊं, चतुर्थे ऋंहंईंसःॠं, पञ्चमे लृंहंईंसःलॄं, षष्ठे एंहंईंसःऐं, सप्तमे ओंहंईंसःऔं, अष्टमे अंहंईंसःअः, इति लिखेत्॥ अत्र केचित्— ''अथातः सम्प्रवक्ष्यामि बहिरस्यैव वेष्टनम्। हंसः पदं वामनेत्रं बिन्द्विन्दुपरिभूषितम्॥ हंसः पदं चैव पश्चात्पञ्चार्णं मनुमालिखेत्'' इति दक्षिणामूर्तिसंहितावचनात् अंहंसःईंहंसः आमित्यादि प्रतिकेसरं सप्ताक्षराणि लेख्यानीति वदन्ति। अन्ये[2] तु—''मायोपेतात्मयुग्मस्वरमिलितलसत्केसरं'' (११। २८)

---

१. 'तद्बहिः' ख. पाठः। २. 'तत्र' ख. पाठः।

इति श्रीशङ्कराचार्यवचनस्य श्रीपद्मपादाचार्यव्याख्या—माया ईकारः, आत्मा हंसः, मायोपेतेनात्मना युग्मस्वरेणेत्यर्थः। इति पदव्याख्यानं कृत्वा, तत्र युग्मस्वरा दलमूलग्रन्थिषु लेखनीया ग्रन्थ्योर्मध्ये हकारसकारयोर्मध्ये माया लेख्येति लेखनप्रकारः, इति लिखितत्वात् पञ्चाक्षराण्येवेति वदन्ति। तत्र यथोपदेशं लेख्यम्। ततोऽष्टदलोदरेषु तिर्यक्पङ्क्त्याकारेण बाह्याभ्यन्तरक्रमेण पाशादित्र्यक्षरं त्रिंशस्त्रिंशः प्रतिदलं विलिख्य, पद्मबाह्यगतवी (थीत्रये आभ्यन्तरवीथ्यां स्वाग्रमारभ्य प्रादक्षिण्येन आंक्रों इति पाशाङ्कुशबीजाभ्यां पुनः पुनर्निरन्तरलिखिताभ्यां वेष्टयित्वा, तद्बहिर्वीथ्याम्) ककारादिक्षकारान्तैः सबिन्दुभिर्मातृकाक्षरैः प्रदक्षिणं संवेष्ट्य तद्बहिर्वीथ्यां क्षकाराद्यकारान्तैः सबिन्दुभिर्वेष्टयेत्।। एतद्यन्त्रमुक्तफलदं भवति।।

सारसङ्ग्रहे—

बिन्द्वनन्तौ रमा माया मारौ चैव सशक्तिकौ। रमाङ्कुशोऽष्टवर्णोऽयं द्वितीयोऽष्टार्ण उच्यते।। १।।
कामिन्यन्ते रञ्जिनि स्याद्वह्निजायावधिर्मनुः। मायां वदेद्गौरि रुद्रदयिते यो—पदं वदेत्।। २।।
गेश्वर्यन्तं च वर्मास्त्रद्विठान्तः षोडशार्णकः।.......................................।।

एते मन्त्राः प्रागेव व्याख्यातत्वान्न व्याख्यायन्ते। तथा—

इदं यन्त्रं भूर्जदले लिखितं रोचनादिभिः। दक्षभुजेतरे कण्ठे स्वशीर्षे वापि धारयेत्।। ३।।
तस्य भूपतयः सर्वे वशगा मनुजा अपि। रोचनेभमदोपेतैः काश्मीरमृगसम्मदैः।। ४।।
अलक्तकरसाक्तैश्च लिखेद्यन्त्राणि मन्त्रवित्। नी[1]लपट्टे विधानेन यन्त्रमालिख्य तत्पुनः।। ५।।
गुलिकीकृत्य साध्यस्य प्रतिमां सिक्थसम्भवाम्। कृत्वा (वक्षसि विन्यस्य पात्रे संस्थापयेत् सुधीः।।६।।
त्रिस्वादुपरिपूर्णे च पूजयेच्च विधानवित्। गन्धपुष्पादिकैः सम्यग् बलिं रात्रौ निवेदयेत्)।। ७।।
तत् स्पृष्ट्वा प्रत्यहं मन्त्री शतमष्टाधिकं जपेत्। ततो मन्त्री सप्तदिनादिष्टां योषां स कर्षयेत्।।८।।
पुनरेतल्लिखेद्भूर्जे गुलिकीकृतमुक्तवत्। जतुना शुद्धताम्रेण रजतेनापि मन्त्रवित् ।। ९।।
वेष्टयेत् तत् सुवर्णेन कलशे तत् प्रविन्यसेत्। भुवनेशीं तत्र यजेच्चन्दनादिभिरुक्तवत्।। १०।।
सहस्रद्वादशमितं तत् स्पृष्ट्वा प्रजपेन्मनुम्। तेनोदकेन शिष्यं वा प्रियं साध्यमथो सुतम्।। ११।।
राजानं वाभिषिच्याथ तद्भाले यन्त्रमुत्तमम्। आबध्नीयात् स्वयं मन्त्री वेदाशीर्वचनैः सह।। १२।।
गत्वा[2]भयत्वमारोग्यं धनं कान्तिं यशांसि च। पुष्टिं च लभते सद्यो नात्र कार्या विचारणा।।१३।।
यन्त्रं कुड्ये समालिख्य ह्यर्चयेच्च पुरोक्तवत्। तं द्रष्टुं नैव शक्ताः स्युर्भूतप्रेतपिशाचकाः।। १४।।
समालिख्य च तद्यन्त्रं सम्यक्पूजादिसाधितम्। धृतं भटेन मुकुटे कुरुते रिपुसङ्कटे।। १५।।
रिपून् महाभटान् हत्वा जयलक्ष्मीयुतो भवेत्।.......................................।।

इति। तथा—

शिखिगेहयुग्ममथ वज्रचिह्नितं सह साध्यकेन लिख मूलमत्र च।
मन्त्रं तदेव विलिखेत् तदश्रिषु प्रवेष्ट्य तेनैव बहिश्च वृत्तके।। १।।

---

[1] 'हरित्' ख. पाठः। [2] 'गता' ख. पाठः।

भूर्जादिष्वोक्तघुसृणेन्दुरोचनालिखितं सवश्यविजयाद्यरोगदम्।

अस्यार्थः— षट्कोणं विलिख्य तत्कोणेषु वज्राणि कृत्वा तन्मध्ये ससाध्यं मूलमन्त्रं विलिख्य, षट्सु कोणेष्वपि पुनस्तदेव विलिख्य बहिर्वृत्तत्रयं कृत्वा तदन्तर्गतवीथीद्वये मूलमन्त्रेणैव वेष्टयेदेतद्यन्त्रमुक्तफलदं भवति।।

स्वरकेसरे वसुदलदले वर्गाष्टकशोभिते धरणिगेहगते।
गुणशश्च पाशलसदङ्कुशबद्धां विलिखेत् सशक्तिमथ साध्यसंयुताम्।। २।।
अखिलोत्तमं त्वरितवाञ्छितदं रणसङ्कटे विजयदं च ततः।
सकलामयान् सपदि नाशयति सुभगत्वं ह्यविरतं खलु नृणाम्। ३।।

अस्यार्थः— अष्टदलपद्मं विलिख्य तन्मध्ये पाशाङ्कुशाभ्यां बद्धां शक्तिं त्रिशो विलिख्य, तत्केसरेषु स्वरान् विलिख्य, तत्पत्रेषु अष्टवर्गान् विलिख्य बहिश्चतुरस्रं कुर्यात्, एतद्यन्त्रमुक्तफलदं भवति।। दशपटल्याम्—

सर्वान्ते मोहिनी ङेन्ता विद्महे तदनन्तरम्। विश्वशब्दं जनन्यै च धीमहीति ततो वदेत्।। १।।
तन्नः शक्तिः प्रशब्दान्ते चोदयादिति चोच्चरेत्। गायत्र्यैषा समाख्याता भुवनेश्याः समृद्धिदा।।२।।

इति। प्रपञ्चसारे— (११ प० ४७)

एभिर्विधानैर्भुवनेश्वरीं तां समर्चयित्वाथ[1] जपेच्च मन्त्री।
स्तुत्यानया स्तौतु सदा[2] समग्रप्राप्त्यै समस्तार्तिविभञ्जिकायाः।। १।।
प्रसीद प्रपञ्चस्वरूपे प्रधाने प्रकृत्यात्मिके प्राणिनां प्राणसंज्ञे।
प्रणोतुं प्रभो प्रारभे प्राञ्जलिस्त्वां प्रकृत्याप्रतर्क्य[3]प्रकामप्रवृत्ते।। २।।
स्तुतिर्वाक्यबद्धा पदात्मैव वाक्यं पदं त्वक्षरात्माक्षरं त्वं महेशि।
ध्रुवं त्वां त्वमेवाक्षरैस्त्वन्मयैः स्तौष्यत[4]स्त्वन्मयी वाक्प्रवृत्तिर्यतः स्यात्।। ३।।
अजाधोक्षजत्रीक्षणाश्चापि रूपं परं नाभिजानन्ति मायामयं[5] ते।
स्तुवन्तीशि तां त्वाममी[6] स्थूलरूपां तदेतावदम्बेह युक्तं ममापि।। ४।।
नमस्ते समस्तेशि बिन्दुस्वरूपे नमस्ते परत्वेन[7] तत्त्वाभिधाने।
नमस्ते महत्त्वं प्रपन्ने प्रधाने नमस्ते त्वहङ्कारतत्त्वस्वरूपे।। ५।।
नमः शब्दरूपे नमो व्योमरूपे नमः स्पर्शरूपे नमो वायुरूपे।
नमो रूपतेजोरसाम्भःस्वरूपे नमस्तेऽस्तु गन्धात्मिके भूस्वरूपे।। ६।।
नमः श्रोत्रचर्माक्षिजिह्वाख्यनासास्यवाक्पाणिपत्पायुसोपस्थरूपे।
मनो बुद्ध्यहङ्कारचित्तस्वरूपे[8] विरूपे नमस्ते विभो विश्वरूपे।। ७।।

---

१. 'समर्च्य सिद्ध्यै तु' ख. पाठः। २. 'याभिस्तुवतां' ग. पाठः। ३. 'र्कै' ग. पाठः। ४. 'स्तोष्यसि' ग. पाठः। ५. 'मये' ग. पाठः। ६. 'मति' ग. पाठः। ७. 'वरत्वेन—रवित्वेन' ग. पाठः। ८. 'त्तात्म' ख. पाठः।

रवित्वेन भूत्वान्तरात्मा दधासि प्रजाश्चेन्द्रमस्त्वेन पुष्णासि भूयः।
दहस्यग्निमूर्तिं दधत्या[1]हुतिं वा महादेवि तेजस्त्रयं त्वत्त एव॥ ८॥
चतुर्वक्त्रयुक्ता लसद्धंसवाहा रजःसंश्रिता ब्रह्मसंज्ञां दधाना।
जगत्सृष्टिकार्या जगत्मातृरूपे[2] वरं त्वत्पदं ध्यायसीशि त्वमेव॥ ९॥
विराजत्किरीटा लसच्छङ्खचक्रा वहन्ती च नारायणाख्यां जगत्सु।
गुणं सत्त्वमास्थाय विश्वस्थितिं यः करोतीह सोंऽशोऽपि देवि त्वमेव॥ १०॥
जटाबद्धचन्द्राहिगङ्गां त्रिनेत्रां जगत् संहरन्तीं च कल्पावसाने।
तमःसंश्रिता रुद्रसंज्ञां दधाना वहन्ती परश्वक्षमाले विभासि॥ ११॥
सचिन्ताक्षमाला सुधाकुम्भलेखाधरा त्रीक्षणार्धेन्दुराजत्कपर्दा।
सुशुक्लांशुकाकल्पदेहा सरस्वत्यपि त्वन्मयैवेशि वाचामधीशा॥ १२॥
लसच्छङ्खचक्रा चलद्खड्गभीमा नदत्सिंहवाहा ज्वलत्तुङ्गमौलिः।
द्रवद्दैत्यवर्गा स्तुवत्सिद्धवर्गा त्वमम्बेशि[3] दुर्गापि सर्गादिहीने॥ १३॥
पुरारातिदेहार्धभागा भवानी गिरीन्द्रात्मजात्वेन यैषा बिभासि।
महायोगिवन्द्या महेशा सुनाथा महेश्यम्बिका तत्त्वतस्त्वन्मयैव॥ १४॥
लसत्कौस्तुभोद्भासिते व्योमनीले वसन्तीं च वक्षःस्थले कैटभारेः।
जगद्वल्लभां सर्वलोकैकनाथां श्रियं त्वां महादेव्यहं तामवैमि॥ १५॥
अजाद्रीड्गुहाब्जाक्षपोत्रीन्द्रकाणां महाभैरवस्यापि चिह्नं वहन्त्यः।
विभो मातराः सप्त तद्रूपरूपाः स्फुरन्त्यस्त्वदंशा महादेवि ताश्च॥ १६॥
समुद्यद्दिवाकृत्सहस्राभभासा सदा सन्तताशेषविश्वावकाशे।
लसन्मौलिबद्धेन्दुलेखे सपाशाङ्कुशाभीत्यभीष्टात्तहस्ते नमस्ते॥ १७॥
प्रभा कीर्तिकान्ती दिवारात्रिसन्ध्याः क्रियाशा तमिस्रा क्षुधाबुद्धिमेधाः।
धृतिर्वाङ्मतिः सन्मतिः श्रीश्च कान्ति[5]स्त्वमेवेशि येऽन्ये च शक्तिप्रभेदाः॥ १८॥
हरे बिन्दुनादैः सशक्त्याख्यशान्तैर्नमस्तेऽस्तु भेदप्रभिन्नैरभिन्ने।
सदा सप्तपाताललोकाचलाब्धिग्रहद्वीपधातुस्वरादिस्वरूपे ॥ १९॥
नमस्ते नमस्ते समस्तस्वरूपे समस्तेषु वस्तुष्वनुस्यूतरूपे[6]।
अतिस्थूलसूक्ष्मस्वरूपे महेशि स्मृते बोधरूपेऽप्यबोधस्वरूपे॥ २०॥
मनोवृत्तिरस्तु स्मृतिस्ते समस्ता तथा वाक्प्रवृत्तिः स्तुतिः स्यान्महेशि।
शरीरप्रवृत्तिः प्रणामक्रिया स्यात् प्रसीद क्षमस्व प्रभो सन्ततं मे॥ २१॥

---

[1] 'वहन्त्या' ख. पाठः। [2] 'भूते परं' ख. पाठः। [3] 'मेवेशि' ख. पाठः। [4] 'दुर्लभां' ख. पाठः।
[5] 'भक्तिः' ग. पाठः। [6] 'शक्ते श्रितस्थूल' ख. पाठः।

हृल्लेखाजपविधिमर्चनाविशेषानेतांस्तां स्तुतिमपि नित्यमादरेण।
योऽभ्यसेत् स खलु परां श्रियं च गत्वा शुद्धं तद् व्रजति पदं परस्य धाम्नः।। २२।।

इति।। अथ भैरवीप्रकरणं शरदायाम्— (१२। १)

अथ वक्ष्ये महा[1]विद्यां त्रिपुरामतिगोपिताम्। यां ज्ञात्वा सिद्धिसङ्घानामधिपो जायते नरः।। १।।
वियद्भृगुहुताशस्थो भौतिको बिन्दुशेखरः। वियत्तदादिकेन्द्राग्निस्थितं वामाक्षिबिन्दुमत्।। २।।
आकाशभृगुवह्निस्थो मनुः सर्गेन्दुखण्डवान्। पञ्चकूटात्मिका विद्या वेद्या त्रिपुरभैरवी।। ३।।
प्रथमं वाग्भवं बीजं[2] द्वितीयं कामबीजकम्[3]। तृतीयं शक्तिबीजाख्यं[4] त्रिभिर्बीजैरुदाहृतम्।। ४।।

इति। अस्यार्थः— शिवचन्द्रवह्निवाग्भवम्, शिवचन्द्रकामपृथिवीवह्निचतुर्थस्वरबिन्दुमत्, शिवचन्द्ररेफयुक्तचतुर्दशस्वरबिन्दुविसर्गाः।।

अस्य पूजा— प्रातःकृत्यादिप्राणायामान्तं कर्म विधाय पीठन्यासं कुर्यात्। पूर्वोक्तंक्रमेणाधारशक्त्यादि 'ह्रीं ज्ञानात्मने नमः' इत्यन्तं विन्यस्य, हृत्पद्मस्य पूर्वादिकेसरेषु ओं इच्छायै नमः। एवं ज्ञानायै० क्रियायै०, कामिन्यै०, कामदायिन्यै०, रत्यै०, रतिप्रियायै०, नन्दायै०, मध्ये मनोन्मन्यै नमः। तदुपरि ऐं परायै अपरायै परापरायै ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः, इति विन्यस्य ऋष्यादिन्यासं कुर्यात्। यथा शिरसि दक्षिणामूर्तिऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि त्रिपुरभैरव्यै देवतायै नमः। गुह्ये वाग्भवाय बीजाय नमः। पादयोः तार्तीयाय शक्तये नमः। सर्वाङ्गे कामराजाय कीलकाय नमः।। दक्षिणामूर्तिसंहितायाम्—

ऋषिश्च दक्षिणामूर्तिरहं शिरसि विन्यसेत्। छन्दः पङ्क्तिस्तु विज्ञेयं मुखे विन्यस्य देवताम्।। १।।
हृदये त्रिपुरेशानीं वाग्भवं बीजमुच्यते। शक्तिबीजं शक्तिरेव कीलकं कामराजकम्।। २।।

नाभ्यादिचरणपर्यन्तं हस्रैं नमः। हृदयान्नाभिपर्यन्तं हसकलरीं नमः। शिरसो हृदयान्तं हस्रौः नमः। एवं आद्यबीजं दक्षिणकरे। द्वितीयबीजं वामकरे। तृतीयबीजमुभयकरयोः। ततो मूर्ध्नि मूलाधारे हृदि यथासंख्येन त्रीणि बीजानि विन्यसेत्।। तथा च निबन्धे—

नाभेराचरणं न्यसेद्वाग्भवं मन्त्रवित्तमः । हृदयान्नाभिपर्यन्तं कामबीजं प्रविन्यसेत्।। १।।
शिरसो हृत्प्रदेशान्तं तार्तीयं विन्यसेत् ततः। आद्यं द्वितीयं करयोस्तार्तीयमुभयोर्न्यसेत्।। २।।
मूर्ध्न्याधारे हृदि न्यसेद्भूयो बीजत्रयं क्रमात्।...।।

इति।। ततो नवयोनिन्यासः— आद्यं बीजं दक्षकर्णे। द्वितीयं बीजं वामकर्णे। तृतीयबीजं चिबुके। एवं शङ्ख[5]योर्वदने, नेत्रयोर्नसि, अंसयोर्जठरे, कुर्परयोः कुक्षौ, जानुनोर्लिङ्गे, पादयोर्गुह्ये, पार्श्वयोर्हृदि, स्तनयोः कण्ठे इति।। तथा च निबन्धे—

नवयोन्यात्मकं न्यासं कुर्याद्बीजैस्त्रिभिः क्रमात्। कर्णयोश्चिबुके भूयो शङ्ख[6]योर्वदने पुनः।। ३।।
नेत्रयोर्नसि विन्यसेदंसयोर्जठरे पुनः। ततः कुर्परयोः कुक्षौ जानुनोर्ध्वजमूर्धनि।। ४।।
पादयोर्गुह्यदेशे च पार्श्वयोर्हृदयाम्बुजे । स्तनयोः कण्ठदेशे च रत्यादिमथ विन्यसेत्।। ५।।

---

१. 'परां विद्यां' ख. पाठः। २. 'कूटं' ख. पाठः। ३. 'राजकं' ख. पाठः। ४.'कूटाख्यं' ख. पाठः।
५. 'गण्डयोः' ख. पाठः। ६. 'गण्डयोः' ख. पाठः।

इति।। अथ रत्यादिन्यासः— मूलाधारे ऐं रत्यै नमः। हृदि क्लीं प्रीत्यै नमः। भ्रूमध्ये सौः मनोभवायै नमः। पुनर्भ्रूमध्ये सौः अमृतेश्यै नमः। हृदि क्लीं योगेश्यै नमः। मूलाधारे ऐं विश्वयोन्यै नमः। इति। तथा च निबन्धे—

मूले रतिं हृदि प्रीतिं भ्रुवोर्मध्ये मनोभवाम्। बालाबीजैस्त्रिभिर्न्यसेत् स्थानेष्वेषु विलोमतः।। ६।।
अमृतेशीं च योगेशीं विश्वयोनिं क्रमादिमाः। विलोमबीजैर्विन्यस्य मूर्तिन्यासमथाचरेत्।। ७।।

इति। अथ मूर्तिन्यासः— मूर्ध्नि स्हौं ईशानमनोभवाय नमः। वक्त्रे स्हैं तत्पुरुषमकरध्वजाय नमः। हृदि स्हूं अघोरकन्दर्पकुमाराय नमः। गुह्ये स्हिं वामदेवमन्मथाय नमः। पादयोः स्हं सद्योजातकामदेवाय नमः। एवमूर्ध्वप्राग्दक्षिणोत्तरपश्चिमेषु मुखेषु ईशानमनोभवादिपञ्चमूर्तीस्तत्तद्बीजपूर्विका विन्यसेत्। तथा च निबन्धे (शारदायां)

स्वस्वबीजादिकं पूर्वं मूर्ध्नीशानमनोभवम्। न्यसेद्वक्त्रे तत्पुरुषमकरध्वजमात्मवित्।। ८।।
हृद्यघोरकुमाराख्यं कन्दर्पं तदनन्तरम्। गुह्यदेशे प्रविन्यसेद्वामदेवादिमन्मथम्।। ९।।
सद्योजातं कामदेवं पादयोर्विन्यसेत्ततः। ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु तान्।। १०।।
प्रविन्यसेद्यथापूर्वं भृगुव्योमाग्निसंस्थितान्। सद्यादिपञ्चह्रस्वाढ्यं बीजमेषां प्रकीर्तितम्।। ११।।

ततो बाणन्यासः यथा— द्रां द्राविण्यै नमः, अङ्गुष्ठयोः। द्रीं क्षोभिण्यै नमस्तर्जन्योः। क्लीं वशीकरिण्यै नमो मध्यमयोः। ब्लूं आकर्षिण्यै नमोऽनामिकयोः। सः उन्मादिन्यै नमः कनिष्ठिकयोः।। ह्रीं कामाय नमः। क्लीं मन्मथाय नमः। ऐं कन्दपार्य नमः। ब्लूं मकरध्वजाय नमः। स्त्रीं मीनकेतवे नमः।। तथा च ज्ञानार्णवे—

पञ्चबाणान् क्रमेणैव कराङ्गुलिषु विन्यसेत्। अङ्गुष्ठादिकनिष्ठान्तं क्रमेण परमेश्वरि।। १।।
थान्तद्वयं समालिख्य वह्निसंस्थं क्रमेण तु। मुखवृत्तेन नेत्रेण वामेन परिमण्डितम्।। २।।
बाणद्वयमिदं प्रोक्तं मदनं भूमिसंस्थितम्। चतुर्थस्वरबिन्द्वाढ्यं नादरूपं वरानने।। ३।।
फान्तं शक्रेण संयुक्तं वामकर्णविभूषितम्। बिन्दुनादसमायुक्तं सर्गवांश्चन्द्रमाः प्रिये।। ४।।
पञ्चबाणान् महेशानि नामानि शृणु पार्वति। द्रावणः क्षोभणो वश्यस्तथाकर्षणसंज्ञकः।। ५।।
उन्मादश्च क्रमेणैव नामानि परमेश्वरि। ....।।

न्यासे तु सर्वत्र स्त्रीलिङ्गेन प्रयोगः।। तथा निबन्धे—

द्रामाद्यां द्राविणीं मूर्ध्नि द्रीमाद्यां क्षोभिणीं पदे। क्लीं वशीकरिणीं वक्त्रे गुह्ये ब्लूंबीजपूर्विकाम्।।१।।
आकर्षिणीं हृदि पुनः सर्गान्तभृगुसंयुताम्। सम्मोहिनीं क्रमादेवं बाणन्यासोऽयमीरितः।। २।।

अत्रोन्मादनसम्मोहनयोरेकपर्यायत्वम्।

कामास्तत्रैव विज्ञेयास्तेषां बीजानि संशृणु। पराबीजं मध्यबाणं वाग्भवं परमेश्वरि।। ३।।
तुर्यबाणं ततश्चैव स्त्रीबीजं च क्रमात् प्रिये। पञ्चकामा इमे देवि नामानि शृणु वल्लभे।। ४।।
काममन्मथकन्दर्पमकरध्वजसंज्ञकाः। मीनकेतुर्महेशानि पञ्चमः परिकीर्तितः।। ५।।

इति।। ततः कराङ्गन्यासौ— ह्स्रां अङ्गुष्ठाभ्यां नमः। ह्स्रीं तर्जनीभ्यां नमः। ह्स्रूं मध्यमाभ्यां नमः। ह्स्रैं अनामिकाभ्यां

नमः। ह्स्त्रौं कनिष्ठिकाभ्यां नमः। ह्स्त्रः करतलपृष्ठाभ्यां नमः। एवं हृदयादिषु। तथा च निबन्धे—''षड्दीर्घयुक्तेनाद्येन बीजेनाङ्गक्रिया मनोः'' इति।। ततो बाणन्यासः— मूर्ध्नि द्रां द्राविण्यै नमः। पादे द्रीं क्षोभिण्यै नमः। वक्त्रे क्लीं वशीकरिण्यै नमः। गुह्ये ब्लूं आकर्षिण्यै नमः। हृदि सं सम्मोहिन्यै नमः।। एषु स्थानेषु कामान् विन्यसेत्।। तथा च श्रीक्रमे—

ललाटे वदने देवि हृदि नाभौ च गुह्यके। एषु कामांस्तु विन्यस्य ताराद्याः सुभगादिकाः।। १।।

इति न्यसेदिति शेषः।। तथा सुभगादिन्यासः—भाले ऐंक्लींब्लूंस्त्रींसः सुभगायै नमः। भ्रूमध्ये ५ँ भगायै नमः। वदने ५ँ भगसर्पिण्यै नमः। लम्बिकायां ५ँ भगमालिन्यै नमः। कण्ठे ५ँ अनङ्गायै नमः। हृदि ५ँ अनङ्गकुसुमायै नमः। नाभौ ५ँ अनङ्गमेखलायै नमः। लिङ्गमूले ५ँ अनङ्गमदनायै नमः।। तथा च निबन्धे—

भालभ्रूमध्यवदनलम्बिकाकण्ठहृत्सु च। नाभ्यधिष्ठानयोः पञ्च ताराद्याः सुभगादिकाः।। १।।
(न्यस्तव्या विधिना देव्यो मन्त्रिणा सुभगा भगा। भगसर्पिण्यथ परा भगमालिन्यनन्तरम्।। २।।
अनङ्गा) नङ्गकुसुमा भूयश्चानङ्गमेखला। अनङ्गमदना सर्वा मदविह्व[१]लमन्थराः।। ३।।
(प्रधानदेवता वर्णभूषणाद्यैरलङ्कृताः। अक्षस्त्रक्पुस्तकाभीतिवरदाढ्यकराम्बुजाः।। ४।।)
वाक्कामबीजं ब्लूंस्त्रींसस्ताराः पञ्चोदितास्त्वमी। न्यासं कुर्याद्भूषणाख्यं ततः साधकसत्तमः।।५।।

इति।। अथ भूषणन्यासः— शिरसि अं नमः। भाले आं नमः। भ्रुवोः इं नमः, ईं नमः। एवं कर्णयोः उं नमः, ऊं नमः। नेत्रयोः ऋं नमः, ॠं नमः। नसि ऌं नमः। गण्डयोः ॡं नमः, एं नमः। ओष्ठयोः ऐं नमः, ओं नमः। दन्तपङ्क्त्योः औं नमः, अं नमः। मुखे अः नमः।। चिबुके कं नमः। गले खं नमः। कण्ठे गं नमः। पार्श्वयोः घं नमः, ङं नमः। स्तनद्वये चं नमः, छं नमः। दोर्मूलयोः जं नमः, झं नमः। कुर्परयोः ञं नमः, टं नमः। पाण्योः ठं नमः, डं नमः। करपृष्ठयोः ढं नमः, णं नमः। नाभौ, तं नमः। गुह्ये थं नमः। ऊर्वोः दं नमः, धं नमः। जानुनोः नं नमः, पं नमः। जङ्घयोः फं नमः, बं नमः। स्फिचोः भं नमः, मं नमः। पत्तलयोः यं नमः। चरणाङ्गुष्ठयोः रं नमः। काञ्च्यां वं नमः। ग्रीवायां लं नमः। कटके ळं नमः। हृदि षं नमः। गुह्ये क्षं नमः। कर्णकुण्डलयोः सं नमः, शं नमः। मौलौ हं नमः।। सर्वत्र नमोऽन्तं न्यसेत्। तथा च निबन्धे—

न्यसेच्छिरसि भालभ्रूकर्णाक्षियुगले नसि। गण्डयोरोष्ठयोर्दन्तपङ्क्त्योरास्ये न्यसेत् स्वरान्।। १।।
चिबुकेऽथ गले कण्ठे पार्श्वयोः स्तनयुग्मके। दोर्मूलयोः कुर्परयोः पाण्योस्तत्पृष्ठदेशतः।। २।।
नाभौ गुह्ये पुनश्चोर्वोर्जानुनोर्जङ्घयोस्ततः। स्फिचोः पत्तलयोः पश्चाच्चरणाङ्गुष्ठयोर्द्वयोः।। ३।।
कादिरान्तान् न्यसेद्वर्णान् स्थानेष्वेषु समाहितः। काञ्च्यां ग्रैवेयके पश्चात् कटके हृदि गुह्यके।। ४।।
कर्णकुण्डलयोर्मौलौ वलळान् षक्षसान् शहौ। अष्टस्वेतान् प्रविन्यसेदेवं देशिकसत्तमः।। ५।।

इति। ततस्त्रिखण्डां मुद्रां बद्ध्वा ध्यायेत्।

---

[१] 'विभ्रम' ख. पाठः।

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम्।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीमर्धहिमांशुरत्नमुकुटां वन्दे सुमन्दस्मिताम्[1] ।। १ ।।

एवं ध्यात्वा, मानसोपचारैः सम्पूज्य शङ्खस्थापनं कृत्वा, आधारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यन्तं सम्पूज्य पूर्वादिकेसरेषु मध्ये च, शारदायां– ''इच्छा ज्ञाना क्रिया पश्चात् कामिनी कामदायिनी। रती रतिप्रिया नन्दा नवमी च मनोन्मनी'' एता प्रणवादिनमोऽन्तेन पूजयेत्। ततः– ऐं परायै अपरायै परापरायै ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः। प्राग्योनिमध्ययोन्योरन्तराले श्रीविद्योक्तगुरुपङ्क्तिं पूजयेत्। तथा च निबन्धे–

वाग्भवं लोहितोरायै श्रीकण्ठं लोहितोऽनलः। दीर्घवान्यै परापश्चादपरायै हसौः पुनः।। १ ।।
सदाशिवमहाप्रेतङेऽन्तं पद्मासनं नमः। अनेन मनुना दद्यादासनं श्रीगुरुक्रमम्।। २ ।।
प्राङ्मध्ययोन्यन्तराले पूजयेत् कल्पयेत् पुनः।.......................................।।

तदशक्तौ[2] ओं गुरुभ्यो नमः। ओं गुरुपादुकाभ्यो नमः। एवं परमगुरुभ्यो नमः। परमगुरुपादुकाभ्यो नमः। परापरगुरुभ्यो नमः। परापरगुरुपादुकाभ्यो नमः। परमेष्टिगुरुभ्यो नमः। परमेष्ठिगुरुपादुकाभ्यो नमः। आचार्येभ्यो नमः। आचार्यपादुकाभ्यो नमः।। अस्याः पूजाया यन्त्रं, निबन्धे–

पद्मं वसुदलोपेतं नवयोन्याढ्यकर्णिकम्। चतुर्द्वारसमायुक्तं भूगृहं विलिखेत् ततः।। १ ।।

इति। 'ऐंह्रींश्रींहसखफ्रें हसौः' इति मन्त्रेण बिन्दुचक्रे मूर्तिं सङ्कल्प्य त्रिखण्डामुद्रया पूर्ववद् देवीं ध्यात्वावाहयेत्। ''देवेशि भक्तिसुलभे परिवारसमन्विते। यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव''।। इत्यादिनावाहयेत्। तथा च निबन्धे–

पञ्चभिः प्रणवैर्मूर्तिं तस्यामावाह्य देवताम्। पूजयेदागमोक्तेन विधानेन समाहितः।। १ ।।
तारावाक्शक्तिकमला हसखफ्रें हसौः पुनः[3]। ....।।

तत आवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत्। यथा देव्या वामकोणे ओंरत्यै नमः। एवं दक्षिणकोणे क्लीं प्रीत्यै नमः। अग्रे मनोभवायै नमः। ततः केसरेष्वग्नीशासुरवायुमध्ये दिक्षु च पूर्वोक्ताङ्गमन्त्रैः पूजयेत्। तथा च ज्ञानार्णवे–''अग्नीशासुरवायव्यमध्ये दिक्ष्वङ्गपूजनम्''। तत उत्तरे द्रां द्राविण्यै नमः, द्रीं क्षोभिण्यै, दक्षिणे क्लीं वशीकरिण्यै, ब्लूं आकर्षिण्यै, अग्रे सः सम्मोहिन्यै। एवमुत्तरे ह्रीं कामाय, क्लीं मन्मथाय, दक्षिणे ऐं कन्दर्पाय, ब्लूं मकरध्वजाय, अग्रे स्त्रीं मीनकेतवे नमः।। तथा च ज्ञानार्णवे–

उत्तरस्यां द्वयं देवि दक्षिणस्यां द्वयं दिशि। अग्रे चैकं क्रमेणैव पञ्चबाणान् क्रमाद्यजेत्।। १ ।।
पञ्चकामांस्तथा देवि बाणवत् परिपूजयेत्।..।।

ततोऽष्टयोनिषु पूर्वादि ऐंक्लींब्लूंस्त्रींसः सुभगायै नमः, एवं ५ँ भगायै०, ५ँ भगसर्पिण्यै०, ५ँ भगमालिन्यै०, ५ँ अनङ्गायै०, ५ँ अनङ्गकुसुमायै०, ५ँ अनङ्गमेखलायै०, ५ँ अनङ्गमदनायै०। ततोऽष्टपत्रेषु पूर्वादि असिताङ्गब्राह्मीभ्यां

---

[1] 'ऽरविन्दस्थिताम्' ख. पाठः। [2] 'तदशक्तौ आगमोक्तविधानाशक्तौ' इत्यर्थः। [3] 'स्मृता' ख. पाठः।

नमः। एवं रुरुमाहेश्वरीभ्यां०, चण्डकौमारीभ्यां०, क्रोधवैष्णवीभ्यां०, उन्मत्तवाराहीभ्यां०, कपालीन्द्राणीभ्यां०, भीषणचामुण्डाभ्यां०, संहारमहालक्ष्मीभ्यां नमः।। तथा च निबन्धे—

अष्टयोनिष्वष्टशक्तीः पूजयेत् सुभगादिकाः। मातरो भैरवाङ्कस्था मदविभ्रमविह्वलाः।। १।।
अष्टपत्रेषु सम्पूज्य यथावत् कुसुमादिभिः। ....।।

ततस्तद्बहिः पूर्ववदिन्द्रवज्रादीन् सम्पूज्य धूपादिविसर्जनान्तं कर्म समापयेत्। किन्तु नैवेद्यानन्तरं श्रीविद्योक्तबलिचतुष्टयमत्र

[redacted]

वाग्भवं बीजमुच्चार्य जीवप्राणसमन्वितम्। सकला भुवनेशानी द्वितीयं बीजमुद्धरेत्।। १।।
जीवप्राणं वह्निसंस्थं शक्रस्वरविभूषितम्। विसर्गाढ्यं महेशानि विद्या त्रैलोक्यमातृका।। २।।

इति। अस्यार्थः– चन्द्रशिवद्वादशस्वरयुक्तं बिन्दुनादकलाढ्यं, चन्द्रकामपृथिवीमाया, चन्द्रशिववाह्नबीजं चतुर्दशस्वरयुक्तं सर्गाढ्यं च। अस्याः पूजायन्त्रं तत्रैव–

त्रिकोणं चैव षट्कोणं वसुपत्रं वरानने। चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्।। १।।

अस्याः पूजा:– प्रातःकृत्यादिकं विधाय आधारशक्त्यादि ''ह्रीं ज्ञानात्मने नमः'' इत्यन्तं विन्यस्य हृत्पद्मस्य केसरेषु पूर्वादिक्रमेण– ओं वामायै नमः एवं ज्येष्ठायै० रौद्र्यै० अम्बिकायै० इच्छायै० ज्ञानायै० क्रियायै० कुब्जिकायै० चित्रायै० विषघ्निकायै० दूतर्यै० नन्दायै० मध्ये– हसौः सदाशिवमहाप्रेतपद्मासनाय नमः। सम्पत्प्रदाबालाकौलेशीसकलेष्टदाविद्यानां एता एव पीठशक्तयो ज्ञानार्णवे उक्तत्वात्। तत्र ऋष्यादिन्यासः– शिरसि दक्षिणामूर्तये ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि चैतन्यभैरव्यै देवतायै नमः। ततः कराङ्गन्यासौ– पूर्वबीजमुच्चार्य अङ्गुष्ठाभ्यां नमः। द्वितीयबीजं तर्जनीभ्यां नमः। तृतीयबीजं मध्यमाभ्यां नमः। पूर्वबीजं अनामिकाभ्यां नमः। द्वितीयबीजं कनिष्ठिकाभ्यां नमः। तृतीयबीजं करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिषु। तथा च तत्रैव– ''द्विरावृत्त्या षडङ्गानि न्यासं सर्वाङ्गरक्षणम्''। इति। ततो ध्यानम्–

उद्यद्भानुसहस्राभां नानालङ्कारभूषिताम्। मुकुटाग्रलसच्चन्द्ररेखां रक्ताम्बरान्विताम्।। १।।
पाशाङ्कुशधरां नित्यां वामहस्ते कपालिनीम्। वरदाभयशोभाढ्यां पीनोन्नतघटस्तनीम्।। २।।

एवं ध्यात्वा मानसोपचारैः सम्पूज्य, शङ्खस्थापनं कृत्वा आधारशक्त्यादिपीठपूजां कुर्यात्। वामाज्येष्ठादिपीठशक्तीः पीठमनुं च पूजयेत्। ततो भैरव्युक्तगुरुपङ्क्तीः सम्पूज्य, पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिपर्यन्तं विधाय आवरणपूजामारभेत्। यथा– प्रथमं षडङ्गपूजा, अग्निकोणं प्रथमबीजमुच्चार्य हृदयाय नमः। ईशाने द्वितीयबीजमुच्चार्य शिरसे स्वाहा। नैर्ऋते तृतीयबीजमुच्चार्य शिखायै वषट्। वायव्ये प्रथमबीजमुच्चार्य कवचाय हुं। मध्ये द्वितीयबीजमुच्चार्य नेत्रत्रयाय वौषट्। चतुर्दिक्षु तृतीयबीजमुच्चार्य अस्त्राय फट्। ततः पूर्ववद्रत्यादिकं सम्पूज्य, अग्रे ओं वसन्ताय नमः। वामे ओं कामदेवाय नमः। दक्षिणे ओं चापाय नमः।। ततः पूर्ववद् बाणान् सम्पूज्य, षट्कोणे पूर्वादि ओं डाकिन्यै नमः। एवं राकिण्यै०, लाकिन्यै०, काकिन्यै०, शाकिन्यै०, हाकिन्यै नमः, इति प्रणवादिनमोन्तेन पूजयेत्। ततोऽष्टदलेषु पूर्वादि पूर्वोक्तानङ्गकुसुमाद्याः पूज्याः। पत्राग्रेषु पूर्वादि ओं परभृताय नमः। एवं सारसाय०, शुकाय०, मेघच्छायाय[१]०, (मेघायेति वा) अपाङ्गाय०, भ्रूविलासाय०, हावाह्वाय०, भावाय नमः।। तत इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुनश्चरणं लक्षजपः ज्ञानार्णवे ''एकलक्षं जपेन्मन्त्रम्'' इत्यादिवचनात्।। अथ कामेश्वरीभैरवी ज्ञानार्णवे– (६। ३२)

कामेश्वरी च रुद्राणी पूर्वसिंहासने स्थिता। एतस्या एव विद्याया बीजद्वयमुदाहृतम्।। १।।
तदन्ते परमेशानि नित्यक्लिन्ने मदद्रवे। एतस्या एव तार्तीयं रुद्राणी परमेश्वरी।। २।।
ध्यानपूजादिकं देवि चैतस्याश्चैव पूर्ववत्[२]। त्रिकोणे तु विशेषोऽस्ति कथयामि वरानने[३]।। ३।।

---

१. 'अत्र शारकायेति प्रपञ्चसारादौ उपन्यस्तपाठः। २. 'चैतन्यभैरवीवत्। चैतन्या इव पूर्ववत्' ख.ग. पाठः। ३. 'तवानघे'ख. पाठः।

अग्रकोणे क्रमेणैव नित्यक्लिन्नां मदद्रवाम्। षडङ्गावरणं पश्चात् पूजयेत् सर्वसिद्धये।। ४।।

इति।। अथ षट्कूटाभैरवी। ज्ञानार्णवे– (८।१)

डाकिनीराकिणीबीजे लाकिनीकाकिनीयुगम्। साकिनी हाकिनी बीजे आवृत्य सुरसुन्दरि।। १।।
आद्यमैकारसंयुक्तमन्यदीकारसंयुतम् । शक्रस्वरान्वितं देवि तार्तीयं बीजमालिखेत्।। २।।
बिन्दुनादकलाक्रान्तं द्वितीयं शैलसम्भवे। ....।।

तृतीयबीजं सविसर्गमिति, तन्त्रान्तरे–

डरौ क्ष्मा मादनं वान्तं शिवमत्र त्रिधा लिखेत्। अर्केण मायाशक्राभ्यां क्रमात् तन्मण्डितं कुरु।१।।
बिन्दुनादान्वितं चाद्ययुग्ममन्त्यं विसर्गवत्। ध्यानमस्याः प्रवक्ष्यामि सर्वभूतनिकृन्तनम्।। २।।
बालसूर्यप्रभां देवीं जपाकुसुमसन्निभाम्। मुण्डमालावलीरम्यां बालसूर्यसमांशुकाम् ।। ३।।
सुवर्णकलशाकारपीनोन्नतपयोधराम्। पाशाङ्कुशौ पुस्तकं च तथा च जपमालिकाम्।। ४।।

दधतीमिति शेषः।

एवं ध्यात्वा यजेद् देवीं मानसैरुपचारकैः। द्विरावृत्त्या षडङ्गानि विधाय परमेश्वरि।। ५।।
यन्त्रमस्या वरारोहे त्रिकोणं तत्पुटं लिखेत्। बहिरष्टदलं पद्मं रविपत्रं ततो लिखेत्।। ६।।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्। षडङ्गावरणं देवि पूर्ववत् पूजयेच्छिवे।। ७।।
रत्यादित्रितयं देवि त्रिकोणे परिपूजयेत्। डाकिन्याद्यास्तु षट्कोणे वसुपत्रे ततः परम्।। ८।।
ब्राह्म्यादियुगलं पश्चाद्रविपत्रे ततः परम्। बालायाः पीठशक्तीस्तु वामाद्याः पूजयेत् क्रमात्।। ९।।
चतुरस्रे लोकपालान् सायुधान् परमेश्वरि। अनेन विधिना चैव नित्याख्यां भैरवीं यजेत्।। १०।।

इति।। अथ भोगमोक्षदा नित्याभैरवी। ज्ञानार्णवे– (८।१७)

एतस्या एव विद्यायाः षड्वर्णान् क्रमतः स्थितात्। विपरीतात् वदेत् प्रौढे विद्येयं भोगमोक्षदा।१।।
नित्याख्याभैरवी देवि रिपुभारनिकृन्तनी। न्यासपूजादिकं सर्वमस्याः पूर्ववदाचरेत् ।। २।।

इति।। अथ रुद्रभैरवी। ज्ञानार्णवे– (७ । ५)

शिवचन्द्रौ मादनान्तं पान्तं वह्निसमन्वितम्। शक्तिभिन्नं बिन्दुनादकलाढ्यं वाग्भवं प्रिये।। १।।
सम्पत्प्रदाया भैरव्याः कामराजं तथैव[1] हि। सदाशिवस्य बीजं तु महासिंहासनस्य च।। २।।
एषा विद्या महेशानि वर्णितुं नैव शक्यते। ....।।

इति। अस्यार्थः– शिवचन्द्रकान्तपान्तवह्नियुक्तमेकादशस्वरविशिष्टं बिन्दुनादकलाक्रान्तं वाग्भवबीजं, शिवचन्द्रकामपृथिवीवह्निचतुर्थस्वरविशिष्टं नादबिन्दुकलाक्रान्तं कामराजबीजं, प्रेतबीजं शक्तिकूटं तृतीयम्। अस्याः पूजायन्त्रं– "त्रिकोणं चैव वृत्तं च वृत्ताष्टदलनीरजम्। वृत्तं भूमण्डलं च" इत्यादि।। अस्य पूजा– प्रातः कृत्यादिप्राणायामान्तं विधाय (चैतन्यभैरवीवत्) पीठन्यासं कुर्यात्। यथा आधारशक्त्यादि ह्रीं ज्ञानात्मने नमः, इत्यन्तं विन्यस्य, पूर्वादिक्रमेण ओं वामायै नमः। एवं ज्येष्ठायै, रौद्र्यै, काल्यै, कलविकरण्यै, बलविकरण्यै, बलप्रमथिन्यै, सर्वभूतदमन्यै, मध्ये मनोन्मन्यै, इति पीठशक्तीर्विन्यस्य, मध्ये पीठमनुं न्यसेत्। अत्र पीठमन्त्रस्तु–"अघोरे ऐं थघोरे ह्रीं घोरघोरतरे क्लीं

---

[1] 'तदेव' ख. पाठः।

सर्वतः सर्वशर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ऐंह्रीं[1]''। ततः ऋष्यादिन्यासः। शिरसि दक्षिणामूर्तये ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि रुद्रभैरव्यै देवतायै नमः। ततः कराङ्गन्यासौ। प्रथमबीजमुच्चार्य अङ्गुष्ठाभ्यां नमः। द्वितीयबीजमुच्चार्य तर्जनीभ्यां स्वाहा। तृतीयबीजमुच्चार्य मध्यमाभ्यां वषट्। प्रथबीजमुच्चार्य अनामिकाभ्यां हुं। द्वितीयबीजमुच्चार्य कनिष्ठिकाभ्यां वौषट्। तृतीयबीजमुच्चार्य करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ततो ध्यानम्–

जद्यद्भानुसहस्राभां चन्द्रचूडां त्रिलोचनाम् । नानालङ्कारसुभगां सर्ववैरिनिकृन्तनीम् ।। १ ।।
वमद्रुधिरमुण्डालीकलितां रक्तवाससम्। त्रिशूलं डमरुं खड्गं तथा खेटकमेव च।। २।।
पिनाकं[2] च शरान् देवि पाशाङ्कुशयुगं क्रमात्। पुस्तकं चाक्षमालां च शिवसिंहासनस्थिताम्।।३ ।।

एवं ध्यात्वा मानसोपचारैः सम्पूज्य, शङ्खस्थापनं कृत्वा पीठन्यासक्रमेण चैतन्यभैरव्युक्तपीठपूजां विधाय, एतन्मन्त्रोक्तपीठमन्त्रेण पीठं सम्पूज्य, पूर्ववद् ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत्। यथा– अग्निकोणे प्रथमबीजमुच्चार्य हृदयाय नमः। ईशाने द्वितीयबीजमुच्चार्य शिरसे स्वाहा। नैर्ऋते तृतीयबीजमुच्चार्य शिखायै वषट्। वायव्ये पुनः प्रथमबीजमुच्चार्य कवचाय हुं। मध्ये द्वितीयबीजमुच्चार्य नेत्रत्रयाय वौषट्। दिक्षु तृतीयबीजमुच्चार्यास्त्राय फट्। ततस्त्रिकोणे रत्यादिकमभ्यर्च्य, पत्रमूले अनङ्गकुसुमादिकाः पूजयेत्। पत्रेषु पूर्वादि असिताङ्गब्राह्म्यादीन् सम्पूज्य, भूगृहे इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपदीपादिविसर्जनान्तं कर्म समापयेत्। अस्याः पुरश्चरणं लक्षजपः, ''लक्षमात्रं जपेन्मन्त्रम्'' इति वचनात्।। अथ भुवनेश्वरीभैरवी। ज्ञानार्णवे– (९। २)

हसाद्यं वाग्भवमाद्यं हसकान्ते सुरेश्वरि। भूबीजं भुवनेशानी द्वितीयं बीजमुद्धृतम्।। १।।
शिवचन्द्रौ महेशानि भुवनेशी च भैरवी।......................................।।

तथा च त्रिपुरार्णवे–

हंसास्त्रयो दन्त्यसकाररूढा वस्वब्धिपङ्क्तिस्वरसंविभिन्नाः।
आद्यौ सबिन्दू परतो विसर्गी मध्यं विरिञ्चीन्द्रहराग्नियुक्तम्।। १ ।।

इति। अस्यार्थः– शिवचन्द्रवाग्भवा इति प्रथमं बीजं, शिवचन्द्रकामपृथिवीमहामाया इति द्वितीयबीजं, शिवचन्द्रचतुर्दशस्वरविसर्गास्तृतीयं बीजम्। अस्याः पूजायन्त्रं चैतन्यभैरवीवद् बोद्धव्यम्। अस्य पूजा– प्रातः-कृत्यादिप्राणायामान्तं कृत्वा चैतन्यभैरव्युक्तपीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात्। यथा– शिरसि दक्षिणामूर्तिऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि भुवनेश्वरीभैरव्यै देवतायै नमः। ततः कराङ्गन्यासः– ''मध्यबीजेन देवेशि षड्दीर्घस्वरभेदिना। षडङ्गानि च विन्यसेदित्यादि''। मध्यबीजेन षड्दीर्घयुक्तेनाङ्गन्यासः। यथा– हसकलह्रां अङ्गुष्ठकाभ्यां नमः। हसकलह्रीं तर्जनीभ्यां स्वाहा इत्यादि। एवं हृदयादिषु। ततो ध्यानम्–

जपाकुसुमसङ्काशां दाडिमीकुसुमोपमाम्। चन्द्ररेखाजटाजूटां त्रिनेत्रां रक्तवाससम्।। १ ।।
नानालङ्कारसुभगां पीनोन्नतघटस्तनीम्। पाशाङ्कुशवराभीतीर्धारयन्तीं शिवां श्रये।। २ ।।

---

[1] 'अघोरे ऐं घोरे ह्रीं सर्वतः सर्वशर्वेभ्यः घोरघोरतरे श्रीं नमस्ते रुद्ररूपेभ्यः ऐंह्रींश्रीं ख. पाठः। [2] 'कपालं' ख. पाठः।

अन्यत्सर्वं चैतन्यभैरवीवत् कर्तव्यम्।

भुवनेश्याश्च भैरव्या भेदान्तरमथोच्यते। सहाद्या सैव देवेशि तदा सा सकलेश्वरी।। १।।
ध्यानपूजादिकं सर्वमेतस्या एव पूर्ववत्।..।।

इयं सहाद्या चेत्सकलेश्वरी, ध्यानपूजादिकं तु पूर्ववत्।। अथ बालात्रिपुरामन्त्रस्तत्र शारदायाम्—

अधरो बिन्दुमानाद्यं ब्रह्मेन्द्रस्थः शशीयुतः। द्वितीयं भृगुसर्गाढ्यो मनुस्तार्तीयमीरितम्।। १।।
एषा बालेति विख्याता त्रैलोक्यवशकारिणी।..।।

अस्यार्थः— वाग्भवं, कामबीजं, चन्द्रबीजं सविसर्गकचतुर्दशस्वरसंयुक्तम्। अस्याः पूजादिकं तु त्रिपुराभैरवीवच्छारदायामुक्तत्वात्। ज्ञानार्णवे तु विशेषः। न्यासादिकं त्वेतद्बीजेन कुर्यात्। कराङ्गन्यासस्तु द्विरुक्त्या "षडङ्गमाचरेद्देवि द्विरावृत्त्या क्रमेण तु।" इति वचनात्। अस्याः पुरश्चरणं त्रिलक्षजपः। तथा च ज्ञानार्णवे—

वर्णलक्षं जपेन्मन्त्रं दशांशं हवनं भवेत्। तर्पणं च तथा कुर्यात् सर्वसौभाग्यभाग्भवेत्।। १।।

इतरेषां लक्षजपः श्रीविद्यायामुक्तत्वात्।। मन्त्रान्तरं श्रीक्रमे—

सूर्यस्वरं समुच्चार्य बिन्दुनादकलान्वितम्। स्वरान्तं पृथिवीसंस्थं तुर्यस्वरसमन्वितम्।। १।।
बिन्दुनादकलाक्रान्तं सर्गवान् भृगुरव्ययः। शक्रस्वरसमोपेता विद्येयं त्र्यक्षरी मता।। २।।

अव्ययो बिन्दुः। दक्षिणामूर्तिसंहितायामप्येवं, तथा[1] विसर्गबिन्द्वन्ता शप्ता। एतां विद्यामुद्धृत्य[2] सारसमुच्चार्यादौ शापबोधनात्। तद्यथा त्रिपुरासारे— (२ प० १८ श्लो०)

विद्यामूलोत्पत्तिरेषा मयोक्ता ज्ञातव्येयं सर्वथा सिद्धिकामैः।
देव्या[3] शप्ता येन विद्येयमाद्या पूर्वं तेन प्राणहीना भवेत् सा।। १।।

इति। मुण्डमालातन्त्रेऽपि—

कुमारी या च विद्येयं त्वया शप्ता पतिव्रते। तथाद्येन तु शप्ता सा मध्यमेन तु कीलिता।। १।।
अन्तिमेन तु सम्भिन्ना तेन विद्या न सिध्यति। ....।।

न चैव शारदादौ उक्तविद्यापि शप्ता स्यादिति वाच्यं, तस्या ज्ञानार्णवोक्तबिन्दुघटितत्वात्। शापोद्धारमाह मुण्डमालातन्त्रे— "केवलं शिवरूपेण शक्तिरूपेण केवलम्। मया प्रतिष्ठिता विद्या" इति। हकारसकारौ वाग्भवे कामराजे च। तृतीयबीजे तु हकारः, वक्ष्यमाणसारसमुच्चये तथा दर्शनात्।। (त्रिपुरासारेऽपि (२—२०) शिवशक्तिबीजमत एव शम्भुना निहितं तयोरुपरि पूर्वबीजयोः। अकुलं कुलोपरि च मध्यमाधरे दहनं ततः प्रभृति सोर्जिताभवत्।।) रुद्रयामलेऽपि—

वाग्भवं प्रथमं देवि कामराजं द्वितीयकम्। तृतीयं शक्तिबीजं तु शिवयुक्तं सदा भवेत्।। १।।
एषा बाला समाख्याता सर्वदोषविवर्जिता। (आद्यबीजं भवेन्मध्ये मध्यं चादौ नियोजयेत्।। २।।
एवं यो जपते मन्त्रं त्रैलोक्यैश्वर्यभाग्भवेत्। आद्यमन्त्येऽन्तिमं मध्ये मध्यं चादौ नियोजयेत्।। ३।।
एवं कृत्वा जपेन्मन्त्रं सर्वसिद्धिमवाप्नुयात्।..।।

इति। तथा मन्त्रान्तरं श्रीक्रमे—

---

[1] 'एषा' ख. पाठः। [2] 'अधिकृत्य' ख. पाठः। [3] 'विद्यां' ग. पाठः।

वाग्भवं क्लेदिनीबीजमीकारान्तं ततः पठेत्। शक्तिमौकारसंयुक्तं विसर्गं तदधः पठेत्।। १।।
बिन्दुनादकला[1]क्रान्तं बीजं परमदुर्लभम्। एतद्बीजत्रयं देवि ह्सौःक्लीं च ततः परम्।। २।।
इयं पञ्चाक्षरी विद्या कथिता भुवि दुर्लभा।..।।

इति। मन्त्रान्तरं तत्रैव–

बालाबीजत्रयं देवि हंसाद्यं वा जपेत् सुधीः। हंसान्तं वा महादेवि शापादिदोषशान्तये।। १।।

इति। तत्रैव–

पाशबीजं महेशानि शक्तिं शिवं सवह्निकम्। द्वादशस्वरसंयुक्तं नादबिन्दुविभूषितम् ।। १।।
कामराजं प्रवक्ष्यामि ह्रींकारं शक्तिशैवकम्। मादनं चेन्द्रबीजं च वह्निवामाक्षिबिन्दुमत्।। २।।
शक्तिकूटं महादेवि क्रोंकारं शक्तिशैवकम्। वह्निबीजं मनुयुक्तं नादबिन्दुससर्गकम्।। ३।।
चतुर्दशाक्षरी विद्या [2]कथिता भुवि दुर्लभा। हंसबीजं ततः पश्चात् षोडशी कथिता मया।। ४।।

इति। अथ नवकूटा तत्रैव–

बालाबीजत्रयं देवि कूटत्रयं नवाक्षरी। वियत्कूटत्रयं देवि भैरव्या नवकूटकम्।। १।।

इति। मन्त्रान्तरं तत्रैव–

शिवः शक्तिश्च वाग्बीजं नादबिन्दुसमन्वितम्। वाग्भवं कथितं देवि कामराजं शृणु प्रिये।। १।।
शिवशक्तिमादनेन्द्रवह्निमायासमन्वितम्। नादबिन्दुकलाक्रान्तं कूटं परमदुर्लभम्।। २।।
शिवश्चन्द्रश्च सद्योन्तः सर्गबिन्दुसमन्वितः। एषा नवाक्षरी बाला सर्वदोषविवर्जिता।। ३।।

इति। अस्यार्थः– शिवचन्द्रवाग्भवं प्रथमम्। शिवचन्द्रकामभूवह्नितुर्यस्वरबिन्दुयुक्तं द्वितीयम्। शिवचन्द्रचतुर्दशस्वरविसर्गयुक्तं तृतीयम्। अपरं सकारादिमन्त्रान्तरं। तथा च त्रिपुरासारे– (२ प० २० श्लो०)

शिवशक्तिबीजमत एव शम्भुना विहितं तयोरुपरि पूर्वबीजयोः।
अकुलं कुलोपरि च मध्यमाधरे दहनं ततः प्रभृति सोर्जिता भवेत्+।। १।।
भैरवीयमुदिताऽकुलपूर्वा देशिकैर्यदि भवेत् कुलपूर्वा।
सैव शीघ्रफलदा भुवि विद्येत्युच्यते पशुजनेष्वतिगोप्या।। २।।

इति। मन्त्रान्तरं तत्रैव–

शिवाष्टमं केवलमादिबीजं भगस्य पूर्वाष्टमबीजमन्यत्।
परं शिरोन्तं गदिता त्रिवर्णा* सङ्केतविद्या गुरुवक्त्रगम्या।। १।।

इति। मन्त्रान्तरं श्रीक्रमे–

शक्तिः शवो वह्निबीजं द्वादशस्वरबिन्दुकम्। शक्तिर्महेशः कामश्च इन्द्रो वह्नीन्दुमायया।। १।।
शक्तिः शिवश्च वह्निश्च मनुस्वरविसर्गकः। नादबिन्दुकलायुक्तं बीजमेतत् प्रकीर्तितम्।। २।।

---

१. 'शिखा' ख. पाठः। २. 'षोडशी शृणु चाम्बिके' ख. पाठः। + अकुल ह, कुलस्यान्त्यबीजस्योपरि निहितम्। मध्य–बीजस्याधो रेफः इत्यर्थः। *शिव उकारस्तस्मादष्टमं ऐ। भग एकारः तस्य पूर्वाष्टमी। शिरो बिन्दुः तदन्तो यस्य स औ।

इति। एतासां पूजायन्त्रं ध्यानं पूजादिकं च भैरवीवत्। पुरश्चरणं लक्षजपः श्रीक्रमोक्तत्वात्। एतासां दीपिनीविद्या श्रीक्रमे—

वद युग्मं महेशानि वाग्वादिनि ततः परम्। एषा त्वष्टाक्षरी विद्या वाग्भवाद्ये नियोजयेत्।। १ ।।
क्लिन्ने क्लेदिनि देवेशि महाक्षोभं ततः कुरु। कामबीजं समुच्चार्य प्रणवं तदनन्तरम्।। २ ।।
महामोक्षं कुरु पश्चाच्छक्तिकूटं तथोच्चरेत्। जपेदादौ जपेत् पश्चात् सप्तवारमनुक्रमात्।। ३ ।।

इति।। अथ अन्नपूर्णेश्वरीभैरवी ज्ञानार्णवे—

तारं च भुवनेशानीं श्रीबीजं कामबीजकम्। हृदन्ते भगवत्यर्णान् माहेश्वरिपदं लिखेत्।। १ ।।
अन्नपूर्णे ठयुगलं विद्येयं विंशदक्षरी।...।।

तथा च कल्पे—

कामबीजं विना देवि श्रीबीजपूर्विका यदा। ऊनविंशाक्षरी देवी धनधान्यसमृद्धिदा।। १ ।।

इति।। अस्याः पूजा—प्रातःकृत्यादिसामान्यपूजापद्धत्युक्तपीठन्यासान्तं विधाय केसरेषु, पूर्वादि ओं वामायै नमः, एवं ज्येष्ठायै०, रौद्र्यै०, काल्यै०, कलविकरिण्यै०, बलविकरिण्यै०, बलप्रमथिन्यै०, सर्वभूतदमिन्यै०, मध्ये मनोन्मन्यै०, तत्समीपे तु जयायै नमः, विजयायै०, अजितायै०, अपराजितायै०, नित्यायै०, विलासिन्यै०, दोग्ध्र्यै०, अघोरायै०, मध्ये मङ्गलायै नमः। तदुपरि ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः। तत ऋष्यादिन्यासः। शिरसि ब्रह्मणे ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि अन्नपूर्णेश्वरीभैरव्यै देवतायै नमः। गुह्ये ह्रींबीजाय नमः। पादयोः श्रींशक्तये नमः। सर्वाङ्गे क्लीं कीलकाय नमः। तथा च ज्ञानार्णवे— ''बीजं च भुवनेशानी श्रीबीजं शक्तिरुच्यते। कीलकं कामबीजं स्यात्'' इति। ततः कराङ्गन्यासौ, ह्रां अङ्गुष्ठाभ्यां नमः। ह्रां हृदयाय नमः, इत्यादि च। तथा च ज्ञानार्णवे— ''भुवनेश्या महेशानि षड्दीर्घस्वरभिन्नया। षडङ्गानि'' इति।। ततः पदन्यासः— मूर्ध्नि ओं नमः। चक्षुषोः ह्रीं नमः, श्रीं नमः। कर्णयोः क्लीं नमः, नमो नमः। नसोः भगवति नमः, माहेश्वरि नमः। मुखे अन्नपूर्णे नमः। गुह्ये स्वाहा नमः। पुनर्गुह्यादिमूर्धान्तं न्यसेत्।। तत्रैव—

एकमेकं ततश्चैकं पुनरेकं द्वयं चतुः। चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्वति।। १ ।।
पदानि देवदेवेशि नवद्वारेषु विन्यसेत्। मूर्धादिगुह्यपर्यन्तं पुनस्तेषु वरानने।। २ ।।
गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत्।...।।

ततो ब्रह्मरन्ध्रमुखहृदयमूलाधारेषु चतुर्बीजानि विन्यसेत्। ततः शेषम्

भ्रूमध्यनासिकाकण्ठनाभिलिङ्गेषु पञ्चसु। पूर्ववत् क्रमतो देवि नमःप्रभृतिकं न्यसेत्।। १ ।।

इति। ततो मूलेन व्यापकं कृत्वा ध्यायेत्।

तप्तकाञ्चनवर्णाभां बालेन्दुकृतशेखराम्। नवरत्नप्रभायुक्त[1]मुकुटां कुङ्कुमारुणाम् ।। २ ।।
चित्रवस्त्रपरीधानां शफराक्षीं[2] त्रिलोचनाम्। सुवर्णकलशाकारपीनोन्नतपयोधराम् ।। ३ ।।
गोक्षीरधामधवलं पञ्चवक्त्रं त्रिलोचनम्। प्रसन्नवदनं शम्भुं[3] नीलकण्ठविराजितम्।। ४ ।।
कपर्दिनं स्फुरत्सर्पभूषणं कुन्द[4]सन्निभम्। नृत्यन्तमनिशं हृष्टं दृष्ट्वानन्दमयीं पराम्[5]।। ५ ।।

---

१. 'प्रभादीप्त' ख. पाठः। २. 'शावकाक्षीं' ख. पाठः। ३. 'शान्तं' ख. पाठः। ४. 'कम्बु' ख. पाठः। ५. 'शिवां' ख. पाठः।

सानन्दमुग्ध[1]लोलाक्षीं मेखलाढ्यां नितम्बिनीम्। अन्नदानरतां नित्यां भूमिश्रीभ्यामलङ्कृताम्।।६।।

एवं ध्यात्वा मानसोपचारैः सम्पूज्य शङ्खस्थापनं कुर्यात्। अस्याः पूजायन्त्रं तु–

त्रिकोणं च चतुष्पत्रं वसुपत्रं ततः परम्। कलापत्रं च भूबिम्बं चतुर्द्वारं समालिखेत्।। ७।।

इति। ततः पीठपूजां विधाय, पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधाय आवरणपूजामारभेत्। कर्णिकायां– अग्न्यादि मध्ये दिक्षु च ह्रां हृदयाय नमः इत्यादिना षडङ्गानि पूजयेत्। त्रिकोणाग्रे ओं हौं नमः शिवाय (नमः) इति शिवं पूजयेत्। वामकोणे ''ओं नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूमिपतित्वं मे देहि ददापय स्वाहा'' इति वराहं पूजयेत्। दक्षिणकोणे'' नमो नारायणाय'' इति नारायणं पूजयेत्। ततो वामे दक्षिणे च ''ग्लौंश्रीं अन्नं देहि अन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रींग्लौं'' इत्येनन भूमिश्रियौ पूजयेत्। ततश्चतुर्दलेषु पुरत आरभ्य ओं परविद्यायै नमः, ह्रीं भुवनेशान्यै नमः, श्रीं कमलायै नमः, क्लीं सुभगायै नमः। तथा च ज्ञानार्णवे–''तारेण परविद्यां च भुवनेशीं तदात्मना। कमलां रमया भद्रे कामेन सुभगां यजेत्''।। इति, अष्टपत्रेषु पश्चिमादितः ब्राह्म्यादिमातृः पूजयेत्। षोडशपत्रेषु पूर्वादि नं अमृतायै अन्नपूर्णायै नमः, मों मानदायै०, भं तुष्ट्यै०, गं पुष्ट्यै०, वं प्रीत्यै०, तिं रत्यै०, मां ह्रियै०, हें श्रियै०, श्वं सुधायै०, रिं रात्र्यै०, अं ज्योत्स्नायै०, न्नं हैमवत्यै०, पूं छायायै०, र्णै पूर्णिमायै०, स्वां नित्यायै०, हां अमावस्यायै नमः। एता अन्नपूर्णाशब्दान्ता नमोन्ताश्च पूजयेत्। तथा च ज्ञानार्णवे– ''शेषैर्वर्णैः प्रपूज्याश्च अन्नपूर्णान्तशब्दिताः''। ततश्चतुरस्रे लोकपालान् पूजयेत्। तत्रैव– ''चतुरस्रे लोकपालान् क्रमेण परिपूजयेत्'' इति। ततो धूपादिविसर्जनान्तं कर्म समापयेत्। अस्याः पुरश्चरणं लक्षजपः। तथा च कल्पे–

एवं ध्यात्वा जपेन्मन्त्रं लक्षसंख्यमनन्यधीः। साज्येनान्नेन जुहुयात् तद्दशांशमनन्यधीः।। १ ।।

इति भैरवीप्रकरणम्।। अथ प्रचण्डचण्डिकामन्त्राः–

प्रचण्डचण्डिकां वक्ष्ये सर्वकामफलप्रदाम्। यस्याः प्रसादमात्रेण सदाशिवो भवेन्नरः।। १ ।।
अपुत्रो लभते पुत्रं दरिद्रो धनमाप्नुयात्। कवित्वं च सुपाण्डित्यं लभते नात्र संशयः।। २ ।।

इति। विश्वसारे यामले च–

लक्ष्मीं लज्जां ततो मायां मात्रां द्वादशिकामपि। वज्रवैरोचनीये द्वे माये फट् स्वाहया युतम्।। १ ।।
लक्ष्मीबीजं यदाद्यं स्यात् तदा श्रीः सर्वतोमुखी। लज्जाबीजेन चाद्येन वश्यतां यान्ति योषितः।।२।।
मायाबीजेन चाद्येन महापातकनाशनम् । मात्राद्वादशिकाबीजमाद्यं स्यान्मुक्तिदायकम्।। ३ ।।

अत्र लज्जापदं कामबीजपरम्। तथा च–

अत्र लज्जापदे देवि कामबीजं वितन्यते। महाकालमतं प्रोक्तं मन्त्रोद्धारं शुभावहम्।। १ ।।

पूर्वमायापदे देवीति पाठे मायायाः पूर्वं लज्जाबीजं तस्मिन्नित्यर्थः। तथा च पूर्वमायापदेन लज्जाबीजमुच्यते अन्यथा तापिन्यादिविरोधः स्यात्। तथा च–

कामाद्यां वाग्भवाद्यां वा मायाद्यां वा जपेत् सुधीः। लक्ष्म्याद्यां वा जपेद्विद्यां चतुर्वर्गफलप्रदाम्।।१ ।।

अन्येषां मुनीनां च मते सर्वत्र मायापदं कूर्चपरम्। तत्रैव–

---

[1] 'सुख' ख. पाठः।

वान्तं वह्निसमारूढं रतिबिन्दुसमन्वितम्। लक्ष्मीबीजमिदं प्रोक्तं सर्वकामार्थसिद्धिदम्।। १।।
वामाक्षिवह्निसंयुक्तं नादबिन्दुविभूषितम्। शिवबीजं महेशानि लज्जाबीजमुदाहृतम्।। २।।
ईशानमुद्धृत्य पुरारिबीजं सबिन्दुकं नादविभूषितं च।
सवामकर्णं परितः प्रकल्प्य मायां वदन्तीह मनीषिणस्ताम्।। ३।।
द्वादशस्वरवर्णं स्यान्नादबिन्दुविभूषितम्। वाग्भवं बीजमित्युक्तं सर्ववाक्यविशुद्धये।। ४।।

इति मन्त्रचतुर्थबीजव्याख्यानात् सर्वत्र मायापदं कूर्चपरम्। अयं तु पक्षः समीचीनः। अस्य पूजाप्रयोगः— प्रातःकृत्यादिकं कृत्वा मन्त्राचमनं कुर्यात्। यथा—

लक्ष्मीमायाकूर्चबीजैस्त्रिभिः पीत्वाम्बु साधकः। वाग्भवेनौष्ठौ सम्मृज्य मायाभ्यां च द्विरुन्मृजेत्।।१।।
कूर्चेन क्षालयेत् पाणी एभिर्मन्त्रैश्च विन्यसेत्। श्रीमायाकूर्चवाक्कामत्रिपुटाभगवर्णकैः।। २।।
कामकलाङ्कुशाभ्यां च वक्त्रनासाक्षिश्रोत्रयोः। नाभिहृन्मस्तकं चांसौ स्पृष्ट्वा शम्भुर्भवेत् क्षणात्।।३।।
आचम्यैवं छिन्नमस्तां वत्सरान्तां प्रपश्यति।...।।

ततः प्राणायामान्तं कर्म कृत्वा षोढान्यासं कुर्यात्।

मन्त्रषोढां ततः कुर्यात् त्रैलोक्यवशकारिणीम्। श्रीबालात्रिपुटायोनिप्रासादप्रणवैस्तथा।। ४।।
कालीवध्वङ्कुशैः कामकलाकूर्चास्त्रकैः क्रमात्। षोडशीसमवर्णैश्च पृथगष्टादशाक्षरैः।। ५।।
एभिर्बीजैर्मातृकार्णान् स्वेषु स्थानेषु विन्यसेत्। एषा ब्रह्मस्वरूपा हि बीजषोढा प्रकीर्तिता।। ६।।
अस्याश्च न्यसनात् सर्वे वज्रदेहा भवन्ति हि। सर्वैश्वर्ययुतास्ते हि जीवन्मुक्ता दशाब्दतः।। ७।।

ततः ऋष्यादिन्यासः— यथा शिरसि क्रोधभूपतिभैरवऋषये नमः। मुखे सम्राट्छन्दसे नमः। हृदि प्रचण्डचण्डिकायै (छिन्नमस्तायै) देवतायै नमः। गुह्ये ह्रींबीजाय नमः। पादयोः स्वाहाशक्तये नमः।। तथा च—

अस्या ऋषिर्भैरवो वा नाम्ना च क्रोधभूपतिः। सम्राट् छन्दो देवता च च्छिन्नमस्ता प्रकीर्तिता।।१।।
माया बीजं स्वाहा शक्तिः कथिता ब्रह्मयोनिना।...।।

ततः कराङ्गन्यासौ। आं खड्गाय हृदयाय स्वाहा, कनीयस्योः। ईं सुखड्गाय शिरसे स्वाहा, पवित्राङ्गुल्योः। ओं सुवज्राय शिखायै स्वाहा, मध्यमयोः। ऐं पाशाय कवचाय स्वाहा, तर्जन्योः। ओं अङ्कुशाय नेत्रत्रयाय स्वाहा, अङ्गुष्ठयोः। अः सुरक्षासुरक्षाय अस्त्राय फट्, करतलपृष्ठयोः।। एवं हृदयादिषु। तदुक्तं भैरवीतन्त्रे—

उच्चरेत् पूर्वमाकारं बिन्दुलाञ्छितमस्तकम्। खड्गाय हृदयायेति स्वाहायुक्तं कनीयसि।। १।।
ईकारं च ततो देवि चन्द्रकोटिसमप्रभम्। सुखड्गाय ततो वाच्यं शिरसे तदनन्तरम्।। २।।
स्वाहायुक्तं ततो वाच्यं पवित्राङ्गुलिसंयुतम्। ऊकारं च ततो वाच्यं बिन्दुलाञ्छितमस्तकम्।।३।।
सुवज्राय ततो वाच्यं शिखायै तदनन्तरम्। स्वाहान्तं मध्यमायां च विन्यसेत् तदनन्तरम्।। ४।।
मात्रां द्वादशिकां देवीं विन्यसेच्च ततः परम्। पाशायेति समुच्चार्य प्रवदेत् कवचाय च।। ५।।
स्वाहान्तं विन्यसेन्मन्त्रं तर्जन्यां तदनन्तरम्। ओङ्कारं च ततो देवि चाङ्कुशं तदनन्तरम्।। ६।।

नेत्रत्रयाय स्वाहान्तमङ्गुष्ठे करयोर्द्वयोः। अकारं च विसर्गान्तं सुरक्षाक्षरसंयुतम्।। ७।।
असुरक्षाय–संयुक्तमस्त्रायेति ततः परम्। फडक्षरसमायुक्तं विन्यसेत् करयोर्द्वयोः।। ८।।
हृदि मूर्ध्नि शिखायां तु कवचे नेत्रमण्डले। यावदस्त्रं चतुर्दिक्षु विदिक्षु च यथाक्रमात्।। ९।।

ततो मूलेन मस्तकादिपादपर्यन्तं पादादिमस्तकान्तं वारत्रयं व्यापकं कृत्वा ध्यायेत्। यथा–

स्वनाभौ नीरजं ध्यायेदूर्ध्वं विकसितं सितम्। तत्पद्मकोशमध्ये तु मण्डलं चण्डरोचिषः।। १।।
जपाकुसुमसङ्काशं रक्तबन्धूकसन्निभम् । रजःसत्त्वतमोलेखायोनिमण्डलमण्डितम् ।। २।।
मध्ये तु तां महादेवीं सूर्यकोटिसमप्रभाम्। छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकम्।। ३।।
प्रसारितमुखां भीमां लेलिहानाग्रजिह्विकाम्। पिबन्तीं रौधिरीं धारां निजकण्ठविनिर्गताम्[1]।। ४।।
विकीर्णकेशपाशां च नानापुष्पसमन्विताम्। दक्षिणे च करे कर्त्रीं मुण्डमालाविभूषिताम्।। ५।।
दिगम्बरां महाघोरां प्रत्यालीढपदस्थिताम्। अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम्।। ६।।
रतिकामोपविष्टां च सदा ध्यायन्ति मन्त्रिणः। सदा षोडशवर्षीयां पीनोन्नतपयोधराम्।। ७।।
विपरीतरतस्थौ[2] तु ध्यायेद्रतिमनोभवौ[3] । डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः ।। ८।।
देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीम्। वर्णिनीं लोहितां सौम्यां मुक्तकेशीं दिगम्बराम्।। ९।।
कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः । नागयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव ।। १०।।
प्रत्यालीढपदां दिव्यां नानालङ्कारभूषिताम्। सदा द्वादशवर्षीयामस्थिमालाविभूषिताम्।। ११।।
डाकिनीं वामपार्श्वे तु कल्पसूर्यानलोपमाम्। विद्युज्जटां त्रिनयनां दन्तपङ्क्तिबलाकिनीम्।। १२।।
दंष्ट्राकरालवदनां पीनोन्नतपयोधराम्। महोदरीं महाघोरां मुक्तकेशीं दिगम्बराम्।। १३।।
लेलिहानमहाजिह्वां मुण्डमालाविभूषिताम्। कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः।। १४।।
देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीम्। करस्थितकपालेन भीषणेनातिभीषणाम्।। १५।।
आभ्यां निषेव्यमानां तां ध्यायेद् देवीं विचक्षणः।.................................।।

पिबन्तीमिति तेन मुखेनेति शेषः। तथा च–

स्वमस्तकं सखर्परं रक्तधाराभिः पूरितम्। ललज्जिह्वं महाभीमं धृत्वा वामभुजे तथा।। १।।

इति भैरवतन्त्रपाठात्। एवं ध्यात्वा मानसोपचारैः सम्पूज्य तारिणीवच्छङ्खस्थापनं कुर्यात्। अस्याः पूजायन्त्रम्–

त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम्। तन्मध्ये विलिखेद्योनिं द्वारत्रयसमन्वितम्।। १।।
बहिरष्टदलं पद्मं भूबिम्बत्रितयं ततः। कूर्चबीजं लिखेन्मध्ये त्रिकोणे फट्समन्वितम्।। २।।

यद्वा एतद्ध्यानोक्तयन्त्रम्। ततः पीठपूजा– ओं आधारशक्तये नमः, एवं प्रकृतये०, कूर्माय०, अनन्ताय०, पृथिव्यै०, क्षीरसमुद्राय०, रत्नद्वीपाय०, कल्पवृक्षाय०, तदधः स्वर्णसिंहासनाय०, आनन्दकन्दाय०, संविन्नालाय०, सर्वतत्त्वात्मकपद्माय०, सं सत्त्वाय०, रं रजसे०, तं तमसे०, आं आत्मने०, अं अन्तरात्मने०, पं परमात्मने०, ह्रीं

---

१. 'समुद्भवाम्' ख. पाठः। २. 'स्थां' ख. पाठः। ३. 'हराम्' ख. पाठः।

ज्ञानात्मने०, पद्ममध्ये– रतिकामाभ्यां नमः। रतिकामोपरि ''वज्रवैरोचनीये देहि२ एहि२ गृह्ण२ मम सिद्धिं देहि२ मम शत्रून् मारय२ करालिके हुं फट् स्वाहा'' इति पीठमन्त्रः। ततः पूर्ववद् ध्यात्वावाहयेत्। यथा– ''ओं सर्वसिद्धिवर्णिनीये सर्वसिद्धिडाकिनीये वज्रवैरोचनीये इहावह२''। पुनस्तन्मन्त्रमुच्चार्य ''इह तिष्ठ२ इह सन्निधेहि२ इह सन्निरुध्वस्व२'' इत्यनेनावाह्य ''आंह्रींक्रोंहंसः'' इत्यनेन प्राणप्रतिष्ठां कृत्वा, ''आं खड्गाय स्वाहा हृदयाय नमः'' इत्यादिना षडङ्गानि विन्यस्य, यथाशक्ति पूजां कृत्वा बलिं दद्यात्। यथा– वज्रवैरोचनीये देहि२ एहि२ गृह्ण२ इमं बलिं गृह्ण२ मम सिद्धिं देहि२ मम शत्रून् मारय२ करालिके हुं फट् स्वाहा'' इति मन्त्रेण। ततो देव्या दक्षिणे ओं वर्णिन्यै नमः। वामे ओं डाकिन्यै नमः। ततो देव्यङ्गे षडङ्गानि सम्पूज्य, दक्षिणे ओं शङ्खनिधये नमः। वामे ओं पद्मनिधये नमः। पूर्वादिदिक्षु लक्ष्मीं लज्जां मायां वाणीं च पूजयेत्। विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान्। मध्ये सदाशिवमहाप्रेतपद्मासनाय नमः, इति प्रणवादिनमोन्तेन पूजयेत्। पुष्पाञ्जलिं दत्त्वावरणपूजामारभेत्। ततोऽग्नीशासुरवायव्यमध्ये दिक्षु च, आं खड्गाय नमः हृदयाय स्वाहा, इति षडङ्गानि पूजयेत्। अष्टपत्रेषु पूर्वादिक्रमेण ओं काल्यै स्वाहा। एवं वर्णिन्यै० डाकिन्यै०, भैरव्यै०, महाभैरव्यै०, इन्द्राक्ष्यै०, पिङ्गाक्ष्यै०, संहारिण्यै स्वाहा। सर्वत्र प्रणवादिस्वाहान्तेन पूजयेत्। यथा–

एकां नामाभिधां कालीं योगिनीं (वर्णिनीं) डाकिनीं तथा। भैरवीं च महापूर्वां भैरवीं तदनन्तरम्।१ ।।
इन्द्राक्षीं च सपिङ्गाक्षीं ततः संहारकारिणीम्। पूर्वादिकं दले पूज्याः शक्तयश्च यथाक्रमम्।। २।।

प्रणवादिस्वाहान्तेन। लज्जाबीजं समुच्चरन्, पद्ममध्ये हुंहुं फट् नमः। देव्या दक्षिणे सम्राट्छन्दसे नमः। देव्या उत्तरे ओं सर्ववर्णेभ्यो नमः। पुनर्दक्षिणे ओं बीजशक्तिभ्यां नमः। पत्राग्रेषु पूर्वादिक्रमेण ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डा महालक्ष्मीः प्रणवादि नमोन्तेन पूजयेत्। ततश्चतुर्दिक्षु हूं करालाय नमः। हूं विकरालाय नमः। हूं अतिकरालाय नमः। हूं महाकरालाय नमः। यथा–

पूर्वद्वारे करालं च विकरालं च दक्षिणे। पश्चिमेऽतिकरालं च महाकारालमुत्तरे।। १ ।।

ततो धूपादिविसर्जनान्तं कर्म समापयेत्। विसर्जने त्वयं विशेषः, संहारमुद्रां प्रदर्श्याञ्जलावारोप्य वामनासापुटेन योनिमुद्रां दीपकलिकाकारां कृष्णप्रतिपच्चन्द्रकलामिव क्रमेण सूक्ष्मतां गतां चण्डरश्मौ निवेदयेत्[1]। मन्त्रस्तु ''उत्तरे शिखरे देवि भूम्यां पर्वतमूर्धनि[2]। ब्रह्मणा च समुत्पन्ने गच्छ देवि ममान्तरम्''।। इति। भैरवीये–

योनिमुद्रां समारूढां प्रदीपकलिकोज्ज्वलाम्। कृष्णपक्षे विधुमिव क्रमेण क्षीणतां गताम्।। १ ।।
इमं मनुं समुच्चार्य चण्डरश्मौ निवेदयेत्[3]।..।।

इमं मनुं ''उत्तरे शिखरे'' इति। अस्य पुरश्चरणं लक्षजपः। सिद्धविद्यात्वात्।। मन्त्रान्तरम्–

भुवनेशीं कामबीजं कूर्चबीजं च वाग्भवम्। भुवनेशीं कूर्चबीजं वाग्भवं तदनन्तरम्।। १ ।।
वज्रवैरोचनीये हुं फट् स्वाहा तदनन्तरम्।..।।

अस्या अङ्गन्यासपूजादिकं सर्वं षोडशीवद्बोद्धव्यम्।

हृल्लेखा मादनं कूर्चं[4] वाग्भवं कूर्चमेव च। अस्त्रान्ता च्छिन्नमस्ताया महाविद्या प्रकीर्तिता।। १ ।।

---

[1] 'निवेशयेत्' ख. पाठः। [2] 'वासिनि। ब्रह्मयोनिसमुत्पन्ने' ख. पाठः। [3] 'निवेशयेत्' ख. पाठः। [4] 'लक्ष्मीं' ख. पाठः।

अस्या हि सदृशी विद्या जगत्स्वपि न विद्यते। षड्वर्णोऽयं मनुः साक्षान्मोक्षदो नात्र संशयः।।२।।
अस्या ध्यानमहं वक्ष्ये शृणुष्व कमलानने।...।।

प्रत्यालीढपदां सदैव दधतीं छिन्नं शिरः कर्त्रिकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं मुदा।
नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरिदृढां ध्यायेज्जपासन्निभाम् ।। ३।।
दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा खर्परं
हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा वर्णिनी।
देव्याश्छिन्नकबन्धतः पतदसृग्धारां पिबन्ती मुदा
नागाबद्धशिरोमणिर्मनुविदा ध्येया सदा सा सुरैः।। ४।।
वामे कृष्णतनुं तथैव दधती खड्गं तथा खर्परं
प्रत्यालीढपदा कबन्धविगलद्रक्तं पिबन्ती मुदा।
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी
शक्तिः सापि सदा परा भगवती नाम्ना परा डाकिनी।। ५।।

इति ध्यानम्। अस्याः पूजादिकं सर्वं षोडशीवत् कार्यम्।

तारं लज्जाद्वयं वज्रवैरोचनीये हुं फट् स्वाहा। ध्यानपूजादिकं सर्वं षोडशीवदुपाचरेत्।। ६।।
वियत् सूत्रयुतं बिन्दुनादयुक्तं ततः प्रिये। एकाक्षरी महाविद्या त्रैलोक्यक्षोभकारिणी।। ७।।

सूत्रं दीर्घ ऊकारः।

ठठान्तैषा महाविद्या त्रैलोक्यमोहकारिणी। ताराद्यन्ता भवत्येषा चतुर्वर्गफलप्रदा।। ८।।
वज्रवैरोचनीये च कूर्चयुग्मं सफट् ठठः। ताराद्येषा महाविद्या सर्वतेजोपहारिणी।। ९।।
वाग्भवाद्या यदा विद्या वागीशत्वप्रदायिनी। त्रैलोक्याकर्षिणी विद्या चतुर्वर्गफलप्रदा।। १०।।
ध्यानपूजादिकं सर्वं षोडशीवत् समाचरेत्।..।।

इति।। इदानीं षोडशीविद्याप्रशंसामाह—

तथा सर्वप्रयत्नेन सर्वोपास्या च षोडशी। लक्ष्मीबीजादिका सैव सर्वैश्वर्यप्रदायिनी।। १।।
लज्जाद्या स्वर्गभूनागयोषिदाकर्षिणी परा। कूर्चाद्या सर्वजन्तुनां महापातकनाशिनी।। २।।
वाग्भवाद्या यदा देवी वागीशत्वप्रदायिनी। एषा तु षोडशीविद्या वेद्या सप्तदशाक्षरी।। ३।।
श्रीबीजपुटिता सा च लक्ष्मीवृद्धिकरी सदा। लज्जया पुटिता विद्या त्रैलोक्याकर्षिणी परा।। ४।।
कूर्चेन पुटिता सर्वपापिनां पापहारिणी। वाग्बीजपुटिता चैषा [१]कवित्वादिप्रदायिनी।। ५।।
चतुर्विधेति विद्यैषा प्रिये सप्तदशाक्षरी। ताराद्या षोडशी चान्या भवेत् सप्तदशाक्षरी।। ६।।

---

१. 'वागैश्वर्य' ख. पाठः।

एषा विद्या महाविद्या भुक्तिमुक्तिप्रदायिनी। कमला भुवनेशानी कूर्चबीजं सरस्वती।। ७।।
वज्रवैरोचीये च पूर्वबीजानि चोच्चरेत्। फट् स्वाहा च महाविद्या वसुचन्द्राक्षरी परा।। ८।।
ताराद्यैकोनविंशार्णा ब्रह्मविद्यास्वरूपिणी। एते विद्योत्तमे देवि भुक्तिमुक्तिप्रदे शुभे।। ९।।
लक्ष्म्यादिपुटिता पूर्वा रन्ध्रचन्द्राक्षरी भवेत्। चतुर्धा च महाविद्या चतुर्वर्गफलप्रदा।। १०।।
प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा। विद्यान्तरं प्रवक्ष्यामि सावधानावधारय।। ११।।
हृल्लेखा कूर्चवाग्बीजवज्रवैरोचनीये हुम्। अस्त्रं स्वाहा महाविद्या चतुर्दशाक्षरी मता।। १२।।
सर्वैश्वर्यप्रदा चैषा सर्वमोहनकारिणी। भुवनेशी त्रितत्त्वं च वाग्बीजं प्रणवं तत:।। १३।।
वज्रवैरोचनीये च फट् स्वाहा च तत: परा। चतुर्दशाक्षरी चैषा चतुर्वर्गफलप्रदा।। १४।।
एषा विद्या महादेवि जन्ममृत्युविनाशिनी। रमा कामस्तथा लज्जा: वाग्भवं वज्रवैपदम्।। १५।।
रोचनीये लज्जाद्वन्द्वमस्त्रं स्वाहासमन्वितम्। इयं सा षोडशी प्रोक्ता सर्वकामफलप्रदा।। १६।।
कथिता: सकला: विद्या: सारात् सारतरा: परा:। आसां ऋषिर्भैरवोऽहं नाम्ना च क्रोधभूपति:।।१७।।
सम्राट् छन्दो देवता च च्छिन्नमस्ता प्रकीर्तिता। षड्दीर्घभाक्स्वरेणैव प्रणवाद्येन सुन्दरि।। १८।।
खड्गाद्येन ठठान्तानि षडङ्गानि प्रकल्पयेत्। नारिदोषादिकं चासां ता: सुसिद्धा: सुरासुरै:।। १९।।
सकलेषु च वर्णेषु सकलेष्वाश्रमेषु च। अन्तिमेषु च वर्णेषु भुक्तिमुक्तिप्रदायिनी।। २०।।
प्रणवाद्या च या विद्या शूद्रादौ न समीरिता। अस्यां चैव विशेषोऽयं योषित् चेत् समुपासयेत्।।२१।।
डाकिनी सा भवत्येव डाकिनीभि: प्रजायते। पतिहीना पुत्रहीना यथा स्यात् सिद्धयोगिनी।।२२।।
इति ते कथितं तत्त्वं रहस्यमखिलं प्रिये। अतिस्नेहतरङ्गेण भक्त्या दासोऽस्मि ते प्रिये।। २३।।

इति। एतासां ध्यानपूजादिकं सर्वं षोडशीवद् बोद्धव्यम्। इति च्छिन्नमस्ताप्रकरणम्।।

अथ धूमावतीप्रकरणम्। तत्र फेत्कारिणीतन्त्रे—

धूमावतीप्रयोगोऽयमधुना कथ्यते मया। दान्तावर्घीशबिन्द्वन्तौ बीजे धूमावती द्विठ:।। १।।
धूमावतीमनु: प्रोक्त: शत्रुनिग्रहकारक:। पिप्पलादो मुनिश्छन्दो निचृज्ज्येष्ठा च देवता।। २।।
चतुर्थेन च वर्णेन बिन्दुनादयुतेन च। षड्दीर्घजातियुक्तेन कुर्यादङ्गानि मन्त्रवित्।। ३।।

दान्तौ धकारद्वयं, अर्घीशबिन्द्वन्तौ पृथगूकारसंयुक्तौ बिन्दुयुक्तौ धूमावती स्वरूपं, ठद्वयं स्वाहाकार:। धां हृदयाय नम:। धीं शिरसे स्वाहा, इत्यादिकरषडङ्गन्यास:। तथा ध्यानम्—

विवर्णा चञ्चला कृष्णा[1] दीर्घा च मलिनाम्बरा। विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा।। ४।।
काकध्वजरथारूढा विलम्बितपयोधरा। शूपर्हस्ता विरूपाक्षी[2] ध्वजहस्ता वरान्विता।। ५।।
प्रवृद्धलोमा[3] तु भृशं कुटिला चाकुले[4]क्षणा। क्षुत्पिपासार्दिता नित्यं सदा कलहतत्परा।। ६।।
एवंविधां सदा ध्यायेत् तत: कर्म समाचरेत्। पूर्वोक्ते पूजयेत् पीठे जयादिनवशक्तिके।। ७।।
केसरेषु षडङ्गानि पूजयेत् प्रोक्तवर्त्मना। अष्टपत्रेषु सम्पूज्या: शक्तयोऽष्टौ क्रमेण हि।। ८।।

---

१. 'रुष्टा' ख. पाठ:। २. 'तिरूक्षाक्षी' ख. पाठ:। ३. 'घोणा' ख. पाठ:। ४. 'कुटिलेक्षणा' ख. पाठ:।

क्षुधा तृष्णा रतिर्निद्रा निर्ऋतिर्दुर्गती रुषा। अक्षमेति च भूबिम्बे इन्द्राद्या हेतयो बहिः।। ९।।

इति। अथ प्रयोगः– तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा शिरसि पिप्पलादाय ऋषये नमः। मुखे निचृच्छन्दसे नमः। हृदये धूमावत्यै देवतायै नमः। इति विन्यस्य यथाविधिविनियोगमुक्त्वा, धां हृदयाय नमः। धीं शिरसे स्वाहा। धूं शिखायै वषट्। धैं कवचाय हुं। धौं नेत्रत्रयाय वौषट्। धः अस्त्राय फट्, इति विन्यस्य ध्यानादिमानसपूजान्ते कुङ्कुमादिना अष्टदलकमलं विरच्य, तद्बहिर्वृत्तं तद्बहिश्चतुरस्रं चतुर्द्वारयुक्तं लिखेत्, इति पूजायन्त्रं निर्माय पुरतः संस्थाप्याभ्यर्च्य अर्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं भुवनेश्वरीपीठमभ्यर्च्यासनादि-पुष्पोपचारान्ते केसरेष्वग्नीशासुरवायव्यमध्ये दिक्षु च षडङ्गानि सम्पूज्य, अष्टदलेषु देव्यग्रादिप्रादक्षिण्येन क्षुधायै नमः। तृष्णायै०, अरत्यै०, निद्रायै०, निर्ऋत्यै०, दुर्गत्यै०, रुषायै०, अक्षमायै नमः। इति सम्पूज्य, चतुरस्रे लोकपालान् तद्बहिर्वज्राद्यायुधानि च सम्पूज्य धूपदीपादिकं सर्वं प्राग्वत् समापयेदिति। तथा–

जपेत् कृष्णचतुर्दश्यां पुरश्चरणसिद्धये। उपवासपरो मन्त्री शून्यागारे दिवानिशम्।। १०।।

अयं जपः पूर्वसेवार्थं, लक्षजपः पुरश्चरणम्।

श्मशाने विपिने चैव[1] जपेल्लक्षं तु वाग्यतः। सोष्णीषः सार्द्रवासाश्च पुरश्चरणकर्मणि।। ११।।

अत्र होमोऽपि घृतेनैव तर्पणादिकं च प्राग्वदिति।

[2]आख्यापर्यन्तमालिख्य तस्मिन् स्थाप्य शिवं जपेत्[3]। अवष्टभ्य शिवं शत्रुनाम्नाथ प्रजपेन्मनुम्।।१२।।
सहस्रादूर्ध्वतः शत्रुर्ज्वरेण परिगृह्यते। पञ्चगव्येन शान्तिः स्याज्ज्वरस्य पयसापि वा।। १३।।
मन्त्राद्यक्षरमालिख्य शत्रुनाम ततः परम्। द्वितीयान्तं मनोः शत्रोर्नामैवं मनुना लिखेत्।। १४।।
रणेऽयुतजपाच्छत्रोर्निश्चितं मरणं भवेत्। कृत्वा यन्त्रे रिपोराख्यामरण्ये यामिनीदले।। १५।।
उत्सादो जायते शत्रोर्मनोरयुतजापतः। दग्ध्वा काकं श्मशानाग्नौ तद्भस्मादाय मन्त्रितम्।। १६।।
विरोधिनाम्नाष्टाशासु[4] सद्य उच्चाटनं रिपोः। श्मशानभस्मना कृत्वा शिवं तस्योपरि न्यसेत्।।१७।।
विरोधिनामसंरुद्धं कृष्णपक्षे समर्चयेत्। महिषीक्षीरधूपं च दद्यात्[5] शत्रुविपत्करम् ।। १८।।
महिषीरूपमासाद्य[6] स्वप्ने शत्रुं निपातयेत्। मन्त्रेणानेन निखनेत् तद्भस्म रिपुमन्दिरे।। १९।।
शत्रुमुच्चाटयेत् तूर्णं नात्र कार्या विचारणा। न्यस्य पाणितले शत्रोरात्मानं चितिभस्मना।। २०।।
वह्नावधोमुखं रुद्ध्वा[7] स्थापयेदयुतं जपन्। धूमावतीमनुं मन्त्री शत्रुं यमपुरं नयेत्।। २१।।
प्राग्वत् करतले नामार्णद्वयोर्ध्वे रिपोर्न्यसेत्। जलस्थः पूजयेन्मन्त्री हुङ्कारान्नाशयेदरीन्।। २२।।
श्मशानभस्मना लिङ्गं कृत्वा पुष्पादिनार्चयेत्। भगवन्निति सम्भाष्य मनसा कर्म चिन्तयन्।। २३।।
निम्बकाकच्छदावेकीकृत्य चाष्टशतं जपेत्। दद्याद्धूपं साध्यनाम्ना सद्यो विद्वेषयेदरीन्।। २४।।
(चिताकाष्ठानले क्षीरहोमाच्छान्तिः प्रजायते। रजोधूमप्रधानेन गृध्ररूपेण कालिका ।। २५।।

---

१. 'वापि' ख. पाठः। २. 'आख्योपरि लिखेन्मंत्रं' ख. पाठः। ३. 'यजेत्' ख. पाठः। ४. 'क्षिपेदित्यर्थः। ५. 'दद्यत्' ख. पाठः।
६. 'पृष्ठमागत्य' क. पाठः। 'रूपेणागत्य' ग. पाठः। ७. 'क्रुद्ध्वा' ख. पाठः।

मारयत्यरिमागत्य शान्तिर्निर्माल्यधूपत:।) वराहबालधूपेन [1]हन्यात् सूकररूपिणी।। २६।।
अश्वत्थपत्रधूपेन शान्तिर्भवति नान्यथा। शान्ति: सर्वाभिचारस्य पञ्चगव्येन जायते।। २७।।
क्षीरेण वापि देवेशि मधुरत्रितयेन वा। कीले क्ष्वेडतरोर्देवि शत्रोर्नाम समालिखेत्।। २८।।
विदर्भ्य मूलमन्त्रेण साध्यनामाक्षराणि वै। जप्त्वा पदद्वये मन्त्री खनेदुच्चाटनं रिपो:।। २९।।

(कीले क्षीरतरोर्विदर्भ्य विलिखेन्मन्त्रेण नामाक्षरं
जप्त्वालिख्य पदद्वयेन निखनेदुच्चाटनं विद्विषाम्।
तत्पादद्वयधूलिकीर्णहविषा दत्त्वा द्विजेभ्यो बलिं
तज्जप्त्वा चितिभस्मकीर्णितमरेर्गेहे तदुच्चाटनम्।।)

ज्येष्ठागारे[2] श्मशाने वा निर्माल्ये पादगोचरे। गर्दभावासभूमौ वा प्रेतस्थाने चतुष्पथे।। ३०।।
ऊषरे मेहनोद्भूमौ पुष्पितावासके स्वयम्। आनीय शर्करा मन्त्री दिग्वासा दक्षिणामुख:।। ३१।।
श्मशानलोष्टे निक्षिप्य चिताग्नौ भर्जयेत् तथा। चूर्णं तत्तु जपेल्लक्षं निक्षिपेच्छत्रुवेश्मनि।। ३२।।
सेनामध्ये तु सर्वेषां क्षणा[3]दुच्चाटनं भवेत्। गर्ते पिपीलिकानां तु पादधूलियुतान् कणान्।। ३३।।
सघृतान् सप्तवार[4] तु जुहुयान्मन्त्रविन्निशि। भ्रमते काकवत् सर्वां महीमाचरणादिषु[5]।। ३४।।
कृत्वा प्रतिकृतिं शत्रोर्जन्मवृक्षेण[6] मन्त्रवित्। कृतप्रतिष्ठितप्राणा[7] विद्ध्वा मर्मसु कण्टकै:।।३५।।
आयसैर्मन्त्रमावर्त्य वक्ष्यमाणै: प्रवेष्टयेत्। पूर्वोक्तशर्कराभिस्तु जप्त्वा नित्यं प्रतापयेत्।। ३६।।
सप्तरात्रेण तस्याशु रिपोरुच्चाटनं भवेत्। मुखे च शिल्यया लेख्यौ सारमेयवराहयो:।। ३७।।
मन्त्रेण दर्भितौ साध्यौ भौमवारे द्वयाद्दिवा। धतूररससंयुक्तचिताङ्गारेण मन्त्रिणा ।। ३८।।
वृषस्य पृष्ठतो बद्ध्वा केशपाशेन तं जपेत्। श्मशाने शत्रुमार्गे वा तद्गृहे निखनेन्निशि।। ३९।।
विद्वेषणं भवेत् सद्यो गौरीशङ्करयोरपि। अश्वत्थत्वचि मन्त्रार्णैर्दर्भितं साध्यमालिखेत्।। ४०।।
अन्यद्विषतरोस्तद्वज्जप्त्वा उद्धृतया न्यसेत्। पूर्वोक्तकण्टकैर्विद्ध्वा जपेत् स्पृष्ट्वा शतं शतम्।।४१।।
विद्विष्टौ भवतस्तौ तु नाम्नामपि च तत्क्षणात्।..।।

वर्णांस्तान् विलिखेत् विदर्भ्यमभित: कोणेषु मन्त्राक्षरै:
संरुद्धान् परित: प्रभञ्जनगृहे मध्ये च साध्यं पृथक्।
अङ्गारै: कनकोत्तरैरपि पदैर्मन्त्रं जपंस्ताडयेत्
कार्पासेन रणे कुजार्कदिवसे भूलोकविद्वेष्यताम्।। ४२।।

आपाद्य पूर्वमूर्तिं च शत्रोरालेख्य शोषयेत्। तापयेन्निशि तां जप्त्वा वह्निरूपे बलिं पचेत्।।४३।।
एवं सप्तदिनं रात्रावाजप्यालिप्य शोधयेत्। व्योषाग्निलशुनोन्मत्तहिङ्गुसिद्धार्थसूरणै: ।। ४४।।

---

[1] 'हुनेत् सूकररूपिणीम्'। [2] 'जप्त्वा वासे' ख. पाठ:। [3] 'लक्षात्' ख. पाठ:। [4] 'सप्तरात्रं' ख. पाठ:। [5] 'पूर्वं महिमामारणा' ख. पाठ:। [6] 'ऋक्षेण' ख. पाठ:। [7] 'कृत्वा प्रतिष्ठां प्राणस्य' ख. पाठ:।

पिण्डैर्लवणसम्भूतैरुन्मत्तद्रवसंयुतैः। पेषयित्वा तेन सम्यग् लिखेन्मन्त्री मनुं जपेत्।। ४५।।
बलिमध्ये खनेत् कीलं शुक्लरूपं तथोपरि। वह्निं प्रज्वाल्य तत्काष्ठैर्द्रव्ययुक्तैर्हुनेज्जपेत्।। ४६।।
निक्षिप्य प्रतिमां तत्र ज्वरे नित्यं जपेन्मनुम्। सप्तरात्रं ततः कुण्डे रत्यागारेऽथवा हुनेत्।। ४७।।
त्रिकोणशूलदीप्ताग्रमेरकायतनान्वितम्। तत्रापि निखनेत् कीलं वह्निं प्रज्वाल्य पूर्ववत्।। ४८।।
ततः प्रतिकृतिं मन्त्री वह्नेरुपरि लम्बयेत्। उक्तद्रव्येण संलिप्तामूर्ध्वपादामधोमुखीम्।। ४९।।
रक्तद्रव्यैः समाराध्य प्रज्वाल्य विषवृक्षजैः। इन्धनैः प्रतिमां यावत् समित्पुञ्जनिभां हुनेत्।। ५०।।
अनिलादिभिरामृत्योर्वशं याति न संशयः।..।।

इति। अथ भद्रकालीमन्त्राः। फेत्कारिणीतन्त्रे—

प्रासादबीजमुद्धृत्य कालीति पदमुच्चरेत्। महाकालीपदं चोक्त्वा किणियुग्ममतः परम्।। १।।
अस्त्रमग्निप्रियान्तोऽयं भद्रकालीमहामनुः। पदैः षड्भिः षडङ्गानि जातियुक्तानि कल्पयेत्।। २।।

प्रासादबीजं वक्ष्यते। अन्यत्पदत्रयं स्वरूपम्। युग्ममिति द्विरुच्चरेदित्यर्थः। अस्त्रं फट्। अग्निप्रिया स्वाहाकारः। हौं हृत्, कालि शिरः, महाकालि शिखा, किणिकिणि कवचम्, फट् नेत्रं, स्वाहा अस्त्रम्।

ध्यातव्येयं महादेवी भद्रकाली भयापहा। आराध्य प्रजपेन्नित्यमष्टाधिकशतेन तु।। ३।।

क्षुत्क्षामा कोटराक्षी मषिमलिनमुखी मुक्तकेशी हसन्ती[1]
नाहं तृप्ता वदन्ती जगदखिलमिदं ग्रासमेकं करोमि।
हस्ताभ्यां धारयन्ती ज्वलदनलशिखासन्निभं पाशमुग्र[2]
दन्तैर्जम्बूफलाभैः परिहरतु भयं पातु मां भद्रकाली।। ४।।

आराध्य प्रजपेन्मन्त्रं नित्यमष्टोत्तरं शतम्। रिष्टमाला विधातव्या शतेनाष्टोत्तरेण च।। ५।।
प्रयोगश्चात्र कर्तव्यः सामान्यपटलोदितः। अशेषं कालिकातन्त्रे कथितं कार्यसिद्धये।। ६।।

सामान्यपटलोदितः फेत्कारिणीतन्त्रे सामान्यपटले प्रोक्तः। कालिकातन्त्रे कथितं श्मशानकालिकातन्त्रे कथितम्।

इयं देवी महादेवी शत्रुनिग्रहकारिणी। यथेष्टचेष्टया चिन्त्या धर्मकामार्थसिद्धिदा।। ७।।

इति। फेत्कारिणीतन्त्रे—

अथातः सम्प्रवक्ष्यामि महाकालीमहामनुम्। यस्य विज्ञानमात्रेण नासाध्यं विद्यते भुवि।। १।।
प्रलयाग्नी रक्तगतावूर्ध्वकेशीसमन्वितौ । नादबिन्दुसमायुक्तावेवं क्रोधिद्वयं पुनः।। २।।
पशुं गृहाणपदतो वर्मास्त्रानलवल्लभा। चतुर्दशाक्षरी प्रोक्ता महाकाली ध्रुवादिका।। ३।।

प्रलयाग्नी क्षकारद्वयं, रक्तो रेफः, ऊर्ध्वकेशी एकारः, नादबिन्दु प्राग्वत्। तेन क्ष्रेंक्ष्रें इति, क्रोधी ककारद्वयं, एवमित्यनेन रेफगतमेकारनादबिन्दुयुक्तं चेत्यवगन्तव्यम्। तेन क्रेंक्रें, वर्म हुं, अस्त्रं फट्, अनलवल्लभा स्वाहा। तथा—

न्यासशुद्धी न ऋष्यादि नात्र किञ्चिद्विचारणा। कृष्णतोयेन सम्पूर्णे कुम्भे[3] चैवाथ कालिकाम्।।४।।

---

१. 'रुदन्ती' ख. पाठः। २. 'पाशयुग्मं' ख. पाठः। ३. 'कृष्णकुम्भे' ख. पाठः।

ब्राह्म्यादिभिश्च दूतीभिर्युक्तां सम्पूज्य भक्तित:। पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनाम्।। ५।।
शक्तिशूलधनुर्बाणखेटखड्गवराभयान्। दक्षादक्षभुजैर्देवीं बिभ्राणां भोगिभूषणाम् ।। ६।।
ध्यात्वैवं साधक: साध्यं साधयेन्मनसि स्थितम्। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।। ७।।
वाराही चैव माहेन्द्री चामुण्डा चण्डिकाष्टमी। पूर्वादीशानपर्यन्तं कुम्भाङ्कुश[1]स्थिता इमा:।। ८।।
कर्त्रिकायां ततो देवीं महाकालीं भयापहाम्। नामोच्चारणसंरब्धं वह्नौ प्रज्वलिते खरे।। ९।।
जुहुयाद्वैरिणं क्रुद्धो[2] देवीमन्त्रं जपंस्तथा। समिध: पिचुमन्दस्य विभीतचितिकाष्ठका:।। १०।।
हरं विषं राजिकां च कण्टजालरसान्विता:। गृहधूमश्मशानास्थिविभीताङ्गारहोमत:।। ११।।
सप्ताहाद्वैरिणं हन्ति कालीमन्त्रप्रयोगत:। उच्चाटनं चापराह्णे सन्ध्यायां मारणं तथा।। १२।।
दक्षिणस्यां दिशि स्थित्वा ग्रामादेर्दक्षिणामुख:।..।।

इति। मन्त्रान्तरं फेत्कारिणीतन्त्रे–

गृध्रकर्णिपदं प्रोक्त्वा विरूपाक्षिपदं तत:। लम्बस्तनिपदं पश्चान्महोदरिपदं वदेत्।। १।।
उत्पाटय पदं भूयस्तथैव मारयेति (?)च। पदान्येतानि वीप्स्याथ वदेद्वर्मास्त्रमेव च।। २।।
वह्निजायापदं चोक्त्वेति।

वीप्स्येति द्विरुच्चार्य, वर्म हुं, अस्त्रं फट्, वह्निजाया स्वाहाकार:। तथा–

पिप्पलादो मुनि: प्रोक्तो निचृच्छन्द उदाहृतम्। भद्रकाली देवता स्यात् पञ्चाङ्गं स्वयमेव तु।। ३।।

स्वयमेव मूलमन्त्रेणैव। यथा–वीप्सितेनाद्यपदद्वयेन हृत्। तदूर्ध्वपदद्वयेन शिर:। तदूर्ध्वपदद्वयेन शिखा। वर्मास्त्राभ्यां कवचम्। स्वाहयास्त्रमिति। तथा–

अतिरौद्रा महादंष्ट्रा भृशं दीर्घा कृशोदरी। सुवृत्तनयनारूढा दीर्घघोणा मदातुरा।। ४।।
स्निग्धम्भीरनिर्घोषा नीलजीमूतसन्निभा। भ्रुकुट्यटाट्टसन्दीप्ता महारदनभीषणा ।। ५।।
दंष्ट्रोग्रकोपताम्राक्षी रक्तदीर्घशिरोरुहा। त्रिशूलव्यग्रदोर्दण्डा नरकीटपलाशिनी।। ६।।
अतिरक्ताम्बरा देवी रक्तमांसासवप्रिया। शिरोमालाविचित्राङ्गी पिबन्ती शोणितासवम्।। ७।।
नृत्यन्ती च हसन्ती च पिशाचगणसेविता। पिशाचस्कन्धमारुह्य भ्रमन्ती वसुधातले।। ८।।
शङ्करस्य मुखोत्पन्ना योगिनीयोगिवल्लभा। इत्थंभूतां भद्रकालीं मातृभि: परिवारिताम्।। ९।।
ध्यात्वा सम्यक् समाराध्य ततो मन्त्रं जपेद्बुध:। अयुतं [3]जपसिद्ध्यर्थं मातृकान्यासतत्पर:।।१०।।

ततो होमादिकमपि कार्यम्। होमस्तु घृतेनैव प्रागुक्तवचनादिति। तथा–

धूमावत्यां च यत् प्रोक्तमनयापि तदाचरेत्। उक्त: प्रयोग एवात्र विशेषविधिरुच्यते।। ११।।
ऋज्वायतं तु निर्दोषमर्कमूलं वनान्तरात्। विषवृक्षं समादाय ततो होमं समाचरेत्।। १२।।
शून्यागारे तथा कुण्डं कृत्वा तत्र त्रिकोणकम्। विषवृक्षेन्धनेनाग्निं प्रज्वाल्यादाय तत् सुधी:।।१३।।
ततो दण्डं जपन्मन्त्री विषवृक्षस्य साधक:। अष्टोत्तरशतं वह्नौ तं दण्डं निक्षिपेद्बुध:।। १४।।

---

[1] 'कुम्भाकाश' ख. पाठ:। 'कुम्भस्थाने' ख. पाठ:। [2] 'शुद्धौ' ख. पाठ:। [3] 'मन्त्र' ख. पाठ:।

सुविनीतं द्विजं वीरं कृत्वा चोत्तरसाधकम्। दिक्षु सर्वासु संस्थाप्य स्वभटान् खड्गहस्तकान्।।१५।।
कृतरक्षः समाराध्य वह्निं क्रोधसमन्वितः। अष्टोत्तरशतं जप्त्वा दण्डाग्रं जातवेदसि।। १६।।
दत्त्वा सिद्धार्थकं मन्त्री जुहुयात् सवनद्वयम्।...।।

यष्ट्यग्रमग्नौ विनिवेश्य पश्चात् सिद्धार्थकैस्तैलसमुक्षितैश्च।
हुनेत् सहस्रद्वयमत्र धीमान् विसृज्य वह्निं बलिदानपूर्वम्।। १७।।
ध्यायेद् देव्याः स्वरूपं प्रलयघननिभं रक्तवर्णोग्रनेत्रं
शूलाग्रप्रोतसिंहं तरुणनरशिरःस्रग्धरं तीक्ष्णदंष्ट्रम्।
उल्काव्यग्रोर्ध्वहस्तं रुधिरमधुमदभ्रान्तचित्तं सुघोरं
शत्रूणां शङ्कुमुच्चैः करविधृतशिलादण्डनिर्घातघोरम्।। १८।।

भावयित्वा करेणोल्कां दक्षिणेन रिपोर्मुखम्। गत्वा दूरेण विसृजेत् तद्वत् क्रुद्धा नभःस्थिता।।१९।।
ससहायस्ततस्तीर्थं गच्छेत् पश्चात्तु वाग्यतः। स्नात्वावश्यं शुचिर्भूत्वा कण्ठमात्रोदके स्थितः।।२०।।
जपेत् सुदर्शनं दुर्गां सावित्रीं च समाहितः। अष्टोत्तरसहस्रं तु जपेदन्यच्छतं शतम्।। २१।।
उष्णीषवासा आच्छाद्य ससहायः सुरालयम्। गत्वा तु महतीं पूजां कृत्वा देवस्य चक्रिणः।।२२।।
पादयुग्मं समालम्ब्य वर्णलक्षं जपेद् बुधः। तावज्जप्त्वा घटे सद्भिरभिषिञ्चेत् स्वकं वपुः।। २३।।
दक्षिणां विधिवद् दत्त्वा शान्तिहोमं च कारयेत्। यद्वा दुर्गां जपेल्लक्षं सावित्रीं च तथैव च।।२४।।
कृत्वाभिषेकं ताभ्यां तु शक्तितो भोजयेद् द्विजान्। दक्षिणाः शक्तितो दत्त्वा सिद्धो भवति साधकः।।२५।।
रुद्रदण्डप्रयोगोऽयं दारुणो रणसूदनः। पुरा देवासुरे युद्धे हरेण किल निर्मितः।। २६।।
तत्प्रयोगमहं वक्तुं न शक्नोमि तथापि चेत्। प्रयोगमात्रं तद्वक्ष्ये विद्वेषोच्चाटनादिकम्।। २७।।
विभीतफलके शत्रोर्लिखेन्नामविदर्भितम्। मन्त्रं जप्त्वा सरोषं[१] तत् खनेत् पितृवने बुधः।। २८।।
उच्चाटनं भवेत् क्षिप्रमचलस्यापि किं पुनः। मानवानां द्विजश्रेष्ठे न कर्तव्यं मनीषिभिः।। २९।।
तथैव किल तस्यैव त्रिकोणेऽधोमुखं खनेत्। धत्तूरबीजचूर्णेन जप्त्वा वालिप्य तत् त्यजेत्।।३०।।
खनेदुच्चाटयेच्छत्रून् वाताहतरजो यथा।..................................।। इति।

अथ श्मशानकाली–

वाणीं मायां ततो लक्ष्मीं कामराजमतः परम्। कालिकेसम्पुटत्वेन चतुष्कं बीजमालिखेत्।। १।।
एकादशार्णा देवेशि चतुर्वर्गप्रदायिनी ।..।। इति।

अस्याः पूजायन्त्रम्–

पद्ममष्टदलं वृत्तं तद्बाह्ये धरणीतलम्। चतुर्द्वारसमायुक्तं मध्ये मूलं समालिखेत्।। २।।
दलेष्वष्टसु विलिखेत् कवर्गाद्यष्टवर्गकम्। धरण्या विलिखेदाद्यं चतुष्के.............।। ३।।

---

[१] 'सहस्रं' ख. पाठः।

पूर्वादिचतुरन्ते च मध्ये देवीं प्रपूजयेत्।.....................................।।

अस्या: पूजाप्रयोग:– प्रात:कृत्यादिप्राणायामान्तं कर्म समाप्य ऋषादिन्यासं कुर्यात्। शिरसि भृगुऋषये नम:। मुखे निचृच्छन्दसे नम:। हृदि श्मशानकालिकायै देवतायै नम:। गुह्ये वाग्बीजाय नम:। पादयो: मायाशक्तये नम:। सर्वाङ्गे कामराजकीलकाय नम:। इति विन्यस्य, ऐं हृदयाय नम:। ह्रीं शिरसे स्वाहा। श्रीं शिखायै वषट्। क्लीं कवचाय हुम्। कालिके नेत्रत्रयाय वौषट्। ऐंह्रींश्रींक्लीं अस्त्राय फट्। अथ ध्यानम्–

अञ्जनादिप्रभां देवीं श्मशानालयवासिनीम्। रक्तनेत्रां मुक्तकेशीं शुष्कामांसातिभीषणाम्।। १।।
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णां समांसकम्। सद्य: कृत्तशिरो दक्षहस्तेन दधतीं शिवाम्।। २।।
स्मितवक्त्रां सदाप्याममांसचर्वणतत्पराम् । नानालङ्कारभूषाङ्गीं नग्नां मत्तां सदासवै:।। ३।।
एवं ध्यात्वा जपेद् देवीं श्मशाने तु विशेषत:। गृहे वापि सहस्त्रं च मत्स्यमांसै: सुभोजनै:।।४।।
नग्नो भूत्वा महापूजां कुर्याद्रात्रौ समाहित:।..।।

पूजनान्ते ध्यात्वा मानसैरुपचारै: सम्पूज्यार्घ्यस्थापनं कृत्वा, पुनर्ध्यात्वा पञ्चोपचारै: सम्पूज्य पत्रेषु ब्राह्म्यादिका यजेत्। तद्बहिरसिताङ्गादिकान्। अस्य पुरश्चरणमेकादशलक्षजप:। तथा च– 'वर्णलक्षं जपेन्मन्त्रं तद्दशांशेन होमयेत्'। मन्त्रान्तरं तथा–

कामबीजं समालिख्य कालिकायै समालिखेत्। नमोन्तेन च देवेशि सप्तार्णो मनुरुत्तम:।। १।।
षडङ्गं कालिकादेव्या अन्यत् सर्वं तु पूर्ववत्।...।।

इति। अथार्द्रपटी– 'प्रणवो हृदयं ततो भगवति चामुण्डे रक्तवाससी अप्रतिहतरूपपराक्रमेऽमुकवधाय विचेतसे वह्निवल्लभा'। आर्द्रपटेनालक्तकपटेनावृत: समुद्रगामिनीनदीतीरे ऊषरभूमौ वा दक्षिणाभिमुख ऊर्ध्वबाहुर्जपेत्, यावत्पट: शुष्यति तावत्प्राणा: शुष्यन्ति शत्रो:।। अथ घर्मटिका–

पूर्वं घर्मटिके युग्मं ततो कर्मटिके युगम्। घोरे विद्वेषकारिणि विद्वेषो द्वेषकारिणि।। १।।
अथ घोराघोरयो: स्यादमुकामुकयोस्तत:। विद्वेषयद्वयं हुं फट् विद्या घर्मटिकेरिता।। २।।

अत्रापि प्रयोग: प्राग्वत्। परन्तु फलं विद्वेषणम्।। अथ श्मशानभैरवी–''श्मशानभैरवि नररुधिरान्त्रवसाभक्षिणि सिद्धिं मे देहि मम मनोरथान् पूरय हुं फट् स्वाहा''।। अथ ज्वालामालिनी– ''ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते हुं फट् स्वाहा''। एतैर्मन्त्रैर्यावन्ति क्रूरकर्माणि तावन्ति कुर्यात्। महाकालीमन्त्रप्रयोगे तु न्यासादिकं न कर्तव्यम्। ''न्यासशुद्ध्यादिकं किञ्चिन्नात्र कार्या विचारणा'' इत्युक्तत्वात्। प्रयोग: प्रागेवोक्त:।। ज्वालामालिनीप्रयोगस्तु–

ओंनमो हृदयं प्रोक्तं भगवतीति शिर: स्मृतम्। ज्वालामालिनि च शिखा गृध्रगणपरिवृते तत:।।१।।
वर्म स्वाहास्त्रमित्युक्तं जातियुक्तं न्यसेत् तनौ।...।।

प्रयोगस्तु–ओं हृदयाय नम: इत्यादि

अभुक्त्वा नियतं चैव जपेन्मन्त्रं जपाञ्जयी। जपेदष्टसहस्त्रं तु त्रयोविंशतिवासरान्।। २।।
प्रत्यहं साधनं सिद्धिं ददाति च न संशय:। स्मृतिमात्रेण वै मन्त्री रिपून् सर्वान् विनाशयेत्।।३।।

इति। तथा फेत्कारीये–''ॐ ठंठांठिंठींठुंठूंठेंठैंठोंठौंठंठ:'' इति मन्त्रेण सृगालास्थिमयं कीलकं पञ्चाङ्गुलं सहस्त्रेणाभिमन्त्रितं

यस्य गृहे निखनेद् यस्य नाम्ना श्मशाने वा निखनेत् स उन्मत्तो भवति।। ''उों डंडांडिंडींडुंडूंडेंडैंडोंडौंडंडः'' अमुकं गृह्ण२ हूं[1] ठःठः'' अनेन मन्त्रेण मनुष्यास्थिमयं कीलकं वितस्तिप्रमाणं सहस्राभिमन्त्रितं यस्य गृहे श्मशाने वा निखनेत् तस्य समस्तपरिवारो नश्यति। उद्धृते खलु शान्तिः। तथा– '' उों हंसःसंसंहः अमुकस्य शान्तिर्भवतु स्वाहा'' अनेन मन्त्रेण घृतमधुसिक्तं क्षीरं हुनेत् तेन शान्तिर्भवति।। तथा– ''उों ढंढांढिंढींढुंढूंढेंढैंढोंढौंढंढः अमुकं मारय२ हूंठंठः'' अनेन मन्त्रेण गर्दभास्थिमयं कीलकं त्रयोदशाङ्गुलं सहस्रेणाभिमन्त्रितं चितामध्ये निखनेत् स ज्वरेण विनश्यति।। ''उों णंणांणिंणींणुंणूंणेंणैंणोंणौंणंणः'' अनेन मन्त्रेण खदिरकाष्ठमयं कीलकं षडङ्गुलं सहस्रेणाभिमन्त्रितं यस्य गृहे निखनेद् यस्य नाम्ना श्मशाने वा निखनेत् तस्य सर्वं नाशयति।। अथ निगडबन्धमोक्षणम्– ''ओं नमो निर्ऋते२ तिग्मतेजो यन्मयं विव्रेताबन्धमेतं यमेन दत्तं तस्यासंविदानोत्तमेनाके अघोरेहवैरं''। अस्य निगडभञ्जनमन्त्रस्य प्रजापतिर्ऋषिः, निर्ऋतिर्देवता, त्रिष्टुप् छन्दः, बन्धादिव्यसनपरिहारे विनियोगः। एवमृष्यादिकं विन्यस्यायुतं जपेत् ततो बन्धव्यसनान्मुक्तो भवति नान्यथा।।

अथ चिटि[2]मन्त्रः–

तारं चिटिद्वयं[3] पश्चाच्चण्डालि तदनन्तरम्। [4]महत्पदाद्यां तां ब्रूयादमुकं मे ततः परम्।। १।।
वशमानय ठद्वन्द्वं चिटिमन्त्र[5] उदाहृतः। सप्तभिर्वशयेद्भूपान् दिवसैर्विधिनामुना ।। २।।

विधिमाह–

विलिख्य तालपत्रे तं साध्यनाम्ना विदर्भितम्। निक्षिप्य क्षीरसम्मिश्रे जले च क्वाथयेन्निशि।। ३।।
वश्यो भवति साध्योऽस्य नात्र कार्या विचारणा। तालपत्रे लिखित्वैनं भद्रकालीगृहे खनेत्।। ४।।
वश्याय सर्वजन्तूनां प्रयोगोऽयमुदाहृतः।...।।

इति।। अथाकर्षणम्–

अथाकर्षविधानानि कथयामि समासतः। यद् दृष्टं त्रैपुरे तन्त्रे यद् दृष्टं भूतडामरे।। १।।
श्रीबीजं मान्मथं बीजं लज्जाबीजं समुद्धरेत्। प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदं ततः।। २।।
अमुकीति पदद्वन्द्वमाकर्षय द्विधा पदम्। स्वाहान्तमन्त्रमुद्धृत्य जपेद् दशसहस्रकम्।। ३।।
षट्कोणं च समालिख्य रक्तचन्दनकुङ्कुमैः[6]। षडङ्गं कारयेन्मन्त्री लज्जाबीजसमन्वितम्।। ४।।
षड्दीर्घभाक्स्वरेणैव नादबिन्दुविभूषितम्। रक्तपुष्पाक्षतधूपनैवेद्यैः परिपूज्य ताम्।। ५।।
भावयंश्चेतसा देवीं त्रिनेत्रां चन्द्रशेखराम्। बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहाम्।। ६।।
पद्मं च दक्षिणे पाणौ जपमालां च वामके। मन्त्रस्यास्य प्रभावेण[7] रम्भामपि तथोर्वशीम्।। ७।।
आकर्षयेन्न सन्देहः किं पुनर्मानुषीमिह। भूर्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा।। ८।।
काश्मीरागरुकस्तूरीरोचनामिलितेन च। अनामारक्तमिश्रेण कामलाक्षीमनुं जपेत् ।। ९।।

''ओंश्रींकमलाक्षि अमुकीं आकर्षय२ हुं फट्''

इमं मन्त्रं जपेदादौ सहस्रैकं ततः पुनः। भूर्जपत्रे समाधाय गुलिकां कारयेत् सुधीः।। १०।।

---

१. 'क्रूंक्रूं' ख. पाठः। २. 'चिढि' ख. पाठः। ३. 'चिढि' ख. पाठः। ४. 'महदाद्यां ततो' ख. पाठः। ५. 'चिढि' ख. पाठः। ६. 'कर्दमैः' ख. पाठः। ७. 'प्रसादेन' ख. पाठः। ८. 'तद्भूर्जपत्रमादाय' ग. पाठः।

तेनैव साध्यपादोत्थमृत्तिकापङ्कवेष्टितम्। शोषितं तेजसा भानोर्वेष्टयेत् त्रिकुटं पुन:।। ११।।
प्रतिमां स्त्रीनिभां कृत्वा तस्यास्तथोदरे क्षिपेत्। गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीम्।।१२।।
तदाशाभिमुखो भूत्वा निर्जने निशि साधक:। यावद्गच्छति चित्तं च तावद्रूपं जपेन्मनुम्।। १३।।
यावदायाति सन्त्रस्ता मदनालसविग्रहा। ....।। इति।

अथ विद्वेषणम्–

अन्योन्यसमरारम्भाद्रोपितौ समरे युतौ। तदीयनखरोड्डीनधूलिमादाय साधक: ।। १।।
धूलिना तेन विद्वेषस्ताडनादभिजायते। परस्परं रिपोर्वैरं मित्रेण सह निश्चितम् ।। २।।
महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत्। ययोर्नाम तयो: शीघ्रं विद्वेषं च परस्परम्।। ३।।
रक्तेन माहिषाश्वेन श्मशानवस्त्रके लिखेत्। यस्य नाम भवेत् तस्य विद्वेषं च परस्परम्।। ४।।
षट्कोणचक्रमध्ये तु रिपोर्नामसमन्वितम्। मन्त्रं च सम्प्रवक्ष्यामि महाभैरवसंज्ञकम्।। ५।।

''ओं नमो महाभैरवाय श्मशानवासिने अमुकामुकयोर्विद्वेषं कुरु कुरु[1] मुरु मुरु स्वाहा''

एतन्मन्त्रं लिखेत्तत्र विद्वेषो जायते ध्रुवम्। अन्ययोगमहं वक्ष्ये दुर्लभं वसुधातले।। ६।।
ज्ञानमात्रेण शत्रूणां विद्वेषो जायते ध्रुवम्।..।।

''ओं नमो भगवति श्मशानकालिके अमुकं विद्वेषय२ हन हन पच पच मथ मथ हुं फट् स्वाहा''

अमुना मन्त्रराजेन साधयेत् प्रयत: सुधी:। वह्निकुण्डे निम्बपत्रेण कटुतैलान्वितेन च।। ७।।
प्रज्वाल्य खादिरं वह्निं श्मशानोत्थं तत: पुन:। दशसाहस्रसंयुक्तं तिलयवाक्षतान्वितम्।। ८।।
भावयन् कुपितां[2] देविमिन्द्रनीलमणिप्रभाम्। व्योमनीलां[3] महाचण्डां सुरासुरविमर्दिनीम्।। ९।।
त्रिलोचनां महारौद्रीं[4] सर्वाभरणभूषिताम्। कपालकर्त्रिकाहस्तां सूर्यचन्द्रोपरि स्थिताम्।। १०।।
शवयानगतां चैव प्रेतभैरववेष्टिताम्। वसन्तीं पितृकान्तारे सर्वसिद्धिप्रदायिकाम्।। ११।।
होमयेद्विविधै: पुष्पैर्बलिच्छागोपहारकै:। पूजयित्वा महेशानीं भक्तियुक्तेन चेतसा।। १२।।
तद्भस्म च समादाय धारयेदभिमन्त्रितम्। भस्मना तेन यं हन्याद्विद्वेषस्तद्भवेन्नृणाम्।। १३।।
वह्नि: शीतलतां याति पतेद्भूमौ तथा रवि:। यदा शुष्यति पाथोधिश्चन्द्रमा: पतितो यदि।। १४।।
तदा मिथ्या भवेद् देवि योगराज: सुदुर्लभ:। षट्कोणं चक्रराजं तु शत्रूणां नामटङ्कितम्।। १५।।
पूर्वद्रव्येण विद्वेषं कारयेदथ साधक:। ....।।

''ओं द्रां विद्वेषिणि अमुकामुकयोर्विद्वेषं कुरु२ स्वाहा।''

यन्त्रबाह्ये लिखेन्मन्त्रमिमं पूर्वोक्तवस्तुभि:। परस्परं भवेद् द्वेषो योगोऽयं कुब्जिकामते।। १६।।

इति।। अथोच्चाटनम्–

अथोच्चाटविधिं वक्ष्ये यथोक्तं श्रीमतोत्तरे। निम्बपट्टे लिखेन्नाम महिषाश्वपुरीषकै:।। १७।।
काकपक्षस्य लेखिन्या लेखनीयमनन्तरम्।..।।

---

१. 'कुरु कुरु हुं फट्' ख. पाठ:। २. 'कालिकां' ख. पाठ:। ३. 'लीनां' ख. पाठ:। ४. ' रावां' ख. पाठ:।

''ओं नमः काकतुण्डि धवलामुखि अमुकमुच्चाटय उच्चाटय हुं फट्।''

एतन्मन्त्रं समभ्यर्च्य लिखित्वा पूर्ववस्तुभिः। निम्बवृक्षस्थितं सर्वं काकालयं हुनेदथ।। १८।।
श्मशानवह्निमानीय धत्तूरकाष्ठदीपितम्। वह्निं कृत्वा महातैलैरथवा कटुवस्तुभिः।। १९।।
पूर्वोक्तमनुना तस्य पत्रं राजीकटुप्लुतम्। सम्पूज्य धवलामुखीं पञ्चोपचारपूजया।। २०।।
तद्भस्म प्रक्षिपेच्छत्रोर्मन्दिरोपरि मन्त्रवित्। ध्यानयुक्तेन मनसा शत्रोरुच्चाटनं भवेत्।। २१।।
धूम्रवर्णां महादेवीं त्रिनेत्रां शशिशेखराम्। जटाजूटसमायुक्तां व्याघ्रचर्मपरिच्छदाम्।। २२।।
कृशाङ्गीमस्थिमालाढ्यकर्त्रिकाढ्यकराम्बुजाम्। कोटराक्षीं सुदंष्ट्रां च पातालसन्निभोदराम्।। २३।।
एवंविधां धियां भाव्य कार्यमुच्चाटनं रिपोः। एष योगविधिः प्रोक्तो वीरतन्त्रे महेश्वरि।। २४।।
गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन।...।।

इति। तथा—

सौरारयोर्दिने ग्राह्यं नरास्थि चतुरङ्गुलम्। निशारसेन संलिप्य प्रधानभवने क्षिपेत्।। २५।।
सप्ताहाभ्यन्तरे शत्रोरुच्चाटनकरं भवेत्। ....।।

मन्त्रस्तु— हुं अमुकस्योच्चाटनं कुरु२ स्वाहा। (हुं अमुकं) हन हन स्वाहा।। अथ सुखप्रसवमन्त्रः— उों मन्मथ मन्मथ वाहि वाहि लम्बोदर मुञ्च मुञ्च स्वाहा। उों मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येण रश्मयः। मुक्तः सर्वभयाद्गर्भ एह्येहि मा विर। (चिर) स्वाहा''।। एतदन्यतरेणाष्टवारं जलमभिमन्त्र्य पेयं ततः सुखप्रसवो भवति। अथादर्शनप्रयोगः—

अर्कशाल्मलिकार्पासपट्टपङ्कजतन्तुभिः। पञ्चभिर्वर्तिकाभिस्तु नृकपालेषु पञ्चसु ।। १।।
नरतैलेन् दीपाः स्युः कज्जलं नृकपालके। ग्राहयेत् पञ्चभिर्यत्नात् पूर्ववच्च शिवालये।। २।।
पञ्चस्थानीयजातं तु एकीकुर्याच्च तं पुनः। [1]लाययित्वाञ्जनं नेत्रे देवैरपि न दृश्यते।। ३।।

मन्त्रस्तु—''ओंहुं फट् कालि२ महाकालि मांसशोणितं खादय २ देवि मा पश्यतु मानुषेति हुं फट् स्वाहा'' इति मन्त्रेणाष्टोत्तरसहस्राभिमन्त्रितं कृत्वा तत्कज्जलं नेत्रे दत्त्वा त्रैलोक्यादृश्यो भवति।।

अथ योगिनीसाधनम्। भूतडामरे—

अथातः सम्प्रवक्ष्यामि योगिनीसाधनोत्तमम्। सर्वार्थसाधनं नाम देहिनां सर्वसिद्धिदम्।। १।।
अतिगुह्या महाविद्या देवानामपि दुर्लभा। यासामभ्यर्चनं कृत्वा यक्षेशोऽभूद् धनाधिपः।। २।।
तासामाद्यां प्रवक्ष्यामि सुराणां सुन्दरीं प्रिये। अस्या अभ्यर्चनेनैव राजत्वं लभते नरः।। ३।।
अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभम्। प्रासादं च समासाद्य कुर्यादाचमनं ततः।। ४।।
प्रणवान्ते सहस्रार हुंफट् दिग्बन्धनं चरेत्। प्राणायामं ततः कुर्यान्मूलमन्त्रेण मन्त्रवित्।। ५।।
षडङ्गं मायया कुर्यात् पद्ममष्टदलं लिखेत्। तस्मिन् पद्मे तथा मन्त्रं जीवन्यासं समाचरेत्।। ६।।
पीठे[2] देवीं समभ्यर्च्य ध्यायेद् देवीं जगत्प्रियाम्। पूर्णचन्द्राननां गौरीं विचित्राम्बरधारिणीम्।।७।।

---

१. 'मत्रयित्व ञ्जयेत्' ख. पाठः। २. 'पीठदेवीं समावाह्य' ख. पाठः।

पीनोत्तुङ्गकुचां वामां सर्वज्ञामभयप्रदाम्। इति ध्यात्वा च मूलेन दद्यात् पाद्यादिकं शुभम्।। ८।।
पुनर्धूपं निवेद्यैव नैवेद्यं मूलमन्त्रतः। गन्धचन्दनताम्बूलं सकर्पूरं सुशोभनम्।। ९।।
प्रणवान्ते भुवनेशीमागच्छ सुरसुन्दरि। वह्नेर्जायां जपेन्मत्रं त्रिसन्ध्यं च दिने दिने।। १०।।
सहस्रैकप्रमाणेन ध्यात्वा देवीं सदा बुधः। मासान्ते व्याप्य दिवसं बलिं पूजां सुशोभनाम्।।११।।
कृत्वा तु प्रजपेन्मन्त्रं निशीथे याति सुन्दरी। सुदृढं साधकं दृष्ट्वा[1] याति सा साधकालये।। १२।।
सुप्रसन्ना साधकाग्रे सदा स्मेरमुखी ततः। दृष्ट्वा देवीं साधकेन्द्रो दद्यात् पाद्यादिकं शुभम्।।१३।।
सुचन्दनं सुमनसा ज्ञात्वाभिलषितं वदेत्। मातरं भगिनीं चाथ भार्यां वा भक्तिभावतः।। १४।।
यदि माता तदा वित्तं द्रव्यं च सुमनोहरम्। भूपतित्वं प्रार्थितं यत् तद् ददाति दिने दिने।। १५।।
पुत्रवत् पातितं लोके सत्यं सत्यं सुनिश्चितम्। यद्यद्भवति भूतं च भविष्यतीति यत् पुनः।। १६।।
तत्सर्वं साधकेन्द्राय वदतीति सुनिश्चितम्। स्वसा ददाति द्रव्यं च दिव्यवस्त्रं तथैव च।। १७।।
दिव्यकन्यां समानीय नागकन्यां दिने दिने। यद्यत् प्रार्थयते सर्वं ददाति सा दिने दिने।। १८।।
भ्रातृवत् पातितं लोके कामनाभिर्मनोगतैः। भार्या सा स्याद्यदा देवी साधकस्य मनोहरा।। १९।।
राजेन्द्रः सर्वराजानां संसारे साधकोत्तमः। स्वर्गे मर्त्ये च पाताले गतिः सर्वत्र निश्चितम्।। २०।।
यद्यद् ददाति सा देवी कथितुं नैव शक्यते। तया सार्धं च सम्भोगं करोति साधकोत्तमः।। २१।।
अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवम्।(२)ततोऽन्यत् साधनं वक्ष्ये निर्मितं ब्रह्मणा पुरा।।२२।।
नदीतीरं समासाद्य कुर्यात् स्नानादिकं ततः। पूर्ववत् सकलं कार्यं चन्दनैर्मण्डलं लिखेत्।। २३।।
स्वमन्त्रं तत्र संलिख्यावाह्य ध्यायेन्मनोहराम्।..:।।

कुरङ्गनेत्रां शरदिन्दुवक्त्रां बिम्बाधरां चन्दनगन्धलिप्ताम्।
चीनांशुकां पीनकुचां मनोज्ञां श्यामां सदा कामदुघां विचित्राम्।। २४।।

एवं ध्यात्वा पूजयेच्च देवीमगुरुधूपकैः। गन्धं पुष्परसं चैव ताम्बूलादींश्च मध्यतः[2]।। २५।।
तारं मायागच्छ मनोहरे पावकवल्लभा। कृत्वायुतं प्रतिदिनं जपेन्मन्त्रं प्रसन्नधीः।। २६।।
मासान्ते व्याप्य दिवसं कुर्याच्च जपमुत्तमम्। आनिशीथं जपेन्मन्त्रं ज्ञात्वा च साधकं दृढम्।।२७।।
गत्वा च साधकाभ्याशे सुप्रसन्ना मनोहरा। वरं वरय शीघ्रं त्वं यत्ते मनसि वर्तते।। २८।।
साधकेन्द्रोऽपि तां भक्त्या पाद्याद्यैरर्चयेन्मुदा। चन्दनोदकपुष्पेण हस्तेन च मनोहराम्।। २९।।
ततोऽर्चिता प्रसन्ना सा पुष्णाति प्रार्थितं च यत्। स्वर्णं शतं साधकाय ददाति सा दिने दिने।।३०।।
सावशेषं व्ययं कुर्यात् स्थिते तत्र[3] न दास्यति। अन्यस्त्रीगमनं तस्य न भवेत् सत्यमीरितम्।।३१।।
अव्याहतगतिस्तस्य भवतीति न संशयः। इयं ते कथिता विद्या सुगोप्या च[4] सुरासुरैः।। ३२।।
तव स्नेहेन भक्त्या च बद्धोऽहं परमेश्वरि। (३)ततो वक्ष्ये महाविद्यां शृणुष्वैकमनाः प्रिये।।३३।।

---

१. 'मत्वा' ख. पाठः। २. 'मूलतः' ख. पाठः। ३. 'त तस्मिन्' ख. पाठः। 'या' ख. पाठः।

गत्वा वटतलं देवीं पूजयेत् साधकोत्तमः। प्राणायामं षडङ्गं च माययाथ समाचरेत्।। ३४।।
सद्यो मांसबलिं दत्त्वा पूजयेत् तां समाहितः। अर्घ्यमुच्छिष्टरक्तेन तस्यै दद्याद् दिने दिने।। ३५।।
प्रचण्डवदनां गौरीं पद्मपत्रायतेक्षणाम्। पक्वबिम्बाधरां बाला[1] सर्वकामप्रदां शुभाम्।। ३६।।
एवं ध्यात्वा जपेन्मन्त्रमयुतं साधकोत्तमः। सप्तदिनं समभ्यर्च्य चाष्टमे विधिवच्चरेत्।। ३७।।
कायेन मनसा वाचा पूजयेच्च दिने दिने। तारं मायां तथा कूर्चं रक्ष कर्मणि तद्बहिः।। ३८।।
आगच्छ कनकान्ते च वति स्वाहा महामनुः। आनिशीथं जपेन्मन्त्रं बलिं दद्यान्मनोहरम्।। ३९।।
साधकेन्द्रं दृढं ज्ञात्वा[2] आयाति साधकालये। साधकोऽपि च तां दृष्ट्वा दद्यादर्घ्यादिकं ततः।।४०।।
ततः सपरिवारेण भार्या स्यात् कामभोजनैः। वस्त्रभूषादिकं त्यक्त्वा याति सा निजमन्दिरम्।।४१।।
एवं भार्या भवेन्नित्यं साधकाज्ञानुरूपतः। आत्मभार्यां परित्यज्य भजेत् तां च विचक्षणः।। ४२।।
(४) ततः कामेश्वरीं वक्ष्ये सर्वकामफलप्रदाम्। प्रणवं भुवनेशीं चागच्छ कामेश्वरि ततः।। ४३।।
वह्निभार्या महामन्त्रः साधकानां सुखावहः। पूर्ववत् सकलं कृत्वा भूर्जपत्रे सुशोभने।। ४४।।
गोरोचनाभिः प्रतिमां निर्माय च स्वलङ्कृताम्। शय्यामारुह्य प्रजपेन्मन्त्रमेकमनास्ततः।। ४५।।
सहस्रैकप्रमाणेन मासमेकं जपेद् बुधः। घृतेन मधुना दीपं दद्याच्च सुसमाहितः।। ४६।।
कामेश्वरीं शशाङ्कास्यां खेल[3]त्खञ्जनलोचनाम्। सदा लोलगतिं कान्तां कुसुमास्त्रशिलीमुखाम्।।४७।।
एवं ध्यात्वा जपेन्मन्त्रं निशीथे याति सा सदा। [4]गत्वा च साधकश्रेष्ठामाज्ञां देहीति तं वदेत्।।४८।।
स्त्रीभावेन मुदा[5] तस्यै दद्यात् पाद्यादिकं ततः। सुप्रसन्ना मुदा[6] देवी साधकं तोषयेत् सदा।।४९।।
अन्नाद्यै रतिभोगेन पतिवत् पालयेत् सदा। नीत्वा रात्रिं सुखैश्वर्यैर्दत्त्वा च विपुलं धनम्।। ५०।।
वस्त्रालङ्कारद्रव्या[7]दीन् प्रभाते याति निश्चितम्। एवं प्रतिदिनं तस्य सिद्धिः स्यात् कामरूपतः।।५१।।
(५) ततः पटे विनिर्माय पुत्तलीं ध्यानरूपतः। सुवर्णवर्णां गौराङ्गीं सर्वालङ्कारभूषिताम्।। ५२।।
नूपुराङ्गदहाराढ्यां रम्यां च पुष्करेक्षणाम्। एवं ध्यात्वा जपेन्मन्त्रं दद्यात् पाद्यमनुत्तमम्।। ५३।।
[8]श्रीचन्दनेन पुष्पेण जातीपुष्पेण पानतः। गुग्गुलं धूपदीपं च दद्यान्मूलेन साधकः।। ५४।।
तारं माया तथागच्छ रतिसुन्दरिपदं ततः। वह्निजायाष्टसाहस्रं जपेन्मन्त्रं दिने दिने।। ५५।।
मासान्ते दिवसं व्याप्य कुर्यात् पूजादिकं शुभम्। घृतदीपं तथा गन्धं पुष्पं ताम्बूलमेव च।। ५६।।
तावन्मन्त्रं जपेद्विद्वान् यावदायाति सुन्दरी। ज्ञात्वा दृढं साधकेन्द्रं निशीथे याति निश्चितम्।। ५७।।
ततस्तामर्चयेद्भक्त्या जातीकुसुममालया। सुसन्तुष्टा साधकेन्द्रं तोषयेत् प्रीति[9]भोजनैः।। ५८।।
भूत्वा भार्या च सा तस्मै ददाति वाञ्छितं वरम्। भूषादिकं परित्यज्य प्रभाते याति सा ध्रुवम्।।५९।।

---

१. 'पक्वाबिम्बाधरां प्रिये। रक्ताम्बरधरां' ख. पाठः। २. 'मत्वा' ख. पाठः। ३. 'चलत्' ख. पाठः। ४. 'दृष्ट्वा तु' ख. पाठः। ५. 'तदा' ख. पाठः। ६. 'यदा' ख. पाठः। ७.'व्याणि' क. पाठः। ८. 'सचन्दनेन' ख. पाठः। ९. 'रति' ख. पाठः।

साधकाज्ञानुरूप्येण प्रयाति सा दिने दिने। निर्जने प्रान्तरे वापि सिद्धि: स्यान्नात्र संशय:।। ६०।।
त्यक्त्वा भार्यां भजेत् तां च अन्यथा नश्यति ध्रुवम्।(६)ततोऽन्यत् साधनं वक्ष्ये स्वगृहे शिवसन्निधौ।।६१।।
वेदाद्यं भुवनेशीं चागच्छ पद्मिनि वल्लभा। पावकस्य महामन्त्रं पूर्ववत् सकलं तत:।। ६२।।
मण्डलं चन्दनै: कृत्वा मूलमन्त्रं लिखेत् तत:। पद्मानना श्यामवर्णां पीनोत्तुङ्गपयोधराम्।। ६३।।
कोमलाङ्गीं स्मेरमुखीं रक्तोत्पलदलेक्षणाम्। एवं ध्यात्वा जपेन्मन्त्रं सहस्रं च दिने दिने।। ६४।।
मासान्ते पूर्णिमां प्राप्य विधिवत् पूजयेन्मुदा। आनिशीथं जपं कुर्यात् तदा[1]भ्यासेन साधक:।।६५।।
सर्वत्र कुशलं दृष्ट्वा[2] याति सा साधकालयम्। भूत्वा भार्या साधकं हि तोषयेद्विविधैरपि।। ६६।।
भोगद्रव्यैर्भूषणाद्यै: पद्मिनी सा दिने दिने। पतिवत् पातितं लोके नित्यं स्वर्णं च सर्वदा।। ६७।।
त्यक्त्वा भार्यां भजेत् तां च साधकेन्द्र: सदा प्रिये।(७)ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता।।६८।।
ज्ञात्वा यां साधिता विद्या बला चातिबला प्रिये। प्रणवान्ते महामायां नटिनि पावकप्रिया।। ६९।।
महाविद्येह कथिता गोपनीया प्रयत्नत:। अशोकस्य तटं गत्वा स्नानं पूर्ववदाचरेत्।। ७०।।
मूलमन्त्रेण सकलं कुर्याच्च सुसमाहित:। त्रैलोक्यमोहिनीं गौरीं विचित्राम्बरधारिणीम्।। ७१।।
विचित्रालङ्कृतां रम्यां नर्तकीवेषधारिणीम्। एवं ध्यात्वा जपेन्मन्त्रं सहस्रं च दिने दिने।। ७२।।
मांसोपहारै: सम्पूज्य धूपदीपौ निवेदयेत्। गन्धचन्दनताम्बूलं दद्यात् तस्यै सदा बुध:।। ७३।।
मासमेकं तु तां भक्त्या पूजयेत् साधकोत्तम:। मासान्ते दिवसं प्राप्य कुर्याच्च पूजनं महत्।।७४।।
अर्धरात्रे भयं दत्त्वा किञ्चित् साधकसत्तमे। सुदृढं साधकं मत्वा सा याति साधकालयम्।। ७५।।
विद्याभि: सकलाभिश्च किञ्चित्स्मेरमुखी तत:। वरं वरय शीघ्रं त्वं यत्ते मनसि वर्तते।। ७६।।
तच्छ्रुत्वा साधकश्रेष्ठो भावयेन्मनसा धिया। मातरं भगिनीं वापि भार्यां वा प्रीतिभावत:।। ७७।।
कृत्वा सन्तोषयेद्भक्त्या नटिनी तत्करोत्यलम्। माता स्याद्यदि सा देवी पुत्रवत् पालयेन्मुदा।।७८।।
स्वर्णं शतं सिद्ध[3]द्रव्यं ददाति सा दिने दिने। भगिनी यदि सा कन्यां देवस्य नागकन्यकाम्।।७९।।
राजकन्यां समानीय ददाति सा दिने दिने। अतीतानागतां वार्तां सर्वां जानाति साधक:।। ८०।।
भार्या स्याद्यदि सा देवी ददाति विपुलं धनम्। अन्नाद्यैरुपहारैश्च ददाति कामभोजनम्।। ८१।।
स्वर्णं शतं सदा तस्मै ददाति सा ध्रुवं प्रिये। यद्यद्वाञ्छति तत् सर्वं ददाति नात्र संशय:।।८२।।
(८)महाविद्यां प्रवक्ष्यामि सावधानावधारय। कुङ्कुमेन समालिख्य भूर्जपत्रे स्त्रियं मुदा[4]।। ८३।।
ततोऽष्टदलमालिख्य कुर्यान्न्यासादिकं प्रिये। जीवन्यासं तत: कृत्वा ध्यायेत् तत्र प्रसन्नधी:।।८४।।
शुद्धस्फटिकसङ्काशां नानारत्नविभूषिताम् । मञ्जीरहारकेयूररत्नकुण्डलमण्डिताम् ।। ८५।।
एवं ध्यात्वा जपेन्मन्त्रं सहस्रं च दिने दिने। प्रतिपदि समारभ्य पूजयेत् कुसुमादिभि:।। ८६।।
धूपदीपविधानैश्च त्रिसन्ध्यं पूजयेन्मुदा:। पूर्णिमां प्राप्य गन्धाद्यै: पूजयेत् साधकोत्तम:।। ८७।।

---

१. दृढा' ख. पाठ:। २. 'ज्ञात्वा' क. पाठ:। ३. 'सिद्धि' क. पाठ:। ४. 'सदा' क. पाठ:।

घृतदीपं तथा धूपं नैवेद्यं च मनोहरम्[1]। रात्रौ च दिवसे जाप्यं कुर्याच्च सुसमाहितः।। ८८।।
प्रभातसमये याति साधकस्यान्तिकं ध्रुवम्। प्रसन्नवदना भूत्वा तोषयेद्रतिभोजनैः।। ८९।।
देवदानवगन्धर्वविद्याधृग्यक्षरक्षसाम् । कन्याभी रत्नभूषाभिः साधकेन्द्रं मुहुर्मुहुः।। ९०।।
चर्व्यचोष्यादिकं सर्वं द्रव्यं ददाति सा ध्रुवम्। स्वर्गे मर्त्ये च पाताले यद्वस्तु विद्यते प्रिये।। ९१।।
आनीय दीयते सापि साधकाज्ञानुरूपतः। स्वर्णं शतं सदा तस्मै ददाति सा दिने दिने ।। ९२।।
साधकाय वरं दत्त्वा याति सा निजमन्दिरम्। तस्याः वरप्रसादेन चिरञ्जीवी निरामयः।। ९३।।
सर्वज्ञः सुन्दरः श्रीमान् सर्वगो भवति ध्रुवम्। रमेत् सार्धं तया देवि साधकेन्द्रो दिने दिने।। ९४।।
तारं माया तथागच्छानुरागिणि मैथुनप्रिये। बह्निभार्या मनुः प्रोक्तः सर्वसिद्धिप्रदायकः।। ९५।।
एषा मधुमती तु स्यात् सर्वसिद्धिप्रदा प्रिये। गुह्याद्गुह्यतरा विद्या तव स्नेहात् प्रकीर्तिता।। ९६।।

श्रीदेव्युवाच

श्रुतं च साधनं पुण्यं यक्षिणीनां सुखप्रदम्। कस्मिन् काले प्रकर्तव्यं विधिना केन वा प्रभो।।९७।।
अत्राधिकारिणः के वा समासेन वदस्व मे।..।।

ईश्वर उवाच

वसन्ते साधयेद्धीमान् हविष्याशी जितेन्द्रियः। सदा ध्यानपरो भूत्वा तद्दर्शनमहोत्सुकः।। ९८।।
उज्जटे प्रान्तरे वापि कामरूपे विशेषतः। स्थानेष्वेकतमं प्राप्य साधयेत् सुसमाहितः।। ९९।।
अनेन विधिना साक्षाद्भवन्ति हि न संशयः। देव्याश्च सेवकाः सर्वे परं चात्राधिकारिणः।। १००।।

इति। ग्रन्थान्तरे—

त्रिपुरान्धगजध्वंसपण्डितस्यास्यपङ्कजात् । करङ्किण्याश्च तन्त्रेऽस्मिन् सिद्धशावरतन्त्रके ।। १।।
निर्गतं तत्प्रसङ्गेन किञ्चिदुद्दिश्यते मया। विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिनी।। २।।
विशाला मदना घण्टा कालकण्टी महाभया। माहेन्द्री शङ्खिनी चान्द्री श्मशानी वटयक्षिणी।।३।।
मेखला विकला लक्ष्मीर्मानिनी शतपत्रिका। सुलोचना सुशोभाढ्या कपाली च सुवासिनी।। ४।।
नटी कामेश्वरी स्वर्णरेखा च सुरसुन्दरी। मनोहरा प्रमोदानुरागिणी नखकेशिका।। ५।।
भामिनी पयस्विनी च सुदती च रतिप्रिया। इति षट्त्रिंशदाख्याता यक्षिण्यो वरसिद्धिदाः।। ६।।
करङ्किण्याश्च तन्त्रे तु शम्भुदेवेन भाषिताः।(१) विचित्रे पदमाभाष्य विचित्रेति पदं ततः।। ७।।
रूपे सिद्धिं कुरुयुगं स्वाहान्तोऽयं महामनुः। लक्षद्वयं जपेन्मन्त्रं मध्वाज्यैः क्षीरमिश्रितैः।। ८।।
कुण्डे त्र्यस्रे दशांशेन जुहुयात् पूर्णयायुतम्। ततः सिद्धा भवेद् देवी विचित्रा वाञ्छितप्रदा।।९।।
(२)तारो माया विभ्रमाङ्गरूपे च विभ्रमे पदम्। कुरुयुग्मं तथैह्येहि भगवत्यग्निवल्लभा।। १०।।
विभ्रमाया महामन्त्रः सर्वमन्त्रोत्तमोत्तमः। लक्षद्वयं जपेन्मन्त्रं श्मशाने निर्भयो नरः।। ११।।

---

[1] 'रमम्' क. पाठः।

घृताक्तैर्गुग्गुलैर्होमे दशांशेन कृते सति। विभ्रमा तोषमायाति पञ्चषण्मानुषैः समैः।। १२।।
ददाति भोजनं दिव्यं प्रत्यहं परितोषिता। (३) प्रणवो हंसि हंसान्ते जाते कामोऽग्निवल्लभा।।१३।।
हंस्यास्त्वयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः। प्रदेशे नगरस्याऽणोर्लक्षसंख्यं जपेच्छुचिः।। १४।।
पद्मपत्रैर्घृताक्तैश्च कृते होमे दशांशके। प्रयच्छत्यञ्जनं हंसी येन पश्यति भूनिधिम्।। १५।।
सुखेन तं च गृह्णाति न विघ्नैः परिभूयते।(४) प्रणवं च महानादे भीषणि द्रां ततः परम्।। १६।।
द्रां स्वाहा भीषणीमन्त्रः सर्वमन्त्रोत्तमोत्तमः। त्रिपथस्थो जपेन्मन्त्रं लक्षसंख्यं दशांशतः।। १७।।
घृताक्तगुग्गुलैर्होमाद्भीषणी चिन्तितप्रदा। (५) प्रणवं रञ्जनान्ते च रञ्जिकेऽग्निवधूस्तथा।। १८।।
मन्त्रोऽयं जनरञ्जिन्याः सर्वसौभाग्यदायकः। कदम्बाधो जपेन्मन्त्रं लक्षद्वयमनन्यधीः।। १९।।
घृताक्तगुग्गुलैर्होमादेषा सौभाग्यदायिनी। (६) तारं सबिन्दुर्झिण्टीशो विशाले द्रां ततः परम्।।२०।।
द्रींक्लींस्वाहेति मन्त्रोऽयं विशालयाः सुसिद्धिकृत्। चिञ्चावृक्षतले लक्षं मन्त्रमावर्तयेच्छुचिः।।२१।।
शतपत्रभवैः पुष्पैः सघृतैर्होममाचरेत्। ततः सिद्धा भवेद् देवी विशालाकाशगामिनी।। २२।।
ददाति मन्त्रिणे तुष्टा रसं दिव्यं रसायनम्। (७) प्रणवं मदने चैव मदनान्ते विडम्बिनि।। २३।।
मूलीयसङ्गमं देहि देहि श्रीमग्निवल्लभा। लक्षसंख्यं जपेन्मन्त्रं राजद्वारे शुचिः स्थितः।। २४।।
ससिद्धैर्मालतीपुष्पैः कृते होमे दशांशतः। मदनायक्षिणी सिद्धा गुटिकां सम्प्रयच्छति।। २५।।
तया मुखस्थयादृश्यो चिरस्थायी नरो भवेत्। (८) प्रणवं वाग्भवं चैव जगदन्ते प्रजास्त्वित।।२६।।
क्षोभयेति पदं चैव ततो भगवतीति च। गम्भीरान्ते स्वरे रे च स्वाहान्तोऽपि महामनुः।। २७।।
घण्टां च वादयन्मन्त्री जपेन्मन्त्रायुतद्वयम्। ततः क्षोभयते लोकान् घण्टिका च सुसिद्धिदा।।२८।।
निर्गुण्डीतरुमूले तु स्थित्वा मन्त्रं जपेत् सुधीः। ततो द्वादशसाहस्रं पूर्वोक्तफलदो भवेत्।। २९।।
(९)तारं सबिन्दुर्झिण्टीशः कालकण्ठि च ठद्वयम्। स्वाहान्तोऽयं महामन्त्रो जपेल्लक्षं जितेन्द्रियः।३०।
मधुराक्तैर्घृतैर्होमे कालकण्ठी प्रसीदति। सैन्याधारास्यवह्न्यम्भोगतिस्तम्भकरी भवेत्।। ३१।।
सततं तां स्मरन् मन्त्री विविधाश्चर्यकारिणी। (१०) प्रणवं मदने चैव मेखले च द्विरुच्चरेत्।। ३२।।
महाभये च स्वाहान्तो मन्त्रराजसुरद्रुमः। अस्थिमुद्राधरो लक्षं श्मशाने प्रजपेन्मनुम्।। ३३।।
ततो महाभया सिद्धा यच्छत्यस्य रसायनम्। (११) वाङ्माहेन्द्रि कुरुयुगं मुरुयुग्ममतः परम्।।३४।।
हंसः स्वाहेति मन्त्रोऽयं माहेन्द्र्याः सर्वसिद्धिदः। शतपत्रवनान्तःस्थो मन्त्री लक्षं जपेन्मनुम्।।३५।।
क्षीराज्यहोमतो यच्छेद्रससिद्धिं च भूनिधिम्। (१२) तारं च भुवनेशानी शङ्खिन्येह्येहि ठद्वयम्।।३६।।
(१३)एवं चान्द्री समुद्दिष्टा साधनं पूर्वभाषितम्।..।।

''ओं ह्रीं शङ्खिनि एहि २ स्वाहा। ओं ह्रीं चान्द्रि एहि २ स्वाहा''। पूर्वभाषितं माहेन्द्र्याः प्रोक्तं पुरश्चरणं फलं च मन्त्रद्वयस्य ज्ञातव्यमित्यर्थः। तथा—

(१४) द्रांद्रींद्रैं तु समुच्चार्य श्मशानान्ते च वासिनि। स्वाहा श्मशानवासिन्या मन्त्र एष उदाहृतः।३७।
नग्नो भूत्वा श्मशानस्थो लक्षमावर्तयेन्मनुम्। श्मशानवासिनी तस्मै पटं तुष्टा प्रदास्यति।। ३८।।

तेन प्रावृतगात्रस्तु अदृश्यो भवति क्षणात्। देववत् पश्यति क्षिप्रं त्रैलोक्यं सचराचरम्।। ३९।।
निधिं पश्यति गृह्णाति न विघ्नैः परिभूयते। (१५) प्रणवं वटयक्ष्यन्ते णिलासिनि सरद्वयम्।।४०।।
प्रिया मे भव शब्दान्ते ह्रिया मे भव ठद्वयम्। मन्त्रो वै वटयक्षिण्याः सर्वसिद्धिप्रदायकः।। ४१।।
सरस्तीरे जपेदर्धलक्षं मन्त्रं तु साधकः। घृताक्तगुग्गुलैर्होमाद् देवी सौभाग्यदा भवेत्।। ४२।।
(१६)तारं द्रां मदनान्ते च मेखले ठद्वयं ततः। स्वाहान्तो मेखलायास्तु मन्त्रः सर्वार्थसाधकः।।४३।।
मधुवृक्षतले मन्त्रं चतुर्दशदिनावधि। प्रजपेन्मेखला तुष्टा ददात्यञ्जनमुत्तमम् ।। ४४।।
(१७)प्रणवं विकले वाणीं मायां श्रीकामराजकम्। स्वाहान्तो विकलायास्तु मन्त्रः सद्भिरुदीरितः।।४५।।
गुहान्तःस्थो धरे मासत्रयं मन्त्रं जपेन्नरः। ततः सिद्धा भवेद् देवि विकला वाञ्छितप्रदा।। ४६।।

धरे पर्वते।

(१८)प्रणवं वाग्भवं लक्ष्मि कमलान्ते च धारिणि। ह्लांसःस्वाहेति मन्त्रोऽयं लक्ष्मीयक्ष्याः सुसिद्धिदः।।४७।।
स्वगृहस्थोऽर्चयेद्रक्तकरवीरप्रसूनकैः । लक्षमावर्तयेन्मन्त्रं दूर्वाज्याभ्यां दशांशतः ।। ४८।।
होमे कृते भवेत् सिद्धा लक्ष्मीर्नाम्नास्य यक्षिणी। रसं रसायनं दिव्यं निधानं सम्प्रयच्छति।।४९।।
(१९)तारं वाङ्मानिनि द्रां च एहि युग्मं च सुन्दरि। हसद्वयं समीहं मे सङ्गमान्ते य ईरितः।।५०।।
स्वाहान्तोऽयं महामन्त्रो मानिन्याः सर्वसिद्धिदः। लक्षमावर्तयेन्मन्त्रं त्रिपथस्थो जितेन्द्रियः।। ५१।।
होमे बिल्वप्रसूनैश्च सितागव्यान्वितैः कृते। मानिनी जायते तुष्टा दिव्यं खड्गं प्रयच्छति।। ५२।।
तत्प्रभावेन लोकेऽस्मिन्नखण्डं राज्यमाप्नुयात्।(२०)प्रणवं द्रां शतान्ते च पत्रिका द्रां ततः परम्।५३।
द्रींह्लींस्वाहेति मन्त्रोऽयं सर्वसिद्धिप्रदायकः। महाव्रतधरो मन्त्री कपालौदनभोजनः ।। ५४।।
लक्षद्वयजपस्यान्ते कपालं लभते मुनिः। आकाशगमनं दूरश्रवणं दूरवर्तनम् ।। ५५।।
दूरदर्शनमित्यादि साधकाय प्रयच्छति। (२१) प्रणवं ब्लूं सुलोचान्ते ने सिद्धिं देहि ठद्वयम्।।५६।।
सुलोचनाया मन्त्रोऽयं साधितः सिद्धिदो नृणाम्। नदीतीरस्थितो लक्षत्रयं मन्त्री जपेन्मनुम्।। ५७।।
घृतहोमे दशांशेन कृते देवी प्रसीदति। ददाति पादुकायुग्मं यदारूढो भुवस्तले।। ५८।।
मनःपवनवेगेन याति चायाति योगवित्। (२२)प्रणवं चाशोकपदं पल्लवाकारके ततः।। ५९।।
कुरु मे शोभनं श्रींक्षं स्वाहा मन्त्र उदाहृतः। पुण्याशोकतलं गत्वा चन्दनेन सुमण्डलम्।। ६०।।
कृत्वा देवीं समभ्यर्च्य धूपं दत्त्वा सहस्रकम्। मन्त्रमावर्तयेन्मासं नक्तभोजी नरस्ततः।। ६१।।
रात्रौ पूजां शुभां कृत्वा जपेन्मन्त्रं निशार्धतः। नदीतीरेऽथवा मन्त्री चतुर्दशदिनं जपेत्।। ६२।।
ततः सिद्धा भवेद् देवी शोभना शुभदायिनी। (२३) प्रणवं वाग्भवं चैव ततश्चैव कपालिनि।।६३।।
पञ्चबाणान् समुद्धृत्य शक्तिकूटं समुद्धरेत्। अस्त्रं स्वाहेति मन्त्रोऽयं कपालिन्याः समीरितः।।६४।।
कुङ्कुमेन समालिख्य भूर्जे देवीं सलक्षणाम्। प्रतिपत्तिथिमारभ्य पुष्पदीपादिकार्चनाम्।। ६५।।
कृत्वा समाहितो मन्त्रं त्रिसन्ध्यं परिवर्तयेत्। मासमेकं ततः पूजां कृत्वा मन्त्रं पुनर्जपेत्।। ६६।।

अर्धरात्रे तथा देवी वाञ्छितार्थं प्रयच्छति।..॥

सुवासिनी नटी कामेश्वरी स्वर्णरेखाः प्रागेवोक्ताः। तथा—

(२९)प्रणवं भुवनेशीं च कुरु युग्मं ततः परम्। आगच्छ युगलं चैव ततो वै सुरसुन्दरि॥ ६७॥
स्वाहान्तोऽयं महामन्त्रः सर्वसिद्धिप्रदायकः। चतुष्पथे स्थितो लक्षं सपादं प्रजपेन्मनुम्॥ ६८॥
लाजादिकुसुमैर्होमे कृते देवी प्रसीदति। (२९)प्रणवं भुवनेशीं च सर्वान्ते कामदे पदम्॥ ६९॥
मनोहरे ततः स्वाहा मन्त्रराजो नमो नमः। नदीतीरे शुभे देशे चन्दनेन सुमण्डलम्॥ ७०॥
विधाय पूजयेद् देवीं साधकोऽथ मनोहरम्। मन्त्रायुतं जपेन्मन्त्री प्रत्यहं दिनसप्तकम्॥ ७१॥
आदायातिप्रसन्नास्मै दीनाराणां शतं शतम्। ददाति प्रत्यहं देवी व्ययं कुर्याद् दिने दिने॥ ७२॥
तद् व्ययाभावतो देवी नो ददात्यतिकुप्यति।(३०)प्रणवं भुवनेशीं च प्रमोदायै च ठद्वयम्।७३॥
प्रमोदाया महामन्त्रः सर्वसिद्धिप्रदायकः। अर्धरात्रे समुत्थाय सहस्रं प्रजपेन्मनुम्॥ ७४॥
मासमेकं ततो देवी निधिं दर्शयति ध्रुवम्।(३१) प्रणवं भुवनेशीं च कामं ब्लूं च ततः परम्।७५॥
चन्द्ररेखे पदं चैवागच्छ युग्मं च ठद्वयम्। मन्त्रोऽयमनुरागिण्याः प्रोक्तः सर्वार्थसाधकः॥ ७६॥
वटमूले पुनर्गत्वा कृष्णाष्टम्यां समाहितः। मण्डलं कारयेत् तत्र अष्टपत्रं सुशोभितम्॥ ७७॥
पश्चात् प्रपूजयेद् देवीं गन्धपुष्पाक्षतादिभिः। बलिं च दापयेत् पश्चाद् दिग्विदिक्षु प्रयत्नतः।७८॥
अर्धरात्रे पुरःप्राप्तिः सिद्धिर्भवति तत्क्षणात्। वरं ददामि वरय किं कार्यं साधकोत्तम॥ ७९॥
साधकेन तु वक्तव्यमस्माकं चेटिके भुवि। रसं रसायनं दिव्यमजरामरतां दिश॥ ८०॥
अव्याहतगतिं देवि भुवनेषु सदैव हि। इष्टसिद्धिं च मे देहि जीवनं ब्रह्मणा सह॥ ८१॥
साधकाय तथा दत्त्वा सा गच्छेन्निजमन्दिरे।(३२) प्रणवं भुवनेशी चागच्छान्ते नखकेशिनि[1]।८२॥
स्वाहान्तोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः। (३३-३५)अस्मिन्नेव महामन्त्रे भामिनीति पयस्विनि।८३॥
सुदतीति च सम्बोध्य मन्त्रत्रयमुदाहृतम्। एतासां साधनं सर्वं पद्मिनीवत् समाचरेत्॥ ८४॥
(३६)रतिप्रियाया वक्ष्यामि साधनं भुवि दुर्लभम्। यस्य विज्ञानमात्रेण दारिद्र्यान्नाभिभूयते।८५॥

इति। करङ्किणीतन्त्रे—

प्रणम्य शिरसा देवी बभाषे सर्ववित् प्रभो। येन कल्पेन दारिद्र्यं विनश्यति च तद्वद॥ १॥
श्रुत्वा गौरीवचः शम्भुः स्मितवाक् शुभवीक्षणः[2]। शृणु त्वं देवदेवेशि दारिद्र्यस्य विनाशनम्॥२॥
पुरा विश्वसृजा प्रोक्तो कुबेराय महात्मने। विद्या दारिद्र्यसंहर्त्री यक्षिणी पापखण्डिनी॥ ३॥
तेन तां तु समादाय मासमाराधिता सुरी। तस्मान्निधिवराणां तु नायको निश्चितोऽभवत्॥ ४॥
निर्धनेन महीपेन विद्या सा ब्रह्मणो मुखात्। श्रुत्वा कुबेरवक्त्रेण सोऽभवत् परमेश्वरः॥ ५॥
तच्छ्रुत्वा गिरिजा देवी पुनः प्राह च शङ्करम्। कृपा ते विद्यते चित्ते तदा तां मां प्रबोधय।६॥

---

[1] 'केशिके' ख. पाठः। [2] 'चारुशुभाननः' क. पाठः।

श्रुत्वा पुनश्च पार्वत्या वाक्यमेवं प्रहस्य च। शम्भुः प्राह न जानासि भवत्या मूर्तिरिव सा।। ७।।
यां स्मृत्वा याति रङ्कोऽपि भूपालत्वं न संशयः। विद्याधरत्वमाप्नोति किं पुनः बहुभाषितैः।। ८।।
याति लक्षेश्वरत्वं च तद्भक्तो देवि सर्वथा। तद्विद्याराधको लोके यस्मिन् रङ्कोऽपि भाषते।। ९।।
भव त्वं वित्तवानेवं सोऽपि लक्षेश्वरो भवेत्। वर्षेणापि हि यो मन्त्रं स्मरेद्बहुधनेश्वरः।। १०।।
नोपसर्पति दारिद्र्यं तार्क्ष्यं भोगिकुलं यथा। अस्य मन्त्रस्य चोद्धारं प्रवक्ष्ये शृणु पार्वति।। ११।।
यस्यैव ज्ञानमात्रेण महादारिद्र्यनाशनम्। भतुरीयं बिन्दुयुतं लज्जाबीजमनन्तरम्।। १२।।
लक्ष्मीबीजं ततः प्रोक्त्वा सम्बोध्य च रतिप्रियाम्। वह्निजायान्वितो मन्त्रः सर्वमन्त्रोत्तमोत्तमः।।१३।।

लज्जाबीजं ह्रीं, लक्ष्मीबीजं श्रीं, सम्बोध्य च रतिप्रियां रतिप्रिये, वह्निजाया स्वाहाकारः। तथा—

नाङ्गन्यासकरन्यासौ न च्छन्दो नास्य देवता। ध्यानमस्याः प्रवक्ष्यामि शृणु त्वं शैलसम्भवे।। १४।।

हेमप्रकारमध्ये सुरविटपितले हेमपीठाधिरूढा
यक्षी बाला विसर्पत्परिमलबहुलोद्भासिधम्मिल्लभारा।
पीनोत्तुङ्गस्तनाढ्या कुवलयनयना रक्तवर्णा कराग्रे-
भ्राम्यद्रक्तोत्पला भानवरविवसना रक्तभूषाङ्गरागा।। १५।।

इति ध्यानं विधातव्यं चन्दनेनानुलेपिते। ताम्रपात्रे विधातव्यं मण्डलं सुमनोहरम्।। १६।।
तत्र पूजा प्रकर्तव्या देव्या एवं मनीषिणा। कुबेरस्य मतेनास्याः पूजैव क्रियते सदा।। १७।।

अथास्य प्रयोगः—तत्र प्राग्वन्मातृकान्यासान्तं विधाय मूलेन प्राणानायम्य, देवीं ध्यात्वा मानसपूजां विधाय, प्राग्वदर्घ्यादिस्थापनाद्यात्मपूजान्ते चन्दनानुलिप्ते ताम्रादिपात्रे चतुरस्रवेष्टितं वृत्तं मण्डलं कृत्वा, तत्र देवीमावाह्यावाहनादिपरमीकरणान्तं तत्तन्मुद्रा विधाय, आसनादिषोडशोपचारैः सम्पूज्य दुग्धदधिखण्डपायसशर्करानैवेद्यं दत्त्वा ताम्बूलं समर्प्य, मूलमन्त्रं यथाशक्ति जपित्वा, जपं देव्या वामहस्ते समर्प्य, प्रदक्षिणनमस्कारैः परितोष्य विसृजेत्। तथा—

सहस्रं सप्ततिस्तावत् पुरश्चरणमिष्यते। तथा घृतेन खण्डेन मधुना च दशांशकम्।। १८।।
होमोऽपि च विधातव्योऽमुना दारिद्र्यमुक्तये। रात्रौ च जप्यते चाष्टसहस्रं सप्तवासरान्।। १९।।
भुक्ते वाप्यथवाभुक्ते पायसान्नं प्रदापयेत्। एतेनापि च सिद्धिः स्यात् पुनश्चर्याधिका भवेत्।। २०।।
बहु किं कथ्यते देवि निशायां जप्यते सदा। शतं वा दशकृत्वो वा सकृद्वापि च किं पुनः।।२१।।
न भवेत् तस्य दारिद्र्यमभिजानीहि पार्वति। चन्द्रसूर्यग्रहे वापि जप्या दारिद्र्यमुक्तये।। २२।।
वित्तं दृष्ट्वान्यलोकस्य जपेदष्टशतं मनुम्। तत्कामाय ददात्येव सदैव तद्विधाय च।। २३।।

अष्टशतमष्टोत्तरशतमित्यर्थः। तद्विधाय तादृशाय दरिद्रायेति यावत्।

यद्ययं जप्यते मन्त्रः श्वेतपुष्पैश्च पूजयेत्। दरिद्राय स्वयं दत्ते गृहमानीय हेम च।। २४।।
येनासौ जप्यते मन्त्रः सदा भक्तिपुरःसरम्। तस्य पुत्रश्च पौत्रश्च प्रपौत्रश्चापि तत्सुतः।। २५।।
दारिद्र्याभिभवं याति न कदाचिन्न संशयः। स्वयं प्राहेति सा यक्षी यो मां स्मरति नित्यशः।।२६।।

तस्य दारिद्र्यशमनं दासीवत् करवाण्यहम्।..॥

इति। धनदायक्षिणीविधिः सिद्धशावरतन्त्रे—

लपूर्वं बिन्दुसंयुक्तं लक्ष्मीप्रणवमेव च। मायाबीजं समुद्धृत्य सम्बोध्य च रतिप्रियाम्॥ १॥
वह्निजायावधिः प्रोक्तो मन्त्रराजोत्तमोत्तमः।...॥

लक्ष्मीप्रणवं श्रीबीजम्। कुबेरानुमतोऽयं मन्त्रः। अस्य पूजाप्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि कुबेराय ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि धनदायै देवतायै नमः, इति विन्यस्य ममाभीष्टार्थे विनियोगः, इति कृताञ्जलिरुक्त्वा "ह्रां हृदयाय नमः" इत्यादिना करषडङ्गन्यासं विधाय ध्यायेत्।

कुङ्कुमोदरगर्भाभां किञ्चिद्यौवनशालिनीम्। मृणालकोमलभुजां केयूराङ्गदभूषिताम्॥ २॥
कराभ्यां भ्राम्यत्कह्लारां रक्तवस्त्राङ्गरागिणीम्। हेमप्राकारमध्यस्थां रत्नसिंहासनोपरि॥ ३॥
ध्यायेत् कल्पतरोर्मूले देवीं ता धनदायिकाम्।......................................।

एवं ध्यात्वा मानसोपचारैः सम्पूज्येत्। अस्या यन्त्रम्—

नवयोन्यात्मकं चक्रं विलिखेत् कर्णिकोपरि। दिग्दलं पद्ममालिख्य चतुरस्रं ततो बहिः॥ ४॥
कोणेषु वज्रान् संलिख्य मध्ये बीजं समुद्धरेत्।...॥

ततोऽर्घ्यस्थापनम्—फडिति पात्रं प्रक्षाल्य, नमः इत्यापूर्य, ततः प्रणवेन गन्धपुष्पे निक्षिप्य, तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य, तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्याधारशक्त्यादिज्ञानात्मान्तं पीठं सम्पूज्य 'पद्माय नमः' इति समस्तं सम्पूज्य पुनर्ध्यात्वा बाह्यपञ्चोपचारैः पूजयेत्। ततो योनिमुद्रां प्रदर्श्याङ्गानि केसरेषु मध्ये दिक्षु च 'क्रां हृदयाय नमः' इत्यादिना षडङ्गानि पूजयेत्। ततो दलेषु ओं श्रियै नमः। एवं लक्ष्म्यै०, परमायै०, पद्मनेत्रायै०, पद्मालयायै०, रमायै०, हरिप्रियायै०, तारायै०, कमलायै०, अब्जायै नमः। इति सम्पूज्य, पुनर्मध्ये देवीं सम्पूज्य धूपदीपादिकं सर्वं प्राग्वत् समर्प्य यथाशक्ति जपित्वा जपं समर्प्य क्षमस्वेति विसर्जयेत्। अस्य पुरश्चरणं लक्षजपः। तथा—

प्रजपेदक्षसूत्रेण रत्नादिककृतेन तु। लक्षजप्ते मन्त्रसिद्धिः पुरश्चर्यां समाचरेत्॥ ५॥
विनियोगान्यथा कुर्यात् साधकः स्वमनोरथान्। रात्रौ च जप्यते साष्टसहस्रं सप्तवासरान्॥ ६॥
एतेनैव सुसिद्धः स्यात् पुरश्चर्यादिको विधिः। किमिहासुलभं देवि साधयेद्यदि मानवः॥ ७॥
भुक्त्वा वाप्यथवाभुक्त्वा पायसान्नं प्रदापयेत्। दशकृत्वोऽथवा शौचमकृत्वा च कुचैलताम्॥८॥
यः स्मरेद् देवि विद्यां तां दारिद्र्यैर्नाभिभूयते। कामदेवं यजेत् पार्श्वे देव्याः प्रत्यहमादरात्॥९॥
तेन प्रीता महादेवी वाञ्छितार्थं प्रयच्छति। पूजान्ते च समायाति रात्रौ देवी धनेश्वरी॥ १०॥
सर्वालङ्कारमुत्सृज्य दत्त्वा याति निजालयम्। धनं च विपुलं दत्त्वा साधकस्य मनोरथान्॥ ११॥
पूजयित्वा महेशानि वशगा जायते शुभा। यद्वा भक्त्या महादेवि चन्दनेनानुलेपनम्॥ १२॥
दातव्यं सर्वदा तस्यै नित्यं दारिद्र्यशान्तये। यक्षिणी स्वयमाहेति यो मां स्मरति मानवः॥१३॥
तस्य दारिद्र्यनिर्नाशं दासीवत् करवाण्यहम्। सहस्रसप्ततिर्यावत् पुरश्चरणमिष्यते॥१४॥

घृतेन खण्डेन तथा मधुना च दशांशतः। होमोऽपि च विधातव्यः क्षणाद् दारिद्र्यशान्तये।। १५।।
पूजा कार्या महादेव्याश्चन्दनेनानुलेपिते। ताम्रपात्रे तथा कार्यं मण्डलं सुमनोहरम्।। १६।।
तत्र पूजा विधातव्या देव्या एवं मनीषिणा। कुतो दारिद्र्यशङ्कास्य स हि कोटीश्वरो नरः।। १७।।
नाङ्गन्यासकरन्यासौ नाङ्गं[1] चैवास्य देवता। कुबेरस्य मतेनास्याः पूजापि क्रियते तथा।। १८।।

इति धनदापरिच्छेदः।। अथ यक्षिणीभेदाः। तत्रादौ मधुमती—

पाशं मायामङ्कुशं च कामराजं च कूर्चकम्। तारमग्निप्रियान्तोऽयं वसुवर्णः प्रकीर्तितः।। १।।

“आंह्रींक्रोंक्लींहूंओंस्वाहा”।।

मधुच्छन्द ऋषिस्त्रिष्टुप् छन्दो मधुमतीति च। मुन्याद्याः पञ्चभिर्बीजैः पञ्चाङ्गानि प्रकल्पयेत्।। २।।
ओं स्वाहेत्यस्त्रमन्त्रः स्याद् देवीं ध्यायेत् समाहितः। मणिकाञ्चनपीठस्थां सुपर्वगणसेविताम्।।३।।
दोर्भ्यां नीलाम्बुजयुगं दधानां विशदप्रभाम्। चारुस्मितमुखाम्भोजां देवीं मधुमतीं स्मरेत्।। ४।।
अष्टलक्षं जपित्वान्ते जुहुयात् तद्दशांशतः। बिल्वपत्रैर्घृताक्तैश्च ततो विप्रान् समर्चयेत्।। ५।।
यजेज्जयादिके पीठे नवशक्तिसमन्विते। केसरेषु षडङ्गानि वसुपत्रेषु शक्तयः ।। ६।।
निद्रा छाया क्षमा तृष्णा कान्तिरार्या श्रुतिः स्मृतिः। भूपुरे लोकपालांश्च तदस्त्राणि च तद्बहिः।। ७।।
एवं देवीं पूजयितुस्तस्य श्रीः सर्वतोमुखी। भूपतीन् रक्तकमलैस्ताम्बूलैर्योषितो हुतैः।। ८।।
वशयेत् पायसैर्भोगान् प्राप्नोति विपुलान् नरः। मधुमत्याः परो मन्त्रो भौतिको बिन्दुना युतः।।९।।

बिन्दुना युतो भौतिकः ऐं इति।

ध्यायेत् कुमारिकां देवीं पूर्ववद्यजनादिकम्। अर्धकोटिजपादेव नानाविद्यानिधिर्भवेत्।। १०।।
माया प्रमदे स्वाहेति षडर्णो मनुरीरिता। ऋषिः शक्तिः स्मृतं छन्दो गायत्रं प्रमदाह्वया।। ११।।
देवता षड्दीर्घयुग्लज्जाबीजेनाङ्गक्रिया मता। सुवर्णाभरणैर्युक्तां कराभ्यां च वराभये।। १२।।
दधानां मघवाद्यैश्च सेवितां सिद्धकिन्नरैः। सुवर्णवर्णां प्रमदां भावयेत् साधकोत्तमः।। १३।।
रसलक्षं जपेन्मन्त्रं तद्दशांशं घृतैर्हुनेत्। अङ्गदिक्पालवज्राद्यैस्त्रिभिरावरणैर्यजेत् ।। १४।।
ततो वने विविक्ते तु अयुतं नियतो हुनेत्। पायसान्नेन जुहुयात् तद्दशाशं ततः स्वपेत्[2]।। १५।।
एकविंशं दिनं यावदेवमाचरतो निशि। आगत्य देवी साभीष्टं ददात्येव न संशयः।। १६।।
प्रमदेति पदं हित्वा प्रमोदे पदमुद्धरेत्। प्रमोदाया महामन्त्रो वाञ्छितार्थप्रदायकः।। १७।।
प्राग्वदृष्यादिपूजा स्यात् पूर्वसेवा च पूर्ववत्। कृत्वा सरित्तटे विद्वान् मण्डलं चन्दनेन च।। १८।।
जपो होमश्च कर्तव्यः प्रमोदां पश्यति ध्रुवम्। तारो हिलिद्वयं वन्दीदेव्यै हृच्छिववर्णकः।। १९।।
भैरवोऽस्य ऋषिः प्रोक्तस्त्रिष्टुप् छन्दश्च देवता। वन्दीदेवी समुद्दिष्टा ह्येकेन हृदुदीरितम्।। २०।।
ततो द्विशः षडङ्गानि कृत्वा ध्यायेत् परां शिवाम्। नीलजीमूतसङ्काशां रत्नसिंहासनस्थिताम्।।२१।।

---

१. ‘न च्छन्दो नास्य’ ख. पाठः। २. ‘स्वयं’ ख. पाठः।

वराभये कराभ्यां च दधतीं पानपात्रकम्। सेवितां सुरकन्याभिर्भजे वन्दीं भवच्छिदे।। २२।।
लक्षद्वयं जपित्वान्ते पायसेन ससर्पिषा। तद्दशांशं हुनेत् पीठे प्राक्प्रोक्ते पूजयेच्छिवाम्।। २३।।
कर्णिकायां षडङ्गानि शक्तीः पत्रेषु संयजेत्। काली तारा भगवती कुब्जाख्या शीतलापि च।।२४।।
त्रिपुरा मातृका लक्ष्मीर्लोकेशानायुधैः सह। एवमाराधिता वन्दी साधकाय समीहितम्।। २५।।
दद्यात् त्रिसप्तदिवसमयुतं प्रत्यहं जपेत्। गणेशं पूजयित्वादौ नियमेन समन्वितः।। २६।।
ततः कारागृहान्मुक्तिमेवं कुर्याद्विचक्षणः। अपूपे चतुरस्रान्तष्ठकारे साध्यनामकम्।। २७।।
घृतेन विलिखेन्मायां दिक्षु संलिख्य तत्परम्। अष्टादशार्णमन्त्रेण चतुरस्रं प्रवेष्टयेत्।। २८।।
तारत्रयं वन्द्यमुष्य बन्धान्मोक्षं कुरुद्वयम्। स्वाहान्तेन ततो वन्द्यां स्थिताग्रे तमपूपकम्।। २९।।
दद्यात् स भक्षयित्वा तु वन्दी मुक्तो भवेन्नरः।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे पञ्चविंशः श्वासः।। २५।।

◆

अथ
षड्विंशः श्वासः

अथ यक्षिणीमन्त्राः। सिद्धशावरतन्त्रे–

अथ वक्ष्ये महादेवि समस्ताभीष्टसिद्धिदाम्। महाविद्यां महागोप्यां सम्प्रीत्या वटयक्षिणीम्।। १।।
एह्येहि यक्षियुगलं महायक्षिपदं ततः। वटवृक्षनिवास्यन्ते नि–शीघ्रं मे च सर्व च।। २।।
सौख्यं कुरुयुगं स्वाहा मन्त्रो द्वात्रिंशदर्णकः। ऋषिः स्याद्विश्रवाश्छन्दोऽनुष्टुप् स्याद् देवता तथा।।३।।
यक्षिणी वटपूर्वा च वह्न्यब्ध्यब्धिवसून्मितैः। मुन्यङ्गैश्च षडङ्गानि कुर्यान्मूलाणुवर्णकैः।। ४।।
मूर्ध्नि नेत्रद्वये वक्त्रे नासाकर्णांसयुग्मतः। कुचयोः पार्श्वयोश्चैव हृदि नाभौ तथोदरे।। ५।।
कट्यूरुनाभिजङ्घासु जान्वोश्च मणिबन्धयोः। करयोर्मस्तके न्यस्येन्मन्त्रवर्णान् विशालधीः।। ६।।
रक्तमाल्याम्बरधरां रक्तगन्धानुलेपनाम्। रक्तभूषणभूषाङ्गीं नीलतोयदसन्निभाम्।। ७।।
नागवल्लीदलयुतलताक्रमुकमञ्जरीम्। दधानां मृगनेत्रां च संस्मरेद्वटयक्षिणीम्।। ८।।
लक्षयुग्मं वटाधस्ताज्जपेद् बन्धूकसम्भवैः। कुसुमैस्तद्दशांशेन जुहुयान्मन्त्रसिद्धये।। ९।।
शाक्ते पीठे यजेद् देवीं प्रोच्यन्ते पीठशक्तयः। कामदा मानदा रक्ता मधुरा मधुरानना।। १०।।
नर्मदा भोगदा [1]मन्दा प्राणदा पीठशक्तयः। मनोहराय यक्षिण्या योगपीठाय हृन्मनुः।। ११।।
कर्णिकायां षडङ्गानि पत्रेष्वष्टसु शक्तयः। सुनन्दा चण्डिका[2] हासा सुलापा मदविह्वला।। १२।।
आमोदा च प्रमोदा च [3]सुखदाष्टौ च सिद्धयः। चतुरस्रे लोकपालान् वज्राद्यायुधसंयुतान्।। १३।।
विविक्ते विपिने गत्वा न्यग्रोधाधस्तले जपेत्। सहस्रं प्रत्यहं मन्त्री सप्तमे दिवसे तथा।। १४।।
मण्डलं चन्दनैः कृत्वा घृतदीपं प्रकाशयेत्। तन्मण्डले यजेद् देवीं नियतो वटयक्षिणीम्।। १५।।
आनिशीथं तदग्रे तु प्रजपेन्मन्त्रनायकम्। मञ्जीरशब्दं गीतं च श्रुत्वा निर्भयतो जपेत्।। १६।।
देवी प्रत्यक्षतां याति तदा वै सुरतार्थिनी। तत्कामपूरणेनास्मै दद्याद्वाञ्छितमुत्तमम्।। १७।।
तदारभ्य च भार्यावत् साधकस्यानुतिष्ठति। रमाद्वयं यक्षिणी हंत्रयं स्वाहा महामनुः।। १८।।

''श्रींश्रीं यक्षिणि हंहंहं स्वाहा।''

दशाक्षरो मुनिः प्राग्वत् पंक्तिश्छन्द उदाहृतम्। यक्षिणी देवता प्रोक्ता ह्येकैकत्रित्रियुग्मतः।। १९।।
सर्वैरङ्गक्रिया प्रोक्ता ध्यायेच्चम्पककानने। सिंहासने समासीनां स्वर्णरत्नविभूषणाम्।। २०।।
रक्ताम्बरधरां रक्तामप्सरोगणसेविताम्। ध्यात्वैवं प्रजपेल्लक्षं जपापुष्पैर्दशांशतः।। २१।।

---

१. 'नन्दा' ख. पाठः। २. 'चन्द्रिका' ख. पाठः। ३. 'वसुदा' ख. पाठः।

हुनेत् पूर्वोदिते पीठे यजेत् सर्वेष्टदा भवेत्। प्रणवं क्रोधियुक् सेन्दुमनुग्रहमुदीरयेत्।। २२।।
मदनान्ते मेखले स्यान्नम:स्वाहान्तको मनु:। रव्यर्णोऽस्या: समर्चादि प्राक्प्रोक्तविधिना चरेत्।।२३।।

''ओं कौं' मदनमेखले नम: स्वाहा''

मधूकतरुमूले तु चतुर्दशदिनावधि। अयुतं प्रत्यहं जप्यात् सहस्रं जुहुयात् सुधी:।। २४।।
मधुराक्तैर्मधूकोत्थपुष्पैस्तत्काष्ठदीपिते। वह्नौ तुष्टाञ्जनं यच्छेद्येन पश्यति भूनिधिम्।। २५।।
तारं वाग्भवमुद्धृत्य विशाले भुवनेश्वरी। श्री: काम: स्वाहया युक्तो मन्त्र: प्रोक्तो दशाक्षर:।।२६।।
प्राग्वन्मुन्यादिकं ज्ञेयं चिञ्चावृक्षतले शुचि:। जपेल्लक्षं दशांशेन शतपत्रैर्हुनेत् तत:।। २७।।
विशाला यक्षिणी तुष्टा साधकाय रसायनम्। प्रयच्छेद्येन दीर्घायुराप्नुयात् साधकोत्तम:।। २८।।

इति यक्षिणीप्रकरणम्।। अथ मातङ्गीप्रकरणम्। उत्तरतन्त्रे—

राजमातङ्गिनीमन्त्रं प्रवक्ष्यामि यथाविधि। यत्पादद्वन्द्वसरसीरुहसंस्मृतितो नर: ।। १।।
लभते मुक्तिमतुलां दुष्प्रापां सिद्धिसञ्चयै:। येन चाकर्षणं साध्यवशीकारो यतो भवेत्।। २।।
येन वाञ्छितमाप्नोति यशस्वी नियतं भवेत्। दुरितौघप्रविध्वंस: सौभाग्याप्तिश्च निश्चिता।। ३।।
सेवितं सन्ततिकरं (न स्यात्) निगडबन्धनम्। समस्तेषु च शास्त्रेषु पाण्डित्यमधिकं भवेत्।। ४।।
विशिष्टशिष्टगम्भीरपदविन्यासकोमले। ललिते च कवित्वेऽसौ प्रगल्भ: सुतरां भवेत्।। ५।।
सङ्गीते सर्वविद्यासु चात्यन्तं निपुणो भवेत्। मन्दिरे तस्य कमला साध्वनश्वरविभ्रमा।। ६।।
निरन्तरं च वसति नात्र कार्या विचारणा। किमत्र बहुनोक्तेन वचसां पतिरेव स:।। ७।।
कान्त्या रतिपतिर्लक्ष्म्या कमलापतिरप्यसौ। द्वादशो दण्डियुग् व्योम वह्निदण्डित्रिमूर्तियुक्।। ८।।
तादृग्रूपं भवेदस्थि सद्यो बिन्दुयुतं च हृत्। भत्योर्मध्ये गवार्णौ स्तो विबिन्दु: कमला विषम्।।९।।
कान्तियुक् कामिका बिन्दुयुता काच्च तृतीयकम्। शिवयुक् श्वरिशब्दान्ते भृगुरग्निश्च केवल:।।१०।।
अम्बु द्वितीयवर्गस्य मध्यस्थं च तपञ्चमम्। विषं नो व्योमा वह्निदृक् सर्वान्ते मु च कात्परम्।।११।।
राजिसर्वमुखं प्रोक्त्वा सबिन्दुर्वह्निरीरित:। जिन्यन्ते प्रवदेत् सर्वं वशंकर्योस्तु मध्यत:।। १२।।
राज स्त्रीपुरुषं दुष्टमृगं सत्त्वं चतुर्षु च। स्थानेषु सर्वलोकान्ते विषं तत्कर्णयुक् च कम्।। १३।।
आदित्य: शिवयुग्–नीरं तदन्तं कान्तियुग् रवि:। दीर्घा मरुच्च भृग्वम्ब्वा व्योम कान्तियुतं मनु:।।१४।।
अष्टीशीत्यक्षर: प्रोक्त: सर्वकामसमृद्धिद:। रक्षार्थं सर्वलोकानामायुरारोग्यवर्धन: ।। १५।।
शान्तिके पौष्टिके चैव वृद्धिसिद्धिकर: प्रिये[2]। अपमृत्युजय: श्रीदो ह्यपस्मारक्षयङ्कर:।। १६।।
सर्वज्वरांश्च शूलानि शक्तो नाशयितुं क्षणात्। राजद्वारे विशेषेण सङ्ग्रामे रिपुसङ्कटे।। १७।।
अग्निचोरनिपातेषु सर्वग्रहनिवारणे। राक्षसेषु पिशाचेषु गन्धर्वेषूरगेषु च।। १८।।
नदीप्रतरणे दुर्गे सङ्ग्रामे प्राणसंशये। असौ मन्त्र: प्रयुक्त: स्यादेतत्सर्वनिवारण:।। १९।।

---

१. 'क्रौं' इति ख. पाठ:। २. 'परा' ख. पाठ:।

स्त्रीणां सौभाग्यहीनानामपुत्राणां विशेषतः। अपुष्पा यानपत्या या सदा पुष्पवती च या।। २०।।
पतिद्वेष्या च या नारी दुष्टा श्वश्रूजनं प्रति। या वन्ध्या मृतपुत्रा च निद्रालस्यमहाभयैः।। २१।।
इत्येवमादिदोषैश्च दुष्टानां योषितामयम् । शक्तस्तद्दोषहरणे स्मरणादेव निश्चितम्।। २२।।
स्त्रीवश्यनरवश्यादिसर्ववश्यजयप्रदः। स्त्रीणां सम्मोहने शक्तो नराणां च विशेषतः।। २३।।
मतङ्गमुनिना पूर्वं गीतस्तेनाप्यनुष्ठितः। वासुदेवेन गीतोऽयं तुम्बुरुप्रमुखादिभिः।। २४।।
जप्तः सदा महामन्त्रो वसिष्ठाद्यैर्महर्षिभिः।.....................................।।

द्वादशः ऐ दण्डी अनुस्वारस्तद्युक्तस्तेन ऐं। व्योम ह, वह्नी रेफः, दण्डी अनुस्वारः त्रिमूर्तिः ई तेन ह्रीं। अस्थिः शकारः। तादृग्रूपं वह्निदण्डित्रिमूर्तियुतमित्यर्थः तेन श्रीं। सद्यः ओकारः। बिन्दुरनुस्वारस्तेन ओं। ह्रन्नमः। भत्योर्मध्ये गवार्णौ तेन भगवति। विबिन्दुः कमला श्री। विषं म कान्तियुक् आकारयुक्ता तेन मा। कामिका त, बिन्दुयुता तेन तं। कतृतीयं ग, शिवः ए तेन गे। श्वरि स्वरूपं। भृगुः स। अग्नी रेफः केवलः स्वररहितोऽम्बु वकारस्तेन र्व। द्वितीयवर्गस्य मध्यस्थं ज, तपञ्चमं न, विषं म, नो स्वरूपं, व्योम ह, आ स्वरूपं तेन हा, वह्नि र दृक् इ तेन रि। सर्व स्वरूपं, मु स्वरूपं, कात्परं ख, राजि स्वरूपं, सर्वमुख स्वरूपं, सबिन्दुर्वह्निः रं, जिनि स्वरूपं, सर्ववशङ्कर्योर्मध्ये राजपदं स्त्रीपुरुषपदं दुष्टमृगपदं सत्त्वपदं च प्रत्येकं वदेत् ‘‘चतुर्षु स्थानेष्वि’’त्युक्तेः। सर्वलोक स्वरूपं, विषं म, तत्कर्णयुक्तं तेन मु। कं स्वरूपं। आदित्यः म, शिवयुगेकारयुक्तं तेन मे। नीरं व, तदन्तं श, कान्तियुग्रविर्मा, दीर्घा न, मरुत् य। भृगुः स, अम्बु व, आ स्वरूपं तेन स्वा। व्योम ह, कान्तिः आ तेन हा,।। स्पष्टम्– ‘ऐंह्रींश्रींओं नमो भगवति श्रीमातङ्गेश्वरि सर्वजनमनोहारि सर्वमुखराजि सर्वमुखरञ्जिनि सर्वराजवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वसत्त्ववशङ्करि सर्वलोकममुकं मे वशमानय स्वाहा’’। (८८)।। तथा–

दक्षिणामूर्तिरस्य स्यादृषिश्छन्द उदाहृतम्। गायत्रं देवता प्रोक्ता मातङ्गी सर्वसिद्धिदा।। २५।।
एकविंशतिर्भिर्वर्णैर्हृदयं समुदाहृतम्। त्रयोदशभिरर्णैः स्याच्छिरश्चाष्टादशार्णकैः ।। २६।।
शिखा तावद्भिरर्णैः स्यात् कवचं दशभिस्त्रिभिः। नेत्रं द्वाभ्यामथास्त्रं स्यान्मन्त्रवर्णैर्विभागशः।।२७।।
वाङ्मायाकमलाद्याद्यैर्न्यासं कुर्यात् कराङ्गयोः।.....................................।।

आद्यैः प्रथमोक्तैरेकविंशतिभिर्वर्णैः, तेन चतुर्विंशतिवर्णात्मको हृदयमन्त्रः। ‘‘वर्णैश्चतुर्भिर्विंशत्या स्याद्धृदिति’’ शारदातिलकवचनात्।

शिरोललाटभ्रूमध्ये तालुकण्ठगलोरसि। अनाहते भुजद्वन्द्वे जठरे नाभिमण्डले।। २८।।
स्वाधिष्ठाने गुह्यदेशे पादयोर्दक्षिणान्ययोः। मूलाधारे गुदे न्यसेत् पदान्यष्टादश क्रमात्।। २९।।

कण्ठस्तन्मणिः, गलस्तदधः।

गुणैकद्विचतुःषड्भिर्वसुषट्पर्वताष्टभिः। दशपङ्क्त्यष्टवेदाग्निचन्द्रयुग्मगुणाक्षिभिः।। ३०।।

गुणास्त्रयः, वसवोऽष्टौ, पर्वताः सप्त, पङ्क्तिर्दश, वेदाश्चत्वारः, अग्नयस्त्रयः, चन्द्र एकः, अक्षि द्वयम्। तथा–

पदपङ्क्तिरियं प्रोक्ता मन्त्रवर्णैर्यथाक्रमम्। (रत्याद्या मूलहृदयभ्रूमध्येषु विचक्षणः ।। ३१।।
वाक्शक्तिलक्ष्मीबीजाद्या मातङ्ग्यन्ताः प्रविन्यसेत्)। शिरोवदनहृद्गुह्यपादेषु च प्रविन्यसेत्।।३२।।

हृल्लेखां गगनां रक्तां भूयो मन्त्री करालिकाम्। महोच्छुष्मां स्वनामाद्यवर्णबीजपुर:सरा:।। ३३।।
मातङ्ग्यन्ता: प्रविन्यस्य बाणन्यासमथाचरेत्। मूर्ध्नि पादास्यगुह्येषु हृदम्भोजे प्रविन्यसेत्।। ३४।।
द्राविणीं शोषिणीं भूयो बन्धिनीं मोहिनीं पुन:। आकर्षिणीं स्वनामादिबीजाद्या: शुभलक्षणा:।।३५।।

स्वनाम्नामाद्यवर्णा एव बीजानि यासां तास्तदाद्या इत्यर्थ:। (केचित्तु स्वनामादौ पूर्वोक्तबीजाद्या इति वदन्ति, एवं चेदाद्यशब्दवैयर्थ्यप्रसङ्गो दुष्परिहर:।)

मातङ्ग्यन्तास्ततो न्यसेन्मन्मथान् वदनांसयो:। पार्श्वकट्योर्नाभिदेशे कटिपार्श्वांसके पुन:।। ३६।।
बीजत्रयादिकान् मन्त्री मन्मथं मकरध्वजम्। मदनं पुष्पधन्वानं पञ्चमं कुसुमायुधम्।। ३७।।
षष्ठं कन्दर्पनामानं मनोभवरतिप्रियौ। मातङ्ग्यन्तांस्तो न्यसेत् स्थानेष्वेतेषु मन्त्रवित्।। ३८।।

बीजत्रयं मूलमन्त्राद्यम्।

प्रथमानङ्गकुसुमा भूयोऽन्यानङ्गमेखला। अनङ्गमदना तद्वदनङ्गमदनातुरा।। ३९।।
अनङ्गमदनोद्वेगा भूयश्चानङ्गसम्भवा। सप्तम्यनङ्गभुवनपालिनी स्यादथाष्टमी।। ४०।।
अनङ्गशशिरेखाख्या मातङ्ग्यन्ता: प्रकीर्तिता:। विन्यस्तव्यास्ततो मूलेऽधिष्ठाने मणिपूरके।। ४१।।
हृत्कण्ठास्ये भ्रुवोर्मध्ये मस्तके मन्त्रिणा तत:। आद्ये लक्ष्मीसरस्वत्यौ रति: प्रीतिश्च कीर्तिका।।४२।।
शान्ति: पुष्टिस्तथा तुष्टिर्मातङ्गीपदशेखरा। मूलमन्त्रं प्रविन्यस्य निजमूर्धनि मन्त्रवित्।। ४३।।
(आधारदेशेऽधिष्ठाने नाभौ पश्चादनाहते। कण्ठे वक्त्रे भ्रुवोर्मध्ये मस्तके विन्यसेत् क्रमात्।।४४।।
ब्राह्म्याद्या: पूर्वमुद्दिष्टा मातङ्गीपदपश्चिमा:। एषु स्थानेषु विन्यसेदसिताङ्गादिभैरवान्।। ४५।।
असिताङ्गो रुरुश्चण्ड: क्रोधोन्मत्तकपालिन:। भीषणाख्यश्च संहार इत्यष्टौ भैरवा: स्मृता:।। ४६।।)
आधारदेशेऽधिष्ठाने नाभौ पश्चादनाहते। कण्ठदेशे भ्रुवोर्मध्ये बिन्दौ भूय: कलापदे।। ४७।।
निरोधिकायामर्धेन्दौ नादनादान्तयो: पुन:। उन्मन्यां विषुवक्त्रे च ध्रुवमण्डलके शुभे।। ४८।।

भ्रूमध्यादिशिवान्तानि स्थानान्यूर्ध्वोर्ध्वं ज्ञेयानि।

प्रमथा भाविनी विद्युन्माला चिच्छक्तिरप्यथ। ततश्च सुन्दरानन्दा नागवल्ली[1]रिति क्रमात्।। ४९।।
शिरोभालहृदाधारेष्वेता बीजत्रयादिका:। मातङ्ग्यन्ता: प्रविन्यसेद्यथावद् देशिकोत्तम:।। ५०।।
मातङ्गीं महदाद्यन्तां महालक्ष्मीपदादिकाम्। सिद्धलक्ष्मीपदाद्यन्तां मूलमाधारमण्डले।। ५१।।
न्यस्य तेनैव कुर्वीत व्यापकं देशिकोत्तम:। एवं न्यस्तशरीरोऽसौ चिन्तयेन्मन्त्रदेवताम्।। ५२।।
अमृतोदधिमध्यस्थे रत्नद्वीपे मनोरमे । स्वर्णप्राकारसंवीते मण्डपे रत्ननिर्मिते।। ५३।।
कदम्बबिल्वकह्लारकल्पवृक्षोपशोभिते। (वेदिमध्ये सुखास्तीर्णे रत्नसिंहासने शुभे।। ५४।।
अष्टपत्रं महापद्मं केसराढ्यं सकर्णिकम्। तन्मध्ये च त्रिकोणं स्यादष्टपत्रं ततो बहि:।। ५५।।
पुन: षोडशपत्रं स्यात्तद्बाह्ये स्याच्चतुर्दलम्। वेदास्रं सचतुर्द्वारं मण्डलं प्रोक्तमुत्तमम्।। ५६।।)
तस्य मध्ये सुखासीनां श्यामवर्णां शुचिस्मिताम्। कदम्बमालाभरणां पूजितां च सुरासुरै:।।५७।।

---

[1] 'बुद्धि:' ख. पाठ:।

प्रलम्बालकसंयुक्तां चन्द्रलेखावतंसिकाम्। ललाटे तिलकोपेतामीषत्प्रहसिताननाम्।। ५८।।
किञ्चित्स्वेदाम्बुमधुरललाटफलकोज्ज्वलाम्। वलीतरङ्गमध्यां तां रोमराजीविराजिताम्।। ५९।।
सर्वाभरणसंयुक्तां मुक्ताहारविभूषिताम् । नानामणिगणोन्नद्धकटिसूत्रैरलङ्कृताम् ।। ६०।।
वलयै रत्नखचितैः केयूरैर्मणिभूषितैः। भूषितां द्विभुजां बालां मधुघूर्णितलोचनाम्।। ६१।।
आपीनमण्डलाभोगसमुन्नतपयोधराम् । प्रलम्बकर्णाभरणां कर्णोत्तंसविराजिताम्।। ६२।।
तमालनीलां तरुणीं मधुमत्तां मतङ्गिनीम्। चतुःषष्टिकलारूपपार्श्वस्थशुकशारिकाम्।। ६३।।
कोटिबालार्कसङ्काशां जपाकुसुमसन्निभाम्। एवं वा पीतवर्णां वा ध्यायेन्मातङ्गिनीं पराम्।।६४।।
एवं ध्यात्वा समाराध्य मानसैरुपचारकैः। अर्घ्यादिपात्राण्यासाद्य पूजयेत् परमेश्वरीम्।। ६५।।

इति। मातङ्गमनुकोशे—''मध्याविःशक्तितेजो रसवसुचतुरस्रस्थमाधारमग्नेः पात्रं सूर्यस्य सोमस्य च विमलजलं मण्डलं भावयित्वा।'' इति अर्घ्याधारमण्डलमाह—मध्याविरिति। शक्तिर्भुवनेश्वरीबीजं, वह्नि (बहिः) त्रिकोणमिति यावत्। रसः षट्कोणं। वसु अष्टकोणं। मण्डलमित्यग्नेरित्यादिषु त्रिषु स्थानेषु सम्बध्नाति।। सारसङ्ग्रहे—

धर्मादिक्लृप्ते पूर्वोक्ते पीठे शक्तीर्नवार्चयेत्। मातङ्ग्यन्ता विभूतिश्च[1] उन्नतिः कान्तिरेव च।। १।।
सृष्टिः कीर्तिः सन्नतिश्च व्युष्टिरुत्कृष्टिरेव च। ऋद्धिश्च नवमी प्रोक्ता मातङ्ग्याः पीठशक्तयः।।२।।
वाङ्मायाकमलासर्वशक्त्यन्ते कमलापदम्। सनाय नम इत्युक्त्वा मातङ्ग्याः पीठमर्चयेत्।। ३।।
देव्या मूर्तिं च मूलेन कल्पयित्वा यथाविधि। पुनर्मूलं परस्यै श्रीमातङ्गीमूर्तये नमः ।। ४।।
अर्चयेद्गन्धपुष्पाद्यैस्तां मूर्तिं साधकोत्तमः। तस्यामावाहयेद् देवीमर्चयेच्च विधानवित्।। ५।।
रत्याद्याः पूजयेन्मन्त्री त्रिषु कोणेषु च क्रमात्। पुरतो दक्षिणे सव्ये रतिः प्रीति(र्मनोभवा)[2]।। ६।।
पाशाङ्कुशकरे श्वेतासिते चान्ये च साञ्जलिः। अरुणा सेक्षुकोदण्डपञ्चबाणलसत्करा।। ७।।
मध्ये दिक्षु च सम्पूज्या हृल्लेखाद्या यथाक्रमम्। गुणसृण्यभयेष्टानि वहन्त्यो भूतसप्रभाः।। ८।।
अग्नीशरक्षःपवनकोणेष्वग्रे दिशासु च । यजेदङ्गानि मन्त्रज्ञः पञ्चबाणांस्ततोऽर्चयेत्।। ९।।
दिक्ष्वग्रे क्रमतो मुक्तास्वर्णविद्रुमहीरकान्। अमलारुणभायुक्तान् धनुर्बाणधरांस्तथा।। १०।।
दलेषु पूजयेदग्रादनङ्गकुसुमादिकाः । गुणसृण्यभयेष्टानि धारयन्त्योऽरुणप्रभाः ।। ११।।
अग्रे दलानां सम्पूज्या रत्याद्याश्चारुभूषणाः। लक्ष्मीर्हेमप्रभा पद्मकरान्या शङ्खसन्निभा।। १२।।
चिन्मुद्रापुस्तककरा धनुर्बाणकरे परे। श्वेतासिते कुन्दसमा चिन्मुद्राब्जकरा परा।। १३।।
चिन्मुद्राभययुक् शान्तिररुणान्ये भयेष्टदे। द्वितीयेऽष्टदले पूज्या मन्मथाद्या मदोद्धताः।। १४।।
पुर आकृष्टचापज्याः पृष्ठतः सनिषङ्गकाः। पत्रसंस्था मातरः स्युस्तदग्रे चाष्टभैरवाः।। १५।।
कपालशूलडमरुवेतालासक्तपाणयः। दीर्घस्वराद्या ब्राह्म्याद्या ह्रस्वाद्या भैरवा अपि।। १६।।
ततः षोडशपत्रस्था वामाद्याः श्यामविग्रहाः। आदर्शं रत्नदीपं च व्यजनं च ततः परम्।। १७।।

---

[1] 'विभूत्यन्ते' क. पाठः। [2] 'च साञ्जलिः' ख. पाठः।

नागवल्लीदलं चैव चामरं ज्ञानकोशकम्। वासोमाल्यातपत्राण्याभरणं शुकशारिके ।। १८।।
चामरं रत्नचषकं तालवृन्तं प्रदीपकम्। बिभ्राणा वामहस्तैश्च देव्यग्रे नतिपाणयः[1]।। १९।।
रक्तवर्णाश्च विमला भावयन्नर्चयेदिमाः। वादयन्त्यः सदा वीणां चतुष्पत्रे ततोऽर्चयेत्।। २०।।
मातङ्ग्याद्यास्तासु चाद्या पाशाङ्कुशवराभयैः। अलङ्कृतभुजा रक्ता द्वितीया चेन्दुसप्रभा।। २१।।
असिखेटकशूलाह्वमुण्डहस्ता तथापरा। पाशाङ्कुशसरोजानि शलिपुञ्जं च बिभ्रती।। २२।।
अरुणा चान्तिमा हेमरत्नपात्रे वराभये। दधाना श्यामवर्णा च ध्यातव्या मन्त्रिसत्तमैः।। २३।।
अग्निनैर्ऋतवायव्यरुद्रकोणेषु संयजेत्। गणेशदुर्गावटुकक्षेत्रपांस्तद्बहिर्यजेत्।। २४।।
चतुरस्रे लोकपालांस्तदस्त्राणि च तद्बहिः।.................................।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ओं दक्षिणामूर्तये ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि श्रीमातङ्गीश्वरीदेवतायै नमः। इति विन्यस्य मम सर्वाभिष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, ऐंह्रींश्रींओं नमो भगवति श्रीमातङ्गीश्वरि सर्वजनमनोहारि हृदयाय नमः। ॐ सर्वमुखराजि सर्वमुखरञ्जिनि शिरसे स्वाहा। ॐ सर्वराजवशङ्करि सर्वस्त्रीपुरुषवशङ्करि शिखायै वषट्। ॐ सर्वदुष्टमृगवशङ्करि सर्वसत्त्ववशङ्करि कवचाय हुं। ॐ सर्वलोकममुकं मे वशमानय नेत्रत्रयाय वौषट्। ॐ स्वाहा अस्त्राय फट्। इति षोढाविभक्तैर्मन्त्रवर्णैः करषडङ्गन्यासान् विधाय, शिरसि ऐंह्रींश्रीं नमः। ललाटे ओं। भ्रूमध्ये नमो०। तालुनि भगवति०। कण्ठे मातङ्गीश्वरि०। गले सर्वजनमनोहारि०। उरसि सर्वमुखराजि०। अनाहते सर्वमुखरञ्जिनि०। दक्षभुजे सर्वराजवशङ्करि०। वामे सर्वस्त्रीपुरुषवशङ्करि०। जठरे सर्वदुष्टमृगवशङ्करि०। नाभौ सर्वसत्त्ववशङ्करि०। स्वाधिष्ठाने सर्वलोकं०। लिङ्गे अमुकं० दक्षपादे मे०। वामे वशं०। मूलाधारे आनय०। गुदे स्वाहा नमः।। मूलाधारे ऐंह्रींश्रीं रं रत्यै मातङ्ग्यै नमः। हृदि ॐ प्रीं प्रीत्यै मा०। भ्रूमध्ये ॐ मं मनोभवायै मा०। शिरसि ॐ हं हल्लेखायै मा०। वदने ॐ गं गगनायै मा०। हृदि ॐ रं रक्तायै मा०। गुह्ये ॐ कं करालिकायै मा०। पादयोः ॐ मं महोच्छुष्मायै मा०। शिरसि— ॐ द्रां द्राविण्यै मा०। पादयोः ॐ शों शोषिण्यै मा०। मुखे ॐ वं बन्धिन्यै मा०। गुह्ये ॐ मों मोहिन्यै मा०। हृदये ॐ आं आकर्षिण्यै मा०। ततो मुखे ॐ मन्मथाय मा०। वामांशे ॐ मकरध्वजाय मा०। वामपार्श्वे ॐ मदनाय मा०। वामकट्यां ॐ पुष्पधन्वने मा०। नाभौ ॐ कुसुमायुधाय मा०। दक्षकट्यां ॐ कन्दर्पाय मा०। दक्षपार्श्वे ॐ मनोभवाय मा०। दक्षांसे ॐ रतिप्रियाय मा०। मुखे ॐ अनङ्गकुसुमायै मा०। वामांसे ॐ अनङ्गमेखलायै मा०। वामपार्श्वे ॐ अनङ्गमदनायै मा०। वामकट्यां ॐ अनङ्गमदनातुरायै मा०। नाभौ ॐ अनङ्गमदनोद्वेगायै मा०। दक्षकट्यां ॐ अनङ्गसम्भवायै मा०। दक्षपार्श्वे ॐ अनङ्गभुवनपालिन्यै मा०। दक्षांसे ॐ अनङ्गशशिरेखायै मा०। मूलाधारे ॐ लक्ष्म्यै मा०। लिङ्गमूले ॐ सरस्वत्यै मा०। मणिपूरे ॐ रत्यै मा०। हृदि प्रीत्यै मा०। कण्ठे कीर्त्यै मा०। मुखे कान्त्यै मा०। भ्रूमध्ये पुष्ट्यै मा०। शिरसि तुष्ट्यै मा०। मूर्ध्नि मूलमन्त्रं न्यसेत्।। मूले ॐ ब्राह्म्यै मा०। स्वाधिष्ठाने माहेश्वर्य्यै मा०। नाभौ कौमार्य्यै मा०। हृदि वैष्णव्यै मा०। कण्ठे वाराह्यै मा०। मुखे

---

[1] 'देवाशागान्यपाणयः' ग. पाठः।

इन्द्राण्यै मा०। भ्रूमध्ये चामुण्डायै मा०। शिरसि महालक्ष्म्यै मा०।। मूले असिताङ्गाय मा०। स्वाधिष्ठाने रुरवे मा०। नाभौ चण्डाय मा०। हृदि क्रोधाय मा०। कण्ठे उन्मत्ताय मा०। मुखे कपालिने मा०। भ्रूमध्ये भीषणाय मा०। शिरसि संहाराय मा०।। आधारे वामायै मा०। लिङ्गे ज्येष्ठायै मा०। नाभौ रौद्र्यै मा०। हृदि शान्त्यै मा०। कण्ठे श्रद्धायै मा०। भ्रूमध्ये वागीश्वर्य्यै मा०। बिन्दौ क्रियाशक्त्यै मा०। कलापदे लक्ष्म्यै मा०। निरोधिकायां सृष्ट्यै मा०। अर्धेन्दौ मोहिन्यै मा०। नादे प्रमथायै मा०। नादान्ते भाविन्यै मा०। उन्मन्यां विद्युन्मालायै मा०। विषुवक्त्रे चिच्छक्त्यै मा०। ध्रुवमण्डले सुन्दरानन्दायै मा०। शिवे नागवल्ल्यै[1] मा०। शिरसि मातङ्ग्यै मा०। ललाटे महामातङ्ग्यै मा०। हृदि महालक्ष्म्यै मा०। मूले सिद्धलक्ष्म्यै मां०। मूलाधारे मूलमन्त्रं विन्यस्य तेनैव व्यापकं कुर्यात्। ततो ध्यानादिमानसपूजान्ते प्रमाणोक्तं मण्डलं कृत्वा सम्प्रदायान्मूलमन्त्रेण मण्डलमध्यमादिबीजत्रयेण, द्विरावृत्त्या षट्कोणं, आद्यन्तप्रणवयुक्तैर्द्विरुक्तैर्बीजैरष्टकोणं, षडङ्गैश्चतुरस्रं च सम्पूज्य उक्तविधिनार्घ्यपात्रं संस्थाप्यान्यानि च पात्राणि प्राग्वत् संस्थाप्य, स्वर्णादिपट्टे कुङ्कुमादिना सकेसरमष्टदलकमलं कृत्वा, तत्कर्णिकायां स्वाभिमुखाग्रं त्रिकोणं कृत्वाष्टदलाद्बहिः पुनरष्टदलकमलं तद्बहिः षोडशदलकमलं तद्बहिश्चतुर्दलं तद्बहिश्चतुर्द्वारोपेतं चतुरस्रत्रयं च कुर्यादिति पूजाचक्रं निर्माय, स्वपुरतः पीठादौ संस्थाप्य मूलेनाभ्यर्च्यार्घ्यस्थापनाद्यात्मपूजान्ते मण्डूकादिज्ञानात्मार्चान्ते अष्टदलकेसरेषु– ओंऐंह्रींश्रीं विभूत्यै मा०। एवं ॐ उन्नत्यै मा०। कान्त्यै मा०। सृष्ट्यै मा०। कीर्त्यै मा०। सन्नत्यै मा०। व्युष्ट्यै मा०। उत्कृष्ट्यै मा०। मध्ये ऋद्ध्यै मा०। इति सम्पूज्य, "ऐंह्रींश्रीं सर्वशक्तिकमलासनाय नमः" इति समस्तं पीठं सम्पूज्य, मूलमुच्चार्य 'श्रीमातङ्गीश्वरीमूर्तिं कल्पयामि' इति मूर्तिं परिकल्प्य, पुनर्मूलमुच्चार्य "परस्यै श्रीमातङ्गीश्वरीमूर्त्यै नमः" इति। मूर्तिमभ्यर्च्य तस्यां देवीमावाह्य, आवाहनादिप्राणप्रतिष्ठान्ते पाशाङ्कुशवराभयखड्गचर्मधनुःशरमौसलीदौर्गबाणयोनीरिति द्वादशमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते प्राग्वत् लयाङ्गत्वेन देवीमूर्तौ षडङ्गानि सम्पूज्य, त्रिकोणे ऐंह्रींश्रीं रत्यै मा०। ॐ प्रीत्यै मा०। ॐ मनोभवायै मा०, इति प्रादक्षिण्येनाभ्यर्च्य, त्रिकोणाष्टदलयोरन्तराले मध्ये चतुर्दिक्षु च– हं हल्लेखायै मा०, गं गगनायै मा०, कं करालिकायै मा०, मं महोच्छुष्मायै मा०, इति सम्पूज्याग्नीशासुरवायव्यमध्येषु चतुर्दिक्षु च क्रमेण षडङ्गानि सम्पूज्य, त्रिकोणाष्टदलयोरन्तराले एवं– द्रां द्राविण्यै मा०, शों शोषिण्ये मा०, बं बन्धिन्यै मा०, मों मोहिन्यै मा०, आं आकर्षिण्यै मा०, इति देव्यग्रादिचतुर्दिक्षु पुनर्देव्यग्रे च प्रादक्षिण्येनाभ्यर्च्य, अष्टदलेषु देव्यग्रदलमारभ्य प्रादक्षिण्येन– अनङ्गकुसुमायै मा०, अनङ्गमेखलायै मा०, अनङ्गमदनायै मा०, अनङ्गमदनातुरायै मा०, अनङ्गमदनोद्वेगायै मा०, अनङ्गसम्भवायै मा०, अनङ्गभुवनपालिन्यै मा० अनङ्गशशिरेखायै मा० इति सम्पूज्यता तदग्रेषु– लक्ष्म्यै मा०, सरस्वत्यै मा०, रत्यै मा०, प्रीत्यै मा०, कीर्त्यै मा०, कान्त्यै मा०, पुष्ट्यै मा०, तुष्ट्यै मा०। ततो द्वितीयाष्टदलमूलेषु देव्याग्रादि प्रादक्षिण्येन– ऐंह्रींश्रीं मन्मथाय मा०, ॐ मकरध्वजाय मा०, ॐ मदनाय मा०, ॐ पुष्पधन्वने मा०, ॐ कुसुमायुधाय मा०, ॐ कन्दर्पाय मा०, ॐ मनोभवाय मा०, ॐ रतिप्रियाय मा०। पत्रमध्येषु– आं ब्राह्म्यै मा०, ईं माहेश्वर्य्यै मा०, इत्यादि। दलाग्रेषु– अं असिताङ्गभैरवाय नमः, इत्यादि भैरवाष्टकं सम्पूज्य, षोडशदलेषु– वामायै मा०, ज्येष्ठायै मा०, रौद्र्यै मा०, शान्त्यै मा०, श्रद्धायै मा०, वागीश्वर्यै मा०, क्रियाशक्त्यै मा०, लक्ष्म्यै मा०, सृष्ट्यै

---

१. 'बुद्ध्यै' 'वत्यै' ख. पाठः।

मा०, मोहिन्यै मा०, प्रमथायै मा०, भाविन्यै मा०, विद्युल्लतायै मा०, चिच्छक्त्यै मा०, सुन्दरानन्दायै मा०, नागवल्ल्यैं[१] मा०। ततश्चतुर्दलेषु– ३ँ मातङ्ग्यै मा०। ३ँ महामातङ्ग्यै मा०। ३ँ महालक्ष्म्यै मा०। ३ँ सिद्धलक्ष्म्यै मा०। इति सम्पूज्य, चतुरस्राभ्यन्तरे आग्नेयादिचतुष्कोणेषु प्रादक्षिण्येन ओं गणेशाय नमः। ओं दुर्गायै नमः। ओं वटुकाय नमः। ओं क्षेत्रपालाय नमः। इत्यभ्यर्च्य, तद्बहिः प्राग्वत् लोकपालार्चादि सर्वं समापयेदिति। तथा–

प्रजपेदयुतं मन्त्री मन्त्रं पश्चाद् दशांशतः। त्रिस्वादुयुक्तैर्जुहुयान्मधूककुसुमैर्वशी ।। २५।।
तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा। एवं सिद्धमनुर्मन्त्री साधयेन्निजवाञ्छितम्।। २६।।
भाग्यार्थी जुहुयाज्जातीमल्लिकानागकेसरैः। श्रीफलैश्चापि तत्पत्रैर्होमाद्राज्यश्रियं लभेत्।। २७।।
राजपुत्रः पङ्कजैः स्वां श्रियमाप्नोत्यनिन्दिताम्। लक्ष्मीपुष्पै[२]रुत्पलैश्च वशयेत् सकलं जगत्।।२८।।
जपाबन्धूकबकुलैर्ब्रह्मवृक्षसमुद्भवैः । सुमनोभिश्च जुहुयाद्वश्यायैव तु मन्त्रवित्।। २९।।
मधुना च हुनेन्मन्त्री सर्वसिद्धिर्भवत्यलम्। त्रिस्वादुसंयुतैः सम्यग् वेतसोत्थैः समिद्वरैः।। ३०।।
जुहुयाद् वृष्टिकामस्तु गुडूचीभिर्ज्वरं हरेत्। कदम्बकुसुमैर्हुत्वा वशयेत् प्रमदाजनान् ।। ३१।।
आयुष्कामः प्रजुहुयाद् दूर्वाभिर्नात्र संशयः। अन्नं प्रजुहुयान्मन्त्री अन्नवानचिराद्भवेत् ।। ३२।।
शालितण्डुलहोमेन धनाकुलगृहो भवेत्। होमद्रव्यं तु यत् प्रोक्तं त्रिस्वाद्वक्तं तु तद्भवेत्।। ३३।।
नन्द्यावर्तप्रसूनैः स्याद्धोमो वाक्सिद्धिदः परम्। निम्बप्रसूनहोमात्तु कमलां वाञ्छितां लभेत्।।३४।।
हुनेत् किंशुकपुष्पैर्यः स भवेत् तेजसां निधिः। चन्दनागुरुकर्पूररोचनाकुङ्कुमैरपि।। ३५।।
होमात्तु विश्वं सकलं वशयेन्नात्र संशयः। अष्टाभिर्जप्तैरेतैस्तु तिलकं जनमोहनम्।। ३६।।
सिन्दुवारस्य मूलानि होमयेद् बन्धमुक्तये। उग्रगन्धस्य तैलेन संसिक्तैर्लवणैर्हुनेत्।। ३७।।
अचिराच्छत्रुसङ्घं स नाशयेन्नात्र संशयः। सञ्चूर्णितनिशामिश्रैर्लवणैः स्तम्भयेदरीन् ।। ३८।।
परिपक्वैरतिरसैः फलैः पुष्पैः सुगन्धिभिः। होमाद्वाञ्छितमाप्नोति नात्र कार्या विचारणा।। ३९।।

इति। सारसङ्ग्रहे–

बालात्रिबीजं वाग्बीजं मायां च कमलां वदेत्। तारं हृद्भगपानीयेति श्रीमातं पदं वदेत्।। १।।
[३]गीश्चर्यन्ते सर्वजान्ते दीर्घा कालश्च नो वियत्। रिसर्वमुखरं झाद्यं नि स्मरः शक्तिरिन्दिरा।। २।।
मध्ये सर्ववशङ्कर्य्योः पञ्चसूच्चारयेत् क्रमात्। राज–स्त्रीपुरुषं दुष्टमृगं सत्त्वपदं वदेत्।। ३।।
लोकं स्यादमुकं मे वशमानय ठयुग्मकम्। वैपरीत्येन चाद्युक्तबीजषट्कान्तिको मनुः।। ४।।
अक्षरैरष्टनवतिमितैरुदित आदरात् । अयं मन्त्रस्त्रिभुवनवशीकारकरः परः ।। ५।।
आचार्यानुग्रहात् प्राप्यो महापुण्यतमैरयम्। दुष्प्राप्योऽकृतपुण्यानां मुनीन्द्राद्यैश्च सेवितः।। ६।।
वाञ्छावितरणे कल्पपादपः परिकीर्तितः।..।।

बालात्रिबीजं पूर्वोक्तं। वाग्बीजं ऐं। माया ह्रीं। कमला श्रीं। तारं ओं। हृन्नमः। भग स्वरूपं। पानीयं व। ति स्वरूपं। श्रीमातं

---

१. 'नन्द बुद्ध्यै' ख: पाठः। २. 'पत्रैः' ख. पाठः। ३. 'गै' ग. पाठः।

स्वरूपं। [१]गीश्वरि स्वरूपं। सर्वज स्वरूपं। दीर्घा न। कालो म। नो स्वरूपं। वियत् ह। रि स्वरूपं। सर्वमुखरं स्वरूपं। झाद्यं ज। नि स्वरूपं। स्मर: क्लीं शक्ति: ह्रीं। इन्दिरा श्रीं। सर्वराजवशङ्करि, सर्वस्त्रीपुरुषवशङ्करि, सर्वदुष्टमृगवशङ्करि, सर्वसत्त्ववशङ्करि, सर्वलोकवशङ्करि, अमुकं स्वरूपं। अत्र न सन्धि: अष्टनवत्यक्षरानुपपत्ते:। मे वशमानय स्वरूपं। ठयुग्मकं स्वाहा। वैपरीत्येन श्रींह्रींऐंसौ:क्लींऐं इति क्रमेण।। स्पष्टम् ऐंक्लींसौ:ऐंह्रींश्रीं ऊों नमो भगवति श्रीमात[२]ङ्गीश्वरि सर्वजनमनोहरि सर्वमुखरञ्जनि क्लींह्रींश्रीं सर्वराजवशङ्करि, सर्वस्त्रीपुरुषवशङ्करि, सर्वदुष्टमृगवशङ्करि, सर्वसत्त्ववशङ्करि, सर्वलोकवशङ्करि, अमुकं मे वशमानय स्वाहा श्रींह्रींऐंसौ:क्लींऐं (९८)।। मतङ्गमनुकोशे— ''सिद्धेऽष्टनवतिवर्णात्मके मन्त्रे सर्व एव पठितफला भवन्ति, तस्मान्मन्त्रमिमं सर्वदैवं जपेदिति''। तथा—

ऋष्याद्या: पूर्वमुदिता मन्त्रस्यास्य भवन्ति हि। ततस्तु मातृकां न्यसेद् देवताभावसिद्धये।। ७।।
पञ्चबाणानङ्गुलीषु विन्यसेत् साधकोत्तम:। मकरध्वजमन्त्रं च तलयोर्विन्यसेत् सुधी:।। ८।।
मकरध्वजङे—माया—हृदन्तो वाग्भवादिक: । मकरध्वजमन्त्रोऽयं सर्ववश्यकर: पर:।। ९।।
शिखाशिरोललाटेषु भ्रूमध्ये नेत्रयुग्मके। श्रोत्रयोर्घ्राणयोर्वक्त्रे गण्डयो: ककुदि क्रमात्।। १०।।
अंसयोरुरसि न्यसेत् स्तनयोर्हृदयाम्बुजे। नाभिमण्डलके लिङ्गे मूलाधारे पदान्यथ।। ११।।
त्रयोविंशतिसंख्यानि त्रित्र्येकद्विचतुस्तथा । षडष्टकससप्तैकचद्राष्टदशपङ्क्तिभि: ।। १२।।
वस्वष्टवह्निचन्द्राक्षित्रिद्वित्रित्रिक्रमान् न्यसेत्। (चन्द्र: १ पङ्क्ति १० वसु ८ वह्नि ३ अक्षि २)।।
एकोनविंशतिं त्यक्त्वा मन्त्रार्णानादित: क्रमात्। पदै: षड्भि: षडङ्गानि त्रिताराद्यै: प्रकल्पयेत्।।१३।।

मतङ्गमनुकोशे तु—ऋष्यादिन्यासानन्तरं, ''अङ्गुलीषु तलयोरथ न्यसेत्पञ्चबाणमकरध्वजांस्तथा। अङ्गषट्कमथ मातृकावलिं मूलमन्त्रमपि खण्डश: कृतम्''।। इति न्यासक्रम उक्त:। यथोपदेशं कार्यमिति।

द्राविण्याद्या: पुन: पञ्च कुक्षौ पार्श्वयुगे हृदि। मणिपूरक एव स्याद् ब्राह्म्याद्या विन्यसेत् तत:।।१४।।
पद्द्वन्द्वसन्धिषु ततो ह्यष्टौ लक्ष्म्यादिका न्यसेत्। सव्यमारभ्य दोर्द्वन्द्वसन्धिषु क्रमत: सुधी:।। १५।।
लक्ष्म्याद्या: पूर्वमुदिता: शक्तीरष्टौ. प्रविन्यसेत्। कान्ते चैव भ्रुवोर्मध्ये नेत्रश्रोत्रगुदेषु च।। १६।।
नासायुग्मे मुखे गण्डद्वन्द्वे जिह्वाग्रदेशके। मूलाधिष्ठानतालौ च वामाद्या: षोडश न्यसेत्।। १७।।
दक्षाङ्घ्रिमारभ्य पदद्वन्द्वसन्धिषु भैरवान्। मातङ्ग्यादिचतुष्कं च हृदि नाभौ शिरोगुदे।। १८।।
गणेशदुर्गावटुकक्षेत्रपालांस्ततो न्यसेत्। कभ्रूमध्यास्यकण्ठेषु मूलेन व्यापकं न्यसेत्।। १९।।
सरस्वतीं तथा लक्ष्मीं निधियुग्मं प्रविन्यसेत्। आनने च भ्रुवोर्मध्ये चरणद्वय एव च।। २०।।
एवं न्यस्ततनुर्मन्त्री ध्यायेद् देवीमनन्यधी:।...।।
अमृतमहोदधिमध्ये रत्नद्वीपे सकल्पवृक्षवने। मणिमयमण्डपमध्ये मणिमयसिंहासनस्योर्ध्वे।। २१।।
मातङ्गीं मधुपूरपानमुदितामाघूर्णमानेक्षणां संस्विद्यद्वदनां कदम्बकुसुमप्रोल्लासिसद्वेणिकाम्।
वीणाशोभिकरां सुरक्तवसनामापक्वबिम्बाधरां कस्तूरीतिलकां शशाङ्कमुकुटां सच्छङ्खपात्रश्रुतिम्।।२२।।

---

१. 'गेश्वरि' क. पाठ:। २. 'मातङ्गे' क. पाठ:।

आपीनोन्नतशोभ्युरोजविनमन्मध्यां शुकश्यामलां
ग्रैवेयाङ्गदचारुहाररसनामञ्जीरसंशोभिताम् ।
भक्तौघं वरहास्यसस्मितदृशां सन्तपर्यन्तीं मुदा
ध्यायेत् पार्श्वगतं तथाखिलकलारूपं शुकं शारिकाम्।। २३।
पूर्वोक्ते च शुभे पीठे यन्त्रमेतत् प्रकल्पयेत्। त्रिकोणं पञ्चकोणं चाप्यष्टपत्रं कलाच्छदम्।। २४।।
अष्टपत्रं वेददलं चतुरस्रं मनोहरम्। चतुर्द्वारसमायुक्तं सर्वदृष्टिमनोहरम् ।। २५।।
अत्रावाह्य यजेद् देवीं मन्त्री शृङ्गारवेषवान्। आदौ लयाङ्गमभ्यर्च्य भोगाङ्गं पूर्ववद्यजेत्।। २६।।
पूर्वोक्तवच्च रत्याद्या यजेन्मन्त्री यथाविधि। द्राविण्याद्याः पञ्च कोणेष्वभ्यर्च्या मन्त्रिणा सदा।।२७।।
अष्टपत्रे यजेन्मातृर्लक्ष्म्याद्याश्च तदग्रतः। वामाद्याः षोडशदले तद्बाह्येऽष्टदले पुनः।। २८।।
भैरवानष्ट चाभ्यर्चेत् तद्बाह्ये च चतुर्दले। मातङ्ग्याद्या यजेन्मन्त्री तद्बाह्ये गणपादिकान्।। २९।।
सरस्वत्यादिकान् मन्त्री तथा च प्रयजेत् ततः। लोकपालान् यजेद्बाह्ये तदस्त्राणि ततो बहिः।।३०।।
एवं सम्पूज्य मातङ्गीं यथाशक्ति मनुं जपेत्। पुरभ्यर्च्याङ्गषट्कं सुमिष्टान्नैश्च पानकैः ।। ३१।।
सुदुग्धैश्च निवेद्याथ देवीं नत्वा ततो बलिम्। दद्याद् भक्तेन मन्त्रज्ञस्तेनेष्टं लभतेऽचिरात्।। ३२।।
नमो भगवतीत्युक्त्वा मातङ्गीश्वरि तत्परम्। इमं बलिं गृह्णयुग्मं स्वाहाशब्दमथोच्चरेत्।। ३३।।
बलिमन्त्रोऽयमाख्यातः सर्वकामफलप्रदः।..।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि दक्षिणामूर्तिऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि मातङ्गीश्वरीदेवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा प्रागवन्मातृकां विन्यस्य, अङ्गुष्ठयोः द्रां द्राविण्यै मातङ्गीश्वरीदेवतायै नमः। तर्जन्योः शों शोषिण्यै मा०। मध्यमयोः बं बन्धिन्यै मा०। अनामिकायोः मों मोहिन्यै मा०। कनिष्ठिकयोः आं आकर्षिण्यै मा०। करतलयोः ऐं मकरध्वजाय ह्रीं नमः। इति विन्यस्य, शिखायां ऐंक्लींसौः नमः। शिरसि ऐंह्रींश्रीं नमः। ललाटे ॐ नमः। भ्रूमध्ये नमो०। दक्षनेत्रे भगवति०। वामे श्रीमातङ्गीश्वरि०। दक्षश्रोत्रे सर्वजनमनोहरि०। वामे सर्वमुखरञ्जनि०। दक्षनासायां क्लीं वामायां ह्रीं०। मुखे श्रीं०। दक्षगण्डे सर्वराजवशङ्करि०। वामे सर्वस्त्रीपुरुषवशङ्करि०। ककुदि सर्वदुष्टमृगवशङ्करि०। दक्षांसे सर्वसत्त्ववशङ्करि०। वामे सर्वलोकवशङ्करि०। उरसि अमुकं०। दक्षस्तने मे०। वामे वशं०। हृदि आनय०। नाभौ स्वाहा०। लिङ्गे श्रींह्रींऐं०। मूलाधारे सौःक्लींऐं०। इति विन्यस्य, ऐंह्रींश्रीं सर्वजनमनोहरि हृदयाय नमः। ३ँ सर्वमुखरञ्जनि शिरसे स्वाहा। ३ँ क्लींह्रींश्रीं सर्वराजवशङ्करि शिखायै वषट्। ३ँ सर्वस्त्रीपुरुषवशङ्करि कवचाय हुं। ३ँ सर्वदुष्टमृगवशङ्करि नेत्राभ्यां वौषट्। ३ँ सर्वसत्त्ववशङ्करि अस्त्राय फट्। इति करषडङ्गन्यासं विधाय, कुक्षिदक्षवामपार्श्वहृदयनाभिषु पुनर्द्राविण्याद्याः पञ्च विन्यस्य, दक्षपादाङ्गुलिमूले आं ब्राह्म्यै मा०। एवं गुल्फसन्धि-दक्षजानु-दक्षोरुमूलवामोरुमूल-तज्जानुगुल्फ-सन्ध्यङ्गुलीमूलेषु माहेश्वर्यादिमहालक्ष्म्यन्ता विन्यस्य, वामदोर्मूले लक्ष्म्यै मा०। तन्मध्यसन्धौ सरस्वत्यै मा०। मणिबन्धे रत्यै मा०। अङ्गुलीमूले प्रीत्यै मा०। दक्षकराङ्गुलीमूले कीर्त्यै मा०। मणिबन्धे कान्त्यै मा०। मध्यसन्धौ पुष्ट्यै मा०।

मूले तुष्ट्यै मा०। शिरसि वामायै मा०। भ्रूमध्ये ज्येष्ठायै मा०। दक्षनेत्रे रौद्र्यै मा०। वामे शान्त्यै मा०। दक्षकर्णे श्रद्धायै मा०। वामे वागीश्वर्य्यै मा०। गुदे क्रियाशक्त्यै मा०। दक्षनसि लक्ष्म्यै मा०। वामे सृष्ट्यै मा०। मुखे मोहिन्यै मा०। दक्षगण्डे प्रमथायै मा०। वामे भाविन्यै मा०। जिह्वाग्रे विद्युल्लतायै मा०। मूलाधारे चिच्छक्त्यै मा०। स्वाधिष्ठाने सुन्दरानन्दायै मा०। तालुनि—नागवल्ल्यै[1] मा०। इति विन्यस्य, दक्षपादाङ्गुलिमूले अं असिताङ्गभैरवाय नमः। गुल्फसन्धौ इं रुरुभैरवाय नमः। जानुनि उं चण्डभैरवाय नमः। दक्षोरुमूले ॠं क्रोधभैरवाय नमः। वामे लृं उन्मत्तभैरवाय नमः। जानुनि एं कपालिभैरवाय नमः। गुल्फसन्धौ ओं भीषणभैरवाय नमः। अङ्गुलिमूलेषु अं संहारभैरवाय।। हृदि मातङ्ग्यै मा०। नाभौ महामातङ्ग्यै मा०। शिरसि सिद्धलक्ष्म्यै मा०। गुदे लक्ष्म्यै मा०।। शिरसि गणेशाय मा०। भ्रूमध्ये दुर्गायै मा०। मुखे वटुकाय मा०। कण्ठे क्षेत्रपालाय मा०। इति विन्यस्य, मूलेन सर्वाङ्गे व्यापकं कृत्वा मुखे सरस्वत्यै मा०। भ्रूमध्ये लक्ष्म्यै मा०। दक्षचरणे शङ्खनिधये मा०। इति विंन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना त्रिकोणं विधाय, तद्बहिः। पञ्चकोणं तद्बहिरष्टदलं तद्बहिः षोडशदलं तद्बहिः पुनरष्टदलं तद्बहिश्चतुर्दलं तद्बहिश्चतुर्द्वारोपेतं चतुरस्रत्रयमिति पूजाचक्रं निर्माय, स्वपुरतः पीठादौ संस्थाप्य मूलेनाभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् मातङ्गीपीठमभ्यर्च्य, तत्र प्राग्वन्मूर्तिकल्पनादिपुष्पोपचारान्ते लयाङ्गमभ्यर्च्य, त्रिकोणाभ्यन्तरे प्राग्वत् षडङ्गानि सम्पूज्य, त्रिकोणे प्राग्वत् रत्यादित्रयमभ्यर्च्य, पञ्चकोणेषु द्राविण्यादिपञ्चकं देव्यग्रादिप्रादक्षिण्येनाभ्यर्च्य, अष्टपत्रेषु ब्राह्म्याद्यष्टकं तदग्रेषु लक्ष्म्याद्यष्टकं षोडशपत्रेषु वामादिशक्तिषोडशकं बाह्येऽष्टदले भैरवाष्टकं चतुर्दले मातङ्ग्यादिचतुष्कमन्तश्चतुरस्रस्याग्नेयादिकोणेषु गणेशादिचतुष्कं देव्यग्रादिद्वारचतुष्टये न्यासोक्तं सरस्वत्यादिचतुष्कं तद्बहिर्लोकपालांस्तद्बहिस्तदस्त्राणि च सम्पूज्य, मूलमन्त्रमृष्यादिन्यासपूर्वकं यथाशक्ति जपित्वा जपं समर्प्य धूपदीपौ निवेद्य, नैवेद्यं प्राग्वत् संस्कृत्य ''ॐ नमो भगवति मातङ्गीश्वरि इमं बलिं गृह्ण २ स्वाहा'' इति नैवेद्यमुत्सृज्य, देव्या उत्तरे भागे वायव्यादीशानान्तं पङ्क्तिक्रमेण— ऐँ गुरुभ्यो नमः। एवं परमगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो नमः। परमाचार्यगुरुभ्यो नमः। आदिसिद्धगुरुभ्यो नमः। अस्मद्गुरुभ्यो नमः। इति सम्पूज्य समापयेद् इति।। तथा—

पूर्वमेव जपेल्लक्षं पुरश्चरणसिद्धये । पलाशपुष्पैस्त्रिस्वादुयुक्तैरन्तेऽयुतं हुनेत् ।। ३४।।
तर्पणं मार्जनं कुर्याद्भोजयेद् भूसुरानपि। कुमारीर्भोजयेच्चापि वशयेत् क्षोभयेज्जगत्।। ३५।।
मातङ्गीविग्रहो भूत्वा सर्वकर्माणि साधयेत्। कुण्डे वा स्थण्डिले वाथ विदध्यात् काम्यकर्म च।।३६।।
रक्तवस्त्रपरीताङ्गो रक्तमाल्यानुलेपनः। घृताक्तैर्गुग्गुलैर्हुत्वा राज्ञः स वशयेत् सुधीः।। ३७।।
मल्लिकाजातिपुन्नागैर्जुहुयाद् भाग्यवान् भवेत्। राज्यार्थी बिल्वपत्रैश्च हुनेत् पद्मैर्विशेषतः।। ३८।।
श्रीकामः श्वेतपुष्पैश्च पीतैर्वापि च संहुनेत्। उत्पलैर्धनकामस्तु लक्ष्मीपुष्पैश्च[2] होमयेत्।। ३९।।
बन्धूकैश्चैव वागर्थी किंशुकैर्बकुलैर्हुनेत्। वश्यार्थी मधुसंयुक्तैर्मधूककुसुमैर्हुनेत् ।। ४०।।
आकर्षणे तु लवणैस्तिलैर्मधुरसंयुतैः। वञ्जुलैर्वृष्टिमाप्नोति गुडूचीभिर्ज्वरं हरेत्।। ४१।।
अन्नाय जुहुयादन्नं धनार्थी शालितण्डुलैः। गन्धद्रव्येण होमस्तु सर्वसौभाग्यदो भवेत्।। ४२।।

---

१. 'वत्यै' 'बुद्ध्यै' ख. पाठः। २. 'पत्रैः' ख. पाठः।

कुङ्कुमै रोचनाभिर्वा होमो वश्यार्थिनां मतः। नन्द्यावर्तैश्च वागर्थी त्र्यर्थी निम्बप्रसूनकैः।। ४३।।
पलाशपुष्पैस्तेजोर्थी कपिलाज्येन वा हुनेत्। शत्रोरुन्मादकृद्धोम उन्मादकुसुमैरपि।। ४४।।
विषवृक्षोत्थनिमम्बाख्यश्लेष्मान्तकविभीतकैः। उलूककाकगृध्रोत्थपक्षैस्तैलपरिप्लुतैः।। ४५।।

विषवृक्षः कोचिलेति प्रसिद्धः। श्लेष्मान्तको लसोडीति प्रसिद्धः कान्यकुब्जभाषया। ''पिचुमन्दकतैलसेवितैर्बलिभुक्–कौशिकगृध्रपक्षकै''रिति मनुकोशवाक्यात्।

होमयेद्रिपुनाशाय निशायां वह्निकुण्डके। पायसैर्गुडसम्मिश्रैः खण्डैरिक्त(क्षु)रसैस्तथा।। ४६।।
उन्मादनाशनो होमः पायसैर्घृतसम्प्लुतैः। मरिचं तिलतैलाक्तं कासश्वासज्वरापहम्।। ४७।।
निर्गुण्डीमूलहोमेन निगडस्य च मोचनम्। इति। तथा–
अथातः सम्प्रवक्ष्यामि जीवस्याकर्षणं परम्। साध्यप्रतिकृतीः कृत्वा चतस्रो मन्त्रवित्तमः।। १।।
एका साध्यर्क्षवृक्षोत्था मधूच्छिष्टेन चापरा। तृतीया[१] पिष्टसम्भूता मृदुत्था च ततः परम्।। २।।
हृद्यालिखितसाध्याख्याः कृतासुस्थापनाः शुभाः। एताः स्पृष्ट्वा जपेन्मन्त्रमष्टोत्तरशतं पृथक्।।३।।
कुण्डाधो व्यङ्गुलां मूर्तिमुत्तानां तरुजां खनेत्। स्वासनाधः पिष्टभवां मृदुत्थां निखनेत् ततः।।४।।
पादन्यासस्थलाधस्ताल्लम्बयेदूर्ध्वमम्बरे । मधूच्छिष्टमयीमूर्ध्वपादामथाप्यवाङ्मुखीम्।। ५।।
पोतलोणं घृतं शत्रुपादपांसुं तथैव च। गुडमाक्षिकसंयुक्तं कुडवं पेषयेत् ततः।। ६।।
तेन प्रतिकृतिं कृत्वा स्पष्टाङ्गीमतिमञ्जुलाम्। रक्तमाल्याम्बरालेपः कृतन्यासविधिः स्वयम्।। ७।।
प्रतिमायां तु संहारवर्त्मनाणुं प्रविन्यसेत्। नामप्रतिष्ठितप्राणां मन्त्री तदनु पूर्ववत् ।। ८।।
असिना सप्तधा छित्त्वा तां साध्यर्क्षतरूद्भवे। अनले जुहुयात् साध्यं संस्मरंश्च निशामुखे।। ९।।
एकोऽङ्घ्रिरूरुमूलादिर्द्वितीयोऽर्धशरीरतः। तृतीयो बाहुमूलादिश्चतुर्थो मस्तकेन च।। १०।।
भागस्तु पञ्चमो दोष्णा षष्ठो देहार्धतः परः। ऊरुमूलादितस्त्वेवं स्त्रीणां वामादि कल्पयेत्।। ११।।
पुंसां दक्षिणभागादिरेकं वा सप्तधा पृथक्। अथवैकादशांशो वा गुल्फजानूरुखण्डतः।। १२।।
एवं सप्ताहतो नार्य्यः संक्षुब्धा मदनातुराः। स्विद्यदङ्गयो वेपमानाः साधके न्यस्तमानसाः।। १३।।
विश्लिष्यत्पृथुलोत्तुङ्गनितम्बवसनाः शुभाः। त्राहि त्राहि क्षमस्वेति पश्य मां न परित्यज।। १४।।
इत्थं सर्वा व्याहरन्त्यः करुणायुक्तमानसाः। पतन्ति साधकस्याग्रे मदनानलदीपिताः।। १५।।
तिष्ठन्ति दासवच्चास्य मन्त्रिणो योषितः सदा। लवणं तिलतैलाक्तं होमयेच्छत्रुनाशनम्।। १६।।
हरिद्राचूर्णसंयुक्तं लवणं स्तम्भने मतम्।...।।

इति। नक्षत्रवृक्षास्तु प्रागेवोक्ताः (पृ० २०७)। सारसङ्ग्रहे–

मातङ्गीप्रीतये मन्त्री भौमवारे प्रपूजयेत्। कन्यामेकां तथा तिस्रः पञ्च सप्त तथा पुनः।। १।।
स्वादुभिर्भक्ष्यभोज्यैश्च स्वन्नपानैर्मनोहरैः। पुष्पैर्धूपैश्च दीपैश्च स्तुत्याः पूज्याश्च देशिकैः।। २।।
वीणाहस्ता गायकाश्च पूज्याः सर्वेऽपि यत्नतः। सर्ववर्णा रमण्यश्च स्वन्नपानैर्मनोहरैः।। ३।।

---

[१] 'परा कुलालमृद्भूता शालिपिष्टोद्भवा परा' ख. पाठः।

अर्चनीयाश्च मन्त्रज्ञैः सर्वभावेन सर्वदा। सर्वा नार्यो भावनीयाः श्यामा एवात्र मन्त्रिणा।। ४।।
भौमवारे तथा पिष्टमयान् दीपान् प्रकारयेत्। प्रज्वालयेद् घृतेनैतान् मातङ्गीप्रीतये बुधः।। ५।।
मातङ्गीप्रीतये मन्त्री योगिन्यष्टाष्टकं यजेत्। वाग्भवाद्याः प्रपूज्याश्च प्रोच्यन्ते ता यथाक्रमम्।। ६।।
दिव्याद्या योगिनी पूर्वा महदाद्या तथा परा। सिद्धादिका गणेश्वर्य्या प्रतासिन्यपि[1] कीर्तिता।। ७।।
डाकिनी च तथा काली कालरात्री निशाचरी। ऊर्ध्वकेशी विरूपाक्षी शुष्काङ्गी[2] भोगिनी मता।।८।।
जटाधारिण्यपि तथा वीरभरण्य[3]पीरिता। धूम्राक्षी षोडशाप्येता ईशानादि प्रपूजयेत्।। ९।।
कलहाद्या प्रिया चान्या राक्षस्यन्या प्रकीर्तिता। गदिता घोररक्ताक्षी विश्वरूपा भयङ्करी।। १०।।
वाराह्या च कुमारी स्यान्मुण्डधारिण्यपीरिता। भयासुरा रुद्रहुङ्कार्य्यपि प्रोक्ता च भीषणा।। ११।।
त्रिपुरान्तकभैरव्यौ ध्वंसिन्यपि चं सम्मता। क्रोधिनी दुर्मदा ज्ञेया आग्नेयादि प्रपूजयेत्।। १२।।
हंसा च दित्या खट्वाङ्गी दीर्घा लम्बोष्ठयान्विता। तापिनीमन्त्रयोगिन्यौ कालाग्निर्ग्राहिणी परा।।१३।।
चक्रिण्यन्या च कङ्काली भुवनेश्वर्य्यपीरिता। हुङ्कारी स्याच्च कौमारी यमदूती करालिनी।। १४।।
नैर्ऋत्यादि यजेदेता योगिनीः षोडश क्रमात्। केशिनी मदिरा पश्चाल्लोमजङ्घा तथा परा।। १५।।
अपधारिण्यपि परा भ्रामरी कार्मुकी मता। लोमकाधोमुखी तद्वन्मता कुण्डोग्ररूपिणी।। १६।।
व्याघ्री सर्वजटी चान्या विकटा घोरया सह। कपालिनी समुद्दिष्टा षोडश्यरिविनाशिनी।। १७।।
वायव्यादि यजेदेता योगिनीः षोडश क्रमात्। लक्षार्धं प्रजपेन्मन्त्रं क्षोभयेत् सर्वयोषितः।। १८।।
पृथ्वीश्वरांस्तदर्धेन वशयेन्नात्र संशयः। तदर्धेन च सत्त्वानि वशगानि भवन्ति हि।। १९।।
दूरस्था योषितः सर्वा आयान्त्ययुतजापतः। नेदीयस्यस्तदर्धेन समायान्त्येव निश्चितम्।। २०।।
सहस्रत्रयतः[4] सर्वा वाञ्छिताप्तिर्भवेद् ध्रुवम्। मातङ्गीशीमहामन्त्रस्त्रिषु लोकेषु विश्रुतः।। २१।।
सकृदुच्चारमात्रेण सर्वलोकप्रियो भवेत्। गोपनीया प्रयत्नेन भोगमोक्षफलप्रदा।। २२।।

आदौ वह्निपुरे लिखेत् प्रविलसद्वाक्शक्तिमाराक्षरां-
स्तत्कोणेषु मनोभवाद्रितनयालक्ष्मीमनून् बाह्यतः।
षट्कोणेषु च बीजपट्कमपरान् पत्रेषु पञ्चस्वथो
वह्न्यम्भोधिरसाष्टसप्तकमितान् मन्त्रस्य वर्णान् बहिः।। २३।।
पत्रेष्वष्टसु रुद्रदिग्युगवसुद्वन्द्वग्रहद्व्यक्षरा-
नन्ते तर्कमितांस्तथा[5] स्वपरितो मन्त्रेण संवेष्टयेत्।
बाह्ये मातृकया क्रमोत्क्रमवशात् साध्याक्षरैर्भूपुरं
भूगेहास्त्रिषु साध्यनामसहितं कामं लिखेन्मन्त्रवित्।। २४।।

---

१. 'प्रेताशिन्यपि' ख. पाठः। २. 'शुक्लाङ्गी' ख. पाठः। ३. 'भद्रिण्यपी' ख. पाठः। ४. 'जपतः' ख. पाठः।
५. 'ततश्च' ख. पाठः।

सुवर्णरचिते पट्टे लेखन्या स्वर्णरौप्ययो:। रजते फलके वापि भूर्जे वा सुमनोहरे।। २५।।
सरोचनाकुङ्कुमचन्दनेन कस्तूरिकालक्तकरक्तसीतै:।
स्वयं शुचि: साधकमानवानां सौभाग्यसिद्ध्यै च लिखेत् सुयन्त्रम्।। २६।।
एतद्यन्त्रं लिखेत्वैवं घृतसम्पातपूर्वकम्। हुत्वा प्रजप्य सम्पूज्य गुलिकीकृत्य साधक:।। २७।।
साभिषेक: स्वयं बाहौ दक्षिणे तद्धि धारयेत्। पूज्यते त्रिदशाद्यैश्च किं पुनर्मानुषोत्तमै:[1]।। २८।।
आयुरारोग्यमैश्वर्यमन्यद्यद्यत् स्ववाञ्छितम्। पुत्रपौत्रादिकं चापि लभते नात्र संशय:।। २९।।

इति। अस्यार्थ:— भूर्जादौ प्रोक्तद्रव्यैरुक्तलेखिन्या त्रिकोणमालिख्य, तन्मध्ये साधकनामसहितं वाग्बीजं शक्तिबीजं मारबीजं चालिख्य, तत्कोणेषु कामबीजं शक्तिबीजं श्रीबीजञ्चालिख्य, तद्बहि: षट्कोणं कृत्वा तत्कोणेषु स्वाग्रादि प्रादक्षिण्येन मन्त्रादिगतबीजषट्कमालिख्य, तद्बहि: पञ्चदलपद्मं विरच्य, तत्र प्रथमदले ओंनमो, द्वितीये भगवति, तृतीये मातङ्गीश्वरि, चतुर्थे सर्वजनमनोहारि, पञ्चमे सर्वमुखरञ्जिनि, इति स्वाग्रादिप्रादक्षिण्येन विलिख्य, तद्बहिरष्टदलपद्मं, विरच्य तद्दलेषु स्वाग्रादिप्रादक्षिण्येन प्रथमे—कामशक्ति श्रीबीजानि सर्वराजवशङ्करि, इति, विलिख्य, द्वितीये—सर्वस्त्रीपुरुषवशङ्करि इति, तृतीये— सर्वदुष्टमृगवशङ्करि इति, चतुर्थे— सर्वसत्त्ववशङ्करि इति, पञ्चमे— सर्वलोकवशङ्करि, इति, षष्ठे—अमुकं मे वशमानय इति, सप्तमे—स्वाहा इति, अष्टमे—अन्तिमबीजषट्कं विलिख्य, तद्बहिर्वृत्तद्वयं कृत्वा वृत्तयोरन्तराले स्वाग्रादिप्रादक्षिण्येन मूलमन्त्रेणावेष्ट्य, तद्बहिर्वृत्तं कृत्वा तत्रस्थवीथ्यां स्वाग्रादिप्रादक्षिण्येन सबिन्दुभिर्मातृकावर्णैरावेष्ट्यान्ते साध्यनामालिख्य, तद्बहिर्वृत्तं कृत्वा तत्रस्थवीथ्यां साध्यनामाक्षराणि विलोमरीत्या विलिख्य, क्षकाराद्यकारान्तान् मातृकावर्णान् सबिन्दूनालिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु साध्यनामसहितं कामबीजं विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। जीवस्याकर्षणे क्रमस्तु—साध्यर्क्षवृक्षेण मधूच्छिष्टेन शालितण्डुलपिष्टेन कुलालहस्तमृदा चैकैकां पुत्तलीं कृत्वा, तासां हृदयेषु "अमुकं मे वशमानय" इति साध्यनामालिख्य, तासु साध्यप्राणान् संस्थाप्य ता: स्पृष्ट्वा प्रत्येकं मूलमन्त्रमष्टोत्तरशतं जपेत्। अत्र मूलमन्त्रजपे अमुकपदस्थाने साध्यनाम योजयित्वा जपेत्।

अमुकपदं यद्रूपं यत्र मन्त्रेषु दृश्यते। साध्याभिधानं तद्रूपं तत्र स्थाने निवेशयेत्।।

इति नारायणीयवचनात्।। कुण्डमध्ये द्व्यङ्गुलाध: काष्ठमयीं पुत्तलीमुत्तानरूपां निखाय स्वासनस्याधस्तथा पिष्टमयीं स्वपादन्यासस्थाने मृण्मयीं निक्षिपेत्। अत्र लवणेन सह निखनेदिति सम्प्रदाय:। ततो मधूच्छिष्टमयीमधोमुखीमूर्ध्वपादामर्कतूलतन्तुना पादयोर्बद्ध्वा, कुण्डादूर्ध्वं धूमेन स्पृश्यमानां लम्बयित्वा, कुडवमात्रं लवणं घृतमधुगुडसहितं श्लक्ष्णं पेषयित्वा, तेन पुत्तलीं कृत्वा स्वयं यथोक्तवेशन्यासादियुक्तो लवणमय्यां पुत्तल्यां मूलविद्याया: प्रोक्तपदानि संहाररीत्या विन्यस्य, अन्यानपि स्वदेहकृतन्यासान् संहाररीत्यैव विन्यस्य कृतप्राणप्रतिष्ठामूरुमूलात् पादद्वयाग्रान्तां एकैकं भागं कटे: कण्ठावधि दैर्घ्येण द्विधाकृतभागद्वयं बाहुद्वयेन भागद्वयं कण्ठादूर्ध्वं भागमेकमिति सप्तधा तीक्ष्णशस्त्रेण च्छित्त्वा, घृतप्लुतमेकमेकं भागं संस्कृतेऽग्नौ साध्यर्क्षवृक्षसमिद्धे साध्यं स्मरन्निशामुखे मूलमन्त्रेण जुहुयात्। साध्य: पुरुषश्चेत्तदा दक्षिणपादमारभ्य जुहुयात्, स्त्री चेद्वामपादमारभ्येति। अथवैकमेकं भागं सप्तधा सप्तधा कृत्वोक्तविधिना जुहुयात्। यद्वा— गुल्फद्वये जानुद्वये छेदेनैकादशधा कृत्वा जुहुयादिति। पुत्तलीमानं तु मात्स्येन्द्रसंहितायाम्—

---

[1] 'मानवोत्तमै:' ख. पाठ:।

आयामः पादयोस्तस्या आकटेश्च[१]तुरङ्गुलम्। पादोनद्व्यङ्गुला कुक्षिस्तावदेवाङ्गुलः करः।। १ ।।
अङ्गुलद्वयमावक्त्रात् कण्ठदेशस्य मानकम्। सशिरोवक्त्रमानं तु सार्धद्व्यङ्गुलमीरितम्।। २ ।।
द्वादशाङ्गुलिभिः सर्वाः सम्यक् पुत्तलिकाः शुभाः।.......................................।।

इति। मातङ्गमनुकोशे— प्रोक्तसर्वपदतस्तार्तीयं राज्यलक्ष्मी च। प्रदे इति पदेऽन्ते पञ्चनवत्यक्षरो मन्त्रः।। अयमर्थः— प्रागुद्धृताष्टाशीत्यक्षरराजमातङ्गिनीमन्त्रे सर्वसत्त्ववशङ्करीति पदानन्तरं ''सौः राज्यलक्ष्मीप्रदे'' इति सप्ताक्षराणि संयोज्यानन्तरं सर्वलोकममुकमित्यादि वदेदिति। एवं पञ्चनवत्यक्षरो मन्त्रो भवति। तथा—

ऋष्यादि पूर्वमुक्तं षड्दीर्घयुजा स्वरेणाङ्गविधिः। विन्यस्याङ्गानि ततो विचिन्तयेन्मनुदेवतामेवम्।।१ ।।

दीर्घयुजा स्वरेण। तेन आंईंऊं इत्यादयः षडङ्गमन्त्राः। एवं पूर्वोक्तप्रकारेण। तेन राजमातङ्गिनीवद् ध्यानपूजादिकं सर्वं ज्ञेयम्। तथा—

मायाहृदोरथान्ते ब्रह्मश्रीराजितेऽक्षरान् प्रोक्त्वा। पदमथ राजपूजिते इति तत्परतो जपे विजये।।१ ।।
गौर्यथ गान्धारि ततो देयं त्रिभुवनवशङ्करीति पदम्। सर्वस्त्रीपुरुषवशङ्करि सुसुदुदुघे ततो घे च।।२।।
वावामायास्वाहान्तः प्रणवादिरयं भवेन्मन्त्रः।.......................................।।

माया ह्रीं, हृत् नमः, अन्यत्सर्वं स्वरूपं। तेन चतुष्पञ्चाशदक्षरोऽयं मन्त्रः। ओं ह्रींनमो ब्रह्मश्रीराजिते राजपूजिते जपे विजये गौरि गान्धारि त्रिभुवनवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सुसुदुदुघेघेवावा ह्रीं स्वाहा। अयं मन्त्रः प्रणवादिः। प्रपञ्चसारे तु— सत्रिभुवनवशङ्कर्यन्ते सर्वलोकवशङ्करीति (सर्वस्त्रीपुरुषवशङ्करीति च) पदं प्रोक्तं। प्रणवो नोद्धृतस्तेनैकाधिकषष्ट्यक्षरो मन्त्रः। तत्र गौरी देवता निचृच्छन्दः। अत्र चतु(ष्पञ्चा)शदक्षरे तु—

ऋषिरस्याजश्छन्दो निचृद्गायत्रमीरितं प्राज्ञैः। वाञ्छितफलदा देवी प्रोक्ता श्रीराजमातङ्गी।। ३ ।।
अङ्गानि मायया स्याद् ध्यानं पूर्वोक्तमेव विज्ञेयम्।.......................................।।

ध्यानमित्युपलक्षणं तेन पूजाजपादिकमपि तथैव ज्ञेयम्।। गौरी देवता पक्षे तु प्रपञ्चसारे—(३२ प०। श्लो० ३७)

सचतुर्दशभिर्दशभिस्तथाष्टभिश्चाष्टभिस्तथा दशभिः। एकादशभिर्मन्त्राक्षरैः क्रमादुच्यते षडङ्गविधिः।।

ह्रीं नमो ब्रह्मश्रीराजिते राजपूजिते हृदयाय नमः। जपे विजये गौरि गान्धारि शिरसे स्वाहा। त्रिभुवनवशङ्करि शिखा०। सर्वलोकवशङ्करि कवचाय०। सर्वस्त्रीपुरुषवशङ्करि नेत्रत्रयाय०। सुसुदुदुघेघेवावाह्रीं स्वाहा अस्त्रं। ध्यानं तत्रैव—

असकलशशिराजन्मौलिराबद्धपाशाङ्कुशरुचिरकराब्जा बन्धुजीवारुणाङ्गी।
अमरनिकरवन्द्या त्रीक्षणा शोणलेपांशुककुसुमयुता स्यात् सम्पदे पार्वती नः।। ४।।

''आराधयेत् तदङ्गैर्मातृभिराशाधिपास्त्रैश्च''। इति मातृभिर्ब्राह्म्यादिभिः। अत्र गौरीदेवतापक्षे भुवनेश्वरीपीठपूजनं ज्ञेयम्। (तदग्रे वक्ष्यते)

अयुतं प्रजपेज्जुहुयात् पायसैर्घृतप्लुतैर्दशांशेन। तद्वच्च तर्पणादि कुर्यादिष्टार्थसिद्धये मन्त्री।।५।।

इति। मातङ्गमनुकोशे—

---

[१] 'कट्यात्' ख. पाठः।

राजमुखि—पदाद्राजाभिमुखि वश्यपूर्वमुखि च पदम्। भुवनेशीश्रीकामान् वदेत् ततो देवदेवि पदम्।।
तदन्ते महादेविपदं पदमथ देवाधिदेवीति। सर्वजनस्य मुखं मम वश्यं कुरु द्विस्ततः स्वाहा।।
प्रणवादिरयं मन्त्रः प्रोक्त श्रीवश्यमातङ्गयाः। जपपूजाद्यं सर्वं प्रोक्तं[1] श्रीराजमातङ्गीवत्।।

इति। प्रपञ्चसारे – (३२–४६)

दशभिः सप्तभिश्चैव चतुर्भिः करणाक्षरैः। पञ्चभिः सप्तदशभिर्वर्णैरङ्गक्रिया मनोः।। १ ।।

करणानि चत्वारि। तेन ओं राजमुखि राजाभिमुखि हृदयाय०। वश्यमुखि ह्रींश्रींक्लीं शिरसे०। देवदेवि शिखा०। महादेवि कवचाय०। देवाधिदेवि नेत्र०। सर्वजनस्य मुखं मम वश्यं कुरुकुरु स्वाहा अस्त्राय०। मातङ्गमनुकोशे—

मायाहृदोरथान्ते[2] हिलिहिलिपदमुच्चरेच्च ततः। चण्डपदान्मातङ्गि[3] वह्निजायेति मन्त्रोऽयम्।। १ ।।
पूजाजपादि सर्वं सम्प्रोक्तं राजमातङ्गयाः। अयुतजपाद् घृतपायसहोमात् सिद्धो भवेन्मन्त्रः।। २ ।।

इति। तथा—

वाग्भवं हृदयं चाथ श्रीराजमातङ्गिपदम्। वदेदमोघे सत्यवादिनि मम कर्णे—पदं ततः।। १ ।।
अवतरपदं वीप्स्य सत्यं कथेति कथ पदम्। एह्येहि पदाभ्यां परतः श्रीमातङ्ग्यै नमस्तदनु।।२।।

वीप्स्य द्विरुच्चार्य।

मन्त्रोऽयं लक्षजपाद् दशांशहोमाच्च पायसघृताद्यैः। सिद्धः कर्णे कथयति शुभाशुभं पृच्छकस्याशु।।३।।

इति। तथा—

तस्मादपि शतगुणफलदं देव्या मूलमन्त्रमथ वच्मि। सिद्धेन येन बहवो मन्त्राः पठनेन सिद्ध्यन्ति।।
वाङ्मायाश्रीबीजं बालाबीजत्रयं ततः कामः। कायाश्रीबीजमथो श्रीमातङ्गीश्वरीति पदम्।। २।।
सर्ववशङ्करिपदतः स्वाहाकारं ततश्च वदेत्। सद्यः फलदो ज्ञेयः श्रीमातङ्गया मूलमन्त्रोऽयम्।।३।।

तस्मादित्यष्टनवत्यक्षरमन्त्रात्। मन्त्रोद्धारः सुगमः। तथा—

ऋषिरस्य दक्षिणामूर्तिश्छन्दो निचृदन्विता च गायत्री। वाञ्छितफलदा ज्ञेया श्रीमातङ्गीश्वरी देवी।।
बालाबीजैस्त्रिभिरथ द्विप्रोक्तैः करषडङ्गविधिः। ध्यात्वा प्राग्वद् देवीं सम्यग् गन्धादिनार्चयेद्भक्त्या।।

प्राग्वदष्टनवत्यक्षरमन्त्रवत्। पूजनमपि तत्रोक्तमेव। तथा—

श्रीमातङ्गीदेव्याः सिद्ध्यति मन्त्रस्त्रिलक्षजपात्। पुष्पैर्मधूकजैरथ मधुरत्रयलोलितैः कृतो होमः।।६।।
सघृतेन पायसेन च फलैस्तथा कदल्या फलदायी।...।।

इति। प्रपञ्चसारे— ‘‘कामिनि रञ्जिनि ठद्वयमित्यपरम्। ठद्वयं स्वाहाकारः।

ऋषिः सम्मोहनः प्रोक्तो निचृच्छन्दोऽस्य देवता। सर्वसम्मोहिनी चाङ्गं द्विरावृत्तैर्पदैर्भवेत्।। १ ।।
श्यामाङ्गी वल्लकीं दोर्भ्यां वादयन्ती सुभूषणा। चन्द्रावतंसा विविधैर्गानैर्मोहयते जगत्।। २।।
पूजा मातङ्गिनीपीठे रत्याद्यास्तु त्रिकोणगाः। पञ्चबाणास्तताः पूज्याः केसरेष्वङ्गपूजनम्।। ३।।
अनङ्गकुसुमाद्यास्तु पत्रेष्वग्रेषु मातरः। लोकपालैश्च वज्राद्यैः सप्तावृत्तिरियं मता।। ४।।

---

१. ‘विज्ञेयं’ ख. पाठः। २. ‘अथ वौषट् सर्वतो हिलि’ ख. पाठः। ३. ‘मातङ्गिनि’ ख. पाठः।

प्रजपेदयुतद्वन्द्वं दशांशं जुहुयात् ततः। मधूकजैस्त्रिमध्वक्तैः सर्वं सम्मोहयेज्जगत्।। ५।।

प्रयोगः सुगम इति। मातङ्गमनुकोशे–

उच्छिष्टशब्दं पुरतो निधाय चण्डालि मातङ्गि पदे च भूयः।
पदं ततः सर्ववशङ्करीति नमोऽग्निपत्न्योर्मनुरेष मध्ये।। १।।

नमःपदादिस्वाहापदान्त एकोनविंशत्यक्षरो मन्त्रः। अत्र केचित्– चण्डालीति दीर्घं चकारं वदन्ति, तन्न ''ह्रन्नेत्रं (कर्णः) चान्तनेत्रे ष्ट कूर्मश्चैवेन्दुखण्डवान्'' इति सारसङ्ग्रहवचनान्मन्त्रोद्धारे चकारस्य ह्रस्वत्वदर्शनात्। अस्य भेदानाह त्त्रैव– ''तारत्रयादिर्मनुरेष सद्यः सर्वार्थसिद्धिं विदधाति नूनम्।'' तारत्रयं वाङ्मायाश्रीबीजात्मकम्। तथा–

कामराजभुवनेश्वरीरमाबीजयुक् सपदि विश्ववश्यकृत्।
मन्त्र एष यदि वा स्मरादिकः स्यादशेषजनरञ्जने क्षमः।। १।।

इति। प्रथमोक्तत्रितारादिमन्त्रस्य सतुम्बुरुर्नारद ऋषिः। इतरयोस्तु–

मदनोऽस्य ऋषिः प्रोक्तश्छन्दो निचृदन्विता च गायत्री। विश्वस्य वशहेतुर्मातङ्गीश्वरी देवता प्रोक्ता।।
दृग्वह्निलोकानलषड्द्विवर्णैरङ्गक्रियाप्यस्य मनोः प्रदिष्टा। अङ्गानि मन्त्रवर्णैरेवं कृत्वाथ देवतां ध्यायेत्।।

कृद् द्वयम्। वह्नयस्त्रयः। लोकास्त्रयः।

मातङ्गी नवयावकार्द्रचरणामुल्लासिकृष्णांशुकां
वीणोल्लासिकरां समुन्नतकुचां मुक्ताप्रवालावलीम्।
हृद्याङ्गीं सितशङ्खकुण्डलधरां बिम्बाधरां सस्मिता-
माकीर्णालिकवेणिमब्जनयनां ध्यायेच्छुकश्यामलाम्।। ४।।
त्र्यश्रं वसुदलयुग्मं चतुरश्रं पीठमेतस्याः। त्र्यश्रेऽर्च्या रत्याद्याः पत्रेषु ब्राह्म्याद्यास्ततोऽभ्यर्च्याः।।५।।
मातङ्ग्यन्ताः सर्वा अनङ्गकुसुमादिकाश्च पत्रेषु। देवीपादतलाग्रे पूज्यास्ता बाणदेवताः सर्वाः।।६।।
अङ्गानि च तत्पार्श्वे मध्ये देवीं च यजेत् पुनः।...।।

इति। अथ प्रयोगः– तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा केवलविद्यया तारत्रयादिविद्यया वा सतुम्बुरवे नारदायऋषये नमः। इतरविद्ययोर्मदनाय ऋषये नमः। निचृद्गायत्रीच्छन्दसे नमः। श्रीमातङ्गीश्वरीदेवतायै नमः। इति यथास्थानं विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इत्युक्त्वा। नमो हृदयाय०। उच्छिष्ट शिरसे०। चण्डालि शिखायै०। मातङ्गि कवचाय०। सर्ववशङ्करि नेत्रत्रयाय०। स्वाहा अस्त्राय०। इति करषडङ्गन्यासं विधाय ध्यानमानसपूजान्ते प्राग्वत् स्वर्णादिपट्टे कुङ्कुमादिनाष्टदलद्वन्द्वमन्तर्बहिर्विभागेन कृत्वा, तदन्तरष्टदलकमलकर्णिकायां स्वाभिमुखाग्रं त्रिकोणं विधाय, पद्माद्बहिश्चतुर्द्वारयुक्तं चतुरस्त्रत्रयं च कुर्यादिति पूजाचक्रं निर्माय, स्वपुरतः संस्थाप्याभ्यर्च्यार्घ्यादिपात्रस्थापना-द्यात्मपूजान्ते प्राग्वत् मातङ्गीश्वरीपीठमभ्यर्च्य आवाहनादिपुष्पोपचारान्ते त्रिकोणकोणेषु प्राग्वद्रत्याद्याः सम्पूज्य, त्रिकोणाद्बहिः पद्मकर्णिकायामेव प्राग्वत् पञ्चबाणान् षडङ्गानि च सम्पूज्य, प्रथमाष्टदलेषु ब्राह्म्याद्याः, द्वितीयाष्टदलेष्वनङ्गकुसुमाद्याः सम्पूज्य, चतुरस्त्रे लोकपालांस्तदस्त्राणि च सम्पूज्य धूपदीपादि सर्वं शेषं समापयेदिति।। तथा–

अयमनुलोमविलोमितबालान्तःस्थस्तदा जप्तः। वाग्मितां च कवित्वं दत्ते गानस्य शक्तिमपि।।७।।
अन्यत् सर्वं प्राग्वदृषिरस्य दक्षिणामूर्तिः। अङ्गक्रिया पुरोवद् बालाबीजत्रयाभ्यासात्।। ८।।

अंसे वेणीं कुसुमनिचयां चूलिकानीलचूडां
मुक्ताभूषां पृथुकुचनतां वल्लकीं वादयन्तीम्।
माध्वीमत्तां मधुरवचनां श्यामलां कोमलाङ्गीं
मातङ्गीं तां सकलफलदां सन्ततं भावयामि।। ९।।

त्रिकपञ्चकाष्टयुगलं षोडशकाष्टौ चतुष्कं च। पीठेऽस्मिन् सम्पूज्या श्रीदेवी भक्तिभावेन।। १०।।

त्रिकं त्रिकोणं, पञ्चकेति, पञ्चदलादीनि पद्मानि।।

त्र्यस्रेऽर्च्या रत्याद्या इच्छाज्ञानक्रियाशक्तीश्च। पञ्चदलेषु ततोऽर्च्याः प्राग्वत्ता बाणदेवताः कन्याः।११।
अष्टदलेषु ब्राह्म्याद्याः कन्या दीर्घस्वरैः क्रमात् पूज्याः। बाह्येऽष्टदलेऽपि यजेदनङ्गकुसुमादिकाश्च कन्यास्ताः।१२।।
पूज्याश्च षोडशारे षोडश कन्यास्तु गन्धाद्यैः। उर्वशीकन्यकां पूर्वं मेनकां कन्यकां ततः।। १३।।
रम्भाघृताच्यौ कन्ये च मञ्जुकेशीं च कन्यकाम्। तथैव काश्यपीं कन्यां सुकेशीं कन्यकां तथा।१४।।
मञ्जुस्थलीं कन्यकां च पूजयेद्भक्तिभावतः। सनागयक्षगन्धर्वसिद्धकिन्नरकन्यकाः।। १५।।
विद्याधरकिंपुरुषपिशाचानां च कन्यकाः। पूजयेद्गन्धपुष्पाद्यैः स्वनामाद्यक्षरान्विताः।। १६।।
अभ्यर्चयेत् ततोऽष्टारे ह्यणिमासिद्धिकन्यकाम्। महिमासिद्धिकन्यां च लघिमासिद्धिकन्यकाम्।१७।।
परकायप्रवेशिन्या पूजयेत् कन्यकां ततः। कन्यकां दूरदर्शिन्यां गुटिकासिद्धिकन्यकाम्।। १८।।
कन्यामञ्जनसिद्धेश्च पादुकासिद्धिकन्यकाम्। ततश्चतुर्षु द्वारेषु पूजयेद् द्वारदेवताः।। १९।।
ततं च विततं चाथ धनं च सुषिरं सह। अग्निकोणेऽथ वटुकं गणेशं नैर्ऋते यजेत्।। २०।।
क्षेत्रपालं च वायव्यामैशान्यां योगिनीरपि। उच्छिष्टशब्दपुरतः पादुकां पूजयाम्यथ।। २१।।
स्वनामाद्यक्षरं बीजं कृत्वा गन्धादिनार्चयेत्। पुनः सर्वोपचारैश्च मध्ये भगवतीं यजेत्।। २२।।
स्वराः सर्वे श्रु[1]तियुता वामभागे ततः परम्। (रामाश्च रागिणीयुक्ताः पूज्याः पार्श्वे च दक्षिणे।२३।
अभ्यर्च्य परमेश्वर्याः पार्श्वयोः शुकसारिके। पुरतो गुरुपङ्क्तिं च स्वगुरुं पूजयेत्ततः।। २४।।)

इति। अथ प्रयोगः— तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं विधाय, शिरसि दक्षिणामूर्तिऋषये नमः। मुखे निचृद्गायत्रीछन्दसे नमः। हृदि श्रीमातङ्गीश्वर्यै देवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा। ऐं नमो हृदयाय०। क्लीं उच्छिष्ट शिरसे०। सौः चण्डालि शिखा०। ऐं मातङ्गि कवचा०। क्लीं सर्ववशङ्करि नेत्र०। सौः स्वाहा अस्त्रा०। इति षडङ्गं विधाय "अंसे वेणी" मित्यादिपूर्वोक्तेन ध्यात्वा, ध्यानमानसपूजान्ते त्रिकोणगर्भं पञ्चदलकमलं तद्बहिरष्टदलद्वयं तद्बहिः षोडशदलं तद्बहिरष्टदलं तद्बहिश्चतुर्द्वारोपेतं चतुरस्रत्रयमिति पूजाचक्रं निर्माय, प्राग्वदभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् मातङ्गीपीठमभ्यर्च्यावाहनादिपुष्पोपचारान्ते प्राग्वत् लयाङ्गं सम्पूज्य, त्रिकोणे स्वाग्रादिप्रादक्षिण्येन— रं रत्युच्छिष्टपादुकां पूजयामि। प्रीं प्रीत्युच्छिष्टपादुकां पूजयामि। मं मनोभवोच्छिष्टपा०।

---

१. 'सर्वे स्तुति' ख. पाठः।

पुनस्त्रिकोणेषु— इं इच्छाशक्त्युच्छिष्टपादुकां०। ज्ञां ज्ञानशक्त्युच्छिष्टपा०। क्रिं क्रियाशक्त्युच्छिष्टपा०। ततः पूर्ववदङ्गानि सम्पूज्य, पञ्चदलेषु— द्रां द्राविणीकन्योच्छिष्टपा०। शों शोषिणीकन्योच्छिष्टपा०। बं बन्धिनीकन्योच्छिष्टपा०। मों मोहिनीकन्योच्छिष्टपा०। आं आकर्षिणीकन्योच्छिष्टपा०। ततोऽष्टदलेषु— आं ब्राह्मीकन्योच्छिष्टपा०। ईं माहेश्वरीकन्योच्छिष्टपा०। इत्याद्यष्टशक्ती: सम्पूज्य, द्वितीयाष्टदले— अं अनङ्गकुसुमाकन्योच्छिष्टपा०, इत्यादिपूर्वोक्ता: सम्पूज्य, षोडशदलेषु— उं उर्वशीकन्योच्छिष्टपा०। में मेनकाकन्यो०। रं रम्भाकन्यो०। घृं घृताचीकन्यो०। मं मञ्जुकेशीकन्यो०। कां काश्यपीकन्यो०। सुं सुकेशीकन्योच्छिष्टपा०। मं मञ्जुस्थलीक०। नां नागक०। यं यक्षक०। गं गन्धर्वक०। सिं सिद्धक०। किं किन्नरक०। विं विद्याधरक०। किं किंपुरुषकन्या०। पिं पिशाचकन्या०। इति सम्पूज्य, तद्बहिरष्टदलेषु— अं अणिमासिद्धिकन्या०। मं महिमासिद्धिक०। लं लघिमासिद्धि०। पं परकायप्रवेशिनीसिद्धिक०। दूं दूरदर्शिनीसिद्धिक०। गुं गुटिकासिद्धिक०। अं अञ्जनसिद्धिक०। पां पादुकासिद्धिक०।। ततश्चतुर्द्वारेषु— तं ततोच्छिष्टपा०। विं विततोच्छिष्टपा०। घं घनोच्छिष्टपा०। सु. सुषिरोच्छिष्टपा०। तत आग्नेयादिकोणेषु— वं वटुकोच्छिष्टपा०। गं गणेशोच्छिष्टपा०। क्षें क्षेत्रपालोच्छिष्टपा०। यों योगिन्युच्छिष्टपा०। इति सम्पूज्य, दिगीशार्चादिदीपान्तं अष्टनवत्यक्षरप्रकरणोक्तबलिमन्त्रेण नैवेद्यमुत्सृज्य, तँत्रोक्तां गुरुपङ्क्तिं देव्या: पुरतोऽभ्यर्च्य प्राग्वत् सर्वं समापयेदिति। अत्र यद्यपि मन्त्रभेदेन पूजाभेद उक्तस्तथापि तन्त्रान्तरदर्शनान्मन्त्रभेदचतुष्टयस्यापि सङ्क्षेपविस्तारकथनार्थमेव द्वैविध्यं प्रतीयते न तु मन्त्रभेदपरत्वेनेति।। तथा च सारसङ्ग्रहे—

''बालात्रिबीजपूर्वो वा मायाद्यो मदनादिक:। त्रिताराद्यो मारशक्तिकमलाद्योऽपि वा भवेत्।। १।।
वाग्भवाद्योऽथवा मन्त्र:।'' इति मन्त्रभेदानुक्त्वान्ते विस्तारपूजनस्यैवोक्तत्वात्। एवमेव मात्स्येन्द्रसंहितायामपीति।।

मातङ्गमनुकोशे—

स्रग्वी सुवस्त्र: शुचिरप्रमत्त: प्रशान्तचित्तो नियुतं प्रजप्य।
उच्छिष्टभक्तेन बलिं निवेद्य मन्त्री निशि स्यादिति मन्त्रसिद्धि:।। १।।

बलिर्नैवेद्यम्। अयमर्थ:— प्रोक्तवेष: पुन: प्रोक्तविधिना रात्रौ देवीं सम्पूज्योच्छिष्टभक्तादिना देव्यै नैवेद्यं निवेद्य उच्छिष्टमुख एव नित्यजपं पौरश्चरणजपं चान्यत् काम्यादि वा सर्वं कुर्यादिति। नियुतलक्षं ''एका च दश च शतं च सहस्रं चायुतं च लक्षं च नियुतं चे''ति श्रुते:। अत्र पुरश्चरणाङ्गहोमद्रव्यं नोक्तं तत्र पूर्वोक्तमेव पालाशपुष्पं ग्राह्यम् ''पालाशकुसुमै: स्वादुयुक्तैर्मन्त्री यथाविधि'' इति सारसङ्ग्रहोक्तम्।। सारसङ्ग्रहे तु 'वर्णलक्षं जपेन्मन्त्रम्'' इत्युक्तं वर्णलक्षमेकोनविंशतिलक्षं स्वोपास्यमन्त्रवर्णसंख्यलक्षं वा। एकलक्षपक्षस्तु स्वगुरुजप्तमन्त्रपर: इति साम्प्रदायिका:।

सारसङ्ग्रहे—

कुमारीपूजनं प्रोक्तं कुर्यादत्रापि साधक:। (योगिन्यष्टाष्टकस्यापि पूजा कार्यात्र मन्त्रिणा।। १।।
उच्छिष्टभक्तशेषेण रात्रौ तस्यै बलिं हरेत्। पूर्वोदितेन मनुना मन्त्रोऽयं तेन सिद्ध्यति)।। २।।

पूर्वोदितेनाष्टनवत्यक्षरप्रकरणोक्तबलिमन्त्रेण।

चतुर्दशावृत्ति जपेद्भोजनानन्तरं मनुम्। नृपतीनां पूजनीयो नारीणां च विशेषत:।। ३।।
अष्टोत्तरसहस्रेण ताम्बूलं मनुनामुना। प्रजप्तं भक्षयेद्या स्त्री याचितानङ्गभोगिका।। ४।।
मन्त्रिणस्तु वशे तिष्ठेद्यावदायुर्न संशय:। सहदेवी तथा दूर्वा मुसली मधुयष्टिका।। ५।।

भद्रा च विष्णुदयिता लक्ष्मीवल्लीन्द्रवल्ल्यपि। अञ्जलिन्यपि सम्प्रोक्ता पृथगेता: स्पृशञ्जपेत्।। ६।।
अष्टोत्तरशतं मन्त्रं ततस्ता मूर्ध्नि धारयेत्। नरनारीनृपतयो धत्ते हर्षसमूहकम् (?)।। ७।।
इन्द्राग्निविश्वयुग्मर्तुमन्वष्टवसुदिङ्मिता: । पृथग्जप्त्वा शतशतमेषां संयोज्य पेषयेत्।। ८।।
शुष्कास्तद्गुटिका मन्त्रं जप्त्वा चाथ सहस्रश:। ललाटे च धृता: सम्यक् सर्वस्त्रीजनरञ्जिका:।।९।।
भवन्ति सर्वलोकस्य दक्षा रञ्जनकर्मणि । एतस्य गुटिकारेणुयोगेन मुनवित्तम: ।। १०।।
तूलवर्त्या च कृष्णाज्ययुक्तया कज्ज्लं धृतम्। सहस्रं मनुना जप्तमञ्जनं नेत्रयो: शुभम्।। ११।।
प्रत्यहं च जगद्वश्यनारीसङ्क्षोभकारकम्। प्रेतग्रहगणादींश्च नाशयेदचिरादपि ।। १२।।
पूर्वोक्तैर्दशभिर्द्रव्यै: पञ्चगव्यैश्च कापिलै:। युक्तैश्च भसितं जप्तं सहस्रं मनुनामुना।। १३।।
धृतं ललाटे वशयेत् भुवनं नैव चान्यथा। क्षौमपट्टे प्रविन्यस्य वर्तिका रचिता शुभा।। १४।।
बिल्वास्यकु[1]मुदश्यामपद्मरेणुसुगर्भिता। कृष्णगोसर्पिषा दीप्ता तदुत्पन्ना च या मसी।। १५।।
मातङ्गीमनुना जप्ता नेत्राक्ता रञ्जने नृणाम्। यद्वा नमस्कारिणी सा गदितात्र न संशय:।। १६।।
लक्ष्मी: सविष्णुदयिता भृङ्गराजोद्भवं रज:। एतद्भावितवर्ति: सा कपिलाज्येन दीपिता।। १७।।
तज्जता या मसी पूर्वफलदा नात्र संशय:। कर्पूरचन्दनं पद्मयुगं बकुलरोचने।। १८।।
त्रैलोक्यं वशयत्येषा मषी तत्सम्भवा भृशम्। निजपञ्चेन्द्रियाणां च मलं क्रकचसम्भवे।। १९।।
फले निवेश्य नीलैश्च तन्तुभिर्वेष्टयेत् फलम्। भुव: सूनोर्दिने भूमौ स्थापयेत् तत्फलं तत:।।२०।।
आभौमवारं सञ्जप्तं कर्पूरं तत्समं तत:। (पिष्ट्वा चात्माम्बुना जप्त्वा गुलिका: कारयेद् बुध:।।२१।।
मस्तके कारिता एता राजादिवश्यदा: परम्। हेम[2]पञ्चाङ्गकं चात्ममलपञ्चकसंयुतम्)।। २२।।
सहस्रजप्तं भक्षेषु प्रयुक्तं पानकेषु च। यस्मै दत्तं नरेशाय स वश्यो नात्र संशय:।। २३।।
पूर्वमन्त्रोदितान् सर्वान् प्रयोगानत्र चाचरेत्। ....।।

पूर्वेति राजमातङ्गीप्रकरणोदितान्।।

मातङ्गिनीं यो भजते जपाद्यै: कृत्वा जगद्वश्यमशेषमत्र।
स साधकेन्द्रो निखिलांश्च भोगान् भुक्त्वा परत्रापि च मुक्तिमेति।।

अथोच्छिष्टमन्त्रा:। फेत्कारिणीतन्त्रे– श्रीदेव्युवाच–

सूचिता मे पुरा शम्भो मन्त्रा नैकविधास्तथा। इदानीं श्रोतुमिच्छामि देवीमुच्छिष्टपूर्विकाम्।। १।।

ईश्वर उवाच

शृणु देवि वरारोहे देवीं तां कथयाम्यहम्। यया विज्ञातया देवि क्षयं गच्छन्ति चापद:।। २।।
स्थावरं जङ्गमं चैव कृत्रिमं चाङ्गजं तथा। विषं जयति देवीशी स्वपराङ्गसमाश्रितम्।। ३।।
इयं विद्या परा विद्या सर्वपापापहारिणी। स्वर्गदा मोक्षदा चैव राज्यसौख्यफलप्रदा।। ४।।

---

१. 'कुङ्कुम' ख. पाठ:। २. 'उक्त' ख. पाठ:।

इयं देवि मया पूर्वं साधिता विषनिर्जये। सकृदुच्चारिता विद्या ब्रह्महत्याविशोधिनी।। ५।।
सर्वपापापहन्त्रीयं वश्यसौभाग्यदायिनी। यद्युच्छिष्टमुखो भूत्वा स्मरेद् देवीं कदाचन।। ६।।
तदाचान्तो भवेद् देवि विनैवाचमने कृते। दुर्भगा सुभगा नूनं दुःखिता सुखिता भवेत्।। ७।।
बन्ध्यापि लभते पुत्रं शतहायनजीवितम्। निर्धनो धनमाप्नोति सर्वविद्या अवाप्नुयात्।। ८।।
यां यां प्रार्थयते सिद्धिं हठात्तां तामवाप्नुयात्। **श्रीदेव्युवाच** –
को विधिः किं फलं चास्यामपि विद्यास्वरूपतः। कथ्यतां देवदेवेश रहस्यं न निवेदितम्।। ९।।

ईश्वर उवाच

विधानं ते प्रवक्ष्यामि शृणु देवि मनोरमे। भोजनानन्तरं देवि विनैवाचमने कृते।। १०।।
बलिं दत्त्वा प्रथमतो मूलमन्त्रेण साधकः। ततो मन्त्रं जपेद् ध्यात्वा देवीं तामिष्टसिद्धये।। ११।।
मन्त्रं शृणु महादेवि यथावत् कथयामि ते। दद्यादुच्छिष्टशब्दं तु तथा चाण्डालिनीति च।। १२।।
सुमुखि च ततो देवि कीर्तयेत् तदनन्तरम्। महापिशाचिनीत्युक्त्वा लज्जाबीजं ततः परम्।।१३।।
नादबिन्दुसमायुक्तं ठकारत्रितयं ततः। सविसर्गं महादेवि सर्वसिद्धिप्रदायकम् ।। १४।।

अत्रादिपदे चकारो ह्रस्व एव। सारसङ्ग्रहे लघुमातङ्गिनीमन्त्रोद्धारे तथैवोद्धृतत्वात्। केचित्तु–चण्डालिनीत्यादिपदत्रये दीर्घमिकारं वदन्ति, तन्न तत्तु सम्बुध्यन्तमेव। अत एव सारसङ्ग्रहे प्राक्प्रोक्ते मन्त्रे चण्डालिपदादीनां सम्बुद्ध्यन्तदर्शनादेतन्मन्त्रयोस्तुल्यरूपत्वाद् अत्रापि तथैवेति निर्णीतमस्माभिरिति। लज्जाबीजं भुवनेश्वरीबीजं, ठकारत्रितयं ठःठःठः इति।।

ग्रन्थान्तरे–

अथ वक्ष्ये परां विद्यां सुमुखीमतिगोपिताम्। यां लब्ध्वा देशिको विद्वान्न शोचिति कृताकृते।।१।।
कर्णो द्युतिः सनयनः श्वेतेशः स्याज्जरासनः। लक्ष्मीर्दीर्घेन्दुसंयुक्ता नन्दी दीर्घा सदृक्क्रिया।।२।।
मेषः समाधवः कर्णी भृगुस्तन्द्री च सेन्धिका। खिदेवि मवियद्दीर्घ पिशाचिनि हिमाद्रिजा।। ३।।
नन्दजत्रितयं सर्गि द्वाविंशत्यक्षरो मनुः। ....।।

कर्ण उ। द्युतिः च्छ, सनयन इकारयुक्तस्तेन च्छि। श्वेतेशः ष; जरासनष्टकारोपरि स्थितस्तेन ष्ट, लक्ष्मीः च दीर्घा आ तेन चा, इन्दुसंयुक्ता बिन्दुसंयुक्ता तेन चां। नन्दी उ दीघा आ तेन डा। सदृक् इकारयुक्तः क्रिया ल, तेन लि। मेषो न समाधव इकारसहितस्तेन नि। कर्णी उकारयुतो भृगुः सकारस्तेन सु। तन्द्री म सेन्धिका उकारयुक्ता तेन मु। खि देवि म स्वरूपं। वियत् हकारो दीर्घमाकारयुक्तं तेन हा। पिशाचिनि स्वरूपं। हिमाद्रिजा भुवनेश्वरीबीजं ह्रीं। नन्दजत्रितयं ठठठ इति सर्गि विसर्गयुक्तं तेन ठःठःठः इति।। स्पष्टम् – 'उच्छिष्टचाण्डालिनि सुमुखि देवि महापिशाचिनि ह्रीठःठःठः'' इति।

स्मृता भैरवगायत्रीसुमुखी मुनिपूर्विका। मुनिरामद्विषट्चन्द्रवह्न्यर्णैरङ्कं मनोः।।
विन्यस्य सुमुखीं ध्यायेद् भक्तचित्ताम्बुजस्थिताम्।............................।।

गुञ्जानिर्मितहारभूषितकुचां सद्यौवनोल्लासिनीं
हस्ताभ्यां नृकपालखड्गलतिके रम्ये मुदा बिभ्रतीम्।
रक्तालङ्कृतिवस्त्रलेपनलसद्देहप्रभां ध्यायतां
नृणां श्रीसुमुखीं शवासनगतां स्युः सर्वदा सम्पदः।। ६।।

लक्षमेकं जपेन्मत्रं दशांशं किंशुकोद्भवैः । पुष्पैः समिद्वरैर्वापि जुहुयान्मन्त्रसिद्धये।। ७।।
कालीपीठे यजेद् देवीं पञ्चकोणात्मकर्णिके । अष्टपत्रे षोडशारवृत्ते भूपुरसंवृते ।। ८।।
मूलेन मूर्तिं सङ्कल्प्य पाद्यादीनि प्रकल्पयेत्। चन्द्रां चन्द्राननां चारुमुखीं चामीकरप्रभाम्।। ९।।
चतुरां पञ्चकोणेषु केसरेष्वङ्गदेवताः। ब्राह्म्याद्या अष्टपत्रेषु षोडशारे कलादिकाः ।।१०।।
कला कलानिधिः काली कमला च क्रिया कृपा। कुला कुलीना कल्याणी कुमारी कलभाषिणी।।११।।
करालाख्या किशोरी च कोमला कुलभूषणा। कल्यदा भूपुरे पूज्या इन्द्राद्या हेतयोऽपि च।।१२।।
इत्थं जपादिभिः सिद्धे मनौ काम्यानि साधयेत्। भुक्त्वौदनमनाचम्य जपेन्मन्त्रमनन्यधीः।।१३।।
उच्छिष्टोऽयुतमेकं यः स भवेत् सम्पदां पदम्। उच्छिष्टेनैव भक्तेन बलिं दद्यान्निरन्तरम्।।१४।।
दध्नाभ्यक्तैः प्रजुहुयाल्लक्षं सिद्धार्थतण्डुलैः। राजानो मन्त्रिणस्तस्य भवन्ति वशगाः क्षणात्।।१५।।
शस्त्राणि वशगानि स्युर्हुतान्मार्जारमांसतः। धनर्द्धिश्छागमांसेन विद्याप्राप्तिस्तु पायसैः।। १६।।
मधुपायससम्पृक्तस्त्रीरजोयुक्तवाससा। होममाचरतः पुंसो जनता वशवर्तिनी।। १७।।
मधुसर्पिर्युतैर्नागवल्लीपत्रैर्महाश्रियः। सद्योनिहतमार्जारमांसेन मधुसर्पिषा ।। १८।।
युक्तेनान्त्यजकेशाद्यैर्हुतैराकर्षयेत् स्त्रियः। मध्वक्तशशमांसेन तत्फलं विद्यया सह।। १९।।
उन्मत्ततरुभिर्दीप्ते चितागनौ जुहुयाच्छदैः। कोकिलाकाकयोर्मन्त्री मारयेदचिरादरीन्।। २०।।
वायसोलूकयोः पत्रैर्होमाद् विद्वेषयेदरीन्। गर्भपातः सगर्भाणामूलूकच्छदनैर्भवेत् ।। २१।।
आज्याक्तैर्बिल्वपत्रैर्यो मासमेकं सहस्रकम्। प्रत्यहं जुहुयात् तेन वन्ध्यापि लभते सुतम्।।२२।।
सौभाग्यार्थे दुर्भगाया बन्धूककुसुमैर्नवैः। मधुराक्तैः प्रजुहुयात् स्त्रीणामाकृष्टयेऽपि तैः।। २३।।
निर्जने [1]सघनेऽरण्ये प्रेतावासे चतुष्पथे। बलिं दत्त्वा प्रजपतां सहस्रं चाष्टसंयुतम्।। २४।।
उच्छिष्टस्य च सा देवी प्रत्यक्षा जायतेऽचिरात्। यत्र नोक्ता होमसंख्याऽयुतं तत्र विनिर्दिशेत्।।२५।।
वाममार्गेण सुमुखी शीघ्रं कामविधायिनी। भोजनान्ते यथोच्छिष्टैर्जप्या सा स्वेष्टसिद्धये।। २६।।
न शीघ्रफलदा देवी सुमुखीसदृशी परा। यस्या मन्त्रजपाद् देवि प्रसिद्ध्यन्ति मनोरथाः।। २७।।

इति। सारसङ्ग्रहे—

न तिथिर्न च नक्षत्रं न चाङ्गन्यासमेव च। नादिदोषो न वा विघ्नं नाशौचं नियमो न च।। १।।
यस्य तिष्ठति मन्त्रोऽयं न स विघ्नैस्तु बाध्यते। ध्यानमस्याः प्रवक्ष्यामि यथावज्जगदीश्वरि।। २।।
शवोपरि समासीनां रक्ताम्बरपरिच्छदाम् । रक्तालङ्कारसंयुक्तां गुञ्जाहारविराजिताम्।। ३।।
रक्तां षोडशवर्षां च पीनोन्नतघनस्तनीम्। कपालकर्त्रिकाहस्तां परमज्योतिरूपिणीम्।। ४।।
वामदक्षिणयोगेन ध्यायेन्मन्त्रविदुत्तमः। उच्छिष्टेन बलिं दत्त्वा जपेत् तद्गतमानसः।। ५।।
उच्छिष्टेनैव कर्तव्यो जपोऽस्याः सिद्धिमिच्छता। उच्छिष्टजपमानस्य जायन्ते सर्वसिद्धयः।। ६।।

---

[1] 'सदने' ख. पाठः।

अपरं च प्रवक्ष्यामि शृणु देवि फलप्रदम्। होमं सन्तर्पणं चास्याः सहसा कार्यसिद्धये।। ७।।
स्थण्डिले मण्डलं कृत्वा चतुरस्रं समाहितः। पूजयेन्मण्डलं देव्या[1] मूलमन्त्रेण मन्त्रवित्।। ८।।
तत्र चाग्निं समाधाय वह्निरूपां व्यवस्थिताम्। देवीं ध्यात्वा चरेद्धोमं (दधिसिद्धार्थतण्डुलैः।।९।।
सहस्रैकं विधानेन राजा भवति वश्यगः। मार्जारस्य च मांसेन यो देव्यै होममाचरेत्।। १०।।
स प्राप्नोति परां विद्यां शस्त्रशास्त्रवशीकृताम्। कुर्याच्छागस्य मांसेन होमं मधुरसान्वितम्।। १।।
सहस्रैकं विधानेन भवन्ति धनसिद्धयः। विद्याकामश्चरेद्धोमं) शर्कराघृतपायसैः ।। १२।।
मासात् तस्य भवन्त्येव सिद्धा विद्याश्चतुर्दश। रजस्वलाया वस्त्रेण मधुना पायसेन च।। १३।।
होमं कृत्वा महादेवि त्रैलोक्यं वश्यमानयेत्। नागवल्ल्या चरेद्धोमं मधुना सह सर्पिषा।। १४।।
अयुतैकं विधानेन सिद्धिरिष्टा भवेत् ध्रुवम्। सद्योमार्जारमांसेन घृतेन मधुना सह।। १५।।
चण्डालकेशयुक्तेन भवेदाकर्षणं ध्रुवम्। शशकस्य तु मांसेन मधुना लोलितेन च।। १६।।
कृत्वा होममवाप्नोति विद्यावित्तवरस्त्रियः। धतूरार्कस्य होमेन चितावह्नौ तु मन्त्रवित्।। १७।।
कोकिलाकाकपक्षैश्च होमाच्छत्रून् विनाशयेत्। उच्चाटनाय शत्रूणां होमं कुर्याच्च मन्त्रवित्।। १८।।
पूर्वोक्तेन विधानेन चिताकाष्ठहुताशने। उलूककाकपक्षाभ्यां कृत्वा होमं निरन्तरम्।। १९।।
(शत्रू विद्वेषयेद् द्विष्टौ अन्योन्यं कलहाकुलम्। उलूकपक्षहोमेन गर्भपातो भवेत् स्त्रियः।। २०।।
सहस्रैकविधानेन कुर्याद्धोमं समाहितः। बिल्वपत्रैः समध्वाज्यैर्मासमेकं निरन्तरम्।। २१।।)
वन्ध्यापि लभते पुत्रं[2] चिरजीविनमुत्तमम्। बन्धूककुसुमं हुत्वा रक्तं मधुसमन्वितम्।। २२।।
दुर्भगाया हठाद्[3] देवि सौभाग्यसुखदायकम्। प्रातरुत्थाय यः कश्चित् कुर्याद्धोमं दिने दिने।।२३।।
जपापुष्पैराज्ययुक्तैरष्टोत्तरशतं प्रिये। षण्मासस्य प्रयोगेण भवेदाकर्षणं ध्रुवम्।। २४।।
देवगन्धर्वकन्याश्च कन्या नागाङ्गनागणाः। [4]हठादागत्य कामार्ता बलादालिङ्गयन्ति तम्।। २५।।
विद्यायै क्रियते होमस्तिलैः पायसमिश्रितैः। समाप्नोति महाविद्यां शास्त्रौघपदशालिनीम्।। २६।।
मधुना रुरुमांसेन होमं कुर्यात् प्रयत्नतः। विद्यावान् धनवान् विद्धि शस्त्रशास्त्रवशीकृतः।। २७।।
इयं देवी महादेवि वामाचारफलप्रदा। दक्षिणाचारयोगेन न भवेत् फलदायिनी।। २८।।
भोजनानन्तरं चास्या बलिं कृत्वा दिने दिने। उच्छिष्टेन जपेन्मन्त्रं शतमष्टोत्तरं प्रिये।। २९।।
उटजे वा श्मशाने वा शून्यागारे चतुष्पथे। बलिप्रधानतो देवी प्रत्यक्षा भवति ध्रुवम्।। ३०।।
एषा देवी मया जप्ता भैरवाकारमिच्छता। इत्येषा कथिता देवी सर्वपापापहारिणी ।। ३१।।
मन्त्रस्योच्चारणाद् देवि सर्वपापविवर्जितः। उच्छिष्टदूषणं हित्वा स पवित्रो भवेद् ध्रुवम्।। ३२।।
इत्युच्छिष्टचण्डालिनी देवी भुवनविश्रुता। गोपनीया प्रयत्नेन कथनीया न कस्यचित्।। ३३।।
गुरुभक्तिश्च कर्तव्या कायेन च धनेन च।...।।

---

[1] 'देवि' ख. पाठः। [2] 'गर्भं' ख. पाठः। [3] 'ग्रहैः' ख. पाठः। [4] 'जवात्' ख. पाठः। ५. 'गोप्तव्ययं' ख. पाठः।

लोकापवादे न च देवि पापं नैवापरा तिष्ठति मर्त्यलोके।
मोक्षैकसारा धनदैकसारा विद्यैकसारा शृणु सिद्धविद्या।।

इति। फेत्कारिणीतन्त्रे—

अथातः सम्प्रवक्ष्यामि मन्त्रं परिमलात्मकम्। येन विज्ञातमात्रेण नासाध्यं भुवनत्रये।। १।।
रुद्रजाया महायोगिन्यन्ते गौरिपदं वदेत्। भुवनभयङ्करीति वर्मान्तमुच्चरेन्मनुम्।। २।।

रुद्रजाया मायाबीजं, महायोगिनि स्वरूपं, गौरि स्वरूपं, भुवनभयङ्करि स्वरूपं, वर्म हुंकारः। तथा—

अङ्गिराश्च ऋषिर्देवी गायत्रीच्छन्द ईरितम्। सिंहवक्त्रा च भूतानां भयकारिण्यतः परम्।। ३।।
महाकृत्या देवता चेत्युक्त्वा न्यासं समाचरेत्। षड्दीर्घयुक्तबीजेन मन्त्रार्धेनास्त्रयोगिना।। ४।।
हृदयं च ततोऽर्धेन मन्त्रार्धेन शिरः क्रमात्। शिखा कवचनेत्रेऽस्त्रमेवं न्यासक्रमस्ततः।। ५।।
सिंहासनां कृष्णमुखीं लम्बमानपयोधराम् । दंष्ट्राकरालवदनां त्रिनेत्रां सर्वतोज्वलाम्।। ६।।
कृष्णकञ्चुकसंवीतां विधूमाग्निसमप्रभाम् । त्रिशूलचक्रचषकखट्वाङ्गकरपङ्कजाम् ।। ७।।
लेलिहानमहाजिह्वां विद्युत्प्रेक्षणभीषणाम्। ध्यात्वा कृत्वा विधानेन पूजयेन्मन्त्रवित्तमः।। ८।।
ध्यात्वा कृत्यामर्चयीत रक्तपुष्पैश्च वश्यके। कृष्णां मारणकृत्येषु मांसरक्तासवैस्तथा।। ९।।
कृत्यां च मदनां सर्वकृत्यामुत्सादिनीं तथा। भीषिणीं श्रीमतीं चैव प्रतिष्ठां च ततः परम्।। १०।।
विद्यामभ्यर्चयेदष्टपत्रेषु क्रमतः सुधीः। पूर्वे तु शाङ्करीं नाम शुभ्रवर्णां वरान्विताम्।। ११।।
द्विभुजां सौम्यवदनां पाशाङ्कुशधरां शिवाम्। दक्षे भयङ्करीं नाम लम्बजिह्वामधोमुखीम्।। १२।।
कृष्णवर्णां रक्तकेशीं रक्तमाल्यानुलेपनाम्। चतुर्भुजां सिंहनादां ज्वलच्छूलकपालिनीम्।। १३।।
खड्गहस्तां शिरोमालां सर्वाभरणभूषिताम्। पश्चिमे वारुणीं नाम स्वर्णवर्णां हसन्मुखीम्।। १४।।
सुवर्णमालिकां शुभ्रदंष्ट्रामभयदां सदा। उत्तरे भीषिकां नाम चतुर्वक्त्रां भयङ्करीम्।। १५।।
पूजयित्वा जपेन्मन्त्रं नित्यमष्टोत्तरं शतम्। ....।।

अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि—अङ्गिरसे ऋषये नमः। मुखे— देवीगायत्रीच्छन्दसे नमः। हृदये— महाकृत्यायै देवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, ह्रांह्रींमहायोगिनि गौरि फट् हृदयाय नमः। ह्रींह्रींभुवनभयङ्करि हुंफट् शिरसे स्वाहा। ह्रूंह्रींमहायोगिनि गौरि फट् शिखायै वषट्। ह्रैंह्रींभुवनभयङ्करि हुंफट् कवचाय हुं। ह्रौंह्रींमहायोगिनि गौरि फट् नेत्रत्रयाय वौषट्। ह्रःह्रींभुवनभयङ्करि फट् अस्त्राय फट्। इति षडङ्गमन्त्रैः करषडङ्गन्यासं कृत्वा, ध्यानाद्यात्मपूजान्ते भुवनेशीपीठं सम्पूज्य तत्रावाह्याङ्गपूजान्तं प्राग्वद्विधाय, देव्याः पुरोभागे ॐशाङ्कर्य्यै नमः। दक्षिणे भयङ्कर्यै नमः। पश्चिमे वारुण्यै नमः। उत्तरे भीषिकायै नमः। इति सम्पूज्य, अष्टदलेषु देव्यग्रमारभ्य, कृत्यायै नमः। एवं मदनायै०। सर्वकृत्यायै०। उत्सादिन्यैः। भीषिण्यै०। श्रीमत्यै०। प्रतिष्ठायै०। विद्यायै०। इति सम्पूज्य, अथवा षडङ्गपूजानन्तरं अष्टदलेषु प्रोक्तशक्तीः सम्पूज्याभ्यन्तरे प्रोक्तशक्तिचतुष्टयं सम्पूज्य दिक्पालार्चादि पूर्ववत् कुर्यादिति। तथा—

अथास्या विनियोगस्तु कर्तव्यो मन्त्रिणा सदा। कालं विदित्वा प्रतिमां मधूच्छिष्टेन कारयेत्।।१६।।

द्वादशाङ्गुलिकां शत्रोर्नखलोमसमन्विताम्। हृदये नामधेयं च फट्कारः सप्तमर्मके।। १७।।
अमुष्य प्राणा इह चामुष्य जीव इह स्थितः। अमुष्य सर्वेन्द्रियाणि अमुष्य वाङ्मनश्चक्षुः।। १८।।
श्रोत्रजिह्वाघ्राणाप्राणा इहागत्याग्निवल्लभा। इति प्राणान् प्रतिष्ठाप्य मरिचैर्लेपयेत् ततः।। १९।।
मृतब्राह्मणचण्डालकेशाभ्यां पादयोः पृथक्। बद्ध्वा कारस्करमये तोरणे वाप्यधोखीम्।। २०।।
तस्याधो मेखलायुक्तं त्रिकोणं वह्निकुण्डकम्। चन्द्रगौरं विधायाग्निं परिस्तीर्य शरैस्तृणैः।। २१।।
विभीतकपरिध्या च कल्पयेद्यस्य मारणम्। जुहुयान्निम्बतैलाक्तैः काकोलूकोत्थपिच्छकैः।। २२।।
दारयैनं शोषयैनं मारयेत्यभिधाय च। अष्टोत्तरशतेनैनमनया जुहुयात् बुधः ।। २३।।
होमान्ते विधिवत् कृत्यामाराध्याग्नेश्च सन्निधौ। यो मे कण्ठग्रहो वातिदूरस्थो वान्तिकेऽपि च।।२४।।
पिब क्रव्यमसृक् तस्येत्येवमुक्त्वा निवेदयेत्। [1]संरक्ष्याग्निविधानेन नवरात्रं समापयेत्।। २५।।
मृतस्तिष्ठति तेनांशस्तावदस्य रिपोर्मृतिः। अर्कक्षीरेण मरिचं पिष्ट्वा सिद्धार्थमेव च।। २६।।
जले संलोड्य मन्त्रेण रिपुं ध्यात्वा निरुद्धदृक्। कृष्णाम्बरोत्तरीयोऽग्रपादेनाक्रम्य तद्रिपुम्।। २७।।
वज्रशूलमिति ध्यात्वा अद्भिस्तस्योपरि क्षिपेत्। नवरात्रान्तरे शत्रुर्म्रियते नाम संशयः।। २८।।
हर (सुस)मिद्धे चितावह्नौ तैलसिक्तैर्बिभीतकैः। जुह्वतो म्रियते शत्रुः सत्यमौशनसोदितम्।। २९।।
रिपोः प्रतिकृतिं कृत्वा साध्यर्क्षफलकेऽमले। अर्कक्षीरेण मरिचं पिष्ट्वा तत्रैव लेपयेत्।। ३०।।
फट्कारं हृदये कृत्वा शिवं निर्माय कूपके। क्षिपेत् कृष्णचतुर्दश्यां जप्त्वा मन्त्रं सहस्रशः।।३१।।
सद्योऽवगाहनं कृत्वा तस्यामेव च रक्षणम्। मन्त्रं जप्त्वा विधानेन भेदयेत् सिंहमुद्रया।। ३२।।
षण्मासान्म्रियते शत्रुः सन्ध्ययोरुभयोरपि। बाह्य[2]समुद्धृतं पत्रं शुष्कं बैभीतिकं ततः।। ३३।।
गृहीत्वा च लिखेन्मन्त्रं कृष्णसर्पस्य शोणितैः। नामधेयं रिपोरन्ते वायुबीजेन वेष्टयेत्।। ३४।।
निखनेत्तस्य गेहे तु काकवद् भ्रमते ध्रुवम्। वातोद्धूतैः शुष्कपत्रैः काष्ठैरशनिपातितैः।। ३५।।
उष्ट्रास्थिना शवाङ्गारैः शत्रोरुच्चाटनं भवेत्। दूर्वागुडूचीगव्येन सर्पिषा तिलतण्डुलैः।। ३६।।
अन्नैः समिद्भिः पालाशैः शान्तिं कुर्याद्विचक्षणः। लक्ष्मीबिल्वफलैः पत्रैर्नन्द्यावर्तैः श्रिये तथा।।३७।।
रक्तपुष्पैरपामार्गैरङ्गारैश्च सुभद्रकैः । मधुरत्रयसंसिक्तैरेभिः कुर्यात् तु वश्यकम्।। ३८।।
उक्तमौशनसे तन्त्रे च्यवनस्यापि कथ्यते। शान्तिं कृत्वा विधानेन जपेत् परिमलं त्विदम्।। ३९।।
महाव्याधिप्रशमनं नित्यमष्टाधिकं शतम्। जपेदेकाग्रचित्तस्तु लोकवश्यकरं परम्।। ४०।।
मनसा चिन्तयेत् कृत्यां गजारूढां वियद्गताम्। तस्य वश्या भवेत् क्षिप्रमश्वारूढा तथा भवे।।४१।।
चौरव्याघ्रमृगादीनां सलिलादिभयापहम् । सकृच्छ्रवणमात्रेण सर्वपापविनाशनम् ।। ४२।।
सप्ताभिमन्त्रितं तोयं पीत्वा मन्त्री समाहितः। मेधावी च भवेद्वाग्मी तावज्जप्ताभिषेकतः।। ४३।।
सप्ताभिमन्त्रितं कृत्वा विषमप्यमृतं भवेत्। पक्षं मासं द्विमासं वा षण्मासं वत्सरं तु वा।। ४४।।

---

१. 'सारत्या' ग. पाठः। २. 'वामा' ख. पाठः।

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्। अथ वक्ष्ये विशेषेण महाशान्तिविधिक्रमम्।।४५।।
सर्वसिद्धिकरं पुण्यं सर्वपापविनाशनम् । सर्वमुद्रा[1]प्रहरणं सर्वारिष्टविनाशनम् ।। ४६।।
अकालमृत्युमथनं सदा विजयवर्धनम्। आयुष्यं पावनं पुष्टिलक्ष्मीसौभाग्यवश्यकृत्।। ४७।।
पुत्रदं पौत्रदं चैव अलक्ष्मीमलनाशनम्। महाव्याधिप्रशमनमपस्मारविनाशनम् ।। ४८।।
योगिनीभूतवेतालाः प्रेतकूष्माण्डपन्नगाः। तत्र स्थाने न तिष्ठन्ति डाकिन्याद्या विशेषतः।। ४९।।
कृत्यामभ्यर्चयेद्वत्स यथाविधिपुरःसरम्। षोडशारं लिखेत् पद्मं योनियुक्तं सबिन्दुकम्।। ५०।।
तन्मध्येऽष्टदलं लिख्य [2]मकारादीन् न्यसेत् क्रमात्। तन्मध्ये रसकोणं तु लिखेन्मूलमनुं स्मरन्।।५१।।
चन्द्रबिम्बं लिखेन्मध्ये तस्योर्ध्वे प्रेतमालिखेत्। तस्य मध्ये न्यसेत् कुम्भं वस्त्रस्रग्रत्नभूषितम्।।५२।।
कुम्भमध्ये न्यसेत् कृत्यां सर्वलक्षणसंयुताम्। अर्चयेच्च यथान्यायं पायसं तु निवेदयेत्।। ५३।।
परितोऽष्टौ घटे न्यस्येदसिताङ्गादिभैरवान्। गन्धपुष्पादिनाभ्यर्च्य तद्बाह्ये क्षेत्रपालकान्।। ५४।।
लोकेशान्तं यजेद्देवीं तदग्रे होममाचरेत्। जुहुयादाज्यसंसिक्तापामार्गतिलसर्षपान्।। ५५।।
दूर्वाग्रखदिराश्वत्थैः प्रत्येकं तु शताष्टकम्। कुण्डे वा स्थण्डिले वापि होमकर्म समाचरेत्।। ५६।।
तस्य दक्षिणपार्श्वे तु लक्ष्मीं ध्यायेद् यथाविधि। कुम्भमध्ये न्यसेद् देवीं दक्षिणे तु श्रियं स्मरेत्।।५७।।
वामपार्श्वे यजेद् देवीं हृल्लेखां परमेश्वरीम्। तस्यैव वामपार्श्वे तु पूजयेद् गणनायकम्।। ५८।।
अयुतं मूलमन्त्रं तु जपेन्मृत्युविनाशनम्। नियुतं भ्रूणहत्यायां जपेत् परिमलं विदुः।। ५९।।
महाव्याधिप्रशमनं तावज्जप्ताभिषेकतः। एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।। ६०।।
येन ज्ञातं परिमलं यस्य वक्त्रे स्थितं सदा। तस्यासाध्यं न विद्येत व्याध्यरिभ्यो भयं नहि।।६१।।
इत्यादि वाखुले तन्त्रे ख्यातः परिमलो मनुः। महाशान्तिकरः पुंसां दुःखदारिद्र्यनाशनः।। ६२।।

इति। तन्त्रान्तरे—

प्रणवं भुवनेशी च वाग्भवं कमला च हृत्। ततश्च भगवत्यन्ते उच्छिष्टपदमीरयेत्।। १।।
चण्डालि श्रीपदं मातङ्गीश्वरीति पदं ततः। सर्वान्ते जनमुच्चार्य वशङ्कर्य्यग्निवल्लभा।। २।।
द्वात्रिंशदक्षरो मन्त्रः सर्वलोकवशङ्करः। ....।।

''ॐह्रींऐंश्रीं नमो भगवति उच्छिष्टचण्डालि श्रीमातङ्गीश्वरि सर्वजनवशङ्करि स्वाहा''।। (३२)

मतङ्गो मुनिराख्यातोऽनुष्टुप् छन्दश्च देवता। श्रीमातङ्गीश्वरी देवी सर्वलोकवशङ्करी।। ३।।
वेदाङ्गाङ्गरसाष्टाक्षिमितैर्मन्त्रसमुद्भवैः। वर्णैः कुर्यात् षडङ्गानि ततो देवीं विचिन्तयेत्।। ४।।
नीलजीमूतसङ्काशां रत्नसिंहासनस्थिताम्। हस्तन्यस्तशुकप्रौढवार्तालापं च शृण्वतीम्।। ५।।
रक्तवस्त्रपरीधानां वीणावादनतत्पराम्। सरोजन्यस्तपद्युग्मां मधुमत्तां मतङ्गिनीम्।। ६।।
एवं ध्यात्वार्चयेत् पीठे राजमातङ्गिकोदिते। त्रिकोणमष्टपत्राब्जयुगषोडशपत्रकम्।। ७।।

---

१. 'पहरणं' ख. पाठः। २. 'वकारादीन्' ख. पाठः।

चतुरस्रं विधायात्र पीठपूजां समाचरेत्। तारमायावाग्रमादि सर्वशक्तिपदं ततः।। ८।।
कमलासनमुच्चार्य ङेन्तो हृत्पीठमन्त्रकः। अनेन मनुना सम्यक् पीठं देव्याः प्रपूजयेत्।। ९।।
मूर्तिं मूलेन सङ्कल्प्य तस्यामावाह्य पूजयेत्। रत्यादींश्च त्रिकोणेषु केसरेष्वङ्गदेवताः।। १०।।
अष्टपत्रेषु ब्राह्म्याद्या द्वितीये भैरवांस्तथा। षोडशारे तु पूर्वादि पूज्याः षोडश शक्तयः।। ११।।
वामा ज्येष्ठा च रौद्री च शान्तिः श्रद्धा महेश्वरी। क्रिया लक्ष्मीश्च सृष्टिश्च मोहिनी प्रमथासिनी।। १२।।
विद्युल्लता च चिच्छक्तिः सुरापानन्दया सह। षोडशी नन्दबुद्धिस्तु पूजनीया विशेषतः।। १३।।
मातङ्गीपूजने प्रोक्ताश्चतुरस्रे प्रपूजयेत्। लोकपालांस्तदस्त्राणि पूजयेद् भाग्यहेतवे।। १४।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि मतङ्गऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीमातङ्गीश्वरीदेवतायै नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृत्वाञ्जलिरुक्त्वा, ॐह्रींऐंश्रीं हृदयाय नमः। नमो भगवति शिरसे स्वाहा। उच्छिष्टचण्डालि शिखायै वषट्। श्रीमातङ्गीश्वरि कवचाय हुं। सर्वजनवशङ्करि नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्। एवं करषडङ्गन्यासं विधाय, ध्यानमानसपूजाद्यर्घ्य-स्थापनाद्यात्मपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना त्रिकोणं, तद्बहिः पुनरष्टदलं, तद्बहिः षोडशदलं, तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रं कुर्यादिति पूजाचक्रं निर्माय, तत्र मातङ्गीपीठं सम्पूज्य, ॐह्रींऐंश्रीं सर्वशक्तिकमलासनाय नमः। इति समस्तं पीठं सम्पूज्य, मूर्तिकल्पनादिपुष्पोपचारान्ते त्रिकोणकोणेषु— रत्यै नमः। प्रीत्यै०। मनोभवायै०। इति सम्पूज्य, केसरेषु प्राग्वत् षडङ्गानि सम्पूज्य, प्रथमाष्टदलेषु ब्राह्म्यादिमातृकाः, द्वितीयाष्टदलेऽसिताङ्गादिभैरवान् सम्पूज्य, षोडशदले—वामायै नमः। ज्येष्ठायैः। रौद्र्यै०। शान्त्यै०। श्रद्धायै०। माहेश्वर्य्यै०। क्रियायै०। लक्ष्म्यै०। सृष्ट्यै०। मोहिन्यै०। प्रमथायै०। असिन्यै०। विद्युल्लतायै०। चिच्छक्त्यै०। सुरापानन्दायै०। नन्दबुद्ध्यै०। इति सम्पूज्य, चतुरस्रे मातङ्ग्यादिशक्तिचतुष्टयं कोणेषु विघ्नेशादिचतुष्टयं प्राग्वत् सम्पूज्य लोकेशादिसमर्चनादि प्राग्वत् समापयेद् इति।। तथा—

अयतुं प्रजपेन्मन्त्रं जुहुयात् तद्दशांशतः। मधूकपुष्पैस्त्रिस्वादुयुक्तैर्मन्त्रस्य सिद्धये।। १५।।
राजमातङ्गिनीप्रोक्तप्रयोगानत्र चाचरेत्। ....।।

इति। तथा—

वागुच्छिष्टपदं चैव चाण्डालिपदमुद्धरेत्। कामराजं च मातङ्गि तार्तीयं सर्वमुद्धरेत्।। १६।।
वशङ्कर्य्यग्निजायान्तो लघुमातङ्गिसंज्ञकः। विंशद्वर्णो महामन्त्रः सर्वलोकवशङ्करः।। १७।।

''ऐं उच्छिष्टचाण्डालि क्लीं मातङ्गि सौः सर्ववशङ्करि स्वाहा''।। २०।।

मातङ्गोऽस्य ऋषिः प्रोक्तोऽनुष्टुप् छन्द उदाहृतम्। लघुमातङ्गिनी देवी देवता परिकीर्तिता।। १८।।
वाग्भवं बीजमित्युक्तं स्वाहा शक्तिरुदाहृता। कीलकं कामराजं स्याद्विनियोगस्तु पूर्ववत्।। १९।।
बालाबीजत्रिरावृत्त्या षडङ्गन्यासमाचरेत् । ....।।

स्मरेत् प्रथमपुष्पिणीं रुधिरबिन्दुनीलाम्बरां
गृहीतमधुपात्रिकां मदविघूर्णनेत्राञ्चलाम्।

घनस्तनभरालसां गलितचूलिकां बालिकां
करस्फुरितवल्लकीं विमलशङ्खताटङ्किनीम्।। २०।।

एवं ध्यात्वा जपपूजाप्रयोगादिकं प्राग्वत् कुर्यादिति।

वाणी शुकप्रिया ङेन्ता विद्महे कामराजकम्। कामेश्वरी धीमहीति तार्तीयं च समुच्चरेत्।। २१।।
तन्न: श्यामीपदं प्रोक्त्वा तत: श्यामा प्रचोदयात्। एषा प्रोक्ता तु मातङ्गी गायत्री सर्वसिद्धदा।।२२।।

इति।। अथ वाराहीप्रकरणम्। तत्र दक्षिणामूर्तिसंहितायाम्। ईश्वर उवाच –

पञ्चमीं रत्नदेवेशीं कथयामि शृणु प्रिये। यस्या: स्मरणमात्रेण पवनोऽयं स्थिरो भवेत्।। १।।
वाग्भवं बीजमुच्चार्य गलानुग्रहबिन्दुभि:। नादेन भूषितं बीजं पार्थिवं चोच्चरेत् तत:।। २।।
पुनराद्यं नमोऽन्ते भगवतीति समालिखेत्। [1]वातालियुग्मं वाराहि पुनरेतद्द्वयं लिखेत्।। ३।।
वराहमुखि च द्वन्द्वं सन्धिहीनं तत: परम्। अन्धे चान्धिनि सप्तार्णं हृदन्तेन भवेत् प्रिये।। ४।।
रुन्धे रुन्धिन्यतो हृच्च जम्भे जम्भिनि हृत्तत:। मोहे मोहिनि हृच्चापि स्तम्भे स्तम्भिनि हृत्तत:।।५।।
एतदुक्त्वा महेशानि सर्वदुष्ट प्रदुष्ट च। सान(आनाम)न्तं च सर्वेषां सर्ववागिति चित्त च।। ६।।
चक्षुर्मुखगति प्रोक्त्वा जिह्वास्तम्भं कुरुद्वयम्। शीघ्रं वश्यं कुरुद्वन्द्वं वाग्भवं पार्थिवं पुन:।। ७।।
ठ(ठ:)कारस्य चतुष्कान्ते कवचास्त्राग्निवल्लभा। चतुर्दशोत्तरशतं मन्त्रवर्णा भवन्ति हि।। ८।।

''ऐंग्लौऐं नमो भगवति वातालि २ वाराहि २ वराहमुखि २ अन्धे अन्धिनि नम: रुन्धे रुन्धिनि नम: जम्भे जम्भिनि नम: मोहे मोहिनि नम: स्तम्भे स्तम्भिनि नम: सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु कुरु शीघ्रं वश्यं कुरु २ ऐंग्लौं ठ:ठ:ठ:ठ: हुं फट् स्वाहा'' (११४)

चतुश्चत्वारिंशतिभि: पदैर्न्यासस्तु कीर्तित:। मातृकावन्न्यसेद्वक्त्रे पदानि दश मन्त्रवित्।। ९।।
दो:पत्सन्धिषु साग्रेषु न्यसेद् विंशतिसंख्यकान्। पदार्णानथ विन्यस्य पार्श्वयोरेकमेतयो:।। १०।।
अनेनैव प्रकारेण मातृकावन्न्यसेत् सुधी:। तत: षडङ्गविन्यासं कुर्याद् देहविशुद्धये।। ११।।
वार्ताल्यास्तु पदद्वन्द्वं हृदयं च तत: परम्। वाराहियुगलं देवि शिरो मन्त्र उदाहृत:।। १२।।
वराहमुखियुग्मं तु शिखा सप्ताक्षरं तत:। कवचं च तत: सप्तवर्णैर्नेत्रं (प्रकीर्तितम्।।१३।।
ततोऽस्त्रं सप्तभिर्वर्णै: षडङ्गानि) न्यसेत् क्रमात्। यन्त्रोद्धारं प्रवक्ष्यामि येन त्रैलोक्यमुत्तमम्।।१४।।
ताम्रे वा राजते स्वर्णमये वा भूर्जपत्रके। लिखेद्रोचनया वापि कुङ्कुमागुरुचन्दनै:।। १५।।
हरिद्रया वारुणया लिखेच्चक्रं मनोरमम्। त्रिकोणं पञ्चकोणं च षट्कोणं वसुपत्रकम्।। १६।।
शतपत्रं सहस्रारं ततो भूबिम्बमालिखेत्। चतुर्द्वारविशोभाढ्यं मध्ये सिंहासनं यजेत्।। १७।।
वाणीभूबीजयुग्मेन सम्पूज्य सर्वमातृका:। स्फटिकाचलमध्यस्थं पीठमेतद्विचिन्त्य च।। १८।।
देवीमावाहयेत् तत्र ध्यानं कुर्याद्विचक्षण:। प्रत्यग्रारुणसङ्काशां [2]पद्मान्तर्गतवासिनीम्।। १९।।
इन्द्रनीलमहातेज:प्रकाशां विश्वमातरम्। रुण्ड च मुण्डमालाढ्यां नवरत्नविभूषिताम्।। २०।।

---

१. 'वार्तालि' ख. पाठ:। २. 'पद्मान्त:स्थशवस्थितां' इति पाठान्तरम्।

अनर्घ्यरत्नघटितमुकुटश्रीविराजिताम्। कौशेयार्धोरुकां[१] चारुप्रवालमणिभूषिताम् ।। २१।।
हलेन मुसलेनापि वरदेनाभयेन च। विराजितचतुर्बाहुं कपिलाक्षीं सुमध्यमाम्।। २२।।
नितम्बिनीमुत्पलाभां कठोरघनसत्कुचाम्। कोलाननां यजेद् देवीमुपचारैः सहेतुभिः।। २३।।
गन्धपुष्पादिभिः सम्यक् सर्वकार्यार्थसिद्धये। दशसप्तसहस्राणि पुरश्चरणसिद्धये।। २४।।
तद्दशांशेन होमस्तु तिलैर्बन्धूकपुष्पकैः । त्रिमध्वक्तैहेतुमिश्रैर्हरिद्राचन्दनैर्हुनेत् ।। २५।।
लाक्षागुरुपुरुद्रव्यैः पिशितैर्विविधैरपि। सिद्धिर्भवति देवेशि मन्त्रिणो नात्र संशयः।। २६।।
आदावङ्गावृतिं पश्चादग्नीशासुरवायुषु। मध्ये दिक्षु त्रिकोणान्तस्त्रिषु कोणेषु संशृणु।। २७।।
वामवामेतराग्रेषु क्रमेण त्रितयं यजेत्। [२]जम्भिनीं स्तम्भिनीं चैव मोहिनीं सर्वसिद्धये।। २८।।
अन्धिन्याद्यास्तु देवेशि स्तम्भिन्यन्ताः प्रपूजयेत्। पञ्चकोणे महादेवि पुर आदिक्रमेण तु।।२९।।
मनुस्था एव तद्बाह्ये ततो मात्रर्चनं भवेत्। षडरे पुर आरभ्य प्रादक्षिण्येन पूजयेत्।। ३०।।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी प्रिये। माहेन्द्री चैव चामुण्डा डाकिन्याद्यास्ततः शृणु।।३१।।
डाकिनी राकिणी देवि लाकिनी काकिनी तथा। शाकिनी हाकिनी चैव ततः षट्कोणके यजेत्।३२।
षट्कोणपार्श्वयोः पूज्ये देव्यौ सर्वार्थसिद्धये। हलं कपालं दधतीं क्रोधिनीं वामतो यजेत्।। ३३।।
मुसलेष्टकरां देवीं स्तम्भिनीं दक्षिणे यजेत्। चण्डोच्चण्डं महेशानि षट्कोणपुरतो यजेत्।। ३४।।
नागं कपालं डमुरुं त्रिशूलं दधतं प्रिये। नग्नं नीलं जटाराजन्मस्तकं पञ्चमीयुतम्।। ३५।।
ततोऽष्टदलपत्रेषु वाताल्याद्यष्टकं यजेत्। शृणु त्वमेवं तस्याग्रे पूजयेन्महिषाष्टकम्।। ३६।।
शृङ्गाभ्यां चान्त्ररक्तारिकुक्षिवक्त्रानिकृन्तनम् । नीलजीमूतसङ्काशं रिपुभूम्यन्तरिक्षगम्।। ३७।।
शतपत्रं क्रमात् पूज्यं रुद्रार्कवसुदस्रकैः । त्रयस्त्रिंशद्दलगतैस्त्रिवारोच्चारितैः पृथक्।। ३८।।
अवशिष्टे दले पूज्या स्तम्भिनी जम्भिनीयुता। शताराग्रे महेशानि महासिंहं समर्चयेत्।। ३९।।
सहस्रपत्रे सम्पूज्यं वाराहीणां सहस्रकम्। अङ्कुशान्ते महेशानि वाराह्यै नम आलिखेत्।। ४०।।
अनेन मनुना देवि पूजयेत् तु सहस्रधा। भूबिम्बे वटुकक्षेत्रयोगिनीगणपान् यजेत्।। ४१।।
पुनर्देवीं समाराध्य गन्धपुष्पादितर्पणैः। अक्षमाला हरिद्राया मुख्या स्तम्भनकारिणी।। ४२।।
स्फाटिकी वाथ पद्माक्षरुद्राक्षादिसमुद्भवा।...।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि दक्षिणामूर्तिऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीवाराहीदेवतायै नमः। इति विन्यस्य ममाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, शिरसि ऐं। मुखवृत्ते ग्लौं। नेत्रयोः ऐं। श्रोत्रयोः नमः। नासिकयोः भगवति। गण्डयोः वार्तालि। ओष्ठयोः वार्तालि। दन्तपङ्क्तिद्वये वाराहि। मूर्ध्नि वाराहि। आस्ये वराहमुखि। दक्षदोर्मूले वराहमुखि। दक्षमणिबन्धे अन्धे। दक्षकराङ्गुलिमूले अन्धिनि। दक्षकराग्रे नमः। वामबाहुमूले रुन्धे। वामकूर्परि रुन्धिनि। वाममणिबन्धे नमः। वामकराङ्गुलिमूले जम्भे वामकराग्रे

---

१. 'धोरकां' ख. पाठः। २. 'जम्भिणीं' क. पाठः।

जम्भिनि। दक्षोरुमूले नम:। दक्षजानुनि मोहे। दक्षगुल्फे मोहिनि। दक्षपादाङ्गुलिमूले नम:। दक्षपादाग्रे स्तम्भे। वामोरुमूले स्तम्भिनि। वामजानुनि नम:। वामगुल्फे सर्वदुष्टप्रदुष्टानां। वामपादाङ्गुलिमूले सर्वेषां। वामपादाग्रे सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं। पार्श्वयो: कुरु। पृष्ठे कुरु। नाभौ शीघ्रं। जठरे वश्यं। हृत्पूर्वे कुरु। दक्षांसे कुरु। अपरगले ऐं। वामांसे ग्लौं। हृदादिदक्षकराग्रान्तं ठ:। हृदादिवामकराग्रान्तं ठ:। हृदादिदक्षपादाग्रान्तं ठ:। हृदादिवामपादाग्रान्तं ठ:। हृदयादिनाभ्यन्तं हुं। हृदादिवक्त्रान्तं फट्। शिरसि स्वाहा। इति विन्यस्य षडङ्गं कुर्यात्।। वातालि २ हृदयाय नम:। वाराहि २ शिरसे स्वाहा। वराहमुखि २ शिखायै वषट्। अन्धे अन्धिनि नम: कवचाय हुं। रुन्धे रुन्धिनि नम: नेत्राभ्यां वौषट्। जम्भे जम्भिनि नम: अस्त्राय फट्। इति विन्यस्य ध्यानमानसपूजान्ते स्वपुरत: स्वर्णादिपट्टे कुङ्कुमादिना त्रिकोणं तद्बाह्ये पञ्चकोणं, तद्बहि: षट्कोणं, तद्बहिरष्टदलकमलं, तद्बहि: शतपत्रकमलं, तद्बहि: सहस्रपत्रकमलं, तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रं लिखेदिति पूजायन्त्रं निर्माय, पुरत: संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते भुवनेश्वरीपीठमभ्यर्च्यावाहनादिपुष्पोपचारान्ते त्रिकोणमध्ये अग्नीशासुरवायव्यमध्ये दिक्षु च प्राग्वत् षडङ्गानि सम्पूज्य, त्रिकोणाग्रेषु– जम्भिन्यै नम:। स्तम्भिन्यै०। मोहिन्यै०। इति सम्पूज्य, पञ्चकोण कोणेषु अन्धिन्यै नम:। रुन्धिन्यै०। जम्भिन्यै०। मोहिन्यै०। स्तम्भिन्यै०। इति सम्पूज्य, षट्कोणकोणेषु–डाकिन्यै नम:। राकिण्यै०। लाकिन्यै०। काकिन्यै०। साकिन्यै०। हाकिन्यै०। इति सम्पूज्य, अष्टदलेषु ब्राह्म्यादिमातृका: सम्पूज्य, षट्कोणपार्श्वयो:–हलकपालधारिण्यै क्रोधिन्यै०। मुसलेष्टकरायै स्तम्भिन्यै० इति सम्पूज्य, षट्कोणपुरत:– चण्डोच्चण्डाय नम:। ततोऽष्टदलेषु–वाताल्यै नम:। वाताल्यै०। वाराह्यै०। वाराह्यै०। वराहमुख्यै०। वराहमुख्यै०। अन्धिन्यै०। रुन्धिन्यै० इति सम्पूज्य, अष्टदलाग्रेषु– अष्टमहिषेभ्यो नम:। इति सम्पूज्य, शतपत्रेषु– एकादश रुद्रा:, द्वादशादित्या:, अष्टौ वसव:, द्वावश्विनीकुमारकौ चेति त्रयस्त्रिंशद् देवतास्त्रिधा सम्पूज्यावशिष्टदले–स्तम्भिन्यै जम्भिनीयुतायै नम:। इति सम्पूज्य, पत्राग्रेषु–महासिंहासनाय नम:। इति सम्पूज्य, सहस्रपत्रेषु–क्रों वाराह्यै नम:। इति मन्त्रेण सहस्रवाराही: सम्पूज्य, भूपुरकोणेषु– वटुकक्षेत्रपालयोगिनीगणपान् सम्पूज्य, लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति। तथा–

अथात: सम्प्रवक्ष्यामि तर्पणं भुवि दुर्लभम्। तिलमैरेयबन्धूककुसुमैस्तर्पयेच्छिवाम्।। ४३।।
मनोहरे सुवर्णादिपात्रे सम्पूज्य पूर्ववत्। अनेन विधिना देवीप्रियो भवति निश्चयात्।। ४४।।
एतस्या एव विद्याया कुण्डेऽस्ति परमेश्वरि। विशेष: कथ्यते सोऽत्र सर्ववैरिनिकृन्तन:।। ४५।।
एकहस्तमितं कुण्डमधो हस्तेन विस्तृतम्। हस्तखातं मनोरम्यं होमो यत्र निगद्यते।। ४६।।
स्तम्भने शिवदिग्भागे निग्रहे यमदिग् भवेत्। अस्मिन् कुण्डे महेशानि भैरवाग्निं प्रपूजयेत्।।४७।।
लौकिकं वा यजेन्मन्त्रैर्वक्ष्यमाणै: परेश्वरि। हृदयं भुवनेशान्या भुवनेशीं च संलिखेत्।। ४८।।
तस्या एव शिखा देवि बीजत्रयमिदं शिवे। उक्त्वा भैरवमुच्चार्य चतुर्थ्यन्तं नमो लिखेत्।। ४९।।

ह्रांह्रींह्रूं इति। भैरवाय नम: इति।

इत्यग्निपूजनं कृत्वा ततोऽग्नेराहुतिं यजेत्। पूर्वबीजत्रयं भैरवाग्नये द्विठमालिखेत्।। ५०।।

ह्रांह्रींह्रूं भैरवाग्नये स्वाहा इति।

अनेनैकां हुतिं दत्त्वा नीलोत्पलस्रुचानले। नीलोत्पलैर्भैरवाग्निं तापिच्छैरपि वा यजेत्।। ५१।।
तापिच्छै: स्तम्भने होमो विज्ञेयस्तु चतु:शतम्। देवदारुतिलैर्लाक्षाहरिद्राभिस्तथा भवेत्।। ५२।।

त्रिसप्तमध्यरात्रेषु प्रत्येकं साष्टकं शतम्। हरिणीमुद्रया होमः कथितस्तव सुन्दरि।। ५३।।
दक्षिणे होमकुण्डस्य हस्तमात्रांस्तिलान् प्रिये। प्रसार्य भाण्डे स्वर्णादौ वृत्ते वा लोहसम्भवे।।५४।।
कृष्णशाटीपरिक्षिप्तोत्पलतापिच्छपुष्पिणीम्। तिलमिश्रैरम्बुभिस्तं पूरयेन्मनुवित्तमः ।। ५५।।
वाग्भवं धरणीमुक्त्वा कर्षणादिहलाय च। नवाक्षरमिदं चोक्त्वा हृदन्तं मन्त्रमालिखेत्।। ५६।।

ऐं धरणीकर्षणहलाय नमः इति। क्रोंहुं मुसलाय नमः इति।

अङ्कुशं कोपितं देवि मुसलाय नमो लिखेत्। सप्तविंशतिकृत्वस्तु देवीमन्त्रं समुच्चरेत्।। ५७।।
घटं स्पृष्ट्वा हृदि ध्यात्वा पञ्चमीं परमेश्वरीम्। तद्घटस्थोदकैः शत्रुमभिषिञ्चेद् विचक्षणः।। ५८।।
कफान्वितक्षयी वैरी वश्यो भवति निश्चयात्। अथ निग्रहहोमस्य विधिं वक्ष्ये शृणु प्रिये।। ५९।।
खरमेषाङ्गरक्तेन लाजाचूर्णतिलैः सह। मिश्रं पिण्डं तु पिण्डेन मेलयेद्धेतुना प्रिये।। ६०।।
पिशितैर्गन्धपुष्पाद्यैर्धूपदीपैश्च साधकः। तर्पयेद्योगिनीपिण्डं परमानन्दसुन्दरम् ।। ६१।
सपत्नवेश्म सङ्कल्प्य मृदा वा लोहकेन वा। निवेश्य कुण्डे वक्त्रे वा हुनेल्लाजारजःकणैः।।६२।।
अयुतं सञ्जपन् देवि त्रिसप्तक्षणदा हुनेत्। त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि वैरिणः।। ६३।।
योगिनीनां मुखे देवि पतन्त्यत्र न संशयः। अथातः सम्प्रवक्ष्यामि साधकानन्दकारकम्।। ६४।।
प्रणवं प्रणवेनैवं सम्पुटीकृत्य योजयेत्। औभ्यामौभ्यां च साध्याख्यां ठकारेण च वेष्टयेत्।।६५।।
अष्टभिः कुलिशैर्भित्त्वा ग्लौक्ष्रौमिति तदन्तरे। कुलिशाग्रे तारबीजं पार्थिवं मण्डलं ततः।। ६६।।
कुलिशान्ते लिखेन्नाम चान्ते विद्यां समालिखेत्। बहिरङ्कुशसंरुद्धं सर्वमेतद्वरानने।। ६७।।
रुद्रस्वरे समारोप्य पीतपुष्पैः समर्चयेत्। पञ्चमीशकटं यन्त्रं त्रिषु लोकेषु दुर्लभम्।। ६८।।
सहस्रसंख्ययानेन निशाभाण्डे क्षिपेद् बुधः। खनेद्रात्रौ भूर्जपत्रे लिखित्वा स्थापयेत् सुधीः।। ६९।।
श्यामलोहितमन्त्रज्ञो रक्तपुष्पैः समर्चयेत्। प्रेतधूमानले[2] क्षिप्त्वा यजेद् गुरुर्विधानतः।। ७०।।
सौवर्णं राजतं ताम्रं क्रमेणैतत् समर्चयेत्। कटकार्थी हरिद्राक्तैः पुष्पैराराधयेच्छिवाम्।। ७१।।
धान्यराशौ च सायाह्ने विनिक्षिप्य च तद्भवेत्। नूतने कुम्भकारस्य खर्परे यन्त्रमालिखेत्।। ७२।।
अञ्जनाभैः समभ्यर्च्य कुसुमैः पथि देशिकः। उच्चाटयेत् तदा शीघ्रं कोट्यब्दसुस्थिरं रिपुम्।।७३।।
तद्भाण्डे तु मषीद्रव्यैर्भिन्नभिन्नाञ्जनप्रभैः। समुद्धृत्य समभ्यर्च्य लोहकारगृहे क्षिपेत्।। ७४।।
वध्यमानो रोगजालैर्मरणं प्राप्नुयाद्रिपुः। निःसाने पटहे वाद्ये विलिखेन्मनुवित्तमः।। ७५।।
युद्धे तद्ध्वनिमाकर्ण्य पलायन्ते महाबलाः। धूमचितौ समालिख्य धूमाभैरर्चयेत् प्रिये।। ७६।।
नश्यन्ति दृष्टयस्तेषां शत्रूणां नान्यथा भवेत्। हरिद्रया शिलामध्ये समालिख्यार्चयेत् सुधीः।।७७।।
पीतपुष्पेषु तद्यन्त्रमधोवक्त्रं विनिक्षिपेत्। वाक्स्तम्भो जायते शीघ्रं वादिनां परमेश्वरि।। ७८।।
अथ सीसे समालिख्य सीसाभैः कुसुमैर्यजेत्। शिलाधस्ताद्विनिक्षिप्य व्यवहारे जयी भवेत्।।७९।।

---

१. 'क्रोधितं' ग. पाठः। २. 'लये' ख. पाठः।

सार्धं लोहमये पात्रे सितपुष्पैः समर्चयेत्। वाक्पतिर्जायते मन्त्री यन्त्रसारेऽथ संलिखेत्। ८०।।
पञ्चवर्णैः प्रसूनैश्च पूजयेत् सर्वकर्मकृत्। अथातस्तिमिरामिश्रे सीसयुग्मे लिखेद् बुधः।। ८१।।
अभ्यर्च्य कुसुमै रम्यैः प्रेतभूमौ प्रतापयेत्। तेनाकृष्टिर्भवेदाशु पुंसां वा योषितामपि।। ८२।।
वृक्षगर्भे न्यसेच्चक्रं सीसपात्रे सुरञ्जिते। बहिष्ठा ग्रामभागेभ्यः सम्प्रविष्टा भवन्ति हि।। ८३।।
साध्यनक्षत्रवृक्षस्य गर्भे चक्रं प्रविन्यसेत्। वृक्षस्य यत्कृतं देवि साध्यस्य भवति स्फुटम्।। ८४।।
जले क्षिप्तं दोषदायि वह्नौ क्षिप्तं तु तापकृत्। योगदं भस्मनि क्षिप्तं हितदं भूमिगं प्रिये।। ८५।।
अन्नगं कामिनीं दद्यात् कुम्भे क्षिप्तं सुतप्रदम्। पूर्वस्यां दिशि सङ्क्षिप्तं रिपूणां भयदं भवेत्।।८६।।
आग्नेये यमदिग्भागे वैरिणां मृत्युदं भवेत्। तथा नैर्ऋतदिग्भागे शत्रून्मादनकारणम्।। ८७।।
पश्चिमे रोगदं तेषां भीतिदं वायुदिग्गतम्। धनदं चोत्तरे भागे साधकस्य न संशयः।। ८८।।
ईशानगं भ्रान्तिकरं वैरिणां परमेश्वरि। मध्यगं सर्वकार्याणि शत्रूणां नाशनं ध्रुवम्।। ८९।।
एतस्या एव विद्याया मध्यरात्रेऽर्चनं भवेत्। अन्यथा देवताशापो जायतेऽतीव दुस्तरम्।। ९०।।

इति। अथैतद्यन्त्ररचनाप्रकारः— तत्र प्रोक्तभूर्जादौ प्रोक्तद्रव्यैरष्टकोणं विलिख्य कोणाग्रेषु कुलिशानि विधाय, मध्ये वप्र (प्रणव) द्वयसम्पुटं प्रणवं विलिख्य, तदुपरिष्टादधस्ताच्च औकारद्वयमध्यगं साध्यनाम विलिख्य, तत्सर्वं ठकारेण संवेष्ट्य, तद्बहिरष्टारस्याष्टकोणेषु तत्कुलिशेषु च ग्लौंक्ष्रौं इति बीजद्वयं प्रतिकोणं प्रतिकुलिशं विलख्य, कुलिशेषु साध्यनाम विलिख्य तत्सर्वं मूलमन्त्रेण संवेष्ट्य, कुलिशाग्रेषु प्रणवं विलिख्य, तद्बहिर्भूपुरं विलिख्य तत्सर्वमङ्कुशबीजेन संवेष्ट्य सर्वं यन्त्रमेकारमध्ये यथा भवति तथा विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति। इति स्तम्भनाद्यखिलेष्टसाधने वाराहीप्रकरणम्। अथ निग्रहवाराही। उत्तरतन्त्रे—

वाग्भवं पृथिवीबीजं ठकारत्रितयं तथा। बिन्दुयुक्तं ततश्चैव कूर्चबीजाग्निवल्लभा।। १।।
''ऐंग्लौंठंठंठंहूं स्वाहा''।
अष्टाक्षरी महाविद्या शत्रुनिग्रहकारिणी। कपिलोऽस्य मुनिश्छन्दोऽनुष्टुप् च परिकीर्तितम्।। २।।
वाराही देवता प्रोक्ता वाताली पदपूर्विका। द्व्येकैकभूमिचन्द्रद्विवर्णैरङ्गक्रिया मनोः।। ३।।
विद्युद्दामसमानाङ्गीं पाशं शक्तिं च मुद्गरम्। अङ्कुशं बिभ्रतीं दोर्भिर्नेत्रत्रयविराजिताम्।। ४।।
नानालङ्कारभूषाङ्गीं वाराहीं संस्मरेत् तदा। प्राक्प्रोक्ते पूजयेत् पीठे अङ्गदिक्पालहेतिकैः।। ५।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि कपिलऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीवातालीवाराहीदेवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, ऐंग्लौं हृदयाय नमः। ठं शिरसे०। ठं शिखायै०। ठं कवचाय०। हूं नेत्रत्रयाय०। स्वाहा अस्त्राय०। इति करषडङ्गन्यासं विधाय, ध्यानमानसपूजान्ते स्वपुरतः स्वर्णादिपट्टे कुङ्कुमादिना षट्कोणवृत्तभूपुरात्मकं यन्त्रं विलिख्य पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते भुवनेश्वरीपीठमभ्यर्च्यावाहनादिपुष्पोपचारान्ते षट्कोणेषु षडङ्गानि सम्पूज्य तद्बहिर्लोकपालार्चादि सर्वं प्राग्वत् समापयेद् इति। तथा—

वसुलक्षं जपेन्मन्त्रं बिल्वपत्रैर्हयारिजैः। धात्रीफलैर्भृङ्गराजपत्रैर्दर्भैर्दशांशतः।। ६।।

जुहुयान्मन्त्रसंसिद्ध्यै ततः कर्माणि साधयेत्। अङ्कुशेनारिमादाय दृढं बद्ध्वा गुणेन च।। ७।।
प्रहारं कुर्वतीं मूर्ध्नि मुद्गरेण स्मरन् जपेत्। अयुतं जुहुयाच्छुद्धैरयुतं वनगोमयैः ।। ८।।
वापीकूपतडागेषु प्रक्षिपेद्भस्म तद्भवम्। तत्र तज्जलपानेन म्रियन्ते शत्रवो भृशम्।। ९।।
पलायन्ते च रिपवो दिशो दश सुनिश्चयात्।..।।

इति निग्रहवाराही।। अथ धूम्रवाराही। तत्र कालमृत्युतन्त्रे— देव्युवाच।

कालरुद्र नमस्तुभ्यं कालाधारं नमोनमः। अधुना धूम्रवाराह्या मन्त्रयोगं वद प्रभो।। १।।

ईश्वर उवाच

कालमृत्युमयं प्रोक्तं प्राणिप्राणापहारकम्। मारणास्त्रमिदं देवि सर्वतन्त्रेषु गोपितम्।। २।।
मन्त्रोद्धारं प्रवक्ष्यामि न्यासध्यानादिकं तथा। यन्त्रं प्रयोगं गिरिजे धूम्रवाराहिगं प्रिये।। ३।।
वेदादि विलिखेत् पूर्वं धूंकारद्वयमेव च। मृत्युधूमे तु प्रोच्चार्य पुनः धूंकारमुच्चरेत्।। ४।।
धूंकारं कालधूमे च पुनः धूंकारमेव च। धूंपूर्वं धूम्रशब्दं च वाराहीति पदं वदेत्।। ५।।
हुंफट्स्वाहा समायुक्तो धूम्रवाराहिगो मनुः। पञ्चविंशतिवर्णोऽयं मन्त्रराजेश्वरेश्वरः।। ६।।

''ॐधूंधूं मृत्युधूमे धूंधूं कालधूमे धूंधूं धूम्रवाराहि हुं फट् स्वाहा''।

कालमृत्युर्ऋषिः प्रोक्तो बृहती छन्द एव च। देवता धूम्रवाराही नियोगः शत्रुमारणे।। ७।।
धूं बीजं हूं तथा शक्तिः कीलकं प्रणवं तथा। न्यासजालं प्रवक्ष्यामि तव पर्वतनन्दिनि।। ८।।

सप्तभिश्च पुनः षड्भिर्द्वाभ्यां वेदैर्द्विका (द्वाभ्यां त्रिका)ब्धिभिः।
न्यासं चैवानुलोमेन विलोमेन पुनर्न्यसेत् ।। ९।।

एवं न्यासविधिं कृत्वा साक्षाद् देवीमयो भवेत्। अथ ध्यानं प्रवक्ष्यामि सावधानावधारय।। १०।।
वाराही धूम्रवर्णा च भक्षयन्ती रिपून् सदा। पशुरूपान् मुनिसुरैर्वन्दितां धूम्ररूपिणीम्।। ११।।
एवं ध्यात्वा मन्त्रराजमयुतं जपमाचरेत्। तर्पणं शुद्धतोयेन पूजयेच्चन्दनादिभिः।। १२।।
होमं दशांशं कुर्वीत तर्पणस्याप्ययं क्रमः।..।।

जपदशांशहोमः। जपदशांशतर्पणमित्यर्थः।

हुनेज्जपदशांशं तु त्रिमध्वक्तगुडौदनैः। अथवा जुहुयाद् देवि मधूककुसुमेन च।। १३।।
तर्पणं तद्दशांशेन ब्राह्मणान् भोजयेत् प्रिये। एवं चानुष्ठितो मन्त्रो मन्त्रिणः सिद्धिमाप्नुयात्।।१४।।
पुनः प्रयोगमतुलं कृत्वा शत्रून् निवारयेत्। पूर्वोक्तविधिना ध्यात्वा वाराहीं धूम्ररूपिणीम्।। १५।।
त्रिसहस्रं जपेन्मन्त्रं गर्भितं शत्रुनामभिः। आगत्य धूम्ररूपेण तच्छत्रून् भक्षयन्त्यपि।। १६।।
शत्रूंश्च शत्रुसेनां च धूममध्ये समाकुलाम्। एवं ध्यात्वा रिपून् सम्यगयुतं जपमाचरेत्।। १७।।
मृत्युना ग्रस्तदेहाश्च म्रियन्ते नात्र संशयः। गृहधूमं समानीय चारनालेन संयुतम् ।। १८।।
मन्त्रयेच्छतवारं तु लोहपात्रमये ततः। तदंशं बिन्दुमात्रेण खाने[1] पाने च वैरिणः।। १९।।

---

१. 'चान्ने' ख. पाठः।

दातव्यं यत्नतो देवि स रिपुर्म्रियते ध्रुवम्। अथवा चारनालं तु निक्षिपेद्गोमये प्रिये।। २०।।
तापज्वरेण महता तच्छत्रुर्म्रियते ध्रुवम्। सहस्रत्रयमाजप्य ध्यायेद् देवीमनन्यधी:।। २१।।
शतयोजनग: शत्रुर्म्रियते पक्षमात्रत: । गृहधूमं गरं चैव गान्धारीद्रवयोगत: ।। २२।।
मर्दयेत् सूक्ष्मकल्कं तु कुर्याद्गुलिकमादरात्। पूजयेदुपचारेण वैरिप्राणान् निवेदयेत्।। २३।।
सहस्रद्वितयेनैव शत्रु: क्षयमवाप्नुयात्। वाराहीं धूम्ररूपेण चिन्तयेत् तस्य मध्यगाम्।। २४।।
रिपुं सङ्क्षुभितं ध्यायेन्नित्यमष्टोत्तरं जपेत्। मण्डलाद्वैरिवर्गं च भार्याबन्धुसमन्वितम्।। २५।।
कुलक्षयं नयेच्छीघ्रं पशुमित्रादिभि: सह। यक्षधूपं समानीय मन्त्रयेन्मूलमन्त्रत: ।। २६।।
शतमष्टोत्तरं चैव जपित्वा पूर्वमेव च। शनै: शनैर्धूपयेच्च जपन्नष्टोत्तरं शतम् ।। २७।।
त्रिदिनै: पञ्चदिवसैश्चतुर्भिर्म्रियते ध्रुवम्। शत्रुमारणकार्येषु प्रोक्तसंख्याजपात् प्रिये।। २८।।
दृश्यते धूम आद्यन्तमाश्चर्यकरमेव च। तदानीमेव तच्छत्रुर्मृतवानिति निश्चितम् ।। २९।।
एवं सिद्धमनुर्देवि दुर्लभो भुवि पार्वति। न वक्तव्यं न वक्तव्यं न वक्तव्यं कदाचन।। ३०।।
धूम्रधूसरवान् देवि रसमांसप्रिये शिवे। शत्रुमारणकार्येषु ध्यायेत् क्रोडमुखीं तत:।। ३१।।

देव्युवाच

नम: कैलासनाथाय करुणाकर शङ्कर। अधुना धूम्रवाराह्या यन्त्रयोगं वद प्रभो।। ३२।।

ईश्वर उवाच

बिन्दुत्रिकोणं षट्कोणमष्टपत्रं कुलेश्वरि। वृत्तं च भूपुरद्वन्द्वमष्टवज्रसमन्वितम् ।। ३३।।
बिन्दुमध्ये लिखेद् देवि धूंकारं यत्नत: प्रिये। ग्लौंकारेण च संवेष्ट्य पश्चाद् धूंकारत: प्रिये।। ३४।।
त्रिकोणे विलिखेद्वर्णान् वाराहीति त्रिमन्त्रितान्। षट्कोणे विलिखेद्वर्णान् वाराहीति षडक्षरी।। ३५।।
कोणरन्ध्रेषु गिरिजे धूंकारं च यथाक्रमम्। अष्टपत्रे लिखेद् देवि वाराह्यष्टाक्षरं तथा।। ३६।।
केसरेषु च पूर्वादि षोडशस्वरयुग्मकान्। आद्ये वृत्ते लिखेन्मन्त्रं धूम्रवाराहिभा[1]षितम्।। ३७।।
द्वितीयवृत्ते विलिखेदस्त्रवाराहिगं मनुम्। तृतीयवृत्ते विलिखेत् प्राणस्थापनगं मनुम्।। ३८।।
अष्टवज्रेषु विलिखेत् कचटाद्यष्टवर्गकान्। एवं यन्त्रवरं देवि लिखेत् कार्यानुसारत:।। ३९।।
स्वर्णे वा रजते वापि शान्तिवश्येषु संलिखेत्। पाषाणे स्तम्भने पत्रे लिखेदुच्चाटकर्मणि।। ४०।।

पत्रे विभीतपत्रे।

ताम्रे विद्वेषकार्येषु मारणे प्रेतवस्त्रके। एवं यन्त्रवरं सम्यग् लिखेद् ग्रन्थोक्तमार्गत:।। ४१।।
आशु प्रयोगा: सकला: सम्भवन्ति न संशय:। स्वर्णपट्टे लिखेद्यन्त्रं वश्यकार्ये विशेषत:।। ४२।।
पूजयेद्रक्तपुष्पैस्तु परमान्नं निवेदयेत्। त्रिसहस्रं जपेन्मन्त्रं शुचिर्भूत्वा तु नित्यश:।। ४३।।
मातृकान्तरितं साध्यं वाराहीमु[2]क्तमार्गत:। मण्डलं चैव गिरिजे भक्त्याप्येवं समाचरेत्।। ४४।।

---

१. 'भू' ख. पाठ:। २. 'ह्या उक्त' ख. पाठ:।

कुबेरसदृश: श्रीमाञ्जायते नात्र संशय:। पाषाणादौ लिखेद्यन्त्रं पत्रे धूम्रमयी प्रिये।। ४५।।
वाराही नाम सा देवी पूजयेत्तां यथाविधि। विद्वेषणमथोच्चाटं यद्यन्मनसि वर्तते।। ४६।।
तत्तदाप्नोति पक्षे तु नित्यमष्टोत्तरं जपेत्। प्रेतवस्त्रे लिखेद्यन्त्रं प्रेताङ्गारेण बुद्धिमान्।। ४७।।
यमकण्टकयोगे तु लिखेद्यमदिशामुख:। भौमवारे खनेद्यत्नाद्वने गर्तमतन्द्रित:।। ४८।।
गोपयेत् तत्र तद्यन्त्रं बलिं दद्याद्गुडोदनै:। जपेदष्टसहस्रं तु मन्त्री निशि दिगम्बर:।। ४९।।

अष्टसहस्रम् अष्टोत्तरसहस्रमित्यर्थ:।

शतयोजनग: शत्रु: सङ्गच्छेद्यममन्दिरम्। पूर्वोक्तविधिना देवि यन्त्रं प्रेतपटे लिखेत्।। ५०।।
निक्षिपेच्छत्रुगेहे तु स शत्रुर्नावशिष्यते। काकोलूकदले चैव रज्जुनापि च वेष्टयेत्।। ५१।।
त्रिसप्तमूलमन्त्रेण वेष्टयित्वा तु भौमके। स्थापयेच्छत्रुगेहे तु जपेदष्टसहस्रकम्।। ५२।।
काकवद् भ्रमते शत्रुस्तिरस्कारेण संयुत:। पूर्वोक्तधूम्रवाराहीमन्त्रे धूंधूमपास्य च।। ५३।।
फट्द्वयं तु समायोज्य धूमरूपे च संलिखेत्। धूम्राक्षरद्वयं हित्वा चास्त्रेति विनियोजयेत्।। ५४।।
अस्त्रवाराहिमन्त्रोऽयं चतुर्विंशतिवर्णक:।..।।

''ॐफट्फट् मृत्युरूपे फट्फट् कालरूपे फट्फट् अस्त्रवाराहि हुं फट् स्वाहा।''

पूर्वोक्ता एव मुन्याद्या: साधनं पूर्ववच्चरेत्। निग्रहोक्तसपर्यात्र विशोषोच्चाटने मता।। ५५।।
नमस्ते अस्त्रवाराहि वैरिप्राणापहारिणि। गोकण्ठमिव शार्दूलो गजकण्ठं यथा हरि:।। ५६।।
शत्रुरूपपशून् हत्वा आशु मांसं च भक्षय। वाराहि त्वां सदा वन्दे वन्द्ये चास्त्रस्वरूपिणि।। ५७।।

इति ध्यानविशेष:।

अन्धिनीपञ्चकोपेता पञ्चमीति निगद्यते। अन्धिनीपञ्चकोपेता वाराही शस्यते बुधै:।। ५८।।
पञ्चमी स्तम्भने शस्ता वाराही वश्यकर्मणि। वाराहीयुगलं चैव वाराहमुखियुग्मकम्।। ५९।।
हित्वा वार्तालिसंज्ञा स्यात् सारस्वतविधायिनी। वाराहीति युगं हित्वा सा विश्वविजयाभिधा।।६०।।
रणे राजकुले द्यूते सर्वत्र जयदायिनी। वाराहमुखियुग्मं तु हित्वा स्याद्भद्रकौमुदी।। ६१।।
सम्प्रत्प्रदा सा गदिता विद्या वैश्रवणार्चिता। वार्तल्यादिकमेकैकं हित्वा स्यात् सर्वतोमुखी।।६२।।
आकर्षणे मोहने च प्रशस्ता वश्यकर्मणि। वक्ष्ये श्रीस्वप्नवाराहीं शीघ्रसिद्धिविधायिनीम्।।६३।।
प्रणवं भुवनेशीं च नमो वाराहि चोच्चरेत्। अघोरेश्वरिशब्दान्ते स्वप्नं ठद्वयमुद्धरेत् ।। ६४।।

''ॐह्रीं नमो वाराहि अघोरेश्वरि स्वप्नं ठठस्वाहा'' (१८)

स्वाहान्तोऽयं महामन्त्रोऽष्टादशाक्षरवर्णवान्। ईश्वर ऋषिराख्यातो गायत्रं छन्द ईरितम्।। ६५।।
देवी श्रीस्वप्नवाराही देवता परिकीर्तिता। बीजं तु प्रणवं चैव स्वाहा शक्तिरुदाहृता।। ६६।।
मायाबीजं कीलकं स्याद् द्वाभ्यां द्वाभ्यां त्रिभिस्तत:। पञ्चभिश्च चतुर्भिश्च द्वाभ्यामङ्गक्रिया मनो:।।६७।।
पज्जानुकटिकण्ठेषु गण्डाक्षिश्रुतिनासिके। मस्तके तु प्रविन्यस्येद् विद्यां पञ्चदशाक्षरीम्।। ६८।।

अत्र प्रणवं मायां च विना सन्धिं कृत्वा पञ्चदशाक्षरमित्यर्थ:।

नीलाञ्जनगिरिश्यामां हेमरत्नविभूषिताम्। अश्वारूढां च वाराहीं पाशाङ्कुशधरां शुभाम्।। ६९।।
भीमरूपां महादेवीं खड्गखेटकधारिणीम्। चतुर्भुजां तीक्ष्णदंष्ट्रां दंष्ट्राग्रस्थवसुन्धराम्।। ७०।।
दुष्टसंहरणोद्युक्तां साधकस्य वरप्रदाम्। ....।।

ध्यायेदञ्जनभूधरोज्ज्वलनिभामश्वाधिरूढां करै-
बिभ्राणां मणिहेमभूषिततनुं पाशाङ्कुशौ भैरवीम्।
खड्गं खेटकमग्रदंष्ट्रविलसत्पृथ्वीमरिध्वंसिनीं
देवीं तुङ्गपयोधरामनुदिनं श्रीस्वप्नवाराहिकाम्।। ७१।।

एवं ध्यात्वा यजेद् देवीं प्राक्प्रोक्तविधिना सुधी:।.....................................।।

प्रागुक्तस्तम्भनवाराहीपूजनमत्रापि कुर्यादित्यर्थ:।। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ईश्वरऋषये नम:। मुखे गायत्रीछन्दसे नम:। हृदये श्रीस्वप्नवाराहीदेवतायै नम:। गुह्ये ऊंबीजाय नम:। पादयो: स्वाहाशक्तये नम:। नाभौ ह्रींकीलकाय नम:। इति विन्यस्य, ममाभीष्टसिद्धये विनियोग:। इति कृताञ्जलिरुक्त्वा, ऊंह्रींहृदयाय नम:। नमो शिरसे०। वाराहि शिखा०। अघोरेश्वरि कवचा०। स्वप्नं ठठ नेत्रत्रयाय०। स्वाहा अस्त्राय फट्। इति, एवं करषडङ्गन्यासं विधाय, पादद्वय-जानुद्वय-कटिद्वय-कण्ठगण्डद्वयाक्षिद्वय-श्रुतिद्वय-नासिकाद्वयमस्तकेषु पञ्चदशाक्षराणि विन्यस्य, प्रणवमायासहितमूलेन सर्वाङ्गे व्यापकं विन्यस्य, ध्यानमानसपूजान्ते भुवनेश्वरीपीठमभ्यर्च्य स्तम्भनवाराह्युक्तपूजां विदध्यात्।। तथा—

जपेच्च वर्णसाहस्रं पुरश्चरणसिद्धये। दशांशं जुहुयाद् देवि तापिच्छैरुत्पलै: शुभै:।। ७२।।
जलैर्वा तर्पयेद् देवीं दशांशैर्नारिकेलजै:। भूतं भव्यं भविष्यं च स्वप्ने कथयति ध्रुवम्।। ७३।।

इति वाराहीप्रकरणम्।। अथ शवरीमन्त्र:।

वदाम्याकर्षिणी विद्यां शीघ्रसिद्धिविधायिनीम्। वकेशोऽनन्तसंयुक्तबिन्दुभूषितमस्तक:। । १।।
अद्रीशस्तादृशो ज्ञेयोऽप्यथ शावरिशक्तिकौ। ङेन्तौ हृदन्तो मन्त्रोऽयं नवार्ण: परिकीर्तित:।। २।।

''शांदांशवर्य्यै शक्त्यै नम:''।

जाबालिरस्यर्षि: प्रोक्तोऽनुष्टप् छन्द: प्रकीर्तितम्। शवरी देवता प्रोक्ता शां बीजं दां च शक्तिकम्।।३।।
आकर्षयाकर्षयेति कीलकं परिकीर्तितम्। शांदां शींदीमिति न्यस्येत् षड्दीर्घस्वरयुक्तित:।। ४।।
रक्तवर्णां बद्धसाध्यां पाशेनानीय तं क्षणात्। वरप्रदां महादुर्गां शवरीं शरणं भजे।। ५।।
अष्टलक्षं जपित्वान्ते पलाशकुसुमैर्हुनेत्। ब्राह्मणान् भोजयेत् पश्चाद् दीनान्धकृपणै: सह।। ६।।
तत: सिद्धो भवेन्मन्त्र: प्रयोगेषु क्षम: सदा। स्फटिकाक्षस्रजा जप्यात् प्रयोगेऽप्ययुतं सुधी:।। ७।।
नववर्णान्तके दद्यात् तमाकर्षय युग्मकम्। शतयोजनगं साध्यं शीघ्रमाकर्षयेद् ध्रुवम्।। ८।।
कांमामिति समुच्चार्य शवरान्ते च देवताम्। ङेन्तां विलिख्य शक्त्यै तमुच्चाटययुगं तत:।। ९।।
वह्निजायान्वितो मन्त्र एकविंशार्णकस्तथा।.......................................।।

''कांमां शवरदेवतायै शक्त्यै तमुच्चाटयोच्चाटय स्वाहा (२१)''

जाबालिरस्यर्षि: प्रोक्तो बृहती छन्द ईरितम्। कादम्बर्य्यादिदुर्गा च देवता परिकीर्तिता।। १०।।
कां बीजं मां तथा शक्तिरुच्चाटययुगं तथा। कीलकं च तथा प्रोक्तं कांमामित्यादिनाङ्गकम्।।११।।
नि:श्वासोत्थमहावातै: शत्रून् देशान्तरे क्षिपन्। नृत्यन्तीं मुक्तकेशान्तां धूम्रवर्णां भजेच्छुभाम्।।१२।।
मासद्वयं लक्षषट्कं जपित्वान्तेऽर्कपुष्पकै:।..।।

अत्र दशांशं हुत्वाष्टादशमिथुनानां भोजनं देयम्। साध्यप्रतिकृतिं विलिख्य हृदये ककारं विलिख्य शिरआदिपादान्तं वायुबीजसाध्यनामसहितमूलमन्त्राक्षराणि विलिख्य, अप्रादक्षिण्येन वेष्टयित्वा स्नुहीक्षीरेण विलिख्य, वीथीस्थपांसुना स्नुहीदण्डेनोरू बद्ध्वा दृष्ट्वा जपेत्। ततस्तं दग्ध्वा तद्भस्म हुनेत् सिद्धिर्भवति।।

अथ कर्णपिशाचिनीमन्त्र:। तदुक्तं तन्त्रान्तरे—

तारं च भुवनेशानी तत: कर्णपिशाचिनि। कर्णे मे कथय स्वाहा मन्त्रोऽयं षोडशाक्षर:।। १।।

"ॐह्रींकर्णपिशाचिनि कर्णे मे कथय स्वाहा" (१६)

पिप्पलाद ऋषिश्छन्दो निचृद्गायत्रसंज्ञकम्। देवता कथिता सद्भिर्देवी कर्णपिशाचिनी।। २।।
एकैकरसवह्न्यग्निनेत्रवर्णै: षडङ्गकम्। कुर्यान्मन्त्रस्य वर्णैश्च ध्यायेत् कर्णपिशाचिनीम्।। ३।।
चितासनसमारूढां मुण्डमालाविभूषिताम्। प्रोतान् नरान्त्रास्थिमणीन् धारयन्तीं कुवस्त्रकाम्।। ४।।
एवं ध्यात्वा श्मशानस्थ: शवस्थो वा जपेन्मनुम्। लक्षसंख्यं दशांशेन विभीतकसमिद्वरै:।। ५।।
हुनेत् पूर्वोदिते पीठे चाङ्गदिक्पालहेतिभि:। यजेत् सिद्धे मनौ कुर्याज्जपं लक्षं समाहित:।।६।।
अशुचिर्बदरीवृक्षाधस्तात् तुष्टा पिशाचिनी। परचित्तस्य वार्तां च त्रिकालस्थां वदेच्छ्रुतौ।। ७।।

इति। मन्त्रान्तरं तन्त्रान्तरे—

कर्णात् सेक्षणलोहितो बकगतोऽनन्तश्चिकारो वदा—
तीतानागतशब्दयुक्तभुवनेशी वह्निजायान्विता।
ताराद्यो मनुरेष लक्षजपतो व्यासेन संसेवित:
सार्वज्ञ्यं लभतेऽचिरेण नियतं पैशाचिकीभक्तित:।। १।।

"ॐ कर्णपिशाचि वदातीतानागतं ह्रीं स्वाहा (१६)" ध्यानम्—

खर्वां रक्तविलोचनां घननिभश्यामां च लम्बोदरीं
बन्धूकारुणजिह्विकां वरकराभीयुक्करामुन्मुखीम्।
धूम्रार्चिर्जटिलां कपालविलसत्पाणिद्वयां चञ्चलां
सर्वज्ञां शवहृत्कृताधिवसतिं पैशाचिकीं तां नुम:।। २।।

इति। अथ पूजा—

निशायामर्धरात्रे च हृदि न्यस्य पिशाचिकीम्। दग्धमीनबलिं दद्याद्रात्रौ सम्पूज्य सञ्जपेत्।।

"ॐ कर्णपिशाचि दग्धमीनबलिं गृह्ण २ मम सिद्धिं कुरु २ स्वाहा।" इति दग्धमीनबलिं दद्यात्।

रक्तचन्दनबन्धूकजपापुष्पादिकं च यत्। अमृतं कुरु देवेशि स्वाहेति प्रोक्षयेज्जलै:।।

पूर्वाह्णे किञ्चिज्जपं कृत्वा मध्याह्ने एकभक्तं निरामिषं भुक्त्वा रात्रावपि तत्संख्यं जपेत्। जपस्य दशाशं तर्पणम्। ''ॐ कर्णपिशाचीं तर्पयामि ह्रीं स्वाहा'' एवं क्रमेण लक्षमेकं पुरश्चरणं कृत्वा दशांशं होमयेत्। तदभावे दशांशतर्पणं कृत्वा वरं प्रार्थयेत्। मूलं रक्तचन्दनेन लिखित्वा यन्त्रोपरि इष्टदेवतां पूजयेत्।। अथ सिद्धिलक्षणमुच्यते— गगनमण्डले हूंकारादिश्रवणदीर्घाग्निशिखारूपसन्दर्शनात् सिद्धिर्भविष्यतीति ज्ञात्वा तथाविधमाचरेत्। मन्त्रान्तरम्—प्रणवं मायाकर्णपिशाचि मे कर्णे कथय हुं फट् स्वाहा। इति प्रदीपतैलं पादयोर्दत्त्वा रात्रौ लक्षं जपेत्। तत: सर्वज्ञो भवति नास्य पूजाध्यानम्। तथा— ''तारं कामबीजं जयादेवि स्वाहा'' अस्यापि न्यासादेरभाव:। पूर्वं लक्षं जप्त्वा गृहगोधिकां निपात्य तदुपरि जयादेवीं यथाशक्ति सम्पूज्य तावज्जपेत् यावत्सा जीवति तत: सिद्ध्यति। सिद्धिस्तु— मानसादिप्रश्ने कृते सा आयाति तस्या: पृष्ठे सर्वं भूतभविष्यादिकं पश्यति। ''ॐचारुचण्डालि चिरुचण्डालि स्वाहा'' इति फलके भूमौ वा चाण्डालिरूपमालिख्य षोडशोपचारै: सम्पूज्य सन्ध्यात्रयेऽष्टोत्तरशतं जपेत्। अष्टदिनावधि आकर्षणं भवति (१)। ॐ चिरुचण्डालि रुचिचण्डालि स्वाहा'' इत्यभिलषितस्त्रीरूपं नामसहितं विलिख्योपचारै: सम्पूज्य पूर्ववदष्टोत्तरशतं जपेदाकर्षणं भवति (२)। ॐ नमो भगवति ललिताङ्गभूषिणि त्रिभुवनतिलकि सर्वजनवशङ्करि ह्रींह्रांह्रूं स्वाहा'' इत्यष्टोत्तरशतं जपेत् स्त्रीवश्यम्।। (३)।। ॐ नमो भगवति शुचिचण्डालिनि श्मशानवासिनि स्वाहा'' इति शयनसमये पश्चिमाभिमुखोऽष्टोत्तरशतं जपेद् आकर्षणं भवति। सा स्त्री नागता चेत्तद्देहे स्फोटका भवन्ति (४)। ॐह्रांह्रूंक्षींक्षींक्षूं रुक्षिरुघेरुघे स्वाहा'' इति सप्तदिनानि नित्यमष्टोत्तरशतं जपेत् नारी समायाति (५)। ॐ हिरहन्नि ॐ नमो भगवति भूतेश्वरि मद्वलय्य मद्वलय्य हरेपुरहुंपुरकोल्ला भगवति रुद्राय स्वाहा'' इति नागवल्लीदले स्त्रीनाम विलिख्य दीपशिखायां तापितं चेत् स्त्र्याकर्षणं भवति (६)। एते डामरोक्तमन्त्रविशेषा षड्भेदा:।। भूतडामरे—

प्रणवं कमलाबीजं स्वप्नेश्वरि पदं तत:। कार्यं मे वद शब्दान्ते वह्निजायान्तिको मनु:।। १।।

''ॐ श्रीं स्वप्नेश्वरि कार्यं मे वद स्वाहा'' (१३)

त्रयोदशाक्षरो मन्त्र: स्वप्नेश्वर्य्या: फलप्रद:। उपमन्युर्ऋषि: प्रोक्तो बृहती छन्द एव च।। २।।
स्वप्नेश्वरी देवता स्यादक्षिवेदाक्षिभूयुगै:। नेत्रार्णैश्च षडङ्गानि न्यस्य ध्यायेच्च देवताम्।। ३।।
वराभये पद्मयुग्मं दधतीं शुभ्रवाससम्। कनकासनमारूढां शरच्चन्द्रायुतप्रभाम् ।। ४।।
रत्नभूषणभूषाढ्यां स्वप्नेशीं हृदि भावयेत्। लक्षसंख्यं जपित्वान्ते बिल्वपत्रैर्दशांशत:।। ५।।
जुहुयाद् भुवनेश्वर्या: पीठे देवीं समर्चयेत्। अङ्गदिक्पालवज्राद्यैरावृतित्रयसंयुताम्।। ६।।
रात्रौ देवीं समभ्यर्च्यायुतं देव्यग्रतो जपेत्। तत: शयीत भूमौ तु ब्रह्मचर्य्येण मन्त्रवित्।। ७।।
दर्भास्तरणके देव्यै स्वस्वकार्यं निवेदयेत्। स्वप्ने वदति सा देवी शुभाशुभफलं ध्रुवम्।। ८।।

इति।। अथ शीतलामन्त्र:—

तारं च भुवनेशानीं श्रीबीजं शीतलापदम्। यै नमोन्तो महामन्त्रो नववर्णात्मक: शिवे।। १।।

''ॐ ह्रीं श्रीं शीतलायै नम:''। (९)।

पूर्वोक्ता एव मुन्याद्या दीर्घषट्कयुजा तथा। शक्तिलक्ष्मीद्वयेनैव षडङ्गन्यासकल्पना ।। २।।
रक्ताम्बरां कराभ्यां च शूर्पं मार्जनिकां तथा। दधानां रासभस्थां च नीलजीमूतसन्निभाम्।। ३।।
रक्ताङ्गरागवसनां रक्तमाल्यविभूषिताम। एवं ध्यायेच्छीतलां च रोगनाशाय सर्वदा।। ४।।

जपेदयुतसंख्याकं पायसेन दशांशतः। हुनेत् प्राग्वद्यजेद् देवीं स्फोटानां नाशनाय च।। ५।।
नाभिमात्रेऽम्भसि स्थित्वा सहस्रं प्रजपेन्मनुम्। तेन स्फोटामयाः शीघ्रं विनश्यन्त्यतिदारुणाः।। ६।।

इति।। अथ कालरात्रिप्रकरणम्। देव्युवाच–

देव देव जगन्नाथ भक्तानामिष्टदायक। त्वत्प्रसादान्मया सर्वं श्रुतं मन्त्रसमुच्चयम्।। १।।
इदानीं श्रोतुमिच्छामि कालरात्रिविधानकम्। मन्त्रयन्त्रप्रयोगादि तत्सर्वं कृपया वद।। २।।

ईश्वर उवाच

शृणु गुह्यतमं देवि न कस्य कथितं मया। इदानीं कथयिष्यामि शृणुष्वैकाग्रमानसा।। ३।।
प्रणवं वाग्भवं शक्तिः कामराजं रमा तथा। काह्लेश्वरि सर्वजनमनोहारि च सर्व च।। ४।।
मुखस्तम्भिनि सर्वान्ते राजेति च वशङ्करि। सर्वदुष्टनिर्दलिनि सर्वस्त्रीपुरुषेति च।। ५।।
कर्षिणीति ततो बन्दी शृङ्खलास्त्रोटयद्वयम्। सर्वशत्रून् भञ्जय द्वे द्वेषिणो दलय-द्वयम्।। ६।।
सर्वं स्तम्भय–युग्मं च मोहनास्त्रेण तत्परम्। द्वेषिणः पदतः पश्चादुच्चाटय-युगं ततः।। ७।।
सर्वं वशं कुरुयुगं स्वाहान्ते देहियुग्मकम्। सर्वं च कालरात्रि च कामिनि च गणेश्वरि।। ८।।
नमोऽन्तेयं महाविद्या वह्न्यग्निविधुवर्णका।...।।

"ॐ ऐं ह्रीं क्लीं श्रीं काह्लेश्वरि सर्वजनमनोहारि सर्वमुखस्तम्भिनि सर्वराजवशङ्करि सर्वदुष्टनिर्दलिनि सर्वस्त्रीपुरुषाकर्षिणि बन्दीशृङ्खलास्त्रोटय २ सर्वशत्रून् भञ्जय २ द्वेषिणो दलय २ सर्वं स्तम्भय २ मोहनास्त्रेण द्वेषिण उच्चाटयोच्चाटय सर्वं वशं कुरु २ स्वाहा देहि २ सर्वं कालरात्रि कामिनि गणेश्वरि नमः (१३३)"

ऋषिर्दक्षो निगदितश्छन्दोऽतिजगती स्मृता। देवता कालरात्रिः स्यादलर्कपुरवासिनी ।। ९।।
मायाबीजं तु बीजं स्यादलर्कपुरवासिनी। मायाराज्ञीति शक्तिः स्यान्नमः कीलकमुच्यते।। १०।।
पञ्चाङ्गुलीषु विन्यसेत् ताराद्यं पञ्चबीजकम्। हृदयं चतुर्विंशतिभिः पञ्चविंशतिभिः शिरः।। ११।।
शिखैकविंशद्वर्णैश्च वर्माष्टादशवर्णकैः । नेत्रं षड्विंशदर्णैश्चोनविंशत्यर्णकैस्ततः ।। १२।।
अस्त्रं तारास्त्रमादौ च दत्वान्ते षट्पदानि च। जगत्त्रयविमोह्यन्ते नि चतुर्दशमीरयेत् ।। १३।।
भुवनव्यापिनि ततो दण्डधारिणि तत्परम्। दुर्गा दुर्गतिहन्त्रीति नानासिद्धिविधायिनि ।। १४।।
सर्वं वशं कुरु कुरु स्वाहेति पदमीरयेत्। षडङ्गमेवं विन्यस्य ध्यायेद् देवीं गणेश्वरीम्।। १५।।
आरक्तभानुसदृशीं कामिनीं मदनातुराम्[1]। चतुर्भुजां त्रिनयनां कवरीमुक्तकेशिकाम् ।। १६।।
मोहनं*दक्षिणे हस्ते वरदं च तथोपरि। भुवनं वामहस्ते च अधोदण्डं सुशोभितम्।। १७।।
चूडाकलापिकाशोभां मातृकापरिवेष्टिताम्। कृष्णाम्बरधरां देवीं कृष्णकञ्चुकभूषिताम्।। १८।।
कर्णताटङ्कसंयुक्तां नानारत्नसुमौक्तिकाम्। विचित्रचाम्पेयपुष्पैः वेणिनद्धां सुकुन्तलाम्।। १९।।
सुनासामौक्तिकां चारुताम्बूलापूरिताननाम्। ग्रैवेयहारपदकस्तनाभरणभूषिताम्।। २०।।
ऋषिभिः सिद्धगन्धर्वैः स्तूयमानां मदालसाम्। कन्यकागणसंसेव्यां मायाराज्ञीं गणेश्वरीम्।। २१।।

---

[1] 'मदनारुहाम्' ख. पाठः। *मोहनं लिङ्गम्। भुवनं ब्रह्माण्डम् इत्यर्थः।

एवं ध्यात्वा जपेन्मन्त्रं पूजयेत् सर्वसिद्धये। निशायां प्रहरातीते महापूजां समाचरेत्।। २२।।
पूजयेत् कालिकापीठे पूजायन्त्रमत: शृणु। बिन्दुत्रिकोणषट्कोणवृत्तं चाष्टदलं तथा।। २३।।
वृत्तं षोडशपत्रं च त्रिवृत्तं भूपुरत्रयम्। लिखेद् भूर्जे क्षीरवृक्षफलके वा लिखेद् बुध:।। २४।।
अष्टगन्धेन शान्त्यै स्याल्लेखिन्या चम्पकस्य च।...................................।।

शक्त्यष्टगन्धा: प्रागेवोक्ता:। तद्यथा– कचूरागुरुकर्पूररोचनारक्तचन्दनम्। कुंकुमं चन्दनं वापि कस्तूरीत्यष्टगन्धकम्।।

सिन्दूरदरदाभ्यां च विलिखेद्वश्यकर्मणि। रसालस्य च लेखिन्या स्तम्भने कोकिलातरो:।। २५।।
मारणे लोहपत्रे च हरितालहरिद्रया। निर्गुण्ड्युन्मत्तकद्रावै: खराश्वमहिषासृजा ।। २६।।
विलिख्यैवं यन्त्रराजं तत्र देवीं समर्चयेत्। सम्मोहिनीं मोहिनीं च ततश्चैव विमोहिनीम्।। २७।।
पूजयेत् त्रिषु कोणेषु षट्कोणेषु षडङ्गकम्। वृत्ते स्वरानष्टदले ब्राह्म्याद्या मातृका यजेत्।। २८।।
व्यञ्जनानि पुनर्वृत्ते कलास्रे उर्वशीमुखा:। उर्वशी मेनका रम्भा घृताची तदनन्तरम्।। २९।।
मञ्जुघोषा च सहजा सुकेशी च तिलोत्तमा। गन्धर्वसिद्धकन्या च किन्नरी नागकन्यका।। ३०।।
विद्याधरी किंपुरुषी यक्षकन्या पिशाचिका। पुनर्वृत्ते पञ्चबीजाधिपान् बीजादिनार्चयेत्।। ३१।।
पञ्चबाणाधिदेव्यश्च पूजनीया: प्रयत्नत:। भूगृहान्त: सिद्धय: स्यु: त्रिरेखासु नव क्रमात्।। ३२।।
इच्छाज्ञानक्रियास्तिस्र आद्यरेखागता यजेत्। द्वितीयायां शिवब्रह्मविष्णवोऽर्च्या: क्रमेण वै।।३३।।
गुणत्रयं तृतीयायां द्वारेषु गणपादिका:। मध्ये देव्याश्चतुर्दिक्षु तिस्रस्तिस्रश्च देवता:।। २४।।
माया च कालरात्रिश्च वटवासिन्यत: परम्। गणेश्वरी च काह्लेशी व्यापिकाऽलर्कवासिनी।। ३५।।
मायाराज्ञी च मदनप्रिया च रतिरेव च। लक्ष्मी: काह्लेश्वरी चेति पूज्या द्वादश शक्तय:।। ३६।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि दक्षाय ऋषये नम:। मुखे अतिजगतीच्छन्दसे नम:। हृदये अलर्कवासिन्यै कालरात्र्यै देवतायै नम:। गुह्ये ह्रींबीजाय नम:। पादयो: मायाराज्ञीशक्तये नम:। नाभौ नम: कीलकाय नम:। इति विन्यस्य ममाभीष्टसिद्धये विनियोग:। इति कृताञ्जलिरुक्त्वा, ओंहुंओंऐंह्रींक्लींश्रीं काह्लेश्वरि सर्वजनमनोहारि सर्वमुखस्तम्भिनि जगत्त्रयविमोहिनि हृदयाय नम:। ओंहुं सर्वराजवशङ्करि सर्वदुष्टनिर्दलिनि सर्वस्त्रीपुरुषाकर्षिणि चतुर्दशभुवनव्यापिनि शिरसे स्वाहा। ओंहुं बन्दीशृङ्खलास्त्रोटय २ सर्वशत्रून् भञ्जय २ दण्डधारिणि शिखायै वषट्। ओंहुं द्वेषिणो दलय २ सर्वं स्तम्भय २ (दुर्गादुर्गतिहन्त्रि) कवचाय हुं। ओंहुं मोहनास्त्रेण द्वेषिण उच्चाटयोच्चाटय सर्वं वशं कुरु २ स्वाहा (नानासिद्धिदायिनि) नेत्रत्रयाय वौषट्। ओंहुं देहि २ सर्वं कालरात्रि कामिनि गणेश्वरि नम: (सर्वं वशं कुरु २ स्वाहा) अस्त्राय फट्।। अथ प्रथमतो विद्यादिपञ्चबीजानि अङ्गुष्ठादिकनिष्ठान्तं विन्यस्य तत: षडङ्गन्यासं कुर्यात्। एवं करषडङ्गन्यासं कृत्वा मूलेन व्यापकन्यासं विधाय, ध्यानमानसपूजान्ते स्वपुरतश्चन्दनादिपीठे कुङ्कुमादिना बिन्दुगर्भे त्रिकोणं विलिख्य, तद्बहि: षट्कोणं, तद्बहिर्वृत्तं, तद्बहिरष्टदलं, तद्बहिर्वृत्तं, तद्बहि: षोडशदलं, तद्बहिर्वृत्तत्रयं, तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयं कुर्यादिति पूजायन्त्रं विरच्य, पुरत: संस्थाप्याभ्यर्च्या–

र्घ्यादिस्थापनाद्यात्मपूजान्ते कालीपीठं समभ्यर्च्यावाहनादिपुष्पोपचारान्ते त्रिकोणेषु—सम्मोहिन्यै नमः। मोहिन्यै०। विमोहिन्यै०। इति सम्पूज्य, षट्कोणकोणेषु प्राग्वत् षडङ्गानि सम्पूज्य, तद्बहिर्वृत्ते—अं नमः। आं नमः। इत्यादिषोडशस्वरान् सम्पूज्य, अष्टसु दलेषु ब्राह्म्यादिमातृकाः प्राग्वत् सम्पूज्य, तद्बहिर्वृत्ते— कं नमः। खं नमः। इत्यादि क्षं नम इत्यन्तं व्यञ्जनानि सम्पूज्य, षोडशदलेषु देव्यग्रादिप्रादक्षिण्येन उर्वश्यै नमः। मेनकायै०। रम्भायै०। घृताच्यै०। मञ्जुघोषायै०। सहजायै०। सुकेश्यै०। तिलोत्तमायै०। गन्धर्वकन्यायै०। सिद्धकन्यायै०। किन्नरकन्यायै। नागकन्यकायै०। विद्याधरकन्यायै०। किंपुरुषकन्यायै०। यक्षकन्यायै०। पिशाचकन्यायै०। इति सम्पूज्य, तदुपरि वृत्ते स्वाग्रादिप्रादक्षिण्येन— ओं परविद्यायै नमः। ऐ सरस्वत्यै०। ह्रीं भुवनेश्वर्यै०। क्लीं मनोभवायै०। श्रीं लक्ष्म्यै०। पञ्चबाणबीजानि तदधिदेवता मातङ्गीप्रकरणोक्ताः सम्पूज्य, भूपुरान्तः स्वाग्रादिप्रादक्षिण्येनाणिमादिसिद्धीः सम्पूज्य प्रथमरेखायां—इच्छाशक्त्यैः नमः। ज्ञानशक्त्यै०। क्रियाशक्त्यै०। इति सम्पूज्य, द्वितीयरेखायां— शिवब्रह्मरमाधिपान् सम्पूज्य, तृतीयरेखायां— सत्त्वरजस्तमोगुणान् सम्पूज्य, पूर्वादिषु चतुर्षु द्वारेषु—गणेशक्षेत्रपालवटुकयोगिनीः सम्पूज्य, तद्बहिर्लोकपांस्तदस्त्राणि च सम्पूज्य, मध्ये देव्याः पूर्वभागे— मायायै नमः। कालरात्र्यै०। वटवासिन्यै०। दक्षभागे—गणेश्वर्यै०। काह्लेश्वर्यै०। व्यापिकायै०। पश्चिमे— अलर्कवासिन्यै नमः। मायाराज्ञ्यै०। मदनप्रियायै०। उत्तरे—रत्यै नमः। लक्ष्म्यै०। काह्लेश्वर्यै०। इति सम्पूज्य धूपदीपादिसर्वं प्राग्वत् समापयेद् इति। तथा—

प्रजपेदयुतं मन्त्रं तद्दशांशं हुनेत् तिलैः। क्षीरद्रुमसमिद्भिर्वा तर्पणादि ततश्चरेत्।। ३७।।
मार्जनं तद्दशांशेन ब्राह्मणान् भोजयेत् सुधीः। एवं संसिद्धमन्त्रस्तु प्रयोगानाचरेद् बुधः।। ३८।।
सन्ध्यायां शनिवारे तु रम्यं गच्छेत् सरोवरम्। मन्त्रेणानेन सम्पूज्य हरिद्राक्षतपुष्पकैः।। ३९।।
तारं नमो जलौकायै द्विधा सर्वजनं वशम्। कुरुद्वन्द्वं हुमन्तोऽयं मन्त्रस्तेनैव पूजयेत्।। ४०।।

"ओं नमो जलौकायै जलौकायै सर्वजनं वशं कुरु कुरु हुं (२२)।"

ततश्च गृहमागत्य देवीं ध्यायन् भुवि स्वपेत्। प्रातस्तत्रैव गत्वा च जलौकाद्वितयं ततः।। ४१।।
गृहीत्वा तु तदागत्य च्छायायां परिशोषयेत्। कृष्णकर्पासतन्तुनैतच्चूर्णसहितां शिवे ।। ४२।।
वर्तिं दृढतरां कृत्वा कुम्भकारस्य चक्रतः। मृदमानीय यत्नेन तया पात्रं तु कारयेत्।। ४३।।
भ्रमद्यन्त्राहृतं तैलं तस्मिन् पात्रे क्षिपेच्छुचि। कोकिलाक्षेन्धनैरग्निमाहरेद्गणिकागृहात्।। ४४।।
त्रिकोणद्वयमालिख्य तद्बहिर्भूपुरं लिखेत्। निशारसेन रचिते लाजाक्षतसमन्विते।। ४५।।

मण्डले इति शेषः।

दीपं प्रज्वाल्य दीपाग्रे कालरात्रिं प्रपूजयेत्। सर्वावरणसंयुक्तां कज्जलाहरणाय च।। ४६।।
नवीनं पात्रमुपरि विन्यसेत् साधकोत्तमः। जातं कज्जलमाहृत्य पश्चिमाभिमुखो नरः।। ४७।।
वक्ष्यमाणेन मन्त्रेण त्रिशतं मन्त्रयेन्मषीम्। प्रणवं वाग्भवं मारं मायां रमां भूमिं ब्लूंहसौः।। ४८।।
नमः काह्लेश्वरिपदं सर्वान्मोहय मोहय। कृष्णे च कृष्णवर्णे च कृष्णाम्बरसमन्विते।। ४९।।
सर्वानाकर्षययुगं शीघ्रं वश्यं कुरुद्वयम्। वर्म वाग्भुवनेशी च कामराजं रमा तथा।। ५०।।
अष्टपञ्चाशदर्णेयं कज्जलस्याभिमन्त्रणे। ....।।

''ओंऐंह्रींक्लींश्रींग्लौंब्लूंह्सौ: नम: काह्लेश्वरि सर्वान्मोहय मोहय कृष्णे कृष्णवर्णे कृष्णाम्बरसमन्विते सर्वानाकर्षयाकर्षय शीघ्रं वश्यं कुरु कुरु हुंऐंह्रींक्लींश्रीं'' (५८)

कपिलानवनीतेन मर्दयेत् कज्जलं शुभम्। अष्टोत्तरशतावृत्त्या मूलमन्त्रेण मन्त्रयेत्।। ५१।।
हुनेदष्टोत्तरशतं मधूककुसुमै: प्रिये। सुवासिनीं कुमारीं च बटुकं भोजयेन्मुदा।। ५२।।
तेनाञ्जनेन तिलकं कुर्यात् साधकसत्तम:। वशयेत् सकलांल्लोकान् नरनारीनरेश्वरान्।। ५३।।
दत्तं तदन्नपानादौ तेनापि च वशं नयेत्। स्तम्भनं ते प्रवक्ष्यामि हारिद्रे कर्पटे लिखेत्।। ५४।।
हरिद्रारोचनाकुष्ठाञ्जनैर्गोमूत्रपेषितै: । लिखेदष्टदलं पद्मं कर्णिकाकेसरोज्ज्वलम् ।। ५५।।
कर्णिकायां साध्यनाम दलेषु प्रणवद्वयम्। भूबीजयुग्मं द्विचटं पीतसूत्रेण वेष्टयेत्।। ५६।।
सप्तभि: कोकिलाक्षद्रुकण्टकै: परिकीलयेत्। अर्कपत्रै: सुसंवेष्ट्य क्षिपेद्वल्मीकरन्ध्रके।। ५७।।
मेषमूत्रेण सम्पूर्य पाषाणैर्घटयेद् दृढम्। सहस्रं प्रजपेन्मूलमन्त्रं राक्षसदिङ्मुख:।। ५८।।
हरिद्रामालिकां कृत्वा बद्धमुद्राकरान्वित:। मनुं वक्ष्ये ध्रुवो ह्लांह्लींह्लूं कामाक्षि तत: परम्।। ५९।।
मायारूपिणि सर्वान्ते मनोहारिण्यनन्तरम्। स्तम्भय द्वे रोधय द्वे मोहय—द्वितयं तत:।। ६०।।
कामबीजं त्रिधा दीर्घै: कामाक्षि च तत: परम्। काह्लेश्वरि त्रिवर्माणि पञ्चाशद्वर्णवान् मनु:।। ६१।।

''ओंह्लांह्लींह्लूं कामाक्षि मायारूपिणि सर्वमनोहारिणि स्तम्भय स्तम्भय रोधय रोधय मोहय मोहय क्लांक्लींक्लूंकामाक्षि काह्लेश्वरि हुंहुंहुं'' (५०)

जपादेतस्य मन्त्रस्य शत्रूणां स्तम्भनं भवेत्। रविवारे हरिद्रां च स्त्रीस्तन्येन च पेषयेत्।। ६२।।
तत्कल्केन लिखेद् भूर्जे कामराजं मनोहरम्। तद्बहिर्वेष्टयेद् वृत्तं कामराजदशान्वितम्।। ६३।।
तद्बहिर्वृत्तमालिख्य वेष्टयेद्रविमन्मथै: । तद्बहिर्वेष्टयेद् वृत्तं षोडशस्मरसंयुतम् ।। ६४।।
षट्कोणं तद्बहिर्लिख्य कामं कोणेषु विन्यसेत्। तत्सर्वं वाग्भवान्त:स्थं यन्त्रं मोहनकारकम्।।६५।।
दशवर्णं मनुं जप्यात् तदुपर्य्युपविश्य च। ध्रुवो ङेन्तं कामपदं कामराजमत: परम्।। ६६।।
कामिन्यै कामराजं च द्वितीयं कामराजकम्। ....।।

''ओं कामाय क्लीं कामिन्यै क्लींक्लीं'' (१०)

पञ्चाहं प्रजपेत् क्रुद्ध: सहस्रं नित्यमादरात्। ततो होमं प्रकुर्वीत तद्दशांशं तिलै: शुभै:।। ६७।।
आज्याक्तैस्तद्भस्मना च तिलकं विश्वमोहनम्। आकर्षणविधानं तु शृणु वक्ष्ये यथाविधि।। ६८।।
कृष्णाष्टमीदिने मूले भौमयुक्तेऽथवा रवौ। उष:काले नाभिदघ्ने जले स्थित्वा सहस्रकम्।। ६९।।
सशतं मूलमन्त्रं तु जपित्वा गृहमागत:। तैलाभ्यक्त: पीठिकादौ विलिखेत् प्रतिमां स्त्रिय:।।७०।।
नराकृतिं वा मषिभिर्यजेल्लजालुपत्रकै:। तन्मूलजै रसै: प्रोक्षेत् तदग्रे प्रजपेन्मनुम्।। ७१।।
नखद्वयार्णं तं वक्ष्ये तारं च हृदयं तत:। कालिकायै पदं सर्वाकर्षिण्यै अमुकीं तत:।। ७२।।
आकर्षय—द्वयं शीघ्रमानय—द्वितयं तत:। पाशमायाङ्कुशा भद्रकाल्यै हृदयमन्तत:।। ७३।।

''ओं नम: कालिकायै सर्वाकषिण्यै अमुकीं आकर्षय आकर्षय शीघ्रमानय आनय आंह्रींक्रों भद्रकाल्यै नम: ४०''

अष्टोत्तरशतं जप्त्वा लोहितैश्च हयारिजैः। पञ्चाशद्भिर्यजेत्तत्र पुत्तलीं तु समाहितः।। ७४।।
एकैकं मातृकावर्णं तन्नामाकर्षय–द्वयम्। नम इत्यभिसञ्जप्य पुष्पमेकैकमर्पयेत् ।। ७५।।

''अं अमुकमाकर्षय आकर्षय नमः।'' इति करवीरपुष्पैः पूजयेदित्यर्थः।

धूपादिकं निवेद्यापि चणकैराज्यसम्प्लुतैः। जुहुयान्मन्त्रवर्य्येण प्रोक्तेनाकर्षणात्मना।। ७६।।
कृष्णकार्पाससूत्रस्य कुमारीनिर्मितस्य च। षण्णवत्यङ्गुलायाममष्टाविंशतितन्तुकम्।। ७७।।
रज्जुमाकृष्य मनुना ग्रन्थीनष्टोत्तरं शतम्। दत्त्वा तड्डोरकं हस्ते धृतमाकर्षयेत् स्त्रियम्।। ७८।।
पुरुषं वा त्रिरात्राच्च एकग्रामस्थमानयेत्। देशान्तरान्नवाहाच्च हठादाकर्षयेद् ध्रुवम्।। ७९।।
अथोच्चाटविधिं वक्ष्ये शृणु देवि समाहिता। कृष्णाङ्गारचतुर्दश्यां प्रयोगं शून्यमन्दिरे।। ८०।।
यमदिग्वदनः कुर्यात् कुक्कुटासनसंस्थितः। नीलाम्बरधरो[1] मुक्तकच्छो[2] मन्त्रमिमं जपेत्।। ८१।।
मौञ्जीरज्जुकृतग्रन्थिमालया मुक्तकुन्तलः। ब्लूंस्लूंम्लूंक्ष्लूं कालरात्रि महाध्वांक्ष्यमुकं पदम्।। ८२।।
आशूच्चाटययुग्मं च छिन्धि भिन्धि शुचिप्रिया। प्रासादबीजं कामाक्षि सृण्यन्तः प्रणवादिकः।।८३।।

''ॐब्लूंस्लूंम्लूंक्ष्लूं कालरात्रि महाध्वांक्षि अमुकमाशु उच्चाटय उच्चाटय छिन्धि भिन्धि स्वाहा हौं कामाक्षि क्रों'' (३६) इति स्पष्टम्।

अर्धरात्रे जपेन्मन्त्रं सहस्रद्वयमेव च। ततो होमं सर्षपैस्तु दशांशं च दिने दिने।। ८४।।
बलिं दद्यात् प्रयत्नेन तैलोदकयुतं ततः। तथा सर्षपपिण्याकशाकपिष्टं च मूलकम्।। ८५।।
मुद्रया सह तेनैव मनुना मन्त्रवित्तमः। एवं यः कुरुते नित्यं सप्ताहाच्चाटयेद् ध्रुवम्।। ८६।।
प्रतिमां देवतानां च का कथा मानवादिषु। अथ विद्वेषणं देवि शृणु गोप्यागमाह्वयम्।। ८७।।
तालवृक्षस्य फलकद्वयमानीय तं नरः। विषैरष्टभिराघृष्य स्नुहीदुग्धेन साधकः।। ८८।।
लिखेन्नाम तयोः साध्येऽथवा रूपं तु कारयेत्। ततस्तु फलके पूज्ये धत्तूरकुसुमैस्तथा।। ८९।।
प्रोक्षयेत् तेन सारेण अष्टाविंशतिसंख्यया। तत् स्पृष्ट्वा प्रजमेन्मन्त्रं सहस्रमधियामिनि।। ९०।।
ह्लौंग्लौंह्सौं ततो भ्रौं च भगवत्यन्तदण्ड च। घारिण्यमुकममुकं शीघ्रं विद्वेषय–द्वयम्।। ९१।।
रोधय–द्वितयं चैव भञ्जय–द्वितयं रमा। मायाराज्ञ्यै ततस्तारो गुणशः कवचं पठेत्।। ९२।।
पञ्चाशदक्षरो मन्त्रस्तारादिर्द्वेषकारकः।..।।

'' ॐह्लौंग्लौंह्सौंभ्रौं भगवति दण्डधारिणि अमुकममुकं शीघ्रं विद्वेषय विद्वेषय रोधय रोधय भञ्जय भञ्जय श्रींमायाराज्ञ्यै ॐहुंहुंहुं'' (५०) इति मूलम्।

जप्त्वा फलकयुग्मं तु बद्ध्वा रज्ज्वा परस्परम्। खरसैरिभगन्धर्वपुच्छरोमसमुत्थया।। ९३।।
वल्मीकरन्ध्रे निक्षिप्य तावत्संख्यं जपेन्मनुम्। सप्ताहाज्जायते वैरं रामलक्ष्मणयोरपि।। ९४।।
अथ मारणकं कर्म कथयामि सविस्तरम्। न प्रयोगं प्रकुर्वीत ब्राह्मणस्योपरि प्रिये।। ९५।।
ब्राह्मेणन विना सर्वं ज्ञातव्यं रिपुवज्जगत्। बहूनां पीडको यस्तु सर्वोपद्रवकारकः।। ९६।।

---

[1] 'रावृत.' ख. पाठः। [2] 'कचः' ख. पाठः।

तस्योपरि प्रकुर्वीत मारणं कुलधर्मवित्। प्रजपेदात्मशुद्ध्यर्थं सहस्रं मूलमन्त्रकम्।। ९७।।
कृष्णपक्षे चतुर्दश्यां भौमवारे विशेषत:। गोपुराच्च श्मशानाच्च शिवागाराच्चतुष्पथात्।। ९८।।
मृदमानीय यत्नेन श्मशानादौ विनिक्षिपेत्। विडङ्गाद्यर्कजाश्वारिपुष्पाण्यानीय देशिक:।। ९९।।
श्मशाने निर्जनागारे मुक्तकेशो दिगम्बर:। नीलाम्बरधरो रात्रौ पुत्तलीं विदधीत वै।। १००।।
तच्छि[1]रस्यालिखेन्नाम साध्यस्य तु प्रयत्नत:। प्राणयन्त्रं हृदि न्यस्य प्राक्प्रोक्तविधिना सुधी:।।१०१।।
प्राणादिस्थापनं कृत्वाऽच्छादयेन्मृतवाससा। खराश्वमहिषाणां तु रुधिरे स्थापयेच्च ताम्।। १०२।।
तैलाभ्यक्तां ततो रक्तचन्दनेन समर्चयेत्। धतूरकुसुमैर्वापि मारणोक्ताणुना तत:।। १०३।।
जपं होमं च पूजां च कुर्यादुक्तविधानत:। ओंम्रांम्रींम्रूंमृतिकेश्वर्य्यमुकं शीघ्रमन्तत:।। १०४।।
मारय—द्वितयं चैव सृणिबीजं त्रिरुच्चरेत्। त्रयोविंशत्यक्षरेण पूजां होमं च कारयेत्।। १०५।।

"ओंम्रांम्रींम्रूंम्रतिकेश्वरि अमुकं शीघ्रं मारय मारय क्रोंक्रोंक्रों" (२३)

वचासर्षपभल्लातबीजैरुन्मत्तबीजकै:। अष्टोत्तरशतं हुत्वा श्मशानादौ विधानवित्।। १०६।।
प्रतिमाया: शिरश्छित्त्वा पूर्णाहुतिमतश्चरेत्। ततश्च प्रतिमां दग्ध्वा मारणाख्याणुना सुधी:।। १०७।।
एवं कृते त्रिसप्ताहाद्रिपुर्याति यमालयम्। भैरवाय बलिं दद्यात् प्रत्यहं विधिना सुधी:।। १०८।।
माषान्नपलमद्याद्यैरेवं सिद्धि: प्रजायते। मृत्युञ्जयादिमन्त्रान् वै प्रजपेत् प्रत्यहं तत:।। १०९।।
आत्मरक्षा भवेन्नो चेत् साधकस्य मृतिर्भवेत्।...।।

इति कालरात्रिप्रकरणम्।। अथ शारदा—

"प्रणवो भुवनेशी च कामराजमत: परम्। भृगु: सर्गी च हृदयं ङेन्तं भगवतीपदम्।। १।।
शारदायै त्रपा वह्ने: प्रिया सप्तदशार्णक:"। 'ओंह्रींक्लींस: नमो भगवत्यै शारदायै ह्रीं स्वाहा' (१७)

नास्य विघ्नो न वा शौचं न वा मन्त्रविपर्यय:। न क्लेशो न च दौर्बल्यं न होमो न चिरन्तता।। २।।
साक्षादमृतरूपोऽयं मन्त्र: सर्वार्थसिद्धिद:। वर्णलक्षं पुरश्चर्या तदर्धं वा महेश्वरि ।। ३।।
अर्धादर्धं समाख्यातमतो न्यूनं न कारयेत्। जीवहीनो यथा देही सर्वकर्मसु न क्षम:।। ४।।
पुरश्चरणहीनोऽपि तथा मन्त्र: प्रकीर्तित:। गृहे वने श्मशाने वा शून्यागारे चतुष्पथे।। ५।।
साधक: सिद्धये कुर्यात् पुरश्चरणकां क्रियाम्। जपाद् दशांशतो होमस्तद्दशांशेन तर्पणम्।। ६।।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्। पुरस्क्रियां मनो: कृत्वा मनूत्कीलनमाचरेत्।। ७।।
मनुं सञ्जीवयेत् पश्चात् सिद्धमूलं ततो जपेत्। सम्पुटं च पुनर्दद्यात् ततो मन्त्रोऽपि सिध्यति।।८।।
आद्यवर्णं महादेवि दद्यान्मन्त्राञ्चले शिवे। मन्त्रादौ दीयते नीरमिदमुत्कीलनं भवेत्।। ९।।
नाम दद्यात् तथाप्यादौ तारं दद्यात् तथाञ्चले। एष सञ्जीवनो नाम मन्त्रो मन्त्रस्य भामिनि।। १०।।
ततो जपेन्मनुं सिद्धं साधक: सर्वसिद्धये। नामाग्रे दीयते नीरं सम्पुटाख्यस्त्वयं मनु:।। ११।।
एकवारं पठेद् देवि यथाशक्त्या जपेत् तत:। अणिमाद्यष्टसिद्धीनामीश्वर: साधको भवेत्।। १२।।

---

[1] 'वक्षसि' ख. पाठ:।

यन्त्रोद्धारं प्रवक्ष्यामि सर्वतन्त्रेषु गोपितम्। सर्वसम्मोहनं यन्त्रं सर्वाशापरिपूरकम्।। १३।।
बिन्दुगर्भं त्रिकोणं च तद्बही रसकोणकम्। अष्टपत्रं षोडशारं भूपुरं विलिखेत् प्रिये।। १४।।
लयाङ्गमथ वक्ष्यामि तव प्रीत्या वरानने। यन्त्रमभ्यर्च्य विधिवत् साधको मुक्तिमाप्नुयात्।। १५।।
गणेशो धर्मराजश्च वरुणश्च कुबेरकः। एते द्वाःस्थाः समाख्याता दक्षावर्तेन पूजयेत्।। १६।।
जया च विजया दुर्गा शाम्बरी रक्तदन्तिका। शाकम्भरी च चामुण्डा शिवा च शिवदूतिका।।१७।।
शीतला सुप्रभा शान्ता रतिः प्रीतिः स्थितिर्मतिः। इति षोडशपत्रेषु पूज्याः षोडश देवताः।।१८।।
करालो विकरालश्च संहारो रुरुभैरवः। महाकालोऽपि कालाग्निरुन्मत्तः सुप्तभैरवः।। १९।।
पूज्या अष्टदले देवि स्वमन्त्रैरष्ट भैरवाः। शारिका च तथा राज्ञीदेवी ज्वालामुखी ततः।। २०।।
कालिका त्रिपुरा देवि सुमुखी परमेश्वरि। एताः षट्कोणमध्यस्थाः पूज्याः साधकसत्तमैः।। २१।।
भवानी बगला तारा पूजनीयास्त्रिकोणगाः। मूलेन शारदादेवीं बिन्दौ विद्यां सरस्वतीम्।। २२।।
पूजयेद् भक्तिभावेन गन्धपुष्पाक्षतादिभिः। शूलं प्रासं तथा पद्मं पाशं कलशमेव च।। २३।।
व्यूहमित्यायुधान् बिन्दौ पूजयेत् साधकोत्तमः। स्ववामे पूजयेद् देवि गुरुपञ्चकमादरात्।। २४।।
स्वदक्षे धर्मवैराग्यं पूजयेत् क्रमशस्ततः। ऊर्ध्वं क्षेत्रेश्वरांश्चैव यथावद्वर्ण्यते मया।। २५।।
क्रोष्टुवक्त्रं हयवक्त्रं ततोऽजवक्त्रकं शिवे। सिंहवक्त्रं महादेवि पूजयेच्चतुरस्रके।। २६।।
शिवं रुद्रं मृडं भीमं भैरवं परमेश्वरि। बिन्दौ सम्पूजयेन्मन्त्री लयाङ्गमिदमुच्यते।। २७।।
मन्त्रस्यास्य महादेवि भैरवो ऋषिरीरितः। छन्दस्त्रिष्टुप् समाख्यातं देवता शारदा स्मृता।। २८।।
माया बीजं शरः शक्तिः स्तम्भं कीलकमुच्यते। धर्मार्थकाममोक्षार्थे विनियोग इति स्मृतः।। २९।।
तारमायास्मराद्यैश्च वर्णैः षड्दीर्घभागिभिः। करन्यासः समाख्यातो हृदयादिषडङ्गकम्।। ३०।।
अश्मरीबीजरूपेण कुर्याद् दिग्बन्धनं सुधीः।.......................................।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यं निर्वर्त्य शौचादिकं विधाय, सः इति शक्तिबीजेन दन्तान् विशोध्य, प्रणवेन मुखं प्रक्षाल्य, ओं मणिधरवज्रिणि हूंशिखापरिसरे रक्ष रक्ष ठःठःठः फट् स्वाहा'' इति मन्त्रेण शिखां बद्ध्वा मलस्नानं विधाय मन्त्रस्नानार्थं स्वपुरतस्तीर्थमण्डलं परिकल्प्य प्राग्वत् तीर्थान्यावाह्य, तत्र ''शारदे वरदे मातर्मातृकाक्षरभूषिते। परिवारयुते देवि यन्त्रेऽस्मिन् सन्निधिं कुरु।।'' इत्यावाह्यान्यत् सर्वं प्राग्वद्विधाय, ओं शारदायै विद्महे सप्तदशाक्षर्य्यै धीमहि तन्नः सरस्वती प्रचोदयात्। इति गायत्र्या सन्ध्यावन्दनादितर्पणान्तं कर्म समाप्य यागगृहमागत्य, योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भैरवाय ऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये श्रीशारदायै देवतायै नमः। गुह्ये ह्रींबीजाय नमः। पादयोः सौःशक्तये नमः। नाभौ नः कीलकाय नमः। इति विन्यस्य मम चतुर्वर्गफलसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, ओंह्रांक्लां इत्यादि षड्दीर्घयुक्तेन करषडङ्गन्यासं कुर्यात्। ततः ओं ह्रींश्रीं कामरूपपीठाय नमः हृदयाय नमः। एवं जालन्धरपूर्णगिरि—उड्याणवाराणसीशारदापीठानां षडङ्गन्यासं कुर्यादिति पीठषडङ्गं विधाय, प्रागुक्तरीत्या शारदामातृकां विन्यस्य आत्मविद्याशिवगुरुशिवशक्तितत्त्वानि षडङ्गेषु न्यसेदिति तत्त्वषडङ्गं विधाय, ओंनमः शिरसि। एवं ह्रींनमो मुखे। क्लींनमो हृदये। सःनमो नाभौ। नं पृष्ठे। मों मेढ्रे। भं गुह्ये। गं कट्यां। वं जानुनि।

त्यै जङ्घायां। शां गुल्फयोः। रं पादयोः। दां शिरसः पादपर्यन्तं। यै पादादिमूर्धान्तं। ह्रीं मूर्ध्नि। स्वां मुखे। हां नमः सर्वाङ्गेषु। एवं न्यासं विधाय, श्रीगुरुं ध्यत्वा देवीं ध्यायेत्।

उद्यद्बालार्कबिम्बद्युतिमनलशिखाकोटितेजस्विनीं तां
भास्वच्चन्द्राग्निनेत्रां विविधमणिशिलारश्मिभास्वत्किरीटाम्।
तारार्णाक्षीं च मायामदनविलसितां शक्तिवर्णैकरूपां
वन्दे सिंहासनस्थां प्रहसितवदनां शारदां षड्भुजाढ्याम्।। १ ।।
अरुणार्कनिभां त्रिलोचनां कमलप्रासकशूलधारिणीम्।
कलशव्यूहकपाशषड्भुजां हृदि देवीमनिशं भजामहे।। २ ।।

इति ध्यात्वा मानसोपचारैराराध्य, स्वपुरतश्चन्दनादिपीठे कुङ्कुमादिना बिन्दुगर्भं त्रिकोणं विलिख्य तद्बहिः षट्कोणं तद्बहिरष्टदलं, तद्बहिः षोडशदलं, तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रं कुर्यादिति पूजायन्त्रं विरच्य, पुरतः संस्थाप्याभ्यर्च्य, अर्घ्यादिस्थापनाद्यात्मपूजान्ते भुवनेश्वरीपीठमभ्यर्च्य, मूलेन मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते बिन्दावग्नी–शासुरवायव्यमध्ये दिक्षु च षडङ्गानि सम्पूज्य, चतुरस्रे वायव्यादीशान्तं गुरुपङ्क्तित्रयं सम्पूज्य, गणेशधर्मराजवरुणकुबेरान् पूर्वादिदिक्षु पूजयेदिति प्रथमावरणम्।। ततः षोडशदले देव्यग्रादिप्रादक्षिण्येन– जयायै नमः। विजया०। दुर्गा०। शाम्बरी०। रक्तदन्तिका०। शाकम्भरी०। चामुण्डा०। शिवा०। शिवदूती०। शीतला०। सुप्रभा०। शान्ति०। रति०। प्रीति०। स्थिति०। मति०। इति द्वितीयावरणम्।। ततोऽष्टदले देव्यग्रादिप्रादक्षिण्येन– करालभैरवाय नमः। विकराल०। संहार०। रुरु०। महाकालभै०। कालाग्नि०। उन्मत्त०। सुप्तभै०। इति तृतीयावरणम्।। ततः षट्कोणे–शारिकायै नमः। राज्ञी०। ज्वालामुखी०। कालिका०। त्रिपुरा०। सुमुखी०। इति चतुर्थावरणम्।। ततस्त्रिकोणे–भवान्यै नमः। बगला०। तारा०। इति पञ्चमावरणम्।। बिन्दौ– श्रीं आनन्दभैरवसहितायै शारदायै नमः इति सप्तवारमभ्यर्च्य, पुनस्त्रिकोणे– भवान्यै नमः। बगला०। तारां०। पूजयेदिति षष्ठम्।। शूलप्रासपद्मकलशव्यूहान् पूजयेदिति सप्तमम्।। स्ववामे– पुनर्गुरुपङ्क्तित्रयमभ्यर्च्य, स्वदक्षे– धर्मज्ञानवैराग्यानि सम्पूज्य, चतुरस्रे– ऊर्ध्वे हयवक्त्र– क्रोष्टुवक्त्र–अजवक्त्र– सिंहवक्त्रान् क्षेत्रेशान् सम्पूज्य, पुनः शिवरुद्रमृडभीमभैरवान् सम्पूजयेदित्यष्टमावरणम्।। एवं सम्पूज्य धूपदीपादिनैवेद्यान्तं दत्त्वा जप्त्वा जपं समर्प्य प्राग्वद्वटुकादिभ्यो बलीनुत्सृज्यारार्तिकं सर्वं समापयेदिति। पुरश्चरणं तु प्रागेवोक्तम्। तथा–

प्रयोगानष्ट वक्ष्यामि साधकानां हिताय वै। स्तम्भनं मोहनं चैव मारणाकर्षणे तथा।। ३१ ।।
उच्चाटनं वशीकारं शान्तिकं पौष्टिकं तथा। उपचारं तथैतेषां शृणु वक्ष्यामि पार्वति।। ३२।।
रवौ प्रभातवेलायां गत्वा प्रेतगृहे शिवे। भस्मना स्नानमङ्गेषु कृत्वा साधकसत्तमः।। ३३।।
मूलं जप्त्वायुतं मन्त्रीं होमं कुर्याच्चितानले। दशांशं घृतपद्माक्षयवमाषाजमेढ्रकैः।। ३४।।
गतिस्तम्भं भवेच्छीघ्रं दस्युवातार्कपाथसाम्। वादिनां च मुखस्तस्भं कामिनां रेतसस्तथा।। ३५।।
चन्द्रे मध्याह्नवेलायां स्नात्वा शून्यस्थलं व्रजेत्। मूलमन्त्रं महादेवि जपेदयुतसंख्यया।। ३६।।
होमः सर्पिर्मधुक्षौद्रमालतीकनकादिभिः। तद्भस्मना चरेद्भाले तिलकं साधकोत्तमः ।। ३७।।

तस्य दर्शनमात्रेण त्रिजगन्मोहमेष्यति। भौमेऽर्धरात्रसमये गत्वा श्मशानमण्डले ।। ३८।।
पशुं सम्पूजेयत् तत्र मूलेनाजं च साधकः। तदग्रे च जपेन्मन्त्रं मालयायुतसंख्यया।। ३९।।
बलिं निवेद्य तत्राज्यं जुहुयात् तस्य मेड्रके। सर्पिषा च सहृत्पद्मं तथान्त्राणि दशांशतः।। ४०।।
शेषं सम्भोजयेच्छीघ्रं यावत्तृप्तो भविष्यति। कर्मणा मनसा वाचा सत्यं सत्यं कुलेश्वरि।। ४१।।
शत्रुः कालसमानोऽपि मृत्युमेष्यति नान्यथा। बुधे सायं समागत्य नदीतीरं च साधकः।। ४२।।
स्नात्वा रहो जपेन्मन्त्रमयुतं दिव्यमालया। होमो घृतगुडूच्यादिद्रव्यशुक्रादिशुद्धिभिः।। ४३।।
तत्रैव सहसा स्त्रीणां भवेदाकर्षणं ध्रुवम्। गुरौ निशीथकाले तु गत्वा तु शवसद्मनि।। ४४।।
चितायामासनं दत्त्वा जपेदयुतसंख्यया। होमो घृतेन मीनैश्च कपोतान्त्रसमन्वितैः।। ४५।।
कटुतैलेन काकानां पक्षैः कार्यो विधानतः। कर्मणा मनसा वाचा रिपुमुच्चाटयेद् ध्रुवम्।। ४६।।
शुक्रे ब्राह्मे मुहूर्ते च गत्वा वटतले जपेत्। मूलं वायुतसंख्याकं साधको मन्त्रसाधकः।। ४७।।
होमं कुर्यात् तदा सर्पिर्मधुगोधूमचूर्णकैः। रजस्वलाम्बरै रक्तैः पीतपुष्पैर्महेश्वरि।। ४८।।
साधकस्य तदा देवि त्रैलोक्यं वशमेष्यति। शनौ रात्रिमुखे देवि गृहे वा वनभूमिषु।। ४९।।
जपेन्मन्त्रायुतं देवि होमयेत् सर्पिषा सिताम्। नारिकेलं च पाषण्डं मीनकण्टकसंयुतम्।। ५०।।
वह्निग्रहादिपीडानामतिवृष्टिभयस्य च । मारीदुर्भिक्षभीतीनां सद्यः शान्तिर्भविष्यति ।। ५१।।
सर्ववारेषु सर्वत्र पौष्टिकं साधकश्चरेत्। शुभेऽह्नि शुभनक्षत्रे गृहे जप्त्वायुतं मनुम्।। ५२।।
होमः सर्पिर्दधिक्षौद्रपायसाद्यैश्च श्रीफलैः। खगाण्डाक्षियुतैः कार्यः साधकैः सर्वसाधकैः।। ५३।।
देवीनां देवतानां च महापुष्टिः प्रजायते। सर्पिर्यवादिगोधूमशालिद्रव्यादिभिः शिवे ।। ५४।।
होमो दशांशतः कार्यः साधकैः सर्वसिद्धये। इतीदं साधनं देवि शारदाया मया स्मृतम्।। ५५।।
गुह्यं गोप्यं न दातव्यं भक्तिहीनाय पार्वति। कुलीनाय च शान्ताय गुरुभक्तिरताय च।। ५६।।
दद्यात् सद्यो भवेत् सिद्धिरन्यत्र सिद्धिहानिता। शारदासाधनं द्रव्यं गोपनीयं विशेषतः।। ५७।।
सर्वदा गोपयेद्यत्नादित्याज्ञा पारमेश्वरी। शारदोपासको देवि दरिद्रो न भवेत् क्वचित्।। ५८।।
मूर्खत्वं च न प्राप्नोति सत्यं सत्यं न संशयः।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे षड्विंशः श्वासः।। २६।।

* * *

अथ

सप्तविंशः श्वासः

अथ वैष्णवमन्त्राः। उत्तरतन्त्रे–

अथ वैष्णवमन्त्राणां विधानमभिधीयते। त्रिषु लोकेषु विख्यातं मुनीन्द्रगणसेवितम्।। १।।
धर्मार्थकाममोक्षाप्तिनिदानं सर्वसम्मतम्। षट्कर्मकरणश्रेष्ठं गोपनीयं सदा बुधैः।। २।।
अज्ञानतिमिरान्धानां ज्ञानदृष्टिप्रदायकम्। [1]धनैश्वर्यप्रदं सर्वपापविध्वंसकारकम् ।। ३।।
अपमृत्युहरं पुंसां रोगदारिद्र्यनाशनम्। क्षुद्रग्रहहरं क्ष्वेडनाशनं श्रीजयप्रदम् ।। ४।।
दुर्गकान्तारमार्गादौ भयनाशकरं परम्। नदीनदसमुद्रादौ तरिध्वंसेषु तारणम् ।। ५।।
नराश्वरथगोहस्तिपुत्रमित्रकलत्रदम्। क्षेत्रग्रामप्रदं वीर्यशौर्यधैर्यप्रभाकरम्।। ६।।
स्फूर्तिकान्तिकवित्वादिकरं सौभाग्यदायकम्। ब्रह्माण्डकोटिसङ्क्षोभिसिद्ध्यष्टकगुणप्रदम्।। ७।।
बहुना किमिहोक्तेन सर्वदं नात्र संशयः। तेष्वथाष्टाक्षरो मन्त्रो यथावदभिधीयते ।। ८।।
पापौघनाशनः श्रीदो भुक्तिमुक्तिप्रदायकः। ध्रुवो दीर्घा विषं सद्यो दीर्घा चाननवृत्तयुक् ।। ९।।
अग्न्यनन्तौ समीरश्च सदीर्घस्तादिरीरयुक्। अष्टाक्षरो मनुः प्रोक्तो नारायणसमाह्वयः।। १०।।

ध्रुवः प्रणवः। दीर्घा नकारः। विषं मकारः, सद्य ओकारः, ताभ्यां मो इति। दीर्घा नकारः, आननवृत्तं आकारः, ताभ्यां ना। अग्नी रेफः, अनन्त आकारः, तेन रा। समीरो य। सदीर्घस्तादिः आकारयुक्तो णकारः, तेन णा। ईरो यकारः। स्पष्टम्। 'ॐ नमो नारायणाय'' इति।। मन्त्रनिरुक्तिश्च तत्रैव–

प्रणवः [2]परमात्मार्णवाचको वक्ष्यते ततः। नकारश्च निषेधार्थः [3]खमर्थे मोपदं मतम्।। ११।।
ना जलं रा वह्निरुक्तो यो वायुर्णा धरात्मता। यश्चतुर्थ्यर्थकस्तस्मादेवं व्याख्यानमीरितम्।। १२।।
गदितो मुनिरस्याणोः साध्यनारायणाह्वयः। प्रोक्तं छन्दस्तु देव्याद्यं गायत्रं देवता मनोः।। १३।।
परमात्मा समुद्दिष्टः पञ्चाङ्गानि ततो न्यसेत्। क्रुद्धोल्कश्च महोल्कश्च वीरोल्को द्युल्कसंज्ञकः।। १४।।
सहस्रोल्कश्चतुर्थ्यन्तैरेभिरङ्गुलिषु न्यसेत्। उक्तमङ्गुष्ठपूर्वासु तर्जन्याद्यासु केचन।। १५।।
कनिष्ठान्तासु सम्प्रोचुर्मन्त्री पश्चात्तनौ न्यसेत्।..।।

चतुर्थ्यन्तैः स्वाहान्तैश्च। ''क्रुधोल्कादिपदैर्वह्निजायान्तैर्जातिसंयुतैः'' इति त्रैलोक्यमोहनतन्त्रवचनात्। ''एषां विभक्तियुक्तानां

---

[1] वाग्' ख. पाठः। [2] 'परमात्माणु' ख. पाठः। [3] 'यमर्थे' ख. पाठः।

भवेदन्तेऽग्निवल्लभा'' इति तन्त्रप्रकाशवचनाच्च। नारायणीये–''कनिष्ठादितदन्तानामङ्गुलीनां त्रिपर्वसु। ज्येष्ठाग्रेण नमस्ताररुद्धानष्टाक्षरे न्यसेत्''।। इति। प्रपञ्चसारे–(२० प०६ श्लो०) ''अष्टाक्षरेण व्यस्तेन कुर्यादष्टाङ्गकं सुधीः। सहृच्छिरः शिखावर्मनेत्रास्त्रोदरपृष्ठके''।। इति। तथा– ''मन्त्रार्णानङ्गषट्केषु जठरे पृष्ठके ततः। दिग्बन्धमस्त्रमन्त्रेण विदध्यान्मन्त्रवित्तमः''।। हृदये ओंनमः इत्यादि, उदरे णां नमः। पृष्ठे यं नमः। इति प्रयोगः। केचित्तु– ओंहृदयाय नमः, नं शिरसे० इत्यादिन्यासं वदन्ति, तन्न, अन्त्यवर्णयोर्जात्यभावात्।। अपरे–णां हृदयाय नमः, यं पृष्ठाय नमः, इति न्यासं वदन्ति तन्न, स्थानानामधिकरणत्वात् नैषु वर्णानामेवंविन्यासः स्यात्। अन्यथा, अं शिरसे नमः, आं मुखवृत्ताय नमः इत्यादिन्यासापत्तेः। अष्टाक्षरेणेति बिन्दुयुक्तेन।। तथा चेशानशिवः– ''वर्णा बिन्दुसमायुक्ताः'' इति। प्रपञ्चसारे– ''अस्त्रमन्त्रेण बद्धाशो मन्त्रवर्णांस्तनौ न्यसेत्''। अस्त्रं चक्रम्। ''बद्धदिक् चक्रमन्त्रेण'' इति शारदातिलकात्। चक्रमन्त्रोऽग्रे वक्ष्यते दिक्बन्धानन्तरम्। हयशीर्षपञ्चरात्रे– ''मूर्धाक्षिमुखहृन्नाभिगुह्यजानुपदेषु च। सृष्टिन्यासोऽयमुद्दिष्टः संहारश्चरणादिकः।। मूर्धान्तः स्थितिरित्युक्तो नाभ्यादिहृदयान्तिकः।'' इति। उत्तरतन्त्रे–

स्थानेषु वक्ष्यमाणेषु मनुवर्णान् न्यसेत् सुधीः। विन्यस्तमात्रैर्यैर्देहे भवेन्नारायणः स्वयम्।। १।।
आधारहृदयाननभुजपदमूलकनाभिषु प्रथमः। गलनाभिहृत्कुचद्वयपार्श्वद्वयपृष्ठकेष्वपरः ।। २।।
शीर्षानननयनद्वयकर्णद्वयनासिकापुटेष्वन्यः। बाहुद्वयपादद्वयसन्धित्रितयशरमिताङ्गुलिषु ।। ३।।
हृदि सप्तधातुवायुषु कदृगास्यहृदुरःसोरुजङ्घासु। पादयोश्च तथान्यो गण्डांसोर्वङ्घ्रिषु न्यसेत्।। ४।।
चक्राङ्गशङ्खसगदापद्मस्थानेषु विन्यसेद्वर्णान्। तत्तन्मुद्रापूर्वकमुक्ता एवं दश न्यासाः ।। ५।।

प्रपञ्चसारे– ''विन्यस्तैर्यैर्भवेन्मन्त्री मन्त्रवर्णात्मको हरिः''।। अत्र पद्मपादाचार्याः– मन्त्री मन्त्रवर्णात्मकं' इत्यनेन न्यासे मन्त्रवर्णानां प्रणवपुटितत्वं प्रतिपर्य्यायं व्यापकन्यासश्चोक्त इति।। मन्त्रतन्त्रप्रकाशे– ''विन्यसेद्वर्णमेकैकं बिन्द्वन्तं ध्रुववेष्टितमिति। उत्तरतन्त्रे–

क्षितिसलिलानलपवनव्योमाहङ्कृतिमहत्प्रकृत्याख्येषु। क्रमगदितैरेतैः क्रमगतमन्त्रार्णसंयुतैर्मन्त्री।।१ ।।
चरणान्धुहृदयवक्त्रकद्वयव्यापकेषु च विन्यसेत्। संहारोऽयं गदितो विपरीता सृष्टिरस्य निर्दिष्टा।।२ ।।

विपरीता प्रकृत्यादिः। अत्र न्यासे अङ्गुलीनियमश्च तत्रैव–

तत्राङ्गुलीभिर्न्यासः स्याच्छिरस्यैकैव मध्यमा। तर्जनीमध्यमाभ्यां तु चक्षुषोर्न्यास उच्यते।। १।।
अङ्गुष्ठानामिकाभ्यां तु मुखे न्यासः प्रकीर्तितः। हृदये ज्ञानमुद्रा स्यादङ्गुष्ठश्च कनिष्ठिका।। २।।
नाभौ प्रकीर्तिता गुह्ये अनङ्गुष्ठाः प्रकीर्तिताः। सर्वा जानौ च पादे च पञ्चापि परिकीर्तिताः।। ३।।

इति। तथा–

बिन्दुनादशक्तिशान्तिरूपमात्मचतुष्टयम्। न्यसेत् सर्वतनौ मन्त्री देवताभावसिद्धये ।। १।।

इति। नारदीये–

द्वादशाक्षरमन्त्राद्या अक्लीबस्वरबीजकाः। केशवाद्या धातृपूर्वसूर्या न्यस्या नमोन्तकाः।। १।।

इति। सारसङ्ग्रहे–

---

१. 'वर्णैरिति' ख. पाठः।

मूर्तिपञ्जरनामानं कुर्यान्न्यासान्तरं शुभम् । ग्रहक्ष्वेडहरं श्रीदं यशःपुष्टिसुखावहम्।। १।।
अष्टवर्णस्यास्य मनोः पूरणायार्कवर्णकः। स्मरणीयो मनुः सम्यग् मन्त्रशास्त्रविशारदैः।। २।।
अष्टप्रकृतिरूपोऽयमष्टवर्णो मनुर्मतः । तासामात्मचतुष्कस्य मेलनाद्विधिवद् बुधैः।। ३।।
उदितो मनुवर्योऽयमर्कसंख्याक्षरः क्रमात्। अतस्तेनैव तद्वर्णान् विषण्ढस्वरपूर्वकान्।। ४।।
द्वादशार्कयुतान् न्यसेत् प्रोक्तान् द्वादशकेशवान्।.......................................।।

प्रोक्तान् केशवादिमातृकान्यासे, अकारादिद्वादशस्वरेशत्वेन।

भाले कुक्षौ हृदि गले पार्श्वांसकगलेषु च। दक्षिणेषु च वामेषु पृष्ठे ककुदि च क्रमात्।। ५।।

कुक्षिपदेन सान्निध्यान्नाभिभागो लक्ष्यते। ''ललाटनाभिहृदयकण्ठपार्श्वांसकन्धरे। पार्श्वान्तरेंऽसे ग्रीवायां पृष्ठे कुकुदि च क्रमात्।।'' इत्यगस्त्यवचनात्। स्वायम्भुवे नारसिंहे च–

केशवं विन्यसेत्तार्क्ष्य मूर्धदेशेऽथ विष्णुना। नाभौ नारायणं देवं विष्ण्वन्तेन समन्वितम्।। १।।
माधवं हृदि विन्यसेन्मन्मथेन समन्वितम्। मन्मथान्तेन संयुक्तं गले गोविन्दसंज्ञकम्।। २।।
विष्णुं भूतस्वरेणाथ दक्षपार्श्वे प्रविन्यसेत्। तदंसे मातृतीयेन सूदनं मधुपूर्वकम्।। ३।।
बिन्दुना शिवयुक्तेन दक्षकर्णे त्रिविक्रमम्। वामनं श्रीधरं चैव हृषीकेशमतः परम्।। ४।।
वामेष्वेकारमोङ्कारमौकारं बिन्दुना सह। बिन्दुना पद्मनाभं च पृष्ठदेशे तदन्तयुक्।। ५।।
अन्त्यं ककुदि दामेन द्वादशाङ्गमिति स्मृतम्। द्वादशेमानि बीजानि नादबिन्दुयुतानि च।। ६।।
आदित्या द्वादश तथा द्वादशोद्धारसंयुताः।..।।

विष्णुः अ, विष्ण्वन्तः आ, मन्मथ इ, मन्मथान्त ई, भूतस्वरः उ, मा लक्ष्मीस्तेन ईकारः, तत्तुतीयः ऊ, शिवः ए, तदन्तं औकारान्तः अं, अन्त्यः अः, इति।। आदित्यास्तु–''धातार्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा। विवस्वदिन्द्रौ पूषा च पर्जन्यो दशमः स्मृतः।। त्वष्टा च विष्णुरित्येते''। इति कुम्भसम्भवोक्ता, अंशुः अंशुमत्त्वात्। ''अंशुस्त्वमंशुधारित्वादिति'' विष्णुधर्मोत्तरवचनात्। प्रपञ्चसारे– (२०। २०)

द्वादशाक्षरमन्त्रं तु मन्त्रविन्मूर्ध्नि विन्यसेत्। मूर्धस्थो वासुदेवस्तु व्याप्नोति सकलां तनुम्।।

मन्त्रविन्मूर्ध्नीत्यष्टाक्षरेण सार्धमित्यर्थ इति पद्मपादाचार्याः। मन्त्रतन्त्रप्रकाशे– ''अष्टाक्षरेण सहितं विन्यसेद् द्वादशाक्षरम्'' इति। न्यासप्रकारमाह कुम्भसम्भवः–

(प्रणवश्च स्वरस्तद्वद्वासुदेवाक्षरस्तथा। श्रीराममन्त्रवर्णाश्च ततः स्युः केशवादयः।।
ध्रुवादयो नमोऽन्ताश्च न्यस्तव्या न्यासयोजने)। ....।।

इति। राममन्त्रवर्णा इति तत्प्रकरणे। प्रपञ्चसारे– (२०। २१)

पुनस्तत्प्रतिपत्त्यर्थं किरीटादिमनुं जपेत्। किरीटकेयूरहारपदान्याभाष्य मन्त्रवित् ।। १।।
मकरान्ते कुण्डलं च शङ्खचक्रगदादिकम्। अब्जहस्तपदं प्रोक्त्वा पीताम्बरधरेति च।। २।।
श्रीवत्साङ्कितमाभाष्य वक्षःस्थलमथो वदेत्। श्रीभूमिसहितं स्वात्मज्योतिर्द्वयपदं वदेत्।। ३।।
दीप्तिमुक्त्वा करायेति सहस्रादित्यतेजसे। हृदन्तः प्रणवादिः स्यात् किरीटादिमनुस्त्वयम्।। ४।।

जपेत् सर्वदेहं स्पृशन्निति। ''ततः किरीटमन्त्रेण सर्वाङ्गे व्यापकं न्यसेत्'' इति सङ्कर्षणवचनात्। मन्त्रे सर्वाणि पदानि सम्बुद्ध्यन्तानि ज्ञेयानि। मन्त्रविदित्यनेन मकरान्ते कुण्डलमित्यलङ्कृतपदाध्याहारः सूचितः, इति पद्मपादाचार्याः।। मन्त्रतन्त्रप्रकाशेऽपि–

तारः किरीटकेयूरहारान्ते मकरं पदम्। कुण्डलालङ्कृतेत्यन्ते शङ्खचक्रगदापदम्।। १।।

इति। सारसङ्ग्रहे–

अतः परं प्रवक्ष्यामि तत्त्वन्यासमनुत्तमम्। यस्तत्त्वन्यासमात्रेण तत्त्वात्मा सम्प्रजायते।। १।।
ध्रुवान्ते मादिकान् वर्णान् कान्तानुक्त्वा हृदन्तकान्। परायेति पदं तत्तन्नामान्ते तत्त्वशब्दतः।। २।।
आत्मने नमसा युक्तांस्तत्त्वमन्त्रान् समुद्धरेत्। जीवप्राणौ सर्वतनौ न्यस्य बुद्धिं ततः परम्।। ३।।
अहङ्कारं मनश्चैव हृद्येतानि प्रविन्यसेत्। मस्तकाननहृद्गुह्यपाददेशेष्वतः परम् ।। ४।।
शब्दस्पर्शौ रूपरसगन्धांस्तु क्रमतो न्यसेत्। श्रोत्रत्वगक्षिजिह्वास्यघ्राणेषु श्रोत्रपूर्वकान् ।। ५।।
स्वस्वस्थानेषु वागादिकर्मेन्द्रियगणं न्यसेत्। मूर्ध्नि वक्त्रे हृदि शिवे पादयोर्वियदादिकान्।। ६।।
हृत्पुण्डरीकसंज्ञं हि हृदये मण्डलानि च। अर्कषोडशदिक्संख्याकलायुक्तानि च क्रमात्।। ७।।
सोमसूर्यकृशानूनां श्वेताकारेन्दुवह्निभिः। अथाकाशादिभूतानां न्यासस्थानेषु विन्यसेत्।। ८।।
पराद्यं मेष्ठिनं चैव पुमांसं विश्वसंज्ञकम्। निवृत्तिं सर्वनामान्तः षोयरावलवर्णकैः ।। ९।।
नारायणान्तकान् वासुदेवाद्यान् विनियोजयेत्। परमेष्ठ्यादिभिः पश्चान्नृसिंहबीजपूर्वकम् ।। १०।।
कोपतत्त्वं च मूर्द्धादिपादान्तं व्यापयेत्ततः। एवं विन्यस्य विधिवत् साक्षान्नारायणो भवेत्।। ११।।
ज्वररोगाभिचाराद्याः प्रलयं यान्ति नान्यथा। भूतप्रेतपिशाचाश्च तथैव ब्रह्मराक्षसाः।। १२।।
कूष्माण्डाश्चैव डाकिन्यो नैव द्रष्टुमपि क्षमाः। एवं न्यस्तशरीरोऽसौ स्मरेद्विष्णुमनन्यधीः।। १३।।

हस्तैश्चक्रदरौ गदासरसिजे बिभ्राणमर्कोल्लस-
त्कान्तिं श्रीधरणीविभूषितलसत्पार्श्वं किरीटान्वितम्।
श्रीवत्साङ्कसकौस्तुभोरुपदकं केयूरहारोज्ज्वलं
राजत्कुण्डलमण्डितं हृदि भजे पीताम्बरं शार्ङ्गिणम्।। १४।।

वामाद्यधःकरयोराद्ये तदाद्यूर्ध्वयोरन्ये इत्यायुधध्यानम्।

पङ्कजं दक्षिणे यस्य पाञ्चजन्यं तथोपरि। वामाधस्तु गदा यस्य चक्रं चोर्ध्वे व्यवस्थितम्।। १।।

इति केशवलक्षणमुक्त्वा,

अधरोत्तरभावेन कृतमेतत्तु यत्र वै। नारायणाख्या सा ज्ञेया स्थापिता भुक्तिमुक्तिदा।। २।।

इति हयशीर्षपञ्चरात्रवचनात्।

सव्यान्यपाणौ प्रथमे तु पद्मं बिभ्राणमब्जं तदनन्तरेण।
आद्ये गदा वामकरेऽथ चक्रं विराजयन्तं भुवनानि भासा।।

इति मन्त्रतन्त्रप्रकाशवचनात् च। सव्यान्यपाशौ दक्षिणे। अब्जं शङ्खम्। तथा– (प्रपञ्चसारे २०। २५)

कृत्वा स्थण्डिलमस्मिन् निःक्षिप्य निजासनिकां समुपविश्य।
पीठादिकं निजाङ्गे प्रपूज्य गन्धादिभिः सुशुद्धमनाः।। १।।
सद्द्वादशाक्षरान्तं प्रपूज्य विधिवत् किरीटमन्त्रेण। कुर्यात् पुष्पाञ्जलिमपि निजदेहे पञ्चशोऽथवा त्रिशः।।

इति। सारसङ्ग्रहे–

नवशक्तिसमायुक्ते पीठे देवं यजेत् ततः। विमला सोत्कर्षिणी च ज्ञाना स्याच्च क्रियान्विता।। १।।
योगा प्रह्वी तथा सत्या सेशानानुग्रहा मता। तारो हृद् ङेन्तभगवत्पदं विष्णुं च ङेयुतम्।। २।।
सर्वभूतात्मने शब्दं वदेद्वासुपदं ततः। ङेन्त देवं च सर्वात्मसंयोगपदमुच्चरेत्।। ३।।
योगपद्मपदं प्रोक्त्वा पीठात्मा ङेयुतो नमः। अयमासनमन्त्रः स्यात् प्रदद्यादमुनासनम्।। ४।।

तारः प्रणवः। हृन्नमः। ङेन्तं भगवत्पदं भगवते। विष्णुं ङेयुतं विष्णवे। सर्वेत्यादिपदं स्वरूपं। वासु स्वरूपं। ङेन्त देवं देवाय। सर्वात्मसंयोग स्वरूपं। योगपद्म स्वरूपं। पीठात्मा ङेयुतः पीठात्मने। नमः स्वरूपं। ''मूलेन मनुना मूर्तिं कल्पयेद् देवमर्चयेत्।'' नारदपञ्चरात्रे–

पीठपूजां विनिष्पाद्य गन्धपुष्पादिभिः क्रमात्। पश्चादावाहयेद् देवं मन्त्रेणानेन केशवम्।। १।।
एह्येहि भगवन् देव लोकानुग्रहकारक। यज्ञभागं गृहाणं त्वं वासुदेव नमोऽस्तु ते।। २।।

सारसङ्ग्रहे–

आवाह्य तत्र विधिवदुपचारैर्यथोदितैः। कर्णिकायां यथास्थानं यजेदङ्गानि पूर्ववत्।। १।।
केसरेषु यजेत् पश्चान्मन्त्रवर्णान् समाहितः। वासुदेवादिका मूर्तीश्चतस्रो विधिपूर्वकम्।। २।।
दिक्पत्रेषु समभ्यर्च्यास्तासां नामान्यमूनि हि। वासुदेवस्तथा प्रोक्तः सङ्कर्षणसमाह्वयः।। ३।।
प्रद्युम्नश्चानिरुद्धश्च पीतवस्त्रैरलङ्कृताः। गौरहारिद्रनीला[1]ख्यशक्रनीलनिभाः क्रमात्।। ४।।
दरचक्रगदापद्मधारिणश्च चतुर्भुजाः। कोणपत्रस्थिता एताः शान्तिः श्रीश्च सरस्वती।। ५।।
रतिसंज्ञा भवेदन्या पूज्याश्चैव यथाक्रमम्। शुक्लस्वर्णपयःश्यामसङ्काशाचारुभूषिताः।। ६।।
दलाग्रेषु ततः पूज्या यथावद्धरिहेतयः। अरिं रक्तं दरं स्वच्छं गदां पीतां च पङ्कजम्।। ७।।
स्वर्णाभं कौस्तुभं श्यामं कृष्णाभं मुसलं ह्यसिम्। सुवर्णं वनमालां च शुभ्राभां च क्रमाद्यजेत्।।८।।
दिग्गताश्च ततो बाह्ये पूज्या एते यथाक्रमम्। ध्वजः कृष्णो वैनतेयो रक्ताभः शङ्खसन्निधिः।।९।।
शुक्लः पद्मनिधी रक्तो विघ्नो रक्तस्तथार्यकः। श्यामः श्यामनिभा दुर्गा विश्वक्सेनो निशानिभः।।१०।।
आग्नेयादिदलेष्वेते सम्पूज्या विधिवत् क्रमात्। लोकपालांस्ततो बाह्ये वज्रादीन्यायुधान्यपि।।११।।
विष्णोः पूजाविधानं तु षडावरणमीरितम्। इति। महाकपिलपञ्चरात्रे–
नारायणाय विद्महे वासुदेवाया धीमहि। तन्नो विष्णुः पुनस्तद्वदन्ते चैव प्रचोदयात्।। १।।
गायत्री वैष्णवी प्रोक्ता सर्वपापहरा त्वियम्। अङ्गानि प्रथमं मूर्तिशक्तयः केशवादिकाः।। २।।
लोकेशास्तद्धेतयश्च पूज्याः सर्वेष्टसिद्धये। वासुदेवादिकानादौ चक्रशङ्खध्वजादिकान्।। ३।।

---

१. 'कृष्णाख्य' ख. पाठः।

केशवाद्यान् द्वादशाथ चक्रवज्रादिकान्यजेत्। वासुदेवान् ध्वजादींश्च लोकपालांस्तदायुधैः।। ४।।
प्रोक्ते विधिचतुष्केऽत्र हरिमेकेन संयजेत्।...।।

अत्रापि तृतीयचतुर्थप्रकारयोरङ्गानि पूज्यान्येव। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि साध्यनारायणाय ऋषये नमः। मुखे देवीगायत्र्यै छन्दसे नमः। हृदये श्रीपरमात्मने देवतायै नमः। इति विन्यस्य ममेष्टार्थे विनियोगः, इति कृताञ्जलिरुक्त्वा, मूलमन्त्रं करयोर्व्यापय्य, क्रुधोल्काय स्वाहा हृदयाय नमः। महोल्काय० शि०। वीरोल्काय० शि०। द्युल्काय० कव०। सहस्रोल्काय० अस्त्रं०। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिपञ्चाङ्गुलीषु विन्यस्य, दक्षकनिष्ठामूलपर्वादितर्जन्यग्रपर्वान्तेषु द्वादशस्थानेषु ओं ओं ओं नमः। ओंनंनओं नमः। ओंमोंओं नमः। ओंनांओं नमः। ओंरांओं नमः। ओंयंओं नमः। ओंणांओं नमः। ओंयंओं नमः।। पुनः ओंओंओं नमः। ओंनंओं नमः। ओंमोंओं नमः। ओंनांओं नमः। ओंरांओं नमः। ओंयंओं नमः। ओंणांओं नमः। ओंयंओं नमः। इति विन्यस्य, वामतर्जनीमूलादिपर्वारभ्य तत्कनिष्ठिकाग्रपर्वान्तेषु द्वादशस्थानेषु— ओंरांओं नमः। ओंयंओं नमः। ओंणांओं नमः। ओंयंओं नमः। पुनः— ओंओंओं नमः। ओंनंओं नमः। ओंमोंओं नमः। ओंनांओं नमः। ओंरांओं नमः। ओंयंओं नमः। ओंणांओं नमः। ओंयंओं नमः। इति त्रिरावृत्त्या मूलमन्त्राक्षराणि विन्यस्य, हृच्छिरःशिखाकवचास्त्रेषु प्रोक्तपञ्चाङ्गानि विन्यस्य, हृदये ओंनमः। शिरसि नं नमः। शिखायां मों नमः। कवचे नां नमः। अस्त्रस्थाने रां नमः। नेत्रयोः यं नमः। (इति षड्भिर्वर्णैः षडङ्गानि विन्यस्य) कुक्षौ णां नमः। पृष्ठे यं नमः। इति विन्यस्य, ऐंह्रीं चक्रेण बध्नामि नमश्चक्राय स्वाहा, आग्नेयीं चक्रेण बध्नामि स्वाहा, इत्यादितत्तद्दिगूहेन दशदिग्बन्धनं कृत्वा, मूर्ध्नि ओंओंओं नमः। नेत्रयोः ओंनंओं नमः। मुंखे ओंमोंओं नमः। हृदि ओंनांओं नमः। नाभौ ओंरांओं नमः। गुह्ये ओंयंओं नमः। जान्वोः ओंणांओं नमः। पादयोः ओंयंओं नमः। इति सृष्ट्या विन्यस्य, पादयोः ओंओंओं नमः। जान्वोः ओंनंओं०। गुह्ये ओंमोंओं०। नाभौ ओंनांओं०। हृदि ओंरांओं नमः। मुखे ओंयंओं०। नेत्रयोः ओंणांओं०। मूर्ध्नि ओंयंओं०। इति संहारेण विन्यस्य, नाभौ ओंओंओं नमः। गुह्ये ओंनंओं०। जानुनोः ओंमोंओं०। पादयोः ओंनांओं०। मूर्ध्नि ओंरांओं०। नेत्रयोः ओंयंओं०। मुखे ओंणांओं०। हृदि ओंयंओं०। इति स्थित्या विन्यस्य, मूलाधारे ओंओंओं नमः। हृदि ओंनंओं०। मुखे ओंमोंओं०। दक्षबाहुमूले ओंनांओं०। वामबाहुमूले ओंरांओं०। दक्षोरुमूले ओंयंओं०। वामोरुमूले ओंणांओं०। नाभौ ओंयंओं०। ततो मूलेन व्यापकं कृत्वा, कण्ठे ओंओंओं नमः। नाभौ ओंनंओं०। हृदि ओंमोंओं०। दक्षस्तने ओंनांओं०। वामे ओंरांओं०। दक्षपार्श्वे ओंयंओं०। वामे ओंणांओं०। पृष्ठे ओंयंओं०। पुनः पृष्ठे ओंयंओं०। इति व्यापकम्। एवं प्रत्यावृत्तिं कुर्यात्। मूर्ध्नि ओंओंओं नमः। मुखे ओंनंओं०। दक्षनेत्रे ओंमोंओं०। वामे ओंनांओं०। दक्षकर्णे ओंरांओं०। वामे ओंयंओं०। दक्षनसि ओंणांओं०। वामे ओंयंओं०। ततो व्यापकम्। दक्षबाहुमूले ओंओंओं नमः। बाहुमध्ये ओंनंओं०। मणिबन्धे ओंमोंओं०। दक्षाङ्गुष्ठाद्यङ्गुलीष्ववशिष्टान् पञ्च वर्णानेवं न्यसेत्। वामबाहुमूले ओंओंओं.। बाहुमध्ये ओंनंओं०। मणिबन्धे ओंमोंओं०। वामाङ्गुष्ठाद्यङ्गुलीष्ववशिष्टान् पञ्च वर्णानेवं न्यसेत्। एवं दक्षोरुमूलजानुगुल्फाङ्गुष्ठादिषु न्यसेद्, एवं वामेऽपि। हृदि एवं त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रेषु सप्तसु धातुषु सप्त वर्णान् विन्यस्य अष्टमं वायौ न्यसेत्। मूर्ध्नि ओंओंओं नमः। नेत्रयोः ओंनांओं नमः। मुखे ओंमोंओं०। हृदि ओंनांओं०। उदरे ओंरांओं०। ऊर्वोः ओंयंओं। जङ्घयोः ओंणांओं०। पादयोः ओंयंओं०। गण्डयोः ओंओंओं०। अंसयोः ओंनंओं०। ऊर्वोः ओंमोंओं०। पादयोः ओंनांओं०। वामाधःकरे ओंरांओं०। दक्षाधःकरे ओंयंओं०। वामोर्ध्वकरे ओंणांओं०। दक्षोर्ध्वकरे ओंयंओं०। इति विभूतिपञ्जरन्यासः।। पादयोः ओंनमः पराय

पृथ्वीतत्त्वात्मने नम:। लिङ्गे ॐनं नम: पराय जलतत्त्वात्मने नम:। हृदि ॐमों नम: पराय तेजस्तत्त्वात्मने नम:। मुखे ॐनां नम: पराय वायुतत्त्वात्मने नम:। मूर्ध्नि ॐरां नम: पारायाकाशतत्त्वात्मने नम:। हृदि ॐयं नम: परायाहङ्कारतत्त्वात्मने नम:। सर्वाङ्गे ॐणां नम: पराय महत्त्वात्मने नम:। ॐयं नम: पराय प्रकृतितत्त्वात्मने नम:। इति संहृत्या न्यस्य, सर्वाङ्गे यं नम: पराय प्रकृतितत्त्वात्मने नम:, णां नम: पराय महत्तत्त्वात्मने नम:। हृदि यं नम: परायाहङ्कारतत्त्वात्मने०। मूर्ध्नि रां नम: परायाकाशतत्त्वात्मने०। मुखे नां नम: पराय वायुतत्त्वात्मने०। हृदि मों नम: पराय तेजस्तत्त्वात्मने०। लिङ्गे नं नम: पराय जलतत्त्वात्मने०। पादयो: ॐ नम: पराय पृथ्वीतत्त्वात्मने०। इति सृष्ट्या विन्यस्य, तत: सर्वाङ्गे ॐआं बिन्दुरूपायात्मने नम:। ओंअं नादरूपायान्तरात्मने नम:। ॐषं शक्तिरूपाय परमात्मने नम:। ॐह्रीं शान्तिरूपाय ज्ञानात्मने०। इति विन्यस्य, ललाटे ॐअं केशवाय धात्रे नम:। उदरे नंआं नारायणायार्यम्णे०। हृदि मोंई माधवाय मित्राय०। कण्ठे भंईं गोविन्दाय वरुणाय०। दक्षपार्श्वे गंउं विष्णवे अंशवे०। दक्षांसे वंऊं मधुसूदनाय भगाय०। गलदक्षभागे तेंएं त्रिविक्रमाय विवस्वते०। वामपार्श्वे वांऐं वामनायेन्द्राय०। वामांसे सुंओं श्रीधराय पूष्णे०। गलवामभागे देंऔं हृषीकेशाय पर्जन्याय०। पृष्ठे वांअं पद्मनाभाय त्वष्ट्रे०। ककुदि यंअ: दामोदराय विष्णवे०। शिरसि ॐ नमो नारायणाय, ॐ नमो भगवते वासुदेवाय नम:। इति न्यस्येदिति मूर्तिपञ्जरन्यास:। तत: किरीटकेयूरहारमकरकुण्डलालङ्कृतशङ्खचक्रगदाब्जहस्तपीताम्बरधरश्रीवत्सालङ्कृतवक्ष:स्थलश्रीभूमिसहितात्मज्योतिर्द्वयदीप्तिकराय सहस्रादित्यतेजसे नम:, इति सर्वाङ्गे व्यापकं न्यसेत्।। सर्वाङ्गे ॐमं नम: पराय जीवात्मने नम:। ॐभं नम: पराय प्राणतत्त्वात्मने नम:। हृदि ॐवं नम: परांय बुद्धितत्त्वा०। ॐफं नम: परायाहङ्कारत०। ॐपं नम: पराय मनस्त०। मूर्ध्नि ॐनं नम: पराय शब्दत०। मुखे ॐधं नम: पराय स्पर्शतत्त्वा०। हृदि ॐदं नम: पराय रूपत०। गुह्ये ॐथं नम: पराय रसत०। पादयो: ॐतं नम: पराय गन्धत०। कर्णयो: ॐणं नम: पराय श्रोत्रत०। सर्वाङ्गे ॐढं नम: पराय त्वक्तत्त्वा०। अक्ष्णो: ॐडं नम: पराय नेत्रत०। जिह्वायां ॐठं नम: पराय जिह्वात०। घ्राणयो: ॐटं नम: पराय घ्राणत०। मुखे ॐञं नम: पराय वाक्त०। पाण्यो: ॐझं नम: पराय पाणित०। पादयो: ॐजं नम: पराय पादत०। पायौ ॐछं नम: पराय पायुत०। गुह्ये ॐचं नम: परायोपस्थतत्त्वाय०। मूर्ध्नि ॐङं नम: परायाकाशत०। मुखे ॐघं नम: पराय वायुत०। हृदि ॐगं नम: पराय तेजस्तत्त्वाय०। लिङ्गे ॐखं नम: पराय जलत०। पादयो: ॐकं नम: पराय पृथ्वीत०। हृदि ॐषं नम: पराय हृत्पुण्डरीकत०। तत्रैव, ॐहं नम: पराय सूर्यमण्डलत०। ॐसं नम: पराय सोममण्डलत०। ॐरं नम: पराय वह्निमण्डलत०।। मूर्ध्नि ॐषों नम: पराय परमेष्ठिने वासुदेवत०। मुखे ॐयं नम: पराय पुरुषाय सङ्कर्षणत०। हृदि ॐरं नम: पराय विश्वाय प्रद्युम्नत०। गुह्ये ॐवं नम: पराय निवृत्तयेऽनिरुद्धत०। पादयो: ॐलं नम: पराय सर्वाय नारायणत०। ॐक्ष्रोऊं नम: पराय नृसिंहाय कोपतत्त्वात्मने नम:। इति मूर्धादिपादान्तं व्यापकत्वेन विन्यस्य, श्रीनारायणात्मकं स्वात्मानं ध्यात्वा प्रागुक्तं ''उद्यत्कोटिदिवाकराभ'' मित्यादि (८। १७०) ध्यायेत्।। ध्यानविशेषस्तु–

वामे विचिन्त्या कमलायताक्षी हेमाब्जवर्णा कमला च देवी।
विभूतिकामेन सुरत्नहारा प्रेम्णा सृजन्ती नयने हरौ या।। १।।
तं च देवं सुवर्णाभं चिन्तयेद्रत्नभूषितम्। क्षेत्रधान्यसुवर्णानां प्राप्तये धरणीं स्मरेत्।। २।।

देवीं दूर्वादलश्यामां दधानां शालिमञ्जरीम्। चिन्तयेद्भारतीं देवीं वीणापुस्तकधारिणीम्।। ३।।
दक्षिणे देवदेवस्य पूर्णचद्रनिभाननाम् । क्षीराब्धिफेनपुञ्जाभे वसानां श्वेतवाससी।। ४।।
भारत्या सहितं विष्णुं ध्यायेदेवं परात्परम्। वेदवेदार्थसंवेदी जायते सर्ववित्तमः।। ५।।

इति। नारायणीये तु–

प्रणवद्वयमध्यस्थो नमोन्तश्च सबीजकः। विबीजो मोक्षकृन्मन्त्रो यथोक्तप्रणवादिकः।।

इति। अथ ध्यानानन्तरं श्रीवत्सकौस्तुभवनमालामुद्राः प्रदर्शयेत्। ततो ध्यानाद्यात्मपूजान्तं कुर्यात्। आत्मपूजायां विशेषस्तु– स्वेष्टदेवतारूपध्यानान्ते विभूतिपञ्जरन्यासक्रमेण न्यासस्थानेषु न्यासमन्त्रेण गन्धपुष्पादिभिः सम्पूज्य, किरीटमन्त्रेण पुष्पाञ्जलिपञ्चकं त्रयं वा स्वदेहे दत्त्वा योगपीठदेवतापूजादि यथोक्तविधिना सर्वं कुर्यादिति। ततो मण्डूकादिपृथिव्यन्ते क्षीरसमुद्रं श्वेतद्वीपं च सम्पूज्य नन्दनोद्यानादि परतत्त्वपूजान्तेऽष्टदलकेसरेषु स्वाग्रादिमध्यान्तं प्रादक्षिण्येन–विमलायै नमः। उत्कर्षिण्यै०। ज्ञानायै०। क्रियायै०। योगायै०। प्रह्व्यै०। सत्यायै०। ईशानायै०। अनुग्रहायै०। इति सम्पूज्य, 'ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः' इति मन्त्रेण समस्तं पीठं सम्पूज्य, मूलमुच्चार्य "श्रीविष्णुमूर्तिं [1]कल्पयामि" इति मध्ये मूर्तिं परिकल्प्य, पुनर्मूलमुच्चार्य "श्रीविष्णुमूर्तये नमः" इति सम्पूज्य, चतुरायतनदेवता गणेशादिकाः समभ्यर्च्य, प्र(मा)णोक्तावाहनमन्त्रेणावाह्य स्थापनादिप्राणस्थापनान्ते वैष्णवमुद्राः प्रदर्श्य आसनादिपुष्पोपचारान्ते कर्णिकायां प्राग्वत् पञ्चाङ्गानि सम्पूज्य अष्टदलकेसरेष्वेव स्वाग्रादिप्रादक्षिण्येन– ॐनं नमः। मों नमः। नां नमः। रां नमः। यं नमः। णां नमः। यं नमः। इति सम्पूज्य अष्टदलेषु स्वाग्रादिदिक्पत्रचतुष्टये– ॐवासुदेवाय नमः। सङ्कर्षणाय०। प्रद्युम्नाय०। अनिरुद्धाय०। विदिग्दलेषु– शान्त्यै नमः। श्रियै०। सरस्वत्यै०। रत्यै०। ततो दलाग्रेषु स्वाग्रादिप्रादक्षिण्येन– चक्राय नमः। शङ्खाय०। गदायै०। पद्माय०। कौस्तुभाय०। मुसलाय०। खड्गाय०। वनमालायै०। ततश्चतुरस्रप्रथमरेखायां देवाग्रादिप्रादक्षिण्येन चतुर्दिक्षु– ध्वजाय नमः। गरुडाय०। शङ्खनिधये०। पद्मनिधये०। विदिक्षु–विघ्नाय नमः। आर्य्याय०। दुर्गायै०। विश्वक्सेनाय०। इति सम्पूज्य, द्वितीयरेखायां इन्द्रादीन्, तृतीयरेखायां वज्रादींश्च सम्पूज्य धूपादिकं सर्वं समापयेदिति।। सारसङ्ग्रहे–

द्वात्रिंशल्लक्षमानेन पादोनेनार्धतोऽपि वा। तदर्धेनाथवा मन्त्री जपेन्मन्त्रमनन्यधीः ।। १।।
जुहुयात् तद्दशांशेन त्रिमध्वक्तैः सरोरुहैः। तर्पयेच्चन्द्रकाश्मीरमृगनाभिसुवासितैः ।। २।।
सलिलैः स्वाभिषेकान्ते तर्पयेद् ब्राह्मणानपि। सुकुलीनसदाचारान् विष्णुभक्तानतन्द्रितः।। ३।।

इति। अत्रेयं जपसंख्या कलियुगादिकृतयुगान्तपरा ज्ञेया। अन्यत्र तु– विकारलक्षं प्रजपेन्मनुमेनं समाहितः। तद्दशांशैः सरसिजैर्जुहुयान्मधुराप्लुतैः।। पीठे सम्पूजयेद् देवं विमलादिसमन्विते इति। तथा–

एवं सिद्धमनुर्मन्त्री प्रयोगान् साधयेत् सुधीः। सायुधाष्टभुजं सौम्यं सर्वाङ्गधवलद्युतिम्।। १।।
निर्विषीकरणे ध्यायेद् विष्णुं गरुडवाहनम्। एवमेव हरिं ध्यायेद्रोगसंहारकर्मणि।। २।।
दधिमध्वाज्यसंयुक्ताश्चतुरङ्गुलसम्मिताः । गडूचीरयुतं हुत्वा मृत्युमेवातिवर्तते[2] ।। ३।।

---

१. 'परिक' ख. पाठः। २. 'मृत्युरेव निवर्तते' ग. पाठः।

शनैश्चरदिनेऽश्वत्थं सम्यगालम्ब्य[1] पाणिना। जपेदष्टशतं शुद्धो म्रियते नापमृत्युना।। ४।।
पञ्चविंशतिकं जप्त्वा मन्त्री शुद्धा: पिबेदप:। निरस्तपातको भूत्वा ह्यरोगी ज्ञानवान् भवेत्।। ५।।
जप्त्वायुतेन कुम्भाद्भि: सेचनं सर्वरोगनुत्। भुञ्जान: सप्तजप्तान्नं [2]श्रीबुद्ध्यारोग्यवान् भवेत्।। ६।।
चन्द्रसूर्योपरागे च त्रिदिनं दिनमेव वा। उपोष्याष्टसहस्रं तु स्पृष्ट्वा ब्राह्मीघृतं जपेत्।। ७।।
य: पिबेल्लभते मेधां कवित्वं वादितां च स:। बिल्वैरयुतहोमेन सद्यो धनपतिर्भवेत् ।। ८।।

बिल्वैस्तत्फलै: पत्रैर्वा।

पद्मतन्तुमयं सूत्रमयुतेनाभिमन्त्रितम्। धारयेद् दक्षिणे हस्ते सर्वत्र स्यात् सुरक्षित:।। ९।।

मन्त्रवर्णध्यानमुक्तं महाकपिलपञ्चरात्रे—

ओंकारं तु सदा ध्येयं ज्योतिर्मालासमाकुलम्। नकारं मेघवर्णाभं मोंकारं चिन्तयेद् सदा।। १।।
भिन्नाञ्जनसमाकारं तृतीयं बीजमुत्तमम्। नाकारं श्यामवर्णाभं सौम्यरूपं सुशोभनम्।। २।।
राकारं जलवर्णाभं सम्यक् सन्दीप्ततेजसम्। धूम्रवर्णं सदा ध्येयं यकारं परमुत्तमम्।। ३।।
अनौपम्यगुणाकारं णाकारं च विचिन्तयेत्। यकारं तु ततो ध्येयं पद्मरागसमप्रभम्।। ४।।

इति। अर्थे उद्देश्ये श्रीबीजादिर्जप्तव्य:। तदुक्तम्— ''श्रीबीजेन युतं मन्त्रं तत्कामस्तन्मना जपेत्'' इति।।

कामनायामपि विशेष:।

नारसिंहमिवात्मानं देवं ध्यात्वातिभैरवम्। मन्त्रेण स्पर्शयेच्छस्त्रं नाविजित्य निवर्तते।। १।।
नारसिंहेन बीजेन मन्त्रं योज्य सदा जपेत्। शतमष्टोत्तरं जप्त्वा वामहस्ताभिमन्त्रित:।। २।।
पुन: पुनश्च य: सिञ्चेत् सर्पदष्टोऽपि जीवति। गारुडेन समायुक्तं पञ्चार्णेन सदा जपेत्।। ३।।
निर्विषीकरणे ध्यायेद् विष्णुं गरुडवाहनम्। अशोकफलके पक्षीन्द्रमालिख्याशोकसंहतौ।। ४।।
अशोकपुष्पैराराध्य भगवन्तं तदग्रत:। जुहुयात् तानि पुष्पाणि त्रिसन्ध्यं सप्तरात्रकम्।। ५।।
प्रत्यक्षो जायते पक्षी वरमिष्टं प्रयच्छति। गाणपत्यसमायुक्तं जपेल्लक्षं पयोव्रत:।। ६।।
महागणपतिं देवं प्रत्यक्षमिव पश्यति। भारतीबीजसंयुक्तं षण्मासात् तज्जपार्चनात्।। ७।।
साक्षात् सरस्वतीं देवीं प्रत्यक्षामिह पश्यति। यो जपेत् प्रणवपूर्वं मन्त्रं त्रैवर्णिक: पुमान्।। ८।।
योषितश्च तथा शूद्रा जपेयु: प्रणवं विना। आदावष्टाक्षरस्य स्यात् प्रणव: सर्वकामिक:।। ९।।
आदावन्ते यदा ह्येष ज्ञानवृद्धिस्तदा भवेत्। आदित: संहितां कुर्यादन्ततस्तु न संहिताम्।। १०।।

इति। कल्पोक्तं यन्त्रमुच्यते—

अष्टपत्रं च षट्कोणं रविसंख्यदलाम्बुजम्। दन्तपत्रं च तद्बाह्ये वृत्तं भूमिपुरं शुभम्।। १।।
ससाध्यं कर्णिकायां तु लिखेदाद्यस्वरं सुधी:। अष्टपत्रेषु मूलार्णान् पत्राग्रे श्रीकरं लिखेत्।। २।।
षट्कोणे चक्रमन्त्रार्णान् सूयरि द्वादशार्णकम्। दन्तपत्रे मन्त्रराजं वृत्ते नृहरिबीजकम्।। ३।।
प्राणार्णैरपि संयुक्तं साक्षाद्विष्णोश्च मन्दिरम्। आवाह्य मन्त्रैराराध्य सूत्रैर्बद्ध्वा दृढं वहन्।। ४।।

---

१. 'लभ्य' ख. पाठ:। २. 'धी' ख. पाठ:।

सर्वदा तस्य वर्द्धन्ते धनारोग्यार्थसम्पदः। सायुज्यं सार्ष्टिसालोक्ये सामीप्यं वाथ वाञ्छितम्।।५।।

इति। सारसङ्ग्रहेऽपि—

षट्कोणे प्रणवान्तरे प्रणवगं साध्यं खिलेन्मध्यतः
षट्कोणेषु लिखेत् सुदर्शनमनुं पद्मेऽष्टपत्रे ततः।
अष्टार्णं च दलाग्रतः प्रविलिखेत् तं श्रीकराष्टाक्षरं
वाह्ये द्वादशवर्णमन्त्रसहितं स्याद् द्वादशारं ततः।। १।।
द्वात्रिंशद्दल आलिखेन्नरहरेरानुष्टुभार्णांस्तत—
स्तद्बीजेन च वेष्टयेद्बहिरिदं यन्त्रं हि विष्णोः परम्।
पूजाहोमसुसाधितं करधृतं भूतादिरक्षाकरं
लक्ष्मीकीर्तिविवर्धनं परमिदं मोक्षार्थिनां मुक्तिदम्।। २।।

इति। अस्यार्थः— षट्कोणं कृत्वा तन्मध्ये प्रणवोदरे प्रणवं विलिख्य, तन्मध्ये साध्यनामालिख्य षट्सु कोणेषु स्वाग्रादिप्रादक्षिण्येन वक्ष्यमाणसुदर्शनषडक्षरस्यैकैकमक्षरं प्रतिकोणं विलिख्य, तद्बहिरष्टदलपद्मं कृत्वा तद्दलेषु नारायणाष्टाक्षरवर्णानालिख्य, तद्दलाग्रेषु प्रागुक्तश्रीकराष्टाक्षराणि आलिख्य, तद्बहिर्द्वादशदलं कृत्वा तद्दलेषु वक्ष्यमाणवासुदेवद्वादशाक्षराणि आलिख्य, तद्बहिर्द्वात्रिंशद्दलपद्मं विरच्य तद्दलेषु वक्ष्यमाणनृसिंहमन्त्रस्य द्वात्रिंशद्वर्णानेकैकशः समालिख्य, तद्बहिर्वृत्तद्वयं कृत्वा वृत्तयोरन्तराले स्वाग्रादिप्रादक्षिण्येन मध्यस्थाक्षरसम्मुखं यथा भवति तथा निरन्तरं नृसिंहबीजेन वेष्टयेदित्येतद्यन्त्रमुक्तफलदं भवति।। श्रीयन्त्रसारे—

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम्। सुदर्शनषडर्णं च षट्सु कोणेषु सन्धिषु।। १।।
[1]षडङ्गानि चतुष्पत्रकेसरेषु क्रमेण च। गोपालकचतुर्वर्णमन्त्रस्यैकैकमक्षरम् ।। २।।
दलेषु द्वादशार्णस्य त्रीणि त्रीण्यक्षराणि च। अष्टपत्रे केसरोद्यदष्टार्णैकैकवर्णके।। ३।।
नृसिंहानुष्टुभो वर्णांश्चतुरश्चतुरस्ततः। सुदर्शनद्व्यष्टपत्रकेसरे षोडशच्छदे ।। ४।।
ऋचां पुरुषसूक्तस्य क्रमात् षोडशकं बहिः। मातृकार्णोल्लसद्वृत्तं भूपुराश्रिस्थतारकम्।। ५।।
यन्त्रं पुरुषसूक्तस्य पुत्रायुःकीर्तिकान्तिदम्। सर्वपापहरं श्रीदं धर्मार्थसुखमोक्षदम्।। ६।।
हैयङ्गवीने प्रविलिख्य यन्त्रं त्रिवारमेतत् प्रविजप्य सूक्तम्।
प्रातःसमद्याद्वनिता विदग्धं पुत्रं प्रसूते सकलागमज्ञम्।। ७।।
घोरे विषे घोरतरेऽभिचारे घोरे ज्वरे घोरतरे च शूले।
प्रभक्षयेत् तत्प्रशमाय जप्त्वा............................।। ८।।

इति। अस्यार्थः— षट्कोणं कृत्वा तत्कर्णिकामध्ये ससाध्यं प्रणवं विलिख्य, तत्कोणेषु सुर्दशनषडक्षरमन्त्रस्यैकैकमक्षरं स्वाग्रादिप्रादक्षिण्येन विलिख्य, तत्सन्धिषु सुदर्शनषड़क्षरस्य षडङ्गमन्त्रानालिख्य, तद्बहिश्चतुर्दलकमलं कृत्वा तत्केसरेषु गोपालचतुरक्षरमन्त्रस्यैकैकमक्षरं विलिख्य, तत्पत्रेषु वासुदेवद्वादशाक्षरमन्त्रस्य वर्णानां त्रयं त्रयं प्रतिदलं विलिख्य,

---

[1] १. 'तदङ्गानि' ख. पाठः।

तद्बहिरष्टदलकमलं कृत्वा तत्केसरेषु नारायणाष्टाक्षरस्यैकैकमक्षरं विलिख्य, तद्दलेषु द्वात्रिंशदक्षरनृसिंहमन्त्रस्य चतुरश्चतुरो वर्णान् प्रतिदलं विलिख्य, तद्बहि: षोडशदलपद्मं कृत्वा तत्केसरेषु वक्ष्यमाणषोडशाक्षरसुदर्शनमन्त्रस्यैकैकमक्षरं विलिख्य, तद्दलेषु पुरुषसूक्तस्यैकैकामृचं विलिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां मातृकां सबिन्दुकां विलिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु प्रणवं विलिखेद्, इत्येतद्यन्त्रमुक्तफलदं भवति।। अत्र पुरुषसूक्तं तु सर्वैरपि ऋग्वेदोक्तमेव ग्राह्यं सर्वेषां सूक्तानां तन्मूलकत्वादन्यवेदेषु पाठभेददर्शनात्।। सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायण ऋषि: पुरुषो देवता पञ्चदशानुष्टुभस्त्रिष्टुबेका। सारसङ्ग्रहे–

अष्टवर्णस्य मन्त्रस्य वर्णाष्टकर्षय: पृथक्। मूर्तिभेदविभिन्नोऽसौ प्रोच्यते साधकेष्टद:।। १ ।।
गौतमोऽथ भरद्वाजो विश्वामित्राह्वयस्तथा। जमदग्निर्वशिष्ठश्च कश्यपश्चात्रिरेव च।। २ ।।
अगस्त्य इति विज्ञेया ऋषयोऽष्टौ यथाक्रमम्। गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च।। ३ ।।
त्रिष्टुप् च जगती चैव विराट् छन्दांसि तु क्रमात्। धरो ध्रुवस्तथा सोम आपोऽग्निर्वायुरेव च।।४।।
प्रत्यूषश्च प्रभासश्च विज्ञेया देवता: क्रमात्। अग्निर्भूर्वायुराकाश आदित्या द्यौर्विधुश्च भम्।। ५।
तत्त्वानि सप्त लोका: स्यु: क्षेत्राणि सपरात्मका:। शुक्लं हिरण्मयं कृष्णं रक्तं कुङ्कुमसन्निभम्।।६।।
पद्मं किञ्जल्कनीलाभं रक्तं वर्णाष्टकं मतम्। षष्ठाद्ययोरुदात्त: स्यात् स्वरितोऽन्त्यद्वितीययो:।।७।।
(प्रचयौ त्रिचतुर्वर्णौ निहतं पञ्चमाक्षरम्। उदात्तं सप्तमं बीजमिति संस्मृत्य सञ्जपेत्।। ८।।
दरचक्रगदापद्मकरे मूर्ती नमोर्णयो:।) इतरा: स्युश्चक्रशङ्खगदापद्मकरा: क्रमात् ।। ९।।
या मूर्ति: पूज्यते पूर्वं तस्या अन्या: प्रयान्त्यथ। अङ्गतामवशिष्टेंऽशे स्वयं यात्यङ्गतां पुन:।।१०।।
वक्ष्यमाणाच्च तारस्य विधानादधिकावृति: । इयमेवेतरत् सर्वं वक्ष्यमाणप्रकारवत्।। ११।।
सर्वार्चायां पूर्वमङ्गमूर्त्यष्टकमतो विदु:। लोकपालादिकं चान्यत् समानं सर्वपूजने।। १२।।
नार्णजे वासुदेवादिशक्तयोऽर्च्या ध्वजादिका:। तृतीयजे रतिधृती कान्तिस्तुष्टि: सपुष्टिका।। १३।।
स्मृतिर्दीप्तिश्च कीर्तिश्च पूज्या पश्चाद् ध्वजादिका:। तुरीयजे च रत्यादिपूजा शेषं च पूर्ववत्।।१४।।
पञ्चमाक्षरजे [1]श्रीर्भूर्माया स्याच्च मनोन्मनी। ह्री: रति: पुष्टिमोहिन्यौ माया च महदादिका।। १५।।
योगादिका तथा पूज्या षष्ठाक्षरभवे त्वरि:। शङ्खो गदा हलं शार्ङ्गो मुसलोऽसि: सशूलक:।।१६।।
सप्तमार्णभवेऽनन्तो वासुकिस्तक्षकस्तथा। (कार्कोटकस्तत: पद्मो महापद्मस्तत: परम्।। १७।।
शङ्खपालाख्यकुलिकौ सम्यक् पत्रेषु पूजयेत्।) मत्स्यादिभि: पञ्चमी स्यात् षष्ठ्यनन्तादिभिर्मता।।१८।।
अन्यत् पूर्ववदेव स्यात् सर्वं मत्स्यश्च कूर्मक:। वराहश्च नृसिंहश्च कुब्जो रामत्रयं तथा।। १९।।
कृष्ण: कल्की त्वनन्तात्मा बुद्ध एवैष नामत:[2]। पूजाविधौ च पूर्वोक्ते यन्त्रोक्तं चोह्यमेव तत्।।२०।।
अष्टाक्षरार्णमन्त्राणां विधानं सम्यगीरितम्। एतेन यो यजेन्मन्त्री भक्त्या परमया हरिम्।। २१।।
स वाञ्छितार्थांल्लभते ह्ययत्नादेव साधक:।...।।

---

१. 'श्रीभू' क. पाठ:। २. 'मत्स्याद्याश्चैव नामत:' ख. पाठ:।

अथाष्टाक्षरस्याष्टवर्णसंज्ञानामष्टमूर्तीनां विधानमाह– अष्टवर्णस्येति। दरः शङ्खः। नमोर्णयोर्मूर्त्योः पूर्ववदायुधध्यानम्। अन्यासां तु दक्षाधःकरमारभ्य प्रादक्षिण्येन दक्षोर्ध्वकरपर्यन्तं चक्रशङ्खगदापद्मानि ध्येयानि।। या मूर्तिरिति– या मूर्तिः प्राधान्येनार्चयितुरिष्टा सा मध्ये पूज्या। इतराः सप्त मूर्तयः पूर्वादिसौम्यान्तासु दिशासु पूज्याः। ईशानकोणे तु पुनः प्रधानमूर्तिरिव पूज्या। अवशिष्टेंऽशे ''स्वयं यात्यङ्गतां पुनः'' इत्युक्तेः। अत्र द्वितीयमूर्तिपूजायां तृतीयादिमूर्तीः सम्पूज्यानन्तरमाद्यां द्वितीयां च पूजयेदेवं तृतीयादिष्वप्यूहनीयम्। तत्र प्रथमपूजायां प्रथममङ्गावृतिः द्वितीया अष्टमूर्तिभिः, तृतीया सशक्तिकैर्वासुदेवादिभिरात्मादिभिः, शान्त्यादिभिः चतुर्थी, चक्रादिभिः पञ्चमी, ध्वजादिभिः शक्रादिभिः तदस्त्रैश्च षष्ठी।। नार्णमूर्त्यर्चायां– तृतीया वासुदेवादिभिः, सशान्त्यादिभिर्ध्वजादिभिश्चतुर्थी, पञ्चमी षष्ठी च शक्रादिभिस्तदस्त्रैश्च। मोर्णमूर्तिपूजायां–तृतीया रत्यादिभिः, सशान्त्यादिभिर्ध्वजादिभिश्चतुर्थी। नार्णजे विधाने– रत्यादिभिस्तृतीया। रार्णविधौ– आत्मादिभिस्तृतीया, तत्र माया महामाया योगमायेति शक्तित्रयनाम ज्ञेयम्। यार्णविधौ– तृतीया शङ्खादिभिः। णाकारविधौ–तृतीयानन्तादिभिः। यकारमूर्तिपूजायां–प्रथमा अङ्गावृतिः, द्वितीया वासुदेवादिभिः शान्त्यादिभिश्च, तृतीया केशवाद्यैः, तुरीया ध्वजाद्यैः, पञ्चमी मत्स्यादिभिः, लोकेशैः षष्ठी, तदस्त्रैः सप्तमी, इति।।

रुद्रयामले–महादेव उवाच।

मन्त्रोद्धारं प्रवक्ष्यामि लक्ष्मीनारायणस्य ते। अष्टसिद्धिप्रदं सद्यः साधकानां सुखावहम्।। १।।
तारं परां च हरितं परां लक्ष्मी ततोऽभिधाम्। लक्ष्मीनारायणायेति विश्वमन्ते मनुः स्मृतः।। २।।

तारं प्रणवः। परां ह्रीं। हरितं ह्सौः। परां ह्रीं। लक्ष्मीं श्रीं। लक्ष्मीनारायणाय स्वरूपं। ''ॐह्रींह्सौःह्रींश्रीं नमो लक्ष्मीनारायणाय''।। तथा–

नास्य विघ्नो न वा दोषो न भीतिर्न विपर्ययः। साक्षान्मोक्षप्रदो मन्त्रः सर्वार्थफलदायकः।। ३।।
वर्णलक्षं पुरश्चर्यां विनायं चास्ति दोषभाक्। जीवहीनो यथा देही सर्वकर्मसु न क्षमः।। ४।।
पुरश्चरणहीनोऽपि न मन्त्रः फलदायकः। वटेऽरण्ये श्मशाने च शून्यागारे चतुष्पथे ।। ५।।
अर्धरात्रे च मध्याह्ने पुरश्चरणमाचरेत्। वर्णलक्षं पुरश्चर्यां तदर्धं वा महेश्वरि।। ६।।
एकलक्षावधिं कुर्यान्नातो न्यूनं कदाचन। प्रथमं गुरुहस्तेन साधकस्य करेण वा।। ७।।
ततः स्वयं चरेद्वह्निं पुरश्चर्याविधानतः। जपाद् दशांशतो होमस्तद्दशांशेन तर्पणम्।। ८।।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्। विना दशांशहोमेन न तत्फलमवाप्नुयात्।। ९।।
पञ्चरत्नेश्वरीं विद्यां लक्ष्मीनारायणस्य हि। जपेत् तां पञ्चभिः सार्धं पुरश्चर्याफलं लभेत्।। १०।।
मन्त्रस्यास्य महादेवि वर्णितोऽत्र ऋषिः शिवः। त्रिष्टुप् छन्दः समाख्यातं देवतापि समीरिता।।११।।
लक्ष्मीनारायणो देवि बीजं लक्ष्मीरुदाहृता। शक्तिः परा तथा तारं कीलकं समुदाहृतम्।। १२।।
भोगापवर्गसिद्ध्यर्थं विनियोगः प्रकीर्तितः। ध्यानमस्य प्रवक्ष्यामि लक्ष्मीनारायणस्य ते।। १३।।
येनैव ध्यानमात्रेण लक्ष्मीसिद्धिमुपैष्यति। पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।। १४।।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे। तारमाभूतिबीजैश्च षड्दीर्घान्तैर्महेश्वरि ।। १५।।
न्यासं कुर्यात् षडङ्गानि[1] करशुद्ध्यादिपूर्वकम्। यन्त्रोद्धारं प्रवक्ष्यामि सर्वाशासिद्धिदं परम्।। १६।।

---

१. 'दि' ख. पाठः।

सर्वसम्मोहनं यन्त्रं वाञ्छितैकप्रदायकम्। बिन्दुत्रिकोणं वस्वस्रं वृत्ताष्टदलमण्डितम्।। १७।।
षोडशारं च वृत्तं च भूगेहेनोपशोभितम्। लक्ष्मीनारायणस्यैतच्छ्रीचक्रं परमार्थदम्।। १८।।
लयाङ्गं देवि वक्ष्यामि भोगमोक्षप्रदायकम्। वेदागमरहस्याढ्यं पूजाकोटिफलप्रदम्।। १९।।
वज्रशक्तिदण्डखड्गपाशयष्टिध्वजास्तथा। शूलं पूज्याः शिवे चैव बाह्यद्वारेषु सर्वदा।। २०।।
इन्द्राग्नियममांसादवरुणानिलवित्तपाः। सेश्वराः साधकैः पूज्या ब्रह्मानन्तादयस्तथा।। २१।।
केशवं माधवं कृष्णं गोविन्दं मधुसूदनम्। गदाधरं शङ्खधरं चक्रपाणिं चतुर्भुजम्।। २२।।
पद्मायुधं कैटभारिं घोरदंष्ट्रं जनार्दनम्। वैकुण्ठं वामनं चैव पूजयेद्गरुडध्वजम्।। २३।।
षोडशारेषु देवेशि वामावर्तेन साधकः। तत्रार्चयेन्महादेवि मन्त्री गुरुचतुष्टयम्।। २४।।
अमृताङ्गं हंसकेतुं वंशपाणिं च पूजयेत् (श्रीपतिं)। वृत्तत्रयेषु देवेशि साधको गन्धपुष्पकैः।।२५।।
संहारं रुरुकं चण्डं भूतेशं कालभैरवम्। कपालं भीषणं चैव तथा श्मशानभैरवम्।। २६।।
पूजयेत् साधकः सिद्ध्यै वसुपत्रे महेश्वरि। विष्णुं च वासुदेवं च देवि दामोदरं तथा।। २७।।
नरसिंहं च देवेशि देवि सङ्कर्षणं तथा। त्रिविक्रमं चानिरुद्धं विश्वक्सेनं च साधकः।। २८।।
लक्ष्मीशब्दान्तिकं देवि वसुकोणेषु पूजयेत्। गङ्गां च यमुनां चैव त्र्यस्रे सरस्वतीं तथा।। २९।।
पूजयेदग्रवह्नीशक्रमयोगेन पार्वति। लक्ष्मीनारायणं देवं पूजयेद् बिन्दुमण्डले ।। ३०।।
गन्धाक्षतप्रसूनाद्यैर्गुरुर्माल्यविभूषणैः।...।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादिस्नानान्तं कर्म समाप्य ''ॐह्रीं लक्ष्मीनारायणाय विद्महे, ह्सौः परब्रह्मणे धीमहि, ह्रींश्रीं तन्नः परमात्मा प्रचोदयात्'' इति गायत्र्या सन्ध्यावन्दनं विधाय ततो यागगृहप्रवेशादि योगपीठन्यासान्तं कृत्वा मूलेन प्राणायामत्रयं कृत्वा, शिरसि सदाशिवाय ऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये श्रीलक्ष्मीनारायणाय देवतायै नमः। गुह्ये श्रींबीजाय नमः। पादयोः ह्रीं शक्तये नमः। सर्वाङ्गे ओं कीलकाय नमः। इति ऋष्यादिकं यथास्थानं विन्यस्य मम चर्तुवर्गफलसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, श्रांह्रां हृदयाय नमः। श्रींह्रीं शिरसे स्वाहा। श्रूंह्रूं शिखायै वषट्। श्रैंह्रैं कवचाय हुं। श्रौंह्रौं नेत्रत्रयाय वौषट्। श्रःह्रः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। ततः करशुद्धिरूपषडङ्गं न्यसेत्। यथा— ॐकामरूपपीठाय नमः अङ्गुष्ठहृदययोः। ह्रीं जालन्धरपीठाय नमः तर्जनीशिरसोः। ह्सौः पूर्णगिरिपीठाय नमः मध्यमाशिखयोः। श्रींवाराणसीपीठाय नमः अनामिकाकवचयोः। ह्रीं अवन्तीपीठाय नमः करतलकरपृष्ठास्त्रयोः। इति विन्यस्य, अं ८ वामपादादि गुल्फान्तं, ॡं ८ दक्षपादादि गुल्फान्तं, क ५ गुल्फादि वामपादमूलान्तं, चं ५ कट्यादि स्कन्धान्तं, यं ५ स्कन्धादि कर्णान्तं, शं ६ शिरसः पादपर्यन्तम्। इति त्रिर्व्यापकम्। ततो मातृकाषडङ्गं विन्यस्य मातृकास्थानेषु बिन्दुयुक्तां मातृकां विन्यस्य, अंओंअं इत्यादि क्षान्तं न्यसेत्। ॐअंॐ इति च क्षान्तं विन्यस्य, अंह्रींअं इति क्षान्तं, ह्रींअंह्रीं इति च क्षान्तं, अंश्रींअं ५१, श्रींअंश्रीं ५१, इति मातृकास्थानेषु षोढान्यासं विधाय, मूलेन त्रिर्व्यापकन्यासं विधाय ध्यानादिमानसपूजान्तेऽर्घ्यादि-

स्थापनाद्यात्मपूजां विधाय, मण्डूकादिपीठमन्वन्तं प्राग्वद्वैष्णवं पीठमभ्यर्च्य, मूलेन मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते देवाज्ञामादाय परिवारदेवताः पूजयेत्। मध्ये त्रिकोणकोणेषु—मू० श्रीमहालक्ष्मीपादुकां पूजयामि नमः। एवं मू० महाराजलक्ष्मीपा०। मू० महासिद्धलक्ष्मी०। इति स्वाग्रादिप्रादक्षिण्येन पूजयेदिति प्रथमावरणम्। ततस्त्रिकोणाग्रेषु—ओंह्रींह्सौः गं गङ्गाश्रीपा०। ॐ यं यमुनाश्री०। ॐ सं सरस्वतीश्री०। इति द्वितीयावरणम्। ततोऽन्तरालचक्रे— ॐ शङ्खश्री०। ॐ चक्रश्री०। ॐ गदाश्री०। ॐ पद्मश्री०। इति तृतीयावरणम्। ततोऽष्टकोणेषु— ॐ लक्ष्मीविष्णुश्री०। ॐ लक्ष्मीवासुदेवश्री०। ॐ लक्ष्मीदामोदरश्री०। ॐ लक्ष्मीनरसिंहश्री०। ॐ लक्ष्मीसङ्कर्षणश्री०। ॐ लक्ष्मीत्रिविक्रमश्री०। ॐ लक्ष्मीअनिरुद्धश्री०। ॐ लक्ष्मीविश्वक्सेनश्री०। इति चतुर्थावरणम्। ततोऽष्टदलेषु— ॐ संहारभैरवश्री०। ॐ रुरुभैरवश्री०। ॐ चण्डभैरवश्री०। ॐ भूतेशभैरवश्री०। ॐ कालभैरवश्री० ॐ कपालभैरवश्री०। ॐ भीषणभैरवश्री०। ॐ श्मशानभैरवश्री०। इति पञ्चमावरणम्। ततो दलाग्रेषु— ॐ अमृताङ्गश्री०। ॐ हंसकेतुश्री०। ॐ वंशपाणिश्री०। ॐ श्रीपतिश्री०। ॐ श्रीगुरुश्री०। ॐ परमगुरुश्री०। ॐ परापरगुरुश्री०। ॐ परमेष्ठिगुरुश्री०। इति षष्ठावरणम्। ततः षोडशदलेषु—ॐ केशवश्रीपा०। ॐ माधव०। ॐ कृष्ण०। ॐ गोविन्द०। ॐ मधुसूदन०। ॐ गदाधर०। ॐ शङ्खधर०। चक्रपाणि०। ॐ चतुर्भुज०। ॐ पद्मायुध०। ॐ कैटभारि०। ॐ घोरदंष्ट्र०। ॐ जनार्दन०। ॐ वैकुण्ठ०। ॐ वामन०। ॐ गरुडध्वज०। इति सप्तमावरणम्। ततश्चतुरस्रे लोकपालैरष्टमम्, तद्बहिस्तदायुधैर्नवमम्, इति नवावरणपूजां कृत्वा मूलेन साङ्गायेत्यादिना पुष्पाञ्जलित्रयं दत्त्वा धूपदीपादिकं सर्वं प्राग्वत् समापयेदिति। अस्य पुरश्चरणं प्रागेवोक्तम्। तथा—

.... प्रयोगानथ पार्वति। वक्ष्ये येन भवेत् सिद्धिर्मन्त्रस्यास्य विशेषतः।। १।।
स्तम्भनं मोहनं चैव मारणाकर्षणे ततः। वशीकारं तथोच्चाटं शान्तिकं पौष्टिकं ततः।। २।।
एतेषां साधनं वक्ष्ये प्रयोगाणां महेश्वरि। एषां साधनमात्रेण मन्त्रसिद्धिः प्रजायते।। ३।।
रवौ स्नात्वा महादेवि गत्वाश्वत्थतरोस्तलम्। जपेदयुतमीशानि हुनेत् तत्र दशांशतः।। ४।।
घृतमत्स्यण्डगुडजैः पुष्पैरानन्दमिश्रितैः। स्तम्भनं जायते सद्यो वादिवातार्कपाथसाम्।। ५।।
चन्द्रेऽर्धरात्रवेलायां गत्वा शृङ्गाटकं सुधीः। दिशो बद्ध्वासनं शोध्य प्राणायामविधानतः।। ६।।
जपेन्मूलं हरिं ध्यात्वा हुत्वा देवि दशांशतः। घृतनागरपुन्नागकरञ्जकुसुमानि च ।। ७।।
तर्पयित्वा दशांशेन मार्जयित्वा महेश्वरि। तद्भस्मना चरेद्भाले तिलकं साधकोत्तमः।। ८।।
त्रैलोक्यं सहसा दृष्ट्वा मोहमेष्यति तन्मुखम्। भौमे गत्वा श्मशानं च जपेदयुतसंख्यया।। ९।।
हुनेद् दशांशतो देवि सर्पिर्गोधूमपायसैः। दूर्वापत्रसमायुक्तैर्मृत्युश्च म्रियते क्षणात्।। १०।।
बुधे गत्वाटवीं दूरं जपेत् झंझातटे शिवे। अयुतं मूलमन्त्रं च हुनेत् सर्पिर्जपाकणाः।। ११।।
दूर्वापूतासपद्माक्षपत्राणि कुसुमानि च। रम्भापि पुरतस्तस्य सद्यः प्रादुर्भविष्यति।। १२।।
गुरौ गत्वा नदीतीरं जपेत् तत्र दशांशतः। हुनेदाज्येन मधुना शटीचन्द्रकरीरकान्।। १३।।

तद्भस्मना साधितेन त्रैलोक्यं वशमेष्यति। शुक्रेऽशोकतरुं गत्वा जपेदयुतसंख्यया।। १४।।
हुत्वा सर्पिर्नागपुटं शालिचूर्णं तुषाकुलम्। तर्पयेदासवाज्येक्षुरसैर्भुक्त्वा दशांशतः।। १५।।
शत्रोः शम्भुसमानस्य भवेदुच्चाटनं ध्रुवम्। शनौ गत्वा नदीतीरं जपेदयुतसंख्यया।। १६।।
होमो दशांशतः कार्यो घृतपायसकुङ्कुमैः। सारनालैर्जम्बुफलैः शान्तिकं जायते क्षणात्।। १७।।
शुभर्क्षे शुभवारे वा गत्वोपवनमण्डलम्। जपेदयुतमीशानि हुनेदाज्येन पङ्कजैः।। १८।।
सोत्पलं सकलं साम्लं महापुष्टिः प्रजायते। एतद्रहस्यं परमं तव भक्त्या मयोदितम्।। १९।।
लक्ष्मीनारायणस्येदं सर्वस्वं परमार्थदम्। न दातव्यमभक्तेभ्यो दुष्टेभ्यो वीरवन्दिते।। २०।।
महाचीनपदस्थेभ्यो भोगदं मोक्षदं शिवे। कलौ गोप्यं गुह्यतमं गुह्याद् गुह्यतमं प्रिये।। २१।।
आनन्दकरणं गोप्यं गोपनीयं स्वयोनिवत्।..।।

इति। सारसङ्ग्रहे—

अथ वक्ष्ये द्वादशार्णमन्त्रं सर्वार्थसिद्धिदम्। सर्वापत्तारणं पुसां भुक्तिमुक्तिप्रदायकम्।। १।।
ध्रुवं नमःपदं ब्रूयात् ङेन्तं च भगवत्पदम्। वासुदेवपदं तद्वद् द्वादशार्णो मनुर्मतः।। २।।

ध्रुवः प्रणवः, नमः स्वरूपं, ङेन्तं भगवत्पदं भगवते, तद्वद्वासुदेवपदं वासुदेवाय। "ओंनमो भगवते वासुदेवाय" इति स्पष्टम्।। तथा—

मुनिः प्रजापतिः प्रोक्तो गायत्री छन्द ईरितम्। देवता स्याद्वासुदेव एकद्व्यब्धिशरार्णकैः।। ३।।

अब्धयश्चत्वारः। शराः पञ्च। तथा—

समस्तेन च पञ्चाङ्गं द्वादशाङ्गं ततो न्यसेत्। हृदादिनेत्रजठरपृष्ठबहूरुजानुषु।। ४।।
सपादेषु मनोरर्णैर्नमोऽन्तैः साधकोत्तमः।.............................।।

अत्रास्त्रानन्तरं नेत्रन्यासः। पद्मपादाचार्यास्तु—पुरुषसत्याच्युतवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धनारायणब्रह्मविष्णुनृसिंहवराहाणां द्वादशाङ्गयोगमाहुः। उक्तं च विष्णुयामले— "आदौ तु पुरुषः सत्याच्युतौ पश्चान्महेश्वरि। वासुदेवादयो नारायणो ब्रह्मा ततः परम्।। नृसिंहश्च वराहश्च द्वादशाङ्गेष्विमान् न्यसेत्।" इति। तथा—

मन्त्रसम्पुटलिप्यर्णैर्यथास्थानं न्यसेत् ततः। त्रिशस्तारप्रपुटितमूलेन व्यापकं न्यसेत्।। ५।।
मन्त्रार्णैस्त्रिविधं न्यासं न्यसेन्मन्त्री समाहितः। कभालदृक्वक्त्रकण्ठदोर्हृज्जठरनाभिषु।। ६।।
लिङ्गजान्वङ्घ्रिषु प्रोक्तः सृष्टिन्यासश्च मन्त्रिभिः। हृदादिकान्तावधिकं स्थितिन्यासं प्रचक्षते।। ७।।
पादादारभ्य शीर्षान्तं न्यासं संहारमूचिरे। एवं[1] क्रमो यतीनां स्याद्विलोमेनोच्यते ह्यसौ।। ८।।
पूर्वाश्रमयुतानां च स्थित्यन्तो गृहमेधिनाम्। संहाराद्यो निगदितो मन्त्रशास्त्रविशारदैः।। ९।।
संहृतेर्दोषसंहारः सृष्टेश्च शुभसृष्टयः। स्थितेश्च शान्तिर्विन्यासः तस्मात् कार्यस्त्रिधा बुधैः।। १०।।
व्यापकत्वेन मन्त्रार्णान् पुनर्न्यसेत् तनौ सुधीः। कभालदृक्वक्त्रकण्ठदोर्युग्महृदयेषु च।। ११।।
कुक्षौ लिङ्गे पादयुग्मे मूलेन व्यापकं न्यसेत्। तत्त्वन्यासं प्रविन्यस्य विन्यसेन्मूर्तिपञ्जरम्।। १२।।

---

[1] 'एष' ख. पाठः।

तत्त्वानि द्वादशानि तु—''जीवप्राणधियश्चित्तं हृत्पद्मं सूर्यमण्डलम्। चन्द्रमण्डलमग्नेश्च मण्डलं स्वकलान्वितम्।। वासुदेवादयश्चेति तत्त्वानि द्वादशावदत्।'' इति हयशीर्षपञ्चरात्रोक्तानि। अत्र तत्त्वानां न्यासस्थानानि प्रागुक्ततत्त्वन्यासप्रकरणे यस्य तत्त्वस्य यत्स्थानमुक्तं तत्र तत्र तत्तत्त्वं न्यसेत्। एतेषां द्वादशतत्त्वानां तदन्तर्गतत्वादेवात्र पृथक्तया न्यासस्थानानि नोक्तानीति। सारसङ्ग्रहे—

ततः समाहितो भूत्वा वासुदेवं हृदि स्मरन्। मध्ये दुग्धाम्बुधि द्वीपे दिव्ययोषानिषेविते।। १।।
तत्र सञ्चिन्त्य विपिनमखिलर्तुनिषेवितम्। तन्मध्ये कल्पवृक्षं च दिव्यमद्भुतदर्शनम्।। २।।
तस्याधस्ताद्रत्नमञ्चे कमलं विमलप्रभम्। शरत्पूर्णेन्दुविलसत्प्रभापटलराजितम्।। ३।।
तत्र सञ्चिन्तयेद् देवं वासुदेवं स्मिताननम्। कुन्देन्द्वाभं गदाचक्रपद्मशङ्खलसत्करम्।। ४।।
चन्द्रायुतलसत्कान्त्या मोहयन्तं जगत्त्रयम्। केयूराङ्गसंराजद्दोर्दण्डं रत्नभूषणम्।। ५।।
श्रीवत्साङ्कं लसद्रत्नमुकुटं कौस्तुभान्वितम्। अरविन्ददलाताम्रसुरम्यायतलोचनम्।। ६।।
कुण्डलप्रोल्लसद्गण्डमण्डलं पीतवाससम्। ग्रैवेयहारसंशोभिकम्बुकण्ठं सुकङ्कणम्।। ७।।
विशालवक्षसं राजत्प्रफुल्लवनमालिकम्। सनकादिमुनीन्द्रैश्च तत्त्वनिर्णयकाङ्क्षया।। ८।।
निषेवितं दित्यदितिजातिगन्धर्वसञ्चयैः। सिद्धविद्याधरौघैश्च सेवितं च महोरगैः।। ९।।

इति। वामोर्ध्वादि तदधःकरान्तमायुधध्यानम्। ''वासुदेवं तु कुर्वीत चतुर्बाहुं सुरेश्वरम्। दक्षिणोपरि चक्रं च पद्मं चाधः प्रकल्पयेत्।। वामोपरि गदा कार्या शङ्खं चाधः सुशोभनम्।'' इति हयशीर्षपञ्चरात्रवचनात्। तथा—

एवं ध्यात्वा वासुदेवं स्वाभेदेन जगत्प्रभुम्। पूर्वोदिते यजेत् पीठे देवमावाह्य मन्त्रवित्।। १०।।
मूर्तिं मूलेन सङ्कल्प्य गन्धाद्यैस्तत्र पूजयेत्। पूर्वमङ्गानि सम्पूज्य वासुदेवादिशक्तयः।। ११।।
दिग्विदिक्षु च सम्पूज्यास्ततो द्वादश मूर्तयः। केशवाद्याः समभ्यर्च्या लोकेशाः स्वायुधैः सह।।१२।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि प्रजापतये ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीवासुदेवाय देवतायै नमः। इति विन्यस्य ममाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, मूलेन करयोर्व्यापकं कृत्वा, ॐ हृदयाय नमः। नमः शिरसे स्वाहा। भगवते शिखा०। वासुदेवाय कवचं०। नमो भगवते वासुदेवायास्त्रं। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य, नेत्रवर्ज्यं हृदयाद्यस्त्रान्तं च विन्यस्य, हृदये ॐ पुरुषाय नमः। शिरसि नं सत्याय नमः। शिखायां मां अच्युताय०। कवचस्थाने भं वासुदेवाय०। अस्त्रस्थाने गं सङ्कर्षणाय०। नेत्रयोः वं प्रद्युम्नाय०। उदरे तं अनिरुद्धाय०। पृष्ठे वां नारायणाय०। बाह्वोः सुं ब्रह्मणे०। ऊरौ दें विष्णवे०। जानुनोः वां नृसिंहाय०। पादयोः यं वराहाय०। ततः शिरसि—ॐ नमो भगवते वासुदेवाय, अं विलोममन्त्रं नमः। एवं १२ आं १२ नमः इत्यादि मूलमन्त्रपुटितान् मातृकान्यासस्थानेषु विन्यस्य, प्रणवपुटितेन मूलमन्त्रेण स्वदेहे त्रिर्व्यापकं कृत्वा, पादयोः ॐ नमः। जानुनोः नं नमः। लिङ्गे मों नमः। नाभौ भं०। उदरे गं०। हृदये वं०। बाह्वोः तें०। कण्ठे वां०। मुखे सुं०। दृशोः दें०। भाले वां०। शिरसि यं नमः। इति संहारेण विन्यस्य, शिरसि ॐ नमः। भाले नं नमः। दृशोः मों नमः। मुखें भं नमः। कण्ठे गं नमः। वाह्वोः वं नमः। हृदये तें नमः। उदरे वां नमः।

नाभौ सुं नमः। लिङ्गे दें नमः। जानुनोः वां नमः। पादयोः यं नमः। इति सृष्टिन्यासः। ततो हृदि ओं नमः। उदरे नं नमः। नाभौ मों नमः। लिङ्गे भं नमः। जानुनोः गं नमः। पादयोः वं नमः। बाह्वोः तें नमः। कण्ठे वां नमः। मुखे सुं नमः। दृशोः दें नमः। भाले वां नमः। शिरसि यं नमः। इति स्थितिन्यासः। एवं गृहस्थैः कर्तव्यं। यतिभिस्तु सृष्टिस्थितिसंहारक्रमेण कार्यः। वर्णिभिस्तु स्थितिसंहारसृष्टिक्रमेण न्यस्तव्य इति। ''एते वर्णाः प्रणवपुटिता न्यस्तव्याः'' इति केचित्। ततः पुनर्मन्त्रवर्णान् मूर्धभालनेत्रवक्त्रकण्ठबाहुद्वयहृदयजठरलिङ्गपादद्वयेषु द्वादशस्थानेषु प्राग्वद्विन्यस्य पुनर्मूलमन्त्रेण व्यापकं कृत्वा, सर्वाङ्गे ओं नमः पराय जीवतत्त्वात्मने नमः। नं नमः पराय प्राणतत्त्वात्मने नमः। हृदये मों नमः पराय बुद्धितत्त्वात्मने नमः। भं नमः मनस्तत्त्वा०। गं नमः हृत्पद्मतत्त्वात्म०। वं नमो द्वादशकलाढ्यसूर्यमण्डलत०। तें नमः षोडशकलान्वितचन्द्रमण्डलत०। वां नमो दशकलान्वितवह्निमण्डलत०। शिरसि सुं नमो वासुदेवत०। मुखे दें नमः सङ्कर्षणत०। हृदि वां नमः प्रद्युम्नत०। गुह्ये यं नमः परायानिरुद्धत०। इति द्वादशतत्त्वानि विन्यस्य, प्राग्वन्मूर्तिपञ्जरन्यासं विधाय, ध्यानादिपुष्पोपचारान्तेऽङ्गानि सम्पूज्याष्टदलेषु प्राग्वद्वासुदेवादिमूर्तिशक्तीः सम्पूज्य, तद्बहिर्द्वादशदलेषु— ओं केशवाय नमः। नारायणाय०। माधवाय०। गोविन्दाय०। विष्णवे०। मधुसूदनाय०। त्रिविक्रमाय०। वामनाय०। श्रीधराय०। हृषीकेशाय०। पद्मनाभाय०। दामोदराय०। इति देवाग्रादिप्रादक्षिण्येन सम्पूज्येन्द्राद्यर्चादि प्राग्वत्सर्वं समापयेदिति तथा—

एवं सम्पूज्य विधिवद्वर्णलक्षं मनुं जपेत्। तत्सहस्रं कमलैर्जुहुयान्मधुराप्लुतैः।। १३।।

वर्णलक्षं द्वादशलक्षम्।

तिलैः शुद्धैरथेच्छन्ति केचिदाज्यपरिप्लुतैः। तर्पणादि ततः कुर्याद्यथोक्तविधिना सुधीः।। १४।।
एवं सिद्धमनुर्मन्त्री वाञ्छितार्थान् प्रसाधयेत्। स्तनजद्रुमसम्भूतसमिद्भिर्पापमुक्तये ।। १५।।

स्तनजद्रुमः क्षीरवृक्षः।

पयोक्ताभिः प्रजुहुयात् साधकोऽर्कसहस्रकम्। साज्येन हविषा चैव जुहुयाच्चित्तशुद्धये।। १६।।
पायसेन तिलैः शुद्धैः समिदाज्यैर्हुनेत् तु यः। शालीभिश्चान्वहं मन्त्री सोऽभीष्टफलभाग्भवेत्।।१७।।
अपुत्रो लभते मुक्तिं नियतात्मा[१] न संशयः। द्वादशाक्षरमन्त्रस्य विधानं परिकीर्तितम्।। १८।।
अशेषतः साधकानां भुक्तिमुक्तिप्रदायकम्।..।।

इति। तथा सारसङ्ग्रहे—

मायाद्वयं रमाद्वन्द्वं लक्ष्मीपदमथोच्चरेत्। वासुदेवं चतुर्थ्यन्तं नमोन्तश्च ध्रुवादिकः।। १।।
मनुसंख्याक्षरः प्रोक्तो मनुः सर्वसमृद्धिदः।..।।

मायाद्वयं भुवनेशीद्वयं ह्रींह्रीं, रमाद्वयं श्रींश्रीं, लक्ष्मी स्वरूपं, वासुदेवं चतुर्थ्यन्तं वासुदेवाय, ध्रुवादिकः प्रणवाद्यः। मनुसंख्याक्षरश्चतुर्दशाक्षरः। ओंह्रींह्रींश्रींश्रींलक्ष्मीवासुदेवाय नमः। तथा—

ऋषिः प्रजापतिश्छन्दो गायत्री देवता मता। मनोर्लक्ष्मीवासुदेवो देवदानववन्दितः ।। २।।
द्वाभ्यां द्वाभ्यां ततो द्वाभ्यां पञ्चभिर्द्वितयेन वा। पञ्चाङ्गानि मनोर्वर्णैः प्रणवाद्यैः प्रकल्पयेत्।। ३।।

---

१. 'विनया' ख. पाठः।

पुरोदिते यजेत् पीठे द्वादशाक्षरवर्त्मना।...................................।।

उद्यत्सौदामिनीरुक् शशधररुचिरं भूषणैर्भूषिताङ्गं
एकीभूतं वपुः श्रीकमलनयनयोः सम्यगाश्लेषलोभात्।
लक्ष्मीं दिश्यात् सदा नो लिखितसरसिजे दर्पणं रत्नकुम्भं
संबिभ्रद् हस्तपद्मैः सरसिरुहगदाशङ्खचक्राह्वयानि ।। ४।।

वामभागस्थैः करैरूर्ध्वादिभिर्लिखितादीनि दक्षिणस्थैः सरसीरुहादीनि च। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि प्रजापतये ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीलक्ष्मीवासुदेवाय देवतायै नमः। इति विन्यस्य ममाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा,ॐह्रींह्रीं हृदयाय नमः। ॐश्रींश्रीं शिरसे स्वाहा। ॐलक्ष्मी शिखायै वषट्। ॐवासुदेवाय कवचाय हुं। ॐनमः अस्त्राय फट्। इति पञ्चाङ्गमन्त्रान्मूलाभिमृष्टयोः पाण्योरङ्गुलीषु विन्यस्य, नेत्ररहितेषु हृदादिषु च विन्यस्य, यथोक्तरूपं ध्यात्वा मानसपूजादिसर्वं द्वादशाक्षरवत् कुर्यादिति।। तथा सारसङ्ग्रहे—

वेदादिमायया युक्तं हौंबीजं शङ्करं वदेत्। ङेन्तं नारायणं प्रोक्त्वा हृदन्तं हौं वदेत् ततः।। १।।
हल्लेखाप्रणवान्तश्च मन्त्रो हरिहरात्मकः। सर्वसम्पत्प्रदो नित्यं षोडशाक्षर ईरितः ।। २।।

वेदादिः प्रणवः। माया भुवनेश्वरीबीजं। हौं स्वरूपं। शङ्कर स्वरूपं। ङेन्तं नारायणं नारायणाय। हृत् नमः। हल्लेखा ह्रीं। ''ॐह्रींहौंशङ्करनारायणाय नमः हौंह्रींॐ''। तथा—

ऋषिः नारायणः प्रोक्तश्छन्दोऽनुष्टुवुदाहृतम्। देवता स्याद्धरिहरः सर्वाभीष्टप्रदायकः।। ३।।
षड्दीर्घयुग्मायया च षडङ्गानि प्रकल्पयेत्। शूलं चक्रं पाञ्चजन्यमभीतिं दधतं करैः।। ४।।
स्वस्वरूपाद्यनीलार्धदेहं हरिहरं भजे। ....।।

दक्षोर्ध्वादि तदधोन्तमायुधध्यानम्।

देवं प्रपूजयेत् पीठे पूर्वोक्ते नवशक्तिके। पूर्वमङ्गानि सम्पूज्य शक्तीरेताः प्रपूजयेत्।। ५।।
लक्ष्मीर्नारायणी भूश्च धरा स्यादम्बिका तथा। त्रैयम्बका तथा गौरी गङ्गा धर्माष्टमी तथा।। ६।।
लोकेशास्तद्बहिः पूज्या वज्रादीन्यायुधान्यपि। एवं सम्यक्प्रकारेण पूजितेऽभीष्टमाप्नुयात्।। ७।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारायणाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीहरिहाराय देवतायै नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः। इति कृताञ्जलिरुक्त्वा, ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिष्वपि विन्यस्य, ध्यानाद्यङ्गपूजान्तेऽष्टदलेषु— लक्ष्म्यै नमः। नारायण्यै०। भूम्यै०। धरायै०। अम्बिकायै०। त्रैयम्बकायै०। गौर्य्यै०। गङ्गायै०। धर्मायै०। इति देवाग्रादिषु प्रादक्षिण्येन सम्पूज्येन्द्राद्यर्चादि सर्वं प्राग्वत् समापयेदिति।। सारसङ्ग्रहे—

अथोच्यते मन्त्रवरो दधिवामनसंज्ञकः। येन प्रजप्तमात्रेण सिद्ध्यन्ते च मनोरथाः।। १।।
ॐ नमो विष्णवे ब्रूयात् सुरान्ते पतये महा। बलायाग्निवधूर्मन्त्रोऽष्टादशाक्षर ईरितः।। २।।

''ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा''। तथा—

मुनिरिन्दुः समाख्यातो विराट् छन्द उदाहृतम्। दधिवामनसंज्ञोऽस्य विष्णुर्देवः समीरितः।। ३।।
हृदयं प्रणवेन स्यान्नमोमन्त्रेण वै शिरः। विष्णवे च शिखा वर्म सुराद्यं पतये स्मृतम्।। ४।।
महाबलाय नेत्रं स्यात् स्वाहास्त्रमङ्गकल्पना। भ्रूमध्यकण्ठहृदयनाभ्यन्ध्वाधारकेषु च ।। ५।।
षट्पदानि मनोर्न्यस्य वर्णान् न्यस्येत् ततः सुधीः। मूर्ध्नि दृक्श्रवणद्वन्द्वे नासायां मुखमध्यतः।।६।।
कण्ठे हृद्बाहुयुग्मे च नाभौ पृष्ठे च गुह्यके। जान्वोश्च पादयोस्तद्वत् स्थानेष्वेषु यथाक्रमम्।। ७।।

इति। शारदातिलके तु— (१५। ५८) ''मूर्ध्नि भाले दृशोर्युग्मे कर्णनासोष्ठतालुषु। कण्ठबाहुद्वये पश्चाद् हृदयोदरनाभिषु।। गुह्योरुजानुयुग्मेषु जङ्घयोः पादयोर्न्यसेत्। पश्चात्पृष्ठे'' इत्युक्तम्। अत्र यथोपदेशं न्यासः कार्यः। ध्यानम्—

राकेन्द्वाभः सिताब्जे स्त्रवदमृतमणिच्छत्रतोऽधोनिविष्टः
श्रीभूम्याश्लिष्टपार्श्वः स्फटिकमणिनिभोऽशेषभूषाविशेषः।
वामे दध्यन्नपूर्णं कनकजचषकं स्वर्णपीयूषकुम्भं
बिभ्रच्छ्रीवामनाख्यः सततमवतु वो विष्णुरिष्टार्थदायी।। ८।।

वामेऽन्नपात्रमित्युक्तेर्दक्षिणे पूर्णकुम्भं ज्ञेयम्।

पूजा तु वैष्णवे पीठे कर्तव्या साधकोत्तमैः। आदावङ्गानि सम्पूज्य पश्चाच्छक्तीः प्रपूजयेत्।। ९।।
शुभ्रवर्णाः सुभूषाश्च वराभयकराः शुभाः। पूषा च सुमना[1] प्रीतिस्तुष्टिः पुष्टिस्तथैव च।। १०।।
ऋद्धिर्धृतिश्च सौम्या च मरीचिन्यंशुमालिनी। शशिनी दुर्गमा चैव लक्ष्मीश्छाया तथैव च।। ११।।
सम्पूर्णमण्डला चैवममृता षोडशी कला। सशक्तीन् वासुदेवाद्यांस्तृतीयावरणेऽर्चयेत्।। १२।।
केशवाद्यैश्चतुर्थं स्यात् पञ्चमं कुमुदादिभिः। शुभ्रवर्णैः शङ्खचक्रगदापङ्कजपाणिभिः ।। १३।।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः। शङ्कुकर्णः सर्वनेत्रः[2] सुमुखः सुप्रतिष्ठितः।। १४।।
यजेत् षष्ठे लोकपालान् सप्तभे दिग्गजानपि।......................................।।

अपिशब्देन वज्रादिपूजानन्तरं दिग्गजपूजेत्युक्तम्। ''वज्रादीन् दिग्गजानष्टौ सप्तावरणमीरितम्'' इति शारदातिलकवचनात्। ''प्रागुक्ते वैष्णवे पीठे चन्द्रमण्डलपश्चिमे। चन्द्रान्तकल्पिते पीठे प्रागुक्ते तं समर्चयेत् (१५। ६२)।।'' इति शारदातिलकात् सूर्यवह्निमण्डले समभ्यर्च्य पश्चात् सोममण्डलमर्चयेदित्यर्थः। चद्रासनत्वविधानादेतदन्तैरेवासनार्चेति केचित्। ''धर्मज्ञानमये पीठे पूजयेच्चन्द्रमण्डले। विष्णवे सहसोमाय त्रैलोक्याप्यायनाय च।। स्वाहान्ततारहृत्पूर्वमन्त्रेणैवार्चयेच्च तत्।'' इति मन्त्रतन्त्रप्रकाशवचनात् तदिति चन्द्रमण्डलम्। एतेन पीठमन्त्रान्तं योगपीठं सम्पूज्य तदेव चन्द्रमण्डलत्वेन ध्यात्वोक्तमन्त्रेणाभ्यर्च्य तत्र देवं पूजयेदिति। पीठ इति प्रागुक्ते योगपीठे। तत्तु मण्डूकादि पीठपर्यन्तमभ्यर्च्य तस्यैव अन्यथा नवशक्त्यर्चनाभावेऽपि पीठत्वानुपपत्तेः।। अथ प्रयोगः तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि इन्दवे ऋषये नमः। मुखे विराजे छन्दसे नमः। हृदये श्रीदधिवामनाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ॐहृदयाय नमः। नमः शिरसे स्वाहा। विष्णवे शिखायैः। सुरपतये कवचाय०। महाबलाय

---

[1] 'सुमनसा' ख. पाठः। [2] 'सर्वमित्रः' ख. पाठः।

नेत्रत्रयाय०। स्वाहा अस्त्राय०।। भ्रूमध्ये ॐनमः। कण्ठे नमो नमः। हृदये विष्णवे नमः। नाभौ सुरपतये नमः। लिङ्गे महाबलाय नमः। मूलाधारे स्वाहा नमः।। मूर्ध्नि ॐनमः। दक्षनेत्रे नं०। वामे मों०। दक्षश्रोत्रे विं०। वो ष्णं०। नासायां वें०। मुखे सुं०। कण्ठे रं०। हृदि पं०। दक्षबाहौ तं०। वामे यें०। नाभौ मं०। पृष्ठे हां०। गुह्ये वं०। दक्षजानुनि लां०। वामे यं०। दक्षपादे स्वां०। नाभौ हां०। इति विन्यस्य, ध्यानाद्यात्मपूजान्ते योगपीठं सम्पूज्य "ॐ नमो विष्णवे सहसोमाय त्रैलोक्याप्यायनाय स्वाहा चन्द्रमण्डलाय नमः"। इति योगपीठमध्ये चन्द्रमण्डलमभ्यर्च्य। आवाहनाद्यङ्गार्चान्ते षोडशदलेषु देवाग्रादिप्रादक्षिण्येन—पूषायै नमः। सुमनायै०। प्रीत्यै०। तुष्ट्यै०। पुष्ट्यै०। ऋद्ध्यै०। धृत्यै०। सौम्यायै०। मरीचिन्यै०। अंशुमालिन्यै०। शशिन्यै०। दुर्भगायै०। लक्ष्म्यै०। छायायै०। सम्पूर्णमण्डलायै०। अमृतायै०। इति सम्पूज्य, अष्टदलेषु दिग्विदिक्षु प्राग्वद्वासुदेवादिमूर्तीः शान्त्यादिशक्तीश्च सम्पूज्य, तद्बहिर्द्वादशदलेषु प्रागुक्तकेशवादि-द्वादशमूर्तीः सम्पूज्य, अष्टदलेषु—कुमुदाय नमः। कुमुदाक्षाय०। पुण्डरीकाय०। वामनाय०। शङ्कुकर्णाय०। सर्वनेत्राय०। सुमुखाय०। सुप्रतिष्ठिताय०। इति सम्पूज्य प्रथमचतुरस्रे—इन्द्रादीन्, द्वितीये वज्रादीन्, तृतीये लक्ष्मीप्रकरणोक्तानष्टौ दिग्गजांश्च सम्पूज्य धूपदीपादि सर्वं प्राग्वत् समापयेत्।। तथा—

दीक्षां प्राप्य शुचिर्भूत्वा जपेद् द्वादशलक्षकम्। तदर्धं वा तदर्धं वा जपेन्मन्त्रमनन्यधीः।। १५।।
तदन्ते जुहुयाद्विद्वान् पायसेन दशांशकम्। तर्पणादि ततः कुर्यान्मन्त्री मन्त्रस्य सिद्धये।। १६।।
एवं सिद्धे मनौ मन्त्री वाञ्छितार्थान् प्रसाधयेत्।..।।

श्रीमन्दिरे मण्डलमध्यभागे मयावटुं वामनमर्चयित्वा।
दध्योदनं निर्मलशर्कराढ्यं निवेदयेत् तस्य सदा विभूत्यै।। १७।।

अन्नकामो हुनेन्नित्यमष्टाविंशतिसंख्यया। सितान्नं घृतमिश्रं तु प्राप्नुयादन्नमक्षयम् ।। १८।।
अपूपं षड्रसोपेतं हुनेदष्टसहस्रकम्। अलक्ष्मीर्नाशमायाति महतीं श्रियमाप्नुयात् ।। १९।।
अयुतं मन्त्रविद् हुत्वा दध्यन्नं शर्करान्वितम्। अन्नपर्वतमाप्नोति यत्र यत्र स गच्छति।। २०।।
हुनेद् बिल्वसमीपस्थः पद्माक्षैरयुतं नरः। वसुधारामहालक्ष्मीर्वसु वर्षति तत्र च ।। २१।।
विद्यार्थी प्रजपेल्लक्षं ध्यायेद् देवं जनार्दनम्। जुहुयात् पायसं मन्त्री साक्षाद्वागीश्वरो भवेत्।। २२।।
पुत्रकामो जपेल्लक्षं पुत्रजीवफलैर्हुनेत्। तत्काष्ठदीपिते वह्नावुत्तमं पुत्रमाप्नुयात् ।। २३।।
ध्यात्वा त्रिविक्रमं देवं रक्ताभं करवीरकैः। हुनेदयुतसंख्यैश्च सर्वत्र विजयी भवेत्।। २४।।
राज्यकामोऽपि पद्मानामयुतं जुहुयान्नरः। ध्यात्वा चन्द्रपदं राज्यं लभेताशु ह्यकण्टकम्।। २५।।
अपामार्गदलैर्हुत्वा लवङ्गैर्वा मधुप्लुतैः। अयुतं साध्यनामाढ्यं स वश्यो भवति ध्रुवम्।। २६।।
आरोग्यकामो जुहुयादपामार्गैः शतं शतम्। सप्ताहान्मुच्यते रोगी तावदेव जपेत् सुधीः।। २७।।
आयुष्कामस्त्रिमध्वक्तैस्तिलदूर्वाङ्कुराक्षतैः। अयुतं जुहुयात् तावज्जपेदायुर्लभेच्चिरम्।। २८।।
स्मृत्वा त्रिविक्रमं रूपं जपेदष्टसहस्रकम्। मुक्तबन्धो भवेत् सद्यो नात्र कार्या विचारणा।। २९।।

अष्टसहस्रमष्टोत्तरसहस्रमित्यर्थः। एवं सर्वत्र ज्ञेयम्।

पद्मे सप्तदशारे तु कर्णिकायां ध्रुवं लिखेत्। स्वरैः संवेष्टितं तत्र केसरेषु च कादिकान्।। ३०।।
क्षान्तान् द्विशो लवर्ज्यांश्च मन्त्रवर्णान् दले लिखेत्। शिष्टान् बाह्ये च संवेष्ट्य प्रणवाभ्यां ततो बहिः।।३१।।
श्रीबीजाभ्यां वेष्टयेच्च यन्त्रं श्रीपुत्रमित्रदम्।...।।

इति। अस्यार्थः— सप्तदशदलं पद्मं विरच्य तन्मध्ये स्वरषोडशकवेष्टितं प्रणवं ससाध्यं विलिख्य, तत्केसरेषु कादिक्षान्तान् द्वितीयलकारवर्जितान् वर्णान् विलिख्य, दलेषु मन्त्रवर्णानवशिष्टान् सप्तदश प्रतिदलमेकैकशो विलिख्य, सम्पुटाकारेण प्रणवद्वयेन मध्ये यन्त्रं यथा भवति तथा संवेष्ट्य तद्बहिरपि तथैव श्रीबीजद्वयेन वेष्टयेत्, एतद्यन्त्रमुक्तफलदं भवति।। तथा—

ससाध्यनामप्रणवाब्जमध्यमष्टाक्षरैरुज्ज्वलपत्रमूलम्।
मन्त्राक्षराणि द्विश आलिखेच्च पत्रेषु शिष्टद्वयमन्त्यपत्रे।। १।।
बहिर्वृतं द्वादशवर्णकेन ततो बहिर्मातृकया च वीतम्।
सम्पूजितं चन्दनपुष्पवर्य्यैर्यन्त्रं त्विदं श्रीकृदभीष्टदं च।। २।।

इति। अस्यार्थः— अष्टदलं पद्मं कृत्वा तन्मध्ये साध्यसहितं प्रणवं विलिख्य, तत्केसरेषु नारायणाष्टाक्षरवर्णानेकैकशः समालिख्य, तत्पत्रेषु मूलमन्त्रस्य वर्णान् द्विशो २ विलिख्यावशिष्टवर्णद्वयमन्त्यपत्रे विलिख्य, पद्माद्बहिर्वृत्तत्रयं कृत्वाभ्यन्तरवीथ्यां वासुदेवद्वादशाक्षरमन्त्रार्णैर्निरन्तरं वेष्टयित्वा बाह्यवीथ्यां मातृकावर्णैस्तथैव वेष्टयेत्, एतद्यन्त्रमुक्तफलदं भवति। तथा—"तारकामरमासौघैर्बीजैर्युक्तो मनुर्मतः"। पूर्वमन्त्रस्यादौ प्रणवकामबीजश्रीबीजानि योजयेदित्यर्थः। तथा—

च्यवनो मुनिराख्यातो गायत्री छन्द ईरितम्। देवता चास्य सम्प्रोक्तः सन् यज्ञेश्वरवामनः।। १।।
षड्दीर्घकामबीजेन षडङ्गानि प्रविन्यसेत्। कर्पूरधवलं देवं निविष्टं सरसीरुहे ।। २।।
सुप्रसन्नं सुनेत्रं च चारुस्मितमनोहरम्। दण्डं चामृतकुम्भं च शरच्चन्द्रसमप्रभम्।। ३।।
दधिभक्तं सोपदंशं वसुपात्रं च बिभ्रतम्। चिन्तयेज्जगतामाद्यं जगदार्तिहरं परम्[1]।। ४।।
अस्य पूजादिकं सर्वं पूर्वोक्तेनैव वर्त्मना।...।।

इति। अथ प्रयोगः— तत्र योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि च्यवनाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीयज्ञेश्वराय वामनाय देवतायै नमः। इति विन्यस्य, क्लांक्लीं इत्यादिना करषडङ्गन्यासं विधाय ध्यानमानसपूजादि सर्वं प्राग्वत् कुर्यादिति।

कुर्यात् ततो मन्त्रसिद्धः काम्यान् स्वाभीष्टदायकान्। सहस्रं हविषा होमाल्लक्ष्मीधान्यमवाप्नुयात्।।५।।
धान्यहोमेन बीजैश्च शतपत्रसमुद्भवैः। सहस्रहोमाद्भीतीनां नाशो भवति निश्चितम्।। ६।।
दध्यक्तान्नेन जुहुयाद् दारिद्र्यान्मुच्यते नरः। त्रिविक्रमं वामनस्य रूपं ध्यायन् मनुं जपेत्।। ७।।
घोराद्भयान्मुच्यतेऽसौ देवेशं च पटे लिखेत्। भित्तौ वालिख्य गन्धाद्यैर्महतीं श्रियमाप्नुयात्।। ८।।
ॐनमः पदमुक्त्वा तु ततो भगवते—पदम्। विष्णवे—पदमारभ्य पूर्वमन्त्रं समुच्चरेत्।। ९।।
ऋषिः कपिल आख्यातो गायत्रं छन्द उच्यते। उदीरितः सर्ववन्द्यो देवता भोगवामनः।। १०।।

---

[1] 'हरिम्' ख. पाठः।

षड्भिर्मन्त्रपदैरुक्तः षडङ्गविधिरुत्तमः । नीलवर्णश्चतुर्बाहुः शङ्खचक्रगदाब्जभृत् ।। ११ ।।
सर्वान् भोगान् ददात्येष भक्तानां भोगवामनः। अस्य पूजादिकं सर्वं मन्त्री पूर्ववदाचरेत्।। १२।।

ॐनमो हृदयाय नमः। भगवते शिरसे०। विष्णवे शिखायै०। सुरपतये कवचाय०। महाबलाय नेत्राभ्यां०। स्वाहा० अस्त्राय०। अन्यत्पूर्ववत्। तथा–

तारो हृदयमायाबालकान्ते विष्णवे–पदम्। आरभ्योक्ताणुरस्यर्षिर्ब्रह्मा गायत्रमुच्यते।। १।।
छन्दश्च देवता प्रोक्ता मायाबालकवामनः। षडङ्गानि च मन्त्रस्य पदैः षड्भिः समाचरेत्।। २।।
पीताम्बरोत्तरीयोऽसौ मौञ्जीकौपीनधृद्धरिः। कमण्डलुं च दध्यन्नं दण्डं छत्रं करैर्दधत्।। ३।।
यज्ञोपवीती नीलाभो ध्यातव्यश्छद्मवामनः। पूजादिकं पूर्ववच्च कुर्यान्मन्त्रीं यथाविधि।। ४।।
अन्नविद्याभूतिदोऽयं भक्तानामभयेष्टदः। ....।।

एतन्मन्त्रोपासकानां नियममाह कपिलपञ्चरात्रे–

नाश्नीयात् कुण्डलीशाकं तथा चोदुम्बरं फलम्। करकं पद्मबीजं च भक्षयेन्न कदाचन।। १।।

करकं वर्षोपलम्।

पद्मपत्रे न भुञ्जीत तथा वार्कदलेष्वपि। तन्तुकार्पासबीजानि न स्पृशेच्च कदाचन।। २।।
वल्मीकं गोमयं विप्रच्छायामपि न लङ्घयेत्। देवाग्निगुरुपूजां च कुर्याद्भक्तिसमन्वितः।। ३।।

इति।। सारसङ्ग्रहे–

अथोच्यते हयग्रीवमन्त्रः सर्वसमृद्धिदः। चन्द्रस्थं गगनं वामकर्णबिन्दुसमन्वितम्।। १।।
एकाक्षरो मनुः प्रोक्तो हयग्रीवस्य मन्त्रिभिः।.......................................।।

चन्द्रः सकारः। गगनं हकारः। वामकर्ण ऊकारः। बिन्दुरनुस्वारः। एतैः ह्सूं इति बीजमुद्धृतम्। शङ्करकल्पे–

शून्यं शून्यसमायुक्तं जीवस्योपरि संस्थितम्। अनुग्रहयुतं कृत्वा वागीशं सर्वकामदम्।। १।।

इति। शून्यं हकारः। शून्यसमायुक्तं बिन्दुयुक्तं जीवस्य सकारस्योपरि स्थितम्, अनुग्रहेण चौकारेण युतं, तेन ह्सौं इति बीजमुद्धृतम्। केचिदस्मिन्नेव श्लोकेऽनुग्रहेणेत्यत्र रुद्रेणेति पठन्ति। रुद्र एकारस्तेन ह्सें इति बीजं वदन्ति। एवं त्रिविधमिदं बीजम्। सारसङ्ग्रहे–

ऋषिर्ब्रह्मा समुद्दिष्टः त्रिष्टुप् छन्द उदाहृतम्। देवता च हयग्रीवो भुक्तिमुक्तिप्रदायकः।। २।।
षड्दीर्घयुक्तमूलेन षडङ्गविधिरीरितः।.......................................।।
धवलनलिननिष्ठं क्षीरगौरं कराब्जैर्जपवलयसरोजे पुस्तकाभीतिदाने।
दधतममलवस्त्राकल्पजालाभिरामं तुरगवदनविष्णुं नौमि देवारिजिष्णुम्।। ३।।

दक्षोर्ध्वादितदधोन्तमायुधध्यानम्।

पुरोक्ते प्रजयेत् पीठे गायत्र्यावाह्य मन्त्रवित्। ङेन्तं वागीश्वरपदं विद्महे पदमुच्चरेत्।। ४।।
हयग्रीवश्च ङेन्तः स्यात् धीमहीति ततो वदेत्। ततो वदेच्च मन्त्रज्ञस्तन्नो हंसः प्रचोदयात्।। ५।।
प्रथमावृतिरङ्गैः स्याद् द्वितीया चाष्टभिर्हयैः। प्रज्ञाहयस्तथा मेधाहयः स्मृतिहयस्तथा।। ६।।

विद्याहयः श्रीहयश्च वागीशीहय एव च। विद्याविलासहयतो हयान्तो नादमर्दनः।। ७।।
लक्ष्म्यादिभिस्तृतीया स्यात् ताश्च लक्ष्मीः सरस्वती। रतिः प्रीतिः कीर्तिकान्ती तुष्टिः पुष्टिस्तथाष्टमी।।८।।
चतुर्थी कुमुदाद्यैः स्याल्लोकपालैस्तु पञ्चमी। तदायुधैस्तु षष्ठी स्यादेवं पूजा समीरिता।। ९।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे त्रिष्टुपछन्दसे नमः। हृदये श्रीहयग्रीवाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ह्सांह्सीं इत्यादि करषडङ्गन्यासं कृत्वा, ध्यानादिपीठपूजान्ते 'ओंवागीश्वराय विद्महे हयग्रीवाय धीमहि तन्नो हंसः प्रचोदयात्'। इत्यनया गायत्र्यावाह्य, मूलेन स्थापनाद्यङ्गपूजान्ते तदष्टदलेषु—देवाग्रमारभ्य, ओंप्रज्ञाहयाय नमः। मेधाहयाय०। स्मृतिहयाय०। विद्याहयाय०। श्रीहयाय०। वागीशीहयाय०। विद्याविलासहयाय०। नादमर्दनहयाय०। इति सम्पूज्य, दलाग्रेषु—लक्ष्म्यै नमः। सरस्वत्यै०। रत्यै०। प्रीत्यै०। कीर्त्यै०। कान्त्यै०। तुष्ट्यै०। पुष्ट्यै०। इति सम्पूज्य, द्वितीयाष्टदलेषु दधिवामनपूजोक्तकुमुदाद्यष्टमूर्तीः सम्पूज्येन्द्रादिपूजादिकं प्राग्वत् कुर्यादिति। तथा—

वेदलक्षं जपित्वान्ते तद्दशांशं हुनेद् घृतैः। तर्पयित्वाथ सलिलैः सुशुद्धैश्च सुगन्धिभिः।। १०।।
आत्माभिषेकं कृत्वा च तर्पयेद् भूसुरानपि। ततः सिद्धमनुर्मन्त्री प्रयोगान् विदधीत वै।। ११।।
शशिमण्डलमध्यस्थं हिमकुन्दनिभं मनुम्। करे ध्यात्वा न्यसेद्वक्त्रे सभापूज्यः स जायते।। १२।।
अथवा तं करे कुम्भे न्यस्य तज्जलसेचनात्। प्रातराहन्ति लूतादिदौर्भाग्यं पञ्चधा विषम्।। १३।।
योऽम्भस्त्रिः सप्तजप्तं तु प्रभाते प्रत्यहं पिबेत्। सम्पूज्य जायते तस्य दिव्या वाणी मनोरमा।।१४।।
इन्दुमण्डलमध्यस्थं लकारे न्यस्य मन्त्रकम्। पीतं वादिमुखे भूत्वा स्तम्भयेत् तस्य भारतीम्।।१५।।
प्रणवद्वयमध्यस्थहकारद्वयमध्यगम्। वादिनाम लिखेद्गर्भे भूर्जपत्रे हरिद्रया ।। १६।।
(पत्राष्टके हयग्रीवाष्टाक्षरं स्वरकेसरे। कादिक्षान्तावृतं बाह्ये तद्बहिर्भूपुरं लिखेत्)।। १७।।
यन्त्रं प्रतिष्ठितप्राणं शरावद्वयसम्पुटे। वेष्टितं पीतसूत्रेण मूकत्वं कुरुतेऽचिरात्।। १८।।
शृङ्गाटपुटमध्यस्थं रेफाक्रान्तं तु बीजकम्। ज्वालामालाकुलं ध्यायेत् स्तम्भनं परमं मतम्।। १९।।

शृङ्गाटं त्रिकोणम्।

वायुमण्डलमध्यस्थं वायुबीजसमन्वितम्। संहारकमिदं ध्यानं विषादीनां न संशयः।। २०।।
जलमण्डलमध्यस्थं ध्यात्वा चन्द्रांशुनिर्मलम्। आप्यायनकरं ह्येतत् सर्वरोगविनाशनम्।। २१।।
शून्यगर्भगतं यन्त्रं हिमगोक्षीरसन्निभम्। ध्यायेद् हृत्पद्ममध्यस्थं निर्विषीकरणं परम्।। २२।।
लिखेद्रोचनया भूर्जे मन्त्रं बाहौ विधारयेत्। महारक्षा भवेदेषा सर्वदोषविनाशिनी।। २३।।
बीजं रेफसमायुक्तं हूङ्कारद्वयमध्यगम्। यस्य नाम्ना जपेन्मन्त्रं मारयेत् तं न संशयः।। २४।।
बीजं रेफसमायुक्तं सकारहकारयोरधः। हूँका[१]रद्वयमध्यस्थं मन्त्रबीजमनुत्तमम्।। २५।।
विद्वेषयेज्जगत् सर्वं मासं जप्तं न संशयः।.................................।।

---

[१] 'अकार' ख. पाठः।

इति।। तथा—

पूर्वं वदेदुद्गि[1]रत्प्रणवोद्गीथपदं वदेत्। सर्ववागीश्वशब्दान्ते ततो रेश्वरशब्दतः ।। २६।।
सर्ववेदपदं प्रोक्त्वा मयाचिन्त्य-पदं वदेत्। सर्वं स्याद्बोधयद्वन्द्वं स्वाहान्तं केचनोचिरे।। २७।।
स्वबीजप्रणवाभ्यां च सम्पुटः परिकीर्तितः। षट्त्रिंशदक्षरो मन्त्रो हयग्रीवहरेः शुभः।। २८।।

स्वबीजं हयग्रीवबीजं पूर्वोद्धृतम्। अन्यत्सर्वं सुगमम्। षट्त्रिंशदक्षरः स्वाहारहितपक्षे। तद्योगे त्वष्टात्रिंशदक्षरः। तथा—

ऋषिर्ब्रह्मानुष्टुबुक्तं छन्दो देवोऽस्य कीर्तितः। वागैश्वर्यप्रदो नित्यं हयग्रीवहरिः स्वयम्।। २९।।
पञ्चाङ्गानि मनोस्तारमन्त्रपादैर्भवन्ति हि। हयग्रीवं चतुर्बाहुं शरदम्भोरुहप्रभम्।। ३०।।
शङ्खारिपाणिमश्वास्यं जानुन्यस्तकरं भजे। पूर्वोदिते यजेत् पीठे देवमावाह्य मन्त्रवित्।। ३१।।

वामदक्षोर्ध्वयोः शङ्खचक्रे।

एकाक्षरेण मूर्तिं तु कल्पयित्वा विधानतः। दिग्गजांश्चतुरो वेदान् यजेत् केसरगांस्ततः।। ३२।।
ऋग्वेदः श्वेतवर्णस्तु द्विभुजो रासभाननः। अक्षमालाभयः सौम्यः पीतश्चाध्यापनोद्यतः।। ३३।।
अजास्यः पीतवर्णस्तु यजुर्वेदोऽक्षसूत्रकः। वामः कुलिशपाणिः स्याद्भूतिदो मङ्गलप्रदः।। ३४।।
नीलोत्पलदलाभासः सामवेदो हयाननः। अक्षमालान्वितो दक्षे वामे कुम्भधरः स्मृतः।। ३५।।
अथर्वणाभिधो देवो धवलो मर्कटाननः। अक्षमालान्वितो दक्षे वामे कुम्भधरः स्मृतः।। ३६।।
कोणकेसरगानङ्गस्मृतिन्यायांस्तथार्चयेत्। सर्वशास्त्रं च पत्रेषु षडङ्गानि समर्चयेत्।। ३७।।
लोकपालान् न्यसेद्बाह्ये तेषामस्त्राणि तद्बहिः। विधानेनामुना देवं भजन् वाचस्पतिर्भवेत्।। ३८।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीहयग्रीवाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ॐहृदयाय नमः। उद्गिरत्प्रणवोद्गीथ शिरसे०। सर्ववागीश्वरेश्वर शिखा०। सर्ववेदमयाचिन्त्य कवच०। सर्वं बोधय२ अस्त्रं०। इति पञ्चाङ्गमन्त्रान् मूलमन्त्राभिमृष्टकराङ्गुलीषु न्यस्य, नेत्रवर्जं हृदयादिषु च विन्यस्य, ध्यानादियोगपीठपूजान्ते एकाक्षरेण मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्तेऽष्टदलकेसरेषु देवाग्रादि चतुर्दिक्षु—ॐऋग्वेदाय नमः। यजुर्वेदाय नमः। सामवेदाय नमः। अर्थवेदाय नमः। इति सम्पूज्य, अग्न्यादिकोणकेसरेषु—षडङ्गेभ्यो नमः। स्मृतिभ्यो नमः। न्यायशास्त्रेभ्यो नमः। सर्वशास्त्रेभ्यो नमः। इति सम्पूज्याष्टदलेषु प्राग्वदङ्गानि सम्पूज्य त्वोकेशार्चादि सर्वं कुर्यादिति।। तथा—

षट्त्रिंशल्लक्षकं जप्त्वा तदन्ते जुहुयात् सुधीः। कुन्दैस्त्रिस्वादुसंयुक्तैस्तर्पणादि ततश्चरेत्।। ३८।।
लक्ष्मीकामः प्रजुहुयाद्बिल्वपत्रैः सुशोभनैः। वाक्कामो जुहुयान्नित्यं कुन्दैस्त्रिमधुराप्लुतैः।। ३९।।
आज्यं ब्राह्मीरसे पक्वं मन्त्रेणानेन साधितम्। सेवितं विधिना प्रातरनर्गलकवित्वदम्। ४०।।
साधितां मन्त्रवर्येण वचामनुदिनं सुधीः। भक्षयेत् सर्वशास्त्राणां व्याख्याता भवति ध्रुवम्।। ४१।।
ऋग्यजुःसामरूपं च वेदाभरणकर्म च । प्रणवोद्गीथवपुषे महाश्वशिरसे पदम् ।। ४२।।

---

[1] 'उद्गिरप्र' ख. पाठः।

डेन्तं पादद्वयं पूर्वं नमोन्ते सोहंपूर्वकम्[1]। हंसादिरश्ववक्त्रस्य प्रोक्त: षट्त्रिंशदक्षर:।। ४३।।

डेन्तं पूर्वापादद्वयं ऋग्यजु:सामरूपाय वेदाभरणकर्मणे इति। अन्यत्सुगमम्।

विश्वोत्तीर्णपदं प्रोक्त्वा स्यात् स्वरूपाय चिन्मय:। नादान्ते रूपिणे तुभ्यं पदं प्रोक्त्वा नमो वदेत्।।४४।।
हयग्रीवपदं पश्चाद्विद्याराजाय विष्णवे। स्वाहा सोहं च हंसादिरष्टत्रिंशाक्षरो मनु:।। ४५।।
ऋष्याद्यङ्गविधिध्यानपूजाकाम्यानि मन्त्रवित्। कुर्यादानुष्टुभोक्तेन विधानेन विधानवित्।। ४६।।

पञ्चाङ्गानि प्रणवमन्त्रपादै:। पुरश्चरणं च षट्त्रिंशल्लक्षम्। तथा–

स्वबीजं पूर्वमुद्धृत्य डेन्तं हयशिरो वदेत्। हृदन्तोऽष्टाक्षरो मन्त्रो हयग्रीवस्य चेरित:।। ४७।।

डेन्तं हयशिर: हयशिरसे। हृन्नम:।

ऋष्याद्यङ्गविधिन्यासजपपूजा यथाविधि। एकाक्षरोक्तमार्गेण च्छन्दोऽनुष्टबुदाहृतम्।। ४८।।
कविताश्रीप्रदो नित्यमस्मादन्यो न कुत्रचित्।..।।

पद्माक्षमालालिखितेष्टदानि दधानमम्भोरुहसन्निविष्टम्[2]।
कर्पूरभङ्गाधिकशुभ्रकान्तिं हयाननं सौम्यमहं स्मरामि।। ४९।।

दक्षिणाध:करमारभ्य वामाध: करपर्यन्तमायुधध्यानमिति।। सारसङ्ग्रहे–

अथोच्यतेऽर्चाविधानं वाराहस्य मनो: क्रमात्। साङ्गहोमाभिषेकं च सप्रयोगसजापकम्।। १।।
भगवत्पदमाभाष्य डेन्तं स्याच्च वरापदम्। डेन्तं हरूपमाभाष्य व्याहृतीश्च ततो वदेत्।। २।।
डेन्तं पतिं भूपतित्वं मे देहि दपदं वदेत्। दापय स्वापदं प्रोक्त्वा हान्तस्तारहृदादिक:।। ३।।
त्रयस्त्रिंशद्वर्णसंख्यो वराहमनुरीरित:। ....।।

भगवत्पदं डेन्तं भगवते। वरा स्वरूपं। हरूपपदं डेन्तं हरूपाय। व्याहृती: भूर्भुव:स्व:। डेन्तं पतिं पतये। भूपतित्वं मे देहि। द स्वरूपं। दापय स्वाहा स्वरूपं। तारहृदादिक: तार: प्रणव:, हृन्नम:। अत्र सन्धि: ओंनमो इत्यादि। तथा–

ऋष्यादयो भार्गवानुष्टुब्वराहा: समीरिता:। डेन्तं हृदेकशृङ्ग:[3] स्याद् व्योमोल्कस्तादृश: शिर:।।४।।
शिखा तेजोधिपतये विश्वरूपाय वर्म च। महादंष्ट्राय चास्त्रं स्यात् पञ्चाङ्गविधिरीरित: ।। ५।।

इति। प्रपञ्चसारे– ''सप्तभिश्च पुन: षड्भि: सप्तभिश्चाथ पञ्चभि:। अष्टभिर्मूलमन्त्रार्णैर्विदध्यादङ्गकल्पनाम्।।'' (२३। १७) इत्युक्तम्। सारसङ्ग्रहे–

अथवा मन्त्रवर्णैस्तु सप्तषण्मुनिसायकै:। वसुभिश्चापि पञ्चाङ्गं विदध्यान्मनुवित्तम:।। ६।।

मुनय: सप्त। सायका: पञ्च। वसवोऽष्टौ।

जान्वो: पदावधि सुवर्णनिभं च नाभेराजानु चन्द्रधवलं च गलाद् हृदन्तम्।
वह्निप्रभं शशिनिभं शिरसो गलान्तं मौलिस्थलाद्वियत एन्दुनिभं च कान्तम्।। ७।।

---

[1] 'मन्तकम्' ख. पाठ:। [2] 'संपुटस्थम्' ख. पाठ:। [3] 'एकदंष्ट्रं' इति केषांचिन्मतम्।

सम्बिभ्रतं करतलैररिशङ्खखड्गान् खेटं गदां तदनु शक्तिवराभयानि।
सर्वंसहाधरणशोभिसदेकदंष्ट्रमाद्यं वराहमनिशं प्रभजस्व चित्ते ॥ ८॥

दक्षाद्यूर्ध्वयोराद्ये, तदधःस्थयोरन्ये,. तदधःस्थयोरपरे, तदधःस्थयोरितरे, इत्यायुधध्यानम्। तथा—

धराधरशरीरं वा नीलजीमूतसन्निभम्। उदध्युपरिगं ध्यायेत् सितदंष्ट्राधृताचलम्॥ ९॥
हेमाभं पार्थिवे ध्यायेन्मण्डले हिमसन्निभम्। वारुणे मण्डले वह्नेः कृशानुभमथानिले॥ १०॥
कृष्णं वियत्युग्रभं स्यादेवं ध्यायेच्च सूकरम्। दंष्ट्रायां वसुधां ध्यायेत् सशैलवनकाननाम्॥ ११॥
वागीशीं हुंकृतौ ध्यायेत् पवनं श्वसिते तथा। बाह्वोर्वामान्ययोश्चन्द्रसूर्यावुदरगान् वसून्॥ १२॥
ब्रह्माणं पादयोर्ध्यायेद् हृदये च हरिं तथा। शङ्करं च मुखे ध्यायेत्.......................॥ १३॥

इति। तथा—

पद्ममष्टदलोपेतमुल्लसत्कर्णिकं शुभम्। मण्डलं विरचय्यैवं कोटिसूर्यसमप्रभम्॥ १४॥
तत्र सम्पूजयेत् कोलं वक्ष्यमाणविधानतः। मूलेन मूर्तिं सङ्कल्प्य कोलमावाहयेत् ततः॥ १५॥
तत्र गन्धादिभिः सम्यग् देवं सम्पूज्य सूकरम्। कोलदंष्ट्राद्य[1]ङ्गतान् वसुधादीन् प्रपूजयेत्॥ १६॥
विदिक्षूर्ध्वमधश्चापि पूजयेदस्त्रमुत्तमम्। चक्रादीनि च तद्बाह्ये चक्रशङ्खासिखेटकान्॥ १७॥
गदाशक्ती वराभीती लोकपालानथो यजेत्। तदस्त्राणि च तद्बाह्ये कोलपूजा समीरिता॥ १८॥

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भार्गवाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीवराहदेवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः। इति कृताञ्जलिरुक्त्वा, एकश‍ृङ्गाय हृदयाय नमः। व्योमोल्काय शिरसे स्वाहा। तेजोधिपतये शिखा०। विश्वरूपाय कवचं०। महादंष्ट्राय अस्त्रं०। इति पञ्चाङ्गमन्त्रान् मूलमन्त्राभिमृष्टयोः पाण्योरङ्गुष्ठादिकनिष्ठान्तास्वङ्गुलीषु विन्यस्य, नेत्ररहितं पञ्चाङ्गेषु च विन्यस्य, ध्यानादिपुष्पोपचारान्ते देवस्य दंष्ट्रायां वसुधायै नमः। अष्टदलकेसरेषु देवाग्रादिचतुर्दिक्षु हृदयादिकवचान्तं सम्पूज्याग्रादिकोणेषु इन्द्रेशानयोर्मध्ये निर्ऋतिवरुणयोर्मध्ये चास्त्रं सम्पूज्य, अष्टदलेषु देवाग्रदलमारभ्य प्रादक्षिण्येन— चक्राय नमः। शङ्खाय०। खड्गाय०। खेटाय०। गदायै०। शक्त्यै०। वराय०। अभयाय०। इति सम्पूज्य लोकपालार्चादि प्राग्वत् कुर्यादिति। तथा—

एकलक्षं जपेन्मन्त्रं नियमस्थो जितेन्द्रियः। तद्दशांशं प्रजुहुयात् (पद्मैः स्वादुपरिप्लुतैः ॥ १९॥
तर्पणादि ततः कुर्याद् ब्राह्मणाराधनावधि। बिल्ववृक्षं स्पृशन्नित्यं जपेन्मासं सहस्रकम् ॥ २०॥
दशांशं जुहुयादग्नौ) पुरश्चरणवान् भवेत्। अर्थो ध्यानाज्जपाद् भूमिर्जपपूजाहुतैः क्रमात्॥ २१॥
धनधान्यधरालक्ष्म्यो भवन्त्येव न संशयः। भूमण्डले सदा ध्यातः प्रयच्छति भुवं शुभाम्॥ २२॥
वारुणे तूच्चकैः शान्तिमाग्नेये च प्रयच्छति। वश्यं ज्वरादिकं सम्यगुच्चाटो वायुमण्डले॥ २३॥
द्युमण्डले शत्रुभूतग्रहक्ष्वेडादिरक्षणम्। सिंहस्थे शुक्लपक्षे हि रवौ श्वेतशिलां शुभाम्॥ २४॥
पञ्चगव्यविनिक्षिप्तां सञ्जप्तामयुतेन च। उदङ्मुखो जपेन्मन्त्रं क्षेत्रे तां निखनेत् ततः॥ २५॥
शत्रूणां सन्निरोधो हि क्षेत्रस्यास्य विनश्यति। अर्कोदयेऽङ्गारवारे जपेन्मन्त्रं समाहितः॥ २६॥

---

[1] 'दण्डगतां वसुधां च' ख. पाठः।

वैरिरुद्धादपि क्षेत्रान्मृदमानीय यत्नतः। तां च त्रिधा विभज्यांशं चुल्यामेकं विलिप्य च।। २७।।
पाकपात्रे परांशं च पयस्यन्यं तृतीयकम्। संस्कृते हव्यवाहे च तण्डुलैश्च पचेच्चरुम्।। २८।।
तत्र देवं यथावच्च धूपदीपादिभिर्यजेत्। साज्येन तेन हविषा हुनेदष्टाधिकं शतम्।। २९।।
एवं भौमाष्टवारेषु कुर्यान्नियतधीः क्रमात्। ततः शत्रुगृहीतं च क्षेत्रं सम्प्राप्यतेऽचिरात्।। ३०।।
अह्नो मुखे भौमवारे मृदं सङ्गृह्य पूर्ववत्। पूर्ववच्च चरुं कृत्वा जुहुयात् प्रोक्तवर्त्मना।। ३१।।
बलिं च दद्यात् क्षेत्रस्य विरोधो नश्यति ध्रुवम्। ....।।

बलिं च देवस्य। हुतशेषेण देवस्य नैवेद्यं दद्यादित्यर्थः।

सप्तभिर्दिवसैश्चाथ डाकिनीविकृतीर्हरेत्। तामेव मृत्तिकां दुग्धे विलोड्याज्येन संहुनेत्।। ३२।।
अष्टाधिकं सहस्रं च मण्डलद्वितयं ततः। निःसपत्ना समृद्धास्य महार्था[1] च मही भवेत्।। ३३।।
आरग्वधसमिद्भिश्च जुहुयादयुतं सुधीः। तस्य सर्वसमृद्धिः स्याल्लभेत् क्षेत्रादिकं बहु।। ३४।।
अष्टाधिकं शतं मन्त्री शालीभिर्दिनशो हुनेत्। स तु संवत्सरात् सम्यग् व्रीहिपूर्णगृहो भवेत्।।३५।।
अनेन जुहुयादाज्यं सहस्रं प्रत्यहं बुधः। तेन स्वर्णसमृद्धिः स्यादञ्जलिन्याः प्रसूनकैः।। ३६।।
सहस्रं स्वादुसम्पृक्तैर्वाससां वृद्धिरिष्यते। लाजाहोमाच्च कन्याप्तिरुत्पलैः श्रीर्भवत्यलम्।। ३७।।
विवादक्षेत्रमासाद्य तस्य जन्मदिने शुभे। तत्रासीनो जपेन्मन्त्रमष्टोत्तरसहस्रकम्।। ३८।।
एवं कृतवतस्तस्य भूमिवादो विनश्यति।..।।

तस्य वादिनः। जन्मदिने जन्मनक्षत्रदिने।

आत्मानं मेरुसदृशं वराहं चिन्तयेद् बुधः। अङ्गारवारे यत्क्षेत्रं जपन् सप्तप्रदक्षिणम्।। ३९।।
कृत्वा मृदं तु गृह्णीयात्तस्य क्षेत्रं भविष्यति। नित्यं भूमिं स्पृशन् मन्त्री जपेदष्टसहस्रकम्।।४०।।
विन्दते महतीं भूतिं शमयेत् सर्वकण्टकम्। भृगुवारे तथा प्रोक्ते भौमवारे विशेषतः।। ४१।।
जपेत् प्रतिष्ठाकामस्तु महतीं भूमिमाप्नुयात्। नित्यमष्टसहस्रं तु यो जपेद्धरिमर्चयेत्।। ४२।।
महतीं श्रियमाप्नोति महाराजो भवत्यलम्। लक्षहोमजपान्ते स्याद् गव्यैश्चैव सपायसैः।। ४३।।
सप्तद्वीपानवाप्नोति नात्र कार्या विचारणा। दधिमध्वाज्यसिक्ताश्च चतुरङ्गुलसम्मिताः।। ४४।।
गुडूचीरष्टसाहस्रं हुनेद् व्याधिर्विनश्यति। आम्रपर्णैर्हुतैर्नित्यं ज्वरशान्तिर्भविष्यति ।। ४५।।
गृहीत्वा हस्तयोर्नीरं जपेदक्षरसंख्यया। मुखे सुप्तः क्षिपेन्नित्यं मुखश्रीस्तस्य वर्धते।। ४६।।

अक्षरसंख्यया मूलमन्त्राक्षरसंख्यया।

ससाध्यं षट्कोणे प्रणवगतबीजं त्वरिमनुं
षडस्त्रिष्वङ्गानि प्रविलिखतु सन्धिष्वथ सुधीः।
द्विशो ह्यष्टार्णाणुं निगमदलमूले दलगतान्
मनोरर्णानष्टौ समधिकमथान्त्ये बहिरथो।। ४७।।

---

[1] 'महार्घ्या' ख. पाठः।

वसुमितदले किञ्जल्केषु स्वरान् द्विश आलिखेद्
दलमनु मनोर्वर्णान् वेदैर्मितानधिकोऽन्तिमे।
विकृतिविवरे किञ्जल्केऽथो लिपिं द्विश आलिखेद्
दलमनु मनोर्वर्णानन्तेऽन्तिमं बहिरावृतम् ।। ४८।।
वेदादिक्षितिकोलबीजमनुभिः साध्याख्यया सम्पुटैः-
स्तद्बाह्ये मनुवर्णदर्भितलसत्साध्याख्यया चावृतम्।
भूबिम्बावृतमश्रिगर्भविलसत्साध्याख्यभूबीजकं
शूलेषु क्षितिकोलबीजलसितं यन्त्रं वराहस्य तत्।। ४९।।
लाक्षाकर्पूरकृष्णागुरुमलयजसद्रोचनाकुङ्कुमै-
स्तत्सम्पिष्टैर्गोमयाद्भिः शुभतरदिवसे संलिखेच्चारुहैम्या।
लेखन्या स्वर्णपट्टे रजतजफलके राज्यमाग्रामलाभ-
स्ताम्रे स्वर्णं निजेष्टं पिचुतरुजदले भूफलं क्षौमपट्टे।। ५०।।
भूर्जे संसारयात्रा भवति च नितरां साधु जप्तं च यन्त्रं
सम्पाताज्याभिषिक्तं निजहितफलदं राशिवर्षे धृतं तत्।
स्वं ध्यात्वा कोलरूपं तदपि च निखनेत् साध्यदेशे वराहं
त्वावाह्याङ्गानि दिक्षु प्रयजतु स भवेत् क्षुद्ररोगैर्विमुक्तः।। ५१।।

इति। अस्यार्थः— आदौ षट्कोणं कृत्वा तन्मध्ये प्रणवं विलिख्य, तस्योदरे हूमिति वराहबीजं तत्र साध्यनाम चालिख्य, तस्य षट्सु कोणेषु स्वाग्रादिप्रादक्षिण्येन वक्ष्यमाणसुदर्शनषडक्षरमन्त्रस्यैकैकमक्षरमालिख्य, षट्कोणसन्धिषु सुदर्शनषड्वर्णस्य षडङ्गमन्त्रानालिख्य, तद्बहिश्चतुर्दलकमलं कृत्वा तत्केसरेषु द्विर्द्विर्नारायणाष्टाक्षरमन्त्रार्णानालिख्य, वाराहानुष्टुभमन्त्रस्य वर्णांश्चतुष्पत्रेषु प्रतिपत्रमष्टावष्टावालिख्य, अन्तिमदलेऽन्त्यवर्णमालिख्य, तद्बहिरष्टदलकमलं कृत्वा तत्केसरस्थाने स्वरान् द्वन्द्वशो विलिख्य, अष्टदलेषु वराहमन्त्रवर्णांश्चतुरो२ विलिख्यान्त्यवर्णमन्त्यदले विलिख्य, (तद्बहिः षोडशदलं पद्मं विलिख्य, तत्केसरेषु द्विशः कादिसान्तान् वर्णनालिख्य, दलमध्येषु मूलमन्त्रार्णान् द्वन्द्वशः संलिख्य अन्तिमार्णमन्तिमदले विलिख्य,) तद्बहिर्वृत्तचतुष्टयं कृत्वा वीथीत्रयं विरच्य, सर्वाभ्यन्तरवीथ्यां साध्याक्षरेण सम्पुटितप्रणवेन संवेष्ट्य, द्वितीयवीथ्यां ग्लौं इति धराबीजेन तथैव संवेष्ट्य, तृतीयवीथ्यां हूँ इति वराहबीजेन साध्यसम्पुटितेन संवेष्ट्य, तद्बहिश्च पुनर्वृत्तं कृत्वा तद्वीथ्यां मूलमन्त्रार्णविदर्भितसाध्याख्यावेष्ट्य, तद्बहिश्चतुरस्रं कृत्वा, तत्कोणेषु ग्लौं इति भूबीजं साध्याख्यागर्भितं विलिख्य, चतुरस्रस्थरेखाचतुष्काद्यष्टकेषु त्रिशूलाष्टकं कृत्वा, तेषु शूलेषु वराहबीजं वसुधाबीजं च लिखेत्, एतद्यन्त्रमुक्तफलदं भवति।। श्रीकेरलीये यन्त्रसारे—

कार्णिकायां कोलगर्भं तारं साध्यसमन्वितम्। चक्रमन्त्रं कोणषट्के षडङ्गानि च सन्धिषु।। १।।
अष्टपत्रे केसरोद्यदष्टार्णद्वयवर्णके। चतुरश्चतुरो वर्णान् कोलमन्त्रस्य चाष्टमे।। २।।
पद्मं चालिख्य बाह्ये च पत्रे षोडशसंज्ञके। क्षेत्रस्येत्यादिसूक्तस्याप्यर्धमर्धमृचां लिखेत्।। ३।।

धरामन्त्रेण संवेष्ट्य बाह्ये मातृकयापि च। भूपुराश्रिषु भूबीजं दिक्षु हूँबीजमालिखेत्।। ४।।
क्षेत्रस्येत्यादिसूक्तस्य यन्त्रमेतच्छुभे दिने। ताम्रपट्टे समालिख्य स्वर्णसूच्या यथाविधि।। ५।।
स्थापितं भवने यद्वा क्षेत्रे वा नगरेऽपि वा। देशे वा तत्र वर्धन्ते दिनशः सर्वसम्पदः।। ६।।
गजाश्वधेनुमहिषीवृषमेषखरादिभिः। धनधान्यधराध्यक्षवासोरत्नविभूषणैः ।। ७।।
आह्लादयन्ती विभवैरन्यैश्च स्यात् सदा रमा।..............................।।

इति। अस्यार्थः– अष्टदलकमलं कृत्वा तत्कर्णिकायां षट्कोणमध्ये प्रणवोदरे ससाध्यं वाराहबीजं विलिख्य, षट्कोणेषु सुदर्शनषडर्णं, तत्सन्धिषु सुदर्शनमन्त्रस्य षडङ्गमन्त्रान्, अष्टदलकेसरेषु नारायणाष्टाक्षरस्य वक्ष्यमाणवाराहाष्टाक्षरस्य चैकैकमक्षरं, दलेषु वराहमन्त्रस्य चत्वारि चत्वार्यक्षराणि, सर्वान्त्यदले पञ्चाक्षराणि, तद्बहिःस्थषोडशदलेषु ''क्षेत्रस्य पतिना'' इत्यादिसूक्तस्य ऋचामर्धमर्धं, बहिर्वृत्तत्रयान्तरालयोरभ्यन्तरान्तराले वेष्टनत्वेन च धरामन्त्रं, बाह्यान्तराले मातृकां, चतुरस्रकोणेषु भूबीजं, दिक्षु वराहबीजं च लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।।

क्षेत्रस्य पतिना वयं हितेनेव जयामसि। गामश्वं पोषयित्वा स नो मृळातीदृशे।। १।। क्षेत्रस्य पत्रे मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्च्युतं धृतमिव सुपूतमृतस्य नः पतयो मूळयन्तु।। २।। मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम्। क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम।।३।। शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम्। शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिंगय।। ४।। शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः। तेनेमामुपं सिञ्चतम्।। ५।। अर्वाचीं सुभगे भव सीते वन्दामहे त्वा। यथा नः सुभगासससि यथा नः सुफलासससि।। ६।। इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समां।। ७।। शुनं नः फाला वि कृषंतु भूमिं शुनं कीनाशा अभि यन्तु वाहैः। शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु दत्त।। ८।। (४। ५७)

क्षेत्रस्य पतिनेति सूक्तस्य। वामदेव ऋषिः। पुरउष्णिगनुष्टुप् त्रिष्टुभः छन्दांसि। क्षेत्रस्य पतिर्देवता।। वैखानसपञ्चरात्रे–

तिथिस्वरयुतं व्योम वामकर्णविभूषितम्। वराहबीजमुदितं सर्वसम्पत्प्रदायकम्।। १।।

तिथिस्वरो बिन्दुः। व्योम हकारः। वामकर्णः ऊकारः। सारसङ्ग्रहे–''हयग्रीव ऋषिः प्रोक्तश्छन्दोऽनुष्टुप् च देवताः। वराहो दीर्घयुक्तेन बीजेनैवाङ्गकल्पनम्। ध्यानपूजादिकं सर्वमस्य पूर्ववदाचरेत्''। इति। महासम्मोहनतन्त्रे– ''नाभिर्वामश्रवः सर्गी तस्य बीजमिहोच्यते।'' इति नाभिर्भकारः। वामश्रवः ऊकारः। सर्गो विसर्गस्तेन भूः इत्युद्धृतम्। अस्य प्राग्वदेव करषडङ्गध्यानपूजादिकं ज्ञेयम्। यथासम्प्रदायं जपः। तथा–

अष्टाक्षरे महामन्त्रे वेदादिः प्रथमाक्षरम्। द्वितीयं व्याहृतिस्तस्माद्वराहाय हृदन्तता।। १।।

वेदादि: प्रणव:। व्याहृतिर्भू:। हृन्नम:।

ऋषिर्ब्रह्मा च जगती छन्दो वराह एव च। देवताङ्गानि च पदैः समस्तेन च कल्पयेत्।।२।।

कृष्णाङ्गं त्वतिनीलवक्त्रनलिनं पद्मस्थितं स्वाङ्कग-
क्षोणीशक्तिमुदारबाहुभिरथो शङ्खं गदामम्बुजम्।
चक्रं बिभ्रतमुग्रकान्तिमनिशं देवं वराहं भजे
भूलक्ष्मीरतिकान्तिभिः परिवृतं चर्मासिसन्दीप्तिभि:।। ३ ।।

वामोर्ध्वमारभ्य दक्षिणोर्ध्वपर्यन्तमायुधध्यानम्। जपपूजादिकं सर्वमस्य वराहमन्त्रवदेव ज्ञेयम्। अथ प्रयोग:— तत्र मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे जगतीछन्दसे नम:। हृदये श्रीवराहदेवतायै नम:। इति विन्यस्य, ओंहृदयाय नम:। भू: शिरसे०। वराहाय शिखा०। नम: कवचं०। ओंभूर्वराहाय नम: अस्त्रं०। इति पञ्चाङ्गं प्राग्वद्विन्यस्य ध्यानादि शेषं सर्वं प्रागुक्तवराहानुष्टुभविधिना कुर्यादिति।

एवं मनुं य: प्रजपेत् स भवेच्च धरापति:। अन्ते विष्णो: परं नित्यं पदमाप्नोत्यसंशय:।। ४।।

इति। सारसङ्ग्रहे—

ध्रुवं नम:—पदं ब्रूयाद्भगवत्यै वदेत्तत:। धरण्यै—पदमुच्चार्य धरणि स्याद्धराधरे[1] ।। १ ।।
एकोनविंशत्यर्णात्मा स्वाहान्तो मनुरीरित:। धराहृदयसंज्ञोऽयं भूपतित्वप्रदायक: ।। २ ।।

ध्रुव: प्रणव:। अन्यानि पदानि स्वरूपाणि। अत्र सन्धिस्तेन ओंनमो भगवत्यै इत्यादि। तथा—

ऋषिर्वराह आख्यातो निचृच्छन्दश्च देवता। पृथिवी सर्वजननी दृष्टादृष्टफलप्रदा।। ३ ।।
त्रिभिर्वेदैस्त्रिभिर्भूतैर्द्वाभ्यां द्वाभ्यां तथा भवेत्। मूलमन्त्रभवैर्वर्णै: षडङ्गानि सजातिभि:।। ४।।
इन्दीवरयुगं शालिमञ्जरीं दधती शुकम्। धरा पद्मासना ध्येया श्यामा तन्वी सुभूषिता।। ५।।

वामोर्ध्वादितदधोन्तमायुधध्यानम्।

पूजा तु वैष्णवे पीठे तद्विधानमुदीर्यते। आदावङ्गानि सम्पूज्य दिग्दलेषु ततो यजेत्।। ६।।
भुवं वह्निं जलं वायुं तत्कला: कोणपत्रगा:। इन्द्रादीन् पूजयेद्बाह्ये वज्रादीनि तत: परम्।। ७।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि वराहऋषये नम:। मुखे निचृच्छन्दसे नम:। हृदये श्रीधरण्यै देवतायै नम:। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोग: इति कृताञ्जलिरुक्त्वा, ओंनम: हृदयाय०। भगवत्यै शिरसे०। धरण्यै शिखा०। धरणि कवचं०। धराधरे नेत्रं०। स्वाहा अस्त्रं०। इति करषडङ्गन्यासं कृत्वा ध्यानादियोगपीठ(कला)नवशक्तिपूजान्ते वैष्णवपीठमन्त्रस्थाने ''सौं वसुन्धराय योगपीठाय नम:'' इति पीठं सम्पूज्यावाहनाद्यङ्गार्चान्ते दिग्दलेषु—भुवे नम:। वह्नये०। जलाय०। वायवे०। विदिग्दलेषु— निवृत्त्यै नम:। विद्यायै०। प्रतिष्ठायै०। शान्त्यै०। इति सम्पूज्येन्द्राद्यर्चादिकं प्राग्वत् कुर्यादिति। तथा—

दशायुतं जपेन्मन्त्रं जुहुयात् तद्दशांशत:। हविषा घृतसिक्तेन तर्पयेदभिषेचयेत्।। ८।।

---

[1] 'धरे धरे' इति पाठ: समुचित:। धरण्यन्तधरे द्वन्द्वमिति शारदातिलकोक्ते:।

ब्राह्मणान् भोजयेत् पश्चान्मन्त्री मन्त्रस्य सिद्धये। विधिनानेन संसिद्धे मनौ काम्यानि साधयेत्।।९।।
रक्तोत्पलानि जुहुयात् स्वाद्वक्तानि सहस्रकम्। भुवमिष्टामवाप्नोति नीलोत्पलहुतात् तथा।। १०।।
प्रियङ्गुपुष्पहोमेन मधुरात्तेन मन्त्रवित्। वसुधान्यधराश्री(स्त्री)णां सत्यं भवति भाजनम्।। ११।।
मधुरार्द्रतरां हुत्वा नूतनां शालिमञ्जरीम्। धरापतिर्भवेन्मन्त्री मण्डलेन न संशयः।। १२।।
प्रातर्भृगुदिने मन्त्री साध्यक्षेत्रान्मृदं हरेत्। शुद्धतोये समालोड्य तां च तत्र पचेच्चरुम्।। १३।।
अग्नौ दुग्धघृताभ्यक्तं जुहुयात् तद्यथाविधि। मासपट्कं भृगोवरिष्वेवं कृत्वा लभेद्धराम्।। १४।।

वाराहं भजति मनुं युतं धराया मन्त्रेण प्रजपहुतार्चनादिभिर्यः।
तस्य द्राक् सकलमहीपतित्वमुच्चैरैश्वर्यं भवति च धान्यवीर्यवृद्धिः।। १ [redacted]

इति। श्रीयन्त्रे—

मध्ये तारं वसुपुरयुगाश्रिष्वथो कोलबीजं
पत्रेष्वष्टस्वपि गुणमितान् मन्त्रवर्णान् क्रमेण।
आवेष्ट्यार्णैः किटिमनुभवैर्मातृकार्णैश्च यन्त्रं
भूगेहस्थं वितरति धरास्वर्णधान्यादिकानि[१]।।

इति। अस्यार्थः— अष्टकोणगर्भमष्टदलं पद्मं कृत्वाष्टकोणमध्ये ससाध्यं प्रणवं विलिख्याष्टकोणेषु वाराहबीजं विलिख्याष्टदलेषु धरामन्त्रस्य प्रणवविधुराणि त्रीणि त्रीण्यक्षराणि विलिख्य, बहिर्वृत्तत्रयं कृत्वाभ्यन्तरवीथ्यां पूर्वोक्तवराहमन्त्रार्णान् विलिख्य, बाह्यवीथीं मातृकावर्णैः संवेष्ट्य बहिश्चतुरस्रं कुर्यात्, एतद्यन्त्रमुक्तफलदं भवति।। श्रीयन्त्रसारे धरामन्त्रविशेष उक्तः। यथा— ''हृदयं भगवत्यै च धरण्यै च धरण्यथ। धरे द्वयं वह्निवधूर्मन्त्रः प्रोक्तोऽखिलार्थदः।। तारमायाधराबीजैः पुटितस्तत्त्ववर्णकः''। इति। माया ह्रीं। धरा ग्लौं। प्रणवानन्तरं बीजद्वयं, पश्चादुक्तमन्त्रः। पुनर्वैपरीत्येन बीजद्वयम्, अन्ते प्रणवः। तत्त्ववर्णश्चतुर्विंशत्यर्णः। सारसङ्ग्रहे—

अथ सम्यक् प्रवक्ष्यामि सुदर्शनमनूत्तमम्। येन सिध्यन्ति सकलाः साधकानां मनोरथाः।। १।।
यात् सप्तमं तदन्त्यं च भृग्वग्नी दीर्घसंयुतौ। यान्त्यं व्योम दक्षकर्णयुक् पान्त्यं केवलश्च टः।।२।।
वेदाद्याद्यश्चक्रमन्त्रः सप्तवर्ण उदाहृतः। ....।।

यात् सप्तमं सकारः। तदन्त्यं हकारः। भृगुः सकारः अग्नी रेफः। दीर्घ आकारः, तेन स्रा। यान्त्यं रेफः। व्योम हकारः, अं अनुस्वारः, दक्षकर्ण उकारः, तेन हुं। पान्त्यं फकारः। केवलः टः, विस्वरः। वेदाद्याद्यः प्रणवाद्यः। तथा—

ऋषिः प्रोक्तो ह्यहिर्बुध्न्योऽनुष्टप् छन्दश्च देवता। सुदर्शनात्मा च महाविष्णुर्मुनिभिरीरितः।। ३।।
चक्रायान्तैराविसुधीसज्वालाशब्दकैः पृथक्। षडङ्गमनवो ह्यस्य जातियुक्ता द्विठान्तकाः।। ४।।
ऐन्द्र्याद्यधोर्ध्वक्रमशश्चक्रेणेति ततो वदेत्। वदेद्बध्नामि हृदयं ङेन्तं चक्रपदं शिरः।। ५।।
दिशामपि दशानां स्याद्बन्धोऽनेनाणुनात्र च। त्रैलोक्यं प्रणवाद्यं च रक्षयुग्मं तनुत्रकम्।। ६।।

---

[१] 'वृद्धिम्' ख. पाठः।

अस्त्रशीर्षयुतो मन्त्रो ह्यग्निप्राकारसंज्ञकः। अनेन मनुना स्वस्य परितोऽग्निमयं बुधः।। ७।।
प्राकारं परिकल्प्याथ न्यासानन्यान् समाचरेत्। शुभ्रारक्तासिताभं तु प्रणवं शिरसि न्यसेत्।। ८।।
भ्रूमध्याननहृद्गुह्यजानुपद्द्वन्द्वसन्धिषु। इतरान्वह्नितुल्याभान् वर्णान्मन्त्री प्रविन्यसेत्।। ९।।

दिग्बन्धादिमन्त्राः प्रयोगे एव स्पष्टीक्रियन्ते। पद्द्वन्द्वसन्धिर्गुल्फः। ''जानुगुह्येषु विन्यसेत्'' इति कपिलवचनात्।

रथाङ्गदरसद्गदाब्जमुसलं धनुःपाशकौ
सृणिं दधतमर्कसप्रभरुचिं कराम्भोरुहैः।
स्वदेहरुचिभिर्जगन्मनसि भासयन्तं स्मरेद्
हरिं रथपदाह्वयं विकटभीमदंष्ट्राननम्।। १०।।

रथाङ्गं चक्रं। दरः शङ्खः। सृणिरङ्कुशः। दक्षाद्यूर्ध्वयोराद्ये, तदाद्यधःस्थयोरन्ये, तदाद्यधःस्थयोरपरे, तदाद्यधःस्थयोरितरे, इत्यायुधध्यानम्। तथा—

पूजयेद्वैष्णवे पीठे गन्धपुष्पादिभिस्ततः। मूलेन मूर्तिं सङ्कल्प्य तत्रावाह्य च पूर्ववत्।। ११।।
अङ्गानि चक्राद्यस्त्राणि लक्ष्म्याद्या लोकपालकान्। तदायुधानि च यजेत् क्रमाद् देशिकसत्तमः।।१२।।
रथाङ्गं च दरश्चैव गदाब्जे मुसलं तथा। धनुः पाशाङ्कुशौ प्रोक्ताः पीतरक्तसितासिताः।। १३।।
द्विशश्च शक्तयोऽभ्यर्च्या विष्णुसान्निध्यकारिकाः। दर्शयेच्चक्रगायत्र्या ततो मुद्रां च मन्त्रवित्।।१४।।

मुद्रां चकाराच्चक्रमुद्रां।

सुदर्शनाय विवदेत्ततश्च विद्महे महा। ज्वालाय धीमहि ततस्तन्नश्चक्रं प्रचोदयात्।। १५।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अहिर्बुध्न्याय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीसुदर्शनाय महाविष्णवे देवतायै नमः। इति विन्यस्य ममेष्टार्थे जपे विनियोगः। इति प्राग्वदुक्त्वा, आचक्राय स्वाहा हृदयाय०। विचक्राय स्वाहा शिरसे०। सुचक्राय स्वाहा शिखा०। धीचक्राय स्वाहा कवच०। सचक्राय स्वाहा नेत्र०। ज्वालाचक्राय स्वाहा अस्त्रम्०। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, ऐंद्रीं चक्रेण बध्नामि नमश्चक्राय स्वाहा। आग्नेयीं चक्रेण बध्नामि नमश्चाक्राय स्वाहा। इत्यादियुक्त्या दशदिग्बन्धनं दक्षकरतर्जन्यङ्गुष्ठोत्थशब्देन विधाय, उों त्रैलोक्यं रक्ष २ हुं फट् स्वाहा, इति मन्त्रेण प्राग्वदग्निप्राकारं कृत्वा, शिरसि उोंनमः। भ्रूमध्ये सं नमः। मुखे हं नमः। हृदि स्रां नमः। गुह्ये रं नमः। ज्ञानुनोः हुं नमः। गुल्फयोः फट् नमः। इति विन्यस्य ध्यानादिप्राणप्रतिष्ठान्ते वैष्णवमुद्राः प्रदर्श्य, ''उोंसुदर्शनाय विद्महे महाज्वालाय धीमहि तन्नश्चक्रं प्रचोदयात्।।'' इति गायत्र्या पुनश्चक्रमुद्रां प्रदर्श्यासनाद्यङ्गार्चान्तेऽष्टदलेषु— चक्राय नमः। शङ्खाय०। गदायै०। पद्माय०। मुसलाय०। धनुषे०। पाशाय०। अङ्कुशाय०। इति सम्पूज्य, दलाग्रेषु हयग्रीवपूजोक्तलक्ष्म्याद्यष्टशक्तीः सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् कुर्यादिति। तथा—

जपेद् द्वादशलक्षं तु तत्सहस्रं हुनेत् तिलैः। सर्षपैर्बिल्वदोग्धान्नयुतैर्मन्त्री यथाविधि।। १६।।

बिल्वैर्बिल्वपत्रैः। 'सर्षपैर्बिल्वपत्रैश्च' इति प्रयोगसारवचनात्। एकैकद्रव्यैश्चतुःशताधिकसहस्रसंख्याको होमः। तिलादिद्रव्यचतुष्टये त्रिमधुयोगः कार्यः। 'त्रिमधुसंयुतैः' इति प्रयोगसारात्। तथा—

तर्पणादि तत: कृत्वा कुर्याद् ब्राह्मणभोजनम्। सिद्धे मनौ विदध्याच्च प्रयोगानिष्टदायकान्।। १७।।
चक्रयुग्मं लिखेन्मन्त्री सौम्ययाम्यगतं क्रमात्। आलिखेत् प्रणवं मध्ये षट्कोणेष्वणुवर्णकान्।। १८।।

चक्रयुग्मं षट्कोणद्वयम्।

पीताभां कर्णिकां कुर्याद्रक्तारं श्याममन्तरम्। सितां नेमिं शिखिशिखापरीतं पार्थिवावृत्तम्।। १९।।
तत्र सौम्ये च कलशं शोणाम्भ:पूर्णमत्र च। चक्राह्वयं समावाह्य हरिं सम्यक् प्रपूज्य च।। २०।।
याम्ये कुर्याद्धोमकर्म षट्त्रिंशच्छतसम्मितै:। आज्यापामार्गकसमिदक्षताराजिकातिलै:।। २१।।
हविषा पञ्चगव्यैश्च हुनेदाज्यप्लुतै: क्रमात्। प्रतिद्रव्यस्य सम्पातान् कुम्भतोये विनिक्षिपेत्।। २२।।
(प्रस्थार्धान्नकृतं पिण्डं सम्यक् कुम्भोदके सुधी:। याम्याशायामुपावेश्य साध्यं नीराज्य तत्र च।।२३।।
सद्रव्यं तं घटमाराद्राशावष्टमके क्षिपेत्।) तत्सामग्र्यादिकमपि क्षिपेत् तद्दक्षभागके।। २४।।
ततो बलिं हरेद्धीमान् हुतशिष्टान्नकेन च। मन्त्रेणानेन हृदयं पठेद्विष्णुगणे तत:।। २५।।
वदेद् भ्योऽन्ते सर्वशान्तिकरेभ्योऽन्ते बलिं हरेत्। प्रतिगृह्णन्तु शान्त्यै च हृदयं तदनन्तरम्।।२६।।
विप्रान् सम्भोज्य गुरवे दक्षिणां च प्रकल्पयेत्। ज्वरादिरोगसङ्घातान् प्रयोगोऽयं विनाशयेत्।।२७।।
अपस्माररुजं चैव पिशाचग्रहवैकृतम्। रक्षोभूतादिपीडां च नाशयेन्मङ्क्ष्वयं विधि:।। २८।।

इति। अस्यार्थ:— सुशुभे स्थाने गोमयोपलिप्ते दक्षिणोत्तरविभागेन हस्तान्तराले षट्कोणद्वयं वृत्तवेष्टितं बहिश्चतुरस्रावृतं च कृत्वा, तन्मध्यं दीक्षोक्तपीतरजसापूर्य षट्कोणोदरं रक्तेनापूर्य, तदन्तरालषट्कं श्यामरजसापूर्य रेखा: सर्वाश्च तेनापूर्य, तन्मध्ये प्रणवं विलिख्य, स्वाग्रादिषट्कोणके मूलमन्त्रस्य द्वितीयार्णादिवर्णषट्कं विलिख्य, (तत्रोत्तरदिग्गतचक्रे कुङ्कुमादिमिश्ररक्तजलपूर्णं कुम्भं दीक्षाविधानोक्तप्रकारेण संस्थाप्य) तत्र पीठपूजापुर:सरं सुदर्शनं सम्यगावाह्य, पञ्चोपचारकै: साङ्गावरणं सम्पूज्य, दक्षिणदिग्गतचक्रे दीक्षोक्तविधानेन नित्यहोमोक्तविधिना वा वैष्णवाग्निं संस्थाप्य प्रोक्तद्रव्यै: प्रतिद्रव्यं हुतशेषं (षट्त्रिंशदधिकं शतं प्रत्याहुति प्रतिद्रव्यं) स्रुवलग्नं कुम्भतोये सम्पातयञ्जुहुयात्। ततो होमं समाप्य कुम्भे पिण्डं प्रस्थार्धान्नकृतं निधाय, साध्यं स्वदक्षभागे समुपवेश्य तं कुम्भमुद्धृत्य साध्यस्योपरि त्रि:परिभ्राम्योक्तस्थाने दूरे तं घटं निक्षिप्य, सामग्र्यादि सर्वं तद्दक्षभागे निक्षिप्य, हुतशिष्टान्नेन ''नमो विष्णुगणेभ्य: सर्वशान्तिकरेभ्यो बलिं प्रतिगृह्णन्तु शान्त्यै नम: '' इति बलिं दत्त्वा स्वगृहमागच्छेत्। ततो यजमानो ब्राह्मणानन्नादिभि: परितोष्य स्वगुरुं प्रयोगकर्तारं गोभूहिरण्यवस्त्रादिभि: सम्यक् परितोषयेदुक्तफलभाग् भवेत्।। तथा—

स्तनजद्रुमसम्भूतै: फलकै: पञ्जरं शुभम्। कृत्वा मन्त्री पञ्चगव्यै: पूरयेत् साध्यमत्र च।। २९।।
निवेशयेच्छुद्धवस्त्रं शुद्धाङ्गं तं स्पृशञ्जपेत्। मनुं कृशानुं वह्न्या[१]दिदिक्षु संस्थाप्य मन्त्रवित्।। ३०।।
विप्रवर्य्यै: कारयित्वा होमं पूर्वोदितै: क्रमात्। द्रव्यैस्तांस्तोषयेद्विप्रान् यजमानो गुरुं तथा।। ३१।।
धनधान्यादिकैर्नत्वा सन्तोष्य प्रीणयेत् तथा। एष योग: सर्वरोगापमृत्युद्रोहनाशक:।। ३२।।
गव्यै: समस्तै: क्षीरद्रुचर्मोत्थैश्च कषायकै:। एभि: सम्पूरितै: कुम्भैर्जप्तै: सम्पातसंयुतै:।। ३३।।

---

[१] 'पूर्वादि' ख. पाठ:।

साध्यं ग्रहाविष्टमनेन सिञ्चेदुग्राभिचारातुरमुग्रपीडम्।
स्वस्थो भवेत् तेन नरोऽतिमङ्क्षु भानोर्दिने साधु सुसाधितैस्तैः।। ३४।।
योषां संस्नापयेत् तैश्च सुखेन प्रसवो भवेत्। घृतपक्वं पञ्चगव्ये सञ्जप्तममुनाणुना।। ३५।।
ग्रहपीडानिरुद्धानां गर्भिणीनां हितावहम्। मनुं जपेद् दशशतं पञ्चगव्यं स्पृशन् सुधीः।। ३६।।
पद्मपत्रे ब्रह्मवृक्षपत्रे बिल्वफलेऽपि वा। तन्न्यस्य तत्स्वीयगृहे निखनेच्च परस्य वा।। ३७।।
रक्षा भवति तद्गेहे सम्पद्वृद्धिश्च जायते। पलाशस्तनजद्रुत्वक्चन्दनं गुग्गुलं तथा।। ३८।।
घुसृणं च हरिद्रा च रोचना बिल्वराजिका। अपामार्गतिलादूर्वा विष्णुक्रान्ता तुलस्यपि।। ३९।।
कृष्णा च तुलसी प्रोक्ता यवोऽर्कद्रुम एव च। सहदेवी तथा लक्ष्मीकुशागोमयसद्द्रवाः।। ४०।।
कमलं रोचना पञ्चगव्ये संक्वाथयेन्मुहुः। सिद्धेऽग्नौ भस्म यावत् स्यादेतत् सर्वेष्टदायकम्।। ४१।।

सिद्धे संस्कृते।

सञ्जप्तं मनुनानेन सम्यक् च शिरसा धृतम्। सर्वभूतग्रहव्याधिकृत्यादुःखादिवारणम्।। ४२।।
द्रोहोन्मादरिपुत्राससर्वपापहरं मतम्। आपन्नाशकमेतत् स्यात् वश्यदं शिवदं परम्।। ४३।।
फलत्रययुतैः कल्कैः पञ्चगव्ये पचेद् घृतम्। प्रस्थं च कल्कद्रव्याणि घनं शुण्ठी निशा तथा।।४४।।

घनं मुस्ता।

चित्रकैलामधोर्यष्टिर्वचा पाठा वृषा तथा। मार्द्वीका च बिडङ्गं च मञ्जिष्ठा दारुरोहिणी।। ४५।।
मनुना तेन सञ्जप्तं बन्ध्यापुत्रप्रदायकम्। भूतप्रेतपिशाचादिभयघ्नं नात्र संशयः ।। ४६।।
पञ्चगव्याज्यमेतत् स्याद्गर्भरक्षाकरं परम्। गुटिकां च पुरोः कृत्वा सहस्राष्टं हुनेत् ततः।। ४७।।

पुरोः गुग्गुलोः।

दिवसत्रितयं वापि चतुर्दिवसमेव च। भवेत् सर्वोपद्रवाणां नाशो मङ्क्षु गदस्य च।। ४८।।
अपामार्गसमिद्भिश्च हुनेदयुतसंख्यया। भूतज्वरभयव्याधिकृत्यापस्मारनाशनम् ।। ४९।।
घृताक्तैः कमलैर्हुत्वा श्रीवृद्धिं लभते नरः। आज्याक्ताभिश्च दूर्वाभिर्होमो दीर्घायुषे भवेत्।। ५०।।
पलाशभूरुट्समिद्भिर्मेधावृद्धिर्भवेत् किल। वस्त्रार्थी श्वेतकुमुदैराज्याक्तैर्जुहुयान्नरः ।। ५१।।
पशूनामृद्धिमृच्छेत[1] स हुनेत् केवलं घृतैः। उदुम्बरसमिद्धोमात् पुत्रलाभो भवत्यलम्।। ५२।।
अष्टोत्तरसहस्रं च हुनेदश्वत्थजैस्तथा । समिद्वरैरेकवर्षं मुक्तयेऽयं विधिः स्मृतः ।। ५३।।
चक्रमध्यस्थितं स्वं च चिन्तयंश्च मनुं जपेत्। एकोऽपि दुर्जयो युद्धे मर्त्यो भवति मन्त्रवित्।।५४।।
कल्पान्ताग्निनिभं चक्रं वैरिणो यस्य मूर्धनि। स्मरेत् सप्तदिनं तस्य ज्वलनप्रतिमो ज्वरः।। ५५।।
भवेत् त्रिंशद्दिनैश्चात्र प्राप्नोति मरणं ध्रुवम्। सकारं स्वरसंवीतं याहीति पदवेष्टितम्।। ५६।।
संस्मरेद्यस्य शीर्षेऽथ तस्योच्चाटो दशाहतः। मण्डलान्मरणं याति शान्तं काकनिभं रिपोः।।५७।।
मूर्ध्नि स्मरेच्च सप्ताहादुच्चाटो वा मृतिर्भयेत्। शरच्छशाङ्कप्रतिमं सुधाधाराभिवर्षणम्।। ५८।।

---

१. 'मीहेत' ख. पाठः। २. 'सान्तं' 'सार्णं' ख. पाठः।

सकारं संस्मरेन्मूर्ध्नि स जीवेच्छरदां शतम्। वह्निगेहयुगे आद्या(टान्ता)न् सप्त मध्ये षडश्रिषु।।५९।।
मन्त्रार्णानथ तेष्वेव लिखेद्यन्त्रमिदं शुभम्। आपन्निवारणं सम्यग् भूतप्रेतभयापहम् ।। ६०।।

इति। अस्यार्थः— षट्कोणं विलिख्य तन्मध्ये षट्कोणेष्वपि ठकारमालिख्य तेषु ठकारेषु मन्त्रार्णानेकैकशो विलिखेत् मध्ये साध्यनाम चेति सम्प्रदायः। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

वह्निगेहयुगे साध्यं लिखेत् तारगठाद्यकम्(ठार्णगम्)। षट्सु कोणेषु मन्त्रार्णांस्तत्सन्धिष्वङ्गमन्त्रकान्।।६१।।
ततः षोडशपत्रं स्यात् षोडशार्णाणुसंयुतान्। वेष्टितं भूपुरेणाथ कृतसम्पातमुत्तमम्।। ६२।।
गर्भिणीगर्भरक्षार्थं हितं परमदुर्लभम् । उन्मादग्रहभूतादीनभिचारांश्च नाशयेत् ।। ६३।।

इति। अस्यार्थः— षट्कोणमध्ये ठकारं तन्मध्ये प्रणवं ससाध्यमालिख्य, षट्कोणेषु शिष्टार्णानालिख्य, षट्कोणसन्धिष्वङ्गमन्त्रानालिख्य, तद्बहिः षोडशदलं पद्मं कृत्वा, तद्दलेषु षोडशाक्षरमन्त्रस्यैकैकमक्षरमालिख्य बहिश्चतुरस्रेण वेष्टयेदुक्तफलदं भवति।। तथा—

षट्कोणे प्रणवगतं च कर्म मध्ये मन्त्रार्णान् दहनयुगस्य कोणकेषु।
अङ्गाणून् विलिखतु सन्धिषूक्तमेतच्चौरादिग्रहभयनाशकं च यन्त्रम्।। ६४।।

इति। अस्यार्थः— षट्कोणमध्ये ससाध्यं प्रणवं विलिख्य कोणेषु शिष्टवर्णान् सन्धिष्वङ्गमन्त्रांश्च लिखेत्, एतदुक्तफलदं भवति।। तथा—

कृशानुगृहयुग्मके लिख ससाध्यतारं लिखेत्
षडश्रिषु मनुं च सन्धिविवरे तथाङ्गानि च।
स्वरद्वयसुकेसरं वसुदलं लिखाष्टार्णयुग्
लिपिद्वयसुकेसरं विकृतिवर्णयुक्सद्दलम्।। ६५।।
हक्षाभ्यां स्वाख्ययां वीतं पाशाङ्कुशवृतं त्रिधा। चक्रयन्त्रमिदं प्रोक्तं सर्वामयनिवारणम्।। ६६।।
सर्वभीतिप्रशमनं क्षुद्रचौरविनाशनम्। ....।।

इति। अस्यार्थः— षट्कोणं विलिख्य तन्मध्ये ससाध्यं प्रणवं विलिख्य, षट्कोणेषु मन्त्रार्णांस्तत्सन्धिषु अङ्गमन्त्रांश्चालिख्य, तद्बहिरष्टदलकमलं कृत्वा, तत्केसरेषु षोडशस्वरान् सबिन्दुकानालिख्य तद्दलेषु नारायणाष्टाक्षरवर्णान् सबिन्दुकानेकैकशो विलिख्य, तद्बहिः षोडशदलपद्मं कृत्वा तत्केसरेषु कादिसान्तान् सबिन्दुकान् द्वन्द्वशो विलिख्य, तत्पत्रेषु वक्ष्यमाणसुदर्शनषोडशाक्षरमन्त्रस्यैकैकमक्षरं विलिख्य, पद्माद्बहिः सप्तवृत्तानि कृत्वा वीथीषट्कं परिकल्प्य, तास्वभ्यन्तरगतासु तिसृषु हकारक्षकारयोर्मध्ये साध्यनामाक्षराणि कृत्वा संवेष्ट्य, बाह्यासु तिसृषु पाशाङ्कुशबीजाभ्यां वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

तारं हृद्भगव प्रोक्त्वा ते महासुपदं वदेत्। दर्शनाय हुमस्त्रान्तः षोडशार्णो मनूत्तमः।। ६७।।

तारं प्रणवः। हृन्नमः। अस्त्रं फट्। अन्यानि पदानि स्वरूपाणि। अत्र सन्धिः, ओंनमो भगवते इति।

यन्त्रेषु लिखितो ह्येष सर्वाभीष्टफलप्रदः। अष्ट रेखा लिखेत् ताश्च युगशः सम्प्रवर्धयेत्।। ६८।।
अष्टार्णान्तरितान् पादान् हृषीकेशमनोर्लिखेत्। चतुष्कोष्ठे मध्यकोष्ठत्रितये साध्यनामयुक्।।६९।।
चक्रमन्त्रं लिखेन्मन्त्री भवेत् तत्सप्तकोष्ठके। यन्त्रं भूर्जे क्षौमपट्टे कोमले कर्पटेऽपि वा।। ७०।।

सम्यक् च गुलिकीकृत्य लाक्षाभिः सम्यगावृतम्। कृतसम्पातपातं च सर्वापन्नाशनं स्मृतम्।।७१।।

इति। अयमर्थः— प्राक्प्रत्यगायता अष्टौ रेखाः कृत्वा रेखात्रितयं त्रितयमन्तरित्वा सर्वरेखाग्राणि बध्नीयात्। एवं कृते कोष्ठसप्तकं जायते। तत्राभ्यन्तरे कोष्ठत्रयं विहाय पार्श्वद्वयवर्तिकोष्ठचतुष्टये नारायणाष्टाक्षरमन्त्रवर्णद्वयमध्यस्थं ''स्थाने हृषीकेश तव'' इति श्लेकस्य चरणचतुष्टयं स्ववामभागमारभ्य दक्षिणान्तमालिख्य, मध्यकोष्ठत्रये साध्याख्यां कर्मसहितां सुदर्शनमन्त्रवर्णद्वयान्तःस्थितामालिखेत्। यथा अमुं देवदत्तं यज्ञदत्तस्य वशं कुरु २ हुं इत्याद्यभ्यूह्य लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

स्थाने हृषीकेश तव प्रकीर्त्याथ जगत्प्र च। हृष्यत्यनुरशब्दान्ते ज्यते च पदमुच्चरेत्।। ७२।।
रक्षांसि भीतानि दिशो द्रवन्ति च पदं वदेत्। सर्वे नमस्यन्ति च सिद्धसङ्घाः प्रकीर्तयेत्।। ७३।।
हृषीकेशमनुः प्रोक्तः सर्वरक्षाकरः शुभः।..।।

मन्त्रोद्धारः सुगमः। श्रीयन्त्रसारे—

षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि। चक्रमन्त्रं षडङ्गानि तत्सन्धिषु दलेष्वथ।। १।।
ऋतुपञ्चर्तुपञ्चर्तुपञ्चषट्पञ्चसंख्यकान्। स्थाने हृषीकेश—मनोर्वर्णानष्टसु केसरे।। २।।
अष्टाक्षरमनोर्वर्णानिकमेकं विलिख्य च। मातृकार्णैः समावेष्ट्य भूपुरेण च वेष्टयेत्।। ३।।
गीतात्रिष्टुब्यन्त्रमिदं सर्वरक्षाकरं परम्।..।।

इति। अस्यार्थः—षट्कोणं कृत्वा तन्मध्ये ससाध्यं तारं विलिख्य, षट्कोणेषु सुदर्शनषडक्षराक्षराणि, षट्कोणसन्धिषु आचक्रादीन् षडङ्गमन्त्रान्, तद्बहिरष्टदलकेसरेषु नारायणाष्टाक्षरवर्णाष्टकं, अष्टदलेषु स्थाने हृषीकेश तवेति श्लोकमन्त्रस्य षट्पञ्चषट्पञ्चषट्पञ्चक्रमेण वर्णान् विभज्य विलिख्य, बहिर्वृत्तयोरन्तराले मातृकार्णैरावेष्ट्य बहिश्चतुरस्रं कुर्यादुक्तफलदं भवति।। तथा—

तारं हृत् स्याद्भगवते महा प्रोक्त्वा च ङेयुतम्। सुदर्शनपदं तद्वन्महाचक्राय वै महा।। १।।
ज्वालायोक्त्वा महादीप्तरूपायेति च सर्वतः। रक्षयुग्मं मां पदान्ते महान्ते च बलाय च।। २।।
स्वाहान्तश्चक्रमन्त्रोऽयं गदितः सर्वकर्मसु। रक्षाकरः प्रसिद्धोऽयं क्रियमाणेषु कर्मसु।। ३।।
अस्यार्चनादिकं सर्वं मन्त्री पूर्ववदाचरेत्।..।।

इति। तारं प्रणवः। हृन्नमः। भगवते इत्यनेन सन्धिः। नमो भगवते इति। ङेयुतं सुदर्शनपदं सुदर्शनाय। रक्षयुग्मं मां पदान्ते मां रक्षरक्षेति। अन्यानि पदानि स्वरूपाणि।। सारसङ्ग्रहे—

अथ प्रवक्ष्यामि मनुं श्रीकरं सार्थनामकम्। येन प्रजप्तमात्रेण शक्रो लेभे श्रियं पराम्।। १।।
धृतिः शुद्धियुगं तुष्टियुतं प्रज्ञा च टान्तयुक्। रमा बिन्दुवियुक्ता च जयाग्निर्भृगुलान्तकौ।। २।।
सदीर्घौ कान्तिमद्व्योमेत्यष्टार्णः श्रीकरो मनुः। प्रणवाद्यं रमाद्यं वा केचनेच्छन्ति सूरयः।। ३।।

धृतिरुकारः। शुद्धियुगं तकारद्वयं, तुष्टियुतमिकारयुक्तं, तेन ति। प्रज्ञा पकारः, टान्तयुक् ठकारयुक्तं, तेन ष्ठ। रमा बिन्दुवियुक्ता श्री। जया ककारः। अग्नी रेफः। भृगुलान्तकौ सकारवकारौ, सदीर्घावाकारयुक्तौ, तेन स्वा। कान्तिमद् व्योम अकारयुक्तो हकारस्तेन हा इति। तथा—

वामदेव ऋषिः पङ्क्तिश्छन्दो विष्णुश्च देवता। हृद्भीषययुगं हुं च हुमन्तं त्रासय द्वयम्।। ४।।

शिरः शिखा च वर्मान्तं प्रमर्दययुगं मतम्। वर्म प्रध्वंसययुगं वर्मान्तं रक्षयद्वयम्॥ ५॥
हुमन्तमस्त्रं सम्प्रोक्तं पञ्चाङ्गानि मनोः क्रमात्। अष्टाङ्गानि न्यसेन्मन्त्रवर्णैर्मन्त्री यथाविधि॥ ६॥
पञ्चाङ्गनेत्रजठरपृष्ठेषु क्रमतो न्यसेत्। विदध्यात् करयोर्न्यासं मन्त्रार्णैरष्टभिः सुधीः॥ ७॥
दक्षतर्जन्यादिका च यावत् स्याद्वामतर्जनी। सृष्टिरेतद्वैपरीत्यं संहारो गदितः स्थितिः॥ ८॥
दक्षान्यतर्जनीपूर्वा कनिष्ठायुग्मकान्तिका। कामबाणानङ्गुलीषु ह्यङ्गुष्ठादिष्वनङ्गकान्॥ ९॥
न्यसेद् बाणार्णपुटितमातृकां विन्यसेत् सुधीः। अष्टौ तत्त्वानि विन्यसेच्छरीरे देशिकोत्तमः॥ १०॥
प्रकृतिमहदहंकृत्याकाशानिलवह्निनीरभूम्याख्यैः।
मन्त्रार्णयुतैः पदान्धुहृदास्यकहृद्हृदयसकलतनुषु॥ ११॥
न्यसेत् संहारयुक्तोऽयं[1] सर्गस्तद्विपरीतकः। तारसम्पुटमूलेन त्रिशो न्यसेत् तनौ बुधः॥ १२॥
काक्ष्यास्यहृन्नाभिगुह्यजानुपादेषु विन्यसेत्। एषा सृष्टिश्च नाभ्याद्या हृदन्ता स्थितिरीरिता॥ १३॥
सर्गव्यूत्क्रमतश्चापि संहारो मन्त्रिभिर्मतः। मूर्ध्नि मध्यातर्जनी स्यान्नेत्रेऽङ्गुष्ठस्त्वनामया॥ १४॥
वक्त्रेऽङ्गुष्ठस्तर्जनी च ह्यङ्गुष्ठकनिष्ठिके। नाभावङ्गुष्ठवर्ज्याश्चाङ्गुलयो गुह्यजानुषु ॥ १५॥
साङ्गुष्ठाः पादयुग्मे च न्यसेन्मन्त्रार्णकास्तनौ।...॥

न्यासेष्वयमङ्गुलिनियमो वैष्णवमन्त्रेषु। यत्र सृष्टिस्थितिसंहारन्यास उक्तस्तत्र सर्वत्र च ज्ञेयः।

द्व्यष्टवारं समावृत्त्या देशिको यतमानसः। मूलाधारसहृद्वक्त्रकरपन्मूलनाभिषु ॥ १६॥
गलतुन्दहृदि कूर्चपार्श्वद्वन्द्वे सपृष्ठके। आस्यनेत्रश्रोत्रघोणाहस्ताग्रे मणिबन्धके ॥ १७॥
कूर्परांसे तृतीयं स्याच्चतुर्थी च तथा भवेत्। पादाग्रकगुल्फजानुनितम्बद्वयकेषु च॥ १८॥
दोःपादसन्धिशाखासु चतुरावृत्तयः स्मृताः। करपादाङ्गुलीयुग्ममध्ये न्यासद्वयं भवेत्॥ १९॥
मूर्धाक्षिकण्ठहृदयजठरोरुपदद्वये[2]। हृदि न्यसेत् सानिलेषु धातुषु क्रमतः सुधीः[3]॥ २०॥
गण्डांसस्तनपार्श्वस्फिगुरुजङ्घाङ्घ्रिषु द्वयम्। प्रथमार्णं पादमूले परं पादाग्रजानुषु॥ २१॥
गुदाण्डगुह्यकन्देऽन्यं पार्श्वनाभौ चतुर्थकम्। वक्षःपृष्ठहृदंसेऽन्यं कण्ठवक्त्रनसान्तरे॥ २२॥
श्रोत्रनेत्रद्वये चान्यं ललाटेऽष्टममीरितम्। शिरोनेत्रादिगदितस्थानेष्वाप्रपदं न्यसेत्॥ २३॥
ततस्तनौ मूलमनुं व्यापयेन्मूर्तिपञ्जरम्। विप्रादिकांश्चतुर्वणान् आस्यहस्तोरुपत्सु च॥ २४॥

इति। शारदातिलके तु (१७। ६६)—मुखे न्यसेद् ब्राह्मणोऽस्य मुखमासीदिमं मनुम्। बाहू राजन्यः कृतोऽयं न्यस्तव्यो बाहुयुग्मके॥ १॥ ऊरू तदस्य यद्वैश्य इममूरुद्वये न्यसेत्। पदद्वये न्यसेन्मन्त्रं पद्भ्यां शूद्रो अजायत॥ २॥ इति॥

न्यसेदाभरणानीह त्वायुधानि च देशिकः। ततः सञ्चिन्तयेद्विष्णुं श्रीकरं हृदयाम्बुजे॥ २५॥

''लोककल्लोले''त्यादि बृहद्ध्यानं प्रागेवोक्तम् (पूर्वार्धे एकादशे श्वासे २४८ पत्रे)। अत्र वामाद्यधःस्थयोर्गदाकमले, तदाद्यूर्ध्वयोः शङ्खचक्रे, इति हेतिध्यानम्।

---

[1] 'योगोऽयं' ख. पाठः। [2] 'योदरोरुजानुपद्द्वये' इति पाठ उचितः। [3] 'न्यसेत्' क. पाठः। [4] 'तले' ख. पाठः।

एवं ध्यात्वा मुकुन्दं तं पीठं पूर्वोदिते यजेत्। मूर्तिं मूलेन सङ्कल्प्य तस्यामावाह्य मन्त्रवित्।।२६।।
अङ्गानि कर्णिकायां च पूजयेन्मन्त्रवित्तमः। दिग्दलेषु च सम्पूज्याः श्री रतिश्च तथा धृतिः।। २७।।
कान्तिश्च वर्णभेदैस्तु रक्तश्वेतासितादिभिः। मूर्तीर्यजेद्विदिक्पत्रेष्विन्द्रादींस्तद्बहिः क्रमात्।। २८।।
वज्रादींश्च यजेत् पश्चाच्छीकरार्चा समीरिता।...।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नमः। मुखे पंक्तिच्छन्दसे नमः। हृदये श्रीकराय देवतायै नमः। इति विन्यस्य ममेष्टसिद्धये विनियोग इति प्राग्वदुक्त्वा, भीषय २ हुं हृदयाय नमः। त्रासय २ हुं शिरसे०। प्रमर्दय २ हुं शिखा०। प्रध्वंसय २ हुं कवचं०। रक्षय २ हुं अस्त्रं०। इति पञ्चाङ्गमन्त्रान् प्राग्वद्विन्यस्य, हृदये उंनमः। शिरसि त्तिंनमः। शिखायां ष्ठंनमः। कवचस्थाने श्रींनमः। अस्त्रस्थाने कंनमः। नेत्रयोः रंनमः। इति नेत्रान्तं षडङ्गेषु विन्यस्य, उदरे स्वांनमः। पृष्ठे हांनमः। इत्यष्टाङ्गं विन्यस्य, (दक्ष) तर्जन्यां उंनमः। मध्यमायां त्तिं०। अनामिकायां ष्ठं०। कनिष्ठिकायां श्रीं०। (वाम) कनिष्ठायां कं०। अनामिकायां रं०। मध्यमायां स्वां०। तर्जन्यां हांनमः। इति सृष्टिः। वामतर्जनीमारभ्य दक्षतर्जनीपर्यन्तं संहारः। दक्षतर्जन्यां उंनमः। मध्यमायां त्ति०। अनामिकायां ष्ठं०। कनिष्ठायां श्रीं०। वामतर्जन्यां कं०। मध्यमायां रं०। अनामिकायां स्वां०। कनिष्ठायां हांनमः। इति स्थितिन्यासः।। अथ प्रथमतः संहारन्यासं कृत्वा ततः सृष्टिस्थितिन्यासौ कार्यौ।। अङ्गुष्ठयोः द्रांद्राविण्यै नमः। तर्जन्योः द्रींक्षोभिण्यै०। मध्यमयोः क्लींवशीकरिण्यै०। अनामिकयोः ब्लूंआकर्षिण्यै०। कनिष्ठयोः सःमोहिन्यै०। अङ्गुष्ठयोः ह्रींकामाय नमः। तर्जन्योः क्लींमन्मथाय०। मध्यमयोः ऐंकन्दर्पाय०। अनामिकयोः ब्लूंमकरध्वजाय०। कनिष्ठयोः स्त्रींमीनकेतवे०। द्रांद्रींक्लींब्लूंसः अं सःब्लूक्लींद्रींद्रां नमः।। एवं रीत्या मातृकां विन्यस्य, पादयोः हांपृथिवीतत्त्वाय नमः। लिङ्गे स्वांजलतत्त्वात्मने नमः। हृदि रंअग्नितत्त्वात्मने नमः। मुखे कंवायुतत्त्वात्मने०। शिरसि श्रींआकाशतत्त्वात्मने नमः। हृदि ष्ठंअहङ्कारतत्त्वात्मने०। हृदये त्तिंमहत्तत्त्वात्मने०। सर्वाङ्गे उंप्रकृतितत्त्वात्मने नमः। इति संहारन्यासः।। ततः सर्वाङ्गे— उंप्रकृतितत्त्वा०। हृदये त्तिंमहत्तत्त्वा०। हृदि ष्ठंअहङ्कारतत्त्वा०। शिरसि श्रीआकाशतत्त्वा०। मुखे कंवायुतत्त्वा०। हृदि रंअग्नित्तत्त्वात्मने०। लिङ्गे स्वांजलतत्त्वात्मने०। पादयोः हांपृथिवीतत्त्वा०।। इति सृष्टिन्यासः। अत्रापि उंनमः परायेत्यादिना न्यासे प्राग्वद्योजनीयम्।। ततः प्रणवसम्पुटितमूलमन्त्रेण त्रिर्व्यापकन्यासं कृत्वा, ततः पादयोः उंनमः। जाजुनोः त्तिं०। गुह्ये ष्ठंनमः। नाभौ श्री०। हृदि कं०। मुखे रं०। नेत्रयोः स्वां०। शिरसि हां०।। शिरसि उंनमः। नेत्रयोः त्तिं०। मुखे ष्ठं०। हृदि श्रीं०। नाभौ कं०। गुह्ये रं०। जानुनोः स्वां०। पादयोः हांनमः।। नाभौ उंनमः। गुह्ये त्तिं०। जानुनोः ष्ठं०। पादयोः श्रीं०। शिरसि कं०। नेत्रयोः रं०। मुखे स्वा०। हृदि हांनमः।। अत्र न्यासे प्रमाणोक्ताङ्गुलयो ग्राह्याः[1]। (१) मूलाधारे उंनमः। हृदि त्तिं०। मुखे ष्ठं०। दक्षबाहुमूले श्रीं०। वामे कं०। दक्षोरुमूले रं०। वामे स्वां०। नाभौ हां०।। (२) गले उंनमः। उदरे त्तिं०। हृदि ष्ठं०। दक्षस्तने श्रीं०। वामे कं०। दक्षपार्श्वे रं०। वामे स्वां०। पृष्ठे हां०।। (३) मुखे उंनमः। नेत्रयोः त्तिं०। श्रोत्रयोः ष्ठं०। नसोः श्रीं०। हस्ताग्रयोः कं०। मणिबन्धयोः रं०। कूर्परयोः स्वां०। अंसयोः हां०।। (४) दक्षपादाग्रे उंनमः। वामे त्तिंनमः। दक्षगुल्फे ष्ठं०। वामे श्रीं०। दक्षजानुनि कं०। वामे रं०। दक्षनितम्बे स्वां०। वामे हां०।। (५) दक्षदोर्मूले उंनमः। मध्ये त्तिं०। मणिबन्धे ष्ठं०। अङ्गुष्ठादिपञ्चाङ्गुलीषु एवं पञ्चवर्णान् न्यसेत्।। (६) एवं

---

[1] 'बोद्धव्याः' ख. पाठः।

वामदोर्मूलादिषु न्यसेत्।। (७) एवं दक्षोरुमूलजानुगुल्फपञ्चाङ्गुलीषु न्यसेत्।। (८) एवं वामोरुमूलादिषु।। (९) दक्षकराङ्गुष्ठतर्जन्योर्मध्यमामारभ्य वामाङ्गुष्ठतर्जन्योर्मध्यमावधि त्वष्टसु स्थानेषु न्यसेत्।। (१०) एवं पादयोरङ्गुल्यन्तरालेषु।। (११) मूर्ध्नि उंनमः। नेत्रयोः त्तिं०। कण्ठे ष्ठं०। हृदि श्रीं०। उदरे कं०। ऊरुद्वये रं०। जानुनोः स्वां०। पादयोः हां०।। (१२) हृद्येव त्वचि उं०। रक्ते त्तिं०। मांसे ष्ठं०। मेदासे श्रीं०। अस्थ्नि कं०। मज्जायां रं०। शुक्रे स्वां०। प्राणे हांनमः।। (१३) दक्षगण्डे उंनमः। दक्षांसे त्ति०। दक्षस्तने ष्ठं०। दक्षपार्श्वे श्रीं०। दक्षस्फिजि कं०। दक्षोरो रं०। दक्षजङ्घायां स्वां०। दक्षपादे हां०।। (१४) एवं वामगण्डादि।। (१५) पादतलयोः उंनमः। पादाग्रजानुषु त्तिं०। गुदवृषणगुह्यमूलेषु ष्ठं०। पार्श्वद्वयनाभिषु श्रीं०। वक्षःपृष्ठहृदंसेषु कं०। कण्ठवक्त्रनासासु रं०। श्रोत्रनेत्रेषु स्वां०। ललाटे हां०। (१६) शिरसि उंनमः। नेत्रयोः त्तिं०। मुखे ष्ठं०। हृदये श्रीं०। नाभौ कं०। गुह्ये रं०। जानुनोः स्वां०। पादयोः हांनमः।। इति षोडशधा मूलमन्त्राक्षराणि विन्यस्य, मूलेन व्यापकं कृत्वा प्रागुक्तमूर्तिपञ्जरन्यासं कृत्वा, मुखे ब्राह्मणोऽस्य मुखमासीन्नमः। हस्तयोः बाहू राजन्यः कृत०। ऊर्वो ऊरू तदस्य यद्वैश्यः०। पादयोः पद्भ्यां शूद्रो अजायत०। इति विन्यस्य, शिरसि किरीटाय नमः। कर्णयोः मकरकुण्डलाय नमः। गले कौस्तुभाय ग्रैवेयाय०। वक्षसि श्रीवत्साय हाराय०। बाहुषु अङ्गदेभ्यो केयूरेभ्यो नमः। कट्यां मणिमेखलायै० पीताम्बराय० इति विन्यस्य, वामदक्षोर्ध्वहस्तयोः शङ्खाय०। चक्राय०। वामदक्षाधोहस्तयोः गदाय०। पद्माय०। इति विन्यस्य, ध्यानादिपुष्पोपचारान्ते कर्णिकायामेवाङ्गानि सम्पूज्य, दिग्दलेषु श्रियै नमः। रत्यै०। धृत्यै०। कान्त्यै०। इति सम्पूज्य, विदिग्दलेषु पूर्वोक्तवासुदेवादिचतुर्मूर्तीः सम्पूज्य लोकपालार्चादि प्राग्वत् कुर्यादिति। तथा—

अष्टलक्षं जपेन्मन्त्रं नियमस्थो जितेन्द्रियः। जुहुयात् तद्दशांशेन बिल्वदुग्धद्रुतर्पणैः।। २९।।

तर्पणैः समिद्भिः।

अब्जैर्दुग्धान्नसुघृतैस्तर्पणादि ततश्चरेत्। गुरुं सन्तोष्य वित्ताद्यैः सिद्धमन्त्रो भवेद् ध्रुवम्।। ३०।।
ततः कुर्वीत मन्त्रज्ञः प्रयोगानिष्टसिद्धये। दुग्धाप्लुतैः सरसिजैरयुते जुहुयाच्छ्रिये।। ३१।।

अयुते अयुतद्वयम्।

मधुरत्रयसंयुक्तैः पलाशकुसुमैर्हुनेत्। मेधावी जायते शीघ्रं यशसे च तिलैर्हुनेत्।। ३२।।
कान्त्यै प्रजुहुयाद्धीमान् केवलाज्येन मन्त्रवित्। पयःप्लुतगुडूच्याश्च खण्डैः प्रजुहुयाद् बुधः।।३३।।
दीर्घमायुरवाप्नोति ह्यरोगी मन्त्रवित्तमः। त्रिस्वादुयुक्तं लवणं हुनेन्निशि सहस्रकम्।। ३४।।
अष्टाधिकं च मासेन सोऽमरस्त्रीर्वशं नयेत्। का कथा मर्त्ययोषासु वाङ्मात्रवशगासु च।। ३५।।
दशपुष्पदारुभस्म सञ्जप्तं मनुनामुना। त्रिसहस्रं धृतं मूर्ध्ना पापरोगहरं परम्।। ३६।।
जनतावश्यकृदेतत् प्रथितं सर्वकामदम्। घृताक्तदूर्वाचरुभ्यां हुनेदयुतसंख्यया ।। ३७।।
भुञ्जीयाद् हुतशिष्टं च चरुं दद्याच्च दक्षिणाम्। गुरवे तर्पयेद्विप्रान् वस्त्रालङ्करणैः शुभैः।। ३८।।
शापापमृत्युरोगादि नश्यत्यायुश्च विन्दति। उत्क्षिप्तबाहुः पुरुषः प्रत्यहं रविबिम्बके।। ३९।।
नयस्तदृष्टिश्चाष्टशतं जपेत् प्राप्नोत्यतन्द्रितः। महाधनाढ्यमचिरादन्नाद्यं पशुकादिकम् ।। ४०।।
दुग्धमध्ये प्रातरमुं रमेशं तर्पयेद्बुधः। अष्टाधिकं सहस्रं तु स लभेदचिराद्धनम्।। ४१।।

सुमृष्टमन्त्रं च वने लभते भृत्यवर्गयुक्। वश्याकर्षणसम्मोहस्तम्भोच्चाटनमारणम्।। ४२।।
कुर्यादनेन मनुना यथाद्रव्यैः सुशोभनैः। किं बहूक्तेन मनुना निखिलं साधयेत् सुधीः।। ४३।।
य एवं श्रीकरं विष्णुं भजेद्भक्तियुतो नरः। भुक्त्वेह सकलान् भोगान् याति विष्णोः परं पदम्।।४४।।

इति।। तथा—

श्रीमन्नारायणस्य तदनु चरणौ शरणं स्यात्प्रपद्ये। ङेन्तं श्रीमच्चरणमपि च नमस्तत्त्ववर्णोऽयमुक्तः।।४५।।

"श्रीमन्नारायणस्य चरणौ शरणं प्रपद्ये श्रीमच्चरणाय नमः"।। (२४) (तत्त्ववर्णश्चतुर्विंशतिवर्णः।।) तथा—

ऋष्याद्याः पूर्वमुक्तासमशरमनुना पञ्च चाङ्गानि कुर्यात्।
पूजाहोमादि सर्वं समुदितविधिना मुक्तिदो मन्त्र एषः।। ४६।।

असमशरमनुना कामबीजेन, तेन क्लांक्लींक्लूंक्लैंक्लौंक्लः इति।। सम्मोहनतन्त्रे—

अथ वक्ष्ये महादेवि मन्त्रं श्रीपुरुषोत्तमम्। धर्मार्थसुखमोक्षाप्तिफलदं योषितां नृणाम्।। १।।
प्रवरं मन्त्ररत्नं ते सर्वतन्त्रेषु गोपितम्। अतिगुह्यतमं देवि दौर्भाग्यव्याधिनाशनम्।। २।।
दारिद्र्यनाशकं देवि जरामरणनाशकम्। शोकभीतिहरं देवि मन्त्रं त्रैलोक्यमोहनम्।। ३।।
वश्याकर्षणविद्वेषमारणोच्चाटकारकम्। स्तम्भकारकमन्तर्धिबिलसिद्धिकरं परम्।। ४।।
शत्रुभिः परिभूतैश्च सर्वविघ्नैरुपद्रुतैः। हृतार्थैः क्लिष्टसंसारवासिभिर्दुःखितैर्जनैः।। ५।।
भर्तृराजाभिभूतैश्च विघ्नार्तैः पुत्रकाङ्क्षिभिः। भृत्यार्थिभिश्च सङ्ग्रामे विजयाकाङ्क्षिभिर्जनैः।।६।।
योषाभिश्चैव संसेव्यं मन्त्रं श्रीसुखमोक्षदम्। शृणु सम्यक् समासेन सर्वलोकसुखप्रदम्।। ७।।
मायारमातारमारबीजानि हृदयं वदेत्। लोहितं कर्णयुक्तं च वदेद्वह्निमुना तथा।। ८।।
षोत्तमाप्रतिरूपं च लक्ष्मीपदमतः परम्। निवाससकलं प्रोक्त्वा जगत्क्षोभणमुच्चरेत्।। ९।।
सर्वस्त्रीहृदयान्ते विदारणस्त्रिभुतो वनम्। मनोन्मादकरान्ते च स्वग्न्यनन्तौ सुरं वदेत्।। १०।।
मनुजं सुन्दरीं चैव जनमुक्त्वा मनांसि च। तापयेति द्विरुच्चार्य वदेद् दीपय शोषय।। ११।।
मारय स्तम्भय द्रावयाकर्षय पदं द्विशः। आवेशय च परमं सुभग सर्वमुच्चरेत्।। १२।।
सौभाग्यान्ते करपदं सर्वकामप्रदेति च। अलक्ष्मीर्हनयुग्मं च चक्रेण गदया पुनः।। १३।।
खड्गेन सर्वबाणैश्च भिन्दयुग्मं ततो वदेत्। पाशेन बन्धद्वितयमङ्कुशेन द्विताडय।। १४।।
तुरुयुग्मं च किं तिष्ठसि तावद्यावदीरयेत्। समीहितं च मे सिद्धं भवति क्लीं सवर्म च।। १५।।
अस्त्रहृच्छक्तिमामारप्रणवांश्च समुच्चरेत्। पुरुषोत्तममन्त्रोऽयं प्रोक्तः सर्वसमृद्धिदः ।। १६।।
पूर्वबीजेन मायान्तेनान्त्यबीजेन चोचिरे। आचार्याः केचनेत्युक्त्वा ह्यावेशय—पदद्वयम्।। १७।।
मोहय—द्वितयं ब्रूयुस्तम्भयद्वयतः परम्। हुं मादौ क्लींच नेच्छन्ति तथा परमपूर्वतः।। १८।।
समस्तशब्दं प्रोचुश्चालक्ष्मीस्थानेऽमुकं पदम्।...।।

इति। माया ह्रीं, रमा श्रीं, तारः प्रणवः, मारः क्लीं, हृदयं नमः, लोहितः पकारः कर्ण उ तेन पु, वह्नी रेफ उना उकारेण तेन रु, षोत्तमाप्रतिरूपं स्वरूपं, लक्ष्मी स्वरूपं, निवाससकल स्वरूपं, जगत्क्षोभण स्वरूपं, सर्वस्त्रीहृदय

स्वरूपं, विदारण त्रिभुवनमनोन्मादकरस्वरूपं, सु स्वरूपं, अग्नी रेफ: अनन्त आ तेन रा, सुर स्वरूपं, मनुजसुन्दरीजन-स्वरूपं, मनांसि स्वरूपं, तापयेति द्विस्तापय तापय, दीपय शोषय मारय स्तम्भय द्रावयाकर्षय, द्विशस्तत्पदानि[१] द्विर्द्विरुच्चरेदित्यर्थ:। आवेशय स्वरूपं, चकाराद्द्वि:। परमसुभगसर्व स्वरूपं, सौभाग्यकर स्वरूपं, सर्वकामप्रद स्वरूपं, अलक्ष्मी: स्वरूपं, हनयुग्मं हनहन, चक्रेण गदया स्वरूपं, खड्गेन सर्वबाणैश्च स्वरूपं, भिन्दयुग्मं भिन्दभिन्द, पाशेन स्वरूपं, बन्धद्वितयं बन्धबन्ध, अङ्कुशेन स्वरूपं, द्विस्ताडय ताडय ताडय, तुरुयुग्मं तुरुतुरु, किं तिष्ठसि तावद्यावत् स्वरूपं, समीहितं मे सिद्धं भवति स्वरूपं, क्लीं स्वरूपं, वर्म हुं, अस्त्रं फट्, हृन्नम:, शक्ति: ह्रीं, मा श्रीं, मार: क्लीं, प्रणव: ओं,। तथा–

जैमिनिर्मुनिरस्योक्तश्छन्दोऽमिततीरितम् । त्रैलोक्यमोहनतनुर्देवता पुरुषोत्तम: ।।१९।।
षडङ्गानि मनोर्देवि नेत्रान्तानि प्रकल्पयेत्। हुंफडन्तानि च शिवे तारमारादिकानि च।। २०।।
वदेत् पूर्वं च पुरुषोत्तमं त्रिभुवनं वदेत्। मनोन्मादकरं हृच्च सकलान्ते जगत्पदम्।। २१।।
क्षोभणं प्रवदेल्लक्ष्मीदयितेति शिरो मतम्। मन्मथोत्तं वदेन्माङ्गजकामान्ते च दीपन।। २२।।
शिखामन्त्रश्च परमं वदेत् सुभगशब्दत:। सर्वसौभाग्यकरतो वदेदप्रतिरूपक।। २३।।
केशव स्मरयुग्वर्म सुरासुरपदं वेदत्। मनुजान्ते सुन्दरी च हृदयान्ते विदारण।। २४।।
सर्वप्रहरणान्ते च धरसर्वपदं वदेत्। कामिकं हनयुग्मं च हृदयान्ते च बन्धना।। २५।।
न्याकर्षयाकर्षयाथ वदेच्चाथ महाबलम्। अस्त्रमन्त्रस्त्रिभुवनेश्वरसर्वजनं वदेत्।। २६।।
मनांसि हनयुग्मं च दारय–द्वन्द्वतश्च मे। वशमानययुग्मं च नेत्रमन्त्र उदाहृत:।। २७।।
विन्यस्यैवं षडङ्गानि द्वादशाङ्गानि विन्यसेत्। हृदाद्युदरपृष्ठेषु करपृष्ठोरुजानुषु।। २८।।
पादे च कुर्यान्मन्त्रस्य पदानि द्वादशैव तु। शक्तिश्रीमारबीजानि संबुद्ध्यन्तान्यणोर्न्यसेत्।। २९।।
तारादीनि हृदाद्यानि परायेत्यस्य चोर्ध्वगम्। मूर्तयो द्वादश तथा पुरुषाद्या: परेश्वरि।। ३०।।
आत्मङेन्ता: नमोन्ताश्च पुरुष: सत्यकाच्युतौ। चत्वारो वासुदेवाद्यास्तद्वन्नारायण: शिवे।। ३१।।
ब्रह्मविष्णुनृसिंहाश्च वराहो द्वादश: स्मृत:। ततो व्यापकमन्त्रेण व्यापकं विन्यसेत् तनौ।। ३२।।
त्रैलोक्यमोहनपदं हृषीकेशाप्रतीति च। रूप मन्मथ सर्वस्त्रीहृदयाकर्षणं वदेत् ।। ३३।।
आगच्छ हृदयं चैव व्यापकाणु: समीरित:। आयुधानां च मनवो वक्ष्यन्ते क्रमश: शिवे।। ३४।।
वेदादिमारबीजाद्या: सर्वे मन्त्रा: महेश्वरि। सुदर्शनमहाचक्रराजान्ते दहयुग्मकम् ।। ३५।।
सर्वदुष्टभयं ब्रूयात् कुरु छिन्द द्विभिन्दयुक्। भूयो विदारय–द्वन्द्वं परमन्त्रान् ग्रसद्वयम्।। ३६।।
भक्षयद्वयं भूतानि त्रासय द्विर्हुमस्त्रकम्। स्वाहा चक्राय हृदयं चक्रमन्त्र उदाहृत:।। ३७।।

अस्त्रं फट्, हृदयं नम:। सुगममन्यत्।

वदेज्जलचरायेति द्विठ: शङ्खमनु: प्रिये। हुंफडन्त: खड्ग तीक्ष्ण भिन्दयुग्मं वदेत्तत:।। ३८।।

---

१. 'एतत्पदषट्कं' ख. पाठ:।

खड्गमन्त्रो महेशानि धनुर्मन्त्रं शृणु प्रिये। शार्ङ्गाय सशरायाथ हुंफडन्तो गदामनुः।। ३९।।
कौमोदकि महाशब्दबले सर्वासुरान्तकि। प्रसीद हुंफट् स्वाहान्तः संवर्तकपदं वदेत्।। ४०।।
मुसलं पोथयद्वन्द्वं हुंफट् स्वाहान्तको मनुः। मुसलस्याङ्कुशस्याणुरङ्कुशं कचयुग्मकम्।। ४१।।
हुंफट् स्वाहान्तकः प्रोक्तः पाश बन्धयुगं वदेत्। आकर्षययुगं हुंफट् स्वाहान्तः पाशमन्त्रकः।।४२।।
एवमायुधमन्त्रास्ते मया प्रोक्ता महेश्वरि। पक्षिराजायाग्निवधूः पक्षिराजमनुर्मतः ।। ४३।।
त्रैलोक्यमोहनायाथ विद्महेऽन्ते स्मराय च। धीमहीति ततस्तन्नो वदेद्विष्णुः प्रचोदयात्।। ४४।।
पुरुषोत्तमगायत्री जपार्चासु विशिष्यते। ततः कराङ्गुलिष्वेतान् बाणान् कामांश्च विन्यसेत्।।४५।।
द्रामाद्यां द्राविणीं देवि द्रींमाद्यां क्षोभिणीमपि। क्लींवशीकरिणीं भद्रे ब्लूंबीजाद्यां महेश्वरि।।४६।।
आकर्षिणीं महेशानि सर्गान्तभृगुपूर्वकम्। सम्मोहिनीं क्रमादेवं बाणन्यासोऽयमीरितः।। ४७।।
काममन्मथकन्दर्पमकरध्वजसंज्ञकाः । मीनकेतुर्महेशानि पञ्चमः परिकीर्तितः ।। ४८।।
पराबीजं मध्यबाणं वाग्भवं परमेश्वरि। तुर्यबाणं ततश्चैव स्त्रीबीजं च क्रमात् प्रिये।। ४९।।
कामबीजप्रपुटितां मातृकां विन्यसेत् प्रिये। विन्यसेन्मारमालां तु वर्णानानाभि मन्त्रवित्।। ५०।।
चत्वारिंशन्मातृकां च ततः पञ्च न्यसेत् सुधीः। जठरे हृदये कण्ठे वक्त्रे नसि ततः प्रिये।।५१।।
त्रीनर्णान् व्यापयेद् देहे समस्तेन सकृत्तथा। व्यापकं विन्यसेद् देहे कामांश्चैव सशक्तिकान्।। ५२।।
कन्दर्पमातृकापूर्वान् मातृकावत् प्रविन्यसेत्। दाडिमीकुसुमाभांश्च वामाङ्केशक्तिसंयुतान् ।।५३।।
सौम्यान् रक्ताम्बरान् सर्वान्[1] पुष्पबाणेक्षुकार्मुकान्। बिभ्राणान् सर्वभूषाढ्यान् मन्त्री कामान् स्मरेत् प्रिये।।
शक्तयः कुङ्कुमनिभाः सर्वाभरणभूषिताः। नीलोत्पलकरा ध्येयाः स्त्रैलोक्याकर्षणक्षमाः।। ५५।।
न्यसेत् कामरती पश्चात् कामदं च सुरेश्वरि। प्रीतिं च कामिनीकान्तौ कान्तिमान् मोहिनीयुतः।।५६।।
कामगः कमला तद्वत् कामबाणो विलासिनी। कामकल्पलते तद्वत् कामुकश्यामले तथा।। ५७।।
कामवर्धनसंयुक्ता विज्ञेया च शुचिस्मिता। रामश्च विस्मिताक्षी च विशालाक्षीयुतो रमः।। ५८।।
रमणो लेलिहाना च रतिनाथदिगम्बरे। रतिप्रियश्च रामा च रात्रिनाथश्च कुब्जिका।। ५९।।
रमाकान्तयुता कान्ता रममाणश्च नित्यया। निशाचरश्च कल्याणी नन्दको भोगिनीयुतः।। ६०।।
नन्दनः कामदायुक्तो नन्दी चापि सुलोचना। सुलोपिन्या युतो देवि तथा नन्दयिता पुनः।। ६१।।
पञ्चबाणश्च मर्दिन्या कहलप्रियया युतः। विज्ञश्चैव महादेवि रतिपूर्वसखा प्रिये।। ६२।।
पुष्पधन्वा वराक्षी च सुमुख्या च महाधनुः। भ्रामणो नलिनीयुक्तो भ्रमणो जटिनीयुतः।। ६३।।
(भ्रममाणश्च पालिन्या भ्रमश्च शिवया युतः। भ्रान्तमुग्ध ततो देवि भ्रामको रमया युतः।।६४।।)
भृङ्गो भ्रमा ततः पश्चाद् भ्रान्तचारश्च लोलया। भ्रमावहश्चञ्चला च मोहनो दीर्घजिह्वया।। ६५।।
रतिप्रियामोहकौ च लोलाक्ष्या मोह एव च। मोहवर्धनभृङ्गिन्यौ मदनः पाटलायुतः।। ६६।।

---

[1] 'कामान्' ख. पाठः।

मन्मथो मदनायुक्तो मातङ्गो मालया युतः। भृङ्गनायकहंसिन्यौ गायनो विश्वतोमुखी।। ६७।।
जगदानन्दिनीयुक्तो गीतिज्ञस्तदनन्तरम्। नर्तको रमणीयुक्तो खेलकः कान्तिसंयुतः।। ६८।।
उन्मत्तः कलकण्ठी च मत्तकश्च वृकोदरी। विलासिमेघश्यामे च सोन्मत्तो लोभवर्धनः।। ६९।।
तत्त्वन्यासं ततः कुर्यात् पार्श्वद्वययुतेषु च। नाभिगुह्यगुदेषु स्यात् पादसन्ध्यङ्गुलीषु च।। ७०।।
अर्काभमारबीजस्य न्यासः सर्वसमृद्धिदः। द्वादशाक्षरमन्त्रस्य न्यासत्रयमथो बुधः।। ७१।।
कुर्यात् संहारसृष्टी च स्थितिश्चैव प्रकीर्तिता। मूर्तिपञ्जरविन्यासं कुर्यान्मन्त्री समाहितः।। ७२।।
पूर्वोदिताया गायत्र्या वर्णान् न्यसेत् तनौ बुधः। कभालदृद्वन्द्वदोःपत्सन्ध्यग्रेषु तनौ च सः।। ७३।।
षडङ्गं द्वादशाङ्गं च बाणानङ्गान् प्रविन्यसेत्। श्रीं स्वां श्रिये नमस्त्वेष श्रियो मन्त्र उदाहृतः।।७४।।
सव्योरौ[1] विन्यसेदेवं मन्त्रं देवेशि मन्त्रवित्। लक्ष्म्याद्याः पुष्टिपर्यन्ता ङेयुताश्च हृदन्तिकाः।। ७५।।
ह्रस्वत्रयक्लीबबिन्दुवर्ज्यस्वरयुतो भृगुः। लान्तयुक् सेन्दुखण्डः स्वबीजन्यासं महेश्वरि।। ७६।।
न्यस्तव्या बीजपूर्वास्ताः कास्यकण्ठेषु गुह्यके। ककुद्धृन्नाभिसर्वाङ्गे व्यापकाणुं न्यसेत् प्रिये।।७७।।
ऋष्यादिकं च विन्यस्य भूषणानि न्यसेत् प्रिये। आयुधाणून् यस्थास्थानं तत्तन्मुद्राभिरद्रिजे।। ७८।।
विन्यसेन्मन्त्रिवर्योऽसौ श्रीवत्सं कौस्तुभं तथा। वनमालां मारबीजैर्यथास्थानं न्यसेत् प्रिये।। ७९।।
ऊर्ध्वाङ्गुष्ठौ मिथः श्लिष्टौ मुष्टिं मूर्ध्नि नियोजयेत्। त्रैलोक्यमोहनाख्येयं मुद्रैनां मूर्ध्नि विन्यसेत्।।८०।।
एवं न्यस्तशरीरोऽसौ ध्यायेच्छ्रीपुरुषोत्तमम्। उद्यानं संस्मरेदादौ सर्वपुष्पोपशोभितम्।। ८१।।
अनल्पकल्पविटपिमञ्जरीराजिराजितम्। मञ्जरीसुरभिपूरपूरिताशामुखं प्रिये ।। ८२।।
निरन्तरपरिभ्रान्तमधुव्रतकदम्बकम्। आमोदपण्यस्थानाभमिन्द्रियाणां सुखप्रदम्।। ८३।।
आत्मयोनेरिव प्रायो मनोज्ञं जननस्थलम्। शृङ्गारलक्ष्म्या इव सत्केलिसद्म मनोरमम्।। ८४।।
रते रतिसुखप्रायमृतूनां जन्मभूरिव। उपमानं मनोज्ञानां नेत्रसाफल्यकारकम् ।। ८५।।
आश्चर्यभूतवस्तूनां दृष्टान्तं केवलं प्रिये। अस्मिन् कल्पद्रुमं देवि स्मरेन्मन्त्री समाहितः।।८६।।
लसन्महाबीज[2]मणिमयमूलमनोरमम् । प्रत्यग्रवज्राश्ममयप्रकाण्डविलसत्तनुम् ।। ८७।।
प्रोल्लासिजाम्बूनन्दवद्दीर्घशाखमकृत्रिमम्। हरिन्मणिप्रौढदलं लसद्विद्रुमपल्लवम्।। ८८।।
अनर्घ्यमणिपुष्पं च मुक्तारुचिरकेसरम्। निपीय पीयूषनिभं मधु पुष्पोदरोद्धृतम्।। ८९।।
रागाज्जरामतीतैस्तैः षट्पदानां समूहकैः। निजयोषित्सहायैश्च गीयमानं विलासिभिः।। ९०।।
शाखाभुजैरर्थिजनव्रजायाशु धनव्रजम्। प्रयच्छन्तं, स्रवत्तोयधाराः पुष्परसोद्भवाः।। ९१।।
दानाम्बुधाराश्रियमुद्वहन्तीव च यस्य, तम्। विवर्तमानरुचिरभ्रमराल्यक्षिमालकम्।। ९२।।
मूर्ध्ना घोरातपोद्द्योतसेवितैः समुनोजलैः। स्नातं तथा तपस्यन्तं नेतुं प्रत्यक्षतामिव।। ९३।।
श्रीमन्तमम्बुजाक्षं तं तस्य मूले मनोहरे। माणिक्यकुट्टिमोद्भूतभूतले पीठमुत्तमम्।। ९४।।

---

[1] 'सव्यासे' ग. पाठः। [2] 'नील' क. ग. पाठः।

अरुणाम्बुजमध्यस्थमस्मिन् प्रद्योतनप्रभम्। गरुडं पक्षिराजं तत्स्कन्धारूढमथास्य तम्।। ९५।।
स्मरेद् रथाङ्गपाणिं तु सूर्यकोटिसमप्रभम्। लावण्यपरिपूर्णोद्यन्नवयौवनकोमलम् ।। ९६।।
अङ्गसौन्दर्यशोभोच्चधिक्कृताङ्गजदर्पकम्। मन्दान्दोलितरक्ताक्षं कामबाणौघविह्वलम्।। ९७।।
मणिभूषणदीप्ताङ्गं दिव्यगन्धाम्बरावृतम्। प्रभयारुणया विश्वं रञ्जयन्तं महेश्वरि ।। ९८।।
यक्षगन्धर्वदेवौघकामिनीशतसेवितम् । नीलकुञ्चितकेशौघविलसत्सुप्रसूनकम् ।। ९९।।
माध्वीकलोलुपालीनां ह्यद्यनादमनोरमम्। कन्दर्पचापविलसच्चटुलालिसदृग्भ्रुवम् ।।१००।।
पद्मपत्रविशालाक्षं लोकनैः कामिनीजनम्। मोहयन्तं महारत्नमौलिद्युतिविराजितम्।। १०१।।
उल्लसद्विद्रुमशिलाशकलारुणिताधरम्। पक्वबिम्बाधरं देवि नासावंशमनोरमम्।। १०२।।
आलोलकुण्डलरुचा समुद्योतिकपोलकम्। विलसत्कल्पपुष्पौघदामभूषितसद्गलम्।। १०३।।
वाह्वष्टकं तथा ध्यायेत् क्वणत्कङ्कणमण्डितम्। अशोकपल्लवाकारविलसद्विद्रुमोपमाः।। १०४।।
कराद्यङ्गुलयो ध्येया नानारत्नाङ्गुलीयकाः। दक्षिणाधःकरे चक्रं चिन्तयेदर्कभास्वरम्।। १०५।।
खड्गं तथोपरितने मुसलं च तदुत्तरे। तथोर्ध्वदक्षिणे हस्ते चिन्तयेद्रुचिराङ्कुशम्।। १०६।।
वामोर्ध्वे चिन्तयेत् पाशं तदधः शङ्खमेव च। सशरं च धनुर्वामे गदां ध्यायेदधः करे।। १०७।।
वक्षःस्थलं हरेर्ध्यायेल्लक्ष्मीकुचविमर्दितम्। श्रीवत्सकौस्तुभोद्भासि विशालकमनीयकम्।। १०८।।
मनोरमसमुद्द्योतिवनमालास्वलङ्कृतम् । गम्भीरदक्षिणावर्तनाभिमण्डलमण्डितम् ।। १०९।।
हेमाभपीतवस्त्रेण संशोभि जघनं स्मरेत्। आरक्तनखरत्नैश्च स्वङ्गुलीयैर्विराजितौ।। ११०।।
रक्तोत्पलनिभौ पादौ चिह्नितौ ध्वजवारिजैः। सुनूपुरौ हरेर्ध्यायेज्ज्ञानैश्वर्यप्रदायकौ ।। १११।।
वामोरौ संस्थितां ध्यायेल्लक्ष्मीं स्वर्णसमप्रभाम्। क्वणन्नूपुरपादाब्जां बृहद्रत्ननितम्बिनीम्।। ११२।।
तनुमध्यां घनोत्तुङ्गचारुपीनपयोधराम्। रणत्कङ्कणबाह्वग्रां नानारत्नाङ्गुलीयकाम् ।। ११३।।
विद्रुमारुणबिम्बोष्ठीं नीलोत्पलविलोचनाम्। दीर्घालिकान्तिमत्स्निग्धनीलकुञ्चितमूर्द्धजाम्।। ११४।।
मुक्तामालां शिरोभागाद् दधानां लोलकुण्डलाम्। कण्ठात् स्तनयुगं यावन्मुक्तादामविराजिताम्।।११५।।
क्षीराब्धिफेनरुचिरे वसानां श्वेतवाससी। दक्षेण बाहुना देवं गाढमालिङ्ग्य संस्थिताम्।। ११६।।
प्रियाङ्गसङ्गमान्मंक्षु जातरोमाञ्चकञ्चुकाम्। देवस्यास्यं समालोक्य स्मरबाणविमोहिताम्।। ११७।।
दक्षिणे देवदेवस्य गद्यपद्यमयीं गिरम्। वदन्तीं भारतीं ध्यायेद्वीणापुस्तकधारिणीम्।। ११८।।
सितचन्दनलिप्ताङ्गीं पीनोन्नतपयोधराम्। विशाललोचनां देवीं मुक्ताहारविभूषिताम्।। ११९।।
सृजन्तीं[1] लोचनैर्भावान् विष्णौ देवीं शुचिस्मिताम्। विद्यासौभाग्यलाभाय ध्यायेदेवं परां गिरम्।।१२०।।
परितो वासुदेवाद्या ध्यातव्या मूर्तयो हरेः। श्यामशुक्ला[2]रुणापीताः क्रमशः सर्वभूषणाः।।१२१।।
लक्ष्म्याद्याः शक्तयो ध्येया रणत्कङ्कणबाहुकाः। सितचामरधारिण्यो मुक्ताहारसुमध्यमाः।। १२२।।

---

१. 'सिञ्चन्तीं' क. ग. पाठः। २. 'मुक्ता' ख. पाठः।

क्वनन्नूपुरपादाब्जा: पीनोत्तुङ्गपयोधरा:। त्रैलोक्यमोहनं देवं वीक्षमाणा: स्मरार्दिता:।। १२३।।
गौर्यौ लक्ष्मीसरस्वत्यौ रतिप्रीती तथारुणे। शशाङ्कधवले ज्ञेये कान्तिकीर्ती हरिप्रिये।। १२४।।
तुष्टिपुष्टी तथा श्यामे ध्यातव्ये हरिवल्लभे। नरेन्द्रदेवदैत्यानां प्रमदा: स्मरविह्वला:।। १२५।।
गृहीत्वा चन्दनादीनि हेमरत्नस्रज: शिवे। आयान्त्य: परितो ध्येया देवदर्शनलालसा:।। १२६।।
हेमप्रसूनमालाभिश्चन्दनैर्विविधै: शुभै:। त्रैलोक्यमोहनं देवं पूजयन्त्यो निरन्तरम् ।। १२७।।
ऋषय: सिद्धगन्धर्वमनुजा मनुजाधिपा:। स्तुवन्त: परितो ध्येया हरिं सर्वप्रियं प्रिये।। १२८।।
इन्द्राद्यैर्लोकपालैश्च समन्तात् परिवारितम्। आब्रह्मभुवनान्त:स्थसर्वलोकै: प्रपूजितम्।। १२९।।
कोटियोजनविस्तीर्णे हेमरत्नविनिर्मिते। मन:प्रीतिकरे देवि साधकाभीष्टदायके।। १३०।।
धर्माद्यैर्निर्मिते देवि मण्डलत्रितयान्विते। विमलादिसुशक्तिस्थे योगपीठे महाप्रभे ।। १३१।।
आसीनं चिन्तयेद् देवं सर्वसत्त्वविमोहनम्। भुवनानि महादेवि भासयन्तं निजत्विषा।। १३२।।
किन्नरोरगगन्धर्वचारणै: खेचरव्रजै: । गीयमानगुणव्रातं सर्ववाञ्छितसिद्धिदम् ।। १३३।।
सुपर्णाय—पदं प्रोक्त्वा विद्महे—पदमीरयेत्। पक्षराजाय धीशब्दं महि तन्नो—पदं वदेत्।। १३४।।
गरुड:—शब्दमुच्चार्य प्रवदेच्च प्रचोदयात्। गायत्र्येषा समाख्याता सिद्धिदा मूलमन्त्रत:।। १३५।।
मूर्तिं प्रकल्प्य देवेशं पूजयेच्चन्दनादिभि:। सर्वादिकं च भूषान्तमर्चयित्वा रमां तत:।। १३६।।
ऊरौ दक्षेतरे चेष्ट्वा ह्यङ्गानि पूजयेत् तत:। वर्मान्तकानि चाशासु विदिक्ष्वस्त्रं पुरो दिशाम्।।१३७।।
दलेषु लक्ष्म्यादिकाश्च पूर्वाद्याशासु संजयेत्। दरचक्रगदाचारुमुसलानि विदिक्ष्वथ।। १३८।।
शार्ङ्गखड्गाङ्कुशोद्द्योति[1]पाशान् आशाधिपांस्तथा। वज्रादीनि ततो बाह्ये कुमुदाद्यान् बहिर्यजेत्।।१३९।।
ततो दत्त्वा धूपदीपौ पूजयेच्च मनो: पदै:। देवि द्वादशभि: पुष्पै: मारबीजस्य चोर्ध्वगम्।। १४०।।
त्रैलोक्यमोहनायेति युतैर्ङेहृदयान्तकै:। पञ्चभिश्चाथ पुरुषोत्तमाद्यै: पूजयेत् क्रमात्।। १४१।।
शक्तिश्रीमारबीजाद्यैर्ङेयुक्तैश्च नमोऽन्तकै:। पुरुषोत्तमसंज्ञश्च हृषीकेशाह्वय: प्रिये।। १४२।।
विष्णुश्रीधररामाश्च ज्ञेया: पञ्चापि ते क्रमात्। षडावरणसंयुक्तं पुरुषोत्तमपूजनम्।। १४३।।
य: करोति भवेत् सोऽथ भाजनं सर्वसम्पदाम्।..।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि जैमिनये ऋषये नम:। मुखे अमिताय च्छन्दसे नम:। हृदये श्रीपुरुषोत्तमाय देवतायै नम:। इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा, ॐक्लीं पुरुषोत्तम त्रिभुवनमनोन्मादकर हुं फट् हृदयाय नम:। रँ सकलजगत्क्षोभण लक्ष्मीदयित हुं फट् शिरसे स्वाहा। रँ मन्मथोत्तमाङ्गज कामदीपन हुं फट् शिखायै वषट्। रँ परमसुभग सर्वसौभाग्यकराप्रतिरूपक केशव स्मर हुं फट् कवचाय हुं। रँ सुरासुरमनुजसुन्दरीहृदयविदारण सर्वप्रहरणधर सर्वकामिक हन २ हृदयबन्धनान्याकर्षय २ महाबल हुं फट् अस्त्राय फट् रँ त्रिभुवनेश्वर सर्वजनमनांसि हन २ दारय २ मे वशमानय २ हुं फट् नेत्रत्रयाय वौषट्। इति

---

[1] १. 'द्योगि' ख. पाठ:।

नेत्रान्तषडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य नेत्रमन्तं कनिष्ठयोर्विन्यस्य, हृदाद्यस्त्रान्तं विन्यस्य पश्चान्नेत्रे न्यसेदिति नेत्रान्तं षडङ्गानि विन्यस्य, हृदये ओंनमःह्रीं पराय पुरुषात्मने नमः। शिरसि ॐनमः श्रीं पराय सत्यात्मने नमः। शिखायां ओंनमः क्लीं परायाच्युतात्मने नमः। कवचस्थाने ॐनमः पुरुषोत्तम पराय वासुदेवात्मने नमः। अस्त्रस्थाने ॐनमोऽप्रतिरूप पराय सङ्कर्षणात्मने नमः। नेत्रयोः ॐलक्ष्मीनिवास पराय प्रद्युम्नात्मने नमः। उदरे ॐनमः सकलजगत्क्षोभण पराय (अनिरुद्धात्मने नमः। पृष्ठे ॐनमः सर्वस्त्रीहृदयविदारण पराय नारायणात्मने नमः। करयोः ॐनमः त्रिभुवनमनोन्मादकर पराय) ब्रह्मणे नमः। ऊर्वोः ॐनमः परमसुभग पराय विष्ण्वात्मने नमः। जानुनोः ॐनमः सौभाग्यकर पराय नृसिंहात्मने नमः। पादयोः ॐनमः सर्वकामप्रद पराय वराहत्मने नमः।। ''त्रैलोक्यमोहनहृषीकेशाप्रतिरूपमन्मथ—सर्वस्त्रीहृदयाकर्षणागच्छ नमः'' इति व्यापकं विन्यस्य, श्रीकरप्रकरणोक्तवत् पञ्चबाणान् पञ्चकामांश्च विन्यस्य, क्लींअंक्लीं नमः इत्यादि मातृकां विन्यस्य, अग्रे वक्ष्यमाणकाममालामन्त्रस्य वर्णेषु चत्वारिंशद्वर्णानादितः ''शिरोवदनवृत्तेत्यादि'' मातृकावर्णन्यासस्थानेषु नाभिपर्यन्तेषु विन्यस्यावशिष्टाक्षरेषु पञ्चवर्णानुदरहृदयकण्ठमुखनासिकासु विन्यस्याक्षरत्रयं पृथक्सर्वाङ्गे व्यापकत्वेन विन्यस्य, सम्पूर्णमालामन्त्रेण सकृद्व्यापकं विन्यस्य, क्लींअं कामाय रत्यै नमः। क्लींआं कामदाय प्रीत्यै नमः। क्लींइं कान्ताय कामिन्यै नमः। क्लींईं क़ान्तिमते मोहिन्यै नमः। क्लींउं कामगाय कमलायै नमः। क्लींऊं कामचाराय विलासिन्यै नमः। क्लींॠं कामिने कल्पलतायै०। एवं ॠं कामुकाय श्यामलायै०। ॡं कामवर्धनाय शुचिस्मितायै०। ॡं कामाय[1] विस्मिताक्ष्यै०। एं रमाय विशालाक्ष्यै०। ऐं रमणाय लेलिहानायै०। ओं रतिनाथाय दिगम्बरायै०। औं रतिप्रियाय रामायै०। अं रात्रिनाथाय कुब्जिकायै०। अः रमाकान्ताय कान्तायै०। कं रममाणाय नित्यायै०। खं निशाचराय कल्याण्यै०। गं नन्दकाय भोगिन्यै०। घं नन्दनाय कामदायै०। ङं नन्दिने सुलोचनायै०। चं नन्दयित्रे सुलापिन्यै०। छं पञ्चबाणाय मर्दिन्यै०। जं रतिसखाय कलाप्रियायै०। झं पुष्पधन्वने वराक्ष्यै०। ञं महाधनुषे सुमुख्यै०। टं भ्रामणाय नलिन्यै०। ठं भ्रमणाय जटिन्यै०। डं भ्रममाणाय पालिन्यै०। ढं भ्रमाय शिवायै०। णं भ्रान्ताय मुग्धायै०। तं भ्रामकाय रमायै०। थं भृङ्गाय भ्रमायै०। दं भ्रान्तचाराय लोलायै०। धं भ्रमावहाय चञ्चलायै०। नं मोहनाय दीर्घजिह्वायै०। पं मोहकाय रतिप्रियायै०। फं मोहाय लोलाक्ष्यै०। बं मोहवर्धकाय भृङ्गिन्यै०। भं मदनाय पाटलायै०। मं मन्मथाय मदनायै०। यं मातङ्गाय मालायै०। रं भृङ्गनायकाय हंसिन्यै०। लं गायनाय विश्वतोमुख्यै०। वं गीतिज्ञाय जगदानन्दिन्यै०। शं नर्तकाय रमण्यै०। षं खेलकाय कान्त्यै०। सं उन्मत्तकाय कलकण्ठ्यै०। हं मत्तकाय वृकोदर्यै०। ळं विलासिने मेघश्यामायै०। क्षं लोभवर्धनायोन्मत्तायै०। इति मातृकास्थानेषु विन्यस्य, ततः श्रीकरप्रकरणोक्तानि द्वादशतत्त्वानि संहारक्रमेण विन्यस्य, पार्श्वद्वयनाभिगुह्यगुदोरुमूलद्वयजानुद्वयगुल्फद्वयाङ्गुलीषु क्लींनमः इति कामबीजं प्रतिस्थानं विन्यस्य, पूर्वं वासुदेवप्रकरणोक्तप्रकारांस्तत्तन्मन्त्राक्षरन्यासान् संहारसृष्टिस्थितिक्रमेण विन्यस्याष्टाक्षरप्रकरणोक्त-मूर्तिपञ्जरन्यासं कृत्वा, शिरसि त्रैंनमः। ललाटे लोंनमः। दक्षनेत्रे क्यंनमः। वामे मोंनमः। दक्षदोर्मूले हंनमः। मध्ये नांनमः। मणिबन्धे यंनमः। अङ्गुलिमूले विंनमः। अग्रे घ्नंनमः। वामदोर्मूले हेंनमः। मध्ये स्मंनमः। मणिबन्धे रांनमः। अङ्गुलिमूले यंनमः। अग्रे धींनमः। दक्षोरुमूले मंनमः। जानुनि हिंनमः। गुल्फे तंनमः। अङ्गुलिमूले न्नोंनमः। अग्रे विंनमः। वामोरुमूले

---

[1] 'रामाय' ख. पाठः।

ष्णुंनमः। जानुनि प्रंनमः। गुल्फे चोंनमः। अङ्गुलिमूले दंनमः। अग्रे यात्नमः।। ततः प्रागुक्तषडङ्गद्वादशाङ्गबाणकामन्यासान्विधाय, वामे श्रींस्वां श्रियै नमः इति विन्यस्य, शिरसि स्वां लक्ष्म्यै०, मुखे स्वीं सरस्वत्यै०। कण्ठे स्वूं रत्यै०। गुह्ये स्वें प्रीत्यै०। कुकुदि स्वैं कान्त्यै०। हृदि स्वों कीर्त्यै०। नाभौ स्वौं तुष्ट्यै०। सर्वाङ्गे स्वः पुष्ट्यै०।। ततः प्राग्वद् व्यापकमन्त्रेण व्यापकं विन्यस्य, पुनरपि ऋष्यादिन्यासं विधाय, वक्षसि क्लीं श्रीवत्साय नमः। कण्ठे क्लीं कौस्तुभाय नमः। स्कन्धादिपादान्तं क्लीं वनमालायै नमः। दक्षिणाधःकरे ओंक्लीं सुदर्शनमहाचक्रराज दह २ सर्वदुष्टभयं कुरु २ छिन्द २ भिन्द २ विदारय २ परमन्त्रान् ग्रस २ भक्षय २ भूतानि त्रासय २ हुंफट् स्वाहा चक्राय नमः। इति विन्यस्य, तदूर्ध्वहस्ते ओंक्लीं खड्ग तीक्ष्ण भिन्द २ हुं फट् स्वाहा खड्गाय नमः। तदूर्ध्वे ओंक्लीं संवर्तकमुसल पोथय २ हुं फट् स्वाहा मुसलाय नमः। तदूर्ध्वे दक्षिणहस्ते ओंक्लींक्रों कच कच[1] हुं फट् स्वाहा अङ्कुशाय नमः। वामोर्ध्वे ओंक्रीं पाश बन्ध २ हुं फट् स्वाहा पाशाय नमः। तदधः ओंक्लीं जलचराय स्वाहा शङ्खाय नमः। तदधः ओंक्लीं शार्ङ्गाय सशराय हुं फट् धनुषे नमः। तदधः ओंक्लीं कौमोदकि महाबले सर्वासुरान्तकि प्रसीद २ मर्दय २ हुं फट् गदायै नमः।। ततस्त्रैलोक्यमोहिनीमुद्रां कामबीजमुच्चरन् मूर्ध्नि विन्यस्योक्तविधिना ध्यात्वा मानसपूजादियोगपीठार्चान्ते पक्षिराजाय स्वाहा। इति गरुडं सम्पूज्य, आवाहनादिपुष्पोपचारान्ते देवस्य वामोरौ ''श्रीं श्रियै नमः''। इति लक्ष्मीं सम्पूज्य, अष्टदलकेसरेषु देवाग्रादि चतुर्दिक्षु हृदाद्यङ्गचतुष्टयं कोणेष्वस्त्रं पुरतो नेत्रमिति षडङ्गानि सम्पूज्य, अष्टदलेषु लक्ष्म्याद्यष्टशक्तीः प्रागुक्ताः सम्पूज्य, दिग्दलाग्रेषु शङ्खाय नमः। चक्राय०। गदायै०। मुसलाय०। कोणदलाग्रेषु शार्ङ्गाय नमः। खड्गाय०। अङ्कुशाय०। पाशाय०। इति सम्पूज्य लोकपालान् वज्रादींश्च सम्पूज्य बहिः पूर्वोक्तान् कुमुदादीन् सम्पूज्य, धूपदीपौ समर्प्य, क्लीं त्रैलोक्यमोहनाय ह्रीं पराय पुरुषात्मने नमः। क्लीं त्रैलोक्यमोहनाय श्रीं पराय सत्यात्मने नमः। क्लीं त्रैलोक्यमोहनाय क्लीं परायाच्युतात्मने नमः। क्लीं त्रैलोक्यमोहनाय पुरुषोत्तमाय पराय वासुदेवात्मने नमः। क्लीं त्रैलोक्यमोहनायाप्रतिरूपाय क्लीं पराय सङ्कर्षणात्मने नमः। क्लीं त्रैलोक्यमोहनाय लक्ष्मीनिवासाय पराय प्रद्युम्नात्मने नमः। क्लीं त्रैलोक्यमोहनाय सकलजगत्क्षोभणाय परायानिरुद्धात्मने नमः। क्लीं त्रैलोक्यमोहनाय सर्वस्त्रीहृदयविदारणाय पराय नारायणात्मने नमः। क्लीं त्रैलोक्यमोहनाय त्रिभुवनमनोन्मादकराय पराय ब्रह्मात्मने नमः। क्लीं त्रैलोक्यमोहनाय परमसुभगाय पराय विष्ण्वात्मने नमः। क्लीं त्रैलोक्यमोहनाय सर्वसौभाग्यकराय पराय नृसिंहात्मने नमः। क्लीं त्रैलोक्यमोहनाय सर्वकामप्रदाय पराय वराहात्मने नमः।। ह्रींश्रींक्लीं पुरुषोत्तमाय नमः। ह्रींश्रींक्लीं हृषीकेशाय नमः। ह्रींश्रींक्लीं विष्णवे नमः। ह्रींश्रींक्लीं श्रीधराय नमः। ह्रींश्रींक्लीं रामाय नमः। इति देवं सम्पूज्य नैवेद्यसमर्पणादि शेषं समापयेत्।। तथा—

एवं सम्पूज्य विधिवल्लक्षसंख्यं जपेन्मनुम्। तद्दशांशं हुनेत् कुण्डे अर्धराकेशसन्निभे।। १४४।।
पलाशपुष्पैर्मनुना तद्गायत्र्याथवा प्रिये। तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत् ततः।। १४५।।
एवं सिद्धमनुर्देवि काम्यकर्माणि साधयेत्।......................................।।

अत्र लक्षजपः कृतयुगपरः। ''एवं ध्यात्वा चतुर्लक्षं जपेन्मन्त्री समाहितः'' इति सारसङ्ग्रहवचनात्। सारसङ्ग्रहे—

---

१. 'कटकट' ख. पाठः।

श्रीफलैः कमलैर्वापि हुनेदर्कसहस्रकम्। अकिञ्चनोऽपि मनुजो धनाधिपसमो भवेत्।। १।।
यो जपेदयुतं प्रातस्तस्याधिर्नाशमेति च। ज्योतिष्मतीतैलवरं जुहुयाद् व्याधिमुक्तये।। २।।

ज्योतिष्मती तेजोवती।

अष्टाधिकसहस्रं च भवेद् बुद्धिकरं[1] ततः। सौभाग्यमतुलं चैव लभते स मनोज्ञताम्।। ३।।
अष्टाधिकशतं जप्त्वा सम्यगञ्जलिनीं शुभाम्। समूलकाण्डां शिरसा धारयेन्मन्त्रवित्तमः।। ४।।
सर्वलोकप्रियतमो भवेन्नियतमाशु सः। अश्वमारप्रसूनैश्च सम्पूज्य पुरुषोत्तमम् ।। ५।।
अष्टाधिकसहस्रं च कुमुदैर्जुहुयात् ततः। राजाना वशगाः सर्वे भवन्त्येव सुनिश्चितम्।। ६।।
दिवसैश्च त्रिदशभिः किङ्करा एव नान्यथा। मालतीपुष्पहोमेन वैश्यान् वशयतेऽचिरात्।। ७।।
पलाशकुसुमैर्हुत्वा विप्रान् शीघ्रं वशं नयेत्। अभिकाङ्क्षति यां योषां तस्या नामयुतं मनुम्।।८।।
जपेल्लक्षं प्रतिदिनं चाष्टाधिकसहस्रकम्। (दिनादौ वशगा भूत्वा तत्रायात्येव नान्यथा।। ९।।
चोरापहृतवित्तस्तु ह्यष्टाधिकसहस्रकम्।) अश्वत्थोत्थसमिद्भिश्च निशि नित्यं त्रिपक्षकम्।। १०।।
अथवा कटुतैलेन त्रिपक्षान्तं हुनेत् क्रमात्। अथवाणुं दशशतं प्रजपेन्मनुजोऽन्वहम्।। ११।।
चौर एत्य धनं दत्त्वा प्रणम्य प्रतिगच्छति। सहस्रजप्तममुना मनुना मनुजास्थि च।। १२।।
निखातं शत्रुसदने शत्रुमुच्चाटयेद् ध्रुवम्। राजिकाष्टशतं जप्त्वा निखातं शत्रुमन्दिरे।। १३।।
हयारिकुसुमं वापि पक्षयोरुभयोरपि। शुक्लं रक्तं केशयुक्तं रिपुमुच्चाटयेद् ध्रुवम्।। १४।।
षण्मासं जुहुयाद्रात्रौ कलिद्रुमसमिद्वरैः । रिपुर्निधनमायाति ह्यष्टाधिकसहस्रतः ।। १५।।
मासषट्कं हुनेद्वेत्रसमिद्भिश्च सहस्रकम्। (तेजोवत्याः सह तैलैर्हुनेदष्टसहस्रकम्)।। १६।।

तेजोवत्या ज्योतिष्मत्याः।

शत्रुर्मरणमाप्नोति ह्यर्वाङ् मासचतुष्टयात्। मन्त्री विविक्ते भूदेशे जपहोमार्चनारतः ।। १७।।
अङ्कोलाज्यं सहस्रं च हुनेन्मासत्रयावधि। ततः कुर्वंश्च मध्याह्ने पावकाच्चन्द्रसन्निभा।। १८।।
प्रादुर्भवेच्च गुटिका तां जप्त्वाभ्यर्च्य धारयेत्। आनने वाथ शिरसि स भवेत् खेचरस्तदा।। १९।।
अदृश्यः सिद्धसङ्घैश्च भवेत् साधकसत्तमः। आज्याक्ताभिश्च दूर्वाभिर्होमो भयविनाशनः।। २०।।
यस्य नामयुतं मन्त्रं प्रजपेत् पूर्वसंख्यया। शमयेदापदस्तस्य नात्र कार्या विचारणा।। २१।।
इमं मन्त्रं जपेद्भूयः समस्तैश्वर्यवान् भवेत्।..।।

इति। महासम्मोहनतन्त्रे—

दारिद्र्यशोकादिमहा[2]भयरोगापमृत्युहृत्। दौर्भाग्यशापपरिभूतिहरः परिकीर्तितः।। १।।
श्रीकीर्तिकान्तिधनदो धर्मकामार्थमोक्षदः। किं बहूक्तेन मन्त्रोऽयं कामधेनुरिवोत्तमः।। २।।
इत्थं सुरासुरव्रातनरोरगसुचारणैः। सिद्धगन्धर्वयक्षैश्च सकलैश्च महर्षिभिः ।। ३।।

---

[1] 'बलं' ख. पाठः। [2] 'मनो' ख. पाठः।

सेवितं मन्त्रवर्यस्य सङ्क्षेपाच्च विधानकम्। पुरुषोचमदेवस्य गदितं च मया प्रिये।। ४।।
गोपनीयं प्रयत्नेन भुक्तिमुक्तिफलप्रदम्।..।।

इति।। सारसङ्ग्रहे–

तारमाररमा नान्तः कर्णयुग्वह्निरुस्थितः। ङेयुक् षोत्तमशब्दश्च वर्मास्त्राग्निवधूयुतः।। १ ।।
त्रयोदशाक्षरो मन्त्रः कीर्तितः पौरुषोत्तमः।..।।

तारः प्रणवः। मारः क्लीं। रमा श्रीं। नान्तः प कर्ण उ, तेन पु। वह्नी रेफः, उस्थितः उकारोपरि स्थितस्तेन रु। ङेयुक् षोत्तमः षोत्तमाय। वर्म हुं। अस्त्रं फट्। अग्निवधूः स्वाहा। तथा–

ऋषिर्ब्रह्मा च गायत्री छन्दः प्रोक्तं च देवता। पुरुषोत्तमसंज्ञश्च विष्णुस्त्रैलोक्यमोहनः।। २ ।।
अङ्गत्रयं पूर्वबीजैः षड्द्विद्व्यर्णैस्तथा त्रयम्।..।।

ॐ हृदि। क्लीं शिरः। श्रीं शिखा। पुरुषोत्तमाय कवचं। हुं फट् नेत्रं। स्वाहा अस्त्रमिति।।

संस्मरेत् सरमं विष्णुं रक्तवर्णं चतुर्भुजम् । शङ्खचक्रगदापद्मधारिणं पुरुषोत्तमम् ।। ३ ।।

वामाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये।

पूर्वोदिते ततः पीठे देवमावाह्य मन्त्रवित्। अङ्गानि संयजेद् दिक्षु वासुदेवादिकान् यजेत्।। ४।।
शक्तयः कोणगाः पूज्याः शङ्खादीनि ततो यजेत्। (कुमुदाद्यान् लोकपालान् वज्रादीनि ततो यजेत्)।।५।।

प्रयोगः सुगमः। तथा–

जपेन्मनुं वर्णलक्षं तत्सहस्रं हुनेत् तथा। प्रफुल्लैः कमलैः पश्चात् तर्पणादि समाचरेत्।। ६ ।।
एवं सिद्धमनुः कुर्यात् प्रयोगान् पूर्वमन्त्रवत्।..।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे सप्तविंशः श्वासः।। २७।।

◆

अथ

अष्टविंशः श्वासः

अथ हृषीकेशमन्त्रः। सारसङ्ग्रहे—

अथोच्यते हृषीकेशमनुः सर्वार्थसाधकः। कामं ततो हृषीकेशा वायुर्नत्यन्त ईरितः।। १।।
अष्टाक्षरो मनुः प्रोक्तो हृषीकेशस्य शोभनः। ऋषिर्ब्रह्मा समुद्दिष्टोऽनुष्टुप् छन्द उदीरितम्[1]।। २।।
देवता च हृषीकेशः सुरासुरनमस्कृतः। षड्दीर्घयुक्तमारेण षडङ्गानि प्रकल्पयेत्।। ३।।

कामं कामबीजं, हृषीकेशा स्वरूपं, वायुर्यकारः, नत्यन्तो नमोन्तः। तथा—

शङ्खचक्रगदापद्मधारिणं संस्मरेद्विभुम्। गरुडोपरि संविष्टं शुभ्रवर्णं सुभूषणम्।। ४।।

पूर्ववदायुधध्यानम्।

ततः पूर्वोदिते पीठे मन्त्री देवं समर्चयेत्। कर्णिकायां समावाह्य हृषीकेशं समाहितः।। ५।।
अङ्गानि च ततः पश्चात् पूजयेदुक्तमार्गतः। वक्षःस्थले दक्षभागे श्रीवत्सायेति पूजयेत्।। ६।।
वामे च कौस्तुभायेति ग्रीवायां पूजयेत् ततः। नमोन्तवनमालायै मुकुन्दायेति संयजेत्।। ७।।
मूर्तौ च कर्णिकायां तु पक्षिराजाय वै नमः। नमः पङ्कजनाभाय गरुडोपरि पूजयेत्।। ८।।
ततोऽष्टदलपद्मे तु वक्ष्यमाणान् प्रपूजयेत्। पुरुषोत्तमको लक्ष्मीनिवासस्तदनन्तरम्।। ९।।
सकलाद्यो जगन्नाथो जगत्क्षोभणकस्तथा। सर्वस्त्रीहृदयं पश्चान्मनोन्मादक एव च।। १०।।
सम्यक्(तद्वत्)त्रिभुवनाद्यश्च सर्वसौभाग्यदस्तथा। सर्वकामप्रदः पश्चाच्चतुर्थ्यन्तान् नमोन्तकान्।। ११।।
तत उत्सङ्गगां देवीं पूजयेत् श्रीं श्रिये नमः। ततश्च परितो देवान् पूजयेन्मन्त्रवित्तमः।। १२।।
लोकेशांश्च ततो बाह्ये वज्रादीनि ततो बहिः।..।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीहृषीकेशाय देवतायै नमः इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा क्लां हृदयाय नमः इत्यादिषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गपूजान्ते देवस्य वक्षसि दक्षभागे श्रीवत्साय नमः। वामभागे कौस्तुभाय नमः। ग्रीवायां वनमालायै नमः। देवमूर्तौ मुकुन्दाय नमः। कर्णिकायां पक्षिराजाय नमः। तदुपरि पङ्कजनाभाय नमः। अष्टदलेषु पुरुषोत्तमाय नमः। लक्ष्मीनिवासाय०। सकलजगन्नाथाय०। जगत्क्षोभणाय०। सर्वस्त्रीहृदयमनोन्मादनाय०। त्रिभुवनमनोन्मादकाय०। सर्वसौभाग्यदाय०। सर्वकामप्रदाय०। इति देवाग्रादिप्रादक्षिण्येन सम्पूज्य, देवस्य वामोत्सङ्गे श्रीं श्रिये नमः। देवस्य परितः सर्वदेवताभ्यो नमः। इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति[2]।। तथा—

---

[1] 'उदाहृतम्' ख. पाठः। [2] 'कुर्यात्' ख. पाठः।

वर्णलक्षं जपेन्मन्त्रं तद्दशाशं हुनेद् बुध:। आज्याक्तै: कमलै: फुल्लै: शोभनैर्मन्त्रवित्तम:।। १३।।
तर्पणं स्वाभिषेकं च कुर्याद् ब्राह्मणभोजनम्। एवं सिद्धमनु: सम्यक् साधयेदिष्टमात्मन:।। १४।।
सम्मोहनीप्रसूनैश्च तर्पणं सर्वकामदम्। तथा पूर्वमनु: सोऽपि हृषीकेशस्य सिद्धिद:।। १५।।

(सम्मोहनी विजया)

स्थाने हृषीकेश इति ऋषिरर्जुन ईरित:। छन्दोऽनुष्टब् देवता च हृषीकेश: समीरित:।। १६।।
अङ्गानि मारबीजेन ध्यानपूजादि पूर्ववत्।..।।

इति। सारसङ्ग्रहे–

रमारुद्धं मारबीजं श्रीधराय ततो वदेत्। त्रैलोक्यमोहनायेति नत्यन्त: षोडशाक्षर:।। १।।

मारबीजं कामबीजं, तद्रमाबीजेन रुंद्धं व्याप्तं, तेन श्रींक्लींश्रीं इति। नत्यन्तो नमोन्त:। तथा–

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छन्द ईरितम्। देवता श्रीधर: प्रोक्त: सर्वद्देवौघवन्दित:।। २।।
श्रीबीजेन षडङ्गानि कुर्याद् दीर्घयुजा सुधी:।..।।

दुग्धाब्धौ सकलर्तुसेवितवने द्वीपे च कल्पद्रुमं
तस्याध: कमलोरुपीठविलसत्पक्षीन्द्ररम्यासने।
बिभ्राणं करपङ्कजैररिदरौ सम्यगगदामम्बुजं
स्वर्णाभं मुकुटोल्लसन्मणिरुचा दीप्तं भजे श्रीधरम्।। ३।।

जपपूजादिकं सर्वमस्य पूर्ववदाचरेत्। पूर्ववत् हृषीकेशवत्।
लक्षमेकं जपेन्मन्त्रं तद्दशाशं हुनेद् घृतै:। तर्पणादि तत: कुर्यात् पूर्ववत् साधकोत्तम:।। ४।।
तत: सिद्धे मनौ मन्त्री काम्यकर्म समाचरेत्। सुगन्धै: श्वेतपुष्पैश्च होमो लक्ष्मीकर: शुभ:।। ५।।
श्रीकराद्युदितान् योगान् विदध्यात् तत्र साधक:। ध्यानपूजाजपाद्यैर्यो भजते श्रीधरं नर:।। ६।।
पुत्रपौत्रैश्वर्यकीर्ती: प्राप्नोत्यखिलसम्पद:। अपुत्र: परमं विष्णोर्धाम संविशते पुन:।। ७।।

इति।। तथा–

अच्युतानन्दगोविन्द–पदं ङेन्तं समुच्चरेत्। हृदन्तोऽयं मनु: प्रोक्तो रुद्रसंख्याक्षर: पुन:।। १।।
अथवैते त्रयो मन्त्रा: प्रोच्यन्ते सर्वकामदा:। अच्युताय नमो ह्येकोऽनन्ताय नम इत्यपि।। २।।
गोविन्दाय नम: प्रोक्तस्तृतीयो देशिकोत्तमै:। समुदायैकमन्त्रस्य ऋषि: शौनक ईरित:।। ३।।
विराट् छन्दो देवता च परमात्मा हरि: स्मृत:। षडङ्गविधिरुक्तो हि द्विरुक्तैर्मन्त्रनामभि:।। ४।।
मन्त्रत्रितयपक्षे तु देवता छन्द इत्युभे। पूर्वोक्ते च मुनि: प्रोक्त: सम्यक् पराशरस्तथा।। ५।।
व्यासश्च नारदश्चैव मन्त्रवर्णै: षडङ्गकम्। शङ्खचक्रधरं देवं चतुर्बाहुं किरीटिनम्।। ६।।
सर्वायुधैरुपेतं तं गरुडोपरि संस्थितम्। सनकादिमुनीन्द्रैस्तु सर्वदेवैरुपासितम्।। ७।।
श्रीभूमिसहितं देवमुद्यदादित्यसन्निभम्। प्रातरुद्यत्सहस्रांशुमण्डलोपमकुण्डलम्।। ८।।

सर्वलोकस्य रक्षार्थमनन्तं नित्यमेव हि। अभयं वरदं देवं धारयन्तं मुदान्वितम्।। ९।।
पूर्वोदिते यजेत् पीठे वैष्णवे तूक्तवर्त्मना। देवमावाह्य मन्त्राङ्गैः प्रथमावृतिरिष्यते।। १०।।
चक्राद्यैश्च द्वितीया स्यात् तृतीया सनकादिभिः। सनकः स्यात् ततस्तद्वत् सनन्दनसनातनौ।। ११।।
सनत्कुमारश्च पराशरो व्यासश्च नारदः। शौनकोऽष्टम एवं स्याच्चतुर्थी लोकपालकैः।। १२।।
तदायुधैः पञ्चमी स्यादेवं पूजा समीरिता।……………………………………………।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शौनकाय ऋषये नमः। मुखे विराजे छन्दसे नमः। हृदि हरये परमात्मने देवतायै नमः इति विन्यस्य, विनियोगमुक्त्वा, ऊंअच्युताय हृदयाय नमः। ओंअनन्ताय शिरसे०। ऊंगोविन्दाय शिखा०। ऊंअच्युताय कवचाय०। ऊंअनन्ताय नेत्र०। ऊंगोविन्दाय अस्त्रा०। इति करषडङ्गन्यासं कृत्वा ध्यानाद्यङ्गार्चान्ते अष्टदलेषु प्रागुक्तचक्राद्यायुधाष्टकं सम्पूज्य, द्वितीयाष्टदले—सनकाय नमः। सनन्दनाय०। सनातनाय०। सनत्कुमाराय०। पराशराय०। व्यासाय०। नारदाय०। शौनकाय०। इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति। तथा—

लक्षमेकं जपेन्मन्त्रं तद्दशांशं हुनेद् घृतैः। तर्पणं स्वाभिषेकं च कुर्याद् ब्राह्मणभोजनम्।। १३।।
एवं कृतवतस्तस्य रोगनाशो भविष्यति। कन्यार्थी लाजहोमेन लक्ष्म्यर्थी बिल्वहोमतः।। १४।।
वस्त्रार्थी पुष्पहोमेन ह्यारोग्यार्थी तिलैर्हुतैः। तत्तत्फलमवाप्नोति मन्त्रविन्नात्र संशयः।। १५।।
रविवारे जले स्थित्वा नाभिमात्रे जपेद् बुधः। अष्टोत्तरसहस्रं तु ज्वरनाशो भविष्यति।। १६।।
विवाहार्थी जपेन्मासं शशिमण्डलमण्डनम्। देवं ध्यायेल्लभेत् कन्यां शोभनां च कुटुम्बिनीम्।।१७।।
जपहोमार्चनाभिर्यो भजेन्मन्त्रं समाहितः। भुक्त्वेह सकलान् भोगान् याति विष्णोः परं पदम्।।१८।।

इति।। अथ नृसिंहमन्त्रः। सारसङ्ग्रहे—

अथ वक्ष्ये समासेन नरसिंहमनोः शुभम्। विधानं सजपध्यानं पूजाहोमादिभेदतः।। १।।
संसारार्ति[1]प्रशमनं दुःखरादारिद्र्यनाशनम्। सर्वरोगहरं मृत्युनाशनं मोक्षदायकम् ।। २।।
विष्णुः शार्ङ्गी वह्निबिन्दुयुतो नीरं त्रिमूर्तियुक्। वह्निबिन्दुयुतः कालो व्योम दीर्घयुतं जलम्।। ३।।
सनेत्रं देशिकैः प्रोक्तं तदन्ते कर्णबिन्दुयुक्। शान्तो ढान्तनिविष्टश्च चतृतीयो जलान्वितः।। ४।।
मांसं बिन्दुयुतं प्रोक्तं तद्वत् णान्तं (सर्व) च पूतना। सद्ययुक्ता सकर्णोऽथ कालः कान्तः सबिन्दुयुक्।।५।।
त्रिविक्रमयुता दीर्घा भृगुः नेत्रेन्दुसंयुतः। व्योम बिन्दुयुतं नाभित्रिमूर्तिः श्वेत एव च।। ६।।
ढान्तो बिन्दुयुतो नाभिस्ततृतीयरबिन्दुयुक्। कालस्त्रिविक्रमयुतः पूतना वालिकर्णयुक्।। ७।।
त्रिविक्रमयुतः सूर्यः शुद्धिः कर्णयबिन्दुयुक्। दीर्घा कालोऽनन्तयुतो रविर्वायुसमन्वितः।। ८।।
व्योम बिन्दुयुतं प्रोक्तो मन्त्रो द्वात्रिंशदक्षरः। वेदादिमायापुटितं केचिदाहुर्मनीषिणः।। ९।।

इति। विष्णुः उ। शार्ङ्गी ग, वह्नि र, बिन्दुः अं, ताभ्यां युक्तस्तेन ग्रं। नीरं व, त्रिमूर्तिः ई, तेन वी। वह्निः र, बिन्दुः

---

[1] ‘ताप’ ख. पाठः।

अं, तेन रं। कालो म। व्योम ह, दीर्घः आ, तेन हा। जलं व, सनेत्रं इयुतं, तेन वि। शान्तः ष, ढान्तो ण, कर्ण उ, बिन्दुः अं, तैः ष्णुं। चतृतीयो ज, जलं व, तेन ज्व। मांसं ल, बिन्दुः अं, तेन लं। णान्तं त, तद्वत् बिन्दुमत्तेन तं। सर्व स्वरूपं। पूतना त, सद्य ओ, तेन तो। कालो म, कर्ण उ, तेन मु। (कान्तः) ख, बिन्दुरनुस्वारस्तेन खं। त्रिविक्रम ॠ, तद्युता दीर्घा न तेन नृ। भृगुः स, नेत्रे इ, इन्दुरनुस्वारस्तेन सिं। व्योम ह, बिन्दुयुतं[१] तेन हं। नाभिः भ, त्रिमूर्तिः ई, तेन भी। श्वेतः ष। ढान्तो ण, बिन्दुः अं, तेन णं। नाभिः भ। तत्रृतीयं द, रस्वरूपं, बिन्दुः अं, तेन द्रं। कालो म, त्रिविक्रम ऋ, तेन मृ। पूतना त, वाली य, कर्ण उ, तेन त्यु। त्रिविक्रमः ऋ, सूर्यः म, तेन मृ। शुद्धिः त, कर्ण उ, य स्वरूपं, बिन्दुः अं, तेन त्युं। दीर्घा न। कालो म, अनन्त आ, तेन मा। रविः म, वायुः य, तेन म्य। व्योम ह, बिन्दुः अं, तेन हं इति। स्पष्टं तु— ''उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्। नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।।'' इति। तथा—

ब्रह्मा ऋषिः समुद्दिष्टोऽनुष्टुप् छन्द उदाहृतम्। देवता नरसिंहोऽथ[२] सुरासुरनमस्कृतः।। १०।।
वेदैश्चतुर्भिर्वसुभिः षड्भिः षड्भिश्च वेदकैः। षडङ्गमुक्तं मन्त्रार्णैः केचित् षड्दीर्घमायया।। ११।।
सहितैरङ्गमिच्छन्ति परे पञ्चाङ्गमूचिरे। पादैः सर्वेण मन्त्रेण वर्णन्यासमथाचरेत् ।। १२।।

पञ्चाङ्गं तु श्रुतिसम्मतम्। तथा वेदे चाथर्वणीये नृसिंहतापनीये—''तस्य हि पञ्चाङ्गानि भवन्ति। चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति सप्रणवं सर्वमेव भवतीति'' इति। तथा—

शीर्षेऽलिके नेत्रयुग्मे आस्यदोष्पादसन्धिषु। अग्रयुक्तेषु कण्ठे च हृदि नाभौ च पार्श्वके।। १३।।
पृष्ठे ककुदि विन्यस्येत् क्रमान्मन्त्रार्णकान् सुधीः। नृसिंहसान्निध्यकरो न्यासो दशविधस्त्विह।।१४।।
सम्प्रोच्यते तत्र पूर्वमङ्गुलीन्यास उच्यते। दशाङ्गुलीनां प्रत्येकं पर्वाणां त्रितयेषु च।। १५।।
त्रिंशद्वर्णान् क्रमान्न्यस्य शिष्टौ द्वौ तलयोर्न्यसेत्। द्वितीयमक्षरन्यासं देहे कुर्याद्विचक्षणः।। १६।।
ब्रह्मरन्ध्रे च शिरसि भाले भ्रूमध्यके ततः। नयने नयनाधश्च कपोले कर्णमूलयोः।। १७।।
दन्तपङ्क्त्योश्च चिबुके उत्तरोष्ठेऽधरोष्ठके। कण्ठे नाभौ भुजे दक्षे वामे च हृदये तनौ।। १८।।
अन्यं दक्षे करतले वामे चापि कटौ तथा। मेढ्रे चोरौ तथा जानुजङ्घागुल्फेषु मन्त्रवित्।। १९।।
पादाङ्गुलीषु च ततो बाह्वोरङ्गुलिषु क्रमात्। पर्वसन्धिषु सद्रोमकूपेषु क्रमतो न्यसेत्।। २०।।
रक्तास्थिमज्जासु तथा न्यसेद्वर्णान् क्रमात् सुधीः। तृतीयो वर्णविन्यासः प्रोच्यते सर्वकामदः।।२१।।
पादे गुल्फे च जङ्घायां जान्वोरूरौ तथा कटौ। नाभौ हृदि न्यसेद् बाह्वोः कण्ठे च चिबुके ततः।।२२।।
दन्ते चोष्ठे कपोले च कर्णास्ये च तथा नसि। नेत्रे च मूर्धनि तथा मन्त्री वर्णान् समाहितः।।२३।।
चतुर्थोऽयं पदन्यास उच्यते भुक्तिमुक्तिदः। शिखायां मूर्ध्नि नासायां नेत्रे श्रोत्रे तथा मुखे।। २४।।
हृदि नाभौ कटौ जान्वोः पादयोः क्रमतो न्यसेत्। चतुरक्षरसंज्ञोऽयं न्यासः पञ्चम उच्यते।। २५।।
नासाग्रे नयने श्रोत्रे नाभौ हृदि च मूर्धनि। बाह्वोश्चरणयोर्न्यस्येच्चतुर[३]र्णक्रमाद् बुधः।। २६।।
षष्ठः पादैश्च विन्यासो मन्त्रविद्भिः प्रकीर्तितः। मूर्ध्नि वक्षसि नाभौ च सर्वाङ्गे क्रमतो न्यसेत्।।२७।।

---

१. 'बिन्दुरं तेन' ख. पाठः। २. 'च' ख. पाठः। ३. 'र्वण' ख. पाठः।

(सप्तमः स्यादथ न्यासो मूर्धादिहृदयावधि। पादादि—हृदयान्तं च न्यस्येदर्धद्वयं मनोः।। २८।।
उग्रादिरष्टमो न्यासो विद्वद्भिर्गदितः शुभः। उग्राद्युग्रादि च पुनः पदानीह नमाम्यहम्।। २९।।
इत्यन्तकानि नवसु स्थानेषु क्रमतो न्यसेत्।) मुखे शिरसि नासायां चक्षुषोः श्रोत्रयोस्तथा।। ३०।।
के शिखास्थानके तद्वद् हृदि नाभौ ततो न्यसेत्। कट्यादि—पादपर्यन्तं क्रमात् न्यस्येद् यथाविधि।।३१।।
वीराख्यो नवमो न्यासः प्रोच्यते सर्वकामदः। वीरादिकानि पूर्वोक्तपदानि नव विन्यसेत्।। ३२।।
नमाम्यहं—पदान्तानि पूर्वोक्तस्थान एव च। नृसिंहाख्यश्च दशमः प्रोच्यते न्यास उत्तमः।। ३३।।
नृसिंहपदपूर्वाणि पदान्युग्रादिकानि च। स्थानेषूक्तेषु विन्यस्य नवसु क्रमशः सुधीः।। ३४।।
मूलाधारे षडङ्गानि विन्यसेन्मन्त्रवित्तमः। मूलाधारात् तथा नाभौ न्यस्येद्वर्णत्रयं बुधः।। ३५।।
नाभेर्हृदयपर्यन्तं न्यस्येद् वर्णचतुष्टयम्। हृदो भ्रूमध्यपर्यन्तं न्यस्येद् वर्णचतुष्टयम्।। ३६।।
वर्णद्वयं पादयुगे शिष्टं व्वर्णद्वयं न्यसेत्। मूर्धादि—पादपर्यन्तं चिन्तयेन्नृहरिं विभुम्।। ३७।।

नृसिंहं भजे जानुविन्यस्तबाहुं त्रिनेत्रं भुजप्रोल्लसच्चक्रशङ्खम्।
कृशानूपमज्योतिषा ग्रस्तदैत्यं शिरःशोभिदंष्ट्रासुदीप्तद्विजिह्वम्।। ३८।।

इति ध्यानम्। दक्षवामयोश्चक्रशङ्खौ।

यजेत् पूर्वोदिते पीठे वैष्णवे प्रोक्तवर्त्मना। मूलेन मूर्तिं सङ्कल्प्य देवमावाह्य मन्त्रवित्।। ३९।।
तस्यां मूर्तौ विधानेन नृसिहं पूजयेत् ततः। वामाङ्के नृहरेः पूज्या लक्ष्मीर्भूषण[1]भूषिता।। ४०।।
वामे पद्मधरा दक्षबाहुना नृहरिं विभुम्। आश्लिष्यन्ती शान्तमूर्तिस्ततोऽङ्गानि प्रपूजयेत्।। ४१।।
पूजयेद् दिक्षु पक्षीन्द्रं तथा शर्वमनन्तकम्। भवं कमलपूर्वं च विदिक्षु च यजेच्छ्रियम्।। ४२।।
ह्रियं तुष्टिं च पुष्टिं च द्वितीयावृतिरीरिता। ततोऽष्टभिर्नृसिंहैश्च तृतीयावृतिरिष्यते।। ४३।।
शङ्खिनं चक्रिणं स्वर्णवर्णं श्यामलवाससम्। नृसिहं स्तम्भनायेति दले प्राच्यां प्रपूजयेत्।। ४४।।
धृताम्बुजगदाशङ्खचक्रं वश्यक्रियाक्षमम्। सिन्दूरारुणमाग्नेये पूजयेद् दक्षिणे ततः।। ४५।।
आन्त्रमालां शङ्खचक्रे गदां खड्गं च बिभ्रतम्। भिन्नदैत्यहृदं कृष्णं त्रिनेत्रं मारणक्षमम्।। ४६।।
विद्वेषोच्चाटनकरं नीलोत्पलसमप्रभम्। शङ्खचक्रगदालोहदण्डं निर्ऋतिजे दले ।। ४७।।
प्रतीच्यां शङ्खचक्रासिपाशान्वितकराम्बुजम्। शक्तियुक्तं जपापुष्पनिभमाकर्षणक्षमम्।। ४८।।
(वायवीये तु शवलं शङ्खचक्रे गदाभये। बिभ्राणं पुष्टिदं नेत्रत्रितयालङ्कृताननम्।। ४९।।
उदग्दले नृसिंहं तं पाञ्चजन्यं सुदर्शनम्।) गदानिधी च बिभ्राणं लक्ष्म्या युक्तं निधिप्रदम्।। ५०।।
विद्यामूर्तिमुदक्पूर्वे क्षीराभं पीतवाससम्। पाशाङ्कुशधरोद्बाहुशङ्खचक्रधरं विभुम्।। ५१।।
हृत्सरोरुहमध्यस्थं चन्द्रपुञ्जसुनिर्मलम्। लक्ष्म्या युक्तं नारसिंहं पूजयेत् साधकः सदा।। ५२।।
चक्रं खड्गं महापद्मं मुसलं देवदक्षिणे। शङ्खं खेटं गदां शार्ङ्गं पूजयेद् देववामतः।। ५३।।

---

[1] 'लक्षणभूषिता' ख. पाठः।

एभिश्चतुर्थावृति: स्याल्लक्ष्म्यादिभिरनन्तरम्। लक्ष्मीं दक्षिणतस्तुष्टिं वामे तत्रैव कौस्तुभम्।।५४।।
श्रीवत्सं दक्षिणे मध्ये वनमालां च पूजयेत्। पीताम्बरं ब्रह्मसूत्रं नाभिपद्मं किरीटकम्।। ५५।।
भूषणानि च सर्वाणि पुरोभागे प्रपूजयेत्। षष्ठी श्रद्धादिभि: प्रोक्ता श्रद्धा मेधा च कामिका।।५६।।
भीमा मा चैव सभया चकान्द्री(?)दीप्तिरष्टमी। लोकेशै: सप्तमी प्रोक्ता वज्राद्यैरष्टमी मता।।५७।।
एवं सम्पूज्य विधिवत् साधकोऽभीष्टमाप्नुयात्।..।।

इति। अथ प्रयोग:—तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे अनुष्टुप्छन्दसे नम:। हृदये श्रीनृसिंहाय देवतायै नम:। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, उग्रं वीरं हृदयाय नम:। महाविष्णुं शिरसे०। ज्वलन्तं सर्वतोमुखं शिखा०। नृसिंहं भीषणं कवचाय०। भद्रं मृत्युमृत्युं नेत्रत्रयाय०। नमाम्यहं अस्त्राय० इति करषडङ्गन्यासं कृत्वा, ॐ उं नम: शिरसि। एवं ग्रं ललाटे। वीं दक्षनेत्रे। रं वामनेत्रे। मं मुखे। हां दक्षदोर्मूले। विं कूर्परे। ष्णुं मणिबन्धे। ज्वं अङ्गुलिमूले। लं अग्रे। तं वामदोर्मूले। सं कपूरि। वँं मणिबन्धे। तो अङ्गुलिमूले। मुं अग्रे। खं दक्षोरुमूले। नृं जानुनि। सिं गुल्फे। हं अङ्गुलिमूले। भीं अग्रे। षं वामोरुमूले। णं जानुनि। भं गुल्फे। द्रं अङ्गुलिमूले। मृं अग्रे। त्युं कण्ठे। मृं हृदि। त्युं नाभौ। नं दक्षपार्श्वे। मां वामे। म्यं पृष्ठे। हं ककुदि।। (१) दक्षकराङ्गुष्ठमूलादिपर्वत्रये उंग्रंवीं०। तर्जनीपर्वत्रये रंमंहां०। मध्यमापर्वत्रये विंष्णुंज्वं०। अनामापर्वत्रये लंतंसं०। कनिष्ठापर्वत्रये वँंतोंमुं०। वामकनिष्ठापर्वत्रये खंनृंसिं। अनामापर्वत्रये हंभींषं०। मध्यमापर्वत्रये णंभंद्रं०। तर्जनीपर्वत्रये मृत्युंमृं०। तदङ्गुष्ठपर्वत्रये त्युंनुंमां०। दक्षकरतले म्यं०। वामे हं०।। (२) ब्रह्मरन्ध्रे उंनम:। शिरसि ग्रं०। भाले वीं। भ्रूमध्ये रं०। नेत्रयो: मं०। नेत्राध: हां०। कपोलयो: विं०। कर्णमूलयो: ष्णुं०। दन्तपङ्क्त्यो: ज्वं०। चिबुके लं०। उत्तरोष्ठे तं०। अधरोष्ठे सं०। कण्ठे वँं०। नाभौ तों०। दक्षभुजे मुं०। वामे खं०। हृदये नृं०। सर्वाङ्गे सिं०। दक्षकरतले हं०। वामोभीं। कटौ षं०। लिङ्गे णं०। ऊर्वो: भं०। जानुनो: द्रं०। जङ्घयो: मृं०। गुल्फयो: त्युं०। पादाङ्गुलीषु मृं०। कराङ्गुलीषु त्युं०। सर्वाङ्गरोमकूपेषु नं०। रक्ते मां०। अस्थ्नि म्यं०। मज्जासु हं०।। (३) दक्षपादे उंनम:। वामे ग्रं०। दक्षगुल्फे वीं०। वामे रं०। दक्षजङ्घायां मं०। वामजङ्घायां हां०। दक्षजानुनि विं०। वामे ष्णुं०। दक्षोरौ ज्वं०। वामे लं०। दक्षकटौ तं। वामे सं०। नाभौ वँं०। हृदि तों०। दक्षकरे मुं०। वामे खं०। कण्ठे नृं०। चिबुके सिं०। ऊर्ध्वदन्तेषु हं०। अधोदन्तेषु भीं०। ओष्ठे षं०। अधरोष्ठे णं०। दक्षकपोले भं०। वामे द्रं०। दक्षकर्णे मृं०। वामे त्युं०। मुखे मृं। दक्षनसि त्युं०। वामे नं०। दक्षनेत्रे मां०। वामे म्यं०। मूर्ध्नि हंनम:।। (४) उग्रंनम: शिखायां। वीरं मूर्ध्नि। महाविष्णुं नासायां। ज्वलन्तं नेत्रयो:। सर्वतोमुखं श्रोत्रयो:। नृसिंहं मुखे। भीषणं हृदि। भद्रं नाभौ। मृत्युमृत्युं कटौ। नमामि जानुनो:। अहं पादयो:।। (५) उग्रंवीरं नम: नासाग्रे। महाविष्णुं नेत्रयो:। ज्वलन्तं स श्रोत्रयो:। र्वतोमुखं नाभौ। नृसिंहं भी हृदि। षणं भद्रं मूर्ध्नि। मृत्युमृत्युं बाह्वो:। नमाम्यहं पादयो:।। (६) ॐउग्रंवीरं महाविष्णुं नमो मूर्ध्नि। ज्वलन्तं सर्वतो मुखं नमो वक्षसि। नृसिंहं भीषणं भद्रं नमो नाभौ। मृत्युमृत्युं नमाम्यहं नम: सर्वाङ्गे।। (७) मूर्धादि उग्रंवीरमित्यादि पूर्वार्धं नाभ्यन्तं न्यस्येत्। नाभ्यादिपादान्तं नृसिंहमित्युत्तरार्धं न्यसेत्।। (८) उग्रमुग्रं नमाम्यहं नमो मुखे। उग्रं वीरं नमाम्यहं नम: शिरसि। उग्रं महाविष्णुं नमाम्यहं नमो नासायां। उग्रं ज्वलन्तं नमाम्यहं नमश्चक्षुषो:। उग्रं सर्वतो मुखं नमाम्यहं नम: श्रोत्रयो:। उग्रं

नृसिंहं नमाम्यहं नमो ब्रह्मरन्ध्रे। उग्रं भीषणं नमाम्यहं नमो हृदि। उग्रं भद्रं नमाम्यहं नमो नाभौ। उग्रं मृत्युमृत्युं नमाम्यहं नमः। कट्यादिपादद्वयाग्रान्तम्।। (९) वीरमुग्रं नमाम्यहं नमो मुखे। वीरं वीरं नमाम्यहं नमः शिरसि। वीरं महाविष्णुं नमो नासायाम्। वीरं ज्वलन्तं नमाम्यहं नमश्चक्षुषो। वीरं सर्वतो मुखं नमाम्यहं नमः श्रोत्रयोः। वीरं नृसिंहं नमाम्यहं नमो ब्रह्मरन्ध्रे। वीरं भीषणं नमाम्यहं नमो हृदये। वीरं भद्रं नमाम्यहं नमो नाभौ। वींर मृत्युमृत्युं नमाम्यहं नमः कट्यादिपादान्तं।। (१०) नृसिंहमुग्रं नमाम्यहं नमः मुखे। नृसिंहं वीरं नमाम्यहं नमः शिरसि। नृसिंहं महाविष्णुं नमो नासायां। नृसिंहं ज्वलन्तं नमाम्यहं नमः चक्षुषोः। नृसिंहं सर्वतो मुखं नमाम्यहं नमः श्रोत्रयोः। नृसिंहं नृसिंहं नमाम्यहं नमः ब्रह्मरन्ध्रे। नृसिंहं भीषणं नमाम्यहं नमो हृदये। नृसिंहं भद्रं नमाम्यहं नमो नाभौ। नृसिंहं मृत्युमृत्युं नमाम्यहं नमः कट्यादिपादान्तं।। ततो मूलषडङ्गानि विन्यस्य ध्यानादिपुष्पोपचारान्ते, देवस्य वामाङ्के श्रींलक्ष्म्यै नमः। इति लक्ष्मीं सम्पूज्य, ततः प्रागवत् षडङ्गानि सम्पूज्य दिग्दलेषु देवाग्रादि—पक्षीन्द्राय नमः। शर्वाय०। अनन्ताय०। कमलभवाय०। विदिग्दलेषु—श्रियै नमः। ह्रियै०। तुष्ट्यै०। पुष्ट्यै०। द्वितीयाष्टदले—देवाग्रादि—स्तम्भननृसिंहाय नमः। वश्यनृसिंहाय नमः। मारणनृसिंहाय नमः। विद्वेषोचाटननृसिंहाय नमः। आकर्षणनृसिंहाय नमः। तुष्टिदनृसिंहाय नमः। निधिप्रदनृसिंहाय नमः। विद्यामूर्तिनृसिंहाय नमः इति सम्पूज्य, दलाग्रेषु देवस्य दक्षिणस्थेषु—चक्राय नमः। खड्गाय०। पद्माय०। मुसलाय०। वामस्थेषु—शङ्खाय नमः। खेटाय०। गदायै०। शार्ङ्गाय०। इत्युपर्युपरिभावेन सम्पूज्य, पुनर्देवस्यैव दक्षिणे लक्ष्म्यै नमः। वामे तुष्ट्यै०। वामे कौस्तुभाय०। दक्षिणे श्रीवत्साय०। मध्ये वनमालायै०। देवाग्रे ब्रह्मसूत्राय०। पीताम्बराय०। नाभिपद्माय०। किरीटाय०। सर्वभूषणेभ्यो०। तृतीयेऽष्टदले—श्रद्धायै नमः। मेधायै०। कामिकायै०। भीमायै० मायायै० भवा[1]यै० चक्रास्यै(?)। दीप्त्यै०। इति सम्पूज्य लोकेशार्चादिसर्वं समापयेदिति।। वैखानसपञ्चरात्रे—

अष्टलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः। तद्दशांशेन जुहुयाद् घृताक्तहविषाऽनले।। १।।

एष कृतयुगपरः।

द्वात्रिंशल्लक्षमानेन जपेन्मन्त्रं जितेन्द्रियः। तत्सहस्रं प्रजुहुयाद् घृताक्तहविषा ततः।। १।।

इति सारसङ्ग्रहात्। अत्र शतांशो होम उक्तः। एष विकल्पः। बाहुल्यादशक्तपरो वा। तथा—

तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा। कुर्यात् संसिद्धमन्त्रस्तु प्रयोगानाचरेत् ततः।। १।।
काम्यप्रयोगसिद्ध्यर्थं ध्यानभेदोऽत्र कथ्यते।...।।

समुद्यत्सहस्रार्कभासं त्रिनेत्रं प्रभाभीषणं वज्रतुल्यं क्षरन्तम्।
कृशानुं ह्यनेकैर्भुजैभीषणाङ्गं स्वहस्ताग्रजोद्भिन्नदैत्यं भजे तम्।। २।।

क्रूरकर्मादिविषये स्मरेद् देवं भयानकम्। विश्वरूपमयं ध्यानं नृहरेः प्रोच्यतेऽधुना।। ३।।
नृसिंहं तं महाभीमं कालानलसमप्रभम्। अन्त्रमालाधरं रौद्रं कण्ठहारेण शोभितम्।। ४।।
नागयज्ञोपवीतं च पञ्चाननसुशोभितम्। चन्द्रमौलिं नीलकण्ठं प्रतिवक्त्रं त्रिलोचनम्।। ५।।
भुजैः परिघसङ्काशैर्दशभिः परिशोभितम्। अक्षसूत्रं गदां पद्मं शङ्खं गोक्षीरसन्निभम्।। ६।।

---

१. 'सभयायै' ख. पाठः।

धनुश्च मुसलं चैव बिभ्राणं चक्रमुत्तमम्। खड्गं च शूलं बाणं च नृहरिं रुद्ररूपिणम्।। ७।।
इन्द्रगोपकनीलाभं स्वर्णाभं चन्द्रसन्निभम्। पूर्वादि चोत्तरं यावदूर्ध्वास्यं सर्ववर्णकम्।। ८।।
एवमुग्रं हरिं ध्यायेत् सर्वव्याधिनिवृत्तये। सर्वमृत्युहरं दिव्यं स्मरणात् सर्वसिद्धये।। ९।।
ध्येयो यदा महत्कर्म सदा षोडशहस्तवान्। नृसिंह: सर्वलोकेश: सर्वाभरणभूषित:।। १०।।
द्वौ विदारणकर्मादौ द्वौ चान्त्रोद्धरणोत्थितौ। शङ्खचक्रधरावन्यावन्यौ बाणधनुर्धरौ।। ११।।
खड्गखेटधरावन्यौ द्वौ गदापद्मधारिणौ। पाशाङ्कुशधरावन्यौ द्वौ रिपोर्मुकुटार्पितौ।। १२।।
इति षोडशदोर्दण्डमण्डितं नृहरिं विभुम्। ध्यायेदम्बुदनीलाभमुग्रकर्मण्यनन्यधी:।। १३।।
ध्येयो महत्तमे कार्ये दशषड्विंशहस्तवान्। नृहरि: सर्वभूषाढ्य: सर्वसिद्धिकर: प्रभु:।। १४।।
दक्षिणे चक्रखड्गौ च परशुं पाशमेव च। हलं च मुसलाभीती ह्यङ्कुशं बाहुपङ्कजै:।। १५।।
पट्टिशं भिन्दिपालं च खेटतोमरमुद्गरान्। वामभागे करै: शङ्खं खड्गं पाशं च शूलकम्।। १६।।
अग्निं च वरदं शक्तिं कुण्डिकां दधतं परै:। कार्मुकं तर्जनीं मुद्रां गदाडमरुसर्पकान्।। १७।।
करद्वन्द्वै: क्रमाच्छत्रोर्जानुमस्तकपत्तलम्। ऊर्ध्वीकृताभ्यां हस्ताभ्यामन्त्रमालाधरं हरिम्।। १८।।
अध:स्थिताभ्यां हस्ताभ्यां हिरण्यकविदारणम्। प्रियङ्करं च भक्तानां दैत्यानां च भयङ्करम्।। १९।।
नृसिंहं संस्मरेद् दिव्यं महामृत्युभयापहम्।..।।
अथोच्यते ध्यानमन्यन्मुखरोगहरं परम्। विषरोगहरं मृत्युहरं शत्रुभयापहम्।। २०।।

स्वर्णौघाभे सुपर्णे स्थितमतिसुमुखं कोटिपूर्णेन्दुवर्णं
विद्युन्मालासदृग्भिस्त्रिभिरतिसुदशं पीतवस्त्रं सुभूषम्।
हस्तोद्यच्चक्रशङ्खाभयवरमखिलक्ष्वेडरोगापमृत्यून्
स्वैर्ध्वानैर्ध्वंसयन्तं सुरनुतमनिशं संस्मरेच्छ्रीनृसिंहम्।। २१।।

इति ध्यानम्। तथा—

लक्ष्मीकामस्त्रिमधुरै: सुगन्धै: कुसुमैर्हुनेत्। अयुतं मधुनाज्यैश्च दरिद्रो न भवेत् कुले।। २२।।
उडुम्बरसमिद्धोमाद् धान्यसिद्धिर्भवेद् ध्रुवम्। अपूपलक्षहोमेन धनदेन समो भवेत्।। २३।।
क्रुद्धस्य सन्निधौ राज्ञो जपेदष्टोत्तरं शतम्। सद्यो नैर्मल्यमाप्नोति प्रसादं चाधिगच्छति।। २४।।
कुन्दप्रसूनहोमेन शर्मोदयमवाप्स्यति । मधूकपुष्पहोमेन चेष्टसिद्धिर्भविष्यति ।। २५।।
तुलसीपत्रहोमेन कीर्तिर्भवति नान्यथा। सक्तुहोमेन शालीनां वशीकरणमुत्तमम्।। २६।।
हरिद्राखण्डहोमेन स्तम्भनं भवति ध्रुवम्। कदलीफलहोमेन सर्वविघ्न: प्रणश्यति।। २७।।
दधिमध्वाज्यसिक्ताश्च गुडूचीश्चतुरङ्गुला:। जुहुयादयुतं योऽसौ शतं जीवति वत्सरान्।। २८।।
शनैश्चरदिनेऽश्वत्थं स्पृष्ट्वा चाष्टोत्तरं शतम्। जपेज्जित्वा सोऽपमृत्युं शतं वर्षाणि जीवति।।२९।।
श्रीप्रसूनै: प्रजुहुयात् तत्काष्ठैर्ज्वलितेऽनले। सहस्रमात्रेण ततो लक्ष्मीं प्राप्नोति निश्चितम्।। ३०।।

दूर्वाहोमादरोगी स्याल्लक्ष्मीवान् श्रीफलैस्तथा। अनेन मनुना जप्ता अन्वहं च सिता वचा।। ३१।।
अशिता प्रातरुत्थाय वाक्सिद्धिं सा प्रयच्छति। जले नृसिंहं सम्पूज्य चन्देनेन च तत्र च।।३२।।
अष्टोत्तरशतं नित्यं दूर्वाभिर्जुहुयात् सुधीः। क्षुद्रभूतज्वरास्तस्य नश्यन्त्येवोपसर्गजाः।। ३३।।
रात्रौ दृष्टे तु दुःस्वप्ने मन्त्री स्नात्वा मनुं जपेत्। सुस्वप्नो जायते तस्य यदि निद्रां न गच्छति।।३४।।
कान्तारे व्याघ्रचौरादिसङ्कुले च मनुं जपेत्। रक्षां करोति भू[1]तेभ्य इतरेभ्योऽपि मन्त्रिणः।। ३५।।
मनुनानेन सञ्जप्तं तस्य नाशयति क्षणात्। क्ष्वेडग्रहमहारोगान् घोरं वाथाभिचारकम्।। ३६।।
गदोन्मादमहोत्पातभये पुंसां स्मरेन्मनुम्। तदुद्भवं महादुःखं नाशमेति सुमन्त्रिणः।। ३७।।
क्रूरं नृसिंहं संस्मृत्य शत्रुं च मृगशावकम्। कन्धरायां गृहीत्वा तं निक्षिप्तं दिक्षु चिन्तयेत्।।३८।।
सबान्धवस्य झटिति ह्युच्चाटो भवति ध्रुवम्। कृत्वा करैश्च युगपत् पातितं हरिणा स्वयम्।।३९।।
नखरैर्दार्यमाणं तं संस्मरेन्निशितैः शरैः। अष्टाधिकशतं चामुं जपेन् मनुमनन्यधीः।। ४०।।
मण्डलस्यैष मध्ये स्याद्रिपुर्वैवस्वतातिथिः। कलिद्रुमभवैः काष्ठैः सम्यक्सन्दीपितेऽनले।। ४१।।
रिपुसङ्घक्षयकरं नृसिंहं चन्दनादिभिः। समभ्यर्च्य प्रजुहुयाच्छरान् साग्रान् समूलकान्।। ४२।।
सहस्रमेकं च मनुं भक्षयन् शत्रुमुत्कटम्। जपन् शरान् विनिक्षिप्य शत्रुसेनां विनाशयेत्।। ४३।।
जुहुयात् सप्तदिवसं ततो राज्ञश्चमूं सुधीः। सुदिने च शुभे लग्ने शत्रुसैन्यजिगीषया।। ४४।।
प्रस्थापयेत् तां सुदृढां दंसितां बलिभिर्वरैः। तदग्रे चिन्तयेद् देवं नृसिंहं शत्रुसञ्चयम्[2]।। ४५।।
भक्षयन्तं जपेन्मन्त्री कुर्यादायाति सा चमूः। यावत् तावद्रिपूञ्जित्वा सर्वान् राजश्रिया सह।। ४६।।
आगच्छेद्भूपतिः शूरः पश्चान्मन्त्रिणमादारात्। तोषयेत् क्षेत्रवसुभिर्वस्त्रालङ्करणैः शुभैः।। ४७।।
मन्त्रिणो यदि सन्तोषो न भवेद्भूपतेस्तदा। अनर्थः सुमहानेव जायते[3] दुःसहो भृशम्।। ४८।।
तस्माद् गुरुं समभ्यर्चेत् तोषयेन्न तु दूषयेत्।..।।
कृशानुगेहयुग्मके विलिख्य तारमध्यगम्। नृसिंहमस्य कोणके सुदर्शनं मनुं तथा।। ४९।।
स्वशक्तिवेष्टितं बहिस्तथाष्टपत्रपद्मके। वसून्मितार्णवर्णकांश्च मायया बहिर्युतम् ।। ५०।।
ततः पतङ्गपत्रके च वासुदेवसन्मनुम्। लिखेत् सुवेष्ट्य मायया च षोडशारके स्वरान्।। ५१।।
बहिश्च शक्तिवेष्टितं ततो ह्यनुष्टुभापि तत्। दले तदर्णसंयुते च शक्तिवेष्टितं बहिः।। ५२।।

(बहिर्वृत्तमध्ये)

ततः पूर्वभागे लिखेत् कादिवर्गाष्टकं दक्षिणे झादिकान् रुद्रसंख्यान्।
लिखेत् पश्चिमे नादिकान् द्वादशार्णान् द्वयं पार्श्वयुग्मं लिखेद्यन्त्रमेतत्।। ५३।।
वरं साधितं होमसम्पातपूजाजपाद्यैर्युतं स्वात्मसन्तर्पणैश्च।
शुभं सच्चतुर्वर्गवाञ्छाफलौघप्रदं नारसिंहं महाचक्रमेतत्[4]।। ५४।।

इति। अस्यार्थः— आदौ षट्कोणं कृत्वा तन्मध्ये प्रणवोदरे ससाध्यं नृसिंहबीजमालिख्य, षट्कोणेषु सुदर्शनषडक्षर-

---

[1] 'दुष्टेभ्यः' ख. पाठः। [2] 'सञ्चयान्' ख. पाठः। [3] 'आपतेत्' ख. पाठः। [4] 'मुक्तम्' ख. पाठः।

स्यैकैकमक्षरं विलिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तयोरन्तराले निरन्तरं मायाबीजेन संवेष्ट्य, तद्बहिरष्टपत्रेषु नारायणाष्टाक्षराणि विलिख्य, तद्बहि: प्राग्वन्मायया संवेष्ट्य, द्वादशदलेषु वासुदेवद्वादशाक्षराणि आलिख्य, बहिर्माययावेष्ट्य, तद्बहि: षोडशदलेषु षोडश स्वरान् सबिन्दुकान् विलिख्य, बहि: प्राग्वन्माययावेष्ट्य, तद्बहिर्द्वात्रिंशद्दलेषु मूलमन्त्रार्णान् विलिख्य, प्राग्वच्छक्त्या संवेष्ट्य, तद्बहिर्वृत्तं कृत्वा तदन्तराले पूर्वभागे कंखंगंघंङंचंछंजं– इत्यष्टवर्णानालिख्य, तद्दक्षिणान्तराले झंञंटंठंडंढंणंतंथंदंधं–इत्येकादशवर्णानालिख्य, तत्पश्चिमान्तराले नंपंफंबंभंमंयंरंलंवंशंषं– इति विलिख्य, तदुत्तरान्तराले संहं–इति विलिख्य, तत्पार्श्वयोर्दक्षे ळं वामे क्षं इति विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा–

प्राक्प्रत्यङ्नवरेखाश्च पञ्च स्युर्दक्षिणोत्तरम्। द्वात्रिंशत्प्रमितान्येवं जायन्ते कोष्ठकानि च।। ५५।।
तस्याग्रिमगता रेखा: फणाकाराश्च कारयेत्। लिखेन्नृसिंहबीजं च द्वात्रिंशत्कोष्ठकेषु च।। ५६।।
मन्त्रराजं समालिख्य ह्यधो रेखाश्च वर्धयेत्। पुच्छाकाराश्च तास्तत्र साध्यनाम लिखेत् सुधी:।।५७।।
सम्पातयेद् होमशिष्टै: सर्वरोगादिनाशनम्।..।।

इति। अस्यार्थ:– तत्र प्राक्प्रत्यक् नव रेखा दक्षिणोत्तरं पञ्च रेखाश्च कृत्वा, ताभिर्द्वात्रिंशत्कोष्ठानि निष्पाद्य, तस्य पूर्वाग्रनवरेखाभि: पञ्च फणान् कृत्वा, तेषु फणेषु नृसिंहबीजं विलिख्य, द्वात्रिंशत्कोष्ठेषु पङ्क्त्याकारेणेशानकोष्ठादिक्रमेण मूलमन्त्रस्य द्वात्रिंशद्वर्णानालिख्य, अधोगतनवरेखा: पञ्च पुच्छाकारेण वर्धयित्वा तेषु पुच्छेषु साध्यनाम लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा–

अष्टपत्रे कर्णिकायां साध्याख्याकर्मसंयुतम्। नृसिंहबीजं विलिखेदष्टपत्रेषु संलिखेत्।। ५८।।
चतुर्वर्णप्रमाणेन मन्त्रराजं सुसाधितम्। यन्त्रं क्षुद्रामयघ्नं च सर्वरक्षाकरं परम्।। ५९।।

इति। अस्यार्थ:– अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं नृसिंहबीजं विलिख्य, अष्टसु दलेषु मन्त्राक्षराणि चत्वारि २ विलिख्य विनियुञ्ज्यात्। एतदुक्तफलदं भवति।। तथा–

ससाध्यनिजबीजयुग्वसुदले मनोर्वर्णकांश्चतुष्परिमितांल्लिखेल्लिपिवृतं बहि: कारयेत्।
स्वबीजयुतकोणयुक् क्षितिपुरद्वयेनावृतं रिपुग्रहविषप्रजामयहरं च लक्ष्मीप्रदम् ।। ६०।।

इति। अस्यार्थ:– अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं नृसिंहबीजं विलिख्य, तद्दलेषु मूलमन्त्रार्णांश्चतुरश्चतुरो विलिख्य, बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां सबिन्दुकान् मातृकार्णान् विलिख्य, तद्बहिरष्टकोणं कृत्वा तत्कोणेषु नृसिंहबीजं विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।

एतद्यन्त्रयुतं सम्यङ्मण्डलं लक्षणान्वितम्। रम्यं नवपदं कृत्वा कलशान् स्थापयेत् सुधी:।।६१।।
नव संशोभनास्तत्र कषायोदकपूरितान्। वस्त्रयुग्मसमायुक्तानावाह्य नृहरिं विभुम् ।। ६२।।
सम्पूजयेच्चन्दनाद्यै: शान्तकायं मनोरमम्। पूर्वादिषु स्तम्भनादीन् यजेन्मन्त्री समाहित:।। ६३।।
अष्टाधिकं ततो मन्त्रं सहस्रं प्रजपेत् सुधी:। एवं जलै: साधितैस्तैर्नरं मन्त्रं त्रिरुच्चरन्।। ६४।।
अभिषिञ्चेन्मृत्युमुखादवश्यं स निवर्तते। ग्रहाभिचारभूतादिभयं नश्यति तत्क्षणात्।। ६५।।
भोजयेद् देवताबुद्ध्या भूदेवांस्तोषयेदपि। प्राणप्रदात्रे गुरवे वित्तशाठ्यविवर्जितम् ।। ६६।।
स्वकीयार्थानुरूप्येण प्रदद्याद् दक्षिणां नर:। स त्वैहिकीं लभेत् सिद्धिं परत्रापि च मोदते।। ६७।।

इति। तथा–मन्त्रान्तरम्

वर्णान्त्याग्नी सभुवनौ बिन्दुनादोत्तमाङ्गकौ। नृसिंहबीजमाख्यातं सर्वसिद्धिप्रदायकम्।। १।।
हृल्लेखासम्पुटं केचित् सङ्गिरन्ते मनुं त्विमम्।..।।

वर्णान्त्य: क्षकार: अग्नी रेफ:, भुवनं औकार:, बिन्दुरनुस्वार:, नादोऽर्धचन्द्र:, एभि: क्ष्रौं इति नृसिंहबीजं भवति।

तथा–

ऋषिरत्रिश्च गायत्री छन्द: श्रीनृहरि: शुभ:। देवता दीर्घयुग्बीजेनैवाङ्गं परिकल्पयेत्।। २।।

क्ष्रांक्ष्रीं इत्यादि षडङ्गकम्।

ध्यानार्चाजपहोमादि सर्वं पूर्ववदाचरेत्। एकलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रिय:।। ३।।
तद्दशांशं हुनेत् सम्यग् घृताक्तै: पायसै: शुभै:। तर्पयेच्छुद्धसलिलै: कृत्वा चात्माभिषेचनम्।।४।।
ब्राह्मणान् सम्यगाराध्य सिद्धमन्त्र: समाचरेत्। मन्त्रराजोदितान् सर्वान् प्रयोगानत्र साधक:।। ५।।
अष्टाधिकसहस्रेण जप्तैश्च कलशोदकै:। विषार्तमभिषिञ्चेत मुच्यते हि विषेण स:।। ६।।
मुच्यतेऽन्यैश्च सर्पाद्यैर्लूतामूषकजैरपि। बहुपाद्वृश्चिकोत्थैश्च विषैर्मुक्तो भवेद् ध्रुवम् ।। ७।।
अनेन मनुना जप्तं भस्माष्टोत्तरकं शतम्। शिरोऽक्षिकर्णहृत्कुक्षिकण्ठरोगान् विनाशयेत्।। ८।।
विसर्पिर्णीं वमिं हिक्कां ज्वरं चैव विनाशयेत्। मन्त्रौषधाभिचारादिसम्भूतांश्च विकारकान्।। ९।।
शमयेद्भस्म सञ्जप्तं नात्र कार्या विचारणा। मृत्युस्थाने लिखेन्मत्रं ससाध्यं च दहन्निव।। १०।।
क्रूरेण चक्षुषा मन्त्रं जपेदष्टदिनावधि। अष्टाधिकं सहस्रं च म्रियते रिपुरस्य तु।। ११।।
वश्यमाकृष्टिविद्वेषमोहोच्चाटादिकानि च। कुर्यादयुतजापेन तत्तदर्हेण कर्मणा।। १२।।
एवमेकाक्षरो मन्त्र प्रोक्त: सर्वसमृद्धिद:।..।।

इति।। सारसङ्ग्रहे–मन्त्रान्तरम्

षडक्षरस्य मन्त्रस्य विधानमभिधीयते। पाशबीजं शक्तिबीजं स्वबीजाङ्कुशबीजके।। १।।
कवचास्त्रान्तिक: प्रोक्त: षडर्णो नृहरेर्मनु:।..।।

पाश: आं, शक्ति: ह्रीं, स्वबीजं नृसिंहबीजं क्ष्रौं, अङ्कुश: क्रों, कवचं हुं, अस्त्रं फट्।।

ऋष्याद्या ब्रह्मपङ्क्तिश्रीनृसिंहा: सम्प्रकीर्तिता:। मन्त्रार्णैरङ्गषट्कं स्यांत् ततो देवं विचिन्तयेत्।।२।।

पायात् क्रोधप्रदीप्त: स्वविकृतवदन: शोणवर्णश्च नाभे–
रूर्ध्वे चन्द्रौघदीप्ति: रविशशिहुतभुग्नेत्र उग्रोरुदंष्ट्र:।
हस्ताब्जैश्चक्रशङ्खौ गुणसृणिकुलिशान् सद्गदां दारणाख्यां
बिभ्राणो भीमकायो विविधमणिगणैर्भूषितो वो नृसिंह:।। ३।।

दक्षाद्यूर्ध्वयोराद्ये। तदाद्यध:स्थयोरन्ये। तदाद्यध:स्थयोरपरे। सर्वाध:स्थाभ्यां दारणामुद्रा। तस्या लक्षणं तु वैखानसपञ्चरात्रे–
''मिथ: संश्लिष्टसन्मुख्योऽङ्गुलय ऋज्वधोमुखा:। स्वस्थानसरलाङ्गुष्ठा मुद्रैषा दारणाभिधा''।। इति।।

पूर्वोदिते शुभे पीठे मूर्तिं मूलेन कल्पयेत्। तस्यां मूर्तौ समावाह्य देवं सर्वोपचारकै:।। ४।।

सम्पूज्यावरणं पश्चात् क्रमतः परिपूजयेत्। पुराङ्गानि समभ्यर्च्य ह्यायुधानि प्रपूजयेत्।। ५।।
अरिं शङ्खं गुणं चैव सृणिं च कुलिशं गदाम्। खड्गं खेटं समभ्यर्च्य लोकपालान् बहिर्यजेत्।।६।।
वज्रादीनि ततो बाह्ये पूजयेद् गन्धपुष्पकैः।...।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि—ब्रह्मणे ऋषये नमः। मुखे—पङ्क्तिच्छन्दसे नमः। हृदये—श्रीनृसिंहाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, मूलषडर्णैः षडङ्गानि विन्यस्य ध्यानाद्यङ्गार्चान्तेऽष्टदलेषु—चक्राय नमः। शङ्खाय०। पाशाय०। अङ्कुशाय०। वज्राय०। गदायै०। खड्गाय०। खेटाय०। इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति। तथा—

वर्णलक्षं जपेन्मन्त्रं केवलेन घृतेन च। जुहुयात् तद्दशांशेन तर्पणादि ततश्चरेत्।। ७।।
एवं संसिद्धमन्त्रस्तु प्रयोगान् साधयेत् ततः। तत्तत्कल्पोदितान् स्वार्थं परार्थं बाणुवित्तमः।। ८।।
अपामार्गसमिद्भिश्च प्लुताभिः पञ्चगव्यकैः। जुहुयाच्च सहस्रैकं सप्ताहं भूतशान्तये।। ९।।
गुडूचीसमिधो दुग्धलोलितास्त्रिसहस्रकम्। चतुर्दिनं प्रजुहुयाज् ज्वरशान्तिर्भविष्यति।। १०।।
रक्तोत्पलैः प्रत्यहं यो मधुरत्रयलोलितैः। (सहस्रसंख्यं जुहुयात् मासेनेष्टमवाप्नुयात्।। ११।।
मन्त्रं जपेद्वत्सरेण धनधान्यसमृद्धियुक्। प्रफुल्लैररुणाम्भोजैर्मधुरत्रयलोलितैः)।। १२।।
सहस्रद्वादशमितं लक्ष्मीवाञ्जायते भुवि। सर्वलोकप्रियः साध्यो भवेन्नैवात्र संशयः।। १३।।
प्रातस्त्रिमधुरोपेतलाजाभिः पक्षमात्रकम्। सहस्रं जुहुयात् कन्यां कन्यार्थी लभतेऽचिरात्।। १४।।
वरार्थिनी लभेताशु वरं सर्वमनोहरम्। तिलराजी (:) त्वपामार्गपायसाज्यैर्हुनेत् सुधीः।। १५।।
स. दीर्घायुरवाप्नोति वियुक्तः सकलैर्गदैः। कलत्रपुत्रादियुतो धनधान्यसमन्वितः।। १६।।

शिखिगेहयुगोदरे लिखेद् भुवनेशीमथ साध्यसंयुताम्।
विलिखाश्रिषु मूलमन्त्रकं वसुपत्रे स्वरकेसरे चतुः।। १७।।
मनुराजसदर्णकांल्लिखेल्लिपिसंवीतमथो बहिः पुनः।
वसुधापुरसंवृतं बहिस्त्वथ चिन्तामणिकोणमञ्जुलम्।। १८।।
नृहरेरथ यन्त्रमुत्तमं लिखितं भूर्जदले शिरोधृतम्।
विषरोगरिपुग्रहादिकं भयभूतज्वरमाशु नाशयेत्।। १९।।

इति। अस्यार्थः— तत्र षट्कोणमध्ये हृल्लेखां ससाध्यामालिख्य, तत्कोणेषु मूलमन्त्रस्य षडक्षराण्यालिख्य, तद्बाह्येऽष्टदलमूलेषु द्वन्द्वशः स्वरानालिख्य, दलेषु मन्त्रराजस्य वर्णांश्चतुरश्चतुरो विलिख्य, तद्बहिर्वृत्तद्वयान्तराले सबिन्दुकान् कादिक्षान्तानालिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु वक्ष्यमाणशैवचिन्तामणिबीजं विलिखेत्। एतदुक्तफलदं भवति।। तथा— मन्त्रान्तरम्

तारं नृसिंहबीजं हृद् ङेयुतं भगवत्पदम्। ङेयुतो नरसिंहः स्याज् ज्वालामाली च ङेयुतः।। १।।
ङेयुक् च दीर्घदंष्ट्रः स्यादग्निनेत्रश्च ङेयुतः। सर्वरक्षोघ्नाय—पदं सर्वभूतविनाशना।। २।।

य सर्वज्वर च (वि) प्रोक्त्वा नाशनाय दहद्वयम्। पच–रक्षयुगं हुंफट् वह्निजायावधिर्मनुः।। ३।।
सप्त (अष्ट) षष्ट्यक्षरः प्रोक्तो ज्वालामालीति विश्रुतः।..।।

तारः प्रणवः। नृसिंहबीजं क्ष्रौं। हृन्नमः। वह्निजाया स्वाहा। सुगममन्यत्।।

ऋषिः प्रजापतिश्छन्दो गायत्रं देवताः हरिः। नृसिंहरूपी मन्त्रार्णैः षडङ्गानि प्रविन्यसेत्।। ४।।
त्रयोदशदशस्थाण्वष्टादशार्काब्धिभिः क्रमात्। षडङ्गानि मनोः कुर्याज्जातियुक्तानि मन्त्रवित्।। ५।।

स्थाणवः एकादश। अर्का द्वादश। अब्धयश्चत्वारः। ध्यानम्–

उद्यत्कालानलाभं प्रलयहुतवहोद्दीप्तदंष्ट्रोत्कटास्यं
विद्युद्दामाभिरामप्रचुरघनसटाटोपभीमं त्रिनेत्रम्।
हस्ताब्जैः शङ्खचक्रे दधतमसिवरं खेटकं श्रीनृसिंहं
वन्दे दैत्यान्तकं तं मुनिसुरनिकरैः स्तूयमानं सदैव।। ६।।

वामोर्ध्वादितदधोन्तमायुधध्यानम्। असिवरं खड्गश्रेष्ठम्।

पूर्वोदिते यजेत् पीठे नृहरिं सर्वकामदम्। षडक्षरोक्तविधिना सर्वदेवौघवन्दितम्।। ७।।

उं क्ष्रौं नमो भगवते नरसिंहाय हृदयाय नमः। ज्वालामालिने दीप्तदंष्ट्राय शिरः०। अग्निनेत्राय सर्वरक्षोघ्नाय शिखा०। सर्वभूतविनाशनाय सर्वज्वरविनाशनाय कवचाय०। दह २ पच २ रक्ष २ नेत्रत्रयाय०। हुंफट् स्वाहा अस्त्राय०। इति करषडङ्गन्यासः। प्रयोगः सुगमः। तथा–

लक्षमेकं जपेन्मन्त्रं तद्दशांशं हुनेत् ततः। कपिलासर्पिषा वह्नौ तर्पणादि विधाय च।। ८।।
मन्त्रराजवदेवात्र प्रयोगान् साधयेत् ततः। विशेषतः क्षुद्रभूतज्वरनाशकरः परः ।। ९।।
बहूदितेनात्र च किं जपन् मनुं मनुष्यवर्यो य इहात्तभोगकः।
स निग्रहानुग्रहशक्तिमान् भवेत् परत्र विष्णोः पदमेति शाश्वतम्।। १०।।

इति।। सारसङ्ग्रहे–मन्त्रान्तरम्

अथ लक्ष्मीनृसिंहस्य विधानमभिधीयते। सर्वापत्तारकं दिव्यं सर्वाभीष्टफलप्रदम्।। १।।
प्रणवः श्रीशक्तिलक्ष्मीबीजानि जयशब्दतः। लक्ष्मीप्रियपदं ङेन्तं नित्यप्रमुदितं वदेत्।। २।।
चेतसे प्रवदेल्लक्ष्मीश्रितार्धं ङेन्तदेहकम्। रमाशक्तिरमायुग् हृत् स्यात् त्रयस्त्रिंशदर्णकः।। ३।।
लक्ष्मीनृसिंहमन्त्रोऽयं जपतां सर्वकामदः।..।।

प्रणव उं। श्रीबीजं श्रीं। शक्तिर्भुवनेश्वरीबीजं। लक्ष्मीः श्रीं। जय स्वरूपं। लक्ष्मीप्रियं ङेन्तं लक्ष्मीप्रियाय। नित्यप्रमुदितचेतसे स्वरूपं। लक्ष्मीश्रितार्ध स्वरूपं। ङेन्तदेहकं देहाय। प्रणवरहितं बीजत्रयं। हृन्नमः। तथा–

ऋषिः प्रजापतिश्छन्दोऽनुष्टुब् लक्ष्मीनृसिंहकः। देवता निजबीजेन षडङ्गानि प्रकल्पयेत्।। ४।।

निजबीजेन नृसिंहबीजेन।

पुरस्तात् केशवः पातु चक्री चाम्बूनदप्रभः। पश्चान्नारायणः शङ्खी नीलजीमूतसन्निभः।। ५।।
इन्दीवरदलश्यामो वामपार्श्वं गदाधरः। गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान्।। ६।।

उत्तरे हलधृग्विष्णुः पद्मकिञ्जल्कसन्निभः। आग्नेय्यामरविन्दाभो मुसली मधुसूदनः ।। ७।।
त्रिविक्रमः खड्गपाणिनैर्ऋत्यां ज्वलनप्रभः। वायव्यां वामनो वज्री वरुणादित्यदीप्तिमान्।। ८।।
ऐशान्यां पुण्डरीकाक्षः श्रीधरः पट्टिशायुधः। विद्युत्प्रभो हृषीकेशो ह्यवाच्यां दिशि मुद्गरी।। ९।।
हृत्पद्मे पद्मनाभो मे सहस्रार्कसमप्रभः। सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः।। १०।।
इन्द्रगोपकसङ्काशः पाशहस्तोऽपराजितः। सबाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः।। ११।।
एवं सर्वत्र निच्छिद्रं नामद्वादशपञ्जरम्। प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदाचन।। १२।।
इति न्यासं विधायादौ लक्ष्मीनरहरिं स्मरेत्।...।।

सर्पेन्द्रभोगनिलयः सुफणातपत्रो विद्युच्छशाङ्करुचिरः परमो नृसिंहः।
आलिङ्गितश्च रमयावतु दिव्यभूषो हस्तैर्दरारिकमलाभयदान् दधानः।। १३।।

दक्षाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्।

देवमावाह्य पूर्वोक्ते पीठे सम्यक् प्रपूजयेत्। प्रथमाङ्गावृतिः प्रोक्ताः द्वितीया शक्तिभिः स्मृता।।१४।।
भास्वती भास्करी चित्रा[1] द्युतिरुन्मीलनी तथा। रमा कान्तिर्धृति[2]श्चेति शक्तयोऽष्टौ रमापतेः।।१५।।
तृतीयावृतिरिन्द्राद्यैश्चतुर्थी च तदायुधैः।...।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि—प्रजापतये ऋषये नमः। मुखे—अनुष्टुप्छन्दसे नमः। हृदये—श्रीलक्ष्मीनृसिंहाय देवतायै नमः। इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा क्ष्रांक्ष्रीं इत्यादिना करषडङ्गन्यासं विधाय, पूर्वोक्तश्लोकैर्नामद्वादशपञ्जरन्यासं कृत्वा ध्यानाद्यङ्गार्चान्तेऽष्टसु दलेषु—भास्वत्यै नमः। भास्कर्यै०। चित्रायै०। द्युत्यै०। उन्मीलन्यै०। रमायै०। कान्त्यै०। धृत्यै०। इति सम्पूज्य लोकेशार्चादि प्राग्वत् कुर्यात्। तथा—

[3]षष्ट्युत्तरत्रिलक्षं तु प्रजपेत् तत्सहस्रकम्। मध्वक्तमल्लिकापुष्पैर्जुहूयान्मन्त्रवित्तमः।। १६।।
अभ्यर्च्य सलिले देवं तर्पयेन्मनुना ततः। अभिषिञ्चेत् स्वमूर्धानं ब्राह्मणान् भोजयेत् ततः।। १७।।
ततः प्रयोगान् कुर्वीत साधको निजवाञ्छितान्। मल्लिकाकुसुमैर्होमः सर्वकाम्यकरः शुभः।।१८।।

इति।। तथा— मन्त्रान्तरम्

तारो लक्ष्मीनृसिंहः स्यात् ङेन्तः श्रीपूर्वकः परः। मन्त्रो लक्ष्मीनृसिंहस्याष्टार्णोऽयं समुदीरितः।। १।।

लक्ष्मीनृसिंहो ङेन्तः श्रीपूर्वकः श्रीलक्ष्मीनृसिंहायेति। तथा—

ऋषिः प्रजापतिश्छन्दोऽनुष्टुब् देवो विशारदः। नृसिंहश्च स्वबीजेन दीर्घयुक्तेन मन्त्रवित्।। २।।
षडङ्गानि मनोरस्य विदध्यात् प्रोक्तवर्त्मना। ध्यानपूजादिकं सर्वं षडक्षरवदीरितम्।। ३।।
वर्णलक्षं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः। पायसैर्जुहुयान्मन्त्री तर्पणादि ततश्चरेत्।। ४।।

इति।। तथा—मन्त्रान्तरम्

जयशब्दं द्विरुच्चार्य श्रीनृसिंहेति चोच्चरेत्। अष्टार्णो मनुराख्यातो ऋष्याद्यं पूर्ववच्चरेत्।। १।।

---

१. 'चिन्ता' ग. पाठः। २. 'रुचिः' ग. पाठः। ३. 'जपेत् षष्टिसहस्राढ्यं' ख. पाठः।

पूर्ववत् पूर्वोक्तष्टाक्षरवत्। अर्थात्पूजा च षडर्णवत्।। तथा—मन्त्रान्तरम्

वदेद्बीजं ङेन्तमत्स्यं बीजं ङेन्तं च कूर्मकम्। बीजं ङेन्तं च वाराहं बीजं ङेन्तं नृसिंहकम्।। १।।
बीजं ङेन्तं वामनयुक् त्रिर्बीजं ङेन्तरामयुक्। बीं कृष्णाय बीजं स्यात् कल्किने जययुग्मकम्।।२।।
शालग्रामाग्निवासिने दिव्यसिंहस्वयम्भुयुक्। पुरुषो ङेयुतो हृत्स्वबीजान्त्योऽयं मनुर्मतः।। ३।।

नृसिंहबीजं मत्स्याय। पुनर्नृसिंहबीजं कूर्माय। इत्यादि त्रिरिति त्रिवारं बीजं रामाय। पुनर्बीजं रामाय। पुनर्बीजं रामायेति हृन्नमः।

ऋष्याद्या अत्र्यतिच्छन्दोनृसिंहा गदिताः क्रमात्। षड्दीर्घयुक्स्वबीजेन षडङ्गानि प्रकल्पयेत्।। ४।।
मन्त्रराजवदेवास्य ध्यानपूजादिकं भवेत्। अङ्गान्ते चाथ मत्स्यादिकावतारांश्च पूजयेत्।। ५।।

इति। अथ प्रयोगः— प्रातःकृत्यादिप्राणायामत्रयं विधाय अत्रिऋषये नमः शिरसि। अतिच्छन्दसे छन्दसे नमो मुखे। श्रीनृसिंहाय देवतायै नमः हृदये। इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा क्ष्रांक्ष्रीं इत्यादिना षडङ्गन्यासः। अङ्गपूजानन्तरं ॐमत्स्याय नमः। कूर्माय०। इत्यादिभिः पूजयेत्। तथा—

अयुतं प्रजपेन्मन्त्रं साज्येन हविषा ततः। जुहुयात् तद्दशांशेन तर्पणादि ततश्चरेत् ।। ६।।
काम्यकर्माणि चान्यानि मन्त्रराजवदेव हि। (१ अथ वीरनृसिंहस्य मन्त्रः सम्प्रोच्यतेऽधुना।। ७।।
प्रणवो हृद्भगवते वीरसिंहाययोर्नृ च। ज्वालामालापिनद्धाङ्गायाग्निनेत्राय सर्वभू ।। ८।।
तविनाशनाय—पदं दहयुग्मं पचद्वयम्। रक्षयुग्मं शक्तियुक्तमस्त्रानलवधूस्तथा ।। ९।।)

इति। वीरसिंहाययोर्नृ चेति वीरपदसिंहायपदयोर्मध्ये नृ इत्यर्थः। तेन वीरनृसिंहायेति। एवमग्रेऽपि। शक्तियुग्मं मायाबीजद्वयं। सुगममन्यत्। तथा—

(२) मन्त्रान्तरमथो वच्मि तस्यैवाशु फलप्रदम्। प्रणवो हृद्भगवते वीरसिंहाययोर्नृ च।। १।।
ङेन्तं ज्वालामालिपदं दीप्तदंष्ट्रं च ङेयुतम्। अग्निनेत्राय सर्वान्ते रक्षोघ्नाय पदं वदेत्।। २।।
सर्वभूतविनाशान्ते नायान्ते सर्वशब्दतः। ज्वरं विनाशयेति स्याद्धनयुग्मं दहद्वयम्।। ३।।
पचद्वयं बन्धयुग्मं रक्षयुग्मं वदेत् ततः। वर्मास्त्राग्निवधूर्वीरनृसिंहस्य मनुर्मतः।। ४।।
(३) अथ मन्त्रान्तरं तस्य वक्ष्यते सर्वकामदम्। अग्निनेत्रायान्तकं तु पूर्वमन्त्र उदाहृतः।। ५।।
ततो वेदत् सर्वभूतविनाशाय ततो वदेत्। सर्वज्वरविनाश च नाय सर्व च दोषवि।। ६।।
नाशनाय हनद्वन्द्वं दहयुक् पचयुग्मकम्। बन्धरक्षयुगं पश्चान्मायाहुंफट् द्विठावधिः।। ७।।
एतन्मन्त्रत्रयस्यापि विधानं पूर्वमीरितम्।..।।

पूर्वमीरितं मन्त्रराजोक्तम्। मन्त्रान्तरम्—

तारं नृसिंहबीजं च महासिंहाययोर्नृ च। हृदन्तो दशवर्णः स्यान्नृसिंहमनुरुत्तमः।। १।।
ऋषिश्च वामदेवाख्यो विराट् छन्द उदाहृतम्। नृसिंहो देवता चास्य सर्वदेवौघवन्दितः।। २।।
षडदीर्घयुक्स्वबीजेन षडङ्गन्यासमाचरेत्। ध्यानपूजादिकं सर्वमस्य पूर्ववदाचरेत्।। ३।।

पूर्ववदिति अष्टाक्षरलक्ष्मीनृसिंहवत्। आदिपदेन पुरश्चरणतद्धोमद्रव्यादिकं गृह्यते। तदा तत्र वर्णलक्षमित्युक्तेरत्रापि वर्णलक्षं दशलक्षं प्राप्यते। मन्त्रान्तरम्—

तारं नृसिंहबीजं हृद् ङेन्तं च भगवत्पदम्। नरसिंहाय मन्त्रोऽयं त्रयोदशभिरक्षरैः।। १।।
वामदेवो मुनि: प्रोक्तो जगती च्छन्द ईरितम्। देवता नरसिंहोऽत्र स्वबीजेनाङ्गकल्पनम्।। २।।
ध्यानपूजाजपार्चादि षडक्षरवदीरितम्। तारं सहस्रारपदं ज्वालान्ते वर्तिने पदम्।। ३।।
नृसिंहबीजं हनयुग् हुंफट् स्वाहान्तिको[1] मनु:। एकोनविंशत्यर्णोऽयं नृहरेश्चक्रसंज्ञक:।। ४।।

तारं प्रणव:। नृसिंहबीजं पूर्वोक्तं। हनयुक् हनहनेति। तथा–

ऋषिर्जयन्त आख्यातश्छन्दो गायत्रमिष्यते। सुदर्शननृसिंहोऽस्य देवता परिकीर्तिता।। ५।।
चक्रराजाय हृत् प्रोक्तं ज्वालाचक्राय वै शिर:। जगच्चक्राय च शिखा कवचं त्वस्य सम्मतम्।। ६।।
असुरान्तकचक्राय ह्यस्त्राणुश्च महापरम्। सुदर्शनायेति मनु: पञ्चाङ्गं समुदीरितम् ।। ७।।
चक्रासनस्य मध्यस्थकालाग्निसदृशद्युतिम्। चतुर्भुजं विवृत्तास्यं चतुश्चक्रधरं हरिम् ।। ८।।
कोटिभास्वन्महद्वर्णं त्रिनेत्रं चोग्रविग्रहम्। ध्यायेत् समस्तदु:खौघज्वरभूतविनाशनम्।। ९।।
पूर्वोक्ते वैष्णवे पीठे पूज्येदुक्तवर्त्मना। अङ्गानि पूजयेद् दिक्षु जयाद्या: पूजयेत् क्रमात्।। १०।।
जया च विजया पश्चादजिता चापराजिता। विदिक्षु पूजयेत् पश्चान्मदनां मोदिनीं तथा।। ११।।
सहाख्यां सिद्धिसंज्ञां च पुरत: पूजयेत्तत:। कृष्णाभौ सितदंष्ट्रौ तौ(?)द्वितीयावृतिरीरिता।। १२।।
अङ्गा(इन्द्रा)दिभिस्तृतीया स्याद्वज्रादिभिरनन्तरम्।..।।

इति। अथ प्रयोग:– तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि–जयन्ताय ऋषये नम:। मुखे–गायत्रीछन्दसे नम:। हृदये–श्रीसुदर्शननृसिंहाय देवतायै नम:। इति विन्यस्य, चक्रराजाय हृदयाय नम:। ज्वालाचक्राय शिरसे०। जगच्चक्राय शिखा०। असुरान्तकचक्राय कवचाय०। महासुदर्शनाय अस्त्राय०। इति पञ्चाङ्गमन्त्रान्मूलाभिमृष्टकराङ्गुलीषु विन्यस्य, नेत्रवर्जं हृदयादिपञ्चाङ्गेषु विन्यस्य ध्यानादिपुष्पोपचारान्तेऽङ्गानि सम्पूज्य, दिग्दलेषु–जयायै नम:। विजयायै०। अजितायै०। अपराजितायै०। विदिग्दलेषु–मदनायै०। मोदिन्यै०। सहायै०। सिद्ध्यै० इति सम्पूज्य, लोकेशार्चादि प्राग्वत् कुर्यात्। तथा–

रविलक्षं जपेन्मन्त्रं तद्दशांशं शुभैस्तिलै:। हुनेत् पुष्पैस्तर्पयेच्च चत्वारिंशत्सहस्रकम्।। १३।।
आज्येन जुहुयान्मन्त्री सहस्रं च नमस्क्रियाम्। तर्पणादि तत: कुर्यात् पूर्वोक्तविधिना सुधी:।।१४।।
तत: सिद्धमनुर्मन्त्री काम्यकर्माणि साधयेत्।..।।

तिलै: पुष्पै: घृतैश्च प्रतिद्रव्यं चत्वारिंशत्सहस्रमित्यर्थ:। रविलक्षं द्वादशलक्षम्। तथा–

ब्राह्मणो जप्तुमिच्छेत्तु कुशानास्तीर्य भूतले। तस्मिन् देशे समाराध्य सुदर्शननृसिंहकम्।। १५।।
मन्त्रं सहस्रमावृत्य हुनेद् देवस्य सन्निधौ। सहस्रं मूलमन्त्रेण ह्यपामार्गसमिद्वरै: ।। १६।।
तद्भस्मतिलकं कृत्वा निर्गच्छेच्छत्रुसन्निधौ। दासवत् कुरुते शत्रून् स सद्यो नात्र संशय:।। १७।।
अथ शत्रुमनुस्मृत्य तर्पणं चापि कारयेत्। अयुतं जयमाप्नोति नात्र कार्या विचारणा।। १८।।

---

[1] 'न्त्यक:' ख. पाठ:।

अथोदुम्बरपीठे तु देवदेवं निवेशयेत्। तस्याग्रे वर्तुले कुण्डे होतव्या खादिरी समित्।। १९।।
अयुतं यो घृताक्तां तु मध्वक्तां वा जितेन्द्रियः। जयमाप्नोति स वादे नित्यं परशुरामवत्।। २०।।
तज्जप्तहाटकं पट्टं रचयित्वा तु चक्रकम्। तेनाङ्गुलीयकं कृत्वा जपहोमादिसाधितम्।। २१।।
धारयेद् दक्षिणे हस्ते मृत्युं रोगाञ्जयेदरीन्। राज्ञः सकाशात् पूजां च लभते धारयन् सदा।। २२।।
जलं त्रिसप्तजप्तं तु सर्वोदरगदान्तकम्। पूर्वं [1]नवशिफानिष्कत्रयं लवणसंयुतम्।। २३।।
स्पृष्ट्वा जप्तं तप्तजले गुल्मशूलादि मासतः। मासमेकं प्रतिदिनं दूर्वाहोमं सहस्रकम्।। २४।।
कृत्वा सम्पूजयेद् देवं राजयक्ष्मा प्रणश्यति। तिलैर्वा मधुना वापि तादृग्होमः प्रमेहनुत्।। २५।।
नेत्ररोगः सहस्रेण पद्महोमेन नश्यति। त्रिसप्तजप्ततोयेन क्षालनं नेत्ररोगनुत्।। २६।।
दशधा जप्ततोयेन करकेणैव सेचयेत्। तावत् सुमन्त्रितेनापि नवनीतेन लेपनात्।। २७।।
सप्ताहं वार्धसप्ताहं नाशयन्ति विसर्पकान्। अपामार्गेण जुहुयान्नित्यमष्टोत्तरं शतम्।। २८।।
जप्त्वा तावन्नमस्कारं कुर्यान्मासमतन्द्रितः। अपस्मारादिकानन्यान् ग्रहान् सर्वान् विनाशयेत्।।२९।।
शुद्धाद्भिः पूरितं कुम्भं चन्द्रमण्डलमध्यगम्। सुदर्शननृसिंहं तु सुधाविग्रहधारिणम्।। ३०।।
यथावच्चिन्तयेत् तत्र पूजयेच्चोपचारकैः। जप्त्वा शतं सहस्रं वा दष्टं तेनैव सेचयेत्।। ३१।।
तथा स्पृशेद्वामहस्ते ह्यम्भःस्पर्शाद्विषं हरेत्।..।।

पद्मं पङ्क्तिदलं हनद्वययुतं मध्ये ससाध्यं ध्रुवे
मन्त्रार्णान् द्विश आलिखेद् दलमनुप्रान्तेऽन्तिगं तद्बहिः।
षट्कोणे निजबीजमग्निसदनं ज्वालापरीतं लिखेद्
दीप्तं जापहुतादिसाधितमिदं रक्षाकरं शत्रुहृत्।। ३२।।

इति। अस्यार्थः— त्रिकोणाभ्यन्तरे षट्कोणं तदन्तर्दशदलकमलं च कृत्वा तत्कर्णिकायां प्रणवमध्ये "अमुकं हन २" इति शत्रुनाम विलिख्य (दलेषु नवसु मन्त्राक्षराणि द्वन्द्वशोऽष्टादश विलिख्य) दशमदलेऽन्त्यमक्षरं मन्त्रस्य विलिख्य षट्कोणेषु नृसिंहबीजं विलिख्य तद्बहिर्भूपुरत्रयं कुर्यात्। जपहोमपूजादिभिः साधितमेतद्यन्त्रं शत्रुनाशनं रक्षाकरं च भवतीति।। अथ श्रीराममन्त्राः। सारसङ्ग्रहे—

अथ राममनून् वक्ष्ये श्रेष्ठान् वैष्णवतन्त्रके। तत्रादौ मन्त्रराजस्तु षडर्णः प्रोच्यतेऽधुना।। १।।
गाणपत्येषु सौरेषु शाक्तशैवेष्वभीष्टदः। वैष्णवेष्वपि सर्वेषु राममन्त्रः फलाधिकः।। २।।
गाणपत्यादिमन्त्रेषु कोटिकोटिगुणाधिकाः। मन्त्रास्तेष्वप्यनायासफलदोऽयं षडक्षरः।। ३।।
षडक्षरोऽयं मन्त्रस्तु सर्वाघौघविनाशनः। मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः।। ४।।
दैनन्दिनं च दुरितं पक्षमासर्तुवर्षजम्। सर्वं दहति निःशेषमूर्णाचलमिवानलः ।। ५।।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च। स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ।। ६।।
सर्वाण्यपि शमं यान्ति मन्त्रराजानुकीर्तनात्। ब्राह्मणं क्षत्रियं वैश्यं शूद्रं हत्वापि कल्मषम्।।७।।
सञ्चिनोति नरो मोहाद्भूयस्तदपि नाशयेत्। ग्रामारण्यपशुघ्नत्वसञ्चितं दुरितं च यत्।। ८।।

---

[1] 'तं च' ख. पाठः।

नि:शेषं नाशयत्येव रामात्मा मन्त्रराजक:। मद्यपानेन यत् पापं तदप्याशु विनाशयेत्।। ९।।
अभक्षभक्षणोत्पन्नं मिथ्याज्ञानसमुद्भवम्। सर्वं विलीयते राममन्त्रस्यास्यैव कीर्तनात्।। १०।।
श्रोत्रियस्वर्णहरणाच्चैनो यदुपगच्छति । रत्नादेरपहारेण तदप्याशु विनाशयेत् ।। ११।।
गत्वा तु मातरं मोहादगम्यां वापि योषितम्। उपास्यानेन मन्त्रेण रामं तदपि नाशयेत्।। १२।।
महापातकयुक्तानां सङ्गत्या सञ्चितं च यत्। नाशयेत् तत्काथालापशयनासनभोजनै:।। १३।।
पितृमातृवधोत्पन्नं बुद्धिपूर्वमघं च यत्। नि:शेषं नाशयत्येव कालत्रयसमुद्भवम्।। १४।।
तदनुष्ठानमात्रेण सर्वमेव प्रलीयते । यत् प्रयागादितीर्थेषु प्रायश्चित्तादिकैरपि।। १५।।
नैवापनुद्यते पापं तदप्याशु विनाशयेत्। कृच्छ्रैस्तप्तपराकाद्यैर्नानाचान्द्रायणैरपि।। १६।।
पापं च नापनोद्यं यत् तदस्याशु विनाशयेत्। आत्मतुल्यसुवर्णादिदानैर्बहुविधैरपि।। १७।।
किञ्चिदप्यपरिक्षीणं पापं तदपि नाशयेत्। भूतप्रेतपिशाचाद्या: कूष्माण्डग्रहराक्षसा:।। १८।।
दूरादेव पलायन्ते मन्त्रराजप्रभावत:। मालिन्यमपि साङ्कर्यं यच्च यावच्च दूषणम्।। १९।।
सर्वं विलयमाप्नोति मन्त्रराजानुकीर्तनात्। अब्रह्मचर्यदोषाच्च नियमातिक्रमोद्भवा:।। २०।।
स्त्रीणां च पुरुषाणां स्युर्मन्त्रेणानेन नाशिता:। शान्त: प्रसन्नो वरदोऽक्रोधनो भक्तवत्सल:।। २१।।
मन्त्रराजसमो मन्त्रो जगत्स्वपि न विद्यते। सकामानां भुक्तिदोऽयं निष्कामाणां च मुक्तिद:।। २२।।
नृणामुभयकामानां भुक्तिमुक्तिप्रदायक:। रात्यभीष्टं महीसंस्थो राजते वा महीस्थित:।। २३।।
अथवा राक्षसा यस्मान्मरणं यान्ति सर्वत:।..।।

इत्यादि। अत्रैव षडक्षरमन्त्रप्रभावकथनं सर्वेषामपि राममन्त्राणां साधारणं बोद्धव्यम्। अथात्रैकाक्षरमारभ्य क्रमेण सर्वे मन्त्रा उद्ध्रियन्ते। तत्र श्रीस्कन्दयामले–

वह्निस्थं शयनं विष्णोरर्धचन्द्रविभूषितम्। एकाक्षरो मनु: प्रोक्तो मन्त्रराजसुरद्रुम:।। १।।

वह्नी रेफ:। विष्णो: शयनमनन्त: आ। अर्धचन्द्रोऽनुस्वारस्तेन रां। अस्यार्थस्तत्रैव–

रेफोऽग्निरहमेवोक्तो विष्णु: सोमो म उच्यते। मध्यगस्त्वावयोर्ब्रह्मा रविराकार उच्यते।। २।।
ज्योतींषि सक[१]लीकृत्य त्रीण्याकाशो विभु: स्वयम्। नादोऽपि धत्ते सन्मात्रं त्वामेव परमेश्वरीम्।।३।।

इति। सारसङ्ग्रहे–

मूर्तिपञ्जरनामानं तत्त्वन्यासं च कारयेत्। ब्रह्मा मुनि: स्याद्गायत्रं छन्दो रामोऽस्य देवता।। १।।
दीर्घार्धेन्दुयुजाङ्गानि कुर्याद् वह्न्यात्मना मनो:। (वह्न्यात्मना रेफेण।)
सरयूतीरमन्दारवेदिकापङ्कजासने। श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ।। २।।
वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम्। अवेक्षमाणमात्मानमात्मन्यमिततेजसम्।। ३।।
शुद्धस्फटिकसङ्काशं केवलं मोक्षकाङ्क्षया। चिन्तयेत् परमात्मानं भानुलक्षं जपेन्मनुम्।। ४।।

भानुलक्षं द्वादशलक्षम्। तथा–

---

[१] 'कवली' ख. पाठ:।

“वह्निर्नारायणेनाढ्यो जाठरः केवलोऽपि च। एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम्”।। ११ ।।

केवल इत्यनेन दीर्घराहित्यमुक्तं न तु व्यञ्जनमात्रम्। इति। तथा–

तारमायारमानङ्गवाक्स्वबीजैश्च षड्विधः। अक्षरो मन्त्रराजः स्यात् सर्वाभीष्टफलप्रदः।। १ ।।

तारः प्रणवः। माया भुवनेश्वरीबीजं। रमा श्रीबीजं। अनङ्गः कामबीजं। वाग्वाणीबीजं। स्वमुक्तरामबीजं। इति तथा–

द्व्यक्षरश्चन्द्रभन्द्रान्तो द्विविधश्चतुरक्षरः । ऋष्यादि पूर्ववज्ज्ञेयमेतेषां च विचक्षणैः ।। २।।

तथा– “सप्रतिष्ठौ रमौ वायुर्हृत्पञ्चार्णो मनुः स्मृतः”। प्रतिष्ठा आ। रमौ रेफमकारौ। वायुर्यकारः। हृन्नमः।

विश्वामित्रो मुनिः प्रोक्तः पङ्क्तिश्छन्दोऽस्य देवता। रामभद्रो बीजशक्ती प्रथमार्णनती क्रमात्।। ३ ।।
भ्रूमध्ये हृदि नाभ्यन्ध्वोः पादयोर्विन्यसेन्मनुम्। षडङ्गं पूर्ववद्यद्वा मन्त्रार्णैर्मनुनास्त्रकम्।। ४।।
मध्येवनं कल्पतरोर्मूले पुष्पलतासने । लक्ष्मणेन प्र[1]गुणितसव्यांसतूणसायकम् ।। ५।।
अवेक्ष्यमाणं जानक्या कृतव्यजनमीश्वरम्। जटाभारलसच्छीर्षं श्यामं मुनिगणावृतम्।। ६।।
लक्ष्मणेन धृतच्छत्रमथवा पुष्पकोपरि । दशास्यमथनं शान्तं ससुग्रीवविभीषणम् ।। ७।।
विजयार्थी विशेषेण वर्णलक्षं जपेन्मनुम्। ....।।

इति। तथा–

स्वकामशक्तिवाग्लक्ष्मीताराद्यः पञ्चवर्णकः । षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः।। ८।।
पञ्चाशन्मातृकामन्त्रवर्णप्रत्येकपूर्वकः। लक्ष्मीवाङ्मन्मथादिश्च तारादिः स्यादनेकधा ।। ९।।
श्रीमायामन्मथैकैकबीजाद्यन्तगतो मनुः। चतुर्वर्णः स एव स्यात् षड्वर्णो वाञ्छितप्रदः।। १०।।
स्वाहान्तो हुंफडन्तो वा नत्यन्तो वा भवेदयम्।...।।

स चतुर्वर्णो यः पूर्वमुक्तो रामभद्ररामचन्द्र इत्येवंरूपो द्विविधः। पञ्चाशद्वर्णपूर्वो बीजपूर्वश्च षडक्षरः। तेन श्रींअंरामचन्द्र श्रींआंरामचन्द्रेत्यादि पञ्चाशत्। एवं वाग्बीजादिःपञ्चाशत्। कामबीजादिः पञ्चाशत्। तारादि पञ्चाशत्। इति शतद्वयम्। एवं श्रींअंरामभद्रेत्यादि, तेन चतुःशतम्।। अगस्त्योऽपि–(८ अध्या०)

रामित्येकाक्षरो मन्त्रो राम इत्यपरो मनुः। चन्द्रान्तश्चैव भद्रान्तः पुनर्द्वेधा विभिद्यते[2]।। १ ।।
पञ्चाशन्मातृकामन्त्र[3]वर्णप्रत्येकपूर्वकम्। लक्ष्मीवाङ्मन्मथादिश्च सर्वत्र प्रणवादिकः।। २ ।।

श्रीमायेत्यादिः पूर्वोक्तो ये नमोन्तः षड्विधः स स्वाहान्तः षड्विधः हुंफडन्तः षट्प्रकारः। एवमष्टादश भेदाः तेनाष्टादशाधिकचतुःशतसंख्यश्चतुरक्षरपञ्चाक्षराभ्यामुत्पन्नाः षडक्षरभेदा इति। तथा–

ब्रह्मा सम्मोहनः शक्तिर्दक्षिणामूर्तिरिव च। अगस्त्यः श्रीशिवः प्रोक्ता मुनयोऽनुक्रमादिमे।। ३।।
छन्दो गायत्रसंज्ञं च श्रीरामो देवता मता। अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः।। ४।।
छन्दो देव्यादिगायत्री रामभद्रोऽस्य देवता। बीजशक्ती यथापूर्वं षड्वर्णान् विन्यसेन्मनोः।। ५।।

श्रीबीजयुक्तद्व्यधिकशतस्यागस्त्यऋषिर्विश्वामित्रो वा। कामबीजयुक्तद्व्यधिकशतस्य सम्मोहनो विश्वामित्रो वा। एवं वाग्बीजयुक्तस्य दक्षिणामूर्तिर्विश्वामित्रो वा। (एवं तारादेः शिवो विश्वामित्रो वा।) एतेन स्वबीजयुक्तस्य ब्रह्मैव। मायाद्युक्तस्य शतद्वयस्य शक्तिरेव। तथा स्वाहान्तानां षण्णां हुंफडन्तानां षण्णां च विश्वामित्र एवेति सम्भूय द्वादशाधिकशतमन्त्राणां स एवेति। तथा–

१. ‘प्रगुणितमक्ष्णः कोणेन’ क. ग. पाठः। २. ‘विभज्यते’ ख. पाठः। ३. ‘मातृकावर्णाः प्रत्येकं रामपूर्वकाः’ ख. पाठः।

ब्रह्मरन्धे भ्रुवोर्मध्ये हृन्नाभ्यन्धुषु पादयोः। बीजैः षड्दीर्घयुक्तैर्वा मन्त्रार्णैर्वा षडङ्गकम्।। ६।।
ध्यायेत् कल्पतरोर्मूले सुवर्णमयमण्डपे। पुष्पकाख्यविमानान्तः सिंहासनपरिच्छदे।। ७।।
पद्मे वसुदले देवमिन्द्रनीलम[1]णिप्रभम्। वीरासनसमासीनं[2] व्याख्यामुद्रोपशोभितम्।। ८।।
वामोरुन्यस्तत[3]द्धस्तं सीतालक्ष्मणसंयुतम्। सर्वाभरणसम्पन्नं वर्णलक्षं जपेन्मनुम्।। ९।।

वर्णलक्षं षड्लक्षम्। मन्त्रान्तरम्—

रामश्च चन्द्रभद्रान्तो ङेन्तो नतियुतो द्विधा। तारादिसहितः सोऽपि मन्त्रस्त्वष्टाक्षरः स्मृतः।।१०।।

तारादयः षट् प्रागुक्तास्तैः सहितः स द्विविधः सप्ताक्षरस्तेनाष्टाक्षरो द्वादशप्रकारः। ''ताराद्यन्तर्गतः सोऽपि नवार्णः स्यादनेकधा''। स सप्तार्ण एव तारादिषण्मध्यगतैरेकैकेन सम्पुटितः। तेन नवार्णोऽपि द्वादशविधः।

तारं रामश्चतुर्थ्यन्तः क्रोधास्त्रं वह्निवल्लभा। अष्टार्णोऽयं परो मन्त्र ऋष्यादि स्यात् षडर्णवत्।। ११।।

क्रोधः हुं। अस्त्रं फट्। वह्निवल्लभा स्वाहा। मन्त्रान्तरम्—

गुणबीजं वदेन्मायां हृद्रामाय पुनश्च ताम्। शिवोमाराममन्त्रोऽयं वस्वर्णः वस्वसुप्रदः ।। १२।।

गुणबीजं प्रणव। माया भुवनेशीबीजं। हृन्नमः। तां मायां। स्ववसुप्रदो भुक्तिमुक्तिप्रदः।

ऋषिः सदाशिवः प्रोक्तो गायत्री छन्द उच्यते। शिवोमारामचद्रोऽस्य देवता परिकीर्तिता।। १३।।
दीर्घया माययाङ्गानि तारपञ्चार्णयुक्तया। ....।।

ॐनमोरामाय ह्रां हृदयाय नमः। ॐनमोरामाय ह्रीं शिरसे० इत्यादि प्रयोगः। ध्यानम्—

रामं त्रिनेत्रं सोमार्धधारिणं शूलिनं वरम् । भस्मोद्धूलितसर्वाङ्गं कपर्दिनमुपास्महे।। १४।।
रामाभिरामां सौन्दर्यसीमां सोमावतंसिनीम्। पाशाङ्कुशधनुर्बाणधरां ध्यायेत् त्रिलोचनाम्।। १५।।
ध्यायन्नेवं वर्णलक्षं जपेत् त्रिमधुराप्लुतैः। बिल्वपत्रैः फलैः पुष्पैस्तिलैर्वा पङ्कजैर्हुनेत्।। १६।।

दशांशमिति शेषः। मन्त्रान्तरम्—

जानकीवल्लभं ङेन्तं स्वाहान्तश्च हुमादिकः। दशाक्षरोऽयं स्याद्वसिष्ठोस्य मुनिः स्वराट्।। १७।।
छन्दश्च देवता रामः सीतापाणिपरिग्रहः। आद्यं बीजं द्विठः शक्तिः कामेनाङ्गक्रिया मता।। १८।।

द्विठः स्वाहाकारः। कामेन षड्दीर्घयुक्तेन। तथा—

शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि। नाभ्यन्धुजानुपादेषु दर्शार्णान् विन्यसेन्मनोः।। १९।।
अयोध्यानगरे रत्नचित्रे सौवर्णमण्डपे। मन्दारपुष्पैराबद्धविताने तोरणाञ्चिते।। २०।।
सिंहासने समारूढं पुष्पकोपरि राघवम्। रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः।। २१।।
संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितम्। सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम्।। २२।।
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम्। ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः।। २३।।

वर्णलक्षं दशलक्षम्। तथा मन्त्रान्तरम्—

रामं ङेन्तं धनुष्पाणयेऽन्ते स्याद्वह्निसुन्दरी। दशाक्षरोऽयं मन्त्रः स्यान्मुनिर्ब्रह्मा विराट् स्मृतम्।।२४।।

---

[1] 'सम' ख. पाठः। [2] 'समारूढं' ख. पाठः। [3] 'सद्' ख. पाठः।

छन्दोऽस्य देवता प्रोक्तो रामो राक्षसमर्दनः। आद्यो बीजं द्विठः शक्तिस्तेनैवाङ्गानि पूर्ववत्।।२५।।

आद्यः रां इति। तेनैव कामेन।

वर्णन्यासं तथा ध्यानं पौरश्चरणिकं विधिम्। दशाक्षरोक्तवत् कुर्याच्चापबाणधरं स्मरेत्।। २६।।
ॐह्द्भगवते रामचन्द्रभद्रौ च ङेयुतौ। अर्कार्णो द्विविधो ह्यस्य ऋषिध्यानादि पूर्ववत्।। २७।।

रामेति स्वरूपम्। पूर्ववद् दशाक्षरवत्। तथा—

श्रीपूर्वं जयमध्यस्थं तद्विधं रामनाम च। त्रयोदशार्ण ऋष्यादि पूर्ववत् सर्वकामदः।। २८।।

श्रीरामजयरामजयरामजय (१३)।

पदत्रयैर्द्विरावृत्तैरङ्गं ध्यानं दशार्णवत्। सतारं हृद्भगवते रामो ङेन्तं महा ततः ।। २९।।
पुरुषाय—पदं पश्चाद् हृदन्तोऽष्टादशाक्षरः। विश्वामित्रो मुनिश्छन्दो गायत्रं देवता मनोः।। ३०।।
दशास्यदर्पदलनो रामभद्रः प्रकीर्तितः। तारं बीजं नमः शक्तिः षडङ्गं कल्पयेत् ततः।। ३१।।
मूलमन्त्रं कोसलेन्द्रं सत्यसन्धमनन्तरम्। रावणान्तकनामानं सर्वलोकहितं तथा।। ३२।।
स्वादुप्रसन्नवदनं चतुर्थ्या नमसा वदेत्।..।।

मूलमन्त्रेण हृत्। कोशलेन्द्राय नमः शिरः। सत्यसन्धाय नमः शिखा। रावणान्तकाय नमः कवचं। सर्वलोकहिताय नमः नेत्रं। स्वादुप्रसन्नवदनाय नमः अस्त्रं। ध्यानम्—

नन्दिग्रामस्योपवने भरतायतनाञ्चिते। रम्ये सुगन्धिपुष्पाढ्यैर्वृक्षवृन्दैश्च शोभिते।। ३३।।
निशानभेरीपटहशङ्खतूर्यादिनिःस्वने। प्रवृत्तनृत्ये परितो जयमङ्गलभाषिते।। ३४।।
पाटीरघुसृणोशीरकर्पूरागरुगन्धिते । नानाकुसुमसौरभ्यवाहिगन्धवहाञ्चिते ।। ३५।।
देवगन्धर्वनारीभिर्गायन्तीभिरलङ्कृते। सिंहासनसमारूढं पुष्पकोपरि राघवम्।। ३६।।
सौमित्रिसीतासहितं जटामुकुटशोभितम्। चापबाणधरं श्यामं ससुग्रीवविभीषणम्।। ३७।।
हत्वा रावणमायान्तं कृतत्रैलोक्यरक्षणम्। रामचन्द्रं हृदि ध्यायन् दशलक्षं जपेन्मनुम्।। ३८।।
(होमपूजाप्रयोगादि सर्वं ज्ञेयं षडर्णवत्।) तथा—
रामभद्रं महेपूर्वं ष्वासाग्निश्च घुतः परम्। वीरं नृपोत्तमपदं दशास्यान्तक मां ततः।। ३९।।
ततो रक्ष ततो देहि पश्चाद् दापय मे श्रियम्।..।।

अग्नी रेफः। श्लोकरूपो मन्त्रः।

द्वात्रिंशदक्षरो मन्त्रो विश्वामित्रो मुनिर्मनोः। छन्दोऽनुष्टुब् देवता च रामभद्रः प्रकीर्तितः।। ४०।।
चतुष्करणवेदाब्धिवस्वर्णैरङ्गकल्पना।..।।

करणानि चत्वारि। वेदाश्चत्वारः। अब्धयश्चत्वारः। वसवोऽष्टौ।। रामभद्र हृत्। महेष्वासो शिरः। रघुवीर शिखा। नृपोत्तम कवचं। दशास्यान्तक मां रक्ष नेत्रं। देहि दापय ते श्रियं अस्त्रम्।

मूर्ध्नि भाले दृशोः श्रोत्रगण्डयुग्मे सनासिके। आस्यदोःसन्धियुगले स्तनहृन्नाभिमण्डले।। ४१।।
कट्यां मेढ्रे पार्श्वपादसन्धिष्वर्णान् न्यसेन्मनोः। पूर्वोक्तं ध्यानमत्रापि त्रिलक्षं नियतो जपेत्।। ४२।।

दृशोर्वर्णद्वयं, गण्डयोश्च, द्विवचनयुग्मपदाभ्याम्। दोष्पत्सन्धय: षोडश।

पीतं वा चिन्तयेद्रामं धनार्थं यो मनुं जपेत्। सतारं हृद्भगवते चतुर्थ्या रघुनन्दनम्।। ४३।।
रक्षोघ्नविशदं तद्वन्मधुरेति वदेत्तत:। प्रसन्नवदनं ङेन्तं वदेदमिततेजसे।। ४४।।
बलरामौ चतुर्थ्यन्तौ विष्णुं ङेन्तं नतिं तत:। प्रोक्तो मालामनु: सप्तचत्वारिंशद्भिरक्षरै:।। ४५।।

अमिततेजसे इत्यत्र पूर्वपदेन न सन्धिरक्षरसंख्यानुपपत्ते:। तथा–

मुनि: पितामहश्छन्द: स्यादनुष्टुप् च देवता। राज्याभिषिक्तो रामश्च बीजशक्ती यथा पुरा।। ४६।।

यथा पुरा तारनती। ''सप्तर्तुसप्तदशषड्रुद्रसंख्यै: षडङ्गकम्''। ॐनमो भगवते हृत्। रघुनन्दनाय शिर:। रक्षोघ्नविशदाय शिखा। मधुरप्रसन्नवदनाय कवचं। अमिततेजसे नेत्रं। बलाय रामाय विष्णवे नमोऽस्त्रम्।

शिरस्याननवृत्ते च भ्रूमध्येऽक्षिद्वयोरपि। श्रोत्रयोर्घ्राणयोश्चैव गण्डयोरोष्ठयोरपि।। ४७।।
दन्तयोरास्यदेशे च दोष्पत्सन्ध्यग्रकेषु च। कण्ठे हृदि स्तनद्वन्द्वे पार्श्वयो: पृष्ठयोस्तत:।। ४८।।
जठरे नाभ्यधिष्ठाने गुह्ये वर्णान् प्रविन्यसेत्। ध्यानं दशाक्षरप्रोक्तं लक्षमेकं जपेन्मनुम्।। ४९।।
बिल्वै: प्रसूनै: पत्रैर्वा फलैस्त्रिमधुराप्लुतै:। मधुरत्रययुक्तेन पायसेनाथवाम्बुजै:।। ५०।।
होमं दशांशत: कुर्यात् तथा सर्वत्र तर्पणम्। रमा सीता चतुर्थ्यन्ता स्वाहान्तोऽयं षडक्षर:।। ५१।।
सीतामन्त्रश्च कथित: स्वतन्त्रोऽङ्गपरोऽपि च। जनकोऽस्य ऋषिश्छन्दो गायत्रं देवता मनो:।। ५२।।
सीताभगवती प्रोक्ता श्रीबीजं शक्तिरन्त्यकौ। दीर्घस्वरयुजा स्वेन षडङ्गानि प्रकल्पयेत्।। ५३।।
पूजयेद्वैष्णवे पीठे ध्यायेद्राघवसंयुताम्। स्वर्णाभामम्बुजकरां रामालोकनतत्पराम् ।। ५४।।
वर्णलक्षं जपेन्मन्त्रमिष्टार्थं साधयेत् तत:। रेफपूर्वं समुद्धृत्य सेन्दु लक्ष्मणसंयुतम् ।। ५५।।
ङेन्तोऽयं लक्ष्मणमनुर्नमसा च समन्वित:। अगस्त्य ऋषिरस्थाथ गायत्रं छन्द उच्यते।। ५६।।
लक्ष्मणो देवता प्रोक्तो लंबीजं शक्तिरस्य हि। नम: स्याद्विनियोगो हि पुरुषार्थचतुष्टये।। ५७।।

रेफपूर्वं लकारम्। तथा–

द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम्। धनुर्बाणकरं रामसेवासंसक्तमानसम् ।। ५८।।
पूजा तु वैष्णवे पीठे साङ्गावरणवर्जिता। सप्तलक्षं पुरश्चर्या तत: सिद्धीस्तु साधयेत्।। ५९।।
भरतस्यैवमेव स्याच्छत्रुघ्नस्याप्ययं विधि:। आदौ वाप्यन्ततो वापि पूजायां राघवस्य तु।। ६०।।
एतेषामपि कर्तव्या भुक्तिं मुक्तिमभीप्सुभि:। अङ्गत्वेनोदिता ह्येते प्राधान्येनापि सुन्दरि।। ६१।।
वदेद् दाशरथायेति विद्महे च पदं तत:। सीतापदं समुद्धृत्य वल्लभाय ततो वदेत्।। ६२।।
धीमहीत्यपि तन्नोऽथ ततो राम: प्रचोदयात्। एषा स्याद्रामगायत्री भक्तानां भुक्तिमुक्तिदा।। ६३।।
जन्मप्रभृति यत् पापं दशभिर्याति संक्षयम्। पुराकृतं शतेनैव सहस्रेण जपेन वा।। ६४।।
पुरश्चरणमस्याश्च चतुर्लक्षजपावधि । यच्च यावच्च पूजादि सर्वं पूर्ववदाचरेत्।। ६५।।
तारादिरेषा गायत्री मुक्तिमेव प्रयच्छति। (मायादिरपि वैदुष्यं रमादिश्च श्रियं पराम्।। ६६।।
मदनेनापि संयुक्ता सम्मोहयति मेदिनीम्। अनयाराधितो राम: सर्वाभीष्टं प्रयच्छति।। ६७।।)

पूजयेद्वैष्णवे पीठे मूर्तिं मूलेन कल्पयेत्। श्रींसीतायै द्विठान्तेन सीतां पार्श्वगतां यजेत्।। ६८।।

पार्श्वं वामं। ''वामभागे'' समासीनामिति वचनात्।

ततो दक्षिणकोणाग्रे सखायं लक्ष्मणं यजेत्। वामपार्श्वे त्रिकोणस्य शार्ङ्गं दक्षिणतः शरान्।। ६९।।

वामादि किञ्चिदग्रे। ''अग्रपार्श्वद्वये शार्ङ्गशरानङ्गानि तद्वदि''रिति सारसङ्ग्रहात्।। तथा—

अग्नीशासुरवायव्यमध्ये दिक्षु च पूजयेत्। केसरेषु षडङ्गानि प्रथमावृतिरीरिता।। ७०।।
द्वितीयात्मादिभिः प्रोक्ता चतुर्भिश्च सशक्तिकैः। आत्मा चैवान्तरात्मा च परमात्मा तृतीयकः।।७१।।
ज्ञानात्मा चेति दिक्पत्रेष्वाग्नेयादिदलेष्वथ। निवृत्तिं च प्रतिष्ठां च विद्यां शान्तिं यजेत् क्रमात्।।७२।।
तृतीया वासुदेवाद्यैर्दलमध्येषु चेरिता। वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।। ७३।।
श्रीश्च शान्तिस्तथा प्रीतिश्चतुर्थी च रतिः स्मृता। दिग्विदिक्क्रमतः पूज्या गन्धपुष्पादिभिः प्रिये।।७४।।
चतुर्थी वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात्। हनुमन्तं ससुग्रीवं भरतं सविभीषणम्।। ७५।।
लक्ष्मणाङ्गदशत्रुघ्नान् जाम्बवन्तं तदग्रतः[१]। आञ्जनेयं च देवाग्रे वाचयन्तं च पुस्तकम्।। ७६।।
दक्षान्ययोश्च भरतशत्रुघ्नावात्तचामरौ। धारयन्तं च पाणिभ्यां छत्रं पृष्ठे च लक्ष्मणम्।। ७७।।
सृष्ट्यादिमन्त्रिणः पूर्वदिक्क्रमेण कृताञ्जलीन्। सृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्धनम्।। ७८।।
अकोपं धर्मपालाख्यं सुमन्तं च क्रमाद्यजेत्। वसिष्ठं वामदेवं च जाबालिं गौतमं तथा।। ७९।।
भरद्वाजं कश्यपं च कौशिकं वाल्मिकं तथा। नारदं सनकं चैव सनातनमतः परम्।। ८०।।
सनत्कुमारं च यजेद् द्वादशारे विचक्षणः। नीलं नलं सुषेणं च मैन्दं च शरभं ततः।। ८१।।
द्विविधं चन्दनगवाक्षौ किरीटं च कुण्डलम्। श्रीवत्सं कौस्तुभं शङ्खं चक्रं गदां च पद्मकम्।। ८२।।
षोडशाब्जेऽर्चयेत् पूर्वदिक्क्रमेण कृताञ्जलीन्। ध्रुवो ध्वरश्च सोमश्च आपश्चैवानिलोऽनलः।। ८३।।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः। वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः।। ८४।।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। भुवनाधीश्वरश्चैव कपाली च दिशांपतिः।। ८५।।
स्थाणुर्भगश्च भगवान् रुद्राश्चैकादश* स्मृताः। वरुणः सूर्यवेदाङ्गौ भानुरिन्द्रो रविस्तथा।। ८६।।
गभस्तिश्च यमः स्वर्णरेताश्चाथ दिवाकरः। मित्रो विष्णुरिति प्रोक्ता आदित्या द्वादश क्रमात्।। ८७।।
धातारमन्ते प्रयजेद् द्वात्रिंशदुदिता इमे। ध्रुवाद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपद्मके ।। ८८।।
इन्द्राद्यैर्भूगृहे बाह्ये नवमावरणं यजेत्। तदस्त्रैर्वज्रशक्त्याद्यैर्दशमावरणं स्मृतम्।। ८९।।
अङ्गैरात्मादिभिर्वासुदेवाद्यैर्वायुजादिभिः। सृष्ट्यादिभिर्लोकपालैस्तदस्त्रैर्वा यजेत् प्रभुम्।। ९०।।
यद्वाङ्गैर्वायुपुत्राद्यैः सृष्ट्याद्यैश्च दिशाधिपैः। तदस्त्रैश्च यजेद् देवं सङ्क्षेपार्चा समीरिता।। ९१।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, इत्यादि गङ्गामन्त्रजपान्ते ॐनमो: भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमिततेजसे बलाय रामाय विष्णवे नमः। इति

---

[१] 'दलाग्रतः' ख. पाठः। * महायशा अपराजितो भगवानिति च विशेषणम्।

मन्त्रेणाष्टवारमभिमन्त्र्योक्तविधिना स्नानादिकं कृत्वा, सन्ध्यावन्दनेऽप्यघमर्षणानन्तरं पुनर्जलमादाय ''हुंजानकीवल्लभाय स्वाहा'' इति मन्त्रेण जलमभिमन्त्र्य, तज्जलं पीत्वाचमनादितर्पणान्तं कृत्वा, प्राणायामादिपूर्वकं ''दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्'' इति रामगायत्रीं यथाशक्ति जपित्वा, मूलमन्त्रजपादि परतत्त्वान्तं योगपीठन्यासं कृत्वा, मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीरामदेवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखाये वषट्। रैं कवचाय हुं। रौं नेत्रयाय वौषट्। रः अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, शिरसि रांनमः। भ्रूमध्ये रांनमः। हृदि मांनमः। नाभो यंनमः। गुह्ये नंनमः। पादयोः मंनमः। इति। विन्यस्य, प्रागुक्तमूर्तिपञ्जरन्यासं तत्त्वन्यासं च विधाय, ध्यानादिमानसपूजान्ते सुवर्णादिपट्टे कुङ्कुमादिना त्रिकोणगर्भमष्टदलपद्मं कृत्वा, तद्बहिः पुनरष्टदलं तद्बहिर्द्वादशदलं तद्बहिः षोडशदलं तद्बहिर्द्वात्रिंशद्दलं तद्बहिश्चतुर्द्वारयुतं चतुरस्रत्रयमिति पूजाचक्रं कृत्वा, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादि-पूजंनादिपुष्पोपचारान्ते, देवस्य वामभागे—श्रींसीतायै स्वाहा सीतायै नमः इति सीतां सम्पूज्य, दक्षिणभागे—लं लक्ष्मणाय नमः। इति लक्ष्मणं सम्पूज्य, किञ्चिद् देवस्य वामाग्रे—शार्ङ्गाय नमः। दक्षिणाग्रे—ओंशरेभ्यो नमः। इति प्राधानार्चां कृत्वा प्राग्वदङ्गानि सम्पूज्य, अष्टदलमूलेषु दिक्षु—ओंआं आत्मने नमः। ओंअं अन्तरात्मने नमः। ओंपं परमात्मने नमः। ओंह्रीं ज्ञानात्मने नमः। कोणेषु—ओंनिवृत्त्यै नमः। प्रतिष्ठायै०। विद्यायै०। शान्त्यै०। ततो दलमध्येषु दिक्षु— ओंवासुदेवाय नमः। सङ्कर्षणाय०। प्रद्युम्नाय०। अनिरुद्धाय०। विदिक्षु—श्रिये नमः। शान्त्यै०। प्रीत्यै०। रत्यै०। द्वितीयाष्टदलाग्रेषु हनुमते नमः। सुग्रीवाय०। भरताय०। विभीषणाय०। लक्ष्मणाय०। अङ्गदाय०। शत्रुघ्नाय०। जाम्बवते०। अग्रेष्वेव— सृष्टये नमः। जयन्ताय०। विजयाय०। सुराष्ट्राय०। राष्ट्रवर्धनाय०। अकोपाय०। धर्मपालाय०। सुमन्त्राय०। द्वादशदलेषु— वसिष्ठाय नमः। वामदेवाय०। जाबालये०। गोतमाय०। भरद्वाजाय०। कश्यपाय०। कोशिकाय०। वाल्मीकये०। नारदाय०। सनकाय०। सनातनाय०। सनत्कुमाराय०। षोडशदलेषु—नीलाय नमः। नलाय०। सुषेणाय०। मैन्दाय०। शरभाय०। द्विविधाय०। चन्दनाय०। गवाक्षाय०। किरीटाय०। कुण्डलाय०। श्रीवत्साय०। कौस्तुभाय०। शङ्खाय०। चक्राय०। गदायै०। पद्माय०। ततो द्वात्रिंशद्दलेषु—ध्रुवाय नमः। ध्वराय०। सोमाय०। आपाय०। अनिलाय०। अनलाय०। प्रत्यूषाय०। प्रभासाय०। वीरभद्राय०। शम्भवे०। गिरीशाय०। अजैकपदे०। अहिर्बुध्न्याय०। पिनाकिने०। भुवनाधिश्वराय०। कपालिने०। दिक्पतये०। स्थाणवे०। भगाय०। वरुणाय०। सूर्याय०। वेदाङ्गाय०। भानवे०। इन्द्राय०। रवये०। गभस्तये०। यमाय०। स्वणरितसे०। दिवाकराय०। मित्राय०। विष्णवे० धात्रे नमः। इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् कुर्यात्। मन्त्रान्तराणां न्यासध्यानादिविशेषः। अर्चनं तु समानमेव।। सारसङ्ग्रहे तु द्वात्रिंशद् देवतानां पूजानन्तरम्—

वषट्कारं च पुरतः [1]प्रयजेत् सगुणत्रयम्। ततो मेषादिराशींश्च यजेन्नागाष्टकं ततः।। १।।
अनन्तो वासुकिः स्थाणुः कार्कोटः पद्म एव च। महापद्मस्तथा शङ्खः कुलिकश्चाष्टमः स्मृतः।।२।।

इत्यावरणान्तरमुक्तम्। एते चतुर्विंशतिसंख्यकाः द्वात्रिंशद्दलपद्माद्बहिश्चतुर्विंशतिदलपङ्कजेषु पूज्याः। अधिकस्याधिकं फलमिति। तथा—

---

[1] 'पूजयेत्' ख. पाठः।

षट्सहस्रं सहस्रं च त्रिशतं शतमेव वा। प्रत्यहं प्रजपेन्मन्त्री नो चेत् प्राप्नोत्यधोगतिम्।। १।।

इति। तथा सारसङ्ग्रहे—

षड्लक्षं प्रजपेन्मन्त्रं जुहुयात् तद्दशांशतः। कमलैर्मधुराभ्यक्तैरेधितेऽग्नौ सुपूजिते ।। १।।
तर्पयेत् सलिलैः शुद्धैः शीतलैश्चन्द्रवासितैः। अभिषिक्तः समभ्यर्च्य ब्राह्मणान् भोजनादिभिः।।२।।

चन्द्रः कर्पूरः।

गुरुमभ्यर्च्य विभवैस्तोषयेद् भक्तिसंयुतः। तदाज्ञयाथ कुर्वीत प्रयोगान् निजवाञ्छितान्।। ३।।
धनाय कमलैर्जातीपुष्पैश्चन्दनलोलितैः। जुहुयाद् धनाधिपवन्नीलोत्पलहुतेन च।। ४।।
वशयेद्विश्वमखिलं बिल्वपुष्पैर्धनाप्तये। (हुतं दीर्घायुषे दूर्वारक्ताब्जैर्धनप्राप्तये)।। ५।।
आधाय कुण्डे विधिवदग्निं पूर्वोक्तवर्त्मना। तत्र देवं समावाह्य पूजयेदुपचारकैः।। ६।।
पञ्चभिर्वा षोडशभिः पूजोपकरणैः पृथक्। पलाशाश्वत्थखदिरोदुम्बराम्रद्रुमेन्धनैः।। ७।।
(अग्निं प्रज्वालयेत् सम्यक् कर्पूरैरथवेन्धनैः)। तत्र सम्पूजयेत् सम्यग् राघवं प्रोक्तवर्त्मना।। ८।।
लक्षं तदर्धमथवा जपित्वा तद्दशांशतः। तिलैर्वा कमलैर्हुत्वा यद्यदिष्टं तदाप्नुयात्।। ९।।
बिल्वप्रसूनैरैश्वर्यमेधितेऽग्नौ हुतैर्भवेत्। पलाशकुसुमैर्हुत्वा मेधावी वेदविद् भवेत्।। १०।।
दूर्वाभिश्च गुडूचीभिः प्रत्येकमपि वा हुतैः। निरामयश्च दीर्घायुर्भवत्येव न संशयः।। ११।।
ध्यात्वाथ मन्मथं रामं सीतामपि रतिं स्मरेत्। सर्ववश्यं प्रयोगेषु जपहोमादिकर्मसु।। १२।।
रामं नवोढया सार्धं स्मरन्नाराध्य भक्तितः। उपैति सदृशीं कन्यां लाजाहोमेन साधकः।। १३।।
रामं विधिवदाराध्य ज्वलितेऽग्नौ प्रयोगवित्। मधुरत्रययुक्तेन पायसेन हुनेत् सुधीः।। १४।।
सर्वाधिपत्यं वैदुष्यं भवेदेव न संशयः। तिलैश्च तण्डुलैराज्यैर्हुत्वा लोकस्य पूजनम्।। १५।।
आराध्य वत्सरं यावत् षट्सहस्रं दिने दिने। जपेच्च जुहुयादग्नौ तद्दशांशं घृतान्धसा।। १६।।
अयमेवान्नदो लोके सर्वेषामपि जायते। बिल्वप्रसूनैः कुमुदैस्तथा बिल्वदलैरपि।। १७।।
हुत्वा तु स लभेल्लक्ष्मीरचिरान्मन्त्रसाधकः। आराध्य रामं चण्डांशुमण्डले वत्सरात् सुधीः।।१८।।
उदयाद्यावदस्तं स्याज्जपेन्मन्त्रमनन्यधीः। फलं भवति तस्याशु देवानामपि दुर्लभम्।। १९।।
वैदुष्येणाधिपत्येन नराणां[1]मुत्तमो भवेत्। पूर्णिमायां[2] निशीथिन्यामुदयास्तमयं विधोः।। २०।।
संवत्सरं प्रकुर्वीत जपहोमादिकं बुधः। रात्रौ जपेद् दिवा होमं कुर्यादिवापरेऽहनि।। २१।।
ब्राह्मणान् भोजयित्वा तु व्रतमेतत् समापयेत्। सोमसूर्यादिकं यस्तु व्रतं कुर्वीत मानवः।। २२।।
भुक्तिं मुक्तिं च लभते इह लोके परत्र च। रक्तपद्मैश्च बन्धूकैस्तथा रक्तोत्पलैरपि।। २३।।
अभीष्टलोकवश्यार्थं जुहुयादर्चितेऽनले। राज्यैश्वर्योपभोगार्थं जपेल्लक्षमनन्यधीः ।। २४।।
पद्मैर्बिल्वप्रसूनैर्वा दशांशं जुहुयात् सुधीः। समुद्रतीरे गोष्ठे वा लक्षजापी पयोव्रतः।। २५।।

---

[1] 'सभ्यानां' ख. पाठः। [2] 'सु' ख. पाठः।

पायसेनाज्ययुक्तेन हुत्वा विद्यानिधिर्भवेत्। मन्त्रवित् स्वाधिपत्याय शाकाहारो जलान्तरे।। २६।।
जपेल्लक्षं च जुहुयाद्बिल्वपत्रैर्दशांशत:। तदेव पुनरायाति स्वाधिपत्यं न संशय:।। २७।।

उपोष्य गङ्गादिजलान्तरस्थो रामं समाराध्य जपेच्च लक्षम्।
हुत्वा दशांशं कमलैस्तिलैर्वा जपा[1]प्रसूनैर्मधुरत्रयाक्तै:।। २८।।
राजश्रियं विन्दति मन्दभाग्यो ह्यमुष्य राज्यं च सदा स्थिरं स्यात्।
रामं समाराध्य च यो हुनेच्च राज्यश्रियं विन्दति सेन्दुखण्डै:।। २९।।

वैशाखे राघवं सूर्ये पश्यन्ननिमिषेक्षण:। निराहारो जपेल्लक्षं मौनी पञ्चाग्निमध्यत:।। ३०।।
दशांशं कमलैर्हुत्वा सर्वभोगो भवेद् ध्रुवम्। माघमासे जले स्थित्वा कन्दमूलफलाशन:।। ३१।।
जपेल्लक्षं च जुहुयात् पायसेनार्चितेऽनले। दशांशं पुत्रपौत्राद्यैरुपेत: प्राप्नुयाच्छ्रियम्।। ३२।।
श्रीरामसदृश: पुत्र: पौत्रोऽप्यस्य प्रजायते। बलिष्ठै: शत्रुभिर्मन्त्री परिभूतोऽथ मानव:।। ३३।।
सदा हनहनेत्युक्त्वा मायान्ते वा रणे यजेत्। ध्यात्वा रघुपतिं क्रुद्धं कालानलमिवापरम्।।३४।।
(आकर्णसशराकृष्टकोदण्डभुजमण्डितम् ।) रणाङ्गने रिपूञ्जित्वा[2] तीक्ष्णमार्गणवृष्टिभि:।। ३५।।
संहरन्तं महावीरमुग्रमैन्द्ररथस्थितम्। लक्ष्मणादिमहावीरैर्युतं हनुमदादिभि:।। ३६।।
कोटिकोटिमहावीरै: शैलवृक्षकरोद्धतै: वज्रीकरण[3]हुङ्कारभोंकारसुमहारवै:।। ३७।।
नदद्भिरपि धावद्भि: समरेऽरिगणं प्रति। एवं ध्यात्वा निराहारो मारणाय रिपो: पुन:।। ३८।।
जुहुयाच्छाल्मलीपुष्पैर्दशांशं मन्त्रसाधक:। अत्यन्तं तु समृद्धोऽपि न शत्रुरवशिष्यते।। ३९।।
वैरिणं रावणं ध्यात्वा तथात्मानं रघूद्वहम्। विधाय पूर्ववत् सर्वमनायासेन मारयेत्।। ४०।।
सीताहरणशोकाच्च स्तब्धीभूतमचेतसम्। जपेद्रघुपतिं ध्यायन्निराहारो जले वसन्।। ४१।।
दशांशं च तिलैर्हुत्वा स्तम्भयेच्छत्रुसंहतिम्। निधाय वायुबीजान्ते तन्नाम भ्रामयेति च।। ४२।।
जपेन्नक्तं निराहारो जुहुयाच्च तिलैरपि। रामं ध्यात्वा विषण्णं तु सीतान्वेषणकातरम्।। ४३।।
भ्रामयत्यचिरं साक्षाद्धेमाद्रिमपि वैरिणम्। समुद्रतीरे लङ्कायां हेमप्राकारसन्निधौ।। ४४।।
सुग्रीवादिभिरन्यैश्च दैवतैर्नारदादिभि:। उपास्यमानं सदसि ध्यात्वा देवं सलक्ष्मणम्।। ४५।।
विभीषणायागताय ध्यात्वैनं[4] शरणार्थिने। वरदं तं जपेल्लक्षं जुहुयात् पङ्कजैरपि।। ४६।।
स्वस्थानमानयेच्छीघ्रं राजानमथवा प्रभुम्। निमील्य चक्षुषी स्नेहादुपलभ्य पुन: पुन:।। ४७।।
प्रमोहयन्तं सहसा विराधान्मारुतिप्रियम्। रामं ध्यात्वा जपेल्लक्षं हुत्वा रक्ताम्बुजैरपि।। ४८।।
सम्मोहयति वेगेन राजानमपि वा प्रभुम्। तारादिर्मुक्तये ह्येष रमादिर्भुक्तये तथा।। ४९।।
वाक्सिद्धये च वाग्बीजं प्रणवान्ते नियोजयेत्। मान्मथं सर्ववश्याय वदेत् तत्रितयं पुन:।। ५०।।

---

१. 'जाती' ख. पाठ:। २. 'सर्वान्' ख. पाठ:। ३. 'वज्जीकशमलंकार' ख. पाठ:। ४. 'ध्यात्वा तं' ख. पाठ:।

तारान्ते चैव तन्मन्त्री सर्वार्थं विनियोजयेत्।..।।

इति। स्कन्दयामले–

आदौ विरच्य षट्कोणं तन्मध्ये बीजमालिखेत्। तद्बीजान्तरधः साध्यं साधकाख्यां तदूर्ध्वतः।।१।।
षष्ठ्या[1](साध्या)धः साधकं कर्म मध्ये तत्पार्श्वयोः क्रियाम्। रमाबीजं च तस्यान्तस्तत्सर्वं वेष्टयेत् ततः।२।
सम्मुखाभ्यां तु ताराभ्यां कोणेष्वङ्गमनूँल्लिखेत्। षट्कोणपार्श्वयोर्मायाश्रीबीजेऽग्रेषु मन्मथम्।।३।।
षट्सन्धिषु च हुंबीजं तत्सर्वं वेष्टयेत् ततः। वाग्भवेन बहिः पद्ममष्टपत्रं सकेसरम्।। ४।।
केसरेषु स्वरान् वर्णान् पत्रेषु विलिखेत् क्रमात्। पत्राग्रेषु लिखेन्मालामन्त्रवर्णान् ऋतून्मितान्।।५।।
पञ्च चान्त्यदले बाह्ये पुनरष्टदलाम्बुजम्। तत्केसरेषु श्रीबीजं दलेष्वष्टाक्षराणि च।। ६।।
नारायणमनोर्बाह्ये बाह्ये पद्मं पुनरष्टदलाम्बुजम्। तत्केसरेषु चत्वारि चत्वारि विलिखेत् क्रमात्।।७।।
अकारादिक्षकारान्तान् मातृकार्णान् सबिन्दुकान्। शिष्टानन्ते तद्दलेषु विलिखेत् परमेश्वरि।। ८।।
वासुदेवमनोर्वर्णान् द्वादशैकैकशः क्रमात्। बहिः षोडशपत्रं[2] च मायाबीजाढ्यकेसरम्।। ९।।
तत्पत्रेषु च वर्मास्त्रहृदन्तान् द्वादशार्णकान्। विलिख्य तत्सन्धिषु तु वायुपुत्रादिबीजकान्।। १०।।
द्वात्रिंशद्दलसंयुक्तं पद्मं कृत्वाथ तद्बहिः। तन्मूलेषु लिखेच्छक्तिश्रीमारबीजकानि च।। ११।।
रामानुष्टुभमन्त्रार्णान् नृसिंहानुष्टुभार्णकान्। दलेष्वैकैकशो देवि विलिखेत् तदनन्तरम्।। १२।।
पत्राग्रेषु च मन्त्रज्ञो वषडित्यक्षरद्वयम्। बहिर्भूपुरमालिख्य वज्राष्टकविराजितम्।। १३।।
नृसिंहबीजं तद्दिक्षु वाराहं कोणकेषु च। लिखेच्छ्रीरामयन्त्रं हि सर्वयन्त्रोत्तमं प्रिये।। १४।।
साधितं जपहोमाभ्यां होमसम्पातसेकतः। धृतं शिरसि वा बाहावायुरारोग्यदं नृणाम्।। १५।।
रक्षाकरं महेशानि महदैश्वर्यवर्धनम्। वन्ध्यानामपि नारीणां पुत्रदं सुखदं परम्।। १६।।
भुक्तिमुक्तिप्रदं चैव गोपनीयं सुरेश्वरि। यस्मै कस्मै न देयं च त्रिषु लोकेषु दुर्लभम्।। १७।।
किं बहूक्तेन देवेशि सर्वदं नात्र संशयः।..।।

इति। अस्यायमर्थः– षट्कोणं कृत्वा, तन्मध्ये श्रीरामबीजं विलिख्य, (तन्मध्ये साध्यनाम विलिख्य) तत्सर्वमन्योन्याभिमुखप्रणवाभ्यां संवेष्ट्य षट्सु कोणेषु षडङ्गमन्त्रानालिख्य, षटकोणपार्श्वयोर्वामे मायां दक्षिणे श्रीबीजं च विलिख्य, तत्कोणाग्रेषु कामबीजं विलिख्य, षट्कोणसन्धिषु हुंबीजमालिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां वाग्भवबीजानि निरन्तरं (वृत्ता) कारेण विलिख्य, तद्बाह्येऽष्टदलं कृत्वा तत्केसरेषु द्वन्द्वशः (षोडश) स्वरान् विलिख्य, तद्दलेषु कचटतपयशळाख्यानष्टवर्गानालिख्य, तत्पत्राग्रेषु पूर्वोक्तमालामन्त्रवर्णान् षट्षट् समालिख्यान्तिमे पञ्चवर्णानालिख्य, तद्बहिः पुरनष्टदलपद्मं कृत्वा, तत्केसरेषु श्रीबीजं, दलेषु नारायणाष्टाक्षराणि विलिख्य, तद्बहिर्द्वादशदलकमलं कृत्वा, तत्केसरेषु मातृकार्णांश्चतुरश्चतुर आलिख्य, तद्दलेषु वासुदेवद्वादशाक्षराणि एकैकशो विलिख्य, तद्बहिः षोडशदलकेसरेषु मायाबीजं प्रतिकेसरं विलिख्य, दलेषु पूर्वोक्तद्वादशाक्षराणि द्वादशदलेषु विलिख्यावशिष्टदलचतुष्टये, ''हुं फट् नमः'' इति वर्णचतुष्टयं प्रतिदलमेकैकं विलिख्य, तद्दलान्तरालेषु प्रागुक्तहनुमदाद्यष्टकसृष्ट्याद्यष्टकयोर्नामाद्यक्षराणि सबिन्दूनि

---

[1] 'कर्ममध्ये समालिख्य देवि तत्पार्श्वयोः क्रियाम्' ख. पाठः। [2] 'त्राब्जं' ख. पाठः।

लिखित्वा तद्बहिर्द्वात्रिंशद्दलेषु पूर्वोक्तश्लोकरूपद्वात्रिंशदक्षररामम‌न्त्रार्णान् नृसिंहद्वात्रिंशदक्षरवर्णांश्चैकैकशो विलिख्य, तत्केसरेषु प्रतिकेसरं शक्तिश्रीकामबीजानि विलिख्य, पत्राग्रेषु प्रत्यग्रं वषडिति विलिख्य, तद्बहिश्चतुरस्रं वज्राष्टकयुतं कृत्वा तत्र दिक्षु प्रोक्तनृसिंहबीजं, विदिक्षु वाराहबीजं विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। सारसङ्ग्रहे—

दहनपुरयुगे च कामबीजे विलिखतु साध्यसमन्वितं च बीजम्।
वृतमिदमणुवर्णकैश्च शिष्टैस्तदनु दशाक्षरमन्त्रवर्णवीतम्।। १।।
षडपि च हृदयादि मुख्यकोणेषु[1] लिखतु शक्तिरमे च कोणपार्श्वे।
कवचमनुमथो लिखेत्तदग्रे वसुदलकेसरगान् द्विशः स्वरांश्च।। २।।
ऋतुपरिमितवर्णकांश्च मालामनुसुभगांश्च तदन्तिमेऽन्तिमांश्च।
कमुखलिपिवृतं धरापुरस्थं दिशि नृहरेश्च वराहबीजमस्रे।। ३।।
जपहोमादिना सम्यक् साधितं यन्त्रमुत्तमम्। सर्वेष्टफलदं मोक्षदायकं श्रीकरं परम्।। ४।।

इति। अस्यार्थः— षट्कोणं विरच्य तन्मध्ये कामबीजोदरे श्रीरामबीजं प्राग्वत् ससाध्यं विलिख्य, अवशिष्टमूलमन्त्रवर्णैरावेष्ट्य, तद्बहिश्च "हुंजानकीवल्लभाय स्वाहा" इति मन्त्रेणावेष्ट्य, षट्कोणेषु प्राग्वत् षडङ्गमन्त्रानालिख्य, षट्कोणपार्श्वयोर्वामदक्षिणयोः शक्तिबीजं मायाबीजं चैकैकशो विलिख्य, कोणाग्रेषु हुं इत्यालिख्य, बहिरष्टदलकमलं कृत्वा तत्केसरेषु द्वन्द्वशः स्वरानालिख्य, तद्दलेषु प्राग्वन्मालामन्त्रवर्णानालिख्य, बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां कादिक्षान्तवर्णैः सबिन्दुकैरावेष्ट्य, बहिश्चतुरस्रं कृत्वा तस्य दिक्षु नृसिंहबीजं कोणेषु वाराहबीजं च लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

षट्कोणे प्रणवं च साध्यसहितं मूलाणुमश्रिष्वथो
सन्धिष्वङ्गमनूंश्च शक्तिमदनौ षट्कोणपार्श्वे लिखेत्।
किञ्जल्केषु कला द्विशश्च दलगं मालाणुषड्वर्णकं
चान्त्यं चान्त्यदले दशार्णमनुना काद्यैर्वृतं भूस्थितम्।। ५।।
दिशि विदिशि नृसिंहवराहकौ लिखतु भूजदले कनकोद्भवे।
राजतेऽथ च सुसाधितमुत्तमं विभवकीर्तिरमाविजयप्रदम्।। ६।।

इति। अस्यार्थः— तत्र षट्कोणं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, कोणषट्के मूलमन्त्रस्य षडर्णानालिख्य, षट्कोणसन्धिषु षडङ्गमन्त्रानालिख्य, षट्कोणपार्श्वयोः शक्तिबीजं स्ववामे दक्षिणे कामबीजं विलिख्य, बहिरष्टदलकमलं कृत्वा, तत्केसरेषु द्वन्द्वशः स्वरान् दलेषु प्राग्वन्मालामन्त्रवर्णांश्च विलिख्य, तद्बहिर्वृत्तत्रयं कृत्वाभ्यन्तरवीथ्यां दशाक्षरमन्त्रेण पूर्वोक्तेनावेष्ट्य, बाह्यवीथ्यां कादिक्षान्तवर्णैरावेष्ट्य, बहिश्चतुरस्रं कृत्वा तस्य दिक्षु नृसिंहबीजं, विदिक्षु वराहबीजं च विलिखेत्। एतद्यन्त्रमुक्तफलदं भवतीति।।

अथ रामानुस्मृतिः। श्रीब्रह्मोवाच—

वन्दे रामं जगद्वन्द्यं सुन्दरास्यं शुचिस्मितम्। कन्दर्पकोटिलावण्यं कामितार्थप्रदायकम्।। १।।
भास्वत्किरीटकटककटिसूत्रोपशोभितम्। विशाललोचनं भ्राजत्तरुणारुणकुण्डलम् ।। २।।

---

[1] १. 'कोणे विलिखतु' क. ख. पाठः।

ज्ञानमयं विभुम्।। ३।।
नीलजीमूतसङ्काशं नीलालकवृताननम्। ज्ञानमुद्रालसद्दक्षबाहुं ज्ञानमयं विभुम्।। ३।।
वामजानुपरिन्यस्तवामाम्बुजकरं हरिम्। वीरासने समासीनं विद्युत्पुञ्जनिभाम्बरम् ।। ४।।
कोटिसूर्यप्रतीकाशं कोमलावयवोज्ज्वलम्। जानकीलक्ष्मणाभ्यां च वामदक्षिणशोभितम्।। ५।।
हनुमद्रविपुत्रादिकपिमुख्यैर्निषेवितम् । दिव्यरत्नसमायुक्तसिंहासनगतं प्रभुम् ।। ६।।
प्रत्यहं[1] प्रातरुत्थाय ध्यात्वैवं राघवं हृदि। एभिः षोडशभिर्नामपदैः स्तुत्वा नमेद्धरिम्।। ७।।
नमो रामाय शुद्धाय बुद्धाय परमात्मने। विशुद्धज्ञानदेहाय रघुनाथाय ते नमः ।। ८।।
नमो रावणहन्त्रे ते नमो बालिविनाशिने। नमो वैकुण्ठनाथाय नमो विष्णुस्वरूपिणे।। ९।।
नमो यज्ञस्वरूपाय यज्ञभोक्त्रे नमोऽस्तु ते। योगिध्येयाय योगाय परमानन्दरूपिणे।। १०।।
शङ्करप्रियमित्राय जानक्याः पतये नमः। य इदं प्रातरुत्थाय भक्तिश्रद्धासमन्वितः।। ११।।
षोडशैतानि नामानि रामचन्द्रस्य नित्यशः। पठेद्विद्वान् स्मरेन्नाम स एव स्याद्रघूत्तमः।। १२।।
श्रीरामभक्तिरतुला भवत्येव हि सर्वदा। जगत्पूज्यः सुखं जीवेद् रामभद्रप्रसादतः।। १३।।
मरणे समनुप्राप्ते श्रीरामः सीतया सह। हृदि सन्दृश्यते तस्य साक्षात् सौमित्रिणा सह।। १४।।
नित्यं चापररात्रेषु रामस्येमां समाहितः। मुच्यतेऽनुस्मृतिं जप्त्वा मृत्युदारिद्र्यपातकैः।। १५।।

इति। श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे रामानुस्मृतिः सम्पूर्णा।। अथ हनुमन्मन्त्राः। सारसङ्ग्रहे—

आञ्जनेयमनुर्लोके भुक्तिमुक्त्येकसाधनम्। प्रकाशितः शङ्करेण लोकानां हितमिच्छता।। १।।
भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः। दृष्ट्वावशाः पलायन्ते मन्त्रानुष्ठानतत्परान् ।। २।।
चतुष्षष्टिं ह्यपस्मारान् षड्विंशतिमतिग्रहान्। शतं शिशुग्रहांस्तद्वत् त्रिषष्टिं ब्रह्मराक्षसान्।। ३।।
गन्धर्वान् द्वादश तथा भूतान्नानाविधान् ग्रहान्। सप्तधा राजयक्ष्माणं तथा चाष्टविधं ज्वरम्।।४।।
चतुर्विंशद्विधं घोरमन्यान् दशानसंख्यकान्। डाकिनीत्यादिकानन्यान् स्मरणादेव नाशयेत्।। ५।।
गुटिकां पादलेपं च रसं चैव रसायनम्। खड्गं सदञ्जनं[1] चैव खेचरं पादुकादिकान्।। ६।।
विद्वेषणं मारणं च वश्यमाकर्षणं तथा। उच्चाटनं मोहनं च सप्तद्वीपाधिपत्यकम्।। ७।।
विद्याधराणां सर्वेषां चक्रवर्ती न संशयः। (प्रधानश्चाङ्गभूतोऽयं मन्त्रराजो ह्यनुत्तमः।। ८।।
पूर्वं नमःपदमुक्त्वा ततो भगवते—पदम्। आञ्जनेय—पदं ङेन्तं महाबलपदं ततः।। ९।।
वह्निजायान्त एवायं मन्त्रो हनुमतः परः। सर्वसिद्धिकरः प्रोक्तो मन्त्रश्चाष्टादशाक्षरः।। १०।।
मालाख्योऽपरमन्त्रोऽपि मारुतेः सर्वसिद्धिदः।) प्रणवं पूर्वमुच्चार्य नमो भगवते पदम्।। ११।।
ङेन्तं प्रस्फुटसंयुक्तं पराक्रमपदं वदेत्। तथाक्रान्तपदोपेतं दिङ्मण्डलमुदीरयेत्।। १२।।
यशोवितानधवलीकृतजगत्पदं वदेत्। त्रितयाय—पदं वज्रदेहरुद्रावतारतः।। १३।।
सम्बुद्ध्यन्तं पदं लङ्कापुरीदहनमीरयेत्। उदधिलङ्घनं चापि दशग्रीवकृतान्तकम्।। १४।।

---

१. 'प्रसन्नं' ख. पाठः।

सीताश्वासनशब्दं च ह्यञ्जनागर्भसं–पदम्। भूतान्ते रामलक्ष्म स्यात् णानन्दकरमीरयेत्।। १५।।
कपिसैन्यप्रा–पदान्ते कारसुग्रीवसा–पदम्। थारणान्ते पर्व–पदं तोत्पाटन–पदं वदेत्।। १६।।
बालब्रह्म–पदं चारिणे गभीर–पदं वदेत्। शब्दसर्वग्रहं प्रोक्त्वा विनाशनमथोच्चरेत्।। १७।।
सर्वज्वरहरं डाकिनीध्वंसनमीरयेत्। ततस्तारं समुच्चार्य महामायां त्रिरुच्चरेत् ।। १८।।
एहि[1] सर्वविषं पश्चाद् हर सर्वबलं पदम्। क्षोभयान्ते च मे सर्वकार्याणि साधयेद्वयम्।। १९।।
वर्मास्त्राग्न्यङ्गनान्तोऽयं हनुमन्मन्त्र ईरितः। ऋषिरीश्वर एव स्यादनुष्टप् छन्द उच्यते।। २०।।
हनुमान् देवता प्रोक्तः सर्वाभीष्टफलप्रदः। नमो भगवते चाञ्जनेयायानेन हृन्मतम् ।। २१।।
रुद्रमूर्तय इत्येवं शिरोमन्त्र उदाहृतः। ङेन्तो वायुसुतश्चायं शिखामन्त्र उदाहृतः।। २२।।
अग्निगर्भाय च ततः कवचाणुरयं मतः। (रामदूताय च पुनर्नेत्रमन्त्रः समीरितः।। २३।।
ब्रह्मास्त्रतो निवारान्ते णायेत्यस्त्रमनुर्मतः। एवं षडङ्गं च सुधीः कृत्वा ध्यायेदनन्यधीः)।। २४।।
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम्। कुण्डलद्वयसंशोभिमुखाम्भोजं स्मरेन्मुहुः।।२५।।
पूजां तु वैष्णवे पीठे शैवे वा विदधीत वै। आवृतानि विना नित्यं वरिष्ठैश्चन्दनादिभिः।।२६।।
अयुतं च पुरश्चर्यां रामस्याग्रे शिवस्य वा।..।।

"द्रव्यानुक्तौ घृतं होमे" इति कपिलवचनाद् घृतेनैव दशांशो होमः। तर्पणमार्जनादि च।। नमो भगवते आञ्जनेयाय हृत्। रुद्रमूर्तये शिरः। वायुसुताय शिखा। अग्निगर्भाय कवचं। रामदूताय नेत्रं। ब्रह्मास्त्रनिवारणाय अस्त्रं। इति करषडङ्गन्यासः। तथा–

जितेन्द्रियस्तु नक्ताशी हनुमद्ध्यानतत्परः। क्षुद्ररोगनिवृत्त्यर्थमष्टोत्तरशतं सुधीः ।। २७।।
जप्त्वा त्रिदिनमेकान्ते तेभ्यो मुच्येत तत्क्षणात्। क्षुद्रभूतप्रशान्त्यर्थं शतमष्टोत्तरं पुनः।। २८।।
दिनत्रयमथो जप्त्वा भूतानां मुच्यते भयात्। भूतप्रेतपिशाचादिशान्तयेऽष्टोत्तरं शतम्।। २९।।
जप्त्वैव तत्क्षणान्मुक्तो भवेदेव न संशयः। महारोगादिशान्त्यर्थमष्टोत्तरसहस्रकम्।। ३०।।
जप्त्वा तस्मात् प्रमुच्येत निशीथे नियताशनः। जयाभिकाङ्क्षिणां राज्ञामस्मादन्यो न [2]वर्तते।।३१।।
ध्यायेत चाक्षहन्तारमयुतं नियताशनः। जपन्नियतमाश्वेव यजेद् दुर्जयमप्यरिम् ।। ३२।।
सम्यक् च रामसुग्रीवसन्धातारं स्मरन् सुधीः। अयुतेन च विच्छिन्नं सन्धिमाप्नोत्यसंशयम्।।३३।।
लङ्काया दाहकं ध्यायञ्जपेदयुतमञ्जसा। शत्रुराष्ट्रं दहेदेव दुग्धाब्धावपि संस्थितम्।। ३४।।
जयार्थं रिपुसङ्घानामस्मादन्यो न विद्यते। यस्तु गेहे हनूमन्तं सर्वदैव प्रपूजयेत्।। ३५।।
मन्दिरे मन्त्रिणस्तस्य भवेल्लक्ष्मीरचञ्चला। दीर्घमायुर्भवेदेव सर्वत्र विजयी भवेत्।। ३६।।

इति।। श्रीयन्त्रसारे–

---

१. 'वदेत्' ख. पाठः। २. 'विद्यते' ख. पाठः।

मध्ये तारं स्वरयुगलसत्केसरे चाष्टपत्रे
मन्त्रस्यार्णान् जलनिधिमितान् अन्तरालिख्य कार्णैः।
वीतं मालामनुवरवृतं भूपुरस्थं हनूम-
द्यन्त्रं चौरग्रहकृमिगदध्वंसि रक्षाकरं च।। १।।

इति। अस्यार्थः— अष्टदलपद्मं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, तत्केसरेषु स्वरान् द्विश आलिख्य, दलेषु वक्ष्यमाणहनुमन्मन्त्रार्णांश्चतुरश्चतुरो विलिख्य, बहिर्वृत्तयोरन्तराले ककारादिक्षकारान्तवर्णैरावेष्ट्य, बहिः पुनर्वृत्तयोरन्तराले वीथ्यां वक्ष्यमाणहनुमन्मालामन्त्रेण संवेष्ट्य बहिश्चतुरस्रं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति।। ॐ नमो भगवते पवनात्मजाय राघवप्राणसमाय लक्ष्मणप्राणदात्रे सीतादुःखविनाशनाय रावणदर्पघ्नाय सर्वदुष्टविनाशनाय रिपुचौरव्याघ्रवराहकृमिपतङ्गादिदुष्टसत्त्वविनाशनाय हुंफट् स्वाहा।। अयं दलेषु लेख्यो मन्त्रः।। अथ हनुमत्स्तुतिः—

नमो हनुमते तुभ्यं नमो मारुतसूनवे। नमः श्रीरामभक्ताय श्यामश्यामाय ते नमः।। १।।
नमो वानरबीजाय सुग्रीवसख्यकारिणे। लङ्काविदाहनार्थाय हेलासागरतारिणे।। २।।
सीताशोकविनाशाय राममुद्राधराय च। रावणादिकुलच्छेदकारिणे ते नमो नमः।। ३।।
मेघनादवरध्वंसकारिणे भयहारिणे। वायुपुत्राय वीराय आकाशोदरगामिने।। ४।।
वनपालशिरश्छेत्रे लङ्काप्रासादभञ्जिने। ज्वलत्कृशानुवर्णाय दीर्घलाङ्गूलधारिणे।। ५।।
सौमित्रिजयदात्रे च रामभक्ताय ते नमः। अक्षस्य वधकर्त्रे च ब्रह्मशक्तिनिवारिणे।। ६।।
संयुगे च महाशक्तिवातक्षेपविनाशिने। रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय नमो नमः।। ७।।
ऋक्षवानरवीरैकप्राणदात्रे नमो नमः। परसैन्यबलघ्नाय शस्त्रौघघ्नाय ते नमः।। ८।।
विषघ्नाय दिष(द्)घ्नाय व[1]रघ्नाय नमो नमः। महारिपुभयघ्नाय भक्तत्राणैककारिणे।। ९।।
परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे। पयःपाषाणतरणकारणाय नमो नमः।। १०।।
बालार्कमण्डलग्रासकारिणे भयतारिणे। नखायुधाय भीमाय दशायुधधराय च।। ११।।
रिपुमानविनाशाय रामाज्ञालोकधारिणे। प्रतिग्रामस्थितायाथ रक्षोबलवधार्थिने ।। १२।।
करालशैलशस्त्राय द्रुमशस्त्राय ते नमः। बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च ।। १३।।
पिशङ्गाङ्गाय सर्वाय वज्रदेहाय ते नमः। कौपीनवाससे तुभ्यं रामभक्तिरताय च।। १४।।
दक्षिणाशाभास्कराय सतां चन्द्रोदयात्मने। कृत्याकृत्यविषघ्नाय सर्वक्लेशहराय च।। १५।।
स्वाम्याज्ञापार्थसङ्ग्रामसख्ये सज्जयदायिने। भक्तानां दिव्यवादेषु सङ्ग्रामे जयदायिने।। १६।।
किङ्किला—बुम्बुका—घोरघोरशब्दकराय च। सर्वोग्रव्याधिसंस्तम्भकारिणे वनचारिणे।। १७।।
सदा वनफलाहारसन्तृप्ताय विशेषतः। महार्णवशिलाबद्धसेतुबन्धाय ते नमः।। १८।।
वादे विवादे सङ्ग्रामे भये घोरे महावने। सिंहव्याघ्रतस्करेषु पठन् स्तोत्रं भयं नहि।। १९।।

---

[1] 'चर' ख. पाठः।

दिव्यभूतभये व्याधौ विषे स्थावरजङ्गमे। राजशत्रुभये चोग्रे तथा ग्रहभयेषु च।। २०।।
जलसर्पमहावृष्टौ दुर्भिक्षे व्रणसम्प्लवे। पठन् स्तोत्रं प्रमुच्येत भयेभ्य: सर्वतो नर:।। २१।।
तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठनात् (त:)। एककालं त्रिकालं वा पठन्नित्यमिमं स्तवम्।।२२।।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा। विभीषणकृतं स्तोत्रं ताक्ष्येण समुदीरितम्।। २३।।
ये पठिष्यन्ति भक्त्या वै सिद्धयस्तत्करे स्थिता:।..।।

इति हनुमत्स्तुति:। अथ गोपालमन्त्र:। श्रीसारसङ्ग्रहे—

श्रीगोपालमनुं वक्ष्ये सर्वसम्पत्प्रदायकम्। ग्रहरोगविषारिघ्नं व्याधिदारिद्र्यनाशनम्।। १।।
पुत्रमित्रकलत्रादिभोगमोक्षफलप्रदम्। विद्याविभवदं नृणां विशिष्टकविताकरम् ।। २।।
समस्तवनिताचित्तराजवश्यकरं परम्। पञ्चान्तकोऽधरान्तान्तो लोहितोऽथ त्रिमूर्तियुक्।। ३।।
चतुराननमेषौ च खड्गीशश्च तत: परम्। पिनाकीशद्वयं भूयो द्विरण्डेशश्च दीर्घवान्।। ४।।
बाली चन्द्रसुधादीर्घा नकुलीशश्च कान्तियुक्। मन्त्रो दशाक्षर: प्रोक्तो गोपालस्य महात्मन:।। ५।।
विष्णुपादाम्बुजद्वन्द्वभक्तिवृद्धिकर: पर:। ....।।

इति। पञ्चान्तको ग, अधरान्तं ओ, अन्ते यस्य स तेन गो। लोहित: पकार:, त्रिमूर्ति ई, तेन पी। चतुराननो ज। मेषो न। खड्गीशो व। पिनाकीशद्वयं ल्ल। द्विरण्डेशो भ, दीर्घ आ, तेन भा। वाली य। चन्द्र: स, सुधा व, दीर्घ आ, तेन स्वा। नकुलीशो ह, कान्ति: आ, तेन हा। तथा—

गोपायत्यखिलं लोकं गोपयेत् पुरुषं परम्। तेन[1] गोपी समाख्याता प्रकृतिर्मूलकारणम्।। ६।।
यतोऽपि जायते[2] विश्वं जनशब्देन गद्यते। आश्रयत्वेन वै गोपीजनयो: प्रेरणादयम्।। ७।।
वल्लभ: प्रोच्यते तज्ज्ञैर्नित्यानन्दं महोऽद्भुतम्। स्वाहाशब्देन चात्मानं महसे प्रापयाम्यहम्।। ८।।
उत्पाद्योत्पादकाधीशो विष्णुर्वै परमात्मना। मन्त्रार्थो विष्णवे तत्त्वं साधकस्य भवेद् ध्रुवम्।। ९।।
विश्वरक्षणसामर्थ्यसङ्घातो वा निगद्यते। गोपीजनपदेनास्य स्वात्माभिन्नस्य वल्लभ:।। १०।।
प्रभु: प्रिय इति ख्यातं स्वाहार्थ: पूर्ववद्भवेत्। गोपाङ्गनाप्रियायास्मै स्वात्मानं च स्वकीयकम्।।११।।
जुहोमि सगुणे ब्रह्मणीत्थं मन्त्रनिरुक्तय:। नादरोऽस्य मुनि: प्रोक्तो विराट् छन्द उदीरितम्।। १२।।
देवता नन्दपुत्रोऽत्र कृष्णो दैत्यविघातकृत्। कलमायाशिरोभिस्तु बीजं मन्त्रस्य कीर्तितम्।। १३।।
शक्ति: स्वाहा समाख्याता मन्त्रवर्यस्य देशिकै:। धर्मार्थकाममोक्षाप्तौ विनियोगो भवेदिति।। १४।।
कृष्ण: प्रकृतिरित्युक्तो दुर्गाधिष्ठातृदेवता। आचक्रेण विचक्रेण सुचक्रेण तत: परम्।। १५।।
त्रैलोक्यरक्षणाद्येन चक्रेण तदनन्तरम्। असुरान्तकचक्रेण चतुर्थ्यन्तैस्तु पञ्चभि:।। १६।।
स्वाहान्तैर्जातिसंयुक्तै: पञ्चाङ्गानि प्रकल्पयेत्। हृदये शीर्षके चैव विखायां कवचे तथा।। १७।।
अस्त्रे पार्श्वद्वये कट्यां पृष्ठे मूर्धनि च क्रमात्। मन्त्रार्णान् विन्यसेन्मन्त्री बिन्द्वन्तान् नमसा युतान्।।१८।।

---

[1] 'अत:' ख. पाठ:। [2] 'विजायते' ख. पाठ:।

करयोर्मध्यत: पृष्ठे तयो: पार्श्वे च मन्त्रवित्। प्रणवाद्यं तदन्तं च व्यापयेद् दशवर्णकम्।। १९।।

(दशवर्णकं समस्तमूलमन्त्रम्)

ध्रुवसम्पुटितैर्वर्णैर्दशभिश्च नमोयुतै:। दशाङ्गुलिषु विन्यस्येत् त्रिपर्वव्याप्तितो बुध:।। २०।।
दक्षिणाङ्गुष्ठमारभ्य वामाङ्गुष्ठावधि न्यसेत्। हस्तगा सृष्टिराख्याता युग्माङ्गुष्ठादिका स्थिति:।।२१।।
वामाङ्गुष्ठादिको न्यासो दक्षाङ्गुष्ठावधिर्भवेत्। संहारो मुनिभि: प्रोक्त: करन्यासत्रयं त्विदम्।।२२।।
करयुगे दशाङ्गं च पञ्चाङ्गं पूर्ववन्न्यसेत्। मन्त्रसम्पुटितैर्वर्णैर्मातृकाया न्यसेत् तत:।। २३।।
दशतत्त्वानि विन्यस्येन्मन्त्रवर्णै: सह क्रमात्। अनुलोमेन मन्त्रार्णान् संहारे योजयेद् बुध:।। २४।।
मन्त्रवर्णांस्तथा सृष्टौ प्रतिलोमेन योजयेत्। उद्धार: पूर्ववज्ज्ञेयो न्यासं वच्मि तु साम्प्रतम्।। २५।।
पृथिवीजलतेजांसि वायुराकाशकं तथा। अहङ्कारो महत्तत्त्वं प्रकृति: पुरुष: पर:।। २६।।
नामानि दशतत्त्वानां स्थानेष्वेषु प्रविन्यसेत्। पादयुग्मे शिवे वक्षोमुखयोर्मस्तके न्यसेत्।। २७।।
तत्त्वयुग्मं ततो मध्ये सर्वाङ्गे तत्त्रयं न्यसेत्। तद्विपर्ययतो न्यासो गुप्तस्तत्त्वदशात्मक:।। २८।।
सर्वगोपालमन्त्रेषु विहित: शीघ्रसिद्धये। मस्तकादि तु पादान्तं कराभ्यां व्यापकं न्यसेत्।। २९।।
वेदादिपुटितं मन्त्रं त्रिवारं मन्त्रवित्तम: । मस्तके नयने कर्णनासिकाननहृत्सु च।। ३०।।
तुन्दान्धुजानुपादेषु मन्त्रार्णान् विन्यसेत् क्रमात्। सृष्टिन्यासस्त्वयं प्रोक्त: स्थितिन्यासं समाचरेत्।।३१।।
हृदयादिमुखान्तोऽसौ सृष्टेस्तु विपरीतक:। संहार: कथितो न्यास एवं न्यासत्रयं भवेत्।। ३२।।
मूलाधारे ध्वजे नाभौ हृदयेऽथ गले मुखे। अंसयोरूरुयुग्मे च न्यास एक: प्रकीर्तित:।। ३३।।
स्कन्धदेशे च नाभौ च कुक्षौ हृदि कुचे तथा। पार्श्वयुग्मे च पृष्ठे च श्रोणियुग्मे द्वितीयक:।।३४।।
मस्तकाननयोरक्ष्णो: कर्णयोर्नासिकाद्वये। गण्डयोश्च तृतीय: स्याद् दक्षहस्तस्य सन्धिषु।। ३५।।
तदग्राङ्गुलिषु प्रोक्तश्चतुर्थो न्यास उत्तम:। इत्थं वामकरे दक्षवामयो: पादयोरपि।। ३६।।
न्यासत्रयं समाख्यातं मस्तके तदनन्तरम्। तत्पूर्वादिषु दिग्भागेषु सम्पूर्णे शिरस्यथ।। ३७।।
बाहुयुग्मे सक्थियुग्मेऽथाष्टम: परिकीर्तित:। मस्तके नयने चास्ये कण्ठे हृदि च तुन्दके।। ३८।।
मूलाधारे च लिङ्गे च जानुनि प्रपदे पुन:। नवमो न्यास आख्यात: कर्णयोर्गण्डयोस्तथा।। ३९।।
अंसयो: स्तनयो: पार्श्वयो: स्फिचोश्चोरुयुग्मके। जानुनोर्जङ्घयोरङ्घ्र्योर्दशमो न्यास ईरित:।। ४०।।
एषु स्थानेषु मन्त्रार्णान् न्यसेन्मन्त्री मुहुर्मुहु:। विभूतिपञ्जरन्यासो दशावृत्तिमयो मनो:।। ४१।।
आयुरारोग्यधर्मार्थकीर्तिकान्त्यादिकारक:। नरनारीनरेन्द्राणां वश्यकर्मणि शस्यते ।। ४२।।
भुक्तिदो मुक्तिदो भक्तिप्रदो विष्णो: पदाम्बुजे। कुर्यान्मन्त्री ततो न्यासं पूर्ववन्मूर्तिपञ्जरम्।। ४३।।
पुन: सृष्टिस्थितिन्यासं दशाङ्गन्यासमाचरेत्। पञ्चाङ्गन्यासं कृत्वा तु मुन्यादिन्यासमाचरेत्।। ४४।।
वक्ष्यमाणास्ततो मुद्रा दर्शयेद्भावतत्पर:। एवं कृत्वा विधानेन मन्त्री मन्त्रकलेवरम्।। ४५।
विश्वोत्पत्तिस्थितिध्वंसनिधानं त्वादिवर्जितम्। त्रय्यन्ते बोधितं नित्यं कृष्णं ध्यायेज्जगत्पतिम्।।४६।।

पूर्वं वृन्दावनं रम्यं स्मरेन्मन्त्री[१] सुसंयतः। नानाकुसुमसंशोभि पुष्पप्रचयशालिभिः।। ४७।।
नवीनपल्लवोद्रेकफलसम्पत्तिभिस्तथा। लसद्विशिष्टच्छाखाशालीभिः सर्वतो वृतम्।। ४८।।
निर्गच्छन्मञ्जरीसङ्कुलतासंहतिसेवितम् । (भ्रमरोत्तमसङ्घैश्च गुञ्जद्भिर्मुखरीकृतम्) ।। ४९।।
मधुपैः कृतझङ्कारैः पक्षिभिश्च सुखावहम्। कीरव्रजगिरा व्याप्तं पारावतरुताकुलम्।। ५०।।
कोकिलप्रमुखानां च सुनादैर्व्याप्तदिङ्मुखम्। नृत्यन्मयुरसङ्घातसेवितं च दिवानिशम्।। ५१।।
वायुभिर्विकचत्पद्ममध्यकिञ्जल्कसङ्गिभिः। पुष्पान्तरान्तरुद्भूतरजोभिश्च सुवासितैः।। ५२।।
आदित्यतनयायाश्च[२] लहरीकणशीतलैः। मन्मथानलसन्दीप्तवल्लवीचीरकम्पनैः।। ५३।।
सर्वदाध्युषितं सम्यगस्मिन् कल्पतरुं स्मरेत्। नूतनान् पल्लवांस्तस्य वैद्रुमांस्तदनन्तरम्।। ५४।।
पत्रजालं मारकतं प्रसूनकलिका अपि। वज्रमुक्तादिकांश्चैव पद्मरागफलोज्ज्वलम्।। ५५।।
ऋतुभिः सेवितं सर्वैरेकदाभीष्टसिद्धिदम्। स्वर्णशाखाग्रसंयुक्तं महोच्छ्रायशिखान्वितम्।। ५६।।
दिव्यामृतौघवर्षेण स्रवन्तं विश्वमञ्जसा। उद्यत्प्रद्योतनप्रख्यामधोऽस्य वरमेदिनीम्।। ५७।।
ज्वलद्रत्नसमाबद्धां पुष्परेणुविभूषिताम्। षडूर्मिरहितां मन्त्री चिन्तयेदिष्टसिद्धये ।। ५८।।
माणिक्यकुट्टिमं तत्र योगपीठं विचिन्तयेत्। पद्ममष्टदलं तत्र यथोक्तं [३]रक्तवर्णकम् ।। ५९।।
तस्य मध्ये सुखासीनं कृष्णं ध्यायेदनन्यधीः। उद्यदादित्यसङ्काशं प्रसन्नवदनं विंभुम्।। ६०।।
इन्द्रनीलमणिप्रख्यस्निग्धदीर्घशिरोरुहम्। मायूरेण सुपिच्छेन राजमानोत्तमाङ्गकम्।। ६१।।
भ्रमराक्रान्तकल्पद्रुपुष्पसंशोभिमस्तकम्। सम्फुल्लनूतनोत्पन्नकर्णपूरीकृतोत्पलम्।। ६२।।
कुटिलालकबिभ्राजल्ललाटमृदुपट्टिकम्। गोरोचनासमासक्ततिलकं चोन्नतभ्रुवम्।। ६३।।
अकलङ्कशरद्राकाचन्द्रबिम्बाद्भुताननम् । कुशेशयदलाकारसुन्दरायतलोचनम् ।। ६४।।
अनर्घमणिसन्दीप्तमकराकारकुण्डलम्। कपोलस्थललावण्यविजितस्वच्छदर्पणम्।। ६५।।
अगस्त्यकुसुमाकाराद्भुतोन्नतसुनासिकम्। जितविद्रुमसौन्दर्यपक्वबिम्बफलाधरम्।। ६६।।
दाडिभीबीजसङ्काशदन्तपङ्क्तिविराजितम्। धवलीकृतदिक्चक्रमीषद्धास्यद्विजांशुना।। ६७।।
आरण्यपल्लवैः पुष्पैः कृतग्रैवेयसम्पदम्। अतिरम्यत्रिरेखाङ्ककम्बुसुन्दरकन्धरम् ।। ६८।।
मधुलोलुपभृङ्गालीसङ्गतैश्च सुगन्धिभिः। अम्लानैः कल्पवृक्षस्य प्रसूनप्रचयैः शुभैः।। ६९।।
कृतदामलसत्स्कन्धं मुक्ताहारविभूषितम्। कौस्तुभप्रभया दीप्तविशालोन्नतवक्षसम्।। ७०।।
श्रीवत्साङ्काङ्कितोरस्कमुन्नतस्कन्धशालिनम्। महापरिघसङ्काशजानुलम्बिमहाभुजम्।। ७१।।
वलित्रितयसंशोभिकिञ्चिद्बन्धुरितोदरम्। दक्षिणावर्तसंयुक्तनाभीपल्वलमण्डितम् ।। ७२।।
षट्पदप्रमदापङ्क्तिशोभिरोमावलीभुवम्[४]। अनेकरत्नसम्बद्धवलयाङ्गदमुद्रिकम्।। ७३।।
ग्रैवेयौदरिकाबन्धतुलाकोटिसुमण्डितम्। क्षुद्रघण्टिकया बद्धकटिदेशविभूषितम्।। ७४।।

---

१. 'पुष्पविराजितम्' ख. पाठः। २. 'पार्श्व' ख. पाठः। ३. 'स्वर्ण' ख. पाठः। ४. 'युतम्' ख. पाठः।

दिव्योत्तमाङ्गलेपेन भूषिताशेषगात्रकम्। पीताम्बरधरं सम्यगूरुजानुमनोहरम्।। ७५।।
मयूरगलसङ्काशजङ्घायुगलमण्डितम्। लसत्प्रपदशोभाभिर्निरस्तकच्छपश्रियम् ।। ७६।।
माणिक्यमुकुराकारनखराजिविराजितम्। सुष्ठुशोणाङ्गुलीपत्रविकासिचरणाम्बुजम्।। ७७।।
चक्रशङ्खलसत्पद्मसीराङ्कुशगदादिभिः। कुलिशप्रमुखैश्चिह्नैरङ्कितारक्तपत्तलम् ।। ७८।।
सौन्दर्यनिधिसम्भाररचितं विलसच्छ्रिया। सम्यग्विजितकन्दर्पगात्रशोभामनोहरम्।। ७९।।
मुखाम्बुजसमासक्तवंशच्छिद्रार्पिताङ्गुलिम्। तदुत्थदिव्यसद्रागश्रवणाहृतमानसम्।। ८०।।
अपाङ्गैः प्राणिजातं तु मोहयन्तमनारतम्। परमानन्दसन्दोहसम्पूर्णीकृतमानसम्।। ८१।।
मुखपद्मसमासक्तस्वान्तनेत्राभिरावृतम् । गोभिरूधोभराक्रान्तमन्दयानाभिरेव च।। ८२।।
कवलीकृतसन्त्यक्तघासलेशाभिरप्यथ[1]। भूमिस्पृष्टमहास्थूलवालधीभिर्निरन्तरम् ।। ८३।।
प्रस्नुतस्तनपानेन सम्भृताननिर्गतैः। डिण्डीरपिण्डसंयुक्तैः दुग्धैर्दृष्टिमनोहरैः ।। ८४।।
वंशवादनसद्गीतगीताकर्णनलालसैः । उत्तम्भितीकृतश्रोतपुटयुग्मैश्च तर्णकैः ।। ८५।।
किंविषाणाङ्कुरोद्भूतिजातकण्डूतिमस्तकैः। परस्परविमर्दार्थं खुरघृष्टमहीतलैः।। ८६।।
स्निग्धैर्गुरुभिरुत्पुच्छैः सुशोभिगलकम्बलैः। वत्सवत्सीसमूहैश्च संवृतं तदनन्तरम्।। ८७।।
कृतहुंभाशब्द[2]जालैर्गुरुदीर्घककुद्वरैः । उच्चकर्णपुटापीतवेणुशब्दसुधारसैः ।। ८८।।
कृतौद्धत्यैर्वृषैर्वीतं महाविवृतनासिकैः। विद्यास्वभाववर्णादिक्रीडानेपथ्यधारणैः ।। ८९।।
समानतां गतैर्गोपैर्वयःसाम्ययुतैरपि। वंशवादनशीलैश्च रम्यरागकृतश्रमैः।। ९०।।
वल्लकीकांस्यतालादिधृतसा[3]रसमस्वरैः। बलद्बाहुलताक्षेपं नृत्यद्भिर्भावगर्भितम्[4]।। ९१।।
जङ्घिकाकटिदेशेषु किङ्किणीजालमण्डितैः। इतस्ततश्चलद्भिश्च मञ्जुभाषणतत्परैः।। ९२।।
मधुराकृतिभिर्बालैरस्पष्टाद्भुतभाषणैः। शार्दूलनखसंक्लृप्तगलाकल्पैर्वृतं तथा।। ९३।।
ततो गोपपुरन्ध्रीणां स्मरेद् वृन्दं समाहितः।.......................................।।

तद्वंशहृद्यस्वनधीररागनिःष्यन्दपीयूषरसावसेकात्।
सञ्जातबोधाङ्गजभूरुहस्य श्रीकोरकाकारविशिष्टरूढैः।। ९४।।
रोमोद्गमैर्भूषितदेहकानां तन्मन्दहासामृतमानसानाम्।
सम्पर्कतो वृद्धसुरागवाचां रागैस्तरङ्गैरिव रागवार्द्धेः।। ९५।।
प्रस्वेदजालैः समतां गतैस्तैः सम्भूषिताशेषशरीरकाणाम्।
तद्भ्रूधनुःप्रेरिततीक्ष्णदृष्टि—पञ्चेषुपञ्चेषुसमूलवर्षैः।। ९६।।
सम्भिन्नबन्धाच्छिथिलीकृताङ्गसञ्जातकम्पाद्भुतवेदनानाम्।
तद्गात्रलावण्यसुधारसौघपाने सतृष्णेक्षणपङ्कजानाम् ।। ९७।।

---

१. 'प्यलम्' ख. पाठः। २.' रव' ख. पाठः। ३. 'धीरतार' ख. पाठः। ४. 'गर्वितम्' क. ख. पाठः।

सस्नेहसालस्यवलत्सुरम्यसाह्लादभावाद्भुतलोचनानाम्।
धम्मिल्लशैथिल्यवशात् पतत्सु[1] प्रफुल्लपुष्पेषु परागलुब्धै:।। ९८।।
धीरं सुगुञ्जद्भिरनेकभृङ्गैरासादितानां मधुराकृतीनाम्।
मनोजवेगोन्मदमानसानां मदस्खलद्वाग्विभवाद्भुतानाम्।। ९९।।
शैथिल्यसञ्जातसुनीविकानां श्रोणीभरैर्दृष्टिपथं गतानाम्।
मृदुस्खलितपादाब्जधीररम्यगतैरपि । मुखरीकृतदिक्कानां चरणामृतशब्दत: ।।१००।।
निमीलन्नेत्रपद्मानां चलदोष्ठयुजां मुहु:। ओष्ठम्लानिं वहन्तीनां दीर्घनि:श्वासयोगत:।। १०१।।
अनेकप्राभृतासक्तहस्तपद्मयुजां तथा। पङ्क्तिभिर्वेष्टितं सम्यक् पूर्वतश्च ततो बहि:।। १०२।।
एतासां नेत्रपद्मानां मालाभिर्भूषिताङ्गकम्। महानन्दनिभं सर्वविलासभुवनं प्रभुम् ।। १०३।।
वल्लवील्लवगवां देववृन्दं बहि: स्मरेत्। सम्मुखे देवदेवस्य काङ्क्षन्तं धनसञ्चयम्।। १०४।।
ब्रह्मेशाखण्डलश्रेष्ठं स्तुतिं कुर्वाणमादरात्। ऋषिसङ्घं तथा दक्षे वेदाध्ययनतत्परम्।। १०५।।
धर्मार्थिन: स्मरेत् पश्चात् सनकप्रमुखांस्तथा। योगीन्द्रान् ध्याननिष्ठांस्तान् नि:श्रेयसफलार्थिन:।।१०६।।
सस्त्रीकान् वामभागे च यक्षगन्धर्वकिन्नरान्। सिद्धविद्याधरांश्चापि चारणान् साप्सरोगणान्।। १०७।।
गीतनर्तनवाद्यादीन् कुर्वत: कामतत्परान्। चन्द्रकर्पूरकुन्दाभं काशपुष्पनिभं मुनिम् ।। १०८।।
मन्त्रतन्त्रप्रवक्तारं विद्युद्दामसदृग्जटम्। विष्णुपादाम्बुजद्वन्द्वे भक्तिमिच्छन्तमद्वयम् ।। १०९।।
त्यक्तान्यसर्वसङ्गं तं वेदवेदार्थपारगम् । अनेकश्रुतिसम्पन्नसप्तरागसमन्वितम् ।। ११०।।
ग्रामत्रयीसमासक्तमूर्च्छनाभिर्यथाविधि। सम्यग्जाताभिरारागाद् गायन्तं कृष्णवेणुकम्।। १११।।
आकाशे नारदं ध्यायेन्मुनिवर्यं गतस्मयम्। ध्यात्वैवं परमात्मानं नन्दपुत्रं विशालधी:।। ११२।।
यजेत् पूर्वोदिते पीठे वैष्णवे नवशक्तिके। पूर्वमर्घ्यादिभिर्मन्त्री मानसैरुपचारकै:।। ११३।।
सर्वै: पूज्यतमं कृष्णमिष्ट्वा भक्तिपरायण:। स्वीये देहमये पीठे भगवन्तं पुरोक्तवत्।। ११४।।
ततो बहि:स्थितैर्द्रव्यै: पूजयेत् साधकोत्तम:। तत्साधनविधि: सम्यक् प्रोच्यते मन्त्रसिद्धिद:।।११५।।
मूलमन्त्रेण मन्त्रज्ञो मूर्तिमस्य प्रकल्पयेत्। तत्रावाह्य यजेद् देवं सर्वावरणसंयुतम्।। ११६।।
आसनादिविभूषान्तान् उपचारान् प्रकल्प्य तु। न्यासोक्तक्रमत: पश्चाद् गन्धाद्यैर्देवमर्चयेत्।। ११७।।
सृष्ट्या स्थित्वा च सम्पूज्य पञ्चाङ्गं च दशाङ्गकम्। वेणुं प्रपूजयेत् पश्चाद् वनमालामनन्तरम्।।११८।।
श्रीवत्सं कौस्तुभं मन्त्री देहे कृष्णस्य पूजयेत्। मूलेन चात्मपूजादावावृती: पूजयेत् तत:।।११९।।
कर्णिकायां चतुर्दिक्षु देवस्य परितोऽर्चयेत्। दामं सुदामनामानं वसुदामं च किङ्किणीम्।। १२०।।

चकाराच्चतुर्थोऽपि दामशब्दान्त:। "वसुदामं समभ्यर्च्य किङ्किणीदाममर्चयेत्" इति त्रैलोक्यसम्मोहनतन्त्रवचनात्।

---

[1] 'स्रवत्सु' क. ग. पाठ:।

तेजोरूपधरा ह्येते केसरेष्वङ्गपूजनम्। रुक्मिणीप्रमुखा ह्यष्टौ पत्रेषु महिषीर्यजेत् ।।१२१।।
कमलं चार्घ्यपात्रं च करयोर्दक्षिणान्ययोः। बिभ्रतीर्दिव्यशुक्लाभवस्त्रलेपादिभिर्युताः।।१२२।।
रुक्मिणीसत्यभामे द्वे नाग्निजित्यपरा मता। सुनन्दा मित्रविन्दा चापरा चापि सुलक्षणा।।१२४।।
सुशीलान्या जाम्बवती स्वर्णमारकतप्रभाः। द्विश एवं क्रमाज्ज्ञेयाः सर्वा एता मनीषिभिः।।१२४।।
स्तनभारनता नानारत्नजालविभूषणाः। पत्राग्रेषु ततः पूज्या वसुदेवश्च देवकी।।१२५।।
नन्दगोपो यशोदा च बलभद्रः सुभद्रिका। गोपाला गोपिकाः कृष्णमुखासक्तहृदीक्षणाः।।१२६।।
स्वर्णाभो वसुदेवस्तु शुक्लो नन्दः प्रकीर्तितः। ज्ञानमुद्रां धारयन्तौ दक्षे वामेऽभयं तथा।।१२७।।
दिव्यवस्त्रानुलेपादिपुष्पालङ्कारसंयुते । रक्तश्यामनिभे तद्वन्मातरौ दक्षिणे करे ।।१२८।।
वरं वामे वहन्त्यौ तु पात्रे च पायसामृतम्[1]। मुक्ताहारधरे रत्नकुण्डलादिविभूषिते।।१२९।।
बलभद्रस्तु कुन्दाभो मुसली हलसंयुतः। नीलाम्बरो मदोन्मत्तश्चञ्चलश्चैककुण्डलः।।१३०।।
श्यामा तन्वी सुभद्राख्या चारुभूषणभूषिता। पीताम्बरा च युवती बिभ्राणा वरदाभये।।१३१।।
गोपाला वंशवीणादिदलशृङ्गलसत्कराः। नानोपायनहस्ताब्जा गोपपत्न्यः सुभूषिताः।।१३२।।
तद्बहिः पञ्च सम्पूज्याः कल्पवृक्षा इमे बुधैः। मन्दारः प्रथमो ज्ञेयः सन्तानस्तदनन्तरम्।।१३३।।
पारिजाताह्वयः पश्चात् कल्पवृक्ष इतीरितः। हरिचन्दननामा तु मध्ये दिक्षु च संस्थिताः।।१३४।।
दीर्घनम्रबृहच्छाखाः साधकेष्टफलप्रदाः। (तद्बाह्ये लोकपालांस्तु वज्रादीन् पूजयेत्ततः।।१३५।।
आवृतीरित्थमभ्यर्च्य गन्धपुष्पे निवेद्य च। धूपदीपौ समर्प्याथ नैवेद्यं च निवेदयेत्।।१३६।।)
पूर्वोक्तविधिना सम्यक् संस्कृतं भक्तितत्परः। शर्करादधिसंयुक्तं सघृतं गोपयो हविः।।१३७।।
नारिकेलगुडापूपनवनीतसितोपलम् । मोचाफलं सोपदंशं सक्षौद्रं रुचिरं शुचिः।।१३८।।
ततः सङ्कल्प्य नैवेद्यं ग्रासमुद्रां प्रदर्श्य च। प्राणादिपञ्चवायूनां मुद्रा दक्षेण-दर्शयेत्।।१३९।।
अङ्गुष्ठाभ्यामनामे द्वे स्पृष्ट्वा पाणितलद्वये। नैवेद्यस्य ततो मुद्रां दर्शयेन्मन्त्रमुच्चरन्।।१४०।।
लाङ्गलीजलसद्यान्तशिरोभिः सहितो नतिः। परायेति समुच्चार्य ब्रह्मात्मपदमुच्चरेत्।।१४१।।
नेऽनिरुद्धं चतुर्थ्यन्तं निवेद्यं कल्पया—पदम्। निवेद्यदानमन्त्रोऽयं म्यन्तो विंशतिवर्णकः।।१४२।।

लाङ्गली ठकारः। जलं व। सद्यान्त औ। शिरो बिन्दुः, एतैः ठौं इति। नतिर्नमः। पराय स्वरूपं। ब्रह्मात्म स्वरूपं। नेऽनिरुद्धं चतुर्थ्यन्तं तेन नेऽनिरुद्धाय। निवेद्यं स्वरूपं। कल्पया स्वरूपं। म्यन्तो मि—इत्यक्षरान्तस्तेन कल्पयामि। तथा—

समर्प्यैवं निवेद्यं हि कुर्यादन्यत् पुरोक्तवत्। ततश्चन्दनपङ्केन स्वीयदेहं विभूषयेत्।।१४३।।
मूलमन्त्रेण मन्त्रज्ञो मुर्तिपञ्जरमन्त्रकैः। ललाटादिषु कुर्वीत तिलकानि ह्यनामया।।१४४।।
कुर्यात् पुष्पाञ्जलीन् पञ्च तुलसीपुष्पतो[2] बुधः। मूलमन्त्रं समुच्चार्य पादपद्मद्वये विभोः।।१४५।।
करवीरद्वयेनाथ मध्यदेहे प्रकल्पयेत्। अम्भोजयुग्मतः पश्चादुत्तमाङ्गे निवेदयेत्।।१४६।।

---

[1] 'पात्रं सुपयसा भृतम्' ख. पाठः। [2] 'युग्मतः' ग. पाठः।

एभि: सर्वै: सर्वगात्रे तावत: कुसुमाञ्जलीन्। देवस्य दक्षिणे दद्याच्छुक्लपुष्पाणि मन्त्रवित्।१४७।।
रक्तपुष्पाणि वामे तच्छ्वेतरक्तपटीरकै:। सप्तावरणसंयुक्तमित्थं कृष्णस्य पूजनम्।। १४८।।
सर्वसम्पत्करं पुंसां भोगमोक्षफलप्रदम् । अङ्गैरिन्द्रादिभिर्वज्रप्रमुखैरावृतित्रयम् ।। १४९।।
पूजयेदथवा ह्येवं सङ्क्षेपात् साधकोत्तम:। एवं गन्धादिभि: सम्यक् पूजयित्वा विधानवित्।१५०।।
अष्टौ कृष्णान् यजेत् पश्चात् सुगन्धिकुसुमादिभि:। कृष्णश्च वासुदेवश्च नारायण इतीरित:।। १५१।।
देवकीनन्दनश्चाथ यदुश्रेष्ठस्तत: परम्। वार्ष्णेयश्चासुरक्रान्तभारहारी ततो भवेत्।। १५२।।
धर्मसंस्थापकस्त्वन्यो ङेनमोन्ता ध्रुवादिका:। एतैरेव विधातव्या कृष्णार्चाप्यथवा बुधै:।। १५३।।
भवाब्धे: पारमिच्छद्भि: सर्वसम्पत्तिसिद्धये। मूलमन्त्रं यथाशक्ति जपित्वा तं जपं बुध:।। १५४।।
समर्पयेदर्घ्यजलैर्गन्धपुष्पाक्षतान्वितै:। ततो नानाविधै: स्तोत्रै: स्तुत्वा देवं विशालधी:।। १५५।।
प्रणम्यान्तर्हृदम्भोजमुद्वास्य प्रजपेत् तत:। ....।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारदाय ऋषये नम:। मुखे विराट्छन्दसे नम:। हृदये श्रीकृष्णाय देवतायै नम:। (गुह्ये क्लींबीजाय०। पादयो: स्वाहाशक्तये०। सर्वाङ्गे कृष्णाय प्रकृतये नम:। हृदि श्रीदुर्गायै अधिष्ठात्र्यै देवतायै नम:)। इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोग: इति कृताञ्जलिरुक्त्वा, मूलमन्त्रेण करयोर्व्यापकं कृत्वा, आचक्राय स्वाहा हृदयाय नम:। विचक्राय स्वाहा शिरसे स्वाहा। सुचक्राय स्वाहा शिखायै वषट्। त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुं। असुरान्तकचक्राय स्वाहा अस्त्राय फट्। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य, हृदयादिकवचान्तं देहे चाङ्गचतुष्टयं विन्यस्यास्त्रमन्त्रेण तालत्रयं दशदिग्बन्धनं च कृत्वा, हृदि गोंनम:। शिरसि पींनम:। शिखायां जंनम:। कवचस्थाने नंनम:। अस्त्रस्थाने वंनम:। दक्षपार्श्वे ल्लंनम:। वामे भांनम:। कट्यां यंनम:। पृष्ठे स्वांनम:। मूर्ध्नि हांनम:।। ततो गोपीजनवल्लभाय स्वाहा इति करतलयो: पृष्ठयो: करपार्श्वयोश्च प्रत्येकं मन्त्रमुच्चरन् व्यापकं कृत्वा, वामाङ्गुष्ठे ओंगोंओं नम:। तर्जन्यां ओंपीओंनम:। मध्यमायां ओजंओं०। अनामायां ओंनंओं०। कनिष्ठिकायां ओंवंओं०। दक्षकनिष्ठिकायां ओंल्लंओं०। अनामायां ओंभांओं०। मध्यमाया ओंयंओं। तर्जन्यां ओंस्वांओं०। अङ्गुष्ठे ओंहांओं०। इति संहारेण प्रथमं विन्यस्य, पुनर्दक्षाङ्गुष्ठादिवामाङ्गुष्ठपर्यन्तं दशवर्णानुक्तप्रकारेण सृष्ट्या विन्यस्य, अङ्गुष्ठद्वयमारभ्य दक्षवामक्रमेण कनिष्ठाद्वयपर्यन्तं स्थित्या, वामाङ्गुष्ठमारभ्य दक्षाङ्गुष्ठान्तं संहृत्या सबिन्दुविसर्गान् विन्यस्य, कराङ्गुलिषु(ष्ठादि) दशाङ्गं च प्राग्वद्विन्यस्य मूलमुच्चार्य, 'अं पुनर्वैपरीत्येन मूलं नम:। मूलं०। पुन: आं विपरीतं मूलं नम:। इत्यादियुक्त्या मातृकां विन्यस्य, (१) पादयो: गोंनम: पराय पृथिवीतत्त्वात्मने नम:। लिङ्गे पींनम: पराय अप्तत्त्वात्मने नम:। वक्षसि जंनम: पराय तेजस्तत्त्वात्मने नम:। मुखे नंनम: पराय वायुतत्त्वात्मने नम:। शिरसि वंनम: परायाकाशतत्त्वात्मने नम:। हृदि ल्लंनम: परायाहङ्कारतत्त्वात्मने नम:। भांनम: पराय महत्तत्त्वात्मने नम:। सर्वाङ्गे यंनम: पराय प्रकृतितत्त्वात्मने नम:। स्वांनम: पराय पुरुषतत्त्वात्मने नम:। हांनम: पराय परतत्त्वात्मने नम:।। (२) सर्वाङ्गे हांनम: पराय परतत्त्वात्मने नम:। स्वांनम: पराय पुरुषतत्त्वात्मने नम:। यंनम: पराय प्रकृतितत्त्वात्मने नम:। हृदि भांनम: पराय महत्तत्त्वात्मने नम:। ल्लंनम: परायाहङ्कारतत्त्वात्मने नम:। शिरसि वंनम: परायाकाशतत्त्वात्मने नम:। मुखे नंनम: पराय वायुतत्त्वात्मने नम:। वक्षसि जंनम: पराय

तेजस्तत्त्वात्मने नमः। लिङ्गे पींनमः पराय जलतत्त्वात्मने नमः। पादयोः गोंनमः पराय पृथिवीतत्त्वात्मने नमः। इति तत्त्वानि विन्यस्य, ततः प्रणवपुटितमूलेन मस्तकादिपादान्तं त्रिर्व्यापकं विन्यस्य, (३) पादयोः गोंनमः। जानुनोः पींनमः। लिङ्गे जंनमः। जठरे नंनमः। हृदि वंनमः। मुखे ल्लंनमः। नासायां भांनमः। कर्णयोः यंनमः। नेत्रयोः स्वांनमः। शिरसि हांनमः।। (४) शिरसि गों०। नेत्रयोः पीं०। कर्णयोः जं०। नासायां नं०। मुखे वं०। हृदि ल्लं०। जठरे भां०। लिङ्गे यं०। जानुनोः स्वां०। पादयोः हांनमः।। (५) हृदि गोंनमः। उदरे पीं०। लिङ्गे जं०। जानुनोः नं०। पादयोः वं०। शिरसि ल्लं०। नेत्रयोः भां०। कर्णयोः यं०। नासायां स्वां०। मुखे हां०।। (१) मूलाधारे गोंनमः। लिङ्गे पीं०। नाभौ जं०। हृदि नं०। गलं वं०। मुखे ल्लं०। दक्षांसे भां०। वामे यं०। दक्षोरौ स्वां०। वामोरौ हां०।। (२) स्कन्धयोः गोंनमः। नाभौ पीं०। कुक्षौ जं०। हृदि नं०। कुचद्वये वं०। दक्षपार्श्वे ल्लं०। वामपार्श्वे भां०। पृष्ठे यं०। दक्षश्रोण्यां स्वां०। वामे हांनमः।। (३) मस्तके गोंनमः। मुखे पीं। दक्षनेत्रे जं०। वामे नं०। दक्षकर्णे वं०। वामे ल्लं०। दक्षनसि भां०। वामे यं०। दक्षगण्डे स्वां०। वामे हांनमः।। (४) दक्षदोर्मूले गोंनमः। तन्मध्ये पीं०। मणिबन्धे जं०। अङ्गुलिमूले नं०। अग्रे वं०। अङ्गुष्ठे ल्लं०। तर्जन्यां भां०। मध्यमायां यं०। अनामायां स्वां०। कनिष्ठायां हांनमः।। (५) एवं वामबाहुमूले इत्यादि।। (६) दक्षोरुमूले गोंनमः। जानुनि पीं०। गुल्फे जं०। अङ्गुलिमूले नं०। तदग्रे वं०। अङ्गुष्ठे ल्लं०। तर्जन्यां भां०। मध्यमायां यं०। अनामयां स्वां०। कनिष्ठायां हांनमः। (७) एवं वामोरुमूले इत्यादि।। (८) शिरसि गोंनमः। तत्पूर्वभागे पीं०। तद्दक्षे जं०। तत्पृष्ठे नं०। तद्वामे वं०। सर्वशिरसि ल्लं। दक्षबाहौ भां०। वामे यं०। दक्षसक्थनि स्वां०। वामे हांनमः।। (९) मस्तके गोंनमः। नयने पीं०। मुखे जं०। कण्ठे नं०। हृदि वं०। उदरे ल्लं०। मूलाधारे भां०। लिङ्गे यं०। जानुनोः स्वां०। प्रपदयोः हांनमः।। (१०) कर्णयोः गोंनमः। गण्डयोः पीं०। अंसयोः जं०। स्तनयोः नं०। पार्श्वयोः वं०। स्फिचोः ल्लं०। ऊर्वोः मां०। जानुनोः यं०। जङ्घयोः स्वां०। पादयोः हांनमः।। ततः पूर्वोक्तं मूर्तिपञ्जरन्यासं कृत्वा पुनः सृष्टिस्थितिन्यासौ दशाङ्गपञ्चाङ्गन्यासौ ऋष्यादिन्यासं च कृत्वा मुद्राविरचनादि (पाद्यादिपात्रस्थापनान्ते स्वात्मानं गन्धाद्यैरलङ्कृत्य मूर्तिपञ्जरन्यासक्रमेण ललाटादिद्वादशस्थानेष्वनामया तिलकानि कृत्वा शेषं पूर्ववद् विधाय पीठपूजादि) पुष्पोपचारान्ते देवस्य देहे न्यासोक्तस्थानेषु सृष्टिस्थितिन्यासक्रमेण दशाङ्गानि पञ्चाङ्गानि च सम्पूज्य, मुखे वेणवे नमः। स्कन्धयोः वनमालायै नमः। वक्षसि श्रीवत्साय नमः। गले कौस्तुभाय नमः। ततो विभूतिपञ्जरन्यासक्रमेण देवस्य देहे सम्पूज्य, कर्णिकायां देवादिप्रादक्षिण्येन ऊंदामाय नमः। ऊंसुदामाय०। ऊंवसुदामाय०। ऊंकिङ्किणीदामाय०। केसरेषु पञ्चाङ्गानि सम्पूज्य, अष्टदलेषु देवाग्रादि रुक्मिण्यै नमः। सत्यभामायै०। नाग्नजित्यै०। सुनन्दायै०। मित्रविन्दायै०। सुलक्ष्मणायै०। सुशीलायै०। जाम्बवत्यै०। दलाग्रेषु—वसुदेवाय नमः। देवक्यै०। नन्दगोपाय०। यशोदायै०। बलभद्राय०। सुभद्रायै०। गोपालेभ्यो०। गोपिकाभ्यो नमः। पद्ममध्ये—मन्दाराय नमः। पद्माद्बहिर्देवाग्रे—सन्तानाय नमः। पारिजाताय०। कल्पवृक्षाय०। हरिचन्दनाय नमः। इति प्रादक्षिण्येन देवाग्रादितः चतुर्दिक्षु सम्पूज्य, लोकपालान् वज्रादीनि च समभ्यर्च्य, धूपदीपौ समर्प्य (देवस्य पुरतः प्राग्वन्नैवेद्यं निधाय संस्कृत्य पाद्याचमनीये दत्त्वा, देवं गन्धादिभिः सम्पूज्यापोशानं दत्त्वा ग्रासमुद्रां प्रदर्श्य) प्राणादिपञ्चमुद्रास्तत्तन्मन्त्रेण प्रदर्श्य, करद्वयेन नैवेद्यमुद्रां बद्ध्वा ''ऊंनमः पराय ब्रह्मात्मनेऽनिरुद्धाय नैवेद्यं कल्पयामि'' इति नैवेद्यं समर्प्य, तत्कालं ध्यानादिप्रसन्नार्चान्ते मूलमुच्चार्य ''श्रीकृष्णाय नमः'' इति देवस्य चरणयोः शुक्लकृष्णैस्तुलसीदलैः पञ्चधा सम्पूज्य, देवस्य हृदये पञ्चधा श्वेतरक्तकरवीरपुष्पैः, देवस्य

शिरसि पञ्चधा सितरक्तपद्मैर्देवस्य सर्वगात्रे श्वेतकृष्णतुलसीभिः श्वेतरक्तमलैः श्वेतरक्तकरवीरैरन्यैश्च पञ्च पुष्पाञ्जलीन् दत्त्वा, पुनर्मूलमुच्चार्य श्रीकृष्णाय नमः। एवं श्रीवासुदेवाय०। श्रीनारायणाय०। श्रीदेवकीनन्दनाय०। श्रीयदुश्रेष्ठाय०। श्रीवार्ष्णेयाय०। श्रीअसुराक्रान्तभूभारहारिणे०। श्रीधर्मसंस्थापकाय नमः। इत्यष्टौ कृष्णान् सम्पूज्य राजोपचारादि सर्वं प्राग्वत् कुर्यादिति। तथा—

ध्यात्वैवं परमात्मानं नन्दपुत्रं विशालधीः। पूर्वोक्तविधिना सम्यग् दीक्षितः प्रजपेन्मनुम्।। १५६।।
मन्त्रार्थं चिन्तयेन्मन्त्री नियमस्थो जितेन्द्रियः। चत्वारिंशत्सहस्राणि श्वेतपद्माक्षमालया।। १५७।।
पश्चान्मन्त्रस्य सिद्ध्यर्थं दशलक्षं जपेत् सुधीः। लक्षं हुनेद्रक्तपुष्पैः सितासर्पिर्मधुप्लुतैः।। १५८।।
शर्करामधु[1]युक्तेन हविर्द्रव्येण वा हुनेत्। तर्पयेत् सलिलैः शुद्धैश्चन्द्रचन्दनवासितैः।। १५९।।
आत्माभिषेकं कृत्वाथ भूदेवान् भोजयेत् ततः। नानाविधैर्भक्ष्यभोज्यैस्ताम्बूलैश्च सुदक्षिणैः।। १६०।।
ततो निजगुरुं सम्यक् प्रणिपत्य यथाविधि। धनधान्याम्बराद्यैश्च वित्तशाठ्यविवर्जितः।। १६१।।
तोषयेत् परया भक्त्या निजकार्यस्य सिद्धये। ततः सिद्धमनुर्मन्त्री प्रयोगान् निजवाञ्छितान्।।१६२।।
कुर्याद्भक्तियुतः सम्यक् नित्यनैमित्तिके रतः[2]।..।।

इति। प्रयोगस्त्वग्रे वक्ष्यते।। अथ श्रीकृष्णमन्त्रः। सारसङ्ग्रहे—

अथो वदामि कृष्णस्य मन्त्ररत्नं सुगोपितम्। त्रैलोक्यख्यातसामर्थ्यं नारदाद्यैरुपासितम्।। १।।
धर्मार्थकाममोक्षार्थकरं वश्यादिसाधनम्। अज्ञानेन्धनकालाग्निं योगैश्वर्यफलप्रदम्।। २।।
अकालमृत्युसंहारि दुरदृष्टनिवारणम्। गलग्रहमहारोगभूतराक्षसनाशनम्।। ३।।
सङ्ग्रामे जयदं नृणामरण्ये चाभयप्रदम्। भृत्यदासीगजाश्वादिरथधेनुधनावहम्।। ४।।
क्षेत्रपुत्रकलत्रादितेजःकान्तियशस्करम्। धैर्य्यगाम्भीर्यशौर्यादिमर्यादाप्रतिभाकरम्।। ५।।
ब्रह्माण्डक्षोभजनकं सिद्ध्यष्टकसमृद्धिदम्। किमत्र बहुनोक्तेन सर्वदं नात्र संशयः।। ६।।
चक्री पुरन्दरारूढस्त्रिमूर्तीन्दुसमन्वितः। बीजमाद्यं भवेदेतत् क्रोधीशाधस्त्रिविक्रमः ।। ७।।
श्वेतो नरकजित् कान्तिर्वायुः शार्ङ्गी तु सद्ययुक्। अमृताक्षीन्दवः पश्चादत्रिर्दीर्घयुतस्ततः।। ८।।
वायुर्दशाक्षरचाष्टादशार्णोऽयं मनूत्तमः[3]। सत्ताभिधायकः शब्दः कृषीति समुदाहृतः।। ९।।
आनन्दार्थो णकारोऽपि कृष्णस्तस्मात्तदर्थकः। कर्षणात् पापजातस्य भक्तानां कृष्ण उच्यते।।१०।।
मन्त्रात्मकशरीरस्य तद्वर्णत्वाच्च देशिकैः। गोशब्दवाचकत्वात्तु ज्ञानं तत्तेन लभ्यते।। ११।।
वेत्ति शब्दमशेषं वा गोविन्दो गोविचारणात्। दशार्ण[4] एवं तुर्यार्णस्तदर्थश्चापि पूर्ववत्।। १२।।

इति। चक्री ककारः, पुरन्दरो लकारः, त्रिमूर्तिरीकारः, इन्दुः बिन्दुः, तैः क्लीं इति कामबीजमुद्धृतम्। क्रोधीशः ककारः। त्रिविक्रमः ऋकारः। तेन कृ। श्वेतः ष, नरकजित् णकारः। कान्तिराकारस्तेन ष्णा। वायुः यकारः। शार्ङ्गी गकारः। सद्य ओकारः। तेन गो इति। अमृतं वकारः, अक्षि इकारः, इन्दुः बिन्दुस्तेन विं। अत्रिर्दकारः, दीर्घा आकारः, तेन दा। वायुर्यकारः। दशाक्षरः पूर्वोक्तगोपालदशाक्षरः।

---

[1] 'घृतयुक्तेन' ख. पाठः। [2] 'ततः' ख. पाठः। [3] 'मनुर्मतः' ख. पाठः। [4] 'दशार्थ एव तुर्यार्धः' क. पाठः।

नारदो मुनिराख्यातो गायत्रं छन्द ईरितम्। श्रीकृष्णो देवता प्रोक्तो बीजशक्त्यादि पूर्ववत्।। १३।।
अन्त:करणवेदाब्धिचतुर्भिर्युगलेन च। मूलमन्त्रविभक्तार्णैः पञ्चाङ्गानि प्रकल्पयेत् ।। १४।।

इति। सनत्कुमारकल्पे तु– ''मन्त्रस्यास्य ऋषिर्ब्रह्मा गायत्रं छन्द उच्यते। गोपवेशधरो विष्णुर्देवता परिकीर्तितः।। १ ।। वर्णैनैकेन हृदयं त्रिभिर्वर्णैः शिरो मतम्। चतुर्भिश्च शिखा प्रोक्ता तावद्भिः कवचं मतम्।। २।। नेत्रं तथा चतुर्वर्णैर्द्वाभ्यामस्त्रं तथा मुने– इत्युक्तम्। अत्र यथागुरूपदेशं शरणमिति।

पञ्चाङ्गानि न्यसेत् पश्चादङ्गुलीषु करद्वये। मूलमन्त्रेण सर्वाङ्गे त्रिवारं व्यापकं न्यसेत्।। १५।।
ध्रुवं व्यापय्य चान्ते तु मन्त्रार्णन्यासमाचरेत्। के ललाटे भ्रुवोर्मध्ये कर्णयोर्नेत्रयोर्नसोः।। १६।।
मुखे ग्रीवाहृदोर्नाभौ कट्योर्लिङ्गे ततः परम्। जानुयुग्मे पदद्वन्द्वे न्यसेदेकैकमक्षरम्।। १७।।
वेदादिं मस्तके न्यस्य पदान् पञ्च प्रविन्यसेत्। शिरोवदनहृद्गुह्यपादेषु मनुवित्तमः ।। १८।।
पञ्चाङ्गानि पुनर्न्यस्य मुन्यादिन्यासमाचरेत्। न्यासान्तरादिकं सर्वं दशवर्णोक्तवद्भवेत्।। १९।।
ध्यानं चोक्तप्रकारेण पूजनं च तथा भवेत्।...।।

इति। अथ प्रयोगः– तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारदाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीकृष्णाय देवतायै नमः। इति विन्यस्य, बीजशक्त्यादिन्यासं पूर्ववत् कुर्यादिति। क्लींकृष्णाय हृदयाय नमः। गोविन्दाय शिरसे०। गोपीजन शिखायै०। वल्लभाय कवचाय०। स्वाहा अस्त्राय०। इति पञ्चाङ्गमन्त्रान् प्राग्वद्विन्यस्य, मूलमन्त्रेण प्राग्वद् व्यापकं त्रिः कृत्वा सकृत् प्रणवेन व्यापकं विन्यस्य, शिरसि क्लींनमः। ललाटे कृं०। भ्रूमध्ये ष्णां०। दक्षकर्णे यं०। वामे गों०। दक्षनेत्रे विं०। वामे दां०। दक्षनसि यं०। वामे गों०। मुखे पीं०। ग्रीवायां जं०। हृदि नं०। नाभौ वं०। दक्षकटौ ल्लं०। वामे भां०। लिङ्गे यं०। जानुनोः स्वां०। पादयोः हांनमः।। शिरसि ॐनमः इति प्रणवं च विन्यस्य, शिरसि क्लींनमः। मुखे कृष्णाय०। हृदि गोविन्दाय०। गुह्ये गोपीजनवल्लभाय०। पादयोः स्वाहा०। इति विन्यस्य पञ्चाङ्गन्यासं कृत्वा, दशाक्षरोक्तान्, न्यासांश्च विधाय ध्यानादिसर्वं दशाक्षरोक्तवत् कुर्यादिति। तथा–

अयुतद्वयसंख्यातमधिकारार्थमादरात्। पञ्चलक्षं जपेत् पश्चाद् दशांशं पूर्ववद्धुनेत्।। २०।।
तर्पणादि ततः सर्वं पूर्वोक्तविधिना चरेत्। अथ साधितमन्त्रस्य साधकस्य फलाप्तये।। २१।।
त्रिकालार्चाविधिं वक्ष्ये गोविन्दस्य जगत्पतेः। उक्ते वृन्दावने रम्ये स्वर्णभूमौ तु मण्डपम्।। २२।।
रम्यं रत्नमयं दिव्यं स्मरेत् कल्पतरोरधः। नानारत्नस्थले मध्ये रत्नसिंहासने शुभे।। २३।।
यथोक्तपद्ममध्यस्थं वासुदेवं विचिन्तयेत्। इन्द्रनीलनिभं कान्तं शिशुं सुमधुराकृतिम्।। २४।।
स्निग्धवक्त्रललाटान्तलोलमूर्धजसञ्चयम्। भृङ्गसङ्घसमासक्तपद्मसुन्दरसन्मुखम् ।। २५।।
इन्दीवरदलाकारशोभिनेत्रद्वयान्वितम्। [1]चलत्कुण्डलसंशोभिपृथुगण्डसुमण्डितम्।। २६।।
रक्ताधरं सुनासं च हसन्तं हृष्टमानसम्। नानारत्नगर्णकीणाकण्ठाभरणभूषितम्।। २७।।
गोधूलिधूसरोरस्कं शार्दूलनखधारिणम्। विशिष्टपुष्टसद्देहं स्वर्णनेपथ्यदीपितम् ।। २८।।

---

[1] 'वलत्' ख. पाठः।

कटिदेशलसज्जङ्घाद्वयबन्धमनोरमम् । रत्नकाञ्चनसञ्छिन्नकिङ्किणीजालमालया ।। २९ ।।
तिरस्कुर्वन्तमत्यर्थं बन्धूकप्रसवश्रियम्। अत्यन्तारुणसच्छाखहस्तपादाब्जशोभया।। ३० ।।
पय: सान्द्रद्रुतं पिण्डं नवनीतं नवं शुभम्। दक्षिणेतरयो: पाण्योर्वहन्तं स्वादु सस्पृहम्।। ३१ ।।
पृथिव्युद्वेगकर्तृणां दैत्यानां दुष्टचेतसाम्। पूतनाशकटादीनां विनाशाय कृतोद्यमम् ।। ३२ ।।
गोपीगोपालधेनूनां समूहेनावृतं सदा। आखण्डलमुखैर्देवै: सेवितं कामतत्परै ।। ३३ ।।
प्रातरेवंविधं कृष्णं ध्यात्वा सुस्थिरमानस:। प्रागुक्त एव पीठे तु हरिं सम्पूजयेत् प्रभुम्।। ३४ ।।
अङ्गावरणमाद्यं स्याद् द्वितीयं लोकपालकै:। वज्रादिभिस्तृतीयं च पूजयित्वा प्रसन्नधी:।। ३५ ।।
पक्वरम्भाफलं खण्डं नवनीतं हविर्दधि। मेलयित्वा तु नैवेद्यं निवेद्य प्रीणयेत् विभुम्।। ३६ ।।
उषस्येवं विधानेन श्रद्धाभक्तिसमन्वित:। श्रीकृष्णं पूजयेद् यस्तु पूजोपकरणै: शुभै:।। ३७ ।।
ऐहिकीं सर्वसम्पत्तिं प्रागेव प्राप्नुयात्तु स:। देहान्ते विष्णुसायुज्यं प्रयाति नियतं कृती।। ३८ ।।
प्रगे प्रत्यहमेवं हि पूजयित्वा नरो[1] हरिम्। गव्यं दधि निवेद्यास्मै गुडयुक्तमथापि वा।। ३९ ।।
तद्बुध्या शुद्धनीरेण तर्पयेत्तु मुखे हरे:। अष्टोत्तरसहस्रं तु मूलमन्त्रं जपेत्तत: ।। ४० ।।

तद्बुद्ध्या गोदधिबुद्ध्या।

मध्यन्दिने [2]यजेच्चातिसुन्दराकृतिमद्भुतम्। देव[3]र्षिदेवसिद्धोघै: सेवितं खेचरैस्तथा ।। ४१ ।।
गवां गोपालगोपीनां समूहै: परितो वृतम्। नीलाम्बुवाहसत्कान्तिविशिष्टाङ्गश्रियं विभुम्।। ४२ ।।
नीलकण्ठस्य सत्पिच्छै: केशभारै: सुमण्डितम्। उद्धतभ्रूलतं देवं पद्मपत्रनिभेक्षणम्।। ४३ ।।
पूर्णचन्द्रसद्वक्त्रं रत्नकुण्डलमण्डितम्। गण्डमण्डलसंशोभिसुघोणं सस्मिताननम्।। ४४ ।।
पीतवस्त्रधरं चारुमुक्ताहारविभूषितम्। काञ्चीकटककेयूरमुद्रिकानूपुरादिभि: ।। ४५ ।।
अलङ्कृतशरीरं तमङ्गरागपिशङ्गितम्। मुक्तामाणिक्यसञ्छन्नवनमालाद्भुतांसकम्।। ४६ ।।
कामबाणप्रविद्धाङ्गं वेणुवादनतत्परम्। हस्ते च बिभ्रतं वेणुं वामे शङ्खं सुवेत्रकम्।। ४७ ।।
अभिरामतरं वक्षोरत्नश्रेष्ठमभीष्टदम्। ध्यात्वैवं विधिना देवं पूजयेदिष्टसिद्धये।। ४८ ।।
दामाद्यैरङ्गकैश्चापि महिषीभिश्च तत्परम्। वासुदेवादिभि: पश्चात् कल्पवृक्षैरनन्तरम्।। ४९ ।।
इन्द्राद्यैश्च तदस्त्रैश्च सप्तावरणसंयुतम्। अर्चयित्वा तु गोविन्दं विधिवत् साधकोत्तम:।। ५० ।।
नैवेद्यं काञ्चने पात्रे पूर्वोक्तं विनिवेदयेत्। अष्टाधिकं शतं पश्चाद्धुनेत् स्वादु पयोन्धसा।। ५१ ।।

पयसा दुग्धेन युतं यदन्धो भक्तं तेनेत्यर्थ:।

शर्कराघृतयुक्तेन बलिं पश्चात् प्रकल्पयेत्। देवर्षियतिसङ्घेभ्यो ह्युपदेवेभ्य आदरात्।। ५२ ।।
स्वस्वदिक्क्रमतो विद्वान् भक्तियुक्त: प्रसन्नधी:।..................................।।

उपदेवा गन्धर्वयक्षादय: ''स्वस्वदिक्क्रमतो ध्याने देवानेवं बहि: स्मरेत्। सम्मुखे देवदेवस्ये''त्युक्तदिक्क्रमेण बलिं पायसादिभि:। तन्निवेदनप्रकारस्तु—देवाग्रादिचतुर्दिक्षु पायसादिकं पात्रेषु साधारेषु निधाय देवेभ्य एष गन्धो नम:'

---

१. 'तत:' ख. पाठ:। २. 'भजेत्' ख. पाठ:। ३. 'इन्द्रादि' ख. पाठ:।

इत्यादिगन्धादिपञ्चोपचारैः सम्पूज्य, स्वहस्ते जलमाधाय 'देवेभ्य एष बलिर्नमः' इति बलिमुत्सृज्य, पुष्पाञ्जलिं दत्त्वा प्रणमेदिति। एवमृषिभ्यो यतिभ्यो गन्धर्वादिभ्यश्च बलिं सम्पूज्य दद्यात्। तथा—

नवनीतहविर्बुद्ध्या तोयैः सन्तर्प्य तन्मुखे। सहस्रं शतमानं वा सम्पूज्य साष्टकं जपेत्।। ५३।।

साष्टकमिति शतं सहस्रं चेत्यात्रापि सम्बध्यते।

मध्याह्ने कृष्णमेवं यः पूजयेद्भक्तितत्परः। गीर्वाणवृन्दवन्द्योऽसौ सम्मतः सर्वजन्तुषु।। ५४।।
आयुर्बुद्धीन्दिराकान्तिसुभगत्वादिसंयुतः। सत्सन्ततिसुहृद्वर्गपशुक्षेत्रधनादिभिः ।। ५५।।
सर्वैश्वर्यसमेतोऽत्र सुखं भुक्त्वा हरिं व्रजेत्। अपराह्णार्चने भेदमङ्गीकुर्वन्ति तद्विदः।। ५६।।
सन्ध्यायामूचिरे केचिद् रात्रावेवापरे तथा। अष्टादशाक्षरान्मन्त्रान् सन्ध्याकाले समर्चनम्।। ५७।।
यामिन्यां सर्वसम्पत्तेर्दशार्णमनुना यदि। कालद्वयेऽपि मन्त्राभ्यां पूजने केऽपि सम्मताः।। ५८।।
सन्ध्यायां द्वारकामध्ये रम्यारामाश्रिते शुभे। गृहैः षोडशसाहस्रैः सर्वतः परिवेष्टिते।। ५९।।
पद्मेन्दीवरकह्लारसम्भृ[1]तैः सुजलाशयैः। हंसादिपक्षिभिर्व्याप्तैः संवृ[2]तेऽद्भुतमन्दिरे।। ६०।।
उद्यदादित्यसङ्काशे चित्रितेऽद्भुतमण्डपे। (कोमलास्तरणे दिव्यस्वर्णपङ्कजमण्डिते।। ६१।।)
सूपविष्टं परात्मानं कृष्णं ध्यायन्समाहितः। नारदादिमुनिश्रेष्ठैः संवृतं मोक्षकाङ्क्षिभिः।। ६२।।
अद्वैतार्थविचारेण मुनिवर्येभ्य एव तु। आत्मरूपं परं तेजो दिशन्तं मन्त्रगौरवात्।। ६३।।
नीलेन्दीवरसत्कान्तिं शान्तिमूर्तिगुणालयम्। सरोजदलसङ्काशनेत्रं मकरकुण्डलम्।। ६४।।
स्निग्धालकाग्रसम्बद्धमुकुटाद्भुतमस्तकम्। अत्यन्तमधुराकारं प्रसन्नमुखपङ्कजम् ।। ६५।।
श्रीवत्साङ्कितवक्षस्कं वनमालाविभूषितम्। कौस्तुभप्रभया दीप्तकुङ्कुमारुणवक्षसम्।। ६६।।
वनमाललङ्कृतांसं पीतवस्त्रावृतं प्रभुम्। नूपुराङ्गदहारादिकटिसूत्रादिभूषितम् ।। ६७।।
दूरीकृतधराभारं प्रसन्नहृदयं विभुम्। दरारिसगदापद्मधारिणं सुचतुर्भुजम् ।। ६८।।
इत्थं सञ्चिन्त्य देवेशं गोविन्दं सम्यगर्चयेत्। अङ्गैरष्टप्रियाभिश्च प्रथमावरणद्वयम्।। ६९।।
ततो नारदनामानं पर्वतं जिष्णुमेव च। निशटं चोद्धवं चैव दारुकं तदनन्तरम्।। ७०।।
विश्वक्सेनं ततो मन्त्री शैनेयं पूयजेत्ततः। पूर्वादिपूजितैरेतैस्तृतीयावरणं भवेत्।। ७१।।
अग्रे गरुडमाराध्य लोकपालान् प्रपूजयेत्। तदस्त्राणि च तद्बाह्ये पञ्चावरणमर्चनम्।। ७२।।
नैवेद्यं पायसं दत्त्वा सम्यक् पूजावसानके। खण्डाक्तक्षीरसद्बुद्ध्या नीरैः कृष्णं प्रतर्पयेत्।। ७३।।
अष्टोत्तरशतं पश्चाज्जपेत् कृष्णं विचिन्तयन्। सर्वार्चासु हुनेन्मन्त्री मध्याह्ने वा यथाविधि।। ७४।।

अष्टोत्तरशतमिति तर्पणजपयोः सम्बध्यते।

[3]अवसानार्घ्यविध्यन्तं विधाय स्तुतिमारभेत्। नत्वा निवेद्य चात्मानं विसृज्य स्वहृदि प्रभुम्।।७६।।

---

१. संवृत्तैः' ख. पाठः। २. 'संभृते' क. ग. पाठः:। ३. 'आसनाद्यर्घ्य' ख. पाठः।

न्यस्य देवमयो भूत्वा स्वात्मानं पूजयेत्तत:। सन्ध्याकाले हरिं त्वेवं प्रत्यहं योऽर्चयेद् बुध:।।७७।।
इह भोगान् बहून् भुक्त्वा व्रजेदन्ते च सद्गतिम्। नन्दात्मजं यजेद्रात्रौ कामाकुलितचेतसम्।।७८।।
रासक्रीडासमाक्रान्तवल्लवीचक्रवेष्टितम्। वितस्त्युच्चं सुवृत्तं च स्थूलं चिक्कणमद्भुतम्।।। ७९।।
निखातं शङ्कुमाक्रम्य पादाभ्यां च परस्परम्। भ्रमिर्गृहीतहस्तैर्या रासगोष्ठी तु सा भवेत्।। ८०।।
स्थलपङ्कजपुष्पाणां मध्यरेणुयुतेन च। रिङ्गत्तरङ्गबिन्दूनां समूहार्द्रेण वायुना।। ८१।।
कालिन्दीसैकते शुभ्रे शीतले तापहारिणि। कामबाणप्रविद्धाङ्गदिव्यस्त्रीकोटिकोटिभि:।। ८२।।
संवृते चन्द्रकिरणसमुद्द्योतितदिङ्मुखे। चलद्भृङ्गाङ्गनाशब्दवाचालितदिगन्तरे ।। ८३।।
सिद्धगन्धर्वदेवौघवयक्षकिन्नरपन्नगै:। विद्याधरै: सपत्नीकैर्विमानेषु कृतासनै: ।। ८४।।
आकाशे सञ्चरद्भिस्तै: पुष्पवर्षकृतोद्भवे[1]। परस्पराबद्धहस्तसुन्दरीजालनिर्मिते ।। ८५।।
रासक्रीडाविधौ रत्नशङ्कुगं परमेश्वरम्। एतद्देहसमाक्लृप्तदिव्यानेककलेवरम्।। ८३।।
नारीणां युग्मयोर्देवं प्रत्येकं चान्तरा गतम्। तत्तत्कण्ठं समालम्ब्य बाहुद्वन्द्वविराजितम्।। ८७।।
आत्मसम्बद्धसञ्जातकामानलसुदीपनात्। रोमोद्गमसमाक्रान्तगात्रवल्लीयुजां मुहु:।। ८८।।
भ्रमन्तमाभी रज्यन्तं महामणिपरिष्कृतै:। कृतचारुस्वनै: सर्वालङ्कारैर्हृदयङ्गमम्।। ८९।।
इत्थं पृथक्शरीरं तु संयुतं[2] मणिभिर्यथा। हिरण्यरचितै: सम्यक् सक्तं मारकतं तथा।। ९०।।
मणिशङ्कौ सुविस्तीर्णे रक्तपद्मगतं प्रभुम्। अतसीसूनसङ्काशं यौवनश्रीसमन्वितम्।। ९१।।
तदानीं फुल्लरक्तारविन्दच्छदविलोचनम्। नूतनैर्विविधैश्चारुपल्ल[3]वैर्नवगुच्छकै: ।। ९२।।
शितिकण्ठशिखण्डैश्च बद्धमूर्धजसञ्चयम्। सद्भुवं चन्द्रसङ्काशसुन्दराननपङ्कजम्।। ९३।।
(रत्नकुण्डलसंशोभिगण्डमण्डलमण्डितम्)। पक्वबिम्बफलाकाररक्ताधरविराजितम्।। ९४।।
नानारत्नसमाक्लृप्त[4]सर्वभूषणभूषितम्। सवर्णवर्णलसद्वस्त्रविभ्रमश्रीगृहं परम्।। ९५।।
नवप्रवालरुचिरहस्तपादतलं विभुम्। भ्रमरालीलसत्सूनमाल्यशोभिभुजद्वयम्।। ९६।।
अङ्गनाकुचसंश्लेषलग्नकुङ्कुमवक्षसम्। महोक्षचारुगमनं वंशवादनसादरम्।। ९७।।
अनङ्गबाणसंविद्धं सर्वलोकैकसद्गतिम्। ध्यात्वेत्थं प्रोक्तसत्पीठे लक्ष्मीकान्तं प्रपूजयेत्।। ९८।।
अङ्गैरावरणं पूर्वं मिथुनैस्तदनन्तरम्। केशवाद्या: पुरा प्रोक्ता: षोडश स्वरमूर्तय:।। ९९।।
कीर्त्यादिशक्तिसहिता लक्ष्मीमन्मथपूर्विका:। प्रत्येकं स्वरसंयुक्ता मिथुनानि भवन्ति हि।।१००।।

श्रींक्लींअं केशवाय कीर्त्यै नम: इत्यादि प्रयोग:।

षोडशारदलेष्वर्च्या रासक्रीडनतत्परा:। इन्द्रादीन् पूजयेद्बाह्ये वज्रादींश्च तत: परम्।। १०१।।
इत्थमावरणैर्युक्तं चतुर्भि: पूजयेत् प्रभुम्। तत: सुक्वथितं दुग्धं सितशर्करया युतम्।। १०२।।
राजसे भाजने सम्यक् संस्कृत्य विनिवेदयेत्। कांस्यपात्रेषु नैवेद्यं स्वरसंख्येषु कल्पयेत्।।१०३।।

१.'तोद्भुते' ख. पाठ:। २.'सम्पुटं' ख. पाठ:। ३.'वानेकगुच्छकै: ख. पाठ:। ४. 'समायुक्त' ख. पाठ:। ५. 'ततस्तु' ख. पाठ:।

प्रत्येकं मिथुनेभ्यश्च पयस्तादृक् च वैभवात्। अन्यत् सर्वं यथापूर्वं कृत्वा पूजां समापयेत्।।१०४।।
रात्रावेवं विधिं यो वै भजेल्लोकवशंकरः। इन्दिरामन्दिरं भूयात् सर्वाराध्यः स मुक्तिभाक्।।१०५।।
रात्रावह्नौ विरामे वा प्रत्यहं यस्तु पूजयेत्। तुल्यं फलं समाप्नोति भवाब्धेः पारगो भवेत्।।१०६।।

इत्थं मन्त्रकलेवरं कमलजाजानिं तु कालत्रये
भक्त्याभ्यर्चयतीह यः स नियतं भूलोकभर्ता भवेत्।
धर्मे नित्यमतिर्महार्हविभवः कामान् यथेष्टान् भजे-
दन्ते विष्णुपुरं प्रयाति परमं सिद्धौघसंसेवितम्।। १०७।।

अर्चान्ते देवदेवस्य तर्पणानां विधिं ब्रुवे। परोक्तानां च काम्यानां साधकेष्टफलप्रदम्।। १०८।।
पूजनव्यतिरिक्तेऽपि तत्कालं लभ्यते बुधैः। पीठाणुभिस्तर्पणादौ सकृन्मूलेन चैकशः।। १०९।।
तत्रावाह्य यजेद् देवं जलैरेवोपचारकैः। धेनुमुद्रां प्रदर्श्यात्र स्मृत्वा तर्पणसाधनम्।। ११०।।
तद्धिया जलमादाय स्वर्णपात्रीकृतेन तु। सम्यगञ्जलिना देवं तर्पयेन्मूलमुच्चरन् ।। १११।।
त्रिकालं तर्पयेन्नित्यमष्टाविंशतिसंख्यया। तत्तत्कालोचितान् पश्चात् तर्पयेत् परिवारकान्।। ११२।।
एकैकवारं मन्त्रज्ञो मूलेनापि प्रतर्पयेत्। [1]क्षौद्रयुक्तं दधि प्रातर्नवनीतयुतं हविः।। ११३।।
अह्नौ मध्ये समाख्यातं सन्ध्यायां दुग्धमुत्तमम्। सितोपलविमिश्रं तु तर्पणद्रव्यमीरितम्।। ११४।।
वाक्यं तु पूर्ववद् विद्यादन्यत् सर्वं तथा भवेत्। तत्प्रसादजलैः पश्चात् सिञ्चेदात्मानमात्मवित्।।११५।।
मूलमन्त्राभिसञ्जप्तं जलं मन्त्री पिबेत्ततः। हरिमुद्वास्य मन्त्रज्ञो जपेन्मन्त्रं तु तन्मयः।। ११६।।
काम्यतर्पणवस्तूनि ततो वक्ष्यामि यानि तु। भजेदुक्तप्रकारेषु समालम्ब्यैकमादरात् ।। ११७।।
सकृज्जलेन सन्तर्प्य दुग्धैर्वारचतुष्टयम्। पश्चात् षोडशभिर्द्रव्यैश्चतस्रस्त्वेकशः क्रमात्।। ११८।।
आवृतीस्तर्पयेन्मन्त्री मूलमन्त्रेण संयुतः। चतुर्वारं पुनः क्षीरैरेकवारं जलेन च।। ११९।।
अन्यद् दुग्धाम्बुना दद्याद्भूयश्च ससितोपलम्। प्रातरेवं तर्पयेद्यश्चतुःसप्ततिसंख्यया।। १२०।।
कृष्णं प्रतिदिनं विद्वान् श्रद्धाभ[2]क्तिश्च तत्परः। तस्य मण्डलमात्रेण वाञ्छितं भवति ध्रुवम्।।१२१।।
पायसं दधिभक्तं च तिलतण्डुलमेव च। गुडभक्तं च दुग्धं च दध्यतो नवनीतकम्।। १२२।।
घृतं च कदली मोचा ततश्चैव रजस्वला। मोचमोदकपूपाश्च पृथुकाश्चैव लाजकाः।। १२३।।
द्रव्याणि षोडशैतानि कथयन्ति मनीषिणः।...।।

मोचा रजस्वला मोचश्च कदलीभेदा एव, तेन चत्वारः कदलीभेदा एव ज्ञेयाः।

अपरं तर्पणं वक्ष्ये तुल्यं पूर्वेण यत्फलम्। धारोष्णक्वथिते दुग्धे दधिदध्युत्थके[3] पुनः।। १२४।।
सर्पिंषि पायसं चैव मत्स्यण्डी क्षौद्रमेव च। पञ्चामृतं नवैतानि द्वादशावृत्ति तर्पयेत्।। १२५।।

धारोष्णं तत्कालं दुग्ध्वानीतं। मत्स्यण्डी खण्डशर्कराविशेषः।

---

१. 'गुडयुक्तं' ख. पाठः। २. 'शुद्धभक्ति' ख. पाठः। ३. 'दध्युदके' ख. पाठः।

प्रत्येकं द्रव्यतस्त्वेतैरष्टोनारशतं विदु:। तर्पणानि विधानेन कृतानि यशसे तथा।। १२६।।
लोकसंवलनार्थं च कथितानि मनीषिभि:। खण्डमिश्रितधारोष्णदुग्धबुद्ध्या जलै: शुभै:।। १२७।।
कृष्णं सन्तर्प्य गच्छेद्यो ग्रामं वा नगरं तथा। (स तु नानारसोद्भूतं भक्ष्यं भोज्यं च विन्दति।।१२८।।
वस्वन्नं[1] वस्त्रधान्यादि मनोभीष्टं च यद्भवेत्। तर्पणं यावदाख्यातं जपस्तावानिह स्मृत:)।।१२९।।
इह सन्तर्पणादेव फलमाप्नोति वाञ्छितम्। भिक्षुको ब्राह्मणो नित्यं स्वयं गोविन्दरूपधृक्।। १३०।।
भूत्वा नानाविधैर्भावैरेभिरन्यैर्मुहुर्मुहु:। मनोभि: सह गोपीनां दधिदुग्धघृतादिकम् ।। १३१।।
बलाद् गृह्णन्नलं भिक्षामाप्नोति महतीं द्रुतम्। षट्कोणान्तलिखेत् कामं साध्याख्याकर्मसंयुतम्।।१३२।।
षडक्षरमनोर्वर्णान् षट्सु कोणेषु संलिखेत्। पद्मं दशदलं बाह्ये रचयेल्लक्षणान्वितम् ।। १३३।।
विंशत्यर्णमनोर्वर्णान् किञ्जल्केषु द्विशो लिखेत्। कोणेषु मदनाक्रान्तभूगृहं रचयेत्तत: ।। १३४।।
रोचनालिखितं ह्येतत् सम्यक् स्वर्णशलाकया। हेमपट्टे विधानेन गुलिकीकृत्य पूजितम्।। १३५।।
सम्यक् सम्पातसंसिक्तं मन्त्रितं मूलमन्त्रत:। गोपालयन्त्रमेतद्धि पुण्यवद्भि: करे धृतम्।। १३६।।
त्रैलोक्यवश्यकर्मादौ समर्थं चातिगोपितम्। कीर्त्यादिवर्धनं राज्यपुत्रपौत्रधनप्रदम्।। १३७।।
कान्तिरक्षाकरं नृणां सर्वसौभाग्यदायकम्। अपस्मारमतिभ्रंशमोहमूर्च्छाज्वरादिभि:।। १३८।।
राक्षसोन्मादभूताद्यै: पीडितानां च मस्तके। एतद्यन्त्रं स्मरेन्मन्त्रं जपेन्नश्यति तत्क्षणात्।। १३९।।

अस्यार्थ:— षट्कोणं कृत्वा तन्मध्ये ससाध्यं कामबीजं विलिख्य, तत्कोणेषु वक्ष्यमाणगोपालषडक्षरमन्त्रार्णनिकैकशो विलिख्य, तद्बहिर्दशदलपद्मं कृत्वा, तत्केसरेषु वक्ष्यमाणगोपालविंशत्यक्षरमन्त्रार्णान् (द्विद्विशो आलिख्य दलेषु पूर्वोक्तदशाक्षरवर्णानिकैकशो) विलिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु कामबीजं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति। तथा—।

कामो ब्रह्मा भारभूति: ष्णावायुर्नमसान्वित:। षडर्णो ह्नुराख्यत: सर्वसम्पत्प्रदायक:।। १४०।।

कामस्तद्बीजं, ब्रह्मा क, भारभूति: ऋ, तेन कृ। ष्णा स्वरूपे। वायुर्य। नमसा नम:शब्देन। तथा— ''मायालक्ष्मीपुरोऽष्टादशार्णो विंशाक्षरो मनु:''। माया भुवनेश्वरीबीजं। लक्ष्मी: श्रींबीजे। एतद्बीजद्वयादि: पूर्वोक्ताष्टादशाक्षरो विंशत्यर्णमन्त्र:।।

सारसङ्ग्रहे—

अथ काम्यानि कर्माणि वक्ष्यन्ते मन्त्रयोर्द्वयो:। देवकीतनयं कृष्णं तदानीं जातमद्भुतम्।। १।।
शङ्खचक्रगदापद्मधारिणं गगनप्रभम् । पीतवस्त्रलसद्गात्रशोभिसर्वाङ्गसुन्दरम् ।। २।।
एवं सञ्चिन्त्य सञ्जप्य रात्रिशेषे दशायुतम्। त्रिमध्वक्तैर्दशांशं तु किंशुकप्रसवैर्हुनेत्।। ३।।
मन्त्रयोरेकतो मन्त्री य: करोतीत्थमादरात्। वीर्य्यं प्रज्ञां स्मृतिं प्राप्य कवीनामग्रणीर्भवेत्।। ४।।
त्यक्तदिव्याद्भुताङ्गं तं मातृक्रोडगतं शिशुम्। चलत्पादकरन्यासं चिन्तयन्नयुतं जपेत् ।। ५।।
तावत्संख्यं हुनेदग्नौ घृतेनैव सुसाधक:। स लभेत् परमां भक्तिमास्तिक: शान्तचेतन:।। ६।।
रुदन्तं बालशयने गोपीभिर्दोलितं शिशुम्। ध्यात्वा क्षीरधिया तोयैस्तर्पयँल्लभतेऽशनम्।। ७।।

---

[1] 'भूषणं' ख. पाठ:।

क्षुद्रबालग्रहप्रेतस्मृतिनाशादिभीतिषु। पिबन्तं पूतनास्तन्यं ग्रस्तस्य शिरसि स्मरन्।। ८।।
शतं साग्रं जपेन्मन्त्रं रुदतीं पूतनां तथा । सप्राणचूषणाशेषच्छिन्नमर्मकलेवराम्।। ९।।
तदानीं प्रकटीभूय प्रोक्ता नश्यन्ति राक्षसाः। हुनेत् सुखरमञ्जर्याः समिधस्त्वर्चितेऽनले।। १०।।
पञ्चगव्योक्षिताः सम्यक् पूतनावैरिणो मुखे। पाययेद्धुतशिष्टं तु द्रव्यैः पीतनरं ततः।। ११।।
सहस्रमन्त्रितैस्तोयैः कुम्भगैरभिषेचयेत्। ग्रहपीडानिवृत्त्यर्थं दुःखौघध्वंसनाय च ।। १२।।
स्वकीयचरणोत्क्षिप्तशकटं भावयन् मनुम्। अयुतं प्रजपेत् सर्वविघ्नसङ्घः शममियात्।। १३।।
नीलगात्रं स्वहस्ताभ्यां नवनीतं नवं हविः। दधानं किङ्किणीसङ्गतरक्षुनखभूषणम्।। १४।।
एवं ध्यात्वा हुनेन्मन्त्री दूर्वाकण्डत्रिकैः शुभैः। दुग्धाज्यल्लोलितैर्लक्षं तावन्मन्त्रं जपेद्बुधः।। १५।।
गुरुं सन्तोष्य वसुभिस्तर्पयेच्च द्विजोत्तमान्। आधिव्याधिविनिर्मुक्तो दीर्घजीवी भवेत्तु सः।। १६।।
बाहुभ्यां बकमादाय पाटयन्तं हि तुण्डयोः। कृष्णं ध्यायंस्तु बालानां भये स्पृष्ट्वा जपेन्मनुम्।।१७।।
अभिमन्त्रिततैलेन लिम्पेत्तदुपशान्तये । गोगणं साधु रक्षन्तं चारयन्तमितस्ततः ।। १८।।
वेणुं धमन्तं गोविन्दं ध्यायेत् पूर्वोदितं फलम्। महासर्पगरप्राप्तौ चिन्तयन् दष्टमस्तके।। १९।।
कालीयस्य फणामध्ये नृत्यन्तं कृष्णमञ्जसा। सुधादृष्ट्याभिवीक्ष(वर्ष)न्तं तद्गात्रं प्रजपेन्मनुम्।।२०।।
वामहस्तस्य तर्जन्या तर्जयन् मन्त्रिसत्तमः। सुखीकरोति विषिणं कालदष्टमपि क्षणात्।। २१।।
कालीयमर्दनं कृष्णं ध्यात्वा कुम्भे प्रपूजयेत्। अष्टोत्तरशतं जप्त्वा स्नापयेत् तज्जलेन यम्।।२२।।
कालकूटविषग्रस्तः सुखीभवति सेचनात्। गोवर्धनगिरिं वामबाहुदण्डेन बिभ्रतम् ।। २३।।
दक्षहस्तसुशाखाभिर्वेणुयोजितसन्मुखम्। कृष्णं सञ्चिन्तयेन्मन्त्रं गच्छन् छत्रमृते जपन्।। २४।।
भीतिदास्तं न बाधन्ते विद्युद्वर्षणवायवः। व्यर्थमेघौघमायान्तं वासवं चिन्तयन् हुनेत्।। २५।।
अयुतं लवणैः शुद्धैरनावृष्टिर्भवेद्ध्रुवम्। कलिन्दतनयातोये विहारनिरतं मुदा ।। २६।।
मज्जनोन्मज्जनाद्यैश्च तरलैः जलसेचनैः। गोपाङ्गनासमूहेन सिच्यमानं मुहुर्मुहुः।। २७।।
कृष्णं सञ्चिन्त्य मन्त्रज्ञो वेतसोत्थैः समिद्वरैः। हुनेदयुतसंख्याकैः क्षीराक्तैर्यो यथाविधि।। २८।।
भूयसीं वृष्टिमिष्टं हि कुर्यादसमयेऽपि सः। एवमेव स्मरन् कृष्णं पीडितस्य तु मस्तके।। २९।।
मोहनार्तिगरस्फोटभूतराक्षसपन्नगैः। मन्त्रं जपेत् तदानीं स सुखीभवति नान्यथा।। ३०।।
वैनतेयगतं कृष्णं सप्रद्युम्नं बलान्वितम्। आत्मज्वरपराभूतज्वरेण स्तुतमादरात् ।। ३१।।
एवं ध्यात्वा ज्वराक्रान्तमस्तके सञ्जपेन्मनुम्। महाघोरज्वरो दुष्टस्तदानीं नाशमाप्नुयात्।। ३२।।
एवं ध्यात्वानले कृष्णमभ्यर्च्याङ्गादिसंयुतम्। गुडूचीशकलर्हुत्वा क्षीराक्तैरयुतं बुधः ।। ३३।।
क्रूरज्वरमशक्यं च नाशयेन्नात्र संशयः। तीक्ष्णबाणप्रविद्धाङ्गभीष्मपीडाहरं हरिम् ।। ३४।।
ध्यात्वा जपेत् स्पृशन्नार्तं पाणिभ्यां स सुखी भवेत्। कृष्णं सान्दीपनेः पुत्रप्रदं ध्यात्वायुतं हुनेत्।।३५।।
दुग्धाप्लुतैर्गुडूचीनां शकलैरर्चितेऽनले। अपमृत्युर्विनश्येत कृत्याः क्रूरा अपि क्षणात्।। ३६।।

कृष्णं पुत्रान् प्रयच्छन्तं द्विजाय मृतसूनवे। ध्यात्वा पार्थयुतं लक्षं जपेत् पुत्रसमृद्धये।। ३७।।
पुत्रजीवोत्थकाष्ठेन ज्वलिते हव्यवाहने। फलैस्तदीयैर्जुहुयादयुतं मधुराप्लुतै: ।। ३८।।
पुत्रान् बहूनरोगान् स लभते चिरजीविन:। (दुग्धवृक्षत्वचां क्वाथै: घटमापूर्य रात्रिषु।। ३९।।
पूजयित्वायुतं जप्त्वा प्रातर्योषां पतिव्रताम्। अभिषिच्य विधानज्ञो घृतं जप्तं च पापयेत्)।। ४०।।
नित्यकर्मोदितेनैवं स पुत्रान् बुद्धिशालिन:। वन्ध्यापि सा समाप्नोति नीरुजो दीर्घजीविन:।। ४१।।
बोधिपत्रपुटे तोयं जप्तमष्टोत्तरं शतम्। मौनं कृत्वा पिबेन्नारी प्राग्वर्षात् सा सुतं लभेत्।। ४२।।
कृत्यां क्रूरां महाभीमां काशिराजेन योजिताम्। पराजित्यात्मचक्रेण काशीं तद्भववह्निना।। ४३।।
शेषेण भस्मीकुर्वन्तं कृष्णं सम्यग् विचिन्तयन्। जुहुयान्निशि सिद्धार्थै: स्वीयतैलविलोलितै:।।४४।।
एवं कृते तु सप्ताहं वैरिणा केनचित्कृता। कृत्या भूयस्तमेवाशु नाशयेन्नात्र संशय:।। ४५।।
आश्रमे रुचिरे दिव्ये बदरीवृक्षभूषिते। सूपविष्टं स्पृशन्तं च हस्ताम्बुजयुगेन च।। ४६।।
घण्टाकर्णस्य सर्वाङ्गं स्मृत्वा गोविन्दमादरात्। मधुराक्तैस्तिलैर्लक्षं जुहुयादेधितेऽनले।। ४७।।
अशेषपापनाशार्थं पुष्ट्यर्थं वा जपेत् तत:। रुक्मिणं बलभद्रं च दीव्यन्तं चाक्षकर्मणा।। ४८।।
ध्यायन् कृष्णं द्वेषयन्तं होमयेद् गुलिका: शुभा:। गोमयोत्था: क्षणाद्द्वेष: प्रीयते जायते ध्रुवम्।।४९।।
खगेश्वरसमारूढं कुर्वन्तं बाणवर्षणम् । धावमानं रिपुगणमनुधावन्तमाशुगम् ।। ५०।।
जपेत् सप्तसहस्राणि कृष्णं ध्यात्वा मनुं बुध:। सप्ताहाद्वैरिणो भूयादुच्चाटो देशतो ध्रुवम्।। ५१।।
कपित्थफलसम्पातेन वने वत्सकं क्षिपन्। कृष्णो ध्येयोऽयुतं जप्यो मनुरुच्चटकृद्रिपो:।। ५२।।
ध्यायन् स्वं कंसमथनं स्वेन मञ्चादध:कृतम्। वैरिणं कंसरूपं च कर्षन्तं प्राणवर्जितम्।। ५३।।
अयुतं प्रजपेन्मन्त्रं हुनेद्वा तत्समं बुध:। समिद्भिर्जन्मनक्षत्रतरूणां तस्य मन्त्रवित्।। ५४।।
शत्रुर्निधनमाप्नोति सुधाभक्षोऽपि नान्यथा। कलिद्रुमसमिद्वर्यैर्निम्बतैलप्लुतैर्हुनेत् ।। ५५।।
यामिन्यामयुतं स्वस्थो रिपुर्यमपुरं व्रजेत्। कार्पासबीजचूर्णानि निशानिम्बदलानि च।। ५६।।
ऐरण्डतैलसिक्तानि हुनेत् त्रिकटुकानि च। रात्रौ श्मशानभूमिस्थो रिपुनाशाय मान्त्रिक:।। ५७।।
मारणं निन्दितं कर्म यदि कुर्वीत साधक:। अयुतं प्रजपेन्मन्त्रं यावद्वा हविषा हुनेत्।। ५८।।
मन्त्री तत्पापनाशाय शान्तचेता दृढव्रत:। पुरन्दरमुखाञ्जित्वा हरन्तं सुरपादपम्।। ५९।।
कृष्णं ध्यायञ्जपेल्लक्षं सर्वतो जयमाप्नुयात्। व्याख्यानमुद्रया कृष्णं गीतार्थं फाल्गुनाय च।।६०।।
कथयन्तं रथारूढं भावयन् प्रजपेन्मनुम्। धर्मवृद्धिर्भवेत् तस्य योगसिद्धिश्च जायते।। ६१।।
त्रिस्वादुयुक्तैर्लक्षं य: किंशुकप्रसवैर्हुनेत्। महाकवि: स वादीन्द्रो वेदवेदाङ्गपारग:।। ६२।।
कोटिभास्करसङ्काशं विश्वरूपशरीरिणम्। सप्तहाटकसत्कान्तिमग्नीषोमशरीरिणम् ।। ६३।।
सूर्यानलस्फुरद्वक्त्रचरणाम्बुजमण्डितम्। विविधानेकसद्धेतिं दिव्यनेपथ्यधारिणम्।। ६४।।
जगद्व्यामान्तरालेषु व्याप्तं कृष्णं विचिन्तयन्। मन्त्रश्रेष्ठं जपेत् सम्यक् सहस्रं साष्टकं बुध:।।६५।।

देशगेहपुरग्रामवास्तुस्वात्मसु रक्षणम्। भवेद् दशार्णमन्त्रेण तद्वदष्टादशार्णतः ।। ६६।।
उक्तानेतान् प्रयोगांस्तु यदृच्छातः[1] समाचरेत्। वश्यकर्माधुना वक्ष्ये मन्त्रद्वयत आदरात्।। ६७।।
यत् कृत्वा विधिना मन्त्री सर्वलोकप्रियो भवेत्। अरण्योद्भवसत्पुष्पैर्विकचैररुणैः शुभैः।। ६८।।
मध्याह्नोक्तविधानेन पूजयित्वा गृहे हरिम्। प्रत्यहं दशवर्णं यः सहस्रं साष्टकं जपेत्।। ६९।।
मण्डलाद् द्विजमुख्यानां चक्रं तस्य वशी भवेत्। मालतीकुसुमैः श्रेष्ठैर्गोपवेषं यथा पुरा।। ७०।।
कृष्णमभ्यर्च्य नृपतीन् वशं नयति दासवत्। क्रीडन्तं रक्तकुसुमैरश्वमारसमुद्भवैः।। ७१।।
वैश्यान् नीलोत्पलैः शूद्रानिष्ट्वा गायन्तमच्युतम्। तण्डुलैः शुक्लपुष्पैश्च घृताक्तैश्च सहस्रकम्।।७२।।
अन्वहं सप्तरात्रं तु हुत्वा तद्भस्म धारयेत्। अलिके धारणान्नारी स्वपुमांसं वंशं नयेत्।। ७३।।
पुरुषश्च तथा नारीं दासीकुर्यान्न संशयः। पुष्पताम्बूलवासांसि कज्जलालेपनादिकम्।। ७४।।
एकेन मन्त्रयेन्मन्त्री सहस्रमभिमन्त्र्य च। दद्यादेभ्यः सदा ते स्युः किङ्करा मरणान्तिकम्।। ७५।।
आपणे व्यवहारादौ विवादे राजवेश्मसु। परिषद्यज्ञकर्मादौ शतं साग्रं जपेत्तु यः।। ७६।।
तत्र यद्वचनं ब्रूयात्तेनैव स जयी भवेत्। सूपविष्टं कदम्बाधो वल्लवीभिः सहाच्युतम्।। ७७।।
हृद्यगानरतं ध्यात्वा हुत्वा त्रिमधुराप्लुतैः। अपामार्गसमिच्छ्रेष्ठैस्त्रैलोक्यं वशमानयेत्।। ७८।।
रासक्रीडारतं कृष्णं ध्यात्वा मन्त्रं दशाक्षरम्। जपेत् सहस्रं नित्यं यो मासमात्रेण साधकः।। ७९।।
इष्टां कन्यामवाप्नोति दुर्लभामपि नान्यथा। अत्युच्चकुन्द(ञ्ज)मारुढं कृष्णं ध्यात्वा सहस्रकम्।।८०।।
सायं जप्यात्तु या कन्या प्रत्यहं मण्डलाद्धि सा। मन्त्रस्यास्य प्रभावेन वाञ्छितं वृणुयाद्वरम्।।८१।।
गोपीहस्तसरोजानि धृत्वा नृत्यन्तमञ्जसा। कृष्णं सञ्चिन्त्य मन्त्रं यो जपेदष्टादशाक्षरम्।। ८२।।
लक्षं मधुप्लुतैर्वापि चूर्णैर्लाजसमुद्भवैः। हुत्वायुतं जपेत् तावत् कन्यामिष्टां लभेत सः।। ८३।।
अष्टादशार्णमन्त्रेण पलाशसमिधोऽयुतम्। मधुप्लुतैः कुशैर्वापि हुनेद्वा तिलतण्डुलैः।। ८४।।
वशीभवन्ति भूदेवा दत्त्वा सर्वस्वमादरात्। कृतमालप्रसूनैश्च कुरण्टकुसुमैरपि ।। ८५।।
हुत्वा वशीकरोत्येवं भूपालान् सपरिच्छदान्। वकुलोद्भवसत्पुष्पैः पाटलोत्थैश्च तैरपि।। ८६।।
अक्षजैर्विट्तुरीयौ च स्वायत्तौ कुरुते क्षणात्। नूतनोत्फुल्लसत्पद्मैः सुगन्धैररुणोत्पलैः।। ८७।।
मध्वक्तैश्चम्पकैर्वापि पाटलोत्थैः प्रसूनकैः। हुत्वायुतं क्रमेणैव वशयेद् [2]वर्णयोषितः।। ८८।।
अश्वमारप्रसूनैर्यो मध्यक्तैः प्रत्यहं हुनेत्। रात्रौ सहस्रसंख्यातैः सप्तरात्रमतन्द्रितः।। ८९।।
पण्याङ्गनानां साहस्रं चारुयौवनगर्वितम्। पञ्चबाणप्रविद्धाङ्गं दासीकुर्यान्न संशयः।। ९०।।
सिद्धार्थैर्लवणोपेतैर्मध्वक्तैस्त्रिसहस्रकम्। होमं प्रकुर्वतो रात्राविद्रोऽपि द्राग् वशी भवेत्।। ९१।।
श्रीवृक्षस्य फलैः पत्रैस्तत्फलैश्च प्रसूनकैः। त्रिस्वादुसंयुतैर्होमात् पद्मैस्तण्डुलसंयुतैः ।। ९२।।
प्रत्येकद्रव्यतो लक्ष्मीं वशीकुर्यान्निजालये। वासांसि वल्लवस्त्रीणां मनोभिः सह केशवम्।।९३।।

---

[1] :यद्वाञ्छातः’ ख. पाठः। [2] ‘वारयोपितः’ क. पाठः।

समादाय कदम्बं तु समारूढं तु चिन्तयन्। जप्यात् सहस्रमानं यो रात्रौ स दशभिर्दिनैः।। ९४।।
शचीमप्यानयन्मत्री शीघ्रमेव न संशयः। किं बहूक्तेन मन्त्राभ्योमताभ्यां सदृशोऽपरः।। ९५।।
नास्ति वश्ये तथाकृष्टौ देवदानवयोषिताम्। चन्द्रकुन्दसुगौराङ्गं रक्तपद्मदलेक्षणम् ।। ९६।।
अरिकम्बू*गदापद्मे बाहुदण्डैस्तु बिभ्रतम्। दिव्यैश्च मण्डनालेपैः पद्मदाम्ना च भूषितम्।। ९७।।
पीताम्बरलसद्गात्रं तरुणं मुनिसेवितम्। विकचत्पद्ममध्यस्थं ध्यात्वा नन्दात्मजं प्रभुम्।। ९८।।
स्वहृत्पद्मगतं देवं पुराणपुरुषं नवम्। नीलमेघनिभं वापि द्रुतहेमद्युतिं तु वा ।। ९९।।
जपेदेकतरं मन्त्री ध्रुवाभ्यां[1] पुटितं कृती। लक्षद्वादशकं सम्यक् तत्सहस्रं समिद्वरैः।। १००।।
दुग्धाप्लुतैर्हुनेन्मन्त्री पयोद्रुम[2]समुद्भवैः। मध्वाज्यलोलितेनापि हविषा वा जितेन्द्रियः।। १०१।।
पश्चाद्विश्वाधिपं नित्यचिदानन्दकलेवरम् । भवान्धकारतरणिं स्वीयहृत्सरसीरुहे ।। १०२।।
आत्माभेदेन सञ्चिन्त्य प्रत्यहं परमेश्वरम्। त्रिसहस्रं जपेन्मन्त्री यजेत् सान्ध्योक्तवर्त्मना।। १०३।।
विधिमेनं भजेद्यस्तु श्रद्धाभक्तिसमन्वितः। संसाराब्धिं महाभीमं जरामृत्युमहाह्वयैः[3]।। १०४।।
अत्युच्चैर्लहरीजालैर्विषयग्राहसंयुतम्। समुल्लङ्घ्य परं तेजो जीवन् विष्णोर्निरञ्जनम्।। १०५।।
उच्चरंस्तस्य नामानि पिबंस्तस्य कथामृतम्। आकारांस्तस्य च ध्यायन् तत्पादाब्जं नमन्नपि।।१०६।।
भक्त्या परमयोपेतो जीवन्मुक्तः स कथ्यते।..।।

पिण्डं वह्निपुटे सुवृत्तविवरे संलिख्य तत्कोणगान्
षड्वर्णान् पुनरङ्गपञ्चकलसत्सन्धीन् दलेष्वष्टसु।
अष्टार्णान् वसुयुग्मवर्णसुमनुं तत्संख्यपत्रस्थितं
बाह्येऽष्टादशपत्रपद्मलसितान् तत्संख्यवर्णांल्लिखेत्।। १०७।।
पद्मं तत्त्वदलं ततः प्रतिदलं गायत्रिवर्णांल्लिखेत्
संवेष्ट्य स्मरबीजतः पुनरथो त्रिंशद्द्विपत्राम्बुजम्।
तत्रानुष्टुभवर्णकाननुदलं वीतं च पिण्डेन तत्
पञ्चाशल्लिपिभिः क्रमेण च पुनः पाशाङ्कुशाभ्यां वृतम्।। १०८।।

सर्वं वृत्तेन संवीतं यन्त्रमेतत् प्रकल्पितम्। यन्त्रराजमिति ख्यातं सर्वविश्वप्रमोहनम्।। १०९।।
कामधर्मार्थफलदं शत्रुदस्युनिवारणम्। कीर्तिकान्तिधनारोग्यरक्षाश्रीविजयप्रदम्।। ११०।।
पुत्रपौत्रप्रदं लोके भूतवेतालनाशनम्। लिखितं भूर्जपत्रादौ पूजितं चाभिमन्त्रितम्।। १११।।
धारितं सर्वकामानां वृद्धिदं नात्र संशयः।..।।

इति। अस्यार्थः— षट्कोणं कृत्वा तन्मध्ये वृत्तं विलिख्य, तस्योदरे पिण्डं गोपालैकाक्षरं बीजं विलिख्य, तन्मध्ये साध्यनाम स्फुटं कृत्वा, षट्कोणेषु पूर्वोक्तषडर्णमन्त्रवर्णानेकैकशो विलिख्य, तत्सन्धिषु ''आचक्राय स्वाहा''

---

*'अरिश्चक्रम्। कम्बुः शङ्खः। [1]. 'ध्रुवाभ्यां प्रणवाभ्याम्'।। [2]. ' पयोद्रुमाः पिप्लादयः। [3]. 'सभाह्वयैः' ख. पाठः।

इत्यादिपूर्वोक्तपञ्चाङ्गमन्त्रानालिख्य, तद्बाह्येऽष्टदलकमलं कृत्वा तद्दलेषु वक्ष्यमाणकृष्णाष्टाक्षरवर्णानालिख्य, (तद्बहिः षोडशदलपद्मं कृत्वा तद्दलेषु वक्ष्यमाणकृष्णषोडशार्णमन्त्रर्णान् विलिख्य, तद्बहिरष्टादशदलं कृत्वा तद्दलेषु पूर्वोक्ताष्टादशाक्षरमन्त्रवर्णानालिख्य) तद्बाह्ये चतुर्विंशतिदलं पद्मं कृत्वा तद्दलेषु वक्ष्यमाणकृष्णगायत्रीवर्णानालिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां कामबीजेन संवेष्ट्य, तद्बहिर्द्वात्रिंशद्दलं पद्मं कृत्वा तद्दलेषु वक्ष्यमाणगोपालानुष्टुभवर्णानालिख्य, तद्बहिर्वृत्तचतुष्टयमालिख्य, वीथीत्रयं निष्पाद्याभ्यन्तरवीथ्यां पिण्डगोपालमन्त्रेणावेष्ट्य, द्वितीयवीथ्यां मातृकावर्णैरावेष्ट्य, तृतीयवीथ्यां पाशाङ्कुशबीजाभ्यां निरन्तरं संवेष्टयेत्। एतद्यन्त्रमुक्तविधिना साधितं धृतमुक्तफलदं भवति॥ तथा— ''कामः कृष्णाय गोविन्दो ङेयुग्वस्वक्षरो मनुः''। कामं कामबीजं क्लीं। कृष्णाय स्वरूपं। गोविन्दो ङेयुक् गोविन्दाय। वस्वक्षरोऽष्टाक्षरः। तथा— ''तारं नमः पदं कृष्णं चतुर्थ्यन्तं वदेत्ततः। ङेन्तं च देवकीपुत्रं वर्मास्त्रान्तं द्विठान्तकः॥ मनुः षोडशवर्णोऽयं षोडशारे प्रकल्पितः।'' तारं प्रणवं। नमः स्वरूपं। कृष्णं चतुर्थ्यन्तं कृष्णाय। ङेन्तं देवकीपुत्रं देवकीपुत्राय। वर्म हुं। अस्त्र फट्। द्विठः स्वाहा। तथा—

दामोदरं चतुर्थ्यन्तं विद्महे तदनन्तरम्। वासुदेवाय चेत्यन्ते धीमहीति पदं वदेत्॥ ११२॥
तन्नः कृष्ण इति प्रोक्त्वा पुनर्ब्रूयात् प्रचोदयात्। गायत्रीयं समाख्याता गोपालस्य जगत्पतेः॥ ११३॥

दामोदरं चतुर्थ्यन्तं दामोदराय। सुगममन्यत्। तथा—

पिण्डमारहृदन्तेऽपि ङेयुतं भवगत्पदम्। नन्दपुत्रपदं ज्ञेयं बालतो वपुषे तथा॥ ११४॥
श्यामलाय पदस्यान्ते दशवर्णमनुं वदेत्। द्वात्रिंशदक्षरो मन्त्रस्तत्संख्यदलकल्पितः॥ ११५॥

पिण्डं ग्लौंबीजं। मारः कामबीजं। हृन्नमः। ङेयुतं भगवत्पदं भगवते। नन्दपुत्रं ङेन्तं नन्दपुत्राय। बालवपुषे स्वरूपं। श्यामलाय स्वरूपम्। दशवर्णमनुः प्रोक्तगोपालदशाक्षरमन्त्रः। एतन्मन्त्रचतुष्टयं यन्त्रे लेख्यम्। तथा—

षट्कोणे पिण्डबीजं द्विनवलिपिवृतं कोणषट्के षडर्णं
दिक्पत्राब्जे दशार्णं विलिखतु च ततो वेष्टितं मारबीजैः।
किञ्जल्केषु स्वराढ्यं द्विवसुदललसत्षोडशार्णं च पद्मं
कादीन् किञ्जल्कसंख्यान् रददललिखितानुष्टुबर्णं च पद्मम्॥ ११६॥
पाशाङ्कुशावृतं बाह्ये भूबिम्बद्वितयाश्रिषु। वस्वर्णमन्त्रसंयुक्तं कृष्णयन्त्रमिदं विदुः॥ ११७॥
रक्षाकृद् घोरमारिघ्नं चतुर्वर्गफलप्रदम्।..॥

इति। अस्यार्थः— षट्कोणमध्ये पिण्डबीजं ससाध्यं विलिख्य, तद्बीजमष्टादशाक्षरमन्त्रेण संवेष्ट्य, षट्कोणेषु प्रोक्तषडक्षरमन्त्रवर्णान् विलिख्य, तद्बहिर्दशदलपद्मं कृत्वा तद्दलेषु पूर्वोक्तगोपालमन्त्रस्य दशाक्षराण्यालिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तयोरन्तरालवीथ्यां कामबीजैर्निरन्तरं संवेष्ट्य, तद्बहिः षोडशदलकमलं कृत्वा तत्केसरेषु (षोडशस्वरान् तद्दलेषु प्रोक्तषोडशाक्षरमन्त्रवर्णांश्चालिख्य, तद्बहिर्द्वात्रिंद्दलकमलं कृत्वा तत्केसरेषु) कादिसान्तात् वर्णानालिख्य तद्दलेषु प्रोक्तद्वात्रिंशदक्षरमन्त्रवर्णानालिख्य, तद्बहिर्वृत्तयोरन्तराले पाशाङ्कुशबीजाभ्यामावेष्ट्य, तद्बहिः सम्पुटितचतुरस्रद्वयात्मकमष्टकोणं कृत्वा तत्कोणेषु प्रोक्ताष्टाक्षरमन्त्रवर्णानेकेकमालिखेत्। एतद्यन्त्रमुक्तफलदं भवति। तथा—

कृत्वा नवपदं मन्त्रा मण्डलं चाब्जशूलकम्। मध्यकोणे लिखेच्छ्लोकं वर्तुलद्वयशोभितम्।।११८।।
वृत्ताकारेण मन्त्रज्ञो मध्यादिमध्यपश्चिमम्। अष्टार्णं शिष्टकोणेषु द्वादशार्णेन वेष्टितम्।। ११९।।
कृष्णयन्त्रमिति ख्यातं सर्वरक्षाकरं परम्। भूर्जपत्रे लिखित्वा तु पूजितं स्थापितानिलम्।। १२०।।
करेण धारितं नित्यं सर्वेष्टसुखवर्धनम्। द्विजद्रुपट्टिकामध्ये सम्यगालिख्य पूजितम्।। १२१।।
शालादौ निहितं यन्त्रं गवां वृद्धिकरं सदा।..।।

इति। अस्यार्थ:— प्राक्प्रत्यक्सूत्रचतुष्टयं दक्षिणोत्तरचतुष्टयं च कृत्वा नवकोष्टयुतं चक्रं विरच्य कोणचतुष्टये शूलचतुष्टयं कृत्वा तन्मध्यकोष्ठमध्ये वर्तुलद्वयं विरच्य तत्र वक्ष्यमाणश्लोकमन्त्राक्षराणि वक्ष्यमाणप्रकारेण लिखेत्। तद्यथा— प्रथमवर्तुले पूर्वार्धं प्रतिलोमतो विलिख्य द्वितीयवर्तुले द्वितीयार्धं तथैव लिखेत्। अवशिष्टकोणेषु पूर्वोक्तगोपालाष्टाक्षर (मन्त्रवर्णनिकमेकं लिखेत्, ततस्तद्बहिर्वृत्तयोरन्तराले पूर्वोक्तद्वादशाक्षर)मन्त्रेण वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

तसुकीतिपदं ब्रूयाद् देवदेवेन उच्चरेत्। तवे देवरतो ब्रूयाद्रतं च तरतो वदेत्।। १२२।।
रूढतो ख्यातशब्दान्ते तख्यातो पदमुच्चरेत्। देवकीसुतशब्दान्त: श्लोकमन्त्रोऽयमीरित:।। १२३।।

तथा चायं मन्त्र:—"तसुकी देवदेवेन तवेदेवरतो रतम्। तरतो रूढतो ख्याततख्यातो देवकीसुत:।।" इति। तथा—

श्लोकमन्त्रं महेशानि चतुष्पष्टिपदे लिखेत्। राक्षसादि च यद्बूय: सर्वतोभद्रनामकम्।। १२४।।
यन्त्रं पुष्टिबलारोग्यकीर्तिलक्ष्मीजयप्रदम्। सारजे फलके कृत्वा निखातं गोष्ठमध्यत:।। १२५।।
दस्युमारीग्रहादिभ्यो रक्षां कुर्याद्गवां सदा। क्षीरगोपपदं प्रोक्त्वा पगोरक्षीति चोद्धरेत्।। १२६।।
रक्षमाक्षपदं पश्चात् क्षमाक्षरपदं तत:। गोमानो—पदमाख्यातं गगनोमापदं वदेत् ।। १२७।।
गोपक्षगपदं प्रोक्त्वा त्यत्यगक्षपमुच्चरेत्। अयं श्लोकमनु: प्रोक्तो द्वितीय: सर्वसिद्धिद:।। १२८।।

मन्त्रस्तु यथा— "क्षीरगोप पगोरक्षी रक्षमाक्ष क्षमाक्षर। गोमानोग गनोमागो पक्षगत्य त्यगक्षप।।" इति।। केरलीये यन्त्रसारे—

साध्यगर्भं लिखेत् कामं वह्निगेहयुगोदरे। षट्सु कोणेषु षड्वर्णांश्चतुष्पत्राम्बुजे तत:।। १।।
केसरोद्यच्चतुर्वर्णे द्वादशार्णमनोर्लिखेत्। त्रीणि त्रीणि च वर्णानि प्रतिपत्रं ततो बहि:।। २।।
पद्मे दिक्पत्रके राजद्दशार्णमनुकेसरे। विंशत्यर्णमनोर्वर्णान् प्रतिपत्रे द्विशो लिखेत् ।। ३।।
बहि: षोडशपत्रेषु स्वरोद्यत्केसरेष्वथ। आगावो ह्यस्य सूक्तस्य चार्धमर्धमृचां लिखेत्।। ४।।
बहि: संवेष्ट्य काद्यैश्च ततो भूबिम्बमालिखेत्। वाराहबीजं तद्दिक्षु भुबीजं कोणगं लिखेत्।। ५।।
गोपलायन्त्रमेतद्धि विधिना स्थापितं गृहे। तत्र गाव: पयस्विन्य: सवृषाश्च निरामया:।। ६।।
पीनोघ्न्यो बहुरूपाश्च सुशीलाश्च भवन्ति हि। धनधान्यधरारत्नशालिनी तस्य मन्दिरे।। ७।।
लक्ष्मीरतिस्थिता भूत्वा वसेदाभूतसम्प्लवम्।..।।

इति। अस्यार्थ:— षट्कोणं विलिख्य तन्मध्ये ससाध्यं कामबीजं विलिख्य, षट्कोणेषु पूर्वोक्तकृष्णषडक्षरमन्त्रार्णानालिख्य, तद्बहिश्चतुर्दलपद्मं कृत्वा तत्केसरेषु "क्लीं कृष्णक्लीं" इति मन्त्रस्यैकैकमक्षरं विलिख्य (तद्दलेषु पूर्वोक्तद्वादशाक्षरमन्त्रस्य

त्रीणि त्रीण्यक्षराणि आलिख्य तद्बहिर्दशदलपद्मं कृत्वा तत्केसरेषु पूर्वोक्तदशाक्षरमन्त्रार्णान् विलिख्य) तद्दलेषु पूर्वोक्तविंशतिवर्णमन्त्रस्य द्विद्विक्रमाद्विंशतिवर्णानालिख्य, तद्बहि षोडशदलपद्मं कृत्वा तत्केसरेषु षोडश स्वरानालिख्य, तद्दलेषु ऋग्वेदोक्तस्य ''आगावो अग्मन्नुत'' इत्येतत्सूक्तस्य प्रतिदलं ऋचामर्धमर्धं विलिख्य, तद्बहिर्वृत्तयोरन्तराले ककारादिक्षकारान्तैरावेष्ट्य, तद्बहिश्चतुरस्रं कृत्वा तस्य चतुर्दिक्षु वराहबीजं कोणेषु भूबीजं चालिखेत्। एतद् यन्त्रमुक्तफलदं भवति। तथा–

मध्ये तारं ससाध्यं वसुदलविवरे गव्यसूक्तस्य चर्चा–
मेकामेकां क्रमेण प्रविलिखतु बहिर्वेष्टितं मातृकार्णैः।
आगावो–सूक्तयन्त्रं कुगृहगतमिदं स्थापितं मन्दिरादौ
दद्याद्गोगृष्टिसत्तर्णकवृषमहिषैः सङ्कुलामाशु लक्ष्मीम्।। ८।।

इति। अस्यार्थः– अष्टदलकमलमध्ये ससाध्यं प्रणवं विलिख्य, दलेषु वक्ष्यमाण ''आगावो'' सूक्तस्येकैकामृचं विलिख्य, वृत्तयोरन्तराले मातृकयावेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्, यन्त्रमुक्तफलदं भवति।। आगावो–सूक्तस्य ऋचस्तु–

आगावो अग्मन्नु॒त भ॒द्रम॑क्रन् सीद॑न्तु गो॒ष्ठे रण॑यन्त्व॒स्मे। प्र॒जाव॑तीः पु॒रुरूपा इ॒ह स्यु॒रिन्द्रा॑य पू॒र्वी॑रु॒षसो॒ दुहा॑नाः।। १।। इन्द्रो॒ यज्वने पृण॒ते च॑ शिक्ष॒त्युपेद्ददा॒ति न स्वं मु॑षायति। भूयोभूयोर॒यिमिदस्य वर्ध॒न्नभि॑न्ने खि॒ल्ये नि द॑धाति दे॒वयुम्।। २।। न ता न॑श्यन्ति॒ न दभा॒ति तस्क॒रो नसामामित्रो व्यथि॒रा द॑धर्षति। दे॒वांश्च॒ याभि॒र्यज॑ते॒ ददा॑ति च॒ ज्योगित्ताभि॑ः सच॒ते गोप॑तिः स॒ह।। ३।। न ता अर्वा॑ रे॒णुक॑काटो अश्नु॒ते न संस्कृ॒तत्रमुप॑ यति॒ सा अभि॒। उ॒रु॒गायमभ॑यं तस्य ता अनु गावो॒ मर्त॑स्य॒ वि च॑रन्ति॒ यज्व॑नः।। ४।। गावो॒ भगो॒ गाव॒ इन्द्रो मे अच्छा॒न् गा॒वः सोम॑स्य प्रथ॒मस्य भ॒क्षः। इ॒मा या गाव॒ः स जना॑स॒ इन्द्र॑ इच्छामीद्वृ॒धा म॑नसा चि॒दिन्द्र॑ं।। ५।। यू॒यं गावो मेदयथा कृ॒शं चि॑दश्रीरं चि॑त्कृणुथा सु॒प्रतीक॑ं। भ॒द्रं गृहं कृणुथ भद्रवाचो बृ॒हद्वो वय॑ं उच्यते सभासु॑।। ६।। प्र॒जाव॑तीः सू॒यव॑सं रि॒शंतीः शु॒द्धा अपः सु॑प्रपा॒णे पिब॑ंतीः। मा व॑ः स्ते॒न ईश॒तं माघशंस॑ः परि वो हे॒ती रु॒द्रस्य॑ वृज्याः।। ७।। उ॒पे॒दमु॒पवर्चनमासु गोषूप॑ पृच्यतां। उप॑ ऋष॒भस्य॒ रे॒त॒स्युपेन्द्र॑ तव वी॒र्ये॑।। ८।।

इति। तथा–

षट्कोणे कर्णिकायां स्मरमथ विलिखेत् कोणषट्के षडर्णं
पत्रेष्वेकैकवर्णं दशसु च दशवर्णस्य बाणैः स्मरस्य।
आवीतं मातृकार्णैरपि च कुगृहगं साधुगोपालयन्त्रं
प्रोक्तं धर्मार्थकामप्रचुरसुखकरं श्रीप्रदं वश्यकारि।। ९।।

इति। अस्यार्थः— षट्कोणं कृत्वा तन्मध्ये ससाध्यं कामबीजं विलिख्य, तत्कोणेषु षडक्षरं विलिख्य, तद्बहिर्दशदलपद्मं कृत्वा तद्दलेषु दशाक्षरमन्त्रवर्णानालिख्य, तद्बहिर्वृत्ताँन्तराले "द्रांद्रींक्लींब्लूंसः" इति बीजैर्मातृकार्णैश्च वेष्टयित्वा तद्बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवति। प्रचुरसुख मोक्षः। तथा

मारं मध्ये वसुदललसच्छिष्टकृष्णादिवर्णान्
द्वौ द्वावन्ते त्रयमथ लिखेत् केसरेषु स्वराणाम्।
द्वौ द्वौ वर्णौ बहिरपि समावेष्टितं मातृकार्णै–
र्भूगेहस्थं निखिलसुखदं यन्त्रमष्टादशार्णम्।। १०।।

इति। अस्यार्थः— अष्टदलकमलमध्ये कामबीजं ससाध्यमालिख्य, तद्दलेषु पूर्वोक्ताष्टादशाक्षरमन्त्रस्य 'कृष्णाय' इत्यादिवर्णेषु चतुर्दशवर्णान् द्विद्विक्रमादालिख्यान्तिमदले वर्णत्रयं विलिख्य, तत्केसरेषु द्वन्द्वशः षोडश स्वरानालिख्य, बहिर्वृत्तान्तरालवीथ्यां कादिक्षान्त वर्णैरावेष्ट्य बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवति।। मुकुन्दमन्त्रः सारसङ्ग्रहे—

अथ मन्त्रवरं वक्ष्ये मुकुन्दस्य जगत्पतेः। सर्वसिद्धिकरं लोकवश्यदं कीर्तिपुष्टिदम्।। १।।
विबिन्दुश्रीर्विषं दीर्घा केवला कर्णयुग् रविः। चन्द्रविष्णुयुतश्चक्री सत्यः कूर्मो हुताशनः।। २।।
ससद्यान्ताः समृद्धिश्च भृगुः सत्यश्च दीर्घवान्। सन्ध्याग्निर्ढान्तवैकुण्ठौ गगनं चेन्दुशेखरम्।। ३।।
शूरोऽग्निसहितः शूरः सत्यो रुद्रेरसंयुतः। अष्टादशाक्षरो मन्त्रो मुकुन्दस्य प्रकीर्तितः।। ४।।

विबिन्दुश्रीर्बिन्दुविधुरं श्रीबीजं श्री इति। विषं म, दीर्घा न, केवला स्वररहिता, तेन न्। कर्ण उ रविः म तेन मु। चन्द्रो बिन्दुः, विष्णुः (उ, चक्री क, तेन कुं। सत्यो द। कूर्मः च। हुताशनो र। सद्यान्त औ, समृद्धिर्ण, तेन चरणो। भृगुः स। सत्यो द) दीर्घ आ तेन दा। सन्ध्या श। अग्निः र। ढान्तो ण। वैकुण्ठो म। गगनं ह, इन्दुः बिन्दुः, तेन हं। शूरः प, अग्नि र, तेन प्र। शूरः प। सत्य द, रुद्र ए, इरो य, तेन द्ये। तथा—

नारदोऽस्य मुनिः प्रोक्तो गायत्री छन्द उच्यते। मुकुन्दो देवता प्रोक्तः सुरासुरनमस्कृतः।। ५।।
आचक्राद्यैः प्रकुर्वीत पञ्चाङ्गानि विचक्षणः। पूजा तु वैष्णवे पीठे ह्यङ्गेन्द्रादि तदायुधैः।। ६।।
मन्त्रं जपेदर्धलक्षं तद्दशांशं हुनेत्ततः। पलाशपुष्पैः स्वाद्वक्तैस्तर्पणादि ततश्चरेत्।। ७।।
मनुनानेन सञ्जप्तमष्टोत्तरशतं जलम्। दिनादावन्वहं पीत्वा मासषट्कं प्रसन्नधीः।। ८।।
सम्यक्श्रुतिधरो मन्त्री जायते वेदपारगः। प्रयोगः सुगमः।। तथा—
समस्तेति समुच्चार्य मरुन्नमितमुद्धरेत्। बाललीलापदं प्रोक्त्वा आत्मने हुं समीरयेत्।। ९।।
अस्त्रेण हृदयेनापि युक्तो मन्त्रोऽमीरितः।...।।

समस्तेति स्वरूपम्। मरुन्नमितस्वरूपम्। बाललीला स्वरूपम्। आत्मने हुं स्वरूपम्। अत्र सन्धिस्तेन लीलात्मने इति मन्त्रे उच्चारः। अस्त्रं फट्। हृदयं नमः। अष्टादशाक्षरोऽयमपि मन्त्रः।। तथा—

नलकूवर आख्यातो मुनिश्छन्द उदाहृतम्। गायत्री बालकृष्णोऽस्य देवता परिकीर्तितः।। १०।।

---

१. 'वृत्तत्रयान्तराले' ख. पाठः। २. 'वृत्तद्वयान्तराले' ख. पाठः।

पञ्चाङ्गानि पुरोक्तानि ध्यानं पूर्वोदितं भवेत्। पूजा चाङ्गेन्द्रवज्राद्यैः पुरश्चर्यादि पूर्ववत्।। ११।।
जपादिकर्मभिर्मन्त्रः सेवितः सर्वसिद्धिदः।...।।

ध्यानं मातुरङ्कगतरूपं ध्येयम्।। तथा–

अन्नरूपपदं प्रोक्त्वा रसरूपेति चोच्चरेत्। तुष्टिरूपं च हृद्युग्ममन्नाधिपतये परम्।। १२।।
ममान्नं च समुच्चार्य प्रयच्छाग्निवधूर्मतः। अन्नप्रदोऽयमाख्यातस्त्रिंशद्वर्णो मनूत्तमः।। १३।।

आदिपदत्रयं स्वरूपम्। हृद्युग्मं नमोद्वयम् अग्निमपदचतुष्टयं स्वरूपम्। अग्निवधूः स्वाहाकारः। अत्र नमः पदान्नपदयोर्विसन्धिः 'त्रिंशद्वर्ण' इत्युक्तेः।। तथा–

ऋ[1]षिर्ब्रह्मा समुद्दिष्टश्छन्दोऽनुष्टुबुदाहृतम्। अत्रान्नाधिपतिः कृष्णो देवता प्रोच्यते बुधैः।। १४।।
अन्नदो जायते मन्त्री मन्त्रमेतं भजेत् सदा। [2]द्वादशाक्षरमन्त्रान्ते वर्मास्त्राग्निवधूयुतः।। १५।।

प्रसिद्धो यो वासुदेवद्वादशाक्षरमन्त्रः पूर्वोक्तः स वर्मास्त्राग्निवध्वन्तो यदा भवति तदा षोडशाक्षरमन्त्रः स्यात्। वर्म हुं। अस्त्रं फट्। अग्निवधूः स्वाहाकारः।

षोडशार्णो मनुः प्रोक्तो ब्रह्मा मुनिरुदाहृतः। गायत्रं छन्द इत्युक्तं देवता च निगद्यते।। १६।।
ग्रहघ्नो देवकीपुत्रो दुष्टग्रहविनाशनः। सर्वग्रहभये घोरे जप्तव्योऽयं मनूत्तमः ।। १७।।
एतेषां मन्त्रवर्याणां पञ्चाङ्गानि दशार्णवत्। अर्चनाङ्गैर्लोकपालैर्वज्राद्यैश्च समीरिता।। १८।।
तत्तद्विशेषफलदा मन्त्रा एते न संशयः। (तथा–) द्वादशार्णमनोरन्ते पुरुषोत्तमशब्दतः।। १९।।
आयुर्मे च ततो देहि चतुर्थ्या विष्णुमुच्चरेत्। तादृशं प्रभविष्णुं हृन्मन्त्रो द्वात्रिंशदक्षरः।। २०।।

द्वादशार्णं वासुदेवद्वादशार्णं। पुरुषोत्तम स्वरूपम्। आयुर्मे देहि स्वरूपम्। अत्र न सन्धिः। चतुर्थ्या विष्णुं विष्णवे। तादृशं प्रभविष्णुं प्रभविष्णवे। हृन्नमः।

नारदो मुनिरस्य स्याच्छन्दोऽनुष्टबुदाहृतम्। श्रीकृष्णो देवता प्रोक्तः पञ्चाङ्गविधिरुच्यते।। २१।।
द्वादशार्णान् समुच्चार्य हृदानन्दात्मने भवेत्। पञ्चार्णान्ते वदेत् प्रीत्यात्मने च शिरसो मनुः।।२२।।
ज्योतिरात्मन इत्यादौ भूतवर्णा शिखा मता। मायात्मने चतुर्वर्णं कवचं परिकीर्तितम्।। २३।।
चिदानन्दात्मने पूर्वं द्वाभ्यामस्त्रमुदाहृतम्।...।।

ॐनमो भगवते वासुदेवायानन्दात्मने हृदयाय नमः पुरुषोत्तमप्रीत्यात्मने शिरसे०। आयुर्मे देहि ज्योतिरात्मने शिखा०। विष्णवे प्रभविष्णवे मायात्मने कवचाय हुं। नमः चिदात्मने अस्त्राय फट्। इति पञ्चाङ्गानि प्राग्वद्विन्यसेत्।

अङ्गलोकेशवज्राद्यैरर्चनोक्ता जपेन्मनुम्। लक्षमेकं दशांशेन जुहुयात् पायसैः शुभैः।। २४।।
दुग्धाज्यसम्प्लुतैर्दूर्वात्रितयैरेधितेऽनले। जुहुयाद् दीर्घजीवित्वं लभते नात्र संशयः।। २५।।

इति। तथा–

ङेन्तं बालवपुः प्रोक्त्वा शिरः सप्तार्णको मनुः। बालानां भयशान्त्यर्थं रक्षार्थं च जपेन्मनुम्।।२६।।

ङेन्तं बालवपुः बालवपुषे। शिरः स्वाहा। तथा–

---

१. 'नारदो मुनिरस्य स्यात्' ख. पाठः। २. 'इति। तथा इत्यधिकः' ग. पाठः।

गोपालकपदस्यान्ते वदेद्वेषधराय च। चतुर्थ्यां वासुदेवं च कवचास्त्रद्विठान्तक:।। २७।।

गोपालकवेषधराय स्वरूपं। वासुदेवं चतुर्थ्यन्तं वासुदेवाय। कवचं हुं। अस्त्रं फट्। द्विठ: स्वाहा।

अष्टादशाक्षरो मन्त्रो नारदोऽस्य मुनिर्मत:। गायत्री छन्द इत्युक्तं देवता कृष्ण ईरित:।। २८।।

आचक्रादिभिरङ्गानि पूजा पूर्वोक्तवर्त्मना। गृहगोपालरक्षादौ प्रशस्त: शान्तिकेऽपि च।। २९।।

पूर्वोक्तवर्त्मना अङ्गेन्द्रवज्राद्यै:।।

कालीयस्य पदं प्रोक्त्वा फणामध्ये ततो वदेत्। दिव्यनृत्यं—पदस्यान्ते करोति तं—पदं तत:।।३०।।
नमामीति समुच्चार्य देवकीपुत्रमप्यथ । नृत्यराजानमाभाष्य वदेदच्युतमन्तत: ।। ३१।।
द्वात्रिंशदक्षरो मन्त्र: सर्वक्ष्वेडनिवारण:। ....।।

अयं मन्त्र:— "कालीयस्य फणामध्ये दिव्यनृत्यं करोति तम्। नमामि देवकीपुत्रं नृत्यराजानमच्युतम्।।" इति श्लोकरूप:।

मुनिर्नारद आख्यातश्छन्दोऽनुष्टबुदीरितम्। कालीयमर्दन: कृष्णो देवता सर्ववन्दित:।। ३२।।
चतुष्पादैश्च सर्वेण मनुनाङ्गविधि: स्मृत:। अङ्गैरिन्द्रादिभि: पश्चाद्वज्राद्यैरर्चनेरिता ।। ३३।।
एकलक्षं जपित्वाग्नौ जुहुयादयुतं घृतै:। विषनाशकरा योगा: कर्तव्या मनुनामुना।। ३४।।
एतन्मन्त्रप्रभावेन नश्यन्ते च महोरगा:। एतन्मन्त्रसमानोऽन्यो विषघ्नो नैव विद्यते।। ३५।।
शुकवृक्षोत्थपञ्चाङ्गैर्गोमूत्रेण सुपेषितै:। निर्मिता गुलिका सम्यग् मन्त्रेणानेन मन्त्रिता।। ३६।।
नस्यालेपाञ्जनै: पानकर्मणा क्ष्वेडनाशिनी। मुकुन्दाद्येतदन्तानां मन्त्राणां क्रमतो बुध:।। ३७।।
दशार्णाणुप्रयोगांस्तु ध्यानभेदान्न कल्पयेत्।..।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे अष्टाविंश: श्वास:।। २८।।

◆

अथ
एकोनत्रिंशः श्वासः

अथ श्रीकान्तमन्त्रः। सारसङ्ग्रहे—

मायारमादिकोऽष्टादशार्णो विंशाक्षरो मनुः। एतन्मन्त्रसमानोऽन्यः सिद्धिदो नैव[1] विद्यते।। १।।
मुनिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द ईरितम्। श्रीकृष्णो देवता बीजशक्त्याद्युक्तवदीरयेत्।। २।।
श्रीकान्तस्य प्रवक्ष्यामि ध्यानमत्रोत्तमोत्तमम्। कुबेरादिधनाध्यक्षैः सर्वदा यद्विधीयते।। ३।।
अक्षयस्य धनस्यापि करं सम्पत्प्रभं (करं) शुभम्। कोटिभास्करसङ्काशैर्द्वारकायां गृहोत्तमैः।। ४।।
बहुभिः कल्पतरुभिर्वेष्टिते रत्नमण्डपे। विद्योतन्मणिवर्यौघस्तम्भद्वारान्तभित्तिके।। ५।।
विकचत्पुष्पमालाभिः सहितानन्तमौक्तिकैः। पुष्परागधराशोभिरत्ननद्योरथान्तरे ।। ६।।
निरन्तरस्त्रवद्रत्नसुधाधाराभिवर्षिणः। अधः कल्पकवृक्षस्य शाखाव्याप्तस्य सर्वतः।। ७।।
ज्वलद्ररत्नप्रदीपालिसमुद्योतितदिङ्मुखे। उद्द्योतद्रविबिम्बाभरत्नसिंहासनाम्बुजे ।। ८।।
सूपविष्टं रमाक्रान्तं द्रुतस्वर्णनिभं स्मरेत्। समोद्यद्रविचन्द्रौघविद्युत्कोटिनिभच्छविम्।। ९।।
हृद्याङ्गं सर्वतः सौम्यं नानालङ्कारमण्डितम्। अरिशङ्खगदापद्मधारिणं पीतवाससम्।। १०।।
स्पृशन्तं कलशं श्च्योतन्मणिधारमहर्निशम्। सव्येन चरणाब्जेन विद्रुमद्युतिकारिणा।। ११।।
रुक्मिणीसत्यभामे द्वे दक्षवामस्थिते प्रभोः। उत्तमाङ्गेऽभिषिञ्चन्त्यौ नानारत्नसुधारया ।। १२।।
लसत्स्वीयकराम्भोजगृहीतघटजातया । यच्छन्त्यौ नाग्नजित्याह्वसुनन्दे सुघटैस्तयोः।। १३।।
मित्रविन्दा तथैवान्या परा चैव सुलक्षणा। एतयोर्जाम्बवत्याह्वसुशीले दक्षवामगे ।। १४।।
रत्नधुन्योः समादाय कलशौ रत्नसम्भृतौ। अर्पयन्त्यौ विलासेन ध्यातव्ये मन्त्रवित्तमैः।। १५।।
ततः षोडशसाहस्त्रमिता नार्यः समन्ततः। स्मर्तव्याः स्वर्णरत्नादिधारायुग्घटसत्कराः।। १६।।
स्मरेदष्ट निधीन् तासां धनान्यावर्षतो बहिः। वृष्णीश्च तद्वहिर्भूयो देवादीनपि पूर्ववत्।। १७।।
एवं सञ्चित्य देवेशं ततः पूजां समारभेत्। पुरोदितप्रकारेण पीठन्यासावसानकम्।। १८।।
कर्म निर्वर्त्य मन्त्रज्ञो मूलमन्त्रेण मन्त्रवित्। प्राणायामत्रयं कृत्वा ऋष्यादिन्यासमाचरेत्।। १९।।
कराङ्गुलीषु तलयोः षडङ्गन्यासमाचरेत्। व्यापकं मूलमन्त्रेण विन्यस्य करयोः तथा।। २०।।
पुनः षडङ्गं विन्यस्य देहे देशिकसत्तमः। पुटितां मूलमन्त्रेण मातृकां च प्रविन्यसेत्।। २१।।

चकारात् पुनः षडङ्गन्यासः उक्तः। ''पुनः षडङ्गं कृत्वा तु मन्त्रवर्णांस्तनौ न्यसेत्।'' इति सनत्कुमारवचनात्।

---

१. 'द्राग् न' ख. पाठः। २. 'द्योतत्' ख. पाठः।

संहारवर्त्मना सृष्ट्या दश तत्त्वानि विन्यसेत्। व्यापकं च प्रविन्यस्य मन्त्रार्णन्यासमाचरेत्।। २२।।
उत्तमाङ्गे ललाटे च भ्रूमध्ये दृक्श्रुतिद्वये। नासिकाननयोश्चैव चिबुके च गले पुनः।। २३।।
बाहुमूले हृदि स्कन्धे नाभिदेशे शिवे तथा। मूलाधारे कटिद्वन्द्वे जानुयुग्मे च जङ्घयोः।। २४।।
गुल्फयुग्मे पादयुग्मे न्यसेद्वर्णान् मनोः क्रमात्। सृष्टिन्यासोऽयमाख्यातो हृदयाद्या स्थितिस्तथा।।२५।।
बाहुमूलान्तिकः प्रोक्तः संहारोऽपि पदादिकः। स्थित्यन्तं पञ्चधा केचिन्न्यस्योक्तं मूर्तिपञ्जरम्।।२६।।
न्यस्य सृष्टिस्थिती पश्चात् षडङ्गानि प्रविन्यसेत्। त्रिवह्निसागरैर्वेदवेदनेत्रैः क्रमाद्बुधः।। २७।।

वह्नयस्त्रयः। सागराश्चत्वारः। नेत्रं द्वयम्।

मूलमन्त्रभवैर्वर्णैर्हृदादौ जातिसंयुतैः। दर्शयित्वा किरीटादिमुद्रा दिग्बन्धनं चरेत्।। २८।।
मूर्तिपञ्जरतो देवं सम्पूज्याङ्गे निजे ततः। देवस्य बाह्यपूजार्थमुच्यते यन्त्रमुत्तमम् ।। २९।।
गोमयेनोपलिप्तायां पीठं भूमौ प्रविन्यसेत्। पूर्वोक्तगन्धपङ्केन संलिप्याब्जं वसुच्छदम्।। ३०।।
विलिख्य कर्णिकासंस्थमग्निमण्डलसम्पुटम्। मादनं साध्यसहितं मन्त्रबीजं निवेशयेत्।। ३१।।
(तदूर्ध्वगैस्ततो वर्णैस्तदेव परिवेष्टयेत्। शक्रराक्षसवायूनां कोणगां कमलां लिखेत्।। ३२।।
अन्येषु च त्रिकोणेषु मायाबीजं प्रकल्पयेत्।) कोणसन्धिषु तद्वर्णान् दलमूलेषु चाग्निशः।। ३३।।
गायत्रीं कामदेवस्य मालाणुं चाष्टपत्रगम्। रसाक्ष[१]रक्रमात् पश्चान्मातृकार्णैः प्रविष्टयेत्।। ३४।।
धरापुरचतुर्दिक्षु रमां मायां च कोणगाम्। विलिख्यैवं महायन्त्रं पट्टे स्वर्णादिजे बुधः।। ३५।।
सम्यक् सञ्जप्य सम्पूज्य धृतं च मनुजोत्तमैः। करोति लोकपूज्यत्वं राजवश्यं च सर्वदा।। ३६।।

यन्त्रोद्धारः प्रयोगे वक्ष्यते।

कामदेवं चतुर्थ्यन्तं विद्महे तदनन्तरम्। ङेयुतं पुष्पबाणं च प्रवदेद् धीमंहीति च।। ३७।।
तन्नोऽन्तेऽनङ्ग इत्युक्त्वा प्रवदेच्च प्रचोदयात्।...।।

कामदेवं चतुर्थ्यन्तं कामदेवाय। विद्महे स्वरूपं। ङेयुतं पुष्पबाणं पुष्पबाणाय। धीमहि स्वरूपं। तन्नोऽनङ्गः स्वरूपं। प्रचोदयात् स्वरूपम्।

गायत्रीयं समाख्याता जपेदेनां प्रयत्नतः। सर्वगोपालमन्त्राणां जपादौ वश्यकारिणी।। ३८।।
हृदन्ते ङेयुतं कामं देवं सर्वजनप्रियम्। तथा सर्वजनस्यान्ते ङेन्तं सम्मोहनं वदेत्।। ३९।।
ज्वल संवीप्स्य मन्त्रज्ञः प्रज्वलेति प्रभाषयेत्। सर्वान्ते जनशब्दं च षष्ठ्यन्तं हृदयं ततः।।४०।।
ममेति च समुच्चार्य वशं प्रोक्त्वा कुरुद्वयम्। द्विठान्तो मारमालाणुश्चतुर्विंशद्द्वयाक्षरः।। ४१।।
जपादिसमये चायं कामबीजादिको भवेत्। राजादिसर्वलोकानां परो वश्यकरो मतः।। ४२।।

हृन्नमः। ङेयुतं कामदेवं कामदेवाय। सर्वजनप्रियं तथा सर्वजनप्रियाय। सर्वजन स्वरूपं। ङेन्तं सम्मोहनं सम्मोहनाय। ज्वल संवीप्स्य ज्वल २। प्रज्वल स्वरूपं। सर्व स्वरूपं। जन षष्ट्यन्तं जनस्य। "हृदयं स्वरूपं। मम स्वरूपं। वशं

---

१. 'रसवर्ण' ख. पाठः।

स्वरूपं। कुरुद्वयं कुरु २। द्विठः स्वाहा। चतुर्विंशद्द्वयम् अष्टाचत्वारिंशत्। तथा–

अस्मिन् मन्त्रे पीठपूजां कृत्वा पूर्वोक्तवर्त्मना। तत्र मूर्तिं प्रकल्प्यास्यां कृष्णमावाह्य पूजयेत्।।४३।।
आसनप्रमुखैर्मन्त्री भूषान्तैरुपचारकैः। मुहुर्न्यासक्रमेणैव पूजयेद्भक्तितत्परः ।।४४।।
आदौ सृष्टिः स्थितिः पश्चात् षडङ्गानि किरीटकम्। कुण्डलद्वितयं भूयो ह्यरिं जलजकं गदाम्।।४५।।

जलजं शङ्खम्।

पद्मं च वनमालां च श्रीवत्सं कौस्तुभं तथा। चन्दनाक्षतपुष्पाद्यैः पुरोवन्मूलतोऽर्चयेत् ।।४६।।
षट्सु कोणेषु वह्न्यादि षडङ्गानि यजेत् पुरा। वासुदेवादिका मूर्तीः कोणकेसरगा यजेत्।।४७।।
(शान्तिं श्रियं सरस्वत्या रति दिग्दलमूलगाः। ततः पूर्वादिपत्रेषु रुक्मिणीप्रमुखाः यजेत्।।४८।।
दक्षवामक्रमात् पश्चादेकदैव समर्चयेत्।) षोडशस्त्रीसहस्राणि देवदेवस्य शार्ङ्गिणः।।४९।।
दलाग्रस्थास्तः पूज्या निधयोऽष्टौ क्रमादमी। इन्द्रो नीलो मुकुन्दश्च मकरोऽनङ्गकच्छपौ।।५०।।
शङ्खपद्मौ च तद्वाह्ये लोकेशायुधपूजनम्। इत्थं सम्पूज्य गोविन्दं नैवेद्यं हविरर्पयेत्।।५१।।

हविः पायसम्।

खण्डाज्यदधिभिः पश्चाच्छत्रादीनि निवेदयेत्। स्तुत्वा प्रणम्य चोद्वास्य हरिं सावरणं हृदि।।५२।।
पुनर्विन्यस्य सम्पूज्य स्वं जपेच्छक्तितो मनुम्।..।।

इति। अथ प्रयोगः– तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीकृष्णाय देवतायै नमः। गुह्ये क्लींबीजाय नमः (पादयोः स्वाहा शक्तये नमः) इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धिये विनियोगः, इति कृताञ्जलिरुक्त्वा, ह्रींश्रींक्लीं हृदयाय नमः। कृष्णाय शिरसे स्वाहा। गोविन्दाय शिखायै वषट्। गोपीजन कवचाय हुं। वल्लभाय नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, मूलमन्त्रेण मूर्धादिपादान्तं व्यापकं कृत्वा, मूलपुटितां मातृकां विन्यस्य, संहारसृष्टिक्रमेण दशाक्षरोक्तप्रकारेण दश तत्त्वानि विन्यस्य पुनर्मूलमन्त्रेण प्रणवपुटितेन त्रिर्व्यापकं कृत्वा, पुनः षडङ्गानि विन्यस्य, शिरसि ह्रींनमः। भाले श्रीं०। भ्रुवोर्मध्ये क्लीं०। नेत्रयोः कृं०। श्रोत्रयोः ष्णां०। नासिकायां यं०। मुखे गों०। चिबुके विं०। गले दां०। बाहुमूलयोः यं०। हृदि गों०। उदरे पीं०। नाभौ जं०। लिङ्गे नं०। मूधाधारे वं०। कट्योः ल्लं०। जानुनो भां०। जङ्घयोः यं०। गुल्फयोः स्वां०। पादयोः हांनमः। एवं सृष्ट्या विन्यस्य, हृदि ह्रींनमः। उदरे श्रीं०। नाभौ क्लीं०। लिङ्गे कृं०। मूलाधारे ष्णां०। कट्यां यं०। जानुनोः गों०। उङ्घयोः विं०। गुल्फयोः दां०। पादयोः यं०। शिरसि गों०। भाले पीं०। भ्रूमध्ये जं०। नेत्रयोः नं०। श्रोत्रयोः वं०। नासिकायां ल्लं०। मुखे भां०। चिबुके यं०। कण्ठे स्वां०। बाहुमूले हांनमः। इति स्थित्या विन्यस्य, पादादिमस्तकान्तं संहारेण विन्यस्येत्। एवं क्रमस्तु यतीनां, गृहस्थैस्तु संहारसृष्टिस्थितिक्रमेण कार्याः वर्णिभिस्तु–स्थितिसंहारसृष्टिक्रमेण कार्य्या इति। ततः पूर्वोक्तमूर्तिपञ्जरन्यासं कृत्वा, पुनरत्रोक्तप्रकारेण सृष्टिस्थितिन्यासौ कृत्वा षडङ्गानि विन्यस्य, वक्ष्यमाणप्रकारेण वैष्णवमुद्रां दर्शयित्वा, दिग्बन्धं कृत्वा निजे देहे मूर्तिपञ्जरन्यासक्रमेण देवं सम्पूज्य, पुरतश्चन्दनादिना पीठे कुङ्कुमादिनाष्टदलं पद्मं विरच्य, तत्कर्णिकायां षट्कोणं कृत्वा, तन्मध्ये ससाध्यं कामबीजं विलिख्य, "कृष्णाय" इत्यादिभिः सप्तदशभिरक्षरैः कामबीजं संवेष्ट्य, षट्कोणस्य पूर्वनिर्ऋतिवायुकोणेषु श्रीबीजं शिष्टकोणेषु मायाबीजं च विलिख्य, षट्कोणसन्धिषु पूर्वोक्तकृष्णषडक्षरमन्त्रवर्णानालिख्य,

तत्केसरेषु प्रोक्तकामगायत्रीवर्णांस्त्रिशस्त्रिश आलिख्य, तद्दलेषु प्रोक्तमकरध्वजमालामन्त्रार्णान् षट्षडालिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णै: सबिन्दुभि: संवेष्ट्य तद्बहिश्चतुरस्रं कृत्वा तस्य चतुर्दिक्षु श्रीबीजं कोणेषु मायाबीजं च आलिख्य, तत्र प्राग्वत् पीठपूजां कृत्वा मूर्तिकल्पनादिपुष्पोपचारान्ते देवस्य देहे सृष्टिन्यासक्रमेण स्थितिन्यासक्रमेण च सम्पूज्य, लयाङ्गत्वेन देवस्य देहे षडङ्गन्यासस्थाने षडङ्गानि सम्पूज्य, देवस्य शिरसि मूलमुच्चार्य किरीटाय नम:। कर्णयो: कुण्डलाभ्यां नम:। दक्षोर्ध्वहस्ते चक्राय नम:। वामोर्ध्वहस्ते शङ्खाय नम:। वामाध:करे गदायै नम:। दक्षाध: करे पद्माय नम:। स्कन्धादिपादान्तं (नाभ्यन्तं वा) वनमालायै नम:। वक्षसि श्रीवत्साय०। कण्ठे कौस्तुभाय नम:। इति मूलेनैव सम्पूज्य, षट्कोणेषु प्राग्वत् षडङ्गानि सम्पूज्य, कोणकेसरेषु वासुदेवादिमूर्तीः दिग्गतकेसरेषु शान्त्यादिशक्तीश्च सम्पूज्य, दलेषु देवस्य दक्षवामक्रमेण रुक्मिण्याद्यष्टमहिषी: सम्पूज्य, षोडशसहस्रसंख्याभ्यो देवीभ्यो नम: इति देवस्य परित: सम्पूज्य, दलाग्रेषु—इन्द्राय नम:। नीलाय०। मुकुन्दाय०। मकराय०। अनङ्गाय०। कच्छपाय०। शङ्खाय०। पद्माय०। इति निध्यष्टकं सम्पूज्य लोकेशार्चादि प्राग्वत् समापयेदिति।। तथा—

एवमभ्यर्च्य देवेशं वेदलक्षं जपेन्मनुम्। सर्पिषा जुहुयात् पश्चाद् दशांशं तर्पयेत्तत:।। ५३।।
स्वाभिषेकं विधायाथ ब्राह्मणान् भोजयेत्तत:। इत्थं साधितमन्त्रस्तु प्रयोगान् विदधीत वै।। ५४।।
पूजयित्वाऽनले कृष्णं श्वेतप्रसूनतण्डुलै:। अयुतं घृतसंयुक्तैर्हुत्वा तद्भस्म धारयेत्।। ५५।।
समस्तधनधान्याप्ति: स्त्रीवश्यं च भवेद् ध्रुवम्। रक्ताब्जैर्लक्षसंख्यं यो हुनेन्मधुरलोलितै:।। ५६।।
गोघृतैर्वापि जुहुयात् तस्य लक्ष्मी: स्थिरा भवेत्। रक्तादिवसनाकाङ्क्षी हुनेत् पुष्पैश्च तादृशै:।।५७।।
मधुराक्तैर्घृताक्तैर्वाप्यष्टोत्तरसहस्रकम्। मधुना संयुतै: श्वेतकुसुमैरष्टसंयुतम्।। ५८।।
सहस्रमन्वहं हुत्वा मासमात्रेण साधक:। राज्ञ: पुरोहितो भूयान्मन्त्रिणो वा न संशय:।। ५९।।
प्रयोगजपहोमादि दशाष्टादशवर्णजम्। मन्त्रेणानेन कुर्वीत ताभ्यां मन्त्रोक्तमादरात्।। ६०।।
न्यासध्यानजपार्चादिहोमतो यो भजेन्मनुम्। रत्नकाञ्चनधान्याद्यै: समृद्धं तस्य मन्दिरम्।। ६१।।
जायते हस्तगा तस्य सकला वसुधाऽचिरम्। पुत्रपौत्रकलत्राद्यैर्भुक्त्वा भोगान् बहून्निह।। ६२।।
अन्ते याति परं धाम वैष्णवं मुनिदुर्लभम्।...।।

इति। श्रीयन्त्रसारे—

षट्कोणकर्णिकामध्ये ससाध्यं मदनं लिखेत्। षट्सु कोणेषु षड्वर्णं चतुर्वर्णं चतुर्दले।। १।।
दशपत्रे केसरोद्यद्दशार्णैकैकवर्णके। विंशत्यर्णमनोवर्णान् क्रमाद् द्वौ द्वौ विलिख्य च।। २।।
मालामन्त्रेण मारस्य बाणैर्मातृकयापि च। वेष्टितं भूपुराश्रिस्थशक्तिश्रीवसुधास्मरम्।। ३।।
विंशत्यर्णमनोर्यन्त्रं प्रोक्तमेतद् यथाविधि। गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित्।। ४।।
धर्मार्थकाममोक्षायु:पुत्रधान्यधराप्रदम्। रक्षाकरं वश्यकारि कान्तिसौभाग्यकीर्तिदम्।। ५।।
किमत्र बहुनोक्तेन काङ्क्षितार्थसुरद्रुमम्।..।।

इति। अस्यार्थ:— षट्कोणं कृत्वा तन्मध्ये ससाध्यं कामबीजं विलिख्य, षट्कोणेषु षडर्णं विलिख्य, बहि:स्थचतुष्पत्रेषु चतुरक्षरं विलिख्य, तद्बहिर्दशकेसरेषु दशाक्षरं विलिख्य, दशपत्रेषु विंशत्यर्णमन्त्रवर्णान् द्वौ द्वौ विलिख्य, बहिर्वृत्तचतुष्टयं

कृत्वा तदन्तरालवीथीत्रयेऽभ्यन्तरवीथ्यां पूर्वोक्तकाममालामन्त्रेण तद्बहिर्वीथ्यां पूर्ववत् पञ्चबाणैस्तद्बहिर्वीथ्यां मातृकार्णैश्च निरन्तरं संवेष्ट्य, बहिःस्थचतुरस्रकोणेषु प्रतिकोणं शक्तिश्रीवसुधाकामबीजानि लिखेत्। एतद्यन्त्रमुक्तफलदम्। पूर्वोक्तं पूजायन्त्रं साधितं धारणयन्त्रं भवति। तदपि यथाविधि (कृष्णं?धृतं) यथोक्तफलदं भवति।। सारसङ्ग्रहे—

रमामायास्मरान्तं च चतुर्थ्या कृष्णमीरयेत्। गोविन्दं ङेयुतं चाथ स्वाहान्तो द्वादशाक्षरः।। १।।

रमा श्रीबीजं। माया तद्बीजं। स्मरः क्लीं। चतुर्थ्या कृष्णं कृष्णाय। गोविन्दं ङेयुतं गोविन्दाय, इति। तथा—

मन्त्रे ब्रह्मा मुनिः प्रोक्तो गायत्रं छन्द ईरितम्। श्रीकृष्णो देवता चन्द्रधरेन्द्वग्न्यब्धिनेत्रकैः।। २।।
मूलमन्त्रभवैर्वर्णैः षडङ्गानि प्रकल्पयेत्। ध्यानपूजाजपाद्यस्य विंशार्णोक्तवदाचरेत् ।। ३।।
कामयन् सर्वसम्पत्तिं मन्त्रमेनं भजेद् बुधः।...।।

ॐश्रीं हृत्। ह्रीं शिरः। क्लीं शिखा। कृष्णाय कवचं। गोविन्दाय नेत्रं। स्वाहा अस्त्रं। तथा—

लक्ष्मीशक्तिमनोजातबीजान्ते दशवर्णकम्। काममायेन्दिरान्तोऽयं षोडशार्णो मनुर्मतः।। ४।।

लक्ष्मीः श्रीबीजं। शक्तिर्मायाबीजं। मनोजातः कामबीजं। दशवर्णाः पूर्वोक्ताः। कामस्तद्बीजं। माया ह्रीं। इन्दिरा श्रीबीजं।

ऋष्यादिकं दशार्णोक्तं पञ्चाङ्गमपि तादृशम्। पूजा विंशाक्षरप्रोक्ता ध्यानं तस्य निगद्यते।। ५।।
वराभयकराब्जाभ्यामालिङ्गन्तं प्रियाङ्कके। अब्जोत्पललसद्धस्ते ताभ्यामालिङ्गितं मुदा।। ६।।
धारयन्तं रथाङ्गं च शङ्खं भव्यकलेवरम्। एवं ध्यात्वा जपेन्मन्त्रं दशलक्षं समाहितः।। ७।।
तावत्संख्यासहस्राणि हुनेदाज्यमनुत्तमम्। तर्पणाद्यैर्भवेन्मन्त्रः सिद्धः स्वेष्टफलप्रदः।। ८।।
मायाश्रीसहितो मन्त्रो दशार्णो द्वादशाक्षरः। विधानमस्य विज्ञेयं षोडशार्णोक्तवर्त्मना।। ९।।

सुगमम्।।

काममायेन्दिरापूर्वो मायाश्रीकामतस्तथा। लक्ष्मीमायास्मराद्यश्च मन्त्रराजो दशाक्षरः ।। १०।।
त्रयोदशाक्षरा मन्त्रास्त्रय एते उदाहृताः[1]। मुन्याद्यङ्गविधिस्त्वेषां पङ्क्त्यर्णोक्तविधानतः।। ११।।
ध्यानं तृतीयमन्त्रे तु दशार्णोक्तमुदाहृतम्। विंशार्णोक्तं द्वितीये तु प्रथमेऽथ निगद्यते।। १२।।
दरारिचापसद्बाणगुणाङ्कुशकराम्बुजम्। वेणुमादाय हस्ताभ्यां वादयन्तं मुदान्वितम्।। १३।।
रविमण्डलगं कृष्णं ध्यायेदिष्टफलाप्तये। अङ्गैरिन्द्रादिवज्राद्यैरर्चना सर्वसिद्धिदा।। १४।।
बाणलक्षं जपित्वाग्नौ दशांशं हविषा हुनेत्। तर्पणादि ततः कुर्यात् सिद्धमन्त्रः समाचरेत्।। १५।।
कान्तिपुष्टिधनारोग्यकामो मन्त्रैः प्रयोगकान्।...।।

बाणलक्षं पञ्चलक्षम्। तथा—

अष्टादशलिपिर्मन्त्रः कामान्तो वसुपुत्रदः। मुनिर्नारद आख्यातो गायत्री छन्द ईरितम्।। १६।।
श्रीकृष्णो देवताङ्गानि षड्दीर्घेण स्मरेण हि। क्लांक्लीं इत्यादिना षडङ्गकम्।

---

[1] 'समुदाहृताः' ख. पाठः।

बालं नीलमुदारकान्तिविभवं हस्ताम्बुजे दक्षिणे
बिभ्राणं परिपक्वदौग्धकवलं नन्दात्मजं सुन्दरम्।
वामे तद्दिनजातमुद्धतरसं दध्युत्थपिण्डं शुभं
वैयाघ्रेण नखेन राजितगलं त्यक्तांशुकं भावयेत्।। १७।।

अङ्गलोकेशवज्राद्यैरर्चनास्य समीरिता। एवं ध्यात्वा जपेन्मन्त्रमेकलक्षमनन्यधीः ।। १८।।
शर्कराघृतयुक्तेन दशांशं हविषा हुनेत्। तर्पणादि ततः कुर्यात् पूर्वोक्तविधिना सुधीः।। १९।।
सरोजमध्यगं कृष्णं पूजयित्वा विधानतः। तस्यैव श्रीमुखाम्भोजे तर्पयेन्मन्त्रमुच्चरन्।। २०।।
गोदुग्धेन सुशुद्धेन सुपक्वैः कदलीफलैः। दध्ना च नवनीतेन पुत्रमाप्नोति वत्सरात्।। २१।।
यद्यदिच्छति तत्सर्वं तर्पणेनैव सिद्ध्यति।..।।

इति। तथा–

अधरो बिन्दुमान् कामो ङेयुक् कृष्णश्च मायया। गोविन्दो ङेयुतो लक्ष्मीर्दशार्णस्तदनन्तरम्।।२२।।
भृगुर्मनुविसर्गाढ्यो द्वाविंशार्णो मनुर्मतः । वागैश्वर्यप्रदो नित्यं साधकानामभीष्टदः।। २३।।
अष्टादशलिपिप्रोक्तं मुन्याद्यं चाङ्गकल्पनम्।..।।

अधरे ऐ, बिन्दुमान् बिन्दुयुक्तस्तेन ऐं। कामस्तद्बीजं। ङेयुक् कृष्णः कृष्णाय। मायया तद्बीजेन सहेति शेषः। गोविन्दो ङेयुतो गोविन्दाय। लक्ष्मीः श्रीबीजं। दशार्णः पूर्वोक्तः। भृगुः सकारः, मनु औ, विसर्गः अः, तेन सौः। विंशाक्षरोक्ता सपर्या। ध्यानमुच्यते।

दक्षोर्ध्वे हस्तपद्मे स्फटिकजपवटीं मातृकावर्णरूपां
वामोर्ध्वे सर्वविद्याकलितमभिनवं पुस्तकं सन्दधानः।
शब्दब्रह्मैकवेणुं करयुगलधृतं वादयञ् श्रेयसे वो
गायन् पीताम्बरोऽसौ भवतु मुररिपु श्यामलः कोमलाङ्गः।। २४।।

मयूरपत्रसन्नद्धकशजालश्रियान्वितः। सर्वज्ञो मुनिवृन्देन सेवितः सर्ववेदिना।। २५।।
इत्थं सञ्चिन्त्य देवेशं नारीनेपथ्यधारिणम्।..।।

नेपथ्यमलङ्कारस्तेन स्त्रीरूपधारी ध्येयः। ''युवतीवेशलावण्यरमणीयतनुं हरिम्''। इति गौतमीयतन्त्रवचनात्। क्लींकृष्णाय हृदयाय०। गोविन्दाय शिरसे०। गोपीजन शिखायै०। वल्लभाय कवचाय०। स्वाहा अस्त्राय०। इति पञ्चाङ्गम्। अन्यत्सुगमम्। तथा–

वेदलक्षं मनुं जप्त्वा किंशुकैर्मधुराप्लुतैः। दशांशं जुहुयादग्नौ साधको मन्त्रसिद्धये।। २६।।
तर्पणादि ततः कुर्यान्मन्त्री पूर्वोक्तवर्त्मना। मन्त्रमेतं जपेद्यस्तु मन्त्री पूर्वोक्तवर्त्मना।। २७।।
देवस्यानुग्रहात् तस्य मुखपद्माद्विजृम्भते। गङ्गातरङ्गकल्लोलवाग्विलासमनोहरा।। २८।।
गद्यपद्यात्मिका सम्यक् प्रचण्डा भारती सदा। अशेषवेदवेदार्थसर्वशास्त्रविशारदः।। २९।।
राजैश्वर्यं महत् प्राप्य मुक्तिमेति परां कृती। ....।।

इति। तथा–

वेदादिहृदयस्यान्ते ङेयुतं भगवत्पदम्। नन्दपुत्राय नन्दान्ते वपुषे श्री दशाक्षरः।। ३०।।
अष्टाविंशाक्षरो मन्त्रो भजतां कामदो मणिः।.....................................।।

वेदादिः प्रणवः। हृदयं नमः। ङेयुतं भगवत्पदं भगवते। नन्दपुत्राय स्वरूपं। नन्दवपुषे स्वरूपं। श्री स्वरूपं। दशाक्षरः पूर्वोक्तः। तथा–

नारदो मुनिरस्य स्यादुष्णिक् छन्द उदाहृतम्। देवता नन्दपुत्रोऽस्य चिन्तितेष्टफलप्रदः।। ३१।।
आचक्रादिपदैरङ्गपञ्चकं परिकीर्तितम्। रत्नपात्रं करे दक्षे हेमवेत्रं च वामतः।। ३२।।
वहन्तं भावयेत् कृष्णं स्त्रीभ्यामालिङ्गितं मुदा। अङ्गलोकेशवज्राद्यैरर्चना फलसिद्धये।। ३३।।
दशायुतं जपित्वान्ते जुहुयात् हविषायुतम्। साधिते साधको मन्त्री भवेत् सर्वसमृद्धिमान्।। ३४।।

इति।। तथा–

नन्दपुत्राय शब्दान्ते श्यामलाङ्गाय भाषयेत्। ङेन्तं बालवपुः प्रोक्त्वा चतुर्थ्या कृष्णमीरयेत्।।३५।।
तारगोविन्दशब्दान्ते दशार्णं च मनुं वदेत्। मन्त्रोऽयं साधुसम्प्रोक्तो द्वात्रिंशद्वर्ण उत्तमः।। ३६।।
मुन्याद्या नारदानुष्टुप्कृष्णा अन्यत् पुरोक्तवत्।.....................................।।

पुरोक्तवद् अष्टाविंशाक्षरोक्तवत्।। तथा–

प्रणवान्ते रमा माया हृदयं भगवांस्ततः। ङेयुक् च नन्दपुत्राय च्छगलाण्डोऽप्यनन्तयुक्।। ३७।।
(इन्द्रतो वपुषे ब्रूयात् श्यामलाङ्गं च ङेयुतम्।) अष्टादशलिपिर्मन्त्रो द्विचत्वारिंशदर्णवान्।। ३८।।

रमा श्रीबीजं। माया तद्बीजं। ङेयुग्भगवान् भगवते। नन्दपुत्राय स्वरूपं। छगलाण्डो बकारः, अनन्त आ, तेन वा। इन्द्रो ल। वपुषे स्वरूपं। श्यामलाङ्गं ङेयुतं श्यामलाङ्गाय। अष्टादशलिपिः पूर्वोक्तः। तथा–

ब्रह्मानुष्टुप् च कृष्णाख्या मुन्याद्याः कथिता बुधैः। अन्यत् सर्वं पुरोक्तेन विधानेन समं भवेत्।।३९।।
वह्न्यैकादशभूतेषुधृतिसंख्यैस्तु मन्त्रवित्। मूलमन्त्रभवैर्वर्णैः पञ्चाङ्गानि प्रकल्पयेत् ।। ४०।।

वह्नयस्त्रयः। भूतानि पञ्च। इषवः पञ्च। धृतिरष्टादश। ॐश्रींह्रीं हृदयाय०। नमो भगवते नन्दपुत्राय शिरः०। बालवपुषे शिखा०। श्यामलाङ्गाय कवचाय०। क्लींकृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा अस्त्राय०।। अन्यदष्टाविंशत्यर्णवत्। ‘‘मन्त्रोऽयं सकलैश्वर्यकाङ्क्षितैकार्थसाधनम्।’’ इति तथा–

ध्रुवश्च हृदयं चैव चतुर्थ्या भगवत्पदं। रुक्मिणीवल्लभायान्यत् स्वाहान्तः षोडशाक्षरः।। ४१।।

ध्रुवः। प्रणवः। हृदयं नमः। चतुर्थ्या भगवत्पदं भगवते। रुक्मिणीवल्लभाय स्वरूपम्।

मुनिर्नारद आख्यातश्छन्दोऽनुष्टबुदीरितम्। रुक्मिणीवल्लभः कृष्णो देवता सर्वसिद्धिदः।। ४२।।
भूद्वन्द्वश्रुतिपातालयुग्मार्णैरङ्गकल्पनम्। (भूः एकः। श्रुयतश्चत्वारः। पातालाः सप्त।)
कलायश्यामलं कृष्णं नानालङ्कारमण्डितम्। पीतकौशेयसद्वस्त्रं स्वर्णवेत्रविभूषितम्।। ४३।।
करपद्मेन दक्षेण श्लिष्यन्तं वामपाणिना। चिन्तारत्नवतीं देवीमङ्कगां काञ्चनप्रभाम्।। ४४।।
वामहस्तधृताम्भोजामन्येनालिङ्गितप्रियाम्। अङ्गैर्नारदमुख्यैश्च लोकपालैस्तदायुधैः ।। ४५।।
पूजनं धर्मकामार्थनिःश्रेयसफलावहम्। एकलक्षं जपेन्मन्त्रं हुनेन्मधुरलोलितैः ।। ४६।।

दशांशं कमलैः पश्चात् तर्पणादि समाचरेत्। महदैश्वर्यवश्यादि काङ्क्षिभिः सेव्यतां मनुः।। ४७।।

ॐहृत्। नमः शिरः। भगवते शिखा। रुक्मिणीवल्लभाय कवचं। स्वाहा अस्त्रम्।। तथा–

वदेल्लीलापदस्यान्ते दण्डगोपीजनं पुनः। संसक्तदोःपदं पश्चाद् दण्डबालपदं वदेत्।। ४८।।
रूपमेघपदं प्रोक्त्वा श्यामं भगपदं वदेत्। वन् विष्णो बह्निवध्वन्त एकोनत्रिंशदक्षरः।। ४९।।

लीलादण्डगोपीजनसंसक्तदोर्दण्डबालरूपमेघश्याम भगवन् विष्णो इति पदानि स्वरूपाणि। वह्निवधूः स्वाहा।

मन्त्रो निखिलसद्वश्यसिद्धिसम्पत्प्रदो मतः। नारदोऽस्य मुनिश्छन्दो गायत्री देवता मता।। ५०।।
लीलादण्डमहाविष्णुः सर्वदेवौघवन्दितः। चतुर्दशचतुर्वेदत्र्यक्षरैरङ्गकल्पनम्।। ५१।।

लीलादण्डगोपीजनसंसक्तदोर्दण्ड हृत्। बालरूप शिरः। मेघश्याम शिखा। भगवन् कवचं। विष्णो स्वाहा अस्त्रम्।

वामहस्ताम्बुजस्थेन लीलादण्डेन गोपिकाः। पुराङ्गनाश्च साकूतं मोहयन्तं महाप्रभुम्।। ५२।।
आत्मनः प्रियमित्रस्य स्कन्धन्यस्तान्यहस्तकम्। हतकंसं स्मरेत् कृष्णमप्रमेयपराक्रमम्।। ५३।।
अङ्गैरिन्द्रादिवज्राद्यैरर्चनास्य मतान्वहम्। लक्षमेकं जपेन्मन्त्रं दशांशं तिलतण्डुलैः।। ५४।।
त्रिमध्वक्तैर्हुनेत् पश्चात्तर्पणादि समाचरेत्। नियमस्थो नरो योऽमुं लीलादण्डमनुं भजेत्।। ५५।।
सुभगः स जगद्वन्द्यो रमाया भवनं भवेत्।..।।

इति।। तथा–

शार्ङ्गी सद्येन सन्दीप्तो बाल इन्द्रद्वयं तथा। विलोमाद् यतृतीयश्च सानन्तोऽथ समीरणः।। ५६।।
कृशानुदयितोपेतो मन्त्रोऽयं धातुवर्णकः।..।।

शार्ङ्गी ग। सद्य ओ, तेन गो। बाल व। इन्द्रद्वयं ल्ल। विलोमाद्यतृतीयो भ, अनन्त आ, तेन भा। समीरणो य। कृशानुदयिता स्वाहा। धातुवर्णः सप्तार्णः। तथा–

नारदो मुनिरस्य स्यादुष्णिक् छन्दश्च देवता। गोवल्लभो हरिः प्रोक्तो गवां वृद्धिकरः परः।। ५७।।
दशार्णोक्तविधानेन पञ्चाङ्गविधिरीरितः। इन्द्रनीललसत्कान्तिं पीतवाससमच्युतम् ।। ५८।।
सर्पारिपिच्छनिकरैः सम्यक्क्लृप्तावतंसकम्। वेणुं वामकरे दक्षे यष्टिं पाशं च बिभ्रतम्।। ५९।।
कपिलाजातमध्यस्थमाह्वयन्तं च तामुदा। एवं ध्यात्वा यजेत् सम्यक् पीठे पूर्वोदिते शुभे।।६०।।
आदावङ्गानि सम्पूज्य पूजयेद्गोगणाष्टकम्। सुवर्णवर्णा प्रथमा द्वितीया गौरपिङ्गला ।। ६१।।
तृतीया रक्तपिङ्गाक्षी चतुर्थी गलपिङ्गला। पञ्चमी बभ्रुवर्णा स्यादुत्तमा कपिला गवाम्।। ६२।।
षष्ठी चतुष्कपिङ्गा स्यात् सप्तमी सम[१]पिङ्गला। अष्टमी कपिला गोषु विज्ञेया पुच्छपिङ्गला।।६३।।
पुरन्दरमुखास्तेषामायुधानि ततः परम्। ध्यात्वा मन्त्रं जपेत् सम्यग् वर्णलक्षं जितेन्द्रियः।। ६४।।
तत्सहस्रं हुनेन्मन्त्री गोदुग्धैस्तु पुरोक्तवत्। गोदुग्धैः प्रत्यहं साग्रं सहस्रं जुहुयात्तु यः।। ६५।।
मासार्धेन गवां वृद्धिर्जायते तस्य भूयसी। दशाक्षरोक्तवत् सर्वं विधानं च प्रकल्पयेत्।। ६६।।

इति। तथा–

ब्रूयात् तारहृदोरन्ते चतुर्थ्यां भगवत्पदम्। अस्थ्यग्निवामनेत्रान्ते गोविन्दं तादृशं वदेत्।। ६७।।

---

[१] 'स्तनपिङ्गला' ख. पाठः।

रव्यर्णो मनुराख्यातो नारदोऽस्य मुनिर्भवेत्। गायत्री छन्द इत्युक्तं देवता कृष्ण ईरितः।। ६८।।

तारः प्रणवः। हृन्नमः। चतुर्थ्या भगवत्पदं भगवते। अस्थि श। अग्नी र। वामनेत्रं ई, तेन श्री। गोविन्दं तादृशं चतुर्थ्यायुतं तेन गोविन्दाय।

चन्द्रनेत्राब्धिबाणार्णैर्मन्त्रेणाप्यङ्गकल्पनम्। कल्पद्रुमतले रम्ये रत्नसिंहासने शुभे।। ६९।।
सर्वलक्षणसन्दीप्तं निविष्टं नन्दनन्दनम्। प्रस्तुतस्तनभारेण गोवृन्देन वृतं स्मरेत्।। ७०।।

मेघश्यामतनुं सुपीतवसनं वेत्रं दरं बिभ्रतं
हस्ताभ्यां कमलायताक्षमनिशं सौन्दर्यसीमास्पदम्।
देवाधीश्वरहस्तयुग्मविलसत्सौवर्णसत्कुम्भतो
निर्यातामृतधारया हरिमहं संसिच्यमानं भजे।। ७१।।

दक्षे वेत्रं। वामे शङ्खः इत्यायुधध्यानम्।

सम्पूज्य वैष्णवं पीठं तत्रावाह्य यजेद्धरिम्। देवस्य दक्षिणे भागे कर्णिकायां तु रुक्मिणीम्।।७२।।
सत्यभामां च तद्वामे वासवं चाग्रदेशतः। सुरभिं पृष्ठतोऽभ्यर्च्य दलमूलेषु मन्त्रवित्।। ७३।।
हृदादिकवचान्तानि दिग्दलेषु समर्चयेत्। चत्वार्यङ्गानि कोणेषु सम्यगस्त्रं यजेत् ततः।। ७४।।
पूर्वादिपत्रमध्येषु कालिन्दीं रोहिणी ततः। नाग्नजित्यादिकाश्चापि षट्शक्तीः क्रमशोऽर्चयेत्।। ७५।।
तद्बहिर्वह्निकोणादिशिवान्तं सम्यगर्चयेत्। किङ्किणीधामयष्टीस्तु वेणुं पश्चात् पुरोगतौ।। ७६।।
श्रीवत्सकौस्तुभौ पूज्यौ वनमालां पुरोऽर्चयेत्। पूर्वादि तद्बहिः शङ्खं गदां चक्रं ततः सुधीः।। ७७।।
वसुदेवाभिधं पश्चाद् देवकीं नन्दगोपकम्। यशोदां धेनुगोपालगोपिकाः पूजयेत् ततः।। ७८।।
लोकपालांस्तदस्त्राणि कुमुदादींश्च पूजयेत्। उत्तरे तद्बहिः पश्चाद्विष्वक्सेनं विधानतः।। ७९।।
कुमुदः प्रथमो ज्ञेयः कुमुदाक्षो द्वितीयकः। पुण्डरीकस्तृतीयश्च वामनस्तदनन्तरम् ।। ८०।।
शङ्कुकर्णः पञ्चमश्च सर्वनेत्रस्ततः परः। सुमुखः सप्तमः पश्चादष्टमः सुप्रतिष्ठितः।। ८१।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारदाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीकृष्णाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ओंहृदयाय नमः। नमः शिरसे स्वाहा। भगवते शिखायै०। श्रीगोविन्दाय कवचाय०। ओंनमो भगवते श्रीगोविन्दाय अस्त्राय०। इति पञ्चाङ्गानि प्राग्वद्विन्यस्य, ध्यानादिपुष्पोपचारान्ते कर्णिकायां देवस्य दक्षिणे श्रीरुक्मिण्यै नमः। वामे सत्यभामायै नमः। अग्रे इन्द्राय०। पृष्ठे सुरभ्यै नमः। दिग्गतकेसरेषु हृदयादिकवचान्तानि कोणकेसरेषु चास्त्रं सम्पूज्य, दलेषु देवाग्रादि—कालिन्द्यै नमः। रोहिण्यै०। नाग्नजित्यै०। सुनन्दायै०। मित्रविन्दायै०। सुलक्ष्मणायै०। जाम्बवत्यै०। सुशीलायै०। अष्टदलाद्बहिः चतुरस्राभ्यन्तरे वह्निकोणादि—किङ्किणीभ्यो नमः। दामभ्यो०। यष्ट्यै०। वेणवे०। इति ईशानान्तमभ्यर्च्य, देवाग्रे—श्रीवत्साय नमः। कौस्तुभाय०। वनमालायै०। चतुरस्रे देवाग्रादिप्रादक्षिण्येन—शङ्खाय नमः। गदायै०। चक्राय०। वसुदेवाय०। देवक्यै०। नन्दगोपाय०। यशोदायै०। धेनुभ्यो०। गोपालेभ्यो०। गोपिकाभ्यो०। इति सम्पूज्य, लोकपालांस्तदस्त्राणि च तद्बहिः सम्पूज्य, तद्बहिः— कुमुदाय नमः। कुमुदाक्षाय०। पुण्डरीकाय०। वामनाय०।

शङ्कुकर्णाय०। सर्वनेत्राय०। सुमुखाय०। सुप्रतिष्ठिताय०। इति। तद्बहिर्देवस्योत्तरे—विष्वक्सेनाय नमः इति सम्पूज्य, धूपदीपादि सर्वं प्राग्वत् कुर्यादिति।। तथा—

एवं सञ्चिन्त्य देवेशं वर्णलक्षं जपेन्मनुम्। तत्सहस्राणि गोक्षीरैर्जुहुयात् तर्पयेत् ततः।। ८२।।
ब्राह्मणाराधनान्तं तु प्राग्वत् कुर्यादतन्द्रितः। दिनादौ चाथ मध्याह्ने समयत्रितये तथा।। ८३।।
गोष्ठाभ्याशगतं कृष्णमर्चयन् विधिनामुना। भक्त्या परमयोपेतो गोभ्यश्च तृणमर्पयन्।। ८४।।
दीर्घायुनिर्भयश्चैव धनधान्यधरादिभिः। पुत्रैः पौत्रैश्च सन्मित्रैराढ्योऽन्ते विष्णुमेति च।। ८५।।

इति।। तथा—

स्मृतिराप्यायनीयुक्ता सृष्टिरिन्धिकयान्विता। क्रिया दीर्घा प्रतिष्ठाढ्या वरदा तादृशी मता।।८६।।
क्षुधा दीर्घा च तन्द्राख्या रसनादीपिता भवेत्। अष्टाक्षरैः समाख्यातो मूलमन्त्रो मनीषिभिः।।८७।।

स्मृतिः ग, आप्यायनी ओ, तेन गो। सृष्टिः क, इन्धिका उ, तेन कु। क्रिया ल। दीर्घा न, प्रतिष्ठा आ, तेन ना। वरदा थ, तादृशी आकारयुक्ता तेन था। क्षुधा य। दीर्घा न। तन्द्रा म, रसना विसर्गः, तेन मः। तथा—

ब्रह्मा मुनिस्तु गायत्री च्छन्दो देवो हरिर्मतः। वर्णद्वन्द्वक्रमादङ्गं सकलेनापि कल्पयेत्।। ८८।।
वन्दे नीलकलेवरं रुचिरया कान्त्या महत्या युतं
बालं कुन्तलजालरुद्धनयनं पञ्चाब्दिकं चाङ्गने।
धावन्तं रशनासुनूपुरमणिग्रैवेयहाराङ्गदै—
रादीप्तं सरलं स्तुतं मुनिगणैर्हृष्टं यशोदासुतम्।। ८९।।
श्रीकृष्णं पूजयेन्नित्यं पीठे पूर्वसमीरिते। दिग्विदिक्क्रमतः पूर्वं पूजयेदङ्गपञ्चकम् ।। ९०।।
दिक्पत्रेषु यजेन्मूर्तीर्वासुदेवादिकास्ततः। रुक्मिणीं सत्यभामां च लक्ष्मणां तदनन्तरम्।। ९१।।
ततो जाम्बवतीं मन्त्री कोणपत्रेषु पूजयेत्। तद्बहिर्वासवादीनां वज्रादीनां च पूजनम्।। ९२।।

इति। अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीकृष्णाय देवतायै नमः। इति विन्यस्य पूर्ववद्विनियोगमुक्त्वा, गोकु हृदयाय नमः। लना शिरसे स्वाहा। थाय शिखायै०। नमः कवचाय०। गोकुलनाथाय नमः अस्त्राय०। इति पञ्चाङ्गानि विन्यस्य, ध्यानादिपुष्पोपचारान्ते देवाग्रादिकेसरचतुष्केऽङ्गचतुष्टयं कोणकेसरेषु अस्त्रमिति पञ्चाङ्गानि विन्यस्य, दिग्दलेषु वासुदेवादिमूर्तिचतुष्टयं सम्पूज्य, कोणपत्रेषु—रुक्मिण्यै नमः। सत्यभामायै०। लक्ष्मणायै०। जाम्बवत्यै०। इति सम्पूज्य दिगीशार्चादि प्राग्वत् कुर्यादिति। तथा—

सम्पूज्यैवं मनुं जप्त्वा वर्णलक्षं हुनेत्ततः। वसुसाहस्रसंख्यातैः पलाशोत्थसमिद्वरैः।। ९३।।
पायसैरथवाज्याक्तैस्तर्पणादि ततश्चरेत्। मन्त्रमेनं भजन्नित्थमन्वहं श्रद्धयान्वितः।। ९४।।
सर्वैश्वर्यसमृद्धोऽन्ते विष्णुसायुज्यमाप्नुयात्।.....................................।।

इति।। तथा —

ध्रुवो रमा महामाया कामान्ते ङेयुतं वदेत्। श्रीकृष्णं तादृशं चैव श्रीगोविन्दमपीरयेत्।। ९५।।

श्रीगोपीजनशब्दान्ते वल्लभाय ततो वदेत्। त्रिः श्रीमत्युद्धुतो मन्त्रः सिद्धगोपालसंज्ञकः।। ९६।।

ध्रुवः प्रणवः। रमा श्रीबीजं। महामाया भुवनेशीबीजं। कामः कामबीजं। ङेयुतं श्रीकृष्णं श्रीकृष्णाय। तादृशं गोविन्दं श्रीगोविन्दाय। श्रीगोपीजनवल्लभाय स्वरूपं। त्रिः श्रीं त्रिवारं श्रीबीजं च वदेदित्यर्थः।

सेवितौ वैनतेयेन माधवौ मण्डपस्थितौ। रमन्तौ दिव्यभावेन बलकृष्णौ तु संस्मरेत्।। ९७।।

इति।। तथा—

सर्गी तिथीशयुक् चक्री मन्त्र एकाक्षरो भवेत्। द्व्यर्णः कृष्णेति ताराद्यो गुणवर्णोऽयमेव हि।।९८।।

चक्री ककारः सर्गी विसर्गयुक्तः तिथीशः ॠ, तेन कृः इति मन्त्रः।। कृष्ण इति द्व्यर्णः। अयं द्व्यर्णस्ताराद्यः प्रणवाद्यश्चेद् गुणवर्णस्त्र्यक्षरः। ॐकृष्ण इति।।

वेदार्णः स चतुर्थ्यन्तः कृष्णाय हृदयान्तकः। (कृष्णाय हृदयं चेति पञ्चार्णोऽयं मनुर्मतः)।। ९९।।

स त्र्यर्णश्चतुर्थ्यन्तश्चेद्वेदार्णः। ॐकृष्णाय इति।। कृष्णाय स्वरूपं। हृन्नमः। एष पञ्चार्णः कृष्णाय नमः इति।।

बाणार्णः कामयुग्मान्तः कृष्णायेति परो मनुः। गोपालो ङेयुतो मन्त्रो द्विठान्तोऽयं षडक्षरः।।१००।।

बाणार्णः पञ्चाक्षरोऽस्य पूर्वेण सम्बन्धः। कामयुग्मं कामबीजद्वयं तयोरन्तर्मध्ये कृष्णाय स्वरूपं। परः पञ्चवर्ण इत्यपरः। क्लींकृष्णाय क्लीं इति। गोपालो ङेयुतो गोपालाय। द्विठः स्वाहा। गोपालाय स्वाहा इति।

मारान्ते ङेयुतं कृष्णं षडर्णोऽन्यः शिरोऽन्तकः। ङेन्तः कृष्णश्च गोविन्दस्तादृक् सप्ताक्षरो मनुः।।१०१।।

मारः कामबीजं। ङेयुतं कृष्णं कृष्णाय। शिरः स्वाहा। क्लींकृष्णाय स्वाहा इति।। ङेन्तः कृष्णः कृष्णाय। गोविन्दस्तादृक् गोविन्दाय। कृष्णाय गोविन्दाय इति।।

रमामायास्मरान्ते तु चतुर्थ्या कृष्णमीरयेत्। कामान्तः सप्तवर्णोऽयं द्वितीयः परिकीर्तितः।। १०२।।

रमा श्रीबीजं। माया शक्तिबीजं। स्मरः कामबीजं। चतुर्थ्या कृष्णं कृष्णाय। कामस्तद्बीजं। श्रींह्रींक्लीं कृष्णायक्लीं इति।।

कामः कृष्णाय गोविन्दश्चतुर्थ्याष्टाक्षरो मनुः। द्वितीयोऽष्टाक्षरो ङेयुक् दधिभक्षणठद्वयम्।। १०३।।

कामः कामबीजं। कृष्णाय स्वरूपं। गोविन्दश्चतुर्थ्या गोविन्दाय। क्लींकृष्णाय गोविन्दाय इति।। ङेयुग् दधिभक्षणः दधिभक्षणाय। ठद्वयं स्वाहा।।

सुप्रसन्नात्म—शब्दान्ते ने हृद्वस्वर्णकोऽपरः। स्मरः कृष्णाय गोविन्दो ङेन्तोऽनङ्गो नवाक्षरः।। १०४।।

सुप्रसन्नात्मने स्वरूपं। हृन्नमः। वस्वर्णोऽष्टाक्षरः।। स्मरः कामबीजं। कृष्णाय स्वरूपं। गोविन्दो ङेन्तो गोविन्दाय। अनङ्गः कामबीजम्।।

अयमेव हृदन्तोऽन्यो विना कामं नवाक्षरः। (हृन्नमः। विना कामं कामद्वयविधुरः।)

कामसम्पुटितं पिण्डं श्यामलाङ्गश्च ङेयुतः। हृद्युतो दशवर्णाढ्यः सर्वसम्पत्समृद्धिदः।। १०५।।

कामबीजपुटितं पिण्डं ग्लौं इति। श्यामलाङ्गः ङेयुतः श्यामलाङ्गाय हृन्नमः।।

बालान्ते वपुषे कृष्णं ङेन्तं स्वाहान्तिकोऽपरः। कामः कृष्णाय बालान्ते वपुषे वह्निवल्लभा।।१०६।।

बालवपुषे स्वरूपं। कृष्णं ङेन्तं कृष्णाय। अपरोऽन्यो दशाक्षरः।। कामः कामबीजं। कृष्णाय स्वरूपं बालवपुषे स्वरूपं। वह्निवल्लभा स्वाहा। अयमेकादशाक्षरः।। तथा—

नारदो मुनिरेतेषां मन्त्राणां छन्द उत्तमम्। सम्यग् देव्यादिका प्रोक्ता गायत्री देवता पुनः।। १०७।।

बालगोपालसंज्ञोऽत्र सर्वदेवौघवन्दित:। षड्दीर्घयुक्तकामेन षडङ्गविधिरीरित:।। १०८।।
वन्दे बालं मुकुन्दं सरसिजनिलयं रक्तपद्माभनेत्रं
नीलाम्भोजच्छविं तं कटितटकरणत्किङ्किणीजालनंद्धम्।
हस्ताभ्यां [1]धारयन्तं दधिजमभिनवं पायसं दिक्षु वीतं
गोगोपीगोपवृन्दै: रुरुनखलसितं कण्ठदेशेऽतिरम्ये।। १०९।।

दधिजं नवनीतम्।

यजेत् पूर्वोदिते पीठे वह्नीशासुरवायुषु। हृदादिकवचान्तानि चत्वार्यङ्गानि साधक:।। १११।।
दृशं तत्पुरतोऽभ्यर्च्य दिक्ष्वस्त्रं तद्बहिस्तत:। आखण्डलमुखान् देवान् वज्रादींश्च समर्चयेत्।।११२।।

इति। प्रयोगस्तु सुगम:। तथा—

विचिन्त्यैनं जपेन्मन्त्रमेकमेकं दशायुतम्। सितोपलघृताक्तेन दशांशं हविषा हुनेत्।। १०६।।
तर्पयेन्मन्त्रसिद्ध्यर्थं तावन्मन्त्री जितेन्द्रिय:। मूलमन्त्रेण मूर्धानमभिषिच्याथ तर्पयेत्।। १०७।।
ब्राह्मणानन्नपानेन गुरुं वसुभिरादरात्। एवं यो भजते मन्त्रमेषामेकं दिने दिने।। १०८।।
चतुर्वर्गफलं प्राप्य देव: साक्षात् स जायते। मन्त्रान्तरमथो वच्मि चतुर्वर्गसमृद्धिदम्।। १०९।।
काम: कृष्णेति कामश्च मन्त्र: शीघ्रफलप्रद:। मुन्यादींश्च षडङ्गानि विदुरुक्तेन वर्त्मना।। ११०।।

काम: कामबीजं। कृष्ण स्वरूपं। पुन: कामबीजं। वर्त्मना एकाक्षराद्युक्तमार्गेण।

श्रीमद्गीर्वाणभूमीरुहतलविकचाम्भोजसंस्थं मुकुन्दं
शाखाभ्यस्तस्य नम्रप्रमुदितकमलप्रोद्भवानेकरत्नै:
संसिक्तं स्वर्णवर्णं निजवपुषि लसत्तेजसा व्याप्तलोकं
वन्देऽहं पायसादं दधिजमभिनवं भक्षयन्तं सुशान्तम्।। १११।।

अङ्गैरावरणं पूर्वं निधिभिस्तदनन्तरम्। लोकपालैश्च वज्राद्यै: पश्चादावरणद्वयम्।। ११२।।

प्रयोग: सुगम:।

एवं ध्यात्वा जपेल्लक्षं नियतं विजितेन्द्रिय:। दशांशं जुहुयादग्नौ श्रीफलैर्मधुराप्लुतै:।। ११३।।
तर्पणादि तत: कुर्यात् पूर्वोक्तं मन्त्रसिद्धये। एवं सम्पूज्य गोविन्दं तर्पयेत् प्रत्यहं बुध:।। ११४।।
मधुरत्रयसद्बुद्ध्या शुद्धतोयैर्दिनागमे।..।।

इति। श्रीयन्त्रसारे

स्मरं कर्णिकायां षडस्रे षडर्णं चतुष्पत्रराजच्चतुर्वर्णमन्त्रम्।
वृतं मातृकार्णैर्धरागेहसंस्थं चतुर्वर्णयन्त्रं समस्तार्थदायि।। १।।

इति। अस्यार्थ:— षट्कोणमध्ये ससाध्यं कामबीजं विलिख्य षट्कोणेषु पूर्वोक्तषडर्णवर्णानालिख्य, बहिश्चतु(र्दलकमलं कृत्वा तद्)दलेषु चतुरक्षरमन्त्रवर्णानालिख्य, बहिर्वृत्तयोरन्तराले मातृकार्णै: संवेष्ट्य बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं

---

[1] 'बिभ्रतं सद्' ख. पाठ:।

भवति।। तथा–

अस्यैव कामयोरिन्द्रौ वह्निदीप्तावधो यदि। अन्यो मन्त्रस्तदा ज्ञेयः सर्वश्रेष्ठो मनीषिभिः।। ११५।।

पूर्वोक्तमन्त्रस्य काबीजद्वयगत[1]लकारयोरदधस्ताद्रेफे दत्तेऽन्यो मन्त्रो भवेदित्यर्थः। क्लरीं कृष्ण क्लरीं।

षड्दीर्घभाजा बीजेन तादृशेनाङ्गकल्पना।

शोणोद्यानगदेववृक्षशिखरे सौवर्णदोलागतं
नीलाकुञ्चितमूर्धजं कटितटे सत्किङ्किणीमण्डितम्।
[2]रत्नद्वीपिनखप्रकल्पितगलाकल्पं मुदा प्रेङ्खितं
गोपीभ्यामतिसुन्दरं मुररिपुं वन्दे यशोदासुतम्।। ११६।।

पूर्वोदिते यजेत् पीठे पूर्वोक्तविधिना हरिम्। सम्यगभ्यर्च्य गोविन्दं जपेन्मन्त्री पुरोक्तवत्।। ११७।।
मधुराक्तैर्हुनेन्मन्त्री रक्तपद्मैर्दशांशतः। तर्पणं पूर्वसंख्यं स्याद्गुरुं यत्नेन तोषयेत्।। ११८।।
मधुरत्रयसंसिक्तामारक्तां शालिमञ्जरीम्। जुहुयान्नित्यशोऽष्टोर्ध्वशतमेकेन मन्त्रयोः।। ११९।।
मण्डलात् सर्वशस्याढ्या वसुधा हस्तगा भवेत्। धनधान्यसमृद्ध्या[3] च सङ्कीर्णं मन्दिरं भवेत्।।१२०।।

पूजाहोमजपप्रयोगविधिभिर्मन्त्री य एकं भजेद्
भक्त्या काम इवापरः स युवतीवृन्देन सम्भाव्यते।
लक्ष्म्यायुश्च यशश्च सर्वविभवान् कामांश्च लब्ध्वा ततो-
प्यन्तेऽनन्तसुखप्रबोधजनकं लोकं व्रजेद्वैष्णवम्।। १२१।।

इति।। सारसङ्ग्रहे–

अथ गोपालमन्त्राणां वक्ष्ये श्रेष्ठतमं मनुम्। कविताश्रीप्रदं वश्यमोहनादिकरं परम्।। १।।
वाङ्मायाविष्णुपत्न्यन्ते ह्लादिनीन्द्वग्निभूषिता। दीर्घा स्थिरा स्थितिः प्रोक्ता साग्निशान्तिसुधाकराः।।२।।
जयं संवीप्स्य कृष्णं च दीर्घा लोचनशालिनी। रक्तेन्दु कामिकारक्तौ सृष्ट्यग्नी वामदृग्युतौ।।३।।
नन्द्यनन्तायुतो जीवश्चक्री कामिकया युतः। पार्श्वरक्ते रविश्रोत्रे सत्यनेत्रे च कामिका।। ४।।
कूर्मो झिण्ठीशसंयुक्तः कामिका च सुधाकरः। झिण्ठीशो नित्यशब्दान्ते पार्श्वाग्नी नेत्रभूषिते।।५।।
वाय्वनन्तौ पुनर्वायुः कृष्णो ङेन्तो रतिप्रियः। दशार्णः सरमामायावाग्भवान्तो मनुर्मतः।। ६।।
वैदुष्यवश्यलक्ष्मीदो द्विपञ्चाशद्भिरक्षरैः।...।।

वाक् ऐं। माया ह्रीं। विष्णुपत्नी श्रीं। ह्लादिनी द, अत्र ईकारस्य प्रश्लेषस्तेन ई स्वरूपं, अग्नी र, इन्दुर्बिन्दुः, तेन द्रीं। दीर्घा न, स्थिरा ज, स्थितिः झ, एते वर्णाः पृथक् अग्निना रेफेण शान्त्या ईकारेण सुधाकरेण बिन्दुना च युक्तास्तेन व्रीर्ज्रींझ्रीं। जयं संवीप्स्य जय जय। कृष्णं च चकाराद्वीप्स्य तेन कृष्ण कृष्ण। दीर्घा न, लोचनं इ, तेन नि। रक्तं र, इन्दुर्बिन्दुः तेन रं। कामिका त। रक्तं र। सृष्टिः क, अग्नी र, वामदृक् ई, तेन क्री। (नन्दी ड, अनन्त आ, तेन डा। जीवः स। चक्री क, कामिका त, तेन क्त। पार्श्वे प, रक्तं र, तेन प्र।) रवि म, श्रोत्रं उ, तेन मु। सत्य द,

---

१. 'ककारलकारात्' ख. पाठः। २. 'रक्तं' ख. पाठः। ३. 'समृद्धिश्च सकान्तैः' क. ग. पाठः।

नेत्रं इ, तेन दि। कामिका त। कूर्मः च, झिण्ठीश ए, तेन चे। कामिका त। सुधाकरः स, झिण्ठीश ए, तेन से। नित्य स्वरूपं। पार्श्वं प, अग्नी र, नेत्रं इ, तेन प्रि। वायुः य, अनन्त आ, तेन या। वायुः य। कृष्णो ङेन्तः कृष्णाय। रतिप्रियः क्लीं। दशार्णः पूर्वोक्तगोपालदशाक्षरः। रमा श्रीबीजं। माया तद्बीजं। वाग्भव ऐं।। तथा–

आनन्दनारदाख्योऽस्य मुनिश्छन्दो विराड् भवेत्। अमृताद्यं तु सम्पूर्वो देवता मोहनो हरिः।।७।।
अष्टभिर्हृदयं वर्णैः शिरो द्वादशभिः स्मृतम्। धातुसंख्यैः शिखा वर्म वस्वर्णैर्नेत्रमात्मना।। ८।।
पङ्क्त्यर्णैरस्त्रमुद्दिष्टं त्रिबीजपुटितैः क्रमात्। एवं मूलभवैर्वर्णैः षडङ्गं समुदीरितम् ।। ९।।

धातवः सप्त। वस्वर्णैः अष्टभिः। आत्मना एकेन। षङ्क्त्यर्णैः दशभिः।

एतत्करणमात्रेण लोकसंवननं भवेत्। भूतशुद्ध्यादिकं कृत्वा देहे पीठं प्रकल्प्य च।। १०।।
हस्तद्वये दशार्णोक्तविधिना न्यासमाचरेत्। षडङ्गं न्यस्य कामानां पञ्चकं च प्रविन्यसेत्।। ११।।
त्रिवारं मूलमनुना व्यापकं च प्रविन्यसेत्। कामसम्पुटितान् न्यस्येन्मातृकार्णान् यथापुरा।। १२।।
दशतत्त्वादिकान् न्यासान् मूर्तिपञ्जरपश्चिमान्। सृष्टिस्थितिषडङ्गानि बाणान् न्यस्येच्च पूर्ववत्।।१३।।
सर्वमन्यत् पुरोक्तेन विधानेन विधाय वै। साधकः सर्वलोकेशं ध्यायेत् सम्मोहनं हरिम्।। १४।।
पुरोत्तमे निजे रम्ये सर्वतोऽम्बुधिमध्यगे। विमलोच्चमहादुर्गगोपुरादिसुवीथिके।। १५।।
मेघोच्छ्रितसुधाधौतसौधजातसमाकुले। रक्तमन्दिरविस्तीर्णकपाटद्वारमण्डिते ।। १६।।
भूदेवबाहुजविशां वृषलानां गृहोत्तमैः। नानाशिल्पिगृहैश्चापि हस्त्यश्वोष्ट्रखरालयैः।। १७।।
गोच्छागमहिषादीनामसंख्यातैर्गृहैर्युते । बह्वापणगतानेकसाधुलोकसमाहृतैः ।। १८।।
क्रयविक्रयकार्यार्थं वस्तुसङ्घैश्च मण्डितैः। लोकस्वान्तवशीकारदक्षनारीनिकेतनैः।। १९।।

दीर्घानेकसुदीर्घिकाजलसमुत्फुल्लाम्बुजान्तः स्रव-
न्मध्वास्वादकृतादरैर्जलचरैः भृङ्गैश्च हंसैः शुभैः।
कारण्डादिगणै रथाङ्गविहगैरन्यैश्च सर्वैस्तथा
सन्तुष्टैरनिशं प्रियासहचरैः पक्ष्यादिभिः सेविते।। २०।।
पुल्लानेकसुगन्धिपुष्पनिचयासक्तैर्भ्रमद्भृङ्गकै-
र्व्याप्तैः कल्पपादपैरनुदिनं कामान् यथेष्टान् मुहुः।
यच्छद्भिर्मनुजेभ्य आदरपरैः शीतैश्च मन्दानिलै-
[1]र्लोलत्सर्वशि[2]खैर्वृते मणिमये सन्मण्डपे भास्वरे।। २१।।

पङ्क्तिभी रत्नदीपानां समुद्द्योतितमध्यके। नानावर्णवितानेन मौक्तिकालम्बिना युते।। २२।।
बहुवर्णसुपुष्पाभिर्मालाभिः शोभितान्तरे। सम्यक्सुगन्धिना गन्धवारिणा सिक्तभूतले।। २३।।

---

१. 'खेलत्सर्व' ख. पाठः। २. 'शिखावृते' क. ग. पाठः।

मङ्गलस्त्रीसहस्त्रौघैर्मदाघूर्णितलोचनैः । कामालसगतैर्हस्तपद्मलोलसुचामरैः ।। २४।।
पृथून्नतकुचाभारत्रुट्यत्क्षीणावलग्नकैः। स्त्रवन्मधुरवाग्गुम्फैरभितः सेवितेऽनिशम्।। २५।।
निरन्तरं महारत्नधारौघं वर्षतोऽद्भुतम्। परानन्दसुधास्पन्दं स्त्रवतः स्वस्तरोरधः।। २६।।
रत्नभूमौ सहस्त्रार्कभास्वत्सिंहासनाम्बुजे। लक्ष्मीकान्तं समासीनं चिन्तयेदिष्टसिद्धये।। २७।।
उद्यन्नूतननीलनीरजलसत्कान्तिं जगत्कारणं
वक्रस्निग्धसुमूर्धजातकुमुमं माणिक्यमौलिं प्रभुम्।
स्म्यक्शोभिललाटनासिकमुदञ्चद्भ्रूलतालङ्कृतं
संरक्तायतलोललोचनयुगं रत्नोल्लसत्कुण्डलम्।। २८।।
श्रीमद्गण्डतलं विनिर्जितलसद्बन्धूकशोणाधरं
हासश्रीवि[1]शदीकृताखिलदिशं प्रस्विन्नमुग्धाननम्।
स्फूर्जद्रश्मिमहार्घरत्ननिकरप्रत्युप्तभूषागणै-
र्मुक्ताहारमुखैर्विभूषिततनुं रोमोद्गमालङ्कृतम्।। २९।।
कर्पूरागरुकुङ्कुमद्रवविलिप्ताङ्गं स्वतः सुन्दरं
वृत्तस्थूलसुदीर्घको[2]मलभुजैर्दिङ्मानसंख्यैर्युतम्।
रक्ताब्जद्युतिपादपद्मयुगलं कामा[3]र्तचिन्ताकुलं
स्वाङ्कन्यस्तकराम्बुजद्वयमतस्तत्र स्थिताया भृशम्।। ३०।।
रुक्मिण्या लसदूरुयुग्मपिहितं सत्स्वर्णकान्तिं प्रिया-
मालिङ्गन्तममुं कराब्जयुगलेनासक्तभावां दृढम्।
बाहुभ्यां भगवन्तमार्द्रजघनामालिङ्ग्य सम्यक् स्थितां
रोमाञ्चाञ्चितदेहवल्लिलसितामानन्दभाराहृताम्।। ३१ ।।
प्रस्वेदच्छद्ममुक्ताभिर्भूषिताङ्गां मनोरमाम्। तस्मिन्नेव समासक्तसर्वेन्द्रियगणां ध्रुवम्।। ३२।।
तरङ्गरहितैरङ्गैर्मज्जन्तीं सुखसागरे। स्वदक्षस्थितयाश्लिष्टं श्यामया सत्यभामया।। ३३।।
दिव्यक्षौमानुलेपाद्यैर्युक्तया सर्वभूषणैः। कामबाणप्रविद्धाङ्ग्या बाहुना परिरब्धया।। ३४।।
(मुखाम्बुजसमासक्तनेत्ररोलम्बया सदा। सर्वाङ्गभव्ययात्यर्थं पद्मद्योतिकराब्जया)।। ३५।।
रक्तया जाम्बवत्या च श्लिष्टं वामस्थया तया। तामुक्तलक्षणोपेतामालिङ्गन्तं स्वबाहुना।। ३६।।
कालिन्द्या च परीरब्धं पृष्ठदेशस्थया विभुम्। करोद्यत्पद्मया नीलमेघश्यामरुचा ततः।। ३७।।
अनङ्गबाणसन्तापभीतया भूषिताङ्ग्या। पद्मं गदां चक्रशङ्खौ चतुर्भिर्दधतं करैः ।। ३८।।
करद्वयलसद्वेणुच्छिद्रार्पितमुखाम्बुजम् । चतुर्दिक्षु बहिर्देवैर्मुनिभिः खचरैर्वृतम् ।। ३९।।

---

[1] 'प्रकटीकृता' क. पाठः। 'विवशीकृता' ख. पाठः। [2] 'हस्तकमलैः' ख. पाठः। [3] 'कामात्त' ख. पाठः।

सर्वैर्भक्ति'रतिप्रेमभावभारानताङ्गकै:। स्तुवद्भि: स्तुतिभि: सम्यक् सेवासंसक्तमानसै:।। ४०।।
चतुर्वर्गप्रदं नित्यं मनोवाचामगोचरम्। स्वतेजसि स्थितं मग्नं महानन्दसुधाम्बुधौ।। ४१।।
इत्थं ध्यात्वा महाविष्णुं सर्वलोकगुरुं परम्। पीठे पूर्वोदिते चैनं पूजयेन्नित्यमादरात्।। ४२।।
विभूतिपञ्जरं न्यासक्रमाद्घ्राणान्तमर्चयेत् । मूर्तिपञ्जरमभ्यर्च्य पश्चादङ्गावसानकम् ।। ४३।।
पूर्वोक्तविधिना सम्यगभ्यर्च्यात्मानमादरात्। विंशाक्षरोक्तसद्यन्त्रे मध्यबीजाद्बहिर्लिखेत्।। ४४।।
जलेन्दुरविजेन्द्राणामाशास्वादौ समाहित:। चतुर्बीजान्यथोक्तानि द्विचत्वारिंशदक्षरै:।। ४५।।
शिष्टै: संवेष्ट्य कोणेषु शम्भुपूर्वाग्निगेषु तु। वाक्शक्तिलक्ष्मीबीजानि संलिख्य तदनन्तरम्।।४६।।
क्षपाटवरुणेराणां तान्येवाश्रिषु संलिखेत्। शेषं पुरोक्तवत्कृत्वा पीठमभ्यर्च्य तत्र तु।। ४७।।
मूर्तिं मूलेन सङ्कल्प्य तत्रावाह्य हरिं यजेत्। मध्यबीजगतं पश्चादग्रदक्षिणवामयो:।। ४८।।
पृष्ठतश्च समभ्यर्च्य बीजगा रुक्मिणीमुखा:। अङ्गानि षट्सु कोणेषु बाणान् केसरगान्यजेत्।।४९।।
दलमध्येषु लक्ष्म्याद्यास्तदग्रेषु ध्वजादिकान्। ध्वजं कृष्णाभमग्रे तु पृष्ठगं वारुणे विषम्।। ५०।।
शङ्खपद्मनिधी पूज्यौ शुक्लरक्तौ तु पार्श्वयो:। सर्वदा चाभिवर्षन्तौ धाराभिर्वसुसञ्चयम्।। ५१।।
हेरम्बं शास्तृनामानं दुर्गां च तदनन्तरम्। विष्वक्सेनं च कोणेषु वह्न्यादि परितो यजेत्।। ५२।।
रक्तमारकतप्रख्यदूर्वाकनकवर्णकान्। तद्बहिर्वासवादीनां वज्रादीनां च पूजनम्।। ५३।।
सप्तावरणसंयुक्ता विष्णुपूजा समीरिता।....................................।।

इति। अथ प्रयोग:— तत्र प्रात: कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि आनन्दनारदाय ऋषये नम:। मुखे अमृतविराट्छन्दसे नम:। हृदये श्रीसम्मोहनाय कृष्णाय देवतायै नम:। इति विन्यस्य पूर्ववद्विनियोगमुक्त्वा, ऐंह्रींश्रींद्रींव्रींज्रींझ्रीं जयजय श्रींह्रींऐं हृदयाय नम:। ऐंह्रींश्रीं कृष्णकृष्ण निरन्तरक्रीडासक्त श्रींह्रींऐं शिरसे स्वाहा। ऐंह्रींश्रीं कृष्णाय प्रमुदितचेतसे श्रींह्रींऐं शिखायै वषट्। ऐंह्रींश्रीं नित्यप्रियाय श्रींह्रींऐं कवचाय हुं। ऐंह्रींश्रीं क्लींगोपीवल्लभाय स्वाहा श्रींह्रींऐं नेत्रत्रयाय वौषट्। ऐंह्रींश्रीं ऐंक्लींश्रीं अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा दक्षाक्षरमन्त्रोक्तप्रकारेण करन्यासं विधाय, पुन: प्रोक्तषडङ्गानि विन्यस्य, पूर्वोक्तप्रकारेण पञ्चकामन्यासं कृत्वा, मूलेन स्वदेहे त्रिर्व्यापकं विन्यस्य, कामबीजपुटितमातृकावर्णान् स्वदेहे प्राग्वद्विन्यस्य, पूर्वोक्तदशतत्त्वन्यासं कृत्वा, प्रणवपुटितमूलमन्त्रेण त्रिर्व्यापकं कृत्वा, सृष्टिन्यासादिमूर्तिपञ्जरन्यासान्तं दशार्णगोपालमन्त्रप्रकारोक्तवत् कृत्वा, पुन: सृष्टिस्थितिषडङ्गानि विन्यस्य पूर्वोक्तपञ्चबाणन्यासं कृत्वा, पुनश्च ऋष्यादिन्यासं विधाय मुद्रा: प्रदर्श्य, ध्यानादिमानसपूजान्ते विंशत्यक्षरप्रोक्तयन्त्रे मध्यस्थं बीजं परितस्तस्य पश्चिमोत्तरदक्षिणपूर्वदिक्षु द्रींव्रींज्रींझ्रीं इति विलिख्य, तच्चतुष्टयं शिष्टैर्द्विचत्वारिंशदक्षरैर्दशबीजरहितै: संवेष्ट्य, षट्कोणेषु ईशानपूर्वाग्नेयदिग्गतकोणेषु ऐंह्रींश्रीं इति विलिख्य, (नैर्ऋतिवरुणवायुदिग्गतकोणेषु पुनस्तान्येव बीजानि विलिख्य, अवशिष्टयन्त्रं पूर्वोक्तमेव विरच्य) पुरत: संस्थाप्य, अर्घ्यस्थापनादिपीठार्चान्ते मध्यबीजे देवमावाह्यावाहनादिवैष्णवमुद्रादर्शनान्ते न्यासक्रमेण विभूतिपञ्जरादिमूर्तिपञ्जरान्तं सम्पूज्य, आसनादिपुष्पोपचारान्ते

देवाग्रतद्दक्षवामपृष्ठलिखितबीजेषु रुक्मिणीं सत्यभामां जाम्बवतीं कालिन्दीं च सम्पूज्य, षट्कोणेषु प्राग्वत् षडङ्गानि सम्पूज्य, केसरेषु प्राग्वत् पञ्चबाणानभ्यर्च्य, दलाष्टके लक्ष्म्याद्याः प्रागुक्ताः सम्पूज्य, देवाग्रदलस्याग्रे ध्वजाय नमः। पृष्ठे दलाग्रे विपाय०। दक्षदलाग्रे शङ्खनिधये नमः। वामे पद्मनिधये०। आग्नेयादिदलाग्रेषु हेरम्बाय नमः। शास्त्रे०। दुर्गायै०। विश्वक्सेनाय०। इति सम्पूज्य तद्बहिश्चतुरस्रे लोकपालार्चादि सर्वं प्राग्वत् कुर्यादिति। तथा–

दीक्षितो विधिना मन्त्रं प्राप्यामुं सद्गुरोः कृती। दर्शनं भाषणं स्पर्शं वचनं श्रवणादिकम्॥ ५४॥
वर्जयेत् प्रजपेल्लक्षं स्त्रीमात्रस्य गुरोरपि। सिताज्यमधुमिश्रेण दशांशं हविषा हुनेत्॥ ५५॥

हविषा पायसेन।

तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत्ततः। मन्त्रमेनं जपेद्यस्तु प्रत्यहं विधिनामुना॥ ५६॥
तमर्चयन्ति गीर्वाणा लोकानन्दकरश्च सः। दिनादौ शर्करायुक्तदुग्धबुद्ध्या जलैः शुभैः॥ ५७॥
अन्वहं तर्पयेद्यस्तु शतं साग्रं भवेद् ध्रुवम्। इन्द्रश्रीर्जलबिन्द्वाभा तद्विभूतिमहार्णवे॥ ५८॥
चन्द्रचन्दनपङ्काक्तमालतीकुसुमैर्नवैः। अयुतं मन्त्रवर्येण यो जुहोति विभावसौ॥ ५९॥
त्रैलोक्यं तद्वशे तिष्ठेत् ख्यातः कविवरो भवेत्। मन्त्रिणो ध्यानमात्रेण मन्त्रस्यास्य यथाविधि॥ ६०॥
वश्या भवन्ति सततं स्मरार्ताः सुरयोषितः। जपादिकर्मभिर्नूनमस्मात् किं किं न लभ्यते॥ ६१॥
स्पर्धां स्वाभाविकीं त्यक्त्वा चित्रमेतत् सुमन्त्रिणाम्। सदेन्दिरासरस्वत्यौ सेवेते भक्तितत्परे॥ ६२॥
व्याधिदारिद्र्यपापौघज्वरमोहविषादिभिः। जरापमृत्युदौर्भाग्यदुःखादिरहितः सदा॥ ६३॥
पुत्रपौत्रधनारोग्यवरस्त्रीबान्धवादिभिः। उपेतः सर्वसम्पद्भिः यशस्वी दीर्घजीवितः॥ ६४॥
उपासकोऽस्य मन्त्रस्य भवत्येव न चान्यथा।.....................................॥

इति॥ अथ सन्तानगोपालस्य। सारसङ्ग्रहे–

अथ सन्तानगोपालमन्त्रं वच्मि सुतप्रदम्। देवकीसुतशब्दान्ते गोविन्देति समीरयेत्॥ १॥
वासुदेवपदात् पश्चात् सम्बुद्ध्यन्तं जगत्पतिम्। देहि मे पदमाभाष्य तनयं कृष्णमुच्चरेत्॥ २॥
त्वामहं शरतो ब्रूयाद् णं गतोऽयं मनुर्भवेत्। द्वात्रिंशदक्षरो मन्त्रो नारदोऽस्य मुनिर्मनोः॥ ३॥
छन्दोऽनुष्टुब् देवता च कृष्णः सन्तानसिद्धिदः। पादैश्चतुर्भिः सर्वेण पञ्चाङ्गानि मनोर्विदुः॥ ४॥
शङ्खचक्रधरं देवं श्यामवर्णं चतुर्भुजम्। सर्वाभरणसन्दीप्तं पीतवाससमच्युतम्॥ ५॥
मयूरपिच्छसंयुक्तं विष्णुं तेजोपबृंहितम्। समर्पयन्तं विप्राय नष्टानानीय बालकान्॥ ६॥
करुणामृतसम्पूर्णचेष्टैकनिलयं प्रभुम्[1]।...॥

चतुर्भुजमित्यनेन गदाम्बुजे सूचिते। वामाद्यूर्ध्वयोराद्ये तदाद्यन्ययोरन्ये, इत्यायुधध्यानम्। स्त्रीभिस्तु–

स्वाङ्के सम्मुखसन्निविष्टममले रक्ताम्बुजे बालकं
माणिक्योज्ज्वलबालभूषणगणं प्रोत्तप्तहेमद्युतिम्।

---

[1] 'त्वजम्' ख. पाठः।

प्रेम्णालिङ्ग्य मुहुर्मुहुः सुखवशात् संलालितं स्वात्मना
पुत्रत्वेन विभावयेन्मुररिपुं पुत्रार्थिनी कामिनी।। ७।।

इति। देवो ध्येयः।

ध्यात्वा जपार्चनादीनि कुर्याद्भक्तिपरायणः। अर्चनाङ्गेन्द्रवज्राद्यैरुदितास्य महामनोः।। ८।।

अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा शिरसि नारदाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदि श्रीकृष्णाय देवतायै नमः। इति मूर्धादिषु विन्यस्य मूलमन्त्रेण करयोर्व्यापकं विन्यस्य, देवकीसुतगोविन्द हृदयाय नमः। वासुदेवजगत्पते शिरसे स्वाहा। देहि मे तनयं कृष्ण शिखायै०। त्वामहं शरणं गतः कवचाय०। देवकीसुतगोविन्द वासुदेव जगत्पते। देहि मे तनयं कृष्ण त्वामहं शरणं गतः अस्त्राय०। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिपञ्चाङ्गुलीषु विन्यस्य, हृदादिष्वपि विन्यस्य ध्यानमानसपूजादि सर्वं समापयेदिति। तथा—

लक्षं जप्त्वा तद्दशांशं जुहुयाद् गोघृतेन च। तर्पणादि ततः कुर्यान्मन्त्रः सिद्ध्यति मन्त्रिणः।।९।।
दशम्यामर्धरात्रे तु शुक्लपक्षेषु मन्त्रवित्। पुत्रार्थी स्वस्तिके न्यस्य तत्संस्थं विष्णुमर्चयेत्।। १०।।

स्वस्तिके मण्डले।

य एवं भजते मन्त्रं साधकः पुत्रकाङ्क्षया। सोऽवश्यं लभते पुत्रं विनीतं चिरजीविनम्।। ११।।

इति।। यन्त्रसारे—

कामं मध्ये स्वरयुगलसत्केसरेष्वष्टपत्रे—
ष्वालिख्यान्तर्जलनिधिमितान् मन्त्रवर्णान् क्रमेण।
भूयो हल्भिर्बहिरभिवृतं भूपुरस्थं तदेतद्
यन्त्रं सद्यो वितरति नृणां पुत्रपौत्राभिवृद्धिम्।। १।।

इति। अस्यार्थः— अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं कामबीजं विलिख्य तत्, केसरेषु द्वन्द्वशः स्वरान् विलिख्य, तद्दलेषु मूलमन्त्राक्षराणि चत्वारि चत्वारि विलिख्य, बहिर्वृत्तद्वयान्तराले कादिक्षान्तवर्णैरावेष्ट्य बहिश्चतुरस्रं सकामबीजकोणचतुष्टयं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति। सारसङ्ग्रहे—

वसुदेवं चतुर्थ्यन्तं निगडच्छे—पदं वदेत्। दनं वा—शब्दतो ब्रूयात् सुदेवं ङेसमन्वितम्।। १२।।
वर्मास्त्रवह्निजायान्तो विंशार्णोऽयं मनुर्मतः।..।।

वसुदेवं स्वरूपं। अत्र कर्मणि द्वितीया। निगडच्छेदनं चतुर्थ्यन्तं निगडच्छेदनाय। वासुदेवं ङेसमन्वितं, वासुदेवाय। वर्म हुं। अस्त्रं फट्। वह्निजाया स्वाहा। तथा—

नारदोऽस्य मुनिः प्रोक्तो गायत्री छन्द ईरितम्। श्रीकृष्णो देवता प्रोक्तो निगडच्छेदनाह्वयः।। १३।।
न्यासध्यानजपार्चादि दशवर्णोक्तवद् भवेत्। अथ वक्ष्ये महामन्त्रमेकाक्षरसमाह्वयम्।। १४।।
धनपुत्रकलत्रादिभोगमोक्षफलप्रदम् । सिद्धर्षियोगिवृन्दानां पुरारेरपि मोहनम् ।। १५।।
नरोरगसुरस्त्रीणां वश्याकर्षकरं परम्। जयाभूशान्तिबिन्द्वात्मा मनुरेकाक्षरस्त्वयम् ।। १६।।

जया ककारः, भूर्लकारः, शान्तिरीकारः, बिन्दुरनुस्वारस्तेन क्लीं। तथा—

मुनिः सम्मोहनाद्योऽस्य नारदो गदितो बुधैः। मन्त्रतन्त्ररहस्यज्ञैश्छन्दो गायत्रमीरितम्॥ १७॥
जगत्सम्मोहनः कृष्णो देवता देववन्दितः। षड्दीर्घाद्येन बीजेन षडङ्गानि प्रकल्पयेत्॥ १८॥
आसनं न्यासपर्यन्तमुक्तरीत्या विधाय तु। अङ्गुलीषु न्यसेदङ्गं हस्तयोस्तलयोरपि॥ १९॥
पञ्चाङ्गुलीषु बाणांश्च पूर्वोक्तांस्तत्क्रमान् न्यसेत्। बीजसम्पुटितान् न्यसेन्मातृकार्णाननन्तरम्॥ २०॥
षडङ्गानि पुनर्न्यस्य यथास्थानं शरान्न्यसेत्। शिरोवदनहृल्लिङ्गपादेषु क्रमतः सुधीः॥ २१॥
शोषणप्रमुखान् ङेन्तान् हृदन्तान् बीजपूर्वकान्। जगत्सम्मोहनं कृष्णं ध्यायेत् पश्चात् समाहितः॥२२॥
वृन्दावनद्रुमोद्यानविकसत्कल्पशाखिनः। मूले रत्नस्थलीराजद्रत्नसिंहासनोपरि ॥ २३॥
उद्यदादित्यसङ्काशं विश्वप्राणस्वरूपिणः। महतो वैनतेयस्य वामस्कन्धोपरि स्थितम्॥ २४॥
बन्धूककुसुमाभं तं[1] शम्बरारिसवर्णकम्। अरिशङ्खसृणीन् पाशं पुष्पबाणेक्षुकार्मुके॥ २५॥
पद्मं गदां च हस्ताब्जैरष्टभिर्दधतं तिजैः। स्निग्धारुणविशालोद्यद्घूर्णिताक्षिद्वयाम्बुजम्॥ २६॥
रत्नप्रत्युप्तमुकुटं मणिकुण्डलमण्डितम्। मुक्ताहारलसद्रत्नकङ्कणाङ्गदमुद्रिकम् ॥ २७॥
किङ्किणीनूपुराद्यैश्च रत्नमाल्यैरलङ्कृतम्। शोणालेपं स्वर्णकान्तिक्षौमाम्बरविराजितम्॥ २८॥
आत्मवामोरुपीठस्थां लक्ष्मीमालिङ्गितप्रियाम्। वामबाहुधृताम्भोजां क्लिद्यन्मदनमन्दिराम्॥ २९॥
[2]कामोन्मदमदव्याप्तव्याकुलाङ्गलतोज्ज्वलाम्। रम्यमालाविलेपाङ्गीं सर्वभूषणभूषिताम्॥ ३०॥
सूक्ष्मशुक्लसुवस्त्राढ्यां कान्तसद्वदनाम्बुजे। प्रेरितालोलनीलाभनेत्रषट्पदमण्डिताम्॥ ३१॥
सेक्षुचापेन वामेन बाहुना तरुणीमिमाम्। आलिङ्गन्तममुं तज्जपरमानन्दनन्दितम्॥ ३२॥
सुरासुरभुजङ्गेन्द्रसिद्धगन्धर्वयोषिताम्। वृन्दैर्वृतं सुभूषाढ्यैः कामबाणनिपीडितैः॥ ३३॥
सर्वलोकगुरुं देवं सत्यानन्दं विचिन्तयेत्।...॥

दक्षाद्यूर्ध्वयोराद्ये, तदादिद्वन्द्वक्रमेणाधोऽधोऽन्यान्यपि बोद्धव्यानि[3]।

विंशाक्षरकृते यन्त्रे प्रत्यहं कृष्णमर्चयेत् । आदावर्घ्यादिभूषान्तैरुपचारैर्यथाविधि॥ ३४॥
पश्चादङ्गानि बाणांश्च न्यासमार्गेण पूजयेत्। किरीटं मस्तके श्रोत्रद्वये कुण्डलयुग्मकम्॥ ३५॥
चक्राद्यस्त्राणि हस्तेषु श्रीवत्सं कौस्तुभं ततः। कुचोर्ध्वदेशतः कण्ठे वनमालां नितम्बके॥ ३६॥
पीताम्बरां महालक्ष्मीं वामाङ्के बीजपूर्विकाम्। अभ्यर्च्य कर्णिकामध्ये दिग्विदिक्ष्वङ्गदेवताः॥३७॥
तद्बहिश्चतुरो बाणान् दिक्षु कोणेषु पञ्चमम्। यजेदग्रादिपत्रेषु लक्ष्म्याद्याः प्रोक्तलक्षणाः॥ ३८॥
दिव्याम्बरानुलेपाद्यैर्भूषणाद्यैश्च भूषिताः। श्वेतचामरधारिण्यः कामार्ताः सस्मिताननाः॥ ३९॥
इन्द्रादीन् पूजयेद्बाह्ये वज्रादीन्यायुधानि च। एकाक्षरमनोरित्थं पूजा सम्यक् समीरिता॥ ४०॥

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि सम्मोहननारदाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये जगत्सम्मोहनाय कृष्णाय देवतायै नमः। गुह्ये कं बीजाय नमः। पादयोः ईं शक्तये

---

[1]. 'भासं' ख. पाठः। [2]. 'कामार्तमदनव्याप्त' ख. पाठः। [3]. 'ध्यायेत्' ख. पाठः।

नमः। (नाभौ लं कीलकाय नमः) इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, क्लांक्लीं इत्यादिना करयोः षडङ्गमन्त्रन्यासं कृत्वा (करयोः पञ्चाङ्गुलीषु पुरुषोत्तमप्रकरणोक्तान् पञ्चबाणान् विन्यस्य कामबीजपुटितमातृकान्यासं कृत्वा) पुनर्हृदयादिषु षडङ्गानि विन्यस्य, शिरोवदनहृदयलिङ्गपादेषु पञ्चबाणान्। विन्यस्य, ध्यानाद्यात्मपूजान्ते विंशत्यक्षरोक्तं यन्त्रं कृत्वा, पीठपूजादिपुष्पोपचारान्ते देवस्य देहे न्यासस्थानेषु षडङ्गानि पञ्चबाणांश्च सम्पूज्य, देवस्य शिरसि किरीटाय नमः। कर्णयोः कुण्डलाभ्यां नमः। चक्राय०। शङ्खाय०। अङ्कुशाय०। पाशाय०। पुष्पबाणेभ्यो०। इक्षुधनुषे०। पद्माय०। गदायै०, इति देवस्य हस्तेषु ध्यानोक्तक्रमेण सम्पूज्य, वक्षःस्थले श्रीवत्साय नमः। कौस्तुभाय कण्ठे वनमालायै०। नितम्बे पीताम्बराय०। वामाङ्गे श्रीलक्ष्म्यै०। कर्णिकायां देवाग्रादिचतुर्दिक्षु चतुष्कोणेषु षडङ्गानि सम्पूज्य, केसरेषु देवाग्रादिचतुर्दिक्षु बाणचतुष्टयं चतुष्कोणेषु पञ्चममिति पञ्चबाणान् सम्पूज्य, अष्टदलेषु लक्ष्म्याद्याः प्रागुक्ताः सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति। तथा—

एकाक्षरमनुं जप्याद् भानुलक्षं जितेन्द्रियः। पलाशकुसुमैः स्वादुत्रयाक्तैरर्चितेऽनले ।। ४१ ।।
हुनेद्रविसहस्राणि तोयैस्तावच्च तर्पयेत्। आत्माभिषेकं कृत्वाथ विप्रानभ्यर्च्य तोषयेत् ।। ४२ ।।
त्रैलोक्यमोहनं ङेन्तं प्रवदेद्विद्महे—पदम्। चतुर्थ्यन्तं स्मरं ब्रूयाद् धीमहि तदनन्तरम्।। ४३ ।।
तन्नो विष्णुरिति प्रोच्य ततो मन्त्री प्रचोदयात्। गायत्र्येषा जपात् पूर्वं जप्यात् पापविशुद्धये।।४४।।
जपपूजाहुताद्यैश्च लक्ष्मीवृद्धिकरी मता। शुद्ध्यर्थमेता मन्त्री पूजाद्रव्यादि सेचयेत्।। ४५ ।।
अनेन मनुना तोयैर्मोहिनीपुष्पसंयुतैः। दिनादावन्वहं मन्त्री तर्पयेद्यः शतं हि सः।। ४६ ।।
सर्वान् कामानवाप्नोति वाञ्छितान् यन्त्रवर्जितात्। अयुतं सर्पिषा हुत्वा ससम्पातं हुताशने।।४७।।
तावज्जप्तं च सम्पातघृतं स्वां भोजयेत् प्रियाम्। यस्तस्य वशगा सा स्यात् सोऽपीत्थं वशगो भवेत्।।४८।।
अष्टादशलिपिप्रोक्तं वश्यकर्मात्र साधयेत्। विधिनानेन यो मन्त्रं भजेदेनमनन्यधीः।। ४९ ।।
लोकत्रयं वशीकृत्य भोगान् भुक्त्वा मनोरमान्। स याति वैष्णवं धाम दाहप्रलयवर्जितम्।।५०।।

इति।। अथ काममन्त्रः, सारसङ्ग्रहे—(अयमेव प्रोक्तकृष्णैकाक्षरमन्त्रः)

अथायमेव कामस्य मनुरेकाक्षरो भवेत्। सम्मोहनो मुनिश्छन्दो गायत्रं देवता स्मरः।। १ ।।
अस्याङ्गानि स्वबीजेन दीर्घभाजा प्रकल्पयेत्।..।।

रक्तं रक्तविलेपनं सुरुचिरं रक्ताम्बरं बिभ्रतं
रत्नोद्यन्मुकुटादिभूषणगणैरादीप्तदेहं प्रभुम्।
पाशं साङ्कुशमिक्षुचापसुमनोबाणान् वहन्तं करैः
रक्ताम्भोजनिकेतनं मनसिजं देवं सदा भावयेत्।। २ ।।

वामाद्यूर्ध्वकरयोराद्ये। तदाद्यधःस्थयोरन्ये। इत्यायुधध्यानम्।

पीठे सम्पूज्येत् कामं सम्मोहिन्यादिशक्तिकम्। मोहिनी क्षोभिणी चैव त्रासिनी स्तम्भिनी तथा।।३।।
आकर्षिणी द्राविणी च ह्लादिनी तदनन्तरम्। क्लिन्ना स्यात् क्लेदिनी प्रोक्ता कामपीठस्य शक्तयः।।४।।
आसनं मनुना दद्यान्मूर्तिं मूलेन कल्पयेत्। तत्रावाह्य स्मरं भक्त्या पूजयेद्विधिनामुना।। ५ ।।

अङ्गानि पूर्वमाराध्य मध्ये दिक्षु शरान् न्यसेत्। उक्तबीजादिकानष्टदलेष्वर्च्या इमाः क्रमात्।। ६।।
प्रथमानङ्गरूपाख्याप्यनङ्गमदना ततः। अनङ्गमन्मथानङ्गसुमाह्वा परा मता।। ७।।
पञ्चमी च ततः प्रोक्ता ह्यनङ्गकुसुमातुरा। अनङ्गशिशिरा षष्ठी भूयश्चानङ्गमेखला।। ८।।
अनङ्गदीपिकाः सर्वाः पद्महस्ताः स्वलङ्कृताः। स्वरसंख्यदलेष्वर्च्या बहिस्तत्संख्यशक्तयः।। ९।।
युवतिः प्रथमा ज्ञेया विप्रलम्भा ततः परा। ज्योत्स्ना सुभ्रूस्ततश्चैव पञ्चमी च मदद्रवा।। १०।।
सुरतावारुणीसंज्ञे लोकालीले परे मते। सौदामिनी ततः कामच्छत्राख्या चन्द्रलेखया।। ११।।
शुकी मदनया युक्ता योनिर्मायावती ततः। कह्लारहस्ताः कामार्ता तरुण्यः सस्मिताननाः।। १२।।
पत्राग्रेषु ततोऽभ्यर्च्याः कामस्य परिचारकाः। शोकमोहौ विलासाख्यो विभ्रमो मदनातुरः।। १३।।
अपत्रपयुवानौ च चन्दनस्तदनन्तरम्। चूतपुष्पाह्वयश्चैव ज्ञातव्योऽयं रतिप्रियः ।। १४।।
ग्रीष्माभिधस्तापनाख्योऽप्यूर्जो हेमन्तसंज्ञकः। शिशिराख्यो मदः पुष्पबाणेक्षुजधनुर्धराः।। १५।।
पृष्ठतोऽर्पिततूणीराः शोणाः स्त्रीसक्तमानसाः। तद्बहिः पूजयेदष्टौ दिक्क्रमेण रतिप्रियान्।। १६।।
परभृत्सारसाख्यौ तु शुको मेघस्ततः परम्। अपाङ्गो भ्रूविलासश्च हावो भावो रतिप्रियाः।। १७।।
भूगृहस्य च कोणेषु चतस्रः पूजयेदिमाः। माधवाख्या मालती च हरिणाक्षी मदोत्कटा।। १८।।
श्वेतचामरसद्धस्ताः श्यामा भूषितविग्रहाः। इन्द्रादींश्च ततो बाह्ये वज्रादीन्यपि पूजयेत्।। १९।।
एवमाराधयेद्यस्तु गन्धपुष्पादिभिः स्मरम्। सौभाग्यमतुलं कामान् महालक्ष्मीं स विन्दति।। २०।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि सम्मोहनाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीकामाय देवतायै नमः। प्राग्बीजशक्त्यादि विन्यस्य विनियोगः। क्लांक्लीं इत्यादिना प्राग्वत् करषडङ्गन्यासं कृत्वा ध्यानादिपरतत्त्वार्चान्ते अष्टदलकेसरेषु—मोहिन्यै नमः। क्षोभिण्यै०। त्रासिन्यै०। स्तम्भिन्यै०। आकर्षिण्यै०। द्राविण्यै०। आह्लादिन्यै०। क्लिन्नायै०। क्लेदिन्यै भमः। इति स्वाग्रादिमध्यान्तं सम्पूज्य, क्लींसर्वशक्तिकमलासनाय नमः। इत्यासनं समस्तं पीठे सम्पूज्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, कर्णिकायां मध्ये चतुर्दिक्षु च बाणान् प्राग्वत् सम्पूज्याष्टदलेषु—अनङ्गरूपायै नमः। अनङ्गमेखलायै०। अनङ्गतन्मथायै०। अनङ्गकुसुमायै०। अनङ्गकुसुमातुरायै०। अनङ्गशिशिरायै०। अनङ्गमेखलायै०। अनङ्गदीपिकायै नमः। इति सम्पूज्य, बहिःषोडशदलेषु— युवत्यै नमः। विप्रलम्भायै०। ज्योत्स्नायै०। सुभ्रुवे०। मदद्रवायै०। सुरतायै०। वारुण्यै०। लोकायै०। लीलायै०। सौदामिन्यै०। कामच्छत्रायै०। चन्द्रलेखायै०। शुक्यै०। मदनायै०। योन्यै०। मायावत्यै नमः। इति प्रादक्षिण्येन देवाग्रादितः सम्पूज्य, षोडशदलाग्रेषु—शोकाय नमः। मोहाय०। विलासाय०। विभ्रमाय०। मदनातुराय०। अपत्रपाय०। यूने०। चन्दनाय०। चूतपुष्पाय०। रतिप्रियाय०। ग्रीष्माय०। तापनाय०। ऊर्जाय०। हेमन्ताय०। शिशिराय०। मदाय[1] नमः। इति सम्पूज्य, चतुरस्रस्याष्टदिक्षु देवाग्रात् प्रादक्षिण्येन—परभृते नमः। सारसाय०। शुकाय०। मेघाय०। अपाङ्गाय०। भ्रूविलासाय०। हावाय०। भावाय नमः। इति सम्पूज्य, चतुरस्रचतुष्कोणेषु आग्नेयादि माधव्यै नमः। मालत्यै०। हिरण्याक्ष्यै०। मदोत्कटायै नमः। इति सम्पूज्य बहिर्लोकपालार्चादि सर्वं समापयेदिति। तथा—

---

१. 'मदनाय' ग. पाठः।

सञ्चिन्त्यैनं जपेन्मन्त्रं राशिलक्षं विधानत:। तद्दशांशं त्रिमध्वक्तै: किंशुकप्रसवैर्हुनेत्।। २१।।
तर्पणं मार्जनं कृत्वा ब्राह्मणानपि भोजयेत्। ततोऽभ्यर्च्य गुरुं वित्तै: प्रणम्य परितोषयेत्।। २२।।
(एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत् तत:। अशोककुसुमै: स्वादुत्रयाक्तैस्त्रिदिनं हुनेत्)।। २३।।
अष्टाधिकं सहस्रं य: सर्वेषां स प्रियो भवेत्। गोघृतेन ससम्पातमष्टोत्तरशतं हुनेत्।। २४।।
सम्यक्सम्पूजिते वह्नौ मन्त्रेणानेन मन्त्रवित्। सम्पातसर्पिषा तेन नारीं स्वां भोजयेत् प्रियाम्।।२५।।
आज्ञानुवर्तिनी सास्य भवेज्जन्मान्तरेऽपि च। दध्यक्तलाजाहोमेन प्रत्यहं मण्डलावधि।। २६।।
वाञ्छितां लभते मन्त्री कन्यां सापि प्रियं पतिम्।..।।

षट्कोणे मदनं ससाध्यमथ तत्कोणेषु चाङ्गं बहि-
र्गायत्र्या गुणशो विभज्य विलिखेद् वर्णान् दलेष्वष्टसु।
तेषामग्रगतांश्च तर्कसमितान् मालाणुवर्णांस्तथा
भूगेहाश्रिषु मन्मथेन लसितं यन्त्रं शुभां मान्मथम्।। २७।।

पूजितं धारितं ह्येतल्लोकत्रयवशीकरम्.....................................।।

अस्यार्थ:— षट्कोणगर्भमष्टदलकमलं कृत्वा, षट्कोणमध्ये ससाध्यं कामबीजं विलिख्य, कोणेषु षडङ्गमन्त्रानष्टदलेषु पूर्वोक्तकामगायत्र्या वर्णत्रयं त्रयं प्रतिदले प्रविलिख्य, दलाग्रेषु पूर्वोक्तकाममालामन्त्रस्य षट्षड्वर्णान् विभज्य विलिख्य बहिश्चतुरस्रकोणेषु कामबीजं विलिखेत्। एतदुक्तफलदं भवति। तथा—

साध्याख्यार्णपुटीकृतैस्तु मदनै: कामं लिखेद् वेष्टितं
मध्ये मारविसर्गपक्षलिपिभिर्ऋद्ध्या सगान्तार्णया।
षष्ठैकादशषट्त्रिभिश्च लसितैरष्टच्छदैरम्बुजं
दिक्शूलाढ्य[1]मिदं मनोहरतरे ताम्बूलपत्रे कृतम्।। २८।।

यन्त्रमेतद्विधानेन पूजितं स्थापितानिलम्। मूलमन्त्रेण सञ्जप्तं नारीं यां खादयेन्निशि।। २९।।
मन्त्री सा तद्वशे तिष्ठेद्यावज्जीवं न संशय:।......................................।।

इति। अस्यार्थ:— अष्टदलकमलं सुगन्धिद्रव्यैर्नागवल्लीदले कृत्वा तत्कर्णिकायां साध्यनामाक्षरसम्पुटितै: कामबीजैर्वेष्टितं कामबीजं विलिख्य, पूर्वादिदलेषु— ॐ अ:आढघऊएख इत्यष्टौ वर्णानिकैकशो विलिख्य दिग्दलाग्रेषु त्रिशूलं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति। इति। केरलीये यन्त्रसारे—

मदनभासितमध्यमथेन्द्रियच्छदविराजितपञ्चमनोभवम्
स्मरशरैर्लिपिभिश्च समावृतं कुगृहकोणविराजितमन्मथम्।। १।।
लिखतु पञ्चमनोभवयन्त्रमित्युदितमेतदशेषसमृद्धिदम्।
कनकनिर्मितपट्टतले तत: शुभतरे दिवसे विधृतं द्रुतम्।। २।।
सकलमानवसिद्धसुराङ्गनाहृदयरञ्जनमीप्सितसिद्धिदम्।

---

[1] 'शूलाग्रं' ख. पाठ:।

रुचकपूर्वविभूषणमध्यगं विदधती वनिताप्यखिलान्नरान्।। ३।।
निजवशे प्रविधाय रमां परां समधिगम्य सुतैः सह मोदते।
इति विलिख्य च कुङ्कुमकर्दमे तदनुलिप्ततनोः सकलं जगत्।। ४।।
वशमुपैति निरीक्षणमात्रतः किमुत सान्त्वसहासनसङ्गमैः।

इति।। अस्यार्थः— पञ्चदलकमलकर्णिकायां ससाध्यं कामबीजं विलिख्य, दलेषु ऐंह्रींक्लींब्लूंस्त्रीं इति पञ्चकाममन्त्रान् प्रतिदलमेकमेकं विलिख्य, बहिर्वृत्तत्रयं कृत्वा तदन्तरालयोरभ्यन्तराले पूर्वोक्तकामबीजैरावेष्ट्य, बाह्यान्तराले मातृकया, संवेष्ट्य बहिश्चतुरस्रकोणेषु कामबीजं प्रतिकोणं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। अथ प्रणवस्य मन्त्रः। सारसङ्ग्रहे—

अथ सम्यक् प्रवक्ष्यामि प्रणवाख्यं महामनुम्। पापौघध्वंसनं नानाकामकल्पमहीरुहम्।। १।।
निःश्रेयसकरं नृणां मुनिवृन्दैस्तु सेवितम्। केशवो विष्णुतन्द्रे च बिन्दुः प्रोक्तो ध्रुवाभिधः।। २।।

केशवः अ। विष्णुः उ। तन्द्रा म। बिन्दुरनुस्वारः। एतैः प्रणवः सिद्धः। तथा—

मन्त्रस्त्रिमात्रकः प्रोक्तो मुनिर्ज्ञेयः प्रजापतिः। छन्दस्तु देवीगायत्री परमात्मा च देवता।। ३।।

दक्षिणामूर्तिः— "बीजं शक्तिस्त्वनुक्रमात्। मकारं कीलक"मिति।। तथा—

ह्रस्वदीर्घस्वरान्तस्थैः षडङ्गानि ध्रुवैर्विदुः। षड्भिर्व्याहृतिभिः सम्यक् सत्यहीनाभिरेव च।। ४।।
निर्मलाङ्गश्रियं विष्णुं पीतकौशेयवाससम्। सर्वतो भासमानेन तेजसा भास्करद्युतिम्[1]।। ५।।
किरीटाङ्गदहाराख्यरशनानूपुरादिभिः। ग्रैवेयकङ्कणाद्यैश्च भूषणैर्भूषिताङ्गकम्।। ६।।
चक्रशङ्खाम्बुजगदा धारयन्तं कराम्बुजैः। कौस्तुभप्रभया दीप्तं मणिकुण्डलमण्डितम्।। ७।।
भजेऽहं सर्वसम्पत्त्यै प्रफुल्लाम्बुजसंस्थितम्।..।।

वामाधःकरमारभ्य दक्षिणाधःकरपर्यन्तमायुधध्यानम्।

सम्पूज्य वैष्णवं पीठं तत्रावाह्य यजेद्धरिम्। केसरेष्वङ्गपूजा स्याद् दिक्पत्रेषु यजेदिमान्।। ८।।
वासुदेवं सङ्कर्षणं प्रद्युम्नमनिरुद्धकम्। शान्तिं श्रियं सरस्वत्या रतिं कोणदलेषु च।। ९।।
दिक्पत्राग्रेषु चात्मानमन्तरात्मानमप्यथ। परमाद्यं तथात्मानं ज्ञानात्मानं च पूजयेत्।। १०।।
कोणपत्राग्रगाः पूज्या निवृत्त्याद्याः पुरोदिताः। तद्बाह्ये शक्रमुख्यानां वज्रादीनां च पूजनम्।। ११।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीछन्दसे नमः। हृदये परमात्मने देवतायै नमः। गुह्ये अंबीजाय नमः। पादयोः उं शक्तये नमः। नाभौ मं कीलकाय नमः। इति विन्यस्य, मम मोक्षार्थे विनियोगः इति कृताञ्जलिरुक्त्वा, अंओंआं हृदयाय नमः। इंओंईं शिरसे स्वाहा। उंओंऊं शिखायै वषट्। एंओंऐं कवचाय हुं। ओंओंऔं नेत्रत्रयाय वौषट्। अंओंअः अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गपूजान्ते दिक्पत्रेषु—प्रागादि वासुदेवादीन् सशक्तिकान् सम्पूज्य, दलाग्रेषु— दिक्क्रमेण आत्मादीन् सशक्तिकानभ्यर्च्य लोकपालार्चादि सर्वं समापयेदिति। तथा—

---

[1] 'प्रभं' ख. पाठः।

सन्दीक्षितो विधानेन कोटिसंख्यं जपेन्मनुम्। हविषा घृतसिक्तेन दशांशं जुहूयात् ततः।। १२।।
समिद्वरैः पलाशोत्थैराज्याक्तैरथवानले । तर्पयित्वा तद्दशांशं शुद्धतौयैर्यथाविधि ।। १३।।
आत्माभिषेचनं कृत्वा ब्राह्मणान् भोजयेत् ततः। गुरुमभ्यर्च्य वित्ताद्यैः प्रणम्य परितोषयेत्।। १४।।
एवं सिद्धमनुर्मन्त्री कृतकृत्यो न संशयः। घृतं हविष्यं शालींश्च तिलांश्च समिधोऽमृतम्।। १५।।
क्रमेण जुहुयाद्यस्तु मन्त्रेणानेन मन्त्रवित्। अभीष्टसिद्धिस्तस्य स्यादिह लोके परत्र च।। १६।।
इत्थं मन्त्रवरं जपार्चनहुतैर्यः[1] सेवते साधकः
सद्भक्त्या प्रणवं निराकुलमतिर्विध्वस्तपापव्रजः।
पत्नीपुत्रविशिष्टमित्रसहितः सत्सम्पदा संयुतो
लोकेऽस्मिन् पुनरप्यवाप्तविमलज्ञानो व्रजेत् सद्गतिम्।। १७।।

इति श्रीकृष्णप्रकरणम्।। अथ कार्तवीर्यमन्त्राः– उड्डामरेश्वरतन्त्रे, देव्युवाच–

देवदेव महादेव देवारिबलसूदन। देववर्द्धन देवेन्द्रवन्दितेन्दुशिखामणे।। १।।
पृच्छे भवन्तं भगवान्[2] कार्तवीर्यस्य भूपतेः। माहाम्त्यं मन्त्रराजस्य विस्तरेण ब्रवीतु मे।। २।।
कार्तवीर्यमनोर्देव विधानं वक्तुमर्हसि। सरहस्यं महापुण्यं श्रोतुमिच्छामि तत्त्वतः।। ३।।

ईश्वर उवाच–

शृणु देवि महामन्त्रं विस्तरेणाखिलार्थदम्। चौरमारीविपक्षाणां विशेषेणापकृन्तनम् ।। ४।।
महद्वश्यकरं शीघ्रं राज्ञां विजयवर्धनम्। भजतां सर्वपापघ्नं सर्वसौख्यकरं परम्।। ५।।
सर्वसम्पत्करं मन्त्रमुद्धरिष्येऽधुना प्रिये। इन्दो रुद्रार्णरूढोऽग्निः सतारोऽर्धेन्दुनादयुक्।। ६।।
तन्मन्त्रबीजं मुनिभिर्गदितं क्षोभकारकम्। तस्य साग्नेर्महामायाबिन्दुनादैश्च सङ्गमम्।। ७।।
इच्छन्त्येके महात्मानो लोक[3]वश्याभिकाङ्क्षिणः। तस्य साग्नेर्नादबिन्दुयुक्तस्य परमेश्वरि।। ८।।
इच्छन्त्यन्ये महात्मानो भौतिकेन समागमम्। (तस्य साग्नेर्भौतिकार्धचन्द्रेण च समागमम्।। ९।।
इच्छन्त्यन्ये सुवाक्सिद्धिकामा देवि महर्षयः)। इत्थं स्वरुच्या तद्बीजं समुद्धृत्य च मानवः।।१०।।
द्वितीयमुद्धरेद्बीजं सर्वशत्रुविनाशनम्। द्वितीयबीजं वक्ष्यामि प्रतिलोमेन सुन्दरि।। ११।।
सूर्या[4]द्विंशतिवर्णस्तु तत्तृतीयं त्रिमूर्तिना। संयुक्तं चार्धशशिना नादेन च पुनः प्रिये।। १२।।
सेन्द्रं षष्ठं द्वितीयात्तु प्रतिलोमेन मायया। नादेन बिन्दुना युक्तं तृतीयं लोकवश्यदम्।। १३।।
तृतीयं प्रथमात् तस्मात् चतुर्थेन चतुर्थकम्। वामकर्णेन्दुनादेन प्रोक्तं संस्तम्भनं क्षणात्।। १४।।
मुखवृत्तं बिन्दुनादसंयुक्तं[5] परमेश्वरि। पञ्चमं च महाबीजं क्षणादाकृष्टिकारकम् ।। १५।।
व्योमार्धेन्द्वग्निदेव्या च युक्तं षष्ठं समीरितम्[6]। उद्धरेत् सप्तमं चक्रों बिन्दूत्थं बिन्दुवह्निना[7]।।१६।।

---

[1] 'संसेवते' ख. पाठः। [2] 'भगवन्' क.ग.पाठः। [3] 'चौराकर्षणकांक्षिणः' ख. पाठः। [4] 'सूर्याद्विंशतिवर्णैश्च वह्निदेव्यर्धचन्द्रकैः। विदितं चोद्धरिष्यामि तृतीयं बीजमुत्तमम् ख. पाठः। [5] 'संसक्तं' क.ग.पाठः। [6] 'समीरयेत्' ग.पाठः। [7] 'बिन्दुनादिना' ख. पाठः।

करणेन च संयुक्तमष्टमं मुनिभिः स्मृतम्। हुंफट् च कार्तवीर्यार्जुनायेत्युक्त्वा नतिं वदेत्।। १७।।
विंशत्यर्णः स्मृतो मन्त्रस्तारादिर्मुनिभिः स्मृतः। एकोनविंशत्यर्णः स्याद्वितारो यदि भाव्यते।।१८।।
कार्तवीर्यार्जुनस्यैतन्महासामर्थ्यदं प्रिये।..।।

इति।। अग्नी रेफः, स इन्दोः ठकाराद्यो रुद्रार्ण एकादशोऽर्णः फकारस्तेनारूढः। यद्वा, पुरस्तात् प्रतिलोमेनेति स्वयमुक्तत्वादत्राप्यध्याहारः। इन्दुः सकारस्तस्माद्वा प्रतिलोमेनैकादशार्णः फकारः। सतार ओकारयुक्तः। अत्र तारशब्देन केवलस्त्रयोदशस्वर उच्यते। अर्धेन्दुनादयुगिति स्वयमुक्तत्वात्। अर्धेन्दुरर्धचन्द्रः। नादो बिन्दुः। एतस्यैव भेदमाह, तस्येति—अत्र तच्छब्देन फकारो गृह्यते साग्नेरिति स्वयमुक्तत्वात्। महामाया ईकारः। तेन तद्बीजस्थं त्रयोदशस्वरमपास्य तत्स्थाने ईकारो योजनीय इत्यर्थः। पुनः प्रकारान्तरमाह—भौतिक ऐकारः, इकारास्थाने ऐकारो योजनीय इत्यर्थः। द्वितीयमिति—सूर्यान्मकारात् प्रतिलोमेन विलोमेन विंशतितमो वर्णश्चकारः। तत्तृतीयं मात्तृतीयमक्षरमनुलोमेन रेफः। त्रिमूर्तिरीकारः। अर्धशशिना इत्यादि. प्राग्वत्। तेन च्रीं इति सिद्धम्। द्वितीयाद् द्वितीयबीजाक्षराच्चकारात् प्रतिलोमेन षष्ठमक्षरं ककारस्तत् सेन्द्रं लकारसहितं, मायया ईकारेण, नादेन बिन्दुना च युक्तमेतेन कामबीजमुक्तम्। प्रथमात् प्रथमबीजात् फकारात् तृतीयं भकारः। तस्माद्भकाराच्चतुर्थेन रेफेण वामकर्णेन ऊकारेण नादेन बिन्दुना च युक्तं, तेन भ्रूं इति जातं। सुखवृत्तमाकारो बिन्द्वादि प्राग्वत्, तेन आं इति। व्योम हकारः, अग्नी रेफः, देवी ईकारः, अर्धेन्द्वादि प्राग्वत् तेन मायाबीजमुद्धृतम्। क्रों स्वरूपम्। बिन्दुः रेतस्तदुत्थमस्थि तस्य रेतोंऽशत्वात्। तथा च श्रुतिः—"अस्थिस्नायुमज्जानः पितृतः इति।" तेन, तद्वाचकमक्षरं शकारो गृह्यते। वह्नी रेफः। करणेन चतुर्थस्वरेण ईकारेण युक्तः। बिन्दुनादौ प्राग्वत्, तेन श्रीं इत्युद्धृतं। हुंफट् स्वरूपं। कार्तवीर्यार्जुनाय स्वरूपं। नतिर्नमः। तथा—

मन्त्रस्यास्य पुरा प्रोक्तो मुनिभिर्मुनिरम्बिके। दत्तात्रेय ऋषिश्छन्दोऽनुष्टबस्य मनोः स्मृतम्।। २०।।
देवता चार्जुनो नाम कार्तवीर्यपदादिकः। मूलबीजैः स्वरारूढैः कुर्यात् पञ्चाङ्गकं सुधीः।। २१।।

द्वाभ्यां द्वितीयस्वरसंयुताभ्यां द्वाभ्यां तुरीयस्वरसंयुताभ्याम्।
द्वाभ्यां च षष्ठस्वरसंयुताभ्यां द्वाभ्यां तथा द्वादशसंयुताभ्याम्।। २२।।
द्वाभ्यां च वर्मास्त्रपदाक्षराभ्यामङ्गानि कृत्वाप्यवशिष्टवर्णैः।
संव्यापयेदात्मनि संयतात्मा कार्ताक्षराद्यैर्नवभिर्ध्रुवाद्यैः ।। २३।।

द्वितीयस्वरः आ। तुरीयस्वरः ई। षष्ठस्वरः ऊ। द्वादशस्वरः ऐ। एतदारूढैरित्यर्थः। तथा—

हृदुदरनाभिजघनगुह्यपदद्वयसोरुजानुजङ्घाख्ये। मूर्धनि तुङ्ग*भ्रूश्रुतिलोचननासास्यकण्ठबाहौ च।।२४।।
दशबीजानि प्रणवद्वयमध्यस्थानि प्रविन्यसेच्छिष्टान्। बिन्द्वन्तिकान् ध्रुवादीनुक्त[1]स्थानेषु प्रविन्यसेदेवम्।।२५।।
ध्यायेच्च मन्त्रमूर्तिं स्वात्मैक्येनादरात् समाहितधीः। रक्षायै च भयेभ्यो वाञ्छितसिद्ध्यै धनाप्तये सुचिरम्।।

अव्यात् सर्वभयात् प्रका[2]शिततनुः प्रद्योतनोद्द्योतितः
स्वर्णस्रक्परिवीतकन्धरधरो रक्तांशुकोष्णीषवान् ।

---

* तुङ्गे शिखायामित्यर्थः। १. 'मन्त्रस्थाने स्वतनौ प्रविन्यसेदेवम्' ख. पाठः। २. 'प्रभाकरतनुः' ख. पाठः।

नानाकल्पविभूषित: करसहस्रार्धात्तबाणासनो
बाणात्तार्धसहस्रबाहुरनिशं भूवल्लभो न: प्रभु:।। २७।।
सप्तद्वीपैकनाथ: सवितृसमरुचि: सर्वदुष्टान्तको न:
पायादब्जायताक्षो रथवरनिलय: स्थूलकायोऽतिभीम:।
चापान्तेषु त्रिलोकीं करधृतधनुषां निस्वनैस्त्रासयन् य:
स श्रीमान् कार्तवीर्यो निलिखनृपनताङ्घ्र्यम्बुज: क्षिप्रकारी।। २८।।
एवं स्मरेन्नित्यमतीव भक्त्या समर्चयेद् हैहयवंशनाथम्।
गन्धादिभिर्वैष्णवपीठमध्ये स्वीयाङ्ग[१]मूर्त्यष्टकशक्तियुक्तम्।। २९।।
तस्याङ्गमूर्तय: पञ्च स्फटिकाभा मनोरमा:[२]। खड्गचर्मधरा वीरा: सर्वाभरणभूषिता:।।३०।।
बाणबाणासनधरा मूर्तयो रक्तरोचिष:। सर्वाभरणसंयुक्ता ध्येया: सर्वसमृद्धये।। ३१।।
चौरमार्यरिसुरारिपदाद्यान् दिक्षु तन्मदविभञ्जनकाख्यान्।
दुष्टदु:खदुरितामयाद्यानाह्वयानभियजेच्च विदिक्षु ।। ३२।।
क्षेमङ्करी वश्यकरी श्रीकरी च यशस्करी। आयुष्करी तथा प्रज्ञाकरी विद्याकरी तथा।। ३३।।
धनङ्करी च पूर्वादिदिक्षु पूज्या: सितप्रभा:।..।।
वरदाम्बुजलसत्करा रक्तांशुकहारकुण्डलोल्लसिता:।
हैहयनाथमनोज्ञा ध्येया: सौन्दर्यललिता: प्रमदा:।। ३४।।
लोकेशाद्या बहि: पूज्या गन्धपुष्पाक्षतादिभि:। षोडशैरुपचारैस्तु पूजयेद्यो दिने दिने।। ३५।।
कार्तवीर्यं महाबीर्यं परिचारप्रियं प्रभूम्। सर्वान् कामानवाप्येह प्राप्यते हरिमन्दिरम्।। ३६।।
एवं य: पूजयित्वा दिनमनु विधिनैवामुना मन्त्रमुख्यं
जप्याद्भक्त्या स विन्द्याद् बलधनवसुशौर्यायुरारोग्यविद्या:।
श्रीमेधाकान्तिपुष्टीर्धृतिमतिवचसां भाजनं स्यान्नरेन्द्रै-
र्नारीभि: पूजित: स्यादनुगतभुवनश्चाप्रधृष्यश्च लोकै:।। ३७।।

इति।। अथ प्रयोग:– तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि दत्तात्रेयऋषये नम:। मुखे अनुष्टुप्छन्दसे नम:। हृदये श्रीकार्तवीर्यार्जुनाय देवतायै नम:। इति विन्यस्य, मम सर्वाभीष्टसिद्धये जपे विनियोग: इति कृताञ्जलिरुक्त्वा, मूलमन्त्रेण करयोर्व्यापकं विन्यस्य, फ्रांघ्रां हृदयाय नम:। क्लींभ्रीं शिरसे स्वाहा। ऊंह्रूं शिखायै वषट्। क्रैंश्रैं कवचाय हुं। हुंफट् अस्त्राय फट्।। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिकनिष्ठान्तास्वङ्गुलीषु विन्यस्य, नेत्ररहितेषु हृदयाद्यस्त्रान्तेषु पञ्चाङ्गेषु च विन्यस्य, ओंकार्तवीर्यार्जुनाय नम: इति सर्वाङ्गे व्यापकं कृत्वा, हृदये ओंफ्रोंओं नम:। उदरे ओंघ्रींओं०। नाभौ ओंक्लींओं०। जघने ओंभ्रूंओं०। गुह्ये ओंआंओं०। पादयो: ओंह्रींओं०। ऊर्वो: ओंक्रोंओं०। जानुनो: ओंश्रींओं०। जङ्घयो: ओंहुंओं०। मूर्ध्नि ओंफट्ओं०। शिखायां ओंकां नम:। भ्रूमध्ये ओंर्तं नम:। श्रुत्यो: ओंवीं०।

---

१. 'स्वाष्टाङ्ग' ग. 'स्वीयाष्ट' ख. पाठ:। २. 'मनोहरा' ख. पाठ:।

नेत्रयोः ॐर्यां नमः। नासायां ॐर्जुं नमः। मुखे ॐनां नमः। कण्ठे ॐयं नमः। दक्षबाहौ ॐनं नमः। वामबाहौ ॐमं नमः। इति विन्यस्य, ध्यानाद्यात्मपूजान्ते प्रागुक्तं वैष्णवं पीठमभ्यर्च्य, तत्र देवमावाह्याङ्गार्चान्तं प्राग्वत् कृत्वाष्टदलेषु देवाग्रादिप्रादक्षिण्येन दिग्दलेषु—चौरमदविभञ्जनाय नमः। मारीमदविभञ्जनाय०। अरिमदविभञ्जनाय०। सुरारिमदविभञ्जनाय०। विदिग्दलेषु—दुष्टमदविभञ्जनाय०। दुःखमदविभञ्जनाय०। दुरितमदविभञ्जनाय०। आमयमदविभञ्जनाय०। इति सम्पूज्य, दलाग्रेषु— ॐक्षेमङ्कर्य्यै नमः। वश्यकर्य्यै०। श्रीकर्य्यै०। यशस्कर्य्यै०। आयुष्कर्य्यै०। प्रज्ञाकर्य्यै०। विद्याकर्य्यै०। धनकर्य्यै०। इति देवाग्रादिप्रादक्षिण्येन सम्पूज्य, तद्बहिश्चतुरस्रे प्राग्वल्लोकपालांस्तदस्त्राणि च सम्पूज्य धूपदीपादिसर्वं प्राग्वत् कुर्यादिति। तथा—

इत्थं ध्यात्वा मन्त्रवर्य्यं प्रजप्य लक्षावृत्त्या मन्त्रवित् प्राप्तदीक्षः।
नद्यास्तीरे गुर्वनुज्ञापूर्वं पश्चात् कुर्याच्चोरपीडाप्रयोगान्।। ३८।।
कुम्भोदकासिक्ततनुः प्रजप्य मन्त्रेण होमं प्रकरोति मन्त्री।
पयोन्धसाग्नौ तिलतण्डुलैर्वा दशांशमानं सघृतैश्च मन्त्री।। ३९।।

इति। एष लक्षजपः कृतयुगपरः। कलावेतच्चतुर्गुणजपः कार्यः। इति प्राग्वत्तर्पणं यथावत्कुर्यादिति। तथा—

(एवं सिद्धमनुर्नरः सुविहितान् कुर्यात् प्रयोगान् प्रिये)
वश्यादीन् विधिवद्विशिष्टचरितश्चौरापहत्यै भृशम्।
दुष्टानामपि वक्ष्यमाणविधिना मन्त्रैर्हुतैस्तर्पणै—
र्ध्यानैर्मन्त्रविशेषकैश्च मतिमान् गुर्वाज्ञया तत्परः।। ४०।।

लिखेदष्टदलं पद्मं कर्णिकाकेसरोज्ज्वलम्। वृत्तं बहिर्भूपुराढ्यं वज्राष्टकविभूषितम् ।। ४१।।
तद्बीजं कर्णिकामध्ये साध्याख्याकर्मसंयुतम्। लिखेत् समीरबीजं च सहतारगतं प्रिये।। ४२।।
सवाग्भवं च पूर्वादिपत्रेषु विलिखेत्ततः। सवर्मान्तानि बीजानि शिष्टार्णानन्तरालके[1] ।। ४३।।
केसरेषु स्वरानूष्मवर्णयुक्तान् समर्पयेत्। वृत्तं प्रवेष्टयेद्वर्णैः कादिभिश्चोष्मवर्जितैः ।। ४३।।
भूमिकोणचतुष्केऽथ भूतवर्णान् समर्पयेत्। संस्थाप्य विधिवत् प्राज्ञः कलशं सम्यगर्चयेत्।। ४५।।
तोयाभिषेकः कर्तव्यो नृणामीहितसिद्धये। वन्ध्याया पुत्रसम्प्राप्त्यै दीक्षायै (यशसे) चायुषे तथा।।४६।।
धनार्थं रोगनाशाय चोरशान्त्यै विशेषतः। वश्याय च हितार्थं वाक्[2]सिद्ध्यै बाणिज्यसिद्धये।।४७।।
तद्यन्त्रारूढकुम्भाम्बुनाभिषिक्तस्य सुन्दरि। किं न सिध्यति लोकेऽस्मिन् कामिनां मनसेप्सितम्।।४८।।
तद्यन्त्रस्थापनाद्राज्यं ग्रामं पुरमथापि वा। रक्षयेच्चाभितोऽरिभ्यो मन्त्रः रोगविषादितः।। ४९।।
(सर्वभूतादिसन्त्रासकृदेतन्नगनन्दिनि।) न प्रकाश्यं हि मूर्खाय स्तेनाय पिशुनाय च।। ५०।।
गुरुप्रियाय धीराय दक्षाय शुद्ध[3]चेतसे । ईर्ष्याद्वेषविहीनाय देयं स्वाचारशालिने।। ५१।।
हिंसारतान् दुष्टचितान् द्वेषयेच्च परस्परम्। कर्षयेद्भ्रामयेच्चौरान् दमयेच्च ज्वरादिकान्।। ५२।।

---

[1] 'लिखेत्' ख. पाठः। [2] 'च विशो वाणिज्य' ख. पाठः। [3] 'महते तथा। प्रकाश्यमेतद्यन्त्रं हि मन्त्रं च परमेश्वरि। मोहयेद् क्षोभयेन्मन्त्री मारयेच्चाटयेदरीन्। एतेन वशयेत् क्षिप्रं देषयेच्च परस्परम्' ख. पाठोऽधिकः।

तत्तद्बीजार्पणाद् देवि क्षिप्रं सिध्यन्ति मन्त्रिणः। बहुनोक्तेन किं देवि मन्त्रोऽयमखिलार्थदः।। ५३।।

इति।। अस्यार्थः— यथोक्तलक्षणमष्टदलकमलं कृत्वा, तद्बहिर्वृत्तं तद्बहिरष्टवज्रयुक्तं चतुरस्रं च कृत्वा, तत्कर्णिकायां ससाध्यं कार्तवीर्यबीजं यमिति वायुबीजं वाग्भवं च प्रणवोदरे विलिख्य, तत्केसरेषु द्वन्द्वशः स्वरान् शषसह इति वर्णांश्चैकैकशो द्विरावृत्त्या, विलिख्य, पूर्वादिदलेषु द्वितीयबीजादिहुंबीजान्तानि अष्टौ बीजानि प्रतिदलमेकैकशो विलिख्य, अन्तिमदल एव फट्कारं (विलिख्यावशिष्टानवान्तराले विलिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तद)न्तरालवीथ्यां ककारादिक्षकारान्तैः शषसहवर्जितैरावेष्ट्य, चतुरस्रस्य कोणचतुष्टये तत्तत्कार्योपयोगिनो भूतवर्णान् दश दश विलिख्य, तत्र दीक्षोक्तविधिना कुम्भं संस्थाप्य, तत्र देवमावाह्य साङ्गं सावरणं सम्पूज्य, मूलमष्टोत्तरसहस्रं तत्कुम्भं स्पृशञ्जपित्वा तत्कुम्भजलेनाभिषेकादुक्तफलसिद्धिर्भवतीति।। भूतवर्णास्तु—शान्तौ (ऋॠओघझढधभवस इति जलवर्णा दश लेख्याः। वश्याकर्षणे तु इईएखछठथफरक्ष इत्यग्निवर्णा दश लेख्याः। स्तम्भने उऊओगजडदबलळ इति भूमिवर्णा दश लेख्याः। उच्चाटने अआऐकचटपतयष इति वायुवर्णा) दश लेख्याः। विद्वेषणमारणयोः ऌॡअंङञणनमशह इत्याकाशवर्णा दश लेख्या इति। (अत्र भूतवर्णलेखनप्रकारस्तु आग्नेयकोणादारभ्य प्रादक्षिण्येन चतुर्षु कोणेषु द्वित्रिक्रमेण विभज्य दशवर्णांल्लिखेदिति सम्प्रदायः)। तथा—

कृतवीर्यात्मजस्याथ मन्त्रभेदान् हि मन्त्रिणः। हिताय देवि वक्ष्यामि दशधैकोऽपि विद्यते।। ५४।।
कार्तवीर्यस्य मन्त्राणामृषिरेकः स्मृतः पुरा। दत्तात्रेयो महाप्राज्ञः साक्षान्नारायणांशजः।। ५५।।
देवता च स्वयं प्रोक्तो मन्त्रभेदेषु सुन्दरि। असौ चक्रहरेरंशादुत्पन्नो हैहयान्वये ।। ५६।।
आज्ञया देवदेवस्य सर्वदुष्टप्रशान्तये। यस्मिन् गर्जति दैत्येन्द्रस्त्रीणां गर्भा बलाद्ध्रुशम्।। ५७।।
प्रच्यवन्ति स चक्राख्यो हरिरासीत् क्षितौ स्वयम्। कृतवीर्यस्य भार्यायां माहिष्मत्यां पुरोत्तमे।।५८।।
रेवातीरे समुत्पन्नो नाम्नार्जुन इतीरितः। दत्तात्रेयात् प्राप्तविद्यस्तत्प्रियश्च द्विजप्रियः।। ५९।।
राजराजो महातेजाः सहस्रकिरणोपमः। सहस्रबाहुर्दोर्दण्डः स विष्णोरंशसम्भवः ।। ६०।।
शीघ्रगामी महावीर्यः सर्वदुष्टान्तकः प्रभुः। सर्वदा सर्वदुष्टघ्नः पुरस्थो बहुरूपवान् ।। ६१।।
सप्तद्वीपवतीं पृथ्वीं तपोबलपराक्रमैः। दमयन् सर्वदुष्टान् यो ररक्ष स हरिः स्वयम्।। ६२।।
एकस्य मूलमन्त्रस्य दशधास्य महात्मनः। कार्तवीर्यस्य वक्ष्यामि भेदांश्च शृणु सुन्दरि।। ६३।।
छन्दोभेदांश्च देवेशि ध्यानभेदांश्च तत्त्वतः। कार्तस्यादौ तस्य मूलं जपेत् सर्वार्थसिद्धये।। ६४।।
दशाक्षरविधानेन अवशिष्टाक्षरान् प्रिये। मूलबीजं च चामुण्डाबीजयुक्तं नवाक्षरम्।। ६५।।
जपेत् संस्तम्भनायाशु चोराणां वसुहारिणाम्। मूलेन सह मच्छत्रुबीजं देवि नवाक्षरम्।। ६६।।
प्रजपेन्नरनारीणां नृपाणां मोहनाय च। स्वमूलं चैव रावार्णसहितं तु नवाक्षरम्।। ६७।।
(भ्रामणोच्चाटनद्वेषमारणाय जपेद्बुधः। मन्त्री स्वमूलं मायाद्यबीजयुक्तं नवाक्षरम्।। ६८।।
पापक्षयाय वश्याय मोहनाय शुभाय च। स्वमूलं पाशबीजेन युक्तं देवि नवाक्षरम्)।। ६९।।
आकर्षणाय चौराणां क्षिप्रं देवि न संशयः। (स्वमूलं मायया चैव सहितं तु नवाक्षरम्।। ७०।।
उच्चाटयेच्च दुष्टानां हिंसापैशुन्यचेतसाम्। स्वबीजं पाशबीजेन सहितं तु नवाक्षरम्।। ७१।।

नरनारीनृणां च वश्यकृद्भवति ध्रुवम्) (क्षेपकम्)। मूलमङ्कुशबीजेन पुटितं तु नवाक्षरम्।। ७२।।
वाक्स्तम्भनाय गमनस्तम्भनाय जपेत् क्षणात्। वर्मास्त्राक्षरयोर्मध्यगतं मूलं नवाक्षरम्।। ७३।।
जपेदुन्मादनायाशु स्तम्भनायारिमोहनम्। वृक्षाग्रस्थितचौराणां स्तम्भनाय विशेषतः।। ७४।।
मूर्धसंस्फोटनायालं चौराणां देव्यसंशयः। स्वबीजं कमलाबीजपूटितं तु नवाक्षरम्।। ७५।।
यो जपेदब्दमात्रेण स स्याद्वैश्रवणोपमः। मूलं वाग्भवबीजेन यो जपेल्लक्षमात्रकम्।। ७६।।
मन्त्रवर्णैस्तु[1] सर्वैर्वा स कवित्वमवाप्नुयात्। एतदेकमपि प्रोक्तं दशधोक्तप्रभेदतः।। ७७।।
तेषामन्यन्महामन्त्रं प्रोक्तमेतद् दशाक्षरम्। तस्य च्छन्दो विराडत्र शेषाणां शृणु तत्त्वतः।। ७८।।
एकादशाक्षराः सर्वे शेषास्तव समीरिताः। शेषाणां त्रैष्टुभं प्रोक्तं मुनिभिर्वेदवादिभिः।। ७९।।
सर्वेषां कार्तवीर्यस्य मन्त्राणां जपकर्मणि। आदौ तारेण संयोज्य जप्तव्यास्तु मनूनथ।। ८०।।

एकस्येत्याद्यथेत्यन्तैः षोडशभिः श्लोकैः कार्तवीर्यस्य मन्त्रभेदांश्छन्दोभेदांश्चाह— तत्र तस्य बीजं फ्रों इति कार्तवीर्यबीजम्, एतत्तु दशस्वपि भेदेषु ज्ञेयम्। चामुण्डाबीजं च्रीं इति। मच्छत्रुर्मम शिष्यशत्रुः कामस्तद्बीजं क्लीं इति। रावार्णं भ्रूं इति। माया ह्रीं। पाशः आं। अङ्कुशः क्रों। वर्म हुं। अस्त्रं फट्। कमला श्रीं। वाग्भवं ऐं। अत्र ''मूलमङ्कुशबीजेन पुटितं तु'' इत्यत्र मूलकार्ताक्षरयोर्मध्येऽङ्कुशबीजं देयमिति तु शब्दार्थः। अन्यथा एकादशाक्षरासम्भवात्।। ''वर्मास्त्राक्षरगतयोर्मध्यगतं मूलं नवाक्षर''मित्यत्र मूलनवाक्षरयोर्मध्ये हुंबीजं तथैव फट्कारं च पृथक् पृथग्योजयेदित्यर्थः। अन्यथा दशविधत्वासम्भवादित्यर्थः। वाग्भवादिस्तु दशभेदाद्बहिर्भूतः, अत एव सर्वैर्वा इत्युक्तं, सर्वैर्विंशतिभिर्वर्णैः, एकोनविंशतिवर्णैर्वादौ संयोज्य जपेदित्यर्थः। तथा—

यन्त्रं च दशमन्त्राणां पूर्वोक्तं विलिखेद्बुधः। कर्णिकायां लिखेन्मूलं दशपत्रे दशाक्षरान्।। ८१।।
(दशाक्षरप्रयोगे च मूलं मध्यदले तथा। लिखेद्गुरूपदेशेन शेषं पूर्ववदाचरेत्)।। ८२।।

अस्यार्थः— तत्र यथोक्तलक्षणं दशदलकमलं कृत्वा, तद्बहिरष्टवज्रयुक्तं चतुरस्रं च कृत्वा, तत्कर्णिकायां ससाध्यं मूलबीजं प्राग्वद्विलिख्य, तत्केसरेषु द्वन्द्वशः स्वरानष्टसु अष्टसु कमलकेसरेषु नवमे शष दशमे सह इति विलिख्य दशपत्रेषु कार्तादिनवाक्षराणि नवसु पत्रेषु दशमे पुनर्मूलबीजमिति सम्प्रदायः। एष एव गुरूपदेशः। इति दशवर्णान् विलिख्य शेषमन्यत् सर्वं पूर्वोक्तयन्त्रवद्बहिर्लिखेत्। इत्येतद्यन्त्रमुक्तफलदं भवति। एतद्दशाक्षरमन्त्रस्य यन्त्रम्। अन्ययन्त्रेषु तन्मध्ये। (प्राग्वन्मूलं ससाध्यं विलिख्य तदनु तथैव केसरेषु) प्राग्वत् स्वरान् शषसहसहितान् विलिख्य (पत्रेषु चावशिष्टदशवर्णान् विलिख्य) शेषं प्राग्वद्विलिखेदिति। तथा—

पूजायां पूर्वसम्प्रोक्तावरणैः सम्यगर्चयेत्। तारादिविंशार्णमिदं पूजयेत् प्रयतोऽनिशम्।। ८३।।
मन्त्रं गुर्वाज्ञया देवि स सर्वार्थानवाप्नुयात्। कार्तवीर्यस्य मन्त्राणां प्रयोगो वक्ष्यतेऽधुना।। ८४।।
हिताय मन्त्रिणां होमः सर्वकामार्थसिद्धये। गौरवे कर्मणि चरेद्बहुद्रव्यघृतादिभिः ।। ८५।।
होमं रात्रौ वक्ष्यमाणद्रव्यैर्देवि सदक्षिणैः। लाघवे च लघुद्रव्यैर्ज्ञात्वा सम्यक् समाचरेत्।। ८६।।
कल्पोक्तसर्वकार्याणां यद्वाञ्छति सदा प्रिये। सम्पूजयेद्गुरुं भक्त्या द्रव्यैश्चास्य समीहितैः।। ८७।।

---

[1] 'समं सर्वैः ख. पाठः।

अन्नदानैर्द्विजान् भक्त्या प्रीणयेत् सर्वकर्मसु। वस्त्राद्यैर्वात्महितवित् प्रारम्भेत् सर्वकर्म च॥ ८८॥
विप्राणां वचनैः कुर्यात् कर्माणि कमलेक्षणे। सितसर्षपहोमेन मारयेद्रिपुमात्मनः ॥ ८९॥
कार्पासलशुनारिष्टैर्विषवृक्षदलैस्तथा । कनकैर्होमयेच्चौरान् स्तम्भयेन्मोहयेत् तथा ॥ ९०॥
विभीतजैः खादिरोत्थैः समिद्भिश्चाटयेच्चिरम्। निम्बैर्विद्वेषयेन्मन्त्री चाकर्षेन्मधुरत्रयैः ॥ ९१॥
नीलोत्पलैश्च वशयेत् तत्क्षणाद्भुवनत्रयम्। पद्मैः साज्यैः श्रिये होमः स्यात् तथा सुमहान् वशः॥९२॥
तिलहोमेन पापानि व्यपोहेद् गोघृतेन वा। तिलतण्डुललोणाब्जलाजसिद्धार्थमिश्रितैः॥ ९३॥
मधुराक्तैर्हुनेदेतैर्वश्यार्थाय च तत्क्षणात्। लोणैश्च सर्ववर्णानां वश्यार्थे पावके हुनेत्॥ ९४॥
सर्वसिद्ध्यै च दूर्वाभिः पयोभिश्च तथायुषे। तक्ष्म्यै दूर्वामृताह्वापामार्गार्कसमिदादिभिः ॥ ९५॥
होमो रोगविमुक्त्यर्थं ग्रहशान्त्यै तथायुषे। वटोदुम्बरबिल्वानां समिद्भिरभिवृद्धये॥ ९६॥
हुनेद्धनाप्तये वापि क्षीराज्याक्तैर्विशेषतः। केवलेनैव पयसा हुनेद्गोकुलवृद्धये ॥ ९७॥
ब्रह्मवृक्षसमिद्भिश्च ब्रह्मवर्चःसमृद्धये। अश्वत्थैर्मनसः शान्त्यै प्लक्षैः सन्ततिवृद्धये ॥ ९८॥
भूतशान्त्यै गुग्गुलुभिः स्त्रीवश्याय प्रियङ्गुभिः। पुष्पैर्हुनेच्च [१]वस्त्रार्थी तत्तद्वर्णैर्मनोहरैः॥ ९९॥
शालिहोमेन भूमान् स्यादन्नैरन्नादिमान् भवेत्। गोरोचनागोमयाभ्यां सेनायाः स्तम्भनं भवेत्॥१००॥
होमेन देवि शत्रूणां गोमूत्रेण विशेषतः। कार्पायगृहधूमादिपादपांसुविमिश्रितैः॥ १०१॥
क्षीरवृक्षसमिद्भिश्च हुनेन्निशि निशातधीः। अङ्गनाशाय चौराणां विद्वेष्ट्यै मारणाय च॥ १०२॥
सर्पनिर्मोककनकसिद्धार्थैर्हवनक्रिया। लवणैः सह चौराणां कुलनाशाय तद्भवेत्॥ १०३॥

सर्पनिर्मोकः सर्पमुक्तत्वक्।

तर्पयेच्च दशांशेन शुद्धतोयेन नित्यशः। हुतसंख्या च साहस्रं सहस्रादयुतान्तका॥ १०४॥
लघुगौरवकार्येषु विचार्य निपुणश्चरेत्। पुष्पैर्होमः प्रयोगोक्तैर्द्रव्यैः साज्यैर्विधीयते॥ १०५॥
रोगशान्त्यायुषे तद्वद्वश्याय मधुरैः सह। मारणद्वेषणोच्चाटस्तम्भमोहनकर्मसु ॥ १०६॥
तीक्ष्णतैलयुतैर्द्रव्यैर्माहिष्याज्ययुतैस्तथा। यद्यष्टविषयुक्तैर्वा चरेत् कर्माज्ञया गुरोः ॥ १०७॥
एवं षट्कर्म सम्प्रोक्तं मनुनानेन सुन्दरि। हिताय मन्त्रिणां सम्यग् हैहयाधिपतेर्विभोः॥ १०८॥
मन्त्रसिद्धस्य सिध्यन्ति कर्माण्येतानि तत्त्वतः। यस्यासिद्धो मनुर्होमात् स पुमान्नाचरेत् क्रियाम्॥१०९॥
न सिध्यति ह्यसिद्धस्य कल्पोक्तं कर्मणां फलम्। सदा वैदिकजप्तस्य शुद्धस्य ब्राह्मणस्य च॥११०॥
न्यायागतमनोः किञ्चित् क्रियास्यापि प्रसिध्यति। तस्मात् सदाचारवता गुरुभक्तेन सुन्दरि॥ १११॥
जप्तव्यो मन्त्रतीर्थो हि पुरुषेण मनूत्तमः। रक्षितुं पुरराष्ट्रादीन् स्त्रीबालादीन् स मन्त्रवित्॥ ११२॥
गोब्राह्मणवरांश्चापि स्वात्मानं च विशेषतः। कुर्यात् प्रयोगान् विधिवन्मारणादीनपि प्रिये॥ ११३॥
सर्वथा चौरजातीनां मारणान्नास्ति पातकम्। यदि स्यात् प्राणिहनना न्यायमेतेन नाशयेत्॥ ११४॥

---

१. 'विद्विष्ट्यै' ख. पाठः।

अन्नगोभूमिदानाद्यैराज्यहोमैश्च मन्त्रवित् । व्यपोहेच्चौरहत्याद्यं प्राणायामजपादिभिः ।।११५।।
जपेच्च देवीं गायत्रीं सर्वपापापनुत्तये। सहस्रं नित्यशो देवीं सर्वरक्षार्थमात्मनः।। ११६।।
गायत्रीं जपमानस्य द्विजातेः संयतात्मनः। किमसाध्यं प्रयोगेषु वैदिकेषु विशेषतः।। ११७।।
गायत्रीजापकं भक्त्या ब्राह्मणं सुसमाहितम्। न स्पृशन्ति महात्मानं पापहत्यादयोऽपि च।। ११८।।
किमु भूतादयः सर्वे घोरा रुधिरभोजनाः। तस्माज्जपेच्च गायत्रीं प्रयोगादौ समाहितः।। ११९।।
प्रयोगान्ते च गायत्रीं नियतः सर्वकर्मणि। अन्यानपि प्रवक्ष्यामि मन्त्रान् क्षिप्रप्रसाधकान्।। १२०।।
कृतवीर्यात्मजस्यात्मभूतान् देवि शृणुष्व तान्। यैः कुर्युः पुरराष्ट्राणां रक्षणां सिद्धमन्त्रिणः।।१२१।।
मन्त्रैर्जप्तैरपि भवेद्रक्षोभिश्च जलादिभिः। तारागिनजाययोर्मध्ये नमः कार्ताक्षरान् वदेत्।। १२२।।
वीर्यार्जुनाय हुंफट् च ऋष्याद्याश्च पुरोदिताः। चतुर्दशार्णो मन्त्रोऽयमनेनाङ्गं समाचरेत्।। १२३।।

तारः प्रणवः। अग्निजाया स्वाहाकारः। सुगममन्यत्।

तारेण नतिना सप्तवर्णैर्वर्मास्त्रठद्वयैः। कुर्यात् पञ्चाङ्गकं मन्त्री ध्यायेत् पूर्वोक्तमार्गतः।। १२४।।

ॐ हृदयं। नमः शिरः। कार्तवीर्यार्जुनाय शिखा। हुंफट् कवचं। स्वाहा अस्त्रम्।

नमोऽन्ते कार्तयोः पूर्वे स्याच्चेद्भगवते पदम्। तदाष्टादशवर्णः स्यान्मनुरेष मनूत्तमः।। १२५।।

"ॐ नमो भगवते कार्तवीर्यार्जुनाय हुंफट् स्वाहा" इति।

मूलमन्त्रेण पञ्चाङ्गं कुर्यात् पूर्ववदेव तु। सतारनतिनैव स्यात् तदा हृदयमम्बिके।। १२६।।

ॐ नमः हृदयं। भगवते शिरः। सप्तभिः शिखा। द्वाभ्यां कवचं। द्वाभ्यां कवचं। द्वाभ्यामस्त्रं। ध्यानं पूर्वोक्तमेव।

यन्त्रं लिखेच्च चौराणां मारणादिषु मन्त्रवित्। षट्कोणमध्ये तद्बीजं लिखेत् कोणषडक्षरम्।।१२७।।
लिखेच्च द्वादशदले शिष्टान् स द्वादशाक्षरान्। स्वरवेष्टितषट्कोणं कादिभिर्वृत्तपञ्चकम्।। १२८।।
भूताक्षरबहिःकोणं भूतमण्डलवेष्टितम्। तत्तत्कार्यवशाद् देवि तत्तन्मण्डलमालिखेत्।। १२९।।
ताले च फलके कुड्यमूले चोरकृते बिले। विलिखेत् सर्वसम्पत्त्यै चौराणां स्तम्भनाय च।।१३०।।
एतद्यन्त्रं मन्त्रजप्तं स्थापितं यत्र कुत्रचित्। भयानि न भवन्त्यत्र देशे देव्यखिलानि च।। १३१।।

ताले तालपत्रे।। अथैतद्यन्त्ररचनाप्रकारः—द्वादशदलं पद्मं विरच्य, तत्कर्णिकायां वृत्तद्वयवीतं षट्कोणं कृत्वा तन्मध्ये कार्तवीर्यबीजं ससाध्यं विलिख्य, षट्सु कोणेषु मूलमन्त्रस्य "ॐनमो भगवते" इति षडक्षरान् सबिन्दून् विलिख्य, षट्कोणाद्बहिर्वृत्तद्वयान्तराले षोडशस्वरैरावेष्ट्य, द्वादशदलेषु शिष्टद्वादशवर्णान् सबिन्दून् विलिख्य, प्राग्वत्तत्कार्योपयोगीनि भूताक्षराणि चतुरस्रकोणेषु विलिख्य तद्बहिस्तत्तद्भूतमण्डलं विलिखेत्। उक्तफलसिद्धिर्भवति।। तथा मन्त्रान्तरम्—

महावीर्यमनुर्नाम कार्तवीर्यस्य वक्ष्यते। स्मरणादपि नश्यन्ति तस्य चौरकुलादयः।। १३२।।
नमो भगवते प्रोच्य श्रीकार्तार्णान् समुद्धरेत्। वीर्यार्जुनायेति ततः सर्वदुष्टान्तकाय च।। १३३।।
तपोबलपदस्यान्ते पराक्रममितीरयेत्। परिपालितसप्तद्वीपाय सर्वपदं ततः।। १३४।।
राजन्यचूडामणये महाशक्तिमते तथा। सहस्रदलनायान्ते हुंफडित्युच्चरेदिदम्।। १३५।।

चतुष्षष्ट्यक्षरो मन्त्रो वाञ्छितार्थप्रसाधकः।..॥

अयमपि मन्त्रः प्रणवादिरिति ज्ञेयः। चतुष्षष्ट्यक्षरः इत्याद्युक्तत्वात्।

ऋष्याद्याश्च हुताद्याश्च पूर्वोक्तास्तु स्मृताः प्रिये। जपश्चायुतसंख्यः स्याच्छन्दोऽस्य त्रिष्टुबुच्यते।।१३६॥

राजन्यचक्रयुतवर्ति च वीरशूरमाहिष्मतीपतिपदैश्च चतुर्थियुक्तैः।
रेवाम्बुलीलपरिदृप्तपदेन कारागेहप्रबाधितदशास्यपदेन चाङ्गम्॥ १३७॥

राजन्यचक्रवर्तिने हृत्। वीराय शिरः। शूराय शिखा। महिष्मतीपतये कवचं। रेवाम्बुलीलापरिदृप्ताय नेत्रं। कारागेहप्रबाधितदशास्याय अस्त्रं। तथा–

एवं कृत्वा षडङ्गं नृपकुलतिलकं कार्तवीर्यं महान्तं
ध्यायेद्रेवातटस्थं युवतिभिरभितः क्रीडमानं मदान्धम्।
मज्जन्तं नग्नरूपं प्रमुदितमनसं लोलरक्तायताक्षं
हस्ताब्जैः स्वैः सहस्रैर्भृशपरिवितते रुध्यमानं जलौघान्॥ १३८॥

एवं ध्यात्वा जपेन्मन्त्री मन्त्रवर्यमनुत्तमम्। सर्वार्थसिद्ध्यै सम्यक् च वश्यायाशु विशेषतः॥१३९॥
जले भयं यदि स्याच्चेत् तदैवं संस्मरेद् बुधः। अन्यथा वक्ष्यते ध्यानं राज्यैश्वर्यसमृद्धये[1]।१४०॥

माहिष्मत्यां महात्मा कनकमणिगणालङ्कृताङ्गं सभाया-
मासीनं मन्त्रिमध्ये रविरुचिविलसद्रत्नपीठे प्रसन्नम्।
ध्यायेत् स्वैर्बाहुदण्डैर्धृतशरनिकरेष्वासवर्मासिपाश-
प्रासाद्यैः सर्वसिद्ध्यै सकलदुरितचौरापहत्यै च लक्ष्म्यै॥ १४१॥

परचक्रभये प्राप्ते तावद्राज्ञो महात्मनः। अथवा वक्ष्यते ध्यानं रक्षायै वाशु सर्वदा॥ १४२॥

दशशतहययुतरथवरनिलयं त्रैलोक्यभीषणं ध्यायेत्।
मध्याह्नार्कसमानं गर्जनतस्तर्जयन्तं परबलान्॥ १४३॥
दोर्दण्डमण्डलैरायुधमण्डलान् आक्षिपन्तमाशुवरम्।
कुण्डलमण्डितगण्डं खण्डितसर्वारिमण्डलं मन्त्री॥ १४४॥
नानायुधनिकरधरैः पदातिभिर्वेष्टितं तथा रथिभिः।
अभितो गजयूथयुतैर्हयसादिभिरुल्ल्वणैश्च पत्त्यङ्गैः॥ १४५॥
ध्यात्वा यो वै मन्त्रमिति प्राङ्मुखो जपेन्नियतः।
स तु सकलवाञ्छितार्थान्मा[2]सेन लभेदयत्नवानपि च॥ १४६॥

यन्त्रं चास्योल्लि[3]खेद् देवि सर्वकामार्थसिद्धये। आदौ चतुर्दलं पद्मं लिखेदष्टदलं ततः॥ १४७॥
तद्बहिः षोडशदलं द्वात्रिंशत्तद्बहिर्दलम्। कर्णिकायां लिखेद्बीजं कार्तवीर्यस्य भूपतेः॥ १४८॥

---

१. 'प्रसिद्धये' ख. पाठः। २. 'अल्पायासेन' ख. पाठः। ३. 'स्योच्यते' ख. पाठः।

वेदादिनतिमध्यस्थं साध्यनाम च दिग्दले। दलाष्टके द्विशो लिख्यान्मन्त्रार्णान् बिन्दुसंयुतान्।।१४९।।
षोडशारदले लिख्यात् कामराजमनूत्तमम्। द्वात्रिंशतिदले तस्यानुष्टुबवर्णान् समालिखेत्।।१५०।।
एकैकशो बहिर्मालामन्त्रेण तत्प्रवेष्टयेत्। तद्वहिः कादिभिर्वीतं प्रतिलोमानुलोमतः।।१५१।।
कूंखूंगूंघूंमहाबीजैश्चतुर्भिः पूजयेत् सुधीः। चतुर्दलान्तराले तु चूंछूंजूंझूं पुनस्तथा।।१५२।।
टूंठूंडूंढूं महाबीजैः तूंथूंदूंधूं पुनस्तथा। पूंफूंबूंभूं महाबीजैः यूंरूंलूंवूं पुनस्तथा।।१५३।।
शूंषूंसूंहूं पुनर्यन्त्रमेतैर्बीजैः समाहितः। द्विरावृत्त्या लिखेद् देवि बहिर्वै भूतमण्डले।।१५४।।
भूताक्षराणि विलिखेत् तत्तत्कार्यसमाप्तये। एतद्यन्त्रस्य माहात्म्यं को नु जानाति पार्वति।।१५५।।
किमु देवादयः सर्वे सुरासुरनमस्कृते। अहं जानामि विष्णुश्च दत्तात्रेयश्च तद्गुरुः।।१५६।।
प्रभावमस्य देवेशि यन्त्रस्याखिलभूपतेः। तद्यन्त्रधार[1]कं दृष्ट्वा भीता भूतादिवैरिणः।।१५७।।
चोररोगादयश्चापि प्रद्रवन्ति न संशयः। स्वर्णपत्रस्थितं यन्त्रमेतत् सर्वार्थदं क्षणात्।।१५८।।
विश्वैश्वर्यप्रदं विश्व[2]मोहनं क्षोभकारकम्। राजते विलिखेद्येतद्राज्यलाभाय मन्त्रवित् ।।१५९।।
ताम्रे च सर्वरक्षायै फलके चाम्बरेऽपि वा। भित्तौ वा सर्ववश्याय भूर्जपत्रे समालिखेत्।।१६०।।
चन्दनागरुकर्पूररोचनासृगुशीरकैः। लाक्षामृगमदाद्यैश्च विलिखेद् वश्यकर्मसु।।१६१।।
लिखेदष्टविषेणाथ मारणादिषु कर्मसु। अष्टगन्धेन वा देवि गुर्वनुज्ञापुरःसरम्।।१६२।।
कारस्करस्य फलके तथा वैकङ्कतोद्भवे। अक्षजे चाथ पाषाणे शरावे वा समाहितः।।१६३।।
एतद्यन्त्रं ध्वजाग्रस्थं युध्यमानस्य शत्रुभिः। एतद् दृष्ट्वारयः सर्वे प्रद्रवन्ति न संशयः।।१६४।।
यत्र यत्र स्थितं यन्त्रं तत्र तत्र जयो भवेत्। नागाश्च नागकन्याश्च यक्षिण्यश्च सुराङ्गनाः।।१६५।।
नरनारीनृपगणा दृष्ट्वा तद्यन्त्रधारिणम्। आगत्य दृष्ट्वा मोहेन तस्मै दद्युश्च वाञ्छितम्।।१६६।।
तद्यन्त्रकलशासेकाद्वन्ध्या पुत्रं प्रसूयते। राजाभिषिक्तो भवति शत्रुनिर्यातवानपि।।१६७।।
त्रैलोक्यमपि चानेन रक्षयेत्तु समाहितः। बहुना किमिहोक्तेन यन्त्रमेतदनुत्तमम्।।१६८।।
सर्वकार्यार्थदं नृणां कुर्यान्मन्त्री विचक्षणः।..................................।।

इति।। अथैतद्यन्त्ररचनाप्रकारः—तत्र प्रथमं चतुर्दलकमलं विलिख्य तद्बहिरष्टदलं तद्बहिः षोडशदलं तद्बहिर्द्वात्रिंशद्दलम्। इति कमलचतुष्टयं कृत्वा, तत्कर्णिकायां ससाध्यं कार्तवीर्यबीजं विलिख्य, चतुर्दलेषु— ''ॐ अमुकं मे वशमानय नमः'' इति प्रतिदलं विलिखेत्। अत्र वशमित्युपलक्षणं स्तम्भय मोहय द्वेषयेत्यादि स्वेष्टकर्मपदं लिखेत्। ततोऽष्टदलेषु विंशत्यक्षरमूलमन्त्रस्य प्रणवमूलबीजनमःपदात्मकाक्षरचतुष्टयं विहाय द्वितीयबीजादि नाय नम इत्यन्तान् षोडशवर्णान् सबिन्दून् द्विशो द्विशः प्रतिदलं विलिख्य, (तद्बहिः षोडशदलेषु प्रतिदलं कामबीजमालिख्य तद्बहिर्द्वात्रिंशद्दलेषु एकैकशो वक्ष्यमाणानुष्टुब्मन्त्रवर्णान् विलिख्य,) तद्बहिर्वृत्तद्वयान्तराले पूर्वोक्तचतुष्षष्ट्यर्णमालामन्त्रेण संवेष्ट्य, तद्बहिर्वृत्तत्रयान्तरालगतवीथीद्वयेऽन्तर्गतवीथ्यां प्रतिलोमेन ककारादिक्षकारान्तैर्वर्णैः संवेष्ट्य, बहिर्गतवीथ्यामनुलोमेन

---

१. 'धारिणं' ख. पाठः। २. 'देवि' ख. पाठः।

तैरेव वर्णैरावेष्ट्य, चतुर्दलस्यान्तरालचतुष्टये प्रमाणोक्तककारादिहकारान्तेष्वष्टाविंशतिबीजेषु कवर्गोत्थं बीजचतुष्टयमष्टदलान्तरालेषु (चटवर्गोत्थबीजाष्टकं, षोडशदलान्तरालेषु तपवर्गोत्थं बीजाष्टकं यादिवर्गोत्थं बीजाष्टकं च विलिख्य द्वात्रिंशद्दलान्तरालेषु पुनः कादिहान्तानि अष्टाविंशतिबीजान्य)ष्टाविंशत्यन्तरालेषु प्रथमं विलिख्य, पुनः कवर्गोत्थं बीजचतुष्टयं शिष्टान्तरालचतुष्टये लिखेत्। अत्र केचिदाद्यबीजचतुष्टयं चतुर्दलान्तरालेषु प्रथमं विलिख्य पुनस्तदाद्यान्यष्टविंशतिबीजान्यष्टादशान्तरालादिषु द्विरावृत्त्या लिखेदिति वदन्ति, नैतदस्मदाराध्यचरणसम्मतम्। यथागुरूपदेशं लेख्यमिति। ततस्तद्बहिस्तत्तत्कार्योपयोगिभूतमण्डलं विरच्य[1] तत्र तत्तद्भूताक्षराणि च प्रागुक्तयुक्त्या लिखित्वा यथाविधि विनियुञ्जीत, यथोक्तफलसिद्धिर्भवति।। तथा अनुष्टुब्मन्त्रः—

अनुष्टुबुच्यतेऽथास्य कार्तवीर्यस्य भूपतेः। एतत् सौम्यं च रौद्रं च सर्वकामफलप्रदम्।। १६९।।
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रभाक्[2]। तस्यानुस्मरणादेव हृतं नष्टं च लभ्यते।। १७०।।
स्वयं छन्दः स्मृतं पादैः सर्वैः पञ्चाङ्गकं भवेत्। अनुष्टुबस्ततो ध्यानविधिं वक्ष्येऽधुना प्रिये।।१७१।।

कैलासाद्रिसमप्रभेभपतिपृष्ठस्थं महाभीषणं
नाग[3]स्यन्दनसप्तिपत्तिनिकरैराघूर्णितैरावृतम्।
दोर्दण्डाम्बुजबद्धचापसशरं पाशाङ्कुशैरावृतं
ध्यायेद् यान्तमरातिवर्गहननायातीव सम्पत्तये।। १७२।।

वने महाचौरभये गजानां युद्धे त्वरातिग्रहरक्षणाय।
एवं स्मरन् मन्त्रवरं प्रजप्यादानुष्टुभं संयतधीर्हि देवि।। १७३।।

स्वैर्हस्ताब्जैः सहस्रैर्धृतकमलसहस्रं स्मरन् मन्त्रमेनं
जप्यादासीनमब्जे निखिलमणिगणालङ्कृताङ्गं प्रसन्नम्।
बुद्ध्वैनं योगनिष्ठं मुनिभिरभिवृतं दीप्तमर्कौघतुल्यं
स्वर्णाप्त्यै गोसमृद्ध्यै सकलधनसमृद्ध्यै च मन्त्रं महान्तम्।। १७४।।

सङ्क[4]र्षणाय जनानां दीर्घायुर्वर्धनाय रोगाणाम्। शान्त्यै च वसुसमृद्ध्यै ध्यायेदित्थं महाभयेष्वपि च।।

तथानुष्टुभ्यन्त्रम्—

आशापत्रे सरोजे दलमनु चतुरोऽनुष्टुबर्णान् विलिख्यात्
तद्बीजं कर्णिकायां स्वरयुगललसत्केसरं कादिवीतम्।
मालामन्त्रार्णवीतं दलविवरलसत्तस्य गायत्रिवर्णा-
स्त्रिस्त्रिर्भूतार्णवृत्तं सकलसुखकरं यन्त्रमानुष्टुबाख्यम्।। १७६।।

इति। अस्यार्थः— तत्राष्टदलकमलं कृत्वा तत्कर्णिकायांससाध्यं कार्तवीर्यबीजं विलिख्य, तत्केसरेषु द्वन्द्वशः स्वरान् विलिख्य, तद्दलेषु आनुष्टुभमन्त्रस्य वर्णांश्चतुरश्चतुरो विलिख्य, तेष्वेव वक्ष्यमाणकार्तवीर्यगायत्रीवर्णांस्त्रिशस्त्रिशो

---

[1] 'विलिख्य' ख. पाठः। [2] 'वान्' ख. पाठः। [3] 'नाना' ख. पाठः। [4] 'संवननाय' क. ग. पाठः।

विलिख्य तद्बहिर्वृत्तत्रयं विभाव्य तदन्तर्गतवीथीद्वयेऽभ्यन्तरवीथ्यां ककारादिक्षकारान्तैर्वर्णैरावेष्ट्य, बहिर्वीथ्यां प्रागुक्तचतुःषष्ट्यक्षरमालामन्त्रेण संवेष्ट्य, तद्बहिर्वृत्तं कृत्वा वृत्ताभ्यन्तरे प्राग्वत् कार्यानुसारेण भूतवर्णान् विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। कार्तवीर्याय विद्महे सहस्रकराय धीमहि तन्नोऽर्जुनः प्रचोदयात्, इति गायत्री।

सर्वमन्त्रप्रयोगेषु जप्तव्यैषा हितार्थिना। गायत्री जपमात्रेण मन्त्रवीर्यप्रवर्धिनी ।।१७७।।
मन्त्रस्यास्य जपाद् देवि नष्टद्रव्यं च लभ्यते। हताश्चौरा भविष्यन्ति नष्टद्रव्यं च सिध्यति।।१७८।।

इति। यन्त्रसारे—

क्ष्रौंबीजान्तःस्थसाध्यं दहनपुरयुगाश्रिष्वथो चक्रमन्त्रं
सन्धिष्वप्यङ्गषट्कं स्वरयुगललसत्केसरे चाष्टपत्रे।
आलिख्यान्मन्त्रवर्णाञ्जलधिपरिमितान् वेष्टयेद्व्यञ्जनार्णै—
र्भूगेहस्थं तदेतन्निखिलसुखकरं कार्तवीर्यस्य यन्त्रम्।। १।।
सर्वरक्षाकरमिदं धनधान्यसमृद्धिदम्। स्थापितं भवने क्षेत्रे सर्वसम्पत्करं नृणाम्।। २।।
चौरभूतपिशाचादिव्याघ्रादिभयनाशनम्।……………………………………..।।
करधृतमेतद्यन्त्रं विलिख्य कटकादिषु च युद्धेषु।
वितरति योद्धुर्विजयं रक्षां च महत्तरां लक्ष्मीम्।। ३।।

अस्यार्थः— अष्टदलकमलमध्यस्थषट्कोणमध्ये ससाध्योदरं नृसिंहबीजं विलिख्य षट्सु कोणेषु सुदर्शनषडर्णं कोणसन्धिषु तत्षडङ्गानि केसरेषु युगशः स्वरान् दलेषु ''ॐनमो भगवते कार्तवीर्यार्जुनाय महाबलाय सर्वदुष्टविनाशनाय हुंफट् स्वाहा'' इति मन्त्रस्य चतुरश्चतुरो वर्णान् विलिख्य, तद्बहिर्वृत्तयोरन्तराले कादिक्षान्तार्णैः संवेष्ट्य तद्बहिश्चतुरस्त्रं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति।

तद्यन्त्रस्थापनान्नृणां रक्षा सर्वत्र जायते। वाञ्छितार्थाः प्रसिध्यन्ति भूताद्वापि तथा प्रिये।। ४।।
आनुष्टुभजपाद्रात्रौ तपःस्वाध्यायतत्परः। तिष्ठन् प्रत्यङ्मुखो नित्यं शतमष्टोत्तरं प्रिये।। ५।।
मण्डलान्म्रियते चौरो विकलाङ्गोऽथवा भवेत्। जपमात्रेण वाऽचौरो भविष्यति न संशयः।। ६।।
यस्यां दिशि भयं देवि विद्यते मन्त्रवित्तमः। नित्यं तत्सम्मुखो रात्रौ जपेच्चानुष्टुभं मनुम्।। ७।।
भयानि न भवन्त्यस्य नात्र कार्या विचारणा। आसीनो वा जपेन्मन्त्री मन्त्रसाधनकर्मणि।। ८।।
अनेन तर्पयेत् प्राज्ञो[1] वाञ्छिताप्त्यै जलैः सुधीः। हुनेद्वा पूर्वसम्प्रोक्तद्रव्यैर्मन्त्री सुरेश्वरि।। ९।।
अनुष्टुभेन मन्त्रेण साधयेत् साधकोत्तमः। सर्वकर्माणि संसिद्धः स्वयं मन्त्री समाहितः।। १०।।

इत्यानुष्टुभमन्त्रः।। तथा मालामन्त्रः—

प्रवक्ष्यामि च सिद्ध्यर्थं सर्वकार्येषु सुन्दरि। येनाशु मुनयः सिद्धिं गताः पूर्वं महाहवे।। १।।

ॐनमो भगवते श्रीकार्तवीर्यार्जुनाय हैहयनाथाय श्रीकार्तवीर्यार्जुन सहस्रकरसदृश सर्वदुष्टान्तक सर्वशिष्ट शिष्टेष्टद

---

१. 'देवं' ख. पाठः। २. 'कार्याणि' ख. पाठः।

सर्वत उदधेरागन्तुकामान् अस्मद्वसुविलुम्पकांश्चौरसमूहान् स्वकरसहस्रैर्निवारय २ रुन्धय २ स्वपाशसहस्रैर्बन्धय २ अङ्कुशसहस्रैराकर्षय २ स्वचापोद्धू[1]तबाणसहस्रैर्भिन्धि २ स्वहस्तोद्धूतखड्गसहस्रैश्छिन्धि २ स्वहस्तोद्धूतमुसलसहस्रैर्मारय २ स्वशङ्खोद्धूतनादसहस्रैर्भीषय २ स्वहस्तोद्धूतचक्रसहस्रैर्निकृन्तय २ परकृत्यां त्रासय २ गर्ज २ आकर्षय २ भ्रामय २ मोहय २ उद्वासय २ उन्मादय २ तापय २ विनाशय २ विदारय २ स्तम्भय २ जृम्भय २ मारय २ वशङ्कुरु २ उच्चाटय २ विनाशय २ दत्तात्रेयश्रीपादप्रियाय नमः श्रीकार्तवीर्यार्जुन सर्वत उदधेरागन्तुका[2]मान् अस्मद्वसुविलुम्पकान् चोरसमूहान् सम्यगुन्मूलय २ हुं फट् स्वाहा।। मालामन्त्रोऽयम्।

अस्य मालामन्त्रस्य दत्तात्रेय ऋषिः, गायत्री छन्दः, श्रीकार्तवीर्यार्जुनो देवता सर्वार्थसाधनाय विनियोगः। दत्तात्रेयप्रियतमाय हृदयाय नमः। माहिष्मतीनाथाय शिरसे०। रेवाजलक्रीडासंसक्ताय शिखायै०। हैहयाधिपतये कवचाय०। सहस्रबाहवे अस्त्राय०। ध्यानम्—

दोर्दण्डैकसहस्रसम्मितकरेष्वेतेष्वजस्रं दधत्
कोदण्डैः सशरैरुदग्रविशिखैरुद्यद्विवस्वत्प्रभः।
ब्रह्माण्डं परिपूरयंस्तदखिलं गण्डस्थलान्दोलित-
द्योतत्कुण्डलमण्डितो विजयते श्रीकार्तवीर्यप्रभुः।। २।।

एवं ध्यात्वा समभ्यर्च्य सर्वक[3]र्माणि कारयेत्। (त्रिसहस्रं जपः प्रोक्तः शेषं पूर्ववदाचरेत्।। ३।।
मन्त्रभेदेषु पूजायामृष्यादिन्यासतत्त्वतः। पूजयेत् तत्तदङ्गाद्यं पूर्वोक्तावरणैर्बुधः ।। ४।।
अनेन मन्त्रवर्येण सर्वकार्याणि कारयेत्।) मालामन्त्रजपाच्छत्रूंश्चौरांश्चापि महाबलान् ।। ५।।
क्षपयेत् स्तम्भयेद्वापि चाटयेन्मारयेत्तथा। वशयेत् तत्क्षणाद् देवि त्रैलोक्यमपि मन्त्रवित्।। ६।।
क्षोभयेत् स्तम्भयेत् प्राज्ञः शमयेच्च ज्वरादिकान्। क्षिप्रं समीहितार्थाप्त्यै मालामन्त्रः प्रजायते।।७।।
वक्ष्यमाणप्रकारेण ध्यायेत् तन्मन्त्रदेवताम्। ध्यानम्

चक्रेषुचापमुसलासिकुठारपाशप्रासाढ्यचर्मधृतशङ्खधरैः स्वहस्तैः।
दक्षोत्तरैः प्रतिशतैररुणाम्बराढ्यं मध्यन्दिनार्कसदृशं स्मरतातिघोरम्।। ८।।
रक्ताम्बराक्षमतिभीषणमेकनाथं नीलाम्बुदाभगजपृष्ठगतं स्वहस्तैः।
संवेष्टितं सकलदुष्टहरं विशिष्टं शिष्टेष्टदं सकलदुःखनिवारणाय।। ९।।

एवं ध्यात्वा जपेन्मन्त्री मालामन्त्रं मनूत्तमम्। अर्धरात्रे विशेषेण नष्टद्रव्याप्तिसिद्धये।। १०।।
चौरैर्हतं समानेतुं नित्यमष्टोत्तरं शतम्। जपेन्निश्येकपादेन सदा रात्रौ विचक्षणः।। ११।।
हृतं द्रव्यं प्रगृह्यातिकृच्छ्रेण भ्रान्तमानसाः। समेत्य मन्त्रिणे चोराः प्रार्पयिष्यन्त्यसंशयम्।। १२।।
नायाति चेन्मृतिस्तस्य षण्मासाज्जपमात्रतः। चौरैर्हतान् पशून् मन्त्री यद्यानेतुं समीहति।। १३।।
अनेन मनुना तेषां कण्ठपाशं जपेन्निशि। प्रगृह्य देवतां ध्यायन् नित्यमष्टोत्तरं शतम्।। १४।।
आयान्ति स्वगृहं गावो द्वादशाहे विमोचिताः। आयान्ति त्रिदिने[4] देवि सितसर्षपहोमतः।। १५।।

---

१. 'सर्वत्र उद्धूतपदे 'उद्गत' इति क. ग. पाठः। २. 'आगन्तुकान्' ख. पाठः। ३. 'कार्याणि' ख. पाठः। ४. 'त्रिदिने मन्त्री गुर्वादेशेन तत्क्षर्णात्। हृतं दशदिनाद् देवि' इत्यधिकः ख. पाठः।

हृतशेषैर्हुनेद्रात्रौ चौरैर्द्रव्यैः समाहितः। ब्रीहिधान्यादिकं मन्त्री गुर्वादेशेन तत्क्षणात्।। १६।।
हृतं प्रकाश्यते देवि चोरैर्झटिति नान्यथा। बाणान् प्रवेशयेद्रात्रौ धनुषा ध्यानतत्परः।। १७।।
दशदिक्षु जपन् मन्त्रं गृहस्य नगरस्य वा। राष्ट्रस्य चापि[1] देशस्य वरणस्याप्यथो गवाम्।। १८।।
मन्त्रमूर्तिः स्वयं भूत्वा रक्षायै जगतो भयात्। मन्त्रेण परिजप्तानि पार्थिवानि रजांसि च।। १९।।
क्षिप्तानि मन्त्रिणा यत्र तत्र रक्षा भवेन्निशि। तर्पयेद्वा हुनेद्वापि जपमानेन नित्यशः।। २०।।
सर्वार्थसिद्ध्यै लक्ष्म्यै च रक्षायै च विशेषतः। सर्वत्र भूपतेर्ध्यानं विना ध्यानं न सिध्यति।। २१।।
यथा च लभ्यते ध्यानं गुरुभक्तेन सुन्दरि। नान्येन[2] लभ्यते ध्यानं मन्त्रिणा चेति निश्चयः।। २२।।
सर्वदा कुर्वतः कर्म जपहोमार्चनादिभिः। विना ध्यानेन चेत्सर्वं तत्फलं नास्य सिद्ध्यति।। २३।।
गुर्वाज्ञातत्परश्चेत् स्याद्विना ध्यानादपि प्रिये। सिद्ध्यन्ति सर्वकार्याणि तस्य नास्त्यत्र संशयः।।२४।।
तस्मात् प्राज्ञः सदा यत्नाद्गुरुभक्तिं समाचरेत्। प्राणैश्चैव[3] धनैः सर्वैः कर्मणा मनसा गिरा।।२५।।
सर्वदा सर्वदेवेशि गुरोराज्ञां न लङ्घयेत्। कृतवीर्यसुतस्यास्य मन्त्रभेदं सुदुस्तरम्।। २६।।
गदितं तव देवेशि मया गुप्तमनुत्तमम्। त्वया चैतन्महामन्त्रं न प्रकाश्यं दुरात्मने।। २७।।
विष्णुभक्ताय दातव्यमतिगुह्यं सुदुर्लभम्। सर्वरक्षाकरं देवि चौरनाशं मलापहम्।। २८।।
भुक्तिमुक्तिप्रदं देवि सत्यं सत्यं न संशयः।.......................................।।

अथ दीपविधिः।। **श्रीदेव्युवाच–**

....। देवदेव महादेव भक्तानुग्रहकारक ।। २९।।
पृच्छामि त्वां सुरश्रेष्ठ लोकानां हितकाम्यया। कार्तवीर्यस्य नृपतेर्वद दीपविधिं प्रभो।। ३०।।

ईश्वर उवाच–

शृणु देवि प्रवक्ष्यामि लोकानुग्रहकाम्यया। गुह्यं च मम सर्वस्वं न चाख्येयं दुरात्मने।। ३१।।
राजचौरादिपीडासु ग्रहरोगभयेषु च। नानादुःखेषु देवेशि सुखप्राप्त्यै तथैव च।। ३२।।
दीपं कुर्वीत विधिवद्गुरुदर्शितमार्गतः। सौवर्णे राजते ताम्रे कांस्ये लौहेऽथ मृन्मये।। ३३।।
गोधूममाषमुद्गानां चूर्णेन घटितेऽपि वा। सौवर्णे कार्यसिद्धिः स्याद्रौप्ये वशं जगद्भवेत्।। ३४।।
ताम्रे तयोरभावेऽपि कांस्ये विद्वेषणं भवेत्। मारणं लोहपात्रे तु उच्चाटो मृन्मये तथा।। ३५।।
गोधूमचूर्णघटिते विवादे विजयो भवेत्। माषे शत्रुमुखस्तम्भः स्यान्मुद्गे शान्तिरुत्तमा।। ३६।।
अलाभे सर्वपात्राणां ताम्रे कुर्याद्विचक्षणः। सप्त पञ्च तथा तिस्र एका वा वर्तिका भवेत्।।३७।।
गुरुकार्येऽधिका कार्या स्वल्पे त्वल्पा मता प्रिये। सूत्रं श्वेतं तथा पीतं माञ्जिष्ठं च कुसुम्भकम्।।३८।।
कृष्णं च कर्बुरं चैव क्रमतो विनियोजयेत्। सर्वाभावे सितेनैव कुर्याद्वर्तीः पृथक् प्रिये।। ३९।।
दश पञ्चाधिकाश्चैव विंशतिस्त्रिंशदेव च। चत्वारिंशत्तथा कार्या पञ्चाशदपि वा भवेत्।। ४०।।

---

[1] 'चाल्पदेशस्य' ख. पाठः। [2] 'नान्यथा' ख. पाठः। [3] 'प्राणेन वा' ख. पाठः।

तत्तत्कार्यवशाद् देवि कुर्यात् तन्तून् समाहित:। गोघृतेन प्रकर्तव्यो दीप: सर्वार्थसिद्धये।। ४१ ।।
गोमयेनोपलिप्तायां भूमौ यन्त्रं समालिखेत्। (कपिलागोमयेनैवं षट्कोणं कारयेत्तत:।। ४२।।
मारबीजं कर्णिकायां षट्कोणे बीजषट्ककम्। दिक्षु बीजचतुष्कं च शेषै: संवेष्टयेद्धि तत्)।।२३।।
तत्र प्रत्यङ्मुखो दीप: स्थाप्य: सर्वाङ्गसुन्दरि। प्राणानायम्य विधिवन्मूलेनाङ्गं समाचरेत्।। ४४।।

मूलेन प्राणानायम्य प्रागुक्तं पञ्चाङ्गं कुर्यादित्यर्थ:।

यन्त्रराजं लिखित्वा तु ताम्रपात्रेऽष्टगन्धकै:। स्थापयेत् पूर्ववत्तस्य कुर्यात् सङ्कल्पमादरात्।। ४५।।
तारं पूर्वं समुद्धृत्य वक्त्रवृत्तं समुद्धरेत्। संयोजयेत् तत्सोमार्धनादेन च पुन: सति।। ४६।।
व्योमार्धेन्द्वग्निना देव्या युक्तं तदपि संलिखेत्। वषट्पदं तत: कार्तवीर्यार्जुनपदं तथा।। ४७।।
माहिष्मतीनाथपदं सहस्रबाहुमुच्चरेत् । सहस्रक्रतुदीक्षित-दत्तात्रेयप्रियस्तथा ।। ४८।।
ङेन्तान्येतानि सम्प्रोच्य आत्रेयाय पठेत् पुन:। अनुसूयागर्भरत्नपदं ङेन्तं समुच्चरेत्।। ४९।।
व्योमाग्निवामकर्णेन्दुनादयुक्तं पुन: प्रिये। चक्रिणं पुनरुद्धृत्य वह्निनादेन संयुतम्।। ५०।।
वामकर्णेन्दुसंयुक्तमिमं दीपं पुनर्वदेत्। गृहाणेति-पदं पश्चादमुकं रक्ष रक्ष च।। ५१।।
दुष्टान् नाशय पातय घातयेति वदेद् द्विश:। शत्रूञ्जहि जहीत्युक्त्वा मायाप्रणवमुच्चरेत्।। ५२।।
स्वबीजं मारबीजं च वामाक्षि बिन्दुसंयुतम्। बह्निजायां वदेत् पश्चान्मन्त्रशास्त्रविशारद:।। ५३।।
अनेन दीपवर्य्येण पश्चिमाभिमुखेन च। मां रक्ष च वदेद् देवि देवदत्त-पदं तथा।। ५४।।
वरप्रदानाय-पदं व्योमयुग्मं वदेत्तत:। (वामकर्णेन्दुना युक्तं नादेन च पुन: प्रिये।। ५५।।
व्योमाग्निमायासंयुक्तं नादयुक्तं पूनर्वदेत्। तारं मारं द्वितीयं च बीजं प्रोच्य वदेत्तत:)।। ५६।।
वह्निजायां ततो देवि जलं भुवि विनिक्षिपेत्।...।।

मन्त्र: प्रयोगे स्पष्टयितव्य:। तथा–

तपवर्गौं सनादौ च वेदादिर्वह्निवल्लभा। पश्चिमाभिमुखो भूत्वा कृत्वा च करसम्पुटम्।। ५७।।
सकृज्जप्त्वा पुनर्मन्त्री जपेन्मन्त्रं समाहित:। तारं नारायणं सेन्दुं व्योमाग्निनादसंयुतम्।। ५८।।
मायायुक्तं समुद्धृत्य प्रथमं मायया युतम्। उच्चरेच्च द्वितीयं तु बीजं स्याद्वह्निवल्लभा।। ५९।।
चक्रिणं वह्निसंयुक्तं तारनादयुतं प्रिये। तारमुद्धृत्य प्रजपेद् दीपाग्रे वै सहस्रकम्।। ६०।।
अनेन विधिना देवि कार्तवीर्यस्य गो[1]पते:। दीपो देय: प्रयत्नेन सर्वं कार्यमभीप्सता।। ६१।।
गुरोराज्ञां पुरस्कृत्य कुर्याद् देवि प्रयत्नत:। अन्यथा हि कृतं लोके विपरीतफलं भवेत्[2]।। ६२।।
विधानं दीपदानस्य कृतघ्ने पिशुनाय च। ब्रह्मकर्मविहीनाय न वक्तव्यं कदाचन।। ६३।।
सुभक्ताय सुशिष्याय साधकाय विशेषत:। विधानं देवि वक्तव्यं मम प्रीतिकरं शिवे।। ६४।।
किं बहूक्तेन भो देवि कल्पोऽयमखिलार्थद:। अथाभिधीयते मानमाज्यस्य वरवर्णिनि।। ६५।।

---

१. 'भूपते:' ख. पाठ:। २. 'लभेत्' ख. पाठ:।

साधकानां हितार्थाय सर्वार्थस्य च सिद्धये। पलानां पञ्चविंशत्या दीपो [1]भूतविनाशन:।। ६६।।
पञ्चाशता घृतपलैश्चौरशान्त्यै च कारयेत्। शत्रुवश्याय च तथा सन्धिकार्ये तथैव च।। ६७।।
पञ्चसप्ततिभिर्देवि शत्रूणां स्यात् पराजय:। शतेन शत्रुनाश: स्यात् सहस्रेणाखिला: क्रिया:।।६८।।
सिद्ध्यन्ति साधकानां हि प्रयोगा येऽपि दुष्करा:। नित्यदीपे न मानं हि सोऽपि कार्य: स्वशक्तित:।।६९।।
यथाकथञ्चिद् देवेशि नित्यदीपं प्रकल्पयेत्। कार्तवीर्याय देवाय सर्वकल्याणसिद्धये।। ७०।।
गुरुकार्येऽधिकं मानं कर्तव्यं देवि सर्वदा। अल्पद्रव्यै: प्रकर्तव्य: स्वल्पे कार्ये वरानने।। ७१।।
विना मानं न कुर्वीत कार्तवीर्यस्य भूपते:। दीपं देवेशि कार्यार्थे कुर्वन्नेष्टमवाप्नुयात्।। ७२।।

अथ दीपदानप्रयोग:—तत्र साधक: कृतनित्यक्रिय: शुभे स्थाने रहसि वितानादिभिरलङ्कृते गृहे गोमयेनोपलिप्ते स्थाने कपिलागोमयेन षट्कोणमण्डलं कृत्वा, तन्मध्ये कुङ्कुमचन्दनादिभि: कामबीजं विलिख्य, षट्सु कोणेषु मूलविंशत्यक्षरमन्त्रस्य प्रणवादि कामबीजरहितं बीजषट्कं (ओंफ्रोंब्रींभ्रूंआंह्रीं) विलिख्य, षटकोणस्य चतुर्दिक्षु स्वाग्रादि शिष्टं बीजचतुष्टयं (क्रोंश्रींहुंफट्) विलिख्य, कार्तादिनवभिर्वर्णै: (कार्तवीर्याजनाय नम:) षट्कोणं संवेष्ट्य, तत्र कार्यानुरूपेण प्रोक्तदीपपात्रे प्रोक्तवर्तीर्निक्षिप्य प्रज्वाल्य, षट्कोणमध्ये पश्चिमाभिमुखं दीपं निधाय, मूलमन्त्रेण प्राणायामत्रयं कृत्वा ऋष्यादिन्यासजातं विधाय, ताम्रपात्रे वैष्णवाष्टगन्धै: कार्तवीर्यस्य यन्त्रं (अष्टदलगर्भचतुरस्त्ररूपं) प्रागुक्तं विलिख्य, दीपस्य पूर्वभागे गोमयोपलिप्ते स्वाभिमुखं संस्थाप्य, अद्येत्यादितिथ्याद्युल्लेखनान्ते स्वगोत्रनामाद्युच्चार्य ''अमुककार्यसिद्ध्यर्थं दीपदानमहं करिष्ये'' इति सङ्कल्प्य, तस्मिन् यन्त्रे देवमावाह्य सर्वोपचारै: साङ्गं, सावरणं सम्पूज्य, दक्षिणहस्तेन जलमादाय ''ॐआंह्रींवषट्कार्तवीर्यार्जुनाय माहिष्मतीनाथाय सहस्रबाहवे सहस्रक्रतुदीक्षिताय दत्तात्रेयप्रियाय आत्रेयाय अनुसूयागर्भरत्नाय ह्रूंक्रूं इमं दीपं गृहाण अमुकं रक्षरक्ष दुष्टान् नाशय २ पातय २ घातय २ शत्रूञ्जहि २ ह्रींॐफ्रोंक्लींईं स्वाहा अनेन दीपवर्येण पश्चिमाभिमुखेन मां रक्ष ''देवदत्तवरप्रदानाय ह्रींह्रींह्रींओंक्लींब्रीं स्वाहा'' इमं मन्त्रं जपित्वा तज्जलं भूमौ निक्षिप्य पश्चिमाभिमुखो भूत्वा कृताञ्जलि: 'तंथंदंधंनंपंफंबंभंमंॐ स्वाहा'' इति सकृत् जपित्वा, ॐआंह्रींफ्रींब्रीं स्वाहा क्रोंॐ'' इति मन्त्रं सहस्रावृत्त्या जपित्वा ततो यावद्दीपस्तिष्ठति तावत्प्रत्यहं तस्मिन् यन्त्रे देवं पूजयेत्। दीपनिर्वापणे देवं विसर्जयेत्। इत देवाय जपं समर्प्य स्तुत्वा प्रणमेत्। इत्थं प्रत्यहं घृतसमाप्तिर्यावद्यावच्च कार्यसिद्धिस्तावत् कुर्यादिति दीपदानविधि:। इति वैष्णवं प्रकरणम्।।

अथ सौरमन्त्रा उद्ध्रीयन्ते[2]—तत्र सारसङ्ग्रहे—

अथोच्यन्ते सौरमन्त्रा: सर्वागमसुगोपिता:। आयुरारोग्यधनदा: कीर्तिदा: पुत्रपौत्रदा:।। १।।
सर्वसौभाग्यजनका: सर्वापन्नाशका: सदा। अष्टादश त्वचो रोगास्तेषां नाशकराश्च ये।। २।।
त्रिलोक्यां विश्रुता नित्या नारदाद्यैश्च सेविता:। तथा गन्धर्वसिद्धौघविद्याधरनिषेविता:।। ३।।
सर्वरोगहरा: सर्वे सर्वोपद्रवनाशका:। धर्मार्थकाममोक्षाप्तितीर्थरूपा: शुभोदया:।। ४।।
वश्याकर्षणसंस्तम्भविद्वेषोच्चाटमारणे। शक्ता: स्मरणमात्रेण साधकेन सुसाधिता:।। ५।।
अज्ञानतिमिरान्धानां ज्ञानदृष्टिप्रदायका:। वाक्सिद्धिखेचरीसिद्धिपादुकासिद्धिदायका:।। ६।।

---

[1] 'देयोऽर्थसिद्धये' ख. पाठ:। [2] 'उच्यन्ते' ख. पाठ:।

किं बहूक्तेन विधिना साधिताः सर्वकामदाः। प्रोच्यतेऽभीष्टफलदस्तेष्वप्यष्टाक्षरो मनुः ।। ७।।
प्रणवो घृणिसर्गान्ते चन्द्रोऽर्घीशसमन्वितः। ईरोऽग्निशिखरोऽनन्तो द सुसूक्ष्मः त्यसंयुतः।। ८।।
अष्टवर्णो मनुर्भानोरिष्टदः परिकीर्तितः।...।।

प्रणव ओं। घृणि स्वरूपं। सर्गो विसर्गः तेन घृणिः। चन्द्रः स, अर्घीश ऊ, तेन सू। ईरो य, अग्नी र, तेन र्य। अनन्त आ। द स्वरूपं, सूक्ष्म इ, तेन दि। त्य स्वरूपं। अत्र यकाराकारयोर्न सन्धिः। एवं श्रुतिदर्शनात्। तथा च श्रुतिः– ''घृणिरिति द्वे अक्षरे सूर्य इति त्रीणि (?द्वे) आदित्य इति त्रीणि एतद्वै सावित्रस्याष्टाक्षरं परमं पदं श्रियाभिषिक्तं य एवं वेद श्रिया हैवाभिषिच्यते'' इति। तथा–

ऋषिस्तु देवभागाख्यश्छन्दो गायत्रमिष्यते। श्रीसूर्यो देवता प्रोक्त ऐहिकामुष्मिकप्रदः।। ९।।
तेजो वदेत्ततो ज्वालामणिहुंफट् द्विठान्तकः। हृन्मनुः सत्यपूर्वोऽयं ब्रह्मपूर्वः शिरोमनुः।। १०।।
विष्णुपूर्वः शिखामन्त्रो वर्माणू रुद्रपूर्वकः। अग्निपूर्वो नेत्रमनुः सर्वपूर्वोऽस्त्रमन्त्रकः।। ११।।
सत्याद्यांश्च चतुर्थ्यन्तान् केचिदिच्छन्ति सूरयः। सत्यतेजः–पदं केचिच्चतुर्थ्यन्तं प्रचक्षते।। १२।।

सत्यतेजोज्वालामणिहुंफट् हृदयाय नमः इति केचिदिति। शारदातिलके– ''सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरित''मित्यादि। अत्र चतुर्थ्यविवक्षितेत्यपेक्षितार्थद्योतनिकाकारादयः। प्रपञ्चसारे तु–

''सत्यब्रह्मविष्णुरुद्रैः साग्निभिः सर्वसंयुतैः। तेजोज्वालामणिहुंफट्स्वाहान्तैरङ्गमाचरेत्''।।

इति। अत्रोक्तं ब्रह्मेत्यत्राकारश्रुतिश्चतुर्थीनिवारणायेति पद्मपादाचार्याः। सारसङ्ग्रहे–

विधायैवं षडङ्गानि मूर्तिं न्यसेद्यथाक्रमम् । मस्तकाननहृद्गुह्यपाददेशेषु देशिकः ।। १३।।
पञ्चह्रस्वैः सहादित्यो रविभानू च भास्करः। सूर्यस्ततश्च मन्त्रार्णान् प्रणवाद्यान् न्यसेद्बुधः।। १४।।
शीर्षाक्षिकण्ठहृत्कुक्षिनाभिलिङ्गाङ्घ्रिषु क्रमात्। ह्रस्वैरक्लीवैरोकाराद्यकारान्तैस्तु पञ्चभिः।। १५।।

''सद्यादिपञ्चभिरपि'' इति शारदायाम्। ध्यानम्–

भास्करं विमलकुण्डलभूषं चारुतरारुणपङ्कजसंस्थम्।
अब्जयुगाभयदानकरं तं रक्ततनुं प्रभजे युगनेत्रम्।। १६।।

दानकरं युगनेत्रमिति पदच्छेदः। ऊर्ध्वकरयोः पद्मे वामाद्यधःस्थयोरभयदाने, इत्यायुधध्यानम्। तथा–

अग्निकोणे प्रभूतं च विमलं नैर्ऋते यजेत्। सारं वायव्यकोणे च समाराध्यं तथैशके।। १७।।
सुखं परमपूर्वं च यजेन्मध्ये तु मन्त्रवित्।...।।

अग्न्यादीति–प्रथमं मण्डूकादिसिंहासनान्तमुक्तरीत्याभ्यर्च्य अग्न्यादिकोणेषु प्रभूतादीन् धर्माधर्मादिस्थानेषु यजेत्। ''पीठाङ्घ्रीन् कल्पयेदेतान् हृदा मध्ये विदिक्षु च''। इति नारायणीयवचनात्। ''ईशानान्ते च मध्येऽपि विदिक्ष्वेतान् प्रपूजयेत्''। इति प्रयोगसारवचनाच्चेति वदन्ति। तत्र– (१५। ६) प्रयजेदथ प्रभूतां विमलां साराह्वयां समाराध्याम्। परमसुखामग्न्यादिष्वस्त्रिषु मध्ये च पीठक्लृप्तेः प्राक्'' इति शङ्कराचार्यचरणैरुक्तत्वात्।। स्त्रीलिङ्गप्रयोगास्तु भुवनेश्यर्चाप्रकरणात्। पीठकल्पनं तु सर्वत्र धर्मादिभिरेव। 'धर्मादिकल्पिते पीठे' इति श्रवणाद्धर्मादिभिर्युक्तस्यैव

योगपीठत्वात्। तदर्चनात् प्रागेतान् सम्पूज्य पश्चाद्धर्मादीन् सम्पूज्यानन्तादिकमर्चयेत्। तथा ''स्वबिम्बं पश्चिमे पीठे पूजिते नव पूजयेत्।'' स्वबिम्बं पश्चिमे इति सोमाग्निमण्डले सम्पूज्य, पश्चात् सूर्यमण्डलं सम्पूज्य, सत्त्वादिपरतत्त्वान्तमभ्यर्च्य पीठशक्तीः पूजयेदित्यर्थः। तथा–

दलमूलेषु पूर्वादि मध्ये च विधिपूर्वकम्। दीप्तासूक्ष्मे जयाभद्रे विभूतिर्विमलान्विता।। १८।।
अमोघा विद्युता चान्या नवमी सर्वतोमुखी। पीठशक्तीः क्रमादेता ह्यग्निवर्णाः सुभूषिताः।। १९।।
ह्रस्वत्रयक्लीबवर्ज्या अचो वह्नीन्दुभूषणाः। बीजान्यासां क्रमादाहुर्मन्त्रशास्त्रविशारदाः।। २०।।

ह्रस्वत्रयं अइउ। क्लीबाः ऋॠऌॡ इति। अचः स्वराः। वह्नी रेफः। इन्दुः बिन्दुस्तेन रांरींरूंरेंरैंरोंरौंरंरः इति नवबीजानि। उक्तं च महाकपिलपञ्चरात्रे– ''आद्योपान्ते तृतीयं च त्यक्त्वा चैव नपुंसकम्। भेदयेन्नवधा यान्तं स्वरैरेभिर्यथाक्रमम्।। बिन्दुयुक्तानि बीजानि शक्तीनामुद्धृतानि वै।'' इति। प्रयोगसार-नारायणीययोस्तु–''आद्यमन्त्यं तृतीयं च त्यक्त्वा चैव नपुंसकम्'' इत्युक्तं यथागुरूपदेशं ग्राह्यमिति।

ङेन्तं वदेत्तारपूर्वं ब्रह्मविष्णुशिवात्मकम्। ततः सौराय पीठाय हृदन्तः समुदीरितः।। २१।।
पीठमन्त्रो दिनेशस्य यजेत् पीठमनेन हि। खखोल्कादित्यमन्त्रेण मूर्तिं तस्य प्रकल्पयेत्।। २२।।
तस्यामावाह्य देवेशं सूर्यं सम्यक् समर्चयेत्। अङ्गपूजां पुरा कृत्वा प्रपूज्या दिग्दलस्थिताः।।२३।।
आदित्याद्याः पुरा प्रोक्ता मूर्तयो वेदसंख्यया। उषाद्याः कोणगाः पूज्याश्चतस्त्रः शक्तयः शुभाः।।२४।।
स्वनामाद्यर्णसंयुक्ताः कथ्यन्ते ता यथाक्रमम्। उपाप्रज्ञे तथा प्रोक्ते प्रभासन्ध्ये मनीषिभिः।। २५।।
ततो दलाग्रे ब्राह्म्याद्या अर्चयेदग्रतोऽरुणम्। सोमपूर्वान् ग्रहानष्टौ पूजयेत् तद्बहिः सुधीः।। २६।।
लोकपालांश्च वज्रादीन् पूर्ववत् संयजेत्ततः।..।।

अथ प्रयोगः– तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि देवभागाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीसूर्याय देवतायै नमः। इति विन्यस्य विनियोगमुक्त्वा, सत्यतेजोज्वालामणि हुंफट् स्वाहा हृदयाय नमः। ब्रह्मतेजोज्वालामणि हुंफट् स्वाहा शिरसे०। विष्णुतेजोज्वालामणि हुंफट् स्वाहा शिखायै०। रुद्रतेजोज्वालामणि हुंफट् स्वाहा कवचाय०। अग्नितेजोज्वालामणि हुंफट् स्वाहा नेत्रत्रयाय०। सर्वतेजोज्वालामणि हुंफट् स्वाहा अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, शिरसि ओंअं आदित्याय नमः। मुखे ओंइं रवये०। हृदि ओंउं भानवे०। गुह्ये ऋं भास्कराय०। पादयोः ऌं सूर्याय०।। शिरसि ओंनमः। नेत्रयोः ओंघृं नमः। कण्ठे ओंणिं नमः। हृदि ओंसूं नमः। कुक्षौ ओंर्यं नमः। नाभौ ओंआं नमः। लिङ्गे ओंदिं नमः। पादयोः ओत्यं नमः।। इति विन्यस्य ध्यानाद्यात्मपूजान्ते मण्डूकादिपृथिव्यन्तं योगपीठमभ्यर्च्य, क्षीरसमुद्रं सम्पूज्य नवरत्नद्वीपादिसिंहासनस्य पादेषु प्रभूताय नमः। विमलाय०। साराय०। समाराध्याय०। मध्ये परमसुखाय०। इति सम्पूज्यानन्तरं धर्मादिपरतत्त्वान्ते प्राग्वत् सम्पूज्याष्टदलकेसरेषु–रां दीप्तायै नमः। रीं सूक्ष्मायै०। रूं जयायै०। रें भद्रायै०। रैं विभूत्यै०। रों विमलायै०। रौं अमोघायै०। रं विद्युतायै०। रः सर्वतोमुख्यै०। इति मध्यान्तं सम्पूज्य, ओंब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः, इति समस्तं पीठं सम्पूज्य, खखोल्काय स्वाहा श्रीसूर्यमूर्तिं परिकल्पयामि नमः इति मन्त्रेण मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, दिग्दलेषु आं आदित्याय नमः। रं रवये०। भां भास्कराय०। भां भानवे०। विदिग्दलेषु उं उषायै नमः। प्रं प्रज्ञायै०। प्रं प्रभायै०। सं सन्ध्यायै०। इति सम्पूज्याष्टदलाग्रेषु प्राग्वद्

ब्राह्म्याद्यष्टशक्ती: सम्पूज्य, देवस्याग्रे अरुणाय नम:। ततश्चतुरस्रस्य प्रथमरेखायां देवाग्रादिप्रादक्षिण्येन सोमाय नम:। भौमाय०। बुधाय०। बृहस्पतये०। शुक्राय०। शनैश्चराय०। राहवे०। केतुभ्यो०। इति सम्पूज्य लोकपालार्चादिसर्वं प्राग्वत् कुर्यादिति। तथा–

अष्टलक्षं जपित्वान्ते दुग्धवृक्षसमिद्वरै:। जुहुयात् तत्सहस्राणि दुग्धाक्तै: साधकोत्तम:।। २७।।
तर्पयेच्छुद्धसलिलैश्चन्द्रचन्दनवासितै:। स्वाभिषेकं तत: कृत्वा ब्राह्मणान् भोजयेत्तत:।। २८।।

इति। प्रयोगसार–अर्घ्यदानविधि:।

रक्ताम्बरधरो रक्तो रक्तमालार्चित: सदा। घृतक्षीरसमायुक्तगुडभक्ताशनो निशि।। १।।
भिक्षाहारोऽथवा वीतसङ्ग: सन्तोषवान् सदा। मन्त्रमावर्तयेन्नित्यमाराधनपरायण:।। २।।
इत्थमभ्यर्च्य भास्वन्तर्घ्यं तस्मै निवेदयेत्। प्रत्यहं रविवारे वा तद्विधानमुदीर्यते।। ३।।
पुरो मण्डलमालिख्य यजेत् पीठं यथाविधि। तत्र संस्थाप्य पात्रं हि शुद्धताम्रसमुद्भवम्।। ४।।
रम्यं प्रस्थजलग्राहि मूलमन्त्रं समुच्चरन्। शुद्धोदकेन सम्पूज्य प्रक्षिपेत्तत्र कुङ्कुमम्।। ५।।
रोचनाराजिकारक्तचन्दनं वंशतण्डुलान्। श्यामाकतण्डुलान् शालीन् करवीरजपाकुशान्।। ६।।
सञ्चिन्त्य देवतात्मैक्यं भास्करं साङ्गमर्चयेत्। उपचारैर्निवेद्यान्तैस्तत्र ध्यायञ्जपेन्मनुम्।। ७।।
सम्यगष्टोत्तरशतं भूय: पुष्पादिभिर्यजेत्। उद्धृत्यामस्तकं पात्रं जानुस्पृष्टमहीतल: ।। ८।।
दृष्टिं निधाय व्योमार्के स्वैक्यं सावरणं स्मरेत्। ततो जपेन्मूलमनुं धिया दद्याच्च भानवे।। ९।।
अर्घ्यं प्रसन्नचित्त: सन् दत्त्वा[1] च सुमनोञ्जलिम्। पुनर्नियतधीस्तावद्यावद्भानुर्निजै: करै: ।। १०।।
अर्घ्योदकं समादत्ते जपेदष्टोत्तरं शतम्। तत: प्रसन्नो भगवान् प्रयच्छेदिष्टमात्मन:।। ११।।

नृणामनेन भवतीह नितान्तमायुरारोग्यपुत्रधनमित्रकलत्रवृद्धि:।
तेजश्च वीर्यमतुलं पशुकान्तिसम्पद्विद्या यशो विभवभोगसमृद्धय: स्यु:।। १२।।

तन्मन्त्रसहिताम्भोभि: सप्तधाञ्जलिसेचनम्। दारिद्र्यपापान्धकारनाशनं श्रीकरं परम् ।। १३।।
स्थण्डिले सुतले कुम्भं तीर्थोदकसुपूरितम्। हिरण्यरत्नगन्धादि तत्र निक्षिप्य पूजयेत्।। १४।।
देवं सपरिवारं तु प्रागुक्तविधिना तत:। स्थण्डिलेऽग्निं समाधाय कपिलापयसा चरुम्।। १५।।
पक्त्वा च तेन जुहुयात् तदाज्यसहितेन च। सहस्रं कृतसम्पातं शुद्धपात्रे तु कारयेत्।। १६।।
ऋतुस्नातां सुनियतां पूर्वेऽह्नि समुपोषिताम्। अष्टमे दिवसे तां तु सहस्रमभिमन्त्रितै:।। १७।।
अभिषिञ्चेत् कुम्भजलैर्दद्यात्तस्यै च मन्त्रवित्। सहस्रमन्त्रितं होमसम्पातान्नं ततो निशि।। १८।।
भर्तापि सूर्य एवाहमिति ध्यात्वा तया सह। सम्भोगमाचरेत् तेन सुपुत्रो गुणवान् भवेत्।। १९।।

इति। यन्त्रसारे–

कर्णिकायां साध्यगर्भं तारं यन्त्रचतुष्टये। सौरस्य चतुर्णस्य क्रमादेकैकमक्षरम्।। १।।

---

[1] 'दद्याच्च' ख. पाठ:।

अष्टाक्षरमनोर्वर्णान् पत्रेष्वष्टसु तद्बहिः। आवेष्ट्य मातृकावर्णैर्भूपुरास्रचतुष्टये ।। २।।
प्रयोजनानां तिलकं ताराद्यं च समालिखेत्। सौरयन्त्रमिदं नृणां सर्वामयविनाशनम्।। ३।।
तेज:प्रतापसौभाग्यपुत्रायु:कीर्तिवर्धनम्। धनधान्यप्रदं वश्यं सर्वरक्षाकरं परम् ।। ४।।
इदमेव यन्त्रमभिलिख्य जले प्रतिमज्जतां शितधियां दिनशः।
ज्वरकुष्ठशूलमुखरोगसङ्कटा विलयं प्रयान्ति न चिरादिति ध्रुवम्।। ५।।

अस्यार्थः— चतुष्पत्रकमलकर्णिकायां साध्यगर्भं प्रणवं विलिख्य पत्रेषु ॐह्रींहंसः इति चतुरक्षरमन्त्रस्यैकैकमक्षरमालिख्य, तद्बहिरष्टपत्रेषु मूलमन्त्रस्यैकैकमक्षरमालिख्य, तद्बहिर्वृत्तयोरन्तराले सबिन्दुभिर्मातृकार्णैरावेष्ट्य बहिश्चतुरस्रकोणेषु ॐह्रांह्रींसः इति वर्णचतुष्टयं प्रतिकोणमेकैकं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति। तथा—

प्रणवं साध्यसमेतं विलिख्य षट्कोणकर्णिकामध्ये। तारं प्रयोजनानां तिलकं हंसं च षट्सु कोणेषु।।६।।
केसरविलसत्सौरचतु[1]र्णैर्दलचतुष्टये वापि। उद्यन्नद्याद्यास्ताः पादचतुष्कमृचोऽष्टपत्रेषु ।। ७।।
केसरराजत्सौरवसुवर्णके दलेष्वृचः पादान्। आलिख्य बहिर्लिप्या चावेष्ट्य कुगृहकोणेषु।। ८।।
चतुरक्षरस्य च मनोः सौरस्यैकैकमक्षरं सम्यक्। विलिखेदेतद्यन्त्रं विनाशयेद्ग्रहान् विधृतम्।। ९।।
प्रथयति तेजो लक्ष्मीर्भोगान् धृतिं प्रतापाद्यान्। अङ्गणभूमावेतद्विलिख्य सम्पूज्य तत्र दिननाथम्।।१०।।
दद्यादर्घ्यं कान्त्यै लक्ष्म्यै कुष्ठज्वरादिशान्त्यै च।...।।
रोगघ्नयन्त्रमिदमेव विलिख्य ताम्रे संस्थापितं निजगृहे विधिवत् प्रपूज्य।
हन्याच्च कुष्ठमुखरोगज्वरातिशूलविस्मृत्यपस्मृतिभवानथवा विकारान्।। ११।।
आलिख्य चैतत् कलधौतपत्रे तैले विनि:क्षिप्य सहस्रसंख्यम्।
जप्त्वा तदभ्यक्ततनोर्नरस्य कुष्ठादिरोगा विलयं प्रयान्ति ।। १२।।
इदमेव नवे विलिख्य यन्त्रं नवनीते त्रितयं प्रजप्य चर्चाम्।
परिभक्षयतां तदैव शूलं विषममामयमाशु नाशमेति।। १३।।

इति। अस्यार्थः— षट्कोणमध्ये ससाध्यं प्रणवं विलिख्य, तत्कोणेषु ''ॐह्रांह्रींसःहंसः'' इत्यक्षरषट्कमेकमेकं विलिख्य, तद्बहिश्चतुर्दलकेसरेषु ''ॐह्रींहंस;'' इति मन्त्रस्यैकैकमक्षरं विलिख्य, चतुर्दलेषु उद्यन्नद्येति ऋचः पादमेकैकमालिख्य, तद्बहिरष्टदलकेसरेषु मूलमन्त्रस्याष्टवर्णानालिख्य, अष्टदलेष्वेतत्सूक्तस्य द्वितीयतृतीयर्चोः पादाष्टकं प्रतिदलमेकमेकं पादमालिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैः संवेष्ट्य चतुरस्रकोणेषु ''ॐह्रीं हंसः'' इति मन्त्रस्यैकैकक्षरं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति। (ऋ० १। ५०। ११)

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय।। १।।
शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं निदध्मसि।। २।।
उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम्।। ३।।

---

[1] 'चतुरर्णं' ख. पाठः।

इति।। सारसंग्रहे मन्त्रान्तरम्–

वदेत् पदं चतुर्थ्यन्तं खखोल्काख्यं द्विठान्तकम्। षडर्णो मनुराख्यातो दिनेशस्य जगत्पते:।। १ ।।

खखोल्काख्यं चतुर्थ्यन्तं खखोल्काय। द्विठ: स्वाहा। अस्मिन्मन्त्रे भेदमाह कपिलपञ्चरात्रे–

याष्टमं बिन्दुना युक्तं कद्वितीयं तथैव च। तदेव केवलं भूय: ओभिन्नं गविलोमकम्।। १ ।।
धविलोमाच्चतुर्थं तु मांसाऽऽक्रान्तं समीरण:। समासादुद्धृतो वत्स मूर्तिमन्त्र: षडक्षर:।। २ ।।

याष्टमं ह, बिन्दुरनुस्वारस्तद्युक्तं तेन हं। कद्वितीयं ख। तथैव बिन्दुयुक्तं तेन खं। तदेव खं केवलं बिन्दुरहितं तेन ख। गविलोमकं खं, तदोभिन्नम् ओकारयुक्तं तेन खो। घविलोमाच्चतुर्थं घकाराद्विलोमेन चतुर्थं ककार:, मांसेन लकारेण आकारेण चाक्रान्तमुपरि स्थितं तेन ल्का। समीरणो य।। तथा नारायणीये मन्त्रान्तरम्–

खकान्तौ दण्डिनौ चण्डो मज्जा दशनसंयुता। मांसं दीर्घाऽजवद्वायुरेतन्मन्त्रोपकृद्दिदु:।। १ ।।

खं ह, कान्त: ख, दण्डी अनुस्वारस्तद्युक्तौ तेन हंखं। चण्ड: ख। मज्जा ष, दशन ओ, तेन षो। मांसं ल, दीर्घा आ, अज: क, तेन ल्का। वायु: य। सारसङ्ग्रहे–

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छन्द ईरितम्। देवता सविता चास्य सर्वसौख्यफलप्रद:।। १ ।।
सूक्ष्मरूपायाग्निवधू: स्वाहान्तं सूक्ष्मतेजसे। सूक्ष्माकारायाग्निवधू: सूक्ष्मवालाय ठद्वयम्।। २ ।।
सूक्ष्मकाय च हुंफट् च जातिवुक्ता: समीरिता:। पञ्चाङ्गमन्त्रा मन्त्रार्णै: षडङ्गं वा समाचरेत्।। ३ ।।
रक्तपद्मद्वयं हस्ते बिभ्राणं वरदाभये। बन्धूकाभं त्रिनेंत्र च रविं ध्यायेत् सुभूषितम्।। ४ ।।
पूर्वोक्ते पूजयेत् पीठे देवमावाह्य पूर्ववत्। लक्षमेकं जपेन्मन्त्री नियतात्मा जितेन्द्रिय:।। ५ ।।
जुहुयात् तद्दशांशेन बिल्वाश्वत्थपलाशजै:। उडुम्बरसमुद्भूतैस्त्रिमध्वक्तै: समिद्वरै: ।। ६ ।।
तर्पणादि तत: कुर्यात् प्राक्प्रोक्तविधिना सुधी:। अर्घ्यादिकं च कुर्वीत पूर्ववद्वाञ्छिताप्तये।। ७ ।।
एवं संसेवनात् तस्य खेचरीसिद्धिरीरिता।...।।

इति।। तथा मन्त्रान्तरम्–

सदण्डी कान्तबीजाढ्य: सप्तार्णोऽयं मनुर्मत:। ऋष्याद्यङ्गविधिध्यानजपपूजादि पूर्ववत् ।। ८ ।।

कान्त: ख दण्डी अनुस्वारस्तेन खं बीजादि: पूर्वमन्त्र: सप्तार्ण इत्यर्थ:। तथा–

ङेन्तं सप्ततुरङ्गं तु विद्महे पदमुच्चरेत्। सहस्रकिरणायेति धीमहीति पदं तत: ।। ९ ।।
तन्नो रविरिति प्रान्ते चोदयादिति सङ्गिरेत्। जप्यात् सर्वार्कमन्वादौ गायत्र्येषा दिनेशितु:।। १० ।।

तेन–सप्ततुरङ्गाय विद्महे सहस्रकिरणाय धीमहि तन्नो रवि: प्रचोदयात्।। तथा मन्त्रान्तरम्–

अथ वक्ष्ये समासेन चतुर्वर्णमनुं रवे:। तारो माया दण्डिवियत् सविसर्गोऽस्य पूर्वग:।। १० ।।

तार: प्रणव:। माया भुवनेशीबीजं। वियत् ह, दण्डी अनुस्वारस्तेन हं। अस्य हकारस्य पूर्वग: स, सविसर्गो विसर्गसहितस्तेन स:। तथा–

ऋषिर्ब्रह्मा च गायत्री छन्द: सूर्यात्मिका तथा। देवता भुवनाधीशा षडङ्गानि ततो न्यसेत्।। ११ ।।
तानि प्रणवशक्तिभ्यां त्रिभिरावर्तनैरथ। तारादिभिश्च षड्दीर्घमायाबीजैर्भवन्ति च[1]।। १२ ।।

---

[1] १. 'वा' क. पाठ:।

भास्वद्रत्नसहस्त्रमौलिविलसच्चन्द्रार्धमुद्योतय-
द्धस्ताब्जैर्दधदङ्कुशं गुणवराभीती: सुतुङ्गस्तनम्।
पायाद्दालितकाञ्चनाम्बुजजपाविद्युज्ज्वलत्कान्तिभि-
र्विश्वं द्योतयदार्कमाशु शिशिरं विश्वेशिकाया वपु:।। १३।।

दक्षाद्यूर्ध्वयोराद्ये तदाद्यध:स्थयोरन्ये, इत्यायुधध्यानम्।

नवशक्तिसमायुक्ते पीठे पूर्वोदिते यजेत्। मूलेन मूर्तिं सङ्कल्प्य तत्रावाह्य दिनेश्वरम्।। १४।।
सम्पूज्य तस्यावरणान्यर्चयेत् क्रमत: सुधी:। हल्लेखाद्या च गगना परा रक्ता तृतीयका।। १५।।
करालिका चतुर्थी स्यान्महोच्छुष्मा तु पञ्चमी। प्रथमावृतिराभि: स्याद् द्वितीयाङ्गै: समीरिता।।१६।।
तृतीया मातृभि: प्रोक्ता चतुर्थी च ग्रहैर्मता। दिक्स्थै: सोमज्ञगुरुभि: सशुक्रैरपरा[१] तथा।। १७।।
विदिग्गतैर्भौमसौरिराहुकेतुभिरादरात्।..।।

इति। तथा प्रयोगसारे—

स्वनामाद्यक्षरैर्बिन्दुभूषितैरन्वितान् यजेत्। भूयस्ततो लोकपालै: पञ्चमी च तदायुधै:।। १।।
षष्ठी प्रोक्तैवमभ्यर्चेद् दिनशो दिननायकम्।..।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे गायत्रीछन्दसे नम:। हृदये श्रीसूर्यरूपिणीभुवनेश्वर्यै देवतायै नम:। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ओं हृदयाय नम:। ह्रीं शिरसे०। ओं शिखायै०। ह्रीं कवचाय०। ओं नेत्रत्रयाय०। ह्रीं अस्त्राय०। इति करषडङ्गन्यासं कृत्वा, ध्यानादिपुष्पोपचारान्ते कर्णिकायामेव देवस्य मूर्तौ देवाग्रदक्षोत्तरपश्चिमेषु— हं हल्लेखायै नम:। गं गगनायै०। रं रक्तायै०। कं करालिकायै०। मं महोच्छुष्मायै०। इति सम्पूज्य प्राग्वत् केसरेषु षडङ्गानि सम्पूज्याष्टदलेषु प्राग्वद् ब्राह्म्याद्या: सम्पूज्याष्टदलाग्रेषु दिग्विदिक्क्रमेण— सं सोमाय नम:। बुं बुधाय०। बृं बृहस्पतये०। शुं शुक्राय०। मं मङ्गलाय०। शं शनैश्चराय०। रं राहवे०। कें केतुभ्यो०। इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् कुर्यात्।। तथा—

चतुर्लक्षं जपेन्मन्त्रं जुहुयात्तद्दशांशत:। ब्रह्मवृक्षसमुद्भूतै: पुष्पैस्त्रिमधुराप्लुतै: ।। १८।।
सरोजैर्वा ततो देवं तर्पयेदभिषेचयेत्। ब्राह्मणाराधनं कुर्यात् तत: सिद्धो भवेन्मनु:।। १९।।
एवं साधितमन्त्रस्तु काम्यकर्माणि साधयेत्। यजेदेवं प्रतिदिनं रविवारेऽथवा सुधी:।। २०।।
दद्यादर्घ्यद्वयमपि भवेत्तस्येप्सितं फलम्।..।।

इति।। तथा मन्त्रान्तरम्—

वह्निदीर्घेन्दुमद्व्योम माया सर्गान्वितो भृगु:। प्रयोजनानां तिलक: त्र्यक्षर: कथितो मनु:।। २१।।

वह्नि: रेफ:, दीर्घा आ, इन्दुरनुस्वारस्तद्युतं व्योम हकार:, तेन ह्रां। माया ह्रीं। सर्गो विसर्ग:। भृगु: सकारस्तेन स:। तथा—

अजोऽस्य मुनिरुद्दिष्टो गायत्रं छन्द उच्यते। देवताऽस्य मनो: ख्यात: सविता सेवित: सुरै:।।२२।।

---

[१] 'अपरै:' क. ख. ग. पाठ:।

गुह्यात्पादतलं यावद्गलादागुह्यकं तथा। कान्ताच्च गलपर्यन्तं मन्त्रार्णान् विन्यसेत् सुधीः।। २३।।
मायाबीजेन षड्दीर्घयुजाङ्गानि प्रविन्यसेत्। इति। ध्यानम्—
अरुणकमलसंस्थं त्रीक्षणं भूरिभूषं ह्यरुणकमलयुग्माभीष्टदाभीतिहस्तम्।
अरुणतरशरीरं भावयामो दिनेशं ह्यरुणकरसुसेव्यं सर्वदेवौघवन्द्यम्।। २४।।
पूर्वोदिते यजेत् पीठे नवशक्तिसमन्विते। देवमावाह्य सम्पूज्य पुराङ्गानि समर्चयेत्।। २५।।
चन्द्रादिभिर्ग्रहैरन्या दिगीशैरपरावृतिः। तदायुधैश्चतुर्थी स्यादेवं पूजा समीरिता।। २६।।
ततश्च तेजश्चण्डाय निर्माल्यं विनिवेदयेत्।...।।

अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अजाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीसूर्याय देवतायै नमः। इति विन्यस्य विनियोगमुक्त्वा, गुह्यादिपादपर्यन्तं, ह्रां नमः। कण्ठाद्गुह्यपर्यन्तं, ह्रीं नमः। मूर्धादिकण्ठान्तं, सः नमः। इति विन्यस्य, ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्राभ्यां०। ह्रः अस्त्राय०। इति करषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गपूजान्ते प्राग्वद् ग्रहान् सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेत्। इति तथा—

जपेद् द्वादशलक्षं च तत्सहस्रं हूनेत्तिलैः। घृताक्तैर्मधुराक्तैश्च पयोन्नैश्चैव तादृशैः।। २७।।
तर्पणादि ततः कुर्यात् प्रयोगान् साधयेत्तथा। दद्यात् पूर्वोदितं चार्घ्यं दिनेशाय सुसाधकः।। २८।।
सोऽप्यस्य धनधान्यादिपुत्रपौत्रविवर्धनम् । करोति रत्नवस्त्रादिभूषणादिविवर्धनम् ।। २९।।
अष्टपत्राम्बुजं कुर्यात्तत्र कुम्भान् नव न्यसेत्। पत्रमध्ये कर्णिकायां तांश्च तोयेन पूरयेत्।। ३०।।
नवग्रहान् समावाह्य तेषु कुम्भेषु मन्त्रवित्। कर्णिकाकलशं मूलमन्त्रेण च सहस्रकम्।। ३१।।
प्रजप्यान्येषु तन्मन्त्रान् शतकृत्वो जपेत् सुधीः। तज्जलैरभिषिञ्चेद्यः साधको ग्रहदोषतः।। ३२।।
रोगा नश्यन्ति सततं लक्ष्मीश्चापि स्थिरा भवेत्। ग्रहहोमः प्रकर्तव्यो ग्रहाणां वैकृते तथा।। ३३।।
चन्द्रभान्वोश्चोपरागे निजर्क्षे वाथ मन्त्रवित्। रिपुजे च भये वाथ घोररूपे गदेऽथवा।। ३४।।
पूर्ववन्मण्डलं कृत्वा ग्रहान् सम्पूज्य तत्र च। स्वदिक्षु चाग्नीन् संस्थाप्य जुहूयाच्च समिद्वरैः।।३५।।
अर्कद्विजद्रुमायूराश्वत्थोडुम्बरखादिरैः । शमीदूर्वाकुशोद्भूतैः क्रमाद्धोमः समीरितः ।। ३६।।

द्विजद्रुः पलाशः। मायूरा अपामार्गाः।

अष्टाधिकं सहस्रं च हुनेत् सूर्यस्य चाहुतीः। अष्टाधिकं शतं मन्त्री सोमादीनां तथाहुतीः।। ३७।।
अन्ते चाज्यैर्व्याहृतिभिर्हुत्वा होमं समापयेत्। गुरुं सन्तोष्य ऋत्विग्भ्यो यथाशक्ति च दक्षिणाम्।।३८।।
दद्याच्च भोजयेद्विप्रान् सङ्ग्रामे विजयी भवेत्। रोगाः शान्तिं व्रजन्त्याशु दीर्घमायुश्च विन्दति।।३९।।
कृत्याद्रोहादिकानां च शान्तिरेवाशु जायते। सर्वेषां च ग्रहाणां च होम एकत्र वा भवेत्।। ४०।।
एवं प्रतिदिनं मन्त्री दिननाथं समर्चयेत्। धनधान्यैश्वर्यपूर्णमायुदीर्घं च विन्दति।। ४१।।

---

१. 'च सम्पूर्णं' ख. पाठः।

इति।। अथ पुत्रेष्टिः। भविष्योत्तरे भृगुं प्रति नारदवाक्यम्—

पुत्रीयं यज्ञमाचक्ष्व सतां वंशविवर्धनम्। शक्रेणेति गुरुः प्रोक्तो यथाहं कथयामि ते।। १।।
बहुस्त्रीकोऽसुतो वन्ध्यः पुत्रीयं यज्ञमाचरेत्। पुण्यर्क्षमासतिथिषु ते कथ्यते यथाक्रमम्।। २।।
पूर्वोत्तरेषु सर्वेषु हस्तश्रवणमूलके। मृगपुष्यमहाज्येषु पूर्वातिथिगुणेषु च (?) ।। ३।।
गुरुशुक्रेन्दुसौम्येषु स्थिरलग्नेषु सङ्गवे। शुक्रे केन्द्रगते वार्कग्रहणे समुपस्थिते ।। ४।।
भृगुशुद्धौ विशुद्धार्के गुरुचन्द्रशुभेऽहनि। मार्गफाल्गुनवैशाखे श्रावणे कार्तिके तथा।। ५।।
शुक्लपक्षे विधातव्यं पुत्रीयं यज्ञमादरात्। आचार्यो भूसुरः श्रीमान् सर्वागमविशारदः।। ६।।
अलोभः सत्यवादी च कर्मवान् सम्मतः सताम्। व्रतकष्टसहिष्णुश्च जितक्रोधो जितेन्द्रियः।। ७।।
कृतोपवासो यजमानस्तद्वत् स्त्रीभिः समावृतः। तद्वदाचार्यनिकटं यायादर्घ्यकरः स्वयम्।। ८।।
पत्नीग्राहितबल्यन्त्रः सायं तस्य निमन्त्रणे। उत्तराभिमुखो विप्रो यजमानोऽप्युदङ्मुखः।। ९।।
पूर्वमुख्यः स्त्रियः सर्वास्ता विशेयुर्यथाक्रमम्। उपस्पृशञ्जलं दर्भं प्रोक्तासनवरोपरि।। ३०।।
गन्धपुष्पादिसौवर्णयज्ञसूत्राङ्गदादिभिः। वासोभिः शोभितं कृत्वा श्रावयेदिदमन्ततः ।। ११।।
श्वस्तनेऽहनि पुत्रेष्टिकर्म कर्तुमहं द्विजाः। उक्त्वा गोत्राह्वयं पश्चाद् ब्राह्मणं तदनन्तरम्।। १२।।
वरिष्ये त्वामिति प्रोच्य प्रणमेद्विप्रमेकदा। स्वस्तिस्वस्तिं तवाहं स्यामाचार्यः पुत्रियक्रतौ।। १३।।
श्वस्तनेऽहनि सम्प्रोच्य सर्वानुत्थापयेच्च तान्। आचार्येण समं सायमेकस्त्रिन्नालये शुभे।। १४।।
संविशेयुः कुशास्त्रीर्णे कम्बले मृदुवाससि। ततः प्रभृति कुर्वीत दीपं रात्र्यन्तगोचरम्।। १५।।
प्रत्यहं छालयेच्छय्यावासः क्षाराम्बुना पृथक्। गृहं च शोधयेन्नित्यं मृद्गोमयजलैः शुभैः।। १६।।
विकिरान् विकिरेत् सायं नूतनं दीपमुज्ज्वलम्। रक्षोघ्नं स्थापयेत्तत्र कपिलापञ्चगव्यकम्।। १७।।
तिलाज्यसमधुसम्पूर्णं हेमपात्रं सरत्नकम् । धूपः सिन्दूरकर्पूरगुग्गुल्वगुरुकुङ्कुमैः ।। १८।।
सचन्दनैः प्रदातव्यः सर्वविघ्नोपशान्तये । भित्तौ च सर्वतस्तस्य सेचयेच्चतुरः समैः।। १९।।
स्नानद्वयं प्रकुर्वीत यजमानो व्रते स्थितः। आचार्यो घृतपलं प्राशेदथ दुग्धपलद्वयम्।। २०।।
पलद्वयं च दधि वा तोयं पलचतुष्टयम्। जलाशी वा फलाशी वा निराहारोऽथवा भवेत्।। २१।।
यजमानस्तु कलमसम्भवास्तण्डुलांस्तथा। अक्षतान् फलसंशुद्धान् क्षालितांश्च पुनः पुनः।। २२।।
प्रस्थमात्रान् कपिलाज्यदुग्धपक्वान् मृदूँल्लघून्। सायंकृत्यान्तरे काले भुञ्जीतैक्षवसंयुतान्।। २३।।
स्त्रियोऽपि श्यामकलमसम्भवांस्तण्डुलांस्तथा। अर्धाहारं प्रकुर्वीत संस्कृतांस्तीर्थवारिणा।। २४।।
सैन्धवेन घृतेनात्र समभ्यर्च्य प्रजापतिम्। ब्राह्मे मुहूर्ते चोत्थाय मूत्रोत्सर्गौ विधाय च।। २५।।
कृतशौचक्रियः शुद्ध आचान्तः प्रोक्तवर्त्मना। दन्तकाष्ठं विधायाथ स्नायात् सूर्योदयात् पुरा।।२६।।
आचार्यो यजमानश्च महानद्यां स्त्रियश्च ताः। प्रातःकृत्यं यथाप्रोक्तं कृत्वा सूर्यमनुं जपेत्।। २७।।
सार्धयामद्वये यावत् प्रातरारभ्य सञ्जपेत्। जपादौ च जपान्ते च देवं सम्पूजयेद्रविम्।। २८।।

होमं कृत्वा दशांशेन ततो माध्याह्निकीं क्रियाम्। कृत्वा सन्तर्पयेद् देवं दशांशैः शुद्धवारिणा।।२९।।
मार्जयेच्च तदर्धेन यावदुक्तार्कमण्डलम्। सायंकृत्यं विधायाथ भुञ्जीरनुक्तवर्त्मना ।। ३०।।
प्रणम्याचार्यचरणौ शयीरंस्तस्य देशतः। एवं प्रोक्तानि कर्माणि प्रातःकृत्यादनन्तरम्।। ३१ ।।
सोपवासः प्रकुर्वीत प्रतिज्ञां पुत्रियक्रतौ। एतस्य यजमानस्य पत्न्यामस्यामथासु वा।। ३२।।
पितृभ्योऽधिकगुणवत्पुत्रकामोऽद्य कालतः। मासद्वयं यावदहं त्रिलक्षकृतसंख्यया ।। ३३।।
अक्षरं(आर्कं) मन्त्रं महाश्वेताशक्तिं भास्करदैवतम्। देवभागमुनिं तद्वद्गायत्रीछन्दसान्वितम्।। ३४।।
जप्त्वैतस्य दशांशेन कपिलाज्यतिलेन च। हुत्वार्कोपचिते वह्नौ योनिकुण्डे तदर्धतः।। ३५।।
तर्पयेच्छुद्धतोयेन सम्मार्ज्यापि तदर्धतः। कल्पोक्तविधिना देवं सम्पूज्य भास्करं प्रभुम्।। ३६।।
रक्तभूमध्यकुम्भं तं सञ्चिन्त्याभ्यर्च्य पूर्ववत्। तज्जलेन सपत्नीकं यजमानं स्नापितं मुने।। ३७।।
तत्पत्नीकर्तृकचरुप्राशनं चरुमुच्चरेत्। पुत्रीयं यज्ञं करिष्ये प्रतिज्ञामाचरेदिति ।। ३८।।
ततो ह्यनन्तरे काले उपान्ते होममाचरेत्। सार्धं त्रिंशत्सहस्राणि जप्त्वा प्रोक्तेन वर्त्मना।। ३९।।
पूर्णाहुतिं सपत्नीकयजमानसमन्वितः। कुर्याच्च त्र्यायुषं तेषु वह्निं संरक्षयेत्ततः।। ४०।।
प्रत्यहं पूजयेत्तं च देवताकारमाहितम्। प्रतिज्ञानिर्विघ्नकरान् कृतस्वस्त्ययनद्विजान्।। ४१।।
सन्तर्पयेद्भोजनेन त्रिमध्वक्तेन साधकः। तेभ्यश्च दक्षिणां दत्त्वा दद्यात्तु प्रेप्सितं वरम्।। ४२।।
चक्रं विदध्यादाचार्यस्ततो वर्णैस्तु पञ्चभिः। नवनाभं यथाशोभं वह्नेरुत्तरतो दिशि ।। ४३।।
हैमान् वा रूप्यताम्रोत्थान् कलशान् नव शोभनात्। क्षालितानस्त्रमनुना धूपितान् कलशांस्तु तान्।।४४।।
मध्यादिप्रदक्षिणतः पदेषु नवसु स्मरन्। ग्रहान्नव ततो दीक्षाविधिवत् स्थापयेत्तु तान्।। ४५।।
सूर्यादिकान् ग्रहांस्तांस्तु पूजयेच्च पृथक् पृथक्। दीक्षोक्तेन विधानेन प्रत्यहं दिवसत्रयम्।। ४६।।
दिक्पालान् पूजयेत् सूर्ये ततश्चाष्टग्रहानपि। सूर्यं तु कुम्भतोयान्तर्जलान्यप्यत्र चान्यतः।। ४७।।
कुम्भेभ्यो निक्षिपेन्मन्त्रैर्मन्त्रास्त्वाद्यर्णबीजकाः। चतुर्थ्यन्ता नमोन्ताश्च मध्यकुम्भाम्भसा पृथक्।।४८।।
आचामयेत् स तान् सर्वानासीनानुत्तरामुखान्। स्नापयेन्मूलमन्त्रेण साधकः सूर्यं संस्मरन्।। ४९।।
तथा ज्येष्ठां च तत्पत्नीं श्वेतवस्त्रं पिधापयेत्। अन्यकुम्भाम्भसा पात्र एकत्र कृतसम्पदा।। ५०।।
आचामेन्मूलमन्त्रेण सर्वनितान् पृथक् पृथक्। चरुं पचेद्धोमवह्नौ कथ्यतेऽस्य विधिः शुभः।। ५१।।
क्षालयेदस्त्रतोयेन हौमं चरुमनेकधा । होमाग्नावादधीतामुं प्रजापतिमनुं स्मरन्।। ५२।।
मूलेन कपिलादुग्धं क्षिपेत् प्रस्थचतुष्टयम्। तथा हैमन्तिकश्वेतधान्यतो हस्तविद्रुतान्।। ५३।।
अक्षतान् प्रस्थसंख्यातान् क्षालितांस्तीर्थवारिणा। कपिलायास्तु गोमूत्रैर्गोमयैः पयसा तथा।। ५४।।
दध्ना घृतेन प्रत्येकं त्रिभिः प्रक्षालयेद् ध्रुवम्। मूलमन्त्रं जपेत् स्पृष्ट्वा सहस्रं होमपात्रके।।५५।।
तत्र सम्पूजयेद्देवं कल्पोक्तविधिना रविम्। तांस्तु देवमयान् ध्यात्वा चरोर्मध्ये तु निक्षिपेत्।।५६।।
हेमपात्र्यां च मूलेन हस्ताभ्यां तन्मुखं स्पृशन्। शतं सहस्रं प्रजपेन्मन्त्रं फलत्रयोपरि।। ५७।।

पूजयेत् पूर्ववत्तत्र भास्करं लोकभास्करम्। निर्माल्यादि चरोस्तस्माद् दूरीकृत्याथ मन्त्रवित्।।५८।।
कल्पोक्तन्यासजातानि चरोरेव प्रविन्यसेत्। अभिघारं घृतेनात्र मूलेनोत्सृज्य च त्रिधा।। ५९।।
अवतार्य मुखं स्पृष्ट्वा सहस्रं च जपेन्मनुम्। व्याहृतीभिः पक्वचरुणाग्नये च ततः परम्।। ६०।।
प्रजापतये स्वाहेति अथेन्द्रादिभ्य एव च। तदस्त्रेभ्यश्च प्रत्येकं भास्करेभ्यश्चरुं[1] तथा।। ६१।।
जुहुयात् पञ्चमांशेन सघृतेन चरोस्ततः। नवनाभान्तरे मध्ये पूजयेत् पूर्ववच्चरुम्।। ६२।।
संस्थाप्य पूजयेत्तत्र देवं पूर्वोक्तवर्त्मना। निर्माल्यं दूरतः कृत्वा ग्रहानष्टौ ततो यजेत्।। ६३।।
दिक्पालान् पूजयेत्तेषु पायसान्नं बलिं हरेत्। ततोऽपसार्य निर्माल्यं चरुमुत्थाप्य मन्त्रवित्।। ६४।।
विप्राशीर्भिः प्रवृत्ताभिः पञ्चघोषपुरःसरम्। आचार्यः पुत्रतेजोदो ब्रह्मप्रत्यधिदैवतम् ।। ६५।।
रुद्राधिदैवतं तस्मादिदं भास्करदैवतम्। गृहाण भुङ्क्ष्व पत्नीभ्यो विभज्याभ्यो निवेदय।। ६६।।
एतान् भुञ्जीत पुत्राप्त्यै पञ्चग्रासान् यथाकृतान्। भुक्त्वाचामयेयुरन्ते दन्तकाष्ठं विधाय च।। ६७।।
पुनराचम्य ते सर्वे गुरुपादाम्बुजद्वये। निपतेयुरसाधुत्थाप्येदं ब्रुवन् स मन्त्रवित्।। ६८।।
पित्रादिगुणवत्पुत्रं लभध्वमतितेजसम्। दीर्घायुषं महासत्त्वं सदा लक्ष्मीनिषेवितम्।। ६९।।
जितशत्रुं कुलदीपं कुलदीप्तिकरं परम्। विद्यानां पारगं दान्तं दातारं गजवाजिनाम्।। ७०।।
भोक्तारं वसुधायास्तं यशसा क्रान्तभूतलम्। इत्यादायाशिषं मूर्ध्ना प्रणमेच्च पुनः पुनः।। ७१।।
एतत्पुत्रीययज्ञस्य प्रतिकार्यं निवेदयेत्। गुरवे दक्षिणां दत्त्वा सुवर्णानां शतं तथा।। ७२।।
गावो महिष्यो वृषभा अश्वयूथो गजादयः। सम्पन्नापणचक्रार्था उद्यानवनशोभिताः।। ७३।।
ग्रामा ग्रामगुणोपेता ये स्युर्नद्यम्बुमातृकाः। भूषणासनशय्यादिधनधान्यालयानि च।। ७४।।
नान्यत्र याचते येन तावदस्मै निवेदयेत्। आचार्ये प्रणतिं कुर्याद् ब्राह्मणैः सहितः स्वयम्।।७५।।
ब्राह्मणान् भोजयित्वा च दीनान्धान् रोगपीडितान्। यजमानं सपत्नीकं शान्तिकुम्भोदकेन च।।७६।।
अभिषिच्य ऋत्विक् स्वस्ति प्रोच्यागच्छेत् स्वमालयम्। यजमानस्त्रियश्चैता यावत्कुसुमसंस्थिताः।।७७।।
पुष्पवत्यामथैकस्याम[2]र्धरात्रे स्त्रियं भजेत्। विशुद्धमृदुशय्याकः शुद्धवस्त्रसुगन्धिधृक् ।। ७८।।
चारुस्रग् गन्धभूषाढ्यः सुगन्धिकृतलेपनः। कुण्डलादिविभूषावान् पृष्ठतो यज्ञसूत्रधृत्[3]।। ७९।।
स्त्रियामासज्ञमानायां सिञ्चेदम्भो दृढध्वजः। सिक्ते रेतस्यथाश्लिष्टौ तिष्ठतां दम्पती क्षणम्।। ८०।।
सुयन्त्रिता तथा नारी कर्तव्या यत्नतः स्तने। सम्भोगेऽपि निपीड्या च यतः शक्तिमुपैति सा।।८१।।
उत्थायाचामतस्तौ हि शूद्रवच्छौचमाश्रितौ। स्नायातां चेत् कृताभ्यङ्गौ तूर्णं वाचामयेत् पृथक्।।८२।।
पयः पीत्वा यथावाञ्छं पुमांस्ताम्बूलमाचरेत्। नारी हरीतकीं भक्षेत् प्रातः कुङ्कुमसंयुताम्।।८३।।
पूर्ववत्तौ शयीयातां यावत् षोडशवासरान्। देवपुत्रो भवेत्तत्र नात्र कार्या विचारणा।। ८४।।

---

१. 'तं तथा' ख. पाठः। २. ' मध्यरात्रे' ख. पाठः। ३. 'भृत्' ख. पाठः।

आषोडशदिनाद्यावदृतुकालं विदुर्बुधा:। दिवा वा निशि वा जाते पुष्पभागे भगाम्बुजे।। ८५।।
ताश्चतस्रो निशास्त्याज्या: स्नानं स्यात् पञ्चमे दिने। आद्याश्चतस्रो निन्द्यास्ता: सङ्गमस्तासु गर्हित:।।८६।।
समरात्रं प्रसिञ्चेत्तु पुत्रार्थी प्रोक्तवर्त्मना। आदौ दिवा निषेवेत यदि गर्भो भवेदपि।। ८७।।
अल्पायुरल्पवचनो दाहमोहरुजाकुल:। द्वितीये दु:खभोग: स्यात्तृतीये रोगवांस्तथा।। ८८।।
चतुर्थे पञ्चपञ्चाशद्दिनानीह स जीवति। षष्ठे षष्टिं च साराढ्यो वर्षाणीह स जीवति।। ८९।।
अष्टमे सप्ततिं वर्षान् दशमेऽशीतिवत्सरान्। द्वादशे नवतिं चाब्दान् षोडशे साष्टकं शतम्।।९०।।
रात्रिकालेऽपि कथ्यन्ते संयोगार्था: सुगोपिता:। प्रथमे घटिकाकाले योगाद्गर्भो यदा भवेत्।। ९१।।
अल्पायुरल्पशक्तिश्च त्रिंशद्वर्षाणि जीवति। चत्वारिंशद् द्वितीयेऽपि एवमग्रेऽपि वर्धते।। ९२।।
एकैकपङ्क्तिभागेन यावत्साग्रं शतं पृथक्। नन्दायां मन्दभाग्य: स्याद्भद्रायां भास्करोपम:।। ९३।।
जयायां विष्णुसदृशो रिक्तायां निर्बलोऽधम:। पूर्णायां पूर्णलक्ष्मीवान् विद्वान् भवति धार्मिक:।।९४।।
कुजे कुब्जादिकं देहे सहिष्णुर्बहुवित्तवान्। बुधे विद्वान् बुद्धिहीनो धर्मकर्मरत: स्मृत:।। ९५।।
गुरौ गुरुमति: श्रीमान् बहुभोक्ता जगत्प्रिय:[१]। शुक्रे मतिजिताशेष: सानुरक्तो गुणप्रिय:।। ९६।।
शनौ स्थिरमति: पापारोपण: परमर्षक:। रवौ क्रोधवशो लोलो बहुपुत्रो रुजाकुल:।। ९७।।
चन्द्रे सुन्दरदेह: स्याद्धनवान् धार्मिक: सुधी:। पञ्चपर्वसु यो जात: स भवेत् तस्करोऽधम:।।९८।।
सार्वभौमो भवेद्गर्भ: पञ्चम्यामुत्तरे भृगौ। शुभसिद्ध्यमृतानन्दे गर्भो राजेश्वरो भवेत्।। ९९।।
विष्टिदुष्टेषु कालेषु यावज्जीवं रुजाकुल:।..।।

इति।। तथा मन्त्रान्तरम्—

मनुर्वह्निसमारूढो मस्तकेन च संयुत:। वर्माढ्यो मनुराख्यात: सङ्ग्रामविजयाभिध:।। १।।

मनु: औकार:, वह्नी रेफ:, मस्तकोऽनुस्वार:, एतै: रौं। वर्म हुंकार:।

ऋष्याद्या मन्त्रिभि: प्रोक्ता अजगायत्रिभानव:। ह्रामाद्यैरङ्गमुद्दिष्टं मनोरस्य दिनेशितु:।। २।।
पद्मयुग्मं वराभीती दधानं करपङ्कजै:। रक्तपद्मस्थितं भानुं रक्तं ध्यायेत् त्रिलोचनम्।। ३।।
न्यासपूजादिकं सर्वं त्र्यक्षरोक्तविधानवत्। अर्घ्यं पूर्वोदितं कृत्वा सङ्ग्रामे विजयी भवेत्।। ४।।

इति।। तथा मन्त्रान्तरम्—

शिरोयुक्तं विष्णुपदं चन्द्रो जिह्वान्वितो मनु:। आत्मनो युग्मवर्णोऽयमजपाख्यो विषापह:।। ५।।

शिरोयुक्तं विष्णुपदं बिन्दुयुक्तो हकार:। चन्द्रो जिह्वान्वितो विसर्गयुक्तो सकार:। तथा—

ब्रह्मा मुनि: समुद्दिष्टो गायत्रीछन्द उच्यते। देवीपूर्वं देवतास्य परमात्मा समीरित:।। ६।।
षड्दीर्घभाजा च हसा विदध्यादङ्गमस्य वै।..।।

रक्ताब्जकाञ्चननिभं गुणटङ्कयुक्तैर्हस्तैरभीतिवरदे दधदम्बुजस्थम् ।
गौरीहराङ्कलितं वपुराश्रयाम: सौमयग्निरूपमनिशं गिरिजार्धभागम्।। ७।।

---

[१] 'जनप्रिय:' ख. पाठ:।

उपरितनयोः करयोः पद्मयुगं, वामाद्यधःकरयोरभीतिवरौ, इत्यायुधध्यानम्।

पूर्वोदिते यजेत् पीठे दीप्तादिपरिकल्पिते। तत्र देवं यजेन्मूर्तिं मूलेनाकल्प्य मन्त्रवित्॥ ८॥
पूर्वमङ्गैर्यजेन्मन्त्री दिग्दलेषु प्रपूजयेत्। क्रमादृतं वसुं तद्वन्नरं पश्चाद्वरं तथा ॥ ९॥
विदिग्दलेषु चाभ्यर्च्या ऋतजाख्या अतः परम्। गोजा अब्जाद्रिजा वापि ततो लोकेश्वरान् बहिः॥१०॥
वज्रादीनि ततः पश्चाद्यजेदनुदिनं सुधीः।..॥

इति। अथ प्रयोगः– तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीछन्दसे नमः। हृदि परमात्मने देवतायै नमः। इति विन्यस्य मम मोक्षार्थे विनियोगः इति कृताञ्जलिरुक्त्वा, ह्सां हृदयाय नमः। ह्सीं शिरसे०। ह्सूं शिखायै०। ह्सैं कवचाय०। ह्सौं नेत्राभ्यां०। ह्सः अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गार्चान्ते दिग्दलेषु देवाग्रादि प्रादक्षिण्येन–ऋताय नमः। वसवे०। नराय०। वराय०। विदिग्दलेषु–अब्जायै नमः। गोजायै०। ऋतजायै०। अद्रिजायै०। इति सम्पूज्य लोकेशार्चादि प्राग्वत् कुर्यादिति। तथा–

जपेद् द्वादशलक्षं तु तद्दशांशं हुनेत् तथा। सर्पिरक्तेन हविषा तर्पणादि ततश्चरेत्॥ ११॥
पूर्वोदितेन विधिना सूर्यायार्घ्यं निवेदयेत्।...॥

कृत्वा सल्लिपिपद्ममत्र च भवेन्मध्ये मनुर्मूलगो
न्यस्यास्योपरि तोयपूर्णकलशं सम्यक् पिधायास्य च।
वक्त्रं वामकरेण मूलमनुना जप्तेन चाष्टोत्तरं
सञ्जप्याथ शतं सुधामयमिति स्मृत्वाभिषिञ्चेच्च तम्॥ १२॥
साध्यं तेन नरो भवेद्विगतभीः सर्वत्र वीतामयो
दीर्घायुश्च विपद्भयेन रहितो योषिच्च सौभाग्ययुक्।
तेनैव प्रजपेत् करेण करकं सम्यक् पिधायामृती-
भूतैस्तैर्विषिणं निषिञ्चति विषं वा कालकूटं हरेत्॥ १३॥
अथवा मनुमत्र जपेत् स्वकरं विषिमूर्ध्नि सुधां विनिधाय ततः।
स तु तक्षकदष्टमपीह नरं प्रतिमोचयते ह्यचिरान्मनुना॥ १४॥

सञ्चिन्त्याशु सुधाकरद्वयगलत्पीयूषधाराप्लुतं बीजं प्रान्तगतं ततः स्रुतसुधासम्भावितं चादिमम्।
मन्त्रस्यास्य कृती जपेन्मनुमिमं क्षुद्रायमघ्नं परं भूतापस्मृतिसर्पजातविकृतिर्हत्वा सुखं जीवति।१५॥
शीर्षे चन्द्रविनिःसृतं स्रुतसुधं हंसात्मरूपं मनुं तत्सौषम्नपथं स वै[1] विमलधीर्नीत्वा ततः स्वां तनुम्।
व्याप्तां तेन विचिन्त्य तां मनुमिमं सञ्जप्य धीमान् कृती रोगापस्मृतिकालकूटदुरितोन्मादज्वरान् संहरेत्॥

---

[1] 'सदा' ख. पाठः।

आकाशान्तरचन्द्रखण्डविलसत्पीयूषधाराचितं
मन्त्रान्त्यं सगतार्धचन्द्रयुगलप्रोद्भूतभास मुहु:।
एवं साधकसत्तमस्य सततं दाहार्तिभूतामया:
कृत्या: शत्रुकृता: प्रयान्ति विलयं योग: परोऽयं मत:।। १७।।

इति।। तथा मार्तण्डस्य मन्त्र:—

वियत् कृशानुमान्ताभ्यां मनुषष्ठेन्दुभिर्युतम्। मार्तण्डभैरवो मन्त्रो भजतां सर्वसिद्धिद:।। १८।।

वियत् हकार:, कृशानु रेफ:, मान्तो यकार:, मनु: औकार:, षष्ठ ऊकार:, इन्दुर्बिन्दु:, एभि: पिण्डितं बीजं ह्र्यौऊं इति सिद्धं भवति।

मध्यगो बिम्बमन्वोश्च सर्वेष्टफलदायक:। दान्ताग्न्यक्ष्युत्तमाङ्गैस्तु बिम्बबीजमुदाहृतम्।। १९।।

दान्तो धकार:, अग्नी र, अक्षि इ, उत्तमाङ्गं बिन्दु:, तेन ध्रिं इति। मन्त्रान्तरं तु—''टान्तं दहननेत्रेन्दुसहितं तदुदीरितम्।'' टान्तं ठकार:, दहनो रेफ:, नेत्रं इ, इन्दुरनुस्वार:, तेन ठ्रिं इति बिम्बबीजमुद्धृतं। यथोपदेशं जप:। ब्रह्मा ऋषि:, निचृद्गायत्री छन्द:, मार्तण्डभैरवो देवता, हं बीजं, बिन्दु: शक्तिरिति वदन्ति। तथा—

मूर्तय: पञ्च चोदिष्टा: सूर्यभास्करभानव:। रविर्दिवाकरश्चापि न्यस्तव्या अङ्गुलीषु ते।। २०।।
मध्यमाङ्गुलिमारभ्य कनिष्ठान्तं न्यसेत् सुधी:। मूलाणुना पञ्चह्रस्वैर्युक्तेनानेन संयुता:।। २१।।
शिरोवदनहृद्गुह्यपादेष्वेता: क्रमान्न्यसेत्।..।।

मध्यमाङ्गुलिमिति मध्यमातर्जन्यङ्गुष्ठानामाकनिष्ठासु। ''मध्यमाद्यनुजान्तास्विति'' नारायणीयवचनात्। पञ्चह्रस्वैरकाराद्योकारान्तै: षण्डविधुरै:।। ''मूर्ती: सद्यावसानिका:'' इति नारायणीयोक्ते:।

तत: षडङ्गं नेत्रान्तं कुर्याद् दीर्घयुजाणुना। ततस्तेनैव कुर्वीत व्यापकं मन्त्रवित्तम:।। २२।।

अत्रास्त्रन्यासानन्तरं नेत्रन्यास: कार्य:। अत्र केचित्—''दीर्घयुक्तेन बीजेन नेत्रान्ताङ्गानि विन्यसेत्।'' इति शारदातिलकवचनात्, नेत्रान्तानि पञ्चाङ्गानि वदन्ति, तन्न ''अस्त्रान्ताङ्गानि षट्'' इति नारायणीयवचनात्। तथा ध्यानम्—

स्वर्णापीतजपानिभं त्रिनयनं मुक्तालसद्धारिणं
खट्वाङ्गारिगुणांस्तथा जपवटीं पद्मं च शक्त्यङ्कुशौ।
हस्ताब्जैर्दधतं कपालममलं सद्वल्लभालिङ्गितं
मार्तण्डं मणिबद्धरम्यमुकुटं ध्यायेच्च वेदाननम्।। २३।।

दक्षोर्ध्वादिखट्वाङ्गादीनि चत्वारि। वामोर्ध्वादिपद्मादीनि चत्वारि ध्येयानि। वेदाननं चतुर्मुखं, त्रिनयनं प्रतिवक्त्रमिति शेष:। अष्टबाहुं द्विषट्काक्ष''मिति नारायणीयोक्ते:। स्वर्णापीतं जपापुष्पनिभं च तेन रक्तमित्युक्तं ''सिन्दूरारुणमीशानं वामोर्ध्वे दधतं रविम्।'' इति नारायणीयोक्ते:। तथा—

नवशक्तिसमायुक्ते पीठे चोषाढ्यकर्णिके। कुर्वीत पूर्ववच्चाङ्गपूजनं नेत्रमीशगम्।। २४।।
पूजयेच्च ग्रहानष्टौ लोकेशांश्च तथायुधै:।..।।

इति। नारायणीये—

न्यसेदुषां प्रभां सन्ध्यां प्रज्ञां दिक्ष्वब्जकर्णिके। दण्डिदीर्घस्वनामादिवर्णैरावाहयेत् ततः।। १।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे निचृद्गायत्रीछन्दसे नमः। हृदि श्रीमार्तण्डभैरवदेवतायै नमः। गुह्ये हं बीजाय नमः। पादयोः बिन्दवे शक्तये नमः। नाभौ रं कीलकाय नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, मध्यमयोः अं सूर्याय नमः। तर्जन्योः इं भास्कराय नमः। अङ्गुष्ठयोः उं भानवे नमः। अनामयोः एं रवये नमः। कनिष्ठयोः ओं दिवाकराय नमः।। शिरसि अं सूर्याय नमः। मुखे इं भास्कराय०। हृदि उं भानवे०। गुह्ये एं रवये०। पादयोः ओं दिवाकराय०।। ह्र्यां हृदयाय नमः। ह्र्यीं शिरसे०। ह्र्यूं शिखायै०। ह्र्यैं कवचाय०। ह्र्यौं नेत्रत्रयाय०। ह्र्यः अस्त्राय०। इति करयोः कनिष्ठान्तं हृदादिषु नेत्रान्तं च विन्यस्य, मूलमन्त्रेण व्यापकं विन्यस्य, ध्यानादिपुष्पोपचारान्ते प्राग्वदङ्गानि यथास्वस्थानं सम्पूज्यास्त्रमीशानकोणे सम्पूज्य, प्राग्वदष्टौ ग्रहान् सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् कुर्यादिति। तथा—

लक्षाणां त्रितयं मन्त्री जपेद्बीजं च बिम्बयोः। मध्यगं जुहुयात् तस्य दशांशेनोत्पलैः शुभैः।।२६।।
त्रिमध्वक्तैस्तर्पणादि कुर्यात् सिध्यति मन्त्रराट्। एवं सिद्धे मनौ मन्त्री काम्यकर्माणि साधयेत्।।२७।।
पूर्ववच्चार्घ्यदानं च कुर्यान्मन्त्री समाहितः। चतुरङ्गुलसम्भूतैः सुमनोभिः श्रियं लभेत्।। २८।।
लक्षं हुनेच्च शाल्याज्यतिलबिल्वैर्निधानभाक्। राजानं वशयेच्छीघ्रं जपाकुसुमहोमतः।। २९।।
जुहुयान्मातुलुङ्गैश्च लभते वाञ्छितार्थकान्। एवं यः साधयेन्मन्त्री तस्य विद्यायशोबलम्।।३०।।
पुत्रा लक्ष्मीश्च सौभाग्यं सर्वदा विजयो भवेत्। वृत्तं त्र्यस्रं पुनर्वृत्तं षडस्रं वृत्तयुग्मकम्।। ३१।।
अष्टास्रकं कलास्रं च विधानेन लिखेत् क्रमात्। (वृत्तस्य मध्ये प्रणवं त्रिकोणेऽङ्गारकं न्यसेत्।।३२।।
गारुडं च पुनर्वृत्ते लिखेत्पञ्चाक्षरं न्यसेत्। षट्कोणे चक्रराजं च वर्गषट्कं लिखेत् क्रमात्।।३३।।)
वृत्तद्वये महासौरं गायत्रीं शिरसा सह। अष्टस्वष्टाक्षरं न्यसेदिन्द्रादीर्देवता अपि ।। ३४।।
कलास्रेषु स्वराः प्रोक्ताः श्रींह्रीं च विलिखेत् क्रमात्। सौरचक्रमिदं पुंसामायुरारोग्यवर्धनम्।। ३५।।
बन्ध्यानां पुत्रजनकं स्त्रीणां सौभाग्यदायकम्। राज्ञां विजयदं सम्यक् रोगिणां रोगनाशनम्[1] ।।३६।।
किं बहूक्तेन विधिना धृतं हस्तेऽखिलप्रदम्। उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्।। ३७।।
हृद्रोगं मम शब्दान्ते सूर्यान्ते हरिमा—पदम्। णं च नाशयशब्दान्ते महासौरमनुर्मतः।। ३८।।

इति। वृत्तमित्यादीनां श्लोकानामयमर्थः— वृत्तं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, तद्बहिस्त्र्यस्रेऽङ्गारकं ''रं इति'' विलिख्य, पुनर्वृत्ते ''क्षिपओं स्वाहा'' इति गारुडपञ्चाक्षरमालिख्य, षट्कोणे पूर्वोक्तसुदर्शनचक्रमन्त्रमालिख्य, तदग्रेषु कवर्गादिवर्गषट्कं विलिख्य, बहिर्वृत्तद्वये महासौरं शिरसा सह गायत्रीं च विलिख्याष्टसु कोणेषु सौराष्टाक्षरमालिख्य, तदग्रेषु शक्रादिबीजान्यालिख्य, षोडशदलेषु स्वरांस्तदग्रेषु श्रींह्रीं इति बीजद्वयं प्रत्यग्रं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। महासौरमन्त्रस्तु ''उद्यन्नद्य मित्रमह'' इति प्रोक्तवैदिकमन्त्रः।। अथ चन्द्रस्य मन्त्रः। सारसङ्ग्रहे—

चन्द्रमन्त्रं प्रवक्ष्यामि मन्त्रिणां हितकाम्यया। सम्पत्प्रदं चतुवर्गफलदं सर्वसिद्धिदम्।। १।।

---

[1] १. 'नाशकृत्' ख. पाठः।

व्योमादिर्मनुपूर्वस्थो बिन्दुयुग् भृगुसद्यतः। रविराननवृत्ताढ्यो मरुद् दीर्घा विषस्तथा।। २।।
कलान्त्ययुक् षडर्णोऽयं सोममत्र उदाहृतः। भृग्वम्बुमन्विन्दुखण्डमपरे बीजमूचिरे।। ३।।

व्योमादिः सकारः, मनुपूर्व ओकारः, बिन्दुरनुस्वारस्तेन सों इति। भृगुः सकारः, सद्यओकारस्तेन सो इति। रविर्मकारः, आननवृत्तमाकारस्तेन मा इति। मरुत् यकारः। दीर्घा न। विषं म, अन्त्यकला विसर्गस्तेन मः इति। प्रकारान्तरेण बीजमुक्तम्—भृगुः सकारः, अम्बु वकारः, मनुरौकारः, इन्दुखण्डोऽनुस्वारस्तैः स्वौं इति बीजं वदन्ति।

ऋषिर्भृगुः पङ्क्तिश्छन्दो देवता चन्द्रमाः स्मृतः[1]। सदीर्घनिजबीजेन षडङ्गानि मनोः क्रमात्।। ४।।
एवं विन्यस्य मन्त्रज्ञो द्विजराजं विचिन्तयेत्।......................................।।

श्वेताब्जस्थः स्फुटिकरजतप्रोल्लसत्कान्तिरुच्चै-
र्मुक्ताहारप्रलसिततनुर्नीलकेशौघरम्यः।
हस्ताब्जाभ्यां कुमुदवरदे धारयन् नः शशाङ्को
भूत्यैर्भूयादभिमततमामञ्चकोद्यत्कलङ्कः।। ५।।

वामदक्षाभ्यां कुमुदवरदे।

पीठे धर्मादिभिर्युक्ते गदिते परिपूज्य च। चन्द्रमण्डलपर्यन्तं ततः सम्पूजयेद्विभुम्।। ६।।

पद्मपादाचार्यास्तु—''राका कुमुद्वती नन्दा सुधा सञ्जीवनी क्षमा। आप्यायनी चन्द्रिका चाह्लादिनी नव शक्तयः।। १।। पूर्वादिक्रमतो मन्त्री नत्यन्ताः पूजयेदिमाः''। इति पीठशक्तीराहुः। स्वायम्भुवे तु— ''अमृता तारका ज्योत्स्ना विमला व्यापिनी तथा। चित्रा च कृत्तिका कान्तिः श्रवणा नव शक्तयः।। अमृतान्ते कलात्मने संवित्पीठाय वै नमः।'' इति। तथा—

किञ्जल्केषु षडङ्गानि तच्छक्तीः पत्रगा यजेत्। तास्वाद्या रोहिणी प्रोक्ता कृत्तिका रेवती पुनः।। ७।।
भरणी रात्रिरार्द्रा च ज्योत्स्नाख्या च कला मताः। सुश्वेताः श्वेतवसनाः श्वेतमाल्यानुलेपनाः।। ८।।
मुक्ताहारालङ्कृताङ्ग्यः पाण्यञ्जलिपुटाः शुभाः। आपीनोन्नतवक्षोजभाराक्लान्तावलग्नकाः।। ९।।
मदेन मन्दगामिन्यः प्राणनाथात्तमानसाः। प्रसन्नचन्द्रवदनाः फुल्लेन्दीवरलोचनाः ।। १०।।
ग्रहानष्टौ दलाग्रेषु लोकेशांश्च ततो यजेत्। वज्रादीनि ततो बाह्ये एवं पूजा समीरिता।। ११।।

ग्रहार्चाक्रमस्तु—''पूर्वदक्षिणपाश्चात्यसौम्यपत्राग्रकेषु च। रविश्चान्द्रिः गुरुः शुक्रः सम्पूज्या साधकैरमी।। आग्नेयादिषु कोणेषु भौममन्दाहिकेतवः।'' चान्द्रिर्बुधः। मन्दः शनिः। अही राहुः, इति स्वायम्भुवोक्ताः। ''स्वनामाद्यर्णबीजकाः'' इति शारदातिलके तत्तन्नामाद्यर्णबीजका रव्यादयो ज्ञेयाः। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भृगुऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदये श्रीचन्द्रमसे देवतायै नमः। गुह्ये सौं बीजाय नमः। पादयोः नमः शक्तये नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, सांसीं इत्यादिना करषडङ्गं कृत्वा ध्यानाद्यात्मपूजान्ते मण्डूकादिकर्णिकान्तं योगपीठं सम्पूज्यार्कमण्डलं वह्निमण्डलं च सम्पूज्य, पश्चात् सोममण्डलमभ्यर्च्य सत्त्वादिपरतत्त्वार्चान्तेऽष्टदलकेसरेषु—स्वाग्रादि प्रादक्षिण्येन मध्यान्तं राकायै नमः। कुमुद्वत्यै०। नन्दायै०। सुधायै०।

---

[1] 'मतः' ख. पाठः।

सञ्जीवन्यै०। क्षमायै०। आप्यायन्यै०। चन्द्रिकायै०। आह्लादिन्यै नमः। इति सम्पूज्य, ''अमृतकलात्मने संवित्पीठाय नमः'' इति पीठं सम्पूज्यावाहनादिषडङ्गपूजान्तेऽष्टदलेषु—रोहिण्यै नमः। कृत्तिकायै०। रेवत्यै०। भरण्यै०। रात्र्यै०। आर्द्रायै०। ज्योत्स्नायै। कलायै नमः। इति सम्पूज्य, दिग्दलाग्रेषु—रं रवये नमः। बुं बुधाय०। गुं गुरवे०। शुं शुक्राय०। कोणदलाग्रेषु—भौं भौमाय नमः। मं मन्दाय०। रां राहवे०। कें केतवे०। इति सम्पूज्य लोकपालार्चादि सर्वं प्राग्वत् कुर्यात्। तथा—

वर्णलक्षं जपेन्मन्त्रं जुहुयात् तत्सहस्रकम्। हविषा घृतसिक्तेन तर्पणादि ततश्चरेत्।। १२।।
ततः सिद्धो भवेन्मन्त्रः साधकस्य न संशयः। एवमुक्तप्रकारेण संसिद्धे मन्त्रवित्तमः ।। १३।।
चन्द्रं शिरसि सञ्चिन्त्य जपेन्मन्त्रमनन्यधीः। त्रिसहस्रेण लभते राज्यैश्वर्यमकिञ्चनः।। १४।।
लघुमिष्टहविष्याशी (जलस्थो विजितेन्द्रियः। वेदलक्षममुं मन्त्रं प्रजपेद्यतमानसः।। १५।।
धरागतं निधानं स ध्रुवं प्राप्नोति तत्क्षणात्। घोरज्वरे महाक्लेशे) शिरोरोगे च दारुणे।। १६।।
शत्रूत्पादितकृत्यासु कामलाद्यामयेषु च। अयुतं प्रजपेन्मन्त्रं तच्छान्तिरचिराद्भवेत्।। १७।।
पूर्णिमायां यथाशक्ति जपेन्मन्त्रं जितेन्द्रियः। सौभाग्यारोग्यसम्पत्तिभाजनं मनुजो भवेत्।। १८।।
ऐन्द्रवारुणविस्तीर्णमण्डलानां त्रयं बुधः। लिप्ते भूमण्डले कृत्वा निषीदेत् पश्चिमे स्वयम्।।१९।।
मध्यस्थे मण्डले न्यस्य पूजोपकरणानि च। अग्रस्थमण्डले पद्मसंयुते पूर्ववद्यजेत्।। २०।।
विधुं ततो रौप्यजातं पात्रं संस्थाप्य पूरयेत्। शुद्धगोपयसा मन्त्री स्पृशन्पात्रं मनुं जपेत्।। २१।।
अष्टाधिकं शतं पश्चाद् राकायामुदये विधोः। चन्द्राय विद्यामनुना दद्यादर्घ्यं यथाविधि।। २२।।

राकायां पौर्णमास्याम्।

एवमर्घ्यविधानं यः करोति प्रतिमासिकम्। षण्मासादीप्सितानर्थाँल्लभते नात्र संशयः।। २३।।
लक्ष्मीं च महतीं पुत्रान् सौभाग्यारोग्यसम्पदः। कान्तिं निजेप्सितां[1] कन्यां सत्कीर्तिं लभते ततः।।२४।।

इति।। तथा—

विद्ये विद्यामालिनियुक् चन्द्रिण्यन्ते च चन्द्रयुक्। मुखि शिरोऽन्त्यस्ताराद्यो विद्यामनुरयं ततः।।२५।।

विद्ये विद्यामालिनि स्वरूपं। चन्द्रिणि स्वरूपं। चन्द्रमुखि स्वरूपं। शिरोऽन्त्यः स्वाहान्त्यः। तथा यन्त्रसारे—

षट्कोणे कर्णिकायां र(ट)परपरिलसत्तारमस्रेषु मन्त्रं
षड्वर्णं चाष्टपत्रे स्वरयुगललसत्केसरे युग्मशोऽर्णान्।
विद्यामन्त्रस्य काद्यैर्वृतमवनिपुराश्रिस्थवंबीजमुक्तं
यन्त्रं सोमस्य कान्तिद्रविणसुतयशःश्रीप्रदं क्ष्वेडहारि।। १।।

इति। अस्यार्थः— अष्टदलकमलकर्णिकायां षट्कोणमध्ये प्रणवोदरे ससाध्यं रंबीजं[2] विलिख्य, षट्कोणेषु सोमषडक्षरस्यैकैकमक्षरं विलिख्याष्टदलकेसरेषु स्वरान् द्विश आलिख्य, अष्टदलेषु विद्यामन्त्रस्य प्रणवरहितान् षोडशवर्णान्

---

[1] 'कान्तिवश्योप्सतां' क. ग. पाठः। [2] 'ठंबीजं' ख. पाठः।

द्वन्द्वशो विलिख्य, बहिर्वृत्तयोरन्तराले कादिक्षान्तवर्णैरावेष्ट्य बहिश्चतुरस्रकोणेषु वंबीजं विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। अथ भौमस्य मन्त्रः—

अथ भौममनुं वक्ष्ये सर्वरोगनिवारणम्। सबिन्द्वाद्यद्वयं प्रोक्तं गारकाय हृदन्तिकः।। २६।।
अष्टवर्णो मनुः प्रोक्तोऽङ्गारकस्य मनीषिभिः।......................................।।

सबिन्द्वाद्यद्वयं अंअं। गारकाय स्वरूपं। हृन्नमः। तथा—

ऋष्याद्या ब्रह्मगायत्रीभूमिपुत्राः समीरिताः। अङ्गषट्कं चास्य मनोर्निजबीजेन सम्मतम्।। २७।।
नमाम्यङ्गारकं रक्तं रक्ताम्बरविभूषितम्। जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम्।। २८।।

आं ईं इत्यादि षडङ्गकम्। अथ बुधस्य मन्त्रः—

बुं ङेन्तं बुधशब्दं च हृदयान्तः षडर्णकः। बुधमन्त्रस्य मुन्याद्या ब्रह्मपङ्क्तिबुधा मताः।। २९।।
षडङ्गानि स्वबीजेन विन्यस्यैवं विचिन्तयेत्। वन्दे बुधं सदा देवं पीताम्बरसुभूषणम्।। ३०।।
जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम्। प्रजपेद्वर्णसाहस्रं दशांशं जुहुयाद् घृतैः।। ३१।।
अर्चनं पूर्वमुदितं ज्ञातव्यं मुनवित्तमैः। बृं बृहस्पतये हृच्च वसुवर्णो गुरोर्मनुः।। ३२।।
ऋष्याद्या ब्रह्मसानुष्टुब्गुरवोऽस्य प्रकीर्तिताः। अङ्गषट्कं दीर्घषट्क[1]स्वीयबीजेन कल्पयेत्।। ३३।।
रत्नस्वर्णांशुकादीनि दक्षपाण्यम्बुजात् किरन्। सव्यादन्यान् वस्तुराशीन् निध्येयोऽमरसद्गुरुः।।३४।।
जपेदष्टसहस्रं तु तच्छतं हविषा हुनेत्। घृताक्तेन षडङ्गैश्च ग्रहाशापायुधैर्यजेत् ।। ३५।।
ध्यात्वा पूर्वोक्तमार्गेण समासीनो नवाम्बरे। जपेत् सप्तदिनं वह्नौ पीतपुष्पैर्घृतप्लुतैः।। ३६।।
एवं दिनानां त्रितयं चाहुनेन्मन्त्रवित्तमः। स्वर्णवस्त्रादिसंसिद्धिर्भवत्यस्य न संशयः।। ३७।।
वस्त्रं मे देहि शुक्राय शुमाद्यो हृदयान्तिकः। मुन्याद्या ब्रह्मसविराट्शुक्रा मन्त्रिभिरीरिताः।। ३८।।

शुमाद्यः शुं वस्त्रं मे इत्यादि।

पदैः षड्भिः षडङ्गानि ततो देवं विचिन्तयेत्। शुक्रं नमाम्यापणस्थं शुक्लाभं वरभूषणम्।। ३९।।
स्वर्णभाण्डे रत्नधाराचिन्मुद्रान्नकरद्वयम्। अयुतं प्रजपेन्मन्त्रं सहस्रं जुहुयाद् घृतैः।। ४०।।
अङ्गग्रहाशापहेतिचतुरावरणं यजेत्। शनैश्चराय हृदयं शमाद्यश्चाष्टवर्णकः।। ४१।।
मुन्याद्या ब्रह्मगायत्रीशनैश्चरसमाह्वयाः। बीजेनैव षडङ्गानि विदधीत विचक्षणः।। ४२।।

विचक्षण इत्युक्तेः षड्दीर्घयुक्तत्वं बीजस्य सूचयति।

वन्दे शनैश्चरं वक्रदंष्ट्रं नीलविभूषणम्। वामजानुस्थतद्धस्तं साभयान्यकराम्बुजम्।। ४३।।
जपेदक्षरसाहस्रं तद्दशांशं हुनेद् घृतैः। षडङ्गग्रहदिक्पालैः सायुधैः परिपूजयेत्।। ४४।।
रां राहवे नमोन्तोऽयं राहुमन्त्रः समीरितः। षडर्णः स्वीयबीजेन षडङ्गानि प्रकल्पयेत्।। ४५।।
मुन्याद्या ब्रह्मगायत्रीरा[2]हवः समुदाहृताः। वन्दे राहुं धूम्रवर्णं सर्पकायं कृताञ्जलिम्।। ४६।।
विकृतास्यं रक्तनेत्रं धूम्रालङ्कारमन्वहम्। जपहोमार्चनाद्यं च पूर्ववत् परिकल्पयेत्[3]।। ४७।।

---

[1] 'दीर्घयुक्त' ख. पाठः। [2] 'गायत्र' क. पाठः। [3] 'कीर्तितम्' ख. पाठः।

पूर्ववत् वर्णसाहस्रघृतहोमतद्दशांशाङ्गग्रहाशाधिपतदायुधैरिति। अथ केतोः—

कें केतवे हृदित्येवं केतुमन्त्रः षडर्णकः। ब्रह्मा मुनिर्मतश्छन्दः पङ्क्तिः केतुश्च देवताः।। ४८।।
पूर्ववत् स्यादङ्गषट्कं ततः केतुं विचिन्तयेत्। वन्दे केतुं कृष्णवर्णं कृष्णवस्त्रादिभूषितम्।।४९।।
वामोरुन्यस्ततद्धस्तं साभयान्यकराम्बुजम्। जपहोममार्जनादि पूर्ववत् परिकल्पयेत्।। ५०।।

इति। अत्र भौमादीनां (पूजाया मध्ये तं तं ग्रहं सम्पूज्य तत्तदुत्तरग्रहादितत्तत्पूर्वग्रहावसानिकान् अष्टौ ग्रहानग्रादिप्रादक्षिण्येन पूजयेत्। अत्रैते ग्रहमन्त्राः) पुरस्तान्नानामन्त्रप्रकरणे वक्तव्या अपि सूर्यमन्त्रस्य प्रयोगोपयोगितया प्रोक्ताः सौकर्यार्थं, न तु पञ्चायतनान्तर्गतत्वेनेति।। अथाग्नेः प्रपञ्चसारे—(१६। २५)

अथाग्निमन्त्रानखिलार्थसिद्धिप्रदान्[1] प्रवक्ष्ये जगतो हिताय।
सर्ष्यादिक्लृप्तीनपि साङ्गभेदान् सार्चाविशेषान् सजपादिकांश्च।। १।।
वियतो दशमोऽर्घिसर्गयुक्तो भुवसर्गो भृगुलान्तषोडशाचः।
हुतभुग्दयिता ध्रुवादिकोऽयं मनुरुक्तः सुसमृद्धिदः कृशानोः।। २।।

इति। वियतो हकाराद्दशमो विलोमेन भकारः। अर्घी ऊकारः। सर्वो विसर्गस्ताभ्यां युक्तो भूरिति। भुवसर्गो भुव इत्यक्षरद्वयं सर्गो विसर्गस्तेन भुवरिति। भृगुः सकारः, लान्तो वकारः, अचः षोडशो विसर्गस्तेन स्वः। हुतभुग्दयिता स्वाहा। ध्रुवादिकः प्रणवादिस्तेन सप्ताक्षरोऽयं मनुः।। तथा—

भृगुरपि तदृषिश्छन्दो गायत्री देवताग्निरुद्दिष्टः। प्राक्प्रोक्तान्यङ्गानि द्विशः समुक्तैश्च मन्त्रवाक्यैर्वा।।३।।

पूर्वोक्तानि, सहस्रार्चिषे हृदयाय नमः इत्यादि प्रागुक्तानि। ध्यानम्—

शक्तिस्वस्तिकपाशान् साङ्कुशवरदाभयान् दधत् त्रिमुखः।
मुकुटादिविविधभूषोऽवताच्चिरं पावकः प्रसन्नो वः।। ४।।
जपेदिमं मनुमृतुलक्षमादराद् दशांशतः प्रतिजुहुयात् पयोन्धसा।
ससर्पिषाप्यसिततरैश्च षाष्ठिकैः समर्चयेदथ विधिवद्विभावसुम्।। ५।।
पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी। रुचिरा ज्वालिनी चेति कृशानोर्नव शक्तयः।।६।।
पीठे तनूनपातः प्रागङ्गैरष्टमूर्तिभिस्तदनु। भूयश्च शतमखाद्यैर्विधिनाथ हिरण्यरेतसं प्रयजेत्।। ७।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भृगवे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये अग्नये देवतायै नमः। इत्यादि दीक्षाप्रकरणोक्तन्यासध्यानपूजादिकं कृत्वा पूजाशेषं समापयेदिति। साज्येन सर्पिषा चेति तर्पणादिकमपि प्राग्वत् कुर्यात्। तथा—

आज्यैरष्टोर्ध्वशतं प्रतिपदमारभ्य मन्त्रविद्दिनशः। चतुरो मासाञ्जुहुयात्(लक्ष्मीरत्यायता भवेत्तस्य।।८।।
शुद्धाभिः शालीभिर्दिनमनु जुहुया)दथाब्दमात्रेण। शालीशालि गृहं स्याद्गोमहिष्याद्यैश्च सङ्कुलं तस्य।।९।।
शुद्धान्नैर्घृतसिक्तैः प्रतिदिनमग्नौ समेधिते जुहुयात्। अन्न[2]समृद्धिर्महती स्यादस्य निकेतनेऽब्दमात्रेण।।१०।।
जुहुयात् तिलैः सुशुद्धैः षण्मासाज्जायते महालक्ष्मीः। कुमुदैः सकह्लारैरपि जातीकुसुमैश्च जायते सिद्धिः।।

---

१. 'करात्' ख. पाठः। २. 'अस्य समिद्धिः' क. ग. पाठः।

पालाशैः पुनरिध्मकैः सरसिजैर्बिल्वैश्च रक्तोत्पल्लै-
दुंग्धैर्वीरुहसम्भवैः खदिरजैर्व्याघातवृक्षोद्भवैः।
दूर्वाख्यैश्च शमीविकङ्कतभवैरष्टोर्ध्वयुक्तं शतं
नित्यं वा जुहुयात् प्रतिप्रतिपदं मन्त्री महासिद्धये॥ १२॥

तारं व्याहृतयश्चाग्ने जातवेद इहावह। सर्वकर्माणि चेत्युक्त्वा साधयाग्निवधूर्मनुः॥ १३॥

तारं प्रणवः। व्याहृतयो भूर्भुवःस्वः। अग्ने स्वरूपं। जातवेद इहावह स्वरूपं। सर्क्कर्माणि स्वरूपं। साधय स्वरूपं। अग्निवधूः स्वाहा। अत्र व्याहृत्यग्निपदयोः सन्धिः, तेन स्वरग्ने इति मन्त्रे पठितव्यम्। तथा—

ऋष्याद्याः पूर्वोक्ता मन्त्रेणाङ्गक्रिया[1]र्णभिन्नेन। भूततुर्करणसेन्द्रियगुणयुग्मैर्जातिभेदितै[2]स्तदपि।।१४॥

भूत ५ ऋतु ६ करण ४ इन्द्रिय ५ गुण ३ युग्म २। ध्यानम्—

अथवा शक्तिस्वस्तिकदर्भाक्षस्त्रक्स्रुवस्रुगभयवरान्।
दधदमिताकल्पो वो वसुरवतात् कनकमालिकालसितः॥ १५॥

अथवेत्यनेन पूर्वमन्त्रध्यानोक्तरूपं वक्ष्यमाणध्यानोक्तरूपं वा ध्यायेदित्युक्तम्। प्रयोगः सुगमः। तथा—

वत्सरादेश्चतुर्दश्यां दिनादावेव दीक्षितः। मन्त्रं द्वादशसाहस्रं जपेत् सम्यगुपोषितः॥ १६॥
अर्चयेदङ्गमूर्तीश्च लोकेशकुलिशादिभिः। समिदाज्यममावस्यां[3] परिशोध्य यथाविधि॥ १७॥
ब्राह्मणान् भोजयित्वाथ स्वयं भूक्त्वा समाहितः। परेऽह्नि प्रतिपद्येतैर्जुहुयादर्चितेऽनले॥ १८॥
मन्त्री वटसमिद्व्रीहितिलराजीहविर्घृतैः। अष्टोत्तरशतावृत्त्या हुनेदेकैकशः क्रमात्॥ १९॥
दशाहमेवं हुत्वा तु पुनरेकादशीतिथौ। शक्त्या प्रतर्प्य विप्रांश्च प्रदद्याद् गुरुदक्षिणाम्॥ २०॥
सुवर्णवासोधान्यानि शोणां गां च सतर्णकाम्। पुनरष्टोत्तरं मन्त्री सहस्रं दिनशो जपेत्॥ २१॥
विधिनेति विधातुरग्निपूजामचिरेणैव भवेन्महासमृद्धिः।
धनधान्यसुव[4]र्णरत्नपूर्णा धरणी गोवृषपुत्रमित्रकीर्णा॥ २२॥

वत्सरादीति चैत्रशुक्लप्रतिपत्, तत्पूर्वचतुर्दश्यां दीक्षा जपश्च। अमायां समिदाज्यशोधनम्। प्रतिपदमारभ्य दशदिनावधि प्रोक्तप्रकारेण होमः। सुगममन्यत्। अथ वेत्यनेन श्लोकेन पूर्वोक्तपुरश्चरणमन्तरेणापि मन्त्रसिद्ध्युपायमाह। पालाशैरित्यादिभिः श्लोकैः काम्यप्रयोगानाह।

प्रजपेदथवा सहस्रसंख्यं दिनशो वत्सरतो भवेन्महाश्रीः।
जुहुयात् प्रतिवासरं शताख्यं हविषाब्देन भवेन्महासमृद्धिः॥ २३॥
पालाशैः कुसुमैर्हुनेद् दधिघृतक्षौद्रप्लुतैर्मण्डलं
नित्यं साष्टशतैस्तथैव करवीरोत्थैः समृद्ध्यै हुनेत्।
षण्मासं कपिलाघृतेन दिनशोऽप्यष्टौ सहस्रं तथा
होतव्यं लभते स राज्यसदृशीं लक्ष्मीं यशो वा महत्॥ २४॥

---

[1] 'ङ्गानि वर्णभिन्नेन' ख. पाठः। [2] 'मन्त्रवर्णकैस्तदपि' ख. पाठः। [3] 'अमायां हि' ख. पाठः। [4] 'समृद्धि' ख. पाठः।

वा समुच्चयार्थः। मन्त्रान्तरम्—

उत्पूर्वात्तिष्ठशब्दात् पुरुषहरिपदे पिङ्गलान्ते निगद्य[१]
प्रोक्त्वाथो लोहिताक्षं पुनरपि च वदेद्देहि मे दात् क्रमेण।
भूयो ब्रूयात्तथा दापय शशियुगलं स्याच्चतुर्विंशदर्णः
प्रोक्तो मन्त्रोऽखिलेष्टप्रतरणसुरसद्माङ्घ्रिपानां सदृक् [२]स्यात्।। २५।।

उत्पूर्वात्तिष्ठशब्दात् उत्तिष्ठेति स्वरूपं। पुरुष हरिपिङ्गल लोहिताक्ष देहि मे ददापय इत्येतानि पदानि स्वरूपाणि। शशियुगलं स्वाहाकारः।

ऋष्याद्याः स्युः पूर्ववदृतुभूतदिशात्रिकरणयुगलार्णैः।
मूलमनुनाथ कुर्यादङ्गानि क्रमश एव मन्त्रितमः।। २६।।

ऋतु ६ भूत ५ दिशा ४ त्रि ३ करण ४ युगल २। अत्र दिशाशब्देन महादिशानामेव ग्रहणम्। आवन्तोऽपि दिशाशब्दोऽस्ति भागुरिमते। ''वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हलन्तानां यथा वाचा निशा दिशा''। इति। ध्यानम्—

हेमाश्वत्थसुरद्रुमोदरभुवो निर्यान्तमश्वाकृतिं
वर्षन्तं धनधान्यरत्ननिचयान् रन्ध्रैः स्वकैः सन्ततम्।
ज्वालापल्लवितस्वरोमविवरं भक्तार्तिसम्भेदनं
वन्दे धर्मसुखार्थमोक्षफलदं दिव्याकृतिं पावकम्।। २७।।

जप्याच्च लक्षमानं मन्त्रीं सन्दीक्षितोऽथ मनुमेनम्। जुहुयाच्च तदवसाने घृतसिक्तैः पायसैर्दशांशेन।।२८।।
अङ्गैर्हुतवहमूर्तिभिराशेशैः संयजेत् तदस्त्रैश्च। पावकमिति मन्त्रितमो गन्धाद्यैरनुदिनं तदुपहारैः।।२९।।

इति। प्रयोगः सुगमः।

दिनावतारे मनुमेनमन्वहं जपेत् सहस्रं नियमेन मन्त्रवित्।
अधृष्यतायै यशसे श्रिये रुजां विमुक्तये युक्तमतिस्तथायुषे।। ३०।।

दिनावतारे सूर्योदयकाले।

शालीतण्डुलकैः सितैश्च पयसा कृत्वा हविः पावकं
गन्धाद्यैः परिपूज्य तेन हविषा संवर्त्य पिण्डं महत्।
आज्यालोडितमेकमेव जुहुयाज्जप्त्वा मनुं मन्त्रवित्
साष्टोर्ध्वं प्रतिपद्यथो शतमतः स्यादिन्दिरा वत्सरात्।। ३१।।
अष्टोत्तरं शतमथो मृगमुद्रयैव मन्त्री प्रतिप्रतिपदं जुहुयात् पयोन्नैः।
साज्यैर्भवेन्न खलु तत्र विचारणीयं संवत्सरात् स च निकेतनमिन्दिरायाः।। ३२।।
अष्टोर्ध्वं शतं हविषा मन्त्रेणानेन नित्यशो जुहुयात्। षण्मासादाढ्यतमो भवति नरो नात्र सन्देहः।।३३।।

---

१. 'निगद्यं' ख. पाठः। २. 'पःस्यात् कृशानोः' ख. पाठः।

शालीभिः शुद्धाभिः प्रतिदिनमष्टोत्तरशतं जुहुयात्। धनधान्यसमृद्धः स्यान्मन्त्री संवत्सरार्धमात्रेण।।३४।।

आज्यैरयुतं जुहुयात् प्रतिमासं प्रतिपदं समारभ्य। अतिमहती लक्ष्मीः स्यात् तस्य तु षण्मासतो न सन्देहः

अरुणैः पुनरुत्पलैः शतं यो मधुराक्तैः प्रजुहोति वत्सरार्धम्।
मनुनाप्यमुना शताधि[1]कं स प्रलभेन्मङ्क्षु महत्तरां च लक्ष्मीम्।। ३६।।
जातीपलाशकरवीरजपाख्यबिल्वव्याघातकेसरकुरण्टभवैः प्रसूनैः।
एकैकशः शतमथो कपिलापयोक्तैः (जुह्वत् प्रतिप्रतिपदं श्रियमेति वर्षात्।। ३७।।
खण्डैश्च सप्तदिनमप्यमृतालतोत्थैर्मन्त्री हुनेद् गुणसहस्रमथा पयोक्तैः।)
सम्यक् समर्च्य दहनं त्वचिरेण जन्तुश्चातुर्थिकादिविषमज्वरतो वियुज्ज्यात्।। ३८।।

गुणसहस्रं सहस्रत्रयम्।

क्षीरद्रुमत्वगभिपक्वजलैर्यथावत् सम्पूर्य कुम्भमभिपूज्य कृशानुमत्र।
जप्त्वा मनुं पुनरमुं त्रिसहस्रमात्रं सेकक्रिया ज्वरहरी ग्रहवैकृतघ्नी।। ३९।।
पयसि हृदयदघ्ने भानुमालोक्य तिष्ठन् प्रजपतु च सहस्रं नित्यशो मन्त्रमेनम्।
स दुरितमपमृत्युं रोगजातांश्च हत्वा व्रजति नियतसौख्यं वत्सराद् दीर्घमायुः।। ४०।।
मनुनामुनाष्टशतजप्तमथ प्रपिबेज्जलं ज्वलनदीपनकृत्।
गुरु भुक्तमप्युदरगं त्वमुना परिजापितं पचति कुक्ष्यनलः।। ४१।।
हुनेदरुणपङ्कजैस्त्रिमधुराप्लुतैर्नित्यशः सहस्रमृतुमासतः पृथुतरा रमा जायते।
प्रतिप्रतिपदं हुनेदिति बुधोऽथवा वत्सरं विनष्टवसुरप्यसौ भवति चेन्दिरामन्दिरम्।। ४२।।

ऋतुमासतः षण्मासतः।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे एकोनत्रिंशः श्वासः।। २९।।

* * *

---

[1] 'दशाधिकं' ख. पाठः।

अथ

त्रिंशः श्वासः

अथ शैवमन्त्रा उद्ध्रियन्ते। तत्र श्रीनन्दिकेश्वरमते—

कैलासशिखरासीनमर्धनारीश्वरं प्रभुम् । ब्रह्मोपेन्द्रमहेन्द्राद्यैर्देवैर्विद्याधरैस्तथा।। १।।
दानवैर्मुनिभिः सिद्धैर्यक्षरक्षोप्सरोगणैः। हेरम्बस्कन्दपूर्वादिगणैर्भक्त्या सुसेवितम्।। २।।
अक्षक्रीडारसास्वादलालसं परमेश्वरम्।(?)* क्रीडतो भुवनेशस्य जगदम्बिकयां सह।। ३।।
अक्षपाताधिकारे तु देव्या नन्दी नियोजितः। क्रीडता क्रमयोगेन जितं देवेन शम्भुना।। ४।।
अक्षप्रपाताद् देवेन प्रोक्तं नन्दिञ्जितं मया। तव सत्याभियोगेन तुष्टोऽहं तव भक्तितः।। ५।।
वद किं क्रियतां वत्स यत्ते मनसि वर्तते। ददामि तन्न सन्देहः प्रीतेन मनसाधुना।। ६।।

श्रीनन्दिकेश्वर उवाच

तुष्टोऽसि यदि मे देव जगतामीश्वर प्रभो। वद मन्त्राञ्जगन्नाथ शैवांस्त्रैलोक्यदुर्लभान्।। ७।।
(वक्त्राङ्गन्याससहितान् पूजाकर्मसमन्वितान्। दीक्षाभिषेकसहितानधिकारपदान्वितान्।। ८।।

श्रीमहादेव उवाच

कथयामि महाभाग त्रैलोक्येष्वतिदुर्लभान्।) शैवान् सर्वमनुश्रेष्ठान् सर्वतन्त्रेषु गोपितान्।। ९।।
भक्तोऽसीति न मे किञ्चिदवाच्यं त्वयि सुव्रत। मूलमन्त्राङ्गविन्यासपूजाकर्मसमन्वितान्।। १०।।
दीक्षाभिषेकसहितानधिकारपदा[1]न्वितात् । उद्धारक्रमयोगेन सर्वकामफलप्रदान् ।। ११।।
सुसमे भूप्रदेशे तु गोमयेनोपलेपिते। पुष्पप्रकरशोभाढ्ये गन्धधूपतरङ्गिते ।। १२।।
विलिखेन्मातृकां तत्र वर्गाष्टकविभेदतः। स्वरैः षोडशभिर्वर्गः प्रथमः परिकीर्तितः।। १३।।
पञ्च पञ्चाक्षराश्चान्ते द्वावन्त्यौ चतुरक्षरौ। वर्गाष्टकं भवेदेवं ततो मन्त्रान् समुद्धरेत्।। १४।।
पञ्चमस्य तु वर्गस्य पञ्चमं प्रथमं वदेत्। षष्ठवर्गान्तिमो वर्णः प्रथमान्त्यसमन्वितः।। १५।।
द्वितीयं वर्णमाख्यातमष्टमस्याद्यमक्षरम्। प्रथमस्य तृतीयार्णसमेतं तत् तृतीयकम्।। १६।।
चतुर्थं सप्तमस्यादिद्वितीयार्णसमन्वितम्। चतुर्थवर्णो मन्त्रस्य सप्तमाद्यं तु पञ्चमम्।। १७।।
एष पञ्चाक्षरो मन्त्रः प्रणवाद्यः षडक्षरः। यत्साधनात्तु मनुजाः शिवसायुज्यमाप्नुयुः।। १८।।
प्रणवस्तु परब्रह्मबोधकः समुदीरितः। पञ्चाक्षरमयानि स्युः पञ्चभूतानि सुव्रत।। १९।।
भूतात्मकं जगदिदं तेनास्य जगदात्मता। ऋषिरुक्तो वामदेवः पङ्क्तिश्छन्द उदाहृतम्।। २०।।

---

* अत्र किञ्चित् पद्यजातं विच्छिन्नं भाति,। इत्यमेव सर्वत्रादर्शपुस्तकेषु पाठः। १. 'परां' ग. पाठः।

सदाशिवो देवतास्य मन्त्रस्य परिकीर्तित:। षडङ्गानि मनोर्वर्णैर्जातियुक्तानि कल्पयेत्।। २१।।
ततस्तत्पुरुषाघोरसद्योवामेशसंज्ञकान्। मूलवर्णादिकान् न्यसेत् त्रिषु स्थानेष्वतन्द्रित:।। २२।।
सतर्जनीमध्यमान्त्यानामाङ्गुष्ठेष्वथापर:। आस्यहृत्पादगुह्येषु मूर्ध्नि वक्त्रेषु चापर:।। २३।।
प्राग्याम्यवारुणोदीच्यमध्यवक्त्रेषु पञ्चसु। तत: षडङ्गं विन्यसेद्वक्ष्यमाणं यथाविधि ।। २४।।
सर्वज्ञो नित्यतृप्तश्च बोधान्तोऽनादि: कीर्तित:। स्वतन्त्रशक्तिश्चालुप्तशक्तिश्चानन्तशक्तियुक्।। २५।।
मूलमन्त्रार्णपूर्वैश्च धाम्नेशब्दान्तिकै: क्रमात्। षडङ्गानि मनोरस्य जातियुक्तानि मन्त्रवित्।। २६।।
कुर्वीत गोलकन्यासं रक्षायै नन्दिकेश्वर। हृदि वक्त्रांसयोरूर्वो:, कण्ठे नाभौ द्विपार्श्वयो:।। २७।।
पृष्ठे हृदि, ततो मूर्ध्नि वदने नेत्रयोर्नसो:। दोष्पत्सन्धिषु साग्रेषु, विन्यसेत् तदनन्तरम्।। २८।।
शिरोवदनहृत्कुक्षिसोरुपादद्वये पुन: । हृदि वक्त्राम्बुजे कण्ठे मृगाभयवरेष्वथ ।। २९।।
वक्त्रांसहृत्सु पादोरुजठरेषु, क्रमान्न्यसेत्। मूलमन्त्रस्य षड्वर्णान् यथावद् देशिकोत्तम:।। ३०।।
मूर्ध्नि भालोदरांसेषु हृदये तान् पुनर्न्यसेत्। नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने।। ३१।।
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे। पश्चादनेन मन्त्रेण कुर्याच्च व्यापकं सुधी:।। ३२।।
एवं न्यस्ततनुर्नन्दिन् ध्यायेद् देवमनन्यधी:। गोक्षीरफेनधवलं रजताद्रिसमप्रभम् ।। ३३।।
चारुचन्द्रकलाराजज्जटामुकुटमण्डितम्। पञ्चवक्त्रधरं शम्भुं प्रतिवक्त्रं त्रिलोचनम् ।। ३४।।
शार्दूलचर्मवसनं रत्नाभरणभूषितम्। दक्षोर्ध्वहस्ते पर[1]शुं वरं च तदध:करे।। ३५।।
वामोर्ध्वहस्ते हरिणं दधानमभयं परे। सुप्रसन्नमुखाम्भोजं निविष्टं पद्मविष्टरे ।। ३६।।
ब्रह्मविष्णुमहेन्द्राद्यै: स्तुतं भक्त्या सुरासुरै:। विश्वाद्यं विश्ववपुषं भवभीतिहरं शिवम्।। ३७।।
इति ध्यात्वा गणश्रेष्ठ मानसैरर्चयेच्छिवम्। उपचारै: षोडशभिर्बाह्यपीठे समर्चयेत्।। ३८।।
पद्मं वसुदलं कृत्वा कर्णिकाकेसरोज्ज्वलम्। बहिरष्टदलद्वन्द्वं चतुरस्रत्रयावृतम्।। ३९।।
चतुर्द्वारसमायुक्तं मण्डलेऽस्मिन् प्रपूजयेत्।..................................।।

अत्र मानसपूजादिपीठपूजान्तस्य प्रागेव प्रयोगप्रकरणे लिखितत्वाद् ग्रन्थगौरवभयाच्च नात्र लिख्यते। तथा–

एवं पीठं समभ्यर्च्य मूर्तिं मूलेन तत्र वै। संस्थाप्य देवमावाह्य तस्यां सम्पूजयेच्छिवम्।। ४०।।
सर्वोपचारैराराध्य मध्ये वत्स ततोऽर्चयेत्। प्रथमेऽष्टदले मूर्तीर्यजेत् तत्पुरुषादिका: ।। ४१।।
दिक्पत्रेषु गणश्रेष्ठ ईशं मध्ये समर्चयेत्। पीतासितश्वेतरक्तश्वेताभाश्चतुरानना: ।। ४२।।
वराभयमृगान् वत्स परशुं बिभ्रती: करै:। कोणपत्रेषु मध्ये च निवृत्त्याद्या: कला यजेत्।। ४३।।
निवृत्तिश्च प्रतिष्टा च विद्या शान्तिस्तत: परम्। शान्त्यतीताश्च ता: प्रोक्तास्तेजोरूपा: कला: क्रमात्।४४।
अग्नीशासुरवायव्यमध्ये दिक्षु च पूजयेत्। केसरेषु षडङ्गानि द्वितीयेऽष्टदले तत:।। ४५।।
अनन्ताद्यान् यजेद्वत्स देवाग्रादिप्रदक्षिणम्। अनन्तं सूक्ष्मनामानं शिवोत्तममनन्तरम्।। ४६।।

---

[1] 'टङ्कं च' ख. पाठ:।

एकनेत्रमेकरुद्रं त्रिमूर्तिं तदनन्तरम्। श्रीकण्ठं च गणश्रेष्ठ शिखण्डिनमपि क्रमात्।। ४७।।
रक्तपीतसितारक्तकृष्णरक्ताञ्जनासितान् । किरीटार्पितबालेन्दून् पद्मस्थांश्चारुभूषणान् ।। ४८।।
त्रिनेत्राञ्छूलवज्रेषुचापहस्तान् मनोहरान्। ततोऽर्चयेद्गणश्रेष्ठ तृतीयेऽष्टदले पुनः ।। ४९।।
उमाचण्डीश्वरौ नन्दी महाकालो गणेश्वरः। वृषभो भृङ्गिरिटिश्च स्कन्दश्चैतान् यथाक्रमम्।। ५०।।
उत्तरं दलमारभ्य नीलपीतासितारुणान्। मुक्तानिशाकरश्वेतपाटलान् क्रमतः सुधीः।। ५१।।
चतुरस्रे गणश्रेष्ठ पूर्वादिक्रमतो यजेत्। इन्द्रं सुराधिपं पीतं वज्रहस्तं सवाहनम्।। ५२।।
अग्निं तेजोधिपं रक्तं शक्तिहस्तं सुभूषितम्। यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत्।। ५३।।
रक्षोधिपं च निर्ऋतिं खड्गहस्तं सुधूम्रकम्। पाशहस्तं सुशुभ्राङ्गं वरुणं यादसां पतिम्।। ५४।।
वायुं प्राणाधिपं धूम्रमङ्कुशाढ्यकरं यजेत्। यक्षा[1]धिपं कुबेरं च मुक्तावर्णं गदाधर[2]म्।। ५५।।
विद्यापतिं तथेशानं स्वच्छं शूलकरं यजेत्। (ब्रह्माणं पद्महस्तं च लोकपं रक्तवर्णकम्।। ५६।।
अनन्तं नागपं गौरवर्णं चक्रधरं तथा।) ऐरावतं[3] तथा मेषं महिषं मृतपूरुषम् ।। ५७।।
मकरं मृगमर्त्यौ च वृक्षं च विपहंसकौ। इन्द्रादिलोकपालानां वाहनानि गणधिप।। ५८।।
ततो बहिस्तदस्त्राणि तत्तत्पार्श्वे समर्चयेत्। वज्रं पीतं सितां शक्तिं दण्डं कृष्णं समर्चयेत्।। ५९।।
खड्गमाकाशसङ्काशं पाशं विद्युन्निभं यजेत्। अङ्कुशं रक्तवर्णं तु शुक्लवर्णां गदां यजेत्।।६०।।
त्रिशूलं नीलवर्णं च यजेद्वत्स समाहितः। रथाङ्गं कुरुविन्दाभं पद्मं रक्तं समर्चयेत्।। ६१।।
लोकपालायुधान्येवं कथितानि तवानघ। य एवं पूजयेद् देवं स सद्यः शिवतां व्रजेत्।। ६२।।

इति। तथा–

तन्महेशपदं ङेन्तं विद्महे वागितीरयेत्। विशुद्धाय च धीशब्दं महि तन्नः शिवः–पदम्।। ६३।।
प्रचोदयादिति प्रोच्य गायत्री श्रीशिवस्य च।..।।

इति। अथ शैवमन्त्राः– तत्र कैलासेत्यादि फलप्रदानित्यन्तमेकादश श्लोकास्तन्त्रावतारक्रमकथनपरा उक्तोच्यमानविषयत्वात् स्पष्टार्थाः। ''सुसमे'' इत्यादिभिरुद्धरेदित्यन्तैस्त्रिभिः श्लोकैर्मन्त्रोद्धारकथनार्थं मातृकाप्रस्तारस्थानस्वरूपं तस्य वर्गाष्टकविभेदं चोपदिशति। तत्र पञ्चमस्य तवर्गस्य पञ्चममक्षरं तेन नकारः, स प्रथममक्षरं मन्त्रस्येति शेषः। (षष्ठस्य वर्गस्यान्तिमो वर्णः मकारः स प्रथमस्यान्त्येन अः इत्यनेन सहितो मन्त्रस्य द्वितीयार्णस्तेन मः इति बोध्यम्।) अष्टमस्य वर्गस्याद्यमक्षरं शकारः प्रथमस्य वर्गस्य तृतीयाक्षरेण इकारेण समेतं मन्त्रस्य तृतीयमक्षरं शि इति। सप्तमस्य वर्गस्य चतुर्थमक्षरं वकारः स प्रथमवर्गस्य द्वितीयार्णेन आ इत्यनेन समन्वितं मन्त्रस्य चतुर्थमक्षरं भवति, तेन वा इति। सप्तमवर्गस्याद्यं य इति मन्त्रस्य पञ्चममक्षरं भवति।। मन्त्रनिरुक्तिमाह–प्रणवस्त्वित्यादि। स्पष्टोऽर्थः।। अथ प्रयोगः– तंत्र प्रागुक्तविधिना दीक्षितः साधकः प्रागुक्तप्रकारेण प्रातरुत्थानादियोगपीठन्यासान्तं कर्म कृत्वा मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदये श्रीसदाशिवाय देवतायै नमः। इति विन्यस्य मम चतुर्विध–

---

[1] 'यक्षपतिं' ग. पाठः। [2] 'गदाकरम्' ख. पाठः। [3] 'ऐरावणं' ख. पाठः।

पुरुषार्थसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत्। तर्जन्योः नं तत्पुरुषाय नमः। मध्यमयोः मं अघोराय नमः। कनिष्ठिकयोः शिं सद्योजाताय नमः। अनामिकयोः वां वामदेवाय नमः। अङ्गुष्ठयोः यं ईशानाय नमः। इति करयोर्विन्यस्य मुखे हृदये पादयोर्गुह्ये मूर्ध्नि चैता मूर्तीर्विन्यस्य, पुनर्मुखे नं तत्पुरुषाय प्राग्वक्त्राय नमः। दक्षकर्णे मं अघोराय दक्षिणवक्त्राय०। चूडाधः शिं सद्योजाताय पश्चिमवक्त्राय०। वामकर्णे वां वामदेवायोत्तरवक्त्राय०। मूर्ध्नि यं ईशानायोर्ध्ववक्त्राय०। इति पञ्चमूर्तीर्विन्यस्य, ॐ सर्वज्ञशक्तिधाम्ने हृदयाय०। नं नित्यतृप्त[1]शक्तिधाम्ने शिरसे०। मं अनादिबोधशक्तिधाम्ने शिखायै०। शिं स्वतन्त्रशक्तिधाम्ने कवचाय०। वां अलुप्तशक्तिधाम्ने नेत्रत्रयाय०। यं अनन्तशक्तिधाम्ने अस्त्राय फट्। इति मन्त्रैः षडङ्गानि यथास्थानं विन्यस्य मूलमन्त्रेण व्यापकन्यासं कुर्यात्। ततः (१) हृदि ॐनमः। वक्त्रे नंनमः। दक्षिणांसे मंनमः। वामांसे शिंनमः। दक्षिणोरौ वांनमः। वामोरौ यंनमः।। (२) कण्ठे ॐनमः। नाभौ नं०। दक्षिणपार्श्वे मं०। वामापार्श्वे शिं०। पृष्ठे वां०। हृदि यं०।। (३) मूर्ध्नि ॐनमः। वदने नं०। दक्षनेत्रे मं०। वामनेत्रे शिं०। दक्षनसि वां०। वामे यं नमः।। (४) दक्षदोर्मूले ॐनमः। मध्ये नं०। मणिबन्धे मं०। अङ्गुलिमूले शिं०। अङ्गुलिमध्ये वां०। अङ्गुल्यग्रे यं नमः।। (५) वामदोर्मूले ॐनमः। मध्ये नं०। मणिबन्धे मं०। अङ्गुलिमूले शि०। मध्ये वां०। अग्रे यंनमः। (६) दक्षोरुर्मूले ॐनमः। जानुनि नं०। गुल्फे मं०। अङ्गुलिमूले शिं०। मध्ये वां०। अग्रे यंनमः। (७) वामोरुर्मूले ॐनमः। जानुनि नं०। गल्फे मं०। अङ्गुलिमूले शिं०। मध्ये वां०। अग्रे यंनमः। (८) शिरसि ॐनमः। मुखे नं०। हृदि मं०। कुक्षौ शिं०। दक्षोरुमूलादिपादाग्रपर्यन्तं वां०। वामोरुमूलादिपादाग्रपर्यन्तं यंनमः।। (९) हृदि ॐनमः। वक्त्रे नं०। कण्ठे मं०। वामोर्ध्वहस्ते मृगे शिं०। वामाधःकरे अभये वां०। दक्षाधोहस्ते वरे यंनमः।। (१०) मुखे ॐनमः। अंसयोः नं०। हृदि मं०। पादयोः शिं०। ऊर्वोः वां०। जठरे यंनमः।। इति विन्यस्य, (पुनर्मूर्ध्नि ॐनमः। ललाटे नंनमः। जठरे मंनमः। दक्षांसे शिंनमः। वामांसे वांनमः। हृदये यंनमः।।) ''नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने। चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे''। इति मन्त्रेण मूर्धादिपादपर्यन्तं व्यापकं न्यसेत्। इति विन्यस्य यथोक्तरूपं देवं ध्यात्वा मानसपूजादियागपीठपूजान्ते यथाविधि देवमावाह्यास[2]नादिपुष्पान्तैरुपचारैः सम्पूज्य, भगवन्नावरणपूजार्थमनुज्ञां देहि इति प्रार्थ्य, प्रथमेऽष्टदले दिग्दलेषु—नं तत्पुरुषाय नमः। मं अघोराय०। शिं सद्योजाताय०। वां वामदेवाय०। मध्ये यं ईशानाय०। इति देवाग्रादिप्रादक्षिण्येन सम्पूज्य, आग्नेयादिदलेषु प्रादक्षिण्येन—ॐ निवृत्त्यै नमः। ओं प्रतिष्ठायै०। ॐ विद्यायै०। ॐ शान्त्यै नमः। मध्ये— ॐ शान्त्यतीतायै नमः। इति सम्पूज्य, द्वितीयाष्टदलान्तः केसरेषु देवस्य दक्षाग्रकेसरे ॐ हृदयाय नमः। वामाग्रे ईशाने नं शिरसे०। पृष्ठदक्षिणे मं शिखायै०। पृष्ठवामे शिं कवचाय०। अग्ने वां नेत्रत्रयाय०। अग्रादिचतुर्दिक्षु यं अस्त्राय०। इति सम्पूज्य, (द्वितीयेऽष्टदले देवाग्रदलमारभ्य प्रादक्षिण्येन—अनन्ताय नमः। सूक्ष्माय०। शिवोत्तमाय०। एकनेत्राय०। एकरुद्राय०। त्रिमूर्तये०। श्रीकण्ठाय०। शिखण्डिने नमः। इति सम्पूज्य) तृतीयेऽष्टदले देवस्य वामदलमारभ्य प्रादक्षिण्येन—उमायै नमः। चण्डीश्वराय०। नन्दिने०। महाकालाय०। गणेश्वराय०। वृषभाय०। भृङ्गिरिटये०। स्कन्दाय नमः। इति सम्पूज्य, चतुरस्त्ररेखात्रयान्तरालगतवीथीद्वयेऽभ्यन्तरालवीथ्यां देवाग्रमारभ्य— लं इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावणवाहनाय नमः। रं अग्नये तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नमः। टं[3] यमाय प्रेताधिपतये कृष्णवर्णाय दण्डहस्ताय महिषवाहनाय नमः। क्षं निर्ऋतये रक्षोधिपतये

---

१. 'तृप्ति' ख. पाठः। २. 'स्नानादि' ग. पाठः। ३. 'यं' क. ग. पाठः।

धूम्रवर्णाय खड्गहस्ताय (प्रेतवाहनाय नमः। वं वरुणाय यादसांपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नमः। यं वायवे प्राणाधिपतये धूम्रवर्णाय अङ्कुशहस्ताय मृगवाहनाय नमः। सं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय) नरवाहनाय नमः। हौं ईशानाय विद्याधिपतये स्फटिकवर्णाय शूलहस्ताय वृषभवाहनाय नमः। इति सम्पूज्य, इन्द्रेशानयोर्मध्ये आं ब्रह्मणे लोकाधिपतये रक्तवर्णाय पद्महस्ताय हंसवाहनाय नमः। निर्ऋतिवरुणयोर्मध्ये ह्रीं अनन्ताय नागाधिपतये गौरवर्णाय चक्रहस्ताय गरुडवाहनाय नमः। इति सम्पूज्य, द्वितीयवीथ्यां—वज्राय नमः। शक्तये०। दण्डाय०। खड्गाय०। पाशाय०। अङ्कुशाय०। गदायै०। त्रिशूलाय०। पद्माय०। चक्राय०। इति लोकपालायुधानि तत्समीपस्थानेषु पूजयेत्। इत्थं लोकपालार्चायां विस्ताराशक्तौ प्रागुक्तप्रकारेण वा पूजयेत्। इत्थं षडावरणसमेतं देवं सम्पूज्य, मूलमन्त्रमुच्चार्य साङ्गाय सपरिवाराय श्रीसदाशिवाय नमः। इति पुष्पाञ्जलिना मध्ये देवं सम्पूज्य धूपदीपादि पूजाशेषं प्रागुक्तविधिना समापयेदिति। तथा—

लक्षषट्कं जपेद्वत्स नियमस्थो जितेन्द्रियः। तावत्सहस्रं जुहुयात् तिलैः शुद्धैर्घृतप्लुतैः।। ६४।।
पायसैः क्षीरवृक्षोत्थसमिद्भिर्वा गणेश्वर। तावत्संख्यं जलैः शुद्धैस्तर्पयेच्चन्द्रवासितैः।। ६५।।
मार्जयेच्च गणश्रेष्ठ स्वात्मानं मूलमन्त्रतः। तर्पणस्य दशांशेन तद्दशांशेन भोजयेत्।। ६६।।
शिवभक्तान् द्विजश्रेष्ठान् सदाचारानतन्द्रितः। पञ्चाङ्गमेवं विधिवत् पुरश्चरणमाचरेत् ।। ६७।।
एवं संसिद्धमन्त्रस्तु सर्वान् कामान् प्रयच्छति।..।।

एष षड्लक्षजपः कृतयुगपरः कलावेतच्चतुर्गुणजपः कार्यः।। लिङ्गपुराणे—

विनियोगं प्रवक्ष्यामि सिद्धमन्त्रप्रयोजनम्। दौर्बल्यं याति तन्मन्त्रं विनियोगमजानतः।। १।।
यस्य तेन नियुञ्जीत कार्येण च विशेषतः। विनियोगः स विज्ञेय ऐहिकामुष्मिकं फलम्।। २।।
विनियोगजमायुष्यमारोग्यं तत्सुनित्यता। राजैश्वर्यं स विज्ञानं स्वर्गो निर्वाणमेव च।। ३।।
प्रोक्षणं चाभिषेकं च अघमर्षणमेव च। स्नानं च सन्ध्ययोस्त्वेवं कुर्यादेकादशेन वै।। ४।।
शुद्धः पर्वतमारुह्य जपेल्लक्षमतन्द्रितः। महानद्यां द्विलक्षं तु दीर्घमायुरवाप्नुयात्।। ५।।
दूर्वाङ्कुरैस्तिलैर्वापि शुद्धै[1]र्द्रव्यैस्तथैव च। तेषां दश सहस्राणि होममायुःप्रवर्धनम्।। ६।।
अश्वत्थवृक्षमाश्रित्य जपेल्लक्षद्वयं सुधीः। शनैश्चरदिने स्पृष्ट्वा दीर्घमायुर्लभेन्नरः।। ७।।
जपेदष्टोत्तरशतं सोऽपमृत्युहरो भवेत्। आदित्याभिमुखो भूत्वा जपेल्लक्षमनन्यधीः।। ८।।
अर्कैरष्टशतं नित्यं जुहुयाद् व्याधिमुक्तये। समस्तव्याधिशान्त्यर्थं पलाशसमिधो नरः।। ९।।
हुत्वा दशसहस्रं तु नीरोगो मनुजो भवेत्। जपेल्लक्षं तु पूर्वाह्ने हुत्वा चाष्टशतेन च।। १०।।
सूर्यं नित्यमुपस्थाय यः स आरोग्यमाप्नुयात्। न[2]दीतोयेन सम्पूर्णं घटं संस्पृश्य शोभनम्[3]।।११।।
जप्त्वायुतं तु तैः स्नायाद्रोगाणां भेषजं भवेत्। अष्टाविंशतिजप्तान्नमश्नीयादन्वहं शुचिः[4]।। १२।।
हुत्वा च ताल[5]पालाशैरेतैरारोग्यमश्नुते। नित्यमष्टशतं जप्त्वा पिबेदपोऽर्कसन्निधौ।। १३।।

---

१. 'शुभैः' ख. पाठः। २. 'नव' पाठः। ३. 'सञ्जपेत्' ख. पाठः। ४. 'सुधाः' ख. पाठः। ५. 'चारु' ख. पाठः।

औदरैर्व्याधिभि: सर्वैर्मासेनैकेन मुच्यते। एकादशेन[1] भुञ्जीयादन्नं चैवाभिमन्त्रितम् ।। १४।।
भक्ष्यं यान्नं तथा पेयं विषमप्यमृतं भवेत्। चन्द्रसूर्यग्रहे पूर्वमुपोष्य विधिना शुचि: ।। १५।।
यावद्ग्रहणमोक्षं तु तावन्नद्यां समाहित:। जपेत् समुद्रगामिन्यां विमोक्षे ग्रहणस्य तु।। १६।।
अष्टोत्तरसहस्रेण पिबेद्ब्राह्मीरसं द्विज:। ऐहिकीं लभते मेधां सर्वश्रुतिवहां शुभाम्।। १७।।
सारस्वती भवेद् दैवी तस्य वागतिमानुषी। ग्रहनक्षत्रपीडासु जपेद् भक्त्यायुतं नर:।। १८।।
(हुत्वा चाष्टसहस्रं च ग्रहपीडा विनश्यति। दु:स्वप्नदर्शने स्नात्वा जपेच्चैवायुतं नर:।। १९।।)
घृतेनाष्टशतं हुत्वा सद्य: शान्तिर्भविष्यति। चन्द्रसूर्यग्रहे लिङ्गं समभ्यर्च्य यथाविधि।। २०।।
यत्किञ्चित् प्रार्थयेद् देवि जपेदयुतमादरात्। सन्निधौ तस्य देवस्य शुचि: संयतमानस:।। २१।।
सर्वान् कामानवाप्नोति पुरुषो नात्र संशय:। गजानां तुरगाणां तु गोजातीनां तथैव च।। २२।।
व्याध्यागमे शुचिर्भूत्वा जुहुयात् समिधाहुतिम्। मासमभ्यर्च्य विधिना अयुतं भक्तिसंयुत:।।२३।।
तेषामृद्धिश्च शान्तिश्च भविष्यति न संशय:। उत्पाते शत्रुबाधायां जुहुयादयुतं शुचि:।। २४।।
पलाशसमिधैर्देवि तस्य शान्तिर्भविष्यति। आभिचारिकशङ्कायामेतद् देवि समाचरेत्।। २५।।
प्रतिधावति तच्छक्ति: शत्रो: पीडा भविष्यति। विद्वेषणार्थं जुहुयाद्विभीतसमिधाष्टकम्।। २६।।
प्रायश्चित्तं च वक्ष्यामि सर्वपापविशुद्धये। पापशुद्धिं यथा सम्यक् कर्तुमभ्युद्यतो नर:।। २७।।
पापशुद्धिर्न चेत् पुंस: क्रिया: सर्वाश्च निष्फला:। ज्ञानं च हीयते तस्मान् कर्तव्यं पापशोधनम्।।२८।।
विद्यालक्ष्मीविशुद्ध्यर्थं मां ध्यात्वाञ्जलिना शुभे। शिवेनैकादशेनाद्भिरभिषिञ्चेत् समन्तत:।। २९।।
अष्टोत्तरशतेनैव स्नायात् पापविशुद्धये। सर्वतीर्थफलं तच्च सर्वपापहरं शुभम् ।। ३०।।
सन्ध्योपासनविच्छेदे जपेद् दशशतं बुध:। विड्वराहैश्च चाण्डालैर्मार्जारै: कुक्कुरैरपि।। ३१।।
स्पृष्टमन्नं न भुञ्जीत भुक्त्वा चाष्टशतं जपेत्। ब्रह्महत्यादिशुद्ध्यर्थं जपेल्लक्षायुतं नर:।। ३२।।
पातकानां तदर्धं स्यान्नात्र कार्या विचारणा। उपपातकदुष्टानां तदर्धं परिकीर्तितम् ।। ३३।।
शेषाणामपि पापानां जपेत् पञ्चसहस्रकम्। आत्मबोधकरं गुह्यं शिवरूपप्रसाधकम्।। ३४।।
जितश्वासो जपेन्मन्त्रं पञ्चलक्षमनाकुल:। पञ्चवायुजयं[2] भद्रे प्राप्नोति मनुज: सुखी[3]।।३५।।
यो जपेत् पञ्चलक्षं तु निगृहीतेन्द्रिय: शुचि:। पञ्चेन्द्रियाणां विजयो भविष्यति वरानने।। ३६।।
ध्यानयुक्तो जपेद्यस्तु मन: संयम्य यत्नत:। सम्यग्विजयमाप्नोति करणानां वरानने।। ३७।।
पञ्चविंशतिलक्षाणां जपेन कमलानने। पञ्चविंशतितत्त्वानां विजयं मनुजो लभेत्।। ३८।।
मध्यरात्रे व्यतीते तु जपेदयुतमादरात्। स ब्रह्मसिद्धिमाप्नोति इहैवानेन सुन्दरि ।। ३९।।
जपेल्लक्षमनालस्यो निर्वाते ध्वनिवर्जिते। मध्यरात्रे शिवज्योत्स्नां पश्यत्येव न संशय:।। ४०।।
(अन्धकारविनाशं च दीपस्येव प्रकाशनम्। हृदयान्तर्बहिर्वापि भविष्यति न संशय:।। ४१।।)

---

१. 'एकादशशतं जप्यात्' ख. पाठ:। २. 'जितो' ग. पाठ:। ३. 'सुखम्' ख. पाठ:।

सर्वसम्पत्समृद्ध्यर्थं जपेदयुतमात्मवान्। सबीजसम्पुटं मन्त्रं शतंलक्षं जपेत् सुधीः[1] ॥ ४२॥
मत्सायुज्यमवाप्नोति भक्तिमान् मनुजः परम्।..॥

इति। तथा लिङ्गपुराणे—

अस्य मन्त्रस्य वक्ष्यामि ऋषिच्छन्दोऽधिदैवतम्। बीजं शक्तिं स्वरं वर्णं स्थानं चैवाक्षरं प्रति॥ १॥
वामदेवो नाम ऋषिः पङ्क्तिश्छन्द उदाहृतम्। देवता शिव एवाहं मन्त्रस्यास्य वरानने॥ २॥
नकारादीनि वर्णानि पञ्चभूतात्मकानि च। आत्मानं प्रणवं विद्धि सर्वव्यापिनमव्ययम्॥ ३॥
शक्तिस्त्वमेव देवेशि सर्वदेवनमस्कृता। त्वदीयं प्रणवं केचिन्मदीयं प्रणवं तथा ॥ ४॥
त्वदीयं देवि मन्त्राणां शक्तिभूतं न संशयः। ओंकारस्य स्वरोदात्त ऋषिर्ब्रह्मा सिता प्रभा ॥ ५॥
छन्दो देवी च गायत्री परमात्माधिदेवता। उदात्तः प्रथमस्तद्वच्चतुर्थश्च[2] द्वितीयकः ॥ ६॥
पञ्चमः स्वरितश्चैव मध्यमो निषादस्तथा। नकारः पीतवर्णोऽस्य (स्थानं पूर्वमुखं स्मृतम् ॥ ७॥
इन्द्रोऽधिदैवतं छन्दो गायत्री गौतम ऋषिः। मकारः कृष्णवर्णोऽस्य) स्थानं वै दक्षिणं मुखम्॥८॥
छन्दोऽनुष्टुबृषिश्चात्री रुद्रो दैवतमुच्यते। शिकारो धूम्रवर्णोऽस्य स्थानं वै पश्चिमं मुखम्॥ ९॥
विश्वामित्र ऋषिस्त्रिष्टुप् छन्दो विष्णुश्च देवता। वकारो हेमवर्णोऽस्य स्थानं चैवोत्तरं मुखम्॥ १०॥
ब्रह्माधिदैवतं छन्दो बृहती चाङ्गिरा ऋषिः। यकारो रक्त[3]वर्णोऽस्य स्थानमूर्ध्वमुखं विराट्॥ ११॥
छन्दो ऋषिर्भरद्वाजो स्कन्दो दैवतमुच्यते।..॥

इति॥ तथा सारसङ्ग्रहे—

इत्थं शिवं समभ्यर्च्य सहस्रं नित्यशो जपेत्। सर्वपापविनिर्मुक्तश्चान्ते सद्गतिमाप्नुयात्॥ १॥
सर्वपापविनिर्मुक्तः प्राप्नुयाद्वाञ्छितां रमाम्। सहस्रद्वयजापेन महारोगैः प्रमुच्यते॥ २॥
सहस्रत्रयजापेन दीर्घमायुर्लभेन्नरः । चतुःसहस्रजापेन वाञ्छितार्थानवाप्नुयात् ॥ ३॥
तिलैः शुद्धैर्घृताभ्यक्तैर्हुनेत्पातसम्भवाः। रोगा विनश्यन्त्यचिरान्नात्र कार्या विचारणा॥ ४॥
प्रजपेच्छतलक्षं यः स शिवो नात्र संशयः। नादीनां पञ्चवर्णानामृषयोऽमी मताः क्रमात्॥ ५॥
गौतमोऽत्रिर्द्वितीयः स्याद्विश्वामित्रोऽङ्गिरास्तथा। भरद्वाजश्च गायत्री सानुष्टुप् त्रिष्टुबेव च॥ ६॥
बृहती सविराडेषां छन्दांसीह मतानि वै। इन्द्ररुद्रहरिब्रह्मस्कन्दा देवाः प्रकीर्तिताः ॥ ७॥
एषामाद्यः पूर्ववत् स्यात् (पूर्वः पीतोऽसितस्तथा। धूम्रपीतारुणा ज्ञेया एवं पञ्चार्णवो मताः॥८॥

एषामाद्यः नादीनामाद्यः प्रणवः स पूर्ववत् स्यात्) परब्रह्मबोधक इत्यर्थः। अथ च पूर्वोक्तमुन्यादिकश्च स्यात्। तथा—

....। ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रीच्छन्द ईरितम् ॥ ९॥
देव्यादिकं देवतास्य परमात्मा समीरितः। ज्योतिर्वर्णः समाख्यातो मोक्षार्थे विनियुज्यते॥ १०॥

---

[1] 'शुचिः' ख. पाठः। [2] 'प्रथमश्च' ग. पाठः। [3] 'हेम' क. ग. पाठः।

इत्यादि। इति पञ्चाक्षरविधि:। नन्दिकेश्वरमते मन्त्रान्तरे—

शृणु नन्दिन् प्रवक्ष्यामि मन्त्रान्तरमुमापते:। अष्टमान्त्यं सप्तमस्य द्वितीयार्णस्थमालिखेत्।। १।।
आद्यवर्गतुरीयार्णोपान्त्याभ्यां परिमण्डितम्। मायाबीजमिदं वत्स त्रिषु लोकेषु दुर्लभम्।। २।।
अनेनाद्यन्तयोर्युक्त: पञ्चार्ण: सप्तवर्णक:। षडर्णश्चाष्टवर्ण: स्यादेवं मन्त्रद्वयं भवेत्।। ३।।

अष्टमान्त्यं हकार:, सप्तमद्वितीयार्णस्थं रेफोपरि स्थितं, आद्यवर्गतुरीयार्ण: ईकार:, तस्यैव (वर्गस्य) उपान्त्यो बिन्दुस्ताभ्यां युक्तं लिखेत्, तेन मायाबीजं सिद्धम्।। तथा—

ऋषिरुक्तो वामदेव: पङ्क्तिश्छन्द उदाहृतम्। उमापतिर्देवता स्यान्मन्त्रयोर्जगदीश्वर:।। ४।।
तारषड्दीर्घयुङ्मायापूर्वैर्मन्त्रार्णकै: क्रमात्। षडङ्गानि गणश्रेष्ठ जातियुक्तानि कल्पयेत्।। ५।।
बन्धूककुसुमारक्तं चन्द्रार्धकृतशेखरम्। दक्षिणोर्ध्वकरे शूलं तदधो वरमुद्रिकाम् ।। ६।।
वामोर्ध्वेन कपालं तदधोहस्तेन चाभयम्। दधानं निजवामोरुपीठस्थाया गणेश्वर।। ७।।
रक्तोत्पलकरायाश्च श्लिष्यन्तं वामबाहुना। सर्वाभरणसन्दीप्तदेहं देव्या मुदान्वितम्।। ८।।
स्मेरवक्त्रं त्रिनयनं सर्वाभरणभूषितम्। एवं ध्यात्वा यजेद् देवं प्राक्प्रोक्ते शैवविष्टरे।। ९।।
पद्मं पञ्चदलं कृत्वा तद्बहिश्चाष्टपत्रकम्। वहिरष्टच्छदाम्भोजं चतुरस्रत्रयं बहि:।। १०।।
वीथीद्वयसमोपेतं चतुर्द्वारोपशोभितम्। अस्मिन् पीठे यजेद् देवं मूर्तिं सङ्कल्प्य मूलत:।। ११।।
सर्वोपचारैराराध्य प्रागवदङ्गानि पूजयेत्। हल्लेखां गगनां रक्तां महोच्छुष्मां करालिकाम्।। १२।।
पूजयेत् पञ्चपत्रेषु बहिरष्टदले पुन: । वृषभं क्षेत्रपात्रं च चण्डेश्वरमनन्तरम् ।। १३।।
दुर्गां च षण्मुखं पश्चान्नन्दिनं विघ्ननायकम्। सेनापतिं ततो बाह्ये यजेदष्टदलेष्विमा:।। १४।।
ब्राह्म्याद्या मातरस्तास्तु ब्राह्मी माहेश्वरी मत:। कौमारी वैष्णवी चैव वाराही तदनन्तरम्।। १५।।
ऐन्द्री च षष्ठी चामुण्डा महालक्ष्मीरिति क्रमात्। लोकपालांस्तदस्त्राणि चतुरस्रान्तरालयो:।।१६।।
एवं सम्पूज्य देवेशं नियमेन जितेन्द्रिय:। लक्षत्रयं जपेत् सार्धं तत्सहस्रं समिद्वरै:।। १७।।
आरग्वधातरूद्भूतैस्तत्पुष्पैर्वा हुनेत् तत: । मधुरत्रयसंसिक्तैस्तर्पणादि ततश्चरेत् ।। १८।।
प्रागुक्तेन विधानेन तत: सिद्धो भवेन्मनु:। सौभाग्यसम्पदायुष्यपुत्रपौत्रादिवर्धन: ।। १९।।
देहान्ते च गणश्रेष्ठ शिवसायुज्यदो भवेत्।..।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्तं प्राग्वत्कृत्वा, शिरसि वामदेवाय ऋषये नम:। मुखे पङ्क्तिच्छन्दसे नम:। हृदये श्रीउमापतये देवतायै नम:। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोग: इति कृताञ्जलिर्वदेत्। ओंह्रांओं हृदयाय नम:। ओंह्रींनं शिरसे०। ओंह्रूंमं शिखायै०। ओंह्रैंशिं कवचाय०। ओंह्रौंवां नेत्रत्रयाय०। ओंह्र:यं अस्त्राय०। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य, (हृदयादिषडङ्गेष्वपि न्यसेत्। ततो ध्यानादिमानसपूजान्ते प्रमाणोक्तं पूजाचक्रं निर्मायार्घ्यादिपुष्पोपचारान्ते प्राग्वद् देवाङ्गानि सम्पूज्य) पञ्चदलेषु देवाग्रदलमारभ्य प्रादक्षिण्येन—ओंहल्लेखायै नम:। ओं गगनायै०। ओंरक्तायै०। ओंमहोच्छुष्मायै०। ओंकरालिकायै नम:। इति सम्पूज्य, अष्टदलेषु देवाग्रमारभ्य वृषभाय नम:।

क्षेत्रपालाय०। चण्डेश्वराय०। दुर्गायै०। षण्मुखाय०। नन्दिने०। विघ्ननायकाय०। सेनापतये नमः। इति प्रादक्षिण्येन सम्पूज्य, तद्बहिरष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—आं ब्रह्म्यै नमः। ईं महेश्वर्य्यै०। ऊं कौमार्य्यै०। ॠं वैष्णव्यै०। ॡं वाराह्यै०। ऐं इन्द्राण्यै०। औं चामुण्डायै०। अः महालक्ष्म्यै नमः। इति सम्पूज्य, ततः प्राग्वल्लोकपालार्चादि सर्वं समापयेदिति।। तथा—प्रासादमन्त्रः

श्रृणु नन्दिन् प्रवक्ष्यामि प्रासादाख्यं महामनुम्। यस्य स्मरणमात्रेण नरः साक्षाच्छिवो भवेत्।। १।।
अष्टमस्यान्त्यवर्णस्तु प्रथमान्त्यादिसंयुतः। तदादिस्वरसंयुक्तः कथितो वै महामनुः।। २।।
धर्मार्थकाममोक्षाणां साधने मुनिसेवितः। प्रसादकरणाच्छीघ्रमस्य प्रासादनामता ।। ३।।

अष्टमान्त्यवर्णो हः, प्रथमान्त्यादिरनुस्वारः, तदादिस्वर औकारस्ताभ्यां युतस्तेन प्रासादबीजमुद्धृतम्।

वामदेवो मुनिर्वत्स पङ्क्तिश्छन्द उदाहृतम्। सदाशिवो देवतास्य मन्त्रस्य परिकीर्तितः।। ४।।
हकारो बीजमित्युक्तमौकारः शक्तिरुच्यते। षट्कलाद्येन बीजेन षडङ्गानि प्रविन्यसेत्।। ५।।
प्रथमाद्यतृतीयेषु रुद्रादित्योत्तरस्वरैः। अष्टमान्त्यं तु सम्भेद्य प्रथमोपान्त्यसंयुतैः ।। ६।।
विलोमगैः पञ्चबीजैरीशानाद्यान् प्रविन्यसेत्।..।।

प्रथमाद्यमिति, प्रथमाद्यं अ, तृतीयं इ, इषु उ, रुद्र ए, आदित्योत्तरः ओ, एभिर्भेदितमष्टमान्त्यं हकारः, प्रथमोपान्त्यो बिन्दुस्तेन हंहिंहुंहेंहों इति, विलोमगैः होंहेंहुंहिंहं इत्यादिभिः।

मूर्तिरीशानश्चाद्यः स्यात् ततस्तत्पुरुषाह्वयः। अघोरो वामदेवश्च सद्योजातश्च पञ्चमः ।। ७।।
अङ्गुष्ठादिष्वङ्गुलीषु मूर्ध्नि वक्त्रे हृदि न्यसेत्। गुह्ये च पादयोश्चाथ पञ्च वक्त्रेषु ताः पुनः।। ८।।
ऊर्ध्वादिषु गणश्रेष्ठ ततो देवं विचिन्तयेत्।..।।

इति। शारदातिलके– (१८। ५६)

''तत्तदङ्गुलिभिर्भूयस्तत्तद्बीजादिकान् न्यसेत्। शिरोबदनहृद्गुह्यपाददेशे यथाक्रमम्।। १।।
ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ताः।''

इति। ता मूर्तीः। तथा–

मुक्ताविद्युद्घनस्वच्छारुणवर्णैस्तु पञ्चभिः। वदनैः शोभितं वत्स प्रतिवक्त्रं त्रिलोचनम्।। ९।।
चन्द्रावतंसविलसज्जटामुकुटमण्डितम्। शुद्धस्फटिकसङ्काशं समासीनं सरोरुहे ।।१०।।
प्रसन्नवदनाम्भोजं दधानं करपङ्कजैः। दक्षिणैस्त्रिशिखं टङ्कं वज्रं खड्गं तथानलम्।। ११।।
सर्पं घण्टासृणी पाशमभयं वामबाहुभिः। नानाभरणसन्दीप्तं ध्यायेद् देवं सदाशिवम्।। १२।।
इति ध्यात्वा गणश्रेष्ठ पूर्वोक्ते योगविष्टरे। पञ्चाक्षरोक्तवत् कृत्वा पूजामण्डलमन्त्रवत्।। १३।।
मूलेन मूर्तिं सङ्कल्प्य तस्यामावाह्य पूजयेत्। उपचारैः समभ्यर्च्य यजेदावृतिदेवताः।। १४।।
प्रथमेऽष्टदले वत्स सद्यादीन् पञ्च पूजयेत्। वेदाक्षमालाभीतीष्टहस्तं कुन्देन्दुसन्निभम्।। १५।।
चतुर्वक्त्रं त्रिनयनं सद्यं पश्चिमतो यजेत्। काश्मीरवर्णोऽभीतीष्टटङ्काक्षस्रक्करः शुभः।। १६।।
त्रीक्षणश्चतुरास्यश्च विलासी चोत्तरे स्थितः। पूजनीयो वामदेवस्त्वघोरं दक्षिणे यजेत्।। १७।।

अक्षमालां वेदपाशौ साङ्कुशं डमरुं करै:। खट्वाङ्गं त्रिशिखं चैव कपालं दधतं क्रमात्।।१८।।
अञ्जनाभं भीमदंष्ट्रं त्रिनेत्रं चतुराननम्। (प्रदीप्तविद्युद्धेमाभं पूर्वे तत्पुरुषं यजेत्।। १९।।
हस्तैर्विषावराभीतिकुठारान् दधतं क्रमात्। चतुर्वक्त्रं त्रिनयनं नागयज्ञोपवीतिनम्।। २०।।)
ईशानं पूजयेन्मध्ये पञ्चवक्त्रं गणेश्वर। मुक्तागौरं त्रिनयनं बाहुभिर्दशभिर्निजै:।। २१।।
दधानमक्षस्त्रग्वेदपाशाङ्कुशसमाह्वयान्। डमरुं चैव खट्वाङ्गं त्रिशूलं च कपालकम्।। २२।।
अभयं वरदं चैव कोणपत्रेषु पूजयेत्। तेजोरूपा निवृत्त्याद्यास्तास्वन्त्यां मध्यतो यजेत्।। २३।।
पुरोक्तवत् षडङ्गानि पूजयेन्नन्दिकेश्वर । अनन्ताद्यानुमाद्याश्च यजेदष्टलद्वये ।। २४।।
पूर्ववल्लोकपालांश्च तदस्त्राणि च पूजयेत्। य एवं पूजयेच्छम्भुं साधक: स्थिरमानस:।। २५।।
भुङ्क्ते स भोगानखिलान् देहान्ते शिवतां व्रजेत्।.....................................।।

इति। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नम:। मुखे पङ्क्तिच्छन्दसे नम:। हृदये श्रीसदाशिवाय देवतायै नम:। गुह्ये हं बीजाय नम:। पादयो: ओं शक्तये नम:। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोग:, इति कृताञ्जलिरुक्त्वा, हां हृदयाय नम:। हीं शिरसे स्वाहा। हूं शिखायै वषट्। हैं कवचाय हुं। हौं नेत्रत्रयाय वौषट्। ह: अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादिकरतलान्तं करयोर्विन्यस्य, हृदयादिनेत्रत्रयान्तं विन्यस्यास्त्रमन्त्रेण तालत्रयं तर्जन्यङ्गुष्ठोत्थशब्देन दशदिग्बन्धनं च कृत्वा, अङ्गुष्ठयो: हों ईशानाय नम:। तर्जन्यो: हें तत्पुरुषाय नम:। मध्यमयो: हुं अघोराय नम:। अनामिकयो: हिं वामदेवाय नम:। कनिष्ठयो: हं सद्योजाताय नम:। इति विन्यस्यैवमेव शिरोवदनहृद्गुह्यपादेषु विन्यस्येत्। शिरसि हों ईशानायोर्ध्ववक्त्राय नम:। मुखे हें तत्पुरुषाय पूर्ववक्त्राय०। दक्षिकर्णे हुं अघोराय दक्षिणवक्त्राय०। वामकर्णे हिं वामदेवायोत्तरवक्त्राय०। चूढाध: हं सद्योजाताय पश्चिमवक्त्राय नम:। इत्युङ्गुष्ठादिभिरेकेनाङ्गुलिनैकैकां मूर्तिं विन्यस्य, ध्यानादिमानसपूजान्ते पञ्चाक्षरोक्तं पूजायन्त्रं विधायार्घ्यस्थापनादिपुष्पोपचारान्ते प्रथमेऽष्टदले देवस्य पृष्ठदले हं सद्योजाताय नम:। वामदले हिं वामदेवाय०। दक्षिणदले हुं अघोराय०। अग्रदले हें तत्पुरुषाय०। कर्णिकायां देवस्याग्रे हों ईशानाय नम:। इति सम्पूज्याग्नेयादिदलेषु मध्ये च निवृत्त्याद्या: सम्पूज्य, तत: प्राग्वत् षडङ्गानि सम्पूज्यानन्तादिपूजामारभ्य पञ्चाक्षरोक्तवत् सर्वं कृत्वा समापयेदिति।। तथा—

लक्षद्वयं जपेन्मन्त्रं हविष्याशी जितेन्द्रिय:। पञ्चसप्ततिसाहस्त्रं समेतं करवीरजै:।। २६।।
जपापुष्पैस्तु पद्मैर्वा त्रिमध्वक्तैर्दशांशत:। पायसै: सघृतैर्वाथ राजवृक्षसमिद्वरै:।। २७।।
जुहुयात् तस्य पुष्पैर्वा तर्पणादि ततश्चरेत्।...................................।।

इति। एष जप: कृतयुगपर:। तथा मन्त्रान्तरम्—

अथ नन्दिन् प्रवक्ष्यामि मन्त्रमष्टाक्षरं परम्। प्रथमस्य तु वर्गस्योपान्त्यवर्णसमन्वितम्।। १।।
तत्त्रयोदशवर्णं तु प्रथमार्णमिदं भवेत्। मायाबीजं द्वितीयं स्यात् प्रासादाख्यं तृतीयकम्।। २।।
पञ्चाक्षरस्तत: पश्चादेवमष्टाक्षरो मनु:।..।।

प्रथमवर्गोपान्त्योऽनुस्वार:, तत्त्रयोदश ओकारस्तेन ओं, स मन्त्रस्यादिमो वर्णो भवति।

वामदेव ऋषिः पङ्क्तिश्छन्दो देवः सदाशिवः। मायाप्रासादबीजाभ्यां भेदिताभ्यां स्वरैरथ।। ३।।
षड्भिः कुर्यात् षडङ्गानि मन्त्रवर्णैः सजातिभिः। ध्यायेद्देवं ततो वत्स हृदि चैकाग्रमानसः।। ४।।
सिन्दूरपुञ्जशोणाङ्गं स्मेरवक्त्रं त्रिलोचनम्। मणिमौलिलसच्चन्द्रकलालङ्कृतमस्तकम् ।। ५।।
दक्षिणोर्ध्वकरे टङ्कं दधानं तदधो वरम्। वामोर्ध्वहस्ते हरिणं तदधःकरमादरात् ।। ६।।
पीनवृत्तघनोत्तुङ्गस्तनाग्रे विनिवेश्य च। वामाङ्के सन्निविष्टायाः प्रियाया रक्तपङ्कजम्।। ७।।
दधत्या दक्षिणे हस्ते चासीनं रक्तपङ्कजे। नानाभरणसन्दीप्तं दिव्यगन्धस्रगम्बरम् ।। ८।।
एवं ध्यात्वा गणश्रेष्ठ पूर्वोक्ते पूजयेच्छिवम्। योगपीठे समावाह्य गन्धपुष्पाक्षतादिभिः।। ९।।
पञ्चाक्षरोक्तविधिना पूजायन्त्रं प्रकल्प्य च। तत्तन्त्रोक्तविधानेन यजेन्मूर्तीः कलाश्च ताः।। १०।।
ततोऽङ्गानि समभ्यर्च्यानन्तादीनप्युमादिकान्। लोकेशांश्च तदस्त्राणि पूजयेद्वत्स पूर्ववत्।। ११।।
अनेन विधिना यस्तु शिवमाराधयेत् सदा। पुत्रपौत्रधनैश्वर्यभोगमोक्षान् स विन्दति ।। १२।।

इति। अथ प्रयोगः— तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते पञ्चाक्षरोक्तमृष्यादिकं विन्यस्य हांहांऔं हृदयाय नमः। हींह्रींनं शिरसे०। इत्यादि करषडङ्गन्यासं विधाय, यथोक्तरूपं देवं ध्यात्वा मानसयजनादिकं पञ्चाक्षरोक्तमन्त्रवत् सर्वं कुर्यादिति।। तथा दक्षिणामूर्तिमन्त्रः—

दक्षिणामूर्तिमन्त्रस्य विधानं नन्दिकेश्वर। प्रवक्ष्यामि गणश्रेष्ठ मन्त्रोद्धारपुरःसरम् ।। १।।
पञ्चमस्य तृतीयार्णः प्रथमः प्रथमस्य तु। तृतीयार्णयुतो वत्स द्वितीयाद्योऽष्टमस्य च।। २।।
द्वितीयार्णयुतश्चाथ चतुर्थान्त्यो गणाधिप। प्रथमस्य द्वितीयार्णयुतोऽन्त्यः षष्ठवर्गजः।। ३।।
आद्यषष्ठसमायुक्तः पञ्चमाद्यस्ततः परम्। सप्तमस्य द्वितीयार्णरूढस्तस्यादिमस्ततः।। ४।।
आद्यैकादशसंयुक्तः पञ्चमाद्यस्ततः पुनः। आद्यपञ्चमसंयुक्तस्तुरीयः षष्ठवर्गजः ।। ५।।
सप्तमाद्यसमायुक्तः प्रथमोपान्त्यसंयुतः। सप्तमान्त्यस्ततो वत्स चतुर्थाद्यस्ततः परम्।। ६।।
षष्ठस्य पञ्चमस्त्वाद्यषष्ठवर्णसमन्वितः। सप्तमस्य तृतीयोऽथ पञ्चमान्त्यस्ततः परम्।। ७।।
आद्यवर्गतृतीयार्णसमेतः सप्तमान्त्यकः। आद्यद्वितीयसंयुक्तस्त्वष्टमस्य तृतीयकः।। ८।।
प्रथमस्य तृतीयार्णसमेतस्तदनन्तरम्। आद्यैकादशसंयुक्तः पञ्चमस्य तु पञ्चमः।। ९।।
सप्तमाद्यसमायुक्तः पञ्चमस्य चतुर्थकः। आद्यद्वितीययुक्तश्च (पञ्चमान्त्यस्ततः परम्।। १०।।
आद्यद्वादशसंयुक्तो द्वितीयाद्यस्तथा परम्। पञ्चमान्त्यस्ततो वत्स आद्यतृतीयसंयुतः।। ११।।
सप्तमस्य द्वितीयोऽथ पञ्चमाद्यस्ततः परम्। आद्यद्वितीयसंयुक्त)स्तस्य पञ्चदशान्वितः।। १२।।
द्वितीयस्य तृतीयोऽथ प्रथमस्य द्वितीययुक्। सप्तमाद्यं ततो वत्स पञ्चमान्त्यस्ततः परम्।। १३।।
षष्ठान्तिमोऽथ नन्दीश आद्यत्रयोदशान्वितः। सप्तमस्य द्वितीयोऽथ आद्यपञ्चमसंयुतम्।। १४।।
पञ्चमस्य तृतीयोऽथ आद्यसप्तम(क?यो)स्तथा। द्वितीयार्णसमायुक्तः सप्तमस्यादिमस्तथा।। १५।।
अष्टमस्यादिमः पश्चात् प्रथमोपान्त्यसंयुतः। षष्ठस्य च चतुर्थोऽथ प्रथमैकादशान्वितः।। १६।।

सप्तमस्य चतुर्थार्ण: प्रोक्तो द्वात्रिंशदक्षर:। पुटितस्तारमायाभ्यां भवेत् षट्त्रिंशदक्षर:।। १७।।
कथितो मन्त्रराजोऽयं वाङ्मोक्षफलदायक:।...।।

इति।। पञ्चमस्य तृतीयार्णो द, प्रथमो मन्त्रस्याद्यमक्षरमित्यर्थ:। द्वितीयाद्य: ककार:, अष्टमस्य द्वितीयोऽर्ण: ष, प्रथमस्य तृतीयार्ण: इ, ताभ्यां युतस्तेन क्षि इति। चतुर्थान्त्यो णकार:, प्रथमस्य द्वितीयार्णयुत प्राकारेण युक्तस्तेन णा इति। षष्ठवर्गान्त्यो मकार:, आद्यषष्ठ ऊकारस्तद्युक्तस्तेन मू इति। पञ्चमाद्यस्तकार:, (सप्तमस्य द्वितीये रेफे आरुढस्तेन तं। तथा तस्यैवादिमो यकार:, प्रथमस्यैकादशेनैकारेण युक्तस्तेन ये। पञ्चमाद्यस्तकार:,) आद्यपञ्चम उकारस्तद्युक्तस्तेन तु इति। षष्ठवर्गतुरीयो भकार:, सप्तमाद्यो यकार:, प्रथमोपान्त्यो विन्दुस्तद्युक्तश्च तेन भ्यं इति। सप्तमान्त्यो वकार:। चतुर्थाद्यो टकार:। षष्ठस्य पञ्चमो मकार:, आद्यषष्ठ ऊकारस्तद्युक्तस्तेन मू। सप्तमस्य तृतीयो लकार:। पञ्चमान्त्यो नकार:, (आद्यवर्गतृतीयार्णसमेत: इकारयुक्तस्तेन नि।) सप्तमान्त्यो वकार:, आद्यद्वितीय आकारस्तेन युक्तो वा इति। अष्टमस्य तृतीय: सकार:, प्रथमस्य तृतीय इकारस्तद्युक्तस्तेन सि। पञ्चमस्य पञ्चमो नकार:, आद्यैकादश एकारस्तद्युक्तस्तेन ने इति। पञ्चमस्य चतुर्थो धकार:, सप्तमाद्यो यकार:, आद्यद्वितीय आकारस्ताभ्यां युक्तस्तेन ध्या इति। पञ्चमान्त्यो नकार:, आद्यद्वादश ऐकारस्तेन युक्तो नै इति। द्वितीयाद्य: ककार:। पञ्चमान्त्यो नकार:, आद्यतृतीय इकारस्तद्युक्तस्तेन नि इति। सप्तमस्य द्वितीयो रेफ:। पञ्चमाद्यस्तकार:, आद्यद्वितीय आकारस्तद्युक्तस्तस्य आद्यवर्गस्य पञ्चदशो बिन्दुस्तद्युक्तस्तेन तां इति। द्वितीयतृतीयो गकार:, प्रथमस्य द्वितीय आकारस्तद्युतस्तेन गा इति। सप्तमाद्यो यकार:। पञ्चमान्त्यो नकार:। षष्ठान्तिमो मकार:, आद्यत्रयोदश ओंकारस्तद्युक्तस्तेन मो इति। सप्तमस्य द्वितीयो रेफ:, आद्यपञ्चम उकारस्तेन रु इति। पञ्चमस्य तृतीयो द, आद्यसप्तमयोर्द्वितीयार्णेन आकाररेफेण युक्तस्तेन द्रा इति। सप्तमस्यादिमो यकार:। अष्टमस्याद्य: शकार:, प्रथमोपान्त्यो बिन्दुस्तद्युक्तस्तेन शं इति। षष्ठस्य चतुर्थो भकार:। सप्तमस्य चतुर्थार्णो वकार:, प्रथमैकादशान्वित एकारेण युक्तस्तेन वे इति। तारमायाभ्यां पुटित: आदौ प्रणवस्तदनु ह्ल्लेखा। स्पष्टम् ''ओंह्रींदक्षिणामूर्तये तुभ्यं वटमूलनिवासिने। ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ह्रीओं।।'' तथा–

ऋषि: शुक: समुद्दिष्टश्छन्दोऽनुष्टुबुदाहृतम्। देवता जगतामादिर्दक्षिणामूर्तिरव्यय:।। १८।।
प्रणवो बीजमित्युक्तं ह्ल्लेखा शक्तिरीरिता। विनियोग: समुद्दिष्ट: पुरुषार्थचतुष्टुये।। १९।।
आदौ तु मूलमन्त्रेण करशुद्धिं समाचरेत्। रसनेत्राष्टकवसुबाणवह्निमितै: क्रमात्।। २०।।
विभक्तैर्मन्त्रवर्णैस्तु तारमायादिकै: पुन:। षड्दीर्घभिन्नमायान्तै: षडङ्गानि प्रविन्यसेत्।। २१।।

रसा: षट्। नेत्रं द्वयं। वसवोऽष्टौ। बाण: पञ्च। वह्नयस्त्रय:।

मूर्ध्नि भाले दृशो: श्रोत्रगण्डयुग्मे च नासिके। आस्यदो:सन्धिषु गले[1] स्तनहृन्नाभिमण्डले।। २२।।
कट्यां गुह्ये पुन: पादसन्धिष्वर्णान् प्रविन्यसेत्। व्यापकं तारमायाभ्यां विन्यसेद्गणनायक।। २३।।
मूर्धादिपादपर्यन्तं ततो देवं विचिन्तयेत्। हिमाचलतटे रम्ये सिद्धकिन्नरसेविते ।। २४।।
विविधद्रुमशाखाभि: सर्वतो वारितातपे। सुपुष्पितलताजालैराश्लिष्टकुसुमद्रुमै: ।। २५।।

---

[1] ‘कण्ठे’ ख. पाठ:।

शिलाविव[1]रनिर्गच्छन्निर्झरानिलशीतले । गायद्भृङ्गाङ्गनासङ्घैर्नृत्यद्बर्हिकदम्ब[2]कैः ।। २६।।
कूजत्कोकिलसङ्घातैर्मुखरीकृतदिङ्मुखे । परस्परविनिर्मुक्तमात्सर्यमृगसेविते ।। २७।।
आद्यैः शुकाद्यैर्मुनिभिरजस्रं समुपस्थिते। पुरन्दरमुखैर्देवैः सेवायातैर्निषेविते ।। २८।।
वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्। गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम्।। २९।।
नवरत्नमयाकल्पैर्लम्बमानैरलङ्कृतम्। जलजैः स्थलजैः पुष्पैरामोदिभिरलङ्कृतम्।। ३०।।
गृणद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम्। संसारतापविच्छेदकुशलच्छायमद्भुतम्।। ३१।।
विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे। आसीनममिताकल्पं शरच्चद्रनिभाननम्।। ३२।।
स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः। संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम् ।। ३३।।
रजताद्रिप्रतीकाशं दुग्धफेनामलच्छविम्। चन्द्रखण्डलसद्रम्यजटामुकुटमण्डितम् ।। ३४।।
विरासने समासीनं नासालोकनतत्परम्। सुप्रसन्नमुखाम्भोजं नयनत्रयशोभितम् ।। ३५।।
दक्षिणोर्ध्वकरे टङ्कं व्याख्यामुद्रामधःकरे। वामोर्ध्वहस्ते हरिणं दधानं तदधःकरम्।। ३६।।
वामाजानुनि विन्यस्य निविष्टं शुभ्रपङ्कजे। कक्षाबन्धविशेषोद्य[3]त्फणिनाथैरलङ्कृतम्।। ४७।।
ध्यात्वैवं दक्षिणामूर्तिं मुनिवृन्दसमावृतम्। प्राक्प्रोक्ते पूजयेत् पीठे देवमावाह्य पूर्ववत्।। ४८।।
लिखेदष्टदलं पद्मं सर्वलक्षणसंयुतम्। अन्तर्बहिर्विभागेन कर्णिकाकेसरोज्ज्वलम्।। ३९।।
चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम्। अस्मिन् पीठे यजेद् देवं प्राग्वदङ्गानि पूजयेत्।। ४०।।
प्रथमेऽष्टदले वत्स सनकं च सनन्दनम्। सनातनं चाथ सनत्कुमारं शुकमेव च।। ४१।।
जाबालिनं नारदं च व्यासमेतान् प्रपूजयेत्। (द्वितीयेऽनन्तसूक्ष्मादींस्तृतीये वृषभादिकान्।। ४२।।
वीथीद्वये लोकपालांस्तदस्त्राणि प्रपूजयेत्।)..।।

इति।। अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शुकाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीदक्षिणामूर्तये देवतायै नमः। गुह्ये ओंबीजाय नमः। पादयोः ह्रींशक्तये नमः। इति विन्यस्य, मम चतुवर्गपुरुषार्थसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत्। ततो मूलमन्त्रेण करशुद्धिं कृत्वा, ओंह्रीं दक्षिणामूर्तये ह्रां हृदयाय नमः। ओंह्रीं तुभ्यं ह्रीं शिरसे स्वाहा। ओंह्रीं वटमूलनिवासिने ह्रूं शिखायै वषट्। ओंह्रीं ध्यानैकनिरताङ्गाय ह्रैं कवचाय हुं। ओंह्रीं नमो रुद्राय ह्रौं नेत्रत्रयाय वौषट्। ओंह्रीं शम्भवे ह्रः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य, हृदयादिषडङ्गेष्वपि न्यसेत्। ततः शिरसि दं नमः। भाले क्षिं०। दक्षनेत्रे णां०। वामे मूं०। दक्षश्रोत्रे र्तें०। वामे यें०। दक्षगण्डे तुं०। वामे भ्यं०। नासायां वं०। मुखे टं०। दक्षबाहुमूले मूं०। मध्ये लं०। मणिबन्धे निं०। अङ्गुलिमूले वां०। वामबाहुमूले सिं०। मध्ये नें०। मणिबन्धे ध्यां०। अङ्गुलिमूले नैं०। गले कं०। स्तनयोः निं०। हृदि रं०। नाभौ तां०। कटौ गां०। गुह्ये यं०। दक्षोरुमूले नं०। जानुनि मों०। गुल्फे रुं०।

---

[1] 'शिखर' क.ग. पाठः। [2] 'भृङ्गकदम्बके' ख. पाठः। [3] 'षोर्ध्वफणि' ख. पाठः।

पादाङ्गुलिमूले द्रां०। वामोरुमूले यं०। जानुनि शं०। गुल्फे भं०। पादाङ्गुलिमूले वें नम:। इति विन्यस्य, (ओंह्रींमिति बीजद्वयेन मूर्धादिपादपर्यन्तं व्यापकं कृत्वा ध्यात्वा प्राग्वच्छैवं पीठं सम्पूज्यावाह्य ध्यात्वावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य) प्रथमाष्टदले देवाग्रदलमारभ्य प्रादक्षिण्येन सनकाय नम:। सनन्दनाय०। सनातनाय०। सनत्कुमाराय०। शुकाय०। जाबालिने०। नारदाय०। व्यासाय नम:। द्वितीय अनन्ताद्यांस्तृतीये वृषभादिकानभ्यर्च्य प्राग्वल्लोकपालादि सर्वं समापयेदिति।। तथा–

इत्थं देवं समभ्यर्च्य प्रजपेदयुताष्टकम् । पुरश्चरणसिद्ध्यर्थं यथोक्तनियमान्वित: ।। ४३।।
जुहुयात् तद्दशांशेन तिलै: क्षीरपरिप्लुतै:। पायसेनाथ वा नन्दिन् सघृतेन द्वयेन वा।। ४४।।
तर्पणादि तत: कुर्याद्यथोक्तेन विधानत:[1]। एवं सिद्धे मनौ मन्त्री प्रयोगनाचरेदथ।। ४५।।
मासमेकं च भिक्षाशी सहस्रं साष्टकं जपेत्। मन्त्रं प्रतिदिनं मन्त्री वैदुष्यं लभते ध्रुवम्।। ४६।।
मूलमन्त्रेण पुटितां मातृकां मन्त्रवित्तम:। जलं स्पृष्ट्वा त्रिधा जप्य पिबेदब्दाद् भवेद् ध्रुवम्।।४७।।
अखिलानां च शास्त्राणां व्याख्याता च महाकवि:। गजपिप्पलिकाब्राह्मीवचासर्षपसैन्धवै:।।४८।।
सुगन्धिद्रव्यसंयुक्तैर्नन्दिकेश्वर कल्कितै:। तत्कल्कसहिते ब्राह्मीरसे पक्वं च गोघृतम्।। ४९।।
अनेन मन्त्रवर्येण प्रजप्तमयुतावधि। एतत् संसेवितं कीर्तिकविताश्रीधृतिप्रदम् ।। ५०।।
कान्तिरक्षायुष्करं च गदितं सर्वसिद्धिकृत्। ....।।

इति।। तथा मन्त्रान्तरम्–

त्रयोदशार्णमुद्धृत्य प्रथमस्य गणाधिप। तस्य पञ्चदशार्णेन संयुक्तं पञ्चमस्य तु ।। १।।
पञ्चमार्णं ततो वत्स षष्ठस्यान्तं ततो वदेत्। आद्यत्रयोदशार्णेन संयुक्तं तदनन्तरम् ।। २।।
(षष्ठस्य तु चतुर्थोऽर्णो द्वितीयस्य तृतीयक:। सप्तमान्त्यं तथोच्चार्य पञ्चमाद्यं समुच्चरेत्।। ३।।
आद्यद्वादशसंयुक्तं पूर्वमन्त्रादिवर्णत:। षडक्षराणि चोच्चार्य षष्ठस्यान्त्यं तथोच्चरेत्।। ४।।
अष्टमान्त्यं सप्तमाद्यसमेतं नन्दिकेश्वर। प्रथमोपान्त्यसहितं तत: षष्ठस्य पञ्चमम् ।। ५।।
आद्यैकादशसंयुक्तं पञ्चमस्य चतुर्थकम्। आद्यद्वितीयोपान्त्याभ्यां संयुक्तं तदनन्तरम्।। ६।।)
षष्ठस्याद्यं सप्तमस्य द्वितीयेन समन्वितम्। सप्तमाद्यं ततो वत्स तृतीयस्य द्वितीयकम्।। ७।।
सघनं चाष्टमस्याथ तृतीयं सप्तमान्त्ययुक्। आद्यद्वितीययुक्तं च ततोऽन्त्यस्यान्त्यमक्षरम्।। ८।।
आद्यद्वितीयसंयुक्तं मन्त्रो द्वाविंशदक्षर:।..।।

इति।। अस्यार्थ:–प्रथमस्य त्रयोदशार्ण ओकार:, तस्य प्रथमस्य पञ्चदशार्णो बिन्दुस्तद्युक्तस्तेन ओं इति। पञ्चमस्य पञ्चमार्णो नकार:। षष्ठस्यान्तो मकार:, आद्यत्रयोदशार्ण ओकारस्तेन मो इति। षष्ठस्य चतुर्थार्णो भकार:। द्वितीयस्य तृतीयो गकार:। सप्तमान्त्यं वकार:। पञ्चमाद्यस्तकार:, आद्यैकादश एकारस्तद्युक्तं तेन ते इति। पूर्वमन्त्रादित:। षडक्षराणि (पूर्वोद्धृतद्वात्रिंशदक्षरमन्त्रस्य प्रणवमायाविधुरस्य आदितो दकारमारभ्य षडक्षराणि) दक्षिणामूर्तये इत्येवंरूपाणि। षष्ठस्यान्तं मकार:। अष्टमान्त्यं हकार:, सप्तमाद्यो यकार:, प्रथमोपान्त्यो बिन्दुस्ताभ्यां युक्तं ह्यं इति। षष्ठपञ्चमो

---

[1] 'विधानवित्' ख. पाठ:।

मकारः, (आद्यैकादश एतद्युक्तस्तेन मे इति)। पञ्चमस्य चतुर्थो धकारः, आद्यद्वितीय आ, उपान्त्यो बिन्दुस्ताभ्यां युक्तस्तेन धां इति। षष्ठस्याद्यं पकारः, सप्तमस्य द्वितीयो रेफस्तद्युक्तस्तेन प्र इति। सप्तमाद्यं यकारः। तृतीयद्वितीयं छकारः, सघनं सप्रयत्नोच्चार्यं द्वित्वद्योतकोच्चार्यमित्यर्थः, तेन च्छ इति। अष्टमस्य तृतीयः सकारः सप्तमान्त्यं वकारः, आद्यद्वितीय आकारस्तद्युक्तस्तेन स्वा इति। अन्त्यस्याष्टमस्यान्त्यं हकारः, आद्यद्वितीय आकारस्तेन युक्तं हा इति। स्पष्टं तु '' ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा'' अत्र केचिदस्मिन्मन्त्रे मेधामिति पदं त्यक्त्वा तत्स्थाने प्रज्ञामिति पदं वदन्ति। 'मेधास्थाने सूरयोऽन्ये प्रज्ञापदमथोचिरे।'' इति मन्त्रतन्त्रप्रकाशवचनात्।। तथा—

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छन्द ईरितम्। देवता श्रीमहादेवो दक्षिणामूर्तिसंज्ञकः ।। ९।।
प्रणवः प्रोच्यते बीजं स्वाहा शक्तिरिति स्मृता। मेधापदं कीलकं स्यात् पुरुषार्थे नियोज्यते।।१०।।
तारुद्धस्वरैर्दीर्घैः षड्भिरङ्गानि कल्पयेत्। शिरोभ्रूमध्यवक्त्रेषु हृदि नाभौ च गुह्यके।। ११।।
जान्वोश्चरणयोर्न्यस्येत् पदानि क्रमशः[1] सुधीः। मूर्ध्नि पश्चाल्ललाटे च चक्षुषोः श्रोत्रयोस्तथा।।१२।।
नासापुटद्वये पश्चादोष्ठयोर्दन्तयोरपि। जिह्वायां चिबुकाग्रे च अंसयोर्युगले गले।। १३।।
बाह्वोश्च हृदये चैव नाभौ गुह्ये गुदे तथा। ऊर्वोर्जान्वोश्च जङ्घायां पादपाणियुगे तथा।। १४।।
सर्वाङ्गेषु च विन्यस्येन्मन्त्रवर्णानतन्द्रितः। एवं न्यस्ततनुर्मन्त्री ध्यायेद् देवमनन्यधीः।। १५।।
अकलङ्कशरच्चन्द्रनिभमम्भोजमध्यगम् । गङ्गाधरं लसच्चन्द्रकलोल्लासितशेखरम्।। १६।।
प्रसन्नवदनाम्भोजं त्रिनेत्रं सस्मिताननम्। दिव्याम्बरधरं दिव्यगन्धमाल्यैरलङ्कृतम्।। १७।।
नानारत्नमयाकल्पमहिकक्ष्याविभूषितम्। मुक्ताक्षमालां दक्षोर्ध्वे ज्ञानमुद्रामधःकरे ।। १८।।
वामोर्ध्वे च सुधाकुम्भं पुस्तकं तदधःकरे। दधानं चिन्तयेन्नन्दिन् मुनिवृन्दनिषेवितम्।। १९।।
सहस्रारशिरःपीठलसद्वामाङ्घ्रिपङ्कजम्। एवं ध्यात्वा गणश्रेष्ठ पूर्वोक्ते शैवपीठके।। २०।।
पद्मत्रयसमोपेते भूगृहत्रितयान्विते । चतुर्द्वारसमायुक्ते देवमावाह्य पूजयेत् ।। २१।।
(आदावङ्गानि सम्पूज्य केसरेषु यथा पुरा। स्वरान् षोडश तत्रैवं द्वन्द्वशः केसरस्थितान्।। २२।।
यजेद्वर्गाष्टकं पश्चादष्टपत्रेषु मन्त्रवित्। द्वितीयेऽष्टदले वत्स सरस्वत्यादिकान् यजेत्।। २३।।)
सरस्वती चतुर्वक्त्रं सनकश्च सनन्दनः। सनातनस्ततो वत्स सनत्पूर्वः कुमारकः।। २४।।
शुको व्यासश्च सम्पूज्य तृतीयेऽष्टदले पुनः। पार्वती सुभगा भद्रा क्रिया शान्तिस्तथैव च।। २५।।
रौद्री काली वल्लभेति दक्षिणामूर्तिशक्तयः। चतुरस्रचतुष्कोणेष्वग्न्यादीशान्तमर्चयेत् ।। २६।।
सिद्धगन्धर्वयोगीन्द्रविद्याधरगणानपि। इन्द्रादींश्च तदस्त्राणि प्राग्वद्वीथीद्वये यजेत् ।। २७।।

इति।। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीदक्षिणामूर्तये देवतायै नमः। गुह्ये प्रणवबीजाय नमः। पादयोः स्वाहाशक्तये नमः। नाभौ मेधाकीलकाय नमः। इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः, इति कृताञ्जलिर्वदेत्। ततः—ॐआंॐ

---

[1] 'क्रमतः' ख. पाठः।

हृदयाय नम:। ऊोंईऊों शिरसे स्वाहा। ऊोंऊंऊों शिखायै वषट्। ऊोंऐंऊों कवचाय हुं। ऊोंऔंऊों नेत्रत्रयाय वौषट्। ऊोंअ:ऊों अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। तत:—शिरसि ऊोंनम:। भ्रूमध्ये नमो नम:। वक्त्रे भगवते०। हृदि दक्षिणामूर्तये०। नाभौ मह्यं०। गुह्ये मेधां०। जान्वो: प्रयच्छ०। पादयो: स्वाहा०। शिरसि ऊोंनम:। ललाटे नं०। नेत्रयो: मों०। कर्णयो: भं०। नासापुटद्वये गं०। ओष्ठयो: वं०। दन्तपङ्क्त्यो:?। जिह्वायां दं०। चिबुकाग्रे क्षि०। अंसयो: णां०। गले मूं०। बाह्वो: र्तं०। हृदये यें०। नाभौ मं०। गुह्ये ह्यं०। गुदे में०। ऊर्वो: धां०। जान्वो: प्रं०। जङ्घयो: यं०। पादयो च्छं०। पाण्यो: स्वां०। सर्वाङ्गे हां नम:। इति विन्यस्य, प्राग्वद् ध्यानादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, प्रथमाष्टदलकेसरेषु अंआं नम:। इंईं नम:। उंऊं नम:। ऋंॠं नम:। ऌंॡं नम:। एंऐं नम:। ओंऔं नम:। अंअ: नम:। इति प्रादक्षिण्येन देवाग्रमारभ्य सम्पूज्य, तद्दलेषु कंखंगंघंङं नम:। चंछंजंझंञं नम:। टंठंडंढंणं नम:। तंथंदंधंनं नम:। पंफंबंभंमं नम:। यंरंलंवं नम:। शंषंसंहं नम:। ळंक्षं नम:। इति सम्पूज्य, द्वितायाष्टदले— सरस्वत्यै नम:। ब्रह्मणे०। सनकाय०। सनन्दनाय०। सनातनाय०। सनत्कुमाराय०। शुकाय०। व्यासाय०। तृतीयाष्टदले तथैव—पार्वत्यै नम:। सुभगायै०। भद्रायै०। क्रियायै०। शान्त्यै०। रौद्र्यै०। काल्यै०। वल्लभायै०। इति सम्पूज्य, (चतुरस्त्रचतुष्कोणयोरन्तरालस्थकोणचतुष्के आग्नेयादि सिद्धगणेभ्यो नम:। गन्धर्वगणेयो०। योगीन्द्रगणेभ्यो०। विद्याधरगणेभ्यो०। इति सम्पूज्य,) प्राग्वल्लोकपालार्चादि सर्वं समापयेदिति।। तथा—

एकलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत् तथा। क्षीरप्लुतैस्तिलै: पद्मै: पायसैर्वा घृतप्लुतै:।। २८।।
तर्पणादि तत: कुर्याद्यथोक्तविधिना सुधी:। मन्त्रवर्यं प्रसाध्यैवं काम्यकर्माणि साधयेत्।। २९।।
कण्ठमात्रोदके स्थित्वा जपेन्मन्त्रं सहस्त्रकम्। प्रत्यहं मण्डलादर्वाक् कवीनामग्रणीर्भवेत्।। ३०।।
पञ्चविंशतिधा जप्तमन्नं पायसमेव च। भक्षितं शीर्षसंसिक्तं परं वाक्सिद्धिकारकम्।। ३१।।
सर्वापन्नाशनं चैव सर्वरोगविनाशनम्। त्रयोदश्यां प्रदोषेषु सोपवास: शिवालयम्।। ३२।।
मौनी गत्वार्चयेद् देवं विद्यायुर्वृद्धयेऽनघ। आज्येन पायसान्नेन वाक्काम: सर्वदा हुनेत्।। ३३।।
श्रीकाम: पद्मैर्बिल्वैर्वा नन्द्यावर्तै: सदा हुनेत्। आज्यक्षीराक्तदूर्वाभिर्हुत्वा दद्याच्च दक्षिणाम्।।३४।।
गुरवे गां च महिषीं तस्य मृत्युभयं कुत:। आदित्याभिमुखो भूत्वा दद्याञ्जलाञ्जलीन् दश।।३५।।
मूलमन्त्रेण मन्त्रज्ञ: सर्वदोषैर्न बाध्यते। प्रात: सायं च सप्तैव मध्याह्ने चैकविंशतिम्।। ३६।।
दुग्धबुद्ध्या जलैर्देवं तर्पयेदर्चयेद्धुनेत्। पलाशपुष्पैरचिरात् कविर्होमादिभिर्भवेत्।। ३७।।
गौर्य्या पार्श्वस्थया सार्धं श्रीकामश्चिन्तयेत् प्रभुम्। अयुतं प्रजपेन्मन्त्रं भूयसीं श्रियमाप्नुयात्।। ३८।।
भुञ्जान: प्रयतो मन्त्री गोमूत्रे पक्वमोदनम्। भिक्षान्नमथवा मन्त्रमयुतद्वितयं जपेत्।। ३९।।
अश्रुतादृष्टशास्त्राणि[२] व्याचष्टे नात्र संशय:। पद्मं दशदलं कृत्वा तारं तत्कर्णिकान्तरे।। ४०।।
साध्याख्याकर्मसंयुक्तं विलिखेन्नन्दिकेश्वर। पत्रेषु मन्त्रसम्भूतानर्णान् द्विर्द्विर्लिखेत् क्रमात्।। ४१।।
अन्त्यमन्त्ये समालिख्य वेष्टयेन्मातृकाक्षरै:। यन्त्रं श्रीदक्षिणामूर्ते: साधितं विधिवन्नृणाम्।। ४२।।

---

[२] 'अश्रुतान् वेदशास्त्रादीन्' ख. पाठ:।

अपस्मारग्रहादीनां नाशनं धारणाद्भवेत्। ....।।

इति।। अस्यार्थः—दशदलं पद्मं कृत्वा तत्कर्णिकायां प्रणवं विलिख्य, तन्मध्ये ''देवदत्तं रक्ष रक्ष'' इति साध्यनाम विलिख्य, तत्पत्रेषु द्विर्द्विर्मन्त्रवर्णानालिख्यान्त्य[1]दले वर्णत्रयं लिखित्वा, बहिर्वृत्तद्वयं कृत्वा तयोरन्तरालवीथ्यां प्रागादिप्रादक्षिण्येनाकारादिक्षकारान्तां सबिन्दुकां मातृकां विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। तथा—

पद्ममष्टदलं कृत्वा मध्ये साध्यं समालिखेत्। किञ्जल्केषु स्वरान् नन्दिन् द्वन्द्वशस्तु समालिखेत्।।४३।।
तारमाद्यदले नन्दिन् वर्णत्रयविभागशः। आलिख्य विलिखेत् पश्चाद्वर्णत्रयविभागतः।। ४४।।
शिष्टपत्रेषु मन्त्रस्य शिष्टवर्णान् समालिखेत्। बहिर्वृत्तद्वयं कृत्वा अन्तराले तयोर्लिखेत्।। ४५।।
कादिक्षान्तान् सबिन्दूंश्च बहिर्भूबिम्बमालिखेत्। प्रधानदिक्षु तस्याथ सप्तमान्त्यं समालिखेत्।।४६।।
प्रथमोपान्त्यसंयुक्तं चतुर्थं स्याद् द्वितीयकम्। कोणेषु विलिखैच्चैतद्यन्त्रं सर्वार्थसाधकम्।। ४७।।
पुत्रपौत्रप्रदं नृणामायुःश्रीविजयप्रदम् । कृत्यापस्मारभूतादिनाशनं सर्वकामदम् ।। ४८।।

इति।। अस्यार्थः— अष्टदलपद्मं कृत्वा तत्कर्णिकायां ससाध्यं नाम समालिख्य किञ्जल्केषु द्विशः स्वरान् सबिन्दूनालिख्य, प्रथमदले प्रणवं अकार—उकारमकारभेदेन विभज्य विलिख्य, सप्तसु दलेषु मन्त्रस्यैकविंशतिवर्णास्त्रिंशस्त्रिंशः समालिख्य वृत्तान्तरालवीथ्यां कादिवर्णानालिख्य भूपुरस्य दिक्षु च कोणेषु वमिति विलिखेत् एतदुक्तफलदं भवति।।

नन्दिकेश्वरमते—मन्त्रान्तरम्।

शृणु नन्दिन् प्रवक्ष्यामि मन्त्रमन्यन्नवाक्षरम्। देवस्य दक्षिणामूर्तेः सर्वज्ञत्वप्रदायकम्।। १।।
आद्यत्रयोदशार्णं तु तस्य पञ्चदशान्वितम्। उद्धृत्य पुनराद्यस्य प्रथमार्णं समुद्धरेत्।। २।।
स एव प्रथमवर्गस्य पञ्चदशसमन्वितम्। पञ्चाक्षरमनुं पश्चादाद्यवर्णद्वयं पुनः।। ३।।
व्युत्क्रमेण वदेन्नन्दिन् मन्त्रः प्रोक्तो नवाक्षरः।..।।

आद्यत्रयोदशार्णं ओकारः, तस्य पञ्चदशो बिन्दुस्तेन प्रणवो जातः। आद्यस्य प्रथमार्णोऽकार, स पञ्चदशार्णेन बिन्दुना समन्वितः तेन अं इति। पञ्चाक्षरमनुः पूर्वोक्तशिवपञ्चाक्षरः। आद्यवर्णद्वयं प्रणवाकार व्युत्क्रमेण अंकारप्रणवक्रमेण। तथा—

ऋषिः शुकः समाख्यातोऽनुष्टुप् छन्द उदाहृतम्। देवता जगतामादिर्दक्षिणामूर्तिरव्ययः।। ४।।
तारेण हृदयं प्रोक्तमङ्कारेण शिरः स्मृतम्। शिखा नमःपदेन स्याच्छिवाय कवचं मतम्।। ५।।
अंकारेण च नेत्रं स्यादस्त्रं तारेण विन्यसेत्। ध्यानम्—

मुद्रापुस्तकवह्निनागविलसद्बाहुं प्रसन्नाननं
मुक्ताहारविभूषणं मणिरुचा भास्वत्किरीटोज्ज्वलम्।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधोपनिवासिनं परगुरुं ध्यायेदभीष्टाप्तये।। ६।।

---

[1] 'अन्ते दले' ख. पाठः।

इति ध्यात्वा यजेद्देवं शैवे पीठे पुरोदिते। पञ्चाक्षरोक्तविधिना पुरश्चर्यादिकं तथा।। ७।।
एवं यो भजते मन्त्रं सर्वज्ञो भवति ध्रुवम्।..।।

इति।। अथ प्रयोग:—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शुकाय ऋषये नम:। मुखे अनुष्टुप्छन्दसे नम:। हृदये श्रीदक्षिणामूर्तये देवतायै नम:। इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा, ओं हृदयाय नम:। अं शिरसे०। नम: शिखायै०। शिवाय कवचाय०। अं नेत्रत्रयाय वौषट्। ओं अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा ध्यानमानसपूजान्ते पञ्चाक्षरवत् सर्वं कुर्यात्:।। तथा—

आद्यद्वादशवर्णं तु तस्योपान्त्येन संयुतम्। पञ्चमं पञ्चमस्याथ षष्ठस्यापि च पञ्चमम्।। १।।
प्रथमस्यान्त्यसंयुक्तं द्वितीयप्रथमं तत:। सप्तमस्य तृतीयस्थं प्रथमस्य तुरीययुक् ।। २।।
प्रथमोपान्त्ययुक्तश्च अष्टमस्याद्यमक्षरम्। तृतीयोपेतमाद्यस्य सप्तमस्य तुरीयकम् ।। ३।।
आद्यद्वितीयसंयुक्तं सप्तमस्याद्यमक्षरम्। अष्टमस्य तृतीयं तु आद्योपान्त्याद्यसंयुतम्।। ४।।
तदन्त्यसहितं नन्दिन् ताराद्योऽयं नवाक्षर:। तव स्नेहान्मया नन्दिन् कथित: सर्वसिद्धिद:।। ५।।

आद्यद्वादश ऐ, तस्योपान्त्यो बिन्दुस्तेन युक्त ऐं इति। पञ्चमस्य पञ्चमो नकार:। षष्ठपञ्चमं मकार:, प्रथमोपान्त्यो विसर्गस्तद्युक्तस्तेन म:। द्वितीयप्रथमं क, सप्तमस्य तृतीयस्थं लकारोपरि स्थितं, प्रथमस्य तुरीय ईकार:, प्रथमोपान्त्यो बिन्दुस्तेनापि युक्तम्, एतेन कामबीजमुद्धृतम्। अष्टमस्याद्यं शकार:, आद्यस्य तृतीयं इकारस्तेन शि। सप्तमस्य तुरीयं वकार:, आद्यद्वितीय आकारस्तेन वा। सप्तमस्याद्यं यकार:। अष्टमस्य तृतीयं सकार: आद्योपान्त्याद्य औ, तदन्त्यो विसर्ग:, ताभ्यां युक्तस्तेन सौ: इति। ताराद्य: प्रणवाद्य:।। तथा—

मुन्याद्या: पूर्वमुद्दिष्टा: पदै: षड्भि: षडङ्गकम्। ध्यायेत् पूर्ववद्देवेशं वामार्धदयितं शिवम्।। ६।।
यजेत् पूर्वोदिते पीठे पञ्चाक्षरविधानत: । पुरश्चरणकृत्यं च पूर्वोक्तं नन्दिकेश्वर ।। ७।।
पूर्वमन्त्रोदितान् कुर्यात् प्रयोगान् साधकोत्तम:।...।।

पूर्वोक्तमिति पञ्चाक्षरोक्तम्। पूर्वमन्त्रोदितान् दक्षिणामूर्तिप्रकरणोदितान्। ओं हृत्। ऐं शिर:। नम: शिखा। क्लीं कवचं। शिवाय नेत्रं। सौ: अस्त्रं। अन्यत् सुगमम्।। तथा—

दक्षिणामूर्तये प्रोक्त्वा विद्महे तु ततो वदेत्। ध्यानस्थिताय धीशब्दं महि तन्नो वदेत् तत:।। ८।।
धीर: प्रचोदयादेषा गायत्री नन्दिकेश्वर।..।।

इति।। नन्दिकेश्वरमते—मृत्युञ्जयस्य मन्त्र:।

अथ मृत्युञ्जयं मन्त्रं कथयामि तवानघ। आद्यत्रयोदशोपान्त्यस्वरावुद्धृत्य नन्दिक।। १।।
ततस्तृतीयवर्गस्य तृतीयं चाद्यषष्ठयुक्। तदुपान्त्यस्वरारूढमष्टमस्य तृतीयकम्।। २।।
आद्यान्त्यवर्णसंयुक्तं तृतीयवर्णमुद्धरेत्। एष मृत्युञ्जयो मन्त्र: प्रोक्तो मृत्युभयावह:।। ३।।

आद्यत्रयोदश ओ, उपान्त्यो बिन्दुस्तेन प्रणवो जात:। तृतीयवर्गस्य तृतीयं जकार:, आद्यषष्ठं ऊ, तदुपान्त्यो बिन्दुस्ताभ्यां युक्तस्तेन जूं इति। अष्टमस्य तृतीयं स, आद्यान्त्यो विसर्गस्तेन स:।।

ऋषि: कहोलो देव्यादिगायत्री च्छन्द ईरितम्। देवतास्य मनो: प्रोक्तं शिवो मृत्युञ्जयाभिध:।। ४।।

प्रणवो बीजमित्युक्तं सः शक्तिरिति कीर्तिता। षड्दीर्घयुक्तेनान्त्येन षडङ्गानि प्रकल्पयेत्।। ५।।
आधारहृच्छिरःस्वेवं न्यसेद्वर्णत्रयं ततः। ध्यायेद् देवं ततो वत्स समाहितमनाश्चिरम्।। ६।।
शुद्धस्फटिकसङ्काशं शुभ्रपद्मासने स्थितम्। कपर्दमौलिविलसच्चन्द्रखण्डच्युतामृतैः।। ७।।
अभिषिक्तसमस्ताङ्गमर्केन्द्वनलललोचनम्। दक्षिणोर्द्धकरे मुद्रां ज्ञानाख्यां तदधःकरे।। ८।।
अक्षमालां च वामोर्ध्वे पाशं वेदमधःकरे। दधानं चिन्तयेद् देवं मृत्युरोगभयापहम्।। ९।।
इति ध्यात्वार्चयेत् पीठे शैवे पूर्वसमीरिते। अष्टपत्राम्बुजे वत्स चतुरस्रत्रयावृते।। १०।।
अर्चनाङ्गेन्द्रवज्राद्यैरावृतित्रयसंयुता।..।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते, शिरसि कहोलाय ऋषये नमः। मुखे देवीगायत्रीछन्दसे नमः। हृदि श्रीमृत्युञ्जयाय देवतायै नमः। गुह्ये ओं बीजाय नमः। पादयोः सः शक्तये नमः। इति विन्यस्य, ममेष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा सांसींसूंसैंसौंसः इति करषडङ्गन्यासं कृत्वा, मूलाधारे ओंनमः। हृदये जूं नमः। शिरसि सः नमः। इति विन्यस्य ध्यानादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य लोकपालपूजादिसर्वं प्राग्वत् समापयेदिति। अत्र पूजामण्डलं चतुरस्रत्रयवेष्टितमष्टदलं ज्ञेयम्। अष्टदलेषु दिक्पालान् चतुरस्रे तदायुधानि पूजयेत्।। तथा—

लक्षत्रयं जपेन्मन्त्रममृताशकलैर्हुनेत्। क्षीराप्लुतैस्तर्पणादि ततो नन्दिन् समाचरेत्।। ११।।
एवं सिद्धे मनौ नन्दिन् प्रयोगानाचरेत् ततः। तारनालं मध्यपत्रमन्त्यमध्यं च सम्पुटे।। १२।।
पद्मयुग्मं तदन्तःस्थमात्मानं चिन्तयेच्छिवम्। संस्रवद्वर्णपीयूषधारासिक्तकलेवरम् ।। १३।।
अनेन योगेन भवेद् दीर्घायुश्च निरामयः।..।।

अयमर्थः— ओंकारनालस्य जूंकारपत्राष्टकस्य सःकारकर्णिकस्य सम्पुटितस्य पद्मद्वयस्य मध्ये समासीनं मन्त्रवर्णत्रयनिर्गच्छदमृतधाराप्लावितसर्वगात्रं शिवात्मानं चिन्तयेदित्यर्थः।। तथा—

वेदाङ्गुलमितैर्नन्दिन् गुडूचीशकलैर्हुनेत्। पयःपरिप्लुतैरर्कसहस्रं विजितेन्द्रियः।। १४।।
आरोग्यायुर्यशोलक्ष्मीरचिराल्लभते ध्रुवम्। (अमृताशकलैर्दुग्धसम्प्लुतैश्चतुरङ्गुलैः।। १५।।
सहस्रद्वादशमितं जुहुयादेधितेऽनले। यावत्संख्यं जुहोत्येवं साधको नन्दिकेश्वर।। १६।।)
तावत्संख्यैः सुधाकुम्भैरग्निः प्रीणाति शङ्करम्। आप्यायितोऽग्निना रुद्रः प्रदद्यात् साधकेप्सितान्।।१७।।
गुडूचीशकलान् नन्दिन् समिधो वटवृक्षजाः। तिला दूर्वाः पयः सर्पिः पायसं च गणाधिप।।१८।।
इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात् सप्तवासरम्। क्रमाद् दशशतं नित्यमष्टोत्तरमतन्द्रितः।। १९।।
सप्ताधिकान् द्विजान् नित्यं भोजयेन्मधुरान्वितैः। विविधैः स्वादुभिर्भोज्यैरन्नपानादिकैर्गण।। २०।।
विकारानुगु[1]णान् नन्दिन् वर्धयेद्धोमवासरान्। होतृभ्यो दक्षिणां दद्यादरुणां गां पयस्विनीम्।। २१।।
गुरुं सम्प्रीणयेन्नन्दिन् धनाद्यैर्देवताधिया। अनेन विधिना साध्यः कृत्यारोग[2]ज्वरादिभिः।। २२।।
विमुक्तः सुचिरं जीवेच्छरदां शतमञ्जसा। अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे।। २३।।

---

[1] 'गणान्' ख. पाठः। [2] 'द्रोह' ख. पाठः।

असाध्यरोगे क्ष्वेडार्तौ मोहे दाहे महाभये। होमोऽयं शान्तिद: प्रोक्त: सर्वसम्पत्प्रदायक:।। २४।।
अथ त्रिजन्मदिवसे द्रव्यै: सप्तभिरादरात्। पृथक् शतं हुनेन्मन्त्रीं मधुरैर्भोजयेद् द्विजान्।। २५।।
दीर्घमायुरवाप्नोति नियमेन न संशय:। अथवा सप्तभिर्द्रव्यैर्जन्मर्क्षे जुहुयात् सुधी:।। २६।।
पृथक् सहस्रं तेन स्यान्निरुपद्रवमुत्तमम्। दीर्घमायुरवाप्नोति नात्र कार्या विचारणा।। २७।।
पयोक्तदूर्वात्रितयैर्हुनेदेकादशाहुती: । दिनश: सोऽपमृत्युं च रोगाञ्जित्वाचिरादसौ ।। २८।।
दीर्घमायुश्च लभते मन्त्रशास्त्रविशारद:। त्रिजन्मसु सुधावल्लीकाश्मरीबकुलोद्भवै: ।। २९।।
समिद्वरै: कृतो होम: सहस्रेण पृथक्पृथक्। अपमृत्युहरो नन्दिन् सर्वरोगान् विनाशयेत्।। ३०।।
सिद्धार्थैर्विहितो होमो महाज्वरविनाशन: । अपामार्गसमिद्धोमस्त्वपमृत्युगदापह: ।। ३१।।
लिखेदष्टदलं पद्मं तारं मध्ये ससाध्यकम्। दिक्पत्रेषु द्वितीयार्णं विदिक्स्थेषु तृतीयकम्।।३२।।
दिक्षु भूमण्डलस्याथ सप्तमान्तं सबिन्दुकम्। विदिक्षु च चतुर्थस्य द्वितीयं बिन्दुभूषितम्।। ३३।।
यन्त्रं मृत्युञ्जयस्येदं जपहोमादिसाधितम्। धृतं मूर्ध्न्यथवा कण्ठे बाहौ कट्यां प्रकोष्टके।। ३४।।
ग्रहरोगविषादीनां नाशनं मृत्युभञ्जनम्। कीर्ति[1]वश्येन्दिराकान्तिपुत्रदं नात्र संशय: ।। ४५।।

इति।। अस्यार्थ:—अष्टदलपद्मं विरच्य तत्कर्णिकायां प्रणवं तन्मध्ये साध्यनाम विलिख्य, तस्य दिक्पत्रेषु जूं इति विलिख्य, कोणपत्रेषु स: इति लिखित्वा, बहिश्चतुरस्रं कृत्वा तस्य दिक्षु—वं, कोणेषु—ठं, इति लिखित्वोक्तविधिना[2] बिभृयादुक्तफलदं भवति।। अथाघोरास्त्रमन्त्र:। तत्र श्रीकण्ठसंहितायाम्—

अथाघोरमनुं वक्ष्ये सर्वशत्रुनिसूदनम्। सर्वदुष्टग्रहव्याधिनाशनं जगदीश्वरि।। १ ।।
रेवती नकुलाक्रान्ता लोलाक्षी श्रीमुखीयुता। भृग्वाक्रान्ता कुर्दिनी च वर्तुलाक्षीयुत: प्रिये।। २।।
रेवती च पुनश्चैतद्द्वयं प्रादि च तद्द्वयम्। शिवोत्तम: सद्ययुक्तो रेवती तद्द्वयं तर।। ३।।
तनुरूपपदं देवि चटयुग्मं प्रपूर्वि तत्। क्रोधीशो नकुलीशश्च पुनरेतद्द्वयं शिवे ।। ४।।
वमयुग्मं बन्धयुग्मं घातयद्वितयं तत:। वर्मास्त्रान्तो मनुर्देवि एकपञ्चादक्षर: ।। ५।।

इति। रेवती रेफ:, नकुलाक्रान्ता हकाराध:स्थिता, लोलाक्षी ईकार:, श्रीमुखी बिन्दुस्ताभ्यां युक्तस्तेन ह्रीं। भृगु: सकार:, तदाक्रान्ता: कुर्दिनी तदध:स्थ: फकार:, वर्तुलाक्षी उकारस्तेन युता, तेन स्फु। रेवती रेफ:। पुनरेतद्द्वयं स्फुर इति। प्रादि च तद्द्वयं प्रस्फुर प्रस्फुर इति। चकाराद्वीप्सा लभ्यते। शिवोत्तमो घकार:, सद्ययुक्त ओकारेण युतस्तेन घो। रेवती रेफ:। पुनरेतद्द्वयं घोर इति। तर स्वरूपं। तनुरूप स्वरूपं। चटयुग्मं चटचट इति। प्रपूर्वि तत् चटयुग्मं प्रपूर्वकं च तेन प्रचट प्रचट इति। क्रोधीश: क। नकुलीशो ह। पुनरेतद्द्वयं कह इति। वमयुग्मं वमवम। बन्धयुग्मं बन्धबन्ध इति। घातयद्वितयं घातय घातय। वर्म हुं। अस्त्रं फट्। इति (वर्णा: ५१)।। तथा—

अघोरोऽस्य ऋषि: प्रोक्तस्त्रिष्टुप् छन्द: समीरितम्। अघोररुद्रो देवता स्यात् हुंबीजं देवि कीर्तितम्।।६।।
शक्तिश्च शक्तिबीजं स्यात् पुरुषार्थचतुष्टये। विनियोगो भवेद् देवि षडङ्गं विन्यसेत् तत:।। ७।।
शरर्तुदशदिग्दन्तिदिवाकरमितै: क्रमात्। पदान्येकादश मनोरेषु स्थानेषु विन्यसेत्।। ८।।

---

१. 'वागिन्दिरा' ख. पाठ:। २. 'उक्तवत्' ख. पाठ:।

शिरोनेत्रवक्त्रगलहृन्नाभ्यन्धूरुजानुषु। सजङ्घापादयोश्चैवं पदानि परमेश्वरि।। ९।।
शरर्तुनेत्रवस्वब्धिरसवेदाब्धिवेदकैः। रसनेत्रमितैर्वर्णैः पदानि स्युर्महेश्वरि।। १०।।

इति। षडङ्गन्यासे वर्णविभागमाह—शर इत्यादि। शराः ५ ऋतवः ६ दश १० दिक् १० दन्तिनः ८ दिवाकराः १२।। पदेषु वर्णविभागमाह—शर इत्यादि। शराः ५ ऋतवः ६ नेत्रं २ वसवः ८ अब्धयः ४ रसा ६ वेदाः ४ अब्धय ४ वेदाः ४ रसाः ६ नेत्रं २।। तथा—

एवं न्यस्ततनुर्मन्त्री ध्यायेद् देवं प्रसन्नधीः। कालमेघनिभं देवं भीमदंष्ट्रं त्रिलोचनम्।। ११।।
भुजङ्गभूषणं रक्तवसनालेपशोभितम्। परशुं करवालं च बाणांस्त्रिशिखमेव च।। १२।।
दधानं दक्षिणैर्हस्तैरुर्ध्वादिक्रमतः परैः। डमरुं खेटकं चापं नृकपालं च पार्वति।। १३।।
काम्यकर्मसु रक्ताभमसितं चाभिचारके। निग्रहे ग्रभूतादिमुक्त्यै[1] मुक्तानिभं स्मरेत्।। १४।।
एवं सञ्चिन्त्य देवेशं शैवे पीठे पुरोदिते। षट्कोणान्तःस्थिते पद्मद्वितये भूपुरैर्वृते।। १५।।
चतुर्द्वारसमायुक्ते वसुपत्रे महेश्वरि। पूजयेद् देवमावाह्य गन्धपुष्पैर्मनोहरैः ।। १६।।
अङ्गानि पूर्वमभ्यर्च्य केसरेषु यथापुरा। प्रथमेऽष्टदले देवि पूजयेदायुधाष्टकम् ।। १७।।
परशुं डमरूं खड्गं खेटं बाणान् धनुस्तथा। शूलं कपालं चैतानि द्वितीयेऽष्टदले पुनः।। १८।।
ब्राह्म्याद्या मातरः पूज्याश्चतुरस्रत्रयान्तरा। वीथीद्वये लोकपालांस्तदस्त्राणि च पूजयेत्।। १९।।

इति।। अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते प्राणायामत्रयं कृत्वा, शिरसि अघोरा ऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये श्रीअघोररुद्राय देवतायै नमः। गुह्ये हुं बीजाय नमः। पादयोः ह्रीं शक्तये नमः। इति विन्यस्य मम चतुर्वर्गपुरुषार्थसिद्धये विनियोगः इति कृताञ्जलिर्वदेत्। ततः स्फुर स्फुर हृदयाय नमः। प्रस्फुर प्रस्फुर शिरसे०। घोर घोरतर तनुरूप शिखायै०। चट चट प्रन्वत प्रचट कवचाय०। कह कह वम वम नेत्रत्रयाय०। बन्ध बन्ध घातय घातय हुंफट् अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि विन्यस्य, शिरसि ह्रीं स्फुर स्फुर नमः। नेत्रयोः प्रस्फुर प्रस्फुर०। मुखे घोर०। कण्ठे घोरतर ननुरूप०। हृदि चट चट०। नाभौ प्रचट प्रचट लिङ्गे कह कह०। ऊर्वोः वम वम०। जान्वोः बन्ध बन्ध०। जङ्घयोः घातय घातय०। पादयोः हुंफट् नमः। इति विन्यस्य, ध्यानादिषडङ्गपूजान्ते प्रथमाष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—परशवे नमः डमरुकाय०। खड्गाय०। खेटाय०। बाणेभ्यः०। धनुषे०। शूलाय०। कपालाय नमः। द्वितीयाष्टदले देवाग्रमारभ्य ब्राह्म्याद्यष्टमातृः सम्पूज्य, प्राग्वदिन्द्रादिपूजामारभ्य सर्वं समापयेदिति।। तथा—

लक्षमेकं जपेन्मन्त्रं हविष्याशी यतव्रतः। जुहुयात् तद्दशांशेन तिलैः शुद्धैर्घृतप्लुतैः।। २०।।
तर्पणं मार्जनं कृत्वा भोजयेन्मधुरैर्द्विजान्। एवं सिद्धे मन्त्रवरे काम्यकर्माणि साधयेत्।। २१।।
क्रमात् सर्पिरपामार्गतिलसर्षपपायसैः। साज्यैः सहस्रं प्रत्येकं यामिन्यां जुहुयात् सुधीः।। २२।।
होमोऽयं नाशयेत् सद्यो भूतकृत्यामयादिकान्। श्वेतकिंशुकनिर्गुण्डीहोमोऽपामार्गसम्भवैः।। २३।।
समिद्वरैः कृतो होमः पूर्ववद्भूतशान्तिदः। अपामार्गारग्वधयोः पञ्चगव्यसमुक्षिताः ।। २४।।

---

[1] १. मुक्तौ' ख. पाठः।

समिधो जुहुयात् कृष्णपञ्चम्यां निशि संयत:। पृथक् सहस्रहोमेन भूतानां निग्रहो भवेत्।। २५।।
क्रमात् सर्पिरपामार्गपञ्चगव्यहविर्घृतै:। हुत्वा सहस्रं प्रत्येकं पात्रे सम्पातयेद् घृतम्।। २६।।
सम्पातसर्पिषा साध्यं भोजयेद्भूतशान्तये। लिखेदष्टदलं पद्मं वह्निगेहयुगान्तरे ।। २७।।
मायां तत्कर्णिकामध्ये साध्याख्याकर्मसंयुताम्। स्वरैरावेष्ट्य तां शक्तिं किञ्जल्केष्वष्टवर्गजान्।।२८।।
ककारादिलकारान्तानालिख्य दलसप्तके। अष्टमे तु दले वादिक्षान्तान् सप्तार्णकाँल्लिखेत्।।२९।।
स्फुरादिचटयुग्मान्तान् मन्त्रवर्णान् त्रिशस्त्रिश:। दलमध्ये तु संलिख्य दलाग्रेषु महेश्वरि।। ३०।।
प्रचटाद्यान् घातयान्तांस्तथैव गुणशो लिखेत्। बहि: षट्कोणकोणेषु प्रतिकोणं समालिखेत्।।३१।।
वर्मास्त्रबीजे तद्बाह्ये भूपुरेण तु वेष्टयेत्। दीक्षोक्तविधिना कुम्भं तस्मिन् यन्त्रे निधाय च।। ३२।।
तत्र देवं समाराध्य तज्जलैरभिषेकत:। भूतापस्मारकृत्याद्या: सर्वे नश्यन्त्युपद्रवा:।। ३३।।

अस्यार्थ:– क्वचिद्भूतले सुसमे सिन्दूरादिना विपुलं षट्कोणं विरच्य, तन्मध्येऽष्टदलं पद्मं कृत्वा, तत्कर्णिकायां शक्तिबीजमालिख्य, तस्य हकारोदरे देवदत्तस्य, रेफस्थाने रोगं, ईकारस्थाने नाशय नाशयेति साधकसाध्यकर्माण्यालिख्य, तद्बीजं सबिन्दुभि: षोडशस्वरैरावेष्ट्याष्टदलकेसरेषु–प्रथमदलकेसरे कंखंगंघं, द्वितीये ङंचंछंजं, तृतीये झंञंटंठं, चतुर्थे डंढंणंतं, पञ्चमे थंदंधंनं, षष्ठे पंफंबंभं, सप्तमे मंयंरंलं, अष्टमे वंशंषंसंहंळंक्षं नम:। इति स्वाग्रादिप्रादक्षिण्येन वर्णान् विलिख्य, दलमध्येषु स्वाग्रदलमारभ्य प्रादक्षिण्येन प्रथमदलमध्ये स्फुरस्फु, द्वितीये रप्रस्फु, तृतीये रप्रस्फु, चतुर्थे रघोर, पञ्चमे घोरत, षष्ठे रतनु, सप्तमे रूपच, अष्टमे टचट, इति विलिख्य, तत: प्रथमदलाग्रेषु प्रचट, द्वितीये प्रचट, तृतीये कहक, चतुर्थे हवम, पञ्चमे वमवं, षष्ठे धबंध, सप्तमे घातय, अष्टमे घातय, इति विलिख्य, तद्बहि:स्थषट्कोणेषु हुंफट् इति प्रतिकोणं विलिख्य तद्बहिश्चतुरस्रे वेष्टयित्वा, तत्र दीक्षोक्तविधिना कुम्भं संस्थाप्य तत्र देवमावाह्य समभ्यर्च्य, तेन जलेन साध्यमभिषेचयेत्, यथोक्तफलसिद्धिर्भवति।। तथा–

अष्टपत्रं लिखेत् पद्मं षट्कोणं तस्य मध्यत:। तन्मध्ये शक्तिमालिख्य साध्याख्यानामसंयुताम्।।३४।।
स्फुरद्द्वयेन तां शक्तिं वेष्टयेज्जगदीश्वरि। षट्कोणस्य तु कोणेषु प्रस्फुरद्वितयं लिखेत्।। ३५।।
एकैकशो महेशानि शिष्टवर्णान् दलेष्वथ। मूलमन्त्रस्य देवेशि रसवेदचतूरसै: ।। ३६।।
चतुश्चतुर्वेदरसैर्विभक्तांस्तद्बहिस्तत: । पुन: षट्कोणमालिख्य तत्कोणेषु महेश्वरि ।। ३७।।
हुंफडित्यालिखेद् बाह्ये चतुरस्रेण वेष्टयेत्। यन्त्रमेतदघोरस्य कीर्तितं भुवि दुर्लभम्।। ३८।।
क्षुद्रचौरग्रहव्यालभूतापस्मारनाशनम् । संसाधितं धृतं नृणां सर्वसिद्धिप्रदायकम् ।। ३९।।

इति।। अस्यार्थ:–विपुलं षट्कोणं कृत्वा तन्मध्येऽष्टदलं पद्मं विरच्य, तत्कर्णिकायां पुन:, षट्कोणमालिख्य, तन्मध्ये प्राग्वत् ससाध्यां शक्तिमालिख्य, तां स्फुर २ इत्यक्षरचतुष्टयेनावेष्ट्यान्त:षट्कोणेषु प्रस्फुर २ इति षडक्षराणि प्रतिकोणमेकमेकमालिख्य, अष्टसु दलेषु स्वाग्रदलमारभ्य प्रादक्षिण्येन 'घोर' इत्यादि 'घातय' इत्यन्तान् वर्णान् ६। ४। ४। ६। ४। ४। ४। ६। इति क्रमेण विभज्यालिख्य बहि: षट्कोणेषु प्राग्वदन्त्याक्षरद्वयं विलिखेत् तद्बहिश्चतुरस्रेणावेष्टयेत्। एतद्यन्त्रमुक्तफदं भवतीति।। श्रीशिवरहस्ये पाशुपतास्त्रमन्त्र:–

अथ वक्ष्ये महेशानमन्त्रं पाशुपताह्वयम्। अस्त्रराजं समस्तापत्तारणं शत्रुकृन्तनम्।। १।।
तारो बकेशः शान्तीन्द्रभूषितश्चन्द्रशेखरः। शिखीशपूर्वो वान्तश्च पञ्चमस्वरसंयुतः[1]।। २।।
वर्मास्त्रान्तः षडर्णोऽयं षडानन समीरितः।..।।

तारः प्रणवः। बकेशः शकारः, शान्तिरीकारः, इन्द्रो लकारः, ताभ्यां भूषितश्चन्द्रशेखरो बिन्दुमस्तकस्तेन श्लीं इति। शिखीशपूर्वः पकारः। वान्तः शकारः, पञ्चमस्वर उकारस्तेन शु। वर्म हुं। अस्त्रं फट्।। तथा—

ऋषिः स्याद्वामदेवोऽस्य पङ्क्तिश्छन्द उदीरितम्। रुद्रः पशुपतिः प्रोक्तो देवता देववन्दितः।। ३।।
मन्त्रार्णैः षड्भिरङ्गानि हुंफडन्तैः सबिन्दुभिः। जातियुक्तानि विन्यस्य षडानन कराङ्गयोः।। ४।।
ध्यायेत् पशुपतिं सम्यङ् मन्त्री चैकाग्रमानसः। पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम्।। ५।।
अग्निज्वालानिभश्मश्रुमूर्धजं भीमदंष्ट्रकम्। खड्गं बाणानक्षसूत्रं शक्तिं परशुमेव च।। ६।।
दधानं दक्षिणैर्हस्तैरूर्ध्वादिक्रमतो गुह। खेटचापौ कुण्डिकां च त्रिशूलं ब्रह्मदण्डकम्[2]।। ७।।
वामहस्तैश्च बिभ्राणं मध्याह्नार्कसमप्रभम्। नानाभरणसन्दीप्तं पन्नगेन्द्रैरलङ्कृतम् ।। ८।।
स्फटिकौघनिभं भान्तं[3] सर्वरक्षाकरं स्मरेत्। पूर्वोक्ते पूजयेत् पीठे शैवे गन्धादिभिः शिवम्।।९।।
पद्ममष्टदलं कृत्वा कर्णिकाकेसरान्वितम् । चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम् ।। १०।।
एवं यन्त्रं समालिख्य स्वर्णरूप्यादिके शुभे। पट्टे वा फलके वत्स श्रीकण्ठादिसमुद्भवे।। ११।।
सर्वोपचारैराराध्य यजेदङ्गानि पूर्ववत्। दलेषु मातरः पूज्या लोकेशास्त्राणि तद्बहिः।। १२।।
पूजयेद्विधिनानेन रुद्रं परमभक्तितः। यः स सर्वानवाप्येह कामानन्ते शिवो भवेत्।। १३।।

अथ प्रयोगः— तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदये पशुपतये देवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत्। ॐहुंफट् हृदयाय नमः। श्लींहुंफट् शिरसे स्वाहा। पहुंफट् शिखायै वषट्। शुहुंफट् कवचाय हुं। हुंहुंफट् नेत्रत्रयाय०। फट्हुंफट् अस्त्राय०। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। ततो ध्यानाद्यङ्गपूजान्ते अष्टदलेषु ब्राह्म्याद्याः सम्पूज्य, बहिर्वीथीद्वये इन्द्राद्यांस्तदस्त्राणि च सम्पूज्य प्राग्वत् सर्वं समापयेदिति।। तथा—

वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः। तद्दशांशं हुनेद् द्रव्यैः सघृतैः संस्कृतेऽनले।। १४।।
तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेद् गुह। ततः सिद्धमनुर्मन्त्री प्रयोगान् विदधीत वै।। १५।।
अनेन मन्त्रितं तोयं ग्रस्तस्य वदने क्षिपेत्। सद्यस्तं मुञ्चति क्रन्दन् ग्रहो मन्त्रप्रभावतः।। १६।।
अमुना मन्त्रितान् बाणान् विसृजेद्युधि भूपतिः। जयेत् क्षणेन सबलानपि शत्रून् षडानन।। १७।।

इति।। अथ श्रीकण्ठसंहितायां नीलकण्ठमन्त्रः—

नीलकण्ठमनुं वक्ष्ये क्ष्वेडत्रयविनाशनम्। यं ज्ञात्वा गिरिजे मन्त्री दृष्ट्या[4] नाशयते विषम्।। १।।
भुजङ्गेशसमारूढो लोहितेशस्तु पार्वति। सद्योऽक्ररसमायुक्तः प्रथमं वरवर्णिनि ।। २।।

---

[1] 'तम्' क. ग. पाठः। [2] 'दण्डयुक्' क. ग. पाठः। [3] 'शान्तम्' ख. पाठः। [4] 'दृष्ट्वा' क. ग. पाठः।

मेषेशोऽपि भुजङ्गस्थो लोलाक्षीश्रींमुखीयुत:। लाङ्गलीशो महासेनयुतस्तार्तीय ईरित:।। ३।।

भुजङ्गेशो रेफ:, तदुपरि स्थितो लोहितेश: पकार:, सद्य ओकार:, अक्रूरो बिन्दुस्ताभ्यां युक्तस्तेन प्रों इति। मेषेशो नकार:, भुजङ्गस्थो रेफोपरि स्थित:, लोलाक्षी ईकार:, श्रीमुखी बिन्दुस्ताभ्यां युक्तस्तेन न्रीं इति। लाङ्गलीशष्ठकार:, महासेनयुतो विसर्गसहितस्तेन ठ: इति। तथा–

अरुणो मुनिरुद्दिष्टोऽनुष्टुप् छन्दश्च देवता। नीलकण्ठ: शिवो देवि षडङ्गविधिरुच्यते।। ४।।
हरयुग्मद्विठान्तो हृत् कपर्दिने द्विठ: शिर:। नीलकण्ठ: सडेर्देवि स्वाहान्तश्च शिखा मता।। ५।।
कवचं कालकूटान्ते विषभक्षणङेयुतम्। वर्मास्त्रबीजयुगलं नीलकण्ठ: सङेशिरा:।। ६।।
अस्त्रमेवं यजेद् देवि पञ्चाङ्गानि कराङ्गयो:। मूर्ध्नि कण्ठे च हृदये न्यसेद्बीजत्रयं तत:।। ७।।
ध्यायेद् देवं नीलकण्ठं बालार्कायुतवर्चसम्। जटाजूटलसच्चन्द्रशकलं[1] फणिसत्तमै:।। ८।।
कृताकल्पं कराम्भोजैर्दधानं जपमालिकाम्। शूलं च दक्षिणाधोर्ध्वे वामोर्ध्वे च कपालकम्।। ९।।
खट्वाङ्गं तदधोहस्ते पञ्चवक्त्रविराजितम्। प्रतिवक्त्रं त्रिनयनं व्याघ्रचर्माम्बरावृतम्।। १०।।
पद्ममध्ये समासीनमतिसुन्दरविग्रहम् । एवं ध्यात्वार्चयेत् पीठे शैवे सर्वोपचारकै:।। ११।।
पद्मे वसुदले रम्ये चतुरस्रत्रयावृते। चतुर्द्वारसमायुक्ते पूर्वमङ्गानि पूजयेत् ।। १२।।
लोकेश्वरानथाभ्यर्च्य तदस्त्राणि च संयजेत्। एवं समर्चयेन्मन्त्री नीलकण्ठं महेश्वरम्।। १३।।
दृष्ट्या[2] विनाशयेत् क्ष्वेडं नीलकण्ठ इवापर:।.......................................।।

इति।। अथ प्रयोग:– तत्र प्राग्वत् प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अरुणाय ऋषये नम:। मुखे त्रिष्टुप्छन्दसे नम:। हृदये श्रीनीलकण्ठाय देवतायै नम:। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोग:, इति कृताञ्जलिर्वदेत्। ततो मूलेन करशुद्धिं कृत्वा, हरहर स्वाहा हृदयाय नम:। कपर्दिने स्वाहा शिरसे स्वाहा। नीलकण्ठाय स्वाहा शिखायै वषट्। कालकूटविषभक्षणाय हुंफट् कवचाय हुं। नीलकण्ठाय स्वाहा अस्त्राय फट्। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य नेत्रवर्जं हृदयादिपञ्चाङ्गेष्वपि न्यसेत् तत: (शिरसि प्रों नम:। कण्ठे न्रीं नम:। शिरसि ठ: नम:। इति विन्यस्य, ध्यानाद्यङ्गपूजान्ते लोकेशांस्तदस्त्राणि च प्राग्वद्वीथीद्वये पूजयेत्। तत:) प्राग्वत् सर्वं समापयेदिति।। तथा–

लक्षत्रयं जपेद् देवि दीक्षितो विजितेन्द्रिय:। हविषा सघृतेनाथ हुनेद् देवि दशांशत:।। १४।।
तर्पणं मार्जनं कृत्वा भोजयेन्मधुरैर्द्विजान्। एवं सिद्धे मनौ देवि मन्त्री हरति तत्क्षणात्।। १५।।
क्ष्वेडत्रयं न सन्देहो नीलकण्ठ इव स्वयम्। स्पृष्ट्वा जपेद्विषग्रस्तं तत्क्षणान्निर्विषो भवेत्।। १६।।
बीजाभ्यां प्रथमान्त्याभ्यां पार्श्वयोर्विषमाहरेत्। मध्येन मध्यगं सर्वं मनुनानेन संहरेत्।। १७।।
एतन्मन्त्राभिसञ्जप्तकलशोदकसेचनात् । तक्षकेणापि सन्दष्टस्तत्क्षणान्निर्विषो भवेत् ।। १८।।
विलोक्य विषिणं मन्त्री प्रजपेत् सुसमाहित:। विषद्वयान्मुच्यतेऽसावचिरान्नात्र संशय: ।। १९।।

---

[1] 'तारकं' ख. पाठ:। [2] 'दृष्ट्वा' क. ख. पाठ:।

दृष्ट्वा क्ष्वेडग्रहग्रस्तं स्वशिरःकण्ठहृत्सु च। मन्त्रवर्णत्रयं न्यस्य देवतारूपकं गुरुम्।। २०।।
स्मरम् स्वदक्षिणानामामध्यमातर्जनीषु च। मन्त्राक्षरद्व(त्र)यं देवि तदङ्गुलिभिरुत्तमः।। २१।।
त्रिशूलमुद्रामापाद्य[1] दष्टस्याभिमुखं नयेत्। प्रदर्श्य मन्त्रं प्रजपेत् पञ्चाशद्वारमद्रिजे।। २२।।
स्थावरं जङ्गमं चैव कृत्रिमं च तथा विषम्। रोगग्रहाद्यपस्मारानपमृत्युं च नाशयेत्।। २३।।
पञ्चाशन्मनुना जप्त[2]मन्त्रमौषधमेव च। भक्षितं क्ष्वेडरोगादिनाशनं परमं शिवे।। २४।।

इति। तथा मन्त्रान्तरम्–

मन्त्रान्तरमथो वक्ष्ये नीलकण्ठस्य पार्वति। तारहृन्नीलकण्ठाय मनुरष्टाक्षरो[3] भवेत्।। १।।

तारः प्रणवः। हृत् नमः। नीलकण्ठाय स्वरूपम्। तथा–

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छन्द उच्यते। देवता नीलकण्ठोऽस्य विषग्रहविनाशनः।। २।।
अङ्गध्यानार्चनाजाप्यहोमाद्यर्णत्रयोक्तवत् । तारं ङेनीलकण्ठोऽग्निवधूरष्टारक्षरोऽपरः ।। ३।।
([4]अरुणोऽस्य मुनिश्छन्दो गायत्री देवता शिवः। नीलकण्ठो महापूर्वो विषरोगादिनाशनः।।४।।)
करौ मूलेन संशोध्य पञ्चाङ्गविधिमाचरेत्। नीलकण्ठः सङेर्हृच्च हृदयोपरि विन्यसेत्।। ५।।
स्वाहा नमः शिरः प्रोक्तं तारं हृच्च शिखा मता। नीलकण्ठा सङेर्हृच्च हृदयोपरि विन्यसेत्।।६।।
स्वाहा चैव हृदन्तास्त्रं पञ्चाङ्गानि न्यसेत् क्रमात्। दक्षतर्जनिकारम्भाद् वामतर्जनिकावधि।। ७।।
वर्णाष्टकं न्यसेन्मन्त्री पादोरुगुह्यनाभिषु। हृत्कण्ठमुखशीर्षेषु न्यसेद्वर्णाष्टकं प्रिये।। ८।।
पूर्वाद्यैराननैर्युक्तः श्वेतपीतारुणासितैः। अभयं वरदं चापं वासुकिं च दधद्भुजैः।। ९।।
ध्येयो देवस्तु पार्श्वस्थगौरीकश्चातिसुन्दरः। संहारनिर्विषस्तम्भावेशान् कुर्यात् क्रमाद्बुधः।। १०।।

दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्।

त्र्यक्षरोक्तविधानेन पूजयेत् परमेश्वरम्। पुरश्चरणमप्युक्तं वर्णलक्षं महेश्वरि।। ११।।

इति।। अथ प्रयोगः–तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं विधाय, शिरसि अरुणाय[5] ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीमहानीलकण्ठाय देवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इत कृताञ्जलिर्वदेत्। ततो मूलमन्त्रेण करशोधनं कृत्वा, नीलकण्ठाय नमः हृदयाय नमः। स्वाहा नमः शिरसे स्वाहा। ॐनमः शिखायै वषट्। नीलकण्ठाय नमः कवचाय हुं। स्वाहा नमः अस्त्राय फट्। इति पञ्चाङ्गमन्त्रानङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य नेत्रवर्जं हृदयादिष्वपि न्यसेत्। ततो यथोक्तरूपं ध्यात्वान्यत् सर्वं त्र्यक्षरवत् कुर्यादिति।।

अथ चिन्तामणिमन्त्रः। तत्र श्रीशिवरहस्ये–

कैलासशिखरे रम्ये नानारत्नविचित्रिते। नानाद्रुमलताकीर्णे मन्दवायुतरङ्गिते।। १।।
नानाकुसुमसौरभ्यैरामोदितदिगन्तरे। सिद्धकिन्नरगन्धर्वचारणाप्सरसां गणैः ।। २।।
गीतवादित्रनृत्यैश्च प्रीणयद्भिः शिवं सदा। ब्रह्मविष्णुसहस्राक्षप्रमुखैरमरैस्तथा।। ३।।
गजास्यनन्दिभृङ्ग्या[6]द्यैर्गणैर्मुनिगणैरपि। निषेवितं शिलापृष्ठे वैडूर्यमणिनिर्मिते।। ४।।

---

१. 'आसाद्य' ख. पाठः। २. 'मन्त्रं' क. ग. पाठः। ३. 'र्णको' ख. पाठः। ४. 'ऋषिश्छन्दो देवता च पूर्ववत् परिकीर्तिताः' क. ग. पाठः। ५. 'ब्रह्मणे' क. ग. पाठः। ६. 'भृङ्गाद्यैः' क. ग. पाठः।

सिंहासनसमासीनमर्धनारीश्वरं हरम्। सुप्रसन्नमुखं शम्भुं स्कन्द: पप्रच्छ शङ्करम्।। ५।।

स्कन्द उवाच

भगवन् सर्वधर्मज्ञ जगदाद्य जगत्पते। अनाद्यन्ताखिलाधार भक्ता[1]नुग्रहविग्रह ।। ६।।
रहस्यं किञ्चिदिच्छामि प्रष्टुं त्वां भक्तवत्सल। भक्तोऽस्मि तव देवेश वदस्व कृपया विभो।। ७।।
चिन्तामणिमनुर्देव सूचितो यस्त्वया पुरा। इदानीं तं जगन्नाथ श्रोतुमिच्छामि शङ्कर।। ८।।

श्रीमहादेव उवाच

साधु साधु गुह प्राज्ञ सर्वतन्त्रार्थपारग। रहस्यमपि वक्ष्यामि भक्तोऽसीति षडानन।। ९।।
न कस्यापि मयाख्यातं त्वत्स्नेहात् प्रवदाम्यहम्। गोपितव्यं त्वया वत्स न प्रकाश्यं षडानन।।१०।।
सद्भक्ताय सुशान्ताय सुकुलीनाय दीयताम्। मन्त्रोद्धारं प्रवक्ष्यामि शृणु वत्स समाहित:।। ११।।
भुजङ्गेशं समुद्धृत्य क्रोधीशं तदध: कुरु। श्वेतेशं तदध: कुर्यान्महाकालं च षण्मुख।। १२।।
(पुनर्भुजङ्गमालिख्य कपालीशमध: कुरु। अनुग्रहेशमर्घीशमक्रूरेशं च योजयेत्।। १३।।
गुरूपदेशविधिना बीजं चिन्तामणेरिदम्। मथित्वा ज्ञानदण्डेन वेदागममहार्णवम् ।। १४।।
उद्धृतोऽयं महामन्त्र: साक्षान्मोक्षैकसाधनम्। तपस्तप्त्वा चिरं पूर्वं कश्यपस्तु प्रजापति:।। १५।।
दृष्टवांस्तेजसां राशिं प्रज्वलन्तं महाद्भुतम्। मन्त्ररत्नं महदिदं चिन्तयंस्तु चिरं पुन:।। १६।।
स्रष्टोऽभूज्जगतां वत्स चिन्तामणिरतो यत:।...।।

इति। भुजङ्गेशो रेफ:, क्रोधीश: ककार:, श्वेतेश: षकार:, महाकालो म, पुनर्भुजङ्गो र, कपालीशो य, अनुग्रहेश: औ, अर्घीश: ऊ, अक्रूरेशो बिन्दु:, एतै: संपिण्डितं रक्षमरयऔऊँ इति कूटं भवति। तथा—

ऋषि कश्यप आख्यातोऽनुष्टुप् छन्द उदाहृतम्। देवता जगतामादि: पार्वतीपतिरीरित: ।।१७।।
क्षकारो बीजमाख्यातं रेफ: शक्तिरितीरिता। मकार: कीलकं वत्स रेफाद्यै: षड्भिराचरेत्।। १८।।
षडङ्गानि मनोरस्य जातियुक्तानि षण्मुख।) तत: सञ्चिन्तयेद् देवमर्धनारीश्वरं शिवम्।। १९।।
विद्रुमारक्तवामार्धदेहं नीलपराङ्गकम्। अहिगङ्गाशशाङ्कार्धविलसत्तुङ्गमौलिकम्।। २०।।
हावभावविलासार्धनारीरूपं महेश्वरम्। भीषणापरदेहार्धं वामोर्ध्वे पाशमद्भुतम्।। २१।।
पद्मं च तदधोहस्ते दधानं दक्षिणोर्ध्वके। करे त्रिशूलं तस्याधो नृकपालं च षण्मुख।। २२।।
प्रविभक्तांशुकाकल्पं मालालेपविराजितम्। एवं ध्यात्वा यजेत् पीठे शैवे सर्वोपचारकै:।। २३।।
अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयं तत:। चतुर्द्वारसमोपेतमस्मिन् षण्मुख पूजयेत्।। २४।।
आदावङ्गानि सम्पूज्य केसरेषु यथाविधि। अर्चयेदष्टपत्रेषु कार्तिकेय वृषादिकान्।। २५।।
ब्राह्म्याद्या मातर: पूज्या द्वितीयेऽष्टदले पुन:। लोकेश्वरांस्तदस्त्राणि प्राग्वत् वीथीद्वये यजेत्।।२६।।

इति।। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि कश्यपाय ऋषये नम:।

---

[1] 'शक्ता' ख. पाठ:।

मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीअर्धनारीश्वराय देवतायै नमः। गुह्ये क्षं बीजाय नमः। पादयोः रं शक्तये नमः। नाभौ मं कीलकाय नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत्। ततः, रं हृदयाय नमः। कं शिरसे स्वाहा। षं शिखायै वषट्। मं कवचाय हुं। रं नेत्रत्रयाय वौषट्। यं अस्त्राय फट्। इति षडङ्गमन्त्रानगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिनेत्रान्तेषु पञ्च मन्त्रान् विन्यस्य अस्त्रमन्त्रेण तालत्रयं दशदिग्बन्धनं कृत्वा ध्यानादिपुष्पोपचारान्ते अष्टदलकेसरेषु आग्नेये रं हृदयाय नमः। ईशाने कं शिरसे नमः। नैर्ऋत्ये पं शिखायै नमः। वायव्ये मं कवचाय नमः। देवाग्रे रं नेत्राय नमः। देवाग्रादिचतुर्दिक्षु यं अस्त्राय नमः। इति षडङ्गानि सम्पूज्य, प्रथमाष्टदले देवाग्रमारभ्य प्रादक्षिण्येन—वृषाय नमः। क्षेत्रपालाय०। चण्डेश्वराय०। दुर्गायै०। षण्मुखाय०। नन्दिने०। विघ्ननायकाय०। सेनापतये०। इति सम्पूज्य, द्वितीयाष्टदले तथैवारभ्य—आं ब्राह्म्यै नमः। ईं माहेश्वर्य्यै०। ऊं कौमार्य्यै०। ॠं वैष्णव्यै०। ॡं वाराह्यै०। ऐं इन्द्राण्यै०। औं चामुण्डायै०। अः महालक्ष्म्यै०। इति सम्पूज्येन्द्रादिपूजादि सर्वं प्राग्वत् समापयेदिति। तथा—

एकलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः। जुहुयात् तद्दशांशेन त्रिमध्वक्तैः सतण्डुलैः।। २७।।
तिलैः सन्तर्पयेद् देवं शुद्धतोयैः षडानन। ततोऽभिषिञ्चेन्मूलेन स्वमूर्धनि समाहितः ।। २८।।
ब्राह्मणांस्तर्पयेत्[1] पश्चादन्नपानैः सदक्षिणैः। एवं सिद्धमनुर्वत्स प्रयोगान् विदधीत वै।। २९।।

इति। एष लक्षजपः कृतयुगपरः। शिवसद्भावे तु शिवशक्त्योः पृथक्पृथग्ध्यानमुक्तम्। तथा—

अथवा देवदेवेशि ध्यायेदष्टभुजं शिवम्। दक्षिणोर्ध्वे करे देवि परशुं तदधः क्रमात्।। १।।
खड्गं बर्हिं शराश्चैव दधानं वामबाहुभिः। भुजङ्गं त्रिशिखं चैव कपालं चापमेव च।। २।।
ऊर्ध्वादितः स्त्रीविलासं त्रीक्षणं त्रिदशार्चितम्। गङ्गातरङ्गविलसच्चन्द्रखण्डाहिशेखरम्।। ३।।
इति सञ्चिन्त्य देवेशं तत्पार्श्वस्थां शिवामपि। अरुणामरुणाकल्पामरुणांशुकधारिणीम्।। ४।।
अरुणालेपमालाढ्यां त्रिनेत्रां मणि[2]भूषणाम्। शूलैः षोडशभिर्व्यग्रभुजषोडशमण्डिताम्।। ५।।
चिन्तयेत् परमेशानीं साधकाभीष्टदायिनीम्।...।।

इति। प्रायशः काम्यमेतदिति चिन्त्यं, नित्यं तु प्रागुक्तमेव। मन्त्रान्तरं शिवरहस्ये—

रेफं त्यक्त्वादिमं वत्स शिवशक्ती नियोज्य च। प्रजपेत्तेन सिद्धिः स्याच्छीघ्रमेव न संशयः।।१ ।।

अयमर्थः—बीजस्यादिमं रेफमपास्य तत्स्थाने शिवशक्ती हकारसकारौ संयोज्य जपेदिति।

प्रासादाद्यं जपेन्मन्त्रमयुतं मन्त्रवित्तमः। तेनावेशो भवेत् सद्यो भूतादीनां रुजामपि।। २।।
ग्रस्तस्य शिरसि ध्यायेच्चन्द्रमण्डलमध्यगम्। स्वरैः षोडशभिर्वीतं स्रवत्पीयूषचर्चितम्।। ३।।
अपमृत्युज्वरक्ष्वेडभ्रान्त्यपस्मारनाशनम्। शिरोरोगहरं चापि गदितं शिखिवाहन।। ४।।
रेफादिवर्णषट्काढ्यषट्कोणान्तस्त्रिकोणगम्। प्रतिलोमस्वरावीतं ग्रस्तस्य शिरसि स्मरेत्।। ५।।
बीजमेतन्महासेन ग्रहार्तिं तत्क्षणाद्धरेत्। त्रिकोणं चिन्तयेन्मूर्ध्नि ग्रस्तजन्तोः षडानन।। ६।।
तन्मध्ये चिन्तयेद्बीजं ज्वलत्कालानलप्रभम्। क्षणादावेशयेन्मन्त्री ग्रहान् रोगादिकानपि।। ७।।
एतन्मन्त्राभिजप्तं च बन्धुजीवप्रसूनकम्। ग्रस्तस्य मूर्धनि क्षिप्तं क्षणादावेशकारकम्।। ८।।

---

१. 'तोषयेत्' क. ग. पाठः। २. 'अहि' ख. पाठः।

पौष्टिके शान्तिके मन्त्रं शुक्लवर्णं विचिन्त्य च। सकारमादौ संयोज्य जपेन्मन्त्रं षडानन।। ९।।
आकृष्टौ च वशीकारे रक्तो रेफादिको भवेत्। हकारादिश्च हेमाभः स्तम्भने क्षोभणे गुह।। १०।।
धूम्रवर्णो यकारादिर्विद्वेषोच्चाटयोरपि। पीतवर्णो लकारादिः स्तम्भने शिखिवाहन ।। ११।।
शुद्धस्फटिकसङ्काशो मन्त्रो ध्येयो मुमुक्षुभिः। अकारादिश्च जप्तव्यो देशिकादेशतो गुह।। १२।।
वायुमण्डलमध्यस्थं मन्त्रं कृष्णं विचिन्तयेत्। नेत्रयोर्द्विषतां वत्स आन्ध्यमाशु प्रजापते।। १३।।
बाधिर्य्यं कर्णयो रन्ध्रे छर्दिश्च वदने स्मृता। कुक्षौ शूलं करोत्याशु वायुं मर्मसु संस्मृतम्।। १४।।
दुःसहं च शिरोरोगं कुर्याच्छिरसि षण्मुख। वाग्रोधं कण्ठनाले च चतुरस्रस्य मध्यगम्।। १५।।
चन्द्रमण्डलमध्यस्थं स्वरैः षोडशभिर्वृतम्। नेत्रे ध्यातं रोगहरं हरत्याशु न संशयः।। १६।।
रक्तस्रावं कृशाङ्गीनां योनौ ध्यातं हरेत् क्षणात्। कुक्षौ ध्यातं शूलनुत् स्याद्विस्फोटे विषमे ज्वरे।।१७।।
तृषि रक्तामये वत्स भ्रमे दाहे शिरोगदे। स्मरेन्मन्त्रं विद्रुमाभं तत्र तद्दोषशान्तये।। १८।।
अत्यारक्तं त्रिकोणान्तःस्थितं बीजं स्मरेद्गुह। यस्य मूर्ध्नि स वश्यः स्यादचिराद् दासवद् ध्रुवम्।।१९।।
इष्टाङ्गनाहृदम्भोजे स्थितं मन्त्रं विचिन्त्य च। मन्त्रवर्णैर्दृढं बद्ध्वा तेजोरूपं च संस्मरेत्।। २०।।
तच्छीर्षमाशु पाशेन कर्षयेद्योषितं ध्रुवम्। स्वनामगर्भितं बीजं योषायोनौ विचिन्तयेत्।। २१।।
वशयेत् तत्क्षणाद्योषां स्रावयेच्छुक्रमेव च। निजलिङ्गशिरःस्थं तद्बीजं सञ्चिन्तयेद् गुह।। २२।।
प्रवेशयेद्योनिमध्ये सम्पर्काद्योषितं वशे। विदध्याद् द्रावयेच्चैव नात्र कार्या विचारणा।। २३।।
कुलालमृदमानीय तत्र बीजं समालिखेत्। तन्मकारस्थरेफे तु साध्याख्यां कर्मसंयुताम्।। २४।।
विलिख्य तत् त्रिकोणेन वेष्टयेत् तद्बहिस्ततः। षट्कोणेन समावेष्ट्य षट्सु कोणेषु चालिखेत्।।२५।।
रेफं सबिन्दुकं तच्च विलोमैर्वेष्टयेत् स्वरैः। प्राणप्रतिष्ठां तस्याथ कृत्वा सम्यक् षडानन।। २६।।
निखनेच्चुल्ल्यधस्ताच्च तत्र पाकं समाचरेत्। तदन्नभक्षणात् सद्यो वश्यो भवति निश्चितम्।।२७।।
पतिः प्रियायाः षड्वक्त्र नात्र कार्या विचारणा। मधुरत्रययुक्तेन शालिपिष्टेन षण्मुख।। २८।।
कृत्वा पुत्तलिकां सम्यक् स्पष्टाङ्गीमतिमञ्जुलाम्। प्रपदाभ्यां च जङ्घाभ्यां जानुभ्यामूरुयुग्मतः।।२९।।
नाभेरधस्ताद्धृदयात् कण्ठादाशीर्षकं ततः। एवं द्वादशधा च्छित्वा तीक्ष्णशस्त्रेण साधकः।। ३०।।
मूलमन्त्रेण जुहुयाद्यमुद्दिश्य षडानन। स वश्यो भवति क्षिप्रं नात्र कार्या विचारणा।। ३१।।
चतुरस्रं समं कृत्वा नागवल्लीदले गुह। तन्मध्ये तु वकारस्य बीजे साध्यं समालिखेत्।। ३२।।
मन्त्रमध्यमकाराधःस्थिते रेफे विचक्षणः। चतुरस्रं चतुष्कोणं ठकारं बिन्दुसंयुतम्।। ३३।।
विलिख्य स्थापितप्राणं मूलमन्त्राभिमन्त्रितम्। अष्टोत्तरसहस्रेण शिरोरोगी प्रभक्षयेत्।। ३४।।
आम्बिकेयाचिरादेव रोगान्मुक्तः सुखी भवेत्। सरेफेण ककारेण कण्ठं साध्यस्य षण्मुख।।३५।।
दक्षस्तनं षकारेण वामं चैव मकारतः। दक्षांसं रेफतो बद्ध्वा वामं चापि यकारतः।। ३६।।
औकारेण मुखं वत्स नाभिमूकारतो गुह। वक्षो बिन्द्वर्धचन्द्राभ्यां बद्ध्वा कर्षन् स्मरेद्धिया।।३७।।

मरणान्तं स वश्यः स्यादचिरान्नात्र संशयः। बन्धुजीवाख्यपुष्पेण त्रिकोणं रचयेद्गुह ।। ३८।।
तन्मध्ये विलिखेद्बीजं चन्दनागरुकुङ्कुमैः। पुष्पेण तेन तन्मध्ये कार्तिकेय विधानतः।। ३९।।
अग्निं संस्थाप्य तत्रेशं सम्पूज्य विधिवत् सुत। हुनेदष्टोत्तरशतं घृतैः सम्पातयेद् घृतम्।। ४०।।
त्रिलोहनिर्मितायां तु मुद्रिकायां विचक्षणः। सम्पातसिक्तां तावत्स[1] सहस्रेणाभिमन्त्रिताम्।। ४१।।
साष्टकेनाथ तां हस्ते धारयेद्यस्तु भूपतिः। जयेत् स युधि षड्वक्त्र बलाढ्यानखिलान् रिपून्।।४२।।
विषवेतालभूतादिदुरितैर्बाध्यते न सः। वक्ष्ये भागं त्रिलोहस्य शृणु षण्मुख साम्प्रतम्।। ४३।।
सोमसूर्याग्निरूपत्वान्मातृकायाः षडानन। तन्मयत्वात् त्रिलोहस्य भागास्तद्वर्णसंख्यया।। ४४।।
भवेद्रूप्यस्य सौम्यत्वाद्भागः षोडश उच्यते। काञ्चनस्यार्करूपत्वात्तद्वर्णाः पञ्चविंशतिः।। ४५।।
तेन भागस्तस्य तावत् ताम्रस्याग्निमयत्वतः। तद्वर्णाश्च दशैतेन तस्य भागोऽपि तादृशः।। ४६।।
अष्टपत्रं लिखेत् पद्मं कर्णिकायां षडस्रकम्। तन्मध्ये च त्रिकोणं स्यात् तन्मध्ये बीजमालिखेत्।।४७।।
साध्याख्याकर्मसंयुक्तं षट्कोणेषु षडङ्गकम्। लिखेत् पूर्वादिपत्रेषु बीजवर्णान् विभज्य च।। ४८।।
रंकंपंमंरंयं इति औंऊमिति च षण्मुख। बहिर्वृत्तचतुष्कं स्यादन्तरालत्रयान्वितम् ।। ४९।।
(स्वरानाद्यान्तराले तु कादिमान्तान् द्वितीयके। तृतीये तु यकारादीन् वेष्टनत्वेन संलिखेत्।।५०।।
चतुरस्रं बहिष्कृत्वा तस्य कोणेषु संलिखेत्। बीजं नरहरेर्वत्स क्ष्रौमित्यक्षररूपकम्।। ५१।।)
एतद्यन्त्रं धृतं सर्वरक्षाकरमनुत्तमम्। अस्मिन् यन्त्रे समाधाय कलशं विधिवद्गुह।। ५२।।
तत्र देवं समभ्यर्च्य साध्यं तेनाभिषेचयेत्। ग्रहरोगादिभिर्मुक्तः सुचिरं सुखमाप्नुयात्।। ५३।।
(कृत्या रोगा विनश्यन्ति जीवेद्वर्षशतं गुह। ततः पूर्णेन्दुबिम्बाभं मण्डलं च समालिखेत्)।।५४।।
आदौ षट्कोणमालिख्य वकारं तत्र संलिखेत्। तन्मध्ये साध्यसंयुक्तं लिखेद्बीजं षडानन।।५५।।
स्वरैः षोडशभिर्वीतं षडस्रेषु रमा[2] लिखेत्। बहिर्वृत्तद्वयं कृत्वा अन्तराले तथा लिखेत्।। ५६।।
ककारादिक्षकारान्तान् वर्णान् बिन्दुसमन्वितान्। अष्टकोणं बहिःकृत्वा तत्कोणेषु लिखेद्गुह।।५७।।
नृसिंहबीजं प्रागुक्तं यन्त्रमेतत् षडानन। दुष्टग्रहविषव्याधिनाशनं सर्वसिद्धिदम् ।। ५८।।
आदौ षट्कोणमालिख्य तन्मध्ये साध्यसंयुतम्। चिन्तामणि समालिख्य षट्सु कोणेषु षण्मुख।।५९।।
रंकंपंमंरंयं इति औंऊं इति च सन्धिषु। विलिख्य बहिरावेष्ट्य वृत्तेन प्रणवेन च।। ६०।।
तद्बहिर्वेष्टयेद्वत्स पुनर्वृत्तं समालिखेत् । तद्बहिश्चतुरस्रेण वेष्टयित्वा विचक्षणः ।। ६१।।
नृसिंहबीजं विलिखेत् तत्कोणेषु च षण्मुख। एतद्यन्त्रं रोचनया विलिखेद्गोमयाम्भसा।। ६२।।
लाक्षावीतमिदं कृत्वा संजप्य विधिवद्बुधः। मस्तके धारयेदेतल्लक्ष्मीसौभाग्यवर्धनम्।। ६३।।
आयुरारोग्यविजयवश्यकृत् पुत्रपौत्रदम् । चौरव्यालमहारोगभूतापस्मारनाशनम् ।। ६४।।
कारस्करतरोः शाखां साग्रामानीय तत्र च। अग्रदेशे महासेन सुरम्यं कारयेत् स्थलम्।। ६५।।

---

१. 'तां वत्स' क. ग. पाठः। २. 'समालिखेत्' क. ग. पाठः।

षट्कोणं विलिखेद्वत्स तत्र साध्यसमन्वितम्। चिन्तामणिं विलिख्याथ षट्सु कोणेषु रं लिखेत्।।६६।।
वह्निज्वाला इवारक्तरेखाः कार्याश्च तद्बहिः। कार्तिकेयाथ सञ्जप्तमष्टोत्तरसहस्रतः[1] ।। ६७।।
मूलमन्त्रेण तत् सम्यक् स्थापयेद्यत्र तत्र वै। चौरव्याघ्रक्रोडसर्परिपुभूतपिशाचकाः ।। ६८।।
न व्रजन्ति कदाचिच्च यन्त्रस्यास्य प्रभावतः।..।।

इति।। अथ तुम्बुरुरुद्रमन्त्रः। श्रीकण्ठसंहितायाम्—

शृणु देवि प्रवक्ष्यामि मन्त्ररत्नं महाद्भुतम्। तुम्बुरोर्देवदेवस्य शत्रुक्षयकरं परम् ।। १।।
संवर्तेशो महादेवि महाकालेन संयुतः। तदधश्च भुजङ्गेशो बालीशस्तदधः शिवे ।। २।।
अर्घीशस्तदधो देवि सर्वोर्ध्वे श्रीमुखी स्थिता। बीजमेतत् समाख्यातं सर्वसिद्धिकरं परम्।। ३।।

संवर्तेशः क्षकारः। महाकालेशो मकारः। भुजङ्गेशो रेफः। वालीशो यकारः। अर्घीशः ऊ। श्रीमुखी बिन्दुरेतैः सपिण्डितं क्ष्म्र्य्ऊं इति बीजं भवति।

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री च्छन्द ईरितम्। श्रीरुद्रो देवता प्रोक्तः सर्वभीष्टाप्तये भवेत्।। ४।।
षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत्। क्षकाररहितं मूलबीजं जभसहान्वितम्।। ५।।
चत्वारि देवीबीजानि देव्यस्तु गिरिनन्दिनि। जयाख्या विजया पश्चादजिता चापराजिता।। ६।।
बीजमङ्गुलिषु न्यस्य करयोर्व्यापकं ततः। कनिष्ठादिषु विन्यस्येत् षडङ्गानि तलावधि।। ७।।
देवं देवीः स्वबीजाढ्याः कनिष्ठादिषु विन्यसेत्। पादान्मूर्धावधि न्यस्येन्मुष्टिना जगदीश्वरि।। ८।।
मूर्धाद्यापादपर्यन्तं तलाभ्यां व्यापकं न्यसेत्। षडङ्गानि पुनर्न्यस्य देवं देवीश्च पूर्ववत्।। ९।।
शिरोवदनहृन्नाभिगुदेषु क्रमतो न्यसेत्। एवं न्यस्ततनुर्देवि ध्यायेद् देवमनन्यधीः ।। १०।।
उद्यदादित्यरुचिरं चतुर्वक्त्रं त्रिलोचनम्। चन्द्रार्धशेखरं हस्तैश्चतुर्भिर्दधतं क्रमात् ।। ११।।
दक्षिणोर्ध्वकरे देवि सृणिं खट्वाङ्गमप्यतः। पाशं वामोर्ध्वहस्ते च कपालं तदधो ज्वलत्।। १२।।
रक्ताङ्गरागाभरणांशुकं चिपिटनासिकम्। अनर्घ्यरत्नाकल्पाढ्यं ध्यायेदेवं शिवं शिवे।। १३।।
शैवं पीठं समभ्यर्च्य वक्ष्यमाणेन वर्त्मना। तत्रावाह्य यजेद्देवं सम्यग् गन्धादिभिः शिवे।। १४।।
नपुंसकस्वरैर्विद्वाननुलोमविलोमगैः । धर्मादिकैरधर्माद्यैः पादगात्राणि कल्पयेत् ।। १५।।
इकारेण न्यसेद् देवि तन्तुरूपान् गुणानथ। चतुर्थपञ्चमाभ्यां तु स्वराभ्यां वरवर्णिनि।। १६।।
मायाविद्यामये देवि अध ऊर्ध्वं छदे न्यसेत्। षष्ठस्वरेण पद्मं च कल्पयित्वा वरानने।। १७।।
सन्ध्यक्षरैर्महादेवि चतुर्भिश्च यथाक्रमम्। वामाद्याः पूजयेदेता वामा ज्येष्ठा ततः परम्।। १८।।
रौद्री चेच्छा च ता ध्येया ज्वालारूपा महेश्वरि। इत्थं सङ्कल्पिते पीठे मूर्तिं सङ्कल्प्य मूलतः।।१९।।
तस्मिन्नावाह्य देवेशं तुम्बुरुं देवि पूजयेत्। चतुर्द्वारसमायुक्तचतुरस्रत्रयावृते।। २०।।
अष्टपत्राम्बुजे देवि यजेदावरणैः सह। आदावङ्गानि सम्पूज्य केसरेषु यथा पुरा।। २१।।

---

[1] १. 'स्रकम्' क. ग. पांठः।

दिक्पत्रेषु यजेद् देवि स्वस्वबीजादिकाः क्रमात्। वामाद्याः पूर्वमुदिता रक्ता रक्तानुलेपनाः।।२२।।
अरुणांशुकपुष्पाढ्यास्ताम्बूलापूरिताननाः। वल्लीकीवादनरता मदविभ्रममन्थराः।। २३।।
कोणपत्रेषु चाभ्यर्च्या दूतीर्बीजादिकाः क्रमात्। दुर्भगा सुभगा चैव कराली मोहिनी ततः।। २४।।
(बद्धाञ्जलिपुटाः किञ्चिदानम्रवदनाम्बुजाः। देवीसदृशभूषाढ्यास्तासां बीजानि पार्वति।। २५।।
वकः श्वेतो भृगुश्चैव नकुली बिन्दुभूषिताः।) बहिर्वीथीद्वये देवि लोकेशान् सायुधान् यजेत्।।२६।।
इत्थं यो भजते देवि तुम्बुरुं विधिवन्नरः। न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते।। २७।।

इति।। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीतुम्बुरुरुद्राय देवतायै नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिर्वदेत्। क्ष्म्रां हृदयाय नमः। क्ष्म्रीं शिरसे स्वाहा। क्ष्म्रूं शिखायै वषट्। क्ष्म्रैं कवचाय हुं। क्ष्म्रौं नेत्रत्रयाय वौषट्। क्ष्म्रः अस्त्राय फट्। इति षडङ्गमन्त्रान् कनिष्ठादितलान्तं करयोर्विन्यस्य, पुनः क्षमरयूं नमः इति केवलबीजमेव कनिष्ठाद्यङ्गुलिषु विन्यस्य, करयोश्च व्यापकं कृत्वा, कनिष्ठयोः क्षमरयूं तुम्बुरुरुद्राय नमः। अनामिकयोः जमरयूं जयायै नमः। मध्यमयोः भमरयूं विजयायै नमः। तर्जन्योः समरयूं अजितायै नमः। अङ्गुष्ठयोः हमरयूं अपराजितायै नमः। इति विन्यस्य, पादादिमूर्धावधि क्षमरयूं नमः इति मुष्टिना विन्यस्य, पुनर्मूर्धादिपादपर्यन्तं करतलाभ्यां बीजं विन्यस्य, पुनः पूर्ववत् षडङ्गानि विन्यस्य, शिरोवक्त्रहृन्नाभिगुदेषु प्राग्वद् देवं देवीश्च विन्यस्य, ध्यानाद्यात्मपूजान्ते पूजाचक्रं यथोक्तं कृत्वा संस्थाप्य, तत्र मण्डूकादिसिंहासनान्तं प्राग्वत्पीठं सम्पूज्य, सिंहासनस्य पादेषु ऋं धर्माय नमः। ॠं ज्ञानाय नमः। लृं वैराग्याय नमः। लॄं ऐश्वर्याय नमः। तस्य गात्रेषु लृं अधर्माय नमः। लॄं अज्ञानाय नमः। ऋं अवैराग्याय नमः। ॠं अनैश्वर्याय नमः। इति सम्पूज्य, ततोऽनन्तं पद्ममानन्दकन्दं संविन्नालं च सम्पूज्य, ईं प्रकृतिमयपत्रेभ्यो०। ऊं विकारमयकेसरेभ्यो०। उं सर्वतत्त्वरूपायै कर्णिकायै०। इति सम्पूजयेत्। अत्र ''षष्ठस्वरेण पद्मं'' चेत्यनेन पद्ममध्यस्था कर्णिका लक्ष्यते, पद्मस्य प्रागेव पूजितत्वादिति। ततः सूर्यादिमण्डलपूजान्ते इं प्रबोधात्मने सत्त्वाय नमः, इत्यादिगुणत्रयं इकारादि, ततः ईं मायायै०। ऊं विद्यायै०। इति यथावत् सम्पूज्यात्मचतुष्टयपूजान्ते दिग्दलकेरसेषु—एवं वामायै नमः। ऐं ज्येष्ठायै०। ओं रौद्र्यै०। औं इच्छायै०। इति शक्तिचतुष्टयं पूजयेत्। अत्र नवशक्तिपूजनं नास्तीति प्रतीयते, विशिष्य सबीजशक्तिचतुष्टयमात्रस्योक्तत्वात्। शैवपीठे नवशक्तिबहिर्भूतेच्छाशक्तेः सङ्ग्रहाच्चेति। इत्थं पीठपूजां विधाय, तत्र मूर्तिकल्पनादिषडङ्गपूजान्तेऽष्टदलेषु देवाग्रादिदिग्दलचतुष्टये प्रादक्षिण्येन—एं वामायै नमः। ऐं ज्येष्ठायै०। ओं रौद्र्यै०। औं इच्छायै०। अग्न्यादिकोणपत्रेषु—शं दुर्भगायै नमः। षं सुभगायै०। सं कराल्यै०। हं मोहिन्यै०। इति सम्पूज्येन्द्राद्यर्चनादि सर्वं समापयेदिति। तथा—

लक्षमेकं जपेन्मन्त्रं तद्दशांशं घृतैर्हुनेत्। तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत्ततः।। २८।।
वायुवह्नियुगान्तःस्थं बीजं स्मृत्वा जपेत् प्रिये। ज्वरशूलमहारोगा नश्यन्ति तेन तत्क्षणात्।। २९।।
कुपितस्य हृदम्भोजे स्मृत्वा बीजमिदं जपेत्। तत्कोपं शमयेच्छीघ्रं ध्रुवं मन्त्रप्रभावतः।। ३०।।
एतन्मन्त्राभिजप्तं तु जलं प्रातः पिबेन्नरः। हृद्रोगकामलाकासश्वासविष्टम्भकास्तथा।। ३१।।

नश्यन्ति तत्क्षणादेव नात्र कार्या विचारणा। मण्डलं नवनाभाख्यं कृत्वा रम्यं महेश्वरि।। ३२।।
तत्र संस्थापयेद्रम्यान् कलशान् नव मन्त्रवित्। देवं मध्येऽष्टसु तथा देवीर्दूतीश्च पूजयेत्।। ३३।।
पुरोक्तवत्तेन सिञ्चेत् कुलजां योषितं शिवे। सुतं वन्ध्यापि सा सूते किमन्या कन्यकाप्रसूः।।३४।।
राजाभिषिक्तो विजयी भूयाद् देवि न संशयः। भूतप्रेतादिकाः कृत्या रोगा नश्यन्ति सेचनात्।।३५।।
अष्टपत्राम्बुजे मध्ये ससाध्यं बीजमालिखेत्। केसरेषु स्वरान् देवि दिक्पत्रेषु लिखेत् ततः।।३६।।
पूर्वोक्तदेवीबीजानि विदिक्पत्रेषु पार्वति। दूतीमन्त्रात् पुरा[1] प्रोक्तानालिखेत् तद्बहिः पुनः।। ३७।।
वृत्तद्वयं विधायाथ तयोर्मध्ये समालिखेत्। ककारादिक्षकारान्तान् बिन्दुयुक्तान् महेश्वरि।। ३८।।
तद्बहिश्चतुरस्रेण वेष्टयेज्जगदीश्वरि। एतद्यन्त्रं महादेवि प्रोक्तं श्रीतुम्बुरोर्महत्।। ३९।।
साधितं जपहोमाभ्यां घृतं नाशयति क्षणात्। रोगकृत्याग्रहान् सम्यग् भूतापस्मारकादिकान्।।४०।।

अत्र यन्त्ररचनाप्रकारः सुगम एव।। अथ क्षेत्रपालमन्त्रः श्रीकण्ठसंहितायाम्—

क्षेत्रपालमनुं वक्ष्ये शृणु देवि यथाविधि। संवर्तोऽनुग्रहेन्द्वाढ्यो रुद्रसंवर्तकौ पुनः।। १।।
आषाढी रेवतीयुक्तो लोहितोऽनन्तसंयुतः। पिनाकी चानन्तयुतो वाली मेषस्ततो भवेत्।। २।।
महाकालो विसर्गाढ्यस्ताराद्योऽयं मनुः प्रिये।...।।

संवर्तः क्षकारः, अनुग्रह औ, इन्दुरनुस्वारस्तेन क्षौं इति। रुद्र एकारः, संवर्तः क्ष, तेन क्षे इति। आषाढी त, रेवती रेफस्तद्युक्तस्तेन त्र इति। लोहितः प, अनन्तयुतः साकारस्तेन पा इति। पिनाकी ल, अनन्त आ, तेन ला इति। वाली य। मेषो न। महाकालो म विसर्गाढ्यस्तेन मः इति। ताराद्यः प्रणवाद्यः।। तथा—

मुनिर्ब्रह्मा समुद्दिष्टो गायत्री च्छन्द ईरितम्। क्षेत्रपालो देवतास्य क्षं बीजं परिकीर्तितम्।। ३।।
नमः शक्तिरिति प्रोक्ता ह्यष्टसिद्धिकरः स्मृतः। षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत्।। ४।।
ततः सञ्चिन्तयेद् देवं क्षेत्रपालमनन्यधीः। अञ्जनाद्रिप्रतीकाशमूर्ध्वपिङ्गजटाधरम्।। ५।।
वर्तुलोग्रत्रिनयनं भीमसर्पविभूषणम्। दंष्ट्राकरालवदनं भीमरूपं दिगम्बरम्।। ६।।
द्विभुजं दक्षिणे हस्ते गदां वामे कपालकम्। दधतं चिन्तयेद् देवि शैवे पीठे समर्चयेत्।। ७।।
पत्तमष्टदलं बाह्ये दिग्द्वारैर्भूगृहैर्वृतम्। कृत्वा तत्र समावाह्य गन्धाद्यैरर्चयेद्विभुम्।। ८।।
आदावङ्गानि सम्पूज्य पूर्ववत् परमेश्वरि। अर्चयेदष्टपत्रेषु किङ्कराष्टकमद्रिजे।। ९।।
अनलश्चाग्निकेशश्च (करालो घण्टिकारवः। महाकोपः पिशिताशः[2] पिङ्गाक्षस्तदनन्तरम्।। १०।।
ऊर्ध्वकेश इमे चाष्टौ) क्षेत्रपालस्य किङ्कराः। लोकेशांश्च तदस्त्राणि पूर्ववत् परिपूजयेत्।। ११।।
धूपदीपादिकं दत्त्वा ततस्तस्मै बलिं हरेत्। एह्येहीति समुच्चार्य विद्विषोऽन्ते मुरुद्वयम्।। १२।।
भञ्जय—द्वितयं पश्चान्नर्तय—द्वितयं ततः। विघ्नयुगमं महान्ते स्याद्भैरव क्षेत्रपालक।। १३।।

---

[1] 'पूर्वमुक्तान्' ख. पाठः। [2] 'तास्यः' ख. पाठः।

बलिं—पदं समुच्चार्य देवि गृह्णद्वयं द्विठः। बलिमन्त्रः समाख्यातः सर्वकामफलप्रदः।। १४।।

बलिर्नैवेद्यम्। तत्र मन्त्रः—एहीति। द्विठः स्वाहाकारः। अन्यत् सुगमम्।। अथ प्रयोगः— तत्र प्राग्वद्योगपीठन्यासान्ते, शिरसि ब्रह्मणे नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीक्षेत्रपालाय देवतायै नमः। गुह्ये क्षं बीजाय नमः। पादयोः नमः शक्तये नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिर्वदेत्। ततः क्षां हृदयाय नमः। क्षीं शिरसे स्वाहा। क्षूं शिखायै वषट्। क्षैं कवचाय हुं। क्षौं नेत्राभ्यां वौषट्। क्षः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। ततो ध्यानादिषडङ्गपूजान्तेऽष्टदलेषु—अनलाय नमः। अग्निकेशाय०। करालाय०। घण्टिकारवाय०। महाकोपाय०। पिशिताशनाय०। पिङ्गाक्षाय०। ऊर्ध्वकेशाय नमः। इति सम्पूज्य लोकेशार्चादि सर्वं समापयेदिति। तथा—

एकलक्षं जपेन्मन्त्रं जुहुयात् तद्दशांशतः। चरुणा घृतसिक्तेन तर्पणादि ततश्चरेत् ।। १५।।
रात्रौ गृहाङ्गणे रम्ये कृत्वा स्थण्डिलमुत्तमम्। आवाह्य तत्र सम्पूज्य क्षेत्रेशं प्रोक्तवर्त्मना।। १६।।
अन्नव्यञ्जनदुग्धाद्यैः कृत्वा वै सिक्थकं महत्। पूर्वोक्तमनुना देवि तस्य हस्ते बलिं हरेत्।। १७।।
बलिनानेन सन्तुष्टः क्षेत्रपालो मुदान्वितः। ऐश्वर्यविजयारोग्यश्रीसौभाग्यादिसम्पदः ।। १८।।
ददाति रौद्रभूतार्तिकृत्याद्याशु निवारयेत्।..।।

अत्र रात्रौ बलिदानं काम्यं। नित्यपूजायामपि नैवेद्यं प्रोक्तमन्त्रेणैव देयम्।।

अथ वटुकभैरवमन्त्रः कौलेशकोटिप्रभेदे—

अथ वक्ष्ये महादेवि भैरवस्येश्वरेश्वरि। मन्त्ररत्नं महागुप्तं दुष्टग्रहनिकृन्तनम्।। १।।
सर्वशत्रुक्षयकरं सर्वव्याधिविनाशनम्। सर्वापत्तारकं देवि सर्वसौभाग्यदायकम्।। २।।
वश्याकर्षणविद्वेषस्तम्भनोच्चाटमारणे। निग्रहे व्याधिकरणे प्रशस्तमखिलेष्टदम्।। ३।।
उद्धरिष्ये महामन्त्रं शृणुष्वावहिता प्रिये। व्योमाग्निशान्तितिथिभिरुद्धरेत् प्रथमाक्षरम्[1]।। ४।।
जलं च खेचरी कर्णयुता काय ततः शिवे। अनन्तो लोहितश्चात्रिः कर्णवान् मीनयुग्मकम्।।५।।
वह्निष्टपञ्चमोऽनन्तयुतः पवन एव च। क्रोधी कर्णयुतो वह्निः कर्णवान् परमेश्वरि।। ६।।
पुरनेतद्द्वयं प्रोक्त्वा[2] द्वितीयार्णादि पार्वति। चतुष्टयं तु वर्णानां पुनराद्यं समुद्धरेत्।। ७।।
एकविंशतिवर्णात्मा मन्त्रराजः समुद्धृतः। गोपनीयः प्रयत्नेन त्रैलोक्येष्वपि दुर्लभः।। ८।।

व्योम ह, अग्नी रेफः, शान्ति ई, तिथिरनुस्वारः, एतैर्भुवनेश्वरीबीजम्। जलं व। खेचरी ट, कर्णयुता उकारेण सहिता, तेन टु इति। काय स्वरूपं। अनन्त आ। अत्र यकार—आकारयोर्न सन्धिः एकविंशतिवर्ण इत्युक्तेः। लोहितः प। अत्रिः द, कर्णवान् उकारयुक्तस्तेन दु इति। मीनयुग्मं धकारद्वयं, तेन द्ध इति। वह्निः रेफः। टपञ्चमो ण, अनन्त आ, तेन णा इति। पवनो य। क्रोधी क, कर्ण उ, तेन कु इति। वह्नी र, कर्ण उ, तेन रु इति। पुनरेतद्द्वयं कुरु इति। द्वितीयार्णादिचतुष्टयं वटुकाय इति। आद्यं ह्रीं इति।। तथा—

---

[1] 'बीजमादिमम्' ख. पाठः। [2] 'देवि द्वितीयार्णचतुष्टयम्। आद्यं बीजं महेशानि पुनरेव समुद्धरेत्।'' इति पाठान्तरं शिवार्चनचन्द्रिकायाम्।

ऋषिरुक्तो महादेवि बृहदारण्यसंज्ञकः। अनुष्टुप् छन्द इत्युक्तं भैरवो देवता शिवे।। ९।।
शक्तिबीजं शक्तिश्च आं कीलकमुदाहृतम्। आद्यक्षरयुगं देवि पञ्चह्रस्वान्वितं कुरु।। १०।।
सद्यादिप्रतिलोमेन नपुंसकविवर्जितम्। एतद्बीजद्वयाद्यास्तु न्यस्तव्याः पञ्चमूर्तयः ।। ११।।
अङ्गुष्ठादिव्यङ्गुलीषु, मूर्धास्यहृदयेषु च। सगुह्यचरणेष्वेवं, मूर्धास्ये दक्षकर्णके ।। १२।।
वामकर्णे च चूडाध ऊर्ध्वपूर्वान्तकोत्तर–। पश्चिमेषु च वक्त्रेषु मूर्तयस्ता महेश्वरि।। १३।।
ईशानाख्यस्तत्पुरुषोऽघोरो देवि तृतीयकः। वामदेवश्चतुर्थः स्यात् सद्योजातस्तु पञ्चमः।। १४।।
पुनराद्यर्णयुगलं षड्दीर्घस्वरभेदितम्। कृत्वा तैस्तु षडङ्गानि जातियुक्तानि कल्पयेत्।। १५।।

इति।। श्रीरुद्रयामले। श्रीदेव्युवाच –

देवदेव जगन्नाथ शम्भोस्त्रैलोक्यनायक। भैरवस्य विधिं भूयो ममाचक्ष्व महामुने।। १।।
येन कार्याणि सिद्ध्यन्ति साधकानां निरन्तरम्। सुगोप्यमपि देवेशि विधिं प्रब्रूहि शङ्कर।। २।।
येनाहं ते प्रिया देव सदा वर्ते निरन्तरम्। ततः कृपां समाधाय विधिं कथय शोभन।। ३।।

श्रीभैरव उवाच –

शृणु देवि प्रवक्ष्यामि वटुकस्य महात्मनः। विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभम्।। ४।।
सूत्रेणैव सुसङ्क्षेपात् कथयिष्यामि वल्लभे। येन विज्ञानमात्रेण त्रैलोक्यं साधयेत् सुधीः।। ५।।
एकदा देवदेवेशि तपसे मन्दराचलम्। गतोऽहं परमानन्दान्मूलप्रकृतिमीश्वरीम् ।। ६।।
चक्रे परमसन्तुष्टां तपसा भावितात्मना। साकाशरूपिणी देवी प्रोवाच वचनं मुदा।। ७।।
तुष्टाहं शङ्कर प्रीता वरं वरय दुर्लभम्। इति वाक्यं समाकर्ण्य प्रोवाचाहं सुवल्लभे।। ८।।
देवि मातर्जगत्पूज्ये यदि दास्यसि मे वरम्। दुर्लभं कस्यचिद् ब्रूहि विधानं परमाशयात्[1]।। ९।।
मन्त्रस्य येन सिद्ध्यन्ति सर्वकार्याणि साम्प्रतम्। इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी।।१०।।
उवाच यादृशं देवि विधानं शृणु वल्लभे। वटुकाख्यस्य देवस्य भैरवस्य महात्मनः।। ११।।
ब्रह्मविष्णुमहेशाद्यैर्वन्दितस्य दयानिधेः। न्यासा एकादश प्रोक्ता वटुकाराधने शिवे।। १२।।
यान् विना नैव सिद्धिः स्याद्वर्षाणामयुतैरपि।..............................।।
आदौ न्यासं प्रेतबीजेन कार्यं पश्चात् साक्षात् सिंहबीजेन देवि।
न्यासं कार्यं क्वाणबीजेन तद्वन्मन्याबीजन्यासमग्रे विदध्यात्।। १३।।
महाश्रीबीजतो न्यासं प्राणबीजेन चापरम्। घण्टाबीजस्य च न्यासं विधाय ख्यातिबीजतः।।१४।।
मूलबीजेन पश्चाच्च न्यासं कृत्वा महामतिः। भ्रामरीबीजतो न्यासं विदध्यात् प्रीतिसंयुतः।। १५।।
एवं न्यासान् दशादौ तु न करोति नरो यदा। त्वां शपेऽहं वरारोहे तावन्मन्त्रो न सिध्यति।।१६।।

---

[1] 'मं महत्' ख. पाठः।

श्रीदेव्युवाच–

देवदेव जगन्नाथ शम्भो संसारतारक। कृपां कृत्वा न्यासविधिं प्राकट्येन निरूपय।। १७।।
कालेनेह यथाल्पेन साधकः सिद्धिमाप्नुयात्। गोपनीयो न मन्त्रोऽयं वटुकाख्यो जगद्गुरो।। १८।।
तथा निरूपय विभो बालकोऽपि यथा लभेत्। श्रीशिव उवाच–
शृणु देवि जगत्पूज्ये न्यासबीजानि शोभने। प्रकटानि यथा शश्वत् कथयामि हिताय ते।। १९।।
स्थानेषु येषु बीजानि न्यस्तव्यानि महात्मभिः। तथात्र प्रवदिष्यामि शृणु मत्प्राणवल्लभे।। २०।।
शिवचन्द्रशिवैः शक्रस्वरोपेतैः सबिन्दुभिः। प्रेतबीजं समाख्यातं तेनाङ्गानि न्यसेच्च षट्।। २१।।
हृच्छिरश्च शिखानेत्रकवचास्त्रेषु सुन्दरि।..।।

शिवो ह, चन्द्रः स, पुनर्ह, शक्रस्वरः औ, बिन्दुरनुस्वारस्तेन ह्स्हौं इति। तथा–

शिवचन्द्रौ ससंवर्तो कालवामाक्षिभूषितौ। बिन्दुनादयुतौ देवि न्यासात् सान्निध्यकारकम्।। २२।।
सिंहबीजमिदं देवि विन्यसेत् सुरसुन्दरि। मूर्ध्नि बाहोश्च लिङ्गे च नाभौ हस्ताङ्गुलीषु च।। २३।।
पादाङ्गुलीषु देवेशि विन्यसेत् परमेश्वरि।..।।

शिवो ह, चन्द्रः स, संवर्तः क्ष, कालो म, वामाक्षि ई, बिन्दुरनुस्वारः, नादोऽर्धचन्द्रस्तैः ह्स्क्ष्मीं इति। तथा–

अजेशोऽग्निसमारूढः शक्रस्वरशशीयुतः। क्वाणबीजमिदं प्रोक्तं विन्यसेत् परमेश्वरि।। २४।।
ब्रह्मरन्ध्रे मुखे नेत्रयुगे ग्रीवानसोरपि। कपोलयोश्च चिबुके ब्रह्मरन्धे पुनर्न्यसेत्।। २५।।

अजेशो झ, अग्नी र, शक्रस्वर औ, शशी बिन्दुस्तैः झ्रौं इति। तथा–

कालशक्रशिवाः सद्योबिन्दुनादविभूषिताः। मन्याबीजं महेशानि पादयोर्हस्तयोस्तथा।। २६।।
नेत्रयोः श्रोत्रयोः कुक्ष्योर्मेढ्रे चैव प्रविन्यसेत्।..।।

कालो म, शक्रो ल, शिवो ह, सद्यः ओ, बिन्दुरनुस्वारः, नादोऽर्धचन्द्रस्तैः म्ल्हों इति। तथा–

अस्थ्यग्निवामकर्णेन्दुनादैर्देवि समीरितम्। महाश्रीबीजमीशानि चिबुके पादयोर्गले।। २७।।
पादयोर्हृदये पादद्वये नाभौ च पादयोः।..।।

अस्थि श, अग्नी र, वामकर्ण ऊ, इन्दुनादौ प्राग्वत्, तेन श्रूँ इति।। तथा–

होहिताग्न्यासनो वामकर्णबिन्दुभिरद्रिजे। प्राणबीजं मुखे देवि हृदये नाभिमण्डले।। २८।।
हृदये पादयोर्देवि हृदये दक्षकुक्षिके। हृदये वामकुक्षौ च हृदये दक्षपत्तले।। २९।।
हृदये वामपादे च हृदये दक्षनेत्रके। हृदये वामनेत्रे च हृदये दक्षघोणके।। ३०।।
हृदये वामघोणे च हृदये दक्षकर्णके। हृदये वामकर्णे च हृदये विन्यसेत् प्रिये।। ३१।।

लोहितः प, अग्नी र, वामकर्ण ऊ, बहुवचनान्नादोऽपि विज्ञेयस्तेन प्रूँ इति। तथा–

कतुरीयोऽग्निमारूढो वामकर्णेन्दुनादवान्। घण्टाबीजं महादेवि विन्यसेत् परमेश्वरि।। ३२।।
घण्टिकायां च नाभौं च घण्टिकायां हृदि न्यसेत्। पादयोर्हृदये कट्यां मस्तके मस्तके कटौ।।३३।।

स्तनयोर्गुल्फयोश्चैव गुल्फयोः स्तनयोर्न्यसेत्।..।।

कतुरीयो घ, अग्नी रेफः, वामकर्ण ऊ, नादबिन्दु प्राग्वत्, तेन घूँ, इति। तथा—

चण्डीशो वायुवह्न्याढ्यो वामकर्णेन्दुनादवान्। ख्यातिबीजमिति प्रोक्तं विन्यसेद्देवि साधकः।।३४।।
मस्तके पादयोश्चैव ग्रीवायां नाभिमण्डले। गले च हृदि देवेशि जङ्घयोर्नेत्रयोस्तथा।। ३५।।
कर्णयोर्बाहुयुग्मे च स्तनयोश्च प्रविन्यसेत्।..।।

चण्डीशः ख, वायुः य, वह्नी र, वामकर्ण ऊ, इन्दुनादौ प्राग्वत्, तेन खयरूं इति। तथा—

प्रणवो मूलबीजं स्याद्धृदये पादयोः प्रिये। हस्तयोः कर्णयोर्नासायुगे चैव प्रविन्यसेत्।। ३६।।

प्रवण ओंकारः इति। तथा—

(द्विरण्डरेवतीशक्रचन्द्रहंसत्रिमूर्तिभिः। सबिन्दुनादैर्देवेशि भ्रामरीबीजमीरितम्।। ३७।।

द्विरण्डो भ, रेवती र, शक्रो ल, चन्द्रः स, हंसो ह, त्रिमूर्तिः ई, बिन्दुनादौ प्राग्वत्, तेन भरलसहीं इति। तथा—

मुखे नेत्रद्वये कर्णद्वये चैव कपोलयोः। गण्डयोः कण्ठदेशे च स्तनयोर्हृदि पादयोः।। ३८।।
चिबुके मस्तके बाह्वोः स्कन्धयोर्दन्तलेखयोः। ब्रह्मरध्रे तथाधारे भ्रूमध्ये च न्यसेत् प्रिये।। ३९।।
इति न्यासान् समाधाय पुरश्चरणकारकः। यथोक्तन्यासकारी च यदि नो वरमाप्नुयात्।। ४०।।
तदा कन्यादूषणोत्थं मम पापं प्रजायताम्। न्यासैरेतैर्वरारोहे ब्रह्महत्या विनश्यति।। ४१।।
का कथान्यस्य पापस्य सत्यं सत्यं वदामि ते। मर्मन्यासानथो वक्ष्ये त्रीन् देवस्य महात्मनः।।४२।।
यान् विधाय नरो विन्देत् सिद्धिं लोकेषु दुर्लभाम्। आकूतबीजं विन्यस्य मस्तके गण्डयोर्मुखे।।४३।।
कालबीजं चक्षुषोश्च कर्णयोरपि विन्यसेत्। नाभौ लिङ्गे गुदे वापि विद्याबीजं कपोलयोः।। ४४।।
ब्रह्मरन्ध्रे दन्तपङ्क्त्योर्विन्यसेत् साधकोत्तमः। श्रीदेव्युवाच —
भगवन् करुणासिन्धो दीनबन्धो जगद्गुरो। कृपां कृत्वा समाख्याहि तन्त्रै[१]रेव पृथक् पृथक्।। ४५।।
साधकस्तु यथा सिद्धिमचिरेणैव विन्दति।..।।

श्रीमहादेव उवाच—

शृणु देवि प्रवक्ष्यामि न्यासत्रयविधिं पृथक्। दीर्घाकालाग्निशक्राणामधः कालानलान्त्यकाः।।४६।।
वह्न्यस्थिवह्निगगनचन्द्रवामाक्षिमण्डिताः। बिन्दुनादसमाक्रान्ता बीजमाकूतमुद्धृतम् ।। ४७।।

दीर्घा न, कालो म, अग्निः र, शक्रो ल, कालो म, अनलः र, अन्त्यः क्ष, वह्निः र, अस्थि श, वह्निः र, गगनं ह, चन्द्रः स, वामाक्षि ई, बिन्द्वादिः प्राग्वत्। तेन नमरलमरक्षरशरहसीं इति। तथा—

ब्रह्माग्नीन्द्रेन्द्वग्निकालवह्निवामाक्षिभिः प्रिये। बिन्दुनादौ च देवेशि कालबीजमितीरितम्।। ४८।।

ब्रह्मा क, अग्निः र, इन्द्रो ल, इन्दुः स, अग्नि र, कालो म, वह्निः र, वामाक्षि ई, बिन्दुनादौ प्राग्वत्। तेन करलसरमरीं इति। तथा—

संवर्तानलचन्द्रोऽग्निः शिचन्द्रत्रिमूर्तिभिः । सबिन्दुनादैर्देवेशि विद्याबीजं समुद्धृतम्।। ४९।।

---

[१] 'सूत्रैः' ख. पाठः।

संवर्त: क्ष, अनलो रेफ:, चन्द्र: स, अग्नी र, शिवो ह, चन्द्र: स, त्रिमूर्ति: ई, बिन्द्वादि पूर्ववत्। तेन क्षरसरहसीं इति। तथा—

एतन्न्यासत्रयं प्रोक्तं साधकाभीष्टसिद्धिदम्। यस्य प्रसादमासाद्य भैरव: शीघ्रसिद्धिद:।। ५०।।
शृणु देवि प्रवक्ष्यामि शृङ्खलान्यासमुत्तमम्। यस्य प्रसादाच्च शिवे वटुक: सिद्धिदो भवेत्।। ५१।।
मस्तके दक्षनेत्रे च वामनेत्रे तथैव च। दक्षकर्णे वामकर्णे कपोले दक्षिणे तथा।। ५२।।
वामे कपोले दक्षे च गण्डके वामके पुन:। चिबुकेऽथ गले स्कन्धे दक्षिणे वामके तथा।। ५३।।
स्तने दक्षे च वामे च हृदये दक्षकुक्षिके। वामकुक्षौ च नाभौ च दक्षजङ्घे च वामके।। ५४।।
लिङ्गे मेढ्रे दक्षिणे च वामे च वरवर्णिनि। मूलाधारे दक्षगुल्फे वामगुल्फे तथैव च।। ५५।।
दक्षपादे च वामे च दक्षपादाङ्गुलीषु च। वामपादाङ्गुलीष्वेवं ब्रह्मरन्ध्रे तथैव च ।। ५६।।
मूलाधारे पुनश्चैव पुनर्वै ब्रह्मरन्ध्रके। महापराख्यं बीजं च विन्यसेत् साधकोत्तम:।। ५७।।

मेढ्रशब्दो वृषवाची दक्षवामनिर्देशाल्लिङ्गस्योक्तत्वाच्चेति।

चन्द्रसूर्यौ पुनस्तौ च मही ब्रह्मा मही प्रिये। त्रिमूर्तिरस्थि वह्न्यम्बुवह्न्यम्बुधरणीजलम्।। ५८।।
षष्ठस्वरस्त्रिमूर्तीन्दुनादभूषितमस्तकम्। महापराख्यबीजं ते कथितं सुरवन्दिते।। ५९।।
न्यासेनानेन सुश्रोणि साक्षाच्छिवसमो भवेत्।.................................।।

चन्द्रसूर्यौ सहौ, पुनस्तौ चन्द्रसूर्यौ सहावेवेत्यर्थ:, मही ल, ब्रह्मा क, मही ल़, त्रिमूर्ति: ई, अस्थि श, वह्नि: र, अम्बु व, वह्नि: र, अम्बु व, धरणी ल, जलं व, षष्ठस्वर, ऊ, त्रिमूर्ति: ई, इन्दुनादौ पूर्ववत्। तेन सहसहलकलईशरवरवलवऊईं इति। तथा—

वटुकस्याथ वक्ष्यामि मातृकान्यासमुत्तमम्। कृतेन येन वटुक: साधकस्य करे भवेत्।। ६०।।
[1]श्रीबीजै: पञ्चभिर्यत्र मातृकामण्डलं भवेत्। प्रोक्तमादौ च [2]झान्ते च तान्ते फान्ते तथान्तके।।६१।।
वटुकस्य परं पूज्यं मातृकान्यासमुत्तमम्। विज्ञाय साधयेत् प्राज्ञ: स सद्य: शिवतां व्रजेत्।।६२।।
विनेमं मातृकान्यासं योऽन्येन न्यासमाचरेत्। वटुकस्तस्य कुपित: सद्य: शापं प्रयच्छति।। ६३।।
तस्मान्न्यास: प्रकर्तव्य: साधकेन विपश्चिता। सर्वेषु मातृस्थानेषु वपुष्पावित्र्यहेतवे।। ६४।।
मातृकान्यासमेवं हि त्यक्त्वा योऽन्यत् समाचरेत्। वर्षकोटिप्रयत्नेन स सिद्धिं नैव विन्दति।।६५।।
ॐकारमादौ संयोज्य सर्वं पूर्ववदाचरेत्। अयमन्तमार्तृकाख्यो न्यास: स्यात् सर्वसिद्धिद:।।६६।।
झकारमादिमं कृत्वा न्यासोऽयं वरवर्णिनि। नाम्ना बहिमार्तृकाख्यो न्यासचूडामणिर्भवेत्।। ६७।।
ध्यानानि पूर्ववद्देवि कथितानि महामते। अथान्यं न्यासमाख्यास्ये शृणुष्व वरवर्णिनि।। ६८।।
सरस्वतीमातृकाख्यं सद्य: सिद्धिप्रदायकम्। न्यसेन्महामते बीजं मातृकास्थानकेषु च।। ६९।।
महासरस्वतीदेव्या: सद्य: सिद्धिप्रदायकम्। क्रोधीशाध: पिनाकीशो दाहकेशभुजङ्गमौ।। ७०।।
भृग्वीशनकुलीशौ च भुजङ्गनकुलीशकौ। संवर्तवकरेत्यस्त्रिमूर्तीन्दुविभूषिता:।। ७१।।
महासरस्वतीबीजं कथितं देवि दुर्लभम्।.................................।।

---

[1] 'सबीजै:' ख. पाठ:। [2] 'द्रान्ते' ग. पाठ:।

क्रोधीश: क, पिनाकीशो ल, दाहकेशो ड, भुजङ्गेश: र, भृग्वीश: स, नकुलीशो ह, भुजङ्गेशो र, नकुलीशो ह, संवर्त: क्ष, बक: श, रेवती रं, त्रिमूर्ति: ई, इन्दुर्बिन्दुदुस्तेन कलडसहरहक्षशरीं इति। तथा–

इति। न्यासा: समाख्याता वटुकाराधने शिवे। सद्य: सिद्धिकरा देवि भाग्यलभ्या न संशय:।।७२।।
न्यूनन्यासस्य कर्ता य: सद्यो हानिमवाप्नुयात्। एतस्मादधिका[1]न्यासात् सिद्ध: स्याज्जन्मजन्मनि।।७३।।

इति। तथा कौलेशकोटिप्रभेदे–

एवं न्यस्ततनुर्देवि ध्यायेद्वटुकभैरवम्। शुद्धस्फटिकसङ्काशं द्विनेत्रोत्पलशोभितम्।। १।।
कुटिलालकसंवीतचारुस्मेरमुखाम्बुजम्। नानारत्नमयाकल्पै: किङ्किणीजालनूपुरै:।। २।।
दीप्तं शुभ्राम्बरावीतं द्विभुजं दक्षिणे करे। त्रिशिखं सव्यहस्ते च दधानं दण्डमद्भुतम्।। ३।।
वटुवेषधरं शम्भुं सात्त्विकं साधक: स्मरेत्।..................................।।

इति। रुद्रयामले तु–''कपालं वामहस्ते तु सूक्ष्मं दण्डं च दक्षिणे'' इत्युक्तम्। सात्त्विकं चतुर्भुजध्यानं तत्रैव–

श्वेतवर्णं चतुर्बाहुं जटामुकुटधारिणम्। त्रिशूलपाशहस्तं च दण्डहस्तकमण्डलुम्।। १।।
त्रिनेत्रं नीलकण्ठं च मुक्ताभरणभूषितम्। एवं ध्यात्वा यजेद्देवं शैवे पीठे सुरेश्वरि।। २।।
अष्टपत्रं महादेवि कर्णिकाकेसरोज्ज्वलम्। पद्मं विलिख्य[2] तन्मध्ये कर्णिकायां सुरेश्वरि।। ३।।
कृत्वा षट्कोणमस्यान्तस्त्रिकोणं परिकल्पयेत्। व्योमपद्मं च[3] तन्मध्ये वसुपत्रविराजितम्।। ४।।
कर्णिकाकेसरैर्युक्तं चतुरस्रत्रयं बहि:। चतुर्द्वारसमायुक्तं तन्मध्ये वटुकं यजेत्।। ५।।
मूर्तिं मूलेन सङ्कल्प्य तस्यामावाहयेत् प्रभुम्। सद्योजातेन मन्त्रेण मूलाद्येन महेश्वरि।। ६।।
स्थापयेद्वामदेवेन मूलाद्येन च सुव्रते। सन्निधाप्याथ मूलेन केवलेनैनमीश्वरि।। ७।।
अघोरान्तेन मूलेन सन्निरोधनमाचरेत्। मूलेन सम्मुखीकुर्यादवगुण्ठ्याथ मूलत:।। ८।।
षडङ्गै: सकलीकृत्यामृतीकृत्य च मूलत:। परमीकरणं चैव स्वस्वमुद्राभिरुक्तवत्।। ९।।
एतत सर्वं विधातव्यं ततो ध्यात्वा समाहित:। कृत्वाऽसुस्थापनं तस्य मुद्रा: सन्दर्शयेदथ।।१०।।
लिङ्गाद्या: पूर्वमुद्दिष्टा योनिमुद्रा च तत्र या। तां दर्शयेत् तत्पुरुषमूलाभ्यां च महेश्वरि।।११।।
ईशानेन नमस्कुर्यान्मूलाद्येन महेश्वरि। आसनाद्यैश्च पुष्पान्तैरुपचारैस्ततोऽर्चयेत्।।१२।।
ततो देवाज्ञया सम्यग् यजेदावृतिदेवता:। न्यासस्थानेषु देवस्य देहेऽङ्गानि समर्चयेत्।।१३।।
देवस्य देहे देवेशि पञ्चमूर्तीर्यजेत् क्रमात्। अङ्गुलीदेहवक्त्रेषु त्रिविधन्यासमार्गत:।।१४।।
कर्णिकायां यजेत् पश्चात् पूर्वदक्षोत्तरेषु च। पश्चिमे देवमूर्तौ च व्योमपद्मदलेष्वथ।।१५।।
असिताङ्गं रुरुं चण्डं क्रोधमुन्मत्तभैरवम्। कपालिनं भीषणं च संहारं च समर्चयेत्।।१६।।
षट्कोणेषु षडङ्गानि यजेद् देवि यथाविधि। ततोऽष्टदलपद्मान्त: षट्कोणाद्बहिरद्रिजे।।१७।।
पूर्वादीशानपर्यन्तं वक्ष्यमाणान् समर्चयेत्। डाकिनीपुत्रकान् देवि राकिणीपुत्रकानपि।।१८।।

---

१. 'अधिकन्यासात्' ख. पाठ:। २. 'विरच्य' ख. पाठ:। ३. 'तु' क. ग. पाठ:।

लाकिनीपुत्रकान् पश्चात् काकिनीपुत्रकानथ। शाकिनीपुत्रकान् भूयो हाकिनीपुत्रकांस्तथा।। १९।।
मालिनीपुत्रकान् देवि देवीपुत्रानतः परम्। उमापुत्रान् रुद्रपुत्रान् (मातृपुत्रानथेश्वरि ।। २०।।
वामभागे तु देवस्य यजेदेतान् क्रमेण वै। इन्द्रेशानदिशोर्मध्ये) ऊर्ध्वमुख्याः सुतान् यजेत्।।२१।।
अधोमुख्याः सुतान् देवि यजेद्रक्षोजलेशयोः। अन्तराले महेशानि पुत्रवर्गांस्त्रयोदश।। २२।।

इति। रुद्रयामले तु—रुद्रपुत्रानन्तरं—''देशग्रामाधिपांश्चैव स्थानाधिपमनुक्रमात्। मेघनादं प्रचण्डाख्यं कालदूतं तथैव च।।'' इत्युक्तं यथोपदेशमत्रापीति।

इत्थं सम्पूज्य तद्बाह्ये पद्मपत्रेषु पूजयेत्। ब्रह्माणीपुत्रकं पूर्वे माहेशीपुत्रमीश्वरे ।। २३।।
वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले। इन्द्राणीपुत्रकं देवि पश्चिमे पूजयेत् ततः।। २४।।
देवेशि नैर्ऋते पश्चान्महालक्ष्मीसुतं यजेत्। वाराहीपुत्रकं देवि दक्षिणे वह्निकोणके।। २५।।
चामुण्डापुत्रमभ्यर्चेल्लोकेशवटुकान् उमे। अष्टपत्राद्बहिर्देवि चतुरस्रान्तरे पुनः।। २६।।
अष्टदिक्षु यजेदेतान् हेरुकं त्रिपुरान्तकम्। वेतालमग्निजिह्वं च कालान्तकमतः परम्।। २७।।
करालमेकपादं च भीमरूपं महेश्वरि। अभ्यर्च्येन्द्रेशयोर्मध्ये यजेदचलमद्रिजे।। २८।।
हाटकेशं महेशानि पाशिराक्षसयोस्तथा। चतुरस्रादिरेखायां दिग्विदिक्षु सुरेश्वरि।। २९।।
अन्तरालेषु चाभ्यर्चेच्छ्रीकण्ठादीन् सुरेश्वरि। ततो द्वितीयरेखायां क्रोधीशादीन् महेश्वरि।। ३०।।
आषाढ्यन्तान् समभ्यर्च्य तृतीयायां समर्चयेत्। दण्डीश्वरादिभृग्वन्तान् नकुलीशादिकाञ्छिवे।।३१।।
देवस्य वामभागे तु पूजयेत् परमेश्वरि। दिव्यन्तरिक्षभूमिष्ठान् योगीशाञ्छक्तिसंयुतान्।। ३२।।
योगिनीश्च समभ्यर्चेदीशानादिषु सुन्दरि। कोणेषु देवदेवेशि दिगीशानायुधैः सह ।। ३३।।
चतुरस्राद्बहिर्देवि पूजयेदुक्तवर्त्मना । इति सम्पूजयेद् देवं वटुकं भक्तितत्परः ।। ३४।।
धर्मार्थकाममोक्षाणां पतिर्भवति मानवः।..।।

इति। अथ प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा बिन्दुविसर्गमातृकान्यासानन्तरं झकारादिजकारान्तान् वर्णान् वामकराङ्गुल्यादितन्मणिबन्धान्तेषु स्थानेषु विन्यस्य, कलामातृकादिश्रीबीजादिमातृकान्यासानन्तरं पुनश्च ''श्रीं अंनमः'' इत्यनन्तरं, आंनमः इत्यादि क्षंनमः इत्यन्तं केवलाक्षराणि शुद्धमातृकावदेव विन्यस्य, पुनर्झकारादौ श्रीबीजं पुनस्थकारादौ पुनर्बकारादौ पुनः क्षकारादौ श्रींनमः इति विन्यसेत्। ततः कलडरसहरहक्षश्रीं अंनमः इत्यादिमातृकां विन्यस्य, ततः कामबीजादिमातृकान्यासान्ते ऋष्यादिन्यासं कुर्यात्। यथा— शिरसि बृहदारण्यकऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीवटुकाय भैरवाय देवतायै नमः। गुह्ये ह्रींबीजाय नमः। पादयोः ह्रीशक्तये नमः। नाभौ आंकीलकाय नमः। इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत्। ततः अङ्गुष्ठयोः ह्रोवों ईशानाय नमः। तर्जन्योः ह्रेंवें तत्पुरुषाय नमः। मध्यमयोः ह्रुंवुं अघोराय नमः। अनामिकयोः ह्रिंविं वामदेवाय नमः। कनिष्ठयोः ह्रंवं सद्योजाताय नमः। ततः शिरसि मुखे हृदये गुह्ये पादयोश्चैता एव मूर्तीर्विन्यस्य, पुनः शिरसि ह्रोंवों ईशानायोर्ध्ववक्त्राय नमः। मुखे ह्रेंवें तत्पुरुषाय पूर्ववक्त्राय०। दक्षकर्णे ह्रुंवं अघोराय दक्षिणवक्त्राय०। वामकर्णे ह्रिंविं वामदेवायोत्तरवक्त्राय नमः। चूडाधः ह्रंवं सद्योजाताय

पश्चिमवक्त्राय नमः। इति विन्यस्य, ह्रांवां हृदयाय नमः। ह्रींवीं शिरसे स्वाहा। ह्रूंवूं शिखायै वषट्। ह्रैंवैं कवचाय हुं। ह्रौंवौं नेत्राभ्यां वौषट्। हः वः अस्त्राय फट्, इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य, हृदयादिषु च विन्यस्यास्त्रमन्त्रेण तालत्रयं छोटिकाभिर्दशदिग्बन्धनं च कृत्वा, पुनः ''हसहौं'' इति प्रेतबीजेन षडङ्गन्यासं कृत्वा, शिरसि ह्स्क्ष्म्रीं नमः, एवं बाहुलिङ्गनाभिहस्ताङ्गुलीषु पादाङ्गुलीषु चेदमेव बीजं न्यसेत्। ततो ब्रह्मरन्ध्रे झ्रौं नमः। एवं मुखनेत्रद्वयग्रीवानासाकपोलद्वयचिबुकब्रह्मरन्ध्रेषु चेदमेव बीजं न्यसेत्। ततः पादयोः मलहों नमः, एवं हस्तद्वयनेत्रद्वयश्रोत्रद्वयकुक्षिद्वयलिङ्गेषु चेदमेव बीजं न्यसेत्। ततः चिबुके श्रूं नमः। एवं पादद्वयगलपादद्वयहृदयपादद्वयनाभिपादद्वयेषु चेदमेव बीजं न्यसेत्। ततो मुखे पृं नमः, एवं हृदयनाभिहृदयपादद्वयहृदयदक्षकुक्षिहृदयवामकुक्षिहृदयदक्षपादतलहृदयवामपादतलहृदयदक्षनेत्रहृदयवामनेत्रहृदयदक्षनासाहृदयवामनासाहृदयदक्षकर्णहृदयवामकर्णहृदयेषु चेदमेव बीजं न्यसेत्। ततो गलघण्टिकायां घ्रूँ नमः, एवं नाभिघण्टिकाहृदयपादद्वयहृदयकटिमस्तकमस्तककटिस्तनद्वयगुल्फद्वयगुल्फद्वयस्तनद्वयेषु चेदमेव बीजं न्यसेत्। ततो मस्तके खयरूँ नमः। एवं पादद्वयग्रीवामस्तकनाभिगलहृदयजङ्घाद्वयनेत्रद्वयकर्णद्वयबाहुद्वयस्तनद्वयेषु चेदमेव बीजं न्यसेदिति। ततो हृदये ऊंनमः, एवं पादद्वयहस्तद्वयकर्णद्वयनासाद्वयेषु चेदमेव न्यसेदिति। ततो मुखे भ्रलसहीं नमः। एवं नेत्रद्वयकर्णद्वयकपोलद्वयगण्डद्वयकण्ठस्तनद्वयहृदयपादद्वयचिबुकमस्तकभुजद्वयस्कन्धद्वयदन्तपङ्क्तिद्वयब्रह्मरन्ध्रमूलाधारभ्रूमध्येषु विन्यसेत्। ततः शिरसि नमरलमरक्षरशरहसीं नमः, एवं गण्डद्वये मुखे चेदमेव बीजं विन्यस्य, ततः नेत्रयोः करलसरमरीं नमः, एवं कर्णद्वयनाभिलिङ्गगुदेषु चेदमेव बीजं न्यसेत्। ततः कपोलयोः क्षरसरहसीं नमः। एवं ब्रह्मरन्ध्रे दन्तपङ्क्त्योश्चेदमेव बीजं न्यसेत्। ततो मस्तके सहसहलकलईशरवरवलवऊईं नमः, एवं दक्षनेत्रवामनेत्रदक्षकर्णवामकर्णकपोलद्वयगण्द्वयषचिबुकगलस्कन्धद्वयस्तनद्वयहृदयकुक्षिद्वयनाभिजङ्घाद्वयलिङ्गमेढ्रद्वयमूलाधारगुल्फद्वयपादद्वयदक्षपादाङ्गुलीवामपादाङ्गुलीब्रह्मरन्ध्रमूलाधारमूलाधारब्रह्मरन्ध्रेषु न्यसेत्। ततः कलडरसहरहक्षशरीं नमः इति महासरस्वतीबीजं मातृकास्थानेषु न्यस्येत्। इत्येवं न्यासान् कृत्वा, ततो ध्यानादिमूर्तिकल्पनान्ते मूलं सद्योजाताय नमः, इति प्रागुक्तविधिनावाह्य मूलमुच्चार्य, वामदेवाय नमः इति प्राग्वत् संस्थाप्य, मूलेन सन्निधाप्य, मूलं अघोराय नमः इति प्राग्वत् सन्निरुध्य, सम्मुखीकरणादिप्राणप्रतिष्ठान्ते लिङ्गमुद्रानन्तरं मूलं तत्पुरुषाय नमः इति योनिमुद्रां प्रदर्श्य, त्रिशूलाद्यास्तु मुद्रा यथापूर्वमेव प्रदर्श्य मूलं ईशानाय नमः इति नमस्कारमुद्रया प्रणम्यासनादिपुष्पान्तानुपचारानुपचर्य, देवस्य देहे षडङ्गन्यासस्थानेषु ह्रांवां हृदयाय नमः, ह्रींवीं शिरसे नमः, इत्यादि नमोऽन्तान्येव षडङ्गानि सम्पूज्य, देवस्य देहे मूर्तिन्यासस्थानेषु पञ्चदशस्वपि न्यासोक्तप्रकारेणैव त्रिरावृत्त्या पञ्चमूर्तीः सम्पूज्य, ततो व्योमपद्मकर्णिकायां पूर्वदक्षिणोत्तरपश्चिमेषु ईशानादिचतुर्मूर्तीः सम्पूज्य पञ्चमीं देवस्य मूर्तौ पूजयेत्। तत उत्तरतोऽष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन–ऊं अं असिताङ्गभैरवाय नमः। इं रुरुभैरवाय०। उं चण्डभैरवाय०। ऋं क्रोधभैरवाय०। लृं उन्मत्तभैरवाय०। एं कपालिभैरवाय०। ओं भीषणभैरवाय०। अं संहारभैरवाय नमः इति सम्पूज्य, षट्कोणेषु स्ववामाग्रमारभ्याग्नेयेशाननिर्ऋतिवायुकोणेषु हृदयाद्यङ्गचतुष्टयं देवाग्रकोणे नेत्रं तदादिचतुर्दिक्षु चास्त्रमिति षडङ्गानि प्राग्वत् सम्पूज्य, अष्टदलपद्माभ्यन्तरे षट्कोणाद्बहिर्देवाग्रमारभ्य प्रादक्षिण्येनाष्टदिक्षु–ऊंडाकिनीपुत्रेभ्यो नमः। राकिणीपुत्रेभ्यः०। लाकिनीपुत्रेभ्यः०। काकिनीपुत्रेभ्य०। शाकिनीपुत्रेभ्यः०। हाकिनीपुत्रेभ्यः०। मालिनीपुत्रेभ्यः०। देवीपुत्रेभ्यो नमः। इत्यष्टदिक्षु सम्पूज्य, देवस्य वामभागे–उमापुत्रेभ्यो नमः। रुद्रपुत्रेभ्यो नमः। मातृपुत्रेभ्यो नमः। इति सम्पूज्य, इन्द्रेशानयोर्मध्ये ऊर्ध्वमुखीपुत्रेभ्यो

नमः। निर्ऋतिवरुणयोर्मध्ये अधोमुखीपुत्रेभ्यो नमः। इत्युर्ध्वाधोबुद्ध्या सम्पूज्य, बहिरष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—ओं ब्रह्माणीपुत्रवटुकाय नमः। एवं माहेशीपुत्र०। वैष्णवीपुत्र०। कौमारीपुत्र०। इन्द्राणीपुत्र०। महालक्ष्मीपुत्र०। वाराहीपुत्र०। चामुण्डापुत्र० इति सम्पूज्य, अष्टपत्राद्बहिश्चतुरस्राभ्यन्तरे देवाग्रमारभ्य प्रादक्षिण्येन—हेरुकाय नमः। त्रिपुरान्तकाय०। वेतालाय०। अग्निजिह्वाय०। कालान्तकाय०। करालाय०। एकपादाय०। भीमरूपाय०। इत्यष्टदिक्षु सम्पूज्य, (इन्द्रेशानयोर्मध्ये अचलाय नमः। निर्ऋतिवरुणयोर्मध्ये हाटकेशाय नमः। इति सम्पूज्य) तद्बहिश्चतुरस्रत्रये अन्तश्चतुरस्रे देवाग्रादिप्रादक्षिण्येन दिक्षु श्रीकण्ठानन्तसूक्ष्मत्रिमूर्तीः, ईशानाग्न्यादिकोणेषु—अमरेशार्घीशभावभूतितिथीशान्, दिक्कोणयोरन्तरालेषु देवस्य दक्षिणाग्रादिप्रादक्षिण्येनाष्टसु दिक्षु स्थाणुहरझिण्ठीशभौतिकसद्यानुग्रहाक्रूरमहासेनेशान् पूजयेत्। द्वितीयरेखायामपि तथैव दिग्विदिक्ष्वन्तरालेषु—क्रोधीशाद्याषाढ़ीशान्तानभ्यर्च्य, तृतीयरेखायामपि तथैव दण्डीशादिभृग्वीशान्तान् सम्पूज्य, नकुलीशशिवेशसंवर्तेशान् देवस्य वामभागे सम्पूज्य, तद्बहिर्देवस्य वामाग्रकोणमारभ्य प्रादक्षिण्येन सशक्तिकेभ्यो दिव्ययोगिभ्यो नमः। एवं अन्तरिक्षयोगिभ्यो नमः। भूमिष्ठयोगिभ्यो नमः। सर्वयोगिनीभ्यो नमः। इति सम्पूज्य, तद्बहिरिन्द्रादींस्तदायुधानपि प्रागुक्तविधिना सम्पूज्य, प्राग्वद् धूपदीपादि दत्त्वा शेषं समापयेदिति।। तथा—

जितेन्द्रियो हविष्याशी जपेदेनं मनुं प्रिये। पञ्चविंशत्सहस्राणि पञ्चलक्षं दशांशतः।। ३५।।
हुनेत् तिलैस्त्रिमध्वक्तैस्तर्पयेत् तद्दशांशतः। अभिषिच्यात्मनो मूर्ध्नि मूलमन्त्रेण साधकः।। ३६।।
मार्जनस्य दशांशेन ब्राह्मणान् भोजयेत् प्रिये।..।।

अयं कृतयुगजपः। कलावेतच्चतुर्गुणजपः कार्यः। ''एवमक्षरलक्षं वा तदर्धार्धार्धमेव च'' इति यामलप्रोक्तत्वात्। अक्षरलक्षमेकविंशतिलक्षम्। एतत्संख्याकथनं तु कलियुगमारभ्य कृतयुगपर्यन्तपरमिति ज्ञेयं, ईश्वरस्य स्वतन्त्रेच्छत्वात् अत एव कलियुगजपप्रतिपादकेषु सङ्ग्रहग्रन्थेषु शारदातिलकादिषु वर्णलक्षमुक्तमिति।।

अथ वीरसाधनम्। रुद्रयामले, देव्युवाच—

भगवन् देवदेवेश रहस्यं वटुकस्य मे। ब्रूहि येन वशीकुर्यात् साधको भैरवं शिव।। १।।

श्रीशिव उवाय —

शृणु देवि परं गोप्यं कथयामि सुशोभने। रहस्यं सिद्धिदं साक्षाद्वटुकस्य महात्मनः।। २।।
सर्वे वटुकदेवस्य साधने ये निरूपिताः। उपाया निष्फला एवं विनैकं वीरसाधनम्।। ३।।
यो वीरसाधनं हित्वा उपायं चान्यमाश्रयेत्। न स सिद्धिमवाप्नोति नरो वर्षशतैरपि।। ४।।
माषान् मुद्गान् मसूरांश्च चणकानोदनं तथा। क्षीरं तथापूपमपि शष्कुलीरपि शोभनाः।। ५।।

माषादीन् स्विन्नान् सिद्धमाषानिति स्वयमभिधानात्। क्षीरं पायसं ''पायसं पात्रमारोप्ये''ति स्वयमभिधानात्। शष्कुली सुहालीति भाषया।

आदाय सूत्रं कार्पासं कन्याकर्तितमेव च। कुङ्कुमेनापि संरज्य कारयित्वाष्ट कीलकान्।। ६।।
स्तम्भार्थमेकं कीलं च गृहीत्वा सुरसुन्दरि। गच्छेच्छ्मशाननिकटे सुधीः सोत्तरसाधकः।। ७।।
पादप्रक्षालनं कृत्वा ततः स्मृत्वा स्वदेवताम्। बद्धाञ्जलिरिदं वाक्यं प्रवदेत् साधकोत्तमः।। ८।।

अत्र श्मशाने या: काश्चिद्देवता निवसन्ति हि। ता: प्रयच्छन्तु मे सिद्धिं प्रसन्ना: सन्तु पान्तु माम्।।९।।
पूर्वे मां शङ्कर: पातु तथाग्नेय्यां च शूलधृक्। कपाली दक्षिणे पातु नैर्ऋते जटिलोऽवतु।। १०।।
पश्चिमे पार्वतीत्राता वायव्ये प्रमथाधिप:। उत्तरे मुण्डमालाढ्य ईशाने वृषभध्वज:।। ११।।
ऊर्ध्वे पातु तथा शम्भुरधस्ताद्धूलिधूसर:। अग्रतो भैरव: पातु पृष्ठत: पातु खेचर:।। १२।।
दक्षिणे भूचर: पातु वामे च पिशिताशन:। केशान् पातु विशालाक्षो मूर्धानं मे मरुत्प्रिय:।।१३।।
मस्तकं पातु भृग्वीशो नेत्रं पातु महामना:। कपोलौ पातु वीरेशो गण्डौ पात्वरिमर्दन:।। १४।।
उत्तरोष्ठं विरूपाक्षौ ह्यधरं योगिनीप्रिय:। दन्तेषु दक्षविध्वंसी चिबुके नृकपालधृक्।। १५।।
कण्ठे रक्षतु मां देवो नीलकण्ठो जगद्गुरु:। दक्षस्कन्धे गिरीन्द्रेशो वामस्कन्धे च सुन्दर:[1]।।१६।।
भुजे च दक्षिणे सर्वमन्त्रनाथ: सदावतु। वामे भुजे सार्वभौमो हृदयं पातु पाण्डुर:।। १७।।
दक्षहस्ते पशुपतिर्वामे पातु महेश्वर:। उदरे सर्वकल्याणकारकोऽवतु मां सदा ।। १८।।
नाभौ कामप्रविध्वंसी जङ्घे पातु दयामय:। जानुनी पातु जामित्रो गुल्फौ गौरीपति: सदा।। १९।।
पादपृष्ठे ज्ञाननिधिस्तथा पादाङ्गुलीर्हर:। पादाध: पातु सततं व्योमकेशो जगत्प्रिय:।। २०।।
इति रक्षां समाधाय मन्त्ररक्षां ततश्चरेत्।...।।

ओंह्रांह्रींह्रह:[2] पूर्वे। ओंह्रांह्रूंह्रौं आग्नेये। ओंह्रांश्रीं दक्षिणे। ओंलूंलूंलूं भगनग नैर्ऋते। ओंब्रूंब्रूंब्रूंसंस: पश्चिमे। ओंम्रांम्रं वायव्ये। [3]भ्रांभ्रींभैरव उत्तरे। ओंब्रूंब्रूंलूं फट् ईशाने। ओंग्लौंस्रूं ऊर्ध्वे। ओं[4]स्रांस्रंस्र: अध:।

एवं रक्षां समाधाय दिक्पालार्चनमारभेत्। ततो वाक्यं पुनर्ब्रूयात् साधक: प्रेमसंयुत:।। २१।।

भां भैरवभैरव भयंकर हर मां रक्ष २ हुं फट् स्वाहा (वर्णा: २२) इति प्रार्थयित्वा,

एकस्मिन् भाजने कृत्वा पालाशस्य महामना:। सिद्धमाषान् व्रजेत् प्राच्यां दिशि पूजार्थमादरात्।।२२।।
तत्र स्थित्वा तु पुटकं करे कृत्वा विचक्षण:। मन्त्रमेनं सुधी: प्रोच्य दद्यादिन्द्राय वै बलिम्।।२३।।
ओंह्रांह्रींह्रूं समुच्चार्य भो इन्द्र सुरनायक। प्रसन्नो भव मे शीघ्रं देहि सिद्धिं सनातनीम्।। २४।।
इमं बलिं गृहणगृहण हुंफट् उच्चार्य साधक:। बलिं दद्यान्महाभागे सिद्ध्यर्थे प्राणवल्लभे।। २५।।
ततो रंरां समुच्चार्य रुंरूंरिंरीं मम प्रिये। अग्ने गृहण मया दत्तं बलिं हुं फट् समुच्चरेत्।। २६।।
मुद्गान् पात्रे समाधाय प्रदद्याद्बलिमादरात्। ततो दक्षिणदेशान्तं[5] समागत्य विचक्षण:।। २७।।
ओंप्रांप्रींपूं समुच्चार्य तथा प्रांप्रीमपि त्रिधा[6]। प्रेतनाथपदस्यान्ते बलिं गृहणेति चोच्चरेत्।। २८।।
हुंफडन्तोऽयमाख्यातो यममन्त्रो वरानने। अनेन दक्षिणे देशे पात्रं मसूरपूरितम् ।। २९।।

---

[1] 'वसुन्दर:' ख. पाठ:। [2] 'ओंहांहूंहूंह: पूर्वे। ओह्रिंहंह्रीं आग्नेये। ओंह्रिह्रींश्रिं दक्षिणे। ओंग्लूंक्लूंग्लूं भगनग नैर्ऋते। ओंप्फ्रंफ्रेंसंस: पश्चिमे। ख. पाठ:। [3] 'भ्राभ्रां भैरव उत्तरे। ओंक्रंस्रूंलूंफट् ईशाने। ख. पाठ:। [4] 'ओंस्रांस्रूंस्रंस: अध: ख. पाठ:। [5] 'दिश्यान्त:' ख.। देशस्थ:' ग. पाठ:। [6] 'रूंरूंरींरींमरीं प्रिये' ख. पाठ:।

स्थापयित्वा नमस्कृत्य निर्ऋत्याशां ततो व्रजेत्। बलिं चणकपात्रस्थं दद्यात् साधकसत्तमः।।३०।।
[१]ऊंफ्रेंफ्रेंफ्रें समुच्चार्य ततो फ्रें[२]फ्रें तथैव च। खेंखेंह्लोंह्लों ततो ब्रूयात् ततो ह्लौंह्लौं समुच्चरेत्।।३१।।
रक्षोनाथपदं ब्रूयाद् गृह्ण फट्-समन्वितः। अनेन मनुना दद्याद्रक्षोनाथबलिं बुधः ।। ३२।।
ततः पश्चिमदेशस्थो भूत्वा देशिकसत्तमः। जलनाथाय सुबलिं दद्यात् स्वस्यार्थसिद्धिये।। ३३।।
वां[३]वींवूंवं समुच्चार्य ततो वरुणमुच्चरेत्। बलिमेनं मया दत्तं गृहाण परमेश्वर।। ३४।।
अनेन मन्त्रवर्येण वरुणायोदनस्य च। बलिं दद्यान्महाभागः स्वार्थसिद्धय आदरात्।। ३५।।
वायुदेशं समासाद्य ततो वायोर्बलिं हरेत्। पायसं पात्रमारोप्य परमादरसंयुतः।। ३६।।
प्रांप्रींप्रूंप्रूं समुच्चार्य प्रैंप्रैंप्रौंप्रौं तथैव च। हुंफडन्तो मनुरयं वायोः सिद्धिप्रदायकः।। ३७।।
अनेन मनुना प्राज्ञो वायवे बलिमाहरेत्। तत उत्तरदेशे तु गत्वा साधकसत्तमः।। ३८।।
अपूपपात्रमाधाय कुबेरबलिमाहरेत्। ऊंक्रींक्रूंक्रूं समुच्चार्य ततः क्रांक्रां समुच्चरेत्।। ३९।।
हुंफडन्तेन मनुना बलिं दद्याद्विचक्षणः। ऐशानीं दिशमाश्रित्य साधकप्रवरस्ततः।। ४०।।
ईशानाय बलिं दद्यात् सर्वकामार्थसिद्धये। ऊंश्रींश्रूंश्रूं समुच्चार्य श्रींश्रींश्रांश्रामथोच्चरेत्।। ४१।।
हुंफडन्तः समाख्यातो मन्त्रोऽयं लोकदुर्लभः। अनेन मनुना दद्याच्छष्कुलीः पात्रसंस्थिताः।। ४२।।
बल्यर्थं सर्वकामार्थसिद्धये साधकोत्तमः। एवमष्ट बलीन् दत्त्वा सर्वकामार्थसिद्धिये।। ४३।।
स्तम्भाधोभागमाश्रित्य कार्यमग्रिममा[६]चरेत्। पुष्पाक्षतान् समाधाय ऊंह्लांह्लींह्लूंह्लः उच्चरेत्।। ४४।।
स्तम्भमन्त्रोऽयमाख्यातो सर्वकामार्थसिद्धदः। अनेन मनुना प्राज्ञः स्तम्भं सम्पूज्य निर्भयः।। ४५।।
ततः पठेन्मन्त्रमयं कवचं कार्यसिद्धये। यस्य प्रसादमासाद्य साधको निर्भयो भवेत्।। ४६।।
[७]ह्लांह्लींह्लंह्लः समुच्चार्य क्षांक्षींक्षंक्षः समुच्चरेत्। हुंहुंहुंहुं समुच्चार्य हुंहुंहुंफडथोच्चरेत्।। ४७।।
सर्वतो रक्षरक्षेति रक्षरक्षेति भैरव। ततो नाथपदं (द्वयं) प्रोच्य फडन्तोऽयं महामनुः।। ४८।।
सर्वरक्षाकरः प्रोक्तः साधकाभीष्टदायकः। एवं विधाय मतिमांस्तनौ रक्षां विशालधीः।। ४९।।
वीरशान्तिमथो कुर्यात् सर्वकामा[८]र्थसिद्धये। यथा सिध्यन्ति कार्याणि साधकानां महेश्वरि।। ५०।।
यावत् कुर्यान्न वीराणां शान्तिं साधकसत्तमः। तावन्न जायते सिद्धिः साधकस्य कथञ्चन।। ५१।।
श्मशानदेशे ये वीराः शिरसाधाय शासनम्। मनःस्थितान् निकृन्तन्ति साधकानां मनोरथान्।।५२।।
अपूजिताः पूजितास्ते सर्वकामफलप्रदाः। वीरशान्तिमथो वक्ष्ये साधकानां हिताय वै।। ५३।।
यस्याः प्रसादमासाद्य साधकः सुखमेधते। पद्ममष्टदलं कृत्वा तद्वाह्ये षोडशच्छदम्।। ५४।।

---

१. 'ओंह्लेंफ्रेंफ्रें' ख. पाठः। २. 'ह्रूंह्रूं' 'फ्रूंफ्रूं' इति पाठः। ३. 'ब्रांब्रांबृंबृं' ख. पाठः। ४. 'औंवांवींवुं'। ५. 'ब्रांब्रींब्रूब्रौं'
६. 'अग्रियं' ख. पाठः। ७. (महाकवचमन्त्रेण कुर्याद्देहस्य रक्षणम्। ओंह्लांह्लींहं ततो ह्लश्च क्षांक्षींक्षंक्षः समुच्चरेत्। खांखींखंखः तथा घ्रांघ्रींघ्रंघः स्त्रांस्त्रीं ततो वदेत्। स्त्रंस्त्रः ततो म्रंम्रः त्रिधा चोक्तः त्रिधा त्रिधा। ह्रूंसप्तकं समुच्चार्य फडन्तं सर्वतो वदेत्। रक्षरक्षपदं प्रोच्य रक्षरक्षेति भैरव। नाथनाथफडन्तोयमेकपञ्चाशदक्षरः) (मेरु त०)। ८. 'कार्यस्य' ख. पाठः।

तद्बाह्येऽष्टदलं वापि भूपुरं च ततो लिखेत्। एवं मण्डलमालिख्य साधको निर्भय: स्थित:।।५५।।
मूलमन्त्रो नैवेद्यं भैरवाय समर्पयेत्। आद्यपद्मस्य मध्ये तु ततश्चैवाष्ट भैरवान्।। ५६।।
षोडशारे महापद्मे तत: साधकसत्तम:। सम्पूज्य प्रयतो दद्यान्नैवेद्यं पायसस्य च।। ५७।।
मित्राणि षोडश प्राज्ञो भैरवस्य महात्मन:। कुलीशं सुकुलीशं च जामित्रं रामठं निभम्।। ५८।।
प्रचण्डं चण्डकेशं च चण्डात्मानं च चामरम्। चारित्रं च चमत्कारं चञ्चलं चारुभूषणम्।। ५९।।
चामीकरं चारुवहं कितवं[1] चेति षोडश। नत्यन्तनामभि: पूज्या: षोडशानन्दपूरिता:।। ६०।।
ततोऽष्टपत्रे सम्पूज्या ब्राह्म्याद्या मातृकास्तत:[2]। स्वस्वदिक्षु महेन्द्रादीन् पूजयेद् साधकोत्तम:।।६१।।
ततोऽक्षतान् समादाय विकिरंश्चक्रमण्डले। वीरशान्तिं पठेत् सम्यक् साधक: प्रीतमानस:।। ६२।।
चण्डप्रचण्डोर्ध्वकेशभीषणाभीषणाभिध:। व्योमकेशो व्योमवहो व्योमव्यापक इत्यपि।। ६३।।
(एतान् वीरान् समाहूयैह्यायाहीति समुच्चरेत्। मण्डले साधकश्रेष्ठो नैवेद्यादिभिरर्चयेत्।। ६४।।
गन्धपुष्पादिभिरेतान् पृथक् सम्पूज्य साधक:। एवमर्चां समाधाय साधको निर्भय: स्थित:।।६५।।
पूर्वप्रोक्तान् सुधी: कृत्वा न्यासानत्यन्तसिद्धिदान्।) पश्चिमाभमुखो भूत्वा मालामादाय पाणिना।।६६।।
उच्चैस्तरां जपं कुर्यादागताय महात्मने। भैरवाय समीपे तु वामहस्तेन पायसम्।। ६७।।
सम्भोजयञ्जपं कुर्यान्निर्भय: प्रीतमानस:। तृप्तो देवो यदा ब्रूयाद्वरं वरय वाञ्छितम्।। ६८।।
प्रणम्य दण्डवद्भूमौ वाञ्छितं वरमुच्चरेत्। गृहे चागत्य प्रयतोऽप्युत्सवं च समाचरेत्।। ६९।।
अनेन मनुना देवि सिद्धेन जगतीतले। असाध्यं नास्ति लोकेषु सत्यं सत्यं मयोदितम्।। ७०।।

इति।। अथास्य प्रयोगो लिख्यते—तत्र साधकेन्द्र: कृतनित्यक्रिय: पालाशपत्रकृतपुटकेषु स्विन्नान् माषान् मुद्गान् समूरांश्चणकानोदनं पायसमपूपान् शष्कुलीश्च पृथक् २ कृत्वा, कन्यया कर्तितं कार्पाससूत्रं कुङ्कुमरञ्जितं क्षीरवृक्षभवानष्टौ कीलकान् स्तम्भार्थमेकं तेभ्य: स्थूलमिति नव कीलांश्च गृहीत्वोत्तरसाधकसहित: श्मशाननिकटे गत्वा, पादक्षालनानन्तरमाचम्य स्वेष्टदेवं स्मृत्वा कृताञ्जलि: ''अत्र श्मशाने या: काश्चि''दिति प्रमाणोक्तं (श्लोकमन्त्रं पठित्वा, पूर्वे मां शङ्कर: पातु—जगत्प्रिये इत्यन्तं प्रमाणोक्तं) श्लोकैककादशकं पठित्वा, पुन: पूर्वे ओंह्लांह्लींह्ल:०। आग्नेये ह्लांह्लींह्लूंह्लौं०। दक्षिणे उोंह्लांश्रीं०। नैर्ऋते लूंलूंलूं भगनग०। पश्चिमे ब्रूंब्रूंब्रूंसंस:०। वायव्ये म्रांम्रं०। उत्तरे भ्रांभ्रींभैरव०। ईशाने व्रूंव्रूंलूं फट्०। ऊर्ध्वे ग्लौभ्रूं०। अध: स्रांस्रंस्र:०। इति स्वात्मानं परितो दशदिक्षु प्रमाणोक्तमन्त्रैरात्मरक्षां कृत्वा, पूर्वाद्यष्टदिक्षु मध्यश्मशाने च कीलकाष्टकं स्तम्भं च निखांय, 'भां भैरव २ भयङ्कर हर मां रक्ष २ हुं फट् स्वाहा' इति प्रार्थयित्वा, सिद्धमाषभरितं पुटकमादाय सोदकपात्रहस्तो निर्भय: पूर्वकीलकसमीपं गत्वा शुद्धे समे भूतले (उों लं इन्द्र साङ्ग सपरिवार इहागच्छागच्छ इत्यावाह्यैरावतारूढं वज्रहस्तं पीतवर्णं सहस्राक्षं सुरगणपरिवृतं ध्यात्वा लं इन्द्रायैतदासनं नम: इति पुष्पादिकमासनं दत्त्वा, लं इन्द्राय एष गन्धो नम:, एवं इमानि पुष्पाणि वौषट्, एष धूपो नम:, दीपो नम: इति दीपान्तैरुपचारै: सम्पूज्य, तत्पुरतश्चतुरस्रमण्डलं) गन्धजलेन कृत्वा, तत्र माषपुटकं

---

१. 'चकितं ख. पाठ:। २. 'मातृसत्तम:' ख. पाठ:।

निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् 'ओंह्लांह्लींह्लं भो २ इन्द्र सुरनायक मे शीघ्रं प्रसन्नो भव सिद्धिं देहि इमं माषबलिं गृह्ण २ हुंफट्' इति मन्त्रेण तस्मिन् पात्रे जलं सिञ्चन्[1] बलिमुत्सृज्य प्रणम्य, आग्नेयकीलकसमीपं गत्वा, तत्र प्राग्वन्मण्डलं कृत्वा, तत्र रं अग्ने इहागच्छ २ इत्यावाह्य, मेषारूढं शक्तिहस्तं त्रिनेत्रं तेजोनिधिं रक्तं ध्यात्वा, रं बीजेन प्राग्वद् दीपान्तैरूपचारैः सम्पूज्य, तथैव मुद्गभरितं पात्रं तदग्रे प्राग्वन्निधाय तथैव जलमादाय, रंरांरुंरूंरिंरीं भो २ अग्ने तेजोनायक मे शीघ्रं प्रसन्नो भव सिद्धि देहि इमं मुद्गबलिं गृह्ण २ हुंफडिति प्राग्बलिं दत्त्वा प्रणम्य दक्षिणकीलकसमीपं गत्वा प्राग्वत् टमिति यमबीजेन यममावाह्य, तत्र यमं महिषारूढं दण्डहस्तं कृष्णवर्णं प्रेतगणपरिवृतं ध्यात्वा सम्पूज्य, तदग्रे प्राग्वन्मसूरपात्रं निधाय प्राग्वज्जलमादाय, ओंप्रांप्रींप्रूंप्रांप्रीं भो २ यम प्रेताधिप मे शीघ्रं प्रसन्नो भव इमं बलिं गृह्ण २ हुंफडिति प्राग्वद्बलिं दत्त्वा प्रणम्य, निर्ऋतिदिग्गतकीलकसमीपं गत्वा तत्र प्राग्वत् क्षं बीजेन निर्ऋतिमावाह्य तं प्रेतारुढं धूम्रमर्णं खड्गहस्तं रक्षोभिः परिवृतं ध्यात्वा क्षं बीजेन तं प्राग्वत्सम्पूज्य, तदग्रे प्राग्वच्चणकपूरितं बलिपात्रं निधाय प्राग्वज्जलमादाय, ओंफ्रें ३ ह्लूं २ ख्रें २ ह्लों २ ह्लौं २ भोभो रक्षोनाथ मे शीघ्रमित्यादि इमं चणकबलिं गृह्ण २ हुंफडिति प्राग्वद्बलिं दत्त्वा प्रणम्य, पश्चिमदिग्गतकीलकसमीपं गत्वा वमिति वरुणबीजेन वरुणमावाह्य, मकरवाहनं श्वेतवर्णं पाशहस्तं यादोगणवन्दितं ध्यात्वा वं बीजेन प्राग्वत्सम्पूज्य, तदग्रे ओदनपूरितपात्रं प्राग्वन्निधाय जलमादाय, वांवींवूंवूं भोभो वरुण जलनाथ में शीघ्रमित्यादि इममोदनबलिं गृह्ण २ हुंफडिति प्राग्वद्बलिमुत्सृज्य प्रणम्य, वायुकोणगतकीलकसमीपं गत्वा तत्र प्राग्वन्मण्डलं कृत्वा, तत्र यं बीजेन वायुमावाह्य मृगवाहनं कृष्णवर्णमङ्कुशहस्तं सपरिवारं प्राणादिवायुगणवेष्टितं ध्यात्वा यं बीजेन प्राग्वत्सम्पूज्य, तदग्रे पायसभृतं बलिपात्रं निधाय प्राग्वज्जलमादाय, प्रांप्रींप्रूंप्रूंप्रैंप्रैंप्रौंप्रौं२ भोभो वायो भुवःपते मे शीघ्रमित्यादि इमं पायसबलिं गृह्ण २ हुंफडिति मन्त्रेण प्राग्वद्बलिं दत्त्वा प्रणम्य, उत्तरदिग्गतकीलकसमीपं गत्वा, तत्र प्राग्वत् कुमिति कुबेरबीजेन कुबेरमावाह्य तं नरवाहनं गदाहस्तं शुक्लवर्णं यक्षगणवेष्टितं ध्यात्वा कुं बीजेन प्राग्वत्सम्पूज्य, तदग्रे अपूपपूरितं पात्रं निधाय प्राग्वज्जलमादाय, ओंक्रींक्रूंक्रांक्रां भोभो यक्षनाथ मे शीघ्रमित्यादि इममपूपबलिं गृह्ण २ हुंफडिति मन्त्रेण बलिं दत्त्वा प्रणम्य, ईशानदिग्गतकीलकसमीपं गत्वा प्राग्वत् हं बीजेन ईशामावाह्य वृषभारूढं स्वच्छवर्णं शूलहस्तं विद्यागणवेष्टितं ईशानं ध्यात्वा हं बीजेन प्राग्वदासनादिदीपान्तैरुपचारैः सम्पूज्य, तदग्रे शष्कुलीपूरितं बलिपात्रं निधाय जलमादाय, ओंश्रींश्रूंश्रूंश्रींश्रींश्रां[3]श्रां भो २ ईशानं विद्याधिपते मे शीघ्रमित्यादि इमं शष्कुलीबलिं गृह्ण २ हु फडिति मन्त्रेण बलिं प्राग्वद् दत्त्वा प्रणम्य, मध्यस्तम्भसमीपं गत्वा पुष्पाक्षतानादाय ओंह्लांह्लींह्लूंह्लः स्तम्भाय नमः इति स्तम्भं सम्पूज्य, निर्भयः सन् ''ओंह्लांह्लींह्लूंह्लः क्ष्रांक्ष्रींक्ष्रूंक्ष्रः ख्रांख्रींख्रूंख्रः घ्रांघ्रींघ्रूंघः म्रांम्रींम्रूंम्रः प्रेंप्रें २ प्रोंप्रों २ ह्लौंह्लौं २ क्लोंक्लों २ ग्रोंग्रों ज्रोंज्रोंज्रोंज्रों हुंहुंहुंहुंहुंहुंहुं फट् सर्वतो रक्ष रक्ष २ भैरव नाथ फट्'' इति स्वरक्षां कृत्वा, स्तम्भसमीपे स्वासने पूजिते पूर्वाभिमुख उपविश्य, स्वपुरतः सुसमे भूतलेऽष्टदलपद्मं कृत्वा, तद्बहिः षोडशदलं तद्बहिः पुनरष्टदलं तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयं कृत्वा, तन्मध्ये देवमावाह्य प्राग्वत् सर्वोपचारैराराध्याङ्गानि सम्पूज्याष्टदलेषु प्राग्वदसिताङ्गादिभैरवनाथ फट् इति अष्टभैरवानभ्यर्च्य, तद्बहिः षोडशदलेषु—ओंकुलीशाय नमः। सुकुलीशाय०। जामित्राय०। रामठाय०। निभाय०। प्रचण्डाय०। चण्डकेशाय०। चण्डात्मने०। चामराय०। चारित्राय०। चमत्काराय०। चञ्चलाय०। चारुभूषणाय०। चामीकराय०। चारुवहाय०। कितवाय नमः। इति सम्पूज्य, तद्बहिरष्टदले प्राग्वद्

---

१. 'मुञ्चन्' ख. पाठः। २. 'ब्रांब्रींब्रूंब्रौं' ३. ' श्रींश्रीं' ख. पाठः।

ब्राह्म्याद्यष्टमातृः (बहिश्चतुरस्रे प्राग्वल्लोकेशांस्तदस्त्राणि च) सम्पूज्य, धूपदीपौ समर्प्य पद्ममध्ये श्रीभैरवाय नमः। अन्यदलेषु पूजितदेवताभ्यः पृथक् पृथक् पात्रेण पायसं नैवेद्यं विधिवत् समर्प्याक्षतान् हस्ताभ्यामादाय पूजामण्डले विकिरन्, ऊंचं चण्ड आयाहि २, एवं प्रचण्ड० ऊर्ध्वकेश० भीषण० अभीषण० व्योमकेश० व्योमवह० व्योमव्यापकायाहीति आहूय, पृथक् पृथक् गन्धादिभिरुपचारैः सम्पूज्य,पायसैः पृथक् नैवेद्यं समर्प्य, निर्भयः सन् पश्चिमाभिमुखः प्राणायामऋष्यादिन्यासपूर्वकं पूर्वोक्तानखिलान् न्यासान् कृत्वा, प्राग्वत् मालां सम्पूज्यादाय मूलमन्त्रस्य स्पष्टाक्षरपदोच्चारणपूर्वकमुच्चैस्तरां जपन्, वामहस्तेन पायसपात्रमादायागतं देवं भोजयन् प्रसन्नचित्तो जपं कुर्यात्। ततस्तृप्तो देवो यदा वरं वरय इति ब्रूयात् तदा दण्डवद्भूमौ प्रणम्य निजेप्सितं वरं गृहीत्वा स्वगृहं गत्वा महोत्सवं कुर्यादिति वीरसाधनविधिः।।

एवं सिद्धमनुर्मन्त्री नित्यनैमित्तिके रतः। विघ्नं दुर्गां समभ्यर्च्य बलिं दत्त्वा विधानतः।। ७१ ।।
काम्यानि साधयेन्मन्त्री यथोक्तां सिद्धिमाप्नुयात्। अन्नं शालिसमुद्भूतं मांसं पक्वं सशर्करम्।।७२।।
लाजाचूर्णगुडापूपमाक्षिकेक्षुरसान्वितम् । घृतप्लुतं सर्वमेव एकीकृत्य महेश्वरि ।। ७३ ।।
कृत्वा ग्रासं समाराध्य वटुकेशं महेश्वरि। प्रागुक्तेन विधानेन रक्तचन्दनसंयुतैः ।। ७४।।
रक्तपुष्पाक्षतैर्देवि धूपैर्दीपैर्मनोहरैः । तस्याग्रे मण्डलं कृत्वा चतुरस्रं सुरेश्वरि ।। ७५ ।।
त्रिकोणगर्भितं तत्र पात्रे हेममये शुभे। राजते वाथ कांस्ये वा निधाय कवलं शुभम्।। ७६ ।।
अर्चयित्वाथ तत्पिण्डं गन्धाद्यैर्मूलमन्त्रितैः। बलिद्रव्याय इत्युक्त्वा नम इत्यर्चयेच्च तत्।।७७।।
ततो जलं समादाय चुलुकेन महेश्वरि। मूलमन्त्रं समुच्चार्य सम्बोध्य वटुकं प्रिये।। ७८।।
इमं बलिं गृह्णयुग्मं स्वाहान्तं समुदीर्य च। जलं समर्पयेत् तत्र चिन्तयेद्वटुकं प्रिये।। ७९ ।।
स्वहस्ते बलिमादाय भुञ्जानं वरदं प्रभुम्। राजसोऽयं बलिर्देवि कथितः सर्वसिद्धिदः।। ८० ।।
सात्त्विको राजसश्चेति बलिः स्याद् द्विविधः प्रिये। राजसः कथितो देवि सात्त्विकं शृणु वल्लभे।।८१ ।।
पूर्वोक्तैः सकलैर्द्रव्यैर्मांसहीनैर्महेश्वरि । मुद्गसूपसमायुक्तैः पायसेन समन्वितैः ।। ८२।।
मधुरत्रयसंयुक्तैः प्राग्वद् दद्याद्विचक्षणः। ब्राह्मणो नियतः शुद्धः सात्त्विकं बलिमाहरेत्।। ८३।।
सात्त्विकं ध्यानमाख्यातं प्रागेव तव सुव्रते। इदानी राजसं ध्यानं शृणु वक्ष्ये महेश्वरि।। ८४।।
उद्यत्सूर्यसहस्राभं त्रिनेत्रं चन्द्रशेखरम् । रक्ताङ्गरागमारक्तमाल्याम्बरविभूषितम् ।। ८५।।
स्मेराननं नीलकण्ठं नानाभरणभूषितम् । दक्षिणोर्ध्वकरे शूलं तदधो वरमद्रिजे ।। ८६।।
वामोर्ध्वहस्ते देवेशि कपालं तदधोऽभयम्। दधानं संस्मरेद् देवं स्मर्तॄणामभयप्रदम्।। ८७।।
काम्यकर्मसु देवेशि ध्यायेदेवं प्रभुं सदा।...।।

इति। रुद्रयामले तु– ''दक्षे त्रिशूलमभयं कपालं वामके वरम्'' इत्युक्तं। यथारुचि ध्येयः।

क्रूरकर्मसु देवेशि तामसं ध्यानमुच्यते। अञ्जनाचलसङ्काशं मुण्डमालाविभूषितम्।। ८८।।
चन्द्रखण्डलसत्पिङ्गकेशभारं दिगम्बरम्। त्रिनेत्रं दक्षिणैर्हस्तैर्डमरुं च सृणिं तथा।। ८९।।

खड्गशूले च देवेशि दधानमपरैः करैः। अभयं नागपाशं च घण्टां च नृकपालकम्।। ९०।।
ऊर्ध्वादिक्रमतो देवि भीमदंष्ट्रं भयानकम्। सर्वाभरणसन्दीप्तं मणिनूपुरमण्डितम्।। ९१।।
किङ्किणीजालसहितं ध्यायेद् वटुकभैरवम्।...।।

इति। रुद्रयामले तु– ''दक्षिणे चाभयं वामे वरं'' इति तन्मते[1] विशेषः। अन्यत् तुल्यम्।

सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम्। आयुरारोग्यजननमपवर्गफलप्रदम्।। ९२।।
राजसं धर्मकामार्थसिद्धिदं तामसं प्रिये। शत्रुक्षयकरं भूतकृत्यापस्माररोगनुत्।। ९३।।
एवं ध्यानं समाख्यातं साधकाभीष्टसिद्धिदम्। काम्यकर्मारम्भदिने तत्समाप्तिदिने ततः।। ९४।।
बलिर्देयो महादेवि तत्तत्कर्मफलाप्तये। जितेन्द्रियः प्रजुहुयादाज्येनेष्टफलं भवेत्।। ९५।।
इक्षुखण्डैर्हुनेद् देवि वशयेदखिलं जगत्। कैरवैः कुमुदैर्होमात् पुत्रलाभो भवेद् ध्रुवम्।। ९६।।
तिलाज्यतण्डुलैर्हुत्वा धनं धान्यं लभेद् बहु। पुष्पैः श्रीतरुसम्भूतैहुत्वा प्राप्नोति तां श्रियम्।।९७।।
त्रिस्वादुयुक्तलवणैर्होमः स्त्रीजनवश्यकृत्। होमो वेतससम्भूतसमिद्भिर्वृष्टिदायकः ।। ९८।।
अन्नहोमाद् धान्यधनसम्पत्तिर्जायतेऽचिरात्। दिनत्रयं च मधुना होमात् संवशयेज्जगत्।। ९९।।
रोगोक्तौषधहोमेन रोगा नश्यन्ति तत्क्षणात्। कृत्यापस्मारभूतादिभवे व्याघ्राजिने शिवे।। १००।।
उपविश्य तिलैर्देवि जुहुयादयुतं शुचिः। कृत्यादयः पलायन्ते नेक्षन्ते तां दिशं भयात्।। १०१।।
कृष्णाष्टमीं समारभ्य यावत् स्यात् तच्चतुर्दशी। तिलैस्तण्डुलसम्मिश्रैर्मधुरत्रयलोलितैः।। १०२।।
त्रिसहस्रं प्रतिदिनं जुहुयात् संस्कृतेऽनले। वटुकेश्वरमभ्यर्च्य भक्ष्यभोज्यफलान्वितम्।। १०३।।
नित्यं निवेद्य नैवेद्यं मध्यरात्रे बलिं हरेत्। त्रिसहस्रं प्रतिदिनं जपित्वा प्रयतो वशी।। १०४।।
समाप्तिदिवसे रात्रावजं हत्वा बलिं हरेत्। ततः कारयिता राजा तोषयेत् साधकं धनैः।। १०५।।
प्रयोगदिवसे नित्यं भक्ष्यभोज्यैः सदक्षिणैः। विप्रान् सप्त महादेवि तोषयेद् वाञ्छिताप्तये।।१०६।।
समाप्तिदिवसे विंशत्सप्तसप्त समाहितः। भोजयेद् वस्त्रवित्ताद्यैस्तोषयेज्जगदीश्वरि।। १०७।।
विधिनानेन सन्तुष्टो वटुकेशः प्रयच्छति। तेजो बलं यशः पुत्रान् कीर्तिं लक्ष्मीमरोगताम्।। १०८।।
नश्यन्ति शत्रवस्तस्य वर्धन्ते मित्रबान्धवाः। अवग्रहो न जायेत राष्ट्रे तस्य महीपतेः।। १०९।।
केवलैर्लवणैर्हुत्वा स्तम्भनं कुरुते ध्रुवम्। (अनेनैव प्रयोगेन निगडान्मुच्यते नरः।। ११०।।
पलं वचाया देवेशि चूर्णं कृत्वातिसूक्ष्मकम्। मन्त्रयेन्मनुनानेन देवि साग्रं सहस्रकम्।। १११।।)
विभजेदूनपञ्चाशद्भागेन परमेश्वरि। दिनशो भागमेकैकं भक्षयेद् गोघृतान्वितम् ।। ११२।।
अन्तर्वत्नी[2] सुतं सूते मेधारोग्यबलान्वितम्। दीर्घायुष्यं च वन्ध्यापि किं पुनः कन्यकाप्रसूः।।११३।।
प्रयोगस्य तथाद्यन्ते वटुकाय बलिं हरेत्।..।।

इति। रुद्रयामले तु–

वन्ध्याचिकित्सां कुर्वाणो बालार्काभं समर्चयेत्। हरिद्रार्धपलं चैकं वचाचूर्णं तु तत्समम्।। १।।
पेषयित्वा तु गोमुत्रे गोलकं घृतसंयुतम्। पद्मपत्रे विनिःक्षिप्य स्थापयेद् देवसन्निधौ।। २।।

---

१. 'तामसे' ख. पाठः। २. 'या नारी सा' ख. पाठः।

प्रणिपत्य नमस्कृत्य जपेदुच्चैः सहस्रकम्। देवादेशप्रकारेण प्राशयेत्तु महौषधम्।। ३।।
श्रीमन्तमायुष्मन्तं च बलवन्तं सुदर्शनम्। विद्यावन्तं पुत्रवन्तं सद्यः पुत्रमवाप्नुयात्।। ४।।

इत्युक्तम्। तथा कौलेशकोटिप्रभेदे—

साधयेद्विधिवद्भस्म मन्त्रेणानेन सुव्रते । उशीरं चन्दनं देवि कुष्ठं कर्पूरकुङ्कुमे ।। १।।
सितार्कमूलं वाराहीं श्रीलतां परमेश्वरि । त्वचश्च क्षीरवृक्षाणां बिल्वमूलं च शोषयेत्।। २।।
सूक्ष्मचूर्णमिदं कृत्वा गोमयेन तु मेलयेत्। अन्तरिक्षे गृहीतेन कृत्वा पिण्डानि पार्वति।। ३।।
शोषयित्वातपेनाथ विधिवत् संस्कृतेऽनले। मूलमन्त्रेण दग्ध्वाथ भस्म सङ्गृह्य तत्पुनः।। ४।।
शुद्धमात्रे विनिःक्षिप्य शोधयित्वा यथाविधि। मालतीकेतकीपुष्पैर्वासितं संस्पृशञ्छिवे।। ५।।
अयुतं प्रजपेन्मन्त्रं तत्र सम्पूज्य भैरवम्। भस्माधारे विनिःक्षिप्य संस्थाप्य दिनशः शिवे।। ६।।
त्रिपुण्ड्रं तेन कुर्वीत वेदोक्तविधिना द्विजः। शूद्राद्यैर्मूलमन्त्रेण कर्तव्यं परमेश्वरि।। ७।।
मूलेन साधकैः सर्वैः कर्तव्यं भस्मधारणम्। य एवं कुरुते नित्यं विधिवद्भस्मधारणम्।। ८।।
तस्य रोगाः प्रणश्यन्ति कृत्याद्रोहमहाग्रहाः। रिपुचौरमृगादिभ्यो भयं तस्य न जायते।। ९।।
वर्द्धन्ते सम्पदः सर्वाः पूज्यते सकलैर्जनैः। राजानो वशमायान्ति सामान्याः सपरिच्छदाः।। १०।।
वचाचूर्णं पालार्धं च तन्मानघृतसंयुतम्। पद्मपत्रे विनिःक्षिप्य त्रिशतं प्रजपेद्बुधः ।। ११।।
प्राशयेन्नियतो भूत्वा पुनर्लक्षत्रयं जपेत्। तस्यैवं कुर्वतः प्रज्ञा निःसीमा भवति ध्रुवम्।। १२।।
गद्यपद्यमयी वाणी श्रुतस्याप्यवधारणम्। भवेत्तस्य महादेवि भैरवस्य प्रसादतः ।। १३।।

अत्र वचाचूर्णभरणं तु यावद्भिर्दिनैस्त्रिलक्षजपो भवति तावतो भागान् कृत्वा प्रत्यहमेकमेकं भागं प्राशयेदिति साम्प्रदायिकाः। अस्मिन् प्रयोगे विशेषमाह रुद्रयामले—

शुक्लपक्षे द्वितीयायां शुक्रवारे समाहितः। पूर्ववत् पूजयेद् देवं सिद्धान्नं च निवेदयेत्।। १।।

सिद्धान्नं सिद्धौदनः। तत्तु हरिद्रागणेशप्रकरणे वक्ष्यते।

पलार्धं च वचाचूर्णं तन्मानघृतसंयुतम्। पद्मपत्रे विनिःक्षिप्य त्रिसहस्रं जपेद्बुधः।। २।।

त्रिसहस्रजपो विशेषः। अन्यत् सर्वं समानम्। रुद्रयामले तु—

विवादक्षेत्रविषये चतुर्थ्यङ्गारवारके । पूर्ववद् देवमाराध्य नैवेद्यं चैव पूर्ववत्।। १।।
जपमानः स्वयं मन्त्रं नमस्कृत्य च बुद्धिमान्। विवादक्षेत्रमध्ये तु देवं ध्यात्वा च तत्क्षणात्।।२।।
अभिमन्त्र्य मृदं प्राश्य[1] सन्ध्योपास्य[2] स्वयं प्रभुम्। सप्ताहे त्रिषु कालेषु तत्क्षेत्रं चैव सिद्ध्यति।।३।।
मृत्युञ्जयविधिं वक्ष्ये यथावच्छृणु सुन्दरि। उत्तरायणकालेषु दक्षिणायनमेव च ।। ४।।
कालज्ञानमिदं ज्ञात्वा तत्त्वज्ञानी जपेत् क्रमात्। कृष्णाष्टम्यां चतुर्थ्यां चाप्यङ्गारकदिने ततः।।५।।
सात्विकं बालरूपं च द्विभुजं चिन्तयन् बुधः। अर्चयित्वा यथान्यायं सिद्धान्नं च निवेदयेत्।।६।।
यद्रूपं कथितं पूर्वमादिमार्चनमध्यगम्। तुषारकणिकाभासं ध्यात्वा देवं समाहितः ।। ७।।

---

१. 'प्रास्य' ख. पाठः। २. 'स्वतन्त्रः' पाठः इति ज्ञेयम्।

भूचरीमुद्रया युक्तां खेचरीबहुमेलकम्। ध्यानयोगेन मन्त्रं च मनसापि जपेद्बुधः ।। ८।।
इत्येवं च जपेल्लक्षं तदा मृत्युञ्जयो भवेत्। मृत्युभङ्गाभिकाङ्क्षी चेत् सात्त्विकं श्वेतरूपकम्।। ९।।
हृदये स्वासनं ध्यात्वा तन्मध्ये देवमासितम्। न तस्य कालनिष्क्रान्तिर्मूर्तिमण्डलमाप्नुयात्।।१०।।
कृष्णपक्षे चतुर्दश्यां भूमिपुत्रस्य वासरे। अभ्यर्च्य[1] विधिवद् देवं तस्याग्रे स्थापयेद्बुधः।। ११।।
रोचनां हेमजे पात्रे सम्पूज्य विधिनाथ ताम्। गन्धपुष्पादिना स्पृष्ट्वा तां जपेदयुतत्रयम्।। १२।।
तद्गर्भव[2]र्तिं प्रज्वाल्य कपिलाघृतसेचिताम्। सौवर्णे नृकपाले वा पात्रे सङ्गृह्य चाञ्जनम्।। १३।।
सम्पूज्य च पुनर्जप्त्वा तत्पात्रं मन्त्रसङ्ग्रहम्। ध्यात्वा देवं दृशोरेतदाचरेदञ्जनं बुधः।। १४।।
वश्या भवन्ति ते सर्वे यान्यान् पश्यति साधकः। अथाभिषेकं कुर्वीत राज्ञो विजयकाङ्क्षिणः।।१५।।
पूर्वोक्तमण्डपे देवि वितानध्वजशोभिते। सर्वतोभद्रमालिख्य वेदिकायां सुरेश्वरि ।। १६।।
अष्टद्रोणमितैस्तस्य कर्णिकां शालिभिः शुभैः। आपूर्य तण्डुलैश्चापि चतुर्द्रोणमितैः प्रिये।। १७।।
शालीनामुपरि न्यस्य कूर्चाक्षतसमन्वितम्। कुम्भं हेमादिरचितं नवरत्नसमन्वितम् ।। १८।।
संस्थाप्य विधिवद् देवि शुद्धैस्तोयैश्च पूरयेत्। तस्मिन् क्षीरद्रुमोत्थानि पल्लवानि विनिःक्षिपेत्।।१९।।
कर्पूरं चन्दनं देवि कक्कोलमगरुं पुनः। उशीरं कुङ्कुमं बिल्वं दुर्वां लक्ष्मीं सहामपि।। २०।।
चम्पकं मल्लिकां जातिमुत्पलं दाडिमं तथा। गोमेदं च विनिःक्षिप्य पट्टवस्त्रद्वयेन च।। २१।।
संवेष्ट्य तस्मिन्नावाह्य वटुकं देवि पूजयेत्। राजसं ध्यानरूपं तं ध्यात्वा सर्वोपचारकैः।। २२।।
प्रथमाष्टदलस्थेषु कुम्भेष्वष्टसु पार्वति। भैरवानसिताङ्गादीन् सम्पूज्य तदनन्तरम् ।। २३।।
त्रयोदशसु कुम्भेषु बाह्यस्थेषु महेश्वरि। त्रयोदश गणान् पश्चात्तद्बाह्ये दशसु क्रमात्।। २४।।
लोकेशवटुकान् देवि कुम्भेषु परिपूजयेत्। चतुरस्रत्रयस्थेषु द्व्यष्टद्व्यष्टसु पार्वति।। २५।।
कुम्भेषु देवि प्रागुक्तान् श्रीकण्ठादीन् यजेत् क्रमात्। प्रागुक्तक्रमयोगेन गन्धाद्यैः सुमनोहरैः।।२६।।
अयुतं प्रजपेन्मन्त्रं घटान् स्पृष्ट्वा सुरेश्वरि। पृथक् सहस्रं जुहुयात् पायसैः सर्पिषा तिलैः।। २७।।
स्पृशन् कुम्भान् प्रतिदिनं रात्रौ तस्मै बलिं हरेत्। राजसोक्तविधानेन मांसत्रयसमन्वितम्।। २८।।
मेषकुक्कुटमीनानां मांसत्रयमुदाहृतम्। सुदिने शुभलग्ने च स्वस्तिवाचनपूर्वकम् ।। २९।।
वेदवेदाङ्गविद्भिश्च विप्रैर्मङ्गलवादिभिः। नदत्सु पञ्चवाद्येषु नमस्कृत्य च भैरवम् ।। ३०।।
भूपालं चाथवा विप्रं शुद्धदेहं जितेन्द्रियम्। आस्तिकं सत्यसन्धं च अभिषिञ्चेत् प्रसन्नधीः।।३१।।
अभिषेक्तारसमकृद् भूयसीं दक्षिणां प्रिये। दद्यात् प्रसीदति यथा साधकस्तावदर्पयेत्।। ३२।।
अभिषिक्तो नरपतिः शतक्रतुरिवापरः। शत्रूञ्जयति सङ्ग्रामे बलाढ्यान् स्तूयते जनैः।। ३३।।
अभिषिक्तस्तु देवेशि प्रतिमासं महीश्वरः। षण्मासावधि शास्त्येव चतुःसागरमेखलाम्।। ३४।।
उर्वीं युद्धेषु महती शक्तिः स्यात् पूर्वतोऽधिका। शत्रुसैन्यविनाशाय राजा दद्याद्बलिं प्रिये।।३५।।

---

१. :आराध्य' ख. पाठः। २. 'वर्तिसंयुक्तं' ख. पाठः।

पूर्वोक्तं राजसं देवि बलिं निष्पाद्य मन्त्रवित्। सम्पूज्य पूर्वं[1]वेद् देवं मध्यरात्रे महेश्वरि।। ३६।।
अन्यूनाङ्गमजं देवि सर्वलक्षणसंयुतम्। आनीय मूलमन्त्रेण स्नपयित्वा शुभैर्जलैः।। ३७।।
गन्धमाल्यैरलङ्कृत्य देवस्याग्रे निधाप्य तम्। मूलमन्त्रेण सम्प्रोक्ष्य संरक्ष्यास्त्रेण तं प्रिये।। ३८।।
कवचेनावगुण्ठ्याथ मुद्रया धेनुसंज्ञया। अमृतीकृत्य सर्वान्ते देवतारूपिणे बलि-।। ३९।।
रूपाय पशवे उक्त्वा नम इत्यर्चयेत् त्रिधा। गन्धाद्यस्तं ततो देवि कर्णे तस्य तु दक्षिणे।। ४०।।
पशुपाशाय इत्युक्त्वा विद्महे तदनन्तरम्। विप्रकर्णाय देवेशि धीमहीति तत: परम्।। ४१।।
तन्नो जीव: समुच्चार्य वदेद्देवि प्रचोदयात्। इत्येतां पशुगायत्रीं त्रिर्जयित्वा महेश्वरि।। ४२।।
निधाय पुरत: खड्गं ॐह्रींकालीति च द्विधा। वज्रेश्वरि च लोहान्ते दण्डायै नम इत्यथ।। ४३।।
खड्गं त्रि: पूजयेद् देवि मुष्टौ तस्य ततोऽर्चयेत्। वागीश्वरीं च ब्रह्माणं लक्ष्मीनारायणौ तत:।।४४।।
मध्येऽग्रदेशे देवेशि उमामहेश्वरौ यजेत्। इत्यर्चितं समादाय खड्गं हस्ते महेश्वरि।। ४५।।
ततस्तं मन्त्रयेन्मन्त्री मन्त्रेणानेन सुव्रते। खड्गायासुरनाशाय देवकार्यार्थतत्पर ।। ४६।।
पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोऽस्तु ते। तत उच्चार्य विधिवत् तिथ्युल्लेखावसानकम्।।४७।।
गोत्रं नाम च सङ्कीर्त्य कामनां समुदीर्य च। श्रीभैरव इमं क्षागबलिं तुभ्यमहं वदेत्।। ४८।।
प्रददे तु समुच्चार्य कुशपुष्पाक्षतान्वितम्। जलं पशोस्तु निक्षिप्य शिरसि श्रीशिवे नम:।। ४९।।
यज्ञार्थे पशव: सृष्टा यज्ञार्थे पशुघातनम्। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवध:।। ५०।।
इति सम्बोधयेत् तस्य शिर: स्पृष्ट्वाऽथ तं पशुम्। अस्त्रमन्त्रं समुच्चार्य च्छिन्धियुग्मं ततो वदेत्।।५१।।
स्वाहेत्युच्चार्य तं खड्गं तस्य स्कन्धे नियोज्य च। स्वात्मानं भैरवं ध्यायन्नित्येकेन[2] महेश्वरि।।५२।।
प्रहारेण समुच्छेद्य बलिमन्त्रमिमं पठेत्। शत्रुपक्षस्य रुधिरं पिशितं च दिने दिने।। ५३।।
भक्षय स्वगणै: सार्धं सारमेयसमन्वित:। शत्रुनामाक्षरैर्मन्त्रं विदर्भ्य मनुवित्तम: ।। ५४।।
सैन्यं शत्रोर्बलित्वेन कल्पयित्वा महेश्वरि। पशुना सह तत्सैन्यं सम्यक् तस्मै निवेदयेत्।। ५५।।
अनेन बलिदानेन सन्तुष्टो भैरव: स्वयम्। शत्रुसैन्यं विभज्याथ स्वगणेभ्य: प्रयच्छति।। ५६।।
क्रुद्ध: सन्नाशयेच्छीघ्रं नात्र कार्या विचारणा।..।।

इति।। अथ गजाश्वादिरक्षाप्रयोग:। तत्र सारसङ्ग्रहे—

गजानां चतुरङ्गानां विशेषाच्छान्तये तत:। तच्छालासु पुरा प्रोक्तं कुण्डं कृत्वा यथाविधि।। १।।
जुहुयात् पायसाद्यैश्च तिलैस्त्र्ययुतमुक्तवत्। तदा विप्रान् भक्ष्यभोज्यैस्तोषयेच्च सदक्षिणै:।। २।।
पूर्वोक्तेन प्रकारेण कलशं स्थापयेत् तत:। तत्र गन्धादिभि: सम्यग् वटुकेशं समर्चयेत्।। ३।।
अभिषिञ्चेज्जलैस्तैस्तान् गजानश्वांश्च मन्त्रवित्। वर्धन्ते प्रत्यहं चैते गजाश्चापि तुरङ्गमा:।। ४।।
तेषां च समरे शक्तिर्महती जायते तत:। गजाश्वानामामयांश्च[3] भवन्ति द्विषतां सदा।। ५।।

---

१. 'मन्त्रवित्' ख. पाठ:। २. 'मस्तकं तु' ख. पाठ:। ४३. 'अजेया:' ख. पाठ:।

अस्मादन्या महारक्षा नास्ति भूण्डलेऽखिले। अथ यन्त्रं प्रवक्ष्यामि वटुकस्य सुरार्चिते।। ६।।
आलिख्याष्टदलं पद्मं कर्णिकायां समालिखेत्। श्रींह्रींक्लींक्ष्रौं इति ततः पत्रेषु सुरसुन्दरि।। ७।।
वटुकायेत्यक्षराणि द्विरावृत्त्या लिखेत् प्रिये। बहिः षोडशपत्राढ्यं पद्मं कृत्वा सुशोभनम्।। ८।।
तत्पत्रेषु लिखेद् देवि (शिष्टवर्णांस्तु षोडश। मन्त्रस्य तद्बहिश्चापि पद्मं षोडशपत्रकम्।। ९।।
तत्पत्रेषु लिखेद् देवि) स्वरान् षोडश सुव्रते। द्वात्रिंशत्पत्रसंयुक्तं पद्मं कृत्वाथ तद्बहिः।। १०।।
कादिसान्ताँल्लिखेत् तस्य पत्रेषु परमेश्वरि । वेष्टयेच्चतुरस्रेण यन्त्रमेतद्वरानने ।। ११।।
जयदं सुखदं वश्यं दु:ख[1]दारिद्र्यनाशनम्। श्रीप्रदं दूरितव्याधिदुष्टग्रहनिकृन्तनम् ।। १२।।
भूतापस्मारकृत्यादिभये रक्षाकरं परम्। अस्मान् परतरा रक्षा नास्ति नास्ति न संशयः।। १३।।

इति।। अस्यार्थः— तत्राष्टदलपद्मं कृत्वा तत्कर्णिकायां श्रींह्रींक्लींक्ष्रौं इति बीजचतुष्टयं ससाध्यं विलिख्य तत्पत्रेषु वटुकाय वटुकायेत्यष्टौ वर्णान् प्रतिपत्रमेकैकशो विलिख्य, तद्बहिः षोडशदलपद्मं कृत्वा तद्दलेषु वटुकेत्यादि षोडशवर्णानेकैकशो विलिख्य, पुनस्तद्बहिः षोडशदलकमलं कृत्वा तद्दलेषु षोडशस्वरान् सबिन्दूनालिख्य, तद्बहिर्द्वात्रिंशद्दलपद्मं कृत्वा तद्दत्तेषु ककारादिसकारान्तान् मातृकावर्णान् सबिन्दूनालिख्य तद्बहिश्चतुरस्रं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति। अत्र साध्यादिलेखनं तु सम्पदे श्रीबीजान्तं, वश्याय कामबीजान्तं, निग्रहादिषु नृसिंहबीजान्तं, शान्त्यादौ भुवनेश्वरीबीजान्तं विलिखेदिति सम्प्रदायः।। कौलेशकोटिप्रभेदे—(अपरोऽयमष्टाक्षरः)

व्योमबीजं समुद्धृत्य वह्निमायासमन्वितम्। बिन्दुनादसमायुक्तं प्रथमं बीजमुद्धृतम्।। १ ।।
गौरीचतुर्थमुद्धृत्य भीषिणीप्रथमं पुनः। मालिनीपञ्चमं विद्धि मोहिनीप्रथमं ततः।। २।।
मालिनीद्वितीयोपेतं वायुबीजं ततः परम्। पूर्वबीजेन संयुक्तो नमोन्तोऽष्टाक्षरो भवेत्।। ३।।

व्योमबीजं हकारः, वह्निः रेफः, माया ईकारः, बिन्दुनादौ अनुस्वारार्धचन्द्रौ, एतेन भुवनेश्वरीबीजमुद्धृतम्। गौरीचतुर्थं वकारः। भीषिणीप्रथमं टकारः, मालिनीपञ्चमं उकारः। पुनः शब्देन तयोर्योगः सूचितस्तेन टु इति। मोहिनीप्रथमं ककारः, मालिनीद्वितीयमाकारस्तद्युक्तस्तेन का इति। वायुबीजं यकारः। पूर्वबीजं भुवनेशीबीजं। नमः स्वरूपम्।

आपदुद्धारणो मन्त्र उत्तमः परिकीर्तितः। सर्वसिद्धिकरः साक्षाच्छिवेन परिकीर्तितः।। ४।।
ऋषिस्तु बृहदारण्यश्छन्दोऽनुष्टुबुदाहृतम्। देवता वटुकः प्रोक्तः साक्षात् परशिवः प्रिये।। ५।।
षडङ्गं सम्प्रवक्ष्यामि वटुकस्य सुरेश्वरि। ह्रांह्रींह्रूंह्रैं समुद्धृत्य ह्रौंह्रश्चैव षडक्षरः ।। ६।।
वटुशब्दं समुच्चार्य वर्माम्बरपदं वदेत्। हृदयायपदं पश्चाद् हृदयं परिकीर्तितम्।। ७।।
वटुप्रमथनं पश्चाच्छिरसे च समन्वितम्। शिखायै वटुसंयुक्तं कवचं वटुकाय च।। ८।।
नेत्रं वटुकसंयुक्तं वटुशब्दं ततःपरम्। दण्डोऽथ पाणये पश्चादस्त्रमन्त्रं समुद्धरेत्।। ९।।
नमः स्वाहा वषट् हुं वौषट् फडन्तं नियोजयेत्।.......................................।।

---

[1] 'मृत्यु' ख. पाठः।

अथ षडङ्गन्यासप्रकार:—ह्रांवटुवर्माम्बर हृदयाय नम:। ह्रींवटुप्रमथन शिरसे स्वाहा। ह्रूंवटु शिखायै वषट्। ह्रैंवटुकाय कवचाय हुं। ह्रौंवटुक नेत्राभ्यां वौषट्। ह्र:वटुदण्डपाणये अस्त्राय फट् इति। अत्रापि प्रागवदङ्गुलीदेहवक्त्रेषु पञ्चमूर्तयो न्यस्तव्या:। ध्यानं च पूर्वोक्तमेव।

अष्टलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रिय:। जुहुयात् तद्दशांशेन तिलैस्त्रिमधुसंयुतै:।। १०।।
एकविंशत्यक्षरोक्तविधिना देवमर्चयेत्। तत्रोक्तकाम्यकर्माणि मन्त्रेणानेन साधयेत्।। ११।।

अत्र पूर्वोक्तैकविंशाक्षरो मन्त्र एवं प्रणवादिर्द्वाविंशत्यक्षरो रुद्रयामलोक्त:। तत्र देवीप्रणव इति मायाबीजस्य नाम, तत्र षडङ्गमन्त्रेषु प्रणवादित्वं पूर्वतो विशेष:। अन्यत्सर्वं तत्रोक्तमेव।। मन्त्रान्तरं तु तथैव—

अनन्तो बिन्दुमानाद्यं नकुलीशो भुजङ्गयुक्। त्रिमूर्ति: श्रीमुखीयुक्त: क्रोधी रेफेन्दुसद्ययुक्।। १।।
चतुर्थं नृहरेर्बीजं वटुकाय पदं तत:। वटुकाय पुनर्ब्रूयादापदुद्धारणाय च।। २।।
कुरुद्वयं समुच्चार्य वटुकाय पुनर्वदेत्। द्वितीयं बीजमुच्चार्य वटुकायाग्निवल्लभा।। ३।।
समुद्धृतो महामन्त्रश्चतुस्त्रिंशद्भिरक्षरै:।..।।

अनन्त आ, बिन्दुरनुस्वारस्तेन आं। नकुलीशो हकार:, भुजङ्गो रेफ:, त्रिमूर्तिरीकार:, श्रीमुखी बिन्दुस्तेन ह्रीं। क्रोधी ककार:, इन्दुरनुस्वार: सद्य ओ, एतैरङ्कुशबीजमुद्धृतम्। नृहरेर्बीजं पूर्वोक्तं क्ष्रौं इति। अन्यानि पदानि स्वरूपाणि। तेषु द्वितीयतृतीयपदयोर्विसन्धि: चतुस्त्रिंशद्भिरक्षरैरित्युक्ते:। द्वितीयं बीजं भुवनेश्वरीबीजं, अग्निवल्लभा स्वाहाकार:। स्पष्टं तु—आंह्रींक्रोंक्ष्रौं वटुकाय वटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रींवटुकाय स्वाहा। (वर्णा: ३४)। तथा—

ऋषिर्ब्रह्मा समुद्दिष्टोऽनुष्टुप् छन्द उदाहृतम्। अतिपूर्वं देवतास्य भैरव: परिकीर्तित:।। ४।।
वेदाष्टमुनिसंख्यार्णैर्वसुबाणविलोचनै:। मन्त्रार्णान् विन्यसेन्मन्त्री जातियुक्तै: षडङ्गकम्।। ५।।

वेदा: ४ मुनय: ७ वसव: ८ बाणा: ५ विलोचनं २। जातय: प्रागेवोक्ता:।

शिखायां ब्रह्मरन्ध्रे च पञ्च(मूर्ध्नि)वक्त्रे च नेत्रयो:। कर्णयोर्घ्राणयोर्गण्डयुगे चोष्ठयुगे तथा।। ६।।
दन्तपङ्क्त्योश्च चिबुके गले बाहुयुगे तथा। सन्ध्यग्रेषु च हृदये स्तनयोरुदरे तथा।। ७।।
नाभौ पृष्ठे स्फिचो: कट्योर्गुह्ये पायौ च पादयो:। सन्ध्यग्रेषु च मन्त्रार्णान् विन्यसेत् साधकोत्तम:।।८।।
शिरो ललाटे भ्रूमध्ये नेत्रनासामुखेषु च। गले हृदि च नाभौ च गुह्ये चोरुयुगे तथा।। ९।।
जानुनो: पादयोश्चैव पदानि च मनोर्न्यसेत्। प्रागुक्तविधिना देवि ध्यात्वा देवमनन्यधी:।। १०।।
शैवे पीठे यजेद् देवं प्राक्प्रोक्तेनैव वर्त्मना।..।।

इति।। अथ प्रयोग:—तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नम:। मुखे अत्यनुष्टुप्छन्दसे नम:। हृदये श्रीवटुकभैरवदेवतायै नम:। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोग: इति कृताञ्जलिरुक्त्वा, आंह्रींक्रौंक्ष्रौं हृदयाय नम:। वटुकाय २ शिरसे०। आपदुद्धारणाय शिखायै०। कुरु २ वटुकाय कवचाय०। ह्रींवटुकाय नेत्राभ्यां०। स्वाहा अस्त्राय०। इति करषडङ्गन्यासं कृत्वा, शिखायां आंनम:। ब्रह्मरन्ध्रे ह्रीं०।

शिरसि क्रौं०। मुखे क्ष्रौं०। दक्षनेत्रे वं०। वामे टुं०। दक्षकर्णे कां०। वामे यं०। दक्षनसि वं०। वामे टुं०। दक्षगण्डे कां०। वामे यं०। ऊर्ध्वोष्ठे आं०। अधरोष्ठे पं०। ऊर्ध्वदन्तपङ्क्तौ टुं०। अधोदन्तपङ्क्तौ द्धां०। चिबुके रं०। गले णां०। दक्षबाह्वौ यं०। वामे कुं०। सन्ध्यग्रेषु रुं०। हृदये कुं०। दक्षस्तने रुं०। वामे वं०। उदरे टु०। नाभौ कां०। पृष्ठे यं०। दक्षस्फिचि ह्लीं०। वामे वं०। दक्षकट्यां टुं०। वामे कां०। गुह्ये यं०। पायौ स्वां०। पादयोः हांनमः। इति विन्यस्य, शिरसि आंनमः। ललाटे ह्लीं०। भ्रूमध्ये क्रों०। नेत्रयोः क्ष्रौ०। नासायां वटुकाय०। मुखे वटुकाय०। गले आपदुद्धारणाय०। हृदि कुरु०। नाभौ कुरु०। गुह्ये वटुकाय०। ऊर्वोः ह्लीं०। जानुनोः वटुकाय०। पादयोः स्वाहा नमः।। इत्यक्षरन्यासः।। अथ पदन्यासः। शिरसि आंनमः। ललाटे ह्लीं०। भ्रूमध्ये क्रों०। नेत्रयोः क्ष्रीं०।। नासायां वटुकाय०। मुखे वटुकाय०। कण्ठे आपदुद्धारणाय०। हृदि कुरु०। नाभौ कुरु०। गुह्ये वटुकाय०। ऊर्वोः ह्लीं०। जानुनोः वटुकाय०। पादयोः स्वाहा०। इति विन्यस्य ध्यानादिकं सर्वं प्राग्वत् कुर्यात्। तथा—

लक्षमेकं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः। जुहुयात् तद्दशांशेन तिलैस्त्रिस्वादुसंयुतैः।। ११ ।।
तर्पणादि ततः कृत्वा गुरुं सन्तोष्य यत्नतः। सिद्धमन्त्रः प्रकुर्वीत काम्यकर्माणि साधकः।। १२ ।।
पूर्वोक्तानि महादेवि सिध्यन्त्येव न संशयः।..।।

इति।। तथा—चण्डेश्वरस्य मन्त्रः

शृणु देवि प्रवक्ष्यामि मन्त्रं चण्डेश्वरस्य ते। सर्वाभीष्टकरं देवि सर्वसिद्धिकरं प्रिये।। १ ।।
अर्घीशं तु समुच्चार्य मीनेशं तु जलस्थितम्। अग्निमूर्धानमस्त्रान्तं त्र्यक्षरोऽयं मनुर्मतः।। २ ।।

अर्घीश ऊ। मीनेशो ध, जलस्थितं वकारोपरिस्थितं, अग्निमूर्धानं रेफशिरस्कं तेन र्ध्व इति सिद्धं, अस्त्रं फट्। स्पष्टं—ऊर्ध्वफट् इति। तथा—

ऋषिस्त्रिकोऽनुष्टुप् छन्दश्चण्डेश्वरोऽस्य देवता। आद्यं बीजं शक्तिरन्त्यमिष्टार्थे विनियुज्यते।। ३ ।।
दीप्तफट् हृदयं प्रोक्तं ज्वालाद् शिर ईरितम्। ज्वालिन्यस्त्रं शिखा देवि नटास्त्रं च तनुच्छदम्।। ४ ।।
हनफट् नेत्रमुदितं सर्वज्वालिनि फट् परम्। एभिर्मन्त्रैः षडङ्गानि जातियुक्तानि कल्पयेत्।। ५ ।।
चण्डेश्वरं रक्तवर्णं त्रिनेत्रं रक्तवाससम्। स्फटिकाक्षस्रजं शूलं दक्षिणे चाधऊर्ध्वयोः।। ६ ।।
करयोर्वामयोश्चापि टङ्कं चैव कमण्डलुम्। दधतं चन्द्रशकलविलसच्छेखरं स्मरेत् ।। ७ ।।
इति ध्यात्वा यजेत् पीठे शैव चण्डेश्वरं प्रिये। चण्डचण्डाय सम्प्रोच्य विद्महे तदनन्तरम्।। ८ ।।
चण्डेश्वराय इत्युक्त्वा धीमहीति ततो वदेत्। ततश्चण्डः प्रशब्दान्ते चोदयादिति चोच्चरेत्।। ९ ।।
चण्डस्यैषा समाख्याता गायत्री चानया च तम्। आवाह्य पूजयेद्देवि प्राग्वत् सर्वोपचारकैः।।१० ।।
आद्यक्षरं बिन्दुयुतं ङेन्तं चण्डेश्वरं च हृत्। अनेन च समभ्यर्च्य यजेदङ्गानि पूर्ववत्।। ११ ।।
दलेषु मातरः पूज्या वीथ्योर्लोकेशहेतयः।..।।

इति।। अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते प्राणानायम्य, शिरसि त्रिकऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीचण्डेश्वराय देवतायै नमः। गुह्ये ऊंबीजाय नमः। पादयोः फट्शक्तये नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, दीप्तफट् हृदयाय नमः। ज्वाला फट् शिरसे०। ज्वालिनिफट् शिखायै०। नटफट्

---

१. 'नुष्टुबुक्तं' छन्दश्चण्डोऽस्य देवता' ख. पाठः।

कवचाय०। हनफट् नेत्राय०। सर्वज्वालिनिफट् अस्त्रायफट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं सरयोर्विन्यस्य हृदयादिषडङ्गेष्वपि विन्यस्य, ध्यानादिपीठपूजान्ते चमिति बीजेन मूर्तिं परिकल्प्य, चण्डचण्डाय विद्महे चण्डेश्वराय धीमहि तन्नश्चण्ड: प्रचोदयात्। इत्यनयावाह्य सर्वोपचारै: चंचण्डेश्वराय नम: इति[1] मन्त्रेण सम्पूज्य पूर्ववदङ्गानि सम्पूज्य, अष्टदलेषु ब्राह्म्यादिमातृर्वीथ्योर्लोकेशांस्तदस्त्राणि च पूजयेदिति। तथा–

लक्षत्रयं जपेन्मन्त्रं जुहुयात् तद्दशांशत:। सतिलैस्तण्डुलैर्वापि त्रिमध्वक्तैर्यथाविधि।। १२।।
राजवृक्षसमिद्भिर्वा तर्पणादि ततश्चरेत्। प्राग्वत् सिद्धे मनौ मन्त्री प्रयोगानाचरेच्छिवे।। १३।।
शालिपिष्टमयी कृत्वा पुत्तलीं प्राणसंयुताम्। देवि का[2]ष्ठेधिते वह्नौ सम्यक् त्रिमधुराप्लुतम्।।१४।।
दक्षिणाङ्गुष्ठमारभ्य पुंसि च्छित्वा पृथक् शतम्। जुहुयाद् वामपादादि योषितश्चापि संहुनेत्।।१५।।
एवं होमो द्विजातीनां वश्यकृन्नात्र संशय:। यो मर्त्योऽनुदिनं पुष्पैर्हुनेदष्टोत्तरं शतम्।। १६।।
स यादृग्भिर्दिनै: कैश्चित् तद्वर्णं सवनं लभेत्। प्रत्यहं मनुनानेन देवि यस्तर्पयेच्छिवम्।। १७।।
चतुर्मासं तस्य लक्ष्मीर्भवत्येव न संशय:। साध्यवृक्षत्वचा लोणै: सम्यक् पिष्टैश्च कारयेत्।।१८।।
तां तु संस्थापितप्राणां प्रतिमां संस्पृशञ्जपेत्। पूजितां च हुनेद्रात्रौ वशमानयते ध्रुवम्।। १९।।
नरो नारी सदा वश्या भवेदेव न संशय:।...।।

इति।। अथ स्तोत्रम्–

वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न क्वापि क्षणमपि भवन्तं प्रणतवान्।
नमन् मुक्त: सत्प्रत्यहमतनुरग्रेऽप्यनतिमान् इतीश क्षन्तव्यं तदिदमपराधद्वयमपि।। १।।

श्रीशम्भो भगवन् त्रिनेत्र जगतां बन्धोऽन्धकध्वंसन
प्रालेयांशुकलावतंस मदनद्वेषिन् मृडानीपते।
व्योमव्यापिवपुर्महेश यमिनामाद्य[3] त्रिलोकीतनो
भास्वद्विग्रह दुर्ग्रहार्तिशमन त्वं पाहि न: सर्वदा।। २।।

रे मूढास्तमपास्य देवमखिलस्वर्लोकिचूडामणि–
श्रेणीपल्लविताङ्घ्रिपीठमपर: क: स्यादुपास्य: प्रभु:।
तुष्टो य: प्रणतामरप्रणयिनीमिष्टां ददाति श्रियं
यश्चोन्मत्तपलाशकाशकुसुमैरभ्यर्चितस्तुष्यति।। ३।।

रे मूढा: किमयं वृथैव तपसा काय: परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणै: किमपरे रिक्ता: क्रियन्ते गृहा:।
भक्तिश्चेदवरोधिनी भगवति त्र्यक्षे तदानीमसा–
बुन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मी: पुरो धावति।। ४।।

---

[1] 'इति पुष्पाञ्जलिं दत्वा पुष्पान्तानुपचर्य अङ्गानि सम्पूज्य' ख. पाठ:। [2] 'काष्ठैरेधितेऽग्नौ' ख. पाठ:। [3] 'शमिताघौव' ख. पाठ:।

किं चिन्तामणिचिन्तनैः किमपरैः कल्पद्रुमान्वेषणैः
किं वा वाञ्छितदानमात्रफलया धेन्वा रहो ध्यातया।
अक्षीणैर्निधिभिश्च तैः किमथवा कल्पान्तरस्थायिभि-
र्वाञ्छातीतफलप्रदे भगवति त्र्यक्षे कुरुष्वानतिम्।। ५।।

त्र्यक्ष त्वां सकृदेव य प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्म स्फुरदङ्घ्रिपीठविलुठत्कीटीरकोटिच्छटाः।
यस्त्वामर्चति सोऽर्च्यते सुकृतिभिर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः।। ६।।

त्वद्रूपैकनिरूपणप्रणयिता शम्भो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि।
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे
कुत्रापि त्वदुपासनव्यसनिता मा नाथ मे शाम्यताम्।। ७।।

प्रज्ञोन्मेषपटो प्रपञ्चय वचो बौद्ध! त्वमप्यद्भुतं
चार्वाक! स्वविकल्पजालजटिलाः स्वैरं गिरः स्फारय।
रे मीमांसक! जैन! सांख्य! भवतां यत् सम्मतं ब्रूत तत्
स्वातन्त्र्यान्मम रोचते नहि नहि त्र्यक्षादृतेऽन्यः प्रभुः।। ८।।

भाग्यैः कन्दलितं सुखैः कुसुमितं दत्तं फलं वाञ्छितैः
कष्टैरस्तमितं शुचा विचलितं नष्टं तदैवारिभिः
सम्पद्धाम्नि निसर्गतोऽपि विपदामुन्माथिनि श्रेयसा-
मावासे निहितं यदैव गिरिजाकान्तप्रणामे मनः।। ९।।

दुःखानि क्षपयत्यघानि दलयत्युन्मूलयत्यापदो
हन्त्याधीन् विरुणद्धि साधुनिखिलव्यापाररोधा रुजः।
मथ्नाति प्रतिपन्थिनः शमयति क्षुद्रानसावञ्जसा
किं [1]तद्यन्न करोति चन्द्रकलिकाचूड त्वदङ्घ्रिस्मृतिः।। १०।।

....
भक्त्या योऽङ्कुरितः प्रतिक्षणमथो..........................।
...........................फलत्यविरतं वाञ्छातिरिक्तं फलैः
....(?)।। ११।।

---

[1] 'तावन्न' ख. पाठः।

हंहो मानस किं न यस्य*सुमते किञ्चिद्रहस्यं ब्रवी-
म्यस्त्वत्यन्तमृदुः प्रकीर्णविभवः श्रीशैलजावल्लभः।
त्वं गत्वा विपिने प्रतार्य्य कुसुमैरर्कस्य दर्भस्य वा
गृह्णीमः सुरमौलिलालितपदां त्रैलोक्यराज्यश्रियम्।। १२।।
नन्दिन् भृङ्गिरिटे गणाधिप महाकालाग्निरुद्र प्रभो
यूयं सन्निहिताः सदैव वदतो धर्म्यं वचः श्रूयताम्।
यद्यस्माकमनल्पपूत्कृतकृतां देवो जगद्व्यापको
नो ध्यायत्सु कृपां करोति तदहो किं नः प्रभुः स्मर्यते।। १३।।
आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः।
लक्ष्मीस्तोयतरङ्गभङ्गिचपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना।। १४।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे त्रिंशः श्वासः।। ३०।।

* * *

---

* प्रयत्नं कुरु इत्यर्थः।

अथ

एकत्रिंशः श्वासः

शारदातिलके– (२३।१)

अथ त्रैयम्बकं मन्त्रमभिधास्याम्यनुष्टुभम्। यं भजन्तं नरं कालः स्वयमीक्षितुमक्षमः ।।१।।

इति। सारसङ्ग्रहे–

भुजङ्गेशसमारूढा पूतना वसुधेन्दुयुक्। बकं यजामहे प्रोच्य सुगन्धिं पुष्टिवर्धनम्।।१।।
उर्वारुकमिवेत्युक्त्वा बन्धनान्मृ-पदं वदेत्। त्योर्मुक्षीय-पदं ब्रूयान्मामृतादित्युदीरयेत्।।२।।
त्रैयम्बकमनुः प्रोक्तो भजतां मृत्युनाशनः।..।।

भुजङ्गेशो रेफस्तदारूढा पूतना तकारः, वसुधा यकारः, इन्दुरनुस्वार, एतैः त्र्यं इति। अन्यानि पदानि स्वरूपाणि।। मन्त्रनिरुक्तिमाह वशिष्ठः–

अथातः सम्प्रवक्ष्यामि मन्त्रस्यार्थं समासतः। तिस्रो देव्यो दि (य)तश्चैव सञ्जाता लोकमातरः।।१।।
द्यौरापः पृथिवी चेति तस्मात् त्र्यम्बक उच्यते। यच्चाम्बकानि चक्षूंषि त्रीण्यस्य स त्रियम्बकः।।२।।
त्रिलोचनं त्रिलोकेशं तं वयं पूजयामहे। यो लोके दृश्यते गन्धः शोभनः सर्ववस्तुषु।।३।।
स सर्वोऽस्यैव देवस्य सुगन्धिः कथ्यते ततः। अथवा शोभनैर्गन्धैः पुष्पैश्चापि मनोहरैः।।४।।
धूपदीपादिभिश्चैव पूजनीयो महेश्वरः। सर्वेषामेव देवानां गन्धर्वोरगरक्षसाम्।।५।।
उपासकानां सर्वेषां पु[1]ष्टिहेतुरुमापतिः। उर्वारुकं यथा पक्वं स्वयं मुच्येत बन्धनात्।।६।।
अहमेवं प्रसादेन देवदेवस्य शूलिनः। अनायासेन मुच्येयं मृत्योर्लोकभयङ्करात्।।७।।
ततः प्राप्यामृतं देवं तमेव परमेश्वरि। मा भूवं तद्वियुक्तोऽहमिति मन्त्रार्थयोजना।।८।।
एवं विदित्वा मन्त्रार्थमृषिं छन्दोऽस्य दैवतम्। जपहोमादि कर्तव्यं साक्षान्मृत्युजयार्थिना।।९।।
यस्मादनेन मन्त्रेण मृत्युं जयति मानवः। मृत्युञ्जयस्ततः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः।।१०।।
अनेनैव तु मन्त्रेण पूर्वे ब्रह्मर्षयोऽमलाः। मृत्युं विजित्य सम्प्राप्ता ऐश्वर्यमणिमादिकम्।।११।।

इति। शारदातिलके– (२३।२)

वसिष्ठोऽस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम्। देवतास्य समुद्दिष्टस्त्र्यम्बकः पार्वतीपतिः।।१।।

वसिष्ठः–

अग्नये हृदयायेति नमोऽन्तो हृदये स्थितः। त्र्यम्बकाय च शिरसे स्वाहान्तं शिरसे न्यसेत्।।१।।

---

[1] 'पुण्यहेतुः' ग. पाठः।

त्रिनेत्राय शिखायेति वषडन्तं शिखां स्मरेत्। (वसिष्ठाय कवचाय हुमन्तं कवचं स्मरेत्)।। २।।
नेत्रत्रयेऽग्निवीर्याय वौषडन्तमुदाहृतम् । रुद्रदैवतडेऽस्त्राय फडन्तास्त्रमुदाहृतम् ।। ३।।
प्रागाद्यासु चतुर्दिक्षु दिगस्त्रं कारयेत् क्रमात्। दुर्गां विनायकं चैव नन्दीशं क्षेत्रपालकम्।। ४।।
एते दिग्बन्धमन्त्राः स्युर्मन्त्रतो ये उदाहृताः। अथवैतस्य मन्त्रस्य वर्णतोऽङ्गानि कल्पयेत्।। ५।।

इति। शारदातिलके—(२३। ३)

विभक्तैर्मन्त्रवर्णैः स्यात् षडङ्गानां प्रकल्पना। हृदयं त्रिभिराख्यातं चतुर्भिः शिर ईरितम्।। १।।
शिखाष्टभिः समुद्दिष्टा नवभिः कवचं मतम्। पञ्चभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतम् ।। २।।
पूर्वपश्चिमयोम्येन्दुवक्त्रेषु तदनन्तरम् । उरोगलास्येषु पुनर्नाभिहृत्पृष्ठकुक्षिषु ।। ३।।
लिङ्गपायूरुमूलान्तर्जानुयुग्मेषु तत्परम्। तद्वृत्तयुग्मे स्तनयोः पार्श्वयोः पादयोः पुनः।। ४।।
पाण्योर्नासिकयोः शीर्षे मन्त्रवर्णान् न्यसेत् क्रमात्। पदान्येकादश न्यसेच्छिरोभ्रूयुगलाक्षिषु।।५।।
वक्त्रे गण्डयुगे भूयो हृदये जठरे पुनः। गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् ।। ६।।

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम्।
अङ्कन्यस्तकरद्वयामृतघटं कैलाससंस्थं (कान्तं) शिवं
स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे।। ७।।

देवं पूर्वोदिते[1] पीठे पूजयेद् वृषभध्वजम्। मूर्तिं मूलेन सङ्कल्प्य वक्ष्यमाणेन वर्त्मना।। ८।।
पूर्वमङ्गानि सम्पूज्य पश्चान्मूर्तीः प्रपूजयेत्। अर्केन्दुवसुधातोयवह्नीरवियदात्मनः ।। ९।।
द्वितीयावरणे पूज्या मूर्तयोऽष्टाविमाः[2] क्रमात्। रमा[3] राका प्रभा ज्योत्स्ना पूर्णोषा[4] पूरणी सुधा।।१०।।
अष्टाविमाः क्रमात् पूज्यास्तृतीयावरणे ततः। विश्वा विद्या सिता प्रह्वा सारा सन्ध्या शिवा निशा।।११।।
चतुर्थावरणे पूज्याः शक्तयोऽष्टौ क्रमादिमाः। आर्या प्रज्ञा प्रभा मेधा शान्तिः कान्तिर्धृतिर्मतिः।।१२।।
पञ्चमावरणे पूज्याः क्रमादेतास्ततः परम्। धरोमा पाविनी पद्मा शान्ताऽमोघाऽजयाऽमला।। १३।।
षष्ठावरणगाः पूज्याः लोकपालास्ततः परम्। सप्तमावरणे पूज्यास्तदस्त्रैरष्टमावृतिः ।। १४।।

इति।। अर्कमूर्तिरीशानः, इन्दुमूर्तिर्महादेवः, वसुधामूर्तिर्भवः, तोयमूर्तिः शर्वः, वह्निमूर्ती रुद्रः, ईरमूर्तिरुग्रः, वियन्मूर्तिर्भीमः, यजमानमूर्तिः पशुपतिः। अत्र प्रमाणं तु जगत्प्रसिद्धः पौराणिकः पार्थिव(लिङ्ग)पूजाक्रमः। अत्र केचिच्छर्वः क्षितिमूर्तिः भवो जलमूर्तिरित्याहुः तन्न, यथा क्षितितोयादीनां भूतानां क्रमस्तथा भवादिमूर्तिन्यासप्रकरणे ''भवं च करभद्रां शर्वं च खगलामपि''। इत्यादिक्रम एवोक्तः, अत एव तदसङ्गतमिति।। अथ प्रयोगः—तत्र प्रातरुत्थानादि-योगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि वशिष्ठाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीमृत्युञ्जयरुद्राय देवतायै नमः। इति विन्यस्य सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, उों अग्नये हृदयाय नमः। त्र्यम्बकाय शिरसे स्वाहा। त्रिनेत्राय शिखायै वषट्। वसिष्ठाय कवचाय हुं। अग्निबीर्याय नेत्रत्रयाय वौषट्।

---

१. 'पञ्चाक्षरोदिते' ख. पाठः। २. 'क्रमादथ' ख. पाठः। ३. 'रामा' ख. पाठः। ४. 'पूर्णोमा' क. ग. पाठः।

रुद्रदैवताय अस्त्राय फट्। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, दुं दुर्गायै नमः। गं गणपतये नमः। नं नन्दीशाय नमः। क्षं क्षेत्रपालाय नमः, इति पूर्वादिचतुर्दिक्षु दिग्बन्धनक्रमेण न्यसेत्।। अथवा त्र्यम्बकं हृदयाय। यजामहे शिरसे। सुगन्धिं पुष्टिवर्धनं शिखायै। उर्वारुकमिव बन्धनात् कवचाय। मृत्योर्मुक्षीय (नेत्राभ्यां)। मामृतात् अस्त्राय। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, मुखे पूर्ववक्त्रस्थाने त्र्यं नमः। चूडाधः पश्चिमवक्त्रस्थाने वं०। दक्षिणकर्णे दक्षिणवक्त्रस्थाने कं०। वामकर्णे उत्तरवक्त्रस्थाने यं०। उरसि जां०। गले मं०। मुखे हें०। नाभौ सुं०। हृदि गं०। पृष्ठे न्धिं। कुक्षौ पुं०। लिङ्गे ष्टिं०। पायौ वं०। दक्षोरुमूले र्धं०। वामोरुमूले नं०। दक्षोरौ उं०। वामोरौ र्वां०। दक्षजानुनि रुं०। वामजानुनि कं०। दक्षजानुवृत्ते मिं०। वामजानुवृत्ते वं०। दक्षस्तने वं०। वामस्तने न्धं०। दक्षपार्श्वे नात्०। वामपार्श्वे मृं०। दक्षपादे त्यों०। वामपादे र्मुं०। दक्षपणितले क्षीं०। वामे यं०। दक्षनसि मां०। वामे मृं०। शिरसि तात्०।। इति वर्णान् विन्यस्य, शिरसि त्र्यम्बकं नमः। भ्रूमध्ये यजामहे०। नेत्रयोः सुगन्धि०। मुखे पुष्टिवर्धनम्०। गण्डद्वये उर्वारुकं०। हृदि इव०। जठरे बन्धनात्०। गुह्ये भृत्योः। ऊरुद्वये मुक्षीय०। जानुनो मा०। पादयोः अमृतात् नमः। इति एकादशपदानि विन्यस्य, ध्यानाद्यात्मपूजान्ते प्रागुक्तं शैवं पीठं सम्पूज्य, तत्र देवतामावाह्य स्थापनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्याष्टदलेषु देवाग्रदलमारभ्य प्रादक्षिण्येन—ईशानाय सूर्यमूर्तये नमः। महादेवाय सोममूर्तये०। भवाय क्षितिमूर्तये०। शर्वाय जलमूर्तये०। रुद्राय अग्निमूर्तये०। उग्राय वायुमूर्तये०। भीमाय आकाशमूर्तये०। पशुपतये यजमानमूर्तये०। इति सम्पूज्य, दलाग्रेषु—रमायै नमः। राकायै०। प्रभायै०। ज्योत्स्नायै०। पूर्णायै०। उषायै०। पूरण्यै०। सुधायै०। इति सम्पूज्य, द्वितीयाष्टदलमूलेषु स्वाग्रादारभ्य—विश्वायै नमः। विद्यायै०। सितायै०। प्रह्वायै०। सारायै०। सन्ध्यायै०। शिवायै०। निशायै०। इति सम्पूज्य, तद्दलेषु—आर्यायै नमः। प्रज्ञायै०। प्रभायै०। मेधायै०। शान्त्यै०। कान्त्यै०। धृत्यै०। मत्यै०। इति सम्पूज्य, तद्दलाग्रेषु—धरायै नमः। उमायै०।। पाविन्यै०। पद्मायै०। शान्तायै०। अमोघायै०। अजयायै०। अमलायै०। इति सम्पूज्य, प्राग्वत् चतुरस्रवीथीद्वये लोकपालांस्तदस्त्राणि च सम्पूज्य, धूपदीपादि सर्वं प्राग्वत् कृत्वा समापयेदिति।।

तथा—

जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः। जुहुयाद् दशभिर्द्रव्यैरयुतं घृतसम्प्लुतैः ।। १।।
बिल्वं पलाशं खदिरं वटं च तिलसर्षपौ। दौग्धं दुग्धं दधिः पुनर्दूर्वां तानि विदुर्बुधाः।। २।।

दौग्धं पायसं। सहस्रमेकैकद्रव्येण।

तर्पयित्वाभिषिच्याथ ब्राह्मणांस्तोषयेद् गुरुम्। एवं कृते प्रयोगार्हो जायतेऽयं महामनुः।। ३।।

इति।। वसिष्ठः—

ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः। आत्मार्थं जपहोमादि कुर्युर्नित्यमतन्द्रिताः।। १।।
परार्थमपि कुर्वीत ब्राह्मणो मन्त्रवित्तमः। दातव्या दक्षिणा तत्र यथा तुष्येद् द्विजोत्तमः।। २।।
आत्मार्थं वा परार्थं वा न कुर्यादितरो जनः। यदि कुर्याज्जपादीनि लोभादज्ञानतोऽपि वा।। ३।।
त्रयीसारेण मन्त्रेण स्वयमेव विनश्यति। आमपात्रे यथान्यस्तं पयो दधि घृतं मधु।। ४।।
तस्य पात्रस्य दौर्बल्यात् सह पात्रेण नश्यति। एवं मन्त्रं त्रयीसारं यदन्यो धारयेन्नरः।। ५।।

क्षिप्रं विनाशमायाति स मन्त्रो निष्फलो भवेत्। तस्मादाचार्यतो लब्ध्वा चीर्णदेवव्रतो द्विजः।।६।।
मृतसञ्जीविनीं विद्यां गोपयेत् तां प्रयत्नतः। अनया विद्यया विप्र सर्वकार्याणि साधयेत्।। ७।।
आयुरारोग्यमैश्वर्य्यमपमृत्युं यजेत सः।..।।

इति।। अथापरन्यासस्तत्र वासिष्ठकल्पे–

अथ न्यासविधिं वक्ष्ये मन्त्रस्यास्य महामुने। सर्वदोषप्रशमनं सर्वकल्याणकारकम् ।। १।।
तेनैव मुच्यते सद्यो मृत्योः कालकृतादपि। अक्षराणि त्रयस्त्रिंशदस्मिन् मन्त्रे महामुने।। २।।
तानि देवा त्रयस्त्रिंशदिति शास्त्रेषु निश्चयः। आदावष्टौ वसून् विद्याद्रुद्रानेकादशोत्तरान्।। ३।।
ततः स्युर्द्वादशादित्याः प्रजापतिरनन्तरम्। वषट्कारोऽमितः प्रोक्तः सर्वानन्दमयं शिवः।। ४।।
ध्रुवोऽध्वरश्च सोमश्च आपश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः।। ५।।
वीरभद्रश्च शम्भुश्च गिरिशश्चाज एकपात्। अहिर्बुध्न्यः पिनाकी च भुवनाधीश्वरस्तथा।। ६।।
कपाली दिक्पतिः स्थाणुर्भर्गो रुद्राः प्रकीर्तिताः। धातार्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा।। ७।।
विवस्वानिन्द्रपूषाख्यौ पर्जन्यस्तदनन्तरः। त्वष्टा विष्णुरिति प्रोक्ता आदित्या द्वादश क्रमात्।। ८।।
एववेतानि रूपाणि देवानां कल्पितानि वै। अक्षराणि न्यसेन्मन्त्री सर्वाङ्गेषु समाहितः।। ९।।
मूर्धादिपञ्चवक्त्रेषु प्रथमं पञ्चकं न्यसेत्। दक्षिणस्य करे च स्यात् पञ्चस्थानेषु पञ्चकम्।। १०।।
तत्रस्थदेवता ध्यात्वा न्यसेत् पञ्चाक्षराण्यतः। ततः पराणि पञ्चैव वामहस्ते न्यसेत् क्रमात्।। ११।।
ततस्तु दक्षिणे पादे सन्धिस्थानेषु पञ्चसु। पराणि पञ्च विन्यस्य वामपादे तथा न्यसेत्।। १२।।
ततश्च दक्षिणे पार्श्वे वामपार्श्वे न्यसेत् क्रमात्। पृष्ठे नाभौ च गुह्ये च मुक्षीयत्रितयं न्यसेत्।। १३।।
भ्रुवोर्मध्ये परगले हृदये मातृतात् न्यसेत्। एवं विन्यस्य सर्वाङ्गे ततोऽन्ते प्रणवं न्यसेत्।। १४।।
यस्याङ्गेषु न्यसेदेवं मन्त्री मन्त्रं समाहितः। तस्य मृत्युभयं नास्ति न च व्याधिकृतं भयम्।। १५।।
एवमेतेन रौद्रेण कवचेनाभिरक्षितम्। वेतालाश्च पिशाचाश्च गन्धर्वोरगराक्षसाः ।। १६।।
पराभिचारकृत्याश्च ये चान्ये च ग्रहादयः। एनं द्रष्टुं न शक्तास्ते साक्षान्मन्त्रशरीरिणम्।। १७।।
एतद्रहस्यं परमं साक्षाद्देवान्मया श्रुतम्। य एनं धारयत्येव स निःशत्रुर्न चान्यथा।। १८।।

इति।। अथैतन्न्यासप्रयोगः–तत्र शिरसि त्रिं ध्रुवाय नमः। मुखे यं ध्वराय०। दक्षिणकर्णे बं सोमाय०। वामे कं आपाय०। चूडाधः यं अनिलाय०। दक्षबाहुमूले जां अनलाय०। तन्मध्ये मं प्रत्यूषाय०। मणिबन्धे हें प्रभासाय०। तदङ्गुलिमूले सुं वीरभद्राय०। तदग्रे गं शम्भवे०। वामबाहुमूले न्धिं गिरिशाय०। तन्मध्ये पुं अजैकपदे०। मणिबन्धे ष्टिं अहिर्बुध्न्याय०। तदङ्गुलिमूले वं पिनाकिने०। तदग्रे र्धं भुवनाधीश्वराय०। दक्षोरुमूले नं कपालने०। तज्जानुनि उं दिशांपतये०। तद्गुल्फे र्वां स्थाणवे०। तदङ्गुलिमूले रुं भर्गाय०। तदग्रे कं धात्रे०। वामोरुमूले भिं अर्यम्णे०। तज्जानुनि वं मित्राय०। तद्गुल्फे वं वरुणाय०। तदङ्गुलिमले न्धं अंशवे०। तदग्रे नात् भगाय०। दक्षपार्श्वे मृं विवस्वते०। वामपार्श्वे त्यों इन्द्राय०। पृष्ठे मुं पूष्णे०। नाभौ क्षीं पर्जन्याय०। गुह्ये यं त्वष्ट्रे०। भ्रुवोर्मध्ये मां विष्णवे०।

परगले मृं प्रजापतये०। हृदये तात् अमितवषट्काराय नमः। ग्रन्थान्तरे–

अथ त्रैयम्बकं मन्त्रमभिधास्याम्यनुष्टुभम्। यं भजन्तं नरं कालः स्वयमीक्षितुमक्षमः।। १ ।।
वसिष्ठोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम्। देवतास्य समुद्दिष्टस्त्र्यम्बकः पार्वतीपतिः।। २ ।।
विभक्तैर्मन्त्रवर्णैः स्यात् षडङ्गानां प्रकल्पना। चतुर्भिर्हृदयं प्रोक्तं शिरस्तावद्भिरीरितम्।। ३ ।।
शिखाष्टभिः समुद्दिष्टा नवभिः कवचं मतम्। पञ्चभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतम्।। ४ ।।
पूर्वपश्चिमयाम्योदग्वक्त्रेषु तदनन्तरम् । उरोगलांसेषु पुनर्नाभिहृत्पृष्ठकुक्षिषु ।। ५ ।।
लिङ्गपायूरुमूलान्तर्जानुयुग्मेषु तत्परम्। तद्वृत्तयुग्मे स्तनयोः पार्श्वयोः पादयोः पुनः।। ६ ।।
पाण्योनासिकयोः शीर्षे मन्त्रवर्णान् न्यसेत् क्रमात्। पदान्येकादश न्यसेच्छिरोभ्रूयुगलाक्षिषु।। ७ ।।
वक्त्रे गण्डयुगे भूयो हृदये जठरे पुनः। गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् ।। ८ ।।

इति। तद्यथा–पूर्वोक्तमन्त्रोद्धारः,

आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतीश्च
प्रोच्चार्य त्र्यम्बकं यो जपति मृतिहरं भूय एवं तथाद्यम्।
कृत्वा न्यासं षडङ्गं स्ववदनत ऋचं मण्डलान्तः प्रविष्टं
ध्यात्वा योगीशरुद्रं स जयति मरणं शुक्रविद्याप्रसादात्।। ९ ।।

एषा षट्प्रणवी विद्या महामृत्युविनाशिनी। चतुर्दशस्वरोपेतो हकारो बिन्दुसंयुतः।। १० ।।
शिवप्रसादजनकं प्रासादमिति कथ्यते। बीजं मृत्युञ्जयं प्रोक्तं देवप्रणवसंज्ञकम् ।। ११ ।।
नकुलीशोऽग्निमारूढो वामनेत्रार्धचन्द्रवान्। मायाबीजं च शक्तिः स्याद् देवीप्रणवसंज्ञिका।। १२ ।।
षष्ठस्वरेण संयुक्तो जकारो बिन्दुसंयुतः। बीजं मृत्युहरं नाम द्वितीयं सम्प्रकीर्तितम्।। १३ ।।
सविसर्गं सकारेण मृत्युञ्जयमथाब्रुवे। ध्रुवस्तारस्तथोङ्कारो मूलं ज्योतिः स्वयंस्थितः।। १४ ।।
वेदादि तारको युक्तो शाखाद्विप्रणवान्वितः (?)। महामृत्युञ्जयं प्रोक्तं प्रासादं मृत्युनाशनम्।। १५ ।।
तारकं व्याहृतिश्चैव व्यस्तान्येतान्यनुक्रमात्। विलोमव्याहृतिश्चैव सम्पुटं प्रणवद्वयम्।। १६ ।।
ततो व्याहृतयस्तिस्त्रो मन्त्रः षट्प्रणवान्वितः।..।।

वेदादिभूरादिपदत्रयं च जपेन्मनुं मृत्युहरं त्रियम्बकम्।
जपेत् फलार्थी विधिवत् प्रयुक्तं प्रासादमृत्युञ्जयसम्पुटेन।। १७ ।।

अगस्त्य उवाच –

देवदेव महादेव भक्तानुग्रहकारक। मृत्युञ्जयविधिं ब्रूहि जपपूजादिसंयुतम्।। १ ।।
पीठपूजादि यन्त्रं च होमं च कृपया वद। ब्रह्मोवाच –
शृणु वत्स समासेन मृत्युञ्जयविधानकम्। यज्ज्ञात्वा मुच्यते मर्त्यो मृत्युव्याधिमहद्भयात्।। २ ।।
ग्रहपीडासु सर्वासु महोग्रे चापि मण्डले। वियोगे बान्धवानां च जनमारे उपस्थिते।। ३ ।।

राष्ट्रभङ्गे जनच्छेदे महामृत्युविनाशने। अभिचारे समुत्पन्ने मनोधर्मविपर्यये ।। ४।।
मृत्युञ्जयस्य देवस्य विधानं क्रियते बुधै:। यदा कदाचित् समये चन्द्रताराबले शुभे।। ५।।
शुभवारे शुभतिथौ शुभनक्षत्रसंयुते। शुभलग्ने शुभे योगे शुभग्रहसमन्विते ।। ६।।
मृत्युञ्जयस्य देवस्य विधानारम्भ इष्यते। मण्डिते शङ्करद्वारे चित्रिते मण्डपान्विते।। ७।।
दीपस्थानं तु संशोध्य रक्तकम्बलसंयुतम्। ब्राह्मणान् वेदशास्त्रज्ञानाहूय गतमत्सरान्।। ८।।
स्वस्तिवाचनपूर्वं तु साधनं परमं भवेत्। प्रारब्धस्य च कार्यस्य सदृशो जप उत्तम:।। ९।।
ऊनाधिकं च कार्याच्च जपेत्तद्विफलं स्मृतम्। राष्ट्रभङ्गे जनक्लेशे महारोगनिपीडिते।। १०।।
कोटिसंख्याजप: प्रोक्तो मुनिभिस्तत्त्वदर्शिभि:। सामान्यगद्पीडायां दु:स्वप्नस्य च दर्शने।। ११।।
मृत्युञ्जयस्य मन्त्रस्य जपेल्लक्षमितं शुभम्। अपमृत्युविनाशाय जपेदयुतसम्मितम्।। १२।।
दुर्वाणीश्रवणे चैव सुहृदामनृते क्षुते। यात्राकामे रुजां नाशे सहस्रं वा समापयेत्।। १३।।
आदावभ्यर्च्य देवेशं शङ्करं लोकशङ्करम्। गर्भागारं जलैर्गाङ्गै: क्षालयेच्चन्दनान्वितै:।। १४।।
दशाङ्गैर्धूपयेद् धूपै: स्नपयेच्छङ्करं तत:। पञ्चामृतेन मन्त्रेण सपुष्पै: साक्षतै: सह।। १५।।
पयो दधि घृतं गव्यं शर्करा च शुभं मधु। गायत्र्या शर्कराशुद्धजलस्नानं तत: परम्।। १६।।
तैलाभ्यङ्ग: शुभ: शम्भो: सर्वकार्येषु चोत्तम:। यथाविधि विधातव्य: सर्वक्लेशनिवारक:।। १७।।
चन्दनेन सुगन्धेन कुर्याद् देवस्य लेपनम्। स्थावरे पाणिना कार्यो जङ्गमे सकनिष्ठकम्।। १८।।
तत: पुष्पैर्विधातव्या पूजा देवस्य शूलिन:। कल्पोद्भवैर्यथोद्दिष्टैर्यथा स्यात् सुमनोहरम्।। १९।।
दशाङ्गैर्धूपयेत् पश्चाद् दीपैर्नीराजयेत् तत:। दीपिकाभिश्च भोज्यैस्तु नैवेद्यै: परितोषयेत्।। २०।।
ताम्बूलमर्पयेत् साङ्गं प्रीत्या देवस्य शूलिन:। न्यस्तबीजाक्षरो मन्त्री जपेत् सञ्चिन्त्य शङ्करम्।।२१।।
यावन्नो जृम्भणं निद्रा शरीरस्यावमर्दनम्। स्थीयते मन्त्रिणा तावदेवं स्याज्जप उत्तम:।। २२।।
भूतशुद्धिं पुरा कृत्वा ततो जयमुदीरयेत्।..।।

प्रणवव्याहृतिसहितत्र्यम्बकं यजामहे इति ऋक् मृतसञ्जीविनीविद्या, महामृत्युञ्जयबीजसम्पुटऋ(यु)क्, त्र्यम्बकमिति मन्त्रस्यायमर्थ:—त्रयाणां ब्रह्मविष्णुरुद्राणां पितरं यजामहे, इति शिष्यसहितो वसिष्ठोऽब्रवीत् इति। किं विशिष्टमित्यत्राह—सुगन्धिं प्रसारितपुण्यकीर्तिम्। किं विशिष्ठं पुष्टिवर्धनं जगद्बीजमुरुशक्तिमित्यर्थ:। कस्य वर्धकमणिमादिशक्तिवर्धकम्, अतस्तत्प्रसादादेव मृत्योर्मरणात् संसाराद्वा मुक्षीय वियुज्येय। यथा बन्धनात् उर्वारुकं पक्वकर्कटीफलं मुच्यते तद्वन्मां मरणात् संसाराद्वा मोचय। किं मर्यादीकृतय आअमृतात् सायुज्यान्तं मोक्षपदपर्यन्तमित्यर्थ: इति।। अथ प्रयोग:— तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, वसिष्ठऋषये नम: शिरसि, अनुष्टुपुछन्दसे नमो मुखे, महामृत्युञ्जयाय देवतायै नमो हृदि, देवप्रणवप्रासादबीजाय नमो गुह्ये, देवीप्रणवमायाबीजशक्तये नमो जान्वो:, ॐकीलकाय नम: पादयो:, अभीष्टसिद्धये विनियोग: सर्वाङ्गेषु। ततो मूलमन्त्रेण करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यस्य, मूलमन्त्रेण व्यापकं कृत्वा, व्याहृत्यादिमन्त्रपादचतुष्टयं करयोरङ्गुष्ठादिकनिष्ठान्तमङ्गुलिषु विन्यस्य,

त्र्यम्बकं सर्वज्ञाय ह्रां हृदयाय नमः। यजामहे नित्यतृप्ताय ह्रीं शिरसे स्वाहा। सुगन्धिं पुष्टिवर्धनं अनादिबोधाय ह्रूं शिखायै वषट्। उर्वारुकमिव बन्धनात् वह्निनेत्रवज्रिणे वज्रहस्ताय स्वतन्त्राय ह्रैं कवचाय हुं। मृत्योर्मुक्षीय नित्यमलुप्तशक्तये ह्रौं नेत्रत्रयाय वौषट्। मामृतात् अचिन्त्यानन्तशक्तये ह्रः अस्त्राय फट्। ततो मूलेन व्यापकं कृत्वा देहाङ्गन्यासमारभेत् ओंत्र्यं त्र्यक्षेशाय त्रिनेत्राशक्तिसहिताय नमः शिखायां। ओंवं बालार्कतेजसे बलप्रभेदिनीशक्तिसहिताय नमः। शिरसि। ओंकं कालान्तकेशाय कल्याणीशक्तिसहिताय नमः ललाटे। ओंयं विघ्नेशाय यज्ञरूपाशक्तिसहिताय नमः भ्रुवोः। ओजां जालन्धरेशाय ज्वालामुखीशक्तिसहिताय नमः नेत्रयोः। ओंमं महादेवेशाय महाशक्तिसहिताय नमः श्रोत्रयोः। ओंहें हाकिनीशाय हैमवतीशक्तिसहिताय नमः नासिकायां। ओंसुं सुगन्धीशाय सुगन्धिशक्तिसहिताय नमः गण्डयोः। ओंगं गन्धेशाय गम्भीराशक्तिसहिताय नमः ऊर्ध्वोष्ठे। ओंधिं महीशाय धीराशक्तिसहिताय नमः अधरोष्ठे। ओंपुं पुण्डरीकाक्षेशाय पूर्णाशक्तिसहिताय नमः ऊर्ध्वदन्तेषु। ओंष्टिं द्व[1]ष्टे(? अधिष्ठे)शाय अधिष्ठानीशक्तिसहिताय नमः अधोदन्तेषु। ओंवं वरिष्ठेशाय वरेण्याशक्तिसहिताय नमः हन्वोः। ओंर्धं धर्मेशाय धर्मशक्तिसहिताय नमः चिबुके। ओंनं नन्दीशाय नन्दिनीशक्तिसहिताय नमः वक्त्रे। ओंउं ऋद्धीशाय उमाशक्तिसहिताय नमः कण्ठे। ओर्वां वरुणेशाय वामाशक्तिसहिताय नमः स्कन्धयोः। ओंरुं रुद्रेशाय रूपवतीशक्तिसहिताय नमः बाह्वोः। ओंकं कान्तेशाय कान्तिशक्तिसहिताय नमः हृदये। ओंमिं मीडुष्टमेशाय शिवाशक्तिसहिताय नमः वक्षसि। ओंवं वेदेशाय वेदगर्भशक्तिसहिताय नमः स्तनयोः। ओंवं बन्धिनीशाय बन्धिनीशक्तिसहिताय नमः हृदये। ओंधं धन्वीशाय धनुष्मतीशक्तिसहिताय नमः नाभौ। ओंनात् नार्के(के)श्वराय पुष्टिं[2]शक्तिसहिताय नमः कट्यां। ओमृं मृत्युञ्जयेशाय मृत्युनाशिनीशक्तिसहिताय नमः गुह्ये। ओंत्यों त्यंत(नित्ये)शाय नित्याशक्तिसहिताय नमः पायौ। ओंर्मुं मुक्तीशाय मुकुन्दाशक्तिसहिताय नमः पार्श्वयोः। ओंक्षीं क्षितीशाय क्षेमङ्करीशक्तिसहिताय नमः ऊर्वोः। ओंयं योगीशाय मन्त्रभेदिनीशक्तिसहिताय नमः गुल्फे। ओंमां मन्त्रेशाय मन्त्रप्रभेदिनीशक्तिसहिताय नमः पादतलयोः। ओंमृं अमृतेशाय अमरशक्तिसहिताय नमः पादोर्ध्वे। ओतात् तन्वीशाय तन्वीशक्तिसहिताय नमः पादयोः। इति वर्णन्यासः।। ओंत्र्यम्बकं त्रिपुरान्तकेशाय त्रैलोक्यशक्तिसहिताय नमः शिरसि। ओंयजां यज्ञवतीशाय सुगन्धाशक्तिसहिताय नमः ललाटे। ओंमहें महत्तत्त्वेशाय मायाशक्तिसहिताय नमः श्रोत्रयोः। ओंसुगन्धि सुगन्धीशाय सुगन्धिशक्तिसहिताय नमः नासिकायां ओंपुष्टिं पुरुषेशाय पुरन्दरीशक्तिसहिताय नमः वदने। ओंवर्धनं वरेशाय वशङ्करीशक्तिसहिताय नमः कण्ठे। ओंउर्वां उमापतीशाय ऊर्ध्वरेखाशक्तिसहिताय नमः हृदये। ओंरुकं रूपवतीशाय रुक्मवतीशक्तिसहिताय नमः कट्यां। ओमिवं मित्रेशाय मित्रवतीशक्तिसहिताय नमः कट्यां। ओंबन्धनात् बालचन्द्रमौलीशाय बर्बरीशक्तिसहिताय नमः गुह्ये। ओंमृत्योः मन्त्रेशाय मन्त्रवतीशक्तिसहिताय नमः ऊर्वोः। ओंमुक्षीय मुक्तिकरीशाय मुक्तिकरीशक्तिसहिताय नमः जान्वोः। ओंमा महाकालेशाय महाशक्तिसहिताय नमः जङ्घयोः। ओंअमृतात् अमृतेशाय अमृतवतीशक्तिसहिताय नमः आधारे। इति पदन्यासः।। ओंत्र्यम्बकं भवेशाय भूतशक्तिसहिताय नमः आधारे। ओंयजामहे शर्वेशाय शर्वाणीशक्तिसहिताय नमः स्वाधिष्ठाने। ओंसुगन्धिं रुद्रेशाय विरूपाशक्तिसहिताय नमः मणिपूरे। ओंपुष्टिवर्धनं पुरुषवरदेशाय वंशवर्धिनीशक्तिसहिताय नमः अनाहते। ओंउर्वारुकमिव उग्रेशाय उग्रशक्तिसहिताय नमः विशुद्धौ। ओंबन्धनात् महादेवेशाय

---

[1]. 'दृष्टेशाय' क. पाठः। [2]. ' युधि' ग. पाठः।

मानवतीशक्तिसहिताय नम: आज्ञायां। ओंमृत्योर्मुक्षीय भीमेशाय भद्रकालीशक्तिसहिताय नम: ब्रह्मरन्ध्रे। ओंमामृतात् ईशानेशाय ईश्वरीशक्तिसहिताय नम: सहस्रदले। इति वाक्यन्यास:।। ओंत्र्यम्बकं यजामहे त्र्यम्बकेशाय त्र्यम्बिकाशक्तिसहिताय नम: पूर्ववक्त्रे। ओंसुगन्धिं पुष्टिवर्धनं मृत्युञ्जयेशाय वामाशक्तिसहिताय नम: दक्षिणवक्त्रे। ओंउर्वारुकमिव बन्धनात् महादेवेशाय भीमाशक्तिसहिताय नम: पश्चिमवक्त्रे। ओंमृत्योर्मुक्षीय मामृतात् सञ्जीवनीशाय द्रौपदीशक्तिसहिताय नम: उत्तरवक्त्रे। इति चरणन्यास:।। ओंत्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् महेशाय गौरीशक्तिसहिताय नम: दक्षिणपादे। ओंउर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् शाम्भवेशाय व्यापिनीशक्तिसहिताय नम: वामपादे। इत्यर्धऋग्न्यास:।। ओंत्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।। सर्वाख्येशाय अनाख्याशक्तिसहिताय नम: सर्वाङ्गे। इति ऋग्न्यास:।। एवं षड्विधन्यास:।। देहाङ्गन्यासं कृत्वा षडङ्गन्यासमारभेत्– ओंनमो भगवते त्र्यम्बकाय शूलपाणये नम: स्वाहा ह्रां हृदयाय नम:। ओं नमो भगवते रुद्राय अमृतमूर्तये मां जीवय ह्रीं शिरसे स्वाहा। ओंनमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा ह्रूं शिखायै वषट्। ओंनमो भगवते रुद्राय त्रिपुरान्तकाय खट्वाङ्गपाणये ह्रैं कवचाय हुं। ओंनमो भगवते रुद्राय त्रिलोचनाय ऋग्यजु:सामाथर्वणमूर्तये ह्रौं नेत्रत्रयाय वौषट्। ओंनमो भगवते मृत्युञ्जयायाग्नित्रयाय ज्वलस्व ज्वलस्व मां रक्ष रक्ष रोगान् विध्वंसय विध्वंसय दुष्टान्निवारय निवारय अघोरास्त्राय फट् ह्र: अस्त्राय फट्।। ओंत्र्यम्बकाय त्रिनेत्राय उमाकालाग्निरुद्राय नम: पादयो:। ओंत्र्यम्बकाय त्रिनेत्राय कालाग्निमूर्तये नम: जङ्घयो:। ओंत्र्यम्बकाय त्रिनेत्राय उमाधारिणे नम: ऊर्वो:। ओंत्र्यम्बकाय त्रिनेत्राय कामविध्वंसिने नम: गुह्ये। ओंत्र्यम्बकाय त्रिनेत्राय पञ्चवक्त्राय नम: वक्त्रे। ओंत्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय नम: गले। ओंत्र्यम्बकाय त्रिनेत्राय चन्द्रार्कवह्निनेत्राय नम: नेत्रयो:। ओंत्र्यम्बकाय त्रिनेत्राय सर्वाभरण– भूषितायामृतप्लुताय नम: मूर्धादिपादान्तम्।। ओंसदाशिवाय नम: शिखायां। ईशानाय० मूर्ध्नि। तत्पुरुषाय० मुखे। अघोराय० हृदि। वामदेवाय० ऊरुद्वये। सद्योजाताय नम: पादयो:। इति।।

एवं न्यासविधिं कृत्वा शिवो भूत्वा शिवं यजेत्। न्यासमूलमिदं सर्वं न्यासं पूर्वं समाचरेत्।। १।।
न्यासेन रहितं कर्म चार्धं गृह्णन्ति राक्षसा:। तस्मात् सर्वप्रयत्नेन न्यासकर्म समाचरेत्।। २।।

ध्यानम्। ततश्चन्द्रमण्डलोपरि बद्धपद्मासनं चन्द्रवर्णं स्रवदमृतचन्द्रकलाधरं योगमुद्राबद्धाधरहस्तद्वयं धृतामृतपूर्णकलशोत्तरकरद्वयं सोमसूर्याग्नित्रिलोचनं बद्धपिङ्गलजटाजूटं नागयज्ञोपवीतिनं नागाभरणभूषणं भक्तानुकम्पिनं भस्मानुलेपिनं श्रीरुद्रं ध्यायेत्।

शुद्धस्फुटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्। गङ्गाधरं जटाजूटखण्डेन्दुमण्डितं तथा।। १।।
कपालमालिनं सौम्यं योगासनगतस्थितिम्। व्याघ्रचर्माम्बरधरं बद्धनागेन्द्रभूषणम्।। २।।
वामे करे त्वभयदं दक्षिणे वरदं तथा। कपालकुण्डलं सव्ये त्रिशूलं दक्षिणे करे।। ३।।
ध्यायेन्मृत्युञ्जयं देवं मृत्युरोगविनाशनम्। एवं ध्यात्वा द्विज: सम्यक् त्र्यम्बकजपमारभेत्।। ४।।

इति। ध्यानान्तरम्–

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षबलये द्वाभ्यां वहन्तं परम्।

अङ्कन्यस्तकरद्वयामृतघटं कैलाससंस्थं शिवं
[1]स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे।। ५।।

गौरीं चतुर्भजां चण्डीं त्रिनेत्रां मुकुटोज्ज्वलाम्। पद्मदर्पणहस्तां च वरदाभयहस्तकाम्।। ६।।
दिव्यवस्त्रपरीधानां दिव्यालङ्कारभूषिताम्। प्रसन्नवदनां ध्यात्वा शिवोत्सङ्गे तु वामतः।। ७।।

एवं ध्यात्वा स्नेहपूर्णेन मनसा पूर्वोक्तमार्गेणार्चनं कृत्वा शरणं व्रजेत्।

त्रियम्बक महादेव पाहि मां शरणागतम्। जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः।। ८।।
तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड। इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बकम्।। ९।।
अङ्गुल्यग्राणि मूले तु कृत्वाङ्गुष्ठे निपीडयेत्। मुष्ठिमुद्रा शिवस्योक्ता सैव शान्तिप्रदायिनी।।१०।।

एष ते रुद्र भाग'' इति लिङ्गमुद्रां प्रदर्शयेत्।

श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः। मुखे त्वन्नाद्यकामस्तु ग्रीवायां रोगनाशने।। ११।।
हृदये सर्वकामस्तु नाभौ ज्ञाने प्रदर्शयेत्। प्रजाकामस्तु गुह्ये वै पशुकामस्तु गुल्फयोः।। १२।।
जानुभ्यां ग्रामकामस्तु राष्ट्रकामस्तु पादयोः। वशीकरणकामस्तु वामहस्ते प्रदर्शयेत्।। १३।।
पापक्षयेऽभिचारे वा व्याधिरोगविनाशने। बहिः शरीरात् कुर्वीत शिवस्याग्रे तु संस्पृशत्।। १४।।

इति।। अथ पूजा—

त्रिभिर्व्याहृतिभिः कुर्यान्निर्माल्यस्य विसर्जनम्। मलस्नानं ततः कुर्यात् पात्रे देवं निधाय च।। १।।
गन्धमाल्यैः सुगन्धैश्च चात्मानं चार्चयेद् बुधः। आवाहनासनं पाद्यमर्घ्यमाचमनीयकम् ।। २।।
स्नानं वस्त्रोपवीतं च गन्धपुष्पं यथाक्रमम्। सहस्रशीर्ष इत्यादिऋग्भिस्तु दशभिर्यजेत्।। ३।।
ततः पीठं समाराध्य गन्धपुष्पाक्षतैः शुभैः। आधारशक्तिं कूर्मं च कैलासं मन्दराचलम्।। ४।।
पृथिवीवेदिकां चैव सिंहासनस्य पादुकाम्। चतुर्थ्यन्तनमोन्तं च पीठमध्ये समर्चयेत्।। ५।।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम्। हुताशनादिकोणेषु ततः प्रागादिषु क्रमात्।। ६।।
धर्मादींश्च यजेत् तत्र नञ्पूर्वांश्च यथाक्रमम्। सिंहासनस्य कोणेषु वह्न्यादिषु यथाक्रमम्।। ७।।
गुणत्रयं तथा विद्याश्चतुर्थ्यन्तं नमोन्तकैः। अतः परं प्रवक्ष्यामि मण्डलस्य तु लक्षणम्।। ८।।
अत्रादौ मण्डलं कार्यं मनोज्ञैः शालितण्डुलैः। पूर्वमष्टादश रेखा उत्तरेऽष्टादश तथा।। ९।।
एकेनोना च नवतिः कोष्ठकाणां शतद्वयम्। आवाह्य देवतास्तत्र त्र्यम्बकाद्याश्च शक्तिकाः।। १०।।
रमा माया प्रभा ज्योत्स्ना पूर्णा पूर्णामृता[2] सुधा। विश्वा विद्या प्रभा[3] प्रह्वा सारा सन्ध्या शिवा निशा।।११।।
ओघा[4] प्रज्ञा प्रभा मेधा कान्तिः शान्तिर्धृतिः स्मृतिः[5]। परा जया ह्यविघ्नी[6] च पद्मा क्षान्तिस्तथैव च।। १२।।
[7]अघोरा अजया माला कलास्त्रिंशत् प्रकीर्तिताः। कलाज्ञानविहीनानां पूजनं निष्फलं भवेत्।।१३।।

---

[1]. 'स्पष्टाम्भोजगतं च चन्द्र' ख. पाठः। [2]. 'पूर्णोषा पूरिणी' ख. पाठः। [3]. 'सिता' ख. पाठः। [4]. 'आर्या' ख. पाठः।
[5]. 'मतिः' ख. पाठः। [6]. 'धरोमा पाविनी चैव' ख. पाठः। [7]. 'अमोघा' ख. पाठः।

प्रणवादिनमोन्तैश्च चतुर्थीपदमध्यगाः। सर्वत्र प्रजपेन्मन्त्रं ततः पीठं प्रपूजयेत्॥ १४॥
क्षारक्षीरदधिसर्पिःस्वादोकसुरेक्षवः। प्रणवादिनमोऽन्ताश्च सागरांस्तत्र पूजयेत् ॥१५॥
जम्बुद्वीपं ततः प्लक्षं शाल्मलिं कुशसंज्ञकम्। क्रौञ्चं शाकं पुष्करं च द्वीपानि तु ततो यजेत्।॥१६॥
भूर्लोकोऽथ भुवर्लोको स्वर्गलोको महर्जनः। तपो लोकः सत्यलोकः क्रमात्तत्रैव पूजयेत्॥ १७॥
अतलं वितलं चैव तलातलमतः परम्। रसातलं च पातालं सुतलं च महातलम्॥ १८॥
आत्मतत्त्वान्तरात्मा परमात्मा ज्ञानमेव च। चतुर्थ्यन्त[1]प्रयोगेण नमोन्तेन प्रपूजयेत् ॥१९॥
गङ्गा च यमुना चैव गोदावरी सरस्वती। नर्मदा सिन्धुः कावेरी नमोन्तेन प्रपूजयेत्॥ २०॥
संवत्सराश्च ऋतवो मासाः पक्षा दिनानि च। प्रणवादिनमोन्तेन ततः शक्तीः प्रपूजयेत्॥ २१॥
वामा ज्येष्ठा तथा श्रेष्ठा रौद्री काली तथैव च। कलविकरणी चैव बलविकरणी तथा॥ २२॥
बलप्रथमनी चैव सर्वभूतदमन्यथ। मनोन्मनी भगवती कालरुद्रात्मने नमः॥ २३॥
उमा चण्डेश्वरो नन्दी महाकालस्तथैव च। वृषभो भृङ्गिरीटिश्च स्कन्दश्चैव क्रमाद्यजेत्॥ २४॥
इन्द्रादिलोकपालांश्च पूजयेत् तदनन्तरम्। सरस्वतीं च दुर्गां च गणेशं क्षेत्रपालकम्॥ २५॥
तत्तद्बीजेन सम्पूज्य वसूनष्टौ तथा यजेत्। रुद्रानेकादश चैव द्वादशादित्यकान् यजेत्॥ २६॥
भैरवाष्टौ ततः पूज्या ब्राह्म्यादींश्च ततो यजेत्। ध्रुवोऽध्वरस्तथा सोम आपश्चैवानिलोऽनलः॥२७॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः। वीरभद्रश्च शम्भुश्च गिरिशोऽप्यज एकपात्॥ २८॥
अहिर्बुध्न्यः पिनाकी च भुवनाधीश्वरस्तथा। दिशांपतिः पशुपतिः स्थाणुर्भर्ग इति स्मृतः॥ २९॥
आदित्यः सविता सूर्यः पूषा मित्रस्तथैव च। तमोघ्नश्च हिमघ्नश्च अरुणो भानुरेव च॥ ३०॥
मार्तण्डो भास्करश्चेति तथैव च दिवाकरः। असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तभैरवः॥ ३१॥
कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ ३२॥
वाराहीन्द्राणी चामुण्डा महालक्ष्म्योऽष्ट मातरः।.......................................॥

इति। ततस्त्र्यम्बकमन्त्रेण पञ्चामृतस्नानादिषोडशोपचारपूजां कुर्यात्। प्लुतप्रणवयोगेन स्नपयेत्। आवाहनस्थापनसन्निधानसन्निरोधनसम्मुखीकरणसकलीकरणावगुण्ठनामृतीकरणपरमीकरणयोनिलिङ्गमहासरस्वतीमुद्राः प्रदर्शयेत्। तत आवणपूजां कुर्यात्। तत्र न्यासोक्तदेवता अष्टाविंशत्युत्तरशतं शक्तयः पूज्याः।

सद्योजाताष्टका ज्ञेया वामदेवास्त्रयोदश। अघोरस्य कला ह्यष्टौ पुरुषस्य चतुष्कलाः॥ ३३॥
ईशानस्य कलाः पञ्च क्रमेण परिकीर्तिताः। अष्टात्रिंशत् कला ज्ञेयाः पूजनीयाः प्रकीर्तिताः॥३४॥
शशिनी चाङ्गदा हृष्टा मरीचिर्ज्वालिनी तथा। ईशानस्य कलाः पञ्च नीराजनपरानुगाः॥ ३५॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च। पुरुषस्य कला ह्येताश्चतस्रः परिकीर्तिताः॥ ३६॥
तमा मोहा क्षमा निद्रा व्याधिर्मृत्युः क्षुधा तृषा। अघोरस्य कला ह्येताश्चाष्ट संज्ञोपलक्षिताः॥३७॥

---

[1] 'चतुर्थी च प्रयोगेण' क. ग. पाठः।

रजा रक्षा रतिर्बाह्या कामसञ्जीवनी तथा। कृपा वृद्धि: क्षमा धात्री भूषणी मोहिनी तथा।। ३८।।
वामदेवकला ह्येता: कीर्तिताश्च त्रयोदश। ऋद्धि: सिद्धिर्लघुर्लक्ष्मीर्मेधा कान्ति: स्वधा प्रजा।।३९।।
सद्योजातकला ह्येता ह्यष्ट संज्ञोपलक्षिता:। शुद्धस्फटिकसङ्काशं निर्मलानन्दसंज्ञितम्।। ४०।।
तत्त्वं निधनकं चैव ईशानोर्ध्वमुखं स्मरेत्।...।।

''ईशान: सर्वविद्यानां'' इति मन्त्रेणेशानस्योर्ध्वमुखं पूजयेत्।

पद्मरागसमाभासं जपाबालार्कसन्निभम्। वक्त्रं च संप्रियं[1] स्निग्धं पूर्वं तत्पुरुषं स्मरेत्।। ४१।।

''तत्पुरुषाय'' इति मन्त्रेण तत्पुरुषस्य पूर्ववक्त्रं पूजयेत्।

नीलाभं च समस्तेज्यं करालं विकृताननम्। दक्षिणस्यां दिशि ध्यातमघोरस्य मुखं स्मरेत्।। ४२।।

''अघोरेभ्य'' इति मन्त्रेणाघोरस्य दक्षिणमुखं पूजयेत्।

नित्यं च हेमवर्णाभं दिव्यरूपं सुलक्षणम्। कामिन्य[2]र्धाङ्गसंयुक्तं वक्त्रं वामोत्तरं यजेत्।। ४३।।

''वामदेवाय'' इति मन्त्रेण वामदेवस्योत्तरं मुखं पूजयेत्।

सुश्वेतं शङ्खवर्णाभं नीलकण्ठस्य शोभितम्। गङ्गार्धचन्द्रमौलिस्थं सद्योजातं तु पश्चिमम्।। ४४।।

''सद्योजात''मिति मन्त्रेण सद्योजातस्य पश्चिमवक्त्रं पूजयेत्।

अथाङ्गपूजा—त्र्यम्बकाय त्रिनेत्राय कालाग्निरुद्राय नम: पादौ पूजयामि। त्र्यम्बकाय त्रिनेत्राय कालाग्निमूर्तये नम: जङ्घे पूजयामि। त्र्यम्बकाय त्रिनेत्राय उमाङ्गधारिणे नम: ऊरू०। त्र्यम्बकाय त्रिनेत्राय कामविध्वंसिने नम: गुह्यं०। त्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय नम: कण्ठं०। त्र्यम्बकाय त्रिनेत्राय पञ्चवक्त्राय नम: वक्त्रं०। त्र्यम्बकाय त्रिनेत्राय चन्द्रार्कवह्निनेत्राय नमो नेत्रं०। त्र्यम्बकाय त्रिनेत्रायामृतप्लुताय दिव्यशरीराय नम: सर्वाङ्गं पूजयामि। ततो मूलमन्त्रेण गन्धपुष्पधूपदीपनैवेद्याचमनीयान्तं कर्म समापयेदिति। ततो मूलमन्त्रं जप्त्वा विसर्जयेत्। पुरश्चरणं तु। तदुक्तम्—

जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रिय: । जुहुयादयुतं द्रव्यैर्दशभिर्घृतसम्प्लुतै: ।। १।।
बिल्वं पलाशं खदिरं वटं च तिलसर्षपान्। दौग्धं दुग्धं दधि पुनदूर्वान्तानि विदु: क्रमात्।। २।।
पञ्चाक्षरोदिते पीठे पूजयेद् वृषभध्वजम्। मूर्तिं मूलेन सङ्कल्प्य वक्ष्यमाणेन वर्त्मना।। ३।।
पूर्वमङ्गानि सम्पूज्य पश्चान्मूर्ती: प्रपूजयेत् । अर्केन्दुवसुधातोयवह्नीरवियदात्मन: ।। ४।।
रमा राका प्रभा ज्योत्स्ना पूर्णोमा पूषणी सुधा। अष्टाविमा: क्रमात् पूज्यास्तृतीयावरणे तत:।।५।।
विश्वा विद्या सिता प्रह्वा सारा सन्ध्या शिवा निशा। चतुर्थावरणे पूज्या: शक्तयोऽष्टौ क्रमादिमा:।।६।।
आर्या प्रज्ञा प्रभा मेधा कान्ति: शान्तिर्धृतिर्मति:। पञ्चमावरणे पूज्या: क्रमादेतास्तत: परम्।। ७।।
एवं कृते प्रयोगार्हो जायतेऽयं महामनु:।...।।

इति।। अथ प्रयोगा उच्यन्ते—

सर्वेषां चैव मन्त्राणां पूर्वसेवा कृता तथा। लक्षैकेन सुसिध्यन्ति दशांशेनैव होमयेत्।। १।।

---

१. 'सुश्रियं' ग. पाठ:। २. 'कामिन्योर्ध्वग' क. ग. पाठ:।

पूर्वसेवार्थमयुतं गुग्गुलं घृतसम्प्लुतम्। भूतशुद्धिं पुरा कृत्वा न्यासजालमतः परम्।। २।।

शुक्लाम्बरधरः शुक्लः शुक्लमाल्यानुलेपनः सपत्नीकः सर्त्विक् साचार्यो यजमानो मङ्गलघोषेण सम्पूर्णकलशसहितः शकुनादिमन्त्रघोषेण कुण्डस्थदेशं स्थण्डिलदेशं वा प्राप्य, तत्रोपविश्य प्राणानायम्य, अद्येत्यादि देशकालौ सङ्कीर्त्य, मया कृतस्य कारितस्य वा जपस्य सम्पूर्णफलावाप्त्यर्थं तद्दशांशहोमममुकद्रव्येण करिष्ये। तदङ्गतया गणेशपूजनं मातृकापूजनं नान्दीमुखश्राद्धं च करिष्ये इति सङ्कल्प्य, संस्कृत्य ग्रहवेद्यां ग्रहस्थापनं कृत्वा, ग्रहाधिदेवताः प्रत्यधिदेवता गणपतिदुर्गाक्षेत्रपालकान् इन्द्राद्यष्टदिक्पालांश्च तत्तन्मन्त्रैः स्थापयित्वा, तत्रैकं मध्ये कलशं संस्थाप्य तन्मुखे वस्त्रोपरि महामृत्युञ्जयमन्त्रं संस्थाप्य, मन्त्रवर्णसंख्याकमाषपरिमितां प्रतिमां तदुपरि संस्थाप्य तां शोधयेत्। प्रथमं देवं प्रणिपत्यैवं प्रार्थयेत्। ''स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते। शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्यां सहस्व ताम्''।। ततो न्यासपूर्वकं रुद्राभिषेकं कुर्यात्। ततोऽग्नेरुत्तारणम्। ''अग्निः सप्तिं वाजम्भरं (१०। ८०। १) इति जप्त्वा पुनः सर्वसूक्तेनाभिषेकः कार्यः। प्रथमं सप्तमृत्तिकाभिरालिप्य शुद्धोदकेन प्रक्षाल्य कोष्ठं हरिद्रावयवश्रीखण्डकचोरक-मुस्ताचूर्णेनोद्वर्त्य जलेन प्रक्षालयेत्। ''आपो हि ष्ठा''। (१०। ९। १) इति ऋग्भिरभ्यर्च्य ततः पुष्पाक्षतान् गृहीत्वा ''आ त्वा वहन्तु हरयः'' (१। १६। १) इति ध्यात्वा ''स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्। तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु''।। आवाहनादिकल्पोक्तप्रकारेण षोडशोपचारपूजां कुर्यात्।

दशक्लेशे हि संसारे प्राप्तोऽहं शरणागतः। भक्त्या समर्चयाम्यद्य सकलं चास्तु पूजनम्।। १।।
साधु वासाधु वा कर्म यद्यदाचरितं मया। तत्सर्वं भगवञ्छम्भो गृहाण विधिपूर्वकम्।। २।।
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर।। ३।।
महादेव जगन्नाथ शरणागतवत्सल। भक्त्या कृतं मया देव तत्सर्वं सफलं कुरु।। ४।।

इति प्रार्थनां कृत्वा, पुनः प्रार्थयेत्।

जय देव जगन्नाथ जय शाश्वत शङ्कर। जय सर्वसुराध्यक्ष जय सर्वसुरार्चित।। १।।
जय सर्वगुणातीत जय सर्ववरप्रद। जय नित्य निराधार जय विश्वम्भराव्यय।। २।।
जय विश्वैकवन्द्येश जय नागेन्द्रभूषण। जय गौरीपते शम्भो जय चन्द्रार्धशेखर।। ३।।
जय कोट्यर्कसङ्काश जयानन्तगुणाश्रय। जय रुद्र विरूपाक्ष जयाचिन्त्य निरञ्जन।। ४।।
जय नाथ कृपासिन्धो जय भक्तार्तिभञ्जन। जय दुस्तरसंसारसागरोत्तारण प्रभो।। ५।।
प्रसीद मम देवेश संसारार्तस्य बिभ्यतः। सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर।। ६।।
महादारिद्र्यमग्नस्य महापापहतौजसः। महाशोकनिमग्नस्य महारोगातुरस्य च।। ७।।
ऋणभारपरीतस्य दह्यमानस्य कर्मभिः।[2]ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर।। ८।।
दरिद्रः प्रार्थयेद् देवं पूजान्ते गिरिजापतिम्। अर्थार्थी[1] वापि राजा वा प्रार्थयेद्देवमीश्वरम्।। ९।।
दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः। ममास्तु नित्यमानन्दः प्रसादात्तव शङ्कर।। १०।।

---

१. 'अर्थाढ्यो' ख. पाठः। २. 'यः' ग. पाठः।

शत्रव: संक्षयं यान्तु प्रसीदन्तु मम ग्रहा:। नश्यन्तु दस्यवो राष्ट्रे जना: सन्तु निरापद:।। १२।।
दुर्भिक्षमारीसन्तापा: शमं यान्तु महीतले। वसुसस्यसमृद्धिश्च भूयात्[1] सुखमयं दिशि।। १३।।
एवमाराधयेद् देवं जपहोमार्चनादिषु। यावत् कर्म समाप्येत तावत् सन्निहतो भवेत्।। १४।।

इति। ततो होमं कुर्यात्। होमकुण्डे चतुर्दिक्षु द्वारपालान् प्रतिष्ठाप्य 'गणानां त्वा०' जातवेदसे०' क्षेत्रस्य पतिना वयं०। प्रणो देवी०' इति मन्त्रै: प्रतिष्ठाप्योपविश्य, प्राणायामपूर्वकमृष्यादिन्यासं कृत्वा, पादयो: विष्णवे नम:। हृदये ब्रह्मणे नम:। शिरसि महेश्वराय नम:। शिखायां सप्तर्षिभ्यो नम:। नासिकायां सप्तजिह्वाय नम:। श्रेत्रयो: अश्विनीदेवताभ्यां नम:। चतुषो: शशिभास्कराभ्यां नम:। जिह्वायां सरस्वत्यै नम:। वाचि बृहस्पतये नम:। दन्तेषु माधवाय नम:। हृदये हृव्यवाहनाय नम:। पादयो: गन्धर्वाप्सरोभ्यो०। कण्ठे द्वादशादित्येभ्य:०। दक्षिणहस्ते एकादशरुद्रेभ्य:०। वामे अष्टवसुभ्यो०। उपकवचे द्वादशादित्येभ्य:०।। अहमेव परमात्मा। त्र्यम्बकाय त्रिपुरान्तकेशाय शूलपाणये स्वाहा हृत्। त्र्यम्बकाय त्रिनेत्राय कपर्दिने स्वाहा शिर:। त्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय स्वाहा शिखा। त्र्यम्बकाय त्रिनेत्राय सर्वसिद्धिफलप्रदाय स्वाहा कवचं। त्र्यम्बकाय त्रिनेत्राय ज्ञानमूर्तये स्वाहा नेत्रे। त्र्यम्बकाय त्रिनेत्राय ज्वल[2] ज्वल प्रज्वल २ प्रतापय स्वाहा अस्त्रं। तत: पूर्ववद् ध्यात्वा अग्निं परिसमूह्य ऋक्शाखाप्रयोगं कुर्यात्। मन्त्रहोमं कृत्वा तत: स्विष्टकृतं हुत्वा, बलिदानं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य प्राणानायम्य सङ्कल्पहोमसम्पूर्णफलावाप्त्यर्थं पूर्णाहुतिहोमं करिष्ये, समुद्रादूर्मि० मूर्धानं दिव:० पुनस्त्वादित्या० सप्त ते अग्ने० धामन्ते० एतैर्मन्त्रैर्हुत्वा आचार्याय प्रतिमां दद्यात्। तत: श्रेय:सम्पादनं कृत्वाचार्यर्त्विक्–गणपतिजपब्राह्मणेभ्यो गन्धमाल्यादिवस्त्रालङ्करणानि दत्त्वा, यथोचितदक्षिणां दत्त्वा, ब्राह्मणान् भोजयित्वा दक्षिणादिभि: सन्तोष्य विसर्जयेत्। इति होमविधि:।। अथ काम्यप्रयोगा:–

दूर्वाभयार्द्रसमिधो गोघृतेन समन्विता:। होतव्या: शान्तिके विप्र शान्तिर्येन भवेत् स्फुटा।। १।।
समिधो राजवृक्षोत्था होतव्या: स्तम्भकर्मणि। मेषीघृतेन संयुक्ता: सहदेव्या सुसिद्धिदा:।। २।।
खादिरा: मारणे प्रोक्ता: कटुतैलेन संयुता:। उत्पा(च्चा)टयेन्महीं सर्वां सशैलवनकाननाम्।। ३।।
यशश्चैव सदा होमे कुसुमैर्दाडिमोद्भवै:। अजाघृतेन देवर्षीन् वशयेत् सचराचरम्।। ४।।
वशमायान्ति ता: सर्वा: यक्षनागाङ्गनादय:। जातिनिर्मल्लिकाहोमो घृतेन सहितो भवेत्।। ५।।
साध्यानां कन्यका: सर्वा: साधकाग्रे पतन्ति च। करवीरैस्तु रक्तैस्तु योषितो वशमानयेत्।। ६।।
शतपत्रै: कृतो होम: पृथ्वीलाभं करोति च। होमाच्च पिचुमन्दैश्च मतिमाञ्जायते नर:।। ७।।
अङ्कोलपुष्पहोमेन सिद्धयोऽष्टौ भवन्ति हि। अर्कपुष्पै: सदारोग्यं मन्दारैरर्थसम्पद: ।। ८।।
तथैव पालिपुष्पैश्च राजानं गिरिकर्णकै:। नीलपुष्पैस्तथा होमे देशं च वशमानयेत्।। ९।।
ब्राह्मणास्तु वशं यान्ति वन्यै: सुक्षितिसम्भवै:। कदम्बपुष्पहोमेन यक्षिणीं वशमानयेत्।। १०।।
कुन्दपुष्पैस्तु सौभाग्यं विद्या रक्तोत्पलैर्भवेत्। बिल्वपत्रैस्तु राज्यं च चक्रवर्तित्वमम्बुजै:।। ११।।
अशोकपुष्पहोमेन सर्वशोकविनाशनम्। कर्णिकापुष्पहोमेन राज्यप्रीतिमवाप्नुयात् ।। १२।।

---

[1] '(य:)' ग. पाठ:। [2] 'ज्वलस्व' ग. पाठ:।

हरीतक्या च आरोग्यं व्याधिनाशो बिभीतकैः। चूतपुष्पफलैर्होमश्चिन्तितार्थफलप्रदः।। १३।।
जम्बूफलैश्च होमेन यशश्चाप्नोति निर्मलम्। न्यग्रोधफलहोमेन सर्वसिद्धिमवाप्नुयात्।। १४।।
दाडिमीफलहोमेन दैत्यकन्यां समानयेत्। कूष्माण्डफलहोमेन धान्यसिद्धिमवाप्नुयात्।। १५।।
बंदरीफलहोमेन रत्नलाभो भवेद् ध्रुवम्। पिचुमन्दफलैः पुष्पैर्विद्वेषाकर्षणं परम् ।। १६।।
द्राक्षाफलैः सदावश्यं स्थावरं जङ्गमं तथा। नारिकेलफलैर्होमे वृद्धिमाप्नोति चाव्ययाम्।। १७।।
कुटजीफलहोमेन वेतालीसिद्धिमाप्नुयात्। चम्पकैश्च कृते होमे सिद्ध्यन्तेऽप्सरसां गणाः।। १८।।
तिलैश्च शान्तिकं कुर्यान्मधुघृतसमन्वितम्। राजिकालवणैरेव वश्याकर्षणकं परम् ।। १९।।
शिलातालकहोमेन मारयेद्रिपुजं कुलम्। बिल्वमूलकहोमेन शक्रतुल्यो भवेन्नरः।। २०।।
प्रियङ्गुकदलीपुष्पैः सर्वसत्त्वं वशं नयेत्। दूर्वाङ्कुरसमिद्भिस्तु अमृताखण्डसंयुतम्।। २१।।
घृतमधुसुसंयुक्तं महामृत्युविनाशनम्। अयुतं जुहुयाद्बिल्वसमिद्भिः सम्पदे सुधीः।। २२।।
जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे। स्वादिरैरयुतं हुत्वा कान्तिं पुष्टिमवाप्नुयात् ।। २३।।
वटवृक्षस्य समिधो जुहुयादयुतावधि। धनधान्यसमृद्धः स्यादचिरेणैव साधकः ।। २४।।
तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते। सिद्धार्थैरयुतं हुत्वा शत्रून् विजयते नृपः।। २५।।
अनेनैव विधानेन नश्येन्मृत्युरकालतः। पायसेन कृतो होमो रक्षाश्रीकीर्तिदायकः[1]।। २६।।
शुद्धान्नपशुदुग्धेन हुत्वा कृत्यां विनाशयेत्। अयमेवं मनोर्होमः शान्तिश्रीसम्पदावहः।। २७।।
दधिदुग्धेन सम्पातं कुर्याद्विद्वेषणे मतम्। प्रत्यहं जुहुयान्मन्त्री दूर्वा अष्टोत्तरं शतम्।। २८।।
आमयानखिलाञ्जित्वा दीर्घमायुरवाप्नुयात्। जुहुयाज्जन्मदिवसे पायसान्नैर्घृतान्वितैः।। २९।।
इष्टामनिन्दितां लक्ष्मीमारोग्यमतुलं यशः । गव्यदुग्धघृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी ।। ३०।।
सविंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः। आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः।। ३१।।
शा[2]ल्मलीसमिधः सर्पिः पयोन्नं त्रिशतं सुधीः[3]। जुहुयाद् ब्राह्मणानन्ते भोजयेन्मधुरान्वितम्।।३२।।
प्रीणयेद् धनधान्याद्यैरात्मनो गुरुमादरात्। अनामयमवाप्नोति दीर्घमायुः श्रिया सह।। ३३।।
सघृतेन पयोन्नेन हुत्वा पर्वणि पर्वणि। राज्यश्रियमवाप्नोति षण्मासान्नात्र संशयः।। ३४।।
लाजैर्विशुद्धैर्जुहुयात् कन्यायाः[4] सुवराप्तये। क्षीरद्रुमसमिद्धोमाद् ब्राह्मणादीन् वशं नयेत्।। ३५।।
स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम्। आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्।। ३६।।
अनेन मनुना सर्वं साधयेदिष्टमात्मनः। ....।।

इति मृत्युञ्जयप्रयोगः।। अथ श्रीविद्यावरणाङ्गत्वेन गायत्रीविधानम्। तत्र शारदातिलके– (प० २१)

अथो वक्ष्यामि गायत्रीं तत्त्वरूपां त्रयीमयीम्। यया प्रकाश्यते ब्रह्म सच्चिदानन्दलक्षणम्।। १।।

---

[1] 'कान्तिदः' ख. पाठः। [2] 'काश्मरी' ख. पाठः। [3] 'पृथक्' ख. पाठः। [4] 'कन्याप्त्यै सा वराप्तये' ख. पाठः।

प्रणवाद्या व्याहृतयः सप्त स्युस्तत्पदादिकाः। चतुर्विंशत्यक्षरात्मा गायत्री शिरसान्विता।। २।।
सर्ववेदोद्धृतः सारो मन्त्रोऽयं समुदाहृतः। ब्रह्मा देव्यादिगायत्री परमात्मा समीरितः।। ३।।
ऋष्याद्याः प्रणवस्यैते मुनिभिः परिकीर्तिताः। प्राग्वत् कृत्वा षडङ्गानि ध्यायेद्विष्णुं तथा ततः।।४।।

तथा तत्प्रकरणोक्तप्रकारेण।

जमदग्निभरद्वाजभृगुगौतमकश्यपान् । विश्वामित्रवसिष्ठाख्यौ व्याहृतीनामृषीन् विदुः ।। ५।।
गायत्र्युष्णिगथानुष्टुब् बृहतीपङ्क्तयः पुनः। त्रिष्टुब्जगत्यौ छन्दांसि कथितानि मनीषिभिः।। ६।।
सप्तार्चिरनिलः सूर्यो वाक्पतिर्वरुणो वृषा। विश्वदेवाः क्रमादासां देवताः परिकीर्तिताः।। ७।।
भूराद्याभिर्व्याहृतिभिः षड्भिः कुर्यात् षडङ्गकम्। व्याहृतीः सप्त भूराद्याः हृन्मुखांसोरुयुग्मके।।८।।
जठरे न्यस्य मन्त्रज्ञो ध्ययेत्ता व्याहृतीस्ततः। स्थानानि सप्त लोकाः स्युः सर्वासां स्वस्वसंज्ञकाः।।९।।
स्वे स्वे च वर्णतरवो रूपयौवनसंयुताः। क्षौमवस्त्रपरीधानाः सर्वाभरणभूषिताः।। १०।।
उन्निद्राम्भोजवदनाः प्रभामण्डलमण्डिताः। सितोपवीतहृदयाः सपवित्रचतुष्कराः।। ११।।
अभयाक्षस्रगप्यत्र(?)वरहस्तसरोरुहाः। एवं होमजपारम्भे ध्येया व्याहृतयो द्विजैः।। १२।।
गायत्र्या मुनिराख्यातो विश्वामित्रो महाद्युतिः। गायत्री छन्द इत्युक्तं देवता सविता स्मृतः।। १३।।
एतान् विन्यस्य ऋष्यादीन् गायत्र्यर्णांस्तनौ न्यसेत्। पत्सन्धिषु ध्वजे नाभौ हृत्कण्ठभुजसन्धिषु।।१४।।
आस्यनासाकपोलाक्षिकर्णभ्रूमस्तके पुनः। पाश्चात्योत्तरयाम्यप्रागूर्ध्ववक्त्रेषु साधकः ।।१५।।
पदानि दश विन्यस्येदेषु स्थानेषु मन्त्रवित्। शिरोभ्रूमध्यदृग्वक्त्रे कण्ठहृन्नाभिगुह्यके ।।१६।।
जानुनोः पादयोर्युग्मे तच्छिरः शिरसि न्यसेत्। हृदयं ब्रह्मणे प्रोक्तं विष्णवे शिर ईरितम्।। १७।।
शिखा रुद्राय कवचमीश्वराय समीरितम्। नेत्रं सदाशिवायोक्तमस्त्रं सर्वात्मने स्मृतम्।। १८।।
षडङ्गान्येवमुक्तानि यथास्थानं प्रविन्यसेत्। शिरसोऽस्य मुनिर्ब्रह्मा छन्दो देव्यादिका स्मृता।। १९।।
गायत्री परमात्मास्य देवता कथिता बुधैः।...।।

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै–
युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम्।
गा[१]यत्रीं वरदाभयाङ्कुशकशान् पाशं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे।। २०।।

कशः काशः, गुणं त्रिशूलम्। दक्षाधःकरमारभ्य दक्षवामदक्षवामक्रमेणोपर्युपरि द्वन्द्वक्रमेणायुधानि ध्येयानि।

सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसान्विताम्। त्रिरुच्चरन् धिया प्राणान् धारयेद्यतमानसः।। २१।।
प्राणायामोऽयमाख्यातः समस्तदुरितापहः। प्राणायामान् पुरा कृत्वा गायत्रीं सन्ध्ययोर्जपेत्।।२२।।
विधाय मण्डलं विद्वान् त्रिकोणोज्ज्वलकर्णिकम्। अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयावृतम् ।। २३।।

---

[१] 'सावित्रीं' ख. पाठः।

सौरं पीठं यजेत् तत्र दीप्तादिनवशक्तिभिः। मूलमन्त्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत्।। २४।।
त्रिषु कोणेषु सम्पूज्या ब्राह्म्याद्याः शक्तयो बहिः। आदित्याद्यास्ततः पूज्या उषादिसहिताः क्रमात्।।२५।।
ततः षडङ्गान्यभ्यर्च्य केसरेषु यथाविधि। प्रह्लादिनीं प्रभां पश्चान्नित्यां विश्वम्भरां पुनः।। २६।।
विलासिनीप्रभावत्यौ जयां शान्तां यजेत् पुनः। कान्ति[1] दुर्गासरस्वत्यौ विश्वरूपां ततः परम्।।२७।।
विशालासंज्ञितामीशां व्यापिनीं विमलां यजेत्। तमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम्।।२८।।
पद्मालयां परा शोभां पद्मरूपां ततोऽर्चयेत्। ब्राह्म्याद्याः सारुणा बाह्ये पूजयेत् प्रोक्तलक्षणाः।।२९।।
ततोऽर्चयेद् ग्रहान् बाह्ये शक्राद्यानायुधैः सह। इत्थमावरणैर्देवीं दशभिः परिपूजयेत्।। ३०।।
धर्मार्थकाममोक्षाणां भोक्ता स्याद् द्विजसत्तमः।...।।

इति। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदये श्रीपरमात्मने देवतायै नमः। इति विन्यस्य, पूर्वं प्रणवप्रकरणोक्तप्रकारेण करषडङ्गन्यासान् कृत्वा तथैव विष्णुं ध्यात्वा, पुनः शिरसि जमदग्निभरद्वाजभृगुगौतमकाश्यपविश्वामित्रवसिष्ठेभ्य ऋषिभ्यो नमः। मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यश्छन्दोभ्यो नमः। हृदये अग्निवायुसूर्यगुरुवरुणवृषविश्वेदेवेभ्यो देवताभ्यो नमः। इति विन्यस्य, ॐभूः हृदयाय नमः। ॐभुवः शिरसे स्वाहा। ॐस्वः शिखायै वषट्। ॐमहः कवचाय हुं। ॐजनः नेत्रेभ्यो वौषट्। ॐ तपः सत्यं अस्त्राय फट्। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, ततः हृदि ॐभूः नमः। मुखे ॐभुवः नमः। दक्षांसे ओं स्वः नमः। वामांसे ओं महः नमः। दक्षोरौ ओं जनः नमः। वामोरौ ओं तपः नमः। जठरे ओं सत्यं नमः। इति विन्यस्य, प्रथमोक्तरूपा व्याहृतीर्ध्यात्वा, शिरसि विश्वामित्रऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदये सवित्रे देवतायै नमः। इति विन्यस्य, ॐब्रह्मणे नमः हृदयाय नमः। विष्णवे नमः शिरसे स्वाहा। रुद्राय नमः शिखायै वषट्। ईश्वराय नमः कवचाय हुं। सदाशिवाय नमः नेत्रत्रयाय वौषट्। सर्वात्मने नमः अस्त्राय फट्। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, पादाङ्गुलिमूलयोः तं नमः। गुल्फयोः त्सं नमः। जानुनोः विं नमः। ऊरुमूलयोः तुं नमः। लिङ्गे र्वं नमः। नाभौ रें नमः। हृदि णिं नमः। कण्ठे यं नमः। कराङ्गुलिमूलयोः भं नमः। मणिबन्धयोः गौं नमः। कुर्परयोः दें नमः। भुजमूलयोः वं नमः। मुखे स्वं नमः। नासिकयोः धीं नमः। कपोलयोः मं नमः। नेत्रयोः हिं नमः। कर्णयोः धिं नमः। भ्रुवोः यों नमः। मस्तके यों नमः। चूडाधः नः नमः। वामकर्णे प्रं नमः। दक्षकर्णे चों नमः। मुखे दं नमः। शिरसि यात् नमः।। शिरसि तत् नमः। भ्रूमध्ये सवितुर्नमः। नेत्रयोः वरेण्यं नमः। मुखे भर्गो नमः। कण्ठे देवस्य नमः। हृदि धीमहि नमः। नाभौ धियो नमः। गुह्ये यो नमः। जानुनोः नः नमः। पादयोः प्रचोदयात् नमः। इति विन्यस्य, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदि परमात्मने देवतायै नमः। इति विन्यस्य, शिरसि ॐआपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवःस्वरों नमः। इति विन्यस्य, महाव्याहृतिभिः प्राणायामत्रयं कृत्वा, पुनश्च गायत्र्याः पदन्यासान्तं कृत्वा, ततश्चतुर्विंशतिन्यासः—

अङ्गं मन्त्रस्तथा पादः पदमक्षरकेशवौ। न्यासाः स्युर्वनमाला श्रीमुद्रा चोत्पत्तिसंज्ञकाः।। १।।

---

[1] 'कान्ता' ख. पाठः।

हृदि मूर्ध्नि शिखायां व कवचे लोचनत्रये। अस्त्रे च विन्यसेत् तत्सवितुरित्याद्यनुक्रमात्॥ २॥
प्रथमं दक्षिणाङ्गुष्ठादारभ्याथ कनिष्ठिका। इ[1]तरेभ्यः समारभ्य न्यसेदङ्गुलिसन्धिषु॥ ३॥
अङ्गेषु विन्यसेत् पश्चामूर्ध्नि वक्त्रे गले हृदि। नाभिमेढ्रोरुपादेषु तारव्याहृतिसंयुतम्॥ ४॥
गायत्रीमन्त्रमेषोऽयं मन्त्रन्यासः प्रकीर्तितः। न्यसेदनामिकायां च कनिष्ठे करयोस्तले॥ ५॥
देहे शिरसि नाभौ च पादान् पादयुगेऽपि च। पुनः शिरसि भालेऽक्ष्णोर्मुखे कण्ठे तथा हृदि।।६॥
नाभौ गुदे च जान्वादिपादयोश्चैव विन्यसेत्। पदन्यास इति प्रोक्तो वसिष्ठादिमहर्षिभिः॥ ७॥
आरभ्य दक्षिणाङ्गुष्ठात् पश्चाच्चान्य(?द् यावत्)कनिष्ठिकाम्। अङ्गुलीषु दशैतानि पदानि क्रमतो न्यसेत्।।८॥
शीर्षभ्रूमध्यगे नेत्रयुगले वदने हृदि। नाभौ गुदे चोरुयुगे जानुद्वन्द्वे पदद्वये ॥ ९॥
दशस्थानेषु चैकैकं न्यसेत् पदमनुक्रमात्। अनामिकाभ्यां प्रणवं न्यसेत् करतलद्वये॥ १०॥
उभाभ्यां तर्जनीभ्यां च युगपद् व्याहृतित्रयम्। अङ्गुष्ठद्वयरेखासु विन्यसेत् तिसृषु क्रमात्।।११॥
पर्वस्वङ्गुष्ठयोगेन अक्षराणि न्यसेत् पृथक्। मुखवृत्ते लोचनयोः कर्णयोर्नासयोरपि ॥ १२॥
गण्डयोरोष्ठयोर्दन्तपङ्क्त्योः कण्ठे च वक्षसि। कुक्षौ नाभौ पार्श्वयोश्च गुह्ये जान्वोः पदोर्न्यसेत्।।१३॥
चतुर्विंशतिवर्णांश्च नमोऽन्तान् प्रणवादिकान्। अक्षरन्यास इत्युक्तो मोक्षैकफलदो नृणाम्॥ १४॥
मूर्ध्नि भाले मुखे नेत्रयुगे कर्णद्वयेऽपि च। पुटद्वन्द्वे नासिकाया वदने चिबुके गले॥ १५॥
बाह्वोर्हृदि स्तन्द्वन्द्वे नाभिदेशे च गुह्यके। ऊरुयुग्जानुयुग्मे च पदयुग्मे च विन्यसेत्॥ १६॥
वर्णानन्ते केशवाय नम इत्यादिकान् क्रमात्। याच्छ्रीकृष्णाय नम इत्यन्तान्नियतमानसः॥ १७॥
केशवन्यास एवं स्याद् भुक्तिमुक्तिफलप्रदः। दक्षिणेतरयोर्बाह्वोस्तर्जन्यङ्गुष्ठयुक्तया ॥ १८॥
मुद्रया वनमालाख्यं न्यासं त्रिपदया न्यसेत्। कण्ठादिपादपर्यन्तं श्रीकरं मोक्षदं शुभम्॥ १९॥
शङ्खचक्रमनुध्यायन् गायत्र्यैकैकमक्षरम् । विन्यसेद्भुजयोर्न्यासं श्रीमुद्रापूर्वमुत्तमम् ॥ २०॥
आदौ वृत्तं वसुदलमष्टकोणं ततः परम्। पश्चात् स्वरदलं ध्यायेल्लिखेद्वा भुजयोर्द्वयोः॥ २१॥
वृत्तमध्ये न्यसेत् तारं व्याहृतित्रयसंयुतम्। गायत्र्याः प्रथमं पादं न्यसेद्वसुदलान्तरम्॥ २२॥
द्वितीयं वसुकोणे च तृतीयं च तुरीयकम्। न्यसेत् स्वरदले विद्वान् सर्वपापनिवृत्तये॥ २३॥

इत्युत्पत्तिन्यासः। अथ स्थितिन्यासः—

अङ्गं वर्णाः पदः पदाश्चार्धऋग् व्यापकाह्वयः। तत्त्वमावृतिरित्यष्टौ न्यासाः स्युः स्थितिसंज्ञकाः।।१॥
पादयोः पच्चतुःसन्ध्योः कट्योर्नाभौ च पार्श्वयोः। पञ्चमास्ये ललाटे च दृशोः श्रुत्योश्च नासयोः।।२॥
[2]गण्डोष्ठदन्तजिह्वासु कण्ठदोर्मूलहृत्स्वपि । चतुर्विंशतिवर्णांश्च न्यसेदङ्गेष्वनुक्रमात्॥ ३॥
एकैकमक्षरं ग्राह्यं दन्तयोर्बाहुमूलयोः। पादयोः पच्चतुःसन्ध्योर्नाभौ शीर्षे ललाटके॥ ४॥
वक्त्रे कण्ठे च हृदये पदानि क्रमतो न्यसेत्। पादद्वये च जान्वादिगुदान्ते नाभिमण्डले॥ ५॥

---

१. 'उत्तरेभ्यः' ग. पाठः। २. 'कण्ठोष्ट' ग. पाठः।

प्रणवादिनमोन्तैश्च चतुर्थीपदमध्यगाः । सर्वत्र प्रजपेन्मन्त्रं ततः पीठं प्रपूजयेत्।। १४।।
क्षारक्षीरदधिसर्पिःस्वादोकसुरेक्षवः । प्रणवादिनमोऽन्ताश्च सागरांस्तत्र पूजयेत् ।। १५।।
जम्बुद्वीपं ततः प्लक्षं शाल्मलिं कुशसंज्ञकम्। क्रौञ्चं शाकं पुष्करं च द्वीपानि तु ततो यजेत्।।१६।।
भूर्लोकोऽथ भुवर्लोको स्वर्गलोको महर्जनः। तपो लोकः सत्यलोकः क्रमात्तत्रैव पूजयेत्।। १७।।
अतलं वितलं चैव तलातलमतः परम्। रसातलं च पातालं सुतलं च महातलम्।। १८।।
आत्मतत्त्वान्तरात्मा परमात्मा ज्ञानमेव च। चतुर्थ्यन्त[1]प्रयोगेण नमोन्तेन प्रपूजयेत् ।। १९।।
गङ्गा च यमुना चैव गोदावरी सरस्वती। नर्मदा सिन्धुः कावेरी नमोन्तेन प्रपूजयेत्।। २०।।
संवत्सराश्च ऋतवो मासाः पक्षा दिनानि च। प्रणवादिनमोन्तेन ततः शक्तीः प्रपूजयेत्।। २१।।
वामा ज्येष्ठा तथा श्रेष्ठा रौद्री काली तथैव च। कलविकरणी चैव बलविकरणी तथा।। २२।।
बलप्रथमनी चैव सर्वभूतदमन्यथ। मनोन्मनी भगवती कालरुद्रात्मने नमः।। २३।।
उमा चण्डेश्वरो नन्दी महाकालस्तथैव च। वृषभो भृङ्गिरीटिश्च स्कन्दश्चैव क्रमाद्यजेत्।। २४।।
इन्द्रादिलोकपालांश्च पूजयेत् तदनन्तरम्। सरस्वतीं च दुर्गां च गणेशं क्षेत्रपालकम्।। २५।।
तत्तद्बीजेन सम्पूज्य वसूनष्टौ तथा यजेत्। रुद्रानेकादश चैव द्वादशादित्यकान् यजेत्।। २६।।
भैरवाष्टौ ततः पूज्या ब्राह्म्यादींश्च ततो यजेत्। ध्रुवोऽध्वरस्तथा सोम आपश्चैवानिलोऽनलः।।२७।।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः। वीरभद्रश्च शम्भुश्च गिरिशोऽप्यज एकपात्।। २८।।
अहिर्बुध्न्यः पिनाकी च भुवनाधीश्वरस्तथा। दिशांपतिः पशुपतिः स्थाणुर्भर्ग इति स्मृतः।। २९।।
आदित्यः सविता सूर्यः पूषा मित्रस्तथैव च। तमोघ्नश्च हिमघ्नश्च अरुणो भानुरेव च।। ३०।।
मार्तण्डो भास्करश्चेति तथैव च दिवाकरः। असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तभैरवः।। ३१।।
कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।। ३२।।
वाराहीन्द्राणी चामुण्डा महालक्ष्म्योऽष्ट मातरः।...।।

इति। ततस्त्र्यम्बकमन्त्रेण पञ्चामृतस्नानादिषोडशोपचारपूजां कुर्यात्। प्लुतप्रणवयोगेन स्नपयेत्। आवाहनस्थापनसन्निधानसन्निरोधनसम्मुखीकरणसकलीकरणावगुण्ठनामृतीकरणपरमीकरणयोनिलिङ्गमहासरस्वतीमुद्राः प्रदर्शयेत्। तत आवणपूजां कुर्यात्। तत्र न्यासोक्तदेवता अष्टाविंशत्युत्तरशतं शक्तयः पूज्याः।

सद्योजाताष्टका ज्ञेया वामदेवास्त्रयोदश। अघोरस्य कला ह्यष्टौ पुरुषस्य चतुष्कलाः।। ३३।।
ईशानस्य कलाः पञ्च क्रमेण परिकीर्तिताः। अष्टात्रिंशत् कला ज्ञेयाः पूजनीयाः प्रकीर्तिताः।।३४।।
शशिनी चाङ्गदा हृष्टा मरीचिर्ज्वालिनी तथा। ईशानस्य कलाः पञ्च नीराजनपरानुगाः।। ३५।।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च। पुरुषस्य कला ह्येताश्चतस्रः परिकीर्तिताः।। ३६।।
तमा मोहा क्षमा निद्रा व्याधिर्मृत्युः क्षुधा तृषा। अघोरस्य कला ह्येताश्चाष्ट संज्ञोपलक्षिताः।।३७।।

---

१. 'चतुर्थी च प्रयोगेण' क. ग. पाठः।

रजा रक्षा रतिर्बाह्या कामसञ्जीवनी तथा। कृपा वृद्धिः क्षमा धात्री भूषणी मोहिनी तथा।। ३८।।
वामदेवकला ह्येताः कीर्तिताश्च त्रयोदश। ऋद्धिः सिद्धिर्लघुर्लक्ष्मीर्मेधा कान्तिः स्वधा प्रजा।।३९।।
सद्योजातकला ह्येता ह्यष्ट संज्ञोपलक्षिताः। शुद्धस्फटिकसङ्काशं निर्मलानन्दसंज्ञितम्।। ४०।।
तत्त्वं निधनकं चैव ईशानोर्ध्वमुखं स्मरेत्।...।।

''ईशानः सर्वविद्यानां'' इति मन्त्रेणेशानस्योर्ध्वमुखं पूजयेत्।

पद्मरागसमाभासं जपाबालार्कसन्निभम्। वक्त्रं च संप्रियं[1] स्निग्धं पूर्वं तत्पुरुषं स्मरेत्।। ४१।।

''तत्पुरुषाय'' इति मन्त्रेण तत्पुरुषस्य पूर्ववक्त्रं पूजयेत्।

नीलाभं च समस्तेज्यं करालं विकृताननम्। दक्षिणस्यां दिशि ध्यातमघोरस्य मुखं स्मरेत्।। ४२।।

''अघोरेभ्य'' इति मन्त्रेणाघोरस्य दक्षिणमुखं पूजयेत्।

नित्यं च हेमवर्णाभं दिव्यरूपं सुलक्षणम्। कामिन्य[2]र्धाङ्गसंयुक्तं वक्त्रं वामोत्तरं यजेत्।। ४३।।

''वामदेवाय'' इति मन्त्रेण वामदेवस्योत्तरं मुखं पूजयेत्।

सुश्वेतं शङ्खवर्णाभं नीलकण्ठस्य शोभितम्। गङ्गार्धचन्द्रमौलिस्थं सद्योजातं तु पश्चिमम्।। ४४।।

''सद्योजात''मिति मन्त्रेण सद्योजातस्य पश्चिमवक्त्रं पूजयेत्।

अथाङ्गपूजा—त्र्यम्बकाय त्रिनेत्राय कालाग्निरुद्राय नमः पादौ पूजयामि। त्र्यम्बकाय त्रिनेत्राय कालाग्निमूर्तये नमः जङ्घे पूजयामि। त्र्यम्बकाय त्रिनेत्राय उमाङ्गधारिणे नमः ऊरू०। त्र्यम्बकाय त्रिनेत्राय कामविध्वंसिने नमः गुह्यं०। त्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय नमः कण्ठं०। त्र्यम्बकाय त्रिनेत्राय पञ्चवक्त्राय नमः वक्त्रं०। त्र्यम्बकाय त्रिनेत्राय चन्द्रार्कवह्निनेत्राय नमो नेत्रं०। त्र्यम्बकाय त्रिनेत्रायामृतप्लुताय दिव्यशरीराय नमः सर्वाङ्गं पूजयामि। ततो मूलमन्त्रेण गन्धपुष्पधूपदीपनैवेद्याचमनीयान्तं कर्म समापयेदिति। ततो मूलमन्त्रं जप्त्वा विसर्जयेत्। पुरश्चरणं तु। तदुक्तम्—

जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः। जुहुयादयुतं द्रव्यैर्दशभिर्घृतसम्प्लुतैः ।। १।।
बिल्वं पलाशं खदिरं वटं च तिलसर्षपान्। दौग्धं दुग्धं दधि पुनर्दूर्वान्तानि विदुः क्रमात्।। २।।
पञ्चाक्षरोदिते पीठे पूजयेद् वृषभध्वजम्। मूर्तिं मूलेन सङ्कल्प्य वक्ष्यमाणेन वर्त्मना।। ३।।
पूर्वमङ्गानि सम्पूज्य पश्चान्मूर्तीः प्रपूजयेत् । अर्केन्दुवसुधातोयवह्नीरवियदात्मनः ।। ४।।
रमा राका प्रभा ज्योत्स्ना पूर्णोमा पूषणी सुधा। अष्टाविमाः क्रमात् पूज्यास्तृतीयावरणे ततः।।५।।
विश्वा विद्या सिता प्रह्वा सारा सन्ध्या शिवा निशा। चतुर्थावरणे पूज्याः शक्तयोऽष्टौ क्रमादिमाः।।६।।
आर्या प्रज्ञा प्रभा मेधा कान्तिः शान्तिर्धृतिर्मतिः। पञ्चमावरणे पूज्याः क्रमादेतास्ततः परम्।। ७।।
एवं कृते प्रयोगार्हो जायतेऽयं महामनुः।...।।

इति।। अथ प्रयोगा उच्यन्ते—

सर्वेषां चैव मन्त्राणां पूर्वसेवा कृता तथा। लक्षैकेन सुसिध्यन्ति दशांशेनैव होमयेत्।। १।।

---

१. 'सुश्रियं' ग. पाठः। २. 'कामिन्योर्ध्वग' क. ग. पाठः।

पूर्वसेवार्थमयुतं गुग्गुलं घृतसम्प्लुतम्। भूतशुद्धिं पुरा कृत्वा न्यासजालमतः परम्।। २।।

शुक्लाम्बरधरः शुक्लः शुक्लमाल्यानुलेपनः सपत्नीकः सर्त्विक् साचार्यो यजमानो मङ्गलघोषेण सम्पूर्णकलशसहितः शकुनादिमन्त्रघोषेण कुण्डस्थदेशं स्थण्डिलदेशं वा प्राप्य, तत्रोपविश्य प्राणानायम्य, अद्येत्यादि देशकालौ सङ्कीर्त्य, मया कृतस्य कारितस्य वा जपस्य सम्पूर्णफलावाप्त्यर्थं तद्दशांशहोमममुकद्रव्येण करिष्ये। तदङ्गतया गणेशपूजनं मातृकापूजनं नान्दीमुखश्राद्धं च करिष्ये इति सङ्कल्प्य, संस्कृत्य ग्रहवेद्यां ग्रहस्थापनं कृत्वा, ग्रहाधिदेवताः प्रत्यधिदेवता गणपतिदुर्गाक्षेत्रपालकान् इन्द्राद्यष्टदिक्पालांश्च तत्तन्मन्त्रैः स्थापयित्वा, तत्रैकं मध्ये कलशं संस्थाप्य तन्मुखे वस्त्रोपरि महामृत्युञ्जयमन्त्रं संस्थाप्य, मन्त्रवर्णसंख्याकमाषपरिमितां प्रतिमां तदुपरि संस्थाप्य तां शोधयेत्। प्रथमं देवं प्रणिपत्यैवं प्रार्थयेत्। "स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते। शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्यां सहस्व ताम्"।। ततो न्यासपूर्वकं रुद्राभिषेकं कुर्यात्। ततोऽग्नेरुत्तारणम्। "अग्निः सप्तिं वाजम्भरं (१०। ८०। १) इति जप्त्वा पुनः सर्वसूक्तेनाभिषेकः कार्यः। प्रथमं सप्तमृत्तिकाभिरालिप्य शुद्धोदकेन प्रक्षाल्य कोष्ठं हरिद्रावयवश्रीखण्डकचोरक-मुस्ताचूर्णेनोद्वर्त्य जलेन प्रक्षालयेत्। "आपो हि ष्ठा"। (१०। ९। १) इति ऋग्भिरभ्यर्च्य ततः पुष्पाक्षतान् गृहीत्वा "आ त्वा वहन्तु हरयः" (१। १६। १) इति ध्यात्वा "स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्। तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु"।। आवाहनादिकल्पोक्तप्रकारेण षोडशोपचारपूजां कुर्यात्।

दशक्लेशे हि संसारे प्राप्तोऽहं शरणागतः। भक्त्या समर्चयाम्यद्य सकलं चास्तु पूजनम्।। १।।
साधु वासाधु वा कर्म यद्यदाचरितं मया। तत्सर्वं भगवञ्छम्भो गृहाण विधिपूर्वकम्।। २।।
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर।। ३।।
महादेव जगन्नाथ शरणागतवत्सल। भक्त्या कृतं मया देव तत्सर्वं सफलं कुरु।। ४।।

इति प्रार्थनां कृत्वा, पुनः प्रार्थयेत्।

जय देव जगन्नाथ जय शाश्वत शङ्कर। जय सर्वसुराध्यक्ष जय सर्वसुरार्चित।। १।।
जय सर्वगुणातीत जय सर्ववरप्रद। जय नित्य निराधार जय विश्वम्भराव्यय।। २।।
जय विश्वैकवन्द्येश जय नागेन्द्रभूषण। जय गौरीपते शम्भो जय चन्द्रार्धशेखर।। ३।।
जय कोट्यर्कसङ्काश जयानन्तगुणाश्रय। जय रुद्र विरूपाक्ष जयाचिन्त्य निरञ्जन।। ४।।
जय नाथ कृपासिन्धो जय भक्तार्तिभञ्जन। जय दुस्तरसंसारसागरोत्तारण प्रभो।। ५।।
प्रसीद मम देवेश संसारार्तस्य बिभ्यतः। सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर।। ६।।
महादारिद्र्यमग्नस्य महापापहतौजसः। महाशोकनिमग्नस्य महारोगातुरस्य च।। ७।।
ऋणभारपरीतस्य दह्यमानस्य कर्मभिः। 'ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर।। ८।।
दरिद्रः प्रार्थयेद् देवं पूजान्ते गिरिजापतिम्। अर्थार्थी[1] वापि राजा वा प्रार्थयेद्देवमीश्वरम्।। ९।।
दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः। ममास्तु नित्यमानन्दः प्रसादात्तव शङ्कर।। १०।।

---

१. 'अर्थाढ्यो' ख. पाठः। २. 'यः' ग. पाठः।

शत्रव: संक्षयं यान्तु प्रसीदन्तु मम ग्रहा:। नश्यन्तु दस्यवो राष्ट्रे जना: सन्तु निरापद:।। १२।।
दुर्भिक्षमारीसन्तापा: शमं यान्तु महीतले। वसुसस्यसमृद्धिश्च भूयात्[१] सुखमयं दिशि।। १३।।
एवमाराधयेद् देवं जपहोमार्चनादिषु। यावत् कर्म समाप्येत तावत् सन्निहतो भवेत्।। १४।।

इति। ततो होमं कुर्यात्। होमकुण्डे चतुर्दिक्षु द्वारपालान् प्रतिष्ठाप्य 'गणानां त्वा०' जातवेदसे०' क्षेत्रस्य पतिना वयं०। प्रणो देवी०' इति मन्त्रै: प्रतिष्ठाप्योपविश्य, प्राणायामपूर्वकमृष्यादिन्यासं कृत्वा, पादयो: विष्णवे नम:। हृदये ब्रह्मणे नम:। शिरसि महेश्वराय नम:। शिखायां सप्तर्षिभ्यो नम:। नासिकायां सप्तजिह्वाय नम:। श्रेत्रयो: अश्विनीदेवताभ्यां नम:। चतुषो: शशिभास्कराभ्यां नम:। जिह्वायां सरस्वत्यै नम:। वाचि बृहस्पतये नम:। दन्तेषु माधवाय नम:। हृदये हृव्यवाहनाय नम:। पादयो: गन्धर्वाप्सरोभ्यो०। कण्ठे द्वादशादित्येभ्य:०। दक्षिणहस्ते एकादशरुद्रेभ्य:०। वामे अष्टवसुभ्यो०। उपकवचे द्वादशादित्येभ्य:०।। अहमेव परमात्मा। त्र्यम्बकाय त्रिपुरान्तकेशाय शूलपाणये स्वाहा हृत्। त्र्यम्बकाय त्रिनेत्राय कपर्दिने स्वाहा शिर:। त्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय स्वाहा शिखा। त्र्यम्बकाय त्रिनेत्राय सर्वसिद्धिफलप्रदाय स्वाहा कवचं। त्र्यम्बकाय त्रिनेत्राय ज्ञानमूर्तये स्वाहा नेत्रे। त्र्यम्बकाय त्रिनेत्राय ज्वल[२] ज्वल प्रज्वल २ प्रतापय स्वाहा अस्त्रं। तत: पूर्ववद् ध्यात्वा अग्निं परिसमूह्य ऋक्शाखाप्रयोगं कुर्यात्। मन्त्रहोमं कृत्वा तत: स्विष्टकृतं हुत्वा, बलिदानं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य प्राणानायम्य सङ्कल्पहोमसम्पूर्णफलावाप्त्यर्थं पूर्णाहुतिहोमं करिष्ये, समुद्रादूर्मि० मूर्धानं दिव:० पुनस्त्वादित्या० सप्त ते अग्ने० धामन्ते० एतैर्मन्त्रैर्हुत्वा आचार्याय प्रतिमां दद्यात्। तत: श्रेय:सम्पादनं कृत्वाचार्यार्त्विक्-गणपतिजपब्राह्मणेभ्यो गन्धमाल्यादिवस्त्रालङ्करणानि दत्त्वा, यथोचितदक्षिणां दत्त्वा, ब्राह्मणान् भोजयित्वा दक्षिणादिभि: सन्तोष्य विसर्जयेत्। इति होमविधि:।। अथ काम्यप्रयोगा:—

दूर्वाभयार्द्रसमिधो गोघृतेन समन्विता:। होतव्या: शान्तिके विप्र शान्तिर्येन भवेत् स्फुटा।। १।।
समिधो राजवृक्षोत्था होतव्या: स्तम्भकर्मणि। मेषीघृतेन संयुक्ता: सहदेव्या सुसिद्धिदा:।। २।।
खादिरा: मारणे प्रोक्ता: कटुतैलेन संयुता:। उत्पा(च्चा)टयेन्महीं सर्वां सशैलवनकाननाम्।। ३।।
यशश्चैव सदा होमे कुसुमैर्दाडिमोद्भवै:। अजाघृतेन देवर्षीन् वशयेत् सचराचरम्।। ४।।
वशमायान्ति ता: सर्वा: यक्षनागाङ्गनादय:। जातिनिर्मल्लिकाहोमो घृतेन सहितो भवेत्।। ५।।
साध्यानां कन्यका: सर्वा: साधकाग्रे पतन्ति च। करवीरैस्तु रक्तैस्तु योषितो वशमानयेत्।। ६।।
शतपत्रै: कृतो होम: पृथ्वीलाभं करोति च। होमाच्च पिचुमन्दैश्च मतिमाञ्जायते नर:।। ७।।
अङ्कोलपुष्पहोमेन सिद्धयोऽष्टौ भवन्ति हि। अर्कपुष्पै: सदारोग्यं मन्दारैरर्थसम्पद: ।। ८।।
तथैव पालिपुष्पैश्च राजानं गिरिकर्णकै:। नीलपुष्पैस्तथा होमे देशं च वशमानयेत्।। ९।।
ब्राह्मणास्तु वशं यान्ति वन्यै: सुक्षितिसम्भवै:। कदम्बपुष्पहोमेन यक्षिणीं वशमानयेत्।। १०।।
कुन्दपुष्पैस्तु सौभाग्यं विद्या रक्तोत्पलैर्भवेत्। बिल्वपत्रैस्तु राज्यं च चक्रवर्तित्वमम्बुजै:।। ११।।
अशोकपुष्पहोमेन . सर्वशोकविनाशनम्। कर्णिकापुष्पहोमेन राज्यप्रीतिमवाप्नुयात् ।। १२।।

---

[१] '(य:) ग. पाठ:। [२] 'ज्वलस्व' ग. पाठ:।

हरीतक्या च आरोग्यं व्याधिनाशो बिभीतकैः। चूतपुष्पफलैर्होमश्चिन्तितार्थफलप्रदः।। १३।।
जम्बूफलैश्च होमेन यशश्चाप्नोति निर्मलम्। न्यग्रोधफलहोमेन सर्वसिद्धिमवाप्नुयात्।। १४।।
दाडिमीफलहोमेन दैत्यकन्यां समानयेत्। कूष्माण्डफलहोमेन धान्यसिद्धिमवाप्नुयात्।। १५।।
बंदरीफलहोमेन रत्नलाभो भवेद् ध्रुवम्। पिचुमन्दफलैः पुष्पैर्विद्वेषाकर्षणं परम् ।। १६।।
द्राक्षाफलैः सदावश्यं स्थावरं जङ्गमं तथा। नारिकेलफलैर्होमे वृद्धिमाप्नोति चाव्ययाम्।। १७।।
कुटजीफलहोमेन वेतालीसिद्धिमाप्नुयात्। चम्पकैश्च कृते होमे सिद्ध्यन्तेऽप्सरसां गणाः।। १८।।
तिलैश्च शान्तिकं कुर्यान्मधुघृतसमन्वितम्। राजिकालवणैरेव वश्याकर्षणकं परम् ।। १९।।
शिलातालकहोमेन मारयेद्रिपुजं कुलम्। बिल्वमूलकहोमेन शक्रतुल्यो भवेन्नरः।। २०।।
प्रियङ्गुकदलीपुष्पैः सर्वसत्त्वं वशं नयेत्। दूर्वाङ्कुरसमिद्भिस्तु अमृताखण्डसंयुतम्।। २१।।
घृतमधुसुसंयुक्तं महामृत्युविनाशनम्। अयुतं जुहुयाद्बिल्वसमिद्भिः सम्पदे सुधीः।। २२।।
जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे। स्वादिरैरयुतं हुत्वा कान्तिं पुष्टिमवाप्नुयात् ।। २३।।
वटवृक्षस्य समिधो जुहुयादयुतावधि। धनधान्यसमृद्धः स्यादचिरेणैव साधकः ।। २४।।
तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते। सिद्धार्थैरयुतं हुत्वा शत्रून् विजयते नृपः।। २५।।
अनेनैव विधानेन नश्येन्मृत्युरकालतः। पायसेन कृतो होमो रक्षाश्रीकीर्तिदायकः[1]।। २६।।
शुद्धान्नपशुदुग्धेन हुत्वा कृत्यां विनाशयेत्। अयमेवं मनोर्होमः शान्तिश्रीसम्पदावहः।। २७।।
दधिदुग्धेन सम्पातं कुर्याद्विद्वेषणे मतम्। प्रत्यहं जुहुयान्मन्त्री दूर्वा अष्टोत्तरं शतम्।। २८।।
आमयानखिलाञ्जित्वा दीर्घमायुरवाप्नुयात्। जुहुयाज्जन्मदिवसे पायसान्नैर्घृतान्वितैः।। २९।।
इष्टामनिन्दितां लक्ष्मीमारोग्यमतुलं यशः । गव्यदुग्धघृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी ।। ३०।।
सविंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः। आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः।। ३१।।
शा[2]ल्मलीसमिधः सर्पिः पयोन्नं त्रिशतं सुधीः[3]। जुहुयाद् ब्राह्मणानन्ते भोजयेन्मधुरान्वितम्।।३२।।
प्रीणयेद् धनधान्याद्यैरात्मनो गुरुमादरात्। अनामयमवाप्नोति दीर्घमायुः श्रिया सह।। ३३।।
सघृतेन पयोन्नेन हुत्वा पर्वणि पर्वणि। राज्यश्रियमवाप्नोति षण्मासान्नात्र संशयः।। ३४।।
लाजैर्विशुद्धैर्जुहुयात् कन्यायाः[4] सुवराप्तये। क्षीरद्रुमसमिद्धोमाद् ब्राह्मणादीन् वशं नयेत्।। ३५।।
स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम्। आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्।। ३६।।
अनेन मनुना सर्वं साधयेदिष्टमात्मनः। ....।।

इति मृत्युञ्जयप्रयोगः।। अथ श्रीविद्यावरणाङ्गत्वेन गायत्रीविधानम्। तत्र शारदातिलके– (प० २१)

अथो वक्ष्यामि गायत्रीं तत्त्वरूपां त्रयीमयीम्। यया प्रकाश्यते ब्रह्म सच्चिदानन्दलक्षणम्।। १।।

---

[1] 'कान्तिदः' ख. पाठः। [2] 'काश्मरी' ख. पाठः। [3] 'पृथक्' ख. पाठः। [4] 'कन्याप्त्यै सा वराप्तये' ख. पाठः।

प्रणवाद्या व्याहृतयः सप्त स्युस्तत्पदादिकाः। चतुर्विंशत्यक्षरात्मा गायत्री शिरसान्विता।। २।।
सर्ववेदोद्धृतः सारो मन्त्रोऽयं समुदाहृतः। ब्रह्मा देव्यादिगायत्री परमात्मा समीरितः।। ३।।
ऋष्याद्याः प्रणवस्यैते मुनिभिः परिकीर्तिताः। प्राग्वत् कृत्वा षडङ्गानि ध्यायेद्विष्णुं तथा ततः।।४।।

तथा तत्प्रकरणोक्तप्रकारेण।

जमदग्निभरद्वाजभृगुगौतमकश्यपान् । विश्वामित्रवसिष्ठाख्यौ व्याहृतीनामृषीन् विदुः ।। ५।।
गायत्र्युष्णिगथानुष्टुब् बृहतीपङ्क्तयः पुनः। त्रिष्टुब्जगत्यौ छन्दांसि कथितानि मनीषिभिः।। ६।।
सप्तार्चिरनिलः सूर्यो वाक्पतिर्वरुणो वृषा। विश्वदेवाः क्रमादासां देवताः परिकीर्तिताः।। ७।।
भूराद्याभिर्व्याहृतिभिः षड्भिः कुर्यात् षडङ्गकम्। व्याहृतीः सप्त भूराद्याः हृन्मुखांसोरुयुग्मके।।८।।
जठरे न्यस्य मन्त्रज्ञो ध्ययेत्ता व्याहृतीस्ततः। स्थानानि सप्त लोकाः स्युः सर्वासां स्वस्वसंज्ञकाः।।९।।
स्वे स्वे च वर्णतरवो रूपयौवनसंयुताः। क्षौमवस्त्रपरीधानाः सर्वाभरणभूषिताः।। १०।।
उन्निद्राम्भोजवदनाः प्रभामण्डलमण्डिताः। सितोपवीतहृदयाः सपवित्रचतुष्कराः।। ११।।
अभयाक्षस्रगप्यत्र(?)वरहस्तसरोरुहाः। एवं होमजपारम्भे ध्येया व्याहृतयो द्विजैः।। १२।।
गायत्र्या मुनिराख्यातो विश्वामित्रो महाद्युतिः। गायत्री छन्द इत्युक्तं देवता सविता स्मृतः।। १३।।
एतान् विन्यस्य ऋष्यादीन् गायत्र्यर्णांस्तनौ न्यसेत्। पत्सन्धिषु ध्वजे नाभौ हृत्कण्ठभुजसन्धिषु।।१४।।
आस्यनासाकपोलाक्षिकर्णभ्रूमस्तके पुनः। पाश्चात्योत्तरयाम्यप्रागूर्ध्ववक्त्रेषु साधकः ।। १५।।
पदानि दश विन्यस्येदेषु स्थानेषु मन्त्रवित्। शिरोभ्रूमध्यदृग्वक्त्रे कण्ठहृन्नाभिगुह्यके ।। १६।।
जानुनोः पादयोर्युग्मे तच्छिरः शिरसि न्यसेत्। हृदयं ब्रह्मणे प्रोक्तं विष्णवे शिर ईरितम्।। १७।।
शिखा रुद्राय कवचमीश्वराय समीरितम्। नेत्रं सदाशिवायोक्तमस्त्रं सर्वात्मने स्मृतम्।। १८।।
षडङ्गान्येवमुक्तानि यथास्थानं प्रविन्यसेत्। शिरसोऽस्य मुनिर्ब्रह्मा छन्दो देव्यादिका स्मृता।। १९।।
गायत्री परमात्मास्य देवता कथिता बुधैः।...।।

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै—
युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम्।
गा[1]यत्रीं वरदाभयाङ्कुशकशान् पाशं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे।। २०।।

कशः काशः, गुणं त्रिशूलम्। दक्षाधःकरमारभ्य दक्षवामदक्षवामक्रमेणोपर्युपरि द्वन्द्वक्रमेणायुधानि ध्येयानि।

सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसान्विताम्। त्रिरुच्चरन् धिया प्राणान् धारयेद्यतमानसः।। २१।।
प्राणायामोऽयमाख्यातः समस्तदुरितापहः। प्राणायामान् पुरा कृत्वा गायत्रीं सन्ध्ययोर्जपेत्।।२२।।
विधाय मण्डलं विद्वान् त्रिकोणोज्ज्वलकर्णिकम्। अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयावृतम् ।। २३।।

---

१. 'सावित्रीं' ख. पाठः।

सौरं पीठं यजेत् तत्र दीप्तादिनवशक्तिभिः। मूलमन्त्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत्।। २४।।
त्रिषु कोणेषु सम्पूज्या ब्राह्म्याद्याः शक्तयो बहिः। आदित्याद्यास्ततः पूज्या उषादिसहिताः क्रमात्।।२५।।
ततः षडङ्गान्यभ्यर्च्य केसरेषु यथाविधि। प्रह्लादिनीं प्रभां पश्चान्नित्यां विश्वम्भरां पुनः।। २६।।
विलासिनीप्रभावत्यौ जयां शान्तां यजेत् पुनः। कान्ति[1] दुर्गासरस्वत्यौ विश्वरूपां ततः परम्।।२७।।
विशालासंज्ञितामीशां व्यापिनीं विमलां यजेत्। तमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम्।।२८।।
पद्मालयां परा शोभां पद्मरूपां ततोऽर्चयेत्। ब्राह्म्याद्याः सारुणा बाह्ये पूजयेत् प्रोक्तलक्षणाः।।२९।।
ततोऽर्चयेद् ग्रहान् बाह्ये शक्राद्यानायुधैः सह। इत्थमावरणैर्देवीं दशभिः परिपूजयेत्।। ३०।।
धर्मार्थकाममोक्षाणां भोक्ता स्याद् द्विजसत्तमः।...।।

इति। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदये श्रीपरमात्मने देवतायै नमः। इति विन्यस्य, पूर्वं प्रणवप्रकरणोक्तप्रकारेण करषडङ्गन्यासान् कृत्वा तथैव विष्णुं ध्यात्वा, पुनः शिरसि जमदग्निभरद्वाजभृगुगौतमकाश्यपविश्वामित्रवसिष्ठेभ्य ऋषिभ्यो नमः। मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यश्छन्दोभ्यो नमः। हृदये अग्निवायुसूर्यगुरुवरुणवृषविश्वेदेवेभ्यो देवताभ्यो नमः। इति विन्यस्य, ओंभूः हृदयाय नमः। ओंभुवः शिरसे स्वाहा। ओंस्वः शिखायै वषट्। ओंमहः कवचाय हुं। ओंजनः नेत्रेभ्यो वौषट्। ओं तपः सत्यं अस्त्राय फट्। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, ततः हृदि ओंभूः नमः। मुखे ओंभुवः नमः। दक्षांसे ओं स्वः नमः। वामांसे ओं महः नमः। दक्षोरौ ओं जनः नमः। वामोरौ ओं तपः नमः। जठरे ओं सत्यं नमः। इति विन्यस्य, प्रथमोक्तरूपा व्याहृतीर्ध्यात्वा, शिरसि विश्वामित्रऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदये सवित्रे देवतायै नमः। इति विन्यस्य, ओंब्रह्मणे नमः हृदयाय नमः। विष्णवे नमः शिरसे स्वाहा। रुद्राय नमः शिखायै वषट्। ईश्वराय नमः कवचाय हुं। सदाशिवाय नमः नेत्रत्रयाय वौषट्। सर्वात्मने नमः अस्त्राय फट्। इति मन्त्रैः करषडङ्गन्यासं कृत्वा, पादाङ्गुलिमूलयोः तं नमः। गुल्फयोः त्सं नमः। जानुनोः विं नमः। ऊरुमूलयोः तुं नमः। लिङ्गे र्वं नमः। नाभौ रें नमः। हृदि णिं नमः। कण्ठे यं नमः। कराङ्गुलिमूलयोः भं नमः। मणिबन्धयोः गौं नमः। कुर्परयोः दें नमः। भुजमूलयोः वं नमः। मुखे स्वं नमः। नासिकयोः धीं नमः। कपोलयोः मं नमः। नेत्रयोः हिं नमः। कर्णयोः धिं नमः। भ्रुवोः यों नमः। मस्तके यों नमः। चूडाधः नः नमः। वामकर्णे प्रं नमः। दक्षकर्णे चों नमः। मुखे दं नमः। शिरसि यात् नमः।। शिरसि तत् नमः। भ्रूमध्ये सवितुर्नमः। नेत्रयोः वरेण्यं नमः। मुखे भर्गो नमः। कण्ठे देवस्य नमः। हृदि धीमहि नमः। नाभौ धियो नमः। गुह्ये यो नमः। जानुनोः नः नमः। पादयोः प्रचोदयात् नमः। इति विन्यस्य, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदि परमात्मने देवतायै नमः। इति विन्यस्य, शिरसि ओंआपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवःस्वरों नमः। इति विन्यस्य, महाव्याहृतिभिः प्राणायामत्रयं कृत्वा, पुनश्च गायत्र्याः पदन्यासान्तं कृत्वा, ततश्चतुर्विंशतिन्यासः—

अङ्गं मन्त्रस्तथा पादः पदमक्षरकेशवौ। न्यासाः स्युर्वनमाला श्रीमुद्रा चोत्पत्तिसंज्ञकाः।। १।।

---

[1] 'कान्ता' ख. पाठः।

हृदि मूर्ध्नि शिखायां व कवचे लोचनत्रये। अस्त्रे च विन्यसेत् तत्सवितुरित्याद्यनुक्रमात्।। २।।
प्रथमं दक्षिणाङ्गुष्ठादारभ्याथ कनिष्ठिका। इ[1]तरेभ्य: समारभ्य न्यसेदङ्गुलिसन्धिषु।। ३।।
अङ्गेषु विन्यसेत् पश्चामूर्ध्नि वक्त्रे गले हृदि। नाभिमेढ्रोरुपादेषु तारव्याहृतिसंयुतम्।। ४।।
गायत्रीमन्त्रमेषोऽयं मन्त्रन्यास: प्रकीर्तित:। न्यसेदनामिकायां च कनिष्ठे करयोस्तले।। ५।।
देहे शिरसि नाभौ च पादान् पादयुगेऽपि च। पुन: शिरसि भालेऽक्ष्णोर्मुखे कण्ठे तथा हृदि।।६।।
नाभौ गुदे च जान्वादिपादयोश्चैव विन्यसेत्। पदन्यास इति प्रोक्तो वसिष्ठादिमहर्षिभि:।। ७।।
आरभ्य दक्षिणाङ्गुष्ठात् पश्चाच्चान्य(?द् यावत्)कनिष्ठिकाम्। अङ्गुलीषु दशैतानि पदानि क्रमतो न्यसेत्।।८।।
शीर्षभ्रूमध्यगे नेत्रयुगले वदने हृदि। नाभौ गुदे चोरुयुगे जानुद्वन्द्वे पदद्वये ।। ९।।
दशस्थानेषु चैकैकं न्यसेत् पदमनुक्रमात्। अनामिकाभ्यां प्रणवं न्यसेत् करतलद्वये।। १०।।
उभाभ्यां तर्जनीभ्यां च युगपद् व्याहृतित्रयम्। अङ्गुष्ठद्वयरेखासु विन्यसेत् तिसृषु क्रमात्।।११।।
पर्वस्वङ्गुष्ठयोगेन अक्षराणि न्यसेत् पृथक्। मुखवृत्ते लोचनयो: कर्णयोर्नासयोरपि ।। १२।।
गण्डयोरोष्ठयोर्दन्तपङ्क्त्यो: कण्ठे च वक्षसि। कुक्षौ नाभौ पार्श्वयोश्च गुह्ये जान्वो: पदोर्न्यसेत्।।१३।।
चतुर्विंशतिवर्णांश्च नमोऽन्तान् प्रणवादिकान्। अक्षरन्यास इत्युक्तो मोक्षैकफलदो नृणाम्।।१४।।
मूर्ध्नि भाले मुखे नेत्रयुगे कर्णद्वयेऽपि च। पुटद्वन्द्वे नासिकाया वदने चिबुके गले।। १५।।
बाह्वोर्हृदि स्तनद्वन्द्वे नाभिदेशे च गुह्यके। ऊरुयुग्जानुयुग्मे च पदयुग्मे च विन्यसेत्।। १६।।
वर्णानन्ते केशवाय नम इत्यादिकान् क्रमात्। याच्छ्रीकृष्णाय नम इत्यन्तान्नियतमानस:।। १७।।
केशवन्यास एवं स्याद् भुक्तिमुक्तिफलप्रद:। दक्षिणेतरयोर्बाह्वोस्तर्जन्यङ्गुष्ठयुक्तया ।। १८।।
मुद्रया वनमालाख्यं न्यासं त्रिपदया न्यसेत्। कण्ठादिपादपर्यन्तं श्रीकरं मोक्षदं शुभम्।। १९।।
शङ्खचक्रमनुध्यायन् गायत्र्यैकैकमक्षरम् । विन्यसेद्भुजयोर्न्यासं श्रीमुद्रापूर्वमुत्तमम् ।। २०।।
आदौ वृत्तं वसुदलमष्टकोणं तत: परम्। पश्चात् स्वरदलं ध्यायेल्लिखेद्वा भुजयोर्द्वयो:।। २१।।
वृत्तमध्ये न्यसेत् तारं व्याहृतित्रयसंयुतम्। गायत्र्या: प्रथमं पादं न्यसेद्वसुदलान्तरम्।। २२।।
द्वितीयं वसुकोणे च तृतीयं च तुरीयकम्। न्यसेत् स्वरदले विद्वान् सर्वपापनिवृत्तये।। २३।।

इत्युत्पत्तिन्यास:। अथ स्थितिन्यास:—

अङ्गं वर्णा: पद: पदाश्चार्धऋग् व्यापकाह्वय:। तत्त्वमावृतिरित्यष्टौ न्यासा: स्यु: स्थितिसंज्ञका:।।१।।
पादयो: पच्चतु:सन्ध्यो: कट्योर्नाभौ च पार्श्वयो:। पञ्चमास्ये ललाटे च दृशो: श्रुत्योश्च नासयो:।।२।।
[2]गण्डोष्ठदन्तजिह्वासु कण्ठदोर्मूलहृत्स्वपि । चतुर्विंशतिवर्णांश्च न्यसेदङ्गेष्वनुक्रमात्।। ३।।
एकैकमक्षरं ग्राह्यं दन्तयोर्बाहुमूलयो:। पादयो: पच्चतु:सन्ध्योर्नाभौ शीर्षे ललाटके।। ४।।
वक्त्रे कण्ठे च हृदये पदानि क्रमतो न्यसेत्। पादद्वये च जान्वादिगुदान्ते नाभिमण्डले।। ५।।

---

१. 'उत्तरेभ्य:' ग. पाठ:। २. 'कण्ठोष्ट' ग. पाठ:।

शीर्षे भाले नेत्रयुगे वक्त्रे कण्ठे च वक्षसि। गायत्र्या विन्यसेत् पादान् क्रमेणैव विचक्षण:।। ६।।
आनाभि पादादारभ्य न्यसेत् पादद्वयं मनो:। आचक्षु: शीर्षमारभ्य न्यसेत् पादं तृतीयकम्।। ७।।
न्यसेद्वक्षसि गायत्रीमृङ्न्यासोऽयमुदाहृत:। गायत्रीं व्याहृतियुतां कराभ्यां विन्यसेद्बुध:।। ८।।
पृथिव्यापस्तथा तेजो वायुराकाशमप्यथ। गन्धो रसस्तथा रूपं स्पर्शशब्दाविति स्थितौ।। ९।।
उपस्थपायुपादांश्च पाणिवाग्घ्राणजिह्वका:। लोचनं त्वक्तत: श्रोत्रं मनोबुद्धिरहङ्क्रिया।। १०।।
अव्यक्तमिति तत्त्वानि चतुर्थ्यन्तानि सर्वत:। नमोन्तकानि गायत्रीमन्त्रवर्णै: सबिन्दुकै:।। ११।।
आवापादौ?च युक्तानि प्रणवादीनि पादयो:। जान्वोर्नाभौ च हृदये भ्रूमध्ये रन्ध्रयोरपि।। १२।।
नासाजिह्वालोचनेषु त्वक्कर्णशेफपायुषु। पादपाण्यास्यनासासु जिह्वायां नयने त्वचि।। १३।।
कर्णद्वये क्रमेणैव न्यसेद्भ्रूयो हृदि न्यसेत्। अवशिष्टानि चत्वारि तत्त्वानि तनुशुद्धये।। १४।।

तत्प्रकारस्तु—ओंभूर्भुव:स्व: तत्पृथिव्यात्मने नम: पादयो: इत्यादि।

परिपूर्णं परं ब्रह्म स्वमात्मानं जगन्मयम्। तेजोमण्डलमध्यस्थं भावयन्नावृतीर्न्यसेत्।। १५।।
दक्षिणस्य पदाङ्गुष्ठादारभ्य त्रिपदाक्षरै:। न्यसेद् वामपदाङ्गुष्ठपर्यन्तं मण्डलाकृति।। १६।।

इति स्थितिन्यास:। अथ लयन्यास:—

मन्त्रपादपदन्यासाक्षरदण्डकचम्पका:। अङ्गव्यापकमित्यष्टौ न्यासा: स्युर्लयसंज्ञिता:।। १।।
पादयोश्च चतु:सन्ध्योर्नाभौ हृदि गले पुन:। गायत्र्या विन्यसेत् तारव्याहृतित्रयसंयुतम्।। २।।
पादोरुजानुजङ्घान्ते नाभौ हृदि गले मुखे। ललाटे मूर्ध्नि गायत्र्या न्यसेत् पादत्रयं क्रमात्।। ३।।
पादयोर्जानुनो: कट्योर्नाभौ हृदि गले मुखे। ललाटे मूर्ध्नि गायत्र्या: शिखायां विन्यसेद्दश।।४।।
उभयो: पादयो: सन्धिचतुष्के नाभिवक्षसि। कण्ठे चोष्ठयुगे दन्तपङ्क्त्योस्तालद्वयेऽपि च।। ५।।
नासाश्रुत्योर्लोचनयो: पूर्वादिमुखपञ्चके। अक्षराणि चतुर्विंशद्गायत्र्या विन्यसेत् क्रमात्।। ६।।
एकैकमक्षरं तालुनासाश्रुत्यक्षिषु न्यसेत्। पञ्च पत्सन्धिषु गले ध्वजे नाभौ च वक्षसि।। ७।।
कण्ठे दो:सन्धिषु दशस्वोङ्कारादि नमोन्तकान्। गायत्र्या विन्यसेद्वर्णान् बिन्दुयुक्तान् यथाक्रमम्।।८।।

ततो दण्डकन्यासं न्यसेत्।

पादजानूरुगुह्येषु नाभौ हृदि च वक्षसि। वक्त्रे भ्रूमध्यशिरसि पदानि क्रमतो न्यसेत्।। ९।।

अथ चम्पकन्यास:। पूर्वोक्तस्थानेषु—ओतं प्रह्लादिन्यै चम्पकनिभायै नम:। ओत्सं प्रभायै अतसीपुष्पसन्निभायै नम:। ओंविं(स?नि)त्यायै पिङ्गलरूपायै नम:। ओंतुं विश्वभद्रा[1]यै इन्द्रनीलप्रभायै नम:। ओंर्वं विलासिन्यै नीलरूपायै नम:। ओंरें प्रभावत्यै नीलवर्णायै नम:। ओंणिं जयायै विद्युन्निभायै नम:। ओंयं शान्तायै रक्तगौरवर्णायै नम:। ओंभं कान्तायै जलदवर्णायै नम:। ओंगौं दुर्गायै रक्तवर्णायै नम:। ओंदें सरस्वत्यै मरकतसन्निभायै नम:। ओंवं विद्रु[2]मायै जातीपुष्पसन्निभायै नम:। ओस्यं विशालायै स्वर्णप्रभायै नम:। ओंधीं ईशायै कुङ्कुमप्रभायै नम:। ओंमं व्यापिन्यै पद्मरागनिभायै नम:। ओंहिं विमलायै शङ्खप्रभायै नम:। ओंधिं तमोपहारिण्यै पाण्डुरनिभायै नम:। ओयों सूक्ष्मायै इन्द्रगोपसन्निभायै नम:। ओंयों

---

१. 'विश्वम्भरायै' ख. पाठ:। २. 'विश्वरूपायै' ग. 'विश्वमायायै' ख. पाठ:।

विश्वयोन्यै क्षौद्रसन्निभायै नमः। ऊंनः जयावहायै आदित्योदयसन्निभायै नमः। ऊंप्रं पद्मालयायै नीलोत्पलसन्निभायै नमः। ऊंचों परायै गोरोचनसन्निभायै नमः। ऊंदं शोभायै कुन्देन्दुशङ्खनिभायै नमः। ऊंयात् [1]पद्मरूपायै स्फटिकसन्निभायै नमः।।

चम्पकन्यास एषोऽयं सर्वपापप्रणाशनः। व्याहृतित्रयपादांश्च षडङ्गेषु न्यसेत् क्रमात्।। १०।।
व्यापकत्वेन गायत्रीं सप्तव्याहृतिपूर्विकाम्। शिरोऽन्तं तुर्यपादं च त्रिवारं विन्यसेत् पृथक्।। ११।।
मूर्धादिपादपर्यन्तमामूर्धा च पदान्ति(? दि)कम्।..।।

इति लयन्यासः।। एवं चतुर्विंशतिन्यासान् विधाय गायत्र्या अर्थबोधो विधेयः। अत्र गायत्रीं प्रणवादिकसप्तव्याहृत्युपेतां शिरःसमेतां सर्ववेदसारमिति वदन्ति। एवं विशिष्टां गायत्रीं प्राणायामैरुपास्य प्रणवव्याहृतित्रयोपेता गायत्री जपादिभिरुपास्या। तत्र शुद्धगायत्री प्रत्यग्ब्रह्मैक्यबोधिका, धियो यो नः प्रचोदयादिति नोऽस्माकं धियो बुद्धीः प्रचोदयात् सर्वबुद्धिसंज्ञान्तः-करणप्रकाशकः सर्वसाक्षी प्रत्यगात्मोच्यते। तत्र प्रचोदयाच्छब्दनिर्दिष्टस्यात्मस्वरूपतः परं ब्रह्म तत्सवितुः—पदैर्निर्दिश्यते। तत्रेदं ''ऊंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः''। इति तच्छब्देन प्रत्यग्भूतं स्वतःसिद्धं परं ब्रह्मोच्यते, सवितुरिति स्थितितयोपलक्षकसर्वप्रपञ्चोत्पादकलक्षणसमस्तद्वैतविभ्रमाधिष्ठानत्वं लक्ष्यते। वरेण्यमिति सर्वैर्वरणीयं निरतिशयानन्दरूपं भर्ग इति अविद्यादोषभर्जनात् ज्ञानस्यैव विषयत्वं, देवस्य विषयस्येति सर्वद्योतनात्मकाखण्डचिदानन्दकरः। तत्सवितुर्देवस्येत्यत्र षष्ठ्यर्थो राहोः शिरः इतिवदौपचारिकः। बुद्ध्यादिसर्वदृश्यसाक्षिलक्षणवत् निः[2]स्वरूपं तत्सर्वाधिष्ठानं, रज्जुसर्पन्यायेन नापवादसमानाधिकरणरूपमेकत्वं सोऽहं इति न्यायेन सर्वसाक्षिप्रत्यगात्मनो ब्रह्मणा सह तादात्म्यरूपमेकत्वं भवतीति सर्वात्मब्रह्मबोधकोऽयं गायत्रीमन्त्रः सम्पद्यते।। सप्तव्याहृतीनामप्ययमर्थः। भूरिति सन्मात्रमत्रोच्यते। भुवरिति सर्वं भावयति प्रकाशयतीति व्युत्पत्त्या चिद्रूपमुच्यते। स्वरिति स्वर्यते इति व्युत्पत्त्या सृष्टं सर्वं प्रेर्यमाणं स्वस्वरूपमुच्यते। मह इति महीयते पूज्यते इति व्युत्पत्त्या सर्वातिशयत्वमुच्यते। जन इति जनयतीति व्युत्पत्त्या सर्वकारणत्वमुच्यते। तप इति सर्वतेजोरूपत्वं, सत्यमिति सर्वबाधाधिकरणं यत्तेजोरूपं तत्सत्तार्थरूपं, तत्तदोङ्कारवाच्यं ब्रह्मैवात्मास्य चिद्रूपात्मभाव इति। यद्वा भूराद्याः सप्त लोकाः ओङ्कारशब्दवाच्यब्रह्मात्मकाः न तद्व्यतिरिक्तं किञ्चिदस्तीति व्याहृतयोऽपि सर्वात्मब्रह्मबोधिकाः।। गायत्रीशिरसोऽप्ययमर्थः। आप इति 'आप्लृ व्याप्तौ' व्यापित्वमुच्यते, ज्योतिरिति प्रकाशरूपं, रस इति सर्वातिशयत्वं, अमृतमिति मरणादिसंसारनित्यमुक्तत्वं, ब्रह्मेति आत्मोच्यते, एवं सर्वव्यापि सर्वप्रकाशं सर्वातिशयं नित्यमुक्तमात्मस्वरूपं सच्चिदानन्दात्मकं यदोङ्कारवाच्यं ब्रह्माहमस्मीति, गायत्रीशिरसोऽपि सर्वात्मब्रह्मबोधकत्वं। यज्ज्ञात्वा (जप्त्वा) पूर्ववत् प्राणायामादिव्याहृतिन्यासशिरसोन्यासादिकं विधाय चतुर्थपादगायत्रीमन्त्रजपं मोक्षार्थी कुर्यात्। ''परो रजसे सावदोंं'' इति चतुर्थः पादः। अस्य विमल ऋषिः, गायत्री छन्दः, परमात्मा देवता। सवितुर्मण्डलान्तः-स्थगुणातीतोऽसौ यः सोऽहं इति चतुर्थपादस्यार्थः। उदासीनो बीजं सुषुम्नानाडी सरस्वती शक्तिः। मोक्षार्थे विनियोगः। ऊंपरः हृदयाय नमः। ऊंरजसे शिरसे स्वाहा। ऊंसावदों शिखायै वषट्। ऊंपरः कवचाय हुं। ऊंरजसे नेत्रत्रयाय वौषट्। ऊंसावदों अस्त्राय फट्। एवमङ्गुलीन्यासः। ध्यानम्—

---

१. 'भद्र' ग. पाठः। २. 'नित्यरूपं' क. पाठः।

ध्यायेद्भास्करशीतांशुवह्नीनां मण्डलोपरि । स्थिते वह्निपुरे नागदलपद्मसमाश्रितम्।। १ ।।
अङ्गुष्ठमात्रममलं विष्णुमोङ्काररूपिणम् । सर्वदेवमयं देवमनन्तं सर्वतोमुखम् ।। २ ।।
स्वमायया समाक्रान्तं सूक्ष्मज्योति:स्वरूपकम्। स ब्रह्मा स शिव: सेन्द्र: सोऽक्षर: परम: स्वराट्।।३ ।।

इति ध्यात्वा–

असित्रिखण्डयोनीश्च सुरभिं चाप्यजस्तनीम्। लिङ्गमुद्रां महामुद्रामञ्जलिं चापि दर्शयेत्।। ४ ।।
गायत्र्याश्छन्दो गायत्री विश्वामित्र ऋषिस्तथा। सविता देवताग्निस्तु मुखं ब्रह्मा शिरस्तथा।। ५ ।।
विष्णुश्च हृदयं शुक्लो ललाटं शुक्लवर्णता। सांख्यायनसगोत्रं स्याज्जपादौ विनियोगत:।। ६ ।।
त्रैलोक्यवरणा पृथ्वी देवता कुक्षिरेव च। एवं ध्यात्वा तु गायत्रीं जपेद् द्वादशलक्षणाम्।। ७ ।।
ब्रह्मचारी गृहस्थश्च प्रणवेन युतां जपेत्। अन्ते च प्रणवं कुर्यात्तेनासौ वृद्धिमाप्नुयात्।। ८ ।।
वानप्रस्थो जपं कुर्याच्चतुर्थसहितां तथा। रे इत्येतत्तु बीजं स्यात् यवर्ण: शक्तिरुच्यते।। ९ ।।
णीत्येत् कीलकं प्रोक्तं गायत्र्यास्त्रिपदात्मन:। गायत्रीछन्द:पादानां विश्वामित्र ऋषिस्तथा।। १० ।।
ब्रह्मा विष्णुश्च रुद्रश्च देवतास्त्विति ता: क्रमात्। अक्षराणां च सर्वेषां प्रजापतिर्ऋषिस्तथा।। ११ ।।
विनियोगाङ्गविन्यासे गायत्री छन्द उच्यते। अक्षराणां च सर्वेषां वक्ष्यन्ते देवता: क्रमात्।। १२ ।।
अग्निर्वायू रविर्विद्युद्यमो वरुण एव च। बृहस्पतिस्तु पर्जन्य इन्द्रो गन्धर्व एव च।। १३ ।।
पूषा शिवश्च त्वष्टा च वसवश्च मरुत्तत:। सोमोऽङ्गिरा विश्वेदेवा अश्विनौ च प्रजापति:।। १४ ।।
सर्वदेवश्च रुद्रश्च ब्रह्मा विष्णुश्च देवता:। जपकाले चिन्तनीयास्तासां सायुज्यमाप्नुयात्।। १५ ।।

अथाक्षरतत्त्वानि–

पृथिवी पुष्करं तेजो वायुरम्बरमेव च। गन्धो रसोऽथ रूपं च स्पर्श: शब्दोऽपि वागपि।। १६ ।।
हस्तावुपस्थ: पायुश्च पच्छ्रोत्रे वक्त्रचक्षुषी। जिह्वा घ्राणो मनस्तत्त्वमहङ्कारो महांस्तथा।। १७ ।।
गुणत्रयं च यत्तत्त्वं क्रमतस्तत्त्वनिश्चय:।.....................................।।

अथाक्षरशक्तयोऽप्युच्यन्ते–

प्रह्लादिनी प्रभा नित्या विश्वभद्रा[1] विलासिनी। प्रभावती जया शान्ता[2] कान्ता दुर्गा सरस्वती।।१८ ।।
विश्वमाया[3] विशालेशा व्यापिनी विमला तथा। तमोपहारिणी सूक्ष्मा विश्वयोनिर्जयावहा।। १९ ।।
पद्मा[4]लया परा शोभा भद्ररूपा च शक्तय:[5]।.....................................।।

अथ प्रत्यक्षध्यानान्युच्यन्ते–

तत्कारं चम्पकापीतं ब्रह्मविष्णुशिवात्मकम्। शान्तं पद्मासनारूढं ध्यायेत् स्वस्थानसंस्थितम्।। १ ।।
सकारं चिन्तयेदेवमतसीपुष्पसन्निभम् । पद्ममध्यस्थितं सौम्यमुपपातकनाशनम् ।। २ ।।

---

[1] 'सविश्वम्भरसंज्ञिता' सविश्वहरसंज्ञिका' इति पाठान्तरम्। [2] 'सीता' पाठान्तरम्। [3] 'विश्वरूपाह्वया' पाठान्तरम्।
[4] 'पद्मरूपा पाठ:। [5] 'तत: परम्' इति वा पाठ:।

विकारं कपिलं नित्यं कमलासनसंस्थितम्। ध्यायेच्छान्तं द्विजश्रेष्ठो महापातकनाशनम्।। ३।।
तुकारं चिन्तयेत् प्राज्ञ इन्द्रनीलसमप्रभम्। निर्दहेत् सर्वदुःखानि ग्रहरोगसमुद्भवान् ।। ४।।
र्वकारं वह्निदीप्ताभं चिन्तयेच्च विचक्षणः। भ्रूणहत्याकृतं पापं तत्क्षणादेव नश्यति।। ५।।
रेकारं विमलं ध्यायेच्छुद्धस्फटिकसन्निभम्। पापं विनश्यति क्षिप्रमगम्यागमनोद्भवम् ।। ६।।
णिकारं चिन्तयेद्योगी शुद्धस्फटिकसन्निभम्। अभक्ष्यभक्षणं पापं तत्क्षणादेव नश्यति।। ७।।
यंकारं तारकावर्णमिन्दुरेखाविभूषितम्। योगिनां वरदं ध्यायेद् ब्रह्महत्याविनाशनम्।। ८।।
भकारं कृष्णवर्णं तु नीलमेघसमप्रभम्। ध्यात्वा पुरुषहत्यादि पापं नाशयते द्विजः।। ९।।
र्गोकारं रक्तवर्णं च कमलासनसंस्थितम्। गोहत्यादिकृतं पापं नाशयन्तं विचिन्तयेत्।। १०।।
देकारं रक्तसङ्काशं कमलासनसंस्थितम्। चिन्तयेत् सततं योगी स्त्रीहत्यादहनं परम्।। ११।।
वकारं शुक्लवर्णं तु जातीपुष्पसमप्रभम्। गुरुहत्याकृतं पापं ध्यात्वा दहति तत्क्षणात्।। १२।।
स्यकारं तु तथा पीतं सुवर्णसदृशप्रभम्। मनसा चिन्तितं पापं ध्यात्वा दहति चानघः।। १३।।
धीकारं चिन्तयेच्छुक्लं कुन्दपुष्पसमप्रभम्। पितृमातृबधात् पापान्मुच्यते नात्र संशयः।। १४।।
मकारं पद्मरागाभं चिन्तयेद् दीपसन्निभम्। पूर्वजन्मार्जितं पापं तत्क्षणादेव नश्यति।। १५।।
हिकारं शङ्खवर्णं तु पूर्णचन्द्रसमप्रभम्। अशेषपापदहनं ध्यायेन्नित्यं विचक्षणः ।। १६।।
धिकारं पाण्डुरं ध्यायेत् पद्मस्योपरि संस्थितम्। प्रतिग्रहकृतं पापं स्मरणादेव नश्यति।। १७।।
योकारं रक्तवर्णं तु इन्द्रगोपसमप्रभम्। ध्यात्वा प्राणिवधपापं निर्दहेन्मुनिपुङ्गव।। १८।।
द्वितीयश्चैव सम्प्रोक्तो योकारो रक्तसन्निभः। निर्दहेत् सर्वपापानि नान्यैः पापैः प्रलिप्यते।। १९।।
नःकारं तु मुखं पूर्वमादित्योदयसन्निभम्। सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम्।।२०।।
नीलोत्पलदलश्यामं प्रकारं दक्षिणामुखम्। सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्ब्रह्मणः पदम्।।२१।।
सौम्यं गोरोचनापीतं चोकारं चोत्तरामुखम्। सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम्।।२२।।
शुक्लवर्णेन्दुसङ्काशं दकारं पश्चिमाननम्। सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम्।। २३।।
यात्कारस्तु शिरः प्रोक्तश्चतुर्वदनसप्रभः। प्रत्यक्षफलदो ब्रह्मविष्णुरुद्र इति स्थितः ।। २४।।
एवं ध्यात्वा तु मेधावी जपहोमौ करोति यः। न भवेत् सूतकं तस्य मृतकं च न विद्यते।।२५।।
यस्त्वेवं न विजानाति गायत्रीं च तथाविधाम्। कथितं सूतकं तस्य मृतकं च तथानघ।। २६।।
नैव दानफलं तस्य न च यज्ञफलं तथा। नैव तीर्थफलं प्रोक्तं तस्यैवं सूतके सति।। २७।।
विन्यस्यैवं जपेद्यस्तु गायत्रीं वेदमातरम्। ब्रह्मलोकमवाप्नोति व्यासस्य वचनं यथा।। २८।।
स्वरूपं यः पुनस्तस्याः कृत्वेवास्ते यथाविधि। ग्रहदोषैर्न लिप्येत अन्नपूर्णा वसुन्धरा।। २९।।
यथाकथञ्चिज्जप्तैषा देवी परमभाविनी। सा च कामप्रदा प्रोक्ता किं पुनर्विधिना नृप।। ३०।।

जपादौ च चतुर्विंशतिमुद्राः प्रदर्शयेत्—

सम्मुखं सम्पुटं चैव विततं विस्तृतं तथा। द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा।। ३१।।
षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकं तथा। शकटं यमपाशं च ग्रथितं सन्मुखोन्मुखम्।। ३२।।
प्रलम्बं मुष्टिकं चैव मत्स्यकूर्मवराहका:। सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवस्तथा।। ३३।।
एता मुद्राश्चतुर्विंशा जपादौ विनियोजयेत्। सुरभिर्ज्ञानचक्रे च योनि: कूर्मोऽथ पङ्कजम्।। ३४।।
लिङ्गनिर्याणमुद्रे च जपान्ते तु प्रकीर्तिता:।..।।

एतासां लक्षणान्यग्रे वदिष्यामि।। जपादौ तु गायत्रीहृदयं पठेत्।

अथातो वसिष्ठ: स्वयंभुवं परिपृच्छति, पृच्छामस्तावद्भगवन् गायत्रीं तां भोरनुब्रूहि। श्रीभगवानुवाच—ब्रह्मज्ञानोत्पत्तिं प्रकृतिं व्याख्यास्याम:, स्वाङ्गुल्या मथ्यमानात् सलिलात् फेनो भवति, फेनाद् बुद्बुदो भवति, बुद्बुदादण्डो भवति, अण्डाद् ब्रह्मा भवति, ब्रह्मणोऽग्निर्भवति, अग्नेर्वायुर्भवति, वायोरोङ्कारो भवति, ओङ्काराद्-व्याहृतिर्भवति, व्याहृत्या गायत्रीं भवति, गायत्र्या: सावित्री भवति, सावित्र्या: सरस्वती भवति, सरस्वत्या वेदा भवन्ति, वेदभ्यो गायत्री भगवन् पृच्छामि व्याहृतीभि: प्रवर्तन्ते। किं वै भू: किं भुव: किं स्व: किं मह: किं जन: किं तप: किं सत्यं किं तत् किं सवितु: किं वरेण्यं किं भर्ग: किं देवस्य किं धीमहि किं धिय: किं य: किं न: किं प्रचोदयात्। भूरिति भूर्लोक: भुवरित्यन्तरिक्षलोक:, स्वरिति स्वर्लोक: महरिति महर्लोक: जन इति जनो लोक:, तप इति तपोलोक:, सत्यमिति सत्यलोक:, भूर्भुव:स्वरोमिति त्रैलोक्यम्। तदिति तदसौ तेज:, सोऽग्नि:, सवितुरिति सविता (त)दादित्यो वरेण्योऽन्नं वै वरेण्योऽन्नमेव प्रजापति:, भर्ग इत्यापो वै भर्गो यदाप: स भर्गो, देवस्येतीन्द्रो देवो यद्वै तद्धीन्द्रियाणि सर्वपुरुषो नाम रुद्रो धीमहीत्यन्तरात्मा यदन्तरात्मा स प्रणवो धिय इत्यध्यात्मन् यदध्यात्मन् तत् परमं पदं, यो न इति पृथिवी वै योनि:[1], प्रचोदयादिति काम: कामीमाँल्लोकानु प्रत्याह्वयते इत्यानृशँसो यदानृशँस: तत्परो धर्म: इत्येषा गायत्री किंगोत्रा कत्यक्षरा कतिपदा कतिकुक्षि: कतिशीर्षा। साख्यायनसगोत्रा सा, चतुर्विंशत्यक्षरा, त्रय: पादा:, ऋग्वेदोऽस्या: प्रथम: पादो भवति, यजुर्वेदो द्वितीय: पाद:, सामवेदस्तृतीय: पाद:। पूर्वा दिक् प्रथमा कुक्षिर्भवति, दक्षिणा द्वितीया, पश्चिमा तृतीया, उत्तरा चतुर्थी, ऊर्ध्वा पञ्चम्यध: षष्ठी, व्याकरणमस्या: प्रथमं शीर्षं भवति, शिक्षा द्वितीयं, कल्पस्तृतीयं, निरुक्तं चतुर्थं, ज्योतिषामयनमिति पञ्चमम्। किमु चेष्टितं किमुदाहृतं किं लक्षणं मीमांसा। अथर्वणवेदो विचेष्टितं छन्दो [2]विधिरित्युदाहरन्ति। को वर्ण: क: स्वर: का देवता कानीमान्यक्षरदेवता। उष:काले रक्ता, मध्याह्ने शुक्ला, अपराह्णे कृष्णा। पूर्वसन्ध्या ब्राह्मी, मध्याह्नसन्ध्या माहेश्वरी, अपराह्णसन्ध्या वैषण्वी। हंसवासिनी ब्राह्मी, वृषवाहिनी माहेश्वरी, गरुडवाहिनी वैष्णवी। षड्जर्षभगान्धारा: स्वरा:। पूर्वाह्णे गायत्री रक्ता कुमारी दण्डाक्षमालाकमण्डलुहस्ता निषण्णा पद्मपीठासनस्था हंसारूढा ब्रह्मदैवत्या भूर्लोकव्यवस्थिता। ऋग्वेदसहितादित्यपथगामिनी। मध्याह्ने सावित्री श्वेताम्बरा श्वेतवर्णा यौवनस्था त्रिनेत्रा त्रिशूलहस्ता रजतपीठासनस्था वृषभारूढा रुद्रदैवत्या भुवर्लोकव्यवस्थिता यजुर्वेदसहितादित्यपथगामिनी। अपराह्णे सरस्वती कृष्णा वृद्धा पीतवासाश्चतुर्भुजा शङ्खचक्रगदासिहस्ता निषण्णा कनकपीठासनस्था विष्णुदैवत्या स्वर्लोकव्यवस्थिता सामवेदसहितादित्यपथगामिनी।। ‘‘प्रह्लादोऽत्रिर्वसिष्ठश्च शुक: कण्व: पराशर:। विश्वामित्रो महातेजा: कपिल: शौनको महान्।। याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपोनिधि:। गौतमो मुद्गल: श्रेष्ठो वेदव्यासश्च रोमश:।। अगस्त्य: कौशिको

---

[1] ‘योनि:’ ख. पाठ:। [2] ‘निचृत्युदाहरन्ति’ ग. पाठ:।

वत्स: पुलस्त्यो कपिलस्तथा। दुर्वासास्तपसा श्रेष्ठो नारद: कश्यपस्तथा''।। गायत्र्युष्णिगनुष्टुप् बृहती पङ्क्तिस्त्रिष्टुब्जगती कान्ति: बृहती पङ्क्तिरास्तारपङ्क्तिबिराट् विष्टारपङ्क्तिरक्षरपङ्क्ति: कात्यायनी ज्योतिष्मती त्रिष्टुप्छन्दो महाच्छन्दो भूरितिछन्दो भुवरिति छन्द: स्वरिति छन्दो भूर्भुव:स्वरोमित्येतानि छन्दांसि। प्रथममाग्नेयं द्वितीयं प्राजापत्यं तृतीयं सौम्यं चतुर्थमैशानं पञ्चममादित्यं षष्ठं बार्हस्पत्यं सप्तमं पितृदैवत्यमष्टमं भगदैवत्यं नवममार्यम्णं दशमं सावित्रं एकादशं त्वाष्ट्रं द्वादशं पौष्णं त्रयोदशमैन्द्राग्नं चतुर्दशं वायव्यं पञ्चदशं वामदेव्यं षोडशं मैत्रावरुणं सप्तदशं भ्रातृव्य(आंगिरसं) मष्टादशं वैश्वदेव्यं एकोनविंशं वैष्णवं विंशं वासवं एकविंशं (रौद्रं द्वाविंशमाश्विनं त्रयोविंशं ब्राह्मं चतुर्विंशं सावित्रं) ''प्रह्लादिनी प्रभा नित्या[1] विश्वभद्रा विलासिनी। प्रभावती जया शान्ता कान्ता दुर्गा सरस्वती।। विद्रुमा च विशालेशा व्यापिनी विमला तथा। तमोपहारिणी सूक्ष्मा विश्वयोनिर्जयावहा।। पद्मालया परा शोभा पद्म[2]रूपा च शक्तय:।। क्रमाच्चम्पकपुष्पाभमतसीपुष्पसन्निभम्। विद्रुमस्फटिकाकारं पद्मपुष्पसमप्रभम्।। प्रवालं पद्मपत्राभं पद्मरागसमप्रभम्। तरुणादित्यसङ्काशं शङ्खकुन्देन्दुसन्निभम्।। इन्द्रनीलमणिप्रख्यं मौक्तिकं कुङ्कुमप्रभम्। अञ्जनाभं च गाङ्गेयं वैडूर्यं क्षौद्रसन्निभम्। (हारिद्रं कृष्णं) दुग्धाभं रविकान्तिसमप्रभम्।। शुकपिच्छसमाकारं क्रमेण परिकल्पयेत्। पृथिव्यापस्तथा तेजो वायुराकाश एव च।। गन्धो रसश्च रूपं च स्पर्श: शब्दस्तथैव च। उपस्थ: पायु: पादश्च पाणिर्वागपि च क्रमात्। घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं तथैव च।। मनो बुद्धिरहङ्कारमव्यक्तं च यथाक्रमम्। सुमुखं सम्पुटं चैव विततं विस्तृतं तथा।। द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा। षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकं तथा। शकटं यमपाशं च ग्रथितं सम्मुखोन्मुखम्। प्रलम्बं मुष्टिकं चैव मत्स्य: कूर्मवराहकौ।। सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवस्तथा। इति मुद्राश्चतुर्विंशा द्वादशा[3]त्मप्रतिष्ठिता:।। एता मुद्रा न जानाति गायत्री निष्फला भवेत्।। ब्रह्मा मूर्ध्नि सङ्घाते विष्णुर्ललाटे रुद्रो(भ्रूमध्ये)केशा: मेघाश्चक्षुषी चन्द्रादित्यौ, कर्णौ शुक्रबृहस्पती, नासापुटावश्विनौ, दन्तोष्ठावुभयसन्धी, मरुतो बाहू, स्तनौ वसव:, ब्रह्मा हृदयं पर्जन्यमाकाशं, उदरं नाभि अग्नि:, कटिरिन्द्राणी, जघनं प्राजापत्यं, कैलासमलयावूरू, विश्वेदेवा जानुनी, शशी जङ्घे, खुरा: पितर:, पृथ्वी पादौ वनस्पतय: केशा लोमानि नखानि, मुहूर्तास्ते विग्रहा: केतुर्मासं ऋतु:[4] सन्धिकालद्वयमाच्छादनं संवत्सरो निमिष: अहोरात्रावादित्यश्चन्द्रमा: प्रवरवरदा देवी पठेद्यो हृदयं ओं तत्सवितुर्वरदाय नम: ओं तत्प्रातरुपदिष्टाय[5] नम:, सायमधीयानो दिवसकृतं पापं नाशयति, प्रात: प्रयुञ्जानो रात्रिकृतं पापं नाशयति, तत्सायंप्रात: प्रयुञ्जानोऽपापो भवति। य इदं सावित्रं ब्राह्मण: पठेत् त्रीणि शतसाहस्र्या: सावित्र्या: षष्टिसहस्राणि जप्तानि फलानि भवन्ति, चत्वारो वेदा अधीता भवन्ति, सर्वेषु वेदेषु ज्ञातो भवति, सर्वेषु तीर्थेषु स्नातो भवति, स्वर्णस्तेयात् पूतो भवति, सुरापानात् पूतो भवति, ब्रह्महत्याया: पूतो भवति, स्त्रीहत्याया: पूतो भवति, वीरहत्याया: पूतो भवति, अगम्यागमनात् पूतो भवति, अभक्ष्यभक्षणात् पूतो भवति, पङ्क्तिशतसहस्राणां पङ्क्तिपाव[6]नात् पूतो भवति, अष्टौ ब्राह्मणान् ग्राहयित्वाऽपरिमितमायुर्भवति। य एवं वेद ब्रह्मलोकं स गच्छति श्रीब्रह्मलोकं स गच्छत्यों नम: इति।

तदित्यवाङ्मनोगम्यं ध्येयं यत् सूर्यमण्डले। सवितु: सकलोत्पत्तिस्थितिसंहारकारिण:।। १ ।।

---

१. 'सत्या' ख. पाठ:। २ 'भद्ररूपा' क. ग. पाठ:। ३. 'गायत्र्या: सुप्रतिष्ठिता:' ख. पाठ:। ४. 'भृगु:' ग. पाठ:।
५. 'आदित्याय' ख. पाठ:। ६. 'भेदनात्' ख. पाठ:।

वरेण्यमाश्रयणीयं यदाधारमिदं जगत्। भर्गस्य साक्षात्कारेण ह्यविद्याशक्तिदायकम्।। २।।
देवस्य ज्ञानरूपत्वस्वानन्दात् क्रीडतोऽपि वा। धीमह्यहँ स ऐवति तेनैवाभेदसिद्धये।। ३।।
धियोऽन्त:करणे वृत्ती: प्रत्यक्प्रवणचारिणी:। य इत्यलिङ्गधर्मं यच्चे[1]त्यज्ञानादिलक्षणम्।।४।।
नोऽस्माकं बहुधाभ्यस्तभेदभिन्नदृशां तथा। प्रचोदयात् प्रेरयति प्रार्थना बहिरिष्यते।। ५।।
यो देव: सवितास्माकं धियो धर्मादिगोचरात्। प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे।। ६।।

ब्रह्माणी चतुराननाक्षवलयं कुम्भं करै: स्रुक्स्रुवौ
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका।
हंसारोहणकेलिरम्बरमणेर्बिम्बार्चिता भूषिता
गायत्री हृदि भाविता भवतु न: सम्पत्समृद्ध्यै सदा।। ७।।
रुद्राणी नवयौवना त्रिनयना वैयाघ्रचर्माम्बरा
खट्वाङ्गत्रिशिखाक्षसूत्रवलयाभीतीर्दधानाम्बिका।
विद्युत्पिङ्गजटाकलापविलसद्बालेन्दुमौलिर्मुदा
सावित्री वृषवाहनामृततनुर्ध्येया यजूरूपिणी।। ८।।
सेव्या सात्र सरस्वती भगवती पीताम्बराडम्बरा
श्यामा सामजपान्विता परिमलोद्गात्राञ्चिता वैष्णवी
तार्क्ष्यस्था नवनूपुराङ्गदमणिग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रसगदाभीति: श्रिये चास्तु न:।। ९।।

इति कात्यायनीपाठ:।। इति पठित्वा गायत्रीं यथाशक्ति जप्त्वा तद्दशांशतस्तुर्यगायत्रीं जपेत्।

"त्रिपदाजपपसाद्गुण्यं तुर्य्याजाप्यदशांशत:। तुर्याजाप्यं विना येन कृतं यन्निष्फलं भवेत्।।"

एवं जपित्वा जपान्ते कवचं पठेत्। अस्य श्रीगायत्रीकवचमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय: ऋग्यजु:सामाथर्वणश्छन्दांसि गायत्रीसावित्रीसरस्वत्यो देवता: ॐतद्बीजं याच्छक्ति धीमहीति कीलकं मम समस्तपापक्षयार्थं गायत्रीकवचपाठे विनियोग:। गायत्र्या षडङ्गं विन्यस्य "मुक्ताविद्रुमहेम" इति ध्यायेत्।

गायत्री पूर्वत: पातु सावित्री पातु दक्षिणे। ब्रह्मसन्ध्या[2] तु मे पश्चादुत्तरे मे सरस्वती।। १।।
पावकीं मे दिशं रक्षेत् पावकोज्ज्वलशालिनी[3]। यातुधानीं दिशं रक्षेद्यातुधानभयङ्करी[4]।। २।।
वायवीं मे मृगारूढा रुद्राणीं रुद्ररूपिणी। ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा।। ३।।
एवं सर्वत्र संरक्षेत् सर्वाङ्गं भुवनेश्वरी। तत्पदं पातु मे पादौ जङ्घे मे सवितु: पदम्।। ४।।
वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च। देवस्य मे तु हृदयं धीमहीति गलं तथा।। ५।।
धियो य: पातु मे नेत्रे न:पदं मे ललाटकम्। एवं पादादिमूर्धान्तं मूर्धानं मे प्रचोदयात्।। ६।।

---

[1] 'यच्छेत्य' ख. पाठ:। [2] 'ब्रह्मसंस्था तु' क. 'विद्या' ख. पाठ:। [3] 'शायिनी' ग. पाठ:। [4] 'गणार्दिनी' ख. पाठ:।

तदर्णः पातु मूर्धानं सकारः पातु भालकम्। चक्षुषी तु विकारार्णः श्रोत्रे रक्षेत् तुकारकः।। ७।।
नासापुटौ र्वकारार्णः रेकारस्तु कपोलयोः। णिकारस्तूत्तरोष्ठं तु यंकारस्त्वधरोष्ठकम्।। ८।।
आस्यमध्ये भकारार्णो र्गोकारश्चिबुकं तथा। देकारः कण्ठदेशं तु वकारः स्कन्धदेशकम्।। ९।।
स्यकारो दक्षिणं हस्तं धीकारो वामहस्तकम्। मकारो हृदयं रक्षेद् हिकारो जठरं तथा।। १०।।
धिकारो नाभिदेशं तु योकारस्तु कटिद्वयम्। गुह्यं रक्षेत्तु योकार ऊरू मेऽव्यान्नःकारकः।। ११।।
प्रकारो जानुनी रक्षेच्चोकारो जङ्घदेशकम्। दकारो गुल्फदेशं तु यात्कारस्तु पदद्वयम्।। १२।।
इतीदं कवचं दिव्यं वाधाशतनिवारणम्। चतुःषष्टिकलाविद्याविला[1]सैश्वर्यसिद्धिदम्।। १३।।
जपारम्भे तु गायत्र्या[2] जपान्ते कवचं पठेत्। ब्रह्मस्त्रीगोवधान्मित्रद्रोहाद्यखिलपातकैः ।। १४।।
मुच्यते सर्वपापेभ्यो परं ब्रह्माधिगच्छति। ....।।

इति गायत्रीकवचम्।। अथ गायत्रीपूजाविधिः। सा पूजा द्विविधा मानासिकबाह्यभेदात्। मानसिकपूजा यथा। तदङ्गत्वेन सौरपीठन्यासं कुर्यात्। ॐगुं गुरुभ्यो नमः मूर्ध्नि। गं गणपतये नमः मूलाधारे। ॐ आधारशक्त्यै नमः। ॐमूलप्रकृत्यै नमः। ॐकूर्माय नमः। ॐअनन्ताय नमः। ॐवराहाय नमः। ॐपृथिव्यै नमः। ॐक्षीरार्णवाय नमः। ॐश्वेतद्वीपाय नमः। ॐकल्पवृक्षाय नमः। रत्नमण्डपाय नमः। रत्नवेदिकायै नमः। श्वेतच्छत्राय नमः। सितचामराभ्यां नमः। तन्मध्ये रत्नसिंहासनाय नमः। इति मूलाधारमारभ्य उपर्य्युपरि विन्यस्य सिंहासनदेवता न्यसेत्। ॐधर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय नमः। एते सिंहासनपादरूपिणः। एवं ॐअधर्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय नमः। इति अंसद्वयोरुद्वयप्रकल्पितपादचतुष्टयत्वेन धर्मादीन् मुखनाभिपार्श्वद्वयप्रकल्पितगात्रचतुष्टयत्वेन अधर्मादींश्च न्यसेत्। सिंहासनमध्ये ॐचिच्छक्त्यै नमः। ॐ मायाशक्त्यै नमः। आनन्दकन्दाय। संविन्नालाय नमः। प्रकृतिमयपत्रेभ्यो नमः। विकारमयकेसरेभ्यो नमः। पञ्चाशद्वर्णबीजाढ्यसकलतत्त्वरूपायै कर्णिकायै नमः। तस्यां ॐअं अर्कमण्डलाय नमः। ॐसों सोममण्डलाय नमः। ॐरं वह्निमण्डलाय नमः। ॐसं सत्त्वाय नमः। ॐरं रजसे नमः। ॐतं तमसे नमः। ॐअं आत्मतत्त्वाय नमः। ॐ मायातत्त्वाय नमः। ॐ विद्यातत्त्वाय नमः। ॐ कलातत्त्वाय नमः। मध्ये परतत्त्वाय नमः। ओंआं आत्मने नमः। ॐअं अन्तरात्मने नमः। ॐपं परमात्मने नमः। ॐह्रीं ज्ञानात्मने नमः। ॐप्रभूताय नमः। ॐविमलाय नमः। ॐसाराय नमः। ॐसमाराध्याय नमः। (मध्ये) ॐअनन्ताय (परमसुखाय) नमः। इति तत्रैव दिक्षु मध्ये च विन्यस्य केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च नव पीठशक्तीर्न्यसेत्। ॐरां दीप्तायै नमः। ॐरीं सूक्ष्मायै०। ॐरूं जयायै०। ॐरें भद्रायै०। ॐरैं विभूत्यै०। ॐरों विमलायै०। ॐरौं अमोघायै०। ॐरं विद्युतायै०। ॐरः सर्वतोमुख्यै नमः। इति विन्यस्य, ओं नमो भगवत्यै ब्रह्मविष्णुशिवात्मिकायै सौरयोगपीठात्मने नमः। इति मध्ये सिंहासनमन्त्रं विन्यस्य, मूलमन्त्रपूर्वकस्वेष्टदेवतामूर्तिं हृदये विन्यस्य, तदेव गुरुस्वरूपं परं ब्रह्म स्वात्मानुग्रहार्थनिलयां परमात्ममूर्तिं परोक्षज्ञानदायिनीं गायत्रीं मन्त्राधिदेवतां सगुणब्रह्मविद्यात्मिकां दिव्यमूर्तिं परममङ्गलात्मिकां सर्वावयवसम्पन्नां सर्वाभरणभूषितां समस्तपरिवारसहितां सकलपुरुषार्थदात्रीं तेजोमयीं स्वहृदयकमलमधितिष्ठन्तीं भावयित्वा मनसा षोडशोपचारपूजां कुर्यात्। इदमासनं स्वागतमस्तु प्रसीद पाद्यमिदमाचमनीयमिदं मधुपर्कमिदं पुनराचमनीयं स्नानमिदं वस्त्रमिदं सौरान्तमुपकल्प्य,

---

[1] 'सकलै' ग. पाठः। [2] 'हृदयं' ख. पाठः।

छत्रचामरगीतनृत्यवाद्यादिमहापूजादिकं सङ्कल्प्य तन्मयमना भूत्वा ध्यायेदिति मानसिकपूजा।। बाह्यपूजायां तु यन्त्रं यथा–

शक्तेर्बाह्यकृशानुकोणविलसद्भूरादिसत्कर्णिकं
वस्वब्जस्वरयुग्मकेसरदलैर्वर्गैस्त्रिवर्णं मनोः।
चूडामन्त्रस[1]तुर्यवेष्टिततमिदं क्ष्माकोणताराङ्कितं
गायत्र्याः कथितं महर्षिभिरिदं यन्त्रं तु दिक्ष्वङ्कितम्।। १।।

इति। द्वितीययन्त्रं तु ब्रह्मोवाच–

शृण्वन्तु ऋषयः सर्वे गायत्रीयन्त्रमुत्तमम्। यस्य विज्ञानमात्रेण सिद्धयोऽष्टौ करे स्थिताः।। १।।
पूर्वं तु विष्णुना प्रोक्तं यन्त्रं मन्त्राङ्गसंयुतम्। रहस्यं परमं गुह्यं वेदान्तेष्वपि गोपितम्।। २।।
अग्निमण्डलमालिख्य तन्मध्ये प्रणवं लिखेत्। मायास्त्रीबीजसंयुक्तं महामायां रमापतिम्।। ३।।
चिन्तामणिं नारसिंहं सुदर्शनमनुं क्रमात्। लिखेदष्टदलं बाह्ये तद्द्वारेषु च मन्त्रवित्।। ४।।
नारायणमनुं लिख्य सन्धौ तु नारसिंहकम्। मायाबीजेन संवेष्ट्य बहिर्दशदलं लिखेत्।। ५।।
दलेषु विलिखेत् कृष्णं सन्धौ राममनुं लिखेत्। स्त्रीबजेन तु संवेष्ट्य तद्बहिर्द्वादशदलम्।। ६।।
वासुदेवं तद्दलेषु सन्धौ तु हयशीर्षकम्। मन्मथेन तु संवेष्ट्य तद्बहिः षोडशदलम्।। ७।।
तद्दलेषु स्वरांल्लिख्यं तत्सन्धौ तु वराहकम्। चिन्तामण्या[2] तु संवेष्ट्य बहिरष्टादशच्छदम्।। ८।।
दलेषु विलिखेत् कृष्णं सन्धौ चक्रे नृकेसरिम्। रामबीजेन संवेष्ट्य बहिर्द्विंशतिच्छदम्।। ९।।
दद्दलेषु च गायत्रीं तत्सन्धौ मन्त्रराजकम्। वेष्टने तु महामायां द्वात्रिंशद्दलमालिखेत्।। १०।।
नृसिंहानुष्टुभं लेख्यं सन्धौ चक्रमनुं लिखेत्। प्रणवेन तु संवेष्ट्य बहिः पार्थिवमण्डलम्।। ११।।
व्यञ्जनानि लिखेत् पश्चात्तन्मध्ये क्रमशोऽभितः। हंसहंसेति रक्षेति वाय्वग्न्यमृतसंयुतम्।। १२।।
यन्त्रसंस्कारमन्त्रांश्च तन्मध्ये विलिखेत् सुधीः। प्राणप्रतिष्ठां कृत्वाथ जपकाले विशेषतः।। १३।।
षोडशैरुपचारैश्चाप्यर्चयेन्मनसापि वा। ध्यात्वा मन्त्रं जपेत् पश्चादष्टोत्तरसहस्रकम् ।। १४।।
अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा। चतुर्थ्यादिप्रदोषेषु गायत्रीं दशधा जपेत् ।। १५।।

इदं धारणायन्त्रम्, पूजायन्त्रमिति केचित्। प्रकृतौ तु– पूर्वोक्तं ''शक्तेर्बाह्येति'' यन्त्रं पूजायां विशिष्टम्। स्वपुरतो मण्डलं कुर्यात्।

सम्मार्जनोपाञ्जनाभ्यां शोषेणोल्लेखनेन च। गवां च परिवासेन भूमिः शुध्यति पञ्चधा।। १६।।

वामहस्तेनाक्रम्य दक्षिणहस्तेन मण्डलं कृत्वा तत्र पूजायन्त्रं लिखेत्।

सिन्दूररजसा भूमौ लिखित्वा यन्त्रमर्चयेत्। अथवा हेमरूप्यादिपट्टपीठोपरि स्थितम्।। १७।।

स्ववामभागे चतुरस्रमण्डलं कृत्वा तत्राधारमस्त्रप्रक्षालितं संस्थाप्य 'रांरींरूं अग्निमण्डलाय दशकलात्मने श्रीगायत्र्या कलशाधाराय नमः' इति सम्पूज्य ''धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी। सुश्रीः सुरूपा कपिला

---

१ 'सुतुर्य' ग. पाठः। २. 'मणिनां सं' क. पाठः। ३. 'प्रोच्छनाभ्यां' ख. पाठः।

हव्यकव्यवहे अपि।। यादीनां दशवर्णानां कला धर्मप्रदा इमाः''। एतासां पूजा कर्तव्या। तदुपरि कलशं संस्थाप्य, मं सूर्यमण्डलाय द्वादशकलात्मने श्रीगायत्र्याः कलशाधाराय नमः इति सम्पूज्य, ''तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी शुचिः। सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा। कभाद्या वसुदाः सौराष्ठडान्ता द्वादशेरिताः''।। कंभं तपिन्यै नमः, इत्यादिक्रमेण पूजयेत्। ततस्तन्मध्ये अनुलोमविलोममातृकां स्मरन् शुद्धोदकेनापूर्य, मं कामप्रदषोडशकलात्मने चन्द्रमण्डलाय श्रीगायत्र्याः कलशामृताय नमः इति सम्पूज्य, अं अमृतायै नमः इत्यादि पूजयेत्। ''अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः। शशिनी चन्द्रिका ज्योत्स्ना कान्तिः श्रीः प्रीतिरङ्गदा।। पूर्ण पूर्णामृता कामदायिन्यः स्वरजाः कलाः''। इति क्रमेण सम्पूज्य, तन्मध्ये ''गायत्र्यास्तु त्रिकोणं चे'' ति यन्त्रं विलिख्य, तत्र ''ब्रह्माण्डोदरतीर्थानि'' इत्यादिना तीर्थमाकृष्य, ''गङ्गे च यमुने चैव'' इति पठित्वा, गङ्गाद्याः सरितः सर्वाः सिन्ध्वाद्या जलदा नदाः। आयान्तु देवीपूजार्थं दुरितक्षयकारकाः''।। इत्यावाहनादिपञ्चमुद्राः प्रदर्श्य ध्यायेत्।। ''कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः।। कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा''। 'इमं मे गङ्गे यमुने' इति पठेत्। इति कलशपूजा।। स्वदक्षिणभागे एवमेव साधारं शङ्खं संस्थाप्य शङ्खमुद्रां प्रदर्श्य तदुदकं सर्वत्र पूजोपकरणादिषु सम्प्रोक्ष्य कलशशङ्खयोर्मध्ये अर्घ्यादिपञ्चपात्राणि साधाराणि स्थापयेत्। ''अर्घ्यपात्रं तु वायव्ये नैर्ऋत्यां पाद्यपात्रकम्। अग्नेय्यां स्नानकलशं ईशे त्वाचमनीयकम्।। मध्ये तु मधुपर्कं स्यादित्येतत्पात्रलक्षणम्''। द्रव्याणि तु—

आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु। रक्तानि करवीराणि तथा रक्तं च चन्दनम्।। १।।
भानोरपि च गायत्र्या अष्टाङ्गार्घ्यमुदाहृतम्। सिद्धार्थं कुङ्कुमं दूर्वा लोष्टं लामज्जकं शशी।। २।।
अमूनि चात्र द्रव्याणि पाद्यस्य कथयन्ति षट्। फलकच्चोरकर्पूरकाष्टीलोशीरकाणि च।। ३।।
अमून्याचमनीयस्य द्रव्याणि कथयन्ति षट्। मधुपर्के च सक्षौद्रं दधि प्रोक्तं मनीषिभिः।। ४।।
दध्यभावे पयः कार्यं मध्यभावे तथा गुडः। इक्षुर्मधु घृतं चैव शर्करापयसायुतम्।। ५।।
पञ्चामृतमिदं प्रोक्तं वसिष्ठादिमनीषिभिः।...।।

ततः पूर्ववत् सामान्यार्घ्यविशेषार्घ्ये स्वपुरतः संस्थाप्य पार्श्वयोर्दीपद्वयं संस्थाप्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा षडङ्गं विन्यस्य करशुद्धिं कुर्यात्।।

प्रकोष्ठे मणिबन्धे च पार्श्वयोः करयोस्तले। तत्पृष्ठे च तदग्रे च करशुद्धिरुदाहृता।। १।।

ततः सौरपीठन्यासवत् पीठपूजां कृत्वा पीठमनुं विन्यस्य, तत्र ''मुक्ताविद्रुमहेम'' इति ध्यानोक्तरूपिणीं स्वहृत्कमलस्थितां गायत्रीं परब्रह्मरूपिणीं वहन्नासापुटेन विनिर्गत्य पूजायन्त्रे उपविष्टामिति ध्यात्वा, आवाहनादिदशमुद्राः प्रदर्श्य षोडशोपचारपूजामष्टादशोपचारपूजां वा कुर्यात्।

आसनावाहने चार्घ्यं पाद्यमाचमनं तथा। स्नानवस्त्रोपवीतानि भूषणानि च सर्वशः।। १।।
गन्धं पुष्पं तथा धूपं दीपमन्येन तर्पणम्। माल्यानुलेपने चैव नमस्कारविसर्जने।। २।।

इत्यष्टादशोपचारैर्मूलेन देवतां सन्तर्प्यावरणपूजां कुर्यात्। तद्यथा—(शा० २१)

विधाय मण्डलं विद्वांस्त्रिकोणोज्ज्वलकर्णिकम्। सौरं पीठं यजेत्तत्र दीप्तादिनवशक्तिभिः।। १।।

मूलमन्त्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत्। कोणेषु त्रिषु सम्पूज्या ब्राह्म्याद्या: शक्तयो बहि:।।२।।
आदित्याद्यास्तत: पूज्या उषादिसहिता: क्रमात्। तत: षडङ्गान्यभ्यर्च्य केसरेषु यथाविधि।। ३।।
प्रह्लादिन्यादिशक्तीश्च तद्बहि: पूजयेत् सुधी:। ब्राह्म्याद्या: सारुणा बाह्ये पूजयेत् प्रोक्तलक्षणा:।।४।।
ततोऽभ्यर्चेद् ग्रहान् बाह्ये शक्राद्यानायुधै: सह। इत्थमावरणैर्देवीं दशभि: परिपूजयेत्।। ५।।
धर्मार्थकाममोक्षाणां प्रोक्ता स्याद् द्विजसत्तम:।..।।

इति। एवं क्रमेण पूजां कृत्वाक्षमालयाष्टोत्तरशतं गायत्रीजपं कृत्वा ''गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वप्रसादान्महेश्वरि''[1]।। इति तेजोरूपं जपं देव्या हस्ते समर्पयेत्। तथा – (शा० २१)

व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो जपेत्[2]। तत्त्वलक्षं विधानेन भिक्षाशी विजितेन्द्रिय:।। १।।
क्षीरौदनतिलान् दूर्वा: क्षीरद्रुमसमिद्वरान्। पृथक् सहस्त्रत्रितयं जुहुयान्मन्त्रसिद्धये ।। २।।
तत्त्वसंख्यासहस्त्राणि मन्त्रविज्जुहुयात् तिलै:। सर्वपापविनिर्मुक्तो दीर्घमायु: स विन्दति।। ३।।
आयुषे साज्यहविषा केवलेनाथ सर्पिषा। दूर्वात्रिकैस्तिलैर्मन्त्री जुहुयात् त्रिसहस्त्रकम्।। ४।।
अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं तत:। महालक्ष्मीर्भवेत् तस्य षण्मासान्नात्र संशय:।। ५।।
ब्रह्मश्रिये प्रजुहुयात् प्रसूनैर्ब्रह्मवृक्षजै:। बहुना किमिहोक्तेन यथावत् साधुसाधिता ।। ६।।
द्विजन्मनामियं विद्या सिद्धा कामदुघा मता। कामनायन्त्रमन्यच्च वक्ष्यामि भुवि दुर्लभम्।। ७।।
ह्रींकारं कर्णिकामध्ये व्याहृतीनां त्रिकोणकम्। बहिश्चाष्टदलं पद्मं प्रोक्तलक्षणपे(ल)क्षितम्।। ८।।
केसरेषु स्वरा लेख्या मन्त्रवर्णास्त्रयस्त्रय:। आदिवर्गाक्षराष्टौ च बहिर्महिन्द्रमण्डलम्।। ९।।
आपोज्योतिरित्येतस्य वेष्टयेद् यन्त्रमुत्तमम्। भूर्जैरेनं समालिख्य रोचनाकुङ्कुमै: सुधी:।। १०।।
प्राणप्रतिष्ठां कृत्वा तु गले वा बाहुमूलके। धारयेत् पुष्टिरक्षायै[3] रोगघ्नं भवति ध्रुवम्।। ११।।
ब्रह्मास्त्रमिति सम्प्रोक्तं विलोमपठितो मनु:। पूर्वोक्ता एव मुन्याद्या मन्त्रस्यास्य प्रकीर्तिता:।।१२।।
प्रतिलोमक्रमादस्य षडङ्गानि प्रकल्पयेत्। वर्णन्यासपदन्यासौ विदध्यात् प्रतिलोमत:।। १२।।
ध्यानभेदान् विजानीयाद् गुर्वदेशान्न चान्यथा। पूर्ववज्जपक्लृप्ति: स्याज्जुहुयात् पूर्वसंख्यया १३।।
पञ्चगव्यसुपक्वेन चरुणा तस्य सिद्धये। अर्चनं पूर्ववत् कुर्याच्छक्तीस्तु प्रतिलोमत:।। १४।।
सर्वत्र देशिक: कुर्याद्गायत्र्या द्विगुणं जपम्। क्रूरकर्माणि कुर्वीत प्रतिलोमविधानत:।। १५।।
शान्तिकं पौष्टिकं कर्म कर्तव्यमनुलोमत:। प्रयोगकाले प्रजपेत् त्रिपदां च विलोमत:।। १६।।
साधितो जायते पश्चान्मन्त्रोऽयं विधिनामुना। आग्नेयास्त्रं शिर: कृत्वा वायव्यं मूलमाकरोत्।१७।।
अस्त्रसम्पुटितं चास्त्रं जपेदष्टसहस्त्रकम्। कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशी।। १८।।
रात्रौ रात्रौ प्रजुहुयाद् व्रणतैलपरिप्लुतै: । चित्रमूलार्कधत्तूरविषवृक्षसमिद्वरै: ।। १९।।
रिपुर्गच्छेज्ज्वराक्रान्त: सकुटुम्बो यमालयम्। कृष्णपक्षे प्रतिपदमारभ्य मासमात्रकम्।। २०।।

---

१. 'त्वयि स्थिता' क. पाठ:। २. 'यजेत्' ग. पाठ:। ३. 'यू' क. ग. पाठ:।

नद्यां समुद्रगामिन्यां स्नात्वा मन्त्री यथाविधि। आर्द्रवस्त्रो वृष्टिकाले स्थित्वा पितृपदिङ्मुखः।।२१।।
शत्रुनामयुतं मन्त्रं जपेदष्टोत्तरं शतम्। त्रिकोणकुण्डे जुहुयाद्रात्रौ पूर्वोक्तसाधनैः ।। २२।।
रक्षितोऽपि रिपुः शीघ्रं ब्रह्मविष्णुशिवैरपि। गच्छेद्यमपुरं रोगैः पीडितः सह बान्धवैः।। २३।।
ब्रह्मशीर्षकमन्त्रस्य ब्रह्मदण्डस्य चानघ। ऋष्यादिन्यासपूजादिप्रयोगान् मन्त्रवित्तमः ।। २४।।
ब्रह्मास्त्रवित् प्रकुर्याद्वै शत्रुनाशनकं विधिम्। अस्त्रत्रयं विजानाति विसर्गादानकर्मणः ।। २५।।
यः स एव शिवः साक्षान्निग्रहानुग्रहक्षमः।..।।

इति गायत्रीविधानं समाप्तम्।।

अथ कादिमतरीत्या मन्त्रपारायणक्रमः। स तु श्रीधर्माचार्यवर्यैः स्वकीये लघुस्तवे ''मायाकुण्डलिनी'' इत्यादिश्लोकेन सूचितः। तथा—

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि।। १।।

इति। माया ह्रीं, कुण्डलिनी ऐं, क्रिया क्लीं, मधुमती शुद्धा बिन्दुयुता विसर्गयुक्ता बिन्दुविसर्गयुक्ता चेति चतुर्विधमातृका। काल्यादीति दश विद्याः। एभिः श्रीमदाराध्यचरणक्रियाप्राप्तो मन्त्रपारायणक्रमः प्रदश्यर्ते, तत्र कृतप्रातराह्निकक्रियो विविक्ते स्थाने स्वासनमास्तीर्य 'आधारशक्तिकमलासनाय नमः' इति तत्सम्पूज्य, तत्र प्राङ्मुख उपविश्य, गुरुगणपति-परदेवताः प्रणम्य, मूलविद्याया ऋष्यादिकरषडङ्गन्यासं चतुरासनदेवताष्टकन्यासं च विधाय देवीं ध्यात्वा मानसैरुपचारैः सम्पूज्य, श्रीपरदेवतात्मकः पारायणजपमारभेत्। तत्र—ओमूलविद्यां ह्रींअकालीसौः। मू० ह्रींआकालीसौः। मू० ह्रींइकालीसौः। मू० ह्रींईकालीसौः। मू० ह्रींउकालीसौः। मू० ह्रींऊकालीसौः। मू० ह्रींऋकालीसौः। मू० ह्रींॠकालीसौः। मू० ह्रींऌकालीसौः। मू० ह्रींॡकालीसौः। मू० ह्रींएकालीसौः। मू० ह्रींऐकालीसौः। मू० ह्रींओकालीसौः। मू० ह्रींऔकालीसौः। मू० ह्रींअंकालीसौः। मू० ह्रींअःकालीसौः। मू० ह्रींककालीसौः। मू० ह्रींखकालीसौः। मू० ह्रींगकालीसौः। मू० ह्रींघकालीसौः। मू० ह्रींङकालीसौः। मू० ह्रींचकालीसौः। मू० ह्रींछकालीसौः। मू० ह्रींजकालीसौः। मू० ह्रींझकालीसौः। मू० ह्रींञकालीसौः। मू० ह्रींटकालीसौः। मू० ह्रींठकालीसौः। मू० ह्रींडकालीसौः। मू० ह्रींढकालीसौः। मू० ह्रींणकालीसौः। मू० ह्रींतकालीसौः। मू० ह्रींथकालीसौः। मू० ह्रींदकालीसौः। मू० ह्रींधकालीसौः। मू० ह्रींनकालीसौः। मू० ह्रींपकालीसौः। मू० ह्रींफकालीसौः। मू० ह्रींबकालीसौः। मू० ह्रींभकालीसौः। मू० ह्रींमकालीसौः। मू० ह्रींयकालीसौः। मू० ह्रींकरालीसौः। मू० ह्रींलकालीसौः। मू० ह्रींवकालीसौः। मू० ह्रींशकालीसौः। मू० ह्रींषकालीसौः। मू० ह्रींसकालीसौः। मू० ह्रींहकालीसौः। मू० ह्रींळकालीसौः। मू० ह्रींक्षकालीसौः। इत्येकपञ्चाशद्वारं जपित्वा, पुनः मूलं ह्रींअंकालीसौः। मू० ह्रींआकालीसौः। मू० ह्रींइंकालीसौः। इत्थं सबिन्दुभिर्मातृकाक्षरैरेकपञ्चाशद्वारं जपित्वा, पुनः मूलं मू० ह्रींअःकालीसौः। मू० ह्रींआकालीसौः। मू० ह्रींइःकालीसौः। मू० ह्रींईःकालीसौः इत्यादि, मू० ह्रींक्षःकालीसौः इत्यन्तं विसर्गसहितमातृकाक्षरैरेकपञ्चाशद्वारं जपित्वा, पुनः मूलं मू० ह्रींअंःकालीसौः। मू० ह्रींआंःकालीसौः। मू० ह्रींइंःकालीसौः। मू० ह्रींईंःकालीसौः इत्यादिः मू० ह्रींक्षंःकालीसौः

इत्यन्तं बिन्दुविसर्गसहितमातृकाक्षरैरेकपञ्चाशद्वारं जपेत्।। इति मायाबीजेन सह चतुर्विधमातृकावर्णैश्चतुरधिकद्विशत-(२०४) वारं मूलविद्यां जपित्वा पुन: मूलं ऐंअकालीसौ:। मू० ऐंआकालीसौ:। मू० ऐंइकालीसौ:। मू० ऐंईकालीसौ:। इत्यादि, मू० ऐंक्षकालीसौ: इत्यन्तं ५१। पुन: मूलं ऐंअंकालीसौ: इत्यादि, मू० ऐंक्षंकालीसौ: इत्यन्तं ५१। पुन: मूलं ऐंअ:कालीसौ: इत्यादि मू० ऐंक्ष:कालीसौ: इत्यन्तं ५१। पुन: मूलं ऐंअं:कालीसौ: इत्यादि मू०ऐंक्षं: कालीसौ: इत्यन्तं ५१। इत्थं वाग्भवबीजेन सह चतुर्विधमातृकाक्षरैश्चतुरधिकद्विशत- (२०४) वारं मूलविद्यां जपित्वा, पुन: मूलं क्लींअकालीसौ: इत्यादि मूलं क्लींक्षकालीसौ: इत्यन्तं ५१। पुन: मूलं क्लींअंकालीसौ: इत्यादि मू० क्लींक्षंकालीसौ: इत्यन्तं ५१। पुन: मूलं क्लींअ:कालीसौ: इत्यादि मू० क्लींक्ष:कालीसौ: इत्यन्तं ५१। पुन: मूलं क्लींअं:कालीसौ: इत्यादि मू० क्लींक्षं:कालीसौ: इत्यन्तं ५१। (२०४) इत्थं चतुर्विधमातृकाक्षरै: प्रत्येकं मायावाग्भवकामराजबीजै: सह (६१२) वारं मूलविद्या जपेत्।।

पुन: मूलं ह्रींअकलासौ: इत्यादि ५१। पुन: मू० ह्रींअंकलासौ: इत्यादि ५१। पुन: मूलं ह्रींअकलासौ: ५१। पुन: मूलं ऐंअं:कलासौ: इत्यादि ५१। मूलं ऐंअ:कलासौ: इत्यादि ५१। मूलं ऐंअ:कलासौ: इत्यादि ५१। मूलं ऐंअं:कलासौ: इत्यादि ५१। (२०४)।। पुन: मूलं क्लींअकलासौ: इत्यादि ५१(२०४)। मूलं क्लींअंकलासौ: इत्यादि ५१। मूलं क्लींअ:कलासौ: इत्यादि ५१। मूलं क्लींअं:कलासौ: इत्यादि ५१। (२०४)। इत्थं चतुर्विधमातृकाक्षरै: प्रत्येकं मायावाग्भवकामराजबीजै: सह द्वादशाधिकषट्शत (६१२) बारं मूलविद्यां जपेत्।।

तत: मू० ह्रींअमालिनीसौ: इत्यादि मू० ह्रींक्षमालिनीसौ: इत्यन्तं ५१। मूलं ह्रींअंमालिनीसौ: इत्यादि मू० ह्रींक्षंमालिनीसौ: इत्यन्तं ५१। पुन: मू० ह्रींअ:मालिनीसौ: इत्यादि मू० ह्रींक्ष:मालिनीसौ: इत्यन्तं ५१। पुन: मू० अं:मालिनीसौ: इत्यादि मू० ह्रींक्षं:मालिनीसौ: इत्यन्तं ५१। (२०४)। पुन: मूलं ऐंअमालिनीसौ: इत्यादि मू० ऐंक्षमालिनीसौ: इत्यन्तं ५१। मू० ऐंअंमालिनीसौ: इत्यादि मू० ऐंक्षंमालिनीसौ: इत्यन्तं ५१। मू० ऐंअ:मालिनीसौ: इत्यादि मू० ऐंक्ष:मालिनीसौ: इत्यन्तं ५१। मू० ऐंअ:मालिनीसौ: इत्यादि मू० ऐंक्षं:मालिनीसौ: इत्यन्तं ५१। (२०४)। पुन: मूलं क्लींअमालिनीसौ: इत्यादि मू० क्लींक्षमालिनीसौ: इत्यन्तं ५१। मू० क्लींअंमालिनीसौ: इत्यादि मू० क्लींक्षंमालिनीसौ: इत्यन्तं ५१। मू० क्लींअ:मालिनीसौ: इत्यादि मू० क्लींक्ष:मालिनीसौ: इत्यन्तं ५१। मूलं क्लींअं:मालिनीसौ: इत्यादि मू० क्लींक्षं:भालिनीसौ: इत्यन्तं ५१। (२०४)।। इत्थं चतुर्विधमातृकाक्षरै: प्रत्येकं मायावाग्भवकामराजबीजै: सह द्वादशाधिकषट् (६१२) शतबारं जपेत्।।

तत: मूलं ह्रींअमातङ्गीसौ: इत्यादि मू० ह्रींक्षमातङ्गीसौ: इत्यन्तं ५१। मू० ह्रींअंमातङ्गीसौ: इत्यादि मू० ह्रींक्षंमातङ्गीसौ: इत्यन्तं ५१। मू० ह्रींअ:मातङ्गीसौ: इत्यादि मू० ह्रींक्ष:मातङ्गीसौ: इत्यन्तं ५१। मू० ह्रींअं:मातङ्गीसौ: इत्यादि मू० ह्रींक्षं:मातङ्गीसौ: इत्यन्तं ५१। (२०४)। पुन: मूलं ऐंअमातङ्गीसौ: इत्यादि मू० ऐंक्षमातङ्गीसौ: इत्यन्तं ५१। मू० ऐंअंमातङ्गीसौ: इत्यादि मू० ऐंक्षंमातङ्गीसौ: इत्यन्तं ५१। मू० ऐंअ:मातङ्गीसौ: इत्यादि मू० ऐंक्ष:मातङ्गीसौ: इत्यन्तं ५१। मू० ऐंअं:मातङ्गीसौ: इत्यादि मू० ऐंक्षं:मातङ्गीसौ: इत्यन्तं ५१। (२०४)। पुन: मूलं क्लींअमातङ्गीसौ: इत्यादि मू० क्लींक्षमातङ्गीसौ: इत्यन्तं ५१। मू० क्लींअंमातङ्गीसौ: इत्यादि मू० क्लींक्षंमातङ्गीसौ: इत्यन्तं ५१। मू० क्लींअ:मातङ्गीसौ: इत्यादि मू० क्लींक्ष:मातङ्गीसौ: इत्यन्तं ५१। मू० क्लींअं:मातङ्गीसौ: इत्यादि मू० क्लींक्षं:मातङ्गीसौ: इत्यन्तं ५१। (२०४)।। इत्थं चतुर्विधमातृकाक्षरै: प्रत्येकं मायावाग्भवकामराजबीजै: सह द्वादशाधिकषट्शत (६१२) बारं जपेत्।

ततः मूलं ह्रींअविजयासौः इत्यादि मू० ह्रींक्षविजयासौः इत्यन्तं ५१। मू० ह्रींअंविजयासौः इत्यादि मू० ह्रींक्षंविजयासौः इत्यन्तं ५१। मू० ह्रींअःविजयासौः इत्यादि मू० ह्रींक्षःविजयासौः इत्यन्तं ५१। मू० ह्रींअंःविजयासौः इत्यादि मू० ह्रींक्षंःविजयासौः इत्यन्तं ५१। (२०४)। पुनः मूलं ऐंअविजयासौः इत्यादि मू० ऐंक्षविजयासौः इत्यन्त ५१। मू० ऐंअंविजयासौः इत्यादि मू० ऐंक्षंविजयासौः इत्यन्तं ५१। मू० ऐंअःविजयासौः इत्यादि मू० ऐंक्षःविजयासौः इत्यन्तं ५१। मू० ऐंअंःविजयासौः इत्यादि मू० ऐंक्षंःविजयासौः इत्यन्तं ५१। (२०४)। पुनर्मूलं क्लीअविजयासौः इत्यादि मू० क्लींक्षविजयासौः इत्यन्तं ५१। मू० क्लींअंविजयासौः इत्यादि मू० क्लींक्षविजयासौः इत्यन्तं ५१। मू० क्लींअःविजयासौः इत्यादि मू० क्लींक्षःविजयासौः इत्यन्तं ५१। मू० क्लींअंःविजयासौः इत्यादि मू० क्लींक्षंःविजयासौः इत्यन्तं ५१। (२०४)।। इत्थं चतुर्विधमातृकाक्षरैः प्रत्येकं मायावाग्भवकामराजबीजैः सह द्वादशाधिकषट्शत (६१२) बारं जपेत्।

पुनर्मूलं ह्रींअजयासौः इत्यादि ५१। मू० ह्रींअंजयासौः इत्यादि ५१। मू० ह्रींअःजयासौः इत्यादि ५१। मू० ह्रींअंःजयासौः इत्यादि ५१। (२०४)। पुनर्मूलं ऐंअजयासौः इत्यादि ५१। मू० ऐंअंजयासौः इत्यादि ५१। मू० ऐंअःजयासौः इत्यादि ५१। मू० ऐंअंःजयासौः इत्यादि ५१। (२०४)। पुनर्मूलं क्लींअजयासौः इत्यादि ५१। मूलं क्लींअंजयासौः इत्यादि ५१। मू० क्लींअःजयासौः इत्यादि ५१। मूलं क्लींअंःजयासौः इत्यादि ५१। (२०४)।। इत्थं पूर्वरीत्या (६१२) बारं जपेत्।।

पुनर्मूलं ह्रींअभगवतीसौः इत्यादि ५१। मू० ह्रींअंभगवतीसौः इत्यादि ५१। मू० ह्रींअःभगवतीसौः इत्यादि ५१। मू० ह्रींअंःभगवतीसौः इत्यादि ५१। (२०४)। पुनर्मूलं ऐंअंभगवतीसौः इत्यादि ५१। मू० ऐंअंभगवतीसौः इत्यादि ५१। मू० ऐंअःभगवतीसौः इत्यादि ५१। मू० ऐंअंःभगवतीसौः इत्यादि ५१। (२०४)। पुनर्मूलं क्लींअभगवतीसौः इत्यादि ५१। मू० क्लींअंभगवतीसौः इत्यादि ५१। मू० क्लींअःभगवतीसौः इत्यादि ५१। मू० क्लींअंःभगवतीसौः इत्यादि ५१। (२०४)।। इत्थं पूर्वरीत्या (६१२) बारं जपेत्।।

पुनर्मूलं ह्रींअदेवीसौः इत्यादि ५१। मू० ह्रींअंदेवीसौः इत्यादि ५१। मू० ह्रींअःदेवीसौः इत्यादि ५१। मू० ह्रींअंःदेवीसौः इत्यादि ५१। (२०४)। पुनर्मूलं ऐंदेवीसौः इत्यादि ५१। मू० ऐंअंदेवीसौः इत्यादि ५१। मू० ऐंअःदेवीसौः इत्यादि ५१। मू० ऐंअंःदेवीसौः इत्यादि ५१। (२०४)। पुनर्मूलं क्लींअदेवीसौः इत्यादि ५१। मू० क्लींअंदेवीसौः इत्यादि ५१। मू० क्लींअःदेवीसौः इत्यादि ५१। मू० क्लींअंःदेवीसौः इत्यादि ५१। (२०४)।। इत्थं पूर्वरीत्या (६१२) बारं जपेत्।।

पुनर्मूलं ह्रींअशिवासौः इत्यादि ५१। मू० ह्रींअंशिवासौः इत्यादि ५१। मू० ह्रींअःशिवासौः इत्यादि ५१। मू० ह्रींअंःशिवासौः इत्यादि ५१। (२०४)। पुनर्मूलं ऐंअशिवासौः इत्यादि ५१। मू० ऐंअंशिवासौः इत्यादि ५१। मू० ऐंअःशिवासौः इत्यादि ५१। मू० ऐंअंःशिवासौः इत्यादि ५१। (२०४)। पुनर्मूलं क्लींअशिवासौः इत्यादि ५१। मू० क्लींअंशिवासौः इत्यादि ५१। मू० क्लींअःशिवासौः इत्यादि ५१। (२०४) मूलं क्लींअंःशिवासौः इत्यादि ५१। (२०४)।। इत्थं पूर्वरीत्या (६१२) बारं जपेत्।।

पुनर्मूलं ह्रींअशाम्भवीसौः इत्यादि ५१। मू० ह्रींअंशाम्भवीसौः इत्यादि ५१। मू० ह्रींअःशांभवीसौः इत्यादि ५१। मू० ह्रींअंःशांभवीसौः इत्यादि ५१। (२०४)। पुनर्मूलं ऐंअशांभवीसौः इत्यादि ५१। मू० ऐंअंशांभवीसौः इत्यादि ५१। मू० ऐंअंःशांभवीसौः इत्यादि ५१। मू० ऐंअंःशांभवीसौः इत्यादि ५१। (२०४)। पुनर्मूलं क्लींअशांभवीसौः इत्यादि ५१। मू० क्लींअंशांभवीसौः इत्यादि ५१। मू० क्लींअःशांभवीसौः इत्यादि ५१। मू० क्लींअंःशांभवीसौः इत्यादि ५१। (२०४)।। इत्थं पूर्वरीत्या (६१२) बारं जपेत्।। इति सम्भूयैकस्मिन्दिने विंशत्युत्तरैकशताधिकषट्सहस्र-

(६१२०) जपो भवति मूलविद्यायाः।।

ततो द्वितीयदिने प्राग्वदासनादिपूजान्ते—मू० ह्रींअकाली हस्रीं सह्रीं इत्यादि ५१। मू० ह्रींअंकाली हस्रीं सह्रीं इत्यादि ५१। मू० ह्रींअःकाली हस्रीं सह्रीं इत्यादि ५१। मू० ह्रींअंःकाली हस्रीं सह्रीं इत्यादि ५१। (२०४)।। पुनर्मूलं ऐंअकाली हस्रीं सह्रीं इत्यादि ५१। मू० ऐंअंकाली हस्रीं सह्रीं इत्यादि ५१। मू० ऐंअःकाली हस्रीं सह्रीं इत्यादि ५१। मू० ऐंअंःकाली हस्रीं सह्रीं इत्यादि ५१। (२०४)।। पुनर्मूलं क्लींअकाली हस्रीं सह्रीं इत्यादि ५१। मू० क्लींअंकाली हस्रीं सह्रीं इत्यादि ५१। मू० क्लींअःकाली हस्रीं सह्रीं इत्यादि ५१। मू० क्लींअंःकाली हस्रीं सह्रीं इत्यादि ५१। (२०४)।। इत्थं पूर्वप्रकारेण ६१२ बारं जपेत्।।

पुनर्मूलं ह्रींअकला हस्रीं सह्रीं इत्यादि ५१। मू० ह्रींअंकला हस्रीं सह्रीं इत्यादि ५१। मू० ह्रींअःकला हस्रीं सह्रीं ५१। मूलं ह्रींअंःकला हस्रीं सह्रीं ५१। (२०४)।। पुनर्मूलं मू० ऐंअंकला हस्रीं सह्रीं ५१। मू० ऐंअंकला हस्रीं सह्रीं ५१। मू० ऐंअःकला हस्रीं सह्रीं ५१। मू० ऐंअंःकला हस्रीं सह्रीं ५१। (२०४)।। पुनर्मूलं क्लींअकला हस्रीं सह्रीं ५१। मू० क्लींअंकला हस्रीं सह्रीं ५१। मू० क्लींअःकला हस्रीं सह्रीं ५१। मू० क्लींअंःकला हस्रीं सह्रीं ५१। (२०४)।। इत्थं पूर्वरीत्या सम्भूय ६१२ बारं जपेत्।।

पुनर्मूलं ह्रींअमालिनी हस्रीं सह्रीं ५१। मू० ह्रींअमालिनी हस्रीं सह्रीं ५१। मू० ह्रींअःमालिनी हस्रीं सह्रीं ५१। मू० ह्रींअंःमालिनी हस्रीं सह्रीं ५१। (२०४)।। पुनर्मूलं ऐंअमालिनी हस्रीं सह्रीं ५१। मू० ऐंअंमालिनी हस्रीं सह्रीं ५१। मू० ऐंअःमालिनी हस्रीं सह्रीं ५१। मू० ऐंअंःमालिनी हस्रीं सह्रीं ५१। (२०४)।। पुनर्मूलं क्लींअमालिनी हस्रीं सह्रीं ५१। मू० क्लींअंमालिनी हस्रीं सह्रीं ५१। मू० क्लींअःमालिनी हस्रीं सह्रीं ५१। मू० क्लींअंःमालिनी हस्रीं सह्रीं ५१। (२०४)।। इत्थं सम्भूय पूर्वरीत्या ६१२ बारं जपेत्।।

पुनर्मूलं ह्रींअमातङ्गी हस्रीं सह्रीं ५१। मू० ह्रींअंमातङ्गी हस्रीं सह्रीं ५१। मू० ह्रींअःमातङ्गी हस्रीं सह्रीं ५१। मू० ह्रींअंःमातङ्गी हस्रीं सह्रीं ५१। (२०४)।। पुनर्मूलं मू० ऐंअमातङ्गी हस्रीं सह्रीं ५१। मू० ऐंअंमातङ्गी हस्रीं सह्रीं ५१। मू० ऐंअःमातङ्गी हस्रीं सह्रीं ५१। मू० ऐंअंःमातङ्गी हस्रीं सह्रीं ५१। (२०४)।। पुनर्मलूं क्लींअमातङ्गी हस्रीं सह्रीं ५१। मू० क्लींअंमातङ्गी हस्रीं सह्रीं ५१। मू० क्लींअःमातङ्गी हस्रीं सह्रीं ५१। मू० क्लींअंःमातङ्गी हस्रीं सह्रीं ५१। (२०४)।। इत्थं सम्भूय पूर्वरीत्या ६१२ बारं जपेत्।।

पुनर्मूलं ह्रींअविजया हस्रीं सह्रीं ५१। मू० ह्रींअंविजया हस्रीं सह्रीं ५१। मू० ह्रींअःविजया हस्रीं सह्रीं ५१। मू० ह्रींअंःविजया हस्रीं सह्रीं ५१। (२०४)।। पुनः मू० ऐंअविजया हस्रीं सह्रीं ५१। मू० ऐंअंविजया हस्रीं सह्रीं ५१। मू० ऐंअःविजया हस्रीं सह्रीं ५१। मू० ऐंअंःविजया हस्रीं सह्रीं ५१। (२०४)।। मूलं क्लींअविजया हस्रीं सह्रीं ५१। मू० क्लींअंविजया हस्रीं सह्रीं ५१। मू० क्लींअःविजया हस्रीं सह्रीं ५१। मू० क्लींअंःविजया हस्रीं सह्रीं ५१। (२०४)।। इत्थं पूर्वरीत्या सम्भूय ६१२ बारं जपेत्।।

पुनर्मूलं ह्रींअजया हस्रीं सह्रीं ५१। मू० ह्रींअंजया हस्रीं सह्रीं ५१। मू० ह्रींअःजया हस्रीं सह्रीं ५१। मू० ह्रींअंःजया हस्रीं सह्रीं ५१। (२०४)।। पुनर्मूलं ऐंअजया हस्रीं सह्रीं ५१। मू० ऐंअंजया हस्रीं सह्रीं ५१। मू० ऐंअःजया हस्रीं सह्रीं ५१। मू० ऐंअंःजया हस्रीं सह्रीं ५१। (२०४)।। मूलं क्लींअजया हस्रीं सह्रीं ५१। मू० क्लींअंजया हस्रीं सह्रीं ५१। मू० क्लींअःजया हस्रीं सह्रीं ५१। मू० क्लींअंःजया हस्रीं सह्रीं ५१। (२०४)।। इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्।।

पुनर्मूलं ह्रींअभगवती हस्त्रीं सह्रीं ५१। मू० ह्रींअंभगवती हस्त्रीं सह्रीं ५१। मू० ह्रींअ:भगवती हस्त्रीं सह्रीं ५१। मू० ह्रींअं:भगवती हस्त्रीं सह्रीं ५१। (२०४)।। मूलं ऐंअभगवती हस्त्रीं सह्रीं ५१। मू० ऐंअंभगवती हस्त्रीं सह्रीं ५१। मू० ऐंअ:भगवती हस्त्रीं सह्रीं ५१। मू० ऐंअं:भगवती हस्त्रीं सह्रीं ५१। (२०४)।। मूलं क्लींअभगवती हस्त्रीं सह्रीं ५१। मू० क्लींअंभगवती हस्त्रीं सह्रीं ५१। मू० क्लींअ:भगवती हस्त्रीं सह्रीं ५१। मू० क्लींअं:भगवती हस्त्रीं सह्रीं ५१। (२०४)।। इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्।।

पुनर्मूलं ह्रींअदेवी हस्त्रीं सह्रीं ५१। मू० ह्रींअंदेवी हस्त्रीं सह्रीं ५१। मू० ह्रींअ:देवी हस्त्रीं सह्रीं ५१। मू० ह्रींअं:देवी हस्त्रीं सह्रीं ५१। (२०४)।। मूलं ऐंअदेवी हस्त्रीं सह्रीं ५१। मू० ऐंअंदेवी हस्त्रीं सह्रीं ५१। मू० ऐंअ:देवी हस्त्रीं सह्रीं ५१। मू० ऐंअं:देवी हस्त्रीं सह्रीं ५१। (२०४)।। मूलं क्लींअदेवी हस्त्रीं सह्रीं ५१। मू० क्लींअंदेवी हस्त्रीं सह्रीं ५१। मू० क्लींअ:देवी हस्त्रीं सह्रीं ५१। मू० क्लींअं:देवी हस्त्रीं सह्रीं ५१। (२०४)।। इत्थं संभूय पूर्वरीत्या ६१२ वारं जपेत्।।

पुनर्मूलं ह्रींअशिवा हस्त्रीं सह्रीं ५१। मू० ह्रींअंशिवा हस्त्रीं सह्रीं ५१। मू० ह्रींअ:शिवा हस्त्रीं सह्रीं ५१। मू० ह्रींअं:शिवा हस्त्रीं सह्रीं ५१। (२०४)।। मूलं ऐंअशिवा हस्त्रीं सह्रीं ५१। मू० ऐंअंशिवा हस्त्रीं सह्रीं ५१। मू० ऐंअ:शिवा हस्त्रीं सह्रीं ५१। मू० ऐंअं:शिवा हस्त्रीं सह्रीं ५१। (२०४)।। मूलं क्लींअशिवा हस्त्रीं सह्रीं ५१। मू० क्लींअंशिवा हस्त्रीं सह्रीं ५१। मू० क्लींअ:शिवा हस्त्रीं सह्रीं ५१। मू० क्लींअं:शिवा हस्त्रीं सह्रीं ५१। (२०४)।। इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्।।

पुनर्मूलं ह्रींअशांभवी हस्त्रीं सह्रीं ५१। मू० ह्रींअंशांभवी हस्त्रीं सह्रीं ५१। मू० ह्रींअ:शांभवी हस्त्रीं सह्रीं ५१। मू० ह्रींअं:शांभवी हस्त्रीं सह्रीं ५१। (२०४)।। मूलं ऐंअशांभवी हस्त्रीं सह्रीं ५१। मू० ऐंअशांभवी हस्त्रीं सह्रीं ५१। मू० ऐंअ:शांभवी हस्त्रीं सह्रीं ५१। मू० ऐंअं:शांभवी हस्त्रीं सह्रीं ५१। (२०४)।। मू० क्लींअशांभवी हस्त्रीं सह्रीं ५१। मू० क्लींअंशांभवी हस्त्रीं सह्रीं ५१। मू० क्लींअ:शांभवी हस्त्रीं सह्रीं ५१। मू० क्लींअं:शांभवी हस्त्रीं सह्रीं ५१। (२०४)।। इत्थं संभूय पूर्वरीत्या ६१२ वारं जपेत्। इत्थं द्वितीयदिनेऽपि (६१२०) वारं श्रीमूलविद्याजपो भवति।।

ततस्तृतीयदिने प्राग्वदासनादिमानसपूजान्ते—मूलं ह्रींअकालीवौषट्। एवं चतुर्विधमातृकाक्षरैः सह २०४। ततो मू० ऐंअकालीवौषट्। एवं चतुर्विधमातृकाक्षरैः सह २०४। मू० क्लींअकालीवौषट्। चतुर्विधमातृकाक्षरैः सह २०४। इत्थं प्रागुक्तरीत्या सम्भूय ६१२ वारं जपो भवति।।

ततो मूलं ह्रींअकलावौषट्। चतुर्विधमातृकाक्षरैः सह २०४। ततो मू० ऐंअकलावौषट्। चतुर्विधमातृकाक्षरैः सह २०४। मू० क्लींअकलावौषट्। चतुर्विधमातृकाक्षरैः सह २०४। ६१२ वारं जपो भवति।।

ततो मूलं ह्रींअमालिनीवौषट्। चतुर्विधमातृकाक्षरैः सह २०४। मूलं ऐंअमालिनीवौषट्। चतुर्विधमातृकाक्षरैः सह २०४। मूलं क्लींअमालिनीवौषट्। चतुर्विधमातृकाक्षरैः सह २०४। सम्भूय पूर्वरीत्या ६१२ वारं जपो भवति।।

ततो मूलं ह्रींअमातङ्गीवौषट्। चतुर्विधमातृकाक्षरैः सह २०४। मू० ऐंअमातङ्गीवौषट्। चतुर्विधमातृकाक्षरैः सह २०४। मूलं क्लींअमातङ्गीवौषट्। चतुर्विधमातृकाक्षरैः सह पूर्वरीत्या २०४। सम्भूय ६१२ वारं जपो भवति।।

मूलं ह्रींअविजयावौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। मू० ऐंअविजयावौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। मू० क्लींअविजयावौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय ६१२ वारं जपो भवति।।

मूलं ह्रींअजयावौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं ऐंअजयावौषट्। एवं मातृकाक्षरैः सह (२०४)। मू० क्लींअजयावौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय ६१२ वारं जपो भवति।।

मूलं ह्रींअभगवतीवौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं ऐंअभगवतीवौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं क्लींअभगवतीवौषट्। चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय ६१२ वारं जपो भवति।।

मूलं ह्रींअदेवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं ऐंअदेवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मू० क्लींअदेवीवौषट्। इत्यादि प्रोक्तमातृकाक्षरैः सह (२०४)। सम्भूय ६१२ वारं जपो भवति।।

मूलं ह्रींअशिवावौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं ऐंअशिवावौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मू० क्लींअशिवावौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय ६१२ वारं जपो भवति।।

मूलं ह्रींअशाम्भवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं ऐंअशांम्भवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मू० क्लींअशांम्भवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय ६१२। इत्थं तृतीयदिनेऽपि (६१२०) वारं मूलविद्याजपो भवति।।

अथ चतुर्थदिने प्राग्वदासनादिमानसपूजान्ते—मू० ह्रींअकालीआह इत्यादि मायावाग्भवकामबीजैः प्रतिबीजं केवल—बिन्दु—विसर्ग—बिन्दुविसर्गयुक्तैर्मातृकाक्षरैः सह ६१२ वारं जपेत्। ततो मूलं ह्रींअकलाआह इत्यादि प्राग्वत् ६१२। मूलं ह्रींअमालिनीआह इत्यादि प्राग्वत् ६१२। मूलं ह्रींअमातङ्गीआह इत्यादि प्राग्वत् ६१२। मूलं ह्रींअविजयाआह इत्यादि प्राग्वत् ६१२। मू० ह्रींअजयाआह इत्यादि प्राग्वत् ६१२। मू० ह्रींअभगवतीआह इत्यादि प्राग्वत् ६१२। मू० ह्रींअदेवीआह इत्यादि प्राग्वत् ६१२। मू० ह्रींअशिवाआह इत्यादि प्राग्वत् ६१२। मू० ह्रींअशाम्भवी इत्यादि प्राग्वत् ६१२। इत्थं सम्भूय चतुर्थदिनेऽपि (६१२०) वारं जपो भवति मूलविद्यायाः।।

ततः पञ्चमदिने प्राग्वदासनादिमानसपूजान्ते—मूलं ह्रींअकालीह्स्त्रैंह्स्क्लींरींहस्त्रौं एवं बीजत्रयादिचतुर्विध-मातृकाक्षरैः सह काल्यादिदशनामभिः प्राग्वत् (६१२०) वारं जपेत्।

ततः षष्ठदिने प्राग्वदासनादिकल्पनान्ते मू० ह्रींअकालीह्रीं इत्यादि प्राग्वत् (६१२०) वारं जपेत्।।

ततः सप्तमदिने प्राग्वदासनाद्यन्ते मू० ह्रींअकाली ह ५ ह ६ स ४ इत्यादि प्राग्वत् (६१२०) वारं जपेत्।।

ततोऽष्टमदिने प्राग्वदासनाद्यन्ते मू० ह्रींअकालीहस्त्रौं सह्रौं इत्यादि प्राग्वत् (६१२०) वारं जपेत्।।

ततो नवमदिने प्राग्वदासनाद्यन्ते मू० ह्रींअकालीहसरकलडैं हसकलरडीं हसकलरडौः इत्यादि प्राग्वत् (६१२०) वारं जपेत्।।

ततो दशमदिने प्राग्वदासनादिमानसपूजान्ते मू० ह्रींअकालीऐंक्लींसौः इत्यादि प्राग्वत् (६१२०) वारं जपेदिति मन्त्रपारायणक्रमः।।

अस्मिन् परायणजपे प्रोक्तक्रमेण दशभिर्दिनैः पर्यायो भवति। एवं दशभिर्दिनैः कर्तुमशक्तैरेकदिनस्य जपं पञ्चधा विभज्य नामद्वयस्य चतुर्विंशत्युत्तरद्विशताधिकसहस्रसंख्यं (१२२४) प्रत्यहं जपः कार्यः। ततः पञ्चाशता दिनैः

पर्यायो भवति। अत्राप्यशक्तैः एकैकनाम्ना प्रतिबीजं चतुर्विधमातृकाक्षरैः सञ्जातद्वादशाधिकषट्शतसंख्यं (६१२) वा प्रत्यहं जपः कार्यः। तदा शतसंख्यैर्दिनैः पर्यायो भवति। एवमुक्तपर्यायेऽप्येकपर्यायानुसारेण साधकैर्मन्त्रपारायणजपः कार्य इति। अत्र पारायणक्रमे प्रागुक्तनामपारायणवदहर्गणादिविचाराभावाद्यदा गुरूपदेशः स्यात् तदैवारभ्य प्रोक्तविधिना साधकैः पारायणजपः कार्य इति। अत्र पारायणे काम्यफलादिकं नामपारायणोक्तमेव ज्ञेयं पृथक्फलानुक्तेः। ''एवं यः कुरुते नित्यं मन्त्रपारायणं बुधः। भुक्त्वेह भोगानखिलानन्ते देवीपदं व्रजेत्''।। इति।।

अथ कादिमतोक्तललितायन्त्राणि लिख्यन्ते। श्रीतन्त्रराजे– (३३ शे पटले)

अथ षोडशनित्यानामाद्या या ललितोदिता। तस्या यन्त्राणि कथ्यन्ते तद्विद्याभेदसम्भवैः।। १।।
रूपैः षष्टिसमोपेतनवशत्या यथाविधि। समस्तवाञ्छितावाप्तिकारणानि कृतात्मनाम् ।। २।।
ललितानित्यपूजायां यन्त्रं विश्वात्मविग्रहम्। षोडशानां च तस्याश्च पूजाकमलचक्रकम् ।। ३।।
अमृताख्यघटं यन्त्रं सिद्धवज्रमतः परम्। कोष्ठवज्रं वज्रलिङ्गं मेरुलिङ्गं यथाविधि ।। ४।।
महालिङ्गं योनियन्त्रं तथा तद्वज्रवज्रकम्। तदेव च महाकारं कोष्ठयन्त्राणि च क्रमात्।। ५।।
नवहस्तं त्रिहस्तं वा श्रीचक्रमभिषेचने। कुर्यात् स्थण्डिलपूजायां हस्तमात्रेऽतिसुन्दरम्।। ६।।
रत्नादिषु तु निर्माणे मानमिच्छावशाद्भवेत्। यदा सुविहिते पूजा शुभान्यस्मिंस्तथान्यथा।। ७।।
भ्रमेण वृत्तं निष्पाद्य सुसमे चतुरस्रके। प्रमृज्य तिर्यङ्मध्यस्थं सूत्रं तिर्यङ् निपातयेत्।। ८।।
सूत्राणि नव, तेषु द्वे वृत्तस्पृष्टोभयान्तके। निधाय[1] तद्द्वयोरन्तान्मध्यसूत्रान्ततः क्रमात्।। ९।।
कृते सूत्रचतुष्के तु षट्कोणं स्यात् त्रिसप्तगम्। द्व्यष्टाग्रतः समारम्भान्नवमं प्रथमान्तरा[2]।। १०।।
कुर्यात् सूत्रचतुष्कं तु (चतुर्मर्मानुगुण्यतः। नवमप्रथमाग्राभ्यां तुर्यसप्तमकावधि ।। ११।।
कुर्यात् सूत्रचतुष्के तु) मर्माष्टकविभेदनात्। ततश्चतुर्थषष्ठान्तद्वयारम्भात् तथाष्टगम्।। १२।।
द्वितीयगं च सूत्राणां चतुष्कं पातयेत्तथा। चतुर्मर्मानुगुण्येन ततः पञ्चमकान्तयोः।। १३।।
तृतीयगं सूत्रयुगं कुर्यान्मर्मद्वयाश्रयम्। मार्जयेन्मध्यगं ब्रह्मसूत्रं स्याच्चक्रमुत्तमम्।। १४।।
बहिरष्टच्छदाम्भोजं तथा तद्द्विगुणच्छदम्। विधाय षड्भिर्वृत्तैश्च चतुरस्रं तथाष्टभिः।। १५।।
सूत्रैर्विधाय तस्यैव प्राक्प्रत्यग्द्वारसंयुतम्। दक्षिणोत्तरतो रेखात्रयात् स्थानद्वयात् तथा।। १६।।
कोणेषु तिर्य्यक्सूत्रैश्च चतुर्भिस्तान्यनुक्रमात्। द्विधा[3] कुर्याच्च चत्वारि पदानि परमेश्वरि।। १७।।
ललितार्चाचक्रमिदं लभ्यं सद्गुरुतः क्रमात्। सुन्दरं सुसमं सर्वलक्षणैश्च समन्वितम्।। १८।।
अधोमुखैः पञ्चभिश्च चतुर्भिश्च तथोर्ध्वगैः। नवभिस्त्वेकसूत्रस्थैः स्यादेतदतिसुन्दरम् ।। १९।।
वृत्तस्पृष्टषडस्रं च तदस्पृष्टाष्टकं तथा । मर्मभिश्चाष्टदशभिर्युतं चक्रं सुलक्षणम् ।। २०।।

---

[1] 'विधाय' ग. पाठः। [2] 'न्तगम्' ग. पाठः। [3] 'विधाय' ग. पाठः।

षड्रेखासन्धिमर्माख्यं सन्ध्याख्यद्वयसङ्गमात्। तच्चतुर्विंशतियुतं चक्रं सर्वार्थसिद्धिदम्।। २१।।
अन्यथा भिन्नमर्मादियुतचक्रसमर्चनात्। शस्त्राद्भयं[1] महाव्याधिं दारिद्र्यमयशो मृतिम्।। २२।।
तस्माल्लक्षणसंयुक्तमुक्तरूपं विधाय वै। चक्रं तत्रैव तां नित्यमर्चयन् मत्समो भवेत्।। २३।।
विधाय वृत्तयोर्मध्यं चत्वारिंशत् सहाष्टभिः। प्रागादितिर्यक्सूत्राणि षट्सु षट्सु च पञ्चसु।। २४।।
पश्चिमात् षट्त्रयेऽप्येवं तन्मध्ये मर्मयुक्तितः। विदध्यात् त्रीणि सूत्राणि कुर्यात् तेनातिसुन्दरम्।।२५।।
त्र्यस्रं वृत्तं पञ्चदशच्छदानि च ततो बहिः। अष्टपत्राम्बुजं बाह्ये दशच्छदसरोरुहम्।। २६।।
पुनर्दशच्छदं पद्मं चतुर्दशदलं ततः । अष्टच्छदाब्जं द्विगुणच्छदमष्टादशच्छदम् ।। २७।।
विधाय तस्य मध्ये तां समावाह्य यजेत् तथा। पश्चान्नाथान् पार्श्वयोश्च हेतीरन्यास्तथार्चयेत्।। २८।।
एतस्मिन् पद्मचक्रस्य मध्ये तासां प्रपूजनात्। महतीं श्रियमाप्नोति ज्ञानान्मां च समाप्नुयात्।।२९।।
पूर्वस्मिन् पूजयेद् देवीमुक्तक्रमसमन्वितम्। श्रियं ज्ञानात्तथावां च संयाति परमेश्वरि।। ३०।।
घटद्वयं समालिख्य बाह्याभ्यन्तरभेदतः। तन्मध्यं नवधा कृत्वा कोणेषु प्रथमं लिखेत्।। ३१।।
द्वितीयं दिक्षु संलिख्य मध्ये तार्तीयमालिखेत्। घटयोरन्तरा कृत्वा तिर्यग्रेखाः समन्ततः।। ३२।।
तेषु प्रदक्षिणं विद्यात् तार्तीयाक्षरसप्तकम्। लिखेद् बिन्दुविसर्गाभ्यां लिखेत् पञ्चामृताम्बुजम्।।३३।।
आद्यनालमयं द्वन्द्वपत्रकेसरकर्णिकम्। विधाय च घटाधस्ताद् विदध्याद् विनियोगकम्।। ३४।।
मध्ये साध्याक्षरोपेतं कृत्वा तममृतं घटम्। विभृयादभिषिञ्चेच्च जन्मर्क्षेष्वायुराप्तये।। ३५।।
कुहूपरागसङ्क्रान्तिदोषेष्वखिलशान्तये। अभिषिञ्चेदशेषार्तिशान्त्यै सिद्ध्यै च सम्पदाम्।। ३६।।
अपमृत्युमहारोगक्षयापस्मारशान्तये । त्रिवर्षमभिषेकं तु कुर्याज्जन्मत्रये तथा ।। ३७।।
सर्वक्लेशविनिर्मुक्तः सुखी वर्षशतं भुवि। अरोगी विजयी विश्ववन्द्यो भवति मानवः।। ३८।।
सौवर्णे राजते ताम्रे कृत्वैतत् सिक्थलिङ्गकम्। विधाय स्थापयेत् क्षौद्रे यजेत् सर्वापमृत्युजित्।।३९।।
तार्तीयविद्यापुटितं नामालिख्य तु साधकः। ऊर्मिकादौ वहेत् सर्वसम्पदेऽरिष्टशान्तये।। ४०।।
कृत्वाश्मनि तथा यन्त्रं तडागादिषु मध्यतः। स्थापयेत् तत्र ये स्नाता नराः स्युः सुखिनोऽनिशम्।।४१।।
प्राक्प्रत्यग्दक्षिणोदक्च सूत्रैरष्टभिरा[2]हितैः। कोष्ठान्येकोपञ्चाशत् तेषु कोणेषु मार्जयेत्।। ४२।।
चतुर्विंशति कोष्ठानि शेषेषु विलिखेत् क्रमात्। दिक्ष्वेकतस्त्रिकोणानि प्रागारम्भात् प्रवेशतः।।४३।।
तार्तीयस्य च भेदोत्थचतुर्विंशतिमालिखेत्। विलोमेनाथ मध्यस्थे तत् ससाध्यं समालिखेत्।।४४।।
सिद्धवज्राभिधं यन्त्रमशेषशुभदायकम् । विनाशनमरिष्टा[3]नां जयसौभाग्यदायकम् ।। ४५।।
समरे विजयप्राप्त्यै बिभृयात् तद्विवादजे। समस्ते धारयेत् क्लेशे विजयं सुखमाप्नुयात्।। ४६।।
प्रतिमासं च पूर्णायामभिषिञ्चेच्च तत्र वै। स्थापयित्वा घटं प्राग्वत् समस्ताभ्युदयाय वै।। ४७।।

---

[1] 'वधं' ख. पाठः। [2] 'आहतैः' ख. पाठः। [3] 'अनिष्टानां' ख. पाठः।

पुत्राप्त्यै कन्यकावाप्त्यै वराप्त्यै कन्यका तथा। दाराधनपशुप्राप्त्यै नरनारीनृपादिनाम्।। ४८।।
वश्यायाविघ्नसंसिद्ध्यै वाक्सिद्ध्यै गेहसिद्धये। धारयेत् सिद्धवज्रं तु समस्तेषु प्रसिद्धये।। ४९।।
ललिताविद्यया विद्यामन्यां यन्त्रेण [1]चामुना। यन्त्रमन्यत् समं वेत्ति योऽसौ स्यान्मूढचेतनः।।५०।।
प्राक्प्रत्यग्दक्षिणोदक्च सूत्राण्यष्टादश क्षिपेत्। तैस्तत्र कोष्ठानि तथा नवाशीतिशतद्वयम्।।५१।।
तेषु कोणेषु कोष्ठानि मार्जयेत् पूर्ववत् प्रिये। षट्त्रिंशच्छिष्टवज्रे तु चतुर्भिर्दिक्त्रिकोणकम्।।५२।।
विधाय, प्राग्बहिर्मध्यात् प्रादक्षिण्यप्रवेशतः। विलिखेत् तद्द्वितीयोत्थभेदांस्तु विलिखेत् ततः।।५३।।
त्रिकोणेष्वथ तार्तीयं समाध्यं मध्यतस्तथा। नवस्व[2]पि लिखेद्विद्याकूटत्रयमथ त्रिशः।। ५४।।
दक्षत्रये त्वाद्यकूटं मध्ये तार्तीयकं तथा। वामत्रये द्वितीयं च लिखेत् साध्ये तृतीयकम्।। ५५।।
एतत्तु कोष्ठवज्राख्यं यन्त्रमिष्टार्थदायकम्। फलानि सर्वयन्त्राणां पटलेऽस्मिन् शृणु प्रिये।। ५६।।
तन्त्रेऽस्मिन्नन्यतन्त्रेषु यत्र[3] यत्रास्ति यत्फलम्। प्रोक्तं तदे[4]वमेकैकं योजयेत् सर्वमेव च।। ५७।।
तेनात्र यन्त्रनिर्माणमात्रमेवोच्यते मया। फलानि वाञ्छयावाप्नोत्ययत्नान्नामयोजनैः ।। ५८।।
अतः फलानि यन्त्राणामिह नोक्तानि कृत्स्नशः। सर्वं च सर्वदा सर्वसमीहितफलाप्तिकृत्।।५९।।
प्राक्प्रत्यग्दक्षिणोदक्च षड्विंशत्या समा[6]हितैः। सूत्रैः कोष्ठानि जायन्ते षट्शतं पञ्चविंशतिः।।६०।।
तेषु कोष्ठेषु परितो मार्जयेदष्टसप्ततिम्। शिष्टे चतुर्भिस्त्र्यस्रं च विदध्याद् दिक्षु पूर्ववत्।। ६१।।
तेषु तार्तीयविद्यां च ससाध्यां प्राग्वदालिखेत्। शिष्टेषु सप्तनवतिद्विशते मध्यतस्तथा।। ६२।।
सर्वमध्यस्थकोष्ठस्य पार्श्वयोरुभयोरपि। कोष्ठानि त्रीणि तिर्यक्च समीकृत्य तयोस्तथा।। ६३।।
उपर्यधश्च द्वे द्वे तु समीकुर्यात् ततस्तथा। तयोरधोर्ध्वं च तथा द्वे द्वे कुर्यादथैकधा।। ६४।।
तदधश्चोपरि तथा त्वेकैकं च द्वयं द्वयम्। एकीकृत्य पुनश्चोर्ध्वे द्वे द्वे तन्मार्जयेत् तथा।। ६५।।
ततो मालावदुपरि पार्श्वयोश्च प्रमार्जयेत्। दशखण्डानि शिष्टैस्तु मध्ये लिङ्गं भवेत् तथा।। ६६।।
एवं लिङ्गः समाख्यातश्चत्वारिंशद्भिरेव च। शिष्टानि कोष्ठवज्राणि[7] द्विशतं दशपञ्च च।। ६७।।
लिङ्गस्य पार्श्वयोर्मृष्टान्येकविंशतियुग्मकम्। तस्य लिङ्गस्य मध्यस्थपङ्क्त्यां तार्तीयमालिखेत्।।६८।।
ऊर्ध्वादि मायामध्यस्थं सर्वमध्ये ससाध्यकम्। सर्वत्र तार्तीयाविद्यालेखनं समुदीरितम्।। ६९।।
लिङ्गरूपेषु नवसु पार्श्वषट्केषु पूर्ववत्। विद्याशेषं समालिख्य प्राग्वदारम्भतस्तथा।। ७०।।
विद्याद्वितीयभेदोत्थं तद्विंशशतमालिखेत्। द्विशस्तत्र यजेद् देवीमावाह्य परिवारकैः।। ७१।।
स्थापयेद्विनियोगेषु प्रोक्तेषु परमेश्वरि। नासाध्यमस्ति भुवने यन्त्रैरेतैर्मयोदितैः ।। ७२।।
एकादिद्वयसंवृद्ध्या पार्श्वयोः कोष्ठवर्धनम्। एकोनविंशकोष्ठान्तं कृत्वा लिङ्गं तथोपरि।। ७३।।

---

१. 'वा' ख. पाठः। २. 'सु वि' ख. पाठः। ३. 'यस्य यन्त्रस्य' ख. पाठः। ४. 'तदेषां' ख. पाठः। ५. 'मानं' ख. पाठः।
६. 'समाहतैः' ख. पाठः। ७. 'वज्रकोष्ठानि' ग. पाठः। ८. 'मनोरमैः' ग. पाठः।

कृत्वा प्राङ्मध्यतः प्राग्वच्चत्वारिंशद्भिरेव हि[१]। तेषु मूलादि परितो मध्यान्तं विन्यसेत् तथा[२]।।७४।।
विद्याद्वितीयभेदोत्था विद्या विंशशतं प्रिये। लिङ्गस्य मध्यकोष्ठान्तं शिष्टं कोणेषु संलिखेत्।।७५।।
विधाय चतुरस्रं तु सूत्रद्वयनिपातनात्। सर्वबाह्ये तदाबद्धं तस्योपरि समालिखेत्।। ७६।।
पङ्क्तिशः सप्तकोष्ठेषु पर्यायादींस्तथार्णकान्। नित्यापर्यायजनिते पार्श्वयोर्दक्षवामयोः।। ७७।।
मध्ये युगोदयार्णौ तु लिखेत् प्रोक्तक्रमेण वै। लिङ्गाग्रमध्यादभितः पिण्डिकायां च संलिखेत्।।७८।।
विद्याः प्रथमभेदोत्थाश्चतुर्विंशतिकास्तथा। कृत्वैवं मेरुलिङ्गं तु यन्त्रं तत्रैव तां लिखेत्।। ७९।।
समस्तवाञ्छितप्राप्त्यै जयारोग्यायुराप्तये। पटादौ तत् समालिख्य पूजयेन्नित्यशश्च ताम्।। ८०।।
(प्राक् प्रत्यग् दक्षिणोदक् च[३] सैकविंशतिसूत्रतः। चतुःशतानि कोष्ठानि भवति सुसमानि वै।।८१।।)
तस्यैकपार्श्वाधोभागे पञ्च कोष्ठानि मार्जयेत्। ततश्चोपरि षट् सप्तेत्येवमेकादशावधि।। ८२।।
मार्जयेदुपरिष्टाच्च तस्यैव प्रतिलोमकम्। तथा कुर्यात् पार्श्वयोश्च[४] तेनाधिष्ठानपिण्डके।। ८३।।
भवतश्चोपरिष्टात्तु पञ्चविंशतिकोष्ठकैः। लिङ्गमन्यानि पार्श्वस्थमार्जनाद् भवति* प्रिये।। ८४।।
अधिष्ठाने पिण्डिकायां तद्द्वितीयविभेदतः। लिङ्गे प्रथमभेदोत्थास्तन्मध्यस्थे स्ववाञ्छितम्।।८५।।
मध्ये तद्दिनजां विद्यामिति प्रोक्तं तवानघे। महालिङ्गाभिधं यन्त्रं तत्र पूजालिखेष्टदा।। ८६।।
समत्रिरेखां निष्पाद्य योनिं तस्यास्तु मध्यतः। तत्तत्सूत्रवशात् कुर्याद् दशं त्रिषु तथा समम्।।८७।।
एवं कृतेऽत्र परितो लिखेत्तां विंशतिं शतम्। शिष्टमध्यत्रिकोणे तु लिखेद्वाञ्छितमात्मनः।। ८८।।
तत्र तामर्चयेत् प्राग्वत् स्थापयेच्च तथा तथा। (तत्र स्वेष्टमवाप्नोति योनिचक्रानुभावतः।। ८९।।
समत्रिरेखं निष्पाद्य त्र्यस्रं योनिं च सङ्गतम्। तत्र तिर्यक् चतुःसूत्रपातनादन्यतस्तथा।। ९०।।)
तिर्यक् सूत्रं मार्जयित्वा पूर्वशृङ्गात् तथाभितः। प्रवेशगत्या विलिखेत् ताश्चतुर्विंशतिं क्रमात्।।९१।।
विलिख्य शिष्टवज्रस्थं विलिखेन्निजवाञ्छितम्। तत्र तां पूजयेद् देवीं पूर्णास्विष्टार्थसिद्धये।।९२।।
तथा विधाय दशभिर्दशभिः सूत्रपातनैः। द्वितीयभेदान्[५] विलिखेत् तथा साध्यसमन्वितान्[६]।।९३।।
तत्रापि पूजनाद्यैस्तु[७] सिद्धयो निजवाञ्छिताः। एव[८]मूह्यं तृतीयोत्थविद्याभिरभि[९]कल्पयेत्।।९४।।
तेऽपि वाञ्छितसंसिद्धिं कुर्युरेव सुनिश्चितम्। कोष्ठयन्त्रविभेदानि शृणु वक्ष्ये यथाविधि।। ९५।।
नवषोडशकोष्ठादि संवर्ध्य विषमं समम्। तेष्वङ्कानि समं कृत्वा पङ्क्तौ तेषु समालिखेत्।। ९६।।
विद्यातृतीयभेदोत्थांस्तत्तदङ्कानुगुण्यतः। मनीषितं च संलिख्य तेषां मध्यस्थकोष्ठतः।। ९७।।
विदध्याद्वाञ्छितं सर्वं तैर्यन्त्रैः कल्पितैस्तथा। वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादिकम्।। ९८।।
आयुरारोग्यविजयविभूत्याद्यं च सिध्यति। स्थापनाद्धारणाच्चान्यैरुपायैः साधकोऽनिशम्।। ९९।।

---

*लिङ्गमित्यस्य भवतीत्यत्रान्वयः।

१. 'वै' ख. पाठः। २. 'क्रमात्' ख. पाठः। ३. 'दक्क' ख. पाठः। ४. 'श्चमन्यत्' ख. पाठः। ५. 'दा' ख. पाठः।
६. 'ताः' ख. पाठः। ७. 'स्युः' ख. पाठः। ८. 'एवं पूज्य' ग. पाठः। ९. 'रपि' क. पाठः।

इति देव्या यन्त्रभेदास्तवोक्ताः सर्वसिद्धदाः। अशेषं देवि ते प्रोक्तं यन्त्रसिध्यभिधागमे।। १००।।

इति। अत्र प्रोक्तयन्त्रक्रमस्तु गुरुमुखादवगन्तव्यः।।

अथ वासनामाह श्रीतन्त्रराजे– (३५ प०)

अथ षोडशनित्यानां स्वात्मत्वे वासनां शृणु। यया तन्मयतासिद्धिः प्रत्यक्षा भवति ध्रुवम्।।१।।
गुरुराद्या भवेच्छक्तिः सा विमर्शमयी मता। नवत्वं तस्य देहस्य रन्ध्रत्वेनावभासते।। २।।

गुरुमन्त्रात्मनामैक्यत्वबुद्धिर्विमर्शः। त्रैलोक्यमोहनादिसर्वानन्दमयान्तचक्राणां नवत्वमित्यर्थः।

बलिदेव्याः स्वमायाः स्युः पञ्चमी जनकात्मिका। कुरुकुल्ला भवेन्माता पुरुषार्थास्तु सागराः।।३।।

अथ मायायास्त्रैविध्यं सात्त्विकी–राजसी–तामसी चेति, एतास्तिस्रः कुरुकुल्लाबलित्रयरूपाः। जनकात्मिका मूलभूता इत्यर्थः।

रत्नद्वीपो भवेद्देहो नवत्वं धातुरोमभिः। सकल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः।। ४।।

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रप्राणजीवाख्या नव धातवो नवखण्डरूपा इत्यर्थः। रोमाण्येव कल्पवृक्षाः, षडाधाराः षड्ऋतवः।

ग्रहर्क्षराशिचक्रेण कालात्मा पश्चिमामुखः। तेन पूर्वाभिमुख्यं स्यादन्यत्ते कथितं[1] मिथः।। ५।।
ज्ञाता स्वात्मा भवेज्ज्ञानमर्घ्यं ज्ञेयं बहिःस्थितम्। श्रीचक्रं पूजनं तेषामेकीकरणमीरितम्।। ६।।

तेषां ज्ञातृज्ञानज्ञेयानाम्।

श्रीचक्रे सिद्धयः प्रोक्ता रसा नियतिसंयुताः। ऊर्मयः पुण्यपापे च ब्राह्म्याद्या मातरः स्मृताः।।७।।

रसाः षट्। नियतिश्चतुर्विधा नियतिपुरुषप्रकृत्यहङ्काराः। षडूर्मयः क्षुत्पिपासाशोकमोहजरामृत्यवः, पुण्यपापे च एते अष्टौ ब्राह्म्यादिमातृका इत्यर्थः।

भूतेन्द्रियमनांस्येवं क्रमान्नित्यकलाः पुनः। कर्मेन्द्रियार्था दोषाश्च ज्ञेयाः स्युः शक्तयोऽष्ट वै।।८।।

पञ्चभूतानि पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्च। कर्मेन्द्रियार्था वचनादानविहरणविसर्गानन्दाः। दोषा वातादयः।

नाड्यश्चतुर्दश प्रोक्ताः क्षोभिण्याद्यास्तु शक्तयः। वायवो दश सम्प्रोक्ताः सर्वसिद्ध्यादिशक्तयः।।९।।

नाड्यश्चतुर्दश प्रागुक्ताः प्रसिद्धाः।

वह्नयो दश सम्प्रोक्ताः सर्वज्ञाद्यास्तु शक्तयः। शीतोष्णसुखदुःखेच्छा गुणाः प्रोक्ताः क्रमेण वै।।१०।।
वशिन्याद्याः शक्तयः स्युस्तन्मात्राः पुष्पसायकाः। मनो भवेदिक्षुधनुः पाशो राग उदीरितः।। ११।।
द्वेषः स्यादङ्कुशः प्रोक्तः क्रमेण वरवर्णिनि। अव्यक्ताहङ्कृतिमहदाकाराः प्रतिलोमतः।। १२।।
कामेश्वर्यादिदेव्यः स्युः संवित् कामेश्वरः स्मृतः। स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा।।१३।।
लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावना। सिद्धस्त्वनन्यचित्तत्वं मुद्रा वैभवभावना[2]।। १४।।
उपचाराश्चलत्वेऽपि तन्मयत्वाप्रमत्तता। प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम्।।१५।।

---

[1] 'कल्पितं' ग. पाठः। [2] 'नम्' ख. पाठः।

यन्त्राणि मन्त्रा: सर्वत्र स्वात्मत्वे स्वैर्यसाधनम्। सन्ध्यासु भजनं देव्या आदिमध्यान्तमज्जनम्[१] ।।१६।।
अन्यास्तु शक्तयश्चक्रगामिन्यो या: समन्तत:। तास्तु विश्वविकल्पानां हेतव: समुदीरिता:।। १७।।
न्यासस्तु देवतात्वेन स्वात्मनो देहकल्पनम्। जपस्तन्मयतारूपभावनं सम्यगीरितम्।। १८।।
होमो विश्वविकल्पानामात्मन्यस्तमयो मत:। तेषामन्योन्यसम्भेदभावनं तर्पणं स्मृतम्[२]।। १९।।
मोहाज्ञानादिदु:खानामात्मन्यस्तमयो दृढम्। अभिषेकस्तु विद्या स्यादात्मा सर्वाश्रयो महान्।।२०।।
उपाधीनां तु राहित्यमुपदेश इतीरित:। दक्षिणा भेदशून्यत्वं शुश्रूषा स्थैर्यमुच्यते।। २१।।
तिथिरूपेण कालेन[३] परिणामावलोकनम्। नित्यापञ्चदशैता: स्युरिति प्रोक्तास्तु वासना:।। २२।।
पृथिव्यादीनि भूतानि कनिष्ठाद्या: क्रमान्मता:। तेषामन्योन्यसम्भेदप्रकारैस्तत्प्रपञ्चता।। २३।।
ललितायास्त्रिभिर्वर्णै: सकलार्थोऽभिधीयते। शेषेण देवीरूपं तु तेन स्यादिदमीरितम्।। २४।।
अशेषतो जगत्कृत्स्नं ह्ल्लेखात्मकमीरितम्। तस्याश्चार्थस्तु कथित: सर्वतन्त्रेषु गोपित:।। २५।।
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना। तयोर्विमर्श ईकारो बिन्दुना तन्निफालनम्[४]।। २६।।
अथ मन्त्रविनिर्माणविधानमभिधीयते । मन्त्रवीर्यसुसिद्धानामितरेषां विशेषकृत् ।। २७।।

प्रागुक्तरश्मिक्रमज्ञानामित्यर्थ:। (मन्त्रवीर्यज्ञानसुसिद्धानाम्। इतरेषां तज्ज्ञानसिद्धिरहितानाम्)

मन्त्रा एकाक्षरा: पिण्डा: कर्तर्य्यो द्व्यक्षरा मता:। वर्णत्रयं समारभ्य नवार्णावधि बीजका:।।२८।।
ततो दशार्णमारभ्य यावद्विंशति मन्त्रका:। अत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते।। २९।।
तथैव पिण्डकर्तर्योर्भेदो बीजेषु वर्णत:। पदैर्मन्त्रेषु भेद: स्यात्तेषां संख्या: शृणु क्रमात्।। ३०।।
षट् चतुर्विंशति तथा शतं विंशतिसंयुतम् (१२०)। सविंशति सप्तशतं (७२०) चत्वारिंशद्भिरन्वितम्।।
सहस्रपञ्चकं(५०४०)पश्चाच्चत्वारिंशत्सहस्रकम्। त्रिशतं विंशति (४०३२०) ततस्त्रिलक्षेण समन्वितम्।।
द्विषष्टिश्च सहस्राणां साशीत्यष्टशतं त्विति(३६२८८०)। भेदसंख्यास्तु सप्तानां[५] ताभिरन्या: समुन्नयेत्।।
प्रस्तारक्रममेतेषां शृणु देवि यथाक्रमम् । एतैरेवोन्नयेन्मन्त्रपदभेदाननुक्रमात् ।। ३४।।
तिर्यग्रेखाद्वयं कृत्वा तत्राधोर्ध्वं लिखेत् क्रमात्। रेखाश्चतस्र: पञ्चैवमृज्वाकारा दशावधि।। ३५।।
तदधो वर्धयेद्रेखास्तत्तत्संख्याङ्गुलावधि। तिर्यग्रेखास्तावतीश्च कृत्वा तेष्वङ्कमालिखेत्।। ३६।।
सव्यदक्षस्थितेष्वेषु कोष्ठपङ्क्तिष्वनुक्रमात्। आद्ये द्विद्विक्रमादङ्कान् पूरयेत् तन्त्र[६]चोदितान्।। ३७।।
एतेनान्यत्र सर्वत्र देया[७]नङ्कानुक्रमात्। द्वितीयपङ्क्तौ प्रथमे खण्डे शेषांस्तु पूरयेत्।। ३८।।
द्वितीयादिष्वपि तथा शेषान् खण्डेषु पूरयेत्। तत[८]स्तृतीयपङ्क्तौ तु खण्डान् शेषैस्तु पूरयेत्।।३९।।
चतुर्थादिष्वपि तथा नवमान्तं समालिखेत्। तिर्यक् पङ्क्तिष्वनभ्यस्तक्रममङ्कांस्तु सर्वत:।। ४०।।

---

१. 'वर्जनम्' ग. पाठ:। २. 'भवेत्' ख. पाठ:। ३. 'कालस्य' ख. पाठ:। ४. तादात्म्यविमर्शनिर्णय: इत्यर्थ:। ५. त्र्यक्षरादिनवान्तानामित्यर्थ:। ६.'तत्र' ख. पाठ:। ७.'नयेत्' क. पाठ:। ८. 'तृतीयपंक्तौ तु शेषैस्त्वेवमेव समालिखेत्' ख. पाठ:।

एवं कृते भवेद्विद्या सर्वोर्ध्वा वीरवन्दिते। सर्वाधस्ताद्विलोमा सा मध्यस्था व्याकुलक्रमात्[1] ।।४१।।
ताभिः सर्वाभिरप्याशु सिध्यत्येवाभिवाञ्छितम्।...।।

इति।। तथा–(३५ प० ५८ श्लो०)

अनुष्णशीते विजने सुसमे रम्यविग्रहे। गृहे वा मण्डपे स्थित्वा पीठं धवलितोदरम्।। १।।
विन्यस्य तस्मिन् पूर्णायां शुभर्क्षे वा शुभोदये। कुचन्दनैः कुङ्कुमैर्वा दरदैर्वोपदेशतः।। २।।
कृत्वोक्तं मण्डलं सार्णं तत्रावाह्य यजेच्छिवाम्। नित्यशो मातृकां जप्यात् सम्प्रदायानुसारतः।।३।।
एवमब्दे तु सम्पूर्णेऽभीष्टदेवाय मन्त्रवित्। कुर्यान्मन्त्रमभीष्टार्थगमकं प्रोक्तयोगतः ।। ४।।

अत्र प्रागुक्तरश्मिक्रमं ज्ञात्वा यद्यद्भूतरश्मिबाहुल्यं यस्मिन्मन्त्रे दृश्यते तत्तद्भूतार्णयुक्ततत्तन्मण्डलं विलिख्य, तन्मध्ये तद्भूतरश्मिकदम्बप्राचुर्यविशिष्टस्वेष्टदेवतापूजायन्त्रं विलिख्य, तत्तदुपचारैः सम्पूजयन् तत्तद्भूतार्णमालया स्वेष्टदेवतामन्त्रं जपन् प्रोक्तसिद्धिर्भवतीत्यर्थः, मन्त्रसिद्धिरपि भवतीति।। तथा–

नभोऽग्निवायुप्रायार्णाः क्रूराः क्षोभकरा: मताः। भूतोयप्रचुराः सौम्याः सेव्याः सिद्धिकराः मताः।।५।।

अत्र येषु येषु मन्त्रेषु आकाशाग्निवायुवर्णप्राचुर्य्यं दृश्यते तैस्तैर्मन्त्रैस्तत्तन्मण्डंले क्रूरप्रयोगाः कर्तव्याः। येषु येषु मन्त्रेषु सौम्यभूतरश्मिप्रचुरता दृश्यते तैर्मन्त्रैस्तत्तत्सौम्यभूतमण्डले सौम्यप्रयोगाः सिध्यन्तीत्यर्थः।

एषामन्योन्यसम्भेदबाहुल्याद्बहवोऽणवः। तैस्तथा भजनात् सिद्धाः फलन्ति स्वैक्ययोगतः।। ६।।

द्वित्रिचतुष्टयपञ्चभूतरश्मिसाङ्कर्यमन्त्रा बहवो जायन्ते, तादृशमन्त्राणां तत्तद्भूतसाङ्कर्यमण्डलेषु भजनं कुर्यात्तत्तत्सिद्धिर्भवतीति। अत्र क्रमस्त्वेवं बोद्धव्यः–मन्त्राक्षराणि स्वरव्यञ्जनरूपेण पृथक्पृथग्विलिख्य, तत्तद्वर्णस्य प्रागुक्तषड्विधरश्मिक्रमं पृथक्पृथग्विलिख्य, तत्तद्भूतरश्मीनां पृथक्पृथगैक्यमेलनेन भूताधिक्यतां विज्ञाय, यस्य भूतस्याधिक्यता सम्पद्यते तत्तन्मण्डलगर्भं पूजायन्त्रं विलिखेत्। पूजायन्त्रमपि प्रचुरभूतमण्डलमध्ये तस्मादूनं तद्बहिस्तस्मादूनं तद्बहिरेवमुत्तरोत्तरं न्यूनाधिकभावेन विलिख्य, तादृशकल्पितोपचारैस्तत्तदावरणदेवतानां तत्तद्भूतार्णसंधानेन सम्पूजयन् तथैव भूतार्थघटितमालया जपेत्तत्तत्सिद्धिर्भवतीत्यर्थः। इदं सर्वं गुरुतः शास्त्रतश्च सम्यग्विज्ञाय भजनं कुर्यात्।। तथा–

मन्त्रार्थास्त्रिविधा ज्ञेया ज्ञातव्याः सिद्धिकाङ्क्षिभिः। पूजापटलसम्प्रोक्तास्त्रिविधाः स्युरुपासकाः।।७।।
वर्णस्योदयविश्रान्तिपदे बुद्धिनिवेशनम्। एकोऽन्यः सर्वतः सिद्धव्युत्पत्त्यर्थाभिवीक्षणम्।। ८।।
वाच्यवाचकसम्भेदभावनादिभिरीरिताः। एषां पञ्चप्रकाराणामशेषेणेष्टसिद्धिदाः।। ९।।

अत्र मन्त्रार्थचिन्तने त्रैविध्यं लक्ष्यते, तत्र वर्णकदम्बकं पदं, पदकदम्बकं वाक्यमिति, प्रतिवर्णे उदयो विश्रान्तिश्च पदे ज्ञातव्या। तादृशपदेषु बुद्धिनिवेशनं कृत्वा तादृशबुद्धिपूर्वकं जपेदित्येकः। द्वितीयस्तु प्राचीनैर्व्याख्यातसिद्धव्युत्पत्त्यार्थाभिवीक्षणपूर्वकजापकः। तृतीयस्तु मन्त्रतद्गतवर्णपदवाक्यतत्प्रतिपादकदेवतानां वाच्यवाचकभावनादिभिरुपासकः। प्रोक्तपञ्चभूतार्णतद्रश्मितत्तद्भूतसाङ्कर्यरश्मिप्रकाराणां प्रोक्तोपासनाक्रमेणाशेषसिद्धयो भवन्तीत्यर्थः। तथा–(३५ प०८०श्लो०)

सिद्धमन्त्रेण कर्तव्याः प्रयोगाः नान्यथा प्रिये। नराणामिव मन्त्राणां देवतानां च पार्वति।। १।।

---

१. 'क्रमाः' ख. पाठः।

अन्योन्यं वैरमस्त्येव गुणभूतसमन्वयात्। आग्नेयानां च भौमानामाप्या मन्त्रास्तु वैरिणः।। २।।
वायव्यानां जलानां च भौमानां स्यात् परस्परम्। स्त्रीदैवत्या वैरिणः स्युः पुंदैवत्यस्य भूयसा।।३।।
स्त्रीदैवत्येषु सौम्यानां क्रूराणां स्यात् परस्परम्। तथैव पुंदैवतानां त्वरितानरसिंहयोः।। ४।।
शास्त्रा तु यक्षिणीनां स्यादघोरास्त्रस्य चक्रतः। मन्त्राणां देवतानां च वैरीकरणमीश्वरि।। ५।।
कथयामि शृणु प्राज्ञे येन लोकोऽव[1]सीदति। वैषम्यभजनं पुंसामज्ञानादाशयात्तथा[2]।। ६।।
तेन मन्त्रा देवताश्च क्रुद्धा हन्युरुपासकम्। तस्मात् सर्वस्य लोकस्य मन्त्रवीर्यं हि जीवितम्।।७।।
यन्निष्ठानाममी दोषा न स्पृशन्ति कदाचन। गुरोः शुश्रूषया काले दीक्षया लब्धमादरात्।। ८।।
तदाज्ञया भवेदेकरूपं मन्त्रं स्वसिद्धये। अन्यथा साधकं हन्याच्छस्त्रेण रिपुतो भयात्।। ९।।
दारिद्र्याद् दीर्घरोगाद्वा व्यसनेष्वतिसर्जनात्। यो यो मन्त्रस्तस्य तस्य वर्णौषधिविनिर्मिता।।१०।।
तत्तद्वर्णोत्थसंख्याभिर्गुलिका मन्त्रसिद्धिदा। तयाभिषेकस्तद्धरणं तत्खादस्तद्विलेपनम् ।।११।।
तत्पूजा च तथा सिद्धिलाभाय स्यान्न चान्यथा।...।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे एकत्रिंशः श्वासः।। ३१।।

◆

---

[1] 'अतिसीदति' ख. पाठः। [2] 'आशयाथवा' ख. पाठः।

अथ
द्वात्रिंशः श्वासः

अथ महागणपतिमन्त्राः प्रदर्श्यन्ते—

अथ वक्ष्ये महादेवि मन्त्रमेकाक्षरं परम्। शार्ङ्गी प्रीतियुतः प्रोक्तो गणेशस्यैकवर्णकः ।। १ ।।

इति। शार्ङ्गी गकारः। प्रीतिरनुस्वारः। नारायणीये त्वस्य मन्त्रस्य पञ्च भेदा उक्ताः। तथा—

“खान्तं सान्तविषं सबिन्दुसकलं बिन्द्वौयुतं केवलं पञ्चैतानि पृथक्फलं विदधते बीजानि विघ्नेशितुः” इति। अन्तो विसर्गः, विषं मकारः ताभ्यां सह वर्तमानः खान्तो गकारः, तेन गं गः इति सिद्धम्। कला विसर्गः तद्युक्तोऽन्यस्तेन गंः। बिन्दुश्च औच ताभ्यां युत इत्यपरः। केवलं बिन्द्वादिरहितः। तथा— “गणकः स्यादृषिश्छन्दो निचृद्विघ्नोऽस्य देवता” इति। प्रयोगसारे—

आदौ गणञ्जयायोक्त्वा स्वाहा हृदयमुच्यते। एकदंष्ट्राय चाभाष्य हुंफट् विद्याशिरस्तथा।। १ ।।
शिखाप्यचलशब्दादिकर्णिने हृत्ततो नमः। कवचं गजवक्त्राय नमो नमः इतीरितम्।। २ ।।
महोदराय चण्डाय हुंफडित्यस्त्रमिष्यते। एतान्यङ्गानि विन्यसेत् पञ्चाङ्गानि मनीषिभिः।। ३ ।।

इति पञ्चाङ्गानि उक्तानि। सारसङ्ग्रहे तु—“षड्दीर्घेण निजेनैव बीजेनाङ्गानि योजयेत्” इंत्युक्तम्। तदेतयोर्विकल्पः। “सप्रांशुना वा बीजेन षडङ्गानि नियोजयेत्” इति प्रयोगसारवचनात्। एवं सप्रांशुना सदीर्घेण षड्दीर्घयुक्तेनेति यावत्। अत्र यथागुरूपदेशं कार्यमिति। प्रयोगसारे—

रक्तो रक्ताङ्गरागांशुककुसुमयुतस्तुन्दिलश्चन्द्रमौलि-
नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः।
हस्ताग्रक्लृप्तपाशाङ्कुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनो वो भवतु नतसुरो भूतये विघ्नराजः।। १ ।।

वामाद्यूर्ध्वयोराद्ये तदाद्यधस्तनयोरन्ये, इत्यायुधध्यानम्। सारसङ्ग्रहे—

रक्ताभः शशिमौलिरङ्कुशगुणौ दन्तं वरं धारयन्
हस्ताब्जैर्द्विरदाननस्त्रिनयनो रक्ताङ्गरागावृतः।
बीजापूरबृहत्करोरुजठरे दानार्द्रगण्डस्थलो
विघ्नेशः[१] फणिभूषणो गणपतिर्भूयाद्भवद्भूतये ।। १ ।।

(तत्रादौ वैदिकानां च गकारः केवलो मतः। दक्षिणानां बिन्दुयुक्तो द्विबिन्दुः पूर्वधर्मिणाम्।। एतद्द्वययुतः एश्चादूर्ध्वाम्नायेति, गौमिति। ग्लौमुत्तरे गोमिति च पातालाम्नाय ईरितम्।। इति मेरुतन्त्रे।) १.‘पद्मरथः’ ख. पाठः।

अत्र दक्षोर्ध्वादि तदधोन्तमायुधध्यानम्। बृहत्करः शुण्डादण्डः (इति ध्यात्वा गणेशानं मानसैरुपचारकैः। पूजयित्वेति शेषः। तीव्रादिशक्तिसंयुक्ते पीठे त्वावाह्य पूजयेत्।) प्रपञ्चसारे–

तीव्रा ज्वालिनीनन्दे सभोगदा कामरूपिणी चोग्रा।
तेजोवती च सत्या सम्प्रोक्ता विघ्ननाशिनी नवमी।। १ ।।
बीजान्ते सर्वशक्ति–प्रोक्त्वा कमलासनाय नम इति च।
आसनमन्त्रः प्रोक्तो नवशक्त्यन्ते समर्चयेदमुना।। २।।

इति। अत्र मण्डूकादिपरतत्त्वान्ता योगपीठदेवतानां पूजा प्रागेव पूजाप्रकरणे लिखितत्वाद् ग्रन्थगौरवभयाच्चात्र न लिखिता। सारसङ्ग्रहे–

अष्टपत्रं सरोजं तु चतुरस्रत्रयावृतम्। चतुर्द्वारसमायुक्तमर्चापीठं विधाय च ।। १।।
तत्रावाह्य गणेशानमर्चयेदुपचारकैः। कर्णिकायां तु पूर्वादिचतुर्दिक्षु गणाधिपम्।। २।।
पीतं गौरं गणेशानं रक्तं च गणनायकम्। गणक्रीडां नीलवर्णं केसरेषु ततो यजेत्।। ३।।
अग्नीशासुरवायव्यमध्ये दिक्षु यथाक्रमम्। षडङ्गानि मनोरस्य ध्यातव्याश्चाङ्गदेवताः।। ४।।
तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः। वरदाभयधारिण्यः प्रधानतनवः स्त्रियः।। ५।।
वक्रतुण्डादिकानष्टौ वक्ष्यमाणान् दले यजेत्। वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ।। ६।।
लम्बोदराख्यविकटौ विघ्नराड्धूम्रवर्णकौ। दलाग्रेषु ततः पूज्या ब्राह्म्याद्यास्त्वष्ट मातरः।। ७।।
ब्राह्मी स्वर्णसमा ध्येया मृगचर्मविभूषिता। अक्षमालाभये दण्डकुण्डिके दधती करैः।। ८।।
त्रिशिखं परशुं हस्तैर्डमरुं नृकपालकम्। बिभ्राणां चन्द्रगौराङ्गीं माहेशीं भावयेच्छुभाम्।। ९।।
गुणखट्वाङ्गदण्डाङ्कुशान् वहन्तीं कराम्बुजैः। इन्द्रगोपारुणां ध्यायेत् कौमारीं करुणालयाम्।।१०।।
अरिशङ्खकपालानि घण्टां च करपङ्कजैः। बिभ्राणां वैष्णवीं ध्यायेन्नीलमेघसमप्रभाम्।। ११।।
हलं च मुसलं दोर्भिर्दधानां खड्गखेटकौ। वाराहीं भावयेच्छक्तिमञ्जनाद्रिसमप्रभाम्।। १२।।
तोमराङ्कुशवज्राह्वविद्युद्युक्तकराम्बुजाम्। इन्द्राणीं भावयेन्मन्त्री नीलवर्णां सुभूषणाम्।। १३।।
धारयन्तीं शूलखड्गौ कपालं नृशिरः करैः। चामुण्डां शोणवर्णां च मुण्डमालायुतां स्मरेत्।।१४।।
स्वर्णाभामक्षमालां च बीजपूरकपालके। पद्मं च दधतीं हस्तैर्महालक्ष्मीं स्मरेत् सुधीः।। १५।।

दक्षाधःकरमारभ्य तदूर्ध्वकरपर्यन्तमायुधध्यानं ब्राह्म्याः। दक्षाद्यधःस्थयोराद्ये तदाद्यूर्ध्वस्थयोरन्ये माहेश्याः। कौमार्यास्तु वामोर्ध्वकरमारभ्य दक्षोर्धकरपर्यन्तम्। वैष्णव्यास्तु दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तम्। अरिश्चक्रम्। वाराह्यास्तु दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये। इन्द्राण्यास्तु वामोर्ध्वकरमारभ्य वामाधः करपर्यन्तम्। चामुण्डायास्तु दक्षोर्ध्वाधः–करयोराद्ये वामोर्ध्वाधःकरयोरन्ये। महालक्ष्म्यास्तु दक्षाधःकरमारभ्य दक्षोर्ध्वकरपर्यन्तायुध्यानम्। तथा–

चतुरस्रत्रयेऽन्तःस्थवीथीद्वन्द्वे समर्चयेत्। दिक्पालांश्च तदस्त्राणि गणेशार्चनमीरितम्।। १६।।
इन्द्रं सुराधिपं पीतं वज्रहस्तं सवाहनम्। अग्निं तेजोधिपं रक्तं शक्तिहस्तं सुभूषितम्।। १७।।

यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत्। रक्षोधिपं च निर्ऋतिं खड्गहस्तं सुधूम्रकम्।। १८।।
पाशहस्तं सुशुभ्राङ्गं वरुणं यादसां पतिम्। वायुं प्राणाधिपं धूम्रमङ्कुशाढ्यकरं यजेत्।। १९।।
यक्षाधिपं कुबेरं च मुक्तावर्णं गदाकरम्। विद्याधिपं तथैशानं स्वच्छं शूलकरं यजेत्।। २०।।
नागाधिपं तथा रक्तं गौरं चक्रकरं यजेत्। लोकाधिपं विधातारं रक्तं पद्मकरं यजेत्।। २१।।
ऐरावतं तथा मेषं महिषं मृतपूरुषम्। मकरं मृगमत्स्यौ च वृषं च विपहंसकौ।। २२।।
इन्द्रादिलोकपालानां वाहनानि विदुर्बुधाः। ततो बहिस्तदस्त्राणि तत्पार्श्वे च समर्चयेत्।। २३।।
वज्रं पीतं सितां शक्तिं दण्डं कृष्णं समर्चयेत्। खड्गमाकाशसङ्काशं पाशं विद्युन्निभं यजेत्।।२४।।
अङ्कुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत्। त्रिशूलं नीलवर्णं च यजेत् साधकसत्तमः।।२५।।
रथाङ्गं कुरुविन्दाभं पद्मं रक्तं समर्चयेत्। लोकपालायुधान्येव कथितानि मनीषिभिः।। २६।।
य एवं पूजयेद्देवं गणेशं भक्तिसंयुतः। इह भुक्त्वाखिलान् भोगानन्ते शिवपदं व्रजेत्।। २७।।

इति।। अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते गणेशमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे निचृच्छन्दसे नमः। हृदये श्रीविघ्नेश्वराय देवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये जपे विनियोगः। इति कृताञ्जलिरुक्त्वा मूलमन्त्रेण करशुद्धिं कृत्वा, अङ्गुष्ठयोः गणञ्जजाय स्वाहा, हृदयाय नमः। तर्जन्योः एकदंष्ट्राय हुंफट्, शिरसे स्वाहा। मध्यमयोः अचलकर्णिने नमोनमः, शिखायै वषट्। अनामिकयोः गजवक्त्राय नमोनमः, कवचाय हुं। कनिष्ठिकयोः महोदराय चण्डाय हुंफट्, अस्त्राय फट्। इति मन्त्रानङ्गुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य, नेत्रवर्जं हृदयादिपञ्चाङ्गेष्वपि न्यसेत्। अथवा गांगीं इत्यादिना करषडङ्गन्यासं कृत्वा ध्यानाद्यात्मपूजान्तं प्रोक्तविधिना कृत्वा, एकदंष्ट्राय विद्महे वक्रतुण्डाय धीमहि तन्नो विघ्नः प्रचोदयात्। इति गणेशगायत्र्या गणेशपूजाद्रव्याणि पूजास्थानं च प्रोक्ष्य, देवताग्रं पूर्वं परिकल्प्य तदनुसारेण प्राप्तनिर्ऋतिकोणे श्रीपर्ण्यादिपीठे कुङ्कुमादिना चतुर्द्वारयुक्तचतुरस्त्रत्रय-वेष्टितमष्टदलकमलं पूजायन्त्रं निर्माय, तत्र प्रागुक्तविधिना मण्डूकादिपृथिव्यन्तं सम्पूज्य, सुधार्णवस्थाने इक्षुरससमुद्रं सम्पूज्य, रत्नद्वीपादिपरतत्त्वार्चान्तेऽष्टदलकेसरेषु स्वाग्रान्मध्यान्तं— ॐतीव्रायै नमः। ज्वालिन्यै०। नन्दायै०। भोगदायै०। कामरूपिण्यै०। उग्रायै०। तेजोवत्यै०। सत्यायै०। विघ्ननाशिन्यै नमः। इति सम्पूज्य, गं सर्वशक्तिकमलासनाय नमः, इति समस्तं पीठमभ्यर्च्य, तत्र मूलमन्त्रमुच्चार्य श्रीगणेशमूर्तिं परिकल्पयामि नमः इति चक्रमध्ये मूर्तिं परिकल्प्य, मूर्त्यभावे पुष्पादिकं निक्षिप्य ध्यानोक्तां मूर्तिं भावयन् मूलमुच्चार्य 'श्रीगणपतिमूर्तये नमः' इति मूर्तिं सम्पूज्य, तस्यां प्रागुक्तविधिना गणेशमावाह्यावाहनादिमुद्राः प्रदर्श्य, प्राणप्रतिष्ठान्ते दन्तपाशाङ्कुशविघ्नपरशुलड्डुकबीजापूराख्याः सप्त मुद्राः प्रदर्श्य, आसनादिपुष्पान्तानुपचारानुपचर्य्य, कर्णिकायां देवाग्रादिचतुर्दिक्षु—ॐगणाधिपाय नमः। गणेशाय०। गणनायकाय०। गणक्रीडाय नमः। इति सम्पूज्य, अष्टदलकेसरेषु—आग्नेये ॐगणञ्जयाय स्वाहा हृदयाय नमः। ईशाने ॐएकदंष्ट्राय हुंफट् शिरसे स्वाहा०। नैर्ऋते ॐअचलकर्णिने नमोनमः शिखायै वषट्०। वायव्ये गजवक्त्राय नमोनमः कवचाय हुं०। ततो देवाग्रादि चतुर्दिक्षु—ॐमहोदराय चण्डाय हुंफट् अस्त्राय फट् नमः। यद्वा, पूर्वोक्तस्थानेष्वेव—गां हृदयाय नमः। गीं शिरसे स्वाहा इत्यादिषडङ्गानि पूजयेत्। अत्र षडङ्गपक्षे तु देवस्याग्रे गौं नेत्रत्रयाय वौषट्। इति नेत्रं सम्पूज्य पश्चादस्त्रं पूजयेदिति शेषः। ततोऽष्टदलेषु देवाग्रदलमारभ्य—ॐवक्रतुण्डाय नमः। एकदंष्ट्राय०। महोदराय०।

गजाननाय०। लम्बोदराय०। विकटाय०। विघ्नराजाय०। धूम्रवर्णाय नम:। इति प्रादक्षिण्येन सम्पूज्य, दलाग्रेषु—आं ब्राह्म्यै नम:। ईं माहश्वर्य्यै। ऊं कौमार्य्यै०। ॠं वैष्णव्यै०। ॡं वाराह्यै०। ऐं इन्द्राण्यै०। औं चामुण्डायै०। अ: महालक्ष्म्यै नम:। इति सम्पूज्य, बहिश्चतुरस्रे प्रथमवीथ्यां देवाग्रमारभ्य—उों लं इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नम:। उों रं अग्नये तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नम:। उों टं यमाय प्रेताधिपतये कृष्णवर्णाय दण्डहस्ताय महिषवाहनाय नम:। उों क्षं निर्ऋतये रक्षोधिपतये धूम्रवर्णाय खड्गहस्ताय प्रेतवाहनाय नम:। उों वं वरुणाय जलाधिपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नम:। उों यं वायवे प्राणाधिपतये कृष्णवर्णायाङ्कुशहस्ताय मृगवाहनाय नम:। उों सं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय नरवाहनाय नम:। उों हौं[1] ईशानाय विद्याधिपतये स्फटिकवर्णाय शूलहस्ताय वृषवाहनाय नम:। इति सम्पूज्य, इन्द्रेशानयोर्मध्ये उों आं ब्रह्मणे लोकाधिपतये रक्तवर्णाय पद्महस्ताय हंसवाहनाय नम:। निर्ऋतिवरुणयोर्मध्ये उों ह्रीं अनन्ताय नागाधिपतये गौरवर्णाय चक्रहस्ताय गरुडवाहनाय नम: इति। सम्पूज्य, द्वितीयवीथ्यां—उों वज्राय नम:। शक्तये०। दण्डाय०। खड्गाय०। पाशाय०। अङ्कुशाय०। गदायै०। त्रिशूलाय०। पद्माय०। चक्राय नम:। इति लोकपालायुधानि देवाग्रमारभ्य प्रादक्षिण्येन सम्पूज्य, मूलमुच्चार्य साङ्गाय सपरिवाराय श्रीगणपतये नम:, इति त्रि:पुष्पाञ्जलिना सम्पूज्य धूपदीपादि पूर्वोक्तविधिना सर्वं कुर्यादिति।। सारसङ्ग्रहे—

एकलक्षं मनुं जप्त्वा जुहुयात् तद्दशांशत:। अष्टद्रव्यैर्महेशानि तर्पणादि ततश्चरेत्।। १ ।।
मोदकै: पृथुकै[2]र्लाजै: सक्तुभि: सेक्षुपर्वभि:। नारिकेलैस्तिलै: शुद्धै: सुपक्वै: कदलीफलै:।। २ ।।

इति। अत्रैकैकद्रव्येण सार्धद्वादशशतं जुहुयात्। उक्तं च गणेश्वरपरामर्शिन्याम्—''अष्टद्रव्यैस्त्रिमध्वक्तैर्जुहुयाच्च पृथक्पृथक्'' इति। अत्र जप: कृतयुगपर:। कलावेतच्चतुर्गुणं जपहोमादिकं कार्यमिति। तथा सारसङ्ग्रहे—

दौग्धान्नेन घृताक्तेन होमोऽभीष्टफलप्रद:। लक्ष्मीकामो नारिकेलैश्चतुर्थ्यां जुहुयाच्छिवे।। ३ ।।
तिललाजान्वितै: सक्तुनारिकेलैश्चतु:शतम्। सितपक्षादिमारभ्य प्रत्यहं च हुनेत् क्रमात्।। ४।।
चतुर्थ्यन्तं तत: सर्वे प्राणिनो वशगा नृणाम्। तिलैस्तण्डुलसंसिक्तै[3](र्होम: श्रीवश्यकीर्तिद:।।५।।)
स्वादुत्रययुतैर्लाजैर्हुनेत् सप्तदिनावधि। कन्यार्थी लभते कन्यां वरं कान्तं वरार्थिनी।। ६ ।।
दधिसंसिक्तलवणै)र्जुहुयाच्च चतुर्दिनम्। निशीथिन्यां च सर्वेषा[4] भवेद्वश्यं तथेप्सितम्।। ७।।

इति। अत्र सर्वत्र काम्यहोमेषु संख्यानुक्तौ कार्यस्य गुरुलाघवं ज्ञात्वा च सहस्रादिनियुतपर्यन्तं कार्यानुसारेण जुहुयात्। उक्तं च कुलार्णवे—

एकेन वाथ सर्वैर्वा तत्कार्यगुरुलाघवम्। ज्ञात्वा देवि सहस्रं वा त्रिसहस्रं तु पञ्च वा।। १।।
अयुतं नियुतं वापि प्रयुतं वा कुलेश्वरि। तत्तत्कर्मोदिते कुण्डे संस्कृते हव्यवाहने।। २।।
सितार्कद्रुममूलेन कुचन्दनसुदारुभि: । गजत्रोटितनिम्बेन विषाणेनैव दन्तिनाम् ।। ३।।
विधाय विघ्नं सम्पूज्य तं स्पृष्ट्वा प्रजपेन्मनुम्। उपोषित: शुचिश्चन्द्रग्रहे तं च समुद्धरेत्।। ४।।

---

[1] 'हुं' ख. पाठ:। [2] 'वटके' क. ग. पाठ: [3] 'संयुक्तै:' ख. पाठ:। [4] 'संवाद:' ख. पाठ:।

शिखायां व्यवहारादौ समरे विजयो भवेत्। रोचना समदानेन सञ्जप्त्वा मनुना ततः।। ५।।

समदा गजमदसहिता।

तिलकात् सर्वराजानो लोकाः स्युर्वशगाः प्रिये। नवनीते नवे साध्यनामालिख्यानुलोमगे[1] ।। ६।।
विलोमे विघ्नबीजे च तद्धृतं स्थापितानिलम्। अष्टोत्तरशतं जप्त्वा तूष्णीं तद्भक्षयेत् ततः।। ७।।
सप्ताहाद्वशगः साध्यः साधकस्य भवेद् ध्रुवम्। गणेशं तर्पयेत् तोयैः संख्यया वक्ष्यमाणया।।८।।
एकोनपञ्चाशता च दिनैरिष्टमवाप्नुयात्। प्रणवादिम[2]मुं मन्त्रं केचिदिच्छन्ति सूरयः ।। ९।।
पूजायां च हृदन्तोऽयं होमे स्वाहान्त ईरितः।..।।

इति। तथा सारसङ्ग्रहे—मन्त्रान्तरम्।

स्मृतिर्भूमनुयुग्बिन्दुनादालङ्कृतमस्तकः। एकाक्षरो गणेशस्य मन्त्र एष उदाहृतः।। १।।

इति। स्मृतिर्गकारः, भूर्लकारः, मनुरौकारः, बिन्दुनादेन युतस्तेन ग्लौं इति। तथा—

शार्ङ्गी चतुर्दशार्णाद्यस्वरयुग् बिन्दुभूषितः। अयमेको गणपतेरेकार्णो मन्त्र उत्तमः।। १।।

इति। शार्ङ्गी गकारः, चतुर्दशाद्यस्वर ओकारः, बिन्दुरनुस्वारस्तेन गों इति।। तथा—

गणको मुनिरुक्तः स्यान्निचृच्छन्दश्च देवता। बालो गणपतिः सर्वसुरासुरनमस्कृतः।। २।।
स्वेन षड्दीर्घयुक्तेन षडङ्गानि प्रकल्पयेत्।..................................।।

अत्राद्ये ग्लांग्लीं इत्यादि, द्वितीये गागीं इत्यादि करषडङ्गन्यासो ज्ञेयः।। तथा—

ध्यानपूजाजपाद्यं स्यादस्य पूर्ववदेव तु। ततः सिद्धे मनौ सम्यक् पूर्वमन्त्रोदितान् प्रिये।। ३।।
प्रयोगान् विधिवत् कुर्यात् साधकोऽभीष्टसिद्धये।..।।

इति।। इत्थमेकाक्षरः सप्तविधः। काम्यहोममाह—दौग्धान्नेनेति, तिललाजेत्यादि—श्लोकस्यायमर्थः—शुक्लप्रतिपदमारभ्य तच्चतुर्थ्यन्तेषु चतुर्षु दिनेषु प्रत्यहं प्रथमतस्तिलैरेकशतं, तदनु लाजैस्तदनु सक्तुभिस्तदनु नारिकेलैस्त्रिमध्वक्तैः क्रमाच्चतुःशतं जुहुयाद् इति। नवनीत इत्यादि, नवे नवनीते परस्परविमुखगणेशबीजद्वयस्य मध्ये तद्बीजद्वयबिन्दुस्थाने मम, बीजाधः अमुकं, तयोर्मध्ये वशं कुरु कुरु, इति साध्यसाधककर्माणि विलिख्य, तत्सर्वं गणेशबीजैरावेष्ट्य, तत्र साध्यप्राणस्थापनं तिधायाष्टोत्तरशतं मूलमन्त्रं नवनीतं स्पृशञ्जपित्वा पश्चात् तद्भक्षयेत्। इत्थं सप्ताहप्रयोगेन साध्यो वश्यो भवति।। सारसङ्ग्रहे—मन्त्रान्तरम्।

विरिशब्दद्वयं प्रोच्य वदेद्गणपतिं ततः। वरेति च समुच्चार्य वरदेति वदेत् पुनः।। १।।
सर्वलोकद्वितीयान्तमन्ते वशमथोच्चरेत्। आनयाग्निवधूरन्ते मायाद्यं च समुद्धरेत्।। २।।
विरिविघ्नेशमन्त्रोऽयं षड्विंशत्यक्षरो भवेत्।..।।

इति। विरिशब्दद्वयं विरिविरि इति। गणपतिमिति लेखनं कर्मणि द्वितीया तेन गणपतिमिति। द्वितीयान्तेन सर्वलोकमिति। अग्निवधूः स्वाहा। मायाद्यं भुवनेश्वरीबीजाद्यं। केचित्त्वेनं मन्त्रमेकोनविंशत्यक्षरात्मकं वदन्ति। तन्मते 'वरवरद' इति पञ्चवर्णा लोकमिति वर्णद्वयं इति सप्तवर्णा न भवन्ति। उक्तं च गणेश्वरपरामर्शिन्याम्—

''वकाररेफावपि लोचनाढ्यौ पुनस्तथोद्धृत्य गणात्पतीति।
सर्वं समुच्चार्य च मे वशं स्यान्माकारतश्चापि तथानयेति।। १।।

---

१. 'गम् विलोमं विघ्नबीजं च' ख. पाठः। २. 'सिमं' ख. पाठः।

शब्दः शिरः स्यात्'' इति। अस्यार्थः–वकाररेफौ लोचनाढ्यौ प्रत्येमिकारयुक्तौ, पुनरेतौ वर्णावुद्धृत्य तेन विरिविरि इति। गणात्पति गणपति सर्वं मे वशमानय, शिरः स्वाहाकारः। मायाद्यश्च पूर्वोद्धृतमन्त्रस्यैव मन्त्रान्तरत्वेनोक्तत्वात्। अन्ये तु–वैपरीत्येनादौ महागणपतिमन्त्रस्य बीजषट्कं योजयित्वा षड्विंशत्यक्षरस्य द्वात्रिंशदक्षरत्वं वदन्ति। बीजषट्कं तन्मन्त्रोद्धारप्रकरणे वक्ष्यते, वैपरीत्यं तु तत्रोक्तक्रमस्य। तथा–

मुनिर्गणक आख्यातश्छन्दो गायत्रमुच्यते। देवता विरिविघ्नेशो दृष्टादृष्टफलप्रदः।। २।।

द्वितीयमन्त्रस्य निचृच्छन्दः।

वेदवेदषुपञ्चार्णैः शरलोचनसंख्यकैः। विभक्तैर्मूलमन्त्रार्णैः षडङ्गानि मनोरथ ।। ३।।
मायाद्यानि विधेयानि जातियुक्तानि मन्त्रिणा।.......................................।।

वेदाश्चत्वारः। इषवः पञ्च। शराः पञ्च। लोचनं द्वयं। मायाद्यानीति प्रत्येकं मायाबीजयुक्तानि। जातयो नमःस्वाहावषट् इत्यादयः। एतल्लक्षणमुक्तं प्रागेव। द्वितीयमन्त्रस्य तु मन्त्रपदैः षड्भिः षडङ्गानि।

सिन्दूराभमिभाननं त्रिनयनं हस्तेषु पाशाङ्कुशौ
बिभ्राणं मधुमत्कपालमनिशं सार्धेन्दुमौलिं भजे।
पुष्ट्या श्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया
तद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करम्।। ४।।

वामदक्षोर्ध्वकरयोर्वामाधःकरे च पाशादित्रयं, दक्षाधःकरं देव्या वराङ्गे, वामाङ्गनिविष्टया देव्या दक्षिणकरेण प्रियाश्लेषः। वामाधःकरेण ध्वजाग्रं स्पृशन्त्या, वामदक्षिणयोः पद्ममित्यायुधध्यानम्। पुष्करं शुण्डादण्डः। द्वितीयेऽपि मन्त्रे इदमेव ध्यानम्। तृतीये तु–

बीजापूरगदे शरासनमरिं मालां च वामैः करै–
र्दक्षैरुत्पल्लपाशमार्गणरदान् रत्नाढ्यकुम्भं दधत्।
सिन्दूरारुणविग्रहस्त्रिनयनो योन्यात्तशुण्डो गण–
स्तल्लिङ्गाहितपाणिमम्बुजकरां पुष्टिं वहन् वोऽवतात्।। ५।।

अत्र वामाधःकरादिदक्षाधःकरादिषु चायुधध्यानम्। कुम्भस्य सर्वोर्ध्वकरे युक्तत्वात्। तथा–

यजेत् पीठे प्रोक्ते नवशक्तिसमन्विते। मूलमन्त्रेण क्लृप्तायां मूर्तावावाह्य पूजयेत्।। ६।।
मिथुनानि यजेदादावामोदादीन् दिगम्बरान्। अङ्गानि पूजयेत् पश्चान्मातृश्चैव ततः सुधीः।। ७।।
अर्चयेल्लोकपालांश्च तदस्त्राणि ततो बहिः। षडावरणसंयुक्तं विरिविघ्नेश्वरं यजेत् ।। ८।।

इति।। अथ प्रयोगः– तत्र प्राग्वद्योगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि विरिविघ्नेश्वराय देवतायै नमः। इति विन्यस्येष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, चतुर्भिर्हृदयं, चतुर्भिः शिरः, पञ्चभिः शिखा, पञ्चभिः कवचं, पञ्चभिर्नेत्रं, द्वाभ्यामस्त्रमिति विभक्तैर्मन्त्रवर्णैः षडङ्गानि विन्यस्य, ध्यानादिपुष्पोपचारान्ते ततस्त्रिकोणे वक्ष्यमाणमहागणपतिपूजोक्तमिथुनत्रयं षट्कोणेष्वामोदादिषट्कं अष्टदलकेसरेष्वङ्गषट्कं दलेषु लोकेशांस्तदस्त्राणि चतुरस्रवीथीद्वये सम्पूज्य प्राग्वत् शेषं समापयेदिति।। तथा–

वेदलक्षं जपेन्मन्त्रं जहुयात् तद्दशांशतः। मधुरत्रयसंयुक्तैर्द्रव्यैरष्टभिरीरितैः ।। ९।।
एवं साधितमन्त्रस्तु प्रयोगान् कर्तुमर्हति। विकचोत्पलहोमेन वशयेत् सकलं जगत्।। १०।।
तिलतण्डुलहोमेन श्रियमाप्नोत्यनिन्दिताम्। मोदकानाज्यसंयुक्तान् हुत्वा विजयमाप्नुयात्।। ११।।
मधुरत्रयहोमेन राजानं वशमाप्नुयात्। अभीष्टसाधनो होमो भक्ष्यभोज्यादिभिः कृतः।। १२।।

इति।। सारसङ्ग्रहे—मन्त्रान्तरम्

वदेत् सौम्यं चतुर्थ्यन्तं महागणपतिं तथा। वरान्ते वरदं प्रोक्त्वा वदेत् सर्वजनं ततः।। १।।
मे वशं च समाभाष्य वदेदानय ठद्वयम्। लक्ष्मीगणेशबीजाढ्य एकोनत्रिंशदक्षरः ।। २।।
लक्ष्मीगणेशमन्त्रोऽयं सर्वसम्पत्प्रदायकः।..।।

चतुर्थ्यन्तं महागणपतिं महागणपतये इति। ठद्वयं स्वाहाकारः। लक्ष्मीबीजं श्रीं। गणेशबीजं गं। एतदाढ्यः। तथा—

अन्तर्यामी मुनिः प्रोक्तो गायत्री निचृदन्विता। छन्दो लक्ष्मीगणेशोऽत्र देवताः समुदाहृतः।। ३।।
षड्दीर्घयुक्तेनाद्येन द्वितीयेन च तद्वता। षडङ्गानि विधेयानि जातियुक्तानि मन्त्रिणा।। ४।।

हेमाभः पीतवस्त्रः करतलकमलैः सन्दधच्चक्रशङ्खौ
दन्ताभीती च नासाधृतकनकघटः पद्मसंस्थस्त्रिनेत्रः।
वामाङ्गाविष्टलक्ष्म्या विधृतकमलया प्रोल्लसद्दक्षदोष्णा
श्लिष्टः सौवर्णकान्त्या गणप इह महाश्रीकरो वः श्रियेऽस्तु।। ५।।

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तमायुधध्यानम्। नासा शुण्डादण्डः। तथा—

प्राक्प्रोक्ते पूजयेत् पीठे तीव्रादिनवशक्तिके। अष्टपत्राम्बुजद्वन्द्वे कर्णिकाकेसरोज्ज्वले।। ६।।
चतुर्द्वारसमायुक्तचतुरस्रत्रयावृते । मूलेन मूर्तिं सङ्कल्प्य तस्यामावाह्य पूजयेत् ।। ७।।
प्रथमावृतिरङ्गैः स्याद् वक्रतुण्डादिभिः परा। अणिमा महिमा चैव लघिमा गरिमा तथा।। ८।।
ईशित्वं च वशित्वं च प्राकाम्यं प्राप्तिरेव च। एताः समर्चयेत् सम्यक् तृतीयावरणे क्रमात्।।९।।
ततस्तु मातरः पूज्या लोकेशास्तदनन्तरम्। तदायुधानि तद्वच्च भक्तियुक्तः समर्चयेत्।। १०।।

इति।। अथ प्रयोगः—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अन्तर्यामिऋषये नमः। मुखे निचृद्गायत्रीछन्दसे नमः। हृदये श्रीलक्ष्मीगणेशाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, श्रांगां हृदयाय नमः। श्रींगीं शिरसे स्वाहा। श्रूंगूं शिखायै वषट्। श्रैंगैं कवचाय हुं। श्रौंगौं नेत्रत्रयाय वौषट्। श्रःगः अस्त्राय फट्। इति करषडङ्गन्यासं विधाय ध्यानादिमानसपूजान्ते प्रोक्तमर्चापीठमुद्धृत्यार्घ्यस्थापनादिपुष्पोपचारान्ते प्रथमाष्टदलकेसरेषु प्राग्वत् षडङ्गानि सम्पूज्य, दलाष्टके एकाक्षरपूजोक्तान् वक्रतुण्डादिकान् सम्पूज्य द्वितीयाष्टदलेषु देवाग्रदलमारभ्य ॐ अणिमासिद्ध्यै नमः। एवं महिमासि०। लघिमासि०। गरिमासि०। ईशित्वसि०। वशित्वसि०। प्राकाम्यसि०। प्राप्तिसिद्ध्यै नमः। इति प्रादक्षिण्येन सम्पूज्य, दलाग्रेषु ब्राह्म्यादिकाः प्राग्वत् सम्पूज्य, चतुरस्रवीथीद्वये लोकपालांस्तदायुधानि च सम्पूज्य

धूपदीपादि सर्वं पूर्ववत् समापयेद् इति। तथा—

लक्षमेकं जपेन्मन्त्रं दीक्षितो विजितेन्द्रिय:। दशांशं जुहुयाद्बिल्वसमिधो मधुरप्लुता:।। ११।।
(तर्पणादि तत: कुर्यात् पूर्वोक्तविधिना प्रिये। एवं सिद्धमनुर्मन्त्री साधयेदिष्टमात्मन:।। १२।।
हुनेच्चतु:सहस्राणि श्रीफलैर्मधुरप्लुतै: ।) महालक्ष्मीकरो होम: पुत्रमित्रकलत्रद: ।। १३।।
शुद्धतोयेन सन्तर्प्य चत्वारिंशच्चतु:शतम्। चत्वारिंशद्दिनान्मन्त्री वाञ्छितां लभते श्रियम्।। १४।।

इति।। सारसङ्ग्रहे—मन्त्रान्तरम्

बिन्दुवामाक्ष्यग्नियुता स्मृतिर्मायासुमध्यगा। त्र्यक्षर: शक्तिगणप: सर्वसिद्धिप्रदायक: ।। १।।

स्मृतिर्गकार:। अग्नी रेफ:। वामाक्षि ईकार:। बिन्दुरनुस्वार:। एतै: पिण्डितं बीजं मायासुमध्यगा मायाबीजद्वयस्य मध्ये कुर्यात्।। तथा—

भार्गवोऽस्य मुनिश्छन्दो विराड् देव: समीरित:। शक्त्यादिगणपस्तत्र देवदानववन्दित:।। २।।
षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत्। गजेन्द्रवदनं साक्षाच्चलत्कर्णसुचामरम् ।। ३।।
हेमवर्णं चतुर्बाहुं पाशाङ्कुशधरं विभुम्। स्वदन्तं दक्षिणे हस्ते बीजापुरं च वामके।। ४।।
पुष्पके मोदकांश्चैव धारयन्तमनुस्मरेत्।..।।

वामोर्ध्वकरमारभ्य वामाध:करपर्यन्तमायुधध्यानम्।

पूर्वोक्ते पूजयेत् पीठे तीव्रादिनवशक्तिके । अष्टपत्राम्बुजे देवं चतुरस्रत्रयावृते ।। ५।।
प्रथमाङ्गावृति: प्रोक्ता द्वितीया मातृभि: स्मृता। तृतीया लोकपालै: स्याद्वज्राद्यैश्च चतुर्थ्यपि।। ६।।

(इति।। अथ प्रयोग:—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भार्गवाय ऋषये नम:। मुखे विराट्छन्दसे नम:। हृदये श्रीशक्तिगणपतये देवतायै नम:। इति विन्यस्य, ग्रांग्रीमित्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते पूजाचक्रमुद्धृत्याघ्यादिपुष्पोपचारान्ते केसरेषु षडङ्गानि दलेषु मातृ: चतुरश्रे लोकेशान् तदायुधानि च प्राग्वत् सम्पूज्य शेषं प्राग्वत् समापयेदिति। तथा—

लक्षमेकं जपेन्मन्त्रं हविष्याशी जितेन्द्रिय:। तद्दशांशं प्रजुहुयादपूपैर्घृतसंप्लुतै:।। ७।।
एवं सिद्धमनुर्मन्त्री काम्यकर्माणि साधयेत्।......................................।।

अत्रापि कलौ चतुर्गुणजपादिकं कार्यमिति।

शुक्लपक्षे चतुर्थ्यां तु पूजयित्वा विनायकम्। अपूपैर्गुडसम्मिश्रै: पक्वान्नैर्घृतसम्प्लुतै:।। ८।।
मरिचैर्जीरकैश्चैव सैन्धवेन विमिश्रितै:। देवस्य सन्निधौ मन्त्री जुहुयात् त्रिसहस्रकम्।। ९।।
गद्यपद्यमयी वाणी सप्ताहाद्भवति ध्रुवम्। वश्यार्थे मधुहोमेन राजानं वशमानयेत्।। १०।।
कन्यार्थी जुहुयाल्लाजैस्तन्नामपुटमन्त्रत:। एकां कन्यामथो सप्तधा जपेल्लभते वधूम्।। ११।।
चन्द्रसूर्यग्रहे प्राप्ते पलं तु कपिलाघृतम्। कर्षमात्रं वचाचूर्णं मिश्रीकृत्याभिमन्त्रयेत्।। १२।।
पिबेत्तदानीं यो भूत्वा देवताध्यानतत्पर:। यावत्पानं भवेत्तावत् नाश्नीयात् किमपीह स:।। १३।।
सप्ताहाज्जायते शीघ्रमपरो वाक्पतिर्यथा। वन्ध्यर्तुस्नानदिवसे पूजयित्वा विनायकम्।। १४।।

निष्कार्धपादभागेन हरिद्रां सैन्धवं वचाम्। गोमूत्रकुडवे पिष्टं सहस्रमभिमन्त्रितम् ।।१५।।
वध्वा कन्यां भक्ष्यभोज्यैर्भोजयित्वा च तत्क्रमात्। गुरवे दक्षिणां दत्त्वा पिबेन्नारी तदौषधम्।।१६।।
ततः सा लभते पुत्रं सर्वलक्षणसंयुतम्। आयुष्मन्तं सुरूपं च बुद्धिमन्तं श्रिया युतम्।।१७।।

इति। सूर्यचन्द्रग्रहे इत्यादिना एतदुक्तं भवति। चन्द्रग्रहे सूर्यग्रहे वा कर्षमात्रमतिश्लक्ष्णं वचाचूर्णं पलमात्रेण कपिलागोघृतेन मिश्रीकृत्य मूलमन्त्रेणाष्टोत्तरसहस्रवारमभिमन्त्र्य तत्सप्तधा विभज्यैकं भागं देवताध्यानपूर्वकं तदानीं पिबेत्। उर्वरितं भागषट्कं प्रत्यहमेकैकभागं प्रतिप्रातर्देवताध्यानपूर्वकं दिनषट्कं पिबेत्। एवं कृते प्रोक्ता सिद्धिर्भवति। बध्वा इत्यादिना एतदुक्तं भवति। निष्कमात्रं हरिद्रा निष्कार्धं सैन्धवं, निष्कचतुर्थांशं वचाचूर्णमेतत्त्रयं पेषितं श्लक्ष्णेन कुडवमात्रेण गोमूत्रेण प्रोक्तसंख्यया मिश्रीकृत्य प्रोक्तविधिना पीतं प्रोक्तफलदं भवति।। तथा सारसङ्ग्रहे—

ताराद्यः पूर्वमन्त्रोऽसौ चतुर्वर्णः प्रकीर्तितः। ऋषिः शुक्रो निगदितश्छन्दो गायत्रमुच्यते।। १।।
देवता शक्तिगणपः सर्वसिद्धिकरः परः। पूर्ववच्च षडङ्गानि कुर्याद् देशिकसत्तमः।। २।।

असौ पूर्वः शक्तिगणपतिमन्त्रश्चेत् प्रणवपूर्वस्तदा चतुर्वर्णो मन्त्रो भवति।

हेमाभं दिव्यवस्त्रं बृहदुदरतनुं चारुबाहुं त्रिनेत्रं
दोर्भिः पाशाक्षसूत्रे निजरदनसृणी मोदकं पुष्करेण।
बिभ्राणं हेमभूषं तरुणतरणिरुक्चारुशक्त्या समेतं
विघ्नेशं विश्ववन्द्यं त्रिभुवनशरणं चिन्तये श्रीगणेशम्।। ३।।

दक्षोर्ध्वकरमारभ्य वामोर्ध्वकरपर्यन्तमायुधध्यानम्। तथा—

ततः पूर्वोदिते पीठे देवमावाह्य पूजयेत्। प्रथमावृतिरङ्गैः स्याद् वक्रतुण्डादिभिः परा।। ४।।
तृतीया मातृभिः प्रोक्ता लोकपालैस्ततो बहिः। तदायुधैः पञ्चमी स्यादेवं सम्पूजयेत् क्रमात्।।५।।

इति।। अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शुक्राय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि श्रीशक्तिगणपतये देवतायै नमः। इति विन्यस्य, ग्रांग्रीं इत्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते प्रोक्तत्र्यक्षरमन्त्रवत् पूजाचक्रमुद्धृत्यार्घ्यादिपुष्पोपचारान्ते केसरेषु षडङ्गानि दलेषु वक्रतुण्डादीन् दलाग्रेषु मातृश्चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य प्राग्वच्छेषं समापयेदिति। कलावेष एव जपो ज्ञेयः।। तथा—

लक्षत्रयं जपेन्मन्त्रं तद्दशांशं समाहितः । जुहुयाद् घृतसंयुक्तैस्तिलैर्मन्त्रविदुत्तमः।। ७।।
तर्पणादि ततः कुर्यदेवं सिद्धो भवेन्मनुः। काम्यकर्म ततः कुर्याद् देशिको यतमानसः।। ८।।
आज्याक्तैर्जुहुयान्नित्यमन्नवान् वत्सराद्भवेत्। पायसान्नेन महतीं श्रियमाप्नोति मानवः।। ९।।

इति।। तथा सारसङ्ग्रहे—मन्त्रान्तरम्।

खान्तो बिन्दुसमायुक्तः क्षकारोऽक्षिसमन्वितः। लोहितो रेफसंयुक्तः पार्श्वो वह्निसमन्वितः।। १।।
सादनाय हृदन्तोऽयं मन्त्रः पङ्क्त्यक्षरो मतः।...।।

खान्तो ग, बिन्दुरनुस्वारस्तद्युक्तः। क्ष स्वरूपं, अक्षि इकारस्तद्युक्तः। लोहितः पकारः, रेफः रकारस्तद्युक्तः। पार्श्वः पकारः, वह्नी रेफस्तद्युक्तः। सादनाय स्वरूपं, हृन्नमः। तथा—

ऋषिर्गणक आख्यातश्छन्द: प्रोक्तं विराडिति। देवता गदित: क्षिप्रप्रसादनविनायक:।। २।।
दीर्घभाजा स्वबीजेन कुर्यादङ्गक्रियां मनो:।..।।
पाशाङ्कुशौ कल्पलतां विषाणं दधत् स्वशुण्डाहितबीजपूर:।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलिर्हारोज्ज्वलो हस्तिमुखोऽवतान्न:।। ३।।

वामोर्ध्वकरमारभ्य वामाध:करपर्यन्तमायुधध्यानम्।।

पूर्वोक्ते पूजयेत् पीठे नवशक्तिसमन्विते। मूर्तिं मूलेन सङ्कल्प्य तस्यां विघ्नेश्वरं यजेत्।। ४।।
प्रथमावृतिरङ्गै: स्याद् द्वितीया चाष्टभिर्गणै:। विघ्नो विनायकाख्योऽन्य: शूराख्यो वीरसञ्ज्ञक:।।५।।
वरदश्चेभवक्त्रोऽन्य एकदन्ताह्वयोऽपर: । लम्बोदरोऽष्टम: प्रोक्तो दलाग्रे मातृपूजनम्।। ६।।
बाह्ये लोकेश्वरा: पूज्यास्तदस्त्राणि ततो बहि:।..।।

इति।। अथ प्रयोग:—तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नम:। मुखे विराट्छन्दसे नम:। हृदये क्षिप्रप्रसादनाय गणपतये देवतायै नम:। इति विन्यस्य गांगीं इत्यादिना करषडङ्गन्यासं विधाय ध्यानादिमानसपूजान्ते चतुर्द्वारयुक्तचतुरस्रत्रयान्वितमष्टदलकमलमर्चापीठं निर्माय, अर्घ्यादिपुष्पोपचारान्ते केसरेषु षडङ्गानि सम्पूज्य, अष्टदलेषु देवाग्रादिप्रादिक्षिण्येन—ओंविघ्नाय नम:। विघ्ननायकाय नम:। शूराय०। वीराय०। वरदाय०। इभवक्त्राय०। एकदन्ताय०। लम्बोदराय नम:। इति सम्पूज्य, दलाग्रेषु मातृ: चतुरस्रे लोकपालांस्तदस्त्राणि च सम्पूज्य प्राग्वच्छेषं समापयेदिति। तथा—

लक्षमेकं जपेन्मन्त्रं तदन्ते तद्दशांशत:। त्रिस्वाद्वक्तैस्तिलैर्होमं कुर्यात् पूर्वोदिताष्टभि:।। ७।।
द्रव्यैर्वा तर्पणादीनि तत: पूर्ववदाचरेत्। एवं सिद्धे मनौ मन्त्री कुर्यात् काम्यान्यशेषत:।। ८।।

कलावेतच्चतुर्गुणजप:।

शर्कराघृतयुक्तेन हविषा जुहुयात् सुधी:। लक्ष्मीवान् केवलाज्येन होमो लोकवशङ्कर:।। ९।।
घृताक्तान्नं प्रजुहुयादन्नवान् साधको भवेत्। चत्वारिंशद्दिनं मन्त्री नारिकेलं हुनेत् तत:।। १०।।
सचर्म लोष्टपक्वं च प्रत्यहं साधकोत्तम:। स वाञ्छितार्थमभ्येति नात्र कार्या विचारणा।। ११।।
सलाजकै: सक्तुभिश्च पृथुकैर्वाञ्छिताप्तये। होमो भवेदष्टभिश्च द्रव्यैस्त्रिमधुरान्वितै: ।। १२।।
(हुनेत्ततश्च वशयेद्राज्ञस्तत्प्रमदा अपि।) चतुश्चत्वारिंशदाढ्यं चतु:शतमतन्द्रित: ।। १३।।
प्रात: प्रातस्तु सलिलैर्विघ्नेशस्य च मस्तके। तर्पयेच्छ्री: समृद्धिश्च भवेत् तस्य न संशय:।। १४।।
पूर्वोदितं गणेशानमायान्तं रविबिम्बत:। सोपानेनाब्जसंस्थं तं[1] चिन्तयित्वा तु तर्पयेत्।। १५।।
पूर्वमन्त्रप्रयोगांश्च कुर्यादत्रापि साधक:। ....।।

इति। पूर्वमन्त्रोक्तान् त्र्यक्षरमन्त्रोक्तान्।। तथा सारसङ्ग्रहे—मन्त्रान्तरम्।

बिन्द्वर्घीशयुत: शार्ङ्गी ताराद्यो नमसा युत:। चतुर्वर्णो मनु: प्रोक्तो हेरम्बस्य महात्मन:।। १।।

शार्ङ्गी गकार:, बिन्दुरनुस्वार: अर्घीश: षष्ठस्वरस्ताभ्यां युक्त:। ताराद्यो, नमोऽन्त:। तथा—

---

[1] १. 'मध्यस्थं' ख. पाठ:।

मुनिर्गणक आख्यातो गायत्रं छन्द ईरितम्। पञ्चवक्त्रोऽस्य हेरम्बो देवता सिंहवाहनः।। २।।
षड्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः।...।।
मुक्ताविद्युत्पयोदामृतघुसृणनिभैः पञ्चभिर्नागवक्त्रै-
र्हेरम्बो भावनीयः शशधरमुकुटो दृप्तसिंहाधिरूढः।
हस्तैर्बिभ्रत् त्रिशूलाङ्कुशकजपवटीमुद्गरान् पुंस्कपालं
टङ्काङ्को मोदकं स्याद्रदलसदभये दानमकौंघदीप्तिः।। ३।।

अधःस्थदक्षवामयोर्वराभये, तदुपरि मोदकरदौ, तदुपरि परशुकपाले, तदुपर्यक्षमालामुद्गरौ, तदुपर्यङ्कुशत्रिशूले। तथा—

पूर्वोक्त एव पीठे तु यजेद्धेरम्बमन्वहम्। पद्ममष्टदलं कृत्वा चतुरस्त्रत्रयावृतम्।। ४।।
चतुर्द्वारसमायुक्तं तत्रादावासनं यजेत्। ध्रुवान्ते हुंद्व[1]यं प्रोक्त्वा महासिंहं च ङेयुतम्।। ५।।
गां च हेरम्बशद्बं स्यादासनाय नमोन्ततः। आसनाख्यो मनुः प्रोक्तो दत्त्वा तेनासनं विभोः।। ६।।
ध्रुवयुक्तेन बीजेन कुर्यान्मूर्तिप्रकल्पनम्। तस्यामावाह्य विघ्नेशं यजेदावरणान्वितम् ।। ७।।
आदावङ्गानि सम्पूज्य लोकपालान् यजेद् बुधः। तेषामस्त्राणि तद्बाह्ये हेरम्बार्चा समीरिता।। ८।।

इति।। अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीहेरम्बाय देवतायै नमः। इति विन्यस्य, गांगीं इत्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते प्रोक्तमष्टदलकमलं विलिख्य, प्रोक्तयोगपीठनवशक्तिपूजान्ते ''ॐहुंहुं महासिंहाय गां हेरम्बासनाय नमः'' इत्यासनं सम्पूज्य, ओंगं गणपतिमूर्तिं कल्पयामि, इति तत्र मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते केसरेषु षडङ्गानि सम्पूज्य लोकेशार्चादि प्राग्वत् समापयेदिति। तथा—

लक्षत्रयं जपित्वान्ते तिलैर्हुत्वा दशांशतः। मधुरत्रयसंयुक्तैस्तर्पणादि समाचरेत्।। ९।।
एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत् ततः। चतुर्दश्यष्टमीषष्ठीष्वेकैकं जुहुयाद् बुधः।। १०।।

अत्रायमेव कलियुगजपः।

अपूपैः कृसरैर्मन्त्री मोदकैश्चेष्टसिद्धये। पूर्वोक्तैर्जुहुयाद् द्रव्यैः पर्वस्वपि च मन्त्रवित्।। ११।।
यद्यदिच्छति तत् सर्वं साधकस्तेन साधयेत्। अथ यन्त्रं प्रवक्ष्यामि हेरम्बस्य गणेशितुः।। १२।।
भूर्जे पद्मं लिखेत् तद्गजमदघुसृणैर्मध्यबीजाढ्यसाध्यं
किञ्जल्केष्वङ्गमन्त्रान् वसुदलविवरे सप्तधा संविभज्य।
मालाणुं शिष्टपत्रे विलिखतु षडपि प्रोक्तगाणेशवर्णान्
शक्त्या बीजं सकारावृतमपि तदनु श्वेतसूत्रावृतं स्यात्।।
लौहैः संवेष्ट्य यन्त्रं त्रिभिरपि विधृतं बाहुनाभीष्टदं स्यात्।। १३।।

इति। अयमर्थः—भूर्जपत्रे गजमदसहितकुङ्कुमेन अष्टदलकमलं विलिख्य तन्मध्ये हेरम्बबीजं विलिख्य, तस्य बिन्दुस्थाने अमुकस्य हुंकारस्थाने अमुकं, मध्ये वशं कुरु कुरु इत्यादि स्वेष्टं कर्मपदं विलिखेदित्येवं साध्यसाधककर्माण्यालिख्य,

---

[1] 'हुंद्वयं' ख. पाठः।

तत्केसरेषु षडङ्गमन्त्रान् यथास्थानमालिख्याष्टसु पत्रेषु पूर्वादिप्रादक्षिण्येन ह्रींक्रोंऊंगं नम: स, द्वितीयदले— वं विघ्नाधिपाय स, तृतीयदले—र्वार्थसिद्धिदाय स, चतुर्थदले—र्वदु:खप्रशमना, पञ्चमदले—य एह्येहि भगवन्, षष्ठदले—सर्वान् खादय स्तम्भ , सप्तमदले—य स्तम्भय ह्रींगंगां, अष्टमदले—नम: स्वाहा क्रोंह्रीं, इति विलिख्य, पद्माद्बहिर्वृत्तत्रयं कृत्वा वीथीद्वयं निष्पाद्य तत्र प्रथमवीथ्यां स्वाग्रमारभ्य प्रादक्षिण्येन निरन्तरं शक्तिबीजैरावेष्ट्य, द्वितीयवीथ्यां तथैव सबिन्दुसकारेणावेष्ट्य गुलिकीकृत्य श्वेतसूत्रेण संवेष्ट्य, पुन: स्वर्णरजतताम्रैरग्निसम्बन्धमकुर्वन्नावेष्ट्य यथाविधि धृतमुक्तफलदं भवति। अत्र यन्त्रलिखितमालामन्त्रस्य पूजाजपादिकं सर्वं हेरम्बमन्त्रवत् कार्यम्। अमितं छन्द इति विशेष:।। तथा सारसङ्ग्रहे—मन्त्रान्तरम्

प्रणव: पतृतीयं च ततो वामबाहुमूलकम्। स्वरहीनस्तवर्गादिर्भुवे हृद् धातुवर्णक:।। १।।
सुब्रह्मण्यमनु: प्रोक्तो भजतां सर्वकामद:।..।।

इति। पतृतीयो वकार:। वामबाहुमूलं चकार:। तवर्गादिस्तकार: स च स्वररहित:। भुवे स्वरूपं। हृन्नम:। धातुवर्ण: सप्ताक्षर:। शारदातिलके तु—अन्त:स्थो वकार उक्त:। प्रयोगसारे तु—प्रशस्तप्रणवा यत्र वाऽप्यशक्तिपूर्वं जपेद्गुरुरिति। अयमर्थ:—प्रणवान्तश्चेदयं मन्त्रस्तदाष्टाक्षरो भवतीति। प्रणवादौ शक्तिबीजं चेद्दीयते तदान्योऽयमष्टाक्षरो भवति। एवं त्रिविधोऽयं मन्तव्य इति। तथा—

ऋषिरग्नि: समाख्यातो गायत्री च्छन्द उच्यते। सुब्रह्मण्योऽस्य मन्त्रस्य देवता परिकीर्तित:।। २।।
दीर्घभाजाग्निबीजेन षडङ्गानि समाचरेत्। ....।।

पायाद्वोऽरुणविग्रह: शशिमुख: सम्यग् दधानो भुजै:
पद्मं भीतिहरं रिपुक्षयकरीं शक्तिं शुभं कुक्कुटम्।
रक्तालेपनवस्त्रदामरुचिरो नानाविभूषान्वित:
सुब्रह्मण्यगणाधिप: शुभकरो भक्ताघविध्वंसक:।। ३।।

दक्षाद्यध:करयोराद्ये, तदाद्यूर्ध्वयोरन्ये, इत्यायुधध्यानम्। तथा—

वह्न्यन्ते पूजिते पीठे पूर्वोक्ते पूजयेद्विभुम्। उक्तोपचारसहितं विधिना भक्तवत्सलम्।। ४।।

वह्न्यन्ते इत्येनन सत्त्वादिपूजानिषेध: प्रतीयते अन्यथोक्तिवैयर्थ्यप्रसङ्गात्।

(पूर्वोदिते यजेत् पीठे सुब्रह्मण्यं गणाधिपम्। केसरेषु षडङ्गानि पूर्वादिषु दलेषु च।। ५।।
जयन्तो ह्यग्निवेषश्च कृत्तिकापुत्र एव च।) ततो भूतपतिसेनान्यौ गुहाख्यो हेमशूलक:।। ६।।
विशालाक्षश्च सम्प्रोक्ता: शूलशक्तिकरा इमे। दलाग्रेषु च पूर्वादि यजेदेताननन्तरम्।। ७।।
देवसेनापतिं शक्तिं विद्यां कुक्कुटमेव च। मेधां मयूरं वज्रं च द्विपं लोकेश्वरांस्तत:।। ८।।
वज्रादीनि ततो बाह्ये देवमित्थं प्रपूजयेत्।..।।

इति।। अथ प्रयोग:—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते, शिरसि अग्नये ऋषये नम:। मुखे गायत्रीच्छन्दसे नम:। हृदि सुब्रह्मण्याय देवतायै नम:। इति विन्यस्य विनियोगमुक्त्वा, रांरीं इत्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते

प्रागुक्तमर्चापीठमुद्धृत्यार्घ्यादिपुष्पोपचारान्ते प्राग्वत् केसरेषु षडङ्गानि सम्पूज्याष्टदलेषु देवाग्रमारभ्य—ओंजयन्ताय नमः। एवं अग्निवेषाय०। कृत्तिकापुत्राय०। भूतपतये०। सेनान्ये०। गुहाय०। हेमशूलाय०। विशालाक्षाय नमः। ततोऽष्टदलेषु देवाग्रमारभ्य—देवसेनापतये नमः। एवं शक्तये०। विद्यायै०। कुक्कुटाय०। मेधायै०। मयूराय०। वज्राय०। द्विपाय नमः। इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति। तथा—

लक्षमेकं जपेन्मन्त्रं सर्पिषा वा पयोन्धसा। अयुतं जुहुयान्मन्त्री तर्पयेद् द्विजपुङ्गवान्॥ ९॥

अयं जपः कृतयुगपरः कलावेतच्चतुर्गुणमिति।

एवं सिद्धे मनौ मन्त्री कुर्यात् कामान्यथेप्सितान्। षष्ठीदिने सुमधुरैर्भक्ष्यभोज्यैः प्रतोषयेत्॥ १०॥
देवं देवधिया सम्यगर्चयेद् ब्रह्मचारिणः। सुब्रह्मण्यमनोः सम्यगुपास्तिं ये प्रकुर्वते॥ ११॥
लक्ष्मीमायुश्च तेजश्च पुत्रपौत्रान्यशः पशून्। ऐहिकामुष्मिकाँल्लोकान् लभन्ते नात्र संशयः॥ १२॥

इति। सारसङ्ग्रहे—

अथ प्रवक्ष्ये मनुवर्य्यमेनं महागणेशस्य समासतोऽत्र।
उपास्य सम्मूढधियोऽपि सिद्धिं प्रापुः सुरैरप्यभिवाञ्छितां ताम्॥ १॥
सिद्धर्षिसङ्घैर्द्विविधैरुपास्यं सुरासुरैः किन्नरयक्षनागैः।
गन्धर्वसिद्धव्रजचारणाद्यैः संसेवितं चापि गणैः समस्तैः॥ २॥
नारीनाराणां वशकारकं तद् भूपालसङ्घातवशे प्रशस्तम्।
तत्सुन्दरीवश्यकरं ह्यमात्यभृत्यौघवश्यप्रदमाशु लोके॥ ३॥
व्याघ्रद्विपव्यालसमूहचोरवेतालभूतादिकदुष्टजन्तून्।
वशे विधातुं प्रथितः पृथिव्यां लोकैकजन्तुव्रजमोहकं च॥ ४॥
तथा जनाकृष्टिकरं प्रसिद्धं पुष्टिप्रदं भक्तजनस्य नित्यम्।
उच्चाटकर्मण्यपि शस्तमाद्यं लोके तथा मारणकर्मशक्तम्॥ ५॥
कृशानुसंस्तभनकारकं च विद्वेषिवाणीगतिरोधकं च।
कृपाणधाराशरसञ्चयानां संस्तम्भकं विद्युदपस्ततीनाम्॥ ६॥
संस्तम्भकं वातसमूहवृष्टेः शुक्रादिसंस्तम्भकरं परं च।
पाताललोकेषु गतिप्रदं च रसायनाद्यञ्जनसिद्धिदं च॥ ७॥
सुपादुकापारदबन्धसिद्धिखड्गादिसिद्धिप्रदमुत्तमं च।
सुयक्षिणीसाधनशक्तमुच्चैः सम्यग्जनावेशकरं प्रसिद्धम्॥ ८॥
वेदा[१]दि पद्मनिलया भुवनेश्वरी सकामा क्षमा गणपमन्त्रवरानिहोक्त्वा।
कान्तान्ततादि पतये वरनीरवह्नीनुक्त्वा दसर्वजनमर्कशिवौ वशं च॥ ९॥
प्रोक्त्वानयेति दहनस्य वधूं समुक्त्वा सङ्कीर्तितो मनुरयं मनुयुग्मवर्णः।

---

[१] अयं मन्त्र ऊर्ध्वाम्नायोक्त इति बोध्यम्।

[1]प्रोक्तोऽथ चिन्तितमनोरथकल्पशाखी भूतिप्रदश्च यततां वरसाधकानाम्।। १०।।

इति। वेदादि प्रणवः। पद्मनिलया श्रीबीजं। भुवनेशी तद्बीजं। सकामा कामबीजसहिता, भुवनेशीबीजानन्तरं कामबीजमित्यर्थः। क्षमा भूबीजं ग्लौं इति। गणपमन्त्रो गं। कान्तान्तो गकारः, तादिर्णकारः। पतये स्वरूपं। वर स्वरूपं। नीरं वकारः। वह्निः रेफः। द सर्वजनं स्वरूपं। अर्को मकारः, शिव ऐकारस्तेन मे। वशं स्वरूपं। आनय स्वरूपं। अत्र सन्धिर्ज्ञेयः। दहनस्य वधूः स्वाहाकारः। मनुयुग्मवर्णोऽष्टाविंशत्यक्षरः।। तथा—

ऋषिः समुक्तो गणको निचृच्च च्छन्दोऽस्य गायत्रमुदीरितं हि।
महागणेशो गदितोऽस्य देवः सुरासुरैः सेवितपादपद्मः।। ११।।

गं बीजं ह्रीं शक्तिरिति पद्मपादाचार्याः।

तारादिषड्बीजसमन्वितेन षड्दीर्घभाजा निजबीजकेन।
कुर्यात् षडङ्गानि मनोर्यथावत् स्वजातियुक्तान्यथ मन्त्रविज्ञः।। १२।।
सद्वादशान्तश्रुतिनेत्रनासाद्वन्द्वास्यदोष्पद्द्वयसन्धिदेशे।
अनाहतेऽथो मणिपूरके स्वाधिष्ठान आधारपदेऽणुवर्णान्।। १३।।
विन्यस्य शीर्षाननहृत्सु गुह्यपद्धृत्सु बीजानि परिन्यसेच्च।
ततोऽवशिष्टैः खलु मन्त्रवर्णैः स व्यापयेत् स्वे सकले शरीरे।। १४।।
कवक्त्रहृद्गुह्यपदेषु पश्चान्न्यसेत् स्वनाम्ना मिथुनानि मन्त्री।
तेष्वेव हृज्जनुयुतेषु भूयो न्यसेच्च षट् शक्तियुतान् गणेशान्।। १५।।
इत्थं प्रविन्यस्य निजे शरीरे ध्यायेद् गणेशं निजहृत्सरोजे।

ऐक्षवे जलधौ द्वीपे नवरत्नमये शुभे। तत्तरङ्गोल्लसत्तोयैर्धौते शीततलेऽमले[2]।। १६।।
तत्तोयकणसम्पृक्तगन्धवाहनिषेविते । कल्पपादपसंशोभिभूभागसमलङ्कृते।। १७।।
नानाकुसुमसङ्कीर्णे नानापक्षिविराजिते। अनेकफलसङ्कीर्णे सेविते चाप्सरोगणैः।। १८।।
उद्यद्बालातपोद्द्योतिचन्द्रज्योत्स्नासमाकुले। विलसत्पद्मरागौघकुट्टिमारुणभूतले ।। १९।।
कल्पपादपपुष्पस्थषट्पदस्वनमञ्जुले। पारिजातं कल्पतरुं तस्य मध्ये विचिन्तयेत् ।। २०।।
युगपदृतुषट्केन सेवितं पुष्पशोभितम्। नवरत्नमयं तस्याधस्तात् सिंहासनं स्मरेत्।। २१।।
तन्मध्ये लिपिपद्मं च षडरं तस्य मध्यतः। कर्णिकायां त्रिकोणं च तत्संस्थं च महागणम्।।२२।।
नानारत्नविभूषाढ्यमेकदन्तं गजाननम्।...।।

चक्राब्जत्रिशिखान् गुणैक्षवधनू रक्तोत्पलं सद्गदां
व्रीह्यग्रान्वितबीजपूररदनं कुम्भं करैर्बिभ्रतम्।

---

१. 'भक्तौघविघ्नित' ख. पाठः। २. 'शीते महीतले' ख. पाठः।

पद्मोद्यत्करया निजप्रमदया श्लिष्टं जपासन्निभं
सार्धेन्दुं प्रभजे महागणपतिं नेत्रत्रयोद्भासितम्।। २३।।
पुष्करोद्धृतरत्नौघमयकुम्भमुखस्रुतान्। मणिमुक्ताप्रवालादीन् वर्षन्तं धारया मुहुः।। २४।।
सर्वतः साधकस्याग्रे स्वदानजललोलुपाम्। षट्पदालीं कर्णतालैर्वारयन्तं मुहुर्मुहुः।। २५।।
अमरासुरसंसेव्यं सद्रत्नमुकुटोज्ज्वलम्। उरूदरं गजमुखं नानाभरणभूषितम् ।। २६।।
इति ध्यात्वा गणपतिं यजेत् सर्वोपचारकैः।..।।

ऊर्ध्ववामदक्षयोश्चक्राब्जे, तदधः शूलपाशौ, तदधो धनुरुत्पले, तदधो गदाब्रीह्यग्रे, तदधो बीजपूररदनौ, शुण्डाग्रे रत्नकुम्भः। इत्यायुधध्यानम्। अपरे तु वामोर्ध्वादिक्रमेण दक्षोर्ध्वान्तं वदन्ति। तदुक्तं प्रयोगसारे—''चक्रप्रासरसालकार्मुकगदासद्बीजपूरद्विजव्रीह्यग्रोत्पलपाशपङ्कजकरं शुण्डाग्रजाग्रद्घटम्'' इति। प्रासस्त्रिशूलम्। रसालकार्मुक इक्षुकार्मुकः। द्विजो दन्तः। गणेश्वरपरामर्शिन्यां तु—''दक्षाधःकरमारभ्य वामाधःस्थकरावधि। गदाशूलाब्जकह्लारविषाणं दक्षिणैः करैः। शाल्यग्रपाशचक्रेक्षुचापसद्बीजपूरकान्। वामैर्दधान''मित्युक्तमत्र यथागुरूपदेशं कार्यमिति। तथा—

धर्मादिक्लृप्ते पूर्वोक्ते तीव्रादिनवशक्तिके। पीठे विघ्नेशमभ्यर्च्य सम्यक् सर्वोपचारकैः।। २७।।
त्रिकोणाग्रस्थं बिल्वाधो विष्णुं लक्ष्म्यान्वितं यजेत्। पद्मद्वयकरा पद्मा शङ्खचक्रधरो हरिः।। २८।।
दक्षकोणे बहिस्तद्वद्गौरीं गौरीपतिं यजेत्। (संस्थितौ च वटाधस्तात् सुवर्णरजतप्रभौ।। २९।।
पाशाङ्कुशधरा गौरी टङ्कशूलधरो हरः। पृष्ठस्थपिप्पलाधस्तात्प्रतिकामौ समर्चयेत्)।। ३०।।
उत्पलद्वन्द्वकोदण्डपुष्पेषुसमलङ्कृतौ। (देवपृष्ठे बहिस्तद्वद्रतिं रतिपतिं यजेत्) ।। ३१।।
उत्तरेऽथ प्रियङ्गोस्तु महीकोलौ यजेत् ततः। शुक्लब्रीह्यग्रकगदाचक्रालङ्कृतसद्भुजौ।। ३२।।
देवस्याग्रे[1] यजेल्लक्ष्म्या सहितं गणनायकम्। षट्कोणेषु यजेत् पश्चादामोदादींश्च षट् क्रमात्।।३३।।
आमोदं सिद्धिसहितमग्रकोणे समर्चयेत्। समृद्ध्या युतमभ्यर्चेत् प्रमोदं वह्निकोणतः।। ३४।।
सुमुखं कान्तिसंयुक्तमीशकोणे मचर्ययेत्। दुर्मुखं मदनावत्या यजेद् वरुणकोणके।। ३५।।
विघ्नं मदद्रवायुक्तं कोणे नैशाचरे यजेत्। वायव्ये विघ्नकर्तारं द्राविण्या सहितं यजेत्।। ३६।।
पाशाङ्कुशधरा विघ्नाः शक्तयश्चाभयेष्टदाः। रक्ता रक्ताम्बरालेपभूषणा मदविह्वलाः।। ३७।।
(षट्कोणस्य बहिर्देवं दक्षिणे तु समर्चयेत्)। तस्य सव्ये शङ्खनिधिं वसुधारान्वितं यजेत्।।३८।।

तस्य महागणेशस्य।

अपसव्ये पद्मनिधिं वसुमत्या सहार्चयेत्। तत्राद्यो मौक्तिकाभोऽन्यो माणिक्याभस्तु धारया।। ३९।।
वर्षन्तौ धनसम्पत्तिं लोकानां स्वेच्छया[2] सदा। केसरेष्वङ्गपूजा स्याद् ब्राह्म्याद्याः पत्रमध्यगाः।।४०।।
चतुरस्रे लोकपालांस्तदस्त्राणि च पूर्ववत्। षडावरणसंयुक्तमित्थं देवं प्रपूजयेत्।। ४१।।

---

१. त्रिकोणान्तरित्यर्थः। २. 'मेघवत्' ख. पाठः।

इति।। अथ प्रयोगः—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे निचृद्गायत्रीच्छन्दसे नमः। हृदये श्रीमहागणपतये देवतायै नमः। गुह्ये गं बीजाय नमः। पादयोः ह्रीं शक्तये नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, ॐगां हृदयाय नमः। श्रींगीं शिरसे स्वाहा। ह्रींगूं शिखायै वषट्। क्लींगैं कवचाय हुं। ग्लौंगौं नेत्रत्राय वौषट्। गंगः अस्त्राय फट्। इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। ततो ब्रह्मरन्ध्रे गं नमः। दक्षनेत्रे णं नमः। वामे पं नमः। दक्षश्रोत्रे तं नमः। वामे यें नमः। दक्षनासायां वं नमः। वामं रं नमः। मुखे वं नमः। दक्षबाहुमूले रं नमः। मध्ये दं नमः। मणिबन्धे सं नमः। अङ्गुलिमूले वँ नमः। अङ्गुल्यग्रे जं नमः। वामबाहुमूले नं नमः। मध्ये में नमः। मणिबन्धे वं नमः। अङ्गुलिमूले शं नमः। अङ्गुल्यग्रे मां नमः। अनाहते नं नमः। मणिपूरके यं नमः। स्वाधिष्ठाने स्वां नमः। मूलाधारे हां नमः।। शिरसि ॐनमः। मुखे श्रीं०। हृदये ह्रीं०। गुह्ये क्लीं०। पादयोः ग्लौं०। हृदये गं नमः। इति विन्यस्य, गणपतये इत्यादिद्वाविंशति—वर्णैर्मूर्धादिपादान्तं व्यापकं विन्यस्य, ध्यानादिमानसपूजान्ते प्रागुक्तं मातृकापद्मं चतुर्द्वारयुक्तचतुरस्रत्रयवेष्टितं कृत्वा तत्कर्णिकायां षट्कोणं तदन्तस्त्रिकोणं च कुर्यादिति पूजाचक्रमुद्धृत्य, अर्घ्यस्थापनादिपुष्पोपचारान्ते प्रोक्तविधिना त्रिकोणं विधाय त्रिकोणाद्बहिर्देवस्याग्रे ॐश्रीं लक्ष्मीनारायणाभ्यां नमः। देवस्य दक्षिणे ॐह्रीं गौरीहराभ्यां नमः। देवस्य पृष्ठे ॐक्लीं रतिकामाभ्यां नमः। देवस्य वामे ॐग्लौं महीवराहाभ्यां नमः।। ततस्त्रिकोणान्तर्देवाग्रे ॐगं लक्ष्मीगणनायकाभ्यां नमः। इति प्रोक्तमिथुनानि तत्तद्वृक्षाधस्तत्तद्ध्यानोक्तरूपाणि सम्यग् ध्यात्वा गन्धादिभिः सम्पूज्य, ततः षट्कोणेषु देवाग्रमारभ्य—ॐगं आमोदसिद्धिभ्यां नमः। ॐगं प्रमोदसमृद्धिभ्यां नमः। सुमुखकान्तिभ्यां नमः। दुर्मुखमदनावतीभ्यां नमः। विघ्नमदद्रवाभ्यां नमः। विघ्नकर्तृद्राविणीभ्यां नमः। इति सम्पूज्य, षट्कोणाद्बहिर्देवस्य दक्षिणे शं शङ्खनिधिवसुधाराभ्यां नमः। वामे पं पद्मनिधिवसुमतीभ्यां नमः। इति सम्पूज्य अष्टदलकेसरेषु प्राग्वत् षडङ्गानि दलेषु ब्राह्म्याद्याश्चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य धूपदीपादि सर्वं प्राग्वत् समापयेत्।। तथा—

एकादशायुतं जप्त्वा सहस्रोत्तरमादरात् । दशांशं जुहुयादष्टद्रव्यैरेकाक्षरोदितैः।। ४२।।
तर्पयित्वा दशांशेन चाभिषिक्तोऽणुना ततः। ब्राह्मणान् भोजयेत् सम्यक् षड्रसैर्भूरिदक्षिणाम्।।४३।।
दत्त्वा प्रणम्य विसृजेदेवं सिद्धो भवेन्मनुः। ततः प्रणम्य विधिवद्गुरुं सन्तोषयेत् ततः।। ४४।।
काम्यकर्माणि कुर्वीत सिद्धये स्युर्न चान्यथा।...।।

अयं पुरश्चरणजपः कृतयुगपरः। कलावेतच्चतुर्गुण इति। तथा—

वक्ष्ये प्रयोगानधुना समासान्महागणेशाणुवरस्य सर्वान्।
रक्तप्रसूनैर्गणपं समर्च्य जपेन्मनुं चाष्टसहस्रमन्ते।। १।।
दशांशतो लोहितवाजिवैरिपुष्पैर्हुनेत् स्वादुपरिप्लुतैश्च।

अष्टसहस्रमष्टोत्तरसहस्रमित्यर्थः। वाजिवैरी करवीरः। स्वादूनि मधुराणि, तानि तु घृतमधुशर्कराः। घृतमधुदुग्धानि वा।

राजा वशे तिष्ठति मन्त्रिणोऽस्य सामात्यभृत्यादिकसैन्ययुक्तः।। २।।

ब्रह्मद्रुसूनैस्त्रिमधुप्लुतैश्च हुत्वा द्विजातीन् वशयेदवश्यान्।
ते चात्र मन्त्रिप्रवरस्य नित्यमुक्तं हि कुर्वन्ति न संशयोऽत्र।। ३।।

ब्रह्मद्रुसूनैः पलाशकुसुमैः –

सर्पिर्हुनेन्मन्त्रिवरो हि तावत् जितेन्द्रियः संस्तदनन्यचेताः।
चराचरेऽस्मिञ्जगति प्रसिद्धां कीर्तिं विशालाममलां लभेत् सः।। ४।।
मन्त्री हुनेदाज्यपरिप्लुतं यो धनं स धान्यं विपुलं लभेत।
मधुप्लुतैर्लोहितपङ्कजैर्यो हुनेदथाष्टोत्तरकं सहस्रम्।। ५।।
पृथ्वीपतींस्तत्प्रमदाश्च नित्यं वशे करोत्येव तदात्मजांश्च।
हयारिवृक्षोत्थसमिद्भिरष्टाधिकं सहस्रं जुहुयान्मनुज्ञः ।। ६।।
(भूदेववर्यान् ससुतान् सबन्धून् सपत्निकांश्च वशयेदवश्यम्।)
अष्टाधिकं मन्त्रिवरः सहस्रं जप्त्वा दशांशेन हुनेन्मनुज्ञः।। ७।।
विशुद्धया राजिकया च लोणैस्तद्भस्म संशोध्य करे गृहीत्वा।

साज्ययेति साम्प्रदायिकाः।

योषां निजेष्टां खलु ताडयेत् सा कन्दर्पतीक्ष्णेषुनिपीडिताङ्गी।। ८।।
स्वजीवितं यावदमुष्य वश्या भवेदवश्या किल किङ्करीव।
शिवालये लक्षमितं मनुं यो जपेद् दशांशेन हुनेच्च मन्त्री।। ९।।
पयोन्धसा साधुमधुप्लुतेन सोऽर्थानवश्यं विविधांल्लभेत।

पयोन्धसा पायसेन।

जातीप्रसूनैर्विधिवत् तथाष्टाधिकं सहस्रं जुहुयान्मनुज्ञः।। १०।।
मेधायुतो वेदसदर्थवेत्ता भवेदथासावचिरादवश्यम्।
दूर्वात्रिकैर्यो जुहुयान्मनुज्ञोऽयुतत्रयं तेन भवेदवश्यम्।। ११।।
मृत्युञ्जयः सर्वगदान् विजित्य लोके स धीमानिह दीर्घजीवी।
समाहितो मन्त्रिवरोऽयुतं यो हुनेद्विधानेन सुपीतपुष्पैः।। १२।।
संस्तम्भयेद्वैरिनृपस्य सेनां सभृत्यनागाश्वरथामवश्यम्।
लोहादिकैः सङ्घटितानि यानि दिव्यानि शस्त्राणि सितानि तेषाम्।। १३।।
धारां ध्रुवं स्तम्भयतीह शत्रोर्नागाश्वसंस्तम्भनमत्र कुर्यात्।
विभीतकद्रूत्थसमिद्भिरत्रायुतत्रयं यो जुहुयाद्विधिज्ञः ।। १४।।

---

१. 'वाचश्च' ख. पाठः।

उच्चाटयेदाशु च वैरिसङ्घान् स्वस्थानतो मन्दरसन्निभांश्च।
ग्रामं पुरं वा नगरं च देशं ध्यायंश्च यं यं जुहुयात् क्रमेण।। १५।।
तं तं तदोच्चाटयतीह मन्त्री तथा च कामं प्रतिमानवानाम्।
मन्त्री त्वपामार्गसमिद्भिरष्टाधिकं सहस्रं विधिवज्जुहोतु।। १६।।
स्वजीवितावध्यथ पण्ययोषा वश्या भवेयुर्न विचार्य्यमत्र।
एरण्डवृक्षोत्थसमिद्भिरष्टोत्तरं सहस्रं जुहुयाद्विधानात् ।। १७।।
रण्डा: स्वजीवावधि तस्य वश्या अर्थप्रदा: कामदुघा भवन्ति।
आनीय निम्बद्रुदलानि तेषु स्वसाध्यनामानि विलिख्य मन्त्री।। १८।।
रक्तैश्च सम्यग् महिषाश्वजातैर्हुनेत् कटुस्नेहयुतै रहस्तै:।
विंशत्सहस्रं भवतीह तेन मर्त्यो हि विप्लु[1]ष्टतर: सदैव।। १९।।

अमुकममुकेन द्वेषयेति साध्यनामानि। रह इति परिच्छेद:।

मर्त्यास्थिसम्भूतमयं[2] हि कीलमष्टाङ्गुलं शावशिरोरुहैस्तम्।
संवेष्ट्य सम्यग् वसुयुक् सहस्रं सञ्जप्तमेनं कुलिकोदये च।। २०।।

वसुयुक्सहस्रमष्टोत्तरसहस्रं। कुलिकोदयस्तु ज्योति:शास्त्रे।

शत्रोर्गृहे द्वारि खनेद्यथावत् सप्ताहतोऽसौ मृतिमेति मर्त्य:।

कुलिकोदयस्तु—

''मन्वर्कदिग्वस्वृतुवेदपक्षैरर्कान्मुहूर्तै: कुलिका भवेयु:
दिवा निरेकैरथ यामिनीषु ते गर्हिता कर्मसु शोभनेषु।।''

इति। अर्कादर्कवारात्। मनु १४ अर्क १२ दिक् १० वसु ८ ऋतु ६ वेद ४ पक्षा: २ इति दिवा। रात्रौ तु निरेकैरेकहीनैरेभिर्मुहूर्तै: कुलिककालो ज्ञेय:। अयमर्थ:—रात्रौ तु त्रयोदशैकादशनवसप्तपञ्चतृतीयप्रथममुहूर्ता: अर्कादिवारेषु यथाक्रमं कुलिककालो ज्ञेय:।

मन्त्री विलद्वारसमीपवर्ती जपेन्मनुं लक्षमितं यथा च।। २१।।
तस्याग्रतश्चाभिपतन्ति नागकन्या विलज्जा: खलु सत्त्वहीना:।
दिव्यानि सिद्धानि रसायनानि नानाप्रकारांश्च मणीन् प्रसिद्धान्।। २२।।
इष्टान्यनर्घ्याणि बहूनि सर्वास्ता: सम्प्रयच्छन्ति न चान्यथात्र।
जपेद्गिरेर्मूर्धनि लक्षमेकं दृढव्रतश्चैकमना नितान्तम् ।। २३।।
भवेद् ध्रुवं तस्य कृपाणसिद्धि: सुरासुरैरप्यभिकाङ्क्षिता या।
लज्जालुकासद्धनसारनन्द्यावर्तानि शुक्लां गिरिकर्णिकां च।। २४।।

---

१. 'विद्विष्टतर:' ख. पाठ:। २. 'मथो' ख. पाठ:।

अध:प्रसूनामथ मेलयित्वा सम्पिष्य जप्त्वा नियुतद्वयेन।
एभिः शुभैरञ्जितलोचनो यो मर्त्यो निधानानि स पश्यतीह।। २५।।

लज्जालुका प्रसिद्धा। तस्या लक्षणं तु—''स्पर्शसङ्कुचत्पत्रत्वम्।'' घनसारः कर्पूरः। शुक्ला गिरिकर्णिका श्वेतापराजिता। अध:प्रसूना शङ्खपुष्पी, अधोमुखपुष्पवती।

भवेद्गणेशाणुशताष्टजप्तश्रीखण्डलेपात् खलु दुःखनाशः।

शताष्टजप्तेत्यष्टोत्तरशतमित्यर्थः। एवं सर्वत्र।

लूतासविस्फोटकभूतकृत्याप्रेतोद्भवान् घोरतरान् ज्वरांश्च।। २६।।
मनोरथाद्यष्टसहस्रजापाद् विनाशयेन्मन्त्रवरस्त्ववश्यम्।
विषद्वयं स्थावरजङ्गमं च ज्यरानथाष्टाविह शूलरोगान्।। २७।।
सुदारुणान्तान् गृहिणीं च रोगान् वातप्रभूतान् कफपित्तजातान्।
गलग्रहादीनपि रोगसङ्घान् शताष्टजापेन विनाशयीत।। २८।।
लक्षैकजापेन मनोरथानां सिद्धिर्भवेदस्य हि पादुकायाः।
मन्त्री ततो गच्छति दूरवर्त्म शतत्रयं योजनसंज्ञकानाम्।। २९।।
गुप्तप्रदेशे विजने मनोज्ञे विलेपिते गोमयतो विशुद्धे।
स्नातः शुचिर्मन्त्रिवरो जितात्मा कुम्भं नवं चर्चितचन्दनार्द्रम्।। ३०।।
संस्थाप्य नीरेण सुगन्धिना तं प्रपूरयेत् तत्र शरावमेकम्।
कुम्भोपरिष्टात् कपिलाज्यपूर्णं विन्यस्य प्रज्वाल्य च दीपमेकम्।।३१।।
प्रपूजयेच्चन्दनपुष्पधूपैः कुमारिकां चाथ कुमारकं च।
आनीय संस्पृश्य जपेदिमं च मनुं तथाष्टाढ्यशतं मनुज्ञः।। ३२।।
भूतं भविष्यं किल वर्तमानं शुभाशुभं वा कथयेदवश्यम्।
महागणेशं गदितस्वरूपं ध्यात्वा जपेद्रात्रिषु मन्त्रिवर्य्यः।। ३३।।
स्वप्ने गणेशः कथयत्यवश्यं शुभाशुभं नात्र विचारणीयम्।
चन्द्रग्रहे वाथ रविग्रहे वा मन्त्रं जपेत् साधुजलाशयस्थः।। ३४।।
आकृष्टिरस्यात्र भवेत् सुसिद्धा धान्यादिकानां पशुयोषितां च।
न्यग्रोधमूले ह्युपविश्य मन्त्रीं मन्त्रं जपेल्लक्षमिमं विधानात्।। २५।।
सा[1] यक्षिणी तस्य भवेत् सुसिद्धा अर्थादि कृष्ट्वा[2] च ददाति नित्यम्।
उपोष्य रात्रौ विधिवद्वचां समानीय यत्नात् प्रयतो नितान्तम्।। ३६।।
स्नात्वार्चयेदत्र महागणेशं स्पृष्ट्वायुतं तां प्रजपेच्च मन्त्रम्।

---

१. 'सा वटाख्या इत्यर्थः। २. 'कृष्टिश्च' ग. पाठः।

कृत्वातिसूक्ष्मं किल चूर्णमस्याः कर्षोन्मितं तत्कपिलाज्ययुक्तम्।। ३७।।
सम्प्राशयेत् प्रातरतीव शुद्धः कविर्भवत्येव हि सप्तरात्रात्।

अत्रापि प्राग्वत् सप्तधा विभज्यैकैकं भागं प्रातःप्रातः सघृतं भक्षयेदिति।

रसं समादाय च कामचारी रसेन संशोध्य च याममेकम्।। ३८।।
कार्पासपत्रोत्थरसेन तावत् प्रमर्द्य सम्यक् खलु मर्दयेच्च।
कुमारिकापत्ररसेन तावत् ततो भवेद्रूप्यसमानवर्णः ।। ४९।।
भागा मताः षोडश पारदस्य शुल्वस्य भागत्रितयं तथैव।
भागत्रयं स्याद्गगनस्य चैकं हेम्नस्तथैकं किल लोहजातेः।। ४०।।
एकत्र कृत्वा बहुधा प्रमर्द्य संस्थापयेत् सम्यगथारनाले।
शिवालये शुद्धमनाश्च गत्वा मनुं जपेल्लक्षमिमं मनुज्ञः।। ४१।।
महागणेशस्य ततः प्रसादात् सिद्धा हि नूनं गुटिका भवेत् सा।

रसं पारदम्। कामचारी आकाशवल्लीति प्रसिद्धा। शुल्वस्ताम्रम्। गगनं स्वगापाक्षिकमभ्रकमिति केचित्। आरनालं काञ्जिकः। अत्र ताम्रादिकं चूर्णीकृत्य मेलयितव्यम्।

तां धारयेदानन एव मन्त्री सुदुर्जयः स्यात् सुरदानवाद्यैः।। ४२।।
समग्रभूतैश्च भवेदवध्यः शस्त्रास्त्रवृन्दैरपि भिद्यते न।
न दह्यते वह्निशतैश्च मर्त्यो विषद्वयेन म्रियते न वापि।। ४३।।
तस्याः प्रभावात् किल वज्रदेहो भवेद्गतिस्तस्य च खेचरी स्यात्।
धरामदृश्यः सकलां च नष्टच्छायो हि भूत्वा विचरेदवश्यम्।। ४४।।
सदा च सा तिष्ठति यस्य गेहे लक्ष्मीः स्थिरा तस्य गृहे भवेच्च।
सा दृष्टिबन्धं जगतः करोति महागणेशाणुवरप्रसादात् ।। ४५।।
सब्रह्मदण्डीं वशिनीं गृहीत्वा पुष्यार्कवारेण ततोऽभियोज्य।
वज्राभ्रकेणाथ पुनस्त्रिलोहैः संवेष्ट्य सम्यग् गुलिकां च कुर्यात्।। ४६।।
महागणेशं परिपूज्य मन्त्रजप्तां गणेशस्य कराच्च लब्धाम्।
इत्थं विचिन्त्य स्वकरे नयेत्तां सिद्धां गणेशस्य मनुप्रभावात्।। ४७।।
वक्त्रे शिखायां च करेऽथ कण्ठे तां धारयेन्मन्त्रिवरः सदैव।
तस्याः प्रभावान्न भवेत् समीपे व्याघ्रादिचौरोरगविघ्नवृन्दः।। ४८।।
क्षोणीभुजः स्युर्वशगास्तथास्य लोके भवेदेव हि कामचारी।
स्त्रीणां प्रियोऽसौ मदनातुराणां भवेदवश्यं गुटिकाप्रसादात्[1]।। ४९।।

---

[1] 'प्रभावात्' ख. पाठः।

ब्रह्मदण्डी भारङ्गी। वशिनी लज्जालुका। वज्राभ्रकोऽभ्रकविशेषः। त्रिलोहैः स्वर्णरजतताम्रैः।

गोरोचनोन्मत्तसुशङ्खपुष्पे देवी सिता स्यादपराजिताह्वा।
सब्रह्मदण्डी मलयोद्भवं च कृष्णागुरुः स्युः समभागकानि।। ५०।।
सम्पिष्य सम्यक् च रवौ सपुष्ये कुर्याद् विधानाद् गुटिकां मनुज्ञः।
कृत्वा च तामर्कसहस्रजप्तां विशेषकोऽस्या जनमोहकः स्यात्।। ५१।।

देवि सहदेवी। विशेषकस्तिलकः।।

ग्राह्यामृता मन्त्रि[2]वरेण दीर्घतुण्डा ततस्तां किल पेषयित्वा।
तच्चूर्णमालिप्य करद्वयेन जपेन्मनुं ह्यष्टयुतं सहस्रम्।। ५२।।
प्रदर्शयेत्तौ गजसम्मुखं च दृष्ट्वा दिशस्ते दश विद्रवन्ति।
मदोत्कटा दानजलार्द्रगण्डा ऐरावतस्यापि कुले प्रसूताः।। ५३।।
सुदीर्घदन्तद्वयरोचमाना[3] गच्छन्ति दूरं विवशा भयार्ताः।
वश्या भवेयुर्मनुवित्तमस्य ह्युक्तं च कुर्वन्ति न संशयोऽस्तिम्।। ५४।।

गजान् गृहीतुकामौ वै राजा गत्वा वनेषु सः। ततश्च कारयेद्गूढां सम्यक् च गजबन्धनीम्।। ५५।।
चतुरस्रां विशालां च शालां तां निकटे ततः। दृढावरणसंवीतां चतुर्द्वारां सुतोरणाम् ।। ५६।।
कुर्यात्तत्र स्थलीं सम्यक् चतुरस्रां समुन्नताम्। तस्यामुत्तरदिग्भागे विदध्यात् कुण्डमुत्तमम्।। ५७।।
सर्वलक्षणसंयुक्तं मेखलाद्यैरलङ्कृतम्। पूर्वादितः स्थलीमध्ये प्रोक्तलक्षणलक्षितम् ।। ५८।।
मण्डलं कारयेत् तत्र समावाह्य गणेश्वरम्। सम्पूज्य च निवेद्यान्तैरुपचारैः सुशोभनैः ।। ५९।।

मण्डलं सर्वतोभद्रम्।

आधायाग्निं ततः कुण्डे स्वमन्त्रैः पूजयेच्च तम्। पुरोक्तैरेव जुहुयादाज्यैर्वारत्रयं ततः।। ६०।।
हुनेत् समृद्धिमन्त्रेण नव मूलाणुनाहुतीः। ....।।

पुरोक्तैरेवेति दीक्षाप्रकरणोक्ताग्निमुखमन्त्रैः। समृद्धिमन्त्रः भूर्भुवःस्वरग्निर्जातवेदा इत्यादिको वक्ष्यमाणः।

प्रणवः श्रीशक्तिमारभूविनायकबीजकैः। अनुबद्धैः क्रमादेभिस्त्रिविभक्तेन संहुनेत्।। ६१।।

पुरोक्तैः श्रीशक्तिमारविनायकबीजकैः। प्रणवेत्यादिना प्राग्दीक्षाप्रकरणे अग्निमुखीकरणहोमे महागणपतिमन्त्रस्य यो दशधा विभाग उक्तस्तत्रान्तिमपदद्वयमेकीकृत्य जुहुयात्, तेन नवधा होमो भवति इत्यर्थः। उक्तं तदाचार्य्यचरणैः—(प्र०सा०)

तारेण लक्ष्म्यद्रिसुतास्मरक्ष्माविघ्नेशबीजैः क्रमशोऽनुबद्धैः।
पदत्रयेणापि च मन्त्रराजं विभज्य मन्त्री नवधा जुहोतु।। इति।

मूलाणुना समस्तेन हुनेन्मन्त्रार्णसंख्यया। आज्येनैव ततश्चाष्टद्रव्यैः स्वादुविलोलितैः।। ६२।।
चत्वारिंशत्सहस्राणि चतुर्भिरधिकानि च। चतुश्शतं चतुश्चत्वारिंशद्भिः सहितं हुनेत्।। ६३।।

---

१. 'पुष्यरक्षौ सदीर्घ' ख. पाठः। २. 'कुम्भा' ख. पाठः। ३. 'शोभमाना' ख. पाठः।

प्रत्यहं भोजयेद्विप्रांस्तदाशीर्भिर्विवर्धित:। गुरवे दक्षिणां दद्यात् पञ्चाशद्दन्तिनोऽथवा।। ६४।।
तन्मूल्यं तद्दशांशं वा दत्त्वा सन्तोष्य सद्गुरुम्। चतुर्णां मिथुनानां षड्गणेशनिधियुग्मयो:।। ६५।।
अङ्गमातृदिगीशानां तन्मन्त्रै: सर्पिषा हुनेत्। एवं होमं समाप्याथ नैवेद्यं च समुद्धरेत्[1]।। ६६।।
पुनरभ्यर्च्य विघ्नेशं साङ्गं सावरणं तत:। निजे हृदि समुद्वास्य विहरेत् स यथासुखम्।। ६७।।
ततो दिनैश्चतुश्चत्वारिंशता निपतन्ति हि। विनायकप्रभावेन कलभा: करिणस्तथा ।। ६८।।
करिणीनां समूहाश्च पात्यन्ते ह्यवटे तत:। प्रोक्तरूपं प्रोक्तकुण्डे गणेशं सम्यगर्चयेत्।। ६९।।

अवटे गर्ते।

तत्र वह्निं समाधाय लक्षमेकं पृथग् हुनेत्। पयोघृताभ्यामुन्मत्तपुष्पै: शर्करयापि च।। ७०।।
क्षौद्रेणान्नेन च ततो कुण्डमध्यात् समुज्ज्वला। वेतालसंज्ञा गुटिका प्राप्यते मन्त्रिणा तत:।। ७१।।
अणिमाद्यष्टसिद्धीनां जायते भाजनं सुधी:। ....।।

अत्राप्येकैकद्रव्येण सप्तषष्ट्युत्तरषट्शताधिकषोडशसहस्रसंख्यो जप: कार्य:। अन्तिमद्रव्ये त्वाहुतिद्वयं न्यूनमिति।

ब्राह्मे काले समुत्थाय क्षीणचन्द्रेऽथ पर्वणि। पद्मपत्रे कापिलं खे गोमयं प्रतिगृह्य च।। ७२।।
अयुतं मन्त्रसञ्जप्तं निखातं द्वारि वारयेत्। व्याघ्रक्रोडाहिचोरारीन् नात्र कार्या विचारणा।। ७३।।

क्षीणचन्द्रे पर्वणि अमावस्यायां। खे अन्तरिक्षे।

जाती सरक्ता च महादिमोहा सदण्डिना स्यात् करयुग्ममेव।
तथाद्रिकर्णी सशिखा च कन्या गोरोचनैतानि समानभागै:।। ७४।।

रक्ता मञ्जिष्ठा, महामोहा धत्तुर:, अद्रिकर्णी अपराजिता, शिखा मयूरशिखा, कन्या कुमारी, करयुग्ममञ्जलिनी।

सम्पिष्य पञ्चाङ्गमलानि तानि कुर्यादथैकत्र ततो जपेच्च।
स्पृष्ट्वैतदेनं मनुवर्य्यमष्टाधिकं सहस्रं भवतीह सिद्धम्।। ७५।।

पञ्चाङ्गमलानीति श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणोत्थानि।

गजे प्रदेयं वदरप्रमाणं यवप्रमाणं च तुरङ्गमे तत्।
यवार्धमात्रं मनुजं प्रदेयं ततश्च तद्योषिति सर्षपार्धम्।। ७६।।
प्रभक्षितं पीतमथो हि वश्यकरं प्रशस्तं हि तथावशानाम्।
जितेन्द्रिय: शुद्धतनुर्मनुज्ञो जपेन्मनुं त्वष्टयुतं सहस्रम्।। ७७।।
हुनेद् दशांशं करवीरलाजान् कन्यां लभेदुत्तमवंशजां स:।
पूर्वोक्तरूपं गणपं विचिन्त्य गन्धादिनाभ्यर्च्य जपेत मन्त्री।। ७८।।
मन्त्रं हि लक्षप्रमितं विमुक्तो भवेदकस्मान्निगडादिबन्धात्।
बिल्वस्य पुष्पं तगरं प्रियङ्गुं सदेवदारुं हरिचन्दनं च।। ७९।।

---

[1] 'समाचरेत्' ख. पाठ:।

तथागुरुं नागसुकेसरं च समानि कृत्वा मधुसा[1]धितानि।
स्पृष्ट्वा जपेत् तानि मनुं सहस्रमष्टाधिकं तैः खलु सिद्धधूपः।। ८०।।
भवेदनेनाशु सुधूपितो ना विजित्य रोगान् किल दीर्घजीवी।
प्राप्नोति चार्थं जुहुयाच्च कोऽपि भवेन्नरः सर्वजनप्रियश्च।। ८१।।
अनेन धूपेन च धूपिता स्त्री सुदुर्भगाऽथो सुभगा भवेच्च।
कुमारिका धूपसुधूपिता च वरं लभेताशु कुलीनमग्र्यम्।
जलाशये लक्षमिताऽणुजापः सप्ताहतो वृष्टिकरः प्रशस्तः।। ८२।।
स्वर्णाप्तौ मधुना च गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च संवृद्धये।
अन्नैरन्नसमृद्धये च सतिलैर्द्रव्याप्तये तण्डुलै-
र्लाजाभिर्यशसे कुसुम्भकुसुमैरश्वारिजैर्वाससे।। ८३।।
पद्मैर्भूपतिमुत्पलैर्नृपवधूं तन्मन्त्रिणः कैरवै-
रश्वत्थादिसमिद्भिरास्यजमुखान् वर्णान् वधूः पिष्टजैः।
पुत्तल्यादिभिरन्वहं स वशयेज्जुह्वन्ननावृष्टये
लौणैर्वृष्टिसमृद्धये च जुहुयान्मन्त्री पुनर्वेतसैः।। ८४।।

इति। अश्वत्थादीत्यादिशब्दैरुदुम्बरप्लक्षवटा गृह्यन्ते। पुत्तल्यादीत्यादिशब्देन पिष्टरचितवृक्षा[2]दयो गृह्यन्ते। तथा सारसङ्ग्रहे—

''शार्ङ्गी शचीवल्लभसोत्तमाङ्गं सद्यान्तयुक्तं खलु भूमिबीजम्''।।

इति पूर्वमूलयन्त्रोद्धारप्रकरणेऽनुद्धृतं भूमिबीजं समुद्धरति। शार्ङ्गः गकारः। शचिवल्लभो लकारः। उत्तमाङ्गो बिन्दुः। सद्यान्त औकारः।

तथा—

षट्कोणे कमलापुटं प्रविलिखेत् तारं ससाध्यं ततः
कोणेष्वङ्गमनून् स्वरान् वसुदले (द्विद्विक्रमात् संलिखेत्।
कामं द्वादशपन्नगं स्वरदले)ष्वालिख्य भूमेर्मनुं
पद्मे तत्त्वदले महागणमनोर्वर्णांश्च शिष्टांल्लिखेत्।। ८५।।
द्वात्रिंशद्दलपङ्कजे कखमुखान् वर्णान् लिखेत् सान्तगान्
भूबिम्बं बहिरष्टवज्रविलसत्कोणस्थशक्रं लिखेत्।
बाह्ये वारुणमण्डले परिवृतं तेनैव शक्त्यावृतं
रुद्धं तत्सृणिना महागणपतेर्यन्त्रं समुक्तं महत्।। ८६।।

---

१. 'भावितानि' ख. पाठः। २. 'वृत्ता' ख. पाठः।

षट्कोणेत्यादिमहदित्यन्तस्यायमर्थः— षट्कोणमध्ये श्रीबीजसम्पुटितं प्रणवं विलिख्य, तन्मध्ये साध्यनामालिख्य, षट्कोणेषु षडङ्गमन्त्रानालिख्य, बहिरष्टदलकमलं कृत्वा तद्दलेषु प्रागादिक्रमेण षोडश स्वरान् द्वन्द्वशो विलिख्य, तद्बहिर्द्वादशदलकमलं कृत्वा तद्दलेषु प्राग्वत् कामबीजं विलिख्य, तद्बहिः षोडशपत्रेषु भूबीजमालिख्य, तद्बहिश्चतुर्विंशतिदलेषु प्रणवश्रीकामभूबीजातिरिक्तानि मूलमन्त्राक्षराण्येकैकशो विन्यस्य, तद्बहिर्द्वात्रिंशद्दलेषु कादिसान्तान् मातृकावर्णान् सबिन्दुकानालिख्य, तद्बहिरष्टवज्रोपेतं चतुरस्रं कृत्वा तत्कोणेषु लमिति विलिख्य, तद्बहिरर्धचन्द्राकारं वारुणं मण्डलं विलिख्य वंबीजेन संवेष्ट्य, तद्बहिर्वृत्तद्वयं कृत्वा, वृत्तयोरन्तराले ह्रींबीजैरावेष्ट्याङ्कुशबीजाभ्यां निरोधयेत्, निरोधनं त्वाद्यन्तयोर्लेखनम्। तथा—

भूर्जे धरायां वसने लिखेत् तत् गोरोचनाकुङ्कुमगोमयाद्भिः।
कस्तूरिकाभिः सुधया च हेमरूप्योद्भवा स्यादिह लेखनी च।। ८७।।
यन्त्रं धृतं येन स दुर्जयः स्याल्लोकैरशेषैर्गणपप्रसादात्।
न दह्यतेऽसौ दहनेन तस्य भीतिर्न च स्यान्नृपतस्करेभ्यः।। ८८।।
द्यूते रणे राजकुले च वादे सदा मनुज्ञो विजयी भवेच्च।
अनामिकारक्तविमिश्रितैस्तत् शोणैर्लिखेद् द्रव्यवरैर्यथावत्।। ८९।।
कुचन्दनाद्यैररुणैश्च पुष्पैः सम्पूज्य तन्मन्त्रिवरो निवेद्यैः।
कृत्वा मनोज्ञाङ्गवतीं च मूर्तिं विन्यस्य तस्या उदरे च यन्त्रम्।। ९०।।
प्रतापयेद् दीपशिखाकृशानौ सप्ताहतो योषितमानयेत् सः।
जप्त्वा मनुं चाष्टशतं प्रताप्य वह्नौ धृतं तद्वशयेन्मृगाक्षीम्।। ९१।।
स्वभावविद्वेषवतां हि रक्तैः श्मशानकाङ्गारयुतैर्लिखेत् तत्।
शावांशुके लेखनिकात्र काकपक्षोत्थिता सम्यगथाभिपूज्य।। ९२।।
उच्चाटयेद्बद्धमिदं ध्यजाग्रे विद्वेषयत्येव हि वैरिसङ्घम्।
द्रव्यैः सुपीतैर्विलिखेच्छिलायां पीतप्रसूनै रुचिरार्कपुष्पैः।। ९३।।
सम्पूज्य संवेष्ट्य च पीतसूत्रैः साध्यानिलस्थापनमाचरेच्च।
तद्देहलीदेश इदं निखातं करोन्मिते स्तम्भनकारि यन्त्रम्।। ९४।।
दुष्टस्य वाक्स्तम्भमरिव्रजस्य गतेस्तु संस्तम्भनमाशु कुर्यात्।
सेनां परेषां गजवाजियुक्तां संस्तम्भयेन्नात्र विचारणीयम्।। ९५।।
श्मशानकाङ्गारवरोत्थमष्या श्मशानवस्त्रे कुपितेन मन्त्री।
चित्तेन संलिख्य नरास्थिजात्र सल्लेखनी चन्दनपुष्पधूपैः।। ९६।।
सम्पूज्य तच्छावधरानिखातं स मारयेद्वैरिणमाशु नूनम्।
उत्खातमेतत् पयसा च धौतं यन्त्रं हि शान्तिं तनुते नराणाम्।। ९७।।

इति। भूर्जेत्यादि, सुधया चूर्णेन। मूर्तिर्देवस्य। साध्यानिलस्थापनं साध्यप्राणप्रतिष्ठा। करोन्मिते हस्तमात्राधस्तात्।

शावधरा श्मशानभूमिः।। तथा—

आलिख्याग्निपुरे सतारविवरे बीजं बहिर्दिक्ष्वथ
श्रीमायामदनं भुवं गृहयुगे बीजानि वह्नेस्ततः।
सन्धिष्वङ्गमनूनथाष्टदलके वर्णान् मनोरालिखेत्
त्रींस्त्रीनन्त्यदले क्रमेण विधिवच्छिष्टं तथैकं कृती।। ९८।।

वेष्टितं मातृकावर्णैः क्रमोत्क्रमगतैरपि। पाशाङ्कुशावृतं बाह्ये भूगेहद्वितयेन च ।। ९९।।
महागणपतेर्यन्त्रं कृतं हेमशलाकया। अलक्तकं च काश्मीरं कस्तूरीरोचनान्वितम्।। १००।।
मेलयित्वा विभागेन पिष्ट्वा चन्दनवारिणा। स्वर्णपट्टेऽथ भूर्जे वा लिखितं विधिपूर्वकम्।। १०१ ।।
कृतप्राणप्रतिष्ठं तद् दोर्धृतं भुक्तिमुक्तिदम्। आयुरारोग्यसम्पत्तिकीर्तिदं प्रीतिवर्धनम् ।। १०२।।

इति। अयमर्थः— षट्कोणमध्ये त्रिकोणमालिख्य त्रिकोणमध्ये प्रणवमध्यगतं ससाध्यं गंबीजमालिख्य, त्रिकोणषट्कोणयोरन्तराले पूर्वादिचतुर्दिक्षु श्रींह्रींक्लींग्लौं इति बीजचतुष्टयमेकैकशो विलिख्य, षट्कोणेषु पूर्वादिक्रमेण प्रणवादिषट्बीजान्यालिख्याष्टदलेषु गणपतये इत्याद्यवशिष्टमन्त्रगतद्वाविंशतिवर्णेषु त्रींस्त्रीन् वर्णान् सप्तदलेषु विलिख्यावशिष्टमेकमक्षरमष्टमदले विलिख्य, बहिर्वृत्तपञ्चकं विधाय तदन्तर्गतवीथीचतुष्टये सर्वाभ्यन्तरवीथ्यां सबिन्दूनकारादिकारान्तान् वर्णानालिख्य, द्वितीयवीथ्यां क्षकाराद्यकारान्तान् वर्णान् विलिख्य, तृतीयवीथ्यां आं इति पाशबीजैरावेष्ट्य, सर्वबाह्यवीथ्यां क्रों इत्यङ्कुशबीजैरावेष्ट्य, तद्बहिश्चतुरस्रद्वयं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति। अत्र चतुरस्रद्वयवेष्टनं बाह्याभ्यन्तरभेदेनेति केचित्। अष्टकोणरूपेणेत्यन्ये। यथागुरूपदेशं कार्यमिति।। केरलीये यन्त्रसारे—

आलिख्य कर्णिकामध्ये शक्तिं कोणेषु षट्स्वपि। तारश्रीशक्तिकामेलाविघ्नबीजानि तद्बहिः।। १ ।।
आलिख्य चाष्टपत्रस्य पद्मस्य प्रथमे दले। कएइत्यादि वाग्बीजं द्वितीये च दले ततः।। २।।
यदद्येत्याद्यृचो वर्णानष्टौ पत्रे तृतीयके। कामबीजं हसेत्यादि पत्रे भूयश्चतुर्थके।। ३।।
उदगा इत्यष्टवर्णानालिख्याथ च पञ्चमे। सकलेत्यादि शाक्तं च बीजं षष्ठे दले पुनः।। ४।।
सर्वं तदिन्द्र तेत्यादिवर्णानष्टौ च सप्तमे। पत्रे गणपतेत्यादिनववर्णान् दलेऽष्टमे।। ५।।
सर्वेत्यादिद्वादशार्णांस्तद्बाह्ये मातृकाक्षरैः। संवेष्ट्य कुगृहाश्लिष्टैः श्रींह्रींक्लींग्लौमिति क्रमात्।। ६।।
आलिखेद्धेमपट्टादौ हेमसूच्यातिरञ्जनम्।...।।

इति। रञ्जनं वश्यकरम्। अस्यार्थः— अष्टदलकमलकर्णिकायां षट्कोणमध्ये ससाध्यं शक्तिबीजं विलिख्य, षट्स्वपि कोणेषु ओंश्रींह्रींक्लींग्लौंगं इत्येकैकशो विलिख्य अष्टदलेषु प्रथमदले श्रीविद्यायाः प्रथमकूटं, द्वितीयदले ''यदद्यकं च वृत्रहन्'' इति विलिख्य, तृतीयदले श्रीविद्याया द्वितीयकूटं, चतुर्थदले ''उदगा अभिसूर्य'' इति विलिख्य, पञ्चमे दले श्रीविद्यायास्तार्तीय कूटं, षष्ठे दले ''सर्वं तदिन्द्र ते वशे'' इति, सप्तमे दले ''गणपतये वरवरदेति'' अष्टमे ''सर्वजनं मे वशमानय स्वाहा'' इति विलिख्य, तद्बहिर्वृत्तयोरन्तराले मातृकाक्षरैरावेष्ट्य चतुरस्रचतुष्कोणेषु च महागणपतिमन्त्रस्य द्वितीयबीजादिबीजचतुष्टयं विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति। इदं यदद्येत्यादिकृचा श्रीविद्यया च सहितं महागणपतियन्त्रम्।। श्रीविद्या तु ज्ञानार्णवे—

सकला भुवनेशानी कामेशीबीजमुत्तमम्। अनेन सकला विद्या: कथयामि तवानघे।। १।।
शक्त्यन्तस्तुर्यवर्णोऽयं कलमध्ये सुलोचने। वाग्भवं पञ्चवर्णं तु कामराजमथोच्यते।। २।।
मादनं शिवचन्द्राद्यं शिवान्तं मीनलोचने। कामराजमिदं भद्रे षड्वर्णं सर्वमोहनम्।। ३।।
शक्तिबीजं वरारोहे चन्द्राद्यं सर्वसिद्धिदम्।...।।

इति। शक्ति: एकारस्तस्थान्ते अध: तुर्य्यवर्ण ई, सकला भुवनेशानीत्यस्य कलाभ्यां सह वर्तमाना भुवनेशानीत्यर्थत्वात्तयोर्मध्ये एईइति वर्णद्वये दत्ते कामराजविद्याया: प्रथमकूटं भवति। मादनं सकलेत्येतत्सम्बन्धात्ककार:, शिवचन्द्रौ हसौ आद्यौ यस्य तत्। शिवो हकारोऽन्ते यस्य तत्, चन्द्र: सकार आद्यो यस्य तत्। एतत्सपर्या यथायोग्या प्रागुक्तविधिनावगन्तव्या।। श्रीयन्त्रसारे–

कर्णिकायां साध्यगर्भं तारं पत्रेषु चाष्टसु। अग्न्यक्ष्यग्न्यग्निजलधित्रीणि त्रिद्व्यक्षराणि च।। १।।
आलिख्य मातृकावर्णैर्भूपुरेण च वेष्टयेत्। यद्यकेत्यृचो यन्त्रं वश्यसौभाग्यकान्तिदम्।। २।।
सुवर्णरत्नधान्यादिसर्वसम्पत्करं परम्। ....।।

इति।। अस्यार्थ:– अष्टदलकर्णिकामध्ये ससाध्यं तारं विलिख्य, तद्दलेषु त्रिद्वित्रित्रिचतुस्त्रित्रिद्विक्रमेण ''यदद्यकं चे'' त्यृचो वर्णान् विभज्य विलिख्य, तद्बहिर्वृत्तयोरन्तराले मातृकार्णैरावेष्ट्य बहिश्चतुरस्रेण वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति। ऋक् तु महागणपतेर्यन्त्रे लिखिता, ऋच ऋष्यादय: सकक्ष इन्द्रो गायत्रीति।। श्रीयन्त्रसारे–

षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि। ओंश्रींह्रींक्लींग्लौंगमिति गणपतये च तद्बहि:।। १।।
शिष्टांश्चतुष्पञ्चसप्तवर्णांश्चापि चतुर्दले। बाह्ये संवादसूक्तस्याप्यर्धमर्धमृचां क्रमात्।। २।।
आलिख्य चाष्टपत्रेषु त्रिष्टुभावेष्ट्य तद्बहि:। मातृकार्णैश्च भूबिम्बकोणेषु च यथाक्रमम्।। ३।।
आलिखेद्भद्र इत्यादि पादमन्त्रचतुष्टयम्। एतत्संवादसूक्तस्य यन्त्रं लोकेषु दुर्लभम्।। ४।।
सङ्घातभेदेऽमात्यानां मैत्रीकरणमुत्तमम्। जगत्सम्मोहनं वश्यं कान्तिसौभाग्यपुष्टिदम्।। ५।।

इति। अस्यार्थ:– चतुर्दलकमलकर्णिकायां षट्कोणमध्ये ससाध्यं प्रणवं विलिख्य, तत्कोणेषु प्रोक्तबीजषट्मालिख्य, चतुर्दलेषु प्रथमे ''गणपतये'' इति, द्वितीये ''वरवरद'' इति, तृतीये ''सर्वजनं मे'' इति, चतुर्थे ''वशमानय स्वाहा'' इति विलिख्य, तद्बहिरष्टदलेषु वक्ष्यमाणसंवादसूक्तस्य ऋचामर्धमर्धं विलिख्य, तद्बहिर्वृत्तत्रयान्त:स्थान्तरालद्वयस्याभ्यन्तरान्तराले वक्ष्यमाणत्रिष्टुभावेष्ट्य, बहि:स्थान्तराले मातृकार्णैरावेष्ट्य, तद्बहिश्चतुरस्रकोणेषु ''भद्रं नो अभिवातय् मन:, मरुतामोजसे स्वाहा, इन्द्रो विश्वस्य राजति, शन्नो भव द्विपदे शं चतुष्पदे'' इति पादमन्त्रचतुष्टयं लिखेत्। एतदुक्तफलदं भवति।।

सं समिद्युवसे वृषन्नग्ने विश्वन्यर्य आ। इळस्पदे समिध्यसे स नो वसून्या भर।। १।।
सं गच्छध्वं सं वदध्वं सं वो मनांसि जानतां। देवा भागं यथा पूर्वे संजानाना उपासते।। २।।
समानो मन्त्र: समिति: समानी समानं मन: सह चित्तमेषां।
समानं मन्त्रमभि मन्त्रये व: समानेन वो हविषा जुहोमि।। ३।।

समानी च आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति।। ४।।

इति ऋग्वेदोक्तं (१०।१९१।१) संवादसूक्तम्। ओंजातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः।। इति त्रिष्टुप्मन्त्रः। संसमिदित्यस्य संवनन ऋषिः, संज्ञानं देवता, तिस्रोऽनुष्टुभः तृतीया त्रिष्टुप्, आद्या आग्नेयी।। सारसङ्ग्रहे–

ध्यानं प्रवक्ष्ये ह्यथ कामनाया भेदेन भिन्नं बहुधातिरम्यम्।
भिन्नाञ्जनाद्रिप्रभदेहकान्तिं सुमेरुसन्मन्दरतुल्यसारम् ।। १।।
नानामणिव्रातविभूषिताङ्गं रत्नोल्लसद्दिव्यकिरीटयुक्तम्।
भीमं महान्तं[1] नयनत्रयाढ्यं कर्णद्वयोल्लासिसुचामरं च।। २।।
लम्बोष्ठमुद्यद्वरनागयज्ञोपवीतिनं चैकरदं गजास्यम् ।
सत्काञ्चनोद्यत्कटिसूत्रयुक्तं रक्तांशुकं लोहितपुष्पभूषम्।। ३।।
पद्माङ्कुशौ पाशरदे च शक्तिं गदां वरं चाब्जमथेक्षुदण्डम्।
शालेस्तथाग्रं दधतं कराग्रे पद्मासनस्थं हृदि भावयेत्तम्।। ४।।
बाणं तथैवाक्षयबाणधन्वकमण्डलूनू मोदकपात्रशक्ती।
सत्तोमरं पाशमथेक्षुदण्डं सृणिं कराब्जैर्दधतं भजेत् तम्।। ५।।
सदाखिलोपद्रवनाशकारि ध्यानं गणेशस्य समीरितं हि।
पीतं स्मरेत् स्तम्भनकार्य एनं वश्याय मन्त्री ह्यरुणं स्मरेत् तम्।। ६।।
कृष्णं स्मरेन्मारणकर्मणीशमुच्चाटने धूम्रनिभं स्मरेत् तम्।
बन्धूकसूनाभनिभं च कृष्टौ स्मरेद्बलार्थं किल पुष्टिकार्ये।। ७।।
स्मरेद्धनार्थी च हरिन्निभं तं मुक्त्यै च शुक्लं मनुवित् स्मरेत् तम्।
एवं प्रकारेण गणं त्रिकालं ध्यायञ्जपन् सिद्धियुतो भवेत् सः।। ९।।

इति।। अथ काम्यतर्पणविधिस्तत्रैव–

पूर्वं मनुं विंशतिधा गणेशं प्रतर्प्य वर्णानिह ठद्वयान्तान्।
प्रतर्पयेद्वारचतुष्टयं च प्रत्येकशो मूलमनुं च तद्वत्।। १।।
युग्मानि विघ्नान् निधिसंयुतान् षट् प्रतर्पयेच्छक्तियुतान् पृथक् च।
पुरोक्तवन्मूलमनुं चतुर्धा प्रतर्पयेन्मन्त्रिवरो यथावत्।। २।।

यथावदित्यनेन मिथुनचतुष्टयषड्गणेशनिधिद्वयानां स्वस्वबीजादित्वं सूचितम्। तदुक्तं गणेश्वरपरामर्शिन्याम्–

मिथुनानि च षड् विघ्नात् शङ्खपद्मनिधी अपि। स्वस्वबीजादिकैर्मन्त्री स्वाहान्तैश्च चतुर्विधैः।। १।।

इति। तथा–

---

[1] 'महोग्रं' ख. पाठः।

सचतुश्चत्वारिंशच्चतु:शतानि तर्पणानि चैवं स्यु:।
अथवा प्रकारभेदात् तर्पणमेतत् प्रवक्ष्येऽहम्।। २।।
मूलाणुना च दशधा विभक्तेनाथ तर्पयेत्। प्रत्येकं मूलमन्त्रेण चतुरावृत्ति तर्पयेत्।। ३।।
तत्र ताररमायामारभूविघ्नबीजकै: । शरेषुदशयुग्मैश्च मन्त्रार्णैस्तर्पयेत् क्रमात् ।। ४।।

शरा: पञ्च, इषव: पञ्च, युग्मं द्वयम्।

अशीतिप्रमितान्येव तर्पणानि भवन्ति च। एकादशभिरप्यत्र बीजपूरादिभि: क्रमात्।। ५।।
कलाशान्तैश्चतुर्धा च मूलेनापि तथा सुधी:। विघ्नभूमारमायाश्रीबीजानि व्युत्क्रमाणि च।। ६।।
समस्तान्येतदन्तैश्च बीजपूरै: प्रतर्पयेत्। अष्टाशीतिमितान्येवं जायन्ते तर्पणान्यथ।। ७।।

अथ बीजापूरादिमन्त्रेषु विशेषमाह, गणेश्वरपरामर्शिन्याम्—

बीजपूरं गदा चेक्षुकार्मुकं च त्रिशूलयुक्। चक्राब्जपाशोत्पलानि कलमाग्रविषाणयुक् ।। १।।
डेन्ताश्च रत्नकलशो हृदन्ता: प्रणवादिका:। गंबीजाद्यादिका: पञ्च श्रीबीजाद्यादिका: पुन:।। २।।
षड्बीजाद्योऽन्तिमश्चैते वक्ष्यमाणपदादिका:। यथाक्रमं महाविघ्नायुधानां मनव: स्मृता:।। ३।।
मन्त्रफलं स्याच्छक्ति: सप्राणत्रिगुणकालचक्रमिति।
व्याप्तिरक्ते भूस्वरूपं विद्या त्रैलोक्यमात्मने—युक्तम्।। ४।।

गंओंमन्त्रफलान्मने बीजपूराय नम: इत्याद्या: प्रयोगे प्रदर्शयितव्या:।

षड्बीजाद्यैर्गणपतेत्यादिमन्त्रादिकै: क्रमात्। दशविघ्नैश्चतुर्वारं मूलेनापि च तर्पयेत्।। ५।।
विघ्नो विनायको वीर: शूरो वरद एव च। इभवक्त्रश्चैकदन्तो लम्बोदरगणस्तथा।। ६।।
क्षिप्रप्रसादनश्चैव महागणपतिस्तथा। तर्पणानि तथाशीतिमितान्येव भवन्ति हि।। ७।।
चत्वारि मिथुनान्यत्र तानि शक्त्यादिकानि च। स्वविनायकबीजादिकानि सन्तर्प्य मन्त्रवित्।। ८।।
मूलाणुना चतुर्वारं मध्ये सन्तर्पयेत् क्रमात्। चतुष्षष्टिमितान्येवं जायन्ते तर्पणान्यथ।। ९।।
आमोदादीन् स्वशक्त्यन्तान् शक्त्याद्यांश्च प्रतर्पयेत्। विघ्नेशबीजप्रथमं चतुर्मूलाणुना चतु:।।१०।।
तर्पयेत् षण्णवत्येवं तर्पणानि भवन्त्यथ। शक्त्यादिकान् स्वशक्त्यन्तनिधिद्वयमथो चतु:।। ११।।
तर्पयेच्च चतुर्मूलं द्वात्रिंशत्प्रमितानि च। तर्पणानि भवन्त्येवं ततो मूलाणुना चतु:।। १२।।
तर्पयत् सचतुश्चत्वारिंशच्चाथ चतु:शतम्। तर्पणानि भवन्त्येभि: सर्वान् कामान् प्रसाधयेत्।।१३।।

इति।। अथ तर्पणप्रयोग:—तत्र प्रथमं श्रीगणेश्वरपरामर्शिन्युक्तपरिपाट्या तर्पणस्थाने तत्र देवं च ध्यात्वा तर्पणारम्भं कुर्यात्। तद्यथा—

सर्वाभीष्टप्रदं वक्ष्ये चतुरावृत्ति तर्पणम्। एकान्ते विजने रम्ये सर्वोपद्रववर्जिते।। १।।
कृतस्नानादिको मन्त्री पूर्ववन्न्याससंयुत:। तडागमध्ये सञ्चिन्त्य पुष्पितं नलिनीवनम्।। २।।
तस्य मध्ये महापद्मं तरुणादित्यसन्निभम्। समुन्नतं सुगन्धाढ्यं रमणीयं मनोहरम्।। ३।।

सद्यो विकसितं ध्यायेन्मन्त्री पूर्वोक्तमन्त्रवित्। शुद्धं रजतसोपानपङ्क्त्या तं रविमण्डलात्।। ४।।
विनिर्गत्यावरुह्याथ कर्णिकामध्यसंस्थितम्। इति ध्यात्वा सावरणं महागणपतिं सुधीः।। ५।।
प्रवरैर्गन्धकुसुमैः समभ्यर्च्याथ पूर्ववत्। निधाय पुष्करमुखं साधकेन्द्रस्य मूर्धनि।। ६।।
वर्षन्तं रत्नधाराभिर्ध्यात्वा देवस्य मूर्धनि। चन्द्रचन्दनकाश्मीरकस्तूरीलोलितैर्जलैः।। ७।।
तर्पयेत् परया भक्त्या देवदेवं प्रसन्नधीः।...।।

इत्येवं ध्यायन् मूलमन्त्रमुच्चार्य्य ''श्रीमहागणपतिं तर्पयामि'' इति देवस्य मूर्ध्नि विंशतिवारं सन्तर्प्य, ४ मू० ४ ॐ तर्पयामि स्वाहा। ४ मू० ४ श्रीं तर्पयामि स्वाहा। ४ मू० ४ ह्रीं तर्पयामि स्वाहा। ४ मू० ४ क्लीं तर्पयामि०। ४ मू० ४ ग्लौं तर्पयामि०। ४ मू० ४ गं तर्पयामि०। ४ मू० ४ गं तर्पयामि०। ४ मू० ४ णं तर्पयामि०। ४ मू० ४ पं तर्पयामि०। ४ मू० ४ तं तर्पयामि०। ४ मू० ४ यें तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ रं तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ रं तर्पयामि०। ४ मू० ४ दं तर्पयामि०। ४ मू० ४ सं तर्पयामि०। ४ मू० ४ वैं तर्पयामि नमः। ४ मू० ४ जं तर्पयामि०। ४ मू० ४ नं तर्पयामि०। ४ मू० ४ में तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ शं तर्पयामि०। ४ मू० ४ मां तर्पयामि०। ४ मू० ४ नं तर्पयामि०। ४ मू० ४ यं तर्पयामि०। ४ मू० ४ स्वां तर्पयामि०। ४ मू० ४ हां तर्पयामि स्वाहा। ४ मू० ४ श्रीं नारायणसहितां लक्ष्मीं तर्पयामि स्वाहा। ४ मू० ४ श्रीं लक्ष्मीसहितं नारायणं तर्पयामि०। ४ मू० ४ ह्रीं हरसहितां गौरीं तर्पयामि०। ४ मू० ४ ह्रीं गौरीसहितं हरं तर्पयामि०। ४ मू० ४ क्लीं कामदेवसहितां रतिं तर्पयामि०। ४ मू० ४ क्लीं रतिसहितं कामदेव तर्पयामि०। ४ मू० ४ ग्लौं वराहसहितां महीं तर्पयामि०। ४ मू० ४ ग्लौं महीसहितं वराहं तर्पयामि०। ४ मू० ४ गं आमोदसहितां सिद्धिं तर्पयामि०। ४ मू० ४ गं सिद्धिसहितं आमोदं तर्पयामि०। ४ मू० ४ गं प्रमोदसहितां समृद्धिं तर्पयामि०। ४ मू० ४ गं समृद्धिसहितं प्रमोदं तर्पयामि०। ४ मू० ४ गं सुमुखसहितां कान्तिं तर्पयामि०। ४ मू० ४ गं कान्तिसहितं सुमुखं तर्पयामि०। ४ मू० ४ गं दुर्मुखसहितां मदनावतीं तर्पयामि०। ४ मू० ४ गं मदनावतीसहितं दुर्मुखं तर्पयामि०। ४ मू० ४ गं विघ्नसहितां मदद्रवां तर्पयामि०। ४ मू० ४ गं मदद्रवासहितं विघ्नं तर्पयामि०। ४ मू० ४ गं विघ्नकर्तृसहितां द्राविणीं तर्पयामि०। ४ मू० ४ गं द्राविणीसहितं विघ्नकर्तारं तर्पयामि०। ४ मू० ४ शं शङ्खनिधिसहितां वसुधारां तर्पयामि०। ४ मू० ४ शं वसुधारासहितं शङ्खनिधिं तर्पयामि०। ४ मू० ४ पं पद्मनिधिसहितां वसुमतीं तर्पयामि०। ४ मू० ४ पं वसुमतीसहितं पद्मनिधिं तर्पयामि स्वाहा।। ४ मू० ४ ॐ तर्पयामि स्वाहा। ४ मू० ४ श्रीं तर्प०। ४ मू० ४ ह्रीं तर्पयामि०। ४ मू० ४ क्लीं तर्पयामि०। ४ मू० ४ ग्लौं तर्पयामि०। ४ मू० ४ गं तर्पयामि०। ४ मू० ४ गं तर्पयामि०। ४ मू० ४ णं तर्पयामि०। ४ मू० ४ पं तर्पयामि०। ४ मू० ४ तं तर्पयामि०। ४ मू० ४ यें तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ रं तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ रं तर्पयामि०। ४ मू० ४ दं तर्पयामि०। ४ मू० ४ सं तर्पयामि०। ४ मू० ४ वैं तर्पयामि०। ४ मू० ४ जं तर्पयामि०। ४ मू० ४ नं तर्पयामि०। ४ मू० ४ में तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ शं तर्पयामि०। ४ मू० ४ मां तर्पयामि०। ४ मू० ४ नं तर्पयामि०। ४ मू० ४ यं तर्पयामि०। ४ मू० ४ स्वां तर्पयामि०। ४ मू० ४ हां तर्पयामि स्वाहा।। एवं ८०।। ४

मू० ४ गंउों मन्त्रफलात्मने बीजपूराय नमः बीजपूरं तर्पयामि स्वाहा।। ४ मू० ४ ग्लौंउों शक्त्यात्मने गदायै नमो गदां तर्पयामि०। ४ मू० ४ क्लींउों प्राणात्मने इक्षुकार्मुकाय नमः इक्षुकार्मुकं तर्पयामि०। ४ मू० ४ ह्रींउों त्रिगुणात्मने त्रिशूलाय नमः त्रिशूलं तर्पयामि०। ४ मू० ४ श्रींउों कालात्मने चक्राय नमः चक्रं तर्पयामि०। ४ मू० ४ श्रींउों चक्रात्मने अब्जाय नमः अब्जं तर्पयामि०। ४ मू० ४ ह्रींउों व्याप्त्यात्मने पाशाय नमः पाशं तर्पयामि०। ४ मू० ४ क्लींउों रक्तात्मने उत्पलाय नम उत्पलं तर्पयामि०। ४ मू० ४ ग्लौंउों भुवनात्मने कलमाग्राय नमः कलमाग्रं तर्पयामि०। ४ मू० ४ गंउों विद्यात्मने विषाणाय नमः विषाणं तर्पयामि०। ४ मू० ४ उोंश्रींह्रींक्लींग्लौंगं उोंत्रैलोक्यात्मने रत्नकलशाय नमो रत्नकलशं तर्पयामि०। एवं ८८।। ४ मू० ४ उोंश्रींह्रींक्लींग्लौंगं विघ्नगणपतये वरवरद इत्यादि०। ४ मू० ४ ६ँ विनायकगणपतये इत्यादि०। ४ मू० ४ ६ँ वीरगणपतये इत्यादि०। ४ मू० ४ ६ँ शूरगणपतये इत्यादि०। ४ मू० ४ ६ँ वरदगणपतये इत्यादि०। ४ मू० ४ ६ँ इभवक्त्रगणपतये इत्यादि०। ४ मू० ४ ६ँ इकदन्तगणपतये इत्यादि०। ४ मू० ४ ६ँ लम्बोदरगणतये इत्यादि०। ४ मू० ४ ६ँ क्षिप्रप्रसादगणतये इत्यादि०। ४ मू० ४ ६ँ महागणपतिगणपतये इत्यादि०। एवं ८०।। ४ मू० ४ श्रींगं लक्ष्मीसहितं नारायणं तर्पयामि०। ४ मू० ४ गंश्रीं नारायणसहितां लक्ष्मीं तर्पयामि०। ४ मू० ४ ह्रींगं गौरीसहितं हरं तर्पयामि०। ४ मू० ४ गंह्रीं हरसहितां गौरीं तर्पयामि०। ४ मू० ४ क्लींगं रतिसंहितं कामं तर्पयामि०। ४ मू० ४ गंक्लीं कामसहितां रतिं तर्पयामि०। ४ मू० ४ ग्लौंगं महीसहितं वराहं तर्पयामि०। ४ मू० ४ गंक्लीं वराहसहितां महीं तर्पयामि०। एवं ६४।। ४ मू० ४ श्रींगं सिद्धिसहितमामोदं तर्पयामि०। ४ मू० ४ गंश्रीं आमोदसहितां सिद्धिं तर्पयामि०। ४ मू० ४ श्रींगं समृद्धिसहितं प्रमोदं तर्पयामि०। ४ मू० ४ गंश्रीं प्रमोदसहितां समृद्धिं तर्पयामि०। ४ मू० ४ श्रींगं कान्तिसहितं सुमुखं तर्पयामि०। ४ मू० ४ गंश्रीं सुमुखसहितां कान्तिं तर्पयामि०। ४ मू० ४ क्लींगं मदनावतीसहितं दुर्मुखं तर्प०। ४ मू० ४ गंक्लीं दुर्मुखहितां मदनावतीं तर्प०। ४ मू० ४ क्लींगं मदद्रवासहितं विघ्नं तर्प०। ४ मू० ४ गंक्लीं विघ्नसहितां मदद्रवां तर्प०। ४ मू० ४ क्लींगं द्राविणीसहितं विघ्नकर्तारं तर्प०। ४ मू० ४ गंक्लीं विघ्नकर्तृसहितां द्राविणीं तर्प०। एवं ९६।। ४ मू० ४ ह्रींगं वसुधारासहितं शङ्खनिधिं तर्पयामि०। ४ मू० ४ गंह्रीं शङ्खनिधिसहितां वसुधारां तर्प०। ४ मू० ४ ग्लौंगं वसुमतीसहित पद्मनिधिं तर्प०। ४ मू० ४ गंग्लौं पद्मनिधिसहितां वसमुतीं तर्प०। एवं ३२।। ततः ४ मू० ४। एवं सम्भूय ४४४।। प्रकारान्तरं तु गणेश्वरपरामर्शिन्याम्—

प्रथमं मूलमन्त्रेण चतुर्वारं प्रतर्प्य च। मिथुनानि च षड् विघ्नान् शङ्खपद्मनिधी अपि।। १।।
स्वस्वबीजादिकैर्मन्त्री स्वाहान्तैश्च चतुश्चतुः। मूलमन्त्रं चतुर्वारं पूर्ववत् तर्पयेत् पृथक्।। २।।
सम्भूयाष्टोत्तरशतं कनिष्ठः स्यादयं क्रमः। अथवा मूलमन्त्राद्यैस्तैस्तैरेतैश्च पूर्ववत्।। ३।।
मन्त्रैर्वा तर्पयेद्विद्वानर्चनोक्तविधानतः। मध्यक्रमोऽयं सम्भूय द्विशतं षोडशोत्तरम्।। ४।।
अथवा मूलमन्त्रेण चतुर्वारं प्रतर्प्य च। पूर्वमन्त्राक्षरैर्मन्त्रैः स्वाहान्तैश्च चतुश्चतुः।। ५।।
मूलमन्त्रचतुर्वारपूर्वकं सम्प्रतर्प्य च। मिथुनादींस्ततः पश्चात् पूर्ववत् सम्प्रतर्पयेत्।। ६।।
भवेत् सम्भूय सचतुश्चत्वारिंशच्चतुश्शतम्। एवं[१] ज्येष्ठक्रमः प्रोक्तो बुधैरागमपारगैः।। ७।।

---

१. 'सर्व' ख. पाठः।

एवं सन्तोष्य तत्पश्चात् पूर्ववत् सोपचारकैः। सर्वाभीष्टं च सम्प्रार्थ्य प्रणम्योद्वासयेद् सुधीः।। ८।।
य एवं तर्पयेन्नित्यं मण्डलात् स फलं लभेत्। अनावृष्ट्यां भये घोरे राजचोराद्युपद्रवे।। ९।।
महत्तरे विवादे च महादारिद्र्यसङ्कटे। विवाहादिषु कार्येषु सर्वेषु च विशेषतः।। १०।।
एवं वै तर्पणं कुर्यात् मानवेन्द्रः प्रसन्नधीः। महागणेश्वरः प्रीतो महासम्पत्करो भवेत्।। ११।।

इति।। अथ प्रयोगः— ४ मू० ४ महागणपतिं तर्पयामि स्वाहा। ४ मू० ४ पुष्टिं तर्प०। ४ मू० ४ श्रीं लक्ष्मीनारायणौ तर्प०। ४ मू० ४ ह्रीं गौरीहरौ तर्प०। ४ मू० ४ क्लीं रतिकन्दर्पौ तर्प०। ४ मू० ४ ग्लौं महीवराहौ तर्प०। ४ मू० ४ गं लक्ष्मीगणनायकौ तर्प०। ४ मू० ४ गं आमोदसिद्धी तर्प०। ४ मू० ४ गं प्रमोदसमृद्धी तर्प०। ४ मू० ४ गं सुमुखकान्ती तर्प०। ४ मू० ४ गं दुर्मुखमदनावत्यौ तर्प०। ४ मू० ४ गं विघ्नमदद्रवे तर्प०। ४ मू० ४ गं विघ्नकर्तृद्राविण्यौ०। ४ मू० ४ शं शङ्खनिधिवसुधारे०। ४ मू० ४ पं पद्मनिधिवसुमत्यौ तर्प०। ४ मू० ४। एवं १२४।। इत्ययं कनिष्ठक्रमः।। ४ मू० ४ श्रीं नारायणसहितां लक्ष्मीं तर्प०। ४ मू० ४ श्रीं लक्ष्मीसहितं नारायणं तर्प०। एवं मिथुनानि पञ्च, अमोदादिषट्, निधिद्वयं, तेषां त्रयोदशमिथुनान्तानां तर्पणसंख्याष्टोत्तरशतद्वयम्। आद्यन्तयोर्मूलेन चतुश्चतुः। एवं सम्भूय षोडशाधिकद्विशतमिति मध्यमप्रकारः।। आदौ मूलेन। ४ मू० ४ ॐ तर्पयामि स्वाहा। ४ मू० ४ श्रीं तर्पयामि०। ४ मू० ४ ह्रीं तर्प०। ४ मू० ४ क्लीं तर्प०। ४ मू० ४ ग्लौं तर्प०। ४ मू० ४ गं तर्प०। ४ मू० ४ गं तर्प०। ४ मू० ४ णं तर्प०। ४ मू० ४ पं तर्प०। ४ मू० ४ तं तर्प०। ४ मू० ४ यें तर्प०। ४ मू० ४ वं तर्प०। ४ मू० ४ रं तर्प०। ४ मू० ४ वं तर्प०। ४ मू० ४ रं तर्प०। ४ मू० ४ दं तर्प०। ४ मू० ४ सं तर्प०। ४ मू० ४ वँ तर्प०। ४ मू० ४ जं तर्प०। ४ मू० ४ नं तर्प०। ४ मू० ४ में तर्प०। ४ मू० ४ वं तर्प०। ४ मू० ४ शं तर्प०। ४ मू० ४ मां तर्प०। ४ मू० ४ नं तर्प०। ४ मू० ४ यं तर्प०। ४ मू० ४ स्वां तर्प०। ४ मू० ४ हां तर्पयामि०।। एवं सम्भूयाष्टाविंशत्यधिकशतद्वयसंख्यं तर्पयित्वा पुनर्मध्यप्रकारोक्तषोडशोत्तरशंतद्वयं तर्पयेत्। तेन सम्भूय चतुश्चत्वारिंशदधिकचतुःशतं तर्पणानि भवन्ति, इत्युत्तमप्रकारः। इति काम्यतर्पणविधिः।।

अथ श्रीमहागणपतेरङ्गविशेषे तु द्रव्यविशेषैस्तर्पणात् फलविशेषानाह सारसङ्ग्रहे—

शुण्डाकराग्रे गणपं जलेन प्रतपर्यन्मुक्तिफलाय मन्त्री।
तथेन्दिराकामनया गणेशं प्रतर्पयेन्मूर्ध्नि पयोभिरत्र।। १।।
गुह्यप्रदेशे मधुना गणेशं प्रतर्पयेत् कामफलाय विद्वान्।
आकृष्टिवश्यादिनिमित्तमत्र प्रतर्पयेत्तं मधुभिश्च नेत्रे।। २।।
भूपालवश्याय महागणेशं प्रतर्पयेच्चारु घृतेन पृष्ठे।
ऊरुस्थले तैलसुतर्पणं च महागणेशप्रियमेतदुक्तम्।। ३।।
एरण्डतैलेन तथास्य रण्डावश्याय नाभौ किल तर्पणं स्यात्।
स्कन्धप्रदेशेऽस्य पयःपयोभिः प्रतर्पणं प्रीतिविवर्धनाय ।। ४।।
क्षीरेण दध्ना मधुनास्य तुण्डे प्रतर्पणं धर्म[1]विवृद्धिकृत् स्यात्।
एवं परिज्ञाय समस्तमेतत् कुर्यात् प्रयोगान् विधिना मनुज्ञः।। ५।।

---

१. 'पुत्रं' ख. पाठः।

एवं मन्त्रीं य एवं गणपमनुवरं ह्यर्चनातर्पणाद्यै-
र्होमैर्जपैश्च सम्यक् प्रभजति विधिना प्राप्नुयात् सोऽत्र लोके।
नानार्थानस्य भूपो भवति च वशगो मोहयेत् सर्वलोकान्
भुक्त्वा भोगान् यथेष्टं व्रजति विमलां मुक्तिमन्ते दुरापाम्।। ६।।

इति।। सारसङ्ग्रहे—मन्त्रान्तरम्।

वक्रेत्युक्त्वा च तुण्डैकदंष्ट्राय तदनन्तरम्। कामशक्तीन्दिराविघ्नबीजानि प्रवदेत् ततः।। १।।
वदेद् गणपतिं पश्चाद्वरान्ते वरदं पदम्। ततः सर्वजनं मेऽन्ते वशमानय ठद्वयम्।। २।।
त्रैलोक्यमोहनो मन्त्रो गणेशस्येष्टदः शुभः। ....।।

इति। वक्र स्वरूपं। तुण्डैकदंष्ट्राय स्वरूपं। मे स्वरूपं। वशमानय स्वरूपं। ठद्वयं स्वाहा। त्रयस्त्रिंशदक्षरोऽयं मन्त्रः।। तथा—

ऋषिस्तु गणकः प्रोक्तो गायत्रं छन्द ईरितम्। त्रैलोक्यमोहनो विघ्नो देवता परिकीर्तितः।। ३।।
हृदेकादशिभिः प्रोक्तं पञ्चभिः शिर ईरितम्। भूतार्णैश्च शिखा प्रोक्ता चतुर्भिः कवचं मतम्।। ४।।
नेत्रं षड्भिः समाख्यातं द्वाभ्यामस्त्रमुदीरितम्। ध्यानपूजादिकं सर्वं महाविघ्नेशवद्भवेत्।। ५।।

वर्णैरिति ज्ञेयः। ध्यानम्—

त्रैलोक्यमोहनगणेशमिमं यथावदभ्यर्चनाजपहुतिस्तुतितर्पणाद्यैः।
[१]सम्पूजयेद्य इह साधकसत्तमोऽसौ लोकेऽखिले भवति पूज्यतमोऽमराणाम्।। ६।।

इति।। अथ प्रयोगः— योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये त्रैलोक्यमोहनाय गणतपये देवतायै नमः। इति ऋष्यादिकं विन्यस्य ममाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, वक्रतुण्डैकदंष्ट्राय क्लींह्रींश्रीं हृदयाय नमः। गं गणपतये शिरसे०। वरवरद शिखायै०। सर्वजनं कवचाय०। मे वशमानय नेत्रेभ्यो०। स्वाहा अस्त्राय०। इति मन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य, हृदयादिषडङ्गेष्वपि विन्यस्य ध्यानपूजादिकं सर्वं महागणपतिवत् कुर्यादिति।। सारसङ्ग्रहे—मन्त्रान्तरम्।

शक्तिरुद्धा स्मृतिः प्रोक्ता चन्द्रखण्डेन संयुता। महागणान्ते पतये स्वाहान्तो द्वादशाक्षरः।। १।।

स्मृतिर्गकारः। चन्द्रखण्डेन संयुता बिन्दुयक्ता। शक्तिरुद्धा भुवनेशीबीजसम्पुटिता। अन्यत्सुगमम्।। तथा—

ऋषिर्गणक आख्यातो गायत्री निचृदन्विता। छन्दः शक्तिगणेशोऽत्र देवता सर्वकामदः।। २।।
एकेनैकेन चैकेन सप्तभिर्द्वितयेन च। समस्तेन च मन्त्रार्णैरङ्गक्लृप्तिरिहोदिता।। ३।।

मुक्ताचन्द्रो[२]त्थदीप्तिं शशिशकलधरं भालनेत्रं मनोज्ञं
हस्ताम्भोजैर्दधानं सरसिरुहसृणी रत्नपात्रं विशालम्।
स्वीयक्रीडस्थिताया ध्वजनिहितलसच्चारुपाणेः प्रियाया
योनौ विन्यस्तहस्तं मणिगणमुकुटं संश्रयेन्नागवक्त्रम्।। ४।।

---

१. 'सन्तोषयेत्' ख. पाठः। २. 'चन्द्रौघ' ख. पाठः।

दक्षाधःकरमारभ्य वामाधःकरपर्यन्तं सरसिजादिकध्यानम्।

एवं सञ्चिन्त्य विधिवत् साधकः सर्वसिद्धये। यजेत् पूर्वोदिते पीठे विरिविघ्नेशवर्त्मना।। ५।।

इति।। अथ प्रयोगः—मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे निचृद्गायत्रीच्छन्दसे नमः। हृदये श्रीशक्तिगणेशाय देवतायै नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, आद्यवर्णेन हृदयं, द्वितीयेन शिरः, तृतीयेन शिखा, सप्तभिः कवचं, द्वाभ्यां नेत्रं, समस्तमन्त्रेणास्त्रमिति मूलमन्त्रार्णैः करषडङ्गन्यासं विधाय ध्यानादिसर्वं विरिविघ्नेशवत् कुर्यादिति।। तथा—

दशायुतं जपेन्मन्त्रमयुतं जुहुयात् ततः। अपूपैर्घृतसंयुक्तैर्विधिवत् पूजितेऽनले ।। ६।।
तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत् ततः। एवं सिद्धमनुर्मन्त्री प्रयोगान् विधिवच्चरेत्।। ७।।
इक्षुदुण्डैः कृतो होमो राज्यलक्ष्मीं प्रयच्छति। कदलैर्नारिकेलैश्च होमो लोकवशङ्करः ।। ८।।
ससितैः पृथुकैर्होमो राजानं वशमानयेत्। सक्तुभिश्च कृतो होमो ब्राह्मणानां वशङ्करः।। ९।।
सर्पिषा जुहुयात् सम्यग् धनधान्यादिसम्पदः।..।।

इति।। सारसङ्ग्रहे—मन्त्रान्तरम्।

प्रणवो मायया रुद्धबीजं च वशमानय। ठद्वयान्तो मनुः प्रोक्तः सम्यगेकादशाक्षरः।। १।।

मायया रुद्धबीजं भुवनेशीबीजद्वयमध्यस्थं गणेशबीजं। ठद्वयं स्वाहाकारः। तथा—

पूर्वोदितास्तु मुन्याद्या मन्त्रार्णैरङ्गकल्पनम्। हृदयं प्रणवेनाथ शिरो मायापुटेन च।। २।।
स्वबीजेन शिखा प्रोक्ता वशंशब्देन चानय। अनेन कवचं नेत्रं स्वाहाशब्देन मन्त्रिभिः।। ३।।
समग्रेणास्त्रमाख्यातं सर्वागमविशारदैः। ....।।

बन्धूकाभं त्रिनेत्रं शशधरमुकुटं भोगलोलं गणेशं
नागास्थं धारयन्तं गुणसृणिवरदानिक्षुदण्डं कराग्रैः।
शुण्डासंस्पृष्टयोषामदनगृहममुं श्यामलाङ्ग्या तयापि
श्लिष्टं लिङ्गस्पृशा तं विधृतकमलया भावयेद् देववन्द्यम्।। ४।।

(वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्। पूर्वोक्ते पीठे पूर्वोक्ता पूजा कार्या।) अत्र प्रयोगः सुगमः। मुन्यादयस्तु द्वादशाक्षरोक्ताः। तथा—

लक्षत्रयं जपेन्मन्त्रमपूपैस्तद्दशांशतः । घृताप्लुतैस्तु जुहुयात् तर्पणादि ततश्चरेत्।। ४।।
ततो निजगुरुं नत्वा धनधान्यैश्च तोषयेत्। ततः काम्यप्रयोगांश्च तत्कल्पोक्तान् प्रसाधयेत्।। ५।।
स्वादुत्रयप्लुतापूपैर्होमो राजवशङ्करः । नारिकेलफलैर्होमो राज्यश्रीवृद्धिदः परः ।। ६।।
त्रिस्वादुसंयुतैर्लोणैर्होमः कान्तावशङ्करः।

इति।। सारसङ्ग्रहे—मन्त्रान्तरम्।

अथो वच्मि महामन्त्रं हरिद्रागणपस्य तु। जगत्त्रयहितं भोगमोक्षदं कविताकरम्*।। १।।

---

*हरिद्रागणेश—सुब्रह्मण्यगणेश—हेरम्ब—क्षिप्रप्रसादन—शक्तिगणेश—लक्ष्मीगणेशा—एते मन्त्रा दक्षिणाम्नायोक्ता बोद्धव्याः।।

नानामन्त्रगणस्याशु सिद्धिदं भुवि दुर्लभम्। गरिष्ठं सफलं चाथ कार्यमात्रप्रसाधने।। २।।
गोपनीयं प्रयत्नेन वाञ्छितार्थसुरद्रुमम्। सौभाग्यपुष्टिलक्ष्मीदं दीर्घजीवित्वदं नृणाम्।। ३।।
नरनारीनरेन्द्राणां परं वश्यफलप्रदम् । विघ्नौघध्वसने दक्षं कृत्याद्रोहनिवारणम् ।। ४।।
दैत्यगीर्वाणसङ्घानां नागगन्धर्वरक्षसाम्। दन्तिनामश्वमुख्यानां श्वापदानां च पक्षिणाम्।। ५।।
स्वान्तसम्मोहनं सम्यक् प्राणाकृष्टिकरं क्षणात्। रोधकं राजसैन्यस्य वायुवर्षणविद्युताम्।। ६।।
कृशानुजलशस्त्राणां स्तम्भकं परमं मतम्। वादिनां जन्तुजातानां वाचां संस्तम्भनं द्विषाम्।। ७।।
सिंहेहामृगनागानां गमनस्तम्भकारकम्। भूषस्य मन्त्रिण: शत्रो: क्रोधस्तम्भकरं हठात्।। ८।।
तरुणीनां कुमारीणां हृदयस्तम्भनं महत्। स्निग्धानामपि शत्रूणां विद्वेषकरणक्षमम् ।। ९।।
उन्मादोच्चाटने शत्रोर्मारणे च्छेदने क्षमम्। बहुप्रयोगसंयुक्तं यन्त्रभेद[1]समन्वितम् ।। १०।।

तार: क्रोधसमन्वितं च खपरं चन्द्रार्धचूडं धरा-
सद्बीजं हरि दाग्निविष्णुशयनान्याभाष्य पश्चाद्गणम्।
संब्रूयात् पतये वरश्च वरदं सर्वाज्जनान्ते हृद-
यं च स्तम्भययुग्ममग्निगृहिणी द्वात्रिंशदर्णो मनु:।। १।।

तार प्रणव:। क्रोधो हूं। खपरं ग, चन्द्रार्धचूडं बिन्दुयुक्तं। धारा ग्लौं। हरि स्वरूपं, दाग्निविष्णुशयनानि द्रा इति। गणपतये स्वरूपं। वरवरद स्वरूपं। सर्वजन स्वरूपं। हृदयं स्वरूपं। स्तम्भयगुम्मं स्तम्भय स्तम्भय इति। आग्निगृहिणी स्वाहा। तथा–

सेवितो मनुसङ्घातैरुद्धृत: सर्वकामद:। मुनिर्मदन आख्यातश्छन्दोऽनुष्टप् समीरितम्।। २।।
हरिद्रागणपो देवो देवता मुनिभि: स्मृत:। षड्दीर्घयुक्स्वबीजेन षडङ्गविधिरीरित:।। ३।।

इति। विनायकसंहितायां सम्मोहनपञ्चरात्रे च–''षड्दीर्घयुक्स्वबीजेन भूमियुक्तेन बुद्धिमान्। षडङ्गमाचरे''दित्युक्तं तत्र यथोपदेशं कार्यमिति। स्वबीजेन महागणपतिबीजेन। तथा–

विधिना येन मन्त्रोऽयं गृह्यते तदहं ब्रुवे। चतुर्थीदिवसे प्राप्ते शुक्लपक्षस्य मन्त्रवित्।। ४।।
शुद्धां हरिद्रामानीय कन्यया पेषितां शुभाम्। सर्वाङ्गे तां समालिप्य स्नायाच्छुद्धजलैस्तत:।। ५।।
भक्त्या परमयोपेत: प्रसन्नेनान्तरात्मना। प्रणम्य गुरुपादाब्जमर्चयित्वा विधानत: ।। ६।।
स्वर्णाङ्गुलीयहाराद्यैर्भूषणैश्च शुभाम्बरै:। पूर्वोक्तविधिना तस्मादधीयीत मनुं त्विमम्।। ७।।
सुगन्धै: सुमनोभिस्तं यजेद् देवधिया पुन:।..।।

स्थाने पूर्वसमीरिते मणिमये सिंहासने संस्थितं
पीतं पीतविभूषणाम्बरलसन्माल्यादिसंशोभितम्।
विघ्नं दन्तिमुखं त्रिनेत्रलसितं हस्तैर्वहन्तं भजेत्
पाशं सत्परशुं वरं सृणियुतं क्रोधाख्यमुद्राभये।। ८।।

---

१. 'द्वय' ख. पाठ:।

वामोर्ध्वादिकरत्रये आद्यत्रयं दक्षोर्ध्वादित्रयेऽन्यत्त्रयमित्यायुधध्यानम्। क्रोधमुद्रा मुष्टिः।

एवं सञ्चित्य देवेशं गजाननमनन्यधीः। एकाक्षरोदितेनात्र वर्त्मना देवमर्चयेत्।। ९।।

इति। अथ प्रयोगः— तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि मदनाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये हरिद्रागणपतये देवतायै नमः। इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, गांगींगूमित्यादिना करषडङ्गन्यासं विधाय ध्यात्वा, मानसपूजादिसर्वं प्रागुक्तैकाक्षरविधिना कृत्वा समापयेदिति। तथा—

साग्रं सहस्रं सञ्जप्य दशांशं हव्यवाहने। सर्पिर्गुडयुतैः सम्यगपूपैर्जुहुयाद् हविः।। १०।।
हरिद्रागणपं तावत् तर्पयेद्भक्तितत्परः। कुमारीर्भोजयेत् तावद् ब्रह्मचारिण एव च।। ११।।
काम्यकर्म ततः कुर्याद्यदिष्टं विष्टपत्रये।...।।

साग्रं सहस्रमष्टोत्तरं सहस्रमित्यर्थः। तावत् होमसंख्यासमसंख्यमित्यर्थः। एतेन तर्पणसख्ययैव कुमार्य्यो ब्रह्मचारिणश्च भोजयितव्याः। ब्रह्मचारिणस्तु नैष्ठिकाः। 'स्वाश्रमस्थांस्त्वपेक्षन्ते' इति साम्प्रदायिकाः। तथा—

पद्मे नागदले सुधाकरगृहे साध्याख्यकर्मावृते
वेदादौ वसुधाविनायकगतं वर्मालिखेन्मध्यतः।
दिक्पत्रेषु वसुन्धरामनुगतं क्रोधं विदिक्पत्रगं
भूबीजं बहिरष्टकोणवसुधाबीजस्थितं वारुणम्।। १२।।

वसुकोणाग्रगानि स्युर्हस्तिनो मस्तकानि च। मस्तकेषु लिखेत् पश्चाद्गणान्तं बीजमुत्तमम्।। १३।।
चतुरस्रेण संवेष्ट्य दिक्षु वर्मान्तमालिखेत्। विदिग्गतं च भूबीजमेवं यन्त्रमनुत्तमम्।। १४।।

अस्यार्थः— तत्र यथोक्ताधिकरणे यथोक्तद्रव्यैरष्टदलकमलं कृत्वा, तत्कर्णिकामध्ये वृत्तं कृत्वा, तन्मध्ये साध्यनामवेष्टितं प्रणवं विलिख्य, तस्योदरे भूबीजमालिख्य भूबीजस्योदरे गणेशबीजमालिख्य, तस्यान्तः हुंकारमालिख्य, अष्टदलकमलस्य पूर्वदक्षिणपश्चिमोत्तरदलेषु भूबीजोदरगतं हूंकारमालिख्याग्नेयादिकोणदलेषु केवलं भूबीजं विलिख्य, कमलाद्बहिश्चतुरस्रद्वयसम्पुटरूपमष्टकोणं कृत्वा तत्कोणेषु भूबीजोदरे वकारं सबिन्दुं विलिख्य, अष्टकोणाग्रेषु गजमस्तकानि कृत्वा तेषु सबिन्दुं गकारं विलिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु भूबीजं, तद्दिक्षु हुंकारं च विलिखेदिति।। तथा—

आदित्यबुधशुक्राणामेकस्य दिवसे वशी। निशीथे विजने देशे सुलिप्ते गोमयाम्भसा।। १५।।
प्रदीपैर्दीपिते तत्र दृषदं विन्यसेच्छुभाम्। उपलं च समानीय हरिद्रां क्षालितां जलैः।। १६।।
तस्यां दृषदि संस्थाप्य कन्यया पेषयेत्ततः। हरिद्रायाश्चतुर्थांशं वसुविघ्नगृहान्मृदम्[1] ।। १७।।
समाहृत्य च संपिष्य मिश्रयित्वाथ शोधयेत्। मन्त्रेणानेन मन्त्रज्ञः पञ्चविंशतिसंख्यया।। १८।।
तत्पश्चाल्लेपयेन्मन्त्री शुभे सूक्ष्मे नवाम्बरे। अस्मिन् पट्टे लिखेद्यन्त्रमेतत् संस्तम्भनाह्वयम् ।।१९।।
अत्र प्राणान् प्रतिष्ठाप्य पूजितं गुलिकीकृतम्। गणेशप्रतिमां पश्चादङ्गप्रत्यङ्गशोभिताम्।। २०।।
विनिर्माय त्रिभिर्भागैर्निशायास्तद्धृदि क्षिपेत्। प्राणसंस्थापनं भूयः कुर्यान्मूर्तेर्विचक्षणः।। २१।।

---

[1] १. स्थानाष्टकाद् इत्यर्थः

गन्धपुष्पादिनैवेद्यै(रभ्यर्च्य गणनायकम्। शरावे क्षालितं न्यस्य सहस्रं साष्टकं मनुम्।। २२।।
सञ्जप्य पूजयेद्भक्त्या पीतवर्णैश्च [1]पुष्पकैः। सिद्धौदनेन नैवेद्यं) निवेद्यात्र बलिं हरेत्।। २३।।
तण्डुलान् शालिसम्भूतान् प्रस्थमानमिताञ्छुभान्। द्विदलीकृतमुद्गान्नं तदर्धेन च मेलयेत्।। २४।।
गुडं वेदपलं भूयो नारिकेलं च तत्समम्। मरिचं मुष्टिमानं च सैन्धवं च तदर्धकम्।। २५।।
तदर्धं जीरकं चाज्यं कुडवार्धसमं भवेत्। एतत्सर्वं चतुष्प्रस्थं गोदुग्धे मन्दवह्निना।। २६।।
पचेत् सिद्धौदनं ह्येतद् गणेशस्य महत्प्रियम्। अमुना पायसेनाथ लड्डुकापूपकादिभिः।। २७।।
कर्पूरवासितैः पूगताम्बूलैश्चन्दनादिभिः। तोषयित्वा विधानेन हरिद्रागणपं विभुम् ।। ३७।।
बलिं दत्त्वा शरावेण च्छादयेदपरेण तम्। प्रणमेद् दण्डवद्भूमौ स्तुत्वा स्तुतिभिरादरात्।। ३८।।
एवं यः कुरुते नित्यं पञ्चभिः सप्तभिर्दिनैः। विघ्नेश्वरप्रभावेण त्रैलोक्यं सचराचरम्।। ३९।।
स्तम्भयेत् साधकेन्द्रस्तु सत्यमेतन्न चान्यथा। युद्धभूमौ तमिस्रायां यद्येनं स्थापयेद् बुधः।। ४०।।
वैरिणो वाहिनीं वीरैर्व्याकुलां स्तम्भयेत् तदा। देशे ग्रामे पुरे गेहे सभायां स्थापितं यदि।। ४१।।
तत्तत्स्थानगतान् सर्वान् विविधान् स्तम्भयेज्जनान्। शाखिशाखाग्रगं सम्यक् स्तम्भयेद्वर्षणं महत्।।४२।।
चत्वरे नगरान्तःस्थान् जलान्तःस्थापितं जलम्। निवासे पथि वा दस्यून् सर्पादीन् वा समीरणान्।।४३।।
हस्तिघोटकशालासु क्षणात् सर्वानुपद्रवान्। आखून् शाल्यालये सर्पान् वल्मीके श्वापदान् वने।।४४।।
क्षेत्रेषु शलभान् हेतीः पाषाणे स्तम्भयेत् स्थितम्। स्मृतिं वाणीं च गानं च विद्यां शत्रोर्विभावसोः।।४५।।
रेतसः स्तंम्भनं कुर्यात् शय्यास्थाननिवेशितम्। सम्यङ्निवेश्य चैतेषु स्थानेषु बलिमाहरेत्।।४६।।
स्तम्भयेदखिलं विश्वं किं पुनर्वाञ्छितं जनम्। सफलं सर्वथा ह्येतद्विधानं गोपयेत् सदा।। ४७।।
अथाकृष्टिकरं यन्त्रं विघ्नेशस्य वदाम्यहम्। हरिद्रां शोधयेद्वेश्ममृदा प्रोक्तेन वर्त्मना।। ४८।।
उदितं यन्त्रमालिख्य मायां गं मध्यतो लिखेत्। अवशिष्टैर्मन्त्रवर्णैर्मायया च प्रवेष्टयेत्।। ४९।।
लिखेत् पाशाङ्कुशावष्टपत्रेषु तदनन्तरम्। वारुणं दिग्दलाग्रेषु टपरं कोणपत्रगम्।। ५०।।
धरामण्डलयुग्मस्य कोणेष्वाशाविदिक्क्रमात्। बाणबीजानि विलिखेद् वक्ष्यमाणानि मन्त्रवित्।।५१।।
तदग्र[2]वसुशूलेषु कवचं साधु संलिखेत्। जलगेहद्वयेनापि मायाकोणेन वेष्टितम् ।। ५२।।
यन्त्रमाकर्षणं ह्येतल्लिखितं पूर्ववर्त्मना। कृतप्राणप्रतिष्ठं च निशाविघ्नेशकुक्षिगम्।। ५३।।
मुहुः सम्पूज्य यत्नेन समीरं स्थापयेद् बुधः। चक्रिहस्तमृदायोज्य गणेशागारमृत्तिकाः।। ५४।।
शरावयुगलं रम्यं निर्मायान्यत्र चोभयोः। विन्यस्य तं गणेशानं कुसुमैररुणैर्यजेत्।। ५५।।
सिद्धौदनादिनैवेद्यैर्बलिभिश्चोक्तवर्त्मना। मनोः सर्वजनस्थाने दत्त्वा साध्याभिधां बुधः।। ५६।।
स्तम्भय-द्वितयं यत्र तत्राकर्षय-युग्मकम्। साध्याशांभिमुखो भूत्वा सहस्रं साष्टकं जपेत्।। ५७।।
बलिं दत्त्वाथ सम्पूज्य विघ्नेशं चन्दनादिभिः। द्वितीयेन शरावेण पिदधीत सुसाधकः।। ५८।।

---

१. ‘काञ्चनैः कृसुमैर्नवैः’ ख. पाठः। २. ‘तदाद्य’ ख. पाठः।

प्रत्यहं कुर्वतस्त्वेवं सप्तभिर्दिवसैर्भुवि। साधकस्य समायाति सन्निधौ वाञ्छितो जनः।। ५९।।
भूपालस्तत्सुतो वापि महिषी वा वराङ्गना। अमात्यः पण्ययोषा वा सुरकन्यापि वा द्रुतम्।। ६०।।
आगच्छति न सन्देहो मन्त्रिसक्तेन चेतसा। यन्त्रमेतल्लिखित्वा तु तालपत्रे गुडाम्भसा।। ६१।।
पूजितं स्थापितप्राणमजादुग्धे निवेश्य तत्। साध्याशाभिमुखो भूत्वा क्वाथयेत् प्रजपन् मनुम्।।६२।।
तदानीमानयेत् कामविह्वलां सुर[1]सुन्दरीम्। सामुद्रं रामठं न्यस्य तस्यागारे हरिद्रया।। ६३।।
सिक्थेन मर्दयित्वा तु कृत्वा साध्याकृतिं शुभाम्। श्वेतार्कच्छदयुग्मान्तः सप्राणां सन्निवेश्य ताम्।।६४।।
दीप्ताग्नौ तापयन् मन्त्रं जपेदष्टसहस्रकम्। क्षणादायाति कामार्ता वाञ्छिता वरवर्णिनी।। ६५।।
नागवल्लीदले क्षौद्रलिप्ते यन्त्रमिदं लिखेत्। साध्यं संस्मृत्य सम्पूज्य सेरं[2] जप्तं प्रभक्षयेत्।।६६।।
सीमन्तिनी समायाति शीघ्रं यौवनगर्विता। पत्रे पुष्पे सुवस्त्रादौ क्षौमे वालिख्य सेरणम्।। ६७।।
यन्त्रमेतत् प्रदातव्यं क्षणादाकृष्टिकारकम्। प्रवाहाभिमुखो वापि सरित्सङ्गमतीरगः ।। ६८।।
तर्पयेत् तज्जलैः शुद्धैरष्टोत्तरसहस्रकम्। शतयोजनदूरस्थं साध्यमाकर्षयेद् ध्रुवम् ।। ६९।।
बहूदितेन किं वात्र स्मृत्वा यं प्राणिनं जपेत्। मन्त्रमेनं विधानेन हठादाकर्षयेद्धि तम्।। ७०।।

इति।। अथाकृष्टिकरं यन्त्रमित्यादिपूर्ववर्त्मनेत्यन्तस्यायमर्थः— तत्र पूर्वोक्तं यन्त्रमालिख्य तन्मध्यस्थं भूबीजं हित्वा तत्स्थाने मायाबीजं विलिख्य तन्मध्ये प्राग्वद्गणपतिबीजमालिख्य हुंकारादिगंबीजरहितैरवशिष्टवर्णैः प्रागुक्तसाध्यनाम-वेष्टनस्थाने संवेष्ट्य मायाबीजैश्च वेष्टयेत्। अत्र मायाबीजवेष्टनं वृत्तान्तराले ज्ञेयं, तेन कर्णिकाभ्यन्तरे वृत्तद्वये ज्ञेयम्। ततोऽष्टदलेषु प्रतिदलं आंक्रों इति पाशाङ्कुशबीजे विलिख्य, दिग्दलाग्रेषु (वमिति, कोणपत्रेषु) ठमिति च विलिख्य, प्राग्वदष्टकोणं कृत्वा तस्य पूर्वदिग्गतकोणे द्रां, दक्षिणे द्रीं, पश्चिमे क्लीं, उत्तरे ब्लूं, इति। विदिग्गतकोणेषु चतुर्ष्वपि सः इति विलिख्याष्टकोणाग्रेषु त्रिशूलानि कृत्वा तेषु शूलेषु हुंकारमालिख्य, तद्बहिरर्धचन्द्रद्वयेन सम्पुटितेन संवेष्ट्य तत्कोणेषु मायाबीजं विलिखेत्। अत्र कोणशब्देनार्धचन्द्रद्वयस्याग्रचतुष्टयं गृह्यते, तस्याग्नेयादिकोणचतुष्टयस्थितत्वात्। अत्र प्राग्वद् गुलिकीकृत्य हरिद्रारचितगणेशकुक्षिगतं समीरं स्थापयेत् प्राणप्रतिष्ठां कुर्यान्मूर्तेरिति शेषः। चक्रिहस्तमृदा कुलालहस्तमृत्तिकया। अन्यत्रान्यतमे। सामुद्रं लवणं। रामठं हिंगुः। तस्यागारे गणेशागारे । सिक्थेन मधूच्छिष्टेन। सेरं सप्राणं कृतप्राणप्रतिष्ठमित्यर्थः। जप्तमभिमन्त्रितम्।। तथा—

अथो वदामि वश्यार्थे यन्त्रसाधनमुत्तमम्। यन्त्रं संलिख्य पूर्वोक्तं स्मरमध्ये गणाधिपम्।। १।।
बहिः शिष्टैर्मन्त्रवर्णैः कामेनापि प्रवेष्टयेत्। शेषमाकर्ष्ययन्त्रेण समानं परिकल्पयेत् ।। २।।
निशाशोधनमप्यत्र कुर्यादीरितवर्त्मना । हरिद्रायाश्चतुर्थांशमितेनेक्षुरसेन हि ।। ३।।
सामुद्रं रोचनां क्षौद्रं पिष्ट्वा संलिप्य सत्पटे। लिखेद्वश्याभिधं यन्त्रं सम्यक् कृत्वा निवेशयेत्।।४।।

इति।। अस्यार्थः—पूर्वोक्तं यन्त्रं विलिख्य तन्मध्यस्थं मायाबीजमपास्य तत्स्थाने कामबीजं तदुदरे गणपतिबीजं विलिख्य, तत् प्राग्वदवशिष्टैर्मन्त्रवर्णैः। कामबीजेन चावेष्ट्य शेषमाकर्षयन्त्रवत् कुर्यादिति।। तथा—

पूर्ववत् कृतविघ्नेशकुक्षिमध्ये निवेश्य तत्। विधिना स्थापितप्राणं शरावे न्यस्य तं यजेत्।। ५।।

---

१. 'वारसुन्दरीं' ख. पाठः। २. स्वैरं' ख. पाठः।

रक्तमाल्यानुलेपाद्यैर्नैवेद्यैः पूर्ववत् कृतैः। मनौ साध्याभिधां दत्त्वा स्थाने पूर्वसमीरिते।। ६।।
वशमानययुग्मं च जपेदष्टसहस्रकम्। साध्यदिक्सम्मुखो भूत्वा मन्त्रं मन्त्री समाहितः।। ७।।

अष्टसहस्रमष्टोत्तरसहस्रमित्यर्थः।

विघ्नेशाय बलिं दत्त्वा च्छादयेत्तं च पूर्ववत्। एवं प्रतिदिनं कुर्वन् सप्तभिर्दिवसैर्बुधः।। ८।।
रक्षोभूतपिशाचाद्यान् देवदानवपन्नगान्। राजानं मन्त्रिणं राज्ञां स्त्रीगणं चेष्टमानुषम् ।। ९।।
वशयेत् साधकः शीघ्रं यावज्जीवं न संशयः। निशांशेनावशिष्टेन निजदेहं विलिम्पयेत्।। १०।।
अचलां कमलां लब्ध्वा वशयेद्विश्वमञ्जसा। हरिद्रांशसमं चूर्णं शालितण्डुलसम्भवम्।। ११।।
तत्समेन गुडेनापि मधुना सैन्धवेन च। सम्मिश्रय मर्दयित्वा च पिण्डाकारं पचेद् घृते।। १२।।
निर्माय गणपं तेन यन्त्रं तद्धृदि निःक्षिपेत्। समीरं च प्रतिष्ठाप्य गन्धाद्यैः पूर्ववद्यजेत्।। १३।।
त्रिदिनं पूजयित्वेत्थं यन्त्रं मध्यात् पृथङ् नयेत्। प्रतिमां भक्षयेत् पश्चात् साध्यो वश्यो भवेद् ध्रुवम्।।१४।।
शालिपिष्टादिपिण्डेन कृत्वा साध्याकृतिं शुभाम्। अष्टाधिकं शतं जप्त्वा पूजितां स्थापितानिलाम्।।१५।।
निवेद्य विघ्नराजाय साध्यं संस्मृत्य भक्षयेत्। वशयेद्वाञ्छितं साध्यं सदा सर्वस्वदायिनम्।। १६।।
वश्ययन्त्रं लिखेन्मन्त्री खानपानादिवस्तुषु। सेरं कृत्वा जपेन्मन्त्री सहस्रं साष्टकं बुधः।। १७।।
भक्षणाद्वशयेत् साध्यवस्तुमात्रस्य साधकः। चन्दनागरुकर्पूरनिशाकुङ्कुमरोचनाः ।। १८।।
मृगेभमदसंयुक्ता अष्टाङ्गं विघ्ननाशनम्। सम्पिश्र्य तद्वशीकारयन्त्रमालिख्य पूर्ववत्।। १९।।
प्रतिमां पूर्ववत् कृत्वा जप्त्वा चाष्टोत्तरं शतम्। लिम्पेदनेन गात्रं स्वं कुर्वीतास्य विशेषकम्।।२०।।
ईक्षणात् स्पर्शनादेव त्रिलोकीं वशमानयेत्। एवं कृते नरं नारी वशयेद्योषितं पुमान्।। २१।।
चन्दनेनैव वा कुर्याद्विधिमेनं फलाप्तये। द्विरेफश्च सदाभद्रा मुसली चेन्द्रवारुणी।। २२।।
भूपद्मं श्रीफलं विष्णुक्रान्ता हस्ती[1] च वन्दिनी। वाराही शतवीर्य्या च मायूरी चन्द्ररोचने।। २३।।
सर्वमिक्षुरसेनैव निशाभागार्धसंयुतम्। पिष्ट्वा वश्याभिधं यन्त्रं निर्माय प्रतिमामपि।। २४।।
प्राणसंस्थापनं कृत्वा जपेदष्टसहस्रकम्। शिष्टद्रव्येण तिलकं कुर्यात् प्रातस्तु यो नरः।। २५।।
त्रैलोक्यं सम्पदा लक्ष्म्या तिरस्कुर्याद्धनाधिपम्। कपिलागोमयं व्योम्नि पद्मिनीदलसम्पुटे।। २६।।
आदाय ब्रह्मचर्येण भेषजैरुदितैः समम्। पञ्चगव्येन सम्मर्द्य पिण्डाकारं प्रकल्पयेत्।। २७।।
शुष्कं दहेच्छतं हुत्वा विल्वकाष्ठैधितेऽनले। समुद्धृत्य च तद्भस्म तन्मध्ये यन्त्रमालिखेत्।।२८।।
समीरणं प्रतिष्ठाप्य गणपं तत्र पूजयेत्। अष्टाधिकं शतं मन्त्रं जपित्वा श्रीफलान्तरे।। २९।।
काञ्चने रूप्यरचिते पत्रे कांस्यमयेऽथवा। निधाय धारयेद्भस्म ललाटादिषु साधकः।। ३०।।
कान्तिपुष्टिधनारोग्यपुत्रपौत्रवशःपशून्। लब्ध्वा लोकप्रियो भूत्वा दीर्घजीवी भवेद् ध्रुवम्।। ३१।।
पुरोधा नृपतेः रक्षां भस्मना प्रातरन्वहम्। कुर्यादायुष्यवृद्ध्यर्थं यशोविजयसम्पदे ।। ३२।।

---

[1] 'हस्ता' ख. पाठः।

तस्मै निष्कत्रयं नित्यं नृपो दद्यात् पुरोधसे। रक्ताम्बरः सुवर्त्यन्तः प्रोक्तभेषजचूर्णकम्।। ३३।।
निधाय कपिलाज्येन तद्वर्त्या नृकपालके। दीपं प्रज्वाल्य तेनैव जपेन्मन्त्रं सुसंयतः।। ३४।।
गृहीत्वा कज्जलं जप्तमष्टोत्तरशतं शुभम्। नेत्रयोरन्वहं दद्याद् युवा वा युवती च या।। ३५।।
दृष्टिमात्रेण वशयेन्निखिलं विश्वमञ्जसा। उक्तौषधीनां गुटिकां पिष्ट्वा चन्दनवारिणा।। ३६।।
अभिमन्त्र्य तु या योषा तिलकं प्रकरोति सा। सर्वलोकप्रिया भूयादङ्गस्पर्शान्निजं पतिम्।। ३७।।
आज्ञानुवर्तिनं कुर्याद्यावज्जीवं न संशयः। शुद्धया निशया कृत्वा विघ्नेशं प्रोक्तलक्षणम्।। ३८।।
चन्द्रोपरागसमये सेरं जप्त्वा सहस्रकम्। अष्टाधिकं समभ्यर्च्य चन्दनादिभिरादरात्।। ३९।।
शिखायां प्रोद्वहेन्नित्यं सर्वतो जयमाप्नुयात्। सङ्ग्रामे विपिने दुष्टश्वापदोत्थभये परे ।। ४०।।
आपणे व्यवहारे च द्यूते वादे महार्णवे। पाटच्चरसमूहेषु सभायां शत्रुसङ्कटे ।। ४१।।
विजयी जायते धीरः कृतकृत्यो निवर्तते। वराङ्गनावृन्दमध्ये शोभते मन्मथो यथा।। ४२।।
नागवल्लीदले यन्त्रं लिखित्वा रात्रिवारिणा। पप्राणमर्चितं जप्तमष्टोत्तरसहस्रतः ।। ४३।।
अशितं वाञ्छितं साध्यं वश्यं नयति तत्क्षणात्। गोदुग्धे ससिते[1] मन्त्री क्वथिते सुदृढीकृते।।४४।।
यन्त्रं विलिख्य तेनैव निर्माय गणनायकम्। अभिमन्त्र्य शतं साग्रं भक्षयेद् वशयेज्जगत्।।४५।।
नारिकेलगुडोपेतं चूर्णितं त्रिफलं हुनेत्। अन्वहं कृतसम्पातमष्टाधिकशतं बुधः ।। ४६।।
सम्पातं भक्षयेद्यस्तु वशमायाति सोऽचिरात्। किं बहूक्तेन मन्त्रज्ञः साध्यं सञ्चिन्तयन् मनुम्।।४७।।
जपेत् स दासतां याति यावदायुर्न संशयः।..।।

इति।। अत्र विषमपदव्याख्या—पूर्वसमीरिते स्थाने सर्वजनमिति स्थाने। मनौ सर्वजनपदस्थाने साध्याभिधा। स्तम्भयेति पदस्थाने वशमानययुग्मं च दत्त्वा जपेदित्यर्थः। तद्धृदि गणेशहृदि। स्थापितानिलं कृतसाध्यप्राणप्रतिष्ठं। साध्यप्राणप्रतिष्ठाप्रकारस्तु प्रागेवोक्तः। अस्य द्रव्याष्टकस्य, विशेषकस्तिलकम्। द्विरेफो भृङ्गराजः। सदाभद्रा मुस्ता। मुसली तालमूलिका। वन्दिनी लज्जालुका। शतवीर्या दूर्वा। मायूरी अपामार्गः। चन्द्रः कर्पूरं। उदितैर्भेषजैर्द्विरेफादिभिः। रात्रिवारिणा हरिद्रोदकेनेति।। तथा—

उच्चाटनं ततो यन्त्रं कथयामि समासतः। उक्तरीत्या लिखेद्यन्त्रं ससाध्यं वर्ममध्यगम्।। १।।
तदन्तर्मारुतं बीजं गाणपत्यं तदन्तरे। प्राणबीजं च पत्रेषु वामकर्णं तदग्रतः।। २।।
तद्बहिर्वसुकोणाग्रशूलेषु कवचं लिखेत्। वायुना वेष्टितं पश्चात् षड्बिन्दुगतवायुना।। ३।।
प्रेतवस्त्रे तदालिख्य निशालेपनपूर्वकम्। श्मशानाङ्गारसारेण ध्वाङ्क्षपक्षशलाकया।। ४।।
यन्त्रमेतत् समालिख्य स्थापयेदीरणं ततः। पिचुमन्दस्थितं ध्वाङ्क्षगृहकाष्ठद्वयं[2] ततः।। ५।।
श्मशानवह्नौ सन्दह्य भस्मादाय तदुद्भवम्। विघ्नाधीशगृहद्वाःस्थशर्करारजसा युतम्।। ६।।
यन्त्रमध्ये प्रविन्यस्य सेरं तद्गुलिकीकृतम्। शवालिप्तनिशाभागं चिताभस्मास्थिनी सदा।। ७।।

---

[1] 'सतिले' ख. पाठः। [2] 'त्रयं' ख. पाठः।

सर्षपं च चिताङ्गारं कपिकच्छूं च वानरीम्। सम्पिष्योन्मत्तसारेण निर्माय गणपाकृतिम्।। ८।।
तत्तुन्दमध्यगं कृत्वा पुनः प्राणान् प्रतिष्ठयेत्। चक्रिहस्तमृदा चैव साध्यपादोत्थपांसुना।। ९।।
शरावयुगलं मन्त्री निर्मायान्यत्र चोभयोः। आम्बिकेयं प्रविन्यस्य कृष्णपुष्पैः समर्चयेत्।। १०।।
मनावुच्चाटयद्वन्द्वं संयोज्य प्रजपेन्मनुम्। अष्टोत्तरसहस्रं हि च्छादयित्वाऽपरेण तम्।। ११।।
निखन्य वैरिणो द्वारि मासेनोच्चाटयेद्धि तम्। सप्तिपस्यालये वैरिसदनेऽपि रणाङ्गणे।। १२।।
स्थापिते गणपे मासादुच्चाटो जायते ध्रुवम्। म्रियन्ते वा ज्वरार्तास्ते प्राणिनो भयविह्वलाः।।१३।।
चतुष्पथेऽथ वल्मीके चत्वरे द्रुमकोटरे। स्थानाद्विघ्नराजस्य शत्रुरुच्चाटितो भवेत् ।।१४।।
विघ्नेशतुन्दगं भस्म विन्यसेद्यस्य मस्तके। भ्रमते काकवत् सोऽपि गतो देशेष्वनिश्चलः।। १५।।
आसने शयने याने पथि शत्रोर्गजालये। भस्मक्षेपान्मृतिस्तत्र भवत्येव च नान्यथा।। १६।।

इति।। अयमर्थः— पूर्वोक्तं यन्त्रमालिख्य तन्मध्ये हुंबीजं विलिख्य, तदन्तर्यमिति वायुबीजमालिख्य, तदन्तर्गमिति गणपतिबीजमालिख्य, तन्मध्ये साध्यनाम लिखित्वा, पत्रेषु यमित्यालिख्य, दलाग्रेषु ईमिति विलिख्य, तद्बहिरष्टकोणाग्रगतशूलेषु हुमित्यालिख्य, बहिः षड्बिन्दुलाञ्छितवृत्ताकारेण वायुमण्डलेन संवेष्ट्य तस्य षड्बिन्दुस्थानेषु यमिति वायुबीजं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। प्रेतवस्त्रे प्रेतत्यक्तवस्त्रे। अङ्गारसारः कोइला इति प्रसिद्धः। ध्वाङ्क्ष काकः। ईरणं प्राणं। पिचुमन्दो निम्बवृक्षः। शर्करा कर्करः। शवालिप्तनिशाभागं शवस्य चर्चितं हरिद्रांशं। सर्षपं ''श्वेतसर्षपमेव चे''ति तन्त्रान्तरात्। उन्मत्तसारो धत्तूररसः। वानरी लताविशेषः। तुन्दः कुक्षिः। आम्बिकेयं गणेशं। उच्चाटयद्वन्द्वं स्तम्भयपदमपास्येति शेषः। सप्तिरश्वः इति।। तथा—

अथ वक्ष्ये समासेन यन्त्रं विद्वेषणाह्वयम्। यन्त्रे पूर्वोदिते वह्निवायुबीजं प्रविन्यसेत्।। १।।
वसुपत्रेषु रंवर्णं[1] फट्कारं विलिखेत्ततः। अष्टशूलेषु हुंकारं व्योम्ना बाह्ये प्रवेष्टयेत्।। २।।
निशातुर्यांशमानेन मरिचं निम्बमेव च। तन्तिडीं द्विगुणां पिष्ट्वा हेमपत्राम्बुना ततः।। ३।।
मृतकर्पटके लिप्त्वा द्वेषयन्त्रमिदं लिखेत्। पञ्चाङ्गं पारिभद्रस्य काकनीडं च तद्गतम्।। ४।।
चितान्गौ सन्दहेद्भस्म यन्त्रमध्ये निवेशयेत्। संवृत्य विघ्नराजस्य सेरं कुक्षौ विनिक्षिपेत्।। ५।।
शरावान्तरगं विघ्नं पूजयेत् पूर्ववर्त्मना। पिचुमन्दभवैः पत्रैः कृष्णपुष्पैर्निवेद्यकैः[2] ।। ६।।
विद्वेषयद्वयं मन्त्री जपेत् संयोज्य साष्टकम्। सहस्रं च शरावेण निखनेच्छादितं ततः।। ७।।
मित्रयोर्विधिनानेन विद्वेषो भवति ध्रुवम्। आदाय गणपं मन्त्री मित्रयोरन्तरा क्षिपेत्।। ८।।
वैरं च जायते क्षिप्रं देहनाशावधि द्वयोः। एतद्यन्त्रगतं भस्म गृहीत्वा पथि.विन्यसेत्।। ९।।
गच्छतां पादसंस्पर्शाद्विवादः सुमहान् भवेत्। देशे ग्रामे पुरे यत्र स्थापितो गणपो भवेत्।। १०।।
तिष्ठतां प्राणिनां तत्र वैरं भवति सर्वदा। पारिभद्रस्य पञ्चाङ्गमेकभागमितं भवेत्।। ११।।
भागैकं मरिचं रात्रिस्तावती त्रितयं त्विदम्। सन्दह्य भसितं पूर्ववर्त्मना संस्कृतं पुनः।। १२।।
विकीर्णं वैरिणो मूर्ध्नि कुर्यादुन्मादमूकते।...।।

---

[1] 'टंवर्णं' इति ख. पाठः। [2] 'निवेदितैः' ख. पाठः।

इति।। अस्यार्थः— तत्र पूर्वोक्तं यन्त्रमालिख्य तन्मध्ये रं यं इति विलिख्याष्टसु दलेषु रकारं फट्कारं च विलिख्य, दलाग्रेषु ईंकारं विलिख्याष्टकोणगतशूलाष्टके हुंकारमालिख्य वहिराकाशमण्डलेन वृत्ताकारेण वेष्टयेदिति।। परिभद्रो निम्बः। हेमपत्राम्बु धत्तूररसः। संवृत्य गुलिकीकृत्य। विद्वेषयद्वयमुच्चाटयस्थाने। रात्रिर्हरिद्रा। पूर्ववर्त्मना चिताग्निना इति।। तथा—

साम्प्रतं मारणं यन्त्रं प्रवदामि यथाक्रमम्। यन्त्रं विरच्य पूर्वोक्तं वर्म मध्ये निवेशयेत्।। १।।
मायाविघ्नेशबीजे द्वे तन्मध्येऽपि समालिखेत्। तद्बाह्येऽप्युक्तरीत्यैव वर्णानग्निगतांल्लिखेत्।। २।।
आशुशुक्षणिबीजं च धरासम्पुटकोणगम्। मस्तकेष्वस्त्रबीजानि वह्निं शूलेषु वर्मकम्।। ३।।
तद्बहिर्वह्निकोणेषु वह्निबीजं समालिखेत्। निशां शुद्धां समालिख्य मृतकर्पटके शुभे।। ४।।
चिताङ्गारास्थिनिर्यासैः काकपक्षशलाकया। यथोक्तं विलिखेद् यन्त्रमेतन्मारणनामकम्।। ५।।
कणारामठशुण्ठ्याख्यानिशामरिचसद्वचाः । स्नुहीक्षीरेण संपिष्य लिप्त्वा शावपटेऽथवा।। ६।।
कारस्करस्य पञ्चाङ्गैः रजनीं जम्बुकासृजा। पिष्ट्वाथ कर्पटे शावे लिप्त्वा शेषं पुरोक्तवत्।। ७।।
समीरं च प्रतिष्ठाप्य कृत्वा गणपतिं ततः। यन्त्रं तद्धृदये न्यस्य पुनः प्राणान् प्रतिष्ठयेत्।। ८।।
मातृसद्मसमुद्भूता गणेशागारमृत्तिकाम् । निम्बमूलमृदं वापि कर्कन्धूमूलसम्भवाम् ।। ९।।
श्मशानमृत्तिकां तद्वत् करवीरद्रुमूलजाम्। कुम्भकारकरस्पृष्टामूषरस्थानजां मृदम् ।। १०।।
पिष्ट्वा शरावयुगलं कृत्वा चान्यत्र चोभयोः। यन्त्राढ्यं गणपं न्यस्य कृष्णपुष्पैः समर्चयेत्।।११।।
कारस्करभवैः पत्रैर्नैवेद्यैश्च यथा पुरा। उक्तमन्त्रपदस्थाने साध्यनाम निवेश्य हि ।। १२।।
मारयद्वयशब्दं च सहस्रं साष्टकं जपेत्। दक्षिणाशामुखो भूत्वा रजन्यां भूतवासरे ।। १३।।
चत्वरे पितृभूमौ वा मातृविघ्नगृहेऽथवा। वल्मीके कोटरे वापि कारस्करतरूद्भवे।। १४।।
पिधायान्यशरावेण निखन्य बलिमाहरेत्। साध्यो यमपुरं याति सप्ताहाज्ज्वरपीडितः।। १५।।
अमोघवीर्यमेतद्धि विधानं भुवि दुर्लभम्। भूदेव्यतिरिक्तेषु राजावैरिषु योजयेत्।। १६।।
नृपोऽपि कारयेद्यः स कर्तारं तोषयेद्धनैः। कर्तापि तद्दशांशेन प्रायश्चित्तं समाचरेत्।। १७।।
हरिद्राविघ्नमन्त्रस्य साङ्गोपाङ्गविधानकम्। निरूपितं यथाशास्त्रं गोपनीयं सदा बुधैः।। १८।।
दातव्यं पुत्रकल्पाय शिष्याय स्थिरचेतसे। चित्तवाक्कायवसुभिर्गुरुशुश्रूषकाय च।। १९।।
श्रद्धाहीनाय दुष्टाय नैव देयं कदाचन। ....।।

इति।। अयमर्थः— तत्र पूर्वोक्तप्रकारेण यन्त्रं विलिख्य मध्ये हुंकारं विलिख्य, तस्योदरे शक्तिबीजं गणपतिबीजं च विलिख्य, दलेषु रमित्यालिख्य, बहिरष्टकोणं कृत्वा तत्कोणेषु रमित्यालिख्य, कोणाग्रेषु फट्कारमालिख्य तदग्रगतशूलेषु हुंकारं विलिख्य, तन्मध्ये रमिति वह्निबीजं विलिख्य, तद्बहिस्त्रिकोणं विलिख्य, तत्कोणेषु रमित्यालिखेत्। एतद्यन्त्रमुक्तफलदं भवति।। चिताङ्गारास्थिनिर्यासश्चितास्थिगलितो द्रवः। कणा पिप्पली। रामठं हिङ्गुः। स्नुही सेहुंड इति कान्यकुब्जभाषया नाम। स्तम्भयपदस्थाने मारयेति च। भूतवासरे चतुर्दश्यां। कोटरे कारस्करस्य। कारस्करोऽपि विषवृक्षो यस्य बीजं कुचिला इति प्रसिद्धम्।। सारसङ्ग्रहे—मन्त्रान्तरम्।

वक्रतुण्डगणेशस्य मनुं वक्ष्ये यथाविधि । सर्वपापक्षयकरं सर्वसौभाग्यदायकम् ।। १ ।।
राज्यवश्यकरं पुंसां वन्ध्यानां पुत्रदायकम्। अमृतं चतुरास्याग्नि: कामिका श्रोत्रबिन्दुयुक्।। २ ।।
टतृतीयोऽनन्तयुक्त: पवन: कवचं तथा। षडक्षरोऽयमादिष्टो भजतां कामदो मणि:* ।। ३ ।।

अमृतं व। चतुरास्य: क अग्नी रेफस्तेन क्र। कामिका त श्रोत्र उ बिन्दुरनुस्वारस्तै: तुं। टतृतीयो ड अनन्त आ तेन डा। पवनो य। कवचं हुं। अत्र केचिद्दीर्घकवचं वदन्ति। ''प्रादुर्बभूव मनसि मन्त्रराज: षडक्षर:। तप्तचामीकरप्रख्यो वक्रतुण्डाय हूमिति''।। इति वक्रतुण्डकल्पवचनात्। ''वक्रतुण्डाय कवचं दीर्घमेव षडक्षर:''। इति गणेश्वरपरामर्शिनीवचनाच्च। तथा–

भार्गवो मुनिराख्यातश्छन्दोऽनुष्टुबुदाहृतम्। देवता वक्रतुण्डोऽस्य सुरासुरनमस्कृत: ।। ४।।
विधाय मूलमन्त्रेण करशुद्धिं जितेन्द्रिय:। षडभिर्मन्त्रगतैर्वर्णै: षडङ्गानि प्रकल्पयेत् ।। ५।।
भ्रूमध्यकण्ठहृदयनाभ्यन्ध्वाधारके क्रमात्। षडक्षराण्यणोर्न्यस्येत् सर्वाङ्गे व्यापकं तत:।। ६।।
विधाय देवं हृदये ध्यायेदेकाग्रचेतसा। ....।।

रम्योद्भिन्नारुणतरमणिव्रातसंशोभिकान्तिं
संविभ्राणं करकिसलयै: पाशमप्यङ्कुशाह्वम्[1]।
साभीतीष्टं त्रिनयनयुतं रक्तमाल्यांशुकाढ्य-
मम्भोजोद्यत्पुटगतममुं संस्मरेद् वक्रतुण्डम्।। ७।।

वामाद्यूर्ध्वयोराद्ये तदाद्यध:स्थयोरन्ये, इत्यायुधध्यानम्। तथा–

पूर्वोक्ते पूजयेत् पीठे वक्रतुण्डं गणेश्वरम्। अष्टपत्राम्बुजद्वन्द्वचतुर्द्वारयुतेन च।। ८।।
चतुरस्रत्रयेणाथ वेष्टितं चक्रमालिखेत्। मध्ये देवं समभ्यर्च्य पुष्पान्तैरुपचारकै:।। ९।।
आदावङ्गानि सम्पूज्य यथास्थानं विशालधी:। पूर्वादिदलमूलेषु शक्तीरष्टौ क्रमाद्यजेत्।। १०।।
विद्याख्या विश्वधात्री च भोगदा विघ्नघातिनी। निधिप्रदा च पापघ्नी तथा पुण्या शशिप्रभा।।११।।
दलेषु च यजेत्तद्वदणिमाद्या: पुरोदिता:। द्वितीयेऽष्टदले तद्वद्वक्रतुण्डादिकान् यजेत्।। १२।।
चतुरस्रे लोकपालांस्तदस्त्राणि च पूजयेत्। प्राग्वद् वीथीद्वये सम्यग् वक्रतुण्डार्चनेरिता:।। १३।।

इति।। अथ प्रयोग:– तत्र प्राग्वत् प्रातरुत्थानादिषडङ्गपूजान्ते प्रथमाष्टदलेषु ओं विद्यायै नम:। विश्वधात्र्यै०। भोगदायै०। विघ्नघातिन्यै०। निधिप्रदायै०। पापघ्न्यै०। पुण्यायै०। शशिप्रभायै०। ततोऽष्टदलमध्येषु प्राग्वल्लक्ष्मीगणेशप्रकरणोक्तसिद्ध्यष्टकं सम्पूज्य, द्वितीयेऽष्टदले प्राग्वदेकाक्षरप्रकरणोक्तवक्रतुण्डादिकान् सम्पूज्य, लोकपालपूजादि प्राग्वत् सर्वं कुर्याद् इति।। तथा–

वर्णलक्षं जपेन्मन्त्रं जुहुयात् तदद्शांशत:। अष्टद्रव्यै: पुरा प्रोक्तैर्मधुराक्तैर्यथाविधि।। १४।।
तर्पणादि तत: कुर्याद् ब्राह्मणाराधनावधि। एवं सिद्धे मनौ मन्त्री काम्यकर्माणि साधयेत्।। १५।।
तर्पयेत् पूर्वमार्गेण वक्रतुण्डगणेश्वरम्। चतुरस्रं हस्तमात्रं कुण्डं कुर्यात् तदग्रत:।। १६।।
आदधीत मथित्वाग्निमनूचानगृहाद् हरेत्। प्राणायामत्रयं कृत्वा मन्त्री कर्म समारभेत्।। १७।।

---

*अयं पूर्वाम्नायोक्त इति बोध्यम्। १. 'कुशाङ्गम्' क. ग. पाठ:।

पूर्वमार्गेण महागणपतिप्रकरणोक्तप्रकारेण। मथित्वा काष्ठादितः। अनूचानः श्रोत्रियः।

ततः पूर्वोक्तवत् कृत्वा मन्त्रन्यासं षडङ्गकम्। गन्धपुष्पादिकैरग्निं सम्पूज्य स्थापयेत् ततः।। १८।।

षडङ्गन्यासं कृत्वा मन्त्रन्यासं कुर्यात्। स्थापयेद् दीक्षोक्तविधिना नित्यहोमविधिना वा। ध्यानम्—

कृशानुमध्ये तत्राथ नागयज्ञोपवीतिनम्। लम्बोदरं भास्वरं तमेकदन्तं त्रिलोचनम्।। १९।।
पद्मासनसमारूढं चतुर्बाहुं सुवर्णभम्। किरीटहारकेयूराङ्गदालङ्कारभूषितम्।। २०।।
एवं सञ्चिन्त्य मनसा समावाह्य गणेश्वरम्। गन्धादिभिः समभ्यर्च्य जलेनाग्निं प्रसिच्य च।। २१।।
षडर्णेन द्विठान्तेन जुहुयाच्च घृताहुतीः। अष्टाधिकं सहस्रं च ततः सिद्धो भवेन्मनुः।। २२।।
सहस्राष्टं चतुर्थीषु पक्षयोरुभयोर्जपेत्। शतं हुनेदपूपैश्च वत्सराल्लभते धनम्।। २३।।

सहस्राष्टं साष्टसहस्रमित्यर्थः।

मध्याह्नकाले नित्यं हि तदग्रे प्रजपेन्मनुम्। सहस्रं त्रिशतं वाथ शतं चाष्टोत्तरं सुधीः।। २४।।

अष्टोत्तरमिति स्थानत्रयेऽप्यन्वेति।

अचिरेणैव महतीं लक्ष्मीं प्राप्नोत्ययत्नतः। प्रसन्नतात्र मनस्तुष्टिरल्पाशिता तथा।। २५।।
स्वापवैमुख्यता चापि स्वप्ने द्विरददर्शनम्। एतानि मन्त्रसिद्धेर्हि चिह्नान्युक्तानि मन्त्रिभिः।। २६।।
पूर्वोक्तसिद्धोदनेन त्रिमासं त्रिशतं हुनेत्। महानिधीनां भवनं भवेद्वैश्रवणोऽपरः।। २७।।
गुडाक्तैः पृथुकैर्नारिकेलैर्मरिचसंयुतैः। अग्नौ सहस्रं जुहुयात् स मन्त्री धनवान् भवेत्।। २८।।
शुभशालीमयैश्चूर्णैः समरीचैः ससैन्धवैः। सजीरकैर्बहुगुडैः शुभैरतिघृतप्लुतैः।। २९।।

शालिमयैः शालितण्डुलचूर्णैः।

अपूपैर्जुहुयान्मन्त्री गणेशस्य हि सन्निधौ। सहस्रमात्रं स लभेन्महतीमचिराद्रमाम्।। ३०।।
साध्यनामार्णपुटितमनुना जुहुयात् सुधीः। अपामार्गसमिद्भिर्वा पक्वैः पनसजैः फलैः।। ३१।।
सहस्रं कदलैर्वाथ नरं नारीं वशं नयेत्। लाजाभिर्जुहुयादग्नौ सहस्रं कन्यकाप्तये।। ३२।।
सहस्रमाज्याहुतीनां हुनेत् क्षीराहुतीरपि। सहस्रं रोगशान्त्यर्थं मन्त्रशास्त्रविशारदः।। ३३।।
दूर्वाहुतीनां जुहुयाल्लक्षं मृत्युञ्जयो भवेत्। ब्रह्मवृक्षोत्थसमिधो मधुरत्रयलोलिताः।। ३४।।
सहस्रं जुहुयान्मन्त्री मासाच्छत्रूञ्जयेद् ध्रुवम्। विभीतकोत्थसमिधां सहस्रं साष्टकं निशि।। ३५।।
लोहिताक्तं श्मशानाग्नौ जुहुयान्मारयेद्रिपुम्। भूमौ शत्रुस्वरूपं च विलिख्यास्योदरेऽनलम्।।३६।।
प्रज्वाल्य सिद्धार्थवरैः सहस्रं जुहुयात् सुधीः। तं मारयेत् सप्तदिनान्नात्र कार्या विचारणा।। ३७।।
कालमेघसमानाभं गणेशं निजशुण्डया। रिपुं गृहीत्वा वडवामुखे वह्नौ महोत्कटे।। ३८।।
प्रक्षिपन्तं गणपतिं ध्यात्वामुं प्रजपेन्मनुम्। सहस्रं त्रिदिनेनासौ शत्रुमुच्चाटयेद् ध्रुवम्।। ३९।।
समुद्रगां नदीं प्राप्य गृहीत्वाञ्जलिना जलम्। सहस्रकृत्वोऽभिमन्त्र्य चाभिषिञ्चेत् स्वमूर्धनि।। ४०।।
अनेन विधिना मन्त्री पापौघं नाशयेद् ध्रुवम्। शनैश्चरदिनेऽश्वत्थमालम्ब्य त्रिसहस्रकम्।। ४१।।
जपेन्मनुं गणं ध्यायन् दोषान् ग्रहभवान् हरेत्। वेतसोत्थसमिद्धोमात् सहस्राद् वृष्टिमाप्नुयात्।।४२।।

धान्यार्थी जुहुयाद्धान्यैरन्नार्थ्यन्नैर्हुनेत् सुधीः। कमलैरुत्पलैर्वापि होमो वस्त्रप्रदो मतः।। ४३।।
क्षेत्राभिकाङ्क्षी पललैर्गुडाभ्यक्तैर्हुनेत् सुधीः। तमर्चयित्वा गणपं हरिद्रां सैन्धवं वचाम्।। ४४।।
निष्कार्धार्धप्रमाणेन सम्पिष्यैतानि निक्षिपेत्। प्रसृत्युन्मितगोमूत्रे सहस्रेणाभिमन्त्रयेत् ।। ४५।।
स्नातामृतुस्नानदिने विशुद्धां शुक्लवाससम्। पाययेत्तां च सा वन्ध्या सूते प्राग्वत्सरात् सुतम्।।४६।।
उपोष्य सोमग्रहणे भास्करग्रहणेऽथवा। कपिलाज्यं पलं चूर्णं वचायाश्च पलार्धकम्।। ४७।।
एतत सहस्रसञ्जप्तं समस्तं प्रपिबेत् सुधीः। अवाप्य मेधां महतीं कवित्वं लभते ध्रुवम्।। ४८।।
गोचर्ममात्रं भूदेशमुपलिप्यांशुकावृतम्। कृत्वात्र स्थापयेत् कुम्भमर्चितं चन्दनादिभिः।।४९।।
तस्योपरिष्टात् कपिलाघृतपूर्णं शरावकम्। घृतं तत्र प्रतिष्ठाप्य ज्वालयेद् दीपमुत्तमम्।। ५०।।
तत्र विघ्नेशमावाह्य पूजयेत् कुसुमादिभिः। कुमारीं वा कुमारं वा दीपस्याग्रे निधाय च।। ५१।।
जपेत्तु मन्त्रप्रवरमष्टोत्तरसहस्रकम्। ततः पृष्टा कुमारी वा कुमारो वा ब्रवीति तत्।। ५२।।
मनोगतं हि सकलं भविष्यं भूतमेव च। वर्तमानं मनोरस्य प्रसादान्नाव संशयः।। ५३।।

इति।। सारसङ्ग्रहे—मन्त्रान्तरम्।

मन्त्रान्तरमथो वक्ष्ये वक्रतुण्डगणेशितुः। यस्य स्मरणमात्रेण सर्वे नश्यन्त्युपद्रवाः।। १।।
झिण्ठीशेन समायुक्तो यपूर्वः कतुरीयकः। सद्याक्रान्तो धरा ब्रह्मानन्तो वाली भृगुस्तथा।। २।।
खड्गीशो दीर्घसंयुक्तो वियन्नारायणान्वितम्। षडक्षरोऽयमाख्यातः सर्ववश्यफलप्रदः।। ३।।

इति। झिण्ठीश एकारः, तेन युक्तो यपूर्वो म तेन मे इति। कतुरीयो घ, सद्य ओ, तेन घो। धरा ल, ब्रह्मा क, अनन्त आ, तेन ल्का इति। वाली य। भृगुः स, खड्गी व, दीर्घ आ, तेन स्वा। वियत् हकारः नारायण आ, तेन हा इति। तथा—

भार्गवो मुनिरस्य स्यादनुष्टुप् छन्द ईरितम्। वक्रतुण्डगणेशोऽस्य देवता देववन्दितः।। ४।।
मन्त्रवर्णैः षडङ्गानि षड्भिः कुर्याद्यथा पुरा। ध्यानपूजादिकं सर्वं मन्त्री पूर्ववदाचरेत्।। ५।।

इति। प्रयोगः सुगमः।। तथा—मन्त्रान्तरम्।

अथान्यत् सम्प्रवक्ष्यामि मन्त्रं द्वात्रिंशदर्णकम्।*रायस्पोषपदं प्रोक्त्वा वदेत् स्य दायिता नि च।। १।।
धिदो रत्नपदं चोक्त्वा दोवदं[1] च ततो वदेत्। रक्षोहणो पदान्ते वो वलगेति पदं ततः।। २।।
हनो पदान्ते सम्प्रोक्तो मन्त्रराजः षडक्षरः। द्वात्रिंशदक्षरो मन्त्रः आथर्वणिक ईरितः।। ३।।

रायस्पोष इति स्वरूपं। स्यदयितानि स्वरूपं। धिदोरत्न स्वरूपं। दोव[2]दं स्वरूपं। रक्षोहणो स्वरूपं। वो स्वरूपं। वलगहनो स्वरूपं। षडक्षरः पूर्वोक्तः। तथा—

संख्यादिकं पुरा प्रोक्तं ध्यानपूजादि पूर्ववत्। जपेदर्कसहस्राणि जुहुयात् तद्दशांशतः।। ४।।
हविषा घृतसिक्तेन तदन्ते तोषयेद्गुरुम्। एवं सिद्धमनुर्मन्त्री साधयेदिष्टमात्मनः।। ५।।

इष्टं काम्यं, तदपि षडक्षरोक्तवत्।। तथा—

---

* अयं पूर्वाम्नायोक्तः। [1] 'मतं' ग. पाठः। [2] 'दोमतः' क. पाठः।

ङेन्तं तत्पुरुषं प्रोक्त्वा विद्महे पदमुच्चरेत्। वक्रतुण्डं चतुर्थ्यन्तं धीमहीति ततो वदेत्।। ६।।
तन्नो दन्तीपदं भाष्य वदेदन्ते प्रचोदयात्। गायत्रीयं समाख्याता वक्रतुण्डगणेशितुः।। ७।।
स्नानकाले सदा जप्या मन्त्रिभिः कर्मसिद्धये।..............................।।

ङेन्त तत्पुरुषं तत्पुरुषायेति। सुगममन्यत्।। सारसङ्ग्रहे—मन्त्रान्तरम्।

[1]उच्छिष्टस्य गणेशस्य विधानमभिधीयते। हस्तिशब्दं समुच्चार्य पिशाचीति ततो वदेत्।। १।।
लिखे-पदं समुच्चार्य वह्निजायान्तमुद्धरेत्। नवाक्षरोऽयमाख्यात उच्छिष्टस्य गणेशितुः।। २।।

वह्निजाया स्वाहा। अन्यत् स्वरूपम्। तथा—

ऋषिः कङ्कोलनामास्य विराट् छन्द उदाहृतम्। उच्छिष्टगणपो देवः सर्वसम्पत्प्रदायकः।। ३।।
द्वाभ्यां हृदयमाख्यातं त्रिभिः शिर उदाहृतम्। द्वाभ्यां शिखा समाख्याता वर्माक्षिभ्यां समीरितम्।।४।।
समस्तेनास्त्रमाख्यातं पञ्चाङ्गविधिरीरितः। ध्यानार्चनविधानं च मन्त्री पूर्ववदाचरेत् ।।५।।

अत्र तु चकारात् पुरश्चरणमपि पूर्वमन्त्रोक्तमेव प्राप्यते तेन वक्रतुण्डषडक्षरप्रकरणे ''वर्णलक्षं जपेन्मन्त्र''मित्युक्तं तदत्रापि लभ्यते, तेनास्य मन्त्रस्य नवलक्षजपः पुरश्चरणमित्यवगम्यते इति। प्रयोगादिकं सुगमम्। तथा—

काम्यकर्माणि वक्ष्यामि स्तम्भे द्वेषे च मोहने। मारणे च वशीकारे तथाकर्षणकर्मणि।। ६।।
एतत् सर्वं करोत्येव सुप्रीतो गणनायकः। प्रतिमां कारयेद्धीमान् निम्बकाष्ठमयीं शुभाम्।। ७।।
साध्याङ्गुष्ठप्रमाणां च गणेशस्य महात्मनः। स्पृष्ट्वा तां प्रजपेन्मन्त्रं काम्यसिद्धिस्ततो भवेत्।।८।।
अष्टम्यां च चतुर्दश्यां कृष्णपक्षस्य मन्त्रवित्। उच्छिष्टो रात्रिमध्ये तु जपेन्मन्त्रमिमं शुभम्।। ९।।
वाञ्छितो वशमायाति साधकस्य न संशयः। भूर्जपत्रे समालिख्य साध्यनाम यथाविधि।। १०।।
मन्त्रेणावेष्टितं कृत्वा जपेन्मन्त्रमनन्यधीः। पादेनाक्रम्य तत्पत्रं हठाकृष्टिरियं मता ।। ११।।
लिखित्वा पूर्ववत् पत्रं पूजयित्वा विधानतः। साध्यं स्मृत्वा जपेन्मन्त्रं सर्वलोकं वशं नयेत्।।१२।।
धारयेन्मस्तके यन्त्रं जपेन्मन्त्रमनन्यधीः। राजानं राजपत्नीं वा कर्षयेत् तत्क्षणात् सुधीः।। १३।।

यन्त्रं मूलमन्त्रवेष्टितं साध्यनामगर्भं भूर्जपत्रम्।

ताम्बूलपत्रपुष्पाणि वस्त्राण्याभरणानि च। फलमूलादिवस्तूनि समादाय जपेन्मनुम्।। १४।।
एकविंशतिवाराणि दद्यादिष्टाय नान्यथा। सर्वलोके वशकरः प्रयोगोऽयमुदाहृतः।। १५।।
श्रीखण्डधूपदानेन राजानं वशमानयेत्। समिधो निम्बकाष्ठस्य कटुतैलसमन्विताः।। १६।।
काकपक्षसमायुक्ता हुत्वा मन्त्री यथाविधि।..............................।।

यथाविधि चिताग्नौ।

रिपुं च परसेनां च समुच्चाटयति क्षणात्। उलूककाकयोः पक्षांस्तद्वसारक्तसंयुतान्।। १७।।
श्मशानाग्नौ तु जुहुयाद्विद्वेषः स्निग्धयोः क्षणात्। शत्रुपादरजोयुक्तां चक्रिहस्तमृदं बुधः।। १८।।
श्मशानभस्मसंयुक्तामुद्वर्तनमलान्विताम्। गृहीत्वा पुत्तलीं कुर्यात् सर्वावयवशोभिताम्।। १९।।

---

१. अयमुत्तराम्नायोक्तः।

उद्वर्तनमलं शत्रुशरीरस्य।

तस्या हृदि लिखेन्नाम मूलमन्त्रेण वेष्टितम्। कृत्वा प्राणप्रतिष्ठां तु विषरक्ताढ्यपात्रके।। २०।।
स्थापयित्वा जपेन्मन्त्रं सम्यगेकाग्रमानसः। म्रियतेऽरिर्न सन्देहो देवेनापि सुरक्षितः ।। २१।।
चितायां दग्धदम्पत्योर्भस्मादाय यथाविधि। रोचनाकुङ्कुमाभ्यां च भूर्जे नाम समालिखेत्।। २२।।
वेष्टितं मूलमन्त्रेण प्राणस्थापनमाचरेत्। साध्यं स्मृत्वा जपेन्मन्त्रं सम्यगष्टोत्तरं शतम्।। २३।।
द्विष्टयोर्जनयोः सम्यक् स्नेहो भवति तत्क्षणात्।...।।

इति।। सारसङ्ग्रहे मन्त्रान्तरम्।

क्रींक्रींपदं समुच्चार्य ह्रीं ह्रीं च पदमुच्चरेत्। हुंकारं सम्यगुच्चार्य घेघेशब्दमथोच्चरेत्।। १।।
फट्कारं स्वाहया युक्तः प्रणवाद्योऽयमीरितः। एकादशाक्षरः सम्यग् मूलमन्त्रो गणेशितुः।। २।।
ऋष्यादिकं पुनः प्रोक्तं ध्यानपूजादिकं तथा। ....।।

इति।। तथा—मन्त्रान्तरम्।

एकदंष्ट्रं चतुर्थ्यन्तं वदेद्धस्तिमुखं ततः। लम्बोदरपदं ङेन्तमुच्छिष्टेति पदं ततः।। १।।
आत्मनेऽङ्कुशबीजं च ग्लूंकारं भुवनेश्वरीम्। [1]हुंघेघेपदमुच्चार्य स्वाहाकारं समुच्चरेत्।। २।।
सप्तविंशतिभिर्वर्णैर्मन्त्रः प्रोक्तो गणेशितुः। ऋष्यादि ध्यानपूजादि यथापूर्वं समाचरेत्।। ३।।

तृतीयचतुर्थपदयोर्विसन्धिः। अन्यत्सुगमम्। यथापूर्वं वक्रतुण्डषडक्षरवत्।। तथा मन्त्रान्तरम्—

ॐकारं विलिखेदादौ नमो भगवते पदम्। एकदंष्ट्राय सम्भाष्य हस्त्यन्ते मुखशब्दतः।। १।।
लम्बोदरपदं ङेन्तमुच्छिष्टेति पदं ततः। महात्मने पदं प्रोक्त्वा वदेदङ्कुशबीजकम्।। २।।
ग्लूंकारं मायया युक्तं हुंघेघे च समुच्चरेत्। स्वाहान्तो मनुराख्यातः सम्यक् षट्त्रिंशदक्षरः।। ३।।

उच्छिष्टेत्यत्र विसन्धिः।

ऋष्यादिकं पुरा प्रोक्तं षड्बीजैरङ्गमीरितम्। ध्यानपूजादिकं सर्वं मन्त्री पूर्वोक्तमाचरेत्।। ४।।

मन्त्रोद्धारः सुगमः। षड्बीजैरिति, क्रों हृदयं, ग्लूं शिरः, ह्रीं शिखा, हुं कवचं, घे नेत्रं, घे अस्त्रं। अन्यत् सुगमम्।
तन्त्रान्तरे—बलिमन्त्रः।

“ॐगंहंक्लौंसमुच्चार्य ग्लौं उच्छिष्टगणे पदम्। ततः शाय महायक्षायायं बलिरिति स्मृतः।।
बलिमन्त्रस्तथोच्छिष्टगणेशस्य महात्मनः। अनेन मनुना मांसं फलं वापि बलिं हरेत्।।”

ॐगंहंक्लौंग्लौं उच्छिष्टगणेशाय महायक्षायायं बलिः। ध्यानविशेषमाह—

चतुर्भुजं त्रिनेत्रं च रक्तवर्णं कराम्बुजैः। पाशाङ्कुशौ मोदकानां पात्रं दन्तं च बिभ्रतम्।। ५।।
कमलासनमासीनमुन्मत्तं गणनायकम्। पुरश्चरणसिद्ध्यर्थं लक्षसंख्यं जपेद् बुधः[2] ।। ६।।
जुहुयात् तद्दशांशेन तिलैराज्यपरिप्लुतैः। यजेत् पूर्वोदिते पीठे उच्छिष्टगणनायकम्।। ७।।
आदावङ्गानि सम्पूज्य मातृका दलसंस्थिताः। दलाग्रेषु च सोर्ध्वाधो दशदिक्षु प्रपूजयेत्।। ८।।

---

१. ‘ह्रीं’ क. पाठः, ‘क्ली’ ग. पाठः। २. ‘मनुम्’ ख. पाठः।

वक्रतुण्डैकदंष्ट्रौ च लम्बोदरसमाह्वयः। विकटो धूम्रवर्णश्च विघ्नश्चैव गजाननः।। ९।।
विनायको गणपतिर्हस्तिदन्तश्च वै दश। चतुरस्रे लोकपालान् वज्रादीनि ततो बहिः।। १०।।
एवं सम्पूज्य विघ्नेशं ततः काम्यानि साधयेत्। श्वेतार्कमूलतो वापि मर्कटीकाष्ठकेन वा।। ११।।
स्वाङ्गुष्ठप्रमितां कुर्याद्गणेशप्रतिमां तथा। प्रोक्तलक्षणसम्पन्नां प्रतिष्ठाप्य प्रयत्नतः।। १२।।
मधुना स्नापयेत्तां तु कृष्णप्रतिपदादितः। शुक्ला चतुर्दशी यावत् सगुडं पायसं तथा।। १३।।
निवेद्य प्रजपेन्मन्त्रं सहस्रं नित्यमादरात्। तिलैस्तावच्च जुहुयाद् घृताक्तैरेधितेऽनले।। १४।।
गणेशोऽहमति ध्यायन्नुच्छिष्टेन दिगम्बरः। पक्षाद्राज्यमवाप्नोति नृपो योऽन्यो नरोऽपि वा।। १५।।
कुलालमृत्स्नाप्रतिमां पूजितां*राज्यमाप्नुयात्। वल्मीकमृत्कृता वापि सर्वाभीष्टं प्रयच्छति।। १६।।
सौभाग्यदा गुडमयी लोणजा शत्रुनाशिनी। रणे द्यूते विवादे च जपेन जयमाप्नुयात्।। १७।।
एतन्मन्त्रप्रभावेन कुबेरो धनदोऽभवत्। विभीषणश्च सुग्रीवो लेभाते राज्यमञ्जसा ।। १८।।
रक्तवस्त्रधरो रक्तस्ताम्बूलं निश्यदञ्जपेत्। यद्वा नैवेद्यशेषं तु मोदकं भक्षयञ्जपेत्।। १९।।

इति।। तथा—मन्त्रान्तरम्।

प्रणवो भुवनेशी च स्मृतिर्बिन्दुसमन्विता। ततो नवाक्षरश्चैव सम्प्रोक्तो द्वादशाक्षरः।। २०।।

ओंह्रींगं हस्तिपिशाचि लिखे स्वाहा (१२)।। तथा—

तारं हृदुच्छिष्टपदं गणेशाय नवाक्षरः। एकोनविंशत्यर्णोऽयं मुन्याद्याः पूर्ववत् स्मृताः।। २१।।
(त्र्यगद्वित्रिद्विद्विभिश्च मन्त्रार्णैः स्यात् षडङ्गकम्।)..।।

ओं नमः उच्छिष्टगणेशाय हस्तिपिशाचि लिखे स्वाहा। १९।। इति।। तथा—

प्रणवं हृद्भगवते एकदंष्ट्राय वै वदेत्। ततो हस्तिमुखं ङेन्तं तथा लम्बोदरं ततः।। २२।।
वदेदुच्छिष्टशब्दान्ते महात्मानं च ङेन्तगम्। पाशमङ्कुशमाये च विघ्नबीजं च घेद्वयम्।। २३।।
वह्निजायावधि सप्तत्रिंशदर्णो मनुर्मतः।...।।

ओं नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आंक्रोंह्रींगंघेघे स्वाहा (३७)।।

गणकोऽस्य ऋषिश्छन्दो गायत्री देवता ततः। उच्छिष्टपदपूर्वश्च गणनाथः समीरितः।। २४।।
गिरिपङ्क्तिशराद्व्यब्धियुगार्णैरङ्गकल्पना।...।।

शरचापगुणाङ्कुशान् स्वहस्तैर्दधतं रक्तसरोरुहे निषण्णम्।
विगताम्बरजायया प्रवृत्तं सुरते सन्ततमाश्रये गणेशम्।। २५।।

लक्षमानं जपेन्मन्त्रं तद्दशांशं हुनेद् घृतैः। तर्पणानि दशांशेन कुर्याद् ब्राह्मणभोजनम्।। २६।।
एवं संसिद्धमन्त्रस्तु प्रयोगानाचरेद् बुधः। धनं धान्यं सुतान् पौत्रान् सौभाग्यमतुलं यशः।। २७।।
प्राप्नोति साधकश्रेष्ठो गणेशस्य प्रसादतः। इभभग्नेन निम्बेन मूर्तिं कुर्याद्गणेशितुः।। २८।।
प्राणान् संस्थाप्य सम्पूज्य तदग्रे तु मनुं जपेत्। ध्यात्वा यं दासवत् सोऽपि वश्यो भवति नान्यथा।।२९।।

---

*प्रतिष्ठाप्येति शेषः।

नदीजलं समादाय सप्तविंशतिसंख्यया। अभिमन्त्र्य ततस्तेन मुखं प्रक्षालयेद्बुध:।। ३०।।
तं दृष्ट्वा वशमायान्ति नरनारीनृपालका:। वामपादरजो गृह्य योषाया: प्रजपेन्मनुम्।। ३१।।
गणेशसन्निधाने हि रविसाहस्रकं स्मरन्। सा समायाति नियतं हठादाकर्षणं त्विदम्।। ३२।।
इभभग्नेन निम्बेन श्वेतार्केनाथवा सुधी:। गणेशप्रतिमां कृत्वा चतुर्थ्यां निशि पूजयेत्।। ३३।।
सर्वरक्तोपंचारैश्च सहस्रं प्रजपेन्मनुम्। सरित्तटे क्षिपेत्तां तु प्रतिमां निशि साधक:।। ३४।।
यत्कार्यमारभेत् तस्य स्वप्ने वक्ति फलाफलम्। सहस्रनिम्बकाष्ठानां होमादुच्चाट़येदरीन्।। ३५।।
समिधां वज्रिणां होमान्मारयेच्छत्रुमात्मन:। मर्कटास्थि सुसञ्जप्तं क्षिप्रमुच्चाटयेद् गृहे।। ३६।।
नरास्थि जप्तं कन्याया गृहे क्षिप्तं तदाप्तिकृत्। स्त्रीणां वामाङ्घ्रिरजसा कुलालस्य मृदा तदा।।३७।।
कुर्यात् पुत्तलिकां तस्या हृदि स्त्रीनाम चालिखेत्। निम्बकाष्ठै: सहैतां तां जप्तं भूमौ विनिक्षिपेत्।।३८।।
उन्मत्ता जायते सा च प्रोद्धृतायां सुखी भवेत्। लशुनेन सहैवारे: शरावद्वयसम्पुटे ।। ३९।।
क्षिप्त्वा तां प्रतिमां सम्यक् पूजितां द्वारि विद्विष:। निखाय पक्षमात्रेण शत्रुमुच्चाटयेद् ध्रुवम्।।४०।।
सङ्कटे समनुप्राप्ते सितार्कारिष्टदारुजम्। पूजितं गणपं सम्यग् रक्तगन्धोपचारकै: ।। ४१।।
मद्यभाण्डे विनिक्षिप्य पूजास्थाने निखातयेत्। तत्रोपविश्य प्रजपेन्मन्त्रं नक्तन्दिवं बुध:।। ४२।।
नश्यन्त्युपद्रवा: सर्वे सप्ताहान्नात्र संशय:। दुष्टनारीवामपादरजोभिर्निजदेहजै: ।। ४३।।
मलैर्मृत्तिकया कुम्भकारकस्य प्रतिमां तथा। गणेशस्य ततो मद्यभाण्डस्थां निखनेद् भुवि।।४४।।
तत्र कुण्डं विधायाशु जुहुयाद्धयमारजै:। कुमुमै: सा भवेद् दासी सहस्रमितहोमत:।। ४५।।

इति।। तथा—मन्त्रान्तरम्।

तारो हस्तिमुखं ङेन्तं लम्बोदरपदं तत:। तथोच्छिष्टमहात्मानं पाशाङ्कुशत्रपास्तत:।। १।।
कामत्रपावर्म घेघे उच्छिष्टायाग्निवल्लभा। द्वात्रिंशदक्षरो मन्त्रो गणेशस्य महात्मन:।। २।।
रसेषुसप्ताष्टयुगनेत्रार्णैरङ्गकल्पना। ....।।

ओंहस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आंक्रोंह्रींक्लींह्रींहुंघेघे उच्छिष्टाय स्वाहा (३२)।।*

अथ मञ्जुघोषप्रकरणम्—

जाड्यौघतिमिरध्वंस: संसारार्णवतारक:। श्रीमञ्जुघोषो जयतां साधकानां सुखावह:।। १।।

आगमोत्तरे—

मातृकादिं समुद्धृत्य वह्निबीजं समुद्धरेत्। वामांसं कूर्मसंज्ञं च ततो मेषेशमुद्धरेत्।। १।।
मीनेशं च तत: कुर्याद्वामनेत्रेन्दुसंयुतम्। षडक्षरो मनु: प्रोक्तो मञ्जुघोषस्य शम्भुना।। २।।

मातृकादिरकार:। वामांसोऽन्त:स्थचतुर्थ:। कूर्मश्चकार:। मेषेशो लकार:। मीनेशो धकार:।

---

*उच्छिष्टगणनाथस्य मन्त्रेष्वेषु न शोधनम्। सिद्धारिचक्रमासादि प्राप्तास्ते सिद्धिदा गुरो:।। मनवोऽमी सदा गोप्या न प्रकाश्या इतस्तत:। वाममार्गाराधनं तु विनानेन न सिद्ध्यति।। जातिभ्रंशो निर्धनत्वं वंशच्छेदोऽन्यथा भवेत्।। (मेरुतन्त्रे १९ शे अध्याये।)

इयं तु दीपनी प्रोक्ता मूलमन्त्रस्तु कथ्यते। अङ्कुशं शक्तिबीजं च रमाबीजं ततः प्रिये।। ३।।
बीजत्रयात्मको मन्त्रो जाड्यौघध्वान्तनाशनः। ततः शक्तिरमाबीजं कामबीजं तथा प्रिये।। ४।।
विद्या श्रुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका। हकारो वह्निमारूढो वामनेत्रेन्दुभूषितः।। ५।।
प्रोक्ता सार्वज्ञविद्येयमेकवर्णात्मिका प्रिये। सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुः सदा।। ६।।
तदा मन्त्रो भवेद्भक्त्या शुभदो बुद्धिदो भवेत्। मध्याह्ने सलिले चैव भोजने भाजने तथा।। ७।।
गोमये तु बहिर्देशे मैथुने रमणीकुचे। गोष्ठे च निशि गोमुण्डे यन्त्रं डमरुसन्निभम्।। ८।।
विलिख्य मन्त्रवर्णांश्च त्रिश ऊर्ध्वमधस्तथा। लिखेच्चन्दनलेखिन्या प्रयत्नात् साधकोत्तमः।। ९।।
उच्चाटने लिखेद्यन्त्रं गोचर्मणि विशेषतः। सलिले विजयो नित्यं भाजने च महेश्वरः।। १०।।
गोमये वावदूकः स्याद्गोष्ठे सर्वज्ञतां व्रजेत्। कुचे श्रुतिधरो नित्यं गोमुण्डे च महाकविः।। ११।।
गोमूत्रं बदरीमूलं चन्दनं पांसुमेव च। एकीकृत्याष्टधा जप्त्वा तिलकं धारयेत् सदा।। १२।।
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद् भक्तितत्परः। वरं प्राप्य च तस्माद्वै विहरेत्तु यथासुखम्।। १३।।
नान्यदेवार्चनं स्नानं प्रणवोच्चारणं न तु। वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा।। १४।।
रात्रिवासो न मुञ्चेत न शुचिः स्यात् कदाचन। एवं कृते प्रयत्नेन ज्ञात्वा गुरुमुखात् सुधीः।। १५।।
मासैकेन कवीन्द्रः स्याद् द्विमासेनैव ईश्वरः। त्रिभिर्मासैर्भवेन्मर्त्यः सर्वशास्त्रविशारदः।। १६।।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्। आयुरारोग्यकामस्तु सर्वान् कामानवाप्नुयात्।। १७।।

तन्त्रान्तरे—

संवर्तको वकेशश्च द्वौ वर्णौ कथितौ प्रिये। षड्दीर्घभाग्भ्यामेताभ्यां षडङ्गानि समाचरेत्।। १८।।

संवर्तः क्ष। बकेशः श। इति। अथ ध्यानम्—

शशिधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं सुरुचिरमतिशान्तं पञ्चचूडं कुमारम्।
पृथुतरवरमुख्यं पद्मपत्रायताक्षं कुमतिदहनदक्षं मञ्जुघोषं नमामि।। १९।।

पीठपूजां ततः कुर्यादाधाराद्यादिशक्तितः। भूतप्रेतादिभिः कुर्यात् पीठासनमनन्तरम्।। २०।।
ज्ञानदात्रे नमः पाद्यं बुद्धिदात्रे तथाचमम्। जाड्यनाशाय गन्धः स्यादर्घ्यं यक्षाधिपाय वै।। २१।।
सर्वसिद्धिप्रदायेति पुष्पं दद्याद्विशेषतः[1]। कुन्दपुष्पं समादाय भैरवान् पूजयेत् ततः।। २२।।
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः। कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः।। २३।।
ततो धूपादिकं दत्त्वा प्रसूनानि विसर्जयेत्। तैः पुष्पैः पूजयेदष्टौ यक्षिणीश्च विशेषतः।। २४।।
सुरादिसुन्दरी चैव मनोहारिण्यनन्तरम्। कनकावती तथा कामेश्वरी रतिकर्यथ ।। २५।।
पद्मिनी च नटी चैव अनुरागिण्यनन्तरम्। पूज्या एतास्तु योगिन्यो हृल्लेखाबीजपूर्विकाः।। २६।।
एवं सम्पूज्य देवेशं लक्षषट्कं जपेन्मनुम्। घृताक्तकुन्दपुष्पैश्च एकादश शतानि च।। २७।।

---

[1] 'विचक्षणः' ख. पाठः।

जुहुयादेधिते वह्नौ कान्तारे पितृवेश्मनि। एवं सिद्धमनुर्मन्त्री महावागीश्वरो भवेत्।। २८।।

इति।। कुक्कुटेश्वरतन्त्रे—

मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुम्। शङ्करं परिपपृच्छ पार्वती परमेश्वरम्।। १।।

श्रीपार्वत्युवाच—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रागमादिषु। वाञ्छितार्थप्रदं लोके मञ्जुघोषं ब्रवीहि मे।। २।।
विशेषतोऽपि जप्त्वा किं कवित्वपददं नृणाम्। सर्वकर्मप्रदं साक्षान्मनःसिद्धिप्रदं तथा।। ३।।
भक्तानां कामदं मन्त्रं कल्पवृक्षमिवापरम्। ....।।

श्रीशङ्कर उवाच—

शृणु देवि महामन्त्रं साधकानां सुखावहम्। यज्ज[1]प्त्वा जडधीः प्रायो वाचस्पतिसमो भवेत्।। ४।।
अङ्गन्यासकरन्यासबहिर्न्याससमन्वितम्। जपात् सिद्धिप्रदं मन्त्रं विना होमार्चनादिभिः।। ५।।
जपेद्वा जापयेद्वापि साधको विधिपूर्वकम्। सर्वज्ञत्वमवाप्नोति सत्यं सत्यं हि पार्वति।। ६।।
कार्तिकेयमुखं यावत्तावल्लक्षं जपेन्मनुम्। सर्वशास्त्रेषु सोऽप्युच्चै[2]र्बृहस्पतिसमो भवेत् ।। ७।।

श्रीपार्वत्युवाच—

कोऽप्यत्रापि ऋषिश्छन्दः पूज्यते कोऽत्र देवता। ध्येयश्च को वा तत् सर्वं ब्रूहि मे भक्तवत्सल।।८।।

श्रीईश्वर उवाच—

बृहदारण्यको नाम ऋषिर्विराडुदाहृतम्। छन्दश्च मञ्जुघोषाख्यो भुक्तिदानेन मुक्तिदः ।। ९।।
ध्यात्वा भैरवरूपेण जपेन्मन्त्रमनन्यधीः। तदा मुक्तिप्रदो मन्त्रो नात्र कार्या विचारणा।। १०।।
ध्यानं तत्र प्रवक्ष्यामि भैरवस्य महात्मनः। यथा ध्यात्वा जपेन्मन्त्रं तन्मे निगदतः शृणु।। ११।।
सात्त्विकं राजसं चैव तामसं तदनन्तरम्। ध्यानं वक्ष्ये महादेवि क्रमेण हितकाम्यया।। १२।।
सद्यः सिद्धिकरं रूपं ध्यात्वा जपेच्च सात्त्विकम्। सिद्धिप्रदं साधकानां भक्तानां चिन्तितप्रदम्।।१३।।
मन्त्रोद्धारमिदं देवि त्रैलोक्यस्यातिदुर्लभम्। अप्रकाशं परं गोप्यं न देयं यस्य कस्यचित्।। १४।।
मन्त्रोद्धारं प्रवक्ष्यामि गुह्याद्गुह्यतरं[3] प्रिये। ....।।

विष्ण्वग्निवाश्च शशियुक् चलधीषडर्णो[4] मन्त्रः समस्तजगतां सकलेष्टदश्च।*
सर्वज्ञतां सदसि वाक्पटुतां प्रसूते वेदान्तवेदनिरतस्य वसुप्रदः स्यात्।। १५।।

[5]आशु मन्त्रं जपेन्मन्त्री स्वमन्त्रं यदि साधकः। बलिनैवेद्यभुक् साक्षाद् बृहस्पतिरिवापरः।। १६।।
मासमात्रेण[6] यः कुर्यात् पुरश्चरणवान्नरः[7]। तस्यापि वदनाद्वाणी निःसरेद्वरवर्णिनि[8] ।। १७।।

---

[1] 'ज्ञात्वा' ग. पाठः। [2] 'सोत्युच्चै' ख. पाठः। [3] तमं ख. पाठः। [4] 'धीस्वरूपं षड्वर्णमन्त्र उदितो जगतां सुखाय'। ख. पाठः। [5] 'अथ मन्त्रं जपेन्मन्त्री अयुतं' ख. पाठः। [6] 'त्रयेण' [7] 'श्चर्यां परं नरः' ख. पाठः। [8] 'रसवर्तिनी' ख. पाठः।

* विष्णुरकारः, अग्निः रेफः, व स्वरूपं, चलधी इति स्वरूपं तेन 'अरवचलधी' इति मन्त्रः।

मासमात्रेण[१] सततं कविरेव न संशयः। गोमुण्डे गवि पृष्ठे च चक्रे[२] वापि च गोमये।। १८।।
यन्त्रे मन्त्रं लिखित्वादौ पश्चान्मन्त्रं जपेत्पुनः। ध्यानमात्रं विधायादौ भावयित्वा चिरं सुधीः।।१९।।
निर्जनं स्थानमासाद्य जपेन्मन्त्रमधोमुखः। पौर्णमासीं समासाद्य[३] कुन्दस्य कुसुमैः शतैः।। २०।।
अष्टाधिकैश्च सम्पूज्य जपेन्मन्त्रं चतुष्पथे। त्रिमुण्डारोहणं कृत्वा निशीथे मुक्तकुन्तलः।। २१।।
षण्मासमात्रं जपति यदि मन्त्री[४] विधानवित्। बृहस्पतिसमो वक्ता नात्र कार्या विचारणा।। २२।।
कुक्कुरस्य च मुण्डैकं मुण्डं क्रोष्टुर्वृषस्य च। त्रिमुण्डमेतद् विख्यातं साधकानां सुखावहम्।।२३।।
आसने चैव गोमुण्डं वामे कुक्कुरमुण्डकम्। दक्षिणे च शिवामुण्डं कृत्वा पूजां समाचरेत्।।२४।।
अर्धचन्द्राकृति साक्षाद्बालचन्द्रोपमं स्फुटम्। यन्त्रं लिखेत्तत्र पूजां कुन्दस्य कुसुमेन च।। २५।।

सव्येन पाणिकमलेन जपादिपूजा शृङ्गारशीलनविधिः खलु दक्षिणेन।
राकासुधाकरमरीचितुषारगौरं ध्यात्वा चतुष्पथतटे वृषमस्तके च[५]।। २६।।
सञ्चिन्त्य कुक्कुरशिरः शिरसाधिरूढं कुन्देन साधकतमो जपति प्रकामम्।
गोचर्मणा विरचितं रसलक्षमग्रे[६] चक्रं ततोऽपि नवकुङ्कुमरोचनाभिः।। २७।।
निर्माय सव्यविधिना व्यजने श्मशाने सम्पूजयेद्वनभवैश्च नवैः पलाशैः।
सम्पूर्णमण्डलतुषारमरीचिमध्ये बालं विचिन्त्य धवलं वरखड्गहस्तम्।। २८।।
(उद्दामकङ्कण(केशनि)वहं वरपुस्तकाढ्यं नग्नं जपेत् क्षतजपद्मदलायताक्षम्।।२९।।
अरिष्टगेहे निशि तैलमेवमादाय यत्नात् करपल्लवेन।
तेनाञ्चितं काञ्चनपुष्पमेव निवेद्य तस्मै जपति प्रकामम्)।। ३०।।
अशोकशाकोटतरोश्च मूले विलिप्य[७] पादौ वदनामृतेन।
त्रिमुण्डमात्राश्रित एव रात्रौ जपेद्यथाशक्ति तु पौर्णमास्याम्।। ३१।।
लकुचतरु[८]तलस्थो मुण्डमात्रैकरूढो हिमकरकरगौरं चिन्तयित्वा निशीथे।
यदि जपति जडात्मा[९] मन्त्रमेनं त्रिलक्षं भवति जगति साक्षाद्गीष्पतिर्नात्र चित्रम्।। ३२।।
[१०]भुक्त्वान्नमेव कदलीतरुमूलसंस्थ आस्तीर्णपुष्परचितासनसन्निविष्टः ।। ३३।।
राकाविधूद्र[११]ममुपेत्य करोति पूजां यः सोऽप्यजेय इति वाक्पतिरीश्वरः स्यात्।। ३४।।
जिह्वां विमृज्य निजपाणिसरोरुहाभ्यां कुन्द[१२]प्रसूनशतकैः परिपूज्य[१३] गोष्ठे।

---

१. 'त्रयेण' ख. पाठः। २. 'गोमुण्डोपरिपृष्ठे च यत्नेनापि' ख. पाठः। ३. 'समारभ्य' ख. पाठः। ४. 'कृत्वा' ग. पाठः। ५. 'मस्तकस्थः' ख. पाठः। ६. 'गोचर्मरक्तचरितं रसकोणमात्रं' ख. पाठः। ७. 'विलिख्य' ख. पाठः। ८. 'विटपिमध्ये' ख. पाठः। ९. 'जडो वा लक्षमेकं त्रिपक्षं' ख. पाठः। १०. 'भुक्तान्नशेषकदलीतरुपुष्पजालमुण्डत्रयेविरचिता' ख. पाठः। ११. 'दयमुपेत्य' ख. पाठः। १२. 'बाण' ख. पाठः। १३. 'परिमृज्य' ख. पाठः।

यो वै जपेदनुदिनं रसलक्षमात्रं शेषं जयेत् किमुत वाक्पतिमेकवक्त्रम्।। ३५।।
स्थित्वा निशीथसमये रजकस्य काष्ठे खड्गान्वितो जपति यद्यपि पौर्णमास्याम्।
सम्पूर्णमासमथ वा तरसापि[1] तस्य वक्त्राद् विनि:सरति गीरमृतायमाना।। ३६।।
यो दन्तधावनकृतैश्च करञ्जकाष्ठैस्तस्यापि गीष्पतिवचो नियतं सुलभ्यम्।
तिलतैलेन मतिमान् कुन्दकैरवपुष्पकै:। यत्नतो जुहुयान्मन्त्री सर्वसिद्धिमुपालभेत्।। ३७।।
मञ्जिष्ठतोयसुवचासितभानुपुष्पै:[2] स्वीयाङ्गशोणितयुतै: समकुष्ठकैकश्च।
कृत्वा ललाटफलके तिलकं जपस्थो[3] विद्यार्थबोधविषये नवगीष्पति: स्यात्।। ३८।।

इति।। भैरवतन्त्रे—मञ्जुघोषमन्त्र:।

मञ्जुघोषाख्यममलं मन्त्रमाकर्णय प्रिये। धनवंशप्रदं रम्यं सार्वज्ञवाग्मिताप्रदम्।। १।।
अदोषकवितामूलममलं प्रतिभाप्रदम्। ....।।

श्रीदेव्युवाच—

भवगन् गिरिजानाथ कथयस्व यथोदितम्[4]। मञ्जुघोष: स क: कीदृक् तस्यानुष्ठानमेव हि।। २।।

श्रीईश्वर उवाच—

श्रूयतां देवि मे वाक्यं (नात्र कार्या विचारणा। मञ्जुघोषस्तु यो देव: सोऽहं देवि न संशय:।। ३।।
एकोऽहं शङ्करो देवि नानारूपधर: स्वयम्। तस्यानुष्ठानमधुना) श्रूयतां मम तत्त्वत:।। ४।।
मन्त्र: षडक्षर: सार: सद्य: कुमतिनाशक:। रसलक्षावधिस्तस्य जाप्य एव सुरेप्सित:।। ५।।

(मञ्जलरींलरीमिति मन्त्र:)

त्रिपक्षजपनाद् देवि वाग्मी भवति मानव:। सुकवित्वं भवेत्[5] तस्य प्रतिभा विश्वजित्वरी।। ६।।
मासत्रयं जपेद्यस्तु पण्डितोऽपण्डितो यदि। षण्मासं यस्तु जपति स सर्वज्ञ: कुशाग्रधी:।। ७।।
अब्देन सिद्धय: सर्वा भवन्ति सत्यमीश्वरि। आहारोऽस्य नृणां वर्चो नैवेद्यं चक्षुषोर्मलम्।। ८।।
मूत्रै: पाद्यं ददेत् तस्य गन्धो विट्खदिरोद्भव:। अरण्यस्य[6] च पत्राणि पुष्पाण्येव सुनिश्चितम्।।९।।
एरण्डमूलै: कार्पासबीजमर्घ्यं प्रचक्षते। तुण्डकीलालदानेन भवेदाचमनीयकम्।। १०।।
ध्यानं वक्ष्ये महादेवि सर्वसिद्धिप्रदायकम्।..।।

शशिधरमिव शुभ्रमित्यादि प्रागुक्तं ध्यानम्।

मन्त्रोद्धारं प्रवक्ष्यामि नमस्कारोपदेशत:। शृणु देवि महाभागे कलौ सद्य: फलप्रदम्।। ११।।
मन्त्रं सर्वार्थदं सारं वशीकरणमुत्तमम्। अमलं निर्गुणं सारं गुणितं सर्वकामदम्।। १२।।
तं नमामि हितं नाथं मञ्जुघोषं नमाम्यहम्। वरेण्यं परमं सारं स्तुतं ब्रह्मादिभि: सुरै:।। १३।।
रक्तं रजोगुणैर्युक्तं मञ्जुघोषं नमाम्यहम्। वचनेन न जानन्ति कायेन न च कोविदा:।। १४।।

---

[1] 'वचसा' क. ग. पाठ:। [2] 'भानुमूलै:' क. ग. पाठ:। [3] 'व्रतस्थ:' ग. पाठ:। [4] 'यथोचितम्' ख. पाठ:।
[5] 'करे' ख. पाठ:। [6] 'आरण्यकस्य' ख. पाठ:।

तं शान्तं तमसा युक्तं पीतवस्त्रं नमाम्यहम्। चरणे पतिता यस्य[1] दैत्यानां जयहेतवे।। १५।।
चरणे पतितो जीवो वृद्धये[2] तं नमाम्यहम्। न जानन्ति सुरा यस्य तत्त्वं सत्त्वगुणेन वै।। १६।।
कृष्णं समस्तसारं च मञ्जुघोषं नमाम्यहम्। धीशं विश्वेश्वरं चैव प्रतिपत्त्यादिहेतुकम्।। १७।।
सकलं निष्कलं चैव तं नमामि हितप्रदम्। (ऋषिः कण्वो भवेत् पङ्क्तिच्छन्दोऽङ्गानि षडक्षरैः)।।१८।।
दक्षिणां च ततो दद्याद् गुरुतुष्टिर्यथा भवेत्। गुरुसन्तोषमात्रेण सिद्धिर्भवति निश्चितम्।। १९।।
(पिता गुरुर्न कार्यो वै दीक्षाकर्मणि पार्वति। यावत्कालं सुतो दुःखी पिता तु नरकं व्रजेत्)।।२०।।

इति मञ्जुघोषप्रकरणम्।। (अथ चरणायुधमन्त्रः—)

पाशबीजं ततस्तीक्ष्णं वामकर्णेन्दुसंयुतः। सद्योजातयुतः क्रोधी पिनाकी सूक्ष्मसंयुतः।। १।।
पुनरेतत् त्रयं प्रोक्त्वा खड्गीशोऽनन्तसंयुतः। मायाबीजं द्वितीयादित्रयं प्रोक्त्वा द्विधा ततः।। २।।
कूर्मः कर्णयुतः खड्गी युतोऽनन्तेन चाङ्कुशम्। अष्टादशाक्षरो मन्त्रश्चरणायुधसंज्ञकः।। ३।।

आंपूंकोलिपूंकोलिवाह्रींपूंकोलिपूंकोलिचुवाक्रों।। १८।।

महारुद्रो मुनिः प्रोक्तो जगती च्छन्द उच्यते। मायाबीजं सृणिः शक्ति पाशबीजं तु कीलकम्।।४।।
देवता कथितः सद्भिश्चरणायुधसंज्ञकः। चतुर्भिश्च त्रिभिर्नेत्रैस्त्रित्रित्र्यर्णैः षडङ्गकम्।। ५।।
मूर्ध्नि भाले भ्रुवोरक्ष्णोः कर्णयोर्घ्राणयोर्मुखे। कण्ठे कुक्षौ च नाभौ च लिङ्गे चैव गुदे तथा।।६।।
जानुनोः पादयोर्न्यस्येन्मन्त्रवर्णान् यथाविधि। सर्वालङ्कारसन्दीप्तकण्ठपादद्वयान्वितम् ।। ७।।
गलत्सुवर्णवर्णाभं चलत्पक्षद्वयान्वितम्। गौरीकरसरोजस्थं सर्वामरसुपूजितम्।। ८।।
रक्तवर्णशिखायुक्तं रक्तचञ्चुपुटद्वयम्। चलत्पादं समस्तार्तिनाशनं सर्वसिद्धिदम्।। ९।।
एवं ध्यायन् महादेवं कुक्कुटेश्वरसंज्ञितम्। एवं ध्यात्वा यजेत् पीठे शैवे तै ताम्रशेखरम्।। १०।।
अङ्गावृत्तिं जयेदादौ दलेष्वष्टसु वै यजेत्। प्रादक्षिण्यक्रमाच्छम्भुं गौरीं गणपतिं तथा।। ११।।
कार्तिकेयं च मन्दारं पारिजातं ततः परम्। महाकालं बर्हिणं च चतुरस्रे दिगीश्वरान्।। १२।।
तदायुधान्यपि बहिः पूजान्ते बलिमाहरेत्। द्वितीयबीजं संवर्तं सबिन्दुं भुवनेश्वरीम्।। १३।।
कुक्कुटेति द्विरुच्चार्य एह्येति च द्विधा वदेत्। इमं बलिं गृह्ण गृह्ण गृह्णापययुगं ततः।। १४।।
सर्वान् कामांश्च देवि द्वे यं कूं[3] ह्रीं पूं नमः पदम्। कुक्कुटायेति मन्त्रोऽयं जिनयुग्मार्णकः परः।। १५।।
मधुरत्रययुक्तैश्च लाजैर्दद्याद्बलिं निशि। ....।।

पूंक्षंह्रीं कुक्कुट २ एहि २ इमं बलिं गृह्ण २ गृह्णापय २ सर्वान् कामांश्च देहि २ यं कूं[4] ह्रीं पूं नमः। कुक्कुटाय(४८)।।

अथः प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि महारुद्राय ऋषये नमः। मुखे अतिजगतीच्छन्दसे नमः। हृदये श्रीकुक्कुटेश्वराय देवतायै नमः। गुह्ये ह्रीं बीजाय नमः। पादयोः क्रों शक्तये

---

१. 'देवाः' ख. पाठः। २. 'बुद्धाये' ख. पाठः। ३. 'फूं' क. पाठः। ४. 'फूं' क. पाठः।

नमः। नाभौ पूं कीलकाय नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, आंपूंकोलि हृदयाय नमः। पूंकोलि शिरसे०। वाह्लीं शिखायै०। पूकोलि कवचाय०। पूंकोलि नेत्रत्रयाय०। चुवाक्रों अस्त्राय०। इति करषडङ्गन्यासं विधाय, मूर्ध्नि आं नमः। भाले पूं०। दक्षभ्रूप्रदेशे कों०। वामे लिं०। दक्षनेत्रे पूं०। वामे कों०। दक्षकर्णे लिं०। वामे वां०। दक्षनासिकायां ह्लीं०। वामे पूं०। वक्त्रे कों०। कण्ठे लिं०। कुक्षौ पूं०। नाभौ कों०। लिङ्गे लिं०। गुदे चुं०। जान्वोः वां०। पादयोः क्रों नमः। इति विन्यस्य, ध्यानादिमानसपूजान्तेऽस्य पुरतः कुङ्कुमचन्दनादिनाष्टदलकमलं विलिख्य तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रं कुर्यात्, इति पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते शैवं पीठं समभ्यर्च्य, मूलेन मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते कर्णिकायामग्नीशासुरवायव्यमध्ये दिक्षु च प्राग्वत् षडङ्गानि सम्पूज्य, दलेषु देवाग्रादिप्रादक्षिण्येन शम्भवे नमः। गौर्य्यै०। गणपतये०। कार्तिकेयाय०। मन्दाराय०। पारिजाताय०। महाकालाय०। बर्हिणे०। इति सम्पूज्य, लोकपालार्चादि सर्वं प्राग्वत् समाप्य प्रोक्तमन्त्रेण प्रोक्तद्रव्यैर्बलिं दद्यादिति।। तथा–

जपेल्लक्षं दशांशेन त्रिमध्वक्तैस्तिलैर्हुनेत्। तर्पणादि ततः कुर्याद्ब्राह्मणाराधनं ततः।। १६।।
एवं सिद्धमनुर्मन्त्री सर्वाभीष्टं च साधयेत्। अयुतं द्विशताधिक्यात् प्रयोगादौ जपेन्मनुम्।। १७।।
दधिक्षीररसिताक्षौद्रसताम्बूलेन्दुपायसैः। बलिं दद्यात् प्रयत्नेन भोजनादौ तदन्तके ।। १८।।
अनेन बलिदानेन कुबेरो धननायकः। बभूव शान्तिके पुष्टौ बलिं दद्यात् प्रयत्नतः।। १९।।
बलिदानेन सन्तुष्टः कुक्कुटोऽभीष्टदायकः। निश्योदनैर्बलिं दत्त्वा त्रिदिनैर्वशयेज्जगत्।। २०।।
गोधूमपिष्टघटितैरपूपैर्दुग्धमिश्रितैः। साज्यकर्पूरकैर्दद्याद् बलिं निशि विशेषतः।। २१ ।।
त्रिदिनैर्वशमायाति सत्यं जगदशेषतः। यमुद्दिश्य जपेन्मन्त्रं सहस्रं नियतो निशि।। २२।।
पीतैः पुष्पैर्बिल्वपत्रैः करवीरैः सहस्रशः। पूजयन्नेव सप्ताहात् स नरो दासतां व्रजेत्।। २३।।
छाग–लावकमांसेन बलिं दत्त्वा निरन्तरम्। समस्तभीष्टसिद्धिः स्यात् सङ्कटान्मुच्यते ध्रुवम्।। २४।।
जपेद्रविसहस्रं तु मुक्तकेश उदङ्मुखः। निशीथेऽष्टदिनं यावद्यमुद्दिश्य स्मरन् धिया।। २५।।
तमाकर्षयति क्षिप्रं योजनानां शतैरपि। जातीफलेऽथ सञ्चूर्णकर्पूरं मध्यतः क्षिपेत्।। २६।।
स्पृष्ट्वा द्वादशसाहस्रमभिमन्त्र्य तु साधकः। सिन्दूरं तत्र निःक्षिप्य जले तु क्वाथयेत्ततः।। २७।।
लोहपात्रे तु संस्थाप्य तत् स्पृष्टं स्तम्भितं भवेत्। लोहकारगृहाद्वह्निमानीयायसपात्रके।। २८।।
हयारिकाष्ठैः प्रज्वाल्य जुहुयात् तत्र धूर्तजैः। शतसंख्यैश्च विषजचूर्णैः सिद्धार्थतैलकैः।। २९।।
उच्चाटयेद्रिपून् सत्यं सप्ताहान्नात्र संशयः। श्मशानाग्नौ प्रजुहुयात् त्रिदिनान्मारयेदरीन्।। ३०।।
साध्यर्क्षवृक्षजां कृत्वा पुत्तलीं स्थापितेरणाम्। स्पृष्ट्वा सहस्रं प्रजपेन्मूलमन्त्रं हि साधकः।। ३१।।
चिताकाष्ठस्य कीलेन श्मशाने निशि संयुतः। यदङ्गं छेद्यते तस्यास्तदङ्गं तस्य नश्यति।। ३२।।

प्राक्प्रयोगप्रकरणे ये ये पुत्तलीप्रयोगास्ते ते सर्वेऽत्रापि ज्ञेयाः। इति ताम्रचूडप्रकरणम्।।

अथ शास्तृप्रकरणम्

अथ वक्ष्ये मनुं शास्तुः सर्वाभीष्टप्रदायकम्। शास्तारं मृगयाश्रान्तमश्वारूढं गणावृतम्।। १।।

पानीयार्थं विना शास्त्रे ते नतो रैवते नमः। द्वात्रिंशदक्षरो मन्त्रो रैवत ऋषिरुच्यते।। २।।
पङ्क्तिश्छन्दो महाशास्ता देवता सकलेष्टदः। पादैश्चतुर्भिः सर्वेण पञ्चाङ्गन्यासमाचरेत्।। ३।।
अश्वारूढं त्रिनेत्रं च शास्तारं पाशकेन च। बद्ध्वा साध्यं साधकाग्रे पातयन्तं भजाम्यहम्।। ४।।
ध्यात्वैवं पूजयेत् पीठे शैवे प्राग्वत् सुसाधकः। आदावङ्गानि सम्पूज्य प्रादक्षिण्याद् दलेष्वथ।।५।।
गोप्तारं पिङ्गलाक्षं च वीरसेनं च शाम्भवम्। त्रिनेत्रं शूलिनं दक्षं भीमरूपं च पूजयेत्।। ६।।
चतुरस्रे लोकपालान् वज्राद्यायुधसंयुतान्। ....।।

इति।। अथ प्रयोगः– तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि रैवताय ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदये श्रीमहाशास्त्रे देवतायै मंनः। इति विन्यस्य, ममाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, शास्तारं मृगयाश्रान्तं हृदयाय०। अश्वारुढं गणावृतं शिरसे०। पानीयार्थं विना शास्त्रे शिखायै०। ते नतो रैवते नमः कवचाय०। समस्तेनास्त्रं०। इति कराङ्गन्यासं विधाय, ध्यानमानसपूजान्ते स्वपुरतः कुङ्कुमादिना चन्दनादिपीठे चतुर्द्वारयुक्तचतुरस्रावृतमष्टदलकमलं कृत्वा, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते शैवं पीठं समभ्यर्च्य, मूलेन मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गपूजां विधायाष्टदलेषु देवाग्रे प्रादक्षिण्येन, गोप्त्रे नमः। पिङ्गलाक्षाय०। वीरसेनाय०। शाम्भवाय०। त्रिनेत्राय०। शूलिने०। दक्षाय०। भीमरूपाय०। इति सम्पूज्य, चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं सर्वं प्राग्वत् कुर्यादिति।। तथा–

तथा लक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्तिलैः। तर्पणादि ततः कुर्यदेवं सिद्धो भवेन्मनुः।। ७।।
तस्मै जलार्थिने दद्याद् मध्याह्ने तु जलाञ्जलिम्। गणेभ्योऽपि तथा दद्याज्जलमञ्जलिना सुधीः।।८।।
तेन सन्तर्पितः शास्ता स्वाभीष्टफलदो भवेत्। अर्धरात्रे बलिं दद्याद्गायत्र्या चाभिमन्त्रितम्।। ९।।
अष्टोत्तरशतं जप्यान्मूलमन्त्रमनन्यधीः। भूताधिपाय चाभाष्य विद्महे पदमीरयेत् ।। १०।।
महादेवाय शब्दान्ते धीमहीति पदं ततः। तन्नः शास्तापदं प्रोक्त्वा ततश्चैवं प्रचोदयात्।। ११।।
गायत्र्येषा समाख्याता सर्वाभीष्टप्रदा नृणाम्।..।।

इति शास्तृप्रकरणम्।। अथ वैवस्वतमन्त्रः–

अथ वक्ष्ये समासेन वैवस्वतमहामनुम्। यस्य विज्ञानमात्रेण नरकं नैव पश्यति।। १।।
प्रणवं चाङ्कुशं मायां पाशं वरुणबीजकम्। डेन्तं वैवस्वतपदं धर्मराजं तथा वदेत्।। २।।
भक्तानुग्रहकृत् डेन्तं हृदन्तो जिनवर्णकः।..।।

ओंक्रोंह्रींआंवं वैवस्वताय धर्मराजाय भक्तानुग्रहकृते नमः।। २४।।

वह्निनेत्रेषुबाणाद्रिनेत्रार्णैरङ्गकल्पना। नीलजीमूतसङ्काशं नृणां पुण्यवतां शुभम्।। ३।।
अशुभं पापकर्तॄणां नानाभरणभूषितम्। दण्डहस्तं च महिषारूढं पितृगणैर्वृतम्।। ४।।
दक्षिणाशाधिपं वीरं सूर्यपुत्रं सदा स्मरेत्। एवं ध्यात्वा जपेन्मन्त्रमष्टोत्तरशतं सुधीः।। ५।।
प्रत्यहं सर्वदुःखार्तिनाशनं नरकापहम्। सर्वसम्पत्करं शत्रुनाशनं श्रीसुखावहम्।। ६।।

सिद्धमन्त्रत्वादृष्यादिकं नास्ति।। अथ चित्रगुप्तमन्त्रः–

प्रणवो हृदयं चैव विचित्रं ङेन्तमेव च। धर्मान्ते लेखकं ङेन्तं यमवान्ते हिकाधि च।। १।।
कारिणे यमलान्ते च वरयूं जन्म चेति च। सम्पदन्ते च प्रलयं कथय द्वेऽग्निवल्लभा।। २।।
अष्टात्रिंशार्णको मन्त्रश्चित्रगुप्तस्य दुःखहा। सप्ताङ्गनवनागाङ्गनेत्रार्णैरङ्गकल्पना।। ३।।

ओं नमो विचित्राय धर्मलेखकाय यमवाहिकाधिकारिणे यमलवरयूं जन्मसम्पत्प्रलयं कथय २ स्वाहा।। (३८)।।

किरीटिनं चित्रवस्त्रं चित्राभरणभूषितम्। विचित्रासनमासीनं पूर्णेन्दुसदृशाननम्।। ४।।
पापपुण्यानि जीवानां लिखन्तं पितृराट्सखम्।..................................।।

ध्यायेदिति शेषः।

सिद्धमन्त्रं जपेन्मर्त्यः प्रत्यहं नियतः शुचिः। चित्रगुप्तः प्रसन्नः सन् पुण्यमेव लिखेत् परम्।। ५।।
पापं न गणयेत्तस्य शुभं वितनुतेऽन्वहम्।...।।

इति।। अथ आसुरीमन्त्रः—

प्रणवं कटुके कट्वन्ते कपत्रे सुभान्तगे। आसुर्य्यन्ते तु रक्ते च ततो वै रक्तवाससे।। १।।
अथर्वणस्य दुहिते अघोरेऽघोरकर्म च। कारिकेऽमुकशब्दान्ते स्यगतिं दहयुग्मकम्।। २।।
उपविष्टस्य तु गुदं दहयुग्मं च सुप्त च। स्यमनो दहयुग्मं च प्रबुद्धस्य हृदान्तके।। ३।।
यं दह द्वे हन द्वन्द्वं पच द्वे तावदन्तके। दह तावत्पचान्ते च यावन्मे वशमा-पदम्।। ४।।
याति वर्मास्त्रयुग्वह्नेर्वल्लभान्तो मनुर्मतः। दशोत्तरशतार्णोऽयमासुर्य्या मन्त्रनायकः।। ५।।

ओं कटुके कटुपत्रे सुभगे आसुरि रक्ते रक्तवाससे अथर्वणस्य दुहिते अघोरे अघोरकर्मकारिके अमुकस्य गतिं दहदह उपविष्टस्य गुदं दहदह सुप्तस्य मनो दहदह प्रबुद्धस्य हृदयं दहदह हनहन पचपच तावद्दह तावत्पच यावन्मे वशमायाति हुंफट् स्वाहा।। ११०।।

अङ्गिरा मुनिराख्यातो विराट् छन्द उदाहृतम्। देवता चासुरी दुर्गा प्रणवो बीजमुच्यते।। ६।।
स्वाहा शक्तिः समुद्दिष्टा दहयुग्मं तु कीलकम्। नवार्णैर्हृदयं प्रोक्तं षड्वर्णैः शिर ईरितम्।। ७।।
सप्तवर्णैः शिखा वर्म वसुवर्णैस्ततः परम्। रुद्रार्णैर्नेत्रमाख्यातं पञ्चषष्ठ्या तथास्त्रकम्।। ८।।
वर्मास्त्रस्वाहयान्ते स्युरङ्गमन्त्राः षडेव हि। सरोजनिलयां देवीं शरच्चन्द्रप्रभां शिवाम्।। ९।।
वरदं चाभयं शूलमङ्कुशं दधतीं करैः*। नागयज्ञोपवीतां च सर्वाभरणभूषिताम्।। १०।।
अथर्वणसुतां घोरामासुरीं चिन्तयेद्बुधः। अयुतं प्रजपेन्मन्त्रं जुहुयात् तद्दशांशतः।। ११।।
राजिकाभिर्घृताक्ताभिस्ततः सिद्धो भवेन्मनुः। आसुर्य्याश्चैव पञ्चाङ्गं शतवाराभिमन्त्रितम्।। १२।।
तेन प्रधूपयेन्मन्त्री स्वात्मानं नियतो निशि। तद्गन्धाघ्राणतः सर्वे लोका वश्या भवन्ति हि।। १३।।
मधुरत्रयसंयुक्तामासुरीं जुहुयान्निशि। सहस्रसंख्यया सत्यं वशयेदखिलं जगत्।। १४।।

लवणदुर्गाप्रकरणे यावन्तः प्रयोगाः प्रोक्तास्तेऽत्रापि ज्ञेयाः।

राजिका निम्बपत्राणि कटुतैलसमन्वितम्। नाम संयोज्य मन्त्रे तु जुहुयादेधितेऽनले।। १५।।

---

* दक्षयोर्वरशूले वामयोरभयाङ्कुशावित्यायुधध्यानम्।

ज्वराक्रान्तो रिपुः सद्यो म्रियते नात्र संशयः। राजीं लवणसंयुक्तां हुत्वा स्फोटो भवेदरेः।। १६।।
अर्कदुग्धयुतां[1] राजीं हुत्वान्धत्वं रिपोर्भवेत्। पलाशेन्धनदीप्ताग्नौ घृताक्तां राजिकां हुनेत्।। १७।।
ब्राह्मणा वशमायान्ति क्षत्रिया गुडयोगतः। दधियोगेन वैश्याः स्युः शूद्रा लवणयोगतः।। १८।।
आसुर्युपासकानां च नासाध्यं भुवनत्रये।.......................।।

इत्यासुरीप्रयोगः।। अथ कुबेरमन्त्रः—

कुबेरस्य मनुं वक्ष्ये सर्वसम्पत्प्रदायकम्। यक्षं ङेन्तं कुबेरं च तथा वैश्रवणाय च।। १।।
धनधान्याधिपतये धनधान्यपदं ततः। समृद्धिं मे देहि—पदं दापयाग्निवधूर्मतः।। २।।
पञ्चत्रिंशार्णको मन्त्रः कुबेरस्य महात्मनः।.......................................।।

''यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा''।।(३५)।।

विश्रवा मुनिराख्यातो बृहती च्छन्द एव च। कुबेरो देवता प्रोक्तो वह्न्यब्धिशरदन्तिभिः।। ३।।
नागाद्रिवर्णैर्मनुजैः षडङ्गविधिरीरितः । गारुत्मतशिलाकूटसन्निभं निधिनायकम् ।। ४।।
किरीटहारकेयूरवलयाङ्गदभूषणम् । वरं गदां च दधतं नरवाहन[2]सम्पदम् ।। ५।।
अलकानगराधीशं शिवमित्रं विचिन्तयेत्। जपेल्लक्षं दशांशेन तिलैराज्यपरिप्लुतैः।। ६।।
जुहुयात् पीठके शैवे पूजयेद्धननायकम्। आदावङ्गानि सम्पूज्य दिगीशांश्च तदायुधैः।। ७।।
अयुतं धनवृद्ध्यर्थं प्रजपेच्छिवसन्निधौ। तथा बिल्वतरोर्मूले जपेद् धनसमृद्धये।। ८।।

इति। तथा—मन्त्रान्तरम्।

तारसम्पुटिता लक्ष्मीः मायया पुटिता रमा। कामेन पूटिता लक्ष्मीर्ङेन्तं वित्तेश्वरं नतिः।। १।।
महादारिद्र्यसंहर्ता षोडशार्णो मनुर्मतः। वह्निद्वियुगलद्वीषुयुग्मार्णैरङ्गकल्पना ।। १।।
ध्यानपूजादिकं सर्वं प्राक्प्रोक्तविधिना चरेत्*।.......................................।।

इति।। सारसङ्ग्रहे—विश्वावसुमन्त्रः।

अथ गन्धर्वराजस्य मन्त्रं विश्वावसोरहम्। प्रवक्ष्यामि समासेन कन्याप्राप्तिकरं शुभम्।। १।।
तारं विश्वावसुपदं नाम गन्धर्व उच्चरेत्। कन्यानामधिशब्दान्ते पतिर्यत इतीरयेत् ।। २।।
लभामि ते देव कन्यां सुवर्णालङ्कृतां ततः। अमुकनाम्नीं देहि शब्दं मे विश्वावसवे द्विठः।।३।।
कन्याप्राप्तिकरो मन्त्रो गन्धर्वस्य त्विहेरितः। दशभिर्हृदयं प्रोक्तं नवभिश्च शिरो मतम्।। ४।।
अष्टभिश्च शिखा प्रोक्ता षड्भिः कवचमीरितम्। पञ्चभिर्नेत्रमाख्यातं दशभिश्चास्त्रमीरितम्।। ५।।

---

१. 'प्लुतां' ख. पाठः। २. 'संस्थितम्' ख. पाठः।

* तथा मेरुतन्त्रे—मन्त्रान्तरमथो वक्ष्ये कुबेरस्य गदाक्षरम्। तारो वैश्रवणायेति स्वाहा पञ्चाङ्गमत्र तु।। स्वाहान्तैः प्रणयाद्यैश्च पञ्चभिर्मन्त्रवर्णकैः। धनपूर्णं स्वर्णकुम्भं तथा रत्नकरण्डकम्।। हस्ताभ्यां बिभ्रतं खर्वकरपादं च तुन्दिलम्। वटाधस्ताद्रत्नपीठोपविष्टं सस्मिताननम्।। वर्णलक्षं जपेद्धोमः पूजा प्राग्वत् महाधनी। सेवनादस्य भवति यक्षिण्याद्यास्तथा वशाः।। इति।

एभिर्विभक्तैर्मन्त्रार्णैर्जातियुक्तै: षडङ्गकम्। कराङ्गयोस्तु विन्यस्य ध्यायेद्गन्धर्वनायकम्।। ६।।

हस्ताब्जं विनिधाय पाणिकमले स्वीये तदीयं वरं
कन्यां प्रार्थयते वराय ददतं सद्वस्त्रभूषोज्ज्वलम्।
कन्याभि: परितो वृतं नतमुखाम्भोजाभिरानन्दितं
नानाकल्पकलाकलापकलितं विश्वावसुं चिन्तयेत्।। ७।।

नाभिमात्रेऽम्भसि स्थित्वा जपेन्मन्त्रं समाहित:। चत्वारिंशत्सहस्राणि तद्दशांशं हुनेत् तत:।। ८।।
इक्षुखण्डयुतैर्लाजैर्घृताक्तैरेधितेऽनले। तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत् तत:।। ९।।
एवं कृते मन्त्रसिद्धिर्भवत्येव न संशय:। पश्चिमाभिमुखो मन्त्री जपेन्मन्त्रमिमं नर:।। १०।।
यामुद्दिश्य जपेत् कन्यां तां प्राप्नोति न संशय:।..।।

इति।। शारदातिलके—शताक्षरमन्त्र:। (२३। ३४)

गायत्रीत्रिष्टुबनुष्टुब्वर्णै: प्रोक्त: शताक्षर: । पूर्वोक्ता एव मुन्याद्या: परं तेजोऽत्र देवता।। १।।
हृत् त्रयोदशभि: प्रोक्तं रुद्रार्णै: शिर ईरितम्। द्वाविंशत्या शिखा प्रोक्ता तावद्भि: कवचं मतम्।।२।।
स्यात् पञ्चदशभिर्नेत्रमस्त्रं सप्तदशाक्षरै:। वर्णन्यासादिकं सर्वं कुर्यात् पूर्वोक्तवर्त्मना ।। ३।।

सत्यं मानविवर्जितं श्रुतिगिरामाद्यं जगत्कारणं
व्याप्तं स्थावरजङ्गमं मुनिवरैर्ध्यातं निरुद्धेन्द्रियै:।
अर्काग्नीन्दुमयं शताक्षरवपुस्तारात्मकं सन्ततं
नित्यानन्दगुणालयं परतरं वन्दामहे तन्मह:।। ४।।

सौरं पीठे यजेत् सम्यग् वक्ष्यमाणविधानत:। आद्यामवृतिमभ्यर्चेत् षडङ्गैर्देशिकोत्तम: ।। ५।।
गायत्रीशक्तिभिस्तिस्र: पूजयेदावृती: क्रमात्। आवृति: पञ्चमी प्रोक्ता त्रिष्टुबुद्धृतशक्तिभि:।। ६।।
अनुष्टुप्शक्तिभि: प्रोक्तमावृतीनां चतुष्टयम्। इन्द्राद्यैर्दशमी प्रोक्ता वज्राद्यैस्तत्परा मता।। ७।।

इति।। अथ प्रयोग:—तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि विश्वामित्रकाश्यपवसिष्ठेभ्य ऋषिभ्यो नम:। मुखे गायत्रीत्रिष्टुबनुष्टुप्छन्देभ्यो नम:। हृदये परतेजसे देवतायै नम:। इति ऋष्यादिकं विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोग: इति कृताञ्जलिरुक्त्वा, तत्सवितुर्वरेण्यं भर्गो देवस्य हृदयाय नम:। धीमहि धियो यो न: प्रचोदयात् शिरसे०। जातवेजसे सुनवाम सोममरातीयतो निदहाति वेद: शिखायै०। स न: पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्नि: कवचाय०। त्रियम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं नेत्राभ्यां०। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् अस्त्राय फट्, इति मन्त्रैर्यथाविधि करषडङ्गन्यासं कृत्वा, वामपादाङ्गुलिमूलयो: तत् नम:। गुल्फयो: सं०। जानुनो: विं०। ऊरुमूलयो: तुं०। लिङ्गे वं०। नाभौ रें०। हृदि णिं०। कण्ठे यं०। कराङ्गुलिमूलयो: भं०। मणिबन्धयो: गौं०। कूर्परयो: दें०। भुजमूलयो: वं०। मुखे स्यं०। नसो: धीं०। कपोलयो: मं०। नेत्रयो: हिं०। कर्णयो: धिं०। भ्रूवो: यों०। मस्तके यों०। चूडाध: पश्चिमवक्त्रे न:०। वामकर्णे उत्तरवक्त्रे प्रं०। दक्षकर्णे दक्षवक्त्रे चों०। मुखे पूर्ववक्त्रे दं०। शिरसि ऊर्ध्ववक्त्रे यात् नम:।। दक्षपादाङ्गुष्ठे जां नम:। वामे तं०। दक्षगुल्फे वें०। वामे दं०। दक्षजङ्घायां सें०। वामे

सुं०। दक्षजानुनि नं०। वामे वां०। दक्षोरौ मं०। वामे सों०। दक्षकट्यां मं०। वामे मं०। लिङ्गे रां०। नाभौ तीं०। हृदि यं०। दक्षस्तने तों०। वामे निं०। दक्षपार्श्वे दां०। वामे हां०। पृष्ठे तिं०। दक्षस्कन्धे वें०। वामे दः०। दक्षबाहुमूले सं०। वामे नः०। दक्षबाहुमध्ये पं०। वामे रं०। दक्षकूर्परे षं०। वामे दं०। दक्षप्रकोष्ठे तिं०। वामे दुं०। दक्षमणिबन्धे गां०। वामे णिं०। दक्षकरतले विं०। वामे श्वां०। मुखे नां०। दक्षनसि वें०। वामे वं०। दक्षनेत्रे सिं०। वामे न्धुं०। दक्षकर्णे दुं०। वामे रिं०। ललाटे तां०। ललाटोपरि त्यं०। मूर्ध्नि ग्निः नमः।। मुखे त्र्यं०। चूडाधः बं०। दक्षकर्णे कं०। वामे यं०। उरसि जां०। गले मं०। मुखे हें०। नाभौ सुं०। हृदि गं०। पृष्ठे धिं०। कुक्षौ पुं०। लिङ्गे ष्टिं०। पायौ वं०। दक्षोरुमूले र्धं०। वामे नं०। दक्षोरौ उं०। वामे र्वां०। दक्षजानुनि रुं०। वामे कं०। दक्षजानुनि वृत्ते मिं०। वामे वं०। दक्षस्तने बं०। वामे न्धं०। दक्षपार्श्वे नां०। वामे न्मृं०। दक्षपादे त्यों०। वामे मुं०। दक्षपाणितले क्षीं०। वामे यं०। दक्षनसि मां०। वामे मृं०। शिरसि तात् नमः।। इत्यक्षरन्यासः।। अथ पदन्यासः शिरसि तत् नमः। भ्रूमध्ये सवितु०। नेत्रयोः वरेण्यं०। मुखे भर्गो०। कण्ठे देवस्य०। हृदि धीमहि०। नाभौ धियो०। गुह्ये यो०। जानुनोः नः०। पादयोः प्रचोदयात्०।। शिखायां जातवेदसे नमः। ललाटे सुनवाम०। दक्षनेत्रे सोमं०। वामे अरातीयतः०। दक्षकर्णे नि०। वामे दहाति०। ओष्ठे वेदः०। अधरे स०। रसनायां नः०। कण्ठे पर्षत्०। बाह्वोः अति०। हृदि दुर्गाणि०। कुक्षौ विश्वा०। कटौ नावा०। गुह्ये इव०। ऊरुद्वये सिन्धुं०। जानुद्वये दुरिता। जङ्घयोः अति०। पादयोः अग्निः०।। शिरसि त्र्यम्बकं नमः। भ्रूयुगे यजामहे०। नेत्रयोः सुगन्धिं०। मुखे पुष्टिवर्धनं०। गण्डयोः उर्वारुकं०। हृदि इव०। उदरे बन्धनात्०। गुह्ये मृत्योः०। ऊरुद्वये मुक्षीय०। जानुनोः मा०। पादयोः अमृतात् नमः।। इति विन्यस्य, ध्यानाद्यात्मपूजान्ते प्रागुक्तं सौरपीठमभ्यर्च्य मूर्तिकल्पनाद्यङ्गपूजान्ते गायत्रीप्रकरणोक्ताः प्रह्लादिन्याद्याश्चतुर्विंशतिशक्तिरावणत्रयस्थितास्तत्रोक्तप्रकारेणैवावरणत्रये तद्बहिश्चतुश्चत्वारिंशद्दलेषु प्रागुक्तजागराद्याः शक्तीस्त्रिष्टुप्प्रकरणोक्ताः सम्पूज्य तद्बहिरष्टदलद्वये प्रागुक्तानुष्टुभमन्त्रप्रकरणोक्ता रमाद्या द्वात्रिंशच्छक्तीः प्रतिकमलमावरणद्वयक्रमेण दलमध्यदलाग्रेषु सम्पूज्य तद्बहिर्लोकेशार्चादि सर्वं प्राग्वत् कल्पयेदिति।। तथा—

लक्षमात्रं जपेदेनमयुतं पायसान्धसा। जुहुयाद् घृतसिक्तेन तर्पणादि ततश्चरेत् ।। ८।।
एवं सिद्धे मनौ मन्त्री भवेद्भास्करसन्निभः। सुधालतोद्भवैः खण्डैर्जुहुयात् क्षीरसंयुतैः ।। ९।।
दीर्घमायुरवाप्नोति निराधिर्व्याधिवर्जितः। दूर्वाभिर्घृतसिक्ताभिस्तदेव फलमाप्नुयात् ।। १०।।
मधुरत्रयसंयुक्तैर्जुहुयादरुणाम्बुजैः । महालक्ष्मीमवाप्नोति षड्भिमासैर्विधानवित् ।। ११।।
रक्तोत्पलैस्त्रिमध्वक्तैर्जुहुयात् सर्वसम्पदे। श्रीप्रसूनैः प्रजुहुयाद्रमाया वसतिर्भवेत् ।। १२।।
सहस्रं जुहुयान्नित्यं मासमेकं तिलैः शुभैः। भानुसंख्यान् द्विजान् नित्यं भोजयेन्मधुरान्वितैः।।१३।।
सर्वपापविनिर्मुक्तः सर्वरोगविवर्जितः। कृत्याद्रोहग्रहान् रोगान् जित्वा दीर्घं स जीवति।। १४।।
प्रातः स्नानरतो मन्त्री जपेन्नित्यं शतं शतम्। भानुमालोकयन् सम्यक् स जीवेच्छरदां शतम्।।१५।।
नित्यमष्टोत्तरशतं निःश्रेयसफलाप्तये । गायत्र्याद्यं जपेन्मन्त्रं सर्वपापविमुक्तये ।। १६।।
सर्वशत्रुविनाशाय त्रिष्टुबाद्यं जपेदमुम्। अनुष्टुबाद्यं प्रजपेदांयुरारोग्यसिद्धये।। १७।।
शताक्षरो मनुः प्रोक्तः समस्तपुरुषार्थदः।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे द्वात्रिंशः श्वासः।। ३२।।

* * *

अथ

त्रयस्त्रिंशः श्वासः

* * *

श्रीयन्त्रसारे– (शताक्षरमनुयन्त्रम्।)

कर्णिकायां लिखेत् तारं व्याहृतिभिः समावृतम्। कोणेषु षट्सु पञ्चार्णान् प्रणवाद्यं दलेष्वथ।। १ ।।
पूर्वार्धमाद्ये गायत्र्यास्त्रैष्टुभार्धं द्वितीयके। अनुष्टुबस्याद्यमर्धं तृतीये च चतुर्थके ।। २ ।।
ओंह्रींठंवंकंसंहंसः जूंसः सोहं वंठं नमः। शिवाय मां पालय सं[१]कंवंठंह्रींध्रुवाक्षरान्।। ३ ।।
आलिख्य पञ्चमेऽनुष्टुबपरार्धं च षष्ठके। त्रिष्टुभश्चापरार्धं च गायत्र्या अपरार्धकम् ।। ४ ।।
सप्तमे च दले तारमापो ज्योतीरसोऽमृतम्। ब्रह्म भूर्भुवरित्यन्ते स्वरोमिति दलेऽष्टमे।। ५ ।।
आलिख्य मातृकार्णोद्यद्वृत्तेनावेष्ट्य तद्बहिः। चिन्तामणिलसत्कोणं भूपुरं च समालिखेत्।। ६ ।।
शताक्षरमनोर्यन्त्रमेतद्यो धारयेन्नरः। पुत्रारोग्यधराधान्यधनकोशौघशालिनीम् ।। ७ ।।
लब्ध्वातिबहुलां लक्ष्मीं स जीवेच्छरदः शतम्। ताम्रादिपट्टेष्वालिख्य जप्त्वा चाष्टोत्तरं शतम्।।७।।
हुत्वा घृतेन तावत्तु सिक्थसम्पातमेव च। भूयोऽपि तावज्जप्त्वा च पुरग्रामाकरादिषु।। ९ ।।
स्थापितं यन्त्रमेतत्तु गोसस्यारोग्यपुष्टिदम्। कुर्याच्च रक्षां तेनारिव्याघ्रादिभयतः सदा।। १० ।।

इति।। अस्यार्थः– तत्राष्टदलकमलमध्यगतषट्कोणमध्ये ससाध्यं तारं विलिख्य तत् सप्तव्याहृतिभिरावेष्ट्य, षट्कोणेषु प्रणवादिशिवपञ्चाक्षरस्यैकमक्षरमालिख्याष्टदलेषु प्रथमदले गायत्र्याः पूर्वार्धं, द्वितीयदले त्रिष्टुभः प्रथमार्धं, तृतीयेऽनुष्टुप्प्रथमार्धं चतुर्थे ओं ह्रीं ठं वं कं सं हंसः जूंसः सोहं वं ठं नमः शिवाय मां पालय सं कं वं ठं ह्रीं ओं इति मन्त्रं विलिख्य, पञ्चमेऽनुष्टब्मन्त्रस्योत्तरार्धं विलिख्य, षष्ठे त्रिष्टुब्मन्त्रस्योत्तरार्धं, सप्तमे गायत्र्युत्तरार्धं, अष्टमे आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवःस्वरोमिति विलिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकावर्णैरावेष्ट्य, तद्बहिश्चतुरस्रकोणेषु पूर्वोक्तचिन्तामणिं विलिख्योक्तविधिना धारणादुक्तफलसिद्धिर्भवति।। इति।। तथा शारदातिलके– (२३–५२) वरुणऋग्विधानम्।

---

[१] 'सम्भवं' ख. पाठः।

ऋचो विधानं वारुण्या यथावदाभिधीयते। ऋग्वेदे सा समुद्दिष्टा ध्रुवास्वाद्या मनीषिभिः।। १।।

"ध्रु॒वासु॑ त्वा॒सु क्षि॒तिषु॑ क्षि॒यन्तो॒ व्य॑स्म॒त्पाशं वरु॑णो मुमोचत्।
अवो॑ वन्वा॒ना अदिते॒रुपस्था॑द्यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः"।। (७-८८-७)

वसिष्ठोऽस्य मुनिः प्रोक्तश्छन्दस्त्रिष्टुबुदाहृतम्। वरुणो देवता प्रोक्तस्तद्वर्णैरङ्गकल्पना।। २।।
अष्टभिर्हृदयं प्रोक्तं सप्तभिः शिर ईरितम्। शिखा षड्वर्णकैः प्रोक्ता वस्वर्णैः कवचं मतम्।। ३।।
सप्तभिः नेत्रमाख्यातमस्त्रं षड्भिरुदाहृतम्। साग्रेषु सन्धिषु पदोर्गुदान्ध्वाधारनाभिषु ।। ४।।
कुक्षौ पृष्ठे हृदि कुचे गले बाह्वग्रसन्धिषु। वक्त्रे कपोलनासाक्षिकर्णभ्रूमध्यमस्तके।। ५।।
शिरःसर्वाङ्गयोर्न्यस्येन्मन्त्रवर्णान् यथाविधि।..।।

चन्द्रप्रभं पङ्कजसन्निषण्णं पाशाङ्कुशाभीतिवरं दधानम्।
मुक्ताविभूषाञ्चितसर्वगात्रं ध्यायेत् प्रसन्नं वरुणं विभूत्यै।। ६।।

धर्मादिकल्पिते पीठे वरुणं सम्यगर्चयेत्। कृत्वाङ्गपूजनं शेषं वासुकिं तक्षकं पुनः।। ७।।
कर्कोटकं तथा पद्मं महापद्मं ततः परम्। शङ्खपालाख्यकुलिकौ सम्यक् पत्रेषु पूजयेत्।। ८।।
इन्द्राद्यानायुधान्येषामर्चयेत् तदनन्तरम्।...।।

इति।। अथ प्रयोगः— तत्र प्रातःकृत्यादियागपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि वसिष्ठाय ऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदि वरुणाय देवतायै नमः। इति विन्यस्य सर्वाभीष्टप्राप्तये विनियोगः इति कृताञ्जलिरुक्त्वा, ध्रुवासु त्वासु क्षितिषु हृदयाय०। क्षियन्तो व्यस्मतपाशं शिरसे०। वरुणो मुमोचत् शिखायै०। अवो वन्वाना अदितेः कवचाय०। उपस्थाद्यूयं पात नेत्रत्रयाय०। स्वस्तिभिः सदा नः अस्त्राय०। इति मन्त्रैः करषडङ्गन्यासं विधाय, दक्षपादाग्रे ध्रुं नमः। वामे वां०। दक्षपादाङ्गुलिमूले सुं०। वामे त्वां। दक्षगुल्फे सुं०। वामे क्षिं०। दक्षजानुनि तिं०। वामे षुं० दक्षोरुमूले क्षिं०। वामे यं०। गुदे तों०। लिङ्गे व्यं०। मूलाधारे स्मत्०। नाभौ पां०। कुक्षौ शं०। पृष्ठे वं०। हृदि रुं०। कुचयोः णों०। गले मुं०। दक्षकराग्रे मों०। वामे चत्०। दक्षकराङ्गुलिमूले अं०। वामे वों०। दक्षमणिबन्धे वं०। वामे न्वां०। दक्षबाहुमूले नां०। वामे अं०। दक्षकूपरि दिं०। वामे तें०। मुखे रुं०। दक्षकपोले पं०। वामे स्थां०। दक्षनासायां द्यूं०। वामायां यं०। दक्षनेत्रे पां०। वामे तं०। दक्षकर्णे स्वं०। वामे स्तिं०। भ्रूमध्ये भिंः०। ललाटे सं०। शिरसि दां०। सर्वाङ्गे नंः नमः। इति विन्यस्य, ध्यानाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठं सम्पूज्य, वं वरुणपीठाय नमः इति समस्तं पीठं सम्पूज्य पीठशक्तिरहिते तस्मिन् पीठे च वरुणमावाह्य, प्राणप्रतिष्ठान्ते

पाशाङ्कुशवराभीतिमुद्राः प्रदर्श्य, आसनाद्यङ्गपूजान्तेऽष्टदलेषु देवाग्रादिप्रादक्षिण्येन ओं शेषाय नमः। एवं वासुकये०। तक्षकाय०। कर्कोटकाय०। पद्माय०। महापद्माय०। शङ्खपालाय०। कुलिकाय०। इति सम्पूज्य लोकेशार्चादि सर्वं कुर्यादिति।। तथा—

लक्षमेकं जपेन् मन्त्रं पायसेन दशांशतः। सर्पिःसिक्तेन जुहुयात् तर्पणादि ततश्चरेत्।। ९।।
ऋणमुक्त्यै जपेन्मन्त्रं प्रत्यहं साष्टकं शतम्। जपेनानेन लभते महतीमव्ययां श्रियम्।। १०।।
सितेक्षुशकलैर्मन्त्री जुहुयाद् घृतसम्प्लुतैः। चतुर्दिनं दशशतं ऋणमुक्त्यै महाश्रिये। ११।।
समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम्। जुहुयाद् वृष्टिसंसिद्ध्यै मन्त्रविद् विजितेन्द्रियः।। १२।।
अनेन विधिना मन्त्री सूर्ये शतभिषं गते। चतुःशतं घृतयुतं पायसं जुहुयाद्वशी।। १३।।
ऋणनाशाय सम्पत्त्यै वश्यारोग्याभिवृद्धये। भृगुवारे कृतो होमः पायसेन ससर्पिषा।। १४।।
महतीं सम्पदं कुर्यान्नाशयेत् सकलापदः। शालिभिर्घृतसंसिक्तैः [1]सरिदन्तरितः सुधीः।। १५।।
त्र्यहं चतुःशतं हुत्वा स्तम्भयेत् परसैन्यकम्[2]। सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम्।। १६।।
चतुःशतं विमुच्येत मन्त्री सर्वैरुपद्रवैः। मन्त्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः।। १७।।
सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये। बहुना किमिहोक्तेन मन्त्रेणानेन साधकः ।। १८।।
साधयेत् सकलान् कामाञ्जपहोमादितत्परः। ध्रुवासु त्वासु क्षितिषु जपन् बन्धात् प्रमुच्यते।। १९।।
तिष्ठन् रात्रौ जपेदेतां विकासः सम्प्रपद्यते[3]। अहोरात्रं स्थितश्चैवमनश्नन् स्याद् दिवोत्थितः।। २०।।
अयःपाशाः स्फुटन्त्यस्य दारुपाशास्तथैव च।..।।

श्रीयन्त्रसारे।

षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि। षडर्णमष्टपत्रे च केसरेषु[4] स्वरांल्लिखेत्।। १।।
पञ्चषड्वेदषट्पञ्चषट्चतुःषट्क्रमान्मनोः। ध्रुवास्वाद्यस्याक्षराणि बहिः पर ऋणेत्यृचा।। २।।
हल्भिश्चावेष्ट्य भूगेहे कोणे वंबीजमालिखेत्। ऋणमोचनमेतत्तु यन्त्रं सर्वसमृद्धिदम्।। ३।।
सर्वरक्षाकरं वश्यं सर्वचोरविनाशनम्। किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं नृणाम्।। ४।।

इति।। अस्यार्थः—तत्राष्टदलस्थषट्कोणमध्ये ससाध्यं प्रणवं विलिख्य, षट्कोणेषु वरुणाय नमः इति मन्त्रस्यैकैकमक्षरं विलिख्य, केसरेषु द्वन्द्वशः स्वरान् विलिख्याष्टदलेषु ध्रुवास्वाद्यस्य मन्त्रस्य वर्णान् पञ्चषड्वेदेति क्रमेण विभज्य विलिख्य, बहिर्वृत्तयोरन्तराले परऋणेत्यृचा वेष्टयित्वा तद्बहिर्वृत्त[5]वीथ्यां ककारादिक्षकारान्तैरावेष्ट्य तद्बहिश्चतुरस्रकोणेषु वंबीजं विलिखेत्। एतद्यन्त्रं साधितं धृतमुक्तफलदं भवति।

---

[1] 'समिदं' ख. पाठः। [2] 'निकान्' ख. पाठः। [3] 'पिशाचस्तं न गच्छति' ख. पाठः। [4] 'केसरोद्यत्' ख. पाठः।
[5] 'तद्वृत्तबहिर्वीथ्यां' ख. पाठः।

पर ऋण सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजं।
अव्युष्टा इन्नु भूयसी रुपास आ नो जीवान् वरुण तासु शाधि।। (२–२८–९)

अस्या ऋष्यादिकं कूर्मो वरुणस्त्रिष्टुप्। श्रीयन्त्रसारे–

कर्णिकायां लिखेत्तारं क्रमात् पत्रेषु चाष्टसु। पिशङ्गभृष्टि-मन्त्रस्य त्रीणि त्रीण्यक्षराणि च।। ५।।
रक्षोहणं वाजिनमित्यृचा मातृकयापि च। अया त इत्यृचा चैव भूपुरेण च वेष्टयेत्।। ६।।
एतद्यन्त्रं ज्वरोन्मादग्रहपीडादिनाशनम्। इदमेव समालिख्य वसने गैरिकादिभिः ।। ७।।
तेन प्रावृतदेहं च ज्वरः सद्यो विमुञ्चति। ....।।

अयमर्थः– अष्टदलकमलकर्णिकायां ससाध्यं तारं विलिख्याष्टसु दलेषु वक्ष्यमाण ''पिशङ्गभृष्टि'' मन्त्रस्य त्रीणि त्रीण्यक्षराणि विभज्य विलिख्य, तद्बहिर्वृत्तचतुष्टयान्तरालस्य वीथीत्रये प्रथमवीथ्यां रक्षोहणं वाजिनमित्यृचा तद्बहिर्वीथ्यां मातृकार्णैस्तद्बहिर्वीथ्यां अयाते अग्ने इत्यृचा च संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्। एतद्यन्त्रमुक्तफलदं भवति।

ऋचस्तु–

पिशङ्ग भृष्टिमंभृणं पिशाचिमिन्द्र संमृण। सर्वं रक्षो नि बर्हय।। (१–१३३–५)
रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम्।। (१०–८७–१)
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्।। (४–४–१५)

पिशङ्गभृष्टिमन्त्रस्य परुच्छेप ऋषिः गायत्री च्छन्दः इन्द्रो देवता।। रक्षोहणमित्यस्य पायुर्भरद्वाज ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता, रक्षोघ्नं हि।। अयाते अग्ने इत्यत्र कृणुष्व पाज इति सूक्तस्यैव ऋष्याद्या ज्ञेयाः ते अग्रे वक्ष्यन्ते। इति मन्त्रस्य वामदेव ऋषिः त्रिष्टुप्छन्दः रक्षोहाग्निर्देवताः।। तथा–

अष्टपत्रस्य पद्मस्य कर्णिकायां विलिख्य च। तारं पत्रेषु मन्त्रार्णांश्चतुरश्चतुरः क्रमात्।। ८।।
मातृकार्णैः समावेष्ट्य क्ष्रौंबीजं कुगृहाश्रिषु। आलिख्य यन्त्रमेतत्तु धारयेद् यो यथाविधि।। ९।।
कृत्याभिभवनिर्मुक्तः स जीवेच्छरदः शतम्।...।।

अयमर्थः– अष्टदलकमलकर्णिकायां ससाध्यं प्रणवं विलिख्य, अष्टदलेषु वक्ष्यमाणाया ''यां कल्पयन्ती'' त्यृचो वर्णान् प्रतिदलं चतुरश्चतुरो विभज्य विलिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैः संवेष्ट्य बहिश्चतुरस्रकोणेषु क्ष्रौं इति नृसिंहबीजं विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति। मन्त्रस्तु–

यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव[1]। तां ब्रह्मणापनिर्णुद्मः प्रत्यक्कर्तारमृच्छतु[2]।। १।।

अस्य मन्त्रस्य प्रत्यङ्गिरा ऋषिः, अनुष्टुप् छन्दः प्रत्यङ्गिरा देवता।। तथा–

कर्णिकायां साध्यगर्भं तारं पत्रेषु षट्स्वपि। कृणुष्वेत्याद्यमर्धं च दधर्षीदन्त[3]मालिखेत्।। १०।।

---

१. 'वधूरिव' ख. पाठः। २. 'मिच्छतु' ख. पाठः। ३. 'कृणुष्वेत्यर्धमर्धं च आदधर्ष्यन्त' क. ख. पाठः।

तद्बाह्येऽष्टसु पत्रेषु ह्युदग्नेत्याद्यृचां क्रमात्। अर्धमर्धं सासदिष्टिरित्यन्तं षोडशस्वथ।। ११।।
पत्रेष्वर्चाम्याद्यवद्यादन्तं चर्चां यथाक्रमम्। अर्धमर्धं समालिख्य बाह्ये रक्षोहणाद्यया।। १२।।
वि ज्योतिषेत्यृचा भूयस्तद्वदेव च वेष्टयेत्। मातृकार्णैः समावेष्ट्य भूपुरेण च वेष्टयेत्।। १३।।
रुचकादिषु भूषासु सम्यक् संयोज्य धारणात्। यन्त्रमेतद् ग्रहोन्मादज्वरकृत्याद्युपद्रवान्।। १४।।
नाशयेदथवा वस्त्रे कुङ्कुमाद्यैर्विलिख्य च। जप्त्वा तत्प्रावृतो यस्तु[1] ज्वरः सद्यो विनश्यति।।१५।।

इति। अस्यार्थः— षड्दलकमलकर्णिकायां ससाध्यं तारं विलिख्य, षड्दलेषु कृणुष्व पाज इत्यारभ्य व्यथिरादधर्षीदित्यन्तस्य ऋक्त्रयस्यार्धषट्कं विलिख्य, तद्बाह्येऽष्टदलेषु उदग्ने तिष्ठेत्यादि सुदिना सासदिष्टिरित्यन्तस्य ऋक्चतुष्टयस्यार्धमर्धं विलिख्य, तद्बहिः षोडशदलेषु अर्चामि ते इत्यादि मित्रमहो अवद्यादित्यन्तस्य ऋगष्टकस्यार्धमर्धं विलिख्य, तद्बाह्ये वृत्तचतुष्टयान्तर्गतान्तरालत्रये प्रथमे रक्षोहणं वाजिनमित्यृचा पूर्वोक्तया, द्वितीये विज्योतिषा बृहतेत्याद्यया ऋचा, तृतीये मातृकया च संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवतीति।। ऋचस्तु—(४। ४। १)

कृणुष्व पाज॒ः प्रसि॑तिं न पृथ्वी या॒हि राजे॒वाम॑वाँ॒ इभे॑न।
तृ॒ष्वीमनु॒ प्रसि॑तिं द्रूणा॒नोऽस्ता॑सि॒ विध्य॑ रक्षसस्तपिष्ठैः।। १।।
तव॑ भ्र॒मास॑ आशु॒या प॑त॒न्त्यनु॑ स्पृश धृष॒ता शोशु॑चानः।
तपूं॑ष्यग्ने जु॒ह्वा॑ पतं॒गानस॑दितो॒ वि सृ॑ज॒ विष्व॑गुल्काः।। २।।
प्रति॒ स्पशो॒ वि सृज॒ तूर्णि॑तमो॒ भवा॑ पा॒युर्वि॒शो॑ अ॒स्या अद॑ब्धः।
यो नो॑ दू॒रे अ॒घशं॑सो॒ यो अन्त्यग्ने॒ माकि॑ष्टे॒ व्यथि॒रा द॑धर्षीत्।। ३।।
उद॑ग्ने तिष्ठ॒ प्रत्या त॑नुष्व॒ न्य॑मित्राँ ओषतात् तिग्महेते।
यो नो॒ अरा॑तिं समिधान चक्रे॒ नी॒चा तं ध॑क्ष्यत॒सं न शुष्कं॑।। ४।।
ऊ॒र्ध्वो भ॑व॒ प्रति॑ वि॒ध्याध्य॒स्मदा॒विष्कृ॑णुष्व॒ दैव्या॑न्यग्ने।
अव॑ स्थि॒रा त॑नुहि यातुजूनां॑ जा॒मिमजा॑मि॒ं प्र मृ॑णीहि॒ शत्रू॑न्।। ५।।
स ते॑ जानाति सम॒तिं य॑विष्ठ॒ य ईव॑ते॒ ब्रह्म॑णे गा॒तुमैरत्।
विश्वा॑न्यस्मै सुदिना॑नि रायो द्युम्नान्यर्यो॑ वि दुरो॑ अभि द्यौत्॑।। ६।।
सेद॑ग्ने अस्तु सु॒भग॑ः सुदा॒नुर्यस्त्वा॒ नित्ये॑न ह॒विषा॒ य उ॒क्थैः।
पिप्री॑षति॒ ख आयु॑षि दुरो॒णे विश्वे॑दस्मै सु॒दिना॒ सासदिष्टिः।। ७।।

---

१. 'प्रावृताङ्ग' ख. पाठः।

अर्चा॑मि ते सुम॒तिं घोष्य॒र्वाक्सं ते॑ वा॒बाता॑ जरता॒मियं गीः।
खश्वास्ता सु॒रथां॑ मर्जयेमा॒स्मे क्षत्राणि॑ धारये॒रनु द्यून्।। ८।।
इ॒ह त्वा॒ भूर्या च॑रे॒दुप॒ त्मन् दोषा॑वस्तर्दी॒दिवांस॒मनु द्यून्।
कील॑न्तस्त्वा सुमन॑सः सपेमाभि द्यु॒म्ना त॑स्थिवांसो॒ जना॑नाम्।। ९।।
यस्त्वा॒ स्वश्व॑ः सुहि॒रण्यो अ॑ग्न उ॒पया॒ति वसु॑मता॒ रथे॑न।
तस्य॑ त्राता भ॑वसि तस्य॒ सखा॒ यस्त आति॒थ्यमा॑नु॒षग् जुजो॑षत्।। १०।।
म॒हो रु॑जामि ब॒न्धुता॒ वचो॑भि॒स्तन्मा॑ पि॒तुर्गोत॑मा॒दन्वि॑याय।
त्वं नो॑ अस्य॒ वचसश्चिकिद्धि॒ होत॑र्यविष्ठ सुक्रतो॒ दमू॑नाः।। ११।।
अस्व॑प्नजस्त॒रण॑यं सुशेवा॒ अत॑न्द्रासोऽवृ॒ता अश्र॑मिष्ठाः।
ते पा॒यव॑ः सध्र्य॑ञ्चो नि॒षद्याग्ने॒ तव॑ नः पान्त्वमूरः।। १२।।
ये पा॒यवो॑ मामते॒यं ते अग्ने॒ पश्य॑न्तो अन्धं॑ दु॒रितादर॑क्षन्।
र॒र॒क्ष तान् सु॒कृतो वि॒श्ववे॑दा॒ दिप्स॑न्त॒ इद्रि॒पवो॒ नाह॑ देभुः।। १३।।
त्वया॑ व॒यं स॑धन्य॑स्त्वो॒ता॒स्तव॒ प्रणीत्य॑श्याम॒, वाजा॑न्।
उ॒भा॑ शंसा॑ सूदय सत्यतातेऽनुष्ठु॒या कृ॑णुह्यह्रयाण।। १४।।
अ॒या ते॑ अग्ने स॒मिधा॑ विधे॒म प्रति स्तोमं॑ श॒स्यमा॑नं गृभाय।
दहा॒शसो॑ र॒क्षस॑ः पाह्य॒स्मान् द्रु॒हो नि॒दो मि॑त्रमहो अव॒द्यात्।। १५।। इति।
र॒क्षोहणं॑ वा॒जिनमा जिघ॑र्मि मि॒त्रं प्रथि॑ष्ठमुप॑ यामि॒ शर्म॑।
शिशा॑नो अ॒ग्निः क्रतु॒भिः समि॑द्धः स नो॒ दिवा॒ स रिषः पातु॒ नक्तम्।।(१०—८७—१)
वि ज्योति॑षा बृ॒हता भा॑त्य॒ग्निरा॒विर्विश्वा॑नि कृणुते महि॒त्वा।
प्रादे॑वीर्मा॒याः सहते दु॒रेवाः॒ शिशी॑ते शृङ्गे॒ रक्ष॑से विनि॒क्षे।। (५—२—९)

इति।। कृणुष्व पाज इत्यस्य पञ्चदशर्चस्य रक्षोघ्नस्य वामदेव ऋषिः, त्रिष्टुप् छन्दः, रक्षोहाग्निर्देवता। वि ज्योतिषेत्यस्य कुमार ऋषिस्त्रिष्टुप् छन्दः, अग्निर्देवता।। तथा—

कर्णिकायां लिखेत् तारं मनोः पत्रेषु चाष्टसु । पञ्चषट्पञ्चषट्पञ्चरसभूतषडर्णकान् ।।१।।
(इन्द्र श्रेष्ठेत्यृचो वर्णान् विभज्य तु विलिख्य च)। वयं त एभिर्मातृकया भूपुरेण च वेष्टयेत्।।२।।

इन्द्र श्रेष्ठानि मन्त्रस्य यन्त्रं सर्वसमृद्धिदम्। आयुरारोग्यसौभाग्यधनधान्यसुतप्रदम्।। ३।।
सर्वरक्षाकरं वश्यं सुदिनत्वयशस्करम्। किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं परम्।। ४।।

अयमर्थः— अष्टदलमध्ये ससाध्यं प्रणवं विलिख्याष्टसु पत्रेषु पञ्च षट् पञ्च षट् पञ्च षट् पञ्च षट् इति क्रमेण इन्द्र श्रेष्ठानीत्यृचो वर्णान् विभिज्य विलिख्य, तद्बहिर्वृत्तान्तरालयोः प्रथमे ''वयं त एभि''रित्यृचा वक्ष्यमाणया द्वितीये मातृकया च संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवति। ऋक् तु— (२। २१। ६)

इन्द्र॒ श्रेष्ठानि॒ द्रवि॑णानि॒ धेहि॒ चित्तिं॒ दक्ष॑स्य सुभ॒गत्व॒मस्मे।
पोषं॑ रयी॒णामरि॑ष्टिं त॒नूनां॑ स्वा॒द्मानं॑ वा॒चः सु॑दि॒नत्वमह्नाम्।। १।।

इन्द्र श्रेष्ठानि मन्त्रस्य गृत्समद ऋषिः त्रिष्टुप् छन्दः इन्द्रो देवता।। एतस्यैव यन्त्रान्तरमाह—

प्रणवभास्वरमध्यमथो बहिर्वसुदले स्वरसंयुतकेसरे।
अयुजि पञ्चगुहाननशो युजि प्रविलिखेच्च मनोः क्रमशोऽर्णकान्।। ५।।
अभिवृतं खलु कादिभिरक्षरैर्धरणिगेहयुगाश्रिगमन्मथम्।
धनधरासुभगत्वमनोज्ञतां मधुरवाग्वररत्नयशःश्रियम्।। ६।।
[1]सुदिनतां च तनोति परं नृणां बलनिषूदनयन्त्रमिदं धृतम्।

गुहाननशः षट्षट्संख्यया। अस्यार्थः— प्रागुक्त एव यन्त्रे केसरेषु युगशः स्वरान् विलिखेत्, कादिक्षान्तैरावेष्टयेत्। अत्र पूर्वयन्त्रोक्तऋग्वेष्टनं नास्ति, अष्टकोणेषु कामबीजं विलिखेत्। वासोऽलङ्कारभूषणमिष्टभोजनस्वेष्टजनदर्शनप्राप्तिः [2]सुदिनत्वम्। तथा—

विलिख्य कर्णिकान्तरे ध्रुवं दलाष्टके मनोः। षडर्तुवेदषट्शरत्रयीस्वरेन्द्रियाक्षरान्।। ७।।
लिखेच्च मातृकाक्षरैर्धरापुरेण चावृतम्। वयं त एभिरित्यृचः सुयन्त्रमेतदिष्टदम्।। ८।।
विशिष्टरत्नगोधरासुवर्णधान्यशालिनीम्। वितीर्य सम्पदं परां रिपुक्षयं च यच्छति।। ९।।

अस्यार्थः—अष्टदलकमलकर्णिकायां ससाध्यं प्रणवं विलिख्य तद्दलेषु वयं त एभिरित्यृचो वर्णान् षट् षट् चतुः षट् पञ्च चतुः सप्त पञ्च-क्रमेण विभज्य विलिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैरावेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवति। मन्त्रस्तु (६। १९। १३)

व॒यं त॑ ए॒भिः पु॑रुहूत स॒ख्यैः शत्रोः॑ शत्रो॒रुत्त॑र इत्स्या॑म।
घ्नन्तो॑ वृ॒त्राण्यु॒भया॑नि शूर रा॒या म॑देम बृ॒हता त्वोताः॑।। १।।

वयं त एभिरिति मन्त्रस्य भरद्वाज ऋषिस्त्रिष्टुप् छन्दः इन्द्रो देवता।। श्रीयन्त्रसारे—

आलिख्य वीप्सितं यन्त्रं बीजं तत्कर्णिकान्तरे। तस्योदरे समिति च बीजं साध्यार्णवेष्टितम्।। १।।
बीजस्य पार्श्वयोर्दृष्टी इईं इति च तत्पुरः। जिह्वां स्रूं ऊमिति दिक्ष्वेतान् सोऽहं हंसार्णकान् बहिः।।२।।
प्राणप्रतिष्ठामन्त्रं च गायत्रीं मन्त्रयन्त्रयोः। यथावकाशं विलिखेत् स्वगुरूक्तेन वर्त्मना ।। ३।।

---

[1] 'मुदितताः' ख. पाठः। [2] 'मुदिनत्वम्' ख. पाठः।

इति।। सारसङ्ग्रहे—

गुलिकीकृत्य यन्त्रं च लाक्षालोहत्रयावृतम्। कृत्वा प्रतिष्ठितप्राणं सिक्तं सम्पातसर्पिषा।। १।।
विन्यस्य कलशे यन्त्र[1]स्थापिते विधिवद्गुरुः। तत्रावाह्य यजेत् सम्यक् तत्र[2] यन्त्रस्य देवताम्।।२।।
तत्कुम्भोदकसिक्ताय वितरेद् यन्त्रमादरात्। गृहीत्वा गुरुणा दत्तं यन्त्रं भव्यः प्रसन्नधीः।। ३।।
बिभृयादुक्तविधिना विश्वस्तः सर्वसिद्धये। चन्दनागुरुकर्पूरकस्तूरीरोचनान्वितः ।। ४।।
मदः करिभवो लाक्षारसकुङ्कुमसंयुतम्। यन्त्रलेखनद्रव्याणि क्रूरेष्वष्टविषाणि च।। ५।।
लवणोषणमेहाम्बुगृहधूमाग्निसंयुतः। श्मशानाङ्गारनिम्बोत्थनिर्यासो विषमीरितम्।। ६।।

उषणमूषरं, मेहाम्बु प्रस्रवः अग्निश्चित्रकम्।

त्रिलोहभूर्जपत्राणि क्षौमतालदलानि च। तत्तत्कल्पोदितानि स्युर्यन्त्राधिकरणानि च।। ७।।

इति।। अथैतत्प्रयोगः—तत्र सुदिने शुभे मुहूर्त्ते चन्द्रताराद्यनुकूले साधकः कृतनित्यक्रियः श्रीगुरुं प्रणम्य विघ्नेश्वरं समभ्यर्च्य, पूर्वोक्तवारेशद्वयतिथीशनक्षत्रेशान् सम्पूज्य, स्वाभिमतं यन्त्रं वर्णविन्यासमन्तरेण विरच्य, तन्मध्ये लेख्यं बीजं विपुलतरोदरं विलिख्य, समिति जीवबीजं विलिख्य, तद्बीजं साध्यनामाक्षरैः संवेष्ट्य, पूर्वलिखितबीजाद्बहिस्तद्दक्षवामपार्श्वयोः ईंईं इति दृष्टिद्वयं विलिख्य, तत्पुरतः स्र्यूमितिः जिह्वाबीजं विलिख्य, तस्य प्रागादिदिक्षु सोहंहंस इति प्रादक्षिण्येनैकैकमक्षरं विलिख्य, तदनु यथास्थानं साधककर्मादि तत्तत्कल्पोक्तं सर्वं विलिख्य सर्वान्ते प्राणप्रतिष्ठामन्त्रं मन्त्रगायत्रीं यन्त्रगायत्रीं च यथावकाशं लिखेत्। तत्र प्राणप्रतिष्ठामन्त्रः प्रागेवोक्तः। मन्त्रगायत्री तत्तत्कल्पोक्ता द्रष्टव्या। यन्त्रगायत्री तु—ॐयन्त्रराजाय विद्महे देवगृहाय धीमहि तन्नो यन्त्रं प्रचोदयात्। इतीत्थं यन्त्रं विलिख्य लाक्षालोहत्रयवेष्टितं क्वचित् संस्थाप्य, स्वासनपूजादिन्यासजालं विधाय, यन्त्रस्य यन्त्रलिखितमन्त्रगणस्य साध्यस्य च पृथक्पृथक् प्राणप्रतिष्ठां कृत्वा, तत्र तद्योगपीठपूजापूर्वकं यन्त्राधिदेवतामावाह्य साङ्गां सावरणां सम्पूज्य, तद्यन्त्रं स्पृशन् मूलविद्यां देवताध्यानपूर्वकं लक्षाद्ययुतावधि कार्यस्य गौरवलाघवं विज्ञाय जपित्वा, कुण्डादावग्निं संस्कृत्य गोघृतेनायुतादिसहस्रान्तं यन्त्रे हुतशेषं स्रुवलग्नं सम्पातयन् हुत्वा, तत्तद्यन्त्रे सर्वतोभद्रमण्डले वा दीक्षोक्तविधिना कुम्भं संस्थाप्य, यन्त्रदेवतां साङ्गां सावरणां सम्पूज्य तेन जलेनाभिषिक्ताय यन्त्रं दद्यात्। सोऽपि प्रणामपूर्वकं यन्त्रमादायाचार्यतोषणं कृत्वा सुसंहृष्टो विश्वासपूर्वकं धारयेत्। तेन सर्वाभीष्टसिद्धयो भवन्तीति।। तथा—

आ कृष्णेनेत्यृचां तारं कर्णिकामध्यसंस्थितम्। साध्यगर्भं समावेष्ट्य प्राग्दले विलिखेत् पुनः।।१।।
आप्यायस्वेत्यृचा याम्ये उद्बुध्यस्वेति पश्चिमे। बृहस्पतेत्यृचा सौम्ये प्र वः शुक्राय इत्यपि।। २।।
आग्नेयकोणगे पात्रे अग्निर्मूर्धेति नैर्ऋते। शन्नोदेवीत्यृचं पत्रे पत्रे वायव्यकोणगे ।। ३।।
कया नेति तथैशाने[3] केतुं कृण्वेत्यृचं दले। तद्बाह्ये मातृकावर्णैः संवेष्ट्य कुगृहास्त्रिषु।। ४।।
ॐह्रींहंसाक्षरान् दिक्षु सोहंहंसाक्षरांल्लिखेत्। स्वर्णादिपट्टेष्वालिख्य यन्त्रमेतद् यथाविधि।। ५।।
अभिषिक्तः शुभैस्तोयैः कृतपुण्याहमङ्गलः। कर्णिकायां क्रमादर्च्याः प्रागाद्यष्टदलेषु च।। ६।।
सूर्यचन्द्रारसौम्यार्किजीवाहिभृगुकेतवः। सुजप्तां सिक्तसम्पातं स्वमन्त्रैश्च यथाविधि ।। ७।।

---

[1] 'यन्त्रं स्थापितं' क. ग. पाठः। [2] 'तत्तद्यन्त्र' ख. पाठः। [3] 'कयान इत्यृचं शैवे' ख. पाठः।

[redacted]

ग्रहपीडाप्रशमनं कृत्याज्वरविनाशनम्। सर्वामयहरं दिव्यं समरे विजयप्रदम्।। ८।।
आयुष्करं पुत्रदं च परचक्रविनाशनम्। किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं नृणाम्।। ९।।

एतस्यायमर्थ:– अष्टदलकमलकर्णिकायां ससाध्यं प्रणवं विलिख्य, आ कृष्णेनेत्यृचा संवेष्ट्य, पूर्वदले आप्यायस्वेति, याम्ये उद्बुध्यस्वेति, पश्चिमे बृहस्पते अतीति, उत्तरदले प्र व: शुक्रायेति, आग्नेयदले अग्निर्मूर्धेति, नैर्ऋत्ये शन्नो देवीरिति, वायव्ये कया नश्चित्र इति, ईशानदले केतुं कृण्वन्निति मन्त्रान् विलिख्य, तद्बाह्ये वृत्तद्वयान्तराले अकारादिक्षकारान्तमातृकावर्णैरावेष्ट्य, तद्बहिर्भूपुरे आग्नेयादिकोणेषु ॐह्रीं हंस: इति प्रतिकोणं विलिख्य, पूर्वादिचतुर्दिक्षु सोहंहंस: इति प्रतिदिशं विलिखेत्। एतद्यन्त्रं प्रोक्तविधिना धारयेत् प्रोक्तफलदं भवतीति।।

अथ वेदोक्तनवग्रहविधानम्। तत्र स्मृतिसङ्ग्रहे–

विधानं ग्रहमन्त्राणां वक्ष्ये सर्वसमृद्धिदम्। आ कृष्णेन सहस्रांशोरिमं देवा तथेन्दवे।। १।।
अग्निर्मूर्धेति भौमाय उद्बुध्यस्व बुधाय च। बृहस्पतेति च गुरो: शुक्रायान्नात्परिस्रुत:।। २।।
शनैश्चरस्य मन्त्रोऽयं शन्नो देवीरुदाहृत:। कया न इति राहोश्च केतुं कृण्वंस्तु केतवे।। ३।।
आप्यायस्वेति चेन्दोश्च शुक्रन्त इति वा भृगो:। नव मन्त्रा: समुद्दिष्टा: सर्वे व्याहृतिपूर्वका:।। ४।।
(१)आ कृष्णेनेति मन्त्रस्य हिरण्यस्तूपसञ्ज्ञक:। ऋषि: प्रोक्तस्ततस्त्रिष्टुप् छन्द: सूर्यस्तु देवता।।५।।
इष्टका[1]मार्थसिद्ध्यर्थं विनियोग उदाहृत:। व्याहृतित्रयमादौ स्यादा कृष्णेन हृदीरितम्।। ६।।
तथैव रजसा चेति शिरश्च समुदाहृतम्। शिखायां च समुद्दिष्टं वर्तमानो निवेशयन्।। ७।।
कवचे चामृतं चैव मर्त्यं चेति समीरयेत्। हिरण्ययेन सविता रथेनेति त्रिनेत्रके।। ८।।
शेषमस्त्रे समुद्दिष्टं षडङ्गन्यास ईरित:। हृदयाय नम: प्रोक्तं शिरसे चाग्निवल्लभा।। ९।।
शिखायै वषडित्युक्तं कवचाय हुमीरितम्। नेत्रत्रयाय वौषट् च अस्त्राय फडुदीरितम्।। १०।।
एवं षडङ्गं विन्यस्य पदन्यासं समाचरेत्। आ कृष्णेनेति शिरसि ललाटे रजसेति च।। ११।।
वर्तमानो निवेशयन् मुखेऽमृतमथो हृदि। मर्त्यं चेति च नाभौ स्यात् कट्यां हिरण्ययेन तु।।१२।।
जङ्घयो: सवितेत्यूर्वो: रथेनेति च जानुनो:। आ देवो याति पदयोर्भुवनानि तत: परम्।। १३।।
पश्यन्निति विधायैवं ध्यानं कुर्यात् समाहित:।..।।

पद्मासन: पद्मकरो द्विबाहु: पद्मद्युति: सप्ततुरङ्गवाद:।
दिवाकरो लोकगुरु: किरीटी मयि प्रसादं विदधातु देव:।। १४।।

ध्यात्वैवं पूजयेत् सूर्यं वृत्तं षट्कोणकं तथा। वृत्तमष्टदलं बाह्ये वृत्तं भूमिपुरं तथा।। १५।।
चतुर्द्वारसमायुक्तं मण्डलेऽस्मिन् प्रपूजयेत्। मध्ये रविं सुसम्पूज्य षट्कोणे तु षडङ्गकम्।। १६।।
तद्बहिर्वसुपत्रेषु पूर्वाद्यं तु प्रदक्षिणम्। सोमं भौमं तथा सौम्यं गुरुशुक्रौ शनिं तथा।। १७।।
राहुं केतुं च सम्पूज्य स्वस्वमन्त्रैर्विशेषत:। भूपुरे लोकपालांश्च पूर्वादिक्रमतो यजेत्।। १८।।

---

[1] 'इष्टकाम्या' ख. पाठ:।

इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा। वायुं कुबेरमीशानं ब्रह्माणं शेषमेव च।। १९।।
वासवेशानयोर्मध्ये ब्रह्माणं पूजयेत् तथा। रक्षोवरुणयोर्मध्ये ह्यनन्तमपि[1] पूजयेत्।। २०।।
तल्लिङ्गकैश्च मन्त्रैर्वा नाममन्त्रैश्च पूजयेत्। तदस्त्राणि ततो बाह्ये वज्रं शक्तिं च दण्डकम्।। २१।।
खड्गं पाशं सृणिं चैव शूलं पद्मं सुदर्शनम्। एवं सम्पूज्य विधिवदुपचारैर्मनोरमैः।। २२।।
अष्टोत्तरसहस्रं वा शतमष्टाधिकं तु वा। तदग्रे मन्त्रमावर्त्य स्तुत्वा देवं विसर्जयेत्।। २३।।
एवं यः पूजयेद्भक्त्या भास्करं ग्रहनायकम्। ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात्।।२४।।
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी। अन्ते सद्गतिमाप्नोति यत्र देवो दिवाकरः।। २५।।
(२)इमं देवेति मन्त्रस्य गौतम ऋषिरीरितः। विराट् छन्दो देवतात्र सोमः सर्वार्थसिद्धये।। २६।।
विनियोगः समाख्यात इमं देवा तथैव च। असपत्नं सुवध्वं च हृदयं महते ततः।। २७।।
क्षत्राय शिर आख्यातं महते च ततः परम्। ज्यैष्ठ्यायेति शिखा प्रोक्ता महते च पुनर्वदेत्।।२८।।
जानराज्याय कवचमिममेति च मुष्य च। पुत्रं नेत्रं ततोऽस्यै च विशेऽस्त्रं समुदाहृतम्।। २९।।
एवं न्यस्य षडङ्गानि पदन्यासं समाचरेत्। इमं देवेति शिरस्यसपत्नमिति भालके।। ३०।।
सुवध्वं मुखदेशे तु महते च ततः परम्। क्षत्राय हृदयं प्रोक्तं महते च ततः परम्।। ३१।।
ज्यैष्ठ्याय ऊर्वोर्महते जानराज्याय जानुनोः। इमममुष्य च पुत्रं गुल्फयोस्तदनन्तरम्।। ३२।।
अस्यै विशे पादयोश्च पदन्यास उदाहृतः।..।।

श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः।
चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः।। ३३।।

एवं ध्यात्वा स्वपुरतः पूजामण्डलमालिखेत्। चतुरस्रं च षट्कोणं वसुपत्रं च भूपुरम्।। ३४।।
मध्ये देवं समावाह्य पूजयेदुपचारकैः। षट्कोणे तु षडङ्गानि वसुपत्रे कुजादिकान्।। ३५।।
भूपुरे लोकपालांश्च बहिर्वज्रादिकान् यजेत्। यथापूर्वं जपं कृत्वा समर्प्य विधिपूर्वकम्।। ३६।।
स्तुत्वा नत्वा च सम्प्रार्थ्य स्वात्मन्युद्वासयेत् सुधीः। एवं यः पूजयेद्भक्त्या सुधांशुं ग्रहनायकम्।।३७।।
ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात्। अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी।।३८।।
अन्ते सद्गतिमाप्नोति यत्र देवः सुधाकरः। (३)अग्निर्मूर्धेति मन्त्रस्य विरूपाक्ष ऋषिः स्मृतः।।३९।।
गायत्रीच्छन्द आख्यातं देवता स्यान्महीसुतः। इष्टकामा[2]र्थसिद्ध्यर्थं विनियोगः प्रकीर्तितः।।४०।।
वैदिकेषु च सर्वेषु न्यासे चैव जपे हुते। व्याहृतित्रयसंयुक्तं साधकाभीष्टसिद्धिदम्।। ४१।।
व्याहृतित्रयसंयुक्तमग्निर्मूर्धा हृदि स्मृतम्। दिवः ककुत् शिरः प्रोक्तं पतिः पृथिव्या अयं शिखा।।४२।।
अपां वर्मणि रेतांसि नेत्रमस्त्रं च जिन्वति। षडङ्गमेवं विन्यस्य पदन्यासं समाचरेत्।। ४३।।
अग्निर्मूर्धेति शिरसि ललाटे दिव इत्यपि। मुखे ककुदिति पतिर्नाभौ कट्यां ततः परम्।। ४४।।

---

१. 'न्तं परिपूजयेत्' ख. पाठः। २. 'काम्या' ख. पाठः।

पृथिव्या अयमपामूर्वोर्जानुनोः पदद्वयम्। रेतांसि गुल्फयोर्न्यसेत् पादयोश्चैव जिन्वति।। ४५।।
एवं विन्यस्य विधिवत् ततो ध्यायेदनन्यधीः।...।।
रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाधरः।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः।। ४६।।
एवं भौमं चिरं ध्यात्वा पूजामण्डलमालिखेत्। त्रिकोणं चैव षट्कोणं वसुपत्रं च भूपुरम्।। ४७।।
मध्ये देवं समावाह्य पूजयेदुपचारकैः। षट्कोणेषु षडङ्गानि वसुपत्रे बुधादिकान्।। ४८।।
चतुरस्रे लोकपालान् वज्रादींश्च ततो बहिः। सम्पूज्यैवं यथापूर्वं जप्त्वा स्तुत्वा विसर्जयेत्।।४९।।
एवं यः पूजयेद्भक्त्या भूमिपुत्रं दृढव्रतः। ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात्।। ५०।।
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी। अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः।। ५१।।
(४)उद्बुध्यस्वेति मन्त्रस्य परमेष्ठी ऋषिः स्मृतः। त्रिष्टुप् छन्दो देवतात्र बुधोऽभीष्टार्थसिद्धये।।५२।।
विनियोगः समाख्यातः उद्बुध्यस्व ततः परम्। अग्ने प्रतीति तत्पश्चाज्जागृहि त्वं हृदि स्मृतम्।।५३।।
इष्टापूर्ते शिरः प्रोक्तं संसृजेथामयं च तु। शिखा अस्मिन् सधस्थे तु कवचाय हुमीरयेत्।। ५४।।
अध्युत्तरस्मिन्विश्वेदेवा नेत्रमन्त्र उदाहृतः। ततोऽस्त्रे च प्रविन्यस्येद् यजमानश्च सीदत।। ५५।।
एवं षडङ्गं विन्यस्य पदन्यासं समाचरेत्। उद्बुध्यस्वेति शिरसि अग्ने प्रति ललाटके।। ५६।।
जागृहि त्वं मुखं चैवमिष्टापूर्ते हृदि स्मृतम्। संसृजेथामयं चेति नाभावस्मिंस्ततः परम्।। ५७।।
सधस्थे इति कट्यां वै अध्युत्तेति ततः परम्। रस्मिन् ऊर्वोस्ततो विश्वे देवा इति च जानुनोः।।५८।।
गुल्फयोर्यजमानश्च पादयोः सीदतेति च। एवं न्यासविधिं कृत्वा ध्यायेद् देवमनन्यधीः।। ५९।।
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च सौम्यः।
सिंहस्थितश्चन्द्रसुतो हरिप्रियः सदा मम स्याद्वरदस्तु सौम्यः।। ६०।।
एवं ध्यात्वा स्वपुरतः पूजामण्डलमालिखेत्। वाणाकारं लिखेन्मध्ये बहिः षट्कोणमालिखेत्[1] ।।६१।।
बहिरष्टदलं पद्मं तद्बहिर्भूपुरं लिखेत्। मध्ये बुधं समावाह्य पूजयेदुपचारकैः।। ६२।।
षट्कोणे तु षडङ्गानि पद्मे गुर्वादिकान् यजेत्[2]। भूपुरे लोकपालांश्च बहिर्वज्रादिकान् यजेत्[3] ।।६३।।
एवं यः पूजयेद्भक्त्या बुधं सोमसुतं बुधः। ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात्।। ६४।।
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी। अन्ते सद्गतिमाप्नोति यत्र देवो महेश्वरः।। ६५।।
(५) बृहस्पते अतीत्यस्य ऋषिर्गृत्समदः स्मृतः। त्रिष्टुप् छन्दो देवता च बृहस्पतिरुदाहृतः।। ६६।।
इष्टकामा[4]र्थसिद्ध्यर्थे विनियोगः प्रकीर्तितः। बृहस्पते अति यदर्य्यो हृदि प्रतिविन्यसेत्।। ६७।।
ततश्चार्हाद् द्युमदिति शिरः प्रोक्तं विभाति च। क्रतुमच्च शिखा प्रोक्ता जनेषु कवचं मतम्।।६८।।
यद्दीदयच्छवसर्तप्रजात इत नेत्रके। तदस्मासु द्रविणमिति धेहि चित्रं तदस्त्रकम्।। ६९।।

---

१. 'कं न्यसेत्' ख. पाठः। २. 'न्यसेत्' ख. पाठः। ३. 'न्यसेत्' ख. पाठः। ४. 'काम्या' ख. पाठः।

षडङ्गमेवं विन्यस्य पदन्यासमथाचरेत्। बृहस्पते इति शिरसि अति यदर्य्यो ललाटे।। ७०।।
अर्हाद्द्युमदिति मुखे विभाति क्रतुमद् हृदि। जनेषु नाभौ यद्दीदयत् कट्यां शवसर्त च।। ७१।।
प्रजात तदिति चोर्वोः अस्मासु द्रविणं तथा। जान्वोर्धेहि तथा गुल्फे चित्रं चेति च पादयोः।।७२।।
एवं न्यासविधिं कृत्वा ध्यायेद् देवमनन्यधीः।..।।
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः।
तथाक्षसूत्रं च कमण्डलुं चाभीष्टं च बिभ्रद्वरदोऽस्तु मह्यम्।। ७३।।
एवं ध्यात्वा स्वपुरतो मण्डलं विलिखेत् सुधीः। चतुरस्रं तथा दीर्घं बहिः षट्कोणमालिखेत्।। ७४।।
तद्बहिर्वसुपत्राढ्यं बहिर्भूबिम्बमालिखेत् । मध्ये देवं समावाह्य पूजयेदुपचारकैः ।। ७५।।
षट्कोणे तु षडङ्गानि शुक्रादीन् वसुपत्रके। भूपुरे लोकपालांश्च वज्रादींस्तद्बहिर्यजेत्।। ७६।।
पूर्ववन्मन्त्रमाजप्य स्तुत्वा नुत्वा विसर्जयेत्। एवं यः पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात्।।७७।।
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी। अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः।। ७८।।
(६)अन्नात्परिस्रुत इति मन्त्रस्य ऋषयः स्मृताः। प्रजापत्यश्विनौ चैव सरस्वती तथैव च।। ७९।।
इन्द्रश्चातिजगती च च्छन्दः शुक्रोऽत्र देवता। इष्टका[1]मार्थसिद्ध्यर्थं विनियोगः प्रकीर्तितः।। ८०।।
अन्नात्परिस्रुतो हृदि रसं ब्रह्म तथैव च। णा व्यपिबच्छिरश्चैव क्षत्रं पयस्तथा शिखा।। ८१।।
सोमं प्रजापतिर्वर्म ऋतेन सत्यमिन्द्रियम्। नेत्रं विपानं शुक्रं चाप्यन्धसेत्यस्त्रमीरितम्।। ८२।।
इन्द्रस्येति च तत्पश्चात् पदन्यासमथाचेत्। अन्नात्परिस्रुतः शिरो रसं ब्रह्मणेति ललाटके।। ८३।।
व्यपिबत् क्षत्रं मुखं चैव पयः सोमं हृदि स्मृतम्। प्रजापतिर्नाभिदेशे ऋतेन सत्यमित्यपि।। ८४।।
इन्द्रियं कटिदेशे विपानं गुह्यप्रदेशके। शुक्रं वृषणयोरन्धस इत्यूर्वोस्तथैव च।। ८५।।
इन्द्रस्येन्द्रियमिदं पय इत्येव जानुनोः। ततोऽमृतं मधु पदोः पदन्यास उदाहृतः।। ८६।।
श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः।
तथाक्षसूत्रं च कमण्डलुं च दण्डं च बिभ्रद् वरदोऽस्तु मह्यम्।। ८७।।
एवं शुक्रं चिरं ध्यात्वा पूजामण्डलमालिखेत्। पञ्चकोणं लिखेदादौ षट्कोणं वसुपत्रकम्।। ८८।।
भूपुरं तद्बहिर्लेख्यं[2] चतुर्द्वारोपशोभितम् ।मध्ये देवं समावाह्य पूजयेदुपचारकैः ।। ८९।।
षट्कोणे तु षडङ्गानि शन्यादीन् वसुपत्रके। भूपुरे लोकपालांश्च वज्रादींस्तद्बहिर्यजेत् ।। ९०।।
प्राग्वन्मन्त्रं जपित्वा तु स्तुत्वा नत्वा विसर्जयेत्। एवं यः पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात्।।९१।।
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी। अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः।। ९२।।
(७)शन्नो देवीति मन्त्रस्य दध्याङाथर्वण ऋषिः। गायत्री च्छन्द आख्यातं देवता शनिरीरितः।।९३।।
इष्टका[3]मार्थासिद्ध्यर्थं विनियोगः प्रकीर्तितः। शन्नो देवीति हृदयं रभिष्टये शिरः स्मृतम्।। ९४।।

---

[1] 'काम्या' ख. पाठः। [2] 'लिख्येच्च' ख. पाठः। [3] 'काम्या' ख. पाठः।

आपो भवन्त्विति शिखा पीतये कवचं मतम्। शं योरभि च नेत्रं स्यादपि स्त्रवन्तु नस्तथा।।९५।।
अस्त्रमिति षडङ्गानि पदन्यासं समाचरेत्। शन्न: शिरसि देवीश्च ललाटेऽभिष्ठये मुखे।। ९६।।
आपो भवन्त्विति नाभौ पीतये कटिदेशके। शं योरूर्वोरभि जान्वो: स्त्रवन्तु न इति पदो:।। ९७।।

नीलाम्बर: शूलधर: किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्।
चतुर्भुज: सूर्यसुतोऽप्रशान्त:[1] सदास्तु मह्यं वरदोऽल्पगामी।। ९८।।

एवं ध्यात्वा स्वपुरत: पूजामण्डलमालिखेत्। लिखेद्वै धनुराकारं षट्कोणं तद्बहिर्न्यसेत्।। ९९।।
बहिरष्टदलं पद्मं तद्बहिर्भूपुरं न्यसेत्। मध्ये देवं समावाह्य पूजयेदुपचारकै: ।।१००।।
ष्टकोणेषु षडङ्गानि मध्ये राह्वादिकान्यजेत्[2]। भूपुरे लोकपालांश्च तद्बहिर्हेतिपूजनम्।।१०१।।
एवं य: पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात्। अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी।।१०२।।
ग्रहपीडां विजित्याशु सर्वसौख्यसमन्वित:। अन्ते सद्गतिमाप्नोति यत्र देव: सनातन:।।१०३।।
(८)कया न इति मन्त्रस्य वामदेव ऋषि: स्मृत:। गायत्री च्छन्द आख्यातं देवता राहुरीरित:।।१०४।।
कया नो हृदयं चित्र आभुवद् शिर ईरितम्। ऊती सदावृध: शिखा सखा कवचमीरितम्।।१०५।।
कया नेत्रं तथास्त्रं च तत: शचिष्ठया वृता। षडङ्गमेवं विन्यस्य पदन्यासमथाचरेत्।।१०६।।
कया शिरसि नो भाले चित्र इत्यास्यदेशके। आभुवद् हृदये ऊती नाभौ कट्यां सदावृध:।।१०७।।
सखा ऊर्वो: कया जान्वोर्गुल्फयोश्च शचिष्ठया। वृतेति पादयोर्न्यस्य ध्यानं कुर्यात् समाहित:।।१०८।।

नीलाम्बरो नीलवपु: किरीटी करालवक्त्र: करवालशूली।
चतुर्भुजश्चक्रधरश्च राहु: सिंहासनस्थो वरदोऽस्तु मह्यम्।। १०९।।

एवं ध्यात्वा स्वपुरतो मण्डलं तु समालिखेत्। शूर्पाकारं लिखेन्मध्ये बहि: षट्कोणमालिखेत्।।११०।।
तद्बहिर्वसुपत्राब्जं तद्बहिर्भूपुरं लिखेत् । मध्ये देवं समावाह्य पूजयेदुपचारकै: ।।१११।।
षट्कोणेषु षडङ्गानि पद्मे केत्वादिकान् ग्रहान्। भूपुरे लोकपालांश्च वज्रादीनि ततो बहि:।।११२।।
एवं य: पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात्। ग्रहपीडां विजित्याशु दीर्घमायुरवाप्नुयात्।।११३।।
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी। अन्ते सद्गतिमाप्नोति यत्र देव: सनातन:।।११४।।
(९)केतुं कृण्वन्निति मनोर्मधुच्छन्दा इति स्मृत:। गायत्री च्छन्द आख्यातं देवता केतुरीरित:।।११५।।
सर्वाभीष्टार्थसिद्ध्यर्थं विनियोग: प्रकीर्तित:। केतुं कृण्वन्निति हृद्यऽकेतवे शिर ईरितम्।।११६।।
पेशो मर्या शिखा प्रोक्ता वर्म प्रोक्तमपेशसे। समुषद्भिरिति नेत्रमजायथा इत्यस्त्रकम्।।११७।।
षडङ्गमेवं विन्यस्य पदन्यासं समाचरेत्। केतुं शिरसि कृण्वंश्च ललाटेऽकेतवे मुखे।।११८।।
पेशो हृदि च मर्य्या चापेशसे कटिदेशके। समूर्वोश्च उषद्भिश्च जान्वोश्चाजायथा: पदो:।।११९।।

---

[1] 'त: प्रशान्त:' ख. पाठ:। [2] 'न्यसेत्' ख. पाठ:।

धूम्रो द्विबाहुर्वरदो गदाधरो गृध्रासनस्थो विकृताननश्च।
किरीटकेयूरविभूषितो यः स चास्तु मे केतुगणः प्रशान्त्यै।। १२०।।
इति ध्यात्वा स्वपुरतो मण्डलं विलिखेत् सुधीः। प्रागवन्मण्डलमालिख्य ध्वजं मध्ये समालिखेत्।। १२१।।
पूजनादिविसर्गान्तं पूर्ववच्च समापयेत्। आदित्याद्या दले पूज्या अन्यत् सर्वं च पूर्ववत्।। १२२।।
यो भक्त्या पूजयेद् देवं सर्वान् कामानवाप्नुयात्। ग्रहपीडां विजित्याशु नीरोगी सुखमेधते।। १२३।।
पुत्रवान् धनवांश्चैव जायते भुवि मानवः। अन्ते सद्गतिमाप्नोति यत्र देवो महेश्वरः।। १२४।।

इति। अथैतेषामाकृष्णेनेत्यादिसूर्यादिनवग्रहमन्त्राणां प्रयोगविधिर्लिख्यते—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रये कृत्वा, शिरसि हिरण्यस्तूपऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये श्रीसूर्याय देवतायै नमः। इति विन्यस्य ममेष्टकाम्यार्थे विनियोगः इति कृताञ्जलिरुक्त्वा, ऊँभूर्भुवःस्वः आकृष्णेन हृदयाय नमः। एवं रजसा शिरसे स्वाहा। वर्तमानो निवेशयन् शिखाः। अमृतं मर्त्यं च कवचाय०। हिरण्ययेन सविता रथेन नेत्रत्र०। आदेवो याति भुवनानि पश्यन् अस्त्राय०। एवमङ्गुष्ठादिकरतलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। तत आकृष्णेन शिरसि। रजसा ललाटे। वर्तमानो निवेशयन्मुखे। अमृतं हृदये। मर्त्यं च नाभौ। हिरण्ययेन कट्यां। सविता जङ्घयोः। रथेन ऊर्वोः। आदेवो याति जान्वोः। भुवनानि पश्यन् पादयोः। इति विन्यस्य ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना वृत्तगर्भं षट्कोणं तदुपरि वृत्तं तदुपर्य्यष्टदलं तदुपरि वृत्तं तदुपरि भूपुरं चतुर्द्वारोपशोभितमिति पूजायन्त्रं विलिख्य, स्वपुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठमभ्यर्च्य जयादिपीठशक्तीः समभ्यर्च्य, ह्रींसर्वशक्तिकमलासनाय नमः, इति समस्तं पीठं सम्पूज्य मूलेन मूर्तिं परिकल्प्य मध्ये सूर्यमावाहयेत्। यथा—किरीटिनं पद्मासनं पद्मकरं पद्मगर्भसमाकृतिं सप्ताश्वं द्विभुजं कलिङ्गदेशजं काश्यपसगोत्रं विश्वामित्रार्षं त्रिष्टुप्छन्दसं रक्ताम्बरधरं रक्ताभरणभूषितं रक्तगन्धानुलेपिनं रक्तध्वजच्छत्रपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताग्निसहितं प्रत्यधिदेवतेश्वरसहितं रक्तवृत्तमण्डले पूर्वमुखमावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य, ऊँभूर्भुवःस्वः श्रीसूर्याय नमः इति मन्त्रेण षोडशोपचारपूजां कुर्यात्। तत्रासनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि प्राग्वत् सम्पूज्य, अष्टपत्रेषु देवाग्रादिप्रादक्षिण्येन—सोमाय नमः। भौमाय०। बुधाय०। बृहस्पतये०। शुक्राय०। शनैश्चराय०। राहवे०। केतुगणेभ्यो नमः। इति सम्पूज्य, चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य पुनर्धूपदीपादिकं निवेद्य, मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य स्तोत्रं पठेत्। श्रीसूर्य उवाच

साधु साम्ब महाबाहो शृणु जाम्बवतीसुत। जपन्नामसहस्रेण पठस्वेमं स्तवं शुभम्।। १।।
यानि नामानि गुह्यानि पवित्राणि शुभानि च। तानि ते कथयिष्यामि प्रयत्नादवधारय।। २।।
विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः। लोकप्रकाशकः श्रीमान् लोकचक्षुर्ग्रहेश्वरः।। ३।।
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता रविग्रहः[१]। [२]तपनः पवनश्चैव शुचिः सप्ताश्ववाहनः।। ४।।
शुभदः कामदः पुण्यो वरेण्यो लोकपावनः। सुभगो निर्भगो भानुः शुभाशुभनिदर्शनः।। ५।।
गभस्तिहस्तो[३] ब्रह्मण्यः सर्वदेवनमस्कृतः। एवं त्रिंशन्नामधेयः स्तव इष्टः सदा मम।। ६।।

---

१. 'तमिस्रहा' ख. पाठः। २. 'पतनः' ख. पाठः। ३. 'हृष्टः' ख. पाठः।

आरोग्यश्रीकरश्चैव कुलवृद्धियशस्कर:। य एतेन महाबाहो मध्याह्नास्तमयोदिते[१] ।। ७।।
स्तौति मां प्रयतो भूत्वा सर्वपापै: प्रमुच्यते। मानसं वाचिकं वापि कर्मजं वापि दुष्कृतम्।। ८।।
एष जाप्यश्च होम्यश्च सन्ध्योपासनयोस्तथा। धूपमन्त्रोऽर्घ्यमन्त्रश्च बलिमन्त्रस्तथैव च।। ९।।
अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे। पूजितोऽयं महामन्त्र: सर्वकर्मणि साधकै:।। १०।।
एवमुक्त्वा तु भगवान् भास्करो जगदीश्वर:। आमन्त्र्य कृष्णतनयं तत्रैवान्तरधीयत।। ११।।
साम्बोऽपि स्तवराजं च श्रुत्वा सप्ताश्ववाहनात्। प्रीतात्मा विजयी श्रीमान् तस्माद्रोगात् प्रमुक्तवान्।।१२।।
पुत्रान् पौत्रान् धनं कामांल्लभते नात्र संशय:। सर्वशत्रून् निहन्त्याशु नीहारमिव भास्कर:।। १३।।
इति हरिसुतरोगध्वंसनं स्तोत्रमेतत् पठति यदि हि भक्त्या प्रातरुत्थाय नित्यम्।
स भवति गतरोग: सर्वसम्पत्तिवा[२]पस्तपनसदृशतेजा: सूर्यलोकं प्रयाति।। १४।।

इति सूर्यस्तोत्रम्।।

अथ चन्द्रमन्त्रप्रयोग:—तत्र प्रात:कृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गौतमाय ऋषये नम:। मुखे विराट्छन्दसे नम:। हृदये श्रीसोमाय देवतायै नम:। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, व्याहृतित्रयपूर्वकं सर्वत्र इमं देवा असपत्नं सुवध्वं हृदयाय नम:। महते क्षत्राय शिरसे०। महते जैष्ठ्याय शिखायै०। महते जानराज्याय कवचाय०। इमममुष्य पुत्रं नेत्रत्र०। अस्यै विशे अस्त्रा०। इति करषडङ्गन्यासं विधाय, इमं देवा शिरसि। असपत्नं ललाटे सुवध्वं मुखे। महते क्षत्राय हृदये। महते ज्यैष्ठ्याय ऊर्वो:। महते जानराज्याय जान्वो:। इमममुष्य पुत्रं गुल्फयो:। अस्यै विशे पादयो:। इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना चतुरस्रगर्भं षट्कोणं तदुपरि वृत्तं तल्लग्नमष्टदलं तदुपरि वृत्तं तदुपरि भूपुरं चतुर्द्वारोपशोभितं पूजामण्डलं विलिख्य, पुरत: संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठं सम्पूज्य, मध्ये मूलेन मूर्तिं परिकल्प्य तत्र सोममावाहयेत्। यथा—किरीटिनं श्वेताम्बरधरं दशाश्वं श्वेतभूषणं पाशपाणिं द्विबाहुं वनायुदेशजमत्रिगोत्रमात्रेयार्षमनुष्टुप्छन्दसं श्वेताभरणभूषितं श्वेतगन्धानुलेपनं श्वेतध्वजच्छत्रपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवता (वरुण)सहितं प्रत्यधिदेवतोमासहितं चतुरस्रमण्डले प्रत्यङ्मुखं सोममावाहयामि, इत्यावाह्यावाहनादिमुद्रा: प्रदर्श्य, प्राग्वत् षोडशोपचारपूजां कुर्यात्। तत्रासनादिपुष्पोपचारान्ते प्राग्वत् षट्कोणे षडङ्गानि, पत्रेषु पूर्वादिभौमाद्यष्टौ ग्रहान्, चतुरस्रे लोकपालांस्तद्बाह्ये वज्राद्यायुधानि च प्राग्वत् सम्पूज्य धूपदीपादिजपान्तं कर्म समाप्य स्तोत्रं पठेत्।

सोमो हिमांशु: सर्वात्मा सर्वक्षोऽथ दयानिधि:। श्रीभ्रातात्र्यक्षिसम्भूत ओषधिशो निशाकर:। १।।
दुग्धाब्धिनन्दनश्चन्द्र: कुमुदाप्त: कलानिधि:। इन्दुर्जैवात्रिको नक्षत्रेशश्च मृगलाञ्छन:।। २।।
द्विजराजो विभु: श्रीमान् महादेवप्रियङ्कर:। अमृतात्मा मनोजातश्चन्द्रमाश्च सुधाकर:।। ३।।
पञ्चविंशतिनामानि प्रातरुत्थाय य: पठेत्। आयुरारोग्यमैश्वर्य्यं लभते नात्र संशय:।। ४।।
विपरीतोऽपि शुभ्रांशु: प्रीतस्तस्य सदा भवेत्। महादेव जातिमल्लीपुष्पगोक्षीरसन्निभ[३] ।। ५।।

---

[१] 'दये' ख. पाठ:। [२] 'भाज:' क. पाठ:। [३] 'पाण्डुर' ख. पाठ:।

सोम सौम्यो भवास्माकं सर्वदा ते नमो नमः।...॥

इति चन्द्रस्तोत्रम्।

अथ भौममन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि विरूपाक्षाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीभौमाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, अग्निर्मूर्धा हृदयाय नमः। दिवः ककुत् शिरसे०। पतिः पृथिव्या अयं शिखायै०। अपां कवचाय०। रेतांसि नेत्रत्र०। जिन्वति अस्त्राय०। इति करषडङ्गन्यासं विधाय, अग्निः शिरसि। मूर्धा ललाटे। दिवः मुखे। ककुत् हृदये। पतिर्नाभौ। पृथिव्याः कट्यां। अयं ऊर्वोः। अपां जान्वोः। रेतांसि गुल्फयोः। जिन्वति पादयोः। इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना त्रिकोणषट्कोणाष्टदलभूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठं सम्पूज्य, मूलेन मूर्तिं परिकल्प्य तत्र भौममावाहयेत्। यथा—किरीटिनं रक्तमाल्याम्बरधरं रक्तशूलगदाधरं चतुर्भुजं मेषगमनमवन्तिदेशोद्भवं वसिष्ठगोत्रजं जमदग्न्यार्षं जगतीच्छन्दसं रक्ताम्बरधरं रक्ताभरणभूषितं रक्तमाल्यानुलेपनं रक्तच्छत्रध्वजपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताभूमिसहितं प्रत्यधिदेवतास्कन्दसहितं त्रिकोणरक्तमण्डले दक्षिणमुखमङ्गारकमावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य, प्राग्वदासनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, पत्रेषु पूर्वादिबुधाद्यष्टौ ग्रहांश्चतुरस्रे लोकपालांस्तथायुधानि च सम्पूज्य, धूपदीपादिजपान्तं कर्म समाप्य स्त्रोत्रं पठेत्।

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः। स्थिरासनो महाकायः सर्वकर्मावबोधकः॥ १॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः। धरात्मजः कुजो भौमो भूतिदो भूतिदायकः॥ २॥
अङ्गारको यमश्चैव सर्वरोगापहारकः। [1]सृष्टिकर्तापहर्ता च सर्वकामफलप्रदः॥ ३॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत्। आयुरारोग्यमैश्वर्य्यं लभते नात्र संशयः॥ ४॥
यः श‍ृणोति कुजस्तोत्रं चिरं जीयात् स मानवः। गोसहस्रफलं तस्य विष्णुर्वचनमब्रवीत्॥ ५॥
भौमपीडां विजित्याशु ग्रहपीडाश्च दारुणाः। भौमप्रसादादिष्टं स्यात् सत्यं सत्यं न संशयः॥ ६॥
कुज कुप्रभवो नित्यं मङ्गल्यः परिपठ्यसे। अमङ्गलं निहत्याशु सर्वदा यच्छ मङ्गलम्॥ ७॥

इति भौमस्तोत्रम्॥

अथ बुधमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि परमेष्ठिने ऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये श्रीबुधाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, उद्बुध्यस्वाग्ने प्रति जागृति त्वं हृदयाय नमः। इष्टापूते शिरसे०। संसृजेथामयं च शिखा०। अस्मिन्सधस्ते कवचाय०। अध्युत्तरस्मिन्विश्वेदेवा नेत्रत्र०। यजमानश्च सीदत अस्त्राय०। इति करषडङ्गन्यासं विधाय, उद्बुध्यस्व शिरसि। अग्ने प्रति ललाटे। जागृहि त्वं मुखे। इष्टापूते हृदये। संसृजेथामयं च नाभौ। अस्मिन् सधस्थे कट्यां। अध्युत्तरस्मिन् ऊर्वोः। विश्वेदेवा जान्वोः। यजमानश्च गुल्फयोः। सीदत पादयोः। इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना बाणाकारमण्डलगर्भषट्कोणाष्टदलभूपुरात्मकं मण्डलं विलिख्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठपूजां विधाय, मध्ये

---

[1] 'वृष्टि' ख. पाठः।

मूलेन मूर्तिं परिकल्प्य बुधमावाहयेत्। यथा—किरीटिनं पीतमाल्याम्बरधरं पीतवर्णकर्णिकारसमद्युतिं खड्गचर्मगदापाणिं सिंहस्थं वरदं मगधदेशजं अत्रिगोत्रं भरद्वाजार्षं बृहतीच्छन्दसं पीताम्बरधरं पीताभरणभूषितं पीतगन्धानुलेपनं पीतच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताविष्णुसहितं प्रत्यधिदेवताविष्णुसहितं बाणाकारमण्डले दक्षिणामुखं बुधमावाहयामि, इत्यावाह्य, आवाहनादिमुद्राः प्रदर्श्य, प्राग्वदासनपूजादिपुष्पोपचारान्ते षट्कोणे तु षडङ्गानि, अष्टदलेषु प्राग्वद् बृहस्पत्याद्यष्टौ ग्रहान्, चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिजपान्तं कर्म समाप्य स्तोत्रं पठेत्।

प्रियङ्गुकलिकाश्यामः पीतवर्णमहाद्युतिः। बोधनः शशिपुत्रश्च सौम्यः सौम्यग्रहो बुधः।। १।।
परतन्त्रः स्वतन्त्रश्च भगवान् भक्तवत्सलः। हरिप्रियश्च सिंहस्थो बुद्धिमान् बुद्धिवर्धनः।। २।।
खड्गचर्मगदापाणिः पीतभूषणभूषितः। विद्यावान् सात्त्विकः शुद्धो निर्मलज्ञानदायकः।। ३।।
विश्वात्मा विश्वयोनिश्च विश्वो विश्वैकवन्दितः। पञ्चविंशतिनामानि प्रातरुत्थाय यः पठेत्।। ४।।
आयुरारोग्यमैश्वर्यं ज्ञानं वित्तं महद्यशः। लभते नात्र सन्देहो ग्रहपीडाविवर्जितः।। ५।।

इति बुधस्तोत्रम्।

अथ बृहस्पतिमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गृत्समदाय ऋषये नमः, मुखे त्रिष्टुप्छन्दसे नमः। हृदये श्रीबृहस्पतये देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, बृहस्पते अति यदर्यो हृदयाय नमः। अर्हाद् द्युमत् शिरसे०। विभाति क्रतुमत् शिखायै०। जनेषु कवचाय०। यद् दीदयच्छवसर्तप्रजात नेत्रत्र०। तदस्मासु द्रविणं धेहि चित्रं अस्त्रा०। इति करषडङ्गन्यासं विधाय, बृहस्पते शिरसि। अतियदर्यो ललाटे। अर्हाद्द्युमत् मुखे। विभाति क्रतुमद् हृदि। जनेषु नाभौ। यद्दीदयत् कट्यां। शवसर्तप्रजात तत् ऊर्वोः। अस्मासु जान्वोः। द्रविणं गुल्फयोः। धेहि चित्रं पादयोः। इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना दीर्घचतुरस्रगर्भषट्कोणाष्टदलभूपुरात्मकं यन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्य अर्घ्यादिस्थापनध्यानमानसपूजान्ते प्राग्वत् पीठपूजां विधाय, मूर्तिं मूलेन परिकल्प्यावाहयेत्। यथा—किरीटिनं पीतमाल्याम्बरधरं दण्डवरदसाक्षसूत्रकमण्डलुधरं सिन्धुदेशोद्भवं आङ्गिरसगोत्रं वसिष्ठार्षमनुष्टुप्छन्दसं पीताम्बरधरं पीताभरणभूषितं पीतगन्धानुलेपनं पीतच्छत्रध्वजपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवतेन्द्रसहितं प्रत्यधिदेवताब्रह्मसहितं पीतदीर्घचतुरस्रमण्डले उदङ्मुखं गुरुमावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य, आसनादिषडङ्गपूजान्ते अष्टदलेषु पूर्वादिशुक्राद्यष्टौ ग्रहान्, भूपुरे लोकपालान् बहिर्वज्राद्यायुधानि च सम्पूज्य, धूपदीपादिकं प्राग्वत् समाप्य स्तोत्रं पठेत्।

बृहस्पतिः सुराचार्यो दयावान् शुभलक्षणः। लोकप्रियो गुरुः श्रीमान् सर्वज्ञः सर्वगो विभुः।। १।।
सर्वेशः सर्वदातुष्टः सर्वदः सर्वतोमुखः। अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता जगत्पतिः[1]।। २।।
विश्वात्मा विश्वकर्ता च विश्वयोनिरयोनिजः। भूभुर्वःस्वःपिता चैव भर्ता जीवो महाबलः।। ३।।
पञ्चविंशतिनामानि पुण्यानि शुभदानि च। प्रातरुत्थाय यो नित्यं कीर्तयेत् सुसमाहितः।। ४।।

---

[1] १. 'प्रभुः' ख. पाठः।

अभीष्टफलदः श्रीमाञ्छुभग्रह नमोऽस्तु ते। यः शृणोति गुरोः स्तोत्रं चिरं जीवेन्न संशयः।। ५।।
गोसहस्रफलं तस्य विष्णुर्वचनमब्रवीत्।..।।

इति गुरुस्तोत्रम्।।

अथ शुक्र[1]मन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि प्रजापत्यश्विनसरस्वतीन्द्रेभ्य ऋषिभ्यो नमः। मुखे अतिजगतीच्छन्दसे नमः। हृदये श्रीशुक्राय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, अन्नात्परिस्रुतः हृदयाय नमः। रसं ब्रह्मणा व्यपिबत् शिरसे०। क्षत्रं पयःशिखा०। सोमं प्रजापतिः कवचाय०। ऋतेन सत्यमिन्द्रियं नेत्रत्र०। विपानं शुक्रमन्धस अस्त्रा०। इति करषडङ्गन्यासं विधाय, अन्नात्परिस्रुतः शिरसि। रसं ब्रह्मणा ललाटे। व्यपिबत्क्षेत्रं मुखे। पयः सोमं हृदये। प्राजापतिः नाभौ। ऋतेन सत्यं कट्यां। इन्द्रियं विपानं गुह्ये। शुक्रं वृषणयोः। अन्धस ऊर्वोः। इन्द्रस्येन्द्रियं जान्वोः। इदं पयः गुल्फयोः। अमृतं मधु पादयोः। इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना पञ्चकोणगर्भषट्कोणाष्टदलभूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपीठमन्वन्तं सम्पूज्य, मूलेन मूर्तिं परिकल्प्य शुक्रमावाहयेत्। यथा—किरीटिनं श्वेतवर्णं चतुर्भुजं दण्डिनं वरदं काव्यं साक्षसूत्रकमण्डलुं कीक[2]टदेशजं भार्गवसगोत्रं शौनकार्षं पङ्क्तिच्छन्दसं श्वेताम्बरधरं श्वेताभरणभूषितं श्वेतगन्धानुलेपनं श्वेतच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवतेन्द्राणीसहितं प्रत्यधिदेवतेन्द्रसहितं पञ्चकोणमण्डले प्राङ्मुखं भगवन्तं शुक्रमावाहयामीत्यावाह्य आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, दलेषु प्रागादिशन्याद्यष्टौ ग्रहान्, भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं प्राग्वत् समाप्य स्तोत्रं पठेत्।

दैत्यमन्त्री दीर्घदर्शी उशना भार्गवः कविः। शुक्रो भृगुर्भृगुसुतश्चान्यजिद् दैत्यपूजितः ।। १।।
श्वेतोऽर्धमण्डली काव्यो निधिमान्नैगमस्तथा। सर्वज्ञः सर्वदः श्रीमान् नीतिज्ञो रक्षसां विभुः।। २।।
विश्वकर्ता च विश्वात्मा दैत्याचार्यः प्रतापवान्। चतुर्विंशतिनामानि प्रातरुत्थाय यः पठेत्।। ३।।
आयुरारोग्यमैश्वर्य्यं लभते नात्र संशयः। प्रतिशुक्रो न तस्यास्ति सर्वसौभाग्यभाग्भवेत्।। ४।।
दैत्यमन्त्रिन् महाप्राज्ञ सर्वासुरनमस्कृत। अभीष्टफलद श्रीमन् दैत्यग्रह[3] नमोऽस्तु ते।। ५।।

इति शुक्रस्तोत्रम्।।

अथ शनिमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि दध्यङाथर्वणाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये शनैश्चराय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, शन्नो देवीः हृदयाय नमः। अभीष्टये शिरसे०। आपो भवन्तु शिखा०। पीतये कवचाय०। शंयोरभि नेत्रत्र०। स्रवन्तु नः अस्त्रा०। एवं करषडङ्गन्यासं विधाय, शन्नः शिरसि। देवीः ललाटे। अभिष्टये मुखे। आपो भवन्तु नाभौ। पीतये कट्यां। शंयो ऊर्वोः०। अभि जान्वोः। स्रवन्तु नः पादयोः। इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना धनुराकारगर्भं षट्कोणाष्टदलभूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपीठमन्वन्तं सम्पूज्य, मूलेन मूर्तिं परिकल्प्यावाहयेत्। यथा—किरीटिनमिन्द्रनीलसमद्युतिं शूलधरं वरदं

---

१. 'शुक्रग्रह' ख. पाठः। २. 'कारीट' ख. पाठः। ३. 'शुभग्रह' ख. पाठः।

गृध्रवाहनं सबाणबाणासनधरं सौराष्ट्रदेशजं काश्यपसगोत्रं भृग्वार्षं गायत्रीच्छन्दसं कृष्णाम्बरधरं कृष्णाभरणभूषितं कृष्णगन्धानुलेपनं कृष्णच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताप्रजापतिसहितं प्रत्यधिदेवतायमसहितं कृष्णधनुर्मण्डले प्राङ्मुखं शनैश्चरमावाहयामीत्यावाह्य, आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि अष्टदले पूर्वादितो राह्वाद्यष्टौ ग्रहान् भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिसर्वं प्राग्वत् समाप्य स्तोत्रं पठेत्—

क्रूरावलोकनवशाद्भवनं नाप्नोति यो ग्रहो रुष्टः।
तुष्टो धनकनकसुखं ददाति सोऽस्माच्छनैश्चरः पातु।। १।।
यः पुनर्नष्टराज्याय नराय परितोषितः। स्वप्ने ददौ निजं राज्यं स मे सौरिः प्रसीदतु।। २।।
कोणं नीलाञ्जनप्रख्यं मन्दचेष्टाप्रसारिणम्। छायामार्तण्डसम्भूतं नमस्यामि शनैश्चरम्।। ३।।
नमोऽर्कपुत्राय शनैश्चराय खञ्जाय नीलोत्पलमेचकाय[1]।
श्रुत्वा रहस्यं भव कामदस्त्वं फलप्रदो मे भव सूर्यपुत्र।। ४।।
नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः। शनैश्चराय क्रूराय शुद्ध[2]बुद्धिप्रदायिने ।। ५।।
य एभिर्नामभिः स्तौति तस्य तुष्टिं ददात्यसौ। तदीयं तु भयं तस्य स्वप्नेऽपि न भविष्यति।।६।।
श्रावणे मासि सञ्जाते शोभने शनिवासरे। लोहरूपं शनिं कृत्वा स्नाप्यं पञ्चामृतैर्नवैः।। ७।।
पुष्पैरष्टविधैर्धूपैः फलैश्चैव विशेषतः। नामभिः पूजयेदेतैः क्रमेण ग्रहसत्तमम्।। ८।।
कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः। सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः।।९।।
एतानि शनिनामानि प्रातरुत्थाय यः पठेत्। शनैश्चरकृता पीडा न भवेत्तु कदाचन।। १०।।

इति शनैश्चरस्तोत्रम्।।

अथ राहुमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं विधाय, शिरसि वामदेवाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीराहवे देवतायै नमः। इति विन्यस्य विनियोगमुक्त्वा, कया नः हृदयाय नमः। चित्र आभुवत् शिरसे स्वाहा। ऊती सदावृधः शिखायै०। सखा कवचाय०। कया नेत्रत्र०। शचिष्ठया वृता अस्त्राय०। एवं करषडङ्गन्यासं विधाय, कया शिरसि। नो भाले। चित्रे मुखे। आभुवत् हृदये। ऊती नाभौ। सदावृधः कट्यां। सखा ऊर्वोः। कया जान्वोः। शचिष्ठया गुल्फयोः। वृता पादयोः। इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना शूर्पाकारगर्भं षट्कोणाष्टदलभूपुरात्मकं मण्डलं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठपूजां विधाय, मूलेन मूर्तिं परिकल्प्य तत्र राहुं ध्यायेत्। यथा किरीटिनं करालवक्त्रं खड्गचर्मशूलधरं सिंहासनस्थं पूर्वदेशं पाटलीगोत्रमाङ्गिरसार्पमनुष्टुप्छन्दसं कृष्णाम्बरधरं कृष्णाभरणभूषितं कृष्णगन्धानुलेपनं कृष्णच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवतासर्पसहितं प्रत्यधिदेवताकालसहितं कृष्णशूर्पमण्डले दक्षिणामुखं राहुमावाहयामीति आवाह्य, आवाहनादिमुद्राः प्रदर्श्य,

---

१. 'नीहारवर्णाञ्जनमेचकाय' क. पाठः। २. 'शुद्धि' ख. पाठः।

आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, अष्टदले केत्वाद्यष्टौ ग्रहान्, भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं प्राग्वन्निवेद्य स्तोत्रं पठेत्—

ओं नमो राहवे महाग्रहाय ओंनमः सत्त्वाय महाग्रहाय। ओंनमो-रजसे महाग्रहाय ओंनमस्तमसे महाग्रहाय।। ओंनमो जैमिनये महाग्रहाय ओंभूर्भुवःस्वःपालयित्रे महाग्रहाय। ओंनमः क्षणदृष्टाय महाग्रहाय ओंनमः कुटिलभ्रुकुटये महाग्रहाय।। ओंनमो विकटदंष्ट्राय महाग्रहाय ओंनमश्चन्द्रादित्यभयप्रदायं महाग्रहाय।

सैहिकेयः सुरारिश्च यमदंष्ट्रो महाबलः। सुर्भानुर्भानुमर्दी च चन्द्रमर्द्यमृतप्रियः ।। १ ।।
तामोग्रहः शिरस्क[1] च तमोऽगुश्चैव दुर्जयः। विधुन्तुदो विधुग्रासी पौर्णमासीकुहूप्रियः।। २ ।।
पातः पातयिता विश्वं पाताङ्गश्चाष्टमो ग्रहः। एकविंशतिनामानि राहोर्नित्यं पठेन्नरः।। ३ ।।
अष्टमे द्वादशे रन्ध्रे (रिफ्फे)द्विचतुष्के च सप्तमे। पञ्चमे वाञ्छितं तस्य दद्यादेकादशात् फलम्।।४।।
राहोः प्रसादात् कूष्माण्डा डाकिन्यो घातका[2] ग्रहाः। पीडां तस्य न कुर्वन्ति वाञ्छितार्थस्य सिद्धिदाः।।५।।
धनापत्यकलत्राणां वृद्धिं प्राप्नोति मानवः। इन्द्रियाणां पटुत्वं च वाञ्छितार्थस्य चागमः।। ६ ।।
बलिदानं जपं होमं कृत्वा तर्पणभो[3]जनम्। दानं दद्याद् गृहस्थाय रत्नं गोमेदकादिकम्।। ७ ।।
विषमस्थे नृणां राहावपि राज्ञां जयप्रदः। एतत् स्तोत्रं तु राजानो जपन्तो जयकाङ्क्षिणः।। ८ ।।
रणे शत्रून् क्षणाञ्जित्वा प्राप्नुवन्ति वसुन्धराम्। प्रातः पठेन्नरो नित्यं पक्षं पक्षार्धमेव वा।। ९ ।।
त्यक्तः सर्वभयेभ्योऽपि सर्वान् कामानवाप्नुयात्।..।।

इति राहुस्तोत्रम्।।

अथ केतुमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि मधुच्छन्दसे ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीकेतवे देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ओं केतुं कृण्वन् हृदयाय नमः। अकेतवे शिरसे०। पेशोमर्या शिखायै०। अपेशसे कवचाय०। समुषद्भिः नेत्रत्र०। अजायथा अस्त्राय०। इति करषडङ्गन्यासं विधाय, केतुं शिरसि। कृण्वन् ललाटे। अकेतवे मुखे। पेशः हृदये। मर्या नाभौ। अपेशसे कट्यां। सं ऊर्वोः। उषद्भिः जान्वोः। अजायथाः पादयोः। इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुङ्कुमादिना ध्वजाकारगर्भषट्कोणाष्टदलभूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठपूजां विधाय, मूलेन मूर्तिं परिकल्प्या[4]वाहयेत्। यथा—धूम्रान् द्विबाहून् पाशधरान् गृध्रवाहनान् किरीटिनो मध्यदेशजाञ्जैमिनिगोत्रजान् गौतमार्षान् नानाच्छन्दसश्चित्राम्बरधरांश्चित्राभरणभूषितान् चित्रगन्धानुलेपनान् कृष्णपिङ्गलध्वजपताकिनो मुकुटकेयूरमणिभूषितानारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणान् ग्रहमण्डले प्रविष्टान् अधिदेवताब्रह्मसहितान् प्रत्यधिदेवताचित्रगुप्तसहितान् कृष्णपिङ्गलध्वजमण्डले दक्षिणमुखान् केतून् आवाहयामीत्यावाह्य, आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, अष्टदलेषु पूर्वादितो रव्याद्यष्टौ ग्रहान्, भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं दत्त्वा समाप्य स्तोत्रं पठेत्—

मृत्युपुत्रः शिखी केतुश्चानलोत्पातरूपधृक्। बहुपुत्रोऽथ धूम्राभः श्वेतः कृष्णश्च पीतदृक्।। १ ।।
छायारूपो ध्वजः पुच्छो जगत्प्रलयकृत् सदा। अदृष्टरूपो दृश्यश्च जन्तूनां भयकारकः।। २ ।।

---

१. 'स्कश्च' ख. पाठः। २. 'बाधका' ख. पाठः। ३. 'पूजनम्' ख. पाठः। ४. 'ध्यायेत्' ख. पाठः।

नामान्येतानि केतोश्च नित्यं य प्रयतः पठेत्। केतुपीडा न तस्यास्ति सर्पचौराग्निभिर्भयम्।। ३।।
दानं दद्याद् गृहस्थाय वैडूर्यं केतवे सदा। यः पठेत् प्रयतो नित्यं पक्षं पक्षार्धमेव वा।। ४।।
त्यक्तः सर्वभयेभ्यो हि[१] सर्वान् कामानवाप्नुयात्।......................................।।

इति केतुस्तोत्रम्।। अथ नवग्रहसाधारणं स्तोत्रम्।

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्। तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्।। १।।
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम्। नमामि सततं सोमं शाम्भोर्मुकुटभूषणम्।। २।।
धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्। कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम्।। ३।।
प्रियङ्गुकलि[२]काश्यामं रूपेणाप्रतिमं बुधम्। सौम्यं सौम्यगुणोपेतं नमामि शशिनः सुतम्।। ४।।
देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम्। बन्धुभूतं[३] लित्रोकज्ञं प्रणमामि बृहस्पतिम्।। ५।।
हिमकुन्दतुषाराभं[४] दैत्यानां परमं गुरुम्। सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्।। ६।।
नीलाञ्जनसमा[५]भासं रविपुत्रं महाग्रहम्। छायामार्तण्डसम्भूतं प्रणमामि शनैश्चरम्।। ७।।
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्। सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम्।। ८।।
तमालनालस[६]ङ्काशं तारकाग्रहमस्तकम्। रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्।। ९।।
इदं व्यासमुखोत्पन्नं[७] ये पठन्ति समाहिताः। दिवा वा यदि वा रात्रौ शान्तिस्तेषां भविष्यति।।१०।।
ऐश्वर्यमतुलं चैवमारोग्यं बुद्धिवर्धनम्। नरनारीनृपाणां च भवेद् दुःस्वप्ननाशनम्।। ११।।
ग्रहनक्षत्रपीडाश्च राक्षसाग्निसमुद्भवाः ते सर्वे प्रशमं यान्ति सत्यं सत्यं न संशयः।। १२।।
नमः सूर्याय सोमाय मङ्गलाय बुधाय च। गुरुशुक्रशनिभ्यश्च राहवे केवते नमः।। १३।।

इति नवग्रहस्तोत्रम्।। अथ रुद्रयामले—मङ्गलकल्पः।

अथातः सम्प्रवक्ष्यामि कल्पं भौमस्य सुव्रते। यज्ज्ञात्वा तु वरारोहे ऋणान्मुच्येत साधकः।। १।।
मन्त्रोद्धारं शृणु प्राज्ञे सर्वसिद्धिप्रदायकम्। श्रीबीजं कामराजं तु भुवनेशीं समालिखेत्।। २।।
नमो भौमाय च ततो वह्निजायां च चोच्चरेत्। दशाक्षरो महामन्त्रो भौमस्य कथितः प्रिये।। ३।।
श्रीमन्मङ्गलमन्त्रस्य विरूपाक्ष ऋषिः स्मृतः। गायत्री च्छन्द आख्यातं देवता भूमिनन्दनः।। ४।।
श्रीबीजं च भवेच्छक्तिः कामबीजं च कीलकम्। बीजं च मायाबीजं स्यात् सर्वकामार्थसिद्धिये।।५।।
विनियोगः समाख्यातो ह्यङ्गषट्कं च कथ्यते। दीर्घषट्स्वरयोगेन स्वबीजेनाङ्गकं न्यसेत्।। ६।।
त्रिबीजाद्यं न्यसेद् देहे चाङ्गुलीषु तथा न्यसेत्। दशरन्ध्रेषु देवेशि दशवर्णान् प्रविन्यसेत्।। ७।।
मूलेन व्यापकं न्यसेत् कुर्याच्च धनवृद्धये। अथ ध्यानं प्रवक्ष्यामि मङ्गलस्य सुलोचने।। ८।।

---

१. 'ऽपि' ख. पाठः। २. 'कणिका' ख. पाठः। ३. 'प्रियं' ख. पाठः। ४. 'मृणालाभं' ख. पाठः।
५. 'चयाभासं' ख. पाठः। ६. 'माला' ख. पाठः। ७. 'द्भूतं' ख. पाठः।

रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनम्। कुमारं शक्तिहस्तं च भौमं वन्दे सदानघम् ॥ ९॥
अथ यन्त्रं शृणु प्राज्ञे सर्वसम्पत्तिदायकम्। वह्नीशवारुणाशाग्रं त्रिकोणं विलिखेत् सुधीः॥ १०॥
प्रतिरेखं पञ्चचिह्नं षडंशेन प्रकल्पयेत्। मध्ये त्रिपञ्च वह्नेस्तु रेखाः सम्पातयेत् सुधीः॥ ११॥
त्रिपञ्चसूत्रैर्देवेशि सम्यग्वै चिह्नयोगतः। षट्त्रिंशत्कोणता साम्यात् कृतेयं वीरवन्दिते॥ १२॥
वारुणाग्रेषु कोणेषु सैकविंशतिषु त्रिधा। भौमनामानि विलिखेदग्निकोणादितः क्रमात्॥ १३॥
ओंकारादिनमोन्तास्तु विलिखेत् सर्वदेवताः। प्रादक्षिण्यक्रमेणैव तद्बहिर्वृत्तमुत्तमम् ॥ १४॥
नागपत्रं ततः पद्मं बहिर्वृत्तं मनोहरम्। तद्बहिर्भूपुरं देवि चतुर्द्वारसमन्वितम् ॥ १५॥
न प्रकाश्यं सदा यन्त्रमृणघ्नं धनदा[1]यकम्। तव स्नेहेन कथितं साधकानां हिताय च॥ १६॥
गोपनीयं प्रयत्नेन निधानमिव चोरतः। अथ पूजां प्रवक्ष्यामि मन्त्रराजस्य तत्त्वतः॥ १७॥
रक्तालङ्कारसुभगो रक्तगन्धानुलेपनः। रक्तवस्त्रपरीधानो गृहे रक्तारुणे स्थितः ॥ १८॥
गुरुं संस्थाप्य शिरसि भूतान् सन्त्रासयेत् सुधीः। भूतशुद्धिं विधायादौ प्राणानायम्य देशिकः॥ १९॥
विनियोगं पुरा कृत्वा करन्यासं षडङ्गकम्। मन्त्रेण व्यापकं चैव ध्यानं पूर्वोदितं कुरु॥ २०॥
अर्घ्यं च वह्निमन्त्रेण पूजयेत् तदनन्तरम्। शङ्खं तत्र तु संस्थाप्य पूजयेद्रक्तपुष्पकैः॥ २१॥
सूर्यमन्त्रेण देवेशि जलैरापूरयेत् ततः। चन्द्रमन्त्रेण देवेशि पूजयेत् तदनन्तरम्॥ २२॥
मूलेन सप्तधा जप्त्वा धेनुमुद्रां प्रदर्शयेत्। तेनोदकेन संसिच्य यन्त्रे पुष्पैस्तथात्मनि॥ २३॥
पलत्रयसमग्राहि पात्रं ताम्रमयं कुरु। त्रिकोणाकाररूपं च देवतापात्रमुत्तमम्॥ २४॥
पूर्ववत् स्थापयेद्विप्रः प्रजपेदुपदेशतः। ततः पुष्पैस्तथा गन्धैरक्षतैर्लोहितैस्तथा॥ २५॥
दक्षभागे निधायाथ पूजयेत् सर्वदेवताः। यन्त्रस्य दक्षवामस्थं गणपं यक्षनायकम्॥ २६॥
आवाहयेद्विभुं भौमं ध्यानोक्तं सर्वसिद्धिदम्। आवाहनादिमुद्रास्तु क्रमेणैवात्र[2] दर्शयेत्॥ २७॥
ऊर्ध्वाञ्जलिमधः कुर्यादियमावाहनी भवेत्। इयं तु विपरीता स्यात्तदा संस्थापनी मता॥ २८॥
ऊर्ध्वाङ्गुष्ठं मुष्टियुगं तदेयं सन्निधापनी। अन्तराङ्गुष्ठमुष्टिभ्यां तदेयं सन्निरोधनी॥ २९॥
तर्जनीभ्यां परिभ्राम्य सकलीकरणं भवेत्। परिवृत्तकरो मन्त्री तर्जनिके कनिष्ठिके॥ ३०॥
मध्यनेऽनामिकायुग्मे श्लेषयेच्च परस्परम्। अमृतीकरणं देवि मुद्रेयं धेनुरूपिणी ॥ ३१॥
एताः सामान्यमुद्रास्तु दर्शयित्वा यजेत् प्रिये। अग्नीशासुरवायव्यमध्ये दिक्ष्वङ्गपूजनम्॥ ३२॥
केसरेषु प्रकर्तव्यं तथा वर्णैश्च[3] देशिकः। प्रथमावरणं देवि कथितं वीरवन्दिते ॥ ३३॥
मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः। स्थिरासनो महाकायः [4]सर्वकर्मावबोधकः॥ ३४॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः। धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः॥ ३५॥
अङ्गारको यमश्चैव सर्वरोगापहारकः। [5]वृष्टिकर्तापहर्ता च सर्वकामफलप्रदः ॥ ३६॥

---

१. 'नायकम्' ख. पाठः। २. 'वतु' ख. पाठः। ३. 'वर्तेत' ख. पाठः। ४. 'पूर्व' ख. पाठः। ५. 'सृष्टि' ख. पाठः।

एकविंशतिकोष्ठेषु प्रादक्षिण्येन तत्त्वतः। अग्रत्रिकोणमारभ्य पूजयेत् सर्वदेवताः।। ३७।।
द्वितीयावरणे देवाः पूर्वोक्तास्त्वेकविंशतिः। आदित्यादिग्रहानष्टौ पूजयेदष्टपत्रके ।। ३८।।
तृतीयावरणे देवि पूजयेद् भौममर्चयेत्। ब्राह्म्यादिभिश्चतुर्थी स्यादसिताङ्गादिभैरवैः ।। ३९।।
पञ्चमी तु भवेद् देवि पत्राग्रेषु प्रपूजयेत्। वामावर्तक्रमेणैव षष्ठी स्याल्लोकनायकैः।। ४०।।
भूबिम्बे पूजयेद् देवि इन्द्रादीन् सर्वसिद्धये। तदायुधैः सप्तमी स्याद् भूबिम्बे च बहिर्यजेत्।। ४१।।
मूलेन पूजयेन्मध्ये रक्तपुष्पाञ्जलित्रयैः। उपचारैः षोडशभिः पूजयेत् परमेश्वरम् ।। ४२।।
रक्तगन्धैश्च पुष्पैश्च धूपैर्दीपादिभिस्तथा। मङ्गलं पूजयेद् भक्त्या मङ्गलेऽहनि सर्वदा।। ४३।।
ऋणरेखाः प्रकर्तव्या अङ्गारेण तदग्रतः। तास्तु प्रमार्जयेत् पश्चाद् वामपादेन बुद्धिमान्।। ४४।।
पूजयेन्मूलमन्त्रेण शतमष्टोत्तरं प्रिये। दशांशं तर्पयेद् देवि होमं तस्य दशांशतः।। ४५।।
मार्जनं तद्दशांशेन मन्त्री मन्त्रस्य सिद्धये। पूजादिमार्जनान्तं तु भौमाय तु निवेदयेत्।। ४६।।
स्तुत्वा स्तोत्रेण देवेशि साधकस्तु स्थिरासनः। स्थिरासनाय नम इत वाचा मन्त्रं समुच्चरेत्।।४७।।
शङ्खोदकैः परिभ्राम्य परिभ्रम्य स्वयं[1] ततः। नमस्कारं प्रकुर्वीत पञ्चाङ्गं प्रणवेन तु।। ४८।।
यन्त्रात् पुष्पं समाघ्राय शुचौ देशे च[2] निःक्षिपेत्। संहारमुद्रया देवि विसृजेत् परमेश्वरम्।।४९।।
पूर्वक्रमान्न सन्देहः ऋणं हन्याद् धनं लभेत्। नित्यार्चको जपेल्लक्षं दशांशं तर्पयेत् ततः।।५०।।
होमयेत् तद्दशांशेन जपापुष्पैश्च सुव्रते। रक्ताश्वमारपुष्पैर्वा घृताक्तैर्वापि गुग्गुलैः।। ५१।।
त्रिमध्वक्तैर्हुनेद् देवि पुरश्चरणसिद्धये। गुरवे दक्षिणां दद्यात् सालङ्कारां पयस्विनीम्।। ५२।।
आरक्तवस्त्रयुग्मेन धेनुं दद्याद् विधानतः।..।।

इति रुद्रयामलोक्तमङ्गलपूजाविधानम्।। अथ भविष्योत्तरपुराणोक्तयन्त्रम्–

अथ यन्त्रं प्रवक्ष्यामि येन सम्पद्यते धनम्। येन विज्ञानमात्रेण ऋणत्रयं विमुञ्चति।। १।।

पूर्वेद्युः कर्ता हविष्यं भुक्त्वा ब्रह्मचारी अधःशयीत, नियमेन तिष्ठेत्, भौमवासरेऽरुणोदयसमये समुत्थायापामार्गेण दन्तधावनं विधायाचम्य पश्चात्तिलामलककल्केन नद्यादौ गृहे वा स्नात्वा धौतरक्तवाससी परिधाय प्रवालरक्तपुष्पादिकं बिभृयात्। रक्तचन्दनमूर्तिं विधाय ताम्रे त्रिकोणमण्डलं च, ततः शुचौ देशे लोहितानुड्डहे त्रिकोणमण्डले धनार्थी पुत्रार्थी वा सह पत्न्या पूजामारभेत्। ओंनमो मङ्गलाय नमः। अनेन मन्त्रेण द्वादश प्राणायामान् कृत्वा, अस्य मङ्गलमन्त्रस्य व्यास ऋषिरनुष्टुप् छन्दः मङ्गलो देवता मं बीजं नमः शक्तिः ऋणापनुत्त्यर्थे जपे विनियोगः। ततो व्याहृतिद्विरावृत्त्या करषडङ्गन्यासं विधाय ध्यायेत्–

रक्तमाल्याम्बरं देवं खड्गशूलगदाधरम्। चमुर्भुजं मेषवाहं वरदं च धरासुतम्।।

ध्यायेदिति शेषः। इति ध्यात्वा यथाविधि जपं पूजां समारभेत्। अद्येत्यादि० अमुकोऽहं धनार्थी पुत्रार्थी वा भौमपूजनं करिष्ये, इति सङ्कल्प्य प्रार्थनां कुर्यात्।

---

१. 'त्रयं' ख. पाठः। २. 'सु' क. ग. पाठः।

अथ देवेश ते भक्त्या करिष्ये व्रतमुत्तमम्। दुःखव्याधिविनाशार्थमृणनाशाय भूमिज।।
पुत्रसन्तानहेतवे यथाकामं वा इति। ततस्ताम्रपात्रे त्रिकोणे भौमं संस्थाप्य ताम्रमयार्घ्यपात्रे रक्तचन्दनरक्ताक्षतरक्तपुष्पादि निःक्षिप्य ''अग्निर्मूर्धे''ति मन्त्रेणाष्टोत्तरशतार्घ्याणि दद्यात्। ततोऽङ्गन्यासः ओंह्रां हृदयाय नमः। ओंशिरसे०। ओंह्रौं शिखायै०। ओंह्रांह्रीं कवचाय०। ओंहंसः नेत्रत्र०। ओंखंखः अस्त्राय०। एवं करषडङ्गन्यासं विधाय पुष्पाञ्जलिं गृहीत्वा तमावाहयेत्।

सर्वग्रहेष्वतिबलं तीक्ष्णाङ्गारसमप्रभम्। नित्यं मन्दारुणाभासं भौममावाहयाम्यहम्।।

इत्यावाह्यावाहनमुद्राः प्रदर्श्य, ओंह्रां इति मन्त्रेण पात्रं प्रक्षाल्योदकेनापूर्य कवचेनावगुण्ठ्यास्त्रेण संरक्ष्य धेनुमुद्रया वमित्यमृतीकृत्य, तेनोदकेनात्मानं पूजोपकरणानि च सम्प्रोक्ष्य, ओंह्रींहंहुंखंखः इति मन्त्रेण षोडशोपचारैः सम्पूज्यारात्रिकादर्शचामरादिकं प्रदर्श्य सफलार्घ्यं दद्यात्।

ओंभूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः। धनार्थी त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते।।
रक्तप्रवालसङ्काश जपाकुसुमसन्निभ। महीसुत महाबाहो गृहाणार्घ्यं नमोऽस्तु ते।।

ततो मूलमन्त्रेण पुष्पाञ्जलित्रयं दत्त्वा एकविंशतिनामभिर्गायत्रीसहितैरेकविंशतिकोष्ठेषु पूजयेत्। अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात्।। मङ्गलाय नमः। एवं भूमिपुत्राय०। ऋणहर्त्रे०। धनप्रदाय०। स्थिरासनाय०। महाकायाय०। सर्वकर्माव[1]बोधकाय०। लोहिताय०। लोहिताङ्गाय०। सामगानां कृपाकराय०। धरात्मजाय०। कुजाय०। भौमाय०। भूतिदाय०। भूमिनन्दनाय०। अङ्गारकाय०। यमाय०। सर्वशोकापहारकाय०। वृ[2]ष्टिकर्त्रे०। वृष्ट्यपहर्त्रे०। सर्वकामफलप्रदाय०। एतैर्नामभिर्गायत्रीसहितैः पूजयेत्। ततस्ताम्बूलं दत्त्वा प्रदक्षिणनमस्कारान् कुर्यात्। ''धरणीगर्भसम्भूतं विद्युत्तेजःसमप्रभम्। कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम्।।'' खादिराङ्गारेण रेखात्रयं कृत्वा ''दुःखदौर्भाग्यनाशाय पुत्रसन्तानहेतवे। कृतं रेखात्रयं वामपादेन मार्जयाम्यहम्''।। अथ प्रार्थनम्—

ऋणहर्त्रे नमस्तेऽस्तु दुःखदारिद्र्यनाशन। सौभाग्यसुखभाङ् नित्यं भवामि धरणीसुत।।
तप्तकाञ्चनसङ्काश तरुणार्कसमप्रभ। सुखसौभाग्यधनद ऋणदारिद्र्यनाशक।।
ग्रहराज नमस्तुभ्यं सर्वकल्याणकारक। प्रसादात्तव देवेश सदा कल्याणभाजनम्।।
देवदानवगन्धर्वयक्षराक्षसपन्नगाः। प्राप्नुवन्ति शिवं सर्वं सदा पूर्णमनोरथाः।।
प्रसादं कुरु मे देव[3] प्रसादं मङ्गलप्रद। बालः[4] कुमारको यस्तु स भौमः प्रार्थितो मया।।
एवं सम्प्रार्थ्य नामानि शरीरे तानि विन्यसेत्।......................................।।

पादयोः मङ्गलाय नमः। जान्वोः भूमिपुत्राय नमः। ऊर्वोः ऋणहर्त्रे०। कट्यां धनप्रदाय०। गुह्ये स्थिरासनाय०। हृदये महाकायाय०। वामबाहौ सर्वकर्मावबोधकाय०। दक्षबाहौ लोहिताय०। कण्ठे लोहिताङ्गाय०। आस्ये सामगानां कृपाकराय०। नासिकयोः धरात्मजाय०। नयनयोः कुजाय०। ललाटे भौमाय०। भ्रुवोः भूतिदाय०। मूर्ध्नि भूमिनन्दनाय०। शिखायां अङ्गारकाय०। कवचे यमाय०। अस्त्रं सर्वरोगापहारकाय०। ऊर्ध्वे वृष्टिकर्त्रे०। अधः वृष्ट्यपहर्त्रे०। सर्वाङ्गेषु सर्वकामफलप्रदाय नमः। ततो भौमपूजनविधेः पूर्णतां कृत्वा स्तोत्रं पठेत्।

---

[1] 'रोधकाय' क. ग. पाठः। [2] 'सृष्टिकर्त्रेऽपहर्त्रे' ख. पाठः। [3] 'भौम' ख. पाठः। [4] 'कालः' ख. पाठः।

ऋणमोचनभौमस्य स्तोत्रं वक्ष्ये शृणुष्वथो। ऋषिरस्य भवेद्गाधिश्छन्दोऽनुष्टुप् प्रकीर्तितम्।। १।।
अङ्गारको देवतात्र ऋणमोचनपूर्वकः। विनियोगः समाख्यातो वि[1]शेषऋणमोचने।। २।।
रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदश्च धरासुतः ।। ३।।
ऋणग्रस्तनराणां च ऋणमुक्तिप्रदायकः। मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।। ४।।
स्थिरासनो महाकायः सर्वकर्माव[2]बोधकः। लोहितो लोहिताङ्गश्च सामगानां कृपाकरः।। ५।।
धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः। अङ्गारको यमश्चैव सर्वरोगापहारकः ।। ६।।
वृष्टिकर्तापहर्ता च सर्वकामफलप्रदः। अङ्गारको महीपुत्रो भगवान् भक्तवत्सलः।। ७।।
नमोऽस्तु ते ममाशेषमृणमाशु विनाशय। एतानि कुजनामानि नित्यं यः प्रयतः पठेत्।। ८।।
ऋणं न जायते तस्य धनप्राप्तिस्तु जायते। भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः।। ९।।
धनार्थी त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते। रक्तगन्धैश्च पुष्पैश्च धूपदीपैर्गुडौदनैः।। १०।।
मङ्गलं पूजित्वा तु मङ्गलेऽहनि सर्वदा। ऋणरेखाः प्रकर्तव्याः खादिराङ्गारकेण तु।। ११।।
अङ्गुष्ठाग्रेण वामाङ्घ्रेरानुपूर्वीकृताः पठेत्। एकविंशतिनामानि पठित्वा तु तदन्तिके।। १२।।
तास्तु[3] प्रमार्जयेत् पश्चाद्वामपादेन [4]संस्पृशन्। एवं स्तुतो महातेजा ऋणं मे नाशय प्रभो।। १३।।
एवं भक्तिः कुजे यस्य न ऋणघ्नो धनी भवेत्।...।।

ओंनमो भगवते अङ्गारकाय भूमिपुत्राय ऋणहर्त्रे धनप्रदाय भक्तवत्सलाय धनं मे देहि शीघ्रं हुं फट् स्वाहा। ओंआं ऐंह्रीश्रींक्लींग्लौं मङ्गलाय मम ऋणविमोचनं कुरु २ स्वाहा धनं देहि २ स्वाहा। गुडौदनोपहारं दत्त्वा पूजनान्ते गोधूमान्नं भुञ्जीयात्। इति मङ्गलपूजनं व्रतं च।। अथ कथा—सूत उवाच—

पूजितो देवदेवेश देवैस्तु मङ्गलप्रदः। गौतमेन पुरा पृष्टो लोहिताङ्गो महीसुतः।। १।।

गौतम उवाच—

कथयस्व महाभाग गुह्यं पूजनमुत्तमम्। मन्त्रमाराधनं सर्वं सर्वपापप्रणाशनम्।। २।।
रूपं सुवर्णसङ्काशं वाहनायुधसंयुतम्। येन पूजितमात्रेण जायते सुखमुत्तमम्।। ३।।
धर्मार्थकाममोक्षाणां कालेनैव फलप्रदम्। सर्वपापप्रशमनं सर्वव्याधिविनाशनम्।। ४।।
सर्वसौख्यप्रदं देवं हत्यापातकनाशनम्। सर्वयज्ञफलं प्रोक्तं सर्वकामफलप्रदम् ।। ५।।
तपसा जपदानानां फलं चैव तु लभ्यते। तद्व्रतं ब्रूहि मे देव लोहिताङ्ग महाग्रह।। ६।।
यस्मिन्नाराधिते मर्त्यः सर्वसौभाग्यवान् भवेत्।...।।

श्रीमङ्गल उवाच—

शृणु विप्र महाभाग धर्मज्ञ ऋषिगौतम। व्रतं च पूजनं दानं यत्कृतं[6] भुवनत्रये।। ७।।

---

१. 'अशेष' ख. पाठः। २. 'रोधकः' सर्वकामार्थसाधकः' ख. पाठः। ३. 'ताश्च' ख. पाठः। ४. 'च' क. ग. पाठः।
५. 'येन' ख. पाठः। ६. 'धृतं'। 'गोप्यं' ख. पाठः।

आसीत् पूर्वं महाप्राज्ञो[1] ब्राह्मणो वेदपारगः। तस्य भार्या सुनन्दीका नाम्ना ख्याता सुलोचना॥८॥
तस्यापत्यं च सञ्जातं वन्ध्यत्वान्न कदाचन। तेनान्यस्य सुता जातु सुशीला रूपसंयुता॥ ९॥
ब्राह्मणस्य कुले जाता गृहीता पोषिता ध्रुवम्। सर्वलक्षणसम्पन्ना मद्व्रतेनैव गौतम॥ १०॥
पुरा जन्मनि तेनाहं चैकभावेन पूजितः। सा पुत्री स्वगृहे नीता ब्राह्मणेनैव पालिता॥ ११॥
नित्यं हि पुष्पितं तस्या अष्टाङ्गं कनकेन वै[2]। तत्सुवर्णेन विप्रोऽसौ धनसौभाग्यगर्वितः॥ १२॥
कोटीश्वरो महर्षिस्तु जातोऽस्मिन् भूमिमण्डले। दृष्ट्वा नन्दकविप्रेण दशवर्षा वरार्थिनी॥ १३॥
विवाहार्थं च विप्रस्य दत्ता सौम्येश्वरस्य च। वेदोक्तविधिना तेन विवाहमकरोत् तदा॥ १४॥
वर्षैः कतिपयैर्विप्रस्तां कन्यां प्रौढयौवनाम्। आदाय श्वशुरगृहान्निर्गतः शुभवासरे ॥ १५॥
स्वदेशोपरि मार्गेण व्रजंश्चौरैस्त्वहर्निशम्। निशान्ते गह्वरे घोरे अरण्ये पर्वतोत्तमे॥ १६॥
सर्वशून्ये व्रजन् तस्मिन्महालोभेन भावितः। मार्गे चलति विप्रोऽसौ चौरैश्च विनिपातितः॥ १७॥
तं पतिं मृतमालोक्य सा नारी शोकपीडिता। पतिना सह विप्रेण मरणे समकल्पत॥ १८॥
स्वपतिं तन्मयं विश्वं चिन्तयन्ती पदे पदे। पतिं प्रदक्षिणीकृत्य चितायाश्च समीपतः॥ १९॥
तेनाहं तस्य तुष्टो हि वरार्थं च प्रणोदिता। **ब्राह्मण्युवाच**—यदि तुष्टोऽसि मे देव तदा जीवतु मे पतिः॥२०॥

मङ्गल उवाच—

देव इवाजरामरस्तव भर्ता भविष्यति। अन्यद्ब्रूहि मयाख्यातं वरं त्रिभुवनोत्तमम्॥ २१॥

ब्राह्मण्युवाच—

यदि तुष्टोऽसि मे देव ग्रहाणामधिपेश्वर। ये त्वां स्मरन्ति देवेश रक्तचन्दनचर्चितम्॥ २२॥
रक्तपुष्पैश्च सम्पूज्य प्रत्यूषे भौमवासरे। बन्धनं व्याधिरोगाश्च कदाचिन्नोपजायते॥ २३॥
न सर्पाग्निभयं मित्रवियोगे ब्राह्मणस्य वै। मा कुरुष्व महीपुत्र भक्तानां सौख्यदो भव॥ २४॥

मङ्गल उवाच—

एकविंशति भौमाश्च मद्भक्ता विजितेन्द्रियाः। एकान्ते ह्यर्चितास्ते च चतुर्दीपाङ्किते गृहे॥ २५॥
अर्घ्यैश्च सकलैर्मन्त्रैर्वेदपौराणिकैस्तथा। स्वशक्त्या भोजयेद्विप्रान् दातव्यं च हिरण्यकम्॥ २६॥
युवानं रक्तवृषभं सर्वोपस्करसंयुतम्। दत्वा वै ग्रहपीडा तु न स्यात् तेषां कदाचन॥ २७॥
भूतवेतालडाकिन्यो न भवन्तीह हिंसकाः। एवमुक्त्वा तदा तत्र मङ्गलोऽपि दिवं गतः॥ २८॥
इदं व्रतं तदाख्यातं सर्वसौख्यप्रदायकम्। इदं व्रतं करिष्यन्ति तेषां पीडा न जायते॥ २९॥
स्त्रीभिर्व्रतं प्रकर्तव्यं पुरुषैश्च विशेषतः। तेषां भुक्तिश्च मुक्तिश्च भवत्येव न संशयः॥ ३०॥

इति भविष्योत्तरे भौमव्रतम्॥ अथ भौमव्रतोद्यापनम्— पूर्वोक्तप्रकारेणैकविंशतिभौमाः कर्तव्याः द्वाविंशतितमे उद्यापनं कार्यम्। तद्यथा—दन्तधावनादिकं पूर्ववत् कृत्वा गृहमागत्य शुद्धायां भूमौ गोधूमैस्त्रिकोणमध्ये एकविंशतिभिः कोष्ठैर्विरचितं मण्डलं कृत्वा, तत्र नानावर्णरजोभिः पूरणं प्रतिकोष्ठे च वस्त्रेणाच्छाद्य तत्तत्प्रतिमाः संस्थाप्य पूर्ववत् पूजां कुर्यात्। केचित्—एतत् सर्वं प्रथमदिने सन्ध्याकालमागत्य कृत्वा रात्रौ जागरणं दीपदानं च कुर्वन्ति।

---

[1] 'सुनन्दीको' ख. पाठः। [2] 'नित्यं प्रसूयते स्वर्णमष्टाङ्गात्कनकद्युतिः' ख. पाठः।

कुङ्कुमं सोदकं दद्याद्वस्त्रं दीपं तथैव च। रक्तचन्दनलिप्ताङ्गाः पञ्चरत्नविभूषिताः।। १।।
रक्तवस्त्रपरिच्छन्ना नानाविधफलान्विताः। त्रिसप्तकलशाः कार्या रक्तवर्णाश्च निर्व्रणाः।। २।।

रक्तचन्दनगोरोचनैर्भौमं सम्पूज्य रक्तपुष्पैर्मालाभिः सर्जरसधूपेन गुडौदनेन नैवेद्येन च पूजयेत्। फलार्घ्यं दद्यात्। ततो भौमादिभिर्मन्त्रैः प्रतिकुम्भं पूजां कुर्यात्। प्रदक्षिणनमस्काराश्च कर्तव्याः। होमं घृततिलैः कुर्यात्।

अग्निर्मूर्धेति मन्त्रेण समिधोऽष्टोत्तरं शतम्। अष्टोत्तरसहस्रं वा अष्टाविंशतिरेव वा ।। ३।।
होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन च। गृह्योक्तविधिना चैव होमं कुर्याज्जितेन्द्रियः।। ४।।
समिधः खादिरा ज्ञेया होमे चाष्टोत्तरं शतम्। भौमप्रीत्यै च विप्रेभ्यः सवस्त्रान् कलशान् दिशेत्।।५।।
प्रतिमां दक्षिणायुक्तामाचार्याय निवेदयेत्। रथं रक्तमनुड्वाहं सर्वोपस्करसंयुतम् ।। ६।।
दद्याद् व्रतसमाप्त्यर्थं सहेम प्रतिपद्य च। अन्येभ्योऽपि यथाशक्त्या दद्याद्विप्रांश्च भोजयेत्।। ७।।

ततोऽच्छिद्रव्रतवाचनम्। इति भविष्योत्तरे भौमव्रतोद्यापनम्।।

अथ ऋग्विधानम्। अग्निरुवाच–

ऋग्यजुःसामकाथर्वविधानं पुष्करोदितम्। भुक्तिमुक्तिकरं जप्याद्धोमाद्रामाय तद्वदे।। ८।।

पुष्कर उवाच

प्रतिवेदं तु कर्माणि कार्याणि प्रवदामि ते। प्रथमं ऋग्विधानं वै शृणु त्वं भुक्तिमुक्तिदम्।। ९।।
अन्तर्जले तथा होमे जपतो मनसेप्सितम्। कामं करोति गायत्री प्राणायामाद्विशेषतः।। १०।।
गायत्र्या दशसाहस्रो जपो नक्ताशिनो द्विज। बहुस्नातस्य तत्रैव सर्वकल्मषनाशनः।। ११।।
दशायुतानि जप्त्वाथ हविष्याशी स मुक्तिभाक्। प्रणवो हि परं ब्रह्म तज्जपः सर्वपापहा।। १२।।
ओंकारशतजप्तं तु नाभिमात्रोदके स्थितः। जलं पिबेत् स सर्वैस्तु पापैर्वै विप्र मुच्यते।। १३।।
मात्रात्रयं त्रयो देवास्त्रयो वेदास्त्रयोऽग्नयः। महाव्याहृतयः सप्त लोका होमोऽखिलाघहा।। १४।।
गायत्री परमा जाप्या महाव्याहृतयस्तथा। अन्तर्जले तथा राम प्रोक्तश्चैवाघमर्षणः।। १५।।
अग्नि[१]मीळे पुरोहितं सूक्तोऽयं वह्निदैवतः। शिरसा धारयन् वह्निं यो जपेत् परिवत्सरम्।। १६।।
होमं त्रिषवणं भैक्ष्यमनग्निज्वलनं चरेत्। अतः परमृचः सप्त वाय[२]वाद्याः प्रकीर्तिताः।। १७।।
ता जपन् प्रयतो नित्यमिष्टान् कामान् समश्नुते। मेधाकामो जपेन्नित्यं सदसस्प[३]तिमित्यृचम्।।१८।।
अम्बयो[४] यन्तीमाः प्रोक्ता नवर्चो मृत्युनाशनाः। शुनः शेषमृचं[६] बद्धः सन्निरुद्धोऽथवा जपेत्।।१९।।
मुच्यते सर्वपापेभ्यो गदी वाप्यगदी भवेत्। य इच्छेच्छाश्वतं कामं मित्रं प्राज्ञं पुरन्दरम्।। २०।।
ऋग्भिः षोडशभिः कुर्यादिन्द्रस्येति दिने दिने। हिरण्यस्तूपमित्येतज्जपञ्छत्रून् प्रबाधते।। २१।।
क्षेमी भवति चाध्वन्यो ये ते पन्था[७] जपन् नरः। रौद्रीभिः[८]षड्भिरीशानं स्तूयाद्यो वै दिने दिने।।२२।।

---

१. (१ म०। १ सू०। ऋ०)। २. (१। २। १) ३. (१। १८। ६) ४. (१। २३। १६) ४५ (१। २४। १३) ६. (१। ३२। १)
७. (१। ३५। ११)। ८. (१। ४३। १)

चरुं वा कल्पयेद्रौद्रं तस्य शान्तिः परा भवेत्। [१]उदित्युद्यन्तमादित्यमुपतिष्ठन् दिने दिने।। २३।।
क्षिपेज्जलाञ्जलीन् सप्त मनोदुःखविनाशनम्। द्विष[२]न्तमित्यथार्धर्चं यद्विप्र तं जपन् स्मरेत्।। २४।।
आगस्कृत् सप्तरात्रेण विद्वेषमधिगच्छति। आरोग्यकामी रोगी वा प्रस्कण्वस्योत्तमं जपेत्।। २५।।
उत्तमस्तस्य चार्धर्चो जपेद्वै विविधासने। उदयत्यायुरक्षय्यं तेजो मध्यन्दिने जपेत्।। २६।।
अस्तं प्रतिगते सूर्ये द्विषन्तं प्रतिबाधते। उपं प्र चेति सूक्तानि जपञ्छत्रून् नियच्छति।। २७।।
एकादश[४] सुपर्णस्य सर्वकामान् विनिर्दिशेत्। आध्यात्मिकीः क इत्येता[५] जपन् मोक्षमवाप्नुयात्।।२८।।
आ नो भद्रा[६] इत्यनेन दीर्घमायुरवाप्नुयात्। त्वं सोमेति च सूक्तेन नवं पश्येन्निशाकरम्।। २९।।
उपतिष्ठेत् समित्पाणिर्वासांस्याप्नोत्यसंशयम्। आयुरीप्सन्निममिति कौत्सं सूक्तं सदा जपेत्।।३०।।
अप[९] नः शोशुचदिति स्तुत्वा मध्ये दिवाकरम्। यथा मुञ्चति चेषीकां तथा पापं प्रमुञ्चति।।३१।।
जातवेदस[१०] इत्येतज्जपेत् स्वस्त्ययनं पथि। भयैर्विमुच्यते सर्वैः स्वस्तिमानाप्नुयात् गृहान्।।३२।।
व्युष्टायाञ्च तथा रात्र्यामेतद् दुःस्वप्ननाशनम्। [११]प्रमन्दिनेति सूयन्त्यां जपेद्गर्भविमोचनम्।। ३३।।
जपन्निन्द्रमिति[१२] स्नातो वैश्वदेवं तु सप्तकम्। मुञ्चत्याज्यं तथा जुह्वत् सकलं किल्विषं नरः।।३४।।
इमा[१३] इति जपन् शाश्वत् कामानाप्नोत्यभीप्सितान्। मान[१४]स्तोक इति द्वाभ्यां त्रिरात्रोपोषितः शुचिः।।३५।।
औडम्बरीश्च जुहुयात् समिधश्चाज्यसंस्कृताः। छित्त्वा सर्वान् मृत्युपाशाञ्जीवेद्रोगविवर्जितः।। ३६।।
ऊर्ध्वबाहुरनेनैव स्तुत्वा शम्भुं तथैव च। मानस्तोकेति च ऋचा शिखाबन्धे कृते नरः।। ३७।।
अधृष्यः सर्वभूतानां जायते संशयं विना। चित्र[१५]मित्युपतिष्ठेत त्रिसन्ध्यं भास्करं तथा।। ३८।।
समित्पाणिर्नरो नित्यमीप्सितं धनमाप्नुयात्। अध[१६] स्वप्नेति च जपन् प्रातर्मध्यन्दिने दिने।।३९।।
दुःस्वप्नं चार्दते कृत्स्नं भोजनञ्चाप्नुयाच्छुभम्। उभे पुनामीति[१७] तथा रक्षोघ्नः परिकीर्तितः।।४०।।
ये देवास[१८] इति ऋचो जपन् कामानवाप्नुयात्। न मा[१९] गरन्निति जपन् मुच्यते चाततायिनः।।४१।।
कया[२०] शुभेति च जपञ्ज्ञातिश्रैष्ठ्यमवाप्नुयात्। इमं नु[२१] सोममित्येतत् सर्वान् कामानवाप्नुयात्।।४२।।
पितुं [२२]न्वित्युपतिष्ठेत नित्यमन्नमुपस्थितम्। अग्ने[२३] नयेति सूक्तेन घृतहोमाच्च मार्गगः।। ४३।।
वीरान्नयमवाप्नोति सुश्लोकं यो जपेत्सदा। कङ्कतो[२४] नेति सूक्तेन विषान् सर्वान् व्यपोहति।।४४।।
यो जात[२५] इति सूक्तेन सर्वान् कामानवाप्नुयात्। गणानामिति[२६] सूक्तेन स्निग्धमाप्नोत्यनुत्तमम्।।४५।।
यो मे राज[२७]न्नितीमान्तु दुःस्वप्नशमनीमृचम्। अध्वनि प्रस्थितो यस्तु पश्येच्छत्रुं समुत्थितम्।।४६।।

---

१. (१।५०।१) २. (१।५०।१३) ३. (१।७१।१) ४. (१।७४।१) ५. (१।८८।१६) ६. (१।८९।१)।
७. (१।९१।१) ८. (१।९४।१) ९. (१।९७।१) १०. (१।९९।१) ११. (१।१०१।१) १२. (१।१०६।१)
१३. (१।११४।१) १४. (१।११४।८) १५. (१।११५।१) १६. (१।१२०।१२) १७. (१।१३३।१)
१८. (१।१३९।११) १९. (१।१५८।५) २०. (१।१६५।१) २१. (१।१७९।१) २२. (१।१८७।१)
२३. (१।१८९।१) २४. (१।१९१।१) २५. (२।१२।१) २६. (२।२६।१) २७. (२।२८।१०)

अप्रशस्तं प्रशस्तं वा कुविन्मा[1] गो इमं जपेत्। [2]द्वाविंशकं जपन् सूक्तमाध्यात्मिकमनुत्तमम्।।४७।।
पर्वसु प्रयतो नित्यमिष्टान् कामान् समश्नुते। कृणु[3]ष्वेति जपन् सूक्तं जुह्वदाज्यं समाहितः।।४८।।
अरातीनां हरेत् प्राणान् रक्षांस्यपि विनाशयेत्। उपतिष्ठेत् स्वयं वह्निं परीत्यृचा दिने दिने।।४९।।
तं रक्षति स्वयं बह्निर्विश्वतो विश्वतोमुखः। हंसः[5] शुचिषदित्येतच्छुचिरीक्षेद् दिवाकरम्।। ५०।।
कृषिं प्रपद्यमानस्तु स्थालीपाकं यथाविधि। जुहूयात् क्षेत्रमध्ये तु शुनं वाहास्तु[6] पञ्चभिः।। ५१।।
इन्द्राय च मरुद्भ्यस्तु पर्जन्याय भगाय च। यथालिङ्गं तु विहरेल्लाङ्गलं तु कृषीवलः।। ५२।।
युक्तो धान्याय सीतायै सुनासीरावथोत्तरम्(४।५७।५)। गन्धमाल्यैर्नमस्कारैर्यजेदेताश्च देवताः।।५३।।
प्रवापने प्रलवने खलसीतापहारयोः। अमोघं कर्म भवति वर्धते सर्वदा कृषिः।। ५४।।
समुद्रादिति[7] सूक्तेन कामानाप्नोति पावकात्। विश्वानि[8] न इति द्वाभ्यां य ऋग्भ्यां वह्निमर्हति।।५५।।
स तरत्यापदः सर्वा यशः प्राप्नोति चाव्ययम्। विपुलां श्रियमाप्नोति जयं प्राप्नोत्यनुत्तमम्।।५६।।
अग्ने[9] त्वमिति च स्तुत्वा धनमाप्नोति वाञ्छितम्। प्रजाकामो जपेन्नित्यं वरुणदैवतत्रयम्।।५७।।
स्व[10]स्त्यात्रेयं जपेत् प्रातः सदा स्वस्त्ययनं महत्। स्वस्ति[11] पन्था इति प्रोच्य स्वस्तिमान् व्रजतेऽध्वनि।।५८।।
विजिहीष्व[12] वनस्पते शत्रूणां व्याधितं भवेत्। स्त्रिया गर्भप्रमूढाया गर्भमोक्ष[13]णमुत्तमम्।। ५९।।
अच्छावदेति[14] सूक्तं च वृष्टिकामः प्रयोजयेत्। निराहारः क्लिन्नवासा न चिरेण प्रवर्षति।।६०।।
मनसः काममित्येतां पशुकामो नरो जपेत्। कर्दमेन इति स्नायात् प्रजाकामः शुचिव्रतः।। ६१।।
अश्वपूर्वामिति स्नायाद्राज्यकामस्तु मानवः। रोहिते चर्मणि स्नायाद्ब्राह्मणस्तु यथाविधि।। ६२।।
राजा चर्मणि वैयाघ्रे छागे वैश्यस्तथैव च। दशसाहस्त्रिको होमः प्रत्येकं परिकीर्तितः।। ६३।।
आगाव[15] इति सूक्तेन गोष्ठे गां लोकमातरम्। उपतिष्ठेद् व्रजेच्चैव यदीच्छेत्ताः सदाक्षयाः।।६४।।
उपेति[16] तिसृभी राज्ञो दुन्दुभिमभिमन्त्रयेत्। तेजो बलं च प्राप्नोति शत्रुं चैव नियच्छति।। ६५।।
तृणपाणिर्जपेत् सूक्तं रक्षोघ्नं[17] दस्युभिर्वृतः। ये के च[18] ज्मेत्यृचं जप्त्वा दीर्घमायुरवाप्नुयात्।।६६।।
जीमूत[19]सूक्तेन तथा सेनाङ्गान्यभिमन्त्रयेत्। यथालिङ्गं ततो राजा विनिहन्ति रणे रिपून्।। ६७।।
[20]आग्नेयेति त्रिभिः सूक्तैर्धनमाप्नोति चाक्षयम्। [21]अमीवहेति सूक्तेन भूतानि स्वापयेन्निशि।।६८।।
सम्बाधे विषमे दुर्गे बन्धो (द्धो) वा निर्गतः क्वचित्। पलायन् वा गृहीतो वा सूक्तमेतत्तथा जपेत्।।६९।।
त्रिरात्रं नियतोऽपोष्य श्रपयेत् पायसं चरुम्। तेनाहुतिशतं पूर्णं जुहुयात् त्र्यम्बकेत्यृचा।। ७०।।
समुद्दिश्य महादेवं जीवेदब्दशतं सुखम्। तच्चक्षुरित्यृचा[23] स्नात उपतिष्ठेद् दिवाकरम्।। ७१।।
उद्यन्तं मध्यगं चैव दीर्घमायुर्जिजीविषुः। (सूक्ताभ्यां पर एताभ्यां महतीं भूतिमाप्नुयात्)।। ७२।।

---

१. (३। ४३। ५) २. (३। ४५। ५) ३. (४। ४। १) ४. (४। १०। ८) ५. (४। ४०। ५) ६. (४। ५७। ४)।
७. (४। ५८। १) ८. (५। ४। ९) ९. (५। २४। १) १०. (५। ५१। ११) ११. (५। ५१। १५) १२. (५। ७८। ५)
१३. (५। ७८। ७) १४. (५। ८३। १) १५. (६। २८। १) १६. (६। ४७। २९) १७. (४। ४। १)।
१८. (६। ५२। १५) १९. (६। ७५। १) २०. (७। १। १) २१. (७। ५५। १) २२. (७। ५९। १२)२३. (७। ६६। १६)

इन्द्रा[१]सोमेति सूक्तं तु कथितं शत्रुनाशनम्। यस्य लुप्तं व्रतं मोहाद् व्रात्यैर्वा संसृजेत् सह।।७३।।
उपोष्याज्यं स जुहुयात् त्वमग्ने व्रतपा[२] इति। अदितीत्यृक्[३] च साम्राजं जप्त्वा वादे जयी भवेत्।।७४।।
नहीति[४] च चतुष्केण मुच्यते महतो भयात्। ऋचं जप्त्वा [५]यदीत्येतत् सर्वान् कामानवाप्नुयात्।।७५।।
द्वाच[६]त्वारिंशतं चैन्द्रं जप्त्वा नाशयते रिपून्। ऋच[७] महीति जप्त्वा च प्राप्नोत्यारोग्यमेव च।।७६।।
शन्नो[८] भवेति द्वाभ्यां तु भुक्त्वान्नं प्रयतः शुचिः। हृदयं पाणिना स्पृष्ट्वा व्याधिभिर्नाभिभूयते।।७७।।
उत्वा[९] मन्दन्त्विति स्नातो हुत्वा शत्रुं प्रमापयेत्। [१०]त्वन्नोऽग्ने इति सूक्तेन हुतेनान्नमवाप्नुयात्।।७८।।
कन्या[११] वारिति सूक्तेन त्वग्दोषाद्विप्र मुच्यते। यदद्य[१२] केच्चत्युदिते जप्ते वश्यं जगद्भवेत्।।७९।।
यद्वागिति[१३] च जप्तेन वाणी भवति संस्कृता। [१४]वचोविदमिति त्वेता जपन् वाचं समश्नुते।।८०।।
पवित्राणां पवित्रं तु पावमान्यो ह्यृचो मताः। वैखानसा[१५] ऋचस्त्रिंशत् पवित्राः परमा मताः।।८१।।
ऋचो द्विषष्टिः प्रोक्ताश्च पव[१६]स्वेत्यृषिसत्तम। सर्वकल्मषनाशाय पावनाय शिवाय च।। ८२।।
स्वादिष्ठयेति[१७] सूक्तानां सप्तषष्टिरुदाहृता। दशोत्तरा ऋचां चैताः पावमान्यः शतानि षट्।।८३।।
एतज्जपंश्च जुह्वच्च घोरं मृत्युभयं जयेत्। आपो[१८] हि ष्ठेति वारिस्थो जपेत् पापभयार्दने।।८४।।
प्र[१९] देवत्रेति नियतो जपेच्च मरुधन्वसु। प्राणान्तिके भये प्राप्ते क्षिप्रमायुस्तु विन्दति।। ८५।।
प्रावेषा[२०] मेत्यृचमेकां जपेच्च मनसा निशि। व्युष्टायामुदिते सूर्ये द्यूते जयमवाप्नुयात्।। ८६।।
मा[२१] प्र गामेति मूढश्च पन्थानं पथि विन्दति। क्षीणायुरिति मन्येत यं कञ्चित् सुहृदं प्रियम्।।८७।।
यत्ते[२२] यममिति स्नातस्तस्य मूर्धानमालभेत्। सहस्रकृत्वः पञ्चाहं तेनायुर्विन्दते महत्।। ८८।।
इद[२३]मित्थेति जुहुयाद् घृतं प्राज्ञः सहस्रशः। पशुकामो गवां गोष्ठे अन्नकामश्चतुष्पथे।। ८९।।
वयः[२४] सुपर्णा इत्येतां जपन्वै विन्दते श्रियम्। हवि[२५]ष्पान्तीयमभ्यस्य सर्वपापैः प्रमुच्यते।।९०।।
तस्य रोगा विनश्यन्ति कायाग्निर्वर्धते तथा। या[२६] ओषधीः स्वस्त्ययनं सर्वव्याधिविनाशनम्।।९१।।
बृहस्पते[२७] प्रतीत्येतद् वृष्टिकामः प्रयोजयेत्। सर्वत्रेति परा शान्तिर्ज्ञेयाऽप्रतिरथं[२८] तथा।।९२।।
भूतांशं[२९] काश्यपं नित्यं प्रजाकामस्य कीर्तितम्। अहं[३०] रुद्रेति च जपेद्वाग्मी भवति मानवः।।९३।।
न योनौ जायते विद्वान् जपन्रात्रीति रात्रिषु। [३१]रात्रिसूक्तं जपन् रात्रौ रात्रिं क्षेमी नयेन्नरः।। ९४।।
कल्पयन्तीति[३२] च जपेन्नित्यं कृत्वारिनाशनम्। (आयुष्यं चैव वर्चस्यं सूक्तं दाक्षायणं महत्)।।९५।।

---

१. (७।१०४।१) २. (८।११।१) ३. (८।१८।६) ४. (८।३०।१) ५. (८।३२।६) ६. (८।४५।१)
७. (८।४७।१) ८. (८।४८।४) ९. (८।६४।१) १०. (८।७१।१) ११. (८।९१।१) १२. (८।९३।४)
१३. (८।१००।१०) १४. (८।१०२।१६) १५. (९।६६।१) १६. (९।२५।१) १७. (९।१।१)
१८. (१०।९।१) १९. (१०।३०।१) २०. (१०।३४।१) २१. (१०।५७।१) २२. (१०।५८।१)
२३. (१०।६१।१) २४. (१०।७३।११) २५. (१०।८८।१) २६. (१०।९७।१) २७. (१०।९८।१)
२८. (१०।१०३।१) २९. (१०।१०६।१) ३०. (१०।१२५।१) ३१. (१०।१२७।१) ३२. (१०।१३०।५६)

उत देवा[१] इति जपेदामयघ्न धृतव्रत:। अयमग्ने[२] जरित्येतज्जपेदग्निभये सति।। ९६।।
आरण्या[३]नीत्यरण्येषु जपेत्तद्भयनाशनम्। ब्राह्मीमासाद्य सूक्ते द्वे वचां ब्राह्मीं शतावरीम्।। ९७।।
पृथगद्भिर्घृतैर्वाद्य मेधां लक्ष्मीं च विन्दति। शास[४] इत्यसपत्नघ्नं सङ्ग्रामं विजिगीषत:।। ९८।।
ब्रह्मणाग्नि:[५] संविदानं गर्भमृत्युनिवारणम्। अपेहीति[६] जपेत् सूक्तं शुचिर्दु:स्वप्ननाशनम्।। ९९।।
तुभ्येदमिति[७] वै जप्त्वा समाधिं विन्दते परम्। मयोभूर्वात[८] इत्येतद्गवां स्वस्त्ययनं महत्।।१००।।
शाम्बरीमिन्द्रजालं वा मायामेतेन वारयेत्। महि त्रीणामवोऽस्त्विवति पथि स्वस्त्ययनं जपेत्।।१०१।।
प्राग्नयेति द्विषन्नेवं जपेच्च रिपुनाशनम्। वास्तोष्पत्येन मन्त्रेण यजेत् गृहदेवता:।। १०२।।
जपस्यैष विधि: प्रोक्तो हुते ज्ञेयो विशेषत:। होमान्ते दक्षिणा देया पापशान्तिर्हुतेन तु।। १०३।।
हुतं शाम्यति चान्नेन अन्नं हेमप्रदानत:। विप्राशिषस्त्वमोघा: स्युर्बहि: स्नानं तु सर्वत:।। १०४।।
सिद्धार्थका यवा धान्यं पयो दधि घृतं तथा। क्षीरवृक्षास्तथेध्मं तु होमा वै सर्वकामदा:।। १०५।।
समिध: कण्टकिन्यश्च राजिका रुधिरं विषम्। अभिचारे तथा शैलमशनं सक्तव: पय:।। १०६।।
दधि भैक्ष्यं फलं मूलमृग्विधानमुदाहृतम्।..।।

इति ऋग्विधानम्।। अथ यजुर्विधानम्—

यजुर्विधानं वक्ष्यामि भुक्तिमुक्तिप्रदं शृणु। ओंकारपूर्विका राम महाव्याहृतयो मता:।। १।।
सर्वकल्मषनाशिन्य: सर्वकामप्रदास्तथा। आज्याहुतिसहस्रेण देवानाराधयेद् बुध: ।। २।।
मनस: काङ्क्षितं राम मनसेप्सितकामदम्। शान्तिकामो यवै: कुर्यात्तिलै: पापापनुत्तये।। ३।।
धान्यै: सिद्धार्थकैश्चैव सर्वकामकरैस्तथा। औडुम्बरीभिरिध्माभि: पशुकामस्य शस्यते।। ४।।
दध्ना चैवान्नकामस्य पयसा शान्तिमिच्छत:। अपामार्गसमिद्भिस्तु कामयन् कनकं बहु।। ५।।
कन्याकामो घृताक्तानि युग्मशो ग्रथितानि तु। जातीपुष्पाणि जुहुयाद् ग्रामार्थी तिलतण्डुलान्।।६।।
वश्यकर्मणि शाखोटं वासापामार्गमेव च। विषासृङ्मिश्रसमिधो व्याधिघातश्च भार्गव।। ७।।
क्रुद्धस्तु जुहुयात् सम्यक् शत्रूणां वधकाम्यया। सर्वब्रीहिमयीं कृत्वा राज्ञ: प्रतिकृतिं द्विज।।८।।
सहस्रशस्तु जुहुयाद्राजा वशगतो भवेत्। *वस्त्रकामस्य पुष्पाणि दूर्वा व्याधिविनाशिनी।। ९।।
ब्रह्मवर्चसकामस्य वासोग्रं⇨ च विधियते। प्रत्यङ्गिरेषु जुहुयात् तुषकण्टकभस्मभि:।। १०।।
विद्वेषणे च पक्षाणि काककौशिकयोस्तथा। कापिलं च घृतं हुत्वा तथा चन्द्रग्रहे द्विज।। ११।।
वचाचूर्णेन‡ सम्पातान् समानीय च तां वचाम्। सहस्रमन्त्रितां भुक्त्वा मेधावी जायते नर:।।१२।।
एकादशाङ्गुलं शङ्कुं लौहं खादिरमेव च। द्विषतो वधोऽसीति जपन्निखनेद्रिपुवेश्मनि।। १३।।

---

१. (१०।१३७।१) २. (१०।१४२।१) ३. (१०।१४६।१) ४. (१०।१५२।१) ५. (१०।१६२।१)
६. (१०।१६४।१) ७. (१०।१६७।१) ८. (१०।१६९।१) ९. (१०।१८५।१) १०. (१०।१८७।१)
११. (७।५४।१) * वसुकामस्य' ग. पाठ:। ⇨ 'वासाग्रं' ग. पाठ:। ‡ 'वचावृतं' ग. पाठ:।

उच्चाटनमिदं कर्म शत्रूणां कथितं तव। चक्षुष्या इति जप्त्वा च विनष्टं चक्षुराप्नुयात्।। १४।।
उपयुञ्जत इत्येतदनुवाकं तथान्नदम्। तनूपा अग्ने सदिति (३।१७) दूर्वां हुत्वार्तिवर्जितः।।१५।।
भेषजमसीति[1] दध्याज्यैर्होमः पशूपसर्गनुत्*। त्रियम्बकं यजामहे[2] होमः सौभाग्यवर्धनः।।१६।।
कन्यानाम गृहीत्वा तु कन्यालाभकरः परः। भयेषु तु जपन्नित्यं भयेभ्यो विप्र मुच्यते।। १७।।
धत्तूरपुष्पं सघृतं हुत्वा स्यात् सर्वकामभाक्। हुत्वा तु गुग्गुलं राम स्वप्ने पश्यति शङ्करम्।। १८।।
युञ्जते [3]मनोऽनुवाकं जप्त्वा दीर्घायुराप्नुयात्। विष्णो रराट[4]मित्येतत् सर्वबाधाविनाशनम्।।१९।।
रक्षोघ्नं च यशस्यं च तथैव विजयप्रदम्। अयन्नो [5]अग्निरित्येतत् सङ्ग्रामे विजयप्रदम्।।२०।।
इदमापः प्रवहत[6] स्नाने पापापनोदनम्। विश्वकर्मन् [7]हविषेति सूचीं लौहीं दशाङ्गुलाम्।।२१।।
कन्याया निखनेद् द्वारि साऽन्यस्मै न प्रदीयते। देव सवितरेतेन[8] हुतेनान्नेन चान्नवान्।। २२।।
अग्ने स्वाहेति[9] जुहुयाद्बलकामो☞ द्विजोत्तम। तिलैर्यवैश्च धर्मज्ञ तथापामार्गतण्डुलैः।। २३।।
सहस्रमन्त्रितां कृत्वा तथा गोरोचनां द्विज। तिलकं च तया कृत्वा जनस्य प्रियतामियात्।।२४।।
रुद्राणां च तथा जप्यं सर्वाघविनिसूदनम्। सर्वकर्मकरो होमस्तथा सर्वत्र शान्तिदः।। २५।।
अजाविकानामश्वानां कुञ्जराणां तथा गवाम्। मनुष्याणां नरेन्द्राणां बालानां योषितामपि।। २६।।
ग्रामाणां नगराणां च देशानामपि भार्गव। उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च।। २७।।
मरके समनुप्राप्ते रिपुजे च तथा भये। रुद्रहोमः परा शान्तिः पायसेन घृतेन च।। २८।।
कूष्माण्डघृतहोमेन सर्वान् पापान् व्यपोहति। सक्तुयावकभैक्षाशी नक्तं मनुजसत्तम।। २९।।
बहिः स्नानरतो मासान्मुच्यते ब्रह्महत्यया। मधु [10]वातेति मन्त्रेण होमादितोऽखिलं लभेत्।।३०।।
दधि क्राब्णेति[11] हुत्वा तु पुत्रान् प्राप्नोत्यसंशयम्। तथा घृतव[12]तीत्येतदायुष्यं स्याद् घृतेन तु।।३१।।
स्वस्ति[13] न इन्द्र इत्येतत् सर्वबाधाविनाशनम्। इह गावः प्रजायध्वमिति पुष्टिविवर्धनम्।। ३२।।
घृताहुतिसहस्रेण तथाऽलक्ष्मीविनाशनम्। स्रुवेण देवस्य[14] त्वेति हुत्वापामार्गतण्डुलम्।।३३।।
मुच्यते विकृताच्छीघ्रमभिचारान्न संशयः। रुद्र यत्ते पलाशस्य समिद्भिः कनकं लभेत्।। ३४।।
शिवो[15] भवेत्यग्न्युत्पाते ब्रीहिभिर्जुहुयान्नरः। याः[16] सेना इति चैतच्च तस्करेभ्यो भयापहम्।।३५।।
योऽस्मभ्यमरातीयाद्[17] हुत्वा कृष्णतिलान्नरः। सहस्रशोऽभिचाराच्च मुच्यते विकृताद् द्विज।।३६।।
अन्नेनान्नपतेत्येवं[18] हुत्वा चान्नमवाप्नुयात्। हंसः शुचिष[19]दित्येतज्जप्तं तोयेऽघनाशनम्।।३७।।
चत्वारि शृङ्गेत्येतत्तु सर्वपापहरं जले। देवा यज्ञेति[21] जप्त्वा तु ब्रह्मलोके महीयते।। ३८।।
वसन्तेति[22] च हुत्वाज्यमादित्याद्वरमाप्नुयात्। सुपर्णोऽसीति चेत्यस्य कर्म व्याहृतिवद्भवेत्।।३९।।

---

१. (३। ५९) २. (३। ६०) ३. (५। १४) ४. (५। २१) ५. (५। ३७) ६. (६। १७) ७. (८। ४६) ८. (५। ३९)
९. (२७। २२) १०. (१३। ३७) ११. (२३। ३२) १२. (३४। ४५) १३. (२५। २९) १४. (५। २२) १५. (११। ४५)
१६. (११। ७७) १७. (११। ८०) १८. (११। ८३) १९. (१०। २४) २०. (१७। ९१) २१. (१९। १२) २२. (२४। २०)
२३. (१२। ४)। * 'होमोऽयमुपसर्गहा' क. पाठः। ☞'धनकामोः' क. पाठः।

नमः सुतेति[१] त्रिर्जप्त्वा बन्धनान्मोक्षमाप्नुयात्। अन्तर्जले त्रिरावर्त्य द्रुपदा[२] सर्वपापनुत्।। ४०।।
इह गावः प्रजायध्वं मन्त्रोऽयं बुद्धिवर्धनः। हुतस्तु सर्पिषा दध्ना पयसा पायसेन वा।। ४१।।
शतं व इति (१२।७६) वैतेन हुत्वा पर्णफलानि च। आरोग्यं श्रियमाप्नोति जीवितञ्च चिरं तथा।।४२।।
ओषधीः प्रतिमोदध्वं[३] वपने लवनेऽर्थकृत्। अश्वावतीं[४] पायसेन होमाच्छान्तिमवाप्नुयात्।।४३।।
उच्छुष्मा[५] इति मन्त्रेण बन्धनस्थो विमुच्यते। युवा सुवासा इत्येव वासांस्याप्नोत्यनुत्तमम्।।४४।।
मुञ्चन्तु मा शपथ्येति[६] सर्वान्तकविनाशनम्। मा मा[७] हिंसीस्तिलाज्येन हुतं रिपुविनाशनम्।।४५।।
नमोऽस्तु सर्वसर्पेभ्यो[८] घृतेन पायसेन च। कृणुष्व पाज[९] इत्येतदभिचारविनाशनम्।। ४६।।
दूर्वाकाण्डायुतं हुत्वा काण्डात्काण्डेति[१०] मानवः। ग्रामे जनपदे वापि मरकं तु शमं नयेत्।।४७।।
रोगार्तो मुच्यते रोगात् तथा दुःखात्तु दुःखितः। औडुम्बरीश्च समिधो मधुमान्नो[११] वनस्पतिः।।४८।।
हुत्वा सहस्रशो राम धनमाप्नोति मानवः। सौभाग्यं महदाप्नोति व्यवहारे तथा जयम्।। ४९।।
अपां गम्भ[१२]निति हुत्वा देवं वर्षापयेद् ध्रुवम्। अपां त्वेमेति(१३।५३)च तथा हुत्वा दधि घृतं मधु।।५०।।
प्रवर्तयति धर्मज्ञ महावृष्टिमनन्तरम्। नमस्ते रुद्र[१३]इत्येतत् सर्वोपद्रवनाशनम् ।। ५१।।
सर्वशान्तिकरं प्रोक्तं महापातकनाशनम्। अध्यवोचदित्यनेन[१४] रक्षणं व्याधितस्य तु।। ५२।।
रक्षोघ्नं च यशस्यं च चिरायुः पुष्टिवर्धनम्। सिद्धार्थकानां क्षेपेण पथि चैतज्जपन् सुखी।। ५३।।
असौ यस्ताम्र[१५] इत्येतत् पश्यन्नित्यं दिवाकरम्। उपतिष्ठेत धर्मज्ञ सायं प्रातरतन्द्रितः।। ५४।।
अन्नमक्षयमाप्नोति दीर्घमायुश्च विन्दति। प्र मुञ्च धन्व[१६]नेत्येतत् षड्भिरायुधमन्त्रणम्।। ५५।।
रिपूणां भयदं युद्धे नात्र कार्या विचारणा। मा नो महान्त[१७] इत्येवं बालानां शान्तिकारकम्।।५६।।
नमो हिरण्यबाहवे[१८] इत्यनुवाकसप्तकम्। राजिकां कटुतैलाक्तां जुहुयाच्छत्रुनाशिनीम्।। ५७।।
नमो वः किरिकेभ्यश्च[१९] पद्मलक्षाहुतैर्नरः। राज्यलक्ष्मीमवाप्नोति तथा बिल्वैः सुवर्णकम्।।५८।।
इमा रुद्रायेति[२०] तिलैर्होमाच्च धनमाप्यते। दूर्वाहोमेन चान्येन सर्वव्याधिविवर्जितः।। ५९।।
आशुः शिशान[२१] इत्येतदायुधानां च रक्षणे। सङ्ग्रामे कथितं राम सर्वशत्रुनिवर्हणम्।। ६०।।
वाजश्च[२२] मेति जुहुयात् सहस्रं पञ्चभिर्द्विज। आज्याहुतीनां धर्मज्ञ चक्षूरोगाद्विमुच्यते।। ६१।।
शन्नो वनस्पते गेहे होमः स्याद्वास्तुदोषनुत्। अग्न आयूंषि[२३] हुत्वाज्यं द्वेषं नाप्नोति केनचित्।।६२।।
अपां फेनेति(१९।७१)लाजाभिर्हुत्वा जयमवाप्नुयात्। भद्रा[२४] इतीन्द्रियैर्हीनो जपन् स्यात् सकलेन्द्रियः।।६३।।
अग्निश्च[२५] पृथिवी चेति वशीकरणमुत्तमम्। [२६]अध्वनेति जपन्मन्त्रं व्यवहारे जयी भवेत्।। ६४।।
ब्रह्म[२७] राजन्यमिति च कर्मारम्भे तु सिद्धिकृत्। संवत्सरोऽसीति[२८] घृतैर्लक्षहोमादरोगवान्।।६५।।

---

१. (१२। ६३) २. (२०। २०) ३. (१२। ७७) ४. (१२। ८१) ५. (१२। ८२) ६. (१२। ९०) ७. (१२। १०२) ।
८. (१३। ६) ९. (१९। ९) १०. (१३। २०) ११. (१३। २९) १२. (१३। ३०) १३. (१६। १) १४. (१६। ५)
१५. (१६। ६) १६. (१६। ९) १७. (१६। १५) १८. (१६। १७) १९. (१६। ४६) २०. (१६। ४८) २१. (१७। ३३)
२२. (१८। १) २३. (१९। ३८) २४. (१५। २९) २५. (२६। १) २६. (२६। १) २७. (२६। २) २८. (२७। ४५)

केतुं कृण्व[१]न्नित्येतच्च सङ्ग्रामे जयवर्धनम्। इन्द्रोऽग्निर्वर्म इत्येतद्रणे वर्मनिबन्धनम्।। ६६।।
धन्वना[२] गेति मन्त्रश्च धनुर्ग्रहणकः परः। ऋ[३]जीतेति तथा मन्त्रो विज्ञेयो ह्यभिमन्त्रणे।। ६७।।
मन्त्रश्चा[४]हिरिवेत्येतच्छराणां मन्त्रणे भवेत्। बह्वीनां पिता[५] इत्येतत्तूणमन्त्रः प्रकीर्तितः।। ६८।।
युञ्जन्तीति[६] तथाश्वानां योजने मन्त्र उच्यते। आशुः शिशान इत्येतद्यात्रारम्भणमुच्यते।। ६९।।
विष्णोः[७] क्रमेति मन्त्रश्च रथारोहणिकः परः। आजङ्घन्तीति[८] चाश्वानां ताडनीयमुदाहृतम्।। ७०।।
याः[९] सेना अभीत्वरीति परसैन्यमुखे जपेत्। दुन्दुभ्य इति चाप्येतद् दुन्दुभीताडनं भवेत्।।७१।।
एतैः पूर्वैर्हुतैर्मन्त्रैः कृत्वैवं विजयी भवेत्। यमेन दत्त[१०]मित्यस्य कोटिहोमाद्विचक्षणः।। ७२।।
रथमुत्पादयेच्छीघ्रं सङ्ग्रामे विजयप्रदम्। आ कृष्णेन[११] तथैतस्य कर्म व्याहृतिवद्भवेत्।। ७३।।
शिवसङ्कल्पजापेन[१२] समाधिं मनसो लभेत्। पञ्चनद्यः[१३] पञ्चलक्षं हुत्वा लक्ष्मीमवाप्नुयात्।।७४।।
यदाबध्नन् दाक्षायणा[१४] मन्त्रेणानेन मन्त्रितम्। सहस्रकृत्वः कनकं धारयेद्रिपुवारणम्।। ७५।।
इमं जीवेभ्य[१५] इति च शिलां लोष्टं चतुर्दिशम्। क्षिपेद् गृहे तदा तस्य न स्याच्चोरभयं निशि।।७६।।
परी मे गामनेषेति[१६] वशीकरणमुत्तमम्। हन्तुमभ्यागतस्तत्र(स्य) वशी भवति मानवः।। ७७।।
भक्ष्यताम्बूलपुष्पाद्यं मन्त्रितं तु प्रयच्छति। यस्य धर्मज्ञ वशगः सोऽस्य शीघ्रं भविष्यति।। ७८।।
शन्नो मित्रः[१७] शमित्येतत्सदा सर्वत्र शान्तिदम्। गणानां त्वा गणपतिं कृत्वा होमं चतुष्पथे।।७९।।
वशीकुर्याज्जगत्सर्वं सर्वधान्यैरसंशयम्। हिरण्यवर्णाः शुचयो मन्त्रोऽयमभिषेचने ।। ८०।।
शन्नो देवीरभिष्टये[१८] तथा शान्तिकरः परः। एकचक्रेति मन्त्रेण हुतेनाज्येन भागशः।। ८१।।
ग्रहेभ्यः शान्तिमाप्नोति प्रसादं च न संशयः। गावो भग इति द्वाभ्यां हुत्वाज्यं गा अवाप्नुयात्।।८२।।
प्रवादांशः सोपदिति ग्रहयज्ञे विधीयते। देवो वनस्पतिरिति[१९] द्रुमयज्ञे विधीयते।। ८३।।
गायत्री वैष्णवी ज्ञेया तद्विष्णोः[२०] परमं पदम्। सर्वपापप्रशमनं सर्वकामकरं तथा।। ८४।।

इति यजुर्विधानम्।। अथ सामविधानम्—

यजुर्विधानं कथितं वक्ष्ये साम्नां विधानकम्। संहितां वैष्णवीं जप्त्वा हुत्वा स्यात्सर्वकामभाक्।।१।।
संहितां छान्दसीं साधु जप्त्वा प्रीणाति शङ्करम्। स्कान्दीं पैत्र्यां संहितां च जप्त्वा स्यात्तु प्रसादवान्।।
यत इन्द्र भयामहे हिंसादोषविनाशनम्। अवकीर्णी मुच्यते च अग्निस्तिग्मेति वै जपन्।। ३।।
सर्वपापहरं ज्ञेयं परितोषिञ्चता सुतम्। अविक्रेयं च विक्रीय जपेद् घृतवतीति च।। ४।।
अद्य नो देव सवितर्ज्ञेयं दुःस्वप्ननाशनम्। अबोध्यग्निरिति मन्त्रेण घृतं राम यथाविधि।। ५।।
अभ्युक्ष्य घृतशेषेण मेखलाबन्ध इष्यते। स्त्रीणां यासां तु गर्भाणि पतन्ति भृगुसत्तम।। ६।।
मणिं जातस्य बालस्य बध्नीयात्तदनन्तरम्। सोमं राजानमेतेन व्याधिभिर्विप्र मुच्यते।। ७।।

---

१. (२९। ३७) २. (२९। ३९) ३. (२९। ४९) ४. (२९। ५१) ५. (२९। ४२) ६. (२३। ५) ७. (१२। ५)।
८. (२९। ५०) ९. (११। ७७) १०. (२९। १३) ११. (३३। ४३) १२. (३४। १) १३. (३४। ११) १४. (३४। ५२)
१५. (३५। १५) १६. (१५। १८) १७. (३६। ९) १८. (३६। १२) १९. (२८। ४६३) २०. (६। ५)।

सर्पसाम प्रयुञ्जानो नाप्नुयात् सर्पजं भयम्। माद्य त्वा वाद्यतेत्येतद् हुत्वा विप्र सहस्रश:।। ८।।
शतावरिमिणिं बद्ध्वा नाप्नुयाच्छत्रुतो* भयम्। दीर्घतमसोऽर्क इति हुत्वान्नं प्राप्नुयात् वसु।।९।।
समिन्यायन्तीति जपन् न म्रियेत पिपासया। त्वमिमा ओषधी ह्येतज्जप्त्वा व्याधिं न चाप्नुयात्।।१०।।
पथि देवव्रतं जप्त्वा भयेभ्यो+ विप्र मुच्यते। यदिन्द्रो अनयदिति हुतं सौभाग्यवर्धनम्।। ११।।
भगो न चित्र इत्येवं नेत्रयोरञ्जनं हितम्। सौभाग्यवर्धनं राम नात्र कार्या विचारणा।। १२।।
जपेदिन्द्रेति वर्गं च तथा सौभाग्यवर्धनम्। परि[1] प्रिया दिव: कवि: काम्यां संश्रावयेत् स्त्रियम्।।१३।।
सा तं कामयते राम नात्र कार्या विचारणा। रथन्तरं वामदेव्यं ब्रह्मवर्चसवर्धनम्।। १४।।
प्राशयेद्बालकं नित्यं वचाचूर्णं घृतप्लुतम्। इन्द्रमिहासिनं जप्त्वा भवेच्छ्रुतिधरस्त्वसौ।। १५।।
हुत्वा रथन्तरं जप्त्वा पुत्रमाप्नोत्यसंशयम्। मयि श्रीरिति मन्त्रोऽयं जप्तव्य: श्रीविवर्धन:।। १६।।
वैरूप्यस्याष्टकं नित्यं प्रयुञ्जान: श्रियं लभेत्। श्रत्ताष्टकं प्रयुञ्जान: सर्वान् कामानवाप्नुयात्।। १७।।
गव्येषु णेति यो नित्यं सायं प्रातरतन्द्रित:। उपस्थानं गवां कुर्यात्तस्य स्युस्ता: सदा गृहे।। १८।।
घृताक्तं तु यवद्रोणं वात[2] आवातु भेषजम्। अनेन हुत्वा विधिवत् सर्वां मायां व्यपोहति।।१९।।
प्रदैवो दासेन तिलान् हुत्वा कार्मणकृन्तनम्। अभि त्वा[3] पूर्वपीतये वषट्कारसमन्वितम्।।२०।।
वासकेध्मसहस्रं तु हुतं युद्धे जयप्रदम्। हस्त्यश्वपुरुषान् कुर्याद्बुध: पिष्टमयान् शुभान्।। २१।।
परकीयानथोद्देश्य प्रधानपुरुषांस्तथा। सुस्विन्नान् पिष्टकवरान् क्षुरेणोत्कृत्य भागश:।। २२।।
अभि त्वां शूर नो नुमो मन्त्रेणानेन मन्त्रवित्। कृत्वा सर्षपतैलाक्तान् प्रोक्तेन जुहुयात्तत:।। २३।।
एतत् कृत्वा बुध: कर्म सङ्ग्रामे जयमाप्नुयात्। गारुडं वामदेव्यं च रथन्तरबृहद्रथौ ।। २४।।
सर्वपापप्रशमन: कथित: संशयं विना।..।।

इति सामविधानम्।। अथाथर्वविधानम्—

साम्नां विधानं कथितं वक्ष्ये चाथर्वणमथ। शान्तातीयं गणं हुत्वा शान्तिमाप्नोति मानव:।। १।।
भैषज्यं च गणं हुत्वा सर्वान् रोगान् व्यपोहति। त्रिसप्तीयं गणं हुत्वा सर्वपापै: प्रमुच्यते।। २।।
क्वचिन्नाप्नोति च भयं हुत्वा चैवाभयं गणम्। न क्वचिज्जायते राम गणं हुत्वापराजितम्।। ३।।
आयुष्यं च गणं हुत्वा अपमृत्युं व्यपोहति। स्वस्तिमाप्नोति सर्वत्र हुत्वा स्वस्त्ययनं गणम्।।४।।
श्रेयसा योगमाप्नोति हुत्वाथर्वगणं तथा। वास्तोष्पत्यं गणं हुत्वा वास्तुदोषान् व्यपोहति।। ५।।
तथा रौद्रगणं हुत्वा सर्वान् दोषान् व्यपोहति। एतैर्दशगणैर्होमो ह्यष्टादशसु शान्तिषु।। ६।।
वैष्णवी शान्तिरैन्द्री तु ब्राह्मी रौद्री तथैव च। वायव्या वारुणी चैव कौबेरी भार्गवी तथा।।७।।
प्राजापत्या तथा त्वाष्ट्री कौमारी वह्निदेवता। मारुद्गणा च गान्धर्वी शान्तिर्नैर्ऋतकी तथा।। ८।।
शान्तिराङ्गिरसी याम्या पार्थिवी सर्वकामदा। यस्त्वां↓मृत्युरिति ह्येतज्जप्तं मृत्युविनाशनम्।। ९।।

---

१. (५।१।१०) २. (२०।७।४।१) ३. (१६।१।१।१) ४. (४।१।१)

* 'शस्त्रत:' ख. पाठ:। + 'तापेभ्य:' ग. पाठ:। ↓'यत् स्वं' ख. पाठ:।

सुपर्णस्त्वेति हुत्वा च भुजगैर्नैव बाध्यते। इन्द्रेण वृत्तमित्येतत् सर्वबाधाविनाशनम्।। १०।।
इमा[1] देवीति मन्त्रश्च सर्वशान्तिकरः परः। देवा मरुत इत्येतत् सर्वकामकरं भवेत्।। ११।।
*यमस्य लोकादित्येतद् दुःस्वप्नशमनं परम्। इन्द्रं वयं वणिजेति पण्यलाभकरं परम्।। १२।।
कामो मे राजेति हुतं स्त्रीणां सौभाग्यवर्धनम्। तुभ्यमेव जरिमन्नित्ययुतं तु हुतं भवेत्।। १३।।
अग्ने गोभिर्न इत्येतत् मेधावृद्धिकरं परम्। ध्रुवं ध्रुवेणेति हुतं स्थानलाभकरं भवेत्।। १४।।
युनक्तिसीरा वियुगा कृषिलाभकरं भवेत्। अयं ते योनिरित्येतत् पुत्रलाभकरं भवेत्।। १५।।
अहन्ते भग इत्येतद्भवेत् सौभाग्यवर्धनम्। ये मे पा[2]शास्तथाप्येतद् बन्धनान्मोक्षकारणम्।। १६।।
अहन्नहन्निति रिपून्नाशयेद्धोमजाप्यतः। त्वमुत्तममिति वैतद् यशोबुद्धिविवर्धनम् ।। १७।।
यथा मृगवतीत्येतत् स्त्रीणां सौभाग्यवर्धनम्। येन देही त्विदं चैव गर्भलाभकरं भवेत्।। १८।।
शिवः शिवाभिरित्येतत् क्रुद्धं भूपं प्रसादयेत्। बृहस्पतिर्नः[3] परिपातु पथि स्वस्त्ययनं भवेत्।।१९।।
मुञ्चामि त्वेति च जपादपमृत्युनिवारणम्। अथर्वशिरसोऽध्येता सर्वपापैः प्रमुच्यते।। २०।।
प्राधान्येन तु मन्त्राणां किञ्चित्कर्म[4] तवेरितम्। वृक्षाणां यज्ञियानां तु समिधः प्रथमं हविः।। २१।।
आज्यं च व्रीहयश्चैव तथा वै गौरसर्षपाः। अक्षतानि तिलाश्चैव दधिक्षीरे च भार्गवः।। २२।।
दर्भास्तथैव दूर्वाश्च बिल्वानि कमलानि च। शान्तिपुष्टिकराण्याहुर्द्रव्याण्येतानि सर्वतः।। २३।।
तैलं कणानि धर्मज्ञ राजिका रुधिरं विषम्। समिधः कण्टकोपेता अभिचारेषु योयजेत्।। २४।।
आर्षं वै दैवतं छन्दो विनियोगज्ञ आचरेत्।..।।

इत्यथर्वविधानम्।। अथ मृत्युञ्जयप्रयोगो ग्रन्थान्तरे—

चतुरस्त्रं चतुर्द्वारं त्रिरेखं पद्मगर्भितम्। हस्तत्रयप्रमाणं तु तण्डुलैर्मण्डलं लिखेत्।। १।।
भैरवीर्भैरवान् सिद्धीर्दिशो नागानुपग्रहान्। पीठोपपीठसंयुक्तदिक्पालादिसमन्वितम्।। २।।
देवतानां चतुष्षष्टिं लिखेत् पद्मे सुशोभने। एकैकपद्मपत्रेषु वसुसंख्या दले दले।। ३।।
प्रणवादिनमोन्तैस्तु नाममन्त्रैः प्रपूजयेत्। गन्धपुष्पाक्षतैर्धूपदीपनैवेदनादिकैः ।। ४।।
अर्चयेत् पद्मपत्रेषु सर्वकार्यप्रसादकान्। सौवर्णं त्र्यम्बकं कुर्यात् पलेनार्धपलेन वा।। ५।।
गोमयेन गुडेनापि तथा वित्तानुसारतः। मृत्युञ्जयेन मन्त्रेण पूजयेदुपचारकैः ।। ६।।
सौम्यद्वारे महाभाग देवदेवं घटे न्यसेत्। जपेन्मृत्युञ्जयं मन्त्रं तदग्रे तु सहस्त्रकम्।। ७।।
देवीसूक्तं जपेत् तावद्रुद्राध्यायं विशेषतः। अथवा बहुभिर्विप्रैः कोटिलक्षायुतादिकम्।। ८।।
जप्त्वा पूर्वं विघ्नराजं सर्वकार्यप्रसाधनम्। षण्मासं राज्यकामस्तु पुत्रकामस्तथैव च।। ९।।
शत्रुनाशनकामस्तु वर्षान्तमपि कारयेत्। षण्मासं पूजयेद्विद्वान् महारोगैः प्रपीडितः।। १०।।
मासमेकं तु मासार्धं कुर्याद्रोगाकुलीकृतः। वन्दीवेश्मनि दुर्गे वा बद्धो मुच्यते बन्धनात्।। ११।।

---

*(१९।५६।१)।[1] इयं वेदी' ख.पाठः। [2] 'एते पन्थाः' ख.पाठः। [3] 'बृहस्पते नः परिपातुं' ख.पाठः। [4] 'कर्मावतारितम्' ग.पाठः।

षाण्मासिकप्रयोगाच्च द्विगुणान्नात्र संशय:। महारिष्टभयग्रस्त: प्रयोगमिममाचरेत्।। १२।।
न चारिष्टभयं घोरं प्राप्नुयादार्तिमेव च। महापापसमुद्भूतं दृढकर्मसमर्जितम्।। १३।।
प्रयोगात् त्र्यम्बकाख्याच्च न त्वा[1]रिष्टभयं क्वचित्। एतन्मण्डलमध्यस्थोऽभिषिक्त: पुरुषो यदा।।१४।।
तत: प्रभृति युद्धेषु शत्रूञ्जयति निश्चितम्। राज्यभ्रष्टो लभेद्राज्यं क्षीणायुर्म्रियते न च।। १५।।
मुक्त्वा पीडां ग्रहा: सर्वे शान्तिं कुर्वन्ति नित्यश:। प्रयोगस्य प्रभावेन नात्र कार्या विचारणा।।१६।।
प्रयोगमपरं वक्ष्ये रहस्यं त्र्यम्बकाभिधम्। सर्वार्थसाधनं पुण्यं सर्वोपद्रवनाशनम् ।। १७।।
यत्कृते सर्वराजानो राजपुत्राश्च मन्त्रिण:। राष्ट्रस्था: सर्वलोकाश्च तत्क्षणात् तद्वचोनुगा:।। १८।।
अवश्या वश्यतां यान्ति दुष्टस्त्रीक्षुद्रजन्तव:। वैरिणो वशगास्तस्य प्रयोगस्य प्रभावत:।। १९।।
सिध्यन्त्यखिलकार्याणि दुर्लभान्यपि तस्य तु। तत्रादौ पूजयेद् देवं गणेशं विधिवत् सुधी:।।२०।।
लिङ्गानेकादशमितान् पूजयेद्गुडसम्भवान्। पार्थिवान् वा प्रयत्नेन तदलाभे प्रयोजयेत्।। २१।।
रक्तवस्त्रैस्तथा गन्धैरुपचारै: समन्त्रकै:। पूजयेच्च तथा देवीं पठेच्चण्डीं विधानत:।। २२।।
कोटिलक्षार्धकं जप्त्वा मन्त्रं मृत्युञ्जयाभिधम्। ओंजूंस: इति वै मन्त्रं त्र्यम्बकाख्यं सनातनम्।।२३।।
कुण्डे षडस्रसंयुक्ते त्र्यस्रे वा विधिवत् कृते। स्वगृह्योक्तविधानेन स्थाप्य तत्र हुताशनम्।। २४।।
होमयेत् तद्दशांशेन मध्वाज्यतिलसर्षपै:। आलिखेन्मण्डलं तत्र तण्डुलै: शोभनं बुध:।। २५।।
चतुरस्त्रं चतुर्द्वारं त्रिरेखं पद्मगर्भितम्। साधकस्य त्रिभिर्हस्तैर्मितं हीनाधिकं न तत्।। २६।।
तन्मध्ये शोभनं पद्मं कृत्वा चाष्टदलान्वितम्। एकैकपद्मपत्रे तु वसुसंख्या दले दले।। २७।।
भैरवीर्भैरवान् सिद्धीर्दिशो नागानुपग्रहान्। पीठोपीठसंयुक्तान् दिक्पालैरष्टभिर्युतान् ।। २८।।
चतुष्षष्टिमितान् देवान् विधिना स्थाप्य तण्डुलै:। गन्धपुष्पोपचारैश्च नैवेद्यैर्विविधैस्तथा।। २९।।
प्रणवादिनमोन्तैश्च नाममन्त्रै: प्रपूजयेत्। पूर्वद्वारे गणेशेन्द्रौ शिवमुत्तरतस्तथा ।। ३०।।
वरुणं पश्चिमे देवं यमं याम्ये विभुं तथा। ईशान्यां कलशं स्थाप्य तीर्थवारिसमन्वितम्।। ३१।।
मृत्युञ्जयेन मन्त्रेण शतवाराभिमन्त्रितम्। सम्पूज्य विधिवद्राजा सिवर्जनमथाचरेत् ।। ३२।।
यान्तु देवगणा: सर्वे पूजामादाय मामकीम्। इष्टकामफलार्थाय पुनरागमनाय च।। ३३।।
अभिषिञ्चेत् ततो वीरं सङ्ग्रामे विजयी भवेत्। श्रद्धयापि कृते ह्यस्मिन् प्रयोगे त्र्यम्बकाभिधे।।३४।।
यथेप्सितमवाप्नोति फलं रुद्रप्रभावत:। अश्रद्धयाल्पकरणात् फलमल्पं प्रजायते ।। ३५।।
यथाविभवतश्चापि महदैश्वर्य्यमाप्नुयात्। ऋत्विग्भ्यो दक्षिणां दद्यात् प्रयोगस्य प्रसिद्धये।। ३६।।
यथाशक्त्या तथा दद्यादाचार्याय विशेषत:। ब्राह्मणान् भोजयेच्छक्त्या स्वयं भुञ्जीत वाग्यत:।।३७।।

इति। मृत्युञ्जयप्रयोगविशेष:।। अथ पार्थिवपूजाविशेषो ग्रन्थान्तरे—

कार्तिके मार्गशीर्षे वा माघे वैशाख एव च[2]। श्रावणे बहुले पक्षे व्रतस्याचरणं शुभम्।। १।।

---

१. 'न चा' ख. पाठ:। २. 'संज्ञके' ख. पाठ:।

लिङ्गं पार्थिवसंज्ञं तु कुर्यात् सम्पत्प्रदायकम्। शुभेऽह्नि प्रातरुत्थाय शिवं ध्यात्वा विधानतः।। २।।
गत्वा प्राचीदिशं तत्र पठित्वा मन्त्रमुत्तमम्। नमो गणेभ्य इति च मृदं ग्राह्य प्रयत्नतः।। ३।।
ये पृथिव्यामित्येतच्च स्नात्वा पञ्चाक्षरं भवेत्। ततस्तु तर्पणं कार्यं शिवमन्त्रैः पृथक्पृथक्।।४।।
शिवं शर्वं तथा चोग्रं मृडं च भवमेव च। शशिशेखरसंज्ञं च शङ्करं च महेश्वरम्।। ५।।
नवमं विश्वरूपं च दशमं च कपर्दिनम्। त्रियम्बकं तर्पयामि प्रणवादींश्च तर्पयेत्।। ६।।
ततो नित्यक्रियां कृत्वा ध्यात्वा देवं महेश्वरम्। लिङ्गान्येकादशाष्टौ वा पञ्च वा कारयेत् सुधीः।।७।।
मन्त्रमुच्चार्य देवेभ्यो ये दिवीति विधानतः। मा नस्तोकेति मन्त्रेण तानि सम्प्रोक्ष्य वारिणा।। ८।।
ये पृथिव्यामिति पठन् आसनानि प्रकल्पयेत्। ओं नमो भगवत्यै च उमादेव्यै च शङ्कर।। ९।।
प्रियायै नम इत्यम्बां वामदेशे नियोजयेत्। ततश्च स्वशरीरे तु न्यासं कुर्यात् समाहितः।। १०।।
ललाटे तु शिवं न्यस्येत् कण्ठे रुद्रं ततः परम्। ईशानं नाभिदेशे तु जान्वोः शङ्करमेव च।।११।।
गुह्ये सर्वव्यापिनं च पञ्चाङ्गेषु ततः परम्। पञ्चब्रह्ममनूंश्चैव तेषु लिङ्गेषु वै द्विजः।। १२।।
मङ्गलायतनं देवं युवानमतिसुन्दरम्। ध्यायेत् कल्पतरोर्मूले समासीनं सहोमया ।। १३।।
एवं ध्यात्वा सहस्राणि सहस्रश इतीरयन्। हिरण्यबाहवे वस्त्रं भूषणं शम्भवाय च।। १४।।
धृष्णवे चोत्तरीयं किरिकेभ्य उपवीतकम्। गन्धं दद्यान्नमः श्वभ्यः पुष्पं पार्याय मन्त्रतः।। १५।।
नमः कपर्दिने धूपं दीपं च नम आशवे। बभ्लुशाय च नैवेद्यं पर्ण्याय चेति पर्णकम्।। १६।।
आरार्तिकं ते तेजांसि एष ते च प्रदक्षिणम्। नमोऽस्त्विवति नमस्कारं एष रुद्रार्चनाविधिः।। १७।।
अथवा ह्यसुसमये ह्युपचाराष्टकं भवेत्। पञ्चाक्षरेण मन्त्रेण दशाक्षरेण वा पुनः।। १८।।
नमः शिवायेति मन्त्रः पञ्चाक्षर इति स्मृतः। ओंनमो भगशब्दान्ते वते रुद्राय वै भवेत्।। १९।।
मन्त्रो दशाक्षरः प्रोक्तः सर्वाभीष्टफलप्रदः। गन्धं पुष्पं च नैवेद्यं धूपं दीपं तथैव च।। २०।।
ताम्बूलं च नमस्कारं प्रादक्षिण्यं तथैव च। उपचारांस्ततो दत्त्वा गौरीशं वै क्षमापयेत्।। २१।।
अष्ट मूर्तीस्ततः पूज्याः शर्वाय क्षितिमूर्तये। नमोन्तेन च सम्पूज्य भवाय जलमूर्तये।। २२।।
नमो रुद्राय तत्राग्निमूर्तये नम ईरितः। उग्राय वायुमूर्तिं ङे नमो भीमाय तत्परम्।। २३।।
आकाशमूर्तये पश्चान्नमः पशुपतिं तथा। ङेन्तं च यजमानेति मूर्तये तदनन्तरम्।। २४।।
ततो नमो महादेवं ङेन्तं सोमादिमूर्तये। नम ईशानाय सूर्यमूर्तये नम ईरितः।। २५।।
अष्ट मूर्तीः शङ्करस्य वामावर्तेन पूजयेत्। लिङ्गस्तवं प्रवक्ष्यामि शृणु पापहरं परम्।। २६।।
सर्वज्ञ ज्ञानविज्ञानप्रदानैकमहात्मने । नमस्ते देवदेवेश सर्वभूतहिते रत।। २७।।
अनन्तकीर्तिसम्पन्न अनन्तासनसंस्थित। अनन्तकान्तिसम्भोग परमेश नमोऽस्तु ते।। २८।।
बहुरूप महारूप सर्वरूपोत्तमोत्तम। पशुपाशार्णवासीन दृढव्रत नमोऽस्तु ते।। २९।।

परापर परातीत उत्पत्तिस्थितिकारक। सर्वार्थसाधनोपाय विश्वेश्वर नमोऽस्तु ते ।। ३०।।
स्वभावनिर्मलाकार[१] सर्वव्याधिविनाशन। योगियोगमहायोग योगीश्वर[२] नमोऽस्तु ते।। ३१।।
कृत्वा लिङ्गप्रतिष्ठां तु स्तवमेनमुदीरयेत्। लिङ्गस्तवं महापुण्यं य: शृणोति सदा नर:।। ३२।।
नोत्पद्यते हि संसारे स्थानं प्राप्नोति शाश्वतम्। तस्मात् सर्वप्रयत्नेन शृणुयाल्लिङ्गसंस्तवम्।।३३।।
पापकञ्चुकनिर्मुक्त: प्राप्नोति परमं पदम्। इति स्तुत्वा चिरं प्रार्थ्य मन्त्रमेनमुदीरयेत्।। ३४।।
अङ्गहीनं क्रियाहीनं विधिहीनं महेश्वर। पूजितोऽसि मया देव तत् क्षमस्व भ्रमात् कृतम्।। ३५।।
यद्यप्युपहतै: पुष्पैरपास्तैर्भावदूषितै:। केशकीटादिविद्धैश्च पूजितोऽसि मया प्रभो।। ३६।।
अन्यत्रासक्तचित्तेन क्रियाहीनेन वा प्रभो। मंनोवाक्कायदुष्टेन पूजितोऽसि त्रिलोचन।। ३७।।
यच्चोपहतपात्रेण कृतमर्घ्यादिकं[३] मया। तामसेन च[४] भावेन तत् क्षमस्व मम प्रभो।। ३८।।
मन्त्रेणाक्षरहीनेन पुष्पेण विह्वलेन[५] च। पूजितोऽसि महादेव तत् सर्वं क्षम्यतां मम।। ३९।।
व्रतं सम्पूर्णतां यातु फलं चाक्षयमस्तु[६] मे।...।।

इति।। अथ भयनाशनम्—

गौरीवल्लभ कामारे कालकूटविषाशन। मामुद्धरापदम्भोधेस्त्रिपुरघ्नान्तकान्तक।। १।।
पाहि पाहि महादेव भक्तवर्गैकपोषक। भयं दूरीकुरुष्वाद्य किमेतदनुवर्तते।। २।।

इति स्मरणेन भयनाशनं भवति।। अथापद्विनाशनम्—

सर्वार्थसाधनोपाय सर्वैश्वर्यप्रदायक। समस्तापत्प्रतीकार चन्द्रशेखर ते नम:।। १।।

इत्यापद्विनाशनम्।। अथ बालरक्षायन्त्रम्—

तारादिलृद्वयजलद्विठवर्णवीता रा(ठा)न्तान्तरे[७] विलिखिता विधिनैव माया।
साध्यावृता बहिरथो वदनार्धचन्द्रैर्यन्त्रं शिशो रुरुदिषां विनिहन्ति सद्य:।। १।।

इति बालरक्षायन्त्रम्।। अथ कुबेरयन्त्रम्—

कर्णिकायां साध्यगर्भं[८] तारं पत्रेषु चाष्टसु। वर्णान् कुबेरमन्त्रस्य चतुरश्चतुरो बहि:।। १।।
अया ते अग्ने समिधा ४।४।२५ मातृकार्णैश्च वेष्टयेत्। भूपुरास्त्रिषु ठंबीजं दिक्षु वंबीजमेव च।।२।।
एतद्यन्त्रं कुबेरस्य रक्षाकरमनुत्तमम् । चातुर्थिकादिविषमज्वरानाशु निहन्ति च ।। ३।।

इति कुबेरयन्त्रम्।। ओंह्रींक्लींकालिके अमुकस्य बन्दीमोक्षं कुरु २ स्वाहा। ''गौरीवल्लभ कामारे कालकूटनिषूदन। त्रिपुरध्वान्तकर्त्रे च निगडध्वंसकारिणे।।'' इति मन्त्रद्वयं जपेद् बन्दीमोक्षो भवति।।

अथ भूरिविजयमन्त्र:— भगे भगे क्षोभय मोहय छेदय क्लेदय क्लिन्नस्य शरीरे हुंफट् स्वाहा।। २६ वर्णा:।

एष मन्त्रवर: श्रीमान् त्रिषु लोकेषु विश्रुत:। नाम्ना भूरिजय इति स्वयं देवेन भाषित:।। १।।
दुर्भगानां च लोकानां निर्द्रव्याणां वरानने। बुद्धितेजोविहीनानां विद्यागुणविवर्जिनाम्।। २।।

---

[१] 'भोग' ख. पाठ:। [२] 'योगयोगि महायोगि योगेश्वर' ख. पाठ:। [३] 'र्चा' ख. पाठ:। [४] 'स्वभावेन' क. पाठ:।
[५] 'विकलेन' क. पाठ:। [६] 'मश्नुते' क. ग. पाठ:। [७] 'टान्ताम्बरे' क. पाठ:। [८] 'साध्ययन्त्रं' ग. पाठ:।

एतज्जपेन तत् सर्वं सम्प्राप्नोति च मानवः। यद्यद्विहीनो जपते तत्तत् प्राप्नोति मानवः।। ३।।

इति।। अथ रत्नधारामन्त्रः— रत्नरत्नमहारत्नधारा स्वाहा। अस्य प्रजापतिर्ऋषिर्गायत्री च्छन्दः रत्नधाराख्यो देवता रत्नधारालाभे विनियोगः। साधकाय रत्नधारावर्षन्तं हस्ताभ्यां हारमुकुटमणिभूषितं ध्यायन् जपेत्, महती रत्नसमृद्धिः।। अथ कुबेरमन्त्रः (होमप्रकारः) वैश्रवणाय स्वाहा, यक्षेशाय०, पिङ्गलाय०, विटिदाय०, कुबेराय०, धनदाय०, राजराजाय०, भूःस्वाहा, भुवः स्वाहा, स्वः स्वाहा, भूर्भुवः स्वाहा। एते दश मन्त्रा धनप्रदाः होमपीठे कनकवर्णे करपुटे करण्डविलसितंकरद्वयबृहदुदररत्नमण्डितशङ्खपद्मनिधिवृतं कुबेरं वटवृक्षाधो ध्यात्वा, वैश्वदेवावसाने अग्निमावाह्य[1] तन्मुखे आज्याक्तवटसमिद्भिर्दशभिर्दशभिर्मन्त्रैर्जुहुयात्, बहुतरधनलाभः। घृताक्तपायसैर्घृताक्तबिल्वसमिद्भिर्वा जुहुयाद्धनलाभः। ''घण्टाकर्ण विरूपाक्ष व्यात्तानन भयङ्कर। विस्फोटकरुजं हत्वा रक्ष रक्ष महाबल''। द्वात्रिंशद्वारं जलमभिमन्त्र्य पेयं विस्फोटकहरणं भवति।।

अथ हनुमत्प्रकरणम्। तत्र पञ्चमुखहनुमन्मन्त्रविधिस्तत्र हनुमद्गह्वरे— अस्य पञ्चमुखहनुमन्मन्त्रस्य, ब्रह्मा ऋषिः, गायत्री छन्दः, पञ्चमुखविराड्रूपी हनुमान् परमात्मा देवता, ह्रां बीजं, ह्रीं शक्तिः, हूं कीलकम्, ममाभीष्टसिद्धये विनियोगः। षड्दीर्घमायया षडङ्गं विधाय ध्यायेत्।

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरि। मत्कृतं देवदेवस्य ध्यानं हनुमतः परम्।। १।।
पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम्। बाहुभिर्दशभिर्युक्तं सर्वकाम्यार्थसिद्धिदम्।। २।।
पूर्वे तु वानरं वक्त्रं कोटिसूर्यसमप्रभम्। दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम्।। ३।।
अत्रैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्। अत्युग्रतेजोवपुषं भीषणं भयनाशनम्।। ४।।
पश्चिमं गारुडं वक्त्रं वज्रतुण्डं महाबलम्। सर्वरोग[2]प्रशमनं विषरोग[3]निवारणम्।। ५।।
उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोनिभम्। पातालानिल[4]भेत्तारं ज्वररोगनिकृन्तनम्।। ६।।
ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम्। एकवक्त्रेण विप्रेन्द्र तारकाख्यं महाबलम्।। ७।।
कुर्वन्तं शरणं तस्य सर्वशत्रुहरं परम्। खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम्।। ८।।
ध्रुवमुष्टिगदामुण्डं दशभिर्मुनिपुङ्गव। एतान्यायुधजालानि धारयन्तं यजामहे।। ९।।
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम्। दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।। १०।।
सर्वाश्चर्यमयं देवमनन्तं विश्वतो मुखम्।......................................।।

पञ्चास्यमच्युतम[5]नेकविचित्रवीर्यवक्त्रं सुशङ्खविधृतं कपिराजवर्यम्।
पीताम्बरादिमुकुटैरभिशोभिताङ्गं पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि।। ११।।

मर्कटेश महोत्साह सर्वलोकविनाशन। शत्रुसंहार मां रक्ष श्रियं दापय देहि मे।। १२।।

इति प्रार्थ्य। (१) ओंनमः पञ्चवदनाय पूर्वकपिमुखेन सकलशत्रुसंहरणाय महाबलाय स्वाहा। (२) ओंनमः पञ्चवदनाय दक्षिणमुखेन करालनृसिंहाय सकलभूतप्रमथनाय स्वाहा (३)। ओंनमः पञ्चवदनाय पश्चिममुखेन वीरगरुडाय सकलविषहराय

---

[1] 'ग्नावेवावाह्य' ख. पाठः। [2] 'सर्वनाग' क. पाठः। [3] 'भूतनिकृन्तनम्' क. पाठः। [4] 'लनिभ' क. पाठः।
[5] 'अनन्तमनेकवीर्य' क. ग. पाठः।

स्वाहा। (४) ओंनम: पञ्चवदनाय उत्तरमुखेनादिवराहाय सकलवशङ्कराय स्वाहा। (५) ओंनम: पञ्चवदनाय ऊर्ध्वमुखेन हनुमद्देवाय सकलजनवशीकराय महादेवाय स्वाहा। इति पञ्च मन्त्राञ्जपेत्, सर्वकार्यसिद्धिर्भवति।। विभीषण उवाच–

भगवंस्तार्क्ष्य पक्षीन्द्र वद कल्पं[१] हनूमत:। साङ्गोपाङ्गस्य मन्त्रस्य श्रीमद्धनुमत: स्मृतम्।। १।।

ताक्ष्‍र्य उवाय–

पवनात्मजमन्त्राणां वदामि गह्वरं परम्। येन विज्ञानमात्रेण हनुमान् सुप्रसीदति।। २।।
प्रणवाद्यामर्ककलां बिन्दुनोर्ध्वविभूषिताम्। रमां मायां च सम्भिद्य मनुतुर्यरसस्वरै:।। ३।।
सबिन्दुभि: पुनश्चाथ शिवाद्यमस्त्रवर्णकम्। एतद्गतं जयारूढं शिवस्वरेण संयुतम्।। ४।।
बिन्दुमद्वा तदग्रे च खमस्त्रेण युतं वदेत्। वह्नियुक्तं शूलपाणिस्वरयुक्तं च बिन्दुमत्।। ५।।
ततो वदेच्छिवं चान्द्रसंयुतं'वह्निसंस्थितम्। मनुस्वरेण संयुक्तं भूषितं बिन्दुनोपरि।। ६।।
तत: साद्यं च शशिना संयुतं शून्यवर्णयुक्। पान्त्यवह्निसमायुक्तं वागादिसंयुतं वदेत्।। ७।।
सबिन्दुकं तत: शैवं शशिसंस्थं च बिन्दुमत्। शक्रस्वरयुतं वाच्यं रुद्रबीजादिको मनु:।। ८।।
ततो नतिं समुच्चार्य ङेन्तं हनुमत: पदम्। अस्मच्छब्दं च षष्ठ्यन्तं परं षष्ठीयुतं तत:।। ९।।
चकार: क्षयकुष्ठेति गण्डमाला च स्फोटक:। क्षतज्वरेति च तत: एकाहिकपदं तत:।। १०।।
द्व्याहिकं त्र्याहिकं चेति चातुर्थिकं च सन्ततम्। ज्वरेति च ततो वाच्यं सान्निपातिकमीरयेत्।।११ ।।
ज्वरभूतज्वरमन्त्र-ज्वरशूल-भगन्दरा:। मूत्रकृच्छ्रकपालेति शूलकर्णेति शूलकम्।। १२।।
अक्षिशूलोदरशूल-हस्तशूलपदं तत:। पादशूलादि प्रवदेत् सर्वव्याधीन् क्षणेन च।। १३।।
भिन्धियुग्मं छिन्धियुग्मं नाशयेति द्विधा वद। निकृन्तयुगं चैव छेदयेति द्विधा वद।। १४।।
भेदयेति द्विधा वाच्यं महावीरपदं तत:। हनूमन् हाक्षरं द्वेधा द्विधा तु कवचं द्विधा।। १५।।
घेशब्दयुगलं चोक्त्वा बीजानि च ततो वदेत्। द्वितीयपञ्चषष्ठैश्च कवचास्त्राग्निवल्लभा।। १६।।
पञ्चषष्ट्युत्तरशतवर्णा मन्त्रे प्रकीर्तिता:। अयं रोगप्रशान्त्यर्थं जप्तव्य: सततं नृभि:।। १७।।

ओंऐंश्रींह्रौंह्रींह्रूं सफ्रें खफ्रें हस्रौं हसखफ्रें हसौं नमो हनुमते मम परस्य च क्षयकुष्ठगण्डमालास्फोटकक्षतज्वरैकाहिकद्व्याहिकत्र्याहिकचातुर्थिकसन्ततज्वरसान्निपातिकज्वरभूतज्वरमन्त्रज्वरशूलभगन्दरमूत्रकृच्छ्रकपालशूलकर्णशूलाक्षिशूलोदरशूलहस्तशूलपादशूलादिसर्वव्याधीन् क्षणेन भिन्धि २ च्छिन्धि २ नाशय २ निकृन्तय २ च्छेदय २ भेदय २ महावीरहनूमन् हाहाहुंहुंघेघेह्रांह्रुंह्रूं फट् स्वाहा, (१६५ वर्णा:) इत्युद्धार:।

भस्मादाय त्रिधा ह्येवं मन्त्रयित्वा ददेत् सुधी:। मन्त्रे मे गदिता रोगास्ते नश्यन्त्यस्य चाज्ञया।।१ ।।

इति। तथा मन्त्रान्तरम्–

आनिलेयस्यान्यमन्त्रं प्रवदामि समासत:। सर्वलोकहितार्थाय सद्य: प्रत्ययकारकम्।। १।।
वेदादि च ततो वाचं लक्ष्मीं मायां त्रिधोच्चरेत्। द्वितीयतुर्य्यषष्ठैश्च स्वरै: समनुवर्तिनीम्।। २।।

---

[१] 'वद तस्य' क. पाठ:।

शशिपान्त्यं वह्निसंस्थमेकारेण विभूषितम्। बिन्दुमच्च ततः शून्यं पान्त्ययुक्तं सवह्निकम्।। ३।।
एकादशकलाढ्यं च बिन्दुनोर्ध्वविभूषितम्। शिवचन्द्राग्निसंरूढमौयुक्तं बिन्दुभूषितम् ।। ४।।
भार्गं सोमं शून्यसंस्थमस्त्रार्णाग्निसमन्वितम्। अर्कादिककलायुक्तं बिन्द्वाढ्यं विजयप्रदम्।। ५।।
हंसयुक्तं मनुकलायुक्तं बिन्दुविभूषितम्। बीजकूटे त्विमे वर्णा एकादश निवेशिताः।। ६।।
हृदयं हनुमच्छब्दं चतुर्थ्यन्तं समुच्चरेत्। महाबल ततश्चाथ पराक्रम ममेति च ।। ७।।
परस्य च चतुर्वर्णात् भूतप्रेतपिशाचकान्। शाकिनी डाकिनी चाथ यंक्षिणी पूतनेति च।। ८।।
मारी ततो महामारी कृत्या यक्षेति राक्षस। ततो भैरववेतालग्रहब्रह्मग्रहेति च ।। ९।।
ब्रह्मराक्षसादिकेति जातक्रूरेति चोच्चरेत्। बाधाः क्षणेन च हन द्विधा भञ्जययुग्मकम्।। १०।।
विनाशय द्विधा वाच्यं वारयेति द्विधा वदेत्। बन्धयेति युगं चैव नुदेति च तथोच्चरेत्।। ११।।
सुन्देति च द्विधा प्रोक्तं धुनेति च द्विधा वदेत्। तथोच्चरेन्मोचयेति मामेनं च ततः परम्।। १२।।
रक्षेति युगलं वाच्यं महामहेश्वरं[1] पदम्। ततो रुद्रावतारेति हा त्रिधा कवचं त्रिधा।। १३।।
घेऽक्षरं च त्रिवारं स्यात् कचास्त्राग्निवल्लभा। एकषष्ट्युत्तरशतं(?)वर्णा मन्त्रे प्रकीर्तिताः।। १४।।

अथोद्धारः– ओंऐंश्रींह्रौंह्रींहूं स्फ्रें खफ्रें ह्स्रौं हसख्फ्रें ह्सौं नमो हनुमते महाबलपराक्रम मम परस्य च भूतप्रेतपिशाचकशाकिनीडाकिनीयक्षिणीपूतनामारीमहामारीकृत्यायक्षराक्षसभैरववेतालग्रहब्रह्मग्रहब्रह्मराक्षसादिकजातक्रूरबाधाः क्षणेन हन २ भञ्जय २ विनाशय २ वारय २ बन्धय २ नुद २ सुन्द २ धुन २ मोचय २ मामेनं च रक्ष २ महामहेश्वर रुद्रावतार हाहाहा हुंहुंहुं घेघेघे हुं फट् स्वाहा।।

सर्वत्र सर्वभूतानां नाशको हनुमन्मनुः। भस्म वारि सर्षपांश्च सिकताश्चाभिमन्त्रयेत्।। १५।।
यत्र क्वापि भयं शङ्का विकिरेत्तत्र तत्र तु। एकैकं वा समूहं वा दशदिक्षु इतस्ततः।। १६।।
विकीर्य भस्म वारिभ्यो भीतस्य प्रक्षिपेत्तनौ। पानार्थं वारि दातव्यं भस्म चाङ्गे निवेशयेत्।। १७।।

इति। तथा मन्त्रान्तरम्–

अपरं चाञ्जनेयस्य मन्त्रं वच्मि समासतः। कलौ जप्तं तु सर्वत्राभयदं सर्वसिद्धिदम्।। १।।
ओंकारवाग्भवरमा ह्रांह्रींहूं च ततः परम्। पूर्ववत् पञ्चकूटानि बीजानि च तथोच्चरेत्।। २।।
एकादशेति कूटानि प्रोच्चार्य च ततः परम्। हनुमते चतुर्वर्णान् मम शब्दं परस्य च।। ३।।
महाभयानि पञ्चार्णान् सर्वव्याघ्रादितस्कर। जलाग्निविषजङ्गमस्थावरसहजेति च ।। ४।।
कृत्रिमोपविषं चेति महासाङ्ग्रामिकं तथा। अरण्यवादविवादशस्त्राण्यस्त्रादिकानि च।। ५।।
संहरेति द्विधोच्चार्य विनाशय तथा पुनः। तथोच्चरेद् ग्रसयुगं ग्रासय त्रोटय द्विधा।। ६।।
भञ्ज द्विधा भञ्जयाथ द्विधा स्तम्भय वै द्विधा। कुण्ठयेति द्विधा वाच्यं [2]मोहयेति द्विधोच्चरेत्।। ७।।
कवचं च त्रिधोच्चार्य घेक्षरं च त्रिधा वद। क्रोधमस्त्रं वह्निजायासंयुतो मनुरीरितः ।। ८।।

---

[1]. 'मायेश्वर' ग. पाठः। [2]. 'मोटय' क. पाठः।

एकषष्ट्युत्तरशतं (?) मन्त्रे वर्णा निवेशिताः। शस्त्रास्त्रविषसर्पादिव्यथाभयविनाशनः।। ९।।
मन्त्रोऽयं रामदूतस्य चिन्तितेप्सितसाधकः।...।।

अथोद्धारः—, ओंऐंश्रींह्रौंह्रींह्रूं स्फ्रें ख्फ्रें ह्स्रौं हसख्फ्रें ह्सौं हनुमते मम परस्य च महाभयानि सर्पव्याघ्रतस्करजलाग्निविषजङ्गमस्थावरसहजकृत्रिमोपविषमहासङ्ग्रामिकारण्यवादविवादशस्त्रास्त्रादिकानि संहर २ विनाशय २ ग्रस २ ग्रासय २ त्रोटय २ भञ्ज २ भञ्जय २ स्तम्भय २ कुण्ठय २ मोहय २ हुं ३ घे ३ हुं फट् स्वाहा। तथा—मन्त्रान्तरम्।

मारुतेमन्त्रमन्यं[1] च ब्रुवे सर्वमनोहरम्। सद्यः फलति भक्तानां कार्यप्रत्ययकारकम्।। १।।
तारं वागिन्दिरां देवीं हृल्लेखां च त्रिधा वद। आद्यस्वरैस्त्रिभिश्चाथ बिन्दुनाङ्कितमस्तकाम्।। २।।
सपान्तं वह्निसंस्थं च ईशानस्वरसंयुतम्। बिन्दुनादं ततः प्रोक्तमितरं कूटकं शृणु।। ३।।
द्वितीयं तु कवर्गस्य पवर्गस्य तदेव हि। यवर्गस्य द्वितीयेन संयुक्तमेयुतं कुरु।। ४।।
बिन्दुना भूषितं मूर्ध्नि ततोऽन्यच्छृणु बीजकम्। शिवेन्दुवह्निमच्छक्रस्वराढ्यं बिन्दुभूषितम्।। ५।।
प्राणजीवशून्यपान्तमनलेशस्वरान्वितम्। बिन्द्वन्तिकशिरस्कं च कूटं पङ्क्त्यभिधं महत्।। ६।।
शिवशक्तियुतं चान्यदिन्द्रस्वरसमन्वितम्। बिन्द्वन्तिकं विद्धि कूटमेकादशमतिध्रुवम्।। ७।।
नतिर्हनुमते चेति पश्चाद्राक्षसकुलेति वै। दावानल द्वादशार्ककोटिसूर्यप्रभा—पदम्।। ८।।
ज्वलत्तनूरुह—पदं भीमनादं ममोच्चरेत्। परस्य च दुष्टपदं दुर्जनस्य महापदम्।। ९।।
पकारकपदं वादि—विवादद्वेषकारक। ततः कार्यभञ्जकेति क्रूरप्रकृतिकं पदम्।। १०।।
प्रवृद्धकोपावेशक हन्तु चेति ततः परम्। कामुकादीन् पदं वाच्यं दूरस्थेति पदं ततः।। ११।।
समीपस्थान् भूतभविष्यद्वर्तमानानथोच्चरेत्। पुंस्त्रीनपुंसकांश्चातुर्वर्णान् क्षणेन सत्वरम्।। १२।।
हन द्विधा दह द्विधा संहारय द्विधा वदेत्। मोहयेति द्विधा वाच्यं मर्दयेति द्विधा वदेत्।। १३।।
द्वेषयेति पुनश्चोक्त्वा मार्जारमूषकेति च। (तथा) वत्सद्यः प्राणैश्च वियोजय द्विधोच्चरेत्।। १४।।
विध्वंसय द्विधा झिल्लि[2] द्विधा मूकय च द्विधा। पौनरुक्त्या जारयेति बन्धयेति द्विधा वदेत्।।१५।।
जृम्भयेति द्विधा प्रोक्त्वा पातयेति द्विधा वदेत्। ततो ममपदं चोक्त्वा परस्य च ततः परम्।।१६।।
पादतलाक्रमितांश्च कुरुद्वन्द्वं[3] ततो वदेत्। दासीभूतान् सम्पादय द्विधा हा च त्रिधोच्चरेत्।। १७।।
त्रिः कोपं च त्रिधा घे च कवचास्त्राग्निवल्लभा। वर्णानां द्विशतं प्रोक्तं पञ्चषष्ट्युत्तरं मनौ।। १८।।
विद्वेषे वैरिदुष्टानां क्रूरबुद्धिविनाशने। मन्त्रोऽयं गदितः सत्यं मुनिभिर्मन्त्रपारगैः ।। १९।।
विशेषतो कलौ सद्यः प्रत्ययश्चाल्पबुद्धिभिः। महारुद्रावतारस्य जगत्प्राणात्मजस्य हि।। २०।।
मनुं विद्धि वरिष्ठं च सर्वसिद्धिप्रदं नृणाम्। वारि भस्माभिमन्त्र्याथ सिकताः सर्षपास्तथा।। २१।।
अभिमन्त्र्य प्रविकिरेत् सर्वत्र च इतस्ततः। तल्लङ्घनाद्भवन्त्येव सर्वे दुष्टास्तु सेवकाः।। २२।।

---

[1] 'वर्यं' ग. पाठः। [2] 'त्रिहि' ख. ग. पाठः। [3] :द्वयं' ग. पाठः।

अथोद्धारः– ओंऐंश्रींह्रौंह्रींहूं स्फ्रे ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं नमो हनुमते राक्षसकुलदावानल द्वादशापर्क कोटिसूर्यप्रभाज्वलत्तनूरुह भीमनाद मम परस्य च दुष्टदुर्जनमहापकारकवादिविवादद्वेषकारककार्यभञ्जक क्रूरप्रकृतिकवृद्धकोपावेशकहन्तुकामुकादीन् दूरस्थसमीपस्थान् भूतभविष्यद्वर्तमानान् पुंस्त्रीनपुंसकांश्चातुर्वर्णान् क्षणेन सत्वरं हन २ दह २ संहारय २ मोहय २ मर्दय २ द्वेषय २ मार्जारमूषिकवत् सद्यः प्राणैर्वियोजय २ विध्वंसय २ झिल्लि[1] २ मूकय २ जारय २ बन्धय २ जृम्भय २ पातय २ मम परस्य च पादतलाक्रमितान् कुरु २ दासीभूतान् सम्पादय २ हा २ हुं ३ घे ३ हुं फट् स्वाहा।। तथा–मन्त्रान्तरम्–

वेदमूर्धा तथा वाणी रमा बिन्दुविभूषिता। माया मुखेन वामाक्षिवामश्रुतिविभेदिना।। १।।
बिन्दुना भूषितं मूर्ध्नि षड्बीजानि ततः परम्। चान्द्रं चास्त्रार्णयुक् कृत्वा दहनारुढमेव च।। २।।
शिवस्वरेण संयुक्तमपरं कूटकं शृणु। शून्यं पान्त्यसमायुक्तमग्निनाधोयुतं तथा।। ३।।
एकादशकलायुक्तं बिन्दुमत्तदनन्तरम् । ततो वदेच्छिवं चान्द्रसंयुतं वह्निसंस्थितम्।। ४।।
मनुस्वरेण संयुक्तं बिन्दुनापि ततः शिवम्। जीवं शून्यं पान्त्ययुक्तं वह्निनाधो युतं तथा।। ५।।
वाण्यादिकेन संयुक्तं बिन्दुभूषितमस्तकम्। शिवमिन्दुयुतं कुर्यात् शतमन्युकलान्वितम्।। ६।।
मस्तके बिन्दुसंयुक्तं तदेतद्बीजपञ्चकम्। नतिर्हनुमते चोक्त्वा त्रैलोक्याक्रमणेति च।। ७।।
पराक्रमेति श्रीरामभक्त मम परस्य च। सर्वशत्रूंश्चतुर्वर्णसम्भवानिति[2] वै वदेत् ।। ८।।
पुंस्त्रीनपुंसकान् भूतभविष्यद्वर्तमानकान्। दूरस्थ च समीपस्थान् राज्ञो नाना ततो वदेत्।। ९।।
नामधेयांस्ततो नाना सुकरेति च कीर्तिजान्। कलत्रपुत्रमित्रेति भृत्यबन्धुसुहृज्जनान्।। १०।।
समेतान् प्रभुशक्तीति सहितान् क्षित्यतः परम्। धनधान्यादिसम्पत्तियुक्तान् राज्ञस्ततः परम्।। ११।।
राजसेवकान् मन्त्रीति पदं मन्त्रिसखानिति। आत्यन्तिकं क्षणेनेति वारयेति द्विधा वद।। १२।।
नानोपायैः पदं चैव ततो मारययुग्मकम्। शस्त्रैश्छेदययुग्मं च अग्निना ज्वालय द्विधा।। १३।।
दाहयेति द्विधा वाच्यं घातयेति द्विधा वद। कुमारवत् पादतलाक्रमणेन ततो वद ।। १४।।
आत्रोटय द्विधा वाच्यं घातयेति द्विधा तथा। बन्धयुग्मं भूतसङ्घैः सह भक्षययुग्मकम्।। १५।।
क्रुद्धचेतसेति नखैर्विदारय द्विधा वद। देशादस्मादिति तत उच्चाटय द्विधा वद्र।। १६।।
पिशाचवद् भ्रंशयेति द्विधा भ्रामय च द्विधा। भयातुरान् विसंज्ञांश्च सद्यः कुरुयुगं वद।। १७।
भस्मीभूतान् द्विधा वाच्यमुन्मूलय पुनर्वद। भक्तजनवत्सलेति सीताशोकापहारक।। १८।।
सर्वत्र मां तथैनं च रक्षयुग्मं च हात्रयम्। क्रोधत्रयं घे-त्रयं च कवचास्त्राग्निवल्लभा।। १९।।
एकचत्वारिंशोत्तरत्रिशतान्यपि च स्फुटम्। वर्णानां गणना ज्ञेया दुष्टारिद्वेषणे तथा।। २०।।
हनुमन्मन्त्रसामर्थ्याद् दुर्जयो मन्त्रविद्भवेत्।..।।

अथोद्धारः– ओंऐंश्रींह्रांह्रींहूं स्फ्रे ख्फ्रें ह्स्रौं हसखफ्रें ह्सौं नमो हनुमते त्रैलोक्याक्रमणपराक्रम श्रीरामभक्त मम परस्य च सर्वशत्रूंश्चतुर्वर्णसम्भवान् पुंस्त्रीनपुंसकान् भूतभविष्यद्वर्तमानकान् दूरस्थसमीपस्थान् राज्ञो नानानामधेयान् नानासुकरकीर्तिजान्

---

[1] 'त्रिहि' ग. पाठः। [2] 'भञ्जनानिति' क. पाठः।

कलत्रपुत्रमित्रभृत्यबन्धुसुहृज्जनसमेतान् प्रभुशक्तिसहितान् क्षितिधनधान्यादिसम्पत्तियुक्तान् राज्ञो राजसेवकान् मन्त्रिमन्त्रिसखानात्यन्तिकं क्षणेन वारय २ नानोपायैर्मारय २ शस्त्रैश्छेदय २ अग्निना ज्वालय २ दाहय २ घातय २ कुमारवत् पादतलाक्रमणेन आत्रोटय २ घातय २ बन्ध २ भूतसङ्घैः सह भक्षय २ क्रुद्धचेतसा नखैर्विदारय २ देशादस्मादुच्चाटय २ पिशाचवद् भ्रंशय २ भ्रामय २ भयातुरान् विसञ्ज्ञांश्च सद्यः कुरु २ भस्मीभूतानुन्मूलय २ भक्तजनवत्सल सीताशोकापहारक सर्वत्र मामेनं च रक्ष २ हा ३ घे ३ हुं फट् स्वाहा।। तथा मन्त्रान्तरम्–

वेदमूर्धा ततो वाणी लक्ष्मीर्बीजत्रयं तत:। द्वितुर्य्यषष्ठभिन्ना च हृल्लेखा समुदीरिता।। १।।
बीजान्येतानि षड्विद्धि सबिन्दूनि महान्त्यपि[1]। शिव: शशी पान्त्यवह्निर्बिन्दुयुक्तं तत: परम्।।२।।
(सफरेणादिसंयुक्तं बिन्दुमद्वैन्दवे तत:। कान्त्यपान्त्यसमारूढं बृहद्धानुस्फुटं युतम् ।। ३।।
ईश्वरेण समायुक्तं बिन्दुभूषितमस्तकम्। शिव: शक्तिश्च वह्निश्च शतमन्युकलायुतम्।। ४।।)*
जीवान्त्यं चन्द्रसंयुक्तं गादिमेन तथा युतम्। अस्त्रवर्णसमोपेतमेवर्णानलसंयुतम् ।। ५।।
बिन्दुना भूषितं पूर्वं सहाद्य[2] समुदीरितम्। शक्त्यारूढ: शिवो ज्ञेयो बिन्दुभूषितमस्तक:।। ६।।
चतुर्दशस्वरोपेतमेतत् कूटमनुक्रमात्। पञ्चकूटानि बीजानि एकादश क्रमेण च।। ७।।
पुनर्वेदादि सम्प्रोक्तं नतिर्हनुमते तत:। प्रकटेति ततश्चान्ते पराक्रमपदं तत:।। ८।।
आक्रान्तदिङ्मण्डलेति यशोवितानधवलीकृत वै तत:।
जगत्त्रितय वज्रदेहेति ज्वलदग्निसूर्यकोटिसमप्रभ।। ९।।
तनूरुहपदं रुद्रावतार लङ्कापुरीदहनेति च। उदधिलङ्घनपदं दशग्रीवशिर:कृतान्तक।। १०।।
सीतासमाश्वासनतस्ततो वायुसुतेति च। अञ्जनीगर्भसम्भूत श्रीरामेति पदं तत:।। ११।।
लक्ष्मणानन्दकरेति कपिसैन्यपदं तत:[3]। प्राकारपदमुच्चार्य ततो द्रोणपदं वदेत्।। १२।।
पर्वतोच्चाटनपदं सुग्रीवसख्यकारण। वालिनिर्हर[4]णकारण ततो द्रोणपदं वदेत्।। १३।।
पर्वतोत्पाटनाशोकवनमुक्त्वा विदारण। अक्ष चेति कुमारेति च्छेदनेति पदं वदेत्।। १४।।
वनरक्षाकरसमूहविभञ्जन ब्रह्मास्त्रमुच्चरेत्। ब्रह्मशक्तिपदस्यान्ते ग्रसनेति ततो वदेत्।। १५।।
तथोद्धरेल्लक्ष्मणेति शक्तिभेदनिवारण। शल्यविशल्यौषधीति समानयन वै तत:।। १६।।
बालोदितभानुपदं मण्डलग्रसनेति च। मेघनादहोमपदं विध्वंसन तत: परम्।। १७।।
इन्द्रजिद्वधकारणेति सीतारक्षक वै पदम्। ततश्च राक्षसीसङ्घविदारणपदं तत:।। १८।।
कुम्भकर्णादिवधेति परायणपदं वदेत्। श्रीरामभक्तितत्पर समुद्रेति पदं वदेत्।। १९।।
व्योमद्रुमलङ्घनेति महासामर्थ्य वै पदम्। महातेज:पुञ्जपदं विराजमान वै पदम् ।। २०।।
स्वामिवचनसम्पादितार्जुनेति पदं वदेत्।। संयुगेति पदं चोक्त्वा सहायेति पदं वदेत्।। २१।।

---

[1] 'न्ति च' क. पाठ:। [2] 'सहायं' क. पाठ:। [3] 'तथा' क. पाठ:। [4] 'निवर्ह' ग. पाठ:।

* इदं बन्धचिह्नान्तर्गतं ख. ग. पुस्तकयोर्नास्ति।

कुमारब्रह्मचारिंश्च गम्भीरशब्द वेति च। उदयेति दक्षिणाशामार्तण्ड मेरु पर्वत।। २२।।
पीठिकार्चन सकलमन्त्रागमपदं तथा। आचार्यपदमुच्चार्य मम सर्वग्रहेति च।। २३।।
विनाशन[1] सर्वपदं ज्वरोच्चाटन सर्व च। विषविनाशनपदं सर्वापत्तिनिवारण ।। २४।।
सर्वदुष्टादीति पदं निवर्हणपदं ततः। सर्पव्याघ्रादिभयेति निवारणपदं ततः।। २५।।
सर्वशत्रु[2]च्छेदनेति पदं मम परस्य च। ततस्त्रिभूवनं पुंस्त्रीनपुंसकात्मकं पदम्।। २६।।
ततः सर्वजीवजातं वशयेति द्वयं वदेत्। ममाज्ञाकारकं चेति सम्पादय द्विधा वद।। २७।।
ततो नानानामधेयान् सर्वराज्ञः पदं वद। ततः सपरिवारांश्च तथैव मम सेवकान्।। २८।।
कुरुयुग्मपदं सर्वशस्त्रास्त्रेति विषाणि च। विध्वंसय द्विधोच्चार्य मायां पूर्ववदुच्चरेत्।। २९।।
हा त्रिधा च समुच्चार्य तद्वदेव हि चोच्चरेत्। पूर्वोदितं पञ्चकूटं वैपरीत्येन चोच्चरेत्।। ३०।।
सर्वशत्रून् हनद्वन्द्वं परबलानि ततः परम्। परसैन्यानि क्षोभय द्विधा ममपदं ततः।। ३१।।
ततः सर्वकार्यजातं साधयेति द्विधा वद। सर्वदुष्टदुर्जनेति मुखानि कीलय द्विधा।। २२।।
घे त्रिधोच्चर हाकारं त्रिधा क्रोधं त्रिधा ततः। त्रिधा चास्त्रं वह्निजायासंयुतोऽयं मनुः स्मृतः।। ३३।।
मन्त्रे वर्णाः समाख्याता द्विनवत्युत्तरा खलु। पञ्चशत्यर्णकाः सत्यं मन्त्रविद्भिः पुरातनैः।। ३४।।
मन्त्रेण वायुपुत्रस्य महाबलयशस्विनः। एकादशोग्ररूपस्य रामचन्द्रपदात्मनः ।। ३५।।
सर्वकार्यार्थसिद्धिश्च गदितः सर्वसिद्धिदः। रक्षाविधौ प्रयोक्तव्यः क्षते शस्त्रामये तथा।। ३६।।
वश्ये विजये वादे स्तम्भे सर्वत्र चोदितः। राजगृहे च सङ्ग्रामे राजचौरभये क्षते ।। ३७।।
विषबन्धविमोक्षे च क्रोधस्तम्भे विशेषतः। रिपुदुर्जनदुष्टानां निग्रहोच्चाटने तथा ।। ३८।।
प्रयोक्तव्यो विशेषेण सत्वरं फलते ध्रुवम्। किमत्र बहुनोक्तेन भाषणेन पुनः पुनः।। ३९।।
यदीच्छेत् प्रत्ययं द्रष्टुं प्रोक्तोऽयं मनुरद्भुतः। कार्ये सम्मोहनेऽत्यर्थं सत्यं सत्यं न चान्यतः।। ४०।।

अथोद्धारः– ओंऐंश्रींह्रौंह्रींहूं स्फ्रे खफ्रें हस्त्रौं हसखफ्रें ह्सौं ओं नमो हनुमते प्रकटपराक्रमाक्रान्तदिङ्मण्डलयशोवितानधवलीकृतजगत्त्रितय वज्रदेह ज्वलदग्निसूर्यकोटिसमप्रभतनूरुह रुद्रावतार लङ्कापुरीदहन उदधिलङ्घन दशग्रीव(शिरः)कृतान्तक सीतासमाश्वासन वायुसुताञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार (द्रोणपर्वतोच्चाटन) सुग्रीवसख्यकारण बालिनिर्हरणकारण द्रोणपर्वतोत्पाटन अशोकवनविदारण अक्षकुमारकच्छेदन वनरक्षाकरसमूहविभञ्जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन लक्ष्मणशक्तिभेदनिवारण शल्यविशल्यौषधिसमानयन बालोदितभानुमण्डलग्रसन मेघनादहोमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षकराक्षसीसङ्घविदारण कुम्भकर्णादिवधपरायण श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलङ्घन महासामर्थ्य महातेजःपुञ्जविराजमान स्वामिवचनसम्पादितार्जुनसंयुगसहाय कुमारब्रह्मचारिन् गम्भीरशब्दोदय दक्षिणाशामार्तण्ड मेरुपर्वतपीठकार्चन सकलमन्त्रागमाचार्य्य मम सर्वग्रहविनाशन सर्वज्वरोच्चाटन सर्वविषविनाशन सर्वापत्तिनिवारण सर्वदुष्टादिनिवर्हण सर्पव्याघ्रादिभयनिवारण सर्वशत्रुच्छेदन मम परस्य च त्रिभुवनं पुंस्त्रीनपुंसकात्मकं सर्वजीवजातं वशय २ ममाज्ञाकारकं सम्पादय २ नानानामधेयान् सर्वराज्ञः सपरिवारान् मम सेवकान् कुरु २ सर्वशस्त्रास्त्राविषाणि विध्वंसय २ ह्रांह्रींहूं हाहाहा ह्सौ। हसखफ्रें ह्स्त्रौं खफ्रें स्फ्रें सर्वशत्रून् हन २ परबलानि परसैन्यानि क्षोभय २ मम सर्वकार्यजातं साधय २ सर्वदुष्टदुर्जनमुखानि कीलय २ ये ३ हा ३ हुं ३ फट् ३ स्वाहा।।

---

[1] 'शक' क. पाठः। [2] 'भेदनेति' क. पाठः।

अथ द्वादशाक्षरमन्त्र:—

द्वादशाक्षरविद्याया उद्धार: क्रियतेऽधुना। शैवं मनुस्वराक्रान्तं बिन्दुभूषितमस्तकम् ।। १ ।।
पूर्वोदितं पञ्चकूटं बीजषट्कमिदं विदु:। हनुमांश्चतुर्थ्या संयोज्य ततो नतिपुर:सरम्।। २ ।।
द्वादशार्णा महाविद्या यस्य कस्यापि मा वद। रहस्यं ते मयाख्यातं वाल्मीकिमुनिनोदितम्।। ३ ।।

हौं स्फ्रें खफ्रें ह्स्रौं हसखफ्रें ह्सौं हनुमते नम:।

रामचन्द्र ऋषि: प्रोक्तो गायत्रं छन्द ईरितम्। महावीरो हनुमांश्च देवतात्र समीरित:।। ४।।
मारुतात्मजशब्दादि ह्स्रौंबीजं तु बीजकम्। अञ्जनीसूनुशब्दान्ते स्फ्रेंबीजं शक्तिरुच्यते।। ५ ।।
कीलकं हात्रयं प्रोक्तं श्रीरामभक्तिरादित:। ह्रांप्राणश्चापि श्रीरामलक्ष्मणानन्दकारि च।। ६ ।।
ह्रांह्रींह्रूमिति जीव: स्यात्तत्तत्कामे नियोजम्। एवं हि सर्वमन्त्राणां ज्ञातव्यो मुनिवित्तमै:।। ७।।
विशेषोऽत्र षडङ्गानि षट्कूटै: कुरुते बुध:। कराङ्गुलीषु विन्यासं कुर्यादिष्टशुभोदयम्।। ८।।
एवमङ्गेषु विन्यस्य मन्त्रवर्णास्ततो न्यसेत्। मूर्ध्नि भाले दृशोरास्ये गले दोर्हृदयाम्बुजे।। ९ ।।
कुक्षौ नाभौ ध्वजे जानुद्वये पादद्वये न्यसेत्। मन्त्रपादैरष्टभिश्च देहाङ्गेष्वेव संस्मृत:।। १०।।
मूर्ध्नि भाले मुखे कण्ठे नाभौ चोर्वोस्तु जङ्घयो:। पादयोश्चैव कर्तव्यो ध्यानं कुर्यात् समाहित:।११ ।।

ध्यायेद्बालदिवाकरप्रतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखै: प्रशस्तयशसं देदीप्यमानं रुचा।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृतम्।। १२ ।।

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि।। १३ ।।

वानरेया च मुद्रेयं तां शृणुष्व वदाम्यहम्। करौ सम्पुटितौ कृत्वा समाश्लिष्टाङ्गुलि स्फुटम्।। १४।।
अङ्गुष्ठौ द्वौ प्रलुपितौ (?) अन्तर्गर्भे स्थिरीकुरु। हृदयोपरि संस्थाप्य मुकुलाकारसम्पुटम्।। १५।।
स्वामिपादे स्थिता दृष्टिर्मुद्रोपरि समास्थिता। ज्ञेयेयं वानरीमुद्रा चैतन्मन्त्रं जपेद् ध्रुवम्।। १६ ।।
तर्जन्यग्रेऽङ्गुष्ठमूले कृत्वा त्वङ्गुलयोरपि(?)। तत् स्यात् पुटितयो: पाण्योर्मुद्रा वानरिसंज्ञिका।१७।।

अरे मल्लवटजेत्युक्त्वा, वातोऽरमल्लवटजेत्युक्त्वा कपिमुद्रां प्रदर्शयेत्।

पुरश्चर्यास्य मन्त्रस्य प्रोक्ता चार्कसहस्त्रिका। भौमस्य वासरे पूजा कार्या हनुमतो ध्रुवम्।। १८ ।।
ततश्चार्कास्तमारभ्य यावत् सूर्योदयो भवेत्। तावन्मन्त्रं जपेद्रात्रौ कार्यमुद्दिश्य मन्त्रवित्।। १९ ।।
प्रियङ्गवो ब्रीहयोऽथ दध्याज्यक्षीरसंयुता:। कदलीमातुलुङ्गाम्रफलैर्नानाविधैर्हुनेत् ।। २० ।।
दशांशेन ततो ब्रह्मचारिणो भोजयेद् ध्रुवम्। द्वाविंशतिं च संख्यांभिर्हनुमत्प्रीतये सुधी:।। २१ ।।
अष्टोत्तरशतेनाभिमन्त्रयेद्भस्म वारि च। ग्रहदोषे विषे चैव मार्जयेत् पयसा तनुम्।। २२ ।।
हनुमत्प्रतिमा कार्या ततो भूताङ्कुशस्य च। पूर्वोत्तरगतेनैव मूलेनाङ्गुष्ठमात्रता (?)।। २३ ।।
सर्वावयवसम्पूर्णा चित्तप्राशस्त्यकारिणी। प्राणसंस्थापनं तस्या: कृत्वा वै मारुतेर्ध्रुवम्।। २४।।
सिन्दूरचर्चितां कृत्वा तथाभ्यर्च्योपचारकै:। मन्त्रिता तेन मन्त्रेण ततस्तां द्वारदेशके।। २५ ।।

खनित्वा निक्षिपेद्भूमौ गृहस्याभिमुखं निशि। भूतजा विषजा बाधा ग्रहजा कूटमन्त्रजा।। २६।।
चेटका[2]भयजा व्याधिज्वरजा चाभिचारजा[3]। चोराग्निबाधा च तथा न भवेत्तद्गृहेऽरिजा।। २७।।
तद्गृहं नन्दते सर्वसमृद्धिधनसंयुतम्। रात्रौ रात्रौ जपेन्मन्त्रं षट्शतं त्रिशतं तथा।। २८।।
दशवासरपर्यन्तं राजशत्रुभयं हरेत्। अभिचारज्वरे भूतज्वरे च भस्मना तनुम् ।। २९।।
मन्त्रितेनाम्भसा वाथ ताडयेद्रोषपूर्वकम्। त्रिदिनाज्ज्वरमुक्तिः स्यान्नात्र कार्या विचारणा।। ३०।।
औषधे च रसे मन्त्रं दशवारं जपेद् बुधः। तेनाभिमन्त्रितं दत्तं सर्वं सफलतां व्रजेत्।। ३१।।
शस्त्रधाराग्निसंस्तम्भे दशवारं जपेद् बुधः। तेनाभिमन्त्रितं तोयं भस्म तस्य प्रदापयेत्।। ३२।।
भस्मना चर्चितं देहं पयश्च प्राशयेद् ध्रुवम्। शस्त्रस्तम्भो भवेत्तस्य सत्यं सत्यं न संशयः।। ३३।।
शस्त्रक्षतेषु लूतासु रक्तग्रन्थ्यादिसम्भवे। भस्मना पयसा तत्र त्रिवारं चाभिमन्त्रयेत्।। ३४।।
न व्यथा न च पूयं स्यात् संशोषयति तद्व्रणम्। सप्तवासरपर्यन्तं विद्वेषोच्चाटने जपः।। ३५।।
सूर्यास्तं च समारभ्य कुर्यादित्थं बुधोत्तमः। अरुणोदयपर्यन्तं भस्म कीलाभिमन्त्रितम्।। ३६।।
तद्द्वारे पूरितं गेहे रोपितं वापि तत्क्षणात्। ततस्तस्योच्चाटनं स्यात् परिवारयुतस्य च।। ३७।।
पुत्रादिभिः सर्वलोकैः पौरैर्जानपदैस्तथा। विद्वेषणप्राणघातः सत्यं सत्यं वचो मम।। ३८।।
भस्माम्बु मन्त्रितं यस्य देहे चन्दनमिश्रितम्। चर्चितं यत्तु खाद्यादियोजितं यत्र दापितम्।। ३९।।
स वश्यो जायते नूनं प्राणैरपि धनैरपि। दासतां याति देवोऽपि मनुष्येषु च का कथा।। ४०।।
क्रूरसत्त्वानि सर्वाणि वशयेदमुना खलु। प्रकारेण महावीर ज्वलनं शीततामियात्।। ४१।।
दिव्यस्थाने च कर्तव्यं निःशक्तिश्च हुताशनः। भवत्येव न सन्देहो लोहतैलेषु संस्थितः।। ४२।।
मारणे क्रुद्धचित्तेन श्मशाने निशि भूतले। रिपोः प्रतिकृतिं कृत्वा भस्मना वाथवा मृदा।। ४३।।
पूर्ववत् प्राणसंस्थां च कृत्वा यत्नेन मन्त्रवित्। प्रतिमाहृदि तन्नाम लेख्यं चैव प्रयत्नतः।। ४४।।
शस्त्रेण च्छेदनं कुर्यान्मन्त्रोच्चारणपूर्वकम्। छिन्धि भिन्धि मारयेति तन्नामान्ते समुच्चरेत्।। ४५।।
एवं सप्तदिनं कुर्याद् दन्तैरोष्ठं निपीड्य च। कृत्वा प्रपीडितं पाणितलयोर्दृढमात्मनः।। ४६।।
होमः कार्यस्तत्र वाथ राजिकालवणैः सह। उन्मत्तफलपुष्पैश्च श्लेष्मान्तकविभीतकैः।। ४७।।
विषरोमनखैश्चैव काककौशिकगृध्रकैः। पक्वैः कटुकतैलाक्तैरर्धचन्द्राकृतौ हुनेत् ।। ४८।।
स्थण्डिले मुक्तकेशस्तु सूकर्य्या मुद्रया बुधः। दक्षिणाशामुखो भूत्वा पल्लवोच्चारणं कुरु।। ४९।।
शित्रतावृत्तिभेदेन सप्तवासरमध्यतः । शत्रुर्मृत्युमवाप्नोति रुद्रेणापि सुरक्षितः ।। ५०।।
दिनत्रयं रात्रिभागे श्मशाने षट्शतं जपेत्। प्रेतमुत्थापयेत् सत्यं वेतालः किङ्करो भवेत्।। ५१।।
शुभाशुभं च वदति मन्त्रिणा सह निश्चयात्। ददाति भाषां सत्यां च कारयेति करोति च।। ५२।।
भस्माम्बु मन्त्रितं रात्रौ सहस्रावृत्तिकं कुरु। दिनत्रयं ततश्चैव निक्षिपेत् प्रतिमासु च।। ५३।।
यासु कासु च स्थूलासु लघुष्वपि विशेषतः। मन्त्रप्रभावाच्चलनं भवत्येव न संशयः।। ५४।।
मन्त्रेणानेन सिद्धेन यदसाध्यं च साधयेत्। विषे भये विवादे च शस्त्रसङ्ग्रामसङ्कटे।। ५५।।
द्यूते दिव्यस्तम्भने च विशेषो मारणे तथा। मृतकोत्थापने चैव प्रतिमाचलने तथा।। ५६।।

---

१. 'संख्याकान्' क. पाठः। २. 'खेटकाक्षय' क. पाठः। ३. 'घातजा' ग. पाठः।

विषे ज्वरे भूतज्वरे ग्रहे कृत्यादिमोचने। क्षते ग्रन्थौ महारण्ये दुर्गे व्याघ्रे च दन्तिनि।। ५७।।
क्रूरसत्त्वेषु सर्वेषु शस्त्रस्तम्भविमोक्षणे। बन्धमोक्षे मारणे च मोहे शान्तौ नियोजयेत्।। ५८।।
मन्त्रमेनं हनुमतो नानाकार्यप्रसाधनम्। बन्धमुक्तौ जपेन्मन्त्रं रात्रौ रात्रौ च निर्भयः।। ५९।।
लिखित्वा प्रतिमां भूमौ मारुतेरस्खलन् नरः। स्वनामाक्षरसङ्घं तु द्वितीयान्तं समालिखेत्।। ६०।।
मन्त्रस्यान्ते तथा मां च विमोचय विमोचय। मार्जयेद्वामहस्तेन पुनस्तथैव लेखयेत् ।। ६१।।
एवमष्टाधिकशतं लेखयेन्मार्जयेन्नरः। एवं कुर्वन् सुबद्धोऽपि शृङ्खलाभिर्दृढं नरः ।। ६२।।
महापराधसंयुक्तः प्राणहानर्थकारकः। स सप्तदिनमध्ये तु बन्धनान्मुच्यते सुखम् ।। ६३।।
हनुमांस्तु समागत्य स्वयं स मोक्षयेन्नरम्। न तु दण्डयितुं शक्ता राजानो विभवो[1] जनाः।। ६४।।
हवनान्यपि सन्त्यत्र दशांशेन निबोधय। स्तम्भने चणका माषा न्यग्रोधस्य फलानि च।। ६५।।
हरिद्रा च तथा प्रोक्ता तालकं सल्लकीफलम्। शाल्मलीकुसुमान्याहुर्मधुत्रययुतानि च।। ६६।।
उच्चाटे गदितान्यत्र श्लेष्मान्तकविभीतकाः। वश्यार्थे सर्षपा लाक्षा मधुकाण्डं च गुग्गुलम्।।६७।।
विद्वेषे करवीराणां पत्राणि समिधस्तथा। श्लेष्मान्तकविभीतानां समिधो जीरकं तथा।। ६८।।
मधुरं रामठं चैव कटुतैलसमन्वितम्। ज्वरे तापे च शूले च गण्डमालाभगन्दरे।। ६९।।
दूर्वागुडूचीखण्डानि साज्यक्षीरदधीनि च। शूलेष्वेरण्डसमिधः कुबेराक्षस्तथैव च ।। ७०।।
निर्गुण्डीसमिधश्चैव तिलतैलसमन्विताः। लक्ष्मीप्राप्त्यै सरोजानि बिल्वपत्राणि चैव हि।। ७१।।
समिधस्तस्य होतव्या मधुत्रयसमन्विताः। पञ्च खाद्यं नारिकेलद्राक्षेक्षुकदलीफलम्।। ७२।।
सौभाग्यसर्वसम्पत्तिसाधनं हवनं शृणु। कर्पूरं केसरं नाभिं चन्दनं रोचनां तथा।। ७३।।
तजपत्रं वीरणं च लवलैतागरुं तथा। मांसीं नखं जातिपत्रं त्वकफलं लोहवालुकाम्।। ७४।।
साज्यान्येतानि सर्वत्र विज्ञेयानि मनीषिभिः। पुष्पैः सुगन्धिभिर्वासः प्राप्यते चोत्तमोत्तमम्।। ७५।।
द्रोहे च मारणे ज्ञेयं विषं स्याद्राजिकास्तथा। कङ्ककौशिकगृध्राणां पक्षाश्च विजया तथा।। ७६।।
गृहधूमकराश्चैव लवणं कटुतैलकम्। पादपांशुस्तथा राजी लवणं कर्षणे स्मृतम्।। ७७।।
उन्मत्तफलपुष्पाणि समिधो मोहने स्मृताः। धान्यैः सम्प्राप्तये धान्यमन्त्रैरन्नसमृद्धयः।। ७८।।
तिलाज्यक्षीरदधिभिर्महषीगोसमृद्धयः। एवं नानाप्रयोगांश्च साधयेन्मन्त्रवित्तमः।। ७९।।
पुरश्चर्याजपेनैव हनुमन्तं च सेवयेत्। ....।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे त्रयस्त्रिंशः श्वासः।। ३३।।

* * *

---

[1] 'रिपवो' ग. पाठः।

अथ

चतुस्त्रिंशः श्वासः

◆ ◆ ◆ ◆

अथ हनुमत्पूजायन्त्रम् –

अथ पूजाविधानार्थं यन्त्रं वै कथ्यतेऽधुना। षट्कोणं वसुपत्रं च चतुरस्त्रं च बाह्यतः ।। १ ।।
बीजयुक्तं लिखेत् सम्यक् नाम लेख्यं हनूमतः। षट्कोणेषु षडङ्गानि बीजयुक्तानि संलिखेत् ।।२ ।।
बीजत्रयं च कोणाग्रे लिखेत् सम्यक् पुनस्ततः[1]। अञ्जनीपुत्राय ततो वै रुद्रमूर्तये।। ३ ।।
तथा वायुसुतायेति जानकीजीवनाय च। रामदूताय ब्रह्मास्त्रनिवारणाय ततः परम्।। ४ ।।
षट्कोणस्यान्तरालेषु संलेख्यं नामषट्ककम्। वसुकोणेषु बीजानि नामानि च समालिखेत्।। ५ ।।
सुग्रीवायाङ्गदायाथ सुशीलाय ततः परम्। नलायाथ च नीलाय तथा जाम्बवते-पदम्।। ६ ।।
प्रहस्ताय सुषेणाय दलमध्येषु संलिखेत्। रामभक्तो महातेजाः कपिराजो महाबलः।। ७ ।।
द्रोणाद्रिधारको मेरुपीठिकार्चनकारकः । दक्षिणाशाभास्करश्च सर्वविघ्ननिवारकः ।। ८ ।।
दलान्तरालेषु लिखेन्नामान्यष्टौ प्रयत्नतः। लोकपालान् सायुधांश्च चतुरस्त्रे च संलिखेत्।। ९ ।।
रक्षोघ्नाय द्वि(वि)षघ्नाय रिपुघ्नाय तथैव च। व्याधिघ्नाय ज्वरघ्नाय भूतघ्नाय ततः परम्।। १० ।।
पाशशस्त्रमन्त्रघ्नाय यन्त्रघ्नाय विशेषतः। सर्पव्याघ्रमहो[2]त्पातभयघ्नाय जितात्मने।। ११ ।।
ब्रह्मग्रहमहाराजकोपघ्नाय तदुत्तरम्। कृत्याक्षतग्रहघ्नाय बलघ्नाय च सर्वतः।। १२ ।।
रामप्रियाय रुद्राय रामभक्तिरताय च। भक्तप्रियाय जगतीदुर्भिक्षार्तिविदारिणे।। १३ ।।
पार्थोग्रसङ्गरानन्तशक्तिविक्रमवर्धिने । अनन्तनगरग्रामपुरपट्टनरक्षिणे ।। १४ ।।
स्वामिभक्ताय शूराय वीरभद्राय योगिने । स्वभक्तवादसङ्ग्रामविजयाप्तिविवर्धिने ।। १५ ।।
इत्येतद्दिक्षु संलेख्यं स्तुत्याख्यं नामसङ्घकम्। एवं यन्त्रवरे सम्यक् पूजा कार्या हनूमतः।। १६ ।।
अप्राप्तं वाञ्छितं सर्वं प्रापयत्येव निश्चितम्। अथ यन्त्रं प्रवक्ष्यामि धारणार्थं विशेषतः[3]।। १७ ।।

---

[1] १. 'तथा' क. पाठः। [2] २. 'महाचौर' क. पाठः। [3] ३. 'समासतः' ख. पाठः।

भूर्जे ताम्रेऽथवा वस्त्रे भित्तौ पट्टे शिलातले। तालपत्रेऽथवा लेख्यं रोचनानाभिकेसरैः।। १८।।
श्रीखण्डैश्चैव कर्पूरैः सर्वं मन्त्रं समालिखेत्। वृत्तत्रयं समालेख्यं वलयेन [1]सुपुच्छवत्।। १९।।
साध्यनाम लिखेन्मध्ये बहिरष्टदलं लिखेत्। दलेष्वष्टसु संलेख्यं हुंकारं सम्मुखं तथा।। २०।।
बहिः संवेष्टयेत्तत्र वलयेन दृढं तथा। तद्बहिश्चतुरस्रं स्याद् रेखाग्रैश्च सुविस्तृतैः।। २१।।
तद्रेखासु त्रिशूलानि लेखयेच्छोभनानि च। मूलमन्त्रेण तत् सर्वं वेष्टयेन्मण्डलक्रमैः।। २२।।
पुनर्बहिस्तथैवापि त्रिरेखाभिश्च वेष्टयेत्। रेखान्ते च त्रिवलयं कारयेदेककोणकम्।। २३।।
तन्मध्ये त्वङ्कुशं लेख्यं ह्सौंबीजं च समालिखेत्। वज्राष्टकेषु संयोज्यं मूलबीजं तथाष्टधा।।२४।।
मर्कटस्य च तद्यन्त्रे प्राणारोपं च कारयेत्। पाशादित्र्यक्षरस्यान्ते स्यादमुष्यपदं पुनः।। २५।।
क्रमात् प्राणा इह प्राणास्तथा जीव इह स्थितः। अमुष्य सर्वेन्द्रियाणि भूयोऽमुष्य पदं वदेत्।।२६।।
वाङ्मनोनयनश्रोत्रघ्राणप्राणपदान्यथ। पश्चादिहागत्य सुखं चिरं तिष्ठन्तु ठद्वयम्।। २७।।
अयं प्राणमनुः प्रोक्तः सर्वजीवप्रदायकः। षट्शतैस्त्रिशतैर्वापि तद्यन्त्रमभिमन्त्रयेत्।। २८।।
मर्कटेश्वरसंयोगं प्राणबुद्ध्या च कारयेत्। निष्कल्मषब्रह्मचर्याव्रतधारी जितेन्द्रियः।। २९।।
त्यक्ताशनो महाभागो हनूमन्तं च पूजयेत्। कदलीमातुलुङ्गादिफलैला[2]दिमनोहरैः।। ३०।।
पुष्पैर्नानाविधैस्तं च सोपचारैः समाहितः। ततो यन्त्रं सुधार्यं स्यात् सर्वबाधाविनाशकृत्।। ३१।।
सर्वरक्षाकरं नृणां बालानां योषितामपि। पशूनां च मृगाणां च हयानां सर्वजीविनाम्[3]।। ३२।।
ज्वरमारीस्फोटकादिचोररोगभयापहम्। राजद्वारे वने घोरे सङ्ग्रामे रिपुसङ्कटे ।। ३३।।
शस्त्रपाते महाभीमे दिव्याग्निजलसम्प्लवे। जनवश्ये राजवश्ये रिपुविद्वेषणे वधे।। ३४।।
दधतामनिशं यन्त्रं प्राणस्थापनपूर्वकम्। सर्वकार्यं सुसिद्धं स्यान्नात्र कार्या विचारणा।। ३५।।
अन्यद्यन्त्रं धारणाख्यं कथ्यते शृणु सुन्दरम्। षट्कोणं विलिखेद्यन्त्रं भूर्जपत्रे च सुन्दरे।। ३६।।
वस्त्रे पट्टे कागदे वा भित्त्यां द्रव्यैः सुगन्धकैः। हसौंमध्यगतं साध्यनाम लेख्यं विशेषतः।। ३७।।
ततस्तद्वेष्टयेत् तेन[4] मायाबीजेन वै पुनः। हनूमान् रक्षरक्षेति षट्कोणेषु लिखेत् ततः।। ३८।।
अन्तराले त्रिशूलानि मायाबीजान्तराणि च। एतद्यन्त्रं महाश्रेष्ठं सर्वसिद्धिकरं नृणाम्।। ३९।।
साधयेत् सर्वकार्याणि नात्र कार्या विचारणा। अधुना प्रतिमायन्त्रं कथ्यते तन्निशामय।। ४०।।
कपीश्वरस्य रूपं च समालेख्यं प्रयत्नतः। वस्त्रे वा कागदे वाथ मस्या चालक्तकेन वा।। ४१।।

---

१. 'सपुच्छ' क. पाठः। २. राद्यैः' क. पाठः। ३. 'जीवताम्' ग. पाठः। ४. 'वेष्टनेऽनेन क. पाठः।

हिङ्गुलेनाथवा चान्यैर्लेख्यं द्रव्यैः सुशोभनैः। तत्रैव क्रमयोगेन साध्यनामाक्षराणि च। ४२।।
प्रथमं हृदये लेख्यं द्वितीयं मस्तके तथा। तृतीयं दक्षिणे बाहौ चतुर्थं वामके भुजे।। ४३।।
पञ्चमं च तथा षष्ठं पाण्योर्दक्षिणवामयोः। उदरे सप्तमं चैव दक्षोरौ चाष्टमं तथा।। ४४।।
वामोरौ नवमं चैव दशमं दक्षपत्तले। एकादशं च संलेख्यं वामपादतले तथा।। ४५।।
एवं क्रमेण संलेख्यं वर्णानां च समूहकम्। वश्ये द्वेषे स्तम्भने च मारणे मोहने तथा।। ४६।।
आकर्षणे बन्धमुक्तौ विजये च विशेषतः। द्वादशाक्षरविद्यायास्तदक्षरयुतं लिखेत् ।। ४७।।
मन्त्राद्यं बीजषट्कं च चतुर्थ्यन्तं नमोन्तकम्। तन्नाम कथिता विद्या द्वादशाक्षरवर्णिका।। ४८।।
वशमानय संलेख्यं वश्ये चाम्रेडितान्वितम्। विद्वेषयाम्रेडितं च विद्वेषे समुदीरितम्।। ४९।।
आम्रेडितं स्तम्भयेति स्तम्भने समुदीरितम्। आम्रेडितं मारयेति मारणे समुदीरितम्।। ५०।।
आम्रेडितं मोहयेति मोहने समुदीरितम्। आम्रेडितं मोक्षयेति बन्धमोक्षे समीरितम्।। ५१।।
एवंविधं तु संलेख्यं प्रतिमायन्त्रमुत्तमम्। साध्याकृतिं वस्त्रमयीं कृत्वा पूर्ववदुत्तमाम्।। ५२।।
रक्ताञ्जनेन संलेश्य सान्द्रां कृत्वा प्रयत्नतः। क्षीरेण नवनीतेन दध्ना चान्येन केनचित्।। ५३।।
प्राणानां स्थापनं कृत्वा रोषेणोच्चाटनं कृतम्। नामोद्देशेन तु रिपोः पीडयेदाकृतिं स्थिताम्।। ५४।।
तद्रसस्य तु पानं वै कारयेन्मृत्युहेतवे। अथवाग्नौ क्षिपेत्तत्तु चैत्ये मारणहेतवे।। ५५।।
एवं कृत्वा रिपोः सत्यं मृत्युर्भवति नान्यथा। प्राणप्रतिष्ठापूर्वं तु सम्पूज्य निक्षिपेद् भुवि।। ५६।।
साध्यस्य द्वारदेशे तु निखनेच्च महामतिः। अथवा भूतले लेख्यं प्रतिमायन्त्रमुत्तमम्।। ५७।।
तत्रेत्थं श्लोकसन्दर्भं साध्यनाम लिखेद् ध्रुवम्। सम्मार्ज्य पुनरालेख्यं तथैव च पुनः पुनः।। ५८।।
एवमष्टोत्तरशतं लेखनावृत्तिपूर्वकम्। यत्तत्काम[1] समासाद्य तदा पल्लवयोजना।। ५९।।
कार्यस्य पूर्वयोगे तु ज्ञातव्या मन्त्रिणा ध्रुवम्।.....................................।।

हरिमर्कटमर्कट मन्त्रमिमं यदि लिखति लिखति[2] भूमितले।
यदि नश्यति नश्यति वामकरात् परिमुञ्चति मुञ्चति शृङ्खलिका।। ६०।।

इति लेखनप्रकारः।। अथ द्वादशाक्षरस्य प्रयोगः— तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि श्रीरामचन्द्राय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीहनुमते देवतायै नमः। गुह्ये मारुतात्मजबीजाय नमः। पादयोः अञ्जनीहृदयानन्दशक्तये नमः। कृपाप्लवङ्गमेति प्राणाः। श्रीरघुवरकपिश्रेष्ठेति कीलकम्। मत्कार्यकर्ता वानरो रामकिङ्करः, इति कवचम्। हरिर्वज्राङ्गवान् इति शस्त्रम्। धनुर्धरध्वजवासीति ध्यानम्। ममाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, ओंमारुतात्मज हृदयाय नमः। अञ्जनीहृदयानन्द शिरसे स्वाहा। लक्ष्मणप्राणदात्रे प्लवङ्गमाय

---

१. 'यद्यत्' क. पाठः। २. 'लिख्यति लिख्यति ग. ख. पाठः।

शिखायै०। हनूमान् रामदूत कवचाय हूं। श्रीरघुवरकपिश्रेष्ठ नेत्रत्रयाय०। श्रीवानरो रामकिङ्कर: अस्त्राय०। एवं करषडङ्गं विधाय ओंहरिर्वज्राङ्गवानिति मणिबन्धयो:। ओंऐंश्रींह्रांह्रांह्रूं हनुमते नम: इति सर्वाङ्गे व्यापकम्। ओंऐंश्रींह्रींह्रींह्रूं हनुमते नम: हृदयाय०। ६ रामदूताय शिरसे०। ६ रामप्रियाय शिखायै०। ६ सीताशोकविनाशनाय कवचाय०। ६ अञ्जनीसूनवे नेत्राभ्यां०। ६ श्रीरामकिङ्करायास्त्राय०।। ओंऐं नम: शिखायां। एवं श्रीं नेत्रयो:। ह्रां मुखे। ह्रीं कण्ठे। ह्रूं बाह्वो:। हं हृदये। नुं कुक्षौ। मं नाभौ। तें गुह्ये। नं जान्वो:। म: पादयो:। इत्यक्षरन्यास:।। हौं नमो मूर्ध्नि। ऐं ललाटे। श्रीं मुखे। ह्रां कण्ठे। ह्रीं नाभौ। ह्रूं ऊर्वो:। हनुमते जङ्घयो:। नम: पादयो:। ध्यानम्—

वामे करे वैरिमिदं वहन्तं शैलं तदन्ये घनरन्ध्रटङ्कम्।
बभार?(विशाल)पुच्छाग्रसुवर्णवर्णं ध्यायेज्ज्वलत्कुण्डलमाञ्जनेयम् ।। १ ।।
अशोकवनपान्दोलं स्वामिमुद्राङ्किताधरम्। जपन्तं रामचन्द्रं च क्रीडादेवारिमर्दनम्।। २ ।।

ओंऐंश्रींह्रांह्रींह्रूं हनुमते नम:, इत्येक:। (ह्रौंऐंश्रींह्राह्रींह्रूं हनुमते नम:) इति द्वादशाक्षरोऽन्य:।।

अथ हनुमन्मालामन्त्र:—

ओंऐंश्रींह्रांह्रींह्रूं नमो हनुमते प्रकटपराक्रमाक्रान्तदिङ्मण्डल-यशोवितानधवलीकृतजगत्त्रितयाय वज्रदेहज्वलदग्निसूर्यकोटिसमप्रभतनूरुह रुद्रावतार लङ्कापुरीदहन उदधिलङ्घन दशग्रीवशिर:कृतान्तक सीताश्वासनवायुसुत अञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार द्रोणपर्वतोत्पाटन अशोकवनविदारण अक्षकुमारच्छेदन राक्षसेश्वरसमूहविभञ्जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन लक्ष्मणशक्तिभेदनिवारण शल्यविशल्यौषधिसमानयन बालोदित-भानुमण्डलग्रसन मेघनादहोमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षक राक्षसीसङ्घविदारण कुम्भकर्णवधपरायण श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलङ्घन महासामर्थ्य महातेज:पुञ्जविराजमान स्वामिवचसम्पादितार्जुनसंयुगसहाय कुमारब्रह्मचारिन् गम्भीरशब्दोदय दक्षिणाशामार्तण्ड मेरुपर्वतपीठिकार्चन सर्वज्वरोच्चाटन सर्वविषविनाशन सर्वापत्तिनिवारण सर्वदुष्टनिवर्हण सर्वव्याघ्रादिभयनिवारण सर्वशत्रुच्छेदन मम परस्य च त्रिभुवनपुंस्त्रीनपुंसकात्मकं सर्वजीवजातं वशय २ ममाज्ञाकरं सम्पादय २ नानानामधेयान् सर्वराज्ञ: सपरिवारान् कुरु २ सर्वशस्त्रास्त्रविषादि विध्वंसय २ ओंऐंश्रींह्रांह्रींह्रूं हाहाहा घेघेघे हुंहुंहुं ह्रूंह्रींह्रांश्रींऐंओं एह्येहि सर्वशत्रून् हन २ परबलानि परसैन्यानि क्षोभय २ मम कार्यजातं साधय २ सर्वदुर्जनदुष्टमुखानि कीलय २ घेघेघे हुं फट् स्वाहा।।

जपेन्मन्त्रमष्टवारं त्रिवारं वा दिने दिने। जपेद् द्वादशसाहस्रं मन्त्रसिद्धिर्भवेद् ध्रुवम्।। १ ।।
अर्घ्यं दशांशत: कुर्याद् दशांशेनैव होमयेत्। मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्।। २ ।।
प्रियङ्गुतिलश्यामाकयवव्रीहिसमन्वितम्। पुष्पफलविशेषैस्तु शर्करामधुसंयुतम्।। ३ ।।
सघृतं शुभखाद्यं च जुहुयाद् भक्तिसंयुत:। करवीरैजार्तिपुष्पैर्बकुलैश्चम्पकै: शुभै:।। ४ ।।
शतपत्रैश्च कह्लारै: पङ्कजैश्च सुशोभनै:। दाडिमीमालुतुङ्गैश्च नारिकेलफलाम्बुना।। ५ ।।
पनसद्राक्षाखजूरै: शुभैर्वस्त्रैर्हविर्भुजे। राजद्वारे सभामध्ये संवादे रिपुसङ्कटे ।। ६ ।।
बन्धमोक्षे च सङ्ग्रामे विषयोगे विशेषत:। असाध्यसाध्यकामे च विद्यारम्भे प्रयत्नत:।। ७ ।।
क्षुद्रप्रयोगनाशार्थे प्रसूतिनिग्रहस्थले । भूतवेतालसर्पादिव्याघ्रचोरभयाकुले ।। ८ ।।

यात्राप्रयाणकाले च पठेन्मन्त्रं स्वमानसे। नेत्रदुःखे च मोक्षे च शिरोदुःखे तथैव च।। ९।।
ज्वरादिसर्व[1]व्याधिश्च ग्रहपीडा न जायते। कानने जलमध्ये च जपेन्मन्त्रं स्वमानसे।। १०।।
चिताभस्म वचा कुष्ठं तगरं कुङ्कुमं समम्। चूर्णं स्त्रीशिरसि क्षिप्त्वा पुरुषाणां च पादयोः।।११।।
अदासो दासतां याति यावज्जीवं न संशयः।...................................।।

इति विधिः।। अथ मन्त्रान्तरम्—

आञ्जनेयमनुं वक्ष्ये भुक्तिमुक्त्येकसाधनम्। प्रकाशितं शङ्करेण लोकानां हितकाम्यया[2]।। १।।
भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः। दृष्ट्वा च प्रलयं यान्ति मन्त्रानुष्ठानतत्परम्।। २।।
प्रधानश्चाङ्गभूतोऽयं मन्त्रराजो ह्यनुत्तमः। पूर्वं नमःपदं चोक्त्वा ततो भगवते—पदम्।। ३।।
आञ्जनेयपदं ङेन्तं महाबलपदं तथा। वह्निजायान्त एव स्यान्मन्त्रो हनुमतः परः।। ४।।

"नमो भगवते आञ्जनेयाय महाबलाय स्वाहा (१८)।।"

मूर्ध्नि भाले भ्रुवोर्मध्ये नेत्रयोः कर्णनासयोः। आस्ये कण्ठे च दोर्मूले हृदयेऽप्यथ नाभिके।।५।।
लिङ्गमूले तथाधारे कट्यां जान्वोश्च जङ्घयोः। पादयोश्च समस्तन व्यापकं विन्यसेन्मनोः।। ६।।
सर्वसिद्धिकरः प्रोक्तो मन्त्रश्चाष्टादशाक्षरः। मालाख्योऽपरमन्त्रोऽपि मारुतेः सर्वसिद्धिदः।। ७।।

एतन्मन्त्रस्यार्ष्यादिध्यानपुरश्चरणप्रयोगादिविधिः पूर्वोक्तवत्।। अथापरो मालामन्त्रः—ओंनमो हनुमते प्रकटपराक्रमाय[3] आक्रान्तदिङ्मण्डलाय यशोवितानधवलीकृतजगत्त्रितयाय वज्रदेहाय रुद्रावताराय लङ्कापुरीदहन उदधिलङ्घन दशग्रीवकृतान्तक[4] सीताश्वासन अञ्जनीगर्भसम्भव[5] रामलक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसाधारण पर्वतोत्पादन बालब्रह्मचारिन् गम्भीरशब्द सर्वग्रहविनाशन सर्वज्वरहर[6] डाकिनीविध्वंसन ओंह्रांह्रींह्रूं भस्मन्येव सर्वविषहर परबलं क्षोभय २ मम सर्वकार्याणि साधय २ हुं फट् स्वाहा।। उद्धारस्तु—

प्रणवं पूर्वमुच्चार्य[7] नमो हनुमते पदम्। ङेन्तं प्रकटसंयुक्तं पराक्रमपदं तथा ।। १।।
तथाक्रान्तपदोपेतं दिङ्मण्डलमुदीरयेत्। यशोवितानधवलीकृतजगत्त्रितयाय च।। २।।
वज्रदेहाय चेत्युक्त्वा रुद्रावतारपदं तथा। सम्बुद्ध्यन्तं पदं लङ्कापुरीदहनमीरयेत्।। ३।।
उदधिलङ्घनपदं दशग्रीवकृतान्तक। सीताश्वासनपदोपेतमञ्जनीगर्भसम्भव ।। ४।।
श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार च। सुग्रीवसाधारणपदं पर्वतोत्पाटनं तथा।। ५।।
तथा बालब्रह्मचारिंस्तथा गम्भीरशब्द च। सर्वग्रहविनाशन सर्वज्वरहरं तथा ।। ६।।
डाकिनीविध्वंसनपदं ततस्तारमुदीरयेत्। मायात्रितयमुच्चार्य भस्मन्येव वदेत् ततः।। ७।।
सर्वविषहर परबलं क्षोभय क्षोभय। मम च सर्वकार्याणि साधयेति द्विरुच्चरेत्।। ८।।
हुंफट् स्वाहेति मन्त्रोऽयं मालाख्यः सर्वकामधुक्। ऋषिरीश्वर एव स्यादनुष्टुप् छन्द ईरितम्।।९।।

---

१. 'सर्प' क. पाठः। २. 'मिच्छता' क. पाठः। ३. 'क्रमाक्रान्त' क. पाठः। ४. 'ग्रीवशिरः कृ' ग. पाठः।
५. 'संमूत' ग. पाठः। ६. 'ज्वरोत्सादन' ग. पाठः। ७. 'उद्धृत्य' ग. पाठः।

हनुमान् देवता प्रोक्तो हुंबीजं शक्तिरन्तजा। कीलकं हात्रयं प्रोक्तं वेधकं तु हसौः पुनः।। १०।।
हनूमत्प्रीतये चैव फलमाद्यमुदीरितम् । नमो भगवते चाञ्जनेयायाङ्गुष्ठयोर्न्यसेत् ।। ११।।
रुद्रमूर्तये च तथा तर्जनीभ्यामनन्तरम्। वायुसुतायेति तथा मध्यमाभ्यामपि स्फुटम्।। १२।।
अग्निगर्भाय च तथानामिकाभ्यां प्रविन्यसेत्। रामदूताय च पुनः कनिष्ठाभ्यां विचक्षणः।। १३।।
ब्रह्मास्त्रनिवारणाय चास्त्रमन्त्रः समीरितः। षडङ्गं चामुना कृत्वा ततो ध्यायेदनन्यधीः।। १४।।
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम्। कुण्डलद्वयसंशोभिमुखाम्भोजं मुहुर्मुहुः।। १५।।
अयुतं तु पुरश्चर्यां रामस्याग्रे शिवस्य वा। पूजां तु वैष्णवे पीठे शैवे वा विदधीत वै।। १६।।
आवृतिभिर्विना नित्यं नियताशी जितेन्द्रियः[1]। क्षुद्ररोगनिवृत्त्यर्थमष्टोत्तरशतं मुने ।। १७।।
पूजयेत् तद्भयान्मुक्तो भवत्येव न संशयः। महारोगादिदशान्त्यर्थमष्टोत्तरसहस्रकम् ।। १८।।
जप्त्वा तस्मात् प्रमुच्येत निशीथे नियताशनः। जयाभिकाङ्क्षिणो राज्ञस्तस्मादन्यन्न विद्यते।।१९।।
ध्यायेद्राक्षसहन्तारमयुतं नियताशनः । जपन्नियमतश्चैव जयेदजेयमप्यरिम् ।। २०।।
सन्दधानं[2] तु सुग्रीवं सन्धानाय स्मरन्नपि। अयुतेनापि बलिना सन्धिमाप्नोत्यसंशयम्।। २१।।
लङ्काया दाहनं ध्यायन् जपन्नयुतमञ्जसा। शत्रुराष्ट्रं दहेदेव विभवेन सहारिणः ।। २२।।
जयार्थे रिपुसङ्घानामस्मादन्यन्न विद्यते। यस्तु ग्रहे हनूमन्तं सर्वदैव प्रपूजयेत्।। २३।।
सर्वदैतस्य मन्त्रेण तस्य लक्ष्मीरचञ्चला। दीर्घमायुर्लभेदेव सर्वतो विजयी भवेत्।। २४।।
सर्पादिभूतसंरक्षा तद्देशे चैव जायते। सर्वतः सर्वदा मित्रं भवत्येव न संशयः।। २५।।
शैवानां वैष्णवानां च षट्कर्मात्र प्रदर्शितम्। नान्यसाधनमस्त्येव मन्त्रादस्मादनुत्तमम्।। २६।।
वैरिव्याघ्रादिभीतीनामयमेव परायणः। सन्नाहे भूरियुद्धेषु रुद्धानां परसैनिकैः ।। २७।।
यात्राकाले हनूमन्तं स्मरन् यस्तु स्वकाद्गृहात्। इच्छया याति वेगेन इष्टार्थमधिगच्छति।। २८।।
स्वापकाले स्मरेन्नित्यं चोरभूतादिकांस्त्यजेत्। पदं च वासुदेवाद्यं हनुमते पदं पुनः।। २९।।
कलद्वन्द्वं घघद्वन्द्वं खत्रयं वह्निवल्लभा। चतुर्विंशतिवर्णोऽन्यो सप्लीहोदररोगहृत् ।। ३०।।

ओंनमो भगवते हनुमते कल २ घघ २ खखख स्वाहा।। (२४)।।

नागवल्लीदले चैवमष्टप्रगुणितं शुभम्। वंशजं शङ्कुकं स्थाप्य क्रमात् प्लीहोदरोपरि।। ३१।।
सप्तारण्योपलाग्रे वै बन्धयष्टिं प्रतापयेत्। मन्त्रेणानेनाभिमन्त्र्य सप्तवारं तथा पुनः।। ३२।।
तथैव मन्त्रयेदेनं[3] सप्तभिस्तु विचक्षणः(?)। स्फोटद्वारा भवेत् प्लीहो भस्मीभूतो न संशयः।।३३।।
कर्पूराद्यष्टगन्धेन पुच्छाकारं पटे लिखेत्। कोकिलाक्षस्य लेखिन्या रूपं हनुमतो मनुम्।। ३४।।
उद्यदष्टादशार्णं तु मन्त्रमध्ये निधारयेत्। मूर्ध्नि बद्धेन तेनैव त्रैलोक्यं जयति ध्रुवम्।। ३५।।
महासैन्यपताकायां मन्त्रं यन्त्रं समालिखेत्। चन्द्रसूर्यग्रहे जाप्यो मन्त्रस्तन्मोक्षणावधि।। ३६।।

---

१. 'नित्याशी विजितेन्द्रियः' ग. पाठः। २. 'संधानाय' क. ग. पाठः। ३. 'एवं' ग. पाठः।

होमयेच्च दशांशेन तिलसर्षपकादिभि:। युद्धकाले पताकां तां गजाश्वोपरि संस्थिताम्।। ३७।।
दर्शयेत् परसैन्यस्य तद्भङ्गं स्यात् सुनिश्चितम्। मालामन्त्रं जपेद्यस्तु हनूमन्तं स्मरन् रणे।। ३८।।
वज्राङ्गो जायते युद्धे हनूमत्समविक्रम:। अथ रक्षां प्रवक्ष्यामि सर्वसिद्धिप्रदायिनीम्।। ३९।।
स्तम्भनीं परसैन्यानां भूतानां च वशङ्करीम्। रोचनाकुङ्कुमाभ्यां च भूर्जपत्रे सुशोभने।। ४०।।
सुवर्णस्य च लेखिन्या यन्त्रमष्टदलं लिखेत्। साध्यनाम च तन्मध्ये मूलमन्त्रं दलाष्टके।। ४१।।
मालामन्त्रं च तन्मध्ये त्रिधा हुंकारवेष्टितम्। त्रिलोहवेष्टितं कृत्वा कटिबाहुशिर:स्थितम्।। ४२।।
धारयेद्बाहुना विद्यां विघ्नस्तस्य न जायते। रणे राजकुले द्यूते व्यवहारे पराभवे।। ४३।।
[1]शस्त्रैर्नाक्रम्यते तस्य सर्वेषां चातिवल्लभ:। तस्य पीडां न कुर्वन्ति ग्रहाश्चोराद्युपद्रवा:।। ४४।।
जलवह्निभयं नास्ति व्याघ्रतस्करजं तथा। ज्वरा: सर्वे विनश्यन्ति त्र्याह्निकाद्या महाबला:।।४५।।
अक्षिजादिमहारोगा मन्त्रराजप्रभावत:। तारो हकारोऽग्नियुत:[2] षड्दीर्घस्वरबिन्दुना ।। ४६।।
प्रणवान्तोऽष्टाक्षरको मूलमन्त्र उदाहृत:।...।।

''ओंह्रांह्रींह्रूंह्रैंह्रौंह्र:ओं'' इति।। (८)।।

चन्दनागरुकर्पूरतमालजल*कुङ्कुमम्। उशीरकुष्ठसंयुक्तमेतद् गन्धाष्टकं स्मृतम्।। ४७।।
ताराद्यं वज्रकायेति वज्रतुण्ड समुद्धरेत्। कपिल पिङ्गल प्रोच्य ऊर्ध्वकेश महाबल।। ४८।।
रक्तमुख तडिज्जिह्वामहारौद्रपदं तत:। दंष्ट्रोत्कट कहकह करालिन् पदमुद्धरेत्।। ४९।।
महादृढप्रहारिंश्च लङ्केश्वरवधोद्यत । महासेतुबन्धपदं महाशैलप्रवाह च ।। ५०।।
गगनचर एह्येति भगवंश्च महापदम्। ततो बलपराक्रम भैरवाज्ञाजयेति च ।। ५१।।
एह्येति च महारौद्र दीर्घपुच्छेन वेष्टय। वैरिणं भञ्जय-पदं द्विरुक्तं हुंफडन्तकम्।। ५२।।
स्वाहान्तक: शतं पञ्चविंशदक्षरको मनु:। मालाख्योऽयं ज्वरादीनां रोगाणामन्तक: स्मृत:।। ५३।।

(१) ओंवज्रकाय वज्रतुण्ड कपिलपिङ्गलोर्ध्वकेश महाबल रक्तमुख ·तडिज्जिह्वामहारौद्रदंष्ट्रोत्कट कह २ करालिन् महादृढप्रहारिन् लङ्केश्वरवधोद्यत महासेतुबन्धमहाशैलप्रवाह गगनचर एह्येहि भगवन् महाबलपराक्रम भैरवाज्ञाजय एह्येहि महारौद्रदीर्घपुच्छेन वेष्टय वैरिणं भञ्जय २ हुंफट् स्वाहा।। (२) ओंह्रौं स्फ्रें खफ्रें हसौं हसखफ्रें हसौं हनुमते नम:।। (३) ओं नमो हनूमान् सर्वग्रहान् भूतभविष्यवर्तमानान् दूरस्थान् सर्वकालमुच्चाटय २ परबलानि क्षोभय २ सर्वकार्याणि साधया २ ह्रांह्रींह्रूं घेघेघे हुंफट् स्वाहा।। (४) ओंशिवं ओंशिव[3] ओंओंसिद्धिं ठोंहरं ओंहरि ठोंहरायै ओंरांठों स्वाहा परमन्त्रपरयन्त्रपराहङ्कारभूतप्रेतपिशाचसर्वज्वरपरदृष्टिसर्वदुर्जनचेटककरणसर्वविद्यासर्पाग्निनिवारण नाशय २ इलु २ वुवु २ खिलि २ विलय सर्वकुयन्त्राणि सर्वदुष्टवाचं हुंफट् स्वाहा।। (५) ओंऐंश्रींह्रांह्रीं हसौं स्फ्रें ख्फ्रें हसखफ्रें हसौं हनुमते नम:। इति षोडशाक्षरमन्त्र:।। (६) ओंस्फ्रें ख्फ्रें हसौं स्ह्रौं। इति पञ्चाक्षरमन्त्र:।। सर्वेषां रामचन्द्र ऋषि:, नानाछन्दांसि, महावीरो हनुमान् देवता, मारुतात्मज हसौं बीजं। अञ्जनीसूनु स्फ्रें इति शक्ति:, श्रीरामभद्र ह्रां इति प्राणा:, ओंह्रां इति कीलकम्, श्रीरामलक्ष्मणानन्दकर ह्रांह्रींह्रूं इति जीव:, मम इष्टसिद्धये विनियोग:। द्वादशाक्षरवत् षडङ्गन्यासध्यानानि ज्ञेयानि।

---

[1] 'शस्त्रं नाक्रमते' क.पाठ:। [2] 'ग्न्यासन:' क.पाठ:। [3] 'सिद्ध' ग.पाठ:। [4] 'हसखफ्रें हसौं' क.पाठ:।*जलं वालकमित्यर्थ:।

इति हनूमत्प्रकरणम्।।

अथोक्तानां काम्यहोमकर्मणां तन्त्रोक्तप्रकारेणाग्निचक्रमविज्ञाय कृतानां नैष्फल्यं प्रत्यवायश्च भवतीति श्रुतेस्तत्परिज्ञानस्यावश्यकत्वात् परिज्ञानं प्रकाश्यते। श्रीरुद्रयामले—

अथ वक्ष्ये महादेवि होमकर्मसु सिद्धिदम्। अग्निचक्रं वरारोहे सर्वतन्त्रेषु गोपितम्।। १।।
नवग्रहमयो वह्निस्ते च वह्निमया ग्रहा:। वह्नौ हुतं हविर्देवि ग्रहाणां प्रविशेन्मुखम्।। २।।
तृप्यन्ति देवता: सर्वास्तेषु तृप्तेषु पार्वति। फलं वापि प्रयच्छन्ति सर्वदेवमया ग्रहा:।। ३।।
अतस्तेषां स्थितिं वह्नौ ज्ञात्वा होमं समाचरेत्। शान्तिके पौष्टिके वृद्धौ क्रूरेष्वपि च कर्मसु।। ४।।
तेषां स्थितिक्रमं वक्ष्ये नक्षत्रेषु यथा स्थिता:। सूर्यो बुधो भृगुश्चैव शनिश्चन्द्रो महीसुत:।। ५।।
जीवो राहुश्च केतुश्च नवैते दिवि खेचरा:। त्रीणि त्रीणि च ऋक्षाणि रव्यादीनि च दापयेत्।। ६।।
सूर्यभाच्चन्द्रभं यावद्गणयेच्च महेश्वरि। सूर्यादीनां फलं देवि शृणु वक्ष्ये यथाक्रमम्।। ७।।
आदित्ये तु भवेच्छोको बुधे चैव धनागम:। शुक्रे लाभं विजानीयाच्छनौ पीडा न संशय:।। ८।।
चन्द्रे लाभो महादेवि भौमे चैव तु बन्धनम्। गुरुणा च धनप्राप्ति: राहौ हानिस्तथैव च।। ९।।
केतुना जायते मृत्यु: फलमेवं महेश्वरि। एवं ज्ञात्वा महेशानि होमकर्म समाचरेत्।। १०।।
सौम्यग्रहमुखे यस्मिन् दिने विंशति चाहुति:। आरम्भं सौम्यहोमस्य दिने तस्मिन् विधीयते।।११।।
क्रूरहोमस्तथा देवि क्रूरग्रहमुखे भवेत्। इति ज्ञात्वा महादेवि काम्यहोमं समाचरेत्।। १२।।
अन्यथा क्रियमाणे तु नैष्फल्यं चात्मनाशनम्।..।।

इति।। ब्रह्मयामले—

अथ वह्ने: स्थितिं वक्ष्ये होमकर्मसु सिद्धये। स्वर्गलोके च पाताले भूमौ तिष्ठति हव्यवाट्।। १।।
तत्प्रकारमहं वक्ष्ये साधकानां हिताय च। धृतिं च तिथिवारांश्च सप्तद्वीपं चतुर्युगम्।। २।।
एकीकृत्य हरेद्भागं त्रिभि: शेषेण पावक:। एकेन वसति स्वर्गे द्वये पाताल एव च।। ३।।
शून्ये च मर्त्यलोके स्यादेवं वसति पावक:। उत्पात: स्वर्गलोकस्थे पातालस्थे धनक्षय:।। ४।।
मर्त्यलोकस्थिते वह्नौ होमोऽभीष्टफलप्रद:। इत्थं विज्ञाय मन्त्रज्ञो होमकर्म समारभेत्[1]।। ५।।

धृतिरष्टादश। तिथय: पञ्चदश प्रतिपदादय: होमारम्भतिथिपर्यन्ता:, वारा: सूर्यवारादिहोमारम्भवारान्ता:। अन्यत्सुगमम्।।

अथारिमन्त्रपरित्यागविधिस्तत्र श्रीरुद्रयामले—

अरिमन्त्रपरित्यागविधिं वक्ष्ये महेश्वरि। यज्ज्ञात्वा मोचयेच्छिष्यं शत्रुमन्त्रभयाद् गुरु:।। १।।
अज्ञानाद्यत्र कुत्राप्तमरिमन्त्रं महेश्वरि। जप्त्वा मूढा महादु:खं प्राप्नुवन्तीह तत्कृतम्।। २।।
गुरुस्तद् रक्षयेद्येन विधिना तद्वदामि ते। शुचि: समाहितो भूत्वा प्रारभेत् प्रवरे दिने।। ३।।
अशेषदु:शनाशाय देशिकप्रवरो विधिम्। तत्रादौ रम्यभवने कुम्भं दीक्षाविधानत:।। ४।।

---

१. 'समाचरेत्' क. पाठ:।

मण्डले स्थापयेद् देवि पूरयेत् तं शुभैर्जलैः। विधिना मन्त्रपाठेन तत्रावाह्येष्टदेवताम्।। ५।।
सकलीकृत्य सम्पूज्यावरणानि प्रपूजयेत्। एवं सारवणामिष्ट्वा देवि मन्त्रस्य देवताम् ।। ६।।
हुत्वा विलोममन्त्रेण गोघृतेन महेश्वरि। अष्टोत्तरसहस्रं वा शतं चाष्टोत्तरं प्रिये।। ७।।
ब्रह्मार्पणेन मनुना तथान्ते तर्पयेत् प्रभुम्। ततो यवान्नदुग्धान्नैर्देवताभ्यो बलिं हरेत्।। ८।।
विदिक्षु दिक्षु च तथाधश्चोर्ध्वे मनुवित्तमः। आयाहीन्द्र सुराधीश शतमन्यो शचीपते।। ९।।
नमस्तुभ्यं गृहाणेमं पुष्पधूपादिकं बलिम्। आयाहि तेजसां नाथ हव्यवाह वरप्रद ।। १०।।
गृहाण पुष्पधूपादिबलिमेनं प्रयोजितम्। प्रेतनाथ त्वमायाहि भिन्नाञ्जनसमायुधैः ।। ११।।
बलिं दत्तं गृहीत्वेमं सुप्रीतो वरदो भव। नमस्ते रक्षसां नाथ निर्ऋते त्वमिहागतः ।। १२।।
गृहाण बलिपूजादि मया भक्त्या निवेदितम्। एहि पश्चिमदिक्पाल जलनाथ नमोऽस्तु ते।। १३।।
भक्त्या निवेदितां पूजां गृहीत्वा प्रीतिमाप्नुहि। प्रभञ्जन प्राणपते त्वमेहि सपरिच्छद।। १४।।
मया प्रयुक्तं विधिवद्गृहाण बलिमादरात्। कुबेरतारकाधीशावगच्छेतां सुरेश्वरौ ।। १५।।
पुष्पधूपादिभिः प्रीतौ भवेतां वरदौ मम। ईश त्वमेहि भगवन् सर्वविद्याश्रय प्रभो।। १६।।
पूजितः पुष्पधूपादिप्रीतो भव विभूतये। आयाहि सर्वलोकानां नाथ ब्रह्मन् समर्चनम्।। १७।।
गृहाण सर्वविघ्नान् मे निवर्तय नमोऽस्तु ते। आगच्छ वरदाव्यक्त विष्णो विश्वस्य नायक।। १८।।
पूजितः परया भक्त्या भव त्वं सुखदो मम। ततः सपरिवारां च पूजयेन्मन्त्रदेवताम्।। १९।।
मन्त्रेण विपरीतेन पुष्पधूपोपचारकैः। ततस्तु प्रार्थयेद्विद्वान् पूजितां मन्त्रदेवताम्।। २०।।
आनुकूल्यमनालोच्य मया तरलबुद्धिना। यदुपात्तं विप्रभावमरिमन्त्रस्वरूपकम्।। २१।।
तेन मे मनसः चोभमशेषं विनिवर्तय। पापं प्रतिहतं मेऽस्तु भूयाच्छ्रेयः सनातनम्।। २२।।
तनोतु मम कल्याणं पावनी भक्तिरेव च। इति सम्प्रार्थ्य मन्त्रेण मन्त्रे यन्त्रे विलोमतः।। २३।।
विलिख्यामलकर्पूरचन्दनेन समर्चयेत्। कलशोपरि संस्थाप्य भक्त्या परमया युतः।। २४।।
तद्यन्त्रं देवि मतिमान् बद्ध्वा निजशिरस्यथ। स्नायात् पूजितकुम्भस्थैर्जलैर्मन्त्रमयैः शिवैः।।२५।।
पुनश्चान्येन तोयेन कुम्भमापूर्य संयतः। तन्मध्ये मन्त्रं यन्त्रं च निक्षिप्याथ प्रपूजयेत्।। २६।।
तत्कुम्भं निम्नगातीरे शुद्धे वान्यजलाशये। विसृजेदथ विप्रांश्च यथाशक्त्या प्रपूजयेत्।। २७।।
इत्थं कृतविधानस्य रिपुमन्त्रोद्भवा रुजः। विनश्यन्ति न सन्देहः क्रमाच्चित्तप्रसन्नता।। २८।।
जायतेऽतीवसम्पन्ना वर्धते तत्कुलं क्रमात्।...।।

इत्यरिमन्त्रपरित्यागविधिः।। अथ गुरोरभावे दीक्षाविधिस्तत्र श्रीरुद्रयामले—

गुरोरभावे विप्रेन्द्र मन्त्रग्रहणमुच्यते। कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ।। १।।
तालपत्रे मनुं लिख्य स्थापयेच्च तदग्रतः। सम्पूज्य दक्षिणामूर्तिमुपचारैः प्रयत्नतः।। २।।
पायसं विनिवेद्याथ प्रणमेद् दण्डवत् ततः। तालपत्रं समालोक्य पठेदष्टोत्तरं शतम्।। ३।।

एवं गृहीतो मन्त्रः स्याद्गुरोरपि विशिष्यते। गुरोः सम्भाविता दोषाः प्रायेण च कलौ युगे।। ४।।
एवं गृहीतमन्त्रः स्यात् सर्वसिद्धिप्रदो नृणाम्। ....।।

इति।। अथ मुद्रालक्षणम्। तन्त्रराजे—

कनिष्ठानामयोः पृष्ठे स्यादङ्गुष्ठस्तु तर्जनी। कुटिला ऋजुमध्यस्था मुद्रासावङ्कुशाभिधा।। १।।

इति। नारदपञ्चरात्रे—

दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु। सावकाशं त्वेकमुष्टिं कुर्यात् कुम्भाख्यमुद्रिका।। १।।

इति। प्रयोगसारे—

त्रिशूलाग्रौ करौ कृत्वा व्यत्यस्तावभितो नयेत्। अस्त्रमुद्रेयमाख्याता वह्निप्राकारलक्षणा।। १।।

इति। सारसङ्ग्रहे— ''ऋषिच्छन्दोदेवतानां न्यासे त्वङ्गुलयः स्मृताः। चतस्रोऽङ्गुष्ठरहिताः'' इति। नारदपञ्चरात्रे—

मन्त्राभिमृष्टयोः पाण्योः पल्लवेऽङ्गानि विन्यसेत्। अङ्गुष्ठेनाचरेन्न्यासमन्याङ्गुलिसमाश्रयम्।। १।।
अङ्गुष्ठविषयं न्यासं तर्जनीशिरसैव हि। अङ्गुष्ठवर्जमङ्गुल्यश्चतस्रो हृदि विन्यसेत्।। २।।
शिखायां मुष्टिरेव स्यादङ्गुष्ठकृतनामिका। सर्वाङ्गुलय आनाभेः पाण्योः कवचबन्धने।। ३।।
तर्जनीयमध्यमानामाः प्रोक्ता नेत्रत्रये क्रमात्। अङ्गुष्ठतर्जन्यग्राभ्यां हस्तयोरभिशब्दयेत्।। ४।।

इति। चतस्रः प्रसारिताः। ''प्रसारिततलेनैव पाणिना हृदयं शिरः'' इति। दक्षिणामूर्तिसंहितायाम्—

कनिष्ठाङ्गुष्ठरहितैस्त्रिभिस्तु हृदि विन्यसेत्। मध्यमानामिकाभ्यां तु न्यसेच्छिरसि मन्त्रवित्।। १।।
शिखाङ्गुष्ठेन विन्यस्य दशभिः कवचं न्यसेत्। हृद्गतैर्नेत्रविन्यासं विन्यसेत् परमेश्वरि।। २।।
तर्जनीमध्यमाभ्यां तु ततोऽस्त्रं विन्यसेत् प्रिये। मुष्टिं कृत्वोच्चलेन्मन्त्री तर्जनी दण्डवत्तदा।। ३।।
सौभाग्यदण्डिनी नाम रिपून् दण्डयती[1]क्षणात्। अङ्गुष्ठे मुष्टिकं कुर्याद्रिपुजिह्वाग्रहा भवेत्।।४।।

इति। ज्ञानार्णवे—''त्रिद्व्येकदशकत्रिद्विमिताङ्गुलिभिरीरिताः''। इत। अस्यार्थः— कनिष्ठाङ्गुष्ठरहिताङ्गुलित्रयेण हृदयमुद्रा। मध्यमानामाभ्यां शिरोमुद्रा। अङ्गुष्ठेन शिखामुद्रा। दशाङ्गुलिभिः कवचमुद्रा। हृदयस्थाभिर्नेत्रमुद्रा। तर्जनीमध्यमाभ्यां तालत्रयेणास्त्रमुद्रा। आनाभेः स्कन्धान्ताधोभूताभ्यां पाणिभ्यां वर्म। ''वर्म स्कन्धादिनाभिग''मिति तन्त्रराजवचनात्। शैवमन्त्राणां तु शैवागमे षडङ्गमुद्राविशेष उक्तः—

कृतमुष्टिपुटौ हस्तौ कृत्वाङ्गुष्ठौ हृदि न्यसेत्। हृन्मुद्रेयं समाख्याता शिरोमुद्रा प्रकीर्त्यते।। १।।
ललाटाग्रे समाधाय कृतमुष्टिपुटौ करौ। कुर्यादूर्ध्वप्रसक्ताग्रे तर्जन्यौ ज्येष्ठबाह्यतः।। २।।
करौ शिखायां संयोज्य कृतमुष्टिपुटाकृती। ज्येष्ठादधः प्रसक्ताग्रौ कारयेदूर्ध्वतस्तथा।। ३।।
कुर्यात् सेयं तथा मुद्रा सर्वोपद्रवनाशिनी। कृत्वाङ्गुष्ठौ प्रसक्ताग्रौ तर्जन्यौ च त्रिकोणवत्।। ४।।
मूर्ध्नि पश्चान्मुखं कृत्वा नयेदुभयपार्श्वतः । करं हृदयमुद्रेयं कवचस्याभयप्रदा ।। ५।।
कृत्वा नेत्रोन्मुखं हस्तं सक्ताङ्गुष्ठकनिष्ठिकम्। प्रसार्य मध्यमाः किञ्चिन्नमयेदितराङ्गुलीः।। ६।।
नेत्रमुद्रेयमुद्दिष्टा रक्षोभूतार्तिभञ्जनी। परस्परतलद्वन्द्वं पुनरास्फोटयेद् भृशम्।। ७।।

---

१. 'दण्डयते क्षणात्' क. पाठः।

तर्जन्या शब्दयेत् ताभ्यां ज्येष्ठाग्रवलिताग्रया।..।।

इति। ताभ्यां कराभ्यां।। मन्त्रतन्त्रप्रकाशे–

कनिष्ठाङ्गुष्ठकौ भुग्नौ करयोरितरेतरम्। तर्जनीमध्यमानामाः संहता भुग्नवर्जिताः।। १ ।।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता[1]।..।।

संहताः परस्परसंयुक्ताः। भुग्नवर्जिताः अकुटिलाः। लक्षणसङ्ग्रहे–

वामाङ्गुष्ठं तु सङ्गृह्य दक्षिणेन तु मुष्टिना। कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत्।। १ ।।
वामाङ्गुल्यस्तथा श्लिष्टाः संयुक्ताः सम्प्रसारिताः। दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका[2] ।।२।।
अधोमुखं वामहस्तं तादृशं दक्षहस्तकम्। विन्यस्याङ्गुष्ठयुग्मं तु पार्श्वयोः सम्प्रसार्य च।। ३ ।।
दर्शयेदर्घ्यपात्रे तु मत्स्यमुद्रेयमीरिता।..।।

इति। पद्मवाहिन्याम्– ''अञ्जल्यनामातर्जाख्यकनिष्ठाग्राख्ययोगतः[3]। मुद्रेयं त्रिशिखा प्रोक्ता''।। इति। अथावाहनादिमुद्राः लक्षणसङ्ग्रहे–

हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्वणोः। अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता।।१ ।।
अधोमुखी त्वियं चेत् स्यात् स्थापनीति निगद्यते। उच्छ्रिताङ्गुष्ठमुष्ट्योश्च संयोगात् सन्निधापनी।।२।।
अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधनी मता। उत्तानमुष्टियुगला सम्मुखीकरणी भवेत्।। ३।।
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः। सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी।। ४।।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता। अन्योन्याभिमुखा[4] श्लिष्टा कनिष्ठानामिका पुनः।। ५।।
तथैव तर्जनी मध्या धेनुमुद्रा प्रकीर्तिता। अमृतीकरणं कुर्यात् तया साधकसत्तमः ।। ६।।
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुली । महामुद्रेयमुदिता परमीकरणे प्रिये ।। ७।।
प्रयोजयेदिमा मुद्रा देवताह्वानकर्मणि। अङ्गन्यासस्य मुद्राणां लक्षणं प्राक् समीरितम् ।। ८।।

इति।। तन्त्रराजे– (४ प० ३३, ४१)

कृताञ्जली करौ कृत्वा व्यत्यस्येत् [5]तदनामिके। तन्नखे तर्जनीग्रस्ते त्रिखण्डा ललितावहा।। १ ।।
कनिष्ठानामिकामध्या नखैरन्योन्यसङ्गताः। कृत्वाङ्गुष्ठौ कनिष्ठास्थौ ऋजू कुर्याच्च तर्जनी।।२।।
सर्वसङ्क्षोभणी मुद्रा त्रैलोक्यक्षोभकारिणी। एतस्या मध्यमे देवि तर्जनीवत्कृते सति।। ३ ।।
सर्वविद्राविणी मुद्रा सर्वासामपि योषिताम्। ताभ्यामङ्कुशरूपाभ्यां संश्लिष्टाकर्षिणी मता।। ४।।
परिवृत्ताङ्गुली कृत्वा नखाश्लिष्टतलौ करौ। अङ्गुष्ठौ तर्जनीश्लिष्टौ नखैरावेशकारिणी।। ५।।
कराग्रे प्रसृते कृत्वा व्यत्यस्येत् तत्कनिष्ठिके। तदग्राश्लेषतो भुग्ने मध्यमेऽनामिके ऋजू।। ६।।
तन्नखस्थे तु तर्जन्यावङ्गुष्ठौ मध्यमोपरि। इयमुन्मादिनी मुद्रा सर्वोन्मादनकारिणी।। ७।।
अस्यास्त्वनामिके भुग्ने तर्जन्यावङ्कुशाकृती। एषा महाङ्कुशामुद्रा स्तम्भनाकर्षकारिणी।। ८।।
सव्यदक्षकरौ सम्यग् व्यत्यस्येत् कूर्परोपरि। मणिबन्धे च बध्नीयादञ्जलिं मध्यपृष्ठयोः।। ९।।

---

[1] 'चालयेत्' ख.पाठः। [2] 'मुद्रैषा शङ्खसंज्ञिता' क.पाठः। [3] 'योजिता' ग.पाठः। [4] 'मुखेश्लिष्टे' क.पाठः। [5] 'व्यत्यस्ततदनामिके' क.पाठः।

विधाय भुग्ने तर्जन्यावङ्गुष्ठौ कारयेदधः। कनिष्ठानामिके कुर्याद् व्यत्यस्ते करपृष्ठगे।। १०।।
इयं सा खेचरीमुद्रा ललिताप्रीतिकारिणी। अस्या विरचनेनैव सर्वाः सिध्यन्ति देवताः।। ११।।

इति।। अस्यामुक्तमुद्रायामीषद्भेद उक्तो वामकेश्वरतन्त्रे—

सव्यं दक्षिणदेशे तु दक्षिणं सव्यदेशके। बाहुं कृत्वा महादेवि हस्तौ सम्परिवर्त्य च।। १।।
कनिष्ठानामिके देवि युक्तानेन[1] क्रमेण तु। तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे।। २।।
अङ्गुष्ठौ तु महेशानि कारयेत् सरलावपि। इयं सा खेचरी नाम्ना मुद्रा सर्वोत्तमा प्रिये।। ३।।
रचितैव महेशानि सर्वतेजोपहारिणी। बद्धयैवैतया देवि दृश्यते साधकोत्तमः।। ४।।
योगिनीसर्ववृन्दैस्तु ज्वलत्पावकसन्निभः। डाकिनीराकिणीवृन्दैर्लाकिनीकाकिनीगणैः।। ५।।
साकिनीहाकिनीवृन्दैर्दृश्यते परमेश्वरि। एतया ज्ञातया देवि योगिनीनां प्रियो भवेत्।। ६।।
अतः समयमुद्रेयं सर्वासां परिकीर्तिता। प्रयतोऽप्रयतो वापि शुचौ देशेऽथवाऽशुचौ।। ७।।
उत्थितश्चोपविष्टश्च चङ्क्रमन् निश्चलोऽपि वा। उच्छिष्टो वा शुचिर्भूत्वा भुञ्जानो मैथुने रतः।। ८।।
मुद्रया मध्यमाङ्गुल्यौ परिवर्त्य क्रमो मनुः। पार्थिवस्थानके युक्तः सद्यः खेचरतां लभेत्।। ९।।

इति।। तन्त्रराजे (४ प० ५१ श्लो०)

मध्यमा, मध्यपार्श्वाधः कनिष्ठाग्रे विपर्ययात्। अनामिकेऽधो व्यत्यस्ते तर्जन्यावङ्कुशाकृती।।१।।
इतरे तन्नखाग्राग्रे बीजमुद्रेयमीरिता । कनिष्ठाङ्गुष्ठसंश्लेषान्महायोनिस्त्रिखण्डिका ।। २।।
कनिष्ठानामिकामध्या व्यत्यस्ताः पृष्ठतः क्रमात्। वलितावूर्ध्वयोगेन ऋजुतर्जनिकौ करौ।। ३।।
शक्त्युत्थापनमुद्रैषा जपपूजासमाधिषु । मूर्तीकरणमेतस्या रचनेन समीरितम् ।। ४।।
बाणकोदण्डमुद्रा स्यादृज्वङ्गुष्ठेन मुष्टिना। (४—३८) पाशमुद्रा तु तेनैव तर्जन्यङ्गुष्ठयोगतः।।५।।
कनिष्ठानामयोः पृष्ठे स्यादङ्गुष्ठस्तु तर्जनी। कुटिला ऋजुमध्यस्था मुद्रासावङ्कुशाभिधा।। ६।।
खेचर्या वक्ष्यमाणाया मध्यमे करपृष्ठगे। तर्जन्यौ ऋजुसंश्लिष्टे मुद्रैषोक्ता नमस्कृतौ।। ७।।

इति।। अथ गणेशमुद्रा लक्षणसङ्ग्रहे—

ततो गणेशमुद्राणामुच्यन्ते लक्षणान्यथ[2]। उत्तानोर्ध्वमुखी मध्या सरला बद्धमुष्टिका।। १।।
दन्तमुद्रा समाख्याता सर्वागमविशारदैः। वाममुष्टेस्तु तर्जन्या दक्षमुष्टेस्तु तर्जनीम् ।। २।।
संयोज्याङ्गुष्ठकाग्राभ्यां तर्जन्यग्रे स्वके क्षिपेत्। एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता।।३।।
ऋज्वीं च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि। संयोज्याकुञ्चयेत् किञ्चिन्मुद्रैषाङ्कुशसंज्ञिका।। ४।।
तर्जनीमध्यमासन्धिनिर्गताङ्गुष्ठमुष्टिका। अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ।। ५।।
तले तलं तु करयोस्तिर्यक् संयोज्य चाङ्गुलीः। संहाराः प्रसृताः[3] कुर्यान्मुद्रा परशुसंज्ञिता[4]।।६।।
ऊर्ध्वास्यं दक्षिणं हस्तमानम्रविरलाङ्गुलिम्। किञ्चिन्निम्नतलं कुर्यान्मुद्रैषा लड्डुकाभिधा।। ७।।

---

१. 'तेन' ग. पाठः। २. 'न्यपि' क. पाठः। ३. 'प्रसृतीः' क. पाठः। ४. 'का' पाठः।

दन्तपाशाङ्कुशविघ्नपरशुलड्डुकाह्वयाः।। ८।।
उत्तानवाममुष्टिस्तु बीजपूरह्वया मता। शाक्तेयानां च मुद्राणां कथ्यन्ते लक्षणानि तु।। ९।।
बीजपूराह्वया चेति गणेशस्य प्रिया मताः। शाक्तेयानां च मुद्राणां कथ्यन्ते लक्षणानि तु।। ९।।
पाशाङ्कुशवराभीतिखड्गचर्मधनुःशराः। मौसली मुद्रिका दौर्गी मुद्राः शक्तिप्रिया मताः।। १०।।
लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्यास्तु पूजने। अक्षमाला तथा व्याख्या वीणा पुस्तकमुद्रिका।।११।।
मातङ्गिन्यास्तु वीणाख्या मुद्रा चातिप्रिया भवेत्। योनिमुद्रा तु सर्वासां शक्तीनां प्रीतिदा मता।।१२।।
पाशाङ्कुशाख्ये प्रोक्ते च कथ्यन्ते ता यथाक्रमम्। उत्तानं दक्षिणं हस्तं कृत्वाधो नमयेच्छनैः।।१३।।
संहताङ्गुलिका मुद्रा वराख्या परिकीर्तिता। पराङ्मुखं वामहस्तमुच्छ्रिताङ्गुलिकं भवेत्।। १४।।
अभयस्य तु मुद्रैषा कथिताभयदायिनी[1]। कनिष्ठानामिके बद्ध्वा स्वाङ्गुष्ठेनैव दक्षतः।। १५।।
शिष्टाङ्गुली तु प्रसृते संसृष्टे खड्गमुद्रिका। वामहस्तं तथा तिर्यक् कृत्वा चैव प्रसार्य च।। १६।।
आकुञ्चिताङ्गुलिं कुर्याच्चर्ममुद्रेयमीरिता। दक्षमुष्टेस्तु तर्जन्या दीर्घया बाणमुद्रिका।। १७।।
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम्। कुर्यान्मुसलमुद्रेयं सर्वविघ्नविनाशिनी।। १८।।
मुष्टिं कृत्वा कराभ्यां च वामस्योपरि दक्षिणम्। कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता।।१९।।
दक्षिणाङ्गुष्ठतर्जन्यौ वक्रलग्ने कराङ्गुलीः। प्रसार्य दर्शयेदेषा मुद्रा स्यादक्षमालिका।। २०।।
एषैव संह[2]तोत्ताना व्याख्यामुद्रा समीरिता। वीणावादनबद्धस्तौ कृत्वा सञ्चालयेत् ततः[3]।। २१।।
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी। वाममुष्टिं स्वाभिमुखे कुर्यात् पुस्तकमुद्रिका।। २२।।

इति।। अथ गायत्र्या द्वात्रिंशन्मुद्रास्तत्रैव—

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा। द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा।। १।।
षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकं तथा। शकटं यमपाशं च ग्रथितं सम्मुखोन्मुखम्।। २।।
विलम्बं मुष्टिकं चैव मत्स्यः कूर्मवराहकौ। सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ।। ३।।
एता मुद्राश्चतुर्विंशद् गायत्र्याः सुप्रतिष्ठिताः। वृथा मन्त्रजपश्चैव स्नानं भोजनमेव च।। ४।।
तथा वै तीर्थयात्रा च मुद्राहीने वृथा हि सा। यज्ञश्च निष्फलस्तेषां होमो देवार्चनं तथा।। ५।।
तस्मान्मुद्रा महाज्ञेया विद्वद्भिर्यत्नमास्थितैः। आकुञ्चिताङ्गुलिकरौ सम्मुखौ सुमुखं भवेत्।। ६।।
कोशाकारौ तु साङ्गुष्ठौ तत् सम्पुटमुदाहृतम्। विरलाङ्गुलिकौ तौ तु विततं परिकीर्तितम्।।७।।
विस्तीर्णं विस्तृतौ हस्तावन्योन्याञ्जलिसंयुतौ। कनिष्ठेऽनामिके युक्ते चेति तद् द्विमुखं भवेत्।।८।।
तदेव मध्यमायुक्तं त्रिमुखं परिकीर्तितम्। तदेव तर्जनीयुक्तं चतुर्मुखमुदीरितम् ।। ९।।
तदेव स्यात् पञ्चमुखं मिलिताङ्गुष्ठकं यदि। तदेव षण्मुखं प्रोक्तं तथा व्यस्तकनिष्ठिकम्।।१०।।
अधोमुखयुतौ हस्तावधोमुखमुदीरितम्। व्यापकाञ्जलिका सा स्याद् व्यस्ताङ्गुलिकरौ युतौ।।११।।
अङ्गुष्ठकद्वययुतं मुष्टिद्वयमधोमुखम्। भवेद्यदि तदा प्रोक्तं शकटं मुनिसत्तमैः।। १२।।

---

१. 'चाभयप्रदा' क. पाठः। २. 'संन्नतोत्तना' ख. पाठः। ३. 'शिरः' ख. पाठः।

मुष्टिं कृत्वा करौ योज्य तर्जनीं च प्रसार्य च। आकुञ्च्याग्रौ तु संयोज्य यमपाशं विदुर्बुधा।।१३।।
अन्योन्यान्तरसाश्लिष्टदशाङ्गुलिकारावुभौ। अन्योन्यमपि बध्नीयाद् ग्रथितं परिकीर्तितम्।।१४।।
चुलुकाग्नौ करौ कृत्वा चोर्ध्वे वामकरे सुधीः। अधोमुखेन दक्षेण योजयेत् सम्मुखोन्मुखम्।।१५।।
अधःकोशाकृतिकरौ विलम्बं विदुषो विदुः। युतं मुष्टिद्वयं चैव सम्यग् मुष्टिकमीरितम्।।१६।।
अन्योन्यानामिकामध्यामन्योन्येन च संस्पृशेत्। कनिष्ठिकायुगेनैव मत्स्यमुद्रा समीरिता।।१७।।
अधोमुखे करे वामे तादृशो दक्षिणः करः। पृष्ठदेशसमाक्रान्तः कूर्ममुद्रा समीरिता।।१८।।
मुष्टिं कृत्वा वामहस्तं मध्यमां तां[1] प्रसार्य्य च। निवेशयेद् वामकक्षे वराहस्य समीरिता।।१९।।
प्रसारिताङ्गुलिकरौ समीपं कर्णयोर्नयेत्। सिंहाक्रान्तं समुद्दिष्टं गायत्रीजपतत्परैः।।२०।।
दर्शयेच्छ्रोत्रयोर्हस्तौ संयुक्ताङ्गुलिपञ्चकौ। महाक्रान्तं भवेन्मुद्रा गायत्रीहृदयङ्गता ।।२१।।
तर्जनीं दक्षहस्तस्य वामे करतले न्यसेत्। बध्नीयाद्वामहस्तेन मुद्गरं समुदीरितम्।।२२।।
दक्षिणेन करेणैव चालिताङ्गुलिना शिरः। वदनाभिमुखेनैव पल्लवं मुनिभिः स्मृतम्।।२३।।
सुरभिर्ज्ञानसिंहौ च योनिः कूर्मोऽथ पङ्कजम्। लिङ्गं निर्याणमुद्रेति जपान्तेऽष्टौ प्रदर्शयेत्।।२४।।

निर्याणं प्रयाणं तेन प्रयाणकाले दर्शनीया संहारमुद्रा लक्ष्यते। अन्याः सप्त मुद्राः प्रसिद्धाः।

मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके। अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः।।२५।।
अङ्गुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता।..।।

इति।। अथ वैष्णवमुद्रास्तत्रैव—

एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः। शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ।।१।।
वनमाला तथा ज्ञानमुद्रा बिल्वाह्वया तथा। गरुडाख्या परा मुद्रा विष्णोः सन्तोषवर्धिनी।।२।।
नारसिंही च वाराही हायग्रीवी धनुस्तथा। बाणमुद्रा च परशुर्जगन्मोहनिका परा ।।३।।
काममुद्रा समाख्याता तासां लक्षणमुच्यते। वामाङ्गुष्ठं तु सङ्गृह्य दक्षिणेन तु मुष्टिना।।४।।
कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत्। वामाङ्गुल्यस्तथा शिष्टाः[2] संयुक्ता सम्प्र[3]सारिताः।।५।।
दक्षिणाङ्गुष्ठसंस्पृष्टा मुद्रैषा शङ्खसंज्ञिता[4]। विपर्यस्ते तले कृत्वा वामदक्षिणहस्तयोः।।६।।
अङ्गुष्ठौ ग्रथयेच्चैव कनिष्ठानामिकान्तरे। चक्रमुद्रेयमुद्दिष्टा सर्वसिद्धिकरी शुभा।।७।।
हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सम्प्रसारितौ। अङ्गुल्यौ मध्यमे भूयः संलग्ने सम्प्रसारिते।।८।।
गदामुद्रेयमाख्याता विष्णोः सन्तोषकारिणी। हस्तौ तु सम्मुखौ कृत्वा सन्न[5]तप्रोन्नताङ्गुली।।९।।
तलान्तर्मिलिताङ्गुष्ठौ मुद्रैषा पद्मसंज्ञिका। ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका।।१०।।
दक्षिणाङ्गुष्ठसंलग्ना तत्कनिष्ठा प्रसारिता। तर्जनीमध्यमानामाः किञ्चित् सङ्कोच्य चालिताः।।११।।
वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः। अन्योन्यपृष्ठकरयोर्मध्यमानामिकाङ्गुली।।१२।।

१.'तत्' ग. पाठः। २. 'श्लिष्टा' ग. पाठः। ३. 'स्युः' ख. पाठः। ४. 'संज्ञका' क. पाठः। ५. 'संहतावुन्नता' क. पाठः।

अङ्गुष्ठेन तु बध्नीयात् कनिष्ठामूलसंश्रिते[1]। तर्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिता।। १३।।
अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका। कनिष्ठ[2]यान्यया बद्धा तर्जन्या दक्षया तथा[3]।।१४।।
वामानामां च बध्नीयाद् दक्षिणाङ्गुष्ठमूलके। अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः पराः।।१५।।
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका। स्पृशेत् कण्ठादिपादान्तं तर्जन्याङ्गुष्ठनिष्ठया।। १६।।
करद्वयेन मालावन्मुद्रेयं वनमालिका। उन्नतं वाममङ्गुष्ठं दक्षाङ्गुष्ठेन वेष्ठयेत् ।। १७।।
दक्षिणाङ्गुष्ठकं चैव तदीयाभिर्निपीड्य च। अङ्गुलीभिर्वामहस्ताङ्गुलिभिस्ताश्च पीडयेत्।। १८।।
गाढं हृदि क्षिपेदेषा बिल्वाख्या मुद्रिका परा। हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठके।।१९।।
मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा। मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत्।।२०।।
एषा गरुडमुद्रा स्याद्विष्णोः प्रीतिविवर्धिनी। तर्जन्यङ्गुष्ठकौ सक्तावग्रतो हृदि विन्यसेत्।। २१।।
वामहस्ताम्बुजं चैव वामजानुनि विन्यसेत्। ज्ञानमुद्रा भवेदेषा रामचन्द्रप्रियङ्करी ।। २२।।
जानुमध्ये करौ कृत्वा चिबुकोष्ठौ समावुभौ। हस्तौ तु भूमिसंलग्नौ कम्पमानः पुनः पुनः।।२३।।
मुखं च विततं कुर्याल्लेलिहानां च जिह्विकाम्। नारसिंही भवेन्मुद्रा ह्येषा तत्प्रीतिवर्धिनी।।२४।।
दक्षोपरि करं वामं कृत्वोत्तानमधः सुधीः। [4]नामयेदिति सम्प्रोक्ता मुद्रा वाराहसंज्ञिता।। २५।।
वामहस्ततले कृत्वा दक्षाङ्गुलीरधोमुखीः। संरोप्य मध्यमां तासामुन्नम्याधो विकुञ्चयेत्।। २६।।
हयग्रीवप्रिया मुद्रा तन्मूर्तेरनुकारिणी।..।।

धनुर्बाणमुद्रे प्रागेवोक्ते। परशुमुद्रापि प्रागुक्ता।

मूर्ध्नि साङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी। हस्तौ तु सम्पुटौ कृत्वा प्रसृताङ्गुलिकौ तथा।।२७।।
तर्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमास्थितौ[5]। काममुद्रेयमुदिता सर्वदेवप्रियङ्करी।। २८।।

इति।। अथ सौरमुद्रे नारायणीये—

पद्माकारौ करौ कृत्वा प्रतिश्लिष्टे तु मध्यमे। अङ्गुल्यौ धारयेत्तस्मिन् बिम्बमुद्रेति सोच्यते।।१।।
दर्शयेदग्रतः पद्मबिम्बमुद्रे यथोदिते।..।।

इति।। अथ शैवमुद्रास्तत्र शिवरहस्ये—

शैवीनामथ मुद्राणां दशानां षण्मुख शृणु। महोदेवप्रियाणां ते कथ्यन्ते लक्षणानि वै।। १।।
उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन बन्धयेत्। वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च वेष्टयेत्।। २।।
लिङ्गमुद्रा समाख्याता शिवसान्निध्यकारिणी। मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके।। ३।।
अनामिका[6]द्वयाश्लिष्टदीर्घमध्यमयोरधः। अङ्गुष्ठाग्रद्वयं न्यस्येद् योनिमुद्रेयमीरिता ।। ४।।
अङ्गुष्ठेन कनिष्ठाग्रं बद्ध्वा शिष्टाङ्गुलित्रयम्। प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्तिता।।५।।

---

१. 'संस्थिते' ग. पाठः। २. 'कनिष्ठिकां तया बद्ध्वा' ख. पाठः। ३. 'यया' ग. पाठः। ४. 'अङ्गुल्यं तु संयुक्तं' ख. पाठः।
५. 'श्रितौ' ख. पाठः। ६. 'कोर्ध्वसंश्लिष्ट' ख. पाठः।

अङ्गुष्ठतर्जन्यग्रं तु ग्रथयित्वाङ्गुलित्रयम्। प्रसारयेद् अक्षमालामुद्रेयं गुह[1] कीर्तिता।। ६।।
अधःकृतो दक्षहस्तः प्रसृतो वरमुद्रिका। ऊर्ध्वीकृतो वामहस्तः प्रसृतोऽभयमुद्रिका।। ७।।
मिलित्वानामिकाङ्गुष्ठमध्यमाग्राणि योजयेत्। शेषाङ्गुल्यावुच्छ्रिताग्रे मृगमुद्रेयमीरिता। ८।।
पञ्चाङ्गुल्यो दक्षिणास्तु मितिलास्तूर्ध्वमुच्छ्रिताः[2]। खट्वाङ्गमुद्रा षड्वक्त्र[3] शिवस्यातिप्रिया मता।।९।।
पात्रवद्वामहस्तं च कृत्वाङ्के वामके तथा। निधायोच्छ्रितवत् कुर्यान्मुद्रा कापालिनी[4] मता।। १०।।
मुष्टिं च शिथिलां बद्ध्वा ईषदुच्छ्रितमध्यमाम्। दक्षिणां तूर्ध्वमुन्नम्य कर्णदेशे प्रचालयेत्।। ११।।
एषा मुद्रा डुमरुका सर्वविघ्नविनाशिनी। लिङ्गयोनित्रिशूलाक्षमालेष्टाभीमृगात्मिकाः ।। १२।।
खट्वाङ्गा च कपालाख्या डमरुः शिवतोषदाः।...।।

इति।। लक्षणसङ्ग्रहे—

आसने पद्ममुद्रा स्याद् हस्तद्वयमधोमुखम्। मुद्रैषा कुशलप्रश्ने तदेवोर्ध्वमुखं पुनः।। १।।
मुद्रा स्यात् स्वागते पाद्यमुद्रा चाञ्जलिरुच्यते। आनामाङ्गुष्ठसंयोगात् प्रोक्ता चार्घ्यस्य मुद्रिका।।२।।
उत्तानं दक्षहस्तं तु कृत्वा निम्नतलं सुधीः। कनिष्ठिहीना संयुक्ताश्चतस्रोऽङ्गुलिकास्तथा।। ३।।
मुद्रैषाचमनी प्रोक्ताऽधोमुखी सा त्वनामया। स्पष्टाङ्गुष्ठा भवेन्मुद्रा मधुपर्के वरानने।। ४।।
अधोमुखी दक्षहस्तकृता मुष्टिः कनिष्ठया। वियुक्ता स्नानमुद्रैषा गदिता परमेश्वरि।। ५।।
उत्तानं दक्षिणं हस्तं कृत्वा तन्मध्यमां पुनः। अङ्गुष्ठेन स्पृशेदेषा मुद्रा वस्त्रस्य कीर्तिता।। ६।।
एषैवानामिकास्पर्शान्मुद्रा भूषणसंज्ञिता। कनिष्ठास्पर्शतो ह्येषा उपवीतस्य मुद्रिका।। ७।।
ज्येष्ठाग्रेण कनिष्ठाग्रं स्पृशेद् गन्धस्य मुद्रिका। अधोमुखं करं कृत्वा तर्जन्यग्रे तु योजयेत्।।८।।
अङ्गुष्ठाग्रं तु मुद्रेयं पुष्पाख्या परमेश्वरि। अङ्गुष्ठाग्रेण तर्जन्याः स्पृशेदग्रं महेश्वरि।। ९।।
धूपमुद्रेयमाख्याता सर्वदेवप्रियङ्करी। ज्येष्ठाग्रेण स्पृशेदग्रं मध्यमायाः सुरार्चिते ।। १०।।
दीपमुद्रेयमुदिता सर्वदेवप्रिया शिवे। अनामाग्रं स्पृशेद् देवि ज्येष्ठाग्रेण तु देशिकः।। ११।।
नैवेद्यमुद्रा कथिता देवानां[5] तृप्तिदायिनी।...।।

इति।। नारदपञ्चरात्रे—

ग्रासमुद्रां सव्यहस्ते प्रफुल्लकमलाकृतिम्[6]। दर्शयेत् पञ्चवायूनामन्यहस्तेन दर्शयेत्।। १।।
कनिष्ठानामिके सम्यगङ्गुष्ठाग्रेण योजयेत्। प्राणमुद्रा समाख्याता प्रथमं दर्शयेदिमाम्।। २।।
योजयेत् तर्जनीमध्यामपानस्याथ मुद्रिका। मध्यमानामिके तद्वद्व्यानमुद्रा प्रकीर्तिता।। ३।।
तर्जनीमध्यमानामा तद्वन्मुद्रा तुरीयका। सर्वाभिरङ्गुलीभिश्च पञ्चमी मुद्रिका मता।। ४।।
स्वकीयैर्मनुभिर्युक्ता पञ्च मुद्राः प्रकीर्तिताः। प्राणसंज्ञस्तथापानो व्यानोदानमनुस्तथा।। ५।।
समानो ङेयुताः सर्वे प्रणवाद्या द्विठान्तकाः। पञ्च मुद्रा भवन्तीह क्रमेणैव समीरिताः।। ६।।

---

[1] 'परि' ख.पाठः। [2] 'रुन्नताः' ग.पाठः। [3] 'विख्याता' ग.पाठः। [4] 'लिका' ख.पाठः। [5] 'देवीनां' ख.पाठः। [6] 'तिः' क.ग.पाठः।

इति।। लक्षणसङ्ग्रहे—

मणिबन्धस्थितौ कृत्वा प्रसृताङ्गुलिकौ करौ। कनिष्ठाङ्गुष्ठयुगलं मिलित्वान्तः प्रसारयेत्।। १।।
सप्तजिह्वाख्यमुद्रेयं प्रिया वैश्वानरस्य हि। ....।।

इति। कुलार्णवे—''सर्वाभिरङ्गुलीभिश्च दद्याद्भूतबलिं प्रिये।'' इति। पद्मवाहिन्याम्—

वृद्धाभ्यामङ्गुलिर्बद्ध्वा तर्जन्यौ दण्डवत् सृजेत्। अग्रं वामं ततः पृष्ठे दक्षमाकर्षयेच्छनैः।। १।।
नाराचमुद्रा सम्प्रोक्ता योज्या बलिविसर्जने।..।।

इति। लक्षणसङ्ग्रहे—

अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम्। क्षिप्त्वाङ्गुलीरङ्गुलीभिः संयोज्य परिवर्तयेत्।। १।।
एषा संहारमुद्रा स्याद्विसर्जनविधौ मता। ऊर्ध्वास्यवामतर्जन्या मध्ये वक्रां परां न्यसेत्।। २।।
तिर्यङ्मध्ये भवेदेषा सृणिमुद्रारिमर्दिनी। अङ्गुष्ठावुन्नतौ मुष्ट्योः कृत्वा संलग्नयोर्द्वयोः।। ३।।
तावेवाभिमुखे कुर्यान्मुद्रैषा कालकर्णिका। दक्षिणा निबिडा मुष्टिर्नासिकार्पिततर्जनी ।। ४।।
मुद्रा विस्मयसंज्ञा स्याद्विस्मयावेशकारिणी। मुष्टिरूर्ध्वीकृताङ्गुष्ठा दक्षिणा नादमुद्रिका।। ५।।
तर्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका। ....।।

इति।। अथ कालविहितासनानि गोरक्षसंहितायाम्—

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते[1]।। १।।
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्। पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः।।२।।
सिद्धासनं भवेदेतत् सर्वव्याधिविषापहम्। एकपादमथैकस्मिन् विन्यस्योपरि संस्थितम्।। ३।।
इतरस्मिंस्तथा चोरौ वीरासनमुदाहृतम्। वामपादामुपादाय दक्षिणोरौ प्रविन्यसेत् ।। ४।।
तथैव दक्षिणं पादं सव्योरौ परिविन्यसेत्। पद्मासनं भवेदेतत् सर्वेषामपि पूजितम्।। ५।।
स्वस्तिकं पद्मकं वीरं सिद्धं चेति चतुष्टयम्। जपे प्रशस्तमन्येषां प्रसङ्गादेव कीर्तितम्।। ६।।

इति।। गौतमे तन्त्रे—

प्राङ्मुखोदङ्मुखो वापि स्वस्तिकासनमास्थितः। रात्रावुदङ्मुखः कुर्याद् देवकार्यं सदैव हि।। १।।
शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः। ....।।

इति। दक्षिणामूर्तिपरमिदम्। उदङ्मुखः प्राङ्मुखो वा भूत्वा प्रयतमानसः। स्वस्तिकासनमासीनः पद्मासनमथापि वा।।'' इति स्वयमेवोभयविधानादिति।। अथ (षट्शाम्भवपूजायाः श्रीचक्रे आवरणत्वेनावश्यकत्वात्[2]) षट्शाम्भवरश्मिपूजाक्रमः, लक्ष्मीकुलार्णवे—

प्रातरुत्थाय शान्तात्मा सहस्रारवराटके। षट् प्रेतान् ब्रह्मविष्ण्वादीन् हेमगर्भानिमान् स्मरेत्।। १।।
पद्मस्य कर्णिकामध्ये द्वादशान्ते गुरूक्तितः। पदत्रयमनुस्मृत्य गुरुस्मृतिपुरःसरम् ।। २।।
शुक्लं रक्तं च मिश्रं च प्रेतोपरि रहस्यवित्। चरणद्वयसम्भूतौ स्वेच्छाविग्रहधारिणौ ।। ३।।

---

१. तदुदीरितम्' कः पाठः। २. 'भृकुट्यन्तर्गतं क. पुस्तके नास्ति।

प्रातःप्रभृति सायान्तं सायादि प्रातरन्ततः। यत् करोमि जगन्नाथ तदस्तु तव पूजनम्।। ५।।
इति सम्प्रार्थनापूर्वं प्रणम्य गुरुपादुकाम्। बहिर्निगत्य शुद्धात्मा पुण्यदेशं तु दूरतः।। ६।।
कृत्वावश्यकमास्थाय शौचाचमनपूर्वकम्। गण्डूषं दन्तकाष्ठं च कृत्वा वाचम्य वाग्यतः।। ७।।

क्लींकामदेवाय सर्वजनप्रियाय नमः इति। चतुर्वारं मुखक्षालनम्।

स्नात्वा सन्ध्यामुपासीत यथाविधि विचक्षणः। स्नानप्रकारं द्विविधं बाह्याभ्यन्तरभेदतः।। ८।।
आन्तरं स्नानमत्यन्तं रहस्यमपि पार्वति। कथयामि भवध्वस्त्यै चतुर्वर्गाप्तयेऽपि च।। ९।।

इति। अथाभ्यन्तरस्नानम्–

सरित्त्रयमुपस्मृत्य चरणत्रयमध्यतः। स्रवन्तं सच्चिदानन्दप्रभावं भावगोचरम् ।। १०।।
विमुक्तिसाधनं पुंसां स्मरणादेव योगिनाम्। तेनाप्लावितमात्मानं भावयेद् भवशान्तये।। ११।।

तत्रैव–

इडा गङ्गेति विख्याता पिङ्गला यमुनानदी। मध्ये सरस्वती ज्ञेया प्रयाग इति संस्मृतः।। १२।।
बाह्यं पञ्चविधं स्नानं पञ्चभूतात्मकं यतः। मन्त्रस्नाने कृते तस्मात् सर्वस्नानकृतो भवेत्।। १३।।
पञ्चभूतात्मबीजानि लवरयहेतीरिताः। सबिन्दुकास्तैः सम्मन्त्र्य दक्षहस्ते स्थिते जले ।। १४।।
वामाङ्गुलिच्छदायोगात् प्रोक्षयेच्छिरसि त्रिधा। वामनासिकयाऽऽपूर्य शिष्टं ज्योतिर्मयं जलम्।।१५।।
दक्षनासिकयान्तःस्थमलक्षालनपूर्वकम्। विरेच्यास्त्रमनुं जप्त्वा प्रक्षिपेच्च शिलोपरि ।। १६।।
अघमर्षणमेतद्धि सकलाघनिवारणम्। इति स्नानं च सर्वापन्निवारणं निर्वत्य च।। १७।।
ततः सन्ध्यामुपासीत यथाविधि विचक्षणः। प्रातः सन्ध्यामुपासीत धर्मकामार्थसिद्धये।। १८।।
मूलाधारे वसाब्जे तु [1]ह्लांबीजं पीतसप्रभम्। ध्यात्वा वहत्पुटान्तःस्थं बहिर्निस्सार्य मण्डले।।१९।।
सौरे विभाव्य पीताभां त्रिनेत्रां च चतुर्भुजाम्। बिभ्राणामभयं शूलं कपालाही च बाहुभिः।। २०।।
बालसूर्यासनां ज्येष्ठां ध्यात्वैवं सञ्जपेन्मनुम्।...।।

ऐंह्रींश्रीं हसखफ्रे हसौं ह्लां हसौं ह्लां ज्येष्ठासंध्यायै ह्लां हसौं ह्लां ऐंह्रींश्रीं हसखफ्रे हसौं श्रीपादुकां पूजयामि तर्पयामि नमः, इति त्रिरर्घ्यं दत्त्वा,

आदित्याभिमुखस्तिष्ठन् गायत्रीं च शतं जपेत्। गायत्र्याभिनियुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्।।२१।।

५ँ षडाननाय विद्महे चित्रपादाय धीमहि तन्नो रुद्रः प्रचोदयात् ५ँ।।

अथ माध्यन्दिनी सन्ध्या मणिपूरे डफाब्जके। ह्लींबीजं श्यामसङ्काशं ध्यात्वा निःसार्य पूर्ववत्।।२२।।
सोममण्डलमध्यस्थां त्रिनेत्रां श्यामविग्रहाम्। आरुढयौवनां जाप्यां पुस्तं वामे तथेतरे[2]।। २३।।
बिभ्राणां च तथा वामां ध्यात्वैवं स[3]ञ्जपेन्मनुम्। ....।।

५ँ ह्लीं हसौं ह्लीं वामासन्ध्यायै ह्लीं हसौं ह्लीं ५ँ श्रीपादुकां पूजयामि तर्पयामि नमः। इति त्रिरर्घ्यं दत्त्वा प्राग्वद्गायत्रीं जपेत्।।

---

[1] 'ह्रीं' क. पाठः। [2] 'वामेतरे करे' ग. पाठः। [3] 'पूजयेत्' क. पाठः।

अथ सायन्तनी सन्ध्या स्वाधिष्ठाने बलाब्जके। ह्रौंबीजं रक्तवर्णं तु ध्यात्वा निःसार्य पूर्ववत्।।२४।।
वह्निमण्डलमध्यस्थां रक्तवर्णां चतुर्भुजाम्। शूलाभये करे दक्षे कपालं तर्जनीं तथा।। २५।।
वामभागे च बिभ्राणां वृद्धां नेत्रत्रयान्विताम्। विचित्राभरणां रौद्रीं ध्यात्वैवं सञ्जपेन्मनुम्।। २६।।

५ँ ह्रौं ह्सौं ह्रौं रौद्रीसन्ध्यायै ह्रौं हसौं ह्रौं ५ँ श्रीपादुकां पूजयामि तर्पयामि नमः, इति त्रिरर्घ्यं दत्त्वा तां देवीं तन्मनुं पश्चान्मूलतेजसि संयोजयेत्। इति सन्ध्याविधिः।।

अथ प्रायश्चित्तखण्डः—

सन्ध्यालोपो न कर्तव्यः शम्भोराज्ञैवमैव हि। दीक्षितः सन्ध्यया हीनो न दीक्षितफलं लभेत्।। १।।
न कुर्यात् यदि[1] तां सन्ध्यां पतिते दशधा जपेत्। अन्यसन्ध्यासमे काले सौत्रकण्टकिविद्यया।।२।।
कृत्वा षडङ्ग[2] मन्त्रेण ध्यायेत् तां सौत्रकण्टकीम्।..।।

अथ ध्यानम्—

षड्वक्त्रां द्वादशभुजां त्रिनेत्रां परमेश्वरीम्। गलादूर्ध्वं शुक्लवर्णां पीतां गलतलादधः।। ३।।
कट्यादिपादपर्यन्तं नीलाभां च ततः स्मरेत्। द्विरष्टवर्षां रक्ताङ्गी [3]सर्वशृङ्गारचर्चिताम्।। ४।।
स्वर्णरक्तप्रभाभिश्च मण्डितालिसहस्रिकाम्। मोचनीं सर्वपापानां रत्नसिंहासने स्थिताम्।। ५।।
तदूर्ध्वे श्वेतपद्मं च तदूर्ध्वे श्वेतकेसरम्। तत्पृष्ठे संस्थितां देवीं त्रिखण्डां [4]गुणमण्डिताम्।। ६।।
रत्नमुकुटोज्ज्वलां दिव्यां सन्ततानन्दपूरिताम्। हसद्वक्त्रां महादेवीं दक्षिणोदयगामिनीम्।। ७।।
महासमययागाय नित्यनिष्कलगामिकाम्[5]। ....।।

अथ मन्त्राः—५ँ ऐंपरदुष्करकर्मच्छेदनकरि अघोरे वरदे विच्चे मायात्रैलोक्यरूपसहस्रपरिवर्तिनि मातृगणे हस्रः[6] ५ँ।।

अथ सौरपूजा—

उषस्युत्थाय यत् कर्म श्रीनाथस्मृतिपूर्वकम्। बाह्यमावश्यकं कृत्वा शौचं दन्तविशोधनम्।। १।।
श्रौतागमात्मकं स्नानं सन्ध्यातर्पणमेव च। सर्वं निवर्त्य पूतात्मा निःशङ्कः शान्तमानसः।। २।।
यथा विभक्तिः स्वच्छाच्छो विशेत् पूजागृहं प्रति। आगत्य तत्सपर्यार्थं साधनाशेषसंयुतम्।। ३।।
समीक्ष्य षट्क्रमावेर्च्छा (?) यदि तत्प्राङ्गणे यजेत्। मार्तण्डं तदशक्तश्चेन्न कुर्याच्चापराद्धयोः।।(?)।।४।।

इति। तथा चोक्तं शम्भुनिर्णये—

चतुरन्वयिनामेव सौरपूजेत्थमीरिता । तद्विचार्य चिदादित्यपूजां कर्तुं सुखासने ।। १।।
प्राङ्मुखः प्रत्यगासीनः समस्निग्धमहीतले । भूभूतशुद्धिश्वसनसंयमादिविचक्षणः ।। २।।
सामान्यार्घ्यं स्वपुरतः प्रणवान् पञ्च चोचरेत्। मण्डलोश्चा(द्धा)रणं कार्यमिति साधारणो मतः।।३।।
भूताङ्गुलं च देवास्त्रं षट्कोणं चोर्ध्वरेखकम्। विलिख्य तस्मिन् साधारपात्रमस्त्रविशोधितम्।।४।।
संस्थाप्य पयसापूर्याधारपात्रजलेषु च। वह्न्यर्कसोमबीजैस्तु तदात्मकविभावनम् ।। ५।।

---

[1] 'पतितां सन्ध्यां पतितो' ग. पाठः। [2] 'पाखण्डमन्त्रेण' ग. पाठः। [3] 'स्वर्णं' ग. पाठः। [4] 'ण्डागुण' ग. पाठः।
[5] ' नीं' ख. पाठः। [6] 'हस्रं' ग. पाठः।

सर्वं निष्पाद्य षड्दीर्घद्वितीयप्रणवात्मकम्। अङ्गं तस्य[1] विधायेत्थं पात्रं संस्थाप्य दक्षिणे।। ६।।
कृत्वा सामान्यवत् पात्रस्थापनान्तं विधाय च। सद्वितीयं निधानेन[2] सम्पूज्याभ्यर्च्य (पूर्य)बिन्दुना।।७।।
सामान्ये योजयेत्तत्र स्वदेहं यागमण्डपम्। सौरं सम्भृत्य सम्भारान् सर्वं सम्प्रोक्षयेदथ।। ८।।
वहच्छ्वासकराग्रेण पुरतः सौरमण्डले। वक्ष्यमाणेन मन्त्रेण कस्तूरीचन्दनादिभिः ।। ९।।

''५ँ ऐं चन्द्रसूर्याग्निगर्भ स्फुर २ धर्मार्थकाममोक्षलाभं कुरु २ महासमयखेचरीमुद्रां प्रकटय २ शाम्भवान्वयिनां सिद्धिं सामर्थ्यं दद २ फ्रें किचि २ फ्रें किलि २ फ्रें मण्डलब्रह्माण्डमण्डल हस्रूं महाचण्डशिवे हसखफ्रें ५ँ''। अनेन मन्त्रेणाभ्यर्च्य वृत्ताष्टदलपद्मं लिखेत्, अथ मण्डलं चतुरस्रं कृत्वा संस्थाप्य तद्दक्षिणे,

''सामान्यवद् विशेषार्घ्यमण्डलं विलिखेद्बुधः। मध्ये सौरार्घ्यपूजार्थं मण्डलं चतुरस्रकम्।। १०।।
कृत्वाधारं तु संस्थाप्य पूजयेदमुनाणुना।''

५ँ ऐं पात्रासनाय नमः ऐं ५ँ। ''तत्रास्त्रक्षालितपात्रं प्रतिष्ठाप्य'' ५ँ क्लीं ५ँ इति मन्त्रेण सामान्यार्घ्यविशेषार्घ्यौ सौः इत्यापूर्याथ षडङ्गकम्

कुर्यात् प्रोक्तद्वितीयेन षट्स्वरैर्भेदितेन च। अष्टगन्धान् विनिक्षिप्य रक्तपुष्पैः समर्चयेत्।। ११।।
अस्त्रेण रक्षां सङ्कल्प्य स्वात्मानन्तादिभिर्यजेत्[3]। अथाष्टदलपद्मस्य मध्ये प्रेतस्वरूपिणम्।। १२।।
अनन्तमर्चयेत्तत्र शयानममुनाणुना। ....।।

५ँ अं अनन्ताय अं ५ँ।

तल्पीकृतस्वयंदेहं छत्रीकृतफणात्रयम्। फणिनामीश्वरं श्वेतं ध्यात्वा सम्पूजयेदथ।। १३।।
मध्यादारभ्य वायव्याद्यस्त्रिषु क्रमतो यजेत्।...।।

५ँ अंहुफ्रें प्रभूताय फ्रेंहुंअं ५ँ श्रीपादु०। मध्ये ५ँ रं विमलाय रं ५ँ। ५ँ लं साराय लं ५ँ। ५ँ यं आराध्याय यं ५ँ। ५ँ हं परमसुखाय हं ५ँ। इति कोणपूजा। मण्डले आवाहनम्।

दहराकाशमध्यस्थं ह्रौंबीजं रक्तसन्निभम्। वहत्पुटाद्विनिःसार्यानन्तं प्रेतात्मकासनम्।। १४।।
आवाह्य तद्बीजमयं ध्यायेन्मार्तण्डभैरवम्। रक्तवर्णं स्थूलदेहं षड्वक्त्रं चोर्ध्वकेशिकम्।। १५।।
भुजद्वादशसंयुक्तं सर्पास्थिरत्नचर्चितम्। क्रोधिनं चोर्ध्वलिङ्गं च ज्वलद्रश्मिसमाकुलम्।। १६।।
तदीयबलिं वृत्तचतुरस्रमण्डले, व्यापकमण्डलाय नम इत्यभ्यर्च्य, ओंह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा, अनेन बलिं दत्त्वा गण्डूषादिराजोपचारान्। "तत्त्वत्रयविशुद्धात्मा स्वीकुर्याद्विधिपूर्वकम्"।। ५ँ ऐंह्रीं अघोरे ह्रींसः ५ँ आत्मतत्त्वं शोधयामि स्वाहा। ५ँ ह्रां परमघोरे हुं घोररूपे हौं घोरमुखि भीमभीषणे वमपिव हेरुरुहःरर ह्रींह्रःफ्रें हसरौं विद्यातत्त्वं शोधयामि स्वाहा। ५ँ सर्वतत्त्वसमष्टिस[1]र्व(शिव)तत्त्वं शोधयामि स्वाहा।

तत्त्वत्रयविशुद्धात्मा पूर्णपात्रत्रयं पुनः। गुरुभैरवशक्तिभ्यो निवेद्याथ स्वयं पुनः।। १।।
स्वकीयानाहूतान्यांश्च पूजयेच्च यथाविधि।.......................................।।

इति सृष्टिपूजा।।

अथ संहारपूजार्थं श्रीनाथं पूजयेत् त्रिशः। तदनुज्ञामवाप्याथ पूर्ववत् पार्थिवादितः।। १।।
मानसान्तं क्रमान् कृत्वा तत्तत्क्रमफलं लभेत्। आज्ञाद्याधारषट्केषु चतुष्कादिक्रमार्चनम्।। २।।
तत्तत्स्थानेषु सम्पूज्य यतः पञ्चक्रमात्ततः । अर्चयेदुक्तमार्गेण श्रीगुरोरुपदेशतः ।। ३।।
चूलीमूले परशम्भुः शाम्भवी योनिमध्यतः। षोडशान्ते परा पूज्या भा पूज्या चूलिमूलके।।४।।
चिन्मनोमन्दिरोद्देशे महा नाभितले स्मृता। कन्दे चेच्छा मेढ्रे सृष्टिः स्थितिर्मेदसि संस्थिता।। ५।।
तिरोधा नासिकाग्रे तु मुक्तिं शूलपथे श्रयेत्। ज्ञाना पृष्ठाग्रके पूज्या सती योनिबिले स्मृता।।६।।
असती लम्बिकामूले सदसती नसाश्र[2]ये। क्रियां च लिङ्गमूले च अण्डे आत्मावतीं श्रयेत्।।७।।
लिङ्गाधो विषयेच्छा तु गोचरी चर्ममालके। लोका नेत्रान्तरे वेदा सञ्चिन्त्योदमध्यतः।। ८।।
कुण्डली नाभिमूले तुं सौष्मणमुष्मणाबिले(?)। जीववायुप्राणसूत्रास्पदकोदण्डरमध्यतः ।। ९।।
मातृका कर्णिकासूत्रे जिह्वायां स्यादनामिका। वर्णावती च जिह्वाग्रे स्वरवर्णाश्च तालुके।। १०।।
वर्गजा ओष्ठयोः पूज्याः संयोगा दन्ततालुके। कण्ठोर्ध्वे मन्दरवती नित्यं पूज्या प्रकीर्तिता।।११।।

---

[1] 'सर्वतत्त्वं ५ँ शोधयामि' ग. पाठः। [2] 'रसनाश्रये' ग. पाठः।

ततः परं वामभागे मण्डलं चतुरस्रकम्।..॥

चतुर्दलपद्मं विभाज्य,

तन्मध्ये चिन्तयेद् देवीं ललितां श्यामविग्रहाम्। कराभ्यां दक्षवामाभ्यां पद्मं नीलोत्पलं तथा।१२॥
बिभ्राणां कुलचण्डं च ध्यात्वानेन प्रपूजयेत्।...॥

५ँ श्रीं कुलचण्डाय श्रीं ५ँ, इति चण्डबलिं दद्यात्।

तर्पयेन्मूलविद्याभ्यां प्रत्येकं सप्तसप्तधा। श्रीगुरोः पादुकां स्मृत्वा सप्तवारं च तर्पयेत्॥ १॥
ततः पात्रं समुद्धृत्य कराभ्यां मस्तकावधि। अहन्तेदन्तयोरैक्यप्रतिपत्त्या निवेदयेत् ॥ २॥
सर्वावरणमध्यस्थं ब्रह्मरन्ध्रे लयं नयेत्।..॥

नानागोत्रजातिश्रीचर्य्याधिकार-श्रीपदाधिष्ठानाधिकार-एकद्विनवद्वादशषोडशपञ्चाशच्चतुरशीतिसिद्धभूतवर्तमानभविष्यतादिगुरुनाथपादुकाः, इत्यादिस्थाने लयः।

सर्वं व्याहृतिसंस्थानो भूदेव्याः शम्भुशक्तयः। ....॥

नमो मम मनसि स्थिताय नाथाय यत्कर्मकार्यपराय स्वाहा।

चरणं पवित्रमित्यादिवेदमागममेव च। शाम्भवं चरणं ध्यात्वा सच्चिदानन्दलक्षणम्॥ १॥
पवित्रं परमं साक्षात् पुराणं परमामृतम्। येन पूता महात्मानः क्षणात् संसारसागरात्॥ २॥
समुत्तीर्य परानन्दं भुञ्जते परशाम्भवम्। तस्मिंश्चित्तलयं कृत्वा तद्भूयोऽहमिति स्मरन्॥ ३॥
एतद्रहस्यमत्यन्तं वैदिके शाम्भवेऽपि च। एतद्गुरुमुखाज्ज्ञात्वा न भूयो भुवि जायते॥ ४॥
आबध्य कमठीमुद्रां पुनर्योगं समभ्यसेत्। इत्यानन्दयतः पूर्वं प्राणबुद्धिलयो भवेत्॥ ५॥

इति श्रीषडन्वयशाम्भवरश्मिपूजाक्रमः॥

अथ नवदुर्गाविधानं रुद्रयामले। श्रीईश्वर उवाच।

अथ वक्ष्ये सुरेशानि नवदुर्गाविधानकम्। यज्ज्ञात्वा साधकः सर्वः षट् कर्माणि प्रसाधयेत्॥ १॥
शान्तिः पुष्टिस्तथा वश्यं मारणोच्चाटकर्मणी। आकर्षणं तथा केचित् षट् कर्माणि नियोजयेत्॥२॥
मार्कण्डेयपुराणोक्तं देवीमाहात्म्यमुत्तमम्। मूलमन्त्रेण पुटितं जपन् वाञ्छितमाप्नुयात्॥ ३॥

अत्र मूलमन्त्रं प्राग्दुर्गाप्रकरणोक्तनवार्णकं श्रीविद्यासंबलितं यथा—ऐंह्रींश्रीं कएईलह्रीं चामुण्डायै हसकहलह्रीं विच्चे सकलह्रीं। एवं श्रीविद्यासंवलितनवार्णमन्त्रं देवीमाहात्म्यस्याद्यन्ते सम्पुटत्वेन संयोज्य देवीमाहात्म्यं पठेदित्यर्थः। तथा—

शतमादौ शतं चान्ते जपेन्मन्त्रं नवाक्षरम्। चण्डीसप्तशतीजाप्ये सम्पुटोऽयमुदाहृतः॥ ४॥
सकामं सम्पुटं जाप्यं निष्कामं सम्पुटं विना। आश्विनस्य सिते पक्षे तृतीयायामुपक्रमेत्॥ ५॥
आमध्यरात्रं प्रजपेद्रवेरुदयतः क्रमात्। एवं मूलमनुं जप्त्वा ततः सप्तशतीं पठेत्॥ ६॥

मूलमनुं विद्यायुक्तं, पाठोऽपि विद्यायुक्तनवार्णमन्त्रसम्पुटितदेवीमाहात्म्यस्य। सम्पुटक्रमस्तु प्रागुक्तः ''शतमादौ शतं चान्ते'' इत्यादि ज्ञेयम्। तथा—

अष्टम्यन्ते जपेल्लक्षं निराहारो जितेन्द्रिय:। सम्पूज्य दिनशो देवीं ततो होमं समाचरेत्।। ७।।

अत्र षड्दिनेषु यथा लक्षं पूर्णं भवेत्तथा जपेदिति।

दशांशतो भक्तियुत: पायसै: सर्पिषा तिलै:। ब्राह्मणान् भोजयेत् पश्चात् कुमारीश्च प्रभोजयेत्।।८।।
इष्टार्थं लभते मन्त्री नात्र कार्या विचारणा। प्रथमं चरितं प्रोक्तं मुधकैटभनाशनम् ।। ९।।
द्वितीयं चरितं प्रोक्तं महिषासुरघातनम् । तृतीयं चरितं शुम्भनिशुम्भहरणं तथा ।। १०।।
प्रथमस्य चरित्रस्य मुनिर्ब्रह्मा समीरित:। गायत्र छन्द आख्यातं महाकाली तु देवता।। ११।।
वाग्भवं बीजमाख्यातमग्निस्तत्त्वं महेश्वरि। धर्मार्थे विनियोग: स्याद्वाग्बीजोक्तं समाचरेत्।। १२।।

षडङ्गं ध्यानमिति ज्ञेय:।

द्वितीयस्य चरित्रस्य मुनिर्विष्णुरुदीरित:। छन्द उष्णिग् महालक्ष्मीर्देवतात्र समीरिता।। १३।।
हृल्लेखा बीजमुदितं वायुस्तत्त्वं महेश्वरि। विनियोगोऽर्थसम्प्राप्त्यै हृल्लेखोक्तं समाचरेत्।। १४।।
उत्तरस्य चरित्रस्य ऋषी रुद्र: समीरित:। त्रिष्टुप् छन्दो महत्पूर्वा देवतात्र सरस्वती।। १५।।
बीजं तु कामराजं स्याद्रविस्तत्त्वं समीरितम्। कामाप्त्यै विनियोग: स्यात् कामराजोक्तमाचरेत्।।१६।।
एवमृष्यादिकं स्मृत्वा प्रागवद् ध्यात्वा समाहित:। ध्यानपूर्वं पठेच्चण्डीं सुस्पष्टपदवर्णकाम्।।१७।।
एवं य: कुरुते देवि न दु:खं प्राप्नुयात् क्वचित्। धनैर्धान्यैर्यशोभिश्च सुभगै: पुत्रपौत्रकै:।। १८।।
सयुक्त: सुचिरं जीवेद्विद्यावान् स शतं समा:। प्रथमं चरितं देवि सृष्टिरूपं न संशय:।। १९।।
द्वितीयं स्थितिरूपं स्यात् तृतीयं लयरूपकम्। पूर्वोक्तविधिना साध्वि साधकस्तु सुबुद्धिमान्।।२०।।

अत्र सृष्ट्यन्तता स्थित्यन्तता संहारान्तता। तत्फलानि चाश्रमभेदेन प्राग्वद्बोध्यानि।

असाध्यं साधयेच्छीघ्रं यदि कार्यं न सिध्यति। पाठमात्रेण सिध्यन्ति नात्र कार्या विचारणा।। २१।।
देव्यालये शिवागारे पठेद् देवि यजेत् तदा। दीपं दत्त्वा घृतेनैव जपेन दशकेन च।। २२।।
धूपयेद् गुग्गुलैर्देवीं मनसा चिन्तयन् सदा। दशावृत्त्या सदा नित्यं शुचिर्भूत्वा समाहित:।। २३।।
अध:शायी हविष्याशी पुरश्चरणरूपत:। शतावर्तं जपेदादौ पुरश्चरणसिद्धये ।। २४।।
तद्दशांशेन जुहुयान्मूलमन्त्रेण साधक:। नमो देव्यै महादेव्यै शिवायै सततं नम:।। २५।।
नम: प्रकृत्यै भद्रायै नियता: प्रणता: स्म ताम्। अनेन वा प्रजुहुयाद् द्रव्यै: प्राक् समुदीरितै:।।२६।।

अत्र केचित् ''जयन्ती मङ्गला कालीं'' इति श्लोकरूपमन्त्रेण वा दशांशं जुहुयादिति। अत्र शतचण्डीविधानस्य मूलमन्त्रेण श्लोकरूपमन्त्रेण वा, दशांशहोमस्तु अयुतसंख्याक:। ''प्रतिश्लोकेन जुहुयात् पायसं तिलसर्पिषा'' इति विधौ प्राग्वत् शतमादौ शतं चान्ते सम्पुटक्रमेण मूलमन्त्रहोम आवश्यक:। अत्रापि तर्पणब्राह्मणसन्तर्पणादिकं पूर्वदशांशेन कृत्वा पुरश्चरणं समाप्य काम्यकर्माणि कुर्यात्।। तथा—

अनुलोमैर्यदा जाप्यं शुभकर्म प्रसिद्ध्यति। विलोमेन तदा देवि क्रूरकर्म प्रसिद्ध्यति।। २७।।
चरित्रं प्रथमं देवि नित्यं जपति साधक:। द्वितीयं वा तृतीयं वा सम्पूर्णं वापि पठ्यते।। २८।।
तस्य सिद्धिर्न सन्देहो ध्रुवं चेति वरानने। अक्षराणां पदानां च पादानामर्धरूपिणाम्।। २९।।

श्लोकानां च तथा प्रोक्तमध्यायानां विलोमतः। नि[1]धनोच्चाटने द्वेषः स्तम्भनं मोहनं तथा।। ३०।।
वश्यादीनि च कर्माणि प्रसिद्ध्यन्ति क्रमेण वै। ग्रथनादिप्रभेदं तु प्राक् प्रोक्तं विधिना चरेत्।।३१।।
अक्षराणि यथा मन्त्रे तथा श्लोकाः स्तवे शुभे।.....................................।।

शुभे स्तवे देवीमाहात्म्ये। अत्रायमर्थः— मन्त्रार्णान्तरितसाध्यनामार्णं ग्रथनं मन्त्रेषु। अत्र तु श्लोकान्तरितसाध्यनामाक्षरं ग्रथनमित्यर्थः। श्लोकद्वयान्तरितसाध्यनामार्णो विदर्भः। सम्पुटक्रमस्तु देवीमाहात्म्यमनुलोमेन पठित्वा अमुकं स्तम्भय स्तम्भय इत्युच्चार्य पुनर्देवीमाहात्म्यमक्षप्रतिलोमेन पठेदित्येकावृत्तिः। एवमग्रेऽपि। रोधनप्रकारस्तु। अर्धं देवीमाहात्म्यस्य पठित्वाऽनुलोमेन अमुकामुकयोर्विद्वेषणं कुरुकुरु इत्युच्चार्योत्तरार्धमक्षरार्धप्रतिलोमेन पठेदित्येकावृत्तिः। एवमग्रेऽपि।। ''आदौ योगो भवेदन्ते पल्लवसम्पुटयो''रित्यत्रोच्चाटने योगो मारणे पल्लवः इति सम्प्रदायः। तेन ''अमुकमुच्चाटय उच्चाटन फट्''। ततः पादप्रतिलोमेन देवीमाहात्म्यं पठेदित्येकावृत्तिः। एवमग्रेऽपि। कार्मणे तु अक्षरप्रतिलोमेन देवीमाहात्म्यं पठित्वा अन्ते ''अमुकं हनहन हुं फट्'' इति पठेदित्येकावृत्तिरेवमग्रेऽपि। ग्रथनक्रमरीत्या विदर्भक्रमो वश्ये। तथा—

संहारसृष्टिस्थित्यन्तं कार्मणोत्कीलनं स्मृतम्। एतस्य वैपरीत्येन स्तम्भनोत्कीलनं भवेत्।। ३२।।
स्थितिसंहारसृष्ट्यन्तमुच्चाटोत्कीलनं स्मृतम्। सृष्टिसंहारस्थित्यन्तं विद्वेषोत्कीलनं तथा।। ३३।।
उत्कीलनक्रमो देवि तवाग्रे कथितो ध्रुवम्। येन ज्ञातेन देवेशि त्रैलोक्यविजयो भवेत्।। ३४।।
उत्कीलनं विना कान्ते स्थितिः क्वापि न जायते। जपित्वोत्कीलनं चाद्यं त्रिखण्डं भ्रंशितं क्षणात्।।३५।।

त्रिखण्डं चरितत्रयम्। भ्रंशितं प्रोक्तसृष्ट्यन्तता स्थित्यन्तता संहारान्तता। अयमर्थः—चरितत्रितयं क्रमेण सृष्टिस्थितिलयरूपं प्रोक्तक्रमेणोत्कीलनं नामपल्लवादिकं विना प्रथमतो जपित्वा ततः प्रयोगरूपेण जपेत्। सम्पुटकार्मणादौ प्रयोगमध्येऽनुग्रहं कर्तुमिच्छति तदानुग्रहप्रोक्तनामपल्लवादिकं संयोज्य यावत् स्वास्थ्यं तावदुत्कीलनमेव जपेदित्यर्थः। केचिदुत्कीलनादौ नामपल्लवादिकं न योज्यमिति वदन्ति, यथागुरूपदेशं कार्यमिति। तथा—

साध्यं कार्मणकर्मादौ वक्ष्येऽहं शृणु पार्वति। सर्वभूतस्य चोरारिहिंसकाः पिशुनाः शठाः।। ३६।।
ते साध्याः कार्मणे प्रोक्ताः कर्मारम्भदिनं शृणु। भूताष्टम्यां चतुर्दश्यां साधयेत् साधकोत्तमः।।३७।।
दशधा पञ्चधा वापि सप्तधा वा त्रिधापि च। देव्यालये पठेद् देवि विलयः सिद्ध्यति क्षणात्।।३८।।
विना न्यासं विना ध्यानं विना भूतविशोधनम्। पाठमात्रेण सिद्ध्यन्ति मन्त्रिणो नात्र संशयः।।३९।।
सिन्दूररेणुभिर्देवि पूजां कुर्यात् समाहितः।.....................................।।

इति। वाराहीतन्त्रे—

चण्डीपाठफलं देवि शृणुष्व गदतो मम। एकावृत्त्यादिपाठानां यथावत् कथयामि ते।। १।।
सङ्कल्प्य[2] पूर्वं सम्पूज्य न्यस्याङ्गेषु मनून् सकृत्। [3]पाठाद् बलिप्रदानाद्धि सिद्धिमाप्नोति मानवः[4]।।२।।
उपसर्गोपशान्त्यर्थं त्रिरावर्तं पठेन्नरः। ग्रहोपशान्तौ[5] कर्तव्यं पञ्चावर्तं वरानने।। ३।।
महाभये समुत्पन्ने सप्तावर्तमुदीरयेत्। नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं भवेत्।। ४।।
राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत्। अर्कावृत्त्या का[6]र्यसिद्धिर्वैरिहानिश्च जायते।। ५।।

---

१. 'निधनं चाटनं' ग. पाठः। २. 'संकल्प पूर्वं' ख. पाठः। ३. 'पठनाद्बलिदानात्' ख. पाठः। ४. 'साधकः' ख. पाठः। ५. शान्त्यै ख. पाठः। ६. 'काम' ख. पाठः।

मन्वावृत्त्या रिपु[1]र्वश्यस्तथा स्त्री वश्यतामियात्। सौख्यं पञ्चदशावृत्त्या श्रियं चाप्नोति मानवः।।६।।
कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः। राज्ञां भीतिविना[2]शाय वैरिप्रोच्चाटनाय च।। ७।।
कुर्यात् सप्तदशावृत्तिं तथाष्टादशकं प्रिये। महाव्रणविनाशाय विंशावर्तं पठेत् सुधीः।। ८।।
पञ्चविंशावर्तनात्तु भवेद्बन्धविमोक्षणम्। सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ।। ९।।
जातिध्वंसे कुलोत्सादेऽप्यायुषो नाश [3]आगते। वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये।। १०।।
तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्या[4]द्यतात्मा शतावृत्तिं तया सम्पद्यते सुखम्।। ११।।
श्रियो वृद्धिः शतावृत्त्या राज्यवृद्धिस्तथा परा[4]। मनसा चिन्तितं देवि सिध्येदष्टोत्तराच्छतात्।।१२।।
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते। सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा[5]।। १३।।
भुक्त्वा मनोरमान् कामान् नरो मोक्षमवाप्नुयात्। यथाश्वमेधः क्रतुराट्[6] देवानां च यथा हरिः।।१४।।
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः। (नातः परतरं किञ्चित् स्तोत्रमस्ति वरानने।। १५।।
भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम्।) अथवा बहु[7]नोक्तेन किमनेन वरानने।। १६।।
चण्ड्याः शतावृत्तिपाठात् सर्वाः सिद्ध्यन्ति सिद्धयः।...।।

इति। अत्र प्रयोगस्तु—क्वचिद् देव्यालये शिवालये वा प्रागुक्तक्रमेण स्वासनोपरि प्राङ्मुख उदङ्मुखो वा उपविश्याचम्य, श्रीविद्यासंवलितनवार्णमन्त्रेण प्राणानायम्य ऋष्यादिकरषडङ्गन्यासध्यानानि प्राक्प्रोक्तक्रमेण विधाय सङ्कल्पं कुर्यात्। अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रोऽमुकदेवशर्म्मा श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतिपूर्वकामुककामनासिद्धिकामोऽद्यारभ्यामुकदिनं यावत् प्रत्यहं द्वादशावृत्त्या नवावृत्त्या त्रिरावृत्त्या वा नियमतः शतसहस्रावृत्तिसंख्याकं ''सावर्णिः सूर्यतनयो'' इत्यादि ''सावर्णिर्भविता मनुः'' इत्यन्तं मार्कण्डेयपुराणान्तर्गतदेवीमाहात्म्यपाठं नवार्णसम्पुटत्वेन करिष्ये इति सङ्कल्प्य, पुस्तकं सम्पूज्य पुस्तकं दृष्ट्वा हस्ते धृत्वा पाठं कुर्यात्। प्राणायामर्ष्यादिकरषडङ्गन्यासध्यानपूर्वकं नवार्णमन्त्रमाद्यन्तेऽष्टोत्तरशतमष्टोत्तरशतं जपेत्। मौनी ध्यानपरायणो मध्येऽन्यत्र वार्तालापमकुर्वन्नस्खलिताक्षरं स्पष्टपदोच्चारणं कुर्वन् यथासंख्यया नियमतः प्रत्यहं तावत्संख्याकपाठं कुर्यात् प्रोक्तसिद्धिर्भवेत्। इति सप्तशतीपाठविधिः।। अत्र ग्रथनादिभेदक्रमेणानुलोमपाठादपि तत्तत्प्रयोगाः सिद्ध्यन्ति। अथवा प्रोक्तक्रमेण वर्णप्रतिलोम-पद-प्रतिलोम- पादप्रतिलोमार्ध-श्लोकप्रतिलोम-श्लोकप्रतिलोमाध्यायप्रतिलोमानां च ग्रथनादियोगात् तत्तत्प्रयोगाः सिध्यन्त्येव, ग्रथनादिकं विनापि सिध्यन्त्येव। एवमुभयथा विलोमक्रमाणां सिद्धिः। अनुलोमक्रमस्य ग्रथनादिकं विना प्रयोगा न सिध्यन्ति, तत्र ग्रथनादिक्रम आवश्यकः। विलोमपाठानामुभयधानुलोमपाठानामेकधा इति सर्वं गुरुतः शास्त्रतश्च सम्यग् ज्ञात्वा प्रयोगादिकं कुर्यात्। प्रथमादिचरित्रत्रयस्य पृथक् पृथक् पाठस्य धर्मार्थकामा यथाक्रमं फलानि बोध्यानि। चरितत्रयपाठस्य चतुर्वर्गफलसिद्धिः। केवलं मोक्षकामस्य सम्पुटं विना पाठः। (गृही ससम्पुटं कुर्यान्मोक्षार्थं सम्पुटं विना)। इति वाराहीतन्त्रोक्तत्वात् गृहस्थः सम्पुटं विना न पठेदिति। अत्र ''सावर्णिः सूर्यतनयः'' इत्यादि सावर्णिर्भविता मनुरित्यन्तं पाठक्रमः।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-
श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे चतुस्त्रिंशः श्वासः।। ३४।।

* * * *

---

[1] 'वैरिनाशः' ख. पाठः। [2] 'विमोक्षाय' ख. पाठः। [3] 'नाशहेतवे' ग. पाठः। [4] 'कुर्याद्बलाच्छतावर्तं तया' ख. पाठः। [5] 'परे' ग. पाठः। [6] 'रमा' भुक्त्वा मनोरथान् दिव्यान् ख. पाठः। [7] 'क्रतुषु' ख. पाठः। [8] 'बहुना किमिहोक्तेन' ग.पाठः।

अथ

पञ्चत्रिंश: श्वास:

❖❖❖❖

तत्र श्रीतन्त्रराजे– (२७ शे पटल)

अथ षोडशनित्यानां कालेन प्राणतोच्यते। मातृकाभूतनाथाद्यै: श्रीचक्रेण च शक्तिभि: ।। १।।

अत्र कालेनाहोरात्ररूपकालेन। प्राणता श्वासरूपतोच्यते इत्यर्थ:। क्रममाह–मातृकेति, मातृकया पञ्चभूतैर्नाथाद्यैर्नवनाथैरादिपदेन नवग्रहराश्यादीनां सङ्ग्रह:। श्रीचक्रेण शक्तिभिरावरणदेवताभि: सहोच्यते इत्यन्वय:। तथा–

लवादीनां तु कालस्य दुर्लक्ष्यत्वात्तदीरितम्। तेनैक[1]श्वासमारभ्य तत्संख्याभि: क्रमेण वै।। २।।

अहोरात्रस्य तद्व्याप्तिमुक्त्वा तेनान्यदूहयेत्। विशेषांश्चान्तराद् बाह्यात्तत्तत्सिद्ध्युपपादकान्।। ३।।

अत्र कालस्यातीन्द्रियत्वात् तत्रापि लवादीनां दुर्लक्ष्यत्वादनुमानेनापि निश्चेतुमशक्यत्वात् तदुदीरितं श्वासक्रम इत्यर्थ:। वक्ष्यमाणरीत्याहोरात्रस्य तद्व्याप्तिं श्वासक्रमं ज्ञात्वा, विशेषांश्चान्तरान् बाह्यान् तत्तत्सिद्ध्युपपादकांश्च वक्ष्यमाणदिशा ऊहयेदित्यर्थ:।

मूलाधारोद्भवो वायु: प्राणाद्याख्यां समश्नुते। स तु पञ्चविधो भूतभेदादुद्भवदेशत:।। ४।।

एक एव वायु: प्राणापानव्यानोदानसमानसंज्ञां लभते। उद्भवदेशमाह–

नासाया: पुटयो: पार्श्वतुङ्गमध्याध[2]रन्ध्रगा:। प्राणाग्नीलाम्बुखात्मान: पवना स्युर्यथाक्रमम्।। ५।।

अत्र नासाया: पुटयो: पार्श्वस्पर्शेन वायुतत्त्वोदय:, ऊर्ध्वभागस्पर्शेनाग्नितत्त्वोदय:, मध्ये दण्डे स्पर्शेन इलातत्त्वोदय:, अध:स्पर्शेनाम्बुतत्त्वोदय:, रन्ध्रयो: परित: स्पर्शेन खतत्त्वोदय:। एवं यथाक्रमं बोद्धव्यमित्यर्थ:। तथा–

गुरुकेतू भृगुकुजौ बुधार्कौ चन्द्रसूर्यजौ। क्रमाच्चतुर्षु भूतेषु व्योम सर्वात्मकं भवेत्।। ६।।
उभयस्थो भवेद्राहुश्चन्द्रसूर्यौ पुटौ[3] क्रमात्। वामदक्षौ तयोस्तस्य प्रवेशो निर्गमस्तथा ।। ७।।
जीवश्चन्द्रो रवि: शून्यो भाग: स्त्रीपुरुषौ तथा। पृथिवी सलिलं चन्द्रो रविरन्यत् त्रयं भवेत्।।८।।
ग्रहेषु चन्द्रो भृग्विन्दुगुरुज्ञा भास्करा: परे। मातृकां च तथा विद्यात् स्वरव्यञ्जनभेदत:।। ९।।

---

[1] 'एकं श्वासं समारभ्य' ख. पाठ:। [2] 'विसर्गलोप: स्वातन्त्र्यात्'। [3] 'पुटक्रमात्' ख. पाठ:।

अध: पृष्ठं च चन्द्र: स्यादूर्ध्वाग्रे दिनकृद्भवेत्। शरीरेऽपि कटेरूर्ध्वं चन्द्रोऽधो रविरीरित:।। १०।।
अस्तीति वाक्यं चन्द्र: स्यान्नास्तीत्युक्तो रवि: स्मृत:। शुक्लकृष्णौ तथा पक्षाविति चन्द्रा दशान्तरा:।।११।।
एवं सूर्या दश प्रोक्ता बाह्याभ्याञ्च यशस्विनि। एकादशविधौ चन्द्रभास्करौ सम्यगीरितौ।। १२।।

एतेषां श्लोकानां स्पष्टोऽर्थ:। तथा–

तयोश्चन्द्रा: प्रीतिकरा भास्करा: क्लेशकारिण:। राहु: शून्यं च सर्वत्र नाशाय भवति क्षणात्।।१३।।
सूर्येषु शस्त: सर्वत्र मृधभोजनमैथुनै:। सङ्ग्रहश्चान्यदखिलं चन्द्रे सिद्ध्यत्ययत्नत:।। १४।।
जीवेषु[1] कथितं तथ्यमेष्यद[2]र्थश्च सिध्यति। निश्चित्य भवतीत्युक्तमन्यथा चेत्तदन्यथा।। १५।।
अनिश्चिते विधौ कन्या गर्भप्रश्नेऽन्यत: पुमान्। शून्ये गर्भविपत्ति: स्यादित्याद्यूह्य वदेद् दृढम्।।१६।।
शून्ये नभसि राहौ च शुभान्येवाशुभान्यपि। शुभानि तत्र सर्वाणि नश्यन्ति परमेश्वरि।। १७।।
वामे वहति वायौ तु वदेद् देशिकशिष्ययो:। तत्स्थाने स्थापयित्वा तं तत्कर्णे कथयेन्मनुम्।।१८।।
अथवा जीवगस्थाने तत्कर्णे मन्त्रमादिशेत्। अन्यथा शून्यराहोस्तु नाशाय गुरुशिष्ययो:।। १९।।
षष्ट्या युतैस्तु त्रिशतैर्निश्वासैर्नाडिका मता। तासां षष्ट्या दिनं पूर्णं तद्दिनं स्यात्पुन: पुन:।।२०।।
एकस्मिंस्तु दिने श्वासा: सहस्राण्येकविंशति:। षट्शतं च ततस्तेषां स्वरूपं शृणु सुन्दरि:।। २१।।
आरम्भ्यार्कोदयं प्रात: सप्तत्या द्विशतं क्रमात्। प्राणाग्नीलाम्बुखानि स्युर्नवत्यान्यत्र सङ्क्रम:।।२२।।
तत्राप्येवमतोऽन्यत्राप्येवं पञ्चदश क्रमात्। दिनमेकं व्रजेदादौ दर्शप्रतिपदं प्रति।। २३।।
एवं क्रमेण सर्वेषां प्राणोदय उदीरित:। एतत्क्रमविपर्यासादभव्यानि भवन्ति हि।। २४।।

अस्यायमर्थ:– शुक्लप्रतिपदमारभ्य दिनत्रयं सूर्योदयकाले वामनासापुटे वायुर्वहति, तदुत्तरं त्रीणि दिनानि दक्षिणे, ततस्त्रीणि दिनानि वामे, ततस्त्रीणि दिनानि दक्षिणे पुनस्त्रीणि दिनानि वामे, तत: कृष्णपक्षे प्रतिपदमारभ्य त्रीणि दिनानि दक्षे, ततस्त्रीणि दिनानि वामे, तदुत्तरं दक्षे, ततस्त्रीणि दिनानि वामे, ततो दक्षिणे, एवं क्रमेण ज्ञातव्यानि। तत्रापि प्रतिनाडि पञ्चघटिकास्थितिर्बोद्धव्येति। तत्रैकैकघटिकास्थितिरेकैकभूतस्य। तत्र क्रमस्तु–प्राणाग्नीलाम्बुखात्मान इति। एकघटिकायामपि सप्तत्युत्तरद्विशतश्वासकालस्थिति:, नवति: श्वासा: सङ्क्रमणे लगन्ति। एवं पञ्चभूतेषु श्वासानां स्थितिसङ्क्रमौ ज्ञेयौ। इत्थं दिवा एकैकनाड्यां वारत्रयं वारत्रयं रात्रावपि तथैव, वारत्रयस्य पञ्चदशघटिकाक्रमेणाहोरात्रमध्ये द्वादशावृत्त्या षष्टिघटिकाभिर्दिनमेकं व्रजेदित्यर्थ:। प्रागुक्तपक्षक्रमविपर्यासादभव्यानि भवन्तीत्यर्थ:। तथा–

---

१. 'जीवे तु' ख. पाठ:। २. 'मेध्यदर्श: प्र' ख. पाठ:।

बलाधिकाश्चरा वामे बलिनो दक्षिणे स्थिरा:। उभयत्रोभयात्मान: शुभाशुभपरीक्षणे।। २५।।
सार्धद्वाविंशतिश्वासक्रमाद् द्वादश राशय:। तत्र सार्धचतुष्केण भूतानि स्युरिति क्रमात्।। २६।।
घटिकार्णेषु सर्वत्र वाय्वाद्येकान्तरोदये। तत्तदर्णभवा: श्वासा: षष्ट्या त्रिशतमीरितम्।। २७।।
तेषु तद्भूतवर्णानां दशानामादितो दश। सप्तावृत्त्या तत: ज्ञेया: प्राणाग्नीलाम्बुखाक्षरै:।। २८।।

अस्यार्थ:— पञ्चभूतेषु पृथिवी जलं च सौम्यं, तेजो वायुराकाशं च क्रूरं। वामनाड्यां पृथिवीतत्त्वं जलतत्त्वं च बलवच्चरं च। दक्षनाड्यां तेजस्तत्त्वं वायुतत्त्वमाकाशतत्त्वं च बलवत् स्थिरं च। उभयत्र साङ्कर्यश्वासेषु सर्वे उभयात्मानो द्विस्वभावा इत्यर्थ:। एकस्यां नाड्यां पञ्चघटिकात्मककालस्थितायां पञ्चघटिकासु पञ्चभूतोदयश्चेदेकैकस्य भूतस्यैकैकघटिकास्थितौ एकस्या घटिकाया: षष्ट्युत्तरत्रिशतं श्वासानां (३६०) नवतिश्वासा: सङ्करा:। एवमेकस्य भूतस्य सप्तत्युत्तरद्विशतश्वासा (२७०) निजास्तेषु श्वासेषु राशिक्रममाह—सार्धद्वाविंशतिश्वासक्रमादिति। अत्र राशिष्वपि बलाधिका इत्याद्यूह्यम्। एकस्मिन् राशौ भूतक्रममाह—तत्र सार्धेत्यादिना। घटिकार्णेष्विति अकारस्योदये अकारस्य प्रथमत: सप्तदश श्वासा अन्येषामक्षराणां सप्त सप्त श्वासा:। एवमेकघटिकामध्ये सप्तावृत्तिर्मातृकाया भवतीत्यर्थ:। द्वितीयघटिकायामाकारस्याप्येवमूह्यम्। तथा—

संख्याभिर्वासनाव्याप्तिं श्वासानां शृणु सुन्दरि। यया विहितया मन्त्री सदा भ[1]जनवान् भवेत्।।२९।।
नित्या[2]तत्त्वाप्तिविद्यानां संख्या: स्यु: पूर्वमेकश:। ततो दिनार्णा: सन्ध्या: स्युस्ततश्च घटिकार्णका:।।३०।।
राशयो द्वादश ततो ग्रहा भूतानि पञ्च वै। मातृकाश्चापि पञ्चाशच्छ्रीचक्रस्थाश्च शक्तय:।। ३१।।
सैका नवतय: प्रोक्ता देवी सर्वात्मना स्थिता। एवंविधां[3] वासनां यो भावयेत् स महेश्वर:।।३२।।

इति। अस्यार्थ:—नित्या: १६ तत्त्वा: ३६ आप्तिविद्या: युगत्वेन पर्यायत्वेन दिनत्वेन तिसृणां विद्यानां त्र्यक्षरत्वेन ९ दिनार्णा: ५७६ सन्ध्यारूपा: ६१ घटिकार्णा: ६० राशय: १२ ग्रहा: ९ भूतानि ५ मातृका: ५० श्रीचक्रशक्तय: ९१ कालनित्या २०७३६ सर्वं मिलित्वा २१६०० श्वासरूपा इत्यर्थ:। तथा—

नाडीचक्रं च मर्माणि देहान्तर्मरुतां क्रियाम्। योगाभ्यासं तदङ्गैश्च स्वेच्छोत्क्रान्तिविधानकम्।।३३।।
परकायप्रवेशं च योगसिद्धस्य लक्षणम्।..।।

अस्यार्थ:— नाडीचक्रस्य ज्ञानं मर्माणि शरीरे यावन्ति तावतां ज्ञानं, देहान्तर्मरुतां प्राणादिदशवायूनां स्थिते: क्रियायाश्च ज्ञानं, अङ्गै: सह योगाभ्यासस्तज्ज्ञानं च, तदङ्गानि यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधय इति। स्वेच्छोत्क्रान्तिविधानकं स्वेच्छया मरणविधानम्। परकायप्रवेशनं चेतत्सर्वं प्राक्प्रोक्तश्वासक्रमं गुरुत: शास्त्रतश्च सम्यग् विज्ञाय तदभ्यासदार्ढ्यानुभूतस्य योगसिद्धस्य लक्षणमित्यर्थ:।। मातृकार्णवे—

---

१. 'दर्शनवान्' ख. पाठ:। २. 'नित्याविद्याप्तितत्त्वानां' ख. पाठ:। ३. 'विद्यां' ख. पाठ:।

नेच्छन्ति काम्यपूजां ये चक्रस्थाभिश्च शक्तिभिः। तेषां काम्यविधिं वक्ष्ये पूर्णमण्डलशक्तिभिः।।१।।
चतुष्वष्टिश्चतुष्षष्टिः प्रत्यावरणदेवताः। नित्यपूजां विधायादौ काम्यपूजां ततश्चरेत्।। २।।
तासां नामानि वक्ष्यामि पूर्णमण्डलवर्णकैः। साध्यसाधककर्माणि प्रत्यावृति नियोजयेत्।। ३।।
अथवा प्रतिवर्गं च प्रतिशक्ति प्रयोजयेत्। अमृता च तथानन्दा इच्छा चैव तथेश्वरी।। ४।।
उमोर्मिका तथा ऋद्धिवृद्धिर्ॠषा तथैव च। लृकारा चैव लृकारा एकनाथा तथैव च।। ५।।
ऐश्वर्या च तथोङ्कारिण्यौषधात्मिकया तथा। अम्बा अःकाररूपा च कमला कामिका तथा।। ६।।
किराता कीर्तिविभवा कुमारी कूर्मरूपिणी। कृपावती च कृकारा क्लृप्ता क्लृरूपिणी तथा।।७।।
केशनी कैतवा कोला कौमारी कम्बुवादिनी। कःकारा च खरूपा च खातीता खिन्नपालिनी।।८।।
खीरूपिणी खुरूपा च खूरूपा खृस्वरूपिणी। खृरूपा ख्लृस्वरूपा च ख्लृरूपा खेचरप्रिया।।९।।
खैरूपा खोस्वरूपा च खौरूपा खण्डितेन्दुधृक्। खःस्वरूपा गणेशी च गायत्री गिरिनन्दना।।१०।।
गीर्वाणव[1]न्द्या गुणपा गूरणा गृञ्जनप्रिया। गृस्वरूपा ग्लृकारा च ग्लृरूपा गेस्वरूपिणी।। ११।।
गैरूपा गोस्वरूपा च गौतमी गण्डकी तथा। गःस्वरूपा घना घाता घिरूपा घीस्वरूपिणी।। १२।।
घुर्घुरा घूर्णरूपा च घृतामोदा च घृकला। घ्लृरूपा घ्लृस्वरूपा च घेरूपा घैस्वरूपिणी।। १३।।
घोटरूपा घोस्वरूपा घण्टानादा च घोऽक्षरी। ङरूपा ङास्वरूपा च ङिरूपा ङीस्वरूपिणी।। १४।।
ङुरूपा ङूस्वरूपा च ङृरूपा ङॄरूपिणी। ङ्लृरूपा ङ्लॄस्वरूपा च ङेरूपा ङैस्वरूपिणी।।१५।।
ङोरूपा ङौस्वरूपा च ङंकारा ङःस्वरूपिणी। चपला चारुचलिता चित्रणी चीरधारिणी।। १६।।
चुर्चुरा चूर्णरूपा च चृरूपा चॄस्वरूपिणी। च्लृस्वरूपा ततः प्रोक्ता च्लॄस्वरूपा ततः परम्।। १७।।
चेतना चैस्वरूपा च चोदयित्री च चौर्यहा। चण्डा च चःस्वरूपा च छन्ना छाया छिरूपिणी।।१८।।
छीत्कारी छुरिकाहस्ता छूरूपा छृस्वरूपिणी। छॄरूपा छ्लृस्वरूपा च छ्लॄकारा छेदिनी तथा।।१९।।
छैरूपिणी च छोरूपा छौरूपा छंस्वरूपिणी। छःस्वरूपा जया जाड्या जिता जीर्णास्वरूपिणी।।२०।।
जुरूपा [2]जूर्तिहन्त्री च जृरूपा जृस्वरूपिणीं। ज्लृरूपा ज्लृस्वरूपा च जेरूपा जैत्ररूपिणी।। २१।।
जोरूपा जौस्वरूपा च जङ्गला जःस्वरूपिणी। झरणा झास्वरूपा च झिरूपा झीस्वरूपिणी।।२२।।
झुरूपा झूस्वरूपा च झृकारा झॄस्वरूपिणी। झ्लृरूपा झ्लॄस्वरूपा च झेरूपा झैस्वरूपिणी।।२३।।
झोरूपा झौस्तरूपा झंरूपा झःस्वरूपिणी। ञकारा ञार्णरूपा च ञिरूपा ञीस्वरूपिणी।। २४।।
ञुरूपा ञूस्वरूपा च ञृरूपा ञृस्वरूपिणी। ञ्लृरूपा ञ्लॄस्वरूपा च ञेरूपा ञैस्वरूपिणी।। २५।।
ञोरूपा ञौस्वरूपा च ञंरूपा ञःस्वरूपिणी। टकाररूपा टाकारा टिकारा टीस्वरूपिणी।। २६।।
टुकारा टूस्वरूपा च टृकारा टॄस्वरूपिणी। ट्लृकारा ट्लॄस्वरूपा च टेकारा टैस्वरूपिणी।। २७।।
टोकारा टौस्वरूपा च टंकारा टःस्वरूपिणी। ठकारा ठास्वरूपा च ठिकारा ठीस्वरूपिणी।।२८।।

---

[1] 'विद्या' क. पाठः। [2] 'जूर्णि' क. पाठः।

ठकारा ठूस्वरूपा च ठृकारा ठॄस्वरूपिणी। ठ्लृकारा ठ्लॄस्वरूपा च ठेकारा ठैस्वरूपिणी।।२९।।
ठोकारा ठौस्वरूपा च ठंकारा ठ:स्वरूपिणी। ड[1]कारा डास्वरूपा च डिकारा डीस्वरूपिणी।।३०।।
डुकारा डूस्वरूपा च डृकारा डॄस्वरूपिणी। ड्लृकारा ड्लॄस्वरूपा च डेकारा डैस्वरूपिणी।।३१।।
डोकारा डौस्वरूपा च डंकारा ड:स्वरूपिणी। ढकारा ढास्वरूपा च ढि[2]कारा ढीस्वरूपिणी।।३२।।
ढु[3]कारा ढूस्वरूपा च ढृकारा[4] ढॄस्वरूपिणी। ढ्लृकारा ढ्लॄस्वरूपा च ढेकारा ढैस्वरूपिणी।।३३।।
ढोकारा ढौस्वरूपा च ढंकारा ढ:स्वरूपिणी। णकारा णास्वरूपा च णिकारा णीस्वरूपिणी।।३४।।
णुरूपा णूस्वरूपा च णृरूपा णॄस्वरूपिणी। ण्लृरूपा ण्लॄस्वरूपा च णेरूपा णैस्वरूपिणी।।३५।।
णोरूपा णौस्वरूपा च णंरूपा ण:स्वरूपिणी। तरुणी तामसी चैव तिलनासा च तीरपा।।३६।।
तुलसी तूर्णरूपा च तृष्णा तॄकाररूपिणी। त्लृकारा त्लॄस्वरूपा च तेजोरूपा च तैतिला।।३७।।
तोमारा तौलिनी तन्द्रा तस्करान्तककारिणी। थरूपा थानरूपा च थिरूपा थीस्वरूपिणी।।३८।।
थुरूपा थूस्वरूपा च थृरूपा थॄस्वरूपिणी। थ्लृकारा थ्लॄस्वरूपा च थेरूपा थैस्वरूपिणी।।३९।।
थोरूपा थौस्वरूपा च थंरूपा थ:स्वरूपिणी। दया दानशीला च दिरूपा दीनपा[5]लिनी।।४०।।
दुर्मदा दूनहन्त्री च (दृकारा दॄस्वरूपिणी। द्लृकारा द्लॄस्वरूपा च) देवी दैत्यनिसूदिनी।। ४१।।
दोषहन्त्री च दौर्भाग्यनाशिनी दम्भवर्जिता। द:स्वरूपा च धर्मज्ञा धारुणी धिस्वरूपिणी।। ४२।।
धीरा धुरीणा धूमावत्यथ पश्चाद् धृतिस्तथा। धॄरूपा ध्लृस्वरूपा च ध्लॄरूपा धेस्वरूपिणी।।४३।।
धैर्या च धोरणी धौर्या धंरूपा: ध:स्वरूपिणी। नदी नारायणी नित्या नीतिज्ञा च नुतिप्रिया।।४४।।
नूनना नृपवन्द्या च नॄरूपा न्लृस्वरूपिणी। न्लॄकाररूपिली पश्चात् सम्प्रोक्ता नेत्रसुन्दरी।।४५।।
नैमित्तिका नोदयित्री नौकास्था नन्दजा तथा। न:स्वरूपा च परमा पाविनी पिलिपिच्छिका।।४६।।
पीता पुण्या पूर्णरूपा पृथ्वी पॄकाररूपिणी। प्लृकारा प्लॄस्वरूपा च पेशला पैस्वरूपिणी।।४७।।
पोतरूपा पौरंसेव्या पण्डिता प:स्वरूपिणी। फट्कारिणी फालरूपा फिटिशब्दनिनादिनी[6]।।४८।।
फीरूपा फुस्वरूपा च फूत्कारा फृस्वरूपिणी। फॄस्वरूपा फ्लृरूपा च फ्लॄरूपा फेरवीरवा।।४९।।
फैरूपा फोस्वरूपा च फौरूपा फंस्वरूपिणी। फ:स्वरूपा च बगला बाला बिलनिवासिनी।।५०।।
बीजरूपा बुधाराध्या बूरूपा च बृहत्कुचा। बॄरूपा ब्लृस्वरूपा च ब्लॄरूपा बेस्वरूपिणी।। ५१।।
बैरूपिणी बोधरूपा बौद्धवन्ध्या च बन्धिनी। ब:स्वरूपा भावाराध्या भाग्यदा भिल्लरूपिणी।।५२।।
भीतिहन्त्री भुजङ्गाढ्यभूषणा भूरिविक्रमा[7]। भृरूपा भॄस्वरूपा च भ्लृकारा भ्लॄस्वरूपिणी।। ५३।।
भेदाभेदविहीना च भैरवी भोगदायिनी। भौमसेव्या भंजिका च भ:स्वरूपा महोदया।। ५४।।
मानिनी मित्रबिम्बा च मीनाक्षी मुसलायुधा। मूर्तिधृग् मृत्युहारिणी मृकाराक्षररूपिणी।। ५५।।

---

१. 'डमनुप्रिया डामरी च' क. पाठ:। २. 'ढिरूपा' क. पाठ:। ३. 'ढुरूपा' क. पाठ:। ४. 'ढृरूपा' क. पाठ:।
५. 'मालिनी' क. पाठ:। ६. 'निवासिनी' क. पाठ:। ७. 'दिविराजिता' ग. पाठ:।

म्लृरूपा म्लॄस्वरूपा च मेनका मैथिली तथा। मोदिनी मौड्यरहिता मङ्गला म:स्वरूपिणी।।५६।।
यमुना यादवप्रीता यिरूपा यीस्वरूपिणी। युवती यूथिकाप्रीता यृकारा यॄस्वरूपिणी।। ५७।।
य्लृरूपा य्लृस्वरूपा च येरूपा यैस्वरूपिणी। योधना यौस्वरूपा च यंरूपा य:स्वरूपिणी।।५८।।
रमणी रागशीला च रिरंसा रीतिदायिनी। रुधिराक्ता च रूक्षा च ॠरूपा च ॠस्वरूपिणी।।५९।।
र्लृरूपा र्लृस्वरूपा च रेवती रैवतात्मजा। रोगघ्नी रौरवघ्नी च रङ्किनी र:स्वरूपिणी।।६०।।
लज्जा च लाभदा लिङ्गा लीला लुप्ता च लूनहा। लृरूपा लॄस्वरूपा च ल्लृरूपा ल्लॄस्वरूपिणी।।६१।।
लेरूपा लैस्वरूपा च लोकधात्री च लौल्यहा। लम्बोष्ठी ल:स्वरूपा च वरदा वारिजानना।।६२।।
विपुला वीतशोका च वुरूपा वूस्वरूपिणी। वृकोदरी वृस्वरूपा ब्लृरूपा ब्लृस्वरूपिणी।। ६३।।
वेदगर्भा वैनतेया वोरूपा वौस्वरूपिणी। वंजरा व:स्वरूपा च शशिखण्डावतंसिनी[1]।। ६४।।
शाकम्भरी शिवा शीला शुष्कमांसा च शूलिनी। शृरूपा शृस्वरूपा च श्लृरूपा श्लॄस्वरूपिणी।।६५।।
शेरूपा शैत्यरूपा च शोभना च शौर्यसम्पदा। शङ्करी श:स्वरूपा च षडङ्गा षास्वरूपिणी।।६६।।
षिङ्गा षीरूपिणी चैव षुरूपा षूस्वरूपिणी। षृरूपा षृस्वरूपा च ष्लृरूपा ष्लृस्वरूपिणी।। ६७।।
षेरूपा षैस्वरूपा च षोरूपा षौस्वरूपिणी। षंडा च ष:स्वरूपा च सर्वदा सामगप्रिया।। ६८।।
सिरात्सारतरा चैव सीरपाणिसमर्चिता। सुभगा सूरशक्तिश्च सृष्टिदा सॄस्वरूपिणी ।। ६९।।
स्लृरूपा स्लृस्वरूपा च सेरूपा सैस्वरूपिणी[2]। सोरूपिणी च सौभाग्या सङ्गता स:स्वरूपिणी।।७०।।
हव्यवाहा हारिणी च हिर[3]ण्या हीनवर्जिता। हुरूपा हूस्वरूपा च हृद्या हॄकाररूपिणी।। ७१।।
ह्लृरूपा ह्लॄस्वरूपा च हेतुदा हैहयान्वया। होरूपा हौस्वरूपा च हंरूपा ह:स्वरूपिणी।। ७२।।
ळरूपिणी च ळारूपा ळिरूपा ळीस्वरूपिणी। ळुरूपा ळूस्वरूपा च ळृरूपा ळृस्वरूपिणी।।७३।।
ळ्लृरूपा ळ्लॄस्वरूपा च ळेरूपा हैस्वरूपिणी। ळोरूपा ळौस्वरूपा च ळंरूपा ळ:स्वरूपिणी।।७४।।
क्षमारूपा तथा क्षामा क्षित्यादिपञ्चधारिणी। क्षीणमध्या क्षुधारूपा क्षूरूपा क्षृस्वरूपिणी।। ७५।।
क्षृरूपा क्ष्लृस्वरूपा च क्ष्लॄरूपा क्षेत्रपालिनी। क्षैकाररूपा च तथा क्षोभिणी क्षौस्वरूपिणी।।७६।।
क्षंकाररूपिणी चैव क्ष:काररूपिणी तथा। इति ते कथितं भद्रे रहस्यातिरहस्यकम्।। ७७।।
प्रत्यावृत्ति चतुर्वर्गं पूजयेत् साधकोत्तम:। सर्वान् कामानवाप्नोति पूजनात् साधकोत्तम:।। ७८।।
प्राणग्नीलाम्बुखात्मानो वर्णशक्तय ईरिता:। तत्तत्प्रयोगसिद्ध्यर्थं तत्तच्छक्ती: प्रपूजयेत्।। ७९।।
एकैकस्य च भूतस्य शतं पञ्चदशोत्तरम्। शक्तय: पूजनीयास्ता नववरणभागश:।। ८०।।
शेषास्तु[4] बिन्दुचक्रे तु तत्तन्मण्डलके शुभे। उच्चाटे वायुवर्णानां शक्तय: समुदीरिता:।। ८१।।
विद्वेषे निधने चैव प्रशस्ता: स्यु: खशक्तय:। वश्ये च मोहने चैव पावकाक्षरशक्तय:।। ८२।।
कार्मणे केचिदिच्छन्ति स्तम्भने लार्णशक्तय:। शान्तिके पौष्टिके रोगनाशादिशुभकर्मसु।। ८३।।

---

१. 'ण्डविराजिता' क. पाठ:। २. 'सेत्रुदा सैकतप्रिया' क. पाठ:। ३. 'हितदा' क. पाठ:। ४. 'स्यु:' क. पाठ:।

जलार्णशक्तयो ज्ञेयास्तत्तन्मण्डलसंयुताः। अथ वक्ष्ये सुरेशानि षट्शाम्भवघृणिक्रमम्।। ८४।।
श्रीचक्रक्रममभ्यर्च्य मोक्षार्थी रश्मिपूजनम्। विदध्यात् तत्क्रमं ज्ञात्वा स्मृत्वा प्रागुक्तमार्गतः।।८५।।
प्रत्यावरणपूजायां चत्वारिंशच्च भागशः। तदन्ते बिन्दुचक्रे तु यष्टव्याः सर्वरश्मयः।। ८६।।
सषट्त्रिंशत्सप्तशतं सहस्राणि च विंशतिः। नाथावृत्तिक्रमेणैव नवावरणपूजनम्।। ८७।।
प्रत्यावृत्ति यजेन्नित्या द्विसहस्रं शतत्रयम्। चत्वारि च समाख्याता देवताभावसिद्धये।। ८८।।
श्वासक्रमेण पूजायां पूर्वोक्तगणनाविधौ। प्रत्यावृत्ति सहस्रे वै चतुःशतमुदीरितम्।। ८९।।
द्वयमात्माणुनित्यान्ते शक्तिसप्ताक्षरीयुतम्। प्रतिश्वासं यजेदेनं[1] बिन्दुचक्रे समग्रकम्।। ९०।।
नानया सदृशी पूजा त्रिषु लोकेषु विद्यते। गुह्याद् गुह्यतरं ह्येतत् तवाग्रे प्रकटीकृतम्।। ९१।।

इति।। तन्त्रराजे– (२७ प० ३४ श्लो०)

आसन्नमृत्युचिह्नानि कथयामि यथाक्रमम्। प्राक्प्रोक्तमूलाधारस्य मध्यस्थत्र्यस्रमध्यतः।। १।।
सुषुम्ना पृष्ठवंशाख्यवीणादण्डस्य मध्यगा। [2]मूलादिब्रह्मरन्ध्रान्ता नासाग्राद् द्वादशाङ्गुले।। २।।
तदग्रात् पायुगा प्रोक्तालम्बुषाख्या तु नाडिका। त्र्यस्राग्रादुत्थिता नाडी कुहूनाम ध्वजान्तिका।।३।।
तद्वामदक्षपार्श्वाभ्यां सविश्वोदरवारणे। जठरान्ता सर्वगा च प्रोक्ते तद्वदनन्तरे।। ४।।
हस्तिजिह्वायशस्विन्यौ तत्तदङ्गुष्ठगे पदोः। तथैवेडापिङ्गले च नासारन्ध्रद्वयान्तगे।। ५।।
गान्धारी च तथा पूषा नेत्रद्वयगते क्रमात्। तथा कर्णगते शङ्खयशस्विन्यौ क्रमेण वै।।। ६।।
सरस्वती तु या नाडी सा तु जिह्वाग्रगामिनी। एवं चतुर्दश प्रोक्ता नाड्यो देहे प्रधानकाः।। ७।।
तासां सन्धिषु तत्सन्धिष्वेवं नाड्यः स्थितास्तनौ। तासां प्रधाननाडीनां संख्या सार्धत्रिलक्षकम्।।८।।
अप्रधाना शिरा देहे त्वसंख्या याभिरेव वै। चेष्टतेऽङ्गैर्नरः सर्वैः स्वकीयैरिच्छयाऽनिशम्।। ९।।
नाडयः सुषिरा रक्तमरुत्पूर्णाश्च सर्वगाः। सुषुम्नामध्यगा वज्र[3]नाडी तन्मध्यगा परा।। १०।।
चित्राभिधाना तन्मध्ये स्थिता सा कुण्डली[4] परा। मर्माण्यङ्गुष्ठगुल्फाङ्घ्रिपृष्ठजङ्घाख्यजानुषु।।११।।
ऊरुसीवनिकामुष्कमेढ्रनाभिषु पार्श्वयोः। हृदयस्तनकण्ठांसकृकाटीकर्णमूर्धसु ।। १२।।
शङ्खयोः पल्ल[5]नासादिमध्यान्तास्यकपोलतः। अष्टात्रिंशदिति प्रोक्तान्येषु वायोस्तु धारणात्।।१३।।
परकायप्रवेशश्च स्वेच्छोत्क्रान्तिश्च सिध्यति। दशानामपि वायूनां देहस्थानां क्रियाः शृणु।। १४।।
ऊर्ध्वाधोगमनासक्तौ प्राणापानौ सदा तनौ। नाग उद्गारकृत् प्रोक्तः क्षुत्कृत् कृकरसंज्ञकः।। १५।।
देवदत्तो जृम्भणकृत् रवकृच्च धनञ्जयः। कूर्म उन्मेषकृत् प्रोक्त उदानोऽपि तथा द्विकृत्।। १६।।
समानवायुः कायाग्निं सन्धुक्षयति पाचितुम्। व्यानाख्यो रसमादाय व्यापयेदखिलां तनुम्।। १७।।
एषां दशानामंशास्तु मारुताः[6] स्युरनन्तकाः। तेषां प्रसा[7]राद् देहस्य समीचीना स्थितिर्भवेत्।।१८।।

---

१. 'यजेदन्ते' क. पाठः। २. 'मूर्धानि' ग. पाठः। ३.'वज्रा' ग. पाठः। ४. 'स्थिता कुण्डलिनी' ग. पाठः।
५. 'फल्गु' ग. पाठः। ६. 'मरुतां' ख. पाठः। ७. 'प्रसादात्' ग. पाठः।

वैलोम्ये विकृताङ्गत्वाल्लोकै[1]र्नाशाय कल्प्यते। जीवात्मा भेदरूपेण मनसा परमात्मनः।। १९।।
योगो योगस्तु विज्ञेयस्तस्याङ्गानि[2] तथाष्ट वै। यमोऽथ नियमः पश्चादासनं तदनन्तरम्।। २०।।
प्राणायामस्तथा प्रत्याहारस्तदनु [3]धारणा। ध्यानं समाधिरित्युक्तान्यष्टाङ्गानि यथाक्रमम्।। २१।।
कथयामि शृणु प्राज्ञे यैर्मर्त्यो मत्समो भवेत्। आत्मापरोक्षप्रत्यूहकर्मणस्तु यमो यमः।। २२।।
तथैकादशरूपः स्यान्नियमः परिकीर्तितः। अहिंसा सत्यमास्तिक्यमार्जवं समता धृतिः।। २३।।
क्षमा दया त्रिधा शौचं सन्तोषो गुरुसेवनम्। तत्प्रत्यूहाः षडाख्याताः कामक्रोधौ ततस्तथा।। २४।।
लोभमोहौ मानमदौ वह्निवत् सर्वनाशकाः। पद्मस्वस्तिकवीराख्यभद्राण्युक्तानि वै क्रमात्।। २५।।
आसनानि मनःस्थैर्यकरणे साधकानि वै। ऊर्वोरुपरि विन्यस्येद् व्यत्यासात् पादयोस्तले।। २६।।
बाह्यपार्श्वद्वयस्पर्शात् तत्पद्मासनमीरितम्। तथा तयोरधोभागे तदन्तः पार्श्वसङ्गमात् ।। २७।।
स्वस्तिकाकारतः प्रोक्तं तद्भद्रासनमीश्वरि। तलान्तः पार्श्वगं कुर्यादेकमन्यत् तु बाह्यगम्।। २८।।
ऊर्वोरधस्तथोर्ध्वं च द्विधा भद्रासनं स्मृतम्। व्यत्यस्ततलयोरूर्ध्वसंस्पर्शादुच्चजङ्घयोः।। २९।।
पादयोर्जानुदेशे वै वीराख्यं योगपट्टतः। प्राणायामस्त्रिधा प्रोक्त उत्तमाधममध्यतः।। ३०।।
लाघवो भूतलत्याग उत्तमे चित्तनिर्वृतिः। सर्वाङ्गे स्वेदसंवृद्धिरधमे मध्यमे तथा।। ३१।।
सर्वाङ्गकम्पनं प्रोक्तमभ्यासात् कालसंयुतात्। तेऽप्युत्तमगुणा भूयुरभ्यासात् कालयोगतः।। ३२।।
तस्मात् समभ्यसेत् प्रातः सायं च नियमेन वै। वामेन नासारन्ध्रेण पूरयेदमृतात्मना।। ३३।।
स्मरन्नम्बु मरुत् पश्चाद् दक्षिणेनापसारयेत्। एवं सुसाधिते पश्चाद् द्वात्रिंशन्मात्रयाहरेत्।। ३४।।
धारयेत् तच्चतुःषष्ट्या रेचयेत् तुत्तरीयतः। कम्पश्च पुलकानन्दौ वैमल्यस्थैर्यलाघवाः।। ३५।।
तद्वत् कान्तिप्रकाशौ च योगसिद्धस्य लक्षणम्। मूलाधारे मनः कृत्वा वायुमापूर्य मूलतः।।३६।।
नाडीचक्रान्तरं नीत्वा सर्वाङ्गानि च धारयेत्[4]। एवं संसाधिते वायावष्टत्रिंशत्सु मर्मसु।। ३७।।
धारयेच्चार[5]येदिच्छावशेनाङ्गानि सर्वतः। तथाधारगतं कृत्वा मनः पवनसंयुतम्।। ३८।।
रसाम्बुदाहव्याप्तस्वैः सहंसैर्व्यापयेत् तनुम्। एवं तैरक्षरैर्देहे वायुना तन्मयीकृते।। ३९।।
त्रिकालज्ञो विशुद्धात्मा सुखी जीवेच्चिरं भुवि। स्वेच्छाचारी व्योमगश्च व्रजेद् देवैश्च सङ्गमम्।।४०।।
स्वेच्छया देहमध्यस्थः क्रीडन् गृहगतो यथा[6]। एवं संसद्धियोगस्तु स्वेच्छया देहमात्मनः।। ४१।।
प्राणानाकृष्य मध्यस्थसुषुम्नारन्ध्रतस्तथा। ब्रह्मरन्ध्राद्विनिर्गत्य भूयात् सर्वान्मनात्मवान्।। ४२।।
अथवोत्तरसम्प्रोक्तचूर्णास्वादनतो वशी। विरक्तचित्तः स्वं देहं तेनोपायेन सन्त्यजेत्।। ४३।।
स्वेच्छोत्क्रान्तिरिति प्रोक्ता योगयुक्तात्मनां प्रिये। परकायप्रवेशं तु वक्ष्ये देवि महाद्भुतम्।। ४४।।
कलौ तु दुष्करं प्रायो मर्त्यैः [7]सर्वैरपीश्वरि। अक्लेशतः परि[8]त्यज्य प्राणान् स्वकतनुं तथा।।४५।।

---

१. 'हासाय कल्पते' ग. पाठः। २. 'न्यष्ट वै क्रमात्' ग. पाठः। ३. 'धारणम्' ख. पाठः। ४. 'चारयेत्' 'चालयेत्' ख. पाठः।
५. 'धारयन् वारयेत्' ख. पाठः। ६. 'ऽन्यथा' ख. पाठः। ७. 'सिद्धैः' ख. पाठः। ८. 'परित्यक्तप्राणां' ग. पाठः।

परिपूर्णाङ्गसंयुक्तामग्रतो वीक्ष्य योगतः। प्रविशेत् तत्तनुं प्राणप्रतिष्ठोक्तविधानतः ।। ४६।।
(स्वां तनुं गोपयेत्स्वीयैस्ततस्तां च तथा व्रजेत्)। सिद्धस्य लक्षणान्यष्टौ योगाभ्यासेन सर्वदा।।४७।।
शृणु तानि महादेवि यैरन्यैर्जायते गुणैः। द्वन्द्वहानिः सुखावाप्तिरारोग्यं वश्यवृत्तिता।। ४८।।
जितेन्द्रियत्वमक्रोधः कृपया जनसेवता[1]। आसन्नमृत्योश्चिह्नानि कथयामि शृणु प्रिये।। ४९।।
यैः साध्यसाधकौ ज्ञात्वा देहत्यागमतन्द्रितौ। देवतास्वात्मभजनपरौ स्यातां ततस्तु तौ।। ५०।।
सगतिं प्राप्य सिद्धौ[2] तु भवतो जातमात्रतः। (अकारणं निजां पूर्वां विमुच्य प्रकृतिं नरः।। ५१।।
समाश्रयेत् ततस्त्वब्दान्मृतिस्तस्य सुनिश्चितम्।) अरुन्धतीं ध्रुवं व्योम्नि नेक्षते चेत्तदर्धतः।। ५२।।
दृशौ नासान्तिकाक्रान्त्या चन्द्रकेऽपाङ्गयोर्न चेत्। विलोकयति तस्यार्धान्मृति[3]स्तस्य सुनिश्चितम्।।५३।।
(गुल्फाधः स्फुरणं नाड्योः पादयोश्चेन्न जायते)। तस्याशु नाशो गदितो भानौ रुण्डं च पश्यतः।।५४।।
निरुद्धकर्णरन्ध्रस्य न चेत् कुण्डलिनीध्वनिः। धूमो वा दृश्यते मूर्ध्नि गृहक्षेत्रादितोऽपि वा।। ५५।।
मूर्ध्नि वा विहगा लीनाः परासुं तं न को वदेत्। पश्चात्कृतार्को गण्डूषे न पश्येच्छक्रचापकम्।।५६।।
सद्यः परासुमात्मानं जानीयात् सर्वथा नरः। मस्तकस्थ[4]करः पश्येत् प्रकोष्ठं स्थूलमात्मनः।।५७।।
अङ्गुल्योरन्तरा दृग्भ्यां [5]पश्येन्न तौ विनश्यतः। श्लेष्मशुक्रमलानि स्युर्निमग्नानि जले यदा।।५८।।
तस्मिन् पक्षे प्रयात्येव यमं सन्त्यक्तजीवितः[6]। हाटकां[7] प्रतिमां पश्यन् ध्रुवं याति यमालयम्।।५९।।
भास्करं भगणैः पश्यन्नपि याति यमालयम्। जलादिषु तनुच्छायां विकृतां वीक्ष्य मासतः।।६०।।
प्रयाति निधनं छिद्रं पश्यन् भानोश्च मण्डले। स्नातानुलिप्तगात्रस्य पूर्वं[8] शुष्यति चेदुरः।। ६१।।
स पक्षाद्याति निधनं सर्वैरपि सुरक्षितः। गुरुमातृगणान् विप्रान् चद्रसूर्यौ च देवताः।। ६२।।
आस्तिकान् सततं निन्दन्नकारणत एव च। स्वेर्ष्यावैरस्य[9] वलने परित्यागे स्वरोषतः।। ६३।।
गुरुमन्त्रद्वि[10]जत्यागेऽप्यचिराज्जायते मृतिः। गुरुं विद्यां च जनकं जननीं सर्वदेवताः।। ६४।।
सदाधिक्षेपशापाभ्यां न्यक्कुर्वन्नाशु नश्यति। पुस्तकं निजगेहं वा विष्टरं शयनं तु वा।। ६५।।
निष्कारणं निराकुर्वन्नाशु नश्यति मानवः। दृग्देहचक्रवालानां[11] वैवर्ण्ये मासतो मृतिः।। ६६।।
ध्याने स्वदेववैरूप्ये मासतो निधनं भवेत्।..।।

इति।। वाराहीतन्त्रे—ईश्वर उवाच।

आश्विनस्य सिते पक्षे श्रीविद्योपासकैरिह। प्रतिपत्तिथिमारभ्य नवम्यन्तं महेश्वरि।। १।।
श्रीचक्रपूजनं देवि कर्तव्यं विधिपूर्वकम्। क्रमार्चनं पुरा कृत्वा देवीमाहात्म्यशक्तयः।। २।।
यष्टव्या यन्त्रतो देवि काम्यमिच्छद्भिरादरात्। तच्छक्तीः सम्प्रवक्ष्यामि शृणु त्वं शैलसम्भवे।। ३।।

---

१. 'जनगोपिता' ख. पाठः। २. 'सिद्ध्यै' ख. पाठः। ३. 'मृतिमेति' ख. पाठः। ४. 'स्थं करं पश्यन्' ग. पाठः।
५. 'पश्यन्नतो विनश्यति' ख. पाठः। ६. 'सन्त्यज्य जीवितम्' ख. पाठः। ७. 'हाटकप्र' ग. पाठः। ८. 'पुरः' ख. पाठः।
९. 'श्वासवैरस्य दलजे' ख. पाठः। १०. 'परि' ख. पाठः। ११. 'वक्त्रवाणीनां' क. पाठः।

वह्वानां (?) मन्दभाग्योऽपि भवेद्वैश्रवणोपमः। नित्या चैव जगन्मूर्तिर्देवी भवगतीति च।। ४।।
महामाया प्रसन्नात्र वरदा मुक्तिदायिनी। परमा हेतुभूता च तथैव च सनातनी।। ५।।
संसारबन्धहेतुश्च तथा सर्वेश्वरीश्वरी । योगनिद्रा ततश्चैव हरिनेत्रकृतालया ।। ६।।
विश्वेश्वरी जगद्धात्री स्थितिसंहारकारिणी। निद्राभगवती चैव ह्यतुला तेजसां निधिः।। ७।।
स्वाहा स्वधा वषट्कारा स्वरात्मा च स्वधाक्षरा। त्रिधामात्रात्मिका चार्धमात्रा स्वरस्वरूपिणी।।८।।
अनुच्चार्या ततः सन्ध्या सावित्री जननी परा। सृष्टिरूपा जगद्योनिः स्थितिरूपा ततः परम्।।९।।
तथा संहृतिरूपा च ततश्चैव जगन्मया। महाविद्या महामाया महामेधा महास्मृतिः।। १०।।
महामोहा च भवती महादेवी महासुरी । प्रकृतिश्चैव सत्त्वादिगुणत्रयविभाविनी ।। ११।।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा । [1]सुरेश्वरी तथा ह्रीश्च बुद्धिर्बोधसुलक्षणा ।। १२।।
लज्जा पुष्टिस्ततस्तुष्टिः शान्तिः क्षान्तिस्तथैव च। खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।।१३।।
शङ्खिनी चापिनी बाणभुसुण्डीपरिघायुधा। सौम्या सौम्यतरा चैव सुन्दरी च परा तथा।। १४।।
परमा परमेशी च सदसच्चाखिलात्मिका। नारी शिवा सिंहवाहिन्यम्बिका भद्रकालिका।। १५।।
चण्डिका च जगन्माता महिषासुरघातिनी। आत्मशक्तिः सर्वदेवमयी श्रद्धा गुणात्मिका।। १६।।
सर्वाश्रयाऽव्याकृताऽऽद्या ततः शब्दात्मिका तथा। वार्त्तार्तिहन्त्री मेधा च दुर्गा भवसमुद्रनौः।।१७।।
असङ्गा कैटभारातिहृदयैककृतालया । गौरी सदार्द्रचित्ता च गीर्वाणवरदायिनी ।। १८।।
देवी चैव महादेवी शिवा भद्रा ततः परम्। रौद्रा धात्री तथा ज्योत्स्ना तथा चैवेन्दुरूपिणी।।१९।।
सुखा चैव तु कल्याणी ऋद्धिः सिद्धिश्च कूर्मिका। नैर्ऋती भूभृतां लक्ष्मीः शर्वाणी च ततः परम्।।२०।।
दुर्गा च दुर्गपारा च सारा च सर्वकारिणी। क्षान्तिः कृत्स्ना च धूम्रा वै यातिसौम्यातिरौद्रिणी।।२१।।
जगत्प्रतिष्ठा कृष्णा[2] च विष्णुमाया ततः परम्। चेतना बुद्धिरूपा च निद्रारूपा क्षुधा तथा।।२२।।
छायारूपा शक्तिरूपा तृष्णारूपा ततः परम्। क्षान्तिरूपा जातिरूपा लज्जारूपा तथैव च।। २३।।
शान्तिरूपा तथा श्रद्धारूपा कान्तिस्वरूपिणी। लक्ष्मीरूपा वृत्तिरूपा धृतिरूपा ततः परम्।।२४।।
स्मृतिरूपा दयारूपा तुष्टिरूपा ततः परम्। पुष्टिरूपा मातृरूपा भ्रान्तिरूपा तथैव च।। २५।।
शुभहेतुः पार्वती च [3]कौशिकी कालिका तथा। उग्रचण्डा च कृष्णा च हिमाचलकृतालया।।२६।।
धूम्रलोचनहन्त्री च असिनी पाशिनी तथा। विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।। २७।।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा। अतिविस्तारवदना जिह्वाललनभीषणा ।। २८।।
निमग्नारक्तनयना नादापूरितदिङ्मुखा। भीमाक्षी भीमरूपा च चण्डमुण्डविनाशिनी।। २९।।
चामुण्डा लोकविख्याता ब्रह्माणी ब्रह्मवादिनी। माहेश्वरी वृषारूढा त्रिशूलवरधारिणी।। ३०।।
महाहिवलया चैव[4] चन्द्ररेखाविभूषणा। कौमारी शक्तिहस्ता च मयूरवरवाहना।। ३१।।

---

[1] 'श्रीरे' क. पाठः। [2] 'कृत्स्ना' ग. पाठः। [3] 'कौलिकी' क. पाठः। [4] 'प्राप्ता' ग. पाठः।

गुहरूपा वैष्णवी च गरुडोपरि संस्थिता। शङ्खचक्रगदाशार्ङ्गखड्गहस्ता तथैव च।। ३२।।
वाराही नारसिंही च नृसिंहसदृशी तथा। घोररावा सटाक्षेपक्षिप्तनक्षत्रसंहतिः ।। ३३।।
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता। सहस्रनयना चैव शक्तरूपा तथैव च।। ३४।।
भीषणाशक्तिरत्युग्रा शिवाशतनिनादिनी। तथापराजिता चैव शिवदूती तथैव च।। ३५।।
कात्यायनी रक्तबीजनाशिनी चण्डघण्टिका। अष्टादशभुजा चोग्रा निशुम्भासुरघातिनी।। ३६।।
शुम्भहन्त्री प्रपन्नार्तिहरा विश्वेश्वरी तथा। आधारभूता च तथा महीरूपा तथैव च।। ३७।।
अपां स्वरूपा च तथाप्यायिनी च ततः परम्। अलङ्घ्यवीर्या चानन्तवीर्या बीजस्वरूपिणी।।३८।।
सम्मोहिनी च विद्या च स्वर्गमुक्तिप्रदायिनी। अशेषजनहृत्संस्था तथा नारायणी शिवा।। ३९।।
कलाकाष्ठादिरूपा च परिणामप्रदायिनी। सर्वमङ्गलमाङ्गल्या शिवा सर्वार्थसाधिका।। ४०।।
शरण्या त्र्यम्बिका गौरी सृष्टिस्थितिलयात्मिका। शक्तिः सनातनी चैव तथा चैव गुणाश्रया।।४१।।
ततो गुणमया चैव नारायणस्वरूपिणी। शरणागतदीनार्तपरित्राणपरायणा ।। ४२।।
सर्वस्यार्तिहरा देवी विष्णुरूपा परात्परा। हंसयुक्तविमानस्था ब्रह्माणीरूपधारिणी।। ४३।।
कौशाम्भःक्षुरिकाशूलचन्द्राहिवरधारिणी। महावृषभसंरूढा तथा माहेश्वरीति च।। ४४।।
त्रैलोक्यत्राणसहिता किरीटवरधारिणी। वृत्रप्राणहरा चैव शिवदूतीस्वरूपिणी।। ४५।।
हतदैत्या महासत्त्वा घोररूपा महारवा। दंष्ट्राकरालवदना शिरोमालाविभूषणा।। ४६।।
चामुण्डा मुण्डमथना लक्ष्मीर्लज्जा तथैव च। महाविद्या तथा श्रद्धा पुष्टिश्चैव सदा ध्रुवा।। ४७।।
महारात्रिर्महाविद्या मेधा सरस्वती वरा। भूतिदा तामसी चैव नियतेशा तथैव च।। ४८।।
सर्वतः पाणिपादान्ता सर्वतोऽक्षिशिरोमुखा। सर्वतः श्रवणघ्राणा तथा सर्वस्वरूपिणी।। ४९।।
सर्वेशा सर्वरूपा च सर्वशक्तिसमन्विता। समस्तरोगहन्त्री च समस्ताभीष्टदायिनी ।। ५०।।
विश्वात्मिका च विश्वेशवन्द्या पापापहारिणी । उत्पातपाकजनितोपसर्गचयनाशिनी ।। ५१।।
विश्वार्तिहारिणी चैव त्रैलोक्यवरदायिनी । नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।। ५२।।
विन्ध्याद्रिवासिनी रौद्ररूपिणी रक्तदन्तिका। दाडिमीकुसुमप्रख्याऽयोनिजा शतलोचना।। ५३।।
भीमा शाकम्भरी दुर्गा दानवेन्द्रविनाशिनी महाकाल्या महाकाली महामारी ततस्त्वजा।। ५४।।
लक्ष्मीवृद्धिप्रदा नित्या पुत्रपौत्रप्रवर्धिनी। शैलपुत्री ततो ब्रह्मचारिणी च ततः परम्।। ५५।।
चण्डघण्टा विशालाक्षी कूष्माण्डा वेदमातृका। स्कन्दमाता गणेशी च विरूपाक्षी ततोऽम्बिका।।५६।।
महागौरी महावीर्या महाबलपराक्रमा। षष्ट्युत्तरं च त्रिशतं शक्तयः संख्यया शिवे।। ५७।।
प्रत्यावरणपूजायां चत्वारिंशच्च शक्तयः। सम्पूज्य बिन्दुचक्रे तु सर्वा एव प्रपूजयेत्।। ५८।।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यचन्दनैः। कुमारीपूजनैर्योगियोगिनीपूजनैः शुभैः।। ५९।।
बलिप्रदानैर्होमैश्च तथा ब्राह्मणतर्पणैः। तोषयेन्मूलविद्यां च जपेदुत्तरवृद्धितः।। ६०।।

देवीमाहात्म्यपाठं तु कुर्यादेकोत्तरं शतम्। एवं य: पूजयेद्भक्त्या प्रतिवर्षं निरन्तरम्।। ६१ ।।
भुक्त्वा भोगांस्ततश्चान्ते देवीसायुज्यमाप्नुयात्।..।।

इति।। श्रीतन्त्रराजे – (२८ प०)

अथ षोडशनित्यानां लोकात्मत्वं वदामि ते। यन्मयं विश्वमखिलं वर्तते सचराचरम्।। १ ।।
कालमातृकयोर्व्याप्ति: प्रागेवोक्ता मया तव। वाच्यवाचकयोगेन मातृकालोकयोरपि।। २ ।।
व्याप्तिमद्य प्रवक्ष्यामि सम्यक् ते काललोकयो:। यदायत्तमिदं विश्वं नित्यास्तत्कालविग्रहा:।।३ ।।
कालस्य षोडशाकारो[1] रूपो दृश्यत एव हि। वृद्धिक्षयाभ्यां चन्द्रस्य चाद्यया कलया तथा।। ४।।
लोकरूपं तत्प्रमाणं कालचक्रं च तादृशम्। तयोरन्योन्यनित्यत्वं व्याप्तिं तद्वत् स्थितिं तयो:।।५ ।।
नित्यालोकस्थितिं मानं नित्या[2]कवचविग्रहम्। ग्रहाणां मातृकारूपं शृणु प्रोक्तक्रमेण वै।। ६ ।।
हेमरूपो भुवो मध्ये मेरुस्तिष्ठति पर्वत:। तस्याभितो मही पार्श्वे पञ्चाशच्छतयोजना।। ७।।
लवणेक्षुसुरासर्पिर्दधिक्षीरजलात्मभि:। सिन्धुभि: सप्तभिर्द्वीपैस्तत्संख्यैर्द्विगुणोत्तरै:।। ८ ।।
आवृता बाह्यसलिलजलधेर्बाह्यपार्श्वयो:। मध्यविस्तारमानं तु बहिरावृत्य तत्पुन:।। ९ ।।
कालचक्रं पराशक्तिमारुतेन सदैव तु। नूनं परिभ्रमत्येव पश्चिमाधोऽपसव्यत:।। १० ।।
तच्च तन्मानवीथीभिर्युतमष्टभिरद्भुतै:। तेजोमयैर्द्वादशारैर्युक्तं मेषादिविग्रहै: ।। ११ ।।
तेषु वीथिषु पूर्वाशामुखा: सप्त ग्रहा: स्थिता:। राशिषूक्तेन कालेन प्रोक्तेनोपर्यधस्तथा।। १२।।
प्रयान्ति तेषां चारेण लोकानां भवति स्थिति:। मध्यस्थमेरौ ललिता सदैवास्ते महाद्युति:।। १३ ।।
तस्याभितो जलान्त:स्था: शेषास्ता: स्युश्चतुर्दश। तद्बहि: परमे व्योम्नि त्वन्त्या चित्रा तु संस्थिता।।१४।।
कृतादिवर्षादारभ्य प्रतिवर्षमिति स्थिता:। द्वितीयादिषु वर्षेषु क्रमात् ता: परिवृत्तिभि:।। १५ ।।
षोडशाब्दे परे व्योम्नि ललिता सलिलाम्बुधौ। चित्रा च भवतीत्थं हि भजन्ते परिवर्तनम्।। १६ ।।
एवं युगेषु चान्येषु वर्तन्ते प्रोक्तरूपत:। कालेष्वपि च मध्यादिपरव्योमान्तमीश्वरि।। १७।।
परिवृत्तिं भजन्ते ता मध्यस्था स्वांशतश्चरेत्। अन्या: सर्वास्तत्र तत्र चरन्ति स्वयमेव वै।। १८ ।।
तथा कालक्रमात् तास्तु भजन्ते परिवर्तनम्। कालतो देशतश्चक्रादैक्यं सञ्जायते यदा।। १९ ।।
तदा भवन्ति भूपाला धार्मिका: कालवर्षत:। प्रजाश्च सुखिनो भूयुररोगा: कालमृत्यव:।। २०।।
कालचक्रस्य बाह्यस्थवीथ्यां तिष्ठन्ति तारका:। तद्बहि: परमव्योम स्थितिस्तत्र तदन्तिका।। २१ ।।
तासामपि च नित्यानां षोडशानां च तत्क्रमात्। एवं देशं च[3] कालं च तन्मयं समुदीरितम्।।२२।।
देशवर्षतिथीनां च सम्पातादैक्यमागताम्। पूजयेत् सविशेषं ता[4] प्रजपेच्चाखिलाप्तये।। २३।।
तेषु विद्योपदेशात्तु तस्यास्तत्सन्निधिर्भवेत्। महाशक्तिश्च जायेत त्रयाणामैक्यवैभवात्।। २४।।
कालप्राप्तां यजेत् स्वाब्दजन्मवासरके तु ताम्। देशप्राप्तां तु तन्मासपूर्णायां पूजयेच्छिवे।। २५।।

---

१. 'काररूपो' क. पाठ:। २. 'तासां' ख. पाठ:। ३. 'देशे च काले' ख. पाठ:। ४. 'तु' ग. पाठ:।

प्रत्यब्दमेवं कुर्वाणं न मुञ्चति रमा यशः। कदाचिदपि दीर्घायुररोगो ज्ञानवान् सुखी।। २६।।
राजभिर्मनुजैः स्त्रीभिरन्यैः प्राणिभिरप्यसौ। मान्यते सर्वमन्त्राश्च सिद्धाः स्युस्तत्र पूजनात्।। २७।।
जम्बूः प्लक्षः शाल्मली च कुशक्रौञ्चौ यथाक्रमम्। शाकश्च पुष्करश्चेति सप्तद्वीपेषु भूरुहाः।।२८।।
तेषां नामभिरेव स्युस्तत्तन्नामानि तन्मुखात्। तत्तन्नामभिरभ्यर्च्य तद्द्वीपं तत्र पूजयेत्।। २९।।
तां तां नित्या[१] तत्र तत्र काले काले तु साधकः। एवं पूजयितुर्लोके न समोऽस्ति न चाधिकः।।३०।।
मध्ये भूमिं तामभितः कालचक्रं ततो बहिः। महाव्योम च निःसीमं तत्रैतद्द्वयसंस्थितिः।। ३१।।
सुस्थिराया भुवो मध्ये चक्रस्य भ्रमतोऽनिशम्। ग्रहाणामत्र संवासः[२] प्रचारनियतात्मनाम्।। ३२।।
कारणं परमेशानि तवेच्छैव तु केवलम्। नत्वन्यदवलम्बाय तयोः कुत्रापि विद्यते।। ३३।।
तयोर्बहिः परे व्योम्नि क्वचिदब्धिचतुष्टयम्। प्रागुक्तरूपां तत्तीरे कोलवक्त्रां तु पञ्चमीम्।। ३४।।
सलिले कुरुकुल्लां च पोतारूढां शुचिस्मिताम्। तन्मध्ये नवरत्नात्म[३]महाद्वीपं च तत्र वै।। ३५।।
कल्पकोद्यानमृतुभिः षड्भिः सेवितविग्रहम्। तन्मध्येऽसंख्यरूपाभिर्वृतां सङ्गीतशक्तिभिः।। ३६।।
गीतवादित्रनृत्यादिसंसक्ताभिरनारतम्। विनोद्यमानां विलसन्मदमन्थरवीक्षणाम् ।। ३७।।
रत्नमण्डपमध्यस्थरत्नसिंहासनोपरि। शुचिस्मितां शक्तिवृन्दगीताकर्णन[४]नन्दिताम्।। ३८।।
सहजासवसम्भोगैः सञ्जातानन्दविग्रहाम्। दयामदारुणापाङ्गविलोकितसुसाधकाम्।। ३९।।
परितो भूषणैश्चित्रैः [५]कर्णचामरकादिभिः। विराजमानान् द्विरदानश्वानपि तथाविधान्।। ४०।।
शक्तिभिर्दर्शितानग्रे पश्यन्तीममितोत्सवाम्। स्वसमानाभिरभितो नित्याभिः सेवितां तथा।। ४१।।
प्रयाति तत्पूजयिता तत्समाकारतां शनैः। तद्विनोदस्तत्समीपनिवासी स्यात् सुनिश्चितम्।। ४२।।
कोटियोजनविस्तीर्णसमायामं महाद्भुतम्। नवरत्नमयं द्वीपं तन्मानाब्धिभिरावृतम्।। ४३।।
तत्तृतीयांशमानस्य सहस्रादित्यतेजसः। रत्नद्वीपस्य मध्यस्थतृतीयांशे तु मण्डपे ।। ४४।।
कोट्यादित्यद्युतिप्रान्तेष्वभितोऽसंख्य[६]शक्तिभिः। तथा समन्वितां ध्यायन्नरो भवति सत्तमः[१]।।४५।।
एवं ध्यात्वार्चयेद् देवीं भक्त्या परमयोक्तया। नरो निरस्तसंसारमूलाज्ञानो जितेन्द्रियः।। ४६।।
निपुणश्च कलादक्षः सुखी निःसङ्गचित्तवान्। अपापः पुण्यशीलश्च सत्यार्जवसमन्वितः।। ४७।।
देशिकः स्वकुलोत्तुङ्गः सर्वसम्भावितात्मवान्। जायते तस्य परितो योजनं पावनं भवेत्।। ४८।।
तदालोकनसंलापसंस्पर्शादिकृता नृणाम्। पापकर्मक्षयात् तेन रहिताः स्युश्च तत्समाः।। ४९।।
कालचक्रस्य नित्याया लोकस्य च बहिः स्थितम्। व्योमरूपमनाद्यन्तं यत्तच्चिन्मयमावयोः।।५०।।
यो वेत्त्येवमशेषं तु नित्यावैभवमीरितम्। स जीवन्मुक्त एवेति प्रोक्तं तल्लक्षणं च ते।। ५१।।

इति।। मातृकार्णवे—

---

१. 'विद्यां' क. पाठः। २. 'संवासप्रचार' क. पाठः। ३. 'रत्नानि' ख. पाठः। ४. 'कर्षण' ख. पाठः। ५. 'स्वर्ण' ख. पाठः।
६. 'अनन्त' ग. पाठः। ७. 'मत्समः' ख. पाठः। ८. 'स्थितिः' ख. पाठः।

शृणु देवि प्रवक्ष्यामि श्रीविद्यापूजनं महत्। रमादिषोडशी विद्या तथा परादिषोडशी।। १।।
कामादिषोडशी चैव तथा वागादिषोडशी। शक्त्यादिषोडशी प्रोक्ता पञ्चधा वै कुलागमे।। २।।
तत्तद्विद्योपासनायां तत्तत्पूजाविधि: स्मृत:।..।।

अत्र यथोक्तषोडशीविद्यादौ तत्तद्बीजस्थापनेन तत्तत्षोडशीति सिद्धान्त:। तथा—

(१)रमादिषोडशीविद्यापूजने शक्तय: स्मृता:। ता: शक्ती: सम्प्रवक्ष्यामि शृणु देवि यथाक्रमम्।।३।।
अनन्ता चाप्रमेया च कमला कामिनी कला। कान्ता च कामगा चैव कलिकल्मषनाशिनी।।४।।
सिद्धलक्ष्मी राज्यलक्ष्मी: सिद्धिस्थाने यजेत् तु ता:। क्षोभिणीं द्राविणीं चैवोन्मादिनीं वशिनीं तथा।।५।।
आकर्षिणीं खेचरीं च ततश्च मदनातुराम्। सर्वबीजमयीं सर्वयोनिरूपां मनोन्मनीम्।। ६।।
एता: शक्तीर्दशैवात्र मुद्रास्थानेषु पूजयेत्। रञ्जनीं रागशीलां च राजसीं रतिरागिणीम्।। ७।।
तामसीं सात्त्विकीं सौम्यां क्रूरां चैवाष्टमातृका:। पूजयेन्मातृकास्थानेष्वेवमाद्यावृतिं यजेत्।। ८।।
षोडशारे यजेत् प्रोक्तकला: सोमस्य षोडश। अष्टारे तु मदोन्मत्तां मन्मथार्तां मनस्विनीम्।। ९।।
मातङ्गीं मदनां मत्तां पश्चाच्च मदविह्वलाम्। मनोवेगां च सम्पूज्य ततश्चतुर्दशारके।। १०।।
इन्द्राणीं चैव शर्वाणीं शाङ्करीं शशिशेखराम्। इच्छावतीं कामचारां ततश्च गगनावतीम्।। ११।।
लास्यप्रियां ललामां च चन्द्रहासां तत: परम्। चार्वङ्गीं चारुचरितां चपलां चारुभूषणाम्।। १२।।
यजेद् दशारयुग्मे तु जीवनां रतिसुन्दरीम्। हावरूपां भावरूपां वीणापुस्तकधारिणीम्।। १३।।
खड्गिनीं वाणिनीं चैवाह्लादिनीं कुसुमप्रियाम्। बालामम्बां विशालाक्षीं सुखाराध्यां सुखोत्सुकाम्।।१४।।
भक्तिप्रियां वेदगर्भां विचित्रां सुरसुन्दरीम्। हंसिनीं कोलवक्त्रां च ततोऽष्टारे यजेदिमा:।। १५।।
ब्राह्मीं सरस्वतीं वाणीं तथा वाग्वादिनीं तथा। भारतीं नकुलीं भाषां श्रुतिस्मृतिविबोधिनीम्।।१६।।
अन्तराले तु सम्पूज्या: प्राग्वदायुधदेवता:। वामां ज्येष्ठां च रौद्रीं च त्रिकोणाग्रेषु पूजयेत्।।१७।।
एवं ते कथितं भद्रे श्रीचक्रार्चनमुत्तमम्। क्रमपूजां विधायादौ प्रोक्तपूजां समाचरेत्।। १८।।
रमादिषोडशीविद्योपासकानामयं क्रम:। य एवं कुरुते नित्यं श्रीचक्रक्रममुत्तमम् ।। १९।।
भुङ्क्त्वेह भोगानखिलान् देवीसायुज्यमाप्नुयात्।(२)अथ वक्ष्ये महेशानि पराद्यायाश्च पूजनम्।।२०।।
माया लज्जा प्रभा ज्योत्स्ना महोच्छुष्मा महानिशा। कमनीया कला कान्ता कम्बुकण्ठी कलावती।।२१।।
वरेण्या वरदा बाला पावनी च परात्परा। भवानी भानुका भव्या भवबन्धविमोचिनी।। २२।।
पाशिनी पाशविच्छेदा वाणिनी शारदा शिवा। अचिन्त्यानन्दचरिता तारिणी धर्मविक्रमा।। २३।।
ईश्वरी कौतुकप्रीता दुर्गा कात्यायनी परा। उर्वशी दैत्यहन्त्री च पद्मा पद्मावती शिवा।। २४।।
स्वाहा स्वधा वषट्कारा श्रद्धा प्रीतिर्मनोरमा। मनोहरा महामाया मानिनी मानपोषणा।। २५।।
अजिता चोर्जितानन्ता ओंकारा सामगप्रिया। अभेद्या नीतिरक्षा च ज्ञानदा भक्तवत्सला।। २६।।
निरवद्या[१] विशोका च वरदा कामरूपिणी। कौलिनी कौलिक[२]प्रीता कुलीना कूर्मरूपिणी।।२७।।

---

१. 'नरविद्या' क. पाठ:। २. 'कौतुक' क. पाठ:।

आधाराधेयरूपा च कुलमार्गप्रबोधिनी। लिङ्गत्रयस्थानगता लिङ्गिनी लिङ्गरूपिणी।। २८।।
अज्ञानहन्त्री घोरास्या मङ्गला मङ्गलप्रदा। भावाभावविनिर्मुक्ता गुणातीता गुणात्मिका।। २९।।
धारुणी धर्मतनया दानशीला दयापरा। त्रिवर्णस्था च षट्कोणनिलया बिन्दुवासिनी।। ३०।।
योगिनी योगगम्या च योगाङ्गा योगरूपिणी। वेदान्तगोचरा वेद्या कालहन्त्री कुलान्तका।। ३१।।
वज्रेश्वरी च कामेशी महाविद्या महाभया। त्रिपुरा त्रिपुरेशी च सुन्दरी भगमालिनी।। ३२।।
नवकोणालया नित्या त्रिगुणा त्रिगुणात्मिका। प्राग्वत् प्रपूजयेदेता नवावरणगाः क्रमात्।। ३३।।
(३)कामादिषोडशीविद्याशक्तीराकर्णयाम्बिके। कामेशी कामरूपा च कुलकान्ता कलावती।।३४।।
कौमोदिनी[1] रतिर्ज्येष्ठा श्रद्धा प्रीतिर्धृतिर्मतिः। काली कलालिका काम्या काम्यदा कामगा[2] सती।।३५।।
सारा सर्वेश्वरी सौम्या साध्वी सत्या सनातनी। ऋद्धिः सिद्धिस्ततः शुद्धिर्बुद्धिस्तन्द्रा क्षुधा जरा।।३६।।
जलजा जातिशीला च जागरा रागवर्जिता। जया च विजया चापराजिता कुसुमायुधा।। ३७।।
आद्या विद्या महाविद्या महावेगा मदोद्धता। भुजङ्गभूषणा रौद्री नरमालाविभूषणा।। ३८।।
आर्या हिमाचलसुता विन्ध्यशैलनिवासिनी। पीठगा पीठनिलया कामरूपकृतालया।। ३९।।
कौमारी कर्कशा क्रुद्धा गणेशी गणवन्दिता। भद्रा भद्रावती भव्या भैरवी भैरवप्रिया।। ४०।।
भावगम्या भवध्वंसिन्यचिन्त्याचिन्त्यवैभवा। नारायणी भद्रकाली वैष्णवी विष्णुपूजिता।। ४१।।
वाराही नारसिंही च भीमा भीमाट्टहासिनी। विशाला विमला बाला परा त्रैलोक्यमातृका।। ४२।।
भगवत्यप्रधृष्या च भगमाला भगोदरी। मदिरा मदिरानन्दा महिषी महिषान्तकी ।। ४३।।
कदम्बवनमध्यस्था किराती कीर्तिशालिनी। अभङ्गुरा विश्वमूर्तिर्विश्वा विश्वैकवन्दिता।। ४४।।
वीरा वीरेश्वरी वीरवन्दिता विमलप्रभा। कपालिनी कामचारा कामिनी कामदायिनी।। ४५।।
इच्छा ज्ञाना क्रिया चैव पूजनीयाः प्रयत्नतः। (४)वागादिषोडशीशक्तीर्वक्ष्ये देवि यथाक्रमम्।।४६।।
वाग्भवा वरदा वाणी शान्तिः क्षान्तिः क्रिया दया। मरीचिरङ्गिरा प्रज्ञा सृष्टिः श्रद्धा च सन्नतिः।।४७।।
गुणप्रिया गुणाराध्या वाणी भाषा सरस्वती। ब्रह्माणी ब्रह्मवन्द्या च ब्राह्मणी ब्रह्मवादिनी।। ४८।।
श्वेतमाल्याम्बरधरा सुश्वेता श्वेतभूषणा। इन्दुमण्डलमध्यस्था चन्द्रखण्डविराजिता ।। ४९।।
चन्द्रिका चारुभूषा च कौबेरी कालकल्यदा। वाच्यवाचकरूपा च ज्ञानगम्या गुणोत्कटा।। ५०।।
गेयाद्या गेयरूपा च गीर्वाणवर[3]वन्दिता। भोगिनी भोगिरूपा च भूतेशी भूतरूपिणी।। ५१।।
भुवनानन्दिनी भूमिर्भुवनव्यापिनी ह्यजा। प्रगल्भा प्रौढचरिता वेदशास्त्रार्थगोचरा ।। ५२।।
वेदान्तवेद्या सीमन्तिन्यङ्कुशिन्यखिलात्मिका। शुकहस्ता शुकाराध्या श्यामला चण्डविक्रमा।।५३।।
चामुण्डा चण्डिका दुर्गा भावनी[4] भावगोचरा। जृम्भिणी मोहिनी चण्डा रञ्जिनी वशिनी[5] तथा।।५४।।
बन्धिनी बुद्धिरक्षा च बुध[6]रूपा बुधार्चिता। सामगानरता नित्या चतुरा चतुरानना ।। ५५।।

१.'दकी' क.पाठः।२. 'कामना' ग.पाठः। ३. 'परि' क.पाठः। ४. 'भवनी' ग.पाठः। ५. 'वासिनी' क.पाठः। ६.'बोध'ग.पाठः।

जाड्यहन्त्री जनाराध्या तारा नीलसरस्वती। कुरुकुल्ला च वाग्वादिन्यानन्दा नन्दगोपजा।। ५६।।
नन्दिनी नादरूपा च नलिनी नलिनप्रिया। पाविनी परमाह्लादिन्यासुरी सुरपूजिता ।। ५७।।
सुमना उन्मना गानप्रिया कल्याणदायिनी। महनीयगुणा रत्नभूषणा जनरञ्जिनी ।। ५८।।
मुनिसेव्या मोदमाना मानिनी मलवर्जिता। मन्दारकुसुमप्रीता बन्धूककुसुमारुणा ।। ५९।।
वृन्दा वृन्दारकनुता बृंहिताश्वमुखी तथा। प्राग्वत्पूजा प्रकर्तव्या नवस्वावरणेषु च ।। ६०।।
(५)शक्त्यादिषोडशीशक्ती: प्रवक्ष्यामि समासत:। याभिरेतज्जगद् व्याप्तं त्रैलोक्यं सचराचरम्।।६१।।
शक्ति: परा वसुमती विश्वाद्या विश्वमातृका। पञ्चभूतात्मिका प्राणदायिनी भूतदायिनी।। ६२।।
विश्वेश्वरी विश्वहन्त्री सृष्टिस्थित्यन्तकारिणी। विश्वयोनिर्जगन्माता भावाभावविवर्जिता ।। ६३।।
व्या[1]प्तिदेवी जगज्जैत्री विवेका वीर्यवर्धिनी। मेयरूपा प्रमेया च प्रमागम्या प्रहेलिका।। ६४।।
ज्ञातृज्ञानज्ञेयरूपा ज्ञानविज्ञानदायिनी। प्रतीता प्रकृति: प्रज्ञा प्रामाण्यमतिसंस्थिता ।। ६५।।
शून्यरूपाऽशून्यरूपा शून्याशून्यविवर्जिता। चित्स्वरूपा चिदंशा च निर्विकल्पा निरीहिका।। ६६।।
निराधारा[2] निराकारा गुणातीता गुणोदया। सूर्यमण्डलमध्यस्था वह्निमण्डलवासिनी ।। ६७।।
चन्द्रमण्डलमध्यस्था ह्याज्ञाचक्रनिवासिनी। अत्यन्तगहनातीता दिव्यमार्गविबोधिनी ।। ६८।।
सुधापानरता सौधी सुधासारा[3] सुधात्मिका। परमात्मस्वरूपा च कुण्डलिन्यमितप्रभा।। ६९।।
दिव्यस्थानत्रयातीता स्थानत्रयनिवासिनी। स्थानदा स्थानगम्या च स्थानास्थानविवेकिनी।। ७०।।
सम्भ्रमा[4] भ्रमरूपा च विभ्रमा भ्रमवर्जिता। विश्रान्तिरूपा शृङ्गाटनिलयाऽकथवर्णिनी[5]।। ७१।।
निर्मला निर्मलज्ञेया मलत्रयविशोषिणी। अव्यक्ता व्यक्तरूपा च व्यक्ताव्यक्तविवर्जिता।। ७२।।
तुरीया च त्वराकारा कुमारी पूजकप्रिया। गिरिजा गिरिशाराध्या गीर्वाणगणसेविता।। ७३।।
जाग्रद्रूपा स्वप्नरूपा तथा सुषुप्तिरूपिणी। अवस्थात्रयनिर्मुक्ता चिदानन्दस्वरूपिणी।। ७४।।
हंसिनी हंसरूपा च मुण्डमालाविभूषणा। आरक्तनयना रक्तभूषणा निरुपद्रवा ।। ७५।।
भक्तप्रिया मुक्तिदात्री भुक्तिदा भुवनात्मिका। जन्मसंसारबन्धघ्नी जननी जनकात्मिका।। ७६।।
जरामरणविध्वंसिन्यम्बुजाक्षी शिवप्रिया। प्राणशक्तिर्भूतमाता सुकेशिन्यथ कौशिकी[6]।। ७७।।
कोशरूपा भूरिगणा पूर्णरूपा पुरातनी। अकलङ्कशशाङ्काभा मुद्रापुस्तकधारिणी ।। ७८।।
त्रिनेत्रा त्रिपुरा चैव त्रिस्थाना त्रिकविग्रहा। त्रिमूर्तिस्त्रिपुराम्बा च महात्रिपुरसुन्दरी।। ७९।।
पञ्चप्रकारयजनं प्रोक्तं तेऽतिरहस्यगम्। गोप्यं गोप्यं पुनर्गोप्यं गोपनीयं प्रयत्नत:।। ८०।।
एवं पूजयिता मर्त्यो मत्समो भवति ध्रुवम्।.....................................।।

इति।। श्रीतन्त्रराजे– (३० प० ४३ श्लो०)

---

[1] 'वाग्देवी च' क. पाठ:। [2] 'निराहारा' क. पाठ:। [3] 'सुधाधारा' क. पाठ:। [4] 'विभ्रमा' क. पाठ:।
[5] 'वर्धिनी' क. पाठ:। [6] 'कौलिकी' क. पाठ:।

ततः सूक्ष्मैः पराख्यैश्च होमैः सिद्धिं शृणु प्रिये। स्वमूलाधारके वह्नौ कुण्डलिन्यग्र[1]गामिनि।। १।।
वाच्यवाचकरूपं तु प्रपञ्चं जुहुयात् तथा। येनावयोः समो देवि जायते हवनेन च।। २।।
तद्विधानं वद प्राज्ञ शम्भो सम्यङ्ममाधुना। आधारे वह्निसंस्थानं कुण्डलिन्याः स्थितिं ततः।।३।।
तद्रूपं तत्क्रियां सर्वं वद मे विशदं प्रभो। शृणु वक्ष्ये विधानं ते सम्यग्विस्तरतोऽधुना।। ४।।
प्राणाग्निहोत्रविद्येति यत् त्रय्यां श्रूयते परम्। यज्ज्ञात्वा वनितागर्भं न प्रयाति नरो ध्रुवम्।। ५।।
यद्व्ययायासरहितमनन्यापेक्षनिर्वहम्। यन्मनःक्लेशविश्रान्तेः स्थानं निःशेषकल्मषम्।। ६।।
सुखास्पदं स्वगं विश्वमयं चिद्वेद्यवेदनात्। अत्रोक्तशेषमखिलं षट्त्रिंशे पटले स्फुटम्।। ७।।
प्रदर्श्यते ततस्तत्र वर्णयामि च किञ्चन। नित्यानित्योदिते मूलाधारमध्येऽस्ति पावकः।। ८।।
सर्वेषां प्राणिनां तद्वद् हृदये च प्रभाकरः। मूर्धनि ब्रह्मरन्ध्राधश्चन्द्रमाश्च व्यवस्थितः ।। ९।।
तत्त्रयात्मकमेव स्यादाद्यानित्यात्रिखण्डकम्। तेषां त्रयाणामैक्यं तु मनसा भावयेत् तथा।। १०।।
गमागमाभ्यां तेजोभिस्तेषामन्योन्यजैः शिवे। तथा समिद्धं तत्तेजस्त्रयं बुद्ध्वाथ तन्मयम्।। ११।।
विश्वं[2] विकल्पविधुरं भावयेदद्भुतं च[3] तम्। तेषां त्रयाणां वर्णानां प्रागुक्तानां क्रमेण वै।। १२।।
द्वाभ्यामन्यतमं कृत्वा पुटितं जुहुयाच्च तैः।* पुटितान् भानुहृद्वर्णैः स्वरांस्तारेण हुंकृतैः।। १३।।
कुण्डलीमुखमार्गाग्नौ जुहुयान्निश्चलाशयः। वह्निभानुपुटान्तःस्थैश्चान्द्रैस्तद्वद् हुनेत् क्रमात्।। १४।।
चन्द्रभानुपुटान्तःस्थैर्वह्न्यर्णैर्जुहुयात् तथा। भानुचन्द्रपुटान्तःस्थैर्वह्न्यर्णैर्जुहुयात् तथा[4]।। १५।।
चन्द्रवह्निपुटान्तःस्थैर्भान्वर्णैर्जुहुयादपि । वह्निचन्द्रपुटान्तःस्थैरपि तद्वद् हुनेत्तथा[5] ।। १६।।
तथा तेषां प्रातिलोम्यात् षोडशानां हुनेदपि। एवं द्वादशधा होममक्षरैः स्यादुदीरितैः।। १७।।
कृत्वा तद्वाच्यमखिलमर्थरूपं च तैः समम्। तेजस्त्रयात्मरूपं स्यादावयोरपि तद्वपुः।। १८।।
अन्यानि चावयोरिच्छागृहीतानि वपूंषि वै। तान्यन्यदेवतादेहसमा[6]नीच्छावशानि च।। १९।।
मुक्तिश्च तन्मयीभावस्थैर्यमेव समीरितम्। तत्र कुण्डलिनीं ब्रूहि स्फुटं मे परमेश्वर।। २०।।
तां वदामि शृणु प्राज्ञे रहस्यं परमाद्भुतम्। मूलाधारस्थवह्न्यात्मतेजोमध्ये व्यवस्थिता।। २१।।
जीवशक्तिः कुण्डलाख्या प्राणाकारेण[7] तेन सा। प्रसुप्तभुजगाकारा त्रिरावर्ता महाद्युतिः।। २२।।

---

*पुटितान् इत्यादिभिः पञ्चभिः श्लोकैः प्राणाग्निहोत्रमन्त्रादिकमुपदिशति—ककारादितकारान्तैः षोडशभिर्भानुवर्णैः सकारादिथकारान्तैर्व्युत्क्रमाद् अग्निवर्णैः स्वरानकारादीन् चन्द्रवर्णान् पुटितान् जुहुयात्। तन्मन्त्रा यथा--कअसों, खआषों इत्यादयः तअःथों इत्यन्ताः षोडश। वह्निभानु—इति। तन्मन्त्रा यथा—थअतों, दआणों इत्यादयः सअःकों इत्यन्तः।। चन्द्रभानु—इति। तन्मन्त्रा यथा—अथतों, आदर्णो इत्यादयः अःसकों इत्यन्ताः।। भानुचन्द्र—इति। तन्त्रमन्त्रा यथा—कथओं, सदंओं गधौंओं इत्यादयः तसओं इत्यन्ताः।। चन्द्रवह्नि—इति। तन्मन्त्रा यथा—अकसों, आकषों इत्यादयः अःतथों इत्यन्ताः।। वह्निचन्द्रेति। तन्मन्त्रा यथा—थकःओं, दखंओं इत्यादयः सतओं इत्यन्ताः।।

[1] 'न्यास्यगामिनि' ख. पाठः। [2] 'चित्त' ख. पाठः। [3] 'हितं' क. 'यत्' ख. पाठः। [4] 'अपि' क. पाठः।
[5] 'तु तैः' क. पाठः। [6] 'सम्यगिच्छा' ख. पाठः। [7] 'राथ' क. पाठः।

मायाशीर्षा नदन्ती तामुच्चरन्त्यनिशं स्वगे। सुषुम्नामध्यदेशे सा यदा कर्णद्वयस्य तु।। २३।।
पिधाय न शृणोत्यस्या ध्वनिं तस्य तदा मृति:। एवं सा जीवशक्तिस्तु यदा कुण्डलिनीस्थितिम्।।३४।।
विहाय ऋजुतां याति स्वेच्छादण्डाहता सती। तदा विश्वप्रतीति: स्यात् प्राणिनामन्यदा पुन:।।२५।।
निशान्धकारे भुवनस्थितिवत्स्वात्मन: स्थिति:। एवं तां वेत्ति यो देहे (देशिकादेशदर्शिताम्।।२६।।
स वेत्ति ब्रह्म परमं मां त्वामपि च साधक:। जीवन्मुक्त: स विज्ञेय: शुद्धात्मासक्तमानस:।। २७।।
अस्पृष्टपुण्यपापश्च शोकहर्षातिभूमिग: । रागद्वेषविनिर्मुक्त)स्त्यक्तसर्वक्रियाफल: ।। २८।।
निरुपाधिकसन्तुष्ट: स्वेच्छाधीनेच्छया युत:। स्वदेहमात्रयात्रश्च समश्च स्तुतिनिन्दयो:।। २९।।
समारिमित्र: कल्याणगुणशीलदयान्वित:। एवं स कथितो जीवन्मुक्तो लोकेषु साधक:।। ३०।।
इतर: पूजने देव्या भजने च सकौतुक:। कालेन सिद्धिभाग्भूयादितरो दु:खभाजनम्।। ३१।।

पूर्वप्रोक्तो जीवन्मुक्तो, द्वितीय: कालेन सिद्धिभागजीवन्मुक्तसदृशो भूयादित्यर्थ:। तदितर: प्रोक्तद्वयातिरिक्तो दु:खभाजनं भवतीति। तथा—

जन्मभिर्बहुभि: क्लिष्टो मूर्खो विद्याधनोद्भवै:। मदैरुन्मदचित्त: सन्नधोऽधो याति योनिषु।। ३२।।
नित्यासु भक्तिर्भुवने प्रक्षीणे पापकर्मणि। जायते यद्व[१]लाल्लोके भवेत् प्रागुक्तलक्षण:।। ३३।।
नरो, भवन्ति तां भक्तिं प्राप्य लोकेषु देवता:। दृश्यन्ते भानुचन्द्रारबुधजीवसितासिता:।। ३४।।
अन्ये च लोकपालाद्यास्तद्भक्तिप्राप्तसम्पद:। बहुना किं परं देवि नित्याभि: सदृशानघे*।। ३५।।
न सन्ति देवता विद्या[२]स्तस्मात्ता एव देवता:। भावयाम्यहमद्यापि त्रिकाले विग्रहान्वित:।। ३६।।
तद्वर्णव्याप्तचक्रस्था ग्रहाश्च तव दर्शिता:। विधिविष्णुशिवात्मत्वं तासामेव निजेच्छया।। ३७।।
अन्याश्च देवता या यास्तास्तास्तन्मयविग्रहा:।...।।

प्रागुक्तमन्त्रभेदा देवताभेदाश्च सर्वे नित्याभेदा एवेत्यर्थ:। तत्प्रदर्शनमेतज्ज्ञानार्थमिति। तथा—

पररूपं तु वक्ष्यामि होमं ते महदद्भुतम्। यत्सिद्धि: सिद्धरूपाणां प्रागुक्तानां भवेत् सदा।। ३८।।
अन्येषां न भवेद्भावस्तथा सर्वाश्रयो महान्। प्रक्षीणाशेषपापानां भक्ति: स्याद्भ[३]क्तसेविनाम्।।३९।।
नित्याविद्यासु भक्तानां लक्षणं शृणु सुन्दरि। आमुष्मिकासंशयत्वं सन्तोषो नित्यपूर्णता।। ४०।।
सुखिता त्यागिता ज्ञानं कृतज्ञत्वमलुब्धता। अकार्पण्यमदीनत्वं परचिन्तानिरुद्यम:।। ४१।।
दयालुता मनस्वित्वमवैषम्यं मन:स्थितौ। लाभहान्यो: प्रीतिरोषाभाव: कल्याणशीलता।। ४२।।
कल्याणाभिनिवेशित्वं सदा कल्याणकीर्तनम्। अकल्याणकथालापवैमुख्यं स्वेच्छया स्थिति:।।४३।।
सदैश्वर्यं च भोक्तृत्वं नैष्ठिकत्वमजिह्मता। सर्वानुकूल्यं सङ्गीतप्रियत्वं वाञ्छिताप्तय:।। ४४।।
राजयोषित्प्रभुप्राज्ञबहुमानममत्सर: । सर्वोत्तरत्ववाञ्छा च लक्षणानीरितानि ते ।। ४५।।
यद्विकल्पस्वरूपं तु मनस्तन्निर्विकल्पके। निधानं परहोमं तु स्थूलसूक्ष्मं च यन्मयम्।। ४६।।
उच्चावचविकल्पनां वस्तूनामग्निदाहत:। तन्मयत्वादैक[४]रूप्यं स्थूलहोममुदीरितम् ।। ४७।।

---

*सदृशा: अनघे इत्यत्र पदच्छेद:। १. 'तत्' क.पाठ:।२.'नित्या:'ग.पाठ:।३.'तज्ज्ञसेविनाम्'ख.पाठ:।४.'ऐक्यरूपं'ख.पाठ:।

सूक्ष्महोमं तथा शब्दैर्नानारूपैस्तु वाचकैः। वाच्यार्थानामशेषेण वेद्यवेत्तृविदात्मना।। ४८।।
स्थितिः परो भवेद्धोमः सर्वभेदविलापनात्। स्वात्मरूपमहावह्निज्वालारूपिषु सर्वदा।। ४९।।
निरिन्धनेद्धरूपेषु परमार्थात्मनि स्थिरे। निर्व्युत्थानविलापस्तु परहोमः समीरितः।। ५०।।

इति।। लक्ष्मीकुलार्णवे। श्रीदेव्युवाच—

अतिदारिद्र्यसिन्धौ तु मग्नानां परमेश्वर। उद्धारक्रमतो देव पूजां वद विधानतः ।। १।।
दारिद्र्यध्वंसनीं पूजां ललितायाः सविस्तराम्। शीघ्रसम्पत्सिद्धिभूतां कृपया वद मे प्रभो।। २।।

श्रीईश्वर उवाच।

शीघ्रसम्पत्प्रसिद्ध्यर्थं भार्गवेण कृता पुरा। श्रीमत्त्रिपुरसुन्दर्याः सा पूजा कथ्यते मया।। ३।।
ययातिमन्दभाग्योऽपि कुबेरसदृशो भुवि। जायते नात्र सन्देहस्तां पूजां शृणु वल्लभे।। ४।।
चक्रपूजां विधायादौ नैमित्तिकमथाचरेत्। तत्तदावरणस्थानेष्वियं पूजा विधीयते ।। ५।।
ताः शक्तीः सम्प्रवक्ष्यामि राज्यसम्पत्प्रदायिकाः। हारनूपुरसंयुक्ता कमलद्वयधारिणी ।। ६।।
लक्ष्मीः परशिवमयी शुद्धजाम्बूनदप्रभा । तेजोरूपा च कमलवसतिर्विश्वमोहिनी ।। ७।।
सर्वभूषोज्ज्वलाङ्गी च बीजापूरधरा तथा। आद्या शक्तिश्च सकलजननी कलशधारिणी।। ८।।
विष्णुवामाङ्गसंस्था च ततश्च कमलालया। श्रीमत्सौभाग्यजननी भार्गवी च सनातनी।। ९।।
सर्वकामफलावाप्तिसाधनैकसुखावहा। हिरण्यवर्णा हरिणी सुवर्णललितस्रजा।। १०।।
समस्तसम्पत्सुखदाऽखिलसौभाग्यदायिनी। समस्तकल्याणकरी ज्ञानदा च हरिप्रिया।। ११।।
विज्ञानसम्पत्सुखदा ह्यश्वपूर्णा हिरण्मयी। विचित्रवाग्भूतिकरी रथमध्या मनोहरा।। १२।।
हस्तिनादप्रमोदा चानन्तसौभाग्यदायिनी। सर्वभूतान्तरस्था च स्वर्णप्राकारमध्यगा।। १३।।
समस्तभूतेश्वरी च विश्वरूपा प्रभामयी। दारिद्र्यदुःखौघतमोपहन्त्री पद्मिनी तथा।। १४।।
दीनार्तिविच्छेददक्षा कृपाकलितलोचना। प्रणतस्वान्तशोकघ्नी शरणागतरक्षणा ।। १५।।
शान्तिः कान्तिः पद्मसंस्था कमनीयगुणाश्रया। क्षान्तिर्दान्तिश्च दुरितक्षयकारिण्यतः परम्।। १६।।
शशिशेखरसंस्था च धनधान्यसमृद्धिदा। शक्ती रतिर्नित्यपुष्टा रजनीकरसोदरा ।। १७।।
करीषिणी च भक्तिश्च भवसागरतारिणी। मतिः सिद्धिर्धृतिश्चैव मधुसूदनवल्लभा ।। १८।।
पुष्टिर्हिरण्यमाला च शुभलक्षणलक्षिता। अतिदुर्गतिहन्त्री च वरसद्गतिदायिनी ।। १९।।
दिवि देवगणाराध्या भुवनार्तिविनाशिनी। आर्द्रा पुष्करिणी [1]पुष्टिर्धरणीधरवल्लभा।। २०।।
दारिद्र्यदुःखहन्त्री च भयविध्वंसिनी तथा। श्रीविष्णुवक्षःस्थलगा ह्यशेषसुविभूतिदा ।। २१।।
लक्षणालक्षिता[2]ङ्गी च पद्मा पद्मसनार्चिता। विद्या सम्पत्करी चैव देवसङ्घाभिपूजिता।। २२।।
भद्रा च भाग्यरूपा च नित्या निर्मलबुद्धिदा। सत्या च सर्वभूतस्था रत्नगर्भान्तरस्थिता।। २३।।

---

१. 'यष्टिः' क. पाठः। २. 'ललिताङ्गी' क. पाठः।

रम्या शुद्धा च कान्ता च कान्ति[१]मद्धासिताङ्गका। सर्वसौख्यप्रदा देवी भक्तौघाभयदायिनी।।३४।।
श्वेतद्वीपकृतावासा जगन्माता जगन्मयी। रत्नगर्भस्थिता सौम्या क्षीराम्बुधिकृतालया ।। २५।।
प्रसन्नहृदया चैव परिपूर्णा हिरण्मयी। वसुन्धरा श्रीधरा च वसुदोग्ध्री कृपामयी।। २६।।
विष्णुप्रिया रत्नगर्भा समस्तफलदा तथा। रसातलगता चैव सुव्रता च हरिप्रिया।। २७।।
धरणीगर्भसंस्था च समुन्नतमुखी तथा। समस्तपुरसंस्था च परिपूर्णमनोरथा ।। २८।।
करुणारसनिःष्यन्दनेत्रद्वयविलासिनी । सर्वराजगृहावासा महालक्ष्मीर्गुणान्विता ।। २९।।
वैकुण्ठनगरस्था च क्षीरसागरकन्यका। योगिहृत्पद्मसंस्था च कल्पवल्ली दयावती।। ३०।।
भक्तचिन्तामणिश्चैव ह्यादिमायेन्दिरा रमा। निराकारा च साकारा ब्रह्माण्डचयधारिणी।। ३१।।
एकनाथाद्यलमीश्चाज्ञानहन्त्री गुणातिगा। प्रज्ञानलोचनाशेषवाग्जाड्यमलहारिणी ।। ३२।।
सुस्पृष्टवाक्प्रदा चैव सर्वसम्पद्विराजिता। प्रभालावण्यसुभगा[२] दोग्ध्री स्वर्णप्रदा तथा।। ३३।।
समस्तविघ्नौघहन्त्री भोगदा च विचक्षणा। देवाधिनाथवन्द्या च दीनपोषण[३]तत्परा ।। ३४।।
माङ्गल्यबीजमहिमा निधिरूपिण्यनन्तगा। आद्यादिलक्ष्मीश्च महासिद्धलक्ष्मीस्ततः परम्।। ३५।।
राज्यलक्ष्मीर्दिव्यलक्ष्मीः सुश्रीर्मङ्गलदेवता। भक्तिदा मुक्तिदा चैव भुक्तिदा सङ्गतिप्रदा।। ३६।।
कीर्तिदा धनदा चैव पुत्रपौत्रविवर्धिनी। पद्मानना च पद्मोरुः पद्माक्षी पद्मसम्भवा।। ३७।।
अश्वदायी च गोदायी धनदायी महाधना। चन्द्रसूर्याग्निसर्वाभा जातवेदास्त्रसंस्थिता।। ३८।।
दिग्गजेन्द्रसमाराध्या दिव्यभूषणभूषिता[४]। सर्वसम्पत्प्रदा चैव तथा सर्वार्थसाधिनी[५]।। ३९।।
एताश्च शक्तयो देव्याः पूजनीयाः प्रयत्नतः। सर्वसम्पत्समृद्धिः स्यादचिरेण न संशयः।। ४०।।
सर्वदा पूजयेद् देवीं कृत्वा चक्रसमर्चनम्। तस्य गेहे स्थिरा लक्ष्मीः पुत्रपौत्रानुगा[६]मिनी।। ४१।।
शक्तयः शतसंख्याताश्चाशीतिश्चतुरुत्तरम्। आदौ संहृतिपूजां च कृत्वा सृष्टिक्रमं भजेत्।। ४२।।
स्थितिक्रमेण पूजां वै केचिदिच्छन्ति तान्त्रिकाः। अथ वक्ष्ये महादेवि षट्सु चक्रेषु पूजनम्।।४३।।
मूलाधारे यजेच्चक्रं वृतं पार्थिवरश्मिभिः। रविवारे च सौभाग्यभाजनं जायते नरः।। ४४।।
इन्दुवारे च नाभिस्थमणिपूरकचक्रके। पूजयेच्चक्रमध्यस्थां जलरश्मिभिरावृताम् ।। ४५।।
भौमवारे लिङ्गदेशे स्वाधिष्ठाने तथा यजेत्। तेजसां रश्मिभिर्वीतां बुधे हृत्पद्मसंस्थिते।। ४६।।
अनाहते वायुरश्मिवृतां तद्वद्यजेत् क्रमम्[७]। विशुद्धिचक्रके चैव गुरोवरि समाहितः।। ४७।।
आकाशांशुभिरावीतां यजेत् सर्वार्थसिद्धये। आज्ञाचक्रे भृगोवरि मानसांशुभिरावृताम्।। ४८।।
यजेच्छ्रीचक्रमध्यस्थां यजेत् सौभाग्यसिद्धये। ब्रह्मरन्ध्रे सहस्रारे शनिवारे विशेषतः।। ४९।।
पूजयेच्च जगद्धात्रीं सर्वरश्मिभिरावृताम्। मनसा पूजयेदेवमन्वहं च समाहितः।। ५०।।

---

[१] 'कान्तिमुद्रा' ग. पाठः। [२] 'सुदया' क. पाठः। [३] 'तोषण' ग. पाठः। [४] 'भूतिदा' ग. पाठः।
[५] 'साधनी' ग. पाठः। [६] 'भिगामिनी' क. पाठः। [७] 'क्रमात्' ग. पाठः।

न कदापि भवेद्रोगो दारिद्र्यं नोपजायते। ग्रहपीडां विजित्याशु पुत्रपौत्रैः समेधते।। ५१।।

अत्र प्रोक्तचक्रेषु प्रोक्तवारेषु श्रीचक्रक्रममभ्यर्च्य, ततो लक्ष्मीशक्तीः समभ्यर्च्य तत्तद्रश्मीनां पूजनं तत्तन्नामकं कुर्यात्। तत्तन्नामानि षट्शाम्भवरश्मिक्रमे ज्ञेयानि।। मातृकार्णवे—

शक्तिकूटप्रभेदोत्थशक्तयोऽत्र प्रपूजिताः। शक्तिकूटोपासनायाः फलं दास्यन्त्ययत्नतः।। १।।

तत्फलं तु प्रागेव दर्शितम्।

बीजद्वयं च तत्कूटरूपिणीशक्तिसंयुतम्। सप्ताक्षरी समुच्चार्य पूजयेत् तत्र तत्र वै।। २।।

अत्र चतुरस्रेऽष्टादश, षोडशारे षोडश, अष्टदलेऽष्टौ, चतुर्दशारे चतुर्दश, दशारद्वये विंशतिः अष्टारेऽष्टौ, अन्तरालेऽष्टौ त्रिकोणे तिस्रः, शेषं बिन्दुचक्रे, एवं क्रमेण पूजयेत्। पूजाक्रमस्तु—ह्रींश्रीं सकलह्रीं रूपिणीशक्तिपादुकां पूजयामीति तत्तत्कूटमुच्चार्य पूजयेदित्यर्थः। प्रथमतः क्रमपूजां विधाय तत एवं पूजयेत्। केचित्तु क्रमपूजायामेव ''अणिमासिद्धिपादुकां पूजयामि, प्रोक्तकूटरूपिणीशक्तिपादुकां पूजयामि'' इत्येकदैव पूजा कार्येति वदन्ति, तत्र यथागुरूपदेशं कार्यमिति। तत्र लक्ष्मीशक्तिपूजायामपि पृथग्वा सहैव वा कर्तव्या। एकदैव चेत् ''हारनूपुरसंयुक्तारूपिणी अणिमासिद्धिपादुकां पूजयामि'' इति क्रमं गुरुतः शास्त्रतश्च विज्ञायाचरेत्। तथा—

तथा वाग्भवकूटोत्थाः शक्तयः सम्प्रपूजिताः। वाग्भवोपासनोक्तं हि फलं दास्यन्त्ययत्नतः।। ३।।
कामराजमहाकूटसम्भवाः शक्तयः क्रमात्। पूजिताः सम्प्रयच्छन्ति ह्यनायासेन तत्फलम्।। ४।।

इति। त्रिपुरार्णवे—

मध्यत्रिकोणे रेखासु नित्यानां मण्डलत्रयम्। पञ्च पञ्च विभागेन मध्ये श्रीललितां यजेत्।। १।।
यद्दिने यां यजेत् तां तु सर्वावरणसंवृताम्। पूजयेत् सर्वसौभाग्यहेतवे ज्ञानसिद्धये ।। २।।

इति। श्रीतन्त्रराजे (३६ प०)—

अथ षोडशनित्यानां विधानानि त्वयाधुना। कथितानि मया तानि श्रुतानि च महेश्वर।। १।।
तासां तव[1] तथान्येषां देवतानां यथार्थतः। स्वरूपं किं कथं विश्वं किमाकारं च दृश्यते।। २।।
प्राणिनां पुण्यपापानि किंरूपाणि च कैस्तथा। तेषां जन्मानि केन स्युः का मुक्तिः संसृतिश्च का।।३।।
कस्य मुक्तिः कथं बन्धः केन तस्य च मोचनम्। किं मूलं संसृतेरस्याः कानि तत्त्वानि का च धीः।।४।।
कानीन्द्रियाणि के प्राणाः को जीवः कः परस्तथा। कः कालः के ग्रहाः सर्वं[2] यथावन्मे वद प्रभो।।५।।
येन वेदैश्च शास्त्रैश्च पुराणैरागमैरपि। कथ्यते[3] तत् स्फुटं ब्रूहि नातिसङ्कोचविस्तरम्।। ६।।
यत् त्वया विंशतिविधः कृतः प्रश्नः शिवेऽधुना। तेषामुक्तक्रमेणैव कथयामि तवोत्तरम्।। ७।।
यैरुत्तरैः स्वस्वरूपं लभ्यते[4] सम्यगञ्जसा। यदितोऽन्यत्र सर्वत्र प्रोक्तं निह्नवचक्रतः।। ८।।
अत्राञ्जसा प्रोच्यते तद् दुर्वचं तु निदर्शनैः। तैर्मयोक्तक्रमाज्जित्वा दुर्जयां वासनां शनैः।। ९।।
सत्यशुद्धस्फुटाशेषस्फुरत्तात्मा भवेद् ध्रुवम्। गुह्यं रहस्यं परमं गोपयेत् सर्वतः सदा।। १०।।

---

१. 'ते मे' ख. पाठः। २. 'सर्वे' ग. पाठः। ३. 'कथ्यन्ते' ग. पाठः। ४. 'ज्ञायते' ख. पाठः।

यज्ज्ञान[1]मिदमो ज्ञानं यज् [2]ज्ञानमहमस्तथा। द्वयोरपि च यज् [3]ज्ञानं तज् [4]ज्ञानं विद्धि मे वपुः।।११।।
तासां तव तथान्येषां चैतन्यात्मा यथार्थतः। लाभादेवं वासनायां विनाशादन्यथा तथा।। १२।।
स्थित[5] आत्मप्रकाशः स्यान्नित्योऽप्रतिभ[6]टो महान्। नित्याहृदयसम्प्रोक्तस्फुटोपायेन वा भवेत्।।१३।।
सा[7]दृश्यबुद्धेर्द्वैरूप्यात् प्रपञ्चस्य च दृश्यते। द्वैरूप्यमनयोरुक्तं सत्यासत्यमयत्वतः।। १४।।
तेनैव प्राणिनां पुण्यपापकर्मसु वर्तनम्। यथात्मज्ञानतोऽर्थेषु व्यापारः पुण्यसंज्ञकः।। १५।।
अनर्थेष्वर्थसङ्कल्पः पापाख्यो मनसा तथा। जन्मानि नानारूपाणि यैर्नित्यं क्लेशभाजनम्।। १६।।
यथार्थज्ञानमर्थानां मुक्तिस्तद्विपरीततः । संसृतिर्मोचनं बुद्धेर्वासना बन्ध ईरितः ।। १७।।
कर्मक्षयात् सद्गुरोस्तु कटाक्षोक्तिविमर्शतः। मोचनं सर्वजन्तूनां नेतरैश्च कदाचन ।। १८।।
संसृतेः कन्दमुदितमविवेकः परो महान्। यदायत्तमिदं जीवभुवनं परिकीर्तितम्[8]। ।१९।।
तत्त्वानि तत्त्वान्युक्तानि सर्वैः सर्वत्र सर्वदा। ज्ञातृज्ञानज्ञेयमयान्यन्यथान्यानि सर्वदा।। २०।।
का च धीरिति यत् पृष्टं तद् दुर्वचमपि स्फुटम्। (कथयामि शृणु प्राज्ञे यदायत्ता च विंशतिः।।२१।।
मनो बुद्धिरहङ्कारश्चित्तमित्यादिनामभिः। वस्तुभेदादभेदाच्च यदुक्तं सर्वतः सदा ।। २२।।
तदेक[9]मक्षयं स्थूलं सूक्ष्मं दुर्ज्ञे[10]मतिस्फुटम्।) विषमं च समं विश्वं विश्वातीतमनामयम्।। २३।।
अरूपं सर्वरूपं च सर्वक्लेशकरं हरम्। सर्वतृष्णाकरहरं सर्वेषां सर्वतः सदा ।। २४।।
सत्त्वरूपं रजोरूपं तमोरूपमतन्मयम् । संसाररूपमुत्तीर्णविग्रहं सुस्थिरं चलम् ।। २५।।
अपापं पापरूपं च जीवरूपं परात्मकम्। अतीन्द्रियं चेन्द्रियात्मा निर्दैवं सर्वदैवतम्।। २६।।
सर्वक्षोभात्मकं सर्वशान्तिरूपं च निर्दयम्। सदयं चाविवेकात्मा विवेकपरमार्थकम् ।। २७।।
उत्तारकं पातनकृद् भङ्गरूपं जयात्मकम्। शोकात्मकं च निःशोकं सकौतुकमकौतुकम्।। २८।।
निरुद्यमं सदोद्युक्तं सावलेपमगर्वकम् । अमर्षरूपमक्षोभ्यं सर्वक्षोभ्यं सुखासुखम्।। २९।।
क्रोधलोभमदद्रोहमा[11]त्सर्यकामविग्रहम् । अस्पृष्टषड्गुणं षण्डं वनिता पुरुषस्तथा ।। ३०।।
अपकृष्टं तथोत्कृष्टं स्वच्छाकारं तथाबिलम्। अगाधमतिगम्भीरमुदारं कृपणं तथा।। ३१।।
भाग्यरूपमभाग्यात्म निर्भयं सभयं तथा। अनिच्छमिच्छारूपं च कातरं वीरविग्रहम्।। ३२।।
निर्दोषं सर्वदोषात्म सर्वविन्मूढविग्रहः। सङ्कोचरूपः सर्वेषां तथा सर्व[12]प्रकाशकः।। ३३।।
अस्तेयरूपः स्तेयात्मा वश्योऽवश्यश्चरो मृदुः। सरसं विरसं क्रूरं सौम्यं तैर्बहुभिस्तु किम्।। ३४।।
त्वन्मयी धीः समाख्याता मन्मयी चिदुदीरिता। उभयैक्याद्विवेकात्मा जीवोऽन्यस्तद्विवेकवान्।।३५।।
तस्यास्तु बुद्धेर्यो वेत्ति याथात्म्यं विकृतीरपि। सामर्थ्यं स्वाविभेदित्वं सिद्धेः प्राप्यफलानि च।।३६।।
योगी च ब्रह्मविज्ज्ञानी[13] शिवयोगी तथात्मवित्। तेनैव विहितं सर्वं प्रपञ्चात्म्यैकविग्रहम्।।३७।।

---

१. 'भानं' क. पाठः। २.३.४. 'भानं' क. पाठः। ५. 'स्थिरः स्वा' ख. पाठः। ६. 'भवः' क. पाठः। ७. 'शब्दस्य' ख. पाठः।
८. 'परिवर्तते' ख. पाठः। ९. 'तदेवं' क. पाठः। १०. 'अपि' क. पाठः। ११. 'स्तब्धवाचालविग्रहम्' ग. पाठः।
१२.'विनाशकः' ग. पाठः। १३. 'योगी ज्ञो ब्रह्मविज्ञानी' ख. पाठः।

स्वात्मनस्तु मनोवृत्त्या विषयग्रहणाय वै। सृष्टानि भूतशक्त्यात्मविग्रहाणीन्द्रियाणि तु।। ३८।।
भूतात्मबुद्धिसङ्घातशक्तिचैतन्यजृम्भणम्। प्राणास्तत्साक्षिभूता हि जीवस्तत्त्वात्मकः परः।। ३९।।
कालस्तु पूर्वं बुद्धेर्यदुक्तं गुणसमस्तवान्। कालं इत्यक्षरं द्वन्द्वाद् यद्वाच्यं तद्वपुर्मम।। ४०।।
न शक्यतेऽञ्जसा वक्तुं तथा दर्शयितुं तव। तथापि तव यत्किञ्चिद् व्याकरोमि समञ्जसम्[1] ।।४१।।
अहोरात्रादिभेदस्तु चन्द्रार्कादिसमन्वयात्। तेन तन्मयतारूपकथनं नोचितं ततः ।। ४२।।
लवत्रुट्यादयो यत्तद् भाष्यन्ते खण्डकास्तु तत्। कालस्य रूपं तत् प्रोक्तं यदनाद्यन्तविग्रहम्।।४३।।
लवत्रुट्यादिकं ब्रूहि यैः कालो ज्ञायते मया। नलिन्या पत्रनिचये सूचीविद्धेऽथ तस्य वै।। ४४।।
एकैकदलोदोत्थावस्था लव उदाहृतः। तत् त्रिंशद्गुणितं प्रोक्तं त्रुटीत्यादिशरीरवान् ।। ४५।।
काल इत्युदितं तस्य स्वरूपं किं कथं भवेत्। इति पृष्टेन तद्वक्तुं शक्यते सुस्फुटं मया।। ४६।।
स्वबुद्ध्या प्रोक्तमात्रस्य भावनाद् यत्तु लभ्यते। तत्तस्य वपुरुद्दिष्टं नान्यास्ति गतिरस्य[2] वै।।४७।।
स्वबुद्ध्या प्रोक्तमात्रस्य भावनाद् यत्तु लभ्यते। तत्तस्य वपुरुद्दिष्टं नानयास्ति गतिरस्य वै।।४७।।
ग्रहास्तु चिन्मयाः काले क्वापि चक्रभ्रमात् पुनः। भूतादनि समस्तानि विकृतानि वितन्वते।।४८।।
नानाविधास्त[3]द्विकाराः प्रपञ्चो दृश्यते सदा। तैरेव तेषां नाशश्च मरुतेव हविर्भुजः।। ४९।।
प्रश्नानामुत्तरं देव त्वया च[4] कथितं विभो। तथापि मे प्रपञ्चात्मविवेकोऽभून्न मेऽधुना।। ५०।।
जननं मरणं चेति द्वयं कस्य कथं भवेत्। अरूपस्य विभोस्तस्य जीवश्चेत् तत्कथं स्थितिः।।५१।।
कुतः स्थितिः कथं वा स्यात् तत्कालपरमात्मनोः। मुक्तो वा जायते किन्तु परे वा सम्भवन्ति किम्।।५२।।
कथं वा पञ्चभूतानां स्थितिर्देहेषु वान्यतः। देहेषु जीवसम्प्राप्तिः कीदृशीत्यादि मे वद।। ५३।।
येन श्रुतेन चित्ते मे शुश्रूषान्यस्य नो भवेत्। तथा मे सर्वसन्देहांश्छिन्धि पूर्णोपदेशतः।। ५४।।
प्रागुक्तबुद्धिवैविध्यारब्धकर्मविपाकतः । जननं मरणं चेति द्वयं देहपरिग्रहात् ।। ५५।।
प्रतप्तलोहपिण्डेऽग्निस्थितिवत् परविश्वयोः। अवस्था कालपरयोस्तादात्म्यादेव वर्तनम्[5]।। ५६।।
मुक्तास्तु जीवा न कदाप्याविर्भूयुः कुतश्चन। न वापूर्वाः सम्भवन्ति बुद्धेः कृत्यमशेषतः।। ५७।।
मुद्रिकारूपमुद्रेव मधूच्छिष्टादिविग्रहम्। जीवादिरूपतो बुद्धिर्विशेषयति तत्परम् ।। ५८।।
भूमेरेवास्फुटं स्थानं कुतश्चित् सुस्थिरं सदा। जलाग्न्योस्तत्र चान्यत्र व्यक्ताव्यक्ता[6] स्थितिः सदा।।५९।।
वायोः सर्वत्र सततमवस्थानं त्वनेकधा। व्योम सर्वगमेव स्यात् कालताद्रूप्यतः सदा।। ६०।।
देहेषु सुस्फुटं तेषामवस्थानं च पञ्चधा। जीवानामागतिर्देहे मातापित्रोस्तु वीर्यतः।। ६१ ।।
तादात्म्यं सङ्गतं तत्र जृम्भते सा चिदात्मना। तत्र प्रारब्धविरमान्मरणं निद्रया समम्।। ६२ ।।
सिद्धानां सर्वदा देहत्यागे भेदो न विद्यते। प्रागेव तस्य देहात्मविवेकान्मनसि स्वगे।। ६३ ।।
नेतरेषां तु[7] साध्यानां साधकानां च कालतः। पौषा[8]दिषु तु मासेषु षट्सु राकोपकण्ठतः।। ६४।।
मरणं सुगतित्वस्य ज्ञापकं भवति स्फुटम्। सिद्धस्तु सर्वतो मुक्तो देहेन्द्रियमनःस्थिरः।। ६५।।

---

[1] 'सा' ख. पाठः। [2] 'अत्र' ख. पाठः। [3] 'तथाकारः' ख. पाठः। [4] 'मे' क. पाठः। [5] 'वर्तते' क. ग. पाठः। [6] 'व्यक्त' ख. पाठः। [7] 'स' ख. पाठः। [8] 'पुष्पादि' ख. ग. पाठः।

यतस्तेनास्य निधनं सर्वदा सर्वतस्तथा। सुगतित्वं व्यनक्त्येव[1] जीवन्मुक्तो यतस्त्वयम्[2]।। ६६।।
देहवत्त्वे समानेऽपि प्राणिनां सर्वतः सदा। बुद्धेर्वैविध्यरूपस्य कारणं किं वद प्रभो।। ६७।।
भूमिष्ठत्वे समानेऽपि तोयानां रसभेदवत्। जायते त्वाश्रयवशात् स च कर्मभिरेव वै।। ६८।।
यथाश्वत्थगतो वह्निरुपायैरितरैः क्वचित्। नोपलभ्यो भवेत् शुष्कमथनव्यापृतिं बिना।। ६९।।
तथात्मज्ञानसम्प्राप्तिः सद्गुरुप्राप्तितो विना। न कस्यापि भवेदेषा प्रतिज्ञा विश्वतोऽनिशम्।। ७०।।
खननाद्भूगतं तोयं यथा समुपलभ्यते। तथा सद्गुरुसंसेवां सम्प्राप्य स्वस्वरूपकम्।। ७१।।
सद्गुरोः पादसेवातः सम्प्राप्तात्मस्वरूपिणः। विशेषः को भवेदन्यदुर्लभः सत्यविग्रहः।। ७२।।
आभिरूप्यमसन्देहः सन्तोषः परिपूर्णता। दयार्द्रचित्तता रागद्वेषाविषयचित्तता ।। ७३।।
सुलभत्वमगर्वित्वं सदा नियतशीलता। कृतज्ञता सत्यता च परचिन्तानिवर्तनम्।। ७४।।
आर्जवं चावित्तलौल्यं विषयानतिसङ्गिता। अदैर्घ्यसूत्र्यमक्षौद्र्य नातिगाधाशयात्मता।। ७५।।
वृथालापेष्वसक्तिश्च वृथाव्यापारवर्जनम्। वृथाविनोदराहित्यं जिह्मचित्तैरसङ्गतिः ।। ७६।।
पुरुषार्थार्थकथनचिन्ताकरणकौतुकम्। अस्तेयशक्तिरास्तिक्यं परलोकानुचिन्तनम्।। ७७।।
देवतापूजनस्तोत्रवैभवालापशीलता। पापानां वर्जनं पुण्यकरणे कौतुकं सदा।। ७८।।
परस्तवननिन्दासु विरतिर्वीतरागिता। निःस्पृहत्वमलोलत्वमनाक्षेपोऽजडात्मता ।। ७९।।
अगोपनं स्वभक्तानामभक्तानां च गोपनम्। गुरुविद्यागमाचारस्तवनं तत्प्रवर्तनम् ।। ८०।।
सिद्धचिह्नानि चैतानि भवन्त्यात्मवतां ध्रुवम्। न भवन्तीतरेषां तु प्रद्विषन्त्येव तांश्च ते।। ८१।।
तत्कृत्यं शृणु वक्ष्येऽहं यो लब्धस्वात्मवैभवः। निरस्ताशेषसंसारमौर्ख्याज्ञानाविवेकवान्।। ८२।।
देशकालकुलाचारान् गुरुराजादिकल्पितान्। पालयन् सुस्मितमुखः पूज्यपूजनकौतुकी।। ८३।।
देहास्थैर्य्यं तथाज्ञान[3]व्यापारान् कालतः क्षणात्। [4]पतितान् बन्धुचित्ताज्ञादुर्लङ्घ्यान् स्वचयस्थितीन्।।८४।।
स्वेन्द्रियाणां च सामर्थ्यं स्वकर्माणि कृतानि च। मुहुर्मुहुश्च विमृशेद्विरमेदशुभात्मनः।। ८५।।
वृथा न कालं गमयेद् द्यूतस्त्रीस्वापवादतः। गमयेद् देवतापूजाजपयोगस्तवादिना।। ८६।।
गुरोः कृपालापकथास्तोत्रागमविलोकनैः। गमयेदनिशं कालं न वदेत् परदूषणम् ।। ८७।।
प्रत्यक्षे च परोक्षे च स्तुवीत प्रणमेद्गुरुम्। [5]सद्गुणैस्तत्कृपाधिक्यैः पुण्यैः [6]स्थैर्यैश्च सत्यतः।। ८८।।
रागलोभमदक्रौ[7]र्यपापपैशुन्यवर्जनैः । सन्तोष[8]ज्ञाननियमशान्तिज्ञानादिभिस्तथा ।। ८९।।
मिताहारो मितालापो विविक्तः सर्ववर्जितः[9]। नित्याचिन्ता स्वात्मशुद्धिः कृत्यमात्मवतां सदा।।९०।।
पूर्वोक्तद्वादशास्रस्य मध्ये कृत्वा यथाविधि। योनिं तन्मध्यतो देवीं ललितां पृष्ठतो गुरून्।।९१।।
पार्श्वयोरायुधान्यष्टौ कोणेषु परितः क्रमात्। कामेश्वर्यादिकास्ति[10]स्रस्तद्बहिर्द्वादशस्वपि ।। ९२।।

---

[1] 'क्त्येषु' क. पाठः। [2] 'तः स्वयं' ग. पाठः। [3] 'ज्ञानं' ग. पाठः। [4] 'पां' ग. पाठः। [5] 'तद्' ख. पाठः। [6] 'पुण्यैर्श्वर्यैः' ख. पाठः। [7] 'क्रोध' ख. पाठः। [8] 'पाचार' ख. पाठः। [9] 'क्तसमवर्तिता' ख. पाठः। [10] 'तत्र' ख. पाठः।

द्वादशान्या यजेत् तत्तन्नित्याविद्याभिरेव वा। तन्नामविद्याभिर्वा ताः पूजयेत् सार्घ्यकल्पनम्।।९३।।
सन्ध्यात्रयं षष्टिसंख्यं जपेत् तद्दिनविद्यया। नान्यत् कृत्यं भवेत् तस्य नित्यनैमित्तिकादिं[1]कम्।।९४।।
तन्मध्ये नवयोनिं वा विधायात्र स्व[2]शक्तिभिः। पूजयेत् प्राग्वदुभयप्रकारादेकयोगतः।। ९५।।
यावज्जीवं विधिस्त्वेष गदितः सिद्धये सदा। सिद्धानामपि सर्वेषां येनासौ स्वात्मवानभूत्।। ९६।।
*(समस्तमेतत्तन्त्रं ते कथितं परमेश्वरि। यत्परामर्शतो भावस्त्वावयोरैक्यमश्नुते ।। ९७।।
तदद्द्यात् तन्त्रमेतत्तु नाभक्ताय कदाचन। नाशिष्याय न दम्भाय प्रच्छन्नानयशीलिने ।। ९८।।
नायाचते नास्तिकाय न लुब्धाय न मानिने। न पापाय न वित्ताय नादक्षाय च भेदिने।। ९९।।
यस्तन्त्रमेतत् सफलं नित्याविद्यास्तु षोडश। शक्त्या सङ्गृह्य विधिवद्भजते स मदंशकः।।१००।।
शिवतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता। अस्या निफालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम्।।१०१।।)

अत्र अस्यार्थतत्त्वं गुरुतो बोद्धव्यम्।। अथ यन्त्रविधिर्नानातन्त्रोक्तः प्रदर्श्यते। तत्र श्रीमातृकार्णवे–

अथ यन्त्रविधिं वक्ष्ये दृष्टादृष्टफलप्रदम्। शुभेऽह्नि पूजयेद्देवं[3] स्वेष्टदेवं यतात्मवान्।। १।।
प्रत्यहं मन्त्रजपवान् हविष्याशी जितेन्द्रियः। इदं यन्त्रं विलिख्य मे भवेदिष्टमिति स्फुटम्।। २।।
स्वप्ने मे कथय क्षिप्रमिति सम्प्रार्थ्य यत्नतः। अधःशायी त्रिरात्रं तु स्वप्ने यद्वदति स्फुटम्।। ३।।
तद्यन्त्रं विलिखेन्मन्त्री तत् कार्यं भवति ध्रुवम्। सिद्धारिकोष्ठके सम्यग्विचार्य च पुनः पुनः।।४।।
अरियन्त्रं परित्यज्य विलिखेत् सिद्धकोष्ठगम्[4]। तदा सिद्धिर्भवेन्नूनं नात्र कार्या विचारणा।। ५।।
प्रागुक्तयन्त्रमन्त्राणां विधिरेष प्रकीर्तितः।..।।

इति। अस्यार्थः– प्रथमतः शुभे दिने हविष्याशी जितेन्द्रियः स्वेष्टमन्त्रमष्टोत्तरसहस्रं जपित्वा रात्रौ शुचिर्भूत्वा अधःशायी स्वप्येत, स्वापसमये भो देवाऽमुककार्यमुद्दिश्यामुकदेवतायन्त्रं लेखिष्यामि तदिष्टं भवति वा नवेति स्वप्ने मे तथ्यं कथयेति प्रार्थयेत्। ततः स्वप्ने यत्किञ्चित् यथा कथयति तथा विधेयम्। अथवा सिद्धसाध्यादिकोष्ठे विचार्य सिद्धसुसिद्धस्थाने यदायाति, तत् कर्तव्यं, अरिकोष्ठगं न कर्तव्यमित्यर्थः। तथा–

यन्त्रे यदुक्तं यद्द्रव्यं तत् सम्पाद्य प्रयत्नतः। स्नातः शुक्लाम्बरधरो लिखेद् यन्त्रं रहस्यके।। ६।।
बीजस्योपरि षष्ट्यन्तां साधकाख्यां समालिखेत्। पार्श्वयोः कुरुयुग्मं च मध्ये कार्यमधस्तथा।। ७।।
साध्यस्याख्यां द्वितीयान्तां सर्वयन्त्रेष्वयं क्रमः।..।।

अत्रायमर्थः–यद्देवतायन्त्रं मध्ये तद्देवताबीजं लेखनीयं, तद्बीजशिरसि षष्ट्यन्तं साधकनाम अमुकस्येति, बीजाधः साध्यनाम द्वितीयान्तं अमुकमिति, बीजगर्भे वशमाकर्षणम् इत्यादिकर्म, बीजपार्श्वयोः कुरु २ एवं लिखेदित्यर्थः। तथा–

तत्प्रासादपराबीजं बीजस्याधो लिखेत् पुनः। ईशान्यादिषु कोणेषु हंसः सोऽहमिति न्यसेत्।। ९।।
एतत्प्राणमयं बीजं नेत्रे श्रोत्रे च विन्यसेत्।..।।

हंस इति ईशाने आग्नेये च, सोऽहमिति वायव्ये नैर्ऋत्ये च लिखेदित्यर्थः। तथा–

---

* बन्धचिह्नान्तर्गतं क. पुस्तके नास्ति। [1] 'दिभिः' क.पाठः। [2] 'अन्नस्य' ख. पाठः। [3] 'देवं' क. पाठः। [4] 'कं' ग.पाठः।

लिखेद् दिक्पालबीजानि पूर्वादिदशदिक्षु च। तास्वेव यन्त्रगायत्रीवर्णान् न्यस्येत् त्रिश: क्रमात्।।१०।।
तद्वहिर्मन्त्रगायत्रीवर्णास्तु क्रमतस्तथा । यन्त्रराजाय शब्दान्ते विद्महे पदमीरयेत् ।।११।।
वरप्रदाय चाभाष्य धीमहीति पदं वदेत्। तन्नो यन्त्रं समुच्चार्य ततश्चैव प्रचोदयात्।।१२।।
प्रोक्ता तु यन्त्रगायत्री तत्तत्कल्पेषु मन्त्रगा। प्राणप्रतिष्ठामन्त्रं तु बहि: सर्वत्र वेष्टयेत्।।१३।।
भूर्जपत्रे तथा क्षौमे तालपत्रेऽथवा लिखेत्। स्वर्णपत्रे तारपत्रे ताम्रपत्रे च सुन्दरि।।१४।।
यन्त्रं विलिख्य गुटिकां कृत्वा लोहत्रयेण च। लाक्षया तु समावेष्ट्य जप्त्वा होमं समाचरेत्।।१५।।
सम्पातसिक्तं संवेष्ट्य लाक्षया स्वर्णरूप्य[1]के। निक्षिप्य तत्तन्मन्त्रेण सम्पूज्य विधिवत् तत:।।१६।।
गले वा मूर्ध्नि बाहौ वा धारयेदिष्टमाप्नुयात्। अथ वश्यकरं यन्त्रं प्रोच्यते शैलसम्भवे।।१७।।
कांस्यपात्रे लिखेदष्टदलं कर्णिकया युतम्। रोचनाचन्दनेनैव जातीकाष्ठसमुत्थया ।।१८।।
लेखन्या कर्णिकामध्ये साध्यनाम समालिखेत्। अष्ट[2]पत्रेष्वष्टवर्गान् केसरेषु स्वरांल्लिखेत्।।१९।।
वृत्तत्रयेण संवेष्ट्य चान्तरालद्वये तथा। मातृकां विलिखेत् तद्वदनुलोमविलोमगाम्।। २०।।
एवं विलिख्य यन्त्रं तु पूजयेदुपचारकै:। सप्ताहाद्वशमायान्ति नरनारीनराधिपा: ।। २१।।
भूर्जपत्रे समालिख्य लोहत्रयसुवेष्टितम्। धारयेद् बाहुमूले वै पूर्वोक्तफलभाग् भवेत्।। २२।।
अथ वक्ष्येऽन्ययन्त्रं तु भूपुरं विलिखेद्बुध:। रेखाद्वयेन मध्ये तु साध्यनाम समालिखेत्।। २३।।
हल्लेखापुटितं चाथ तदुपर्य्यध आलिखेत्। मायाबीजचतुष्कं तु भूर्जे गन्धाष्टकेन च।। २४।।
अनामारक्तयुक्तेन पूजयेद् वश्यकृद् भवेत्। कुमारीपूजनं कृत्वा रक्तपुष्पान्नसंयुतम्।। २५।।
बलिं दद्याच्छागमांसं तत: सिद्धिर्भवेद् ध्रुवम्। यन्त्रधारणमात्रेण क्रोधस्तम्भं भवेत् क्षणात्[3] ।।२६।।
अन्यद् यन्त्रं प्रवक्ष्यामि दक्षिणोत्तरगं तथा। रेखाद्वयं समालिख्य तदुपर्यध आलिखेत्।। २७।।
तथैव रेखायुग्मं तु मध्ये साध्यं समालिखेत्। तारलक्ष्मीपुटं वामे दक्षिणे कोष्ठके तथा।। २८।।
[4]क्षकारं सर्गसंयुक्तं विलिख्योपर्यधस्तथा। कोष्ठत्रयं समालिख्य मध्यकोष्ठे क्षकारकम्।। २९।।
सविसर्गं लिखेदेवं पार्श्वयोस्तु रमां लिखेत्। भूर्जे रोचनयालिख्य शरावद्वयसम्पुटे ।। ३०।।
दग्ध्वा तद्भस्म चादाय पिबेद् दुग्धेन चैव हि। स्वामी वश्यो भवेदस्य यावज्जीवं न संशय:।।३१।।
अथान्यदपि वक्ष्यामि यन्त्रं परमदुर्लभम्। षट्कोणं विलिखेन्मध्ये बहिर्भूबिम्बमालिखेत्।। ३२।।
मध्ये साध्यं च तत्कर्म मायागर्भं लिखेत् तत:। मायाबीजं समालिख्य भूबिम्बे चाष्टदिक्षु च।।३३।।
षट्कोणस्यान्तरालेषु कोणाग्रेष्वथ संलिखेत्। भूर्जपत्रे लिखेदेवं रोचनाकुङ्कुमेन च।। ३४।।
शरावसम्पुटे क्षिप्त्वा पूजयित्वोपचारकै:। तदग्रे तु जपेन्मायां सहस्रं यतमानस:।। ३५।।
तद्यन्त्रं धारयेन्मूर्ध्नि दिव्यस्तम्भनमुत्तमम्। अथान्यदपि वक्ष्यामि यन्त्रं सुमहदद्भुतम्।। ३६।।
लिखेदष्टदलं पद्मं भूर्जपत्रे मनोहरे। चतुरस्रेण संवेष्ट्य माया भृगुर्विसर्गवान्।। ३७।।

---

१. 'रूपके' क. पाठ:। २. 'दलेष्व' क. पाठ:। ३. 'क्रमात्' क. पाठ:। ४. 'सकारं' क. पाठ:।

एतद्बीजद्वयेनैव पुटितं साध्यमालिखेत्। कर्णिकायां ततश्चाष्टदले च विलिखेत् पुनः।। ३८।।
मायासम्पुटितां बालातार्तीयं तच्छरावयोः। निक्षिप्य सर्वोपचारैः पूजयेत् प्रजपेत् तथा।। ३९।।
राजानं मोहयेत् सप्तरात्रादर्वाक् च साधकः। मृत्युञ्जयाख्यं यन्त्रं तु वक्ष्ये रक्षाकरं परम्।। ४०।।
भूर्जपत्रद्वये चैव लिखेद्यन्त्रं पृथक्पृथक्। प्रथमं विलिखेन्मध्ये कर्णिकायां समाहितः।। ४१।।
उपर्युपरिभागेन भूपुराणां च सप्तकम्। वृत्तं तदुपरि न्यस्य तल्लग्नं रविपत्रकम्।। ४२।।
बहिर्भूपुरमालिख्य मध्ये साध्याख्यकर्म च। विलिख्य द्वादशदले षण्डस्वरविवर्जितान्।। ४३।।
द्वादशस्वरसंयुक्तान् लकारान् क्रमशो लिखेत्। तद्बहिश्चतुरस्रस्य कोणेषु त्रिशिखं न्यसेत्[1]।।४४।।
एतद्यन्त्रद्वयं योज्य क्वचित् संस्थाप्य यत्नतः। उपरिष्टाच्छिलां स्थाप्य तदुपर्य्युपविश्य च।। ४५।।
उदङ्मुखो जपेद्विद्यां मातृकां लोकमातरम्। एवमभ्यस्यतः पुंसो रोगमृत्युभयं कुतः।। ४६।।
अथ वक्ष्ये महायन्त्रं विवादे विजयप्रदम्। रोचनाकुङ्कुमाभ्यां तु भुर्जपत्रे समालिखेत्।। ४७।।
चतुर्दलं कर्णिकायां साध्याख्यायुक्तकर्म च। दलेषु मायां संलिख्य तद्यन्त्रं पयसि न्यसेत्।।४८।।
विवादे जयमाप्नोति सर्वथा नात्र संशयः। धनिकस्य वशीकृत्यै यन्त्रमन्यद्वदाम्यहम्।। ४९।।
रोचनाकुङ्कुमाभ्यां तु भूर्जपत्रे समालिखेत्। षट्कोणं तु समालिख्य साध्याख्यां मध्यदेशके।।५०।।
कोणान्तराले काम्यांश्च कोणाग्रेषु च संलिखेत्। बहिर्वृत्तद्वयं कृत्वा मायया वेष्टयेद्बहिः।। ५१।।
पूजयेत् सप्तदिवसैर्देवीमाहात्म्यमुत्तमम्। पठेत् तदग्रतो नित्यं कुमारीपूजनं चरेत्।। ५२।।
होमं कृत्वा तु तद्यन्त्रं धारयेद्बाहुमूलके। यद्यद्धि याचते द्रव्यं तद् ददाति धनी पुनः।। ५३।।
न याचते पुनर्द्रव्यं यन्त्रराजप्रभावतः। राजान्तिके स्थितो दुष्टः पैशुन्यं कुरुते यदा।। ५४।।
तदा तन्मोहनार्थं तु यन्त्रं कुर्वीत बुद्धिमान्। भूर्जे लिंखेद्वसुदलं रक्तेन भुजगस्य च।। ५५।।
कर्णिकायां साध्यनाम मायां वसुदलेष्वपि। अर्घीशयुग्भृगुं कोणचतुष्के संविलिख्य च।। ५६।।
बहिर्वृत्तद्वयं कृत्वा पूजयित्वा जले क्षिपेत्। एकविंश[2]द्दिनं यावद् दुष्टवश्यं भवेद् ध्रुवम्।। ५७।।
अथाभिधास्ये जयदं यन्त्रं मानप्रदं शिवे। भूर्जपत्रे रोचनया चतुरस्रं तु मध्यके।। ५८।।
तल्लग्नमष्टपत्राणि तद्बहिर्भूपुरं लिखेत्। मध्ये लिखेद्रमां हस्त्रीं दिग्दलेषु क्रमाल्लिखेत्।। ५९।।
रोहरोधस्तम्भयेति कोणेषु विलिंखेत् सुधीः। सविसर्गं च संवर्तं मध्ये मायाख्यया युतम्।।६०।।
शरावद्वयमध्यस्थं पूजयेदुपचारकैः। इन्द्रादिलोकपालेभ्यो बलिं दद्यात् समाहितः ।। ६१।।
विवादे व्यवहारे च राजद्वारे भयापहम्। मानदं तत् समाख्यातं यन्त्रमेतत् सुदुर्लभम्।। ६२।।
अन्यद्यन्त्रं प्रवक्ष्यामि यावज्जीववशप्रदम्। अलक्तकैरनामासृग्रोचनेभमदैः सह ।। ६३।।
भूर्जे च जातिलेखन्या चतुरस्रं तु संलिखेत्। आद्यपङ्क्तौ सप्त लिखेद् बीजानि भुवनेशितुः।।६४।।

मायाबीजानीत्यर्थः।

---

[1] 'लिखेत्' ग. पाठः। [2] 'शदिने' ग. पाठः।

साध्यनामपुटत्वेन सृणिमायामनोभवैः। द्वितीयपङ्क्त्यामथ च पुटिता रत्नबीजतः ।। ६३।।
माया तत्पुटितानङ्गस्तृतीयायां ततः परम्। मायाबीजचतुष्कं च चतुर्थ्यां विलिखेत् सुधीः।।६४।।
चतुरस्राद्वहिर्दिक्षु त्यक्त्वा याम्यं गणेशितुः। क्षिप्रप्रसादनस्यापि दशबीजानि संलिखेत्।। ६५।।

गं क्षिप्रप्रसादनाय नमः इति।

एवं यन्त्रं समालिख्य कृष्णमृन्निर्मितस्य च । गणेशस्योदरे क्षेप्यं पूजयेदुपचारकैः।। ६६।।
तदग्रे पूजयेन्मन्त्रं सहस्रं यतमानसः । देवदेव गणाध्यक्ष सुरासुरनमस्कृत ।। ६७।।
देवदत्तं ममायत्तं यावज्जीवं कुरु प्रभो। एवं मन्त्रं प्रजप्याथ हस्तमात्रेऽवटे तथा।। ६८।।
संस्थाप्य च गणाध्यक्षं गर्तं सम्पूरयेन्मृदा। यावज्जीवं वशीभूयात् स नरो नात्र संशयः।। ६९।।
अथान्यदपि वक्ष्यामि यन्त्रं सुमहदद्भुतम्। कर्पूररोचनाभ्यां च श्रीखण्डागुरुसंयुतम् ।। ७०।।
चतुर्दलाब्जं विलिखेद् भूर्जपत्रे मनोहरे। कर्णिकायां लिखेत् साध्यमीकारं च ततः परम्।। ७१।।
ओंनमश्च तथा लेख्यं पूर्वपश्चिमपत्रयोः। अजिते इत्यपि लिखेद् दक्षिणोत्तरपत्रयोः।। ७२।।
त्रिदिनं पूजयेद्यन्त्रं चतुर्थेऽह्नि समाहितः। ब्राह्मणं भोजयित्वैवं यन्त्रं बाहौ च धारयेत्।। ७३।।
दर्शनादेव साध्योऽस्य वश्यो भवति निश्चितम्। भृत्यवश्यकरं यन्त्रं भूर्जे रोचनया लिखेत्।।७४।।
चतुर्दलं कर्णिकायां साध्यं मायोदरे लिखेत्। हृल्लेखां तु दलेष्वेवं पूजयेद्विधिपूर्वकम्।। ७५।।
दधिमध्ये क्षिपेद्यन्त्रं भृत्यवश्यकरं भवेत्। दुष्टं प्रभुं वशीकर्तुं चतुरस्रं विरच्य च।। ७६।
साध्यनाम लिखेन्मायागर्भे मध्ये च यत्नतः। लिखेद्रोचनया भूर्जे दुष्टप्रभुवशंकरम् ।। ७७।।
राजिकासाध्यपांशूत्थप्रतिमाया हृदि क्षिपेत्। उपचारैः सुसम्पूज्य चुल्लीपार्श्वे निखातयेत्।। ७८।।
दिक्पालेभ्यो बलिं दद्यान्महा[1]कालाय वै पुनः। अजारक्तेन सम्मिश्रं दुष्टभूपं वशं नयेत्।। ७९।।
भर्तृवश्यकरं यन्त्रं स्त्रीणां दौर्भाग्यनाशनम्। रोचनाकुङ्कुमाभ्यां च भूर्जपत्रे मनोरमे।। ८०।।
चतुरस्रं लिखेन्मध्ये तल्लग्नाष्टदलानि च। कोणेषु विलिखेन्मायाबीजानां च त्रयं त्रयम्।। ८१।।
मध्ये नामार्णपुटितं मायाबीजत्रयं लिखेत्। पत्रेषु विलिखेन्मायाबीजानां च त्रयं त्रयम्।। ८२।।
यजेच्छुक्लत्रयोदश्यामुपचारैरुदङ्मुखः। निशि सप्ताहमेवं तु कृत्वान्ते भोजयेन्मुदा।। ८३।।
सुवासिनीः सप्तसंख्या ललिताप्रीतये पुनः। यन्त्रं धातुगतं धार्यं नारीणां भाग्यदायकम्।। ८४।।
अथान्यदपि वक्ष्यामि भर्तृवश्यकरं परम्। रोचनाकुङ्कुमाभ्यां तु भूर्जपत्रे सुशोभने।। ८५।।
लिखेदष्टदलं पद्मं साकारपुटितं तथा। साध्यनाम च तन्मध्ये हृल्लेखां पत्रमध्यतः।। ८६।।
निशि सम्पूज्य यन्त्रं तु त्रिदिनं भोजयेत्ततः। सुवासिनीत्रयं पश्चाद्धारयेद् गलदेशके।। ८७।।
भर्तृवश्यकरं स्त्रीणां क्षिप्रमेव न संशयः। लिखेदष्टदलं पद्मं कर्णिकायां समालिखेत्।। ८८।।
ह्स्त्रीं[2] क्लीं भुवनेशी च बीजत्रयमतन्द्रितः। दलेष्वपि लिखित्वैव बीजानां च त्रयं त्रयम्।।८९।।

---

[1] 'व्यालाय' क. पाठः। [2] 'ह्सीं' क. पाठः।

भूर्जे रोचनयालिख्यं पूजयेच्च दिनत्रयम्। हेममध्यगतं कृत्वा धारयेद्बाहुमूलके ।। ९०।।
स्त्रीणां सौभाग्यदं प्रोक्तं भवेद् दौर्भाग्यनाशनम्। निजरक्तकुशीताभं लिखेद्भूर्जे चतुर्दले।। ९१।।
क्रोधबीजं साध्यनामयुतं मध्ये दलेष्वपि। पूजयित्वा क्षिपेद्यन्त्रमाज्ये चाकृष्टिकारकम्।। ९२।।
अथाकृष्टिकरं यन्त्रं त्रिपुराया वदाम्यहम्। भूर्जपत्रे रोचनया षट्कोणं विलिखेद् बुधः।। ९३।।
वाक्कामपुटितं साध्यनाम मध्ये समालिखेत्। बालातृतीयबीजं च कोणमध्येषु संलिखेत्।।९४।।
पूजयेदुपचारैश्च घृतमध्ये निवेशयेत्। साध्यस्याकर्षणं भूयात् सप्ताहान्नात्र संशयः।। ९५।।
शिलायां विलिखेद्यन्त्रं हरिद्राया रसैः पुनः। कर्णिकायां साध्यनाम भूबीजोदरगं लिखेत्।। ९६।।
दलेष्वष्टसु भूबीजं पूजयेदुपचारकैः। पीतैरुपर्य्यधश्चापि शिलाभ्यां सम्पुटीकृतम्।। ९७।।
भूमौ खनित्वा संस्थाप्य शिलाभिः पूरयेन्मृदा। मुखस्तम्भो वादिनां च भवेत् क्षिप्रं न संशयः।।९६।।

अत्र भूबीजं ग्लौमिति पिण्डबीजम्।

गोरोचनाचन्दनाभ्यां भूर्जपत्रे समालिखेत्। वृत्तं कृत्वा च तन्मध्ये साध्यनाम समर्चयेत्।। ९९।।
तद्बहिर्विलिखेद् दिक्षु वकाराणां चतुष्टयम्। तद्बहिर्भूपुरं लेख्यं लोहत्रयसुवेष्टितम्।। १००।।
पूजितं धारयेद्बाहौ भयादग्नेर्निवर्तते। यस्मिन् गृहे स्थापयेत् तदग्निनाक्रम्यते न च।। १०१।।
अथ विद्वेषणं यन्त्रं वक्ष्यामि[1] शृणु शैलजे। नक्षत्रयोनिक्षतजैर्लेखन्या काकपक्षया।। १०२।।
श्मशानखर्परि[2] लेख्यं वृत्तं तन्मध्यतो न्यसेत्। मायया पुटितं चैवमकारं बिन्दुसंयुतम्।। १०३।।
तद्गर्भे विलिखेत् साध्यनाम कर्मसमन्वितम्। चतुर्दलेष्वपि तथा लेख्यं निशि च पूजयेत्।।१०४।।
छागरक्तेन सम्मिश्रमोदनं विनिवेद्य च। सुवासिनीं प्रपूज्याथ श्मशाने वा शिवालये।। १०५।।
निखातयेत् तदा शत्रोर्विद्वेषं जायते मिथः। नृकपाले लिखेद्यन्त्रं मेषरक्तविमिश्रितैः।। १०६।।
विषैरष्टभिरालेख्यं लेखन्या काकपिच्छया। अस्त्रसम्पुटितं साध्यं कर्णिकायां दलेष्वपि।। १०७।।
दिग्गतेषु च हुकारं कोणपत्रेषु फड्युतम्। तद्बहिर्वृत्तमालेख्यं वर्मणा वेष्टयेच्च तत्।। १०८।।
श्मशानभस्मनाच्छाद्य वह्निना ज्वालयेदमुम्। एकविंशद्दिनं यावच्छत्रुर्मृत्युप्रियो भवेत्।। १०९।।
काककौशिकरक्तेन भौमाहे भूर्जपत्रके। चतुर्दलं लिखेत् पद्मं कर्णिकागतसाध्यकम्।। ११०।।
मारुतं सर्गिसंयुक्तं दलेषु विलिखेद् बुधः। रक्तस्रग्गन्धभूषाद्यैर्निशि सम्पूज्य यन्त्रतः।। १११।।
रक्तोपचारैराराध्य कुमारीं भोजयेत् तदा। एवं विंशद्दिनं कृत्वा चरमेऽह्नि तु यन्त्रकम्।। ११२।।
उच्छिभष्टभक्ते सङ्क्षेप्यं चूर्णीकृत्य प्रयत्नतः। तदोदनं वायसेभ्यो दद्याद् विकिरणेन च।। ११३।।
उच्चाटो जायते शत्रोः क्षिप्रमेव न संशयः। चन्द्रचन्दनकस्तूरीरोचनाकुङ्कुमैः शुभे।। ११४।।
दिने भूर्जे लिखेद्यन्त्रं जातीकाष्ठसमुत्थया। लेखन्योदङ्मुखो भूत्वा प्राक्प्रत्यग्दक्षिणोत्तरम्।।११५।।
रेखाष्टकेन चैकोनपञ्चाशत्कोष्ठकानि च। बहिः प्राक्कोष्ठमारभ्य प्रादक्षिण्यक्रमेण तु।। ११६।।

---

[1] 'वदामि' क. पाठः। [2] 'कर्पटे' ग. पाठः।

अकारादिजकारान्तान् तदन्तःकोष्ठकादितः। झकारादिभकारान्तान् तदन्तःकोष्ठकादितः।।११७।।
मकारादिसकारान्तान् हकारं मध्यकोष्ठके। प्रतिरेखं त्रिशूलानि प्रतिशूलमुपर्य्यधः।। ११८।।
अभ्यन्तरविभागेन हृल्लेखासप्तकं लिखेत्। एवं विलिख्य यन्त्रं तु देवीमाहात्म्यमुत्तमम्।।११९।।
पठन् यचेच्च त्रिदिनं ब्राह्मणान् भोजयेत् ततः। लोहत्रयगतं कृत्वा बाहुमूले तु धारयेत्।।१२०।।
उपसर्गादिका दोषा न भवन्ति कदाचन। पूर्वोक्तैर्विलिखेद् द्रव्यैर्यन्त्रं भूर्जे मनोरमे।। १२१।।
कर्णिकायां लिखेत् साध्यं दलेषु सर्गवान् भृगुः। पूर्ववत् पूजयेद्यन्त्रं कण्ठे बद्धं भुजे शिशोः।।१२२।।
ग्रहभूतपिशाचादिभयेभ्यो मुच्यते क्षणात्। श्मशानखर्परे[1] लेख्यं धत्तूरस्य रसेन च।। १२३।।
कृष्णाष्टम्यां चतुर्दश्यामष्टकोणं मनोहरम्। मध्ये साध्यं समालिख्य कोणाग्रेष्वन्तरालके।।१२४।।
रेफान् षोडश चालिख्य चतुरस्त्रं लिखेद्बहिः। दिक्षु कोणेषु विलिखेद्रेफांस्तत् पूजयेन्निशि।।१२५।।
निखातं पितृभवने ज्वरः सद्यो विमुञ्चति। सुगन्धैर्विलिखेद् भूर्जे पद्मं वसुदलं ततः।। १२६।।
कर्णिकायां साध्यनाम दलेष्वजपया युतम्। पूजितं विधृतं बाहौ सर्पभीतिः कदापि न।। १२७।।
अष्टगन्धैर्लिखेद् भूर्जे षोडशच्छदकाम्बुजम्। स्वरान् दलेषु संलिख्य द्वात्रिंशद्दलमम्बुजम्।।१२८।।
बहिर्विलिख्य पत्रेषु द्वात्रिंशद्व्यञ्जनानि च। विलिख्य भूपुरेणैव वेष्टयेद् दिग्विदिक्षु च।। १२९।।
हक्षौ विलिख्य तन्मध्ये साध्यं मायोदरे लिखेत्। अथवा कांस्यपात्रे तु लिखित्वा सप्तवासरान्।।१३०।।
पूजयेद् धारयेद्वापि बन्धमोक्षप्रदं भवेत्। ....।।

इति।। शारदातिलके– (२४ प०)

अथ वक्ष्यामि यन्त्राणां भेदांस्तन्त्रेषु गोपितान्। यैः साधयन्ति सततं मन्त्रिणो निजवाञ्छितम्।। १।।

मार्णे लिखेत् सार्णयुतं स्वसाध्यं वर्गाष्टपत्रे स्वरकेसराब्जे।
बहिः सदीर्घैर्गगनैः प्रवीतं रक्षाकरं यन्त्रमिदं प्रदिष्टम्।। २।।

अस्यार्थः– भूर्जपत्रे प्रोक्तद्रव्यैरष्टदलकमलं विलिख्य, तत्कर्णिकायां मकारोदरे सकारं विलिख्य, तद्गर्भे साध्यनाम विलिख्य, पत्रेष्वष्टवर्गान् केसरेषु द्वन्द्वशः स्वरान् विलिख्य, बहिर्वृत्तं कृत्वा हांकारेण वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति। तथा–

पुटीकृते भूमिपुरस्य युग्मे मायां लिखेन्मध्यगसाध्यसंज्ञाम्[2]।
वकारकोणेन महीपुरेण संवेष्टितं वश्यकरं तदुच्चैः।। ३।।

अस्यार्थः– अष्टकोणं विलिख्य, मध्ये मायोदरे साध्यनाम विलिख्य, कोणेषु वकारं विलिख्य तदुपरि भूपुरेणावेष्टयेद् उक्तफलदं भवति। तथा–

(मध्ये सार्णविदर्भितं प्रपुटितं मृत्युञ्जयत्र्यक्षरैः
क्षान्तःस्थं निजसाध्यनाम विलिखेत् किञ्जल्कसंस्थान् स्वरान्।

---

१. 'कर्पटे' ग. पाठः। २. 'युक्ताम्' ख. पाठः।

पत्रेष्वष्टसु नाम मन्त्रपुटितं वर्गांस्तदग्रेष्वथो
यन्त्रं पद्मपुटीकृतं निगदितं मृत्युञ्जयाख्यं परम्।। ४।।
विषज्वरशिरोरोगनाशनं श्रीजयप्रदम्। कान्तिपुष्टिप्रदं वश्यं सर्वकामार्थसाधकम्।। ५।।)

अस्यार्थ:— अष्टदलकमलं विलिख्य तत्कर्णिकायां साध्यनाम सकारेण विदर्भितं कृत्वा, मृत्युञ्जयत्र्यक्षरै: सम्पुटितं कृत्वा सर्वं क्षकारोदरे यथा भवति तथा विलिख्य, केसरेषु स्वरान् विलिख्य पत्रेषु पत्राग्रेषु च नाम मन्त्रपुटितं वर्गाष्टकं द्विधा विलिख्य, बहिर्वृत्तं कृत्वा पद्मद्वयपुटितं कुर्यादुक्तफलदं भवति।। तथा—

साध्या[1]ढ्यचिन्तामणिमग्निगेहे विलिख्य बाह्येऽनलगेहवीतम्।
प्रवेष्टयेत् तद्बहिरष्टवर्णान्[2] मन्त्रेण यन्त्रं ज्वरशान्तिदं स्यात्।। ६।।
सम्प्ल[3]वस: प्लावयेसा मन्त्रोऽष्टाक्षर ईरित:। एष एव भवेद् दक्षो विषज्वरविनाशने।। ७।।

अस्यार्थस्तु सुगम एव। तथा—

तारठद्वययुतं कुरुकुल्ले मन्त्रमत्र हुतभुग्गृहयुग्मे।
मध्यकोणविवरेषु लिखेत् तद्यन्त्रमाशु विनिहन्ति भुजङ्गान्।। ८।।
ओंकारमायादिकमेखलेऽग्निवधूमनुं वह्निगृहस्य युग्मे।
मध्यादिकोणेषु विलिख्य भूर्जे यन्त्रं विदध्याद् रिपुनागहारि।। ९।।
शूलाङ्किते[4] वह्निगृहस्य युग्मे धूमावतीमत्र लिखेत् क्रमेण।
मध्यादिकोणेषु मरुद्गृहस्थं यन्त्रं हुताशानिलवर्णवीतम्।। १०।।
दान्तौ[5] सार्घीशबिन्द्वन्तौ बीजे धूमावती द्विठ:। धूमावतीमनु: प्रोक्त: शत्रुनिग्रहकारक:।। ११।।
विषेण कनकाम्भोभि: प्रेतकर्पटकल्पितम्। श्मशाने निखनेदेतच्छत्रूनूच्चाटयेद् ध्रुवम्[3]।। १२।।
हुताशगेहद्वितये लिखित्वा वैवस्वताय द्विठमन्त्रवर्णान्।
मध्यान्तमाकल्पितमिन्दुबिम्बे यन्त्रं महाभूतपिशाचवैरि।। १३।।

अत्र षट्कोणं विलिख्य मध्यादिषट्कोणेषु "वैवस्वताय स्वाहा" इति सप्ताक्षराणि विलिख्य, बहिरिन्दुबिम्बेन वृत्तेन वेष्टयेत् इति।। तथा—

नामालिख्य मकारकोष्ठयुगले कोणेषु तस्यां लिखेत्
मन्त्रज्ञो ङञणान् नकारसहितान् धूमावतीपत्रगान्।
वीतं घर्मटिकादिनां वरमिदं वायुत्रिगेहावृतं
यन्त्रं प्रान्तपरेतभूमिनिहितं विद्वेषणं स्याद् द्विषाम्।। १४।।
पूर्वं धर्मटिकेयुग्मं ततो मर्कटिके युगम्। घोरे विद्वेषकारिणि विद्विषो द्वेषकारिणि।। १५।।
अथ घोराघोरयो: स्यादमुकामुकयोस्तत:। विद्वेषयद्वयं हुंफट् विद्या घर्मटिकेरिता।। १६।।

---

१. 'साध्याख्य' क. पाठ:। २. 'वर्गान्' क. पाठ:। ३ 'सम्प्लवसं प्लावयेसा' क. ग. पाठ:। ४. 'तं वह्निगृहस्य मध्ये' क. ग. पाठ:। ५. 'धान्तं' सार्घीशबिन्द्वन्तं बीजं' ग. पाठ:। ६. 'द्रुतम्' ग. पाठ:।

मन्त्रोद्धारः सुगमः। अत्र षट्कोणं विलिख्य तन्मध्ये पूर्वकोष्ठे चाग्नेयकोष्ठे च मकारमन्यकोष्ठचतुष्टये ङञणनान् विलिख्य, तद्बहिर्वृत्तं विरच्य तल्लग्नान्यष्टपत्राणि विलिख्य, पत्रेषु धूमावतीमन्त्रस्यैकैकमक्षरं प्रतिपत्रं विलिख्य तद्बहिर्वृत्तद्वयान्तराले घर्मटिकाविद्यया वेष्टयेत्, उक्तफलदं भवति।। तथा—

प्राक्प्रत्यक्दक्षिणोदग्विधिवदभिलिखेत् स्पष्टरेखाचतुष्कं
कोणोद्यच्छूलयुक्तं वलययुगयुतं मध्यपूर्वं तदन्तम्।
मन्त्रस्यार्णान् परस्ताद् वसुपदविवरेष्वष्टवर्णांल्लिखित्वा
शूलोद्यद्द्वादशार्णं विधिवदभिहितं प्रेतराजस्य यन्त्रम्।। १७

यमराजस[1]दामेय यमेदासजरामय। यदयोनिरपक्षेप पक्षेपरनियोदय।। १८।।
उक्तो धूमान्धकाराय स्वाहेत्यष्टाक्षरो मनुः। प्रणवोग्रं ततो दंष्ट्रां तत्परं विकृतं ततः।। १९।।
आननाय वधूर्वह्नेर्मन्त्रोऽयं द्वादशाक्षरः। विषवृक्षस्य फलके नृचर्मणि पटेऽथवा।। २०।।
आलिख्याष्टविषैरेतत् श्मशाने निखनेन्निशि। ज्वरेण महताविष्टो मूर्छाकुलितमानसः।। २१।।
रिपुर्गच्छति पक्षेण यमलोकं न संशयः। ....।।

अस्यार्थः— तत्र प्राक्प्रत्यग्दक्षिणोदक् च चतुःसूत्रनिपातनेन नवकोष्ठात्मकं चक्रं निर्माय, मध्यकोष्ठे साध्यनामयुक्तं यमराजेति वर्णचतुष्टयं विलिख्य, प्रागाद्यष्टसु कोष्ठेषु यममन्त्रस्य वर्णचतुष्टयं क्रमेण विलिख्य, चतुष्कोणेषु चत्वारि शूलानि मध्यगतरेखाग्रद्वये शूलद्वयमिति सम्भूय द्वादश शूलानि निष्पाद्य, शूलाग्रेषु द्वादशाक्षरमन्त्रस्यैकैकं वर्णमालिख्य, तदुपरि वृत्तद्वयं निष्पाद्य तल्लग्नमष्टपत्राणि विरच्य, प्रतिदलमेकमेकं वर्णमष्टाक्षरमन्त्रस्य विलिखेत्, उक्तफलदं भवति।। तथा—

एकाशीतिपदेषु मध्यदहने साध्यं लिखेत् हूं पुनः
छूं[2]क्षूंभूमिति दिग्दलेषु विलिखेद् बीजानि पङ्क्तिष्वथ।
शिष्टेष्वीशनिशाचरादि विलिखेत् कालीमनुं पङ्क्तिश-
स्तद्बाह्ये यमवीतमग्निपवनावीतं च यन्त्रं लिखेत्।। २२।।

कालीमार रमालीका लीनमोक्ष क्षमोनली। मामोदेत तदेमोमा रक्षतत्व त्वतक्षर।। २३।।
कालीमनुरयं प्रोक्तः कालरात्रिः स्ववैरिणाम्। यमावाट टवामाय माटमोट टमोटमा।। २४।।
वामोभूरि रिभूमोवा टटरीत्व त्वरीटट। यमात्मकोऽयमाख्यातः श्लोको वैरिविनाशनः।। २५।।
लिखेदष्टविषाङ्गारनिम्बनिर्यासकज्जलैः। निग्रहाख्यमिदं यन्त्रं काकपक्षेण कर्पटे ।। २६।।
विभीतवृक्षे वल्मीके श्मशाने वा चतुष्पथे। दक्षिणस्थेऽनिले मन्त्री निखनेदर्धरात्रके।। २७।।
सर्वथा शत्रुरेतेन सप्ताहान्मरणं व्रजेत्। निगृ[3]ह्यते महारोगैः पतितो वा भवेदसौ।। २८।।
शिलायामिष्टकायां वा चक्रमेतत् प्रकल्पितम्। मर्कटीविषदण्डीभिः समालिप्तमधोमुखम्।। २९।।
यन्त्रं रात्रौ खनेत्तत्र भूयोभूयोऽशुभं भवेत्।..।।

---

१. 'सदोमेय यमेदो स' ख. पाठः। २. 'संशंभं' क. ग. 'क्षृंभृंब्लूं' ख. पाठः। ३. 'स गृ' ग. पाठः।

लिखेच्चतुष्षष्टिपदेषु कालीमीशादिकान्यादि यमात्मकेन।
श्लोकेन संवेष्ट्य कृशानुवायुबीजावृतं यन्त्रमिदं विदध्यात्।। ३०।।
लिप्तं विषमषीदण्डीमर्कटीभिरधोमुखम्। निखनेद्यत्र तत्र स्यान्नृणामुच्चाटनं सदा।। ३१।।
सस्यहानिमनावृष्टिं गवां नाशं करोति तत्।

एतद्यन्त्रद्वयोद्धारस्त्वरिताप्रकरणे।। (२१ शे श्वासे) द्रष्टव्य:।। तथा–

आख्यां तुम्बुरुमध्यत: स्मरगतामालिख्य जृम्भादिकां
विद्यां दिग्गतपत्रकेष्वथ लिखेद् देवीं दलेषु स्मरम्।
कोणस्थेषु सनामकं बहिरध: पाशाङ्कुशाभ्यां वृतं
यन्त्रं वश्यकरं ग्रहादिभयहृत् क्षुद्राभिचारापहम्।। ३२।।

जृम्भे जृम्भिनि ठद्वन्द्वं मोहे मोहिनि ठद्वयम्। अन्धे अन्धिनि ठद्वन्द्वं रुन्धे रुन्धिनि ठद्वयम्।। ३३।।
हित्वा कामं लिखेच्छान्तिं यन्त्रेऽस्मिन् नृकपालके। सन्ध्यासु तापयेदेतदुच्चै: साध्यं वशं नयेत्।।३४।।
हित्वा शान्ति लिखेद्वर्म फट्[1] च वा नरचर्मणि। वह्निवायुगृहावीतं श्मशानस्थं रिपून् दहेत्[2]।।३५।।
त्यक्त्वा वर्मालिखेदस्त्रं फलकेऽक्षतरुद्भवे। वह्निवायुयुतं नाम मेषोत्थ[3]रुधिरेण तत्।। ३६।।
चत्वरे निखनेज्जप्तं विद्वेषं कुरुते मिथ:। हित्वा रेफयकारौ द्वौ लकारं मध्यतो लिखेत्।। ३७।।
(धरापुरेण वीतं तदिष्टकान्तर्निवेशितम्। सर्वेषां स्तम्भनं कुर्यान्नात्र कार्या विचारणा।। ३८।।
हित्वा लकारं तन्मध्ये वायुबीजं समालिखेत्।) विषरक्तमषीकाकपुरीषैर्ध्वजवाससि।। ३९।।
श्मशाने निहितं कुर्यात् कुलोत्सादं[4] स्ववैरिणाम्। मुक्त्वा वायुमयं बीजं तत्र फट्कारमालिखेत्।।४०।।
परेतवस्त्रे काकस्य रुधिरेण यथाविधि। ईप्सिते निखनेत् स्थाने विद्वेषं कुरुते द्विषाम्[5]।। ४१।।
अस्त्रबीजमपास्यास्मिन् लृकारं[6] मार्णसंयुतम्। विलिखेद् यन्त्रमेतत्तु लोहत्रयसमावृतम्।। ४२।।
सर्वरोगप्रशमनं कृत्याद्रोहादिशान्तिदम्। विहाय बीजं लृकारं[7] ग्लौंकारं तत्र संलिखेत्।। ४३।।
क्षकारेणावृतं बाह्ये पाशाङ्कुशवृतं पुन:। [8]डकारेणावृतं भूयो भूमिमण्डलमध्यगम्।। ४४।।
[9]लकारैर्बिन्दुसंयुक्तैर्वेष्टितं तद्बहि: क्रमात्। सर्गान्तमातृकावीतं सर्वं वृत्तेन वेष्टितम्।। ४५।।
कौशेयकर्पटे क्लृप्तामिष्टकाद्वयमध्यगम्। सेनाग्रे निखनेदेतत्[10] स्तम्भनं कुरुते ध्रुवम्।। ४६।।

उद्धार: सुगम:। तथा–

मध्ये श्रीनरसिंहबीजमथ तद्बाह्ये स्वरान् केसरे
वारीट्चन्द्रयमेन्द्रदिक्षु विलिखेन्मध्ये मनुं गारुडम्।
अन्त:स्थान् मरुदग्निनिर्ऋतिशिवेष्वालिख्य वर्णावृतं[11]
यन्त्रं सर्गिभिरष्टभि: परिवृतं संवर्तकैर्गारुडम्।। ४७।।

---

[1] 'पटे' ख.पाठ:। [2] 'हरेत्' ख.पाठ:। [3] 'विषाढ्य' ख.पाठ:। [4] 'कुलोच्छेदं' ख.पाठ:। [5] 'नृणाम्' ख.पाठ:। [6] 'भूकारं सार्णं' ग.पाठ:। [7] 'भूकारं' ग.पाठ:। [8] 'ठपरेण' ख.पाठ:। [9] 'अकारै:' ग.पाठ:। [10] 'यन्त्रं' ख.पाठ:। [11] 'वर्गावृतं' ग.पाठ:।

संवर्तको नेत्रयुतः पार्श्वस्तारोऽग्निसुन्दरी। गारुडो मनुराख्यातो विषद्वयविनाशनः।। ४८।।
स्मरन् गरुडमात्मानं मन्त्रमेनं जपेन्नरः। विषमालोकनेनैव हन्यान्नागकुलोद्भवम्।। ४९।।
मध्ये वर्णान् भृगुस्थान् विलिखतु विधिवत् साध्यनाम्ना समेतान्
किञ्जिल्केषु स्वराः स्युः वसुदलविवरेष्वालिखेन्मध्यबीजम्।
काद्यार्णान् केसरेषु द्विगुणवसुदलेषु[1] द्वयं मध्यबीजं
यन्त्रं सञ्जीवनाख्यं सलिलपुरगतं क्षुद्ररोगाप[2]हारि।। ५०।।
मध्ये पिण्डमचो दलादिषु लिखेद्वारीशताराधिप-
प्रेताधीश्वरशक्रदिक्षु विवरे मध्ये च वर्णांल्लिखेत्।
यादीन् मारुतवह्निराक्षसशिवेष्वर्णान् बहिर्वेष्टयेत्
काद्यैर्वामविलोचनेन कलितं पिण्डाख्ययन्त्रं परम्।। ५१।।
मनुस्वरेन्द्वजेशाग्निसंयुतश्चतुराननः। पिण्डबीजमिदं प्रोक्तं पुंसां सर्वार्थसाधनम्[2]।। ५२।।
बीजेनानेन सञ्जप्तं यन्त्रं रक्षाकरं परम्। आयुरारोग्यजननं लक्ष्मीसौभाग्यवश्यदम्।। ५३।।
चोरसर्पमृगव्याघ्रभूतामयनिकृन्तनम्। गर्भरक्षाकरं स्त्रीणां पुत्रदं क्षुद्रनाशनम् ।। ५४।।
धृतं मूर्ध्नि करोत्येव लोकवश्यमनुत्तमम्।..।।
मध्ये तोयगृहे लकारविवरे सार्णाढ्यसाध्यं लिखेत्
पत्रेष्वष्टसु हंसमन्त्रमभितो हंसार्णसंवेष्टितम्।
यन्त्रं भूमिगृहेण वेष्टितमिदं मूर्ध्ना सदा धारितं
हन्यात् क्षुद्रमहाज्वरामयरिपून् दद्याद्यशः सम्पदः।
ईका[4]रगर्भे विलिखेत् स्वसाध्यं तमष्टपत्रेषु पुनर्विलिख्य।
संवेष्टयेत् तेन धरापुरस्थं यन्त्रं भवेद्वश्यकरं नराणाम्।। ५६।।
ताम्रपत्रे समालिख्य यन्त्रमेतत् प्रपूजयेत्। वशयेत् सकलान् मर्त्यान् नात्र कार्या विचारणा।।५७।।
मध्य भान्तं भृगुविनिहितं नामव[5]र्णैः प्रवीतं
टान्तं लान्तान्वितमथ लिखेदष्टपत्रेषु भूयः।
भूबिम्बस्थं निगदितमिदं साधु सञ्जीवनाख्यं
शास्त्रोद्धूतं भयमपहरेद्धार्यमाणं भुजेन ।। ५८।।
वर्णावृतं साध्ययुतं जकार[6] टान्ते लिखेदष्टदलेषु हंसम्।
आवेष्टयेदम्बुगृहेण बाह्ये लान्तावृतं यन्त्रमिदं ज्वरघ्नम्।। ९।।

---

१. 'ष्वर्पयेत्' ख. पाठः। २. 'दिहारि' ग. पाठः। ३. 'कं' ख. पाठः। ४. 'एकार' ख. पाठः। ५. 'साध्यवर्णैः' ग. पाठः।
६. 'सकारं' ख. पाठः। 'ऋकारं' गं. पाठः।

टान्ते नाम लिखेत् क्षकारविवरे मृत्युञ्जयत्र्यक्षरैः
रुद्धं तद्बहिरष्टपत्रविवरे साध्याह्वयं पूर्ववत्।
अच्किञ्जल्कयुते वसुद्वयदले पद्मे तथैवाह्वयं
द्वात्रिंशद्दलपङ्कजेऽपि च तथा काद्यार्णयुक्केसरे।। ६०।
ईकारेण समावीतं यन्त्रं मृत्युञ्जयाह्वयम्। सर्वरोगाभिचारघ्नं सर्वसौभाग्यंसिद्धिदम्।। ६१।।
ग्लौंरुद्धं प्रणवद्वयं प्रविलिखेत् साध्यस्य नामान्वितं
बाह्ये भूपुरमष्टवज्रं[1]विलसत्तारं लिखित्वा पुनः।
क्षं कोणेषु दिशासु लं प्रविलिखेत् पाशाङ्कुशत्र्यक्षरै-
र्वीतं स्तम्भनयन्त्रमावृतिलसज्जृम्भादिविद्याष्टकैः।। ६२।।
जृम्भे वह्निवधूः पूर्वं पश्चाज्जृम्भिनि ठद्वयम्। मोहे पावकजाया स्यात् पश्चान्मोहिनि ठद्वयम्।।६३।।
अन्धे हुतभुजो जाया ततोऽप्यन्धिनि ठद्वयम्। रुन्धे कृशानुपत्नी स्याद्रुन्धिनि द्विठसंयुतम्।।६४।।

उद्धारः सुगमः। तथा–

लान्ते नाम विलिख्य दिक्षु विलिखेद् भूतस्तमेवाष्टसु
क्षोणीबिम्बमथो नगेन्द्रभुजगावन्योन्यबद्धौ लिखेत्।
आख्यां तन्मुखयोर्विभीतफलके यन्त्रं समापादितं
निर्माल्ये निहितं सदा वितनुते वाचां द्विषां स्तम्भनम्।। ६५।।
साध्याढ्यं कवचं लिखेद् बहिरथो दिक्पत्रमध्येषु तद्
ग्लौमन्येषु महीपुरस्य विलिखेत् कोणेषु रान्तान्वितम्।
वज्रेष्वष्टसु वर्म तोयपुरगं भूबिम्बमध्यस्थितं
यन्त्रं रात्रिविनायकान्तरगतं न्यस्येच्छरावद्वये।। ६६।।
रहस्यस्थाननिक्षिप्तं पूजितं प्रतिवासरम्। स्तम्भनं कुरुते वाचां सेनादीनां च वैरिणाम्।। ६७।।
कृत्वा रेखाष्टकमृजु पुनस्तिर्यगालिख्य षट्कं
बाह्यावृत्त्या लिखतु विधिवद् बिन्दुयुक्तं क्षकारम्।
अन्तःपङ्क्तौ लिखतु धरणीं शिष्टकोष्ठत्रयान्तः
कृत्वा नाम प्रथितमुदितं यन्त्रमेतज्ज्वरघ्नम्।। ६८।।
यन्त्रमेतत् समभ्यर्च्य दत्त्वा भूतबलिं ततः। साध्यस्य मूर्ध्नि बध्नीयात् सर्वज्वरविमुक्तये।। ६९।।
तारं लिखेद् वह्निपुरस्य युग्मे तत्पार्श्वयोर्लर्णमथाग्निबीजम्।
कोणेषु पूर्वापरयोश्च यन्त्रं पाशाङ्कुशावीतमिदं ज्वरघ्नम्।। ७०।।
यन्त्रमभ्यर्च्य मन्त्रेण तारपाशाङ्कुशात्मना। निबध्नीयाज्ज्वरार्तस्य हस्तादौ ज्वरशान्तये।। ७१।।

---

[1] 'पत्रं' ग. पाठः।

पिण्डे लिखेन्नाम ससर्गटान्तविदर्भितं सस्वरकेसराढ्यम्।
टान्ताष्टपत्रं वसुधापुरस्थं कान्तिप्रदं यन्त्रमिदं ज्वरघ्नम्।। ७२।।
तारादिलुद्वयजलद्विठवर्णवीता टान्तान्तरे विलिखिता विधिनैव माया।
साध्यावृता बहिरथो वदनार्धचन्द्रैर्यन्त्रं शिरोर्तिनिचयं[1] विनिहन्ति सद्यः।। ७३।।
व्योमार्णमालिख्य सबिन्दुमाख्याविदर्भितं यन्त्रमयुग्मकोणे।
वसुन्धरागेहयुगे निबद्धं यन्त्रं समस्तज्वरनाशनं स्यात्।। ७४।।
सार्णं नामविदर्भितं परिलिखेद् बाह्येऽष्टपत्रे भृगुं
पद्मं स्यादथ कादिषान्तलिपिमत् त्रिंशद्दलं बाह्यतः।
वीतं तोयपुरेण यन्त्रमुदितं भूर्जोदरे कल्पितं
भूतव्याधिमहाज्वरप्रशमनं कृत्यापहं श्रीप्रदम्।। ७५।।
चक्रे चतुःषष्टिपदे सबिन्दुनन्तःस्थवर्णान् क्रमशो विलिख्य।
रेखाशिरःकल्पितशूलयुक्ते यन्त्रे[2] शयीत ज्वरशान्तिहेतोः।। ७६।।
पुटितभूमिपुरद्वयमध्यतः[3] प्रविलिखेद् वनितां गिरिजापतेः।
प्रणवमस्य लिखेद्वसुकोणगं ज्वरहरं परमेतदुदीरितम्।। ७७।।
बार्णे लिखेन्नाम शशाङ्कमध्ये टान्तं बहिर्भूमिपुरं परस्तात्।
वृत्तावृतं यन्त्रमिदं समुक्तं वश्याय नृणां सकलार्तिशान्त्यै।। ७८।।
सस्वस्तिके दहनगेहयुगे ससाध्यां मायां लिखेल्ललितनागलतादलान्तः।
पाशाङ्कुशावृतमिदं निशि तोय[4]मध्ये मन्त्रं जपन् व्रजति तं स्वयमेव साध्यः।। ७९।।
षट्कोणे निजसाध्यनामसहितां मायां लिखेन्मध्यत–
स्तत्कोणेषु विदर्भितामभिलिखेच्छक्तिं स्वसाध्याख्यया।
बाह्ये भूमिपुरं सकोणमदनं ताम्बूलपत्रे कृतं[5]
जप्तं खादयितुः प्रियां निशि भवेत् सा तस्य वश्या चिरम्।। ८०।।
शक्तौ नाम लिखेच्चतुर्भिरभितो बीजैः समावेष्टयेद्
वीतं शक्तिमनोभवाङ्कुशमनुं [6]ह्रींबीजकैः पिष्टजे।
रूपे साध्यनरस्य जप्तपवने[7] त्रिस्वादुनाभर्ज्य तत्
खादेत् तस्य वशं प्रयाति नियतं साध्यः सदा दासवत्।। ८१।।
कामं लिखेत् साध्ययुतं सरोजे स्वरोल्लसत्केसरवर्गपत्रे।
उदीरितं मन्मथयन्त्रमेतत् सौभाग्यलक्ष्मीविजयप्रदायि।। ८२।।

---

१. 'शिशो रुरुंदिषां' ख. पाठः। २. 'यन्त्रं सुशीतज्वरशान्तिहेतुः' ग. पाठः। ३. 'के' क. ग. पाठः। ४. 'तापयेद्यः' ख. पाठः।
५. 'पत्रोदरे' क. पाठः। ६. 'प्रोंबीजकैः' ख. पाठः। ७. ' नं ' क. पाठः।

काश्मीररोचनालाक्षामृगेभमदचन्दनैः। विलिखेद् हेमलेखन्या यन्त्राण्येतानि देशिकः।। ८३।।
भूमिस्पृष्टं शवस्पृष्टं दग्धं निर्माल्यसङ्गतम्। विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न धारयेत्।।८४।।

इति।। मातृकार्णवे–

विंशत्या शतखण्डानि शक्तिकूटोद्भवानि च। तेषां तावन्ति यन्त्राणि जायन्ते तत्फलानि च।। १।।
शृणु वक्ष्ये समासेन समाहितमनास्ततः। रोगकृत्याग्रहादीनां निरासो वश्यकर्म च।। २।।
जलार्णोद्भवखण्डानां फलं ज्ञेयं ततः पुनः। द्वितीयार्णसमुत्थानामुच्चाटनफलं स्मृतम्।। ३।।
तृतीयार्णसमुत्थानां स्तम्भनं फलमीरितम्। चतुर्थाक्षरसम्भूतखण्डानां कार्मणं फलम्।। ४।।
पञ्चमार्णसमुत्थानां विद्वेषणमुदाहृतम्। चतुर्विंशतिसंख्यानि खण्डानि स्युः पृथक् पृथक्।। ५।।

तन्त्रराजे तु– "नव षोडशकोष्ठानि[1] संवर्ध्य विषमं समं" (३३, ९६) इति। अत्र नव-पञ्चविंशति-ऊनपञ्चाशत-एकाशीतिपदानि यन्त्राणि विषमाणि, अग्रेऽपि तथैव विषमरीत्या योजनीयानि, समानि तु षोडशषट्त्रिंशच्चतुष्षष्टि-पदक्रमेण योजितानि समयन्त्राणि ज्ञेयानि। अग्रेऽपि तथैवोपर्य्युपरि समरीत्या योजनीयानीत्यर्थः। तथा तत्रैव–

तेष्वङ्कानि समं कृत्वा पङ्क्तौ तेषु समालिखेत्। विद्यातृतीयभेदोत्थांस्तत्तदङ्कानुगुण्यतः ।। १।।
मनीषितं च संलिख्य तेषां मध्यस्थकोष्ठतः। विदध्यात् शान्तिकं सर्वं तैर्यन्त्रैः कल्पितैस्तथा।।२।।
वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादिकम्। आयुरारोग्यविजयविभूत्याद्यं च सिद्ध्यति ।। ३।।
स्थापनाद्धारणाच्चान्यैरुपायैः साधकोऽनिशम्।...।।

तैः कल्पितैः संवर्ध्य विषमं सममित्यादिरीत्या कल्पितैर्यन्त्रैरङ्कैश्च, अङ्कप्रकारस्तु "प्राणाग्नीलाम्बुखात्मानः" इत्यादिना प्रतिभूतं दशदशवर्णक्रमेण क्रमागतवर्णजनिताङ्को ज्ञेयः। अङ्कवृद्धिक्रमस्तु मातृकार्णवे–

नवकोष्ठात्मके यन्त्रे वदाम्यङ्कक्रमं शृणु। शक्तिकूटाद्यखण्डस्य प्रोक्तं व्यञ्जनपञ्चकम्।। १।।
तस्याद्याद्ये क्रमोक्तानि ज्ञातव्यानि मनीषिभिः। प्राक्प्रत्यग्दक्षिणोदक्च चतुःसूत्रनिपातनात्।। २।।
कोष्ठानि नव जायन्ते पङ्क्तित्रयविभेदतः। द्विनवाब्धिगिरीषुत्रिषट्चन्द्रवसुकोष्ठकैः ।। ३।।
एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनव क्रमात्। पदसंख्यां विजानीयाद्वर्णाङ्कानां तु योजने ।। ४।।
आद्यार्णोत्थचतुर्विंशत्खण्डानां परमेश्वरि। चतुर्विंशतिसंख्या स्यात् क्रमेणैकादितोऽम्बिके।। ५।।
एकाङ्कमाद्यकोष्ठे तु चाद्यखण्डस्य वै भवेत्। तथा द्वितीयखण्डस्य द्वयमाद्यपदे भवेत्।। ६।।
एवं तृतीयखण्डादौ त्र्यङ्कादि विलिखेत् तथा। चतुर्विंशतिकूटानां चतुर्विंशतिसंख्यया।। ७।।
यन्त्राणि देवि जायन्ते चाद्यवर्णोद्भवानि च। एवं द्वितीयवर्णोत्थभेदानां परमेश्वरि ।। ८।।
पञ्चविंशतितोऽप्यष्टाचत्वारिंशत्तमावधि। ततोऽप्येवं क्रमेणैव तृतीयादिषु चोन्नयेत् ।। ९।।
एवं प्रोक्तमहायन्त्रैर्नासाध्यं विद्यते भुवि। अथ षोडशकोष्ठानां यन्त्राणां च विधिं शृणु।। १०।।
प्राक्प्रत्यग्दक्षिणोदक्च पञ्चसूत्रनिपातनात्। कोष्ठानि देवि जायन्ते षोडशात्र क्रमाल्लिखेत्।।११।।

---

१. 'दि' क. पाठः।

व्यञ्जनेष्वन्त्यवर्णानां सप्त सप्त समीरिता:। आदिमध्यस्थवर्णानां दश क्रमगताङ्ककम्।। १२।।
विषमे विषमाङ्कं स्यात् समे चैव समाङ्ककम्। प्रतिपङ्क्ति यथासाम्यमङ्कसङ्कलनं तथा।। १३।।
सम्यग्विचार्य संलेख्यं चतुस्त्रिंशत्समन्तत:। आद्यखण्डस्य विज्ञेयं षट्त्रिंशच्च तत: परम्।। १४।।
अष्टत्रिंशत् ततश्चत्वारिंशदेव क्रमोत्तरम्। द्विवृद्ध्या च द्वितीयादिखण्डानां योजयेत् प्रिये।। १५।।
विंशोत्तरं शततमं खण्डं यावच्च वर्धयेत्। एवं साम्येषु यन्त्रेषु सर्वेषु च समुन्नयेत्।। १६।।
द्वित्र्यादिखण्डसम्भूतवर्णाङ्कानां च मेलने। स्थूलयन्त्राणि कल्प्यानि फलानि प्राग्वदुन्नयेत्।। १७।।
चतुर्विंशतिसंख्यानि खण्डान्याद्यार्णजानि च। शृणु वक्ष्ये क्रमेणैव यथावद्गिरिसम्भवे।। १८।।
एकद्वित्रिचतुष्पञ्च चैकत्रिद्विचतु:शरा: । एकाब्धिद्वित्रिबाणाश्च एकद्व्यब्धित्रिपञ्च च ।। १९।।
एकत्र्यब्धिद्विपञ्चैव एकवेदत्रियुक्शरा:। एकद्वित्रिशराब्धिश्च एकत्रिद्विशराब्धय:।। २०।।
एकेषुत्रिद्विवेदाश्च एकत्रीषुद्विवेदका:। एकेषुद्वित्रिवेदाश्च एकद्वीषुगुणाब्धय: ।। २१।।
एकद्विवेदेषुगुणा एकाब्धिद्विशरत्रय:। एकेषुद्व्यब्धिदोषाश्च एकद्वीषुश्रुतित्रय: ।। २२।।
एकाब्धीषुद्वित्रयश्च एकेष्वब्धिद्विकालका:। एकत्र्यब्धीषुयुगलमेकाब्धित्रीषुयुग्मकम्।। २३।।
एकेषुत्र्यब्धियुगलमेकत्रीष्वब्धियुग्मकम्। एकेष्वब्धित्रियुगलमेकाब्धीषुत्रियुग्मकम् ।। २४।।
एवं प्रोक्तानि खण्डानि चाद्यार्णादुद्भवानि च। द्वितीयार्णसमुत्थानि खण्डानि शृणु पार्वति।। २५।।
द्व्येकत्र्यब्धिशराश्चैव द्वित्र्येकाब्धिशरास्तथा। द्व्यब्धित्र्येकशराश्चैव द्वित्र्यब्ध्येकशरास्तथा।। २६।।
द्व्येकाब्धित्रीषवश्चैव द्व्यब्ध्येकत्रिशरास्तथा। द्विपञ्चैकत्रिवेदाश्च युग्मैकेषुत्रिसागरा:।। २७।।
द्वित्रीष्वेकाब्धयश्चैव द्विपञ्चत्र्येकसागरा:। द्विचन्द्रत्रीषुवेदाश्च द्विवह्न्येकेषुसागरा:।। २८।।
द्व्येकाब्धीष्वनलाश्चैव द्व्यब्ध्येषुगुणास्तथा। द्विपञ्चवेदैकगुणा द्व्यब्धीष्वेकत्रयस्तथा।। २९।।
द्विपञ्चैकश्रुतिगुणा द्विचन्द्रेष्वब्धिवह्नय:। द्वित्र्यब्धिशरचन्द्राश्च द्व्यब्धिष्वेककास्तथा।। ३०।।
द्विपञ्चवेदवह्नीन्दु द्विवेदेषुगुणेन्दव:। द्विवह्नीष्वब्धिचन्द्राश्च द्वीषुत्र्यब्धिसुधांशव:।। ३१।।
एवं प्रोक्तानि खण्डानि द्वितीयार्णोद्भवानि च। तृतीयार्णसमुत्थानि खण्डानि शृणु शैलजे।। ३२।।
त्रिचन्द्रद्व्यब्धिभूतानि त्रिद्व्येकाब्धिशरास्तथा। त्रिवेदैकद्विभूतानि त्रिवेदद्व्येकसायका: ।। ३३।।
वह्निद्विवेदचन्द्रेषु वह्न्येकाब्धिद्विसायका:। त्रिद्विचन्द्रेषुवेदाश्च त्रिद्विभूतेन्दुसागरा: ।। ३४।।
त्रिपञ्चद्व्येकवेदाश्च त्रिपञ्चैकद्विसागरा:। वह्निचन्द्रेषुयुग्माब्धिर्वह्नीन्दुद्वीषुसागरा:।। ३५।।
त्रिवेदेषुद्विचन्द्राश्च त्रिवेदद्विशरेन्दव:। त्रिद्वीषुवेदचन्द्राश्च त्रिद्व्यब्धीषुधरास्तथा।। ३६।।
त्रिपञ्चाब्धिद्वीन्दवश्च त्रिपञ्चद्व्यब्धिचन्द्रका:। त्रिवेदेष्वेकयुग्मानि त्रिपञ्चाब्धीन्दुयुग्मकम्।। ३७।।
त्रिचन्द्रवेदेषुयुग्मं त्रिवेदेन्दुशरद्विकम् । त्रिपञ्चेन्द्वब्धियुग्मानि त्र्येकेष्वब्धियुगं तथा ।। ३८।।
एवं प्रोक्तानि खण्डानि तृतीयार्णोद्भवानि च। चतुर्थार्णसमुत्थानि खण्डानि शृणु पार्वति।। ३९।।
वेदत्रिद्व्येकभूतानि वेदद्वित्रीन्दुसायका: । वेदैकद्वित्रिभूतानि वेदद्व्येकत्रिसायका: ।। ४०।।

वेदैकत्रिद्विभूतानि वेदत्र्येकद्विसायकाः। वेदेष्विन्दुद्व्यग्नयश्च वेदैकैषुद्विवह्नयः।। ४१ ।।
वेदद्व्येकेषुवह्निश्च वेदैकद्वीषुवह्नयःऽ। वेदद्विसायकेन्द्वग्निर्वेदेषुद्व्येकवह्नयः ।। ४२ ।।
वेदेष्विन्दुत्रियुग्मं च वेदैकेषुत्रियुग्मकम्। वेदेषुत्रीन्युग्मं च वेदत्रीष्विन्दुयुग्मकम्।। ४३ ।।
वेदैकत्रीषुयुग्मं च वेदत्र्येकेषुयुग्मकम्। वेदद्वित्रीषुचन्द्राश्च वेदत्रिद्वीषुचन्द्रमाः।। ४४ ।।
वेदेषुत्रिद्विचन्द्राश्च वेदत्रीषुद्विचन्द्रमाः। वेदद्वीषुत्रिचन्द्राश्च वेदेषुद्वित्रिचन्द्रमाः ।। ४५ ।।
एवं प्रोक्तानि खण्डानि चतुर्थार्णोद्भवानि च। पञ्चमार्णोत्थखण्डानि शृणु वक्ष्ये समासतः।। ४६ ।।
इषुवेदत्रियुग्मैकं भूतत्र्यब्धिद्विचन्द्रमाः। भूताब्धिद्वित्रिचन्द्राश्च भूतद्व्यब्धित्रिचन्द्रमाः ।। ४७ ।।
भूतत्रिव्द्यब्धिचन्द्राश्च भूतद्वित्र्यब्धिचन्द्रमाः। भूताब्धित्र्येकयुग्मं च भूतत्र्यब्ध्येकयुग्मकम् ।। ४८ ।।
भूताब्ध्येकत्रियुग्मं च भूतैकाब्धित्रियुग्मकम्। भूतत्र्येकाब्धियुग्मं च भूतैकत्र्यब्धियुग्मकम्।। ४९ ।।
इष्वब्धीन्दुद्विवह्निश्च भूतैकाब्धिद्विवह्नयः। भूताब्धिद्व्येकवह्निश्च भूतद्व्यब्धीन्दुवह्नयः ।। ५० ।।
भूतद्व्येकाब्धिवह्निश्च भूतैकद्व्यब्धिवह्नयः। भूतैकद्वित्रिवेदाश्च भूतद्व्येकत्रिसागराः।। ५१ ।।
भूतत्रिद्व्येकवेदाश्च भूतद्वित्र्येकसागराः। भूतत्रीन्दुद्विवेदाश्च भूतेन्दुत्रिद्विसागराः ।। ५२ ।।
एवं प्रोक्तानि खण्डानि पञ्चमार्णोद्भवानि च।.....................................।।

इति।। अत्र षोडशकोष्ठयन्त्रेष्वयं क्रमः—प्रथमार्णोत्थचतुर्विंशतिखण्डानामाद्यखण्डस्य चतुस्त्रिंशद्, द्वितीयस्य षट्त्रिंशत्, तृतीयस्याष्टात्रिंशत्, चतुर्थस्य चत्वारिंशत्, पञ्चमस्य द्विचत्वारिंशत्, षष्ठस्य चतुश्चत्वारिंशदेवं चतुर्विंशति यन्त्राणि द्व्यङ्कवृद्ध्याशीतिपर्यन्तमूह्यानि। ततो द्वितीयार्णोत्थखण्डानामपि द्व्यशीतिमारभ्य ह्यङ्कवृद्ध्या चतुर्विंशति यन्त्राणि ऊह्यानि। एवमुत्तरोत्तरं फलान्यपि प्राक्प्रोक्तानि ज्ञेयानि। तथा वाग्भवकामराजकूटोत्थखण्डानामपि प्राक्प्रोक्तरीत्याङ्कानि कृत्वा विषमसमयन्त्राणामुद्धारं कृत्वा तत्तत्फलेषु योज्यानि। इति यन्त्रप्रकरणम्।।

ओं अथास्मदाराध्यचरणैरुपदिष्टा श्रीविद्यापद्धतिर्लिख्यते। तत्र

ब्राह्मे मुहूर्ते चोत्थाय ब्रह्मरन्ध्रे सिताम्बुजे। चिच्चन्द्रमण्डले शुद्धस्फटिकाक्षवराभये।। १ ।।
दधानं रक्तया शक्त्याश्लिष्टं वामाङ्कसंस्थया। धारयन्त्योत्पलं दीर्घनेत्रत्रयविभूषितम्।। २ ।।
प्रसन्नवदनं शान्तं स्मरेत् तन्नामपूर्वकम्। रक्तशुक्लात्मकं तस्य संस्मृत्य चरणद्वयम्।। ३ ।।
गुरुं च गुरुपत्नीं च देवं देवीं विभावयेत्। पादुकामन्त्रमुच्चार्य यथास्वस्वगुरूक्तितः।। ४ ।।

पादुकाविद्याः प्रागेवोक्ताः, तत्तद्विद्यायुक्तैर्गन्धाद्यैरुपचारैः सम्पूज्य प्रार्थयेत्।।

प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः। यत्करोमि जगद्योने तदस्तु तव पूजनम्।। ५ ।।

इति प्रार्थ्य स्वगुरुं तन्नामपूर्वकं प्रणम्य नमस्कृत्य मूलादिब्रह्मरन्ध्रपर्यन्तम्,

सूर्यकोटिप्रतीकाशां चन्द्रकोटिसमप्रभाम्। उद्यद्दिवाकरोद्द्योतां यावच्छ्वासं दृढासनः।। ६ ।।
ध्यात्वा तदैकरस्येन किञ्चित्कालं सुखी भवेत्।.....................................।।

इत्युक्तरीत्या मूलविद्यां विभाव्य, तदाज्ञयाऽजपादिसङ्कल्पं कुर्यात्। अस्य श्रीअजपानामगायत्रीमन्त्रस्य० शिरसि हंसऋषये नमः, मुखे अव्यक्ता[1]गायत्रीछन्दसे नमः, हृदि परमहंसाय देवतायै नमः, गुह्ये हंबीजाय नमः, पादयोः सः शक्तये नमः, नाभौ सोहं कीलकाय नमः, इति विन्यस्य मम समस्तपापक्षयार्थमद्याहोरात्रमध्ये श्वासोच्छ्वासरूपेण षट्शताधिकैकविंशति-

---

[1] 'अव्यक्तागायत्री' ख. ग. पाठः।

सहस्रसंख्याकमजपानामगायत्रीजपमहं करिष्ये, इति सङ्कल्प्य मूलेन प्राणायामं करशुद्धिमङ्गुलीन्यासं च कुर्यात्। ह्सां सूर्यात्मने हृदयाय नम:, ह्सीं सोमात्मने शिरसे स्वाहा, ह्सूं निरञ्जनात्मने शिखायै वषट्, ह्सैं निराभासात्मने कवचाय हुम्, ह्सौं अतनुसूक्ष्मप्रबोधात्मने नेत्रत्रयाय वौषट्, हस: अव्यक्तप्रबोधात्मने अस्त्राय फट्, इति करषडङ्गन्यासं विधाय हंसरूपं विभावयेत्।

आत्मानमग्नीषोमाख्यपक्षयुक्तं शिवात्मकम्। हकारेण बहिर्यान्तं विशन्तं च सकारत:।। ७।।
हंस: सोहमिति स्मृत्वा सोहं व्यञ्जनहीनत:। पक्षौ संहृत्य चात्मानमण्डरूपं विभावयेत्।। ८।।

तारमभ्यस्य परेऽहन्यप्येवं कुर्यात्। तत: पूर्वेद्युरहोरात्रमध्ये जातश्वासोच्छ्वासरूपषट्शताधिकैकविंशतिसहस्रसंख्याकमजपानामगायत्रीजपं ब्रह्मरन्ध्रे सहस्रदलकमलकर्णिकामध्यवर्तिने श्रीगुरवे निवेदयामीति निवेद्य, स्वस्थाने गुरुमुद्वास्य बहिर्गत्वा यथाविधि शौचाचमनदन्तधावनं निर्वर्त्य, उत्तराभिमुखो भूत्वा भूमिं गुरुं चाभ्यां मन्त्राभ्यां प्रार्थयेत्।

''धारणं पोषणं त्वत्तो भूतानां देवि सर्वदा। तेन सत्येन मां पाहि पाशान्मोचय धारुणि।।
अखण्डमण्डलाकारं व्याप्तं येन चराचरम्। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नम:।।''

एताभ्यां नमस्कृत्य वैदिकस्नानं विधाय मन्त्रस्नानं कुर्यात्। नाभिमात्रे जले स्थित्वा तीर्थं सूर्यमण्डलादङ्कुशमुद्रया ''ऐं हृदयाय नम:'' इति मन्त्रेणाकृष्य तीर्थे क्षिप्त्वा, शक्तिबीजं समुच्चरन् योनिमुद्रया संस्पृश्य पाणिभ्यां संछाद्यामृतेश्वरीं सप्तशो जपित्वा ध्यात्वा स्नायात्। तद्यथा 'ऐंह्रींक्लीं अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ सांजूंजूंस: अमृतेश्वर्यै स्वाहा'

अमृतामृतरश्म्योघसन्तर्पितचराचराम्। भवानि भवशान्त्यै त्वां भावयाम्यमृतेश्वरीम्।। ९।।
अन्त: शक्तिमभिध्यायन्नाधाराद् ब्रह्मरन्ध्रगाम्। तस्या: पीयूषवर्षेण स्नानमन्त: समाचरेत्।। १०।।

इत्युक्तरीत्या ध्यात्वा निमज्ज्य मूलेन शिरसि पार्श्वयो: सम्प्रोक्ष्य मूलं सप्तवारमुच्चार्य, सप्तधातुस्थकल्मषं शोधयामीति धिया सप्तवारमुन्मृज्य, कुम्भमुद्रया शिरसि मूलेन त्रिवारमभिषिच्य वशिन्याद्याभिरभिषिच्य सम्पत्कर्या चाभिषिच्य, तीरमागत्य बालया प्रोक्षिते धौते वाससी परिधायाचम्य, विभूतिं वामहस्ते निधाय दक्षहस्तेन पिधाय, जातवेदसेन॰ गायत्र्या॰ त्र्यम्बकेन॰ अग्निरिति॰ मानस्तोके॰ त्र्यायुषं जमदग्ने॰ इति षड्भि:। 'अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि भस्मानि भवन्ति।' ततो मूलविद्यया सप्तवारमभिमन्त्र्य, ईशान इति शिरसि। तत्पुरुषायेति वक्त्रे। अघोरेभ्य इति हृदये। वामदेवायेति गुह्ये। सद्योजातमिति पादयो:। श्रीविद्यया शिरसि। ऐं वद वद वाग्वादिनि ऐंक्लीं क्लिन्ने क्लेदिनि क्लेदय क्लेदय महाक्षोभं कुरु कुरु क्लीं सौ: मोक्षं कुरु हसौं:' अनया दीपिन्या मुखे। 'ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रींह्रींह्रूं रररररर ज्वालामालिनि हुं फट् स्वाहा' अनया वक्षसि। 'ओं ह्रीं वह्निवासिन्यै नम:' इति नाभौ।* 'ओं सहस्रार हुं फट्' इत्यूर्वो:। 'ओंश्लींपशु हुं फट्' इति जङ्घयो:। 'ओं ह्रीं स्फुर स्फुर प्रस्फुर २ घोर घोरतर तनुरूप चट चट प्रचट २ कह २ वम २ बन्धय बन्धय घातय २ हुं फट्'

---

*सुदर्शनध्यानं यथा सौभाग्यरत्नाकरे– कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तं रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम्। चक्रं शङ्खं गदां च पृथुतरमुसलं चापपाशाङ्कुशान् वै बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्रसंज्ञम्।।

इति पादयो:। 'ओंह्रीं वैष्णव्यै नम:' इति हृदये।

अघोरविद्याया पृष्ठे। मातृकया सर्वसन्धिषु। 'उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्। नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्' इति बाह्वो:। ओंक्ष्रौं नमो[1] भगवते नृसिंहाय ज्वालामालिने दीप्तदंष्ट्रायाग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय सर्वज्वरविनाशाय[2] दह दह रक्ष रक्ष हुं फट् स्वाहा। अनया ज्वालानृसिंहविद्यया च बाह्वो:⇨ ओं उत्तिष्ठ पुरुषाधार पिङ्गललोहिताक्ष देहि मे ददापय स्वाहा।' अनया वडवानलभैरव्या सर्वाङ्गे (भस्म) स्नानमाचरेत्।।

एता एव महाविद्या विभूतेरभिमन्त्रणे। कथिता: सर्वरक्षार्थं सर्वापन्निवहापहा: ।। ११ ।।
इति ज्ञात्वा विधानेन भस्मस्नानं समाचरेत्। सर्वाङ्गेष्वथ वा कुर्यात् केवलं मूलविद्यया।। १२।।

एवं भस्मधारणं विधाय सन्ध्यावन्दनं कुर्यात्। तद्यथा—व्यस्तसमस्तमूलविद्यया बीजसहितै: स्वाहान्तैरात्मतत्त्वादिभिर्जलं पीत्वा द्विरुन्मृज्य सकृत् स्पृष्ट्वा नासिके नयने शिरो हृदयं दक्षिणं कर्णं संस्पृशेत्, अयमाचम:। एवमाचम्य षोडशस्वरै: सबिन्दुभिर्मार्जयित्वा कादिमान्तै: स्पर्शवर्णैर्मूलविद्यासहितैर्जलं पीत्वा यादिवर्णैर्दशभि: पुनर्मार्जयित्वोत्थाय 'ऐं त्रिपुरादेव्यै विद्महे क्लीं कामेश्वर्यै धीमहि सौ: तन्न: क्लिन्ना प्रचोदयात्' इति गायत्र्या त्रिरर्घ्यमुत्क्षिप्याचम्य,

यथाशक्ति जपेदेनां गायत्रीं त्रिपुराह्वयाम्। प्रात: सन्ध्याविधिं वक्ष्ये मूलाधारस्थपङ्कजे।। १३।।
वाग्भवं काञ्चनाकारं मध्ये बीजमनुस्मरेत्। दक्षनासापुटपथा विनि:सार्यार्कमण्डले ।। १४।।
आवाह्य देवतां सन्ध्यां कालरूपां विभावयेत्। पीतालङ्कारवसनां पुस्तकाक्षस्रगुज्ज्वलाम्।। १५।।
एवं ध्यात्वा जपित्वा च गायत्रीं प्रणमेद्गुरुम्। वागीश्वरीं नमस्कृत्य सन्ध्यां स्वस्थानमानयेत्।।१६।।
अथ मध्याह्नसन्ध्यायां मणिपूरे जपारुणम्। कामराजं हृदि ध्यात्वा बहिश्चेत् सूर्यमण्डले।। १७।।
वराभययुतां रक्तवर्णां यौवनमास्थिताम्। कामेश्वरीं हृदि ध्यात्वा पुन: स्वस्थानमानयेत्।। १८।।
अथ सायन्तने काले भ्रूमध्ये चन्द्रसन्निभम्। तार्तीयं भावयित्वाथ बाह्येऽप्यावाह्य पूर्ववत्।। १९।।
भैरवीं श्वेतवर्णाभां वृद्धां मुकुटहारिणीम्। पाशाङ्कुशधरां ध्यात्वा पुन: स्वस्थानमानयेत्।। २०।।
अथार्धरात्रसमये ब्रह्मरन्ध्रे महाप्रभम्। तुरीयं बीजमुच्चार्य ध्यात्वाकाशे पराह्वये।। २१।।
चिच्चन्द्रमण्डले देवीं ध्यात्वा त्रितयरूपिणीम्। पाशाङ्कुशधनुर्बाणधारिणीं मूलविद्यया।। २२।।
समाराध्य च चिद्रूपे स्वस्थाने च लयं नयेत्।..।।

एवमुक्तकालचतुष्टये मार्जनपूर्वकमर्घ्यदानादिगायत्रीजपं कुर्यात्। सन्ध्यालोपे द्विगुणं जपमाचरेत्।

जपेन दुरितं हन्ति सर्वं तत्परमास्तिक:। इति सन्ध्याविधिं कृत्वा ततस्तर्पणमाचरेत्।। २३।।

अघोरास्त्रस्य– (सौ०र०)

सजलघनसमानं भीमदंष्ट्रं त्रिनेत्रं भुजगधरमघोरं रक्तवस्त्राङ्गरागम्।
परशुमडमरुक्षखड्गं खेटकं बाणपाशौ त्रिशिखनरकपालं बिभ्रतं भावयामि।।

⇨ वनदुर्गाया ध्यानम्– (सौ०र०)

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां शङ्खं चक्रवराभयानि दधतीमिन्दो: कलां बिभ्रतीम्। ग्रैवेयाङ्गदहारकुण्डलधारामाखण्डलाद्यै: स्तुतां ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम्।।

[1] 'नम:' इति क. संज्ञके नास्ति। [2] 'इदं क. संज्ञके नास्ति।

यथा– जलान्तिके समुपविश्य प्राङ्मुख उदङ्मुखो वाचम्योपस्थानसहस्राक्षर्योपस्थाय, उपस्थानसहस्राक्षरीमग्रे (३६ श्वा०) वक्ष्याम:। ओंऐंह्रींश्रीं वसुभ्य: स्वाहा नम: सूर्यायामितरुद्रेभ्य:, ॐ रुद्रेभ्य: स्वाहा नम: सूर्यायामितरुद्रेभ्य:, ॐ आदित्येभ्य: स्वाहा नम: सूर्यायामितरुद्रेभ्य:, ॐ आङ्गिरसेभ्य: स्वाहा नम: सूर्या०, ॐ ब्रह्मणे स्वाहा नम: सूर्या०, ॐ विष्णवे स्वाहा नम: सूर्या०, ॐ रुद्राय स्वाहा नम: सूर्या०, ॐ ग्रहेभ्य: स्वाहा नम: सूर्या०, ॐ नक्षत्रेभ्य स्वाहा नम: सूर्यायामितरुद्रेभ्य:, ॐ राशिभ्य: स्वाहा नम: सूर्या०, ॐ योगेभ्य: स्वाहा नम: सूर्या०, ॐ करणेभ्य: स्वाहा नम: सूर्या०, ॐ एतांश्चतुर्थीवह्निजायान्तान् देवतीर्थेन तर्पयेत्।। ॐ ऋषिभ्यो नम:, ॐ मरीचये नम:, ॐ अत्रये०, ॐ पुलहाय०, ॐ पुलस्त्याय०, ॐ क्रतवे, ॐ वसिष्ठाय०, ॐ भरद्वाजाय०, ॐ गौतमाय०, ॐ अगस्त्याय०, ॐ लोपामुद्रायै०, ॐ अहल्यायै०, ॐ अनूसूयायै०। चतुर्थ्यन्तं नमोन्तं च प्रत्येकं द्विर्द्विस्तर्पयेत्। प्राचीनावीती। ॐ अग्निष्वात्तेभ्य: स्वधा नमस्तर्पयामि, ॐ बर्हिषद्भ्य: ॐ पितृभ्य:, पित्रादिस्वपितृक्रमं तर्पयेत्। "त्रि: स्वधाहृदयान्तांश्च पितृतीर्थेन तर्पयेत्"। तत: ॐ भैरवास्तृप्यन्तु, ॐ क्षेत्रपालास्तृप्यन्तु, ॐ कुमार्यस्तृप्यन्तु, ॐ योगिनीगणास्तृप्यन्तु, ॐ सर्वभूतानि तृप्यन्तु, इति तर्पयित्वा, ओं[१]ह्रांह्रींस: सूर्याय नम:, इति

सूर्यायार्घ्यत्रयं दत्वा मूलबीजचतुष्टयै:। चतुस्तत्त्वान्तिकै: शोधयाम्यन्तै: सलिलं पिबेत्।। २४।।
चतुर्विशेषाचमोऽयं देहतत्त्वविशोधक:। ....।।

तत: श्रीचक्रावरणदेवतातर्पणं कुर्यात्। तद्यथा–

सकलीकृत्य तां देवीं चित्सुधारसरूपिणीम् । पञ्चशक्तिचतुर्वह्निद्विपद्मत्रिमहीतले ।। २५।।
महाचक्रे सावरणां पूजामार्गेण वारिणि। विभाव्य तर्पयेदद्भि: सुधारूपाभिरन्वहम्।। २६।।
यद्वा भूगृहरेखादिनवयोन्यां प्रतर्पयेत्। पीठदेवीं यथाशक्ति साङ्गां नीत्वा गुरुक्रमम्।। २७।।
सकृत्समयविद्यांश्च दत्त्वा पञ्चोपचारकम्। तत: समाहितो विद्यां जपेत् तर्पणसंख्यया।। २८।।
निष्कलीकृत्य हृदये देवीमुद्वास्य [२]तत्कृताम्। सकलीकृत्य संहृत्य तीर्थं मार्तण्डमण्डले।।२९।।
कृत्वा षडङ्गमुत्तिष्ठेदस्त्रपञ्जरमध्यत:। न बाह्यान् भावमानस्तु न स्पृशन् नावलोकयन्।। ३०।।

यागगृहं गच्छेदिति ज्ञेय:। अत्र पञ्चशक्तीत्यादि सृष्टिक्रमेण स्थितिरूपेण च तर्पणमुक्तम्। यद्वेत्यादिना संहारक्रमेणोक्तम्। अत्र येन क्रमेण चक्रपूजा क्रियते तेनैव क्रमेण वक्ष्यमाणावरणदेवता: सन्तर्प्य यथोक्तसंख्यं मूलदेवीं तर्पयेत्। इति सन्ध्यावन्दनविधि:।।

अथ शुचौ देशे विधिप्रोक्ते मृद्वा[३]सने ऐंबीजकर्णिकं स्वरयुग्मकिञ्जल्कं कचटतपयशक्षवर्गाष्टकदलं दिक्षु ठंबीजसहितं मातृकामण्डले ध्यात्वा, तत्र आधारशक्तिकमलासनाय नम:, इति पुष्पाक्षतादिभिरभ्यर्च्य, प्राङ्मुख उदङ्मुखो वोपविश्य भूमिं प्रार्थयेत्

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।३१।।

इति भूमिं प्रार्थ्य स्वशिरसि मातृकाम्बुजं ध्यात्वा दीपनाथं पूजयेत्। तद्यथा–वाराणस्यां ॐ वं मेद आत्मकखड्गीशाय वर्णेशानन्दनाथायातिरक्तवर्णाय रक्तद्वादशशक्तियुक्तायास्मिन् क्षेत्रे इमां पूजां गृहण गृहण स्वाहा, इति दीपनाथमभ्यर्च्य

---

१. 'ओंह्रीस:' क. पाठ:। २. 'यत्कृताम्' ग. पाठ:। ३. 'मृतात्मने' क. पाठ:।

गुर्वादिवन्दनं कुर्यात्। तद्यथा—हस्ताभ्यामञ्जलिं विधाय ॐ शिवादिगुरुभ्यो नमः इति दक्षवामपार्श्वोर्ध्वाधोभागेषु विन्यस्य, अखण्डमण्डलाकारं० इति, चरणं पवित्रं० इत्यादिवैदिकैर्मन्त्रैर्गुरुपादुकाविद्यामुच्चार्य, अमुकानन्दनाथपादुकां पूजयामीति श्रीगुरुं सम्पूज्य

अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।। ३२।।

ओंश्लींपशु हुं फट् इति पाशुपतास्त्रेण नाराचमुद्रया विघ्नानुत्सार्य, सिद्धार्थाक्षतकुसुमैः पातालभूनभोलीनान् विघ्नान् क्रमेण वामपादपार्ष्णिघात—करास्फोट—समुदञ्चितवक्त्रैरुत्सार्य, उक्तपाशुपतास्त्रेण वामहस्ततलं द्विधा

मणिबन्धं समारभ्य संस्पृष्टं दक्षपाणिना। प्रमृज्य दक्षिणं पाणिं सकृदेवोक्तमार्गतः।। ३३।।

एवं षट् करशोधनं कृत्वा आनाभेरापादं हृदो[1] नाभिपर्यन्तं शिरसो हृत्पर्यन्तं तेनैवास्त्रेण व्यापयित्वा अन्तस्तालत्रयं बहिस्तालत्रयं कृत्वा दशदिग्बन्धनं विधाय, रं अग्निप्राकाराय नमः सुदर्शनाघोरास्त्राभ्यां पूर्वोक्ताभ्यां वाह्निरेवाग्निप्राकारत्रयं कृत्वात्मरक्षां कुर्यात्। तदुक्तं लक्ष्मीकौलार्णवे—

त्रिरग्निवेष्टनं कृत्वा गणेशं पञ्चमीं ततः। दुर्गां विघ्नं च शरभमघोरं च सुदर्शनम्।। १।।
एताः समयविद्याश्च जपेत् प्रत्यूहशान्तये। एवं रक्षां पुरा कृत्वा भूतशुद्धिमथाचरेत्।। २।।

इति। ओंश्रींह्रींक्लींग्लौंगं गणपतये वरवरद सर्वजनं मे वश्यमानय स्वाहा, (१)। ऐंग्लौंओं नमो भगवति वार्तालि २ वाराहि २ वराहमुखि २ अन्धे अन्धिन्यै नमः रुन्धे रुन्धिन्यै नमः जम्भे जम्भिन्यै नमः मोहे मोहिन्यै नमः स्तम्भे स्तम्भिन्यै नमः सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु २ शीघ्रं वश्यं कुरु २ ठः ५ हुं फट् स्वाहा ग्लौं ऐं, (२)। उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा, (३)। ओं ह्रीं वां वटुकाय आपदुद्धारणाय कुरु २ वटुकाय ह्रीं, (४)। ओं ह्रीं ह्रौं नमः शिवाय महाशरभाय, (५)। ओं ह्रीं ह्रौं नमः शिवायै महाशरभ्यै, (६)। अघोरास्त्र—सुदर्शनास्त्रे प्रागुक्ते, (७। ८)। समयविद्यास्तु प्रागेवोक्ता अग्रेऽपि वक्ष्यामः। एता विद्याः शाम्भवपाठत्वेन पठित्वा आत्मरक्षां कृत्वा भूतशुद्धिं कुर्यात्। तद्यथा— कुम्भकयोगेन प्रणवद्वादशावृत्त्या नाडीशुद्धिं विधाय हृदिस्थं चैतन्यं हंस इति मन्त्रेण सङ्घट्टमुद्रयोर्ध्वमुन्नीय, द्वादशान्तस्थिते परे तेजसि संयोज्यास्त्रेण रक्षां कृत्वा भूतानि शोधयेत्। पादादिजानुपर्यन्तं पृथिवीमण्डलं पीतवर्णं चतुष्कोणं[2] वज्रलाञ्छितं ब्रह्मदैवत्यं ध्यात्वा, लमिति बीजेन संशोध्याप्सु लयं नयेत्। जान्वादिना[3]भिपर्यन्तं जलमण्डलं [4]धवलवर्णं धनुराकारं महोत्पललाञ्छितं विष्णुदैवत्यं ध्यात्वा, वमिति बीजेन संशोध्य तेजसि लयं नयेत्। [5]नाभ्यादिवक्षःपर्यन्तं तेजोमण्डलं रक्तवर्णं त्रिकोणाकारं स्वस्तिकलाञ्छितं रुद्रदैवत्यं ध्यात्वा, रमिति बीजेन संशोध्य वायौ लयं नयेत्। हृदयादिभ्रूयुगान्तं वायुमण्डलं कृष्णवर्णं षट्कोणाकारं षड्बिन्दुलाञ्छितमीश्वरदैवत्यं ध्यात्वा, यमिति बीजेन संशोध्याकाशे लयं नयेत्। भ्रूयुगादिब्रह्मरन्ध्रान्तमाकाशमण्डलं नीलवर्णं वर्तुलाकारं नादरेखा[6]ङ्कितं सदाशिवदैवत्यं ध्यात्वा, हमिति बीजेन संशोध्य परशिवे लयं नयेत्।।

षष्टिसंख्यां समारभ्य द्वादश द्वादश न्यसेत्। पृथिव्यादीनि भूतानि क्रमेण स्वस्वकारणे।। ३।।

अस्यार्थः— भूतानां लयक्रमे पृथिवीशोधनं तद्बीजं षष्टिवारं जपेत्, तथोत्तरोत्तरं द्वादश द्वादश हित्वा जपेदित्यर्थः। उत्पत्तिक्रमे तथैवाकाशबीजं षष्टिसंख्यं जपेत्, उत्तरोत्तरं द्वादश द्वादश हित्वा जपेत्। अयं क्रमः प्राणायामयोगेनेति केचित्। एवं पञ्चमहाभूतानि परे तत्त्वे एकीभूतानि विचिन्त्य, प्राणायामयोगेन योनिमुद्रां बद्ध्वा

---

[1] 'हृदयतो' क. पाठः। [2] 'चतुरस्राकारं' ग. पाठः। [3] 'लिङ्गपर्यन्तं' ग. पाठः। [4] 'शुक्लवर्णं पद्मलाञ्छितमर्धचन्द्रकारं' ग. पाठः। [5] 'लिङ्गादिनाभिपर्यन्तं' ग. पाठः। [6] 'रेखान्वितं' क. पाठः।

कुलकुण्डलिनीमुत्थाप्य षट् सरोजानि भित्त्वा जीवप्रदीपस्नेहरूपिणीं तां मातृकासमुदोयेन सह परे तेजसि संयोज्य शोषणादि समाचरेत्। अत्र मातृकां तु संहारक्रमेण क्षकारं ळकारे, ळकारं हकारे, हकारं सकारे, एवमाकारमकारे विलाप्य तमकारं नवनीतनिभं कुण्डलिनीद्वारा ब्रह्मरन्ध्रं प्रापयेदित्यर्थ:।

वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभम्। ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम्।। १ ।।
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्। तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।। २ ।।
उपपातकरोमाणं रक्तश्मश्रुविलोचनम्। खड्गचर्मधरं क्रुद्धं कुक्षौ पापं विचिन्तयेत्।। ३ ।।

ततो वामनासापुटे वायुमण्डलं तद्बीजयुक्तं कादिमान्तै: स्पर्शवर्णै: संवीतं धूम्रवर्णं ध्यात्वा मात्रा शोडशकेन सम्पूर्य प्राणापानवायुभ्यां सह संयोज्य, तदुत्थितेनानिलेन च सह पापपुरुषं संशोष्य चतुष्षष्टिमात्राभि: कुम्भयित्वा द्वात्रिंशन्मात्राभि: रेचयेत्। ततो दक्षनासापुटे वह्निमण्डलं तद्बीजयुक्तं यादिभिर्दशभि: संवीतं रक्तवर्णं सञ्चिन्त्य, प्राणापानवायुभ्यां सह संयोज्य तदुत्थितेनानलेन पापपुरुषं सन्दह्य प्राग्वत् षोडशमात्राभि: पूरकं चतुष्पष्टिमात्राभि: कुम्भकं द्वात्रिंशन्मात्राभी रेत्रनम्। ततो वामनासापुटे आप्यमण्डलं तद्बीजयुक्तं षोडशस्वरै: संवीतं धवलवर्णं सञ्चिन्त्य प्राग्वत् पूरकादिकं विधाय, मूलाधारगतेन वायुना वह्निकुण्डलिनीमुत्थाप्य तस्या ज्वालसमुदायेन विगलद्ब्रह्मरन्ध्रेन्दुमण्डलादमृताप्लावनं, पूर्ववत् पूरककुम्भकरेचका:। एवं शोषणदहनाप्लावनानि कृत्वा, परस्मिन् शाम्भवे ब्रह्मणि स्वशरीरं तत्सारूप्यप्रतिबिम्बितं बुद्बुदाकारं ध्यात्वा, पार्थिवबीजेन कठिनीकृत्य, व्योमबीजेन विभेद्य भूतोत्पत्तिं विचिन्तयेत्।

अक्षरात् खं ततो वायुर्वायोस्तेजस्ततो जलम्। जलात् प्रसूता जगती जगत्यां जायते जगत्।।१ ।।

इति क्रमेण द्वादशसंख्या समारभ्य षष्टिपर्यन्तं वर्धयन् सोऽहमित्युच्चार्य ह्सौमिति शिवात्मानं बीजं षट्त्रिंशत्तत्त्वरूपं स्मरेत्। ''प्राणप्रतिष्ठां कुर्वीत वक्ष्यमाणप्रकारत:।''

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य० शिरसि ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नम:, मुखे ऋग्यजु:सामाथर्वेभ्यश्छन्दोभ्यो नम:, हृदि प्राणशक्तये देवतायै नम:, गुह्ये आं बीजाय नम:, पादयो: ह्रीं शक्तये नम:, नाभौ क्रों कीलकाय नम: इति विन्यस्य मम प्राणप्रतिष्ठापने विनियोग: इति कृताञ्जलिरुक्त्वा, अं कं ५ आं पृथिव्यप्तेजोवाय्वाकाशात्मने हृदयाय नम:। इं चं ५ ईं शब्दस्पर्शरूपरसगन्धात्मने शिरसे स्वाहा। उं टं ५ ऊं त्वक्चक्षु:श्रोत्रजिह्वाघ्राणात्मने शिखायै वषट्। एं तं ५ ऐं वाक्पाणिपादपायूपस्थात्मने कवचाय हुं। ओं पं ५ औं वचनादानगतिविसर्गानन्दात्मने नेत्रत्रयाय वौषट्। अं यं १० अ: बुद्धिमनोहङ्कारचित्तात्मनेऽस्त्राय फट्, इति हृदादिषडङ्गन्यास:। एवं करषडङ्गन्यासं विधाय, यं त्वगात्मने नम:। रं असृगात्मने नम:। लं मासात्मने नम:। वं मेद आत्मने नम:। शं अस्थ्यात्मने नम:। षं मज्जात्मने नम:। सं शुक्रात्मने नम:। हं प्राणात्मने नम:। ळं जीवात्मने नम:। क्षं परमात्मने नम:। इति व्यापकन्यासं कृत्वा, बीजत्रयेणैव व्यापकं कृत्वा ध्यायेत्।

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जै:
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्च बाणान्।
बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्ति: परा न:।। १ ।।

इति ध्यात्वा, ओं आं ह्रीं क्रों हंसःसोहं यरलवशषसहों श्रीमहात्रिपुरसुन्दर्याः प्राणा इह प्राणाः २ँ५ जीव इह स्थितः २ँ५ सर्वेन्द्रियाणि २ँ५ वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य चिरं सुखं तिष्ठन्तु स्वाहा, इति हृदि हस्तं दत्त्वा त्रिवारं पठेत्। इति प्राणप्रतिष्ठा।। अथ मातृकान्यासः–

गुदात्तु द्व्यङ्गुलादूर्ध्वं सुषुम्नासूक्ष्मरन्ध्रगम्। वादिवेदार्णल[1]सितं पङ्कजं कनकप्रभम् ।। २।।
तत्स्थां विद्युल्लताकारां तेजोरूपामणीयसीम्। कुलकुण्डलिनीमूर्ध्वं नयेत् षट्चक्रभेदतः।। ३।।
द्वादशान्तस्य मध्यस्थं पूर्वोक्तं मातृकाम्बुजम्। नवनीतनिभं ध्यात्वा द्रुतं कुण्डलिनीत्विषा।। ४।।
तेजोऽञ्जलौ विनिःसार्य मातृकान्यासमाचरेत्। ....।।

अंआंइंईंउंऊं इति षट् स्वरान् दक्षवामकरतलतत्पृष्ठतत्करभतद्व्याप्तिक्रमेण न्यसेत्। अवशिष्टदशस्वरान् अङ्गुष्ठादिकनिष्ठान्तं दशस्वङ्गुलीषु न्यसेत्। दक्ष[2]प्रदेशिनीमारभ्य वामकनिष्ठापर्यन्तं पर्वत्रयाग्रेषु चतुश्चतुरः कादिसान्तान् वर्णान् हलावङ्गुष्ठयोरन्यमङ्गुल्यग्रेषु न्यसेदिति मातृकाकरशुद्धिं विधाय, अस्या अन्तर्मातृकायाः शिरसि दक्षिणामूर्तये ऋषये नमः। मुखे गायत्र्यै छन्दसे नमः। हृदये श्रीमातृकासरस्वत्यै देवतायै नमः। गुह्ये हल्भ्यो बीजेभ्यो नमः। पादयोः स्वरेभ्यः शक्तिभ्यो नमः। नाभौ अव्यक्ताय कीलकाय नमः। इति विन्यस्य मम शरीरशुद्ध्यर्थं विनियोगः इति कृताञ्जलिरुक्त्वा, अंकं ५ आं हृदयाय नमः। इंचं ५ ईं शिरसे स्वाहा। उंटं ५ ऊं शिखायै वषट्। एंतं ५ ऐं कवचाय हुं। ओंपं ५ औं नेत्रत्रयाय वौषट्। अंयं १० अंः अस्त्राय फट्। इति करषडङ्गन्यासं विधाय, विशुद्धे षोडशदलेषु स्वरान्, हृदये द्वादशदलेषु कादिठान्तान्, नाभौ दशदलेषु डादिफान्तान्, स्वाधिष्ठाने षड्दलेषु वादिलान्तान्, मूलाधारे चतुर्दलेषु वादिसान्तान् विन्यस्य ध्यायेत्।

आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वेपत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के।
वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणां
हंक्षं तत्त्वार्थयुक्तं सकलमुनिमतं वर्णरूपं नमामि।। १।।

अथ बहिर्मातृकान्यासः। तत्र प्राग्वदृष्यादिकं विन्यस्य ध्यायेत्।

पञ्चाशद्वर्णभेदैर्विहितवदनदोष्पादयु[3]क्कुक्षिवक्षो-
देशा[4] भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दा[5]वदाताम्।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां [6]पद्मसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि।। २।।

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तमायुधध्यानम्। इति ध्यात्वा,

कानवृत्तद्व्यक्षिश्रुतिनासागण्डोष्ठन्दतमूर्धास्ये। दोष्पत्सन्ध्यग्रेषु च पार्श्वद्वयपृष्ठनाभिजठरेषु।। ३।।
हृद्दोर्मूलापरगलकक्षेषु हृदादिपाणिपादयुगलेषु। जठराननयोर्व्यापकसंज्ञान् न्यसेदक्षरान् क्रमशः।।४।।

अत्र दशधातुषु यादीन् प्राग्वत् न्यसेत्। अयं मातृकान्यासस्त्रिविधः– शुद्धमातृका बिन्दुयुक्ता विसर्गयुक्ता चेति।

---

१. 'ललितं' क. पाठः। २. 'प्रदेशिन्या आरभ्य' क. पाठः। ३. 'हृत्' ग. पाठः। ४. 'देहां' क. पाठः।
५. 'खण्डा' क. पाठः। ६. 'सुस्मितास्यां' क. पाठः।

अन्तर्बहि (ष्ठाः? स्था) च कलायुता च श्रीकण्ठविष्ण्वादिसमन्विता च।
लज्जारमाकामपृथक्समूहा प्रपञ्चयागो दश मातृकाः स्युः ।। ५।।

इति क्रमेण मातृकावैभवं प्रागेव वर्णितम्, साम्प्रतमस्मदाराध्यचरणोपदिष्टक्रमेण सङ्क्षेपतो भ्रमनिरासाय प्रोच्यते इति।।

अथ कलामातृकान्यासः। अस्य षडङ्गन्यासध्यानानि प्रागेवोक्तानि। ॐ अं निवृत्तिकलायै नमः शिरसि। आं प्रतिष्ठाकलायै नमः मुखे। एवं इं विद्या० दक्षनेत्रे। ईं शान्ति० वामनेत्रे। उं इन्धिका० दक्षकर्णे। ऊं दीपिका० वामकर्णे। ऋं रेचिका० दक्षनसि। ॠं मोचिका० वामनसि। ऌं सूक्ष्मा० दक्षगण्डे। ॡं सूक्ष्मातीता० वामगण्डे। एं अमृता० ऊर्ध्वोष्ठे। ऐं ज्ञाना० अधरोष्ठे। ओं व्योमरूपा० ऊर्ध्वदन्तेषु। औं आप्यायिनी० अधोदन्तेषु। अं व्यापिनी० ललाटे। अः अनन्तरूपा० जिह्वायां। इति विन्यस्य 'विष्णुर्योनिं०' जपेत्। ततः ॐ अंआमित्यादि षोडश स्वरान् उच्चार्य भुक्तिमुक्तिप्रदनादजानन्तकलायै नमः इति मुखे व्यापकं न्यसेत्। ततः ॐ कं सृष्टि० दक्षबाहुमूले। खं वृद्धि० कुर्परे। गं स्मृति० मणिबन्धे। घं मेधा० अङ्गुलिमूले। ङं कान्ति० अङ्गुल्यग्रे। चं लक्ष्मी० वामबाहुमूले। छं धृति० कुर्परे। जं स्थिरा० मणिबन्धे। झं स्थिति० अङ्गुलिमूले। ञं सिद्धि० अङ्गुल्यग्रे। इति विन्यस्य हंसः शुचिषदिति जपेत्। ततः कं १० सृष्टिप्रदाकारप्रभवब्रह्मकलायै नमः इति भुजयोर्व्यापकं न्यसेत्। ततः ॐ टं जरा० दक्षपादमूले। ठं पालिनी० जानौ। डं शान्ति० गुल्फे। ढं ईश्वरी० अङ्गुलिमूले। णं रति० अङ्गुल्यग्रे। तं कामिका० वामपादमूले। थं वरदा० जानौ। दं ह्लादिनी० गुल्फे। धं प्रीति० अङ्गुलिमूले। नं दीर्घा० अङ्गुल्यग्रे। इति विन्यस्य प्रतद्विष्णुरिति जपेत्। ततः ॐ टं १० स्थितिप्रदोकारप्रभवविष्णुकलाभ्यो नमः इति पादयोर्व्यापकं न्यसेत्। ततः ॐ पं तीक्ष्णा० दक्षपार्श्वे। फं रौद्री० वामपार्श्वे। बं मया० पृष्ठे। भं निद्रा० नाभौ। मं तन्द्री० जठरे। यं क्षुधा० हृदि। रं क्रोधिनी० दक्षांसे। लं क्रिया० वामांसे। वं उत्कारी० ककुदि। शं मृत्यु० हृदादिदक्षपाण्यन्तम्। इति विन्यस्य त्र्यम्बकं यजामहे इति जपेत्। ततः पं १० संहृतिप्रदमकारप्रभवरुद्रकलाभ्यो नमः इति हृदयादिमध्ये व्यापकं न्यसेत्। ततः ॐ षं पीता० हृदादिवामपाण्यन्तम्। सं श्वेता० हृदादिदक्षपादान्तम्। हं अरुणा० हृदादिवामपादान्तम्। ळं असिता० पादादिनाभ्यन्तम्। क्षं सिता० नाभ्यादिमूर्धान्तम्। इति विन्यस्य तत्सवितुरिति जपित्वा, ॐ षं ५ तिरोधानप्रदबिन्दुप्रभवेश्वरकलाभ्यो नमः इति सर्वाङ्गे व्यापकं न्यसेत्। इति प्रणवोत्थकलामातृकान्यासः।।

अथ श्रीकण्ठादिन्यासः। तत्रादौ तदङ्गशक्तिषडङ्गन्यासः—ओंह्रीं नमो भगवति ब्राह्मि रक्ष रक्ष पद्महस्तेन मां रक्ष रक्ष अंकं ५ आंहौंह्रींह्सौं सञ्जीवनि हृदयाय नमः। ओंह्रीं नमो भगवति माहेश्वरि रक्ष रक्ष त्रिशूलहस्तेन मां रक्ष रक्ष इंचं ५ ईंहौंह्रींह्सौं ऊर्ध्वकेशिनि शिरसे स्वाहा। ओंह्रीं नमो भगवति कौमारि रक्ष रक्ष शक्तिहस्तेन मां रक्ष रक्ष उंटं ५ ऊंहौंह्रींह्सौं जटिलिनि शिखायै वषट्। ओंह्रीं नमो भगवति वैष्णवि रक्ष रक्ष चक्रहस्तेन मां रक्ष रक्ष एंतं ५ ऐंहौंह्रींह्सौं मायात्रैलोक्यरूपसहस्रपरिवर्तिनि कवचाय हुम्। ओंह्रीं नमो भगवति वाराहि रक्ष रक्ष दंष्ट्राहस्तेन मां रक्ष रक्ष ओं पं ५ औंहौंह्रींह्सौं तारकाक्षिणि नेत्रत्रयाय वौषट्। ओंह्रीं नमो भगवति ऐन्द्रि रक्ष रक्ष वज्रहस्तेन मां रक्ष रक्ष अंयं १० अःहौंह्रींह्सौं मारय मारय अस्त्राय फट्। ओंह्रीं नमो भगवति चामुण्डे रक्ष रक्ष पाशहस्तेन मां रक्ष रक्ष अंआं ५१

---

१. 'प्रभवेशान' क. पाठः।

अंइंउंएंओं आंईंऊंऐंऔंअः हौंह्रींह्सौं मम सर्वाङ्गं रक्ष रक्ष सर्वाङ्गव्यापिनि स्वाहा, इति व्यापकम्। अस्य श्रीकण्ठादिमातृकान्यासस्य शिरसि अम्बरीष ऋषिः, मुखे अनुष्टुप् छन्दः, हृदि अर्धनारीश्वरो देवता, न्यासे विनियोगः। ओंह्रीह्रींह्सौं मम सर्वाङ्गरक्षकाय अं श्रीकण्ठेशपूर्णोदरीभ्यां नमः, एवं सर्वत्र। आं अनन्तेशविरजाभ्यां०। इं सूक्ष्मेशशाल्मलीभ्यां०। ईं त्रिमूर्तीशलोलाक्षीभ्यां०। उं अमरेशवर्तुलाक्षीभ्यां०। ऊं अर्घीशदीर्घघोणाभ्यां०। ऋं भारभूतीशदीर्घमुखीभ्यां०। ॠं अतिथीशगोमुखीभ्यां०। ऌं स्थाण्वीशदीर्घजिह्वा०। ॡं हरेशकुण्डोदरी०। एं झिण्टीशोर्ध्वकेशी०। ऐं भौतिकेश विकृतमुखी०। ओं सद्योजातेशज्वालामुखी०। ओं अनुग्रहेशोल्कामुखी०। अं अक्रूरेश[1]श्रीमुखी०। अः महासेनेशविद्यामुखी०। कं क्रोधीशमहाकाली०। खं चण्डीशसरस्वती०। गं पञ्चान्तकेशसर्वसिद्धिगौरी०। घं शिवोत्तमेशत्रैलोक्यविद्या०। ङं एकरुद्रेशमन्त्रशक्ति०। चं कूर्मेशात्मशक्ति०। छं एकनेत्रेशभूत[2]मातृ०। जं च[3]तुराननेशलम्बोदरी०। झं अजेशविद्राविणी०। ञं शर्वेशनागरी०। टं सोमेशखेचरी०। ठं लाङ्गलीशमञ्जरी०। डं दारुकेशरूपिणी०। ढं अर्धनारीश्वरेशवीरिणी०। णं उमाकान्तेशकाकोदरी०। तं आषाढीशपूतना०। थं दण्डीशभद्रकाली०। दं अद्रीशयोगिनी०। धं मीनेशशङ्खिनी०। नं मेषेशगर्जिनी०। पं लोहितेशकालरात्री०। फं शिखीशकुर्दिनी०। बं छगलाण्डेशकपर्दिनी०। भं द्विरण्डेशव[4]ज्रिणी०। मं महाकालेशजया०। यं त्वगात्मक- कापालीशसुमुखी०। रं असृगात्मक-भुजङ्गीशरेवती०। लं मांसात्मक-पिनाकीशमाधवी०। वं मेदात्मक-खड्गीशवारुणी०। शं अस्थ्यात्मक-बकेशवायवी०। षं मज्जात्मक-श्वेतेशरक्षोपधारिणी०। सं शुक्रात्मक-भृग्वीशसहजा०। हं प्राणात्मक-नकुलीशमहालक्ष्मी०। ळं शक्त्यात्मक-शिवेशव्यापिनीभ्यां नमः। ओंह्रींहौं नमः शिवाय क्षं शिवात्मक-संवर्तेशमहामायाभ्यां नमः, इति विन्यस्य ध्यायेत्।

बन्धूककाञ्चननिभं रुचिराक्षमालां पाशाङ्कुशौ च वरदं निजबाहुदण्डैः।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयामि ॥

इति ध्यायेत्। दक्षाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्। इति श्रीकण्ठादिमातृकान्यासः॥

अथ केशवादिमातृकान्यासः। अस्याः केशवादिमातृकायाः शिरसि ब्रह्मा ऋषिः, मुखे गायत्री छन्दः, हृदये श्रीपरमात्मा केशवो देवता, न्यासे विनियोगः। तत्र कामराजबीजेन षड्दीर्घयुक्तेन षडङ्गन्यासं कृत्वा ध्यायेत्।

हस्तैर्दधानां नवनीरदाभां शङ्खं च चक्रं च गदां च पद्मम्।
कीर्त्यादियुक्तामतिसुन्दरीं तां श्रीकेशवीं सन्ततमाश्रयेऽहम्॥

ओं ऐं ह्रीं श्रीं क्लीं ओं नमो नारायणाय अं केशवकीर्तिभ्यां नमः। एवं सर्वत्र। आं नारायणकान्ति०। इं माधवतुष्टि०। ईं गोविन्दपुष्टि०। उं विष्णुधृति०। ऊं मधुसूदन[5]शान्ति०। ऋं शिविक्रमक्रिया०। ॠं वामनदया०। ऌं श्रीधरमेधा०। ॡं हृषीकेशहर्षा०। एं पद्मनाभश्रद्धा०। एं दामोदरलज्जा०। ओं वासुदेवलक्ष्मी०। औं सङ्कर्षणसरस्वती०। अं प्रद्युम्नप्रीति०। अः अनिरुद्धरति०। कं चक्रिजया०। खं गदिदुर्गा०। गं शार्ङ्गिप्रभा०। घं खड्गिसत्या०। ङं शङ्खिवण्डिका०। चं हलिवाणी०[6]। छं मुसलिविलासिनी०। जं शूलिविजया०। झं पाशिविरजा०। ञं अङ्कुशिविश्वा०। टं मुकुन्दविनदा०। ठं नन्दजसुतदा०। डं नन्दिस्मृति०। ढं नरऋ[7]द्धि०। णं नरकजित्समृद्धि०। तं हरिशुद्धि०। थं कृष्ण[8]भुक्ति०। दं सत्यबुद्धि०। धं सात्वतमति०। नं शौरिक्षमा०। पं शूररमा०। फं. जनार्दनोमा०। बं. भूधरक्लेदिनी०। भं विश्वमूर्तिक्लिन्ना०। मं वैकुण्ठवसुदा०। यं त्वगात्मक-पुरुषोत्तमवसुधा०। रं असृगात्मक—बलिपरा०। लं मांसात्मक-बलानुजपरायणा०। वं मेदात्मक-बालसूक्ष्मा०। शं अस्थ्यात्मक-वृषघ्नसन्ध्या०।

---

१. 'सुमुखी' क. पाठः। २. 'भूतधात्री' ग. पाठः। ३. 'चित्राननेश' ख. पाठः। ४.' विरजा' क. पाठः। 'महावज्रा' ख. पाठः। ५. 'क्षान्ति' ख. पाठः। ६. वीरा' क. पाठः। ७. 'वृद्धि' क. पाठः। ८. 'ऋद्धि' क. पाठः। ९. 'शूक्लसत्या' क. पाठः।

षं मज्जात्मक-वृषभप्रज्ञा०। सं शुक्रात्मक-हंसप्रभा०। हं प्राणात्मक-वराहनिशा०। ळं शिवशक्त्यात्मक-विम[१]लामोघा०। क्षं परात्मक-नृसिंहविद्युताभ्यां नमः। इति केशवादिमातृकान्यासः।।

अथ लज्जाबीजादिमातृकान्यासः। तत्र शक्तिर्ऋषिः, देवीगायत्री छन्दः, सकलप्रपञ्चमूलरूपिणी शक्तिर्देवता न्यासे विनियोगः। ततः षड्दीर्घयुक्तमायाबीजेन करषडङ्गं विधाय ध्यायेत्।

उद्यद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावनद्ध[२]-
द्योतन्मौलिं त्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मगां च।
हारग्रैवेयकाञ्चीगुणमणिवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशाङ्कुशाद्याभयवरदकरामम्बिकां तां नमामि।।

इति ध्यात्वा ह्रींअंह्रीं इत्यादिक्रमेण न्यसेत्। इति शक्तिमातृकान्यासः।।

अथ रमा[३]बीजादिमातृकान्यासः। तत्र भार्गव ऋषिः, गायत्री छन्दः, रमा देवता न्यासे विनियोगः। श्रांश्रीमित्यादिना करषडङ्गन्यासं विधाय ध्यायेत्।

वामे करे तदितरे च तथोपरिष्टात् पात्रं सुधारसयुतं वरमातुलुङ्गम्।
खेटं गदां च दधतीं भवतीं भवानीं ध्यायन्ति येऽरुणनिभां कृतिनस्त एव।।

इति ध्यात्वा श्रींअंश्रीमित्यादि न्यसेत्। इति लक्ष्मीमातृकान्यासः।।

अथ कामबीजादिमातृकान्यासः। तत्र सम्मोहन ऋषिः, गायत्री छन्दः, कामेश्वरी देवता न्यासे विनियोगः। क्लांक्लींमित्यादिना करषङ्गन्यासं विधाय ध्यायेत्।

त्रिनेत्रां सुस्मितमुखीमरुणाम्बरभूषणाम्। पाशाङ्कुशधनुर्बाणधरां कामेश्वरीं भजे।।

इति ध्यात्वा क्लींअंक्लींमित्यादि न्यसेत्। इति काममातृकान्यासः।।

अथ त्रिशक्तिमातृकान्यासः। तत्र ब्रह्मा ऋषिः, गायत्री छन्दः, त्रिशक्तिर्देवता न्यासे विनियोगः। त्वज्जारमाकामबीजत्रयद्विरावृत्त्या करषडङ्गन्यासं विधाय प्राग्वत् ध्यात्वा ह्रींश्रींक्लींअं नमः इत्यादि न्यसेत्। इति त्रिशक्तिमातृकान्यासः।।

अथ प्रपञ्चयागमातृकान्यासः।

अथ प्रपञ्चयागस्य विधानमभिधीयते। येन निर्धूतकलुषो ब्रह्मभूयं समश्नुते।।

अस्य परब्रह्म ऋषिः, परमा गायत्री छन्दः, परमात्मा देवता न्यासे विनियोगः। स्वाहा हृदयाय नमः। सोऽहं शिरसे स्वाहा। हंसः शिखा०। ह्रीं कवचा०। ओं[४] नेत्रा०। हरिहर अस्त्राय०। मूलमन्त्रेण त्रिधा व्यापकं कृत्वा ध्यायेत्।

तारादिपञ्चमनुभिः परिचीयमानं मानैरगम्यमनिशं जगदेक[५]मूलम् ।
[६]सच्चित्समस्तगमनश्वरमच्युतं तत्तेजः परं भजत[७] तान्द्रसुधाम्बुराशिम्।।

इति ध्यात्वा ओंह्रींअं हंसः सोहं स्वाहा, ओंह्रींआं हंसः सोहं स्वाहा, इत्यादि न्यसेत्। इति प्रपञ्चयागमातृकान्यासः।।

इति साधारणतो दशविधमातृकान्यासः सर्वमन्त्रसाधारणः।।

---

१. 'कपिल' ग. पाठः। २. 'नद्धां' क. पाठः। ३. 'लक्ष्मी' क. पाठः। ४. 'ठः नेत्रा' क. पाठः।
५. 'मृगयं' ग. पाठः। ६. 'संवित्' क. पाठः। ७. 'नमत' ग. पाठः।

अथ मातृविशेषाः। तत्रादौ बालामातृकान्यासः। तत्र दक्षिणामूर्तिः ऋषिः[१], पङ्क्तिः छन्दः, बालावागीश्वरी देवता न्यासे विनियोगः। ततो बालात्रिबीजद्विरावृत्त्या करषडङ्गन्यासं कृत्वा ध्यायेत्।

आधारे तरुणार्कबिम्बरुचिरं हेमप्रभं वाग्भवं
बीजं मान्मथमिन्द्रगोपसदृशं हृत्पङ्कजे संस्थितम्।
चक्रे भालमये शशाङ्कसदृशं बीजं च तार्तीयकं
ये ध्यायन्ति पदत्रयं तव शिवे ते यान्ति [२]सौख्यास्पदम्।

इति ध्यात्वा ऐंक्लींसौःअं नमः इत्यादि न्यसेत्। इति बालामातृकान्यासः।।

अथ श्रीविद्यामातृकान्यासः। तत्र शिरसि दक्षिणामूर्तिर्ऋषिः, मुखे पङ्क्तिः छन्दः, हृदि महात्रिपुरसुन्दरी देवता न्यासे विनियोगः। ऐंह्रींश्रींऐं सर्वज्ञताशक्त्यै हृदयाय नमः। इँ क्लीं नित्यतृप्तिताशक्त्यै शिरसे स्वाहा। इँ सौः अनादिबोधशक्त्यै शिखायै०। इँ ऐं स्वतन्त्रताशक्त्यै कवचाय०। इँ क्लीं नित्यमलुप्तताशक्त्यै नेत्र०। इँ सौः अनन्तशक्त्यै अस्त्रा०। इति विन्यस्य ध्यायेत्।

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम्।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम्।।

इति ध्यात्वा मूलविद्यासम्पुटितमातृकां न्यसेत्। इति श्रीविद्यामातृका न्यासः।।

अथ परामातृकान्यासः। तत्र हंस ऋषिः, अव्यक्तगायत्री छन्दः, परा देवता न्यासे विनियोगः। सौः हृदयाय नमः। सौः शिरसे०। इत्यादि करषडङ्गन्यासं विधाय ध्यायेत्।

अकलङ्कशशाङ्काभां त्र्यक्षां चन्द्रकलावतीम्। मुद्रापुस्त[३]लसद्बाहुं प्रणमामि परां कलाम्।

इति ध्यात्वा सौः अंसौः इत्यादि न्यसेत्। इति परामातृकान्यासः।।

अथ कामरतिन्यासः। अस्य ब्रह्म ऋषिः, गायत्रं छन्दः, परमात्मा देवता न्यासे विनियोगः। बालया षडङ्गं विधाय ध्यायेत्।

श्यामाङ्गकान् वरान् सर्वान् सर्वाभरणभूषितान्। सशक्तिकान् स्मरेत् कामान् पञ्चाशद्वर्णभावने।।

इति ध्यात्वा ओंऐंह्रींश्रींक्लींअं कामेश्वररतिभ्यां नमः, एवं सर्वत्र। आं कामदप्रीति०। इं कान्तका[४]मिनी०। ईं कान्तिमन्मोहिनी०। उं कामगकमला०[५]। ऊं कामचारलिासिनी०। ऋं कामिकल्पलता०। ॠं कामुकश्यामा०। लृं कामवर्धनशुचिस्मिता०। ॡं वामविस्मिता०। एं [६]रामविशालाक्षी०। ऐं रमणलेलिहाना०। ओं रतिनाथदिगम्बरा०। औं रतिप्रियवामा०[७]। अं [८]रात्रिनाथकुब्जिका०। अः रमकान्तकान्ता०[९]। कं रमणनित्या०। खं निशाचर[१०]कुल्या०। गं नन्दकभोगिनी०[११]। घं नन्दनकामदा०। ङं नन्दिसुलोचना०[१२]। चं नन्दयितृसुलापिनी०। छं पञ्चबाण[१३]मर्दिनी०। जं रतिसख[१४]कलहप्रिया०। झं पुष्पधन्ववराक्षी०। ञं महाधनुःसुमुखी०। टं भ्रामण[१५]नलिनी०। ठं भ्रमण[१६]जटिनी०। डं भ्रममाणपालिनी०। ढं भ्रमशिवा०। णं भ्रान्तमुग्धा०[१७]। तं भ्रामकरमा०[१८]। थं भृङ्गभ्रमा०[१९]। दं भ्रान्तचारलोला०। धं भ्रमावहचञ्चला०। नं मोहनदीर्घजिह्वा०। पं [२०]मोहकरतिप्रिया०। फं मोह[२१]लोलाक्षी०। वं मोहवर्धनभृङ्गिणी०। भं मदनपाटला०[२२]। मं मन्मथमदना०। यं मातङ्गमाला०।

---

१. 'ऋषये नमः' इत्येवं क. पाठः। २. 'सूक्ष्मां गतिम्' ग. पाठः। ३. 'पुस्तक' ग. पाठः। ४. 'कान्ति' क. पाठः। ५. 'कमलालया' ग. पाठः। ६. 'रति' क. पाठः। ७. 'वामना' क. पाठः। ८. 'रतिनायक' क. पाठः। ९. 'धरा' क. पाठः। १०. 'कल्याणी' ग. पाठः। ११. 'मोहिनी' ख. पाठः। १२. 'सुरोत्तमा' ग. पाठः। १३. 'मत्तवाहनदमयन्ती' क. पाठः। १४. सरस' क. पाठः। १५. 'नित्या' क. पाठः। १६. 'रञ्जनी' क. पाठः। १७. 'मूर्छा' क. पाठः। १८. 'भ्रमा' क. पाठः। १९. रमा' क. पाठः। २०. 'मोचक' क. पाठः। २१. 'मुग्ध' क. पाठः। २२. कपटा' क. पाठः।

रं भृङ्गनायकहंसिनी०। लं गायकविश्वतोमुखी०। वं गीतिजगदानन्दिनी०। शं नर्तकरमणी०। षं खेलककान्ति०। सं उन्मत्तकलकण्ठी[१]०। हं मत्तकवृकोदरी०। ळं [२]विलासिमेघश्यामा०। क्षं लोभ[३]वर्धनलोभवर्धनीभ्यां नमः।

एतान् पौण्ड्रेक्षुकोदण्डपुष्पपञ्चकसायकान्। रतिभिः स्वर्णवर्णाभिस्ताम्बूलं च कुशेशयम्।।
धारयन्तीभिराश्लिष्टान् सर्वाभरणभूषितान्। सहकारमशोकं च केतकी नवमल्लिका।।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः। ....।।

इति कामरतिन्यासः।

अथाष्टात्रिंशत्कलान्यासः। तत्रेशानादिपञ्चब्रह्मणः ईशतत्पुरुषाग्निवामदेवहरा ऋषयः, अनुष्टुब्गायत्र्यनुष्टुप्कृत्यनुष्टुभः छन्दांसि, ईशानादयो देवताः पञ्चब्रह्मन्यासे विनियोगः। ऐंह्रींश्रीं हसखफ्रें हसौं सर्वज्ञाय हृदयाय नमः। बीजपञ्चकं सर्वत्र। ५ँ अमृते तेजोज्वालामालिने नित्यतृप्ताय शिरसे०। ५ँ ज्वलितशिखिशिख अनादिबोधाय शिखायै०। ५ँ वज्रिणे वज्रधराय[४] स्वतन्त्राय कवचाय०। ५ँ ओं स्ह्रौं हसौं नित्यमलुप्तशक्तये नेत्रत्रयाय०। ५ँ ओंश्लींपशुहुं फट् अनन्तशक्तयेऽस्त्राय०। ततः हों ईशानाय नमः। हें तत्पुरुषाय नमः। हुं अघोराय नमः। हिं वामदेवाय नमः। हं सद्योजाताय नमः। एवं पञ्चब्रह्ममन्त्रान् ऊर्ध्वपूर्वदक्षिणोत्तरपश्चिमवक्त्रेषु विन्यस्याष्टात्रिंशत् कला न्यसेत्। तद्यथा—ओं ईशानः सर्वविद्यानां शशिन्यै नमः। ऊर्ध्ववक्त्रे। ईश्वरः सर्वभूतानां अङ्गदायै नमः पूर्ववक्त्रे। ब्रह्माधिपतिब्रर्ह्मणोऽधिपतिः ब्रह्मेष्टदायै नमः। दक्षवक्त्रे। ब्रह्मा शिवो मे अस्तु मरीच्यै नमः उत्तरवक्त्रे। सदाशिवों अंशुमालिन्यै नमः पश्चिमवक्त्रे। इति समुष्ट्यङ्गुष्ठेन न्यसेत्।। तत्पुरुषाय विद्महे शान्त्यै नमः पूर्ववक्त्राधः। महादेवाय धीमहि विद्यायै नमः दक्षिणवक्त्राधः। तन्नो रुद्रः प्रतिष्ठायै नमः उत्तरवक्त्राधः। प्रचोदयात् निवृत्त्यै नमः पश्चिमवक्त्राधः। इत्यङ्गुष्ठातर्जनीयोगेन न्यस्तव्याः।। अघोरेभ्यस्तमाकलायै नमः हृदि। अथ घोरेभ्यो मोहायै नमो ग्रीवायां। घोरक्षमायै नमः दक्षांसे। घोरतरेभ्यो निद्रायै नमो वामांसे। सर्वतः शर्व व्याधिकलायै नमः नाभौ। सर्वेभ्यो मृत्युकलायै नमः कुक्षौ। नमस्ते अस्तु क्षुधायै नमः पृष्ठे। रुद्ररूपेभ्यस्तृष्णायै नमः वक्षसि। इत्यङ्गुष्ठमध्यमायोगेन न्यस्तव्याः।। वामदेवाय नमो रजायै नमो गुह्ये। ज्येष्ठाय नमः श्रेष्ठाय नमो रक्षायै नमः लिङ्गे। रुद्राय नमो रत्यै नमः दक्षोरौ। कालाय नमो मालिन्यै नमः वामोरौ। कलविकरणाय नमः काम्यायै नमः दक्षजानुनि। विकरणाय नमः शशिन्यै नमः वामजानुनि। बलविकरणाय नमः क्रियायै नमः दक्षजङ्घायां। विकरणाय नमः सिद्ध्यै नमः वामजङ्घायां। बलाय नमः स्थिरायै नमः दक्षिस्फिचि। बलप्रमथनाय नमो रात्र्यै नमः वामस्फिचि। सर्वभूतदमनाय नमो भ्रामिण्यै नमः कट्यां। मनोन्मनाय नमो मोहिन्यै नमः दक्षपार्श्वे। उन्मनाय नमो जरायै नमः वामपार्श्वे। इत्युङ्गुष्ठानामिकायोगेन न्यस्तव्याः।। सद्योजातं प्रपद्यामि सिद्ध्यै नमः दक्षपादतले। सद्योजाताय वै नमः ऋद्ध्यै नमः वामपादतले। भवे लक्ष्म्यै नमः दक्षहस्ततले। भवे धृत्यै नमः वामहस्ततले। [५]नातिभवे मेधायै नमः नासिकायां। भवस्व मां प्रज्ञायै नमः शिरसि। ओं भव प्रभायै नमः दक्षबाहौ। उद्भवाय नमः सुखायै नमः वामबाहौ। इत्यङ्गुष्ठकनिष्ठिकायोगेन न्यस्तव्याः।।

प्रणवाद्याश्चतुर्थ्यन्ताः कलाः सर्वाः नमोन्तिकाः। अष्टात्रिंशत्कलाः प्रोक्ताः पञ्चब्रह्मपरादिकाः।।
इति विन्यस्तदेहोऽसौ भवेद्गङ्गाधरः स्वयम्।..।।

इत्यष्टात्रिंशत्कलान्यासः। एवं न्यासान् कृत्वा प्राणायामत्रयं कृत्वा गणेशपञ्चमीदुर्गावटुकक्षेत्रपालान्नपूर्णाश्वारूढामन्त्रान् क्रमेण पठेत्।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य–श्रीभगवच्छङ्कराचार्यशिष्य–
श्रीविष्णुशर्माचार्यशिष्य–श्रीप्रगल्भाचार्यशिष्य–श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे पञ्चत्रिंशत्तमः श्वासः।। ३५।।

१.'कलङ्कघ्नी' ग.पाठः। २.'विमल' क.पाठः। ३.'कामवर्धनमेषोन्मत्ता' क.पाठः। ४.'वज्रहस्ताय'क.पाठः। ५.'अनाति'ग.पाठः।

अथ
षट्त्रिंशः श्वासः

* * *

अथ मालिनीन्यासः। अस्य श्रीमालिनीन्यासस्य परशम्भुः ऋषिः, गायत्री छन्दः, मूलशक्तिर्मालिनी देवता न्यासे विनियोगः। नफक्षमलवरयां हृदयाय नमः, नफक्षमलवरयीं शिरसे, एवं षड्दीर्घयुक्तेन करषडङ्गन्यासं विधाय ध्यायेत्।

रक्तवस्त्राधरां देवीं पञ्चवक्त्रधरां शिवाम्। निवृत्त्यादिकलायुक्तां प्रतिवक्त्रं त्रिलोचनाम्।।
पाशाङ्कुशधरां देवी सुधासिक्तकपालिनीम्। इच्छादित्रयसंयुक्तां शूलं दक्षकरे धराम्।।
रक्तपङ्कजमध्यस्थां मालिनीं भावयेच्छिवाम्।..।।

इति ध्यात्वा

परासम्पुटितां कुर्यान्मालिनीं मातृकामपि। मूलादिब्रह्मरन्ध्रान्तं (हृद्बीजं मदनात्मना।।
ब्रह्मरन्ध्रादिमूलान्तं) स्मरेदात्मपरामपि। ....।।

सौः अं कं ५ आं सौः हृदयायः। सौः इं चं ५ ईं सौः शिरसे०। सौः उं टं ५ ऊं सौः शिखायै०। सौ० एं तं ५ ऐं सौः कवचाय०। सौः औं पं ५ औं सौः नेत्र०। सौः अं यं १० अंः सौः अस्त्राय०। इति करषडङ्गन्यासं विधाय, सौः नं नादिन्यै नमः सौः शिखायां। सौः ऋं निवृत्त्यै नमः सौः पश्चिमवक्त्रे। सौः ॠं प्रतिष्ठायै नमः सौः उत्तरवक्त्रे। सौः ऌं विद्यायै नमः सौः दक्षिणवक्त्रे। सौः ॡं शान्तायै नमः सौः पूर्ववक्त्रे। सौः थं प्रसन्यै नमः सौः ऊर्ध्ववक्त्रे। सौः चं चामुण्डायै नमः सौः ललाटनेत्रे। सौः धं प्रियदर्शनायै नमः सौः नेत्रयोः। सौः ईं गुह्यशक्तये नमः सौः नासिकायां। सौः णं नारायिण्यै नमः सौः कर्णयोः। सौः उं मोहिन्यै नमः सौः दक्षकर्णमुद्रायां। सौः ऊं प्रज्ञायै नमः सौः वामकर्णमुद्रायां। सौः वं वज्रिण्यै नमः सौः मुखे। सौः कं कङ्कटायै नमः सौः ऊर्ध्वदन्तेषु। सौः खं कालिकायै नमः सौः अधोदन्तेषु। सौः गं शिवायै नमः सौः ऊर्ध्वोष्ठे। सौः घं घोरघोरायै नमः सौः अधरोष्ठे। सौः ङं खिविरायै नमः सौः (जिह्वाग्रे)। सौः इं मायायै नमः सौः जिह्वायां। सौः अं वागीश्वर्यैं नमः सौः वाचि। सौः वं शिखिवाहिन्यै नमः सौः कण्ठे। सौः भं भीषण्यै नमः सौः दक्षस्कन्धे। सौः यं वायुवेगायै नमः सौः वामस्कन्धे। सौः डं लामायै नमः सौः

दक्षभुजे। सौः ढं विनायिक्यै नमः सौः वामभुजे। सौः ठं पूर्णिमायै नमः सौः हस्तयोः। सौः झं झङ्कर्यै नमः सौः दक्षहस्ताङ्गुलिषु। सौः ञं कुर्दनायै नमः सौः वामहस्ताङ्गुलिषु। सौः जं जयन्त्यै नमः सौः शूले। सौः रं दीपिन्यै नमः सौः दण्डे। सौः टं कपालिन्यै नमः सौः कपाले। सौ पं पावन्यै नमः सौः हृदये। सौः छं छगल्यै नमः सौः दक्षस्तने। सौः लं पूतनायै नमः सौः वामस्तने। सौः आं आमोटन्यै नमः क्षीरे। सौः सं परमायै नमः सौः आत्मनि। सौः अंः इच्छाशक्तये नमः सौः प्राणात्मनि। सौः हं अम्बिकायै नमः सौः प्राणे। सौः षं लम्बिकायै नमः सौः उदरे। सौः क्षं संहारिकायै नमः सौः नाभौ। सौः मं महाकाल्यै नमः सौः नितम्बे। सौः शं कुसुमायुधायै नमः सौः गुह्ये। सौः अं शुक्रादेव्यै नमः सौः दक्षोरौ। सौः तं तारायै नमः सौः वामोरौ। सौः एं ज्ञानशक्तये नमः सौः दक्षजानौ। सौः ऐं क्रियाशक्तये नमः सौः वामजानौ। सौः ओं गायत्र्यै नमः सौः दक्षजङ्घायां। सौः औं सावित्र्यै नमः सौः वामजङ्घायां। सौः दं दहन्यै नमः सौः दक्षपादे। सौः फं फेट्कार्यै नमः सौः वामपादे। सौः नफक्षमलवरयीं सौः श्रीमालिन्यै नमः सौः हृदि। सौः ऐंह्रींश्रींसौः मातृकायै नमः सौः शिरसि। सौः नफक्षमलवरयां सौः हृदयाय नमः, इत्यादिषड्दीर्घयुक्तेन मालिनीबीजेन करषडङ्गन्यासं कृत्वा प्राग्वत् ध्यायेत्। इति मालिनीन्यासः।। ततः प्राणायामत्रयं कृत्वा लिङ्गन्यासं कुर्यात्। ॐ ऐं स्वयंभूलिङ्गाय नमः आधारे। ॐ ईं बाणलिङ्गाय नमः हृदये। ॐ औं इतरलिङ्गाय नमः भ्रूमध्ये। ॐ ऐंईंऔं परलिङ्गाय नमः ब्रह्मरन्ध्रे। कनकपटलनिभं तत्समष्टिरूपं तेजो विचिन्त्य वहन्नासापुटाध्वना कराञ्जलौ सङ्क्रम्य, अंआंसौः इति बीजत्रयं मध्यमानामिकाकनिष्ठाङ्गुष्ठतर्जनीकरतलेषु विन्यस्येत्। इति करशुद्धिन्यासः।। नाभेरापादं हृदो नाभिपर्यन्तं शिरसो हृत्पर्यन्तं तदेव बीजत्रयं बालया वा व्यस्तसमस्तक्रमेण विन्यस्य, ह्रींऐंक्लींसौः त्रिपुरसुन्दरि आत्मानं रक्ष रक्ष हृदयाय नमः इति क्रमेण षडङ्गन्यासं कृत्वा, आधारहृत्-शिरसु चतुर्दलद्वादशदलषोडशदलमण्डलानि विभाव्य तेषु क्रमेण वह्निसूर्यसोमात्मकतया मूलविद्याखण्डत्रयं तेजोरूपं विचिन्त्य, करयोर्मूलमध्याग्रेषु मूलहृद्बिन्दुषु च न्यसेत्।

मूलविद्यात्रयावृत्त्या तुर्येण ब्रह्मरन्ध्रके। द्वादशान्तेन्दुविगलत्पीयूषेणात्मनस्तनुम्।।
सम्भाव्य तन्मयो भूत्वा न्यसेत् पश्चान्नवासनम्।..................................।।

ॐ अंआंसौः त्रिपुरामृतार्णवासनाय नमः। ॐ ऐंक्लींसौः त्रिपुरेश्वरीरक्तपीताम्बुजासनाय नमः। ॐ ह्रींक्लींसौः त्रिपुरसुन्दरी-देव्यात्मासनाय नमः। ॐ हैंह्क्लींहसौः त्रिपुरवासिनीसर्वचक्रासनाय नमः। ॐ हसैंहसक्लीं हस्सौः त्रिपुराश्रीसर्वमन्त्रासनाय नमः। ॐ ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनाय नमः। ॐ ह्रींश्रींसौः त्रिपुरासिद्धासिताम्बुजासनाय नमः। ॐ हस्रैं हसकलरीं हस्रौः त्रिपुराम्बापर्यङ्कपीठासनाय नमः। ॐ हसकलरडैं हसकलरडीं हसकलरडौः त्रिपुरभैरवीसदाशिव-महाप्रेतपद्मासनाय नमः।।

एतांस्तु पादजानूरुजघनापानलिङ्गके। नाभिहृद्ब्रंह्मरन्ध्रेषु विन्यसेत् क्रमतः सुधीः।।

अथ परान्यासः। ब्रह्मरन्ध्रेऽरुणाधोमुखसहस्रदलकमलकर्णिकायामरुणपूर्णचिच्चन्द्रमण्डलं विभाव्य तन्मध्ये उदितादित्यसङ्काशं स्वशिखामूलाग्रं शृङ्गाटं ध्यात्वा, तन्मध्ये अकथादिक्रमेण समस्ताक्षरमयमकुलासनं वाग्भवं ध्यात्वा, तन्मध्ये हक्षपार्श्वमादिवर्णकदम्बकं दीप्तमवर्णरूपमनुत्तरमनच्कतरहात्मकं सञ्चिन्त्य, तन्मध्यादुद्यन्तीं हार्धकलारूपामृतकुण्डलिनीं मूलश्रृङ्गाटमध्यपर्यन्तमविच्छिन्नां विसतन्तुनिभां सितां कुण्डलिनीं महाकामकलात्मिकां ध्यात्वा, मूलाधारे चतुर्दलपद्मकर्णिकायामपि वह्निमण्डले त्रिकोणस्याग्रकोणाग्रे शृङ्गाटं पूर्ववत् ध्यात्वा, तदन्तः कुलासनं तत्र च वाग्भवं सञ्चिन्त्य, तत्र प्राग्वत् कामकलां ज्वलदग्निरूपां ध्यात्वा तन्मध्यादुद्यन्तीं सपरार्धकलामयीमग्निकुण्डलिनीं लिङ्गाकारतया योनिरूपसुधाकुण्डलिनीमध्यमार्गमनुप्रवेश्य षड्ग्रन्थिसञ्चयं भित्त्वा तदकुलपदावध्यूर्ध्वं ध्यात्वा, अकुलाम्बुधिमध्यगतदण्डाकारतरदण्डलिङ्गेन प्रवेशयित्वा तयोरमृतानलकुण्डलिन्योर्योनिलिङ्गरूपयोर्मथनसम्भवैर्निरन्तरनिविडस्रवदरुणामृतवर्षैरात्मानं सिक्तं ध्यात्वा तयोः सामरस्यात् तदेकनादरूपिणीं परां शक्तिं भावयेत्। इति परान्यासः।।

अथ पश्यन्तीन्यासः। स्वशिरसि अकुलपद्मे आत्माग्रं त्रिकोणं ब्र[1]ह्मरसभरितमाद्यवर्णकदम्बकं ध्यात्वा तत्सामरस्यादेकादशशक्त्यात्मकं पश्यन्त्यवस्थारसभरितं सञ्चिन्त्य अग्रादिवामावर्तेन त्रिरेखासु त्रिकं पञ्चकं त्रिकं च पश्यन्तीक्लाकदम्बकं न्यसेदिति। प्रथमरेखायां ॐ वामायै नमः। ॐ ज्येष्ठायै नमः। ॐ रौद्र्यै नमः। द्वितीयरेखायां ॐ अम्बिकायै नमः। ॐ इच्छायै नमः। ॐ ज्ञानायै०। ॐ क्रियायै०। ॐ शान्तायै०। तृतीयरेखायां ॐ अकारात्मिकायै नमः। ॐ हकारात्मिकायै०। ॐ अक्षरात्मिकायै०। इति न्यसेत्। इति पश्यन्तीन्यासः।।

अथ मध्यमान्यासः। (मध्यमान्यासो द्विविधः सूक्ष्मस्थूलभेदात् स्थूलन्यासो यथा–शिरसि ॐ अं इं उं ॠं ॡं नमः। ललाटे एं ऐं ओं औं नमः। भ्रूमध्ये ॐ यं रं लं वं ळं नमः। लम्बिकाग्रे ॐ ङं ञं णं नं मं नमः। विशुद्धौ ॐ कं चं टं तं पं नमः। हृदि ॐ खं छं ठं थं फं नमः। नाभौ ॐ घं झं ढं धं भं नमः। स्वाधिष्ठाने ॐ गं जं डं दं बं नमः। मूलाधारे शं षं सं हं नमः।) सौ० र०। ॐ अनच्कात्मने अविकृतनादाय नमो ब्रह्मरन्ध्रे। ॐ अकारात्मने शून्यनादाय नमः। ललाटे। ॐ बिन्दुद्वयात्मने स्पर्शनादाय नमः भ्रूमध्ये।* ॐ षट्कोणरेखात्मने नादनादाय नमः लम्बिकाग्रे। ॐ अर्धचन्द्रात्मने ध्वनिनादाय नमः विशुद्धौ। वृत्तात्मने बिन्दुनादाय नमः अनाहते। एकारात्मने शक्तिनादाय नमः मणिपूरके। इन्द्वा[3]त्मने बीजनादाय नमः स्वाधिष्ठाने। हंसरूपात्मने अक्षरनादाय नमः आधारे। इति मध्यमान्यासः।।

अथ वैखरीन्यासः। षडाधारं गुणत्रयेण त्रिधा विभज्य बीजत्रयसङ्गतं कृत्वा वस–बलाब्जयोस्तडिदाभं मूलवाग्भवं, डफ–कठाब्जयोरलक्तकनिभं शुद्धकामराजं, स्वरहक्षयोः चन्द्रसंनिभं शुद्धतार्तीयं शिवशक्तिबीजसङ्गतं कृत्वा न्यसेत्। तद्यथा– मूलाधारे पूर्वादिचतुर्दले (स्वाग्रादिप्रादक्षिण्येन) वंह[3]सैं, शंहसैं, षंहसैं, संहसैं। स्वाधिष्ठाने

---

१. 'हंसभरितं' ग. पाठः। २. 'बिन्दुद्वयात्मने' ग. पाठः। ३. 'हसौं क. पाठः अग्रतः सर्वत्र।

* अत्र 'बिन्दुत्रिकोणात्मने ध्वनिनादाय नमः मुखपद्मे। इत्यधिकः पाठः गः संज्ञे।

बंहसैं, भंहसैं, मंहसैं, यंहसैं, रंहसैं, लंहसैं। मणिपूरे डंहसीं, ढंहसीं, णंहसीं, तंहसीं, थंहसीं, दंहसीं, धंहसीं, नंहसीं, पंहसीं, फंहसीं। अनाहते द्वादशदलेषु पूर्वादि कंहसीं, खंहसीं, गंहसीं, घंहसीं, ङंहसीं, चंहसीं, छंहसीं, जंहसीं, झंहसीं, ञंहसीं, टंहसीं, ठंहसीं। ततो विशुद्धौ षोडशदलेषु अंहसौः आंहसौः इत्यादि अंःहसौः इत्यन्तं विन्यस्य, आज्ञायां हंहसौः, क्षंहसौः इति विन्यसेदिति वैखरीन्यासः।। (अन्तःसुधासिक्तं पद्मरागप्रभं वर्णकदम्बकं ध्यायेत्)

अथ कामकलान्यासः।* तत्र ईंकारोर्ध्वगतबिन्दुमात्मनो वक्त्रं परिकल्प्य ऐं परावक्त्राय नमः इति मुखे व्यापकत्वेन विन्यस्य, तदधः सपरार्धरूपं बिन्दुद्वययुक्तं स्तनद्वयं ध्यात्वा क्लीं सपरार्धबिन्द्वात्मकस्तनयुग्माय नमः। इति व्यापकं कृत्वा, सौः सपरार्धाभिव्यञ्जकरेखात्मयोन्यै नमः इति लिङ्गे व्यापकं, नासां ललाटं चक्षुषीं कर्णौं वदनं च मुखबिन्दौ, भुजचतुष्टयं वक्षोजद्वयं स्तनाबिन्दौ, चरणद्वयं योनिबिन्दौ ध्यात्वा, समष्टिभूतमकुलाक्षरं सर्वावयवसम्पूर्णं परमसौन्दर्यमयं कामेश्वराङ्कस्थितमात्मानं ध्यात्वायुधन्यासं कुर्यात्। ४ँ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां[1] जृम्भणकामेश्वरकामेश्वरी- बाणेभ्यो नमः स्वदक्षिणाधःकरे। ४ँ धं (थं) सम्मोहनकामेश्वरकामेश्वरीधनुर्भ्यां नमः स्ववामाधःकरे। ४ँ ओं आं ह्रीं वशीकरणकामेश्वरकामेश्वरीपाशाभ्यां नमः स्वदक्षिणोर्ध्वकरे। ४ँ क्रों क्रों स्तम्भनकामेश्वर्यङ्कुशाभ्यां नमः स्ववामोर्ध्वकरे। एंव तत्तन्मुद्राः प्रदर्श्य पञ्चदश्या त्रिर्व्यापकं कृत्वा (मातृकास्थानेषु) कलालिकान्यासं कुर्यात्[2]। ४ँ अं कामिनी त्रिपुराश्रीपादुकां पूजयामि नमः, एवं सर्वत्र। आं मोदिनी त्रि०। इं मदना त्रि०। ईं उन्मादिनी त्रि०। उं द्राविणी त्रि०। ऊं खेचरी त्रि०। ऋं घण्टिका त्रि०। ॠं कलावती त्रि०। ऌं क्लेदिनी त्रि०। ॡं शिवदूती त्रि०। एं सुभगा त्रि०। ऐं भगा त्रि०। ओं विद्येश्वरी त्रि०। औं महालक्ष्मी त्रि०। अं कौलिनी त्रि०। अंः सुरेश्वरी त्रि०। कं कुलमालिनी त्रि०। खं व्यापिनी त्रि०। गं भगावहा त्रि०। घं वागीश्वरी त्रि०। ङं वषट्कारिणी त्रि०। चं पिङ्गला त्रि०। छं भगसर्पिणी त्रि०। जं सुन्दरी त्रि०। झं नीलपताका त्रि०। ञं त्रिपुरा त्रि०। टं सिद्धेश्वरी त्रि०। ठं अमोघा त्रि०। डं रत्नमालिनी त्रि०। ढं मङ्गला त्रि०। णं भगमालिनी त्रि०। तं नित्या त्रि०। थं रौद्री त्रि०। दं व्योमेश्वरी त्रि०। धं अम्बिका त्रि०। नं अट्टहासा त्रि०। पं आप्या[3]यिनी त्रि०। फं वज्रेश्वरी त्रि०। बं क्षोभिणी त्रि०। भं शाम्भवी त्रि०। मं स्तम्भिनी त्रि०। यं अनामा

---

१. 'सां' क. पाठः २. 'अयमेव भूषणन्यासः'। ख. पाठोऽधिकः ३. 'व्यापिनी' क. पाठः

*बहिः कामकलान्यासः। तत्र कामकलाभूतस्य सबिन्दुतुर्यस्वरस्यादिबिन्दुं देवीरूपस्यात्मनः केशकर्णनेत्रनासाद्यवयवसमेतं वक्त्रं परिकल्प्य तस्याधोबिन्दुद्वयं बाहुचतुष्टयाद्यवयवसमेतं स्तनद्वयं ध्यात्वा तस्याधो हार्धकलां पादद्वयाद्यवयवसमेतां योनिं विचिन्त्य ४ँ वाग्भवकूटमुच्चार्य ईंकारस्योर्ध्वबिन्द्वात्मने श्रीमहात्रिपुरसुन्दर्याः केशाद्यवयवसमेतवक्त्राय नमः ४ँ कामकूटमुच्चार्य ईकारस्याधोबिन्दुद्वयात्मने श्रीमहात्रिपुरसुन्दर्याः बाहुचतुष्टयाद्यवयव- सहितस्तनद्वयाय नमः। ४ँ तृतीयकूटमुच्चार्य ईकारस्य हार्धकलात्मने श्रीमहात्रिपुरसुन्दर्याः पदद्वयाद्यवयवसहितयोनये नमः इति मूर्धादिकण्ठपर्यन्तं कण्ठादिनाभिपर्यन्तं नाभ्यादिपादद्वयाग्रपर्यन्तं च व्यापकत्वेन विन्यस्य, ४ँ मूलविद्यामुच्चार्य समस्तकामकलात्मने श्रीमहात्रिपुरसुन्दर्याः सर्वावयवेभ्यो नमः इति व्यापकं विन्यस्य समष्टिकामकलाभूतपरमाक्षरमय- सर्वावयवसम्पूर्णां परमसौन्दर्यवतीं कामेश्वराङ्कनिलयां सर्वाभरणसम्पन्नां देवीं स्वात्मानं ध्यायेदिति। (सौ० र०)।

त्रि०। रं रक्ता त्रि०। लं शुक्ला त्रि०। वं अपराजिता त्रि०। शं संवर्तिका त्रि०। षं विमला त्रि०। सं [1]अघोरा त्रि०। हं घोरा त्रि०। ळं बिन्दुभैरवी त्रि०। क्षं सर्वाकर्षिणी त्रि०। इति कलालिकान्यासः॥

अथ कामकलान्यासः। क्लीं [2]श्रद्धायै नमः दक्षपादे। क्लीं प्रीत्यै नमः जङ्घायां। क्लीं रत्यै नमः जानुनि। क्लीं स्मृत्यै नमः ऊरौ। क्लीं कान्त्यै नमः वक्षसि। क्लीं मनोरमायै नमः बाहौ। क्लीं मनोहरायै नमः मुखे। क्लीं मनोरथायै नमः मूर्ध्नि। एवं दक्षभागे विन्यस्य वामभागे विलोमेन। क्लीं मनोन्मन्यै नमः मूर्ध्नि। क्लीं मोदिन्यै नमः आस्ये। क्लीं दीपिन्यै नमः बाहौ। क्लीं शोषिन्यै नमः वक्षसि। क्लीं वशंकर्यै नमः ऊरौ। क्लीं राजस्यै नमः जानौ। क्लीं सुभगायै नमः जङ्घायां। क्लीं प्रियदर्शिन्यै नम पादे। इति कामकलान्यासः॥

अथ सोमकलान्यासः। सं पूषायै नमः पृष्ठवंशे। सां यशस्विन्यै नमः अंसपृष्ठे। सिं सुमनसे नमः ग्रीवापृष्ठे। सीं रत्यै[3] नमः कर्णे। सुं प्रीत्यै नमः नेत्रे। सूं धृत्यै नमः नासाविले। सृं ऋद्ध्यै नमः ललाटे। सॄं सौम्यायै नमः मस्तके। एं दक्षभागे विन्यस्य वामभागे विलोमतः। स्लृं मरीच्यै नमः मस्तके। स्लॄं अंशुमालिन्यै नमः ललाटे। सें अम्बिकायै नमः नासाबिले। सैं शशिन्यै नमः नेत्रे। सों छायायै नमः कर्णे। सौं सम्पूर्णमण्डलायै नमः ग्रीवापृष्ठे। सं तुष्ट्यै नमः अंसपृष्ठे। सः अमृतायै नमः पृष्ठवंशे। इति सोमकलान्यासः॥ ''एवं सोमकलान्याससत्राणदः परिकीर्तितः।''

अथ योगपीठन्यासः। तत्रांसद्वयोरुद्वयकल्पितपादचतुष्टयं मुखनाभिपार्श्वद्वयकल्पितगात्रचतुष्टयं योगपीठं निजदेहे ध्यात्वा न्यसेत्। मूलाधारे ४ँ महाकाला[4]य रक्तवर्णाय मण्डूकाधाराय नमः। उपरि स्वाधिष्ठानपर्यन्तं ४ँ पञ्चवक्त्रदशभुजाय रक्तकृष्णवर्णवामदक्षिणपार्श्वाय कालाग्निरुद्राय नमः। तदुपरि नाभिपर्यन्तं ४ँ बन्धूकरुचिरायै मूलप्रकृतये नमः। तदुपरि हृदयपर्यन्तं ४ँ शरच्चन्द्रप्रभायै पङ्कजद्वयधारिण्यै आधारशक्तये नमः। तदुपरि हृदय एव कूर्माय०। अनन्ताय०। वराहाय०। पृथिव्यै०। अमृतार्णवाय०। ४ँ अंआं इत्यादिक्षान्तं मातृकामुच्चार्य नवखण्डविराजिताय नवरत्नमयद्वीपाय नमः। तत्रैव नवखण्डेषु नवरत्नानि न्यसेत् ईशानादिमध्यान्तं प्रादक्षिण्यक्रमेण। ३ँ पुष्परागरत्नाय०। ३ँ नीलरत्नाय०। ४ँ वैदूर्यरत्नाय०। ३ँ विद्रुमरत्नाय०। ३ँ मौक्तिकरत्नाय०। ३ँ मरकतरत्नाय०। ३ँ वज्ररत्नाय०। ३ँ गोमेदरत्नाय०। ३ँ मध्ये पद्मरागरत्नाय०। तत्रैव ३ँ सुवर्णपर्वताय०। ३ँ नन्दनोद्यानाय०। ३ँ कल्पकोद्यानाय०। तत्रैव ३ँ वसन्तादिषड्ऋतुभ्यो नमः। पश्चिमे ३ँ इन्द्रियाश्वेभ्यो नमः। पूर्वे ३ँ इन्द्रियार्थगजेभ्यो नमः। ३ँ विचित्ररत्नभूमिकायै नमः। तत्र पश्चिमादिमध्यान्तं विलोमेन नव चक्राणि न्यसेत्। ३ँ कालचक्रेश्वरीपादुकां पूजयामि नमः। ३ँ मुद्राचक्रेश्वरी०। ३ँ मातृचक्रेश्वरी०। ३ँ रत्नचक्रेश्वरी०। ३ँ देशचक्रेश्वरी०। ३ँ गुरुचक्रेश्वरी०। ३ँ तत्त्वचक्रेश्वरी०। ३ँ ग्रहचक्रेश्वरी०। मध्ये ३ँ मूर्तिचक्रेश्वरी०। (३ँ कारणतोयपरिधये०। ३ँ माणिक्यमण्डपाय०। तस्य नैर्ऋत्यादिकोणेषु ३ँ देशरूपिणीशक्तिश्री०। ३ँ कालरूपिणीशक्तिश्री०। ३ँ अकाररूपिणीशक्तिश्री०। ३ँ शब्दरूपिणीशक्तिश्री०।) मध्ये ३ँ संगीतयोगिनीरूपिणीशक्तिश्री०। तन्मध्ये ३ँ समस्तगुप्तप्रकटयोगिनीशक्ति०। तन्मध्ये ३ँ कल्पतरुभ्यो०। तदधः ३ँ रत्नवेदिकायै०। ३ँ श्वेतच्छत्राय०। ३ँ रत्नसिंहासनाय०।

---

१. 'सं वीरा। हं अघोरा' क. पाठः २. 'सिद्धायै' क. पाठः ३. 'रेवत्यै' क. पाठः ४. 'कायाय' ग. पाठः।

एवं हृदये विन्यस्य रत्नसिंहासनत्वेन स्वदेहं ध्यायन् सिंहासनदेवता न्यसेत्। दक्षांसें ॐ रक्तवर्णाय वृषभरूपाय धर्माय नमः। वामांसे ॐ श्यामवर्णाय सिंहरूपाय ज्ञानाय नमः। वामोरौ ॐ पीतवर्णाय भूताकाराय वैराग्याय नमः। दक्षोरौ ॐ इन्द्रनीलप्रभाय गजरूपाय ऐश्वर्याय नमः। एते सिंहासनपादरूपिण:। मुखे ॐ अधर्माय नमः। वामपार्श्वे ॐ अज्ञानाय नमः। नाभौ ॐ अवैराग्याय नमः। दक्षपार्श्वे ॐ अनैश्वर्याय नमः। एते सिंहासनगात्ररूपिण:। मध्ये ॐ मायायै नमः। ॐ विद्यायै नमः। तदुपरि आनन्दकन्दाय नमः। ॐ संविन्नालाय०। ॐ प्रकृतिमयपत्रेभ्य:। ॐ विकृतिमयकेसरेभ्यो०। ॐ पञ्चाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै०। तस्यां ॐ अं अर्कमण्डलाय०। ॐ उं सोममण्डलाय०। ॐ रं वह्निमण्डलाय०। ॐ सं सत्त्वाय०। ॐ रं रजसे०। ॐ तं तमसे०। तदुपरि पूर्वादिदिक्षु मध्ये च ॐ ज्ञानतत्त्वात्मने०। ॐ मायातत्त्वात्मने०। ॐ कलातत्त्वात्मने०। ॐ विद्यातत्त्वात्मने०। मध्ये ॐ परतत्त्वात्मने०। तत्र ॐ आं आत्मने०। ॐ अं अन्तरात्मने०। ॐ पं परमात्मने०। ॐ ह्रीं ज्ञानात्मने०। तत: केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च प्रादक्षिण्येन नव शक्तीर्न्यसेत्। ॐ दूतर्यम्बाश्री०। ॐ सुन्दर्यम्बा०। ॐ सुमुख्यम्बा०। ॐ विरू[1]पाम्बा०। ॐ विमलाम्बा०। ॐ अन्तर्यम्बा०। ॐ बदर्यम्बा०। ॐ पुरन्दर्यम्बा०। मध्ये ॐ पुष्पम[2]र्दिन्यम्बा०। तदुपरि ॐ क्लीं सर्वशक्तिकमलासनाय नमः। इति पीठमन्त्रं विन्यस्य तदुपरि श्रीचक्रं ध्यात्वा, समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीश्रीचक्रदेवतापादुकाभ्यो नमः। इति व्यापकत्वेन विन्यस्य, हृदि त्रिकोणं विभाव्य, तन्मध्ये ॐ बालामूलपञ्चदशीविद्यामुच्चार्य त्रिकोणरक्तवर्णोड्यानपीठश्री०। त्रिकोणस्याग्रे ॐ बालामूलयोर्वाग्भवद्वयमुच्चार्य, चतुरस्रपीतवर्णकामरूपपीठश्री०। दक्षकोणे ॐ कामराजद्वयमुच्चार्य, अर्धचन्द्रनिभश्वेतवर्णजालन्धरपीठश्री०।* वामकोणे ॐ शक्तिबीजद्वयमुच्चार्य, षड्बिन्दुलाञ्छितवृत्तधूम्रवर्णपूर्णगिरिपीठश्री०। इति चतुष्पीठं विन्यस्य, पुनर्बैन्दवे आग्नेयादिकोणेषु ४ँ लांह्लां ब्रह्मणे पृथिव्यधिपतये नमो ब्रह्मप्रेतासनश्री०। ४ँ वांह्रीं विष्णवे अपामधिपतये नमो विष्णुप्रेतासनश्री०। ४ँ रांह्रूं रुद्राय तेजोधिपतये नमो रुद्रप्रेतासनश्री०। ४ँ यांह्रैं ईश्वराय वाय्वधिपतये नम ईश्वरप्रेतासनश्री०। ४ँ ह्सौ वियदधिपतये पञ्चवक्त्राय सदाशिवाय नमः सदाशिवमहाप्रेतपद्मासनश्री०। इति पञ्चप्रेतासनं विन्यस्य, तदुपरि रक्तपद्मकर्णिकायां चतुरस्रग[3]र्भषट्कोणपीठे षडासनानि विन्यसेत्। ४ँ अंआंसौ: त्रिपुरासुधार्णवासनाय नमः। ४ँ ऐंक्लींसौ: त्रिपुरेश्वरीपीताम्बुजासनाय नमः। ४ँ ह्रीं क्लीं सौ: त्रिपुरसुन्दरीदेव्यात्मासनाय नमः। ४ँ हैं हक्लीं ह्सौ: त्रिपुरवासिनीसर्वचक्रासनाय नमः। ४ँ ह्सैं ह्सक्लीं ह्सौ: त्रिपुराश्रीसर्वमन्त्रासनाय नमः। ४ँ ह्रींक्लींब्ले त्रिपुरमालिनीसाध्यसिद्धासनाय नमः। इति षडस्रेषु षडासनानि विन्यस्य, मध्ये चतुरस्रे चतुष्पीठसहितं चतुरासनं न्यसेत्। ईशाने ॐ वाग्भवद्वयमुच्चार्य, अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मने जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मकरुद्रशक्तिश्रीकामेश्वरीदेवीह्रींक्लींसौ: त्रिपुरसुन्दरीदेव्यात्मासनाय नमः। वायव्यकोणे ॐ कामराजद्वयमुच्चार्य,

---

१. 'विश्वरूपाम्बा' क. पाठ:। २. 'भद्रिण्यम्बा' क. पाठ:। ३. 'गर्भित' ग. पाठ:।

* उड्यानं चतुरस्रं स्यात् कामरूपं तु वर्तुलम्। जालन्धरं च चन्द्रार्धं त्र्यस्रं पूर्णगिरिर्भवेत्।। इत्याद्यन्यत्र प्रोक्तम्।

सूर्यचक्रे जालन्धरपीठे [1]षष्ठेशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्णुशक्तिश्रीवज्रेश्वरी देवी हैंहक्लींह्सौः त्रिपुरवासिनीसर्वचक्रासनाय नमः। नैर्ऋतकोणे ३ँ शक्तिबीजद्वयमुच्चार्य, सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालनीदेवी ह्सैं ह्सक्लीं ह्सौः त्रिपुराश्रीसर्वमन्त्रासनाय नमः। आग्नेये ३ँ समस्तद्वयमुच्चार्य, ब्रह्मचक्रे श्रीमदुड्यानपीठे चर्यानाथात्मके तुरीयतुरीयातीतदशाधिष्ठायके परब्रह्मशक्त्यात्मकश्रीत्रिपुरसुन्दरीदेवी ह्रीक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनाय नमः। मध्ये त्रितारबालापञ्चदशीमुच्चार्य, श्रीमहात्रिपुरसुन्दरीसर्वमन्त्रासनाय नमः। इति विन्यस्य, ४ँ समस्तमातृकामुच्चार्य, शिवशक्तिसदाशिवेश्वरशुद्धविद्या-मायाकलाविद्यारागकालनियतिपुरुष-प्रकृत्यहङ्कारबुद्धिमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्श-रूपरसगन्धाकाशवायुवह्निसलिलपृथिव्यात्मने श्रीमहात्रिपुरसुन्दरीयोगपीठात्मने नमः। इति व्यापकं कृत्वा, मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीपादुकां पूजयामि नमः। इति षट्त्रिंशत्तत्त्वात्मने देहमये महायोगपीठे स्वेष्टदेवतां हृदि विन्यसेत्। ''इति देहमये पीठे चिन्तयेत्परदेवताम्।'' इति योगपीठन्यासः।

अथ षोढान्यासः—अस्य गणेशन्यासस्य गणक ऋषिः, निचृद्गायत्री छन्दः, श्रीगणेशो देवता, न्यासे विनियोगः। ४ँ गां शक्त्यानन्दाय हृदयाय नमः। ४ँ श्रींगीं मुखेन्दुरूपाय शिरसे स्वाहा। ४ँ ह्रूंगूं राजच्चन्द्राय शिखाय०। ४ँ क्लींगैं मदोत्क[2]टाय कवचाय०। ४ँ ग्लौंगौं प्रमोदाय नेत्रत्र०। गंगः सर्वमन्त्रात्मने आमोदाय अस्त्राय०। इति करषडङ्गन्यासं कृत्वा ध्यायेत्।

तरुणारुणसङ्काशान् गजवक्त्रांस्त्रिलोचनान्। पाशाङ्कुशवराभीतिलसच्छक्तिसमन्वितान्।।
एवं ध्यात्वैव पञ्चाशच्छक्तियुग्गणपान् न्यसेत्। ....।।

वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्। शक्तीनां वामकरे कमलम्।

(तास्तु सिन्दूरवर्णाभाः सर्वालङ्कारशोभिताः। एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः।।)

४ँ गंअं विघ्नेशनाथश्रीअम्बाभ्यां नमः। एवं सर्वत्र। आं विघ्नराजह्रीभ्यां०। ईं विनायकपुष्टि०। ईं शिवोत्तमशान्ति०। उं विघ्नकृत्सरस्वती०। ऊं विघ्नह[3]द्रति०। ऋं विघ्नराट्[4]स्वाहा। ॠं गणनायकमेधा०। लृं एकदन्तभूति०। लॄं द्विदन्तकामिनी०। एं गजवक्त्र[5]मोहिनी०। ऐं निरञ्जनजटा०। ओं कपर्दितीव्रा०। औं दीर्घमुखज्वालिनी०। अं शङ्कुकर्णनन्दा०। अः वृषध्वजयशस्विनी०। कं गणनाथकामरूपिणी०। खं गजेन्द्रोग्रा[6]०। गं शूर्पकर्णतेजोवती०। घं त्रिलोच[7]नसती०। ङं लम्बोदरविघ्नेशी०। चं महानन्द[8]स्वरूपिणी०। छं चतुर्मूर्तिकामदा०। जं सदाशिवमदविह्वला०। झं आमोदकान्ति०। ञं दुर्मुखधूम्रा०। टं सुमुखसिता०। ठं प्रमोदरमा०। डं एकपादमहिषी०। ढं द्विजिह्वनाथध्वजिनी। णं शूरविकर्णा०। तं वीरभ्रुकुटी०। थं षण्मुखलज्जा०। दं वरददीर्घघोणा०। धं मत्तवाहनधनुर्धरा०। नं वक्रतुण्डपाशिनी०। पं द्विरण्डरात्रि०। फं सेनानीकामान्धा०। वं ग्रामणीशशिप्रभा०। भं मत्तलोलाक्षी०। मं विमत्तचञ्चला०। यं मत्तवाहनदिति०। रं जटिसुभगा०। लं मुण्डिदुर्भगा०। वं खड्गिशिवा०। शं वरेण्यदुर्गा०[9]। षं वृषकेतुभगिनी०। सं भक्ष्यप्रियभोगिनी०। हं गणेशगणप्रिया०। ळं मेघनादकालिका०। क्षं गणेश्वरकालजिह्वा०। इति गणेशन्यासः।।

---

१. 'षष्ठीश' क. पाठः। २. 'मदनोत्कटाय' क. पाठः। ३. 'हर्तृरति' ग. पाठः। ४. 'विघ्नेशस्वाहा' ख. पाठः। ५. 'मोदिनी' ग. पाठः। ६. 'गजेन्द्रोमा' ग. पाठः। ७. 'त्रिनेत्रसती' ग. पाठः। ८. 'नाद' क. पाठः। ९. 'गर्भा' ग. पाठः।

अथ ग्रहन्यासः। ॐ अं १६ माणिक्यात्मने सूर्याय भगवते रेणुकाम्बायै नमः हृदयाधः। ॐ यरंलवं मुक्तात्मने चन्द्राय भगवते अमृताम्बायै नमः ललाटे। ॐ कं ५ विद्रुमात्मने लोहिताय मङ्गलाय भगवते [1]मेधाम्बायै नमः नेत्रत्रये। ॐ चं ५ वज्रात्मने शुक्राय भगवते [2]ज्ञानाम्बायै नमः हृदये। ॐ टं ५ मरकतात्मने बुधाय भगवते यशस्विन्य[3]म्बायै नमः हृदयोपरि। ॐ तं ५ पुष्परागात्मने बृहस्पतये भगवते शाङ्कर्यम्बायै[4] नमः कण्ठे। ॐ पं ५ नीलात्मने शनैश्चराय भगवते शक्त्यम्बायै नमः नाभौ। ॐ शं ४ गोमेदात्मने राहवे भगवते कृष्णाम्बायै नमः मुखे। ॐ ळंक्षं वैदूर्यात्मभ्यः केतुभ्यो भगवद्भ्यो धूम्राम्बायै नमः पादयोः।

कामरूपधरान् सर्वान् सर्वाभरणभूषितान्। वामोरुन्यस्तहस्तांश्च दक्षहस्ताभयाव[5]हान्।।
(शक्तयोऽपि तथा ध्येया वराभयकराम्बुजाः। स्वस्वप्रियाङ्कनिलयाः सर्वाभरणभूषिताः।।)

भावयेदिति शेषः। इति ग्रहन्यासः।।

अथ नक्षत्रन्यासः। ॐ अंआं अश्विन्यै नमो भाले। ॐ इंईं भरण्यै नमः दक्षनेत्रे। ॐ उंऊं कृत्तिकायै नमः वामनेत्रे। ॐ ऋंॠंऌंॡं रोहिण्यै नमः दक्षकर्णे। ॐ एं मृगशिरसे नमः वामकर्णे। ॐ ऐं आर्द्रायै नमः दक्षनासापुटे। ॐ ओंऔं पुनर्वसवे नमः वामनासापुटे। ॐ कं पुष्याय नमः कण्ठे। ॐ खंगं अश्लेषायै नमः दक्षस्क[6]न्धे। ॐ घंङं मघायै नमः वामस्कन्धे[7]। ॐ चं पूर्वाफाल्गुन्यै नमः दक्षकूर्परे[8]। ॐ छंजं उत्तराफाल्गुन्यै नमः वामकूर्परे[9]। ॐ झंञं हस्ताय नमः दक्षमणिबन्धे। ॐ टंठं चित्रायै नमः वाममणिबन्धे। ॐ उं स्वात्यै नमः दक्षहस्ते। ॐ ढंणं विशाखायै नमः वामहस्ते। ॐ तंथंदं अनुराधायै नमः नाभौ। ॐ धं ज्येष्ठायै नमः दक्षकट्यां। ॐ नंपंफं मूलायै नमः वामकट्यां। ॐ बं पूर्वाषाढायै नमः दक्षोरौ। ॐ भं उत्तराषाढायै नमः वामोरौ। ॐ मं श्रवणाय नमः दक्षजानुनि। ॐ यरं धनिष्ठायै नमः वामजानुनि। ॐ लं शतभिषायै नमः दक्षजङ्घायां। ॐ वंशं पूर्वाभाद्रपदायै नमः वामजङ्घायां। ॐ षंसंहं उत्तराभाद्रपदायै नमः दक्षपादे। ॐ अंअंःळंक्षं रेवत्यै नमः वामपादे।

ज्वलत्कालानलप्रख्या वरदाभयपाणयः। नतिपाण्योऽश्विनीपूर्वा ध्येया मुक्ताविभूषणा[5]।।

दक्षाद्यधःकरयोर्वराभये, ऊर्ध्वयोर्नतिमुद्रे। इत्यायुधध्यानम्। इति नक्षत्रन्यासः।।

अथ योगिनीन्यासः। (१) विशुद्धस्थाने षोडशदलकमलकर्णिकायां ॐ डांडींडूं डमलवरयूं डाकिनि मां रक्ष २ मम त्वग्धातुं रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृहण २ ऐं घोरे देवि ह्रींसः परमघोरे हूं घोररूपे एह्येहि नमः चामुण्डे डरलकसहैं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि नमः अं १६ विशुद्धपीठस्थे विशुद्धडाकिनि विशुद्धनाथदेवयुग्मश्रीपादुकां पूजयामि नमः। इत्यङ्गुष्ठानामिकाभ्यां विन्यस्य, तद्दलेषु ॐ अं अमृतायै नमः। एवं आं आकर्षिण्यै। इं इन्द्राण्यै। ईं ईशान्यै। उं उमायै। ऊं ऊर्ध्वकेश्यै[10]। ऋं ऋद्धिदायै[11]। ॠं ॠषायै। ऌं ऌकारायै[12]। ॡं ॡषायै। एं एकपादायै। ऐं ऐश्वर्यात्मिकायै। ओं ओंकारिण्यै। औं ओषधात्मिकायै। अं अम्बिकायै। अंः अक्षरात्मिकायै। इति

---

[1] 'धामाम्बायै' ग. पाठः। [2] 'शाङ्कर्यम्बायै' ख. पाठः। [3] 'ज्ञानरूपाम्बायै' ख. पाठः। [4] 'यशस्विन्यम्बायै' ख. पाठः। [5] भयप्रदान्' क. पाठः। [6] 'दक्षभुजे' ग. पाठः। [7] 'वामभुजे' ग. पाठः। [8] 'दक्षहस्ते' ग. पाठः। [9] 'वामहस्ते' ग. पाठः। [10] 'केशिन्यै' ख. पाठः। [11] 'ऋद्ध्यै' ख. पाठः। [12] 'ऌतायै' 'ऌं ऌप्यायै। एं एकपादिन्यै' ग. पाठः।

प्रादक्षिण्येन विन्यस्य ध्यायेत्।

ग्रीवाकूपे विशुद्धे नृपदलकमले रक्तवर्णां त्रिनेत्रां
सत्खट्वाङ्गं त्रिशूलं चषकमपि[1] महाचर्म सन्धारयन्तीम्।
वक्त्रैणैकेन युक्तां पशुजनभयदां पायसान्ने प्रसक्तां
त्वक्स्थां वन्देऽमृताद्यैः परिवृतवपुषं डाकिनीं वीरवन्द्याम्* ।।

दक्षोर्ध्वाधः शूलखट्वाङ्गे, वामोर्ध्वाधःखेटचषके। इत्यायुधध्यानम्।

अथामृतादिशक्तीनां डाकिनीसदृशं वपुः। तत्समानायुधादीनि न्यासपूजनचिन्तने।।

(२) ततोऽनाहतचक्रे हृदये द्वादशदलकमलकर्णिकायां, ४ँ रांरींरूं रमलवरयूं राकिणि मां रक्ष २ मम रक्तधातुं रक्ष २ सर्वसत्त्ववशङ्करीत्यादि शेषं समानं। कं १२ अनाहतपीठस्थे अनाहतराकिणि अनाहतनाथदेवयुग्मश्रीपादुकां पूजयामि नमः। इति विन्यस्य, तद्दलेषु ४ँ कं कालरात्र्यै नमः। एवं खं खातीतायै। गं गायत्र्यै। घं घण्टाधारिण्यै। ङं ङार्णात्मिकायै। चं चण्डायै। छं छायाजै। जं जयायै। झं झांकारिण्यै। ञं ञांर्णात्मिकायै। टं टंकहस्तायै। ठं ठंकारिण्यै। इति विन्यस्य ध्यायेत्।

अथ ध्यानम्—

हृत्पद्मे भानुपत्रे द्विवदनविलसद्दंष्ट्रिर्णी श्यामवर्णा—
मब्जं शूलं कपालं डमरुमपि भुजैर्धारयन्तीं त्रिनेत्राम्।
रक्तस्थां कालरात्रिप्रभृतिपरिवृतां शुद्धभक्ते प्रसक्तां
श्रीमद्वीरेन्द्रवन्द्यामभिमत[3]फलदां भावयेद्राकिणीं ताम्☛ ।।

दक्षाधःकरमारभ्य दक्षोर्ध्वकरपर्यन्तमायुधध्यानम्।

कालरात्र्यादिका रक्ताश्चतुर्हस्ता नमस्क्रियाम्। द्वाभ्यां भुजाभ्यां दधतीर्द्वाभ्यां हेतिद्वयं क्रमात्।।
कपालासी वराभीती पुस्तकाक्षरमालिके। घण्टाखड्गौ सृणिगुणौ खड्गखेटौ वराभये ।।
कदलीकलशौ शूलवेतालौ वरदाभये। कुठारहरिणौ पश्चात् त्रिशूलडमरू अपि ।।

(३) मणिपूरकचक्रे नाभौ दशदलकमलकर्णिकाभ्यां, ४ँ लांलींलूं लमलवरयूं लाकिनि मां रक्ष २ मम मांसधातुं रक्ष २ सर्वसत्त्ववशंकरि—इत्यादि शेषं प्राग्वत्, डं १० मणिपूरकपीठस्थे मणिपूरकलाकिनि मणिपूरकनाथदेवयुग्मश्रीपादुकां पूजयामि नमः। इति विन्यस्य तद्दलेषु ४ँ डं डामर्यै नमः। एवं ढं ढङ्कारिण्यै०। णं णका[4]रिण्यै०। तं तामस्यै०। थं

---

*सौभाग्यरत्नाकरे—रक्तां रक्तत्रिनेत्रां पशुजनभयकृच्छूलखट्वाङ्गहस्तां वामे खेटं दधानां चषकमपि सुरापूरितं चैकवक्त्राम्। अत्युग्रामुग्रदंष्ट्रामरिकुलमथनीं पायसान्ने प्रसक्तां कण्ठस्थानेऽमृताद्यैः परिवृतवपुषं भावयेत् डाकिनीं ताम्।।

☛श्यामां शूलाब्जहस्तां डमरुकसहितं तीक्ष्णचक्रं वहन्तीं द्व्यास्यां रक्तत्रिनेत्रां भ्रुकुटिवलिलसद्दष्टदन्तप्रभाभिः। दीप्तास्यां देवदेवीं हृदयनिलयगां रक्तधात्वेकनाथां शुद्धान्नेषु प्रसक्तां मधुमदमुदितां चिन्तयेद्राकर्णीं ताम्।। (सौ० र०)

१. 'त्रिशिखमपि' ग. पाठः। २. 'ज्ञानरूपिण्यै' ग. पाठः। ३. 'मधुमदमुदितां' ख. पाठः। ४. 'णामिन्यै' ग. पाठः।

स्थापिन्यै[1]०। दं दाक्षायण्यै०। धं धात्र्यै०। नं नन्दा[2]यै०। पं पार्वत्यै०। फं फट्वारिण्यै०। इति विन्यस्य ध्यायेत्।

नाभौ दिक्पत्रपद्मे त्रिवदनविलसत्त्रीक्षणां कृष्णवर्णां
शक्तिं दम्भोलिदण्डौ वरदमपि भुजैर्धारयन्तीं महोग्राम्।
डामर्याद्यैश्च वीतां पशुजनभयदां मांसधात्वेकनिष्ठां
गौडान्ने सक्तचित्तां सकलसुखकरीं संस्मरेल्लाकिनीं ताम्❁ ।।

लाकिन्या: कथितायास्तु दशसंख्या मरीचय:। कपालशूलधारिण्य: कृष्णाश्च नतिसंयुता:।।
किरीटहारकेयूरकाञ्चीनूपुरभूषिता:। ....।।

(४) स्वाधिष्ठानचक्रे[3] षड्दलकमलकर्णिकायां ४ँ कांकींकूं कमलवरयूं काकिनि मां रक्ष २ मम मेदोधातुं रक्ष २ शेषं पूर्ववत्, बं ६ स्वाधिष्ठानपीठस्थे स्वाधिष्ठानकाकिनि स्वाधिष्ठाननाथदेवयुग्मश्री० इति विन्यस्य, तद्दलेषु ४ँ बं बन्धिन्यै नम:। एवं भं भद्रकाल्यै०। मं मायायै०। यं यशस्विन्यै०। रं रक्षायै[4]०। लं लम्बोष्ठ्यै[5]०। इति विन्यस्य ध्यायेत्।

स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां
पीताभां धारयन्तीं त्रिशिखसृ[6]णिकपालाभयान्यात्तगर्वाम्।
मेदोधातु[7]प्रतिष्ठामलिमदमुदतां बन्धिनीत्यादिवीतां
दध्यन्ने सक्तचित्तामभिमतफलदां काकिनीं भावयेत्ताम्।।

दक्षोर्ध्वकरमारभ्य दक्षाध:करपर्यन्तमायुधध्यानम्। ''बन्धिन्याद्यास्तु पीताभा वराभीनतिसंयुता:''।।

(५) मूलाधारचक्रे चतुर्दलकमलकर्णिकायां, ४ँ सांसींसूं समलवरयूं साकिनि मां रक्ष २ मम अस्थिधातुं रक्ष २ शेषं प्राग्वत्, वंशंषंसं मूलाधारपीठस्थे मूलाधारसाकिनि मूलाधारनाथदेवयुग्मश्री० इति विन्यस्य, तद्दलेषु ४ँ वं वरदायै नम:। एवं शं श्रियै०। षं षण्डायै०। सं सरस्वत्यै०। इति विन्यस्य ध्यायेत्।

मूलाधारस्थपद्मे श्रुतिदललसिते पञ्चवक्त्रां त्रिनेत्रां
स्वर्णाभामस्थिसंस्थां सृणिमपि कमलं पुस्तकं ज्ञानमुद्राम्।
बिभ्राणां बाहुदण्डै: सुललितवरदाद्याभिवीतां मनोज्ञां
मुद्रान्ने सक्तचित्तां मधुमदमुदितां भावयेत् साकिनीं ताम्☼ ।।

❁कृष्णां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां वज्रं शक्तिं च दण्डाभयवरददरीर्दक्षवामे दधानाम्। ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिके लाकिनीं तां मांसस्थां गौडभक्तोत्सुकहृदयवतीं विन्यसेत् साधकेन्द्र:।। दक्षाद्यूर्ध्वयोराद्ये, तदाद्यध:स्थयोरन्ये, तदध:स्थयोरपरे इत्यायुधध्यानम्। (सौ० र०)

☼देवीं ज्योति:स्वरूपां त्रिनयनविलसत्पञ्चवक्त्रां सुदंष्ट्रां हस्ताभ्यामिक्षुचापं सृणिमपि दधतीं पुस्तकं ज्ञानमुद्राम्। मूलाधारस्थपद्मे निखिलपशुजनोन्मादिनीमस्थिसंस्थां मुद्रान्नप्रीतियुक्तां मधुमदमुदितां भावयेच्छाकिनीं ताम्।। वामाद्यूर्ध्वयोराद्ये, तदध:स्थयोरन्ये इत्यायुधध्यानम्। (सौ० र०)

१. 'स्थामन्यै' क. पाठ:। २. 'नन्दिन्यै' क. पाठ:। ३. 'स्वाधिष्ठानेलिङ्गचक्रे' ग. पाठ:। ४. 'रं रक्तायै' तथा 'रमायै' ख.पाठ:। ५. 'लम्बोदर्यै' क. पाठ:। ६. 'गुण' ख. पाठ:। ७. 'धातौ' क. पाठ:।

रक्तपीतासितश्वेताश्चतस्त्रो वरदादय:। नत्यक्षमालावरदैर्विराजितचतुर्भुजा:।।

(६) भ्रूमध्ये आज्ञाचक्रे द्विदलकमलकर्णिकायां, ४ँ हां हीं हूं हमलवरयूं हाकिनि मां रक्ष २ मम मज्जाधातुं रक्ष २ सर्वसत्त्वेति प्राग्वत्, हं क्षं आज्ञापीठस्थे आज्ञाहाकिनि आज्ञानाथदेवयुग्मश्री० इति विन्यस्य, तद्दलयो: ४ँ हं हंसवत्यै नम:। ४ँ क्षं क्षमावत्यै नम:। इति विन्यस्य ध्यायेत्।

भ्रूमध्ये बिन्दुपद्मे द्विदलसुललिते शुक्लवर्णां कराब्जै-
बिंभ्राणां ज्ञानमुद्रां डमरुकसहि[1]ताक्षमालां कपालम्।
षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्तां
हारिद्रान्ने प्रसक्तां सकलसुखकरीं हाकिनीं भावयेत्ताम्।।

दक्षाद्यूर्ध्वयोराद्ये, तदध:स्थयोरन्ये। इत्यायुधध्यानम्।

श्वेता हंसवती ध्येया त्रिशूलवरधारिणी। रक्तां क्षमा वराभीतिनतिमुद्रालसत्करा।

(७) ब्रह्मरन्ध्रे सहस्रदलकमलकर्णिकायां, यां यीं यूं यमलवरयूं याकिनि मां रक्ष २ मम शुक्रधातुं रक्ष २ सर्वसत्त्वेत्यादि पूर्ववत्, ४ँ अं ५० ब्रह्मरन्ध्रपीठस्थे ब्रह्मरन्ध्रयाकिनि ब्रह्मरन्ध्रनाथदेवयुग्मश्री० इति विन्यस्य, तद्दलेषु ४ँ अं अमृतायै नम:। इत्यादि क्षमावत्यन्तं न्यसेत्। अथ ध्यानम्।

मुण्डव्योमस्थपद्मे दशशत[2]दलके याकिनीं भैरवीं ता-
मक्षान्ताढ्यां[3] समस्तायुधलसितकरां सर्ववर्णां समष्टिम्।
डादीनां सर्ववक्त्रां सकलसुखकरीं सर्वधातुस्थरूपां
सर्वान्ने सक्तचित्तां परशिवरसिकां भावयेत् सर्वरूपाम्।।

इति योगिनीन्यास:।।

अथ राशिन्यास:। ४ँ अं आं इं ईं मेषराशये नम: दक्षपादे। ४ँ उं ऊं वृषराशये नम: दक्षवृषणे। ४ँ ऋं ॠं ऌं ॡं मिथुनराशये नम: दक्षकुक्षौ। ४ँ एं ऐं कर्कटराशये नम: दक्षोरसि। ४ँ ओं औं सिंहराशये नम: दक्षकरे। ४ँ अं अ: शं षं सं हं कन्याराशये नम: दक्षशिरसि। ४ँ कं ५ तुलाराशये नम: वामशिरसि। ४ँ चं ५ वृश्चिकराशये नम: वामकरे। ४ँ टं ५ धनूराशये नम: वामोरसि। ४ँ तं ५ मकरराशये नम: वामकुक्षौ। ४ँ पं ५ कुम्भराशये नम: वामवृषणे। ४ँ यं रं लं वं ळं क्षं मीनराशये नम: वामपादे।।

स्वस्वनामसमाकारा: कन्याकुम्भौ समाकृती। क्रमाद् रक्तश्वेतहरित्पाटलाधूम्रपाण्डुरा:।।
चित्रकृष्णस्वर्णपिङ्गकर्पूरस्वच्छकान्तय:। ....।।

इति राशिन्यास:।।

अथ पीठन्यास:, मातृकास्थानेष्वेव। ४ँ अं कामरूपपीठाय नम: शिरसि। ४ँ आं वाराणसी०। इं नेपाल०। ईं पौण्ड्रवर्धन०। उं पुर[4]स्थिर०। ऊं कान्यकुब्ज०। ऋं पूर्णगिरि०। ॠं अर्बुद०। ऌं आम्रातकेश्वर०। ॡं एकाम्र०। एं तिस्रोत:पी०। ऐं का[5]मकोट०। ओं कैलास०। औं भृगुनगर०। अं केदार०। अ: चन्द्रपुर०। कं श्रीपीठ०। खं एकवीर०।

१.'कमले' ग.पाठ:। २.'सकलदलयुते'.ग.पाठ:। ३.'अक्षाख्यातां' क.पाठ:। ४.'परस्थिति'। ५.'देवीकोट' ग.पाठ:।

गं जालन्धर०। घं मालव०। ङं कुलान्तक०। चं देवीकोट०। छं गोकर्ण०। जं मारुतेश्वर०। झं अट्टहास०। ञं विरज०। टं राज[1]गृह०। ठं महापथ०। डं कोल्हापुर०। ढं फलापुर०। णं ओंकार०। तं जयन्तिका०। थं उज्जयिनी०। दं विचित्रक०। धं क्षीर[2]पुर०। नं हस्तिनापुर०। पं उड्डीश०। फं प्रयाग०। वं विश्वपुर०। भं मायापुर०। मं जलेश्वर०। यं मलयगिरि०। रं श्रीगिरि०। लं मेरुगिरि०। वं गिरिवर०। शं महेन्द्रगिरि०। षं वामनपुर०। सं हिरण्यपुर०। हं महालक्ष्मीपुर०। ळं उड्यान०। क्षं छायाछत्रपीठाय नमः। इति पीठन्यासः।।

एते पीठाः समादिष्टा मातृकारूपमास्थिताः। एवं षोढा पुरा कृत्वा श्रीचक्रन्यासमाचरेत्।।
यः षोढान्यस्तगात्रस्तु स स्वयं परमेश्वरः। षोढान्यासविहीनं यं प्रणमेदेष पार्वति।।
सोऽचिरान्मृत्युमाप्नोति नरकं प्रतिपद्यते। नास्त्यस्य पूज्यो लोकेषु पितृमातृमुखो जनः।।

(तथा मत्स्यपुराणे–

प्रयागे ललिता देवी विन्ध्ये विन्ध्यनिवासिनी। वाराणस्यां विशालाक्षी तारा किष्किन्धपर्वते।।)

इति षोढान्यासः।।

अथ श्रीचक्रन्यासः।

श्रीमत्त्रिपुरसुन्दर्याश्चक्रन्यासं शृणु प्रिये। यन्न कस्यचिदाख्यातं तनुशुद्धिकरं परम्।।

स्वहृत्पीठे बिन्दुमये परितस्त्रिकोणे यथाविधि कामकलोक्तप्रकारेण ध्यात्वा, तत्र देवीं मानसोपचारैः सम्पूज्य, वाङ्मायाकमलाबीजान्ततो बालां समुद्धरेत्। ऐं ह्रीं श्रीं ऐं क्लीं सौः समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीश्रीपादुकाभ्यो नमः। इति त्रिधा व्यापकं कृत्वा, आत्मानं कामकलास्वरूपमेव भावयन् चक्रन्यासं कुर्यात्। ॐ त्रैलोक्यमोहनचक्राय नमः, चतुरस्राद्यरेखायै नमः, इति सर्वाङ्गे व्यापकं। ॐ अणिमासिद्धिश्रीपादुकां पूजयामि नमः दक्षांसपृष्ठे। ॐ लघिमासिद्धि० दक्षकराग्रे। ॐ महिमासिद्धि० दक्षजानुनि। ॐ ईशित्वसिद्धि० दक्षपादाग्रे। ॐ वशित्वसिद्धि० वामपादाग्रे। ॐ प्राकाम्यसिद्धि० वामजानुनि। ॐ भुक्तिसिद्धिश्री० वामकराग्रे। ॐ इच्छासिद्धि० वामांसपृष्ठे। ॐ रससिद्धि० शिरसि। ॐ मोक्षसिद्धि० शिरःपृष्ठे। इति सिद्धिदशकं विन्यस्य, चतुरस्रमध्यरेखायै नमः, इति व्यापकं कृत्वा, ॐ आं ब्रह्माणीश्री० पादाङ्गुष्ठयोः। ॐ ईं माहेश्वरीश्री० दक्षपार्श्वे ॐ। ऊं कौमारीश्री० शिरसि। ॐ ॠं वैष्णवीश्री० वामपार्श्वे। ॐ ॡं वाराहीश्री० वामजानुनि। ॐ ऐं इन्द्राणीश्री० दक्षजानुनि। ॐ औं चामुण्डाश्री० दक्षांसे। ॐ अंः महालक्ष्मीश्री० वामांसे। चतुरस्रान्तरेखायै नमः, इति व्यापकं कृत्वा, ॐ द्रां सर्वसङ्क्षोभिणीमुद्राशक्तिश्री० पादाङ्गुष्ठद्वये। द्रीं सर्वविद्राविणीमुद्राशक्तिश्री० दक्षपार्श्वे। क्लीं सर्वाकर्षिणीमुद्राशक्तिश्री० शिरसि। ब्लूं सर्ववशंकरीमुद्राशक्तिश्री० वामपार्श्वे। सः सर्वोन्मादिनीमुद्राशक्तिश्री० वामजानुनि। क्रों सर्वमहाङ्कुशामुद्राशक्तिश्री० दक्षजानुनि। हसखफ्रें सर्वखेचरीमुद्राशक्तिश्री० दक्षांसे। ऐं क्लीं सौः सर्वत्रिखण्डामुद्राशक्तिश्री० वामांसे। हसौ सर्वबीजमुद्राशक्तिश्री० शिरसि। ऐं सर्वयोनिमुद्राशक्तिश्री० पादयोः। एवं विन्यस्य, ॐ अं आं सौः त्रिपुराचक्रेश्वरीनित्याश्रीपादुकां पूजयामि। इति हृदये विन्यस्य, एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्राः ससिद्धयः सायुधाः

---

१. 'ग्रहराज' ग. पाठः। २. 'क्षीरकपुर' क. पाठः। ३. 'लं गिरिवर वं मे गिरि' क. ग. पाठः।

सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजितास्तुष्टाः सन्तु। द्रामिति सर्वसङ्क्षोभिणीमुद्रां प्रदर्शयेत्। इति प्रथमावरणन्यासः।।

अथ द्वितीयावरणन्यासः। ॐ सर्वशा[1]पूरकचक्राय नमः। ॐ षोडशदलकमलचक्राय नमः। इति व्यापकं विन्यस्य, ॐ अं कामाकर्षिणीनित्याकलाश्री० दक्षश्रोत्रपृष्ठे। ॐ आं बुद्ध्याकर्षिणीनित्या० दक्षांसपृष्ठे। ॐ इं अहङ्काराकर्षिणीनित्या० दक्षकुपरि। ॐ ईं शब्दाकर्षिणीनित्या० दक्षकरपृष्ठे। ॐ उं स्पर्शाकर्षिणीनित्या० दक्षोरौ। ॐ ऊं रूपाकर्षिणीनित्या० दक्षजानौ। ॐ ऋं रसाकर्षिणीनित्या० दक्षगुल्फे। ॐ ॠं गन्धाकर्षिणीनित्या० दक्षपादे। ॐ ऌं चित्ताकर्षिणीनित्या० वामपादे। ॐ ॡं धैर्याकर्षिणीनित्या० वामगुल्फे। ॐ एं स्मृत्याकर्षिणीनित्या० वामजानुनि। ॐ ऐं नामाकर्षिणीनित्या० वामोरौ। ॐ ओं बीजाकर्षिणीनित्या० वामकरपृष्ठे। ॐ औं आत्माकर्षिणीनित्या० वामकुपरि। ॐ अं अमृताकर्षिणीनित्या० वामांसे। ॐ अः शरीराकर्षिणीनित्या० वामश्रोत्रपृष्ठे। एवं विन्यस्य, ॐ ऐंक्लींसौः त्रिपुरेशीचक्रेश्वरीश्री० इति विन्यस्य, एता गुप्तयोगिन्यः सर्वाशा[2]पूरके समुद्रा इत्यादिना समर्प्य सर्वविद्राविणीमुद्रां प्रदर्शयेत्। इति द्वितीयावरणम्।।

अथ तृतीयावरणन्यासः। ततः ॐ सर्वसङ्क्षोभणचक्राय नमः। ॐ अष्टदलचक्राय नमः। इति व्यापकं कृत्वा, ॐ कं ५ अनङ्गकुसुमादेवीश्री० दक्षशङ्खे। ॐ चं ५ अनङ्गमेखलादेवी० दक्षजानौ। ॐ टं ५ अनङ्गमदनादेवी० दक्षोरौ। ॐ तं ५ अनङ्गमदनातुरादेवी० दक्षगुल्फे। ॐ पं ५ अनङ्गरेखादेवी० वामगुल्फे। ॐ यं ४ अनङ्गवेगिनीदेवी० वामोरौ। ॐ शं ४ अनङ्गांकुशादेवी० वामजानौ। ॐ ळक्षं अनङ्गमालिनीदेवी० वामशङ्खे। एवं विन्यस्य, ॐ ह्रींक्लींसौः त्रिपुरसुन्दरीचक्रेश्वरीनित्याश्री० इति हृदये विन्यस्य, एता गुप्ततरयोगिन्यः सर्वसङ्क्षोभकारके चक्रे समुद्रा इत्यादिना समर्प्य क्लीमित्याकर्षिणीमुद्रां प्रदर्शयेत्। इति तृतीयावरणम्।

अथ चतुर्थावरणन्यासः। ततः ॐ सर्वसौभाग्यदायकचतुर्दशारचक्राय नमः इति व्यापकं कृत्वा, ॐ अं सर्वसङ्क्षोभिणीशक्तिश्री० दक्षभागशिरःपृष्ठे। ॐ इं सर्वविद्राविणीशक्तिश्री० दक्षललाटे। ॐ उं सर्वाकर्षिणीशक्ति० दक्षगण्डस्थले। ॐ ऋं सर्वाह्लादिनीशक्ति० दक्षांसे। ॐ ऌं सर्वसम्मोहिनीशक्ति० दक्षपार्श्वे। ॐ एं सर्वस्तम्भिनीशक्ति० दक्षोरौ। ॐ ऐं सर्वजृम्भिणीशक्ति० दक्षजङ्घायां। ॐ ओं सर्ववशङ्करीशक्ति० वामजङ्घायाम्। ॐ औं सर्वरञ्जिनीशक्ति० वामोरौ। ॐ हं सर्वोन्मादिनीशक्ति० वामपार्श्वे। ॐ यं सर्वार्थसाधनीशक्ति० वामांसे। ॐ रं सर्वसम्पत्प्रपूरणीशक्ति० वामगण्डस्थले। ॐ लं सर्वमन्त्रमयीशक्ति० वामललाटे। ॐ वं सर्वद्वन्द्वक्षयङ्करीशक्ति० वामभागशिरःपृष्ठे। इति विन्यस्य, ॐ हैं हक्लीं हसौः श्रीत्रिपुरवासिनीचक्रेश्वरीनित्याश्री०। इति विन्यस्य, एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्रा इत्यादिना समर्प्य ब्लूं इति सर्ववशङ्करीमुद्रां प्रदर्शयेत्। इति चतुर्थावरणन्यासः।

अथ पञ्चमावरणन्यासः। ततः ॐ सर्वार्थसाधकबहिर्दशारचक्राय नमः इति व्याप्य, ॐ तं सर्वसिद्धिप्रदा०

---

१. 'परिपूरक' ग. पाठः। २. 'परिपूरके' ग. पाठः।

दक्षनेत्रे। ४ँ थं सर्वसम्पत्प्रदा० नासामूले। ४ँ दं सर्वप्रियङ्करी० वामनेत्रे। ४ँ धं सर्वमङ्गलकारिणी० कुक्षिपूर्वे। ४ँ नं सर्वकामप्रदा० कुक्षिवायव्ये। ४ँ टं सर्वदु:खविमोचिनी० वामजानुनि। ४ँ ठं सर्वमृत्युप्रशमनी० दक्षजानुनि। ४ँ डं सर्वविघ्नविनाशिनी० गुदे। ४ँ ढं सर्वाङ्गसुन्दरी० कुक्षिनैर्ऋते। ४ँ णं सर्वसौभाग्यदायिनी० कुक्ष्याग्नेये। ४ँ हसैं हसक्लीं हसौ: त्रिपुराश्रीचक्रेश्वरीश्री० इति हृदि विन्यस्य, एता: कुलकौलयोगिन्य: सर्वार्थसाधके चक्रे समुद्रा इत्यादिना समर्प्य स: इति सर्वोन्मादिनीमुद्रां प्रदर्शयेत्। इति पञ्चमावरणन्यास:।।

अथ षष्ठावरणन्यास:। तत: ४ँ सर्वरक्षाकरान्तर्दशारचक्राय नम: इति व्यापकं कृत्वा, ४ँ चं सर्वज्ञादेवीश्री० दक्षनासिकायां। ४ँ छं सर्वशक्तिदेवीश्री० दक्षसृक्विणि। ४ँ जं सर्वैश्वर्यप्रदादेवी० दक्षस्तने। ४ँ झं सर्वज्ञानमयीदेवी० दक्षवृषणे। ४ँ ञं सर्वव्याधिविनाशिनीदेवी० सीवन्यां। ४ँ कं सर्वाधारस्वरूपादेवी० वामवृषणे। ४ँ खं सर्वपापहरादेवी० वामस्तने। ४ँ गं सर्वानन्दमयीदेवी० वामसृक्विणि। ४ँ घं सर्वरक्षास्वरूपिणीदेवी० वामनासिकायां। ४ँ ङं सर्वेप्सितफलप्रदादेवी० नासाग्रे। ४ँ ह्रींक्लींब्लें त्रिपुरमालिनीचक्रेश्वरीनित्याश्री० इति हृदि। एता निगर्भयोगिन्य: सर्वरक्षाकरे चक्रे समुद्रा इत्यादिना व्याप्य (समर्प्य) क्रोमिति सर्वमहाङ्कुशामुद्रां प्रदर्शयेत्। इति षष्ठावरणन्यास:।।

अथ सप्तमावरणन्यास:। तत: ४ँ सर्वरोगहराष्टारचक्राय नम: इति व्याप्य, ४ँ अं १६ ब्लूँ वशिनीवाग्देवताश्री० दक्षचिबुके। ४ँ कं ५ कलह्रीं कामेश्वरीवाग्देवताश्री० दक्षकण्ठे। ४ँ चं ५ नवलीं मोदिनीवाग्देवताश्री० दक्षहृदि। ४ँ टं ५ य्लूँ विमलावाग्देवताश्री० नाभिदक्षिणे। ४ँ तं ५ ज्म्रीं अरुणावाग्देवताश्री० नाभिवामे। ४ँ पं ५ हसलवयूँ जयिनीवाग्देवताश्री० हृद्वामे। ४ँ यं ४ झमरयूँ सर्वेश्वरीवाग्देवताश्री० वामकण्ठे। ४ँ शं ४ क्षमरीं कौलिनीवाग्देवताश्री० वामचिबुके। ४ँ ह्रींश्रींसौ: त्रिपुरासिद्धाचक्रेश्वरीनित्याश्री० इति हृदये। एता रहस्ययोगिन्य: सर्वरोगहरे चक्रे समुद्रा इत्यादिना समर्प्य हसखफ्रें इति खेचरीमुद्रां प्रदर्शयेत्। इति सप्तमावरणन्यास:।।

अथाष्टमावरणन्यास:। तत: ४ँ सर्वसिद्धिप्रदान्तरालचक्राय नम: इति व्याप्य, ४ँ द्रांद्रींक्लींब्लूंस: यांरांलांवांशां जं जृम्भणकामेश्वरकामेश्वरीबाणेभ्यो नम: हृदयाग्रे। ४ँ धांधां मोहनकामेश्वरकामेश्वरीधनुर्भ्यां नम: हृदयेशाने। ४ँ आंह्रीं वशीकरणकामेश्वरकामेश्वरीपाशाभ्यां नम: हृदयनैर्ऋते। ४ँ क्रोंक्रों स्तम्भनकामेश्वरकामेश्वरीअङ्कुशाभ्यां नम: हृदयवायव्ये। ४ँ अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मकरुद्रात्मकशक्तिकामेश्वरीदेवीश्री० हृदि त्रिकोणाग्रे। ४ँ सूर्यचक्रे जालन्धरपीठे षष्ठेशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिश्रीवज्रेश्वरीदेवीश्री० हृदयदक्षिणे। ४ँ सोमचक्रे पूर्णगिरिगह्वरे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालिनीदेवीश्री० हृत्त्रिकोणवामभागे। हस्त्रैं हसकलरीं हस्त्रौ: त्रिपुराम्बाचक्रेश्वरीनित्याश्री० इति हृदये विन्यस्य, एता अतिरहस्ययोगिन्य: सर्वसिद्धिमये चक्रे समुद्रा इत्यादिना समर्प्य हसौं इति सर्वबीजमुद्रां प्रदर्शयेत्। इति अष्टमावरणन्यास:।।

ततो नवमावरणन्यास:। तत: ४ँ सर्वानन्दमयबैन्दवचक्राय नम: इति व्यापकं विन्यस्य, तारत्रयबालाश्रीविद्यामुच्चार्य

ब्रह्मचक्रे श्रीमदुड्याणपीठे चर्यानन्दनाथात्मके तुरीयदशाधिष्ठायके ब्रह्मशक्त्यात्मकपरब्रह्मात्मकशक्तिश्रीमहात्रिपुरसुन्दरीदेवीश्री० इति मध्ये। ४ँ हसकलरडैं हसकलरडीं हसकलरडौः श्रीमहात्रिपुरभैरवीचक्रेश्वरीनित्याश्री० इति हृदये विन्यस्य, एषा परापररहस्ययोगिनी सर्वानन्दमये बैन्दवे चक्रे (सर्वचक्रेश्वरी-सर्वमन्त्रेश्वरी सर्वपीठेश्वरी सर्वविद्येश्वरी सर्ववागीश्वरी सर्वसिद्धीश्वरी सर्वजगदुत्पत्तिमातृका) सचक्रमुद्रा ससिद्धिका सायुधा सवाहना सशक्तिका सालङ्कारा सपरिवारा सर्वोपचारैः सम्पूजिता तुष्टा भवतु इति समर्प्य ऐं इति योनिमुद्रां प्रदर्शयेत्। इति नवमावरणन्यासः।। इति श्रीचक्रन्यासः। एवमेतावत्-करणाशक्तौ प्रागुक्तश्रीचक्रन्यासकवचं पठेत्। अयं तु संहारक्रमः।। तथा, बिन्दुचक्रादिचतुरस्रान्तरेखान्तं न्यसेदिति सृष्टिक्रमः।।

अथ स्थितिश्रीचक्रन्यासः। स च विद्याचक्रचक्रेश्वरीत्यङ्गत्रयात्मकः सम्प्रदायात्। तत्र प्राग्वत् करशोधनविद्यया करशुद्धिं विधाय आत्मरक्षाविद्ययात्मरक्षां कृत्वा, श्रीमहात्रिपुरसुन्दरीरूपमात्मानं ध्यात्वा स्थितिन्यासं समाचरेत्। तत्रादौ विद्यान्यासः।

मूर्ध्नि गुह्ये च हृदये नेत्रत्रितय एव च। कर्णयोर्यु[1]गले देवि मुखे च भुज एव च।।
पृष्ठे जान्वोश्च नाभौ च मूलविद्यां न्यसेत् क्रमात्। ....।।

इति कूटाक्षरभेदेन व्यस्ताव्यस्तां मूलविद्यां न्यसेत्। ४ँ वाग्भवकूटाय नमः मूर्ध्नि। ४ँ कामराजं गुह्ये। एवं शक्तिकूटं हृदये, वाग्भवं दक्षनेत्रे कामराजं वामनेत्रे, शक्तिकूटं भालनेत्रे, वाग्भवं दक्षकर्णे, कामराज वामकर्णे, शक्तिकूटं मुखे, वाग्भवं दक्षभुजे, कामराजं वामभुजे, शक्तिकूटं पृष्ठे, वाग्भवं दक्षजानौ, कामराजं वामजानौ, शक्तिकूटं नाभौ, ४ँ वाग्भवं (समस्तविद्यां) मूर्ध्नि, कामराजं एवं गुह्ये, एवं प्राग्वत् न्यसेत्। इति कूटन्यासः।।

अथाक्षरन्यासः। तत्र श्रीविद्यायाः पञ्चदशाक्षराणि एकैकं बिन्द्वन्तं पञ्चदशसु स्थानेषु न्यसेत्। तद्यथा—प्रथमं मूर्ध्नि, द्वितीयं गुह्ये, तृतीयं हृदि, चतुर्थं दक्षनेत्रे, पञ्चमं वामनेत्रे, षष्ठं भालनेत्रे, सप्तमं दक्षकर्णे, अष्टमं वामकर्णे, नवमं मुखे, दशमं दक्षभुजे, एकादशं वामभुजे, द्वादशं पृष्ठे, त्रयोदशं दक्षजानुनि, चतुर्दशं वामजानुनि, पञ्चदशं नाभौ। इत्यक्षरन्यासः।। ततः ''कण्ठस्थाने प्रविनिस्येन्नित्यामन्त्रांस्तु षोडश''। इति क्रमेण कण्ठे षोडशदलेषु षोडश नित्या न्यसेत्।।

अथ बालाबीजत्रयेण नवयोनिन्यासं कुर्यात्।

श्रोत्रयोश्चिबुके देवि शङ्खास्येषु दृशोर्नसि। अंसद्वये च हृदये विन्यसेत् करकुक्षिषु।।
जान्वन्धुकु[2]क्षिपादेषु पा[3]र्श्वयोर्हृदयाम्बुजे। स्तनद्वये कण्ठदेशे नवयोनीर्न्यसेत् क्रमात्।।

इति नवयोनिन्यासः।।

अथ शृङ्खलान्यासः। बालया शृङ्खलान्यासस्तु ''शिखायां चिबुके वक्त्रे, वक्त्रे कण्ठे चिबुके, चिबुके हृदये कण्ठे, कण्ठे नाभौ तथा हृदि, हृदि लिङ्गे च नाभौ, च नाभौ (मूलाधारे स्वाधिष्ठाने, स्वाधिष्ठाने ऊर्वोः आधारे, आधारे जानुनोः ऊर्वोः, ऊर्वोः) पादे च जानुनोः''। इति शृङ्खलान्यासः।। ततो वक्ष्यमाणं ''ततः श्रीचक्रमारुढामिति ध्यात्वा'' नवमुद्राः प्रदर्श्य अंआंसौः नमः पादयोः। ऐंक्लींसौः नमः जङ्घयोः। ह्रींक्लींसौः नमः जान्वोः। हैं हक्लीं हसौः नमः ऊर्वोः। हसैं हसक्लीं हसौः नमः स्फिचोः (गुदपार्श्वयोः)। ह्रींक्लींब्लें नमः स्वाधिष्ठाने। ह्रींश्रींसौः नमः

---

१. 'भ्रूयुगे' ग. पाठः। २. 'गुह्यपादेषु' ग. पाठः। ३. 'पादयोः' क. पाठः।

मूलाधारे। हस्रैं हसकलरीं हस्रौः नमः पूर्वन्यस्तविद्योपरि। हसकलरडैं हसकलरडीं हसकलरडौः नमः सर्वाङ्गे। इति नवचक्रेश्वरीविद्यान्यासः।।

अथ नवचक्रन्यासः। त्रैलोक्यसम्मोहनचक्राय नमः अकुलपद्मे। (गुदमूलाधारमध्यस्थरक्तसहस्रदलकमलचक्रे)। सर्वाशापरिपूरकचक्राय नमः मूलाधारे। सर्वसङ्क्षोभणचक्राय नमः स्वाधिष्ठाने। सर्वसौभाग्यदायकचक्राय नमः मणिपूरके। सर्वार्थसाधकचक्राय नमः अनाहते। सर्वरक्षाकरचक्राय नमः विशुद्धे। सर्वरोगहरचक्राय नमः लम्बिकापद्मे। सर्वसिद्धिप्रदचक्राय नमः भ्रूमध्ये। सर्वानन्दमयचक्राय नमः ब्रह्मरन्ध्रे। एतेषु स्थानेषु प्रागुक्तनवचक्रेश्वरीर्न्यसेत्।। इति स्थितिश्रीचक्रन्यासः।

अथाष्टाष्टकन्यासः। ४ँ प्रयागक्षेत्रे वेसिनीपु[1]र्यां कामरूपपीठे वटवृक्षे पद्ममुद्रायां व्योममण्डले मेरुसन्ता[2]नावल्यां आंक्षां मङ्गला[3]म्बायै नमः, अंक्षं मङ्गलनाथाय, आंक्षां ब्रह्माण्यै, अंक्षं असिताङ्गभैरवाय, कं ५ सर्वद्वीपनाथाय सर्वद्वीपनाथाम्बायै मम त्वगाधारचक्रे दिव्यक्रीडारतां पूजयामि घोरेऽघोरे अमोघे वरदे विच्चे नमः इत्याधारचक्रे विन्यस्य, परितोऽष्टदलेषु ४ँ क्षंक्षां अक्षोभ्यां नमः, क्षिंक्षीं रुक्षकर्णाभ्यां नमः, क्षुंक्षूं राक्षसाभ्यां नमः क्षृंक्षॄं क्षपणाभ्यां नमः, क्ष्लृंक्ष्लॄं क्षपाभ्यां नमः, क्षेंक्षैं पिङ्गलाक्षीभ्यां नमः, क्षोंक्षौं अक्षयाभ्यां नमः, क्षंक्षः क्षमाभ्यां नमः, इत्याधारे।।

४ँ वाराणसीक्षेत्रे शौण्डिनीपुर्यां मलयगिरिपीठे श्लेष्मातकवृक्षे लिङ्गमुद्रायां वायुमण्डले महेन्द्रा[4]वल्यां ईंलां चर्चिकाम्बायै नमः, इंलं चर्चिकनाथाय, ईंलां माहेश्वर्यै, इंलं रुरुभैरवाय, चं ५ सर्वद्वीपनाथाय सर्वद्वीपनाथाम्बायै मम रक्तनितम्बचक्रे दिव्यक्रीडारतां पूजयामि इति पद्मकर्णिकायां घोरेऽघोरे वरदे विच्चे नमः इति सर्वत्र, नितम्बचक्रे पद्मदलेषु ३ँ लंलां लीलाभ्यां नमः, लिंलीं लोलाभ्यां नमः, लुंलूं लुत्थाभ्यां नमः, लृंलॄं लृताभ्यां नमः, ल्लृंल्लॄं ल्लृताभ्यां नमः, लेंलैं लङ्केश्वराभ्यां नमः, लोंलौं लोलसाभ्यां नमः, लंलः विमलाभ्यां नमः, इति नितम्बे।।

४ँ कौलापुरीक्षेत्रे कैवर्तिनीपुर्यां पूर्णगिरिपीठे उडम्बरवृक्षे सुरभिमुद्रायां वह्निमण्डले चन्द्रशिलातलावल्यां[5] ऊंहां योगीशाम्बायै नमः, उंहं योगीशनाथाय, ऊंहां कौमार्यै, उंहं चण्डभैरवाय, टं ५ सर्वद्वीपेत्यादि मम मांसचक्रे नाभिस्थाने दिव्यक्रीडारतां पूजयामीति नाभिपद्मकर्णिकायां विन्यस्य, तद्दलेषु ३ँ हंहां हुताशनाभ्यां नमः, हिंहीं विशालाक्षीभ्यां नमः, हुंहूं वाडवामुखीभ्यां नमः, हृंहॄं हर्षाभ्यां नमः, ह्लृंह्लॄं हारयाभ्यां नमः, हेंहैं महाक्रोधाभ्यां नमः, होंहौं क्रोधिनीभ्यां नमः, हंहः स्वरयाभ्यां नमः, इति नाभौ।।

४ँ अट्टहासक्षेत्रे कुटिनीपुर्यां कुलान्तकपीठे अश्वत्थवृक्षे क्षोभिणीमुद्रायां सलिलमण्डले शाम्बरभेदावल्यां ॠसां हरसिद्धाम्बायै नमः, ऋंसं हरसिद्धनाथाय, ॠंसां वैष्णव्यम्बायै, ऋंसं क्रोधभैरवनाथाय, तं ५ सर्वद्वीपेत्यादि मम स्नायुचक्रे हृदयस्थाने दिव्यक्रीडारतां पूजयामि इति हृदयचक्रकर्णिकायां विन्यस्य, तद्दलेषु ३ँ संसां संख्यापीठसिद्धाभ्यां नमः, सिंसीं तरलाभ्यां नमः, सुंसूं ताराभ्यां नमः, सृंसॄ हृष्टाभ्यां नमः, स्लृंस्लॄं हल्लेखाभ्यां नमः, सेंसैं दशकन्दराभ्यां नमः, सोंसौं सारसाभ्यां नमः, संसः रससङ्ग्राहिणीभ्यां नमः, इति हृदये।।

४ँ जयन्तिकाक्षेत्रे गण्डकीपुर्यां चौहारपीठे विभीतकवृक्षे द्राविणीमुद्रायां पृथिवीमण्डले अम्बरयोगावल्यां लॄंषां

---

१. 'वंशनी' ग.पाठः। २. 'नवल्यां' क.पाठः। ३. 'मङ्गलादेव्यै' ग.पाठः। ४. 'महेन्द्रवल्यां' क.पाठः। ५. 'तलवल्यां' क. पाठः।

[1]भद्राम्बायै नमः, लृषं भद्रनाथाय, लॄषां वाराह्यै, लृषं उन्मत्तनाथाय, पं ५ सर्वद्वीपेत्यादि मम अस्थिचक्रस्थाने कण्ठे दिव्यक्रीडारतां पूजयामि इति कण्ठपद्मकर्णिकायां, तद्दलेषु षंषां तालजङ्घाभ्यां नमः, षिंषीं रक्ताक्षीभ्यां, षुषूं विद्युज्जिव्हाभ्यां, पृंपॄं करङ्काभ्यां, ष्लृंष्लॄं मेघनादाभ्यां, षेंषैं प्रचण्डौघाभ्यां, षोंषौं कालकर्णाभ्यां, षंषः बल[2]प्रदाभ्यां, इति कण्ठे।।

ॐ चारित्रक्षेत्रे रजनीपुर्यां जालन्धरपीठे निम्बवृक्षे अङ्कुशमुद्रायां अग्निमण्डले कुलिशभेदावल्यां ऐंशां किलिकिलाम्बायै नमः, एंशं किलिकिलिनाथाय, ऐंशां इन्द्राण्यै, एंशं कपालिभैरवाय, यं ४ सर्वद्वीपेत्यादि मम मज्जस्थचक्रे मुखस्थाने दिव्यक्रीडारतां पूजयामि इति मुखपद्मकर्णिकायां, तद्दलेषु शंशां शम्पाभ्यां, शिंशीं चम्पावलीभ्यां, शुशूं प्रवाया[3]भ्यां, शृंशृं शूल[4]सादिकाभ्यां, श्लृंश्लॄं पिचुवक्त्राभ्यां, शेंशैं पिशाचाक्षीभ्यां, शोंशौं पिशिताशनाभ्यां, शंशः लोलुपाभ्यां, इति मुखे।।

ॐ एकाम्रक्षेत्रे शिल्पि[5]नीपुर्यां उड्यानपीठे करञ्जवृक्षे लेलिहानमुद्रायां व्यापिकामण्डले रक्तवर्णावल्यां औंवां कालरात्र्यम्बायै नमः, ओंवं कालरात्रिनाथाय, औंवां चामुण्डायै, ओंवं भीषणभैरवनाथाय, शंषंसंहं सर्वद्वीपेत्यादि मम शुक्रचक्रे नासापुटस्थाने दिव्यक्रीडारतां पूजयामीति नासापुटकर्णिकायां, तद्दलेषु वंवां वामनासाभ्यां, विंवीं वानराभ्यां, वुंवूं वासनाभ्यां, वृंवॄं विकटास्याभ्यां, ब्लृंब्लॄं वायुवेगाभ्यां, वेंवैं बृहत्कला[6]भ्यां, वोंवौं विकनाभ्यां, वंवः विश्वरूपिणीभ्यां, इति नासिकायाम्।।

ॐ देवीकोटक्षेत्रे सटीनापुर्यां देवीकोटपीठे कदम्बवृक्षे भेकिमुद्रायां शिवमण्डले लम्पटावल्यां अःयां विभीषकाम्बायै नमः, अंयं विभीषकनाथाय, अःयां महालक्ष्म्यै, अंयं संहारभैरवाय, ळंक्षं सर्वद्वीपेत्यादि मम क्रोधललाटचक्रे दिव्यक्रीडारतां पूजयामीति ललाटपद्मकर्णिकायां, तद्दलेषु यंयां यमजिह्वाभ्यां, यिंयीं जयन्तीभ्यां, युंयूं दुर्जयाभ्यां, यृंयॄं यमान्तकाभ्यां, य्लृंय्लॄं विडालाभ्यां, येंयैं रेवतीभ्यां, योंयौं पूतनाभ्यां, यंयः विजयाभ्यां, इति ललाटे।। ''शान्तिके पौष्टिके चैव कुर्यादष्टाष्टकं बुधः''।। इत्ययं न्यासः काम्यः।।

अथ वशिन्याद्यष्टकन्यासश्चक्रन्यासेऽवलोक्यः (पृ० ८८१)

शिरोललाटभ्रूमध्यकण्ठहृन्नाभिगुह्यके। आधारे व्यूहके चैव वशिन्याद्यष्टकं न्यसेत्।।

इति यथाक्रमं न्यसेदिति।। अथ भूषणन्यासः। ॐ अं शिरसि, आं भाले, इंईं भ्रूयुगे, उंऊं कर्णयुगे, ऋंॠं नेत्रयोः, लृं नासिकायां, लॄंएंऐं गण्डयोः, ओं ओष्ठयोः, औंअं दन्तपङ्क्तौ, अः मुखे, कं चिबुके, खं गले, गं कण्ठे, घंङं पार्श्वयोः, चं स्तनयुग्मे, छंजं दोर्मूलयोः, झंञं कुर्परयोः, टंठं पाण्योः, डं पाणिपृष्ठे, ढं नाभौः, णं गुह्ये, तंथं ऊर्वोः, दंधं जान्वोः, नंपं जङ्घयोः, फंवं स्फिचोः, भंमं पादतलयोः, यंरं पादाङ्गुष्ठयोः, लं कण्ठके, वं काञ्च्यां, शं ग्रैवेये, षं मुकुटे, संहं कर्णकुण्डलयोः, ळं हृदये, क्षं गुह्याधः, त्रितारादिनमोऽन्तः।।

अथ षडङ्गन्यासः। ॐ ऐं वदवद वाग्वादिनि ऐं हृदयाय नमः, ॐ क्लीं क्लिन्ने क्लेदिनि क्लेदय २ महाक्षोभं कुरु क्लीं शिरसे स्वाहा, ॐ सौः मोक्षं कुरु २ हसौः शिखायै वषट्, पुनस्तैरेव कवचनेत्रास्त्रेषु न्यसेत्।

अथ श्रीविद्याबीजैस्तत्त्वचतुष्टयन्यासः। ॐ वाग्भवद्वयमुच्चार्य आत्मतत्त्वाय नमः नाभेरापादान्तं। ॐ

---

[1] 'भट्टिन्यम्बायै' क. पाठः। [2] 'बलप्रभाभ्यां' क. पाठः। [3] 'प्रबाधाभ्यां' क. पाठः। [4] 'मूलयान्तिभ्यां' क. पाठः। [5] 'शिल्पिपुर्यां' क. पाठः। [6] 'बृहत्कुक्षिभ्यां' क. पाठः।

कामराजद्वयमुच्चार्य विद्यातत्त्वाय नमः हृदो नाभिपर्यन्तं। ४ँ शक्तिद्वयमुच्चार्य शिवतत्त्वाय नमः शिरसो हृत्पर्यन्तं। ४ँ समस्तमुच्चार्य सर्वतत्त्वाय नमः सर्वाङ्गे व्यापकं न्यसेत्।।

अथामठन्यासः। अस्यामठन्यासस्य लक्ष्मीनारायण ऋषिः ककुप् छन्दः सर्वजनवशङ्करी श्रीमहालक्ष्मीः देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं मम सर्वजनवश्यार्थे न्यासे विनियोगः। ऐं वागीश्वर्यै नमः केशान्ते, ह्रीं पार्वत्यै नमः भ्रूमध्ये, अं अर्कमण्डलाय नमः दक्षनेत्रे, मं वह्निमण्डलाय नमः वामनेत्रे, ठं चन्द्रमण्डलाय नमः मुखे, मण्डलीकृत्य तृतीयनेत्रे, श्रीं श्रियै नमः जिह्वाग्रे, स्वां दन्तिन्यै नमः दक्षगण्डे हां दन्तिन्यै नमः वामगण्डे, आं पाशाय नमः दक्षकर्णे, क्रों अंकुशाय नमः वामकर्णे, क्लीं कामदेवाय नमः चिबुके। एवमेकादशवारं कर्तव्यः। इति अमठन्यांसः।।

अथोर्ध्वाम्नायन्यासक्रमः। आदौ महाषोढान्यासस्ततो मन्त्रन्यासः। ऊर्ध्वाम्नायमन्त्रास्तु–

चरणं नवनाथाश्च मूलविद्याश्च षोडश। आधारषट्कं देवेशि संविद्देव्य उदाहृताः।।

तथा–

पञ्चाम्बा नवनाथाश्च मूलविद्याश्च षोडश। षडाधारादिविद्याश्च चरणाद्याः क्रमादिह।।

चरणं विश्रान्तिचरणं शम्भुचरणं चेति। अत्रोध्वाम्नाये पञ्चाम्बा दिव्यौघाः, द्विधा नवनाथाः आकाशाख्यनवनाथाः आत्मानन्दादिनवनाथाश्चेति। तत्राकाशाख्याः सिद्धौघाः, परमात्मानन्दाद्या मानवौघाः। ते च चरणगुरुपङ्क्तिमूलविद्याषोडाधारविद्याख्याः चत्वारो मन्त्रन्यासाः। चरणचतुष्टयीत्रयोविंशतिनाथषोडशमूलविद्याः षडाधारविद्याः पराप्रासाददशप्रणवाश्च (?)– इत्येकपञ्चाशदूर्ध्वाम्नायमन्त्राः।।

तत्र प्रथमं महाषोढान्यासः पराप्रासादेनोर्ध्वाम्नायदीक्षितानां महाषोढान्यासमात्रेऽधिकारः चरणादिविद्यादीक्षितानां तदादिन्यासेष्वेवाधिकारः न तु महाषोढान्यासे। षडन्वयशाम्भवदीक्षितानां तद्विषयकन्यासेऽधिकारः। विद्यादीक्षितानां सर्वत्रैवाधिकारः इति (सौ० र० १० तरङ्गे) कुलप्रकाशतन्त्रे–

प्रपञ्चो भुवनं मूर्तिर्मन्त्रदैवतमातरः। महाषोढाह्वयो न्यासः सर्वन्यासोत्तमोत्तमः।।

तत्र प्रथमं शिरसि सङ्घट्टमुद्रया ४ँ हसखफ्रें हसक्षमलवरयूं हंसः शिवः हसौः सोहं हसक्षमलवरयूं अमुकानन्दनाथनिजगुरुश्रीपादुकां पूजयामि, इति श्रीगुरुपादुकामन्त्रं ब्रह्मरन्ध्रे विन्यस्य ध्यायेत्।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम्।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरे शिरसि हंसगं तदभिधानपूर्वं गुरुम्।।

इति ध्यात्वा, मानसैरुपचारैः सम्पूज्य षडङ्गन्यासं कुर्यात्। तदुक्तं यामले–

ईशतत्पुरुषाघोरवामसद्योभवात्मनः। पञ्चाङ्गुलीषु विन्यस्य मूर्ध्नि वक्त्रेषु विन्यसेत्।।
पराप्रासादबीजेन षडङ्गान्येवमाचरेत्।..।।

अस्य श्रीपराप्रासादमन्त्रस्य परशम्भुः ऋषिः, अव्यक्तागायत्री छन्दः, मन्त्रेश्वरी परा देवता, हसांस्हां बीजं हसीं स्हीं शक्तिः हसूंस्हूं कीलकं श्रीपरादेवताप्रसादसिद्ध्यर्थे विनियोगः। शिरोमुखहृदयगुह्यजानुपादेषु विन्यस्य, हसांस्हां हृदयाय नमः इत्यादि करषडङ्गन्यासं कृत्वा, ओंऐंह्रींश्रींहसौंस्हौंहौं ईशानाय नमः अङ्गुष्ठयोः। ५ँ हें तत्पुरुषाय

नमः तर्जन्योः। ५ँ हुं अघोराय नमः मध्यमयोः। ५ँ हिं वामदेवाय नमः अनामिकयोः। ५ँ हं सद्योजाताय नमः कनिष्ठिकयोः। इति विन्यस्य, ५ँ हों ईशानाय नमः ऊर्ध्ववक्त्रे, मूर्ध्नि अङ्गुष्ठेन न्यस्येत्। ५ँ हैं तत्पुरुषाय नमः पूर्ववक्त्रे, मुखे तर्जन्या। ५ँ हुं अघोराय नमः दक्षिणवक्त्रे, कर्णप्रदेशे मध्यमया। ५ँ हिं वामदेवाय नमः उत्तरवक्त्रे, वामकर्णप्रदेशेऽनामिकया। ५ँ हं सद्योजाताय नमः पश्चिमवक्त्रे, कन्धरोपरि शिरःपृष्ठाधोभागे कनिष्ठया। इति पञ्चवक्त्रन्यासः।।

अथ मूर्तिषडङ्गन्यासः। ५ँ हों ईशानाय हृदयाय नमः। ५ँ हें तत्पुरुषाय शिरसे स्वाहा। ५ँ हुं अघोराय शिखायै वषट्। ५ँ हिं वामदेवाय कवचाय हुं। ५ँ हं सद्योजाताय नेत्रत्रयाय वौषट्। ५ँ पञ्चवक्त्राय अस्त्राय फट्।।

अस्य श्रीमहाषोढान्यासस्य परब्रह्म ऋषिः जगती छन्दः, शिवशक्त्यात्मस्वरूपी सदाशिवो देवता, न्यासे विनियोगः। मूर्ध्नि वक्त्रे च हृदि ओं नमः इति विन्यस्य, ततः पराप्रासादषड्दीर्घैः षडङ्गन्यासं कृत्वा ध्यायेत्।

पञ्चवक्त्रां चतुर्बाहुं सर्वाभरणभूषितम्। चन्द्रसूर्यसहस्राभं शिवशक्त्य[१]क्षरं भजे ।।
अन्तः[२]षोढां महेशानि कुर्यादुक्तस्य [३]वर्त्मना। ततः कुर्यान्महान्यासं महाषोढाह्वयं परम्।।
वक्ष्यमाणप्रकारेण देवताभावसिद्धये। यस्य कस्यापि नैवोक्तं तव स्नेहाद्वदाम्यहम्।।

अथ प्रपञ्चन्यासः। ४ँ हसौः अं प्रपञ्चरूपायै श्रियै नमः स्हौः श्रींह्रींऐंओं। एवं बीजसम्पुटं सर्वत्र। आं द्वीपरूपायै मा[४]यायै। इं अब्धिरूपायै कमलायै। ईं गिरिरूपायै विष्णुवल्लभायै। उं [५]पत्तनरूपायै पद्मधारिण्यै। ऊं पीठरूपायै समुद्रतनयायै। ऋं क्षेत्ररूपायै लोकधात्र्यै। ॠं वनरूपायै कमलवासिन्यै। ऌं आश्र[७]यरूपायै इन्दिरायै। ॡं गुहारूपायै मायायै। एं नदीरूपायै रमायै। ऐं चतुररूपायै पद्मायै। ओं अद्भिज्जरूपायै नारा[८]यणप्रियायै। औं जरायुजरूपायै राज्यलक्ष्म्यै। अं अण्डजरूपायै नारायण्यै। अंः स्वेदजरूपायै सिद्धलक्ष्म्यै। कं लवरूपायै आर्यायै। खं त्रुटिरूपायै उमायै। गं कलारूपायै चण्डिकायै। घं काष्ठारूपायै दुर्गायै। ङं निमेषरूपायै शिवायै। चं श्वासरूपायै अपर्णायै। छं घटिकारूपायै अम्बिकायै। जं मुहूर्तरूपायै सत्यै। झं प्रहररूपायै ईश्वर्यै। ञं दिवसरूपायै शाम्भव्यै। टं सन्ध्यारूपायै ईशान्यै। ठं रात्रिरूपायै पार्वत्यै। डं तिथिरूपायै सर्वमङ्गलायै। ढं वाररूपायै दाक्षायण्यै। णं नक्षत्ररूपायै हैमवत्यै। तं योगरूपायै महामायायै। थं करणरूपायै माहेश्वर्यै। दं पक्षरूपायै मृडान्यै। धं मासरूपायै रुद्राण्यै। नं राशिरूपायै शर्वाण्यै[९]। पं ऋतुरूपायै परमेश्वर्यै। फं अयनरूपायै काल्यै[१०]। वं वत्सररूपायै कात्यायन्यै। भं युगरूपायै गौर्यै। मं प्रलयरूपायै भवान्यै। यं पृथिव्यप्तेजोवाय्वाकाशाख्यपञ्चभूतरूपायै ब्राह्म्यै[११]। रं शब्दस्पर्शरूपरसगन्धतन्मात्ररूपायै वागीश्वर्यै। लं वाक्पाणिपादपायूपस्थाख्यपञ्चकर्मेन्द्रियरूपायै वाण्यै। वं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यपञ्चज्ञानेन्द्रियरूपायै वाक्प्रदायै नमः। शं प्राणापानव्यानोदानसमानाख्यपञ्चप्राणरूपायै गायत्र्यै। षं सत्त्वरजस्तम आख्यगुणत्रयरूपायै सावित्र्यै। सं मनोबुद्ध्यहङ्कारचित्ताख्यान्तःकरणचतुष्टयरूपायै सरस्वत्यै। हं जाग्रत्स्वप्नसुषुप्ततुरीयाख्यावस्थाचतुष्टयरूपायै शारदायै। ळं त्वगसृग्मांसमेदोस्थिमज्जाशुक्राख्यसप्तधातुरूपायै भारत्यै। ४ँ क्षं

---

१. 'शक्त्यात्मकं' ग. पाठः। २. 'अतः' ग. पाठः। ३. 'स्ववर्त्मना' ग. पाठः। ४. 'रमायै इं जलधिरूपायै' क. पाठः। ५. 'पद्मरूपायै' क. पाठ। ६. 'लोकमात्रे' क. पाठः। ७. 'आश्रम' क. पाठः। ८. 'नारायण्यै' क. पाठः। ९. 'पार्वत्यै' क. पाठः। १०. 'कान्त्यै' क. पाठः। ११. 'वायव्यै' ग. पाठः।

वातपित्तश्लेष्माख्यदोषत्रयरूपायै विद्यात्मिकायै पञ्चभूतव्यापिकाधीश्वर्यै नमः। इति प्रपञ्चादीनि मातृकास्थानेषु विन्यस्य, ४ँ आदिक्षान्तमुक्तसकलप्रपञ्चरूपायै पराम्बादेव्यै नमः इति व्यापकं कुर्यात्। इति प्रपञ्चन्यासः।।

अथ भुवनन्यासः। ओं ऐं ह्रीं श्रीं हसौः अं आं इं अतललोकनिलयशतकोटिगुह्याद्ययोगिनीमूलदेवतायुताधारशक्त्यम्बादेव्यै नमः स्हौः श्रीं ह्रीं ऐं ओं पादयोः। एवं बीजसम्पुटं सर्वत्र। इं उं ऊं वितललोकनिलयशतकोटिगुह्यतमयोगिनीमूलदेवतायुता[1]लिप्तपराशक्त्यम्बादेव्यै नमः गुल्फयोः। ऋं ॠं लृं सुतललोकनिलयशत[2]कोटिपरमगुह्यतमयोगिनीमूलदेवतायुता[3]चिन्त्यपराशक्त्यम्बादेव्यै नमः जङ्घयोः। लॄं एं ऐं महातललोकनिलयशतकोटिगुह्यतमयोगिनीमूलदेवतायुतास्वारम्भशक्त्यम्बादेव्यै नमः जान्वोः। ओं औं तलातललोकनिलयशतकोटिपरमगुह्ययोगिनीमूलदेवतायुतेच्छाशक्त्यम्बादेव्यै नमः ऊर्वोः। अंअः रसातललोकनिलयशतकोटिरहस्ययोगिनीमूलदेवतायुतज्ञानशक्त्यम्बादेव्यै नमः गुह्यके। कं ५ पाताललोकनिलयशतकोटिरहस्यतम[4]योगिनीमूलदेवतायुतक्रियाशक्त्यम्बादेव्यै नमः मूलाधारे। चं ५ भूर्लोकनिलयशतकोटि-अतिरहस्ययोगिनीमूलदेवतायुतरडाकिनीशक्त्यम्बादेव्यै नमः स्वाधिष्ठाने। टं ५ भुवर्लोकनिलयशतकोटिपरम[5]रहस्ययोगिनीमूलदेवतायुतराकिणीशक्त्यम्बादेव्यै नमः नाभिदेशे। तं ५ स्वर्लोकनिलयशतकोटिपरमरहस्ययोगिनीमूलदेवतायुतलाकिनीशक्त्यम्बादेव्यै नमः हृदये। पं ५ महर्लोकनिलयशतकोटिगुप्तयोगिनीमूलदेवतायुकाकिनीशक्त्यम्बादेव्यै नमः कण्ठदेशे। यं ४ जनलोकनिलयशतकोटिगुप्ततरयोगिनीमूलदेवतायुतशाकिनीशक्त्यम्बादेव्यै नमः आज्ञायाम्। शं ४ तयोलोकनिलयशातकोट्यतिगुप्तयोगिनीमूलदेवतायुतहाकिनीशक्त्यम्बादेव्यै नमः ललाटे। ळं क्षं सत्यलोकनिलयशतकोटिमहागुप्तयोगिनीमूलदेवतायुतयाकिनीशक्त्यम्बादेव्यै नमः ब्रह्मरन्ध्रे। ४ँ अं ५१ चतुर्दशभुवनाधिपायै श्रीपराम्बादेव्यै नमः। इति व्यापकं न्यसेत्। इति भुवनन्यासः।।

अथ मूर्तिन्यासः। ४ँ हसौं अं केशवाक्ष[6]याभ्यां नमः स्हौं श्रीं ह्रीं ऐं ओं ललाटे। एवं बीजसम्पुटं सर्वत्र। आं नारायणाद्या[7]भ्यां दक्षमुखे[8]। इं माधवेष्टदाभ्यां दक्षस्कन्धे। ईं गोविन्देशानाभ्यां दक्षकुक्षौ। उं विष्णूग्राभ्यां दक्षोरौ। ऊं मधुसूदनोर्ध्वनय[9]नाभ्यां दक्षजानौ। ऋं त्रिविक्रमऋ[10]द्धिभ्यां दक्षजङ्घायां। ॠं वामनरूपिणीभ्यां दक्षपादे। लृं श्रीधरलुप्ताभ्यां वामपादे। लॄं हृषीकेशलूनदोषाभ्यां वामजङ्घायाम्। एं पद्मनाभैकनायिकाभ्यां वामजानौ। ऐं दामोदरैंकारिणीभ्यां वामोरौ। ओं वासुदेवौघवतीभ्यां वामकुक्षौ। औं सङ्कर्षणौर्वकामाभ्यां वामस्कन्धे। अं प्रद्युम्नाञ्जनप्रभाभ्यां वाममुखे[11]।। अं अनिरुद्धास्थिमालाधराभ्यां वाममस्तके। कं भं भवकरभद्राभ्यां दक्षपादे। खं बं शर्वखगबलाभ्यां वामपादे। गं फं रुद्रगरिमादिफलप्रदाभ्यां दक्षपार्श्वे। घं पं पशुपतिधर्मप्रशमनीभ्यां वामपार्श्वे। ङं नं उग्रपङ्क्तिनासाभ्यां दक्षबाहौ। चं धं महादेवचन्द्रार्धधारिणीभ्यां वामबाहौ। छं दं भीमछन्दोमयीभ्यां कण्ठे। जं थं ईशानज[12]गत्स्थानाभ्यां ऊर्ध्ववक्त्रे। झं तं तत्पुरुषप्रताराभ्यां पूर्ववक्त्रे। ञं णं अघोरज्ञानदाभ्यां दक्षास्ये। टं ढं सद्योजातट[13]ङ्कधराभ्यां पश्चिमास्ये। ठं डं वामदेवठङ्कारडामरीभ्यां वाममुखे। यं ब्रह्मयक्षिणीभ्यां मूलाधारे। रं प्रजापतिरञ्जनीभ्यां स्वाधिष्ठाने[14]। लं वेधोलक्ष्मीभ्यां [15]मणिपूरे। वं परमेष्ठिवज्रिणीभ्यां अनाहते। शं पितामहशक्तिधारिणीभ्यां विशुद्धे। षं विधातृषडाधारा[16] याभ्यां आज्ञायाम्।

---

१. 'युताधारशक्त्य' क. पाठः। २. 'कोटिगुह्य' क. पाठः। ३. 'युतालिप्तपरा' क. पाठः। ४. 'तर' ग. पाठः। ५. 'महारहस्य' ग. पाठः। ६. 'क्षराभ्यां' ग. पाठः। ७. 'णाग्राभ्यां' क. पाठः। ८. 'दक्षभुजे' क. पाठः। ९. 'प्रमधाभ्यां' क. पाठः। १०. 'क्रोधिनी' क. पाठः। ११. वामनाभौ' क. पाठः। १२. गरुत्सखाभ्यां' ग. पाठः। १३. 'टङ्कढक्काधराभ्यां' ग. पाठः। १४. 'मणिपूरे' ग. पाठः। १५. 'स्वाधिष्ठाने' ग. पाठः। १६. 'शयाभ्यां' क. पाठः।

सं विरिञ्चिसर्वनायिकाभ्यां इन्दौ, हं सृष्टहरिता[1]ननाभ्यां बिन्दौ, ळं चतुराननललिताभ्यां नादे, क्षं हिरण्यगर्भक्षमाभ्यां नादान्ते, ४ँ अं ५१ हरिहरब्रह्मत्रिमूर्त्यात्मिकायै श्रीपराम्बादेव्यै नमः, इति व्यापकं न्यसेत्। इति मूर्तिन्यासः।।

अथ मन्त्रन्यासः। प्रथमोक्तबीजसम्पुटं सर्वत्र। ओंऐंह्रींश्रींहसौः अंआंइं एकलक्षकोटिभेदप्रणवाद्येकाक्षरात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै एककूटेश्वर्यम्बादेव्यै नमः स्हौः श्रींह्रींऐंओं मूलाधारे। ईउंऊं द्विलक्षकोटिभेदहंसादिद्विकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै द्विकूटेश्वर्यम्बादेव्यै नमः लिङ्गे। ऋंॠंऌं त्रिलक्षकोटिभेदवह्न्यादित्रिकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै त्रिकूटेश्वर्यम्बादेव्यै नमः नाभौ। ॡंएंऐं चतुर्लक्षकोटिभेदचन्द्रादिचतुष्कूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै चतुष्कूटेश्वर्यम्बादेव्यै नमः हृदये। ओंऔंअंअः पञ्चलक्षकोटिभेदसूर्यादिपञ्चकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै पञ्चकूटेश्वर्यम्बादेव्यै नमः कण्ठे। कंखंगं षड्लक्षकोटिभेदस्कन्धादिषट्कूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै षट्कूटेश्वर्यम्बादेव्यै नमः मुखे। घंङंचं सप्तलक्षकोटिभेदगणेशादिसप्तकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै सप्तकूटेश्वर्यम्बादेव्यै नमः नेत्रयोः। छंजंझं अष्टलक्षकोटिभेदवटुकाद्यष्टकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै अष्टकूटेश्वर्यम्बादेव्यै नमः आज्ञायाम्। ञंटंठं नवलक्षकोटिभेदब्रह्मादिनवकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै नवकूटेश्वर्यम्बादेव्यै नमः इन्दौ। डंढंणं दशलक्षकोटिभेदविष्ण्वादिदशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै दशकूटेश्वर्यम्बादेव्यै नमः बिन्दौ। तंथंदं एकादशलक्षकोटिभेद[2]रुद्राद्येकादशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै एकादशकूटेश्वर्यम्बादेव्यै नमः कलायां। धंनंपं द्वादशलक्षकोटिभेदवाण्यादिद्वादशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै द्वादशकूटेश्वर्यम्बादेव्यै नमः उन्मन्याम्। फंबंभं त्रयोदशलक्षकोटिभेदलक्ष्म्यादित्रयोदशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै त्रयोदशकूटेश्वर्यम्बादेव्यै नमः शिरोवृत्ते। मंयंरं चतुर्दशलक्षकोटिभेदगौर्यादिचतुर्दशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै चतुर्दशकूटेश्वर्यम्बादेव्यै नमः नादे। लंवंशं पञ्चदशलक्षकोटिभेददुर्गादिपञ्चदशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै पञ्चदशकूटेश्वर्यम्बादेव्यै नमः नादान्ते। षंसंहं षोडशलक्षकोटिभेदत्रिपुरादिषोडशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै षोडशकूटेश्वर्यम्बादेव्यै नमः ब्रह्मरन्ध्रे। ४ँ अं ५१ सर्वमन्त्रात्मिकायै पराम्बादेव्यै नमः, इति व्यापकं न्यसेत्। इति मन्त्रन्यासः।।

अथ दैवतन्यासः। ओंऐंह्रींश्रींहसौः अंआं सहस्रकोटियोगिनीकुलसेवितायै निवृत्त्यम्बादेव्यै नमः स्हौः श्रींह्रींऐंओं दक्षपादाङ्गुष्ठे। एवं बीजसम्पुटं सर्वत्र। इंईं सहस्रकोटियोगिनीकुलसेवितायै प्रतिष्ठाम्बादेव्यै नमः दक्षगुल्फे। उंऊं सहस्रकोटितपस्विनीकुलसेवितायै विद्याम्बादेव्यै नमः दक्षजङ्घायां। ऋंॠं सहस्रकोटिऋषिकुलसेवितायै शान्त्यम्बादेव्यै नमः दक्षजानौ। ऌंॡं सहस्रकोटिमुनिकुलसेवितायै शान्त्यतीताम्बादेव्यै नमः दक्षोरौ। एंऐं सहस्रकोटिदेवकुलसेवितायै हृल्लेखाम्बादेव्यै नमः दक्षकट्यां। ओंऔं सहस्रकोटिराक्षसकुलसेवितायै गगनाम्बादेव्यै नमः दक्षपार्श्वे। अंअः सहस्रकोटिविद्याधरकुलसेवितायै रक्ताम्बादेव्यै नमः दक्षस्तने। कंखं सहस्रकोटिसिद्धकुलसेवितायै महोच्छुष्माम्बादेव्यै नमः दक्षकक्षे। गंघं सहस्रकोटिसाध्यकुलसेवितायै करालाम्बादेव्यै नमः दक्षकरे। ङंचं सहस्रकोटि अप्सरःकुलसेवितायै जयाम्बादेव्यै नमः दक्षस्कन्धे। छंजं सहस्रकोटिगन्धर्वकुलसेवितायै विजयाम्बादेव्यै नमः दक्षकर्णे। झंञं सहस्रकोटि-

---

१. 'हसिता' घ. पाठः। २. 'शिवा' क. पाठः।

गुह्यककुलसेवितायै अजिताम्बादेव्यै नमः दक्षशिरसि। टंठं सहस्रकोटियक्षःकुलसेवितायै अपराजिताम्बादेव्यै नमः वामशिरसि। डंढं सहस्रकोटिकिन्नरकुलसेवितायै वामाम्बादेव्यै नमः वामकर्णे। णंतं सहस्रकोटिपन्नगकुलसेवितायै ज्येष्ठाम्बादेव्यै नमः वामस्कन्धे। थंदं सहस्रकोटिपितृकुलसेवितायै रौद्र्यम्बादेव्यै नमः वामकरे। धंनं सहस्रकोटिगणेशकुलसेवितायै मायाम्बादेव्यै नमः वामकक्षे। पंफं सहस्रकोटिभैरवकुलसेवितायै कुण्डलिन्यम्बादेव्यै नमः वामस्तने। बंभं सहस्रकोटिवटुककुलसेवितायै काल्यम्बादेव्यै नमः वामपार्श्वे। मंयं सहस्रकोटिक्षेत्रेशकुलसेवितायै कालरात्र्यम्बादेव्यै नमः वामकट्यां। रंलं सहस्रकोटिप्रमथ[1]कुलसेवितायै भगवत्यम्बादेव्यै नमः वामोरौ। वंशं सहस्रकोटिब्रह्मकुलसेवितायै सर्वैश्वर्यम्बादेव्यै नमः वामजानौ। षंसं सहस्रकोटिविष्णुकुलसेवितायै सर्वज्ञाम्बादेव्यै नमः वामजङ्घायां। हंळं सहस्रकोटिरुद्रकुलसेवितायै सर्वकर्त्र्यम्बादेव्यै नमः वामगुल्फे। क्षं सहस्रकोटिचराचरकुलसेवितायै शक्त्याम्बादेव्यै नमः वामपादाङ्गुष्ठे। ४ँ अं ५१ समस्तदेवतात्मिकायै श्रीपराम्बिकादेव्यै नमः इति सर्वाङ्गे व्यापकं न्यसेत्। इति दैवतन्यासः।।

अथ मातृकान्यासः—ओंऐंश्रीं मू० कं ५ अनन्तकोटिभूचरीकुलसेवितायै आंक्षां मङ्गलाम्बादेव्यै आंक्षां ब्रह्माण्यम्बादेव्यै अनन्तकोटिभूतकुलसहिताय अंक्षं मङ्गलनाथाय अंक्षं असिताङ्गभैरवनाथाय नमः आधारे। त्रितारमूलं तु सर्वत्र। चं ५ अनन्तकोटिखेचरीकुलसहितायै ईंळां चर्चिकाम्बादेव्ये ईंळां माहेश्वर्यम्बादेव्यै अनन्तकोटिवेतालकुलसहिताय इंळं चर्चिकनाथाय (इंळं वेतालभैरवनाथाय☛) इंळं रुरुभैरवनाथाय नमः स्वा[2]धिष्ठाने। टं ५ अनन्तकोटिपातालकुलसहितायै ऊंहां योगीश्वर्यम्बादेव्यै ऊंहां कौमार्यम्बादेव्यै नमः अनन्तकोटिपिशाचकुलसहिताय उंहं योगीश्वरनाथाय उंहं चण्डभैरवनाथाय नमः मणिपूरे[3]। तं ५ अनन्तकोटिदिक्चरीकुलसहितायै ॠंसां हरसिद्धाम्बादेव्ये ॠंसां वैष्णव्यम्बादेव्यै अनन्तकोट्यपस्मारकुलसहिताय ऋंसं हरसिद्धनाथाय ऋंसं क्रोधराजभैरवनाथाय नमः अनाहते। पं ५ अनन्तकोटिसहचरीकुलसेवितायै ॡंषां भट्टि[4]न्यम्बादेव्यै ॡंषां वाराह्यम्बादेव्यै अनन्तकोटिब्रह्मराक्षसकुलसहिताय ऌंषं भट्टनाथाय ऌंषं उन्मत्तभैरवनाथाय नमः विशुद्धे। यं ४ अनन्तकोटिगिरिचरीकुलसेवितायै ऐंशां किलिकिलाम्बादेव्यै ऐंसां इन्द्राण्यम्बादेव्यै अनन्तकोटिवटुककुलसहिताय एंशं किलिकिलनाथाय एंशं कपालिभैरवनाथाय नमः आज्ञायाम्। शं ४ अनन्तकोटिवनचरीकुलसहितायै औंवां कालरात्र्यम्बादेव्यै औंवां चामुण्डाम्बादेव्यै अनन्तकोटिप्रेतकुलसहिताय ओंवं कालरात्रिनाथाय ओंवं भीषणभैरवनाथाय नमः ललाटे। लंक्षं अनन्तकोटि[5]कुलचरीकुलसेवितायै अःलां भीषणाम्बादेव्यै अःलां महालक्ष्म्यम्बादेव्यै अनन्तकोटि[6]शाकिनीकुलसहिताय अंलं भीषणनाथाय अंलं संहारभैरवाय नमः इति व्यापकं न्यसेद् इति मातृकान्यासः। इति महा[7]षोढान्यासः।।

अथ मूलमन्त्रन्यासः— तत्रादौ विश्रान्तिचरणन्यासः। शिरसि सङ्घट्टमुद्रां विधाय ओंऐंह्रींश्रीं हंसः शिवः हसौः सोऽहं तुरीयविद्यामुच्चार्य सच्चिदानन्दज्योतिरहं, ओंऐंह्रींश्रीं हंसः शिवः हसौः सोहं तुर्यविद्यामुच्चार्य सच्चिदानन्दज्योतिरहमेव, ओंऐंह्रींश्रीं हंसः शिवः हसौः सोहं तुर्यविद्यामुच्चार्य सच्चिदानन्दज्योतिरहमेवास्मि। ततः क्षणं विश्राम्य तत्रैव प्रकाशचरणं न्यसेत्। ओंऐंह्रींश्रीं हंसः शिवः हसौः सोहं [8]'योऽहमस्मि अहमस्मि ब्रह्माहमस्मि सोऽहं स्वच्छप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णानन्दनाथश्रीपादुकां पूजयामि। इति प्रकाशचरणन्यासः।।

---

१. 'प्रच्छन्न' क. पाठः। २. 'लिङ्गे' क. पाठः। ३. 'नाभौ' क. पाठः। ४. 'भद्राम्बा' क. पाठः। ५. 'जलचरी' ग. पाठः। ६. 'राकिणी' क. पाठः। ७. 'गुह्य' ग. पाठः। ८. ओं योहं' ग. पाठः। ☛बन्दचिह्नान्तर्गतं प्रक्षिप्तं भाति।

ततः स्वात्मानं सकलप्रपञ्चोत्तीर्णं संविदेकस्वभावं आनन्दमयं विचिन्त्य कृतकृत्यो निश्चितान्तरतमः पञ्चाम्बान्यासं कुर्यात्। तत्र शिरसि सङ्घट्टमुद्रया ॐ ह्रींश्रीं श्रीआदिनाथव्योमातीताम्बाश्री०। ॐ ह्रींश्रीं श्रीआदिनाथव्योमेश्वर्यम्बाश्री०। ॐ ह्रींश्रीं श्रीअनामयनाथव्योमगाम्बाश्री०। ॐ ह्रींश्रीं श्रीअनन्तनाथव्योमचारिण्यम्बाश्री०। ॐ ह्रींश्रीं श्रीचिदाभासनाथव्योमस्थाम्बाश्री०। इति पञ्चाम्बान्यासः।।

अथ नवाकाशनाथन्यासः। शिरसिॐ हं उन्मनाकाशनाथश्री०। ॐ सं समनाकाशनाथश्री०। ॐ क्षं व्यापकाकाशनाथश्री०। ॐ मं शक्त्याकाशनाथश्री०। ॐ लं ध्वन्याकाशनाथश्री०। ॐ वं ध्वनिमात्राकाशनाथश्री०। ॐ रं अनाहताकाशनाथश्री०।ॐ यं इन्द्वाकाशनाथश्री०। ॐ ऊं बिन्द्वाकाशनाथश्री०। इति सङ्घट्टमुद्रां शिरसि न्यसेत्। इत्याकाशनाथन्यासः।।

अथ पूज्यनवनाथन्यासः। अत्र नाथानुपूर्वकानन्दशब्दप्रयोगः— ॐ परमात्मानन्दनाथश्री०, ॐ शाम्भवानन्दनाथश्री०, ॐ चिन्मुद्रानन्दनाथश्री०, ॐ वाग्भवानन्दनाथश्री०, ॐ लीलानन्दनाथश्री०, ॐ सम्भ्रमानन्दनाथश्री०, ॐ चिदानन्दानन्दनाथश्री०, ॐ प्रसन्नानन्दनाथश्री०, ॐ विश्वानन्दनाथश्री०। अत्रोर्ध्वाम्नाये पञ्चाम्बा दिव्यौघाः। नवाकाशनाथाः सिद्धौघाः। परमात्मादिनाथा मानवौघाः। इति नवनाथन्यासः।।

अथ स्वपारम्पर्यन्यासः— ॐ यज्ञेश्वरानन्दनाथश्री०। ॐ संविदानन्दनाथश्री०। ॐ स्वात्मानन्दनाथश्री०। ॐ चिदानन्दनाथश्री०। ॐ संविदानन्दनाथश्री०। ॐ (चिदानन्दनाथश्री०। ॐ संविदानन्दनाथश्री०।) ॐ ब्रह्मानन्दनाथश्री०। ॐ संविदानन्दनाथश्री०। ॐ पूर्णानन्दनाथश्री०। ॐ संविदानन्दनाथश्री०। ततः स्वगुरुं शिरसि सङ्घट्टमुद्रया स्वपारम्पर्यं विन्यस्य, स्वनाम (स्वगुरुकृतं) मूलाधारे न्यसेत्। इति गुरुपङ्क्तिन्यासः।।

अथ षोडशमूलविद्यान्यासः। शिरसि (१) ओंऐंह्रींश्रीं स्वच्छ[1]प्रकाशपरिपूर्णपरापरमहासिद्धविद्याकुलयोगिनी ह्रीं कुलयोगिनीमूलविद्याश्रीपादुकां पूजयामि। (२) ॐ हसौः स्वात्मानं बोधय २ हसौः प्रसादपराम्बामूलविद्याश्री०। (३) ॐ ऐंक्लीं क्लिन्ने क्लेदिनि महामदद्रवे[2] क्लीं क्लीं मोहय २ क्लीं नमः स्वाहा अतिरह[3]स्ययोगिनीमूलविद्याश्री०। (४) ॐ हंसः स्वच्छानन्दपरमहंसपरमात्मने स्वाहा हसौं हसौं[4] शाम्भवीमूलविद्याश्री०। (५) ॐ ह्रीं नित्यस्फुरत्ताचैतन्यानन्दमयि महाबिन्दुव्यापकमातृस्वरूपिणि ऐंह्रींश्रींईं [5]हल्लेखामूलविद्याश्री०। (६) ॐ स्व[6]च्छप्रकाशात्मिके ह्रीं कुलमहामालिनि ऐं कुलगर्भमातृके ह्रीं समयविमले श्रीं समयविमलामूलविद्याश्री०। (७) ॐ हंसः नित्यप्रकाशात्मिके कुलकुण्डलिनि आज्ञासिद्धिमहाभैरवि आत्मानं बोधय २ अम्बे भगवति ह्रींहुं[7] परबोधिनीमूलविद्याश्री०। (८) ॐ ओं मोक्षं कुरु कुलपञ्चाक्षरीमूलविद्याश्री०। (९) ॐ लोपामुद्रापञ्चदशाक्षरीमुच्चार्य चैतन्यत्रिपुरामूलविद्याश्री०। (१०) ॐ ऐं शुद्धसूक्ष्मनिराकारनिर्विकल्पपरब्रह्मस्वरूपिणि क्लीं परानन्दशक्ति सौः[8] शाम्भवानन्दनाथानुत्तरकौलिनीमूलविद्याश्री०। (११) ॐ हंसः सोऽहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा गुरूत्तमविमर्शिनीमूलविद्याश्री०। (१२) ॐ अनामाख्याव्योमातीतनाथपरापरव्योमातीतव्योमेश्वर्यम्बानामाख्यामूलविद्याश्री०। (१३) ॐ ऐंईंऔं[9] सङ्केतसारामूलविद्याश्री०। (१४) ॐ ह्रीं भगवति

---

१. 'स्वप्र' क. पाठः। २. 'द्रवे क्लेदय' ख. पाठः। ३. 'स्याति' ग. पाठः। ४. 'सहक्षौं' ख. पाठः। ५. 'चिल्लेखा' ख.पाठः। ६. 'ऐंह्रींश्रीं' क. अधिकः। ७. 'ह्रीं पर' क. पाठः। ८. 'श्रींसौः' क. पाठः। ९. 'ऐंइंईंउं' ग. पाठः।

विच्चे वाग्वादिनि क्लीं महाह्रदमहामातङ्गिनि ऐं क्लिन्ने ब्लूंस्त्रीं अनुत्तरवाग्वादिनीमूलविद्याश्री०। (१५) ॐ हसौ: हसखफ्रें हसकलरीं हसौ: अनुत्तरशाङ्करीमूलविद्याश्री०। (१६) त्रयोदशाक्षरमूलतुरीयविद्यामुच्चार्य सर्वानन्दमये चक्रे बैन्दवे परब्रह्मस्वरूपिणी परामृतशक्ति: सर्वमन्त्रेश्वरी सर्वविद्येश्वरी सकलजगदुत्पत्तिमातृका सचक्रा सशक्ति: समुद्रा ससिद्धि: सायुधा सपरिवारा सर्वोपचारै: सम्पूजितास्तु शून्याशून्यवर्जितशक्तिश्रीमहात्रिपुरसुन्दरीमूलविद्याश्री०। इति सङ्घट्टमुद्रया⇕ शिरसि विन्यसेत्। इति षोडशमूलविद्यान्यास:।।

अथ षडाधारविद्यान्यास:। ॐ हंस: स्व[1]च्छानन्दविभूत्यै स्वाहा मूलाधारविद्याश्री०, मूलाधारे। ॐ सोहं परमहंसविभूत्यै स्वाहा स्वाधिष्ठानविद्याश्री०, स्वाधिष्ठाने। ॐ हंस: सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा मणिपूरकविद्याश्री०, मणिपूरके। ॐ हंस: सोहं[2] स्वात्मानं बोधय २ परात्मानन्दनाथ अनाहतविद्याश्री०, अनाहते। ॐ सोहं परमात्मने बोधय २ स्वात्मानन्दनाथ विशुद्धविद्याश्री०, विशुद्धौ। ॐ हंस: सोहं स्वच्छानन्द[3]चित्प्रकाशामृतहेतवे स्वाहा आज्ञाविद्याश्री०, आज्ञायाम्। इति विन्यस्य पुन: सङ्घट्टमुद्रया शम्भुचरणमात्रविन्यास:। ॐ हंस: शिव: हसौं: सोहं योहमस्मि अहमस्मि ब्रह्माहमस्मि सोहं स्वच्छप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णानन्दनाथश्री०। इति ब्रह्मरन्ध्रे न्यसेत्। इति षडाधारविद्यान्यास:।। (इति चरणादिन्यास:)

ततो हसां हसीमित्यादिना करषडङ्गन्यासं विधाय पराप्रसादमन्त्रेण प्राणायामत्रयं कृत्वा दश मुद्रा: प्रदर्शयेत्। तदुक्तं तत्रैव–

तत: सन्दर्शयेन्मुद्रादशकं परमेश्वरि। योनिं लिङ्गं च सुरभिं हेतिमुद्राचतुष्टयम्।।
वनमालां नभोमुद्रां महामुद्रामिति क्रमात्।..।।

इति। हेतिमुद्रा: कपालज्ञानशूलपुस्तकाख्या:। नभोमुद्रा खेचरीमुद्रा। तथा सङ्घट्टमुद्राया अपि लक्षणमुक्तं "शिवशक्त्यात्मनोर्योगे सैव सङ्घट्टमुद्रिका"। शिवशक्त्यात्मनोर्दक्षिणवामयोरित्यर्थ:। तयोश्चाङ्गीभूतयोर्वा हंसीभूतयोर्वा तत्त्वात्मनोर्वा सम्प्रदायभेदाद् यथागुरूपदेशं कार्यमिति। अथ ध्यानम्–

एवं न्यस्ततनुर्देवि ध्यायेद् देवमनन्यधी:। अमृतार्णवमध्योद्यत्स्वर्णद्वीपे [5]मनोरमे।। १।।
कल्पवृक्षवनान्त:स्थे नवमाणिक्यमण्डपे। नवरत्नमयश्रीमत्सिंहासनगताम्बुजे ।। २।।
त्रिकोणान्त: समासीनं चन्द्रसूर्यसमप्रभम्। अर्धाम्बिकासमायुक्तं प्रविभक्तविभूषणम्।। ३।।
कोटिकन्दर्पलावण्यं सदा षोडशवार्षिकम्। मन्दस्मितमुखाम्भोजं त्रिनेत्रं चन्द्रशेखरम्।। ४।।
दिव्याम्बरस्रगालेपं दिव्याभरणभूषितम्। पानपात्रं च चिन्मुद्रां त्रिशूलं पुस्तकं करै:।। ५।।
विद्यासंसिद्धिं[6] बिभ्राणं सदानन्दमुखेक्षणम्। महाषोढोदिताशेषदेवतागणसेवितम् ।। ६।।
एवं चित्ताम्बुजे ध्यायेदर्धनारीश्वरं शिवम्। पुंरूपं वा स्मरेद् देवि स्त्रीरूपं वा विचिन्तयेत्।। ७।।

---

१. 'स्वानन्द' ख. पाठ:। २. 'हंस: स्वा' ख. पाठ:। ३. 'न्दनाथ' ख. पाठ:। ४. 'ओं योहं' ग. पाठ:।
५. 'द्वीपोपशोभिते' ग. पाठ:। ६. 'संसदि' क. पाठ:।

⇕सङ्घट्टमुद्रा तु–शिवशक्त्यात्मकदक्षिणवामकरयो: पृथक् अङ्गुष्ठरहिताङ्गुलिचतुष्टयाग्रयोगरूपा युगपदधोमुखं शिरसि निहिता भवति (सौ० र० १० तरङ्ग।)

अथवा निष्कलं ध्यायेत् सच्चिदानन्दलक्षणम्। सर्वतेजोमयं ध्यायेत् सचराचरविग्रहम्।। ८।।

इति। अत्र पुंरूपध्याने ''त्रिकोणान्त: समासीनं चन्द्रकोटिसमप्रभ'' मित्यादि शुभ्रवर्णत्वं पुंभूषणादिकमूह्यम्। स्त्रीरूपध्याने ''सूर्यकोटिसमप्रभ''मित्यादि रक्तवर्णत्वादिस्त्रीप्रत्ययान्तपदमूहनीयमिति। आयुधादिकं तु समानम्। इति ध्यात्वा मानसोपचारैराराध्य, पराप्रासादमन्त्रं जपित्वा यथाशक्ति चरणषोडशमूलविद्याषडाधारविद्याश्च जपेत्। तत: शिरसि गुरुं ध्यात्वा तत्पादुकाविद्यां च जपेत्। ततो जपं समर्प्य तदभेदेन स्वेष्टदेवतां मत्वा ''बालार्कमण्डलाभासा''मित्यादि श्रीमहात्रिपुरसुन्दरीं ध्यात्वा मूलविद्यां यथाशक्ति जपित्वा जपं समर्प्य प्रणमेत्। तदुक्तम्—

यथाशक्ति जपेन्मूलमन्त्रं श्रीपादुकामपि। मूर्ध्नि सञ्चिन्तयेद् देवि श्रीगुरुं शिवरूपिणम्।।

इति। महाषोढान्यासफलं तु प्रागुक्तं बोध्यम्। ''ऊर्ध्वाम्नायप्रवेशश्च पराप्रासादचिन्तनम्। महाषोढाह्वयो न्यासो नाल्पस्य तपस: फलम्'' इति।।

अथ रक्तामृताब्धिमध्यस्थरत्नद्वीपे मदनोन्मादनं नाम पुष्पलताकुलं कूजत्कोकिलपिकवाचालविपिनगह्वरं जातीपुंनागपाटलोत्फुल्लाशेषसुमनोभिरलङ्कृतं ह्रींकारमुखरभ्रमद्भ्रमरकलकलाकुलं मलयपवननर्तितलताजालं नन्दनोद्यानं ध्यात्वा, तदन्तरुदितादित्यसङ्काशं स्वर्णप्राकारपरिक्षिप्तरत्नसोपानमण्डितं सतोरणद्वारदेशं कृष्णागुरुधूपोद्गारसुरभितककुभं सेवासमुत्सुकानेककोटिदेवतागणसेवितं दिव्यमण्डपं ध्यात्वा, तन्मध्ये समकालसमुदितसहस्रसवितृमण्डलसङ्काशं रत्न[1]चतुस्तम्भसंराजितरक्तपटवितानवर्तीं कर्पूरशकलमध्यवर्तिकाप्रवर्तितदीपाङ्कुराङ्कितकोणदेशां मणिमयीं वेदिकां ध्यात्वा, तन्मध्ये ॐ अमृतार्णवासनाय नम:। ॐ रत्नद्वीपाय नम:। मणिमण्डपस्य परित: प्रादक्षिण्येन— ॐ पुष्परागखण्डाय नम:। ॐ वैडूर्यखण्डाय नम:। ॐ विद्रुमखण्डाय नम:। ॐ मौक्तिकखण्डाय नम:। ॐ मरकतखण्डाय नम:। ॐ वज्रखण्डाय नम:। ॐ गोमेधखण्डाय नम:। ॐ पद्मरागखण्डाय०। ॐ षड्ऋतुभ्यो०। ॐ इन्द्रियाश्वेभ्यो०। ॐ इन्द्रियार्थगजेभ्यो०। मण्डपस्य परित: प्रादक्षिण्येन— ॐ कालचक्रेश्वर्यै०। ॐ मुद्राचक्रेश्वर्यै०। ॐ मातृकाचक्रेश्वर्यै०। ॐ देशचक्रेश्वर्यै०। ॐ गुरुचक्रेश्वर्यै०। ॐ तत्त्वचक्रेश्वर्यै०। ॐ ग्रहचक्रेश्वर्यै०। मध्ये ॐ मूर्तिचक्रेश्वर्यै०। ॐ करुणातोयपरिखायै०। ॐ वज्रालङ्कृतस्वर्णप्राकाराय०। तत्पूर्वद्वारदक्षिणवामशाखयो: ॐ गं गणपतये नम:। ॐ क्षां क्षेत्रपालाय०। तदूर्ध्वोदुम्बरशाखयो:— ॐ सं सरस्वत्यै नम:। ॐ दुं दुर्गायै नम:। तन्मध्ये ॐ श्रीं श्रियै नम:। ॐ दें देहल्यै नम:। ततो दक्षपादपुर:सरमन्त: प्रविश्य प्राकारस्याग्नेयादिकोणकेषु—ओंश्रींह्रींक्लींग्लौंगं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।। ऐंग्लौं नमो भगवति वातालि २ वाराहि २ वराहमुखि २ अन्धे अन्धिन्यै नम: रुन्धे रुन्धिन्यै नम: जम्भे जम्भिन्यै नम: मोहे मोहिन्यै नम: स्तम्भे स्तम्भिन्यै नम: सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं[2] कुरु २ शीघ्रं वश्यं कुरु २ ठ:ठ:ठ:ठ: हुंफट् स्वाहा ग्लौंऐं।। उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा।। ॐह्रींवां वटुकायापदुद्धारणाय कुरु २ वटुकाय ह्रीं। इति गणेशपञ्चमी-दुर्गावटुकानाग्नेयादिकोणचतुष्केषु पूजयेत्। तदन्त: ॐ कदम्बवनाय नम: तन्मध्ये ॐ रत्नमण्डपाय नम:। तस्य पश्चिमादिवामावर्तेन ॐ देशरूपिण्यै नम:। ॐ कालरूपिण्यै नम:। ॐ आकाशरूपिण्यै नम:। ॐ शब्दरूपिण्यै नम:। मण्डपस्य वामदक्षिणशाखयो: ॐ ह्रींश्रींह्रीं विरिगणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।। ॐ ऐं क्लींसौ: ओं नमो भगवति श्रीमातङ्गेश्वरि

---

[1] १. 'रक्त' क. पाठ:। [2] २. 'स्तम्भनं' क. पाठ:।

सर्वजनमनोहारि सर्वदुष्टमृगवशङ्करि सर्वसत्त्ववशङ्करि सर्वलोकवशङ्करि सर्वजनं मे वशमानय स्वाहा सौ:क्लींऐं श्रींह्रींऐं[1] इति शक्तिगणेशं मातङ्गीं च सम्पूज्य, तन्मध्ये—हसखफ्रें लं[2] लक्ष्मीभैरव्यै नम:। इति द्वारलक्ष्मीं सम्पूज्य, दें देहल्यै नम:। अपसर्पन्तु इति, पाशुपतास्त्रेण च देहल्यां पुष्पाणि निक्षिप्य, वामपादपुर:सरं देहलीमस्पृशन् अन्त:प्रविश्य, तद्द्वारदक्षवामशाखयो: ॐ शं शङ्खनिधये नम:। ॐ पं पद्मनिधये नम:। वायवीं दिशमारभ्य नैर्ऋत्यान्तद्वारमुन्मृज्य पङ्क्त्या समुपविष्टा वेणावतीर्गायन्ती: सरस्वत्यादि-गायिका यजेत्। ॐ सं सरस्वत्यै नम:। ॐ श्रीं श्रियै नम:। ॐ दुं दुर्गायै नम:। ॐ भं भद्रकाल्यै नम:। ॐ स्वं स्वस्त्यै नम:। ॐ स्वां स्वाहायै नम:। ॐ शुं शुभङ्कर्यै नम:। ॐ गौं गौर्यै नम:। ॐ लों लोकधात्र्यै नम:। ॐ वां वागीश्वर्यै नम:। मण्डपान्तरभित्त्यां प्रागादिदशदिक्षु— ॐ लं इन्द्राय सुराधिपतये पीतवर्णाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय योषिद्रूपधराय नम:। ॐ रं अग्नये तेजोधिपतये पिङ्गलवर्णाय साङ्गायेत्यादि०। ॐ टं यमाय प्रेताधिपतये कृष्णवर्णाय साङ्गाय०। ॐ क्षं निर्ऋतये रक्षोधिपतये धूम्रवर्णाय०। ॐ वं वरुणाय जलाधिपतये शुक्लवर्णाय०। ॐ यं वायवे प्राणाधिपतये धूम्रव०। ॐ सं सोमाय नक्षत्राधिपतये श्वेतवर्णाय०। ॐ हौं ईशानाय विद्याधिपतये स्फटिकवर्णाय०। ॐ आं ब्रह्मणे लोकाधिपतये पद्मवर्णाय०। ॐ ह्रीं अनन्ताय नागाधिपतये श्यामवर्णायेत्यादि। ततो मण्डपस्योर्ध्वप्राग्दक्षिणोदीच्यपश्चिमद्वारेषु ॐ हौं शान्त्यतीताकलाद्वारायै नम:। ॐ हैं शान्ताकलाद्वारायै नम:। ॐ हूं विद्याकलाद्वारायै नम:। ॐ हीं निवृत्तिकलाद्वारायै नम:। ॐ हां प्रतिष्ठाकलाद्वारायै नम:। ॐ ईं नमस्त्रैलोक्यमोहिनि महामाये सकलपशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा, इति तिरस्करिणीं सम्पूज्य,

मुक्तकेशीं विवसनां मदघूर्णितलोचनाम्। स्वयोनिदर्शनान्मुह्यत्पशुवर्गां स्मराम्यहम्।।

इति ध्यात्वा, तस्या दूतीश्चतुर्द्वारिषु प्रागादि द्वेद्वे शूलकपालधारिण्यौ श्यामवर्णे शक्ती पूजयेत्। ॐ क्लीं सुन्दरीसुमुखीभ्यां नम:। ॐ क्लीं विरूपाविमलाभ्यां नम:। ॐ क्लीं अन्तरीविनोदिनीभ्यां नम:। ॐ क्लीं पुरन्दरीपुष्पमर्दिनीभ्यां नम:। एवं भावनया मण्डपार्चनं विधाय, ॐ ओंह्रींहौं नम: शिवाय महाशरभाय, ॐ ओंह्रींहौं नम: शिवायै महाशरभ्यै, इति विघ्नशान्तये शरभद्वयमभ्यर्च्य स्वपुरतश्चन्दनादिपीठे कुङ्कुमादिना श्रीयन्त्रराजं समुद्धृत्य, अथवा रत्नादिनिर्मितं यन्त्रं संस्थाप्य, नम: इत्यभ्यर्च्यार्घ्यादिस्थापनं कुर्यात्। श्रीचक्रात्मनोर्मध्ये वहन्नाडीहस्तेन मत्स्यमुद्रया मायाङ्कितभूबिम्ब-वृत्तत्रिकोणात्मकं मण्डलं विरच्य, सव्याङ्गुष्ठेनावष्टभ्य वामेन पुष्पाक्षतैर्बालया व्यस्ताव्यस्तक्रमेण सम्पूज्य, मध्येऽस्त्र-प्रक्षालितमाधारं वाग्भवेन प्रतिष्ठाप्य रं वह्निमण्डलाय नम:, इति सम्पूज्य, कामराजेन शङ्खं संस्थाप्य हं सूर्यमण्डलाय नम:, इति सम्पूज्य, गन्धादिकं निक्षिप्य तार्तीयेन शुद्धोदकेन पूरयित्वा, सं सोममण्डलाय नम:, इति सम्पूज्य गन्धादिकं निक्षिप्य, हसौं वरुणदेव हसौं नम:, इति सप्तवारं जपित्वा तज्जलेन दक्षिणे भूबिम्बवृत्तषट्कोणत्रिकोणात्मकं मण्डलं विरच्य शङ्खमुद्रया दक्षकरेणावष्टभ्य व्यस्ताव्यस्तक्रमेण बालया षट्कोणं त्रिकोणं मध्यं च सम्पूज्य, भूबिम्बे अग्नीशासुरवायव्यमध्ये दिक्षु च षडङ्गानि सम्पूज्य षडासनानि च सम्पूज्य, त्रिकोणेषु मध्ये पीठचतुष्टयं सम्पूज्यास्त्र-प्रक्षालितमाधारं वाग्भवेन श्रीमहात्रिपुरसुन्दर्या अर्घ्याधारं स्थापयामि नम:, इत्याधारं संस्थाप्य, ॐ रांरींरूं धर्मप्रददशकलात्मने वह्निमण्डलाय श्रीमहात्रिपुरसुन्दर्या अर्घ्याधाराय नम: इति सम्पूज्य, तदुपरि प्रादक्षिण्येन—यं धूम्रार्चिषे नम:। रं ऊष्मायै

---

१. 'ह्रींश्रीं ग. पाठ:। २. 'लमिति' क. नास्ति।

नमः। लं ज्वलिन्यै नमः। वं ज्वालिन्यै नमः। शं विस्फुलिङ्गिन्यै नमः। षं सुश्रियै नमः। सं स्वरूपायै नमः। हं कपिलायै नमः। ळं हव्यवाहायै नमः। क्षं कव्यवाहायै नमः। इति दश वह्निकलाः सम्पूज्य, तदुपरि सौवर्णं राजतं ताम्रं विश्वामित्र- (कपाल)मयं पात्रमस्त्रप्रक्षालितं सुधूपितं श्रीमहात्रिपुरसुन्दर्या अर्घ्यपात्रं स्थापयामि नमः इति संस्थाप्य, ॐ हसक्षमलवरयऊं वसुप्रदद्वादशकलात्मने सूर्यमण्डलाय श्रीमहात्रिपुरसुन्दर्या अर्घ्यपात्राय नमः रमलवरयूं इति सम्पूज्य। तदुपरिप्रादक्षिण्येन— ॐ कंभं तपिन्यै नमः। ॐ खंवं तापिन्यै०। ॐ गंफं धूम्रायै०। ॐ घंपं मरीच्यै०। ॐ ङंनं ज्वालिन्यै०। ॐ चंधं रुच्यै०। ॐ छंदं सुषुम्नायै०। ॐ जंथं भोगदायै०। ॐ झंतं विश्वायै०। ॐ ञंणं बोधिन्यै०। ॐ टंढं धारिण्यै०। ॐ ठंडं क्षमायै नमः। इति द्वादशकलाः सम्पूज्य, श्रीमहात्रिपुरसुन्दर्या अर्घ्यामृतं पूजयामि नमः, मूलविद्याविलोममातृकयार्घ्यमापूर्य, कामराजेन द्वितीयं निक्षिप्यामृतेश्वरीविद्यया त्रिधावलोड्य, तत्रत्यदोषजालं वायुबीजेन संशोष्याग्निबीजेन सन्दह्य, अमृतबीजेनामृतीकृत्य, ॐ सांसींसूंसमलवरयऊं सं कामप्रदषोडशकलात्मने चन्द्रमण्डलाय श्रीमहात्रिपुरसुन्दर्या अर्घ्यामृताय नमः, इति सम्पूज्य, तत्र प्रादक्षिण्येन ॐ अं अमृतायै नमः। ॐ आं मानदायै०। ॐ इं पूषायै०। ॐ ईं तुष्ट्यै०। ॐ उं पुष्ट्यै०। ॐ ऊं रत्यै०। ॐ ऋं धृत्यै०। ॐ ॠं शशिन्यै०। ॐ ऌं चन्द्रिकायै०। ॐ ॡं ज्योत्स्नायै०। ॐ एं कान्त्यै०। ॐ ऐं श्रियै०। ॐ ओं प्रीत्यै०। ॐ औं अङ्गदायै०। ॐ अं पूर्णायै०। ॐ अः पूर्णामृतायै०। इति षोडश कलाः सम्पूज्य, सर्वासां कलानां प्राणप्रतिष्ठामपि विधाय, तत्र क्रमत्रयमपि सम्भाव्य, तत्र चतुर्दिक्षु मध्ये च ग्लूं गगनरत्नाय नमः। स्लूं स्वर्गरत्नाय नमः। प्लूं पातालरत्नाय नमः। म्लूं मर्त्यरत्नाय नमः। न्लूं नागरत्नाय नमः। तन्मध्ये अकथादित्रिनेत्रां हळक्षगतकोणकं वर्णकदम्बकं विलिख्य, ऐंक्लींसौः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय सांजूं २ सः अमृतेश्वर्यै स्वाहा, इत्यमृतेश्वरीं त्रिशो जप्त्वा, जातवेदसे गायत्रीं त्र्यम्बकं च जपेत्। ततः शंशींशूंशैंशौंशः इति शुक्रशापविमोचिन्याभिमन्त्र्य पुनरमृतेश्वरीं स्मृत्वा,

ऐं अखण्डैकरसानन्दकरे वरसुधात्मनि। स्वच्छन्दस्फुरणार्थाय निधेह्यमृतरूपिणि।।

हसक्षमलवरयऊं आनन्दभैरवाय वौषट्, सहक्षमलवरयीं सुधादेव्यै वौषट्, इत्यर्घ्यमध्ये आनन्दभैरवमिथुनं तद्बिन्दुभिरेव सन्तर्प्य,

ऐं क्लीं अकुलस्थामृताकारे सिद्धिज्ञानकरे परे। अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि।।

पुनरानन्दभैरवमिथुनं सन्तर्प्य,

सौः तद्रूपेणैकरस्यं त्वं दत्त्वार्घ्ये [1]तत्स्वरूपिणी। भूत्वा परामृताकारे मयि चित्स्फुरणं कुरु।।

पुनरानन्दभैरवं सन्तर्प्य, मूलेन सप्त[2]धाभिमन्त्र्यास्त्रेण संरक्ष्य कवचेनागुण्ठ्यामृतबीजेनामृतीकृत्य धेनुमुद्रां प्रदर्शयेत्। एवमर्घ्यस्थापनं विधायान्यान्यपि पात्राणि यथासंख्यं[3] संस्थाप्यार्घ्यजलेनात्मानं पूजोपकरणानि चाभ्युच्य, ह्रींबीजेन संशोध्यात्मपूजां कुर्यात्। तद्यथा—शिरःपीठे सौः शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुष-प्रकृत्यहङ्कारबुद्धिमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवाय्वग्निसलिलभूम्यात्मने श्रीयोगपीठाय नमः, इति सम्पूज्य स्वमूलाधारादिषडाधारेषु योगिनीन्यासमन्त्रोक्तरीत्या[4]धारदेवतास्तदावृतीश्च सम्पूज्य,

---

१. 'चित्स्वरूपिणि' ख. पाठः। २. 'सप्तवारं' क. पाठः। ३. 'यथायथं' क. पाठः। ४. 'नीत्या' ग. पाठः।

पुनस्तत्तेजस्त्रिपुष्कररूपेण त्रिधा कृत्वा, ऐं स्वयम्भूलिङ्गाय नमः। ईं बाणलिङ्गाय नमः। औं इतरलिङ्गाय नमः। ऐंईंऔं परलिङ्गाय नमः। इत्याधारहृदयभ्रूमध्यमूर्धसु वह्निसूर्यसोमतत्समष्टिरूपतयानुसन्धाय, पुनस्तत्तेजो निष्कलीकृत्य,

''स्वरद्वयपुटान्तःस्थमनच्कद्वयसंश्रयम्। तेजो दण्डमयं ध्यायेत् कुलाकुलनियोजनात्'' इति क्रमेण सन्तर्प्य पूर्वोक्तपीठे सौः इति परां कलां विभाव्य, तां परां कलां ''अकलङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती। मुद्रापुस्तलसद्बाहुः पातु मां परमा कला।।'' इति सावयवां सञ्चिन्त्य मानसोपचारेः सम्पूज्य, शिरोबिन्दोः परितः त्रिकोणपञ्चारवृत्तचतुर्दलपञ्चारचतुष्टयचतुरस्रात्मकं षट्त्रिंशत्तत्त्वात्मकं (मण्डलं) विरच्य तदनुज्ञया रश्मिपूजां कुर्यात्। आदौ बाह्यचतुरश्रेऽष्टदिक्षु— अं असिताङ्गभैरवाय नमः। आं ब्राह्म्यै[२]०। इं रुरुभैरवाय नमः। ईं माहेश्वर्यै०। उं चण्डभैरवाय नमः। ऊं कौमार्यै०। ऋं क्रोधभैरवाय०। ॠं वैष्णव्यै०। ऌं उन्मत्तभैरवाय०। ॡं वाराह्यै०। एं कपालिभैरवाय०। ऐं इन्द्राण्यै०। ओं भीषणभैरवाय०। औं चामुण्डायै०। अं संहारभैरवाय०। अः महालक्ष्म्यै०। ततो बाह्यपञ्चारे—सौः पृथिवीतत्त्वश्रीपा०। एवं पराबीजादि सर्वत्र। अप्तत्त्व०। तेजस्तत्त्व०। वायुतत्त्व०। आकाशतत्त्व०। तदन्तरपञ्चारे गन्धरसरूपस्पर्शशब्दतत्त्व०। तदन्तरपञ्चारे— उपस्थतत्त्व०। पायुतत्त्व०। पादतत्त्व०। पाणितत्त्व०। वाक्तत्त्व०। तदन्तरपञ्चारे—घ्राणतत्त्व०। जिह्वातत्त्व०। श्रोत्रतत्त्व०। चक्षुस्तत्त्व०। त्वक्तत्त्व०। तदन्तरचतुर्दले—मनस्तत्त्व०। बुद्धितत्त्व०। अहङ्कारतत्त्व०। प्रकृतितत्त्व०। तदन्तरवृत्ते—पुरुषतत्त्व०। नियतितत्त्व०। रागतत्त्व०। कालतत्त्व०। विद्यातत्त्व०। मायातत्त्व०। तदन्तरपञ्चारे—शुद्धविद्यातत्त्व०। ईश्वरतत्त्व०। सदाशिवतत्त्व०। शक्तितत्त्व०। शिवतत्त्व०। तदन्तस्त्रिकोणे—ऐं सत्त्वगुणाय नमः। क्लीं रजोगुणाय०। सौः तमोगुणाय०। तद्रेखासु—ऐं[३] इच्छाशक्तिश्री०। क्लीं ज्ञानशक्तिश्री०। सौः क्रियाशक्तिश्री०। सौः परशक्त्यम्बाश्री०। इति मध्ये यथाशक्ति मानसोपचारैः सन्तर्पयेत्। ततो ''रागद्वेषपशून् हत्वा तर्पयेच्च रसामृतैः'' इति द्वादशान्ते बिन्दुभिः सन्तर्प्य, पुनस्तन्निष्कलीकृत्य बिन्दुत्रयेण[४] विभाव्य, शुक्लं त्रिशूलेन संयोज्य तद्विसर्गे लयं नयेत्। इत्यनुसन्धाय, प्रकाशविमर्शचरणाभ्यां सम्पूज्य तदनन्तरं तत्र ''तत्त्वे विश्रामयेन्मुहु''रिति रीत्यात्मानं देवीरूपं विभाव्य मिश्रचरणविद्यया सम्पूज्य, ''चराचरमिदं विश्वं तदीयं वाचकं स्मरेदि''त्युक्तरीत्या जगत्सर्वं तत्र च लीनं विभाव्य, बहुशोऽभ्यस्या नन्दस्वरूपमात्मानं विभाव्य, ऐं आत्मतत्त्वाधिपतिः श्रीपरा तृप्यतु। ईं विद्यातत्त्वाधिपतिः श्रीपरा तृप्यतु। अः शिवतत्त्वाधिपतिः श्रीपरा तृप्यतु। सौः सर्वतत्त्वाधिपतिः श्रीपरा तृप्यतु। इति सन्तर्प्य, मूलाधारे त्रिकोणकुण्डं विभाव्य,

प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम्। धर्माधर्मकलास्नेहपूर्णामग्नौ जुहोम्यहं स्वाहा।।
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा।।

मूलाधारे सर्वभूतानि तृप्यन्तु। रोमकूपे चतुःषष्टियोगिन्यस्तृप्यन्तु। इति सन्तर्प्य, तत्त्वचतुष्टयशोधनेन विगलितभवबन्धमात्मानं परमशिवात्मानमनुसन्धाय,

मायान्ततत्त्वे सदहं शिवोऽहं शक्त्यन्ततत्त्वे चिदहं शिवोऽहम्।
शिवान्ततत्त्वे सुखदः शिवोऽहमतः परं पूर्णमनुत्तरोऽहम्।।
देशिकवागुपदेशविनश्यद् देहमरुन्मयशून्यविकल्पः ।
अद्वयबोधविमर्शसुखः सन्नद्य शिवोऽस्मि शिवोऽस्मि शिवोऽस्मि।।

---

१. 'ब्रह्माण्यै' ग. पाठः। २. 'ईं' क. पाठः। ३. 'रूपेण' ग. पाठः।

इत्यनुसन्धाय, विगलिताखिलबन्धः परमशिवभट्टारको भूत्वा जीवन्मुक्तः सुखी विश्रामयेत्। इति आत्मपूजा।।

ततः पादुकास्मरणं कुर्यात्। ऐं पराश्री०। क्लीं अपराश्री०। सौः परापराश्री०। ॐ ऐं अनङ्गनाथदेवश्री० अनङ्गनाथदेवश्री०। क्लीं अवतरनाथश्री० अवतरनाथदेवीश्री०। सौः सिद्धनाथदेवश्री० सौः सिद्धनाथदेवश्री०। इति समयपादुकाः सप्त।

ॐ ऐं क्लीं सौः निजगुरुनाथसदाशिवनाथश्री०। ॐ अमृतानन्दनाथसदाशिवनाथश्री०। ॐ नकुलीशनाथसदाशिवश्री०। ॐ मृगपर्यङ्कनाथसदाशिवश्री०। ॐ चन्द्रार्कनाथसदाशिवश्री०। ॐ शङ्खपालनाथसदाशिवश्री०। ॐ आदिनाथसदाशिवश्री०। इति सङ्केतपादुकाः सप्त।

ॐ परप्रकाशानन्दनाथश्री०। ॐ परशिवानन्दनाथश्री०। ॐ परशक्त्यम्बाश्री०। ॐ कौलेश्वरानन्दनाथश्री०। ॐ शुक्रदेव्यम्बाश्री०। ॐ कुलेश्वरानन्दनाथश्री०। कामेश्वर्यम्बाश्री०। इति सप्त दिव्यौघाः।।

ॐ भोगानन्दनाथश्री०। ॐ क्लिन्नानन्दनाथश्री०। ॐ सहजानन्दनाथश्री०। ॐ समयानन्दनाथश्री०। ॐ इति चत्वारः सिद्धौघाः।।

ॐ गगनानन्दनाथश्री०। ॐ विश्वानन्दनाथश्री०। ॐ विमलानन्दनाथश्री०। ॐ मदनानन्दनाथश्री०। ॐ भुवनानन्दनाथश्री०। ॐ लीलानन्दनाथश्री०। ॐ स्वात्मानन्दनाथश्री०। ॐ प्रियानन्दनाथश्री०। ॐ सहजानन्दनाथश्री०। ॐ स्वच्छन्दानन्दनाथ०। ॐ प्रकाशानन्दनाथ०। ॐ अमृतानन्दनाथ०। ॐ इति द्वादश मानवौघाः।।

अथोर्ध्वाम्नायक्रमः। तत्र बालया षडङ्गं विधाय पात्रं संशोध्य सुधयात्मानं सानन्दीकृत्य संविद्देवतागणं स्मरेत्। ''चरणं नवनाथाश्च मूलविद्याश्च षोडश। आधारषट्कं देवेशि संविद्देव्य उदाहृताः।। तत्रादौ चरणविद्याः— ॐ ओं योऽहमस्मि सोऽहमस्मि अहमस्मि ब्रह्माहमस्मि ब्रह्म सोऽहं स्वच्छप्रकाशपरिपूर्णपरापरमहाकाशपरिपूर्णानन्दनाथश्री०। (ॐ अनादिनाथव्योमेश्वर्यम्बाश्री०) ॐ कुलीशनाथव्योमव्यापिन्यम्बाश्री०। ॐ अनामयनाथव्योमगाम्बाश्री०। ॐ अनन्तनाथव्योमचारिण्यम्बाश्री०। ॐ चिदाभासानन्दनाथव्योमस्थाम्बाश्री०। इति दिव्यौघाः।।

ॐ हं उन्मनाकाशानन्दनाथश्री०। ॐ सं समनाकाशानन्दनाथश्री०। ॐ क्षं व्यापकाकाशानन्दनाथश्री०। ॐ मं शक्त्याकाशानन्दनाथश्री०। ॐ लं ध्वन्याकाशानन्दनाथश्री०। ॐ वं ध्वनिमात्राकाशानन्दनाथश्री०। ॐ रं [1]नादाकाशानन्दनाथश्री०। ॐ यं बिन्द्वा[1]काशानन्दनाथश्री०। ॐ ऊं व्यस्ताकाशानन्दनाथश्री०। ॐ हः[2] समस्ताकाशानन्दनाथश्री०। इति सिद्धौघाः।।☛

ॐ आत्मानन्दनाथश्री०। ॐ परमानन्दनाथश्री०। ॐ शम्भवानन्दनाथश्री०। ॐ वाग्भवानन्दनाथश्री०। ॐ नीलकण्ठानन्दनाथश्री०। ॐ चिदानन्दानन्दनाथश्री०। ॐ स्वच्छप्रकाशानन्दनाथश्री०। ॐ निजप्रकाशानन्दनाथश्री०। ॐ अमृतानन्दनाथश्री०। इति मानवौघाः।

(१) ह्रींश्रीं स्वच्छप्रकाशपरिपूर्णपरापरमहासिद्धविद्याकुलयोगिनीह्रींश्रींश्री०। इति कुलयोगिनीमूलविद्या।।

---

[1] 'इन्दु' ख. पाठः। [2] 'हसः' ग. पाठः।

☛ उन्मना—समना—व्यापक—शक्ति—ध्वनि—ध्वनिमात्र—अनाहत—इन्दु—बिन्द्वाकाशाख्या नव नाथा इति (सौभाग्यकल्पद्रुमः।)

(२) हसौं स्वात्मानं बोधय बोधय हसौं श्री०। इति प्रसादपरा। (३) ॐ ऐंब्लूं क्लिन्ने क्लेदिनि महामदद्रवे क्लीं क्लेदय क्लांक्लीं मोहय मोहय क्लीं नमः स्वाहा श्री०। इत्यतिरहस्यविद्या।। (४) ॐ हंसः स्वच्छानन्दपरमहंसपरात्मात्मने स्वाहा हसौं[1] श्री०। इति शाम्भवीविद्या।। (५) ॐ ह्रीं[2] नित्यस्फुरत्ताचैतन्यानन्दमयी महाबिन्दुव्यापकमातृस्वरूपिणी ह्रींऐंश्रींह्रींश्रीपा०। इति हृल्लेखाविद्या।। (६) ॐ स्व[6]च्छप्रकाशात्मिके ह्रीं कुलमहामालिनि कुलगर्भमातृके ऐं समयविमले श्री०। इति समयविमलामूलविद्या। (७) ॐ हंसः नित्यप्रकाशात्मिके कुलकुण्डलिनि आज्ञासिद्धिमहाभैरवि आत्मानं बोधय बोधय अम्बे भगवति [3]ह्रींहुंश्री०। इति परबोधिनी मूलविद्या। (८) ॐ ओं मोक्षं कुरु श्री०। इति कुलपञ्चाक्षरीविद्या।। (९) ॐ नवमी लोपामुद्रा श्रीविद्या चैतन्यत्रिपुरामूलविद्याश्री०।। (१०) ॐ ऐं शुद्धसूक्ष्मनिराकारनिर्विकल्प- परब्रह्मस्वरूपिणी क्लीं परमानन्दशक्तिः सौः शाम्भवानन्दनाथश्री०। इत्यनुत्तरकौलिनी।। (११) ॐ हंसः सोऽहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा। इति गुरूत्तमविमर्शिनीमूलविद्या।। (१२) ॐ अनामाख्याव्योमातीतनाथपरापरव्योमातीतव्योमेश्वर्यम्बाश्री०। इत्यनामामूलविद्या।। (१३) ॐ ऐंईंऔं[4]श्री०, इति सङ्केतसारविद्या।। (१४) ॐ ह्रीं भगवति विच्चे वाग्वादिनी क्लौं क्लीं महाह्रदमहामातङ्गिनि ऐं क्लिन्ने ब्लूंस्त्रींश्री०। इत्यनुत्तरवाग्वादिनीयम्। (१५) ॐ ह्रींश्रीं हसखफ्रें सहकलरीं सौः श्री०। इत्यनुत्तरशाङ्करी।। । (१६) ॐ ह्रींश्रीं हसकल–हसकलहल–सकलह्रीं श्रीमहात्रिपुरसुन्दरि सर्वानन्दमये बैन्दवे चक्रे परब्रह्मस्वरूपिणी परमात्मशक्तिः सर्वमन्त्रेश्वरी सर्वविद्येश्वरी सर्वपीठेश्वरी सर्ववीरेश्वरी सर्वयोगीश्वरी सर्ववागीश्वरी सर्वसिद्धीश्वरी सकलजगदुत्पत्तिमातृका सचक्रा सदेवता समुद्रा ससिद्धिः सायुधा सवाहना सपरिवारा सशक्तिका सालङ्कारा सर्वापचारैः सम्पूजिताऽस्तु श्री०। इति श्रीमहात्रिपुरसुन्दरी मूलविद्या।। एता विद्याः स्वशिरसि संस्मृत्य षडाधारविद्यास्तर्पयेत्। ॐ सं सर्वानन्दविभूत्यै स्वाहा, मूलाधारे। ॐ रं सोहं परमविभूत्यै स्वाहा, स्वाधिष्ठाने। ॐ हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा, नाभौ। ॐ हंसः स्वात्मानं बोधय बोधय परमानन्दनाथश्री०, अनाहते। ॐ सोहं परमात्मानं बोधय बोधय स्वात्मानन्दनाथश्री०, विशुद्धौ। ॐ ह्रींश्रीं हंसः सोहं स्वच्छानन्दचित्प्रकाशामृतहेतवे स्वाहा, आज्ञायाम्।। ततश्चरणविद्यां द्वादशान्ते तर्पयेत्।

अथ चरणविद्याः। ॐ क० ह० स० ह्रीं हंसः शिवः ऐंह्रींश्रीं हसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं हंसः हसौं शुक्लविद्यामहापीठशुक्लपुष्पशुक्लमण्डलमहापीठंशुक्लचरुकमहापीठशुक्लमन्त्रमहापीठशुक्लदीपशुक्लमुद्रामहापीठशुक्लनतिशुक्लमहाप्रकाशात्मकपरमशिवश्रीपादुकां पूजयामि हसौं हंसः हसक्षमलवरयूं हंसः सोहं स्वच्छचिदा[5]नन्दपरमात्मने स्वाहा, ॐ त्रिपुरसुन्दरीब्रह्मविद्याश्रित–अमुकशक्तियुक्तश्रीपरमेष्ठिगुरु–अमुकानन्दनाथामुकशक्तियुक्तश्रीपरमगुरु–अमुकानन्दनाथामुकशक्तियुक्तश्रीगुरु–अमुकानन्दनाथश्रीपादुकां पूजयामि नमः। इति शुक्लंवरणम्।। ॐ क० ह० स० ह्रीं सोहं शिवः ऐंह्रींश्रीं हसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं सोहं हंसः श्रीरक्तविद्यामहापीठरक्तपुष्परक्तमण्डलमहापीठरक्तचरुकरक्तमन्त्रमहापीठरक्तदीपरक्तमुद्रामहापीठरक्तनतिरक्तमहाविमर्शात्मकपरशक्त्यम्बाश्री०। ॐ स्ह्रीं सोहं सहक्षमलवरयीं सहक्षमलवरयूं हसखफ्रें श्रींह्रींऐंऐंह्रींश्रीं हसक्षमलवरयूं सहक्षमलवरयीं हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा इंह्रीं त्रिपुरसुन्दरि ब्रह्मविद्याश्रितामुकशक्तियुक्तपरमेष्ठिगुरु–अमुकानन्दनाथामुकशक्तियुक्तपरमगुरु–अमुकानन्दनाथामुकशक्तियुक्तश्रीगुरु–अमुकानन्दनाथाश्री०। इति रक्तचरणम्।। ॐ क० ह० स० ह्रीं हंसः सोऽहं श्रींह्रींऐंऐंह्रींश्रीं हसखफ्रें

---

१. 'हसौं क्ष्रौं' ख. पाठः। २. 'क्रीं क्लीं' ग. पाठः। ३. 'ह्रींह्रीं' ग. पाठः। ४.'इंईंउं' ग. पाठः। ५. 'निजा' क. पाठः।

हसक्षमलवरयूं सहक्षमलवरयीं हंसः सोहं ह्स्त्रीं सहरीं मिश्रविद्यामहापीठमिश्रपुष्पमिश्रमण्डलमहापीठमिश्रचरुकमिश्रमन्त्रमहापीठमिश्रदीपमिश्रमुद्रामहापीठमिश्रनतिमिश्रमहाप्रकाशविमर्शात्मकपरमशिवशक्त्यम्बाश्री०। स्ह्रौंह्स्त्रीं सोहं हंसः सहक्षमलवरयीं हसक्षमलवरयूं हसखफ्रें श्रींह्रीं ऐंऐं ह्रींश्रीं हसक्षमलवरयूं सहक्षमलवरयीं हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा इंह्रींश्रीं महात्रिपुरसुन्दरीब्रह्मविद्याश्रित-अमुकशक्तियुक्तपरमेष्ठिगुरु-अमुकानन्दनाथ-अमुकशक्तियुक्तपरमगुरु-अमुकानन्दनाथ-अमुकशक्तियुक्तश्रीगुरु-अमुकानन्दनाथश्रीपादुकां पूजयामि नमः। इति मिश्रचरणम्।। एवं सर्वं स्वशिरसि सङ्घट्टमुद्रया विन्यस्य पीठपूजामारभेत्। ॐ मण्डूकाय नमः। एवं ॐ कालाग्निरुद्राय नमः। मूलप्रकृत्यै०। आधारशक्त्यै०। कूर्माय०। अनन्ताय०। वराहाय०। पृथिव्यै०। इत्यादि परतत्त्वान्तं न्यासोक्तरीत्या सम्पूज्य, ॐ श्रीचक्रराजाय नमः। ॐ तत्र समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीश्रीचक्रदेवताश्री०। इति पुष्पाञ्जलिं दत्त्वा, भूबिम्बवृत्तयोर्मध्ये वायव्यादीशानान्तं ॐ मित्रेशनाथश्री०। ॐ उड्डीशनाथश्री०। ॐ षष्ठीशनाथश्री०। ॐ चर्यानाथश्री०। इति युगनाथानभ्यर्च्य, चक्रस्येशानादिचतुष्कोणेषु—ॐ गां गणपतिनाथश्री०। ॐ वां वटुकनाथश्री०। ॐ क्षां क्षेत्रपालनाथश्री०। चतुरश्रे ॐ योगिनीश्री०। ॐ अंआंसौः त्रिपुरामृतार्णवासनश्री०। पद्मद्वये—ॐ ऐंक्लींसौः त्रिपुरेश्वरीपोताम्बुजासनश्री०। चतुर्दशारे ॐ ह्रींक्लींसौः त्रिपुरसुन्दरीदेव्यात्मासनश्री०। दशारद्वये—ॐ हैं हक्लीं हसौः त्रिपुरवासिनीसर्वचक्रासनश्री०। अष्टारे—ॐ हसैं ह्सक्लीं ह्सौः त्रिपुराश्रीसर्वमन्त्रासनश्री०। त्रिकोणे—ॐ ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनश्री०। एवं षडासनानि चतुरश्रे पद्मद्वये चतुर्दशारे दशारद्वये अष्टारे त्रिकोणे च क्रमेण सम्पूज्य, ॐ ऐं कामरूपपीठश्री०। ॐ क्लीं पूर्णगिरिपीठश्री०। ॐ सौः जालन्धरपीठश्री०। ॐ ऐंक्लींसौः उड्याणपीठश्री०। इति त्रिकोणाग्रदक्षवाममध्येषु सम्पूज्य, ॐ ह्लां पृथिव्यधिपतिब्रह्मप्रेतपा०। ॐ ह्रौं[1] जलाधिपतिविष्णुप्रेतपा०। ॐ हुं तेजोधिपतिरुद्रप्रेतपा०। ॐ स्हीं वाय्वधिपतीशानप्रेतपा०। ॐ क्लीं आकाशाधिपतिसदाशिवप्रेतपा०। इति मध्यपीठस्याग्नेयादिपादचतुष्टये मध्ये च पञ्चप्रेतासनानि सम्पूज्य, ॐ प्रसूनतूलिकापा०। ॐः महापद्मवनपा०। ॐ ह्रींश्रींस्सौः कामेश्वरकामेश्वरीपा०। ततो देव्या मूर्तिं कामेश्वराङ्कोपविष्टां ध्यात्वा—

ध्यायेत् परशिवाङ्कस्थां पाशाङ्कुशधनुःशरैः। भासमानचतुर्बाहुमरुणामरुणांशुकाम्।।

इति ध्यात्वा, ऐंह्रींश्रीं "प्रकटाद्याश्च योनिन्यो महावीराः परापराः। सान्निध्यं कुलयागेऽस्मिन् कुर्वन्त्वद्य शिवाज्ञया"।। इति देवीमूर्तौ पुष्पाञ्जलिं ध्यात्वा त्रिखण्डामुद्रां बद्ध्या, ॐ ह्सैं[3] ह्क्लीं ह्सौः इति पञ्चकूटविद्यया द्वादशान्ततश्चैतन्यमयीं परां देवीं वहन्नासापुटाध्वना पुष्पाञ्जलावानीय,

एह्येहि देवदेवेशि त्रिपुरे देवपूजिते। परामृतमये शीघ्रं सान्निध्यं कुरु सिद्धिदे[4]।।
महापद्मवनान्तःस्थे कारणानन्दविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि ।।

अस्मिन् मण्डले सान्निध्यं कुरु २ नमः। इति पूर्वसङ्कल्पिते देवीमूर्तौ चैतन्यमावाह्यावाहन-स्थापन-सन्निधापन-सन्निरोधनमुद्राः प्रदर्श्यावगुण्ठनमुद्रयावगुण्ठ्य, शिरसि धेनुमुद्रयामृतीकृत्य, देव्यङ्गे षडङ्गमन्त्रैः सकलीकृत्य परमीकरणमुद्रया परमीकृत्य,

---

१. 'क्लीं' क. पाठः। २. 'रूं' क. पाठः। ३. 'हस्त्रैं हसकलरीं हस्त्रौः' क. पाठः। ४. 'सर्वदे' क. पाठः।

मूलमन्त्रेण दीपिन्या मालिन्याऽर्घ्योदकेन च। त्रिवारं प्रोक्षयेदेवं[1] देवशुद्धिरितीरिता।।

इति क्रमेण सम्प्रोक्ष्य ध्यायेत्। तद्यथा–

ततः श्रीचक्रमारूढां ध्यायेत् त्रिपुरसुन्दरीम्। ततः[2] पद्मनिभां ध्यायेद्बालार्ककिरणारुणाम्।। १।।
जपाकुसुमसङ्काशां दाडिमीकुसुमप्रभाम्। पद्मरागप्रतीकाशां कुङ्कुमोद[3]रसन्निभाम्।। २।।
स्फुरन्मुकुटमाणिक्यकिङ्किणीजालमण्डिताम्। कालालिकुलसङ्काशकुटिलालकपल्लवाम्।। ३।।
प्रत्यग्रारुणसङ्काशवदनाम्भोजमण्डलाम्। किञ्चिदर्धेन्दुकुटिलललाटमृदुपट्टिकाम्।। ४।।
पिनाकिधनुराकारभ्रूलतां परमेश्वरीम्। आनन्दमुदितोल्लोललीलान्दोलितलोचनाम्।। ५।।
स्फुरत्मयू[4]खसङ्घातविलसद्धेमकुण्डलाम्। स्वगण्डमण्डलाभोगजितेन्द्वमृतमण्डलाम्।। ६।।
विश्वकर्माविनिर्माणसूत्रसुस्पष्टनासिकाम्। ताम्रविद्रुमबिम्बाभरक्तोष्ठीममृतोपमाम्।। ७।।
दाडिमीबीजवज्राभदन्तपङ्क्तिविराजिताम्। रत्नद्वी(दी)पसमुद्भासिजिह्वां मधुरभाषिणीम्।। ८।।
स्मितमाधुर्यविजितमाधुर्यरससागराम्। अनौपम्यगुणोपेतचिबुकोद्देशशोभिताम्।। ९।।
कम्बुग्रीवां महादेवीं मृणालललितैर्भुजैः। मणिकङ्कणकेयूरभूषणैः परिशोभिताम्।। १०।।
रक्तोत्पलदलाकारसुकुमारकराम्बुजाम्। कराम्बुजनखज्योत्स्नाविराजितनभस्तलाम्।। ११।।
मुक्ताहारलतोपेतसमुन्नतपयोधराम्। पीनवृत्तोन्नतकुचां तनुमध्येन शोभिताम्।। १२।।
त्रिवलीवलनायुक्तमध्यदेशसुशोभिताम्। लावण्यसरिदावर्ताकारनाभिविभूषिताम्।। १३।।
अनर्घरत्नखचितकाञ्चीयुक्त[5]नितम्बिनीम्। नितम्बबिम्बद्विरदरोमराजिवराङ्कुशाम्।। १४।।
कदलीललितस्तम्भसुकुमारोरुमीश्वरीम्। लावण्यकदलीतुल्यजङ्घायुगलमण्डिताम्।। १५।।
गूढगुल्फपदद्वन्द्वप्रपदाजितकच्छपाम्। नूपुरैर्विलसत्पादपङ्कजातिमनोहराम्।। १६।।
ब्रह्मविष्णुशिरोरत्ननिर्घृष्टचरणाम्बुजाम्। तनुदीर्घाङ्गुलीभास्वन्नखचन्द्रविराजिताम्।। १७।।
शीतांशुशतसङ्काश[6]कान्तिसन्तानहासिनीम्। लौहित्यजितसिन्दूरजपादाडिमरागिणीम्।। १८।।
रक्तवस्त्रपरीधानां पाशाङ्कुशकरोद्यताम्। रक्तपुष्पनिविष्टां तु रक्ताभरणभूषिताम्[7]।। १९।।
चतुर्बाहुं त्रिनेत्रां च पञ्चबाणधनुर्धराम्। कर्पूरशकलोन्मिश्रताम्बूलापूरिताननाम्।। २०।।
महामृगमदोद्दामकुङ्कुमारुणविग्रहाम्। सर्वशृङ्गारवेषाढ्यां सर्वाभरणभूषिताम्।। २१।।
जगदाह्लादजननीं जगद्रञ्जनकारिणीम्। जगदाकर्षणकरीं जगत्स्थापनरूपिणीम्।। २२।।
सर्वमन्त्रमयीं देवीं सर्वसौभाग्यसुन्दरीम्। सर्वलक्ष्मीमयीं नित्यां परमानन्दनन्दिताम्।। २३।।
महात्रिपुरमुद्रां तु स्मृत्वावाहनरूपया। विद्ययावाह्य सुभगे नमस्तारिणियुक्तया।। २४।।
पूर्वोक्तया साधकेन्द्रो महात्रिपुरसुन्दरीम्। चक्रमध्ये तु सञ्चिन्त्य ततः पूजनमारभेत्।। २५।।

---

[1] 'एतत्' क. पाठः। [2] 'ध्यायेत् पद्मनिभां देवीं' क. पाठः। [3] 'दक' ग. पाठः। [4] 'मुकुट' क. पाठः।
[5] 'युत' क. पाठः। [6] 'सन्तान' क. पाठः। [7] 'मण्डिताम्' ग. पाठः।

इति। ज्ञानार्णवे—

शृणु देवि प्रवक्ष्यामि यजनं चान्तरं महत्। मूलादिब्रह्मरध्रान्तं बिसतन्तुतनीयसीम् ।। १ ।।
उद्यत्सूर्यसहस्राभां विद्युत्कोटिसमप्रभाम्। चन्द्रकोटिप्रभार्द्रभां त्रैलोक्यैकप्रभामयीम्।। २।।
अशेषजगदुत्पत्तिस्थितिसंहारकारिणीम्। ध्यायेन्मनो यदा देवि निश्चलं जायते तदा ।। ३।।
सहजानन्दसन्दोहमन्दिरं भवति क्षणात्। मनो निश्चलतां प्राप्तं शिवशक्तिप्रभावतः ।। ४।।
समाधिर्जायते तत्र संज्ञाद्वयविजृम्भितः। स्यवं प्रज्ञातनामैको ह्यसम्प्रज्ञातनामधृक् ।। ५।।
स्वयं प्रज्ञातभेदस्तु शिवाधिक्येन जायते। असम्प्रज्ञातसंज्ञस्तु शक्त्याधिक्येन वै भवेत्।। ६।।
स्वयं प्रज्ञातभेदस्तु तीव्रस्तीव्रतरो भवेत्। असम्प्रज्ञातभेदस्तु मन्दो मन्दतरस्तथा ।। ७।।
हास्यरोदनरोमाञ्चकम्पस्वेदादिलक्षितः। तीव्रस्तीव्रतरो देवि समाधिरुपलक्षितः ।। ८।।
शाम्भवेन तु वेधेन सुखीभूयान्निरन्तरम्। अन्तर्यागविधिं कृत्वा बहिर्यागं समारभेत् ।। ९।।
एवं विन्यस्तदेहः सन् सर्वात्मा साधकोत्तमः। ध्यायेन्निरामयं वस्तु जगत्त्रयविमोहिनीम्।। १०।।
अशेषव्यवहाराणां [१]साधिनीं संविदं पराम्। उद्यत्सूर्यसहस्राभां दाडिमीकुसुमप्रभाम्।। ११।।
जपाकुसुमसङ्काशां पद्मरागमणिप्रभाम्। स्फुरत्पद्मनिभां तप्तकाञ्चनाभां परेश्वरीम् ।। १२।।
रक्तोत्पत्तदलाकारपादपल्लवराजिताम् । अनर्घरत्नखचितमञ्जीरचरणद्वयाम् ।। १३।।
पादाङ्गुलीयकस्वर्णतेजोराशिविराजिताम्। कदलीललितस्तम्भसुकुमारोरुमण्डलाम् ।। १४।।
नितम्बबिम्बविलसद्रक्तवस्त्रपरिष्कृताम्। मेखलावज्रमाणिक्यकिङ्किणीनादविभ्रमाम् ।। १५।।
अलक्ष्यमध्यमां निम्ननाभियुक्तोदरीं पराम्। रोमराजिलताभूतमहाकु[२]चफलान्विताम् ।। १६।।
सुवृत्तनिबिडोत्तुङ्गकुचमण्डलराजिताम्। नवरत्नप्रभाराजद्ग्रैवेयवरभूषणाम् ।। १७।।
श्रुतिभूषामनोरम्यकपोलस्थलमञ्जरीम्। उद्यदादित्यसङ्काशताटङ्कसुमुखप्रभाम्।। १८।।
पूर्णचन्द्रमुखीं पद्मवदनां मीनलोचनाम्। स्फुरन्मदनकोदण्डसुभ्रुवं पद्मलोचनाम् ।। १९।।
ललाटपट्टसंराजद्ररत्नाढ्यतिलकप्रभाम्। मुक्तामाणिक्यघटितमुकुटस्थलकिङ्किणीम् ।। २०।।
स्फुरच्चन्द्रकलाराजन्मुकुटां लोचनत्रयाम्। प्रवालवल्लीविलसद्बाहुवल्लीचतुष्टयाम् ।। २१।।
इक्षुकोदण्डपुष्पेषुपाशाङ्कुशचतुर्भुजाम्। सर्ववेदमयीमम्बां सर्वसौभाग्यसुन्दरीम् ।। २२।।
सर्वतीर्थमयीं देवीं ([३]सर्वकामप्रपूरणीम्। सर्वक्षेत्रमयीं दिव्यां सर्वदेवस्वरूपिणीम् ।। २३।।
सर्वशास्त्रमयीं देवीं सर्वागमनमस्कृताम्। सर्वज्ञानमयीं देवीं) सर्वदानवसेविताम् ।। २४।।
सर्वानन्दमयीं ज्ञानगह्वरां संविदं पराम्। एवं ध्यात्वा परामम्बा[४] वहन्नाडीपुटक्रमात् ।। २५।।
आवाह्य चक्रमध्ये तु मुद्रया हि त्रिखण्डया। संस्थितां पूजयेत् तत्र श्रीपीठान्तर्निवासिनीम्।। २६।।
मुद्राः सन्दर्शयेत् तत्र तर्पणैस्तु त्रिधा यजेत्[५]। लयाङ्गं कल्पयेत् देहे देव्यास्तु परमेश्वरि।। २७।।

१.'स्वामिनीं'क.पाठः। २.'महाकुलफलोन्नताम्'ग.पाठः। ३.'बन्धचिह्नान्तर्गतं'क.पुस्तके नास्तिः। ४.'मायां'क.पाठः। ५.'र्चयेत्'ग.पाठः।

गन्धपुष्पाक्षतादीनि देव्यै सम्यग् निवेदयेत्। उपचारै: षोडशभि: सम्पूज्य परदेवताम्।। २८।।
तर्पणानि पुनर्दद्यात् त्रिवारं मूलविद्यया।...।।

इति। ततो मूलविद्यान्ते श्रीमहात्रिपुरसुन्दरीनित्याश्रीपादुकां पूजयामीति त्रि: पुष्पाञ्जलिं दत्त्वा तर्पयाम्यन्तं सन्तर्प्य, बालान्ते श्रीमहात्रिपुरसुन्दरि एतत्ते आसनं नम:। एवं स्वागतं नम:। एतत्ते पाद्यं नम:। एष तेऽर्घ्य: स्वाहा। एतत्ते आचमनीयं सुधा। एष ते मधुपर्क: सुधा। एतत्ते आचमनीयं सुधा। इति समर्प्य, द्रांद्रींक्लींब्लूंस: हसखफ्रें क्रोंहसौंऐं इति नवबीजैर्नव मुद्रा: प्रदर्श्य, स्वर्णपादुके उपनीयोत्तरत: स्नानमण्डपमानीय, रत्नसिंहासने संस्थाप्यार्घ्यादिचन्दनान्तान् उपचारान् निवेद्य, केशप्रसाधनमभ्यङ्गं गन्धामलकोद्वर्तनमुष्णोदकस्नानं पञ्चगव्यस्नानं पञ्चामृतस्नानं समा[1]प्याङ्गप्रोञ्छनं केशसंस्कारं चिकुरशोधनं कृत्वा, भगवति एतत्ते स्नानीयं नम:। तत: एतत्ते वस्त्रयुग्मं नम:। इति वस्त्रयुग्मं परिधाप्य, नीराजनादिमङ्गलाचारान् विधाय भूषणमण्डपे रत्नसिंहासने समुपवेश्य, मुकुटरत्नताटङ्कनासामौक्तिकग्रैवेयहारकेयूरकङ्कणाङ्गुलीयकरत्नबन्धनमध्यबन्धनकाञ्चीकलापपादकटकनूपुरपादाङ्गुलीयकादिनानाजातीयनानादेशीयविविधभूषणैर्भूषयित्वा, सर्वाङ्गे महामृगमदलेपनं कृत्वा, कण्ठे कह्लारमालां बद्ध्वा, चक्षुषोर्दिव्याञ्जनं रक्षाञ्जनं भाले आदर्शदर्शनं छत्रचामरे समर्प्य, पूजामण्डपमानीय, पुन: कामेश्वराङ्के समुपवेश्य सर्वोपचारै: सम्पूज्य यथोपचारं प्रथमादिभि: सन्तर्प्य, पुष्पाञ्जलिं दत्त्वा नैवेद्यताम्बूलान्तानि निवेद्य प्रार्थयेत्।।

संविन्मये परे देवि परामृतरसप्रिये। अनुज्ञां देहि देवशि परिवारार्चनाय मे।।

इति पुष्पाञ्जलिपुर:सरमनुज्ञां प्राप्य श्रीचक्रात्मनोर्मध्ये त्रिकोणवृत्तचतुरस्रमण्डलं विलि[2]ख्य, तत्र तिथिमयीर्नित्या: पूजयेत्। प्रतिपत्प्रभृतिपूर्णिमापर्यन्तं कामेश्यादिनित्या: पूजयेत्। त्रिकोणमध्ये प्रधानदेवतात्वेन तत्तिथिनित्यां पूजयेत्। तद्रेखासु शेषा: पूज्या:, एवं शुक्लपक्षे। कृष्णपक्षे तु प्रतिपदादिदर्शान्तं चित्रादिकामेश्यन्तं पूजनीयम्। एता नित्या: प्रागेवोद्धृता ज्ञातव्या:। मध्ये श्रीविद्यामुच्चार्य श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि०। ततो मध्यबिन्दोरभित: अग्नीशासुरवायव्यमध्ये दिक्षु षडङ्गानि सम्पूज्य, मध्यत्रिकोणप्राक्त्रिकोणयोर्मध्ये देव्या: पृष्ठभागे त्रिपङ्क्त्या दिव्यौघसिद्धौघमानवौघान् सम्पूज्य, चरणत्रयविद्यया मानवौघान्ते स्वगुरुक्रमं सम्पूज्य, मध्यत्रिकोणरेखात्रये पञ्चपञ्च क्रमेण स्वरानुद्भाव्य, प्रागुक्तमन्त्रै: पञ्चदश नित्या: सम्पूज्य, विसर्गयुक्तमूलविद्यया मध्ये मूलदेवीं यष्ट्वा नवावरणपूजां कुर्यात्।

तत्र भूबिम्बे प्रथमरेखायां पश्चिमादिदिक्षु वायव्यादिविदिक्षु च अणिमादिदशसिद्धिदेवता यजेत्। तत्रादौ* ४ँ त्रैलोक्यमोहनचक्राय नम:। चतुरस्ररेखायै नम:। इति पुष्पं दत्त्वा।☛ ४ँ अंणिमासिद्धिदेवीश्री०। ४ँ लघिमासिद्धिदेवीश्री०। ४ँ महिमासिद्धिदेवीश्री०। ४ँ ईशित्वसिद्धिदेवीश्री०। ४ँ वशित्वसिद्धिदेवीश्री०। ४ँ प्राकाम्यसिद्धिश्री०। ४ँ भुक्तिसिद्धिश्री०। ४ँ इच्छासिद्धिश्री०। ४ँ रससिद्धिश्री०। ४ँ मोक्षसिद्धिश्री०। इति दशकं सम्पूज्य, चतुरस्रमध्यरेखायै नम:। इति पुष्पाञ्जलिं दत्त्वा,✕आं ब्रह्माणीश्री०। ईं माहेश्वरीश्री०। ऊं कौमारीश्री०। ॠं वैष्णवीश्री०। ॡं वाराहीश्री०। ऐं इन्द्राणीश्री०। औं चामुण्डाश्री०। अ: महालक्ष्मीश्री०। एता: पश्चिमादिद्वारेषु वायव्यादिकोणेषु च पूजयेत्। ततश्चतुरस्रान्त्यरेखायै नम:। इति पुष्पाञ्जलि दत्त्वा,▥ ४ँ द्रां सर्वसङ्क्षोभणीमुद्राशक्तिश्री०। ४ँ द्रीं सर्वविद्राविणी०। ४ँ क्लीं सर्वाकर्षिणी०। ४ँ ब्लूं सर्ववशङ्करी०। ४ँ स: सर्वोन्मादिनी०। ४ँ क्रों सर्वमहाङ्कुशा०। ४ँ हसखफ्रें

१.'संतर्प्य' क. पाठ:। २. ' विरच्य ' क. पाठ:। *शुक्लारुणपीतवर्णविचित्ररत्नघटितं समस्थलरूपं चतुरस्रत्रयं ध्यात्वा–(सौ०र०)।
☛ दशसिद्धी: पाशाङ्कुशपद्मद्वयकरा: रक्तवर्णा: शशिशेखरा निधिवाहनस्था: ध्यात्वा पूजयेत्। (सौ०र०)। ✕ रक्तोत्पलकपालहस्ता नीवर्णवस्त्राभरणा मातॄर्ध्यात्वा पूजयेत्। ▥ पाशांकुशस्वस्वमुद्राङ्कितचतुर्भुजा रक्ता: सालङ्कारा दशमुद्रादेवीर्ध्यात्वा पूजयेत्।

सर्वखेचरी०। ४ँ ह्सौं सर्वबीजमुद्रा०। ४ँ ऐं सर्वयोनिमुद्रा०। ४ँ ऐंक्लींसौः सर्वत्रिखण्डामुद्रा०।❦ अंआंसौः त्रिपुराचक्रेश्वरीनित्याश्री०। एताः प्रकटयोगिन्यस्त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजितास्तुष्टा वरदाः सन्तु। इति पुष्पाञ्जलिं दत्त्वा द्रामिति सर्वसङ्क्षोभिणीमुद्रां दर्शयेत्। ततः श्रीपात्रस्थबिन्दुना बिन्दौ प्रधानदेवतां त्रिबारं सन्तर्प्य योनिमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा,

अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

इति समर्प्य द्वितीयावरणं पूजयेत्। अत्र तु त्रैलोक्यमोहनादिचक्रत्रये शङ्खोदकेन सर्वसौभाग्यदायकादिषट्चक्रे श्रीपात्रस्थजलेनाथवा शङ्खस्थवारिणैवेति सर्वत्र सम्प्रदायः। इति प्रथमावरणम्॥

अथ द्वितीयावरणम्।☼ ४ँ सर्वाशापूरकषोडशदलचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा पश्चिमादिवामावर्तेन पूजयेत्।❋ ४ँ अं कामाकर्षिणीनित्याकलाश्री०। एवं ४ँ आं बुद्ध्वाकर्षिणी०। ४ँ इं अहङ्काराकर्षिणी०। ४ँ ईं शब्दाकर्षिणी०। ४ँ उं स्पर्शाकर्षिणी०। ४ँ ऊं रूपाकर्षिणी०। ४ँ ऋं रसाकर्षिणी०। ४ँ ॠं गन्धाकर्षिणी०। ४ँ ऌं चित्ताकर्षिणी०। ४ँ ॡं धैर्याकर्षिणी०। ४ँ एं स्मृत्याकर्षिणी०। ४ँ ऐं नामाकर्षिणी०। ४ँ ओं बीजाकर्षिणी०। ४ँ औं आत्माकर्षिणी०। ४ँ अं अमृताकर्षिणी०। ४ँ अः शरीराकर्षिणी०।⧗ ४ँ ऐंक्लींसौः त्रिपुरेश्वरीचक्रेश्वरीनित्याश्री०। एता गुप्तयोगिन्यः सर्वाशापूरके चक्रे समुद्रा इत्यादिना समर्प्य, द्रीमिति सर्वविद्राविणीं मुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीति द्वितीयावरणार्चनम्'' इति पुष्पाञ्जलिं दद्यात्। इति द्वितीयावरणम्॥

अथ तृतीयावरणम्॥ अष्टदलकमलं जपाकुसुमप्रभं ध्यात्वा। ४ँ सर्वसङ्क्षोभणाष्टदलचक्राय नमः। पाशाङ्कुशनीलोत्पलकरां रक्तवर्णां ध्यात्वा॥ अनङ्गकुसुमाद्यास्तु पूर्वादिदिक्षु आग्नेयादिविदिक्षु च पूजयेत्। ४ँ कं ५ अनङ्गकुसुमादेवीश्री०। ४ँ चं ५ अनङ्गमेखला०। ४ँ टं ५ अनङ्गमदना०। ४ँ तं ५ अनङ्गमदनातुरा०। ४ँ पं ५ अनङ्गरेखा०। ४ँ यं ५ अनङ्गवेगिनी०। ४ँ शं ५ अनङ्गाङ्कुशा०। ४ँ ळं क्षं ५ अनङ्गमालिनी०। रक्तवर्णां सर्वालङ्कारभूषितां पुस्तकाक्षमालावराभयकरां त्रिपुरसुन्दरीं ध्यात्वा। ह्रींक्लींसौः त्रिपुरसुन्दरीचक्रेश्वरीनित्याश्री०। एता गुप्ततरयोगिन्यः सर्वसङ्क्षोभणे चक्रे समुद्रा इत्यादिना समर्प्य, क्लीमित्याकर्षिणीमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीत्यादि तृतीयावरणार्चनम्'' इति पुष्पाञ्जलिं समर्पयेत्। इति तृतीयावरणम्॥

अथ चतुर्थावरणम्। पश्चिमादिवामावर्तेन पूजयेत्। चतुर्दशारचक्रं दाडिमीकुसुमप्रभं ध्यात्वा, रक्तवर्णाः सर्वाभरणभूषिताः पाशाङ्कुशदर्पणपानपात्रकराश्चतुर्दश शक्तीर्ध्यायेत्। ४ँ सर्वसौभाग्यदायकचतुर्दशारचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा, ४ँ अं सर्वसङ्क्षोभिणीश्री०। ४ँ इं सर्वविद्राविणी०। ४ँ उं सर्वाकर्षिणी०। ४ँ ऋं सर्वाह्लादिनी०। ४ँ ऌं सर्वसम्मोहिनी०। ४ँ एं सर्वस्तम्भिनी०। ४ँ ऐं सर्वजृम्भिणी०। ४ँ ओं सर्ववशङ्करी०। ४ँ औं सर्वरञ्जिनी०।

❦ अणिमासिद्धेरग्रे पुस्तकाक्षसूत्रपद्मद्वयकरां स्फटिकाभां मुक्ताभरणां त्रिपुराचक्रेश्वरीं ध्यात्वा। ☼ षोडशदलं पूर्णचन्द्रनिभं स्रवत्पीयूषं ध्यात्वा। ❋ पाशांकुशामृतपूर्णस्फटिकघटवराङ्कितकराः शुक्लाः पीयूषवर्षिणीर्ध्यात्वा। ⧗ पाशाङ्कुशवराभयहस्तां शुभ्राम्बराभरणां रत्नमुकुटां त्रिपुरेश्वरीं ध्यात्वा।

४ँ हं सर्वोन्मादिनी०। ४ँ यं सर्वार्थसाधनी०। ४ँ रं सर्वसम्पत्प्रपूरणी०। ४ँ लं सर्वमन्त्रमयी०। ४ँ वं सर्वद्वन्द्वक्षयकरी०। इति सम्पूज्य, रक्तवर्णां पुस्तकाक्षमालावराभयकरां त्रिपुरवासिनीं ध्यायेत्। ऐंह्रींश्रीं हैं हक्लीं हसौः त्रिपुरवासिनीचक्रेश्वरीनित्याश्री०। एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे सतुद्रा इत्यादिना समर्प्य, ब्लूं सर्ववशकरीमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीत्यादि चतुर्थावरणार्चनम्'' इति पुष्पाञ्जलिं समर्पयेत्। इति चतुर्थावरणम्।।

अथ पञ्चमावरणम्। (बहिर्दशारचक्रे) पश्चिमादिवामावर्तेन पूजयेत्। तत्र ४ँ सर्वार्थसाधकबहिर्दशारचक्राय नमः। इति पुष्पं दत्त्वा, बाह्यदशारं सिन्दूरवर्णं ध्यात्वा जपाकुसुमवर्णाः पाशाङ्कुशालङ्कारपेटीहस्ताः सर्वाभरणभूषिता दशशक्तीः ध्यायेत्। ४ँ तं सर्वसिद्धिप्रदादेवीश्री०। ४ँ थं सर्वसम्पत्प्रदा०। ४ँ दं सर्वप्रियङ्करी०। ४ँ धं सर्वमङ्गलकारिणी०। ४ँ नं सर्वकामप्रदा०। ४ँ टं सर्वदुःखविमोचिनी०। ४ँ ठं सर्वमृत्युप्रशमनी०। ४ँ डं सर्वविघ्नविनाशिनी० ४ँ ढं सर्वाङ्गसुन्दरी०। ४ँ णं सर्वसौभाग्यदायिनी०। ४ँ हसैं हसक्लीं हसौः त्रिपुराश्री। उद्यद्भानुसमानकान्तिं सर्वालङ्कारभूषितां मदाघूर्णनेत्रत्रयां पुस्तकाक्षमालावराभयकरीं ध्यायेत्। चक्रेश्वरीनित्याश्री०। एताः कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्रा इत्यादिना समर्प्य, सः इति सर्वोन्मादिनीमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीत्यादि पञ्चमावरणार्चनम्'' इति पुष्पाञ्जलिं निवेदयेत्। इति पञ्चमावरणम्।।

अथ षष्ठावरणम्। अन्तर्दशारचक्रे अन्तर्दशारचक्रं जपाकुसुमवर्णं ध्यात्वा बालार्कवर्णाः पाशटङ्कज्ञानमुद्रावरकरा मुक्तविभूषणाः सर्वज्ञाद्या ध्यायेत्। चक्रेश्वरीं त्रिपुरमालिनीं रक्तवर्णां पाशाङ्कुशकपालाभयधारिणीं ध्यायेत्।। पश्चिमादिविलोमेन पूजयेत्। ४ँ सर्वरक्षाकरान्तर्दशारचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा, ४ँ चं सर्वज्ञादेवीश्री०। ४ँ छं सर्वशक्ति०। ४ँ जं सर्वैश्वर्यप्रदा०। ४ँ झं सर्वज्ञानमयी०। ४ँ ञं सर्वव्याधिविनाशिनी०। ४ँ कं सर्वाधारस्वरूपा०। ४ँ खं सर्वपापहरा०। ४ँ गं सर्वानन्दमयी०। ४ँ घं सर्वरक्षास्वरूपिणी०। ४ँ ङं सर्वेप्सितफलप्रदा०। ४ँ ह्रींक्लींब्लें त्रिपुरमालिनीचक्रेश्वरीनित्या०। एता निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रा इत्यादिना समर्प्य, क्रों इत्यङ्कुशमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीत्यादि तत्षष्ठावरणार्चनम्'' इति पुष्पाञ्जलिं निवेदयेत्। इति षष्ठावरणम्।।

अथ सप्तमावरणम्। अष्टारचक्रं पद्मरागप्रभं ध्यात्वा तत्र रक्तवर्णा रक्तवस्त्राभरणानुलेपनाः पञ्चबाणधनुःपुस्तकवरकरा ध्यायेत्। चक्रेश्वरीं त्रिपुरासिद्धां शुभवर्णां पाशाङ्कुशकपालाभयधारिणीं ध्यायेत्। अष्टारचक्रे प्रागादिवामावर्तेन वशिन्याद्याः पूजयेत्। तत्र ४ँ सर्वरोगहराष्टारचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा, ४ँ अं १६ ब्लूँ वशिनीवाग्देवताश्री०। ४ँ कं ५ कलह्रीं कामेश्वरीवाग्देवताश्री०। ४ँ चं ५ नवलीं मोदिनीवाग्देवता०। ४ँ टं ५ य्लूं विमलावाग्देवताश्री०। ४ँ तं ५ जम्रीं अरुणावाग्देवताश्री०। ४ँ पं ५ हसलवयूँ जयिनीवाग्देवता०। ४ँ यं ४ झमरयूँ सर्वेश्वरीवाग्देवता०। ४ँ शं ४ क्ष्म्रीं कौलिनीवाग्देवता०। ह्रींश्रींसौः त्रिपुरासिद्धाचक्रेश्वरीनित्याश्री०। एता रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादिना समर्प्य, हसखफ्रें इति सर्वखेचरीमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीत्यादि सप्तमावरणार्चनम्'' इति पुष्पाञ्जलिं निवेदयेत्। इति सप्तमावरणम्।।

अथाष्टमावरणम्। अन्तस्त्रिकोणं बन्धूककुसुमारुणं ध्यात्वा तत्र रक्तवर्णा वराभयसुधापात्रकरा नवरत्नविभूषणाः स्वस्वायुधभूषितहस्तका यौवनोन्मत्तविग्रहा आयुधदेवता ध्यायेत्। त्रिकोणाग्रकोणे शुक्लां शुक्लाम्बरविभूषणामिक्षुधनुःपुष्पबाणपुस्तकाक्षमालाधरां त्रिनेत्रां चन्द्रचूढां कामेश्वरीं ध्यायेत्। वामकोणे नीलवर्णां रक्तवस्त्राभरणमिक्षुचापपुष्पबाणवराभयकरां त्रिनेत्रां चन्द्रशेखरां वज्रेश्वरीं ध्यायेत्। दक्षिणकोणे हेमाभां पाशाङ्कुशजपमालापुस्तककरां त्रिनेत्रां चन्द्रशेखरां भगमालिनीं ध्यायेत्। चक्रेश्वरीं त्रिपुराम्बामुद्यत् सूर्यसहस्राभां त्रिनेत्रां शशाङ्कमुकुटां रक्ताम्बरां रक्तालङ्कारभूषितां पीनोन्नतघनस्तनीं शोणितपिच्छिलमालाधरां पुस्तकाभयजपमालावरकरां ध्यायेत्। त्रिकोणाग्रदक्षवामकोणेषु तद्बहिरन्तरालचक्रे। तत्र ४ँ सर्वसिद्धिप्रदान्तरालचकाय नमः। इति पुष्पाञ्जलिं दत्त्वा, द्रांद्रींक्लींब्लूंसः यांरांलांवांशां जं जृम्भणेभ्यः कामेश्वरकामेश्वरीबाणेभ्यो नमः। ४ँ द्रां ५ यां ५ धंथं सम्मोहनकामेश्वरकामेश्वरीधनुर्भ्यां नमः। ४ँ द्रां ५ यां ५ आंह्रीं वशीकरणकामेश्वरकामेश्वरीपाशाभ्यां नमः। ४ँ द्रां ५ यां ५ क्रोंह्रीं स्तम्भनकामेश्वरकामेश्वर्यकुशाभ्यां नमः। ४ँ ऐं अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मकरुद्रात्मकशक्तिश्रीकामेश्वरीदेवी०। ४ँ क्लीं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिवज्रेश्वरीदेवीश्री०। ४ँ सौः सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालिनीदेवी०। ४ँ हस्रैं हसकलरीं हस्रौः त्रिपुराम्बाचक्रेश्वरीनित्याश्री०। एता अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्रा इत्यादिना समर्प्य, हसौं इति सर्वबीजमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहीत्यादि अष्टमावरणार्चनम्'' इति निवेदयेत्। इत्यष्टमावरणम्।।

अथ नवमावरणम्। बिन्दुचक्रं परब्रह्मात्मकं ध्यात्वा, साध्यसिद्धासने स्वसमानकामेश्वराङ्के स्वस्तिकासनेनोपविष्टां प्रमुदितां श्रीललितां यथोक्तरूपां ध्यायेत्। अत्र सर्वावरणदेवता मूलदेव्यभिमुखोपविष्टज्ञातव्याः (सौ०र०) ऐंक्लींसौः मूलं सर्वानन्दमयबैन्दवचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा, ब्रह्मचक्रे श्रीमदुड्याणपीठे चर्यानन्दनाथात्मके तुरीयदशाधिष्ठायके परब्रह्मात्मकशक्तिश्रीमहात्रिपुरसुन्दरीश्री०। ४ँ हसकलरडैं हसकलरडीं हसकलरडौः त्रिपुरभैरवीचक्रेश्वरीनित्याश्री०। एषा परापररहस्ययोगिनी सर्वानन्दमये बैन्दवे चक्रे सर्वचक्रेश्वरी सर्वमन्त्रेश्वरी सर्वपीठेश्वरी सर्वविद्येश्वरी सर्ववागीश्वरी सर्वसिद्धीश्वरी सर्वजगदुत्पत्तिमातृका सचक्रा ससिद्धिः सायुधा सवाहना सशक्तिका सालङ्कारा सपरिवारा सर्वोपचारैः सम्पूजिता तुष्टा वरदास्तु इति समर्प्य, ऐं इति सर्वयोनिमुद्रां प्रदर्श्य ''अभीष्टसिद्धिं मे देहि शरणागतत्सले। भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्'' इति निवेदयेत्। इति नवमावरणम्।।

४ँ ऐंक्लींसौः आंईंऊंयांरांलांवांशां कामेश्वरीच्छाकामफलप्रदे सर्वसत्त्ववशङ्करि जगत्क्षोभकरि हूं ३ द्रांद्रींक्लींब्लूंसः हसौं क्लीं ऐं कामेश्वरीसमयदेवताश्री०। इति विद्यया देव्या मूलाधारे पुष्पाञ्जलिं समर्पयेत्। ४ँ ह्रीं सर्वकार्यसाधके वज्रेश्वरि वज्रपञ्जरमध्यगते ह्रीं क्लिन्ने ऐंक्रों नित्यमदद्रवे ह्रीं वज्रेश्वरीसमयदेवताश्री०। इति देव्या हृदि पुष्पाञ्जलिं समर्पयेत्। ४ँ भगमालिनीविद्यामुच्चार्य भगमालासमयदेवता श्री०। इति बिन्दौ पुष्पाञ्जलिः। ४ँ क्लीं भगवती ब्लूं नित्याकामेश्वरि स्त्रीं सर्वसत्त्ववशङ्करि सः त्रिपुरभैरवि ऐं विच्चे त्रिपुरसुन्दरीसमयदेवता श्री०। इति शिरसि पुष्पाञ्जलिः। ४ँ मूलविद्यया सप्तधा शिरसि सन्तर्प्य, ४ँ ऐंक्लींसौः श्रीविद्याषोडशाक्षरीमुच्चार्य सप्तदशीं कलां यष्ट्वा प्रागुक्तां कामकलां भावयेत्। ''कलारूपमिदं देवि प्रोक्तमेतत् परात्परम्।'' इत्युक्तरीत्या स्मृत्वा, वटुकयोगिनीगणपतिक्षेत्रपालेभ्यो

बलीनुत्सृज्य सर्वभूतबलिं तन्मन्त्रेणोत्सृज्य, ततो नैवेद्यपात्रं साधारं सात्रं संस्थाप्य धूपदीपौ प्रदर्शयेत्, अस्त्रेण सम्प्रोक्ष्य गन्धादिभिरभ्यर्च्य धेनुमुद्रां प्रदर्श्य ''ऐं [1]जगध्वनिमन्त्रमातः स्वाहा'' इति घण्टां सम्पूज्य वामकरे गृहीत्वा वादयन् नीचैर्धूपं समर्पयेत्।

वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।

इति पठित्वा समर्पयेत्।

सुप्रकाशो महादीपः सर्वत्र तिमिरापहः। सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्।।

इत्युच्चैर्दीपं समर्पयेत्। ततो नैवेद्यमस्त्रेण सम्प्रोक्ष्य, त्रिशूलमुद्रया संरक्ष्य, वाय्वादिबीजैः शोषणादिकं विधाय, सुरभिमुद्रयामृतीकृत्य, गन्धाद्यैरलङ्कृत्य महत्तरनैवेद्यं स्वाहान्तेन मूलेन समर्पयेत्।

नैवेद्यं षड्रसोपेतं पञ्चभक्ष्यसमन्वितम्। सुधारसमहोदारं शिवेन सह गृह्यताम्।।

इत्यङ्गुष्ठशिरसि कनिष्ठानामायोगात् तत्र वामकरेण विकचोत्पलनिभां ग्रासमुद्रां प्रदर्श्य दक्षहस्तेन प्राणादिमुद्राः प्रदर्शयेत्। प्राणाय स्वाहा, इत्यादिना समर्प्य स्वगुरूक्तक्रमेण तत्त्वत्रयमन्त्रैः आत्मतत्त्वाधिपतिः श्रीकामेश्वरी तृप्यतु। एवं विद्यातत्त्वाधिपतिः, शिवतत्त्वाधिपतिः, सर्वतत्त्वाधिपतिः। ततः कामेश्वरस्तृप्यतु इत्यादि चतुस्तत्त्वैः सन्तर्प्य, ऐं परायै श्रीमहात्रिपुरसुन्दर्यै नैवेद्यं स्वाहा। क्लीं परायै०। सौः परायैः। इति नैवेद्यं समर्प्य, ''अमृतोपस्तरणमसि स्वाहा'' इत्युक्त्वा प्राणादिमुद्राः प्रदर्श्य, प्राणाय स्वाहा इत्यादि पञ्चाहुतीर्निवेद्य, जवनिकामधः कृत्वा मूलमन्त्रं स्मरन् यावत् तृप्तिभोजनं तावदाकाङ्क्षमाणः क्षणं विश्रमेत्। अत्र वटुकादिबलिर्नैवेद्यात् पूर्वमित्यस्मत्सम्प्रदायः। केचित्तु नैवेद्योत्तरं वदन्ति। तत्तु यथासम्प्रदायं कार्यमिति। मध्ये पानीयमुत्तरापोशनं करशुद्ध्यादिमुखवाससमर्पणान्तं कुर्यात्। अत्र नैवेद्यसमर्पणानन्तरं नित्यहोमं कृत्वा बलितर्पणादि कुर्यात्। ततः कुलदीपं निवेदयेत्। शालिगोधूमादिपिष्टेन गुडेन सजीरकेण शालिद्वितीयेन सार्धं त्रिकोणाकारान् डमरुकरूपेण नव पञ्च त्रीन् वा विधाय घृतेन पाचयित्वा, ताम्रादिभाजनेऽष्टदलादि तत्संख्यया मण्डलं विधाय, अष्टदलं चेद्वशिन्याद्यष्टकं मध्ये देवीं यष्ट्वा, पञ्च चेत् कामेश्वर्यादि भैरवीर्यजेत्। त्रिकोणं चेद् गुणत्रयात्मिकां परेश्वरीं[2] यजेत्। गुह्यमालिनीविद्यया फलपुष्पताम्बूलसुवर्णादीनि निक्षिपेत्। ''ऐं महादीपतेजोवति अमोघाज्ञाप्रभामालिनि भगा'' इयं गुह्यमालिनी।। ततो रत्नेश्वर्याभिमन्त्र्य पूजयित्वा दीपभाजनमुद्धृत्य सामयिकश्लोकद्वयं पठन् देव्युपरि नवधा पञ्चधा त्रिधा वा भ्रामयेत्।

अन्तस्तेजो बहिस्तेज एकीकृत्य निरन्तरम्। अध ऊर्ध्वक्रमेणैव कुलदीपं निवेदयेत्।।
समस्तचक्रचक्रेशीयुते देवि नवात्मिके। आरात्रिकमिदं भद्रे गृहाण मम सिद्धये।।

इत्याभ्यां श्लोकाभ्यां लवणनिम्बपत्रादिना दृष्टिमुत्तार्य चतुस्तत्पिण्डादिभिरपि। ततो मूलेन प्राणायामत्रयं कृत्वा, अस्याः—शिरसि आनन्दभैरवाय ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदये श्रीत्रिपुरसुन्दर्यै देवतायै नमः। गुह्ये वाग्भवकूटबीजाय नमः। पादयोः शक्तिकूटशक्तये नमः। नाभौ कामराजकूटकीलकाय नमः। इति विन्यस्य मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः इति कृताञ्जलिरुक्त्वा, बालाबीजत्रयद्विरावृत्त्या पञ्चदशीकूटत्रयद्विरावृत्त्या महाषोडशी-

---

१. 'जगद्ध्वनि' ख. पाठः। २. 'परेशीं' ग. पाठः।

खण्डत्रयद्विरावृत्त्या च त्रिधा षडङ्गन्यासत्रयं विधाय, सर्वज्ञायै हृदयाय, नमः इत्यादिमन्त्रैरपि षडङ्गन्यासं विधाय मूलविद्यान्यासान् कुर्यात्। ज्ञानार्णवे– ''ततो न्यासादिकं कुर्यात् सन्नाहं नु शरीरके''। इत्यारभ्य ''कुमार्या त्रिपुरेशान्याः षडङ्गानि च पूर्ववत्''। इत्यन्तमुक्त्वा,

अथ वक्ष्ये महेशानि श्रीविद्यान्यासमुत्तमम्। सम्पूर्णां चिन्तयेद्विद्यां ब्रह्मरन्ध्रेऽरुणप्रभाम्।। १।।
स्रवत्सुधाषोडशार्णां महासौभाग्यदां न्यसेत्[1]। वामांसदेशे सौभाग्यदण्डिनीं भ्रामयेत् ततः।। २।।
रिपुजिह्वाग्रहां मुद्रां पादमूले प्रविन्यसेत्। त्रैलोक्यस्य त्वहं[2] कर्ता ध्यात्वैवं तिलकं न्यसेत्।।३।।
सम्पूर्णमेव वदने वेष्टनत्वेन विन्यसेत्। पुनः पूर्णां च वदने गलोर्ध्वे विन्यसेत् ततः।। ४।।
पुनः सम्पूर्णया देहे वेष्टनेन च विन्यसेत्। व्यापकान्ते योनिमुद्रां मुखे क्षिप्त्वाभिवन्द्य च।। ५।।
श्रीविद्यापूर्णरूपोऽयं न्यासः सौभाग्यवर्धनः। ब्रह्मरन्ध्रे क्षिपेद् देवि मणिबन्धे न्यसेत् ततः।। ६।।
ललाटेऽनामिकां कुर्यात् षोडशार्णां स्मरन् बुधः। त्रैलोक्यस्य तु कर्ताहमिति सम्यग् विभावयेत्।।७।।
सम्मोहनाख्यो देवेशि न्यासोऽयं क्षोभकारकः। त्रैलोक्यमरुणं ध्यायन् श्रीविद्यां मनसि स्मरन्।।८।।
पादयोर्जङ्घयोर्जान्वोः कट्योरन्धुनि मस्तके। नाभौ पार्श्वद्वये चैव स्तनयोरंसयोस्तथा।। ९।।
कर्णयोर्ब्रह्मरन्ध्रे च वदनेऽन्धुनि पार्वति। ततः कर्णप्रदेशे तु करवेष्टनयोः क्रमात्।। १०।।
संहारोऽयं महान्यासो बीजैः षोडशभिः क्रमात्। श्रीविद्यायाः षोडशार्णैर्न्यासैर्विश्वेश्वरो भवेत्।। ११।।

इत्यादिरीत्या मन्त्रन्यासान् विधाय प्राग्वद् ध्यात्वा, प्रागुक्तकुरुकुल्लादिस्मरणपूर्वकं शतादिसंख्यया मूलविद्यां जप्त्वा गुह्यातिगुह्येति च निवेदयेत्। भूयोऽपि मुद्रानवकं प्रदर्श्य सहस्राक्षर्या पुष्पाञ्जलिं दत्त्वा स्तोत्रैः स्तुत्वा बहुशः प्राणायामादिभिः प्रार्थयेत्।।

ततः श्रीचक्रं चतुराम्नायत्वेन विभाव्य तत्तदाम्नायविद्याभिर्व्यस्तसमस्तबालया वा पूजयेत्। तद्यथा– चतुरश्रषोडशाष्टदलमण्डलं सृष्ट्यात्मकं पूर्वाम्नायं विभाव्य, तदीश्वरीं रुद्रशक्तिं यजेत्। मन्वश्रं द्विदशारं स्थितिरूपं दक्षिणाम्नायं मत्वा तदीश्वरीं रुद्राणीं यजेत्। अष्टारं त्र्यश्रं संहाररूपं पश्चिमाम्नायं मत्वा तदीश्वरीं कुब्जिकां यजेत्। बिन्दुचक्रात्मकमनाख्यात्वेन विभाव्य उत्तराम्नायं मत्वा तदीश्वरीं कालसङ्कर्षिणीं यजेत्।।

ततश्च षड्दर्शनात्मकमनुसन्धाय [3]तत्तन्मन्त्रैरर्चयेत्। भूगेहत्रयं बौद्धजैनचार्वाकदर्शनरूपं मत्वा तदीश्वरीं वज्रतारां यजेत्। ''ओं तारे तुतारे तुरे स्वाहा''। इयं वज्रतारा।। षोडशाष्टदलं वैदिकदर्शनं मत्वा सचतुर्थपादां सशिखां गायत्रीं यजेत्। मन्वश्रं सौरदर्शनं विभाव्य सौराष्टाक्षरेण सूर्यं यजेत्। द्विदशारं वैष्णवदर्शनं मत्वा नारायणाष्टाक्षरेण विष्णुं यजेत्। अष्टारं शाक्तदर्शनं मत्वा बालया यजेत्। त्रिकोणं सान्तरालं शैवदर्शनमनुसन्धाय ''हौं नमः शिवाय हसौं नमः'' इत्यनेन शिवं यजेत्।।

ततः श्रीचक्रं सिद्धान्तरूपं मत्वा तत्तत्सिद्धान्तविद्याभिरर्चयेत्। त्रैलोक्यमोहनचक्रं सृष्टिसृष्ट्यात्मकं मत्वा चार्वाकसिद्धान्तं यजेत्। चांचींचूं चमलवरयूं चार्वाकदर्शनाधिदेवतायै श्रीचण्डिकायै नमः।। सर्वाशापूरकचक्रं सृष्टिस्थित्यात्मकं मत्वा बौद्धसिद्धान्तमर्चयेत्। तद्यथा–४ँ नवसहकछलहरीं बौद्धदर्शनाधिदेवतायै तारायै नमः।। सर्वसङ्क्षोभणं चक्रं

---

१. 'स्मरेत्' ग. पाठः। २. 'स्वयं' ग. पाठः। ३. 'ततस्तन्मन्त्रैः' क. पाठः।

सृष्टिसंहारात्मकं मत्वा जैनसिद्धान्तमर्चयेत्। तद्यथा—[1]आंज्रौंक्रौंछ्रौंझ्रौंज्रौं जैनदर्शनाधिदेवतायै अर्हन्तायै नम:।। सर्वसौभाग्यदायकं चक्रं स्थितिसृष्ट्यात्मकं मत्वा सांख्यसिद्धान्तमर्चयेत्। ४ँ अइउऋऌ सांख्यदर्शनाधिदेवतायै श्रीमूलप्रकृत्यै नम:।। सर्वार्थसाधकं चक्रं स्थितिरूपं मत्वा प्राक् गायत्र्या वैदिकसिद्धान्तमर्चयेत्। ''परो रजसेसावदोम्'' इति चतुर्थ: पाद:।। सर्वरक्षाकरं चक्रं स्थितिसंहाररूपं मत्वा सौरसिद्धान्तमर्चयेत्। श्रींह्रींक्लीं ओंऐंह्रींश्रीं ओंक्लींह्रींश्रीं।। सर्वरोगहरं चक्रं संहारसृष्टिरूपं ध्यात्वा ओं नमो नारायणायेति वैष्णवसिद्धान्तं यजेत्।। सर्वसिद्धिप्रदं चक्रं संहारस्थित्यात्मकं शाक्तसिद्धान्तं बालया शक्तिदर्शनाधिदेवतायै श्रीत्रिपुरायै नम: इति यजेत्।। सर्वानन्दमयचक्रं संहारसंहृतिरूपं मत्वा शैवदर्शनं यजेत्। प्रासादपुटितषडक्षर्या शैवदर्शनाधिदेवतायै श्रीब्रह्मविद्यायै नम:।। बिन्दौ व्योम्नि महार्थानाख्याभासाचक्रे सर्वात्मनि शिवाद्वयमनुसन्धाय ज्ञानदर्शनं यजेत्। ४ँ हसखफ्रें महाचण्डयोगेश्वराय संविदद्वैतसमयाधिदेवतायै कालसङ्कर्षिण्यै नम:। इति प्रदक्षिणनमस्कारादिभि: परितोष्य, जानुभ्यामवनिं गत्वा स्वाभिमतं प्रार्थ्य पञ्चमुद्राभिर्नुत्वा,

चतुरश्रं च मत्स्यं च मुद्गरं गोमुखं तथा। योनिमुद्रेति पञ्चैता गुरुदेवाभिवन्दने।।

इति। तत:

रश्मिरूपा महादेव्या अत्र पूजितदेवता:। श्रीसुन्दर्यङ्गलीनास्ता: सन्तु सर्वसुखावहा:।।

इति देव्यै पुष्पाञ्जलिं दत्त्वा, संहारमुद्रया

गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि। यत्र ब्रह्मादयो देवा न विदु: परमं पदम्।।

इति पुष्पं गृहीत्वाघ्राय ब्रह्मरन्ध्रं नीत्वा

तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि। यत्र ब्रह्मादयो देवा: सुरास्तिष्ठन्ति मे हृदि।।

इति पुष्पं हृदयपर्यन्तं नीत्वा मुञ्चेदिति देवतां स्वहृद्युद्वास्य, प्राग्वत् पात्रोद्वासनमपि विधाय श्रीगुरुं प्रणमेत्। ततो ब्रह्मार्पणमन्त्रेण जलं भूमौ निक्षिप्य, ऐशान्यां दिशि नैवेद्यशेषं निर्माल्यपुष्पं निक्षिप्य ''क्लीं नम: उच्छिष्टचण्डालि मातङ्गि सर्ववशङ्करि स्वाहा'' इति तत्र जलमुत्क्षिप्य,

व्योमचक्रसमारूढे भुवनान्तरचारिणि। चरुकं देहि मे देवि प्रसादं कुरु सिद्धिदे।।

इत्यनेन सचरुकं दीपं गृहीत्वा

देहस्थाखिलदेवता गजमुखा: क्षेत्रेश्वरा भैरवा
योगिन्यो वटुकाश्च यक्षपितरो वेतालकाश्चेटका:।
अन्ये दिक्षुचरास्तथैव खचरा भूता: पिशाचा ग्रहा-
स्तृप्ता: स्यु: कुलपुत्रकस्य पिबत: पानं सदीपं चरुम्।।

इत्यनेन मूलमन्त्रमुच्चरन् तदात्मसात् कुर्यात्। ततो योगिनीयोगिभिर्वृत: किञ्चित्कालं नीत्वा मिश्रचरणविद्यया स्वात्मानं सच्चिदानन्दमयं परामृश्य सुखीभूयाद् इति श्रीविद्यापद्धति:।।

अथ सहस्राक्षर्यो लिख्यन्ते। तास्तु यामल—महार्णवोक्तभेदेन नानाविधा: सन्ति। तत्रादावुपस्थानसहस्राक्षरी। ऐं नमो भगवति त्रिपुरसुन्दरि दु[2]र्गतितारिणि क्षमरीं[3] प्रीं कर २ विसर २ नृत्य २ वद २ वाग्वादिनि स्वाहा ह्रीं नम: क्लीं नम: श्रींप्लीं[4]क्लीं नम: सुरासुरवन्दिते सकलजन[5]क्षोभिणि श्रींश्रींश्रीं कारिणि द्रांद्रां द्राविणि मोंमों मोहिनि स्तंस्तं

---

[1] 'न्द्रौंज्रौंक्रौघ्रौंछ्रौंज्रौं' ग.पाठ:। [2] 'दुर्गतरणि' ख.पाठ:। [3] 'क्ष्रीं' क.पाठ:। [4] 'प्रीं' ग.पाठ:। [5] 'जगत्' क.पाठ:।

स्तम्भिनि आंआं आकर्षिणि परमसुभगे नमः [1]कमलवासिनि रस २ वरव[2]र्तिनि ह्लां ३ करि ह्लीं[3] कारि ह्लां ३ कारिके कांकां काकिनि रांरां राकिणि डांडां डाकिनि हांहां हाकिनि ऐं[4] शाङ्करि गन २ किश २ भ्रम २ वदवद सत्यसत्य उत २ मालिनि महामाये तत्त्वविग्रहे अरूपे अमले विमलेऽजिते अपराजिते मर्द २ हर २ संहर २ ओंह्लींऐं कुरु २ लेप २ [5]किटि ओंजूंसः सौःक्लीं ऐंश्रीं नद २ नादबीजे त्रांत्रींत्रूंत्रैंत्रौंत्रः म्रांम्रींम्रूंम्रैंम्रौंम्रः य्रांय्रींय्रूंय्रैंय्रौंय्रः [6]रांरींरूंरैंरौंरः ल्रांल्रींल्रूंल्रैंल्रौंल्रः व्रांव्रींव्रूंव्रैंव्रौंव्रः श्रांश्रींश्रूंश्रैंश्रौंश्रः ष्रांष्रींष्रूंष्रैंष्रौंष्रः स्रांस्रींस्रूंस्रैंस्रौंस्रः ह्रांह्रींह्रूंह्रैंह्रौंह्रः क्ष्रांक्ष्रींक्ष्रूंक्ष्रैंक्ष्रौंक्ष्रः गौरि रुद्रदयिते वज्रिणि वज्रनायिके कपालमालाधारे प्रेतासननिवासिनि सर्वतत्त्वा[7]वतारे अवतर २ गर्ज २ शोषय २ सर्वमन्त्रान् ग्रस २ सर्वदुष्टान् मर्द २ सर्वयन्त्रान् भञ्ज २ सर्वदुखं तपतप तापय तापय तारे तारिणि परविद्यां छिन्धि छिन्धि परकायं प्रविश २ वज्रिणि गोंगों गोचरि खेंखें खेचरि भूंभूं भूचरि हंसवाहे[8] हस २ तिष्ठ २ बन्धय २ धारय धारय ऊ (तू)र्णामणि मोचय २ विमोचय २ विमोचनि पश्य २ हुंरावे मेरुमन्दरसङ्काशे महाविद्येश्वरि वाचं नियच्छ आच्छादिनि सरस्वति महाश्वेते किणिविद्ये अर्ककोटिसहस्रमालिनि पुरपुर द्रुम[10]२ अनन्तक्षोभकारिणि रणे वज्रादिकर्तरि विद्याविनोदिनि त्वर २ त्वरिते वह २ क्रन्दय २ सङ्क्रामय २ मदिरानन्दघूर्णिते कामेश्वरि गांगींगूंगैंगौंगः कन्दर्पमदविह्वले स्फुरद्योनिचक्रे भगवति भगमालिनि ईश्वरचक्रकपालडमरुकधारिणि महाभैरवि वसुधारे वसुमति [11]धारिणिधरे वशय २ [12]कर्मधारिणि कामेशि जिह्वया वद २ मनसा रभ[13] २ क्रन्द वस[14] २ बिन्दुप्रिये हूं[15] ५ रद शारदशशाङ्कनिकाशे शारदे विद्यादानविशारदे क्लीं गणनायिके आनन्दमय[16]विग्रहे गृहीतपूर्णकपाले [17]ज्वलज्ज्विह्वे ह्लादिनि नित्यक्लिन्ने मदद्रवे स्वाहा सौंसौंक्षूं सरस्वत्यै नमः मदिरे मधुमति मदाभोग[18]सुभगे भगमाले[19] मुरु २ चुरु २ धुन २ स्फुर २ स्फोटय २ घण्टारवेण निरन्तरपरबलभेदिनि फ्रें[20] कुब्जिकायै ह्लांह्लीं नञणङ्मे अघोरमुखि किणि २ विच्चे ऐंह्लींश्रींफ्रेंह्लींहुंफट् सर्वज्ञे जम्भ[21] २ जन्मजरामरणदारिद्र्यघातिनि सर्वसिद्धिनिधाने महाभयधारिणि ओंहंसः हुंफट् विद्येश्वरि [22]ज्रांज्रींज्रूंज्रैंज्रौंज्रः ल्रींप्रींसौः स्रौंक्ष्रौं क्षुद्रविद्राविणि विद्रुतविद्रुमप्रभे क्ष्म्रीं [25]हस्रौः चण्डि चण्डेश्वरि ब्रह्माण्डमालाधारिणि बन्धुकशोणाधरे त्रैलोक्यसत्ये नमः प्रसीद २ [26]ऐंश्रींफ्रेंसौः ऐंह्लींश्रींश्रींमहात्रिपुर[27]सुन्दरि स्वाहा।। इति त्रिपुरसुन्दर्युपस्थानसहस्राक्षरी।। (त्रैपुरीविद्यापठितसिद्धा शुभदा साधकानाम्।।)

अथ प्रस्तारसहस्राक्षरी। तत्र—

मनुश्चन्द्रः कुबेरश्च लोपामुद्राथ मन्मथः। अगस्त्यो नन्दिसूर्यौ च इन्द्रः स्कन्दः शिवस्तथा।।
क्रोधभट्टारको देव्या द्वादशैते उपासकाः। सर्वप्रस्तारसहिता सहस्रार्णाधुनोच्यते।।
श्रीविद्याजपसम्पत्त्यै सर्वकामफलाप्तये।...।।

सुरासुरवन्दितचरणारविन्दे जपाकुसुमनिभे योगिनीगणसेविते मधुमदमुदितमानस सन्ध्यावर्णदुकूलवसने सततमुदितमहामदे

१.'कल २' ग. पाठः। २. 'पटिवावर्तिनि' ग. पाठः। ३: 'हृं' क. पाठः। ४. 'फ्रें शाङ्करि भलगलक्ष्मीशसं भ्रम २' ग. पाठः।
५. 'किङि' क.पाठः। ६. 'डांडींडूंडैंडौंडः' ग.पाठः। ७. 'सत्त्वा' ग.पाठः। ८. 'वादे' क. पाठः। ९. 'नियच्छ यच्छ' ग.पाठः।
१०.'द्रुह' वा 'क्षुह' क. पाठः। ११.'मतीधारिणि' ग. पाठः। १२.'दामिनि' ग. पाठः। १३.'रस' ग. पाठः। १४. 'वसु' ग. पाठः।
१५. 'हुं ३' ग. पाठः। १६. 'मद' ग. पाठः। १७. 'ज्वलनिके' ग. पाठः। १८. 'मोद' ग. पाठः। १९. 'भगले' क. पाठः।
२०. 'ऐं' ग. पाठः। २१. 'ह्लांह्लूं' क. पाठः। २२. 'भञ्ज' ग. पाठः। २३. 'द्रांद्रींद्रूंद्रैंद्रौंद्रः' क. पाठः। २४. 'त्रींत्रींसौंःद्यौंक्ष्रौं' ग. पाठः। २५. 'हस्रौं' ग. पाठः। २६. 'ऐंक्लींह्लींश्रींफ्रेंश्रीं' क. पाठः। २७.'त्रिभुवनेश्वरि' क. पाठः।

माणिक्यकिरणारुणे मन्त्रपवित्रविग्रहे बिन्दुनादरूपिणि सच्चिन्मात्रस्वरूपे ह्सौं हसकलरीं हसौः स्हौः क्लौं[1] हसौः हसकएईलह्रीं हसकएईलह्रीं सहकएईलह्रीं नमो देवि आगच्छ सन्निधिं कुरु २ सर्वतो मां रक्ष २ वर्धय २ नन्दय २ स्थापय २ प्रापय प्रापय सर्वकार्याणि मम साधय पोषय हस्त्रां हस्त्रींहस्त्रूहस्त्रैंहस्त्रौंहस्त्रः सकलहएईलऐंह्रीं हसकएईलह्रीं नमो भगवति भगरूपे पापापहारिणि राजानं मे वशमानय विपदो दलय स्त्रीराकर्षयाकर्षय क्लेदय २ मनांसि क्षोभय २ मादय २ उल्लासयोल्लासय सौभाग्यं मे सम्पादय सम्पादय सौन्दर्यं मे जनय फट् हसहैं हसहरीं हसहरौं हसहैं हसहरीं हसहरौं ३ँ कएईलह्रीं हसकलह्रीं नमः कल्याणकारिणि [2]लाक्षाभरणप्रभारञ्जितशरीरे रक्ताम्बुजनिषण्णे पाशाङ्कुशेक्षुचापकुसुमबाणधारिणि चतुर्भुजे चन्द्रशेखरे चतुरङ्गे चतुवर्गफलप्रदे दिव्यमालालङ्कृतदिव्यदेहे मम सकलसमीहितानि साधय साधय स्फारय २ स्थिरय २ हसकलरैं हसकलरीं हसकलरौं सकलरैं हसकलरीं हसकलरौं ४ँ सहकलह्रीं सहकलरीं सहकलह्रीं नमो वरदे रेते सुरेते सत्ये नित्ये निरञ्जने जगत्क्षोभ (करे क्षोभ)कारिणि कमले कमनीयाङ्गे कलावति सुखानि मे परिपूरय राज्यं प्रयच्छ २ कीर्तिं वितारय २ परसैन्यं स्तम्भय २ भेदय २ मर्दय २ च्छेदय २ उत्सादयोत्सादय हसकलह्रैं हसकलह्रीं हसकलह्रौं सकलह्रैं सकलह्रीं सकलह्रौं ५ सहसकलह्रीं सकलह्रीं नमः परमेश्वरि परमात्मस्वरूपे करुणामृतवर्षिणि द्रांद्रींक्लींब्लूंसः मनोज्ञे मुशलायासे मणिकङ्कणपरिचित्रितकुण्डलिनि कोमलाङ्गे अङ्कुशेनाकर्षयाकर्षय पाशेन बन्धय २ चापेन मोहय मोहय बाणेन भिन्धि २ च्छिन्धि २ डांडींडूंडैंडौंडः सहकलरडैं सहकलरडीं सहकलरडौं सहकलरीं सहकलरीं सहकलह्रीं नमस्त्रिपुरे वादय २ त्रिपुरेश्वरि विघ्नेश्वरि वीरवन्दिते विद्याधरवीज्यमानचामरे विद्यादानविशारदे मदोदयाघूर्णनेत्रे विनेत्रे श्रीत्रिपुरसुन्दरि डांडींडूंडैंडौंडः हसकलडैं हसकलडीं हसकलडौं हसकलडैं हसकलडीं हसकलडौंः सकलडौः सकलह्रीं नमः त्रिपुरवासिनि त्रिपुराश्रि देवि प्रपद्ये सम्प्रपद्ये सदा प्रपद्ये शरणं प्रपद्ये शरण्ये शरणागतवत्सले मदने मदनदेहे सर्वजनहृदयहारिणि सर्वत[3]त्त्वहृदयङ्गमे सर्वभूतवशङ्करि मम सर्वभूतानि वशमानयानय कामान् पूरय २ कीर्तिं दापय २ दुरितं खण्डय २ क्लेशं नाशय २ शत्रून् त्रोटय २ बन्धं छेदय २ मोक्षं कुरु कुरु ऐंह्रींश्रीं हसकलरडरहैं हसकलरडरहीं हसकलरडरहौं सहकलरडरहैं [4]सहकलरडरहीं [5]सहकलरडरहौंः हसकलह्रीं हसकलह्रीं हसकलह्रीं ओंनमस्त्रिपरमालिनि चिन्तितार्थविद्याविधायिनि वित्तदे ब्रह्मविष्णुरुद्रशङ्करसदाशिवपूजिते सुपूज्ये मम मनोरथान् पूरय २ समुद्रादुत्तारय २ अरिष्टं भञ्जय २ राजनीतिं स्थापय २ दुष्कर्माणि कृन्त २ कृत्यां कर्तय २ ऐंह्रींश्रीं हसकलरडरहरैं, हसकलरडरहरीं हसक[6]लरडरहरौं हसकलरडरसहरीं ऐंह्रींश्रीं हसखफ्रें हसौः त्रिपुरसिद्धे त्रिपुरानन्दयोगेश्वरि कुलाकुलमहारूपे अरुणावृतमहारूपे हसक्षमलवरयीं सकलनृपवशङ्करि सर्वसम्पत्तिकारिणि सर्वैश्वर्यप्रदे सर्वदुःखविदारिणि सर्वज्ञे हसकलरडसहरडैं, हसकलरड[7]सहरडीं, हसकलरड[8]सहरडौं, हसकलरड[9]सरडौं, हस[10]कलरडसरडीं हसकलरडसरडैं, कएईलह्रीं [11]हसकहलह्रीं सर्वानन्दमये बिन्दुचक्रस्थे परब्रह्मस्वरूपिणि परमात्मशक्तिसर्वचक्रेश्वरि सर्वमन्त्रेश्वरि सर्वयोगीश्वरि सर्वजगदुत्पत्तिमातृके सर्वविद्यामयि महाभैरवि कवलीकृतसर्वतत्त्वात्मिके बिन्दुसर्वात्मिके महाश्रीत्रिपुरसुन्दरि नमः ऐंईऔंः ॐऐंह्रींऐं ऐंह्रींश्रींऔं नमः शिवाय नमः शिवायै।। इति प्रस्तारसहस्राक्षरी।।

अथावरणसहस्राक्षरी। ओंऐंह्रींश्रीं हंसः ओं नमो भगवति अक्षोभ्ये रूक्षकर्णे राक्षसिपक्षत्रणे क्षपे पिङ्गलाक्षि

---

१. 'क्वौं' क. पाठः। २. 'रत्न' घ. पाठः। ३. 'हस' ग. पाठः। ४. 'हस' ग. पाठः। ५. 'हस' ग. पाठः। ६. 'हस' ग. पाठः 'हसकहर' क. पाठः। ७. 'रडर' क. पाठः। ८: 'रडर' क. पाठः। ९. 'रडर' क. पाठः। १०. 'रडर' क. पाठः। ११. 'कसकह्रीं क. पाठः।

अरुणे क्षये लीले लोले ललिते लूते लुलिते लम्बिके लङ्केश्वरि लासे विमले हताशनि विशालाक्षि हूंकारे वडवामुखि महारवे महाक्रोडक्रोधिनि खरास्ये सर्वज्ञे तरले तारे दृष्टिहृष्टे [1]खगकन्धरे सारसि रससङ्ग्रहिणि तालजङ्घे करङ्किणि मेघनादे प्रचण्डोग्रे कालकर्णि चेलप्रदे चम्पे चम्पावति प्रचम्पे प्रलयान्तकि पितृवक्त्रे पिशाचाक्षि पिशुनि लोलुपे वानति वानरि वामविकृतास्ये वायुवेगे बृहत्कुक्षिविकृते विश्वरूपिणि यमजिह्वे जये दुर्जये पुमन्तकि बिडालरेवति पूतने विजये अनन्ते क्रन्दिनि चण्डि रेकर्णि (सर्वसङ्क्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्ववशङ्करि) सर्वोन्मादिनि सर्वमहांकुशे खेचरि (खचक्रधारिणि) सर्वबीजरूपे महायोनिरूपे त्रिखण्डे, अनङ्गब्राह्मि अनङ्गमाहेश्वरि अनङ्गकौमारि अनङ्गवैष्णावि अनङ्गवाराहि अनङ्गइन्द्राणि अनङ्गचामुण्डे अनङ्गमहालक्ष्मि प्रकटयोगिनीशि चार्वाकदर्शनाङ्गि त्रैलोक्यमोहनचक्रस्वामिनि, कामाकर्षिणि (बुद्ध्वाकर्षिणि अहङ्काराकर्षिणि शब्दाकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिणि आत्माकर्षिणि) अमृताकर्षिणि शरीराकर्षिणि गुप्तयोगिनीशि बौद्धदर्शनाङ्गि सर्वाशापूरकचक्रस्वामिनि, अनङ्गकुसुमे अनङ्गमेखले अनङ्गमदने अनङ्गमदनातुरे अनङ्गरेखे अनङ्गवेगिनि अनङ्गाङ्कुशे अनङ्गमालिनि अतिगुप्तयोगिनीशि रौद्रदर्शनाङ्गि सर्वसङ्क्षोभणचक्रस्वामिनि पूर्वाम्नायेशि सृष्टिप्रदे, सर्वसङ्क्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहिनि सर्वस्तम्भनि सर्वजृम्भिनि सर्ववशङ्करि सर्वरञ्जनि सर्वोन्मादिनि सर्वार्थसाधनि सर्वसम्पत्प्रपूरणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि सम्प्रदाययोगिनीशि सर्वदर्शनाङ्गि सर्वसौभाग्यदायकचक्रस्वामिनि, सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुःखविमोचनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारणि सर्वाङ्गसुन्दरि सर्वसौभाग्यदायिनि कुलकौलयोगिनीशि सर्वार्थसाधकचक्रस्वामिनि, सर्वज्ञे सर्वशक्ते सर्वैश्वर्यप्रदायिनि सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधारस्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपे सर्वेप्सितफलप्रदे निगर्भयोगिनीशि सर्वरक्षाकरचक्रस्वामिनि दक्षिणाम्नायेशि स्थितिप्रदे, ब्लूँ वशिनि कलह्रीं कामेशि न्ब्लूं मोदिनि म्लूं विमले ज्म्रीं अरुणे हसलवयूं जयिनि झमरयूं सर्वेश्वरि क्ष्म्रीं कौलिनि रहस्ययोगिनीशि शाक्तदर्शनाङ्गि सर्वरोगहरचक्र स्वामिनि, द्रां क्लिन्ने मोहनकामबाण द्रीं शोशणकामबाण क्लीं नित्य–सन्दीपनकामबाण ब्लूं मंद–सन्तापनकामबाण सः द्रवे उन्मादनकामबाण द्रांद्रींक्लींब्लूंसः जम्भिनि जम्भय २ मोहिनि मोहय २ आं आकर्षिणि आकर्षय २ स्तम्भिनि स्तम्भय २ ऐं कामेशि क्लीं वज्रेशि सौः भगमाले अतिरहस्ययोगिनीशि सर्वसिद्धिमयचक्रस्वामिनि, कामराजविद्या महात्रिपुरसुन्दरीमातः परापररहस्ययोगिनीशि सौगतदर्शनाङ्गि सर्वानन्दमय–चक्रस्वामिनि, पश्चिमाम्नायेशि अंआंसौः त्रिपुरे ऐंक्लींसौः त्रिपुरेश्वरि ह्रींक्लींसौः त्रिपुरसुन्दरि हैं हक्लींहसौः त्रिपुरवासिनि हसैंसहक्लींहसौः त्रिपुराश्रि ह्रींक्लींब्लें त्रिपुरमालिनि ह्रींश्रींसौः त्रिपुरासिद्धे हस्रैं सहकलरीं हस्रौंः त्रिपुराम्बे हसकलरडैं हसकलरडीं हसकलरडौः महात्रिपुरभैरवि अं कामेशि आं भगमाले इं नित्यक्लिन्ने ईं भीरुण्डे उं वह्निवासिनि ऊं महावज्रेश्वरि ॠं शिवदूति ॠं त्वरिते ऌं कुलसुन्दरि ॡं नित्ये एं नीलपताके ऐं विजये ओं सर्वमङ्गले औं ज्वालामालिनि अं विचित्रे अः कामेश्वरि विद्यामालिनि[2] अकुले कुलाकुलमहाकुले सर्वोत्तरपञ्चार्थज्ञानप्रदे सर्वदर्शनाङ्गमयि सर्वदर्शनोत्तीर्णस्वरूपिणि सर्वाध्वाशोधनि कालकालेशवर्णे नवाक्षरि बालविद्या षोडशाधिका च नवकूटद्वयं सहख[3]फ्रें आनन्देश्वरि घोरकालिनि अम्बाश्रीपादुकां पूजयामि हंसः श्रींह्रींऐं।। इत्यावृत्तिसहस्राणांविद्यां त्रैलोक्यपूजिता।। कुलार्णवे–

अथाभिधास्य सङ्क्षेपादन्त्ययागविधिक्रमम्। साधकानां च सिद्धानां दीक्षितानां शिवागमे।। १।।
दीक्षितास्त्रिविधाः प्रोक्ता उत्तमाधममध्यमाः। तत्रोत्तमस्य नान्त्येष्टिः सर्वोत्तीर्णात् स्वदर्शनात्।। २।।

---

[1] 'खदग' ख. पाठः। [2] 'माले' क. पाठः। [3] 'सहखफ्ररयूं' ग. पाठः।

अधमस्यापि नान्त्येष्टिर्मोचिका सामयं जगत्। पारिशेष्यादथान्त्येष्टिर्मध्यमस्येति न: स्थिति:।। ३।।
अथवा श्रद्धया कुर्यात् सर्वेषामुत्तमो गुरु:। स्वात्मशुद्ध्यर्थमेकत्र....रूपयैव.........हि(?)।। ४।।
साक्षात् करन्ध्रमध्येन ब्रह्मरन्ध्रविनिर्गत:। उत्तमो मध्यमस्त्वास्यश्रोत्रनासादिमार्गत: ।। ५।।
अधम: पायुलिङ्गाभ्यां केवलं नारकी हि स:। पैशाचलोकमाप्नोति पायुमार्गविनिर्गत: ।। ६।।
आस्येन देवलोकस्थो नासया नरलोकभाक्। श्रोत्रेण पितृलोक: स्याद् देवलोकस्तु चक्षुषा।।७।।
करन्ध्रेण शिवस्थानमिति लोकस्य निर्णय:। मृतानां कृपयान्त्येष्टि: कर्तव्या देशिकेन तु।। ८।।
परीक्ष्य कालं विधिवद् देशिको मृत्यहात् पुरा। सप्ताहे वाथ पञ्चाहे त्र्यहे वाथ कुशार्पणम्।।९।।
विधाय गात्रमानीय भैरवान् योगिनीस्तथा। समभ्यर्च्य गुरुं पश्चादीशानं योगविष्टरे।। १०।।
कृत्वा च प्रणतिं सम्यक् पुष्पाञ्जलिपुर:सरम्। इति विज्ञापयेद् दीनो जानुभ्यामवनीं गत:।। ११।।
देवदेव महादेव करुणालय शङ्कर। नित्यानन्द निराधार निराकुल निरञ्जन ।। १२।।
आज्ञया तव देवेशि सिद्ध्यत्येव ममेप्सितम्। तथापि शिव सर्वज्ञ यानि दुश्चरितानि मे।। १३।।
प्रमादादथवा ज्ञानात् तानि सर्वाणि सर्वदा। क्षमस्व परमेशान दासोऽहं तव चाव्यय।। १४।।
इति विज्ञाप्य गुरवे दिव्यागमपुर:सरम्। स्वार्जितद्रव्यजातं यत्तत् सर्वं विनिवेदयेत्।। १५।।
त्वदाज्ञयार्जिता ह्येते त्वदर्थं विनियोजिता:। इत्युक्त्वा प्रणमेद् भूयो गुरुभक्तिपरायण:।। १६।।
गुरौ व्याप्ते प्रतिष्ठाप्य पादुकां तस्य पीठत:। समभ्यर्च्य यथान्यायं सर्वं तत्र समाचरेत्।। १७।।
पुत्रशिष्यादिभि: कार्यं कारयित्वा विचक्षण:। स्वयं कर्तुमशक्तश्चेत् सर्वदा तद्दिने पुन:।। १८।।
तत्प्रसादं महायत्नात् स्वीकर्तव्यं मनीषिभि:। अवशिष्टं तु यद्वस्तु चतुर्धा च विभज्य तत्।।१९।।
औरसाय स्वपुत्राय दद्याद्भागद्वयं पुन:। गोत्रिभ्य एकमेवं तु स्वस्यान्तेष्ट्यर्थमादिशेत्।। २०।।
श्रीचक्रं पूजयेत् तावद्यावत् पञ्चत्वमाप्नुयात्। उत्क्रान्तिकाले तत्कर्णे जपेत् तद्गुरुपादुकाम्।।२१।।
चरणत्रयमन्त्रं च वदेच्चेवमथो गुरु:। तत्तत्समयनिष्ठानां तत्तन्मन्त्रं जपेद्गुरु:।। २२।।
यस्मिन् निष्ठा परा तस्य तत्कर्णे सर्वथा जपेत्। अनुसन्धानबाहुल्यात् तत्र चित्तलयो भवेत्।।२३।।
श्रीभूतिराजलब्धानि श्रीशम्भुवदनाम्बुजात्। वाक्यानि ब्रह्मविद्याया: प्रणवै: पुटितानि च।। २४।।
अथोच्यते ब्रह्मविद्या सद्य: प्रत्ययकारिका। शिव: श्रीभूतिराजो यां सुविद्यां विन्यवेदयत्।।२५।।
सर्वेषामेव भूतानां मरणे समुपस्थिते। यया पठितयोत्क्रम्य जीवो याति निरञ्जनम्।। २६।।
या ज्ञानिनोऽपि सम्पूर्णकृत्यस्यापि श्रुता सती। प्राणविच्छेदजां मृत्युव्यथां सद्यो व्यपोहति।।२७।।
यामाकर्ण्य महामोहविवशोऽपि क्रमागत:। प्रबोधं वक्तृसाम्मुख्यमभ्येति रभसात् स्वयम्।। २८।।
तारो माया वेदकलो मातृतारो नवात्मक:। प्रतिवाक्यं यदाद्यन्ते योजिता परिपठ्यते।। २९।।

ओंह्रीहूं फ्रें हसक्षमलवरयूं[1] इति निष्कलब्रह्मविद्या।

---

[1] १. 'ओंह्रीं हसखफ्रें अं हसक्षमलवरयूं' क. ख. ग. पाठ:।

एतां तु वक्ष्यमाणेषु आद्यन्ते विनियोजयेत्। ....।।

ओंह्रींहूं फ्रं हसक्षमलवरयूं।

परमपदात् त्वमिहागाः सनातनस्त्वं जहिहि देहान्तम्।
पादाङ्गुष्ठादि विभो निबन्धनं बन्धनं ह्युग्रम्। हसक्षमलवरयूं फ्रेंहूंह्रींओं।। १।।
५ँ गुल्फान्ते जानुगतं जत्रुस्थं बन्धनं तथा मेढ्रे।
जहिहि पुरमुग्रमध्यं हृत्पद्मात् त्वं समुत्तिष्ठ ५ँ।। २।।
५ँ हंस हयग्रीव विभो सदाशिवस्त्वं परोऽसि जीवाख्यः।
रविसोमवह्निसङ्घृष्टं बिन्दुं देवं हहह समुत्क्राम ५ँ।। ३।।
५ँ हंसमहामन्त्रमयः सनातनस्त्वं शुभाशुभोपेक्षी।
मण्डलमध्यनिविष्टः शक्तिमहासेतुकारणमहार्थः ५ँ।। ४।।
५ँ कमलोभयनिविष्टः प्रबोधमायाहि देवतादेव ५ँ
अज्ञानात् त्वं बद्धः प्रबोधितोत्तिष्ठ देवादे ५ँ ।। ५।।
५ँ व्रज तालुमाह्वयान्तं ह्यौडुम्बरघट्टितं महाद्वारम्।
प्राप्य प्रयाहि हंहो हंहो वा वामदेव पदम् ५ँ।। ६।।
५ँ ग्रन्थीश्वर परमात्मन् सान्त महातालुरन्ध्रमासाद्य।
उत्क्राम हे देहेश्वर निरञ्जनं शिवपदं प्रयाह्याशु ५ँ।। ७।।
५ँ आक्रम्य मध्यमार्गं प्राणापानौ समाहृत्य।
धर्माधर्मौ त्यक्त्वा नारायण प्रयाहि शान्तान्तम् ५ँ।। ८।।
५ँ हे ब्रह्मन् हे विष्णो हे रुद्र शिवोऽसि वासुदेवस्त्वम्।
अग्नीषोम सनातन मृत्पिण्डं जहिहि हे महाकाश ५ँ ।। ९।।
५ँ अङ्गुष्ठमात्रमलमावरणं जहिहि हे महासूक्ष्म ५ँ।। १०।
५ँ पुरुषस्त्वं प्रकृतिमयैर्बद्धोऽहङ्कारतन्तुना बन्धैः।
अभवाभव नित्योदित परमात्मंस्त्यज सरागमध्वानम् ५ँ ।। ११।।
५ँ ह्रींहूं—मन्त्रशरीरमविलम्बमाशु त्वमेहि देहान्तम् ५ँ ।। १२।।
५ँ तदिदं गुणभूतमयं त्यज स्वं षाट्कोशिकं पिण्डम् ५ँ।। १३।।
५ँ मां देहं भूतमयं प्रगृह्यतां शाश्वतं महादेहम् ५ँ।। १४।।
५ँ मण्डलममलमनन्तं त्रिधा स्थितं गच्छ भित्त्वैतत् ५ँ।। १५।।

इति श्रीब्रह्मविद्या।

ज्ञातं चेत् स्वयमेवासून् नियम्य प्रजपेत् तदा। अन्यथा शृणुयाद्वापि तदेकाग्रमना भवेत्।। १।।

निर्वाणविद्यानिरतो निर्वाणपदभाग्भवेत्। श्रुत्वैतस्मिंस्तथान्त्येष्टिकर्ता स शिवसंयुत: ।। २।।
स्नात्वा सम्यगलङ्कृत्य नित्यकृत्यं यथाविधि। विधायानन्दसम्पूर्ण: कृत्वा न्यासादिकं तनौ।। ३।।
अभिमन्त्र्य जलं पश्चात् पञ्चप्रणवैर्गुरूक्तित:। पिण्डं संशोधयेद्विद्वानथ वासरपञ्चके ।। ४।।
अथवा दीपिनीमुक्त्वा ज्वालामालिन्यनन्तरम्। व्योमषष्ठखरार्धेन्दुहंसफडन्तको मनु: ।। ५।।
मायाबीजान्तिक: प्रोक्त: शोधक: सर्वदेहिनाम्। आकृष्य स्थापयेत् प्रेतपिण्डे तु गुरुवाक्यत:।।६ ।।

ओंह्रीं हसखफ्रें अं हसक्षमलवरयूं ऐं। दीपिनी, ज्वालामालिनी। हूंहंस: फट् ह्रीं हसक्षमलवरयूं हसखफ्रें ह्रीं ओं। इति दीपिन्यादिविधि:।

एवं विशोधिते देहे शक्तिचालनयोगत:। नेत्ररन्ध्रादिमार्गेण लोकोत्तरविनिर्मि(र्ग)त:।। ७।।
वियद्वह्निभृग्वारूढं बिन्दुमुच्चार्य मोक्षदे। चक्षुरादिपदान्ते तु प्रेतनाम तथोच्चरेत्।। ८।।
आवाहयामीत्यनेन सपञ्चप्रणवेण वै। ....।।

५ँ हं: मोक्षदे चक्षुराद्यवयववन्तमावाहयामि ५ँ।

मन्त्रेणावाहयेत् प्रेतं सर्गादिभ्यो निराकुलम्। अमुष्येत्यादिमन्त्रेण प्रतिष्ठाप्य समीरणम्।। ९।।
अङ्गं सङ्कल्पयेत् पश्चान्मायाषड्दीर्घजातिभि:। एकसूत्राभिसंवीतं प्रतिष्ठाप्य घटं पुन:।। १०।।
अभ्यर्च्योक्तेन मार्गेण पिण्डं संस्थापयेत्तत:। आदाय पूजितां पक्ष्या (चाधो)वार्धनीमस्त्ररूपिणीम्।।११ ।।
सर्वतीर्थमनुं स्मृत्वा तत्तोयैरभिषेचयेत्। भस्मस्नानं तत: कुर्यात् परमेष्ठिमनुं स्मरेत्।। १२।।
पिण्डं दक्षिणमूर्धानं न्यस्तं दर्भास्तरे पुन:। नववस्त्रस्त्रगालेपैरलङ्कृत्याथ भूषणै: ।। १३।।
तस्मिन् पिण्डे न्यसेत् पश्चान्मन्त्रराजमशेषत:। अभ्यर्च्य क्रममुद्वास्य समाप्तिं गुरुपादुकाम्।।१४।।
सम्यग्विमानं सङ्कल्प्य संस्थाप्य तं विचक्षण:। ग्रामं प्रदक्षिणीकृत्य शङ्खभेर्यादिति:स्वनै:।। १५।।
प्रेतस्थानं प्रविश्याथ दक्षिणोत्तरमायताम्। उपलिप्य समां भूमिं लाजाक्षततिलानपि।। १६।।
विकीर्य सर्षपान् प्रोक्ष्य विमानं तत्र विन्यसेत्। संस्थाप्य तत्र चित्याग्निं परिस्तीर्य विलोमत:।।१७।।
पात्राण्यासाद्य विधिवद् दक्षिणे विष्णुदेवतम्। प्रणीतापात्रमासाद्य सम्पूज्य कुसुमादिभि:।। १८।।
दर्भैराच्छादितं धीमान् वह्निकोणे प्रविन्यसेत्। दक्षभागे यजेद् देवं भैरवं मण्डले क्रमात्।। १९।।
पूर्वोक्तेन विधानेन कृत्वा जिह्वादिकल्पनाम्। तिलतण्डुलसम्मिश्रं पायसं चरुकं पुन:।। २०।।
मृत्युञ्जयेन सम्मन्त्र्य पञ्चश्लोकैर्विशेषत:। साज्येन चरुणा पश्चात् पञ्चरत्नैर्विशेषत:।। २१।।
ब्रह्माण्यां न्यासम्प्रोक्तै: स्वाहान्तै: सुसमाहित:। मूलविद्याद्वयं जप्त्वा प्रत्येकं सप्तसप्तकम्।।२२।।
हुनेत् क्रमात् सावरणं विलोमेन विधानत:। एवं विलोमतो होमान्न्यस्तमन्त्रान् गुरोस्तनौ।। २३।।
क्रमेण विलयं कुर्यात् सूक्ष्मपुर्यष्टकात्मनि। हुत्वा वाग्भवमन्त्रेण स्वाहान्तेन विचक्षण:।। २४।।
पुनश्च विद्यया हुत्वा ततस्तत्त्वलयात्मिकाम्। इष्टिं संन्यासिनां कुर्यात् क्रमेण व्याप्तिभाजनम्।।२५।।
ततस्तत्त्वानि सूक्ष्माणि विलोमेन विधानत:। तत्रार्धे शेषं संयोज्य सर्वमात्मनि योजयेत्।। २६।।
सूक्ष्मरूपेणात्मगतपुण्यपापे सदा ह्ययम्। नाशयेत् कर्म शिष्यस्य भयभक्षिणिहोमत:।। २७।।

५ँ खटंकसखवरयूं हुं फट् शिशो: खहुं पुण्यपापानां नाशयामि स्वाहा ५ँ।

एवं स्थूलक्रमं हुत्वा सूक्ष्मलीनं विभावयेत्। विलोमेन क्रमेणैव सूक्ष्मं चापि परं तथा।। २९।।
एवं विभौ[1] समायोज्यं शिष्यं क्षीणमलत्रयम्। पूर्णाहुतिप्रयोगेण योजयेत् परमे पदे।। ३०।।
शिवशक्त्यात्मके शुद्धे पुनरावृत्तिवर्जिते। संवित्सुखमये साक्षात् तत्त्वातीते निजे पदे।। ३१।।
इति संयोजिते साक्षाद् गुरुणा परमे पदे। सन्त्यज्य मलकालुष्यं शुभं वा चावकल्पके(?)।।३२।।
आज्येन जुहुयात् पञ्चश्लोकैस्तत्त्वैरघोरतः। अनुलोमविधानेन प्रायश्चित्ताय चास्तिकः।। ३३।।
देहमानेन शिष्यस्य शयनं परिकल्पयेत्। बहिर्दक्षिणदिग्भागे कुलवृक्षसमुद्भवैः।। ३४।।
शङ्कुभिर्दक्षिणावर्तसमिद्भिर्वाथ पिङ्गलैः। दर्भैश्च शयनं कृत्वा त्रिगुणीकृत्य तन्तुना।। ३५।।
नवकृत्वो वेष्टयित्वा चन्दनागुरुपूर्वकैः। कृत्वा चितिं पुनः काष्ठैर्नववस्त्रेण वेष्टयेत्।। ३६।।
पद्मं त्रिकोणषट्कोणकर्णिकं साष्टपत्रकम्। सद्विरेखं विधायात्र पुष्पाणि विनिसार्य च।। ३७।।
प्रेतं दक्षिणमूर्धानं विन्यस्य जिह्मदृष्टिकः। रक्षां मन्त्रेण सङ्कल्प्य ज्वालामालिनिविद्यया।। ३८।।
प्रज्वाल्याघोरमन्त्रेण तथा पाशुपतेन वा। यावद्भस्मीभवत्येतत् तावद्धोमो विधीयते।। ३९।।
प्राप्ता ये गोत्रिणस्तत्र सर्वत्र च समागताः। स्तोत्रं मन्त्रजपं कुर्युः प्रयुतायुतकर्मणा।। ४०।।
विभाव्य क्रमतः प्रेतं भक्षितं योगिनीगणैः[2]। विद्याद्वयजपं कुर्यान्निश्चलेनान्तरात्मना।। ४१।।
स्तुत्वा पश्चाद्यथाशास्त्रं स्वक्रमं सम्यगर्चयेत्। रक्षयेच्च चितावह्निं यावदस्थिसमुच्चयम्।। ४२।।
दिवसे सप्तमे वह्निं घृतेन पयसाथवा। नि[3]र्वाप्यास्थीनि पादाद्यं नवधा मस्तकावधि।। ४३।।
क्रमात् सङ्गृह्य निःक्षिप्य पात्रे संवेष्ट्य वाससा। नवेन भस्म प्रक्षिप्य नद्यां तोयालयेऽपि वा।।४४।।
देवमातृगृहे वाथ स्वगृहे वास्थिभाजनम्। खात्वा निधाय तस्योच्चैर्मेखलात्रयसंयुतम्।। ४५।।
पीठं सङ्कल्प्य शिष्यो वा कनिष्ठोऽणुविधानवित्। त्रिसन्ध्यमर्चयेत् पीठे विधिवद्गुरुमण्डलम्।।४६।।
एकादशे दिने कृत्वा सायमुत्सवमास्तिकः। सम्यक्पात्रं प्रतिष्ठाप्य हेतुनापूर्य सादरम्।। ४७।।
स्वर्णरत्नादिकं तत्र विनिःक्षिप्य यथाबलम्। समयाचारसम्पन्नं नित्यपूजापरायणम् ।। ४८।।
योग्यं मान्त्रिकमानीय सम्पूज्यास्मै निवेदयेत्। पर्वपूजां मृताहेऽपि प्रतिमासं समाचरेत्।। ४९।।
सम्पूर्णे वत्सरे कुर्यान्महोत्सवमतन्द्रितः। अस्थिभाजनमुद्धृत्य पश्चाद् देशिकपुङ्गवः ।। ५०।।
नद्यां समुद्रगामिन्यां निक्षिपेन्निखनेत् तु वा। नदीतीरेऽथवान्यत्र तत्र वृक्षान् प्ररोपयेत् ।। ५१।।
अथवा प्रतिमां वापि कृत्वा शिल्पिभिरन्वितः। पादुकां वा शुभे देशे सुलग्ने सुमुहूर्तके।। ५२।।
पूर्वोक्तेन विधानेन संयोज्य परमे पदे। भावयेन्मनसा पश्चात् शम्भुत्वं तस्य चान्तिके[4]।। ५३।।
ये केचित् पशुमार्गस्था गुप्ताचाराः कुलागमे। तेषामपि मृते कुर्याद् दर्भैः पञ्चाशता गुरुः।। ५४।।
विधाय कूर्चमावाह्य तत्र प्रेतं विधानतः। पूर्वोक्तेन विधानेन तत्र सर्वं समाचरेत्।। ५५।।
जोषयेदन्यशिष्याणामन्यथा कृपया गुरुः। कुर्याद्वा तेन प्रतिमामन्त्येष्टिं कुलशासने।। ५६।।

---

[1] 'विधौ' ख. पाठः। [2] 'योगिनां गणैः' ग. पाठः। [3] 'निवार्याः' ग. पाठः। [4] 'चास्तिकः' क. पाठः।

सर्वलक्षणसम्पन्नं शालिपिष्टमयं शुभम्। देहं कृत्वा समावाह्य शिष्यात्मानं विधानत:।। ५७।।
तस्मिन् पिण्डे न्यसेत् पूर्वं मन्त्रं[1] पूर्ववदेव तु। पश्चाद्विलोममार्गेण हुत्वा स्थूलक्रमं बुध:।। ५८।।
परे क्रमे निवेश्याथ पिण्डं पिष्टमयं तत:। स्रुचि नि:क्षिप्य जुहुयात् स्रुवेणाच्छाद्य देशिक:।।५९।।
पूर्णाहुतिप्रयोगेण प्राणाद्यैरेव पञ्चभि:। गुरुमुद्दिश्य कर्तव्या शिष्यैर्हूतिभिरेव वा ।। ६०।।
अन्त्येष्टि: सर्वदा कार्या मृतानाममृतेन तु। साक्षात् शाम्भवसिद्धानामन्ययोगो विधीयते।। ६१।।
तथापि कुर्यात् सिद्धार्थमात्मान: सर्वमास्तिक:। अथवा मनसा कुर्यादेकान्ते स्वयमास्तिक:।।६२।।
मानसं परमुत्कृष्टं योगिनामपि न स्थिति:। तस्मात् सर्वप्रयत्नेन मानसं क्रममाचरेत्।। ६३।।

इत्यन्त्येष्टिविधि:।।

श्रीनाथाङ्घ्रिसरोजकल्पकमहाशाख्येकनानाबिल-
श्रीमत्तन्त्रकदम्बकाकलनतो विद्यार्णवाख्यं परम्।
विद्यारण्ययतिश्चकार सुमहत् तन्त्रं सतां प्रीतये
श्रीविद्यानगरेऽम्बदेवनृपतौ सन्नीतित: शासति।।

।। इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्यशिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे षट्त्रिंश: श्वास:।। ३६।।

सम्पूर्णोऽयं श्रीविद्यार्णव:। शुभमस्तु पाठकोपासकेभ्य:।

* * *

---

१. 'पूर्वमन्त्रे' घ. पाठ:। २. 'चरुणाचार्यदेशिक:' घ. पाठ:। ३. 'गुरुं सन्दिश्य' घ. पाठ:। ४. 'शाखैकतानोऽखिल' घ. पाठ:।

''अदृश्यभावान्मतिविभ्रमत्वात्पदार्थहीनं लिखितं मयात्र। तत्सर्वमाद्यै: परिशोधनीयं कोपं न कुर्यु: खलु लेखकस्य।। संवत् १७८२ श्रावण:।'' इति मूलपुस्तकस्यान्तिमपत्रे लिपिकृतोऽयं श्लोक: कालाद्युल्लेखश्च।

श्रीकण्ठनाथाख्यहिमाद्रिशृङ्गस्रवत्सुतन्त्रामृतनिर्झराणाम् ।
वैधात्रसोपानपथावतारस्रोतोजुषां भूमिमुपागतानाम् ।। १ ।।
पूर्वादिकाम्नायभिदा प्रसिद्धः सम्भेदभूतः खलु गौडपादः।
वंशक्रमाच्छास्त्रमिदं तु तस्माच्छ्रीशङ्करस्वामिनमेत्य भेजे ।। २।।
शिष्यैर्यदीयैः किल सम्प्रदायाः प्रचारिताः क्षेत्रमठादिकेषु।
दृश्यन्त एवाद्य च तत्प्रशिष्यशिष्यो न्यबध्नाद् गुरुसाम्प्रदायम्।। ३ ।।
विद्यार्णवाभिख्यमिदं सुतन्त्रं विद्याद्यरण्याख्ययतिर्यतीन्द्रः।
त्र्यङ्काङ्कभूसम्मित (१९९३) वैक्रमाब्दे राजेश्वरश्रीहरिसिंहशिष्ट्या।। ४।।
श्रीरामचन्द्राधिकृतित्वनीतौ कश्मीरदेशे हरभट्टशास्त्री ।
सम्पाद्य विद्वत्–शिवनाथसाह्यात् प्राकाशयद् ग्रन्थमिमं सुपूर्णम्।। ५।।

◆

श्रीविद्यार्णवतन्त्र उत्तरभाग की हिन्दी विषयानुक्रमणिका।

विषय: पृष्टसंख्या

एकोनविंशति श्वास।

न्यास विधि १
षडङ्गन्यास ,,
योगपीठन्यास २
मन्त्रन्यास ,,
ध्यान अन्तर्याग एवं जप ,,
पूजा यंत्र प्रतिष्ठा विधि ३
इष्टदेवता पूजाङ्ग के रूप में पार्थिवविधान ४
वैदिकपरम्परा की पार्थिवार्चा ,,
ऋष्यादिन्यास ५
षडङ्गन्यास ,,
वैदिकमार्गकी पूजा ,,
पारदलिंग विधान ६
वाणलिंग ,,
वैष्णवोपासना ,,
द्वादशमूर्तियों की तालिका ७
चतुर्दशमूर्तियों की तालिका ७-८
शालग्रामशिला के लक्षण ८
वर्णभेद से गुणदोष विचार ९
प्रसंगत: ज्ञातव्य बातें १०
पदार्थों के देवता ,,
गन्ध के पॉच प्रकार ११
पुष्प के पॉच प्रकार ,,
साधक के विशेष कर्तव्य ११-१२

विंशति श्वास

देवता मंत्र एवं यंत्र के स्वरूप ज्ञान का प्रकार १३
ऊर्ध्वाम्नाय में आकाशात्मक ईशान मुख से उत्पन्न रश्मियों का निरुपण १४
शिव निर्माल्यभक्षण निर्णय ,,
नित्याओं का ध्यान १५
कालीमत में रश्मि क्रम १५
नित्या प्रयोग विधि ,,
मंत्ररचना प्रकार ,,
मंत्रों में स्वरों के योजन का महत्त्व १६
भगमालिनी यंत्र विधि ,,

एकविंशति श्वास

कौतुक प्रकरण—चमत्कार प्रदर्शन १७
षोडश नित्यावासना ,,
प्रणवस्वरूप निरूपणम् ,,
योगलक्षण १८

द्वाविंशति श्वास

लक्ष्मीका एकाक्षरी मंत्र १९
वशीकरण चन्दन ,,
लक्ष्मीकामी पुरुष के लिए विधि निषेध ,,
अन्य ग्रन्थों में विधि निषेध २०
आश्विन नवरात्र में महालक्ष्मी पूजन का प्रकार ,,
नवार्णविधानोक्त महालक्ष्मी पूजा पद्धति ,,

त्रयोविंशति श्वास

अति दुर्गा मंत्र २१
लवण दुर्गा मंत्र ,,
अन्नपूर्णेश्वरी मंत्र विधान ,,
अश्वारूढ़ा मंत्र ,,

श्रीविद्यार्णवतन्त्र उत्तरभाग की हिन्दी विषयानुक्रमणिका।

विषय: पृष्ठसंख्या

गौरी मंत्र ,,

नित्यकर्म न करने की परिस्थियाँ २२

ब्रह्मास्त्रविद्या बगलामुखी ,,

चतुर्विंशति श्वास

शाक्त उपासना २३

बीज मंत्रों की महिमा ,,

तारा प्रकरण २४

कुशभेद ,,

रहस्य पुरश्चरण २४

महाविद्या षोडशी सुन्दरी आदि भेद २५

श्रीविद्या पद्धति ,,

षोडशनित्या न्यास २६

पंचविंशति श्वास

भुवनेश्वरी एकाक्षरी बीज २७

त्रितारी मंत्र ,,

भुवनेश्वरी गायत्री ,,

भैरवी प्रकरण २८

प्रचण्ड चण्डिका मंत्र भैरवी ,,

षोडशी श्रीविद्या ,,

धूमावती प्रकरण २९

सुख प्रसव मंत्र ,,

अदर्शन प्रयोग ,,

योगिनी साधना ,,

यक्षिणी साधना ३०

यक्षिणियों के भेद ,,

षड्विंशति श्वास

मातंगी प्रकरण ३१

विषय: पृष्ठसंख्या

अष्टकर्म विवेचन ,,

उच्छिष्ट मंत्रो का प्रयोग ,,

परिमल मंत्र ३२

वाराही प्रकरण ,,

शवरी मंत्र ३३

कर्णपिशाची ,,

स्वप्नेश्वरी ३४

शीतला मंत्र ,,

कालरात्रि प्रकरण ,,

शारदा विधान ,,

सप्तविंशति श्वास

ऊँ नमोनारायण मंत्र निर्वचन ३५

लक्ष्मीनारायण मंत्र ३६

द्वादशाक्षरी मंत्र ,,

चतुर्दशाक्षर मंत्र ,,

षोडशाक्षर मंत्र ,,

दधिवामन मंत्र ,,

सुदर्शन मंत्र ३७

श्रीकरण मंत्र ,,

पुरुषोत्तम हृषीकेश मंत्र ३८

अष्टाविंशति श्वास

हृषीकेश मंत्र ३९

श्रीधर मंत्र ,,

अच्युतानन्त गोविन्द मंत्र ,,

नृसिंह मंत्र ,,

एकाक्षर मंत्र ४०

लक्ष्मी नृसिंह मंत्र ,,

श्रीविद्यार्णवतन्त्र उत्तरभाग की हिन्दी विषयानुक्रमणिका।

विषयः पृष्ठसंख्या

राममंत्र ४१
एकाक्षरमंत्र ,,
रामगायत्री ,,
रामानुस्मृति ४२
गोपालमंत्र ,,
श्रीकृष्णमंत्र ,,
मरुन्नमित मंत्र ४३

एकोनत्रिंशत् श्वास

श्रीकान्त मंत्र ४५
सिद्धगोपाल मंत्र ४६
सन्तानगोपाल मंत्र ,,
प्रणव मंत्र ,,
कार्तवीय मंत्र ,,
अनुष्टुब् मंत्र ,,
वार्तवीर्य का माला मंत्र ४७
दीपदान विधान ,,
सौरमंत्र ,,
अष्टाक्षर मंत्र ,,
सूर्यार्घ्य विधि ४८
पुत्रेष्टि यज्ञ ४९
मार्तण्डमंत्र प्रकरण ,,
चन्द्रमंत्र ,,
अग्नि मंत्र विधान ५०
मंत्रान्तर ,,

त्रिंशत् श्वास

पञ्चाक्षर मंत्र ५१
पुरश्चरण विधि ,,

विषयः पृष्ठसंख्या

मंत्र विनियोग का महत्त्व ,,
मंत्रान्तर ,,
प्रासाद मंत्र ५२
अष्टाक्षर मंत्र ,,
दक्षिणामूर्ति मंत्र ५२
दक्षिणामूर्ति का मंत्रान्तर ,,
मृत्युंजय मंत्र ५३
अघोरास्त्र मंत्र ,,
पाशुपत मंत्र ,,
नीलकण्ठ मंत्रान्तर ,,
चिन्तामणिमंत्र ,,
तुम्बुरु मंत्र ,,
क्षेत्रपाल मंत्र ५४
बटुक भैरव मंत्र ,,
बीजों का उद्धार न्यास स्थान सहित ,,
वीरसाधन ५५
मृत्युंजय विधान ,,
गजाश्व रक्षा प्रयोग ५६
बटुक मंत्र विधान ,,
मंत्रान्तर ,,
चण्डेश्वर मंत्र ,,

एकत्रिंशत श्वास

वैदिक त्र्यंबक मंत्र ५७
मंत्र निरुक्ति वशिष्ठ के अनुसार ,,
उपासना विधि ,,
श्रीविद्यावरणाङ्ग के रूप में गायत्री विधान ५८
मुद्राप्रदर्शन ,,

श्रीविद्यार्णवतन्त्र उत्तरभाग की हिन्दी विषयानुक्रमणिका।

विषय:	पृष्टसंख्या
गायत्री हृदय	५९
गायत्री के प्रत्येक शब्द का अर्थ	,,
मंत्र पारायण	,,
कादिमत से ललिता यंत्र निर्माण विधि	६०
षोडश नित्याओं की वासना	६०—६३
मंत्र स्वरूप निरूपण	६३
मंत्रजप विधि	,,
प्रयोग विधि	६३—६४

द्वात्रिंशत् श्वास

विषय:	पृष्टसंख्या
एकाक्षरी मंत्र भेद तथा विधान	६५
कामना भेद से हवन सामग्री भेद	,,
वशीकरण प्रयोग	६६
चार मंत्रान्तर	,,
अभिमंत्रण प्रयोग	,,
चतुर्वण हेरम्ब मंत्र	६७
सुब्रह्मण्य मंत्र	,,
महागणेश मंत्र	,,
हरिद्रा गणेश मंत्र	,,
वक्रतुण्ड मंत्र	,,
उच्छिष्टगणेश मंत्र	६८
मंजुघोष प्रकरण	,,
चरणायुध (ताम्रचूड) मंत्र	,,
शास्त्र प्रकरण	६९
वैश्वत मंत्र	,,
चित्रगुप्त मंत्र	,,
आसुरी मंत्र	,,
कुबेर मंत्र	६९
शताक्षर मंत्र	७०

त्रयस्त्रिशत् शवास

विषय:	पृष्टसंख्या
वरुण ऋग्विधान	७१
यंत्रसार के अनुसार अनेक यंत्र (कुल आठ)	७१
वेदोक्त नवग्रह विधान	७२
सूर्यपूजा विधान	७३
मङ्गलकल्प	,,
ऋग्यजु: सामाथर्व विधानम्	,,
वैदिक के प्रयोगों के लिए विशेष निर्देश	,,
भयनाशन प्रयोग	७४
आपत्ति नाशक	,,
कारागार से मुक्ति	,,
बालरक्षा यंत्र	,,
कुबेर यंत्र	७५
भूरि विजय यंत्र	,,
रत्नाधारा	,,
कुबेरमंत्र (हवन के लिए)	,,
विस्फोटक से मुक्ति	,,
हनुमत् प्रकरण मंत्र विधि	,,
पंचमुख हनुमत् मंत्र विधि	,,
छ: हनुमत् माला मंत्र	७६
द्वादशाक्षर मंत्र	,,

चतुस्त्रिंशत श्वास

विषय:	पृष्टसंख्या
हनुमत् यंत्र विधान	७७
द्वादशाक्षर मंत्र प्रयोग	,,
हनुमत माला मंत्र	,,
माला मंत्रान्तर	,,

श्रीविद्यार्णवतन्त्र उत्तरभाग की हिन्दी विषयानुक्रमणिका।

विषयः पृष्ठसंख्या
रक्षाविधान ७८
माला मंत्र ,,
काम्य होमकर्म में अग्नि चक्र का ज्ञान ,,
अग्निवास ,,
शत्रु मंत्र की परिहार विधि ,,
गुरु के अभाव में दीक्षाविधि ,,
मुद्रालक्षण ७९
अंकुश मुद्रा ,,
कुम्भ मुद्रा ,,
शैव मुद्रा ,,
खेचरी मुद्रा ८०
गणेश मुद्रा ,,
शक्तिप्रिय मुद्रायें ,,
गायत्री की चौबीस मुद्रायें ,,
वैष्णव मुद्रायें ८१
सौर मुद्रायें ,,
शैवी मुद्रायें ,,
पूजन मुद्रायें ,,
नैवेद्य निवेदन या भोजन की मुद्रायें ,,
आसन विधान ,,
षट्शाम्भव रश्मिपूजा पद्धति (संख्याविधि) ,,
नवदुर्गा विधान ८२

पञ्चत्रिंशत् श्वास

नित्याओं की प्राणात्मता ८३—८५
श्वास विभाग ८५
योग सिद्ध का लक्षण ,,
काम्यविधि ,,
विषयः पृष्ठसंख्या
षट् शाम्भव रश्मि पूजन ८६
नाड़ी विज्ञान ,,
शरीर में मर्मस्थान ८७
देहस्थित वायु दशक का व्यापार तथा अनुभाव ,,
योग का स्वरूप ८७
योग के अष्टाङ्ग ८८
यमादि के लक्षण ,,
योगसिद्धि के लक्षण ,,
देहोत्क्रान्ति के दो उपाय ८९
परकाया प्रवेश ,,
सिद्ध के अन्य लक्षण ,,
आसन्नमृत्यु के चिह्न ,,
देवीमाहात्म्य की शक्तियाँ ९१
षोडश नित्याओं की लोकात्मता ,,
नित्यालोक ,,
श्रीविद्यापूजन ९२
होम प्रकरण स्थूल, सूक्ष्म, परहोम ९३
जीवन मुक्ति का स्वरूप ९४
दारिद्र्यध्वंसिनी पूजा ,,
षट्चक्रपूजा ,,
भक्तिकूटोपासना ९५
यंत्र निर्माण विधि ,,
श्रीविद्यापद्धति ९६

षट्त्रिंशत् श्वास

सहस्त्राक्षरियाँ ९७
अन्त्ययाग विधि ९७-१००

एकोनविंशति श्वास

भाव-विवृति

प्रथम खण्ड के अट्ठारहवें श्वास की समाप्ति सपर्या के पूर्वाङ्ग के विवरण में हुई थी। उसी क्रम को आगे बढ़ाते हुए न्यास विधि का निरूपण करते हैं—

न्यास का तात्पर्य है स्थापना मन्त्र, देवता आदि को अपने में स्थापित करके साधक दिव्यता प्राप्त कर उपासना के योग्य बनता है

न्यासविधि

करन्यास न्यास के मंत्र या मंत्राङ्ग का (नमः, स्वाहा, वषट्, हुम्, फट्) का योग करते हुए सभी अंगुलियों का अँगूठे से तथा अँगूठे का तर्जनी से न्यास अग्रभाग में करना चाहिए तथा मूल मंत्र से शिर से लेकर दोनों पैरों के अग्रभाग तक का तथा इसके विलोम से **व्यापकन्यास** दोनों हाथों से करना चाहिए।

षडङ्गन्यास

प्रथम तंत्र के अनुसार हृदय बुद्धिगम्य है अतः नमः से हृदय से प्रणाम की भावना की जाती है। स्वाहा रूप शिर मंत्र से विषयों का उपसंहार किया जाता है। शिखा मंत्र वषट् से अपने शरीर के तेज की रक्षा की जाती है। 'कव' का अर्थ ग्रहण है अतः कवच मंत्र हुम् से उस तेज को पकड़ा जाता है। मंत्री की दृष्टि के तेज की रक्षा के लिए 'वौषट्' का प्रयोग करते है। नेत्र शब्द में 'ने' का भाव है प्रक्षेप एवं 'त्र' का भाव है सुख। अतः सुख में प्रक्षेप नेत्र का अर्थ है। फट् अग्नि है अतः अस्त्र मंत्र से अनिष्ट के नाश का भाव होता है।

गौतमीय तंत्र में लिखा है कि— उपासना के आरंभ में हृदय मंत्र से अपनी आत्मा को सच्चिदानन्दात्मा के परायण किया जाता है। शिरोमंत्र से सर्वज्ञादि गुणों से युक्त, संविद्रूपचिदात्मा में विषयों का उपसंहार किया जाता है। अपने शरीर में हृदय एवं शिरः स्थित चैतन्यधाम के साथ तन्मयता भावना शिखा मन्त्र से दृढ़ की जाती है। मंत्रात्मक देह की मन्त्र वाच्य तेज के द्वारा कवच मंत्र के माध्यम सर्वात्मना रक्षा की जाती है। सविद्रूप परमात्मा का हृदय आदि में स्थित जो तेज है उसका परम ज्ञान है। वह नेत्र मन्त्र से प्राप्त होता है। साधक की जो अविद्या हैं उसका विनाश अस्त्र मंत्र द्वारा करके उसके आध्यात्मिक परंधाम को प्राप्त किया जाता है।

(ग्रन्थकार ने प्रपञ्चसार, दक्षिणामूर्ति संहिता, ज्ञानार्णव तथा नारदपञ्चरात्र आदि के आधार पर निर्णय दिया है कि 'नेत्राय बौषट् ही कहना चाहिए नेत्रयाय या नेत्राम्यां उचित नहीं है।)

योगपीठ न्यास

दीक्षित साधक मंत्र जप से पूर्व आगमोक्त पद्धति से अपने शरीर को न्यास के द्वारा योगपीठ बनावे। एतदर्थ मंत्रानुकूल गुरूक्त पद्धति का अनुसरण करना चाहिए।

